# শব্দকল্পদ্রুমঃ

অর্থাৎ

এতদ্দেশস্থসমস্তকোষাশেষশাস্ত্রসঙ্কলিতাকারাদিবর্ণক্রমবিন্যস্তশব্দতল্লিঙ্গ-
নানার্থপর্য্যায়প্রমাণপ্রয়োগধাতুতদনুবন্ধাভিধেয়সহিততত্তচ্ছব্দ-
প্রসঙ্গোত্থিতবেদবেদাঙ্গবেদান্তন্যায়পুরাণেতিহাসসঙ্গীত-
শিল্পসূপকারশাস্ত্রজ্যোতিষতন্ত্রাখ্যানকাব্যালঙ্কার
চ্ছন্দঃপ্রভৃতিনামলক্ষণোদাহরণদ্রব্যগুণরোগ
নিদানৌষধস্মৃত্যুক্তব্যবস্থাদিসংযুক্তসর্ব্ব
দর্শনমতানুসারিসংস্কৃতাভিধানগ্রন্থঃ

স্যার রাজরাধাকান্তবাহাদুরেণ
বিরচিতঃ

শ্রীযুতকুমারউপেন্দ্রকৃষ্ণদেববাহাদুরস্যানুকূল্যেন
শ্রীবরদাকান্তমিত্রপ্রভৃতিভিঃ
পুনঃপ্রকাশিতঃ।

## প্রথমঃ কাণ্ডঃ।




কলিকাতারাজধান্যাং
নূতনবাঙ্গালাযন্ত্রে শ্রীগা[illegible]াদচট্টোপাধ্যায়েন
মুদ্রিতঃ।

সংবৎ—১৯৩১।

CALCUTTA:

PRINTED BY S. P. CHATTERJEE,

AT THE NEW BENGAL PRESS.

# বিজ্ঞাপন।

বিশ্ব-বিখ্যাত, মহামান্য, মহাত্মা স্বর্গীয় স্যার রাজা রাধাকান্ত দেব বাহাদুর, অবিশ্রান্ত পরিশ্রম, অসাধারণ অধ্যবসায়, অসীম যত্ন এবং অপরিমিত অর্থ ব্যয় করিয়া, অগাধ, অপার শাস্ত্রসমুদ্র মন্থন পূর্ব্বক, শব্দকল্পদ্রুম নামক অভূত-পূর্ব্ব মহাকোষ গ্রন্থ সংগ্রহ করিয়া গিয়াছেন। এই মহাকোষ গ্রন্থে উল্লিখিত হয় নাই, এমন বিষয়ই নাই বলিলেও, বোধ হয়, অত্যুক্তি হয় না। গ্রন্থখানি বাস্তবিকই শব্দের কল্পদ্রুম;—কল্পদ্রুম নামটি সর্ব্বতো-ভাবেই সার্থক হইয়াছে। এটি ভারতবর্ষের, সংস্কৃতভাষার ও ভারতবর্ষীয় আর্য্য জাতির গৌরবস্তম্ভ স্বরূপ;—মহামূল্য রত্নস্বরূপ। ইহা যেমনি আদরণীয়, তেমনি প্রয়োজনীয়।—কি শাস্ত্রব্যবসায়ী, কি বিশ্বী, কি বিচারপতি, কি ব্যবহারজীবী, কি বিদ্যার্থী, কি যশঃপ্রার্থী, কি পুরাবৃত্তানুসন্ধায়ী কি কৌতূহলপ্রয়াসী, সকলেরই পক্ষে শব্দকল্পদ্রুমের এক এক খণ্ড সাদরে ও সযত্নে স্ব স্ব আবাসে রাখা সর্ব্বতোভাবে আবশ্যক।—কিন্তু ক্ষোভের বিষয় এই যে, সাদরে ও সাগ্রহে ভূমণ্ডলস্থ সমস্ত সভ্য জাতির পরিগৃহীত নিরতিশয় বাঞ্ছনীয় এই মহামূল্য রত্নকল্প মহাকোষ এক্ষণে মুদ্রণাভাবে এককালে দুষ্প্রাপ্য হইয়া উঠিয়াছে।—এমন কি, বহু মূল্যদান স্বীকার করিয়াও কেহ উহার এক খণ্ডও সংগ্রহ করিতে পারেন না।—আমরা, এই বিশ্বজনীন অভাব বিমোচনার্থ, স্বর্গীয় রাজাবাহাদুরের উত্তরাধিকারিগণের নিকট হইতে পুনর্ম্মুদ্রাঙ্কনের স্বত্ব গ্রহণ পূর্ব্বক, শব্দকল্পদ্রুম পুনর্ম্মুদ্রিত করিতে প্রবৃত্ত হইয়াছি।—রাজাবাহাদুর অনন্যসাধারণ বদান্যতা প্রদর্শনপূর্ব্বক স্বপ্রণীত মহামূল্য গ্রন্থ বিনা-মূল্যে বিতরণ করিয়াছিলেন;—আমরা তৎকল্পে অসমর্থতা নিবন্ধন যথাসম্ভব স্বল্প মূল্য নির্দ্ধারিত করিয়াছি।

রাজাবাহাদুর এই মহাকোষ সাত খণ্ডে বিভক্ত করিয়া প্রচার করিয়াছিলেন।—অনন্তর পরিশিষ্ট নামক আর এক খণ্ডও বাহির করেন। তিনি, গ্রন্থের মুখবন্ধনস্থলে প্রথমতঃ পরিশিষ্ট প্রচারের কারণ নির্দ্দেশ করিয়া, পরিশেষে লিখিয়াছেন, "অতঃপরমেতৎপারিশিষ্টীয়াপুনরুক্ত-শব্দাদীন্ প্রাগুদিতসপ্তকাণ্ডীয়শব্দসূচীমধ্যে যথাস্থানং স্থাপয়িত্বা গ্রন্থসমাপ্তৌ মঙ্গলাচরণ-

বীজং পরিশিষ্টকরণকারণঞ্চ হিত্বা এতন্মুখবন্ধনং প্রথমকাণ্ডস্য পূর্ব্বং যোজয়িত্বা পুনর্মুদ্রাঙ্কনে কৃতে এষ কোষঃ সুসম্পূর্ণো ভবিষ্যতি।" রাজাবাহাদুরের এই অভিপ্রায় অনুসারে উল্লিখিত পরিশিষ্ট-সঙ্কলিত প্রত্যেক শব্দ ও প্রমাণ প্রয়োগাদি গ্রন্থের যথাস্থানে সন্নিবেশিত হইতেছে। মূলের এবং পরিশিষ্টের মঙ্গলাচরণ ও মুখবন্ধনাদি তাঁহার অভিপ্রেতস্থলে অবিকল বিনিবেশিত হইল। এইরূপে স্পষ্ট ও প্রকৃত মঙ্গলাচরণ যথাস্থানে সংযোজিত হওয়াতে, অনাবশ্যক বিধায় "অথ শব্দকল্পদ্রুমো মুদ্র্যতে" এই অস্পষ্ট মঙ্গলাচরণ পরিত্যাগপূর্ব্বক, গ্রন্থারম্ভে "শব্দকল্পদ্রুমঃ" এতন্মাত্র রক্ষিত হইয়াছে। তাঁহার রচনার সমস্ত অংশ অবিকল মুদ্রিত করা যুক্তিযুক্ত বোধে, তদীয় স্পষ্ট অনুমতি সত্ত্বেও "গ্রন্থ সমাপ্তৌ মঙ্গলাচরণবীজং" "পরিশিষ্টকরণকারণঞ্চ" এই দুইটি বিষয় পরিত্যক্ত হয় নাই।

তিনি পরিশিষ্টের মুখবন্ধে তদীয় জামাতৃদৌহিত্রগণ কর্ত্তৃক দেবনাগর অক্ষরে সুপ্রণালীতে শব্দকল্পদ্রুম মুদ্রাঙ্কনের বিষয় উল্লেখ করিয়া লিখিয়াছিলেন "তস্য প্রকাশালোকানামুপকারো ভবিষ্যতি।" বস্তুতঃ, তাঁহারা যেরূপে কার্য্যের আরম্ভ করিয়াছিলেন, তদনুসারে কার্য্যের সমাধা হইলে সর্ব্বসাধারণের উপকারের সীমা থাকিত না। কিন্তু আক্ষেপের বিষয় এই, তাঁহারা এক খণ্ড মাত্র প্রচার করিয়া অবলম্বিত মুদ্রাঙ্কন কার্য্য হইতে এককালে বিরত হইয়াছেন। তাঁহারা বিরত না হইলে, আমাদের এ উদ্যোগের অণুমাত্র আবশ্যকতা থাকিত না।

উপসংহার কালে কৃতজ্ঞচিত্তে স্বীকার করিতেছি যে, শোভাবাজার রাজকুল-কিশোর, উদারচিত্ত, বিদ্যানুরাগী শ্রীযুত কুমার উপেন্দ্রকৃষ্ণ দেব বাহাদুর শব্দকল্পদ্রুমের প্রচার সম্বন্ধে যথেষ্ট আনুকূল্য করিয়াছেন। এমন কি, তাঁহার তাদৃশ আনুকূল্য না পাইলে আমরা আদৌ একার্য্য আরম্ভ করিতেই পারিতাম না। অলমতিবিস্তরেণ।

শ্রীবরদাকান্ত মিত্র কোং

প্রকাশকগণ।

শব্দকল্পদ্রুম কার্য্যালয়।

কলিকাতা—শোভাবাজার—রাজবাটী।

১ লা জ্যৈষ্ঠ,—১২৮১।

# মুখবন্ধনং ।

### তত্রাদৌ মঙ্গলাচরণশ্লোকাঃ ।

যোঽদ্বৈতসচ্চিতানন্দপরব্রহ্মেতি কীর্ত্তিতঃ । উপাসকানাং কার্য্যার্থং কৃপয়া পঞ্চধা-ভবৎ ॥ শক্তিঃ শিবস্তথা সূর্য্যো গণেশো বিষ্ণুরেবচ । অশেষবিঘ্ননাশায় ভক্তিশ্রদ্ধাসমন্বিতঃ ॥ সাষ্টাঙ্গং তং প্রণম্যাদৌ শিষ্টাচারানুসারতঃ । রাজবাহাদুরোপাধিশ্রীরাধাকান্তদেবজঃ ॥ পরেষামুপকারায় শব্দকল্পদ্রুমাভিধং । কোষং নব্যক্রমযুতং কৃতবান্ বহুযত্নতঃ ॥

### গ্রন্থসমাপ্তৌ মঙ্গলাচরণবীজং ।

সংস্কৃতগ্রন্থানামেতাদৃশী রীতিঃ সর্ব্বত্র প্রচলিতা যন্মঙ্গলাচরণশ্লোকানুক্রমণিকাদিকং গ্রন্থাদাবেব লেখনীয়ং ভবিতুমর্হতি । কিন্ত্বস্মিন্ কোষে তন্নাচরিতং । তস্যৈতৎকারণং । উক্ত-শ্লোকাদিরচনপ্রাগেব প্রথমকাণ্ডাদিমুদ্রাঙ্কনসমাপনমাত্রেণ তল্লিপ্সবো স্বদেশবিদেশীয়মহাত্মানঃ পুনঃ পুনঃ প্রার্থয়িত্বা সর্ব্বমেব গৃহীতবন্তঃ । ইদানীং এতৎকোষস্য প্রথমাদিকাণ্ডং নোপস্থিতং । তেন হেতুনা এতন্মঙ্গলাচরণাদিরূপমুখবন্ধনং শেষকাণ্ডপুরোবর্ত্তি কৃতং । কিন্ত্বেতদ্গ্রন্থারম্ভে অথ শব্দকল্পদ্রুমো মুদ্র্যতে ইতি লিখনেন মঙ্গলবাচকাথশব্দপ্রয়োগাদেব এতৎকোষস্য মঙ্গলাচরণসিদ্ধির্জাতা । তদুক্তং শ্রাদ্ধতত্ত্বধৃতশ্রুতৌ । ওঙ্কারশ্চাথশব্দশ্চ দ্বাবেতৌ ব্রহ্মণঃ পুরা । কণ্ঠং ভিত্ত্বা বিনির্যাতৌ তেন মাঙ্গলিকাবুভৌ ॥

### গ্রন্থরচনপ্রয়োজনং ।

অষ্টাদশসংখ্যকাসু শাস্ত্রীয়ভাষাসু সংস্কৃতভাষা গীর্ব্বাণবাণী । অতঃ সর্ব্বোৎকৃষ্টা সর্ব্বত্র সমরূপা সর্ব্বজনমান্যা চ । দেবৈঋ্ষিভিশ্চ তদ্ভাষয়া অষ্টাদশবিদ্যাঃ প্রণীতাঃ । কিন্ত্বস্মিন্ ভারতবর্ষে উক্তবিদ্যাসম্বন্ধিপারিভাষিকশব্দাদীনাং প্রকাশককোষো ন প্রাপ্যতে । তে চ তত্তদ্ভাষ্যটীকাদিভিরেব চরিতার্থা ভবন্তি । কিঞ্চ মহামহোপাধ্যায়ৈঃ প্রাচীননবীনকবিকোবিদ-গণৈঃ পদ্যেন পর্য্যায়নানার্থযুক্তবহুবিধাভিধানরচনা কৃতা । কিন্তু তত্তদ্গ্রন্থীয়ৈকার্থশব্দ-সংগ্রহস্য বর্গস্মরণাভাবাৎ প্রয়োজনীয়পর্য্যায়শব্দপ্রাপ্তিঃ সুদুষ্করী । এবং অনেকার্থশব্দ-সংগ্রহস্য একাদিষড়ক্ষরপর্য্যন্তকান্তাদিহান্তশব্দনিবদ্ধনিখিলশ্লোকানাং পাঠব্যতিরেকেণ প্রার্থ-নীয়নানার্থশব্দনির্গমোঽতিদুর্গমশ্চ । বিশেষতঃ তত্তদেকৈককোষে সমগ্রশব্দার্থয়োর্লাভাভাবঃ ।

বীজং পরিশিষ্টকরণকারণঞ্চ হিত্বা এতন্মুখবন্ধনং প্রথমকাণ্ডস্য পূর্ব্বং যোজয়িত্বা পুনর্মুদ্রাঙ্কনে কৃতে এষ কোষঃ সুসম্পূর্ণো ভবিষ্যতি।" রাজাবাহাদুরের এই অভিপ্রায় অনুসারে উল্লিখিত পরিশিষ্ট-সঙ্কলিত প্রত্যেক শব্দ ও প্রমাণ প্রয়োগাদি গ্রন্থের যথাস্থানে সন্নিবেশিত হইতেছে। মূলের এবং পরিশিষ্টের মঙ্গলাচরণ ও মুখবন্ধনাদি তাঁহার অভিপ্রেতস্থলে অবিকল বিনিবেশিত হইল। এইরূপে স্পষ্ট ও প্রকৃত মঙ্গলাচরণ যথাস্থানে সংযোজিত হওয়াতে, অনাবশ্যক বিধায় "অথ শব্দকল্পদ্রুমো মুদ্র্যতে" এই অস্পষ্ট মঙ্গলাচরণ পরিত্যাগপূর্ব্বক, গ্রন্থারম্ভে "শব্দকল্পদ্রুমঃ" এতন্মাত্র রক্ষিত হইয়াছে। তাঁহার রচনার সমস্ত অংশ অবিকল মুদ্রিত করা যুক্তিযুক্ত বোধে, তদীয় স্পষ্ট অনুমতি সত্ত্বেও "গ্রন্থ সমাপ্তৌ মঙ্গলাচরণ-বীজং" "পরিশিষ্টকরণকারণঞ্চ" এই দুইটি বিষয় পরিত্যক্ত হয় নাই।

তিনি পরিশিষ্টের মুখবন্ধে তদীয় জামাতৃদৌহিত্রগণ কর্ত্তৃক দেবনাগর অক্ষরে সুপ্রণালীতে শব্দকল্পদ্রুম মুদ্রাঙ্কনের বিষয় উল্লেখ করিয়া লিখিয়াছিলেন "তস্য প্রকাশাল্লোকানামুপকারো ভবিষ্যতি।" বস্তুতঃ, তাঁহারা যেরূপে কার্য্যের আরম্ভ করিয়াছিলেন, তদনুসারে কার্য্যের সমাধা হইলে সর্ব্বসাধারণের উপকারের সীমা থাকিত না। কিন্তু আক্ষেপের বিষয় এই, তাঁহারা এক খণ্ড মাত্র প্রচার করিয়া অবলম্বিত মুদ্রাঙ্কন কার্য্য হইতে এককালে বিরত হইয়াছেন। তাঁহারা বিরত না হইলে, আমাদের এ উদ্যোগের অণুমাত্র আবশ্যকতা থাকিত না।

উপসংহার কালে কৃতজ্ঞচিত্তে স্বীকার করিতেছি যে, শোভাবাজার রাজকুল-কিশোর, উদারচিত্ত, বিদ্যানুরাগী শ্রীযুত কুমার উপেন্দ্রকৃষ্ণ দেব বাহাদুর শব্দকল্পদ্রুমের প্রচার সম্বন্ধে যথেষ্ট আনুকূল্য করিয়াছেন। এমন কি, তাঁহার তাদৃশ আনুকূল্য না পাইলে আমরা আদৌ একার্য্য আরম্ভ করিতেই পারিতাম না। অলমতিবিস্তরেণ।

শ্রীবরদাকান্ত মিত্র কোং
প্রকাশকগণ।

শব্দকল্পদ্রুম কার্য্যালয়।
কলিকাতা—শোভাবাজার—রাজবাটী।
১ লা জ্যৈষ্ঠ,—১২৮১।

# মুখবন্ধনং।

তত্রাদৌ মঙ্গলাচরণশ্লোকাঃ।

যোঽদ্বৈতসচ্চিতানন্দপরব্রহ্মেতি কীর্ত্তিতঃ। উপাসকানাং কার্য্যার্থং কৃপয়া পঞ্চধা-ভবৎ॥ শক্তিঃ শিবস্তথা সূর্য্যো গণেশো বিষ্ণুরেবচ। অশেষবিঘ্ননাশায় ভক্তিশ্রদ্ধাসমন্বিতঃ॥ সাষ্টাঙ্গং তং প্রণম্যাদৌ শিষ্টাচারানুসারতঃ। রাজবাহাদুরোপাধিশ্রীরাধাকান্তদেবজঃ॥ পরেষামুপকারায় শব্দকল্পদ্রুমাভিধং। কোষং নব্যক্রমযুতং কৃতবান্ বহুযত্নতঃ॥

গ্রন্থসমাপ্তৌ মঙ্গলাচরণবীজং।

সংস্কৃতগ্রন্থানামেতাদৃশী রীতিঃ সর্ব্বত্র প্রচলিতা যন্মঙ্গলাচরণশ্লোকানুক্রমণিকাদিকং গ্রন্থাদাবেব লেখনীয়ং ভবিতুমর্হতি। কিন্ত্বস্মিন্ কোষে তন্নাচরিতং। তস্যৈতৎকারণং। উক্ত-শ্লোকাদিরচনপ্রাগেব প্রথমকাণ্ডাদিমুদ্রাঙ্কনসমাপনমাত্রেণ তল্লিপ্সবো স্বদেশবিদেশীয়মহাত্মানঃ পুনঃ পুনঃ প্রার্থয়িত্বা সর্ব্বমেব গৃহীতবন্তঃ। ইদানীং এতৎকোষস্য প্রথমাদিকাণ্ডং নোপস্থিতং। তেন হেতুনা এতন্মঙ্গলাচরণাদিরূপমুখবন্ধনং শেষকাণ্ডপুরোবর্ত্তি কৃতং। কিন্ত্বেতদ্‌গ্রন্থারম্ভে অথ শব্দকল্পদ্রুমো মুদ্র্যতে ইতি লিখনেন মঙ্গলবাচকাথশব্দপ্রয়োগাদেব এতৎকোষস্য মঙ্গলাচরণসিদ্ধির্জাতা। তদুক্তং শ্রাদ্ধতত্ত্বধৃতশ্রুতৌ। ওঙ্কারশ্চাথশব্দশ্চ দ্বাবেতৌ ব্রহ্মণঃ পুরা। কণ্ঠং ভিত্বা বিনির্যাতৌ তেন মাঙ্গলিকাবুভৌ॥

গ্রন্থরচনপ্রয়োজনং।

অষ্টাদশসংখ্যকাসু শাস্ত্রীয়ভাষাসু সংস্কৃতভাষা গীর্ব্বাণবাণী। অতঃ সর্ব্বোৎকৃষ্টা সর্ব্বত্র সমরূপা সর্ব্বজনমান্যা চ। দেবৈর্ঋষিভিশ্চ তদ্ভাষয়া অষ্টাদশবিদ্যাঃ প্রণীতাঃ। কিন্ত্বস্মিন্ ভারতবর্ষে উক্তবিদ্যাসম্বন্ধিপারিভাষিকশব্দাদীনাং প্রকাশককোষো ন প্রাপ্যতে। তে চ তত্তদ্ভাষ্যটীকাদিভিরেব চরিতার্থা ভবন্তি। কিঞ্চ মহামহোপাধ্যায়ৈঃ প্রাচীননবীনকবিকোবিদ-গণৈঃ পদ্যেন পর্য্যায়নানার্থযুক্তবহুবিধাভিধানরচনা কৃতা। কিন্তু তত্তদ্‌গ্রন্থীয়ৈকার্থশব্দ-সংগ্রহস্য বর্গস্মরণাভাবাৎ প্রয়োজনীয়পর্য্যায়শব্দপ্রাপ্তিঃ সুদুষ্করী। এবং অনেকার্থশব্দ-সংগ্রহস্য একাদিষড়ক্ষরপর্য্যন্তকান্তাদিহান্তশব্দনিবদ্ধনিখিলশ্লোকানাং পাঠব্যতিরেকেণ প্রার্থ-নীয়নানার্থশব্দনির্গমোঽতিদুর্গমশ্চ। বিশেষতঃ তত্তদেকৈককোষে সমগ্রশব্দার্থয়োর্লাভাভাবঃ।

ইত্যাদিদোষমহমালোচ্য পরোপকারায় পঠদ্দশাবধিবর্ত্তমানকালপর্য্যন্তং বহুতরপরিশ্রমৈর্ধীর-বরনিকরসাহায্যৈরেতদ্দেশপ্রাপ্যসমস্তকোষবেদবেদান্তবেদাঙ্গভাষ্যব্যাকরণছন্দোজ্যোতিষসাহি-ত্যনাটককাব্যালঙ্কারবৈদ্যকসঙ্গীতন্যায়সাংখ্যপাতঞ্জলবৈশেষিকমীমাংসাস্মৃতিপুরাণেতিহাসতন্ত্রা-গমনিগমশিল্পসূপকারনীতিশাস্ত্রকুলাচার্য্যগোস্বামিগ্রন্থাদিভ্যঃ শব্দসমূহং সংগৃহ্য কবিকল্পদ্রুম-নামকধাতুপাঠগ্রন্থাৎ ধাতুনিবহঞ্চ সঙ্কলয্য সকলশব্দধাত্বর্থানামনায়াসেন লাভার্থং বিনা পদ্যেন বর্ণব্যবস্থাক্রমেণ শব্দকল্পদ্রুমাভিধানাভিনবাভিধানং কৃতবান্। ইমং সপ্তকাণ্ডাত্মকবৃহৎকোষং স্বীয়কোষব্যয়েন মুদ্রাঙ্কয়িত্বা মুদ্রাব্যতিরেকেণ নানাদিগ্দেশীয়বিশিষ্টপাত্রেভ্যো বন্ধুবর্গেভ্যো যাচকেভ্যশ্চ দত্তবান্॥

### গ্রন্থস্য নামকারণং।

এতৎকোষস্য শব্দকল্পদ্রুমনামকরণকারণমেতৎ। স্বর্গীয়কল্পদ্রুমসন্নিধানে যো যৎ প্রার্থ-য়তে তস্য তৎপ্রাপ্তির্ভবত্যেব। মৎকৃতমভ্যীয়শব্দকল্পদ্রুমসমীপে যানি যানি সমীহিতশব্দা-দীনি প্রার্থয়ন্তে তানি তান্যবশ্যং প্রাপ্নুবন্তি। অতঃ কল্পবৃক্ষসাদৃশ্যমেব নামকারণং। প্রাচীন-সংগ্রহকৃদ্ভিরপি স্বকৃতগ্রন্থানাং কল্পদ্রুমকল্পতরুকল্পলতাপ্রভৃতি নামধেয়ং কৃতং। তৎ-সদৃশার্থককামধেনুচিন্তামণ্যাদিপুস্তকানি চ প্রচলন্তি। এতদ্গ্রন্থস্য বৃক্ষরূপকত্বাৎ অস্য খণ্ডস্য কাণ্ডেতি সংজ্ঞাং কৃতবান্॥

### অথ গ্রন্থপরিপাটী।

অতঃ পরমহমেতৎকোষস্যানুক্রমং বিশেষনিয়মঞ্চ বিবৃণোমি। নিখিলাভিধানিকশাস্ত্রিক-লৌকিকব্যবহারিকসাধুশব্দানাং ধাতুগণানাঞ্চ ঝটিতি প্রাপ্তয়ে তেষামানুপূর্ব্বিকাকারাদিক্ষকা-রান্তপঞ্চাশদ্বর্ণানাং যথাক্রমং সূচীং কৃত্বা বিন্যাসমকুর্ব্বং। তত্র প্রথমং স্বরবর্ণাদিশব্দানাং পরে হলবর্ণাদিশব্দানাং শেষে যুক্তাক্ষরাদিশব্দানাঞ্চ বর্ণক্রমেণৈব যথাস্থানং প্রথমাবিভক্ত্যন্তত্বেন সংস্থাপনমকার্য্যং। পদসাধনে যেষামন্ত্যাক্ষরাণাং বিকারো লোপো বা অভবৎ তে বর্ণাস্তত্ত-চ্ছব্দোপরি বিন্যস্তাঃ। অনুস্বারবিসর্গাণাং ষোড়শস্বরান্তর্গতত্বেন তদুভয়বদাদ্যবর্ণযুক্তশব্দান্ স্বরবর্ণস্থলাভিষিক্তান্ চকার। তৎপশ্চাৎ প্রত্যেকশব্দস্য লিঙ্গং প্রত্যেকধাতোরনুবন্ধঞ্চ নির্ণীতবান্। যেষাং ধাতূনামনুবন্ধো নাস্তি তৎস্থানং বিন্দুযুক্তমথবা শূন্যমাস্তে। তদনন্তরং সকলশব্দানামর্থবাচকপদানি প্রথমাবিভক্ত্যন্তত্বেন এবং সমস্তধাত্বর্থবাচকপদানি সপ্তমী-বিভক্ত্যন্তত্বেন লিখিতানি। প্রত্যেকপ্রসিদ্ধশব্দোত্তরং তদীয়পর্য্যায়াঃ দেশভাষাশ্চ তথা প্রত্যেকধাত্বর্থানন্তরং তট্টীকা ধাতুদীপিকোক্তব্যাখ্যা পদাদীনি বিহিতানি সর্ব্বশেষে তেষাং প্রমাণানি তদভাবে তৎপ্রয়োগাঃ তদ্বিরহে তদ্ব্যুৎপত্তির্লিখিতা॥

বর্ণমালায়াং চবর্গ্যজকারান্তঃস্থযকারৌ মূর্দ্ধন্যণকারদন্ত্যনকারৌ বর্গ্যবকারান্তঃস্থবকারৌ তালব্যশকারমূর্দ্ধন্যষকারদন্ত্যসকারাঃ সন্তি। এতদখিলবর্ণাদিশব্দানাং ধাতূনাঞ্চ প্রভেদং কৃত্বা সূচীপূর্ব্বকং যথাস্থানং সংস্থাপনং কৃতবান্। বঙ্গদেশে উক্তবর্ণানামুচ্চারণভেদাভাবঃ। বিশেষতো বকারদ্বয়স্যাকারোচ্চারণয়োর্ভেদো নাস্তি পশ্চিমাদিদেশে বর্ত্ততে। কিন্তু মুগ্ধবোধ-টীকায়াং দুর্গাদাসবিদ্যাবাগীশধৃতা বকারভেদিকৈকপ্রাচীনকারিকাস্তি। সা যথা। উদূটৌ যত্র বিদ্যেতে যো বঃ প্রত্যয়সন্ধিজঃ। অন্তঃস্থং তং বিজানীয়াত্তদন্যো বর্গ্য উচ্যতে॥ এতৎকারি-কয়া সকলবকারপ্রভেদো ন ভবতি। ইতি হেতোরহং ধাতূনাং শব্দাকরত্বাদোষ্ঠ্যদন্ত্যবকারাদি-ধাতুদ্বারা পদসাধনং কৃত্বা বহুপ্রযত্নৈর্বকারদ্বয়ভেদং প্রকাশিতবান্। রেফযুক্তবর্ণস্তু রবর্ণাৎ পরং শব্দসূচীমধ্যে বিন্যস্তবান্॥

পূর্ব্বতনকোষকারবর্গৈঃ স্বস্বকোষে ধাতুসঞ্চয়ো ন কৃতঃ শব্দমাত্রসংগ্রহঃ কৃতঃ। কিন্তু শব্দানামুৎপত্তিস্থানং ধাতুঃ। অতএবাহং সর্ব্বোত্তমবোপদেবীয়ধাতুপাঠকবিকল্পদ্রুমাৎ (১৭৫৪) চতুঃপঞ্চাশদধিকসপ্তদশশতসংখ্যকধাতূনাং সঙ্কলনং কৃত্বা এতৎকোষান্তর্গতান্ কৃতবান্। তত্র ১৩২ অকারান্তধাতবঃ। ২৪ আকারান্তধাতবঃ। ১৯ ইকারান্তধাতবঃ। ২৫ ঈকারান্ত-ধাতবঃ। ৩৩ উকারান্তধাতবঃ। ১৩ ঊকারান্তধাতবঃ। ২১ ঋকারান্তধাতবঃ। ১৬ ৠকারান্ত-ধাতবঃ। ৬ একারান্তধাতবঃ। ২৫ ঐকারান্তধাতবঃ। ৫ ওকারান্তধাতবঃ। ৫৯ ককারান্ত-ধাতবঃ। ২১ খকারান্তধাতবঃ। ২৭ গকারান্তধাতবঃ। ২০ ঘকারান্তধাতবঃ। ৫০ চকারান্ত-ধাতবঃ। ১৯ ছকারান্তধাতবঃ। ৭২ জকারান্তধাতবঃ। ৩ ঝকারান্তধাতবঃ। ৭১ টকারান্ত-ধাতবঃ। ২৩ ঠকারান্তধাতবঃ। ৭৬ ডকারান্তধাতবঃ। ১ ঢকারান্তধাতুঃ। ৫০ ণকারান্ত-ধাতবঃ। ৩১ তকারান্তধাতবঃ। ২৮ থকারান্তধাতবঃ। ৭৯ দকারান্তধাতবঃ। ৩৭ ধকারান্ত-ধাতবঃ। ২৮ নকারান্তধাতবঃ। ৬৪ পকারান্তধাতবঃ। ১৫ ফকারান্তধাতবঃ। ৪৫ বকারান্ত-ধাতবঃ। ৩৯ ভকারান্তধাতবঃ। ৩৩ মকারান্তধাতবঃ। ৩১ যকারান্তধাতবঃ। ৪২ রান্ত-ধাতবঃ। ৯৩ লকারান্তধাতবঃ। ৬৮ বকারান্তধাতবঃ। ৩৯ তালব্যশকারান্তধাতবঃ। ১১৬ মূর্দ্ধন্য-ষকারান্তধাতবঃ। ৬৫ দন্ত্যসকারান্তধাতবঃ। ৫০ হকারান্তধাতবঃ। ৪২ সৌত্রধাতবঃ সন্তি। এষাং মধ্যে সংখ্যায়া একষ্ঠকারান্তধাতুরেবমেকো লকারান্তধাতুর্নাস্তি। সৌত্রধাতূনাং নিয়ত-প্রয়োগাভাবঃ। এতৎসমুদায়ধাতুর্গণভেদে বিভক্তো ভূতস্তস্মাদ্ধেতোর্ধাতুপাঠস্য গণসংজ্ঞা অভবৎ। তন্মধ্যে প্রসিদ্ধগণা দশ। অবান্তরগণা অনেকে বিদ্যন্তে। যথা। ভ্বাদ্যদাদী জুহো-ত্যাদির্দিবাদিঃ স্বাদিরেব চ। তুদাদিশ্চ রুধাদিশ্চ তনক্র্যাদিচুরাদয়ঃ॥ ইতি দুর্গাদাসবিদ্যা-বাগীশকৃতকবিকল্পদ্রুমটীকা ধাতুদীপিকা॥ উক্তগণে বোপদেববিপ্রেণ অকারাদ্যাদিধাতুপাঠ-ক্রমেণ অকারান্তাদিধাতুসকলং কথিতবান্। কিন্ত্বহমেতৎক্রমানুগমনমকৃত্বা নিজকোষরীত্যনু-সারেণ শব্দসূচীমধ্যে ধাতুগণান্ লিখিতবান্॥

## সাঙ্কেতিকবর্ণচিহ্নাদীনাং বিবরণং।

এতৎপুস্তকস্য প্রতিপত্রস্য প্রত্যেকপৃষ্ঠমধ্যস্থানে যুগ্মরেখাপ্রদানেন দ্বিভাগং কৃত্বা তদ্ভাগদ্বয়ে শব্দাদির্লিখিতঃ। তস্যান্তিমশব্দাদের্ব্বর্ণং ত্র্যক্ষরপর্য্যন্তং উক্তভাগদ্বয়োপরি বিন্যস্তমভবৎ। তদ্দৃষ্টিমাত্রেণ যদক্ষরপর্য্যন্তশব্দস্তৎপৃষ্ঠারূঢ়ো ভূতস্তদ্বোধো ভবিষ্যতি। তেনেষ্টশব্দানামনায়াসেন লাভো ভবিতা॥

পুংলিঙ্গস্য সঙ্কেতঃ "পুং"। স্ত্রীলিঙ্গস্য সংক্ষেপঃ "স্ত্রী"। ক্লীবলিঙ্গস্য চিহ্নং "ক্লী"। বাচ্যলিঙ্গস্য অর্থাৎ ত্রিলিঙ্গস্য লক্ষ্ম "ত্রি"। এবমব্যয়শব্দস্যৈকদেশস্য "ব্য" ইত্যক্ষরস্য গ্রহণং কৃতং॥

যস্মিন্ স্থলে একশব্দঘটকীভূতবহুবর্ণাঃ পংক্তিদ্বয়ে পতিতাস্তজ্জ্ঞাপনার্থং তৎপ্রথমপংক্তিশেষে একা ক্ষুদ্রসমরেখা ( - ) প্রদত্তা ভূতা॥

একার্থশব্দস্যোত্তরং এবং প্রমাণস্য পূর্ব্বং একা বিষমরেখা ( । ) প্রদত্তা। ভিন্নার্থকশব্দস্য এবং প্রমাণস্য পরং বিষমরেখাদ্বয়ং ( ॥ ) বিন্যস্তং। প্রথমকাণ্ডে ক্বচিদস্য ব্যতিক্রমো জাতঃ॥

সমানার্থকদ্বিত্র্যাদিশব্দেষ্বেকস্থলে উপস্থিতেষু তদুত্তরং তজ্জ্ঞাপকং এবম্প্রকারবেষ্টনচিহ্নং " } " দত্তং॥

বিশেষবৃত্তান্তসমাপনাৎ পরং বিশেষশব্দার্থারম্ভাৎ পূর্ব্বঞ্চ পুষ্পাকারচিহ্নং ( * ) কৃতং। এবং বিস্তারিতবিষয়ান্তর্গতপ্রকরণভেদস্থলে পুষ্পাকারেণাঙ্কিতং॥

যেষাং প্রসিদ্ধশব্দানামুত্তরং তৎপর্য্যায়শব্দা লিখিতাস্তৎসংখ্যানামঙ্কপাতঃ কৃতঃ। তত্রোক্তপ্রসিদ্ধশব্দমেকত্বেন গণয়িত্বা তৎপর্য্যায়ে দ্ব্যাদিসংখ্যাঙ্কাঃ স্থাপিতাঃ॥

পূর্ব্বোদিতচতুঃপঞ্চাশদধিকসপ্তদশশতধাতূনাং ষট্চত্বারিংশদনুবন্ধবর্ণানাং ফলানি লিখ্যন্তে॥

অঃ — অনুবন্ধেষু মধ্যে অকারঃ সুখোচ্চারণার্থঃ। যথা ধক্ক নক্ক ক নাশনে ইতি॥

আঃ — নিষ্ঠাভাবাদিকর্ম্মবেট্। আকারেতো ধাতোর্ভাবে আদিকর্ম্মণি চ বিহিতায়া নিষ্ঠায়া বা ইট্ ইত্যর্থঃ। যথা ইর্ম্মিদা স্নেহে ভাবাদিঢে বেতি মিন্নং মেদিতং তেন। প্রমিন্নঃ প্রমেদিতঃ সঃ। ভাবাদিকর্ম্মভ্যামন্যত্র নিষ্ঠায়া ন ইম্ ইত্যর্থঃ। যথা আদিত ইতি মিন্নঃ মিন্নবান্॥

ইঃ — নুন্বান্। বদিঙ্ স্তুত্যভিবাদয়োঃ। অতএবেদিতো নুন্ বন্দ্যতে বিষ্ণুঃ॥

ইর্ — বা আঙ্বান্। চ্যুতির্ ক্ষরণে ইরিতস্ত বেতি অচ্যুতৎ অচ্যোতীৎ॥

ঈঃ — অনিড়্নিষ্ঠঃ। দীপীঙ্ যৃ দীপনে। নেমডীশ্বীতি দীপ্তঃ দীপ্তবান্॥

উঃ—ক্ত্বাবেট্। চমু ভক্ষণে। পু ক্লিশুদিত ইম্ ইতি চমিত্বা চান্ত্বা ॥

ঊঃ—বেট্কঃ। যস্য সামান্যবিধিনা ইম্‌বিহিতঃ ঊদিতঃ পরস্য তস্য বা ইম্ ইত্যর্থঃ। ষিধূ শিবে শাস্ত্রে। বেমূদিদিতি অসেধীৎ অসৈৎসীৎ ॥

ঋঃ—চঙ্যহ্রস্বঃ। চঙি ঞেঃ পরে অঙি পরে অহ্রস্বঃ হ্রস্বাভাববান্। যথা ঢৌকৃঙ্ গত্যাং। ঞ্যেঙ্ঢ্যুঙস্ব ইত্যত্র ঋদিদ্বর্জনাৎ অডুঢৌকৎ ॥

ৠঃ—বা চঙি অহ্রস্বঃ ইত্যনুবর্ত্ততে। কণৄ আর্ত্তস্বরে। ভ্রাজ ভ্রাসেতি অচীকণৎ। অচকাণৎ। যেষাং সপ্তমস্বরানুবন্ধঃ কৈশ্চিৎ পঠ্যতে কৈশ্চিন্ন পঠ্যতে তেষাং হ্রস্ববিকল্পনার্থোঽয়মনুবন্ধঃ ॥

ঌঃ—অঙ্‌বান্। ঔগম্ঌ গত্যাং। শাস্ঌ হ্ল্যৎপুষাদের্রিতি অগমৎ ॥

এঃ—সিচি অবৃদ্ধিঃ। সিচি ট্যাংবিহিতসৌ। এ কট বৃতৌ বৃষি। হসাদেঃ সেম ইত্যত্র এদিদ্বর্জনাৎ অকটীৎ ॥

ঐঃ—যজাদিঃ স্যাৎ। যজৈ ঞৌ দেবার্চ্চনে। ব্যথগ্রহেতি জিঃ ইয়াজ। গ্রহস্বপাদ্যোরিতি ইজ্যাৎ ॥

ওঃ—নিষ্ঠাতনঃ। নিষ্ঠায়াস্তো নিষ্ঠাতঃ নিষ্ঠাতো নো যস্মাৎ স নিষ্ঠাতনঃ। রুজো শৌ ভঙ্গে। সূল্বাদ্যোদিদিতি রুগ্নঃ রুগ্নবান্ ॥

ঔঃ—অনিট্। ঔ গম্ঌ গত্যাং। বসোরস্মেত্যত্র ঔদিদ্বর্জনাৎ গন্তা ॥

কঃ—চুরাদিঃ। গণৎক সংখ্যানে। চুর্ভ্যো ঞির্ব্বেতি গণয়তি ॥

কিঃ—চুরাদির্ব্বা। পক্ষে গণান্তরনিয়মাভাবাৎ ভ্বাদিরিত্যর্থঃ। যুজ কি সংযমে যোজয়তি যোজতি। যদ্যপি চুরাদিভ্যো ঞির্ব্বিকল্প্যতে তথাপ্যন্যেষামনুরোধাদিদমুক্তং। অন্যেষাং মতে তু চুরাদিভ্যো ঞির্নিত্যঃ। তত্রাপি যুজপ্রভৃতিভ্যো বেতি। স্বমতে তু চুর্ভ্যো ঞির্ব্বেত্যত্র বাশব্দস্য ব্যবস্থাবাচিত্বাৎ চুরাদিভ্যো ঞির্নিত্যঃ। অত্র যুজ প্রভৃতিভ্যো বেতি ॥

গঃ—ক্র্যাদিঃ। ডু ক্রী ঞ গ দ্রব্যপর্য্যয়ে। দিবস্থ তুদেতি ক্রীণাতি ॥

গিঃ—প্বাদিরপি। অপিশব্দাৎ ক্র্যাদিশ্চ। পূ ঞ গি শোধে। প্বাদেঃ স্ব ইতিহ্রস্বঃ পুনাতি। অপূঃ স ভ্বাদিঃ। পূবর্জ্জিতঃ স প্বাদির্ল্বাদিশ্চ স্যাৎ। লূ ঞগি ছিদি লুনাতি। সূল্বাদ্যোদিদিতি লূনঃ লূনবান্। কৄ গৄ জ্যা গ্লাহা ল্বাদেরিতি লুনিঃ ॥

ঘঃ—রুদাদিঃ। লঘির রুদ রোদে। রুদ্ভ্যোঽয়ো হস্রস্মেম ইতি রোদিতি। রুদাদ্যস্তীতি ঈম্ অরোদীৎ ॥

ঙঃ—তঙ্‌বান্ কর্ত্তরি। কর্ত্তরি বাচ্যে তঙ্‌বান্ আত্মনেপদী। এধ ঙ বৃদ্ধৌ। নবশঃ পমে ইতি এধতে ॥

জঃ—জ্বলাদ্যঃ। জ্বল জ্বা চলত্বিষোঃ। দূনীভূজ্বলাদ্যেতি ণঃ জ্বালঃ। পক্ষে পচাদিত্বাদন্ জ্বলঃ। এবং কুচ জ রোধপক্ষকৌটিল্যলেখনে। দূনীভূজ্বলাদ্যেতি ণঃ কোচঃ। পক্ষে কৄ গৄ জ্ঞা প্রীতি কঃ কুচঃ॥

ঝঃ—জ্বলাদ্যঃ। ইতি কেচিৎ॥

ঞঃ—আত্মনে। আত্মনে আত্মার্থং ফলবতি কর্ত্তর্য্যাত্মনেপদং অফলবতি পরস্মৈপদমিতি শেষঃ যজে ঞৌ দেবার্চ্চায়াং যজতে যজমানঃ যজতি যাজকঃ। চুরাদেস্তু স্বার্থবিহিতঞে-ঞঁকারেণ ঞিত্বেঽপি উভয়পদং ন স্যাৎ অন্যথা স্মম ঞক্ বিতর্কে ইত্যাদের্ঞানুবন্ধো ব্যর্থঃ স্যাৎ॥

ঞিঃ—অদ্যক্তঃ। অদ্য বর্ত্তমানে ক্তো যস্মাৎ স অদ্যক্তঃ। ঞি ষ্ঠা স্থানে। জ্ঞার্চ্চেচ্ছার্থ-ঞীচ্ছীলাদেরিতি স্থিতো বিষ্ণুস্তিষ্ঠতীত্যর্থঃ॥

টুঃ—সাথুঃ। টু ঙ বেপ চলনে। টিতোঽথুরিতি বেপথুঃ॥

ঠঃ—ফণাদিঃ। ইতি কেচিৎ॥

ডুঃ—ত্রিমগ্‌যুতঃ। কৃ ঞ দ ডু কৃতৌ। ড্বিতস্তুজ্জে ইতি কৃত্রিমং॥

ণঃ—ফণাদিঃ। ফণ ণ নিস্নেহে। তৄ ফল ভজেতি ফেণতুঃ পফণতুঃ ফেণিথ পফণিথ॥

তঃ—অদন্তঃ। অদন্তানাং পৃথগ্বর্গবিধানেনৈব জ্ঞানে সিদ্ধে তানুবন্ধোঽনভ্যাসানামঙ্কাদিষু কান্তত্বাদিভ্রমনিরাসার্থঃ॥

দঃ—তনাদিঃ। তন দু ঞ বিস্তৃতৌ। তন্‌ভ্যঃ শ্নুবিতি তনোতি। সেলুঁক্ তথাসোরিতি অতত অতনিষ্ট অতথাঃ অতনিষ্ঠাঃ। বন তনাদ্যনিমামিতি প্রতত্য॥

ধঃ—রুধাদিকঃ। রুধির্ধো ঞি ঞ আবৃতৌ। দিবস্থু তুদেতি রুণদ্ধি॥

নঃ—স্বাদিঃ। ষু ঞ সন্ধাক্লেদপীড়মন্থে। দিবস্থু তুদেতি সুনোতি॥

পঃ—মুচাদিঃ। মুচ্‌ঌ শ প ঞৌ মোক্ষে। মুণ্‌রধোমুচামিতি মুঞ্চতি॥

ভঃ—শমাদিঃ। শমুর্ভির্য শমে। যন্তোশমাদীতি শাম্যতি॥

মঃ—ঘটাদিঃ। নিচিম্নমোর্দীর্ঘো বা। দীর্ঘো দীর্ঘবান্। ঘট য ম ঙ চেষ্টে। ঞীম্নমোস্তু-র্ঘশ্চেতি অঘটি অঘাটি ঘটং ঘটং ঘাটং ঘাটং। নিচি হ্রস্বঃ মোঽনুবর্ত্ততে। নিচি ঞৌ হ্রস্বঃ হ্রস্ববান্। ঘটাদি জনীতি ঘটয়তি॥

মিঃ—বা। নিচি হ্রস্ব ইত্যনুবর্ত্ততে। ফণ মি ণ গতৌ। বা সম যম ফণেতি ফণয়তি ফাণয়তি॥

যঃ—দিবাদ্যঃ। দিবু্য জিগীষেচ্ছাদৌ। দিবস্থু তুদেতি দীব্যতি॥

রঃ—বৈদিকঃ। বেদেষ্বেব প্রযুজ্যন্তে নতু ভাষায়ামিত্যর্থঃ। গার্লিস্তুতৌ জন্মনি। জগাতি॥

লঃ—অদাদিকঃ। অদ্লৌ ভক্ষে। লুগস্ত্যোঽপঃ অত্তি॥

লিঃ—হ্বাদিঃ। হ্বাদেরদাদ্যন্তর্গণত্বেন খ্যাতত্বাদদাদিত্বসূচকানুবন্ধো ন কৃতঃ। অথবা লুঃ স্বপাদিশ্চ লির্হ্বাদিরিত্যেকং বাক্যং। লু লি এতদুভয়ানুবন্ধৌ ধাতূ ক্রমাৎ স্বপাদি হ্বাদী স্তঃ। চকারস্ত্বোভয়ত্র সম্বন্ধাদদাদী চেত্যর্থঃ। হ্বাদিঃ পৃথক্‌গণ ইত্যেকে। অতএব পঠন্তি চ। হ্বাদ্যদাদী জুহোত্যাদির্দিবাদিঃ স্বাদিরেব চ। তুদাদিশ্চ রুধাদিশ্চ তনক্র্যাদিচুরাদয়ঃ॥ ইতি। হুলি হোমেঽদনে। হ্বাদী রে দ্বিঃ জুহোতি॥

লুঃ—স্বপাদিশ্চ। চকারাদদাদিশ্চ। স্বমতে স্বপাদেঃ প্রয়োজনং নাস্তি। দরিদ্রতীত্যাদৌ স্বপাদিত্বাদজাদৌ সার্ব্বধাতুকে। আত্ত্যদাত্তত্বমিতি বোপদেবঃ॥

বঃ—বৃতাদিঃ। বৃত ঙ ব ৯ বর্ত্তনে। বৃত্ত্যোনেম পে ইতি তেনৈব পরস্মৈপদে বর্ৎস্যতি বিবৃৎসতি। আত্মনে পদে তু বর্ত্তিষ্যতে বিবর্ত্তিষতে। অন্যত্র বিবর্ত্তিষা বিবৃৎসা॥

শঃ—তুদাদিকঃ। তুদৌ ঞ শ ব্যথে। দিবস্থ তুদেতি তুদতি॥

শিঃ—কুটাদিশ্চ। চকারাৎ তুদাদিশ্চ। কুটাং নুব্রী ঞ্ণিতি ইতি নিয়মাৎ কুট শি কৌটিল্যে ইত্যাদীনাং অকুটীৎ ইত্যাদৌ ন গুণঃ। ণু শি স্তবনে ইত্যাদীনাং অনুবীদিত্যাদিষু ন বৃদ্ধিঃ। অগুণত্বাদুব্ চ॥

ষঃ—কৃদঙবান্। আখ্যাতিকস্যাঙোঽপ্রাপ্ত্যর্থং কৃদিতি বিশেষণং। স্বমতে তুভয়ত্র ঙ এব। ডু ঞৌ শ পচ পাকে। ভীষি চিন্তীতি পচা॥

ক্ষঃ—জক্ষাদিঃ। জক্ষ ক্ষ লু ষ ভক্ষহাসয়োঃ। দ্বিরুক্ত জক্ষাদীতি দ্বিসংজ্ঞায়াং শত্রন্তস্য ত্রিদচোঽন্বেরিতি ন নুণ্ জক্ষৎ। ক্লীবে জস্‌শসোস্তু দ্বেঃ শতুর্নুণ্ ইতি জক্ষতি জক্ষন্তি। আখ্যাতিকেঽন্তোঽন্তো দ্বেরিতি জক্ষতি। অনুস্ সিদ্বেরিতি অজক্ষুঃ। ইতি ধাতুদীপিকায়াং অনুবন্ধফলনিরূপণং॥

## আদিকোষবিবরণং।

সর্ব্বেষাং কোষাণামাদি অগ্নিপুরাণোক্তাভিধানং। তত্রাদৌ স্বর্গপাতালাদিবর্গঃ ততোঽব্যয়বর্গঃ। ততো নানার্থবর্গঃ। ততো ভূপুরাদ্রিবনৌষধিসিংহাদিবর্গাঃ। ততো নৃব্রহ্মক্ষত্রবিট্‌শূদ্রবর্গাঃ। শেষে সামান্যানি নামলিঙ্গানি সন্তীতি ময়া দৃষ্টং। অমরসিংহস্তু উক্তাগ্নিপুরাণীয়াভিধানস্য কস্যচিৎ কস্যচিৎ বর্গস্য ব্যতিক্রমং কৃত্বা তত্রোদিতসামান্যনামলিঙ্গানাং বিশেষ্যনিঘ্নবর্গসঙ্কীর্ণবর্গাবিতি সংজ্ঞাং স্থাপয়িত্বা অন্তে লিঙ্গাদিসংগ্রহবর্গস্য যোগং কৃত্বা স্বীয়কোষং রচিতবান্। এবং জটাধরোঽপি অমরকোষস্যানুকরণং কৃতবান্। ইতি বিরলপ্রচারঃ॥

## প্রাপ্তকোষাদিনামানি।

অত্রাভিধানে মৎপ্রাপ্তযদ্যৎকোষাদিতঃ শব্দাদয়ঃ সংগৃহীতাস্তেষাং সংজ্ঞাঃ পশ্চাল্লিখ্যন্তে ॥

| | | |
|---|---|---|
| অমরসিংহকৃতং | নামলিঙ্গানুশাসনং | ১ |
| অজয়পালকৃতঃ | নানার্থসংগ্রহঃ | ২ |
| গদসিংহকৃতা | নানার্থধ্বনিমঞ্জরী | ৩ |
| চক্রপাণিদত্তকৃতা | শব্দচন্দ্রিকা | ৪ |
| জটাধরাচার্য্যকৃতঃ | পর্য্যায়নানার্থকোষঃ | ৫ |
| দণ্ডাধিনাথকৃতা | নানার্থরত্নমালা | ৬ |
| দুর্গাদাসবিদ্যাবাগীশকৃতা | ধাতুদীপিকা | ৭ |
| ধনঞ্জয়কবিকৃতা | নামমালা | ৮ |
| ধরণিদাসব্রাহ্মণকৃতঃ | সারসংগ্রহনামকানেকার্থসমুচ্চয়ঃ | ৯ |
| নরসিংহকাশ্মীরপণ্ডিতকৃতঃ | নিঘণ্টুরাজঃ অর্থাৎ রাজনির্ঘণ্টঃ | ১০ |
| নারায়ণদাসকবিরাজকৃতঃ | রাজবল্লভঃ | ১১ |
| পদ্মনাভদত্তদ্বিজকৃতঃ | ভুরিপ্রয়োগঃ | ১২ |
| পুরুষোত্তমদেবকৃতঃ | একাক্ষরকোষঃ | ১৩ |
| তৎকৃতঃ | দ্বিরূপকোষঃ | ১৪ |
| তৎকৃতঃ | ত্রিকাণ্ডশেষঃ | ১৫ |
| তৎকৃতা | হারাবলী | ১৬ |
| ভাবমিশ্রকৃতঃ | ভাবপ্রকাশঃ | ১৭ |
| মথুরেশপণ্ডিতকৃতা | শব্দরত্নাবলী | ১৮ |
| মহেশ্বরবৈদ্যকৃতঃ | বিশ্বপ্রকাশঃ | ১৯ |
| মেদিনীকরবৈদ্যকৃতঃ | নানার্থশব্দকোষঃ | ২০ |
| রামেশ্বরশর্ম্মকৃতা | শব্দমালা | ২১ |
| রত্নমালাকরবৈদ্যকৃতা | আয়ুর্বেদার্ণবোখিতপর্য্যায়রত্নমালা | ২২ |
| বোপদেববিপ্রকৃতঃ | কবিকল্পদ্রুমঃ | ২৩ |
| শ্রীনন্দনভট্টাচার্য্যকৃতং | বর্ণাভিধানং | ২৪ |
| শ্রীরামশর্ম্মকৃতঃ | উণাদিকোষঃ | ২৫ |
| সিদ্ধান্তকৌমুদী সংক্ষিপ্তসারকারকৃতে | উণাদিবৃত্তী | ২৬।২৭ |
| হলায়ুধভট্টকৃতা | অভিধানরত্নমালা | ২৮ |
| হেমচন্দ্রজৈনকৃতঃ | অভিধানচিন্তামণিঃ | ২৯ |

## অপ্রাপ্তকোষনামানি।

এতদ্ভিন্নানেকপ্রাচীনাভিধানানি সন্তি। যদ্যপি তানি ময়া অপ্রাপ্তানি তথাপি তেষাং মধ্যে বহুকোষাণাং প্রয়োগপ্রমাণানি অমরটীকাধৃতানি আসাদিতানি। এবং বিশ্বমেদিনীকোষে

তৎসকলাভিধানানাং শব্দাঃ সমাহৃতাঃ। উক্তকোষদ্বয়শব্দানাং শব্দকল্পদ্রুমাভ্যন্তরিতত্বেন বক্ষ্যমাণসমস্তপ্রাচীনকোষাণাং শব্দাঃ এতৎকোষান্তর্গতা ভূতাঃ॥

## বিশ্বধৃতপ্রাচীনকোষাঃ।

| | |
|---|---|
| ভোগীন্দ্র | ১ |
| কাত্যায়ন | ২ |
| সাহসাঙ্ক | ৩ |
| বাচস্পতি | ৪ |
| ব্যাড়ি | ৫ |
| বিশ্বরূপ | ৬ |
| মঙ্গল | ৭ |
| শুভাঙ্ক | ৮ |
| বোপালিত | ৯ |
| ভাগুরিরচিতকোষাঃ | ১০ |

## মেদিনীধৃতপ্রাচীনকোষাঃ।

| | |
|---|---|
| উৎপলিনী | ১ |
| শব্দার্ণবঃ | ২ |
| সংসারাবর্ত্তঃ | ৩ |
| নামমালাখ্যঃ | ৪ |
| বররুচি | ৫ |
| শাশ্বৎ | ৬ |
| রন্তিদেব | ৭ |
| রত্নাপরনামহর | ৮ |
| গোবর্দ্ধন | ৯ |
| রভসপাল | ১০ |
| রুদ্র | ১১ |
| অমরদত্ত | ১২ |
| গঙ্গাধর | ১৩ |
| বাভট | ১৪ |
| মাধব | ১৫ |
| ধর্ম্ম | ১৬ |
| তারপাল | ১৭ |
| বামন | ১৮ |
| চন্দ্র | ১৯ |
| বিক্রমাদিত্য | ২০ |
| গোমিরচিতকোষাঃ | ২১ |
| পাণিনিপদানুশাসনঞ্চ | ২২ |

এতদন্যে বলহড্ডপ্রভৃতিকৃতকোষাঃ সন্তি॥

## লব্ধালব্ধামরকোষটীকানামানি।

অমরকোষশ্চ ভৃশপ্রামাণিকঃ ব্যুৎপাদকশ্চ। তস্মাৎ বহুতরটীকাকারৈস্তস্য নানাবিধা টীকা কৃতা। তন্মধ্যে কতিপয়লব্ধটীকানাং প্রমাণানি শব্দকল্পদ্রুমে দত্তানি। কিন্তু তৎসমুদায়-টীকাকৃন্নামানি টীকানামধেয়ানি চাহং ব্যক্তীকরোমি॥

| | |
|---|---|
| ক্ষীরস্বামী | ১ |
| সুভূতিঃ | ২ |
| হড্ডচন্দ্রঃ | ৩ |
| কলিঙ্গঃ | ৪ |
| কোঙ্কটঃ | ৫ |
| সর্ব্বধরঃ | ৬ |
| রাজদেবঃ | ৭ |
| গোবর্দ্ধনঃ | ৮ |
| দ্রাবিড়ঃ | ৯ |
| ভোজরাজঃ | ১০ |

অথ সর্ব্বোপাসকসম্মতমঙ্গলাচরণোনবিংশতিপদ্যানি।

বেদা বদন্তি যং সত্যমানন্দমদ্বিতীয়কং। তথামৃতঞ্চৈকরূপমবাঙ্মনসগোচরং॥ সর্ব্বাতীতং সর্ব্বগতং চিদেকরসমেব চ। দেশকালাপরিচ্ছিন্নমপাদমপি শীঘ্রগং॥ সর্ব্বগ্রহমপাণিঞ্চ সর্ব্বেষাং দর্শকং তথা। অচক্ষুষমপি শ্রোত্রহীনং শ্রোতারকং পুনঃ॥ অচিন্ত্যমপি সর্ব্বজ্ঞং সর্ব্বেষাঞ্চ নিয়ামকং। সর্ব্বশক্তিযুতং সৃষ্টিস্থিতিপ্রলয়কারকং॥ ১॥ তথৌপনিষদা যং হি শুদ্ধবুদ্ধস্বভাবকং। ২। কথয়ন্ত্যাদিবিদ্বাংসং সিদ্ধং যং কাপিলা বিদুঃ॥ ৩॥ ক্লেশকর্ম্মবিপাকাশয়াপরামৃষ্টমেব যং। নির্ম্মাণকায়মাস্থায় সম্প্রদায়প্রবর্ত্তকং॥ তথানুগ্রাহকমপি প্রভাষন্তে পতঞ্জলাঃ। ৪। লোকবেদবিরুদ্ধৈর্যং নির্লেপঞ্চ স্বতন্ত্রকং॥ মহাপাশুপতাঃ সর্ব্বে ব্রুবন্তি সততং ভুবি। ৫। শৈবাঃ শিবং যং বদন্তি বৈষ্ণবাঃ পুরুষোত্তমং॥ ৬। ৭॥ পিতামহমিতি প্রাহুঃ পৌরাণিকজনা বিদুঃ। ৮। যাজ্ঞিকা যজ্ঞপুরুষং সর্ব্বজ্ঞমিতি সৌগতাঃ॥ ৯। ১০॥ নিরাবরণমিত্যেব প্রলপন্তি দিগম্বরাঃ। ১১। যমুপাস্যত্বরূপেণ দেশিতং হি নিরন্তরং॥ মীমাংসকা বৈ ভাষন্তে চার্ব্বাকাঃ প্রবদন্তি যং। লোকানাং ব্যবহারেণ সিদ্ধং সন্ততমেব চ॥ ১২। ১৩॥ যাবদুক্তোপপন্নং হি ন্যায়জ্ঞাঃ সংপ্রচক্ষতে। ১৪। শিল্পিনো বিশ্বকর্ম্মেতি যং ভণন্তি সুনিশ্চিতং॥ ১৫॥ শাক্তা বদন্তি যং নিত্যামাদ্যাপ্রকৃতিরূপিণীং। ১৬। সৌরাস্তেজোময়ং সূর্য্যং গাণপত্যা গণেশ্বরং॥ ১৭। ১৮॥ রামানুজা যং বদন্তি বিশিষ্টাদ্বৈতবাদিনঃ। লক্ষ্মীনারায়ণং ভক্তাধীনং নিত্যশরীরিণং॥ ১৯॥ নিম্বাদিত্যাস্তথা মাধ্বাচার্য্যাদ্যা দ্বৈতবাদিনঃ। বিষ্ণুং সশক্তিং সন্মূর্ত্তিং যমাহুর্ভক্তবৎসলং॥ ২০॥ রামানন্দা রামচন্দ্রং ভক্তানুগ্রহকারকং। সীতয়া সহিতং প্রোচুর্যং নিত্যং নিত্যবিগ্রহং॥ ২১॥ শ্রীমন্মাধ্বানুযায়িশ্রীনিত্যানন্দাদিবংশজাঃ। গোস্বামিনো নন্দসূনুং শ্রীকৃষ্ণং প্রবদন্তি যং॥ ২২॥ কায়েন মনসা বাচা ভক্ত্যা চ প্রণিপত্য তং। শ্রীরাধাকান্তদেবেন রাজ্ঞাতিশয়যত্নতঃ॥ শব্দাদীন্যবশিষ্টানি সংগৃহ্য বহুশাস্ত্রতঃ। পরিশিষ্টঃ শব্দকল্পদ্রুমস্য ক্রিয়তেঽধুনা॥

অথ গ্রন্থপ্রতিজ্ঞানবশ্লোকাঃ।

শব্দকল্পদ্রুমগ্রন্থে সপ্তকাণ্ডময়েঽখিলে। যেষামেব হি শব্দার্থপর্য্যায়াণাং তথৈব চ॥ প্রমাণানাং প্রয়োগাণাং ধাতুসম্বন্ধিনাং পুনঃ। পদোদাহরণানাঞ্চ চিকিৎসানাং গদস্য চ॥ ন সংগ্রহোঽভবৎ পূর্ব্বগ্রন্থে কারণকূটতঃ। তেষাং সঙ্কলনঞ্চাস্মিন্ পরিশিষ্টে করোম্যহং॥ তথা বেদনিঘণ্ট্বাখ্যঃ পঞ্চাধ্যায়সমন্বিতঃ। বৈদিকানাঞ্চ শব্দানামতিপ্রাচীনকোষকঃ॥ তস্যাত্র দেশে বিরলপ্রচারত্বেন তদ্ধৃতঃ। পর্য্যায়শব্দসন্দোহঃ কেনাপি কোষকারিণা॥ ন সংগৃহীত-

স্তদ্ধেতোর্দুরূহোঽশ্রুত এব চ। প্রায়ো বৈদিকশব্দার্থো বোধগম্যো ভবেন্নহি ॥ অতস্তৎপ্রথমাধ্যায়ে দ্বিতীয়ে চ তৃতীয়কে। যেষাং স্থিতানাং শব্দানাং পর্য্যায়ান্ পরিশিষ্টগান্ ॥ করিষ্যামস্তু নিম্নে হি তেষাং বর্গস্তু নাম চ। তথা সঙ্খ্যা বিলিখ্যন্তে লোকানাং জ্ঞানহেতবে ॥ চতুর্থে পঞ্চমাধ্যায়ে যদস্তি পদবৃন্দকং। তৎপর্য্যায়স্য বোধস্য চাভাবান্নাত্র গৃহ্যতে ॥

তত্র প্রথমাধ্যায়ে ৪১৪ নামানি যথা।

| বর্গঃ | নাম | | | | সঙ্খ্যা |
|---|---|---|---|---|---|
| ১ | পৃথিবীনামধেয়ানি | ... | ... | | ২১ |
| ২ | হিরণ্যনামানি | ... | ... | ... | [illegible] |
| ৩ | অন্তরীক্ষনামানি | ... | | ... | ১৬ |
| ৪ | সাধারণনামানি | ... | ... | ... | ৬ |
| ৫ | রশ্মিনামানি | ... | ... | ... | ১৫ |
| ৬ | দিঙ্নামানি | ... | ... | ... | ৮ |
| ৭ | রাত্রিনামানি | ... | ... | ... | ২৩ |
| ৮ | উষোনামানি | | ... | | [illegible] |
| ৯ | অহর্নামানি | ... | ... | ... | [illegible] |
| ১০ | মেঘনামানি | ... | ... | | [illegible] |
| ১১ | বাঙ্নামানি | ... | ... | ... | [illegible] |
| ১২ | উদকনামানি | ... | ... | ... | ১০১ |
| ১৩ | নদীনামানি | ... | ... | ... | ৩৭ |
| ১৪ | অশ্বনামানি | ... | ... | ... | ২৬ |
| ১৫ | আদিষ্টোপযোজনানি | ... | ... | | ১০ |
| ১৬ | জ্বলতিকর্ম্মাণঃ | ... | ... | | ১১ |
| ১৭ | জ্বলতো নামধেয়ানি | ... | ... | | ১১ |

ইতি বেদনিঘণ্টৌ প্রথমাধ্যায়ঃ ॥

---

দ্বিতীয়াধ্যায়ে ৫১৬ নামানি।

| বর্গঃ | নাম | | | | সঙ্খ্যা |
|---|---|---|---|---|---|
| ১ | কর্ম্মনামানি | ... | ... | ... | ২৬ |
| ২ | অপত্যনামানি | ... | ... | ... | ১৫ |
| ৩ | নৃনামানি | ... | ... | ... | ২৫ |
| ৪ | বাহুনামানি | ... | ... | ... | ১২ |
| ৫ | অঙ্গুলিনামানি | ... | ... | ... | ২২ |
| ৬ | কান্তিকর্ম্মাণঃ | ... | ... | ... | ১৮ |
| ৭ | অন্ননামানি | ... | ... | ... | ২৮ |
| ৮ | অত্তিকর্ম্মাণঃ | ... | ... | ... | ১০ |
| ৯ | বলনামানি | ... | ... | ... | ২৮ |
| ১০ | ধননামানি | | | ... | ২৮ |
| ১১ | গোনামানি | ... | | ... | ৯ |
| ১২ | ক্রুধ্যতিকর্ম্মাণঃ | ... | ... | ... | ১০ |
| ১৩ | ক্রোধনামানি | ... | ... | | ১১ |
| ১৪ | গতিকর্ম্মাণঃ | ... | ... | ... | ১২২ |
| ১৫ | ক্ষিপ্রনামানি | ... | ... | ... | [illegible] |
| ১৬ | অন্তিকনামানি | ... | ... | ... | [illegible] |
| ১৭ | সংগ্রামনামানি | | ... | | [illegible] |
| ১৮ | ব্যাপ্তিকর্ম্মাণঃ | | ... | | [illegible] |
| ১৯ | বধকর্ম্মাণঃ | | | ... | ৩৩ |
| ২০ | বজ্রনামানি | | | | ১৮ |
| ২১ | ঐশ্বর্য্যকর্ম্মাণঃ | | | ... | ৪ |
| ২২ | ঈশ্বরনামানি | | ... | ... | [illegible] |

ইতি বেদনিঘণ্টৌ দ্বিতীয়াধ্যায়ঃ ॥

---

তৃতীয়াধ্যায়ে ৪১০ নামানি।

| বর্গঃ | নাম | | | | সঙ্খ্যা |
|---|---|---|---|---|---|
| ১ | বহুনামানি | ... | | ... | ১২ |
| ২ | হ্রস্বনামানি | | ... | ... | ১১ |
| ৩ | মহন্নামানি | ... | ... | ... | ২৫ |
| ৪ | গৃহনামানি | ... | ... | ... | ২২ |
| ৫ | পরিচরণকর্ম্মাণঃ | ... | ... | ... | ১০ |
| ৬ | সুখনামানি | ... | ... | ... | ২০ |
| ৭ | রূপনামানি | ... | ... | ... | ১৬ |

| বর্গঃ | নাম | সঙ্খ্যা |
|---|---|---|
| ৮ | প্রশস্যনামানি … … … | ১০ |
| ৯ | প্রজ্ঞানামানি … … … | ১১ |
| ১০ | সত্যনামানি … … … | ৬ |
| ১১ | পশ্যতিকর্ম্মাণঃ … … … | ৮ |
| ১২ | উত্তরাণি পদানি সর্ব্বপদসমাম্নানায় … | ৯ |
| ১৩ | উপমানামানি … … … | ১২ |
| ১৪ | অর্চ্চতিকর্ম্মাণঃ … … … | ৪৪ |
| ১৫ | মেধাবিনামানি … … … | ২৪ |
| ১৬ | স্তোতৃনামানি … … … | ১৩ |
| ১৭ | যজ্ঞনামানি … … … | ১৫ |
| ১৮ | ঋত্বিঙ্নামানি … … … | ৮ |
| ১৯ | যাচ্ঞাকর্ম্মাণঃ … … … | ১৭ |
| ২০ | দানকর্ম্মাণঃ … … … | ১০ |
| ২১ | অধ্যেষণাকর্ম্মাণঃ … … … | ৪ |
| ২২ | স্বপিতিকর্ম্মাণঃ … … … | ২ |
| ২৩ | কূপনামানি … … … | ১৪ |
| ২৪ | স্তেননামানি … … … | ১৪ |
| ২৫ | নির্ণীতান্তর্হিতনামধেয়ানি … | ৬ |
| ২৬ | দূরনামানি … … … | ৫ |
| ২৭ | পুরাণনামানি … … … | ৬ |
| ২৮ | নূতননামানি … … … | ৬ |
| ২৯ | দিশ উত্তরাণি নামানি … … | ২৬ |
| ৩০ | দ্যাবাপৃথিব্যোর্নামধেয়ানি … | ২৪ |

ইতি বেদনিঘণ্টৌ তৃতীয়াধ্যায়ঃ ॥

চতুর্থাধ্যায়ে ২৭৮ পদানি।

| বর্গঃ | পদং | সঙ্খ্যা |
|---|---|---|
| ১ | জহা ইত্যাদিপদানি … … | ৬২ |
| ২ | সস্নিমিত্যাদিপদানি … … | ৮৪ |
| ৩ | আশুশুক্ষণিরিত্যাদিপদানি … | ১৩২ |

ইতি বেদনিঘণ্টৌ চতুর্থাধ্যায়ঃ ॥

পঞ্চমাধ্যায়ে ১৫১ পদানি।

| বর্গঃ | পদং | সঙ্খ্যা |
|---|---|---|
| ১ | অগ্নিরিত্যাদিপদানি … … | ৩ |
| | দ্রবিণোদা ইত্যাদিপদানি … | ১৩ |
| ৩ | অশ্ব ইত্যাদিপদানি … … | ৩৬ |
| ৪ | বায়ুরিত্যাদিপদানি … … | ৩২ |
| ৫ | শ্যেন ইত্যাদিপদানি … … | ৩৬ |
| ৬ | অশ্বিনাবিত্যাদিপদানি … … | ৩১ |

ইতি বেদনিঘণ্টৌ পঞ্চমাধ্যায়ঃ ॥


অথ গ্রন্থস্যানুক্রমণিকাদিলেখনাভাবকারণং বৃত্তদ্বয়ং।

গ্রন্থস্যানুক্রমণিকা সাঙ্কেতাক্ষরলক্ষ্ম চ। পরিশিষ্টস্য করণে কারণাদিকমেব হি ॥
পূর্ব্বে সপ্তমকাণ্ডীয়মুখবন্ধে প্রকীর্ত্তিতং। অতো ন লিখ্যতেঽত্রৈব পুনরুক্তিভয়ান্ময়া ॥

অথাদর্শপত্রাণাং বল্মীকভক্ষণজন্যমনস্তাপতন্নিবারণহেতুপঞ্চপদ্যানি।

ইদানীং পরিশিষ্টীয়বহুলাদর্শপত্রিকাঃ। যন্ত্রালয়সমুৎপন্নবল্মীকগণভক্ষিতাঃ ॥ অতস্তদ্গতশব্দানাং নাভবন্মুদ্রয়াঙ্কনং। তচ্চেদ্ভূতং তদা গ্রন্থবাহুল্যং সমজায়ত ॥ কিন্তু সাম্প্রতমাদর্শনাশজন্যো মনোগতঃ। তাপো জামাতৃদৌহিত্রগণৈরেব নিবারিতঃ ॥ যতস্তে পরিশিষ্টীয়শব্দৈরন্যৈশ্চ সংযুতং। দেবনাগরবর্ণৈঃ শব্দকল্পদ্রুমং পুনঃ ॥ মুদ্রাঙ্কিতং প্রকুর্ব্বন্তি যত্নেনাতিশয়েন চ। তস্য প্রকাশাল্লোকানামুপকারো ভবিষ্যতি ॥

## অথ গ্রন্থকর্ত্তুর্ব্বংশবর্ণনশ্লোকাঃ।

আসীৎ শ্রীহরিদেবাখ্যঃ শ্রীহরেরংশরূপকঃ। কায়স্থানাং কুলে দেববংশস্যোদ্ভবহেতুকঃ॥ মুরশিদাবাদনগরাসন্নে স্বজনপালকঃ। কর্ণস্বর্ণনামধেয়সমাজে বাসকারকঃ॥ সদা হরিপদাম্ভোজ-যুগলধ্যানধারকঃ। মৌদ্গল্যগোত্রজাতানামেষ বীজাভিধানকঃ॥ ১॥ তস্য দুর্গাবরো নাম সুতঃ সর্ব্বগুণান্বিতঃ। ২। তস্মাদ্বিশ্বেশ্বরো জাতস্তস্য বিঘ্নেশ্বরঃ সুতঃ॥ ৩। ৪॥ সদানন্দেন সংপূর্ণঃ পূর্ণানন্দোঽভবত্ততঃ। ৫। খানোপাধিস্তত্তনয়ঃ পীতাম্বর ইতি স্মৃতঃ॥ অদভ্রশালিশালিত্বাদ্ধান্য-পীতাম্বরেতি চ। বিখ্যাতো ভুবি সর্ব্বত্র গোষ্ঠীপতিবরঃ স চ॥ ৬॥ পৃথ্বীধরস্তত্তনূজস্তস্মাচ্চ কুরুনন্দনঃ। ৭। ৮। চত্বারস্তনয়াস্তস্য চতুর্দ্দেশনিবাসিনঃ॥ প্রথমঃ শিবদাসাখ্যশ্চৌখণ্ডি-খ্যাতিসংযুতঃ। মলুয়ীনামকে দেশে বাসস্তেন সদা কৃতঃ॥ নিত্যানন্দো দ্বিতীয়স্তু রায়োপাধিঃ সুবিশ্রুতঃ। কৃতসৌদপুরাবাসো নিত্যানন্দেন পূরিতঃ॥ চতুর্ভুজস্তৃতীয়ো যঃ সোঽপি রায়ে-ত্যুদাহৃতঃ। তালাগ্রামকৃতাবাসশ্চতুর্ভুজপদাশ্রিতঃ॥ চতুর্থঃ শ্রীনাথরায়ো ধুলে পুরকৃতায়নঃ। সদা শ্রীনাথচরণাম্ভোজার্চ্চনপরায়ণঃ॥ ৯॥ নিত্যানন্দাত্মজঃ শ্রীমান্ শ্রীমন্তেতি সমীরিতঃ। ১০। চণ্ডীবরস্তস্য পুত্রশ্চণ্ডিকাপূজনে রতঃ॥ ১১॥ তজ্জাতঃ পরমানন্দঃ পরমানন্দদায়কঃ। ১২। কাশীনাথশ্চ বিজয়াবল্লভস্তৎকুমারকঃ॥ জ্যেষ্ঠস্তু মল্লিকোপাধী রায়োপাধিঃ কনিষ্ঠকঃ। ১৩। বিজয়াবল্লভাজ্জাতঃ কৃষ্ণানন্দো দ্বিজার্চ্চকঃ॥ ১৪॥ রঘুনন্দনদেবস্তৎতনয়ঃ পরিকীর্ত্তিতঃ। ১৫। বিদ্যাধরস্তস্য সূনূ রায়েতিখ্যাতিমাগতঃ॥ আদৌ নাজরাগ্রামবাসী নিতাড়াবাসকৃত্ততঃ। ১৬। তস্যাত্মজো হরিহরো জাতো হরিহরাশ্রিতঃ॥ ১৭॥ ষট্ সুতাস্তস্য বিজ্ঞেয়াঃ সর্ব্বলোকপ্রশং-সিতাঃ। জ্যেষ্ঠস্তু যাদবানন্দঃ সদা যাদবসেবিতা॥ দ্বিতীয়ো রামচন্দ্রাখ্যস্তৃতীয়ো লক্ষ্মণো মতঃ। দেবীদাসস্তুরীয়োঽভূৎ মজুমদার উপাধিতঃ॥ পরোপকারনিরতঃ সদা বন্ধুভিরাবৃতঃ। মুড়াগাছাদি-দেশানাং কানুনগোপদমাগতঃ॥ স চ তস্মিন্ জনপদে কর্ণস্বর্ণসমাজতঃ। উত্থায় বাসমকরোৎ পুত্রদারাদিভির্যুতঃ॥ দুর্গাদাসঃ পঞ্চমস্তু সদা দুর্গাপ্রপূজকঃ। ষষ্ঠস্তু মাধবানন্দঃ সর্ব্বানন্দ-প্রদায়কঃ॥ ১৮॥ দেবীদাসমজুমদারতনয়াঃ ষট্ প্রজাভৃতঃ। গৌরীকান্তো জ্যেষ্ঠপুত্রঃ স চ বংশবিবর্জ্জিতঃ॥ চণ্ডীশরণসংজ্ঞস্তু মধ্যমশ্চণ্ডিকার্চ্চকঃ। তৃতীয়ঃ পুণ্ডরীকাক্ষঃ সহস্রাক্ষ-শ্চতুর্থকঃ॥ মহাবজ্জঙ্গতো যো হি পদে পৈত্র্যে নিযোজিতঃ। সরকারোপাধিযুতো রাজেন্দ্রঃ পঞ্চমঃ সুতঃ॥ কামারপোলগ্রামান্তর্ব্বাসস্তেন বিনির্ম্মিতঃ। কনিষ্ঠো রুক্মিণীকান্তো বহুভি-র্জ্ঞাতিভির্ব্বৃতঃ॥ মুড়াগাছাপ্রদেশে তু পঞ্চগ্রামে হ্যধিষ্ঠিতঃ। স চ কেশবরায়স্য ক্ষত্রিয়স্য বিশেষতঃ॥ অপ্রাপ্তব্যবহারস্য বিখ্যাতস্য সমন্ততঃ। তদ্দেশাধিপতে রাজ্যে নবাবেন নিযো-জিতঃ॥ অপশ্যদ্ব্যবহারাংশ্চ তদ্রাজ্যশাসনে রতঃ। অতোঽস্মিন্ ভূতলে লোকৈর্ব্যবহর্ত্তেতি কীর্ত্তিতঃ॥ ১৯॥ তস্যৈব তু কনিষ্ঠস্য চত্বারো দেহসম্ভবাঃ। ধার্ম্মিকাঃ কর্ম্মকুশলা লোকে

সংপ্রাপ্তগৌরবাঃ ॥ জ্যেষ্ঠো রামেশ্বরঃ পৈত্র্যং পদং প্রাপ্তঃ কৃতশ্রমঃ। মহাবজ্জঙ্গতস্তেষু কৃষ্ণরামস্তু মধ্যমঃ ॥ রাজারামস্তৃতীয়স্তু তেষাং রুদ্রেশ্বরোঽন্তিমঃ। অনপত্যতয়া সোঽপি রুদ্রারাধকসত্তমঃ ॥ ২০ ॥ রামেশ্বরস্য ষট্ পুত্রাস্তেষাং জ্যেষ্ঠো মহাগুণঃ। রামচন্দ্রস্তথা রামচরণো মধ্যমঃ পুনঃ ॥ তৃতীয়ো রঘুনাথাখ্যঃ শ্রীরামস্তু তুরীয়কঃ। রামকেশবনামা চ পঞ্চমঃ কেশবার্চ্চকঃ ॥ বলরামাভিধঃ ষষ্ঠো বলবান্ বলিনাং যতঃ। এষাং জ্যেষ্ঠঃ কনিষ্ঠশ্চ বংশাভাবমুপাগতঃ ॥ ২১ ॥

মধ্যমো রামচরণো গুণৈর্ব্বহুভিরন্বিতঃ। ব্যবহর্ত্তোপাধিযুক্তো গোবিন্দপুরসংস্থিতঃ ॥ স চ হিজ্‌লীতমোলিপ্তমহিষাদলদেশতঃ। লবণস্য তথা রাজ্ঞঃ করাদানে নিযোজিতঃ ॥ কটকাদিপ্রদেশস্য মহাবজ্জঙ্গতস্ততঃ। দেবানীসংজ্ঞকপদং প্রাপ্তবান্ বহুমানিতঃ ॥ বহুলৈর্ব্বর্গিভিঃ সার্দ্ধং মেদিনীপুরমধ্যতঃ। সংগ্রামং তুমুলং কৃত্বা রণমধ্যে নিপাতিতঃ ॥ ২১ ॥

দেবানরামচরণব্যবহর্ত্তৃমহাশয়াৎ। সমুৎপন্নাস্ত্রয়ঃ পুত্রা অশেষকুশলালয়াৎ ॥ ব্যবহর্ত্তোপাধিযুক্তো রামসুন্দর আদিমঃ। বিদ্যান্নৌষধদানেন গণনীয়ঃ স চাগ্রিমঃ ॥ পঞ্চকোটাদিদেশে সোঽভবদধ্যক্ষসত্তমঃ। মাণিক্যচন্দ্রদেবশ্চ মধ্যমঃ পুণ্যকৃত্তমঃ ॥ অঙ্কর্ষিধরণীচন্দ্রমাণে হিজরিহায়নে। দিল্লীশ্বরপ্রসাদেন সম্প্রাপ্তৌ তৌ শুভক্ষণে ॥ ফর্‌মাননামকলিপিং রায়োপাধিং তথৈব চ। মন্‌সবানাং সহস্রং সাদিপঞ্চশতমেব চ ॥ * ॥ কনিষ্ঠো নবকৃষ্ণাখ্যদেবো জাতো গুণাকরঃ। আসীৎ কিলকিলারূপামরাবত্যাং পুরন্দরঃ ॥ রূপবান্ ধনবান্ মান্যো বদান্যঃ পণ্ডিতাশ্রয়ঃ। কুলশীলাদিসম্পন্নো গোষ্ঠীপতিমহাশয়ঃ ॥ রসেষুসিন্ধুশুভ্রাংশুমানে ইংরেজিহায়নে। কোম্পানিনা মুন্সিপদে নিযুক্তোঽসৌ শুভে দিনে ॥ সোঽভবৎ কারণং তেষাং বঙ্গরাজ্যস্য শাসনে। ততঃ কিলকিলাপুর্য্যাং বাণিজ্যকার্য্যসাধনে ॥ স্থিতান্ ইংরেজনিচয়ান্ নবাবো বলমাশ্রিতঃ। সেরাজদ্দৌলাভিধানো দূরীকৃত্য গতস্ততঃ ॥ অথ তৎপরবর্ষে তু কর্ণেল্ ক্লাইব্ মহাবলঃ। আগত্য নবকৃষ্ণেন মুন্সিনা সহিতঃ কিল ॥ যোদ্ধুং যযৌ নবাবেন সার্দ্ধং স্ববলসংবৃতঃ। গত্বা পলাশিগ্রামে স যুদ্ধং কৃত্বাজয়ৎ ততঃ ॥ ধরণীরসবাজীন্দুমিত ইংরেজিবৎসরে। কাসমালীখাননামা নবাবোঽভূত্ততঃ পুরে ॥ স এবেংরেজপক্ষীয়ান্ প্রধানরাজপূরুষান্। নিহত্য সাধয়ামাস নিখিলান্ স্বমনোরথান্ ॥ মেজর্ আদম্ ততঃ শীঘ্রং সার্দ্ধং তেনৈব মুন্সিনা। গত্বা তুদয়নালায়াং রণং কৃত্বা দুরাত্মনা ॥ বিজিত্য বলবন্তং তং নবাবং সেনয়া সহ। নিষ্কণ্টকমিদং রাজ্যং কৃতবান্ স ভয়াপহঃ ॥ বাণর্ত্তুসিন্ধুশশভৃন্মিত ইংরেজিবৎসরে। ভূত্বা গবর্ণরো লার্ড ক্লাইব্ কিলকিলাপুরে ॥ সমেত্য মুন্সিনা সার্দ্ধং পরামৃষ্য চ বিস্তরং। জাফরালীখানসংজ্ঞং নবাবং মতিমত্তরং ॥ বঙ্গদেশস্য চ সুবাদারং কৃত্বা ততঃ পরং। মোজফ্‌ফর্‌জঙ্গনামানমতিবুদ্ধিমতাং বরং ॥ তং নায়েবসুবাদারং চকার গুণসাগরং। পঞ্চবিংশতিলক্ষস্তু মুদ্রাণাং কৃতবান্ স্থিরং ॥ তয়োর্ব্যয়ার্থং প্রত্যব্দং ততঃ ক্লাইব্ গুণাকরঃ।

তেনৈব মুন্সিনা সার্দ্ধং দিল্লীং গত্বা চ সত্বরঃ ॥ শাহালম্‌বাদশাহেন নবাবেন চ ধীমতা স্থজাদ্দৌলা নামকেন স সন্ধিমকরোৎ সতা ॥ অঙ্কাব্ধিচন্দ্রভূমানে হিজ্‌রিসংবৎসরে ততঃ শৌযালস্থ দ্বিতীয়াহে নবকৃষ্ণায় তোষতঃ ॥ শ্রীশাহালম্‌বাদশাহো ফর্‌মানাখ্যং লিপিং মুদা দত্তবান্ যত্র লিখিতং দিল্লীশেন সুসম্পদা ॥ সহস্রপঞ্চকঞ্চৈব মন্সবানাং হি সাদিনাং। সহস্রত্রিতয়ং বীর্য্যযুতানাং শীঘ্রগামিনাং ॥ উত্তমং শিবিকাযানং ঝল্লরেণ সুশোভিতং। নকারাখ্যং বাদ্যযন্ত্রং ধ্বজং তোগেতিনামিতং ॥ রাজবাহাদুরোপাধিং মানবৃদ্ধিযশস্করং। কৃপয়া দত্তবানস্মৈ বহুমানপুরঃসরং ॥ স্থজাদ্দৌলা নবাবস্থ সমীপাৎ রাজযোগ্যকং। খেলাতনামকং প্রাপ্তো বসনং ভূষণাদিকং ॥ তস্মিন্ বর্ষে স ভূপালো নবকৃষ্ণোঽতিধীমতে। নবদ্বীপাধিপশ্রীলকৃষ্ণচন্দ্রায় ভূভৃতে ॥ মহারাজেন্দ্রবাহাদুরোপাধিং মানবৃদ্ধিতঃ। দাপয়ামাস শাহালম্‌বাদশাহসমীপতঃ ॥ ততঃ স সহিতো লার্ড ক্লাইবেন মহাত্মনা। কাশীধাম সমাগম্য বভূবাসৌ মহামনাঃ ॥ মহারাজোপাধিকশ্রীবলবন্তাহ্বয়েন চ। সিংহেন হি সুবে বারাণস্যাঃ সুনিয়মং স চ ॥ কৃত্বা বিশ্বেশ্বরস্যাগ্রে নাট্যমন্দিরমধ্যতঃ। নবকৃষ্ণেশ্বরং লিঙ্গং স্থাপয়ামাস ভক্তিতঃ ॥ ততঃ পাট্‌নানামদেশে মহারাজেন তত্র চ। শেতাবরায়েণ সহ সুবে বেহারকস্থ চ ॥ কৃত্বা সুনিয়মং তত্র তেনৈব সহিতো হি সঃ। কলিকাতাখ্যনগরে সমায়াতো গতালসঃ ॥ ততস্তুষ্টমনাঃ ক্লাইব্ কোম্পানের্দ্দত্তবান্ পদং। দেবানীসংজ্ঞকং তস্মৈ রাজ্ঞে বহুলমানদং ॥ রসর্ত্তুসিন্ধুভূমানে ইংরেজিহায়নে পুনঃ। শাহালম্‌বাদশাহস্থ প্রাগুক্তস্থ মহাত্মনঃ ॥ সমীপতঃ ফর্‌মানাখ্যলিপিমানীয় যত্নতঃ। তস্মৈ রাজ্ঞে দদৌ প্রীত্যা প্রীতয়ে তস্থ ধীমতঃ ॥ যত্রাস্তীদং বিলিখিতং দিল্লীশেন সতা স্বয়ং। মন্সবানাং ষট্‌সহস্রং সহস্রাণাং চতুষ্টয়ং ॥ সাদিনাঞ্চ মহারাজোপাধিমস্মৈ প্রদত্তবান্। এবং সুবর্ণঘটিতং পদকঞ্চ দদৌ মহান্ ॥ যত্র মুদ্রিতপারস্থভাষয়াস্তীতি বর্ণিতং। ইংরেজকোম্পানিকর্ম্মোত্তমরূপেণ সাধিতং ॥ পশ্চাতো বাদশাহস্থ সমীপাৎ সননামকে। সপ্তাশীত্যধিকে চৈব রুদ্রসখ্যশতেঽব্দকে ॥ রাজোপাধেস্তথা বাহাদুরোপাধেস্তথৈব চ। ভূপালনবকৃষ্ণাভিধানবাহাদুরায় চ ॥ দাতুং দয়াভবৎ লার্ড ক্লাইবস্থ মহামতেঃ। তগ্‌ময়া সহিতং চিহ্নং কোম্পানেস্তন্মহীভৃতে ॥ দত্তং তথা দশবিধং খেলাতং বস্ত্ররূপকং। কিরীটং কুণ্ডলং রত্নভূষাং হারঞ্চ মৌক্তিকং ॥ ফলকং করবালঞ্চ দণ্ডং চামরমুত্তমং। ময়ূরপুচ্ছব্যজনং ঘটীযন্ত্রং মনোরমং ॥ হস্ত্যশ্বং ঝল্লরৈর্যুক্তং শিবিকাযানমেব চ। লার্ড ক্লাইব্ দদৌ রাজ্ঞে সদা হিতকরায় চ ॥ এবং সিপাইসংজ্ঞানাং নৃণাং তদ্দ্বারপালনে। আজ্ঞাং দত্ত্বা তস্থ হস্তং গৃহীত্বা তু বরাসনে ॥ হস্তিপৃষ্ঠে সমারোহ্য পুরং প্রেরিতবাংস্ততঃ। হস্ত্যশ্বপত্তিনিকরৈর্ব্বহুদীনৈশ্চ সংবৃতঃ ॥ স চ রাজা রৌপ্যমুদ্রাং ক্ষিপন্ মার্গেতি হর্ষতঃ। বিবেশ স্বং পুরং রম্যং সর্ব্বলোকৈঃ প্রশংসিতঃ ॥ সমুদ্ররসবাজীন্দুমানে ইংরেজিহায়নে। স লার্ড ক্লাইবো মেস্তর্ বার্লেষ্টায় মহাত্মনে ॥ রাজ্যভারং সমর্প্যাথ স্বস্থানে প্রস্থিতোঽভবৎ। চকার চ মহা-

রাজ্ঞো দেবানীকর্ম্ম পূর্ব্ববৎ ॥ তস্যাস্মিন্ সময়ে মাতা মৃতা বিষ্ণোঃ পদং গতা। অনেকলক্ষ-মুদ্রাভিস্তেনাদ্যা তৎক্রিয়া কৃতা ॥ ততঃ কোম্পানিসংক্রান্তং কর্ম্ম ত্যক্ত্বা স ভূপতিঃ। পার-মার্থিকচিন্তায়াং নিযুক্তোঽভূন্মহামতিঃ ॥ অথ কোম্পানিনা গির্জ্জানির্ম্মাণার্থং প্রযাচিতঃ। মূল্যং বিনার্থিতাং ভূমিং দত্তবানতিমোদতঃ ॥ বসুসিন্ধুমুনিক্ষৌণীমানে ইংরেজিহায়নে। সুতা-নুট্যাদিকং গ্রামং প্রাপ্তবানিহ পত্তনে ॥ তেনৈব তস্য রাজ্যস্তু ধনিবিজ্ঞানিমানিনঃ। প্রজা ভূতা হি বহুলা এতন্নগরবাসিনঃ ॥ সমুদ্রবসুভূমীন্দুমানে বঙ্গাখ্যকাব্দকে। হেষ্টিংস্ গবর্ণরশ্চাকৃলা-বর্দ্ধমানাভিধানকে ॥ দেশে তঞ্চ মহারাজং সাজাওলীতিনামকে। কার্য্যে নিযোজয়ামাস স গত্বা তত্র দেশকে ॥ রাজ্যস্য শাসনঞ্চৈবং রাজ্ঞো রাজ্যান্তথৈব চ। সমগ্রবিষয়স্যৈব সুন্দরং নিয়মং স চ ॥ কৃত্বা রাজকরান্ সর্ব্বানাদায় বহুকৃচ্ছ্রতঃ। খালিসানামকে স্থানেঽর্পিতবান্ সুসমাহিতঃ ॥ এবং রসবসুক্ষৌণীন্দুমে বঙ্গাখ্যবর্ষতঃ। মহারাজাধিরাজো যস্তেজশ্চন্দ্রেতি-সংজ্ঞিতঃ ॥ চতুঃসপ্ততিসাহস্রাধিকাষ্টলক্ষমুদ্রিকাঃ। তথা সপ্তশতং মুদ্রাঃ সপ্তবিংশতিকা-ধিকাঃ ॥ ঋণং কৃত্বা মহাভাগো মহারাজসকাশতঃ। রাজ্ঞঃ করং রাজকোষে প্রেষয়ামাস যত্নতঃ ॥ ততো গবর্ণরস্যৈব হ্যনুমত্যনুসারতঃ। খালিসাসংজ্ঞকাৎ স্থানাৎ মহারাজোঽতিবাধিতঃ ॥ ক্রমশঃ ক্রমশশ্চৈব মুদ্রাস্তাঃ প্রতিবর্ষতঃ। আদানমকরোৎ রাজাধিরাজস্যোপকারতঃ ॥ রামর্ষি-শশিভূমানে বঙ্গসংবৎসরে স চ। শ্রীমদ্রাধাবল্লভস্য সেবনার্থং চিরায় চ ॥ দত্তবান্ বল্লভপুরং কৃত্বা দেবোত্তরং মুদা। শ্রীমন্নন্দদুলালস্য সেবার্থমপি সর্ব্বদা ॥ আনরুপুরেতিখ্যাতায়াং পর্-গণায়াং প্রযত্নতঃ। চারগ্রামং তথা দেবোত্তরং কৃত্বা দদৌ ততঃ ॥ তথাগ্রদ্বীপতঃ শ্রীমদ্গোপী-নাথং মনোহরং। বিগ্রহং বল্লভপুরাৎ শ্রীরাধাবল্লভং পরং ॥ এবঞ্চ খড়্দহগ্রামাৎ শ্রীশ্যাম-সুন্দরাহ্বয়ং। শ্রীমন্নন্দদুলালাখ্যং শাঁইবনাগ্রামতঃ স্বয়ং ॥ স্বকং পুরং সমানীয় স রাজা বহু-যত্নতঃ। বিধিবোধিতরূপেণ চিরং সংসেব্য সংযতঃ ॥ নানাবিধানলঙ্কারান্ মুক্তাবজ্রবিভূষিতান্। তাপনীয়ান্ মণিময়ান্ দত্ত্বা প্রেরিতবাংশ্চ তান্ ॥ পিপীতকাখ্যদ্বাদশ্যাং স মাহূয়াথ পণ্ডিতান্। দানমানৈঃ পুরস্কৃত্য দিগ্বিদিক্ষু সমাশ্রিতান্ ॥ শ্রীমদ্গোপীনাথসংজ্ঞং শ্রীগোবিন্দং তথা পরং। বিগ্রহং সংপ্রতিষ্ঠাপ্যাকরোদারাধনং বরং ॥ বেহালাগ্রামমারভ্য কুলপীং যাবদুত্তমং। স স্বব্যয়েন পন্থানং কৃতবান্ সর্ব্বতঃ সমং ॥ তথা স্বকীয়পুরতঃ পুরোঽতিশয়বিস্তৃতং। চকার রাজপন্থানং মঞ্জুলং সুপরিষ্কৃতং ॥ নেত্রাম্বরাব্ধিভূমানে শকসংজ্ঞকহায়নে। কুলাচার্য্যান্ বুধগণাংশ্চানীয় স্বনিকেতনে ॥ স চ দ্বাবিংশপর্য্যায়িমুখ্যানাং বহুযত্নতঃ। কুলীনানামেকযায়ী-মকরোদ্ভূরিদানতঃ ॥ আম্নায়াম্বরপক্ষেন্দুমানেঽসৌ বঙ্গবৎসরে। বিহায় দেহমগমৎ পাদাম্ভোজ-যুগং হরেঃ ॥ ২২ ॥

রামসুন্দরদেবস্য রায়খ্যাতিযুতস্য চ। অশেষগুণসম্পন্নাঃ পুত্রা জাতা হি পঞ্চ চ ॥ কৃষ্ণ-মোহনদেবস্তু তেষাং জ্যেষ্ঠঃ প্রকীর্ত্তিতঃ। ব্রজমোহনদেবো যঃ স ধীমান্ মধ্যমঃ স্মৃতঃ ॥ গোপী-

মোহনদেবশ্চ তৃতীয়ো ভুবি বিশ্রুতঃ। ভূপতের্নবকৃষ্ণস্য স এব দত্তকঃ সুতঃ ॥ চতুর্থো নির-
পত্যোঽভূদ্দেবো গোলোকমোহনঃ। কনিষ্ঠো বৈষ্ণবোঽপুত্রো দেবো ভুবনমোহনঃ ॥ * ॥
মাণিক্যচন্দ্ররায়স্য দ্বৌ সুতৌ চ তয়োঃ পুনঃ। জ্যেষ্ঠো রাধাকৃষ্ণদেবো নিরপত্যো মহাগুণঃ ॥
গোপীকৃষ্ণাখ্যদেবস্তু কনিষ্ঠো দেবতার্চ্চকঃ। শুদ্ধাচারঃ কৃতী দান্তো বুদ্ধিমান্ বংশকারকঃ॥ ২৩ ॥

পুত্রাবুভৌ মহারাজনবকৃষ্ণস্য চাগ্রিমঃ। গোপীমোহনদেবস্তু তয়োর্যঃ স চ দত্রিমঃ॥
কৌন্সেলাধ্যক্ষজান্ ইষ্টে বিল্সাভিধানকস্য চ। এবমাদিমজেন্‌রেল্ জান্ কার্ণকস্য তথৈব চ ॥
গবর্ণরমেক্‌ফার্শনস্য দেবানীসংজ্ঞকং পদং। স প্রাপ্য তত্র কর্ত্তব্যং কৃতবানতিমানদং ॥
তথাত্র মৎস্যবিপণের্ব্বর্ত্মার্থং বহুমূল্যকং। কোম্পানয়ে দদৌ স্থানং সর্ব্বেষাং হিতকারকং ॥
অঙ্কেন্দুপক্ষভূমানে বঙ্গসংজ্ঞকহায়নে। পৌত্রোদ্বাহার্থমাহূয় স তু যত্নাৎ শুভে দিনে ॥ কুলা-
চার্য্যান্ কুলীনাংশ্চ গৃহীত্বা তৎসুসম্মতিং। কনিষ্ঠষড়্‌ভ্রাতৃজয়োঃ কুলয়োশ্চিরসংস্থিতিং ॥
কৃতবানথ মাত্রা স তুলাপুরুষদানকং। কারয়ামাস যত্নেন যথোক্তবিধিপূর্ব্বকং ॥ ততশ্চ
মাতৃকৃত্যে স সুবর্ণদানসাগরং। কৃত্বা দদৌ দ্বিজাগ্র্যেভ্যস্তানাহূয় চ সাদরং ॥ রামাগ্নিনাগ-
ভূমানে ইংরেজাব্দে স মানদং। গবর্ণরস্য কারুণ্যাৎ প্রাপ্তবানুত্তমং পদং ॥ রাজবাহা-
দুরোপাধিং সুবর্ণাম্বরসপ্তকং। অনেকরত্নঘটিতং শিরোভূষণযুগ্মকং ॥ তথা সন্মৌক্তিকং হারং
ফলকং করবালকং। শস্ত্রিষট্‌সঙ্খ্যপত্তীনাং শিবিকাগ্রগমার্থকং ॥ আজ্ঞাঞ্চ প্রাপ্তবান্ সোঽপি
বহুসম্মানপূর্ব্বকং। চিরমাধ্যাদিরহিতঃ কৃত্বা রাজ্যমকণ্টকং ॥ বহ্নিবেদাক্ষিশশভৃন্মানে বঙ্গাখ্য-
হায়নে। সৌরচৈত্রে শুক্লপক্ষস্যৈকাদশ্যাং তিথৌ দিনে ॥ অর্দ্ধং নারায়ণক্ষেত্রেঽন্যার্দ্ধং কারণ-
জীবনে। দেহস্যাধায়াত্মজনৈর্গীয়মানে জনার্দ্দনে ॥ ভাবয়ন্নিষ্টদেবস্য রূপং হৃদয়সংস্থিতং।
জ্ঞানতঃ স মহীপালঃ সংপ্রাপ্তোঽথ মৃতোঽমৃতং ॥ * ॥ কনিষ্ঠো রাজকৃষ্ণাখ্য ঔরসো গুণি-
মানকৃৎ। রাজাগ্রগণ্যো মান্যশ্চ বদান্যো গানশাস্ত্রবিৎ ॥ স চ ত্রয়োবিংশসংখ্যপর্য্যায়াণাং
মহাত্মনাং। কুলীনানামেকযায়ীং কৃতবান্ গুণশালিনাং ॥ তথা কুলপ্রদীপাখ্যং কুলশাস্ত্রং
প্রযত্নতঃ। কুলীনানন্দজনকং চকার কীর্ত্তিলাভতঃ ॥ যথা চৈতন্যদেবেন কৃতং নগরকীর্ত্তনং।
তথা রাজ্ঞা কৃতঞ্চেতি জনাঃ কুর্ব্বন্তি কীর্ত্তনং ॥ রামাগ্নিবসুশুভ্রাংশুমানে ইংরেজিবৎসরে।
গঙ্গাতীরে জ্ঞানপূর্ব্বং মৃতোঽগাৎ হরিমন্দিরে ॥ ২৩ ॥

কৃষ্ণমোহনদেবস্য তনয়ৌ দ্বৌ সুশীলকৌ। রাজনারায়ণাখ্যানশ্রীনারায়ণদেবকৌ ॥ * ॥
ব্রজমোহনদেবস্যাপ্যুভৌ পুত্রৌ তয়োঃ পরঃ। ধার্ম্মিকো রামরত্নাখ্যো হরনারায়ণোঽবরঃ ॥ * ॥
গোপীকৃষ্ণস্য দেবস্য পুত্রাশ্চত্বার এব চ। তেষাং জ্যেষ্ঠস্তু গোপালকৃষ্ণোঽতিসাত্ত্বিকঃ স চ ॥
শ্রীলগোকুলকৃষ্ণস্তু মধ্যমো গুণসাগরঃ। বাঙ্গালবেঙ্কে নায়েবদেবানীকর্ম্মতৎপরঃ ॥ গোপেন্দ্র-
কৃষ্ণগোপেশকৃষ্ণৌ সন্তানবর্জ্জিতৌ। তৃতীয়কতুরীয়ৌ চ বাল্যে দেহান্তরং গতৌ ॥ ২৪ ॥

বাণাম্বরর্ষিভূমানসমায়াং শকভূপতেঃ। গোপীমোহনদেবস্য গোষ্ঠীপতিমহীপতেঃ ॥

শ্রীরাধাকান্তদেবেতি নাম্না পুত্রোঽভ্যজায়ত। বঙ্গবিদ্যাং তথা হিন্দীং পারসীমারবীং ততঃ ॥ ইংরেজীং সংস্কৃতঞ্চৈবাধীতবান্ সোঽতিযত্নতঃ। তথা চতুর্দ্ধুরীণস্য গোপীকান্তস্য ধীমতঃ ॥ সর্ব্বাগ্রমান্যস্য গোষ্ঠীপতের্ম্মৌলিকরাজতঃ। সিংহেত্যুপাধিযুক্তস্য প্রপৌত্রীং স উপাযত ॥ গোষ্ঠীপতিরভূত্তেন কুলাচার্য্যাদিসম্মতঃ। বঙ্গেংলণ্ডফ্রান্‌সজর্ম্মান্‌ডেম্মার্কাদিপ্রদেশতঃ ॥ রুষিয়া-মেরিকাসংজ্ঞদেশানাঞ্চৈব মধ্যতঃ। বিদ্যাদিবিষয়াণাস্ত সভানাং সভ্যতামিতঃ ॥ এবং ধর্ম্ম-সভায়াশ্চ তথান্যাসাং সভাপতিঃ। বভূব বহুসম্মানপূর্ব্বকং স মহামতিঃ ॥ স বাণাগ্নীভশশ-ভূম্মিত ইংরেজিবৎসরে। প্রাপ্তঃ কিলকিলানামনগরেঽস্মিন্ মনোহরে ॥ গবর্ণরস্যৈবেচ্ছাতো মাজিষ্ট্রেটীয়কং পদং। যদেবৈকান্তমান্যানাং গুণিনামপি মানদং ॥ মুন্যগ্নিনাগভূমানে ঐংরে-জাব্দে তু পৈতৃকং। রাজোপাধিঞ্চ কৌন্‌সেলাৎ বসনং ভূষণাদিকং ॥ মানবর্দ্ধনপত্রেণ সহিতং বহুমূল্যকং। তথা গবর্ণরস্যৈব সভায়ামাদিপীঠকং ॥ প্রাপ্তবানতিদুষ্প্রাপ্যং যল্লোকে মান-দায়কং। অঙ্কবেদাক্ষিভূমানে বঙ্গাব্দে বিধিপূর্ব্বকং ॥ গয়াতীর্থপ্রয়াণার্থং প্রস্থিতঃ পথিমধ্যতঃ। মুর্‌শিদাবাদনগরে শ্রীনবাবসভাঙ্গতঃ ॥ সম্মানিতঃ স চ সমাদরতস্তৎসমীপতঃ। রাজার্হং হেম-বসনং সপ্তকং সপ্তরূপতঃ ॥ হোমাখ্যপক্ষিপুচ্ছেন যুক্তং যুগ্মং কিরীটকং। কুণ্ডলং মৌক্তিকং হারং ফলকং করবালকং ॥ যৎ সদা ভূপতীনাং হি ভূরিসম্ভ্রমবর্দ্ধকং। প্রাপ্তবাংস্তত্তু দুষ্প্রাপ্যং বহুসম্মানপূর্ব্বকং ॥ অথেন্দুরসপক্ষাব্জমানে বঙ্গাখ্যহায়নে। পৌত্রোদ্বাহোপলক্ষেণ সভাং কৃত্বা শুভে দিনে ॥ সমাহূয় কুলাচার্য্যান্ কুলীনান্ পণ্ডিতান্ স চ। কায়স্থানাং চতুর্ব্বিংশপর্য্যায়াণাং তথৈব চ ॥ সুমুখ্যানাং কুলীনানাং কনিষ্ঠানাঞ্চ সর্ব্বশঃ। এবং ষড়্‌ভ্রাতৃজাতানামেকযাত্রীং চকার সঃ ॥ তৎপত্রিকাং কারিকায়াঃ পুস্তকঞ্চাপি মুদ্রিতং। কুলীনঘটকাদিভ্যঃ কৃত্বা তেন সমর্পিতং ॥ পাঠশালাধ্যাপনায় গ্রন্থনির্ম্মাণহেতুতঃ। স্কূল্‌বুক্ সোসাইটীনাম যা সভাস্মিন্ প্রদেশতঃ ॥ স তদর্থং নীতিকথা বাংলাশিক্ষাদিপুস্তকং। কৃতবান্ হেক্‌মতে আশ্‌জার্ রক্ষায়ু-র্ব্বেদবাচকং ॥ পুস্তং পারস্যভাষাত ইংরেজীভাষয়া পুনঃ। অনুবাদ্য গ্রেটব্রিটন্‌দেশে রাজ্ঞো মহাত্মনঃ ॥ স চ রাইয়ল্ এসিয়াটিক্ সমাজে প্রেরয়ত্ততঃ। তত্র মুদ্রাঙ্কিতং কৃত্বা তৎশতং পরিমাণতঃ ॥ অনুবাদকসান্নিধ্যে তস্যৈব দর্শনার্থতঃ। কৃপয়া প্রেষয়ামাসুস্তৎসদঃস্থাঃ প্রয-ত্নতঃ ॥ তথা বহুব্যয়ায়াসকালসম্পাদনীয়কং। শব্দকল্পদ্রুমাখ্যাভিধানঞ্চ সপ্তকাণ্ডকং ॥ পরোপকৃতয়ে কৃত্বা গুণিভ্যোঽভবদর্পিতা। যৎ প্রাপ্যালোক্য সন্তুষ্টাঃ সর্ব্বদেশীয়পণ্ডিতাঃ ॥ প্রত্যেকে প্রেরয়ামাসুঃ সুখ্যাতিপত্রিকাদিকং। বিশেষতো দিনেমাররাজ্যেশোহেমহারকং ॥ স্বীয়াস্যচিহ্নসংযুক্তপদকোত্তমধারকং। প্রীত্যা সংপ্রেষয়ামাস রাজ্ঞোঽর্থে মানদায়কং ॥ পুনস্তদভিধানস্য পরিশিষ্টমতিশ্রমাৎ। নির্ম্মায় মুদ্রিতং তেন প্রদানার্থং বহুব্যয়াৎ ॥ ২৪ ॥

অত্রৈব কথয়ামীমং ইতিহাসং পুরাতনং। সঙ্ক্ষেপেণ চ তদ্রাজ্ঞো লোকবিস্ময়কারণং ॥ নাগবেদাষ্টভূমানে ইংরেজাব্দে হি বৈরিণা। টাকীগ্রামনিবাসেন কেনচিৎ খ্যাতমুন্‌সিনা ॥

দুষ্টেনাভীষ্টসিদ্ধ্যর্থং দণ্ডপারুষ্যসংজ্ঞকে। বিবাদস্য পদে মান্যজনানাং মাননাশকে॥ কারিতো মিথ্যাভিযোগস্তস্য নির্দ্দোষভূভৃতঃ। হুগ্লীগ্রামস্য মেজিষ্ট্রেট্ নামকেনাবিচারতঃ॥ পোলিস্‌ সুপ্‌রিণ্টেনডেণ্টসংজ্ঞকস্য সমীপতঃ। ক্রুধা তন্মিথ্যাপবাদঃ পত্রেণ প্রকটীকৃতঃ॥ তেন সেক্রেটরিদ্বারা গবর্ণরায় বেদিতঃ। সোঽপি তৈর্ব্বহুধা চেষ্টাং কৃতবান্ তদ্দমার্থতঃ॥ কিন্তু সেশন্‌জজাখ্যস্য প্রাড্‌বিবাকস্য ধীমতঃ। অতিসূক্ষ্মবিচারেণ রাজা নির্দ্দোষতাং গতঃ॥ তস্মাদ্‌ বিপক্ষপক্ষাণাং ক্রূরাণাঞ্চ বিশেষতঃ। তেষামুদ্যমভঙ্গেন লজ্জাধিক্যমজায়ত॥ তেন সর্‌ হর্‌বর্ট মেডাক্‌ ডেপিউটী গবর্ণরঃ। স্নেহেনাক্লিন্নহৃদয়ঃ সদয়শ্চাতিসত্বরঃ॥ আহ্বানার্থং তস্য রাজ্ঞঃ প্রেষয়ামাস পত্রকং। স চানীয় স্বভবনে তঞ্চ সম্মানপূর্ব্বকং॥ সান্ত্বয়িত্বা জয়ান্তস্মৈ ধন্যবাদং প্রদত্তবান্। এবং গবর্ণরো জেন্‌রেল্‌ লার্ডডেল্‌হৌসিরাত্মবান্॥ স্বদেশযানসময়ে সভামধ্যেঽতিহর্ষিতঃ। তদ্রাজ্ঞো দক্ষিণং হস্তং গৃহীত্বাতিপ্রযত্নতঃ॥ লার্ডেন চ তথা লেডী কেনিঙ্গেন সহোৎসুকঃ। সাক্ষাৎ তং কারয়ামাস মানিনাং মানবর্দ্ধকঃ॥ পূর্ব্বোক্তমিথ্যাভিযোগে দণ্ডার্হকরণায় চ। উদ্যোগজন্যদোষস্যাপ্যকরোৎ ক্ষালনং স চ॥ স তু মুন্সী পুনরপি দণ্ডপারুষ্যবাদতঃ। ফরাসডাঙ্গানগরে পলায়িত্বা মৃতস্ততঃ॥

রাজকৃষ্ণস্য নৃপতের্জাতা বসুমিতাঃ সুতাঃ। শিবকৃষ্ণো নৃপো জ্যেষ্ঠো যস্যাস্তি শিবতুল্যতা॥ রূপবান্ গুণবাংশ্চাপি কালীকৃষ্ণস্তু মধ্যমঃ। দয়ালুর্ব্বুদ্ধিমান্ মান্যো ধার্ম্মিকো মানবোত্তমঃ॥ ইংরেজীভাষয়া সোঽপি মহানাটকনামকং। তথা রসলসেত্যাখ্যমিংরেজানাঞ্চ পুস্তকং॥ বঙ্গীয়ভাষয়া চৈবানুবাদমকরোত্ততঃ। রাজবাহাদুরোপাধিং প্রাপ্তো গবরন্‌মেণ্টতঃ॥ দেবীকৃষ্ণোঽতিসরলো দেবভক্তস্তৃতীয়কঃ। অপূর্ব্বগুণসংযুক্তোঽপূর্ব্বকৃষ্ণস্তুরীয়কঃ॥ দেবান্‌ কুঙর্‌ নামধেয়ং গ্রন্থং স চোর্দ্দুভাষয়া। নির্ম্মাণং কৃতবান্ সোঽপি নিজায়াসব্যয়েচ্ছয়া॥ ততো মাধবকৃষ্ণস্তু সুশীলঃ পুত্রবর্জ্জিতঃ। পঞ্চমো দেবতাভক্তঃ সোঽল্পে বয়সি সংস্থিতঃ॥ কৃতবান্ স চ বেতালপঞ্চবিংশতিনামকং। গ্রন্থং পারস্যভাষাতোঽনুবাদং যত্নপূর্ব্বকং॥ ষষ্ঠঃ কমলকৃষ্ণস্তু দৈবে পৈত্র্যে সদা রতঃ। কার্য্যে বহুগুণোপেতস্তথা পণ্ডিতমণ্ডিতঃ॥ এবং গঙ্গাসাগরয়োঃ সঙ্গমে তেন নির্ম্মিতং। শ্রীমৎকপিলদেবস্য মন্দিরং সুপরিষ্কৃতং॥ তুলাপুরুষদানঞ্চ শ্রীমদ্ভাগবতস্য চ। পারায়ণং বাগবাজারস্য ঘট্টে তথৈব চ॥ শিবস্য স্থাপনং মাত্রা কারয়ামাস সোৎসুকঃ। বহুবিত্তব্যয়েনৈব কুলকীর্ত্তিবিবর্দ্ধকঃ॥ নরেন্দ্রকৃষ্ণেতিসংজ্ঞো যঃ সুতঃ স তু সপ্তমঃ। রূপবান্ গুণবাংশ্চৈব নরেন্দ্রেণ পুনঃ সমঃ॥ স চ ডেপিউটীমেজিষ্ট্রেট্ বভূব সদাশয়ঃ। যো হি যাদবকৃষ্ণস্তু কনিষ্ঠোঽতিদয়াময়ঃ॥ তেন দেবান্ মোশ্‌ফকাখ্যং পুস্তকঞ্চোর্দ্দুভাষয়া। নির্ম্মায় মুদ্রিতং তচ্চ কৃত্বা দত্তং নিজেচ্ছয়া॥ গয়াধামমৃতঃ সোঽপি পুত্রহীনোঽমৃতং গতঃ। চন্দ্রেষুপক্ষভূমানে বঙ্গসংজ্ঞকবর্ষতঃ॥ রাজরাধাকান্তদেবসাহায্যেন মুদান্বিতৈঃ। স্বপর্য্যায়কুলীনানামেকযায়ী কৃতা চ তৈঃ॥ ২৪॥

শ্রীরাধাকান্তদেবস্য রাজবাহাদুরস্য চ। ত্রয়ঃ সুতাঃ সিদ্ধগোষ্ঠীপতয়ঃ স্বকুলেষু চ ॥ যতো গোষ্ঠীপতেঃ পুত্রা দৌহিত্রাশ্চ বিশেষতঃ। তেষাং জ্যেষ্ঠঃ শ্রীমহেন্দ্রনারায়ণ ইতীরিতঃ ॥ দেবব্রাহ্মণভক্তঃ স বুদ্ধিমাংশ্চ গুণান্বিতঃ। মধ্যমঃ শ্রীলরাজেন্দ্রনারায়ণ ইতি শ্রুতঃ ॥ ধার্ম্মিকঃ সত্যবাদী স কর্ম্মদক্ষশ্চ সত্তমঃ। যস্তু শ্রীদেবেন্দ্রনারায়ণো দেবঃ স চান্তিমঃ ॥ ব্যবহারজ্ঞান-যুতঃ প্রতাপাদিসমন্বিতঃ। মন্ত্রণাদাননিপুণো ধীমান্ ধীমদ্ভিরাবৃতঃ ॥ এতে ভারতবর্ষীয়-গবর্ণরসমাজতঃ। তত্র যানস্যাধিকারং কুমারোপাধিকং ততঃ ॥ পঞ্চপ্রকারং বসনং ভূষণঞ্চ মনোরমং। ত্রয়ঃ সহোদরাঃ সর্ব্বে প্রত্যেকে লেভিরে সমং ॥ ২৫ ॥

জাতাঃ পুত্রাস্ত্রয়ঃ শ্রীমৎশিবকৃষ্ণস্য ভূভৃতঃ। তেষাং শ্রীযুতভূপেন্দ্রকৃষ্ণো জ্যেষ্ঠঃ প্রকীর্ত্তিতঃ ॥ চত্বারস্তনয়াঃ শ্রীলকালীকৃষ্ণস্য ভূপতেঃ। তেষাং জ্যেষ্ঠঃ শ্রীহরেন্দ্রকৃষ্ণ ইত্যভিধীয়তে ॥ বভূব যো ডেপিউটীমেজিষ্ট্রেটিপদে স্থিতঃ। শ্রীদেবীকৃষ্ণদেবস্য তনয়ৌ দ্বৌ চ ধীমতঃ ॥ শ্রীমদানন্দকৃষ্ণো যস্তয়োর্জ্যেষ্ঠঃ স চ স্মৃতঃ। শ্রীযুতাপূর্ব্বকৃষ্ণস্য চত্বারস্তনয়াস্ততঃ ॥ শ্রেষ্ঠো জ্যেষ্ঠঃ শ্রীকুমারকৃষ্ণেতিখ্যাতিসংযুতঃ। শ্রীমন্নরেন্দ্রকৃষ্ণো যঃ সম্ভূতাস্তস্য দেহতঃ ॥ ত্রয়ঃ পুত্রাস্তেষু মধ্যে জ্যেষ্ঠপুত্রোঽভবৎ পুনঃ। শ্রীমদ্‌ব্রজেন্দ্রকৃষ্ণেতি নাম্না খ্যাতঃ সুলক্ষণঃ ॥ ২৫ ॥

রাজনারায়ণস্যৈব দেবোপাধিযুতস্য চ। পুত্রোঽভবজ্জগৎকৃষ্ণনামেদানীং মৃতঃ স চ ॥ শ্রীনারায়ণদেবস্য ত্রয়ঃ পুত্রা গুণৈর্য়ুতাঃ। তেষাং জ্যেষ্ঠঃ শ্রীপ্রসন্ননারায়ণ ইতি শ্রুতঃ ॥ গবর্নমেণ্টস্য তোশাখানায়াং প্রথমং স হি। অধ্যক্ষোঽভূত্তত্র কর্ম্মনির্ব্বাহকরণেন হি ॥ তস্মৈ গবর্ণরো লার্ডহার্ডিঞ্জঃ কৃপয়ান্বিতঃ। রায়বাহাদুরোপাধিং দত্তবানতিতোষতঃ ॥ ততো মুরশিদাবাদে নবাবস্য সমীপতঃ। নেজামতস্য দেবানীং প্রাপ্তবান্ বহুভাগ্যতঃ ॥ তত্রাপি চ নবাবস্য সন্নিধৌ লব্ধবানয়ং। রাজবাহাদুরোপাধিমেকান্তমানতঃ স্বয়ং ॥ ২৫ ॥

গোপালকৃষ্ণদেবস্য পুত্রাশ্চত্বার এব তু। শ্রীলশ্রীকৃষ্ণদেবো যঃ সর্ব্বেষামগ্রজঃ স তু ॥ শ্রীমদ্গোকুলকৃষ্ণস্য তনয়ৌ দ্বৌ মহাত্মনঃ। শ্রীমন্নৃপেন্দ্রকৃষ্ণস্তু জ্যেষ্ঠোঽতিনন্দিবর্দ্ধনঃ ॥ ২৫ ॥

শ্রীমন্মহেন্দ্রাদিনারায়ণদেবস্য ধীমতঃ। নাদ্যাপি তনয়ো জাতো গ্রহবৈগুণ্যদোষতঃ ॥ তথা শ্রীযুতরাজেন্দ্রনারায়ণস্য কায়তঃ। শ্রীমদ্গিরীন্দ্রাদিনারায়ণঃ পুত্রো ব্যজায়ত ॥ এবং শ্রীযুক্ত-দেবেন্দ্রনারায়ণশরীরতঃ। সংজাতশ্চ শ্রীব্রজেন্দ্রনারায়ণেতিসংজ্ঞিতঃ ॥ ২৬ ॥

শ্রীমদ্ভূপেন্দ্রকৃষ্ণস্য পুত্রো জাতোঽতিসুন্দরঃ। শ্রীজিতেন্দ্রিয়কৃষ্ণেতিখ্যাতিযুক্তঃ প্রিয়ঙ্করঃ ॥ শ্রীমদ্ধরেন্দ্রকৃষ্ণস্য তনয়শ্চাতিশোভনঃ। শ্রীমদ্বরেন্দ্রকৃষ্ণোঽগ্রজাতঃ সরসিজাননঃ ॥ ২৬ ॥

জগৎকৃষ্ণস্যাত্মজস্তু জ্যেষ্ঠোঽভুদতিশীলবান্। শ্রীমত্তারণকৃষ্ণেতিনাম্না খ্যাতোঽতিবুদ্ধিমান্ ॥ শ্রীলপ্রসন্নাদিনারায়ণস্য সুত উত্তমঃ। শ্রীমদ্ভূপেন্দ্রাদিনারায়ণঃ শশধরোপমঃ ॥ ২৬ ॥

ইত্যেকাদিকষড়্‌বিংশপুরুষান্তাতিনির্ম্মলা।
দেববংশাবলী যা সা সমাপ্তা মৌলিকাতুলা ॥

# শব্দকল্পদ্রুমঃ

অ অংশঃ

অ অকারঃ। আদ্যস্বরবর্ণঃ। অস্যোচ্চারণ-স্থানং কণ্ঠঃ। স তু হ্রস্বো দীর্ঘঃ প্লুতশ্চ ভবতি। ইতি ব্যাকরণং॥ অস্য লেখন-প্রকারো যথা। দক্ষতঃ কুণ্ডলী ভূত্বা কুঞ্চিতা বামতো গতা। ততোঽর্দ্ধসঙ্গতা রেখা দক্ষোর্দ্ধা তাসু শঙ্করঃ॥ বিধির্নারায়ণশ্চৈব সন্তিষ্ঠেৎ ক্রমতঃ সদা। অর্দ্ধমাত্রা শক্তি-রূপা ধ্যানমস্য চ কথ্যতে॥ ইতি বর্ণো-দ্ধারতন্ত্রং॥ অস্য তত্ত্বং যথা। শৃণু তত্ত্বং অকারস্য অতিগোপ্যং বরাননে। শরচ্চন্দ্র-প্রতীকাশং পঞ্চকোণময়ং সদা॥ পঞ্চ-দেবময়ং বর্ণং শক্তিত্রয়সমন্বিতং। নির্গুণং ত্রিগুণোপেতং স্বয়ং কৈবল্যমূর্ত্তিমান্॥ বিন্দুতত্ত্বময়ং বর্ণং স্বয়ং প্রকৃতিরূপিণী। ইতি কামধেনুতন্ত্রং॥ অস্য পর্য্যায়ঃ। অঃ শ্রীকণ্ঠো মাতৃকাদ্যোঽনন্তো বিষ্ণুরনুত্তরঃ। ইতি বীজবর্ণাভিধানং॥ অন্যচ্চ। অঃ শ্রীকণ্ঠঃ সুরেশশ্চ ললাটশ্চৈকমাত্রিকঃ। পূর্ণোদরী সৃষ্টিমেধৌ সারস্বতঃ প্রিয়ম্বদঃ॥ মহাব্রাহ্মী বাসুদেবো ধনেশঃ কেশবো-ঽমৃতং। কীর্ত্তির্নিবৃত্তির্বাগীশো নরকারি-র্হরো মরুৎ॥ ব্রহ্মা বামাদ্যজো হ্রস্বঃ করস্থঃ প্রণবাদ্যকঃ। প্রণবাদ্যাবয়ব ইত্যর্থঃ॥ ব্রহ্মাণী কামরূপশ্চ কামেশী বাসিনী বিয়ৎ॥ বিশ্বেশঃ শ্রীবিষ্ণুকণ্ঠৌ প্রতিপত্তিথিরংশিনী। অর্কমণ্ডলবর্ণাদৌ ব্রাহ্মণঃ কামকর্ষিণী॥ ইতি বর্ণাভিধান-তন্ত্রং॥

অ ব্য অভাবঃ। অল্পঃ। নিষেধঃ। অনুকম্পা। ইতি মেদিনী॥

অঃ (পুং) বিষ্ণুঃ। ইতি মেদিনী॥

অঋণী [ন্] (ত্রি) অনৃণী। অঋণগ্রস্তঃ। অধারী। যথা। দিবসস্যাষ্টমে ভাগে শাকং পচতি যো নরঃ। অঋণী চাপ্রবাসী চ স বারিচর মোদতে॥ ইতি মহাভারতং॥

অংশ ৎ ক বিভাজনে। অংশকরণে। ইতি কবিকল্পদ্রুমঃ॥ তালব্যোপধঃ। বিভাজন ইতি ভাজ ৎ ক তু পৃথক্কৃত্যাং ইত্যস্য রূপং। অংশয়তি অংশাপয়তি ধনং বণিক্। ইতি দুর্গাদাসকৃতধাতুদীপিকা॥

অংশঃ (পুং) বিভাজনং। তৎপর্য্যায়ঃ। ভাগঃ ২ বণ্টকঃ ৩। ইত্যমরঃ॥ বিভাগঃ ৪ ভক্তিঃ ৫। ইতি জটাধরঃ॥ অংসশব্দো দন্ত্যসান্তোঽপি। অংশাংস ৎ ক বিভাজনে

ইতি কবিকল্পদ্রুমদর্শনাৎ ॥ স্কন্ধঃ। ইতি বিদ্যাবিনোদাদয়ঃ ॥

অংশকং (ক্লী) দিনং। ইতি ত্রিকাণ্ডশেষঃ ॥

অংশকঃ (পুং) জ্ঞাতিঃ। দায়াদঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

অংশভাক্ [জ্] (ত্রি) অংশী। যথা। বৌধায়নঃ। প্রবন্তীম্বনিরুদ্ধাসু ত্রয়ো বর্ণা দ্বিজাতয়ঃ। প্রাতরুত্থায় কর্ত্তব্যং দেবর্ষিপিতৃতর্পণং ॥ নিরুদ্ধাসু ন কুর্ব্বীরন্নংশভাক্ তত্র সেতুকৃৎ। ইতি প্রায়শ্চিত্ততত্ত্বং ॥

অংশলঃ (ত্রি) অংসলঃ। বলবান্। ইত্যমরটীকায়াং রমানাথঃ ॥

অংশী [ন্] (ত্রি) অংশযোগ্যঃ। বণ্টকবিশিষ্টঃ। ভাগী। যথা। যাজ্ঞবল্ক্যঃ। বিভাগঞ্চেৎ পিতা কুর্য্যাৎ স্বেচ্ছয়া বিভজেৎ সুতান্। জ্যেষ্ঠং বা শ্রেষ্ঠভাগেন সর্ব্বে বা স্যুঃ সমাংশিনঃ ॥ ইতি। সতি তু পিতরি পার্ব্বণানধিকারাৎ পুত্ত্রাণাং নাংশিতা। এবং ধনিনঃ পৌত্ত্রস্বত্বোপরমে তদংশমাত্রে প্রপৌত্ত্রাণামংশিতা। ইতি দায়তত্ত্বং ॥

অংশুঃ (পুং) কিরণঃ। প্রভা। ইতি মেদিনী ॥ বেশঃ। ইতি ধরণী ॥ সূত্রাদিসূক্ষ্মাংশঃ। ইতি হেমচন্দ্রঃ ॥ লেশঃ। সূর্য্যঃ। ইতি বিশ্বঃ ॥

অংশুকং (ক্লী) বস্ত্রমাত্রং। সূক্ষ্মবস্ত্রং। উত্তরীয়বস্ত্রং। ইতি মেদিনী ॥ শুক্লবস্ত্রং। ইত্যমরটীকায়াং রমানাথঃ ॥ পত্রং। তেজপাত ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ ॥

অংশুধরঃ (পুং) সূর্য্যঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

অংশুমৎফলা (স্ত্রী) কদলীবৃক্ষঃ। ইত্যমরঃ ॥

অংশুমতী (স্ত্রী) সালপর্ণীবৃক্ষঃ। ইত্যমরঃ ॥

অংশুমান্ [ৎ] (পুং) সূর্য্যঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ অসমঞ্জপুত্ত্রঃ সূর্য্যবংশীয়রাজবিশেষঃ। যথা। সগরস্যাসমঞ্জস্তু অসমঞ্জাদথাংশুমান্। দিলীপোঽংশুমতঃ পুত্ত্রো দিলীপস্য ভগীরথঃ ॥ ইতি রামায়ণে বালকাণ্ডে ৭০ সর্গঃ ॥ সূর্য্যবংশীয়াসমঞ্জোরাজপৌত্ত্রঃ। যথা। ততশ্চকারাসমঞ্জা গঙ্গানয়নকারণং। লক্ষবর্ষং তপস্তপ্ত্বা মমার কালযোগতঃ ॥ দিলীপস্তস্য তনয়ো গঙ্গানয়নকারণং। তপঃ কৃত্বা লক্ষবর্ষং যযৌ লোকান্তরং নৃপঃ ॥ অংশুমাংস্তস্য পুত্ত্রোঽভূদ্গঙ্গানয়নকারণং। তপঃ কৃত্বা লক্ষবর্ষং মমার কালযোগতঃ ॥ ভগীরথস্তস্য পুত্ত্রো মহাভাগবতঃ সুধীঃ। তপঃ কৃত্বা লক্ষবর্ষং মমার কালযোগতঃ ॥ ইত্যাদি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ৮ অধ্যায়ঃ ॥ অংশুযুক্তে ত্রি ॥

অংশুমালী [ন্] (পুং) সূর্য্যঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

অংশুলঃ (পুং) চাণক্যমুনিঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

অংশুহস্তঃ (পুং) সূর্য্যঃ। ইতি জটাধরঃ ॥

অংস ৎ ক বিভাজনে। অংশকরণে। ইতি কবিকল্পদ্রুমঃ ॥ দন্ত্যোপধঃ। বিভাজন ইতি ভাজ ৎ ক তু পৃথক্কৃত্যাং ইত্যস্য রূপং। অংসয়তি অংসাপয়তি ধনং বণিক্। ইতি দুর্গাদাসঃ ॥

অংসঃ (পুং ক্লী) স্কন্ধঃ। ইত্যমরঃ ॥ বিভাগে পুং। ইতি বিশ্বো হেমচন্দ্রশ্চ ॥

অংসকূটঃ (পুং) ককুদ্। ষাঁড়ের ঝুঁট ইতি ভাষা। ইতি হেমচন্দ্রঃ ॥

অংসলঃ ( ত্রি ) বলবান্। ইত্যমরঃ ॥

অংহঃ [ স্ ] ( ক্লী ) পাপং। ইত্যমরঃ ॥

অংহতিঃ ( স্ত্রী ) দানং। ইত্যমরঃ ॥ রোগঃ। ত্যাগঃ। ইতি মেদিনী ॥

অংহতী ( স্ত্রী ) দানং। ইত্যমরটীকাসারসুন্দরী ॥

অংহিতিঃ ( স্ত্রী ) দানং। ইত্যমরটীকায়াং রায়মুকুটঃ ॥

অংঘ্রিঃ ( পুং ) পাদঃ। বৃক্ষমূলং। ইত্যমরঃ ॥

অংঘ্রিপঃ ( পুং ) বৃক্ষঃ। ইতি হলায়ুধঃ ॥

অংঘ্রিস্কন্ধঃ ( পুং ) গুল্ফঃ। ইতি হেমচন্দ্রঃ ॥

অক ম বক্রগতৌ। কুটিলগমনে। ইতি কবিকল্পদ্রুমঃ ॥ ম অকয়তি অকতি সর্পঃ। ইতি দুর্গাদাসঃ ॥

অক ই ক লক্ষ্মণি। ইতি কবিকল্পদ্রুমঃ। লক্ষ্ম চিহ্নযুক্তকরণং। ই ক অঙ্কয়তি বস্ত্রং রজকঃ। নোপধপাঠেঽপি ণ্যেন্নিত্যত্বা-দ্ধস্বণ্ডলোপোঽনাবিত্যস্যাপ্রাপ্তৌ যগাদৌ অঙ্ক্যতে ইত্যাদৌ সিদ্ধে ইদিৎপাঠশ্চুরাদে-র্ণ্যেরনিত্যত্বজ্ঞাপনার্থঃ। তেন অঙ্কতীত্যপি স্যাৎ। তথাচ বোপদেবঃ। সিদ্ধে নিত্যণিজন্তত্বান্নিত্যনুস্বে কিতামিদিৎ ণিজনিত্যত্ববোধার্থং ন দৃষ্টোঽনুম্বিধিঃ ক্বচিদিতি ॥ অস্যার্থঃ। কিতাং কানুবন্ধানাং নিত্যণিজন্তত্বান্নিত্যঞ্যন্তত্বান্নিত্যনুস্বে নিত্যনকারবত্ত্বে সিদ্ধে ইদিৎ ইদনুবন্ধকরণং ণিচো ণ্যেরনিত্যত্ববোধার্থং। কিন্তু অনুম্বিধির্নকারাভাবঃ ক্বচিদপি ন দৃষ্টঃ। ইতি দুর্গাদাসঃ ॥

অক ই ঙ গত্যাং। লক্ষ্মণি। ইতি কবিকল্পদ্রুমঃ ॥ ই অঙ্ক্যতে। ঙ অঙ্কতে পুণ্যতীর্থেষু বৃষযুগ্মান্যশঙ্কিতঃ। ইতি হলায়ুধঃ ॥ ইতি দুর্গাদাসঃ ॥

অকং ( ক্লী ) পাপং। দুঃখং। ইতি মেদিনী ॥

অকচঃ ( পুং ) কেতুগ্রহঃ। ইতি হারাবলী ॥ বাচ্যলিঙ্গস্তু কেশশূন্যে ॥

অকথ্যঃ ( ত্রি ) অকথনীয়ঃ। অবক্তব্যঃ ॥

অকনিষ্ঠঃ ( পুং ) বুদ্ধঃ। ইতি শব্দরত্নাবলী ॥ কনিষ্ঠভিন্নে বাচ্যলিঙ্গঃ ॥

অকনিষ্ঠগঃ ( পুং ) বুদ্ধঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

অকম্পিতঃ ( পুং ) বৌদ্ধগণাধিপবিশেষঃ। ইতি হেমচন্দ্রঃ ॥ কম্পরহিতে বাচ্যলিঙ্গঃ ॥

অকরণিঃ ( স্ত্রী ) আক্রোশবিশেষঃ। শাপঃ। যথা তস্যাকরণিরেবাস্তু। ইত্যমরঃ ॥

অকরা ( স্ত্রী ) আমলকী। ইতি শব্দচন্দ্রিকা ॥ বাচ্যলিঙ্গস্তু কররহিতে ॥

অকরুণঃ ( ত্রি ) করুণাশূন্যঃ। নির্দয়ঃ। অকৃপঃ। যথা। রঘোর্বংশে কুৎসামকরুণ সমুৎসারয়তি কঃ। ইতি মহানাটকং ॥

অকর্কশঃ ( ত্রি ) কার্কশ্যরহিতঃ। কোমলঃ। ইতি হেমচন্দ্রঃ ॥

অকর্ণঃ ( ত্রি ) কর্ণরহিতঃ। বধিরঃ। ইতি হেমচন্দ্রঃ ॥

অকর্ত্তনঃ ( পুং ) বামনঃ। খর্ব্বঃ। ইতি জটাধরঃ ॥

অকর্ত্তব্যং ( ত্রি ) অকরণীয়ং। অকরণার্হং। অকার্য্যং। যথা অবিরোধো ভবাব্ধৌ চ সর্ব্বমঙ্গলমঙ্গলং। বিরোধো নাশবীজঞ্চ সর্ব্বোপদ্রবকারণং ॥ অকর্ত্তব্যো বিরোধশ্চ দারুণৈঃ ক্ষত্রিয়ৈঃ সহ। ইতি ব্রহ্মবৈবর্ত্তে গণপতিখণ্ডে ২৮ অধ্যায়ঃ ॥

অকর্ত্তা [ ঋ ] ( ত্রি ) অকারকঃ। যথা। চাতুর্বর্ণ্যং ময়া সৃষ্টং গুণকর্ম্মবিভাগশঃ। তস্য কর্ত্তারমপি মাং বিদ্ধ্যকর্ত্তারমব্যয়ং ॥ ইতি শ্রীভগবদ্গীতায়াং ৪ অধ্যায়ে ১৩ শ্লোকঃ ॥

অকর্ম্ম [ ন্ ] ( ক্লী ) অকরণীয়কার্য্যং। যথা। কিং কর্ম্ম কিমকর্ম্মেতি কবয়োঽপ্যত্র মোহিতাঃ। তত্তে কর্ম্ম প্রবক্ষ্যামি যজ্জ্ঞাত্বা মোক্ষ্যসেঽশুভাৎ ॥ কর্ম্মণো হ্যপি বোদ্ধব্যং বোদ্ধব্যঞ্চ বিকর্ম্মণঃ। অকর্ম্মণশ্চ বোদ্ধব্যং গহনা কর্ম্মণো গতিঃ ॥ কর্ম্মণ্যকর্ম্ম যঃ পশ্যেদকর্ম্মণি চ কর্ম্ম যঃ। স বুদ্ধিমান্ মনুষ্যেষু স যুক্তঃ কৃৎস্নকর্ম্মকৃৎ ॥ ইতি শ্রীভগবদ্গীতায়াং ৪ অধ্যায়ে ১৬। ১৭। ১৮ শ্লোকাঃ ॥

অকর্ম্মণ্যং ( ত্রি ) কর্ম্মাযোগ্যং। কার্য্যানর্হ্যং। নিষ্কর্ম্মণ্যং। অকেজুয়া ইতি ভাষা। যথা ষষ্টিদণ্ডাত্মিকায়াশ্চ তিথের্নিক্রমণে পরে। অকর্ম্মণ্যং তিথিমলং বিদ্যাদেকাদশীস্থিনা॥ ইতি তিথ্যাদিতত্ত্বং ॥

অকর্ম্মা [ ন্ ] ( ত্রি ) কার্য্যাক্ষমঃ। নিষ্কর্ম্মা। কার্য্যানুপযুক্তঃ ॥

অকর্ম্মান্বিতঃ ( ত্রি ) নিষ্কর্ম্মান্বিতঃ। অকর্ম্মবিশিষ্টঃ। দুষ্কর্ম্মযুক্তঃ ॥

অকল্কনঃ ( ত্রি ) দম্ভরহিতঃ। তৎপর্য্যায়ঃ। বীতদম্ভঃ ২। ইতি হেমচন্দ্রঃ ॥ অকল্কল ইত্যপি পাঠঃ ॥

অকল্কা ( স্ত্রী ) জ্যোৎস্না। ইতি শব্দচন্দ্রিকা ॥ বাচ্যলিঙ্গস্তু কল্করহিতে ॥

অকল্পিতঃ ( ত্রি ) কল্পনারহিতঃ। অকাল্পনিকঃ। অকৃত্রিমঃ। অরচিতঃ ॥

অকল্যঃ ( ত্রি ) রোগী। কল্যো নিরাময়ঃ তত্র নঞ্সমাসঃ ॥

অকল্যাণং ( ক্লী ) অমঙ্গলং। অশুভং ॥

অকস্মাৎ ব্য অতর্কিতং। হঠাৎ। তৎপর্য্যায়ঃ। সহসা ২ সদ্যঃ ৩ সপদি ৪ তৎক্ষণে ৫ একপদে ৬। ইতি হেমচন্দ্রঃ ॥ নঞ্সমস্তকিম্শব্দস্য পঞ্চম্যন্তপ্রয়োগোঽয়ং। ইতি কেচিৎ ॥

অকারণং ( ক্লী ) কারণশূন্যং। নির্হেতু। অনিমিত্তং। যথা। কুতঃ পুনঃ শশ্বদভদ্রমীশ্বরে নচার্পিতং কর্ম্ম যদপ্যকারণং। ইতি শ্রীভাগবতং ॥

অকারণগুণোৎপন্নগুণঃ ( পুং ) স্বাভাবিকগুণঃ। ন্যায়মতে বিভুনিষ্ঠবিশেষগুণাঃ যথা। বুদ্ধিঃ ১ সুখং ২ দুঃখং ৩ ইচ্ছা ৪ দ্বেষঃ ৫ যত্নঃ ৬ ধর্ম্মঃ ৭ অধর্ম্মঃ ৮ ভাবনা ৯ শব্দঃ ১০। ইতি সিদ্ধান্তমুক্তাবলী ॥

অকার্পণ্যং ( ক্লী ) কৃপণতারাহিত্যং। যথা। স্তোকাদপি চ দাতব্যমদীনেনৈব চাত্মনা। অহন্যহনি যৎকিঞ্চিদকার্পণ্যং হি তৎ স্মৃতং ॥ ইত্যেকাদশীতত্ত্বং ॥

অকার্য্যং ( ক্লী ) কার্য্যাভাবঃ। অকৃত্যং। অকর্ম্ম। যথা। কিমকার্য্যং কদর্য্যাণাং দুস্ত্যজং কিং ধৃতাত্মনাং। ইতি শ্রীভাগবতং ॥

অকালঃ ( পুং ) অসময়ঃ। অপ্রশস্তকালঃ। যথাযোগ্যকালাতিরিক্তসময়ঃ। অশুদ্ধকালঃ। যথা গুরোরস্তাৎ প্রাক্ বৃদ্ধত্বে পঞ্চদশাহঃ। তস্যান্তে দ্বাত্রিংশদ্দিনং। তস্যোদয়াৎ পরং বালত্বে পঞ্চদশাহঃ। গুর্ব্বাদিত্যযোগে স্থিতিকালঃ দশত্রিংশদ্দিনাদিঃ।

সিংহে গুরোঃ স্থিতিকালঃ সম্বৎসরস্থূলঃ। অস্য বিশেষঃ যদি মাঘপৌর্ণমাস্যাং মঘানক্ষত্রং প্রাপ্যতে তদৈবং ভাব্যং। বক্রিগুরৌ অষ্টাবিংশতিদিনং। পূর্ব্বরাশাবনাগতাতিচারিগুরৌ একবর্ষঃ। অয়মেব লুপ্তসম্বৎসরঃ। পূর্ব্বরাশিগতাতিচারিগুরৌ পঞ্চচত্বারিংশৎদিনং। নীচস্থগুরোঃ স্থিতিকালঃ সংবৎসরস্থূলঃ। রাহুযুক্তগুরোঃ স্থিতিসময়ঃ একাব্দঃ স্থূলঃ। ভৃগোর্মহাস্তাৎ প্রাক্ বৃদ্ধত্বে পঞ্চদশাহঃ। তস্য মহাস্তে দ্বিসপ্ততিদিনং। তস্যোদয়াৎ পরং বালত্বে দশাহঃ। এতত্রয়ং শীঘ্রাস্তমুচ্যতে। ভৃগোঃ পাদাস্তাৎ প্রাক্‌বৃদ্ধত্বে দশাহঃ। তস্য পাদাস্তে দ্বাদশাহঃ। তস্যোদয়াৎ পরং বালত্বে দিনত্রয়ং। এতত্রয়ং বক্রাস্তমুদিতং। মলমাসে মাসমেকং। ভানুলঙ্ঘিতমাসে ক্ষয়মাসে চ তদেব। ভূকম্পাদ্যদ্ভুতে সপ্তাহঃ। পৌষাদিচতুর্মাসে একদিনচরণাঙ্কিতবর্ষণে তদ্দিনং। দিনদ্বয়চরণাঙ্কিতবর্ষণে দিনত্রয়ং। দিনত্রয়চরণাঙ্কিতবর্ষণে সপ্তাহঃ। দক্ষিণায়নে ষণ্মাসাঃ শ্রীহরিশয়নে চতুর্মাসঃ। চন্দ্রসূর্য্যগ্রহণে কর্ম্মবিশেষে একত্রিসপ্তদিনানি। ইতি জ্যোতিষতত্ত্বং॥

অকালজঃ (ত্রি) অকালজাতঃ। অসময়োৎপন্নঃ। অপূর্ণকালোদ্ভবঃ। যথা। অকালজস্তু বিরসং ন ধান্যং গুণবৎ স্মৃতং। ইতি রাজবল্লভঃ॥

অকালজলদোদয়ঃ (পুং) কুজ্ঝটী। ইতি শব্দমালা॥ অকালে মেঘানামুদয়ঃ॥

অকালমেঘোদয়ঃ (পুং) কুজ্ঝটী। ইতি শব্দমালা॥ অকালে মেঘানামুদয়ঃ॥

অকিঞ্চনঃ (ত্রি) দরিদ্রঃ। নাস্তি কিঞ্চিদপি যস্য। ইতি হেমচন্দ্রঃ॥

অকিঞ্চনতা (স্ত্রী) অকিঞ্চনস্য ভাবঃ। সা তু পরিগ্রহত্যাগরূপযমবিশেষঃ। ইতি হেমচন্দ্রঃ॥

অকিল্বিষঃ (ত্রি) কিল্বিষশূন্যঃ। পাপরহিতঃ। যথা। ন মাং দোষেণ সুগ্রীব গন্তুমর্হস্যকিল্বিষং। ইতি রামায়ণং॥

অকীর্ত্তিঃ (স্ত্রী) অযশঃ। যথা। অকীর্ত্তিং চাপি ভূতানি কথয়িষ্যন্তি তেঽব্যয়াং। সম্ভাবিতস্য চাকীর্ত্তির্ম্মরণাদতিরিচ্যতে॥ ইতি শ্রীভগবদ্গীতায়াং ২ অধ্যায়ে ৩৪ শ্লোকঃ॥

অকীর্ত্তিকরং (ত্রি) অযশস্করং। যথা। কুতস্ত্বা কশ্মলমিদং বিষমে সমুপস্থিতং। অনার্য্যজুষ্টমস্বর্গ্যমকীর্ত্তিকরমর্জ্জুন॥ ইতি শ্রীভগবদ্গীতায়াং ২ অধ্যায়ে ২ শ্লোকঃ॥

অকুতোভয়ঃ (ত্রি) নাস্তি কস্মাদ্ভয়ং যস্য। নির্ভয়ঃ। যথা। ইচ্ছতামকুতোভয়মিতি ভক্তিরসামৃতসিন্ধুঃ॥

অকুপ্যং (ক্লী) স্বর্ণং। রূপ্যং। ইতি হলায়ুধঃ॥

অকূপারঃ (পুং) সমুদ্রঃ। ইত্যমরঃ॥ কূর্ম্মরাজঃ। পাষাণাদিঃ। ইতি মেদিনী॥ কমঠঃ। ইতি ত্রিকাণ্ডশেষঃ॥

অকূর্চ্চঃ (পুং) বুদ্ধঃ। ইতি ত্রিকাণ্ডশেষঃ। কৈতবশূন্যে ত্রি॥

অকৃতং (ত্রি) ন কৃতং। অনিষ্পাদিতং। যথা। কালাতীতন্তু যৎ কুর্য্যাদকৃতন্তদ্বিনির্দ্দিশেৎ। ইতি স্মৃতিঃ॥

অকৃতজ্ঞঃ ( ত্রি ) কৃতঘ্নঃ। হিতাস্মর্ত্তা। উপকারামানী। উপকারহন্তা। যথা। ভজতোঽপি ন বৈ কেচিদ্ভজন্ত্যভজতঃ কুতঃ। আত্মারামাঃ পূর্ণকামা অকৃতজ্ঞা গুরুদ্রুহঃ॥ ইতি শ্রীভাগবতং॥

অকৃতিত্বং ( ক্লী ) অক্ষমতা। অপটুতা। কর্ম্মাকুশলত্বং। অযোগ্যত্বং॥

অকৃতী [ ন্ ] ( ত্রি ) কর্ম্মাক্ষমঃ। কার্য্যাকুশলঃ। ক্রিয়ানুপযুক্তঃ॥

অকৃত্রিমং ( ত্রি ) অকরণজং। অজন্যং। সিদ্ধং। অকরণজাতং। যথা দক্ষঃ। চতুর্থে চ তথা ভাগে স্নানার্থং মৃদমাহরেৎ। তিলপুষ্পকুশাদীনি স্নানঞ্চাকৃত্রিমে জলে॥ ইত্যাহ্নিকাচারতত্ত্বং॥ *॥ কিঞ্চ। কাত্যায়নঃ। পূর্ব্বপক্ষং স্বভাবোক্তং প্রাড়্বিবাকোঽথ লেখয়েৎ। শোধয়েৎ পূর্ব্বপক্ষন্তু যাবন্নোত্তরদর্শনং॥ স্বভাবোক্তং অকৃত্রিমং। ইতি ব্যবহারতত্ত্বং॥

অকৃপঃ ( ত্রি ) কৃপাশূন্যঃ। নির্দ্দয়ঃ। অকরুণঃ। যথা। বনজৌ বনজৌ হ্রস্বস্ত্রিরামী সকৃপোঽকৃপঃ। ইত্যনুষ্টুবাচার্য্যঃ॥

অকৃপণঃ ( ত্রি ) কার্পণ্যরহিতঃ। দীনতাশূন্যঃ। যথা। মহদ্বা ব্যসনং প্রাপ্তো দীনঃ কৃপণ উচ্যতে। কুলেঽপ্যকৃপণে রাম সংভূতঃ সর্ব্বকামদে॥ ইতি রামায়ণং॥

অকৃষ্ণকর্ম্মা [ ন্ ] ( ত্রি ) দুষ্কর্ম্মরহিতঃ। নিষ্পাপঃ। শুদ্ধাচারঃ। অকৃষ্ণং নিষ্পাপত্বাৎ শুক্লং কর্ম্মাস্য। ইত্যমরটীকায়াং ভরতঃ॥

অকেশঃ ( ত্রি ) কেশরহিতঃ। অল্পকেশযুক্তঃ। অপ্রশস্তকেশবিশিষ্টঃ॥

অকৈতবং ( ক্লী ) কৈতবাভাবঃ। অকপটতা। অধূর্ত্ততা। অবঞ্চনা॥

অকোটঃ ( পুং ) গুবাকঃ। ইতি ত্রিকাণ্ডশেষঃ॥

অকোবিদঃ ( ত্রি ) অপণ্ডিতঃ। মূর্খঃ॥

অকৌটিল্যং ( ক্লী ) কৌটিল্যাভাবঃ। সরলতা॥

অক্কা ( স্ত্রী ) মাতা। ইতি শব্দরত্নাবলী॥

অক্তঃ ( ত্রি ) যুক্তঃ। গতঃ। ব্যক্তঃ। অন্জ ব্যক্তিগতিম্রক্ষণে ইত্যস্মাৎ কর্ম্মণি ক্তঃ। যথা। হিক্কাশ্বাসাতুরে পূর্ব্বং তৈলাক্তে স্বেদ ইষ্যতে। ইতি চক্রদত্তঃ॥

অক্তুঃ ( স্ত্রী ) রাত্রিঃ। অনক্তি প্রতিদিনং গচ্ছতি অক্তুঃ। অঞ্জু ধঞি ব্যক্তিগতিম্রক্ষণে বাহুলকাৎ কুঃ অনিদিতামিতি নলোপঃ। বেদপ্রচুরপ্রয়োগোঽয়ং॥

অক্রব্যাদঃ ( ত্রি ) অমাংসভক্ষকঃ। যথা। ক্রব্যাদাংস্তু মৃগান্ হত্বা ধেনুং দদ্যাৎ পয়স্বিনীং। অক্রব্যাদান্ বৎসতরীমুষ্ট্রং হত্বা তু কৃষ্ণলং॥ ইতি মানবে ১১ অধ্যায়ে ১৩৩ শ্লোকঃ॥

অক্রমঃ ( ত্রি ) ক্রমরহিতঃ। ব্যতিক্রমঃ। যথা। অক্রমাচ্ছেফসো বৃদ্ধিং যোঽভিবাঞ্ছতি মূঢ়ধীঃ। ইতি মাধবকরঃ॥

অক্রান্তা ( স্ত্রী ) বৃহতী। ইতি কাচিদ্রত্নমালা॥ অনাক্রান্তে ত্রি॥

অক্রিয়ঃ ( ত্রি ) অক্রিয়ান্বিতঃ। কুকর্ম্মবিশিষ্টঃ। ক্রিয়ারহিতঃ। যথা অক্রিয়ত্বাচ্চ সর্ব্বদা। ইতি চরকঃ॥

অক্রূরঃ ( পুং ) গান্দিনীপুত্রঃ। শ্রীকৃষ্ণপিতৃব্যঃ। তস্য পিতাশ্বফল্কঃ। ইতি শ্রীভাগবতং॥ ক্রূরতাশূন্যে ত্রি॥

অক্রোধঃ ( পুং ) ক্রোধশ্চিত্তবিকারঃ তদ্বিপরীতঃ। স তু আশ্রমিণাং দশধর্ম্মান্তর্গতধর্ম্মঃ। ইতি জটাধরঃ॥ বাচ্যলিঙ্গস্তু ক্রোধরহিতব্যক্তৌ॥

অক্লান্তঃ (ত্রি) ক্লান্তিরহিতঃ। অনবসন্নঃ। অগ্লানঃ॥

অক্লিকা (স্ত্রী) নীলীবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥

অক্লিষ্টকর্ম্মা [ ন্ ] ( ত্রি ) অক্লেশেন কর্ম্মকর্ত্তা। যথা। দূতোঽহং কোশলেন্দ্রস্য রামস্যাক্লিষ্টকর্ম্মণঃ। ইতি রামায়ণং॥

অক্লেশঃ ( ক্লী ) ক্লেশাভাবঃ। যথা। যাত্রামাত্রপ্রসিদ্ধ্যর্থং স্বৈঃ কর্ম্মভিরগর্হিতৈঃ। অক্লেশেন শরীরস্য কুর্ব্বীত ধনসঞ্চয়ং॥ ইতি মানবে ৪ অধ্যায়ে ৩ শ্লোকঃ॥ ক্লেশাভাববতি ত্রি॥

অক্লেশঃ (ত্রি) ক্লেশশূন্যঃ। অনায়াসঃ। অকষ্টঃ॥

অখট্টঃ (পুং) প্রিয়ালবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

অখট্টিঃ ( পুং ) অসদ্ব্যবহারঃ। আখুটি ইতি খ্যাতঃ। ইতি ত্রিকাণ্ডশেষঃ॥

অখণ্ডঃ ( ত্রি ) খণ্ডরহিতঃ। পূর্ণঃ। ইত্যমরঃ॥

অখণ্ডনঃ ( পুং ) কালঃ। ইতি শব্দচন্দ্রিকা॥

অখণ্ডিতর্ত্তুঃ ( ত্রি ) সফলবৃক্ষাদিঃ। ইতি শব্দচন্দ্রিকা॥

অখাতং ( ক্লী পুং ) দেবখাতং। অকৃত্রিমজলাশয়ঃ। ইত্যমরঃ॥ আখাতমিতি স্বামী॥ পুংসি যথা। আখাতো দেবখাতক ইত্যমরদত্তঃ॥

অখাদ্যং ( ত্রি ) খাদ্যানর্হং। অভক্ষ্যং॥

অখিলং ( ত্রি ) সর্ব্বং। ইত্যমরঃ॥

অখ্যাতঃ ( ত্রি ) অখ্যাতিবিশিষ্টঃ। অপ্রতিষ্ঠিতঃ। অপ্রসিদ্ধঃ॥

অগ ম বক্রগতৌ। কুটিলগমনে। ইতি কবিকল্পদ্রুমঃ॥ ম অগয়তি অগতি সর্পঃ। ইতি দুর্গাদাসঃ॥

অগ ই গতৌ। ইতি কবিকল্পদ্রুমঃ॥ ই অঙ্গ্যতে। ইতি দুর্গাদাসঃ॥

অগঃ ( পুং ) পর্ব্বতঃ। বৃক্ষঃ। সর্পঃ। সূর্য্যঃ। ইতি হেমচন্দ্রঃ॥

অগচ্ছঃ ( পুং ) বৃক্ষঃ। ইতি ত্রিকাণ্ডশেষঃ॥

অগজং ( ক্লী ) শিলাজতু। ইতি রত্নমালা॥ পর্ব্বতবৃক্ষজে ত্রি॥

অগণ্যং ( ত্রি ) অগণনীয়ং। অগণেয়ং। অগণিতব্যং। যথা। গুণৈরগণ্যৈরতিশীলশালিভিরিতি ভারবিঃ॥

অগদঃ ( পুং ) ঔষধং। ইত্যমরঃ॥ নীরোগে ত্রি। ইতি রমানাথঃ॥

অগদঙ্কারঃ ( পুং ) বৈদ্যঃ। ইত্যমরঃ॥

অগমঃ ( পুং ) বৃক্ষঃ। ইত্যমরঃ॥ পর্ব্বতঃ। ন গচ্ছতীত্যগমঃ॥

অগম্যং (ত্রি) অগন্তব্যং। অগমনীয়ং। গমনাযোগ্যং। যথা। অগম্যা সাভবত্তত্র যত্রাভূৎ স মহারণঃ। ইতি দেবীমাহাত্ম্যং॥

অগম্যা ( স্ত্রী ) অমৈথুনার্হা নারী। গম্যাগম্যাবিবরণং যথা। যম উবাচ। যা যা গম্যা নৃণামেব নিবোধ কথয়ামি তে। স্বস্ত্রী গম্যা চ সর্ব্বেষামিতি বেদনিরূপিতা॥ অগম্যা চ তদন্যা যা ইতি বেদবিদো বিদুঃ। সামান্যং কথিতং সর্ব্বং বিশেষং শৃণু সুন্দরি॥ অগম্যাশ্চৈব যা যাশ্চ নিবোধ কথয়ামি তাঃ। শূদ্রাণাং বিপ্রপত্নী চ বিপ্রাণাং শূদ্রকামিনী॥ অত্যগম্যা চ নিন্দ্যা চ

পঞ্চাশদগ্নয়ঃ। ইতি পুরাণং ॥ অস্য পর্য্যায়ঃ। বৈশ্বানরঃ ১ বহ্নিঃ ২ বীতি-হোত্রঃ ৩ ধনঞ্জয়ঃ ৪ কৃপীটযোনিঃ ৫ জ্বলনঃ ৬ জাতবেদাঃ ৭ তনূনপাৎ ৮ তনূনপাঃ ৯ বর্হিঃশুষ্মা ১০ বর্হিঃ ১১ শুষ্মা ১২ কৃষ্ণবর্ত্মা ১৩ শোচিষ্কেশঃ ১৪ উষর্ব্বুধঃ ১৫ আশ্রয়াশঃ ১৬ আশয়াশঃ ১৭ বৃহদ্ভানুঃ ১৮ কৃশানুঃ ১৯ পাবকঃ ২০ অনলঃ ২১ রোহিতাশ্বঃ ২২ বায়ুসখা ২৩ বায়ুসখঃ ২৪ শিখাবান্ ২৫ শিখী ২৬ আশুশুক্ষণিঃ ২৭ হিরণ্যরেতাঃ ২৮ হুতভুক্ ২৯ হব্যভুক্ ৩০ দহনঃ ৩১ হব্য-বাহনঃ ৩২ সপ্তার্চ্চিঃ ৩৩ দমুনাঃ ৩৪ দমূনাঃ ৩৫ শুক্রঃ ৩৬ চিত্রভানুঃ ৩৭ বিভাবসুঃ ৩৮ শুচিঃ ৩৯ অপ্পিত্তং ৪০। ইত্যমরস্তট্টীকা চ ॥ বৃষাকপিঃ ৪১ জুহূ-বালঃ ৪২ কপিলঃ ৪৩ পিঙ্গলঃ ৪৪ অরণিঃ ৪৫ অগিরঃ ৪৬ পাচনঃ ৪৭ বিশ্বপ্সাঃ ৪৮ ছাগবাহনঃ ৪৯ কৃষ্ণার্চ্চিঃ ৫০ জুহূবারঃ ৫১ উদর্চ্চিঃ ৫২ ভাস্করঃ ৫৩ বসুঃ ৫৪ শুষ্মঃ ৫৫ হিমারাতিঃ ৫৬ তমোনুৎ ৫৭ সুশিখঃ ৫৮ সপ্তজিহ্বঃ ৫৯ অপ-পারিকঃ ৬০ সর্ব্বদেবমুখঃ ৬১। ইতি জটাধরঃ ॥ * ॥ অস্য গুণাঃ। বায়ুকফস্তম্ভ-শীতকম্পনাশকত্বং। আমাশয়জনকত্বং। রক্তপিত্তপ্রকোপকত্বঞ্চ। ইতি রাজ-বল্লভঃ ॥ অপিচ। অগ্নের্দ্ধর্ষতাজ্যোতি-স্তাপঃ পাকঃ প্রকাশনং। শোকো রাগো লঘুস্তৈক্ষ্ণ্যং সততঞ্চোর্দ্ধভাসিতা ॥ ইতি মোক্ষধর্ম্মঃ ॥ * ॥ অথ কর্ম্মবিশেষেঽগ্নে-র্নামানি। যথা। লৌকিকে পাবকো হ্যগ্নিঃ প্রথমঃ পরিকীর্ত্তিতঃ ১। লৌকিকে নবগৃহপ্রবেশাদৌ। অগ্নেস্তু মারুতো নাম গর্ভাধানে বিধীয়তে ২ ॥ পুংসবনে চন্দ্র-নামা ৩ শুঙ্গাকর্ম্মণি শোভনঃ ৪। সীমন্তে মঙ্গলো নাম ৫ প্রগল্ভো জাতকর্ম্মণি ৬ ॥ নাম্নি স্যাৎ পার্থিবো হ্যগ্নিঃ ৭ প্রাশনে চ শুচিস্তথা ৮। সত্যনামাথ চূড়ায়াং ৯ ব্রতাদেশে সমুদ্ভবঃ ১০ ॥ ব্রতাদেশে উপনয়নে। গোদানে সূর্য্যনামাচ ১১ কেশান্তে হ্যগ্নিরুচ্যতে ১২। গোদানে গোদানাখ্যসংস্কারে। কেশান্তে সমা-বর্ত্তনে। বৈশ্বানরো বিসর্গে তু ১৩ বিবাহে যোজকঃ স্মৃতঃ ১৪ ॥ বিসর্গে সাগ্নিকর্ত্তব্য-কর্ম্মবিশেষে। চতুর্থ্যাস্তু শিখীনাম ১৫ ধৃতিরগ্নিস্তথাপরে ১৬। চতুর্থ্যাং বিবা-হান্তে চতুর্থীহোমে। অপরে ধৃতি-হোমাদৌ। প্রায়শ্চিত্তে বিধুশ্চৈব ১৭ পাক-যজ্ঞে তু সাহসঃ ১৮ ॥ প্রায়শ্চিত্তে প্রায়-শ্চিত্তাত্মকমহাব্যাহৃতিহোমাদৌ। পাক-যজ্ঞে পাকাঙ্গকহোমে বৃষোৎসর্গগৃহপ্রতি-ষ্ঠাদৌ। লক্ষহোমে চ বহ্নিঃ স্যাৎ ১৯ কোটিহোমে হুতাশনঃ ২০। পূর্ণাহুত্যাং মৃড়ো নাম ২১ শান্তিকে বরদস্তথা ২২ ॥ পৌষ্টিকে বলদশ্চৈব ২৩ ক্রোধোঽগ্নি-শ্চাভিচারিকে ২৪। বশ্যর্থে শমনো নাম ২৫ বরদানেঽভিদূষকঃ ২৬ ॥ কোষ্ঠে তু জঠরো নাম ২৭ ক্রব্যাদোঽমৃত-ভক্ষণে ২৮। ইতি গোভিলপুত্রকৃত-সংগ্রহঃ ॥ * ॥ অথ তস্য রূপং। যথা। পিঙ্গ-

ভ্রূশ্মশ্রুকেশাক্ষঃ পীনাঙ্গজঠরোঽরুণঃ। ছাগস্থঃ সাক্ষসূত্রোঽগ্নিঃ সপ্তার্চ্চিঃ শক্তিধারকঃ॥ ইত্যাদিত্যপুরাণং॥ *॥ অথ হোমীয়াগ্নেঃ শুভলক্ষণানি। যথা। অর্চ্চিষ্মান্ পিণ্ডিতশিখঃ সর্পিঃকাঞ্চনসন্নিভঃ। স্নিগ্ধঃ প্রদক্ষিণশ্চৈব বহ্নিঃ স্যাৎ কার্য্যসিদ্ধয়ে॥ ইতি বায়ুপুরাণং॥ * বৈদ্যকমতে অগ্নিস্ত্রিধা। ভৌমঃ ১ দিব্যঃ ২ উদর্য্যঃ ৩ তত্রাদ্যঃ কাষ্ঠেন্ধনপ্রভব ঊর্দ্ধজ্বলনস্বভাবঃ পচনস্বেদাদিসমর্থশ্চ। দ্বিতীয় উদকেন্ধনঃ পর্য্যগ্‌জ্বলনশীলো বাড়বঃ। তৃতীয় উভয়েন্ধনঃ পর্য্যগ্‌জ্বলনশীলঃ ভুক্তস্যাহারস্য রসাদিপরিণামনিমিত্তঞ্চ বিদ্যুদাদিশ্চ। ইতি বিজয়রক্ষিতোপরি সন্দেহভঞ্জিকা॥*॥ অপিচ। মন্দ ১ স্তীক্ষ্ণো ২ ঽথ বিষমঃ ৩ সমশ্চেতি চতুর্বিধঃ ৪। কফপিত্তানিলাধিক্যাত্তৎসাম্যাজ্জাঠরোঽনলঃ॥ তেষাং কার্য্যং যথা। বিষমো বাতজান্ রোগান্ ১ তীক্ষ্ণঃ পিত্তনিমিত্তজান্ ২। করোত্যগ্নিস্তথা মন্দো বিকারান্ কফসম্ভবান্ ৩॥ সমাসমাগ্নেরশিতা মাত্রা সম্যগ্বিপচ্যতে ৪। স্বল্পাপি নৈব মন্দাগ্নের্বিষমাগ্নেস্তু দেহিনঃ॥ কদাচিৎ পচ্যতে সম্যক্ কদাচিচ্চ ন পচ্যতে। তীক্ষ্ণাগ্নিরিতি তং বিদ্যাৎ সমাগ্নিঃ শ্রেষ্ঠ উচ্যতে॥ ইতি মাধবকরঃ॥ অত্যন্ততীক্ষ্ণাগ্নিরেব হি ভস্মক উচ্যতে। স তু আহারাভাবে শোণিতাদীন্ ধাতূন্ পাচয়িত্বা আশু মারয়তি। ইতি রক্ষিতঃ॥ *॥ অগ্নিকোণাধিপতিঃ ইত্যমরঃ॥ চিত্রকবৃক্ষঃ। রক্তচিত্রকঃ। ভল্লাতকঃ। নিম্বুকঃ। পিত্তং। স্বর্ণং। ইতি রাজনির্ঘণ্টঃ॥

অগ্নিকঃ (পুং) ইন্দ্রগোপনামরক্তবর্ণকীটঃ। ইতি হেমচন্দ্রঃ॥

অগ্নিকণঃ (পুং) অগ্নিকণা। স্ফুলিঙ্গঃ। ইত্যমরঃ॥

অগ্নিকারিকা (স্ত্রী) অগ্নিকার্য্যং। ইতি হেমচন্দ্রঃ॥

অগ্নিকার্য্যং (ক্লী) অগ্নাবগ্নের্বা কার্য্যং। হবির্দানাদিপূর্ব্বকাগ্নিজ্বালনং। তৎপর্য্যায়ঃ। অগ্নীন্ধনং ২ অগ্নীধ্রা ৩ অগ্নিকারিকা ৪। ইতি হেমচন্দ্রঃ॥

অগ্নিকাষ্ঠং (ক্লী) অগুরু। ইতি রাজনির্ঘণ্টঃ॥

অগ্নিকুক্কুটঃ (পুং) জ্বলদগ্নিতৃণোল্কা। জ্বলন্ত নুড়া ইতি খ্যাতঃ। ইতি ত্রিকাণ্ডশেষঃ॥

অগ্নিকোণং (ক্লী) পূর্ব্বদক্ষিণকোণং। তৎকোণাধিপতিরগ্নিঃ। ইতি জ্যোতিষং॥ যথা হলায়ুধধৃতং। গত্বৈব তীর্থং কর্ত্তব্যং শ্রাদ্ধং তৎপ্রাপ্তিহেতুকং। পূর্ব্বাহ্ণেঽপ্যথ বা প্রাতর্দেশে স্যাৎ পূর্ব্বদক্ষিণে॥ পূর্ব্বদক্ষিণে অগ্নিকোণে। ইতি প্রায়শ্চিত্ততত্ত্বং॥

অগ্নিক্রীড়া (স্ত্রী) অগ্নিখেলা। খধূপাদিত্যাগঃ। আতশবাজীতি খ্যাতা॥

অগ্নিগর্ভঃ (পুং) অগ্নিজারবৃক্ষঃ। সূর্য্যকান্তমণিঃ। ইতি রাজনির্ঘণ্টঃ॥

অগ্নিগর্ভা (স্ত্রী) মহাজ্যোতিষ্মতীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

অগ্নিচিৎ (পুং) অগ্নিহোত্রী। সাগ্নিকঃ। ইত্যমরঃ॥

অগ্নিজঃ (পুং) অগ্নিজারবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

অগ্নিজাতঃ ( পুং ) অগ্নিজারবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

অগ্নিজারঃ (পুং) ঔষধবিশেষঃ। অস্য পর্য্যায়ঃ। অগ্নিনির্য্যাসঃ ২ অগ্নিগর্ভঃ ৩ অগ্নিজঃ ৪ বড়বাগ্নিমলঃ ৫ জরায়ুঃ ৬ অর্ণবোদ্ভবঃ ৭ অগ্নিজাতঃ ৮ অগ্নিজালঃ ৯ সিন্ধুফলঃ ১০। অস্য গুণাঃ। কটুত্বং। উষ্ণত্বং। কফবায়ুসন্নিপাতশূলাতিশীতরোগনাশিত্বং। পিত্তপ্রদত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

অগ্নিজালঃ ( পুং ) অগ্নিজারবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

অগ্নিজ্বালা ( স্ত্রী ) জলপিপ্পলী। ধাতকীবৃক্ষঃ। ইতিরাজনির্ঘণ্টঃ ॥ অগ্নিশিখা ॥

অগ্নিজিহ্বা ( স্ত্রী ) লাঙ্গলীবৃক্ষঃ। বিষলাঙ্গলা ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ ॥ অগ্নেঃ কাল্যাদিসপ্তার্চ্চীংষি। ইতি জটাধরঃ ॥ অগ্নেঃ সপ্তশিখাঃ। তাসাং নামাদিকং সপ্তজিহ্বশব্দে দ্রষ্টব্যং ॥

অগ্নিদমনী ( স্ত্রী ) ক্ষুপবিশেষঃ। অস্য পর্য্যায়ঃ। বহ্নিদমনী ২ বহুকণ্টকা ৩ বল্লিকণ্টারিকা ৪ গুচ্ছফলা ৫ ক্ষুদ্রফলা ৬ ক্ষুদ্রদুঃস্পর্শা ৭ ক্ষুদ্রকণ্টারিকা ৮ মর্ত্যেন্দ্রমাতা ৯ দমনী ১০। অস্যা গুণাঃ। কটুত্বং। উষ্ণত্বং। রূক্ষত্বং। বাতকফগুল্মপ্লীহনাশিত্বং। রুচিকরত্বং। অগ্নিদীপনত্বং। হৃদ্যত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

অগ্নিদীপনঃ ( ত্রি ) অগ্নিবর্দ্ধকঃ। জঠরাগ্নিকারকৌষধবিশেষঃ। যথা। রসেন্দ্রচিন্তামণৌ। পারদামৃতলবঙ্গগন্ধকং ভাগযুগ্মমরিচেন মিশ্রিতং। তত্র জাতিফলমর্দ্ধভাগিকং তিন্তিড়ীফলরসেন মর্দ্দিতং ॥ বহ্নিমান্দ্যদশবক্ত্রনাশনো রামবাণ ইতি বিশ্রুতো রসঃ। সংগ্রহগ্রহণিকুম্ভকর্ণকমামবাতখরদূষণং জয়েৎ ॥ দীয়তে তু শণকানুমানতঃ সদ্য এব জঠরাগ্নিদীপনঃ। ইতি। হরীতকী তথা শুণ্ঠী ভক্ষমাণা গুড়েন বা। সৈন্ধবেন যুতা বা স্যাৎ সাতত্যেনাগ্নিদীপনী ॥ ইতি চ ভাবপ্রকাশঃ ॥

অগ্নিদীপ্তা ( স্ত্রী ) মহাজ্যোতিষ্মতীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

অগ্নিদেবা ( স্ত্রী ) কৃত্তিকানক্ষত্রং। ইতি হেমচন্দ্রঃ ॥

অগ্নিনির্য্যাসঃ ( পুং ) অগ্নিজারবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

অগ্নিপ্রস্তরঃ ( পুং ) অগ্নিজনকপাষাণঃ। চকমকীর পাতর ইতি ভাষা ॥

অগ্নিবর্দ্ধনং ( ক্লী ) জঠরাগ্নিবৃদ্ধিকারকং। যথা। জীরকং রুচিকৃৎ স্বর্য্যং গন্ধাঢ্যং কফবাতনুৎ। পাকে চ কটুতীক্ষ্ণোষ্ণং লঘু পিত্তাগ্নিবর্দ্ধনং ॥ ইতি রাজবল্লভঃ ॥

অগ্নিভং ( ক্লী ) স্বর্ণং। ইতি রাজনির্ঘণ্টঃ ॥

অগ্নিভূঃ ( পুং ) কার্ত্তিকেয়ঃ। ইত্যমরঃ ॥ জলে ক্লী। ইতি বেদপুরাণে ॥

অগ্নিভূতিঃ ( পুং ) বৌদ্ধভেদঃ। স চ শেষজৈনাচার্য্যশিষ্যঃ। ইতি হেমচন্দ্রঃ ॥

অগ্নিমণিঃ (পুং) সূর্য্যকান্তমণিঃ। ইতি জটাধরঃ॥

অগ্নিমন্থঃ ( পুং ) গণিকারিকাবৃক্ষঃ। ইত্যমরঃ ॥

অগ্নিমারুতিঃ ( পুং ) অগস্ত্যমুনিঃ। ইতি হেমচন্দ্রঃ ॥

অগ্নিমুখঃ (পুং) দেবতা। ব্রাহ্মণঃ। ইতি মেদিনী॥ চিত্রকবৃক্ষঃ। ভল্লাতকঃ। ইতি বিশ্বঃ॥

অগ্নিমুখী (স্ত্রী) ভল্লাতকী। ইত্যমরঃ॥ লাঙ্গলিকী। ইতি রাজনির্ঘণ্টঃ॥

অগ্নিরক্ষণং (ক্লী) অগ্ন্যাধানং। অগ্নিহোত্রং। ইতি হেমচন্দ্রঃ॥

অগ্নিরজাঃ [ স্ ] ( পুং ) ইন্দ্রগোপাখ্যকীটঃ। ইতি হেমচন্দ্রঃ॥

অগ্নিরুহা (স্ত্রী) মাংসরোহিণী। ইতি রাজনির্ঘণ্টঃ॥

অগ্নিবর্দ্ধকঃ (ত্রি) অগ্নিবৃদ্ধিকারকৌষধাদিঃ। আগ্নেয়ঃ। ইতি বৈদ্যকং॥

অগ্নিবল্লভঃ (পুং) সালবৃক্ষঃ। রালঃ। ইতি রাজনির্ঘণ্টঃ॥

অগ্নিবাহঃ (পুং) ধূমঃ। ইতি ত্রিকাণ্ডশেষঃ॥

অগ্নিবাহুঃ (পুং) ধূমঃ। ইতি জটাধরঃ॥

অগ্নিবিৎ (পুং) অগ্নিচিৎ। অগ্নিহোত্রী। ইতি হেমচন্দ্রঃ॥

অগ্নিবীজং (ক্লী) স্বর্ণং। ইতি ত্রিকাণ্ডশেষঃ॥

অগ্নিবীর্য্যং (ক্লী) স্বর্ণং। ইতি রাজনির্ঘণ্টঃ॥

অগ্নিশিখং (ক্লী) স্বর্ণং। ইতি রাজনির্ঘণ্টঃ॥ কুঙ্কুমং। কুসুম্ভপুষ্পং। ইতি মেদিনী॥

অগ্নিশিখঃ (পুং) কুসুম্ভবৃক্ষঃ। কুঙ্কুমং। দীপঃ। বাণঃ। ইতি শব্দরত্নাবলী॥

অগ্নিশিখা (স্ত্রী) লাঙ্গলিকীবৃক্ষঃ। বিষলাঙ্গলা ইতি ভাষা। বৃক্ষবিশেষঃ। তস্য পর্য্যায়ঃ। বিশল্যা ১ অনন্তা ২ ফলিনী ৩ শক্রপুষ্পী ৪। ইত্যমরঃ॥ জ্বালা। আগুনের শিষ ইতি ভাষা॥

অগ্নিশেখরং (ক্লী) কুঙ্কুমং। ইতি রাজনির্ঘণ্টঃ॥

অগ্নিষ্টোমঃ (পুং) যজ্ঞবিশেষঃ। ইতি শব্দরত্নাবলী॥ তস্য বিধিঃ। জ্যোতিষ্টোমেন স্বর্গকামো যজেতেতি বাক্যবিহিতজ্যোতিষ্টোমনামকযাগবিশেষস্য গুণবিকারোঽগ্নিষ্টোমো নাম। তস্য কালো বসন্তঃ। তত্রাধিকারী অধীতবেদ আহিতাগ্নিশ্চ। দ্রব্যং সোমঃ। দেবতা ইন্দ্রবায়্বাদয়ঃ। ঋত্বিজঃ ষোড়শ। তেষাঞ্চ চত্বারো গণাঃ। হোতৃগণঃ ১ অধ্বর্য্যুগণঃ ২ ব্রহ্মগণঃ ৩ উদ্গাতৃগণঃ ৪। একৈকস্য গণস্য চত্বারশ্চত্বারঃ। তত্র হোতৃগণে হোতা ১ প্রশাস্তা ২ অচ্ছাবাকো ৩ গ্রাবস্তোতা ৪। অধ্বর্য্যুগণে অধ্বর্য্যুঃ ১ প্রতিপ্রস্থাতা ২ নেষ্টা ৩ উন্নেতা ৪। ব্রহ্মগণে ব্রহ্মা ১ ব্রাহ্মণাচ্ছংশী ২ অগ্নীতৃ ৩ পোতা ৪। উদ্গাতৃগণে উদ্গাতা ১ প্রস্তোতা ২ প্রতিহর্ত্তা ৩ সুব্রহ্মণ্যঃ ৪। স চ পঞ্চাহসাধ্যঃ। প্রথমদিনে দীক্ষা দীক্ষণীয়াদিতদঙ্গানুষ্ঠানং। তত্র দ্বিতীয়দিবসে প্রায়ণীয়যাগঃ সোমলতাক্রয়ণং। ততো দ্বিতীয়তৃতীয়চতুর্থদিবসেষু প্রাতঃকালে সায়ংকালে চ প্রবর্গ্যোপসন্নামকযাগানুষ্ঠানং। চতুর্থদিবসে প্রবর্গ্যোদ্বাসনানন্তরং অগ্নীষোমীয়পশ্বনুষ্ঠানং। তত্র যস্য যজমানস্য গৃহে পিতৃপিতামহপ্রপিতামহানাং মধ্যে কেনাপি বেদো নাধীতোঽগ্নিষ্টোমো বা ন কৃতঃ স দুর্ব্রাহ্মণো ভবতি। তস্য দৌর্ব্রাহ্মণ্যপরিহারায়াশ্বিনপশুঃ কর্ত্তব্যঃ। যস্য যজমানস্য পিতৃপিতামহপ্রপিতামহানাং মধ্যে কেনাপি সোমপানং ন কৃতং স্যাৎ তস্য

সোমপানবিচ্ছেদদোষপরিহারার্থ মৈন্দ্রাগ্ন-পশ্বনুষ্ঠানং কর্ত্তব্যং। ইত্থং ত্রয়াণাং পশূনাং যুগপদালম্ভপক্ষে একস্মিন্নেব যুপে ত্রয়াণাং পশূনাং বন্ধনং। ইত্থং পশুত্রয়ানুষ্ঠানং চতুর্থদিবসে তস্মিন্নেব দিনে বা তৃতীয়ভাগে উত্থায় প্রয়োগা-রম্ভঃ কার্য্যঃ। তত্র পাত্রাসাদনং। পাত্রা-ণিচ গ্রহাশ্চমসাঃ স্থাল্যশ্চেতি। তত্র গ্রহ-পাত্রাণি বিতস্তিমাত্রাণি উলূখলাকারাণি। ঊর্দ্ধপাত্রাণি চমসপাত্রাণি তাবৎপরি-মিতান্যেব তির্য্যগাকৃতীনি কোণচতুষ্টয়-বিশিষ্টানি ধারণার্থদণ্ডযুক্তানি। স্থাল্যো মার্ত্তিক্যঃ। তত আরভ্য সোমলতাকণ্ডনেন সোমরসং নিষ্কাস্য নিষ্কাস্য গ্রহৈশ্চমসৈশ্চ হোমঃ কর্ত্তব্যঃ। তত্র সূর্য্যোদয়ানন্তরং আগ্নেয়পশুযাগঃ কর্ত্তব্যঃ। এবমুক্থ্যপর্য্যা-য়ান্তে কৃতে প্রাতঃসবনসমাপ্তিঃ। ততো মধ্যন্দিনসবনং। তত্র দক্ষিণাদানং। দক্ষি-ণাচ দ্বাদশোত্তরশতং গাবঃ। ততস্তৃতীয়-সবনং। ইত্থং প্রাতঃসবনমাধ্যন্দিনসবন-তৃতীয়সবনরূপসবনত্রয়াত্মকঃ অগ্নিষ্টোমঃ প্রধানযাগঃ। ইতরেঽঙ্গযাগাঃ। তৃতীয়-সবনসমাপ্ত্যুত্তরমবভৃথযাগঃ। উদকে বরুণ-দেবতাকপুরোডাশহোমঃ। তদনন্তরমনু-বন্ধ্যা পশুযাগঃ। তত্র গৌঃ পশুঃ। তস্য কলিনিষিদ্ধত্বাৎ তস্য চ নিত্যত্বাৎ তৎস্থানে আমীক্ষাযাগঃ। তত উদয়নীয়া তত উদ-বসানীয়া। সা চ পঞ্চমদিবসে যাবদ্রাত্রি কর্ত্তব্যা। তৎসমাপ্তাবগ্নিষ্টোমযাগসমাপ্তিঃ। ইত্যগ্নিষ্টোমযাগীয়পদার্থকলাসূচী॥

অগ্নিষ্ঠঃ (পুং) লৌহময়তণ্ডুলাদিভর্জনপাত্রং। ইতি ত্রিকাণ্ডশেষঃ॥

অগ্নিসখঃ (পুং) বায়ুঃ। বায়ুসখোঽগ্নিরিতি দর্শনাৎ॥

অগ্নিসন্দীপনং (ত্রি) বহ্নিবর্দ্ধকৌষধাদি। যথা। এলা ত্বঙ্নাগপুষ্পাণাং মাত্রোত্তর-বিবর্দ্ধিতা। মরিচং পিপ্পলী শুণ্ঠী চতুঃ-পঞ্চষড়ুত্তরা॥ দ্রব্যাণ্যেতানি যাবন্তি তাবতী সিতশর্করা। চূর্ণমেতৎ প্রযোক্তব্য-মগ্নিসন্দীপনং পরং॥ ইতি ভাবপ্রকাশঃ॥ অপি চ। অগ্নিসন্দীপনং হৃদ্যং লবণা-র্দ্রকভক্ষণং। ইতি রাজবল্লভঃ॥

অগ্নিসম্ভবঃ (পুং) অরণ্যকুসুম্ভঃ। ইতি রাজ-নির্ঘণ্টঃ॥

অগ্নিসহায়ঃ (পুং) বনকপোতঃ। ইতি রাজ-নির্ঘণ্টঃ॥

অগ্নিসারং (ক্লী) রসাঞ্জনং। ইতি রাজ-নির্ঘণ্টঃ॥

অগ্নিস্তম্ভনং (ক্লী) মন্ত্রৌষধিদ্বারা অগ্নের্দ্দাহিকা-শক্তিনিবারণং। তদ্‌যথা। মালূরস্য বসাং গৃহ্য জলৌকাং তত্র পেষয়েৎ। হস্তৌ তু লেপয়েত্তেন অগ্নিস্তম্ভনমুত্তমং॥ মালূরস্য স্থানে মানুষস্য ইতি বা পাঠঃ॥ ১॥ শাল্মলী-রসমাদায় খরমূত্রে নিধাপিতং। অগ্ন্যা-গারে ক্ষিপেত্তেন অগ্নিস্তম্ভনমুত্তমং॥ ২॥ বায়সী উদরং গৃহ্য মণ্ডূকবসয়া সহ। গুটিকাং কারয়েত্তেন ততোঽগ্নিং প্রক্ষিপে-দ্বশী॥ এবমেতৎপ্রয়োগেণ অগ্নিস্তম্ভন-মুত্তমং। ৩। রক্তপাটলমূলস্তু অবষ্টব্ধঞ্চ মূলকৈঃ॥ দিব্যং স্তম্ভয়তে ক্ষিপ্রং পয়ঃ-

পিণ্ডং জলান্তকং। ৪। মুণ্ডীতকা বচা কুষ্ঠং মরীচং নাগরং তথা॥ চর্ব্বিত্বা চ ইমং সদ্যো জিহ্বয়া জ্বলনং লিহেৎ। ৫। গোরোচনাং ভৃঙ্গরাজং চূর্ণীকৃত্য ঘৃতং সমং॥ দিব্যস্তম্ভশ্চ পীত্বা স্থাম্মন্ত্রেণানেন বৈ তথা। ৬। ওমহুং অগ্নিস্তম্ভনং কুরু। ইতি গারুড়ে ১৮৬ অধ্যায়ঃ॥

অগ্নিস্বাত্তাঃ (পুং) মরীচিপুত্ত্রপিতৃগণবিশেষঃ। নিত্যবহুবচনান্তশব্দোঽয়ং। ইতি শব্দমালা॥

অগ্নিহোত্রং (ক্লী) যজ্ঞবিশেষঃ। তৎ দ্বিবিধং। মাসসাধ্যং যাবজ্জীবনসাধ্যঞ্চ। দ্বিতীয়ে বিশেষোঽয়ং। তদগ্নৌ যাবজ্জীবং প্রত্যহং প্রাতঃ সায়ং হবনং। তদগ্নিনা যাগকর্ত্তুর্দাহশ্চ। ইতি স্মৃতিঃ॥ তত্র ক্রমো যথা। ব্রাহ্মণক্ষত্ত্রিয়বৈশ্যানাং কৃতদারপরিগ্রহাণাং কাণত্বান্ধত্ববধিরত্বপঙ্গুত্বাদিদোষরহিতানাং বর্ণক্রমেণ বসন্তগ্রীষ্মশরৎসু অগ্ন্যাধানং বিহিতং। অগ্নয়স্ত্রয়ঃ গার্হপত্যঃ ১ দক্ষিণাগ্নিঃ ২ আহবনীয়ঃ ৩। এষামাধানং নাম দেশবিশেষে তত্তন্মন্ত্রৈঃ স্থাপনং। তেম্বগ্নিষু সায়ংকালে প্রাতঃকালে চাগ্নিহোত্রহোমঃ কর্ত্তব্যঃ। অগ্নিহোত্রং নাম হোমস্য নামধেয়ং। অগ্নয়ে হোত্রং হোমো যস্মিন্ কর্ম্মণীতি ব্যধিকরণবহুব্রীহিঃ। তত্র দ্রব্যাণি দশ। পয়ঃ ১ দধি ২ যবাগূঃ ৩ ঘৃতং ৪ ওদনঃ ৫ তণ্ডুলাঃ ৬ সোমরসঃ ৭ মাংসং ৮ তৈলং ৯ মাষাঃ ১০। সম্প্রতি কলিযুগে পয়সা তণ্ডুলৈর্ব্বাথা চ হোমঃ শিষ্টাচারপ্রসিদ্ধঃ। তত্র এক ঋত্বিক্ নিত্যং হোমঃ যজমানেন বা কর্ত্তব্যঃ ঋত্বিজা বা কারয়িতব্যঃ। অমাবাস্যায়াস্তু রাত্রৌ যবাগূদ্রব্যেণ যজমানেনৈব কর্ত্তব্যঃ। স চাগ্নিহোত্রহোমঃ আরম্ভপ্রভৃতি যাবজ্জীবনং কর্ত্তব্যঃ। প্রথমদিনে পূর্ব্বোক্তানাং দশানাং দ্রব্যাণাং মধ্যে সম্প্রতি প্রচলদ্রূপাণাঞ্চ মধ্যে যেন দ্রব্যেণ প্রথমাগ্নিহোত্রহোমঃ কৃতঃ তেনৈব দ্রব্যেণ যাবজ্জীবনং কর্ত্তব্যঃ। প্রথমহোমশ্চ যস্মিন্ দিনে অগ্ন্যাধানং কৃতং তস্মিন্ দিনে সায়ংকালে আরম্ভণীয়ঃ। তত্র শতহোমে সূর্য্যো দেবতা সায়ংকালে অগ্নির্দেবতা। আধানানন্তরং প্রথমপৌর্ণমাস্যাং দর্শপূর্ণমাসযাগারম্ভঃ কর্ত্তব্যঃ। দর্শপূর্ণমাসাভ্যাং স্বর্গকামো যজেতেতি বিধিবাক্যং। তত্র ষড়্যাগাঃ। পৌর্ণমাস্যাং ত্রয়ঃ। অমায়াং ত্রয়ঃ। পৌর্ণমাস্যামাগ্নেয়াগ্নীষোমীয়োপাংশুযাগাস্ত্রয়ো যাগাঃ। অমাবস্যায়ামাগ্নেয়ৈন্দ্রদধিপয়ো যাগাস্ত্রয়ঃ। তত্রামায়াং কর্ত্তব্যযাগত্রয়স্য দর্শপদং নামধেয়ং। পৌর্ণমাস্যাং কর্ত্তব্যযাগত্রয়স্য পূর্ণমাসপদং নামধেয়ং। দর্শশ্চ পূর্ণমাসশ্চ দর্শপূর্ণমাসাবিতি দ্বন্দ্বঃ। পৌর্ণমাসযাগস্য প্রাথমিকত্বেঽপি অল্পাচ্তরমিতি পাণিনীয়ানুশাসনানুসারেণ দর্শশব্দস্যাল্পাচ্কত্বাৎ পূর্ব্বনিপাতঃ। দর্শপূর্ণমাসাবপি যাবজ্জীবং কার্য্যৌ। তত্রাপি ত্রয়াণাং বর্ণানামুপরি লিখিতান্ধত্বাদ্যধিকারপ্রতিবন্ধকীভূতদোষসম্বন্ধাভাববতাং কৃতাগ্নিধানানাং সপত্নীকানামধিকারঃ। সামান্যতঃ

পর্ব্বণ্যারম্ভঃ প্রতিপদি যাগ ইতি পরিভাষা। তত্রাকৃতসোমযাগস্য যজমানস্য পৌর্ণমাস্যামাগ্নেয়পুরোডাশযাগঃ আজ্যেনোপাংশুযাজযাগঃ। অমায়াস্তু আগ্নেয়পুরোডাশযাগঃ ঐন্দ্রাগ্নপুরোডাশযাগঃ। কৃতসোমযাগস্য যজমানস্য তু পৌর্ণমাস্যামাগ্নেয়পুরোডাশযাগঃ আজ্যেনোপাংশুযাজযাগঃ অগ্নীষোমীয়পুরোডাশযাগঃ। অমায়াস্তু আগ্নেয়পুরোডাশযাগঃ ঐন্দ্রপয়োযাগঃ ঐন্দ্রদধিযাগশ্চেতি ত্রয়ঃ। তত্র ঋত্বিজশ্চত্বারঃ। অধ্বর্য্যুঃ ১ ব্রহ্মা ২ হোতা ৩ অগ্নীদিতি ৪। যজুর্ব্বেদকর্ম্মকর্ত্তা অধ্বর্য্যুঃ। ঋগ্‌যজুঃসামবেদত্রয়কর্ম্মকর্ত্তা ব্রহ্মা। ঋগ্‌বেদকর্ম্মকর্ত্তা হোতা। অগ্নীত্তু প্রায়শোঽধ্বর্য্যোরেবানুযায়ী তৎপ্রেরিতকর্ম্মকর্ত্তা। পুরোডাশো ব্রীহিতণ্ডুলৈর্যবতণ্ডুলৈর্বা কর্ত্তব্যঃ। অগ্নিহোত্রবদ্‌যেন দ্রব্যেণারম্ভঃ কৃতস্তেনৈব দ্রব্যেণ যাবজ্জীবং যাগঃ কর্ত্তব্যঃ। আরম্ভবেলায়ামিচ্ছেব নিয়ামিকেত্যাদিদিঙ্মাত্রমিদং। ইতি যজুর্ব্বেদঃ॥ * ॥ যজ্ঞাগ্নিসঞ্চয়ঃ। তৎপর্য্যায়ঃ। অগ্ন্যাধানং ২ অগ্নিরক্ষণং ৩।

অগ্নিহোত্রঃ (পুং) অগ্নিঃ। ঘৃতং। ইতি মেদিনী॥

অগ্নিহোত্রী [ন্] (পুং) অগ্নিহোত্রযাগকর্ত্তা। তৎপর্য্যায়ঃ। অগ্নিবিৎ ২ আহিতাগ্নিঃ ৩। ইতি হেমচন্দ্রঃ॥ অগ্নিচিৎ ৪। ইত্যমরঃ॥ সাগ্নিকঃ ৫। ইতি পুরাণং॥

অগ্নীধ্রঃ (পুং) ঋত্বিগ্বিশেষঃ। তস্য কর্ম্মাগ্নিরক্ষণং। ইত্যমরঃ॥

অগ্নীধ্রা (স্ত্রী) অগ্নিকার্য্যং। হবির্দ্দানাদিপূর্ব্বকাগ্নিজ্বালনং। ইতি হেমচন্দ্রঃ॥

অগ্নীন্ধনং (ক্লী) অগ্নিকার্য্যং। হবির্দ্দানাদিপূর্ব্বকাগ্নিজ্বালনং। ইতি হেমচন্দ্রঃ॥

অগ্ন্যস্ত্রং (ক্লী) আগ্নেয়াস্ত্রং। অগ্নিঘটিতাস্ত্রং। বন্দূক কামান ইত্যাদি ভাষা॥

অগ্ন্যাধানং (ক্লী) শ্রুতিবিহিতাগ্নিসংস্কারঃ। অগ্নিরক্ষণং। অগ্নিহোত্রং। ইতি হেমচন্দ্রঃ॥

অগ্ন্যালয়ঃ (পুং) যজ্ঞাগ্ন্যাধারকুণ্ডং। ইতি জটাধরঃ॥

অগ্ন্যুৎপাতঃ (পুং) আকাশাদিষু অগ্নিবিকারঃ। ধূমকেতূল্কাপাতাদিঃ। অগ্নিনিষ্ঠোৎপাতো বা। স তু মন্ত্রাদিদ্বারা অগ্নের্দাহশক্তিনিবারণং। তৎপর্য্যায়ঃ। উপাহিতঃ ২। ইত্যমরস্তট্টীকা চ॥

অগ্রং (ক্লী) উপরিভাগঃ। আগা ইতি ভাষা। অস্য পর্য্যায়ঃ। শিরঃ ২ শিখরং ৩। ইত্যমরঃ॥ পুরস্তাৎ। অবলম্বনং। পলপরিমাণং। প্রান্তং। সমূহঃ। ইতি মেদিনী॥

অগ্রঃ (ত্রি) শ্রেষ্ঠঃ। উত্তমঃ। ইত্যমরঃ॥ প্রধানঃ। অধিকঃ। প্রথমঃ। ইতি মেদিনী॥

অগ্রগণ্যঃ (ত্রি) অগ্রে গণনীয়ঃ। যথা। শমনভবনযানে যত্নবানগ্রগণ্যঃ। ইতি মহানাটকং॥

অগ্রগামী [ন্] (ত্রি) অগ্রে গমনকর্ত্তা। অগ্রেসরঃ। ইতি হেমচন্দ্রঃ॥

অগ্রজঃ (পুং) জ্যেষ্ঠভ্রাতা। তৎপর্য্যায়ঃ। পূর্ব্বজঃ ২ অগ্রিয়ঃ ৩। ইত্যমরঃ॥ ব্রাহ্মণঃ। ইতি হেমচন্দ্রঃ॥ অগ্রে জাতে ত্রি॥

অগ্রজঙ্ঘা ( স্ত্রী ) প্রতিজঙ্ঘা। জঙ্ঘাগ্রভাগঃ। ইতি হেমচন্দ্রঃ ॥

অগ্রজন্মা [ ন্ ] ( পুং ) ব্রাহ্মণঃ। ইত্যমরঃ ॥ জ্যেষ্ঠভ্রাতা। ব্রহ্মা। ইতি বিশ্বঃ ॥

অগ্রজাতকঃ (পুং) ব্রাহ্মণঃ। ইতি শব্দরত্নাবলী ॥

অগ্রজাতিঃ (পুং) ব্রাহ্মণঃ। ইতি হেমচন্দ্রঃ ॥

অগ্রণীঃ (ত্রি) অগ্রিমঃ। শ্রেষ্ঠঃ। ইতি হেমচন্দ্রঃ ॥

অগ্রতঃ [ স্ ] ব্য অগ্রে। প্রথমে। তৎপর্য্যায়ঃ। পুরতঃ ২ পুরঃ ৩। ইত্যমরঃ ॥

অগ্রতঃসরঃ ( ত্রি ) অগ্রগামী। ইত্যমরঃ॥

অগ্রদানী [ ন্ ] ( পুং ) পতিতব্রাহ্মণবিশেষঃ। স চ প্রেতসম্প্রদানকষড়ঙ্গতিলাদিদ্রব্যগ্রাহী। যথা। লোভী বিপ্রশ্চ শূদ্রাণামগ্রে দানং গৃহীতবান্। গ্রহণে মৃতদানানামগ্রদানী বভূব সঃ॥ ইতি ব্রহ্মবৈবর্ত্তপুরাণং ॥ তৎপর্য্যায়ঃ। আগ্রহারিকঃ ২। ইতি স্মৃতিঃ ॥

অগ্রপর্ণী ( স্ত্রী ) অজলোমাবৃক্ষঃ। ইতি রত্নমালা ॥ আলকুশী ইতি কেচিৎ ॥

অগ্রমাংসং ( ক্লী ) হৃদয়ং। ইত্যমরঃ ॥ উদরমধ্যবর্ত্তিমাংসবর্দ্ধনরূপরোগবিশেষঃ। ইতি বৈদ্যকং ॥

অগ্রযানং ( ক্লী ) নাসীরং। সেনাগ্রগমনং। ইতি হেমচন্দ্রঃ ॥

অগ্রলোহিতা ( স্ত্রী ) চিল্লীশাকং। ইতি রাজনির্ঘণ্টঃ ॥

অগ্রবীজঃ ( পুং ) বীজাগ্রবৃক্ষমাত্রং। স চ কুরণ্টাদিঃ। ইতি হেমচন্দ্রঃ ॥

অগ্রসন্ধানী ( স্ত্রী ) যমপঞ্জিকা। জীবানাং শুভাশুভকর্ম্মলিখিতং যমস্য পুস্তকং। ইতি ত্রিকাণ্ডশেষঃ ॥

অগ্রসরঃ ( ত্রি ) অগ্রেসরঃ। অগ্রগামী। ইতি হেমচন্দ্রঃ ॥

অগ্রহঃ (পুং) বানপ্রস্থঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ অগৃহ ইতি পাঠে গার্হস্থ্যাশ্রমবহির্ভূতঃ ॥

অগ্রহায়ণঃ (পুং ) মাসবিশেষঃ। তস্য ব্যুৎপত্তির্যথা। হায়নস্যাগ্রোঽগ্রহায়ণঃ নিপাতনাৎ পরনিপাতনত্বঞ্চ। ইত্যমরটীকায়াং ভরতঃ॥ মার্গশীর্ষমাসঃ। ইতি শব্দরত্নাবলী ॥ অস্য পর্য্যায়ঃ আগ্রহায়ণিকে জাতফলং তৎকৃঞ্চ মার্গশীর্ষে দ্রষ্টব্যং ॥

অগ্রাহ্যং ( ত্রি ) অগ্রহণীয়ং। গ্রহণাযোগ্যং। যথা। অগ্রাহ্যং শিবনৈবেদ্যং পত্রং পুষ্পং ফলং জলং। সালগ্রামশিলাস্পর্শাৎ সর্ব্বং যাতি পবিত্রতাং ॥ ইতি তিথ্যাদিতত্ত্বং ॥

অগ্রিমঃ ( ত্রি ) প্রধানঃ। উত্তমঃ। ইতি হেমচন্দ্রঃ॥ জ্যেষ্ঠঃ। অগ্রজঃ। ইতি জটাধরঃ ॥

অগ্রিমা ( স্ত্রী ) লবণীফলং। লোণা ইতি খ্যাতা। ইতি শব্দচন্দ্রিকা ॥

অগ্রিয়ং ( ত্রি ) প্রধানং। ইত্যমরঃ ॥

অগ্রিয়ঃ ( পুং ) অগ্রজঃ। জ্যেষ্ঠভ্রাতা। ইত্যমরঃ

অগ্রীয়ং ( ত্রি ) প্রধানং। ইত্যমরঃ ॥ অগ্রজে পুং। ইতি তট্টীকায়াং রমানাথঃ ॥

অগ্রুঃ (স্ত্রী) অঙ্গুলিঃ। বেদপ্রচুরপ্রয়োগোঽয়ং ॥

অগ্রেগাঃ ( পুং ) অগ্রগামী। ইতি মুগ্ধবোধব্যাকরণং

অগ্রেগূঃ ( পুং ) অগ্রগামী। ইত্যুণাদিবৃত্তিঃ ॥

অগ্রেদিধিষুঃ ( পুং ) দ্বিরূঢ়ৈব যস্য কুটুম্বিনী স

দ্বিজঃ। দ্বিজ ইত্যুপলক্ষণং। দিধিষূঃ পরপূর্ব্বাগ্রে দিধিষুস্তৎপূরন্ধ্রিকঃ। ইতি সামান্যেন নামমালাদর্শনাৎ। দ্বিতীয়বারবিবাহিতপুত্রাদিমতিগৃহিণীর স্বামী ইতি ভাষা। ইত্যমরঃ॥

অগ্রেদিধিষুঃ (স্ত্রী) অবিবাহিতজ্যেষ্ঠভগিনীসত্ত্বে অগ্রে বিবাহিতা কনিষ্ঠা। যথা। জ্যেষ্ঠায়াং বিদ্যমানায়াং কন্যায়ামুহ্যতেঽনুজা। সা চাগ্রেদিধিষুর্জ্ঞেয়া পূর্ব্বা চ দিধিষুঃ স্মৃতা॥ ইতি দেবলঃ। দিধিষূর্দীর্ঘোকারান্তোঽপি॥

অগ্রেবণং (ক্লী) বনস্যাগ্রভাগঃ। ইতি শব্দমালা॥

অগ্রেসরঃ (ত্রি) অগ্রে গমনকর্ত্তা। তৎপর্য্যায়ঃ। পুরোগঃ ২ প্রষ্ঠঃ ৩ অগ্রতঃসরঃ ৪ পুরঃসরঃ ৫। ইত্যমরঃ॥ অগ্রগামী ৬ অগ্রসরঃ ৭ অগ্রগঃ ৮ পুরোগমঃ ৯ পুরোগামী ১০। ইতি হেমচন্দ্রঃ॥

অগ্রেসরিকঃ (ত্রি) অগ্রগামী। ইতি ত্রিকাণ্ডশেষঃ॥

অগ্র্যঃ (ত্রি) প্রধানঃ। উত্তমঃ। ইত্যমরঃ॥ জ্যেষ্ঠভ্রাতরি পুং ইতি তট্টীকায়াং রমানাথঃ॥

অঘ ই ঙ গতৌ। নিন্দায়াং। আরম্ভে। জবে। ইতি কবিকল্পদ্রুমঃ॥ জবো বেগগতিঃ। ই অঙ্ঘ্যতে। ঙ অঙ্ঘতে বায়ুর্ব্বেগেন গচ্ছতীত্যর্থঃ। জবে এব কৈশ্চিৎ পঠ্যতে। ইতি দুর্গাদাসঃ॥

অঘ ৎ ক তৎকৃতৌ। ইতি কবিকল্পদ্রুমঃ॥ তৎকৃতিঃ পাপকৃতিঃ। অঘয়তি ব্যাধঃ। কর্ম্মণোঽর্থমধ্যপাঠাদকর্ম্মকোঽয়ং। তথা চ। ধাতোরর্থান্তরে বৃত্তে ধাত্বর্থেনোপসংগ্রহাৎ। প্রসিদ্ধেরবিবক্ষাতঃ কর্ম্মণোঽকর্ম্মিকা ক্রিয়া॥ ইতি গোয়ীচন্দ্রঃ॥ ধাত্বর্থেন সহ কর্ম্মণ উপসংগ্রহাদিত্যর্থঃ। ক্রমেণোদাহরণানি। নদী বহতি ক্ষরতীত্যর্থঃ। অঘয়তি ব্যাধঃ। ভবতি ঘটঃ। আহতে জনঃ। ইতি দুর্গাদাসঃ॥

অঘং (ক্লী) পাপং। দুঃখং। ব্যসনং। ইত্যমরঃ॥

অঘমর্ষণং (ত্রি) পাপনাশনং। সর্ব্বপাপধ্বংসিজপ্যং। ইত্যমরঃ॥ অশ্বমেধযজ্ঞাঙ্গাবভৃথস্নানমন্ত্রঃ। বৈদিকসন্ধ্যান্তর্গতমন্ত্রকরণকাঘ্রাতজলপ্রক্ষেপরূপপাপনাশকক্রিয়াবিশেষঃ। ইতি স্মৃতিঃ॥ তান্ত্রিকসন্ধ্যায়ান্তু ষড়ঙ্গন্যাসমাচর্য্য বামহস্তে জলং ততঃ। গৃহীত্বা দক্ষিণেনৈব সংপুটং কারয়েদ্বুধঃ॥ শিববায়ুজলপৃথ্বীবহ্নিবীজৈস্ত্রিধা পুনঃ। অভিমন্ত্র্য চ মূলেন সপ্তধা তত্ত্বমুদ্রয়া॥ নিঃক্ষিপেৎ তজ্জলং মূর্দ্ধ্নি শেষং দক্ষে নিধায় চ। ইড়য়াকৃষ্য দেহান্তঃক্ষালিতং পাপসঞ্চয়ং॥ কৃষ্ণবর্ণং তদুদকং দক্ষনাড্যা বিরেচয়েৎ। দক্ষহস্তে চ তন্মন্ত্রী পাপরূপং বিচিন্ত্য চ॥ পুরতো বজ্রপাষাণে নিক্ষিপেদস্ত্রমুচ্চরন্॥ ইতি তন্ত্রসারঃ॥

অঘবান্ [ৎ] (ত্রি) অঘবিশিষ্টঃ। পাপী॥

অঘাসুরঃ (পুং) অঘনামাসুরঃ। স চ কংসরাজসেনাপতিঃ। ইতি শ্রীভাগবতং॥

অঘোঃ [স্] ব্য সম্বোধনং। যথা অঘো যজ ইতি বোপদেবঃ॥

অঘোরঃ (পুং) মহাদেবঃ। ইতি শিবচতুর্দ্দশীব্রতপূজায়াং॥ অতিভয়ানকে অভয়ানকে চ ত্রি॥

অঘোরা (স্ত্রী) ভাদ্রকৃষ্ণচতুর্দ্দশী। যথা

ভাদ্রমাস্যসিতে পক্ষে অঘোরাখ্যা চতুর্দ্দশী। তস্যামারাধিতঃ স্থাণুর্নয়েচ্ছিবপুরং ধ্রুবং॥ ইতি স্মৃতিঃ॥

অঘোষঃ (ত্রি) আভীরশূন্যদেশাদিঃ। শব্দরহিতঃ। অল্পধ্বনিযুক্তঃ। কলাপাদিব্যাকরণস্য সংজ্ঞাবিশেষে পুং। স তু বর্গপ্রথমদ্বিতীয়বর্ণাঃ শষসাশ্চ॥

অঘ্ন্যঃ (পুং) ব্রহ্মা। ইত্যুণাদিকোষঃ॥

অঘ্ন্যা (স্ত্রী) স্ত্রীগবী। ইত্যমরঃ॥

অঙ্ক ৎ ক পদে। লক্ষণি। ইতি কবিকল্পদ্রুমঃ॥ কণ্ঠ্যবর্গাদ্যোপধঃ। পদং সংখ্যাসংস্থানং। লক্ষ্ম চিহ্নযুক্তক্রিয়া। তথা চ। অর্থক্রিয়ৈব ধাতূনাং কর্ত্তব্যাপারলক্ষণা। আত্মনিষ্ঠং ক্রিয়ার্থত্বং ধাত্বর্থেত্বক্রিয়াত্মসু॥ ইতি বোপদেবঃ॥ অঙ্কয়ত্যরিসৈন্যানি যুধি পৃষ্ঠেষু শায়কৈরিতি হলায়ুধঃ॥ অঙ্কয়তি অঙ্কাপয়তি। ইতি দুর্গাদাসঃ॥

অঙ্কঃ (পুং) চিহ্নং। ক্রোড়ং। ইত্যমরঃ রূপকবিশেষঃ। অপরাধঃ। রেখা। বিভূষণং। সমীপং। স্থানং। নাটকাংশঃ। ইতি মেদিনী॥ চিত্রযুদ্ধং। ইতি বিশ্বঃ॥ শরীরং। ইত্যুণাদিকোষঃ॥ নবসংখ্যা। ইতি জ্যোতিষং॥

অঙ্কতিঃ (পুং) ব্রহ্মা। অগ্নিঃ। অগ্নিহোত্রী। ইতি বিশ্বঃ॥ বায়ুঃ। ইতি ত্রিকাণ্ডশেষঃ॥

অঙ্কনং (ক্লী) সংখ্যাসংস্থানং। চিহ্নযুক্তীকরণং। আঁকন্ দাগন্ ইতি ভাষা। চিহ্নকরণং। যথা পরাশরাঙ্গিরসৌ। অন্যত্রাঙ্কনলক্ষ্মাভ্যাং বাহনির্ম্মোচনে কৃতে। সায়ং সংযমনার্থন্তু ন দুষ্যেদ্রোধবন্ধয়োঃ॥ অঙ্কনং ত্রিশূলাদিচিহ্নকরণং। লক্ষ্ম স্থিরচিহ্নকরণং। ইতি প্রায়শ্চিত্ততত্ত্বং॥

অঙ্কপালিকা (স্ত্রী) আলিঙ্গনং। ইতি শব্দমালা॥

অঙ্কপালী (স্ত্রী) আলিঙ্গনং। ধাত্রী। বেদিকাখ্যগন্ধদ্রব্যং। তস্য নামান্তরং কোটিঃ। ইতি মেদিনী

অঙ্কলোড্যঃ (পুং) চিঞ্চোটকবৃক্ষঃ। চেঁচ্কো ইতি ভাষা। চিঞ্চোড়মূল ইতি কেচিৎ॥ অস্য গুণাঃ। গুরুত্বং। অজীর্ণকারিত্বং। শীতলত্বঞ্চ। ইতি রাজবল্লভঃ॥

অঙ্কিতঃ (ত্রি) লাঞ্ছিতঃ। চিহ্নিতঃ। ইতি ব্যাড়িঃ॥

অঙ্কী (স্ত্রী) অঙ্ক্যঃ। মৃদঙ্গবিশেষঃ। ইতি শব্দরত্নাবলী॥

অঙ্কুরঃ (পুং) বীজোদ্ভবঃ। নূতনোৎপন্নতৃণাদিঃ। অস্য পর্য্যায়ঃ। অভিনবোদ্ভিদ্ ২। ইত্যমরঃ॥ উদ্ভেদঃ ৩ প্ররোহঃ ৪ অকুরঃ ৫। ইতি রাজনির্ঘণ্টঃ॥ রোহঃ ৬ অঙ্কূরঃ ৭। ইতি হেমচন্দ্রঃ॥ জলং। রক্তং। লোম। ইতি মেদিনী॥

অঙ্কুরকঃ (পুং) নীড়ঃ। পক্ষিবাসস্থানং। ইতি শব্দমালা॥

অঙ্কুশঃ (পুং ক্লী) হস্তিচালনার্থলোহময়বক্রাগ্রাস্ত্রং। ডাঙ্গশ ইতি ভাষা। তৎপর্য্যায়ঃ। শৃণিঃ ২। ইত্যমরঃ॥ সৃণিঃ ৩। ইতি তট্টীকা॥ অঙ্কুষঃ ৪। ইত্যুণাদিকোষঃ॥

অঙ্কুশদুর্দ্ধরঃ (পুং) দুরন্তহস্তী। ইতি ত্রিকাণ্ডশেষঃ॥

অঙ্কুশী (স্ত্রী) জিনানাং চতুর্বিংশতিশাসনদেব্যন্তর্গতদেবীবিশেষঃ। ইতি হেমচন্দ্রঃ॥

অঙ্কূরঃ ( পুং ) অঙ্কুরঃ। অভিনবোদ্ভিদ্। ইতি হেমচন্দ্রঃ

অঙ্কূষঃ ( পুং ক্লী ) অঙ্কুশঃ। ইত্যুণাদিকোষঃ॥

অঙ্কোটঃ (পুং ) অঙ্কোঠবৃক্ষঃ। ইতি রত্নমালা॥

অঙ্কোঠঃ ( পুং ) বৃক্ষবিশেষঃ। আকোড় ইতি খ্যাতঃ। ধলআঁকুড়া ইতি কেচিৎ। অস্য পর্য্যায়ঃ। নিকোচকঃ ২। ইত্যমরঃ॥ নিকোঠকঃ ৩ লিকোচকঃ ৪। ইতি ভরতঃ॥ অঙ্কোলকঃ ৫ বোধঃ ৬ নেদিষ্ঠঃ ৭ দীর্ঘকীলকঃ ৮। ইতি জটাধরঃ॥ অঙ্কোটঃ ৯ রামঠঃ ১০। ইতি রত্নমালা॥ কোঠরঃ ১১ রেচী ১২ গূঢ়পত্রঃ ১৩ গুপ্তস্নেহঃ ১৪ পীতসারঃ ১৫ মদনঃ ১৬ গূঢ়বল্লিকা ১৭ পীতঃ ১৮ তাম্রফলঃ ১৯ দীর্ঘকীলঃ ২০ গুণাঢ্যকঃ ২১ কোলকঃ ২২ লম্বকর্ণঃ ২৩ গন্ধপুষ্পঃ ২৪ রোচনঃ ২৫ বিশানতৈল-গর্ত্তঃ ২৬। অস্য গুণাঃ। কটুত্বং। স্নিগ্ধত্বং। বিষলূতাদিদোষনাশিত্বং। কফবায়ুহারিত্বং। সূতশুদ্ধিকারিত্বং। রেচকত্বঞ্চ॥ *॥ তৎফলগুণাঃ। শীতলত্বং। স্বাদুত্বং। শ্লেষ্মনাশিত্বং। গুরুত্বং। বলকারিত্বং। ধাতুপোষকত্বং। বিরেচকত্বং। বাতপিত্ত-দাহক্ষয়দুষ্টরক্তনাশিত্বঞ্চ। ইতি রাজ-নির্ঘণ্টঃ॥

অঙ্কোলঃ ( পুং ) অঙ্কোঠবৃক্ষঃ। আকোড় যস্য প্রসিদ্ধিঃ। ইত্যমরটীকায়াং স্বামী॥

অঙ্কোলকঃ (পুং) অঙ্কোঠবৃক্ষঃ। ইতি জটাধরঃ॥

অঙ্কোলিকা (স্ত্রী) আলিঙ্গনং। ইতি শব্দমালা॥

অঙ্কোল্লসারঃ ( পুং ) স্থাবরবিষপ্রভেদঃ। ইতি হেমচন্দ্রঃ॥

অঙ্ক্যঃ ( পুং ) হরীতক্যাকৃতিমৃদঙ্গঃ। পাখওয়াজ ইতি ভাষা। ইত্যমরঃ॥ তদুক্তং। সার্দ্ধ-তালত্রয়াযামশ্চতুর্দ্দশাঙ্গুলাননঃ। হরীতক্যা-কৃতির্যঃ স্যাদঙ্ক্যোঽঙ্কে স হি বাদ্যতে॥ ইতি ভরতঃ॥

অঙ্গ ৎ ক পদে। লক্ষ্মণি। ইতি কবিকল্প-দ্রুমঃ॥ কণ্ঠ্যবর্গতৃতীয়োপধঃ। পদং সংখ্যাসংস্থানং। লক্ষ্ম চিহ্নযুক্তক্রিয়া। তথা চ। অর্থক্রিয়ৈব ধাতূনাং কর্ত্তৃব্যাপার-লক্ষ্মণা। আত্মনিষ্ঠং ক্রিয়ার্থত্বং ধাত্বর্থে স্বক্রিয়াত্মসু। ইতি বোপদেবঃ॥ অঙ্গয়তি অঙ্গাপয়তি। ইতি দুর্গাদাসঃ॥

অঙ্গ ব্য সম্বোধনং। পুনরর্থঃ। ইত্যমরঃ॥

অঙ্গং ( ক্লী ) শরীরাদেরেকদেশঃ। আং ইতি হিন্দী ভাষা। তৎপর্য্যায়ঃ। অবয়বঃ ২ প্রতীকঃ ৩ অপঘনঃ ৪। ইত্যমরঃ॥ গাত্রং। অপ্রধানং। উপায়ঃ। ইতি মেদিনী॥ মনঃ। অঙ্গং মনসি কায়ে চে-ত্যভিধানান্তরদর্শনাৎ। যথা। হিরণ্যগর্ভাঙ্গ-ভুবং মুনিং হরিরিতি মাঘঃ॥ বেদাঙ্গ-শাস্ত্রাণি ষট্। যথা। শিক্ষা ১ কল্পঃ ২ ব্যাকরণং ৩ নিরুক্তং ৪ জ্যোতিষং ৫ ছন্দঃ ৬। ইত্যমরঃ॥ অঙ্গস্য লক্ষণং যথা। তদীয়প্রধানফলজনকব্যাপারজন-কত্বে সতি তদীয়প্রধানফলাজনকত্বং। ইতি তিথ্যাদিতত্ত্বটীকা॥

অঙ্গঃ (পুং) স্বনামখ্যাতদেশঃ। ইতি হেমচন্দ্রঃ॥ মেদিনীকারমতে নিত্যবহুবচনান্তশব্দো-ঽয়ং। দেশবিশেষঃ। যথা। বৈদ্য-নাথং সমারভ্য ভুবনেশান্তগং শিবে।

তাবদঙ্গাভিধো দেশো যাত্রায়াং ন হি দুষ্যতে॥ ইতি শক্তিসঙ্গমতন্ত্রে ৭ পটলঃ॥

অঙ্গঃ (ত্রি) অঙ্গবিশিষ্টঃ। নিকটঃ। ইতি মেদিনী॥

অঙ্গগ্রহঃ (পুং) গাত্রবেদনা। ইতি বৈদ্যকং॥

অঙ্গজং (ক্লী) রক্তং। ইতি মেদিনী॥ শরীরজে বাচ্যলিঙ্গং॥

অঙ্গজঃ (পুং) পুত্রঃ। কেশঃ। কামঃ। মদঃ। ইতি বিশ্বমেদিন্যৌ॥ মদস্থানে গদঃ। ইতি কাচিন্মেদিনী॥

অঙ্গজা (স্ত্রী) কন্যা। অঙ্গাজ্জাত ইত্যস্মাৎ স্ত্রিয়ামাপ্॥

অঙ্গণং (ক্লী) অঙ্গনং। চত্বরং। ইত্যমরটীকায়াং ভরতঃ॥

অঙ্গতিঃ (পুং) ব্রহ্মা। বিষ্ণুঃ। অগ্নিঃ। অগ্নিহোত্রী। ইতি শব্দরত্নাবলী॥

অঙ্গদং (ক্লী) কেয়ূরং। তাড় বাজু ইত্যাদি ভাষা। ইত্যমরঃ॥

অঙ্গদঃ (পুং) কপিভেদঃ। স চ বালিনামবানররাজপুত্রঃ। ইতি মেদিনী॥

অঙ্গদা (স্ত্রী) দক্ষিণদিগ্‌হস্তিভার্য্যা। ইতি মেদিনীকরহেমচন্দ্রৌ॥

অঙ্গনং (ক্লী) অঙ্গনভূমিঃ। আঙ্গন্ উঠান ইতি ভাষা। তৎপর্য্যায়ঃ। চত্বরং ২ অজিরং ৩। ইত্যমরঃ॥ অঙ্গণং ৪। ইতি তট্টীকা॥ প্রাঙ্গনং ৫। যানং। গমনং। ইতি মেদিনী॥

অঙ্গনা (স্ত্রী) কামিনী। সুন্দরাঙ্গী স্ত্রী। ইতি মেদিনী॥ সার্ব্বভৌমনাম্ন উত্তরদিগ্‌গজস্য পত্নী। ইত্যমরঃ॥ বৃষকর্কটকন্যাবৃশ্চিকমকরমীনরাশয়ঃ। ইতি জ্যোতিষতত্ত্বং॥

অঙ্গনাপ্রিয়ঃ (পুং) অশোকবৃক্ষঃ। ইতি শব্দমালা॥

অঙ্গপালিঃ (পুং) আলিঙ্গনং। ইতি ত্রিকাণ্ডশেষঃ॥

অঙ্গমর্দ্দঃ (পুং) অঙ্গমর্দ্দনকারকভৃত্যঃ। তৎপর্য্যায়ঃ। সংবাহকঃ ২। ইতি হেমচন্দ্রঃ॥ অঙ্গমর্দ্দকঃ ৩। ইতি ত্রিকাণ্ডশেষঃ॥ অঙ্গমর্দ্দী ৪। ইতি হলায়ুধঃ॥

অঙ্গমর্দ্দকঃ (পুং) অঙ্গমর্দ্দঃ। ইতি ত্রিকাণ্ডশেষঃ॥

অঙ্গমর্দ্দী [ন্] (পুং) অঙ্গমর্দ্দঃ। ইতি হলায়ুধঃ॥

অঙ্গরক্তঃ (পুং) বৃক্ষবিশেষঃ। গুণ্ডারোচনী ইতি খ্যাতঃ। তৎপর্য্যায়ঃ। পিকাঙ্গঃ ২ রোচনী ৩ লঘুপত্রকঃ ৪। ইতি শব্দচন্দ্রিকা॥ কম্পিল্লঃ ৫ কর্কশঃ ৬ চন্দ্রঃ ৭ রক্তাঙ্গঃ ৮। ইত্যমরঃ॥

অঙ্গরক্ষিণী (স্ত্রী) অঙ্গত্রাণং। সাঁজোয়া ইতি ভাষা। তৎপর্য্যায়ঃ। জালিকা ২ জালপ্রায়া ৩ আয়সী ৪। ইতি হেমচন্দ্রঃ॥

অঙ্গরাগঃ (পুং) গাত্ররঞ্জনং। অঙ্গে চন্দনাদিলেপনং। তৎপর্য্যায়ঃ। বিলেপনং ২। ইতি হেমচন্দ্রঃ॥

অঙ্গরাট্ (পুং) অঙ্গদেশাধিপতিঃ। স চ কর্ণঃ। ইতি হেমচন্দ্রঃ॥

অঙ্গলোড্যঃ (পুং) চিঞ্চাটকতৃণং। ইতি রত্নমালা॥ অঙ্কলোড্য ইতি চ পাঠঃ॥

অঙ্গবঃ (পুং) শুষ্কফলং। ইতি শব্দচন্দ্রিকা॥

অঙ্গবিকৃতিঃ (পুং) অপস্মাররোগঃ। ইতি রাজনির্ঘণ্টঃ॥

অঙ্গবিক্ষেপঃ ( পুং ) অঙ্গহারঃ। অঙ্গচালনরূপ-নৃত্যং। ইত্যমরঃ ॥

অঙ্গবৈকৃতং (ক্লী) আকারঃ। ইঙ্গিতং। ইতি জটাধরঃ ॥

অঙ্গসংস্কারঃ ( পুং ) কুঙ্কুমাদিনা শরীরশোভাধানরূপসংস্কারঃ। ইতি ভরতঃ ॥ স্নানোদ্বর্ত্তনাদিঃ। ইতি স্বামী ॥ শরীরসংস্কারমাত্রং। ইত্যন্যে ॥ স্বেদাদিকৃতদৌর্গন্ধ্যহরণায় চন্দনাদিনা উদ্বর্ত্তনানুলেপনাদিঃ। ইতি সারসুন্দরী ॥ তৎপর্য্যায়ঃ। পরিকর্ম্ম ২। ইত্যমরঃ ॥ প্রতিকর্ম্ম ৩। ইতি কচিৎ পাঠঃ ॥

অঙ্গহারঃ ( পুং ) অঙ্গানাং স্থানাৎ স্থানান্তরনয়নং। তৎপর্য্যায়ঃ। অঙ্গবিক্ষেপঃ ২। ইত্যমরঃ ॥ অঙ্গহারিঃ ৩। ইতি তট্টীকা ॥ স্থিরহস্তপর্য্যস্তকাদিকো দ্বাত্রিংশৎপ্রকারঃ। ইতি মধুঃ ॥ বৃশ্চিকভ্রমরাদির্দ্বাত্রিংশদ্রূপঃ। ইতি রায়ঃ॥ অঙ্গুল্যাদিবিন্যাসস্ত্রিংশদ্রূপঃ। ইতি কৌমুদী ॥

অঙ্গহারিঃ ( পুং ) অঙ্গহারঃ। ইতি ভরতধৃতহড্ডচন্দ্রঃ ॥

অঙ্গহীনঃ ( ত্রি ) অবয়বরহিতঃ। অঙ্গহানিবিশিষ্টঃ। যথা। অঙ্গহীনং ক্রিয়াহীনং বিধিহীনঞ্চ যদ্ভবেৎ। ইতি স্মৃতিঃ ॥ কামদেবে পুংলিঙ্গঃ ॥

অঙ্গাধিপঃ ( পুং ) অঙ্গদেশাধিপতিঃ। স চ কর্ণঃ। ইতি ভূরিপ্রয়োগঃ ॥

অঙ্গারঃ ( পুং ক্লী ) দগ্ধকাষ্ঠখণ্ডং। তত্তু নিরগ্নি সাগ্নি চ। কয়লা আঙ্গরা ইতি ভাষা। তৎপর্য্যায়ঃ। অলাতং ২ উল্মুকং ৩। ইত্যমরঃ॥ আলাতং ৪ উল্মূকং ৫। ইতি তট্টীকা ॥

অঙ্গারঃ ( পুং ) মঙ্গলগ্রহঃ। ইতি মেদিনী ॥ হিতাবলী। ইতি বৈদ্যকং ॥

অঙ্গারকঃ ( পুং ) মঙ্গলগ্রহঃ। ইত্যমরঃ ॥ অঙ্গারঃ। কুরুণ্টকবৃক্ষঃ। ইতি মেদিনী ॥ ভৃঙ্গরাজঃ। ইতি রাজনির্ঘণ্টঃ ॥

অঙ্গারতৈলং ( ক্লী ) স্বনামখ্যাতপক্বতৈলং। তস্য পাকপ্রকারো গুণশ্চ যথা। মূর্ব্বা লাক্ষা হরিদ্রে দ্বে মঞ্জিষ্ঠা সেন্দ্রবারুণী। বৃহতী সৈন্ধবং কুষ্ঠং রাস্না মাংসী শতাবরী ॥ আরনালাঢ়কেনৈব তৈলপ্রস্থং বিপাচয়েৎ। তৈলং অঙ্গারকং নাম সর্ব্বজ্বরবিমোক্ষণং ॥ ইতি সুখবোধঃ ॥

অঙ্গারকমণিঃ (পুং) প্রবালঃ। ইতি রাজনির্ঘণ্টঃ॥

অঙ্গারকুষ্ঠকঃ ( পুং ) হিতাবলী। ইতি রাজনির্ঘণ্টঃ ॥

অঙ্গারধানিকা ( স্ত্রী ) অঙ্গারধারণপাত্রং। আঙ্গটা ইতি খ্যাতা। সাঁজাল ইতি কেচিৎ। তৎপর্য্যায়ঃ। অঙ্গারশকটী ২ হসন্তী ৩ হসনী ৪। ইত্যমরঃ ॥

অঙ্গারপরিপাচিতং ( ক্লী ) অঙ্গারপক্বং। শূলবিদ্ধাঙ্গারদগ্ধমাংসং। কাবাব ইতি খ্যাতং। ইতি শব্দচন্দ্রিকা ॥

অঙ্গারপর্ণঃ ( পুং ) চিত্ররথগন্ধর্ব্বঃ। ইতি মহাভারতং ॥

অঙ্গারপুষ্পঃ ( পুং ) ইঙ্গুদীবৃক্ষঃ। জিয়াপুতা। ইতি খ্যাতঃ। ইতি রত্নমালা ॥

অঙ্গারমঞ্জী ( স্ত্রী ) করঞ্জবিশেষঃ। ইতি শব্দরত্নাবলী ॥ অস্য নামান্তরং অঙ্গারমঞ্জরী॥

অঙ্গারবল্লরী ( স্ত্রী ) করঞ্জবিশেষঃ। ইত্যমরঃ॥ ভার্গী। গুঞ্জা। ইতি রাজনির্ঘণ্টঃ॥

অঙ্গারবল্লী ( স্ত্রী ) মহাকরঞ্জঃ। ভার্গী। ইতি রাজনির্ঘণ্টঃ॥

অঙ্গারশকটী (স্ত্রী) অঙ্গারধানিকা। ইত্যমরঃ॥

অঙ্গারিঃ ( স্ত্রী ) অঙ্গারধানিকা। ইতি জটাধরঃ॥

অঙ্গারিকা ( স্ত্রী ) ইক্ষুকাণ্ডং। পলাশকলিকা। ইতি মেদিনী॥

অঙ্গারিণী (স্ত্রী) অঙ্গারধানিকা। ভাস্করত্যক্তা দিক্। ইতি মেদিনী॥

অঙ্গারিতং ( ক্লী ) পলাশকলিকোদ্গমঃ। দগ্ধে ত্রি। ইতি বিশ্বঃ॥

অঙ্গিকা ( স্ত্রী ) কঞ্চকঃ। কাঁচুলী ইতি খ্যাতা। ইতি হেমচন্দ্রঃ॥

অঙ্গিরাঃ [ স্ ] ( পুং ) মুনিবিশেষঃ। স চ ব্রহ্মণো মুখাজ্জাতঃ। তস্য ভার্য্যা কর্দ্দমমুনিকন্যা শ্রদ্ধা। পুত্রঃ উতথ্যঃ ১ বৃহস্পতিঃ ২। কন্যা সিনীবালী ১ কুহূঃ ২ রাকা ৩ অনুমতিঃ ৪। ইতি শ্রীভাগবতং॥

অঙ্গী [ ন্ ] ( ত্রি ) অঙ্গবিশিষ্টঃ। অবয়বী। যথা যেনাঙ্গেনাঙ্গী বিকৃতো ভণ্যতে তস্মাদঙ্গাচ্চ ত্রি। ইতি মুগ্ধবোধটীকায়াং দুর্গাদাসঃ॥ প্রধানঃ। মুখ্যঃ। যথা। যদ্যঙ্গী স্যাদ্রসান্তরে। ইতি ধ্বনিকারঃ॥

অঙ্গীকারঃ ( পুং ) স্বীকারঃ। তৎপর্য্যায়ঃ। সম্বিৎ ২ আগূঃ ৩ প্রতিজ্ঞানং ৪ নিয়মঃ ৫ আশ্রবঃ ৬ সংশ্রবঃ ৭ অভ্যুপগমঃ ৮ সমাধিঃ ৯ প্রতিশ্রবঃ ১০। ইত্যমরঃ॥

অঙ্গীকৃতং ( ত্রি ) স্বীকৃতং। তস্য পর্য্যায়ঃ। ঊরীকৃতং ২ উররীকৃতং ৩ আশ্রুতং ৪ প্রতিজ্ঞাতং ৫ সংগীর্ণং ৬ বিদিতং ৭ সংশ্রুতং ৮ সমাহিতং ৯ উপশ্রুতং ১০ উপগতং ১১ প্রতিশ্রুতং ১২ অভ্যুপগতং ১৩। ইত্যমরঃ॥

অঙ্গুরিঃ ( স্ত্রী ) পাণিপাদাঙ্গুলী। ইত্যুণাদিকোষঃ॥

অঙ্গুরী ( স্ত্রী ) অঙ্গুলী। ইত্যমরটীকা॥

অঙ্গুরীয়ঃ ( পুং ক্লী ) অঙ্গুলীয়কং। আঙ্গুটী ইতি ভাষা। অঙ্গুলৌ ভবং অঙ্গুলীয়ং মনীষাদিত্বাৎ লস্য রঃ। ইতি ভরতঃ॥

অঙ্গুরীয়কং ( ক্লী পুং ) অঙ্গুলীয়কং। ইত্যমরটীকায়াং মুকুটাদয়ঃ॥

অঙ্গুলঃ ( পুং ) অঙ্গুষ্ঠঃ। বাৎস্যায়নমুনিঃ। ইতি হেমচন্দ্রঃ॥ অঙ্গুলী। ইত্যমরটীকায়াং রমানাথঃ॥ অষ্টযবপরিমাণং। ইত্যমরটীকায়াং বাচস্পতিঃ॥

অঙ্গুলিঃ (স্ত্রী) করশাখা। আঙ্গুল ইতি ভাষা। গজকর্ণিকা। হস্তিশুণ্ডাগ্রভাগঃ। ইতি হেমচন্দ্রঃ॥ অঙ্গুষ্ঠঃ। ইত্যুণাদিকোষঃ॥

অঙ্গুলিতোরণং ( ক্লী ) চন্দনাদিদ্বারা ললাটে কৃতোঽর্দ্ধচন্দ্রঃ। ইতি হারাবলী॥

অঙ্গুলিমুদ্রা ( স্ত্রী ) সাক্ষরোর্ম্মিকা। প্রভুনাম্না স্বনাম্না বা অঙ্কিতমঙ্গুরীয়কং। ছাপের আঙ্গুটী মোহর খোদা আঙ্গুটী ইতি ভাষা। ইত্যমরঃ॥

অঙ্গুলিমুদ্রিকা ( স্ত্রী ) অঙ্গুলিমুদ্রা। ইত্যমরটীকায়াং রমানাথঃ॥

অঙ্গুলিমোটনং ( ক্লী ) অঙ্গুলিদ্বয়মর্দ্দনজাতশব্দঃ। আঙ্গুল মট্‌কান ইতি ভাষা।

তৎপর্য্যায়ঃ। পুচ্ছটী ২। ইতি ত্রিকাণ্ডশেষঃ ॥ স্বচ্ছটী ৩ অঙ্গুলিসন্দেশঃ ৪। ইতি হারাবলী ॥ মুচুটী ৫। ইতি জটাধরঃ ॥ মুচুটী তু মুষ্টিপর্য্যায়ে হেমচন্দ্রেণ লিখিতা ॥

অঙ্গুলিসন্দেশঃ (পুং) অঙ্গুলিমোটনং। ইতি হারাবলী ॥

অঙ্গুলী (স্ত্রী) শরীরাবয়ববিশেষঃ। আঙ্গুল ইতি ভাষা। তৎপর্য্যায়ঃ। করশাখা ২। ইত্যমরঃ ॥ অঙ্গুলিঃ ৩ অঙ্গুরিঃ ৪ অঙ্গুরী ৫ অঙ্গুলঃ ৬। ইতি তট্টীকা ॥ সা ক্রমেণ পঞ্চধা যথা। অঙ্গুষ্ঠঃ ১ তর্জ্জনী ২ মধ্যমা ৩ অনামিকা ৪ কনিষ্ঠা ৫ ইত্যমরজটাধরৌ ॥ হস্তিশুণ্ডাগ্রং। ইতি মেদিনী ॥

অঙ্গুলীকঃ (পুং ক্লী) অঙ্গুলীয়কং। ইতি ত্রিকাণ্ডশেষঃ ॥

অঙ্গুলীপঞ্চকং (ক্লী) হস্তস্য পঞ্চাঙ্গুলানি যথা। অঙ্গুষ্ঠঃ ১ প্রদেশিনী ২ মধ্যমা ৩ অনামিকা ৪ কনিষ্ঠিকা ৫। ইতি রাজনির্ঘণ্টঃ ॥

অঙ্গুলীয়ঃ (পুং ক্লী) অঙ্গুলীয়কং। ইত্যমরটীকা ॥

অঙ্গুলীয়কং (ক্লী পুং) অঙ্গুলিভূষণং। আঙ্গুটী ইতি ভাষা। তৎপর্য্যায়ঃ। ঊর্ম্মিকা ২। ইত্যমরঃ ॥ অঙ্গুরীয়কং ৩ অঙ্গুরীয়ঃ ৪ অঙ্গুলীয়ঃ ৫। ইতি তট্টীকা ॥ করারোটঃ ৬ অঙ্গুলীকঃ ৭। ইতি ত্রিকাণ্ডশেষঃ ॥ পুংসি প্রমাণং। অয়ং মৈথিল্যভিজ্ঞানং কাকুৎস্থস্যাঙ্গুরীয়কঃ। ইতি ভট্টিঃ ॥

অঙ্গুলীসম্ভূতঃ (পুং) নখঃ। ইতি রাজনির্ঘণ্টঃ ॥

অঙ্গুষ্ঠঃ (পুং) বৃদ্ধাঙ্গুলিঃ। বুড়ো আঙ্গুল ইতি ভাষা। ইত্যমরঃ ॥

অঙ্গূষঃ (পুং) নকুলঃ। বাণঃ। ইত্যুণাদিকোষঃ ॥

অজ্ঞঃ [স্] (ক্লী) অংহঃ। পাপং। ইত্যুণাদিকোষঃ ॥

অঙ্ঘিঃ (পুং) অঙ্ঘ্রিঃ। ইতি বিশ্বঃ ॥

অঙ্ঘ্রিঃ (পুং) পাদঃ। বৃক্ষমূলং। ইতি ত্রিকাণ্ডশেষঃ ॥

অঙ্ঘ্রিনাম [ন্] (ক্লী) বৃক্ষমূলং। ইতি হেমচন্দ্রঃ ॥

অঙ্ঘ্রিনামকঃ (পুং) বৃক্ষমূলং। ইত্যমরঃ ॥

অঙ্ঘ্রিপঃ (পুং) বৃক্ষঃ। ইতি হেমচন্দ্রঃ ॥

অঙ্ঘ্রিপর্ণী (স্ত্রী) পৃশ্নিপর্ণী। চাকুলিয়া ইতি খ্যাতা। ইত্যমরটীকায়াং রমানাথঃ ॥

অঙ্ঘ্রিবল্লিকা (স্ত্রী) চিত্রপর্ণীবৃক্ষঃ। চাকুলিয়া ইতি ভাষা। ইত্যমরঃ ॥ অস্যা রূপান্তরং অঙ্ঘ্রিবল্লিঃ অঙ্ঘ্রিবল্লী ॥

অচ ই পূজায়াং। ইতি কবিকল্পদ্রুমঃ ॥ ই অঞ্চতে। অঞ্চু গতিপূজনয়োরিতি পূজার্থো যঃ স এবায়ং। ইদিৎ পাঠঃ পূজায়াং নলোপাভাবাৎ। উদনুবন্ধাভাবশ্চ ক্ষুধবসপূজার্থাঞ্চেত্যাদিনা ক্তাপ্রত্যয়স্য নিষ্ঠায়াশ্চ নিত্যেম্বিধানাৎ। ইতি দুর্গাদাসঃ ॥

অচ ই ঞ গতৌ। ম্লিষ্টোক্তৌ। ইতি কবিকল্পদ্রুমঃ ॥ ই অঞ্চ্যতে। ঞ অঞ্চতি অঞ্চতে। ইতি দুর্গাদাসঃ ॥

অচ উ ঞ গতৌ। ম্লিষ্টোক্তৌ। ইতি কবিকল্পদ্রুমঃ ॥ অচতি অচতে। উ অচিত্বা

অক্ত্বা। ম্লিষ্টোক্তিরব্যক্তশব্দঃ। ইতি দুর্গাদাসঃ॥

অচণ্ডী (স্ত্রী) সুশীলা গৌঃ। শান্ত গাই ইতি ভাষা। তৎপর্য্যায়ঃ। সুকরা ২। ইত্যমরঃ॥ অকোপনা স্ত্রী॥

অচলঃ (পুং) পর্ব্বতঃ। কীলকঃ। ইতি মেদিনী॥ অকম্পে ত্রি॥

চলকীলা (স্ত্রী) পৃথিবী। ইতি শব্দরত্নাবলী

অচলত্বিট্ [ষ্] (পুং) কোকিলঃ। ইতি শব্দচন্দ্রিকা॥

অচলভ্রাতা [ঋ] (পুং) বৌদ্ধগণাধিপবিশেষঃ। স তু শেষজৈনাচার্য্যস্য একাদশশিষ্যান্তর্গতঃ। ইতি হেমচন্দ্রঃ॥

অচলা (স্ত্রী) পৃথিবী। ইতি মেদিনী॥

অচিরদ্যুতিঃ (স্ত্রী) বিদ্যুৎ। ইতি ত্রিকাণ্ডশেষঃ॥

অচিরপ্রভা (স্ত্রী) বিদ্যুৎ। ইতি হেমচন্দ্রঃ॥

অচিররোচিঃ [স্] (স্ত্রী) বিদ্যুৎ। ইতি জটাধরঃ॥

অচিরা (স্ত্রী) অর্হতাং মাতৃবিশেষঃ। ইতি হেমচন্দ্রঃ

অচিরাংশুঃ (স্ত্রী) বিদ্যুৎ। ইতি হলায়ুধঃ॥

অচিরাৎ ব্য অচিরং। শীঘ্রং। অবিলম্বং। যথা। অচিরাদুপকর্ত্তুরাচরেদথবাত্মৌপয়িকীমুপক্রিয়াং। ইতি নৈষধং॥

অচিরাভা (স্ত্রী) বিদ্যুৎ। ইতি হারাবলী॥

অচেতনঃ (ত্রি) চেতনারহিতঃ। চৈতন্যশূন্যঃ। অজ্ঞানঃ। যথা। কামার্ত্তা হি প্রকৃতিকৃপণাশ্চেতনাচেতনেষু। ইতি মেঘদূতকাব্যং॥ সেন্দ্রিয়ং চেতনং দ্রব্যং নিরিন্দ্রিয়মচেতনং। ইতি চরকঃ॥

অচৈতন্যং (ক্লী) নিশ্চেতনা। চেতনাভাবঃ। অজ্ঞানং। যথা। অচৈতন্যমিদং বিশ্বং চৈতন্যং দেবমেব যৎ। ন জানন্ত্যপি শাস্ত্রজ্ঞা ভ্রমন্ত্যেব হি কেবলং॥ ইতি চৈতন্যচন্দ্রামৃতং॥ তদ্বতি ত্রি॥

অচ্ছং ব্য আভিমুখ্যং। সাম্মুখ্যং। ইতি মেদিনী॥

অচ্ছঃ (ত্রি) স্বচ্ছঃ। নির্ম্মলঃ। ইত্যমরঃ॥

অচ্ছঃ (পুং) স্ফটিকঃ। ভালূকঃ। ইতি মেদিনী॥

অচ্ছভল্লঃ (পুং) ভালূকঃ। ইত্যমরঃ। তট্টীকাকারমতে অচ্ছো ভল্লশ্চেতি শব্দদ্বয়মপি॥

অচ্ছা (স্ত্রী) বিষ্ণোরাচ্ছাদনং। ইতি মুগ্ধবোধব্যাকরণং॥

অচ্ছিদ্রং (ত্রি) ছিদ্ররহিতং। দোষাভাববিশিষ্টং। যথা শাতাতপপরাশরৌ। অচ্ছিদ্রমিতি যদ্বাক্যং বদন্তি ক্ষিতিদেবতাঃ। প্রণম্য শিরসা গ্রাহ্যমগ্নিষ্টোমফলৈঃ সমং॥ ইতি শ্রাদ্ধতত্ত্বং॥

অচ্ছিদ্রাবধারণং (ক্লী) দোষরহিতকর্ম্মনিশ্চয়ঃ। তজ্জ্ঞাপকবাক্যং যথা। ততঃ কর্ম্মমাত্রপ্রাপ্তাচ্ছিদ্রাবধারণং কুর্য্যাৎ। তথাচ শাতাতপপরাশরৌ। অচ্ছিদ্রমিতি যদ্বাক্যং বদন্তি ক্ষিতিদেবতাঃ। প্রণম্য শিরসা গ্রাহ্যমগ্নিষ্টোমফলৈঃ সমং॥ ইতি শ্রাদ্ধতত্ত্বং॥ অপি চ। বশিষ্ঠঃ। ততঃ শান্তিং প্রকুর্ব্বীত অবধারণবাচনং।

অবধারণং অচ্ছিদ্রাবধারণং। ইতি তিথ্যাদিতত্ত্বং ॥ তদ্বাক্যং যথা অদ্যামুকে মাসি অমুকপক্ষে অমুকতিথৌ মৎকৃতৈতদমুককর্ম্মাচ্ছিদ্রমস্তু ॥

অচ্ছিন্নং (ত্রি) ছেদরহিতং। অকর্ত্তিতং। যথা গর্গঃ। শ্রুত্বা পুত্রস্য বৈ জন্ম কৃত্বা বেদোদিতাঃ ক্রিয়াঃ। অচ্ছিন্ননালং পশ্যেত্তং দত্ত্বা রুক্মং ফলান্বিতং ॥ ইতি শুদ্ধিতত্ত্বং ॥ অপি চ। শঙ্খঃ। অশ্রদ্দধানঃ পাপাত্মা নাস্তিকোঽচ্ছিন্নসংশয়ঃ। হেতুনিষ্ঠশ্চ পঞ্চৈতে ন তীর্থফলভাগিনঃ ॥ অচ্ছিন্নসংশয়ঃ ফলোপায়েতিকর্ত্তব্যতাসু নিশ্চয়শূন্যঃ। ইতি প্রায়শ্চিত্ততত্ত্বং ॥

অচ্যুতঃ (পুং) বিষ্ণুঃ। ইত্যমরঃ॥ স্থিরে ত্রি ॥

অচ্যুতাগ্রজঃ (পুং) বলরামঃ। ইত্যমরঃ ॥ ইন্দ্রঃ। ইতি হেমচন্দ্রঃ ॥

অচ্যুতাবাসঃ (পুং) অশ্বত্থবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

অজ ক্ষেপে। গতৌ। ইতি কবিকল্পদ্রুমঃ ॥ অজতি। ইতি দুর্গাদাসঃ ॥

অজ ইক ভাসি। ইতি কবিকল্পদ্রুমঃ ॥ ইক অঞ্জয়তি। ভাসি দীপ্তৌ। ইতি দুর্গাদাসঃ॥

অজঃ (পুং) ব্রহ্মা। বিষ্ণুঃ। শিবঃ। কামদেবঃ। সূর্য্যবংশীয়রাজবিশেষঃ। স চ রঘুরাজপুত্রঃ দশরথপিতা চ। মেষঃ। ইতি জ্যোতিষং ॥ মাক্ষিকধাতুঃ। ইতি হেমচন্দ্রঃ ॥ জন্মরহিতে বাচ্যলিঙ্গঃ। ছাগঃ। ইতি মেদিনী ॥ তৎপরীক্ষা। যথা নক্ষত্রাণাং বিভেদেন নরাণাস্তু গণত্রয়ং। তেষাং শুভায় নির্দ্দিষ্টং পশুবস্তুত্রয়ং বলৌ ॥ যে কৃষ্ণাঃ শুচয়শ্চাগাঃ পশবোঽন্যে তথৈব চ। দেবজাতিভিরুৎসৃজ্যাস্তে সর্ব্বার্থোপসিদ্ধয়ে ॥ যে পীতা হরিতা বাপি নরজাতেরুদীরিতাঃ। যে শুক্লাশ্চ মহান্তো বা রক্ষোজাতেঃ শুভপ্রদাঃ ॥ যো মোহাদথবাজ্ঞানাদ্বলিমন্যং প্রযচ্ছতি। বধ এব ফলং তস্য নান্যৎ কিঞ্চিৎ ফলং ভবেৎ॥ ইতি যুক্তিকল্পতরুঃ॥

অজকর্ণঃ (পুং) অসনবৃক্ষঃ। ইতি রত্নমালা ॥

অজকর্ণকঃ (পুং) সালবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

অজকবঃ (পুং ক্লী) শিবধনুঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

অজকাবঃ (পুং ক্লী) শিবধনুঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

অজগন্ধা (স্ত্রী) বনযমানী। তৎপর্য্যায়ঃ। অজমোদা ২। খরাশ্বা ৩। কারবী ৪। ইতি রত্নমালা ॥ উগ্রগন্ধা ৫। ইত্যমরঃ ॥ বৃক্ষবিশেষঃ। ববরী ইতি হিন্দী ভাষা। ইতি মদনবিনোদঃ ॥ তিলৌণি ইতি রাজনির্ঘণ্টঃ ॥ তৎপর্য্যায়ঃ। বস্তগন্ধা ৩ খরপুষ্পা ৪ অবিগন্ধিকা ৫ উগ্রগন্ধা ৬ ব্রহ্মগর্ভা ৭ ব্রাহ্মী ৮ পূতিময়ূরিকা ৯। অস্যা গুণাঃ। কটুত্বং। উষ্ণত্বং। বাতগুল্মোদররোগবর্ণব্রণার্ত্তিশূলনাশিত্বং। পীতা চেদগ্ননে হিতা। ইতি রাজনির্ঘণ্টঃ ॥

অজগন্ধিকা (স্ত্রী) বর্ব্বরাবৃক্ষঃ। বাবরি ইতি ভাষা। ইত্যমরঃ ॥

অজগন্ধিনী (স্ত্রী) অজশৃঙ্গীবৃক্ষঃ। ইতি রত্নমালা ॥

অজগরঃ ( পুং ) স্বনামখ্যাতবৃহৎসর্পঃ। তৎপর্য্যায়ঃ। শয়ুঃ ২ বাহসঃ ৩। ইত্যমরঃ ॥

অজগবং ( ক্লী ) পিনাকঃ। শিবধনুঃ। ইত্যমরঃ ॥ তস্য রূপান্তরং। অজকবং। অজকাবং। অজীকবং। অজগাবং ॥

অজগাবং ( ক্লী ) শিবধনুঃ। ইতি শব্দমালা ॥

অজজীবিকঃ ( পুং ) অজাজীবী। ছাগপালকঃ। তৎপর্য্যায়ঃ। জাবালঃ ২। ইতি হেমচন্দ্রঃ॥

অজটা (স্ত্রী) ভূম্যামলকী। ইতি রাজনির্ঘণ্টঃ॥ তস্যা রূপান্তরং। অজড়া। অজ্ঝটা ॥

অজড়া ( স্ত্রী ) কপিকচ্ছুঃ। আলকুশী ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ ॥

অজথ্যা ( স্ত্রী ) স্বর্ণযূথিকা। ইতি দীক্ষিতাঃ ॥

অজদণ্ডী ( স্ত্রী ) ব্রহ্মদণ্ডীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

অজনকঃ ( ত্রি ) অনুৎপাদকঃ। অজন্মদঃ। অস্রষ্টা। অকারকঃ ॥

অজননিঃ ( পুং ) জন্মরাহিত্যং। উৎপত্ত্যভাবঃ। অকরণিঃ। শাপঃ। যথা। অজননিরস্তু তস্য। ইত্যমরটীকায়াং রায়মুকুটঃ ॥

অজন্যং ( ক্লী ) উৎপাতঃ। শুভাশুভসূচকভূকম্পাদিঃ। ইত্যমরঃ ॥ অজননীয়ে ত্রি ॥

অজপঃ ( পুং ) অসদধ্যেতা। কুপাঠকঃ। ইতি হেমচন্দ্রঃ ॥ ছাগপালকঃ। যথা। ওষধীর্নামরূপাভ্যাং জানতে হ্যজপা বনে। ইতি চরকঃ ॥

অজপা ( স্ত্রী ) হংসমন্ত্রঃ। যথা। বিয়দর্দ্ধেন্দুললিতস্তদাদিসর্গসংযুতঃ। অজপাখ্যো মনুঃ প্রোক্তো দ্ব্যক্ষরঃ সুরপাদপঃ ॥ * ॥ অস্য দেবতার্দ্ধনারীশ্বরমূর্ত্তিঃ। যথা। উদ্যদ্ভানুস্ফুরিততড়িদাকারমূর্দ্ধাম্বিকেশং পাশাভীতিং বরদপরশুং সংদধানং করাব্জৈঃ। দিব্যাকল্পৈর্নবমণিময়ৈঃ শোভিতং বিশ্বমূলং সৌম্যাগ্নেয়ং বপুরবতু নশ্চন্দ্রচূড়ং ত্রিনেত্রং ॥ ইতি তন্ত্রসারঃ ॥ * ॥ স্বাভাবিকনিঃশ্বাসপ্রশ্বাসরূপেণ জীবজপ্যহংসমন্ত্রঃ। তথাচ দক্ষিণামূর্ত্তিসংহিতায়াং। অথ বক্ষ্যে মহেশানি প্রত্যহং প্রজপেন্নরঃ। মোহবন্ধং ন জানাতি মোক্ষস্তস্য ন বিদ্যতে॥ শ্রীগুরোঃ কৃপয়া দেবি জ্ঞায়তে জপ্যতে যদা। উচ্ছ্বাসনিঃশ্বাসতয়া তদা বন্ধক্ষয়ো ভবেৎ॥ উচ্ছাসৈরেব নিঃশ্বাসৈহংস ইত্যক্ষরদ্বয়ং। তস্মাৎ প্রাণস্য হংসাখ্য আত্মাকারেণ সংস্থিতঃ॥ নাভেরুচ্ছ্বাসনিশ্বাসাৎ হৃদয়াগ্রে ব্যবস্থিতঃ। ষষ্টিশ্বাসৈর্ভবেৎ প্রাণঃ ষট্প্রাণা নাড়িকা মতাঃ॥ ষষ্টিনাড্যা হ্যহোরাত্রং জপসংখ্যাক্রমো মতঃ। একবিংশতিসাহস্রং ষট্শতাধিকমীশ্বরি ॥ জপতে প্রত্যহং প্রাণী সান্দ্রানন্দময়ীং পরাং। উৎপত্তির্জপমারম্ভো মৃত্যুস্তত্র নিবেদনং ॥ বিনা জপেন দেবেশি জপো ভবতি মন্ত্রিণঃ। অজপেয়ং ততঃ প্রোক্তা ভবপাশনিকৃন্তনী॥ অন্যত্রাপি। ষট্শতানি দিবারাত্রৌ সহস্রাণ্যেকবিংশতিং। এতৎসংখ্যান্বিতং মন্ত্রং জীবো জপতি সর্ব্বদা ॥ * ॥ সন্ধ্যাবন্দনহীনা। ইতি মহাভারতং ॥

অজভক্ষঃ ( পুং ) বর্ব্বূরবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

অজমীঢ়ঃ (পুং) রাজা যুধিষ্ঠিরঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

অজমোদা (স্ত্রী) যমানিকা। তৎপর্য্যায়ঃ। উগ্রগন্ধা ২ ব্রহ্মদর্ভা ৩ যবানিকা ৪। ইত্যমরঃ॥ চত্বারি যমান্যাং। যমানী দ্বিবিধা। একা ক্ষেত্রযমানী সা অজমোদেত্যেব খ্যাতা। অপরা যমানীত্যেব খ্যাতা। অবিশেষাৎ দ্বয়োরপীতি স্বভূতিঃ॥ কেচিত্তু অজমোদাদিদ্বয়ং বনযমান্যাং। ব্রহ্মদর্ভাদিদ্বয়ং যমান্যামিত্যাহুঃ। উগ্রগন্ধাজমোদাখ্যা স্মৃতক্ষেত্রযমানিকেতি। যমানী দীপকো দীপ্যো ভূতিকশ্চ যমানিকেতি চ রত্নমালা॥ ইতি ভরতঃ॥ *॥ বৈদ্যকে তু বনযমানী ইতি খ্যাতা। তৎপর্য্যায়ঃ। খরাহ্বা ২ বস্তমোদা ৩ মর্কটী ৪ মোদা ৫ গন্ধদলা ৬ হস্তিকারবী ৭ গন্ধপত্রিকা ৮ মায়ূরী ৯ শিখিমোদা ১০ মোদাঢ্যা ১১ বহ্নিদীপিকা ১২ ব্রহ্মকোশী ১৩ বিশালী ১৪ হয়গন্ধা ১৫ উগ্রগন্ধিকা ১৬ মোদিনী ১৭ ফলমুখ্যা ১৮ বিশল্যা ১৯। অস্যা গুণাঃ কটুত্বং। উষ্ণত্বং। রুক্ষত্বং। রুচিকারিত্বং। কফবায়ুশূলাধ্মানারুচিজঠরাময়নাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ যমানী। যথা। অজমোদা খরাশ্বা চ ময়ূরো দীপ্যকস্তথা। তথা ব্রহ্মকুশা প্রোক্তা কারবী লোচমস্তকঃ॥ অজমোদা কটুস্তীক্ষ্ণা দীপনী কফবাতনুৎ। উষ্ণা বিদাহিনী হৃদ্যা বৃষ্যা বলকরী লঘুঃ॥ নেত্রাময়কৃমিচ্ছর্দ্দিহিধ্মবস্তিরুজো হরেৎ॥*॥ অথ খুরাসানীযবানীনামগুণাঃ। পারসীয়যবানী তু যবানীসদৃশী গুণৈঃ। বিশেষাৎ পাচনী রুক্ষা গ্রাহিণী মাদিনী গুরুঃ॥ ইতি ভাবপ্রকাশঃ॥

অজমোদিকা (স্ত্রী) যবানী। ইতি বৈদ্যকং॥

অজম্ভঃ (পুং) ভেকঃ। ইতি শব্দরত্নাবলী॥ ন সন্তি জম্ভা দন্তা অস্য॥

অজয়ঃ (পুং) পরাজয়ঃ। যথা। সুখদুঃখে সমে কৃত্বা লাভালাভৌ জয়াজয়ৌ। ইতি ভগবদ্গীতা॥ রাঢ়দেশপ্রসিদ্ধনদবিশেষঃ॥

অজয়া (স্ত্রী) বিজয়া। ভাঙ্গ সিদ্ধি ইতি খ্যাতা। ইতি রাজনির্ঘণ্টঃ॥

অজয্যং (ত্রি) জেতুমশক্যং। অজেয়ং। ইতি মুগ্ধবোধব্যাকরণং॥

অজরঃ (ত্রি) জরারহিতঃ। বার্দ্ধক্যশূন্যঃ। যথা। অজরামরবৎ প্রাজ্ঞো বিদ্যামর্থঞ্চ চিন্তয়েৎ। ইতি হিতোপদেশঃ॥

অজরা (স্ত্রী) জীর্ণফঞ্জীলতা। বৃদ্ধদারকপ্রভেদঃ। গৃহকন্যা। ঘৃতকুমারীতি খ্যাতা। ইতি রাজনির্ঘণ্টঃ॥

অজর্য্যং (ক্লী) সঙ্গতং। সৌহার্দং। ইতি হেমচন্দ্রঃ॥ অজরার্হে ত্রি॥

অজলম্বনং (ক্লী) স্রোতোঞ্জনং। ইতি শব্দচন্দ্রিকা॥

অজলোমা [ন্] (পুং) বৃক্ষবিশেষঃ। গুয়াশিষা। শূয়াশিম্বী ইতি চ ভাষা। তৎপর্য্যায়ঃ। শিখী ২ কেশী ৩ মহাহ্রস্বা ৪ অগ্রপর্ণী ৫। ইতি রত্নমালা॥

অজশৃঙ্গী (স্ত্রী) বৃক্ষবিশেষঃ। গাড়রশিঙ্গী মেড়াশিঙ্গী। ইতি খ্যাতা। তৎপর্য্যায়ঃ। বিষাণী ২। ইত্যমরঃ॥ বিষাণিকা ৩ চক্রশ্রেণী ৪ অজগন্ধিনী ৫ মৌর্ব্বী ৬ নেত্রৌষধী ৭ আবর্ত্তিনী ৮। ইতি রত্নমালা॥ মেষশৃঙ্গী ৯ বর্ত্তিকা ১০ সর্পদংষ্ট্রিকা ১১

চক্ষুষ্যা ১২ তিক্তদুগ্ধা ১৩ পুত্রশৃঙ্গী ১৪ কর্ণিকা ১৫। অস্যা গুণাঃ। কটুত্বং। তিক্তত্বং। কফার্শঃশূলশোথশ্বাসহৃদ্রোগবিষরোগকাসকুষ্ঠনাশিত্বং। চক্ষুর্হিতকারিত্বঞ্চ ॥ তৎফলস্য গুণাঃ। তিক্তত্বং। উষ্ণত্বং। কটুত্বং। কফবায়ুনাশিত্বং। জঠরানলরুচিকারিত্বং। হৃদ্যত্বং। লবণাম্লরসত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

অজস্রং (ক্লী) নিরন্তরং। সততং। ইত্যমরঃ ॥

অজহৎস্বার্থা (স্ত্রী) লক্ষণাখ্যবৃত্তিবিশেষঃ। উপাদানলক্ষণা। স্বীয়ার্থাত্যাগিনী লক্ষণা। যথা। কুন্তাঃ প্রবিশন্তীত্যত্র কুন্তধারিপুরুষে লক্ষণা। ইত্যলঙ্কারশাস্ত্রং ॥

অজহল্লিঙ্গঃ (পুং) বিশেষণভূতোঽপি স্বলিঙ্গাত্যাগী শব্দঃ। ইতি ব্যাকরণং ॥

অজহা (স্ত্রী) শূকশিম্বী। ইত্যমরটীকায়াং স্বামী ॥ অত্যাজ্যে ত্রি ॥

অজা (স্ত্রী) ছাগী। ইত্যমরঃ ॥ মায়া। আদ্যা শক্তিঃ। ইতি পুরাণং ॥

অজাগরঃ (পুং) ভৃঙ্গরাজবৃক্ষঃ। ইতি শব্দরত্নাবলী ॥ জাগরণরহিতে ত্রি ॥

অজাজী (স্ত্রী) শ্বেতজীরকঃ। কৃষ্ণজীরকঃ। কাকোডুম্বরিকা। ইতি রাজনির্ঘণ্টঃ ॥

অজাজীবঃ (পুং) জাবালঃ। ছাগোপজীবী। ইত্যমরঃ ॥

অজাতঃ (ত্রি) অজন্মবিশিষ্টঃ। অনুৎপন্নঃ। যথা। অজাতপক্ষা ইব মাতরং খগাঃ। ইতি শ্রীভাগবতং ॥

অজাতশত্রুঃ (পুং) রাজা যুধিষ্ঠিরঃ। ইতি হেমচন্দ্রঃ ॥

অজাতারিঃ (পুং) রাজা যুধিষ্ঠিরঃ। ইতি ভূরিপ্রয়োগঃ ॥

অজাতৌল্বলিঃ (পুং) অজোপজীবিমুনিবিশেষঃ। ইতি মধ্যপদলোপিকর্ম্মধারয়সমাসে স্বপদ্মব্যাকরণং ॥ তুল্বলস্যাপত্যং তৌল্বলিঃ অজোপজীবী চাসৌ তৌল্বলিশ্চেতি। ইতি তট্টীকা ॥

অজাদনী (স্ত্রী) ক্ষুদ্রদুরালভা। ইতি রাজনির্ঘণ্টঃ ॥

অজানেয়ঃ (পুং) উত্তমঘোটকঃ। তৎপর্য্যায়ঃ। হয়োত্তমঃ২ বাতাশ্বজাত্যঃ৩। ইতি ত্রিকাণ্ডশেষঃ ॥ আজানেয়ঃ ৪ কুলীনঃ৫। ইত্যমরঃ ॥ নির্ভয়ে ত্রি। ইতি ত্রিকাণ্ডশেষঃ ॥

অজান্ত্রী (স্ত্রী) বৃক্ষবিশেষঃ। নীলবর্ণবোনা ইতি ভাষা। তৎপর্য্যায়ঃ। নীলবুহ্না ২ নীলপুষ্পী ৩ অতিলোমশা ৪ নীলিনী ৫ ছগলান্ত্রী ৬ অন্তঃকোঠরপুষ্পী ৭। ইতি রত্নমালা ॥ বস্তান্ত্রী। বৃদ্ধদারকঃ ইতি রাজনির্ঘণ্টঃ ॥

অজাপালকঃ (ত্রি) অজাজীবী। ছাগরক্ষকঃ। ইতি শব্দরত্নাবলী ॥

অজিতং (ত্রি) অনির্জ্জিতং। ইতি হেমচন্দ্রঃ ॥ অতিপরাজিতশ্চ ॥

অজিতঃ (পুং) বিষ্ণুঃ। বুদ্ধঃ। তীর্থঙ্করজৈনবিশেষঃ। ইতি হেমচন্দ্রঃ ॥ শিবঃ। ইতি তস্য সহস্রনামমধ্যে পঠিতঃ ॥

অজিনং (ক্লী) চর্ম্ম। ব্রহ্মচার্য্যাদিধার্য্যকৃষ্ণসারাদিত্বক্। ইত্যমরঃ ॥ জিনভিন্নে বাচ্যলিঙ্গং ॥

অজিনপত্রা (স্ত্রী) চর্ম্মচটিকা। চামচিকা ইতি খ্যাতা। তৎপর্য্যায়ঃ। জতুকা ২। ইত্যমরঃ ॥ জতূকা ৩। ইতি তট্টীকা ॥

অজিনপত্রী (স্ত্রী) জতুকা। ইতি রাজনির্ঘণ্টঃ॥
অজিনযোনিঃ (পুং) হরিণঃ। ইত্যমরঃ॥
অজিরং (ক্লী) চত্বরং। বায়ুঃ। শরীরং। মণ্ডূকঃ। বিষয়ঃ। ইতি মেদিনী॥
অজিহ্মং (ত্রি) অবক্রং। সরলং। ইত্যমরঃ॥ ভেকে পুং। ইতি শব্দরত্নাবলী॥
অজিহ্মগঃ (পুং) বাণঃ। ইত্যমরঃ॥ অবক্রগে বাচ্যলিঙ্গঃ॥
অজিহ্বঃ (পুং) ভেকঃ। ইতি ত্রিকাণ্ডশেষঃ॥ জিহ্বারহিতে ত্রি॥
অজীর্ণং (ক্লী) অপাকঃ। তৎপর্য্যায়ঃ। বায়ুগুঃ ২ অন্তর্বমিঃ ৩ পলতাশয়ঃ ৪। ইতি ত্রিকাণ্ডশেষঃ॥ অথাজীর্ণস্য বিপ্রকৃষ্টং নিদানমাহ। অত্যম্বুপানাদ্বিষমাশনাচ্চ সন্ধারণাৎ স্বপ্নবিপর্য্যয়াচ্চ। কালেঽপি সাত্ম্যং লঘু চাপি ভুক্তমন্নং ন পাকং ভজতে নরস্য॥ সন্ধারণাৎ ক্ষুদ্বাতমূত্রপুরীষাদীনাং। স্বপ্নবিপর্য্যয়াৎ দিবাশয়নাদ্রাত্রৌ জাগরণাৎ। লঘু চাপীত্যপি শব্দাৎ স্নিগ্ধোষ্ণাদিগুণযুক্তমপি॥ *॥ অন্যচ্চ। ঈর্ষাভয়ক্রোধপরিপ্লুতেন লুব্ধেন রুগ্দৈন্যনিপীড়িতেন। প্রদ্বেষযুক্তেন চ সেব্যমানমন্নং ন সম্যক্ পরিপাকমেতি॥ পরিপ্লুতেন ব্যাপ্তেন। উক্তকারণেভ্যোঽতিমাত্রভোজনং বিশেষাদজীর্ণস্য কারণমজীর্ণঞ্চ বহুব্যাধীনাং কারণমিত্যাহ। অনাত্মবন্তঃ পশুবদ্ভুঞ্জতে যেঽপ্রমাণতঃ। রোগানীকস্য তে মূলমজীর্ণং প্রাপ্নুবন্তি হি॥ অনাত্মবন্তঃ অবুদ্ধিমন্তঃ। রোগানীকস্য বিসূচ্যাদেঃ। মূলং কারণং॥ *॥

অন্যচ্চ। প্রায়েণাহারবৈষম্যাদজীর্ণং জায়তে নৃণাং। তন্মূলো রোগসংঘাতস্তদ্বিনাশাদ্বিনশ্যতি॥ তদ্বিনাশাদ্বিনশ্যতি অজীর্ণবিনাশাৎ বিনশ্যতি রোগসংঘাত ইত্যর্থঃ। যদ্বা তৎ অজীর্ণং আশাৎ ভক্ষণাৎ বিনা ভক্ষণাভাবে বিনশ্যতি নিবর্ত্তত ইত্যর্থঃ॥*॥ অজীর্ণস্য সামান্যস্য লক্ষণমাহ। গ্লানিগৌরবমাটোপো ভ্রমো মারুতমূঢ়তা। বিবন্ধোঽতিপ্রবৃত্তির্বা সামান্যাজীর্ণলক্ষণং॥ মারুতমূঢ়তা বায়োরবরোধঃ। বিবন্ধঃ মলাপ্রবৃত্তিঃ॥ *॥ সন্নিকৃষ্টকারণৈঃ সহিতানজীর্ণস্য ভেদানাহ। আমং বিদগ্ধং বিষ্টব্ধং কফপিত্তানিলৈস্ত্রিভিঃ। ত্রিভিরিত্যেকশো ন তু মিলিতৈঃ। অজীর্ণং কেচিদিচ্ছন্তি চতুর্থং রসশেষতঃ॥ কেচিৎ সুশ্রুতাদয়ঃ॥ রসশেষতঃ ভুক্তস্য পক্বস্য সারভূতো যো দ্রবঃ স রসঃ সোঽপি পচ্যতে। ভুক্তস্য পক্বস্য সারভূতো যো দ্রবঃ স চাপক্বঃ স রসশেষঃ তস্মাৎ চতুর্থমজীর্ণং নত্বামাজীর্ণং॥ *॥ নন্বামাজীর্ণাদ্রসশেষস্য কো ভেদ উচ্যতে। আমং মধুরতাগতমপক্বং অন্নমেব। রসশেষস্তু ভুক্তস্য পক্বস্য সারভূতো যো দ্রবঃ স চাপক্ব ইতি ভেদঃ। অজীর্ণং পঞ্চমং কেচিৎ নির্দ্দোষং দিনপাকি চ। নির্দ্দোষং গৌরবভ্রমশূলাদিদোষাজনকং। দিনপাকি চ আহারোঽহোরাত্রেণ পাকং যাতীতি স্বভাবঃ। যত্তু মাত্রাকালসাত্ম্যাদিদোষাদ্দিনান্তরে পাকং যাতি তদ্দিনপাকি। অতএব যামমধ্যে ন ভোক্তব্যমিতি বচনং। বদন্তি ষষ্ঠং

চাজীর্ণং প্রাকৃতং প্রতিবাসরং। প্রাকৃতং অবিকারকং। প্রতিবাসরং প্রতিদিনভাবি। ভুক্তং যাবন্নজীর্ণং তাবদজীর্ণমিত্যুচ্যতে। এতদভিধানস্য প্রয়োজনং পাকার্থং বামপার্শ্বশয়নপ্রিয়শব্দাদিসেবনাদিকং। ন চাত্রাহারস্য নিষেধঃ। প্রাতরাশে ত্বজীর্ণে তু সায়মাশো ন দুষ্যতীতি বচনেন সায়মাশস্যাবশ্যং কর্ত্তব্যত্বাৎ॥ * ॥ আমাজীর্ণস্য লক্ষণমাহ। তত্রামে গুরুতোৎক্লেশঃ শোথো গণ্ডাক্ষিকূটগঃ। উদ্গারশ্চ যথাভুক্তমবিদগ্ধঃ প্রবর্ত্ততে॥ গুরুতা উদরাঙ্গয়োঃ। উৎক্লেশঃ উপস্থিতং বমনমিব। অক্ষিকূটোঽক্ষিপুটকঃ। অবিদগ্ধঃ অনম্লো নির্গন্ধশ্চ ॥ * ॥ বিদগ্ধাজীর্ণস্য লক্ষণমাহ বিদগ্ধে ভ্রমতৃণ্মূর্চ্ছা পিত্তাচ্চ বিবিধা রুজঃ। উদ্গারশ্চ সধূমাম্লঃ স্বেদো দাহশ্চ জায়তে॥ বিবিধা রুজঃ ওষচোষদাহাদয়ঃ ॥ * ॥ বিষ্টব্ধাজীর্ণস্য লক্ষণমাহ। বিষ্টব্ধে শূলমাধ্মানং বিবিধা বাতবেদনাঃ॥ মলবাতাপ্রবৃত্তিশ্চ স্তম্ভো মোহোঽঙ্গপীড়নং। বাতবেদনাঃ তোদভেদাদয়ঃ॥ স্তম্ভো গাত্রাণাং। মোহো মূর্চ্ছা ॥ * ॥ রসশেষাজীর্ণস্য লক্ষণমাহ। রসশেষেঽন্নবিদ্বেষো হৃদয়াশুদ্ধিগৌরবে ॥ * ॥ এতস্য উপদ্রবানাহ। মূর্চ্ছা প্রলাপো বমথুঃ প্রসেকঃ সাদনং ভ্রমঃ। উপদ্রবা ভবন্ত্যেতে মৃতিশ্চ রসশেষতঃ॥*॥ অতিশয়িতেভ্যঃ আমাদ্যজীর্ণেভ্যো বিসূচ্যাদিরোগানাহ। আমং বিদগ্ধং বিষ্টব্ধমিত্যজীর্ণং যদীরিতং। বিসূচ্যলসকৌ তস্মাদ্ভবেচ্চাপি বিলম্বিকা॥ নাত্র যথাসংখ্যং তদা বিষ্টব্ধাদ্বিলম্বিকা ভবিতুমর্হতি। সা চ কফবাতাভ্যাং ভবতীত্যেকৈকতোঽজীর্ণাদ্বিসূচ্যাদিত্রয়োৎপত্তিঃ॥*॥ বিসূচ্যাদিনিরুক্তিমাহ। সূচীভিরিব গাত্রাণি তদ্বৎসন্তিষ্ঠতেঽনিলঃ। যত্রাজীর্ণেন সা বৈদ্যৈর্ব্বিসূচীতি নিগদ্যতে ॥ * ॥ বিসূচ্যা নিদানমাহ। ন তাং পরিমিতাহারা লভন্তে বিদিতাগমাঃ। মূঢ়াস্তামজিতাত্মানো লভন্তেঽশনলোলুপাঃ॥ বিদিতাগমাঃ জ্ঞাতায়ুর্ব্বেদাঃ॥ * ॥ বিসূচ্যা লক্ষণমাহ। মূর্চ্ছাতিসারো বমথুঃ পিপাসা শূলং ভ্রমোদ্বেষ্টনজৃম্ভদাহাঃ। বৈবর্ণ্যকম্পৌ হৃদয়ে রুজশ্চ ভবন্তি তস্যাং শিরসশ্চ ভেদঃ॥ উদ্বেষ্টনং হস্তপাদয়োঃ। শিরসো ভেদঃ শিরঃশূলং॥*॥ বিসূচ্যা উপদ্রবানাহ। নিদ্রানাশোঽরতিঃ কম্পো মূত্রাঘাতো বিসংজ্ঞতা। অমী উপদ্রবা ঘোরাঃ বিসূচ্যাঃ পঞ্চ দারুণাঃ। অমী উপদ্রবাঃ ঘোরা অমী নিদ্রানাশাদয়ঃ উপদ্রবাঃ সর্ব্বেষামেব রোগাণাং ঘোরা ভয়ঙ্করাঃ। বিসূচ্যাঃ পঞ্চ দারুণা বিসূচ্যাস্তু পঞ্চাপি যদি স্যুস্তদা দারুণাঃ প্রাণভয়ঙ্করাঃ॥ * ॥ অলসকলক্ষণমাহ। কুক্ষিরানহ্যতেঽত্যর্থং প্রতাম্যেৎ পরিকুজতি। নিরুদ্ধো মারুতশ্চৈব কুক্ষাবুপরি ধাবতি॥ বাতবর্চো নিরোধশ্চ যস্যাত্যর্থং ভবেদপি। তস্যালসকমাচষ্টে তৃষ্ণোদ্গারৌ চ যস্য তু॥ আনহ্যতে আধ্মায়তে। প্রতাম্যেৎ গ্লায়তি। পরিকূজতি আর্ত্তনাদং করোতি। কুক্ষৌ অজীর্ণেন নিরুদ্ধো মারুতঃ উপরি ধাবতি হৃদয়কণ্ঠাদিকং গচ্ছতীত্যর্থঃ। কাশ্যপস্ত্বাহ।

নাধো যাতি ন চাপ্যূর্দ্ধমাহারো ন চ পচ্যতে। কোষ্ঠে স্থিতোঽলসীভূতস্ততোঽসাবলসঃ স্মৃতঃ ॥ * ॥ বিসূচ্যলসয়োররিষ্টমাহ। যঃ শ্যাবদন্তৌষ্ঠনখোঽল্পসংজ্ঞঃ ছর্দ্দ্যর্দ্দিতোঽভ্যন্তরযাতনেত্রঃ। ক্ষামস্বরঃ সর্ব্ববিমুক্ত-সন্ধির্যায়ান্নরঃ সোঽপুনরাগমায় ॥ সর্ব্ব-বিমুক্তসন্ধিঃ সর্ব্বে বিমুক্তাঃ শিথিলীভূতাঃ সন্ধয়ো যস্য সঃ ॥ * ॥ বিলম্বিকায়া লক্ষণ-মাহ। দুষ্টঞ্চ ভুক্তং কফমারুতাভ্যাং প্রব-র্ত্ততে নোর্দ্ধমধশ্চ যত্র। বিলম্বিকাং তাং ভৃশদুশ্চিকিৎসামাচক্ষতে শাস্ত্রবিদঃ পুরাণাঃ॥ ভৃশদুশ্চিকিৎসাং প্রত্যাখ্যায়োপ-চরণীয়ং। ইয়মসাধ্যেবেতি জেজ্জটঃ ॥ * ॥ জীর্ণস্যাহারস্য লক্ষণমাহ। উদ্গারশুদ্ধিরুৎ-সাহো বেগোৎসর্গো যথোচিতং। লঘুতা ক্ষুৎপিপাসে চ জীর্ণাহারস্য লক্ষণং ॥*॥*॥ অথ চিকিৎসা। হরীতকী তথা শুণ্ঠী ভক্ষ্য-মাণা গুড়েন বা। সৈন্ধবেন যুতা বা স্যাৎ সাতত্যেনাগ্নিদীপনী॥ গুড়েন শুণ্ঠীমথবোপ-কুল্যাং পথ্যাং তৃতীয়ামথ দাড়িমং বা। আমেষ্বজীর্ণেষু গুদাময়েষু বর্চ্চো বিবন্ধেষু চ নিত্যমদ্যাৎ ॥ ব্যোষং দন্তী ত্রিবৃচ্চিত্রং কৃষ্ণামূলং বিচূর্ণিতং। তচ্চূর্ণং গুড়সং-মিশ্রং ভক্ষয়েৎ প্রাতরুত্থিতঃ॥ এতদ্‌গুড়া-ষ্টকং নাম বলবর্ণাগ্নিবর্দ্ধনং। শোথোদাবর্ত্ত-শূলঘ্নং প্লীহপাণ্ড্বাময়াপহং ॥ সর্ব্বচূর্ণসমো গুড়ো দেয়ঃ। কেচিত্তু দ্বিগুণং গুড়ং দত্ত্বা গুটিকাং কুর্ব্বন্তি। রেচকোঽয়ং যোগঃ। গুড়াষ্টকং ॥ * ॥ দহনাজমোদসৈন্ধবনাগর-মরিচানি চাম্লতক্রেণ। সপ্তাহাদগ্নিকরং

পাণ্ডুর্শোনাশনং পরমং ॥ ঔষধমিত্য-ধ্যাহার্য্যং। তত্রামে বমনং কার্য্যং বিদগ্ধে লঙ্ঘনং হিতং। বিষ্টব্ধে স্বেদনং শস্তং রসশেষে শয়ীত চ॥ বচা লবণতোয়েন বান্তিরামে প্রশস্যতে। কণাসিন্ধুবচাকল্কং পীত্বা বা শিশিরাম্ভসা॥ জলমত্র সরাব মাত্রং। বচা কর্ষার্দ্ধমিতা। সৈন্ধবং কর্ষার্দ্ধ-মিতং। দ্বয়োশ্চূর্ণযুতেন জলেন পীতেন। কণাদিকল্কং বা পীত্বা বান্তিরামে প্রশ-স্যতে ইত্যনেনান্বয়ঃ ॥ * ॥ ধান্যনাগর-সিদ্ধং বা তোয়ং দদ্যাদ্বিচক্ষণঃ। আমা জীর্ণপ্রশমনং শূলঘ্নং বস্তিশোধনং॥ ভবেদ্ যদি প্রাতরজীর্ণশঙ্কা তদাভয়াং নাগর-সৈন্ধবাভ্যাং। বিচূর্ণিতাং শীতজলেন ভুক্ত্বা ভুঞ্জীত নিঃশঙ্কো মিতমন্নকালে ॥ বিদহ্যতে যস্য তু ভুক্তমাত্রং দংদহ্যতে হৃচ্চ গলশ্চ যস্য। দ্রাক্ষাং সিতামাক্ষিকসংপ্রযুক্তাং লীঢ়্বাভয়াং চাতিসুখং লভেত ॥ ত্রিকটুক মজমোদা সৈন্ধবং জীরকে দ্বে সমধরণ ধৃতানামষ্টমো হিঙ্গুভাগঃ। প্রথমকবলভুক্তং সর্পিষা চূর্ণমেতজ্জনয়তি জঠরেঽগ্নিং বাত-রোগাংশ্চ হন্তি॥ অজমোদাত্র যবানী। অন্তঃসংমার্জ্জকত্বাৎ। জীরকে দ্বে শুক্লং কৃষ্ণঞ্চ। ধরণমত্র মানং। তেন সমধরণং ধৃতানাং তুল্যমানং গৃহীতানাং শুণ্ঠ্যাদীনাং ভাগাঃ সপ্ত। তত্রাষ্টমো ভাগো হিঙ্গুনঃ। হিঙ্গ্বষ্টকং ॥ * ॥ শুদ্ধং সূতং গন্ধকঞ্চ পলমানং পৃথক্ পৃথক্। হরীতকী চ দ্বিপলা নাগরস্ত্রিপলঃ স্মৃতঃ ॥ কৃষ্ণা চ মরিচং তদ্বৎ সিন্ধূত্থং ত্রিপলং মতং। চতুষ্পলা চ

বিজয়া মর্দ্দয়েন্নিম্বুকদ্রবৈঃ ॥ পুটানি সপ্ত দেয়ানি ঘর্ম্মমধ্যে পুনঃ পুনঃ । অজীর্ণারিরয়ং প্রোক্তঃ সদ্যো দীপনপাচনঃ ॥ ভক্ষয়েদ্দ্বিগুণং ভক্ষ্যং পাচয়েদ্ভেদয়েদপি। অজীর্ণারিঃ ॥ * ॥ দ্বৌ ক্ষারৌ চিত্রকং পাঠা করঞ্জং লবণানি চ । সূক্ষ্মৈলাপত্রকং ভার্গী কৃমিঘ্নং হিঙ্গু পৌষ্করং ॥ শটী দার্ব্বী ত্রিবৃন্মুস্তং বচা চেন্দ্রযবাস্তথা। বৃক্ষাম্লং জীরকং ধাত্রী শ্রেয়সী চোপকুঞ্চিকা ॥ অম্লবেতসমম্লীকা যবানী দেবদারু চ । অভয়াতিবিষা শ্যামা হপুষারগ্বধং সমং ॥ তিলমুষ্ককশিগ্রূণাং কোকিলাক্ষপলাশয়োঃ । ক্ষারাণি লৌহকিট্টঞ্চ তপ্তং গোমূত্রসেচিতং ॥ সূক্ষ্মচূর্ণানি কৃত্বা তু সমভাগানি কারয়েৎ । মাতুলুঙ্গরসেনৈতদ্ভাবয়েদ্দিবসত্রয়ং ॥ দিনত্রয়ন্তু শুক্তেন তথার্দ্রকরসেন চ । অত্যগ্নিকারকং চূর্ণং প্রদীপ্তাগ্নিসমপ্রভং ॥ উপযুক্তং বিধানেন নাশয়ত্যচিরাদ্গদান্ । অজীর্ণমথ গুল্মাংশ্চ প্লীহানং গুদজানি চ ॥ উদরাণ্যন্ত্রবৃদ্ধিঞ্চ অষ্ঠীলাং বাতশোণিতং । প্রণুদত্যুল্বনান্দোষানষ্টমগ্নিং প্রদীপয়েৎ ॥ দ্বৌ ক্ষারৌ স্বর্জ্জীকা যবক্ষারশ্চ । লবণানি পঞ্চ । বৃক্ষাম্লং বিষাম্বিল ইতি লোকে । শ্রেয়সী হরীতকী । উপকুঞ্চিকা মগরৈলা । অম্লবেতসাভাবে চুক্রং দাতব্যং । শ্যামা সাগু । মুষ্ককঃ মোষ ইতি লোকে । কোকিলাক্ষঃ কোইলষা ইতি লোকে ।

বৃহদগ্নিমুখচূর্ণং ॥ * ॥ স্নুহ্যর্কচিত্রকৈরণ্ডবরুণং সপুনর্নবং । তিলাপামার্গকদলীপলাশং তিন্তিলী তথা ॥ গৃহীত্বা জ্বালয়েদেতৎ প্রস্থং ভস্মাখিলঞ্চ তৎ । জলাঢকে বিপক্তব্যং যাবৎ পাদাবশেষিতং ॥ সুপ্রসন্নং বিনিস্রাব্য লবণপ্রস্থসংযুতং । পক্কং নির্ধূমকঠিনং সূক্ষ্মচূর্ণীকৃতং পুনঃ ॥ যবানীজীরকব্যোষস্থূলজীরকহিঙ্গুভিঃ। পৃথগর্দ্ধপলৈরেভিশ্চূর্ণিতৈস্তৎ বিমিশ্রয়েৎ ॥ আর্দ্রকস্বরসেনাপি ভাবয়েচ্ছোষয়েৎ পুনঃ। শীতোদকেন তচ্চূর্ণং পিবেৎ প্রাতর্হি মাত্রয়া ॥ তস্মিন্ জীর্ণেঽন্নমশ্নীয়াদ্যূষৈর্জাঙ্গলজৈ রসৈঃ । ঈষদম্লৈঃ সলবণৈঃ সুখোষ্ণৈর্বহ্নিদীপনৈঃ ॥ এতেনাগ্নির্ব্বিবর্দ্ধেত বলমারোগ্যমেব চ । তত্রানুপানং শস্তং হি তক্রং বা ভোজনং হিতং ॥ মন্দাগ্ন্যর্শোবিকারেষু বাতশ্লেষ্মাময়েষু চ । সর্ব্বাঙ্গশোথরোগেষু শূলগুল্মোদরেষু চ ॥ অশ্মর্য্যাং শর্করায়াঞ্চ বিন্মূত্রানিলরোগিষু।

বৈশ্বানরক্ষারঃ ॥ * ॥ সামুদ্রং লবণং গ্রাহ্যমষ্টকর্ষমিতং বুধৈঃ। সৌবর্চ্চলং পঞ্চকর্ষং বিড়সৈন্ধবধান্যকং ॥ পিপ্পলী পিপ্পলীমূলং পত্রকং কৃষ্ণজীরকং । তালীশং কেশরং চব্যমম্লবেতসকং তথা ॥ দ্বিকর্ষমাত্রাণ্যেতানি প্রত্যেকং কারয়েদ্বুধঃ । মরিচং জীরকং বিশ্বমেকৈকং কর্ষমাত্রকং ॥ দাড়িমং স্যাচ্চতুঃকর্ষং ত্বগেলে চার্দ্ধকর্ষকে । এতচ্চূর্ণীকৃতং সর্ব্বং লবণং ভাস্করাভিধং ॥ ভক্ষয়েচ্ছাণমানং তত্তক্রমস্তককাঞ্জিকৈঃ । বাতশ্লেষ্মভবং গুল্মং প্লীহানমুদরং ক্ষয়ং ॥ অর্শাংসি গ্রহণীং কুষ্ঠং বিবন্ধঞ্চ ভগন্দরং । শূলং শোথং

শ্বাসকাসাবামদোষঞ্চ হৃদ্রুজং ॥ অশ্মরীং শর্করাঞ্চাপি পাণ্ডুরোগং কৃমীনপি । মন্দাগ্নিং নাশয়েদেতদ্দীপনং পাচনং পরং ॥ হিতায় সর্ব্বলোকানাং ভাস্করেণৈতদীরিতং । হন্যাৎ সর্ব্বাণ্যজীর্ণানি ভুক্তমাত্রমসংশয়ং ॥ নিম্বুরসাদিকং দত্ত্বা গুটিকামপ্যেকে কুর্ব্বন্তি ॥ অথ দাড়িমস্য বীজানাং চূর্ণং কর্ষচতুষ্টয়মিতং দেয়ং । ভাস্করলবণচূর্ণং ॥ * ॥ সৈন্ধবং সমূলমগধা চব্যানলনাগরং পথ্যা । ক্রমবৃদ্ধিমগ্নিবৃদ্ধ্যৈ বড়বানলনামচূর্ণং স্যাৎ ॥ বড়বানলচূর্ণং ॥ * ॥ পথ্যানাগরকৃষ্ণাকরঞ্জবিল্বাগ্নিভিঃ সিতাতুল্যৈঃ । বড়বানল ইব জরয়তি বহুগুর্ব্বপি ভোজনং চূর্ণং ॥ দ্বিতীয়ং বড়বানলচূর্ণং ॥ * ॥ এলাত্বগ্ভাগপুষ্পাণাং মাত্রোত্তরবিবর্দ্ধিতা । মরিচং পিপ্পলী শুণ্ঠী চতুঃপঞ্চ ষড়ুত্তরং ॥ দ্রব্যাণ্যেতানি যাবন্তি তাবতী সিতশর্করা । চূর্ণমেতৎ প্রয়োক্তব্যমগ্নিসন্দীপনং পরং ॥ সমশর্করচূর্ণং ॥ * ॥ ইন্দ্রাসনং সপ্তপলং ত্রিফলায়াঃ পলত্রয়ং ॥ পলত্রয়ং ত্র্যূষণস্য সিতায়াশ্চ চতুষ্পলং ॥ অমৃতা শতপুত্রী চ তথা কৃষ্ণাপরাজিতা । আসাং চূর্ণং সমাদায় পলমাত্রং পৃথক্ পৃথক্ ॥ ভাবয়েদেকতঃ সর্ব্বং ভৃঙ্গরাজরসেন তু । স্বভাবিকমিদং চূর্ণং স্নিগ্ধভাণ্ডে বিনিক্ষিপেৎ ॥ বিলিহন্ মধুসর্পির্ভ্যাং মন্দাগ্নেঃ সহসা নরঃ । মুচ্যতে গ্রহণীরোগাৎ গুদরোগাৎ সজাঠরাৎ ॥ মেহং কুষ্ঠঞ্চ বীসর্পবাতরোগান্ সশোণিতান্ । ন চাত্র পরিহারোঽস্তি ভোজনং সর্ব্বকামিকং ॥ রোগানীকপ্রশান্ত্যর্থং মুনিভিঃ পরিকীর্ত্তিতং । অস্যাভ্যাসাৎ বলং বীর্য্যং পুষ্টিদৃষ্টিযশস্তথা ॥ ত্রিসপ্তাহপ্রয়োগেণ জায়তে নাত্র সংশয়ঃ । জ্বালামুখীচূর্ণং ॥ * ॥ অথ অজীর্ণে রসাঃ । দ্বিপলং গন্ধকং শুদ্ধং পলমেকন্তু পারদং । মৃতং লোহং তথা তাম্রং কর্ষদ্বয়মিতং পৃথক্ ॥ সংচূর্ণ্য সর্ব্বং সংমিশ্র্য দ্রাবয়িত্বাগ্নিযোগতঃ । সম্যগ্‌দ্রুতং সমস্তং তৎ পঞ্চাঙ্গুলদলে ক্ষিপেৎ ॥ পুনঃ সংচূর্ণ্য তৎ সর্ব্বং লোহপাত্রে নিধায় চ । জম্বীরস্য রসং তত্র পূতং পলশতং ক্ষিপেৎ চুল্ল্যাং নিবেশ্য তদ্‌যত্নান্মৃদুনা বহ্নিনা পচেৎ । রসে তস্মিন্ ঘনীভূতে তৎ সংশোষ্য বিচূর্ণয়েৎ ॥ পঞ্চকোলকষায়স্য চুক্রেণ সহিতস্য চ । ভাবনাস্তত্র দাতব্যাঃ পঞ্চাশৎসংখ্যয়া শনৈঃ ॥ ভৃষ্টটঙ্কণচূর্ণেন তুল্যেন সহ মেলয়েৎ । মরিচেনাপি তুল্যেন তদর্দ্ধেন বিড়েন চ ॥ ভাবয়েৎ সপ্তকৃত্বস্তচ্চণকাম্লজলেন চ । ততঃ সংশোষ্য সংপিষ্য কূপীমধ্যে নিধাপয়েৎ ॥ রসঃ ক্রব্যাদনামায়ং ভৈরবানন্দযোগিনা । উক্তঃ সিংহলরাজায় বহুমাংসাশিনে পুরা ॥ ভক্ষয়েদ্ভোজনস্যান্তে মাষদ্বয়মিতং রসং । ভক্ষয়িত্বা রসং পশ্চাৎ পিবেত্তক্রং সসৈন্ধবং ॥ অতীবগুরু যদ্ভুক্তমতিমাত্রমথাপি বা । তৎসর্ব্বং জীর্য্যতি ক্ষিপ্রং রসস্যৈতস্য ভক্ষণাৎ ॥ শূলং গুল্মঞ্চ বিষ্টম্ভং প্লীহানমুদরং তথা । রসঃ ক্রব্যাদনামায়ং বিনিহন্তি ন সংশয়ঃ ॥ ক্রব্যাদো রসো-

হজীর্ণে ॥ * ॥ রসেন্দ্রচিন্তামণৌ রস-রত্নপ্রদীপে রসপ্রদীপে চ ॥ ক্ষারত্রয়ং সূতগন্ধৌ পঞ্চকোলমিদং শুভং। সর্ব্বে-স্তুল্যা জয়া ভৃষ্টা তদর্দ্ধা শিগ্রুজা জটা ॥ এতৎ সর্ব্বং জয়াশিগ্রুবহ্নিমার্কবজৈ-র্দ্রবৈঃ। ভাবয়েত্রিদিনং ঘর্ম্মে ততো লঘুপুটে ক্ষিপেৎ ॥ সপ্তধার্দ্রদ্রবৈর্ঘৃষ্টো রসো জ্বালানলো ভবেৎ। নিষ্কোহস্য মধুনা লীঢ়োঽনুপানং গুড়নাগরং ॥ হন্ত্যজীর্ণ-মতীসারং গ্রহণীমগ্নিমার্দ্দবং। শ্লেষ্মহৃল্লাস-বমনমালস্যমরুচিং জবাৎ ॥ পঞ্চকোলং। পিপ্পলী পিপ্পলীমূলং চব্যচিত্রকনাগরং। জয়াত্র বিজয়া। মার্কবো ভৃঙ্গরাজঃ। লঘু-পুটে গজপুটে। আর্দ্রমার্দ্রকং। নিষ্কঃ টঙ্কঃ। জ্বালানলো রসোঽজীর্ণে॥ * ॥ রস-প্রদীপে॥ টঙ্কণং রসগন্ধৌ চ সমং ভাগত্রয়ং বিষাৎ। কপর্দ্দঃ স্বর্জ্জিকাক্ষারৌ মাগধী বিশ্ব-ভেষজং ॥ পৃথক্ পৃথক্ কর্ষমাত্রং বসুভাগ-মিহোষণং। জম্বীরাম্লৈর্দ্দিনং ঘৃষ্টং ভবে-দগ্নিকুমারকঃ ॥ বিসূচীশূলবাতাদিবহ্নি-মান্দ্যপ্রশান্তয়ে। ক্ষারো যবক্ষারঃ। অগ্নি-কুমারো রসো বিসূচ্যাদ্যজীর্ণে ॥*॥ রসেন্দ্র-চিন্তামণৌ ॥ শুদ্ধসূতং গন্ধকঞ্চ পলমানং পৃথক্ পৃথক্। হরীতকী চ দ্বিপলা নাগরস্ত্রি-পলঃ স্মৃতঃ॥ কৃষ্ণা চ মরিচং তদ্বৎ সিন্ধুত্থং ত্রিপলং মতং। চতুষ্পলা চ বিজয়া মর্দয়ে-ন্নিম্বুকদ্রবৈঃ॥ পুটানি সপ্ত দেয়ানি ঘর্ম্ম-মধ্যে পুনঃপুনঃ। অজীর্ণারিরয়ং প্রোক্তঃ সদ্যো দীপনপাচনঃ॥ ভক্ষয়েদ্দ্বিগুণং ভক্ষ্যং পাচয়েদ্রেচয়েদপি। অজীর্ণারিঃ ॥ * ॥

পারদামৃতলবঙ্গগন্ধকং ভাগযুগ্মমরিচেন মিশ্রিতং। তত্র জাতিফলমর্দ্ধভাগিকং তিন্তিড়ীফলরসেন মর্দ্দিতং॥ বহ্নিমান্দ্যদশ-বক্ত্রনাশনো রামবাণ ইতি বিশ্রুতো রসঃ। সংগ্রহ গ্রহণি কুম্ভকর্ণকমানবাত খরদূষণং জয়েৎ ॥ দীয়তে তু চণকাম্বুমানতঃ সদ্য এব জঠরাগ্নিদীপনঃ। রোচকঃ কফকুলান্ত-কারকঃ শ্বাসকাসবমিজন্তুনাশনঃ॥ পারা-ভাগ ১ বিষভাগ ১ লবঙ্গভাগ ১ গন্ধক-ভাগ ১ মরিচভাগ ৮ জায়ফলভাগ ২। রাম বাণরসোঽজীর্ণে ॥ * ॥ রসেন্দ্রচিন্তামণৌ পলং চিঞ্চাক্ষারঃ পলপরিমিতং পঞ্চলবণং দ্বয়ং সম্যক্পিষ্টং ভবতি লঘু নিম্বূফল-রসৈঃ। ততস্তপ্তং তস্মিন্ পলপরিমিতং শঙ্খশকলং ক্ষিপেদ্বারান্ সপ্ত দ্রবতি তদা নৈব বিধিনা ॥ পলপ্রমাণং কটুকত্রয়ঞ্চ পলার্দ্ধমানেন চ হিঙ্গুভাগঃ। বিষং পলদ্বাদশ-ভাগযুক্তং তাবান্রসো গন্ধক এব চোক্তঃ ॥ বদরাস্থিপ্রমাণেন বটীমেতস্য কারয়েৎ। ভক্ষয়েৎ সর্ব্বদা সা স্যাৎ সর্ব্বাজীর্ণপ্রশা-ন্তয়ে॥ সর্ব্বোদরেষু শূলেষু বিসূচ্যাং বিবিধে-ষু চ। অগ্নিমান্দ্যেষু গুল্মেষু সদা শঙ্খবটী হিতা॥ শঙ্খবটী অজীর্ণে॥ * ॥ রসপ্রদীপে॥ স্নুগর্কচিঞ্চাপামার্গরম্ভাতিলপলাশজান্। লবণান্ ভিষগা দদ্যাৎ প্রত্যেকং পলমাত্রয়া॥ লবণানি পৃথক্ পঞ্চ গ্রাহ্যাণি পলমাত্রয়া। স্বর্জ্জিকা চ যবক্ষারষ্টঙ্কণং ত্রিতয়ং পলং॥ সর্ব্বং ত্রয়োদশপলং সূক্ষ্মচূর্ণং বিধায় তু। নিম্বূফলরসে প্রস্থসংমিতে তৎপরিক্ষিপেৎ॥ তত্র শঙ্খস্য শকলং পলং বহ্নৌ প্রতাপ্য

তু। বারান্নির্ব্বাপয়েৎ সপ্ত সর্ব্বং দ্রবতি তদ্‌যথা ॥ নাগরং ত্রিপলং গ্রাহ্যং মরিচঞ্চ পলদ্বয়ং। পিপ্পলী পলমানা স্যাৎ পলার্দ্ধং ভৃষ্টহিঙ্গুনঃ॥ গ্রন্থিকং চিত্রকং চাপি যবানী জীরকং তথা। জাতীফলং লবঙ্গঞ্চ পৃথক্ কর্ষদ্বয়োন্মিতং॥ রসো গন্ধো বিষঞ্চাপি টঙ্কণঞ্চ মনঃশিলা। এতানি কর্ষমাত্রাণি সর্ব্বং সংচূর্ণ্য মিশ্রয়েৎ॥ শরাবার্দ্ধেন চুক্রেণ সংনীয় বটিকাঞ্চরেৎ। মাষপ্রমাণাং সা বৈদ্যৈর্ব্বৃহচ্ছঙ্খবটী স্মৃতা॥ সর্ব্বাজীর্ণপ্রশমনী সর্ব্বশূলনিবারিণী। বিসূচ্যলসকাদীনাং সদ্যো ভবতি নাশিনী॥ বৃহচ্ছঙ্খবটিকা অজীর্ণে॥ * ॥ টঙ্কণকণামৃতানাং সহিঙ্গুলানাং সমভাগাঃ। মরিচস্য ভাগযুগলং নিম্বুনীরৈর্ব্বটী কার্য্যা॥ বটিকাং কলায়সদৃশীমেকাং দ্বে বা সমশ্নীয়াৎ। সজ্বরমজীর্ণশান্ত্যৈ বহ্নের্ব্বৃদ্ধ্যৈ কফধ্বস্ত্যৈ॥ অজীর্ণকণ্টকো রসঃ॥ * ॥ জলপীতমপামার্গমূলং হন্যাদ্বিসূচিকাং। সতৈলং কারবেল্ল্যম্বু বিধুনোতি বিসূচিকাং॥ বালমূলস্য নিক্বাথঃ পিপ্পলীচূর্ণসংযুতঃ। বিসূচীনাশনঃ শ্রেষ্ঠো জঠরাগ্নিবিবর্দ্ধনঃ॥ বিল্বনাগরনিঃক্বাথো হন্যাচ্ছর্দ্দিবিসূচিকাং। বিল্বনাগরকৈড়র্য্যক্বাথস্তদধিকো গুণৈঃ॥ কৈড়র্য্যং কট্‌ফলং। ব্যোষং করঞ্জস্য ফলং হরিদ্রে মূলং সমাবাপ্য চ মাতুলুঙ্গ্যাঃ। ছায়াবিশুষ্কা গুটিকাঃ কৃতাস্তা হন্যুর্ব্বিসূচীং নয়নাঞ্জনেন॥ মাতুলুঙ্গী মধুকর্ক্কটী। অনুভূতমিদং॥ * ॥ অপামার্গস্য পত্রাণি মরিচানি সমানি চ। অশ্বস্য লালয়া পিষ্টান্যঞ্জনাদ্ঘ্নন্তি সূচিকাং॥ বিসূচ্যামতিবৃদ্ধায়াং তক্রং দধিসমং জলং। নারিকেলাম্বু পেয়ম্বা প্রাণত্রাণায় যোজয়েৎ॥ ত্বক্পত্ররাস্নাগুরুশিগ্রুকুষ্ঠৈরম্লপ্রপিষ্টৈঃ সবচাশতাহ্বৈঃ। উদ্বর্ত্তনং খল্লিবিসূচিকাঘ্নং তৈলং বিপক্কঞ্চ তদর্থকারি॥ ত্বক্‌তৈলং কুষ্ঠসৈন্ধবয়োঃ কল্কঃ চুক্রং তৈলং তু তচ্ছৃতং। বিসূচ্যাং মর্দ্দনং তেন খল্লীশূলনিবারণং॥ কুষ্ঠতৈলং॥ * ॥ পিপাসায়াং তথোৎক্লেশে লবঙ্গস্যাম্বু শস্যতে। জাতীফলস্য বা শীতং শৃতং ভদ্রঘনস্য বা॥ * ॥ উৎক্লেশলক্ষণং। উৎক্লিশ্যান্নং ন নির্গচ্ছেৎ প্রসেকষ্ঠীবনেরিতং। হৃদয়ং পীড্যতে চাস্য তমুৎক্লেশং বিনির্দ্দিশেদিতি॥ সরুগানদ্ধমুদরমম্লপিষ্টৈঃ প্রলেপয়েৎ। দারুহৈমবতীকুষ্ঠশতাহ্বাহিঙ্গুসৈন্ধবৈঃ॥ হৈমবতী শ্বেতবচা। দারুষট্‌কং॥ * ॥ তক্রেণ যুক্তং যবচূর্ণমুষ্ণং সক্ষারমার্ত্তিং জঠরে নিহন্যাৎ। স্বেদো ঘটৈর্ব্বা বহুবাষ্পপূর্ণৈরুষ্ণৈস্তথান্যৈরপি পাণিতাপৈঃ॥ বিলম্বিকালসকয়োরয়মেব ক্রিয়াক্রমঃ। অতএবৈতয়োরুক্তং পৃথক্ নেহ চিকিৎসিতং॥ তদ্ভস্মকং গুরুস্নিগ্ধসান্দ্রমন্দহিমস্থিরৈঃ। অন্নপানৈর্নয়েচ্ছান্তিং পিত্তঘ্নৈশ্চ বিরেচনৈঃ॥ অত্যুদ্ধতাগ্নিশান্ত্যৈ মাহিষদধিদুগ্ধসর্পীংষি। সংসেবেত যবাগূং সমধুচ্ছিষ্টাং সসর্পিষ্কাং॥ অসকৃৎ পিত্তহরণং পায়সং প্রতিভোজনং। শ্যামা ত্রিবৃদ্ধিপক্কঞ্চ পয়ো দদ্যাদ্বিরেচনং॥ যৎকিঞ্চিৎ মধুরং মেধ্যং শ্লেষ্মলং গুরু ভোজনং। সর্ব্বং তদত্যগ্নি-

হিতং ভুক্ত্বা প্রস্বপনং দিবা ॥ সিততণ্ডুলং
সিতকমলং ছাগীক্ষীরেণ পায়সং সিদ্ধং।
ভুক্ত্বা ঘৃতেন পুরুষো দ্বাদশদিবসাদ্বুভু-
ক্ষিতো ভবেৎ ॥*॥ অথ বিশিষ্টদ্রব্যাজীর্ণে
বিশিষ্টপাচনদ্রব্যমাহ। অলং পনসপাকায়
ফলং কদলসম্ভবং। কদলস্য তু পাকায়
বুধৈরভিহিতং ঘৃতং ॥ ঘৃতস্য পরিপাকায়
জম্বীরস্য রসো হিতঃ। নারিকেলফলতাল-
বীজয়োঃ পাচকং সপদি তণ্ডুলং বিদুঃ।
ক্ষীরমাশু সহকারপাচনং চারমজ্জনি
হরীতকী হিতা ॥ মধূকমালূরনৃপাদনানাং
পরূষখর্জ্জূরকপিত্থকানাং। পাকায় পেয়ং
পিচুমর্দ্দবীজং ঘৃতেঽপি তক্রেঽপি তদেব
দেয়ং॥ খর্জ্জূরশৃঙ্গাটকয়োঃ প্রশস্তং বিশ্বৌ-
ষধং কুত্র চ ভদ্রমুস্তং। যজ্ঞাঙ্গবোধিদ্রু-
ফলেষু শীতং প্লক্ষে তথা বার্য্যুষিতং
প্রণীতং ॥ তণ্ডুলেষু পয়সঃ পয়ো হিতং
দীপ্যকস্তু চিপিটে কণাযুতং। ষষ্টিকা দধি-
জলেন জীর্য্যতে কর্কটী চ সুমনেষু
গীর্য্যতে ॥ সুমনেষু গোধূমেষু। গীর্য্যতে
কথ্যতে। গোধূমমাষহরিমন্থসতীলমুদ্গ-
পাকো ভবেৎ ঝটিতি মাতুলপুত্রকেণ।
খণ্ডঞ্চ খণ্ডয়তি মাষভবং ত্বজীর্ণং তৈলং
কুলত্থমথবা বিদধাতি জীর্ণং॥ মাতুলপুত্রকঃ
ধত্তূরফলং। কঙ্গুশ্যামাকনীবারাঃ কুলত্থ-
শ্চাবিলম্বিতং। দধ্নো জলেন জীর্য্যন্তি
বৈদলাঃ কাঞ্জিকেন তু ॥ পিষ্টান্নং শীতলং
বারি কৃশরান্ সৈন্ধবং পচেৎ। মাষেণ্ডরী
নিম্বমূলং পায়সং মুদ্গযূষকৈঃ ॥ বটো-
বেশবারাল্লবঙ্গেন ফেণীশমং পর্পটঃ শিগ্রু-
বীজেন যাতি। কণামূলতো লড্ডুকাপূপ-
শট্টাবিপাকো ভবেচ্ছষ্কুলী মণ্ডয়োশ্চ ॥
বেশবারঃ বেগর ইতি লোকে। তদ্-
যথা। স্নেহো নিশাহিঙ্গুলবঙ্গকৈলাধান্যাক-
জীরার্দ্রকনাগরাণি। অম্লোষণং সৈন্ধবপূর্ণ-
মন্নে যথোচিতং সংস্কৃতয়ে প্রণীতমিতি ॥
শট্টা শট্টকঃ পানকবিশেষঃ। মণ্ডঃ মাণ্ডে
ইতি লোকে। কিমত্র চিত্রং বহুমৎস্যমাংস-
ভোজী সুখী কাঞ্জিকপানতঃ স্যাৎ। ইত্য-
দ্ভুতং কেবলবহ্নিপক্বমাংসেন মৎস্যঃ পরি-
পাকমেতি ॥ আমমাত্রফলং মীনে তদ্বীজং
পিশিতে হিতং। কূর্ম্মমাংসং যবক্ষারা-
চ্ছীঘ্রং পাকমুপৈতি হি ॥ কপোতপারা-
বতনীলকণ্ঠকপিঞ্জলানাং পিশিতানি ভুক্ত্বা।
কাশস্য মূলং পরিপীয় পিষ্টং সুখী ভবেন্ন!
বহুশো হি দৃষ্টং॥ কপোতো ধবলঃ পাণ্ডুঃ।
শাকানি সর্ব্বাণ্যপি যান্তি পাকং ক্ষারেণ
সদ্যস্তিলনালজেন। চঞ্চুকসিদ্ধার্থকবাস্তু-
কানাং গায়ত্রিসারক্কথিতেন পাকঃ ॥ চঞ্চুকং
চেচূরু ইতি লোকে। গায়ত্রী খদিরঃ। পল-
ঙ্কিকাকেমুককারবেল্লীবার্ত্তাকুবংশাঙ্কুরমূল-
কানাং। উপোদিকালাবুপটোলকানাং
সিদ্ধার্থকো মেঘরবস্য পক্তা ॥ মেঘরবঃ
চবরাঙ্গী ইতি লোকে। বিপচ্যতে শূরণকং
গুড়েন তথালুকং তণ্ডুলজোদকেন। পিণ্ডা-
লুকং জীর্য্যতি কোরদূষাৎ কসেরুপাকঃ
কিল নাগরেণ ॥ লবণস্তণ্ডুলতোয়াৎ সর্পি-
র্জম্বীরকাদ্যম্লাৎ। মরিচাদপি তচ্ছীঘ্রং
পাকং যাত্যেব কাঞ্জিকাত্তৈলং ॥ ক্ষীরং
জীর্য্যতি তক্রেণ তদ্গব্যং কোষ্ণমণ্ডকাৎ।

মাহিষং মাণিমস্থেন শঙ্খচূর্ণেন তদ্দধি ॥ মণ্ডুকঃ মাণ্ডে ইতি লোকে ॥ রসালা জীর্য্যতি ব্যোষাৎ খণ্ডং নাগরভক্ষণাৎ। সিতা নাগরমুস্তেন তথেক্ষুশ্চার্দ্রকারসাৎ ॥ জরামিরাগৈরিকচন্দনাভ্যামভ্যেতি শীঘ্রং মুনিভিঃ প্রণীতং। উষ্ণেন শীতং শিশিরেণ চোষ্ণং জীর্ণো ভবেৎ ক্ষারগণস্তথাম্লৈঃ ॥ ইরা মদিরা। তপ্তং তপ্তং হেম বা তারমগ্নৌ তোয়ে ক্ষিপ্তং সপ্তকৃত্বস্তদম্ভঃ। পীত্বাজীর্ণং তোয়জাতং নিহন্যাত্তত্র ক্ষৌদ্রং ভদ্রযুক্তং বিশেষাৎ ॥ তত্র তোয়াজীর্ণে। ইতি জঠরাগ্নিবিকারাজীর্ণবিসূচিকালসবিলম্বিকাচিকিৎসা। ইতি ভাবপ্রকাশঃ ॥

অজীবঃ (ত্রি) মৃতঃ। অবসন্নঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

অজীবনিঃ (স্ত্রী) জীবনাভাবঃ। অকরণিঃ। শাপঃ। যথা। তস্যাজননিরেবাস্তু। ইত্যমরটীকায়াং ভরতঃ॥ অজীবনিস্তব ভূয়াৎ। ইতি মুগ্ধবোধং ॥

অজুগুপ্সিতঃ (ত্রি) অনিন্দিতঃ। যথা। উপবেশ্য তু তান্ বিপ্রানাসনেষ্বজুগুপ্সিতান্। গন্ধমাল্যৈঃ সুরভিভিরর্চ্চয়েদ্দেবপূর্ব্বকং ॥ ইতি মানবে ৩ অধ্যায়ে ২০৯ শ্লোকঃ ॥

অজেয়ঃ (ত্রি) ইতি নঞ্ পূর্ব্বকজিধাতোঃ কর্ম্মণি যপ্রত্যয়ঃ। অজেতব্যঃ। অজয়নীয়ঃ। যথা। অজেয়স্ত্বঞ্চ সংগ্রামে মমাপি হি ভবিষ্যতি। ইতি স্কান্দে কাশীখণ্ডে ২৩ অধ্যায়ঃ।

অজ্যেষ্ঠবৃত্তিঃ (পুং) জ্যেষ্ঠবৃত্তিরহিতঃ। ভ্রাতৃষু পিতৃবদ্বর্ত্তনাভাববান্। যথা। যো জ্যেষ্ঠো জ্যেষ্ঠবৃত্তিঃ স্যান্মাতেব স পিতেব সঃ। অজ্যেষ্ঠবৃত্তির্যস্তু স্যাৎ স সম্পূজ্যস্তু বন্ধুবৎ ॥ ইতি মানবে ৯ অধ্যায়ে ১১০ শ্লোকঃ ॥ যো জ্যেষ্ঠোঽনুজেষু ভ্রাতৃষু পিতৃবদ্বর্ত্তে স পিতেব মাতেব অগর্হণীয়ো ভবতি। পুনস্তথা ন বর্ত্তেত স মাতুলাদিবদর্চ্চনীয়ঃ ইতি তট্টীকায়াং কুল্লূকভট্টঃ ॥

অজৈকপাৎ [ দ্ ] (পুং) একাদশরুদ্রান্তর্গতরুদ্রবিশেষঃ। ইতি শব্দমালা ॥

অজৈকপাদঃ (পুং) রুদ্রবিশেষঃ। ইতি জটাধরঃ॥ ছন্দোঽনুরোধাদসন্ধিরপি বিষ্ণুপুরাণে চন্দ্রকলাপপ্রস্তাবে অজএকপাদিতি ॥

অজ্জুকা (স্ত্রী) নাট্যোক্তৌ বেশ্যা। ইত্যমরঃ ॥

অজ্ঝটা (স্ত্রী) ভূম্যামলকী। ইত্যমরঃ ॥

অজ্ঝলং (ক্লী) ফলকং। ঢাল ইতি খ্যাতং। ইতি হেমচন্দ্রঃ ॥

অজ্ঞঃ (ত্রি) জড়ঃ। মূর্খঃ। ইত্যমরঃ ॥

অজ্ঞানং (ক্লী) বিরুদ্ধজ্ঞানং। তৎপর্য্যায়ঃ। অবিদ্যা ২ অহম্মতিঃ ৩। ইত্যমরঃ ॥ সৃষ্টিকালে ব্রহ্মা প্রথমং পঞ্চপ্রকারমজ্ঞানং সসর্জ। যথা। তমঃ ১ মোহঃ ২ মহামোহঃ ৩ তামিস্রং ৪ অন্ধতামিস্রং ৫। ইতি শ্রীভাগবতং ॥ বেদান্তমতে সদসদ্ভ্যামনির্ব্বচনীয়ং ত্রিগুণাত্মকং ভাবরূপং জ্ঞানবিরোধি যৎকিঞ্চিৎ। জ্ঞানরহিতে ত্রি ॥

অঞ্চতিঃ (পুং) বায়ুঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

অঞ্চলঃ (পুং) বস্ত্রপ্রান্তভাগঃ। আঁচল ইতি ভাষা। ইতি হলায়ুধঃ ॥

অঞ্চিতঃ (ত্রি) পূজিতঃ। ইত্যমরঃ ॥

অঞ্চিতভ্রূঃ (স্ত্রী) সুন্দরভ্রূযুক্তনারী। ইতি স্ত্রীপর্য্যায়ে রাজনির্ঘণ্টঃ॥

অঞ্জনং (ক্লী) ম্রক্ষণং। গমনং। ব্যক্তীকরণং। ইত্যনট্‌প্রত্যয়ান্তান্‌জধাত্বর্থঃ। কজ্জলং। তত্তু ষড়্‌বিধং। যথা। সৌবীরং জাম্বলং তুত্থং ময়ূরগ্রীকরং তথা। দর্ব্বিকা নীলমেঘশ্চ অঞ্জনানি ভবন্তি ষট্‌॥ তদ্‌লক্ষণানি যথা। স্রবদ্ভ্রপস্তু সৌবীরং জাম্বলং প্রস্তরং তথা। ময়ূরগ্রীকরং রত্নং মেঘনীলস্তু তৈজসং॥ ঘৃষ্টা নিগাহু চৈতানি শিলায়াং তৈজসেঽথবা। প্রদদ্যাৎ সর্ব্বদেবেভ্যো দেবীভ্যশ্চাপি পুত্রক॥ ঘৃততৈলাদিযোগেন তাম্রাদৌ দীপবহ্নিনা। যদঞ্জনং জায়তে তু দর্ব্বিকা পরিকীর্ত্তিতা॥ সর্ব্বাভাবে তু তাং দদ্যাৎ দেবীভ্যো দর্ব্বিকাঞ্জনং। মহামায়া জগদ্ধাত্রী কামাখ্যা ত্রিপুরা তথা। আপ্নুবন্তি মহাতোষং ষড়্‌ভিরেভিঃ সদাঞ্জনৈঃ॥ বিধবা নাঞ্জনং কুর্য্যাৎ মহামায়ার্থমুত্তমং। নাদত্তে ত্বঞ্জনং দেবী বৈষ্ণবী বিধবাকৃতং॥ ন মৃৎপাত্রে যোজয়েত্তু সাধকো নেত্ররঞ্জনং। ন পূজাফলমাপ্নোতি মৃৎপাত্রবিহিতাঞ্জনৈঃ॥ চতুর্ব্বর্গপ্রদো ধূপঃ কামদং নেত্ররঞ্জনং। তস্মাদ্দ্বয়মিদং দদ্যাদ্দেবেভ্যো ভক্তিতো নরঃ॥ ইতি কালিকাপুরাণে ৬৮ অধ্যায়ঃ॥ অস্য গুণঃ। তারানৈর্ম্মল্যকারিত্বং। নির্ম্মলচন্দ্রতুল্যনিরাকুলদৃষ্টিকারিত্বঞ্চ। ইতি রাজবল্লভঃ॥ সৌবীরাঞ্জনং। রসাঞ্জনং। অক্তিঃ। মসী। ইতি হেমচন্দ্রঃ॥ অগ্নিঃ। ইতি বিশ্বঃ॥ আলঙ্কারিকভাষয়া ব্যঞ্জনাখ্যবৃত্তিঃ। যথা। অনেকার্থস্য শব্দস্য বাচকত্বে নিযন্ত্রিতে। সংযোগাদ্যৈরবাচ্যার্থধীকৃদ্ব্যাপৃতিরঞ্জনং॥ ইতি কাব্যপ্রকাশঃ॥

অঞ্জনঃ (পুং) পশ্চিমদিগ্‌হস্তী। জ্যেষ্ঠী। জেঠী ইতি ভাষা। ইতি বিশ্বমেদিন্যৌ॥

অঞ্জনকেশী (স্ত্রী) হট্টবিলাসিনীনামগন্ধদ্রব্যং। ইত্যমরঃ॥

অঞ্জনা (স্ত্রী) বানরীবিশেষঃ। সা চ হনূমন্‌মাতা। ইতি মেদিনী॥

অঞ্জনাধিকা (স্ত্রী) অঞ্জনিকা। ইতি হেমচন্দ্রঃ॥

অঞ্জনাবতী (স্ত্রী) সুপ্রতীকনামদিগ্‌গজভার্য্যা। ইত্যমরঃ॥

অঞ্জনিকা (স্ত্রী) জ্যেষ্ঠীবিশেষঃ। আঁজনাই ইতি আঞ্জিনা ইতি চ ভাষা। তৎপর্য্যায়ঃ। অঞ্জনাধিকা ২ হালিনী ৩ হলাহলঃ ৪। ইতি ক্ষুদ্রমূষিকা। ইতি জটাধরঃ॥

অঞ্জনী (স্ত্রী) লেপ্যনারী। চন্দনাদিলেপনযোগ্যা। ইতি বিশ্বমেদিন্যৌ॥ কটুকাবৃক্ষঃ। কালাঞ্জনীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

অঞ্জলিঃ (পুং) হস্তসম্পুটঃ। আঁজলা ইতি ভাষা। কুড়বপরিমাণং। ইতি মেদিনী॥

অঞ্জলিকা (স্ত্রী) বালমূষিকা। ইতি জটাধরঃ॥ অঞ্জনিকা। ইতি চ পাঠঃ॥

অঞ্জলিকারিকা (স্ত্রী) লজ্জালুলতা। ইতি রাজনির্ঘণ্টঃ॥ পুত্তলিকা। ইতি হেমচন্দ্রঃ॥

অঞ্জসঃ (ত্রি) অবক্রঃ। ঋজুঃ। ইতি হেমচন্দ্রঃ॥

অঞ্জসা ব্য দ্রুতং। শীঘ্রং। যথার্থং। প্রকৃতং। ইত্যমরঃ॥

অঞ্জিঃ (পুং) প্রেষণিকঃ। প্রেরকঃ। ইত্যুণাদিকোষঃ॥

অঞ্জিষ্ঠঃ ( পুং ) সূর্য্যঃ । ইত্যুণাদিকোষঃ ॥

অঞ্জীরং ( ক্লী ) স্বনামখ্যাতফলবৃক্ষবিশেষঃ । আঁজির ইতি পেয়ারা ইতি চ ভাষা । তৎপর্য্যায়ঃ । মঞ্জুলং ২ কাকোডুম্বরিকাফলং ৩ । অস্য গুণাঃ । শীতলত্বং । স্বাদুত্বং । গুরুত্বং । বায়ুপিত্তরক্তক্রিমিশূলহৃৎপীড়াকফমুখবৈরস্যনাশিত্বং । অগ্নিকারিত্বঞ্চ । লঘ্বঞ্জীরং তস্মাদল্পগুণং । ইতি রাজবল্লভরাজনির্ঘণ্টৌ ॥

অট গত্যাং । ইতি কবিকল্পদ্রুমঃ ॥ অটতি । ইতি দুর্গাদাসঃ ॥

অটনং (ক্লী) ভ্রমণং । যথা । সর্ব্বজ্ঞত্বমধীশ্বরত্বমগমৎ ত্বাং মাঞ্চ ভিক্ষাটনং । ইতি ঘণ্টাকর্ণঃ ॥

অটনিঃ ( স্ত্রী ) ধনুরগ্রভাগঃ । ধনুকের হূল্ ইতি ভাষা । ইত্যুণাদিকোষঃ ॥

অটনী (স্ত্রী) অটনিঃ । ধনুষ্কোটিঃ । ইত্যমরঃ ॥

অটরুষঃ ( পুং ) বাসকবৃক্ষঃ । ইত্যমরঃ ॥

অটরূষঃ ( পুং ) বাসকবৃক্ষঃ। ইত্যমরটীকায়াং রায়মুকুটঃ ॥

অটবিঃ ( স্ত্রী ) বনং । ইতি রায়মুকুটঃ ॥

অটবী ( স্ত্রী ) বনং । ইত্যমরঃ ॥

অটা (স্ত্রী) পর্য্যটনং । ভ্রমণং । ইতি রত্নকোষঃ নীলকণ্ঠশ্চ ॥

অটাট্যা (স্ত্রী) পর্য্যটনং । ইত্যমরঃ ॥ পুনঃপুনর্ভ্রমণং । অতিশয় ভ্রমণং । ইতি ব্যাকরণং ॥

অট্ট ক তৌচ্ছ্যে । অনাদরে । ইতি কবিকল্পদ্রুমঃ ॥ টদ্বয়ান্তঃ । ক অট্টয়তি । একটকার ইতি রামঃ ॥ তৌচ্ছ্যমল্পীভাবঃ । ইতি দুর্গাদাসঃ ॥

অট্ট ঙ অতিক্রমে । বধে । ইতি কবিকল্পদ্রুমঃ॥ মূর্দ্ধন্যবর্গাদ্যোপধঃ । ঙ অটিট্টিষতে । দন্ত্যবর্গাদ্যোপধঃ । ঙ অতিট্টিষতে । দন্ত্যবর্গতৃতীয়োপধঃ । ঙ অট্টিটিষতে খলং রাজা । ইতি দুর্গাদাসঃ ॥

অট্টং ( ক্লী ) শুষ্কং । ভক্তং । অন্নং । ইতি মেদিনী ভূরিপ্রয়োগশ্চ ॥

অট্টঃ ( পুং ) ক্ষৌমঃ । ইত্যমরঃ ॥ হর্ম্ম্যাদিগৃহং । ইতি ভরতঃ ॥ প্রাকারাগ্রস্থিতরণগৃহং । ইতি কৌটিল্যঃ ॥ অট্টেতি খ্যাতগৃহবিশেষঃ । ইতি কোক্কটঃ ॥ প্রাকারমণ্ডপস্যোপরি শালা । ইতি কেচিৎ ॥ হর্ম্ম্যাদিবাতকুটিকা । ইতি কেচিৎ ॥ মণ্ডপোপরি হর্ম্ম্যপৃষ্ঠং । ইতি কেচিৎ ॥ প্রাকারধারণার্থোঽভ্যন্তরে ক্ষৌমাখ্যোঽট্টঃ । ভট্টঃ ॥ অতিশয়ঃ । ইতি মেদিনী ॥ হট্টঃ ইতি হেমচন্দ্রঃ ॥

অট্টট্ট ব্য অত্যুচ্চং । ইতি জটাধরঃ ॥

অট্টনং (ক্লী) চক্রফলাস্ত্রং । ইতি ত্রিকাণ্ডশেষঃ ॥

অট্টহাসঃ ( পুং ) মহত্তরো হাসঃ । শব্দযুক্তহাস্যং । ইতি হেমচন্দ্রঃ ॥

অট্টহাসকঃ ( পুং ) কুন্দপুষ্পবৃক্ষঃ । ইতি রাজনির্ঘণ্টঃ ॥

অট্টহাসী [ন্] (পুং) শিবঃ । ইতি হেমচন্দ্রঃ

অট্টালঃ(পুং)প্রাকারাদুপরিতনমুন্নতস্থানং । ইতি শ্রীধরস্বামী ॥ যথা । ভজ্যমানপুরোদ্যানপ্রাকারাট্টালগোপুরং । ইতি শ্রীভাগবতং ॥ ঃ( পুং ) উপরিতনগৃহং । অট্টালিকোপরি গৃহং । তৎপর্য্যায়ঃ । ক্ষৌমঃ ২ অট্টঃ ৩ । ইতি হেমচন্দ্রঃ ॥

অট্টালিকা ( স্ত্রী ) রাজগৃহং । তৎপর্য্যায়ঃ ।

নৃপাগারং ২ হর্ম্ম্যং ৩ সৌধং ৪ ধবলাগারং ৫। ইতি জটাধরঃ ॥

অট্টালিকাকারঃ (পুং) শূদ্রাগর্ব্ভে চিত্রকারৌরসজাতজাতিবিশেষঃ। তস্য কর্ম্ম গৃহনির্ম্মাণাদি। রাজ ইতি থৈকর ইতি চ ভাষা। কুলটায়াঞ্চ শূদ্রায়াং চিত্রকারস্য বীর্য্যতঃ। বভূবাট্টালিকাকারঃ পতিতো জারদোষতঃ॥ ইতি ব্রহ্মবৈবর্ত্তপুরাণং ॥

অট্যা (স্ত্রী) পরিভ্রমণং। পর্য্যটনং। ইত্যমরটীকায়াং রায়মুকুটঃ ॥ যথা। তৌর্য্যত্রিকং বৃথাট্যা চ কামজো দশকো গণঃ। ইতি স্মৃতিঃ ॥

অঠি ই ঙ গতৌ। ইতি কবিকল্পদ্রুমঃ ॥ ই অণ্ঠ্যাতে ঙ অণ্ঠতে। ইতি দুর্গাদাসঃ ॥

অঠ গতে। ইতি কবিকল্পদ্রুমঃ॥ অঠতি। ইতি দুর্গাদাসঃ ॥

অড র ন ব্যাপ্তৌ। ইতি কবিকল্পদ্রুমঃ ॥ র বৈদিকঃ। ন অড্ণোতি। ইতি দুর্গাদাসঃ ॥

অড উদ্যমে। ইতি কবিকল্পদ্রুমঃ॥ অডতি লোকঃ সুখায়। ইতি দুর্গাদাসঃ ॥

অড্ড অভিযোগে। ইতি কবিকল্পদ্রুমঃ ॥ মূর্দ্ধন্যবর্গতৃতীয়োপধঃ। অডিড্ডিষতি। ক্বিপি সংযোগান্তলোপে অড়্। অভিযোগঃ সমাধানং। অড্ডতি পক্ষং বিদ্বান্। অভি সমন্তাৎ যোগোঽভিযোগ ইতি গোবিন্দভট্টঃ ॥ ইতি দুর্গাদাসঃ ॥

অণ রবে। ইতি কবিকল্পদ্রুমঃ ॥ অণতি। রবঃ শব্দঃ। ইতি দুর্গাদাসঃ॥

অণ য ঙ জীবনে। প্রাণনে। ইতি কবিকল্পদ্রুমঃ ॥ য ঙ অণ্যতে জনো দুঃখেন জীবতীত্যর্থঃ। ইতি দুর্গাদাসঃ ॥

অণকঃ (ত্রি) কুৎসিতঃ। অধমঃ। ইত্যমরঃ ॥

অণব্যং (ক্লী) আণবীনং। অণুধান্যোৎপাদকক্ষেত্রং। ইতি রায়মুকুটঃ ॥

অণিঃ (পুং স্ত্রী) অক্ষাগ্রকীলকঃ। রথচক্রাগ্রস্থিতকীলঃ। ইত্যমরঃ॥ অশ্রিঃ। সূচ্যাদ্যগ্রভাগঃ। সীমা। ইতি মেদিনী ॥ তস্য রূপান্তরং। অণী। আণিঃ। ইত্যমরটীকা ॥

অণিমা [ ন্ ] (পুং) অণোর্ভাবঃ। অণুত্বং। সূক্ষ্মতা। ইতি ব্যাকরণং। অষ্টবিধৈশ্বর্য্যমধ্যে ঐশ্বর্য্যবিশেষঃ। ইত্যমরঃ ॥ যৎপ্রভাবাৎ দেবাঃ সিদ্ধাশ্চ সূক্ষ্মীভূয় সর্ব্বত্র বিচরন্তি কৈশ্চিদপি ন লক্ষ্যন্তে। ইতি তট্টীকা ॥

অণীয়ঃ [ স্ ] (ত্রি) অত্যল্পং। অতিসূক্ষ্মঃ। ইত্যমরঃ ॥

অণু (ত্রি) ক্ষুদ্রং। সূক্ষ্মং। ইতি মেদিনী ॥

অণুঃ (পুং) লেশঃ। ব্রীহিবিশেষঃ। সূক্ষ্মধান্যং। চিনা ইত্যাদি ভাষা। ইত্যমরঃ ॥

অণুকঃ (ত্রি) চতুরঃ। নিপুণঃ। অল্পঃ। স্তোকঃ। ইতি মেদিনী ॥

অণুভা (স্ত্রী) বিদ্যুৎ। ইতি ত্রিকাণ্ডশেষঃ ॥

অণুরেবতী (স্ত্রী) দন্তীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ

অণুব্রীহিঃ (পুং) সূক্ষ্মধান্যং। তৎপর্য্যায়ঃ প্রসাতিকা ২। ইতি রত্নমালা ॥

অণ্ডং (ক্লী) পক্ষ্যাদিপ্রাদুর্ভাবককোষঃ। অণ্ডা। ডিম্। ইতি ভাষা। তৎপর্য্যায়ঃ। পেশী ২ কোষঃ ৩। ইত্যমরঃ॥ পেশিঃ ৪ কোশঃ ৫ পেশীকোষঃ ৬। ইতি তট্টীকা॥ ডিম্বঃ ৭। ইতি মেদিনী॥ মৎস্যপক্ষিকূর্ম্মাণ্ডস্য গুণাঃ।

স্বাদুত্বং। কটুপাকিত্বং। রুচিশুক্রকারিত্বং। বাতশ্লেষ্মনাশিত্বঞ্চ। ইতি রাজবল্লভঃ॥ মুষ্কঃ। বীর্য্যং। ইতি বিশ্বঃ॥ মৃগনাভিঃ। ইতি কেচিৎ॥

অণ্ডকঃ (পুং) অণ্ডকোষঃ। ইতি হেমচন্দ্রঃ॥

অণ্ডকোটরপুষ্পী (স্ত্রী) অজান্ত্রীবৃক্ষঃ। নীলরাম্না। নীলবুহ্না ইতি খ্যাতা। ইতি কাচিদ্রত্নমালা॥ অন্তঃকোঠরপুষ্পী ইত্যপি পাঠঃ॥

অণ্ডকোশঃ (পুং) অণ্ডকোষঃ। ইত্যমরটীকা॥

অণ্ডকোষঃ (পুং) স্বনামখ্যাতশরীরাবয়ববিশেষঃ। তৎপর্য্যায়ঃ। মুষ্কঃ ২ বৃষণঃ ৩। ইত্যমরঃ॥ অণ্ডং ৪ পেলং ৫ অণ্ডকঃ ৬। ইতি হেমচন্দ্রঃ॥ বীজপেশিকা ৭। ইতি রাজনির্ঘণ্টঃ॥ সীমা ৮। ইতি জটাধরঃ॥ ফলকোষকঃ ৯। ইতি ত্রিকাণ্ডশেষঃ॥ ফলং ১০। ইতি রামায়ণং॥ কোষকোষকমুষ্কাণ্ডবৃষণা অণ্ডকোষকঃ। সীমা চ পেলসীমানৌ ফলমিত্যপি কুত্রচিৎ॥ ইতি শব্দরত্নাবলী॥

অণ্ডকোষকঃ (পুং) অণ্ডকোষঃ। ইতি শব্দরত্নাবলী॥

অণ্ডজঃ (পুং) পক্ষী। সর্পঃ। মৎস্যঃ। কৃকলাসঃ। ইতি বিশ্বমেদিন্যৌ॥ অণ্ডজাতমাত্রে ত্রি। ইত্যমরঃ॥

অণ্ডজা (স্ত্রী) মৃগনাভিঃ। কস্তূরী। ইতি বিশ্বমেদিনীহেমচন্দ্রাঃ॥

অণ্ডালুঃ (পুং) মৎস্যঃ। ইতি শব্দচন্দ্রিকা॥

অণ্ডীরঃ (পুং) পুরুষঃ। শক্তঃ। ইতি মেদিনী॥

অণ্বী (স্ত্রী) অঙ্গুলিঃ। অস্যাঃ প্রচুরপ্রয়োগো বেদে। ক্ষীণা॥

অত ই বন্ধনে। ইতি কবিকল্পদ্রুমঃ॥ অতীতিবন্ধে। শেষো দীর্ঘাদিরিত্যন্যঃ। অতএব অন্ত্যতে ঈন্ত্যতে। স্বমতে তু অন্ত্যতে ইন্ত্যতে। ছন্দোহনুরোধাত্তূভয়ত্র ইকারঃ। ইতি দুর্গাদাসঃ॥

অত ঈ বন্ধনে। ইতি কবিকল্পদ্রুমঃ॥

অত সাতত্যগতে। ইতি কবিকল্পদ্রুমঃ॥ সাতত্যগতং নৈরন্তর্য্যেণ ভ্রমণং প্রাপণঞ্চ। অততি বায়ুঃ। অততি সূর্য্যো গগন প্রাপ্নোতীত্যর্থঃ। ইতি দুর্গাদাসঃ॥

অতঃ [স্] ব্য কারণং। অপদেপঃ। নির্দ্দেশঃ। ইতি বিশ্বঃ॥ এতদ্‌শব্দাৎ তস্‌প্রত্যয়েঽপ্যেবমেব রূপং॥

অতএব ব্য অস্মাদেব। এতৎকারণেনৈব। অনেনৈব হেতুনা। যথা। অতএব মহেশানি রলয়োঃ সমতা ভবেৎ। ইতি সারদাতিলকটীকায়াং রাঘবভট্টঃ॥ অতএব পং। ইতি বোপদেবঃ॥

অতটঃ (পুং) পর্ব্বতস্যোচ্চস্থানং। তৎপর্য্যায়ঃ। প্রপাতঃ ২ ভৃগুঃ ৩। ইত্যমরঃ॥

অতর্কঃ (পুং) অহেতুকঃ। শুষ্কতর্কপরঃ। ইতি মহাভারতে দানধর্ম্মঃ॥

অতলং (ক্লী) প্রথমখণ্ডপাতালং। ইতি ভূরিপ্রয়োগঃ॥

অতলস্পর্শঃ (ত্রি) অগাধঃ। অতিগভীরঃ। ইত্যমরঃ॥

অতলস্পৃক্ [শ্] (ত্রি) অতলস্পর্শঃ। তৎপর্য্যায়ঃ। আস্থা ২ আস্থাগং ৩ অস্তাঘং ৪ অগাধং ৫। ইতি হেমচন্দ্রঃ॥

অতসঃ (পুং) বায়ুঃ। ইত্যুণাদিকোষঃ॥ আত্মা।

ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ॥ বল্কল-নির্ম্মিতবস্ত্রং। অস্ত্রং। যথা অতসঃ ক্ষৌমং প্রহরণং বায়ুশ্চেতি ধাতুবৃত্তৌ মাধবঃ॥

অতসী (স্ত্রী) কৃষ্ণপুষ্পক্ষুদ্রবৃক্ষভেদঃ। মসিনা ইতি খ্যাতা। তৎপর্য্যায়ঃ। চণকা ২ উমা ৩ ক্ষৌমী ৪ রুদ্রপত্নী ৫ সুবর্চ্চলা ৬। ইতি রত্নমালা॥ পিচ্ছিলা ৭ দেবী ৮ মদগন্ধা ৯ মদোৎকটা ১০ ক্ষুমা ১১ হৈমবতী ১২ সুনীলা ১৩ নীলপুষ্পিকা ১৪। অস্যা গুণাঃ। উষ্ণত্বং। তিক্তত্বং। বাতহারিত্বং। শ্লেষ্মপিত্তকারিত্বঞ্চ। অস্যাস্তৈলস্য গুণাঃ। মধুরত্বং। পিচ্ছিলত্বং। মদগন্ধিত্বং। কষায়ত্বং। বায়ুকফকাসনাশিত্বং। স্বাদুত্বং। উষ্ণত্বং। অম্লত্বং। পাকে কটুত্বঞ্চ। ইতি রাজবল্লভরাজনির্ঘণ্টৌ॥ যথা। অতসী নীলপুষ্পী চ পার্ব্বতী স্যাদুমা ক্ষুমা। অতসী মধুরা তিক্তা স্নিগ্ধা পাকে কটুর্গুরুঃ। উষ্ণা দৃক্‌শুক্রবাতঘ্নী কফপিত্তবিনাশিনী॥ ইতি ভাবপ্রকাশঃ॥ শণবৃক্ষঃ। ইত্যমরটীকা॥

অতি ব্য প্রশংসা। প্রকর্ষং। লঙ্ঘনং। ইতি বিশ্বমেদিন্যৌ॥ অতিশয়ং। ক্রান্তং। পূজনং। অসম্ভাবনা। ইতি দুর্গাদাসঃ। প্রাদিবিংশত্যুপসর্গান্তর্গতোঽয়ং॥

অতিকথঃ (ত্রি) অশ্রদ্ধেয়ঃ। নষ্টঃ। ইতি মেদিনী॥ নষ্টধর্ম্মঃ। ইতি হেমচন্দ্রঃ॥

অতিকথা (স্ত্রী) অপার্থবাক্যং। ব্যর্থভাষণং। ইতি বিশ্বঃ হেমচন্দ্রশ্চ॥ [নির্ঘণ্টঃ॥

অতিকন্দকঃ (পুং) হস্তিকন্দবৃক্ষঃ। ইতি রাজ-

অতিকেশরঃ (পুং) কুব্জকবৃক্ষঃ। ইতি রাজ-নির্ঘণ্টঃ॥

অতিক্রমঃ (পুং) ক্রমোল্লঙ্ঘনং। তৎপর্য্যায়ঃ অতিপাতঃ ২ উপাত্যয়ঃ ৩ পর্য্যয়ঃ ৪। অভিক্রমঃ। রণে শত্রূন্ প্রতি অভীত-যোধাদের্গমনং। ইত্যমরঃ॥

অতিক্রান্তঃ (ত্রি) কৃতাতিক্রমঃ। কৃতক্রমোল্লঙ্ঘনঃ। যথা। রাজানমতিক্রান্তা অতিরাজী। ইতি বোপদেবঃ॥ অতীতঃ। যথা। বেগে তু সমতিক্রান্তে গতোঽয়মিতি লক্ষ্যতে। ইতি রক্ষিতঃ॥

অতিক্রামকঃ (ত্রি) অতিক্রমকর্ত্তা। ক্রমোল্লঙ্ঘকঃ। অতিপূর্ব্বক্রমধাতোঃ কর্ত্তরি ণকঃ॥

অতিগণ্ডঃ (পুং) বিষ্কুম্ভাদিসপ্তবিংশতিযোগ-মধ্যে ষষ্ঠযোগঃ। তত্র জাতফলং। কলিপ্রিয়ো বেদবিনিন্দকশ্চ ধূর্ত্তঃ কৃতঘ্নো গলরোগযুক্তঃ। সরোমদেহঃ পুরুষোঽতিদীর্ঘঃ প্রকাশগণ্ডস্ত্বতিগণ্ডজন্মা॥ ইতি কোষ্ঠীপ্রদীপঃ॥

অতিগন্ধঃ (পুং) ভূতভৃণং। চম্পকঃ। মুদ্গরবৃক্ষঃ। গন্ধকঃ। ইতি রাজনির্ঘণ্টঃ॥

অতিগন্ধালুঃ (পুং) পুত্রদাত্রীলতা। ইতি রাজ-নির্ঘণ্টঃ॥

অতিগর্ব্বিতঃ (ত্রি) মহাহংকৃতঃ। অতিশয়গর্ব্বযুক্তঃ। তৎপর্য্যায়ঃ। সমুন্নদ্ধঃ ২। ইতি হলায়ুধঃ॥

অতিগুহা (স্ত্রী) পৃশ্নিপর্ণীবিশেষঃ। ক্ষুদ্রচাকুলিয়া ইতি ভাষা। ইতি রত্নমালা॥ গুহাতিক্রামকে ত্রি॥

অতিচরা (স্ত্রী) পদ্মচারিণীবৃক্ষঃ। স্থলপদ্মিনী। ইত্যমরঃ রাজনির্ঘণ্টশ্চ॥

অতিচারঃ (পুং) শীঘ্রগমনং। অতিক্রম্য

গমনং। কুজাদিপঞ্চগ্রহাণাং রাশিভোগ-কালাসমাপ্তৌ রাশ্যন্তরগমনং। তত্র পূর্ব্ব-রাশিগমনে বক্রাতিচারঃ। পররাশিগমনে অতিচারঃ। এতৌ গুরোশ্চেদকালো ভবতি। গুরুস্তু যদি পুনঃ পূর্ব্বরাশিং নায়াতি তদা মহাতিচারঃ। তেন লুপ্তসম্বৎ-সরো ভবতি। গ্রহাণাং স্বভোজ্যমানরাশা-বপি বক্রাতিচারৌ ভবতঃ॥ তত্র নাকালঃ। ইতি স্মৃতিজ্যোতিষে॥

অতিচ্ছত্রঃ (পুং) ভূতৃণং। ইতি রাজনির্ঘণ্টঃ॥ জলতৃণবিশেষঃ। অরুণবর্ণকুল্যাখাড়া ইতি খ্যাতঃ। ইতি রত্নমালা॥ ছত্রা। কাট ছাতি। ভুঁইছাতি। পোয়ালছাতি ইতি খ্যাতা। ইত্যমরঃ॥

অতিচ্ছত্রকঃ (পুং) ছত্রবৃক্ষঃ। ছাতারিয়াবিষ ইতি খ্যাতঃ। তস্য মূলে পত্রে বচাকারঃ কটুরসশ্চ। ইতি রত্নমালা॥ ভূতৃণং। ইতি রাজনির্ঘণ্টঃ॥

অতিচ্ছত্রা (স্ত্রী) অবাক্‌পুষ্পী। মৌরী ইতি খ্যাতা। ইত্যমরঃ॥ শতাহ্বা। শলুপা ইতি প্রসিদ্ধা। ইতি রত্নমালা॥

অতিজবঃ (ত্রি) অতিশীঘ্রগামী। অতিবেগবান্। তৎপর্য্যায়ঃ। জঙ্ঘালঃ ২। ইত্যমরঃ॥ জঙ্ঘিলঃ ৩ অতিবলঃ ৪। ইতি তট্টীকা॥

অতিজাগরঃ (পুং) নীলক্রৌঞ্চঃ। কালবকঃ। ইতি রাজনির্ঘণ্টঃ॥

অতিডীনং (ক্লী) পক্ষিণাং প্রচণ্ডগমনং। ইতি মহাভারতং॥

অতিতীব্রা (স্ত্রী) গণ্ডদূর্ব্বা। ইতি রাজনির্ঘণ্টঃ॥

অতিথিঃ (পুং) কুশপুত্রঃ। স চ শ্রীরামচন্দ্রস্য পৌত্রঃ। ইতি মেদিনী॥ কোপঃ। ইতি বিশ্বঃ॥

অতিথিঃ (ত্রি) অজ্ঞাতপূর্ব্বগৃহাগতব্যক্তিঃ। ইতি শ্রীধরস্বামী॥ অতিথ্ ইতি ভাষা। তৎপর্য্যায়ঃ। আগন্তুঃ ২ আবেশিকঃ ৩ গৃহাগতঃ ৪। ইত্যমরঃ॥ স্ত্রীলিঙ্গে আবে-শিকী ৫ অতিথী ৬। ইতি তট্টীকাসার-সুন্দরী॥ আগান্তুঃ ৭। ইতি হড্ডচন্দ্রঃ॥ প্রঘূর্ণঃ ৮ অভ্যাগতঃ ৯ প্রাঘুর্ণিকঃ ১০। ইতি হেমচন্দ্রঃ॥ প্রাঘুণিকঃ ১১। ইতি বিশ্বঃ॥ প্রাঘুণঃ ১২। ইতি ত্রিকাণ্ডশেষঃ॥ *॥ তস্য লক্ষণং। যস্য ন জ্ঞায়তে নাম ন চ গোত্রং ন চ স্থিতিঃ। অকস্মাৎ গৃহমায়াতি সোঽতিথিঃ প্রোচ্যতে বুধৈঃ॥ *॥ তস্য নিবর্ত্তনে গৃহস্থস্য দোষো যথা। অতিথির্যস্য ভগ্নাশো গৃহাৎ প্রতিনিবর্ত্ততে। স তস্মৈ দুষ্কৃতং দত্ত্বা পুণ্যমাদায় গচ্ছতি॥ ইতি পুরাণং॥ *॥ তস্য গ্রহণকালঃ। ততো গোদোহমাত্রন্তু কালং তিষ্ঠেদ্‌গৃহাঙ্গনে। অতিথিগ্রহণার্থায় তদূর্দ্ধং বা যদৃচ্ছয়া॥ ইতি বিষ্ণুপুরাণং॥ *॥ গোদোহকালশ্চ মুহূর্ত্তাষ্টমভাগঃ। যথা। আচম্য চ ততঃ কুর্য্যাৎ প্রাজ্ঞো দ্বারাবলোকনং। মুহূর্ত্ত-স্যাষ্টমং ভাগমুদ্বীক্ষ্যো হ্যতিথির্ভবেৎ॥ ইতি মার্কণ্ডেয়পুরাণং॥ *॥ তস্য মূর্খত্বাদি-বিচারো নাস্তি। প্রিয়ো বা যদি বা দ্বেষ্যো মূর্খঃ পতিত এব বা। সংপ্রাপ্তে বৈশ্বদেবান্তে সোঽতিথিঃ স্বর্গসংক্রমঃ॥ ইতি শাতা-তপঃ॥ *॥ তস্য বেদাদয়ো ন প্রষ্টব্যাঃ। স্বাধ্যায়গোত্রচরণমপৃষ্ট্বাপি তথা কুলং।

হিরণ্যগর্ভবুদ্ধ্যা তং মন্যেতাভ্যাগতং গৃহী॥ ইতি বিষ্ণুপুরাণং ॥ * ॥ তস্য দেশাদৌ পৃষ্টে দোষঃ। দেশং নাম কুলং বিদ্যাং পৃষ্ট্বা যোঽন্নং প্রযচ্ছতি। ন স তৎফলমাপ্নোতি দত্ত্বা স্বর্গং ন গচ্ছতি ॥ ইতি স্মৃতিঃ ॥ * ॥ অতিথয়ে শক্ত্যনুসারেণ দাতব্যং। ভোজনং হন্তকারং বা অগ্রং ভিক্ষামথাপি বা। অদত্ত্বা নৈব ভোক্তব্যং যথা বিভবমাত্মনঃ ॥ ইতি মার্কণ্ডেয়পুরাণং ॥ * ॥ ভিক্ষাদিলক্ষণং। গ্রাসপ্রমাণা ভিক্ষা স্যাদগ্রং গ্রাসচতুষ্টয়ং। অগ্রাচ্চতুর্গুণং প্রাহুর্হন্তকারং দ্বিজোত্তমাঃ ॥ ইতি মার্কণ্ডেয়পুরাণং ॥ ইত্যাহ্নিকতত্ত্বং ॥

অতিথিপূজনং (ক্লী) অতিথিসেবা। আতিথ্যক্রিয়া। তৎপর্য্যায়ঃ। নৃযজ্ঞঃ ২। ইতি হেমচন্দ্রঃ ॥

অতিদানং (ক্লী) বহুদানং। অপরিমিতদানং। যথা। অতিদানে বলির্ব্বদ্ধঃ অতিমানে চ কৌরবাঃ। অতিরূপে হৃতা সীতা সর্ব্বমত্যন্তগর্হিতং ॥ ইতি চাণক্যঃ ॥

অতিদিষ্টঃ (ত্রি) অতিদেশবিশিষ্টঃ। যথা। ন সমানগোত্রাং ভার্য্যাং বিন্দেতেত্যনেন শূদ্রস্যাপি সগোত্রা কথং ন নিষিধ্যতে ইতি চেদত্র উপদিষ্টাতিদিষ্টগোত্রস্যৈব নিষেধো নত্বতিদিষ্টাতিদিষ্টশূদ্রগোত্রাদেঃ। ইত্যুদ্বাহতত্ত্বং ॥

অতিদীপ্যঃ (পুং) রক্তচিত্রকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

অতিদেশঃ (পুং) অন্যধর্ম্মস্যান্যত্র আরোপণং। যথা। ইন্দ্রবদিক ইত্যাদিঃ। ইতি দুর্গাদাসঃ ॥ কারিকা যথা। প্রকৃতাৎ কর্ম্মণো যস্মাৎ তৎসমানেষু কর্ম্মসু। ধর্ম্মোঽতিদিশ্যতে যেন অতিদেশঃ স উচ্যতে॥ ইতি মলমাসতত্ত্বং ॥ স তু পঞ্চবিধঃ। শাস্ত্রাতিদেশঃ ১ যথা নিত্যেন তুল্যং শেষং স্যাৎ ইত্যত্র তুল্যশব্দেন অতিদেশঃ। ১। কার্য্যাতিদেশঃ ২ যথা অপ্রযাজাস্তাঃ ইত্যত্র কার্য্যেণ নিষেধেন দর্শপৌর্ণমাসধর্ম্মাতিদেশঃ। ২। নিমিত্তাতিদেশঃ ৩ যথা বিকৃতৌ মৌদ্গচরুযাগে ব্রীহিকার্য্যকারিণি মুদ্গে ব্রীহিকার্য্যনিমিত্তত্বাৎ ধর্ম্মাঃ প্রোক্ষণাদয়ঃ কল্প্যন্তে। ৩। ব্যপদেশাতিদেশঃ ৪ যথা মাসমগ্নিহোত্রং জুহোতি ইত্যত্র মাসসাধ্যায়নাখ্যযাগে অগ্নিহোত্রপদব্যপদেশাৎ অগ্নিহোত্রধর্ম্মাতিদেশঃ। ৪। রূপাতিদেশঃ ৫ যথা যজমানাস্তিম্নো যূপঃ ইত্যত্র যূপে যজমানাদন্যত্বরূপাবগমাৎ যজমানধর্ম্মস্য তদীয়পরিমাণস্যাতিদেশঃ। ইতি শ্রাদ্ধবিবেকটীকায়াং শ্রীকৃষ্ণঃ ॥

অতিনু (ত্রি) অতীতনৌকং। নাবমতিক্রান্তং। নাবোত্তীর্ণং। ইত্যমরঃ ॥ তস্য পুংস্ত্রীলিঙ্গয়োঃ অতিনৌঃ ইতি রূপং ॥

অতিপতনং (ক্লী) অত্যয়ঃ। অতিক্রমণং। ইতি শব্দরত্নাবলী ॥

অতিপন্থাঃ [ন্] (পুং) সন্মার্গঃ। সুপথঃ। ইত্যমরঃ ॥

অতিপত্রঃ (পুং) হস্তিকন্দবৃক্ষঃ। শাকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

অতিপাতঃ (পুং) অতিক্রমঃ। উপাত্যয়ঃ। পর্য্যয়ঃ। ইত্যমরঃ ॥

অতিপাতকং (ক্লী) নববিধপাপমধ্যে গুরুতর-পাতকং। তৎ ত্রিবিধং। পুংসঃ মাতৃদুহিতৃ-স্নুষাগমনজন্যং। স্ত্রিয়াস্তু পুত্রপিতৃশ্বশুর-গমনজন্যং। ইতি প্রায়শ্চিত্তবিবেকঃ॥

অতিবলঃ (ত্রি) প্রবলঃ। অতিশয়বলবান্। প্রকৃষ্টবলবিশিষ্টঃ। ইতি মেদিনী॥

অতিবলা (স্ত্রী) পীতবলা। পীতবর্ণবাড়িয়ালা ইতি খ্যাতা। পিটারণী। ইতি মদনবিনোদঃ॥ গুরশকরীভেদঃ। ইতি রাজনির্ঘণ্টঃ॥ তৎ-পর্য্যায়ঃ। বলিকা ২ বল্যা ৩ বিকঙ্কতা ৪ বাদ্যপুষ্পিকা ৫ ঘণ্টা ৬ শীতা ৭ শীত-পুষ্পা ৮ ভূরিচলা ৯ বৃষ্যগন্ধিকা ১০। তস্যা গুণাঃ। তিক্তত্বং। কটুত্বং। বাত-কৃমিনাশিত্বং। দাহতৃষ্ণাবিষচ্ছর্দ্দিক্লেদোপ-শমকারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

অতিভারগঃ (পুং) খেসরঃ। খচর ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥

অতিভীঃ (পুং) বজ্রজ্বালা। ইতি হলায়ুধঃ॥

অতিভূমিঃ (স্ত্রী) আধিক্যং। যথা। প্রাপ্য মন্মথমদাদতিভূমিং দুঃসহস্তনভরাঃ সুরত-স্যেতি মাঘঃ॥ অতিশয়িতভূমিঃ॥

অতিমঙ্গল্যঃ (পুং) বিল্ববৃক্ষঃ। ইতি রত্ন-মালা॥ অতিশয়মঙ্গলজনকে ত্রি॥

অতিমর্য্যাদঃ (ত্রি) অতিশয়িতঃ। ইতি হেম-চন্দ্রঃ॥ অতিশয়ে ক্লী॥ [ইত্যমরঃ॥

অতিমাত্রং (ক্লী) অতিশয়ঃ। তদ্‌যুক্তে ত্রি।

অতিমুক্তঃ (পুং) মাধবীলতা। ইত্যমরঃ॥ তিনিশবৃক্ষঃ। ইতি হেমচন্দ্রঃ॥

অতিমুক্তঃ (ত্রি) নিষ্ফলঃ। নিঃসঙ্গঃ। ইতি বিশ্বমেদিন্যৌ॥ প্রাপ্তনির্ব্বাণঃ॥

অতিমুক্তকঃ (পুং) তিনিশবৃক্ষঃ। ইত্যমরঃ॥ তিন্দুকবৃক্ষঃ। পুষ্পবৃক্ষবিশেষঃ। তৎ-পর্য্যায়ঃ। পুণ্ড্রকঃ ২ মল্লিনী ৩ ভ্রমরা-নন্দা ৪ কামুককান্তা ৫। তস্য গুণাঃ। কষায়ত্বং। শীতলত্বং। শ্রমনাশিত্বং। পিত্তদাহজ্বরোন্মাদহিক্কাচ্ছর্দ্দিনিবারকত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

অতিমোদা (স্ত্রী) নবমল্লিকা। ইতি রাজনির্ঘণ্টঃ॥

অতিরসা (স্ত্রী) মূর্ব্বালতা। রাস্না। ক্লীত-নকং। ইতি রাজনির্ঘণ্টঃ॥

অতিরিক্তঃ (ত্রি) অধিকঃ। অতিশয়িতঃ। তৎপর্য্যায়ঃ। সমধিকঃ ২। ইত্যমরঃ॥

অতিরেকঃ (ত্রি) অতিশয়ঃ। যথা। সম্পূর্ণে ভূভয়োর্জ্জ্যৈয়মতিরেকে পরেঽহনি। ইতি তিথ্যাদিতত্ত্বং॥

অতিরোগঃ (পুং) ক্ষয়ব্যাধিঃ। ইতি রাজ-নির্ঘণ্টঃ॥

অতিরোমশঃ (পুং) বনচ্ছগলঃ। ইতি হারা-বলী॥ বৃহৎবানর ইতি কেচিৎ॥ অতি-শয়লোমযুক্তে ত্রি॥

অতিলোমশা (স্ত্রী) নীলবুহ্না। ইতি রত্নমালা॥

অতিবর্ত্তুলঃ (পুং) কলায়বিশেষঃ। বাঁটুলা কড়াই ইতি ভাষা। ইতি রত্নমালা॥ অস্য গুণাঃ সতীলশব্দে দ্রষ্টব্যাঃ॥

অতিবাদঃ (পুং) অভিবাদঃ। পরুষোক্তিঃ। ইত্যমরটীকায়াং রমানাথঃ॥

অতিবিকটঃ (পুং) দুষ্টহস্তী। ইতি শব্দ-মালা॥ অতিকরালে ত্রি॥

অতিবিষা (স্ত্রী) বৃক্ষবিশেষঃ। আতইষ। আতৈচ ইতি ভাষা। তৎপর্য্যায়ঃ। বিশ্বা ২ বিষা ৩

প্রতিবিষা ৪ উপবিষা ৫ অরুণা ৬ শৃঙ্গী ৭ মহৌষধং ৮। ইত্যমরঃ॥ কাশ্মীরা ৯ শ্বেতা ১০। ইতি রত্নমালা॥ শ্বেতকন্দা ১১ ভৃঙ্গী ১২ ভঙ্গুরা ১৩ বিরূপা ১৪ শ্যামকন্দা ১৫ বিষরূপা ১৬ বীরা ১৭ মাদ্রী ১৮ শ্বেতবচা ১৯ অমৃতা ২০। ইতি রাজনির্ঘণ্টঃ॥ তস্যা গুণাঃ। পাচকত্বং। গ্রাহিত্বং। দোষনাশিত্বঞ্চ। ইতি রাজবল্লভঃ॥ কটুত্বং। উষ্ণত্বং। কফপিত্তজ্বরামাতিসারকাসবিষচ্ছর্দ্দিনাশিত্বঞ্চ। ত্রিবিধাতিবিষা জ্ঞেয়া শুক্লা কৃষ্ণা তথারুণা। রসবীর্য্যবিপাকেষু নির্ব্বিষেব গুণাধিকা॥ ইতি রাজনির্ঘণ্টঃ॥ বিষা ত্বতিবিষা বিশ্বা শৃঙ্গী প্রতিবিষারুণা। শুক্লকন্দা চোপবিষা ভঙ্গুরা ব্রণবল্লভা॥ বিষা সোষ্ণা কটুস্তিক্তা পাচনী দীপনী হরেৎ। কফপিত্তাতিসারামবিষকাসবমিক্রমীন্॥ ইতি ভাবপ্রকাশঃ॥

অতিবিশ্রব্ধনবোঢ়া (স্ত্রী) স্বীয়ান্তর্গতমধ্যনায়িকাভেদঃ। তস্যা লক্ষণং। নায়কাতিশয়প্রশ্রয়যুক্তা। অস্যাশ্চেষ্টা। সধৈর্য্যসাপরাধনায়কে বক্রোক্তিঃ। অধৈর্য্যসাপরাধনায়কে পরুষবাক্। ইতি রসমঞ্জরী॥

অতিবৃষ্টিঃ (স্ত্রী) অতিশয়বৃষ্টিঃ। ঈতিবিশেষঃ। স তু মহদ্বর্ষণরূপঃ কৃষিণামুৎপাতঃ। যথা। অতিবৃষ্টিরনাবৃষ্টিঃ শলভা মূষিকাঃ খগাঃ। প্রত্যাসন্নাশ্চ রাজানঃ ষড়েতে ঈতয়ঃ স্মৃতাঃ॥ ইতি পরাশরঃ॥

অতিবেলং (ক্লী) অতিশয়ঃ। অতিশয়িতে ত্রি। ইত্যমরঃ॥

অতিব্যথা (স্ত্রী) অতিশয়যাতনা। তীব্রবেদনা। ইতি শব্দরত্নাবলী॥

অতিব্যাপ্তিঃ (স্ত্রী) অতিশয়ব্যাপনং। অলক্ষ্যে লক্ষণস্য গমনং। যথা সাধ্যাভাববদবৃত্তিত্বমিতি ব্যাপ্তিলক্ষণে ধূমবান্ বহ্নেরিত্যত্র ধূমাভাবাধিকরণহ্রদবৃত্তিত্বাভাবমাদায় অতিব্যাপ্তিঃ। ইতি তার্কিকাঃ॥ স্বাব্যবহিতপ্রাক্ক্ষণাবচ্ছেদেন রবিভুজ্যমানরাশীয়রবিসংযোগবিশিষ্টস্বান্তিমক্ষণকত্বং মলমাসত্বং ভানুলঙ্ঘিতে অতিব্যাপ্তিবারণায় ঔৎপাতিকভিন্নত্বেন বিশেষণীয়ং। ইতি মলমাসতত্ত্বটীকা॥ মুখ্যফলজনকব্যাপারজনকত্বে সতি মুখ্যফলাজনকত্বং অঙ্গত্বং ঘটাদাবতিব্যাপ্তিবারণায় সত্যন্তং ইতি তিথ্যাদিতত্ত্বটীকা চ॥

অতিশক্তিতা (স্ত্রী) বিক্রমঃ। মহাবলং। ইত্যমরঃ॥

অতিশক্তিভাক্ [জ্] (পুং) অতিশয়শক্তিবিশিষ্টঃ। অতিসমর্থঃ। সবীর্য্যমতিশক্তিভাক্। ইত্যমরঃ॥

অতিশয়ঃ (পুং) অধিকঃ। তৎপর্য্যায়ঃ। ভরঃ ২ অতিবেলং ৩ ভৃশং ৪ অত্যর্থং ৫ অতিমাত্রং ৬ উদ্গাঢ়ং ৭ নির্ভরং ৮ তীব্রং ৯ একান্তং ১০ নিতান্তং ১১ গাঢ়ং ১২ বাঢ়ং ১৩ দৃঢ়ং ১৪। ইত্যমরঃ॥ অতিমর্য্যাদঃ ১৫ উৎকর্ষঃ ১৬। ইতি হেমচন্দ্রঃ॥ বলবৎ ১৭ সুষ্ঠু ১৮ কিমুত ১৯ সু ২০ অতীব ২১ অতি ২২। ইত্যব্যয়বর্গে অমরঃ॥ অতিরিক্তঃ ২৩ সমধিকঃ ২৪। ইতি বিশেষ্যনিঘ্নবর্গে অমরঃ॥

অতিশয়নং ( ক্লী ) অতিশয়ঃ। তদযুক্তে ত্রি। ইত্যমরটীকায়াং রমানাথঃ ॥

অতিশায়নং ( ক্লী ) অতিশয়নং। ইতি শব্দরত্নাবলী ॥

অতিশোভনঃ ( ত্রি ) অতিশয়শোভাযুক্তঃ। অতিপ্রশস্যঃ। শ্রেষ্ঠঃ। ইত্যমরঃ ॥

অতিসর্জ্জনং ( ক্লী ) অতিশয়দানং। তৎপর্য্যায়ঃ। বিলম্ভঃ ২। ইত্যমরঃ ॥ দানং। বধঃ। ইতি মেদিনী ॥

অতিসারঃ ( পুং ) বহুদ্রবমলনিঃসরণরোগঃ। তৎপর্য্যায়ঃ। অম্লগন্ধিঃ ২ উদরাময়ঃ ৩। ইতি ত্রিকাণ্ডশেষঃ ॥ অতীসারঃ ৪। ইতি বৈদ্যকং ॥ * ॥ তস্য নিদানং। গুর্ব্বতিস্নিগ্ধরূক্ষোষ্ণদ্রবস্থূলাতিশীতলৈঃ। বিরুদ্ধাধ্যশনাজীর্ণৈর্বিষমৈশ্চাপি ভোজনৈঃ ॥ স্নেহাদ্যৈরতিযুক্তৈশ্চ মিথ্যাযুক্তৈর্বিষৈর্ভয়ৈঃ। শোকাদ্দুষ্টাম্বুমদ্যাতিপানৈঃ সাত্ম্যর্ত্তুপর্য্যয়ৈঃ ॥ জলাভিরমণৈর্বেগবিঘাতৈঃ ক্রিমিদোষতঃ। নৃণাং ভবত্যতীসারো লক্ষণং তস্য বক্ষ্যতে ॥ * ॥ সংপ্রাপ্তির্যথা। সংশম্যাপাং ধাতুরগ্নিং প্রবৃদ্ধঃ শকৃন্মিশ্রো বায়ুনাধঃ প্রণুন্নঃ। সরত্যতীবাতিসারং তমাহুর্ব্যাধিং ঘোরং ষড়্বিধং তং বদন্তি ॥ একৈকশঃ সর্ব্বশশ্চাপি দোষৈঃ শোকেনান্যঃ ষষ্ঠ আমেন চোক্তঃ ॥ * ॥ পূর্ব্বরূপং যথা। হৃন্নাভিপায়ূদরকুক্ষিতোদগাত্রাবসাদানিলসন্নিরোধাঃ। বিট্‌সঙ্গ আধ্মানমথাবিপাকো ভবিষ্যতস্তস্য পুরঃসরাণি ॥ ইতি মাধবকরঃ ॥ অথ সামান্যাতিসারস্য চিকিৎসামাহ। আমপকক্রমং হিত্বা নাতিসারক্রিয়া যতঃ। অতোঽতিসারে সর্ব্বস্মিন্নামং পকঞ্চ লক্ষয়েৎ ॥ ক্রমশশ্চিকিৎসা। তত্রামপকয়োর্লক্ষণং। সংসৃষ্টমানৈর্দোষৈস্তু ন্যস্তমপ্সু নিমজ্জতি। পুরীষং ভৃশদুর্গন্ধি পিচ্ছিলং চামসংজ্ঞিতং ॥ এতান্যেব তু লিঙ্গানি বিপরীতানি যস্য বৈ। লাঘবঞ্চ বিশেষেণ তস্য পকং বিনির্দ্দিশেৎ ॥ ন চ সংগ্রাহণং দদ্যাৎ পূর্ব্বমামাতিসারিণে। অকালে সংগৃহীতো হি বিকারান্ কুরুতে বহূন্ ॥ দণ্ডকালসকাধ্মানগ্রহণ্যর্শোভগন্দরান্। শোথং পাণ্ড্বাময়ং প্লীহগুল্মমেহোদরজ্বরান্ ॥ ডিম্ভস্থঃ স্থবিরস্থশ্চ বাতপিত্তাত্মকশ্চ যঃ। ক্ষীণধাতুবলস্যাপি বহুদোষোঽতিবিশ্রুতঃ ॥ আমোঽপি স্তম্ভনীয়ঃ স্যাৎ পাচনান্মরণং ভবেৎ। লঙ্ঘনমেকং মুক্ত্বা ন চান্যদস্তীহ ভেষজং বলিনঃ। সমুদীর্ণদোষনিচয়ং তৎ পাচয়তে তথা শময়েৎ ॥ * ॥ লঙ্ঘন এব দোষদুঃসহপিপাসায়াং দোষপাকার্থং ষড়ঙ্গবিধিনার্দ্ধশৃতং যোগচতুষ্টয়মাহ। ধান্যোদীচ্যশৃতং তোয়ং তৃষ্ণাদাহাতিসারিণে। হ্রীবেরশৃঙ্গবেরাভ্যাং মুস্তপর্পটকেন বা ॥ মুস্তোদীচ্যশৃতং শীতং প্রদাতব্যং পিপাসবে। হিতং লঙ্ঘনমেবাদৌ পূর্ব্বরূপেঽতিসারিণঃ ॥ কার্য্যম্বানশনস্যান্তে প্রদ্রবং লঘু ভোজনং। পথ্যাদারুবচামুস্তৈর্নাগরাতিবিষান্বিতৈঃ ॥ আমাতীসারনাশায় ক্বাথমেভিঃ পিবেন্নরঃ। পথ্যাদিক্বাথঃ ॥ * ॥ পাঠা হিঙ্গুজমোদোগ্রা পঞ্চকোলাব্দজং রজঃ। উষ্ণাম্বুপীতং সরুজং জয়ত্যামং

সসৈন্ধবং ॥ পাঠাদিচূর্ণং ॥ * ॥ হরীতকীং সাতিবিষাং হিঙ্গু সৌবর্চ্চলাং বচাং। সৈন্ধবঞ্চাপি সংপিষ্য পায়য়েদুষ্ণবারিণা ॥ আমাতিসারং যোগোঽয়ং পাচয়িত্বা চিকিৎসতি। আমাতিসারো যোগেন যদ্যেতেন ন শাম্যতি। ন তং যোগশতেনাপি চিকিৎসতি চিকিৎসকঃ॥ চিকিৎসতি অপনয়তি। হরীতক্যাদিকস্কঃ ॥ * ॥ বৎসকাতিবিষা বিল্বমুস্তবালকজং শৃতং। অতীসারং জয়েৎ সামং চিরজং রক্তশূলজিৎ ॥ বৎসকাদিক্বাথঃ ॥ * ॥ এরণ্ডরসসংপিষ্টং পক্কমামঞ্চ নাগরং। আমাতিসারশূলঘ্নং দীপনং পাচনং পরং ॥ নাগরস্য পুটপাকঃ কল্কশ্চ ॥ * ॥ ধান্যবালকবিল্বাব্দনাগরৈঃ পাচিতং জলং। আমশূলবিবন্ধঘ্নং পাচনং নিত্যসেবিতং ॥ ধান্যপঞ্চকং ॥ * ॥ পিত্তে ধান্যচতুষ্কস্তু শুণ্ঠীত্যাগাদ্বদন্তি হি। রক্তেঽপি পিত্তসাধর্ম্ম্যাদ্বিতং ধান্যচতুষ্টয়ং ॥ ধান্যচতুষ্কং। ইতি আমাতিসারস্য চিকিৎসা ॥ * ॥ সলোধ্রং ধাতকী বিল্বং মুস্তাম্রাস্থি কলিঙ্গকং। পিবেন্মাহিষতক্রেণ পক্কাতীসারনাশনং ॥ লোধ্রাদিচূর্ণং ॥ * ॥ অম্বষ্ঠা ধাতকী লোধ্রং সমঙ্গা পদ্মকেশরং। মধুকারলুবিল্বঞ্চ পক্কাতীসারহা গণঃ ॥ অরলুঃ শ্যোণাকঃ। পাঠাদির্গণঃ ॥ * ॥ সমঙ্গা ধাতকীপুষ্পং মঞ্জিষ্ঠা লোধ্র এব চ। শাল্মলীবেষ্টকো লোধ্রো দাড়িমদ্রুফলত্বচৌ ॥ আম্রাস্থিমধ্যং লোধ্রঞ্চ বিল্বমধ্যং প্রিয়ঙ্গু চ। মধূকং শৃঙ্গবেরঞ্চ দীর্ঘবৃন্তত্বগেব চ॥ চত্বার এতে যোগাঃ স্যুঃ পক্কাতিসারনাশনাঃ। তে যোগা উপযোগ্যাঃ স্যুঃ সক্ষৌদ্রাস্তণ্ডুলাম্বুনা ॥ সমঙ্গাত্র লজ্জালুঃ। শাল্মলীবেষ্টকো মোচরসঃ। দাড়িমস্য দ্রুমফলয়োস্ত্বচৌ। প্রিয়ঙ্গোর্নপুংসকত্বমত্র ফলে বর্ত্তমানত্বাৎ। শৃঙ্গবেরমত্র শুণ্ঠী। দীর্ঘবৃন্তঃ শ্যোণাকঃ তস্য ত্বক্। সমঙ্গাদীনি চত্বারি চূর্ণানি ॥ * কঞ্চটজম্বূদাড়িমশৃঙ্গাটকপত্রবিল্ববর্হিষ্ঠৈঃ। জলধরনাগরসহিতং গঙ্গামপি বেগবাহিনীং রুন্ধ্যাৎ ॥ কঞ্চটং চবরাঈ শাকস্য ভেদঃ কঞ্চটাদিভিশ্চতুর্ভিঃ পত্রশব্দঃ সম্বধ্যতে বর্হিষ্ঠং বালকং। গঙ্গাধরক্বাথঃ ॥ * ॥ মোচরসমুস্তনাগরপাঠারলুধাতকীকুসুমৈঃ। চূর্ণং মথিতসমেতং রুণদ্ধি গঙ্গাপ্রবাহমপি॥ অরলুঃ শ্যোণাকঃ। মথিতং নির্জ্জলং দধি বস্ত্রপূতং। গঙ্গাধরচূর্ণং ॥ * ॥ মুস্তা বৎসকবীজং মোচরসো বিল্বধাতকীলোধ্রং। গুড়মথিতসংপ্রযুক্তং গঙ্গামপি বেগবাহিনীং রুন্ধ্যাৎ ॥ দ্বিতীয়ং গঙ্গাধরচূর্ণং ॥ * ॥ মুস্তারলুকশুণ্ঠীভির্ধাতকীলোধ্রবালকৈঃ। বিল্বমোচরসাভ্যাঞ্চ পাঠেন্দ্রযববৎসকৈঃ ॥ আম্রবীজসমঙ্গাতিবিষাযুক্তৈর্বিচূর্ণিতৈঃ। মধুতণ্ডুলপানীয়পীতৈর্নশ্যেৎ প্রবাহিকাং॥ সর্ব্বেঽতিসারা গ্রহণী প্রশমং যাতি বেগতঃ। বৃদ্ধগঙ্গাধরং চূর্ণং রুন্ধ্যাদ্গীর্ব্বাণবাহিনীং ॥ সমঙ্গা লজ্জালুঃ। বৃদ্ধগঙ্গাধরচূর্ণং ॥ * ॥ অঙ্কোঠমূলকল্কঃ তণ্ডুলপয়সা সমাক্ষিকঃ পীতঃ। সেতুরিব বারিবেগং ঝটিতি রুন্ধ্যাদতীসারং ॥ অঙ্কোঠকল্কঃ ॥ * ॥ কুটজত্বগ্ধলামার্দ্রাং

দ্রোণনীরে পচেৎ ভিষক্। পাদশেষং শৃতং নীত্বা বস্ত্রপূতং পুনঃ পচেৎ ॥ লজ্জালুর্ধাতকী বিল্বং পাঠা মোচরসস্তথা। মুস্তং প্রতিবিষা চৈব চূর্ণান্যেষাং পলং পলং ॥ নিক্ষিপ্য বিপচেত্তাবৎ যাবৎ দর্ব্বী প্রলিপ্যতে। জলেন ছাগদুগ্ধেন পীতো মণ্ডেন বা জয়েৎ ॥ ঘোরান্ সর্ব্বানতীসারান্ নানাবর্ণান্ সবেদনান্। অসৃগ্দরং সমস্তঞ্চ তথার্শাংসি প্রবাহিকাং ॥ কুটজাবলেহঃ॥*॥ কৃষ্ণালবালং সুদৃঢ়ং পিষ্টৈরামলকৈর্ভিষক্। আর্দ্রকস্বরসেনাশু পূরয়েন্নাভিমণ্ডলং ॥ নদীবেগোপমং ঘোরং প্রবৃদ্ধং দুর্দ্ধরং নৃণাং। সদ্যোঽতিসারমজয়ং নাশয়ত্যেব যোগরাট্ ॥ পাঠা পিষ্টা চ গোদধ্না তথা মধ্যত্বগাত্রজা। অতীসারং ব্যথাদাহযুক্তং হস্ত্যুদরে ধৃতা ॥ * ॥ অথ বাতাতিসারস্য লক্ষণং। অরুণং ফেনিলং রূক্ষমল্পমল্পং মুহুর্মুহুঃ। শকৃদামং সরুক্ছব্দং মারুতেনাতিসার্য্যতে ॥ অরুণমীষদ্রক্তং। শকৃৎ পুরীষং। সরুক্ছব্দং শব্দো গুদে। তৎসাহচর্য্যাৎ রুগপি গুদ এব বোদ্ধব্যা ॥*॥ তস্য চিকিৎসা। বচা চাতিবিষা মুস্তং বীজানি কুটজস্য চ। শ্রেষ্ঠঃ কষায় এতেষাং বাতাতিসারশান্তয়ে ॥ * ॥ অথ পিত্তাতীসারস্য লক্ষণং। পিত্তাৎ পীতং শকৃদ্রক্তং দুর্গন্ধি হরিতং দ্রুতং। গুদপাকতৃষামূর্চ্ছাদাহযুক্তং প্রবর্ত্ততে ॥*॥ তস্য চিকিৎসা। বিল্বশক্রযবাম্ভোদবালকাতিবিষাকৃতঃ। কষায়ো হন্ত্যতীসারং সামং পিত্তসমুদ্ভবং। বিল্বাদিকষায়ঃ ॥ * ॥ রসাঞ্জনং সাতিবিষং কুটজস্য পলং ত্বচং। ধাতকীশৃঙ্গবেরঞ্চ পায়য়েত্তণ্ডুলাম্বুনা ॥ নিহন্তি মধুনা পীতং পিত্তাতীসারমুল্বণং। অগ্নিং সন্দীপয়ত্যেতৎ শূলমাশু নিবারয়েৎ ॥ রসাঞ্জনাদিচূর্ণং ॥*॥ অথ পিত্তাতিসারভেদস্য রক্তাতীসারস্য সংপ্রাপ্তিমাহ। পিত্তকৃন্তি যদাত্যর্থং দ্রব্যাণ্যশ্নাতি পৈত্তিকে। তদ্দোষাজ্জায়তে শীঘ্রং রক্তাতীসার উল্বণঃ ॥ * ॥ তস্য চিকিৎসা। বৎসকতরুত্বগার্দ্রা দাড়িমফলসম্ভবা ত্বক্ চ। ত্বগ্যুগলং পলমানং বিপচেদষ্টাংশসম্মিতে তোয়ে ॥ অষ্টমভাগং শেষং ক্বাথং মধুনা পিবেৎ পুরুষঃ। রক্তাতিসারমুল্বণমতিশয়িতং নাশয়েন্নিয়তং ॥ কুটজদাড়িমক্বাথঃ ॥*॥ কুটজাতিবিষা মুস্তং বালকং লোধ্রচন্দনং। ধাতকী দাড়িমং পাঠা ক্বাথমেষাং সমাক্ষিকং ॥ পিবেদ্রক্তাতিসারে তু দাহশূলামসংযুতে। কুটজাদিকষায়োঽয়ং সর্ব্বাতীসারনাশনঃ ॥ চন্দনমত্র রক্তচন্দনং। কুটজাদিক্বাথঃ ॥*॥ গুড়েন ভক্ষয়েদ্বিল্বং রক্তাতীসারনাশনং। আমশূলবিবন্ধঘ্নং কুক্ষিরোগহরং পরং ॥ বিল্বং সুস্বিন্নং বালবিল্বগর্ভং শীতং তৎস্বেদনোদকং চানুপেয়ং। গুড়বিল্বং ॥*॥ জম্ব্বাম্রামলকীনাস্তু কুট্টয়েৎ পল্লবান্ নবান্। সংগৃহ্য স্বরসং তেষাং অজাক্ষীরেণ যোজয়েৎ ॥ তৎ পিবেন্মধুনা যুক্তং রক্তাতীসারনাশনং। জম্ব্বাদিস্বরসঃ ॥ * ॥ নিষ্ক্বাথ্য মূলমমলং গিরিমল্লিকায়াঃ সম্যক্ পলদ্বিতয়মম্বু চতুঃশরাবে। তৎপাদশেষসলিলং খলু শোষণীয়ং ক্ষীরে পলদ্বয়মিতে

কুশলৈরজায়াঃ ॥ প্রক্ষিপ্য মাষকানষ্টৌ মধুনস্তত্র শীতলে। রক্তাতিসারী তৎ পীত্বা নৈরুজ্যং ক্ষিপ্রমাপ্নুয়াৎ॥ কুটজক্ষীরং ॥*॥ পীত্বা শতাবরীকল্কং পয়সা ক্ষীরভুগ্ জয়েৎ। রক্তাতিসারং পীত্বা বা তয়া সিদ্ধং ঘৃতং নরঃ ॥ শতাবরীকল্কস্তদ্ঘৃতঞ্চ ॥ * ॥ গোদুগ্ধনবনীতস্তু মধুনা সিতয়া সহ। লীঢ়ং রক্তাতিসারে তু গ্রাহকং পরমং মতং ॥ নবনীতাবলেহঃ॥ *॥ পাতং মধুসিতাযুক্তং চন্দনং তণ্ডুলাম্বুনা। রক্তাতিসারজিদ্রক্ত-পিত্ততৃড়্দাহমেহনুৎ ॥ চন্দনমত্র শ্বেতং। চন্দনকল্কঃ ॥ *॥ বিরেকৈর্ব্বহুভির্যস্য গুদং পিত্তেন দহ্যতে। পচ্যতে বা তয়োঃ কার্য্যং সেকপ্রক্ষালনাদিকং॥আদিশব্দেন লেপাদি-গ্রহঃ। পটোলযষ্টীমধুককাথেন শিশিরেণ হি। গুদপ্রক্ষালনং কার্য্যং তেনৈব গুদ-সেচনং ॥ দাহে পাকে হিতং ছাগীদুগ্ধং সক্ষৌদ্রশর্করং। গুদস্য ক্ষালনে সেকে যুক্তং পানে চ ভোজনে॥ গুদস্য দাহ-পাকয়োঃ। গুদনিঃসরণে প্রোক্তং চাঙ্গেরী-ঘৃতমুত্তমং। অতিপ্রবৃত্ত্যা মহতী ভবেদ্যদি গুদব্যথা ॥ স্নিগ্ধমূষকমাংসেন তদা সংস্বে-দয়েদ্গুদং। অথ গোধূমচূর্ণস্য সংনীতস্য তু বারিণা॥ সাজ্যস্য গোলকং কৃত্বা মৃদু সংস্বেদয়েদ্গুদং। গুদব্যথায়াং গুদভ্রংশে গুদং স্নেহৈরভ্যজ্যান্তঃপ্রবেশয়েৎ।প্রবিষ্টং স্বেদয়েন্মন্দং মূষকস্যামিষেণ হি॥ মূষক-স্যামিষেণ কাঞ্জিকেনোৎস্বিন্নেন এরণ্ড-পত্রাদিস্থাপিতেন স্বেদয়েৎ। মূষকস্যাথ বসয়া পায়ুং সম্যক্ প্রলেপয়েৎ। গুদ-ভ্রংশাভিধো ব্যাধিঃ প্রণশ্যতি ন সংশয়ঃ ॥ চাঙ্গেরীকোলদধ্যম্লক্ষারনাগরসংযুতং।ঘৃতং বিপকং পাতব্যং গুদভ্রংশগদাপহং ॥ চারেঙ্গী চতুষ্পত্রা অম্ললোনিকা তস্যাঃ স্বরসঃ কোলস্য কাথঃ দধ্যম্লং দধিরূপমম্লং এতত্রয়ং মিলিতং ঘৃতাচ্চতুর্গুণং। ক্ষার-নাগরয়োঃ কল্কঃ। চাঙ্গেরীঘৃতং ॥ * ॥ কোমলং পদ্মিনীপত্রং যঃ খাদেচ্ছর্করা-ন্বিতং। এতন্নিশ্চিত্য নির্দ্দিষ্টং ন তস্য গুদনির্গমঃ ॥ পদ্মিনীপত্রং পুরইনিপত্রং তৎ সংশোষ্য সংচূর্ণ্য শর্করাযুক্তং খাদেৎ। অয়ন্তু গুদভ্রংশোঽতীসারং বিনাপি ভবতি। ততঃ ক্ষুদ্ররোগেষু লিখিতঃ। অত্র তু গুদস্য দাহপাকব্যথাপ্রসঙ্গাৎ ভ্রংশোঽপি লিখিতঃ। চিকিৎসা তুভয়ত্র তুল্যৈব ॥ * ॥ অথ শ্লেষ্মাতিসারস্য লক্ষণং। শ্বেতং স্নিগ্ধং ঘনং বিস্রং শীতলং মন্দবেদনং। গৌরবা-রুচিসংযুক্তং শ্লেষ্মণা সার্য্যতে শকৃৎ ॥ বিস্রং স্যাদামগন্ধি যৎ ॥ * ॥ অথ তস্য চিকিৎসা। শ্লেষ্মাতিসারে প্রথমং হিতং লঙ্ঘনপাচনং। যোজ্যশ্চামাতিসারঘ্নো যথোক্তো দীপনো গণঃ ॥ চব্যঞ্চাতিবিষা কুষ্ঠং বালবিল্বং সনাগরং। বৎসকত্বক্ফলে পথ্যা ছর্দ্দিশ্লেষ্মাতিসারনুৎ ॥ চব্যাদি-কাথঃ ॥*॥ হিঙ্গু সৌবর্চ্চলং ব্যোষমভয়াতি-বিষা বচা। পীতমুষ্ণাম্বুনা চূর্ণমেষাং শ্লেষ্মাতিসারনুৎ॥ হিঙ্গ্বাদিচূর্ণং ॥*॥ কৃমি-শত্রুবচাবিল্বপেশীধান্যাককট্ফলং। এষাং কাথং ভিষগ্দদ্যাৎ অতীসারে বলাসজে ॥ বিড়ঙ্গাদিকাথঃ ॥ * ॥ অথ দ্বিদোষজাতি-

সারাণাং লক্ষণানি চিকিৎসা চ। দ্বিদোষলক্ষণৈর্ব্বিদ্যাদতীসারং দ্বিদোষজং। তেষাং চিকিৎসা প্রোক্তৈব বিশিষ্টা চ নিগদ্যতে॥ কট্‌ফলং মধুকং লোধ্রত্বক্ দাড়িমফলস্য চ। সতণ্ডুলজলং চূর্ণং বাতপিত্তাতিসারনুৎ॥ বাতপিত্তাতিসারে॥*॥ চিত্রকাতিবিষা মুস্তং বালবিল্বং সনাগরং। বৎসকত্বক্‌ফলং পথ্যা বাতশ্লেষ্মাতিসারনুৎ॥ বাতশ্লেষ্মাতিসারে॥*॥ মুস্তা সাতিবিষা মূর্ব্বা বচা চ কুটজঃ সমাঃ। এষাং কষায়ঃ সক্ষৌদ্রঃ পিত্তশ্লেষ্মাতিসারনুৎ॥ পিত্তশ্লেষ্মাতিসারে॥*॥ অথ সন্নিপাতাতিসারস্য লক্ষণং। তন্দ্রাযুক্তো মোহসাদাস্যশোষী বর্চঃ কুর্য্যান্নৈকরূপং তৃষার্ত্তঃ। সর্ব্বোদ্ভূতে সর্ব্বলিঙ্গোপপত্তিঃ কৃচ্ছ্রোঽসাধ্যো বালবৃদ্ধাবলানাং॥ * ॥ অথ তস্য চিকিৎসা। পঞ্চমূলীবলাবিল্বগুড়ূচীমুস্তনাগরৈঃ॥ পাঠাভূনিম্ববর্হিষ্ঠকুটজত্বক্‌ফলৈঃ শৃতং॥ সর্ব্বজং হন্ত্যতীসারং জ্বরঞ্চাপি তথা বমিং। সশূলোপদ্রবং শ্বাসং কাসং বাপি সুদুস্তরং॥ পঞ্চমূল্যত্র সামান্যা পিত্তে যোজ্যা কনীয়সী। বাতে পুনর্ব্বলাসে চ সা যোজ্যা মহতী মতা॥ বর্হিষ্ঠং বালকং। পঞ্চমূল্যাদিক্বাথঃ॥ * ॥ অভয়া নাগরং মুস্তং গুড়েন সহ যোজিতং। চতুঃসমেয়ং গুটিকা স্যাত্রিদোষাতিসারনুৎ॥ আমাতিসারমানাহং সবিবন্ধং বিসূচিকাং। কৃমীনরোচকং হন্যাদ্দীপয়ত্যাশু চানলং॥ চতুঃসমো মোদকঃ॥ * ॥ তৎকালাকৃষ্টকুটজত্বচং তণ্ডুলবারিণা। পিষ্টাং

চতুঃপলমিতাং জম্বুপল্লববেষ্টিতাং॥ সূত্রেণ বদ্ধা গোধূমপিষ্টেন পরিবেষ্টিতাং। লিপ্তাঞ্চ ঘনপঙ্কেন নির্দ্দহেদ্গোময়াগ্নিনা॥ অঙ্গারবর্ণাঞ্চ মৃদং দৃষ্ট্বা বহ্নেঃ সমুদ্ধরেৎ। ততো রসং সমাদায় শীতং ক্ষৌদ্রযুতং পিবেৎ॥ উক্তঃ কৃষ্ণাত্রিপুত্রেণ পুটপাকস্তু কৌটজঃ। জয়েৎ সর্ব্বানতীসারান্ দুস্তরান্ সুচিরোত্থিতান্॥ কুটজপুটপাকঃ ॥ * ॥ কুটজত্বক্‌কৃতঃ ক্বাথো বস্ত্রপূতো ঘনীকৃতঃ। স লীঢ়োঽতিবিষাযুক্তঃ স্যাত্রিদোষাতিসারনুৎ॥ ইচ্ছন্ত্যত্রাষ্টমাংশেন ক্বাথাদতিবিষারজঃ। প্রক্ষিপেদ্বা চতুর্থাংশমিতি কেচিদ্বদন্তি হি॥ কুটজাবলেহঃ॥ * ॥ পলমঙ্কোঠমূলস্য পাঠাং দার্ব্বীঞ্চ তৎসমাং। পিষ্ট্বা তণ্ডুলতোয়েন বটকানক্ষসম্মিতান্॥ ছায়াশুষ্কাংশ্চ তান্ কুর্য্যাত্তেম্বেকং তণ্ডুলাম্বুনা। পেষয়িত্বা প্রদদ্যাত্তং পানায় প্রদিনে ভিষক্॥ বাতপিত্তকফোদ্ভূতান্ দ্বন্দ্বজান্ সান্নিপাতিকান্। হন্যাৎ সর্ব্বানতীসারান্ বটকোঽয়ং প্রযোজিতঃ॥ অঙ্কোঠবটকঃ॥*॥ অথাগন্তুজস্য শোকাতিসারস্য সংপ্রাপ্তিপূর্ব্বকং লক্ষণমাহ। তৈস্তৈর্ভাবৈঃ শোচতোঽল্পাশনস্য বাষ্পোষ্মা বৈ বহ্নিমাবিশ্য জন্তোঃ। কোষ্ঠং গত্বা ক্ষোভয়েৎ তস্য রক্তং তচ্চাধস্তাৎ কাকণন্তীপ্রকাশং॥ নির্গচ্ছেদ্বৈ বিড়্‌বিমিশ্রং হ্যবিড়্‌বা নির্গন্ধস্বা গন্ধবদ্বাতিসারঃ। শোকোৎপন্নো দুশ্চিকিৎসোঽতিমাত্রং রোগো বৈদ্যৈঃ কষ্ট এব প্রদিষ্টঃ॥ অয়মর্থঃ। তৈস্তৈর্ভাবৈর্বন্ধুবিত্তক্ষয়াদিভিঃ। শোচতঃ শোকং কুর্ব্বতঃ

জন্তোঃ প্রাণিনঃ । বাষ্পোষ্মা বাষ্পঃ শোকজদেহোষ্মণা জনিতং নেত্রনাশাগলাদিষু জলং তেন সহিতঃ উষ্মা শোকজং দেহতেজঃ। স কোষ্ঠং গত্বা বহ্নিমাবিশ্য জঠরাগ্নিং মন্দীকৃত্য । বাষ্পসাহিত্যাদুষ্মণাপি বহ্নের্মন্দীভাব ইতি ন দোষঃ। বহ্নের্মন্দীভাবাদেব অল্পাশনস্যেতি জন্তোর্বিশেষণং । ততস্তস্য জন্তো রক্তং ক্ষোভয়েৎ স্বস্থানাচ্চালয়েৎ। ইতি সংপ্রাপ্তিঃ॥*॥ অথ লক্ষণং । তচ্চ রক্তং অধস্তাৎ গুদাৎ কাকণন্তীপ্রকাশং গুঞ্জাফলসদৃশং বিড়্‌মিশ্রং গন্ধবচ্চ। অবিট্ নির্গন্ধং বা নির্গচ্ছেৎ। শোকোৎপন্নোঽতিসারঃ অতিমাত্রং দুশ্চিকিৎস্যঃ । শোকাপনোদনং বিনা কেবলেন ভেষজেন প্রতিকর্ত্তুমশক্যত্বাৎ। এষোঽতীসারঃ বৈদ্যৈঃ কষ্টঃ কষ্টেন সাধ্যঃ। প্রদিষ্টঃ কথিত ইত্যর্থঃ॥ * ॥ অথাগন্তুজত্বেন সাম্যাৎ ভয়াতীসারস্যাপি সংপ্রাপ্তিপূর্ব্বকং লক্ষণমত্রৈবাহ। ভয়েন ক্ষোভিতা দোষা দূষয়ন্তি মলং যদা। তদাতিসার্য্যতে তস্তু ক্ষিপ্রমুষ্ণজলপ্লবং ॥ বাতপিত্তাতিসারস্য প্রায়ো লিঙ্গৈঃ সমন্বিতং। ন ভয়োপশমাচ্ছর্ম্ম যস্মিন্ স্যাৎ স ভয়াৎ স্মৃতঃ॥ প্লবত ইতি প্লবং জলে প্লবমানং । নমু ভয়াতিসারস্য কথমাগন্তুজত্বঽয়মপি দোষজ এব। যত আহ। ভয়েন ক্ষোভিতা দূষিতা দোষা মলং দূষয়ন্তি। তন্মলমতিসরতি । অত্র পূর্ব্বমেব দোষসম্বন্ধঃ । উচ্যতে। রাগদ্বেষভয়াৎ যে চ তে স্যুরাগন্তবো গদাঃ। ইতি বচনাদ্-

ভয়াতীসার আগন্তুজ এব। শ্লোকস্য ত্বয়মর্থঃ। ভয়েনৈব হেতুভূতেন দোষা বাতপিত্তকফা অতীসারণায় ক্ষোভিতাঃ সঞ্চালিতাঃ ন দূষিতা ভয়েন ত্রয়াণামপি দোষাণাং দূষণাসম্ভবাৎ। অতিসর্ত্তুং চলিতা বাতপিত্তকফা মলং দূষয়ন্তি তৎ সর্ব্বং বাতপিত্তকফমলং ভয়েনৈবাতিসার্য্যতে । পশ্চাদ্বাতসম্বন্ধো ভয়াদ্বায়ুরিতি বচনাৎ। অতএব ভয়াতিসারে বাতহর্য্যেব ক্রিয়া কথিতেতি সমাধিঃ॥*॥ অথ তয়োশ্চিকিৎসা। ভয়শোকসমুদ্ভূতৌ জ্ঞেয়ৌ বাতাতিসারবৎ । তয়োর্ব্বাতহরী কার্য্যা হর্ষণাশ্বাসনৈঃ ক্রিয়া ॥ বাতাতিসারবৎ বাতাতিসারলক্ষণৈঃ । তয়োশ্চিকিৎসা চ হর্ষণাশ্বাসনপূর্ব্বিকা বাতহরী কার্য্যা ॥ * ॥ অথামাতীসারস্য সংপ্রাপ্তিপূর্ব্বকং লক্ষণমাহ। অন্নাজীর্ণাৎ প্রদ্রুতাঃ ক্ষোভয়ন্তো দোষাঃ কোষ্ঠে ধাতুসংঘান্ মলাংশ্চ । নানাবর্ণং নৈকশঃ সারয়ন্তি শূলোপেতং ষষ্ঠমেনং বদন্তি ॥ অন্নং ভুক্তং তদজীর্ণং চেতি কর্ম্মধারয়ে অন্নাজীর্ণং তস্মাৎ প্রদ্রুতা উপদ্রুতাঃ। ক্ষোভয়ন্তঃ চালয়ন্তঃ। নৈকশ ইত্যত্র নাকাদিত্বান্নাক্ষরবিপর্য্যয়ঃ। নম্বামেন দোষা দূষ্যন্তে গুর্ব্বাদিভক্ষণাদিভিরিব তে চাতীসারমুৎপাদয়ন্তি। নত্বামমেবাতীসারমুৎপাদয়তি । তেনামাতীসারোঽপি দোষজ এব কিমর্থময়ং পৃথগুচ্যতে। উচ্যতে। আমাতীসারস্য চিকিৎসাবিশেষার্থং সম্প্রাপ্তিপূর্ব্বকো লক্ষণবিশেষঃ পৃথগুক্তঃ। কঃ স চিকিৎসা-

বিশেষস্তমাহ। অতীসারেষু সর্ব্বেষ্বেব সং-
গ্রাহকমৌষধমুক্তমামাতীসারে তু গ্রাহকং
বিরুদ্ধং। যত উক্তং। নামে সংগ্রা-
হকং বিদ্যাদতীসারে কদাচন। সংগৃহীতো
বলাদামো বিকারান্ কুরুতে বহূন্॥ ইতি।
বলাদ্ভেষজবলাৎ। বিকারান্ গ্রহণ্যাধ্মান-
শূলগুল্মশোথোদরজ্বরাদীন্ ॥ * ॥ তস্য
চিকিৎসা। বৎসকাতিবিষা শুণ্ঠী বিল্বহিঙ্গু-
যবাম্বুদাঃ। চিত্রকেন যুতা এষাং ক্বাথ
আমাতিসারনুৎ॥ আমাতিসারস্য চিকিৎসা
পূর্ব্বমুক্তেন॥ * ॥ শোথঘ্নীন্দ্রযবাঃ পাঠা
বিড়ঙ্গাতিবিষা ঘনাঃ। ক্বথিতাঃ সোষণাঃ
পীতাঃ শোথাতীসারনাশনাঃ॥ শোথঘ্নী
পুনর্ণবা। উষণং মরিচং। সশোথাতী-
সারে॥ * ॥ আম্রাস্থিমধ্যমালুরফলক্বাথঃ
সমাক্ষিকঃ। শর্করাসহিতো হন্যাৎ ছর্দ্যতী-
সারমুল্বণং॥ মালুরফলং বিল্বফলং।
কষায়ো ভৃষ্টমুদ্গস্য সলাজমধুশর্করঃ। নিহ-
ন্যাচ্ছর্দ্যতীসারং তৃষ্ণাদাহং জ্বরং ভ্রমং॥
ছর্দ্যতীসারে॥*॥ দধ্না সসারেণ সমাক্ষিকেণ
ভুঞ্জীত নিঃসারকপীড়িতস্তু। সুতপ্তকুপ্য-
ক্বথিতেন চাপি ক্ষীরেণ শীতেন মধুপ্লুতেন॥
নিঃসারকঃ নিঢ়াহী ইতি লোকে। সুতপ্ত-
কুপ্যক্বথিতেন সুতপ্তসুবর্ণরজতেতরলোহ-
নির্ব্বাপণকথিতেন। ভুঞ্জীত পথ্যমিতি
শেষঃ॥ নিঃসারকে ॥ * ॥ দীপ্তাগ্নির্ন্নি-
ষ্পুরীষো যঃ সার্য্যতে ফেনিলং শকৃৎ।
স পিবেৎ ফাণিতং শুণ্ঠীং দধি তৈলং পয়ো
ঘৃতং॥ বলা বিশ্বাশৃতং ক্ষীরং গুড়তৈলানু-
যোজিতং। দীপ্তাগ্নিং পায়য়েৎ প্রাতঃ
সুখদং বর্চ্চসক্ষয়ে॥ পুরীষক্ষয়ে॥*॥ তুলাং
সংকুট্য বিল্বস্য পচেৎ পাদাবশেষিতং।
সক্ষীরং সাধয়েত্তৈলং শ্লক্ষ্ণপিষ্টৈরিমৈঃ
সমৈঃ॥ বিল্বং সধাতকীকুষ্ঠং শুণ্ঠী রাস্না
পুনর্ণবা। দেবদারু বচা মুস্তং লোধ্রমোচ-
রসান্বিতং॥ এভির্ম্মৃদ্বগ্নিনা পক্বং গ্রহণ্যর্শো-
ঽতিসারনুৎ। বিল্বতৈলমিতি খ্যাতমত্রি-
পুত্রেণ ভাষিতং॥ গ্রহণ্যর্শোঽধিকারে যে
স্নেহাঃ সমুপদর্শিতাঃ। প্রযোজ্যাস্তেঽতি-
সারেঽপি ত্রয়াণাং তুল্যহেতুতা॥ ত্রয়াণাং
গ্রহণ্যর্শোঽতিসারাণাং। বিল্বতৈলং॥ * ॥
অথাতিসারভেদস্য প্রবাহিকাব্যাধেঃ সং-
প্রাপ্তিপূর্ব্বকলক্ষণমাহ। বায়ুঃ প্রবৃদ্ধো
নিচিতং বলাসং নুদত্যধস্তাদহিতাশনস্য।
প্রবাহতোঽল্পং বহুশো মলাক্তং প্রবাহিকাং
তাং প্রবদন্তি তজ্জ্ঞাঃ॥ অস্যায়মর্থঃ।
অহিতাশনস্য অতিশয়েন বাতলভক্ষ্য-
ভোজিনঃ। প্রবৃদ্ধো বায়ুঃ প্রবাহতঃ কণ্ঠ-
হৃদ্বলেন সশব্দং বায়ুমপানমার্গেণ ত্যজতঃ।
নিচিতং সঞ্চিতং। বলাসং কফং। মলাক্তং
পুরীষযুক্তং অল্পং। বহুশঃ বারংবারং।
অধস্তাৎ গুদমার্গেণ। নুদতি প্রেরয়তি।
তজ্জ্ঞাঃ পুরাণা বৈদ্যাঃ। তাং প্রবাহিকাং।
প্রবদন্তি কথয়ন্তি॥ * ॥ তস্যা বাতজাদি-
ভেদেন রূপমাহ। প্রবাহিকা বাতকৃতা
সশূলা পিত্তাৎ সদাহা সকফা কফাচ্চ।
সশোণিতা শোণিতসম্ভবাচ্চ তাঃ স্নেহরূক্ষ-
প্রভবা মতাস্তু॥ তত্র রূক্ষপ্রভবা বাতজা।
স্নেহপ্রভবা কফজা। তুশব্দাত্তীক্ষ্ণোষ্ণ-
প্রভবা পিত্তজা রক্তজা চ। তাসামতীসার-

বদাদিশেচ্চ লিঙ্গং ক্রমং চামবিপক্কতাঞ্চ। ক্রমং চিকিৎসাং ॥ * ॥ তস্যাশ্চিকিৎসামাহ। বিল্বপেশী গুড়ং লোধ্রং তৈলং মরিচসংযুতং। লীঢ্বা প্রবাহিকাক্রান্তঃ সত্বরং সুখমাপ্নুয়াৎ ॥ বিল্বাদিরবলেহঃ ॥ * ॥ ধাতকী বদরীপত্রকপিত্থরসমাক্ষিকং। সলোধ্রমেকতো দধ্না পিবেন্নির্ব্বাহিকার্দ্দিতঃ ॥ একতঃ প্রত্যেকং দধ্না পিবেদিত্যর্থঃ। নির্ব্বাহিকা প্রবাহিকা। ধাতক্যাদিঃ ॥ * ॥ অথ অসাধ্যাতিসারিণো লক্ষণমাহ। পক্কজাম্ববসংকাশং যকৃৎখণ্ডনিভং তনুং। ঘৃততৈলবসামজ্জবেসবারপয়ো দধি। মাংসধাবনতোয়াভং কৃষ্ণং নীলারুণপ্রভং ॥ কুণপং সক্রদালোক্য নাতিসারমুপক্রমেৎ। তৃষ্ণাদাহারুচিশ্বাসহিক্কাপার্শ্বাস্থিশূলিনং ॥ সংমূর্চ্ছারতিসংমোহযুক্তং পক্কবলীগুদং। প্রলাপযুক্তঞ্চ ভিষক্ বর্জ্জয়েদতিসারিণং ॥ সংমূর্চ্ছা সকলেন্দ্রিয়মনসাং স্বস্ববিষয়গ্রহণাশক্তিহেতুরবস্থাবিশেষঃ। সংমোহঃ বিকৃতমতিত্বং। অসংবৃতগুদং ক্ষীণং শূলাধ্মানৈরুপদ্রুতং। গুদে পক্কে গতোষ্মাণমতীসারিণমুৎসৃজেৎ ॥ অসংবৃতগুদং গুদসংবরণাক্ষমং। গুদে পক্কে গতোষ্মাণং গুদপাকারম্ভকে পিত্তে বিদ্যমানেঽপি শীতগাত্রং নষ্টাগ্নিম্বা। শ্বাসশূলপিপাসার্ত্তং ক্ষীণং জ্বরনিপীড়িতং। বিশেষেণ নরং বৃদ্ধমতীসারো বিনাশয়েৎ ॥ শোথং শূলং জ্বরং তৃষ্ণাং শ্বাসং কাসমরোচকং। ছর্দ্দিমূর্চ্ছাঞ্চ হিক্কাঞ্চ দৃষ্ট্বাতিসারিণং ত্যজেৎ ॥ হস্তপাদাঙ্গুলীসন্ধিপ্রপাকো মূত্রনিগ্রহঃ। পুরীষস্যোষ্ণতাতীব মরণায়াতিসারিণাং ॥ অতীসারী রাজরোগী গ্রহণীরোগবানপি। মাংসাগ্নিবলহীনো যো দুর্ল্লভং তস্য জীবনং ॥ বালে বৃদ্ধে ত্বসাধ্যোঽয়ং লিঙ্গৈরেতৈরুপদ্রুতঃ। অপি যূনামসাধ্যঃ স্যাদতিদুষ্টেষু ধাতুষু ॥ এতৈর্লিঙ্গৈঃ পূর্ব্বোক্তৈঃ পক্কজাম্ববসংকাশত্বাদিভিঃ ॥ * ॥ অথাতিসারযুক্তস্য লক্ষণং। যস্যোচ্চারং বিনা মূত্রং সম্যগ্বায়ুশ্চ গচ্ছতি। দীপ্তাগ্নের্লঘু কোষ্ঠস্য স্থিতস্তস্যোদরাময়ঃ ॥ উচ্চারং পুরীষং বিনা স্থিতঃ নিবৃত্ত উদরাময়ো হত্রাতীসারঃ ॥ * ॥ অথাতীসারিণো বর্জ্জনীয়ান্যাহ। স্নানাবগাহনাভ্যঙ্গগুরুস্নিগ্ধাদিভোজনং। ব্যায়ামমগ্নিসন্তাপমতীসারী বিবর্জ্জয়েৎ ॥ স্নানমুদ্ধৃতজলেন। অবগাহনং নদ্যাদৌ। ইত্যতীসারাধিকারঃ। ইতি ভাবপ্রকাশঃ

অতিসারকী [ ন্ ] ( ত্রি ) সাতিসারঃ। অতিসাররোগযুক্তঃ। উদরাময়ী। ইত্যমরঃ ॥

অতিসাম্যা ( স্ত্রী ) লতাযষ্টিমধু। ইতি রাজনির্ঘণ্টঃ ॥ অস্যা গুণাঃ ক্লীতনকশব্দে দ্রষ্টব্যাঃ ॥

অতিস্ফিরঃ ( ত্রি ) অতিস্ফূর্ত্তিশালী। তৎপর্য্যায়ঃ। স্ফেষ্ঠঃ ২। ইতি জটাধরঃ ॥

অতিহসিতং ( ক্লী ) অতিশয়হাস্যং। ইতি

অতিহাসঃ ( পুং ) সশব্দহাসঃ। তৎপর্য্যায়ঃ। অনুস্যূতঃ ২। ইতি হেমচন্দ্রঃ ॥

অতীতং ( ত্রি ) ভূতকালঃ। তত্র ত্রিম্রোঘী টী

ঠী বিভক্ত্যো ভবন্তি। যথা ভবদ্ভূতভব্যে। ত্রিশঃ কাদ্যাঃ। কাদ্যাঃ ক্রয়স্তিস্রস্তিস্রঃ ক্রমাদ্বর্ত্তমানাতীতভবিষ্যৎস্যু কালেষু স্যুঃ। ইতি মুগ্ধবোধব্যাকরণং ॥ তস্য লক্ষণাদি যথা। বর্ত্তমানধ্বংসপ্রতিযোগিত্বমতীতত্বং। লঙ্লুঙোরতীতত্বং। লিট্কসোর্ব্বক্তুঃ পরোক্ষত্বং অতীতত্বঞ্চ। লুঙোঽতীতত্বং ক্রিয়াতিক্রমশ্চ। কুতশ্চিদ্বৈগুণ্যাৎ ক্রিয়ানিষ্পত্তিঃ ক্রিয়াতিক্রমঃ। ক্তক্তবত্বোরতীতত্বং। ইতি সারমঞ্জরী ॥

অতীতঃ (ত্রি) গতঃ। ভূতঃ। অতিক্রান্তঃ। যথা। ন নশ্যং ন্যূনসপ্তাব্দে নাতীতাশীতিবৎসরে॥ ইতি বৈদ্যকপরিভাষা॥ সংগীতশাস্ত্রমতে মানপ্রভেদঃ ॥

অতীন্দ্রিয়ং (ত্রি) অপ্রত্যক্ষং। প্রত্যক্ষাবিষয়ং। ইন্দ্রিয়াগোচরং। ইন্দ্রিয়াগ্রাহ্যং। ইত্যমরঃ ॥

অতীব ব্য অতিশয়ঃ। ইত্যমরঃ ॥

অতীসারঃ (পুং) অতিসাররোগঃ। ইতি বৈদ্যকং

অতুলঃ (পুং) তিলবৃক্ষঃ। ইতিশব্দচন্দ্রিকা ॥ তুলনারহিতে ত্রি ॥

অতুল্যং (ত্রি) নিস্তুল্যং। অনুপমং। অসাম্যং। অসদৃশং। যথা। অতুল্যমহসা সাকং মম রামেণ বিগ্রহঃ। ইতি ভট্টিঃ ॥

অতুষ্টিকরং (ত্রি) সন্তোষাজনকং। যথা মনুঃ। অনির্দ্দশঞ্চ প্রেতান্নং অতুষ্টিকরমেব চ। ইত্যাহ্নিকতত্ত্বং ॥

অতৃপ্তিঃ (স্ত্রী) তৃপ্ত্যভাবঃ। অপরিতুষ্টিঃ। অন্নাভিলাষঃ। যথা। উষ্মাতৃপ্তিতমঃ প্রবেশদহনং কট্বম্লতিক্তা রসা বর্ণঃ পাণ্ডুবিবর্জ্জিতঃ কথিততা কর্ম্মাণি পিত্তস্য বৈ ॥ ইতি রক্ষিতঃ ॥ অতৃপ্তে ত্রি ॥

অতেজঃ [স্] (ক্লী) ছায়া। ইতি রাজনির্ঘণ্টঃ ॥ তেজোরহিতে ত্রি ॥

অৎকঃ (পুং) শরীরাবয়বঃ। অঙ্গং। ইত্যুণাদিকোষঃ ॥

অৎকঃ (ত্রি) পথিকঃ। পান্থঃ। ইত্যুণাদিকোষঃ ॥

অৎট ঙ অতিক্রমে। বধে। ইতি কবিকল্পদ্রুমঃ ॥ দন্ত্যবর্গাদ্যোপধঃ। ঙ অতিট্টিষতে। ইতি দুর্গাদাসঃ ॥

অত্তা (স্ত্রী) মাতা। জ্যেষ্ঠভগিনী। ইত্যমরটীকায়াং রমানাথঃ ॥ অত্তা মাতাগ্রজস্বসা। ইতি নানার্থকোষঃ ॥ প্রাকৃতভাষায়াং শ্বশ্রূঃ। ইতি সাহিত্যদর্পণটীকা ॥

অত্তিঃ (স্ত্রী) নাট্যোক্তৌ জ্যেষ্ঠা ভগিনী। ইতি শব্দরত্নাবলী ॥

অত্তিকা (স্ত্রী) অন্তিকা। নাট্যোক্তৌ জ্যেষ্ঠা ভগিনী। ইতি ভরতঃ দ্বিরূপকোষশ্চ ॥

অত্নুঃ (পুং) সূর্য্যঃ। ইত্যুণাদিকোষঃ ॥

অত্যঃ (পুং) অশ্বঃ। বৈদিকশব্দোঽয়ং ॥

অত্যন্তং (ক্লী) অতিশয়ঃ। যথা। অত্যন্তং কঠিনৌ তথাপি হৃদয়ানন্দায় বক্ষোরুহৌ। ইতি নরহরিকবিঃ ॥

অত্যন্তকোপনঃ (ত্রি) অতিশয়ক্রোধী। তৎপর্য্যায়ঃ। চণ্ডঃ ২। ইত্যমরঃ ॥

অত্যন্তগামী [ন্] (ত্রি) অতিশয়গমনশীলঃ। অতিশীঘ্রগমনকর্ত্তা। তৎপর্য্যায়ঃ। অত্যন্তিকঃ ২। ইতি হেমচন্দ্রঃ ॥

অত্যন্তসুকুমারঃ (পুং) কঙ্গুনীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

অত্যন্তিকঃ (পুং) অতিশয়ভ্রমণকর্ত্তা। অত্যন্তগামী। ইতি হেমচন্দ্রঃ॥

অত্যন্তীনঃ (ত্রি) ভৃশঙ্গামী। অতিশয়গমনশীলঃ। ইত্যমরঃ॥

অত্যম্লং (ক্লী) বৃক্ষাম্লং। তেঁতুল ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥

অত্যম্লপর্ণী (স্ত্রী) লতাবিশেষঃ। তৎপর্য্যায়ঃ। তীক্ষ্ণা২ কণ্ডুরা৩ বল্লিশূরণঃ৪ করবড়বল্লী৫ বয়স্থা ৬ অরণ্যবাসিনী ৭। অস্যা গুণাঃ। তীক্ষ্ণাম্লত্বং। প্লীহমূলবিনাশিত্বং। বাতহারিত্বং। অগ্নিরুচিকারিত্বং। গুল্মশ্লেষ্মরোগাপহারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

অত্যম্লা (স্ত্রী) বনবীজপূরঃ। মধুরলেবু। মধুটাবা ইতি খ্যাতা। ইতি রত্নমালা॥

অত্যয়ঃ (পুং) মৃত্যুঃ। অতিক্রমঃ। দণ্ডঃ। দোষঃ। কৃচ্ছ্রং। ইত্যমরঃ॥

অত্যর্থং (ক্লী) অতিশয়ঃ। তদ্বিশিষ্টে বাচ্যলিঙ্গং। ইত্যমরঃ॥

অত্যল্পং (ত্রি) যৎকিঞ্চিৎ। অতিসূক্ষ্মং। তৎপর্য্যায়ঃ। অল্পিষ্ঠং ২ অল্পীয়ঃ ৩ কণীয়ঃ ৪ অণীয়ঃ ৫। ইত্যমরঃ॥

অত্যাকারঃ (পুং) ন্যক্কারঃ। তিরস্কারঃ। ইতি হেমচন্দ্রঃ॥

অত্যাচারং (ক্লী) বিরুদ্ধাচরণং। আচারমতিক্রম্য ইত্যব্যয়ীভাবসমাসনিষ্পন্নং॥

অত্যাচারঃ (পুং) অসঙ্গতাচরণং। আচারোল্লঙ্ঘনং। অন্যায়ঃ॥

অত্যাজ্যং (ত্রি) ত্যাগানর্হং। অত্যক্তব্যং। অত্যজনীয়ং। যথা যত্তু পতিতস্ত্রীগমনস্য লঘুত্বং প্রায়শ্চিত্তবিবেককৃদ্ভিরুক্তং তদত্যাজ্যাপরং। ইতি প্রায়শ্চিত্ততত্ত্বং॥

অত্যালঃ (পুং) রক্তচিত্রকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

অত্যাশা (স্ত্রী) অতিশয়াশা। অত্যন্তস্পৃহা। অসম্ভাবনীয়বাঞ্ছা। যথা। অত্যাশাভিরুপাগতাধ্বগগনান্ ধন্বাবনৌ তাপিতান্নোযত্তর্পয়িতুং ক্ষমোঽস্মি মম তদ্দুঃখৈর্মনো দূয়তে। ইত্যুদ্ভটঃ॥

অত্যাহারী [ন্] (ত্রি) অতিপূর্ব্বাঙ্‌পূর্ব্বহৃধাতোঃ কর্ত্তরি ণিন্‌প্রত্যয়নিষ্পন্নঃ। অতিশয়াহারকর্ত্তা। বহ্বাশী। অপরিমিতভোক্তা॥

অত্যাহিতং (ক্লী) মহাভীতিঃ। অতিশয়ভয়ং। জীবানপেক্ষি কর্ম্ম। জীবনাশারহিতসাহসকর্ম্ম। ইত্যমরঃ॥

অত্যুক্তিঃ (স্ত্রী) আরোপিতকথনং। অতিশয়োক্তিঃ। অসম্ভবোক্তিঃ। অলঙ্কারবিশেষঃ। যথা। অত্যুক্তিরদ্ভুতাতথ্যশৌর্য্যোদার্য্যাদিবর্ণনং। ত্বয়ি দাতরি রাজেন্দ্র যাচকাঃ কল্পশাখিনঃ॥ ইতি চন্দ্রালোকঃ॥

অত্যূহঃ (পুং) কালকণ্ঠঃ। দাত্যূহপক্ষী। ইতি মেদিনী॥ অতিশয়বিতর্কঃ॥

অত্যূহা (স্ত্রী) নীলিকা। শেফালিকা। ইতি মেদিনী॥

অত্র ব্য এতস্মিন্। এখানে ইতি ভাষা। এতচ্ছব্দস্য সপ্তম্যাস্ত্রাদেশে রূপোঽয়ং॥

অত্রভবান্ [ৎ] (ত্রি) পূজ্যঃ। শ্লাঘ্যঃ মান্যঃ। নাটকেঽস্য প্রচুরপ্রয়োগঃ। ইতি হেমচন্দ্রঃ॥

অত্রিঃ (পুং) সপ্তর্ষিমধ্যে ঋষিবিশেষঃ। স চ ব্রহ্মণশ্চক্ষুষো জাতঃ। তস্য ভার্য্যা কর্দম-মুনিকন্যা অনসূয়া। পুত্ত্রঃ দত্তঃ ১ দুর্ব্বাসাঃ ২ চন্দ্রশ্চ ৩। ইতি শ্রীভাগবতং ॥

অত্রিজাতঃ (পুং) চন্দ্রঃ। দ্বিজন্মা। যথা। অত্রিজাতস্য যা মূর্ত্তিঃ শশিনঃ সজ্জনস্য চ। ক্ব সা চৈবাত্রিজাতস্য তমসো দুর্জ্জনস্য চ॥ ইতি ত্রিবিক্রমভট্টঃ ॥

অত্রিদৃগ্জঃ (পুং) চন্দ্রঃ। ইতি হেমচন্দ্রঃ ॥

অত্রিনেত্রজঃ (পুং) চন্দ্রঃ। ইতি জটাধরঃ ॥

অত্রিনেত্রপ্রসূতঃ (পুং) চন্দ্রঃ। ইতি হলায়ুধঃ ॥

অত্রিনেত্রভূঃ (পুং) চন্দ্রঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

অত্রিভারদ্বাজিকা (স্ত্রী) অত্রিভারদ্বাজী বিবাহঃ। ইতি শব্দরত্নাবলী ॥

অথ ব্য মঙ্গলং। অনন্তরং। আরম্ভঃ। প্রশ্নঃ। কাৎর্স্ন্যং। ইত্যমরঃ॥ অধিকারঃ। সংশয়ঃ। বিকল্পঃ। সমুচ্চয়ঃ। ইতি মেদিনী ॥

অথকিং ব্য স্বীকারঃ। ইতি শব্দরত্নাবলী ॥

অথর্ব্ব [ন্] (ক্লী) বেদবিশেষঃ। ইতি মেদিনী ॥ তত্তু চতুর্থবেদঃ নবশাখাযুক্তঃ। অস্য বিবরণং বেদশব্দে দ্রষ্টব্যং ॥

অথর্ব্বণঃ (পুং) শিবঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

অথর্ব্বণিঃ (পুং) অথর্ব্ববেদজ্ঞব্রাহ্মণঃ। পুরোহিতঃ। ইতি মেদিনী ॥

অথর্ব্বা [ন্] (পুং) ব্রাহ্মণঃ। ইতি মেদিনী॥

অথো ব্য মঙ্গলং। আনন্তর্য্যং। সমুচ্চয়ঃ। প্রশ্নঃ। আরম্ভঃ। কাৎর্স্ন্যং। অধিকারঃ। সংশয়ঃ। বিকল্পঃ। ইতি মেদিনী ॥

অদ ই বন্ধে। ইতি কবিকল্পদ্রুমঃ ॥ ই অন্দ্যতে। ইতি দুর্গাদাসঃ ॥

অদ ল ঔ ভক্ষণে। ইতি কবিকল্পদ্রুমঃ ॥ ল অত্তি। ঔ অত্ত্বা। গণকৃতমনিত্যমিতি ন্যায়াৎ শপঃস্থিতৌ অদতীত্যপীতি বররুচিঃ। ইতি দুর্গাদাসঃ ॥

অদঃ [স্] (ত্রি) এতৎ। পুরোবর্ত্তি। এই ইতি ভাষা। পরং। পরোক্ষভূতং। সেই ইতি ভাষা। ইতি মেদিনী ॥

অদত্তং (ত্রি) অন্যায়েন দত্তং। যথা। যৎ পুনরন্যায়েন দত্তং তদদত্তং। ষোড়শপ্রকারমপি প্রত্যাহর্ত্তব্যমেব ইত্যর্থাদুক্তং ভবতি। নারদেন চ। দত্তং সপ্তবিধং প্রোক্তমদত্তং ষোড়শাত্মকমিতি প্রতিপাদ্য দত্তাদত্তয়োঃ স্বরূপং বিবৃতং। অদত্তন্তু ভয়ক্রোধশোকবেগরুজান্বিতৈঃ। তথোৎকোচপরীহাসব্যত্যাসচ্ছলযোগতঃ ॥ বালমূঢ়াস্বতন্ত্রার্ত্তমত্তোন্মত্তাপবর্জিতং। কর্ত্তা মমেদং কর্ম্মেতি প্রতিলাভেচ্ছয়া চ যৎ ॥ অপাত্রে পাত্রমিত্যুক্তে কার্য্যে বা ধর্ম্মসংহিতে যদ্দত্তং স্যাদবিজ্ঞানাদদত্তমিতি তৎস্মৃতমিতি ॥ অয়মর্থঃ। ভয়েন বন্দিগ্রাহাদিভ্যো দত্তং। ক্রোধেন পুত্ত্রাদিবৈরনির্যাতনায়ান্যস্মৈ দত্তং। পুত্ত্রবিয়োগাদিনিমিত্তশোকাবিষ্টেন দত্তং। উৎকোচেন কার্য্যপ্রতিবন্ধনিরাসার্থমধিকৃতেভ্যো দত্তং। পরিহাসেনোপহাসেন দত্তং। একঃ স্বদ্রব্যমন্যস্মৈ দদাত্যন্যোঽপি তস্মৈ দদাতীতি দানব্যত্যাসঃ। ছলযোগতঃ শতদানমভিসন্ধায় সহস্রমিতি পরিভাষ্য দদাতি। বালেনাপ্রাপ্তষোড়শবর্ষেণ। মূঢ়েন লোকবেদানভিজ্ঞেন। অস্বতন্ত্রেণ পুত্ত্রদাসাদিনা। আর্ত্তেন

রোগাভিভূতেন মত্তেন মদনীয়প্রমত্তেন। উন্মত্তেন বাতিকাদ্যুন্মাদগ্রস্তেন। অপবর্জ্জিতং দত্তং। তথায়ং মদীয়মিদং কর্ম্ম করিষ্যতীতি প্রতিলাভেচ্ছয়া দত্তং। অচতুর্ব্বেদায় চতুর্ব্বেদোঽহমিত্যুক্তবতে দত্তং। যজ্ঞং করিষ্যামীতি ধনং লব্ধ্বা দ্যূতাদৌ বিনিযুঞ্জানায় দত্তমিত্যেবং ষোড়শপ্রকারমপি দত্তমদত্তমিত্যুচ্যতে। প্রত্যাহরণীয়ত্বাৎ। আর্ত্তদত্তস্যাদত্তত্বং ধর্ম্মকার্য্যব্যতিরিক্তবিষয়ং। স্বস্থেনার্ত্তেন বা দত্তং শ্রাবিতং ধর্ম্মকারণাৎ। অদত্ত্বা তু মৃতে দাপ্যস্তৎস্থতো নাত্র সংশয়ঃ॥ ইতি কাত্যায়নস্মরণাৎ। যঃ পুনঃ ষোড়শপ্রকারমপ্যদত্তং গৃহ্লাতি। যশ্চাদেয়ং প্রযচ্ছতি। তয়োর্দণ্ডো নারদেনোক্তঃ। গৃহ্লাত্যদত্তং যো লোভাৎ যশ্চাদেয়ং প্রযচ্ছতি। অদেয়দায়কো দণ্ড্যস্তথাদত্তপ্রতীচ্ছকঃ॥ ইতি মিতাক্ষরা॥

অদত্তা (স্ত্রী) অবিবাহিতা। ইতি স্মৃতিঃ॥

অদনং (ক্লী) ভক্ষণং। ভোজনং। ইতি হেমচন্দ্রঃ॥

অদভ্রঃ (ত্রি) প্রচুরঃ। বহুঃ। ইত্যমরঃ॥

অদর্শনং (ক্লী) দর্শনাভাবঃ। অসাক্ষাৎ। দৃষ্ট্যগোচরং। তৎপর্য্যায়ঃ। বিনাশঃ ২। ইত্যমরঃ॥

অদলঃ (পুং) হিজ্জলবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥ দলরহিতে ত্রি॥

অদলা (স্ত্রী) ঘৃতকুমারী। ইতি শব্দচন্দ্রিকা॥

অদাতা (ত্রি) কৃপণঃ। দানশক্তিরহিতঃ। যথা। অদাতা পুরুষস্ত্যাগী স্বধনং ত্যজ্য গচ্ছতি। ইতি প্রাচীনাঃ॥

অদান্তঃ (ত্রি) তপঃক্লেশাসহিষ্ণুঃ। অকৃতবাহ্যেন্দ্রিয়নিগ্রহঃ। ইতি পুরাণং॥

অদিতিঃ (স্ত্রী) দক্ষপ্রজাপতিকন্যা। সা কশ্যপপত্নী। দেবমাতা চ। ইতি ত্রিকাণ্ডশেষঃ॥ ভূমিঃ। অখণ্ডঃ। ইতি শব্দরত্নাবলী॥

অদিতিনন্দনঃ (পুং) দেবতা। ইত্যমরঃ॥

অদৃক্ [শ্] (ত্রি) দৃষ্টিরহিতঃ। অন্ধঃ। ইত্যমরঃ॥

অদৃশ্যং (ত্রি) অদর্শনীয়ং। অদ্রষ্টব্যং। যথা। কন্যাদ্রেরতিকোমলা ত্রিভুবনব্যাপ্তাপ্যদৃশ্যা জনৈঃ। ইত্যুদ্ভটঃ॥

অদৃষ্টং (ক্লী) অগ্নিজলাদিদ্বারা জাতং ভয়ং। ইত্যমরঃ॥ জন্মান্তরীয়সংস্কারঃ। ভাগ্যং। যথা। অদৃষ্টমপ্যর্থমদৃষ্টবৈভবাৎ করোতি সুপ্তির্জনদর্শনাতিথিং॥ ইতি শ্রীহর্ষঃ॥ তত্তু আত্মনোঽতীন্দ্রিয়গুণঃ। ইদং বাসনাজন্যং। তত্ত্বজ্ঞাননাশ্যং। ভোগনাশ্যঞ্চ। ধর্ম্মাধর্ম্মভেদেন তৎ দ্বিবিধং। ধর্ম্মস্তু স্বর্গাদিকারণং। গঙ্গাস্নানযাগাদিজন্যঃ। কর্ম্মনাশাজলাদিস্পর্শনাশ্যশ্চ। অধর্ম্মস্তু নরকাদিকারণং। প্রায়শ্চিত্তাদিনাশ্যশ্চ। ইতি ভাষাপরিচ্ছেদঃ॥

অদৃষ্টঃ (ত্রি) অকৃতদর্শনঃ। অবীক্ষিতঃ। যথা। অদৃষ্টে দর্শনোৎকণ্ঠা দৃষ্টে বিচ্ছেদভীরুতা। ইতি রসতরঙ্গিণ্যাং ভানুদত্তঃ॥

অদৃষ্টবান্ [ৎ] (ত্রি) ভাগ্যবান্। কপালিয়া ইতি ভাষা॥

অদৃষ্টিঃ (স্ত্রী) প্রতিকূলা দৃষ্টিঃ। কুৎসিতা দৃষ্টিঃ। সরোষবক্রদৃষ্টিঃ কুটিলচক্ষুঃ। অসৌম্যাক্ষি। বক্রদৃষ্টিযুক্তচক্ষুঃ। ইত্যমরঃ॥

অদৃষ্টিকা ( স্ত্রী ) সরোমবক্রদৃষ্টিঃ। ইতি শব্দরত্নাবলী ॥

অদেবমাতৃকঃ ( পুং ) দেবমাতৃকভিন্নদেশঃ। নদীমাতৃকদেশঃ। যথা। বিতন্বতি ক্ষেমমদেবমাতৃকাঃ। ইতি ভারবিঃ ॥

অদগঃ ( পুং ) ঘৃতং। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ ॥

অদৃট ঙ অতিক্রমে বধে। ইতি কবিকল্পদ্রুমঃ ॥ দন্ত্যবর্গতৃতীয়োপধঃ। ঙ অট্টিষতে। ইতি দুর্গাদাসঃ ॥

অদ্ড অভিযোগে। ইতি কবিকল্পদ্রুমঃ ॥ দন্ত্যবর্গতৃতীয়োপধঃ। অড্ডিডিষতি। ক্বিপি সংযোগান্তলোপে অদ্। অভিযোগঃ সমাধানং। অড্ডতি পক্ষং বিদ্বান্। অভি সমন্তাৎ যোগোঽভিযোগঃ ইতি গোবিন্দভট্টঃ ॥ ইতি দুর্গাদাসঃ ॥

অদ্ধা ব্য যথার্থং। তৎপর্য্যায়ঃ। তত্ত্বং ২ অঞ্জসা ৩। ইত্যমরঃ ॥

অদ্ভুতং ( ক্লী ) অপূর্ব্বং। তৎপর্য্যায়ঃ। বিস্ময়ঃ২ আশ্চর্য্যং ৩ চিত্রং ৪। তদ্বিশিষ্টে বাচ্যলিঙ্গং। ইত্যমরঃ ॥

অদ্ভুতং ত্রি ) আশ্চর্য্যং। তৎপর্য্যায়ঃ। ইঙ্গং২। ইতি জটাধরঃ ॥ * ॥ অথাদ্ভুতং। অদ্ভুতসাগরে আথর্ব্বণাদ্ভুতবচনং। প্রকৃতিবিরুদ্ধমদ্ভুতমাপদঃ প্রাক্ প্রবোধায় দেবাঃ সৃজন্তীতি। তেন আপজ্জ্ঞানায় ভূম্যাদীনাং পূর্ব্বং স্বভাবপ্রচ্যবোদেবকর্ত্তৃকোঽদ্ভুত ইতি। এবঞ্চ বুধোদয়পর্ব্বগ্রহণাদীনাং গণিতাগতত্বেন প্রকৃতানামপি যদুৎপাতত্বং তদ্ভাক্তং। তৎকারণঞ্চ গর্গসংহিতাবার্হস্পত্যয়োঃ ॥ অতিলোভাদসত্যাদ্বা নাস্তিক্যাদ্বাপ্যধর্ম্মতঃ। নরাপচারান্নিয়তমুপসর্গঃ প্রবর্ত্ততে ॥ ততোঽপচারান্নিয়তমপবর্জ্জন্তি দেবতাঃ। তাঃ সৃজন্ত্যদ্ভুতাংস্তাংস্তু দিব্যনাভসভূমিজান্ ॥ ত এব ত্রিবিধা লোকে উৎপাতা দেব নির্ম্মিতাঃ। বিচরন্তি বিনাশায় রূপৈঃ সম্বোধয়ন্তি চ ॥ তাংশ্চ পরং ন দর্শয়েদিত্যাহ বিষ্ণুঃ ॥ নোৎপাতং দর্শয়েদিতি॥*॥ তত্র বেলানক্ষত্রমণ্ডলনিরূপণং। যথা দীপিকায়াং ॥ প্রাক্দ্বিত্রিচতুর্ভাগেষু দ্যুনিশোরদ্ভুতেষু সর্ব্বেষু। অনিলাগ্নিশক্রবরুণা মণ্ডলপতয়ঃ শুভাশুভৈশ্চ ॥ বেলামণ্ডলং ॥ * ॥ অর্য্যম্নাদিচতুষ্কচন্দ্রতুরগাদিত্যেষু বায়ুর্ভবেৎ দেবেজ্যাজবিশাখযাম্যযুগলে পিত্রদ্বয়ে চানলঃ। বিশ্বাদিত্রয়ধাতৃমৈত্রযুগলেষ্বিন্দ্রো ভবেন্মণ্ডলঃ সর্পোপান্ত্যমৃগান্ত্যমূলযুগলেশানেষ্বপাম্পীশ্বরঃ ॥ পবনদহনৌ নেষ্টৌ যোগস্তয়োরতিদুষ্করঃ। সুরপবরুণৌ শস্তৌ যোগস্তয়োরতিশোভনঃ ॥ সবরুণমরুন্মিশ্রঃ শক্রস্তথাগ্নিসমাযুতঃ। ফলবিরহিতঃ সেন্দ্রো বায়ুস্তথাগ্নিযুতোঽম্বুপঃ ॥ যন্মণ্ডলেঽদ্ভুতং জাতং শান্তিস্তদ্দেবতাশ্রয়া। তথা শান্তিদ্বয়ং কার্য্যং মণ্ডলদ্বয়জাদ্ভুতে ॥ * ॥ বিষ্ণুধর্ম্মোত্তরে। গ্রহর্ক্ষবৈকৃতং দিব্যং আন্তরীক্ষং নিবোধ মে। উল্কাপাতো দিশাং দাহঃ পরিবেশস্তথৈব চ ॥ গন্ধর্ব্বনগরঞ্চৈব বৃষ্টিশ্চ বিকৃতা তথা। এবমাদীনি লোকেঽস্মিন্ নাভসানি বিনির্দ্দিশেৎ ॥ চরস্থির-

ভবং ভৌমং ভূকম্পমপি ভূমিজং। জলা-
শয়ানাং বৈকৃত্যং ভৌমং তদপি কীর্ত্তিতং॥
ভৌমঞ্চাল্পফলং জ্ঞেয়ং চিরেণ পরি-
পচ্যতে। নাভসং মধ্যফলদং মধ্যকালফল-
প্রদং॥ দিব্যং তীব্রফলং জ্ঞেয়ং শীঘ্র-
কারি তথৈব চ॥ * ॥ শীতোষ্ণতাবিপ-
র্য্যাস ঋতূনাং রিপুজং ভয়ং॥ পুষ্পে ফলে
চ বিকৃতে রাজ্ঞো মৃত্যুং তথাদিশেৎ।
অকালপ্রভবা নার্য্যঃ কালাতীতাঃ প্রজা-
স্তথা॥ বিকৃতাঃ প্রসবাশ্চৈব যুগ্মপ্রসবনং
তথা। হীনাঙ্গা অধিকাঙ্গাশ্চ জায়ন্তে যদি
বা ত্রয়ঃ॥ পশবঃ পক্ষিণশ্চৈব তথৈব চ
সরীসৃপাঃ। বিনাশং তস্য দেহস্য কুলস্য
চ বিনির্দ্দিশেৎ॥*॥ প্রদোষে কুক্কুটারাবো
হেমন্তে চাপি কোকিলাঃ। অর্কোদয়ে-
হর্কাভিমুখশ্বারাবো নৃভয়ং দিশেৎ॥ উলূকো
বসতে যত্র নিপতেদ্বা তথা গৃহে। জ্ঞেয়ো
গৃহপতের্ম্মৃত্যুর্ধননাশস্তথৈব চ॥ গৃধ্রঃ কঙ্কঃ
কপোতশ্চ উলূকঃ শ্যেন এব চ। চিল্লশ্চ
চর্ম্মচিল্লশ্চ ভাসঃ পাণ্ডুর এব চ॥ গৃহে যস্য
পতন্ত্যেতে গেহং তস্য বিপদ্যতে। পক্ষান্-
মাসাত্তথা বর্ষান্মৃত্যুঃ স্যাদ্গৃহমেধিনঃ॥
পত্ন্যাঃ পুত্রস্য বা মৃত্যুর্দ্রব্যঞ্চাপি বিনশ্যতি।
ব্রাহ্মণায় গৃহং দত্ত্বা দত্ত্বা তন্মূল্যমেব বা॥
গৃহ্নীয়াদ্যদি রোচেত শান্তিঞ্চেমাং প্রযো-
জয়েৎ। মাংসাস্থীনি সমাদায় শ্মশানাদ্গৃধ্র-
বায়সাঃ॥ শ্বা শৃগালোঽথ বা মধ্যে পুরস্য
প্রবিশন্তি চেৎ। বিকিরন্তি গৃহাদৌ চ
শ্মশানং সা মহী ভবেৎ॥ চৌরেণ হন্যতে
লোকঃ পরচক্রসমাগমঃ। সংগ্রামশ্চ মহা-

ঘোরো দুর্ভিক্ষং মরকং তথা॥ অদ্ভুতানি
প্রসূয়ন্তে তত্র দেশস্য বিদ্রবঃ। অকালে
ফলপুষ্পাণি দেশবিদ্রবকারণং॥*॥ মৎস্য-
পুরাণে। অতিবৃষ্টিরনাবৃষ্টির্দুর্ভিক্ষাদিভয়ং
মতং। অনৃতৌ তু দিনাদূর্দ্ধং বৃষ্টির্জ্ঞেয়া
ভয়ায় চ॥ নিরভ্রে বাথ রাত্রৌ বা শ্বেতং
যাম্যোত্তরেণ তু। ইন্দ্রায়ুধং ততো দৃষ্ট্বা
উল্কাপাতং তথৈব চ॥ দিগ্দাহপরিবেশৌ চ
গন্ধর্ব্বনগরং তথা। পরচক্রভয়ং বিদ্যাৎ
দেশোপদ্রবমেব চ॥ ভাসো বনকুক্কুটঃ॥*॥
কংসনিধনসূচনে হরিবংশঃ। বক্রমঙ্গারক-
শ্চক্রে চিত্রায়াং ঘোরদর্শনঃ। চলত্যপর্ব্বণি
মহীগিরীণাং শিখরাণি চ॥*॥ বাণোৎপাতে
স এব। দক্ষিণাং দিশমাস্থায় ধূমকেতুঃ
স্থিতো ভবেৎ। বক্রমঙ্গারকশ্চক্রে কৃত্তিকাসু
ভয়ঙ্করঃ॥*॥ কৃত্যচিন্তামণৌ। ত্যক্তা-
শৌচবিবেকতত্ত্ববসুধা লোকাঃ ক্ষুধাপীড়িতা
বিপ্রা বেদহতাস্তথা প্রচলিতা বহ্বাশিনো
দুঃখিতাঃ। ক্ষৌণী মন্দফলা নৃপাশ্চ বিকলাঃ
সংগ্রামঘোরা মহী প্রেতাঘাতদুরন্তপীড়িত-
তরা দেবেজ্যরাহ্বোর্যুতৌ॥ রক্তে শস্ত্রোদ্-
যোগো মাংসাস্থিবসাদিভির্ম্মরকঃ। ধান্য-
হিরণ্যত্বক্ফলকুসুমাদ্যে বর্ষিতে ভয়ং
বিদ্যাৎ॥ অঙ্গারপাংশুবর্ষে বিনাশমুপযাতি
তন্নগরং। উপলং বিনা জলধরৈর্বিকৃতা বা
যদা প্রাণিনো বৃষ্ট্যা॥ ছিদ্রং বাপ্যতিবৃষ্টিং
শস্যানামীতিসংজননং॥*॥ বুধকৌশিক-
সম্বাদে। পল্ল্যাঃ প্রপাতে চ ফলং শরটস্য
প্ররোহণে। শীর্ষে রাজশ্রিয়োঽবাপ্তি-
র্ভালে চৈশ্বর্য্যমেব চ। কর্ণয়োর্ভূষণা-

বাপ্তির্নেত্রয়োর্বন্ধুদর্শনং ॥ নাসিকায়াঞ্চ সৌগন্ধ্যং বক্ত্রে মিষ্টান্নভোজনং। কণ্ঠে চৈব শ্রিয়োঽবাপ্তির্ভুজয়োর্বিভবো ভবেৎ॥ ধনলাভো বাহুমূলে করয়োর্ধনবৃদ্ধয়ঃ। স্তনমূলে চ সৌভাগ্যং হৃদি সৌখ্যবিবর্দ্ধনং ॥ পৃষ্ঠে নিত্যং মহীলাভঃ পার্শ্বয়োর্বন্ধুদর্শনং। কটিদ্বয়ে বস্ত্রলাভো গুহ্যে মৃত্যুসমাগমঃ ॥ জঙ্ঘে চার্থক্ষয়ো নিত্যং গুদে রোগভয়ং ভবেৎ। উর্ব্বোস্তু বাহনাবাপ্তির্জানুজঙ্ঘেঽর্থসংক্ষয়ঃ ॥ বামদক্ষিণয়োঃ পাদোভ্রর্মণং নিয়তং ভবেৎ। পল্ল্যাঃ প্ররোহণে চৈব পতনে শরটস্য চ ॥ ব্যত্যাসাচ্চ ফলঞ্চৈব তদ্বদেবং প্রজায়তে। পল্ল্যাঃ প্ররোহণং রাত্রৌ শরটস্য প্রপাতনং ॥ নিধনার্থায় ভবতি ব্যাধিপীড়াবিপর্য্যয়ে। পতনানন্তরঞ্চৈবারোহণং যদি জায়তে ॥ পতনে ফলমুৎকৃষ্টং রোহণেঽন্যৎ ফলং ভবেৎ। আরোহণঞ্চোর্দ্ধবক্ত্রে অধোবক্ত্রে চ পাতনং ॥ ভবেদিষ্টফলং তস্য তৎ ফলং জায়তে ধ্রুবং। স্পৃষ্টমাত্রেণ যঃ সদ্যঃ সচেলং জলমাবিশেৎ ॥ পঞ্চগব্যপ্রাশনঞ্চ কুর্য্যাদর্কাবলোকনং। পল্লীরূপং সুবর্ণস্য রক্তবস্ত্রেণ বেষ্টয়েৎ ॥ পূজয়েদ্‌গন্ধপুষ্পাদ্যৈস্তদগ্রে পূর্ণকুম্ভকে। পঞ্চগব্যং পঞ্চরত্নং পঞ্চামৃতং সপল্লবং ॥ পঞ্চবৃক্ষকষায়ঞ্চ নিঃক্ষিপ্যাবাহয়েৎ তত। পূজয়েদ্গান্ধপুষ্পাদ্যৈর্লোকপালাংস্তথা গ্রহান্ ॥ মৃত্যুঞ্জয়েন মন্ত্রেণ সমিদ্ভিঃ খাদিরৈঃ শুভৈঃ। তিলৈর্ব্যাহৃতিভির্হোমমষ্টোত্তরসহস্রকং ॥ পল্লী গৃহগোধিকা।

মৃত্যুঞ্জয়মন্ত্রস্ত্র্যম্বকমন্ত্রঃ। ইতি বিদ্যাকরঃ ॥ * ॥ গর্গসংহিতাবার্হস্পত্যয়োঃ। যে তেষু শান্তিং কুর্ব্বন্তি ন তে যান্তি পরাভবং। যে তু ন প্রতিকুর্ব্বন্তি ক্রিয়য়া শ্রদ্ধয়ান্বিতাঃ ॥ দাম্ভিক্যাদ্বা বিমোহাদ্বা বিনশ্যন্ত্যেব তেঽচিরাৎ ॥ * ॥ অত্র নিমিত্তনিশ্চয়বতোঽধিকারঃ। অন্যথা দোষঃ। ইত্যাহ মৎস্যপুরাণং। ভিন্নমণ্ডলবেলায়াং যে ভবন্ত্যদ্ভুতাঃ কচিৎ। তত্র শান্তিদ্বয়ং কার্য্যং নিমিত্তে সতি নান্যথা ॥ নির্নিমিত্তকৃতা শান্তির্নিমিত্তমুপপাদয়েৎ। এতচ্চ তত্তদ্বিশেষবিহিতশান্তিবিষয়ং। অন্যথা বেলামণ্ডলসন্দেহে শান্তির্ন স্যাৎ সাধারণশান্তিশ্চ নির্বিষয়া স্যাৎ। অতএবোক্তং যোগিযাজ্ঞবল্ক্যেন। যত্র যত্র চ সংকীর্ণমাত্মানং মন্যতে দ্বিজঃ। তত্র তত্র তিলৈর্হোমো গায়ত্র্যা সমুদাহৃতঃ ॥ গায়ত্র্যা প্রযতঃ শুদ্ধঃ সর্ব্বপাপৈঃ প্রমুচ্যতে। শান্তিকামশ্চ জুহুয়াৎ গায়ত্রীমক্ষতৈ শুচিঃ ॥ হন্তুকামশ্চ নৃপতের্ঘৃতেন জুহুয়াৎ শুচিঃ। সাবিত্র্যা শান্তিহোমাংশ্চ কুর্য্যাৎ পর্ব্বসু নিত্যশঃ ॥ প্রণবব্যাহৃতিভ্যাঞ্চ স্বাহান্তা হোমকর্ম্মণি। প্রতিলোমা প্রযোক্তব্যা ফট্‌কারান্তাভিচারকে ॥ * ॥ বিশ্বামিত্রেণাপি নিমিত্তসন্দেহে কৃচ্ছ্রাদীন্যুক্তানি। যথা। কৃচ্ছ্রচান্দ্রায়ণাদীনি শুদ্ধ্যভ্যুদয়কারণং। প্রকাশে চ রহস্যে চ সংশয়েঽনুক্তকেঽস্ফুটে ॥ * ॥ মার্কণ্ডেয়পুরাণং। দিগ্দেশজনসামান্যং নৃপসামান্যমাত্মনি। নক্ষত্রগ্রহসামান্যং নরো ভুঙ্‌ক্তে

শুভাশুভং ॥ পরস্পরাভিবাদশ্চ গ্রহ-দোষেষু জায়তে। তথা। তস্মাচ্ছান্তিপরঃ প্রাজ্ঞো লোকবাদরতস্তথা॥ লোকবাদাংশ্চ শান্তীশ্চ গ্রহপীড়াসু কারয়েৎ। ভূদোহা-নুপবাসাংশ্চ শস্তং চৈত্যাভিবন্দনং ॥ কুর্য্যাৎ হোমং তথা দানং শ্রাদ্ধং ক্রোধ-বিবর্জ্জনং। অদ্রোহং সর্ব্বভূতেষু মৈত্রীং কুর্য্যাচ্চ পণ্ডিতঃ॥ বর্জ্জয়েদ্দুষতীং বাচমতি-বাদাংস্তথৈব চ। গ্রহপূজাঞ্চ কুর্ব্বীত সর্ব্ব-পীড়াসু মানবঃ॥ এবং শাম্যন্ত্যশেষাণি ঘোরাণি দ্বিজসত্তম। প্রযতানাং মনুষ্যাণাং গ্রহর্ক্ষোত্থান্যনেকশঃ॥ * ॥ লোকবাদাশ্চ চৈত্রেবোক্তাঃ। যথা। আকাশাদ্দেবতানাঞ্চ দেব্যাদীনাঞ্চ সৌহৃদাৎ। পৃথিব্যাং প্রতি-লোকে চ লোকবাদা ইতি স্মৃতাঃ ॥ তে চ সর্ব্বভূতডাকিন্যাদ্যভিভবশান্ত্যর্থং লৌকিকৌষধমন্ত্রাদয়ঃ বিষহরীমঙ্গলচণ্ডিকা-গীতাদয়ঃ চৈত্যবৃক্ষাদৌ ক্ষেত্রপালদেবতা-পূজা চ। তথাচাপস্তম্বঃ। স্ত্রীভ্যোঽবর-বর্ণেভ্যো ধর্ম্মশেষান্ প্রতীয়াদিত্যেক ইতি। ধর্ম্মশেষান্ শ্রুতিস্মৃতিসদাচারেষ্বপ্রসিদ্ধা-নিতি নারায়ণোপাধ্যায়াঃ। ভূদোহশ্চ পাত্রং বিনা ভূমৌ গোস্তনং নিষ্পীড্য দুগ্ধোৎসর্গঃ। চৈত্যঃ পূজ্যত্বেন খ্যাতো গ্রামস্য বৃক্ষঃ। তথা চ বাণোৎপাতে হরি-বংশঃ। অনেকশাখশ্চৈত্যশ্চ নিপপাত মহীতলে। অর্চ্চিতঃ সর্ব্বকন্যাভির্দানবানাং মহাত্মনাং ॥ উষতীমকল্যাণীং। অতি-বাদশ্চ পূজ্যমতিক্রম্য ভাষণং॥ * ॥ মৎস্য-পুরাণং। কাকস্যৈকরবশ্রাবঃ প্রভাতে দুঃখ-দায়কঃ। কাকো মৈথুনকাসক্তঃ শ্বেতো বা যদি দৃশ্যতে॥ উলূকো বসতে যত্র নিপ-তেদ্বা তথা গৃহে। জ্ঞেয়ো গৃহপতের্মৃত্যু-র্ধননাশস্তথৈব চ॥ * ॥ বরাহসংহিতায়াং। ক্রীড়ানুরক্তো রতিমাংসলুব্ধো ভীতো রুজার্ত্তঃ পতিতো বিহঙ্গঃ। নাসৌ গৃহ-স্বস্য বিনাশহেতুর্দোষঃ সমুৎপদ্যত আহ-রার্য্যাঃ॥ * ॥ অদ্ভুতশান্তিমাহ মাৎস্যে। গৃহে পক্ষিবিকারেষু কুর্য্যাচ্চামরতর্পণং। দেবাঃ কপোতা ইতি বা জপ্তব্যং সপ্তভি-র্দ্বিজৈঃ ॥ গাবশ্চ দেয়া বিবিধা দ্বিজানাং সকাঞ্চনা বস্ত্রযুগোত্তরীয়াঃ। এবং কৃতে পাপমুপৈতি শান্তিং মৃগৈর্দ্বিজৈর্ব্বা বিনি-বেদিতং যৎ॥ দ্বিজৈঃ পক্ষিভিঃ। অপিনা অন্যৈরপি॥ * ॥ ভুজবলভীমে। একো বৃষস্ত্রয়ো গাবঃ সপ্তাশ্বা নব দন্তিনঃ। সিংহ-প্রসূতিকা গাবঃ কথিতাঃ স্বামিঘাতকাঃ॥*॥ মৎস্যপুরাণে। অঙ্গে দক্ষিণভাগে তু শস্তং বিস্ফুরণং ভবেৎ। অপ্রশস্তং তথা বামে পৃষ্ঠস্য হৃদয়স্য চ॥ লাঞ্ছনং পিটকং চৈব জ্ঞেয়ং বিস্ফূর্জিতং তথা। বিপর্য্যয়েণ বিহিতং সর্ব্বং স্ত্রীণাং ফলং তথা ॥ * ॥ অনিষ্টচিহ্নোপগমে দ্বিজানাং কার্য্যং সুবর্ণেন চ তর্পণং স্যাৎ। শঙ্খঃ। দুঃস্বপ্না-নিষ্টদর্শনাদৌ ঘৃতং হিরণ্যঞ্চ দদ্যাদিতি। মাৎস্যে। নমস্তে সর্ব্বলোকেশ নমস্তে ভৃগু-নন্দন। কবে সর্ব্বার্থসিদ্ধ্যর্থং গৃহাণার্ঘ্যং নমোঽস্তু তে॥ এবং শুক্রোদয়ে কুর্ব্বন্ যাত্রাদিষু চ ভারত। সর্ব্বান্ কামানবাপ্নোতি বিষ্ণুলোকে মহীয়তে॥ নমস্তেঽঙ্গিরসাং

নাথ বাক্‌পতেঽথ বৃহস্পতে। ক্রূরগ্রহৈঃ পীড়িতানামমৃতায় নমো নমঃ॥ সংক্রান্তাবপি কৌন্তেয় যাত্রাস্বভ্যুদয়েষু চ। কুর্ব্বন্ বৃহস্পতেঃ পূজাং সর্ব্বান্ কামান্ সমশ্নুতে ॥*॥ বৈষ্ণবামৃতে ব্যাসঃ। গ্রহযজ্ঞৈঃ শান্তিকৈশ্চ কিং ক্লিশ্যন্তি নরা দ্বিজ। মহাশান্তিকরঃ শ্রীমাংস্তুলস্যা পূজিতো হরিঃ॥ উৎপাতান্ দারুণান্ পুংসাং দুর্নিমিত্তাননেকশঃ। তুলস্যা পূজিতো ভক্ত্যা মহাশান্তিকরো হরিঃ॥ অত্র ব্রহ্মপুরাণীয়ো মন্ত্রঃ নমস্তে বহুরূপায় বিষ্ণবে পরমাত্মনে স্বাহা ইতি ॥ * ॥ ছন্দোগপরিশিষ্টং। অথাতো রজস্বলাভিগমনে গোঽশ্বভার্য্যাসু গমনে যমজজননে বিজাতীয়জননে বা কাককঙ্কগৃধ্রবকশ্যেনভাসচিল্লকপোতানাং গৃহপ্রবেশে মানুষস্যোপরি বিশ্রামণে এষামেব ক্রিয়মাণে গৃহদ্বারারোহণে বাদ্ভুতেষু কল্পদৃষ্টেন বিধিনাগ্নিমুপসমাধায় প্রায়শ্চিত্তাজ্যাহুতীর্জ্জুহোতি অদ্ভুতায় অগ্নয়ে স্বাহা সোমায় বিষ্ণবে রুদ্রায় বায়বে সূর্য্যায় মৃত্যবে বিশ্বেভ্যো দেবেভ্যঃ স্বাহেতি স্থালীপাকব্রতান্যদিতি ॥ * ॥ কপোতং বিশেষয়তি শৌনকঃ। রক্তপাদঃ কপোতাখ্যঃ অরণ্যৌকাঃ শুকচ্ছবিঃ। স চেচ্ছালাং বিশেচ্ছালাসমীপস্থঃ ব্রজেদ্যদি॥ অন্যেষু গৃহমধ্যে বা বল্মীকস্যোদ্গমাদিষু। কল্পদৃষ্টেন বিধিনা গৃহ্যোক্তেন। প্রায়শ্চিত্তাজ্যাহুতীঃ অদ্ভুতদোষপ্রশমনার্থাঃ সপ্তাজ্যাহুতীঃ। অদ্ভুতায় অগ্নয়ে স্বাহা ইত্যাদিমন্ত্রৈঃ। তত্র স্থালীপাকেতিকর্ত্তব্যতায়াং পায়সচরুভিরেতেভ্যো দেবেভ্যো জুহুয়াৎ। ছন্দোগপরিশিষ্টং। পশ্চাৎ ঘৃতপায়সেন ব্রাহ্মণান্ ভোজয়িত্বা গোবরং দত্ত্বা শান্তির্ভবতীতি। গোবরং গোশ্রেষ্ঠং দক্ষিণাং তাং গাং কৃত্বা দোষশান্তির্ভবতীতি। তথা চোক্তং। গৌর্বিশিষ্টতমা লোকে বেদেষ্বপি নিগদ্যতে। ন ততোঽন্যদ্বরং যস্মাৎ তস্মাদ্গৌর্বরমুচ্যতে ॥ * ॥ ছন্দোগপরিশিষ্টং। যস্ত্বেষামন্যতমমাপন্নঃ প্রায়শ্চিত্তং ন কুর্য্যাৎ তস্য গৃহপতের্ম্মরণং সর্ব্বস্বনাশো বা ভবতি তস্মাৎ প্রায়শ্চিত্তং কর্ত্তব্যং কর্ম্মাপবর্গে বামদেব্যগানং শান্তিঃ শান্তিরিতি। অপবর্গে সমাপ্তৌ। বামদেব্যগানং শান্তিঃ কর্ত্তব্যা আবৃত্তিঃ প্রকরণসমাপ্ত্যর্থা। বার্হস্পত্যে। শময়ন্ত্যা সপ্তাহাৎ কম্পাদিকৃতং নিমিত্তমাশ্বেব। অতিবর্ষণোপবাসব্রতদীক্ষাজপ্যহবনানি ॥*॥ বরাহঃ। যে চ ন দোষং জনয়ন্ত্যুৎপাতাংস্তানৃতুস্বভাবকৃতান্। ঋষিপুত্রকৃতৈঃ শ্লোকৈর্বিদ্যাদেভিঃ সমাসোক্তৈঃ॥ তথাচ মৎস্যপুরাণং। বজ্রাশনিমহীকম্পসন্ধ্যানির্ঘাতনিস্বনাঃ। পরিবেশরজোধূমরক্তার্কাস্তময়োদয়াঃ॥ দ্রুমেভ্যোঽথ রসস্নেহমধুপুষ্পফলোদ্গমাঃ। গোপক্ষিমদবৃদ্ধিশ্চ শিবায় মধুমাধবে ॥*॥ তারোল্কাপাতকলুষং কপিলার্কেন্দুমণ্ডলং। অনগ্নিজ্বলনং স্ফোটং ধূমরেণুনিরাকুলং॥ রক্তপদ্মারুণা সন্ধ্যা নভঃ ক্ষুব্ধার্ণবোপমং। সরিতাঞ্চাম্বুসংশোষং দৃষ্ট্বা গ্রীষ্মে শুভং বদেৎ॥ * ॥ শক্রায়ুধপরিবেশৌ বিদ্যুচ্ছুষ্কবিরোহণং। কম্পোদ্বর্ত্তনবৈকৃত্যং রসনং

দরণং ক্ষিতেঃ॥ নদ্যুদপানসরসাং বৃষ্ট্যর্দ্ধ্যা ভবনপ্লবাঃ। পতনঞ্চাদ্রিগেহানাং বর্ষাসু ন ভয়াবহং॥ হরিবংশে বর্ষাবর্ণনায়াং। কচিৎ কন্দরহাসাঢ্যং শিলীন্ধ্রাভরণং কচিৎ। ইতি দর্শনাৎ বর্ষাসু শিলীন্ধ্রোদ্গমো ন ভয়াবহঃ॥ * ॥ দিব্যস্ত্রীভূতগন্ধর্ব্ববিমানাদ্ভুতদর্শনং। গ্রহনক্ষত্রতারাণাং দর্শনঞ্চ দিবাম্বরে॥ গীতবাদিত্রনির্ঘোষো বনপর্ব্বতসানুষু। শস্যবৃদ্ধিরসোৎপত্তিরপাপাঃ শরদি স্মৃতাঃ॥ * ॥ শীতানিলতুষারত্বং নর্দ্দনং মৃগপক্ষিণাং। রক্ষোযক্ষাদিসত্ত্বানাং দর্শনং বাগমানুষী॥ দিশো ধূমান্ধকারাশ্চ শলম্বা নগপর্ব্বতাঃ। উচ্চৈঃ সূর্য্যোদয়াস্তত্বং হেমন্তে শোভনা মতাঃ॥ * ॥ হিমপাতানিলোৎপাতবিরূপাদ্ভুতদর্শনং। দৃষ্ট্বাঞ্জনাভমাকাশং তারোল্কাপাতপিঞ্জরং॥ চিত্রা গর্ভোদ্ভবাঃ স্ত্রীষু গোঽজাশ্বমৃগপক্ষিণাং। পত্রাঙ্কুরলতানাঞ্চ বিকারাঃ শিশিরে শুভাঃ॥ ঋতুস্বভাবজা হ্যেতে দৃষ্টাঃ স্বর্ত্তৌ শুভাবহাঃ। ঋতাবন্যত্র চোৎপাতা দৃষ্টাস্তে ভৃশদারুণাঃ॥ * ॥ উন্মত্তানাঞ্চ যা গাথাঃ শিশূনাঞ্চেষ্টিতঞ্চ যৎ। স্ত্রিয়ো যচ্চ প্রভাষন্তে তত্র নাস্তি ব্যতিক্রমঃ॥ পূর্ব্বং চরতি দেবেষু পশ্চাদ্গচ্ছতি মানুষান্। নাদেশিতা বাগ্বদতি সত্যা হ্যেষা সরস্বতী॥ * ॥ বৃহস্পতিঃ। জ্যোতির্জ্ঞানং তথোৎপাতমবিদিত্বা তু যে নৃণাং। শ্রাবয়ন্ত্যর্থলোভেন বিনেয়াস্তেঽপি যত্নতঃ॥ বিনেয়া দণ্ডনীয়াঃ। ইতি জ্যোতিস্তত্ত্বং॥

অদ্ভুতঃ (পুং) শৃঙ্গারাদিনবরসানাং মধ্যে রসবিশেষঃ। তস্য স্থায়িভাবো বিস্ময়ঃ। দেবতা গন্ধর্ব্বঃ। বর্ণঃ পীতঃ। আলম্বনং লোকাতীতবস্তু। উদ্দীপনং তদ্গুণমহিমা। অনুভাবাঃ স্তম্ভস্বেদরোমাঞ্চগদ্গদস্বরবিভ্রমনেত্রবিকাশাদয়ঃ। অস্য ব্যভিচারিভাবাঃ বিতর্কাবেগসম্ভ্রান্তিহর্ষাদয়ঃ। ইতি সাহিত্যদর্পণং॥

অদ্ভুতস্বনঃ (পুং) মহাদেবঃ। ইতি ত্রিকাণ্ডশেষঃ॥

অদ্ভুতসারঃ (পুং) খদিরসারঃ। ইতি কেচিৎ॥

অদ্মনিঃ (পুং) অগ্নিঃ। ইত্যুণাদিকোষঃ॥

অদ্মরঃ (ত্রি) ভক্ষকঃ। ভক্ষণপরঃ। ইত্যমরঃ॥

অদ্য বং বর্ত্তমানদিনং। আজি ইতি ভাষা। ইত্যমরঃ॥

অদ্যতনঃ (পুং) কালবিশেষঃ। স চ ভাষ্যমতে দুর্গসিংহমতে চ পূর্ব্বরাত্রিশেষদণ্ডচতুষ্টয়াবধিকপররাত্রিসার্দ্ধযামপর্য্যন্তঃ। পূর্ব্বরাত্রিশেষার্দ্ধাবধিপররাত্রিপ্রথমার্দ্ধপর্য্যন্তো বা। ভর্ত্তৃহরিক্রমদীশ্বরমতে পূর্ব্বরাত্রিশেষপ্রহরাবধিপররাত্রিপ্রথমপ্রহরপর্য্যন্তঃ। অদ্যজাতবস্তুনি ত্রি॥

অদ্যশ্বীনং (ত্রি) আসন্নমরণাদি। অদ্যশ্বো বা ভবতি অদ্যশ্বীনং মরণং। ইতি সংক্ষিপ্তসারব্যাকরণপরিশিষ্টং॥

অদ্যশ্বীনা (স্ত্রী) আসন্নপ্রসবা অদ্যশ্বো বা সূতে অদ্যশ্বীনা গৌঃ ইতি সংক্ষিপ্তসারপরিশিষ্টং॥

অদ্যাবধি (ক্লী) অদ্যারভ্য। আজি ইস্তক ইতি ভাষা। বর্ত্তমানদিবসপর্য্যন্তং। আজি লাগাইত ইতি ভাষা॥

অদ্রিঃ (পুং) সূর্য্যঃ। পর্ব্বতঃ। বৃক্ষঃ। ইত্যমরঃ॥ পরিমাণবিশেষঃ। ইতি শব্দরত্নাবলী॥

অদ্রিকর্ণী (স্ত্রী) অপরাজিতা। ইতি রাজনির্ঘণ্টঃ ॥
অদ্রিকীলা (স্ত্রী) ভূমিঃ। ইতি ত্রিকাণ্ডশেষঃ ॥
অদ্রিজং (ক্লী) শিলাজতু। ইতি রত্নমালা ॥
পর্ব্বতজাতবস্তুনি ত্রি ॥
অদ্রিজা (স্ত্রী) দুর্গা। ইতি হেমচন্দ্রঃ ॥
সৈংহলীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥
অদ্রিতনয়া (স্ত্রী) পার্ব্বতী। যথা। এষোঽহ-
মদ্রিতনয়ামুখপদ্মজন্মেতি কাব্যপ্রকাশঃ ॥
অদ্রিনন্দিনী (স্ত্রী) দুর্গা। হিমালয়াদ্রিজাতত্বাৎ॥
অদ্রিভিদ্ (পুং) ইন্দ্রঃ। ইতি ত্রিকাণ্ডশেষঃ॥
অদ্রিভূঃ(পুং)আখুকর্ণীলতা। ইতি রাজনির্ঘণ্টঃ॥
অদ্রিরাজঃ (পুং) হিমালয়পর্ব্বতঃ। ইতি
হেমচন্দ্রঃ ॥
অদ্রিসারঃ (পুং) লৌহঃ। ইতি রত্নমালা ॥
অদ্রীশঃ (পুং) শিবঃ। হিমালয়ঃ। ইতি ধরণী ॥
অদ্বয়ঃ (পুং) বুদ্ধঃ। ইতি হেমচন্দ্রঃ ॥
অদ্বয়বাদী [ন্] (পুং) বুদ্ধঃ। ইত্যমরঃ ॥
অদ্বারং (ক্লী) দ্বারব্যতিরিক্তপ্রদেশঃ। যথা।
অদ্বারেণ চ নাতীয়াদ্গ্রামং বা বেশ্ম বাবৃতং।
রাত্রৌ চ বৃক্ষমূলানি দূরতঃ পরিবর্জ্জয়েৎ॥
ইতি মানবে ৪ অধ্যায়ে ৭৩ শ্লোকঃ ॥
প্রাচীরাদ্যাবৃতং গ্রামং গৃহঞ্চ দ্বারব্যতি-
রিক্তপ্রদেশেন প্রাকারাদিলঙ্ঘনং কৃত্বা ন
বিশেৎ। রাত্রৌ চ বৃক্ষমূলাবস্থানং দূরত-
স্ত্যজেৎ। ইতি তট্টীকায়াং কুল্লূকভট্টঃ ॥
দ্বাররহিতে ত্রি ॥
অদ্বিতীয়ঃ (ত্রি) দ্বিতীয়রহিতঃ। অতুল্যঃ। যথা।
একমেবাদ্বিতীয়ং ব্রহ্ম। ইতি বেদান্তঃ ॥
নচাশ্বিনেয়ঃ স হি নাদ্বিতীয়ঃ। ইতি নৈষধং ॥
অদ্বৈতঃ (ত্রি) দ্বিতীয়রহিতঃ। একঃ। যথা।
যদদ্বৈতং ব্রহ্মোপনিষদি তদপ্যস্য তনুভা।
ইতি শ্রীচৈতন্যচরিতামৃতং ॥
অদ্বৈতঃ (পুং) দ্বৈতরহিতঃ বিষ্ণুঃ। যথা।
বিষ্ণুমানন্দমদ্বৈতং বিজ্ঞানং সর্ব্বগং প্রভুং।
প্রণমামি সদা ভক্ত্যা চেতসা হৃদয়ালয়ং ॥
ইতি গারুড়ে ২৩৮ অধ্যায়ঃ ॥*॥ শিবাব-
তারবিশেষঃ। যথা। নিত্যানন্দো ভক্ত-
রূপো ব্রজে যঃ শ্রীহলায়ুধঃ। ভক্তাবতার
আচার্য্যোঽদ্বৈতো যঃ শ্রীসদাশিবঃ ॥ * ॥
তৎপিত্রাদিবিবরণং যথা। মহাদেবস্য
মিত্রো যঃ কুবেরো গুহ্যকেশ্বরঃ। কুবের-
পণ্ডিতঃ সোঽদ্য জনকোঽস্য বিদাম্বরঃ ॥
পুরা কুবেরঃ কৈলাসে সিধ্যসাধ্যনিষেবিতে।
জজাপ পরমং মন্ত্রং শৈবং শ্রীশিববল্লভঃ ॥
ততো দয়ালুর্ভগবান্ বরং বৃণ্বিতি সোঽব্র-
বীৎ। ততঃ কুবেরো বরয়ামাস ত্বং মে
সুতো ভব ॥ প্রার্থিতস্তেন দেবেশো বরদেশঃ
সদাশিবঃ। জন্মজন্মান্তরে পুত্র প্রাপ্স্যামি
পুত্রতাং তব ॥ ইতি প্রাপ্য বরং কষ্টং
কিয়ন্তং কালমাস্থিতঃ। কার্য্যাদাশবশাৎ
সোঽদ্যাদ্বৈতস্য জনকোঽভবৎ ॥ যোগমায়া
ভগবতী গৃহিণী তস্য সাম্প্রতং। সীতা-
রূপেণাবতীর্ণা শ্রীনাম্নী তৎপ্রকাশতঃ ॥
তস্য পুত্রোঽচ্যুতানন্দঃ কৃষ্ণচৈতন্যবল্লভঃ।
শ্রীমৎপণ্ডিতগোস্বামিশিষ্যপ্রিয় ইতি শ্রু-
তং ॥ যঃ কার্ত্তিকেয়ঃ প্রাগাসীদিতি জল্পন্তি
কেচন। ইতি গৌরগণোদ্দেশদীপিকা ॥
অদ্বৈতবাদী [ন্] (ত্রি) একব্রহ্মবাদী। তস্য মতং
যথা। ব্রহ্মৈব সত্যং প্রত্যক্ষাদিসিদ্ধং
বিশ্বং ব্রহ্মণি আরোপিতং। যথা রজ্জুঃ

রজ্জুস্বরূপাজ্ঞানাৎ সর্পবৎ প্রতিভাতি। তথা ব্রহ্মস্বরূপাজ্ঞানাৎ বিশ্বং বস্তুবৎ প্রতিভাতি। প্রকৃতির্জীবশ্চাপি পর্য্যবসানে ব্রহ্মৈব ব্রহ্মান্যৎ সদ্বস্তু নাস্তি। অত্র প্রমাণং শারীরিকসূত্রস্য শঙ্করাচার্য্যকৃতভাষ্যতট্টীকাকল্পতরুভাষরত্নপ্রভাদি॥

অধঃ [ স্ ] ব্য তলং। নীচং। অধোভাগঃ। যথা। লোকানুপর্য্যুপর্য্যাস্তেঽধোঽধোঽধ্যধি চ মাধবঃ। ইতি বোপদেবঃ॥ পাতালং। যোনিঃ। ইতি ত্রিকাণ্ডশেষঃ॥

অধঃপুষ্পী (স্ত্রী) গোজিহ্বা। ইতি রাজনির্ঘণ্টঃ॥ তৃণবিশেষঃ। হেঠাহুলী। চোরখড়িকা। ভাঁটুই ইতি ভাষা। তৎপর্য্যায়ঃ। অবাক্পুষ্পী ২ মঙ্গল্যা ৩ অমরপুষ্পিকা ৪। ইতি রত্নমালা॥

অধঃক্ষিপ্তঃ (ত্রি) অধস্ত্যক্তবস্তু। ইতি জটাধরঃ॥

অধমঃ (ত্রি) ন্যূনঃ। নিন্দিতঃ। অপকৃষ্টঃ। তৎপর্য্যায়ঃ। নিকৃষ্টঃ ২ প্রতিকৃষ্টঃ ৩ অর্ব্বা ৪ রেফঃ ৫ যাপ্যঃ ৬ অবমঃ ৭ কুৎসিতঃ ৮ অবদ্যঃ ৯ কুপূয়ঃ ১০ খেটঃ ১১ গর্হ্যঃ ১২ অণকঃ ১৩। ইত্যমরঃ॥ রেপঃ ১৪ অরমঃ ১৫ আণকঃ ১৬ অনকঃ ১৭। ইতি তট্টীকা॥

অধমঃ (পুং) উপপতিভেদঃ। তস্য লক্ষণং। ভয়দয়ালজ্জাশূন্যত্বং। কামক্রীড়াবিষয়ে কর্ত্তব্যাকর্ত্তব্যাবিচারকত্বঞ্চ। ইতি রসমঞ্জরী॥

অধমভৃতকঃ (ত্রি) অধমভৃত্যঃ। নীচদাসঃ। দৌবারিকভারবাহকাদয়ঃ॥

অধমর্ণঃ (ত্রি) ঋণগৃহীতা। ঋণী। খাতক ইতি ভাষা। ইত্যমরঃ॥

অধমর্ণিকঃ (ত্রি) অধমর্ণঃ। যথা। গৃহীতানুক্রমাদ্দাপ্যো ধনিনামধমর্ণিকঃ। দত্ত্বা তু ব্রাহ্মণায়ৈব নৃপতেস্তদনন্তরং॥ ইতি মিতাক্ষরা॥

অধমা (স্ত্রী) স্বীয়াদ্যন্তর্গতনায়িকাভেদঃ। অস্যা লক্ষণং। হিতকারিপ্রিয়তমে অহিতকারিত্বং। অস্যাঃ ক্রিয়া অধমা। অস্যা নিষ্কারণকোপত্বাৎ চণ্ডীতি নাম। ইতি রসমঞ্জরী॥

অধমাঙ্গং (ক্লী) পাদঃ। চরণঃ। ইতি শব্দচন্দ্রিকা॥

অধরং (ক্লী পুং) স্মরাগারং। রতিগৃহং। যোনিরিতি যাবৎ। ইতি শব্দরত্নাবলী ত্রিকাণ্ডশেষশ্চ॥

অধরঃ (পুং) মুখাবয়ববিশেষঃ। নাবো ঠোঁট ইতি ভাষা। ওষ্ঠঃ। উপর ঠোঁট ইতি ভাষা। তয়োঃ পর্য্যায়ঃ। রদনচ্ছদঃ ২ দশনবাসঃ ৩। ইত্যমরঃ॥ পরন্তু দ্বয়োরপি ওষ্ঠাধরপ্রয়োগঃ যথা। রদনচ্ছদৌ দশনবাসসী উভয়ত্র বর্ত্তেতে তথা ওষ্ঠাধরাবপি উভয়ত্রেতি নয়নানন্দঃ॥ রায়মুকুটোঽপ্যাহ উপরিবর্ত্তী অধোবর্ত্তী চ ওষ্ঠঃ অধরোঽপ্যেবং। পুরুষস্য রক্তাধরঃ প্রশস্তঃ। যথা। পাণিপাদতলৌ রক্তৌ নেত্রান্তরনখানি চ। তালুকোঽধরজিহ্বা চ সপ্তরক্তং প্রশস্যতে॥ স্ত্রিয়াস্তু যথা। পাটলাবর্ত্তুলঃ স্নিগ্ধো রেখাভূষিতমধ্যভূঃ। সীমন্তিনীনামধরো রাজ্ঞাং চৈব প্রিয়ো ভবেৎ॥ শ্যামঃ স্থূলোঽধরোষ্ঠঃ স্যাৎ বৈধব্যকলহপ্রদঃ। মস্তণো মত্তকাশিন্যাশ্চোত্তরোষ্ঠঃ সুভোগদঃ॥ ইতি সামুদ্রকং॥

অধরঃ (ত্রি) অধঃ। তলং। হীনঃ। অপকৃষ্টঃ। ইতি মেদিনী॥ হীনবাদী। ইতি হেমচন্দ্রঃ॥

অধরতঃ [ স্ ] ব্য অধস্তাৎ। অধোভাগঃ। ইতি হলায়ুধঃ ॥

অধরমধু (ক্লী) বক্ত্রাসবঃ। অধরামৃতং অধররসঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

অধরস্তাৎ ব্য অধরতঃ। ইতি হলায়ুধঃ ॥

অধরস্মাৎ ব্য অধস্তাৎ। অধরাৎ। দিগ্বাচক-শব্দাৎ দিগ্দেশকালবাচ্যে প্রথমাপঞ্চমী-সপ্তমীনাং স্থানে স্মাৎ প্রত্যয়ো ভবতি। ইতি ব্যাকরণং ॥

অধরা ( স্ত্রী ) অধোদিক্। ইতি ব্যাকরণং ॥ নীচা। যথা। অধরাথ কৃতা যয়ৈব সা। ইতি নৈষধং ॥ [ মরটীকা ॥

অধরাৎ ব্য অধরতঃ। অধরেণ। অধরস্তাৎ। ইত্য-

অধরামৃতং (ক্লী) অধরসুধা। যথা। সিঞ্চাঙ্গ ন-স্ত্বদধরামৃতপূরকেণ হাসাবলোককলগীতজ-হৃচ্ছয়াগ্নিং। নো চেদ্বয়ং বিরহজাগ্ন্যুপ-যুক্তদেহা ধ্যানেন যাম পদয়োঃ পদবীং সখে তে ॥ ইতি শ্রীভাগবতে ১০ স্কন্ধে ২৯ অধ্যায়ঃ ॥ [ জটাধরঃ ॥

অধরীণঃ ( ত্রি ) ধিক্কৃতঃ। তিরস্কৃতঃ। ইতি

অধরেণ ব্য অধোদিগ্দেশকালঃ। অধোদিগ্দেশ-কালে। ইতি ব্যাকরণং ॥

অধরেদ্যুঃ [ স্ ] ব্য অধরদিবসঃ। পরদিনং। ইতি শব্দরত্নাবলী ॥

অধর্ম্মঃ (পুং) ধর্ম্মবিরোধী। স তু ব্রহ্মণঃ পৃষ্ঠা-জ্জাতঃ। ইতি শ্রীভাগবতং ॥ পাপং। অপ-রাধঃ। শ্রুতিস্মৃতিবিরুদ্ধাচারঃ। যথা। অধর্ম্মেণৈধতে রাজন্ ততো ভদ্রাণি পশ্যতি। ততঃ সপত্নান্ জয়তি সমূলস্তু বিনশ্যতি ॥ ইতি মহাভারতং ॥

অধর্ম্মী [ ন্ ] ( ত্রি ) অধার্ম্মিকঃ। অধর্ম্মাত্মা। অধর্ম্মশব্দাদস্ত্যর্থে ইন্ ॥

অধশ্চরঃ ( পুং ) চৌরঃ। ইতি হারাবলী ॥ অধোগামিনি ত্রি ॥

অধশ্চৌরঃ (পুং) নীচচৌরঃ। সিঁদাল চোর ইতি ভাষা। ইতি কেচিৎ ॥

অধস্তাৎ ব্য অধোভাগঃ। ইতি হলায়ুধঃ ॥ পশ্চাদ্ভাগঃ। ইত্যমরটীকা ॥ রতিগৃহং। ভগং। ইতি ত্রিকাণ্ডশেষঃ ॥

অধামার্গবঃ ( পুং ) ধামার্গববৃক্ষঃ। ইত্যমর-টীকায়াং রায়মুকুটঃ ॥

অধার্ম্মিকঃ (ত্রি) অধর্ম্মী। অধর্ম্মাত্মা। পাপী। তৎপর্য্যায়ঃ। আধার্ম্মিকঃ ২। ইতি ত্রিকাণ্ড-শেষঃ ॥ যথা। যস্তু পঞ্চ মহাযজ্ঞবিহীনঃ স নিরাকৃতঃ। অধার্ম্মিকঃ স্যাদ্বৃষলঃ অবকীর্ণী ক্ষতব্রতী। ইতি জটাধরঃ ॥ অতো না ধার্ম্মিকে বসেদ্গ্রামে। ইতি কুল্লূকভট্টশ্চ ॥

অধি ব্য প্রাদিবিংশত্যুপসর্গমধ্যে উপসর্গ-বিশেষঃ। অস্যার্থঃ। উপরিভাগঃ। ইতি দুর্গাদাসঃ ॥ অধিকারঃ। ঈশ্বরঃ। ইতি মেদিনী ॥ অধিকং। যথা অধিমাসঃ অধিকো মাসঃ ইত্যর্থঃ। ইতিস্মৃতিঃ ॥

অধিঃ ( পুং ) আধিঃ। মনঃপীড়া। ইত্যমর-টীকায়াং ভরতঃ ॥

অধিকং (ক্লী) কাব্যালঙ্কারভেদঃ। তস্য লক্ষণং। অধিকং পৃথুলাধারাদাধেয়াধিক্যবর্ণনং। উদাহরণং যথা। ব্রহ্মাণ্ডানি জলে যত্র তত্র মান্তি ন তে গুণাঃ ॥ ইতি কুবলয়ানন্দে অপ্পেয়দীক্ষিতঃ ॥ [ হেমচন্দ্রঃ ॥

অধিকঃ ( ত্রি ) অতিরিক্তঃ। অনেকঃ। ইতি

অধিকরণং ( ক্লী ) একন্যায়োপপাদনং। ইতি হেমচন্দ্রঃ ॥ অধিক্রিয়তে অত্র। বিষয়াদি-পঞ্চাবয়ববিবেচনোপেতগ্রন্থঃ। যথা। বিষয়ো বিশয়শ্চৈব পূর্ব্বপক্ষস্তথোত্তরং। নির্ণয়-শ্চেতি পঞ্চাঙ্গং শাস্ত্রেঽধিকরণং স্মৃতং ॥ বিষয়ো বিচারার্হবাক্যং। বিশয়োঽস্যায়-মর্থো ন বেতি সংশয়ঃ। পূর্ব্বপক্ষঃ প্র-কৃতার্থবিরোধিতর্কোপন্যাসঃ। উত্তরং সিদ্ধা-ন্তানুকূলতর্কোপন্যাসঃ। নির্ণয়ো মহা-বাক্যার্থতাৎপর্য্যনিশ্চয়ঃ। এবং ক্রমেণ বিবেচনমত্রাধিক্রিয়তে ইত্যধিকরণং। ইতি তিথ্যাদিতত্ত্বং ॥ অধিক্রিয়তেঽর্থাদ্বিচা-রোঽস্মিন্ননেনেতি বা অধিকরণং বেদ-বিচারগ্রন্থাত্মিকা মীমাংসা। সা চ দ্বিধা কর্ম্ম-মীমাংসা ব্রহ্মমীমাংসা চেতি। কর্ম্মকাণ্ড-বেদবিচারগ্রন্থঃ কর্ম্মমীমাংসা জৈমিনি-প্রণীতা সৈব মীমাংসাত্বেন প্রসিদ্ধা পূর্ব্ব-মীমাংসা ইত্যুচ্যতে। ব্রহ্মকাণ্ডবেদবিচার-গ্রন্থশ্চ ব্রহ্মমীমাংসা বেদব্যাসপ্রণীতা সা চ বেদান্তত্বেন প্রসিদ্ধা উত্তরমীমাংসা ইত্যু-চ্যতে। ইত্থঞ্চ মীমাংসাপদমপি করণাধি-করণব্যুৎপত্ত্যা গ্রন্থপরং জ্ঞেয়ং। ভাবব্যুৎ পত্ত্যা তু বিচারপূর্ব্বকনির্ণয়পরমিতি। যত্তু অধিক্রিয়তে বিচারোঽস্মৈ ইতি ব্যুৎপত্ত্যা অধিকরণং মীমাংসাসিদ্ধান্ত ইত্যুদীচ্যে-নাভিহিতং তন্ন। সিদ্ধান্তস্যাধিকরণচরমা-বয়বত্বেনাধিকরণাঙ্গত্বাৎ অধিকরণত্বানুপ-পত্তেঃ। যথা ন্যায়মতে নিগমনস্য ন্যায়া-বয়বত্বং ন তন্মাত্রস্য ন্যায়ত্বং তথেহাপীতি সুধীভির্ভাব্যং। তস্য চাধিকরণস্য পঞ্চাঙ্গানি তদুক্তং। বিষয়োঽবিষয়শ্চৈব পূর্ব্বপক্ষ-স্তথোত্তরং। নির্ণয়শ্চেতি পঞ্চাঙ্গং শাস্ত্রে-ঽধিকরণং স্মৃতং ॥ বিষয়ো বিচারার্হ-বাক্যং। যথা। খাদিরে পশুং বধ্নাতি খাদিরং বীর্য্যকামস্য যূপং কুর্ব্বীত ইত্যাদি সংযোগ-পৃথক্ত্বাধিকরণাদেঃ। এবং বিষয়ো নিশ্চয়-স্তদ্ভিন্নস্তদ্বিরোধী বা অবিষয়ঃ সংশয়ঃ। তদুক্তং। বিশব্দশ্চ বিশেষার্থঃ সিনোতি-র্বন্ধনার্থকঃ। বিশেষেণ সিনোতীতি বিষয়ো-ঽর্থনিয়ামকঃ ॥ নিয়ামকঃ কোটিনিশ্চায়ক-তয়া বিশেষদর্শনাত্মকব্যাপ্যবত্ত্বাদিনিশ্চয় এব। এবমেব ন্যায়গুরুন্যায়বাগীশভট্টা-চার্য্যচরণাঃ ॥ অন্যে তু বিশয় ইতি বি-পূর্ব্বস্য শেতেঃ সংশয়ার্থকত্বমালোচ্য তালব্যমধ্যপাঠং বদন্তঃ বিশয়ঃ সংশয়ঃ ইতি ব্যাচক্ষতে তত্র বিপূর্ব্বশেতেঃ সংশয়ার্থকত্বে মানমনুসন্ধেয়ং। সংশয়ঃ অস্যায়মর্থো ন বেত্যাকারকঃ। পূর্ব্বপক্ষঃ সিদ্ধান্তবিরুদ্ধ-তর্কোপন্যাসেন সিদ্ধান্তবিরুদ্ধসংশয়ৈক-কোটিব্যবস্থাপনং। উত্তরং প্রকৃতসিদ্ধা-ন্তানুকূলতর্কোপন্যাসেন প্রকৃতসিদ্ধান্ত-সিদ্ধসংশয়াপরকোটিব্যবস্থাপনং। নির্ণয়ঃ সিদ্ধান্তসিদ্ধবিচার্য্যবাক্যতাৎপর্য্যাবধারণং। কর্ম্মমীমাংসাধিকরণানি সহস্রসংখ্যকানি জৈমিনিপ্রণীতানি শাস্ত্রদীপিকাদৌ পার্থ-সারথিমিশ্রাদিভির্ব্বহুধা বিবৃতানি। ইতি চন্দ্রশেখরকৃততত্ত্বসম্বোধিনী ॥*॥ ব্যাকরণ-মতে আধাররূপকারকং। তচ্চতুর্ব্বিধং। সামীপ্যং ১ যথা গঙ্গায়াং ঘোষঃ। কালিন্দ্যাং রেমে ॥ আশ্লেষঃ ২ যথা দিবি দেবাঃ।

কাননে রেমে ॥ বিষয়ঃ ৩ যথা শাস্ত্রে নিপুণঃ। কেলৌ কুশলঃ ॥ ব্যাপ্তিঃ ৪ যথা তিলেষু তৈলং। সকলে স্থিতঃ ॥ * ॥

অধিকর্দ্ধিঃ (ত্রি) অতিশয়সম্পত্তিযুক্তঃ। তৎপর্য্যায়ঃ। সমৃদ্ধঃ ২। ইত্যমরঃ ॥

অধিকর্ম্মিকঃ (পুং) হট্টাধ্যক্ষঃ। হাটের দারোগা ইতি ভাষা। ইতি হেমচন্দ্রঃ ॥

অধিকাঙ্গং (ক্লী) সকঞ্চুকাঃ মধ্যে যদ্বধ্নন্তি তৎ। কঞ্চুকাদিদার্ঢ্যার্থং শূরৈর্ম্মধ্যকায়ে নিবধ্য পট্টিকাদি। তৎপর্য্যায়ঃ। সারসনং ২। ইত্যমরঃ ॥ বিংশত্যঙ্গুল্যাদ্যতিরিক্তঅঙ্গবিশিষ্টে ত্রি ॥

অধিকারঃ (পুং) রাজাদীনাং চামরধুননচ্ছত্রধারণাদিব্যাপারঃ। তৎপর্য্যায়ঃ। প্রক্রিয়া ২। ইত্যমরঃ ॥ প্রকরণং। যথা নৈমিত্তিকোঽয়ং প্রায়শ্চিত্তাধিকার ইতি মিতাক্ষরা ॥ স্বামিত্বং। যথা সর্ব্বে স্যুরধিকারিণ ইতি স্মৃতিঃ ॥ অধিকৃতদেশাদিঃ। যথা নিজাধিকারঃ ভিন্নাধিকারঃ ইত্যাদিবহবঃ শিষ্টপ্রয়োগাঃ ॥

অধিকারী [ন্] (ত্রি) প্রভুঃ। স্বামী। অধিপতিঃ। অধিকারবিশিষ্টঃ। স্বত্ববান্। ইতি স্মৃতিঃ ॥ যথা। ইষ্টাপূর্ত্তং দ্বিজাতীনাং ধর্ম্মঃ সামান্য উচ্যতে। অধিকারী ভবেৎ শূদ্রঃ পূর্ত্তে ধর্ম্মে ন বৈদিকে ॥ ইতি মলমাসতত্ত্বং ॥ অপিচ। স্নাতোঽধিকারী ভবতি দৈবে পৈত্রেচ কর্ম্মণি। ইত্যাহ্নিকাচারতত্ত্বং ॥ বেদান্তমতে বিধিবদধীতবেদাঙ্গত্বেন আপাততোঽধিগতাখিলবেদার্থোঽস্মিন্ জন্মনি জন্মান্তরে বা কাম্যনিষিদ্ধবর্জনপুরঃসরং নিত্যনৈমিত্তিকপ্রায়শ্চিত্তোপাসনানুষ্ঠানেন নির্গতনিখিলকল্মষতয়া নিতান্তনির্ম্মলস্বান্তঃ সাধনচতুষ্টয়সম্পন্নঃ প্রমাতা। ইতি বেদান্তসারঃ ॥ * ॥ ধনাধিকারিণো দায়ভাগশব্দে দ্রষ্টব্যাঃ ॥*॥ শ্রীমূর্ত্ত্যাদীনাং বেশকর্ত্তা। ইতি লোকপ্রসিদ্ধং ॥

অধিকারী [ন্] (পুং) বেদান্তশাস্ত্রবেত্তা। অধিগতাখিলবেদার্থনিতান্তনির্ম্মলস্বান্তঃ সাধনচতুষ্টয়সম্পন্নঃ প্রমাতা। ইতি বেদান্তসারঃ ॥ পুরুষঃ। ইতি রাজনির্ঘণ্টঃ ॥

অধিকৃতঃ (পুং) অধ্যক্ষঃ। আয়ব্যয়াবেক্ষকঃ ॥ ইত্যমরঃ ॥ কৃতাধিকারদ্রব্যে বাচ্যলিঙ্গঃ।

অধিক্রমঃ (পুং) আক্রমণং। ইতি হেমচন্দ্রঃ ॥

অধিত্যকা (স্ত্রী) পর্ব্বতোপরি ভূমিঃ। ইত্যমরঃ ॥

অধিপঃ (ত্রি) অধিপতিঃ। স্বামী। ইত্যমরঃ ॥ রাজা। ইতি ত্রিকাণ্ডশেষঃ ॥

অধিপতিঃ (পুং) প্রভুঃ। স্বামী। ইতি হলায়ুধঃ ॥

অধিভূঃ (পুং) স্বামী। প্রভুঃ। ইত্যমরঃ ॥

অধিমাসঃ (পুং) রবিসংক্রান্তিদ্বয়মধ্যবর্ত্তিচান্দ্রমাসঃ। রবিসংক্রান্তিশূন্যশুক্লপ্রতিপদাদিদর্শান্তমাসঃ। তৎপর্য্যায়ঃ। অধিকমাসঃ ২ অসংক্রান্তমাসঃ ৩ মলমাসঃ ৪ মলিম্লুচঃ ৫ বিনামকঃ ৬ নপুংসকঃ ৭। ইতি মলমাসতত্ত্বং ॥

অধিমাংসকঃ (পুং) দন্তরোগবিশেষঃ। যথা। দন্তরুক্ পশ্চিমে দন্তে মহান্ শোথো মহান্ রুজঃ। লালাস্রাবী কফকৃতো বিজ্ঞেয়ঃ সোঽধিমাংসকঃ ॥ ইতি ভাবপ্রকাশঃ ॥ অস্য চিকিৎসা দন্তরোগশব্দে দ্রষ্টব্যা ॥

অধিরথঃ (পুং) কর্ণপিতা। স তু ক্ষত্রিয়জাতিঃ। তস্য কর্ম্ম সারথ্যং। যথা। বিবেশাধিরথো রঙ্গং যষ্টিপ্রাণো হ্বয়ন্নিব। ইতি মহাভারতং॥

অধিরাজ্যভাক্ (পুং) অধিরাট্। যথা। অত্যন্যান্ পৃথিবীপালান্ পৃথিব্যামধিরাজ্যভাক্। ইতি মহাভারতং॥

অধিরাট্ [জ্] (পুং) সম্রাট্। চক্রবর্ত্তী। ইতি মহাভারতং॥

অধিরোহিণী (স্ত্রী) বংশকাষ্ঠাদিনির্ম্মিতারোহণমার্গঃ। সিঁড়ি ইতি ভাষা। তৎপর্য্যায়ঃ। নিঃশ্রেণিঃ ২। ইত্যমরঃ॥ নিঃশ্রেণী ৩। ইতি তট্টীকা॥ অধিরোহণী ইত্যপি পাঠঃ॥

অধিবচনং(ক্লী)নাম। সংজ্ঞা।ইতি ত্রিকাণ্ডশেষঃ॥

অধিবাসঃ(পুং) নিবাসঃ। ধূপনাদিভিঃ সংস্কারঃ। ইতি মেদিনী॥ তদ্দ্রব্যাণি। মৃত্তিকা ১ গন্ধঃ ২ শিলা ৩ ধান্যং ৪ দূর্ব্বা ৫ পুষ্পং ৬ ফলং ৭ দধি ৮ ঘৃতং ৯ স্বস্তিকং ১০ সিন্দুরং ১১ শঙ্খঃ ১২ কজ্জলং ১৩ রোচনা ১৪ শ্বেতসর্ষপঃ ১৫ স্বর্ণং ১৬ রৌপ্যং ১৭ তাম্রং ১৮ চামরং ১৯ দর্পণং ২০ দীপঃ ২১ প্রশস্তপাত্রং ২২।ইতি ভবদেবঃ॥ কচিৎ পুস্তকে শ্বেতসর্ষপস্থানে সিন্দূরং কচিচ্চ চামরস্থানে। তত্রানুষ্ঠানং। ৺দুর্গাপূজাদোলযাত্রাযাগাদৌ পূর্ব্বদিনে সায়ংকালে আচারাৎ সংস্কারকর্ম্মণি তদ্দিনে পূর্ব্বাহ্নে মন্ত্রং পঠিত্বা ক্রমেণোক্তদ্রব্যাণি আদৌ দেবাদীনাং ললাটে পশ্চাদ্ভূমৌ স্পর্শয়িত্বা প্রশস্তপাত্রে স্থাপয়িত্বা তৎপাত্রং পূর্ব্বোক্তক্রমেণ বারত্রয়ং স্পর্শয়েৎ। দ্রব্যবিশেষেণ সংস্কারঃ। তত্র যজুর্ব্বেদোক্তমন্ত্রাস্ত্রয়োবিংশতিদ্রব্যাণি চ যথা। তৈলহরিদ্রাং গৃহীত্বা ওঁকোসি কতমোসি কস্মৈ ত্বা কায় ত্বা সুশ্লোকঃ সুমঙ্গলঃ সত্যরাজন্। অনয়া তৈলহরিদ্রয়া অস্য শুভাধিবাসনমস্তু। এবং সর্ব্বত্র। ১। গন্ধং গৃহীত্বা ওঁ গন্ধদ্বারাং দুরাধর্ষাং নিত্যপুষ্টাং করীষিণীং। ঈশ্বরীং সর্ব্বভূতানাং ত্বামিহোপহ্বয়ে শ্রিয়ং। ২। মহীং গৃহীত্বা ওঁ ভূরসি ভূমিরস্য দিতিরসি বিশ্বধায়া বিশ্বস্য ভুবনস্য ধর্ত্রীং পৃথিবীং যচ্ছ পৃথিবীং দৃংহ পৃথিবীং মাহিংসীঃ। ৩। পুনর্গন্ধেন গন্ধদ্বারামিতি। শিলাং গৃহীত্বা ওঁ প্রপর্ব্বতস্য বৃষভস্য

স্নাবশ্চরন্তি স্বসি চ ইয়ানাঃ তা আবৃত্র নধরা গুদক্তা অহিং বুধ্ন্যমনুরীয়মানাঃ। বিষ্ণোর্বিক্রমণমসি বিষ্ণোর্বিক্রান্তমসি বিষ্ণোঃ ক্রান্তমসি। ৪। ধান্যং গৃহীত্বা ওঁ ধান্যমসি ধিনুহি দেবান্ ধিনুহি যজ্ঞং ধিনুহি যজ্ঞপতিং ধিনুহি মাং যজ্ঞন্যং। ৫। দূর্ব্বাং গৃহীত্বা ওঁ কাণ্ডাৎ কাণ্ডাৎ প্ররোহন্তী পরুষঃ পরুষঃ পরিএবানো দূর্ব্বে প্রতনু সহস্রেণ শতেন চ। ৬। পুষ্পং গৃহীত্বা ওঁ শ্রীশ্চ তে লক্ষ্মীশ্চ পত্ন্যা অহোরাত্রে পার্শ্বে নক্ষত্রাণি রূপমশ্বিনৌ ব্যাপ্তং ইষ্ণন্নিশান মুম্মইশান সর্ব্বলোকম্মইশান। ৭। ফলং গৃহীত্বা ওঁ যাঃ ফলিনীর্যা অফলা অপুষ্পা যাশ্চ পুষ্পিণীঃ বৃহস্পতিপ্রসূতাস্তা নো মুঞ্চন্ত্বংহসঃ। ৮। দধি গৃহীত্বা ওঁ দধিক্রাব্ণোঽকার্ষং জিষ্ণোরশ্বস্য বাজিনঃ। সুরভিনো মুখাকরোৎ

প্রণতায়ুংষিতার্ধৎ। ৯। ঘৃতং গৃহীত্বা ওঁ তেজোসি শুক্রমস্যমৃতমসি ধামনামাসি প্রিয়ং দেবানামনাধৃষ্টং দেবযজনমসি।১০। স্বস্তিকং গৃহীত্বা ওঁস্বস্তিন ইন্দ্রো বৃদ্ধশ্রবাঃ স্বস্তিনঃ পূষা বিশ্ববেদাঃ স্বস্তি ন স্তার্ক্ষ্যো রিষ্টনেমিঃ স্বস্তি নো বৃহস্পতির্দধাতু।১১। সিন্দূরং গৃহীত্বা ওঁসিন্ধোরিব প্রাধ্বনে শূঘনাসো বাতপ্রমীয় পতয়ন্তু ঘৃতস্য ধারা অরুষোণ বাজী কাষ্ঠাভিন্দন্নূর্ম্মিভিঃ পিন্ন- মানঃ। অত্র বাতপ্রমীয় পতয়স্তি জহ্বা। ইত্যপি পঠন্তি। ১২। শঙ্খং গৃহীত্বা ওঁ প্রতিশ্রুৎকায়া অর্ত্তনং ঘোষায় ভয়মন্তায় বহুবাদিনমনন্তায় মূকংং শব্দায়াড়ম্বরা- ঘাতং মহসে বীণাবাদং ক্রোশায় তূণবদ্ধ- মবরস্পরায় শঙ্খধ্বং বনায় বনপ মন্যতো- হরণ্যায় দাবপং। ১৩। কজ্জলং গৃহীত্বা ওঁসমিদ্ধোঽঞ্জন ক্রদরং মতীনাং ঘৃতমগ্নে মধুমৎ পিন্নমানঃ বাজীবহন্ বাজিনং জাত- বেদো দেবানাং বক্ষিপ্রিয়মাসধস্থং। ১৪। রোচনাং গৃহীত্বা। ওঁ যুঞ্জন্তি ব্রধ্নমরুষং চরন্তং পরিতস্থুষঃ রোচন্তে রোচনা দিবি। ১৫। সিদ্ধান্নং গৃহীত্বা। ওঁ অন্নপতে অন্নস্য নো ধেহ্যনমীবস্য শুষ্মিণঃ। প্রদা- তারং তার্ষঊর্জং নো ধেহি দ্বিপদেশং চতু- ষ্পদে। সিদ্ধান্নমত্র আতপতণ্ডুলাঃ। ১৬। কাঞ্চনং গৃহীত্বা ওঁহিরণ্যগর্ভঃ সমবর্ত্ততাগ্রে ভূতস্য জাতঃ পতিরেকঃ আসীৎ। সদাধারঃ পৃথিবীং দ্যামুতেমাং কস্মৈ দেবায় হবিষা বিধেম। ১৭। রজতং গৃহীত্বা ওঁ তেজোসি শুক্রমস্যমৃতমসি ধামনামাসি প্রিয়ং দেবানামনাধৃষ্টং দেবযজনং। ১৮। তাম্রং গৃহীত্বা ওঁ অসৌ যস্তাম্রোরুণ উতবভ্রুঃ সুমঙ্গলঃ যে চৈনংং রুদ্রা অভিতো দিক্ষু শ্রিতাঃ সহস্রশো বৈষাংং হেলই- মহে। ১৯। সিদ্ধার্থং গৃহীত্বা ওঁ রক্ষোহনো বলগহনঃ প্রোক্ষামি বৈষ্ণবান্ রক্ষহনো বনগহনো বলয়ামি বৈষ্ণবান্ রক্ষোহনো বলগহনোঽবস্তৃণামি বৈষ্ণবান্ রক্ষোহনৌ বনগহনা উপধামি বৈষ্ণবী রক্ষোহনৌ বন- গহনৌ পর্য্যুহামি বৈষ্ণবী বৈষ্ণবমসি বৈষ্ণবাস্থ। ২০। দর্পণং গৃহীত্বা ওঁ আকৃ- ষ্ণেন রজসা বর্ত্তমানো নিবেশয়ন্নমৃতং মর্ত্ত্যঞ্চ হিরণ্যয়েন সবিতা রথেনা দেবো- যাতি ভুবনানি পশ্যন্। ২১। দীপং গৃহীত্বা ওঁ অগ্ন আয়াহি বীতয়ে গৃণানো হব্যদাতয়ে নিহোতা সৎসু বর্হিষি। ২২। সর্ব্বদ্রব্য- যুক্তডল্লকং গৃহীত্বা। ওঁ প্রতিপদসি প্রতি- পদে ত্বা অনুপদসি অনুপদে ত্বা সম্পদসি সম্পদে ত্বা তেজোসি তেজসে ত্বা। ২৩। ইতি যজুর্বেদীয়দুর্গোৎসবপদ্ধতিঃ ॥ * ॥

সামবেদিনামধিবাসমন্ত্রাস্তত্তদ্দ্রব্যাণি চ যথা। প্রথমং গন্ধেন। ওঁ ভদ্রা ইন্দ্রস্য রাতয়ঃ যোঽস্য কামং বিধতো নরোষতি মনোদানায় চোদয়ন্। ১। ওঁ মহিত্রীণামব- রস্তু দ্যুক্ষমিত্রস্যার্যম্ণঃ দুরাধর্ষং বরুণস্য।২। ইতি মহ্যা। পুনর্গন্ধেন ওঁ ভদ্রা ইন্দ্রস্য রাতয়ঃ ইত্যাদি। ৩। ওঁ বিত্বদাপো ন পর্ব্বতস্য পৃষ্ঠাদুক্থেভিরগ্নে জনয়ন্ত দেবাঃ তত্বাগিরঃ। সুষ্টুতয়ো বাজযত্যা জিষ্ণগির্ব্ব র্বাহো জিগ্যুরস্বাঃ। ৪। ইতি শিলয়া।

ওঁ ধানাবন্তং করম্ভিণ মপূপ্যবন্তমুক্‌থিনং ইন্দ্রপ্রাতর্জুষস্বনঃ। ৫। ইতি ধান্যেন। ওঁ জজ্জায়থা মপূর্ব্ব্য মঘবন্ বৃত্রহত্যায়। তৎপৃথিবী মপ্রথয়স্তদস্তভ্না উতো দিবম্।৬। ইতি দূর্ব্বয়া। ওঁপবমান ব্যশ্নুহি রশ্মি-ভির্ব্বাজসাতমঃ। দধৎস্তোত্রে সুবীর্য্যম্ ।৭। ইতি পুষ্পেণ। ওঁইন্দ্রমরোনে মধিতা হবন্তে যৎপার্য্যা যুঞ্জতে ধিয়স্তাঃ শূরো নৃষাতা শ্রবসশ্চ কামত্বা গোমতি ব্রজে ভজাত্বমঃ। ৮। ইতি ফলেন। ওঁদধিক্রাব্ণো-হকারিষং জিষ্ণোরশ্বস্য বাজিনঃ সুরভিনো মুখাকরৎ প্রণতায়ুংষি তারিষৎ। ৯। ইতি দধ্না। ওঁ ঘৃতবতী ভুবনানামধিশ্রিয়োর্ব্বী পৃথ্বী মধুদুঘে সুপেশসা দ্যাবা পৃথিবী বরুণস্য ধর্ম্মণা বিষ্কভিতেহজরে ভূরিরেতসা। ১০। ইতি ঘৃতেন। ওঁ অস্তি সোমোহয়ং সুতঃ পিবন্ত্যস্য মরুতঃ উতস্বরাজোহশ্বিনা। ১১। ইতি স্বস্তিকেন। ওঁ সিন্ধোরুচ্ছ্বাসে পতয়ন্তমুক্ষণং হিরণ্যপাবাঃ পশুমপ্সু গৃভ্নতে। ১২। ইতি সিন্দূরেণ। ওঁ স্বস্তুন্বয়ো বসূনাং যো রায়া মানেতা য ইড়ানাং সোমো যঃ সুক্ষিতীনাং। ১৩। ইতি শঙ্খেন। ওঁ অঞ্জতে ব্যঞ্জতে সমঞ্জতে ক্রতুং রিহন্তি মধ্বাভ্যঞ্জতে। ১৪। ইতি কজ্জলেন। ওঁশ্রায়ন্ত ইব সূর্য্যং বিশ্বেদিন্দ্রস্য ভক্ষত বসূনি জাতো জনিমান্যোজসা প্রতিভাগমদীধিমঃ। ১৫। ইতি রোচনয়া। ওঁ প্রণীউষা অপূর্ব্বা ব্যুৎসতি প্রিয়া দিবস্তুষে বা মশ্বিনা বৃহৎ।১৬। ইতি সিদ্ধার্থেন। ওঁ সদসস্পতিমদ্ভুতং প্রিয়মিন্দ্রস্য কাম্যং। সনিং মেধা ময়াসিষং। ইতি কাঞ্চনেন। ১৭। ওঁ যদ্বর্চ্চো হিরণ্যস্য যদ্বা বর্চ্চো গবামুত। সত্যস্য ব্রহ্মণো বর্চ্চস্তেন মা সংসৃজামসি। ১৮। ইতি রৌপ্যেণ। ওঁবন্মহাংসি সূর্য্য বড়াদিত্য মহাংঅসি মহস্তে সতো মহিমাপনিষ্ট সমহ্না দেবমহাং অসিঃ। ১৯। ইতি তাম্রেণ। ওঁ মনজ্যোতির্জুষতামাজ্যস্য বৃহস্পতির্যজ্ঞমিমং তনোত্বরিষ্টং। যজ্ঞং সমিমং দধাতু বিশ্বেদেবাঃ স ইহ মাদয়ন্তা মোং প্রতিষ্ঠ। ২০। ইতি দীপেন। ওঁ আদিত্য প্রযতস্য বেত্তসো জ্যোতিঃ পশ্যন্তি বাসরং পাবায় দিব্যং তোদিবি। ২১। ইতি দর্পণেন। ওঁ উদ্যল্লোকানরোচয় প্রভভূতমরোচয় হোই ইমান্ লোকান্ নরোচয় হোই বিশ্বভূতমরোচয়। হোহা ঐবাত্র ধর্ম্মো জ্যোতীংসি। ইতি প্রশস্তপাত্রেণ। ২২। প্রশস্তপাত্রং পূর্ব্বোক্তসর্ব্বদ্রব্যস্থাপিতৈকপাত্রং। ইতি সামবেদীয়দুর্গোৎসবপদ্ধতিঃ॥

অধিবাসনং (ক্লী) অধিবাসঃ। গন্ধমাল্যাদিভিঃ সংস্কারকরণং। ইত্যমরঃ॥

অধিবিন্না (স্ত্রী) অধ্যূঢ়া। প্রথমবিবাহিতা স্ত্রী। কৃতানেকবিবাহস্বামিনঃ আপেক্ষিকপ্রথমোঢ়া ভার্য্যা। ইত্যমরঃ॥

অধিশ্রয়ণী (স্ত্রী) চুল্লী। চুলা ইতি ভাষা। ইত্যমরঃ॥

অধিষ্ঠানং (ক্লী) নগরং। চক্রং। প্রভাবঃ। অধ্যাসনং। অবস্থানং। ইত্যমরঃ॥

অধিক্ষিপ্তঃ (ত্রি) প্রতিক্ষিপ্তঃ। ইত্যমরঃ॥

প্রেরিতঃ। ইতি ভরতঃ॥ প্রণিহিতঃ। স্থাপিতঃ। কুৎসিতঃ। ভর্ৎসিতঃ। ইতি মেদিনী॥

অধীতঃ (ত্রি) কৃতাধ্যয়নঃ। পঠিতঃ। যথা। অধীতে শতসাহস্রমনন্তং বেদপারগে। ইতি স্মৃতিঃ॥ পঠিতশাস্ত্রং। পাঠে ক্লী॥

অধীতিঃ (স্ত্রী) অধ্যয়নং। পঠনং। ইতি জটাধরঃ॥

অধীতী [ন্] (ত্রি) অধ্যয়নবিশিষ্টঃ। কৃতাধ্যয়নঃ। ইতি ব্যাকরণং॥

অধীনঃ (ত্রি) পরবশঃ। তৎপর্য্যায়ঃ। নিঘ্নঃ ২ আয়ত্তঃ৩ অস্বচ্ছন্দঃ৪ গৃহ্যকঃ৫। ইত্যমরঃ॥

অধীরঃ (ত্রি) চঞ্চলঃ। ইতি হলায়ুধঃ॥ কাতরঃ। ইত্যমরঃ॥

অধীরা (স্ত্রী) বিদ্যুৎ। ইতি হারাবলী॥ মানাবস্থায়াং মধ্যাপ্রগল্‌ভনায়িকয়োর্ভেদঃ॥ তস্যা লক্ষণং। অব্যঙ্গকোপপ্রকাশকত্বং। মধ্যাধীরায়াঃ পরুষবাক্ কোপপ্রকাশিকা॥ প্রৌঢ়াধীরায়াস্তর্জ্জনতাড়নাদিকং কোপপ্রকাশং। সা দ্বিধা। জ্যেষ্ঠা কনিষ্ঠা চ। ইতি রসমঞ্জরী॥

অধীশঃ (ত্রি) অধিপতিঃ। প্রভুঃ। ইতি হলায়ুধঃ॥

অধীশ্বরঃ (ত্রি) প্রণতাশেষসামন্তঃ। মহারাজঃ। চক্রবর্ত্তী। ইত্যমরঃ॥

অধুতং (ত্রি) অকম্পিতং। ধুঞ্ কম্পে ইত্যস্মাৎ কর্ম্মণি ক্তঃ পশ্চান্নঞ্ সমাসঃ। দীর্ঘমধ্যোঽপি॥ [ইত্যমরঃ॥

অধুনা ব্য অস্মিন্‌কালে। ইদানীং। সম্প্রতি।

অধুনাতনং (ত্রি) ইদানীন্তনং। বর্ত্তমানকালবৃত্তি। এতৎকালীনং। ইতি ব্যাকরণ

অধূতঃ (পুং) বিষ্ণুঃ। ইতি তস্য সহস্রনামমধ্যে পঠিতঃ। অকৃতধারণবস্তুনি ত্রি॥

অধৃষ্টঃ (ত্রি) সলজ্জঃ। তৎপর্য্যায়ঃ। অপ্রগল্‌ভঃ ২। ইতি শব্দরত্নাবলী॥ শারদঃ ৩ অপ্রতিভঃ ৪। ইতি জটাধরঃ॥ শালীনঃ ৫। ইত্যমরঃ॥ [মেদিনী॥

অধৃষ্যঃ (ত্রি) প্রগল্‌ভঃ। অধর্ষণীয়ঃ। ইতি অধৃষ্যা (স্ত্রী) নদীবিশেষঃ। ইতি মেদিনী॥

অধৈর্য্যঃ (ত্রি) ধীরতাশূন্যঃ। ধৈর্য্যাভাবে ক্লী। যথা। ধৈর্য্যাধৈর্য্যপরিগ্রহগ্রহিলয়োরেণীদৃশোঃ প্রীতয়ে। ইতি ভানুভট্টঃ॥

অধোংশুকং (ক্লী) পরিধানবস্ত্রং। ইত্যমরঃ॥

অধোঘণ্টা (স্ত্রী) অপামার্গঃ। ইতি রত্নমালা॥

অধোজিহ্বিকা (স্ত্রী) তালুমূলস্থক্ষুদ্রজিহ্বা। আল্‌জিব ইতি ভাষা। ইতি হারাবলী॥

অধোভুবনং (ক্লী) পাতালং। ইত্যমরঃ॥

অধোমর্ম্ম [ন্] (ক্লী) গুহ্যদ্বারং। ইতি হেমচন্দ্রঃ॥

অধোমুখঃ (ত্রি) অধোবদনঃ। পাতালমুখঃ। তৎপর্য্যায়ঃ। অবাঙ্মুখঃ ২। ইত্যমরঃ॥ অবাচীনঃ ৩। ইতি জটাধরঃ॥ অধোমুখনক্ষত্রগণো যথা। অশ্লেষবহ্নিযমপিত্র্যবিশাখযুক্তং পূর্ব্বাত্রয়ং শতভিষা চ নবাপ্যুডূনি। এতান্যধোমুখগণানি শুভানি নিত্যং বিদ্যার্থ্যভূমিখননেষু চ শোভিতানি॥ ইতি জ্যোতিঃসারসংগ্রহঃ॥

অধোমুখা (স্ত্রী) গোজিহ্বাবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

অধোবায়ুঃ (পুং) অপানবায়ুঃ। যথা। ক্ষুতেঽধোবায়ুগমনে জৃম্ভণে জপমুৎসৃজেৎ। ইতি তন্ত্রসারে যোগিনীহৃদয়ং॥

অধোক্ষজঃ ( পুং ) বিষ্ণুঃ। ইত্যমরঃ॥

অধ্যগ্নি ( ক্লী ) বিবাহকালে অগ্নিসমীপে স্ত্রিয়ৈ দত্তং ধনাদি। যথা। বিবাহকালে যৎ স্ত্রীভ্যো দীয়তে হ্যগ্নিসন্নিধৌ। তদধ্যগ্নি কৃতং সদ্ভিঃ স্ত্রীধনন্তু প্রকীর্ত্তিতং॥ ইতি দায়ভাগে কাত্যায়নঃ॥

অধ্যণ্ডা ( স্ত্রী ) কপিকচ্ছুঃ। আল্‌কুশী ইতি ভাষা। ইত্যমরঃ॥ ভূম্যামলকী। ইতি রত্নমালা॥

অধ্যয়নং ( ক্লী ) গুরুমুখাদানুপূর্ব্বীশ্রবণং। পঠনং। ব্রাহ্মণস্য ষট্‌কর্ম্মান্তর্গতমিদং। ইতি শব্দরত্নাবলী॥

অধ্যবসায়ঃ (পুং) উৎসাহঃ। ইত্যমরঃ॥ কর্ম্মসু সুকরঃ প্রত্যয়ঃ। ইতি মধুঃ॥ কর্ম্মসু দৃঢ়-যত্নকারকো ভাবঃ। ইতি রমানাথঃ॥ কর্ম্মসু প্রত্যয়ঃ। ইতি নয়নানন্দঃ॥ অশক্যে বলোদ্যমঃ। ইতি কেচিৎ॥ উদ্যোগো-দ্যমৌ চাত্র। ইতি ভরতঃ॥

অধ্যশনং ( ক্লী ) অজীর্ণে ভোজনং। যথা। অজীর্ণে ভুজ্যতে যত্তু তদধ্যশনমুচ্যতে। ইতি ভাবপ্রকাশঃ॥

অধ্যক্ষঃ (পুং) ক্ষীরিকাবৃক্ষঃ। ইতি শব্দরত্নাবলী॥

অধ্যক্ষঃ ( ত্রি ) প্রত্যক্ষঃ। ইন্দ্রিয়জন্যজ্ঞানং। অধিকৃতঃ। আয়ব্যয়াদিনিরীক্ষকঃ। ইত্যমরঃ॥

অধ্যাপকঃ ( ত্রি ) অধ্যাপনকর্ত্তা। পাঠগুরুঃ। অধ্যাপয়িতা। তৎপর্য্যায়ঃ। উপাধ্যায়ঃ ২। ইত্যমরঃ॥

অধ্যাপনং ( ক্লী ) পাঠনং। বিদ্যাদানং। ব্রাহ্ম-ণানাংষট্‌কর্ম্মান্তর্গতকর্ম্মেদং। ইতি শব্দ-রত্নাবলী॥

অধ্যায়ঃ ( পুং ) বেদপুরাণাদিপরিচ্ছেদঃ। গ্রন্থ-সন্ধিঃ। তন্নামান্তরাণি যথা। সর্গঃ। বর্গঃ। পরিচ্ছেদঃ। উদ্ঘাতঃ। অঙ্কঃ। সংগ্রহঃ। উচ্ছ্বাসঃ। পরিবর্ত্তঃ। পটলঃ। কাণ্ডং। স্থানং। প্রকরণং। পর্ব্ব। আহ্নিকং। ইতি ত্রিকাণ্ডশেষঃ॥ স্কন্ধঃ। স্তবকঃ। উল্লাসঃ। পাদঃ। উদ্যোতঃ। বিরচনং। ইত্যাদ্যপি॥

অধ্যারূঢ়ঃ ( ত্রি ) সমারূঢ়ঃ। কৃতারোহণঃ। অভ্যধিকঃ। অতিশয়ঃ। ইতি মেদিনী॥

অধ্যারোপঃ (পুং) বস্তুন্যবস্ত্বারোপঃ। সচ্চিদা-নন্দানন্তাদ্বয়ব্রহ্মণি অজ্ঞানাদিসকলজড়-সমূহস্যারোপণমিত্যর্থঃ। অসর্পভূতরজ্জৌ সর্পারোপবৎ। ইতি বেদান্তসারঃ॥

অধ্যাবাহনিকং ( ক্লী ) স্ত্রীধনবিশেষঃ। যথা। যৎ পুনর্লভতে নারী নীয়মানাহি পৈতৃ-কাৎ। অধ্যাবাহনিকং নাম তৎ স্ত্রীধনমুদা-হৃতং॥ ইতি দায়ভাগে কাত্যায়নঃ

অধ্যাহরণং ( ক্লী ) অধ্যাহারঃ। তর্কণং। ঊহনং। ইতি শব্দরত্নাবলী॥

অধ্যাহারঃ ( পুং ) তর্কঃ। ঊহঃ। ইত্যমরঃ॥ অস্পষ্টার্থস্য শব্দান্তরেণ স্পষ্টীকরণং। আকাঙ্ক্ষাসমাপকপদানুসন্ধানং। বাক্য-সম্পূর্ণার্থপদযোজনং। যুক্তিপ্রাপ্তস্য পদা-ন্তরমুদাহৃত্য ব্যক্তীকরণং। ইতি তট্টীকা॥

অধ্যুষ্টঃ ( ত্রি ) সার্দ্ধত্রিসংখ্যা। ৩॥ সাড়ে তিন ইতি ভাষা। যথা। অবাপ্য স্বাং ভূমিং ভুজগ-নিভমধ্যুষ্টবলয়ং। ইতি আনন্দলহরী॥

অধ্যুষ্ট্রঃ ( পুং ) উষ্ট্রযুক্তরথঃ। উষ্ট্রবাহ্যপ্রেঙ্খা। ইতি হারাবলী॥

অধ্যূঢ়ঃ ( পুং ) মহেশ্বরঃ। ইতি মেদিনী॥

অধ্যূঢ়ঃ (ত্রি) অধিকবৃদ্ধিযুক্তঃ। সমৃদ্ধঃ। ইতিধরণী॥

অধ্যূঢ়া ( স্ত্রী ) প্রথমবিবাহিতা স্ত্রী কৃতসাপত্নিকা। কৃতানেকবিবাহস্য প্রথমোঢ়া স্ত্রী। ইত্যমরমেদিনীকরৌ॥

অধ্যেষণা ( স্ত্রী ) যাজ্ঞা। ইতি হেমচন্দ্রঃ॥ আরাধ্যস্যাদরপূর্ব্বকং কর্ম্মণি নিযুক্তকরণং। গুর্ব্বাদেঃ সৎকারপূর্ব্বকংক্বচিদর্থে নিয়োজনং। তৎপর্য্যায়ঃ। সনিঃ ২। ইত্যমরঃ॥ সনী ৩। ইতি তট্টীকা॥

অধ্বগঃ ( পুং ) পথিকঃ। ইত্যমরঃ॥ উষ্ট্রঃ। ইতি ত্রিকাণ্ডশেষঃ॥ সূর্য্যঃ। ইতি হেমচন্দ্রঃ॥ খেসরঃ। খচর ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥ [ত্রিকাণ্ডশেষঃ॥

অধ্বগভোগ্যঃ ( পুং ) আম্রাতকবৃক্ষঃ। ইতি

অধ্বগা ( স্ত্রী ) গঙ্গা। ইতি ত্রিকাণ্ডশেষঃ॥

অধ্বজা (স্ত্রী) স্বর্ণুলীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

অধ্বনীনঃ ( ত্রি ) পথিকঃ। ইত্যমরঃ॥

অধ্বন্যঃ ( ত্রি ) পথিকঃ। ইত্যমরঃ॥

অধ্বরঃ ( পুং ) যজ্ঞঃ। বসুভেদঃ। সাবধানঃ। ইতি মেদিনী॥

অধ্বরথঃ ( পুং ) পথরথঃ। অধ্বগমনোপযুক্তরথঃ। তৎপর্য্যায়ঃ। পরিঘাতিকঃ ২। ইতি হেমচন্দ্রঃ॥

অধ্বর্য্যুঃ ( পুং ) যজুর্বেদবেত্তা। ইত্যমরঃ॥

অধ্বশল্যঃ (পুং) অপামার্গঃ। ইতি রাজনির্ঘণ্টঃ॥

অধ্বা [ ন্ ] (পুং) পন্থাঃ। কালঃ। সংস্থানং। অবস্কন্দঃ। ইতি মেদিনী॥ শাস্ত্রং। স্কন্ধঃ। ইতি চ পাঠান্তরং॥ অধ্বগমনজন্যগুণঃ। মেদঃকফস্থূলতাসৌকুমার্য্যনাশিত্বং। ইতি রাজবল্লভঃ॥

অধ্বান্তশাত্রবঃ ( পুং ) শ্যোণাকবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥

অন ঘ লু প্রাণনে। জীবনে। ইতি কবিকল্পদ্রুমঃ॥ ঘ লু অনিতি লোকো জীবতি ইত্যর্থঃ। ইতি দুর্গাদাসঃ॥

অন য ঙ প্রাণনে। জীবনে। ইতি কবিকল্পদ্রুমঃ॥ য ঙ অন্যতে। ইতি দুর্গাদাসঃ॥

অনংশুমৎফলা (স্ত্রী) অংশুমৎফলা। কদলী। ইতি জটাধরঃ॥

অনঃ [ স্ ] ( ক্লী ) শকটং। ইত্যমরঃ॥ অন্নং। ইত্যুণাদিকোষঃ॥ জননী। জন্ম। জন্মী। ইতি কোষান্তরং॥

অনকঃ ( ত্রি ) অণকঃ। অধমঃ। ইত্যমরটীকায়াং ভরতঃ॥

অনগারঃ ( পুং ) ঋষিঃ। মুনিঃ। ইতি হেমচন্দ্রঃ॥ অগারশূন্যে বাচ্যলিঙ্গঃ॥

অনগ্নিঃ ( পুং ) শ্রৌতস্মার্ত্তকর্ম্মহীনঃ। ইতি মহাভারতে দানধর্ম্মঃ॥

অনঘঃ ( ত্রি ) অপাপঃ। নির্ম্মলঃ। মনোজ্ঞঃ। ইতি মেদিনী॥

অনঙ্গং (ক্লী) আকাশং। মনঃ। ইতি মেদিনী।

অনঙ্গঃ ( পুং ) কামদেবঃ। ইত্যমরঃ॥ অঙ্গরহিতে বাচ্যলিঙ্গঃ॥ [রত্নাবলী॥

অনঙ্গকং ( ক্লী ) চিত্তং। মনঃ। ইতি শব্দ-

অনঙ্গাসুহৃৎ [ দ্ ] ( পুং ) শিবঃ। ইতি হেমচন্দ্রঃ॥

অনচ্ছঃ (ত্রি) আবিলঃ। অনির্ম্মলঃ। ইত্যমরঃ॥

অনঞ্জনং ( ক্লী ) আকাশং। ইতিশব্দচন্দ্রিকা॥ অঞ্জনশূন্যে ত্রি॥ [ রাজনির্ঘণ্টঃ॥

অনডুজ্জিহ্বা ( স্ত্রী ) গোজিহ্বাবৃক্ষঃ। ইতি

অনডুহী ( স্ত্রী ) অনড্বাহী। গাই ইতি ভাষা। ইতি হেমচন্দ্রঃ ॥

অনড্বান্ [ ডুহ ] ( পুং ) বৃষঃ। এঁড়ে ইতি ভাষা। তৎপর্য্যায়ঃ। গৌঃ ২ ভদ্রঃ ৩ বলীবর্দ্দঃ ৪ দম্যঃ ৫ দান্তঃ ৬ স্থিরঃ ৭ বলী ৮ উক্ষা ৯ ককুদ্মান্ ১০ ঋষভঃ ১১ বৃষভঃ ১২ বৃষঃ ১৩ ধুর্য্যঃ ১৪ ধুরীয়ঃ ১৫ ধৌরেয়ঃ ১৬ শাক্করঃ ১৭ শিববাহনঃ ১৮ রোহিণীরমণঃ ১৯ বোঢ়া ২০ গোনাথঃ ২১ সৌরভেয়কঃ ২২ ইতি রাজনির্ঘণ্টঃ ॥ [ইতি হেমচন্দ্রঃ॥

অনড্বাহী (স্ত্রী) অনডুহী। স্ত্রীগবী। গাই ইতি ভাষা॥

অনদ্যঃ (পুং) গৌরসর্ষপঃ। ইতি রাজনির্ঘণ্টঃ ॥

অনধিগতঃ ( ত্রি ) অনবগতঃ। যথা। অরে বিদ্বন্মন্যা হ্যনধিগতবেদার্থবিভবাঃ। ইতি ভগবদ্বাক্যমিতি প্রামাণিকাঃ ॥

অনধ্যক্ষঃ ( ত্রি ) অপ্রত্যক্ষঃ। ইত্যমরটীকায়াং রমানাথঃ ॥ অধ্যক্ষভিন্নঃ ॥

অনন্তং (ক্লী) আকাশং। ইত্যমরঃ॥ অভ্রকং ইতি রাজনির্ঘণ্টঃ

অনন্তঃ (পুং) বিষ্ণুঃ। ইতি মেদিনী॥ বলদেবঃ। অনন্তজিন্নাম জিনঃ। ইতি হেমচন্দ্রঃ॥ শেষনাগঃ। ইত্যমরঃ॥ বাসুকিঃ। ইতি শব্দমালা॥ সিন্দুবারবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

অনন্তঃ ( ত্রি ) অন্তরহিতঃ। অনবধিঃ। অশেষঃ। অসীমঃ। ইত্যমরো মেদিনী চ ॥

অনন্তজিৎ ( পুং ) জিনানাং চতুর্বিংশত্যন্তর্গতচতুর্দ্দশজিনঃ। তৎপর্য্যায়ঃ। অনন্তঃ২। ইতি হেমচন্দ্রঃ ॥ [ চন্দ্রঃ ॥

অনন্ততীর্থকৃৎ ( পুং ) অনন্তজিৎ। ইতি হেম-

অনন্তরং ( ত্রি ) অনবকাশং। অন্তররহিতং। তৎপর্য্যায়ঃ। অব্যবহিতং ২ সংসক্তং ৩ অপটান্তরং ৪। ইতিহেমচন্দ্রঃ॥পশ্চাদর্থেক্লী॥

অনন্তবিজয়ঃ ( পুং ) যুধিষ্ঠিররাজস্য শঙ্খঃ। ইতি শ্রীভগবদ্গীতা ॥

অনন্তবীর্য্যঃ ( পুং ) ভাবিকল্পে জিনানাং চতুর্বিংশত্যন্তর্গতত্রয়োবিংশতীর্থকরজিনঃ। ইতি হেমচন্দ্রঃ ॥

অনন্তব্রতং ( ত্রি ) ভাদ্রশুক্লচতুর্দ্দশীকর্ত্তব্যমনন্তদেবস্য ব্রতং। তদ্বিধির্যথা। ভবিষ্যে। অনন্তব্রতমেতদ্ধি সর্ব্বপাপহরং শুভং। সর্ব্বকামপ্রদং নৃণাং স্ত্রীণাঞ্চৈব যুধিষ্ঠির॥ তথা শুক্লচতুর্দ্দশ্যাং মাসি ভাদ্রপদে ভবেৎ। তস্যানুষ্ঠানমাত্রেণ সর্ব্বপাপং প্রণশ্যতি॥*॥ ব্রতারম্ভপ্রতিষ্ঠয়োর্বর্জ্জ্যকালমাহ জ্যোতিষে। গুরোর্ভৃগোরস্তবাল্যে বার্দ্ধকে সিংহগে গুরৌ। বক্রিজীবাষ্টবিংশেহহ্নি গুর্ব্বাদিত্যে দশাহিকে॥ পূর্ব্বরাশাবনায়ত্যাতিচারিগুরুবৎসরে। প্রাগ্রাশিগন্তৃজীবস্য চাতিচারে ত্রিপক্ষকে ॥ কম্পাদ্যদ্ভুতসপ্তাহে নীচস্থেজ্যে মলিম্লুচে। ভানুলঙ্ঘিতকে মাসি ক্ষয়ে রাহুযুতে গুরৌ ॥ পৌষাদিকচতুর্ম্মাসে চরণাঙ্কিতবর্ষণে। একেনাহ্না চৈকদিনে দ্বিতীয়েন দিনত্রয়ে ॥ তৃতীয়েন তু সপ্তাহে মাঙ্গল্যানি শুভান্বিতাঃ। বিদ্যারম্ভকর্ণবেধৌ চূড়োপনয়নোদ্বহান্ ॥ তীর্থস্নানমনারব্ধং তথানাদিসুরেক্ষণং। পরীক্ষারামযজ্ঞাংশ্চ পুরশ্চরণদীক্ষণে ॥ ব্রতারম্ভপ্রতিষ্ঠে চ গৃহারম্ভপ্রবেশনে। প্রতিষ্ঠারম্ভণে দেবকূপাদের্ব্বর্জ্জয়ন্তি হি ॥ দ্বাত্রিংশদ্দিবসাশ্চান্তে জীবস্য ভার্গবস্য চ।

দ্বাসপ্ততির্ম্মহত্যস্তে পাদান্তে দ্বাদশক্রমাৎ ॥ অস্তাৎ প্রাক্‌পরয়োঃ পক্ষং গুরোর্ব্বার্দ্ধক-বালতে। পক্ষং বৃদ্ধো মহাস্তে তু ভৃগুর্ব্বালো দশাহিকঃ॥ পাদাস্তে তু দশাহানি বৃদ্ধো বালো দিনত্রয়ং ॥ * ॥ ন চ মধ্যাহ্নে ভোজ্য-বেলায়াং সমুত্তীর্য্য সরিত্তটে। দদর্শ শীলা সা স্ত্রীণাং সমূহং রক্তবাসসাং ॥ চতুর্দ্দশ্যা-মর্চ্চয়ন্তং ভক্ত্যা দেবং পৃথক্ পৃথক্। ইতি ভবিষ্যোত্তরীয়াম্মধ্যাহ্নব্যাপিনী তিথি-গ্রাহ্যেতিবাচ্যং । পূর্ব্বাহ্লে বৈ দেবানা-মিতি শ্রুত্যাদিভিঃ পূর্ব্বাহ্লে দৈবকৃত্যবিধা-নাৎ। বিধ্যসমভিব্যাহৃতার্থবাদেন তদ্বাধা-যোগাৎ কিন্তু তস্যৈব গৌণকালবোধকং তৎ। কালমাধবীয়োঽপ্যেবং । ভবিষ্যেঽপি পূজাবিধায়কো মধ্যাহ্নো নোক্তঃ। যথা। কৃত্বা দর্ভময়ানন্তং বারিধান্যাং নিবেশ্য চ। পূজয়েদ্গন্ধপুষ্পাদ্যৈর্নৈবেদ্যৈর্ব্বিবিধৈরপি॥ চতুর্দ্দশফলৈর্মূলৈর্জলজৈঃ কুসুমৈরপি। যব-গোধূমশালীনাং চূর্ণৈ নৈকতরস্য চ ॥ কৃত্বা পূপদ্বয়ং তস্মৈ দদ্যাদেকং ঘৃতান্বিতং। স্বয়মেকন্তু ভুঞ্জীত করে বদ্ধা সুডোরকং ॥ চতুর্দ্দশগ্রন্থিযুক্তং কুঙ্কুমেন বিলেপিতং। সুবিন্যস্তং বিষ্ণুনামপ্রতিগ্রন্থিসমন্বিতং। চতুর্দ্দশসূত্রময়ং সূত্রং কার্পাসমেব চ ॥ * ॥ পূজাডোরকবন্ধনমন্ত্রস্তু রত্নাকরে। অনন্ত-সংসারমহাসমুদ্রে মগ্নান্ সমভ্যুদ্ধর বাসু-দেব। অনন্তরূপিন্ বিনিযোজয়স্ব অনন্ত-রূপায় নমো নমস্তে॥ ইতি মন্ত্রমুক্ত্বা। অনেন ডোরকং বদ্ধা ভোক্তব্যং সুস্থমানসৈঃ। ইত্যর্দ্ধং ভবিষ্যোত্তরীয়ং কালকৌমুদ্যাং লিখিতমিতি ॥ * ॥ তথা। পাপোঽহং পাপকর্ম্মাহং পাপাত্মা পাপসম্ভবঃ। ত্রাহি মাং পুণ্ডরীকাক্ষ সর্ব্বপাপহরো ভব ॥ অদ্য মে সফলং জন্ম জীবিতঞ্চ সুজীবিতং। যত্তবাঙ্ঘ্রিযুগাব্জাগ্রে মূর্দ্ধা মে ভ্রমরায়তে ॥ ইত্যাভ্যাং নমস্কুর্য্যাৎ। অনন্তকথামপ্যত্র শৃণুন্তি। ইতি তিথ্যাদিতত্ত্বং ॥ * ॥ * ॥ অথ প্রয়োগঃ। আচম্য স্বস্তিবাচ্য সঙ্কল্পং কুর্য্যাৎ। অদ্য ভাদ্রে মাসি শুক্লে পক্ষে চতু-র্দ্দশ্যাং তিথাবারভ্য অমুকগোত্রঃ শ্রীঅমুকঃ ধনধান্যপুত্রপৌত্রাদ্যনবচ্ছিন্নসন্ততিপ্রাপ্তি-কামঃ শ্রীবিষ্ণুপ্রীতিকামো বা চতুর্দ্দশবর্ষ-পর্য্যন্তং ভগবদনন্তভট্টারকপূজাচতুর্দ্দশগ্রন্থি-যুক্তডোরকরমূলবন্ধনকথাশ্রবণব্রাহ্মণসং-প্রদানকাতপসিততণ্ডুলপ্রস্থদ্বয়ঘটিতপূপা-র্দ্ধোপকল্পনতদর্দ্ধাত্মকর্তৃকভোজনরূপমনন্ত-ব্রতমহং করিষ্যে ইতি সঙ্কল্প্য সূক্তং পঠেৎ ॥ * ॥ ততো গুণ্ডিকয়া অষ্টদলপদ্মং নির্ম্মায় তন্মধ্যে ঘটমারোপ্য শালগ্রামং বা চতুর্দ্দিক্ষু ধ্বজা নিবেশ্য যথোক্তবিধিনা গণেশনবগ্রহদিক্‌পালশিবদুর্গালক্ষ্মীনারা-য়ণপূজাং কৃত্বা শক্রং ধ্যায়েৎ। ওঁ মহেন্দ্রং মত্তৈরাবতস্কন্ধস্থং সহস্রনয়নোজ্জ্বলং। মণিকাঞ্চনঘটিতনানালঙ্কারভূষিতং বজ্র-হস্তং শচ্যন্বিতং দেবগন্ধর্ব্বগণৈর্ব্বৃতং মুনি-গণৈঃ স্তূয়মানং ॥ এবং ধ্যাত্বা মহেন্দ্রায় নমঃ এবং ক্রমেণ সংপূজ্য প্রণমেৎ। ওঁ শক্রঃ সুরপতিশ্চৈব বজ্রহস্তো মহাবলঃ। ঐরাবত-গজারূঢ়ঃ সহস্রাক্ষ নমোঽস্তু তে ॥ ততো বৃহৎপাত্রে জলং সংস্থাপ্য হস্তং দত্ত্বা

সমুদ্রমাবাহয়েৎ। ওঁ গঙ্গে চেত্যাদিনাবাহ্য সমুদ্রং পূজয়েৎ ॥ * ॥ ততো ভূতশুদ্ধ্যাদি-প্রাণায়ামান্তং কৃত্বা অনন্তং ধ্যায়েৎ ওঁ দিব্যসিংহাসনাসীনং দেবেশং গরুড়ধ্বজং। শুক্লবর্ণং চতুর্ব্বাহুং নাগযজ্ঞোপবীতিনং ॥ শঙ্খচক্রগদাপদ্মধরং পীতাম্বরং বিভুং। শ্রিয়া বাণ্যা চ সংশ্লিষ্টং কিরীটাদিসমু-জ্জ্বলং॥ ফণাশতসমাযুক্তং জগন্নাথং জগদ্-গুরুং। অনন্তং চিন্তয়েদ্দেবং নারদাদ্যৈ-রুপস্তুতং ॥ এবং ধ্যাত্বা স্বশিরসি পুষ্পং দত্ত্বা মানসোপচারৈঃ সংপূজ্য অর্ঘ্যং সংস্থাপ্য। আং হৃদয়ায় নমঃ এবং ষড়ঙ্গানি বিন্যস্য পুনর্ধ্যাত্বাবাহয়েৎ। ওঁ আগচ্ছানন্ত দেবেশ পত্নীভ্যাং বাহনান্বিত। গন্ধর্ব্বাদি-গণোপেত সান্নিধ্যমিহকল্পয় ॥ ততঃ পূজ-য়েৎ। পাদ্যং গৃহীত্বা। ওম্ পাদ্যং গৃহাণ দেবেশ সুরাসুরমনোহরং। তুষ্টো মে ভব দেবেশ নরসিংহ নমোঽস্তু তে ॥ অর্ঘ্যং গৃহীত্বা। অর্ঘ্যং গৃহাণ দেবেশ সুগন্ধিকুঙ্কু-মান্বিতং। দূর্ব্বাক্ষতসমাযুক্তং নমস্তে বিশ্ব-মূর্ত্তয়ে ॥ আচমনীয়ং গৃহীত্বা। ওমিদমাচ-মনীয়ন্তে দিব্যতোয়োদ্ভবং প্রভো। ভক্ত্যা দত্তং ময়ানন্ত নমস্তে পন্নগাধিপ ॥ এবং মধুপর্কং পুনরাচমনীয়ং স্নানীয়ং বস্ত্রযুগ্মঞ্চ দদ্যাৎ ॥ * ॥ গন্ধঃ। ওম্ গন্ধোঽয়ং দেব-দেবেশ কুঙ্কুমাগুরুসম্ভবঃ। যথাশক্ত্যা ময়া দত্তো দেবেশ প্রতিগৃহ্যতাং ॥ পুষ্পং। ওম্ পুষ্পং গৃহাণ ভোঽনন্ত সুগন্ধিদ্রব্যমুত্তমং। পদ্মনাভ নমস্তেঽস্তু কুশলং কুরু সর্ব্বদা ॥ ধূপঃ। ওম্ ধূপোঽয়ং তে মহাভাগ দশাঙ্গো-হগুরুণা সহ। ময়া দত্তঃ প্রভো বিষ্ণো গৃহ্যতাং সুরনায়ক ॥ দীপঃ। ওম্ দীপং গৃহাণ ভোঽনন্ত জাজ্জ্বল্যমানমদ্ভুতং। ত্বং গৃহাণ সদা দেব রক্ষ মাং ঘোরসাগরাৎ ॥ যজ্ঞোপবীতং। ওম্ ঋগ্‌যজুঃসামমন্ত্রেণ ত্রিবৃত্তং পদ্মযোনিনা। সাবিত্রীগ্রন্থিসংযুক্তং উপবীতং তবানঘ ॥ নৈবেদ্যং। ওম্ নানা-ভক্ষ্যসমাযুক্তং চতুর্দ্দশফলৈর্যুতং। ভক্ত্যা সম্পাদিতং দেব সপূপং গৃহ্যতাং বিভো ॥*॥ ততো বলভদ্রং সংপূজ্য স্তুতিং কুর্য্যাৎ। ওম্ বলভদ্রং মহাত্মানং হলিনং লাঙ্গ-লায়ুধং। কাদম্বরীমদোন্মত্তং নমামি বল-দেবকং॥ তত আবরণদেবতাঃ পূজয়েৎ। ওম্ গণেশায় নমঃ। এবং লোকপালেভ্যঃ। নব-গ্রহেভ্যঃ। অষ্টবসুভ্যঃ। একাদশরুদ্রেভ্যঃ। দ্বাদশাদিত্যেভ্যঃ। অনন্তাদিনাগেভ্যঃ। মৎ-স্যাদিদশাবতারেভ্যঃ। মাসেভ্যঃ। ঋতুভ্যঃ। বৎসরেভ্যঃ। ধর্ম্মায়। অধর্ম্মায়। জ্ঞানায়। অজ্ঞানায়। বৈরাগ্যায়। অবৈরাগ্যায়। ঐশ্বর্য্যায়। অনৈশ্বর্য্যায়। শিবায়। দুর্গায়ৈ। পৃথিব্যৈ। গঙ্গায়ৈ। যমুনায়ৈ। মহালক্ষ্ম্যৈ। সরস্বত্যৈ। গরুড়ায়। শঙ্খায়। চক্রায়। গদায়ৈ। পদ্মায়। কৌস্তুভায়। সূর্য্যমণ্ড-লায়। সোমমণ্ডলায়। বহ্নিমণ্ডলায়। বায়ু-মণ্ডলায়। সর্ব্বেভ্যো দেবেভ্যঃ। সর্ব্বাভ্যো দেবীভ্যঃ ॥ * ॥ ততঃ স্তুতিং পঠেৎ। ওম্ অনন্ত সংসারমহাসমুদ্রে মগ্নং সমভ্যুদ্ধর বাসুদেব। অনন্তরূপিন্ বিনিযোজয়স্ব অনন্তরূপায় নমো নমস্তে॥ নমোঽস্ত্বনন্তায় সহস্রমূর্ত্তয়ে সহস্রপাদাক্ষিশিরোরুবাহবে।

সহস্রনাম্নে পুরুষায় শাশ্বতে সহস্রকোটী-যুগধারিণে নমঃ ॥ হৃদিস্থং সর্ব্বদেবানাং ইন্দ্রিয়াণাং গুণাতিগং। পর্ব্বপাপহরং দেবং প্রণমামি জনার্দ্দনং ॥ অনন্তরূপেণ বিভর্ষি পৃথ্বীং অনন্তলক্ষ্মীং বিদধাসি তুষ্টঃ। অনন্তভোগান্ প্রদদাসি তুষ্টঃ অনন্তমোক্ষং পুরুষে প্রহৃষ্টঃ ॥ প্রণমামি হৃষীকেশং বাসুদেবং জগদ্‌গুরুং। সৃষ্টিস্থিতিবিনাশানাং কর্ত্তারং প্রণমাম্যহং ॥ রাক্ষসানামরিং নৌমি নৌমি দৈত্যবিমর্দ্দকং। জগতাং হিতকর্ত্তারং নৌমি পঙ্কেরুহেক্ষণং ॥ জন্মজন্মকৃতং যচ্চ বাল্যযৌবনবার্দ্ধকে। বৃদ্ধিমাপ্নোতু তৎ পুণ্যং পাপং হর হলায়ুধ ॥ ভক্তিহীনং ক্রিয়াহীনং মন্ত্রহীনং যদর্চ্চিতং। যথোদ্দিষ্টামিমাং পূজাং পরিপূর্ণাং কুরুষ্ব মে ॥ পাপোঽহং পাপকর্ম্মাহং পাপাত্মা পাপসম্ভবঃ। ত্রাহি মাং পুণ্ডরীকাক্ষ হরে সংসারসাগরাৎ ॥ * ॥ ততো ঘটস্থজলেন সংপ্রোক্ষ্য করমূলে ডোরকং সমর্পয়েৎ। ওঁ ইদং ডোরমনন্তাখ্যং চতুর্দ্দশগুণাত্মকং। সর্ব্বদেবময়ং বিষ্ণো স্বকরে ধারয়াম্যহং ॥ ততো ভোজ্যমুৎসৃজেৎ ॥ * ॥ ততঃ কথাং শৃণুয়াৎ। যথা। অরণ্যবাসমুষিতো যুধিষ্ঠিরনৃপো বশী। প্রাপ্তস্ত্রৈলোক্যনাথেন কৃষ্ণেন পরমাত্মনা ॥ কথোপকথনং জাতং তয়োস্তত্র প্রিয়াপ্রিয়ং। বিশেষেণ চ গোবিন্দং পপ্রচ্ছ চ যুধিষ্ঠিরঃ ॥ * ॥ যুধিষ্ঠির উবাচ। কেন ব্রতেন দেবেশ বাঞ্ছিতং প্রাপ্যতে ফলং। নিষ্পাপাঃ সকলা লোকাঃ ভবন্তি জন্মনি ॥ * ॥ শ্রীকৃষ্ণ উবাচ। অস্তি ব্রতমনন্তাখ্যং যৎ কৃতং সুরসদ্মনি। ইন্দ্রাদ্যৈর্লোকপালৈশ্চ তস্মে কথয়তঃ শৃণু ॥ শুক্লপক্ষে চতুর্দ্দশ্যাং মাসি ভাদ্রপদে তথা। তস্যানুষ্ঠানমাত্রেণ সর্ব্বপাপং প্রণশ্যতি॥*॥ যুধিষ্ঠির উবাচ। কৃষ্ণ কোঽয়ং ত্বয়াখ্যাতো যোঽনন্ত ইতি সংজ্ঞিতঃ। কোঽয়ং শেষশ্চ নাগশ্চ অনন্তস্তক্ষকঃ স্মৃতঃ ॥ পরমাত্মোত্তমং বাপি উতাহো ব্রহ্ম উচ্যতে। ক এষোঽনন্তসংজ্ঞো বৈ তস্মে ব্রূহি জনার্দ্দন ॥*॥ শ্রীকৃষ্ণ উবাচ। অনন্ত ইত্যহং পার্থ মম রূপং নিবোধ তৎ। আদিত্যগতিরূপেণ যঃ কাল উপপদ্যতে ॥ কলাকাষ্ঠামুহূর্ত্তাদিদিনরাত্রিব্যবস্থয়া। পক্ষো মাস ঋতুর্ব্বর্ষো যুগকল্পব্যবস্থয়া ॥ সোঽহং কালোঽবতীর্ণোঽস্মি ভুবো ভারাবতারণাৎ। দানবানাং বিনাশায় বসুদেবতনূদ্ভবং ॥ অনন্তং বিদ্ধি মাং পার্থ কৃষ্ণং বিষ্ণুং হরিং শিবং। ব্রহ্মাণং ভাস্করং শেষং সর্ব্বব্যাপিনমীশ্বরং ॥ প্রত্যয়ার্থং ময়া পার্থ বিশ্বরূপং নিবোধ তৎ। পূর্ব্বমেব মহাবাহো যোগিধ্যেয়মনূপমং ॥ * ॥ যুধিষ্ঠির উবাচ। অনন্তব্রতমাহাত্ম্যং বিধিং বিধিবিদাম্বর। কিং পুণ্যং কিং ফলং তস্য অনুষ্ঠানঞ্চ তস্য কিং ॥ কেন বা তৎ কৃতং পূর্ব্বং লোকে কেন প্রকাশিতং। তৎ সর্ব্বং বহু বিস্তার্য্য ব্রূহি নারায়ণ প্রভো ॥ * ॥ শ্রীকৃষ্ণ উবাচ। আসীৎ পুরা কৃতযুগে সুমন্তুর্নাম বৈ দ্বিজঃ। বশিষ্ঠগোত্রজো বিদ্বান্ শীলবান্ বিজিতেন্দ্রিয়ঃ ॥ পত্নী তস্যাভবদ্দীক্ষা সতী সত্য-

ব্রতে স্থিতা। চরিত্রশীলসম্পন্না সুরূপা ভৃগুবংশজা ॥ তস্যাঃ কালেন সংজাতা দুহিতা সর্ব্বলক্ষণা। শীলা নাম্না সুশীলা সা বর্দ্ধতে পিতৃবেশ্মনি ॥ মাতা তস্যাস্তু কালেন জ্বরদাহপ্রপীড়িতা। সমাগত্য নদীতোয়ে মৃতা স্বর্গপুরং যযৌ ॥ কৃতং সুমন্তুনা তস্যাঃ কর্ম্ম যৎ পারলৌকিকং। ততঃ সুমন্তুঃ সংত্যজ্য দুঃখং শোকং ক্রমাৎ পুনঃ ॥ নাপত্নীকো গৃহী ধর্ম্মং কর্ত্তুমর্হতি বৈ কচিৎ। ইতি সঞ্চিন্ত্য মনসা বিবাহোৎসুকমানসঃ ॥ দেবলস্য মুনেঃ কন্যাং কর্কশাং পরিণীতবান্। সা কর্কশাতিদুঃশীলা সদা নিষ্ঠুরভাষিণী ॥ কোপনা প্রতিকূলা চ নির্লজ্জা কলহপ্রিয়া। অদক্ষা গৃহকৃত্যেষু দক্ষা ভোজনকর্ম্মণি ॥ কলহেন তু সন্তুষ্টা রুষ্টা বন্ধুজনান্ প্রতি। সা তু শীলা পিতুর্গেহে বর্দ্ধিতা চ দিনে দিনে ॥ করোতি সখিভিঃ সার্দ্ধং শিশুক্রীড়ামনুত্তমাং। গৃহান্তরস্থলদ্বারদেহলীতোরণাদিষু ॥ চতুরঙ্গকবর্ণৈশ্চ রক্তপীতসিতাসিতৈঃ। স্বস্তিকং পদ্মশঙ্খৌ চ মণ্ডয়ন্তী পুনঃ পুনঃ ॥ কুর্ব্বন্তী প্রত্যহং বালা দেবতাতিথিপূজনং। গৃহকৃত্যে সদা দক্ষা পিতুরত্যন্তবল্লভা ॥ কালেন কিয়তা বিপ্রস্তাং দৃষ্ট্বা যৌবনোদ্গতাং। কস্মৈ দেয়া ময়া কন্যা ইতি চিন্তান্বিতোঽভবৎ ॥ ততো দৈববশাত্তত্র কৌণ্ডিন্যঃ সমুপাগতঃ। মুনিশ্রেষ্ঠো মহাভাগঃ কুলীনো ধর্ম্মতৎপরঃ ॥ মনসা চিন্তয়ামাস সুমন্তুঃ সুতপাঃ সুধীঃ। অস্মৈ ভাগ্যবশাচ্ছীলা প্রতিপাদ্যা প্রযত্নতঃ ॥ ইতি কৃত্বা মতিং বিপ্রো দদৌ কন্যাং শুভে দিনে। কন্যামলঙ্কৃতাং সাধ্বীং শীলাং চন্দ্রনিভাননাং ॥ গৃহ্যোক্তবেদবিধিনা বিবাহমকরোত্তদা। ততো হোমাদিকং কর্ম্ম সমাপ্য সময়ে মুনিঃ ॥ সুমন্তুঃ কর্কশাং প্রাহ জামাত্রে দেহি দক্ষিণাং। সফলং কুরু মে দানং প্রিয়ে মুনিকুলোদ্ভবে ॥ দক্ষিণারহিতং কর্ম্ম নিষ্ফলং জায়তে যতঃ। সা তু তদ্বচনং শ্রুত্বা কর্কশা কুপিতাভবৎ ॥ সুমন্তুং ভর্ৎসয়ামাস কর্কশৈর্ব্বচনৈঃ পতিং। অলঙ্কারং সমানীয় স্বকীয়ঞ্চাপি বন্ধনং ॥ নিঃক্ষিপ্য নিভৃতে স্থানে কর্কশান্যগৃহং যযৌ। সুমন্তুশ্চাতিদীনাত্মা লজ্জিতশ্চাভবত্তদা ॥ যৎকিঞ্চিদর্থযোগ্যঞ্চ দ্রব্যমানীয় যৌতুকং। জামাত্রে প্রদদৌ বিপ্রঃ পরিচার্য্য পুনঃ পুনঃ ॥ ততো বিবাহং নির্ব্বর্ত্ত্য কৌণ্ডিন্যোঽপি নিজাশ্রমং। গোযানে তাং সমারোপ্য শীলামাদায় বৈ যযৌ ॥ ততঃ সা পথি গচ্ছন্তী শীলা চন্দ্রনিভাননা। মধ্যাহ্নে ভোজ্যবেলায়াং সমুত্তীর্য্য সরিত্তটে ॥ দদর্শ শীলা নারীণাং সমূহং ব্রতচারিণাং। পুংসাং বৃন্দঞ্চ তত্রৈব রক্তপীতাম্বরাসনং ॥ চতুর্দ্দশ্যামর্চ্চয়ন্তং ভক্ত্যানন্তং পৃথক্ পৃথক্। দৃষ্ট্বা সমূহং নারীণাং সতী পপ্রচ্ছ সাদরং ॥ বিনয়াবনতা সাধ্বী প্রণিপত্য সুরেশ্বরং। কিমিদং ক্রিয়তে কার্য্যং ভবতীভিস্তদুচ্যতাং ॥ * ॥ স্ত্রিয় ঊচুঃ। ভাদ্রে মাসি সিতে পক্ষে উত্থিতে বাসবধ্বজে। আরাধিতে মহেন্দ্রে চ ধ্বজাকারাসু যষ্টিষু ॥ নদ্যাং সরসি যঃ স্নাত্বা অনন্তার্চ্চনমারভেৎ। কৃত্বা

দর্ভময়ং দেবং বারিবাজসমন্বিতং ॥ অনন্তং দেবদেবেশং চতুর্ব্বাহুং কিরীটিনং । অতসীপুষ্পসংকাশং কাঞ্চনাঙ্গদভূষণং ॥ শঙ্খচক্রগদাশার্ঙ্গং বিবিধায়ুধধারিণং । এহ্যেহি ভগবন্ কৃষ্ণ তব যজ্ঞঃ প্রবর্ত্ততে ॥ বারিধান্যাং তথানন্তং ভগবন্তং নিযোজয়েৎ । মণ্ডলে পুষ্পনৈবেদ্যং ধূপবস্ত্রানুলেপনং ॥ দত্ত্বা চ পূজয়েদ্ভক্ত্যা অনন্তং বিশ্বরূপিণং । পিষ্টকার্থং ব্রীহিচূর্ণং যবগোধূময়োশ্চ বা ॥ এতেষাং প্রাপ্যতে যত্তু তদ্‌গ্রাহ্যং প্রস্থসংস্থিতং । অৰ্দ্ধং বিপ্রায় দাতব্যং অর্দ্ধমাত্মনি যোজয়েৎ ॥ পূজয়িত্বা তথা দেবং গন্ধপুষ্পৈর্যথাক্রমং । শ্রুত্বা কথাং ততস্তস্য কুঙ্কুমাক্তং সুডোরকং ॥ চতুর্দ্দশগ্রন্থিযুক্তং নারী বামকরে ন্যসেৎ । পুমাংস্তু দক্ষিণে বাহৌ তদানন্তং প্রপূজয়েৎ ॥ নির্ব্বর্ত্ত্য পূজাং দেবস্য পূপং ভুক্ত্বা যথাসুখং । বিসৃজ্য দক্ষিণাং দত্ত্বা প্রণম্য চ যথাসুখং ॥ শীলা শ্রুত্বা বচস্তাসাং যথা তাভিরুদাহৃতং । ব্রতং চকার সা বাহৌ বদ্ধ্বা ডোরকমুত্তমং ॥ পূপপ্রস্থঞ্চ সা কৃত্বা ভুক্ত্বা চৈব তথৈব চ । পুনর্জগাম তেনৈব গোরথেন সমন্বিতা ॥ তেনানন্তপ্রসাদেন গৃহং গোধনসঙ্কুলং । তদাশ্রমং শ্রিয়া যুক্তং ধনধান্যসমন্বিতং ॥ বিবিধাতিথিসম্পূর্ণং নানারত্নৈর্বিভূষিতং । বরাশ্বমত্তমাতঙ্গমহিষৈর্গোধনান্বিতং ॥ শীলা চ মণিকাঞ্চীভির্মুক্তাভরণভূষিতা । দিব্যাঙ্গী শীলসম্পন্না সাবিত্রীপ্রতিমা যথা ॥ কদাচিদুপবিষ্টা সা বহ্নিকুণ্ডং সমাগতা ।

কৌণ্ডিন্যোঽপি বিশেদ্রোষাৎ দৃষ্ট্বা ডোরমনন্তকং । শীলায়াঃ করমূলে চ বদ্ধমেব প্রযত্নতঃ । পপ্রচ্ছ ক্রোধবচসা ভ্রুকুটীকুটিলং মুখং ॥ কিমিদং ডোরকং হস্তে বদ্ধা ভার্য্যেঽত্র তিষ্ঠসি । প্রমেয়ঃ কস্য দেবস্য দুর্ব্বুদ্ধে ব্রূহি সত্বরং ॥ * ॥ শীলোবাচ । অনন্তং দেবদেবস্য প্রমেয়ং ডোরকং শুভং । করে বদ্ধং বিধানেন শৃণু মে বচনং প্রভো ॥ প্রসাদাদ্‌যস্য দেবস্য ভুঙ্‌ক্তে সুবিপুলং ধনং । ন জানাসি কথং নাথ তদেবং জগদীশ্বরং ॥ শীলাবাক্যং ততঃ শ্রুত্বা কৌণ্ডিন্যঃ কুপিতোঽভবৎ । কোঽসাবনন্তসংজ্ঞো বৈ ন শ্রুতোঽপি বরাননে ॥ ইত্যুক্ত্বাকৃষ্য কুপিতো ভুজাড্ডোরমনন্তকং । ক্ষিপ্তং জ্বালাকুলে বহ্নৌ নির্ভৎর্স্য বহুধা প্রিয়াং ॥ ততঃ সা সংভ্রমাৎ শীলা হাহা কৃত্বা প্রধাবিতা । বহ্নেঃ সূত্রং সমাদায় ক্ষীরমধ্যে ততোঽক্ষিপৎ ॥ ততস্তয়া করে বামে পুনর্ব্বদ্ধং সুডোরকং । অনন্তাক্ষেপদোষেণ দারিদ্রং পতিতং গৃহে ॥ ন কৈশ্চিৎ বর্ণ্যতে শোকৈঃ সোঽপি বিপ্রো যুধিষ্ঠির । গাত্রে মলিনতা প্রাপ্তা চক্ষুর্নিদ্রাং তথৈব চ ॥ শূন্যানি গৃহরূপাণি দগ্ধানি বহ্নিনা কচিৎ । নিরীক্ষ্য স্বপুরং বিপ্রশ্চিন্তয়ামাস চেতসা ॥ অথ শীলা বিবর্ণা সা দুঃখিতা পতিদোষতঃ । বিচচার পুরীং সর্ব্বাং শূন্যাগারসমন্বিতাং ॥ অথ কৌণ্ডিন্যবিপ্রস্য সংজাতা বুদ্ধিরুত্তমা । মমাপি দুষ্কৃতং কর্ম্ম কৃতং বা মে বিগর্হিতং ॥ অনন্তাক্ষেপদোষেণ মমাপি গতিরীদৃশী । অনন্তং যত্র পশ্যামি তত্র

যাস্যামি দুর্ম্মতিঃ॥ ততো জগাম কৌণ্ডিন্যো বনং ব্যাঘ্রাদিসংকুলং। ব্রতস্যান্বেষণং কর্ত্তুং পাদৌ দ্রষ্টুং তথা হরেঃ॥ বিহ্বলঃ স যযৌ মার্গে জনজন্তুবিবর্জ্জিতে। তত্রাপশ্যচ্চ তং বৃক্ষং ফলপুষ্পসমন্বিতং॥ বর্জ্জিতং পক্ষিসংঘাতৈঃ কীটৈশ্চৈব বিশেষতঃ। তমপৃচ্ছৎ ত্বয়ানন্তঃ কচিদ্দৃষ্টো মহাদ্রুম॥ স চোবাচ মহাবৃক্ষো নানন্তং বেদ্মি ভো দ্বিজ। ততো গচ্ছন্ দদর্শাগ্রে তৃণমধ্যে সবৎসিকাং॥ তৃণমধ্যে প্রধাবন্তী ন খাদতি ন জিঘ্রতি। হে মহাধেনুকে ব্রুহি কিমনন্তস্ত্বয়েক্ষিতঃ॥ সবৎসা তমুবাচাথ নানন্তং বেদ্মি হে দ্বিজ। ততো গচ্ছন্ দদর্শাগ্রে বৃষশ্রেষ্ঠং বনে স্থিতং॥ তমপৃচ্ছদয়ং বিপ্রঃ অনন্তো বীক্ষিতস্ত্বয়া। বৃষভস্তমুবাচেদং বিষণ্ণং ব্রাহ্মণং প্রতি॥ যদ্যনন্তমহং জানে তদা মে গতিরীদৃশী। ততো ব্রজন্ দদর্শাগ্রে গর্দ্দভং কুঞ্জরং তথা॥ নানামায়াপ্রচরন্তং মদগর্জ্জনদর্পিতং। স তং দৃষ্ট্বা দ্বিজোঽপৃচ্ছদনন্তং দৃষ্টবান্ কিমু॥ প্রত্যুত্তরমুবাচেদং নানন্তং বেদ্মি হে দ্বিজ। ততো ব্রজন্ দদর্শাগ্রে রম্যং পুষ্করিণীদ্বয়ং॥ অন্যোন্যজলসংঘাতৈর্ব্বীচিভিরুপশোভিতং। শুভৈঃ কুমুদকহ্লারৈঃ কমলোৎপলশোভিতং॥ ভ্রমরৈশ্চক্রবাকৈশ্চ হংসকারণ্ডবৈর্যুতং। তমপৃচ্ছৎ দ্বিজোঽনন্তো ভবতীভ্যাঞ্চ লক্ষিতঃ॥ পুষ্করিণ্যাবূচতুস্তং ন জানীবো হরিং কচিৎ। নিপপাত ততো বিপ্রো হাহা কৃত্বা রুদন্ ভুবি॥ কিঙ্করোমি ক গচ্ছামি কথং পশ্যামি তং বিভুং॥ * ॥

ততঃ কৃপালুহৃদয়ো দেবেশো দেবপূজিতঃ॥ তৎক্ষণাদ্ভগবান্ বিষ্ণুর্দ্বিজপ্রত্যক্ষমাগতঃ। বৃদ্ধব্রাহ্মণরূপেণ প্রোবাচ বচনং দ্বিজং॥ উত্তিষ্ঠোত্তিষ্ঠ বিপ্রেন্দ্র ত্যজ দুঃখং সুখী ভব। অনন্তং দর্শয়িষ্যামি কৃষ্ণং বিষ্ণুং হরিং শিবং॥ ব্রাহ্মণং তং সমাদায় পাতালবর্ত্মনা পুরীং। তাং পুরীং দর্শয়ামাস ততশ্চান্তর্দ্দধে দ্বিজঃ॥ স তাং দদর্শ কৌণ্ডিন্যঃ পুরীং ত্রৈলোক্যদুর্ল্লভাং। দিব্যনারীনরৈর্যুক্তাং মণিরত্নবিভূষিতাং॥ সুবর্ণরচিতাং সর্ব্বাং বেষ্টিতাং তক্ষকাদিভিঃ। তত্রাপশ্যৎ স কৌণ্ডিন্যো দেবদেবমনন্তকং॥ বিশ্বরূপং জগন্নাথং চতুর্ব্বাহুং কিরীটিনং। শঙ্খচক্রগদাপদ্মধারিণং গরুড়ধ্বজং॥ দক্ষিণে বিলসল্লক্ষ্মীং বামে ক্রীড়ৎসরস্বতীং। সপ্তফণাসমাযুক্তং দিব্যসিংহাসনে স্থিতং॥ এবংরূপং জগন্নাথং দৃষ্ট্বা ভক্ত্যা স্তুতিঃ কৃতা॥ জগাম ভূমৌ শিরসা অনন্তস্য সমীপতঃ॥ নমোঽস্ত্বনন্তায় সহস্রমূর্ত্তয়ে সহস্রপাদাক্ষিশিরোরুবাহবে। সহস্রনাম্নে পুরুষায় শাশ্বতে সহস্রকোটীযুগধারিণে নমঃ॥ অজ্ঞানেন ময়া দেব যৎ কৃতং পাপকর্ম্মণা। তৎ সর্ব্বং কৃপয়াশংস ক্ষমস্ব মধুসূদন॥ * ॥ অথ কৌণ্ডিন্যবিপ্রস্য স্তুতিং শ্রুত্বা জনার্দ্দনঃ। প্রসন্নো ভগবান্দেবশ্চানন্তোঽনন্তরূপধৃক্॥ কথং মে প্রিয়মাখ্যাতমিহাগচ্ছেতি ভূসুর॥ * ॥ অনন্ত উবাচ। তুষ্টোঽহং ব্রাহ্মণশ্রেষ্ঠ ভক্ত্যা তব বিশেষতঃ। বরং গৃহাণ বিপ্রেন্দ্র তুষ্টোঽস্মি

ত্যজ বিস্ময়ং ॥ * ॥ কৌণ্ডিন্য উবাচ। স্বকর্ম্মফলভোগেন যাং যাং যোনিং ব্রজাম্যহং। তস্যাং তস্যাং হৃষীকেশ হরিভক্তির্দ্দৃঢ়াস্তু মে॥ অতিপ্রমাদান্মোহাদ্বা যন্ময়া দুষ্কৃতং কৃতং। তদাগঃ ক্ষম্যতাং নাথ প্রণমামি পুনঃ পুনঃ॥ শ্রুত্বানন্তস্তু তদ্বাক্যং দদৌ তস্মৈ বরত্রয়ং। দারিদ্রনাশনং ধর্ম্মং বিষ্ণুলোকং তথাক্ষয়ং॥ *॥ কৌণ্ডিন্য উবাচ। পূর্ণো মনোরথো দেব মম চাদ্য বিশেষতঃ। কিঞ্চিৎ পৃচ্ছামি দেবেশ তন্মে ব্রূহি জগৎপতে॥ কশ্চূতঃ কো বৃষঃ কা গৌঃ কিন্তৎ পুষ্করিণীদ্বয়ং। কঃ খরঃ কুঞ্জরঃ কো বা কো বা বৃদ্ধদ্বিজোত্তমঃ॥ কৃপয়া কথয়স্বাদ্য পথি দৃষ্টৌ ময়া বিভো। শ্রীঅনন্ত উবাচ। যশ্চাত্রবৃক্ষো দৃষ্টো হি বিপ্রো বিদ্যাসু গর্ব্বিতঃ। উপস্থিতায় শিষ্যায় বিদ্যাং যস্মান্ন দত্তবান্॥ তেন কর্ম্মবিপাকেন বৃক্ষত্বং প্রাপ্য তিষ্ঠতি। বৃষভো যত্ত্বয়া দৃষ্টো লোভকর্ম্মকৃতঃ পুরা॥ দত্তং পর্য্যুষিতং দ্রব্যং স্বাদু ভুক্তং স্বয়ং যতঃ। বৃষভত্বং সমাসাদ্য ততস্তিষ্ঠতি নির্জ্জনে॥ বিপ্রায় বসুধাং দত্ত্বা নিষ্ফলাং শস্যবর্জ্জিতাং। তেনাসৌ গোত্বমাসাদ্য তৃণমধ্যে প্রধাবতি॥ ধর্ম্মাধর্ম্মৌ বিজানীয়াদযত্তৎ পুষ্করিণীদ্বয়ং। গর্দ্দভোঽজ্ঞানসম্পন্নঃ কুঞ্জরো মদগর্ব্বিতঃ॥ ব্রাহ্মণোঽসাবনন্তোঽহং যত্ত্বয়া দর্শিতো মুনে। এতত্তে কথিতং সর্ব্বং গচ্ছ বিপ্র নিজাশ্রমং॥ পুনঃ সমৃদ্ধিস্তে বিপ্র ভবিষ্যতি ন সংশয়ঃ। ভুক্ত্বা ভোগাংশ্চ বিপুলান্ সংপ্রাপ্স্যসি মহৎ পদং॥ ইতি দত্ত্বা বরং তস্মৈ তত্রৈবান্তরধীয়ত। কৌণ্ডিন্যোঽপি গৃহং গত্বা করোতি ব্রতমুত্তমং॥ অনন্তাখ্যং মহাপুণ্যং বর্ষাণাঞ্চ চতুর্দ্দশং। শীলয়া সহ ধর্ম্মাত্মা সুখং ভুক্ত্বা মনোরথান্॥ বিষ্ণুলোকং সমাসাদ্য ররাজ শীলয়া সহ। অনন্তাখ্যব্রতেনেহ সমাপ্তেনৈব পার্থিব॥ সর্ব্বপাপবিনির্ম্মুক্তা যাস্যন্তি পরমাং গতিং। এবমেবং হি নিয়মাৎ স্ত্রিয়োঽনন্তব্রতান্নৃপ॥ পুত্রপৌত্রধনৈর্যুক্তা ভুক্ত্বা ভোগান্ মনোরথান্। বিষ্ণুলোকমাপ্নুবন্তি যাবচ্চন্দ্রদিবাকরৌ॥ ইতি ভবিষ্যপুরাণে অনন্তব্রতং সমাপ্তং॥

অনন্তশীর্ষা (স্ত্রী) বাসুকিপত্নী। ইতি শব্দমালা॥

অনন্তা (স্ত্রী) পার্ব্বতী। পৃথিবী। অগ্নিশিখাবৃক্ষঃ। শ্যামালতা। দূর্ব্বা। পিপ্পলী। দুরালভা। হরীতকী। আমলকী। গুড়ূচী। ইতি মেদিনী॥ যবাসঃ। শ্বেতদূর্ব্বা। নীলদূর্ব্বা। অগ্নিমন্থবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥ অনন্তমূলং। তৎপর্য্যায়ঃ। গোপবল্লী ২ করালা ৩ সুগন্ধা ৪ ভদ্রবল্লিকা ৫ ভদ্রা ৬ নাগজিহ্বা ৭। ইতি রত্নমালা॥ গোপী ৮ শ্যামা ৯ শারিবা ১০ উৎপলশারিবা ১১। ইত্যমরঃ॥ গোপ্যাদিপঞ্চশ্যামলতায়াং নাগজিহ্বায়ামিতি কেচিৎ। গোপ্যাদিত্রয়ং শ্যামলতায়াং অনন্তোৎপলশারিবেতি দ্বয়ং অনন্তমূলে ইতি কেচিৎ। ইতি তট্টীকায়াং ভরতঃ॥ তস্যা গুণাঃ। মলবন্ধকারিত্বং। রক্তপিত্তনাশিত্বং। শীতলত্বঞ্চ। ইতি রাজবল্লভঃ॥

অনন্যগতিকঃ (ত্রি) গত্যন্তররহিতঃ। একাশ্রয়ঃ। যথা। অনন্যগতিকে জনে বিগতপাতকে চাতকে যথারুচি তথা কুরু প্রিয় তথাপি নান্যং ভজে। ইত্যুদ্ভটঃ॥

অনন্যজঃ (পুং) কামদেবঃ। ইত্যমরঃ॥

অনন্যবৃত্তিঃ (ত্রি) একমাত্রবৃত্তিঃ। তৎপর্য্যায়ঃ। একতানঃ২ একাগ্রঃ৩ একায়নঃ৪ একসর্গঃ ৫ একাগ্র্যঃ ৬ একায়নগতঃ ৭। ইত্যমরঃ॥

অনপায়ী [ন্] (ত্রি) নিশ্চলঃ। অপায়শূন্যঃ। অনশ্বরঃ। যথা। অনপায়িভিরস্মাভির্গুপ্তাঃ য়াশ্চ গৃহে প্রভো। ইতি শ্রীভাগবতং॥

অনভিজ্ঞঃ (ত্রি) মূর্খঃ। প্রজ্ঞারহিতঃ। বুদ্ধিহীনঃ। যথা। ধিক্ ত্বাং চূততরো পরাপরপরিজ্ঞানানভিজ্ঞো ভবান্। ইতি প্রাচীনাঃ॥

অনভিলাষঃ (পুং) অরুচিঃ। ইতি রাজনির্ঘণ্টঃ॥ অনিচ্ছা॥

অনমঃ (পুং) ব্রাহ্মণঃ। ইতি ত্রিকাণ্ডশেষঃ॥

অনমিতম্পচঃ (ত্রি) মিতম্পচঃ। কৃপণঃ। ইত্যমরটীকায়াং রমানাথঃ॥

অনম্বরঃ (পুং) বৌদ্ধবিশেষঃ। ইতি সিদ্ধান্তশিরোমণৌ গোলাধ্যায়ঃ॥

অনয়ঃ (পুং) দৈবং। অশুভং। ব্যসনং। বিপদ্। ইতি মেদিনী॥

অনর্গলং (ত্রি) নিরর্গলং। প্রতিবন্ধকরহিতং। তৎপর্য্যায়ঃ। অবাধং ২ উচ্ছৃঙ্খলং ৩ উদ্দাম ৪ নিযন্ত্রিতং ৫ নিরঙ্কুশং ৬। ইতি হেমচন্দ্রঃ॥

অনর্থকং (ক্লী) নিরর্থকং। অর্থশূন্যবাক্যং। তৎপর্য্যায়ঃ। অবদ্ধং ২। ইত্যমরঃ॥ অবধ্যং ৩। ইতি তট্টীকা॥

অনলঃ (পুং) অগ্নিঃ। বসুভেদঃ। ইতি মেদিনী॥ চিত্রকঃ। রক্তচিত্রকঃ। ভল্লাতকঃ। পিত্তং। ইতি রাজনির্ঘণ্টঃ॥

অনলপ্রভা (স্ত্রী) জ্যোতিষ্মতীলতা। ইতি রাজনির্ঘণ্টঃ॥

অনলপ্রিয়া (স্ত্রী) অগ্নিভার্য্যা। আগ্নেয়ী। ইতি জটাধরঃ॥

অনলিঃ (পুং) বকবৃক্ষঃ। ইতি ত্রিকাণ্ডশেষঃ॥

অনবধানং (ক্লী) চিত্তস্যাবিক্ষেপঃ। অমনোযোগঃ। অপ্রণিধানং। ইতি হলায়ুধঃ॥ তদ্বিশিষ্টে ত্রি॥

অনবধানতা (স্ত্রী) মনোযোগশূন্যতা। চিত্তস্যানন্যবিষয়াভাবত্বং। কার্য্যে অনবহিতত্বং। তৎপর্য্যায়ঃ। প্রমাদঃ ২। ইত্যমরঃ॥ কর্ত্তব্যাকরণং যত্র সমর্থস্য কচিদ্ভবেৎ। উচ্যতে দ্বিতয়ং তত্র প্রমাদোঽনবধানতা॥ ইতি শব্দরত্নাবলী॥

অনবরঃ (ত্রি) অকনিষ্ঠঃ। অন্যূনঃ। শ্রেষ্ঠঃ। প্রধানঃ। যথা। সোঽয়মিন্দ্রাদনবরো বাসুদেবাচ্চ ভারত। ইতি বিরাটপর্ব্ব

অনবরতং (ক্লী) নিরন্তরং। তৎপর্য্যায়ঃ। সততং ২ অনারতং ৩ অশ্রান্তং ৪ সন্তুতং ৫ অবিরতং ৬ অনিশং ৭ নিত্যং ৮ অজস্রং ৯ প্রসক্তং ১০ আসক্তং ১১ অনন্তং ১২। ইতি জটাধরঃ॥ তদ্বিশিষ্টে বাচ্যলিঙ্গং। ইত্যমরঃ॥

অনবরার্দ্ধ্যঃ (ত্রি) উত্তমঃ। প্রধানঃ। ইত্যমরঃ॥

অনবলম্বঃ (ত্রি) অবলম্বনশূন্যঃ। নিরাশ্রয়ঃ।

যথা। ন পরং পথি পক্ষপাতিতানবলম্বে কিমু মাদৃশেঽপি সা। ইতি নৈষধং ॥

অনবসরঃ ( ত্রি ) নিরবকাশঃ। অবসরাভাবে পুং। যথা। অতর্ক্যৈশ্বর্য্যে ত্বয্যনবসরদুঃস্থো হতধিয়ঃ। ইতি মহিম্নঃ স্তোত্রং ॥

অনবস্করং ( ত্রি ) নির্ম্মলং। শোধিতং। ইত্যমরঃ ॥

অনবস্থা ( স্ত্রী ) তর্কবিশেষঃ। তস্য লক্ষণং। অপ্রামাণিকানন্তপ্রবাহমূলকপ্রসঙ্গত্বং। যথা ঘটত্বং যদি যাবদ্ঘটহেতুবৃত্তি স্যাৎ ঘটান্যবৃত্তি স্যাৎ। ইতি তার্ক্কিকাঃ॥ উপপাদ্যোপপাদকয়োরবিশ্রান্তিঃ। ইতি মীমাংসকাঃ॥ দশাভাবঃ। স্থিত্যভাবঃ॥

অনবস্থানঃ ( পুং ) বায়ুঃ। ইতি রাজনির্ঘণ্টঃ॥ অবস্থিতিশূন্যে ত্রি॥

অনবস্থিতিঃ ( স্ত্রী ) চাপল্যং। চাঞ্চল্যং। অস্থিরতা। অধৈর্য্যং। ইতি হেমচন্দ্রঃ॥

অনশনং ( ক্লী ) ভোজনাভাবঃ। উপবাসঃ। ইতি হলায়ুধঃ॥ তদ্বতি ত্রি॥

অনশ্বরং ( ত্রি ) সনাতনং। নিত্যং। ধ্রুবং। শাশ্বতং। ইতি হেমচন্দ্রঃ॥

অনসূয়া ( স্ত্রী ) অসূয়াভাবঃ। তস্যা লক্ষণং যথা বৃহস্পতিঃ। ন গুণান্ গুণিনো হন্তি স্তৌতি মন্দগুণানপি। নান্যদোষেষু রমতে সানসূয়া প্রকীর্ত্তিতা॥ ইত্যেকাদশীতত্ত্বং॥ অত্রিমুনিপত্নী। ইতি গারুড়ে ২৯ অধ্যায়ঃ॥ কর্দ্দমমুনিকন্যা। ইতি শ্রীভাগবতং॥ অসূয়াশূন্যে ত্রি॥

অনহংবাদী [ ন্ ] ( ত্রি ) গর্ব্বরহিতঃ। যথা শ্রীভগবদ্গীতা। মুক্তসঙ্গোঽনহংবাদী ধৃত্যুৎসাহসমন্বিতঃ। সিদ্ধ্যসিদ্ধ্যোর্নির্ব্বিকারঃ কর্ত্তা সাত্ত্বিক উচ্যতে॥ অনহংবাদী গর্ব্বরহিতঃ। ইত্যাহ্নিকতত্ত্বং॥

অনহঙ্কৃতিঃ (স্ত্রী) অহঙ্কারাভাবঃ। তৎপর্য্যায়ঃ। অশোচঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥

অনক্ষঃ ( ত্রি ) অক্ষিহীনঃ। অন্ধঃ। ন বিদ্যেতে অক্ষিণী যস্য ইত্যর্থে ষপ্রত্যয়ঃ। অক্ষভিন্নঃ॥

অনক্ষরং ( ক্লী ) দুর্ব্বচনং। ইতি ভরতঃ॥ অবচনার্হং। গালিপ্রভৃতি। ইতি মধুঃ॥ গুণাক্ষেপকদোষাবিষ্কারিবাক্যং। ইতি কেচিৎ॥ তৎপর্য্যায়ঃ। অবাচ্যং ২। ইত্যমরঃ॥

অনক্ষি ( ক্লী ) কুৎসিতচক্ষুঃ। তৎপর্য্যায়ঃ। অসৌম্যাক্ষি ২। ইতি হেমচন্দ্রঃ॥

অনাকুলঃ ( ত্রি ) স্থিরঃ। একাগ্রঃ। অব্যাকুলঃ। অব্যগ্রঃ। ইতি জটাধরঃ॥

অনাক্রান্তা ( স্ত্রী ) কণ্টকারীবৃক্ষঃ। ইতি রত্নমালা॥ অনাক্রমণবিশিষ্টে ত্রি॥

অনাগতং (ত্রি) ভবিষ্যৎ। ইতি রাজনির্ঘণ্টঃ॥ অনায়াতং। অনুপস্থিতং। অজ্ঞাতং। যথা। অনাগতাদিলিঙ্গেন ন স্যাদনুমিতিস্তদা। ইতি ভাষাপরিচ্ছেদঃ॥

অনাগতার্ত্তবা ( স্ত্রী ) অপ্রাপ্তঋতুকা। অরজস্কা। তৎপর্য্যায়ঃ। গৌরী ২ নগ্নিকা ৩। ইত্যমরঃ॥

অনাচারঃ ( পুং ) কদাচারঃ। অশুদ্ধাচারঃ। শ্রুতিস্মৃতিবিরুদ্ধকর্ম্মকরণং। যথা সর্ব্বদেশেষ্বনাচারঃ পথি তাম্বূলচর্ব্বণং॥ ইতি স্মৃতিঃ॥ তদ্বিশিষ্টে ত্রি॥

অনাতপঃ ( পুং ) রৌদ্রাভাবঃ। ছায়া। ইতি রাজনির্ঘণ্টঃ ॥

অনাতুরঃ (ত্রি) অরোগী। যথা। তেষামনাতুরাঃ পূর্ব্বে বাতলাদ্যাঃ সদাতুরাঃ। ইতি চরকঃ॥

অনাথঃ ( ত্রি ) প্রভুহীনঃ। নাথশূন্যঃ। যথা। বনা বনা বনাথবৎ স্বজীবনা বনাভবৎ। ইতি নলোদয়ঃ ॥

অনাদরঃ ( পুং ) নিরাদরঃ। তৎপর্য্যায়ঃ। পরিভবঃ ২ পরিভাবঃ ৩ তিরস্ক্রিয়া ৪ রীঢ়া ৫ অবমাননা ৬ অবজ্ঞা ৭ অবহেলং ৮ অসূক্ষণং ৯। ইত্যমরঃ ॥ অসুক্ষণং ১০ অসুর্ক্ষণং ১১ অসূর্ক্ষণং ১২। ইতি ভরতঃ॥

অনাদিঃ ( ত্রি ) আদিরহিতঃ। উৎপত্তিশূন্যঃ। স্বয়ম্ভূঃ। যথা। অনাদিরাদির্গোবিন্দঃ সর্ব্বকারণকারণং ॥ ইতি ব্রহ্মসংহিতা ॥

অনাদৃতঃ ( ত্রি ) নিরাদরঃ। অবজ্ঞাতঃ। অবমানিতঃ। ইতি হেমচন্দ্রঃ ॥

অনামকং ( ক্লী ) অর্শোরোগঃ। ইতি শব্দরত্নাবলী ॥ মলমাসে পুং। ইতি মলমাসতত্ত্বং ॥ ছুর্নামকে নির্নামকে চ ত্রি ॥

অনাময়ং ( ক্লী ) রোগাভাবঃ। আরোগ্যং। ইত্যমরঃ ॥ তদ্বিশিষ্টে ত্রি ॥

অনামা [ ন্ ] ( পুং ) অনামিকাঙ্গুলী। ইতি শব্দরত্নাবলী ॥

অনামিকা (স্ত্রী) কনিষ্ঠামধ্যময়োর্মধ্যবর্ত্ত্যঙ্গুলী। ইত্যমরঃ ॥

অনায়ত্তঃ ( ত্রি ) অবশীভূতঃ। অনধীনঃ। যথা এতাবজ্জন্মসাফল্যং যদনায়ত্তবৃত্তিতা। ইতি হিতোপদেশঃ ॥

অনায়াসঃ ( পুং ) অক্লেশঃ। তস্য লক্ষণং যথা বৃহস্পতিঃ। শরীরং পীড্যতে যেন সুশুভেনাপি কর্ম্মণা। অত্যন্তং তন্ন কুর্ব্বীত অনায়াসঃ স উচ্যতে ॥ ইত্যেকাদশীতত্ত্বং ॥ শ্রমব্যতিরেকঃ। যত্নাভাবঃ। যথা। অনায়াসেন মরণং বিনা দৈন্যেন জীবনং। অনারাধিতগোবিন্দচরণস্য কথং ভবেৎ ॥ ইতি প্রামাণিকাঃ ॥

অনায়াসকৃতং ( ত্রি ) অনায়াসেন যৎ ক্রিয়তেস্ম তৎ। বিনা যত্নেন কৃতং। তৎপর্য্যায়ঃ। ফাণ্টং ২। ইত্যমরঃ ॥

অনারতং (ক্লী) অনবরতং। সততং। নিত্যং। ইত্যমরঃ ॥

অনারম্ভঃ (পুং) আরম্ভাভাবঃ। যথা। ন কর্ম্মণামনারম্ভান্নৈষ্কর্ম্ম্যং পুরুষোঽশ্নুতে। ইতি ভগবদ্গীতা ॥

অনার্জবঃ ( পুং ) রোগঃ। ইতি রাজনির্ঘণ্টঃ॥ ঋজুত্বাভাবঃ ॥

অনার্য্যঃ (ত্রি) অশ্রেষ্ঠঃ। যথা। অনার্য্যজুষ্টমস্বর্গ্যমকীর্ত্তিকরমর্জ্জুন। ইতি শ্রীভগবদ্গীতা॥

অনার্য্যকং ( ক্লী ) অগুরুকাষ্ঠং। ইতি রাজনির্ঘণ্টঃ ॥

অনার্য্যজং ( ক্লী ) অগুরু। ইতি হেমচন্দ্রঃ ॥

অনার্য্যতিক্তঃ ( পুং ) ভূনিম্বঃ। চিরাতা ইতি ভাষা। ইত্যমরঃ ॥

অনালোচিতঃ ( ত্রি ) অকৃতালোচনঃ। ইতিকর্ত্তব্যতয়ানবধারিতঃ। অবিবেচিতঃ। যথা। কিং করোমি প্রতিজ্ঞা মে যদনালোচিতা পুরা ॥ ইতি দেবীমাহাত্ম্যং ॥

অনাবিলঃ ( ত্রি ) আবিলশূন্যঃ। নির্ম্মলঃ। ইতি হলায়ুধ

অনাবৃতঃ (ত্রি) আবরণশূন্যঃ। অনাচ্ছাদিতঃ। যথা। অনাবৃতত্বাদ্বহিরন্তরং ন তে। ইতি শ্রীভাগবতং ॥

অনাবৃষ্টিঃ (স্ত্রী) ঈতিবিশেষঃ। বর্ষণাভাবঃ। শুকা ইতি ভাষা। ইতি স্মৃতিঃ ॥

অনাশ্যঃ (ত্রি) নাশাযোগ্যঃ। নশধাতোর্ণ্যণি নঞ্সমাসঃ ॥

অনাসিকঃ (ত্রি) নাসিকারহিতঃ। তৎপর্য্যায়ঃ। বিখ্রঃ২ বিখ্নুঃ৩ বিগ্রঃ ৪। ইতি হেমচন্দ্রঃ॥

অনাহতং (ক্লী) তন্ত্রোক্তষট্চক্রান্তর্গতচতুর্থ-চক্রং। তত্তু হৃদয়স্থকাদিঠান্তবর্ণযুক্তোদ্য-দাদিত্যসন্নিভদ্বাদশদলপদ্মাকারং। তন্মধ্যে অযুতসূর্য্যসমপ্রভশব্দব্রহ্মময়বাণলিঙ্গমস্তি। ইতি তন্ত্রসারঃ ॥

অনাহতং (ত্রি) নূতনবস্ত্রং। ছেদক্ষালনভোগ-রহিতবস্ত্রং। ইত্যমরঃ॥ অগুণিতং। ইত্যঙ্কশাস্ত্রং ॥ অকৃতাঘাতং ॥

অনাহারঃ (পুং) নিরাহারঃ। ভোজনাভাবঃ। যথা।ঋতাবনাহারতয়া ভয়েনেতি চরকঃ॥

অনাহূতঃ (ত্রি) অকৃতাহ্বানঃ। অনিমন্ত্রিতঃ। যথা। অনাহূতৈরেত্য প্রচুরগুণলোভেন ভবতঃ। ইত্যুদ্ভটঃ॥ হ্রস্বমধ্যোঽপি যথা। অনাহুতা অপ্যভিযান্তি সৌহৃদং। ইতি শ্রীভাগবতং ॥

অনিগীর্ণঃ (ত্রি) অনুক্তঃ। যথা। বিষয়স্যানি-গীর্ণস্যান্যতাদাত্ম্যপ্রতীতিকৃৎ। ইতি সাহিত্যদর্পণং ॥

অনিচ্ছুঃ (ত্রি) অনিচ্ছাবিশিষ্টঃ। অনাকাঙ্ক্ষী। অস্পৃহঃ। ইচ্ছতীতি ইচ্ছুঃ ততো নঞ্-সমাসঃ ॥

অনিত্যঃ (ত্রি) নশ্বরঃ। অস্থায়ী। জন্যবস্তু। যথা। ধর্ম্মো নিত্যঃ সুখদুঃখেঽপ্যনিত্যে। জীবো নিত্যো হেতুরস্যাপ্যনিত্যঃ। ইতি মহাভারতে ভারতসাবিত্রী ॥

অনিন্দিতঃ (ত্রি) নিন্দারহিতঃ। অগর্হিতঃ। তৎপর্য্যায়ঃ। প্রণায্যঃ ২ সাধুঃ ৩। ইতি ত্রিকাণ্ডশেষঃ ॥

অনিপুণঃ (ত্রি) অপ্রবীণঃ। অবিজ্ঞঃ। অপটুঃ। যথা। যঃ শাস্ত্রাদিষ্বনিপুণঃ শ্রদ্ধাবান্ স তু মধ্যমঃ। ইতি ভক্তিরসামৃতসিন্ধুঃ ॥

অনিমিষঃ (পুং স্ত্রী) দেবতা। মৎস্যঃ। ইত্যমরঃ॥

অনিমিষাচার্য্যঃ (পুং) বৃহস্পতিঃ। দেবগুরুঃ। ইতি শব্দরত্নাবলী ॥ [চন্দ্রঃ॥

অনিমেষঃ (পুং) দেবতা। মৎস্যঃ। ইতি হেম-

অনিয়তং (ত্রি) অনিত্যং। অস্থায়ি। যথা। রত্যাদয়োঽপ্যনিয়তে রসে স্যুর্ব্যভিচারিণঃ। ইতি সাহিত্যদর্পণং॥ রিষ্টং ত্রিবিধং মুনয়ো নিয়তমনিয়তং যোগজঞ্চ। ইতি জ্যোতিষং ॥

অনিয়মঃ (পুং) নিয়মাভাবঃ। অনিশ্চয়ঃ। অনির্দ্ধারঃ। যথা। গুরুষষ্ঠঞ্চ পাদানাং শেষেষ্বনিয়মো মতঃ॥ ইতি ছন্দোমঞ্জরী॥ তদ্বিশিষ্টে ত্রি ॥

অনিরাকৃতঃ (ত্রি) অনিবারিতঃ। যথা। অনিরা-কৃততাপসম্পদং ফলহীনাং সুমনোভিরুজ্-ঝিতাং। ইতি মাঘঃ ॥

অনিরুদ্ধং (ক্লী) সন্দানং। পশ্বাদিবন্ধনরজ্জুঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

অনিরুদ্ধঃ (পুং) কামদেবপুত্রঃ। তৎপর্য্যায়ঃ ঊষাপতিঃ ২ ব্রহ্মসূঃ ৩ বিশ্বকেতুঃ ৪।

ইত্যমরঃ ॥ স তু ভগবতশ্চতুর্ব্যূহান্তর্গতা-দিব্যূহঃ। তস্মাৎ সৃষ্টির্ভবতি। যথা। তমসো ব্রহ্মসম্ভূতং তমোমূলামৃতাত্মকং। তদ্বিশ্ব-ভাবসংজ্ঞান্তং পৌরুষীং তনুমাশ্রিতং ॥ সোঽনিরুদ্ধ ইতি প্রোক্তস্তৎ প্রধানং প্রচ-ক্ষতে। তদব্যক্তমিতি জ্ঞেয়ং ত্রিগুণং নৃপ-সত্তম ॥ বিদ্যাসহায়বান্ দেবো বিশ্বক্-সেনো হরিঃ প্রভুঃ। অপ্স্বেব শয়নঞ্চক্রে নিদ্রাযোগমুপাগতঃ ॥ জগতশ্চিন্তয়ন্ সৃষ্টিং মহানাত্মগুণঃ স্মৃতঃ। ইতি মহাভারতে মোক্ষধর্ম্মঃ ॥

অনিরুদ্ধঃ (ত্রি) রোধশূন্যঃ। অপ্রতিবদ্ধঃ। চরঃ। ইতি বিশ্বঃ ॥

অনিরুদ্ধপথং (ক্লী) আকাশং। ইতি শব্দ-চন্দ্রিকা ॥ অরুদ্ধবর্ত্ম ॥

অনিরুদ্ধভাবিনী (স্ত্রী) ঊষা। সা চ কামপুত্ত্র-পত্নী। বাণরাজকন্যা। ইতি শব্দরত্নাবলী ॥

অনির্ণয়ঃ (পুং) অনির্দ্ধারঃ। অনিশ্চয়ঃ। নির্ পূর্ব্বকনীঞ্ধাতোরলি নঞা সমাসঃ ॥

অনির্ধারিতঃ (ত্রি) অকৃতনির্ধারণঃ। অনি-শ্চিতঃ। যথা। অনির্ধারিতৈকত্বানেকত্ব-বিশেষস্য পূর্ব্বরূপমাত্রস্য ব্যক্তস্য ব্যাধি-লিঙ্গত্বং। ইতি রোগপূর্ব্বরূপলক্ষণে রক্ষিতঃ ॥

অনির্ম্মলঃ (ত্রি) মলিনঃ। আবিলঃ। অপরি-ষ্কৃতঃ। নির্ম্মলাভাবে ক্লী ॥

অনির্ম্মাল্যা (স্ত্রী) পৃক্কানামকৌষধিঃ। ইতি শব্দরত্নাবলী ॥

অনির্ব্বচনীয়ঃ (ত্রি) নির্ব্বচনাযোগ্যঃ। অনি-র্ব্বাচ্যঃ। বাক্যাগম্যঃ। যথা সদসদ্ভ্যামনি-র্ব্বচনীয়ং ত্রিগুণাত্মকং ভাবরূপং জ্ঞান-বিরোধি যৎকিঞ্চিদিতি বদন্তি। ইত্য-জ্ঞানলক্ষণে বেদান্তসারঃ ॥

অনির্ব্বাহঃ (পুং) নির্ব্বাহাভাবঃ। অনিষ্পত্তিঃ। অসঙ্গতিঃ। যথা। মুখ্যার্থবাধে তদ্যোগে ইতি কারিকায়াং মুখ্যার্থস্যান্বয়বাধোঽপি তাৎপর্য্যবিষয়স্যান্বয়স্য মুখ্যার্থতাবচ্ছেক-রূপেণানির্ব্বাহ এব। ইতি কাব্যপ্রকাশ-টীকায়াং মহেশ্বরঃ ॥

অনির্ব্বিণ্ণঃ (ত্রি) নির্ব্বেদশূন্যঃ। বত্রে নির্ব্বিণ্ণ-মানস ইত্যত্র নির্ব্বিণ্ণং বিরক্তং ইতি দেবীমাহাত্ম্যটীকা তদ্ভিন্নঃ অবিরক্তঃ বিষয়াসক্ত ইতি যাবৎ ॥ নির্ব্বিণ্ণোতি মমত্বেন ইত্যত্র নির্ব্বিণ্ণো দুঃখিতঃ ইতি দেবীমাহাত্ম্যটীকা তদ্ভিন্নঃ অদুঃখিতঃ বহুব্রীহৌ তু অতিদুঃখিতঃ ॥

অনির্ব্বৃতিঃ (স্ত্রী) নির্ব্বৃত্যভাবঃ। দরিদ্রতা। যথা। অনির্ব্বৃতিনিশাচরী মম গৃহান্তরালং গতা। ইত্যুদ্ভটঃ ॥

অনিলঃ (পুং) বায়ুঃ। ইত্যমরঃ ॥ বসু-বিশেষঃ। ইতি মেদিনী ॥

অনিলঘ্নকঃ (পুং) বিভীতকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

অনিলসখঃ (পুং) অগ্নিঃ। ইতি হেমচন্দ্রঃ ॥

অনিলান্তকঃ (পুং) ইঙ্গুদীবৃক্ষঃ। ইতি রাজ-নির্ঘণ্টঃ ॥

অনিলাময়ঃ (পুং) বাতরোগঃ। ইতি রাজ- [নির্ঘণ্টঃ ॥

অনির্লোচিতঃ (ত্রি) অনালোচিতঃ। অবিবে-চিতঃ। যথা। অনির্লোচিতকার্য্যস্য বাগ্-জালং বাগ্মিনো বৃথা। ইতি মাঘঃ ॥

অনিশং (ক্লী) অনবরতং। সততং। ইত্যমরঃ॥

অনিশ্চিতঃ (ত্রি) নিশ্চয়রহিতঃ। অনিরূপিতঃ। অনির্ণীতঃ। যথা। কবয় আনতকন্ধরচিন্তাঃ কশ্মলং যযুরনিশ্চিততত্ত্বাঃ। ইতি শ্রীভাগবতং॥

অনিষ্টঃ (ত্রি) অনভিলষিতঃ। অবাঞ্ছিতঃ। যথা। ইষ্টনাশাদনিষ্টাপ্তেঃ করুণাখ্যো রসো ভবেৎ। ইতি সাহিত্যদর্পণং॥

অনিষ্টা (স্ত্রী) নাগবলা। ইতি রাজনির্ঘণ্টঃ॥

অনিষ্ণাতঃ (ত্রি) অকুশলঃ। অপ্রবীণঃ। অনভিজ্ঞঃ। অকৃতী। নিপূর্ব্বাৎ স্নাল শোধনে ইত্যস্মাৎ কর্ত্তরি ক্তে নঞ্সমাসঃ॥

অনিষ্পন্নঃ (ত্রি) নিষ্পত্তিরহিতঃ। অসমাপ্তঃ। অসম্পূর্ণঃ। নির্ পূর্ব্বকপদধাতোঃ কর্ম্মণি ক্তে নিষ্পন্নঃ পশ্চান্নঞ্সমাসঃ॥

অনিক্ষুঃ (পুং) ইক্ষুবিশেষঃ। আনাখু। খাকড়া ইতি খ্যাতঃ। তৎপর্য্যায়ঃ। ইক্ষুতুল্যা ২ ইক্ষুরালিকা ৩ ইক্ষ্বালিকা ৪। ইতি রত্নমালা॥

অনীকঃ (পুং ক্লী) যুদ্ধং। সৈন্যং। ইতি মেদিনী॥

অনীকস্থঃ (পুং) রণগতঃ। সংগ্রামস্থঃ। হস্তিশিক্ষাবিচক্ষণঃ। রাজরক্ষকঃ। চিহ্নং। বীরমর্দ্দলকঃ। জয়ঢাক ইতি ভাষা। ইতি মেদিনী॥

অনীকিনী (স্ত্রী) সেনা। সৈন্যসংখ্যাবিশেষঃ। তদ্যথা। ৬৫৬১ অশ্বাঃ। ২১৮৭ হস্তিনঃ। ১০৯৩৫ পদাতয়ঃ। ২১৮৭ রথাঃ। সমুদায়েন সপ্তত্যধিকাষ্টশতাধিকসহস্রাধিকাযুতদ্বয়ং। ২১৮৭০ অক্ষৌহিণীদশমাংশেয়ং। ইত্যমরভরতৌ॥

অনীচিদর্শী [ন্] (পুং) বুদ্ধভেদঃ। ইতি ত্রিকাণ্ডশেষঃ॥

অনীতিঃ (স্ত্রী) দুর্নীতিঃ। অন্যায়ঃ। অত্যাচারঃ। যথা। বিষ্টয়ো ব্যতিপাতাশ্চ যে চান্যেঽনীতিসম্ভবাঃ। ইতি বামনপুরাণং॥

অনীশঃ (পুং) বিষ্ণুঃ। ইতি তস্য সহস্রনামমধ্যে পঠিতঃ॥ ঈশ্বরভিন্নে ত্রি। যথা। অনীশো বা কুর্য্যাদ্ভুবনজননে কঃ পরিকরং। ইতি পুষ্পদন্তঃ॥

অনু ব্য উপসর্গবিশেষঃ। অন্বার্থাঃ। পশ্চাৎ। সাদৃশ্যং। লক্ষণং। বীপ্সা। ইত্থম্ভাবঃ। ভাগঃ। হীনঃ। সহার্থঃ। আয়ামঃ। সমীপং। পরিপাটী। ইতি মেদিনী॥ পুনরর্থঃ। ইতি মুগ্ধবোধটীকায়াং দুর্গাদাসঃ॥

অনুকঃ (ত্রি) কামুকঃ। কামী। ইত্যমরঃ॥

অনুকম্পা (স্ত্রী) দয়া। কৃপা। ইত্যমরঃ॥

অনুকম্প্যঃ (ত্রি) তরস্বী। বেগবান্। ইতি হারাবলী॥ কৃপাযোগ্যঃ। দয়াপাত্রং। অনুকম্প্যোঽননুকম্প্যশ্চ স জাতঃ স চ জীবতি। ইতি কাব্যপ্রকাশঃ॥

অনুকরণং (ক্লী) অনুকারঃ। সদৃশীকরণং। ব্যাকরণমতে তৎ দ্বিবিধং। যত্রার্থরহিতকেবলশব্দস্য সদৃশকরণং তৎ শব্দানুকরণং ১। যত্রার্থবিশিষ্টস্য সদৃশকরণং তদর্থানুকরণং ২। ইতি গোয়ীচন্দ্রটীকোপরি বিদ্যালঙ্কারটীপ্পনী॥

অনুকর্ষঃ (পুং) রথাধঃস্থিতকাষ্ঠং। রথের তলা ইতি ভাষা। ইত্যমরঃ॥ রথস্যাধস্তনভাগে যদ্দারুধারণকাষ্ঠং তিষ্ঠতি যতোঽধশ্চক্রং উপরি পট্টকর্ম্ম যত্র চক্রং

তদনুকর্ষশব্দবাচ্যং। ইতি ভরতঃ॥ আকর্ষণং। ইতি মেদিনী॥

অনুকর্ষণং (ক্লী) অবকর্ষণং। আকর্ষণং। ইতি মেদিনী॥

অনুকর্ষা [ন্] (পুং) অনুকর্ষঃ। রথাধঃস্থিতকাষ্ঠং। ইত্যমরটীকায়াং রায়মুকুটঃ॥

অনুকল্পঃ (পুং) মুখ্যকল্পাদধমঃ। গৌণকল্পঃ। মুখ্যস্থানাপন্নপ্রতিনিধিঃ। যথা। ব্রীহ্যভাবে নীবারৈর্যজেত। ইত্যমরভরতৌ॥

অনুকামীনঃ (ত্রি) কামঙ্গামী। স্বেচ্ছাগমনশীলঃ। ইত্যমরঃ॥

অনুকারঃ (পুং) সদৃশীকরণং। সদৃশরূপবেশভাষাদ্যাবিষ্করণং। তৎপর্য্যায়ঃ। অনুহারঃ ২। ইত্যমরঃ॥ উপমা। ইতি হেমচন্দ্রঃ॥

অনুকূলঃ (ত্রি) অপ্রতিকূলঃ। দক্ষিণঃ। সহায়ঃ। যথা। ময়ানুকূলেন নভস্বতেরিতং। ইতি শ্রীভাগবত

অনুকূলঃ (পুং) পতিভেদঃ। তস্য লক্ষণং। সদা পরাঙ্গনাপরাঙ্মুখত্বে সতি স্বস্ত্র্যনুরক্তত্বং। ইতি রসমঞ্জরী॥

অনুকূলতা (স্ত্রী) আনুকূল্যং। তৎপর্য্যায়ঃ। দাক্ষিণ্যং ২। ইতি হেমচন্দ্রঃ॥

অনুকূলা (স্ত্রী) দন্তীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

অনুক্রমঃ (পুং) যথাক্রমং। তৎপর্য্যায়ঃ। আনুপূর্ব্বী ২ পরিপাটী ৩ আবৃৎ ৪ পর্য্যায়ঃ ৫। ইত্যমরঃ॥ প্রতিসংক্রমণং। অনুক্রমণিকা। যথা। দ্বাদশে তু পুরাণোক্তসর্ব্বার্থানুক্রমঃ কৃতঃ। প্রথমস্কন্ধমারভ্য প্রাধান্যেন সমাসতঃ॥ ইতি শ্রীভাগবতে ১২ স্কন্ধে ১২ অধ্যায়টীকায়াং শ্রীধরস্বামী॥

অনুক্রমণিকা (স্ত্রী) ভূমিকা। গ্রন্থাদের্মুখবন্ধঃ। পুরাণাদেরুক্তবিবরণস্য সংক্ষেপেণ পুনঃ কথনং। ইতি পুরাণং॥

অনুক্রোশঃ (পুং) করুণা। দয়া। ইত্যমরঃ॥

অনুগঃ (ত্রি) পশ্চাদ্গামী। অনুচরঃ। অনুসরঃ। তৎপর্য্যায়ঃ। অন্বক্ ২ অন্বক্ষঃ ৩ অনুপদঃ ৪। ইত্যমরঃ॥ সেবকঃ। দাসঃ। ইতি হলায়ুধঃ॥

অনুগতঃ (ত্রি) অনুগঃ। আশ্রিতঃ। অধীনঃ। পশ্চাদ্গতঃ। যথা। আগচ্ছদ্যত্র কাকুৎস্থঃ স্বর্গায় সমুপস্থিতঃ। বিমানবরকোটীভির্দৈবৈরনুগতস্তদা॥ ইতি রামায়ণং॥ নিয়তঃ। যথা। ন চ তদনুগতমেব অভিধাবলম্বনে নাপি তস্থ ভাবাৎ। ইতি পঞ্চমোল্লাসে কাব্যপ্রকাশকারঃ॥

অনুগবীনঃ (পুং) গোপঃ। গোরক্ষকঃ। গোঃ পশ্চাৎ যথেষ্টগামী। ইতি সংক্ষিপ্তসারব্যাকরণপরিশিষ্টং॥

অনুগমঃ (পুং) পশ্চাদ্গমনং। উপসর্পণং। যথা। কৃতে তু দীয়তে গত্বা ত্রেতায়ামাহৃতায় বৈ। দ্বাপরে যাচমানায় কলৌ ত্বনুগমান্বিতে॥ ইতি স্মৃতিঃ॥ ন্যায়মতে যেন রূপেণ তাবৎপদার্থগ্রহঃ তদেব রূপং তাবৎপদার্থানুগমকং তস্ত ক্রিয়া॥

অনুগমনং (ক্লী) সহগমনং। যথা। অষ্টৌ লোকপালা আদিত্যচন্দ্রানিলাগ্ন্যাকাশভূমিজলহৃদয়াবস্থিতান্তর্যামিপুরুষযমদিনরাত্রিসন্ধ্যাধর্ম্মা যূয়ং সাক্ষিণো ভবত

জ্বলচ্চিতারোহণেন ভর্ত্তৃশরীরানুগমনমহং করোমি। ইতি শুদ্ধিতত্ত্বং ॥

অনুগামী [ ন্ ] ( ত্রি ) কামংগামী। ইতি হেমচন্দ্রঃ ॥ সহচরঃ। পশ্চাদ্গামী। যথা। দৃষ্ট্বা শ্রিয়মিবায়ান্তীং ব্রহ্মাণমনুগামিনীং। ইতি রামায়ণং ॥

অনুগ্রহঃ ( পুং ) দুঃখদূরকরণেচ্ছা। অনিষ্ট-বারণপূর্ব্বকেষ্টসাধনং। তৎপর্য্যায়ঃ। অভ্যুপপত্তিঃ ২। ইত্যমরঃ ॥

অনুচরঃ ( ত্রি ) সহচরঃ। সহায়ঃ। ইত্যমরঃ ॥ দাসঃ। ইতি হলায়ুধঃ ॥

অনুচ্ছিষ্টঃ ( ত্রি ) উচ্ছিষ্টভিন্নঃ। পবিত্রঃ। ইতি হলায়ুধঃ ॥

অনুজং ( ক্লী ) প্রপৌণ্ডরীকনামসুগন্ধিদ্রব্যং। ইতি রাজনির্ঘণ্টঃ ॥

অনুজঃ ( পুং ) কনিষ্ঠভ্রাতা। তৎপর্য্যায়ঃ। জঘন্যজঃ ২ কনিষ্ঠঃ ৩ যবীয়ান্ ৪ অবরজঃ ৫। ইত্যমরঃ ॥ কনীয়ান্ ৬ যবিষ্ঠঃ ৭। ইতি জটাধরঃ ॥ জঘন্যঃ ৮। ইতি শব্দরত্নাবলী ॥

অনুজা ( স্ত্রী ) ত্রায়মাণালতা। ইতি রাজনির্ঘণ্টঃ ॥ কনিষ্ঠা ভগিনী ॥

অনুজাতা ( স্ত্রী ) কনিষ্ঠা ভগিনী। যথা ভ্রাতস্তবানুজাতাহং ভুঙ্ক্ষ্ব ভক্তমিদং পয়ঃ। ইতি তিথ্যাদিতত্ত্বং ॥

অনুজীবী [ ন্ ] ( ত্রি ) দাসঃ। তৎপর্য্যায়ঃ। সেবকঃ ২ অর্থী ৩। ইত্যমরঃ ॥ অনুচরঃ। ইতি হলায়ুধঃ ॥

অনুজ্ঞা (স্ত্রী) আজ্ঞা। অনুমতিঃ। যথা। নাগ্ন্যোর্ন ব্রাহ্মণয়োর্ন গুরুশিষ্যয়োরন্তরা ব্যপেয়াৎ অনুজ্ঞয়া তু ব্যাপেয়াৎ। ইতি তিথ্যাদিতত্ত্বং

অনুতরং (ক্লী) আতরঃ। তরপণ্যং। পারাণী কড়ী ইতি ভাষা। ইত্যমরটীকায়াং রায়মুকুটঃ ॥

অনুতর্ষঃ ( পুং ) তৃষ্ণা। অভিলাষঃ। মদ্যপানপাত্রং। ইতি মেদিনী ॥

অনুতর্ষণং ( ক্লী ) চষকঃ। সুরাপানপাত্রং। ইত্যমরঃ ॥

অনুতাপঃ ( পুং ) পশ্চাত্তাপঃ। পস্তান ইতি ভাষা। ইত্যমরঃ ॥

অনুত্তমঃ ( ত্রি ) শ্রেষ্ঠঃ। প্রধানঃ। ইত্যমরঃ ॥ নঞ্সমাসে তু অধমঃ ॥

অনুত্তরং (ত্রি) মুখ্যং। ইতি হেমচন্দ্রঃ ॥ শ্রেষ্ঠং। প্রতিজল্পবিবর্জ্জিতং। প্রত্যুত্তরহীনং। ইতি মেদিনী ॥ স্থিরং। ইতি ধরণী ॥ অধঃ। দক্ষিণদিক্। ইত্যমরটীকায়াং স্বামী ॥ প্রত্যুত্তরাভাবে ক্লী। যথা। ভবত্যবজ্ঞা চ ভবত্যনুত্তরাৎ। ইতি নৈষধং ॥

অনুদগ্রঃ (ত্রি) অনুচ্চঃ। বহুব্রীহৌ তু অত্যুচ্চঃ ॥

অনুদাত্তঃ ( পুং ) বেদগানে নীচস্বরঃ। যথা। উদাত্তশ্চানুদাত্তশ্চ স্বরিতশ্চ ত্রয়ঃ স্বরাঃ। ইতি শব্দরত্নাবলী ॥

অনুদারঃ (ত্রি) অতিশয়দাতা। অদাতা। অতিমহান্। অমহান্। অনুগতদারঃ। যথা যস্মিন্ প্রসীদসি পুনঃ স ভবত্যুদারোঽনুদারশ্চ। ইতি মম্মটভট্টঃ ॥

অনুদিনং ( ক্লী ) প্রতিদিনং। প্রত্যহং। যথা। পারাবতঃ খলু শিলাকণমাত্রভোগী কামী ভবেদনুদিনং বদ কোঽত্র হেতুঃ। ইতি শ্রীচৈতন্যদেবঃ ॥

অনুদ্রুতং (ক্লী) তালবিশেষঃ। স তু দ্রুতার্দ্ধো মাত্রাচতুর্থভাগো বা। যথা। অর্দ্ধমাত্রং দ্রুতং জ্ঞেয়ং দ্রুতার্দ্ধঞ্চাপ্যনুদ্রুতং। ইতি শব্দরত্নাবলী॥ অনুধাবিতে ত্রি। যথা। অনুদ্রুতঃ সংযতি যেন কেবলং বলস্য শত্রুঃ প্রশশংস শীঘ্রতাং। ইতি মাঘঃ॥

অনুধাবনং (ক্লী) পশ্চাদ্ধাবনং। অনুসন্ধানং। যথা। তস্মিন্ কুরঙ্গশাবাক্ষি মুহুশ্চিত্তং নিবারয়। ন তন্মনস্তবাধীনং বৃথা তত্রানুধাবনং॥ ইত্যুদ্ভটঃ॥

অনুনয়ঃ (পুং) বিনয়ঃ। তৎপর্য্যায়ঃ। প্রণিপাতঃ ২ প্রণতিঃ ৩। ইতি হেমচন্দ্রঃ॥

অনুপদং (ক্লী) ব্য অনুগঃ। পশ্চাদ্গামী। ইত্যমরঃ॥

অনুপদী [ন্] (ত্রি) অন্বেষ্টা। অন্বেষণকর্ত্তা। ইতি হলায়ুধঃ॥

অনুপদীনা (স্ত্রী) পদায়তোপানৎ। মোজা। বুট্ ইত্যাদি ভাষা। ইত্যমরঃ॥

অনুপমঃ (ত্রি) উপমাশূন্যঃ। উত্তমঃ। ইতি মেদিনী॥

অনুপমা (স্ত্রী) কুমুদনামদিগ্গজযোষা। ইত্যমরঃ॥ সুপ্রতীকনামদিগ্গজস্ত্রী। ইতি মেদিনী॥

অনুপাতঃ (পুং) পশ্চাৎপতনং। পূর্ব্বাঙ্কপাতানুসারেণ অপরাঙ্কপাতঃ। যথা। পুরান্তরং চেদিদমুত্তরং স্যাৎ তদক্ষবিশ্লেষলবৈস্তদা কিং। চক্রাংশকৈরিত্যনুপাতযুক্ত্যা যুক্তং নিরুক্তং পরিধেঃ প্রমাণং॥ ইতি সিদ্ধান্তশিরোমণৌ গোলাধ্যায়ঃ॥

অনুপাতকং (ক্লী) মহাপাতকসদৃশপাপবিশেষঃ। তৎ পঞ্চত্রিংশৎপ্রকারং যথা।

| | |
|---|---|
| সমুৎকর্ষে মিথ্যাবচনং | ১ |
| তৎ দ্বিবিধং। আত্মগামি। | |
| অসূয়াপূর্ব্বকপরগামি চ। | |
| রাজগামি পৈশুন্যং | ১ |
| পিতুর্মিথ্যাদোষকথনং | ১ |
| এতৎ ত্রয়ং ব্রহ্মহত্যাসমং॥ | ৩ |
| বেদত্যাগঃ। স তু অধীতবেদবিস্মরণং। | ১ |
| বেদনিন্দা | ১ |
| কৌটসাক্ষ্যং | ১ |
| তদ্দ্বিবিধং। জ্ঞাতস্যাকথনং। মিথ্যাকথনঞ্চ। | |
| সুহৃদ্বধঃ | ১ |
| স তু ব্রাহ্মণব্যতিরিক্তমিত্রবধঃ। | |
| জ্ঞানপূর্ব্বকাভ্যাসেনগর্হিতান্নস্য অর্থাৎ অন্ত্যজান্নস্য ভক্ষণং | ১ |
| জ্ঞানপূর্ব্বকাভ্যাসেন গর্হিতাদ্যস্য অর্থাৎ ছত্রাকাদের্ভক্ষণং | ১ |
| এতৎ ষড়্বিধং সুরাপানসমং॥ | ৬ |
| নিক্ষেপহরণং | ১ |
| নরহরণং | ১ |
| অশ্বহরণং | ১ |
| রজতহরণং | ১ |
| ভূমিহরণং | ১ |
| | ১ |
| মণিহরণং | ১ |
| এতানি সপ্ত স্বর্ণস্তেয়সমানি | ৭ |

| | |
|---|---|
| সপিণ্ডস্ত্রীগমনং | ১ |
| কুমারীগমনং | ১ |
| অন্ত্যজাগমনং | ১ |
| সখ্যুঃ স্ত্রীগমনং | ১ |
| ঔরসেতরপুত্রস্ত্রীগমনং | ১ |
| পুত্রস্যাসবর্ণস্ত্রীগমনং | ১ |
| এতানি ষট্ বিমাতৃগমনসমানি ॥ | ৬ |
| মাতৃস্বসৃগমনং | ১ |
| পিতৃস্বসৃগমনং | ১ |
| শ্বশ্রূগমনং | ১ |
| মাতুলানীগমনং | ১ |
| শিষ্যস্ত্রীগমনং | ১ |
| ভগিনীগমনং | ১ |
| আচার্য্যভার্য্যাগমনং | ১ |
| শরণাগতাগমনং | ১ |
| রাজ্ঞীগমনং | ১ |
| প্রব্রজিতাগমনং | ১ |
| ধাত্রীগমনং | ১ |
| সাধ্বীগমনং | ১ |
| বর্ণোত্তমাগমনং | ১ |
| এতানি ত্রয়োদশ গুর্ব্বঙ্গনাগমনসমানি ॥ | ১৩ |
| ইতি প্রায়শ্চিত্তবিবেকসংগ্রহঃ ॥ | ৩৫ |

অনুপানং (ক্লী) ঔষধাঙ্গপেয়বিশেষঃ। ঔষধেন সহ তৎপশ্চাদ্বা পীয়তে যৎ। যথা অনুপানবিশেষেণ করোতি বিবিধান্ গুণান্। ইতি বৈদ্যকং ॥

অনুপুষ্পঃ (পুং) শরঃ। ইতি শব্দচন্দ্রিকা ॥

অনুপ্রাসঃ (পুং) তুল্যবর্ণবিন্যাসঃ। যথা। বর্ণসাম্যমনুপ্রাস ইতি কাব্যপ্রকাশঃ ॥ বর্ণাবৃত্তিরনুপ্রাসঃ পদে পাদে বিধীয়তে। ইতি কাব্যচন্দ্রিকা ॥ অস্য বিবরণং অলঙ্কারশব্দে দ্রষ্টব্যং ॥

অনুপ্লবঃ (পুং) সহায়ঃ। অনুচরঃ। ইত্যমরঃ॥

অনুবন্ধঃ (পুং) দোষোৎপত্তিঃ। প্রকৃত্যাদিঃ। আদিশব্দেন প্রত্যয়াগমাদেশাঃ। বিনশ্বরঃ। উচ্চরিতপ্রধ্বংসী ইৎসংজ্ঞকো বর্ণঃ ॥ মুখ্যানুযায়িশিশুঃ। বিবাহামন্ত্রণযাত্রাদিষু মুখ্যং পিত্রাদিকমনুযাতি যঃ। মুখ্যানুযায়ী শিশুশ্চেতি দ্বয়ং স্বতন্ত্রমিতি স্বামী ॥ প্রকৃতস্যানুবর্ত্তনং। প্রক্রান্তস্য অনিবর্ত্তনং। ইত্যমরভরতৌ ॥ দোষোৎপাদে যথা। অনুবন্ধং বুদ্ধ্বাস্য দণ্ডো বিধীয়তামিতি ॥ বিনশ্বরে যথা। ঔট্ টকারানুবন্ধে লোপঃ। প্রকৃতস্যানুবর্ত্তনে যথা। ভোক্তুমনুবন্ধঃ কৃতঃ। শিশৌ যথা। বালকানুবন্ধেন যাত্রাভঙ্গো মাভূৎ। ইত্যমরটীকাসারসুন্দরী॥*॥ বন্ধঃ। ইতি মেদিনী ॥ আরম্ভঃ। ইতি শব্দরত্নাবলী ॥ লেশঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ * ॥ বেদান্তমতে অধিকারিবিষয়সম্বন্ধপ্রয়োজনানি। বৈদ্যকমতে বাতাদিদোষাণামপ্রাধান্যং ॥

অনুবন্ধী (স্ত্রী) হিক্কা। তৃষ্ণা। ইতি মেদিনী॥

অনুবোধঃ (পুং) গন্ধোদ্দীপনং। ন্যূনপূর্ব্বগন্ধস্য চন্দনাদেঃ প্রযত্নবিশেষেণ পুনঃ পূর্ব্বসৌগন্ধ্যোৎপাদনং। তৎপর্য্যায়ঃ প্রবোধনং ২। ইত্যমরঃ ॥ পশ্চাদ্বোধঃ

অনুভবঃ (পুং) স্মৃতিভিন্নজ্ঞানং। অনুমানাদি।

ধারাবাহিজ্ঞানং। তৎপর্য্যায়ঃ। উপলম্ভঃ২ ইত্যমরঃ ॥

অনুভাবঃ (পুং) প্রভাবঃ। কোষদণ্ডজং তেজঃ। সতাং মতিনিশ্চয়ঃ। সতাং অভিপ্রায়স্য নিশ্চয়ঃ। নিশ্চয়মাত্রেঽপি। ভাববোধকঃ। রত্যাদিসূচকগুণক্রিয়াদিঃ। স চ লোচন-চাতুর্য্যভ্রূক্ষেপমুখরাগাদিরূপঃ। এবমন্যত্রাপি। ইত্যমরভরতৌ ॥

অনুভূতিঃ (স্ত্রী) অনুভবঃ। সা চতুর্ব্বিধা। প্রত্যক্ষং ১ অনুমিতিঃ ২ উপমিতিঃ ৩ শাব্দবোধঃ ৪। ইতি ভাষাপরিচ্ছেদঃ ॥

অনুভূতাদ্যবিস্মৃতিঃ (স্ত্রী) সংস্কারঃ। অনুভূতানাং স্মৃতানাঞ্চ অবিস্মৃতির্যস্মাৎ স ভাবনাখ্যসংস্কার ইতি যাবৎ ॥

অনুমতকর্ম্মকারী [ন্] (ত্রি) লিখিতপত্রাদ্যনুসারেণ কর্ম্মকর্ত্তা। অছী ইতি আরবী ভাষা। ইতি ব্যবহারকাণ্ডং ॥ আজ্ঞয়া কার্য্যকর্ত্তা চ॥

অনুমতিঃ (স্ত্রী) সম্মতিঃ। অনুজ্ঞা। ন্যূনেন্দুকলা পূর্ণিমা। চতুর্দ্দশীযুক্তা পূর্ণিমা। ইতি মেদিনী ॥

অনুমরণং (ক্লী) পশ্চান্মরণং। ভর্ত্তরি মৃতে তৎপাদুকাদিকমাদায় জ্বলচ্চিতারোহণপূর্ব্বকং স্ত্রিয়া মরণং। যথা। দেশান্তরমৃতে পত্যৌ সাধ্বী তৎপাদুকাদ্বয়ং। নিধায়োরসি সংশুদ্ধা প্রবিশেৎ জাতবেদসং ॥ ইতি ব্রহ্মপুরাণং ॥ ব্রাহ্মণ্যা নিষেধমাহ স্মৃতিঃ। পৃথক্ চিতিং সমারুহ্য ন বিপ্রা গন্তুমর্হতি॥ সহমরণং। মৃতভর্ত্রা সহ জ্বলচ্চিতারোহণপূর্ব্বকং স্ত্রিয়া মরণং। যথা। ভর্ত্ত্রানুমরণং কালে যাঃ কুর্ব্বন্তি তথা বিধাঃ। কামাৎ ক্রোধাৎ ভয়ান্মোহাৎ সর্ব্বাঃ পূতা ভবন্তি তাঃ ॥ ইতি মহাভারতং ॥

অনুমা (স্ত্রী) অনুমিতিঃ। অনুমানং। ইতি ত্রিকাণ্ডশেষঃ ॥

অনুমানং (ক্লী) অনুমিতিকরণং। অনুমিতিঃ। ইতি চিন্তামণিঃ ॥ তৎপর্য্যায়ঃ। অনুমা ২ ইতি ত্রিকাণ্ডশেষঃ ॥

অনুমানোক্তিঃ (স্ত্রী) তর্কঃ। ঊহঃ। ইতি হলায়ুধঃ ॥

অনুমিতিঃ (স্ত্রী) অনুভববিশেষঃ। ব্যাপ্তিবিশিষ্টপক্ষধর্ম্মতাজ্ঞানজন্যজ্ঞানং। যথা। ধূমদর্শনাদ্বহ্নিমান্ পর্ব্বত ইত্যাকারজ্ঞানং। অস্যা ব্যাপারকারণং পরামর্শঃ। অস্যাঃ করণং ব্যাপ্তিজ্ঞানং। ইতি ভাষাপরিচ্ছেদঃ॥

অনুমোদিতং (ত্রি) কৃতানুমোদনং। অনুমতং। যথা। ভবতা যদ্ব্যবসিতং তন্মে সাধ্বনুমোদিতং। ইতি শ্রীভাগবতং ॥

অনুযায়ী [ন্] (ত্রি) সদৃশঃ। পশ্চাদগামী। যথা। মুখ্যানুযায়িনি শিশাবিত্যনুবন্ধশব্দার্থে অমরঃ ॥

অনুযুক্তঃ (পুং) ভৃতকাধ্যেতা। ইতি মহাভারতং ॥

অনুযোক্তা [ঋ] (পুং) ভৃতকাধ্যাপকঃ। ইতি মহাভারতং ॥

অনুযোগঃ (পুং) প্রশ্নঃ। ইত্যমরঃ ॥

অনুযোগকৃৎ (পুং) আচার্য্যঃ। ইতি হেমচন্দ্রঃ॥

অনুযোজনং (ক্লী) প্রশ্নঃ। ইতি হেমচন্দ্রঃ ॥

অনুযোজ্যং (ত্রি) নিন্দার্হং। অনুপূর্ব্বকনিন্দার্থযুজধাতোঃ কর্ম্মণি যপ্রত্যয়ঃ॥

অনুরক্তঃ (ত্রি) আসক্তঃ। অনুরাগযুক্তঃ।

যথা। অনুরক্তো গুণান্ ক্রতে বিরক্তো দূষণানি চ। ইত্যুদ্ভটঃ॥

অনুরঞ্জনং (ক্লী) অনুরাগঃ। হর্ষজননং। যথা। বিশ্বেষামনুরঞ্জনেন জনয়ন্নানন্দমিন্দীবরেতি জয়দেবঃ॥

অনুরতঃ (ত্রি) অনুরাগবিশিষ্টঃ। প্রীতঃ। অনুরক্তঃ। অনুপূর্ব্বরমধাতোঃ কর্ত্তরি ক্তঃ॥

অনুরতিঃ (স্ত্রী) অনুরাগঃ। ইতি হেমচন্দ্রঃ॥

অনুরাগঃ (পুং) প্রীতিঃ। আসক্তিঃ। তৎপর্য্যায়ঃ। রতিঃ ২ রাগঃ ৩ অনুরতিঃ ৪। ইতি হেমচন্দ্রঃ॥

অনুরাগী [ন্] (ত্রি) অনুরাগবিশিষ্টঃ। অনুরক্তঃ। ইতি শব্দরত্নাবলী॥

অনুরাধা (স্ত্রী) সপ্তদশনক্ষত্রং। তস্যা রূপং। সর্পাকৃতিসপ্ততারাময়ং। ইতি কালিদাসঃ। বলিনিভতারাচতুষ্টয়াত্মকং। ইতি দীপিকাটীকা॥ অস্যা অধিদেবতা মিত্রঃ। তত্র জাতফলং। যথা। সৎকীর্ত্তিকান্তিশ্চ সদোৎসবঃ স্যাজ্জেতা রিপূণাঞ্চ কলাপ্রবীণঃ। স্যাৎ সম্ভবে যস্য কিলানুরাধা সম্পৎপ্রমাদৌ বিবিধৌ ভবেতাং॥ ইতি কোষ্ঠীপ্রদীপঃ॥

অনুরূপঃ (ত্রি) তুল্যরূপঃ। সদৃশঃ। যথা। দেবানামনুরূপা হি চরন্ত্যেতে মহীতলে ইতি রামায়ণং॥

অনুরোধঃ (পুং) আরাধ্যাদেরিষ্টসম্পাদনং। উপরোধঃ। তৎপর্য্যায়ঃ। অনুবর্ত্তনং ২। ইত্যমরঃ॥

অনুলাপঃ (পুং) মুহুর্ভাষা। পুনঃ পুনঃ কথনং। পুনরুক্তিঃ। ইত্যমরঃ॥

অনুলেপনং (ক্লী) গাত্রে গন্ধদ্রব্যাদিলেপনং। তদ্দ্রব্যঞ্চ। তস্য গুণাঃ। প্রীত্যোজঃশুক্রবৃদ্ধিকারিত্বং। ঘর্ম্মদৌর্গন্ধ্যতন্দ্রাপাপশ্রমনাশিত্বঞ্চ। ইতি রাজবল্লভঃ॥

অনুলোমঃ (পুং) যথাক্রমং। অবিলোমঃ। যথা। বর্ণমালা সমাখ্যাতা অনুলোমবিলোমিকা। ইতি তন্ত্রসারে নারদবচনং॥

অনুলোমজঃ (ত্রি) অনুলোমজাতঃ। অপ্রতিলোমজঃ। যথা। ব্রাহ্মণাৎ ক্ষত্রিয়াগর্ভজাতঃ। ক্ষত্রিয়াৎ বৈশ্যায়াং জাতঃ। ইত্যাদি উত্তমাদধমায়াং জাতঃ। যথা। সঙ্কীর্ণযোনয়ো যে তু প্রতিলোমানুলোমজাঃ। অন্যোঽন্যব্যতিষক্তাশ্চ তান্ প্রবক্ষ্যাম্যশেষতঃ॥ ইতি মনুঃ॥

অনুবৎসরঃ (পুং) বর্ষঃ। ইতি হেমচন্দ্রঃ॥ সংবৎসরাদিপঞ্চকান্তর্গতবৎসরবিশেষঃ। অস্মিন্ বর্ষে ধান্যদানে মহাফলং। শকাব্দাৎ পঞ্চভির্হৃতে যঃ শেষস্তিষ্ঠতি তেন একাদিক্রমেণ সংপরি ইদা অনু উদা পূর্ব্বকবৎসরসংজ্ঞকা বৎসরা ভবন্তি। ইতি মলমাসতত্ত্বং॥

অনুবর্ত্তনং (ক্লী) অনুরোধঃ। ইত্যমরঃ॥ ব্যাকরণমতে পূর্ব্বলক্ষণস্থিতপদাদেরনুবৃত্তিঃ॥

অনুবাকঃ (পুং) ঋগ্‌যজুঃসামসমূহঃ। ইত্যমরঃ॥ বেদবিশেষঃ। ইতি স্মৃতিঃ॥

অনুবাদঃ (পুং) কুৎসিতার্থবাক্যং। ইতি শব্দরত্নাবলী॥ পুনরুক্তিঃ। উক্তস্য পুনঃকথনং। যথা। বিরোধে গুণবাদঃ স্যাদনুবাদোঽবধারিতে। ভূতার্থবাদস্তদ্ধানাদর্থবাদস্ত্রিধা মতঃ॥ ইতি শুদ্ধিতত্ত্বটীকা॥

বাচারম্ভনমাত্রং। যথা। বিনানুবাদং ন চ তন্মনীষিতং সম্যগ্‌যতস্ত্যক্তমুপাদদৎ পুমান্। ইতি শ্রীভাগবতং॥

অনুবাসনং (ক্লী) স্নেহনং। ধূপনং। ইতি হেমচন্দ্রঃ॥ স্নেহবস্তিঃ। যথা। অথানুবাসনং স্নেহবস্তিধূপনয়োরপীতি মেদিনী॥ দ্বিধা-বস্তিঃ পরিজ্ঞেয়ো নিরূহশ্চানুবাসনং। কষায়াদ্যৈর্নিরূহঃ স্যাৎ স্নেহাদ্যৈরনুবাসনং॥ ইতি বৈদ্যকং॥

অনুবৃত্তিঃ (স্ত্রী) অনুবর্ত্তনং। অনুরোধঃ। ইতি হেমচন্দ্রঃ॥ ব্যাকরণমতে পূর্ব্বসূত্রস্থিতপদস্য পরসূত্রেষূপস্থিতিঃ। তৎপর্য্যায়ঃ। অধিকারঃ২। সা ত্রিবিধা যথা। সিংহাবলোকিতাখ্যশ্চ মণ্ডূকপ্লুতিরেব চ। গঙ্গাস্রোত ইতি খ্যাতঃ অধিকারাস্ত্রয়ো মতাঃ॥ সিংহাবলোকিতো যথা। বাবগোর্দান্তে ইত্যস্মাৎ দান্ত ইতি পদস্য ঋক্যগিত্যন্তেষূপস্থিতিঃ॥ মণ্ডূকপ্লুতির্যথা। টা ভিস্ ঙে ঙসীত্যস্মাৎ অত ইতি পদস্য আক্তিমভবীত্যত্রোপস্থিতিঃ॥ গঙ্গাস্রোতো যথা। লেঃ সি ঔ জসিত্যস্মাৎ লেরিতি পদস্য তদ্ধিতপর্য্যন্তেষূপস্থিতিঃ॥ ইতি মুগ্ধবোধটীকায়াং দুর্গাদাসঃ॥

অনুব্রজনং (ক্লী) অনুব্রজ্যা। গৃহাগতানাং শিষ্টানাং গমনসময়ে কিয়দ্দূরপর্য্যন্তপশ্চাদ্গমনরূপশিষ্টাচারঃ। আগ বাড়ান। অনুবর্জান ইতি ভাষা। যথা। আয়ান্তমগ্রতো গচ্ছেৎ গচ্ছন্তং তমনুব্রজেৎ। ইতি তন্ত্রসারে নিগমকল্পদ্রুমঃ॥

অনুশয়ঃ (পুং) দীর্ঘদ্বেষঃ। পূর্ব্ববৈরতা। অনুতাপঃ। ইত্যমরঃ॥ দ্বেষঃ। অনুবন্ধঃ। ইতি মেদিনী॥

অনুশয়ানা (স্ত্রী) পরকীয়ান্তর্গতনায়িকাভেদঃ। তস্যা লক্ষণং। ইষ্টহানিজনিতানুতাপবতী। সা ত্রিধা। বর্ত্তমানসঙ্কেতস্থানবিঘট্টনেন ১ ভাবিসঙ্কেতস্থানাভাবশঙ্কয়া ২ স্বানধিষ্ঠিতসঙ্কেতস্থানে ভর্ত্তুর্গমনানুমানেন ৩। ইতি রসমঞ্জরী॥

অনুশয়ী (স্ত্রী) ক্ষুদ্ররোগান্তর্গতপাদরোগবিশেষঃ। তস্য লক্ষণং। যথা। গম্ভীরামল্পসংরম্ভাং সবর্ণামুপরিস্থিতাং। পাদস্যানুশয়ীং তান্তু বিদ্যাদন্তঃপ্রপাকিনীং॥ ইতি মাধবকরঃ॥ তচ্চিকিৎসা যথা। হরেদনুশয়ীং বৈদ্যঃ ক্রিয়য়া শ্লেষ্মবিদ্রধেঃ। ইতি ভাবপ্রকাশঃ॥

অনুশয়ী [ন্] (ত্রি) দণ্ডবৎপ্রণামৈশ্চরণমূলে শেতে যঃ। যথা। যং সংপদ্য জহাত্যজামনুশয়ী সুপ্তঃ কুলায়ং যথা। ইতি শ্রীভাগবতং॥

অনুশরঃ (পুং) রাক্ষসঃ। ইতি শব্দমালা॥

অনুশাসনং (ক্লী) আদেশঃ। আজ্ঞা। যথা। ইত্যেতে ব্রহ্মণঃ পুত্রা আশ্রুত্যাত্মানুশাসনং। ইতি শ্রীভাগবতং॥ ব্যুৎপাদনং। যথা নামলিঙ্গানুশাসনমিত্যমরঃ॥

অনুশীলনং (ক্লী) পুনঃপুনরভ্যাসঃ। মুহুঃ সেবনং। যথা। আনুকূল্যেন কৃষ্ণানুশীলনং ভক্তিরুত্তমা। ইতি ভক্তিরসামৃতসিন্ধুঃ॥

অনুশোচনং (ক্লী) অনুশোচনা। তৎপর্য্যায়ঃ। মন্যুঃ২ শোকঃ৩ শুক্ ৪। ইতি জটাধরঃ॥

অনুষঙ্গঃ (পুং) কারুণ্যং। দয়া। ইতি হলায়ুধঃ॥

একত্রান্বিতপদস্যান্যত্রান্বয়ঃ। যথা। কোযো বলঞ্চাপহৃতমিত্যাদৌ বলান্বিতাপহৃতস্য কোষেঽন্বয়ঃ ॥ ন্যায়ে উপনয়স্থায়ম্পদস্য নিগমনেঽনুষঙ্গঃ। যথা। বহ্নিব্যাপ্যধূমবাং-শ্চায়ং তস্মাদ্বহ্নিমান্। প্রসঙ্গঃ। অন্যো-দ্দেশে প্রবৃত্তাবন্যস্যাপি সিদ্ধিঃ। যথা। নিত্যক্রিয়াং তথা চান্যে হ্যনুষঙ্গফলাং শ্রুতিং। ইতি স্মৃতিঃ ॥

অনুষ্টুপ্ [ভ্] (স্ত্রী) সরস্বতী। ইতি শব্দরত্না-বলী॥ অষ্টাক্ষরপদং ছন্দঃ। সা তু সমার্দ্ধ-সমবিষমবৃত্তভেদেন ত্রিধা তত্র শেষস্য প্রায়িকপ্রয়োগঃ। তস্য লক্ষণং। পঞ্চমং লঘু সর্ব্বত্র সপ্তমং দ্বিচতুর্থয়োঃ। গুরুষষ্ঠস্তু পাদানাং শেষেষ্বনিয়মো মতঃ ॥ ইতি ছন্দোমঞ্জরী ॥ অস্যাঃ প্রস্তারাঃ ২৫৬। ইতি পিঙ্গলঃ ॥

অনুষ্ঠানং (ক্লী) কর্ম্মারম্ভঃ। করণং। যথা। কৃতা শ্রীভবদেবেন কর্ম্মানুষ্ঠানপদ্ধতী ॥

অনুষ্ণং (ক্লী) উৎপলং। ইতি রাজনির্ঘণ্টঃ ॥

অনুষ্ণঃ (ত্রি) অলসঃ। ইত্যমরঃ॥ উষ্ণভিন্নঃ। শীতলঃ। বহুব্রীহৌ তু অত্যুষ্ণঃ ॥

অনুষ্ণবল্লিকা (স্ত্রী) নীলদূর্ব্বা। ইতি রাজ-নির্ঘণ্টঃ ॥

অনুসন্ধানং (ক্লী) অন্বেষণং। চেষ্টা। ইত্যাদি কাব্যানুসন্ধানবলাদিতি কাব্যপ্রকাশঃ ॥

অনুসারঃ (পুং) অনুসরণং। অনুযানং। অনুক্রমঃ। যথা। অথ লৌহবিধিং বক্ষ্যে লৌহশাস্ত্রানুসারতঃ। ইতি বৈদ্যকসুখ-বোধঃ ॥

অনুহারঃ (পুং) অনুকারঃ। সদৃশীকরণং। সদৃশরূপবেশভাষাদ্যাবিষ্করণং। ইত্যমরঃ॥ উপমা। ইতি হেমচন্দ্রঃ ॥

অনূক্ষণং (ক্লী) প্রতিক্ষণং। সর্ব্বদা। অনব-রতং। ক্ষণশব্দস্য বীপ্সার্থানুপসর্গেণা-ব্যয়ীভাবসমাসঃ ॥

অনূকং (ক্লী) কুলং। বংশঃ। শীলং। স্বভাবঃ। ইতি মেদিনী ॥

অনূকঃ (পুং) গতজন্ম। পূর্ব্বজন্ম। ইতি মেদিনী ॥

অনূচানঃ (পুং) সাঙ্গবেদবিচক্ষণঃ। শিক্ষাদি-ষড়ঙ্গসহিতবেদবেত্তা। ইত্যমরঃ ॥

অনূচানঃ (ত্রি) বিনীতঃ। সবিনয়ঃ। ইতি মেদিনী॥

অনূঢ়ঃ (ত্রি) অবিবাহিতঃ। আইবড় ইতি ভাষা। যথা। পরিবেত্তানুজোঽনূঢ়ে জ্যেষ্ঠে দারপরিগ্রহাৎ। ইত্যমরঃ ॥

অনূদ্যং (ত্রি) অনুবাদ্যং। অনুবদনীয়ং। অবদনীয়ে হ্রস্বমধ্যং। ইতি সংক্ষিপ্তসার-ব্যাকরণং

অনূনং (ত্রি) অখণ্ডং। সমগ্রং। পূর্ণং। ইতি জটাধরঃ ॥

অনূনকং (ত্রি) সকলং। পূর্ণং। অখণ্ডং। ইত্যমরঃ ॥

অনূপং (ত্রি) জলবহুলদেশঃ। জলপ্লাবিত-স্থানং। তৎপর্য্যায়ঃ। জলপ্রায়ং ২। ইত্য-মরঃ॥ অস্য গুণাঃ। শীতলত্বং। স্নিগ্ধত্বং। বাতশ্লেষ্মকারিত্বং। গুরুত্বঞ্চ। ইতি রাজ-বল্লভঃ ॥ এতদ্দেশীয়জলগুণাঃ। গুরুত্বং। ঘনত্বং। পিচ্ছিলত্বং। মধুরত্বং। শ্লেষ্ম-জনকত্বং। স্নিগ্ধত্বং। অগ্নিনাশিত্বং। প্রমেহ-গলগণ্ডশ্লীপদচ্ছর্দ্দিপ্রভৃতিরোগকারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

অনূপঃ ( পুং ) মহিষঃ। ইতি ত্রিকাণ্ডশেষঃ॥

অনূপজং (ক্লী) আর্দ্রকং। ইতি রাজনির্ঘণ্টঃ॥

অনূপদেশঃ (পুং) জলপ্রায়দেশঃ। তস্য লক্ষণং যথা। নদীপল্বলশৈলাদ্যফুল্লোৎপলকুলৈর্যুতঃ। হংসসারসকারণ্ডচক্রবাকাদিসেবিতঃ॥ সরোবরাহমহিষরুরুরোহিকুলাকুলঃ। প্রভূতক্রমমুখ্যাঢ্যো নানাশস্যফলান্বিতঃ॥ অনেকশালিকেদারকদলীক্ষুবিভূষিতঃ। অনূপদেশো জ্ঞাতব্যো বাতশ্লেষ্মময়ার্ত্তিমান্॥ ইতি ভাবপ্রকাশঃ॥

অনূরুঃ ( পুং ) সূর্য্যসারথিঃ। অরুণঃ। ইত্যমরঃ॥

অনূরুসারথিঃ ( পুং ) সূর্য্যঃ। যথা। গতং তিরশ্চীনমনূরুসারথেঃ। ইতি মাঘঃ॥

অনৃজুঃ ( ত্রি ) অসরলঃ। শঠঃ। ইত্যমরঃ॥

অনৃণী [ ন্ ] ( ত্রি ) অঋণী। অধারী। যথা। একমপ্যক্ষরং যস্তু গুরুঃ শিষ্যে নিবেদয়েৎ। পৃথিব্যাং নাস্তি তদ্দ্রব্যং যদ্দত্ত্বা সোঽনৃণী ভবেৎ॥ ইত্যাহ্নিকতত্ত্বং॥ ঋণাভাববিশিষ্টঃ। যথা। যক্ষ উবাচ। কো মোদতে কিমাশ্চর্য্যং কঃ পন্থাঃ কা চ বার্ত্তিকা। বদ মে চতুরঃ প্রশ্নান্ মৃতা জীবন্তু বান্ধবাঃ॥ উবাচ। পঞ্চমেঽহনি ষষ্ঠে বা শাকং পচতি স্বে গৃহে। অনৃণী চাপ্রবাসী চ স বারিচর মোদতে॥ অহন্যহনি ভূতানি গচ্ছন্তীহ যমালয়ে। শেষাঃ স্থিরত্বমিচ্ছন্তি কিমাশ্চর্য্যমতঃ পরং॥ তর্কোঽপ্রতিষ্ঠঃ শ্রুতয়ো বিভিন্না নৈকো মুনির্যস্য মতং প্রমাণং। ধর্ম্মস্য তত্ত্বং নিহিতং গুহায়াং মহাজনো যেন গতঃ স পন্থাঃ॥ অস্মিন্ মহামোহময়ে কটাহে সূর্য্যাগ্নিনা রাত্রিদিবেন্ধনেন। মাসর্ত্তুদর্ব্বীপরিঘট্টনেন ভূতানি কালঃ পচতীহ বার্ত্তা॥ ইতি মুদ্রাঙ্কিতমহাভারতে বনপর্ব্বণি ৩১২ অধ্যায়ঃ॥ অপি চ। দেবানামনৃণী জন্তুর্যজ্ঞৈর্ভবতি মানবঃ। ইত্যাদি শুদ্ধিতত্ত্বং॥

অনৃতং ( ক্লী ) কৃষিঃ। মিথ্যা। ইত্যমরঃ॥ বিবাহাদিপঞ্চকেষ্বনৃতকথনং ন পাপজনকং। যথা। বিবাহকালে রতিসংপ্রয়োগে প্রাণাত্যয়ে সর্ব্বধনাপহারে। বিপ্রস্য চার্থে হ্যনৃতং বদেত পঞ্চানৃতান্যাহুরপাতকানি॥ ইতি মহাভারতে কর্ণপর্ব্বণি অর্জ্জুনং প্রতি শ্রীকৃষ্ণবচনং॥

অনেকং ( ত্রি ) একত্বাতিরিক্তসংখ্যানং তদ্বিশিষ্টঞ্চ। বহু। যথা। অনেকরাজন্যরথাশ্বসঙ্কুলং। ইতি ভারবিঃ॥

অনেকজঃ ( পুং ) পক্ষী। ইতি ত্রিকাণ্ডশেষঃ॥ বহুজাতে ত্রি॥

অনেকধা ব্য অনেকপ্রকারং। বহুধা। যথা পাটীসূত্রোপমং বীজং গূঢ়মিত্যবভাষতে। নাস্তি গূঢ়মগূঢ়ানাং নৈব ষোঢ়েত্যনেকধা॥ ইতি লীলাবতী॥ অনেকবারার্থেঽপি কচিৎ প্রয়োগঃ॥

অনেকপঃ ( পুং স্ত্রী ) হস্তী। ইত্যমরঃ॥

অনেকাশ্রিতগুণঃ ( পুং ) বহুনিষ্ঠগুণঃ। তদ্যথা। সংযোগঃ১ বিভাগঃ২ দ্বিপৃথক্ত্বাদিঃ৩ একত্বান্যসংখ্যা৪। ইতি সিদ্ধান্তমুক্তাবলী॥

অনেড়মূকঃ ( ত্রি ) ধূর্ত্তঃ। শঠঃ। শ্রুতিবাগ্বিহীনঃ। কালা বোবা ইতি ভাষা। ইতি মেদিনী॥

অনেহাঃ [ স্ ] ( পুং ) কালঃ। সময়ঃ। ইত্যমরঃ॥

অনৈক্যং (ক্লী) ঐক্যাভাবঃ। অনেকতা। একস্য ভাব ঐক্যং পশ্চান্নঞ্সমাসঃ॥

অনো ব্য নিষেধার্থঃ। অভাবঃ। না। ইত্যমরটীকায়াং নীলকণ্ঠঃ॥

অনোকহঃ (পুং) বৃক্ষঃ। ইত্যমরঃ॥

অন্চ উ গতিপূজনয়োঃ। ইতি মুগ্ধবোধে বোপদেবঃ॥

অন্চ উ গমনে। শ্লিষ্টোক্তৌ। ইতি কবিকল্পদ্রুমঃ॥ উ অঞ্চিত্বা অক্ত্বা। শ্লিষ্টোক্তিরব্যক্তশব্দঃ। ইতি দুর্গাদাসঃ॥

অন্চ ক ব্যক্তৌ। ইতি কবিকল্পদ্রুমঃ॥ ব্যক্তিরিহ বিশেষণং। ক অঞ্চয়তি বুদ্ধিং সুধীঃ। বিশিনষ্টীত্যর্থঃ। ইতি দুর্গাদাসঃ॥

অন্জ উ ধ ঞি ব্যক্তৌ। গতৌ। ম্রক্ষণে। ইতি কবিকল্পদ্রুমঃ॥ উ অঞ্জিষ্যতি অঙ্ক্ষ্যতি। ধ অনক্তি। ঞি অক্তোঽস্তি। ব্যক্তিঃ স্ফুটীকরণং। শরীরভাজাং ভবদীয়দর্শনং ব্যনক্তি কালত্রিতয়েঽপি যোগ্যতাং। ইতি মাঘঃ॥ অনক্তি গাত্রং তৈলেন জনঃ। ইতি দুর্গাদাসঃ॥

অন্তং (ক্লী) স্বরূপং। স্বভাবঃ। ইতি মেদিনী ত্রিকাণ্ডশেষশ্চ॥

অন্তং (ক্লী পুং) শেষঃ। ইতি মেদিনী॥ তৎপর্য্যায়ঃ। জঘন্যং ২ চরমং ৩ অন্ত্যং ৪ পাশ্চাত্যং ৫ পশ্চিমং ৬। ইত্যমরঃ॥

অন্তঃ (পুং) নাশঃ। ইত্যমরঃ॥ স্বরূপঃ। প্রান্তঃ। সীমা। নিশ্চয়ঃ। অবয়বঃ। ইতি হেমচন্দ্রঃ॥

অন্তঃ (ত্রি) অন্তিকঃ। নিকটঃ। ইতি মেদিনী॥ অতিমনোহরঃ। ইতি বিশ্বঃ॥

অন্তঃকরণং (ক্লী) অন্তরিন্দ্রিয়ং। ধীন্দ্রিয়ং। তৎপর্য্যায়ঃ। মনঃ ২ নিগুঃ ৩। ইতি ত্রিকাণ্ডশেষঃ॥ অস্য কার্য্যভেদান্নামচতুষ্টয়ং যথা। মনো বুদ্ধিরহঙ্কারশ্চিত্তং করণমান্তরং। সংশয়ো নিশ্চয়ো গর্ব্বঃ স্মরণং বিষয়া অমী॥ ইতি বেদান্তঃ॥

অন্তঃকুটিলঃ (পুং) শঙ্খঃ। ইতি রাজনির্ঘণ্টঃ॥ কুটিলান্তঃকরণে ত্রি॥

অন্তঃপুরং (ক্লী) রাজ্ঞাং স্ত্রীগৃহং। তৎপর্য্যায়ঃ। অবরোধনং ২ অবরোধঃ ৩ শুদ্ধান্তঃ ৪। ইত্যমরঃ॥ অন্তঃপুরাদয়ো রাজদারেষপি তাৎস্থ্যাৎ বর্ত্তন্তে। যথা। শুদ্ধান্তসম্ভোগনিতান্ততুষ্টে। ইতি নৈষধং। ইতি ভরতঃ॥ দাক্ষিণ্যেন দদাতি বাচমুচিতামন্তঃপুরেভ্যো যদা। ইত্যভিজ্ঞানশকুন্তলা॥

অন্তঃপুরাধ্যক্ষঃ (পুং) রাজ্ঞামন্তঃপুররক্ষকঃ। তল্লক্ষণং যথা। বৃদ্ধঃ কুলোদ্গতঃ শক্তঃ পিতৃপৈতামহঃ শুচিঃ। রাজ্ঞামন্তঃপুরাধ্যক্ষো বিনীতশ্চ তথেষ্যতে॥ ইতি যুক্তিকল্পতরুঃ॥

অন্তঃসত্ত্বা (স্ত্রী) ভল্লাতকঃ। ইতি শব্দচন্দ্রিকা॥ গর্ভবতী। অন্তরুদরমধ্যে সত্ত্বং প্রাণী যস্যাঃ সা॥

অন্তঃস্বেদঃ (পুং) হস্তী। ইতি ত্রিকাণ্ডশেষঃ॥

অন্তকঃ (পুং) যমঃ। ইত্যমরঃ॥

অন্তগঃ (ত্রি) অন্তগামী। পারগঃ। যথা। বেদান্তগো ব্রাহ্মণঃ স্যাৎ ক্ষত্রিয়ো বিজয়ী ভবেৎ। ইতি মহাভারতে বিষ্ণুসহস্রনামফলং॥ মৃতঃ। অন্তং নাশং গচ্ছতীতি॥

অন্ততঃ [ স্ ] ব্য সম্ভাবনা। অবয়বঃ। পক্ষ্যর্থং। শাসনং। ইতি বিশ্বঃ॥

অন্তর্ ব্য মধ্যং। প্রান্তং। স্বীকারঃ। ইতি বিশ্বঃ॥

অন্তরং (ক্লী) অবকাশঃ। অবধিঃ। পরিধানং। অন্তর্ধানং। ভেদঃ। তাদর্থ্যং। অবসরঃ। মধ্যং। অন্তরাত্মা। ছিদ্রং। আত্মীয়ঃ। বিনা। বহিঃ। ইত্যমরঃ॥ সদৃশঃ। ইতি তট্টীকা মেদিনী চ॥ *॥ অবকাশে যথা। মৃণালসূত্রান্তরমপ্যলভ্যং। ইতি কুমারসম্ভবঃ॥ অবধৌ যথা। নিরন্তরাভ্যন্তরবাতবৃষ্টিষু॥ পরিধানে যথা। অন্তরে শাটকাঃ পরিধানীয়া ইত্যর্থঃ॥ অন্তর্দ্ধৌ যথা। পর্ব্বতান্তরিতো রবিঃ॥ ভেদে যথা। যদন্তরং সর্ষপশৈলরাজয়োর্যদন্তরং বায়সবৈনতেয়য়োঃ। ইতি রামায়ণং॥ তাদর্থ্যে যথা। ত্বামন্তরেণ ঋণং গৃহীতং ত্বদর্থমিত্যর্থঃ॥ ছিদ্রে যথা। প্রহরেদন্তরে রিপুং॥ আত্মীয়ে যথা। অয়মত্যন্তরো মম॥ বিনার্থে যথা। হরে ত্বদালোকনমন্তরেণ॥ বহিরর্থে যথা। অন্তরে চণ্ডালগৃহা বাহ্যা ইত্যর্থঃ॥ অবসরে যথা। অত্রান্তরে চ কুলটা কুলবর্ত্মপাতেত্যাদি॥ মধ্যে যথা। আবয়োরন্তরে জাতাঃ পর্ব্বতাঃ পরিতো ক্রমাঃ॥ সদৃশে যথা। হকারস্য ঘকারোঽন্তরতমঃ। ইতি ভরতঃ॥

অন্তরঙ্গঃ ( ত্রি ) আত্মীয়ঃ। স্বসম্পর্কঃ। যথা। চরমগিরিকুরঙ্গী শৃঙ্গকণ্ডূয়নেন স্বপিতি সুখমিদানীমন্তরঙ্গঃ কুরঙ্গঃ। ইতি কালিদাসঃ॥

অন্তরা ব্য বর্জ্জনং। বিনা। মধ্যং। নিকটং। ইতি মেদিনী॥

অন্তরাপত্যা ( স্ত্রী ) গর্ব্ভিণী। অন্তরে উদরমধ্যে অপত্যং যস্যাঃ সা॥

অন্তরায়ঃ ( পুং ) বিঘ্নঃ। ইত্যমরঃ॥

অন্তরালং ( ক্লী ) মধ্যপ্রদেশঃ। অভ্যন্তরং ইত্যমরঃ॥

অন্তরালকং ( ক্লী ) অভ্যন্তরং। ইতি রাজনির্ঘণ্টঃ॥

অন্তরিতং (ত্রি) অন্তর্দ্ধানপ্রাপ্তং। ব্যবহিত। তৎপর্য্যায়ঃ। প্রস্তৃতং ২। ইতি ত্রিকাণ্ডশেষঃ॥ ব্যবকলিতাঙ্কঃ। বাকি ইতি ভাষা। ইতি লীলাবতী॥

অন্তরিক্ষং ( ক্লী ) অন্তরীক্ষং। আকাশং। ইতি ছান্দসং। ইত্যমরটীকায়াং পুরুষোত্তমজাতরূপস্বভূতিরায়াদয়ঃ॥

অন্তরীপং ( ক্লী পুং ) দ্বীপং। ইত্যমরঃ॥

অন্তরীয়ং ( ক্লী ) অধোবস্ত্রং। পরিধানবস্ত্রং ইত্যমরঃ॥

অন্তরীক্ষং ( ক্লী ) গগনং। ইত্যমরঃ॥ অভ্রকধাতুঃ। ইতি রাজনির্ঘণ্টঃ॥

অন্তরীক্ষজলং ( ক্লী ) আকাশজলং। দিব্যোদকং। ইতি রাজনির্ঘণ্টঃ॥

অন্তরে ব্য মধ্যং। অভ্যন্তরং। ইত্যমরঃ॥

অন্তরেণ ব্য মধ্যং। বিনা। ব্যতিরেকঃ। ইত্যমরঃ॥

অন্তর্গড়ুঃ ( ত্রি ) নিরর্থকঃ। বৃথা। ইতি হেমচন্দ্রঃ

অন্তর্গতং ( ত্রি ) বিস্মৃতং। মধ্যপ্রাপ্তং। ইতি হেমচন্দ্রঃ॥

অন্তর্গৃহং (ক্লী) গৃহমধ্যং। ঘরের ভিতর ইতি ভাষা। ইতি নানার্থকোষ্ঠশব্দার্থে অমরঃ॥

অন্তর্জঠরং (ক্লী) কুক্ষিমধ্যং। কোষ্ঠং। ইত্যমরঃ॥

অন্তর্দধনং (ক্লী) সুরাবীজং। ইতি শব্দচন্দ্রিকা॥

অন্তর্দাহঃ (পুং) কোষ্ঠসন্তাপঃ। শরীরাভ্যন্তরজ্বালা। ইতি রাজনির্ঘণ্টঃ॥

অন্তর্দ্ধা (স্ত্রী) অন্তর্দ্ধানং। ইত্যমরঃ॥

অন্তর্দ্ধানং (ক্লী) আচ্ছাদনং। ইতি শব্দরত্নাবলী॥ তৎপর্য্যায়ঃ। অন্তর্দ্ধা২ ব্যবধা.৩ অন্তর্দ্ধিঃ৪ অপবারণং ৫ অপিধানং ৬ তিরোধানং ৭ পিধানং ৮ ছদনং ৯। ইত্যমরঃ॥

অন্তর্দ্ধিঃ (পুং) অন্তর্দ্ধানং। ইত্যমরঃ॥

অন্তর্দ্বারং (ক্লী) প্রকোষ্ঠদ্বারং। ইতি ভরতঃ॥ গৃহাভ্যন্তরদ্বারং। গৃহাভ্যন্তরপ্রকোষ্ঠাদিদ্বারং জালদ্বারং বা। ইতি স্বামী॥ তৎপর্য্যায়ঃ। প্রচ্ছন্নং ২। ইত্যমরঃ॥ পক্ষদ্বারং খড়্কিকাদ্বারং। যথা। প্রচ্ছন্নমন্তর্দ্বারঞ্চ পক্ষদ্বারং তদুচ্যতে। ইতি শবরস্বামী॥

অন্তর্ভূতঃ (ত্রি) গুণীভূতঃ। অন্তঃস্থঃ। অন্তরস্থঃ। অন্তর্গতঃ। যথা। স এব ভগবান্ বিষ্ণুরন্তর্ভূতঃ সনাতনঃ। ইতি পদ্মপুরাণে মাঘমাহাত্ম্যং॥

অন্তর্ম্মনাঃ [স্] (ত্রি) দুর্ম্মনাঃ। বিমনাঃ। ব্যাকুলচেতাঃ। ইত্যমরঃ॥

অন্তর্যামী [ন্] (পুং) অন্তঃকরণনিয়ামকঃ। তৎপর্য্যায়ঃ। আত্মা ২ জীবঃ ৩ পুরুষঃ ৪ পুদ্গলঃ ৫ ঈশ্বরঃ ৬। ইতি ত্রিকাণ্ডশেষঃ॥ বিশুদ্ধসত্বপ্রধানাজ্ঞানোপহিতচৈতন্যং। ইতি বেদান্তসারঃ॥ মনোগতজ্ঞে ত্রি॥

অন্তর্বংশিকঃ (পুং) অন্তঃপুরাধিকৃতঃ। অন্তঃপুরাধ্যক্ষঃ। ইত্যমরঃ॥

অন্তর্বত্নী (স্ত্রী) গর্ব্বিণী। ইত্যমরঃ॥

অন্তর্ব্বমিঃ (পুং) অপাকঃ। অজীর্ণঃ। ইতি ত্রিকাণ্ডশেষঃ॥

অন্তর্ব্বাণিঃ (ত্রি) শাস্ত্রবিৎ। শাস্ত্রজ্ঞঃ। ইত্যমরঃ॥

অন্তর্ব্বিগাহনং (ক্লী) প্রবেশনং। ইতি হেমচন্দ্রঃ॥

অন্তর্ব্বেদী (স্ত্রী) ব্রহ্মাবর্ত্তদেশঃ। গঙ্গাযমুনয়োর্ম্মধ্যদেশঃ। আপ্রয়াগহরিদ্বারপর্য্যন্তদেশঃ। দোয়াব ইতি পশ্চিমদেশে খ্যাতা। তৎপর্য্যায়ঃ। শশস্থলী ২। ইতি ত্রিকাণ্ডশেষঃ॥

অন্তর্হাসঃ (পুং) অব্যক্তহাসঃ। গূঢ়হাস্যং। তৎপর্য্যায়ঃ। উদ্বর্দ্ধনং ২। ইতি ত্রিকাণ্ডশেষঃ॥ তদ্বতি ত্রি॥

অন্তর্হিতং (ত্রি) লুক্কায়িতং। গুপ্তং। পর্য্যায়ঃ। সংবীতং ২ রুদ্ধং ৩ আবৃতং ৪ সংবৃতং ৫ পিহিতং ৬ ছন্নং ৭ স্থগিতং ৮ অপবারিতং ৯ তিরোধানং ১০। ইতি হেমচন্দ্রঃ॥

অন্তেবাসী [ন্] (পুং) অন্তেবাসী। শিষ্যঃ। ইত্যমরটীকায়াং ভরতঃ॥

অন্তশয্যা (স্ত্রী) ভূমিশয্যা। মৃত্যুঃ। শ্মশানং। ইতি মেদিনী॥

অন্ত্যাবশায়ী [ন্] (পুং) চণ্ডালঃ। মুনিবিশেষঃ। ইতি হেমচন্দ্রঃ॥ নাপিতঃ। ইত্যমরঃ॥

অস্তিঃ (স্ত্রী) নাট্যোক্তৌ জ্যেষ্ঠা ভগিনী।

ইতি শব্দরত্নাবলী ॥ সমীপে ব্য। যথা। মুগ্ধপ্রভীতবচ্ছপেয়ুরন্তিমাত্রোঃ। ইতি ।ভাগবত

অন্তিকং (ত্রি) নিকটং। ইত্যমরঃ ॥ সামীপ্যে ক্লী। ইতি ধরণী ॥

অন্তিকতমঃ (ত্রি) অতিনিকটঃ। তৎপর্য্যায়ঃ। নেদিষ্ঠঃ ২। ইত্যমরঃ ॥ নেদীয়ান্ ৩ অন্তিতমঃ ৪। ইতি জটাধরঃ ॥

অন্তিকা (স্ত্রী) নাট্যোক্তৌ জ্যেষ্ঠা ভগিনী। ইত্যমরঃ ॥ তৎপর্য্যায়ঃ। অত্তিকা ২ অর্ত্তিকা ৩। ইতি তট্টীকা ॥ চুল্লী। শাতলা-নামৌষধং। চামারকষা ইতি খ্যাতা। ইতি মেদিনী ॥

অন্তিকাশ্রয়ঃ (পুং) নিকটাশ্রয়ঃ। সমীপস্থাবলম্বনং। তৎপর্য্যায়ঃ। উপঘ্নঃ ২। ইত্যমরঃ ॥

অন্তিমঃ (ত্রি) অন্তে ভবঃ। চরমঃ। অন্ত্যঃ। ইতি জটাধরঃ ॥ অতিনিকটঃ। ইত্যমরটীকায়াং নীলকণ্ঠঃ ॥

অন্তেবাসী [ন্] (পুং) শিষ্যঃ। চণ্ডালঃ। ইত্যমরঃ ॥ প্রান্তস্থায়িনি ত্রি। ইতি বিশ্বঃ ॥

অন্ত্যং (ক্লী) দশসাগরসংখ্যা। সহস্রলক্ষকোটিঃ। ইতি লীলাবতী ॥ দ্বাদশলগ্নং। ইতি জ্যোতিষং ॥

অন্ত্যঃ (ত্রি) অন্তে ভবঃ। শেষোৎপন্নঃ। অধমঃ। জঘন্যঃ। ইতি মেদিনী ॥

অন্ত্যঃ (পুং) মুস্তা। মুতা ঘাস ইতি ভাষা। ইতি মেদিনী ॥ ম্লেচ্ছঃ। ইতি প্রায়শ্চিত্ততত্ত্বং ॥

অন্ত্যজঃ (পুং স্ত্রী) শূদ্রঃ। ইতি হলায়ুধঃ ॥ রজকাদিসপ্তজাতয়ঃ। যথা। রজকশ্চর্ম্মকারশ্চ নটো বরুড় এব চ। কৈবর্ত্তমেদভিল্লাশ্চ সপ্তৈতে অন্ত্যজাঃ স্মৃতাঃ ॥ ইতি যমবচনং ॥ জঘন্যজে ত্রি ॥

অন্ত্যজন্মা [ন্] (পুং স্ত্রী) চতুর্থবর্ণঃ। শূদ্রঃ। ইতি শব্দরত্নাবলী ॥

অন্ত্যজাতিঃ (পুং) চাণ্ডালাদিঃ। যথাপস্তম্বঃ। অন্ত্যজাতিরবিজ্ঞাতো নিবসেদ্যস্য বেশ্মনি। স বৈ জ্ঞাত্বা তু কালেন কুর্য্যাত্তত্র বিশোধনং ॥ চান্দ্রায়ণং পরাকো বা দ্বিজাতীনাং বিশোধনং। প্রাজাপত্যস্তু শূদ্রাণাং তথা সংসর্গদূষণে ॥ যৈস্তত্র ভুক্তং পক্কান্নং কৃচ্ছ্রং তেষাং বিনির্দ্দিশেৎ। তেষামপি চ যৈর্ভুক্তং তেষামর্দ্ধং বিধীয়তে ॥ তেষামপি চ যৈর্ভুক্তং কৃচ্ছ্রপাদো বিধীয়তে। ইতি প্রায়শ্চিত্ততত্ত্বং ॥

অন্ত্যভং (ক্লী) রেবতীনক্ষত্রং। মীনরাশিঃ। ইতি জ্যোতিষং ॥

অন্ত্যবর্ণঃ (পুং স্ত্রী) শূদ্রঃ। ইতি হেমচন্দ্রঃ ॥

অন্ত্যাবসায়ী [ন্] (পুং স্ত্রী) চাণ্ডালাদিসপ্তজাতয়ঃ। যথা চাণ্ডালঃ শ্বপচঃ ক্ষত্তা সূতো বৈদেহকস্তথা। মাগধায়োগবৌ চৈব সপ্তৈতেঽন্ত্যাবসায়িনঃ ॥ ইতি অঙ্গিরাঃ ॥

অন্ত্যেষ্টিঃ (স্ত্রী) চরমসংস্কারঃ। স তু শবদাহাদিরূপঃ। যথা। সপিণ্ডাদিভিদাশৌচসংক্ষেপোঽন্ত্যেষ্টিপদ্ধতিঃ। ইতি শুদ্ধিতত্ত্বপ্রতিজ্ঞায়াং স্মার্ত্তভট্টাচার্য্যঃ ॥ তৎপ্রয়োগো দাহশব্দে দ্রষ্টব্যঃ ॥ তদনন্তরং পূরকপিণ্ডপ্রমাণং পিণ্ডশব্দে দ্রষ্টব্যং ॥ তস্য প্রয়োগোঽত্র লিখ্যতে। ততঃ পিণ্ডদানং তত্র ক্রমঃ। তণ্ডুলপ্রসৃতিদ্বয়ং দ্বিঃ প্রক্ষাল্য ঐশান্যাং দিশি সুস্বিন্নং পচেৎ। ততঃ পবিত্রপাণিঃ

প্রাচীনাবীতী পাতিতবামজানুর্দক্ষিণামুখো হস্তপ্রমাণাং চতুরঙ্গুলোচ্ছ্রায়াং দক্ষিণপ্লবাং পিণ্ডিকাং কৃত্বা তদুপরি রেখাং কৃত্বা দর্ভানাস্তীর্য্য তিলান্ প্রক্ষিপ্য। ওম্ অমুকগোত্র প্রেতামুকদেবশর্ম্মন্নবনেনিক্ষ্ব ইত্যাস্তীর্ণকুশোপরি সতিলজলেনাবনেজয়েৎ। ততস্তিলমধুঘৃতাদিমিশ্রং তণ্ডুপিণ্ডং গৃহীত্বা অদ্যামুকগোত্রস্য প্রেতস্যামুকদেবশর্ম্মণঃ এতৎ প্রথমপিণ্ডং পূরকং ইত্যবনেজনস্থানে দদ্যাৎ। ততঃ পিণ্ডপাত্রক্ষালনজলেন পুনরবনেজয়েৎ। ওম্ অমুকগোত্র প্রেতামুকদেবশর্ম্মন্নেতত্তে ঊর্ণাতন্তুময়ং বাসঃ। তত আমমৃণ্ময়পাত্রে জলাঞ্জলিং পিণ্ডসমীপে স্থাপয়েৎ। গন্ধং মাল্যঞ্চ যথাশক্তি দদ্যাৎ। বাষ্পপর্য্যন্তং পিণ্ডং পশ্যংস্তিষ্ঠেৎ। ততঃ পিণ্ডাদিকং জলে ক্ষিপেৎ। কালেঽপ্যকৃতচূড়োপনয়নানাং অনূঢ়কন্যানাঞ্চ কুশাস্তরণং বিনেতিশেষঃ। এবং কৃতচূড়ানামুপনয়নকালাৎ প্রাক্ দর্ভোপরি পিণ্ডদানং। উপনয়নকালে আগতে ত্বকৃতোপনয়নানাং দর্ভোপরি পিণ্ডদানং। এবং অষ্টবর্ষবিবাহকাল আগতে ঊঢ়স্ত্রীণাং দর্ভোপরি পিণ্ডদানং। রাত্রাবাচম্য দক্ষিণামুখঃ প্রাচীনাবীতী পাতিতবামজানুঃ ত্রিকাষ্ঠিকোপরি মৃণ্ময়পাত্রে উদকং তথা পাত্রান্তরে ক্ষীরং নিধায় প্রেতাত্র স্নাহি পিব চেদং ক্ষীরমিতি ব্রূয়াৎ। তদেকরাত্রমাবশ্যকং দশরাত্রং ফলভূয়স্ত্বার্থমিতি। দ্বিতীয়পিণ্ডাদিষু দ্বিতীয়ং পিণ্ডং পূরকং ইত্যাদিবিশেষঃ। দ্বিতীয়পিণ্ডে মৃণ্ময়পাত্রদ্বয়ে জলাঞ্জলিদ্বয়ং। তৃতীয়াদিপিণ্ডে পাত্রাদিবৃদ্ধিঃ। যেন পঞ্চপঞ্চাশৎ পাত্রাণ্যঞ্জলয়শ্চ তাবন্তি। ত্র্যহাশৌচে প্রথমদিনে পিণ্ডানাং ত্রয়ং। দ্বিতীয়দিনে চতুষ্টয়ং। তৃতীয়ে ত্রয়ং। প্রথমমেকং দ্বিতীয়ে চতুষ্টয়ং। তৃতীয়ে পঞ্চমং বা কল্পঃ। চতুরহাশৌচে প্রথমচতুর্থয়োর্দ্বৌ দ্বৌ। দ্বিতীয়তৃতীয়য়োস্ত্রয়স্ত্রয়ঃ পঞ্চাহাশৌচে তু প্রথমপঞ্চমদিনয়োরেকৈকশঃ পিণ্ডঃ। দ্বিতীয়চতুর্থয়োর্দ্বৌ দ্বৌ। তৃতীয়ে চত্বারঃ। ষড়হাশৌচে দ্বিতীয়চতুর্থদিনয়োস্ত্রয়স্ত্রয়ঃ। শেষেষ্বেকৈকঃ। সপ্তাহাশৌচে তৃতীয়চতুর্থপঞ্চমদিনেষু দ্বৌ দ্বৌ। শেষেষ্বেকৈকঃ। অষ্টাহাশৌচে চতুর্থপঞ্চমদিনয়োর্দ্বৌ দ্বৌ। শেষেষ্বেকৈকঃ। নবাহাশৌচে তু পঞ্চমদিনে দ্বৌ। শেষেষ্বেকৈকঃ। পক্ষিণীদ্ব্যহাশৌচয়োস্তু আদ্যদ্বিতীয়দিনয়োঃ পঞ্চ পঞ্চ পিণ্ডাঃ। দ্বাদশাহাদ্যশৌচে নবদিনেষু নব পিণ্ডাঃ। শেষদিনে দশমঃ। সদ্যঃশৌচৈকাহয়োরেকাহ এব দশ পিণ্ডাঃ। অশৌচান্তমধ্যে পিণ্ডো দেয়ঃ রাত্রাবপি ॥ * ॥ গঙ্গাস্বস্থিপ্রক্ষেপপ্রয়োগস্তু। ততঃ স্নাত্বাচম্য উদঙ্মুখঃ কুশত্রয়জলান্যাদায় ওম্ তৎসদিত্যুচ্চার্য্য অদ্যামুকেত্যাদি অমুকস্য এতদস্থিসমসংখ্যকবর্ষসহস্রাবচ্ছিন্নস্বর্গাধিকরণকমহীয়মানত্বকামোঽমুকস্যৈতান্যস্থিখণ্ডানি গঙ্গায়াং প্রক্ষিপামীতি সঙ্কল্প্যাপসব্যং কৃত্বাস্থীনি পঞ্চগব্যেন সিক্ত্বা হিরণ্যমধ্বাজ্যতিলৈঃ সংযোজ্য মৃত্তিকাপুটে স্থাপয়িত্বা দক্ষিণহস্তেন তৎপুটকমাদায় দক্ষিণাং দিশং

পশ্যন্ ওম্ নমোঽস্তু ধর্ম্মরাজায়েতি বদন্ জলং প্রবিশ্য স মে প্রীতো ভবত্বিত্যুক্ত্বাঞ্জলিং প্রক্ষিপেৎ। ততো মজ্জনং কৃত্বোত্থায় সূর্য্যং দৃষ্ট্বা দক্ষিণামুখস্ত্যজেৎ। ইতি শুদ্ধিতত্ত্বং ॥ * ॥ কিঞ্চ। সাতাতপঃ। জলমেকাহমাকাশে স্থাপ্যং ক্ষীরঞ্চ মৃণ্ময়ে। পারস্করঃ। মৃণ্ময়ে তাং রাত্রিং ক্ষীরোদকে বিহায়সি নিদধ্যুঃ। প্রেতাত্র স্নাহীত্যুদকং পিব চেদং ক্ষীরং। ইদং রাত্রাবিতি গৌড়াঃ। গারুড়ে তু। অপকে মৃণ্ময়ে পাত্রে দুগ্ধং দদ্যাৎ দিনত্রয়মিত্যুক্তং। হেমাদ্রৌ পাদ্মে তু দশাহমুক্তং। তস্মান্নিধেয়মাকাশে দশরাত্রং পয়োজলং। সর্ব্বতাপোপশান্ত্যর্থমধ্বশ্রমবিনাশনং ॥ দেবজ্ঞানীয়ে কারিকায়াং। তত্র প্রেতোপকৃতয়ে দশরাত্রমখণ্ডিতং। কুর্য্যাৎ প্রদীপং তৈলেন বারিপাত্রঞ্চ মার্ত্তিকং ॥ ভোজ্যাৎ ভোজনকালে তু ভক্তমুষ্টিঞ্চ নির্ব্বপেৎ। নামগোত্রেণ সম্বুধ্য ধরিত্র্যাং পিতৃযজ্ঞবৎ॥ ইতি নির্ণয়সিন্ধৌ ৫ পরিচ্ছেদঃ ॥

অন্ত্রং (ক্লী) পুরীতৎ। আঁৎড়ী আঁৎ ইতি ভাষা। ইত্যমরঃ ॥

অন্ত্রবৃদ্ধিঃ (স্ত্রী পুং) রোগবিশেষঃ। তন্নিদানাদি যথা। বাতকোপিভিরাহারৈঃ শীততোয়াবগাহনৈঃ। ধারণে রণভারাধ্ববিষমাঙ্গপ্রবর্ত্তনৈঃ॥ ক্ষোভণৈঃ ক্ষোভিতাগ্যৈশ্চ ক্ষুদ্রান্ত্রাবয়বং যদা। পবনো দ্বিগুণীকৃত্য স্বনিবেশাদধো নয়েৎ॥ কুর্য্যাদ্বংক্ষণসন্ধিস্থো গ্রন্থ্যাভং শ্বয়থুং তদা। ধারণং উপস্থিতস্য বেগস্য। ঈরণং অনুপস্থিতস্য বেগস্য প্রেরণং। বিষমাঙ্গপ্রবর্ত্তনং বক্রত্বেনাঙ্গমোটনং। অন্যানি ক্ষোভণানি চ বলবদ্বিগ্রহকঠোরধনুরাকর্ষণাদীনি। তৈঃ ক্ষোভিতঃ সংদূষ্য সঞ্চালিতঃ পবনঃ যদা ক্ষুদ্রান্ত্রাবয়বং দ্বিগুণীকৃত্য স্বনিবেশাদধো নয়েৎ। তদা বংক্ষণসন্ধিস্থঃ সন্ বংক্ষণসন্ধৌ গ্রন্থিরূপং শ্বয়থুং কুর্য্যাৎ ইত্যর্থঃ ॥ * ॥ উপেক্ষিতায়া অন্ত্রবৃদ্ধেরবস্থামাহ। উপেক্ষমাণস্য মরুদ্বিবৃদ্ধিমাধ্মানরুক্ স্তম্ভবতীঞ্চ কুর্য্যাৎ। স পীড়িতোঽন্তঃ স্বনবান্ প্রয়াতি প্রধ্মাপয়ন্নেতি পুনশ্চ মুক্তঃ ॥ উপেক্ষমাণস্য বৃদ্ধিমিত্যর্থঃ। মরুদ্বৃদ্ধিং মুষ্কবৃদ্ধিং। আধ্মানরুক্ স্তম্ভবতীং কুর্য্যাৎ। তত্রাধ্মানমুদরে রুক্ বৃষণয়োর্মুষ্কয়োঃ স্তম্ভো গাত্রে তদ্‌যুক্তাং কুর্য্যাৎ ইত্যর্থঃ। ভোজোঽপ্যাহ। অন্ত্রং দ্বিগুণমাদায় বাতো নয়তি বংক্ষণং। বংক্ষণাত্তুদ্রুজা যুক্তং ফলকোষ্যাং প্রপদ্যতে ॥ স মুষ্কবৃদ্ধিঃ। অন্তঃ উদরে প্রধ্মাপয়ন্ আগমনমার্গমুচ্ছূনং কুর্ব্বন্ এতি প্রয়াতি ॥ * ॥ অসাধ্যমাহ। যশ্চান্ত্রাবয়বল্লিষ্টাম্মুষ্কয়োর্ব্বাতসঞ্চয়াৎ। স্যাদন্ত্রবৃদ্ধিঃ সোঽসাধ্যো বাতবৃদ্ধিসমাকৃতিঃ॥ স কীদৃক্ স্যাদিত্যাকাঙ্ক্ষায়ামাহ। বাতবৃদ্ধিসমাকৃতিঃ॥*॥ সামীপ্যাদত্রৈব ব্রধ্নমাহ। অত্যভিষ্যন্দিগুর্ব্বামশুষ্কপূত্যামিষাশনাৎ। করোতি গ্রন্থিবচ্ছোথং দোষো বংক্ষণসন্ধিষু ॥ জ্বরশূলাঙ্গসাদাঢ্যং তং ব্রধ্নমিতি নির্দ্দিশেৎ ॥ * ॥ অথ বৃদ্ধেশ্চিকিৎসা। বৃদ্ধাবত্যাসনং মার্গমুপবাসং গুরূণি চ। বেগাঘাতং পৃষ্ঠযানং ব্যায়ামং মৈথুনং ত্যজেৎ॥ বাতবৃদ্ধৌ পিবেৎ

স্নিগ্ধং যথা প্রাপ্তং বিরেচনং। সক্ষীরং বা পিবেৎ তৈলংমাসমেরণ্ডসম্ভবং॥ গুগ্গুল্বে-রণ্ডজং তৈলং গোমূত্রেণ পিবেন্নরঃ। বাত-বৃদ্ধিং জয়ত্যাশু চিরকালানুবন্ধিনীং॥ পিত্তগ্রন্থিক্রমেণৈনং পিত্তবৃদ্ধিমুপাচরেৎ। জলৌকাভির্হরেদ্রক্তংবৃদ্ধৌ পিত্তসমুদ্ভবে॥ চন্দনং মধুকং পদ্মমুশীরং নীলমুৎপলং। ক্ষীরপিষ্টপ্রলেপেন দাহশোথরুজাপহং॥ ত্রিকটুঃ ত্রিফলাক্বাথং সক্ষারং লবণং পিবেৎ। বিরেচনমিদং শ্রেষ্ঠং কফবৃদ্ধি-বিনাশনং॥ লেপনং কটুতীক্ষ্ণোষ্ণং স্বেদনং রূক্ষমেব চ। পরিষেকোপনাহৌ চ সর্ব্বমুষ্ণ-মিহেষ্যতে॥ মুহুর্মুহুর্জলৌকাভিঃ শোণিতং রক্তজে হরেৎ। পিবেদ্বিরেচনং বাপি শর্করা-ক্ষৌদ্রসংযুতং॥ শীতমালেপনং সর্ব্বং সর্ব্বং পিত্তহরং তথা। পিত্তবৃদ্ধিক্রমং কুর্য্যাদামে পক্বে চ রক্তজে॥ স্বেদোমেদঃ-সমুত্থে তু লেপয়েৎ সুরসাদিনা। শিরো বিরেচনদ্রব্যৈঃ সুখোষ্ণৈর্মূত্রসংযুতৈঃ॥ সংস্বেদ্য মূত্রপ্রভবং বস্ত্রপট্টেন বেষ্টয়েৎ। সীবন্যাঃ পার্শ্বতোঽধস্তাৎ বিধ্যদ্‌ব্রীহিমুখেন বৈ॥ মুষ্কশোথমগচ্ছন্ত্যামন্ত্রবৃদ্ধৌ বিচক্ষণঃ। ব্রীহিমুখেন শস্ত্রবিশেষেণ। অগচ্ছন্ত্যাং অস্রবত্যাং॥ তৈলমেরণ্ডজং পীত্বা বলা-সিদ্ধং পয়োন্বিতং। আধ্মানশূলোপচিতা-মন্ত্রবৃদ্ধিং জয়েন্নরঃ॥ রাস্নাযষ্ট্যমৃতৈরণ্ড-বলারগ্বধগোক্ষুরৈঃ। পটোলেন বৃষেণাপি বিধিনা বিহিতং শৃতং॥ রুবুতৈলেন সংযুক্তমন্ত্রবৃদ্ধিং ব্যপোহতি। রাস্নাদি-ক্বাথঃ॥ *॥ গন্ধর্ব্বহস্ততৈলেন বৃষেণাপি

যুতং পিবেৎ। বিশালামূলজং চূর্ণং বৃদ্ধিং হন্যান্ন সংশয়ঃ॥ বিশালা ইন্দ্রবারুণী॥ *॥ বচাসর্ষপকল্কেন প্রলেপঃ শোথনাশনঃ। শিগ্রুত্বক্‌সর্ষপৈঃ পিষ্টৈঃ শোথশ্লেষ্মানিলা-পহঃ॥ শুদ্ধসূতং দ্বিধাগন্ধং মৃতান্যেতানি যোজয়েৎ। লোহং রঙ্গং তথা তাম্রং কাংস্যঞ্চাথ বিশোধিতং॥ তালকং তুত্থকং বাপি তথা শঙ্খং বরাটকং। ত্রিকটু ত্রিফলা চব্যং বিড়ঙ্গং বৃদ্ধদারকং॥ কর্চ্চূরং মাগধী-মূলং পাঠাং সহবুষাং বচাং। এলাবীজং দেবকাষ্ঠং তথা লবণপঞ্চকং॥ এলাদিসম-ভাগানি চূর্ণয়েদথ কারয়েৎ। কষায়েণ হরী-তক্যা বটিকাং টঙ্কসম্মিতাং॥ একাং তাং বটিকাং যস্তু নিগিলেদ্বারিণা সহ। অণ্ডবৃদ্ধি-রসাধ্যোঽপি তস্য নশ্যতি সত্বরং॥ বৃদ্ধি-বাধিকা বটী॥ *॥ অথ ব্রধ্নস্য চিকিৎসা। ভৃষ্টশ্চৈরণ্ডতৈলেন সম্যক্ কল্কোঽভয়া-ভবঃ। কৃষ্ণাসৈন্ধবসংযুক্তো ব্রধ্নরোগহর পরঃ॥ অজাজী হবুষা কুষ্ঠং গোমেদবদরা-ন্বিতং। কাঞ্জিকেন তু সংপিষ্টং তল্লেপো ব্রধ্নজিৎ পরঃ॥ গোমেদং পত্রং। তথা চ নিঘণ্টৌ ধন্বন্তরিঃ। পত্রং হলাহ্বয়ং রামং গোমেদং বসনাহ্বয়ং। ইতি বৃদ্ধিব্রধ্নাধি-কারঃ। ইতি ভাবপ্রকাশঃ॥

অন্দিকা (স্ত্রী) অন্তিকা। চুল্লী। চুলা ইতি ভাষা। ইত্যমরটীকায়াং নীলকণ্ঠঃ॥

অন্দুঃ (স্ত্রী) হস্তিনিগড়ঃ। আঁদুয়া ইতি ভাষা। স্ত্রীপাদভূষণং। মল পঞ্চম ইত্যাদি ভাষা। ইতি হেমচন্দ্রো ভূরিপ্রয়োগশ্চ॥

অন্দুকঃ (পুং) হস্তিপাদবন্ধনশৃঙ্খলঃ

তৎপর্য্যায়ঃ। নিগড়ঃ ২। ইত্যমরঃ॥ পাদালঙ্কারবিশেষঃ। তৎপর্য্যায়ঃ। পাদকটকঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥

অন্দুঃ (স্ত্রী) হস্তিপাদবন্ধনলৌহনিগড়ঃ। আন্দুয়া ইতি ভাষা। স্ত্রীপাদভূষণং। মল গুজরী ইত্যাদি ভাষা। ইতি মেদিনী॥

অন্দুকঃ (পুং) অন্দুঃ। ইত্যমরটীকায়াং স্বামী॥

অন্ধ ৎক দৃক্ক্ষয়ে। ইতি কবিকল্পদ্রুমঃ॥ দৃক্ক্ষয়ো দৃষ্টিরহিতীভাবঃ। তেনাকর্ম্মকোঽয়ং। সত্তাজীবনদর্পভীতিশয়নক্রীড়ানিবাসক্ষয়াব্যক্তধ্বাননভোগতিস্থিতিজরালজ্জাপ্রমাদোদয়ে। মোহে খোটনবেগযুদ্ধদহনখ্যাতিক্ষরোম্মাদকে শুদ্ধিস্বেদপলায়নভ্রমণকে শান্তৌ প্লুতৌ মজ্জনে॥ দৃপ্তৌ জাগরশোষবক্রগমনোৎসাহে মৃতৌ সংশয়ে ম্লানৌ মন্দগতৌ চ নৃত্যপতনে চেষ্টাক্রুধৌ রোদনে। বৃদ্ধৌ হাবকৃতৌ চ সিদ্ধিবিরতৌ হর্ষোপবেশে বলে কম্পোদ্বেগনিমেষভঙ্গযতনাদ্যে ধাতবোঽকর্ম্মকাঃ॥ দৌর্বল্যাদিষু চার্থেষু বর্ত্তমানাস্তু ধাতবঃ। বাচকা ভাবমাত্রস্য যতস্তস্মাদকর্ম্মকাঃ॥ কৌটিল্যাদিষু চার্থেষু প্রোক্তা যে তে তু ধাতবঃ। তদ্বদ্ভাবেঽকর্ম্মকাঃ স্যুস্তদ্বৎকৃত্যাং সকর্ম্মকাঃ॥ ইতি। অন্ধয়তি অন্ধাপয়তি বৃদ্ধঃ। ইতি দুর্গাদাসঃ॥

অন্ধং (ক্লী) অন্ধকারঃ। জলং। ইতি মেদিনী॥

অন্ধঃ (ত্রি) চক্ষুর্দ্বয়হীনঃ। আন্ধা আঁধলা ইতি হিন্দী ভাষা। তৎপর্য্যায়ঃ। অদৃক্ ২। ইত্যমরঃ॥

অন্ধঃ [স্] (ক্লী) অন্নং। ইত্যমরঃ॥

অন্ধকঃ (পুং) দেশভেদঃ। ইতি শব্দরত্নাবলী॥ নৃপভেদঃ। অসুরভেদঃ। ইতি মহাভারতং॥ মুনিবিশেষঃ। ইতি যাজ্ঞবল্ক্যঃ॥

অন্ধকরিপুঃ (পুং) শিবঃ। ইত্যমরঃ॥ শ্লেষকাব্যাদৌ অন্ধকারনাশকত্বাৎ সূর্য্যাগ্নিচন্দ্রেষু চ বর্ত্ততে॥

অন্ধকারঃ (পুং ক্লী) তেজঃসামান্যাভাবঃ। আঁধার ইতি ভাষা। তৎপর্য্যায়ঃ। ধ্বান্তং ২ তমিস্রং ৩ তিমিরং ৪ তমঃ ৫। ইত্যমরঃ॥ ভূচ্ছায়ং ৬। ইতি রাজনির্ঘণ্টঃ॥ মহান্ধকারে অন্ধতমসং ৭ সর্ব্বব্যাপকান্ধকারে সন্তমসং ৮ অল্পান্ধকারে অবতমসং ৯। ইত্যমরঃ॥ অস্য গুণাঃ। ভয়দৃষ্টিতেজোঽবরোধকারিত্বং। তিক্তত্বং। সর্ব্বব্যাধিকরত্বঞ্চ। ইতি রাজবল্লভঃ॥

অন্ধকাসুহৃদ্ (পুং) শিবঃ। ইতি হেমচন্দ্রঃ॥

অন্ধকূপঃ (পুং) সান্ধকারকূপঃ। আঁধুয়া পাৎকুয়া ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ॥

অন্ধতমসং (ক্লী) নিবিড়ান্ধকারং। ইত্যমরঃ॥

অন্ধতামসং (ক্লী) নিবিড়ান্ধকারং। মহান্ধকারং। ইত্যমরটীকায়াং স্বামী॥

অন্ধতামিস্রং (ক্লী) নিবিড়ান্ধকারময়নরকবিশেষঃ। পঞ্চপ্রকারাজ্ঞানান্তর্গতাজ্ঞানবিশেষঃ। দেহনাশে অহমেব মৃতোঽস্মীতি বুদ্ধিঃ। ইতি ভারতভাগবতে॥

অন্ধমুষিকা (স্ত্রী) দেবতাড়বৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥

অন্ধাহিঃ (পুং স্ত্রী) মৎস্যভেদঃ। কুঁচিয়া ইতি খ্যাতঃ। ইতি ত্রিকাণ্ডশেষঃ॥

অম্বিকা (স্ত্রী) দ্যুতবিশেষঃ। রাত্রিঃ। ইতি

মেদিনী ॥ সর্ষপী । ইতি হেমচন্দ্রঃ ॥ স্ত্রীবিশেষঃ । চক্ষুরোগবিশেষঃ । ইতি শব্দরত্নাবলী ॥

অন্ধুঃ ( পুং ) কূপঃ । ইত্যমরঃ ॥

অন্ধুলঃ ( পুং ) শিরীষবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥

অন্ধ্রঃ ( পুং ) ব্যাধঃ। মৃগয়াজীবী। ইতি কশ্চিৎ সংগ্রহকারঃ ॥

অন্নং ( ক্লী ) স্বিন্নতণ্ডুলং। যথা। শস্যং ক্ষেত্রগতং প্রাহুঃ সতুষং ধান্যমুচ্যতে। আমং বিতুষমিত্যুক্তং স্বিন্নমন্নমুদাহৃতং ॥ ইতি শ্রাদ্ধতত্ত্বধৃতবশিষ্ঠবচনং ॥ তৎপর্য্যায়ঃ। ভক্তং ২ অন্ধঃ ৩ ভিস্সা ৪ ওদনং ৫ দীদিবিঃ ৬। ইত্যমরঃ ॥ ভিস্সা ৭। ইতি তট্টীকা ॥ ক্রূরং ৮। ইতি রাজনির্ঘণ্টঃ ॥ অট্টং ৯ কসিপুঃ ১০ জীবাতুঃ ১১। ইতি জটাধরঃ ॥ কূরং ১২ আপূপিকং ১৩ জীবন্তিঃ ১৪ প্রসাদনং ১৫। ইতি শব্দরত্নাবলী ॥ * ॥ অস্য গুণাঃ। বুদ্ধিশুক্রপ্রীতিপুষ্টিধাত্বিন্দ্রিয়বলকারিত্বং। গুরুত্বং। ক্ষুধাক্ষয়রোগশ্রমকার্শ্যনাশিত্বঞ্চ ॥ * ॥ নবান্নগুণাঃ শ্লেষ্মকারিত্বং। স্বাদুত্বং। সুস্নিগ্ধত্বং। বৃংহণত্বং। গুরুত্বঞ্চ ॥ * ॥ পুরাণান্নগুণাঃ। বিরসত্বং। রূক্ষত্বং। পথ্যত্বং। অগ্নিকারিত্বঞ্চ ॥ * ॥ উষ্ণান্নগুণাঃ। প্রশংসনীয়ত্বং। হৃদ্যত্বং। অগ্নিকারিত্বং। বায়ুশ্লেষ্মনাশিত্বং। রক্তপিত্তপ্রকোপকারিত্বঞ্চ ॥ * ॥ অত্যুষ্ণান্নগুণঃ। বলনাশিত্বং ॥ * ॥ শীতশুষ্কান্নয়োর্গুণঃ। দুর্জ্জরত্বং ॥ * ॥ অতিক্লিন্নান্নগুণঃ। গ্লানিকারিত্বং ॥ * ॥ তণ্ডুলান্বিতান্নগুণঃ। দুর্জরত্বং ॥ * ॥ জলধৌতসদ্যোঽন্নগুণাঃ। শীঘ্রপাকিত্বং। হিমত্বং। লঘুত্বঞ্চ ॥ * ॥ রাত্রিস্থিতজলযুক্তান্নগুণৌ। ত্রিদোষকোপকারিত্বং। রূক্ষত্বঞ্চ ॥ * ॥ ভৃষ্টতণ্ডুলান্নগুণৌ। লঘুত্বং। অগ্নিপ্রদীপনত্বঞ্চ। ইতি রাজবল্লভঃ ॥ * ॥ ধান্যং। ইতি রাজনির্ঘণ্টঃ ॥ বিষ্ণুঃ। ইতি তস্য সহস্রনামমধ্যে পঠিতং ॥ অদনীয়দ্রব্যমাত্রং ॥ অন্নসাধনং যথা। সুধৌতাংস্তণ্ডুলান্ স্ফীতাংস্তোয়ে পঞ্চগুণে পচেৎ। তদ্ভক্তং প্রসৃতং চোষ্ণং বিষদং গুণবন্মতং ॥ তদ্‌গুণাঃ। ভক্তং বহ্নিকরং পথ্যং তর্পণং রোচনং লঘু। অধৌতমস্রুতং শীতং গুর্ব্বরুচ্যং কফপ্রদং ॥ ইতি ভাবপ্রকাশঃ ॥ * ॥ তদ্দানফলং যথা। বারিদস্তৃপ্তিমায়াতি সুখমক্ষয্যমন্নদঃ ॥ অন্নস্য প্রজাপতির্দ্দেবতা। অক্ষয়সুখপ্রাপ্তিঃ ফলং। প্রতিগ্রহে মুষ্টিগ্রহণং। ইতি শুদ্ধিতত্ত্বং ॥ অপি চ। ব্রহ্মহত্যাকৃতং পাপং অন্নদানাৎ প্রণশ্যতি। অন্নদঃ পাপকর্ম্মাপি পূতঃ স্বর্গে মহীয়তে ॥ ইতি প্রায়শ্চিত্ততত্ত্বং ॥ * ॥ অথ প্রজাপতিদৈবতান্নদানাবর্ত্তঃ। তত্র অন্নদানস্তুতিঃ। ব্রহ্মপুরাণে। অন্নে প্রতিষ্ঠিতা লোকা অন্নমাখক্ষয়ং পরং। তস্মাদন্নং প্রশংসন্তি সদৈব পিতৃমানবাঃ ॥ অন্নস্য হি প্রদানেন নরো যাতি পরাং গতিং। সর্ব্বকামসমাযুক্তঃ প্রেত্য চেহাধিকং শুভং ॥ তথা। অন্নমূর্জ্জস্বলং লোকে দত্বোর্জ্জস্বী ভবেন্নরঃ। সতাং পন্থানমাশ্রিত্য সর্ব্বপাপৈঃ প্রমুচ্যতে ॥ মহাভারতে। অন্নদঃ পশুমান্ পুত্রী ধনবান্ ভোগবানপি

প্রাণবাংশ্চাপি ভবতি রূপবাংশ্চ তথা নৃপ ॥ তথা। অন্নদস্য মনুষ্যস্য বলমোজো যশাংসি চ। কীর্ত্তিশ্চ বর্দ্ধতে শশ্বত্ত্রিষু লোকেষু পাণ্ডব ॥ আগ্নেয়পুরাণে। অন্নস্তুত্যনন্তরং। তস্মাদন্নং সদা দেহি শ্রদ্ধয়া নৃপসত্তম। ব্রহ্মহত্যাদিকং পাপং অন্নদস্য প্রণশ্যতি ॥ তথা। অন্নদানাৎ পরং দানং ন ভূতং ন ভবিষ্যতি। পুণ্যং যশস্যমায়ুষ্যং বলপুষ্টিবিবর্দ্ধনং ॥ সর্ব্বমন্নস্য দানেন ভবতীতি বিনিশ্চয়ঃ। মহাকাঞ্চনচিত্রাণি সেবিতান্যপ্সরোগণৈঃ ॥ অন্নদস্যোপতিষ্ঠন্তি বিমানানি সুরালয়ে। ভক্ষ্যভোজ্যময়াঃ শৈলা দিব্যরূপাদ্যলঙ্কৃতাঃ ॥ হৃষ্টপুষ্টজনা নিত্যমুপতিষ্ঠন্তি চাগ্রতঃ। হস্ত্যশ্বরথযানৈশ্চ ক্রীড়মানাশ্চ তে নরাঃ ॥ পদ্মপুরাণে। আপর্ব্বতনদী বাপী পৃথিবী সর্ব্বকামদা। বিধিনা তেন সা দত্তা যোঽন্নং দদাতি সর্ব্বদা। ক্ষুধিতে যঃ প্রযচ্ছেত অন্নং শ্রদ্ধাসমন্বিতঃ। ব্রহ্মণো ভবনে স বৈ ব্রহ্মণা সহ মোদতে ॥ চান্দ্রবারুণলোকাশ্চ যাম্যাঃ কৌবেরকাস্তথা। গোলোকো ব্রহ্মলোকশ্চ সর্ব্বে চান্নে প্রতিষ্ঠিতাঃ ॥ দদৎ কন্যামলঙ্কৃত্য হস্ত্যশ্বঞ্চ মহাধনং। অন্নদানস্য চৈতানি কলাং নার্হন্তি ষোড়শীং ॥ বিষ্ণুধর্ম্মোত্তরে। যাবতো গ্রসতে গ্রাসান্ বিদ্বান্ বিপ্রঃ সুসংস্কৃতঃ। অন্নপ্রদস্য তাবন্তঃ ক্রতবঃ পরিকীর্ত্তিতাঃ ॥ *॥ অথান্নদানধর্ম্মাঃ। যমঃ। আদরেণ চ ভক্ত্যা চ যদন্নমুপদীয়তে। তৎ প্রীণয়তি পাত্রাণি মামৃতং মানবর্জ্জিতং ॥ দুর্ল্লভস্তু মুদা দাতা মুদা ভোক্তা চ দুর্ল্লভঃ। মুদা দাতা চ ভোক্তা চ তাবুভৌ স্বর্গগামিনৌ ॥ যোঽন্নং বহুমতং ভুঙ্‌ক্তে যশ্চান্নং নাবমন্যতে। যশ্চান্নং প্রীতিতো দদ্যাৎ তস্যান্নমুপতিষ্ঠতে ॥ প্রীতিতোঽন্নঞ্চ যো দদ্যাৎ গৃহ্নীয়াৎ যোঽভিপূজ্য চ। প্রীতিতোঽক্ষয়মশ্নাতি পূজিতঃ স্বর্গমশ্নুতে ॥ যো দদ্যাদ্বিপ্রিয়েণান্নং যশ্চান্নং নাভিনন্দতি। তাবুভৌ নরকে মগ্নৌ বসেতাং শরদঃ শতং ॥*॥ অথান্নদানবিশেষফলবিশেষপরিভাষা। কূর্ম্মপুরাণে। গৃহস্থায়ান্নদানেন ফলং নাপ্নোতি মানবঃ। আমমেবাস্য দাতব্যং দত্ত্বাপ্নোতি পরাং গতিং ॥ অন্নদানেন পক্বান্নদানেন ফলং নাপ্নোতীতি গৃহস্থায়ামান্নদানেন যাদৃশং ফলং তাদৃশং পক্বান্নদানেন নাপ্নোতীত্যর্থঃ। গৃহস্থস্যামান্নদানে সতি তস্য পঞ্চযজ্ঞনিষ্পত্তেঃ ॥ * ॥ অথ সামান্যান্নদানং। নন্দিপুরাণে। অন্নাদ্ভূতানি জাতানি দেবা হ্যন্নাদ্যকাঙ্ক্ষিণঃ। ন তস্য পাত্রাদিবিধির্ব্বিনা শ্রাদ্ধং প্রকীর্ত্তিতঃ ॥ তথা। অপি কীটপতঙ্গানাং শুনাং চাণ্ডালযোনিনাং। দত্ত্বান্নং লোকমাপ্নোতি প্রাজাপত্যং সমাসতঃ ॥ বান্ধবেভ্যোঽতিথিভ্যোঽন্নং পুত্রেভ্যোঽন্নং প্রযচ্ছতঃ। দীনান্ধকৃপণানাঞ্চ স্বর্গঃ স্যাদন্নদায়িনাং ॥ গ্রাসমাত্রং নরো দত্ত্বা অন্নানামন্নগৃধ্নবে। স্বর্গে বসেৎ সমানাস্তু শতং ভোগৈর্ম্মনোরমৈঃ ॥ গ্রাসে গ্রাসে ফলং হ্যেতদ্বিধিবৎ পরিকীর্ত্তিতং। এতদেবায়নে প্রোক্তং দ্বিগুণং পুণ্যগৌরবং ॥ অন্নং বিনা কৃশাঙ্গস্য

মানসৈঃ সংপূজ্য শঙ্খস্থাপনং কুর্য্যাৎ। ততঃ সামান্যোক্তপীঠপূজাং বিধায় ভুবনেশ্বরীমন্ত্রোক্তজয়াদিপীঠমন্বন্তাং পীঠপূজাং বিধায় পুনর্ধ্যাত্বা আবাহনাদিপঞ্চপুষ্পাঞ্জলিদানপর্য্যন্তং বিধায় আবরণপূজামারভেৎ। যথা কেশরেম্বগ্নিকোণে হ্রীঁ হৃদয়ায় নমঃ। নৈঋর্তে হ্রীঁ শিরসে স্বাহা। বায়ব্যে হ্রীঁ শিখায়ৈ বষট্। ঐশান্যাং হ্রীঁ কবচায় হুঁ। মধ্যে হ্রীঁ নেত্রত্রয়ায় বৌষট্। চতুর্দ্দিক্ষু হ্রীঁ অস্ত্রায় ফট্। অষ্টদলেষু পূর্ব্বাদিষু ব্রাহ্ম্যৈ মাহেশ্বর্য্যৈ কৌমার্য্যৈ বৈষ্ণব্যৈ বারাহ্যৈ ইন্দ্রাণ্যৈ চামুণ্ডায়ৈ মহালক্ষ্ম্যৈ প্রণবাদিনমোঽন্তেন পূজয়েৎ। তত্রৈব। দলেষু পূজয়েদেতা ব্রাহ্ম্যাদ্যাঃ ক্রমশঃ সুধীঃ। শূদ্রস্য প্রণবশ্চতুর্দ্দশস্বরো বিন্দুযুক্তঃ। কালিকাপুরাণে মন্ত্রস্য সেতুকরণে উক্তত্বাৎ। তত ইন্দ্রাদীন্ বজ্রাদীংশ্চ পূজয়িত্বা ধূপাদিবিসর্জ্জনান্তং কর্ম্ম সমাপয়েৎ ॥ * ॥ অস্য পুরশ্চরণজপঃ ষোড়শসহস্রসঙ্খ্যঃ। তথা চ। যথাবিধি জপেন্মন্ত্রং বসুযুগ্মসহস্রকং। সাজ্যেনান্নেন জুহুয়াত্তদ্দশাংশমনন্তরং ॥ অয়ং মন্ত্রঃ প্রণবাদিরষ্টাদশাক্ষরঃ। মায়াদিঃ শ্রীবীজাদিশ্চ। তথা মায়াং বিনা প্রণবাদিঃ কামাদিঃ শ্রীবীজাদিঃ বাগ্ভবাদিশ্চ সপ্তদশাক্ষরঃ। কবচে তথা প্রতিপাদনাৎ। বিশেষস্তু যদ্যদ্বীজাদিকো মন্ত্রস্তেনৈবাঙ্গপ্রকল্পনা ॥ * ॥ অথান্নপূর্ণাস্তোত্রং। নমঃ কল্যাণদে দেবি নমঃ শঙ্করবল্লভে। নমো ভক্তপ্রিয়ে দেবি অন্নপূর্ণে নমোঽস্তু তে ॥ নমো মায়াগৃহীতাঙ্গি নমঃ শঙ্করবল্লভে। মাহেশ্বরি নমস্তুভ্যমন্নপূর্ণে নমোঽস্তু তে ॥ মহামায়ে শিবধর্ম্মপত্নীরূপে হরপ্রিয়ে। বাঞ্ছাদাত্রি সুরেশানি অন্নপূর্ণে নমোঽস্তু তে ॥ উদ্যদ্ভানুসহস্রাভে নয়নত্রয়ভূষিতে। চন্দ্রচূড়ে মহাদেবি অন্নপূর্ণে নমোঽস্তু তে ॥ বিচিত্রবসনে দেবি অন্নদানরতেঽনঘে। শিবনৃত্যকৃতামোদে অন্নপূর্ণে নমোঽস্তু তে ॥ সাধকাভীষ্টদে দেবি ভবদুঃখবিনাশিনি। কুচভারনতে দেবি অন্নপূর্ণে নমোঽস্তু তে ॥ ষট্‌কোণপদ্মমধ্যস্থে ষড়ঙ্গযুবতীময়ে। ব্রহ্মাণ্যাদিস্বরূপে চ অন্নপূর্ণে নমোঽস্তু তে ॥ দেবি চন্দ্রকৃতাপীড়ে সর্ব্বসাম্রাজ্যদায়িনি। সর্ব্বানন্দকরে দেবি অন্নপূর্ণে নমোঽস্তু তে ॥ ইন্দ্রাদ্যর্চ্চিতপাদাব্জে রুদ্রাদিরূপধারিণি। সর্ব্বসম্পৎপ্রদে দেবি অন্নপূর্ণে নমোঽস্তু তে ॥ পূজাকালে পঠেদ্যস্তু স্তোত্রমেতৎ সমাহিতঃ। তস্য গেহে স্থিরা লক্ষ্মীর্জায়তে নাত্র সংশয়ঃ ॥ প্রাতঃকালে পঠেদ্যস্তু মন্ত্রজাপপুরঃসরং। তস্য চান্নসমৃদ্ধিঃ স্যাদ্বর্দ্ধমানা দিনে দিনে ॥ যস্মৈ কস্মৈ ন দাতব্যং ন প্রকাশ্যং কদাচন। প্রকাশাৎ কার্য্যহানিঃ স্যাত্তস্মাদ্যত্নেন গোপয়েৎ ॥ ইত্যন্নপূর্ণাস্তোত্রং সমাপ্তং ॥ * ॥ অথ অন্নপূর্ণাকবচং ॥ কথিতাশ্চান্নপূর্ণায়া যা যা বিদ্যাঃ সুদুর্ল্লভাঃ। কৃপয়া কথিতাঃ সর্ব্বাঃ শ্রুতাশ্চাধিগতা ময়া ॥ সাম্প্রতং শ্রোতুমিচ্ছামি কবচং যৎ পুরোদিতং। ত্রৈলোক্যরক্ষণং নাম কবচং মন্ত্রবিগ্রহং ॥ ঈশ্বর উবাচ। শৃণু পার্ব্বতি বক্ষ্যামি সাবধানাবধারয়।

ত্রৈলোক্যরক্ষণং নাম কবচং ব্রহ্মরূপকং ॥ ব্রহ্মবিদ্যাস্বরূপঞ্চ মহদৈশ্বর্য্যদায়কং। পঠনাদ্ধারণান্মর্ত্ত্যস্ত্রৈলোক্যৈশ্বর্য্যভাগ্‌ভবেৎ ॥ ত্রৈলোক্যরক্ষণস্যাস্য কবচস্য ঋষিঃ শিবঃ। ছন্দো বিরাড়ন্নপূর্ণা দেবতা সর্ব্বসিদ্ধিদা ॥ ধর্ম্মার্থকামমোক্ষেষু বিনিয়োগঃ প্রকীর্ত্তিতঃ। হ্রীঁ নমো ভগবত্যন্তে মাহেশ্বরিপদং ততঃ অন্নপূর্ণে ততঃ স্বাহা চৈষা সপ্তদশাক্ষরী ॥ পাতুমামন্নপূর্ণা সা যা খ্যাতা ভুবনত্রয়ে। বিমায়া প্রণবাদ্যৈষা তথা সপ্তদশাক্ষরী ॥ পাত্বন্নপূর্ণা সর্ব্বাঙ্গং রত্নকুম্ভান্নপাত্রদা। শ্রীবীজাদ্যা তথা চৈষা দ্বিরন্ধ্রার্ণা তথা মুখং ॥ প্রণবাদ্যা ভ্রুবৌ পাতু কণ্ঠং বাগ্বীজপূর্ব্বিকা। কামবীজাদিকা চৈষা হৃদয়ন্তু মহেশ্বরী ॥ তারং শ্রীঁ হ্রীঁ নমোঽন্তে চ ভগবতি পদং ততঃ। মাহেশ্বরিপদং চান্নপূর্ণে স্বাহেতি পাতু মে ॥ নাভিমেকোনবিংশার্ণা পায়ান্মাহেশ্বরী সদা। তারং মায়া রমা কামঃ ষোড়শার্ণাস্ততঃ পরং ॥ শিরঃস্থা সর্ব্বদা পাতু বিংশত্যর্ণাত্মিকা চ যা। করৌ পাদৌ সদা পাতু রমা কামো ধ্রুবস্তথা ॥ ধ্বজঞ্চ সর্ব্বদা পাতু বিংশত্যর্ণাত্মিকা চ যা। অন্নপূর্ণা মহাবিদ্যা হ্রীঁ পাতু ভুবনেশ্বরী॥ শিরঃ শ্রীং হ্রীঁ তথা ক্লীঞ্চ ত্রিপুটা পাতু মে গুদং। ষড়্‌দীর্ঘভাজা বীজেন ষড়ঙ্গানি পুনস্তু মাং ॥ ইন্দ্রো মাং পাতু পূর্ব্বে চ বহ্নিকোণেঽনলোঽবতু। যমো মাং দক্ষিণে পাতু নৈঋর্ত্যাং নিঋর্তিশ্চ মাং ॥ পশ্চিমে বরুণঃ পাতু বায়ব্যাং পবনোঽবতু। কুবেরশ্চোত্তরে পাতু মামৈশান্যাং শিবোঽবতু ॥ ঊর্দ্ধাধঃ সততং পাতু ব্রহ্মানন্তো যথাক্রমাৎ। বজ্রাদ্যাশ্চায়ুধাঃ পান্তু দশদিক্ষু যথাক্রমাৎ ॥ ইতি তে কথিতং পুণ্যং ত্রৈরক্ষণং পরং। যদ্ধৃত্বা পঠনাদ্দেবাঃ সর্ব্বৈশ্বর্য্যমবাপ্নুয়ুঃ ॥ ব্রহ্মা বিষ্ণুশ্চ রুদ্রশ্চ কবচং ধারণাদ্‌যতঃ। সৃজত্যবতি হন্ত্যেব কল্পে কল্পে পৃথক্ পৃথক্ ॥ পুষ্পাঞ্জল্যষ্টকং দেব্যৈ মূলেনৈব পঠেত্ততঃ। যুগাযুতকৃতায়াস্তু পূজায়াঃ ফলমাপ্নুয়াৎ ॥ প্রীতিমন্যোন্যতঃ কৃত্বা কমলা নিশ্চলা গৃহে। বাণী বক্ত্রে বসেত্তস্য সত্যং সত্যং ন সংশয়ঃ ॥ অষ্টোত্তরশতং চাস্য পুরশ্চর্য্যাবিধিঃ স্মৃতঃ। ভূর্জ্জে বিলিখ্য গুলিকাং স্বর্ণস্থাং ধারয়েদ্‌যদি ॥ কণ্ঠে বা দক্ষিণে বাহৌ সোঽপি সর্ব্বতপোময়ঃ। ব্রহ্মাস্ত্রাদীনি শস্ত্রাণি তদ্গাত্রং প্রাপ্য পার্ব্বতি ॥ মাল্যানি কুসুমান্যেব ভবন্ত্যেব ন সংশয়ঃ। ইতি ভৈরবতন্ত্রে ভৈরবভৈরবীসংবাদে অন্নপূর্ণাকবচং সমাপ্তং। ইতি তন্ত্রসারঃ॥ *॥ তস্যাঃ স্তুত্যন্তরং যথা। ওঁ নমোঽন্নপূর্ণায়ৈ। ওঁ নিত্যানন্দকরী বরাভয়করী সৌন্দর্য্যরত্নাকরী নির্ধূতাখিলঘোরপাবনকরী প্রত্যক্ষমাহেশ্বরী। প্রালেয়াচলবংশপাবনকরী কাশীপুরাধীশ্বরী ভিক্ষান্দেহি কৃপাবলম্বনকরী মাতান্নপূর্ণেশ্বরী ॥ ১ ॥ নানারত্নবিচিত্রভূষণকরী হেমাম্বরাড়ম্বরী মুক্তাহারবিলম্বমানবিলসদ্বক্ষোজকুম্ভান্তরী। কাশ্মীরাগুরুবাসিতাঙ্গরুচিরী কাশীপুরাধীশ্বরী ভিক্ষান্দেহি কৃপাবলম্বনকরী মাতান্নপূর্ণেশ্বরী ॥ ২ ॥ যোগানন্দকরী রিপুক্ষয়করী ধর্ম্মৈকনিষ্ঠা-

করী চন্দ্রার্কানলভাসমানলহরী ত্রৈলোক্য-রক্ষাকরী। সর্ব্বৈশ্বর্য্যকরী তপঃফলকরী কাশীপুরাধীশ্বরী ভিক্ষান্দেহি কৃপাবলম্বনকরী মাতান্নপূর্ণেশ্বরী ॥ ৩ ॥ কৈলাসাচলকন্দরালয়করী গৌরী উমা শঙ্করী কৌমারী নিগমার্থগোচরকরী ওঁকারবীজাক্ষরী। মোক্ষদ্বারকবাটপাটনকরী কাশীপুরাধীশ্বরী ভিক্ষান্দেহি কৃপাবলম্বনকরী মাতান্নপূর্ণেশ্বরী॥৪॥ দৃশ্যাদৃশ্যবিভূতিভাবনকরী ব্রহ্মাণ্ডভাণ্ডোদরী লীলানাটকসূত্রভেদনকরী বিজ্ঞানদীপাঙ্কুরী। বিশ্বাধীশমনঃপ্রমোদনকরী কাশীপুরাধীশ্বরী ভিক্ষান্দেহি কৃপাবলম্বনকরী মাতান্নপূর্ণেশ্বরী॥৫॥ গুর্ব্বী সর্ব্বজনেশ্বরী জয়করী মাতান্নপূর্ণেশ্বরী নারীনীলসমানকুন্তলধরী নিত্যান্নদানেশ্বরী। সর্ব্বানন্দকরী সদা শিবকরী কাশীপুরাধীশ্বরী ভিক্ষান্দেহি কৃপাবলম্বনকরী মাতান্নপূর্ণেশ্বরী ॥ ৬ ॥ আদিক্ষান্তসমস্তবর্ণনকরী চন্দ্রপ্রভা ভাস্করী কাশ্মীরা ত্রিপুরেশ্বরী ত্রিলহরী নিত্যাঙ্কুরী শর্ব্বরী। কামাকাঙ্ক্ষ্যকরী মহোৎসবকরী কাশীপুরাধীশ্বরী ভিক্ষান্দেহি কৃপাবলম্বনকরী মাতান্নপূর্ণেশ্বরী ॥ ৭ ॥ চন্দ্রার্কানলকোটিপূর্ণবদনা বালার্কবর্ণেশ্বরী চন্দ্রার্কাগ্নিসমানকুণ্ডলধরী চন্দ্রার্কবিম্বাধরী। মালাপুস্তকপাশকাঙ্কুশধরী কাশীপুরাধীশ্বরী ভিক্ষান্দেহি কৃপাবলম্বনকরী মাতান্নপূর্ণেশ্বরী॥৮॥ দর্ব্বীপাকসুবর্ণরত্নঘটিকা দক্ষে করে সংস্থিতা বামে চারুপয়োধরী রসভরী সৌভাগ্যমাহেশ্বরী। ভক্তাভীষ্টকরী ফলপ্রদকরী কাশীপুরাধীশ্বরী ভিক্ষান্দেহি কৃপাবলম্বনকরী মাতান্নপূর্ণেশ্বরী ॥ ৯ ॥ সর্ব্বত্রাণকরী মহাভয়হরী মাতা কৃপাসাগরী দাক্ষানন্দকরী নিরাময়করী বিশ্বেশ্বরী শ্রীধরী। সাক্ষান্মোক্ষকরী সদা শিবকরী কাশীপুরাধীশ্বরী ভিক্ষান্দেহি কৃপাবলম্বনকরী মাতান্নপূর্ণেশ্বরী ॥ ১০ ॥ অন্নপূর্ণে সদা পূর্ণে শঙ্করপ্রাণবল্লভে। জ্ঞানবৈরাগ্যসিদ্ধ্যর্থং ভিক্ষান্দেহি নমোঽস্তু তে॥১১॥ ইতি শ্রীশঙ্করাচার্য্যবিরচিতমন্নপূর্ণাস্তোত্রং সমাপ্তং ॥ কচিৎ পুস্তকে শঙ্করাচার্য্যস্থানে বেদব্যাস ইতি পাঠঃ ॥

অন্নপ্রাশনং (ক্লী) ষষ্ঠে মাসি অষ্টমে বা বালকস্য পঞ্চমে মাসি সপ্তমে বা বালিকায়াঃ প্রথমান্নভক্ষণরূপসংস্কারঃ। ইতি স্মৃতিঃ ॥ তস্য ক্রমঃ। শোভনদিনে কৃতস্নানঃ কৃতবৃদ্ধিশ্রাদ্ধঃ পিতা শুচিনামানমগ্নিং সংস্থাপ্য বিরূপাক্ষজপান্তাং কুশণ্ডিকাং সমাপ্য প্রকৃতকর্ম্মারম্ভে প্রাদেশপ্রমাণাং ঘৃতাক্তাং সমিধং তূষ্ণীমগ্নৌ হুত্বা মহাব্যাহৃতিহোমং কুর্য্যাৎ। তত আজ্যেন তত্তন্মন্ত্রৈঃ পঞ্চাহুতীর্জুহুয়াৎ। ততঃ পঞ্চপ্রাণানাং হোমঃ। ততো মহাব্যাহৃতিহোমং কৃত্বা প্রাদেশপ্রমাণাং ঘৃতাক্তাং সমিধং তূষ্ণীমগ্নৌ হুত্বা প্রকৃতং কর্ম্ম সমাপ্য উদীচ্যং শাট্যায়নহোমাদিবামদেব্যগানান্তং কর্ম্ম নির্ব্বর্ত্ত্য মন্ত্রেণ কুমারস্য মুখে অন্নং দদ্যাৎ। ততঃ কর্ম্মকারয়িতৃব্রাহ্মণায় দক্ষিণাং দদ্যাৎ। ইতি ভবদেবভট্টঃ ॥ তস্য বিহিতদিনাদি যথা। ততোঽন্নপ্রাশনং ষষ্ঠে মাসি কার্য্যং যথাবিধি। অষ্টমে বাথ কর্ত্তব্যং যদ্বেষ্টং মঙ্গলং

কুলে॥ ষষ্ঠ ইতি মুখ্যঃ কল্পঃ প্রাগুক্ত-ন্যায়াৎ। কৃত্যচিন্তামণৌ। অন্নস্য প্রাশনং কার্য্যং মাসি ষষ্ঠেঽষ্টমে বুধৈঃ। স্ত্রীণাস্তু পঞ্চমে মাসি সপ্তমে প্রজগৌ মুনিঃ॥ দ্বাদশী-সপ্তমীনন্দারিক্তাসু পঞ্চপর্ব্বসু। বলমায়ু-র্যশো হন্যাৎ শিশূনামন্নভক্ষণং॥ ভুজবল-ভীমে। ষষ্ঠে মাসি নিশাকরে শুভকরে রিক্তে-তরে বা তিথৌ সৌম্যাদিত্যসিতেন্দুজীব-দিবসে পক্ষে চ কৃষ্ণেতরে। প্রাজেশাদিতি পৌষ্ণবৈষ্ণবযুগৈর্হস্তাদিষট্‌কোত্তরৈরাগ্নে-য়াপ্পতিপিত্র্যভৈশ্চ নিতরামন্নাদিভক্ষং শুভং॥ যুগৈরিতি প্রাজেশাদৌ প্রত্যেকং সম্বধ্যতে। তথাত্রাপি তিথ্যাদিবিদ্ধমৃক্ষং বিবর্জ্জয়েৎ। বৃষদ্বন্দ্বধনুর্ম্মীনকন্যালগ্নে-ঽন্নভক্ষণং। ত্রিকোণাষ্টকযুকান্ত্যগ্রহা যদ্বত্তথাফলং॥ তুষ্টঃ শশধরো লগ্নাৎ ষষ্ঠাষ্টস্থোঽন্নভক্ষণে। মার্কণ্ডেয়ঃ। দেবতা পুরতস্তস্য পিতুরঙ্কগতস্য চ। অলঙ্কৃতস্য দাতব্যমন্নং পাত্রে চ কাঞ্চনে॥ মধ্বাজ্য-কনকোপেতং প্রাশয়েৎ পায়সং ততঃ। কৃতপ্রাশনমুৎসঙ্গে মাতুর্ব্বালস্তু তং ন্যসেৎ॥ দেবাগ্রতোঽথ বিন্যস্য শিল্প-ভাণ্ডানি সর্ব্বশঃ। শাস্ত্রাণি চৈব শস্ত্রাণি ততঃ পশ্যেত্তু লক্ষণং॥ প্রথমং যৎ স্পৃশে-দ্বালঃ শিল্পভাণ্ডং স্বয়ং তথা। জীবিকা তস্য বালস্য তেনৈব তু ভবিষ্যতি॥ ইতি জ্যোতিস্তত্ত্বং॥

অন্নময়কোষঃ (পুং) স্থূলশরীরং। ইতি বেদান্তসারঃ॥

অন্নমলং (ক্লী) মদ্যং। যথা। সুরা বৈ মল-মন্নানাং পুরীষং মলমুচ্যতে। তস্মাদ্‌-ব্রাহ্মণরাজন্যৌ বৈশ্যশ্চ ন সুরাং পিবেৎ॥ ইতি প্রায়শ্চিত্তবিবেকঃ॥

অন্নবিকারঃ (পুং) শুক্রং। ইতি রাজনির্ঘণ্টঃ॥

অন্নাদঃ (পুং) বিষ্ণুঃ। ইতি তস্য সহস্রনাম-মধ্যে পঠিতঃ॥ অন্নভোক্তরি ত্রি॥

অন্যঃ (ত্রি) অসদৃশঃ। ইতি মেদিনী॥ পরঃ। তৎপর্য্যায়ঃ। ভিন্নঃ২ অন্যতরঃ ৩ একঃ ৪ ত্বঃ ৫ ইতরঃ ৬। ইত্যমরঃ॥ বিলক্ষণঃ ৭ ইতি জটাধরঃ॥ একতরঃ ৮ নোমঃ ৯। ইতি শব্দরত্নাবলী॥

অন্যৎ ব্য ইতরং। ভিন্নং। যথা দেবদত্ত আয়াতোঽন্যদ্‌যজ্ঞদত্তঃ। অন্যদেবাস্য গাম্ভীর্য্যমন্যদ্বৈর্য্যং মহীয়তে ইত্যাদৌ তু ক্লীবলিঙ্গপ্রথমৈকবচনান্তান্যশব্দস্বীকারেণা-প্যুপপত্তিরিতি বোধ্যং॥

অন্যতঃ [স্‌] ব্য অন্যত্র। অন্যস্মাৎ। যথা। একতো হি ধিগমূমগুণজ্ঞামন্যতঃ কথমদঃ-প্রতিলম্ভঃ। ইতি নৈষধং॥

অন্যতমঃ (ত্রি) ভিন্নতমঃ। বহূনাং মধ্যে নির্দ্ধারিতৈকঃ। অনেকের মধ্যে এক ইতি ভাষা। ইতি ব্যাকরণং॥ ন্যায়মতে অনেকভেদাবচ্ছিন্নপ্রতিযোগিতাকভেদঃ॥

অন্যতরঃ (ত্রি) অন্যঃ। ইত্যমরঃ॥ ভিন্নতরঃ। দ্বয়োর্ম্মধ্যে নির্দ্ধারিতৈকঃ। দুয়ের মধ্যে এক ইতি ভাষা। ইতি ব্যাকরণং॥ ন্যায়-মতে দ্বয়াবচ্ছিন্নপ্রতিযোগিতাকভেদঃ॥

অন্যতরেদ্যুঃ [স্‌] ব্য অন্যতরদিনে। দিন-দ্বয়য়োরেকতরদিনে। ইত্যমরঃ॥

অন্যত্র ব্য বর্জ্জনং। বিনা। যথা। অন্যত্র

নিধনাৎ পত্যুঃ পত্নী কেশান্ বাপয়েদিতি প্রাচীনাঃ। পত্যুর্নিধনাদন্যত্র পতিমরণং বিনেত্যর্থঃ। স্থানান্তরং। যথা। অন্যত্র যূয়ং কুসুমাবচায়ং কুরুধ্বমত্রাস্মি করোমি সখ্যঃ। ইতি কাব্যপ্রকাশঃ॥

অন্যথা ব্য পরার্থঃ। মিথ্যা। ইতি মেদিনী॥ তুষ্টং। ইতি শব্দরত্নাবলী॥ অন্যপ্রকারং। ইতি ব্যাকরণং॥

অন্যথাসিদ্ধিঃ (স্ত্রী) কার্য্যাব্যবহিতপূর্ব্ববর্ত্তিত্বে সতি কার্য্যানুৎপাদকত্বং। সা পঞ্চবিধা। যথা। যৎকার্য্যং প্রতি কারণস্য পূর্ব্ববর্ত্তিতা যেন রূপেণ গৃহ্যতে তৎকার্য্যং প্রতি তদ্রূপমন্যথাসিদ্ধং। যথা ঘটং প্রতি দণ্ডত্বং॥ ১॥ যস্য স্বাতন্ত্র্যেণ অন্বয়ব্যতিরেকৌ ন স্তঃ কিন্তু কারণমাদায়ান্বয়ব্যতিরেকৌ তদন্যথাসিদ্ধং। যথা ঘটং প্রতি দণ্ডরূপং॥ ২॥ অন্যং প্রতি পূর্ব্ববর্ত্তিতাং গৃহীত্বৈব যস্য যৎকার্য্যং প্রতি পূর্ব্ববর্ত্তিত্বং গৃহ্যতে তস্য তৎকার্য্যং প্রতি অন্যথাসিদ্ধত্বং। যথা ঘটাদিকং প্রতি আকাশস্য॥ ৩॥ যৎকার্য্যজনকং প্রতি পূর্ব্ববর্ত্তিত্বং গৃহীত্বৈব যস্য যৎকার্য্যং প্রতি পূর্ব্ববর্ত্তিত্বং গৃহ্যতে তস্য তৎকার্য্যং প্রতি অন্যথাসিদ্ধত্বং। যথা কুলালপিতুর্ঘটং প্রতি॥ ৪॥ অবশ্যক৯প্তনিয়তপূর্ব্ববর্ত্তিন এব কারণত্বসম্ভবে তদ্ভিন্নমন্যথাসিদ্ধং। যথা ঘটং প্রতি রাসভাদিঃ॥ ৫॥ ইতি সিদ্ধান্তমুক্তাবলী॥

অন্যদা ব্য কালান্তরে। অন্যসময়ে। যথা। অন্যদা ভূষণং পুংসঃ ক্ষমা লজ্জেব যোষিতঃ। পরাক্রমঃ পরিভবে বৈজাত্যং সুরতেষ্বিব॥ ইতি মাঘঃ॥

অন্যপুষ্টঃ (পুং) কোকিলঃ। যথা। অপ্যন্যপুষ্টাঃ প্রতিকূলশব্দাঃ শ্রোতুর্ব্বিতন্ত্রীরিব তাড্যমানাঃ। ইতি কুমারসম্ভবঃ॥

অন্যপূর্ব্বা (স্ত্রী) পৌনর্ভবা কন্যা একস্মৈ বাগাদিনা দত্তা পুনরন্যেন বিবাহিতা কন্যা। সা সপ্তধা যথা। সপ্ত পৌনর্ভবাঃ কন্যা বর্জ্জনীয়াঃ কুলাধমাঃ। বাচা দত্তা মনোদত্তা কৃতকৌতুকমঙ্গলা॥ উদকস্পর্শিতা যা চ যা চ পাণিগৃহীতিকা। অগ্নিং পরিগতা যা তু পুনর্ভূপ্রসবা চ যা॥ ইত্যেতাঃ কাশ্যপেনোক্তা দহন্তি কুলমগ্নিবৎ। ইত্যুদ্বাহতত্ত্বং॥

অন্যভৃৎ (পুং) কাকঃ। ইতি হেমচন্দ্রঃ॥

অন্যভৃতঃ (পুং) কোকিলঃ। ইতি হলায়ুধঃ॥

অন্যমনস্কঃ (ত্রি) ভিন্নচিত্তঃ। অন্যমনাঃ। অন্যস্মিন্ মনো যস্য স ইতি বহুব্রীহৌ কপ্রত্যয়েন সিদ্ধঃ॥

অন্যবর্দ্ধিতঃ (ত্রি) অন্যপুষ্টঃ। পরৈর্ধিতঃ। অন্যেন প্রতিপালিতঃ। ইতি জটাধরঃ॥

অন্যবাদী [ন্] (ত্রি) ইতরবাদী। অস্থিরবাদী। অন্যথাবাদী। যথা। অন্যবাদী ক্রিয়াদ্বেষী নোপস্থায়ী নিরুত্তরঃ। আহূতপ্রপলায়ী চ হীনঃ পঞ্চবিধঃ স্মৃতঃ॥ ইতি ব্যবহারতত্ত্বে নারদঃ॥

অন্যশাখকঃ (পুং) স্ববেদশাখামুৎসৃজ্যাপরশাখাশ্রয়কর্ম্ম কুর্ব্বাণঃ। তৎপর্য্যায়ঃ। শাখারণ্ডঃ ২। ইতি হেমচন্দ্রঃ॥

অন্যাদৃক্ [শ্] (ত্রি) অন্যপ্রকারঃ। ইতি মুগ্ধবোধব্যাকরণং॥

অন্যাদৃশঃ ( ত্রি ) অন্যপ্রকারঃ। ইতি মুগ্ধবোধ-ব্যাকরণং ॥

অন্যায়ঃ ( পুং ) ন্যায়ভিন্নঃ। অনৌচিত্যং। অযুক্তিঃ। যথা। অন্যায়েনাপি যদ্ভুক্তং পিত্রা পূর্ব্বতরৈস্ত্রিভিঃ। ন তচ্ছক্যমপাকর্ত্তুং ক্রমাত্ত্রিপুরুষাগতং ॥ ইতি ব্যবহারতত্ত্বে নারদঃ ॥

অন্যায্যঃ ( ত্রি ) অনুচিতঃ। অযোগ্যঃ। যথা। দৃষ্টার্থসত্ত্বে অদৃষ্টকল্পনায়া অন্যায্যত্বাদিত্যধিকরণমালায়াং মাধবাচার্য্যঃ ॥

অন্যূনঃ ( ত্রি ) ন্যূনতারহিতঃ। সম্পূর্ণঃ। ইতি জটাধরঃ ॥

অন্যেদ্যুঃ [ স্ ] ব্য অন্যস্মিন্নহনি। দিবসান্তরে। অন্যদিনে। ইত্যমরঃ ॥

অন্যোদর্য্যঃ ( পুং স্ত্রী ) বৈমাত্রেয়ঃ। যথা। অন্যোদর্য্যস্তু সংসৃষ্টী নান্যোদর্য্যো ধনং হরেৎ। ইতি যাজ্ঞবল্ক্যঃ ॥

অন্যোন্যং (ত্রি) উভয়তঃ। তৎপর্য্যায়ঃ। ইতরেতরং ২ পরস্পরং ৩। ইতি হেমচন্দ্রঃ ॥

অন্যোন্যাশ্রয়ঃ ( ত্রি ) পরস্পরজ্ঞানসাপেক্ষজ্ঞানাশ্রয়ঃ। ইতি স্মার্ত্তাঃ ॥ স্বগ্রহসাপেক্ষগ্রহসাপেক্ষগ্রহকঃ। ইতি তার্কিকাঃ ॥ তর্কবিশেষঃ। তস্য লক্ষণং। স্বাপেক্ষাপেক্ষিতত্বনিবন্ধনপ্রসঙ্গত্বং। অপেক্ষা চ জ্ঞপ্তৌ উৎপত্তৌ স্থিতৌ চ গ্রাহ্যা। তত্রাদ্যা যথা। ঘটোঽয়ং যদ্যেতদ্ঘটজ্ঞানজন্যজ্ঞানবিষয়ঃ স্যাৎ তদৈতদ্ঘটভিন্নঃ স্যাৎ। দ্বিতীয়া যথা। ঘটোঽয়ং যদ্যেতদ্ঘটজন্যজন্যঃ স্যাৎ তদৈতদ্ঘটজন্যভিন্নঃ স্যাৎ। তৃতীয়া যথা। ঘটোঽয়ং যদ্যেতদ্ঘটবৃত্তিবৃত্তিঃ স্যাৎ তথাত্বেনোপলভ্যেত। ইতি জগদীশঃ ॥

অন্বক্ [ চ্ ] ( ত্রি ) পশ্চাদ্গামী। ইত্যমরঃ ॥

অন্বয়ঃ ( পুং ) বংশঃ। কুলং। ইত্যমরঃ ॥ পদানাং পরস্পরাকাঙ্ক্ষা যোগ্যতা চ। ইতি দুর্গাদাসঃ ॥ পরস্পরসম্বন্ধঃ। ইতি রামতর্কবাগীশঃ ॥

অন্ববায়ঃ ( পুং ) বংশঃ। কুলং। ইত্যমরঃ ॥

অন্বষ্টকা (স্ত্রী) অষ্টকাপশ্চাত্তিথিঃ। সা তু গৌণচান্দ্রপৌষমাঘফাল্গুনাশ্বিনমাসানাং কৃষ্ণনবমী। তত্র সাগ্নীনাং মাতৃকশ্রাদ্ধং। ইতি শ্রাদ্ধবিবেকঃ ॥ তত্র সাগ্নিকর্ত্তব্যমাতৃপক্ষশ্রাদ্ধং। যথা শঙ্খঃ। পিত্রাদিত্রিকপত্নীষু ভোজ্যা মাতৃঃ প্রতি দ্বিজাঃ। স্ত্রীণামেব তু তদ্বস্যান্মাতৃশ্রাদ্ধমিহোচ্যতে ॥ এতচ্চান্বষ্টকাশ্রাদ্ধং সাগ্নিমাত্রেণ কর্ত্তব্যং। তথা চ বিষ্ণুঃ। অন্বষ্টকাস্বস্টকাবদগ্নৌ হুত্বা মাত্রে পিতামহ্যৈ প্রপিতামহ্যৈ পূর্ব্ববদ্ব্রাহ্মণান্ ভোজয়িত্বা ইতি। অত্র হোমত্বাদেবাগ্নিপ্রাপ্তেরগ্নিগ্রহণং তন্নিয়মার্থং। ন চাগ্নৌকরণহোমে বিপ্রপাণ্যাদের্ব্বিধানাদত্রাপি তথেতি বাচ্যং। প্রকৃতীভূতশ্রাদ্ধবিধ্যুক্তস্যাধারান্তরস্য বিকৃতীভূতশ্রাদ্ধে বিশেষবিহিতাধারেণ বাধাৎ। শরময়বর্হিষা কুশময়বর্হির্ব্বাধবৎ। ন বা লৌকিকাগ্নৌ হোমঃ। ন পৈত্রযজ্ঞীয়ো হোমো লৌকিকাগ্নৌ বিধীয়তে। ইতি মনুবচনেন নিষেধাৎ। শ্রাদ্ধচিন্তামণাবপ্যেবং। ইতি শ্রাদ্ধতত্ত্বং ॥

অন্বক্ষঃ ( ত্রি ) পশ্চাদ্গামী। ইত্যমরঃ ॥

অন্বাধিঃ ( পুং ) একস্মিন্ যদর্পিতং বস্তু তেন

পুরুষান্তরে অমুষ্মিন্ স্বামিনি ত্বং দাস্য-সীতি নিক্ষিপ্তং তৎ। ইতি বিবাদার্ণব-সেতুঃ॥ কার্য্যেষু বাচনেন অমুষ্মিন্ পুরুষে ত্বং দদ্যা ইতি পরিভাষ্য যৎ সমর্পিতং তৎ। ইতি হলায়ুধঃ॥ যথা। অথমার্গণ-কার্য্যেষু অন্যস্মিন্ বচনান্মম। দদ্যাস্ত্বমিতি যো দত্তঃ স ইহান্বাধিরুচ্যতে॥ ইতি কাত্যায়নঃ॥ পুনর্ব্বন্ধকঃ। পশ্চাম্মানসী ব্যথা। অনুপূর্ব্বকস্য আধিশব্দস্য ইত্যর্থ-দ্বয়মপি সম্ভবতি॥

অন্বাধেয়ং (ক্লী) বিবাহানন্তরপিতৃমাতৃভর্ত্তৃ-কুললব্ধস্ত্রীধনং। যথা। বিবাহাৎ পরতো যত্তু লব্ধং ভর্ত্তৃকুলাৎ স্ত্রিয়া। অন্বাধেয়ং তদুক্তন্তু লব্ধং বন্ধুকুলাত্তথা॥ ইতি কাত্যায়নঃ॥

অন্বাসনং (ক্লী) স্নেহবস্তিঃ। অনুশোচনং। উপাসনা। ইতি বিশ্বমেদিন্যৌ॥ শিল্পাদি-গৃহং। ইতি হলায়ুধঃ॥

অন্বাহার্য্যং (ক্লী) মাসিকশ্রাদ্ধং। ইত্যমরঃ॥ তত্ত প্রত্যমাবাস্যাবিহিতং পার্ব্বণশ্রাদ্ধং অকৃতসপিণ্ডীকরণস্য বৎসরান্তে প্রতি-মাসং যৎ শ্রাদ্ধং তদিতি কেচিৎ। ইতি ভরতঃ॥ গোভিলগৃহ্যোক্তকর্ম্মণামাদ্যঙ্গ-শ্রাদ্ধং। তদন্তাঙ্গদক্ষিণা চ। যথা। যৎ শ্রাদ্ধং কর্ম্মণামাদৌ যাচান্তে দক্ষিণা ভবেৎ। অমাবাস্যং দ্বিতীয়ং যদন্বাহার্য্যং বিদু-র্বুধাঃ॥ ইতি গোভিলগৃহ্যং॥

অন্বাহার্য্যকং (ক্লী) অন্বাহার্য্যং। যথা। পিণ্ডা-ন্বাহার্য্যকং শ্রাদ্ধং কুর্য্যান্মাসানুমাসিকং। ইতি মনুঃ॥

অন্বাহিতং (ত্রি) যদেকস্য হস্তে নিহিতং দ্রব্যং তেনাপি পশ্চাদন্যস্য হস্তে স্বামিনে দেহীতি নিহিতং তৎ। ইতি মিতাক্ষরা॥ গচ্ছিত দ্রব্য তাহার স্বামিকে দিতে অন্য-হস্তে অর্পণকরা ইতি ভাষা॥

অন্বিতঃ (ত্রি) যুক্তঃ। মিলিতঃ। ইতি জটাধরঃ॥ কৃতান্বয়পদাদিঃ। যথা। পদার্থান্তরৈরন্বি-তানাং সঙ্কেতো গৃহ্যতে। ইতি কাব্য-প্রকাশঃ॥

অন্বিষ্টঃ (ত্রি) অন্বেষিতঃ। কৃতান্বেষণঃ। ইত্যমরঃ॥

অন্বীতঃ (ত্রি) অন্বিতঃ। যুক্তঃ। ইতি জটাধরঃ॥

অন্বেষণং (ক্লী) অন্বেষণা। অনুসন্ধানং। যথা। সুগ্রীবো রামমিত্রং ক জনকতনয়ান্বেষণে প্রেষিতোঽহং। ইতি মহানাটকং॥

অন্বেষণা (স্ত্রী) তর্কাদিনা যথাবোধিতধর্ম্মা-দ্যন্বেষণং। অন্বেষণমাত্রং। তৎপর্য্যায়ঃ। পরীষ্টিঃ ২ পর্য্যেষণা ৩ গবেষণা ৪। ইত্য-মরঃ॥

অন্বেষিতঃ (ত্রি) কৃতান্বেষণঃ। তৎপর্য্যায়ঃ। গবেষিতঃ ২ অন্বিষ্টঃ ৩ মার্গিতঃ ৪ মৃগিতঃ ৫ ইত্যমরঃ॥ পরীষ্টঃ ৬ পর্য্যে-ষিতঃ ৭। ইতি অন্বেষণাপর্য্যায়ে পরীষ্টি-পর্য্যেষণাপদদর্শনাৎ॥

অন্বেষ্টা [ ঋ ] (ত্রি) অন্বেষণকর্ত্তা। তৎ-পর্য্যায়ঃ। আনুপদ্যঃ ২। ইতি হেমচন্দ্রঃ॥

অপ ব্য উপসর্গবিশেষঃ। অস্যার্থঃ। অনাদরঃ। ভ্রংশঃ। অসাকল্যং। বৈরূপ্যং। ত্যাগঃ। নঞর্থঃ। ইতি দুর্গাদাসঃ॥ অপকৃষ্টার্থঃ। বর্জ্জনার্থঃ। বিয়োগঃ। বিপর্য্যয়ঃ।

বিকৃতিঃ। চৌর্য্যং। নির্দ্দেশঃ। হর্ষঃ। ইতি মেদিনী॥

অপঃ [স্] (ক্লী) যজ্ঞকর্ম্ম। ইত্যুণাদিকোষঃ॥

অপকর্ম্ম (ক্লী) দুষ্ক্রিয়া। মন্দকর্ম্ম। অপকৃষ্টার্থোপোপসর্গেণ কর্ম্মশব্দস্য কর্ম্মধারয়সমাসঃ॥

অপকারঃ (পুং) দ্রোহঃ। অনুপকারঃ। মন্দকরণং। ইতি হলায়ুধঃ॥

অপকারগীঃ [র্] (স্ত্রী) অপকারবাক্যং। ভর্ৎসনং। ইত্যমরঃ॥

অপকারী [ন্] (ত্রি) অপকারকঃ। দ্রোহকঃ। যথা। অপকারিণি চেৎ ক্রোধঃ ক্রোধঃ ক্রোধে কথং ন তে। ধর্ম্মার্থকামমোক্ষাণাং চতুর্ণাং পরিপন্থিনি॥ ইত্যুদ্ভটঃ॥

অপকৃষ্টং (ত্রি) জঘন্যং। তৎপর্য্যায়ঃ। অধমং ২ নিকৃষ্টং ৩ অণকং ৪ গর্হ্যং ৫ অবদ্যং ৬ কাণ্ডং ৭ কুৎসিতং ৮ প্রতিকৃষ্টং ৯ যাপ্যং ১০ রেফঃ ১১ অবমং ১২ ক্রুবং ১৩ খেটং ১৪ পাপং ১৫ অপশদং ১৬ কুপূয়ং ১৭ চেলং ১৮ অর্ব্বচং ১৯। ইতি হেমচন্দ্রঃ॥

অপক্রমঃ (পুং) পলায়নং। ইত্যমরঃ॥

অপক্রিয়া (স্ত্রী) দ্রোহঃ। অপকারঃ। ইতি হেমচন্দ্রঃ॥

অপক্রোশঃ (পুং) নিন্দনং। জুগুপ্সনং। ভর্ৎসনং। ইতি শব্দরত্নাবলী॥

অপক্কঃ (ত্রি) পক্বভিন্নঃ। কাঁচা ইতি ভাষা। যথা। তৈলে বিপর্য্যয়ং বিদ্যাৎ পক্কে চাপক্ক এব চ। ইতি বৈদ্যকপরিভাষা॥

তৎপর্য্যায়ঃ। অসিদ্ধং ২ আমং ৩ অশৃতং ৪। ইতি রত্নমালা॥

অপগতঃ (ত্রি) মৃতঃ। ইতি হেমচন্দ্রঃ॥ গতঃ। দূরীভূতঃ। যথা। তাপো নাপগতস্তৃষা ন চ কৃষা ধূলী ন ধূতা তনোরিত্যাদি বল্লালসেনঃ॥

অপগা (স্ত্রী) আপগা। নদী। ইত্যমরটীকায়াং ভরতঃ॥

অপঘনঃ (পুং) অবয়বঃ। অঙ্গং। ইত্যমরঃ॥

অপঘাতঃ (পুং) অপহননং। অপকৃষ্টার্থোপোপসর্গাৎ হনধাতোর্ভাবে ঘঞ্ হস্য ঘঃ নস্য তঃ। অপকৃষ্টমৃত্যুফলকব্যাপারঃ। অপহন্যতে ইতি ব্যুৎপত্ত্যা অপপূর্ব্বকহনধাতোর্ভাবে ঘঞ্প্রত্যয়েন নিষ্পন্নঃ॥

অপচয়ঃ (পুং) ক্ষতিঃ। হানিঃ। তৎপর্য্যায়ঃ। অপহারঃ ২। ইত্যমরঃ॥

অপচায়িতঃ (ত্রি) পূজিতঃ। ইত্যমরঃ॥

অপচারঃ (পুং) অহিতাচরণং। যথা। যোনিপ্রদোষাচ্চ ভবন্তি শিশ্নে পঞ্চোপদংশা বিবিধাপচারৈঃ। ইতি মাধবকরঃ॥

অপচিতঃ (ত্রি) পূজিতঃ। ইত্যমরঃ॥ অপচয়বিশিষ্টঃ। যথা। তত্রাপচিতবলাঃ প্রাণিনো ভবন্তি সূর্য্যবলত্বাৎ। ইতি সুশ্রুতঃ॥

অপচিতিঃ (স্ত্রী) হানিঃ। ব্যয়ঃ। পূজা। নিষ্কৃতিঃ। ইতি মেদিনী॥

অপচ্ছায়ঃ (ত্রি) দেবঃ। উপদেবঃ। নিষ্প্রভঃ। অপগতা ছায়া যস্য ইতি বহুব্রীহৌ হ্রস্বঃ॥

অপঞ্চীকৃতং (ক্লী) সূক্ষ্মভূতং। পঞ্চীকৃতভিন্নাকাশাদিপঞ্চভূতং। ইতি বেদান্তসারঃ॥

অপটান্তরং (ত্রি) অপদান্তরং। অব্যবহিতং ইত্যমরটীকায়াং স্বামী ॥

অপটী (স্ত্রী) বস্ত্রপ্রাবরণং। কানাৎ ইতি ভাষা। ইতি হেমচন্দ্রঃ ॥

অপটুঃ (ত্রি) ব্যাধিতঃ। রোগী। ইত্যমরঃ ॥ পটুতারহিতঃ। কার্য্যাক্ষমঃ। যথা। সাক্রান্তা জঘনস্থলেন গুরুণা গন্তুং ন শক্তা বয়ং দোষৈরন্যজনাশ্রয়ৈরপটবো জাতাঃ স্ম ইত্যদ্ভুতং ॥ ইত্যমরুকবিঃ ॥

অপতর্পণং (ক্লী) লঙ্ঘনং। রোগাদৌ ভোজনাভাবঃ। ইতি হেমচন্দ্রঃ ॥

অপত্যং (ক্লী) পুত্রঃ। কন্যা। তৎপর্য্যায়ঃ। সন্তানঃ ২ তোকং ৩ সন্ততিঃ ৪ প্রসূতিঃ ৫। ইতি জটাধরঃ ॥

অপত্যদা (স্ত্রী) গর্ভদাত্রীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ।

অপত্যপথঃ (পুং) ভগং। যোনিঃ। ইতি হেমচন্দ্রঃ ॥

অপত্যশত্রুঃ (পুং) কর্কটঃ। কাঁকড়া ইতি ভাষা। ইতি শব্দচন্দ্রিকা ॥

অপত্রপঃ (ত্রি) ত্রপারহিতঃ। নির্লজ্জঃ। অপগতা ত্রপা যস্যেতি বহুব্রীহৌ আকারস্য হ্রস্বঃ॥

অপত্রপা (স্ত্রী) অন্যতো লজ্জা। পরস্মাৎ লজ্জা। ইত্যমরঃ ॥ লজ্জামাত্রং। ইতি রত্নকোষঃ ॥

অপত্রপিষ্ণুঃ (ত্রি) স্বভাবসত্রপঃ। লজ্জাশীলঃ। লাজুক ইতি ভাষা। ইত্যমরঃ ॥

অপথং (ক্লী) ব্য অপন্থাঃ। মার্গ এব যো ন ভবতি তৎ। ইত্যমরঃ ॥ যোনিঃ। ইতি শব্দরত্নাবলী ॥

অপথ্যং (ত্রি) পথ্যাভিন্নং। অহিতং। যথা। যৎ পথ্যং যদপথ্যঞ্চ বক্ষ্যতে রক্তপিত্তিনাং ইতি পথ্যাপথ্যগ্রন্থঃ ॥

অপদানং (ক্লী) অবদানং। বৃত্তং কর্ম্ম। বৃত্তিঃ প্রবর্ত্তনং সা প্রশস্তা বিদ্যতে যত্র তৎ। যত্র কর্ম্মণি বৃত্তিঃ সর্ব্বৈঃ প্রশস্যতে তৎ ইত্যর্থঃ। ইত্যমরটীকায়াং স্বামী ॥

অপদান্তরঃ (ত্রি) অব্যবহিতঃ। সংযুক্তঃ। ইত্যমরঃ ॥ অভিন্নপদে ক্লী ॥

অপদিশং (ক্লী) ব্য দিক্কোণঃ। দিশোর্ম্মধ্যং। তৎপর্য্যায়ঃ। বিদিক্ ২। ইত্যমরঃ ॥

অপদেশঃ (পুং) স্থানং। নিমিত্তং। শরব্যং। স্বরূপাচ্ছাদনং। তৎপর্য্যায়ঃ। ব্যাজঃ ২ লক্ষ্যং ৩। ইত্যমরঃ ॥ পরানিষ্টকারিভিন্নশঠতা। ইতি মহাভারতটীকা ॥

অপধ্বংসজঃ (পুং) বর্ণসঙ্করঃ। যথা। শূদ্রাণাস্তু সধর্ম্মাণঃ সর্ব্বেঽপধ্বংসজাঃ স্মৃতাঃ। ইতি মনুঃ ॥

অপধ্বস্তঃ (ত্রি) পরিত্যক্তঃ। নিন্দিতঃ। চূর্ণীকৃতঃ। ইতি মেদিনী ॥

অপনয়নং (ক্লী) খণ্ডনং। দূরীকরণং। যথা। ইতি শ্রীশাম্বপুরাণে রোগাপনয়নে শ্রীসূর্য্যবক্তৃবিনির্গতস্তবরাজঃ সমাপ্ত ইতি ॥

অপনোদনং (ক্লী) খণ্ডনং। দূরীকরণং। যথা। মানাপনোদনবিনোদনতে গিরীশে। ইতি শ্রীহর্ষঃ ॥

অপন্থাঃ [ থিন্ ] (পুং) অপথং। ইত্যমরঃ ॥

অপপাত্রিতঃ (ত্রি) উৎকটদোষৈর্জ্ঞাতিভির্ভিন্নোদকীকৃতঃ। যথা। অপপাত্রিতস্য রিকৃথপিণ্ডোদকানি নিবর্ত্তন্তে। ইতি শুদ্ধিতত্ত্বে শঙ্খাপস্তম্বৌ ॥

অপভ্রংশঃ (পুং) গ্রাম্যভাষা। অপভাষা। তৎপর্য্যায়ঃ। অপশব্দঃ ২। ইত্যমরঃ॥ পতনং। যথা। অত্যারূঢ়ির্ভবতি মহতামপ্যপভ্রংশনিষ্ঠা। ইত্যভিজ্ঞানশকুন্তলা॥

অপমঃ (পুং) ক্রান্তিঃ। ইতি সিদ্ধান্তশিরোমণৌ গোলাধ্যায়ঃ॥

অপমানং (ক্লী) অনাদরঃ। অমর্য্যাদা। ইতি শব্দরত্নাবলী॥ তৎপর্য্যায়ঃ। স্যাদবজ্ঞা পরীহারঃ পরিহারঃ পরাভবঃ। অপমানং পরিভবস্তিরস্কারস্তিরস্ক্রিয়া॥ অবহেলা চ হেলা স্যাদবহেলনহেলনং। ক্ষেপো নিকারধিক্কারৌ পর্য্যায়ঃ স্যাদনাদরে॥ ইতি শব্দরত্নাবলী॥ *॥ তস্য অপ্রকাশ্যত্বং যথা। অর্থনাশং মনস্তাপং গৃহে দুশ্চরিতানি চ। বঞ্চনঞ্চাপমানঞ্চ মতিমান্ন প্রকাশয়েৎ॥ ইতি চাণক্যং॥

অপমিত্যকং (ক্লী) ঋণং। ইতি হলায়ুধঃ॥

অপমৃত্যুঃ (পুং) অপঘাতমরণং। বিনা রোগেণ মরণং। যথা। অপমৃত্যুভয়ং নাস্তি মৃতো মোক্ষমবাপ্নুয়াৎ। ইতি দেবীমাহাত্ম্যকীলকং॥ যত্তু শুদ্ধিতত্ত্বে প্রোক্তং পক্ষিমৎস্যমৃগদংষ্ট্রিশৃঙ্গিনখিপতনানশনবজ্রাগ্নিবিষবন্ধজলপ্রবেশাস্ত্রক্ষতাদিজন্যমরণং তদেবাপমৃত্যুরিতি সুধীভির্বিভাব্যং॥

অপযানং (ক্লী) পলায়নং। ইত্যমরঃ॥

অপরং (ক্লী) হস্তিপশ্চাদ্ভাগঃ। গজাস্ত্যজঙ্ঘাদিভাগঃ। ইতি মেদিনী॥ [মেদিনী॥

অপরঃ (ত্রি) অন্যঃ। ইতরঃ। অর্ব্বাচীনঃ। ইতি

অপরত্বং (ক্লী) অপরস্য ভাবঃ। ন্যায়মতে তৎ দ্বিবিধং। দৈশিকং কালিকঞ্চ। দৈশিকং যথা। অল্পসূর্য্যসংযোগজ্ঞানজন্যগুণঃ। তস্যাসমবায়িকারণং দিক্‌সংযোগঃ॥ কালিকং যথা। অল্পসূর্য্যপরিস্পন্দজ্ঞানজন্যগুণঃ। তস্যাসমবায়িকারণং কালপিণ্ডসংযোগঃ। তদুভয়ং অপেক্ষাবুদ্ধিজন্যং। অপেক্ষাবুদ্ধিনাশাদেব তদুভয়োর্নাশঃ। ইতি সিদ্ধান্তমুক্তাবলী॥ [চন্দ্রঃ॥

অপরতিঃ (স্ত্রী) নিবৃত্তিঃ। বিরতিঃ। ইতি হেম-

অপরপক্ষঃ (পুং) কৃষ্ণপক্ষঃ। স তু পিতৃপক্ষঃ। যথা। পূর্ব্বঃ পক্ষো দেবানামপরঃ পক্ষঃ পিতৄণামিতি শ্রুতিঃ॥ পক্ষৌ পূর্ব্বাপরৌ শুক্লকৃষ্ণৌ মাসস্তু তাবুভৌ। ইত্যমরঃ॥ মনুঃ। অথ শ্রাদ্ধমমাবাস্যায়াং পিতৃভ্যো দদ্যাৎ পঞ্চমীপ্রভৃতি বাপরপক্ষস্য যদহর্ব্বা সম্পদ্যতে। ইতি শ্রাদ্ধতত্ত্বঞ্চ॥

অপররাত্রঃ (পুং) রাত্রিশেষঃ। তৎপর্য্যায়ঃ। উচ্চন্দ্রঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥

অপরস্পরং (ত্রি) ক্রিয়াসাতত্যং। কর্ম্মনিরন্তরতা। ইত্যমরঃ॥

অপরা (স্ত্রী) জরায়ুঃ। ইতি মেদিনী॥ পশ্চিমদিক্। ইতি হেমচন্দ্রঃ॥

অপরাঙ্গং (ক্লী) গুণীভূতব্যঙ্গ্যপ্রভেদঃ। যথা অগূঢ়মপরস্যাঙ্গমিতি ভরতমুনিঃ॥ অস্যার্থঃ। অপরস্য রসাদের্বাক্যার্থীভূতস্য বা বাচ্যস্যাঙ্গং রসাদি অনুরণনরূপং বা। ইতি কাব্যপ্রকাশঃ॥ তত্রৈবোদাহরণং। অয়ং স রসনোৎকর্ষী পীনস্তনবিমর্দ্দনঃ। নাভ্যূরুজঘনস্পর্শী নীবীবিস্রংসনঃ করঃ॥ অত্র শৃঙ্গারঃ করুণস্যাঙ্গমিতি॥

অপরাঙ্মুখঃ (পুং) অবিমুখঃ। সংমুখীভূতঃ।

যথা। আহবেষু মিথোঽন্যোন্যং জিঘাংসন্তো মহীক্ষিতঃ। যুদ্ধমানাঃ পরং শক্ত্যা স্বর্গং যান্ত্যপরাঙ্মুখাঃ॥ ইতি মানবে ৭ অধ্যায়ে ৮৯ শ্লোকঃ॥

অপরাজিতঃ (পুং) শিবঃ। বিষ্ণুঃ। ঋষিবিশেষঃ। অনির্জ্জিতে ত্রি। ইতি মেদিনী॥

অপরাজিতা (স্ত্রী) দুর্গা। জয়ন্তীবৃক্ষঃ। অশনপর্ণী। ইতি মেদিনী॥ স্বল্পফলা। বিষ্ণুক্রান্তা। ইতি রাজনির্ঘণ্টঃ॥ শেফালী। শমীভেদঃ। শঙ্খিনী। হপুষাভেদঃ। ইতি বৈদ্যকং॥ স্বনামখ্যাতপুষ্পলতাবিশেষঃ। শুক্লনীলভেদেন সা দ্বিধা। তস্যাঃ পর্য্যায়ঃ। আস্ফোতা ২ গিরিকর্ণী ৩ বিষ্ণুক্রান্তা ৪। ইত্যমরঃ॥ আস্ফোটা ৫। ইতি তট্টীকা॥ গবাক্ষী ৬ অশ্বখুরী ৭ শ্বেতা ৮ শ্বেতভণ্ডা ৯ গবাদনী ১০। ইতি রত্নমালা॥ অদ্রিকর্ণী ১১ কটভী ১২ দধিপুষ্পিকা ১৩ গর্দ্দভী ১৪ সিতপুষ্পী ১৫ শ্বেতস্পন্দা ১৬ ভদ্রা ১৭ সুপুত্রী ১৮ বিষহন্ত্রী ১৯ নগপর্য্যায়কর্ণী ২০ অশ্বাহ্বাদিখুরী ২১। অস্যা গুণাঃ। হিমত্বং। তিক্তত্বং। পিত্তোপদ্রববিষদোষনাশিত্বং। চক্ষুর্হিতত্বং। ত্রিদোষশমতাকারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ শোথকাসনাশিত্বং। কণ্ঠহিতকারিত্বঞ্চ। ইতি রাজবল্লভঃ॥

অপরাদ্ধপৃষৎকঃ (ত্রি) লক্ষ্যচ্যুতশায়কঃ। যস্য বাণো লক্ষ্যাৎ চ্যুতঃ সঃ। ইত্যমরঃ॥

অপরাধঃ (পুং) অকার্য্যাদিদোষঃ। তৎপর্য্যায়ঃ। আগঃ ২ মন্তুঃ ৩। ইত্যমরঃ॥ স চ দ্বাত্রিংশদ্বিধো যথা। আগমে। যানৈর্ব্বা পাদুকৈর্ব্বাপি গমনং ভগবদ্‌গৃহে। দেবোৎসবাদ্যসেবা চ অপ্রণামস্তদগ্রতঃ॥ উচ্ছিষ্টে বাথবাশৌচে ভগবদ্দর্শনাদিকং। একহস্তপ্রণামশ্চ তৎপুরস্তাৎ প্রদক্ষিণং॥ পাদপ্রসারণং চাগ্রে তথা পর্য্যঙ্কবন্ধনং। শয়নং ভক্ষণং বাপি মিথ্যাভাষণমেব চ॥ উচ্চৈর্ভাষা মিথোজল্পো রোদনানি চ বিগ্রহঃ। নিগ্রহানুগ্রহৌ চৈব নৃষু চ ক্রূরভাষণং॥ কম্বলাবরণং চৈব পরনিন্দা পরস্তুতিঃ। অশ্লীলভাষণং চৈব অধোবায়ুবিমোক্ষণং॥ শক্তৌ গৌণোপচারশ্চ অনিবেদিতভক্ষণং। তত্তৎকালোদ্ভবানাঞ্চ ফলাদীনামনর্পণং॥ বিনিযুক্তাবশিষ্টস্য প্রদানং ব্যঞ্জনাদিকে। পৃষ্ঠীকৃত্যাসনং চৈব পরেষামভিবাদনং॥ গুরৌ মৌনং নিজস্তোত্রং দেবতানিন্দনং তথা। অপরাধাস্তথা বিষ্ণোর্দ্বাত্রিংশৎ পরিকীর্ত্তিতাঃ॥ *॥ বারাহে। দ্বাত্রিংশদপরাধা যে কীর্ত্ত্যন্তে বসুধে ময়া। বৈষ্ণবেন সদা তে তু বর্জ্জনীয়াঃ প্রযত্নতঃ॥ যে বৈ ন বর্জ্জয়ন্ত্যেতান্ অপরাধান্ ময়োদিতান্। সর্ব্বধর্ম্মপরিভ্রষ্টাঃ পচ্যন্তে নরকে চিরং॥ রাজান্নভক্ষণঞ্চৈকমাপদ্যপি ভয়াবহং। ধ্বান্তাগারে হরেঃ স্পর্শঃ পরং সুকৃতনাশনঃ॥ তথৈব বিধিমুল্লঙ্ঘ্য সহসা স্পর্শনং হরেঃ। দ্বারোদ্ঘাটো বিনা বাদ্যং ক্রোড়মাংসনিবেদনং॥ পাদুকাভ্যাং তথা বিষ্ণোর্মন্দিরায়োপসর্পণং। কুক্কুরোচ্ছিষ্টকলনং মৌনভঙ্গোঽচ্যুতার্চ্চনে॥ তথা পূজনকালে চ বিড়ুৎসর্গায় সর্পণং। শ্রাদ্ধাদিকমকৃত্বা চ নবান্নস্য চ ভক্ষণং॥ অদত্ত্বা গন্ধমাল্যাদি

ধূপনং মধুঘাতিনঃ। অকর্ম্মণ্যপ্রসূনেন পূজনঞ্চ হরেস্তথা॥ অকৃত্বা দন্তকাষ্ঠঞ্চ কৃত্বা নিধুবনং তথা। স্পৃষ্ট্বা রজস্বলাং দীপং তথা মৃতকমেব চ॥ রক্তং নীলমধৌতঞ্চ পারক্যং মলিনং পটং। পরিধায় মৃতং দৃষ্ট্বা বিমুচ্যাপানমারুতং॥ ক্রোধং কৃত্বা শ্মশানঞ্চ গত্বা ভুক্ত্বাপ্যজীর্ণভুক্। ভক্ষয়িত্বা ক্রোড়মাংসং পিণ্যাকং জালপাদকং॥ তথা কুসুম্ভশাকঞ্চ তৈলাভ্যঙ্গং বিধায় চ। হরেঃ স্পর্শো হরেঃ কর্ম্মকরণং পাতকাবহং॥ *॥ কিঞ্চ তত্রৈব। মম শাস্ত্রং বহিষ্কৃত্য, অস্মাকং যঃ প্রপদ্যতে। মুক্ত্বা চ মম শাস্ত্রাণি শাস্ত্রমন্যৎ প্রভাষতে॥ মদ্যপস্তু সমাসাদ্য প্রবিশেদ্ভবনং মম। যো মে কুসুম্ভশাকেন প্রাপণং কুরুতে নরঃ॥ অপি চ। মম দৃষ্টেরভিমুখং তাম্বূলং চর্ব্বয়েত্তু যঃ। কুরুবকপলাশস্থৈঃ পুষ্পৈঃ কুর্য্যান্মমার্চ্চনং॥ মমার্চ্চামাসুরে কালে যঃ করোতি বিমূঢ়ধীঃ। পাঠাসনোপবিষ্টো যঃ পূজয়েদ্বা নিরাসনঃ॥ বামহস্তেন মাং ধৃত্বা স্নাপয়েদ্বা বিমূঢ়ধীঃ। পূজাপর্য্যুষিতৈঃ পুষ্পৈঃ ষ্ঠীবনং গর্ব্বকল্পনং॥ তির্য্যক্পুণ্ড্রধরো ভূত্বা যঃ করোতি মমার্চ্চনং। যাচিতৈঃ পত্রপুষ্পাদ্যৈর্যঃ করোতি মমার্চ্চনং॥ অপ্রক্ষালিতপাদো যঃ প্রবিশেন্মম মন্দিরং। অবৈষ্ণবস্য পক্বান্নং যো মহ্যং বিনিবেদয়েৎ॥ অবৈষ্ণবেষু পশ্যৎসু মম পূজাং করোতি যঃ। অপূজয়িত্বা বিঘ্নেশং সম্ভাষ্য চ কপালিনং॥ নরঃ পূজাস্তু যঃ কুর্য্যাৎ স্নপনঞ্চ নখাম্ভসা। অমৌনী ঘর্ম্মলিপ্তাঙ্গো মম পূজাং করোতি যঃ॥ জ্ঞেয়াঃ পরেঽপি বহবোঽপরাধাঃ সদসংমতৈঃ। আচারৈঃ শাস্ত্রবিহিতনিষিদ্ধাতিক্রমাদিভিঃ॥*॥ অথাপরাধশমনং। সম্বৎসরস্য মধ্যে চ তীর্থে শৌকরকে মম। কৃতোপবাসঃ স্নানেন গঙ্গায়াং শুদ্ধিমাপ্নুয়াৎ॥ মথুরায়াং তথাপ্যেবং সাপরাধঃ শুচির্ভবেৎ। অনয়োস্তীর্থয়োরঙ্কে যঃ সেবেৎ সুকৃতী নরঃ॥ সহস্রজন্মজনিতানপরাধান্ জহাতি সঃ। স্কান্দে। অহন্যহনি যো মর্ত্ত্যো গীতাধ্যায়স্তু সংপঠেৎ। দ্বাত্রিংশদপরাধৈস্তু অহন্যহনি মুচ্যতে॥ অত্র কার্ত্তিকমাহাত্ম্যে। তুলস্যা কুরুতে যস্তু শালগ্রামশিলার্চ্চনং। দ্বাত্রিংশদপরাধাংশ্চ ক্ষমতে তস্য কেশবঃ॥ তত্রৈবান্যত্র। দ্বাদশ্যাং জাগরে বিষ্ণোর্যঃ পঠেত্তুলসীস্তবং। দ্বাত্রিংশদপরাধানি ক্ষমতে তস্য কেশবঃ॥ যঃ করোতি হরেঃ পূজাং কৃষ্ণশস্ত্রাঙ্কিতো নরঃ। অপরাধসহস্রাণি নিত্যং হরতি কেশব ইতি॥ ইতি শ্রীহরিভক্তিবিলাসে ৮ বিলাসঃ॥

অপরাহ্ণঃ (পুং) শেষং অহঃ। দিনশেষভাগঃ। বিকাল ইতি খ্যাতঃ। ইত্যমরঃ॥ তস্য ভেদাঃ। দ্বিধাবিভক্তদিনস্য শেষভাগঃ॥ ত্রিধাবিভক্তদিনস্য তৃতীয়ভাগঃ। স তু ত্রিংশদ্দণ্ডদিনমানে বিংশতিদণ্ডাৎ পরং দশদণ্ডং যাবৎ। পঞ্চধাবিভক্তদিনস্য চতুর্থভাগঃ। স তু অষ্টাদশদণ্ডাৎ পরং ষড়্দণ্ডং যাবৎ। ইতি শ্রুতিস্মৃতী॥

অপরাহ্ণতনং (ত্রি) অপরাহ্ণভববস্তু। অপরাহ্ণজাতং। ইতি সিদ্ধান্তকৌমুদী॥

অপরাহ্লেতনং (ত্রি) অপরাহ্লুতনং। ইতি সিদ্ধান্তকৌমুদী ॥

অপরিকলিতঃ (ত্রি) অজ্ঞাতঃ। অদৃষ্টঃ। যথা। অপরিকলিতপূর্ব্বঃ কশ্চমৎকারকারী স্ফুরতি মম গরীয়ানেষ মাধুর্য্যপূরঃ। অয়মহমপি হন্ত প্রেক্ষ্য যং লুব্ধচেতাঃ সরভসমুপভোক্তুং কাময়ে রাধিকেব ॥ ইতি ললিতমাধবঃ ॥

অপরিচ্ছন্নং (ত্রি) পরিচ্ছদশূন্যং। পরিপূর্ব্বছদধাতোঃ কর্ত্তরি ক্তে নঞ্‌সমাসঃ ॥

অপরিচ্ছিন্নং (ত্রি) পরিচ্ছেদরহিতং। অসীম। বহিরন্তরশূন্যং। যথা। কিঞ্চ পরিচ্ছিন্নস্য নীড়ে পক্ষ্যাদেরিব প্রবেশো ভবেৎ তব ত্বনাবৃতত্বাৎ অপরিচ্ছিন্নত্বেন বহিরন্তরভেদো নাস্তি কুতঃ প্রবেশঃ। ইতি শ্রীধরস্বামী ॥

অপরিপক্কং (ত্রি) পরিপাকরহিতং। কিঞ্চিৎপক্কং। পরিপূর্ব্বপচধাতোঃ কর্ত্তরি ক্তে তস্য বত্বে চস্য চ কত্বে পরিপক্কং ততো নঞ্‌সমাসঃ ॥

অপরিমিতং (ত্রি) পরিমাণরহিতং। মানতুলাসংখ্যাশূন্যং। যথা। অপরিমিতা ধ্রুবাস্তনুভৃতো যদি সর্ব্বগতাস্তর্হি ন শাস্যতেতি নিয়মো ধ্রুবনেতরথা। ইতি শ্রুত্যধ্যায়ঃ॥

অপরিম্লানঃ (পুং) রক্তাম্লানবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥ ম্লানিরহিতে বাচ্যলিঙ্গঃ ॥

অপরিষ্কারঃ (পুং) পরিষ্কারাভাবঃ। অনির্ম্মলত্বং। তদ্বতি ত্রি। পরিপূর্ব্বকৃধাতোর্ভাবে ঘঞি নঞ্‌সমাসঃ ॥

অপরিষ্কৃতং (ত্রি) অমার্জ্জিতং। অনির্ম্মলং। অভূষিতং। অনলঙ্কৃতং। পরিপূর্ব্বকৃধাতোঃ কর্ম্মণি ক্তে নঞ্‌সমাসঃ॥ যথা। মলপূতিসমাযুক্তশ্লেষ্মবিণ্মূত্রপিচ্ছিলং। রেতোনিষ্ঠীবমানাভিঃ স্রবদ্ভিরপরিষ্কৃতং ॥ ইতি কালিকাপুরাণে ৫৬ অধ্যায়ঃ ॥

অপরিহার্য্যং (ত্রি) অপরিহরণীয়ং। অত্যাজ্যং। যথা। জাতস্য হি ধ্রুবো মৃত্যুর্ধ্রুবং জন্ম মৃতস্য চ। তস্মাদপরিহার্য্যেহর্থে ন ত্বং শোচিতুমর্হসি। ইতি শ্রীভগবদ্গীতা ॥

অপরূপং (ত্রি) অপকৃষ্টরূপং। বিকৃতরূপং। অপোপসর্গেণ রূপশব্দস্য বহুব্রীহিসমাসঃ॥ কর্ম্মধারয়সমাসে ক্লী॥ লোকে তু আশ্চর্য্যমিতি প্রসিদ্ধং ॥ [ইত্যমরঃ ॥

অপরেদ্যুঃ [স্] ব্য অপরেহ্নি। অপরদিনে।

অপর্ণা (স্ত্রী) দুর্গা। ইত্যমরঃ॥ পত্রশূন্যে ত্রি ॥

অপর্য্যাপ্তং (ত্রি) পর্য্যাপ্তিশূন্যং। অসীম। অসমর্থং। যথা। অপর্য্যাপ্তং তদস্মাকং বলং ভীষ্মাভিরক্ষিতং। পর্য্যাপ্তং ত্বিদমেতেষাং বলং ভীমাভিরক্ষিতং ॥ ইতি শ্রীভগবদ্গীতা ॥

অপর্য্যুষিতং (ক্লী) অব্যুষ্টং। সদ্যোভবং। যথা নারসিংহে। অপর্য্যুষিতনিশ্ছিদ্রৈঃ প্রোক্ষিতৈর্জ্জন্তুবর্জ্জিতৈঃ। স্বীয়ারামোদ্ভবৈর্ব্বাপি পুষ্পৈঃ সংপূজয়েদ্ধরিং ॥ ইত্যাহ্নিকাচারতত্ত্বং ॥ [নির্ঘণ্টঃ ॥

অপর্ব্বদণ্ডঃ (পুং) রামশরতৃণং। ইতি রাজ-

অপলং (ক্লী) কীলকং। ইতি শব্দমালা ॥ পলশূন্যে ত্রি ॥

অপলপনং (ক্লী) অপলাপঃ। অপোপসর্গাৎ লপধাতোর্ভাবে অনট্‌প্রত্যয়ঃ ॥

অপলাপঃ (পুং) সতোঽপ্যসত্ত্বেন কথনং। জ্ঞাতস্য গোপনং। তৎপর্য্যায়ঃ। নিহ্নুতিঃ ২ অপহ্নুতিঃ ৩ অপহ্নবঃ ৪ নিহ্নবঃ ৫। ইতি শব্দরত্নাবলী ॥ প্রেম। ইতি মেদিনী ॥

অপলাষিকা (স্ত্রী) তৃষ্ণা। ইতি হেমচন্দ্রঃ ॥

অপবনং (ক্লী) উপবনং। কৃত্রিমবনং। ইতি হেমচন্দ্রঃ ॥

অপবরকঃ (পুং) অন্তর্গৃহং। তৎপর্য্যায়ঃ। গর্ব্ভাগারং ২ বাসৌকঃ ৩ শয়নাস্পদং ৪। ইতি হেমচন্দ্রঃ ॥

অপবর্গঃ (পুং) মোক্ষঃ। ত্যাগঃ। ক্রিয়াবসানসাফল্যং। কর্ম্মফলং। ইতি বিশ্বমেদিন্যৌ ॥ ক্রিয়ান্তঃ। কার্য্যসমাপ্তিঃ। ইতি জটাধরো রত্নাবলী চ ॥ পূর্ণতা। ইতি ধরণী ॥

অপবর্জ্জনং (ক্লী) দানং। মোক্ষঃ। ত্যাগঃ। ইতি মেদিনী ॥

অপবাদঃ (পুং) আজ্ঞা। নিন্দা। তৎপর্য্যায়ঃ। অবর্ণঃ ২ আক্ষেপঃ ৩ নির্বাদঃ ৪ পরীবাদঃ ৫ উপক্রোশঃ ৬ জুগুপ্সা ৭ কুৎসা ৮ গর্হণং ৯। ইত্যমরঃ ॥ বিশ্বাসঃ। ইতি মেদিনী ॥ বিশেষঃ। বাধকঃ। যথা। কচিদপবাদবিষয়েঽপ্যুৎসর্গোঽভিনিবিশতে। ইতি কলাপপরিশিষ্টং ॥ রজ্জুবিবর্ত্তস্য সর্পস্য রজ্জুমাত্রত্ববৎ বস্তুবিবর্ত্তস্যাবস্তুনোঽজ্ঞানাদেঃ প্রপঞ্চস্য বস্তুমাত্রত্বং। তদুক্তং। সতত্ত্বতোঽন্যথা প্রথা বিকার ইত্যুদীরিতঃ। অতত্ত্বতোঽন্যথা প্রথা বিবর্ত্ত ইত্যুদাহৃতঃ ॥ অস্য ফলং। আভ্যাং অধ্যারোপাপবাদাভ্যাং তত্ত্বম্পদার্থশোধনমপি সিদ্ধং ভবতি। ইতি বেদান্তসারঃ ॥

অপবারণং (ক্লী) ব্যবধানং। অন্তর্দ্ধানং। ইত্যমরঃ ॥

অপবারিতং (ত্রি) অন্তর্হিতং। ইতি হেমচন্দ্রঃ ॥

অপবিত্রং (ত্রি) পবিত্রতারহিতং। অশুদ্ধং। যথা। অপবিত্রঃ পবিত্রো বা সর্ব্বাবস্থাং গতোঽপি বা। যঃ স্মরেৎ পুণ্ডরীকাক্ষং সবাহ্যাভ্যন্তরঃ শুচিঃ ॥ ইতি স্মৃতিঃ ॥

অপবিদ্ধঃ (ত্রি) প্রত্যাখ্যাতঃ। নিরাকৃতঃ। ইতি হেমচন্দ্রঃ ॥

অপবিদ্ধপুত্রঃ (পুং) দ্বাদশবিধপুত্রমধ্যে পুত্রবিশেষঃ। স তু পোষণাদ্যসমর্থমাতাপিতৃভ্যাং ত্যক্তঃ তয়োরন্যতরমরণে অন্যতরেণ বা ত্যক্তঃ অনন্তরং অন্যেন গৃহীত্বা পুত্রত্বেন পরিকল্পিতঃ। যথা। মাতাপিতৃভ্যামুৎসৃষ্টং তয়োরন্যতরেণ বা। যং পুত্রং পরিগৃহ্লীয়াদপবিদ্ধঃ স উচ্যতে ॥ ইতি মনুঃ ॥

অপবিষা (স্ত্রী) নির্ব্বিষীতৃণং। ইতি রাজনির্ঘণ্টঃ ॥

অপশদঃ (পুং) অপসদঃ। নীচঃ। ইত্যমরটীকায়াং ভরতঃ ॥

অপশব্দঃ (পুং) অসংস্কৃতশব্দঃ। অশাস্ত্রীয়শব্দঃ। লৌকিকশব্দঃ। গ্রাম্যভাষা। তৎপর্য্যায়ঃ। অপভ্রংশঃ ২। ইত্যমরঃ ॥ আভীরাদিগিরঃ কাব্যেষ্বপভ্রংশ ইতি স্মৃতঃ। শাস্ত্রেষু সংস্কৃতাদন্যদপভ্রংশতয়োদিতং ॥ ইতি দণ্ডী ॥

অপশুক্ [ চ্ ] (পুং) আত্মা। যথা। ক উত্তমশ্লোকগুণানুবাদাৎ পুমান্ বিরজ্যেত বিনা পশুঘ্নাৎ। ইতি শ্রীভাগবতং ॥

অপশোকঃ (পুং) অশোকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

অপষ্টং (ক্লী) অঙ্কুশাগ্রং। ইতি হেমচন্দ্রঃ ॥

অপষ্ঠু ব্য নিরবদ্যং। বিপরীতং। শোভনং। ইতি শব্দমালা ॥
অপষ্ঠুঃ (পুং) কালঃ। বামে ত্রি। ইতি মেদিনী॥
অপষ্ঠুরং (ত্রি) প্রতিকূলং। ইতি হেমচন্দ্রঃ ॥
অপষ্ঠুলং (ত্রি) প্রতিকূলং। বিপরীতং। ইতি ত্রিকাণ্ডশেষঃ ॥
অপসদঃ (পুং) নীচঃ। ইতরলোকঃ। ইত্যমরঃ॥
অপসরঃ (পুং) অপসরণং। স্থানাৎ স্থানান্তরগমনং। অপোপসর্গাৎ গত্যর্থসৃধাতোর্ভাবে অল্প্রত্যয়ঃ ॥
অপসর্জ্জনং (ক্লী) মোক্ষঃ। পরিত্যাগঃ। দানং। ইতি ভূরিপ্রয়োগঃ ॥
অপসর্পঃ (ত্রি) চরঃ। হর্‌করা ইতি প্রসিদ্ধঃ। ইত্যমরঃ ॥
অপসলবি ব্য প্রদেশিন্যঙ্গুষ্ঠয়োরন্তরা। পিতৃতীর্থং। যথা। প্রদেশিন্যঙ্গুষ্ঠয়োরন্তরা অপসলবি অপসব্যং বা তেন পিতৃভ্যো নিদধাতি। ইতি শ্রাদ্ধতত্ত্বে ভট্টভাষ্যধৃতগৃহ্যং ॥
অপসব্যং (ক্লী) অপসলবি। পিতৃতীর্থং। ইতি শ্রাদ্ধতত্ত্বে ভট্টভাষ্যধৃতগৃহ্যং ॥
অপসব্যঃ (ত্রি) শরীরদক্ষিণভাগঃ। প্রতিকূলঃ। ইতি মেদিনী ॥
অপস্করঃ (পুং) রথাঙ্গং। তচ্চ অক্ষযুগচক্রাদি। ইত্যমরঃ ॥ গুহ্যদারং। বিষ্ঠা। ইতি ধরণী॥
অপস্নাতঃ (ত্রি) মৃতমুদ্দিশ্যকৃতস্নানো জনঃ। ইত্যমরঃ ॥ সংস্কারার্থং স্নাপিতো মৃতঃ। ইতি স্বামী ॥
অপস্নানং (ক্লী) মৃতস্নানং। মৃতোদ্দেশ্যকস্নানং। ইতি হেমচন্দ্রঃ ॥
অপস্মারঃ (পুং) রোগবিশেষঃ। মৃগী ইতি ভাষা। তৎপর্য্যায়ঃ। অঙ্গবিকৃতিঃ ২ লালাধঃ ৩ ভূতবিক্রিয়া ৪। ইতি রাজনির্ঘণ্টঃ॥*॥ তস্য সামান্যরূপং। তমঃপ্রবেশঃ সংরম্ভো দোষোদ্রেকহতস্মৃতেঃ। অপস্মার ইতি জ্ঞেয়ো গদো ঘোরশ্চতুর্বিধঃ ॥ * ॥ তস্য নিদানপূর্ব্বিকা সম্প্রাপ্তিঃ। চিন্তাশোকাদিভিঃ ক্রুদ্ধা দোষা হৃৎস্রোতসি স্থিতাঃ। কৃত্বা স্মৃতেরপধ্বংসমপস্মারং প্রকুর্ব্বতে ॥ * ॥ তস্য পূর্ব্বরূপং যথা। হৃৎকম্পঃ শূন্যতা স্বেদো ধ্যানং মূর্চ্ছা প্রমূঢ়তা। নিদ্রানাশশ্চ তস্মিংশ্চ ভবিষ্যতি ভবত্যথ ॥ * ॥ বাতিকস্য রূপং। কম্পতে প্রদশেৎ দন্তান্ ফেনোদ্বামী শ্বসিত্যপি। পরুষারুণকৃষ্ণানি পশ্যেদ্রূপাণি চানিলাৎ ॥ * ॥ পৈত্তিকস্য রূপং। পীতফেনাঙ্গবক্ত্রাক্ষঃ পীতাসৃগ্রূপদর্শনঃ ॥ সতৃষ্ণোষ্ণানলব্যাপ্তলোকদর্শী চ পৈত্তিকঃ ॥*॥ শ্লৈষ্মিকরূপং। শুক্লফেনাঙ্গবক্ত্রাক্ষঃ শীতহৃষ্টাঙ্গজো গুরুঃ। পশ্যন্ শুক্লানি রূপাণি শ্লৈষ্মিকো মুচ্যতে চিরাৎ॥*॥ ত্রিদোষজরূপং। সর্ব্বৈরেভিঃ সমস্তৈশ্চ লিঙ্গৈর্জ্ঞেয়স্ত্রিদোষজঃ॥*॥ অসাধ্যলক্ষণং॥ অপস্মারঃ স চাসাধ্যো যঃ ক্ষীণস্যানবশ্চ যঃ ॥ * ॥ অরিষ্টলক্ষণং। প্রস্ফুরন্তং সুবহুশঃ ক্ষীণং প্রচলিতভ্রুবং। নেত্রাভ্যাঞ্চ বিকুর্ব্বাণমপস্মারো বিনাশয়েৎ ॥ * ॥ তস্য বেগকালঃ। পক্ষাদ্বা দ্বাদশাহাদ্বা মাসাদ্বা কুপিতা মলাঃ। অপস্মারায় কুর্ব্বন্তি বেগং কিঞ্চিদথান্তরং ॥ দেবে বর্ষত্যপি যথা ভূমৌ বীজানি কানিচিৎ। শরদি প্রতিরোহন্তি তথা ব্যাধিসমুচ্ছয়াঃ ॥ ইতি মাধবকরঃ ॥*॥

তস্য চিকিৎসা যথা। তৈলেন লশুনঃ সেব্যঃ পয়সা চ শতাবরী। ব্রাহ্মীরসশ্চ মধুনা সর্ব্বাপস্মারভেষজং ॥ * ॥ চূর্ণৈঃ সিদ্ধার্থকাদীনাং ভক্ষিতৈরথবাপি তৈঃ। গোমূত্রপিষ্টৈঃ সর্ব্বাঙ্গলেপৈঃ শাম্যত্যপস্মৃতিঃ ॥ সিদ্ধার্থকাদিঃ উম্মাদোক্তঃ ॥ * ॥ শিগ্রু কটৃঙ্গকিণিহীনিম্বত্বগ্রসপাচিতং। চতুর্গুণে গবাং মূত্রে তৈলমভ্যঙ্গনে হিতং ॥ কটৃঙ্গঃ শোনাপাঠা। কিণিহী চিরিচিরা ॥*॥ নির্গুণ্ডীভববন্দাকনাবনস্য প্রয়োগতঃ। উপৈতি সহসা নাশমপস্মারো মহাগদঃ ॥*॥ মনোহ্বা তার্ক্ষ্যবিষ্ঠা বা শকৃৎ পারাবতস্য চ। অঞ্জনাদ্ধন্ত্যপস্মারমুন্মাদঞ্চ বিশেষতঃ ॥ মনোহ্বা মনঃশিলা। তর্ক্ষ্যো গরুড়ঃ। শকৃৎ বিষ্ঠা ॥ * ॥ যঃ খাদেৎ ক্ষীরভক্তাশী মাক্ষিকেণ বচারজঃ। অপস্মারং মহাঘোরং চিরোত্থং স জয়েদ্ধ্রুবং ॥ বচা ঘুরবচ্ ॥*॥ কুষ্মাণ্ডকফলোত্থেন রসেন পরিপেষিতং। অপস্মারবিনাশায় যষ্ঠ্যাহ্বং চ পিবেত্ত্র্যহং॥ ত্র্যহমিতি এতস্য পানাদ্দিবসত্রয়েণৈবাপস্মারোপশমো ভবতীত্যভিপ্রায়ঃ ॥ * ॥ ব্রাহ্মীরসবচাকুষ্ঠশঙ্খপুষ্পীশৃতং ঘৃতং। পুরাণং স্যাদপস্মারোন্মাদগ্রহহরং পরং ॥ এতস্য প্রক্রিয়া। পুরাণং গোঘৃতং প্রস্থমিতং বচাকুষ্ঠশঙ্খপুষ্পীণাং সমুদিতানাং কুড়বমিতানাং কল্কেন প্রস্থমিতব্রাহ্মীরসপিষ্টেন পচেৎ। ব্রাহ্মীঘৃতং ॥ * ॥ কুষ্মাণ্ডকরসে সর্পিরষ্টাদশগুণে পচেৎ। যষ্ঠ্যাহ্বকল্কং তৎপানমপস্মারবিনাশনং ॥ কুষ্মাণ্ডকঘৃতং ॥ * ॥ স্মৌ কীটমেযৌ বিধিবদানীয় রবিবাসরে। কণ্ঠে ভুজে বা সংধার্য্য জয়েদুগ্রামপস্মৃতিং ॥ অয়স্তু কীটো নদীতীরে সিকতামধ্যে তিষ্ঠতি ॥ * ॥ শিগ্রুকুষ্ঠজলাজাজীলশুনব্যোষহিঙ্গুভিঃ। বস্তমূত্রে শৃতং তৈলং নাবনং স্যাদপস্মৃতৌ॥ জলং বালকং। অজাজী জীরকঃ। বস্তঃ ছাগঃ। নাবনং নস্যং ॥ * ॥ ইত্যপস্মারাধিকারঃ। ইতি ভাবপ্রকাশঃ ॥

অপহারঃ (পুং) অপচয়ঃ। হানিঃ। ইত্যমরঃ ॥ অপহরণং। চৌর্য্যং। সংগোপনং। ধনস্বাম্যনুপযোগিব্যয়ঃ। ইতি দায়ভাগঃ ॥

অপহারকঃ (ত্রি) অপহারী। অপহরণকর্ত্তা। যথা। পরাপবাদনিরতঃ পরদ্রব্যাপহারকঃ। ইতি পুরাণং ॥

অপহাসঃ (পুং) অকারণহাস্যং। ইতি হেমচন্দ্রঃ ॥ [ মেদিনী ॥

অপহ্নবঃ (পুং) অপলাপঃ। স্নেহঃ। ইতি

অপহ্নুতিঃ (স্ত্রী) অপলাপঃ। অপহ্নবঃ। ইতি শব্দরত্নাবলী ॥ উপমেয়াসত্যকরণপূর্ব্বকোপমানসত্যতাব্যবস্থাপিকালঙ্কৃতিঃ। তস্যা লক্ষণং। প্রকৃতং যন্নিষিধ্যান্যৎ সাধ্যতে সা ত্বপহ্নুতিঃ ॥ উদাহরণং। অবাপ্তঃ প্রাগল্ভ্যং পরিণতরুচঃ শৈলতনয়ে কলঙ্কো নৈবায়ং বিলসতি শশাঙ্কস্য বপুষি। অমুষ্যেয়ং মন্যে বিগলদমৃতস্যন্দিশিশিরে রতিশ্রান্তা শেতে রজনিরমণী গাঢ়মুরসি ॥ ইতি কাব্যপ্রকাশঃ ॥

অপাংনাথঃ (পুং) সমুদ্রঃ। ইতি রাজনির্ঘণ্টঃ॥

অপাংনিধিঃ (পুং) সমুদ্রঃ। বারাংনিধিরিতি দর্শনাৎ ॥

অপাংপতিঃ ( পুং ) সমুদ্রঃ। ইত্যমরঃ॥ বরুণঃ। অপ্পতিরিত্যমরেণোক্তত্বাৎ॥

অপাংপিত্তং ( ক্লী ) অগ্নিঃ। ইতি শব্দরত্নাবলী॥ চিত্রকবৃক্ষঃ। বহ্নিসংজ্ঞক ইত্যমরেণোক্তত্বাৎ॥

অপাক্ [ চ্ ] ( ত্রি ) দক্ষিণদিগ্‌ভববস্তু। তৎপর্য্যায়ঃ। অপাচীনং ২। ইতি হেমচন্দ্রঃ॥

অপাকঃ ( পুং ) পাকাভাবঃ। অজীর্ণতা। যথা। অঙ্গমর্দ্দোঽরুচিস্তৃষ্ণা আলস্যং গৌরবং জ্বরঃ। অপাকঃ শূনতাঙ্গানামামবাতস্য লক্ষণং॥ ইতি মাধবকরঃ॥ পাকাভাববিশিষ্টে ত্রি। যথা। গাত্রপ্রদেশে কচিদেব দোষাঃ সংমূর্চ্ছিতা মাংসমসৃক্ প্রদূষ্য। বৃত্তং স্থিরং মন্দরুজং মহান্তমনল্পমূলং চিরবৃদ্ধ্যপাকং॥ ইতি মাধবকরঃ॥

অপাকশাকং (ক্লী) আর্দ্রকং। ইতি রাজনির্ঘণ্টঃ॥

অপাঙ্গঃ ( পুং ) নেত্রয়োরন্তঃ। চক্ষুঃকোণঃ। তিলকঃ। ইত্যমরঃ॥ অঙ্গহীনে ত্রি। ইতি মেদিনী॥

অপাঙ্গকঃ (পুং) অপামার্গবৃক্ষঃ। আপাং ইতি ভাষা। ইতি শব্দরত্নাবলী॥ অঙ্গহীনে ত্রি

অপাঙ্গদর্শনং (ক্লী) কটাক্ষঃ। ইতি হেমচন্দ্রঃ॥

অপাচী ( স্ত্রী ) দক্ষিণদিক্। ইতি হলায়ুধঃ॥

অপাচীনং ( ত্রি ) অপাগর্থং। দক্ষিণদিগ্‌ভববস্তু। বিপর্য্যস্তং। বিপরীতং। ইতি বিশ্বমেদিন্যৌ॥

অপাচ্যং ( ত্রি ) দক্ষিণদিগ্‌ভববস্তু। অপাচী দক্ষিণদিক্ ততো ভবার্থে যৎপ্রত্যয়ঃ। পচনাযোগ্যং। পচধাতোঃ কর্ম্মণি ঘ্যণি পাচ্যং পশ্চান্নঞ্‌সমাসঃ॥

অপাটবং ( ক্লী ) রোগঃ। ইতি হেমচন্দ্রঃ॥ অপটুতা। জড়তা। পটোর্ভাবঃ পাটবং ততো নঞ্‌সমাসঃ॥

অপাত্রং ( ক্লী ) কুপাত্রং। অসৎপাত্রং। যথা। অপাত্রে পাতয়েদ্দত্তং সুবর্ণং নরকার্ণবে। ইতি মলমাসতত্ত্বং॥

অপাত্রীকরণং ( ক্লী ) নববিধপাপমধ্যে পাপবিশেষঃ। তচ্চতুর্ব্বিধং। নিন্দিতধনাদানং ১ বাণিজ্যং ২ শূদ্রসেবনং ৩ অসত্যভাষণং ৪। ইতি প্রায়শ্চিত্তবিবেকঃ॥

অপাদানং (ক্লী) যস্মাদ্বস্তুনো বস্ত্বন্তরস্য চলনং ভবতি তৎ। ষট্‌কারকমধ্যে পঞ্চমকারকং। তত্রৈকাদশার্থে পঞ্চমী স্যাৎ যথা। যতোঽপায়ঃ। যথা বৃক্ষাৎ পর্ণং পততি ১। যতো ভীঃ। যথা ব্যাঘ্রাদ্বিভেতি ২। যতো জুগুপ্সা। যথা পাপাৎ জুগুপ্সতে ধীরঃ ৩। যতঃ পরাজয়ঃ। যথা সিংহাৎ পরাজয়তে হস্তী ৪। যতঃ প্রমাদঃ। যথা ধর্ম্মাৎ প্রমাদ্যতি নীচঃ ৫। যত আদানং। যথা ভূপাৎ ধনমাদত্তে বিপ্রঃ ৬। যতো ভূঃ। যথা পিতুঃ পুত্রো জায়তে ৭। যতস্ত্রাণং। যথা ব্যাঘ্রাৎ গাং রক্ষতি গোপঃ ৮। যতো বিরামঃ। যথা জপাদ্বিরমতি বিপ্রঃ৯। যতোঽন্তর্দ্ধিঃ। যথা গুরোরন্তর্দ্ধত্তে শিষ্যঃ১০। যতো বারণং। যথা যবেভ্যো গাং নিবারয়তি ১১। ইতি মুগ্ধবোধটীকায়াং দুর্গাদাসঃ॥

অপানং ( ক্লী ) মলদ্বারং। তৎপর্য্যায়ঃ। গুদং ২ পায়ুঃ ৩। ইত্যমরঃ॥ গুহ্যং ৪

গুদবর্ত্ম ৫। ইতি জটাধরঃ॥ তনুহূর্দঃ৬। মার্গঃ ৭। ইতি শব্দরত্নাবলী॥

অপানঃ ( পুং ) গুদস্থবায়ুঃ। ইত্যমরঃ॥ অবাগ্‌গমনবান্ পায়্বাদিস্থানবর্ত্তী বায়ুঃ। ইতি বেদান্তসারঃ॥

অপাপঃ ( ত্রি ) নিষ্পাপঃ। পাপশূন্যঃ। যথা। ইয়ং দাশরথে সীতা সুব্রতা ব্রহ্মচারিণী। অপাপা হি ত্বয়া ত্যক্তা মমাশ্রমসমীপতঃ॥ ইতি রামায়ণং॥

অপামার্গঃ ( পুং ) বৃক্ষবিশেষঃ। আপাং ইতি ভাষা। তৎপর্য্যায়ঃ। শৈখরিকঃ ২ ধামার্গবঃ ৩ ময়ূরকঃ ৪ প্রত্যক্‌পর্ণী ৫ কীশপর্ণী ৬ কিণিহী ৭ খরমঞ্জরী ৮। ইত্যমরঃ॥ শৈখরেয়ঃ ৯ অধামার্গবঃ ১০ কেশপর্ণী ১১ ইতি তট্টীকা॥ স্থলমঞ্জরী ১২ প্রত্যক্‌পুষ্পী ১৩ ক্ষারমধ্যঃ ১৪ অধোঘণ্টা ১৫ শিখরী ১৬ ইতি রত্নমালা॥ দুর্গ্রহঃ ১৭ অধ্বশল্যঃ ১৮ কাণ্ডীরকঃ ১৯ মর্কটী ২০ দুরভিগ্রহঃ২১ বাশিরঃ ২২ পরাক্‌পুষ্পী ২৩ কণ্টী ২৪ মর্কটপিপ্পলী ২৫ কটুমঞ্জরিকা ২৬ অঘাটঃ ২৭ ক্ষরকঃ ২৮ পাণ্ডুকণ্টকঃ ২৯ নালাকণ্টঃ ৩০ কুব্জঃ ৩১। অস্য গুণাঃ। তিক্তত্বং। উষ্ণত্বং। কটুত্বং। কফার্শঃকণ্ডূদরামবিষরোগনাশিত্বং। ধারকত্বং। বান্তিকারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ অগ্নিবর্দ্ধকত্বং। ক্লেদকারিত্বং। স্রংসনত্বঞ্চ। ইতি রাজবল্লভঃ॥ *॥ তৎফলগুণাঃ। রসে স্বাদুত্বং। পাকে দুর্জ্জরত্বং। বিষ্টম্ভিত্বং। বায়ুকারিত্বং। রূক্ষত্বং। রক্তপিত্তপ্রসাদনত্বঞ্চ। ইতি ভাবপ্রকাশঃ॥

অপাম্পতিঃ ( পুং ) সমুদ্রঃ। ইত্যমরঃ॥ বরুণঃ। অপ্পতিরিত্যমরেণোক্তত্বাৎ॥

অপাম্পিত্তং ( ক্লী ) অগ্নিঃ। ইতি শব্দরত্নাবলী॥ চিত্রকবৃক্ষঃ। বহ্নিসংজ্ঞক ইত্যমরেণোক্তত্বাৎ

অপায়ঃ ( পুং ) বিশ্লেষঃ। ইতি রামতর্কবাগীশঃ॥ চলনং। ইতি দুর্গাদাসঃ॥ বিনাশঃ। যথা। সা কাশী ত্রিপুরারিরাজনগরী পায়াদপায়াজ্জগৎ॥ ইতি কাশীখণ্ডং॥

অপারং ( ক্লী ) অবারং। নদ্যাদেরর্ব্বাক্‌পারং। ইতি হলায়ুধঃ॥ অসীমে ত্রি॥

অপাবৃতং ( ত্রি ) পিহিতং। আবৃতং। স্বতন্ত্রং। স্বাধীনং। ইতি মেদিনী॥

অপাবৃত্তং ( ত্রি ) লুঠিতং। লোটা। গড়াগড়ি ইতি ভাষা। ইতি হেমচন্দ্রঃ॥

অপাশ্রয়ঃ ( পুং ) প্রাঙ্গণাবরণং। সামিয়ানা। চাঁদোয়া ইতি ভাষা। তৎপর্য্যায়ঃ। মত্তালম্বঃ ২ প্রগ্রীবঃ ৩ মত্তবারণঃ ৪। ইতি হেমচন্দ্রঃ॥ আশ্রয়শূন্যে ত্রি॥

অপাসঙ্গঃ ( পুং ) উপাসঙ্গঃ। তূণঃ। ইত্যমরটীকাসারসুন্দরী॥

অপাসনং ( ক্লী ) মারণং। ইত্যমরঃ॥

অপাস্তং ( ত্রি ) নিরস্তং। যথা। এতেন নাতিসন্ধ্যাসমীপত ইত্যনেন রাক্ষসীবেলামাত্রং। নিষিধ্যত ইতি মৈথিলমতমপাস্তং। ইতি তিথ্যাদিতত্ত্বং॥

অপাক্ষং ( ত্রি ) প্রত্যক্ষং। ইতি ত্রিকাণ্ডশেষঃ। কুৎসিতচক্ষুঃ। লোচনশূন্যং। এতাবর্থৌ ব্যুৎপত্তিলব্ধৌ॥

অপি ব্য উপসর্গবিশেষঃ। অস্যার্থাঃ। আহরণং।

সম্ভাবনং। নিন্দা। অনুজ্ঞা। অল্পত্বং। সমুচ্চয়ঃ। ইতি দুর্গাদাসঃ॥ প্রশ্নঃ। শঙ্কা। যুক্তপদার্থঃ। কামাচারক্রিয়া। ইতি বিশ্বমেদিন্যৌ॥

অপিগীর্ণং (ত্রি) স্তুতং। বর্ণিতং। ইত্যমরঃ॥

অপিচ্ছিলঃ (ত্রি) পৈচ্ছিল্যাভাববিশিষ্টঃ। পিচ্ছিলতাশূন্যঃ। যথা। প্রমেহিণো যদা মূত্রমনাবিলমপিচ্ছিলং। ইতি মাধবকরঃ॥

অপিতু ব্য যদ্যর্থং। যদ্যপি। ইতি ত্রিকাণ্ডশেষঃ॥

অপিধানং (ক্লী) আচ্ছাদনং। অন্তর্দ্ধানং। ইত্যমরঃ॥

অপিনদ্ধং (ত্রি) পরিহিতবস্ত্রাদি। তৎপর্য্যায়ঃ। আমুক্তঃ২ প্রতিমুক্তঃ৩ পিনদ্ধঃ৪। ইত্যমরঃ॥

অপীতঃ (পুং) পীতভিন্নবর্ণঃ। তদ্বিশিষ্টে অকৃতপানে চ ত্রি। ইতি নঞ্‌সমস্তপীতশব্দস্যৈতাবর্থৌ॥

অপীনসং (ক্লী) পীনসরোগঃ। ইতি রভসঃ॥ তদ্রহিতে ত্রি॥

অপীব্যং (ত্রি) অতিসুন্দরং। যথা। অপাব্যদর্শনং শশ্বৎ সর্ব্বলোকনমস্কৃতং। সন্তং বয়সি কৈশোরে ভৃত্যানুগ্রহকাতরং॥ ইতি শ্রীভাগবতং॥ [ চন্দ্রিকা॥

অপুচ্ছা (স্ত্রী) শিংশপাবৃক্ষঃ। ইতি শব্দ-

অপুনর্ভবঃ (পুং) মুক্তিঃ। কৈবল্যং। ইতি হেমচন্দ্রঃ॥ পুনর্জন্মাভাবঃ। যথা। হেতৌ লিঙ্গে প্রশমনে রোগাণামপুনর্ভবে। জ্ঞানং চতুর্বিধং যস্য স রাজার্হো ভিষকৃতমঃ॥ ইতি চরকঃ॥

অপুষ্পফলদঃ (পুং) পনসবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥ পুষ্পব্যতিরেকজাতফলবৃক্ষমাত্রং॥

অপূপঃ (পুং) পিষ্টকঃ। ইত্যমরঃ॥ গোধূমঃ। ইতি রাজনির্ঘণ্টঃ॥

অপূপ্যঃ (পুং) গোধূমচূর্ণং। ময়দা ইতি ভাষা। ইতি জটাধরঃ॥

অপূরণী (স্ত্রী) শাল্মলিবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥

অপূর্ব্বং (ক্লী) কর্ম্মজন্যমদৃষ্টং। তৎপর্য্যায়ঃ। অনুশয়ঃ২ নিয়োগঃ৩ অতিশয়ঃ৪ কার্য্যং৫ প্রয়োগঃ ৬। ইতি স্মৃতিঃ॥ তচ্চতুর্বিধং যথা। ফলাপূর্ব্বং ১ সমুদায়াপূর্ব্বং ২ উৎপত্ত্যপূর্ব্বং ৩ অঙ্গাপূর্ব্বং ৪। যেন স্বর্গ আরভ্যতে তৎ ফলাপূর্ব্বং। অমাবাস্যায়াং ত্রয়াণাং যাগানামেকঃ সমুদায়ঃ পৌর্ণমাস্যামপরঃ তয়োর্ভিন্নকালবর্ত্তিনোঃ সংহত্যফলাপূর্ব্বারম্ভাযোগাত্তদারম্ভায় সমুদায়দ্বয়জন্যমপূর্ব্বদ্বয়ং কল্পনীয়ং। তয়োরেকৈকস্যারম্ভায় একৈকসমুদায়বর্ত্তিনাং ত্রয়াণাং যাগানাং ভিন্নক্ষণবর্ত্তিত্বেন সংঘাতাপত্ত্যভাবাৎ যাগত্রয়জন্যানি ত্রীণ্যুৎপত্ত্যপূর্ব্বাণি কল্পনীয়ানি। তেষাঞ্চাঙ্গোপকারমন্তরেণানিষ্পত্তেরঙ্গানাং চানেকক্ষণবর্ত্তিনাং সংঘাতাসম্ভবাৎ অঙ্গাপূর্ব্বাণি কল্পনীয়ানি। তত্র ত্বয়ং বিভাগঃ। ইত্যধিকরণমালা॥

অপূর্ব্বং (ত্রি) আশ্চর্য্যং। যথা। অপূর্ব্বেয়ং হরের্মায়া ত্রিগুণা রজ্জুরূপিণী। যয়া মুক্তো ন চলতি বদ্ধো ধাবতি ধাবতি॥ ইতি উদ্ভটঃ॥ পূর্ব্বদিগ্‌দেশকালভিন্নং॥

অপেতরাক্ষসী (স্ত্রী) তুলসীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

অপেয়ং (ত্রি) পানাযোগ্যং। অপানীয়ং। যথা। মদ্যমপেয়মদেয়মনিগ্রাহ্যং। ইতি তিথ্যাদিতত্ত্বে উশনঃসূত্রং ॥

অপেক্ষণীয়ং (ত্রি) অপেক্ষাযোগ্যং। অপেক্ষ্যং। অপেক্ষিতব্যং। যথা। আত্মা যত্নেন রক্ষ্যো রণশিরসি পুনঃ সোঽপি নাপেক্ষণীয়ঃ। ইতি নবরত্নমধ্যে শঙ্কুঃ ॥

অপেক্ষা (স্ত্রী) কার্য্যনিমিত্তয়োরন্যোন্যাভিসম্বন্ধঃ। ইতি সুপদ্মটীকায়াং বিষ্ণুমিশ্রঃ ॥ আকাঙ্ক্ষা। যথা। সা প্রক্রিয়া যা কথমিত্যপেক্ষা। ইতি বেদান্তটীকায়াং বাচস্পতিমিশ্রঃ ॥

অপেক্ষাবুদ্ধিঃ (স্ত্রী) অনেকৈকত্ববিষয়কবুদ্ধিঃ। নানৈকত্বাবগাহিবুদ্ধিঃ। অয়মেকঃ অয়মেক ইত্যাকারবুদ্ধিঃ। ইতি ভাষাপরিচ্ছেদঃ ॥

অপোগণ্ডঃ (ত্রি) স্বভাবতো ন্যূনাধিকাঙ্গবিশিষ্টঃ। তৎপর্য্যায়ঃ। পোগণ্ডঃ ২ বিকলাঙ্গঃ ৩ অঙ্গহীনকঃ ৪। ইতি শব্দরত্নাবলী ॥ শিশুঃ। বলিভঃ। ত্রিবলিযুক্তঃ। ইতি মেদিনী ॥ অতিভীরুঃ। ইতি বিশ্বো হেমচন্দ্রশ্চ ॥ দ্বে স্বভাবতো ন্যূনাধিকাঙ্গে ঊনবিংশত্যঙ্গুলীকৈকবিংশত্যঙ্গুলীকাদৌ জনে বর্ত্ততে ইত্যর্থঃ। বিকলং স্বভাবহীনং অঙ্গমস্য বিকলাঙ্গঃ। অপকৃষ্টং গচ্ছতি অপোগণ্ডঃ। নাম্নীতি গমের্ডঃ নিপাতনাৎ পস্য পোভাবঃ। অপোগণ্ডস্তু শিশুকে বিকলাঙ্গে চ ভীরুকে। ইতি বিশ্বঃ ॥ নিপাতনাদপস্যাদিলোপে পোগণ্ডোঽপি। পোগণ্ডো বিকলাঙ্গে স্যাদিতি হলায়ুধঃ ॥ পোগণ্ডো বিকলাঙ্গকঃ। ইতি রত্নকোষঃ ॥ ইতি তট্টীকায়াং ভরতঃ ॥

অপোদিকা (স্ত্রী) উপোদিকা। পূতিকাশাকং। ইত্যমরটীকায়াং স্বামী ॥

অপোহঃ (পুং) অপগত ঊহঃ। বিতর্কাভাবঃ। শুশ্রূষাদ্যষ্টধাধীগুণান্তর্গতষষ্ঠগুণঃ। ইতি হেমচন্দ্রঃ ॥ অতদ্ব্যাবৃত্তিঃ। ইতি কাব্যপ্রকাশটীকায়াং মহেশ্বরঃ ॥

অপ্নঃ [ স্ ] (ক্লী) যজ্ঞকর্ম্ম। ইত্যুণাদিকোষঃ ॥

অপ্নুঃ (পুং) শরীরং। অঙ্গং। ইত্যুণাদিকোষঃ ॥

অপ্সঃ [ স্ ] (ক্লী) জলং। বেদপ্রয়োগোঽয়ং ॥

অপ্পতিঃ (পুং) বরুণঃ। ইত্যমরঃ ॥ সমুদ্রঃ। অপাম্পতিরিতি দর্শনাৎ ॥

অপ্পিত্তং (ক্লী) অগ্নিঃ। ইত্যমরঃ ॥ চিত্রকবৃক্ষঃ। বহ্নিসংজ্ঞকত্বাৎ ॥

অপ্রকটঃ (ত্রি) অব্যক্তঃ। অপ্রকাশঃ। যথা। প্রকটাপ্রকটা চেতি লীলা সেয়ং দ্বিধোচ্যতে। ইতি ভাগবতামৃতে পদ্মপুরাণং ॥ অস্য বিবরণং লীলাশব্দে দ্রষ্টব্যং ॥

অপ্রকাণ্ডঃ (পুং) কাণ্ডরহিতবৃক্ষঃ। স তু ঝিণ্টিকাদিঃ। তৎপর্য্যায়ঃ। স্তম্বঃ ২ গুল্মঃ ৩। ইত্যমরঃ ॥

অপ্রকাশঃ (পুং) প্রকাশাভাবঃ। তৎপর্য্যায়ঃ। জনান্তিকং ২। ইতি ত্রিকাণ্ডশেষঃ ॥ তদ্বিশিষ্টে ত্রি ॥ [ অধমে ত্রি ॥

অপ্রকৃষ্টঃ (পুং) কাকঃ। ইতি শব্দরত্নাবলী ॥

অপ্রখরঃ (ত্রি) প্রাখর্য্যরহিতঃ। অতীক্ষ্ণঃ। তদ্ধর্ম্মে ক্লী। খং রাতীতি কঃ খরঃ প্রকৃষ্টঃ খরঃ প্রখরস্ততো নঞ্‌সমাসঃ ॥

অপ্রগুণঃ (ত্রি) ব্যাকুলঃ। ব্যস্তঃ। ইত্যমরঃ ॥

অপ্রতিকরঃ (ত্রি) বিশ্বস্তঃ। বিশ্বাসপাত্রং। ইতি জটাধরঃ ॥

অপ্রতিপক্ষঃ (ত্রি) অপ্রতিযোগী। বিপক্ষশূন্যঃ। নাস্তি প্রতিপক্ষো যস্য। ইতি বহুব্রীহিসমাসনিষ্পন্নঃ॥

অপ্রতিভঃ (ত্রি) অপ্রত্যুৎপন্নমতিঃ। অপ্রগল্ভঃ। নাস্তি প্রতিভা নবনবোন্মেষশালিনী প্রজ্ঞা যস্য সঃ। ইতি প্রতিভান্বিতশব্দার্থে ভরতঃ॥

অপ্রতিরথং (ক্লী) যাত্রা। সামবেদঃ। মঙ্গলং। ইতি ভূরিপ্রয়োগত্রিকাণ্ডশেষৌ॥

অপ্রতিরথঃ (পুং) যোদ্ধা। ইতি ভূরিপ্রয়োগঃ॥ তুল্যযোদ্ধৃরহিতঃ। ইতি পুরাণং॥

অপ্রতিরূপকথা (স্ত্রী) অপ্রতিবচনা বাক্। অতুল্যা কথা। তৎপর্য্যায়ঃ। সঙ্গনিকা ২। ইতি ত্রিকাণ্ডশেষঃ॥

অপ্রতিষ্ঠঃ (ত্রি) অপ্রতিষ্ঠিতঃ। প্রতিষ্ঠারহিতঃ। নাস্তি প্রতিষ্ঠা যস্যেতি বহুব্রীহৌ হ্রস্বঃ। যথা। হয়শীর্ষপঞ্চরাত্রীয়সঙ্কর্ষণকাণ্ডে। সর্ব্বসূক্তেষু কর্ত্তব্যা প্রতিষ্ঠা বিধিনা বুধৈঃ। ফলার্থিভিস্ত্বপ্রতিষ্ঠং যস্মান্নিষ্ফলমুচ্যতে॥ ইতি মঠাদিপ্রতিষ্ঠাতত্ত্বং॥

অপ্রতুলং (ক্লী) প্রকৃষ্টপরিমাণাভাবঃ। অনির্বৃতিরিতি লোকপ্রসিদ্ধিঃ। প্রকৃষ্টতুলারহিতে ত্রি। নাস্তি প্রকর্ষা তুলা যস্য ধনাদেঃ ধনাদের্যস্য বা॥

অপ্রত্যয়ঃ (পুং) প্রত্যয়াভাবঃ। অবিশ্বাসঃ। যথা দোষাণাং সন্নিধানং কপটশতময়ং ক্ষেত্রমপ্রত্যয়ানাং। ইতি শ্রীশিহ্লনঃ॥

অপ্রত্যক্ষঃ (ত্রি) প্রত্যক্ষশূন্যঃ। ইন্দ্রিয়াগোচরঃ। তৎপর্য্যায়ঃ। অতীন্দ্রিয়ঃ ২। ইত্যমরঃ॥ প্রত্যক্ষাভাবে ক্লী॥

অপ্রধানং (ক্লী) প্রাধান্যরহিতং। তৎপর্য্যায়ঃ। অপ্রাগ্র্যং ২ উপসর্জ্জনং ৩। ইত্যমরঃ॥ বাচ্যলিঙ্গোঽপ্যয়ং। ইতি ভরতঃ॥

অপ্রমত্তঃ (ত্রি) অবধানবিশিষ্টঃ। সাবধানঃ। যথা। পাপাৎ পরাজিতো দুঃখাদপ্রমত্তো বিধেঃ সতঃ। ইতি বোপদেবঃ॥

অপ্রয়োগঃ (পুং) প্রয়োগাভাবঃ। অনুল্লেখাদিঃ। যথা। উক্তার্থানামপ্রয়োগঃ। ইতি দুর্গাদাসঃ॥

অপ্রলম্বং (ক্লী) অবিলম্বং। শীঘ্রং। ইতি হলায়ুধঃ॥ তদ্বতি ত্রি

অপ্রশস্তং (ত্রি) অসৎ। অশ্রেষ্ঠং। অবিহিতং। যথা। অপ্রশস্তং নিশি স্নানং রাহোরন্যত্র দর্শনাৎ। ইতি তিথ্যাদিতত্ত্বে পরাশরঃ॥

অপ্রসন্নং (ত্রি) আবিলং। অনচ্ছং। ইতি শব্দরত্নাবলী॥ অতুষ্টং। যথা। ত্বয়ি প্রসন্নে পরশর্ম্মভিঃ কিং ত্বয্যপ্রসন্নে পরশর্ম্মভিঃ কিং। ইতি প্রাচীনাঃ॥

অপ্রসিদ্ধং (ত্রি) প্রসিদ্ধতারহিতং। অবিখ্যাতং। যথা। লিঙ্গং সামর্থ্যং রূঢ়িগতং প্রসিদ্ধং ন ত্বপ্রসিদ্ধং। ইতি তিথ্যাদিতত্ত্বং॥

অপ্রস্তুতং (ত্রি) অপ্রক্রান্তং। প্রকরণাপ্রাপ্তং। যথা। অপ্রস্তুতপ্রশংসা সা যা চৈব প্রস্তুতাশ্রয়া। ইতি কাব্যপ্রকাশঃ॥ অপ্রশংসিতং। প্রপূর্ব্বস্তুত্যর্থস্তুধাতোঃ কর্ম্মণি ক্তে নঞ্-সমাসঃ॥

অপ্রস্তুতপ্রশংসা (স্ত্রী) কাব্যালঙ্কারবিশেষঃ। সা চ অপ্রাকরণিকস্যার্থস্য অভিধানেন প্রাকরণিকস্যাক্ষেপঃ। তস্যা লক্ষণং। অপ্রস্তুতপ্রশংসা সা যা চৈব প্রস্তুতাশ্রয়া। সা চ। কার্য্যে নিমিত্তে সামান্যে বিশেষে প্রস্তুতে

সতি। তদন্যস্য বচস্তুল্যে তুল্যস্যেতি চ পঞ্চধা ॥ আদ্যায়া উদাহরণং যথা। যাতাঃ কিন্ন মিলন্তি সুন্দরি পুনশ্চিন্তা ত্বয়া মৎকৃতে নো কার্য্যাতিতরাং কৃশাসি কথয়ত্যেবং সবাষ্পে ময়ি। লজ্জামন্থরতারকেণ নিপতদ্ধারাশ্রুণা চক্ষুষা দৃষ্ট্বা মাং হসিতেন ভাবিমরণোৎসাহস্ত্বয়া সূচিতঃ ॥ ইতি কাব্যপ্রকাশঃ ॥ ইতরাসাং উদাহরণানি বাহুল্যান্নোক্তানি ॥ [ ইত্যমরঃ ॥

অপ্রহতং ( ত্রি ) অকৃষ্টভূমিঃ। খিলা ভূমিঃ। অপ্রাগ্র্যং ( ত্রি ) অপ্রধানং। ইত্যমরঃ ॥

অপ্রাচীনং ( ত্রি ) অপুরাতনং। নব্যং। প্রাচীতরদিগ্জাতং। প্রাগ্ভবং প্রাচীনং ততো নঞ্সমাসঃ ॥

অপ্রাপ্তঃ ( ত্রি ) অলব্ধঃ। যথা। অপ্রাপ্তপ্রাপকো বিধিঃ। ইতি সঙ্কল্পকৌমুদী দুর্গাদাসশ্চ ॥

অপ্রাপ্তব্যবহারঃ ( পুং ) ব্যবহারানভিজ্ঞঃ। অপ্রাপ্তবয়স্কঃ। নাবালগ্ ইতি আরবী ভাষা। যথা। অপ্রাপ্তব্যবহারাণাং ধনং ব্যয়বিবর্জ্জিতং। ন্যসেয়ুর্বন্ধুমিত্রেষু প্রোষিতানাং তথৈব চ ॥ ইতি দায়তত্ত্বধৃতকাত্যায়নবচনং ॥ কিঞ্চ। গর্ভস্থৈঃ সদৃশো জ্ঞেয়ঃ অষ্টমাদ্বৎসরাৎ শিশুঃ। বাল আষোড়শাদ্বর্ষাৎ পোগণ্ডোঽপি নিগদ্যতে ॥ পরতো ব্যবহারজ্ঞঃ স্বতন্ত্রঃ পিতরাবৃতে ॥ ইতি ব্যবহারতত্ত্বধৃতনারদবচনং ॥

অপ্রাপ্তিঃ (স্ত্রী) অপ্রাপণং। অলাভঃ। তদ্বতি ত্রি। যথা। তদপ্রাপ্তিমহাদুঃখবিলীনাশেষপাতকা। ইতি কাব্যপ্রকাশকারঃ

অপ্রাপ্যং ( ত্রি ) অপ্রাপণীয়ং। অপ্রাপ্তব্যং। প্রপূর্ব্বাদাপধাতোঃ কর্ম্মণি যে নঞ্সমাসঃ ॥

অপ্রামাণিকঃ ( ত্রি ) প্রমাণানভিজ্ঞঃ। প্রমাণাসিদ্ধঃ। প্রামাণ্যরহিতঃ। যথা। অতোঽবিভক্তার্জ্জিতত্বমাত্রেণ ধনস্য সাধারণত্বাভিধানমপ্রামাণিকং। ইতি দায়ভাগঃ ॥

অপ্রামাণ্যং (ক্লী) প্রামাণ্যাভাবঃ। যথা। অপ্রামাণ্যং জনয়তি সদা নন্দসূনোর্বিয়োগঃ। ইতি পদাঙ্কদূতঃ

অপ্রিয়ং ( ত্রি ) অনভীষ্টং। অনীপ্সিতং। অপ্রীতিকরং। অহৃদ্যং। যথা। সত্যং ব্রূয়াৎ প্রিয়ং ব্রূয়াৎ ন ব্রূয়াৎ সত্যমপ্রিয়ং। ইতি পুরাণং ॥

অপ্রিয়বচঃ ( ক্লী ) নিষ্ঠুরবাক্যং। ইতি পারুষ্যশব্দার্থে ভরতঃ ॥

অপ্রিয়া (স্ত্রী) শৃঙ্গীমৎস্যঃ। ইতি শব্দরত্নাবলী ॥

অপ্রীতং ( ত্রি ) প্রীতিরহিতং। অসন্তুষ্টং। প্রীত্যর্থপ্রীধাতোঃ কর্ত্তরি ক্তে নঞ্সমাসঃ ॥

অপ্রেতরাক্ষসী (স্ত্রী) অপেতরাক্ষসী। তুলসী। ইতি রত্নমালা ॥

অপ্সরসঃ (স্ত্রী) স্বর্ব্বেশ্যাঃ। উর্ব্বশীমেনকাদ্যাঃ। বহুবচনান্তোঽয়ং শব্দঃ। ইত্যমরঃ ॥

অপ্সরা (স্ত্রী) স্বর্ব্বেশ্যা। ইতি শব্দরত্নাবলী ॥

অফলঃ (ত্রি) বিফলঃ। নিষ্ফলঃ। ইতি হেমচন্দ্রঃ ॥ ফলকালে অনুৎপন্নফলকবৃক্ষঃ। তৎপর্য্যায়ঃ। বন্ধ্যঃ ২ অবকেশী ৩। ইত্যমরঃ ॥ ঝাবুকবৃক্ষঃ। ইতি শব্দচন্দ্রিকা ॥

অফলা ( স্ত্রী ) ভূম্যামলকী। ঘৃতকুমারী। ইতি শব্দচন্দ্রিকা ॥

অফেনং (ক্লী) বৃক্ষনির্যাসবিশেষঃ। আফিং ইতি

ভাষা । তৎপর্য্যায়ঃ । খস্‌খসরসং ২ নিফেনং ৩ অহিফেনকং ৪ । অস্য গুণাঃ । সন্নিপাতনাশিত্বং । শুক্রবলমোহকারিত্বঞ্চ ॥ তত্তু চতুর্ব্বিধং । একং শ্বেতবর্ণং । অন্ন-জীর্ণতাকারকত্বান্নাম জারণং । দ্বিতীয়ং কৃষ্ণবর্ণং মৃত্যুকারকত্বান্নাম মারণং । তৃতীয়ং পীতবর্ণং । বয়ঃস্তম্ভনকারকত্বান্নাম ধারণং । চতুর্থং কর্ব্বূরবর্ণং । মলসারকত্বান্নাম সারণং । ইতি রাজনির্ঘণ্টঃ ॥

অব ই ঙ শব্দে । ইতি কবিকল্পদ্রুমঃ ॥ ই অব্যতে । ঙ অবতে অবাং পুত্রঃ । ইতি চতুর্ভুজঃ । ইতি দুর্গাদাসঃ ॥

অবদ্ধং ( ত্রি ) প্রকৃতানুপযোগিবচনং । সমুদায়ার্থশূন্যবাক্যং । অনর্থককথা । ইত্যমরঃ ॥ বন্ধনশূন্যং ॥

অবদ্ধকং ( ত্রি ) সমুদায়ার্থশূন্যবাক্যং । ইতি শব্দরত্নাবলী ॥

অবদ্ধমুখঃ ( ত্রি ) অপ্রিয়বাদী । দুর্ম্মুখঃ । ইত্য- [ মরঃ ॥

অবধ্যং ( ত্রি ) অনর্থকবাক্যং । বধাযোগ্যং । ইতি মেদিনী ॥

অবন্ধ্যঃ (ত্রি) সফলঃ । ফলকালে ফলযুক্তবৃক্ষঃ । তৎপর্য্যায়ঃ । ফলেগ্রহিঃ ২ । ইত্যমরঃ ॥ ফলগ্রহিঃ ৩ । ইতি তট্টীকা ॥ অমোঘফলোদয়ঃ ৪ । ইতি রাজনির্ঘণ্টঃ ॥

অবলং ( ত্রি ) বলরহিতং । দুর্ব্বলং । যথা । অবলস্বকুলাশিনো ঝসান্ । ইতি নৈষধং ॥

অবলঃ (পুং) বরুণবৃক্ষঃ । ইতি শব্দচন্দ্রিকা ॥

অবলা ( স্ত্রী ) নারী । ইত্যমরঃ ॥

অবাধং (ত্রি) বাধশূন্যং । অনিবারিতং । তৎপর্য্যায়ঃ । নিরর্গলং ২ । ইত্যমরঃ ॥ অনর্গলং ৩ উচ্ছৃঙ্খলং ৪ উদ্দাম ৫ অনিযন্ত্রিতং ৬ নিরঙ্কুশং ৭ । ইতি হেমচন্দ্রঃ ॥ বাধা পীড়া তয়া হীনঞ্চ ॥ [ভঙ্গিকা ॥

অবিন্ধনঃ ( পুং ) বাড়বাগ্নিঃ । ইতি সন্দেহ-

অবোধঃ (পুং) অজ্ঞানং । যথা । নিসর্গদুর্বোধমবোধবিক্লবাঃ । ইতি ভারবিঃ ॥ বহুব্রীহৌ ত্রি ॥

অব্জং ( ক্লী ) পদ্মং । ইতি মেদিনী ॥ দশার্ব্বুদসংখ্যা । শতকোটিঃ । ইতি লীলাবতী ॥

অব্জঃ ( পুং ) চন্দ্রঃ । ধন্বন্তরিঃ । নিচুলবৃক্ষঃ । ইতি মেদিনী ॥

অব্জঃ ( পুং ক্লী ) শঙ্খঃ । ইতি মেদিনী ॥

অব্জজঃ ( পুং ) ব্রহ্মা । ইতি ত্রিকাণ্ডশেষঃ ॥

অব্জভোগঃ (পুং) পদ্মকন্দঃ । ইতি শব্দচন্দ্রিকা ॥

অব্জযোনিঃ (পুং) বিধাতা । ব্রহ্মা । ইত্যমরঃ ॥

অব্জবাহনঃ (পুং) শিবঃ । ইতি ত্রিকাণ্ডশেষঃ ॥

অব্জহস্তঃ ( পুং ) সূর্য্যঃ । ইতি হেমচন্দ্রঃ ॥

অব্জিনী ( স্ত্রী ) পদ্মিনী । ইতি রাজনির্ঘণ্টঃ ॥ পদ্মসমূহঃ । পদ্মলতা । পদ্মযুক্তদেশঃ । ইতি নলিনীশব্দটীকায়াং ভরতঃ ॥

অব্জিনীপতিঃ ( পুং ) সূর্য্যঃ । ইতি হেমচন্দ্রঃ ॥

অব্দঃ ( পুং ) বৎসরঃ । মেঘঃ । মুস্তা । ইতি মেদিনী ॥ পর্ব্বতবিশেষঃ । ইতি বিশ্বঃ ॥

অব্দসারঃ ( পুং ) কর্পূরভেদঃ । ইতি রাজনির্ঘণ্টঃ ॥

অব্ধিঃ ( পুং ) সমুদ্রঃ । ইত্যমরঃ ॥

অব্ধিকফঃ ( পুং ) সমুদ্রফেনঃ । তৎপর্য্যায়ঃ । হিণ্ডীরঃ ২ ফেনঃ ৩ । ইত্যমরঃ ॥

অব্ধিজৌ ( পুং ) অশ্বিনীকুমারৌ । দ্বিবচনান্তোঽয়ং শব্দঃ । ইতি হেমচন্দ্রঃ ॥

অব্ধিদ্বীপা (স্ত্রী) পৃথিবী। ইতি ত্রিকাণ্ড-শেষঃ ॥

অব্ধিনগরী (স্ত্রী) দ্বারকাপুরী। ইতি ত্রিকাণ্ড-শেষঃ ॥

অব্ধিনবনীতকঃ (পুং) চন্দ্রঃ। ইতি শব্দরত্নাবলী ॥

অব্ধিফেনঃ (পুং) সমুদ্রফেনঃ। ইতি রাজ-নির্ঘণ্টঃ ॥

অব্ধিমণ্ডুকী (স্ত্রী) মুক্তাস্ফোটঃ। শুক্তিঃ। ঝিনুক ইতি ভাষা। ইতি হেমচন্দ্রঃ ॥

অব্ধিশয়নঃ (পুং) বিষ্ণুঃ। ইতি হেমচন্দ্রঃ ॥

অব্ধ্যগ্নিঃ (পুং) বড়বানলঃ। ইতি হেমচন্দ্রঃ ॥

অব্রক্ষঃ (পুং) সর্পঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

অব্‌ভ্রং (ক্লী) মেঘঃ। ইত্যমরঃ। মুস্তাতৃণং। অভ্রকধাতুঃ। ইতি রাজনির্ঘণ্টঃ ॥

অব্‌ভ্রমাতঙ্গঃ (পুং) ঐরাবতঃ। ইত্যমরঃ ॥

অব্‌ভ্রিঃ (স্ত্রী) কাষ্ঠকুদ্দালঃ। নৌকামলাপনয়-নার্থকুদ্দালাকৃতিকাষ্ঠং। ইত্যমরঃ ॥

অব্‌ভ্রিয়ং (ত্রি) মেঘোদ্ভববস্তু। ইত্যমরঃ ॥

অব্রহ্মচর্য্যকং (ক্লী) মৈথুনং। ইতি ত্রিকাণ্ড-শেষঃ ॥ ব্রহ্মচর্য্যশূন্যে ত্রি ॥

অব্রহ্মণ্যং (ক্লী) নাট্যোক্তৌ নায়ং বধ্য ইত্যা-কারোক্তিঃ। অবধ্যাচ্ঞা। তৎপর্য্যায়ঃ। অবধ্যোক্তিঃ ২। ইত্যমরঃ ॥

অভ ই ঙ ধ্বনৌ। ইতি কবিকল্পদ্রুমঃ ॥ ই অম্ভ্যতে। ঙ অম্ভতে। ইতি দুর্গাদাসঃ ॥

অভয়ং (ক্লী) বীরণমূলং। ইত্যমরঃ ॥ ভয়া-ভাবঃ। যথা। প্রবৃত্তিঞ্চ নিবৃত্তিঞ্চ কার্য্যা-কার্য্যে ভয়াভয়ে। বন্ধং মোক্ষঞ্চ যা বেত্তি বুদ্ধিঃ সা পার্থ সাত্ত্বিকী ॥ ইতি শ্রীভগবদ্‌-গীতা ॥ ভয়রহিতে ত্রি। ইতি বিশ্বঃ ॥

অভয়ডিণ্ডিমঃ (পুং) যুদ্ধঢক্কা। সংগ্রাম-পটহঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

অভয়া (স্ত্রী) হরীতকী। ইত্যমরঃ ॥ চম্পাদেশ-জাতপঞ্চশিরাহরীতকী। সা নেত্ররোগে প্রশস্তা। ইতি রাজবল্লভঃ ॥

অভক্ষ্যং (ত্রি) অভক্ষণীয়ং। অখাদ্যং। যথা। অধার্য্যং চর্ম্ম মে সদ্ভিঃ করিষ্যসি কিম-স্থিভিঃ। অভক্ষ্যং চৈব মে মাংসং ত্বাদৃশৈ-র্ব্রহ্মচারিভিঃ ॥ ইতি রামায়ণং ॥

অভাজনং (ক্লী) অপাত্রং। অযোগ্যং। যথা। দীধীবেবীট্‌সমঃ কশ্চিৎ গুণবৃদ্ধ্যোর-ভাজনং। কিপ্‌প্রত্যয়নিভঃ কশ্চিদযত্র সন্নি-হিতে ন তে। ইতি কাব্যপ্রকাশঃ ॥ পাত্র-রহিতে ত্রি ॥

অভাবঃ (পুং) মরণং। অসত্তা। ইতি বিশ্ব-মেদিন্যৌ ॥ দ্রব্যাদিষট্‌কভিন্নঃ। স দ্বিবিধঃ। সংসর্গাভাবঃ ১ অন্যোন্যাভাবশ্চ ২। ইতি ভাষাপরিচ্ছেদঃ ॥ ভাবশূন্যঃ ভাবঃ স্থায়ি-ভাবাদিরিতি অলঙ্কারশাস্ত্রং ॥

অভাবনীয়ঃ (ত্রি) অচিন্তনীয়ঃ। চৌরাদিক-চিন্তনার্থভূধাতোঃ কর্ম্মণ্যনীয়ে নঞ্‌সমাসঃ॥

অভাষণং (ক্লী) অকথনং। মৌনং। ইত্যমরঃ॥

অভি ব্য উপসর্গবিশেষঃ। অস্যার্থাঃ। সমন্তাৎ। উভয়ার্থঃ। বীপ্সা। ইত্থম্ভাবঃ। ধর্ষণং। ইতি দুর্গাদাসঃ ॥ অভিলাষঃ। আভিমুখ্যং। ইতি মেদিনী ॥ চিহ্নং। ইতি বোপদেব-হেমচন্দ্রৌ ॥

অভিকঃ (ত্রি) কামী। কামুকঃ। ইত্যমরঃ ॥

অভিক্রমঃ (পুং) অভীতযোধাদের্যুদ্ধে শত্রুসম্মুখ-গমনং। আরোহণং। ইতি হেমচন্দ্রঃ ॥

অভিখ্যা (স্ত্রী) নাম। শোভা। কীর্ত্তিঃ। ইতি মেদিনী॥ আখ্যানং। ইতি শব্দরত্নাবলী॥

অভিগ্রস্তঃ (ত্রি) শত্রুণাক্রান্তঃ। ইত্যভিপন্নশব্দার্থে অমরঃ॥

অভিগ্রহঃ (পুং) অভিযোগঃ। ইত্যমরঃ॥ কলহাহ্বানং। অপচিকীর্ষয়া অতিক্রম্যাক্রমণং। আভিমুখ্যেন যুদ্ধাদিপ্রবৃত্তিঃ। ইতি তট্টীকায়াং ভরতঃ॥ গৌরবং। অভিগ্রহণং। লুট্ ইতি ভাষা। ইতি মেদিনী॥

অভিগ্রহণং (ক্লী) অভিহারঃ। ইত্যমরঃ॥ চৌর্য্যকরণং। সম্মুখে হরণং। ইতি তট্টীকায়াং ভরতঃ॥

অভিঘাতঃ (পুং) দণ্ডাদিভিরভিহননং। আঘাতঃ। যথা অভিঘাতাভিচারাভ্যামভিষঙ্গাভিশাপতঃ। ইতি মাধবকরঃ॥ প্রশ্নাদৌ কবর্গাদিবর্গাণাং পূর্ব্বস্থিতচতুর্থদ্বিতীয়তৃতীয়চতুর্থবর্ণাঃ ক্রমেণ পরস্থিতবর্গে কৈকদ্বিত্রিবর্ণযুক্তাঃ। তত্র ক্লী। যথা। অভিঘাতং স্যাৎ পূর্ব্বং বেদদ্বিত্র্যেক্কিবর্ণাশ্চেৎ। নগবর্গাণাং পরতো ধরণীচন্দ্রদ্বিরামাঢ্যাঃ॥ ইতি কেরলগ্রন্থঃ॥

অভিঘাতী [ন্] (পুং) শত্রুঃ। ইত্যমরঃ॥

অভিঘারঃ (পুং) ঘৃতং। ইতি রাজনির্ঘণ্টঃ॥

অভিচরঃ (পুং) দাসঃ। ভৃত্যঃ। ইতি হেমচন্দ্রঃ

অভিচারঃ (পুং) হিংসাকর্ম্ম। ইত্যমরঃ॥ অথর্ব্ববেদোক্তমন্ত্রযন্ত্রাদিনিষ্পাদিতমারণোচ্চাটনাদিহিংসাত্মককর্ম্ম। ইতি ভরতঃ॥ মারণাদিফলকতান্ত্রিকপ্রয়োগবিশেষঃ। স ষড়্বিধঃ। মারণং ১ মোহনং ২ স্তম্ভনং ৩ বিদ্বেষণং ৪ উচ্চাটনং ৫ বশীকরণং ৬। ইতি তন্ত্রসারঃ॥ উপপাতকবিশেষঃ। ইতি প্রায়শ্চিত্তবিবেকঃ॥ স তু শ্যেনাদিযজ্ঞেনানপরাধস্য মারণং। ইতি কুল্লূকভট্টঃ॥ যথা। হিংসৌষধীনাং স্ত্র্যাজীবোঽভিচারো মূলকর্ম্ম চ। ইতি মনৌ ১১ অধ্যায়ঃ॥*॥ অথাভিচারঃ। ওম্ বিরুদ্ধে রূপিণি চণ্ডিকে বৈরিণমমুকং দেহি দেহি স্বাহা। ইতি খড়্গমভিমন্ত্র্য খড়্গমন্ত্রাংশ্চ পঠিত্বা খড়্গং সংপূজ্য ছাগাদিকমমুকোঽসি ইতি বৈরিনাম্নাভিমন্ত্র্য রক্তসূত্রেণ ত্রিধা মুখং বদ্ধা বৈরিনাম্না প্রাণপ্রতিষ্ঠাং কৃত্বা ওম্ অয়ং স বৈরী যো দ্বেষ্টি তমিমং পশুরূপিণং। বিনাশয় মহাদেবি স্ফেং স্ফেং খাদয় খাদয়॥ ইতি পঠিত্বা বলিশিরসি পুষ্পং দত্ত্বা বলিমন্ত্রং পঠিত্বা বলিং সংপূজ্য অদ্যাশ্বিনে মাসি মহানবম্যাং অমুকগোত্রোঽমুকদেবশর্ম্মা অমুকশত্রুনাশায় ইমং ছাগং মহিষং বা অমুকদৈবতং ভগবত্যৈ দুর্গায়ৈ তুভ্যমহং সম্প্রদদে। ইত্যুৎসৃজ্য আং হ্রুং ফট্ ইতি ছিত্ত্বা মূলং পঠিত্বা এতদ্রুধিরং দুর্গায়ৈ নমঃ। ইতি রক্তং শিরশ্চ দত্ত্বা অষ্টাঙ্গমাংসৈর্হোমং মূলমন্ত্রেণ কুর্য্যাদিতি। ইতি তন্ত্রসারঃ॥

অভিচারী [ন্] (ত্রি) অভিচারকর্ত্তা। তন্ত্রাদিশাস্ত্রোক্তানিষ্টকারী। অভিপূর্ব্বচরধাতোঃ কর্ত্তরি ণিন্॥

অভিজনঃ (পুং) খ্যাতিঃ। জন্মভূমিঃ। কুলশ্রেষ্ঠঃ। বংশঃ। ইতি মেদিনী॥

অভিজাতঃ (ত্রি) সুন্দরঃ। ন্যায্যঃ। ইতি বিশ্বঃ॥

কুলজঃ। কুলীনঃ। বুধঃ। পণ্ডিতঃ। ইত্যমরঃ॥

অভিজিৎ (ক্লী) দিবসস্যাষ্টমমুহূর্ত্তং। কুতপকাল ইতি প্রসিদ্ধং। যথা। অপরাহ্নে তু সংপ্রাপ্তে অভিজিদ্রৌহিণোদয়ে। যদত্র দীয়তে জন্তোস্তদক্ষয়মুদাহৃতং॥ ইতি মৎস্যপুরাণং॥ নক্ষত্রবিশেষঃ। তত্তু তারকাত্রয়াত্মকশৃঙ্গাটকাকৃতি। উত্তরাষাঢ়ায়াঃ শেষপঞ্চদশদণ্ডাঃ শ্রবণায়াঃ প্রথমদণ্ডচতুষ্টয়ং এতদূনবিংশতিদণ্ডাত্মকমভিজিদ্ভবতি। ইতি জ্যোতিষং॥ তত্র জাতফলং। অতিসুললিতকান্তিঃ সম্মতঃ সজ্জনানাং ননু ভবতি বিনীতশ্চারুকীর্ত্তিঃ সুবেশঃ। দ্বিজবরসুরভক্তো ব্যক্তবাঙ্মানবঃ স্যাদভিজিতি যদি সূতির্ভূপতিঃ স্বস্ববংশে॥ ইতি কোষ্ঠীপ্রদীপঃ॥ [ ইত্যমরঃ॥

অভিজ্ঞঃ (ত্রি) প্রবীণঃ। নিপুণঃ। বিজ্ঞঃ।

অভিজ্ঞানং (ক্লী) চিহ্নং। ইতি হেমচন্দ্রঃ॥

অভিতঃ [স্] ব্য শীঘ্রং। সাকল্যং। আভিমুখ্যং। উভয়তঃ। সমীপং। ইতি মেদিনী॥

অভিধর্ষণং (ক্লী) রক্ষঃপিশাচভূতাদেরভিষঙ্গঃ। ইতি মহাভারতং॥ সর্ব্বতোভাবেন ধর্ষণঞ্চ॥

অভিধা (স্ত্রী) নাম। ইতি হেমচন্দ্রঃ॥ ন্যায়মতে শব্দশক্তিঃ। মীমাংসামতে বিধিসমবেতবিধিব্যাপারীভূতপদার্থঃ। তস্যা লক্ষণং। স মুখ্যোঽর্থস্তত্র মুখ্যো ব্যাপারোঽস্যাভিধোচ্যতে। ইতি কাব্যপ্রকাশঃ॥*॥ তত্র সঙ্কেতিতার্থস্য বোধনাদগ্রিমাভিধা। ইতি সাহিত্যদর্পণং॥

অভিধানং (ক্লী) নাম। ইত্যমরঃ॥ কথনং। যথা। তবাভিধানাদ্ব্যথতে নতাননঃ। ইতি ভারবিঃ॥ শব্দকোষঃ। যথা। কৃত্তদ্ধিতসমাসানামভিধানং নিয়ামকং। ইতি বোপদেবঃ॥

অভিধেয়ং (ক্লী) অভিধানং। নাম। অভিধীয়তে অনেনেতি করণে যঃ॥

অভিধেয়ং (ত্রি) অভিধাগম্যং। বাচ্যং। প্রতিপাদ্যং। যথা। ইতি প্রয়োজনাভিধেয়সম্বন্ধাঃ। ইতি বোপদেবঃ॥

অভিধ্যা (স্ত্রী) পরস্বে বিষয়স্পৃহা। ইত্যমরঃ॥ পরদ্রব্যে জিঘৃক্ষা। দোষচিন্তাপূর্ব্বকং পরস্বে লিপ্সা ইত্যেকে। বিষয়প্রার্থনা। ইতি স্বামী। বিষয়স্য লাভস্য স্পৃহাবিষয়স্পৃহাবিষয়েণ চৌর্য্যাদিনা স্পৃহা ইতি তৃতীয়াসমাসঃ ইত্যন্যে। বিষয়িস্পৃহেতিপাঠে পরস্ববিষয়ে বিষযিতয়া স্পৃহা জিঘৃক্ষামাত্রং। ইতি কশ্চিৎ ইতি কৌমুদী। ইত্যমরটীকায়াং ভরতঃ॥ অভিলাষঃ। ইতি রায়মুকুটঃ॥

অভিনন্দনঃ (পুং) বুদ্ধবিশেষঃ। চতুর্থস্তীর্থকরজিনোঽয়ং। ইতি হেমচন্দ্রঃ॥ সর্ব্বতোভাবেনানন্দজনকে ত্রি॥

অভিনয়ঃ (পুং) হৃদ্গতক্রোধাদিভাবাভিব্যঞ্জকঃ। অঙ্গুল্যাদিনা ব্যক্তীকৃতমনঃকার্য্যং। তৎপর্য্যায়ঃ। ব্যঞ্জকঃ ২। ইত্যমরঃ॥ দৃশ্যকাব্যং। রঙ্গাদিভির্নটৈ রামযুধিষ্ঠিরাদীনামবস্থানুকরণং। স চতুর্ব্বিধঃ। আঙ্গিকঃ ১ বাচিকঃ ২ আহার্য্যঃ ৩ সাত্ত্বিকঃ ৪। ইতি সাহিত্যদর্পণং॥

অভিনবঃ (ত্রি) নূতনঃ। ইত্যমরঃ॥

অভিনবোদ্ভিৎ [ দ্ ] (পুং) অঙ্কুরঃ। ইত্যমরঃ ॥
অভিনির্ম্মুক্তঃ (পুং) সূর্য্যাস্তকালশায়ী। যস্মিন্ সুপ্তে সূর্য্যোঽস্তং যাতি সঃ। ইত্যমরঃ ॥
অভিনির্যাণং (ক্লী) বিজিগীষোঃ প্রয়াণং। যাত্রা। ইত্যমরঃ ॥
অভিনিবেশঃ (পুং) মনঃসংযোগবিশেষঃ। মনোনিবেশঃ। আবেশঃ। শাস্ত্রাদৌ প্রবেশঃ। তৎপর্য্যায়ঃ। নিবন্ধঃ ২। ইতি হেমচন্দ্রঃ॥ যোগশাস্ত্রমতে মরণজন্যভয়জনকাবিদ্যা-বিশেষঃ ॥ [ মেদিনী ॥
অভিনিষ্ঠানঃ (পুং) বিসর্গঃ। অক্ষরং। ইতি
অভিনীতঃ (ত্রি) যুক্তঃ। ন্যায্যঃ। অতি-সংস্কৃতঃ। প্রশস্তো ভূষিতো বা। অমর্ষী। ক্রোধনঃ অক্ষমাবান্ বা। ইত্যমরঃ ॥
অভিনেতা [ঋ] (ত্রি) অভিনয়কর্ত্তা। কেচো সংওয়ালা ইত্যাদি ভাষা। ইতি নাটক-প্রসিদ্ধং ॥
অভিপন্নঃ (ত্রি) অপরাদ্ধঃ। অপরাধবান্। ব্যাপদ্গতঃ। প্রাপ্তবিপত্তিঃ। অভিগ্রস্তঃ। শত্রুণাক্রান্তঃ। ইত্যমরঃ ॥
অভিপ্রায়ঃ (পুং) ইচ্ছাবিশেষঃ। তৎপর্য্যায়ঃ। আশয়ঃ২ ছন্দঃ ৩। ইত্যমরঃ॥ আকূতং ৪ ভাবঃ ৫। ইতি জটাধরঃ ॥
অভিপ্রেতং (ত্রি) অভিপ্রায়বিষয়ীভূতং। অভীষ্টং। যথা। কামায় তু হিতং কাম্য-মভিপ্রেতার্থসিদ্ধয়ে। পার্ব্বণেন বিধানেন তদপ্যুক্তং খগাধিপ॥ ইতি ভবিষ্যপুরাণং॥
অভিভবঃ (পুং) গর্ব্বনাশঃ। পরিভবঃ। পরা-ভবঃ। ইতি শব্দরত্নাবলী হেমচন্দ্রশ্চ ॥
অভিভূতঃ (ত্রি) জ্ঞানরহিতঃ। তৎপর্য্যায়ঃ। ইতিকর্ত্তব্যতামূঢ়ঃ ২ বিহস্তঃ ৩ ব্যাকুলঃ ৪ অভিমায়ঃ ৫ বিক্লবঃ ৬ বিহ্বলঃ ৭। ইতি জটাধরঃ॥ পরাভূতঃ। ভগ্নদর্পঃ। তৎ-পর্য্যায়ঃ। আত্তগর্ব্বঃ ২। ইতি জটাধরঃ॥ আত্তগন্ধঃ ৩। ইত্যমরঃ॥ অভিহতঃ ৪। ইতি তট্টীকা ॥
অভিভূতিঃ (স্ত্রী) অনাদরঃ। অবজ্ঞা। ইতি শব্দরত্নাবলী ॥
অভিমতং (ত্রি) ইষ্টং। সম্মতং। যথা। অভি-মতফলশংসী চারু পুস্ফোর বাহুস্তরুষু চুকূবুরুচ্চৈঃ পক্ষিণশ্চানুকূলাঃ। ইতি ভট্টিঃ ॥
অভিমন্ত্রণং (ক্লী) আহ্বানং। আকারণং। ডাকন্ ইতি ভাষা। ইতি হেমচন্দ্রঃ ॥
অভিমন্থঃ (পুং) চক্ষুরোগঃ। ইতি ত্রিকাণ্ড-শেষঃ॥ অধিমন্থ ইতি বৈদ্যকে পাঠঃ। তস্য নিদানসম্প্রাপ্তিরূপাণি। বৃদ্ধৈরেতৈ-রভিষ্যন্দৈর্নরাণামক্রিয়াবতাং। তাবস্ত-স্ত্বধিমন্থাঃ স্যুর্নয়নে তীব্রবেদনাঃ॥ উৎ-পাট্যত ইবাত্যর্থং নেত্রং নির্ম্মথ্যতে তথা। শিরসোঽর্দ্ধঞ্চ তং বিদ্যাদধিমন্থং স্বলক্ষণৈঃ॥ স তু চতুর্ব্বিধঃ। যথা। হন্যাদ্দৃষ্টিং শ্লৈষ্মিকঃ সপ্তরাত্রাদধিমন্থো রক্তজঃ পঞ্চরাত্রাৎ। ষড়্রাত্রাদ্বৈ বাতিকঃ সংনিহন্যান্মিথ্যাচারাৎ পৈত্তিকঃ সদ্য এব ॥ ইতি মাধবকরঃ ॥
অভিমন্যুঃ (পুং) অর্জ্জুনপুত্রঃ। স তু সুভদ্রা-গর্ভজাতঃ। ইতি মহাভারতং ॥
অভিমরঃ (পুং) যুদ্ধং। বধঃ। স্বসৈন্যভয়ং। ইতি বিশ্বমেদিন্যৌ ॥ বন্ধনং। ইতি জটাধরঃ ॥

অভিমর্দ্দঃ ( পুং ) অবমর্দ্দঃ। পীড়নং। সম্পরায়ঃ। যুদ্ধং। ইতি মেদিনী ॥

অভিমাতিঃ ( পুং ) শত্রুঃ। ইতি হেমচন্দ্রঃ ॥

অভিমানঃ (পুং) অর্থাদিনা দর্পঃ। তৎপর্য্যায়ঃ। অহঙ্কারঃ ২ গর্ব্বঃ ৩ স্ময়ঃ ৪ অবলেপঃ ৫ দর্পঃ ৬ অবশ্যায়ঃ ৭ টঙ্কঃ ৮। ইতি জটাধরঃ॥ জ্ঞানং। বোধঃ। প্রণয়ঃ। প্রেমপ্রার্থনা চ। হিংসা। হননং। ইত্যমরভরতৌ॥ অপি চ। গর্ব্বো মদোঽভিমানঃ স্যাদহঙ্কারস্ত্বহঙ্কৃতিঃ। স্যাদুদ্ধতমনস্কত্বে মানশ্চিত্তসমুন্নতিঃ॥ অহঙ্কারস্য পর্য্যায় ইতি কেচিৎ প্রচক্ষতে। ইতি শব্দরত্নাবলী ॥

অভিমানিতং ( ক্লী ) সুরতং। মৈথুনং। ইতি ত্রিকাণ্ডশেষঃ ॥ অভিমানযুক্তে ত্রি ॥

অভিমানী [ ন্ ] ( ত্রি ) অভিমানযুক্তঃ। অভিমানগ্রস্তঃ। যথা। কর্ত্তা দ্যূতচ্ছলানাং জতুময়শরণোদ্দীপিতঃ সোঽভিমানী। ইতি বেণীসংহারঃ॥ [ ইতি জটাধরঃ ॥

অভিমায়ঃ (ত্রি) ইতিকর্ত্তব্যতামূঢ়ঃ। অভিভূতঃ।

অভিমুখং ( ত্রি ) সম্মুখং। ইতি জটাধরঃ ॥

অভিযাতিঃ ( পুং ) শত্রুঃ। ইতি হেমচন্দ্রঃ ॥

অভিযাতী [ ন্ ] ( পুং ) শত্রুঃ। ইত্যমরটীকায়াং রায়মুকুটঃ ॥

অভিযুক্তঃ ( ত্রি ) তৎপরঃ। পরকর্ত্তৃকরুদ্ধঃ। ইতি মেদিনী ॥ স্মৃতিশাস্ত্রমতে অভিযোগবিষয়ীভূতঃ। আসামী ইতি খ্যাতঃ। তৎপর্য্যায়ঃ। প্রত্যর্থী ২ প্রতিবাদী ৩। যথা। অভিযুক্তোঽভিযোগস্য যদি কুর্য্যাদপহ্নবং। মিথ্যা তত্তু বিজানীয়াদুত্তরং ব্যবহারতঃ॥ ইতি ব্যবহারতত্ত্বে নারদঃ ॥

অভিযোক্তা [ ঋ ] ( ত্রি ) অভিযোগকর্ত্তা। বিবাদকর্ত্তা। ফরিয়াদী ইতি খ্যাতঃ। তৎপর্য্যায়ঃ। বাদী ২ অর্থী ৩। যথা। অভিযোক্তা প্রগল্ভত্বাৎ বক্তুং নোৎসহতে যদি। তদা কালঃ প্রদাতব্যঃ কার্য্যশক্ত্যনুরূপতঃ॥ ইতি ব্যবহারতত্ত্বে নারদঃ ॥

অভিযোগঃ (পুং) অপরাধাদিযোজনং। অন্যেন বিরোধে স্বার্থসম্বন্ধিতয়া রাজসমীপে কথনং। আদ্দাস নালিশ ইতি খ্যাতঃ। যথা। অভিযোগমনিস্তীর্য্য নৈনং প্রত্যভিযোজয়েৎ। ইতি যাজ্ঞবল্ক্যঃ॥ যুদ্ধার্থাহ্বানং। ইতি রায়মুকুটঃ॥ অপকারকরণেচ্ছাপূর্ব্বকাক্রমণং। তৎপর্য্যায়ঃ। অভিগ্রহঃ ২। ইত্যমরঃ॥ উদ্যোগঃ। ইতি হেমচন্দ্রঃ ॥

অভিরামঃ ( ত্রি ) রুচিরঃ। সুন্দরঃ। ইতি হেমচন্দ্রঃ ॥

অভিরূপঃ ( পুং ) পণ্ডিতঃ। ইতি হেমচন্দ্রঃ ॥ কামদেবঃ। চন্দ্রঃ। শিবঃ। বিষ্ণুঃ। ইতি শব্দরত্নাবলী ॥ [ মেদিনী ॥

অভিরূপঃ ( ত্রি ) মনোহরঃ। পণ্ডিতঃ। ইতি

অভিলাপঃ ( পুং ) শব্দঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ সঙ্কল্পাঙ্গবাক্যং। যথা। কাম্যাভিলাপসহিতঃ কুশতিলজলত্যাগরূপঃ সঙ্কল্পঃ শাস্ত্রার্থঃ। ইতি প্রক্রমাধিকরণং ॥

অভিলাবঃ ( পুং ) ছেদনং। ইত্যমরঃ ॥

অভিলাষঃ ( পুং ) লোভঃ। তৎপর্য্যায়ঃ। ইচ্ছা ২ আকাঙ্ক্ষা ৩ স্পৃহা ৪ ঈহা ৫ তৃট্ ৬ বাঞ্ছা ৭ লিপ্সা ৮ কামঃ ৯ তর্ষঃ ১০ মনোরথঃ ১১। ইত্যমরঃ॥ কাঙ্ক্ষা ১২ কাম্তিঃ ১৩ রুক্ ১৪ রুচিঃ ১৫ দোহদঃ ১৬

অভিলাসঃ ১৭। ইতি শব্দরত্নাবলী॥ শ্রদ্ধা।১৮তৃষ্ণা।১৯ মতিঃ২০ ছন্দঃ২১। ইতি জটাধরঃ॥ সঙ্গমেচ্ছা। ইতি রসমঞ্জরী॥

অভিলাষী [ ন্ ] ( ত্রি ) অভিলাষযুক্তঃ। যথা। জলাভিলাষী জলমাদদানাং ছায়েব তাং ভূপতিরন্বগচ্ছৎ॥ ইতি রঘুঃ॥

অভিলাষুকঃ ( ত্রি ) অভিলাষযুক্তঃ। তৎপর্য্যায়ঃ। লুব্ধঃ ২ গৃধ্নুঃ ৩ গর্দ্ধনঃ ৪ তৃষ্ণক্ ৫। ইত্যমরঃ॥ লোভী ৬ বিলাসবিভবানসঃ ৭। ইতি জটাধরঃ॥

অভিলাসঃ ( পুং ) অভিলাষঃ। ইচ্ছা। ইত্যমরটীকাসারসুন্দরী॥

অভিবাদঃ ( পুং ) অপ্রিয়বাক্যং। তৎপর্য্যায়ঃ। পারুষ্যং ২। ইত্যমরঃ॥

অভিবাদকঃ ( ত্রি ) বন্দনশীলঃ। তৎপর্য্যায়ঃ। বন্দারুঃ ২। ইত্যমরঃ॥ অপ্রিয়বক্তা। পারুষ্যার্থাভিপূর্ব্ববদেঃ কর্ত্তরি ণকঃ॥

অভিবাদনং ( ক্লী ) নামোচ্চারণপূর্ব্বকনমস্কারঃ। অভিবাদয়ে ভো অমুকশর্ম্মাহমিত্যেবংরূপঃ। তত্তু পাদস্পর্শপূর্ব্বকনমস্কারঃ। তৎপর্য্যায়ঃ। পাদগ্রহণং ২। ইত্যমরঃ॥

অভিব্যাপ্তিঃ ( স্ত্রী ) সর্ব্বত্রাবস্থানং। সর্ব্বতোবৃত্তিঃ। তৎপর্য্যায়ঃ। সংমূর্চ্ছনং ২। ইত্যমরঃ॥

অভিশপনং ( ক্লী ) মিথ্যাভিশংসনং। অভিশাপঃ। অভিপূর্ব্বশপঁধাতোর্ভাবেঽনট্॥

অভিশপ্তঃ ( ত্রি ) প্রাপ্তাভিশাপঃ। শাপগ্রস্তঃ। যথা। ন নামগ্রহণং কুর্য্যাৎ কৃপণস্য গুরোস্তথা। ভার্য্যায়া অভিশপ্তস্য জনকস্য বিশেষতঃ॥ ইতি মেঘদূতটীকা॥

অভিশস্তঃ ( ত্রি ) পরস্ত্রিয়াং পরপুরুষে বা মৈথুনং প্রতি মিথ্যাদূষিতঃ। মৈথুনং প্রতি আহূত। ইতি কেচিৎ। উপপন্নপাতক। ইতি কেচিৎ। মিথ্যাদূষিতমাত্রং। ইতি কেচিৎ। ইতি ভরতঃ॥ তৎপর্য্যায়ঃ। আক্ষারিতঃ ২ ক্ষারিতঃ ৩। ইত্যমরঃ॥

অভিশস্তিঃ ( স্ত্রী ) লোকাপবাদঃ। ইতি হেমচন্দ্রঃ॥ যাচ্ঞা। ইত্যমরঃ॥

অভিশাপঃ ( পুং ) স্বর্ণস্তেয়ং ত্বয়া কৃতমিত্যাদিমিথ্যাদূষণং বাক্যং। মিথ্যাপবাদঃ। তৎপর্য্যায়ঃ। মিথ্যাভিশংসনং ২। ইত্যমরঃ॥ ক্রোধাৎ দ্বিজাদিভির্দুঃখাভিধারণং। ইতি পুরাণং॥ ব্রাহ্মণগুরুবৃদ্ধসিদ্ধানাং অনিষ্টাভিশংসনং। ইতি বিজয়রক্ষিতঃ॥

অভিষঙ্গঃ ( পুং ) পরাজয়ঃ। আক্রোশঃ। শপথঃ। ইতি মেদিনী॥ মিথ্যাপবাদঃ। ইতি মথুরানাথঃ॥ আলিঙ্গনং। ইত্যমরটীকায়াং রায়মুকুটঃ॥ সর্ব্বতোভাবেন সঙ্গঃ। ইতি হলায়ুধঃ॥ ভূতাদ্যাবেশঃ। যথা অভিঘাতাভিচারাভ্যামভিষঙ্গাভিশাপতঃ। ইতি মাধবকরঃ॥

অভিষবং ( ক্লী ) কাঞ্জিকং। কাঁজি ইতি ভাষা। ইতি হলায়ুধঃ॥

অভিষবঃ ( পুং ) যজ্ঞঃ। স্নানং। মদ্যসন্ধানং। তত্তু চিরস্থাপিতমদ্যোৎপাদকদ্রব্যং। ইতি মেদিনী॥ যজ্ঞস্নানং সোমলতাপানঞ্চ। তৎপর্য্যায়ঃ। সূত্যা ২ সবনং ৩। ইত্যমরঃ॥

অভিষুতং ( ক্লী ) কাঞ্জিকং। ইত্যমরঃ॥

অভিষেকঃ ( পুং ) স্নানং। ইতি ত্রিকাণ্ডশেষঃ॥

অথ ৺দোলযাত্রাভিষেকদ্রব্যাণি লিখ্যন্তে। শীতলজলং ১ গোময়ং২ গোমূত্রং৩ দুগ্ধং৪ দধি ৫ ঘৃতং ৬ কুশোদকং ৭ শঙ্খোদকং ৮ চন্দনোদকং ৯ কুঙ্কুমোদকং ১০ ফলোদকং ১১ পুষ্পোদকং ১২ চন্দনপিষ্টামলক্যুদ্বর্ত্তনং ১৩ সুগন্ধিজলং ১৪ তেনাষ্টবারস্নানং তত্র দ্বিতীয়সপ্তমাষ্টমবারেষু দুগ্ধঘৃতমধুযোজনং। গন্ধোদকং ১৫ তেন পঞ্চধা স্নানং। তীর্থজলং ১৬ গঙ্গোদকং ১৭ বল্মীকতোয়ং ১৮ সর্ব্বৌষধিজলং ১৯ সহস্রধারাজলং ২০ ঘটোদকং ২১ কেষাঞ্চিন্মতে অষ্টোত্তরশতঘটোদকং। ইতি উৎকলখণ্ডং ॥ * ॥ অথ বৃহন্নন্দিকেশ্বরপুরাণোক্ত ৺ দুর্গাপূজাভিষেকদ্রব্যাণি লিখ্যন্তে। পিষ্টামলকীযুক্তহরিদ্রা ১ তয়া দর্পণপ্রতিবিম্বে দেবীমুদ্বর্ত্ত্য যথাক্রমং বক্ষ্যমাণপ্রত্যেকদ্রব্যেণ মন্ত্রং পঠিত্বা স্নাপয়েৎ। শুদ্ধজলং ২ শঙ্খজলং ৩ গঙ্গাজলং ৪ গন্ধোদকং ৫ পঞ্চগব্যং প্রত্যেকং যথা। গোমূত্রং ৬ গোময়ং ৭ দুগ্ধং ৮ দধি ৯ ঘৃতং ১০ কুশোদকং ১১ পঞ্চামৃতং ১২ শিশিরোদকং ১৩ মধু ১৪ পুষ্পোদকং ১৫ ইক্ষুরসসাগরোদকে ১৬ সর্ব্বৌষধিমহৌষধিজলং ১৭ পঞ্চকষায়োদকং ১৮ অষ্টমৃত্তিকাঃ ১৯ ফলোদকং ২০ উষ্ণোদকং ২১ সহস্রধারাজলং ২২ অষ্টকলসোদকং যথা। ব্যোমগঙ্গাম্বুপূর্ণাদ্যকলসঃ ২৩ মেঘতোয়পূর্ণদ্বিতীয়কলসঃ ২৪ সারস্বততোয়পূর্ণতৃতীয়কলসঃ ২৫ সাগরোদকপূর্ণচতুর্থকলসঃ ২৬ পদ্মরেণুমিশ্রিতজলপূর্ণপঞ্চমকলসঃ ২৭ নির্ঝরোদকপূর্ণষষ্ঠকলসঃ ২৮ সর্ব্বতীর্থাম্বুপূর্ণসপ্তমকলসঃ ২৯ শুদ্ধজলপূর্ণাষ্টমকলসঃ ৩০ ॥*॥ নানাপদ্ধতিষু দ্রব্যাণাং ব্যুৎক্রমপুনরুক্ত্যাধিক্যানি সন্তি যত্র যান্যুক্তাতিরিক্তদ্রব্যাণি তানি লিখ্যন্তে। যথা। নদী ১ নারিকেল ২ রত্ন ৩ বৃষ্টি ৪ কর্পূর ৫ চন্দনা ৬ গুরু ৭ স্বর্ণ ৮ রজত ৯ গোরোচনা ১০ কুঙ্কুম ১১ শ্রীফল ১২ ধান্য ১৩ দূর্ব্বা ১৪ শর্করা ১৫ সরোবরা ১৬ স্র ১৭ গঙ্গাসাগর ১৮ পঞ্চশস্য ১৯ তিল ২০ হ্রদ ২১ পুষ্করিণী ২২ কূপ ২৩ ফলমূলা ২৪ র্ঘ্য ২৫ ঘটচতুষ্টয় ২৬ জলানি। শীতলজলঞ্চ ২৭ ॥ তিলতৈল ১ গন্ধতৈলে ২ ॥ নদীকূল ১ বরাহদন্ত ২ বেশ্যাদ্বার ৩ রাজদ্বার ৪ বৃষশৃঙ্গ ৫ বল্মীক ৬ চতুষ্পথ ৭ পারাবার ৮ দেবদ্বার ৯ গঙ্গা ১০ মৃত্তিকাঃ ॥ গজদন্ত ১১ নদো ১২ ভয়কূল ১৩ নাগর ১৪ গোষ্ঠ ১৫ ত্রিপথ ১৬ মৃত্তিকা ইতি কেচিৎ ॥ পঞ্চামৃতং প্রত্যেকং সর্ব্বৌষধিমহৌষধী পৃথক্ ॥ পঞ্চকষায়াঃ প্রত্যেকং॥ পঞ্চামৃতাতিরিক্তমধুঘৃতদুগ্ধানি॥ উদ্বর্ত্তনদ্রব্যে কেবলহরিদ্রা ইতি কেচিৎ ॥ তৈলহরিদ্রা ইতি কেচিৎ॥ গন্ধপিষ্টপঞ্চশস্যচূর্ণমিতি কেচিৎ ॥ কালীপুরাণদেবীপুরাণোক্তপদ্ধতিষ্বপি তথা। তাসাং মধ্যে. পূর্ব্বোক্তাতিরিক্তদ্রব্যাণি লিখ্যন্তে। যথা। প্রবাল ১ মরকত ২ পদ্মরাগ ৩ মুক্তা ৪ মাণিক্য ৫ বৈদূর্য্য ৬ পদ্ম ৭ কহ্লার ৮ কুমুদ ৯ খণ্ডা ১০ লক্ত ১১ বাপী ১২ রক্তচন্দন ১৩ নানা-

তীর্থ ১৪ হরিদ্রা ১৫ পিষ্ট ১৬ শালি-তণ্ডুল ১৭ সিদ্ধার্থ ১৮ জলানি॥ পঞ্চতীর্থ-মৃৎ ১। বিষ্ণুতৈলং ১। উদ্বর্ত্তনদ্রব্যং তৈলহরিদ্রাযুক্তামলকী ১॥ * ॥ অথ বৃহন্নন্দিকেশ্বরদেবীকালীপুরাণপদ্ধত্যুক্তাষ্ট-কলসস্নানকালীনরাগিণীরাগবাদ্যানি॥

পুং। রাগরাগিণ্যৌ। বাদ্যং।

| | |
|---|---|
| বৃং। মালসা ১ মঙ্গলোৎসবঃ | ১ |
| দেং। বারাড়ী ১ ইন্দ্রবিজয়ঃ | ১ |
| কাং। মালবঃ ১ বিজয়ঃ | ১ |
| বৃং। দেবকীরী ২ ভুবনবিজয়ঃ | ২ |
| দেং। মালবগৌড়ঃ ২ মঙ্গলবিজয়ঃ | ২ |
| কাং। ললিতা ২ ডুন্দুভিঃ | ২ |
| বৃং। বারাড়ী ৩ বিজয়ঃ | ৩ |
| দেং। মালবঃ ৩ দেবোৎসবঃ | ৩ |
| কাং। বিভাষা ৩ ডুন্দুভিঃ | ৩ |
| বৃং। দেশালঃ ৪ রাজাভিষেকঃ | ৪ |
| দেং। দেশালঃ ৪ ঘনতালঃ | ৪ |
| কাং। ভৈরবী ৪ বংশী | ৪ |
| বৃং। ধানুষী ৫ মধুরী | ৫ |
| দেং। মালবী ৫ মধুকরঃ | ৫ |
| কাং। কোড়া ৫ ইন্দ্রাভিষেকঃ | ৫ |
| বৃং। ভৈরবী ৬ করতালঃ | ৬ |
| দেং। ভৈরবী ৬ ঢক্কা | ৬ |
| কাং। বারাড়ী ৬ শঙ্খঃ | ৬ |
| বৃং। গুজ্জরী ৭ বংশী | ৭ |
| দেং। বসন্তঃ ৭ শঙ্খঃ | ৭ |
| কাং। বসন্তঃ ৭ পঞ্চশব্দঃ | ৭ |
| বৃং। বসন্তঃ ৮ পঞ্চশব্দঃ | ৮ |
| দেং। কোড়া ৮ মৃদঙ্গঃ | ৮ |
| কাং। ধানুষী ৮ বিজয়ঃ | ৮ |

অথ দেবপ্রতিষ্ঠাভিষেকদ্রব্যাণি। নদী ১ নদ ২ সাগর ৩ নির্ঝর ৪ মেঘজলানি ৫ পঞ্চামৃতং ৬ কুশোদকসহিতপঞ্চগব্যং ৭ অশ্বখুর ৮ গজদন্ত ৯ পর্ব্বত ১০ কুশ ১১ বল্মীকমৃত্তিকাঃ ১২ তিলতৈলং ১৩ ঘৃতং ১৪ পঞ্চকষায়োদকং ১৫ আম্র ১৬ চম্পক ১৭ শমী ১৮ পদ্ম ১৯ করবীরপুষ্পাণি ২০ তুলসী ২১ কুন্দ ২২ শ্রীফলপত্রাণি ২৩ তিলকল্কশালিতণ্ডুলবিল্বপত্রামলকচূর্ণান্য-তমমার্জ্জনদ্রব্যং ২৪ উষ্ণোদকং ২৫ তীর্থোদকং ২৬ অষ্টোত্তরশতকুম্ভাঃ তদ-র্দ্ধম্বা বিংশতির্ব্বা একো বা ২৭। বৈদিকা-ষ্টোত্তরশতপলেন লৌকিকমষ্ট্যধিকশত-ত্রয়তোলকমিতেন জলেন পৃথক্ পৃথক্ ঘটেন দ্রব্যমালোড্য কার্য্যং॥ অশক্তৌ তু। বল্মীকমৃত্তিকা। গোময়ং। শুষ্কগোময়ং। ভস্মযুক্তপরিমিতজলং। গন্ধযুক্তজলঞ্চ। ইতি দেবপ্রতিষ্ঠাতত্ত্বং॥ * ॥ অথ রাজা-ভিষেকদ্রব্যাণি। মৃগচর্ম্মাস্তীর্ণালঙ্কৃতস্বর্ণ-ভদ্রাসনং ১ গঙ্গাযমুনাসঙ্গমজলং ২ যাবৎ-পুণ্যনদীজলং ৩ পূর্ব্বমুখনদীজলং ৪ পশ্চান্মুখ-নদীজলং ৫ তির্য্যঙ্নদীজলং ৬ সর্ব্বসমুদ্র-জলং ৭ ক্ষীরিবৃক্ষপ্রবালযুক্তপদ্মোৎপলবি-মিশ্রিতালঙ্কৃতকাঞ্চনপূর্ণকুম্ভাঃ ৮ রুচকঃ ৯ রোচনা ১০ ঘৃতং ১১ মধু ১২ দুগ্ধং ১৩ দধি ১৪ পুণ্যতীর্থমৃত্তিকা ১৫ পুণ্যতীর্থ-

জলং ১৬ মঙ্গলদ্রব্যং ১৭ মণিদণ্ডশ্বেতচামরব্যজনং ১৮ মাল্যভূষিতশ্বেতচ্ছত্রং ১৯ শ্বেতবৃষঃ ২০ শ্বেতাশ্বঃ ২১ মহাগজবরঃ ২২ বরাভরণভূষিতাষ্টকন্যাঃ ২৩ সর্ব্ববাদিত্রাণি ২৪ অলঙ্কৃতবন্দী ২৫। ইতি বাল্মীকরামায়ণে অযোধ্যাকাণ্ডং ॥ * ॥ অথ রাজাভিষেকবিধিঃ। পুরোহিতো রাজ্ঞঃ প্রজাপালনাধিকারসিদ্ধ্যর্থং পরদিনেঽভিষেকে কর্ত্তব্যে পূর্ব্বদিনে গণেশমাতৃকাপূজনপুণ্যাহবাচননান্দীপ্রভৃতি পূর্ব্বাঙ্গং কুর্য্যাৎ। রাজা রাজ্ঞী চ নিয়মং কৃত্বা উপবাসং কুর্য্যাৎ। পরদিনে অমাত্যসামন্তসহিতঃ পুরোহিতঃ কৃতমঙ্গলস্নানৌ রাজ্ঞীরাজানৌ মণিকাঞ্চনপৃথিবীপুষ্পাণি স্পর্শয়িত্বা নানারত্নচন্দ্রাতপোপশোভিতমণ্ডপমধ্যে ব্যাঘ্রচর্ম্মাচ্ছাদিতাসনে উপবেশয়েৎ। ততঃ পূর্ব্বোত্তরনীচাং বেদীং কৃত্বা তত্র স্বগৃহ্যোক্তবিধিনাগ্নিং সংস্থাপ্য ঘৃতাক্তাঃ পলাশাশ্বত্থশমীসমিধো বৈদিকৈর্ম্মন্ত্রৈর্জুহুয়াৎ। তত ঔডুম্বরস্রুবেণ বৈদিকমন্ত্রৈর্ঘৃতাহুতীর্জুহুয়াৎ। ততঃ সর্ব্বতোভদ্রমণ্ডপে স্থাপিতস্বর্ণরজততাম্রমৃণ্ময়কলসস্থসর্ব্বৌষধিপল্লবৈলালবঙ্গাদিসুগন্ধিদ্রব্যসম্বাসিতপুণ্যনদীতোয়ং স্বর্ণবিভূষিতশঙ্খেন ঋত্বিগ্ভিঃ সহ গৃহীত্বা তূর্য্যঘোষৈর্মঙ্গলপাঠৈ রাজসূয়বাজপেয়মহাভিষেকোক্তসূক্তমন্ত্রৈঃ সস্ত্রীকং রাজানং প্রাঙ্মুখং মূর্দ্ধ্নি কন্যাভিঃ সহাভিষিঞ্চেৎ। ততোঽমাত্যাদয়ঃ সর্ব্বে অভিষিঞ্চেয়ুঃ। ততঃ পুরোহিতমন্ত্রিসামন্ত প্রকৃতিপুরুষা অলঙ্কৃতাভিঃ কন্যাভিঃ সহ সুবাসোগন্ধমাল্যাদ্যলঙ্কৃতরাজ্ঞীরাজ্ঞো র্ললাটে কুঙ্কুমাগুরুকস্তূর্য্যাদিদ্রব্যৈস্তিলকং দদ্যুঃ। ততো রাজ্ঞো মূর্দ্ধ্নি কিরীটং দত্ত্বা ছত্রচামরাদিরাজচিহ্নদ্রব্যাণি সমুপকল্পয়েয়ুঃ। ততো দুন্দুভিস্বস্তিপুণ্যাহচতুর্ব্বেদঘোষৈঃ স্বকুলক্রমাগতনাম্না অমুক ত্বং রাজা ভব ইত্যুক্ত্বা রাজোপরি শ্বেতকুসুমলাজাক্ষতাদি বিকিরেয়ুঃ। ততো বন্দিনো মাগধাশ্চ স্তুতিং কুর্য্যুঃ। ততো ব্রাহ্মণা আশিষং কুর্য্যুঃ। ততঃ অমাত্যাদয়ঃ রাজ্ঞে উপায়নানি দত্ত্বা নমস্কুর্য্যুঃ। ইতি মহাভারতাদয়ঃ ॥*॥

অভিষেণনং (ক্লী) শত্রুং প্রতি সেনাসহিতগমনং। সেনয়া সহ করণভূতয়া বা বিজিগীষোঃ শত্রোরাভিমুখ্যেন গমনং। ইত্যমরভরতৌ ॥

অভিষ্টুতং (ত্রি) বর্ণিতং। স্তুতং। ইত্যমরঃ ॥

অভিষ্যন্দঃ (পুং) অতিবৃদ্ধিঃ। আস্রাবঃ। চক্ষূরোগবিশেষঃ। ইতি মেদিনী ॥ তস্য নিদানং সম্প্রাপ্তিশ্চ। যথা। উষ্ণাভিতপ্তস্য জলপ্রবেশাদ্দূরেক্ষণাৎ স্বপ্নবিপর্য্যয়াচ্চ ॥ স্বেদাদ্রজো ধূমনিষেবণাচ্চ ছর্দ্দের্বিঘাতাদ্বমনাতিযোগাৎ ॥ দ্রবাত্তথান্নান্নিশি সেবিতাচ্চ বিণ্মূত্রবাতক্রমনিগ্রহাচ্চ। প্রসক্তসংরোদনশোককোপাচ্ছিরোঽভিঘাতাদতিমদ্যপানাৎ॥ তথা ঋতূনাঞ্চ বিপর্য্যয়েণ ক্লেশাভিঘাতাদতিমৈথুনাচ্চ। বাষ্পগ্রহাৎ সূক্ষ্মনিরীক্ষণাচ্চ নেত্রে বিকারান্ জনয়ন্তি দোষাঃ ॥ স চ চতুর্ব্বিধঃ। যথা। বাতাৎ পিত্তাৎ কফাদ্রক্তাদভিষ্যন্দশ্চতুর্ব্বিধঃ। প্রায়েণ জায়তে ঘোরঃ সর্ব্বনেত্রাময়াকরঃ ॥

নিস্তোদনস্তম্ভনরোমহর্ষসংঘর্ষপারুষ্যশিরোঽভিতাপাঃ। বিশুষ্কভাবঃ শিশিরাশ্রুতা চ বাতাভিপন্নে নয়নে ভবন্তি ॥ দাহপ্রপাকৌ শিশিরাভিনন্দা ধূমায়নং বাষ্পসমুচ্ছ্রয়শ্চ। উষ্ণাশ্রুতা পীতকনেত্রতা চ পিত্তাভিপন্নে নয়নে ভবন্তি ॥ উষ্ণাভিনন্দা গুরুতাক্ষিশোথঃ কণ্ডূপদেহাবতিশীততা চ। স্রাবো বহুঃ পিচ্ছিল এব চাপি কফাভিপন্নে নয়নে ভবন্তি ॥ তাম্রাশ্রুতা লোহিতনেত্রতা চ রাজ্যঃ সমন্তাদতিলোহিতাশ্চ। পিত্তস্য লিঙ্গানি চ যানি তানি রক্তাভিপন্নে নয়নে ভবন্তি ॥ ইতি মাধবকরঃ ॥ তস্য চিকিৎসা যথা। দ্বে পাদমধ্যে পৃথুসন্নিবেশে শিরোগতে দ্বে বহুধা হি নেত্রে। তাঃ প্রোক্ষণোৎসাদনলেপনাদীন্ পাদপ্রযুক্তান্নয়নং নয়ন্তি ॥ প্রোক্ষণং সেচনং। উৎসাদনং উদ্বর্ত্তনং। মলোষ্মসংঘট্টনপীড়নাদ্যৈস্তা দূষয়ন্তে নয়নানি তুষ্টাঃ। ভজেন্মহাদৃষ্টিহিতানি তস্মাতুপানদভ্যঞ্জনধাবনানি॥ মলং ধূল্যাদি। মলাদিভির্দুষ্টাঃ তাঃ শিরা নয়নানি দূষয়ন্তে ইত্যন্বয়ঃ ॥ চক্ষুষ্যাঃ শালয়ো মুদ্গা যবা মাংসন্তু জাঙ্গলং। পক্ষিমাংসং বিশেষেণ বাস্তূকং তণ্ডুলীয়কং ॥ পটোলকর্কোটককারবেল্লফলানি সর্পিঃপরিপাচিতানি। তথৈব বার্ত্তাকুফলং নবীনং দৃশোর্হিতঃ স্বাদু তথাপি তিক্তঃ॥ কট্বম্লগুরুতীক্ষ্ণোষ্ণমাষনিষ্পাবমৈথুনং ॥ মদ্যবল্লূরপিণ্যাকমৎস্যশাকবিরূঢ়জং। বিদাহীন্যন্নপানানি ন হিতান্যক্ষিরোগিণঃ ॥ সেক আশ্চোতনং পিণ্ডী বিড়ালস্তর্পণং তথা। পুটপাকোঽঞ্জনং চৈভিঃ কল্কৈর্নেত্রমুপাচরেৎ ॥ * ॥ কল্কবিধিঃ। তত্র সেকবিধিঃ। সেকস্তু সূক্ষ্মধারাভিঃ সর্ব্বস্মিন্নয়নে হিতঃ। মীলিতাক্ষস্য মর্ত্ত্যস্য প্রদেয়শ্চতুরঙ্গুলঃ ॥ স চাপি স্নেহনো বাতে পিত্তে রক্তে চ রোপণঃ। লেখনস্তু কফে কার্য্যস্তস্য মাত্রা বিধীয়তে। ষড়্‌ভির্বাচাং শতৈঃ স্নেহে চতুর্ভিস্তৈস্তু রোপণে। তৈস্ত্রিভির্লেখনে কার্য্যঃ সেকো নেত্রপ্রসাদনে ॥ নিমেষোন্মেষণে পুংসামঙ্গুল্যাচ্ছোটিকা তথা। গুর্ব্বক্ষরোচ্চারণং বা বাঙ্মাত্রেয়ং স্মৃতা বুধৈঃ ॥ ছোটিকা টুটকী ইতি লোকে। সেকস্তু দিবসে কার্য্যো রাত্রৌ চাত্যন্তিকে গদে। স যথা। এরণ্ডদলমূলত্বক্‌শৃতমাজং পয়ো হিতং। সুখোষ্ণং নেত্রয়োঃ সিক্তং বাতাভিষ্যন্দনাশনং ॥ পথ্যাক্ষামলখস্‌খসবল্কলকল্কেন সূক্ষ্মবস্ত্রেণ। কৃত্বা পোটলিকাং তামহিফেনোত্থদ্রবেণাক্তাং ॥ নিদধীত লোচনে স্যাৎ সর্ব্বাভিষ্যন্দসংক্ষয়ঃ শীঘ্রং। যোগোঽয়মৃষিভিরুক্তো জগতুপকারায় কারুণিকৈঃ ॥ ভুক্ত্বা পাণিতলং ঘৃষ্ট্বা চক্ষুষোর্যদি দীয়তে। অচিরেণৈব তদ্বারি তিমিরাণি ব্যপোহতি॥ স্নানং কৃষ্ণতিলৈশ্চাপি চক্ষুষ্যমনিলাপহং। আমলৈঃ সততং স্নানং পরং দৃষ্টিবলাবহং ॥ ত্রিফলায়াঃ কষায়স্তু ধাবনান্নেত্ররোগজিৎ। কবলান্মুখরোগঘ্নঃ পানতঃ কামলাপহঃ ॥ * ॥ অথাশ্চোতনবিধিঃ। ক্বাথক্ষীরদ্রবস্নেহবিন্দুনাং যত্তু পাতনং। দ্ব্যঙ্গুলোন্মীলিতে নেত্রে প্রোক্তমাশ্চোতনঞ্চ তৎ। বিন্দবোঽষ্টৌ লেখনেষু রোপণে

দশবিন্দবঃ॥ স্নেহনে দ্বাদশ প্রোক্তাস্তে শীতে কোষ্ণরূপিণঃ। উষ্ণে তু শীতরূপাঃ স্যুঃ সর্ব্বত্রৈবৈষ নিশ্চয়ঃ॥ বাতে তিক্তং তথা স্নিগ্ধং পিত্তে মধুরশীতলং। কফে ত্রিক্তোষ্ণরূক্ষং স্যাৎ ক্রমাদাশ্চোতনং হিতং॥ আশ্চোতনানাং সর্ব্বেষাং মাত্রা স্যাদ্বাকৃশতোন্মিতা। ততঃ পরং লোচনাভ্যাং ভেষজায় নয়ো মতঃ॥ আশ্চোতনং ন কর্ত্তব্যং নিশায়াং কেনচিৎ কচিৎ। তদ্যথা। বিল্বাদিপঞ্চমূলেন বৃহত্যেরণ্ডশিগ্রুভিঃ। ক্বাথ আশ্চোতনে কোষ্ণো বাতাভিষ্যন্দনাশনঃ॥ ত্রিফলাশ্চোতনং নেত্রে সর্ব্বাভিষ্যন্দনাশনং॥ *॥ অথ পিণ্ডীবিধিঃ। উক্তভেষজকল্কস্য পিণ্ডী চ কোলমাত্রয়া। বস্ত্রখণ্ডেন সংবদ্ধাভিষ্যন্দব্রণনাশিনী॥ স্নিগ্ধোষ্ণা পিণ্ডিকা বাতে পিত্তে সা শীতলা মতা। রূক্ষোষ্ণা শ্লেষ্মণি প্রোক্তা বিধিরুক্তো বুধৈরয়ং॥ সা যথা। এরণ্ডপত্রমূলত্বগ্ভির্ন্মিতা বাতনাশিনী। ধাত্রী বিরচিতা পিত্তে শিগ্রুপত্রকৃতা কফে॥ নিম্বপত্রকৃতা পিণ্ডী পিত্তশ্লেষ্মহরী ভবেৎ। শুণ্ঠী নিম্বদলৈঃ পিণ্ডী সুখোষ্ণা স্বল্পসৈন্ধবা॥ ধার্য্যা নেত্রেঽনিলশ্লেষ্মশোথকণ্ডূব্যথাহরী। ত্রিফলা পিণ্ডিকা নেত্রে বাতপিত্তকফাপহা॥ পথ্যাক্ষামলখস্মসবল্কলকস্কোঽহিফেনজলযুক্তঃ। তেন বিরচিতা পিণ্ডী শময়তি সকলানভিষ্যন্দান্॥ ইতি ভাবপ্রকাশঃ॥

অভিষ্যন্দিরমণং (ক্লী) প্রধাননগরসন্নিহিতনগরং। তৎপর্য্যায়ঃ। শাখানগরং ২। ইতি জটাধরঃ॥

অভিসন্তাপঃ (পুং) যুদ্ধং। ইতি হলায়ুধঃ॥

অভিসন্ধানং (ক্লী) বঞ্চনং। প্রতারণং। ইতি হেমচন্দ্রঃ

অভিসন্ধিঃ (পুং) অভিসন্ধানং। উদ্দেশঃ। যথা। পিতৃন্নমস্যে দিবি যে চ মূর্ত্তাঃ স্বধাভুজঃ কাম্যফলাভিসন্ধৌ। প্রদানশক্তাঃ সকলেপ্সিতানাং বিমুক্তিদা যেঽনভিসংহিতেষু॥ ইতি রুচিস্তবঃ॥

অভিসম্পাতঃ (পুং) যুদ্ধং। ইত্যমরঃ॥

অভিসরঃ (পুং) সহায়ঃ। অনুচরঃ। ইত্যমরঃ

অভিসর্জ্জনং (ক্লী) দানং। বধঃ। ইতি ধরণী

অভিসারঃ (পুং) বলং। যুদ্ধং। সহায়ঃ। সাধনং। ইতি ধরণী॥ স্ত্রীপুংসয়োরন্যতরস্যান্যতরার্থং সঙ্কেতস্থলগমনং। ইত্যলঙ্কারশাস্ত্রং

অভিসারিকা (স্ত্রী) স্বীয়াদিষোড়শনায়িকামধ্যে অবস্থাবিশিষ্টাষ্টনায়িকান্তর্গতনায়িকাবিশেষঃ। অস্যা লক্ষণং। সঙ্কেতস্থলে স্বয়ং গন্ত্রী এবং প্রিয়গমনকারয়িত্রী। অস্যা শ্চেষ্টা। সময়ানুরূপভূষণং। শঙ্কা। বুদ্ধিনৈপুণ্যং কপটসাহসাদিঃ। সা ত্রিবিধা। দিবাভিসারিকা ১ জ্যোৎস্নাভিসারিকা ২ অন্ধকারাভিসারিকা ৩। ইতি রসমঞ্জরী॥

অভিহারঃ (পুং) চৌর্য্যং। সম্মুখে হরণং। তৎপর্য্যায়ঃ। অভিগ্রহণং ২। ইত্যমরঃ॥ সন্নহনং। কবচধারণং। অভিযোগঃ। অপচিকীর্ষয়াভিগম্যাক্রমণং। ইতি মেদিনী॥

অভিহিতং (ত্রি) উক্তং। কথিতং। ইত্যমরঃ॥

অভীকঃ (পুং) কবিঃ। ইতি মেদিনী॥ স্বামী। ইতি হলায়ুধঃ॥

অভীকঃ (ত্রি) কামুকঃ। ক্রূরঃ। উৎসুকঃ। নির্ভয়ঃ। ইতি শব্দরত্নাবলী ॥

অভীপ্সিতং (ত্রি) বাঞ্ছিতং। অভীষ্টং। ইত্যমরঃ

অভীরঃ (পুং) আভীরঃ। গোপঃ। ইত্যমরটীকায়াং রমানাথঃ ॥

অভীরুঃ (পুং) ভৈরবঃ। যথা। অভীরুর্ভৈরবো ভীরুর্ভূতপো যোগিনীপতিঃ। ইতি বটুকভৈরবস্তবঃ ॥ নির্ভয়ে ত্রি ॥

অভীরুঃ (স্ত্রী) শতমূলী। ইত্যমরঃ ॥

অভীরুপত্রী (স্ত্রী) শতমূলী। ইত্যমরঃ ॥

অভীশুঃ (পুং) প্রগ্রহঃ। বাগ্‌ডোর ইতি ভাষা। বেদেঽস্য প্রচুরপ্রয়োগঃ ॥ কিরণং। ইতি হলায়ুধঃ ॥ [ প্রয়োগঃ ॥

অভীশুঃ (স্ত্রী) অঙ্গুলিঃ। বেদেঽস্য প্রচুর-

অভীষঙ্গঃ (পুং) আক্রোশঃ। ইত্যমরঃ ॥

অভীষুঃ (পুং) প্রগ্রহঃ। কিরণঃ। ইত্যমরঃ ॥ কামঃ। অনুরাগঃ। ইতি শব্দরত্নাবলী ॥

অভীষ্টং (ত্রি) বাঞ্ছিতং। তৎপর্য্যায়ঃ। অভীপ্সিতং ২ হৃদ্যং ৩ দয়িতং ৪ বল্লভং ৫ প্রিয়ং ৬। ইত্যমরঃ ॥

অভীষ্টা (স্ত্রী) রেণুকানামগন্ধদ্রব্যং। ইতি শব্দচন্দ্রিকা ॥

অভীক্ষ্ণং (ক্লী) ভৃশং। নিত্যং। তদ্‌যুক্তক্রিয়য়োস্ত্রি। ইতি মেদিনী ॥

অভীক্ষ্ণং ব্য পুনঃপুনঃ। অনারতং। ইত্যমরঃ ॥

অভুক্তঃ (ত্রি) উপবাসী। যথা। অভুক্তস্য দিবানিদ্রা পাষাণমপি জীর্য্যতি। ইতি বৈদ্যকং ॥ অকৃতভোজনং বস্তু ॥

অভূমিঃ (স্ত্রী) স্থানাভাবঃ। অনাধারঃ। আশ্রয়াভাবঃ। যথা। অভূদভূমিঃ প্রতিপক্ষজন্মনাং ভিয়ামিতি মাঘঃ ॥ নাভূদভূমিঃ স্মরশায়কানামিতি নৈষধং ॥

অভেদঃ (ত্রি) ভেদরহিতঃ। অবিশেষঃ। যথা। অভেদঃ শিবরাময়োরিতি পুরাণং ॥

অভেদ্যং (ক্লী) হীরকং। ইতি রাজনির্ঘণ্টঃ ॥ অভেদনীয়বস্তুনি ত্রি। যথা। অস্ত্রাণ্যনেকরূপাণি তথা ভেদ্যঞ্চ দংশনং। ইতি দেবীমাহাত্ম্যং ॥

অভোজনং (ক্লী) ভোজনাভাবঃ। উপবাসঃ। যথা। অজীর্ণে ভোজনং যেষাং জীর্ণে যেষামভোজনং। রাত্রাবভোজনং যেষাং তেষাং নশ্যন্তি ধাতবঃ ॥ ইতি বৈদ্যকং ॥

অভ্যগ্রং (ত্রি) সমীপং। নিকটং। ইত্যমরঃ ॥

অভ্যঙ্গঃ (পুং) তৈলমর্দনং। তৎপর্য্যায়ঃ। স্নেহনং ২। ইতি রাজনির্ঘণ্টঃ ॥ যথা। তৈলমল্লং যদঙ্গেষু ন চ স্যাদ্বাহুতর্পণং। সা মার্ষ্টিঃ পৃথগভ্যঙ্গো মস্তকাদৌ প্রকীর্ত্তিতঃ ॥ অভ্যঙ্গমাচরেন্নিত্যং স জরাশ্রমবাতহা। শিরঃশ্রবণপাদেষু তং বিশেষেণ শীলয়েৎ ॥ ইত্যায়ুর্ব্বেদঃ ॥ * ॥ অস্য গুণাঃ। মার্দবকারিত্বং। কফবাতনাশিত্বং। ধাতুপুষ্টিজনকত্বং। ত্বগ্বর্ণবলপ্রদত্বঞ্চ ॥ পাদাভ্যঙ্গগুণাঃ। নিদ্রাচক্ষুর্হিতকারিত্বং। পাদরোগনাশিত্বঞ্চ ॥ পাদগতে দ্বে শিরে চক্ষুষি সম্বন্ধে স্তঃ অতশ্চক্ষুর্হিতার্থিনা পাদাভ্যঙ্গঃ করণীয়ঃ ॥ কফগ্রস্তকৃতভেদবমনাজীর্ণিভির্নাভ্যঙ্গঃ করণীয়ঃ। ইতি রাজবল্লভঃ ॥ * ॥ অপরঞ্চ। মূর্দ্ধ্নি দত্তং যদা তৈলং ভবেৎ সর্ব্বাঙ্গসঙ্গতং। স্রোতোভিস্তর্পয়েদ্বাহূ

স চাভ্যঙ্গ উদাহৃতঃ ॥ তৎপর্য্যায়ঃ। অভ্যঞ্জনং ২। আভাং ইতি ভাষা। ইতি শুদ্ধিতত্ত্বধৃতায়ুর্ব্বেদঃ ॥

অভ্যঙ্কঃ (পুং) তিলকল্কঃ। ইতি ঋগ্বেদিশ্রাদ্ধপ্রয়োগঃ ॥

অভ্যঞ্জনং (ক্লী) তৈলং। ইতি হেমচন্দ্রঃ ॥ অভ্যঙ্গঃ। ইতি রাজনির্ঘণ্টঃ ॥

অভ্যন্তরং (ক্লী) মধ্যং। তৎপর্য্যায়ঃ। অন্তরালং ২। ইত্যমরঃ ॥ অন্তঃ ৩ অন্তরং ৪ অন্তরালকং ৫। ইতি রাজনির্ঘণ্টঃ ॥

অভ্যমিতঃ (ত্রি) রোগী। ইত্যমরঃ ॥

অভ্যমিত্রীণঃ (পুং) অভ্যমিত্র্যঃ। ইত্যমরঃ ॥

অভ্যমিত্রীয়ঃ (পুং) অভ্যমিত্র্যঃ। ইত্যমরঃ ॥

অভ্যমিত্র্যঃ (পুং) স্বসামর্থ্যবশেন শত্রুসম্মুখগমনকর্ত্তা। যুদ্ধস্থলে শত্রুসম্মুখগামী। তৎপর্য্যায়ঃ। অভ্যমিত্রীয়ঃ ২ অভ্যমিত্রীণঃ ৩। ইত্যমরঃ ॥

অভ্যর্ণং (ত্রি) নিকটং। ইত্যমরঃ ॥

অভ্যবকর্ষণং (ক্লী) শল্যাদেরুৎপাটনং। তৎপর্য্যায়ঃ। নির্হারঃ ২। ইত্যমরঃ ॥

অভ্যবস্কন্দঃ (পুং) নিঃশক্তীকরণায় শত্রুভিদীয়মানঃ প্রহারঃ। তৎপর্য্যায়ঃ। অভ্যাসাদনং ২ প্রপাতঃ ৩ ধাটী ৪। ইতি হেমচন্দ্রঃ ॥

অভ্যবস্কন্দনং (ক্লী) নিঃশক্তীকরণায় শত্রুভিদীয়মানঃ প্রহারঃ। শত্রুসম্মুখগমনং ইত্যমরভরতৌ ॥ [ হেমচন্দ্রঃ ॥

অভ্যবহারঃ (পুং) ভক্ষণং। আহারঃ। ইতি

অভ্যবহৃতং (ত্রি) ভুক্তং। খাদিতং। ইত্যমরঃ ॥

অভ্যসনং (ক্লী) অভ্যাসকরণং। পৌনঃপুন্যেন করণং চিন্তনঞ্চ। যথা। স্যাদভ্যাসোঽভ্যসনেঽন্তিকে। ইতি মেদিনী ॥

অভ্যসূয়া (স্ত্রী) অসূয়া। গুণেষু দোষারোপণং। যথা। চৈত্রস্য দানং তামসং। ইত্যমরটীকায়াং ভরতঃ ॥

অভ্যাকাঙ্ক্ষিতং (ক্লী) মিথ্যাভিযোগঃ। মিছা দাওয়া ইতি ভাষা। ইতি শব্দরত্নাবলী ॥

অভ্যাখ্যানং (ক্লী) মিথ্যাভিযোগঃ। মিথ্যাবিবাদঃ। শতং মে ধারয়সীত্যাদি মিথ্যোদ্ভাবনং। ইত্যমরভরতৌ ॥

অভ্যাগতঃ (পুং) অতিথিঃ। ইতি হেমচন্দ্রঃ ॥ স চ অজ্ঞাতপূর্ব্বগৃহাগতঃ। ইতি শ্রীধরস্বামী ॥

অভ্যাগমঃ (পুং) সমীপং। মারণং। যুদ্ধং। বৈরং। অভ্যুত্থানং। ইতি বিশ্বঃ ॥

অভ্যাগারিকঃ (ত্রি) কুটুম্বব্যাপৃতঃ। পুত্রদারাদিপোষণব্যগ্রঃ। ইত্যমরঃ ॥

অভ্যাদানং (ক্লী) আরম্ভঃ। ইত্যমরঃ ॥ প্রথমারম্ভঃ। ইতি রায়মুকুটঃ ॥

অভ্যান্তঃ (ত্রি) রোগী। ইত্যমরঃ ॥

অভ্যামর্দঃ (পুং) সংগ্রামঃ। ইত্যমরঃ ॥

অভ্যাশঃ (ত্রি) সমীপং। ইত্যমরটীকায়াং রায়মুকুটঃ ॥

অভ্যাসঃ (পুং) অভ্যসনং। আবৃত্তিঃ। ইতি মেদিনী ॥ শরাভ্যাসঃ। তৎপর্য্যায়ঃ। খুরলী ২ যোগ্যা ৩। ইতি ত্রিকাণ্ডশেষঃ ॥ সমীপে ত্রি। ইত্যমরঃ ॥ চিত্তস্যৈকস্মিন্নভ্যন্তরে বাহ্যে বা প্রতিমাদাবালম্বনে সর্ব্বতঃ সমাহৃত্য পুনঃ পুনঃ স্থাপনমভ্যাসঃ। যথা। অভ্যাসযোগেন ততো মামিচ্ছাপ্তুং ধনঞ্জয়েতি ভগবদ্গীতাটীকায়াং নীলকণ্ঠঃ ॥

অভ্যাসাদনং (ক্লী) নিঃশক্তীকরণায় শত্রুভির্দীয়মানঃ প্রহারঃ। শত্রুসম্মুখগমনং। ইত্যমরভরতৌ॥

অভ্যাহারঃ (পুং) অভিহারঃ। চৌর্য্যং। ইত্যমরটীকা॥

অভ্যুত্থানং (ক্লী) গৌরবং। ইতি হেমচন্দ্রঃ॥ আসনাদেরুত্থানং। যথা। যদা যদা চ ধর্ম্মস্য গ্লানির্ভবতি ভারত। অভ্যুত্থানমধর্ম্মস্য তদাত্মানং সৃজাম্যহং॥ ইতি শ্রীভগবদ্গীতা॥

অভ্যুদয়ঃ (পুং) ইষ্টলাভঃ। বিবাহাদিঃ। ইতি আভ্যুদয়িকশব্দার্থে শ্রাদ্ধতত্ত্বং॥ সর্ব্বতোভাবেনোদয়ঃ। অর্থাদ্ধনজনাদিবৃদ্ধিঃ। যথা। রাজন্নভ্যুদয়োঽস্তু বল্লনকবে হস্তে কিমাস্তে তব শ্লোকঃ কস্য কবেরমুষ্য কৃতিনস্তৎ পঠ্যতাং পঠ্যতে। কিন্ত্বাসামরবিন্দসুন্দরদৃশাং দ্রাক্চামরান্দোলনাদুদ্বেল্লদ্ভুজবল্লিকঙ্কণঝনৎকারঃ ক্ষণং বার্য্যতাং॥ ইত্যস্য পূর্ব্বার্দ্ধং বল্লনকবিকর্ণাটরাজয়োর্বাক্যং শেষার্দ্ধং কালিদাসস্য॥

অভ্যুদিতঃ (ত্রি) যস্মিন্ স্বপ্তে সূর্য্য উদেতি সঃ। সূর্য্যোদয়কালশায়ী। ইত্যমরঃ॥ উদয়প্রাপ্তঃ। যথা। মাঘে মাসি রটন্ত্যাপঃ কিঞ্চিদভ্যুদিতে রবৌ। ব্রহ্মঘ্নমপি চাণ্ডালং কং পতন্তং পুনীমহে॥ ইতি তিথ্যাদিতত্ত্বং॥

অভ্যুপগতঃ (ত্রি) স্বীকৃতঃ। অঙ্গীকৃতঃ। ইতি হেমচন্দ্রঃ॥

অভ্যুপগমঃ (পুং) স্বীকারঃ। ইত্যমরঃ॥ নিকটাগমনং। ইতি মেদিনী॥

অভ্যুপপত্তিঃ (স্ত্রী) অনুগ্রহঃ। ইত্যমরঃ॥

অভ্যুপায়ঃ (পুং) অঙ্গীকারঃ। স্বীকারঃ। ইতি হেমচন্দ্রঃ॥ উপায়ঃ। যথা। তৎস্বীকৃতিব্যতিকরে ক ইহাভ্যুপায়ঃ। ইতি কাব্যপ্রকাশঃ॥

অভ্যুপায়নং (ক্লী) উপায়নং। উপঢৌকনদ্রব্যং। যথা। তাবানয় সমং গোপৈর্নন্দাদ্যৈঃ সাভ্যুপায়নৈঃ। ইতি শ্রীভাগবতং॥

অভ্যুপেতং (ত্রি) স্বীকৃতং। উপগতং। যথা। অহমভ্যুপেতস্ত্বামর্থিভাবাদিতি মে বিষাদঃ। ইতি রঘুঃ॥

অভ্যুষঃ (পুং) অভ্যূষঃ। পৌলিঃ। ইত্যমরটীকায়াং ভরতঃ॥

অভ্যূষঃ (পুং) পাকাবস্থাগতকলায়াদিঃ। আরব্ধপাকযবসর্ষপাদিঃ। বহ্নিনা ঈষদ্দগ্ধঃ চুট চুট শব্দবান্ ইতি কেচিৎ॥ দরদগ্ধ ইতি শ্রীধরঃ॥ তৎপর্য্যায়ঃ। আপক্কং ২ পৌলিঃ ৩। ইত্যমরঃ॥ অভ্যুষঃ ৪ অভ্যোষঃ ৫। ইতি ভরতঃ॥ * ॥ পোলিকা। রোটী ইতি প্রসিদ্ধা। অস্যা গুণাঃ। মধুরত্বং। গুরুত্বং রোচকত্বং। বলকারিত্বং। শ্লেষ্মবৃদ্ধিজনকত্বং। পিত্তরক্তপ্রদায়িত্বঞ্চ॥ * ॥ অঙ্গারকৃতায়াস্তস্যা গুণাঃ। অগ্নিদীপনত্বং। বায়ুবৃদ্ধিকারিত্বং। লঘুত্বং। বলকারিত্বঞ্চ। সা স্নেহযুক্তা চেৎ ঘনাঘনগুণান্বিতা। ইতি রাজনির্ঘণ্টঃ॥ ঈষৎপক্কং। যথা। আপক্কমবপক্কং স্যাদাভ্যুষঃ পৌলিপৌলিকে। অভ্যুষোঽভ্যোষ ইত্যেতি ঈষৎপক্কযবাদিষু॥ ইতি শব্দরত্নাবলী॥

অভ্যোষঃ (পুং) অভ্যুষঃ। ইত্যমরটীকায়াং ভরত

অভ্র গতৌ। ইতি কবিকল্পদ্রুমঃ॥ ওষ্ঠবর্গ-চতুর্থোপধঃ। অভ্রতি। ইতি দুর্গাদাসঃ॥

অভ্রং (ক্লী) মেঘঃ। আকাশং। স্বর্ণং। অভ্রক-ধাতুঃ। ইতি মেদিনী॥ উপধাতুবিশেষঃ। তস্যোৎপত্তিনামলক্ষণগুণাঃ। পুরা বধায় বৃত্রস্য বজ্রিণা বজ্রমুদ্ধৃতং। বিস্ফুলিঙ্গাস্ততস্তস্য গগনে পরিসর্পিতাঃ॥ তে নিপেতুর্ঘনধ্বানাচ্ছিখরেষু মহীভৃতাং। তেভ্য এব সমুৎপন্নং তত্তদ্‌গিরিষু চাভ্রকং॥ তদ্‌বজ্রং বজ্রজাতত্বাদভ্রমভ্ররবোত্তবাৎ। গগনাদ্বলিতং যস্মাদ্গগনঞ্চ ততো মতং॥ বিপ্রক্ষত্রিয়বিট্‌শূদ্রভেদাত্তৎ স্যাচ্চতুর্ব্বিধং। ক্রমেণৈব সিতং রক্তং পীতং কৃষ্ণঞ্চ বর্ণতঃ॥ প্রশস্যতে সিতং তারে রক্তং তত্তু রসায়নে। পীতং হেমনি কৃষ্ণন্তু গদেষু দ্রুতয়েঽপি চ॥ পিনাকং দর্দ্দুরং নাগং বজ্রঞ্চেতি চতুর্ব্বিধং। মুঞ্চত্যগ্নৌ বিনিঃক্ষিপ্তং পিনাকং দলসঞ্চয়ং॥ অজ্ঞানাদ্ভক্ষণাত্তস্য মহাকুষ্ঠপ্রদায়কং। দর্দ্দুরং ত্বগ্নিনিঃক্ষিপ্তং কুরুতে দর্দ্দুরধ্বনিং॥ গোলকান্ বহুশঃ কৃত্বা স স্যান্মৃত্যুপ্রদায়কঃ। নাগন্তু নাগবদ্বহ্নৌ ফুৎকারং পরিমুঞ্চতি॥ তদ্ভক্ষিতমবশ্যন্তু বিদধাতি ভগন্দরং। বজ্রন্তু বজ্রবত্তিষ্ঠেত্তন্নাগ্নৌ বিকৃতিং ব্রজেৎ॥ সর্ব্বাভ্রেষু বরং বজ্রং ব্যাধিবার্দ্ধক্যমৃত্যুহৃৎ। অভ্রমুত্তরশৈলোত্থং বহুসত্ত্বং গুণাধিকং॥ দক্ষিণাদ্রিভবং স্বল্পসত্ত্বমল্পগুণপ্রদং॥ *॥ মারিতাভ্রগুণাঃ। অভ্রং কষায়ং মধুরং সুশীতমায়ুষ্করং ধাতুবিবর্দ্ধনঞ্চ। হন্যাত্ত্রিদোষং ব্রণমেহকুষ্ঠং প্লীহোদরগ্রন্থিবিষক্রমীংশ্চ॥ রোগান্ হন্তি দৃঢ়য়তি বপুর্বীর্য্যবৃদ্ধিং বিধত্তে। তারুণ্যাঢ্যং রময়তি শতং যোষিতাং নিত্যমেব॥ দীর্ঘায়ুষ্কান্ জনয়তি সুতান্ বিক্রমৈঃ সিংহতুল্যান্। মৃত্যোর্ভীতিং হরতি সততং সেব্যমানং মৃতাভ্রং॥ *॥ অশোধিতাভ্রদোষাঃ। পীড়াং বিধত্তে বিবিধাং নরাণাং কুষ্ঠং ক্ষয়ং পাণ্ডুগদঞ্চ শোথং। হৃৎপার্শ্বপীড়াঞ্চ করোত্যশুদ্ধমভ্রং হ্যসিদ্ধং গুরুতাপদং স্যাৎ॥ *॥ অস্য শোধনবিধির্যথা। কৃষ্ণাভ্রকং ধমেদ্বহ্নৌ ততঃ ক্ষীরে বিনিঃক্ষিপেৎ। ভিন্নপত্রন্তু তৎ কৃত্বা তণ্ডুলীয়াম্লজৈর্দ্রবৈঃ॥ ভাবয়েদষ্টযামং তদেবমভ্রং বিশুদ্ধ্যতি॥ *॥ তস্য মারণং যথা। কৃত্বা ধান্যাভ্রকং তচ্চ শোধয়িত্বাথ মর্দ্দয়েৎ। অর্কক্ষীরৈর্দিনং খল্লে চক্রাকারঞ্চ কারয়েৎ॥ বেষ্টয়েদর্কপত্রৈশ্চ সম্যগ্‌গজপুটে পচেৎ। পুনর্ম্মর্দ্দ্যং পুনঃ পাচ্যং সপ্তবারান্ পুনঃ পুনঃ॥ ততো বটজটাক্বাথৈস্তদ্বদ্দেয়ং পুটত্রয়ং। ম্রিয়তে নাত্র সন্দেহঃ প্রযোজ্যং সর্ব্বকর্ম্মসু॥ তুল্যং ঘৃতং মৃতাভ্রেণ লৌহপাত্রে বিপাচয়েৎ। ঘৃতে জীর্ণে তদভ্রন্তু সর্ব্বযোগেষু যোজয়েৎ॥*॥ তত্র ধান্যাভ্রস্য বিধিঃ। পাদাংশসলিলং যুক্তমভ্রং বদ্ধাথ কম্বলে। ত্রিরাত্রং স্থাপয়েন্নীরে তৎক্লিন্নং মর্দ্দয়েৎ করৈঃ॥ কম্বলাদ্গলিতং সূক্ষ্মং বালুকারহিতঞ্চ যৎ। তদ্ধান্যাভ্রমিতি প্রোক্তমভ্রমারণসিদ্ধয়ে॥ ইতি ভাবপ্রকাশঃ॥

অভ্রংলিহঃ (পুং) বায়ুঃ। ইতি পাণিনিঃ॥

অভ্রকং (ক্লী) স্বনামখ্যাতধাতুঃ। আভ ইতি ভাষা। তৎপর্য্যায়ঃ। গিরিজং ২ অমলং ৩

ইত্যমরঃ॥ গিরিজামলং ৪ গৌর্য্যামলং ৫। ইতি স্বামী॥ গিরিজাবীজং ৬ গরজধ্বজং ৭। ইতি বাচস্পতিঃ॥ শুভ্রং ৮। ইতি জটাধরঃ॥ ঘনং ৯ ব্যোম ১০ অব্দং ১১। ইতি রত্নমালা॥ অভ্রং ১২ ভৃঙ্গং ১৩ অম্বরং ১৪ অন্তরীক্ষং ১৫ আকাশং ১৬ বহুপত্রং ১৭ খং ১৮ অনন্তং ১৯ গৌরীজং ২০ গৌরীজেয়ং ২১। ইতি রাজনির্ঘণ্টঃ॥ অস্য গুণাঃ। রসায়নত্বং। স্নিগ্ধত্বং। বলবর্ণাগ্নিবর্দ্ধকত্বঞ্চ। ইতি রাজবল্লভঃ॥ অপি চ। গুরুত্বং। হিমত্বং। বল্যত্বং। কুষ্ঠমেহত্রিদোষনাশিত্বঞ্চ॥ *॥ তচ্চতুর্বিধং যথা। শ্বেতং পীতং লোহিতং নীলমভ্রং চাতুর্ব্বিধ্যং চাতিভিন্নক্রিয়ার্হং। শ্বেতং তারে কাঞ্চনে পীতরক্তে নীলং ব্যাধিব্যগ্রমগ্র্যং গুণাঢ্যং॥ ইতি মদনবিনোদঃ॥

অভ্রঙ্কষঃ (পুং) বায়ুঃ। ইতি পাণিনিঃ॥

অভ্রপিশাচঃ (পুং) রাহুগ্রহঃ। ইতি ত্রিকাণ্ডশেষঃ॥

অভ্রপিশাচকঃ (পুং) রাহুগ্রহঃ। ইতি হারাবলী॥

অভ্রপুষ্পং (ক্লী) জলং। যথা। অভ্রপুষ্পমপি দিৎসতি শীতং সার্থিনা বিমুখতা যদভাজীতি নৈষধং॥

অভ্রপুষ্পঃ (পুং) বেতসবৃক্ষঃ। ইত্যমরঃ॥

অভ্রমঃ (ত্রি) ভ্রমরহিতঃ। অভ্রান্তঃ। নাস্তি ভ্রমো যস্যেতি বহুব্রীহিঃ॥

অভ্রমাংসী (স্ত্রী) আকাশমাংসীলতা। ইতি রাজনির্ঘণ্টঃ॥

অভ্রমাতঙ্গঃ (পুং) ঐরাবতঃ। ইন্দ্রহস্তী। ইত্যমরঃ॥

অভ্রমালা (স্ত্রী) মেঘশ্রেণী। মেঘসমূহঃ। ইতি হলায়ুধঃ॥

অভ্রমুঃ (স্ত্রী) ঐরাবতস্ত্রী। সা পূর্ব্বদিগ্‌হস্তিনী। ইত্যমরঃ॥

অভ্রমুপ্রিয়ঃ (পুং) ঐরাবতহস্তী। ইতি হেমচন্দ্রঃ॥

অভ্রমুবল্লভঃ (পুং) ঐরাবতহস্তী। ইত্যমরঃ॥

অভ্ররোহং (ক্লী) বৈদূর্য্যমণিঃ। ইতি রাজনির্ঘণ্টঃ॥

অভ্রবাটিকঃ (পুং) আম্রাতকঃ। ইতি রাজনির্ঘণ্টঃ॥

অভ্রান্তঃ (ত্রি) ভ্রান্তিশূন্যঃ। যথা। আপ্তাঃ শিষ্টা বিবুদ্ধাস্তে তেষাং বাক্যমসংশয়মিত্যত্র গতোঽভ্রান্তবুদ্ধয় ইতি চরকটীকাকারঃ॥

অভ্রিঃ (স্ত্রী) কাষ্ঠকুদ্দালঃ। নৌকামার্জ্জনার্থকুদ্দালাকৃতিকাষ্ঠং। ইত্যমরঃ॥

অভ্রিয়ঃ (ত্রি) অভ্রোদ্ভববস্তু। তৎপর্য্যায়ঃ। মেঘভবঃ ২। ইত্যমরঃ॥ [ভরতঃ॥

অভ্রী (স্ত্রী) কাষ্ঠকুদ্দালঃ। ইত্যমরটীকায়াং

অভ্রেষঃ (পুং) উচিতঃ। ন্যায়ঃ। ইত্যমরঃ॥

অভ্রোত্থং (ক্লী) বজ্রং। ইতি ত্রিকাণ্ডশেষঃ॥

অম ক্‌ রোগে। ইতি কবিকল্পদ্রুমঃ॥ ক আময়তি ব্যাধির্লোকং। ইতি দুর্গাদাসঃ॥

অম গতৌ। ভজনে। শব্দে। ইতি কবিকল্পদ্রুমঃ॥ অমতি ইতি দুর্গাদাসঃ॥

অম্‌ ব্য শীঘ্রতা। অল্পং। ইতি ব্যাড়িঃ॥

অমং (ত্রি) অপক্কফলাদি। ইতি শব্দরত্নাবলী॥ রোগে পুং। ইতি মুগ্ধবোধব্যাকরণং॥

অমঙ্গলং (ক্লী) অশুভসূচকং। তদ্যথা। সার্দ্ধং সৈন্যসমূহৈশ্চ বাদ্যভাণ্ডৈরসংখ্যকৈঃ। দদর্শামঙ্গলং রাজা পুরো বর্ত্মনি বর্ত্মনি॥

যযৌ তথাপি সমরং ন জগাম গৃহং পুনঃ। মুক্তকেশীং ছিন্ননাসাং রুদন্তীঞ্চ দিগম্বরাং॥ কৃষ্ণবস্ত্রপরীধানামপরাং বিধবামপি। দুষ্টাং যোনিদুষ্টাং ব্যাধিযুক্তাঞ্চ কুট্টনীং॥ পতিপুত্রবিহীনাঞ্চ ডাকিনীং পুংশ্চলীমহো। কুম্ভকারং তৈলকারং ব্যাধং সর্পোপজীবিনং॥ কুচেলমতিরূক্ষাঙ্গং নগ্নং কাষায়বাসিনং। অঙ্গবিক্রয়িণঞ্চৈব কন্যাবিক্রয়িণং তথা॥ চিতাং দগ্ধশবং ভস্ম নির্ব্বাণাঙ্গারমেব চ। সর্পক্ষতনরং সর্পং গোধাঞ্চ শশকং বিষং॥ শ্রাদ্ধপাত্রঞ্চ পিণ্ডঞ্চ মোটকং বানরং তথা। দেবলং বৃষবাহঞ্চ শূদ্রশ্রাদ্ধান্নভোজিনং॥ শূদ্রান্নপাচকং শূদ্রযাজকং গ্রামযাজকং। কুশপুত্তলিকাঞ্চৈব শবদাহনকারিণং॥ শূন্যকুম্ভং ভগ্নকুম্ভং তৈলং লবণমস্থি চ। কার্পাসং কচ্ছপং চূর্ণং কুক্কুরং শব্দকারিণং॥ দক্ষিণে চ শৃগালঞ্চ কুর্ব্বন্তং ভৈরবং রবং। কপর্দ্দকঞ্চ ক্ষৌরঞ্চ ছিন্নকেশং নখং মলং॥ কলহঞ্চ বিলাপঞ্চ বিলাপকারিণং জনং। অমঙ্গলম্বদন্তঞ্চ রুদন্তং শোককারিণং॥ মিথ্যাসাক্ষিপ্রদাতারং চৌরঞ্চ নরঘাতিনং। পুংশ্চলীপতিপুত্রঞ্চ পুংশ্চল্যোদনভোজিনং॥ দেবতাগুরুবিপ্রাণাং বস্তুবিত্তাপহারিণং। দত্তাপহারিণং দস্যুং হিংসকং সূচকং খলং॥ পিতৃমাতৃবিরক্তঞ্চ দ্বিজাশ্বত্থবিঘাতিনং। সত্যঘ্নঞ্চ কৃতঘ্নঞ্চ স্থাপ্যাপহারিণং জনং॥ বিপ্রদ্রোহং মিত্রদ্রোহং ক্ষতং বিশ্বাসঘাতকং। গুরুদেবদ্বিজানাঞ্চ নিন্দকং স্বাঙ্গঘাতকং॥ জীবানাং ঘাতকঞ্চৈব স্বাঙ্গহীনঞ্চ নির্দ্দয়ং। ব্রতোপবাসহীনঞ্চ দীক্ষাহীনং নপুংসকং॥ গলিতব্যাধিগাত্রঞ্চ কাণং বধিরমেব চ। পুক্কসং ছিন্নলিঙ্গঞ্চ সুরামত্তং সুরাং তথা॥ ক্ষিপ্তং বমন্তং রুধিরং মহিষং গর্দ্দভং তথা। মূত্রং পুরীষং শ্লেষ্মাণং কঙ্কিনং নৃকপালিনং॥ ঝঞ্ঝাবাতং রক্তবৃষ্টিং বাত্যাঞ্চ বৃক্ষপাতনং। বৃকঞ্চ শূকরং গৃধ্রং শ্যেনং কঙ্কঞ্চ ভল্লুকং॥ পাশঞ্চ শুষ্ককাষ্ঠঞ্চ বায়সং গন্ধকং তথা। অগ্রদানিব্রাহ্মণঞ্চ তন্ত্রমন্ত্রোপজীবিনং॥ বৈদ্যঞ্চ রক্তপুষ্পঞ্চৈবৌষধং তুষমেব চ। কুবার্ত্তাং মৃতবার্ত্তাঞ্চ বিপ্রশাপঞ্চ দারুণং॥ দুর্গন্ধবাতং দুঃশব্দং রাজা সংপ্রাপ বর্ত্মনি। মনশ্চ কুৎসিতং প্রাণাঃ ক্ষুভিতাশ্চ নিরন্তরং॥ বামাঙ্গস্পন্দনং দেহজাড্যং রাজ্ঞো বভূব হ। তথাপি রাজা নিঃশঙ্কো দর্শং দর্শমমঙ্গলং॥ ইতি ব্রহ্মবৈবর্ত্তে গণপতিখণ্ডে ৩৫ অধ্যায়ঃ॥

অমঙ্গলঃ (পুং) এরণ্ডবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥

অমঙ্গলঃ (ত্রি) মঙ্গলশূন্যঃ। অকুশলঃ। যথা অমঙ্গলং রূপমিদং দধন্ কথং। ইতি বিদগ্ধমোদতরঙ্গিণী॥ মঙ্গলাভাবে ক্লী। যথা। অমঙ্গলাভ্যাসরতিং বিচিন্ত্য তং। ইতি কুমারসম্ভবঃ॥

অমঙ্গল্যঃ (ত্রি) অমঙ্গলজনকঃ। যথা। অমঙ্গল্যং শীলং তব ভবতু নামৈবমখিলং। ইতি পুষ্পদন্তঃ॥

অমণ্ডঃ (পুং) এরণ্ডবৃক্ষঃ। ইত্যমরঃ॥

অমতঃ (পুং) রোগঃ। মৃত্যুঃ। কালঃ। ইত্যুণাদিকোষঃ॥

অমতিঃ ( পুং ) কালঃ। চন্দ্রঃ। ইতি মেদিনী॥ দুষ্টে ত্রি। ইতি শব্দরত্নাবলী॥

অমত্রং ( ক্লী ) পাত্রং। অস্য ভাষা অমির্ত্তি। ইত্যমরঃ॥

অমৎসরঃ ( পুং ) অন্যশুভদ্বেষাভাবঃ। অত্র নঞো সমাসঃ। মাৎসর্য্যরহিতে ত্রি। অত্র বহুব্রীহিসমাসঃ॥

অমনিঃ (স্ত্রী) বর্ত্ম। পন্থাঃ। ইত্যুণাদিকোষঃ॥

অমন্দঃ ( পুং ) বৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥ মন্দভিন্নে ত্রি। যথা। পৃষ্ঠভ্রাম্যদমন্দমন্দরগিরিগ্রাবাগ্রকণ্ডুয়নান্নিদ্রালোঃ কমঠাকৃতের্ভগবতঃ শ্বাসানিলাঃ পান্তু বঃ। ইতি শ্রীভাগবতং॥

অমমঃ ( পুং ) ভাবিজিনবিশেষঃ। ইতি হেমচন্দ্রঃ॥ মমতাশূন্যে ত্রি॥

অমরঃ ( পুং ) দেবঃ। ইত্যমরঃ॥ কুলিশবৃক্ষঃ। অস্থিসংহারবৃক্ষঃ। ইতি মেদিনী॥ পারদঃ। ইতি রাজনির্ঘণ্টঃ॥ মৃত্যুরহিতে ত্রি। যথা। অজরামরবৎ প্রাজ্ঞো বিদ্যামর্থঞ্চ চিন্তয়েৎ। ইতি হিতোপদেশঃ॥ অমরসিংহঃ। স চাদিশাব্দিকঃ নামলিঙ্গানুশাসননামককোষকারঃ বিক্রমাদিত্যরাজসভীয়নবরত্নান্তর্গতরত্নবিশেষশ্চ। যথা। ইন্দ্রশ্চন্দ্রঃ কাশকৃৎস্না পিশলী শাকটায়নঃ। পাণিন্যমরজৈনেন্দ্রা জয়ন্ত্যষ্টাদিশাব্দিকাঃ॥ ইতি কবিকল্পদ্রুমঃ॥ ধন্বন্তরিক্ষপণকামরসিংহশঙ্কুবেতালভট্টঘটকর্পরকালিদাসাঃ। খ্যাতো বরাহমিহিরো নৃপতেঃ সভায়াং রত্নানি বৈ বররুচির্নব বিক্রমস্য॥ ইতি নবরত্নং॥ স এব বৌদ্ধমতাবলম্বীতি কেচিৎ॥.

অমরজঃ ( পুং ) দুর্খদিরবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥ [ নির্ঘণ্টঃ॥

অমরদারুঃ ( পুং ) দেবদারুবৃক্ষঃ। ইতি রাজ-

অমরদ্বিজঃ ( পুং ) দেবলব্রাহ্মণঃ। ইতি ত্রিকাণ্ডশেষঃ॥

অমরপুষ্পকঃ ( পুং ) কাশতৃণং। কেশ্যা ইতি ভাষা। ইতি রত্নমালা॥ [ রত্নমালা॥

অমরপুষ্পিকা ( স্ত্রী ) অধঃপুষ্পীবৃক্ষঃ। ইতি

অমররত্নং ( ক্লী ) স্ফটিকঃ। ইতি রাজনির্ঘণ্টঃ॥

অমরবল্লরী (স্ত্রী) আকাশবল্লী। ইতি বৈদ্যকং॥

অমরা (স্ত্রী) দূর্ব্বা। গুড়ূচী। ইন্দ্রপুরী। স্থূণা। জরায়ুঃ। ইতি মেদিনী॥ ইন্দ্রবারুণীবৃক্ষঃ॥ বটীবৃক্ষঃ। মহানীলীবৃক্ষঃ। গৃহকন্যা। ঘৃতকুমারী ইতি খ্যাতা। ইতি রাজনির্ঘণ্টঃ॥ নাভিনালা। ইতি ত্রিকাণ্ডশেষঃ॥

অমরাদ্রিঃ ( পুং ) সুমেরুঃ। ইতি জটাধরঃ॥

অমরাবতী ( স্ত্রী ) ইন্দ্রনগরী। ইত্যমরঃ॥ অমরাঃ সন্তি অস্যামিতি মোদ্বমূপাদিতি বতুনাম্ন্যস্ত্যর্থে ইতি দীর্ঘঃ। ইতি ভরতঃ॥ তৎপর্য্যায়ঃ। পূষভাসা ২ দেবপূঃ ৩। ইতি জটাধরঃ॥ মহেন্দ্রনগরী ৪ অমরা ৫ সুরপুরী ৬। ইতি শব্দরত্নাবলী॥ তদ্বর্ণনং যথা। শিবশর্ম্মোবাচ। রময়ন্তী মনোঽতীব কেয়ং কস্যেয়মীশিতুঃ। নয়নানন্দসন্দোহদায়িনী পূরনুত্তমা॥ গণাবূচতুঃ। শিবশর্ম্মন্ মহাভাগ সুতীর্থফলিতক্রম। লোকোঽত্র রমতে বিপ্র সহস্রাক্ষপুরী ত্বিয়ং॥ তপোবলেন মহতা নির্ম্মিতা বিশ্বকর্ম্মণা।

দিবাপি কৌমুদী যস্যাঃ সৌধশ্রেণীশ্রিয়ং শ্রয়েৎ ॥ যদা কলানিধিঃ ক্বাপি দর্শেঽদৃশ্যত্বমাবহেৎ। তদা স্বপ্রেয়সীং জ্যোৎস্নাং সৌধেষ্বেষু নিগূহয়েৎ ॥ যদচ্ছভিত্তৌ বীক্ষ্য স্বমন্যযোষিদ্বিশঙ্কিতা। মুগ্ধা নাশু বিশেচ্চিত্রমপি স্বাং চিত্রশালিকাং ॥ হর্ম্ম্যেষু নীলমণিভির্নির্ম্মিতেষ্বত্র নির্ভয়ং। স্বনীলিমানমাধায় তমোঽহঃস্বপি তিষ্ঠতি ॥ চন্দ্রকান্তশিলাজালস্রুতমত্রামলং জলং। তত্র চাদায় কলসৈর্নেচ্ছন্ত্যন্যজলং জনাঃ ॥ কুবিন্দা ন চ সন্ত্যত্র ন চ তে পশ্যতো হরাঃ। চেলান্যলঙ্কৃতীরত্র যতঃ কল্পদ্রুমোঽর্পয়েৎ॥ গণকা নাত্র বিদ্যন্তে চিন্তাবিদ্যাবিশারদাঃ। যতো জানাতি সর্ব্বেষাং চিন্তাং চিন্তামণির্দ্রুতং ॥ সূপকারা ন সন্ত্যত্র রসকর্ম্মবিচক্ষণাঃ। দুগ্ধে সর্ব্বরসানেকা কামধেনুরতোঽনিশং ॥ কীর্ত্তিরুচ্চৈঃশ্রবা যস্য সর্ব্বতো বাজিরাজিষু। রত্নমুচ্চৈঃশ্রবাশ্চাত্র হয়ানাং পৌরুষাধিকঃ ॥ ঐরাবতো দন্তিরাজশ্চতুর্দ্দন্তোঽত্র রাজতে। দ্বিতীয় ইব কৈলাসো জঙ্গমঃ স্ফাটিকোজ্জ্বলঃ ॥ তরুরত্নং পারিজাতঃ স্ত্রীরত্নং সোর্ব্বশী ত্বিহ। নন্দনং বনরত্নঞ্চ রত্নং মন্দাকিনী হ্যপাং ॥ ত্রয়স্ত্রিংশৎ সুরাণাং যা কোটিঃ শ্রুতিসমীরিতা। প্রতীক্ষতে সাবসরং সেবায়ৈ প্রত্যহং ত্বিহ ॥ স্বর্গেঽস্মিন্নিন্দ্রপদাদন্যন্ন বিশিষ্যেত কিঞ্চন। যদ্যৎ ত্রৈলোক্যমৈশ্বর্য্যং ন তত্তুল্যমনেন হি ॥ অশ্বমেধসহস্রস্য লভ্যং বিনিময়েন যৎ। কিন্তেন তুল্যমন্যৎ স্যাৎ পবিত্রমথবা মহৎ ॥ অর্চ্চিষ্মতী সংযমনী পুণ্যবত্যমলাবতী। গন্ধবত্যলকৈশী চ নৈততুল্যা মহর্দ্ধিভিঃ ॥ অয়মেব সহস্রাক্ষস্ত্বয়মেব দিবস্পতিঃ। শতমন্যুরয়ন্দেবো নামান্যেতানি নামতঃ ॥ সপ্তাপি লোকপালা যে ত এনং সমুপাসতে। নারদাদ্যৈর্ম্মুনিবরৈরয়মাশীর্ভিরীড্যতে ॥ এতৎস্বৈর্য্যেণ সর্ব্বেষাং লোকানাং স্বৈর্য্যমিষ্যতে। পরাজয়াম্মহেন্দ্রস্য ত্রৈলোক্যং স্যাৎ পরাজিতং ॥ মনুজা দনুজা দৈত্যাস্তপস্যন্ত্যুগ্রসংযমাঃ। গন্ধর্ব্বযক্ষরক্ষাংসি মহেন্দ্রপদলিপ্সবঃ ॥ সগরাদ্যা মহীপালা বাজিমেধবিধায়কাঃ। কৃতবন্তো মহাযত্নং শক্রৈশ্বর্য্যংজিঘৃক্ষবঃ ॥ নিষ্প্রত্যূহং ক্রতুশতং যঃ কশ্চিৎ কুরুতেঽবনৌ। জিতেন্দ্রিয়োঽমরাবত্যাং স প্রাপ্নোতি পুলোমজাং ॥ অসমাপ্তক্রতুশতা বসন্ত্যত্র মহীভুজঃ। জ্যোতিষ্টোমাদিভির্যাগৈর্যে যজন্ত্যপি তে দ্বিজাঃ ॥ তুলাপুরুষদানাদিমহাদানানি ষোড়শ। যে যচ্ছন্ত্যমলাত্মানস্তে লভন্তেঽমরাবতীং ॥ অক্লীববাদিনো ধীরাঃ সংগ্রামেষ্বপরাঙ্মুখাঃ। বিক্রান্তা বীরশয়নে তেঽত্র তিষ্ঠন্তি ভূভুজঃ॥ ইত্যুদ্দেশাৎ সমাখ্যাতা মহেন্দ্রনগরীস্থিতিঃ। যাযজূকা বসন্ত্যত্র যজ্ঞবিদ্যাবিশারদাঃ ॥ এতস্যা দক্ষিণে ভাগে যেয়ং দৃশ্যেত পূঃ শুভা। ইমামর্চ্চিষ্মতীং বীক্ষ্য বীতিহোত্রপুরীং শুভাং ॥ ইতি স্কান্দে কাশীখণ্ডে ১০ অধ্যায়ঃ ॥

অমর্ত্যঃ ( পুং ) দেবতা। ইত্যমরঃ ॥

অমর্ত্ত্যভুবনং ( ক্লী ) স্বর্গঃ। ইতি হলায়ুধঃ ॥

অমর্ষঃ ( পুং ) ক্রোধঃ। ইত্যমরঃ ॥

অমর্ষণঃ (ত্রি) ক্রোধী। ইত্যমরঃ॥ [মেদিনী॥
অমলং (ক্লী) অভ্রধাতুঃ। নির্ম্মলে ত্রি। ইতি
অমলা (স্ত্রী) লক্ষ্মী। ইতি মেদিনী॥ সাতলা-
বৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥ ভূম্যামলকী।
ইত্যমরঃ॥ নাভিনালা। ইতি ত্রিকাণ্ডশেষঃ॥
অমসঃ (পুং) কালঃ। নির্ব্বোধঃ। রোগঃ।
ইত্যুণাদিকোষঃ॥
অমা ব্য সহার্থং। নিকটং। ইত্যমরঃ॥
অমা (স্ত্রী) অমাবস্যা। ইতি ত্রিকাণ্ডশেষঃ॥
চন্দ্রমণ্ডলস্য ষোড়শকলা। তথা চ স্কন্দ-
পুরাণীয়প্রভাসখণ্ডে। অমা ষোড়শভাগেন
দেবি প্রোক্তা মহাকলা। সংস্থিতা পরমা
মায়া দেহিনাং দেহধারিণী॥ অস্যার্থঃ।
চন্দ্রমণ্ডলস্য ষোড়শভাগেন পরিমিতা
আধারশক্তিরূপা ক্ষয়োদয়রহিতত্বাৎনিত্যা
স্রক্‌সূত্রবৎ সর্ব্বানুস্যূতা অমা নাম্নী মহা-
কলা প্রোক্তা। ইতি রঘুনন্দনঃ॥
অমাংসঃ (ত্রি) দুর্ব্বলঃ। ইত্যমরঃ॥ অল্প-
মাংসযুক্তঃ। মাংসরহিতশ্চ॥
অমাত্যঃ (পুং) মন্ত্রী। ইত্যমরঃ॥ তৎপরীক্ষা
যথা। শান্তো বিনীতঃ কুশলঃ সৎকুলীনঃ
শুভান্বিতঃ। শাস্ত্রার্থতত্ত্বগোঽমাত্যো ভবে-
দ্ভূমিভুজামিহ॥ ইতি যুক্তিকল্পতরুঃ॥
অমাননং (ক্লী) অনাদরঃ। ন্যক্কারঃ। ইতি
শব্দরত্নাবলী॥
অমানস্যং (ক্লী) দুঃখং। পীড়া। ব্যথা। তদ্-
যুক্তে ত্রি। ইত্যমরঃ॥ আমনস্যং আমা-
নস্যমপি পাঠঃ॥
অমান্যঃ (ত্রি) অমাননীয়ঃ। অনাদৃত্যঃ।
মান্যশব্দস্য নঞা সমাসঃ॥

অমামসী (স্ত্রী) অমাবস্যা। ইত্যমরটীকায়াং
রমানাথঃ॥ [রমানাথঃ॥
অমামাসী (স্ত্রী) অমাবস্যা। ইত্যমরটীকায়াং
অমায়িকঃ (ত্রি) মায়ারহিতঃ। মায়া বিদ্যতে
যস্য স মায়িকঃ ততো নঞা সমাসঃ॥
অমাবসী (স্ত্রী) অমাবাস্যা। ইতি শব্দরত্নাবলী॥
অমাবস্যা(স্ত্রী)কৃষ্ণপক্ষান্ততিথিঃ। সা তু চন্দ্রমণ্ড-
লস্য পঞ্চদশকলাক্রিয়ারূপা তৎক্রিয়ো-
পলক্ষিতঃ কালো বা। ইতি তিথ্যাদিতত্ত্বং॥
সূর্য্যাচন্দ্রমসোর্যঃ পরঃ সন্নিকর্ষঃ সামা-
বস্যা। ইতি গোভিলঃ॥ পরঃ সন্নিকর্ষশ্চ
উপর্য্যধোভাবাপন্নসমসূত্রপাতন্যায়েন এক-
রাশ্যবচ্ছেদেন সহাবস্থানরূপঃ। ইতি রঘু-
নন্দনঃ॥ তৎপর্য্যায়ঃ। অমাবাস্যা ২ দর্শঃ ৩
সূর্য্যেন্দুসঙ্গমঃ ৪। ইত্যমরঃ॥ পঞ্চদশী ৫।
ইতি স্মৃতিঃ॥ অমাবসী ৬ অমাবাসী ৭।
ইতি শব্দরত্নাবলী॥ অমামসী ৮ অমা-
মাসী ৯। ইত্যমরটীকায়াং রমানাথঃ॥ সা
দৃষ্টেন্দুকলা সিনীবালী ১০ নষ্টেন্দুকলা চ
কুহূঃ ১১। ইত্যমরঃ॥ তদ্ব্যবস্থাদি যথা।
অথামাবস্যা। সা চ প্রতিপদ্‌যুতা গ্রাহ্যা
যুগ্মাৎ। বরাহপুরাণে চাণ্ডালশপথে। ষষ্ঠ্য-
ষ্টম্যপ্যমাবাস্যা উভে পক্ষে চতুর্দ্দশী
অস্নাতানাং গতিং যাস্যে যদ্যহং নাগমে
পুনঃ॥ অতোঽত্র স্নানমাবশ্যকং। অতো-
ঽত্র জীবৎপিতৃকেণাপি স্নাতব্যং। অমা-
স্নানং গয়াশ্রাদ্ধং দক্ষিণামুখভোজনং। ন
জীবৎপিতৃকঃ কুর্য্যাৎ কৃতে চ পিতৃহা
ভবেৎ॥ ইতি বচনং রাগপ্রাপ্তস্নাননিষে-
ধকং। ত্রয়োদশীপ্রকরণোক্তভোগায়

ক্রিয়তে যত্তু স্নানং যাদৃচ্ছিকং নরৈঃ। তন্নিষিদ্ধং দশম্যাদৌ নিত্যনৈমিত্তিকে ন তু॥ ইতি বচনাচ্চ॥ * ॥ পৈঠিনসিঃ। ন পর্ব্বসু তৈলং ক্ষৌরং মাংসমভ্যুপেয়াৎ নামাবাস্যায়াং হরিতমপি ছিন্দ্যাৎ। ইতি ॥ * ॥ পুষ্যে তু জন্মনক্ষত্রে ব্যতীপাতে চ বৈধৃতৌ। অমায়াঞ্চ নদীস্নানং পুনাত্যাসপ্তমং কুলং॥ অত্র দহত্যাজন্মদুষ্কৃতমিতি জ্যোতিষে পাঠঃ॥ * ॥ ব্যাসঃ। অমাবাস্যাং ভবেদ্বারো যদি ভূমিসুতস্য চ। গোসহস্রফলং দদ্যাৎ স্নানমাত্রেণ জাহ্নবী॥ সিনীবালী কুহূর্ব্বাপি যদি সোমদিনে ভবেৎ। গোসহস্রফলং দদ্যাৎ স্নানং যন্মৌনিনা কৃতং॥ সিনীবালী চতুর্দ্দশীযুক্তামাবাস্যা ব্যস্তাপি প্রশস্তা এবমন্যত্রাপি বারবিশিষ্টবিধৌ ন যুগ্মাদরঃ নিরবকাশত্বেন সংশয়াযোগাৎ। এতচ্চ মৌনমরুণোদয়কালমারভ্য স্নানপর্য্যন্তং। ন তু স্নানকালমাত্রে। তত্র উচ্চারে মৈথুনে চৈব প্রস্রাবে দন্তধাবনে। স্নানে ভোজনকালে চ ষট্সু মৌনং সমাচরেৎ॥ ইতি স্কান্দেন তস্য সামান্যতঃ প্রাপ্তত্বাৎ। উচ্চারে পুরীষোৎসর্গে॥*॥ স্মৃতিঃ। করতোয়াজলং প্রাপ্য যদি সোমযুতা কুহূঃ। অরুণোদয়বেলায়াং সূর্য্যগ্রহশতৈঃ সমা॥ স্নানমন্ত্রঃ। করতোয়ে সদানীরে সরিৎশ্রেষ্ঠে সুবিশ্রুতে। পৌণ্ড্রান্ প্লাবয়সে নিত্যং পাপং হর করোদ্ভবে॥ পৌণ্ড্রান্ দেশবিশেষান্ ॥ * ॥ মরীচিঃ। মাসে নভস্যমাবাস্যা তস্যাং দর্ভচয়ো মতঃ। অযাতযামাস্তে দর্ভা বিনিযোজ্যাঃ পুনঃ পুনঃ॥ অত্র দর্ভাঃ কৃষ্ণাজিনং মন্ত্রা ব্রাহ্মণা হবিরগ্নয়ঃ। অযাতযামান্যেতানি নিযোজ্যানি পুনঃ পুনঃ॥ ইতি গৃহ্যপরিশিষ্টবচনেনৈব সিদ্ধৌ শ্রাবণামাবাস্যায়া উপাদানং। বার্ষিকাংশ্চতুরো মাসানাহরেৎ কুশমৃত্তিকাঃ।আদদীত স্বভাবেঽপি সদ্যো যস্যোপযোজনং॥ ইতি সম্বৎসরপ্রদীপধৃতশিবরহস্যীয়স্যাপবাদকমিতি॥ বিদ্যাকরধৃতং। সংগ্রহাদ্বৎসরং যাবৎ শুদ্ধিঃ স্যাদিধ্মবর্হিষাং। ততঃ পরং ন গৃহ্নীয়াৎ জপাদৌ যজ্ঞকর্ম্মণি॥*॥ সম্বৎসরপ্রদীপে। অমাবাস্যাস্তু কন্যার্কে তীর্থপ্রাপ্তৌ তথা নৃপ। কৃত্বা শ্রাদ্ধং বিধানেন দদ্যাৎ ষোড়শপিণ্ডকং॥ তৎপ্রমাণপ্রয়োগৌ ষোড়শীশব্দে দ্রষ্টব্যৌ ॥ * ॥ অমাবাস্যায়ামপি মলমাসে শ্রাদ্ধাভাবমাহ কৌথুমিঃ। সম্বৎসরাতিরেকো বৈ মাসো যঃ স্যাত্ত্রয়োদশঃ। তস্মিংস্ত্রয়োদশে শ্রাদ্ধং ন কুর্য্যাদিন্দুসংক্ষয়ে॥ সম্বৎসরপ্রদীপে। একরাশিস্থিতে সূর্য্যে যদি দর্শদ্বয়ং ভবেৎ। দর্শশ্রাদ্ধং তদাদৌ স্যান্ন পরত্র মলিম্লুচে॥ যত্তু। জাতকর্ম্মণি যৎ শ্রাদ্ধং দর্শশ্রাদ্ধং তথৈব চ। মলমাসেঽপি তৎ কার্য্যং ব্যাসস্য বচনং যথা॥ ইতি ব্যাসবচনং তৎপিণ্ডপিতৃযজ্ঞাখ্যশ্রাদ্ধপরং ॥ * ॥ অমাবাস্যাশ্রাদ্ধকালমাহ ছন্দোগপরিশিষ্টং। পিণ্ডান্বাহার্য্যকং শ্রাদ্ধং ক্ষীণে রাজনি শস্যতে। বাসরস্য তৃতীয়াংশে নাতিসন্ধ্যাসমীপতঃ॥ পিণ্ডানাং পিতৄণাং অন্বাহার্য্যং শ্রাদ্ধং

মাসৈকতৃপ্তিজনকং যত্তত্তথা। তথা চ মনুঃ। পিতৃণাং মাসিকং শ্রাদ্ধমন্বাহার্য্যং বিদু-র্বুধাঃ। রাজনি চন্দ্রে। শস্যত ইত্যনেন কচিচ্চন্দ্রক্ষয়াভাবেঽপি অমাবাস্যাশ্রাদ্ধং সূচিতং। এতাদৃগ্ব্যুৎপত্তেঃ সাগ্নিনিরগ্নি-সাধারণত্বাৎ বক্ষ্যমাণকাত্যায়নোক্তরীত্যা ক্ষীণাস্তমিতাবর্দ্ধমানাভেদঃ সাধারণঃ ॥*॥ যত্তু পিতৃযজ্ঞন্তু নির্ব্বর্ত্ত্য বিপ্রশ্চন্দ্রক্ষয়েঽগ্নি-মান্। পিণ্ডান্বাহার্য্যকং শ্রাদ্ধং কুর্য্যান্-মাসানুমাসিকং॥ ইতি মনুবচনং তৎ সাগ্নিঃ পিণ্ডপিতৃযজ্ঞং নির্ব্বর্ত্ত্য মাসানুমাসিকং প্রতিমাসিকং শ্রাদ্ধং কুর্ব্বীতেতিক্রমবিধা-য়কং। অত্রানুশব্দস্য বীপ্সার্থকত্বং। তথা চ। লক্ষণবীপ্সেত্থম্ভূতেষ্বভির্ভাগে পরিপ্রতী। অনুরেষু সহার্থে চ হীনে উপশ্চ কথ্যতে॥ চন্দ্রক্ষয়েঽমাবাস্যায়াং ন তু কাত্যায়নোক্ত-ক্ষয়ে তথাত্বে বর্দ্ধমানাদৌ প্রতিমাসানুপ-পত্তেঃ। এবমেব শ্রাদ্ধবিবেকঃ। অতএব তত্ত্রেবামাবাস্যাব্যতিরিক্তকৃষ্ণপক্ষবিহিত-পার্ব্বণশ্রাদ্ধে যয়াস্তমিতি বচনাৎ ব্যব-স্থেত্যুক্তং। তত্র সাগ্নিকর্ত্তব্যত্বাবিশেষিতা-মাবাস্যাব্যতিরেকাভিধানাৎ ক্ষীণাদি-ভেদেন ব্যবস্থা সাগ্নিনিরগ্নিসাধারণীত্যব-গম্যতে। এবঞ্চামাবাস্যায়াং মৃতাহনিমিত্তক ঔরসক্ষেত্রজপুত্রকর্ত্তব্যপার্ব্বণে ক্ষীয়মাণা-দিনা ন ব্যবস্থা কিন্তু যয়াস্তমিত্যনেন। এতদ্বিবৃতং মলমাসতত্ত্বে ॥*॥ যত্তু দশম-মুহূর্ত্তস্য মৎস্যপুরাণোক্তাপরাহ্লিকত্বেঽপি শ্রাদ্ধে তস্য ত্যাগঃ। পিণ্ডপিতৃযজ্ঞার্থ এবেতি বাসরতৃতীয়াংশাভিধানং সাগ্নি-

পরমেবেতি পরিশিষ্টপ্রকাশোক্তং তন্ন যুক্তং। পূর্ব্বাহ্নো বৈ দেবানাং মধ্যং দিনং মনুষ্যাণাং অপরাহ্নঃ পিতৃণাং ইতি শ্রুত্যা তন্মুহূর্ত্তস্য মনুষ্যকর্ম্মাঙ্গত্বেন বোধনাদেব শ্রাদ্ধে পরিত্যাগঃ। এতচ্ছ্রুতিমূলকমেব বাসরস্য তৃতীয়াংশ ইত্যুক্তং। বাসরস্য তৃতীয়াংশে ত্রিধাবিভক্তস্য দিনস্য তৃতীয়-ভাগে নাতিসন্ধ্যাসমীপত ইতি সন্ধ্যাসমী-পৈকমুহূর্ত্ত আপদ্যপি বর্জ্জনীয় ইত্যর্থঃ। তেন প্রাতঃকালো মুহূর্ত্তাংস্ত্রীন্ সঙ্গবস্তাব-দেব তু। মধ্যাহ্নস্ত্রিমুহূর্ত্তঃ স্যাদপরাহ্নস্ততঃ পরং ॥ সায়াহ্নস্ত্রিমুহূর্ত্তঃ স্যাৎ শ্রাদ্ধং তত্র ন কারয়েৎ। রাক্ষসী নাম সা বেলা গর্হিতা সর্ব্বকর্ম্মসু ॥ ইতি মৎস্যপুরাণে নিষিদ্ধমুহূর্ত্তত্রয়ে আপদি মুহূর্ত্তদ্বয়মভ্যনু-জ্ঞাতং অতিশব্দস্বরসাৎ। ত্রিমুহূর্ত্তাপি কর্ত্তব্যা পূর্ব্বা দর্শা চ বহ্বৃচৈঃ। ইতি হারীত-বচনাচ্চ। তেন পূর্ব্বদিনে মুহূর্ত্তত্রয়মাত্র-লাভে পরদিনে বাসরস্য তৃতীয়াংশালাভে পূর্ব্বদিনে এব শ্রাদ্ধং। এতেন নাতিসন্ধ্যা-সমীপত ইত্যনেন রাক্ষসীবেলামাত্রং নিষি-ধ্যত ইতি মৈথিলমতমপাস্তং। সর্ব্বকর্ম্মসু স্নানদানাদিষ্বপি অনাপদীত্যর্থঃ। ইতি শ্রাদ্ধবিবেকঃ॥ তেনাশক্তৌ তস্যামপি তৎ-করণং। অতএব পরাশরঃ। দিবাকরকরৈঃ পূতং দিবাস্নানং প্রশস্যতে। অপ্রশস্তং নিশি স্নানং রাহোরন্যত্র দর্শনাৎ ॥ ইতি ॥ * ॥ দর্শদ্বৈধে কুত্র শ্রাদ্ধমিত্যাহ ছন্দোগ-পরিশিষ্টে কাত্যায়নঃ। যদা চতুর্দ্দশীযামং তুরীয়মনুপূরয়েৎ। অমাবাস্যা ক্ষীয়মাণা

তদৈব শ্রাদ্ধমিষ্যতে ॥ চতুর্দ্দশীযামং চতুর্দ্দশীসম্বন্ধিদিনযামমিতি তদ্দিনস্যামাবাস্যাসম্বন্ধেঽপি চতুর্দ্দশীনির্দ্দেশোঽধিকেন ব্যপদেশা ভবন্তীতি ন্যায়াৎ। তেন যদা অমাবাস্যাচতুর্দ্দশীসম্বন্ধিদিনস্য চতুর্থং প্রহরং কৃৎস্নং কিঞ্চিন্ন্যূনম্বা অনুপূরয়েৎ অত্রানুপূরয়েদিত্যভিধানাৎ তুরীয়যামস্য পাদোনদণ্ডদ্বয়ান্যূনপ্রথমমুহূর্ত্তস্য বহুকালত্বং প্রতীয়তে। এতেন প্রহরত্রয়াভ্যন্তরে কিঞ্চিদধিকপ্রহরত্রয়ে বা চতুর্দ্দশী প্রতীয়তে। ততশ্চোভয়বাসরীয়তৃতীয়াংশসম্বন্ধিপঞ্চধাবিভক্তাপরাহ্নমুহূর্ত্তয়োর্ম্মুহূর্ত্তান্যূনদর্শলাভে দ্বৈধং ন ত্বেকদিনমাত্রে তল্লাভে। তত্র পূর্ব্বোক্তেন বাসরস্য তৃতীয়াংশ ইত্যনেনৈব দ্বৈধানুদয়াৎ। অতো যদ্দিনে বাসরতৃতীয়াংশে তাদৃশদর্শলাভস্তত্রৈব শ্রাদ্ধং। মুহূর্ত্তোনতিথেস্তু কর্ম্মানর্হত্বান্ন দ্বৈধাবসরঃ। তথা চ ভবিষ্যে। ব্রতোপবাসনিয়মে ঘটিকৈকা যদা ভবেৎ। সা তিথিঃ সকলা জ্ঞেয়া পিত্রর্থে চাপরাহ্নিকী ॥ ইতি। অত্র চ প্রাগুক্তজাবালিবচনোক্তা মুহূর্ত্তাত্মিকা ঘটিকা গ্রাহ্যা যোগ্যত্বাৎ ন ত্বেকদণ্ডাত্মিকা বক্ষ্যমাণরৌহিণাদিগ্রহণে তথা দৃষ্টত্বাচ্চ। ততশ্চ পূর্ব্বোক্তদ্বৈধে তদ্দিবসীয়চতুর্দ্দশ্যপেক্ষয়া পরদিনে অমাবাস্যা ক্ষীয়মাণা ন্যূনকালব্যাপিনী ন তু পূর্ব্বাপরদিবসীয়যাবচ্চতুর্দ্দশ্যপেক্ষয়া অনুপস্থিতেঃ। এবং স্তম্ভিতাবর্দ্ধমানয়োরপি। তদৈব পূর্ব্বদর্শ এব শ্রাদ্ধং। স্বোক্তচন্দ্রক্ষয়ানুরোধাৎ। যদা ত্রিংশদ্দণ্ডাত্মকদিবসে চতুর্দ্দশ্যধিকচতুর্থযামপূরণে মুখ্যাপরাহ্নীয়কিঞ্চিন্ন্যূন মুহূর্ত্তলাভস্তদাপি তদৈবেত্যনেন চন্দ্রক্ষয়ানুরোধাৎ পূর্ব্বদিনে শ্রাদ্ধং ন তু মুখ্যাপরাহ্নীয়মুহূর্ত্তলাভেঽপি পরদিনে। অত্র চন্দ্রক্ষয়শ্চতুর্দ্দশ্যষ্টমযামাৎ প্রভৃতি অমাবস্যাসপ্তমযামপর্য্যন্তমিতি বক্ষ্যতে। তদৈবেত্যেব শ্রবণাত্তিথিদ্বৈধে খণ্ডবিশেষো নিয়ম্যতে কর্ম্মণি খণ্ডান্তরব্যুদাসায়। এবঞ্চ যত্র পূর্ব্বাপরদিনে বাসরতৃতীয়াংশীয়মুখ্যাপরাহ্নে মুহূর্ত্তোনদর্শলাভস্তত্রাপি পূর্ব্বদিন এব শ্রাদ্ধং বাসরতৃতীয়াংশচন্দ্রক্ষয়াতিশব্দস্বরসাৎ। ত্রিমুহূর্ত্তাপীত্যনুরোধাচ্চ। যত্র তু পূর্ব্বদিনে ত্রিমুহূর্ত্তমাত্রব্যাপিন্যমাবাস্যা পরদিনে তৃতীয়াংশমুহূর্ত্তব্যাপিনী সতী ক্ষীয়মাণা তত্র পরদিনে চন্দ্রক্ষয়াভাবেঽপি মুখ্যাপরাহ্নলাভাৎ শ্রাদ্ধং। অন্যথা যদা চতুর্দ্দশীযামং তুরীয়মনুপূরয়েৎ। ইতি বিশেষাভিধানং ব্যর্থং স্যাৎ ॥ * ॥ অথ যত্র পূর্ব্বাহে শ্রাদ্ধং তত্র যদহস্ত্বেব চন্দ্রমা ন দৃশ্যেত তামমাবাস্যাং কুর্ব্বীত ইতি গোভিলবিরোধঃ। তথাবিধচতুর্দ্দশীযুক্তামাবাস্যায়াঃ সিনীবালীত্বেন প্রাতশ্চন্দ্রদর্শনাৎ। তত্রাহ স এব। যদুক্তং যদহস্ত্বেব দর্শনং নেতি চন্দ্রমাঃ। তৎক্ষয়াপেক্ষয়া জ্ঞেয়ং ক্ষীণে রাজনি চেত্যপি ॥ যদহস্ত্বেব চন্দ্রমা ন দৃশ্যেত তামমাবাস্যাং কুর্ব্বীত ইতি যদ্গোভিলসূত্রং তচ্চন্দ্রক্ষয়াভিপ্রায়িকং। অন্যথা গোভিলীয়তাদৃশসূত্রান্তরেণ সহ পৌনরুক্ত্যাপত্তেঃ। তস্মাৎ প্রথমসূত্রং কুহূপরং তচ্চ বর্দ্ধমানাপক্ষে নিয়তং। ক্ষীণা-

স্তস্তিভয়োস্ত যথাযোগ্যমনুসরণীয়ং। এবঞ্চ যদহস্ত্বেব চন্দ্রমা ন দৃশ্যেত তামমাবাস্যাং কুর্ব্বীত ইতি শ্রুতিরেতৎসমানার্থকং শ্রুত্যন্তরং বা তদপি বর্দ্ধমানাদিপরং ন তু কাত্যায়নবচনাত্তত্র ক্ষয়লক্ষণা কল্পতরুপ্রভৃতিভিরুক্তা যুক্তা। শ্রুতিস্মৃতিবিরোধে তু শ্রুতিরেব গরীয়সীতি বিরোধাৎ। ক্ষীণ ইতি কাত্যায়নেন ময়া যৎ ক্ষীণে রাজনীত্যুক্তং তদপি ক্ষয়াভিপ্রায়কং। অথৈবং দৃশ্যমানেঽপ্যেকদা ইতি যদ্গোভিলস্য সূত্রান্তরং তদ্বার্থং। যদহস্ত্বেব ইত্যাদি দ্বিতীয়সূত্রপ্রাপ্ততিথেঃ সিনীবালীত্বেনৈব চন্দ্রদর্শনপ্রাপ্তেরিত্যত আহ স এব। যচ্চোক্তং দৃশ্যমানেঽপি তচ্চতুর্দ্দশ্যপেক্ষয়া। অমাবাস্যাং প্রতীক্ষেত তদন্তে বাপি নির্ব্বপেৎ ॥ দৃশ্যমানেঽপ্যেকদেতি যদুক্তং তচ্চতুর্দ্দশ্যাং শ্রাদ্ধায় পূর্ব্বসূত্রমমাবাস্যাপদোপাদানাচ্চন্দ্রক্ষয়ে সত্যমাবাস্যাবিষয়ং। ইদং পুনরিত্থম্ভূতচতুর্দ্দশীবিষয়মিতি শ্রাদ্ধবিবেকঃ॥ তৎ কিমমাবাস্যাবচ্চতুর্দ্দশীত্যত্রাহ অমাবাস্যাং প্রতীক্ষেত উভয়তিথিপ্রাপ্তৌ শ্রাদ্ধায়ামাবাস্যা প্রতীক্ষণীয়া। যত্র পূর্ব্বদিনে দিবা সার্দ্ধমুহূর্ত্তমাত্রে অমাবাস্যা পরদিনে চ সার্দ্ধদশমমুহূর্ত্তমাত্রে তত্র চোভয়দিনে শ্রাদ্ধযোগ্যামাবাস্যা ন প্রাপ্যতে তত্র তদন্তে চতুর্দ্দশ্যন্তে নির্ব্বপেৎ দদ্যাৎ ॥ * ॥ অত্রৈব বিষয়ে সাগ্নিনিরগ্ন্যোর্ব্বিশেষমাহ কালমাধবীয়ে জাবালিঃ। অপরাহ্নদ্বয়াব্যাপী যদি দর্শস্তিথিক্ষয়ে। আহিতাগ্নেঃ সিনীবালী নিরগ্ন্যাদেঃ কুহূর্ম্মতা ॥ আদিশব্দাদনুপনীতশূদ্রয়োর্গ্রহণং ॥ * ॥ ক্ষয়মাহ কাত্যায়নঃ। অষ্টমেঽংশে চতুর্দ্দশ্যাঃ ক্ষীণো ভবতি চন্দ্রমাঃ। অমাবাস্যাষ্টমাংশে চ ততঃ কিল ভবেদণুঃ ॥ চতুর্দ্দশ্যষ্টমে যামে চন্দ্রমাঃ ক্ষীণঃ চতুর্থভাগোনকলাবশিষ্টো ভবতি। অত্রেন্দুরাদ্যপ্রহরেঽবতিষ্ঠতে ইত্যাদিস্বরসাৎ। অমাবাস্যাষ্টমে যামে চাণুর্ভবতি পুনরুৎপদ্যতে কিলেত্যাগমবার্ত্তায়াং তেন অমাবাস্যায়াঃ সপ্তমে যামে কৃৎস্নক্ষয় ইত্যবগম্যতে। ততশ্চান্ত্যকলাবয়বনাশোৎপত্তিরেব ক্ষয়ঃ সা চ সূক্ষ্মতায়াং বিনাশেঽপ্যস্তীতি শ্রাদ্ধবিবেকঃ ॥ উৎপত্তিরাদ্যক্ষণসম্বন্ধঃ। তেন বিনাশস্যানন্তত্বেঽপি নাতিব্যাপ্তিঃ ॥*॥ অত্র বিশেষমাহ সএব। আগ্রহায়ণ্যমাবাস্যা তথা জ্যৈষ্ঠস্য যা ভবেৎ। বিশেষমাভ্যাং ব্রুবতে চন্দ্রচারবিদো জনাঃ ॥ আভ্যামিতি ল্যব্লোপে পঞ্চমী ইমে প্রাপ্যেত্যর্থঃ। চন্দ্রচারবিদো জ্যোতির্ব্বিদঃ। অত্র পৌর্ণমাস্যান্তমাস ইতি পরিশিষ্টপ্রকাশঃ ॥ অত্র বীজং ব্রহ্মপুরাণীয়তিথিকৃত্যং। তথা চ শ্রাদ্ধমধিকৃত্য ব্রহ্মপুরাণং। পয়োমূলফলৈঃ শাকৈঃ কৃষ্ণপক্ষে চ সর্ব্বদা। অত্র কৃষ্ণপক্ষে চতুর্দ্দশীব্যতিরিক্তায়াং যস্যাং কস্যাঞ্চিৎ তিথৌ শ্রাদ্ধবিধানাদমাবাস্যাপি লভ্যত ইতি ॥*॥ কো বিশেষ ইত্যত্রাহ স এব। অত্রেন্দুরাদ্যে প্রহরেঽবতিষ্ঠতে চতুর্থভাগোনকলাবশিষ্টঃ। তদন্ত এব ক্ষয়মেতি কৃৎস্নমেবং জ্যোতিশ্চক্রবিদো বদন্তি ॥

অত্র মাসদ্বয়ে অমাবাস্যায়াং চতুর্থভাগোনকলাবশিষ্টঃ চতুর্থভাগোনা যা কলা তয়াবশিষ্টঃ কলাভাগত্রয়মাত্রঃ সন্ধ্যাদ্যে প্রহরেঽবতিষ্ঠতে। অর্থাৎ চতুর্দশ্যষ্টমযামে ক্ষয়ারম্ভ ইতি। তদন্ত এব অমাবাস্যান্তযাম এব ক্ষয়ং কৃৎস্নমেতি। অন্যত্রামাবাস্যা সপ্তমযাম ইতি বিশেষঃ। তেন মার্গশীর্ষজ্যৈষ্ঠয়োরুভয়দিনে চন্দ্রক্ষয়লাভে যদ্যপি যদা চতুর্দশীযামমিতি বচনাৎ পূর্ব্বদিনে এব শ্রাদ্ধং প্রাপ্নোতি তথাপি তদ্বচনং চন্দ্রক্ষয়ানুরোধমূলমিতি। কৃতস্নক্ষয়ানুরোধাৎ ক্ষীণায়ামপি পরত্রাপরাহ্ণলাভে শ্রাদ্ধং অন্যথৈতদ্বিশেষাভিধানং ব্যর্থং স্যাৎ॥ *॥ অত্রাপি বিশেষান্তরমাহ স এব। যস্মিন্নব্দে দ্বাদশৈকশ্চ যব্যস্তস্মিং-স্তৃতীয়য়া পরিদৃশ্যো নোপজায়েত। যব্যো মাসঃ। তৃতীয়য়া মাত্রয়া চতুর্থভাগোনকলয়া পরিদৃশ্যশ্চন্দ্রো ন ভবতি কিন্তু তদধিকন্যূনকলয়েতি। তেন মলমাসযুতাব্দে অন্যমাসবদনয়োরপি চতুর্দশ্যন্তযামাদি দর্শসপ্তমযামপর্য্যন্তং ক্ষয় ইতি। মলমাসযুতাব্দস্তু একস্মান্মলমাসাদব্দদ্বয়ানন্তরাব্দস্তৃতীয়েঽব্দে মলমাসস্যাবশ্যম্ভাবাদিতি॥*॥ চন্দ্রক্ষয়ানুরুদ্ধং ক্ষীণাপক্ষমুপসংহরতি স এব। এবংচারং চন্দ্রমসো বিদিত্বা ক্ষীণে তস্মিন্নপরাহ্ণে চ দদ্যাৎ। এবংচারং গতিবিশেষং॥ *॥ স্তম্ভিতায়াং ব্যবস্থামাহ স এব। সম্মিশ্রা যা চতুর্দশ্যা অমাবাস্যা ভবেৎ কচিৎ। খর্ব্বিতাং তাং বিদুঃ কেচিদুপেধ্বমিতি চাপরে॥ ক্ষীণায়াঃ পূর্ব্বমুক্তত্বাৎ বর্দ্ধমানায়াশ্চ বক্ষ্যমাণত্বাৎ অস্য বচনস্য স্তম্ভিতাপরত্বং। খর্ব্বিতাং নীচাং পিতৃলোকপ্রাপণানর্হাং কেচিৎ যজুর্ব্বেদিনঃ। অপরে ঋগ্বেদিনঃ তামেব উপেধ্বমুপগচ্ছত শ্রাদ্ধায়েতি শেষঃ। উপেধ্বমিত্যত্র গতাধ্বামিতিপাঠে গতঃ প্রাপ্তঃ পিতৃলোকপ্রাপণায় অধ্বা অনয়েতি গতাধ্বা প্রশস্তেত্যর্থঃ। তস্মাচ্ছন্দোগা উভয়ানুরোধাদিচ্ছাত উভয়াদরং কুর্ব্বন্তি ইতি কাত্যায়নস্বরসঃ॥ *॥ ব্যক্তমাহ লঘুহারীতঃ। ত্রিমুহূর্ত্তাপি কর্ত্তব্যা পূর্ব্বা দর্শা চ বহ্বৃচৈঃ। কুহূরধ্বর্য্যুভিঃ কার্য্যা যথেষ্টং সামগীতিভিঃ॥ অত্র ত্রিমুহূর্ত্তেত্যুপাদানাৎ স্তম্ভিতায়াঃ পূর্ব্বদিনে ত্রিমুহূর্ত্তমাত্রলাভেঽপি বহ্বৃচানাং শ্রাদ্ধং। ন তু মুখ্যাপরাহ্ণলাভাদপি পরদিনে। সামগানাং তত্রাপ্যনিয়মঃ। এতাদৃগ্বিষয় এব উভয়ত্রাপরাহ্ণালাভেঽপীয়ং ব্যবস্থেতি শ্রাদ্ধবিবেকঃ॥ মুখ্যাপরাহ্ণস্য একদিনমাত্রলাভেঽপ্যুভয়দিনালাভাৎ॥ *॥ বর্দ্ধমানায়াং ব্যবস্থামাহ কাত্যায়নঃ। বর্দ্ধমানামমাবাস্যাং লক্ষয়েদপরেঽহনি। যামাংস্ত্রীনধিকান্ বাপি পিতৃযজ্ঞস্ততো ভবেৎ॥ যামাংস্ত্রীনিতি পূর্ব্বদিবসীয়যামত্রয়ন্যূনচতুর্দশ্যপেক্ষয়া। অথৈবং বাসরতৃতীয়াংশানুরোধেন শ্রাদ্ধবিধানাৎ কথমমাবাস্যাশ্রাদ্ধে পর্য্যুদস্তরাত্র্যাদীতরকালপরিগ্রহঃ। সত্যং। তিথিদ্বৈধে ক্ষীণাদিভেদেন খণ্ডবিশেষপরিগ্রহায় বাসরতৃতীয়াংশাপেক্ষা অন্যথোভয়দিনে বাসরতৃতীয়াংশাপ্রাপ্তৌ শ্রাদ্ধ-

লোপাপত্তেঃ। প্রাগুক্তনিরস্যাদেঃ কুহূ-শ্মৃতেত্যস্য নির্ব্বিষয়তাপত্তেশ্চ অতঃপর্য্যু-দস্তেতরকালস্যাপি পরিগ্রহঃ। যদা তু পূর্ব্বাপরখণ্ডয়োরন্যতরস্যৈব পরিগ্রহস্তদা যথাযোগ্যং তত্রৈব সায়াহ্নমুহূর্ত্তদ্বয়পর্য্যু-দস্তেতরকালকুতপাদিমুহূর্ত্তপঞ্চকরৌহিণা-দিমুহূর্ত্তচতুষ্টয়বাসরতৃতীয়াংশীয়াপরাহ্ণমু-হূর্ত্তদ্বয়কালাঃ। যথাক্রমমাপৎসামান্য-প্রশস্তপ্রশস্ততরপ্রশস্ততমত্বেন জ্ঞেয়াঃ। এবমখণ্ডতিথাবপি নাতিসন্ধ্যাসমীপত ইতি পূর্ব্বোক্তত্বাৎ। সায়াহ্নস্ত্রিমুহূর্ত্তঃ স্যাৎ শ্রাদ্ধং তত্র ন কারয়েৎ। ইতি মৎস্য-পুরাণাৎ। রাত্রৌ শ্রাদ্ধং ন কুর্ব্বীত রাক্ষসী কীর্ত্তিতা হি সা। সন্ধ্যয়োরুভয়োশ্চৈব সূর্য্যে চৈবাচিরোদিতে॥ ইতি মনুবচ-নাভ্যাং। ঊর্দ্ধং মুহূর্ত্তাৎ কুতপাৎ যন্মুহূর্ত্ত-চতুষ্টয়ং। মুহূর্ত্তপঞ্চকং বাপি স্বধাভবন-মিষ্যতে॥ ইতি মৎস্যপুরাণাম্মুহূর্ত্তপঞ্চক-মিত্যত্র কুতপাদিতি ল্যব্ লোপে পঞ্চমী কুতপমারভ্যেত্যর্থঃ। ততস্তেনৈব। অপ-রাহ্ণে তু সম্প্রাপ্তে অভিজিদ্রৌহিণোদয়ে। যদত্র দীয়তে জন্তোস্তদক্ষয়মুদাহৃতং॥ ইত্যুক্তং। পূর্ব্বাহ্ণো বৈ দেবানাং মধ্যং দিনং মনুষ্যাণাং অপরাহ্ণঃ পিতৃণাং। ইতি শ্রুতিঃ॥ বাসরস্য তৃতীয়াংশ ইতি কাত্যায়নবচনং সায়াহ্নস্ত্রিমুহূর্ত্তঃ স্যাৎ শ্রাদ্ধং তত্র ন কারয়েদিত্যেষামেকবাক্য-ত্বাৎ বাসরতৃতীয়াংশীয়াপরাহ্ণমুহূর্ত্তদ্বয়স্য লাভঃ। ইতি তিথ্যাদিতত্ত্বং॥

অমাবাসী (স্ত্রী) অমাবস্যা। ইতি শব্দরত্নাবলী॥

অমাবাস্যা (স্ত্রী) অমাবসীতিথিঃ। ইত্যমরঃ॥

অমিত্রঃ (পুং) শত্রুঃ। ইত্যমরঃ॥

অমিষং (ক্লী) লৌকিকসুখং। ইত্যুণাদি-কোষঃ॥ ছলাভাবঃ॥ [বোপদেবঃ॥

অমী [ন্] (ত্রি) রোগী। যথা। অম্যয়ং। ইতি

অমীবং (ক্লী) পাপং। দুঃখং। যথা। তং ত্বাহং ভবভীতানাং প্রপন্নানাং ভয়াপহং। আপৃচ্ছে শাপনির্ম্মুক্তঃ পাদস্পর্শাদমী বহন্॥ ইতি শ্রীভাগবতং॥

অমুকং (ত্রি) বুদ্ধিস্থত্বোপলক্ষিততত্তৎধর্ম্মাব-চ্ছিন্নং। স্বস্ববৃত্তিবিশেষধর্ম্মপুরস্কারেণ তত্তদ্বস্তুবাচকং। ফল্না ইতি ভাষা। অদস্‌শব্দস্য অকি কৃতে সোরোত্বাভাবে অকোঽকারস্য উত্বে অমুক ইতি ভবতি অমুক ইত্যাগমিকং। ইতি ক্রমদীশ্বরঃ॥ যথা। অমুকামুকগোত্রৈতৎ তুভ্যমন্নং স্বধা নমঃ। ইতি শ্রাদ্ধতত্ত্বং॥

অমুক্তং (ক্লী) ছুরিকাবিশেষঃ। হাতছুরী ইতি ভাষা। ইতি হলায়ুধঃ॥ মুক্তিরহিতে অত্যক্তে চ ত্রি॥

অমুত্র ব্য জন্মান্তরং। পরলোকঃ। ইত্যমরঃ॥

অমুষ্যপুত্রঃ (পুং স্ত্রী) প্রখ্যাতবংশোদ্ভবঃ। কুলীনঃ। ইতি জটাধরঃ॥

অমূর্ত্তঃ (ত্রি) মূর্ত্তভিন্নঃ। মূর্ত্তিরহিতঃ। যথা। সুজ্ঞানা অমূর্ত্তত্বাদিতি বোপদেবঃ॥ ন্যায়-মতে। আকাশং। কালঃ। দিক্। আত্মা। এষাং সামান্যগুণাঃ সংখ্যা ১ পরিমিতিঃ ২ পৃথক্ত্বং ৩ সংযোগঃ ৪ বিভাগঃ ৫। আকা-শস্য বিশেষগুণঃ শব্দঃ। কালদিশো-র্বিশেষগুণো নাস্তি আত্মনো বিশেষগুণাঃ

বুদ্ধিঃ ১ সুখং ২ দুঃখং ৩ ইচ্ছা ৪ দ্বেষঃ ৫ যত্নঃ ৬ ভাবনাখ্যসংস্কারঃ ৭ ধর্ম্মঃ ৮ অধর্ম্মঃ ৯। ইতি ভাষাপরিচ্ছেদঃ

অমূদৃশঃ (ত্রি) এবংপ্রকারঃ। এতদ্রূপঃ। ইতি মুগ্ধবোধং ॥ যথা। অমূদৃশী তৎ কবিবন্দি-বর্ণিতৈরিতি নৈষধং ॥

অমূলকং (ত্রি) মূলরহিতং। প্রমাণশূন্যং। নাস্তি মূলং যস্যেতি বহুব্রীহ্যর্থে কপ্রত্যয়ঃ॥

অমূলা (স্ত্রী) অগ্নিশিখাবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥ মূলরহিতে ত্রি। ইতি মুগ্ধবোধং ॥

অমৃণালং (ক্লী) বীরণমূলং। ইত্যমরঃ॥

অমৃতং (ক্লী) সমুদ্রোদ্ভবদেবভক্ষ্যামরত্বজনক-দ্রব্যবিশেষঃ। যদা পৃথুরাজভয়েন গৌর্ভূর্তা তদা দেবা ইন্দ্রং বৎসং কৃত্বা হিরণ্ময়পাত্রে অমৃতরূপম্পয়োঽদুদুহন্ তত্তু দুর্ব্বাসসঃ শাপাৎ সমুদ্রমধ্যং গতং পশ্চাৎ সমুদ্রমথনে অমৃতপূর্ণকলসং গৃহীত্বা ধন্ব-ন্তরিরুত্থিতঃ। ইতি ভারতভাগবতে॥ তৎ-পর্য্যায়ঃ। পীযূষং ২ সুধা ৩। ইত্যমরঃ॥ পেয়ূষং ৪। ইতি তট্টীকাসারসুন্দরী ॥ * ॥ নির্জরং ৫ সমুদ্রনবনীতকং ৬। ইতি শব্দ-রত্নাবলী॥ জলং। ঘৃতং। যজ্ঞশেষদ্রব্যং। অযাচিতবস্তু। মুক্তিঃ। ইতি মেদিনী॥ দুগ্ধং। ঔষধং। বিষসামান্যং। বৎস-নাভঃ। পারদঃ। ইতি রাজনির্ঘণ্টঃ॥ অন্নং। ধনং। স্বর্ণং। ভক্ষণীয়দ্রব্যং। হৃদ্যং। স্বাদুদ্রব্যং। ইতি হেমচন্দ্রঃ॥

অমৃতঃ (পুং) ধন্বন্তরিঃ। দেবতা। ইতি মেদিনী॥ বারাহীকন্দঃ। বনমুদ্গঃ। ইতি রাজনির্ঘণ্টঃ॥ সুন্দরঃ। অতিহৃদ্যঃ। ইতি ভরতধৃতব্যাড়িঃ॥ মরণরহিতে ত্রি। যথা। অমৃতে জারজঃ কুণ্ডঃ। ইত্যমরঃ॥

অমৃতজটা (স্ত্রী) জটামাংসী। ইতি রাজ-নির্ঘণ্টঃ॥

অমৃততরঙ্গিণী (স্ত্রী) জ্যোৎস্না। ইতি রাজ-নির্ঘণ্টঃ॥

অমৃতদীধিতিঃ (পুং) চন্দ্রঃ। ইতি শব্দরত্না-বলী॥

অমৃতফলং (ক্লী পুং) পারেবতবৃক্ষঃ। পটোলঃ। ইতি রাজনির্ঘণ্টঃ॥ নাসপাতী। ইতি পারস্যভাষা। যথা। অথামৃতফলং। যদহক-সাতকাবিলপ্রভৃতিদেশেষু নাসপাতী ইতি প্রসিদ্ধং। অমৃতফলং লঘু বৃষ্যং সুস্বাদু ত্রীন্ হরেদ্দোষান্। দেশেষু মুদ্গলানাং বহুলং তল্লভ্যতে লোকৈঃ॥ ইতি ভাব-প্রকাশঃ॥

অমৃতফলা (স্ত্রী) দ্রাক্ষা। আমলকী। ইতি রাজনির্ঘণ্টঃ॥

অমৃতবল্লী (স্ত্রী) গুড়ূচী। ইতি রত্নমালা॥

অমৃতরসা (স্ত্রী) কপিলদ্রাক্ষা। ইতি রাজ-নির্ঘণ্টঃ॥

অমৃতসম্ভবা (স্ত্রী) গুড়ূচী। ইতি রাজনির্ঘণ্টঃ॥

অমৃতসারজঃ (পুং) গুড়ঃ। তবরাজোদ্ভব-খণ্ডঃ। ইতি রাজনির্ঘণ্টঃ॥

অমৃতসূঃ (পুং) চন্দ্রঃ। ইতি হেমচন্দ্রঃ॥ দেবমাতরি স্ত্রী। অমৃতানাং দেবানাং সূঃ প্রসূতিঃ॥

অমৃতসোদরঃ (পুং) ঘোটকঃ। ইতি রাজ-নির্ঘণ্টঃ॥

অমৃতস্রবা (স্ত্রী) রুদন্তীবৃক্ষঃ। লতাবিশেষঃ

তৎপর্য্যায়ঃ। বৃক্ষারুহা ২ উপবল্লিকা ৩ ঘনবল্লী ৪ সিতলতা ৫। অস্যা গুণাঃ। পথ্যত্বং। ঈষত্তিক্তত্বং। রসায়নত্বং। ব্রণনাশিত্বং। বিষকুষ্ঠামকামলাশ্বযথুজয়কারিত্বঞ্চ॥ ইতি রাজনির্ঘণ্টঃ॥

অমৃতা (স্ত্রী) গুড়ূচী। মদিরা। ইন্দ্রবারুণী। জ্যোতিষ্মতী। গোরক্ষদুগ্ধা। অতিবিষা। রক্তত্রিবৃৎ। দূর্ব্বা। আমলকী। হরীতকী। ইতি রাজনির্ঘণ্টঃ॥ তুলসী। ইতি শব্দমালা॥ পিপ্পলী। ইতি মেদিনী॥ চম্পাদেশজস্থূলমাংসা হরীতকী। সা বিরেচনে প্রশস্তা। ইতি রাজবল্লভঃ॥

অমৃতান্ধঃ [স্] (পুং) দেবতা। ইত্যমরঃ॥

অমৃতাফলঃ (পুং) পটোলঃ। ইতি দ্রব্যাভিধানং॥

অমৃতাশনঃ (পুং) দেবতা। ইতি হলায়ুধঃ॥

অমৃতাষ্টকং (ক্লী) হরিতক্যাদ্যষ্টদ্রব্যং। যথা। অমৃতা কটুকারিষ্টপটোলঘনচন্দনং। নাগরেন্দ্রযবৈশ্চৈতদমৃতাষ্টকমিতীরিতং॥ কথিতং সকণাচূর্ণং পিত্তশ্লেষ্মজ্বরাপহং। হৃল্লাসারোচকচ্ছর্দ্দিতৃষ্ণাদাহনিবারণং॥ ইতি ভাবপ্রকাশঃ॥

অমৃতাসঙ্গং (ক্লী) তুত্থবিশেষঃ। তৎপর্য্যায়ঃ। কর্পরিকাতুত্থং ২ অঞ্জনং ৩। ইতি হেমচন্দ্রঃ॥

অমৃতাহরণঃ (পুং) গরুড়ঃ। ইতি হারাবলী॥

অমৃতাহ্বং (ক্লী) লঘুবিল্বফলাকৃতিখোরাসানদেশজনাসপাতীনাম ফলং। তৎপর্য্যায়ঃ। রুচিফলং ২। অস্য গুণাঃ। গুরুত্বং। বাতনাশিত্বং। স্বাদুত্বং। অম্লত্বং। রুচিশুক্রকারিত্বঞ্চ॥ তল্লঘুফলগুণাঃ। বৃষ্যত্বং। সুস্বাদুত্বং। ত্রিদোষনাশিত্বঞ্চ। তৎমুদ্গলদেশে বহুলং লভ্যতে। ইতি ভাবপ্রকাশঃ॥

অমৃতোৎপন্নং (ক্লী) খর্পরীতুত্থং। ইতি রাজনির্ঘণ্টঃ॥

অমৃতোৎপন্না (স্ত্রী) মক্ষিকা। ইতি রাজনির্ঘণ্টঃ॥

অমৃতোদ্ভবং (ক্লী) তুত্থং। খর্পরীতুত্থং। ইতি রাজনির্ঘণ্টঃ॥

অমেধাঃ [স্] (পুং) মূঢ়ঃ। মূর্খঃ। ইতি হেমচন্দ্রঃ॥

অমেধ্যং (ক্লী) পুরীষং। ইতি শব্দরত্নাবলী॥ অপবিত্রে ত্রি॥

অমোঘঃ (ত্রি) সফলঃ। অব্যর্থঃ। ইতি মেদিনী॥ নদবিশেষে পুং। ইতি শব্দরত্নাবলী॥

অমোঘা (স্ত্রী) পাটলিবৃক্ষঃ। বিড়ঙ্গং। ইত্যমরঃ॥ হরীতকী। ইতি মেদিনী॥

অম্ব গতৌ। ইতি কবিকল্পদ্রুমঃ॥ ওষ্ঠ্যবর্গশেষোপধঃ। অম্বতি। ইতি দুর্গাদাসঃ॥

অম্বকং (ক্লী) নেত্রং। ইতি হেমচন্দ্রঃ॥ তাম্রং। ইতি রাজনির্ঘণ্টঃ॥

অম্বরং (ক্লী) বস্ত্রং। আকাশং। কার্পাসঃ। স্বনামখ্যাতসুগন্ধিদ্রব্যং। ইতি বিশ্বঃ॥ অভ্রধাতুঃ। ইতি রাজনির্ঘণ্টঃ॥

অম্বরিষং (ক্লী) ভর্জ্জনপাত্রং। ভাজনা খোলা ইতি ভাষা। ইত্যমরটীকায়াং রমানাথঃ॥

অম্বরীষং (ক্লী) ভ্রাষ্ট্রঃ। ভর্জনপাত্রং। ইত্যমরঃ॥ যুদ্ধং। ইতি মেদিনী॥

অম্বরীষঃ (পুং) বিষ্ণুঃ। শিবঃ। ইতি ত্রিকাণ্ডশেষঃ॥ কিশোরঃ। ভাস্করঃ। নৃপভেদঃ।

স তু সূর্য্যবংশীয়নাভাগরাজপুত্রঃ। নরকভেদঃ॥ আম্রাতকবৃক্ষঃ। অনুতাপঃ। ইতি মেদিনী॥

অম্বষ্ঠঃ (পুং) দেশবিশেষঃ। বিপ্রাদ্বৈশ্যায়ামুৎপন্নঃ। ইতি মেদিনী॥ অয়ং চিকিৎসাবৃত্তিঃ বৈদ্য ইতি খ্যাতঃ। ইত্যমরটীকায়াং ভরতঃ॥ হস্তিপকঃ। যথা। অম্বষ্ঠাম্বষ্ঠ মার্গং নৌ দেহ্যপক্রামমাচিরং। ইতি শ্রীভাগবতং॥ কায়স্থজাতিবিশেষঃ। ইতি পশ্চিমদেশে প্রসিদ্ধঃ॥

অম্বষ্ঠকী (স্ত্রী) লতাবিশেষঃ। আকনাদি নিমুখী ইতি চ ভাষা। তৎপর্য্যায়ঃ। পাঠা ২ অম্বষ্ঠা ৩ কুচেলী ৪ পাপচেলিকা ৫ একাষ্ঠীলা ৬ বরা ৭ তিক্তা ৮ প্রাচীনা ৯ একোশিকা ১০ বৃকা ১১। ইতি রত্নমালা॥ বিদ্ধকর্ণী ১২ স্থাপনী ১৩ শ্রেয়সী ১৪ রসা ১৫ পাপচেলী ১৬ বনতিক্তিকা ১৭। ইত্যমরঃ॥ অবিদ্ধকর্ণী ১৮ অবিদ্ধকর্ণা ১৯। ইতি তট্টীকা॥ অম্বষ্ঠিকা ২০ যূথিকা ২১ বিদ্ধকর্ণিকা ২২ দীপনী ২৩ তিক্তপুষ্পা ২৪ বৃহত্তিক্তা ২৫ শিশিরা ২৬ বৃকী ২৭ মালতী ২৮ দেবী ২৯ বৃত্তপর্ণী ৩০। ইতি রাজনির্ঘণ্টঃ॥ অস্যা গুণাঃ। অতীসারশমনত্বং। লঘুত্বং। ত্রিদোষনাশিত্বঞ্চ। ইতি রাজবল্লভঃ॥ তিক্তত্বং। গুরুত্বং। উষ্ণত্বং। বাতপিত্তজ্বরপিত্তদাহশূলনাশিত্বং। ভগ্নসন্ধানকারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

অম্বষ্ঠা (স্ত্রী) ক্ষুপবিশেষঃ। অম্বাড়া ইতি খ্যাতা। অস্যাঃ পর্য্যায়ঃ। বালিকা ২ বালা ৩ শঠাম্বা ৪ অম্বালিকা ৫ অম্বিকা ৬ অম্বা ৭ মাচিকা ৮ দৃঢ়বল্কা ৯ ময়ূরিকা ১০ গন্ধপত্রী ১১ চিত্রপুষ্পী ১২ শ্রেয়সী ১৩ মুখবাচিকা ১৪ ছিন্নপত্রী ১৫ ভূরিমল্লী ১৬। অস্যা গুণাঃ। কষায়ত্বং। অম্লত্বং। কফকণ্ঠরোগবাতরোগবলাশনাশিত্বং। রুচ্যগ্নিকারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ *॥ পাঠা। চাঙ্গেরী। যূথিকা। ইত্যমরমেদিনীকরৌ॥

অম্বষ্ঠিকা (স্ত্রী) অম্বষ্ঠা। আকনাদি ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥ ব্রাহ্মণী। বামনহাটী ইতি প্রসিদ্ধা। ইতি রত্নমালা॥

অম্বা (স্ত্রী) জননী। ইতি শব্দরত্নাবলী॥ নাট্যোক্তৌ সৈব। ইত্যমরঃ॥ পাণ্ডুরাজমাতুঃস্বসা। ইতি মহাভারতং॥ অম্বষ্ঠা। ইতি রাজনির্ঘণ্টঃ॥ দুর্গা। ইতি কেচিৎ॥

অম্বালিকা (স্ত্রী) মাতা। ইতি শব্দরত্নাবলী॥ অম্বষ্ঠা। ইতি রাজনির্ঘণ্টঃ॥ পাণ্ডুরাজমাতা। ইতি মহাভারতং॥

অম্বিকা (স্ত্রী) দুর্গা। মাতা। ধৃতরাষ্ট্রজননী। ইতি মেদিনী॥ জৈনদেবীবিশেষঃ। ইতি হেমচন্দ্রঃ॥ কটুকীবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥ অম্বষ্ঠা। ইতি রাজনির্ঘণ্টঃ॥

অম্বিকেয়ঃ (পুং) গণেশঃ। কার্ত্তিকেয়ঃ। ধৃতরাষ্ট্ররাজঃ॥ অম্বিকায়া অপত্যমিত্যর্থে ঢেয়ঃ॥

অম্বিকেয়কঃ (পুং) গণেশঃ। ইতি জটাধরঃ॥

অম্বু (ক্লী) জলং। বালনামৌষধিঃ। বালা ইতি ভাষা। ইত্যমরঃ॥

অম্বুকণ্টকঃ (পুং) কুম্ভীরঃ। ইতি ত্রিকাণ্ডশেষঃ॥

অম্বুকিরাতঃ (পুং) কুম্ভীরঃ। ইতি ত্রিকাণ্ডশেষঃ॥

অম্বুকীশঃ (পুং) শিশুমারজন্তুঃ। শুশুক ইতি ভাষা। ইতি হেমচন্দ্রঃ॥

অম্বুকূর্ম্মঃ (পুং) শিশুমারঃ। ইতি হেমচন্দ্রঃ॥

অম্বুকেশরঃ (পুং) ছোলঙ্গবৃক্ষঃ। ইতি রত্নমালা॥

অম্বুচামরং (ক্লী) শৈবালং। শেয়ালা ইতি ভাষা। ইতি জটাধরঃ॥

অম্বুজং (ক্লী) পদ্মং। ইতি মেদিনী॥ বজ্রং। ইতি ত্রিকাণ্ডশেষঃ॥

অম্বুজঃ (পুং) হিজ্জলবৃক্ষঃ। ইত্যমরঃ॥

অম্বুজন্ম [ন্] (ক্লী) পদ্মং। ইতি রাজনির্ঘণ্টঃ॥

অম্বুতালঃ(পুং)শৈবালং। ইতি ত্রিকাণ্ডশেষঃ॥

অম্বুদঃ (পুং) মেঘঃ। ইতি রত্নমালা॥ মুস্তকং। যথা। কণাসবিশ্বানলদং সহাম্বুদং। ইতি বৈদ্যকং

অম্বুধিঃ (পুং) সমুদ্রঃ। ইতি শব্দরত্নাবলী॥

অম্বুধিস্রবা (স্ত্রী) গৃহকন্যা। ঘৃতকুমারী ইতি খ্যাতা। ইতি রাজনির্ঘণ্টঃ॥

অম্বুপঃ(পুং)চক্রমর্দ্দকবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥

অম্বুপত্রা (স্ত্রী) উচ্চটাবৃক্ষঃ। ইতি রত্নমালা॥

অম্বুপ্রসাদঃ (পুং) কতকবৃক্ষঃ। নির্ম্মলী ইতি খ্যাতঃ। ইতি রাজনির্ঘণ্টঃ॥ [শেষঃ॥

অম্বুপ্রসাদনং (ক্লী) কতকবৃক্ষঃ। ইতি ত্রিকাণ্ড-

অম্বুভৃৎ (পুং) মেঘঃ। মুস্তকং। ইত্যমরঃ॥ সমুদ্রঃ। ইতি কেচিৎ॥

অম্বুমাত্রজঃ (পুং) শম্বুকঃ। শামুক ইতি ভাষা। ইতি হেমচন্দ্রঃ॥

অম্বুরঃ (পুং) দ্বারাধঃকাষ্ঠং। গোবরাট্ ইতি ভাষা। ইতি হেমচন্দ্রঃ॥

অম্বুরুহা (স্ত্রী) স্থলপদ্মিনী। ইতি রাজনির্ঘণ্টঃ॥

অম্বুবাচী (স্ত্রী) ঋতুমতী পৃথ্বী। যথা। যদ্বারে যৎকালে মিথুনসংক্রমণং ভূতং তদ্বারাভ্যন্তরে তাবৎকালাবধি বিংশত্যাদিদণ্ডাধিকদিনত্রয়মম্বুবাচী। তত্রাধ্যয়নং বীজবপনং ন কার্য্যং। সর্পভয়োপশমনায় দুগ্ধং পেয়ং। ইতি কৃত্যতত্ত্বং॥*॥ অপি চ। জ্যোতিষে। রজোযুক্ ক্ষাম্বুবাচী চ রৌদ্রাদ্যপাদগে রবৌ। তস্যাং পাঠো বীজবাপো নাহিভীর্দুগ্ধপানতঃ॥ মৃগশিরসি নিবৃত্তে রৌদ্রপাদেঽম্বুবাচী ঋতুমতি খলু পৃথ্বী বর্জ্জয়েত্ত্রীণ্যহানি। যদি বপতি কৃষাণঃ ক্ষেত্রমাসাদ্য বীজং ন ভবতি ফলভাগী শস্যচাণ্ডালপাকঃ॥ রজোযুক্ ক্ষা ঋতুমতী পৃথ্বী। মৎস্যসূক্তে। ধরণ্যামৃতুমত্যাঞ্চ ভূমিকম্পে তথৈব চ। অন্তরাগমনে চৈব বিদ্যাং নৈব পঠেদ্বুধঃ॥ জ্যোতিষে। যস্মিন্ বারে সহস্রাংশুর্যৎকালে মিথুনং ব্রজেৎ। অম্বুবাচী ভবেন্নিত্যং পুনস্তৎকালবারয়োঃ॥ ইদন্তু প্রায়িকং। ইতি তিথ্যাদিতত্ত্বং॥*॥ অন্যচ্চ। যদার্দ্রর্ক্ষং সমাদায় ভানোর্ম্মন্মথগামিতা। পুনস্তৎস্থেনমাদায় বর্জনং ত্রিদিনং ত্যজেৎ॥ কাম্যনৈমিত্তিকঞ্চৈব যাত্রাং মন্ত্রক্রিয়াস্তথা। ঋতুমত্যাং ন কুর্ব্বীত পূর্ব্বসঙ্কল্পিতাদৃতে॥ ন কুর্য্যাৎ খননং ভূমেঃ সূচ্যগ্রেণাপি শঙ্করি। বীজানাং বপনঞ্চৈব চতুর্ব্বিংশতিযামকং॥ প্রমাদাদ্বপনং কৃত্বা গাবস্তত্র প্রচারয়েৎ। কৃচ্ছ্রং কুর্য্যাৎ তৎক্ষণাচ্চ খননাত্তিলকাঞ্চনং॥ ইতি মৎস্যসূক্তে মহাতন্ত্রে ৫৮ পটলঃ॥*॥ অপরঞ্চ। রবৌ

রুদ্রাদ্যপাদস্থে ভূমেঃ সংজায়তে রজঃ। তস্মাদ্দিনত্রয়ং যাবৎ বীজবাপং পরিত্যজেৎ॥ চত্বারিংশল্লিপ্তিকষড়্ভাগযুতো রবির্যদা ভবতি। তত্রাম্বুবাচী জ্ঞেয়া শিবর্ক্ষপাদস্থিতো যাবৎ॥ দিগ্‌ভাগশূন্যলিপ্তো গণিতেন ভবতি রবির্যদা সাপ্তঃ। স ভবতি নির্গুণকালো দ্বিতীয়পাদাশ্রয়াদ্রৌদ্রে॥ ন স্বাধ্যায়ং বষট্‌কারং ন দেবপিতৃতর্পণং। হলানাং বাহনঞ্চৈব বীজানাং বপনং তথা॥ ইতি রাজমার্ত্তণ্ডঃ॥ * ॥ অত্র পাকনিষেধো যথা। যতিনো ব্রতিনশ্চৈব বিধবা চ দ্বিজস্তথা। অম্বুবাচীদিনে চৈব পাকং কৃত্বা ন ভক্ষয়েৎ॥ স্বপাকং পরপাকং বা অম্বুবাচীদিনে তথা। ভক্ষণং নৈব কর্ত্তব্যং চাণ্ডালান্নসমং স্মৃতং॥ ইতি সম্বৎসরপ্রদীপে বিষ্ণুরহস্যং॥

অম্বুবাসিনী (স্ত্রী) পাটলাবৃক্ষঃ। ইতি জটাধরঃ॥

অম্বুবাসী (স্ত্রী) পাটলাবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

অম্বুবাহঃ (পুং) মেঘঃ। ইতি রত্নমালা॥ মুস্তকং। মেঘনামা ইত্যমরেণোক্তত্বাৎ॥

অম্বুবাহিনী (স্ত্রী) কাষ্ঠাম্বুবাহিনী। কাষ্ঠাদিকৃতচ্ছিন্নাগ্রনৌকাকৃতিজলসেচনী। ইত্যমরটীকায়াং মথুরানাথঃ॥

অম্বুবেতসঃ (পুং) জলবেতসঃ। তৎপর্য্যায়ঃ। পরিব্যাধঃ২ বিদুলঃ৩ নাদেয়ী৪। ইত্যমরঃ॥

অম্বুশিরীষিকা (স্ত্রী) জলশিরীষবৃক্ষঃ। তৎপর্য্যায়ঃ। শিরোষিকা২ টিণ্টিণিকা৩ দুর্ব্বলা৪ বারিশিরীষিকা ৫। অস্যা গুণঃ। ত্রিদোষবিষকুষ্ঠার্শোনাশিত্বং। ইতি ভাবপ্রকাশঃ॥

অম্বুসর্পিণী (স্ত্রী) জলৌকাঃ। জোঁক্ ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ॥

অম্বুসেচনী (স্ত্রী) অম্বুবাহিনী। নৌকাজলসেচনপাত্রং। ইত্যমরটীকায়াং মথুরানাথঃ॥

অম্বুকৃতং (ত্রি) শ্লেষ্মকণনির্গমসহিতবাক্যং। তৎপর্য্যায়ঃ। সনিষ্ঠেবং ২। ইত্যমরঃ॥ সথূৎকারং ৩। ইতি হেমচন্দ্রঃ॥

অম্ল়ঃ (পুং) অম্লরসঃ। অম্বল টক ইতি চ ভাষা। ইত্যুণাদিকোষঃ॥

অম্ভঃ [স্] (ক্লী) জলং। বালনামৌষধং। ইত্যমরঃ॥ লগ্নাদিতশ্চতুর্থরাশিঃ। ইতি জ্যোতিষং॥

অম্ভঃসারং (ক্লী) মুক্তা। ইতি রাজনির্ঘণ্টঃ॥ অম্ভস্‌সারমপি পাঠঃ॥

অম্ভঃসূঃ (পুং) ধূমঃ। ইতি হেমচন্দ্রঃ॥ অম্ভস্‌সূরিতি চ পাঠঃ॥

অম্ভোজং (ক্লী) পদ্মং। ইতি শব্দরত্নাবলী॥ সারসপক্ষী। পুষ্করাহ্ব ইত্যমরেণোক্তত্বাৎ। চন্দ্রে পুং। যথা। পিবন্তং ত্বন্মুখাম্ভোজচ্যুতং হরিকথামৃতং। ইতি শ্রীভাগবতং॥ জলজাতে ত্রি॥

অম্ভোজন্মজনিঃ (পুং) ব্রহ্মা। যথা। অম্ভোজন্মজনিস্তদন্তরগতো বৎসানিতো বৎসপান্। ইতি শ্রীভাগবতং॥

অম্ভোজযোনিঃ (পুং) ব্রহ্মা। যথা। সদনমুপগতোঽহং পূর্ব্বমম্ভোজযোনেরিতি প্রবোধচন্দ্রোদয়ঃ॥

অম্ভোজিনী (স্ত্রী) পদ্মলতা। পদ্মসমূহঃ। পদ্মযুক্তদেশঃ। ইতি শব্দরত্নাবলী॥

অম্ভোদঃ (পুং) মেঘঃ। মুস্তকং। ইতি শব্দরত্নাবলী॥

অম্ভোধরঃ (পুং) মেঘঃ। মুস্তকং। ইতি শব্দরত্নাবলী॥

অম্ভোধিঃ (পুং) সমুদ্রঃ। ইতি শব্দরত্নাবলী॥

অম্ভোধিবল্লভঃ (পুং) প্রবালঃ। ইতি রাজনির্ঘণ্টঃ॥

অম্ভোনিধিঃ (পুং) সমুদ্রঃ। ইতি শব্দরত্নাবলী॥

অম্ভোরাশিঃ (পুং) সমুদ্রঃ। ইতি রাজনির্ঘণ্টঃ॥

অম্ভোরুহং (ক্লী) পদ্মং। সারসপক্ষী। ইত্যমরঃ॥

অম্ময়ং (ত্রি) জলবিকারং। ফেনাদি। ইত্যমরঃ॥ জলময়ে ত্রি। যথা। ন হ্যম্ময়ানি তীর্থানি ন দেবা মৃচ্ছিলাময়াঃ। তে পুনন্ত্যুরুকালেন দর্শনাদেব সাধবঃ॥ ইতি শ্রীভাগবতং॥

অম্রঃ (পুং) আম্রবৃক্ষঃ। ফলে ক্লীবং। ইতি শব্দরত্নাবলী॥ [মালা॥

অম্রাতঃ (পুং) আম্রাতকবৃক্ষঃ। ইতি শব্দ-

অম্রাতকঃ (পুং) আম্রাতকবৃক্ষঃ। ইতি ত্রিকাণ্ডশেষঃ॥

অম্লং (ক্লী) তক্রং। ইতি রাজনির্ঘণ্টঃ॥

অম্লঃ (পুং) ষড়্রসমধ্যে রসবিশেষঃ। টক ইতি ভাষা। তোয়াগ্নিগুণবাহুল্যাদম্লঃ। ইতি সুশ্রুতঃ। অস্য গুণাঃ। শাকবদ্দোষকারিত্বং। হৃদ্যত্বং। রুচ্যগ্নিরক্তমাংসকারিত্বং। শীতলত্বং। বায়ুনাশিত্বং। স্নিগ্ধোষ্ণত্বং। কটুরসতোঽধিকোষ্ণবীর্য্যত্বং। জিহ্বোদ্বেগকারিত্বঞ্চ। ইতি রাজবল্লভঃ॥ অস্য দন্তোদ্বেগকারিত্বগুণোঽপ্যস্তি। অপি চ। প্রীত্যগ্নিপটুতাকারিত্বং। প্রপাচনত্বং। ইতি রাজনির্ঘণ্টঃ॥ *॥ তদতিশয়ভক্ষণগুণাঃ। পাচকত্বং। পিত্তশ্লেষ্মবাস্তিক্লেদকারিত্বং। লঘুত্বং। উষ্ণত্বং। বহিঃশীতত্বং। বায়ুনাশিত্বঞ্চ। ইতি রাজবল্লভঃ॥ ভ্রান্তিতুষ্টিকফপাণ্ডুদোষকার্শ্যকাসকারিত্বং। ইতি রাজনির্ঘণ্টঃ॥ তদ্বতি ত্রি। ইত্যমরঃ॥ *॥ অম্লবেতসঃ। ইতি রাজনির্ঘণ্টঃ॥

অম্লকঃ (পুং) লকুচবৃক্ষঃ। ইতি শব্দরত্নাবলী॥

অম্লকাণ্ডং (ক্লী) লবণতৃণং। ইতি রাজনির্ঘণ্টঃ॥

অম্লকেশরঃ (পুং) মাতুলুঙ্গঃ। বীজপূরঃ। ইতি রত্নমালা॥

অম্লচূড়ঃ (পুং) অম্লশাকঃ। ইতি রাজনির্ঘণ্টঃ॥

অম্লজম্বীরঃ (পুং) অম্লনিম্বুকঃ। ইতি রাজনির্ঘণ্টঃ॥

অম্লনায়কঃ (পুং) অম্লবেতসঃ। ইতি রাজনির্ঘণ্টঃ॥

অম্লনিশা (স্ত্রী) শটী। ইতি রাজনির্ঘণ্টঃ॥

অম্লপঞ্চফলং (ক্লী) অম্লরসযুক্তপঞ্চপ্রকারফলং। তদ্যথা। কোলং ১ দাড়িমং ২ বৃক্ষাম্লং ৩ চুক্রিকা ৪ অম্লবেতসং ৫॥ মতান্তরে। জম্বীরং ১ নারঙ্গং ২ অম্লবেতসং ৩ তিন্তিড়ীকং ৪ বীজপূরং ৫। ইতি রাজনির্ঘণ্টঃ॥ [নির্ঘণ্টঃ॥

অম্লপত্রঃ (পুং) অশ্মন্তকবৃক্ষঃ। ইতি রাজ-

অম্লপত্রী (স্ত্রী) পলাশীলতা। ক্ষুদ্রাম্লিকা। ইতি রাজনির্ঘণ্টঃ॥

অম্লপূরং (ক্লী) বৃক্ষাম্লং। ইতি রাজনির্ঘণ্টঃ॥

অম্লফলং (ক্লী) বৃক্ষাম্লং। তেঁতুল ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥

অম্লকলঃ (পুং) আম্রবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

অম্লভেদনঃ (পুং) অম্লবেতসঃ। ইতি রাজনির্ঘণ্টঃ॥

অম্লরুহা (স্ত্রী) মালবদেশজনাগবল্লীভেদঃ। অস্যা গুণাঃ। সুতীক্ষ্ণত্বং। মধুরত্বং। রুচিকারিত্বং। হিমত্বং। দাহনাশিত্বং। পিত্তোদ্রেকহরত্বং। অগ্নিবলসুখামোদশ্রীসৌভাগ্যবিবর্দ্ধনত্বং। মদকারিত্বং। গুল্মাধ্মানবিবন্ধনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

অম্ললোণিকা (স্ত্রী) ক্ষুদ্রবৃক্ষবিশেষঃ। আমরুল ইতি ভাষা। তৎপর্য্যায়ঃ। চাঙ্গেরী ২ চুক্রিকা ৩ দন্তশঠা ৪ অম্বষ্ঠা ৫। ইত্যমরঃ॥ অস্যা গুণাঃ। কফবায়ুনাশিত্বং। অগ্নিদীপনত্বং। গ্রহণীরোগে হিতকারিত্বঞ্চ। ইতি রাজবল্লভঃ॥ বস্ত্রাদিলগ্নলোহচিহ্নকষায়রাগনাশকগুণোঽপ্যস্তি। রাজনির্ঘণ্টোক্তগুণপর্য্যায়ৌ ক্ষুদ্রাম্লিকাশব্দে দ্রষ্টব্যৌ। তৎপর্য্যায়গুণাঃ। চাঙ্গেরী চুক্রিকা দন্তশঠাম্বষ্ঠাম্ললোণিকা। অশ্মন্তকস্তু শফরী কুশলী চাম্লপত্রকঃ॥ কচিৎ পুস্তকে কুশলীস্থানে শকলী ইতি চ পাঠঃ। চাঙ্গেরী দীপনী রুচ্যা লঘূষ্ণা কফবাতনুৎ। পিত্তলাম্লাগ্রহণ্যর্শঃকুষ্ঠাতীসারনাশিনী॥ ইতি ভাবপ্রকাশঃ॥

অম্ললোণী (স্ত্রী) অম্ললোণিকা। চাঙ্গেরী। ইত্যমরটীকা॥

অম্লবতী (স্ত্রী) ক্ষুদ্রাম্লিকা। আমরুল ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥

অম্লবর্গঃ (পুং) অম্লগণঃ। যথা। চাঙ্গেরী। লকুচং। অম্লবেতসং। জম্বীরকং। বীজপূরকং। নাগরঙ্গং। দাড়িমং। কপিত্থং। অম্লং। বীজাম্লকং। অম্বষ্ঠা। করমর্দকং নিম্বুকং। ইতি রাজনির্ঘণ্টঃ॥

অম্লবল্লী (স্ত্রী) ত্রিপর্ণিকানামকন্দবিশেষঃ ইতি রাজনির্ঘণ্টঃ॥

অম্লবাটিকা (স্ত্রী) নাগবল্লীভেদঃ। অস্যা গুণাঃ কটুত্বং। অম্লত্বং। তিক্তত্বং। রূক্ষত্বং। উষ্ণত্বং। মুখপাককারিত্বং। বিদাহপিত্তরক্তপ্রকোপকারিত্বং। বিষ্টম্ভদাতৃত্বং। বায়ুনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

অম্লবাস্তূকং (ক্লী) চুক্রং। ইতি রাজনির্ঘণ্টঃ॥

অম্লবীজং (ক্লী) বৃক্ষাম্লং। ইতি রাজনির্ঘণ্টঃ॥

অম্লবৃক্ষং (ক্লী) বৃক্ষাম্লং। তেঁতুল ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥

অম্লবেতসঃ (পুং) স্বনামপ্রসিদ্ধঅম্লরসবৃক্ষবিশেষঃ। চুকাশাক ইতি খ্যাত ইতি কেচিৎ। অম্লকুচাই ইতি খ্যাত ইতি কেচিৎ। ইত্যমরটীকায়াং ভরতঃ॥ তৎপর্য্যায়ঃ অম্লঃ ২ বেধী ৩ রসাম্লঃ ৪ আম্লবেতসঃ ৫ বেতসাম্লঃ ৬ অম্লসারঃ ৭ শতবেধী ৮ বেধকঃ ৯ ভীমঃ ১০ ভেদনঃ ১১ ভেদী ১২ রাজাম্লঃ ১৩ অম্লভেদনঃ ১৪ অম্লাঙ্কুশঃ ১৫ রক্তসারঃ ১৬ ফলাম্লঃ ১৭ অম্লনায়কঃ ১৮ সহস্রবেধী ১৯ বীরাম্লঃ ২০ গুল্মকেতুঃ ২১ বরাভিধা ২২ শঙ্খদ্রাবী ২৩ মাংসদ্রাবী ২৪। ইতি রাজনির্ঘণ্টঃ॥ বরাঙ্গী ২৫। ইতি রত্নমালা॥ চুক্রঃ ২৬। ইত্যমরঃ॥ তৎফলগুণাঃ। অত্যম্লত্বং। কষায়ত্বং। উষ্ণত্বং। বায়ুকফার্শঃশ্রমগুল্মনাশিত্বং। অরুচিহারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ ছাগমাংসলোহসূচীদ্রবকারিত্বং। চণকাম্লবৎ গুণকারিত্বঞ্চ।

ইতি ভাবপ্রকাশঃ ॥ আনাহরোগনাশিত্বং। তৎপক্বফলগুণাঃ। দোষবিনাশিত্বং। গুরুত্বং। ধারকত্বঞ্চ। ইতি রাজবল্লভঃ॥ তৎপর্য্যায়গুণাঃ। স্বাদম্লবেতসশ্চুক্রঃ শতবেধী সহস্রজিৎ। অম্লবেতসমত্যম্লং ভেদনং লঘু দীপনং॥ হৃদ্রোগশূলগুল্মঘ্নং পিত্তলোহিতদূষণং। রূক্ষং বিণ্মূত্রদোষঘ্নং প্লীহোদাবর্ত্তনাশনং॥ হিক্কানাহারুচিশ্বাসকাসাজীর্ণবমিপ্রণুৎ। কফবাতাময়ধ্বংসি ছাগমাংসদ্রবত্বকৃৎ॥ চণকাম্লগুণং জ্ঞেয়ং লৌহসূচীদ্রবত্বকৃৎ। ইতি ভাবপ্রকাশঃ॥

অম্লশাকং (ক্লী) বৃক্ষাম্লং। চুক্রং। ইতি রাজনির্ঘণ্টঃ॥

অম্লশাকঃ (পুং) অম্লদ্রব্যবিশেষঃ। তৎপর্য্যায়ঃ। শাকাম্লং ২ শুক্তাম্লং ৩ অম্লচুক্রিকা ৪ চিঞ্চাম্লং ৫ অম্লচূড়ঃ ৬ চিঞ্চাসারঃ ৭। অস্য গুণাঃ। অতিশয়াম্লত্বং। বাতনাশিত্বং। কফদাহহারিত্বঞ্চ। সমশর্করামিশ্রিতস্যাস্য গুণঃ। দাহপিত্তকফার্ত্তিনাশিত্বং। ইতি রাজনির্ঘণ্টঃ॥

অম্লসারং (ক্লী) কাঞ্জিকং। ইতি রাজনির্ঘণ্টঃ॥

অম্লসারঃ (পুং) অম্লবেতসঃ। নিম্বুকঃ। হিন্তালঃ। ইতি রাজনির্ঘণ্টঃ॥

অম্লহরিদ্রা (স্ত্রী) শটী। ইতি রাজনির্ঘণ্টঃ॥

অম্লাঙ্কুশঃ (পুং) অম্লবেতসঃ। ইতি রাজনির্ঘণ্টঃ॥

অম্লাতকঃ (পুং) অম্লানবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥ অস্য গুণপর্য্যায়ৌ রাজতরুণীশব্দে জ্ঞেয়ৌ॥

অম্লানঃ (পুং) মহাসহাবৃক্ষঃ। আঁয়লা ইতি খ্যাতঃ। ইত্যমরভরতৌ॥

অম্লানঃ (ত্রি) ম্লানিরহিতঃ। যথা। অম্লানপঙ্কজাং মালাং শিরস্যুরসি চাপরাং। ইতি দেবীমাহাত্ম্যং॥

অম্লানিনী (স্ত্রী) পদ্মসমূহঃ। পদ্মিনী। ইতি ত্রিকাণ্ডশেষঃ॥

অম্লিকা (স্ত্রী) তিন্তিড়ী। ইত্যমরঃ॥ পলাশীলতা। শ্বেতাম্লিকা। ক্ষুদ্রাম্লিকা। ইতি রাজনির্ঘণ্টঃ॥ অম্লোদ্গারঃ। ইতি মেদিনী॥

অম্লিকাবটকঃ (পুং) অম্লিকাং স্বেদয়িত্বা জলেন সহ মর্দয়িত্বা তৎসংস্কৃতজলে মগ্নবটকঃ। অম্লবড়া ইতি ভাষা। অস্য গুণাঃ। রুচ্যগ্নিকারিত্বং। বটকগুণতুল্যগুণত্বঞ্চ। ইতি ভাবপ্রকাশঃ॥

অম্লীকা (স্ত্রী) অম্লিকা। ইত্যমরটীকায়াং রায়মুকুটঃ॥

অম্লোটকঃ (পুং) অশ্মন্তকবৃক্ষঃ। অম্লকুচাই ইতি খ্যাতঃ। ইতি রত্নমালা॥

অয় ঙ গতৌ। ইতি কবিকল্পদ্রুমঃ॥ ঙ অয়তে। ইতি দুর্গাদাসঃ॥ [ ইত্যমরঃ॥

অয়ঃ (পুং) শুভাবহবিধিঃ। মঙ্গলানুষ্ঠানং।

অয়ঃ [ স্ ] (ক্লী) লৌহং। ইত্যমরঃ॥

অয়নং (ক্লী) শাস্ত্রং। যথা। জ্যোতিষাময়নং নেত্রং নিরুক্তং শ্রোত্রমুচ্যতে। ইতি তিথ্যাদিতত্ত্বং॥ পন্থাঃ। সূর্য্যস্য উত্তরদক্ষিণদিগ্গমনং। তদ্যথা। মাঘাদিষণ্মাসাঃ উত্তরায়ণং। শ্রাবণাদিষণ্মাসাঃ দক্ষিণায়নং। ইত্যমরঃ॥ গমনং। গত্যর্থায়ধাতোর্ভাবেঽনট্॥ রবিসংক্রান্তিবিশেষঃ। যথা ভবিষ্য-

মাৎস্যজ্যোতিষেষু। মৃগকর্কটসংক্রান্তী দ্বে তূদক্ দক্ষিণায়নে। বিষুবতী তুলামেষে গোলমধ্যে তথাপরাঃ॥ মৃগো মকরঃ। গোলো রাশিচক্রং। দেবীপুরাণে যাবদ্বিংশকলা ভুক্তা তৎপুণ্যং চোত্তরায়ণে। নিরংশে ভাস্করে দৃষ্টে দিনান্তং দক্ষিণায়নে॥ তত্র স্নানদানাদৌ কোটিগুণফলং ভবতি। যথা মাৎস্যে। অয়নে কোটিগুণিতং লক্ষং বিষ্ণুপদীষু চ। ইত্যাদি। অয়নে বিষুবে চৈব শয়নে বোধনে হরেঃ। অনধ্যায়স্তু কর্ত্তব্যো মন্বাদিষু যুগাদিষু॥ ইতি তিথ্যাদিতত্ত্বং॥*॥ সূর্য্যগতিবিশেষঃ। যথা। মৃগসংক্রান্তিতঃ পূর্ব্বং পশ্চাত্তারাদিনান্তরে। একবর্ষে চতুঃপঞ্চপলমানক্রমেণ তু॥ ষট্‌ষষ্টিবৎসরানেকদিনং স্যাদয়নং রবেঃ। এবং চতুঃপঞ্চদিনময়নান্তরং ক্রমাৎ॥ ব্যুৎক্রমেণ চ তদ্বৎ স্যাচ্ছুদগ্যানং রবের্ধ্রুবং। কর্কিসংক্রমণে তদ্বদভিতো দক্ষিণায়নং॥ ইতি জ্যোতিস্তত্ত্বং॥

অয়নাংশঃ (পুং) সূর্য্যগতিবিশেষস্য ভাগঃ। অথায়নাংশলগ্নসাধনং। লগ্নং লগ্নান্তরং কৃত্বা অয়নাংশৈঃ প্রপূরয়েৎ। খানলৈর্হরতে ভাগং মিশ্রয়িত্বা দিনে দিনে॥ অস্যার্থঃ। লগ্নং রামো গবেদৈরিত্যাদ্যুক্তং লগ্নান্তরং কৃত্বা যথা মেষলগ্নং ৩।৪৭ লগ্নান্তরং বৃষলগ্নং ৪।১৭ অত্রান্তরেণ দ্বয়োরাধিক্যেন ৩০ ত্রিংশৎপলং তচ্চায়নাংশৈঃ পূরয়েৎ॥ অয়নাংশস্তু জাতকার্ণবোক্তঃ। যথা। শাকমেকাব্ধিবেদোনং দ্বিঃ কৃত্বা দশভির্হরেৎ। লব্ধং হীনঞ্চ তত্রৈব ষষ্ট্যাপ্তাশ্চায়নাংশকাঃ॥ ইতি। লব্ধস্থানে লব্ধেন ইতি পাঠঃ সিদ্ধান্তরহস্যে। তে চ ইদানীং চৈত্রস্যৈকাদশাহে সম্ভবাৎ ঊনবিংশতিসংখ্যকাঃ। তে চ পুনঃ খানলৈঃ৩০ ত্রিংশতা হরেৎ। ভাগলব্ধিস্তু ঊনবিংশতিঃ ১৯। তচ্চ মেষলগ্নে মিশ্রয়িত্বা ৪।৬ ষট্‌পলাধিকদণ্ডচতুষ্টয়াত্মকং মেষলগ্নং ভবতি। এবং বৃষাদিকমূহ্যং। কিন্তু লগ্নান্তরেণ যত্রাধিকং লভ্যতে তত্রাধিকং লগ্নং ভবতি। এবং যত্র লগ্নান্তরেণ হানিস্তত্র লগ্নেঽপি হানিরিতি নিষ্কর্ষঃ॥*॥ ইদানীং স্পষ্টজ্ঞানার্থং পদ্যেন লিখ্যতে। বাণৈর্বেদো ৪।৫ ইষ্টবেদৈঃ শ্রুতি ৪।৪৮ রিভনয়নৈরিন্দ্রিয়ং ৫।২৮ খাম্বুনেষু ৫।৪০ বাণো বেদানলৈঃ ৫।৩৪ খাগ্নিভিরিষু ৫।৩০ রিষুরঙ্গাগ্নিনে ৫।৩৬ যুঃ কুবেদৈ ৫।৪১ বাণো নাগেন্দুভিস্তু ৫।১৮ শ্রুতিরপি রসরামৈ ৪।৩৬ র্গুণাঃ সপ্তবাণৈঃ ৩।৫৭ রামোঽশ্বাব্ধিস্তু ৩।৪৭ সিদ্ধান্তজমতময়নাংশাদিদং লগ্নমানং॥ এতচ্চ তমোলিপ্তাদিদেশীয়ং প্রাগুক্তায়নাংশসাধিতং॥*॥ অঙ্গেন বেদো ৪।৬ মেষঃ স্যাৎ বসুবেদৈঃ সুখং ৪।৪৮ বৃষঃ। মুনিযুগ্মৈঃ শরো ৫।২৭ দ্বন্দ্বঃ ব্যোমাব্ধিবাণ ৫।৪০ কর্কটঃ॥ বেদরামৈঃ শরঃ ৫।৩৪ সিংহঃ কন্যাক্ষযুগ্মপঞ্চকঃ ৫।২৯। তুলা ঋষিরামপঞ্চ ৫।৩৭ বৃশ্চিকঃ খাব্ধিপঞ্চকঃ ৫।৪০॥ নবচন্দ্রবাণ ৫।১৯ ধনুর্বেদরামৈঃ সুখং ৪।৩৪ মৃগঃ। বসুপঞ্চত্রয় ৩।৫৮ কুম্ভঃ ঋষিবেদত্রয়ো ৩।৪৭ ঝষঃ॥*॥ শক্রর্বেদশ্চ ৪।৬ মেষো নন্দসুখস্তথা ৪।৪৯

গৌর্ম্মৃত্যুযুগ্মৈঃ শিবাস্যো ৫।২৮ ঘন্মোহংক্কাগ্নিভবাণো ৫।৩৯ হিমকরভবনো রামরামৈঃ কলঘঃ ৫।৩৩। সিংহঃ কন্যাজরামৈরিষু ৫।৩১ রিষুজস্বখাগ্নীষু ৫।৩৪ যূকোহলিপৃথ্বী ৫।৪১ বেদেশান্মোহংস্টপৃথ্বীস্মরহরমুখ ৫।১৮ কোদণ্ডমাহুর্বরাহাঃ॥ বন্ধূরামশ্চ বেদো ৪।৩৪ রবিমৃতভবনঃপর্ব্বতঃ পঞ্চরামঃ ৩।৫৭ কুম্ভো মীনশ্চ ভুঙ্ক্তে গিরিমুখদহনং ৩।৪৭ প্রত্যহং প্রক্রমেণ। অস্তং যামিত্ররাশাবসুদিনমবসাদ্যঞ্চ রাজীবনাথো যদ্যাতিস্ম ক্রতং স্বাদুদয়মসুদিবারাত্রমাহুর্বরাহাঃ॥ *॥ লগ্নং লগ্নান্তরং কৃষ্ণেতি প্রকারান্তরেণ যদুক্তং তদপি পদ্যেন লিখ্যতে যথা। বেদোহঙ্গৈ ৪।৬ রিভবেদৈঃ শ্রুতি ৪।৪৮ রিষুরিভপক্ষৈঃ ৫।২৮ কুবেদৈশ্চ বাণো ৫।৪১ বাণো রামানলৈ ৫।৩৩ রিন্দ্রিয়মপি নবাঙ্কৈ ৫।২৯ রিষুঃ সপ্তরামৈঃ৫।৩৭ বাণঃ শূন্যাব্ধিনে৫।৪০ মূর্দ্ধ তিথি ৫।১৮ রিষুগুণৈরব্ধি ৪।৩৫ রষ্টেষুণাগ্নী ৩।৫৮ রামোহশ্বাস্তিস্ত ৩।৪৭ সিদ্ধান্তজমতময়নাংশাদিদং লগ্নমানং॥ চৈত্রস্যৈকাদশাহে তু বিষুবারম্ভণং যদা। তদৈতল্লগ্নমানং হি জ্ঞেয়মন্যত্র সাধনাৎ॥ ইতি জ্যোতিষসংগ্রহঃ॥

অযানয়ীনঃ (পুং) শারঃ। যথা। অনুপদসর্ব্বায়ানয়ং বদ্ধা ভক্ষয়তি নেয়েষু। অযানয়ঃ স্থলবিশেষঃ। তন্নেয়ঃ। অযানয়ীনঃ শারঃ। ইতি সিদ্ধান্তকৌমুদী॥

অযন্ত্রিতঃ (ত্রি) অবাধঃ। অনর্গলঃ। ইতি হেমচন্দ্রঃ॥

অয়স্কান্তঃ (পুং) লৌহবিশেষঃ। কান্তলোহ ইতি খ্যাতঃ। তৎপর্য্যায়ঃ। কান্তলৌহং ২ কান্তং ৩ লৌহকান্তকং ৪ কান্তায়সং ৫ কৃষ্ণলোহং ৬ মহালোহং ৭। অস্য গুণাঃ। তীক্ষ্ণত্বং। উষ্ণত্বং। রূক্ষত্বং। পাণ্ডুশোথকফপিত্তহরত্বং। রসায়নত্বং। অমৃতমত্বঞ্চ। স চতুর্ব্বিধঃ। ভ্রামকঃ ১ চুম্বকঃ ২ রোমকঃ ৩ স্বেদকঃ ৪। এতে রসায়নে উত্তরোত্তরগুণিনঃ। ক্রমেণ দার্ঢ্যাঙ্গকান্তিকাৎর্স্ন্যনীরোগদায়িনঃ। ইতি রাজনির্ঘণ্টঃ॥ চুম্বকপ্রস্তরোহপ্যয়ং॥

অয়স্কারঃ (পুং) প্রজঙ্ঘাগ্রঃ। জঙ্ঘাগ্রভাগঃ। ইতি ত্রিকাণ্ডশেষঃ॥ লৌহকারঃ। অয়স্করোতীতি ব্যুৎপত্ত্যা॥

অয়াঃ [স্] (পুং) অগ্নিঃ। ইত্যুণাদিকোষঃ॥

অযাচকঃ (ত্রি) যাচ্ঞারহিতঃ। যথা। যদি ভবতি স দাতা যাচকাযাচকেষু। ইত্যুদ্ভটঃ॥

অযাচিতং (ত্রি) যাচ্ঞাং বিনা লব্ধবস্তু। অপ্রার্থিতং। ইত্যমৃতশব্দার্থে মেদিনী॥

অযাচিতঃ (পুং) মুনিবিশেষঃ। তৎপর্য্যায়ঃ। উপবর্ষঃ ২ হলভূতিঃ ৩ কৃতকোটিঃ ৪। ইতি ত্রিকাণ্ডশেষঃ॥

অযানং (ক্লী) স্বভাবঃ। ইতি হারাবলী॥ অগমনং। গত্যর্থযাধাতোর্ভাবেহনট্ ততো নঞ্সমাসঃ॥

অয়ি ব্য প্রশ্নঃ। অনুনয়ঃ। সম্বোধনং। ইতি মেদিনী॥

অযুক্চ্ছদঃ (পুং) সপ্তপর্ণবৃক্ষঃ। ইতি হেমচন্দ্রঃ॥

অযুক্তং (ত্রি) অমিশ্রিতং। অনুচিতং। যথা।

অযুক্তং যদিহ প্রোক্তং প্রমাদেন ভ্রমেণ বা। ইতি দুর্গাদাসঃ ॥

অযুগ্মচ্ছদঃ (পুং) বিষমচ্ছদঃ। সপ্তপর্ণবৃক্ষঃ। ইত্যমরটীকায়াং ভরতঃ ॥

অযুতং (ক্লী) দশসহস্রসংখ্যা। ১০০০০ দশ হাজার ইতি ভাষা। ইতি হেমচন্দ্রঃ ॥

অযুতঃ (ত্রি) অমিশ্রিতঃ। অযুক্তঃ। যথা। অপৃথগ্‌ভাবোঽযুতাসিদ্ধিঃ। ইতি চরকটীকা ॥

অয়ে ব্য কোপঃ। বিষাদঃ। সম্ভ্রমঃ। স্মরণং। ইতি মেদিনী ॥ সম্বোধনং। ইতি শব্দরত্নাবলী ॥

অযোগঃ (পুং) বিশ্লেষঃ। বিধুরঃ। কূটঃ। কঠিনোদ্যমঃ। ইতি মেদিনী ॥ বমনবিরেচনাদীনাং প্রতিলোমপ্রবৃত্তিরল্পপ্রবৃত্তির্ব্বা। যথা। যোগঃ সম্যক্‌প্রবৃত্তিঃ স্যাদতিযোগোঽতিবর্ত্তনং। অযোগঃ প্রাতিলোম্যেন ন চাল্পং বা প্রবর্ত্তনং ॥ ইতি বৈদ্যকং ॥ যোগো ধ্যানং তদভাবঃ। যোগো ভেষজং তদভাবশ্চ ॥

অযোগবঃ (ত্রি) বৈশ্যকন্যায়াং শূদ্রাদুৎপন্নসন্তানঃ। ইতি জটাধরঃ ॥

অয়োগুড়ঃ (পুং) লৌহগুলিকা। যথা। বরনারীবিষবিষং কথিতং তাম্রমেব বা। পীতমত্যগ্নিসন্তপ্তা ভক্ষিতা বাপ্যয়োগুড়াঃ ॥ ইতি চরকঃ ॥

অয়োগ্রং (ক্লী) মুষলং। ইত্যমরঃ ॥

অয়োঘনঃ (পুং) একীভূতলৌহপুঞ্জঃ। হাতুড়ী ইতি ভাষা। তৎপর্য্যায়ঃ। লৌহকূটং ২। ইতি হেমচন্দ্রঃ ॥

অযোধ্যা (স্ত্রী) শ্রীরামনগরী। পশ্চিমদেশে অওদ্ ইতি প্রসিদ্ধা। তৎপর্য্যায়ঃ। সাকেতং ২ কোশলা ৩। ইতি হেমচন্দ্রঃ ॥ উত্তরকোশলা ৪। ইতি ত্রিকাণ্ডশেষঃ ॥ সা তু মোক্ষদা পুরী। যথা। অযোধ্যা মথুরা মায়া কাশী কাঞ্চী অবন্তিকা। পুরী দ্বারাবতী চৈব সপ্তৈতা মোক্ষদায়িকাঃ ॥ এতাস্তু পৃথিবীমধ্যে ন গণ্যন্তে কদাচন। শ্রীরামধনুরগ্রস্থা অযোধ্যা সা মহাপুরী ॥ ইতি ভূতশুদ্ধিতন্ত্রং ॥ * ॥ তদ্বর্ণনং যথা। কোশলো নাম মুদিতঃ স্ফীতো জনপদো মহান্। নিবিষ্টঃ সরযূতীরে প্রভূতধনধান্যবান্ ॥ অযোধ্যা নাম নগরী তত্রাসীল্লোকবিশ্রুতা। মনুনা মানবেন্দ্রেণ যা পুরী নির্ম্মিতা স্বয়ম্ ॥ আয়তা দশ চ দ্বে চ যোজনানি মহাপুরী। শ্রীমতী ত্রীণি বিস্তীর্ণা সুবিভক্তমহাপথা ॥ রাজমার্গেণ মহতা সুবিভক্তেন শোভিতা। মুক্তপুষ্পাবকীর্ণেন জলসিক্তেন নিত্যশঃ ॥ তাস্তু রাজা দশরথো মহারাষ্ট্রবিবর্দ্ধনঃ। পুরীমাবাসয়ামাস দিবি দেবপতির্যথা ॥ কপাটতোরণবতীং সুবিভক্তান্তরাপণাং। সর্ব্বযন্ত্রায়ুধবতীমুষিতাং সর্ব্বশিল্পিভিঃ ॥ সূতমাগধসম্বাধাং শ্রীমতীমতুলপ্রভাং। উচ্চাট্টালধ্বজবতীং শতঘ্নীশতসংকুলাং ॥ বধূনাটকসংঘৈশ্চ সংযুক্তাং সর্ব্বতঃ পুরীং। উদ্যানাম্রবণোপেতাং মহতীং শালমেখলাং ॥ দুর্গগম্ভীরপরিখাং দুর্গামন্যৈর্দুরাসদাং। বাজিবারণসম্পূর্ণাং গোভিরুষ্ট্রৈঃ খরৈস্তথা ॥ সামন্তরাজসংঘৈশ্চ বলিকর্ম্মভি-

রাবৃতাং। নানাদেশনিবাসৈশ্চ বণিগ্‌ভিরুপশোভিতাং॥ প্রাসাদৈ রত্নবিকৃতৈঃ পর্ব্বতৈরিব শোভিতাং। কূটাগারৈশ্চ সম্পূর্ণামিন্দ্রস্যেবামরাবতীং॥ চিত্রামষ্টাপদাকারাং বরনারীগণৈর্যুতাং। সর্ব্বরত্নসমাকীর্ণাং বিমানগৃহশোভিতাং॥ গৃহগাঢ়ামবিচ্ছিদ্রাং সমভূমৌ নিবেশিতাং। শালিতণ্ডুলসম্পূর্ণামিক্ষুকাণ্ডরসোদকাং॥ দুন্দুভীভির্মৃদঙ্গৈশ্চ বীণাভিঃ পণবৈস্তথা। নাদিতাং ভৃশমত্যর্থং পৃথিব্যাং তামনুত্তমাং॥ বিমানমিব সিদ্ধানাং তপসাধিগতং দিবি। সুনিবেশিতবেশ্মান্তাং নরোত্তমসমাবৃতাং॥ যে চ বাণৈর্ন বিধ্যন্তি বিবিক্তমপরাপরং। শব্দবেধ্যঞ্চ বিততং লঘুহস্তা বিশারদাঃ॥ সিংহব্যাঘ্রবরাহাণাং মত্তানাং নদতাং বনে। হন্তারো নিশিতৈঃ শস্ত্রৈর্বলাদ্বাহুবলৈরপি॥ তাদৃশানাং সহস্রৈস্তামভিপূর্ণাং মহারথৈঃ। পুরীমাবাসয়ামাস রাজা দশরথস্তদা॥ তামগ্নিমদ্ভির্গুণবদ্ভিরাবৃতাং দ্বিজোত্তমৈর্ব্বেদষড়ঙ্গপারগৈঃ। সহস্রদৈঃ সত্যরতৈর্মহাত্মভির্মহর্ষিকল্পৈঋর্ষিভিশ্চ কেবলৈঃ॥ ইত্যার্ষে রামায়ণে বাল্মীকীয়ে বালকাণ্ডে পঞ্চমঃ সর্গঃ॥ * ॥ তস্যাং পুর্য্যামযোধ্যায়াং বেদবিৎ সর্ব্বসংগ্রহঃ। দীর্ঘদর্শী মহাতেজাঃ পৌরজানপদপ্রিয়ঃ॥ ইক্ষ্বাকূণামতিরথো যজ্বা ধর্ম্মপরো বশী। মহর্ষিকল্পো রাজর্ষিস্ত্রিষু লোকেষু বিশ্রুতঃ॥ বলবান্নিহতামিত্রো মিত্রবান্ বিজিতেন্দ্রিয়ঃ। ধনৈশ্চ সঞ্চয়ৈশ্চান্যৈঃ শক্রবৈশ্রবণোপমঃ॥ যথা মনুর্মহাতেজা লোকস্য পরিরক্ষিতা। তথা দশরথো রাজা লোকস্য পরিরক্ষিতা॥ তেন সত্যাভিসন্ধেন ত্রিবর্গমনুতিষ্ঠতা। পালিতা সা পুরী শ্রেষ্ঠা ইন্দ্রেণেবামরাবতী॥ তস্মিন্ পুরবরে হৃষ্টা ধর্ম্মাত্মানো বহুশ্রুতাঃ। নরাস্তুষ্টা ধনৈঃ স্বৈঃ স্বৈরলুব্ধাঃ সত্যবাদিনঃ॥ নাল্পসন্নিচয়ঃ কশ্চিত্তদা তস্মিন্ পুরোত্তমে। কুটুম্বী যো হ্যসিদ্ধার্থোঽগবাশ্বধনধান্যবান্॥ কামী বা ন কদর্য্যো বা নৃশংসঃ পুরুষঃ কচিৎ। দ্রষ্টুং শক্যমযোধ্যায়াং নাবিদ্বান্ চ নাস্তিকঃ॥ সর্ব্বে নরাশ্চ নার্য্যশ্চ ধর্ম্মশীলাঃ সুসংযতাঃ। মুদিতাঃ শীলবৃত্তাভ্যাং মহর্ষয় ইবামলাঃ॥ নাকুণ্ডলী নামুকুটী নাস্রগ্বী নাল্পভোগবান্। নামৃষ্টো ন ন লিপ্তাঙ্গো নাসুগন্ধশ্চ বিদ্যতে॥ নামৃষ্টভোজী নাদাতা নাপ্যনঙ্গদনিষ্কধৃক্। নাহস্তাভরণো বাপি দৃশ্যতে নাপ্যনাত্মবান্॥ নানাহিতাগ্নির্নাযজ্বা ন ক্ষুদ্রো বা ন তস্করঃ। কশ্চিদাসীদযোধ্যায়াং ন চাবৃত্তো ন সঙ্করঃ॥ স্বকর্ম্মনিরতা নিত্যং ব্রাহ্মণা বিজিতেন্দ্রিয়াঃ। দানাধ্যয়নশীলাশ্চ সংযতাশ্চ প্রতিগ্রহে॥ নাস্তিকো নানৃতো বাপি ন কশ্চিদবহুশ্রুতঃ। নাসূয়কো ন চাশক্তো নাবিদ্বান্ বিদ্যতে কচিৎ॥ নাষড়ঙ্গবিদত্রাস্তি নাব্রতো নাসহস্রদঃ। ন দীনঃ ক্ষিপ্তচিত্তো বা ব্যথিতো বাপি কশ্চন॥ কশ্চিন্নরো বা নারী বা নাশ্রীমান্নাপ্যরূপবান্। দ্রষ্টুং শক্যমযোধ্যায়াং নাপি রাজন্যভক্তিমান্॥ বর্ণেষ্বগ্র্যচতুর্থেষু দেবতাতিথিপূজকাঃ। কৃতজ্ঞাশ্চ বদান্যাশ্চ শূরা

বিক্রমসংযুতাঃ ॥ দীর্ঘায়ুষো নরাঃ সর্ব্বে ধর্ম্মং সত্যঞ্চ সংশ্রিতাঃ। সহিতাঃ পুত্র-পৌত্রৈশ্চ নিত্যং স্ত্রীভিঃ পুরোত্তমে॥ ক্ষত্রং ব্রহ্মমুখং চাসীদ্বৈশ্যাঃ ক্ষত্রমনুব্রতাঃ। শূদ্রাঃ স্বকর্ম্মনিরতাস্ত্রীন্ বর্ণানুপচারিণঃ॥ সা তেনেক্ষ্বাকুনাথেন পুরী সুপরিরক্ষিতা। যথা পুরস্তান্মনুনা মানবেন্দ্রেণ ধীমতা॥ যোধানামগ্নিকল্পানাং পেষলানামমর্ষিণাং। সম্পূর্ণা কৃতবিদ্যানাং গুহা কেশরিণামিব॥ কাম্বোজবিষয়ে জাতৈর্ব্বাহ্লীকৈশ্চ হয়োত্তমৈঃ। বনায়ুজৈর্নদীজৈশ্চ পূর্ণা হরিহয়োত্তমৈঃ॥ বিন্ধ্যপর্ব্বতজৈর্ম্মত্তৈঃ পূর্ণা হৈমবতৈরপি। মদান্বিতৈরতিবলৈর্ম্মাতঙ্গৈঃ পর্ব্বতোপমৈঃ॥ ঐরাবতকুলীনৈশ্চ মহাপদ্মকুলৈস্তথা। অঞ্জনাদপি নিষ্ক্রান্তৈর্ব্বামনাদপি চ দ্বিপৈঃ॥ ভদ্রৈর্ম্মন্দ্রৈর্ম্মৃগৈশ্চৈব ভদ্রমন্দ্রমৃগৈস্তথা। ভদ্রমন্দ্রৈর্ভদ্রমৃগৈর্ম্মৃগমন্দ্রৈশ্চ সা পুরী॥ নিত্যমত্তৈঃ সদা পূর্ণা নাগৈরচলসন্নিভৈঃ। সা যোজনে দ্বে চ ভূয়ঃ সত্যনামা প্রকাশতে॥ তাং পুরীং স মহাতেজা রাজা দশরথো মহান্। শশাস শমিতামিত্রো নক্ষত্রাণীব চন্দ্রমাঃ। তাং সত্যনামাং দৃঢ়-তোরণার্গলাং গৃহৈর্ব্বিচিত্রৈরুপশোভিতাং শিবাং। পুরীমযোধ্যাং নৃসহস্রসংকুলাং শশাস বৈ শক্রসমো মহীপতিঃ॥ ইত্যার্ষে রামায়ণে বাল্মীকীয়ে বালকাণ্ডে ষষ্ঠঃ সর্গঃ॥ যুদ্ধাযোগ্যে ত্রি॥

অয়োমলং (ক্লী) লৌহমলং। লোহার গু ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥ তৎপর্য্যায়ঃ। মণ্ডুরং ২ লৌহকিট্টং ৩। তস্য গুণাঃ। শতোর্দ্ধমুত্তমং কিট্টং মধ্যঞ্চাশীতিবর্ষকং। অধমং ষষ্টিবর্ষীয়ং ততো হীনং বিষোপমং॥ যল্লৌহং যদ্গুণং প্রোক্তং তৎকিট্টঞ্চাপি তদ্গুণং। ইতি বৈদ্যকং॥

অরং (ক্লী) শীঘ্রং। চক্রাঙ্গং। চাকার পাকি ইতি ভাষা। শীঘ্রগে ত্রি। ইতি মেদিনী॥

অরঃ (পুং) জিনানাং কালচক্রস্য দ্বাদশাংশঃ। স তু অবসর্পিণ্যাঃ ষষ্ঠভাগঃ॥ জিনানামষ্টা-দশতীর্থঙ্করঃ। ইতি হেমচন্দ্রঃ॥

অরকঃ (পুং) শৈবালং। ইতি হারাবলী॥ পর্পটঃ। ইতি রাজনির্ঘণ্টঃ॥

অরগ্বধঃ (পুং) আরগ্বধবৃক্ষঃ। সোঁদালি ইতি-খ্যাতঃ। ইত্যমরটীকায়াং ভরতঃ॥

অরঘট্টঃ (পুং) মহাকূপঃ। ইত্যমরজটাধরৌ॥

অরঘট্টকঃ (পুং) মহাকূপঃ। তৎপর্য্যায়ঃ। পাদাবর্ত্তঃ ২। ইতি হেমচন্দ্রঃ॥

অরজাঃ [স্] (স্ত্রী) কন্যা। কুমারী। ইতি হেম-চন্দ্রঃ॥ রজোগুণরহিতে ত্রি॥

অরটুঃ (পুং) অরলুবৃক্ষঃ। ইত্যমরটীকায়াং রায়মুকুটঃ॥

অরণিঃ (পুং) গণিকারিকাবৃক্ষঃ। ইতি মেদিনী॥ সূর্য্যঃ। ইতি কাশীখণ্ডং॥

অরণিঃ (পুং স্ত্রী) নির্ম্মন্থ্যদারু। অগ্নিসাধনীভূত-কাষ্ঠং। ঘর্ষণদ্বারাগ্নিজনককাষ্ঠং। ইত্য-মরঃ॥

অরণী (স্ত্রী) অরণিঃ। ইত্যমরটীকায়াং ভরতঃ॥

অরণীকেতুঃ (পুং) অগ্নিমন্থবৃক্ষঃ। ইতি রাজ-নির্ঘণ্টঃ॥

অরণ্যং (ক্লী) বনং ইত্যমরঃ॥

অরণ্যঃ (পুং) কট্‌ফলবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥

অরণ্যকদলী ( স্ত্রী ) গিরিকদলী। ইতি রাজনির্ঘণ্টঃ॥

অরণ্যকার্পাসী (স্ত্রী) বনকার্পাসী। তৎপর্য্যায়ঃ। বনজা ২ ভারদ্বাজী ৩ বনোদ্ভবা ৪। অস্যা গুণাঃ। হিমত্বং। রুক্ষত্বং। ব্রণশস্ত্রক্ষতনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

অরণ্যকুলত্থিকা (স্ত্রী) কুলত্থা। বনকুলথী ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥

অরণ্যকুস্তুম্ভঃ (পুং) বনকুস্তুম্ভঃ। তৎপর্য্যায়ঃ। কৌসুম্ভঃ ২ অগ্নিসম্ভবঃ ৩। অস্য গুণাঃ। পাকে কটুত্বং। শ্লেষ্মনাশিত্বং। অগ্নিবৃদ্ধিকারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

অরণ্যঘোলী (স্ত্রী) বনঘোলী। পত্রশাকবিশেষঃ। ইতি রাজনির্ঘণ্টঃ॥

অরণ্যচটকঃ ( পুং ) বনচটকঃ। তৎপর্য্যায়ঃ। ধূসরঃ ২ ভূমিশয়ঃ ৩। অস্য গুণাঃ। শীতত্বং। লঘুত্বং। শুক্রবৃদ্ধিকারিত্বং। বলপ্রদত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

অরণ্যজার্দ্রকা (স্ত্রী) বনার্দ্রকা। বন আদা ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥ অস্য গুণপর্য্যায়ৌ ঐন্দ্রশব্দে দ্রষ্টব্যৌ॥

অরণ্যজীরঃ ( পুং ) বনজীরঃ। বনজীরা ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥

অরণ্যধান্যং ( ক্লী ) নীবারঃ। উড়ী ধান ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥

অরণ্যমক্ষিকা ( স্ত্রী ) দংশঃ। ডাঁশ ইতি ভাষা। ইতি শব্দরত্নাবলী॥

অরণ্যমুদগঃ ( পুং ) মকুষ্টকঃ। বন মুগ ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥

অরণ্যবায়সঃ ( পুং ) দ্রোণকাকঃ। ডাঁড় কাক ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥

অরণ্যবাসিনী ( স্ত্রী ) অত্যম্লপর্ণী লতা। ইতি রাজনির্ঘণ্টঃ

অরণ্যবাস্তুকঃ ( পুং ) বনবাস্তুকঃ। বন বেতো ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥ অস্য গুণপর্য্যায়ৌ কুণঞ্জরশব্দে দ্রষ্টব্যৌ॥

অরণ্যশালিঃ (পুং) নীবারঃ। বনধান্যং। ইতি রাজনির্ঘণ্টঃ॥

অরণ্যশূরণঃ ( পুং ) বনশূরণঃ। বনওল ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥

অরণ্যশ্বা [ন্] (পুং) বৃকঃ। নেকড়ে বাঘ ইতি ভাষা। ইতি হেমচন্দ্রঃ॥

অরণ্যষষ্ঠী ( স্ত্রী ) জ্যৈষ্ঠশুক্লষষ্ঠী। বাঁটাষষ্ঠী ইতি ভাষা। যথা রাজমার্ত্তণ্ডে। জ্যৈষ্ঠে মাসি সিতে পক্ষে ষষ্ঠী চারণ্যসংজ্ঞিতা। ব্যজনৈককরাস্তস্যামটন্তি বিপিনে স্ত্রিয়ঃ॥ তাং বিন্ধ্যবাসিনীং স্কন্দষষ্ঠীমারাধয়ন্তি চ। কন্দমূলফলাহারা লভন্তে সন্ততিং শুভাং॥ কন্দং শূরণাদি। মূলং তদিতরৎ। ইতি তিথ্যাদিতত্ত্বং॥

অরণ্যানী ( স্ত্রী ) মহাবনং। ইত্যমরঃ॥

অরতত্রপঃ ( পুং স্ত্রী ) কুক্কুরঃ। ইতি ত্রিকাণ্ডশেষঃ॥ রত্যলজ্জে ত্রি॥

অরতিঃ ( পুং ) ক্রোধঃ। ইত্যুণাদিকোষঃ॥

অরতিঃ ( স্ত্রী ) অনবস্থিতচিত্তত্বং। ইতি রক্ষিতঃ॥ ক্রীড়াভাবঃ। ইতি কার্ত্তিকঃ॥ রতিবিরহঃ। রতিশূন্যে ত্রি॥

অরত্নিঃ ( পুং ) বিস্তৃতকনিষ্ঠাঙ্গুলিমুষ্টিকহস্তঃ। কূর্পরঃ। ইতি মেদিনী॥

অরন্ধনং (ক্লী) পাকাভাবঃ। তত্তু কন্যা-সংক্রান্ত্যাং কৃতশ্চেৎ বৃদ্ধারন্ধনং কথ্যতে। সৌরভাদ্রস্য যস্মিন্ কস্মিন্ দিনে কৃতশ্চেৎ ইচ্ছারন্ধনমিত্যুচ্যতে। ইতি লোক-প্রসিদ্ধং। তত্র প্রমাণং। কর্কান্নমদ্যাৎ সিংহাহে সিংহান্নং সিংহকন্যয়োঃ। মনসা-শেষনাগেভ্যো দত্ত্বা সর্ব্বং নিশোধিতং ॥ ইত্যাচারমার্ত্তণ্ডধৃতবচনং ॥

অরমঃ (ত্রি) অবমঃ। অধমঃ। ইত্যমরটীকা-সারসুন্দরী ॥

অররং (ত্রি) কবাটং। ইত্যমরঃ॥ করীর-কোষঃ। আচ্ছাদনং। ইতি বিশ্বঃ ॥

অররিঃ (পুং ক্লী) কপাটং। ইতি হেমচন্দ্রঃ॥

অররুঃ (পুং) শত্রুঃ। ইতি সিদ্ধান্তকৌমুদ্যা-মুণাদিবৃত্তিঃ ॥

অররে ব্য স্বরান্বিতসম্বুদ্ধিঃ। শীঘ্রসম্বোধনং। ইতি শব্দরত্নাবলী ॥

অরলুঃ (পুং) শ্যোনাকবৃক্ষঃ। শোনাগাছ ইতি ভাষা। ইত্যমরঃ ॥

অরবিন্দং (ক্লী) পদ্মং। সারসপক্ষী। ইত্য-মরঃ ॥ তাম্রং। রক্তকমলং। নীলোৎপলং। ইতি রাজনির্ঘণ্টঃ ॥

অরবিন্দিনী (স্ত্রী) নলিনী। ইতি শব্দরত্নাবলী॥ পদ্মসমূহঃ। পদ্মাকরঃ। ইতি রত্নমালা ॥

অরসিকঃ (ত্রি) অরসজ্ঞঃ। অবিদগ্ধঃ। যথা। অরসিকেষু রসস্য নিবেদনং শিরসি মা লিখ মা লিখ মা লিখ॥ ইত্যুদ্ভটঃ ॥

অরাজকঃ (ত্রি) রাজশূন্যদেশাদিঃ। যথা। চৌরপ্রায়ং জনপদং হীনসত্ত্বমরাজকং। ইতি শ্রীভাগবতং ॥

অরাজকঃ (পুং) রাজশূন্যদেশাদিঃ। যথা। অরাজকে হি লোকেঽস্মিন্ সর্ব্বতো বিদ্রুতে ভয়াৎ। রক্ষার্থমস্য সর্ব্বস্য রাজানমসৃজৎ প্রভুঃ ॥ ইতি মানবে ৭ অধ্যায়ে ৩ শ্লোকঃ ॥

অরাতিঃ (পুং) শত্রুঃ। ইত্যমরঃ ॥

অরালং (ত্রি) কুটিলং। বক্রং। ইত্যমরঃ ॥

অরালঃ (পুং) সর্জ্জরসঃ। মত্তহস্তী। ইতি মেদিনী॥ বক্রহস্তঃ। ইতি শব্দরত্নাবলী ॥

অরালা (স্ত্রী) অধৃষ্টা। কুলটা। ইতি শব্দ-রত্নাবলী ॥

অরিঃ (পুং) শত্রুঃ। ইত্যমরঃ ॥ চক্রং। ইতি ত্রিকাণ্ডশেষঃ॥ খদিরভেদঃ। তৎপর্য্যায়ঃ। সন্দানিকা ২ দালী ৩ খদিরপত্রিকা ৪। অস্য গুণাঃ। কষায়ত্বং। কটুত্বং। তিক্তত্বং। রক্তার্ত্তিপিত্তনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

অরিত্রং (ক্লী) কর্ণঃ। হালি ইতি ভাষা। তৎপর্য্যায়ঃ। কেনিপাতকঃ ২। ইত্যমরঃ॥ কেনিপাতঃ ৩। ইতি ভরতঃ ॥

অরিন্দমঃ (ত্রি) শত্রুদমনকারকঃ। ইতি মুগ্ধবোধব্যাকরণং ॥

অরিমর্দ্দঃ (পুং) কাসমর্দবৃক্ষঃ। ইতি রাজ-[নির্ঘণ্টঃ ॥

অরিমেদঃ (পুং) বৃক্ষবিশেষঃ। গুইয়া বাবলা ইতি ভাষা। তৎপর্য্যায়ঃ। ইরিমেদঃ ২ রিমেদঃ ৩ গোধাস্কন্দঃ ৪ অরিমেদকঃ ৫ অহিমারঃ ৬ পূতিমেদঃ ৭ অহিমেদকঃ ৮ বিট্‌খদিরঃ ৯। অস্য গুণাঃ। কষায়ত্বং। উষ্ণত্বং। তিক্তত্বং। ভূতবিনাশিত্বং। শোথাতিসারকাসবিষবৈসর্পনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

অরিষ্টং (ক্লী) সূতিকাগৃহং। অশুভং। তক্রং। মরণচিহ্নং। শুভং। ইতি মেদিনী ॥ উপদ্রবঃ। তৎপর্য্যায়ঃ। উপলিঙ্গঃ ২ উপসর্গঃ ৩ অজন্যং ৪ ঈতিঃ ৫ উৎপাতঃ ৬। ইতি হেমচন্দ্রঃ ॥

অরিষ্টঃ ( পুং ) লশুনঃ। নিম্বঃ। ফেনিলবৃক্ষঃ। কাকঃ। কঙ্কপক্ষী। ইতি মেদিনী ॥ বৃষভাসুরঃ। ইত্যনেকার্থধ্বনিমঞ্জরী ॥ মদ্যবিশেষঃ। ইক্ষুবিকারসহিতাভয়াচিত্রকদন্তীপিপ্পল্যাদিভূরিভেষজকাথাদিসংস্কারবান্ অরিষ্টোঽভিধীয়তে। ইতি সুশ্রুতটীকা ॥ অস্য গুণঃ। অর্শঃশোথগ্রহণীকফরোগনাশিত্বং। ইতি রাজবল্লভঃ ॥

অরিষ্টকঃ ( পুং ) ফেনিলবৃক্ষঃ। রীঠাকরঞ্জ ইতি খ্যাতঃ। ইতি শব্দরত্নাবলী ॥ অরিষ্টশব্দার্থোঽপ্যত্র ॥

অরিষ্টতাতিঃ ( ত্রি ) ক্ষেমঙ্করঃ। শুভঙ্করঃ। ইতি ভূরিপ্রয়োগঃ ॥

অরিষ্টদুষ্টধীঃ ( ত্রি ) আসন্নমরণসূচিতলক্ষণেন দূষিতবুদ্ধিঃ। মরণকুবুদ্ধিযুক্তঃ। তৎপর্য্যায়ঃ। বিবশঃ ২। ইত্যমরঃ ॥

অরিষ্টনেমিঃ (পুং) জিনানাং চতুর্ব্বিংশত্যন্তর্গতদ্বাবিংশতিতীর্থঙ্করঃ। ইতি হেমচন্দ্রঃ ॥

অরিষ্টসূদনঃ ( পুং ) বিষ্ণুঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ শুভাশুভনাশকে ত্রি ॥

অরিষ্টা (স্ত্রী) কটুকা। কট্‌কী ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ ॥

অরুঃ [ স্ ] ( পুং ) সূর্য্যঃ। ইত্যুণাদিকোষঃ ॥ রক্তখদিরঃ। ইতি রাজনির্ঘণ্টঃ ॥

অরুঃ [ স্ ] (পুং ক্লী) ব্রণং। ক্ষতং। ইত্যমরঃ ॥

অরুঃ [ স্ ] ব্য মর্ম্ম। সন্ধিস্থানং। ইত্যুণাদিকোষঃ ॥

অরুচিঃ (পুং) রোগভেদঃ। স চ সত্যভিলাষেঽভ্যবহারাসামর্থ্যরূপঃ। ইতি রক্ষিতঃ ॥ তৎপর্য্যায়ঃ। অরোচকঃ ২ অশ্রদ্ধা ৩ অনভিলাষঃ ৪। ইতি রাজনির্ঘণ্টঃ ॥

অরুজঃ ( পুং ) আরগ্বধবৃক্ষঃ। সোঁদালি ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ ॥

অরুণং ( ক্লী ) কুঙ্কুমং। সিন্দুরং। ইতি রাজনির্ঘণ্টঃ ॥

অরুণঃ ( পুং ) সূর্য্যসারথিঃ। স তু বিনতাপুত্রঃ গরুড়জ্যেষ্ঠভ্রাতা চ। তৎপর্য্যায়ঃ। সূরসূতঃ ২ অনূরুঃ ৩ কাশ্যপিঃ ৪ গরুড়াগ্রজঃ ৫। সূর্য্যঃ। অর্কবৃক্ষঃ। অব্যক্তরাগঃ। ঈষদ্রক্তবর্ণঃ। ইত্যমরঃ ॥ সন্ধ্যারাগঃ। শব্দরহিতঃ। কপিলবর্ণঃ। কুষ্ঠভেদঃ। অরুণগুণবিশেষ্টে তু বাচ্যলিঙ্গঃ। ইতি মেদিনী ॥ পুন্নাগবৃক্ষঃ। গুড়ঃ। ইতি রাজনির্ঘণ্টঃ ॥

অরুণকমলং ( ক্লী ) রক্তোৎপলং। ইতি রাজনির্ঘণ্টঃ ॥

অরুণলোচনঃ ( পুং ) পারাবতঃ। ইতি রাজ- [ নির্ঘণ্টঃ ॥

অরুণসারথিঃ ( পুং ) সূর্য্যঃ। ইতি হেমচন্দ্রঃ ॥

অরুণা ( স্ত্রী ) অতিবিষা। শ্যামা। মঞ্জিষ্ঠা। ত্রিবৃতা। ইতি মেদিনী ॥ ইন্দ্রবারুণী। গুঞ্জা। ইতি রাজনির্ঘণ্টঃ ॥ মুণ্ডিতিকা। ইতি রত্নমালা ॥

অরুণাত্মজঃ (পুং) জটায়ুপক্ষী। ইতি ত্রিকাণ্ডশেষঃ ॥

অরুণাবরজঃ (পুং) গরুড়ঃ। ইতি হেমচন্দ্রঃ ॥

অরুণোদয়ঃ ( পুং ) সূর্য্যোদয়াৎ পূর্ব্বং মুহূর্ত্তদ্বয়কালঃ। যথা। চতস্রো ঘটিকাঃ প্রাতররুণোদয় উচ্যতে। যতীনাং স্নানকালোঽয়ং গঙ্গাম্ভঃসদৃশঃ স্মৃতঃ॥ ইতি ব্রহ্মবৈবর্ত্তপুরাণং॥

অরুণোদয়সপ্তমী ( স্ত্রী ) মাঘশুক্লসপ্তমী। মাকরী সপ্তমী। যথা। ভবিষ্যে। সূর্য্যগ্রহণতুল্যা হি শুক্লা মাঘস্য সপ্তমী। অরুণোদয়বেলায়াং তস্যাং স্নানং মহাফলং॥ মাঘে মাসি সিতে পক্ষে সপ্তমী কোটিভাস্করা। দদ্যাৎ স্নানার্ঘদানাভ্যামায়ুরারোগ্যসম্পদঃ॥ অরুণোদয়বেলায়াং শুক্লা মাঘস্য সপ্তমী। গঙ্গায়াং যদি লভ্যেত সূর্য্যগ্রহশতৈঃ সমা॥ কোটিভাস্করা কোটিসপ্তমীতুল্যা। সূর্য্যগ্রহণফলং স্নানজং সন্নিহিতে বুদ্ধিরন্তরঙ্গা ইতি ন্যায়াৎ। তেন বহুশতসূর্য্যগ্রহণকালীনগঙ্গাস্নানজন্যফলসমফলপ্রাপ্তিঃ ফলমত্র জ্ঞেয়ং। অত্র বহুশতসূর্য্যগ্রহাণাং প্রত্যেকাধিকরণতাসংসর্গেণান্বয়াৎ কালানাং স্নানানাং তৎফলানামপি বহুশতত্বং লভ্যতে। অতো নাপ্রসিদ্ধিঃ॥ * ॥ পূর্ণসপ্তম্যাং পূর্ব্বাপরয়োর্যত্রারুণোদয়কালে সপ্তমী তত্র পূর্ব্বদিনে তৎকালে স্নানং। চতস্রো ঘটিকাঃ প্রাতররুণোদয় উচ্যতে। যতীনাং স্নানকালোঽয়ং গঙ্গাম্ভঃসদৃশঃ স্মৃতঃ॥ ত্রিযামাং রজনীং প্রাহুস্ত্যক্ত্বাদ্যন্তচতুষ্টয়ং। নাড়ীনাং তদুভে সন্ধ্যে দিবসাদ্যন্তসংজ্ঞিতে॥ ইতি কালমাধবীয়ধৃতব্রহ্মবৈবর্ত্তীয়েন পূর্ব্বস্য তৎকালস্য পূর্ণতিথিসম্বন্ধিদিনকর্ত্তব্যকর্ম্মাঙ্গত্বেন ইতরস্য চেতরাঙ্গত্বেনাভিধানাৎ। অতএব দক্ষেণ তৎকালমারভ্যাহ্নিককৃত্যমভিহিতং॥ * ॥ অত্রারুণোদয়কালে মুহূর্ত্তান্যূনতিথিলাভ এব স্নানং। ব্রতোপবাসস্নানাদৌ ঘটিকৈকা যদা ভবেৎ। উদয়ে সা তিথির্গ্রাহ্যা শ্রাদ্ধাদাবস্তগামিনী॥ ইতি বিষ্ণুধর্ম্মোত্তরাৎ। অত্র ঘটিকা মুহূর্ত্তং শ্রাদ্ধযোগ্যকালানুরোধাদিতি বক্ষ্যতে। ব্রহ্মবৈবর্ত্তবচনে ঘটিকা দণ্ডরূপা। পরবচনে নাড়ীনামাদ্যন্তচতুষ্টয়মিত্যেকবাক্যত্বাৎ॥ * ॥ যে তু সূর্য্যোদয়াৎ প্রাগপি প্রাতঃস্নানবিধানাৎ তত্রৈব মাঘসপ্তম্যাখ্যগুণফলবিধির্লাঘবাদিত্যাহুস্তচ্চিন্ত্যং। প্রকরণান্যত্বে প্রয়োজনান্যত্বং ইতি জৈমিনিসূত্রেণ প্রকরণভেদে গুণবিধ্যসিদ্ধেঃ। অতএব কল্পতরুরত্নাকরয়োঃ। য ইচ্ছেদ্বিপুলান্ ভোগান্ চন্দ্রসূর্য্যগ্রহোপমান্। প্রাতঃস্নায়ী ভবেন্নিত্যং দ্বৌ মাসৌ মাঘফাল্গুনৌ॥ ইতি। বিষ্ণুস্মৃতৌ। যথাহনি তথা প্রাতর্নিত্যং স্নায়াদনাতুরঃ। ইতি নিত্যস্নানপ্রকরণাৎ প্রকরণান্তরাম্নানাৎ প্রকরণান্তরাধিকরণন্যায়েন কাম্যস্নানান্তরমিদমপ্যুক্তং। ন তু গুণফলবিধিঃ। কিন্তু কাম্যকরণে প্রসঙ্গান্নিত্যসিদ্ধিরিতি॥ * ॥ অত্র মাঘমাসনিমিত্তকমাঘসপ্তমীনিমিত্তককাম্যস্নানয়োঃ প্রাতর্ব্বিধানাৎ নৈমিত্তিকত্বেন প্রায়শ্চিত্তবৎ সকৃদনুষ্ঠানং। প্রধানস্যাক্রিয়া যত্র সাঙ্গং তৎ ক্রিয়তে পুনঃ। তদঙ্গস্যাক্রিয়ায়াস্তু নাবৃত্তির্ন চ তৎক্রিয়া॥ ইতি কাত্যায়নবচনাৎ। ন স্নান-

মাচরেদ্ভুক্ত্বা নাতুরো ন মহানিশি। ন বাসোভিঃ সহাজস্রং নাবিজ্ঞাতে জলাশয়ে॥ ইতি মনুবচনেনৈকদাজস্রস্নাননিষেধাৎ। ধর্ম্মবিন্নাচরেৎ স্নানমাহ্নিকঞ্চ পুনঃ পুনঃ॥ ইতি মনুবচনাচ্চ। অতএব নান্দীমুখপ্রকরণশেষে প্রধানানামপি কাম্যানাং তত্তদ্দেশকালবিহিতানাং তন্ত্রেণৈব সিদ্ধিরিতি শ্রাদ্ধচিন্তামণিঃ॥ নিষ্কামবিষ্ণুপ্রীতিকাময়োঃ স্মৃতরাং সকৃদনুষ্ঠানং। গুণতারতম্যাৎ ফলতারতম্যং ইতি ন্যায়েন ফলং বোধ্যং। তত্তু ইক্ষুক্ষীরগুড়াদিমাধুর্য্যভেদবন্নির্দ্দেষ্টুমশক্যং। পক্ষান্তরেঽপি কন্যাস্থে রবৌ শ্রাদ্ধং প্রশস্যতে। কন্যাগতে পঞ্চমে তু বিশেষেণৈব কারয়েৎ॥ ইতি হেমাদ্রিধৃতাদিত্যপুরাণোক্তবৎ। এতদ্বচনপ্রাগর্দ্ধং কার্ত্তিকমলমাসাব্দবিষয়ং। দেশকালাশ্রমক্ষেত্রদ্রব্যদাতৃমনোগুণাঃ। স্বল্পস্যাপি দানস্য ফলাতিশয়হেতবঃ॥ ইতি ব্রহ্মপুরাণোক্তবচ্চ॥*॥ তীর্থভেদে ত্বেকদাপি নানাস্নানং। বিষুবদ্দিবসে প্রাপ্তে পঞ্চতীর্থী বিধানতঃ। ইতি ব্রহ্মপুরাণাদিবচনাৎ। তীর্থভেদে তন্ত্রপ্রসঙ্গয়োরসম্ভবাচ্চ। অতএব গঙ্গাবাক্যাবলীতীর্থচিন্তামণ্যোঃ। যত্তু প্রয়াগে ত্র্যহস্নানে ক্রোড়ীকৃতেঽপি মাঘসপ্তমী স্নানাদাবসাধারণসঙ্কল্পেন পুনস্তথৈব প্রাতঃস্নানাচরণং তদযুক্তং তদা সকৃৎস্নানস্যৈব বিহিতত্বাৎ। অন্যথা তৎত্র্যহফলকামনায়াং তদানন্ত্যাপত্তেরিত্যুক্তং॥*॥ স্নানে পরিপাটীমাহ কৃত্যকল্পলতায়াং বিষ্ণুঃ। সপ্তবদরপত্রাণি সপ্তার্কপত্রাণি চ শিরসি নিধায়। যদ্‌যজ্জন্মকৃতং পাপং ময়া সপ্তসু জন্মসু। তন্মে রোকঞ্চ শোকঞ্চ মাকরী হন্তু সপ্তমী॥ ইত্যুচ্চার্য্য স্নায়াদিতিশেষঃ। রোকং ছিদ্রং। তিথিকৃত্যস্য পৌর্ণমাস্যন্তমাসাঙ্গকত্বাৎ মাকরীপদং মকরার্কারব্ধচান্দ্রমাসীয়তিথিপরং। তিথিকৃত্যে চ কৃষ্ণাদিং ব্রতে শুক্লাদিমেব চ। বিবাহাদৌ চ সৌরাদিং মাসং কৃত্যে বিনির্দ্দিশেৎ॥ ইতি ব্রহ্মপুরাণামন্বন্তরাদিস্থেন তথা যুক্তত্বাচ্চ। যথা মৎস্যপুরাণে। যস্মান্মন্বন্তরাদৌ তু রথমাপুর্দ্দিবাকরাঃ। মাঘমাসস্য সপ্তম্যাং তস্মাৎ সা রথসপ্তমী॥ অরুণোদয়বেলায়াং তস্যাং স্নানং মহাফলং। অতএব নারসিংহে রথ্যাখ্যায়ামিত্যুক্তং। যথা। মহানবম্যাং দ্বাদশ্যাং ভরণ্যামপি চৈব হি। তথাক্ষয়তৃতীয়ায়াং শিষ্যান্নাধ্যাপয়েদ্বুধঃ॥ মাঘমাসে তু সপ্তম্যাং রথ্যাখ্যায়াস্তু বর্জ্জয়েৎ। দ্বাদশ্যাং শয়নোত্থানদ্বাদশ্যাং। ভরণ্যাং শক্রধ্বজপাতভরণ্যামিতি কল্পতরুঃ॥ অত্র মহানবম্যাদিসাহচর্য্যাচ্চান্দ্রত্বং প্রতীয়তে। অতএব চতুর্দ্দশমন্বন্তরাদিগণনে কাপি ন রাশ্যুল্লেখঃ। যথা ভবিষ্যমৎস্যয়োঃ। অশ্বযুক্ শুক্লনবমী দ্বাদশী কার্ত্তিকী তথা। তৃতীয়া চৈত্রমাসস্য তথা ভাদ্রপদস্য চ॥ ফাল্গুনস্যাপ্যমাবাস্যা পৌষস্যৈকাদশী তথা। আষাঢ়স্যাপি দশমী তথা মাঘস্য সপ্তমী॥ শ্রাবণস্যাষ্টমী কৃষ্ণা তথাষাঢ়স্য পূর্ণিমা। কার্ত্তিকী ফাল্গুনী চৈত্রী জ্যৈষ্ঠী পঞ্চদশী সিতা॥ মন্বন্তরাদয়স্ত্বেতা দত্তস্যা-

ক্ষয়কারিকাঃ। অত্র অমাবাস্যাষ্টমীব্যতিরিক্তাঃ শুক্লাঃ পুনঃপুনস্তথাপদোপাদানাৎ। উপক্রমোপসংহারয়োঃ শুক্লত্বকীর্ত্তনাচ্চ॥ অত্র কামধেনৌ তৃতীয়া চৈব মাঘস্যেতি। কল্পতরৌ তু তৃতীয়া চৈত্রমাসস্যেতি লিখিতং। অত্র পাঠদ্বৈধে শ্রীপতিরত্নমালায়াং। অশ্বযুজি শুক্লনবমী দ্বাদশ্যূর্জ্জে মধৌ তৃতীয়া চ। ইতি পাঠাচ্চৈত্রতৃতীয়ৈব গ্রাহ্যা। শ্রীদত্তোঽপ্যেবং। মাঘসপ্তম্যাশ্চান্দ্রত্বং সৌরাগমেঽপি। অর্কপত্রৈঃ সবদরৈর্দূর্ব্বাক্ষতসচন্দনৈঃ। অষ্টাঙ্গবিধিনা চার্ঘ্যং দদ্যাদাদিত্যতুষ্টয়ে॥ মাঘেঽথ ফাল্গুনে বাপি ভবেদ্বৈ মাঘসপ্তমী। মাকরীতি চ যৎ প্রোক্তং তৎপ্রায়ো বৃত্তিদর্শনাৎ॥ অষ্টাঙ্গবিধিনা। যোঽষ্টাঙ্গমর্ঘ্যমাপূর্য্য ভানোর্ম্মূর্দ্ধ্নি নিবেদয়েৎ।তাম্রপাত্রার্ঘ্যদানেন পুণ্যং দশগুণং স্মৃতং॥ ইতি ভবিষ্যপুরাণীয়েন। আদিত্যপুরাণে। ঋক্ষরাশিবিশেষেণ যৎ কর্ম্ম বিহিতং নরৈঃ। দৈবং বাপ্যথবা পৈত্র্যং তদন্যত্রাপি দৃশ্যতে॥ *॥ অর্ঘ্যমন্ত্রস্তু। জননী সর্ব্বভূতানাং সপ্তমী সপ্তসপ্তিকে। সপ্তব্যাহৃতিকে দেবি নমস্তে রবিমণ্ডলে॥ প্রণামমন্ত্রস্তু। সপ্তসপ্তিবহপ্রীত সপ্তলোকপ্রদীপন। সপ্তম্যাং হি নমস্তভ্যং নমোঽনন্তায় বেধসে॥ সপ্তিরশ্বঃ। ইতি তিথ্যাদিতত্ত্বং॥

অরুণোপলঃ (পুং) রক্তবর্ণমণিবিশেষঃ। চুনী ইতি ভাষা। তৎপর্য্যায়ঃ। পদ্মরাগঃ ২ লোহিতকঃ ৩ লক্ষ্মীপুষ্পঃ ৪। ইতি হেমচন্দ্রঃ॥

অরুন্তুদঃ (ত্রি) মর্ম্মপীড়কঃ। তৎপর্য্যায়ঃ। মর্ম্মস্পৃক্ ২। ইত্যমরঃ॥

অরুন্ধতী (স্ত্রী) বশিষ্ঠপত্নী। তৎপর্য্যায়ঃ। অক্ষমালা ২। ইতি হেমচন্দ্রঃ॥ সা কর্দমমুনিকন্যা মহাসাধ্বী। ইতি শ্রীভাগবতং॥ আকাশে সপ্তর্ষিমধ্যে বশিষ্ঠসন্নিধৌ তস্যা উদয়ঃ। গতায়ুষস্তাং ন পশ্যন্তি। সপ্তপদীগমনানন্তরং জামাতা মন্ত্রং পাঠয়ন্ বধূং তাং দর্শয়তি চ॥

অরুন্ধতীজানিঃ (পুং) বশিষ্ঠমুনিঃ। ইতি হেমচন্দ্রঃ॥

অরুন্ধতীনাথঃ (পুং) বশিষ্ঠমুনিঃ। ইতি ত্রিকাণ্ডশেষঃ॥

অরুষ্কঃ(পুং)ভল্লাতকবৃক্ষঃ। ইতি শব্দরত্নাবলী॥

অরুষ্করং (ক্লী) ভল্লাতকফলং। ইতি হেমচন্দ্রঃ॥

অরুষ্করঃ (পুং) ভল্লাতকবৃক্ষঃ। ইতি শব্দরত্নাবলী॥ [মেদিনী॥

অরুষ্করঃ (ত্রি) ব্রণকরঃ। ক্ষতকারকঃ। ইতি

অরুহা (স্ত্রী) ভূঁধাত্রী। ভুমি আমলা ইতি খ্যাতা। ইতি রাজনির্ঘণ্টঃ॥

অরূপঃ (ত্রি) রূপশূন্যঃ। যথা। অরূপবাতাতীসারাদাবিবারুণ্যং। ইতি রক্ষিতঃ॥ কুৎসিতরূপঃ। যথা। অরূপহার্য্যং কিমতঃ পরং ভবেদিতি কালিদাসঃ॥

অরূষঃ (পুং) সর্পবিশেষঃ। ইত্যুণাদিকোষঃ॥ সূর্য্যঃ। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ॥

অরে ব্য নীচসম্বোধনং। ওরে ইতি ভাষা। ইতি হেমচন্দ্রঃ॥ অপাকৃতিঃ। অসূয়া। ইতি মেদিনী॥

অরেরে ব্য অধমসম্বোধনং। ইতি জটাধরঃ॥ সক্রোধাহ্বানং। ইতি শব্দমালা॥

অরোকঃ (ত্রি) নিষ্প্রভঃ। দীপ্তিরহিতঃ। ইত্যমরঃ॥ রোকশ্ছিদ্রন্তদ্রহিতশ্চ॥

অরোচকঃ (পুং) রোগবিশেষঃ। অরুচিরোগ ইতি ভাষা। তস্য নিদানরূপে। বাতাদিভিঃ শোকভয়াতিলোভক্রোধৈর্ম্মনোম্নাশনরূপগন্ধৈঃ। অরোচকাঃ স্যুঃ পরিহৃষ্টদন্তঃ কষায়বক্ত্রোঽস্য মতোঽনিলেন॥ কট্বম্লমুষ্ণং বিরসঞ্চ পূতি পিত্তেন বিদ্যাল্লবণঞ্চ বক্ত্রং। মাধুর্য্যপৈচ্ছিল্যগুরুত্বশৈত্যবিবদ্ধসম্বদ্ধযুতং কফেন॥ ইতি মাধবকরঃ॥ অরোচকাঃ ন ভোজনে রুচিমুৎপাদয়ন্তীত্যরোচকা ব্যাধয়ঃ পঞ্চবাতজাদিভেদৈঃ॥*॥ বাতিকস্য লক্ষণমাহ। পরিহৃষ্টদন্তঃ অম্লভক্ষণেনেব পরিহৃষ্টৌ দন্তৌ যত্র সঃ। তথা কষায়বক্ত্রঃ। কষায়রসং বক্ত্রং যত্র সঃ॥ * ॥ পৈত্তিকমাহ। কট্বম্লমুষ্ণং বিরসঞ্চ পূতি পিত্তেন বিদ্যাল্লবণঞ্চ বক্ত্রং। কট্বম্লমিত্যাদিনা বিদ্যাদিত্যন্তেন পৈত্তিকস্য লক্ষণং॥ * ॥ শ্লৈষ্মিকমাহ। লবণঞ্চ বক্ত্রং কফজলক্ষণেন পঠনীয়ঃ। যতো বিদগ্ধঃ শ্লেষ্মা লবণতাবমুপৈতি। মাধুর্য্যপৈচ্ছিল্যগুরুত্বশৈত্যস্নিগ্ধত্বদৌর্গন্ধ্যযুতং কফেন। পৈচ্ছিল্যং মুখস্যাভ্যন্তরে। স্নিগ্ধত্বং বহিঃ॥ * ॥ আগন্তুজমাহ। অরোচকে শোকভয়াতিলোভাৎ ক্রোধাদ্যহৃদ্যাশুচিগন্ধজে স্যাৎ। স্বাভাবিকং চাস্যমথারুচিশ্চ ত্রিদোষজে নৈকরসন্তবেচ্চ॥ ক্রোধাদীত্যাদিশব্দেনাহৃদ্যয়োরশনরূপয়োর্গ্রহণং। স্বাভাবিকং। অবিকৃতরসং॥ *॥ ত্রিদোষজমাহ। নৈকরসং অনেকরসমাস্যং স্যাৎ। বাতজাদিভেদনমুখে বিকৃতিমভিধায়ান্যদেশে বিকৃতিমাহ। হৃচ্ছূলপীড়নযুতং পবনেন পিত্তাৎ তৃড়্দাহচোষবহুলং সকফপ্রসেকং। শ্লেষ্মাত্মকং বহুরুজং বহুভিশ্চ বিদ্যাদ্বৈগুণ্যমোহজড়তাভিরথাপরঞ্চ॥ হৃচ্ছূলপীড়নযুতং হৃদি শূলেন পীড়নং তেন যুতং। চোষঃ পার্শ্বস্থিতাগ্নিনেব সন্তাপঃ। বহুভিস্ত্রিভির্দোষৈঃ। বহুরুজং উক্তবাতাদিরোগযুক্তং। বৈগুণ্যং মনসো ব্যাকুলত্বং। জড়তা শূন্যাঙ্গতা। অপরং আগন্তুজং। ভক্তদ্বেষাভক্তচ্ছন্দৌ চরকসুশ্রুতাভ্যামরোচকত্বেনৈব সংগৃহীতৌ॥ * ॥ বৃদ্ধভোজস্ত্বেষাং লক্ষণানি পৃথগাহ। প্রক্ষিপ্তন্তু মুখে চান্নং যত্র নাস্বাদতে নরঃ। অরোচকঃ স বিজ্ঞেয়ো ভক্তদ্বেষমতঃ শৃণু॥ আস্বাদতে অন্নস্য মিষ্টতাং ন প্রাপ্নোতি। তদন্নং মিষ্টং ন লগতি ইতি যাবৎ। চিন্তয়িত্বা তু মনসা দৃষ্ট্বা স্পৃষ্ট্বা চ ভোজনং। দ্বেষমায়াতি যো জন্তুর্ভক্তদ্বেষঃ স উচ্যতে॥ কুপিতস্য ভয়ার্ত্তস্য তথা ভক্তনিরোধতঃ। যত্র নান্নে ভবেচ্ছন্দঃ সোঽভক্তচ্ছন্দ উচ্যতে॥ * ॥ অথারোচকস্য চিকিৎসা। ভোজনাগ্রে সদা পথ্যং লবণার্দ্রকভক্ষণং। রোচনং দীপনং বহ্নের্জিহ্বাকণ্ঠবিশোধনং॥ ১॥ শৃঙ্গবেররসঞ্চাপি মধুনা সহ যোজয়েৎ। অরুচিশ্বাসকাসঘ্নং প্রতিশ্যায়কফাপহং॥ ২॥ পকাম্লিকা সিতা শীতবারিণা বস্ত্রগালিতা।

এলালবঙ্গকর্পূরমরিচৈরবধূলিতা ॥ পানকস্যাস্য গণ্ডূষং ধারয়িত্বা মুখে মুহুঃ। অরুচিং নাশয়ত্যেব পিত্তং প্রশময়েত্তথা॥ অম্লিকাপানং ॥ ৩ ॥ রাজিকা জীরকো ভৃষ্টৌ ভৃষ্টং হিঙ্গু সনাগরং। সৈন্ধবং দধি গোঃ সর্ব্বং বস্ত্রপূতং প্রকল্পয়েৎ ॥ তাবন্মাত্রং ক্ষিপেত্তত্র যথা স্যাদ্রুচিরুত্তমা। তক্রমেতদ্ভবেৎ সদ্যোরোচনং বহ্নিবর্দ্ধনং ॥ তক্রং ॥ ৪ ॥ গব্যমাবর্ত্তিতং দুগ্ধং নিবদ্ধং দধি মাহিষং। একীকৃত্য পটে ঘৃষ্টং শুভ্রশর্কর্য়া সমং॥ এলালবঙ্গকর্পূরমরিচৈশ্চ সমন্বিতং। নাম্না শিখরিণী কুর্য্যাৎ রুচিং সকলবল্লভা॥ শিখরিণী ॥৫॥ দ্বে পলে দাড়িমাদষ্টৌ খণ্ডাদ্ব্যোষং পলত্রয়ং। ত্রিসুগন্ধিপলকৈকং চূর্ণমেকত্র কারয়েৎ ॥ তচ্চূর্ণং মাত্রয়া ভুক্তমরোচকহরং পরং। দীপনং পাচনঞ্চ স্যাৎ পীনসজ্বরকাসজিৎ ॥ দাড়িমাদিচূর্ণং ॥ ৬ ॥ লবঙ্গককোলমুশীরচন্দনং নতং সনীলোৎপলকৃষ্ণজীরকং। জলং সকৃষ্ণাগুরুভৃঙ্গকেসরং কণা সবিশ্বা নলদং সহৈলয়া॥ তুষারজাতীফলরংশরোচনাসিতাভ্রভাগাঃ সকলং বিচূর্ণিতং। সুরোচনং তর্পণমগ্নিদীপনং বলপ্রদং বৃষ্যতমস্ত্রিদোষজিৎ॥ উরোবিবন্ধং তমকং গলগ্রহং সকাসহিক্কারুচিযক্ষ্মপীনসং। গ্রহণ্যতীসারমুরক্ষতং তৃষাং তথা প্রমেহান্নিখিলান্নিহন্তি হি॥ কক্কোলং ফলং সুগন্ধবিশেষঃ। নতং তগরং। জলং বালকং। ভৃঙ্গং ত্বক্। নলদমুশীরং। তুষারঃ কর্পূরঃ। লবঙ্গাদিচূর্ণং॥ ৭ ॥ ইত্যরোচকাধিকারঃ। ইতি ভাবপ্রকাশঃ॥

অর্ক ক তাপে। স্তুতৌ। ইতি কবিকল্পদ্রুমঃ॥ এককককারঃ প্রকৃতিঃ পশ্চাদ্রেফনিমিত্তকদ্বিত্বং বিভাষয়া বক্তব্যং। তেন ক অর্ক্কয়তি অর্কয়তি এবং সর্ব্বত্র। ইতি দুর্গাদাসঃ॥

অর্কঃ (পুং) সূর্য্যঃ। ইন্দ্রঃ। তাম্রং। স্ফটিকঃ। ইতি মেদিনী ॥ পণ্ডিতঃ। ইতি শব্দরত্নাবলী ॥ জ্যেষ্ঠভ্রাতা। ইতি দণ্ডাদিনাথঃ॥ লক্ষণয়া রবিবারঃ। ইতি জ্যোতিষং ॥ বৃক্ষবিশেষঃ। আকন্দ ইতি ভাষা। তৎপর্য্যায়ঃ। ক্ষীরদলঃ ২ পুচ্ছী ৩ প্রতাপঃ ৪ ক্ষীরকাণ্ডকঃ৫ বিক্ষীরঃ৬ ক্ষীরী৭ খর্জ্জুঘ্নঃ৮ শীতপুষ্পকঃ ৯ জম্ভনঃ ১০ ক্ষীরপর্ণী ১১ বিকীরণঃ ১২ সদাপুষ্পঃ ১৩ সূর্য্যাহ্বঃ ১৪ আস্ফোতকঃ১৫ তূলফলঃ১৬ শুকফলঃ ১৭। ইতি রাজনির্ঘণ্টঃ॥ বসুকঃ১৮ আস্ফোতঃ১৯ গণরূপঃ ২০ মন্দারঃ ২১ অর্কপর্ণঃ ২২। ইত্যমরঃ ॥ * ॥ অথ শ্বেতার্কপর্য্যায়ঃ। অলর্কঃ ১ রাজার্কঃ ২ প্রতাপসঃ ৩ গণরূপী ৪ ॥ * ॥ অথ রক্তার্কপর্য্যায়ঃ। বিশ্বোরঃ১ সদাপুষ্পী২ রূপিকা৩ আদিত্যপুষ্পিকা ৪ দিব্যপুষ্পিকা ৫ অর্কঃ ৬। ইতি রত্নমালা ॥ অস্য গুণাঃ। কটুত্বং। উষ্ণত্বং। অগ্নিকারিত্বং। বাতশোথব্রণার্শঃকুষ্ঠক্রিমিনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ কফদোষনাশিত্বং। তীক্ষ্ণত্বঞ্চ। অস্য ক্ষীরগুণাঃ। ক্রিমিদোষব্রণনাশিত্বং। কুষ্ঠার্শউদররোগেষু হিতকারিত্বঞ্চ। ইতি রাজবল্লভঃ॥

তস্য পর্য্যায়গুণাঃ। শ্বেতার্কো গণরূপঃ স্যান্মন্দারো বসুকোঽপি চ। শ্বেতপুষ্পঃ সদাপুষ্পঃ স বালার্কঃ প্রতাপসঃ॥ রক্তোঽপরোঽর্কনামা স্যাদর্কপর্ণো বিকীরণঃ। রক্তপুষ্পঃ শুক্লফলস্তথাস্ফোতঃ প্রকীর্ত্তিতঃ॥ অর্কদ্বয়ং সরং বাতকুষ্ঠকণ্ডুবিষব্রণান্। নিহন্তি প্লীহগুল্মার্শঃশ্লেষ্মোদরযকৃৎকৃমীন্॥ শুক্লার্ককুসুমং বৃষ্যং লঘু দীপনপাচনং। অরোচকপ্রসেকার্শঃকাসশ্বাসনিবারণং॥ রক্তার্কপুষ্পং মধুরং সতিক্তং কুষ্ঠকৃমিঘ্নং কফনাশনঞ্চ। অর্শোবিষং হন্তি চ রক্তপিত্তং সংগ্রাহি-গুল্মে শ্বযথৌ হিতং তৎ॥ ক্ষীরমর্কস্য তিক্তোষ্ণং স্নিগ্ধং সলবণং লঘু। কুষ্ঠগুল্মোদরহরং শ্রেষ্ঠমেতদ্বিরেচনং॥ ইতি ভাবপ্রকাশঃ॥ *॥ নির্যাসবিশেষঃ। আরক্ ইতি আরবী ভাষা। তস্য বিধির্যথা। দ্রব্যকল্পঃ পঞ্চধা স্যাৎ কল্কচূর্ণং রসস্তথা। তৈলমর্কঃ ক্রমাজ্জ্ঞেয়ং যথোত্তরগুণং প্রিয়ে॥ পৃথক্ দ্বন্দ্বে সন্নিপাতে সঙ্করেঽসাধ্যরোগিণি। ক্রমাদেতে প্রযোক্তব্যা অন্যথা তু বিনাশকাঃ॥ আদ্যে গুণা গুণাঃ সর্ব্বে দ্বিতীয়ঞ্চ ততো লঘু। তৃতীয়ং শীঘ্রকারি স্যাৎ চতুর্থং নাতিদোষকৃৎ॥ পঞ্চমং দোষরহিতং গুণসদ্যঃপ্রকাশকং। পঞ্চমস্য তু সামর্থ্যং স্বয়ং পঞ্চাননোঽব্রবীৎ। বর্ষাণাস্তু সহস্রাণি কথ্যতেঽহর্নিশং ময়া। সংপূর্ণো নৈব জায়েত কল্পোঽর্কস্য দশানন॥*॥ পুংবারে পুরুষর্ক্ষে চ দিবার্কো যস্তু নির্ম্মিতঃ॥ রমণীষু প্রদাতব্যো বিলোমাৎ পুংসু যোজয়েৎ॥ লোহচূর্ণং গৈরিকঞ্চ খটিকা ভৃষ্টমৃত্তিকা। মৃত্তিকাস্থিভবং চূর্ণং কাচং কীকসজং রজঃ॥ এতানি সমভাগানি সর্ব্বতুল্যা চ মৃত্তিকা। ভ্রংশনীয়া পঞ্চমূত্রৈঃ খরাশ্বমহিষোষ্ট্রবৈঃ॥ গজাজসম্ভবাভ্যাঞ্চ শটিতং তদ্বিশোষয়েৎ। যথা গন্ধবিনাশঃ স্যাৎ তথা সংমর্দয়েত্ততঃ॥ লঘুহস্তঃ কুলালোঽস্য কুর্য্যাদ্যন্ত্রং সুনির্ম্মলং। যথেষ্টাং স্থালিকাং কুর্য্যাৎ অঙ্গুলপ্রান্তসারিকাং॥ পৃথুবুধ্নোদরাকারাং দ্ব্যঙ্গুলোৎসেধবেষ্টনীং। সারিকান্তে তু পরিধিং ত্র্যঙ্গুলোৎসেধশোভিতাং॥ বিনির্মায়াথ সার্য্যন্তে যথা শিল্পবিনির্ম্মিতাং। ছিদ্রং কৃত্বা নলং দদ্যাদ্গজশুণ্ডসমং বুধঃ॥ সারিকাপরিধেরন্তস্তস্য কুর্য্যাৎ পিধানকং। অর্দ্ধনিম্বফলসমং পরিধিং তস্য চান্ততঃ॥ বেদাঙ্গুলং মস্তকোর্দ্ধং কার্য্যং তোয়স্য ধারণে। সমর্থাং তত্র নলিকাং কুর্য্যাত্তোয়বিমোচনীং॥ তস্যৈবান্তরতো লেপ্যা জীর্ণাস্থ্যাং মৃত্তিকাম্বুনা। অথবা শ্বেতকাচস্তু সর্ব্বদোষাপনুত্তয়ে॥*॥ অথ বক্ষ্যে তু জীর্ণাস্থিমৃত্তিকাকরণং প্রিয়ে। শিলাজতুস্থলে কুর্য্যাৎ দীর্ঘগর্ত্তং মনোহরং॥ নিক্ষিপেত্তত্র নানাস্থিসঞ্চয়ং দ্বিচতুষ্পদাং। সর্জ্জিক্ষারং মহাক্ষারং মৃৎক্ষারং লবণানি চ॥ গন্ধকোষ্ণজলং ক্ষেপ্যং নানামূত্রাণি তত্র বৈ। এবং কৃত্বা মাসষট্কং দদ্যাৎ পাষাণমৃত্তিকাং॥ কক্ষাস্থ্যূর্দ্ধং তদূর্দ্ধন্তু কুর্য্যাদ্বল্মীকিকাং শুভাং। ত্রিবর্ষাজ্জায়তে সর্ব্বমেকীভূতং দৃষৎসমং॥ ততো নিষ্কাশ্য তচ্চূর্ণং কৃত্বা

পাত্রাণি নির্ম্মমেৎ। প্রশস্তং ভোজনং তত্র সূচয়েদন্নদূষণং ॥ মহাবিষস্য সংযোগাত্তস্য ভঙ্গং প্রজায়তে। সূচীবিষাদিসংযোগাৎ যত্র স্ফোটা ভবন্তি চ ॥ তত্র ক্ষিপ্তং ক্ষুদ্রবিষং পাত্রং কৃষ্ণং প্রজায়তে। এবং জ্ঞাত্বা তত্র দদ্যান্ন কদাচিদ্বিষাদিকং ॥ বিষাদীনামর্কসিদ্ধ্যৈ কুর্য্যাৎ পাত্রন্তু লোহজং। স্বর্ণজং রৌপ্যজং বাপি কুর্য্যাৎ পাত্রমকল্মষং ॥ অথবা তাম্রজং কুর্য্যাদন্তর্ব্বঙ্গবিলেপিতং। পাত্রন্তু বুদ্ধা কুর্ব্বীত কষায়ো ন ভবেদ্রসঃ ॥ দ্রব্যান্তরস্য সংযোগাদর্কং তৈলঞ্চ গর্ত্ততঃ। সর্ব্বেষাং নিঃসরত্যেব পাষাণস্যাপি কিং পুনঃ ॥ অনগ্ন্যর্কস্তথা তৈলং গন্ধতালাদিসম্ভবং। বেধকং সর্ব্বধাতূনাং দেহস্যাপি চ সিদ্ধিদং ॥ যস্তৈলকরণে দক্ষশ্চার্কনিঃসারণে ক্ষমঃ। তত্তৎসেবাকরো নিত্যং স রোগৈর্নৈব বাধ্যতে ॥ * ॥ কুৎসিতার্কস্তু যামেন দ্বিযামাভ্যাস্তু মধ্যমঃ। ত্রিভির্যামৈর্ভবেচ্ছ্রেষ্ঠঃ স এবার্কস্তু সিদ্ধিদঃ ॥ দ্রব্যাদধিকসৌগন্ধ্যং যস্মিন্নর্কে প্রদৃশ্যতে। জীর্ণাস্থিপাত্রসম্ভিন্নো দ্রব্যবর্ণঃ প্রদৃশ্যতে ॥ শঙ্খকুন্দেন্দুধবলোঽন্যথা পাত্রান্তরে স্থিতঃ। জিহ্বোপরিগতঃ স্বাদং দদ্যাদ্দ্রব্যভবস্তু যঃ ॥ তমেবার্কং বিজানীয়াদন্যজ্জ্ঞেয়ং রসাদিবৎ। কৃত্বা সুগন্ধং দুর্গন্ধমর্কং পুষ্পাদিভিঃ সুধীঃ ॥ গুণার্থং পশ্চাৎ সেবেত হ্যন্যথাপগুণো ভবেৎ। দুর্গন্ধং ভক্ষয়েদর্কং যদি মোহাৎ কথঞ্চন ॥ তদাস্য জায়তে গ্লানির্ব্বান্তিরালস্যকং তৃষা। তদ্দোষস্য বিনাশায় কুর্য্যাদ্বান্তিমতন্দ্রিতঃ ॥ দ্বীপোদ্গমপ্রসূনানাং পিবেদর্কপলং জনঃ। চম্পেল্যর্কপলং বাপি শীতার্ত্তো মালতীভবং ॥ * ॥ অর্কনিষ্কাশনার্থায় ক্রমাজ্জ্ঞেয়াঃ ষড়গ্নয়ঃ। ধূমাগ্নিশ্চৈব দীপাগ্নির্ম্মন্দাগ্নির্ম্মধ্যমস্তথা ॥ খরাগ্নিশ্চ ভড়াগ্নিশ্চ তেষাং বক্ষ্যামি লক্ষণং বিস্তালো যো ধূমশিখো ধূমাগ্নিঃ স উদাহৃতঃ ॥ সসারমতিশুষ্কং যৎ মুষ্টিমধ্যে সমেষ্যতি। তৎকাষ্ঠং কাষ্ঠমিত্যাহুঃ খদিরাদিসমুদ্ভবং ॥ দ্বাভ্যাং তস্য চতুর্থাভ্যাং যোঽগ্নির্দীপাগ্নিরুচ্যতে। চতুরংশেন তেনৈব মন্দাগ্নিঃ পরিকীর্ত্তিতঃ ॥ অর্দ্ধীকৃতাভ্যাং দ্বাভ্যাস্তু মধ্যমাগ্নিরুদাহৃতঃ। অর্দ্ধৈস্তৈঃ পঞ্চভিঃ প্রোক্তঃ খরাগ্নিঃ সর্ব্বকর্ম্মসু ॥ মস্তকাবধিপাত্রস্য চতুর্দ্দিক্ষু ক্রমেণ চ। প্রসরন্তি যদা জ্বালাঃ স ভড়াগ্নিরুদীরিতঃ ॥ সার্দ্ধযামঞ্চ যামঞ্চ যামমেকং মুহূর্ত্তকং। মুহূর্ত্তমাত্রমিত্যেবমর্কার্থং বহ্নয়ঃ স্মৃতাঃ ॥ * ॥ জীর্ণাস্থিপাত্রে গৃহ্লীয়াদর্কং বা কাচসম্ভবে। পাষাণসম্ভবে পাত্রে কাংস্যজেঽথ হিমস্থলে ॥ পিবেদর্কমনির্ব্বাপং পীত্বা তাম্বুলভক্ষণং। কুর্য্যাদমুক্তাম্বুলে লবঙ্গং ভক্ষয়েত্ততঃ ॥ মর্দ্দনাদিষু সর্ব্বত্র দ্রব্যতৈলং প্রযোজয়েৎ। অর্ক এব প্রযোক্তব্যো ভক্ষণে ন তু মর্দ্দনে ॥ যে যে দ্রব্যগুণাঃ প্রোক্তাঃ সর্ব্বে তেঽর্কসমাশ্রিতাঃ। সেবেতার্কং প্রিয়ে তস্মাদ্রাজা পরমধার্ম্মিকঃ ॥ স্বস্মেঽপি বা রোগিণে বা যাচ্যতেঽর্কস্তু যেন বা। জ্ঞাত্বা তল্লক্ষণং দদ্যাদন্যথা ব্রহ্মহা ভবেৎ ॥*॥ বর্ণস্বরাণাং প্রমিতিং দূতোক্তস্য তু কারয়েৎ। শকৈ-

ঘুর্ত্বা বিগুণিতা ত্রিভির্ভাগং সমাহরেৎ ॥ একশেষে গুণাঃ শীঘ্রং দ্বিশেষে বর্দ্ধতে গদঃ। ত্রিশেষে মরণং বাচ্যং স্বার্থং বাচয়তে যদি ॥ অর্কং তদৈতৎ বিজ্ঞায় দদ্যাদর্কং ন চান্যথা। গদিনা তু যদা দূতঃ প্রেষিতশ্চেদ্বিচার্য্যতে ॥ নপুংসকান্ত্যে রূণান্তু স্বরা একাদশ প্রিয়ে। বর্ণাস্তৎসঙ্খ্যকা লেখ্যাঃ কঠবাদ্যাশ্চ তত্তলে ॥ একাদশসু কোষ্ঠেষু ক্রমাদঙ্কান্ প্রবিন্যসেৎ। রসাস্ত্রয়ো দ্বয়ং বেদাঃ পর্ব্বতা ঋতবঃ কৃতাঃ ॥ বহ্নয়ঃ পৃথিবী শূন্যং চন্দ্রমা ইতি চ ক্রমাৎ। বিহায় জীবং দূতস্য নামাঙ্কাক্ষরযোজনং ॥ এবমেবাতুরে কৃত্বা দ্বয়োরষ্টাবশেষিতং। কৃত্বাঙ্কযোগং গদিনোঽধিকে শেষে শুভং ভবেৎ ॥ সমশেষে দীর্ঘরোগঃ ন্যূনশেষে চ তন্মৃতিঃ। এতদ্বিচার্য্য দাতব্যমন্যদপ্যৌষধং বুধৈঃ ॥ চক্রদ্বয়স্তু যোঽজ্ঞাত্বা দদ্যাদর্কং বিমোহিতঃ। জায়তে ত্বযশস্তস্য যথা মম মৃতে সতি ॥ ইতি শ্রীলঙ্কানাথকৃতার্কচিকিৎসায়াং যন্ত্রবিধিশতকং প্রথমং ॥*॥

অথাতঃ সংপ্রবক্ষ্যামি নির্গমোঽর্কস্য ভামিনি। পঞ্চপ্রকারদ্রব্যস্য কুর্য্যান্নিষ্কাশনং ভিষক্ ॥ অত্যন্তকঠিনং চাদ্যং কঠিনঞ্চ দ্বিতীয়কং। আর্দ্রং তৃতীয়মুদ্দিষ্টং চতুর্থং বুদ্বুলং ভবেৎ ॥ পঞ্চমঞ্চ দ্রবদ্রব্যং তেষাং বিধিরথোচ্যতে ॥ * ॥ রসবচ্চূর্ণয়েৎ দ্রব্যমত্যন্তকঠিনন্তু যৎ ॥ দ্বিগুণে নিক্ষিপেত্তোয়ে ছায়ায়াং স্থাপয়েচ্চ তৎ। যাবচ্ছুষ্কং ভবেত্তোয়ং দ্রব্যঞ্চ শিথিলং যথা ॥ ততঃ পুনঃ ক্ষিপেত্তোয়ং পূর্ব্বদ্রব্যসমং ভিষক্। কৃত্বাষ্টপ্রহরং তত্তু সূর্য্যচন্দ্রকরৈরলং ॥ সংপূজ্য গণপতিং সূর্য্যং ভৈরবং কুলদেবতাং। নিঃক্ষিপেদর্কযন্ত্রে তৎ ক্ষিপ্ত্বাস্যার্কং সমাহরেৎ ॥ বর্ষাধিকন্তু যৎ দ্রব্যমত্যন্তকঠিনন্তু তৎ। চন্দনাদীনি সর্ব্বাণি অত্যন্তকঠিনানি চ॥ কীটৈর্ভুক্তং ঘুণৈর্ভুক্তং যচ্চ গন্ধবিবর্জ্জিতং। রহিতং স্বরসেনাপি নার্ককর্ম্মণি যোজয়েৎ ॥ যথার্কে সংস্থিতং দ্রব্যং কুর্য্যাস্তোক্তস্তথা বপুঃ। অর্কে তরুণভৈষজ্যং তস্মাৎ সংযোজয়েৎ প্রিয়ে ॥*॥

যবান্যজাজীত্রিকটুভূনিম্বাদিকমৌষধং। জ্ঞেয়ং তৎ কঠিনং দ্রব্যং তদর্কস্য বিধিং শৃণু ॥ দ্বিগুণং নিঃক্ষিপেত্তোয়ং দ্রব্যে তু কঠিনে মতে। অষ্টপ্রহরিকং তচ্চ কুর্য্যাৎ পর্য্যায়মেককং ॥ রক্ষেৎ দ্রব্যং দ্বিগুণিতং দৃষ্ট্বা দেশে তু কৌতুকং। পশ্চাৎ দত্ত্বার্কযন্ত্রে তৎ অর্কং নিষ্কাশয়েচ্ছনৈঃ ॥ * ॥

আর্দ্রদ্রব্যং দ্বিধা প্রোক্তং সরসং নীরসং তথা। সতুষং গুপ্তরসকং দ্বিধা নীরসমুচ্যতে ॥ বাস্তুকং সার্ষপং শাকং নির্গুণ্ড্যেরণ্ডমার্ষকং। ধত্তূরাদ্যমিদং সর্ব্বমার্দ্রং সরসমুচ্যতে ॥ এষাং নালান্ চূর্ণয়িত্বা বিংশাংশং নিঃক্ষিপেজ্জলং। মুহূর্ত্তমুষ্ণে সংস্থাপ্য গ্রাহ্যোঽর্কো বিবুধোত্তমৈঃ ॥ পত্রাণান্তু শতাংশেন তুল্যতোয়েন সেচয়েৎ। দদ্যাৎ ঘটীমর্ককরাং ততোঽর্কং কলয়েচ্ছনৈঃ॥ বটাশ্বত্থকক্ষীরাদ্যমার্দ্রদ্রব্যন্তু নীরসং। বিংশাংশং নিঃক্ষিপেত্তোয়ং জলং ঘর্ম্মে চ ধারয়েৎ ॥ ততো নিষ্কাশয়েদর্কং ক্রমবৃদ্ধ্যাগ্নিনোক্তবৎ। সতুষন্তু

দ্বিধা প্রোক্তং মৃদু তীক্ষ্ণমিতি ক্রমাৎ ॥ সাতলাবজ্রসেহুণ্ডসৌরিণ্যাদ্যাস্তু তীক্ষ্ণকাঃ। খণ্ডানি তেষাং কৃত্বাথ নিঃক্ষিপেৎ পুষ্কলে জলে ॥ দিনত্রয়ঞ্চ নিষ্কাশ্য তোয়াদীষচ্চ কুট্টয়েৎ। তদা ন দৃশ্যতে দুগ্ধং দদ্যাত্তোয়ং রদাংশকং ॥ নিষ্কাশয়েচ্ছনৈরর্কং স তু তীক্ষ্ণার্কসংজ্ঞিকঃ। ছুঞ্চিকার্কক্ষীরিণ্যাদ্যা মৃদুদুগ্ধাঃ প্রকীর্ত্তিতাঃ ॥ জলে চতুর্গুণে দদ্যাত্তান্ ঘর্ম্মে বিনিবেশয়েৎ। যাবজ্জল-স্যোষ্ণতা স্যাৎ ততো যন্ত্রে বিনিঃক্ষিপেৎ ॥ আদাবীষচ্চূর্ণয়িত্বা ষষ্ঠাংশজলসংযুতং। এবং দ্রব্যং লক্ষয়িত্বা স্বযুক্ত্যার্কং বিনি-র্হরেৎ ॥ খণ্ডীকৃত্বা চ আমানাং ফলানাং মৃদুকায়িনাং। সরসানাঞ্চ গৃহ্নীয়াদর্কং তোয়েন বর্জ্জিতং ॥ * ॥ কাঠোড়ুম্বরিকা-দীনাং আমানাং দার্ঢ্যভাগিনাং। কৃত্বা স্বল্পানি খণ্ডানি অশীত্যংশং প্রদাপয়েৎ ॥ পৃথক্ পৃথক্ চ তুবরীং সর্জ্জিক্ষারঞ্চ সৈন্ধবং। দত্ত্বা বিমর্দয়েৎ সর্ব্বং চত্বারিংশাংশকং জলং ॥ ক্ষিপ্ত্বা তৎকলসং ঘর্ম্মে যামার্দ্ধে-নোষ্ণতা ভবেৎ। ততো যন্ত্রে তু তদ্দত্ত্বা গৃহ্নীয়াদর্কমুত্তমং ॥ অতিপক্কফলানাস্তু বীর্য্যতশ্চার্কমাহরেৎ। পুষ্পার্কার্থং ষোড়-শাংশং জলং পুষ্পেষু দাপয়েৎ ॥ বহুবার-ফলাদীনি চিল্লিকাদীনি যানি চ। ক্ষেপ্যা-ণ্যুষ্ণোদকে তানি বুদ্বুদস্যস্য শান্তয়ে ॥ ততশ্চত্বারিংশদংশং জলং দত্ত্বা সমা-হরেৎ। তেষামর্কমথ দ্রাবদ্রব্যার্কো-পায় উচ্যতে ॥ দ্রবদ্রব্যোৎক্ষেপশান্ত্যৈ প্রোচ্যতে বাপকল্পনা ॥ * ॥ পিধানানি

বিচিত্রাণি তেষামন্তো ন বিদ্যতে ॥ শতপত্র-প্রসূনৈর্ব্বা জাত্যুথৈর্ম্মালতীভবৈঃ। গুলাব-পারিজাতৈশ্চ কেতকীজৈঃ সমাচরেৎ ॥ দুগ্ধে দধ্নি রসে তক্রে ক্ষৌদ্রে তৈলে চ সর্পিষি। মূত্রাদৌ দেহতোয়ে চ চম্বেল্যাদি-পিধানকং ॥ * ॥ কান্তপাষাণসম্বন্ধ কৃতং যন্ত্রমনুত্তমং। নিষ্কাশয়েৎ সর্ব্বথার্কং দ্রব-দ্রব্যস্য নান্যথা ॥ অথবা তুত্থকং দ্রব্যং দগ্ধন্তু নবনীতকং। বর্বরল্লী জলস্যোক্তা মধু-চ্ছিষ্টন্তু সর্পিষঃ। গোকণ্ঠকস্তু দুগ্ধস্য তথা মদ্যস্য কিণ্বকং। তৈলস্য তস্য পিণ্যাকং সর্ব্বং ঘৃতসমন্বিতং ॥ যন্ত্রে দত্ত্বা দ্রবদ্রব্যং যথাস্থালীনিবেশনং। তথা স্থলং স্থাপয়িত্বা দ্রবৈর্যন্ত্রং প্রপূরয়েৎ ॥ আচ্ছাদ্যং সারকৈঃ পূর্ণং স্থালীং দদ্যাদধোমুখীং। তথা চাক-র্ষিতঃ সর্ব্বো দ্রবঃ ফেনং পরিত্যজেৎ ॥*॥ দুর্গন্ধির্যো ভবেদর্কস্তং কুর্য্যাৎ শুচিগন্ধকং। সর্ব্বেষামেব মাংসানাং দুর্গন্ধানাঞ্চ সর্ব্বশঃ॥ ঘৃতাভ্যক্তা হিঙ্গুজীরমেথিকা রাজিকা কৃতা। নবীনায়াং হণ্ডিকায়াং দদ্যাৎ দ্রব্যং পুনঃ পুনঃ ॥ তত্র দদ্যাত্তদর্কন্তু যথা দুর্গন্ধ-তাং ব্রজেৎ। তথা পুনঃ পুনঃ কার্য্যং জায়তে গন্ধবারণং ॥ আয়াতি রোচকো গন্ধো ভবেত্তন্বহ্নিদীপনং ॥ * ॥ সর্ব্বেষর্ক-প্রয়োগেষু গন্ধপাষাণবাসনা ॥ অর্কাণাস্তু প্রদাতব্যা তে ভবন্ত্যর্কসম্ভবাঃ। সর্ব্বত্র বাতরোগেষু মহিষাক্ষাদিবাসনা। মহিষাক্ষ-স্তথা রালং নির্যাসঃ সর্জ্জকস্য চ। কৃষ্ণা-গুরুঃ কদম্বঞ্চ মহিষাক্ষাদিপঞ্চকং ॥ সর্ব্বেষু পিত্তরোগেষু চন্দনাদিকবাসনা। সর্ব্বেষু

কফরোগেষু জটামাংস্যাদিবাসনং ॥ চন্দনঞ্চ তথোশীরং কর্পূরো গন্ধবাকুচী। এলা-কর্চুরগোহ্লুলাঃ সপ্তৈতে চন্দনাদয়ঃ ॥ জটা-মাংসী নখং পত্রী লবঙ্গং তগরং রসঃ। শিলায়া গন্ধপাষাণঃ সপ্ত মাংস্যাদিকা অমী ॥ বাসয়েদ্বা দশাঙ্গেন ত্রিদোষাপ্তেন চার্ককং। নশ্যন্তি যস্য ধূপেন অবগ্রহ-পিশাচকাঃ ॥ পঞ্চাশদগন্ধপাষাণাৎ তাব-ন্মহিষগুগ্গুলুঃ। চতুরংশং চন্দনঞ্চ জটা-মাংসী চ তাবতী ॥ ত্রিভাগঃ সর্জ্জকঃ সার-স্তাবদেব হি রালকং। উশীরং তু দ্বিভাগং স্যাৎ ঘৃতভৃষ্টং নখং সমং ॥ কর্পূরো মৃগ-নাভিশ্চ একভাগৌ প্রকীর্ত্তিতৌ। এষ দশাঙ্গধূপস্তু রুদ্রস্যাপি মনো হরেৎ ॥*॥ পলাণ্ডুলশুনাদীনাং নির্গন্ধীকরণং শৃণু। উৎপাদ্যান্তর্ব্বিষং সম্যক্ তক্রমধ্যে বিনিঃ-ক্ষিপেৎ ॥ পর্য্যায়মেকমত্যম্লমধ্যেঽস্মিন্ বিরসে সতি। দদ্যান্নিষ্কাশ্যান্যতক্রং কুর্য্যা-ত্তচ্চাষ্টমাংশকং ॥ দ্রোণপুষ্পীরসেঽপ্যেবং মূর্ব্বাপত্ররসেঽপি বা। ত্রিপর্য্যায়োত্তরং তত্তু রসোনং ক্ষালয়েৎ সুধীঃ ॥ হরিদ্রা-রাজিকাতোয়ে স্থাপ্যং পর্য্যায়মেককং। উষ্ণোদকেন সংক্ষাল্য পর্য্যায়ং বাসয়ে-ত্ততঃ॥ সহস্রপত্রীপুষ্পৈর্ব্বা অভাবে পল্লবৈ-রপি। আলোড়য়েদ্দশাংশেন পঞ্চাংশেন চ মস্তুনা ॥ যুক্তং কৃত্বা যামমাত্রং স্থাপয়েৎ প্রকটাতপে। ততো নিষ্কাশয়েদর্কং জাত্যাদিকপিধানিতং ॥ অস্যার্কস্য সুগ-ন্ধেন একদা মোহিতো হরঃ। কো জানাতি রসোনস্য হ্যর্কোঽয়মিতি ভূতলে ॥ একতঃ সর্ব্ব এবার্কা মাংসার্কস্তু তথৈকতঃ। ময়া স্বর্গে গৃহীতস্তু প্রাপ্তং তত্র চ নামৃতং ॥ তদা প্রোক্তং শিবস্যাগ্রে মম ধিগ্-জীবিতং প্রভো। নীতা বাথ প্রভুক্তা বা সুধা দেবৈর্ময়া শ্রুতং ॥ ন দৃষ্টা তত্র দেবেশ শিরশ্ছেদং করোম্যহং। ততঃ প্রসন্নো গিরিশো বাক্যং মাং প্রতি সো-ঽব্রবীৎ ॥ দত্তং ময়া সমস্তং তে দেবাবধ্যত্ব-মেব চ। কিন্তে কার্য্যন্তু সুধয়া সুধাতোঽধিক-রোচনং ॥*॥ সংপ্রবক্ষ্যামি মাংসার্কং মদ্য-স্যার্কং তথৈব চ। দ্রব্যাণাং বিজয়াদীনাং লভ্যতে যৈঃ সুখং মহৎ॥ মাংসস্তু ত্রিবিধং জ্ঞেয়ং মৃদুলং কঠিনং ঘনং। তেষামর্কং যথা প্রোক্তং যন্ত্রান্নিষ্কাশয়েচ্ছনৈঃ ॥ মৃদুলং যস্তবেন্মাংসং চত্বারিংশাংশকং পটুঃ। স্থূলখণ্ডীকৃতে তস্মিন্ দত্ত্বা তৎ ক্ষালয়েচ্ছনৈঃ॥ ষষ্ট্যংশেনাষ্টগন্ধেন তদ্বি-লোড্য চ নিঃক্ষিপেৎ। রসমিক্ষোরষ্ট-মাংশং তদভাবে পয়ঃ ক্ষিপেৎ ॥ জাতী-পত্রং লবঙ্গঞ্চ ত্বগেলা নাগকেশরং। মরিচং মৃগনাভিশ্চ বিত্তুর্গন্ধাষ্টকং স্বিদং ॥ কার্য্যং পুষ্পপিধানাদ্যমর্কং নিষ্কাশয়েত্ততঃ। জায়তেঽসৌ মহাস্বাদুঃ সুধাসমরসঃ প্রিয়ে ॥ দৃঢ়মাংসস্য খণ্ডানি লঘূন্যেব প্রকল্পয়েৎ। দদ্যাচ্চ তুবরীং তত্র লবঙ্গং প্রোক্তয়া দিশা ॥ ক্ষালয়েদারনালেন ত্রিবারং কোষ্ণ-বারিণা। ক্ষালয়েৎ সপ্তবারাণি হরেদর্কস্তু পূর্ব্ববৎ ॥ দৃঢ়মাংসস্য খণ্ডানি কুর্য্যাদতি লঘূনি চ। আলোড্য শঙ্খদ্রাবেণ ক্ষালয়েৎ পয়সা পুনঃ ॥ সপ্তবারাণি লবণং চয়েৎ

পূর্ব্ববদেব হি। তদ্দত্ত্বা যন্ত্রমধ্যে তু হরেৎ পূর্ব্ববদর্ককং॥ সর্জ্জিক্ষারং যবক্ষারং শ্বেতক্ষারঞ্চ টঙ্কণং। সৌভাগ্যক্ষারকং সৌরক্ষারং শঙ্খভবং তথা॥ অর্কসেহুণ্ড-পালাশক্ষারঞ্চ তুবরী তথা। অপামার্গভবং ক্ষারং তথাষ্টৌ লবণানি চ॥ লবণাষ্টক-মেতচ্চ সৈন্ধবঞ্চ সুবর্চ্চলং। বিড়ং সমুদ্র-সংজাতং ঔদ্ভিদং রোমকং গড়ং॥ কৃত্বা সর্ব্বাণি চৈকত্র নিম্বুনীরেণ ভাবয়েৎ। একবিংশতিবারাণি কাচকূপ্যাং বিনিঃ-ক্ষিপেৎ॥ নখাংশনিম্বুরসকৈঃ সর্ব্বমার্দ্রী-কৃতঞ্চ তৎ। অধঃসচ্ছিদ্রপীঠরীং মধ্যে কূপ্যাং নিবেশয়েৎ॥ মৃৎকর্পটসমাযুক্তাং সহেদগ্নিং যথাবিধি। তস্যাগ্রে কূপিকা যোজ্যা দীর্ঘকণ্ঠা মনোহরা॥ সা কূপিকা তলে স্থাপ্যা মেলয়েচ্চ দ্বয়োর্ম্মুখং। জল-মুষ্কং যথা ন স্যাৎ তথা চাপরকূপিকা॥ অগ্নয়ঃ ক্রমতো দেয়া যামং যামঞ্চ পঞ্চ চ। অনেনৈব প্রকারেণ ক্ষারার্কাণাং সমুদ্-ভবঃ॥ দদ্যাদস্থীনি মাংসানি শঙ্খশুক্ত্যাদি-কান্যপি। সর্ব্বাণ্যপি বিলীয়ন্তে শঙ্খদ্রাবে ন সংশয়ঃ॥ * ॥ পারাবতাজচটকশশ-শূকরটিট্টিভাঃ। ক্ষুদ্রমৎস্যাদিকাঃ সর্ব্বে মাংসেষু মৃদুলাঃ স্মৃতাঃ॥ মৃগরোহিত-কাদ্যাশ্চ মৎস্যাঃ শল্লকিসম্বরাঃ। এতে কঠিনমাংসাঃ স্যুঃ পক্ষিণো জলচারিণঃ॥ গজকুম্ভীরঘণ্টাদ্যাঃ সুগন্ধা বর্করাদয়ঃ। গোধা গোহশ্বা লুলাপাদ্যাঃ ঘনমাংসাঃ প্রকীর্ত্তিতাঃ॥ * ॥ অন্নাদিসম্ভবো যোঽর্ক-স্তন্মদ্যং পরিকীর্ত্তিতং। তস্য ভেদান্ প্রব-

ক্ষ্যামি শটিতং তৎ সমুদ্ধরেৎ। তদ্বাসনা-নিবৃত্ত্যর্থমষ্টগন্ধং প্রযোজয়েৎ। পূর্ব্বোক্তৈ-র্ধূপয়েদ্ধূপৈর্জ্জায়তে গন্ধবর্জ্জিতং॥ অর্দ্ধং তত্র জলং দেয়ং সিদ্ধে দেয়োঽষ্টগন্ধকঃ। তুষোদকৈর্যবৈরামৈঃ সতুষৈঃ সকলী-কৃতৈঃ॥ সৌবীরস্তু যবৈরামৈঃ সতুষৈঃ সকলীকৃতৈঃ। গোধূমৈরপি সৌবীরং জায়তে স্বল্পমাদকং॥ আরনালস্তু গোধূমৈ-রামৈঃ স্যান্নিস্তুষীকৃতৈঃ। ধান্যাম্লং শালি-চূর্ণাদিকোদ্রবাদিকৃতং ভবেৎ॥ শণ্ডাকী-রাজিকাযুক্তৈঃ স্যান্মূলকদলদ্রবৈঃ। সর্ষপ-স্বরসৈর্ব্বাপি শালিপিষ্টকসংযুতৈঃ॥ কন্দ-মূলফলাদীংশ্চ সস্নেহলবণানি চ। একী-কৃত্বা কৃতোঽর্কো যস্তৎসূক্তমভিধীয়তে॥ পক্বৌষধাম্বুসংসিদ্ধো যোঽর্কস্তৎ স্যাদ-রিষ্টকং। অরিষ্টলঘুপাকেন সর্ব্বতশ্চ গুণাধিকং॥ শালিপিষ্টকপিষ্টাদিকৃতো যোঽর্কঃ সুরা তু সা। পুনর্নবাশিবাপিষ্টৈ-র্বিহিতা বাহনী স্মৃতা॥ ইক্ষোঃ পক্বৈ রসৈঃ সিদ্ধঃ সীধুঃ পক্বরসস্য সঃ। আমৈ-স্তৈরেব যঃ সিদ্ধঃ স চ শীতরসঃ স্মৃতঃ॥ পর্য্যায়া বাগ্‌ভবেন্মদ্যং তামস্যং রাক্ষস-প্রিয়ং। মণ্ডলাবাগ্রাজসস্তু তদূর্দ্ধং সাত্ত্বিকং ভবেৎ॥ সাত্ত্বিকে গীতহাস্যাদি রাজসে সাহসাদিকং। তামসে নিন্দ্যকর্ম্মাণি নিদ্রাঞ্চ মদিরা চরেৎ॥ ভঙ্গ্যাদিমত্ত-দ্রব্যাণাং যবানীপাদযোগতঃ। অর্কং নিষ্কাশয়েদ্ধীমান্ বোধকঃ স্যান্মদস্য সঃ॥ ধুস্তূরাদিকবীজানি তক্রং পয়সি নিঃক্ষি-পেৎ। কণ্ঠশোষবিবন্ধাদিরহিতোঽর্কো

ভবেৎ স হি ॥ ইতি শ্রীলক্ষানাথকৃতার্কচিকিৎসায়াং যন্ত্রশতকং দ্বিতীয়ং ॥ * ॥ অথাতঃ সংপ্রবক্ষ্যামি কেবলার্কগুণান্ প্রিয়ে। হরীতক্যাঃ শূলকৃচ্ছ্রকামলানাহনাশনঃ ॥ বিভীতকস্য তৃট্‌ছর্দ্দিকফকাসবিনাশনঃ। আমলস্য ত্রিদোষাস্রপিত্তমেহান্ বিনাশয়েৎ॥ পিপ্পল্যাঃ শ্বাসকাসামবাতার্শোজ্বরশূলহৃৎ। মরীচস্য কৃমীন্ শ্বাসং হরেৎ সর্ব্বান্ গদানপি ॥ গ্রন্থিকস্য প্লীহগুল্মকফবাতোদরাপহঃ। চব্যার্কোঽত্যন্তরুচিকৃৎ বিশেষাদ্‌গুদজাপহঃ ॥ অর্কস্তু গজপিপ্পল্যা বাতশ্লেষ্মাগ্নিমান্দ্যনুৎ। চিত্রকস্যাগ্নিকৃৎ কাসগ্রহণীকৃমিশোথহা ॥ যবান্যাঃ পাচনো রুচ্যো দীপনঃ শুক্রশূলহৃৎ। অজমোদোদ্ভবো বাতকফহা বস্তিশোধনঃ ॥ পারসীকযবান্যাস্তু গ্রাহী পাচনমাদনঃ। জীরকস্য তু সংগ্রাহী গর্ভাশয়বিশুদ্ধিকৃৎ॥ কৃষ্ণজীরস্য চক্ষুষ্যো গুল্মচ্ছর্দ্যতিসারজিৎ। কারব্যা বলকৃৎ হ্যর্কো জ্বরঘ্নঃ পাচনঃ সরঃ॥ ধান্যার্কস্য তৃষাদাহবমিশ্বাসত্রিদোষহৃৎ। শোথজ্বরানিলশ্লেষ্মব্রণশূলাক্ষিরোগহৃৎ॥ মিশ্রেয়ায়া বহ্নিমান্দ্যযোনিশূলকৃমীন্ হরেৎ। জ্বালামরীচকস্যাপস্মারভূতত্রিদোষহৃৎ ॥ মেথিকায়াঃ শ্লেষ্মবাতজ্বরামককনাশনঃ। বনমেথ্যাঃ সর্ব্বরোগান্ হরেৎ কুঞ্জরবাজিনাং॥ চন্দ্রশূরস্য হিক্কাসৃগ্‌বাতহৃৎ পুষ্টিবর্দ্ধনঃ। হিঙ্গুনঃ পাচনো রুচ্যঃ কৃমিশূলোদরাপহঃ ॥ বচায়া বহ্নিবমিকৃৎ বিবন্ধাধ্মানশূলহৃৎ। পারসীকবচায়াস্তু ভূতোন্মাদবলং হরেৎ ॥ কুলিঞ্জনস্য স্বরকৃৎ হৃৎকণ্ঠমুখশোধনঃ।স্থূলগ্রন্থিভবশ্চার্কো বিশেষাৎ কফকাসনুৎ ॥ দ্বীপান্তরবচায়াস্তু হরেচ্ছূলং ফিরঙ্গকং। হপুষায়া হরেৎ প্লীহং বিষং মোহঞ্চ দারুণং ॥ হপুষায়াঃ সমীরার্শোগ্রহণীগুল্মশূলহৃৎ। বিড়ঙ্গস্যোদরশ্লেষ্মকৃমিবাতবিবন্ধনুৎ ॥ তুম্বুরোর্গুরুতাশ্বাসকাসপ্লীহকৃমীন্ হরেৎ। বংশরোচনজস্তৃষ্ণাক্ষয়কাসজ্বরান্ হরেৎ ॥ সমুদ্রফেনজঃ শীতো লেখনঃ কফহৃৎ সরঃ। জীরকোত্থঃ শুক্রকফবলকৃচ্ছীতলঃ সমঃ ॥ আর্ষভঃ পিত্তদাহাস্রকাসবাতক্ষয়াপহঃ। মহামেদোদ্ভবোঽর্কস্তু বৃষ্যস্তন্যঃ কফাবহঃ ॥ মহামেদোদ্ভবঃ শীতো রক্তপিত্তজ্বরপ্রণুৎ। কাকোল্যাঃ শুক্রলঃ শীতঃ পিত্তশোষজ্বরাপহঃ ॥ ক্ষীরকাকোলিকাজাতো বৃংহণো দাহবাতহা। ঋদ্ধ্যা বল্যস্ত্রিদোষঘ্নো রক্তপিত্তবিনাশনঃ। বৃদ্ধ্যা গর্ভপ্রদঃ শীতঃ ক্ষতকাসক্ষয়াপহঃ ॥ মধুযষ্ট্যাঃ কেশকরঃ স্বর্য্যঃ পিত্তানিলাস্রজিৎ। জলযষ্ট্যা বিষচ্ছর্দ্দিতৃষ্ণাগ্লানিক্ষয়াপহঃ ॥ কম্পিল্লস্য বিরেকী স্যাৎ মেহানাহবিকারনুৎ। আরগ্বধস্য পিত্তামবাতোদাবর্ত্তশূলহৃৎ ॥ কট্‌ব্যা মেহশ্বাসকাসকৃমিকুষ্ঠজ্বরাপহঃ। ভূনিম্বস্য তৃষাকুষ্ঠজ্বরব্রণকৃমিপ্রণুৎ ॥ ভদ্রায়া বস্তপিত্তাস্রকৃমিবীসর্পকুষ্ঠনুৎ ॥ মদনোত্থঃ ছর্দ্দনেন চাতুর্থজ্বরকাদিহৃৎ ॥ রাস্নোদ্ভবঃ সমীরাস্রবাতশূলোদরাপহঃ। নাগভিন্নোদ্ভবো ভোগিলূতাদ্যাখুবিকারহৃৎ ॥ মাচিকাজস্তু পিত্তাস্রপকাতীসারহা

লঘুঃ। তেজস্বিন্যাঃ শ্বাসকাসকফহৃদ্বহ্নিদীপনঃ॥ জ্যোতিষ্মত্যা বান্তিকরো বহ্নিবুদ্ধিস্মৃতিপ্রদঃ। কুষ্ঠস্য হন্তি বাতাস্রকাসকুষ্ঠমহৎকফান্॥ পৌষ্করস্যারুচিশ্বাসান্ বিশেষাৎ পার্শ্বশূলনুৎ। হেমাহ্বায়া রেকবান্তিকরঃ কণ্ডুবিনাশনঃ॥ শৃঙ্গ্যা হরেদূর্দ্ধবাতহিক্কাতৃষ্ণাক্ষয়স্বরান্। কট্‌ফলোত্থঃ শ্বাসকাসপ্রমেহার্শোঽরুচীন্ হরেৎ॥ ভার্গ্যা হরেৎ কফশ্বাসপীনসজ্বরমারুতান্। পাষাণভেদজো যোনিরোগকৃচ্ছ্রাশ্মগুল্মহা॥ ধাতকীজস্তৃষাসারবিষকৃমিবিসর্পজিৎ। মঞ্জিষ্ঠাজো বিষশ্লেষ্মরক্তাতীসারকুষ্ঠহা॥ কুসুম্ভজো বর্ণকরো রক্তপিত্তকফাপহঃ। লাক্ষাজঃ কৃমিবীসর্পব্রণোরক্ষতকুষ্ঠহা॥ হরিদ্রায়া মেহশোথত্বগ্‌দোষব্রণপাণ্ডুনুৎ। আরণ্যকহরিদ্রায়াঃ কুষ্ঠবাতাস্রনাশনঃ। কর্পূরকহরিদ্রায়াঃ সর্ব্বকণ্ডুবিনাশনঃ। দার্ব্ব্যা বিশেষতো লেপাৎ নেত্রকর্ণাস্যরোগনুৎ॥ রসাঞ্জনোদ্ভবো নেত্রবিকারব্রণদোষহৃৎ। বাকুচ্যাঃ কৃমিবিষ্টম্ভপাণ্ডুশোথকফাপহঃ॥ প্রপুন্নাটস্য হন্ত্যেব কণ্ডুদদ্রুবিষানিলান্। ব্রিষাজো দীপ্তিকৃৎ পাকে কফপিত্তাতিসারহা॥ লোধ্রজঃ শীতলো গ্রাহী চক্ষুষ্যঃ কফপিত্তনুৎ। বৃহৎপত্রোদ্ভবো নেত্র্যোদরাতীসারশোথহৃৎ॥ ভল্লাতকোদ্ভবো হন্যাৎ জ্বরোদরকৃমিব্রণান্। গুড়ূচ্যা দীপনো গ্রাহী কাসপাণ্ডুজ্বরাপহঃ॥ তাম্বূল্যা মুখদৌর্গন্ধ্যমলবাতশ্রমাপহঃ। বৈল্বঃ শ্লেষ্মহরো বল্যো লঘুরুষ্ণশ্চ পাচনঃ॥ গম্ভারীজো ভ্রমতৃষ্ণাশূলার্শোবিষদাহহৃৎ॥

পাটল্যাশ্ছর্দ্দিশোথাস্রতৃট্‌শ্লেষ্মারুচিদাহহা। অগ্নিমন্থোদ্ভবঃ শোথকৃমিপাণ্ডুবলাসনুৎ। শ্যোনাকজস্তু গুল্মার্শঃকৃমিহৃদরুচিদীপ্তিকৃৎ॥ শালিপর্ণ্যাঃ ক্ষতকৃমিজ্বরচ্ছর্দ্দ্যতিসারহা। পৃশ্নিপর্ণ্যা জ্বরশ্বাসরক্তাতীসারদাহজিৎ॥ বার্ত্তাক্যা জ্বরবৈরস্যমলারোচকশূলহা। কণ্টকার্য্যা গর্ভকরঃ পাচনঃ কফকাসহা॥ গোক্ষুরস্যাশ্মরীমেহকৃচ্ছ্রহৃদ্রোগবাতহা। জীবন্ত্যাঃ সারহৃন্নেত্রদোষত্রিতয়নাশনঃ॥ মুদ্গপর্ণ্যাঃ শোথদাহগ্রহণ্যর্শোঽতিসারহৃৎ। মাষপর্ণ্যাঃ শুক্রকরো বাতপিত্তজ্বরাস্রজিৎ॥ পঞ্চাঙ্গুলোদ্ভবঃ শূলশিরঃপীড়োদরাপহঃ। রুবুকোত্থো ব্রধ্নশ্বাসকাসকুষ্ঠামমারুতান্॥ মন্দারজো বাতকুষ্ঠকণ্ডুব্রণবিষাপহঃ। অর্কার্কঃ প্লীহগুল্মার্শঃশ্লেষ্মোদরকৃমীন্ হরেৎ॥ ঘস্ত্রীজো লেপতো হন্যাদ্‌ব্রণশোথোদরব্রণান্। সাতলোত্থঃ কফানাহপিত্তোদাবর্ত্তশোথহা॥ লাঙ্গল্যা লেপতো হন্যাৎ শোফাস্রব্রণরুগ্‌জিতঃ। করবীরোদ্ভবো নেত্রকোপকুষ্ঠব্রণাপহঃ॥ চণ্ডালোত্থস্তু বিষবৎ ভক্ষণে লেপনে সুহৃৎ। ধত্তূরজো হরেৎ ক্লেশযুকাকৃমিবিষাদিকং॥ বাসোদ্ভবো জ্বরচ্ছর্দ্দিমেহকুষ্ঠক্ষয়াপহঃ। পার্পটো হন্তি পিত্তাস্রভ্রমতৃষ্ণাকফজ্বরান্॥ নিম্বজো ভ্রমতৃট্‌কাসজ্বরারুচিবমিপ্রণুৎ। মহানিম্বোদ্ভবো গুল্মমূষিকাবিষনাশনঃ॥ পারিভদ্রোঽনিলশ্লেষ্মশোথমেদকৃমিপ্রণুৎ। কাঞ্চনারো গণ্ডমালাগুদভ্রংশব্রণাপহঃ॥ কোবিদারস্তু পিত্তাস্রপ্রদরক্ষয়কাসহা। শোভাঞ্জনার্কো রুচিকৃৎ

শুক্রলো গ্রাহিদীপনঃ ॥ মধুশিগ্রুস্তবো হন্যাৎ বিদ্রধিশ্বযথুক্রিমীন্। শিগ্রুজো বিষহন্নেত্র্যো নস্যেনাশ্বক্ষিরোগহৃৎ ॥ গিরিকর্ণ্যাঃ কুষ্ঠশূলশোথব্রণবিষাপহঃ। সিন্ধুবারোস্তবো হন্তি শূলশোথামমারুতান্ ॥ নির্গুণ্ড্যর্কো হরেজ্জন্তুব্রণকুষ্ঠারুচীন্ লঘুঃ। কৌটজো দীপনঃ শীতঃ কফতৃষ্ণামকুষ্ঠজিৎ ॥ কারঞ্জঃ কফগুল্মার্শোব্রণকৃমিবিষাপহঃ। ঘৃতকারঞ্জকো ভেদী বাতার্শঃকৃমিকুষ্ঠজিৎ ॥ করঞ্জ্যা বমিবাতার্শঃকৃমিকুষ্ঠপ্রমেহজিৎ। উচ্চটার্কঃ কেশকরো বাতপিত্তকফাপহঃ ॥ গুঞ্জায়া হরতে শ্বাসমুখশোষভ্রমজ্বরান্। কপিকচ্ছূস্তবো বৃষ্যো বৃংহণো বাজিকর্ম্মকৃৎ ॥ মাংসরোহিণ্যুস্তবস্তু বৃষ্যো দোষত্রয়াপহঃ। চিহ্লঃ কুর্য্যাদ্ধাতুপুষ্টিং তৎফলাদ্মারয়েজ্জনান্ ॥ পুস্তকান্তরে চেল্হুরিতি চ পাঠঃ ॥ কণ্টকার্য্যা দীপনঃ শ্লেষ্মশোথোদররুজং হরেৎ। বৈতসো হরতে দাহং শোথার্শোযোনিরুগ্ব্রণান্ ॥ জলবেতসজো গ্রাহী শীতো বাতপ্রকোপনঃ। ইন্দ্রজলার্কস্তু হরতে চরাচরবিষং স্ফুটং ॥ অঙ্কোঠকস্য শূলামশোথগ্রহবিষাপহঃ। বলার্কো গ্রাহী বাতাস্রপিত্তাস্রক্ষতনাশনঃ ॥ অতিপূর্ব্ববলার্কস্তু মূত্রাতীসারনাশনঃ। মহাবলার্কো হরতে কৃচ্ছ্রং বাতানুলোমনঃ ॥ নাগপূর্ব্ববলার্কস্তু মূর্চ্ছামোহহরঃ পরঃ। লক্ষ্মণার্কস্তু সেবেত বন্ধ্যাপি লভতে সুতং ॥ স্বর্ণবল্ল্যাঃ শিরঃপীড়াত্রিদোষান্ হন্তি শুক্রদঃ। কার্পাসার্কঃ কর্ণসংস্থঃ কর্ণরোগান্ বিনাশয়েৎ ॥ বংশজঃ কফপিত্তঘ্নঃ কুষ্ঠাস্র-

ব্রণশোথজিৎ। নলার্কো বস্তিযোন্যর্ত্তিদাহপিত্তবিসর্পহৃৎ ॥ পাট্যা জয়েৎ জ্বরচ্ছর্দ্দিতীসারহৃদ্রুক্রুজঃ। শ্বেতবৃক্ষোস্তবো রেকী পিত্তজার্শোদরাপহঃ ॥ শরপুঙ্খোস্তবঃ প্লীহান্ গুল্মব্রণবিষাপহঃ। জবাসজো মদভ্রান্তিপিত্তাস্বৃক্কুষ্ঠকাসজিৎ ॥ মণ্ডিজোহত্যন্তবলকৃৎ প্লীহমোহানিলার্ত্তিজিৎ। অপামার্গভবশ্ছর্দ্দিকফমেদোহনিলাপহঃ। আরক্তাপামার্গভবো ধাতুস্তম্ভনকারকঃ। কোকিলাক্ষভবঃ শীঘ্রং সেকাচ্ছোফাগ্নিবারয়েৎ ॥ অস্থিসংহারিকায়াস্তু ভগ্নসন্ধানকৃচ্ছিবে। কুমারিকায়া উত্থোহগ্নিদগ্ধবিস্ফোটকান্ জয়েৎ॥ পুনর্নবায়াঃ শ্বেতায়াঃ সর্ব্বনেত্রামরাপহঃ। পুনর্নবায়া রক্তায়া গ্রাহী পিত্তাস্রনাশনঃ ॥ প্রসারিণ্যা বাতহরো বৃষ্যঃ সন্ধানকৃৎ স্বরঃ। সারিবায়া বহ্নিমান্দ্যকাসামবিষনাশনঃ ॥ ভৃঙ্গরাজস্য দন্তোহর্কঃ কেশ্যস্ত্বচ্যঃ শিরোহর্ত্তিহৃৎ। শণপুষ্পীলতায়াস্তু অর্কঃ পিত্তকফান্তকঃ ॥ ত্রায়ন্ত্যর্কঃ শূলবিষবিলেপী জ্বরনাশনঃ। মূর্ব্বায়া মোহহৃদ্রোগকণ্ডুকুষ্ঠজ্বরাপহঃ ॥ কাকমাচ্যা নেত্রহিতশ্ছর্দ্দিহৃদ্রোগনাশনঃ। কাকনাসাভবো বামী শোথার্শশ্চিত্রকুষ্ঠহৃৎ ॥ কাকজঙ্ঘোস্তবো হন্যাৎ জ্বরকণ্ডুবিষকৃমীন্ নাগিন্যাস্তু হরেচ্ছূলযোনিদোষবমিকৃমীন্ ॥ মেষশৃঙ্গ্যাঃ শ্বাসকাসব্রণশ্লেষ্মাক্ষিশূলহা। হংসপাদ্যা হন্তি শূলভূতরক্তবিষব্রণান্ ॥ সোমবল্ল্যাস্ত্রিদোষঘ্নঃ ক্ষীরহৃচ্চ রসায়নঃ। আকাশবল্ল্যাঃ শীতোহর্কঃ পিত্তশ্লেষ্মামনাশনঃ ॥ পাতালগরুড়ীজাতোহর্কো বৃষ্যঃ

পবনাপহঃ। বৃন্দাবৃক্ষোত্তবোঽর্কস্তু বিষরক্ষোব্রণাপহঃ ॥ বটপত্রীভবশ্চোঞ্চো যোনিমূত্রগদাপহঃ। হিঙ্গুপত্র্যা বিবন্ধার্শঃশ্লেষ্মগুল্মানিলাপহঃ ॥ বংশপত্র্যাঃ পাচমোষ্ণো হৃদ্বস্তিগদসংবহৃৎ। মৎস্যাক্ষ্যর্কো গ্রাহিশীতকুষ্ঠপিত্তকফাস্রজিৎ ॥ সর্পাক্ষ্যা রোপণঃ সর্পবৃশ্চিকোন্দুরদংশহৃৎ। শঙ্খপুষ্প্যা বিষহরঃ স্মৃতিকান্তিবলাগ্নিদঃ ॥ অর্কপুষ্প্যাঃ কৃমিশ্লেষ্মমেহপিত্তবিকারজিৎ। লজ্জালুকায়া ভগরুগ্রক্তপিত্তাতিসারহৃৎ ॥ অলম্বুষাসম্ভবোঽর্কঃ কৃমিপিত্তকফাপহঃ। ছুঞ্চিকায়াঃ কফহরো বৃষ্যস্তম্ভী ক্রিমিপ্রণুৎ ॥ ভূম্যামল্যাঃ কাসতৃষ্ণাকফপাণ্ডুক্ষতাপহঃ। ব্রাহ্ম্যা বুদ্ধিপ্রদশ্চার্কঃ ষণ্মাসাভ্যাসতঃ কবিঃ ॥ ব্রহ্মমণ্ডুকিকা পাণ্ডুবিষশোথজ্বরান্ হরেৎ। দ্রোণপুষ্প্যা জ্বরশ্বাসকামলাশোথজন্তুজিৎ ॥ সূর্য্যমুখ্যা হরেৎ স্ফোটযোনিরুক্কৃমিপাণ্ডুতাঃ। বন্ধ্যাকর্কোটিকাজাতঃ সর্পদর্পব্রণাপহঃ ॥ মার্কণ্ডিকায়া দুর্গন্ধবিষগুল্মোদরাপহঃ। দেবদাল্যাঃ শূলগুল্মশ্লেষ্মার্শোবাতজিৎ পরঃ। ধত্তূরজো গ্রাহিহিমো বহ্নিকৃদ্ব্রণদাহহা। গোজিহ্বায়া মেহকাসব্রণসারজ্বরাপহঃ ॥ নাগপুষ্প্যাঃ সর্পবিষসর্ব্বগ্রহনিবারণঃ। বেল্লন্তরো মূত্রাঘাতাশ্মরীযোন্যনিলার্ত্তিজিৎ ॥ ছিক্কন্যা বহ্নিরুচিকৃদর্শঃকুষ্ঠকৃমিপ্রণুৎ। কৌকুন্দরো জ্বরং রক্তং মুখশোষং কফং হরেৎ ॥ সুদর্শনার্কশ্চাত্যুষ্ণঃ কফশোথাস্রবাতজিৎ। ইতি শ্রীলঙ্কানাথকৃতার্কচিকিৎসায়ামৌষধ্যর্কবিধানং তৃতীয়শতকং ॥ * ॥ অতঃ পরং নানৌষধবিধানং চতুর্থশতকং। নানারোগনিবারণার্থং পঞ্চমশতকং। বিস্ফোটকনিবারণার্থং ষষ্ঠশতকং। ক্ষুদ্ররোগাদের্নিবারণং সপ্তমশতকং। কার্ম্মণং নামাষ্টমশতকং। গণসংখ্যা নবমশতকং। ধাতুশুদ্ধির্দ্দশমশতকং। এতৎ সর্ব্বং অর্কপ্রকাশে রাবণমন্দোদরীসংবাদে অস্তি বাহুল্যভিয়া ন লিখিতং ॥

অর্ককান্তা (স্ত্রী) আদিত্যভক্তা। হুড়হুড়িয়া ইতি খ্যাতা। ইতি রাজনির্ঘণ্টঃ ॥

অর্কচন্দনং (ক্লী) রক্তচন্দনং। ইতি রাজনির্ঘণ্টঃ ॥

অর্কজৌ (পুং) অশ্বিনীকুমারৌ। নিত্যদ্বিবচনান্তশব্দোঽয়ং। ইতি হেমচন্দ্রঃ ॥

অর্কতনয়ঃ (পুং) কর্ণরাজঃ। ইতি হেমচন্দ্রঃ ॥ বৈবস্বতমনুঃ। সাবর্ণিমনুঃ। শনিঃ। যমঃ। যমুনায়াং তপত্যাঞ্চ স্ত্রী। ইতি মহাভারতং ॥

অর্কনন্দনঃ (পুং) অর্কতনয়ঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

অর্কপত্রঃ (পুং) আদিত্যপত্রবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

অর্কপত্রা (স্ত্রী) বৃক্ষবিশেষঃ। ঈশের মূল ইতি ভাষা। তৎপর্য্যায়ঃ। সুনন্দা ২ অর্কমূলা ৩ বিষাপহা ৪। ইতি রত্নমালা ॥

অর্কপর্ণঃ (পুং) অর্কবৃক্ষঃ। আকন্দ ইতি খ্যাতঃ। ইত্যমরঃ ॥

অর্কপাদপঃ (পুং) নিম্ববৃক্ষঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

অর্কপুষ্পিকা (স্ত্রী) বৃক্ষভেদঃ। অর্কহুলী হুলী-

পুষ্পশ্চেতি খ্যাতা। তৎপর্য্যায়ঃ। পয়স্যা২ সূর্য্যবল্লী ৩ সিতপর্ণী ৪। ইতি রত্নমালা॥

অর্কপুষ্পী (স্ত্রী) কুটুম্বিনীবৃক্ষঃ। তৎপর্য্যায়-গুণাঃ। অর্কপুষ্পী ক্রূরকর্ম্মা পয়স্যা জল-কামুকা। অর্কপুষ্পী কৃমিশ্লেষ্মমেহচিত্ত-বিকারজিৎ॥ ইতি ভাবপ্রকাশঃ॥ রাজ-নির্ঘণ্টোক্তপর্য্যায়গুণাঃ কুটুম্বিনীশব্দে দ্রষ্টব্যাঃ॥

অর্কপ্রিয়া (স্ত্রী) জবা। ইতি রাজনির্ঘণ্টঃ॥

অর্কবন্ধুঃ (পুং) গৌতমঃ। স চ ইক্ষ্বাকুকুলো-দ্ভবশাক্যবংশীয়বুদ্ধঃ। ইত্যমরঃ॥

অর্কবান্ধবঃ (পুং) অর্কবন্ধুঃ। ইতি হেমচন্দ্রঃ॥

অর্কভক্তা (স্ত্রী) আদিত্যভক্তাবৃক্ষঃ। হুড়্‌-হুড়িয়া ইতি খ্যাতা। ইতি রাজনির্ঘণ্টঃ॥

অর্কমূলা (স্ত্রী) অর্কপত্রা। ঈশের মূল ইতি ভাষা। ইতি রত্নমালা॥

অর্করেতোজঃ (পুং) সূর্য্যপুত্রবিশেষঃ। তৎ-পর্য্যায়ঃ। রেবন্তঃ ২ প্লবগঃ৩ হয়বাহনঃ৪। ইতি হেমচন্দ্রঃ॥

অর্কবল্লভঃ(পুং)বন্ধূকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

অর্কবেধং(ক্লী)তালীশপত্রং। ইতি রাজনির্ঘণ্টঃ॥

অর্কব্রতং (ক্লী) আরোগ্যসপ্তম্যাদি সূর্য্যব্রতং। ইতি স্মৃতিঃ॥ সূর্য্যস্য জলশোষণবৎপ্রজা-করগ্রহণং। যথা। অষ্টৌ মাসান্ যথাদিত্য-স্তোয়ং হরতি রশ্মিভিঃ। তথা হরেৎ করা-ন্রাষ্ট্রান্নিত্যমর্কব্রতং হি তৎ॥ ইতি মনুঃ॥

অর্কসূনুঃ (পুং) যমঃ। ইতি হেমচন্দ্রঃ॥

অর্কসোদরঃ(পুং)ঐরাবতহস্তী। ইতি হেমচন্দ্রঃ॥

অর্কহিতা (স্ত্রী) আদিত্যভক্তাবৃক্ষঃ। হুড়্‌-হুড়িয়া ইতি খ্যাতা। ইতি রাজনির্ঘণ্টঃ॥

অর্কাশ্মা [ন্] (পুং) অরুণোপলঃ। সূর্য্য-কান্তমণিরিতি যাবৎ। ইতি হলায়ুধঃ॥

অর্কাহ্বঃ (পুং) অর্কবৃক্ষঃ। আকন্দ ইতি ভাষা। ইত্যমরঃ॥

অর্কোপলঃ (পুং) সূর্য্যকান্তমণিঃ। ইতি রাজনির্ঘণ্টঃ॥

অর্গলং (ক্লী স্ত্রী) কপাটবন্ধককাষ্ঠবিশেষঃ। হুড়্‌কা তসলা ইত্যাদি ভাষা। ইত্যমরঃ॥ কল্লোলে ত্রি। ইতি মেদিনী॥ দেবীমাহাত্ম্য-পাঠস্যাদৌ পাঠ্যস্তোত্রবিশেষঃ। যথা। মার্কণ্ডেয় উবাচ। ব্রহ্মন্ কেন প্রকারেণ দুর্গামাহাত্ম্যমুত্তমং। শীঘ্রং সিদ্ধ্যতি তৎ সর্ব্বং কথয়স্ব মহাপ্রভো। ব্রহ্মোবাচ। অর্গলং কীলকঞ্চাদৌ পঠিত্বা কবচং পঠেৎ। জপেৎ সপ্তশতীং পশ্চাৎ ক্রম এষ শিবো-দিতঃ॥ অর্গলং দুরিতং হন্তি কীলকং ফলদং তথা। কবচং রক্ষতে নিত্যং চণ্ডিকা ত্রিতয়ং দিশেৎ॥ অর্গলং হৃদয়ে যস্য স চানর্গলবাক্ সদা। কীলকং হৃদয়ে যস্য বশকীলিতমানসঃ॥ কবচং হৃদয়ে যস্য স বজ্রহৃদয়ঃ খলু। ব্রহ্মণা নির্ম্মিতং পূর্ব্বং বিনিশ্চিত্যাপি চেতসা॥ ইত্যাদি। তদাদ্য-শ্লোকো যথা। জয় ত্বং দেবি চামুণ্ডে জয় ভূতাপহারিণি। জয় সর্ব্বগতে দেবি কাল-রাত্রি নমোঽস্তু তে॥ তস্য শেষশ্লোকো যথা। ইদং স্তোত্রং পঠিত্বা চ মহাস্তোত্রং পঠেন্নরঃ। সপ্তশতীং সমারাধ্য বরমাপ্নোতি সম্পদং॥ ইত্যর্গলাস্তোত্রং॥

অর্গলিকা (স্ত্রী) অল্পার্গলা। খিল ইতি ভাষা। ইতি হেমচন্দ্রঃ॥

অর্ঘ মূল্যে ইতি কবিকল্পদ্রুমঃ ॥ অর্ঘতি গাং গোপঃ। ইতি দুর্গাদাসঃ ॥

অর্ঘঃ (পুং) মূল্যং। পূজাবিধিঃ। ইত্যমরঃ ॥ অয়ং শব্দঃ সামগানাং সর্ব্বত্রাভিলাপে সযকারো নপুংসকলিঙ্গেনৈব প্রযোজ্যঃ অন্যবেদিনাং নির্যকারঃ পুংলিঙ্গেন প্রযোজ্যঃ। ইতি শ্রাদ্ধতত্ত্বং ॥

অর্ঘীশঃ (পুং) শিবঃ। ইতি শব্দরত্নাবলী ॥

অর্ঘ্যং (ত্রি) পূজনযোগ্যং। পূজ্যং। ইতি মেদিনী ॥ অর্ঘ্যার্থং। তত্তু পূজার্থদূর্ব্বাক্ষতচন্দনপুষ্পমিশ্রিতবারি। ইত্যমরঃ ॥ অর্ঘার্থজলং ইতি কেচিৎ। ইতি তট্টীকায়াং ভরতঃ॥ তত্তু সামান্যবিশেষভেদেন দ্বিবিধং। তত্রাদ্যস্য ক্রমঃ। স্ববামে ত্রিকোণবৃত্তভূবিম্বং বিলিখ্যাধারশক্তিং পূজয়িত্বা অস্ত্রমন্ত্রেণ পাত্রং প্রক্ষাল্য মন্ত্রেণ জলেনাপূর্য্যাঙ্কুশমুদ্রয়া মন্ত্রেণ সূর্য্যমণ্ডলাত্তীর্থমাবাহ্য প্রণবেণ গন্ধপুষ্পাভ্যাং সংপূজ্য ধেনুমুদ্রাং প্রদর্শ্য প্রণবমষ্টধা দশধা বা জপেৎ ॥ অন্যস্য ক্রমঃ। স্ববামে ত্রিকোণমণ্ডলং কৃত্বা তত্র ত্রিপদিকামারোপ্য অস্ত্রেণ শঙ্খং প্রক্ষাল্য তদুপরি সংস্থাপ্য মন্ত্রেণ গন্ধপুষ্পাক্ষতদূর্ব্বাদি তত্র নিঃক্ষিপ্য বিমলজলেন বিলোমমাতৃকয়া মূলেন চ পূরয়েৎ ততস্ত্রিপদিকায়াং বহ্নিমণ্ডলপূজা শঙ্খে সূর্য্যমণ্ডলপূজা জলে সোমমণ্ডলপূজা ততো মন্ত্রেণাঙ্কুশমুদ্রয়া সূর্য্যমণ্ডলাত্তীর্থমাবাহ্য মন্ত্রেণ স্বহৃদয়াদ্দেবতাং তত্রাবাহ্য কূর্চ্চমন্ত্রেণাবগুণ্ঠ্যাস্ত্রমন্ত্রেণ গালিনীমুদ্রাং প্রদর্শ্য মন্ত্রেণ তজ্জলং বীক্ষ্য অঙ্গমন্ত্রৈঃ সকলীকৃত্য গন্ধপুষ্পাভ্যাং দেবতাং সংপূজ্য তদুপরি মৎস্যমুদ্রয়াচ্ছাদ্য মূলমন্ত্রমষ্টধা জপ্ত্বা ধেনুমুদ্রাং প্রদর্শ্যাস্ত্রেণ সংরক্ষ্য তস্মাৎ কিঞ্চিৎ জলং প্রোক্ষণীপাত্রে নিঃক্ষিপেৎ। ইতি তন্ত্রসারঃ ॥

অর্ঘ্যং (ক্লী) জরৎকারুমুনিতপোবনতরুভূতমধু। তস্য গুণাঃ। চক্ষুরায়ুর্হিতকারিত্বং। আমবাতকফপিত্তনাশিত্বঞ্চ। ইতি রাজবল্লভঃ ॥

অর্চ্চ ক পূজে। ইতি কবিকল্পদ্রুমঃ ॥ ক অর্চ্চয়তি। গোবর্দ্ধনস্ত্বিমমাত্মনেপদিনং মত্বা বিভ্রাজসে মকরকেতনমর্চ্চয়ন্তীত্যাদি স্খলিতমিত্যাহ। ইতি দুর্গাদাসঃ ॥

অর্চ্চ ঞ পূজে। ইতি কবিকল্পদ্রুমঃ ॥ ঞ অর্চ্চতি অর্চ্চতে। ইতি দুর্গাদাসঃ ॥

অর্চ্চকঃ (ত্রি) পূজকঃ। অর্চ্চনাকারকঃ। যথা। অর্চ্চকস্য তপোযোগাৎ অর্চ্চনস্যাতিশায়নাৎ। আভিরূপ্যাচ্চ বিম্বানাং দেবঃ সান্নিধ্যমৃচ্ছতি ॥ ইতি তিথ্যাদিতত্ত্বং ॥

অর্চ্চনং (ক্লী) পূজনং। যথা। ধনধান্যকরং নিত্যং গুরুদেবদ্বিজার্চ্চনং। ইতি রাজবল্লভঃ ॥ পূজাদ্রব্যে ত্রি। যথা। অর্চ্চকস্য তপোযোগাৎ অর্চ্চনস্যাতিশায়নাৎ। ইতি তিথ্যাদিতত্ত্বং ॥

অর্চ্চনা (স্ত্রী) পূজা। ইতি জটাধরঃ ॥ গুরুদেবদ্বিজানাং নিত্যার্চ্চনাগুণাঃ। স্বর্গযশআয়ুর্ধনধান্যকারিত্বং। অলক্ষ্মীপাপনাশিত্বঞ্চ। ইতি রাজবল্লভঃ ॥

অর্চ্চা (স্ত্রী) পূজা। প্রতিমা। ইতি মেদিনী ॥

অর্চ্চিঃ (স্ত্রী) অগ্নিশিখা। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ ॥

অর্চ্চিঃ [ স্ ] ( স্ত্রী ক্লী ) অগ্নিশিখা। কিরণং। ইত্যমরঃ॥ দীপ্তিঃ। ইত্যুণাদিকোষঃ॥ অয়ং শব্দঃ সান্ত ইদন্তশ্চ॥

অর্চ্চিতঃ ( ত্রি ) পূজিতঃ। ইত্যমরঃ॥

অর্চ্চিষ্মান্ [ৎ] ( পুং ) অগ্নিঃ। ইতি হেমচন্দ্রঃ॥ সূর্য্যঃ। অর্চ্চিঃশব্দাৎ অতিশয়ে মতুপ্রত্যয়ঃ॥

অর্চ্চ্যঃ ( ত্রি ) অর্চ্চনীয়ঃ। পূজ্যঃ। ইতি হেমচন্দ্রঃ॥

অর্জ্জ অর্জ্জনে। ইতি কবিকল্পদ্রুমঃ॥ অর্জ্জনমলব্ধস্য লাভঃ। যশশ্চার্জ্জতি যঃ স্থিরমিতি হলায়ুধঃ। ইতি দুর্গাদাসঃ॥

অর্জ্জ ক সংস্কারে ইতি কবিকল্পদ্রুমঃ॥ ক অর্জ্জয়তি কিমপি লোকঃ সংস্করোতীত্যর্থঃ। প্রতিযত্নে প্রাঞ্চঃ। অর্জ্জয়তি ধনং পরিজনঃ। ইতি রমানাথঃ। ইতি দুর্গাদাসঃ॥

অর্জ্জকঃ ( পুং ) শ্বেতপর্ণাসঃ। বাবুই ইতি ভাষা। তৎপর্য্যায়ঃ। শ্বেতচ্ছদঃ ২ গন্ধপত্রঃ ৩ পাতা ৪ কুঠেরকঃ ৫। ইতি শব্দচন্দ্রিকা॥ বর্ব্বরীভেদঃ। আজবলাই ইতি পশ্চিমদেশে খ্যাতঃ। তৎপর্য্যায়ঃ। ক্ষুদ্রতুলসী ২ ক্ষুদ্রপর্ণঃ ৩ মুখার্জ্জকঃ ৪ উগ্রগন্ধঃ ৫ জম্বীরঃ ৬ কুঠেরঃ ৭ কঠিঞ্জরঃ ৮। অস্য গুণাঃ। কটুত্বং। উষ্ণত্বং। কফবাতাময়নেত্ররোগনাশিত্বং। রুচিকারিত্বং। সুখপ্রসবকারকত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ সামান্যতুলসী। ইতি রত্নমালা॥

অর্জ্জকঃ ( ত্রি ) উপার্জ্জনকর্ত্তা। যথা। অতএব বশিষ্ঠেন জ্যেষ্ঠস্যাংশদ্বয়মভিধায়ার্জ্জকস্যাংশদ্বয়মভিহিতং। ইতি দায়ভাগঃ॥

অর্জ্জনং ( ক্লী ) উপার্জ্জনং। স্বত্বহেতুভূতো ব্যাপারঃ। যথা। অর্জ্জনং স্বত্বহেতুভূতো ব্যাপারঃ অর্জ্জনং স্বত্বং নাপাদয়তীতি বিপ্রতিষিদ্ধমিতি দায়ভাগঃ॥

অর্জ্জুনং ( ক্লী ) তৃণং। নেত্ররোগঃ। ইতি বিশ্বমেদিন্যৌ॥ তস্য লক্ষণং। একো যঃ শশরুধিরোপমস্তু বিন্দুঃ শুক্লস্থো ভবতি তদর্জ্জুনং বদন্তি। ইতি মাধবকরঃ॥

অর্জ্জুনঃ ( পুং ) পাণ্ডুরাজস্য তৃতীয়পুত্ত্রঃ। স তু ইন্দ্রাৎ কুন্তীগর্ভে জাতঃ। তৎপর্য্যায়ঃ। ফাল্গুনঃ ২ জিষ্ণুঃ ৩ কিরীটী ৪ শ্বেতবাহনঃ ৫ বীভৎসুঃ ৬ বিজয়ঃ ৭ কৃষ্ণঃ ৮ সব্যসাচী ৯ ধনঞ্জয়ঃ ১০। ইতি বিরাটপর্ব্ব॥ পার্থঃ ১১ শক্রনন্দনঃ ১২ গাণ্ডীবী ১৩ মধ্যমপাণ্ডবঃ ১৪ শ্বেতবাজী ১৫ কপিধ্বজঃ ১৬ রাধাভেদী ১৭ সুভদ্রেশঃ ১৮ গুড়াকেশঃ ১৯ বৃহন্নলঃ ২০। ইতি জটাধরঃ॥ ঐন্দ্রিঃ ২১। ইতি ভূরিপ্রয়োগঃ॥*॥স্বনামখ্যাতবৃক্ষবিশেষঃ। আজন ইতি ভাষা। তৎপর্য্যায়ঃ। নদীসর্জ্জঃ ২ বীরতরুঃ ৩ ইন্দ্রদ্রুঃ ৪ ককুভঃ ৫। ইত্যমরঃ॥ শম্বরঃ ৬ পার্থঃ ৭ চিত্রযোধী ৮ ধনঞ্জয়ঃ ৯ বৈরান্তকঃ ১০ কিরীটী ১১ গাণ্ডীবী ১২ শিবমল্লকঃ ১৩ সব্যসাচী ১৪ কর্ণারিঃ ১৫ করবীরকঃ ১৬ কৌন্তেয়ঃ ১৭ ইন্দ্রসূনুঃ ১৮ বীরদ্রুঃ ১৯ কৃষ্ণসারথিঃ ২০ পৃথাজঃ ২১ ফাল্গুনঃ ২২ ধন্বী ২৩। ইতি রাজনির্ঘণ্টঃ॥ তৎপর্য্যায়গুণাঃ। ককুভোহর্জ্জুননামাখ্যো নদীসর্জ্জশ্চ কীর্ত্তিতঃ। ইন্দ্রদ্রুর্বীরবৃক্ষশ্চ বীরশ্চ ধবলঃ স্মৃতঃ॥ ককুভঃ শীতলো ভগ্নক্ষতক্ষয়বিষাস্র-

জিৎ। মেদোমেহব্রণান্ হন্তি তুবরঃ কফপিত্তহৃৎ॥ ইতি ভাবপ্রকাশঃ॥ অস্য গুণাঃ। ক্ষতভগ্নরক্তস্তম্ভনমূত্রকৃচ্ছ্ররোগে পথ্যত্বং। ইতি রাজবল্লভঃ॥ কষায়ত্বং। উষ্ণত্বং। ব্রণশোধনত্বং। কফপিত্তশ্রমতৃষ্ণার্ত্তিনাশিত্বং। বায়ুরোগপ্রকোপকারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ *॥ কার্ত্তবীর্য্যার্জ্জুনঃ। ময়ূরঃ। মাতুরেকসুতঃ। ইতি মেদিনী॥ শ্বেতবর্ণঃ। তদ্বতি ত্রি। ইত্যমরঃ॥

অর্জ্জুনধ্বজঃ (পুং) হনুমান্। ইতি হেমচন্দ্রঃ॥

অর্জ্জুনী (স্ত্রী) গবী। করতোয়ানদী। কুট্টনী। উষা। ইতি বিশ্বমেদিন্যৌ॥

অর্জ্জুনোপমঃ (পুং) বৃক্ষভেদঃ। শেগন ইতি ভাষা। তৎপর্য্যায়ঃ। মহাপত্রঃ ২ শাকবৃক্ষঃ ৩ অনীলঃ ৪ অর্ণঃ ৫। ইতি শব্দচন্দ্রিকা॥ শাকাখ্যঃ ৬ খরপত্রঃ ৭। ইতি রত্নমালা॥

অর্ণঃ (পুং) শাকবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥ অক্ষরং। ইত্যাগমঃ॥ বর্ণঃ। যথা। বর্ণোঽক্ষরং রশ্মিবর্ণঃ স্বরাস্তু কথিতা অচঃ। ব্যঞ্জনানি হলো বর্ণাঃ কাদয়োঽর্ষৌ প্রকীর্ত্তিতাঃ॥ ইতি বীজবর্ণাভিধানং॥

অর্ণঃ [স্] (ক্লী) জলং। ইত্যমরঃ॥

অর্ণবঃ (পুং) সমুদ্রঃ। ইত্যমরঃ॥

অর্ণবজঃ (পুং ক্লী) সমুদ্রফেনঃ। ইতি রত্নমালা॥

অর্ণবমন্দিরঃ (পুং) বরুণঃ। ইতি হেমচন্দ্রঃ॥

অর্ণবোদ্ভবঃ (পুং) অগ্নিজারবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

অর্ণোদঃ (পুং) মুস্তকঃ। মেঘঃ। ইতি রাজনির্ঘণ্টঃ॥

অর্ণোভবঃ (পুং) শঙ্খঃ। ইতি রাজনির্ঘণ্টঃ॥

অর্ত্তগলঃ (পুং) আর্ত্তগলঃ। নীলঝিণ্টিকা। ইত্যমরটীকায়াং ভরতঃ॥

অর্ত্তনং (ক্লী) জুগুপ্সা। নিন্দা। ইত্যমরঃ॥

অর্ত্তিঃ (স্ত্রী) পীড়া। ধনুরগ্রভাগঃ। ইত্যমরঃ॥

অর্ত্তিকা (স্ত্রী) অত্তিকা। নাট্যোক্তৌ জ্যেষ্ঠা ভগিনী। ইত্যমরটীকায়াং স্বামী॥

অর্থ ৎ ক ঙ যাচনে। ইতি কবিকল্পদ্রুমঃ॥ ঙ অর্থয়তে অর্থাপয়তে। প্রার্থয়ত্যল্পমূল্যানীত্যাদৌ প্রার্থনং প্রার্থঃ পশ্চাৎ প্রার্থং করোতি ইতি ঞৌ পরস্মৈপদং। ইতি দুর্গাদাসঃ॥

অর্থঃ (পুং) বিষয়ঃ। যাচ্ঞা। ধনং। কারণং। বস্তু। শব্দপ্রতিপাদ্যঃ। নিবৃত্তিঃ। প্রয়োজনং। ইতি মেদিনী॥ প্রকারঃ। ইতি হেমচন্দ্রঃ॥

অর্থনা (স্ত্রী) যাচ্ঞা। ভিক্ষা। ইত্যমরঃ॥

অর্থপতিঃ (পুং) কুবেরঃ। রাজা। ইতি মেদিনী॥

অর্থপ্রয়োগঃ (পুং) বৃদ্ধিজীবিকা। সুদে দেয়া বাড়ী দেয়া ইত্যাদি ভাষা। ইত্যমরঃ॥

অর্থবাদঃ (পুং) স্তুতিঃ। প্রশংসা। ইতি হেমচন্দ্রঃ॥ বিধ্যসমভিব্যাহৃতবাক্যং। যথা। অর্থবাদশ্চ বিধ্যসমভিব্যাহৃতবাক্যরূপঃ। স তু ত্রিবিধঃ। গুণবাদঃ ১ অনুবাদঃ ২ ভূতার্থবাদঃ ৩। যথা। বিরোধে গুণবাদঃ স্যাদনুবাদোঽবধারিতে। ভূতার্থবাদস্তদ্ধানাবর্থবাদস্ত্রিধা মতঃ॥ ইতি ভট্টঃ॥ অয়মর্থঃ। বিরোধে বিশেষ্যবিশেষণয়োঃ সামানাধিকরণ্যেনান্বয়বিরোধে গুণবাদঃ

অঙ্গকথনরূপত্বাৎ। যথা যজমান প্রস্তর ইতি। অত্র প্রস্তরঃ কুশমুষ্টিঃ তস্য যজমানেঽভেদান্বয়বাধাৎ যজমানস্য কুশ-মুষ্টিধারণরূপার্থবাদরূপত্বাৎ গুণবাদঃ। অবধারিতে প্রমাণান্তরসিদ্ধেঽর্থে যো বাদঃ। যথা নান্তরীক্ষেঽগ্নিশ্চেতব্যঃ অগ্নির্হিমস্য ভেষজং ইত্যাদি চ। অন্তরীক্ষেঽগ্নিচয়নস্যাসম্ভবেন তদভাবস্য অগ্নের্হিমনাশকত্বস্য চ লৌকিকপ্রমাণসিদ্ধত্বাৎ অনুবাদঃ। তদ্ধানৌ তয়োর্বিরোধাবধারণয়োরভাবে ভূতার্থবাদঃ। যথা ইন্দ্রো বৃত্রহন্নিত্যাদি। সোঽপি দ্বিবিধঃ। স্তুত্যর্থবাদো নিন্দার্থবাদশ্চ। যথা। সন্ধ্যামুপাসতে যে চ ইত্যাদি স্তুত্যর্থবাদঃ। স্ত্রীতৈলমাংসসংভোগী পর্ব্বস্বেতেষু বৈ পুমান্। বিণ্মূত্রভোজনং নাম প্রয়াতি নরকং মৃতঃ॥ ইত্যাদি নিন্দার্থবাদঃ। ইতি শ্রাদ্ধবিবেকটীকায়াং শ্রীকৃষ্ণতর্কালঙ্কারঃ॥ *॥ প্রকরণপ্রতিপাদ্যস্য তত্র তত্র প্রশংসনং। ইতি বেদান্তসারঃ॥ তদ্বিবরণং যথা। অথার্থবাদাধিকরণং। তত্রার্থবাদাশ্চ বহুষু শ্রূয়ন্তে তে কিং প্রমাণং ন বেতি সংশয়ে পূর্ব্বপক্ষসূত্রং। আম্নায়স্য প্রবর্ত্তকত্বং তদর্থমেব তদবতারাদিতি। অস্যার্থঃ। আম্নায়স্য বেদস্য প্রবর্ত্তকত্বং বিধেয়ে ইতি শেষঃ। তদর্থং বেদাভিধানাৎ। তচ্চ প্রবর্ত্তকত্বং কার্য্যতাজ্ঞানদ্বারৈব তদ্বিনা প্রবৃত্ত্যভাবাৎ। অতঃ সিদ্ধার্থকানাং স্তুত্যর্থবাদানাং কার্য্যতাবাচকপদাভাবাৎ ন কার্য্যতাধীজনকত্বং। অতোঽপ্রামাণ্যমেব। অতস্তেষামর্থবাদানাং প্রবর্ত্তকত্বার্থমবশ্যং বিধিকল্পনং কল্পতবিশেষণত্বম্বা যুক্তং অতএব সিদ্ধান্তসূত্রং। বিধিনা ত্বেকবাক্যত্বাৎ স্তুত্যর্থেন বিধীনাং স্যুরিতি। অস্যার্থঃ। অর্থবাদানাং স্তুতিপরত্বেন বিধিনা সহ একবাক্যত্বাৎ তে অর্থবাদাঃ প্রমাণানি স্যুঃ। তথা চ বিধেয়প্রবৃত্তাবেব তেষাং তাৎপর্য্যং তত্রৈব প্রামাণ্যং যৎ পরশব্দঃ স শব্দার্থ ইতি সিদ্ধান্তাৎ ন স্বার্থে স্তুত্যাদৌ তত্র তাৎপর্য্যাভাবাৎ। তর্হি যন্ন দুঃখেন সম্ভিন্নমিত্যাদেঃ স্বতন্ত্রার্থবাদানাং কা গতিরিত্যত্রাহ ভূতার্থানাং ক্রিয়ার্থেন সমাম্নায়ঃ। অস্যার্থঃ। ভূতার্থানাং সিদ্ধার্থানাং ক্রিয়ার্থেন কার্য্যবোধকেন বিধিনা ইতি যাবৎ। সমাম্নায়ঃ পাঠঃ কার্য্য ইতি শেষঃ। ততশ্চ বিধিবাক্যাকাঙ্ক্ষাপূরকত্বেন কার্য্যান্বিতবোধকতয়া তেষাং প্রামাণ্যং। যথা লিখিষ্যমাণযূপাহবনীয়বাক্যানাং যূপাহবনীয়পরিচয়ায় কার্য্যান্বিতবোধকত্বেন স্বার্থবোধকত্বে প্রামাণ্যং। তথা স্বর্গকামো যজেতেত্যত্র স্বর্গরূপপরিচয়ায় স্বর্গবোধকত্বেন যন্ন দুঃখেন সম্ভিন্নং ন চ গ্রস্তমনন্তরং। অভিলাষোপনীতং যৎ তৎ সুখং স্বঃপদাস্পদং॥ ইত্যাদিবাক্যানামপি প্রামাণ্যং। অন্যথা যূপাদিপদার্থাপরিচয়ে চ তত্তদ্বিধিবাক্যানাং প্রবৃত্তির্ন স্যাদতো বিধিনৈকবাক্যত্বাৎ সিদ্ধার্থকানামপি প্রামাণ্যং। যত্র তু বিধিনা সহ বিরোধঃ তত্র ন স্বার্থে প্রামাণ্যং। যথা অহরহঃ সন্ধ্যামুপাসীত ইত্যাদৌ সন্ধ্যামুপাসতে যে তু নিয়তং সংশিত-

ব্রতাঃ। বিধূতপাপাস্তে যান্তি ব্রহ্মালোকমনাময়মিত্যাদ্যর্থবাদানাং ॥ অতো নিত্যে কর্ম্মণি ফলশ্রুতিরর্থবাদ এব সোঽপি রুচ্যুৎপাদনপরঃ। অতোঽত্র কার্য্যতাজ্ঞানাদেরপ্রবৃত্তিরিতি দিক্। ইতি ধর্ম্মদীপিকা ॥ তত্ত্বসম্বোধিনীমতে সপ্তবিধঃ। স্তুত্যর্থবাদঃ ১ ফলার্থবাদঃ ২ সিদ্ধার্থবাদঃ ৩ নিন্দার্থবাদঃ ৪ পরকৃতিঃ ৫ পুরাকল্পঃ ৬ মন্ত্রঃ ৭। এষামুদাহরণানি শ্রুত্যুক্তত্বাৎ ন লিখিতানি ॥

অর্থবান্ [ৎ] (পুং) পুরুষঃ। ইতি রাজনির্ঘণ্টঃ ॥ অর্থবিশিষ্টে ত্রি ॥

অর্থবিজ্ঞানং (ক্লী) শুশ্রূষাদ্যষ্টধীগুণান্তর্গতগুণবিশেষঃ। শব্দার্থজ্ঞানং। ইতি হেমচন্দ্রঃ ॥

অর্থব্যয়জ্ঞঃ (ত্রি) ধনব্যয়প্রকারবিৎ। তৎপর্য্যায়ঃ। সুকুলঃ ২। ইতি হেমচন্দ্রঃ ॥

অর্থশাস্ত্রং (ক্লী) চাণক্যাদিপ্রণীতং নীতিশাস্ত্রং। তৎপর্য্যায়ঃ। দণ্ডনীতিঃ২। ইত্যমরঃ ॥ যথা। বৃহস্পতিপ্রভৃতিভিঃ প্রণীতঞ্চার্থশাস্ত্রকং। তত্রৈব দণ্ডনীতিঃ স্যাদত্র জ্ঞেয়ৌ নয়ানয়ৌ ॥ ইতি শব্দরত্নাবলী ॥ অষ্টাদশবিদ্যান্তর্গতবিদ্যাবিশেষঃ। যথা বিষ্ণুপুরাণং। অঙ্গানি বেদাশ্চত্বারো মীমাংসা ন্যায়বিস্তরঃ। ধর্ম্মশাস্ত্রং পুরাণঞ্চ বিদ্যা হ্যেতাশ্চতুর্দ্দশ ॥ আয়ুর্ব্বেদো ধনুর্ব্বেদো গান্ধর্ব্বশ্চেতি তে ত্রয়ঃ। অর্থশাস্ত্রং চতুর্থঞ্চ বিদ্যা হ্যষ্টাদশৈব তাঃ ॥ ইতি প্রায়শ্চিত্ততত্ত্বং ॥ *॥ ধর্ম্মশাস্ত্রেণার্থশাস্ত্রস্য বাধ্যত্বং যথা। স্মৃত্যর্থেন বিরোধে হি অর্থশাস্ত্রস্য বাধনং। পরস্পরবিরোধে তু ন্যায়যুক্তং প্রমাণবৎ ॥ অর্থশাস্ত্রস্য মন্বাদিপ্রণীতরাজনীত্যাদিবিষয়স্য। যদাহ। অনাগমস্তু যো ভুঙ্‌ক্তে বহূন্যব্দশতান্যপি। চৌরদণ্ডেন তং পাপং দণ্ডয়েৎ পৃথিবীপতিঃ ॥ ইত্যনয়োর্ধর্ম্মশাস্ত্রার্থশাস্ত্রয়োর্বিপ্রতিপত্তৌ ধর্ম্মশাস্ত্রেণ দণ্ডবিধায়কমর্থশাস্ত্রং বাধ্যতে। ততশ্চার্থশাস্ত্রস্য ত্রিপুরুষীয়েতরপরত্বেন সঙ্কোচঃ। ইতি মলমাসতত্ত্বং ॥

অর্থসিদ্ধকঃ (পুং) সিন্দুবারবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

অর্থাগমঃ (পুং) ধনাগমঃ। তৎপর্য্যায়ঃ। আয়ঃ ২। ইতি হলায়ুধঃ ॥

অর্থিকঃ (পুং) বৈতালিকঃ। নিদ্রাণস্য রাজাদের্জাগরয়িতা। ইতি হেমচন্দ্রঃ ॥

অর্থী [ন্] (ত্রি) যাচকঃ। সহায়ঃ। সেবকঃ। বিবাদী। ইতি বিশ্বঃ ॥ ধনী। অর্থো বিদ্যতেঽস্যেতি ইন্ ॥

অর্থ্যং (ক্লী) শিলাজতু। ইত্যমরমেদিনীকরৌ ॥ অর্থহিতে ত্রি ॥

অর্থ্যঃ (ত্রি) পণ্ডিতঃ। ধনবান্। ন্যায্যঃ। ইত্যমরভরতৌ ॥ যাচ্যঃ। যাচনার্থকার্থধাতোঃ কর্ম্মণি যঃ ॥

অর্দ্দ যাতনাগতিযাচনে। ইতি কবিকল্পদ্রুমঃ ॥ যাতনা তাড়নং। অর্দ্দতি পুত্ত্রং পিতা। শরদ্ঘনং নার্দ্দতি চাতকোঽপি। ন যাচতীত্যর্থঃ। ইতি দুর্গাদাসঃ ॥

অর্দ্দ ঐ বধে। ইতি কবিকল্পদ্রুমঃ ॥ ঐ অর্দ্দতি অর্দ্দতে। রক্ষঃসহস্রাণি চতুর্দ্দশার্দ্দীৎ। অয়মাত্মনেপদীত্যন্যে। ইতি দুর্গাদাসঃ ॥

অর্দ্দ ক বধে। ইতি কবিকল্পদ্রুমঃ ॥ ক

অর্দ্দয়তি। অয়মাত্মনেপদীত্যন্যে। ইতি দুর্গাদাসঃ ॥

অর্দনং (ক্লী) যাচনং। পীড়নং। হননং। গমনং। অর্দধাতোর্ভাবেঽনট্প্রত্যয়ঃ ॥

অর্দনা (স্ত্রী) যাচ্ঞা। ভিক্ষা। ইত্যমরঃ ॥

অর্দনিঃ (পুং) অগ্নিঃ। যাচ্ঞা। রোগঃ। ইত্যমরটীকায়াং ভরতঃ ॥

অর্দিতং (ক্লী) বায়ুব্যাধিবিশেষঃ। তস্য নিদানসংপ্রাপ্তিপূর্ব্বকং লক্ষণমাহ। উচ্চৈর্ব্যাহরতোঽত্যর্থং খাদতঃ কঠিনানি চ। হসতো জৃম্ভতো ভারাদ্বিষমাচ্ছয়নাসনাৎ ॥ শিরোনাসৌষ্ঠচিবুকললাটেক্ষণসন্ধিগঃ। অর্দ্দয়ত্যনিলো বক্ত্রমর্দ্দিতং জনয়েত্ততঃ ॥ বক্রীভবতি বক্ত্রার্দ্ধং গ্রীবা বাপ্যপবর্ত্ততে। শিরশ্চলতি বাক্সঙ্গো নেত্রাদীনাঞ্চ বৈকৃতং ॥ গ্রীবাচিবুকদন্তানাং তস্মিন্ পার্শ্বে চ বেদনা॥ তমর্দ্দিতমিতি প্রাহুর্ব্যাধিং ব্যাধিবিশারদাঃ ॥ ইতি মাধবকরঃ ॥ ব্যাহরতঃ বদতঃ। কঠিনানি পুগফলাদীনি। বিষমাচ্ছয়নাসনাৎ গ্রীবাদিবৈপরীত্যেন শয়নাদাসনাচ্চ। অর্দ্দয়তি পীড়য়তি। ততঃ তদনন্তরং অর্দ্দিতং জনয়েৎ। অর্দ্দিতে জাতে কিং স্যাত্তদাহ। বক্রীভবতীত্যাদি। অপবর্ত্ততে বক্রীভবতি। চলতি কম্পতে। বাক্সঙ্গঃ বাঙ্নিরোধঃ। নেত্রাদীনামিত্যাদিশব্দেন ভ্রূগণ্ডনাসিকাদীনাং গ্রহণং। বৈকৃতং বেদনাস্ফুরণবক্রত্বাদি। গ্রীবেত্যাদি যস্মিন্ পার্শ্বে অর্দ্দিতং তস্মিন্ পার্শ্বে গ্রীবাদীনাং বেদনা ॥ * ॥ বাতাৎ পিত্তাৎ কফাচ্চ স্যাৎ ত্রিবিধং তৎ সমাসতঃ। লালাস্রাবো ব্যথা কম্পঃ স্ফুরণং হনুবাগ্গ্রহঃ॥ ওষ্ঠয়োঃ শ্বযথুঃ শূলশ্চার্দ্দিতে বাতজে ভবেৎ। পীতমাস্যং জ্বরস্তৃষ্ণা পিত্তজে মোহধূপনে ॥ গণ্ডে শিরসি মন্যায়াং শোথঃ স্তম্ভঃ কফাত্মকে ॥ * ॥ তস্যাসাধ্যস্য লক্ষণমাহ। ক্ষীণস্যানিমিষাক্ষস্য প্রসক্তাব্যক্তভাষিণঃ। ন সিধ্যত্যর্দ্দিতং গাঢ়ং ত্রিবর্ষং বেপনস্য চ॥ অনিমিষাক্ষস্য নিমেষাসমর্থচক্ষুষঃ। প্রসক্তং প্রকর্ষেণ লগ্নং অব্যক্তঞ্চ ভাষিতুং শীলং যস্য। তস্য অর্দ্দিতং ন সিধ্যতি। ত্রিবর্ষং অতীতবর্ষত্রয়ং। অথবা ত্রয়াণাং চক্ষুর্নাসামুখানাং বর্ষঃ স্রাবো যত্র তৎ। বেপনস্য কম্পনশীলস্য চ। গাঢ়মতিশয়েন ন সিধ্যতি ইত্যন্বয়ঃ ॥*॥ অথ তস্য চিকিৎসা। স্নেহপানানি নস্যঞ্চ ভোজ্যান্যনিলহন্তি চ। উপনাহাশ্চ শস্যন্তে স্বেদনং বস্তয়োঽর্দ্দিতে ॥ বস্তিরত্র শিরোবস্তিরেব। দশমূলীকষায়েণ মাতুলুঙ্গরসেন বা॥ বলয়া পঞ্চমূল্যা বা ক্ষীরং বাতাত্মকে হিতং ॥ পিষ্টং মাষকৃতং জগ্ধ্বা নবনীতেন সোঽর্দ্দিতী। ক্ষীরং মাংসরসৈর্ভুক্ত্বা দশমূলীরসং পিবেৎ ॥ অর্দ্দিতে পিত্তজে শীতান্ স্নেহাংশ্চৈব বিনির্দ্দিশেৎ। ঘৃতবস্তিপ্রসেকঞ্চ ক্ষীরসেকং তথৈব চ ॥ জিহ্মীভূতাননো মূকো দাহবান্ যোঽর্দ্দিতী ভবেৎ। কুর্য্যাৎ প্রতিক্রিয়াং তস্য বাতপিত্তবিনাশিনীং ॥ শ্লেষ্মভাগে ক্ষয়ং নীতে বৃংহণৈঃ সমুপাচরেৎ। অর্দ্দিতে শোথসংযুক্তে বমনঞ্চ প্রশস্যতে॥ রসোনকল্কং তিলতৈলমিশ্রং খাদেন্নরো যোঽর্দ্দিত-

রোগযুক্তঃ। তস্যার্দ্দিতং নাশমুপৈতি শীঘ্রং বৃন্দং ঘনানামিব বায়ুবেগাৎ॥ ইতি ভাবপ্রকাশঃ॥

অর্দ্দিতঃ (ত্রি) যাচিতঃ। ইত্যমরঃ॥ হিংসিতঃ। ইতি মেদিনী॥ গতঃ। পীড়িতঃ। ইতি শব্দরত্নাবলী॥

অৰ্দ্ধং (ক্লী) সমানাংশঃ। সমভাগঃ। আধা ইতি ভাষা। ইত্যমরঃ॥ সমভাগেঽৰ্দ্ধশব্দঃ পুমান্ ক্লীবঞ্চ। অৰ্দ্ধশব্দঃ পুংলিঙ্গঃ খণ্ডপর্য্যায় এব বিভাগীকৃত্য বণ্টিতস্য তুল্যবণ্টিতে অৰ্দ্ধং ক্লীবমেবেতি কেচিৎ। অৰ্দ্ধো রূপভেদাৎ ভাগে পুংসি। যথা বস্ত্রার্দ্ধো নগরার্দ্ধঃ উপচারাত্তু ভাগবতি বাচ্যলিঙ্গঃ। যথা অৰ্দ্ধা শাটী অৰ্দ্ধঃ কম্বলঃ অৰ্দ্ধং বস্ত্রং। ইতি মাধবী॥ অসমপরিভাগবৃত্তিস্ত্রিলিঙ্গোঽৰ্দ্ধ ইত্যনুন্যাসঃ। সমপ্রবিভাগেঽৰ্দ্ধশব্দো নপুংসক এব নান্যলিঙ্গঃ। ইতি ভাগবৃত্তিঃ। ইতি ভরতঃ॥

অৰ্দ্ধঃ (পুং) একদেশঃ। তৎপর্য্যায়ঃ। ভিত্তং ২ শকলং ৩ খণ্ডং ৪। ইত্যমরঃ॥

অৰ্দ্ধগঙ্গা (স্ত্রী) কাবেরী নদী। ইতি ত্রিকাণ্ডশেষঃ॥

অৰ্দ্ধগুচ্ছঃ (পুং) চতুৰ্ব্বিংশতিগুচ্ছকহারঃ। চব্বিশনরি দানা ইতি ভাষা। ইতি হেমচন্দ্রঃ

অৰ্দ্ধচন্দ্রঃ (পুং) নখক্ষতং। বাণবিশেষঃ। গলহস্তঃ। গলাটিপী যস্য প্রসিদ্ধিঃ। ইতি মেদিনী॥ চন্দ্রকঃ। ময়ূরপুচ্ছের চাঁদ ইতি ভাষা। চন্দ্রখণ্ডং। ইতি হেমচন্দ্রঃ

অৰ্দ্ধচন্দ্রা (স্ত্রী) কৃষ্ণত্রিবৃৎ। কাল তেউড়ী ইতি ভাষা। ইত্যমরঃ॥ [নির্ঘণ্টঃ॥

অৰ্দ্ধচন্দ্রিকা (স্ত্রী) কর্ণস্ফোটালতা। ইতি রাজ-

অৰ্দ্ধচোলকঃ (পুং) ক্ষুদ্রচোলকঃ। কাঁচলী ইতি ভাষা। ইতি হারাবলী॥ [চন্দ্রঃ॥

অৰ্দ্ধজাহ্নবী (স্ত্রী) কাবেরী নদী। ইতি হেম-

অৰ্দ্ধতিক্তঃ (পুং) নেপালনিম্বঃ। ইতি রাজনির্ঘণ্টঃ॥

অৰ্দ্ধনারীশঃ (পুং) শিবঃ। ইতি শব্দরত্নাবলী॥ তস্য ধ্যানং যথা। নীলপ্রবালরুচিরং বিলসত্ত্রিনেত্রং পাশারুণোৎপলকপালকশূলহস্তং। অৰ্দ্ধাম্বিকেশমনিশং প্রবিভক্তভূষং বালেন্দুবদ্ধমুকুটং প্রণমামি রূপং॥ ইতি তন্ত্রসারঃ॥

অৰ্দ্ধনারীশ্বরঃ (পুং) উমামহেশ্বরঃ। স চ শিবঃ। যথা বিষ্ণুধর্ম্মোত্তরে। অষ্টমী নবমীযুক্তা নবমী চাষ্টমীযুতা। অৰ্দ্ধনারীশ্বরপ্রায়া উমামাহেশ্বরী তিথিঃ॥ ইতি তিথ্যাদিতত্ত্বং॥ অপি চ। অজেশঃ সৰ্ব্বঃ সোমেশস্তথা লাঙ্গুলিদারুকৌ। অৰ্দ্ধনারীশ্বরশ্চোমাকান্তশ্চাষাঢ়িদণ্ডিনৌ॥ ইতি তন্ত্রসারে শিবমন্ত্রে শ্রীকণ্ঠাদিন্যাসঃ॥*॥ অস্য মন্ত্রাদিকং যথা। অগ্নিসম্বৰ্ত্তকাদিত্যরানিলৌ ষষ্ঠবিন্দুমৎ। চিন্তামণিরিতি খ্যাতং বীজং সৰ্ব্বসমৃদ্ধিদং॥ অগ্নী রেফঃ। সম্বর্ত্তকঃ ক্ষকারঃ। আদিত্যো মকারঃ। র রেফঃ। অনিলো যকারঃ। ঐ স্বরূপং। ষষ্ঠস্বর ঊকারঃ॥ প্রপঞ্চসারে। অনলকযমরেফপ্রাণসত্যান্তবামশ্রুতিহিমরুচিখণ্ডৈর্মণ্ডিতো মন্ত্ররাজঃ। ইতি বচনাৎ রেফ এব

ন তু বকারঃ। রঁং কঁং মঁং রঁং যঁং ঔঁং ঊঁং। ইতি মন্ত্রঃ। অস্য পূজা প্রাতঃকৃত্যাদিশৈবোক্তপীঠমন্বন্তং বিন্যস্য ঋষ্যাদিন্যাসং কুর্য্যাৎ। যথা শিরসি কশ্যপায় ঋষয়ে নমঃ। মুখেঽনুষ্টুপ্‌ছন্দসে নমঃ। হৃদি অর্দ্ধনারীশ্বরায় দেবতায়ৈ নমঃ। ততঃ করাঙ্গন্যাসৌ কুর্য্যাৎ। রং অঙ্গুষ্ঠাভ্যাং নমঃ। কং তর্জ্জনীভ্যাং স্বাহা। যং মধ্যমাভ্যাং বষট্। মং অনামিকাভ্যাং হুঁ। রং কনিষ্ঠাভ্যাং বৌষট্। যং করতলপৃষ্ঠাভ্যাং ফট্। এবং হৃদয়াদিষু। তথা চ নিবন্ধে। রেফাদিব্যঞ্জনৈঃ ষড়্‌ভিঃ কুর্য্যাদঙ্গানি ষট্ ক্রমাৎ। ততো ধ্যানং। নীলপ্রবালরুচিরং বিলসত্ত্রিনেত্রং পাশারুণোৎপলকপালকশূলহস্তং। অর্দ্ধাম্বিকেশমনিশং প্রবিভক্তভূষং বালেন্দুবদ্ধমুকুটং প্রণমামি রূপং॥ এবং ধ্যাত্বা মানসৈঃ সংপূজ্যার্ঘ্যস্থাপনং কৃত্বা শৈবোক্তপীঠপূজাং বিধায় পুনর্ধ্যাত্বাবাহনাদিপঞ্চপুষ্পাঞ্জলিদানপর্য্যন্তং বিধায় আবরণপূজামারভেৎ। যথা। কেশরেম্বগ্ন্যাদিকোণেষু মধ্যে দিক্ষু চ রং ইত্যাদিনা ষড়ঙ্গানি পূজয়েৎ। ততঃ পত্রেষু পূর্ব্ববৎ বৃষভাদীন্ পূজয়েৎ। পত্রাগ্রেষু পূর্ব্বাদিতঃ ব্রাহ্মীং মাহেশ্বরীং কৌমারীং বৈষ্ণবীং বারাহীং ইন্দ্রাণীং চামুণ্ডাং মহালক্ষ্মীঞ্চ পূজয়েৎ। তদ্বহিরিন্দ্রাদীন্ বজ্রাদীংশ্চ সংপূজ্য ধূপাদিবিসর্জনান্তং কর্ম্ম সমাপয়েৎ॥ অস্য পুরশ্চরণং লক্ষজপঃ। তথা চ। লক্ষমেকং জপেন্মন্ত্রমিত্থং মন্ত্রী বিচিন্তয়ন্। অযুতং মধুরাসিক্তৈর্জ্জুহুয়াত্তিলতণ্ডুলৈঃ॥ ইতি তন্ত্রসারঃ॥

অর্দ্ধপারাবতঃ (পুং) চিত্রকণ্ঠকপোতঃ। তিত্তিরিপক্ষী। ইতি মেদিনী॥

অর্দ্ধমাণবঃ (পুং) দ্বাদশযষ্টিকহারঃ। বারনরি হার ইতি ভাষা। ইতি হেমচন্দ্রঃ॥

অর্দ্ধরাত্রঃ (পুং) রাত্র্যর্দ্ধভাগঃ। দুইপ্রহর রাত্রি ইতি ভাষা। তৎপর্য্যায়ঃ। নিশীথঃ২। ইত্যমরঃ॥ নিসম্পাতঃ৩ অবসরালয়ঃ ৪। ইতি শব্দরত্নাবলী॥ সুপ্তজনঃ৫। ইতি জটাধরঃ॥ রাত্র্যষ্টমহূমুর্ত্তঃ। স তু রাত্রিমধ্যদণ্ডদ্বয়াত্মকঃ। সম্পূর্ণার্দ্ধরাত্রোঽপ্যয়ং। মহানিশা। সা তু সার্দ্ধপ্রহরানন্তরং সার্দ্ধতৃতীয়প্রহরপর্য্যন্তং। ইতি স্মৃতিঃ॥

অর্দ্ধর্চ্চঃ (পুং ক্লী) অর্দ্ধঋক্। ঋঙ্‌নামকবৈদিকমন্ত্রার্দ্ধভাগঃ। ইত্যমরঃ॥

অর্দ্ধলক্ষ্মীহরিঃ (পুং) বিষ্ণুঃ। যথা। গৌতমীয়ে। ঋষিঃ প্রজাপতিশ্ছন্দো গায়ত্রী দেবতা পুনঃ। অর্দ্ধলক্ষ্মীহরিঃ প্রোক্তঃ শ্রীবীজেন ষড়ঙ্গকং॥ অস্য মন্ত্রাদি যথা। তারং নমঃপদং ক্রয়াম্বরৌ দীর্ঘসমন্বিতৌ। পবনোণায় মন্ত্রোঽয়ং প্রোক্তো বস্বক্ষরঃ পরঃ॥ অস্য পূজাপ্রয়োগঃ। প্রাতঃকৃত্যাদিস্নানান্তং কর্ম্ম কৃত্বা পূজামণ্ডপমাগত্য বৈষ্ণবাচমনং কুর্য্যাৎ। তদ্যথা। গৌতমীয়ে। কেশবাদ্যৈস্ত্রিভিঃ পীত্বা দ্বাভ্যাং প্রক্ষালয়েৎ করৌ। দ্বাভ্যামোষ্ঠৌ দ্বিরুন্মৃজ্য দ্বাভ্যাং মৃজ্যান্মুখং ততঃ। একেন হস্তং প্রক্ষাল্য পাদাবপি তথৈকতঃ। সংপ্রোক্ষ্যৈকেন মূর্দ্ধানং ততঃ সঙ্কর্ষণাদিভিঃ॥ আস্য-

নাসাক্ষিকর্ণাংশ্চ নাভ্যুরস্কং ভুজৌ ক্রমাৎ। স্পৃশেদেবং ভবেদাচমনঞ্চ বৈষ্ণবাম্বয়ে॥ এবমাচমনং কৃত্বা সাক্ষান্নারায়ণো ভবেৎ। কেশবাদয়স্তু কেশবনারায়ণমাধবগোবিন্দ-বিষ্ণুমধুসূদনত্রিবিক্রমবামনশ্রীধরহৃষীকেশ-পদ্মনাভদামোদরসঙ্কর্ষণবাসুদেবপ্রদ্যুম্নানি-রুদ্ধপুরুষোত্তমাধোক্ষজনৃসিংহাচ্যুতজনার্দ্দ-নোপেন্দ্রহরিবিষ্ণবঃ॥ বাক্যন্তু ওম্ কেশ-বায় নমঃ। ইত্যাদি। তথা চ। সচতুর্থি-নমোহন্তৈশ্চ নামভির্ব্বিন্যসেৎ সুধীঃ। ততঃ সামান্যার্ঘ্যাদিমাতৃকান্যাসান্তং কর্ম্ম বিধায় কেশবকীত্যাদিন্যাসং কুর্য্যাৎ। অস্য ঋষ্যাদিন্যাসঃ। শিরসি প্রজাপতয়ে ঋষয়ে নমঃ। মুখে গায়ত্রীচ্ছন্দসে নমঃ। হৃদি অর্দ্ধলক্ষ্মীহরয়ে দেবতায়ৈ নমঃ। ততঃ করাঙ্গন্যাসৌ। শ্রীং অঙ্গুষ্ঠাভ্যাংনমঃ ইত্যাদি শ্রীং হৃদয়ায় নমঃ। ইত্যাদি। তথা চ গৌতমীয়ে। ঋষিঃ প্রজাপতিশ্ছন্দো গায়ত্রী দেবতা পুনঃ। অর্দ্ধলক্ষ্মীহরিঃ প্রোক্তঃ শ্রীবীজেন ষড়ঙ্গকং॥ ততো ধ্যানং। উদ্যৎপ্রদ্যোতনশতরুচিং তপ্ত-হেমাবদাতং পার্শ্বদ্বন্দ্বে জলধিসুতয়া বিশ্ব-ধাত্র্যা চ জুষ্টং। নানারত্নোল্লসিতবিবিধা-কল্পমাপীতবস্ত্রং বিষ্ণুং বন্দে দরকমল-কৌমোদকীচক্রপাণিং॥ ইত্যাদি। ইতি তন্ত্রসারঃ॥ [ইতি হেমচন্দ্রঃ॥

অর্দ্ধবীক্ষণং (ক্লী) অপাঙ্গদর্শনং। কটাক্ষঃ।

অর্দ্ধশনং (ক্লী) অর্দ্ধাশনং। অর্দ্ধভোজনং। ইতি শব্দরত্নাবলী॥

অর্দ্ধসফরঃ (পুং) ক্ষুদ্রমৎস্যবিশেষঃ। দাঁড়িকা মাছ ইতি ভাষা। তৎপর্য্যায়ঃ। দণ্ড-পালঃ ২। ইতি হারাবলী॥

অর্দ্ধহারঃ (পুং) চতুঃষষ্টিযষ্টিকহারঃ। চৌষট্টি-নরি হার ইতি ভাষা। ইত্যমরঃ॥

অর্দ্ধাশনং (ক্লী) অর্দ্ধভোজনং। ইতি শব্দ-রত্নাবলী॥

অর্দ্ধাসনং (ক্লী) স্নেহদানং। অকুৎসনং। ইতি ধরণিঃ॥

অর্দ্ধেন্দুঃ (পুং) চন্দ্রার্দ্ধভাগঃ। গলহস্তঃ। নখ-চিহ্নং। অতিপ্রৌঢ়স্ত্রীযোন্যঙ্গুলিযোজনং। ইতি মেদিনী॥ অর্দ্ধচন্দ্রবাণঃ। ইতি হেম-চন্দ্রঃ॥

অর্দ্ধোদয়ঃ (পুং) যোগবিশেষঃ। স চ রবিবার-ব্যতীপাতশ্রবণানক্ষত্রৈর্যুক্তা চেৎ পৌষ-মাঘয়োরমাবাস্যা স্যাত্তদা ভবতি। যথা। পাশ্চাত্যনির্ণয়ামৃতে। অমার্কপাতশ্রবণৈ-র্যুক্তা চেন্মাঘপৌষয়োঃ। অর্দ্ধোদয়ঃ স বিজ্ঞেয়ঃ কোটিসূর্য্যগ্রহৈঃ সমঃ॥ অত্র সূর্য্য-পর্ব্বশতাধিক ইতি কৃত্যচিন্তামণৌ পাঠঃ। তথা। দিবৈব যোগঃ শস্তোহয়ং ন চ রাত্রৌ কদাচন। স্কন্দপুরাণে। অর্দ্ধোদয়ে তু সংপ্রাপ্তে সর্ব্বং গঙ্গাসমং জলং। শুদ্ধা-ত্মানো দ্বিজাঃ সর্ব্বে ভবেয়ুর্ব্রহ্মসন্নিভাঃ॥ যৎকিঞ্চিৎ ক্রিয়তে দানং তদ্দানং মেরু-সন্নিভং। শিববিষ্ণুস্নানপ্রশস্তকালোহপি। বৃহন্নারদীয়ং। অর্দ্ধোদয়ে চ পুষ্যার্কে হস্তার্কে রোহিণীবুধে। ইতি তিথ্যাদিতত্ত্বং॥

অর্দ্ধোরুকং (ক্লী) উত্তমস্ত্রীণাং অর্দ্ধোরু-পর্য্যন্তং চেলনাকারপরিধেয়বস্ত্রং। তৎ-পর্য্যায়ঃ। চণ্ডাতকং ২। ইত্যমরঃ॥

অর্পণং (ক্লী) প্রাপণং। সমর্পণং। যথা। যৎ করোষি যদশ্নাসি যজ্জুহোষি দদাসি যৎ। যত্তপস্যসি কৌন্তেয় তৎ কুরুষ্ব মদর্পণং॥ ইতি শ্রীভগবদ্গীতায়াং ৯ অধ্যায়ঃ॥

অর্পিশঃ (পুং) হৃদয়ং। ইত্যুণাদিকোষঃ॥

অর্ব্ব হিংসে। গতৌ। ইতি কবিকল্পদ্রুমঃ॥ অর্ব্বতি। ইতি দুর্গাদাসঃ॥

অর্ব্বুদঃ (পুং ক্লী) দশকোটিসংখ্যা। রোগবিশেষঃ। মাংসকীলঃ। মাংসপুরুষঃ। আব্ ইতি ভাষা। ইতি লিঙ্গাদিসংগ্রহে অমরো মেদিনী চ॥ তস্য নিদানলক্ষণে। গাত্রপ্রদেশে কচিদেব দোষাঃ সংমূর্চ্ছিতা মাংসমসৃক্ প্রদূষ্য। বৃত্তং স্থিরং মন্দরুজং মহান্তমনল্পমূলং চিরবৃদ্ধ্যপাকং॥ কুর্ব্বন্তি মাংসোচ্ছ্রয়মত্যগাধং তমর্ব্বুদং শাস্ত্রবিদো বদন্তি॥ মহান্তং গ্রন্থ্যপেক্ষয়া চিরেণ বৃদ্ধিরপাকশ্চ যস্য তৎ চিরবৃদ্ধ্যপাকং। অপাকমিতি গ্রন্থেঃ সকাশাদস্য ভেদজ্ঞাপকং। অত্যগাধং দূরানুপ্রবিষ্টং॥ *॥ নিদানপূর্ব্বকাণি বিশিষ্টানি লক্ষণান্যাহ। বাতেন পিত্তেন কফেন বাপি রক্তেন মাংসেন চ মেদসা চ। তজ্জায়তে তস্য চ লক্ষণানি গ্রন্থেঃ সমানানি সদা ভবন্তি॥ গ্রন্থেঃ সমানানি বাতিকপৈত্তিকশ্লৈষ্মিকমেদোজানাং গ্রন্থীনাং লক্ষণৈর্ব্বাতিকপৈত্তিকশ্লৈষ্মিকমেদোজানামর্ব্বুদানাং লক্ষণানি তুল্যানি ভবন্তি॥ *॥ রক্তার্ব্বুদমাহ। দোষপ্রদুষ্টে রুধিরং শিরাশ্চ সঙ্কোচ্য সংপীড্য ততস্ত্বপাকং। সাস্রাবমুন্নহ্যতি মাংসপিণ্ডং মাংসাঙ্কুরৈরাবৃতমাশু বৃদ্ধিং॥ স্রবত্যজস্রং রুধিরং প্রদুষ্টমসাধ্যমেতদ্রুধিরাত্মকন্তু। রক্তক্ষয়োপদ্রবপীড়িতত্বাৎ পাণ্ডুর্ভবেদর্ব্বুদপীড়িতস্তু॥ দোষোঽত্র পিত্তং রুধিরং শিরাশ্চ সঙ্কোচ্য সংপীড্য সংহতীকৃত্য মাংসাসৃজোঃ সর্ব্বেষ্বর্ব্বুদেষু দূষ্যত্বং রক্তজে তু বিশেষতো রক্তদুষ্টিঃ। এবং মাংসার্ব্বুদে বিশেষতো মাংসদুষ্টির্ব্বোদ্ধব্যা। ততো মাংসপিণ্ডমুন্নহ্যতি উদ্গতং করোতি। অপাকং ঈষৎপাকং যথা স্যাদেবমিতি ক্রিয়াবিশেষণং ঈষৎপাকশ্চ একদেশপাকেন। রক্তক্ষয়োপদ্রবপীড়িতত্বাৎ। রক্তক্ষয়োপদ্রবাঃ সুশ্রুতেনোক্তাঃ। তৈঃ পীড়িতত্বাৎ। অর্ব্বুদপীড়িতঃ রক্তার্ব্বুদপীড়িতঃ॥ *॥ মাংসার্ব্বুদস্য সংপ্রাপ্তিমাহ। মুষ্টিপ্রহারাদিভিরর্দ্দিতেঽঙ্গে মাংসং প্রদুষ্টং সমুপৈতি শোথং। অবেদনং স্নিগ্ধমনন্যবর্ণমপাকমশ্মোপমমপ্রচাল্যং॥ মাংসং প্রদুষ্টং বাতেন। অবেদনং বেদনারহিতং ঈষদ্বেদনং বা। অপাকং পাকরহিতং ঈষৎপাকং বা। অশ্মোপমং পাষাণবৎ কঠিনং। অপ্রচাল্যং স্থিরং। যদ্যপি রক্তমাংসার্ব্বুদয়ো রক্তমাংসয়োর্হেতুত্বেনোক্তিঃ তথাপি রক্তজে পিত্তং। মাংসজে বায়ুরারম্ভকঃ॥*॥ নিদানমাহ। প্রদুষ্টমাংসস্য নরস্য গাঢ়মেতদ্ভবেন্মাংসপরায়ণস্য। মাংসাশনাভ্যাসেন যঃ প্রদুষ্টমাংসস্তস্যৈব ভবতি ইত্যর্থঃ॥*॥ অসাধ্যমাহ। মাংসার্ব্বুদং ত্বেতদসাধ্যমাহুঃ সাধ্যেষ্বপীমানি বিবর্জ্জয়েচ্চ।

সংপ্রস্তুতং মর্ম্মসু যচ্চ জাতং স্রোতঃসু বা যচ্চ ভবেদচাল্যং ॥ সাধ্যেষ্বপি বাতজাদিষ্বপি। ইমানি বক্ষ্যমাণানি সংপ্রস্তুতাদীনি ॥*॥ অপরাসাধ্যমাহ। যজ্জায়তেঽন্যৎ খলু পূর্ব্বজাতে জ্ঞেয়ং তদধ্যর্ব্বুদমর্ব্বুদজ্ঞৈঃ। যদ্দ্বন্দ্বজাতং যুগপৎ ক্রমাদ্বা দ্বিরর্ব্বুদং তচ্চ ভবেদসাধ্যং ॥*॥ অর্ব্বুদানাং পাকাভাবে হেতুমাহ। ন পাকমায়াতি কফাধিকত্বাম্মেদোবহুত্বাচ্চ বিশেষতস্তু। দোষস্থিরত্বাৎ গ্রথনাচ্চ তেষাং সর্ব্বার্ব্বুদান্যেব নিসর্গতস্তু ॥ গ্রথনাৎ গ্রন্থিরূপত্বাৎ। নন্বপচ্যাং কফমেদসোরাধিক্যেঽপি পাকো দৃশ্যতে তথাত্র কথং ন পাক ইত্যাহ নিসর্গাৎ স্বভাবাৎ ॥*॥ অথার্ব্বুদস্য চিকিৎসা। গ্রন্থ্যর্ব্বুদানাং ন যতো বিশেষঃ প্রদোষহেত্বাকৃতিদোষদূষ্যৈঃ। অতশ্চিকিৎসেদ্ভিষগর্ব্বুদানি বিধানবিদ্‌গ্রন্থিচিকিৎসিতেন ॥ হরিদ্রালোধ্রপত্তঙ্গগৃহধূমমনঃশিলা। মধুপ্রগাঢ়ো লেপোঽয়ং মেদোঽর্ব্বুদহরঃ পরঃ॥ ১ ॥ মূলকস্য কৃতঃ ক্ষারো হরিদ্রায়াস্তথৈব চ। শঙ্খচূর্ণেন সংযুক্তো লেপঃ সিদ্ধোঽর্ব্বুদাপহঃ ॥ ২ ॥ বটদুগ্ধকুষ্ঠরোমকলিপ্তং বদ্ধং বটস্য পত্রেণ। অধ্যস্থিসপ্তরাত্রাৎ মহদপ্যুপশান্তিমর্ব্বুদং গচ্ছেৎ ॥৩॥ শিগ্রুমূলকয়োর্ব্বীজং রক্ষোঘ্নং সুরসাং যবং। তক্রেণাশ্বরিপুং পিষ্ট্বা লিম্পেদর্ব্বুদশান্তয়ে ॥৪॥ রক্ষোঘ্নং সর্ষপং। সুরসাং তুলসীং। যবং ইন্দ্রযবং। অশ্বরিপুং করবীরং। ইত্যর্ব্বুদাধিকারঃ। ইতি ভাবপ্রকাশঃ ॥

অর্ব্বুদঃ (পুং) পর্ব্বতবিশেষঃ। ইতি মেদিনী ॥

অর্ভঃ (পুং) বালকঃ। ইতি হেমচন্দ্রঃ ॥

অর্ভকঃ (পুং) শিশুঃ। ইত্যমরঃ ॥ মূর্খঃ। কৃশঃ। ইতি মেদিনী ॥ স্বল্পঃ। সদৃশঃ। ইত্যুণাদিকোষঃ ॥

অর্শ্মং (ক্লী পুং) চক্ষূরোগবিশেষঃ। ইতি লিঙ্গাদিসংগ্রহে অমরঃ ॥ তচ্চ পঞ্চবিধং। প্রস্তার্য্যর্শ্ম ১ শুক্লার্শ্ম ২ রক্তার্শ্ম ৩ মাংসার্শ্ম ৪ স্নায়্বর্শ্ম ৫। এষাং লক্ষণানি তত্তৎশব্দে দ্রষ্টব্যানি। বৈদ্যকে নাস্তি ক্লীবলিঙ্গোঽয়ং শব্দঃ ॥ [ পরিভাষা ॥

অর্শ্মণঃ (পুং) দ্রোণপরিমাণং। ইতি বৈদ্যক-

অর্য্যঃ (পুং) স্বামী। বৈশ্যঃ। ইত্যমরঃ ॥ শ্রেষ্ঠে ত্রি। ইতি তট্টীকায়াং ভরতঃ ॥

অর্য্যমা [ন্] (পুং) সূর্য্যঃ। অর্কবৃক্ষঃ। ইত্যমরঃ ॥ পিতৃদেববিশেষঃ। ইতি মেদিনী ॥

অর্য্যা (স্ত্রী) বৈশ্যস্ত্রীজাতিঃ। ইত্যমরঃ ॥

অর্য্যাণী (স্ত্রী) বৈশ্যস্ত্রীজাতিঃ। ইত্যমরঃ ॥

অর্য্যী (স্ত্রী) বৈশ্যপত্নী। ইত্যমরঃ ॥ বৈশ্যস্ত্রীজাতিঃ। ইতি দুর্গাদাসঃ ॥

অর্ব্ব বধে। ইতি কবিকল্পদ্রুমঃ ॥ অর্ব্বতি। ইতি দুর্গাদাসঃ ॥ অন্তঃস্থবকারান্তোঽয়ং ॥

অর্ব্বতী (স্ত্রী) ঘোটকী। ইতি হলায়ুধঃ ॥ কুট্টনী। ইতি ত্রিকাণ্ডশেষঃ ॥

অর্ব্বা [ন্] (পুং) ঘোটকঃ। ইত্যমরঃ ॥ ইন্দ্রঃ। গোকর্ণপরিমাণং। ইতি বিশ্বঃ ॥ কুৎসিতে ত্রি। ইত্যমরঃ ॥

অর্ব্বাক্ ব্য পূর্ব্বকালতঃ পশ্চাৎ। তৎপর্য্যায়ঃ। অবরঃ ২। ইত্যমরঃ ॥ নিকটং। ইতি ভরতঃ ॥ অর্ব্বাচ্ ইতি কেচিৎ ॥

অর্ব্বাচীনঃ (ত্রি) পশ্চাজ্জাতঃ। বিপর্য্যস্তং। ইতি ধরণিঃ॥

অর্শং (ক্লী) অর্শোরোগঃ। ইতি শব্দরত্নাবলী॥

অর্শঃ [স্] (ক্লী) স্বনামখ্যাতপায়ুরোগঃ। তৎপর্য্যায়ঃ। দুর্নামকং ২। ইত্যমরঃ॥ দুর্নাম ৩ গুদকীলঃ ৪ গুদাঙ্কুরঃ ৫। ইতি রাজনির্ঘণ্টঃ॥ অনামকং ৬। ইতি শব্দরত্নাবলী॥ যথা। অথার্শোঽধিকারঃ। তত্রার্শসঃ সন্নিকৃষ্টনিদানান্যাহ। পৃথগ্দোষৈঃ সমস্তৈশ্চ শোণিতাৎ সহজানি চ। অর্শাংসি ষট্প্রকারাণি বিদ্যাদ্গুদবলিত্রয়ে॥ কেচিদ্রুধিরস্যাপি দোষত্বং মন্যন্তে। তন্মতমাশ্রিত্যাহ। শোণিতাদিতি। সহজানি শরীরেণ সহ জাতানি। সঙ্খ্যাঞ্চাহ। ষট্প্রকারাণীতি। গুদবলিত্রয়ে সার্দ্ধচতুরঙ্গুলং গুদস্য মানং তস্যাবয়বভূতাস্তিস্রো বলয়ঃ শঙ্খাবর্ত্তনিভা উপর্য্যুপরি সন্তি। তাসাং নাম প্রবাহিণী বিসর্জ্জনী সম্বরণী চেতি। তত্র গুদৌষ্ঠোঽর্দ্ধাঙ্গুলমানস্তদূর্দ্ধমঙ্গুলমানা প্রথমা বলিঃ। সার্দ্ধৈকাঙ্গুলমানা দ্বিতীয়া। তৃতীয়া চ তাবতী। উক্তঞ্চ। অর্দ্ধাঙ্গুলপ্রমাণেন গুদৌষ্ঠং পরিচক্ষতে। গুদৌষ্ঠাদঙ্গুলং চৈকং প্রথমাস্তু বলিং বিদুঃ॥ সার্দ্ধৈকাঙ্গুলমানেন পৃথগন্যে প্রকীর্ত্তিতে॥ *॥ অথ বাতার্শসো বিপ্রকৃষ্টং নিদানমাহ। কষায়কটুতিক্তানি রূক্ষশীতলঘূনি চ। প্রমিতাল্পাশনং তীক্ষ্ণং মদ্যং মৈথুনসেবনং॥ লঙ্ঘনং দেশকালৌ চ শীতৌ ব্যায়ামকর্ম্ম চ। শোকো বাতাতপস্পর্শো হেতুর্ব্বাতার্শসাং মতঃ॥ প্রমিতমপরিমিতং। তীক্ষ্ণমিতি মদ্যবিশেষণং। পৈষ্ট্যাদিমুত্তমদ্যস্য বাতসমকত্বাৎ। আতপস্তূষ্ণবীর্য্যোঽপ্যুদ্ভূতরৌক্ষ্যাদ্বাতপ্রকোপে হেতুঃ বাতার্শসাং। নন্বর্শাংসি সর্ব্বাণি ত্রিদোষজানি। যত আহ। পঞ্চাত্মা মারুতঃ পিত্তং কফো গুদবলিত্রয়ে। সর্ব্ব এব প্রকুপ্যন্তি গুদজানাং সমুদ্ভবে ইতি॥ তথা সতি কথং বাতার্শসামিতি উচ্যতে। তত্তদাধিক্যাদ্ব্যপদেশভেদ ইতি ন দোষঃ। অতএব অগ্রে বক্ষ্যতে। পিত্তোল্বণানামিতি তথাচ চরকঃ। অর্শাংসি নাম জায়ন্তে নাসন্নিপতিতৈস্ত্রিভিঃ। দোষৈর্দোষবিশেষাত্তু বিশেষঃ কথ্যতেঽর্শসামিতি॥*॥ অথ পিত্তার্শসো বিপ্রকৃষ্টনিদানমাহ। কট্বম্ললবণোষ্ণানি ব্যায়ামাগ্ন্যাতপপ্রভাঃ। দেশকালাবশিশিরৌ ক্রোধো মদ্যমসূয়নং॥ বিদাহি তীক্ষ্ণমুষ্ণং যৎ তৎ সর্ব্বং পানভোজনং। পিত্তোল্বণানাং বিজ্ঞেয়ঃ প্রকোপে হেতুরর্শসাং॥ উষ্ণদ্রব্যস্য স্পর্শনাদি বোদ্ধব্যং উষ্ণপানভোজনস্যাগ্রে বক্ষ্যমাণত্বাৎ। অগ্ন্যাতপপ্রভা অগ্ন্যাতপয়োঃ প্রভা তেজঃ। অথবা অগ্ন্যাতপেতরতেজস্বিদ্রব্যস্য দীপ্তিঃ প্রভা। অশিশিরো দেশো মরুঃ। অসূয়নং পরসম্পত্তিদ্বেষঃ। পানভোজনং পীয়ত ইতি পানং। ভুজ্যতে ইতি ভোজনং প্রকোপে উৎপত্তৌ॥ *॥ অথ কফার্শসো বিপ্রকৃষ্টং নিদানমাহ। মধুরস্নিগ্ধশীতানি লবণাম্লগুরূণি চ। অব্যায়ামদিবাস্বপ্নশয্যাসনসুখে রতিঃ॥ প্রাগ্বাতসেবাশীতৌ চ দেশকালাবচিন্তনং। শ্লৈষ্মিকাণাং সমুদ্দিষ্টমেতৎ কারণমর্শসাং॥

অচিন্তনং নিশ্চিন্ততা ॥ * ॥ অথ ত্রিদোষার্শসো বিপ্রকৃষ্টং নিদানমাহ। সর্ব্বো হেতুস্ত্রিদোষাণাং সহজৈর্লক্ষণং সমং। জনকত্বেন ত্রয়ো দোষা যেষাং তানি ত্রিদোষাণি অর্শাংসি তেষাং সর্ব্বো হেতুঃ। পৃথগ্‌বাতপিত্তকফার্শোহেতুঃ। ত্রিদোষার্শসাং লক্ষণঞ্চ সহজৈঃ সহজার্শোভিঃ সমং সদৃশং। নন্থ ত্রিদোষাণাং ইতি বিশেষণং ব্যর্থং। যতঃ সর্ব্ব এব ব্যাধয়স্ত্রিদোষজাঃ। উক্তঞ্চ। দ্রব্যমেকরসং নাস্তি ন রোগোহপ্যেকদোষজঃ। একস্ত কুপিতো দোষ ইতরাবপি কোপয়েৎ ॥ ইতি। যুক্তিমপ্যাহ। স্বকারণাদ্বৃদ্ধো বায়ুঃ শৈত্যাচ্ছীতলং শ্লেষ্মাণং লাঘবাত্তেজোরূপং পিত্তং বর্দ্ধয়তে। তথা পিত্তং কটুকত্বাৎ বাতং দ্রবত্বাৎ কফং বর্দ্ধয়তে। শ্লেষ্মা চ শৈত্যাদ্বায়ুং দ্রবত্বাৎ পিত্তং বর্দ্ধয়তে ইতি। উচ্যতে। যত্র স্বস্বকারণাত্ত্রয়ো দোষাঃ কুপ্যন্তি তত্র ত্রিদোষজব্যপদেশ ইতি ন দোষঃ॥ * ॥ অথার্শসাং পূর্ব্বরূপমাহ। বিষ্টম্ভোহন্নস্য দৌর্ব্বল্যং কুক্ষেরাটোপ এব চ। কার্শ্যমুদ্গারবাহুল্যং সক্থিসাদোহল্পবিট্‌কতা ॥ গ্রহণীদোষপাণ্ড্বর্ত্তেঃ প্রশঙ্কা চোদরস্য চ। পূর্ব্বরূপাণি নির্দ্দিষ্টান্যর্শসামভিবৃদ্ধয়ে ॥ দৌর্ব্বল্যমাবল্যং। আটোপঃ গুড়্‌গুড়াশব্দঃ। অভিবৃদ্ধয়ে উৎপত্তয়ে॥*॥ অথার্শসাং সংপ্রাপ্তিপূর্ব্বকং সামান্যং লক্ষণমাহ। দোষাস্ত্বঙ্মাংসমেদাংসি সংদূষ্য বিবিধাকৃতীন্। মাংসাঙ্কুরানপানাদৌ কুর্ব্বন্ত্যর্শাংসি তান্ জগুঃ॥ ত্বঙ্মাংসপদেন ত্বঙ্মাংসাশ্রিতং রক্তমপি গৃহ্যতে। চিকিৎসায়াং রক্তস্রাবণোপদেশাৎ। অপানং গুদং। আদিশব্দান্নাসানেত্রনাভিমেঢ্রাদিষ্বপি কুর্ব্বন্তি॥ * ॥ অথ বাতার্শোলক্ষণমাহ। গুদাঙ্কুরা বহ্বনিলাঃ শুষ্কাশ্চিমিচিমান্বিতাঃ। ম্লানাঃ শ্যাবারুণাঃ স্তব্ধা বিশদাঃ পরুষাঃ খরাঃ। মিথোবিসদৃশা বক্রাস্তীক্ষ্ণা বিস্ফুটিতাননাঃ॥ বিম্বীকর্কন্ধুখর্জ্জুরকার্পাসীফলসন্নিভাঃ। কেচিৎ কদম্বপুষ্পাভাঃ কেচিৎ সিদ্ধার্থকোপমাঃ॥ শিরঃপার্শ্বাংসকট্যূরুবংক্ষণাভ্যধিকব্যথাঃ। ক্ষবথূদ্গারবিষ্টম্ভহৃদ্‌গ্রহারোচকপ্রদাঃ ॥ কাসশ্বাসাগ্নিবৈষম্যকর্ণনাদভ্রমাবহাঃ। তৈরার্ত্তো গ্রথিতং স্তোকং সশব্দং সপ্রবাহিকং ॥ রুক্‌ফেনপিচ্ছানুগতং বিবদ্ধমুপবেশ্যতে। কৃষ্ণত্বঙ্‌নখবিণ্মূত্রনেত্রবক্ত্রশ্চ জায়তে॥ গুল্মপ্লীহোদরাষ্ঠীলাসম্ভবস্তত এব চ। বহ্বনিলাঃ বাতোল্বণাঃ। গুদাঙ্কুরাঃ অর্শাংসি। চিমিচিমান্বিতাঃ চিমিচিমা ব্যথাবিশেষঃ চরচরাব ইতি লোকে তদন্বিতাঃ। শ্যাবারুণাঃ শ্যাবা ধূম্রবর্ণাঃ। অরুণা ঈষদ্রক্তাঃ। স্তব্ধাঃ কঠিনাঃ। বিশদাঃ অপিচ্ছিলাঃ। পরুষাঃ গোজিহ্বাবৎ স্পর্শে কর্কশাঃ। খরাঃ কর্কোটকফলবৎ সূক্ষ্মানেককণ্টকাচিতাঃ। বিম্ব্যাদিফলসন্নিভাঃ আকৃত্যা। অত্র বিকল্পবোধকং বক্ষ্যমাণং কেচিৎ কেচিদিতি পদং সম্বন্ধনীয়ং। কদম্বপুষ্পাভাঃ স্থূলা অনেকসূক্ষ্মশিখরাঃ। সিদ্ধার্থকোপমাঃ পীতসূক্ষ্মপিড়কাশ্রিতাঃ। তৈরার্ত্ত ইতি অর্শোভিঃ পীড়িতঃ। তৈরার্ত্তো বিড়ুপবেশ্যত ইত্যার্ত্তস্য প্রযোজ্য-

কর্ত্তুঃ কর্ম্মতার্থত্বাৎ। গ্রথিতং মলগুটিকা-গ্রথিতবিড়্মূর্ত্তিরূপং। পিচ্ছা পিচ্ছিলো স্রবভাগঃ। বদ্ধং সংহতং। বিষ্‌শব্দো নপুংসকেঽপ্যস্তি। উপবেশ্যতে ত্যজ্যতে। তত এব বাতার্শস এব গুল্মাদীনাং সম্ভবঃ। অষ্ঠীলা নাভেরধোভাগে পাষাণপিণ্ডিকাবদ্বাতব্যাধিবিশেষঃ॥ *॥ অথ পিত্তার্শো-লক্ষণমাহ। পিত্তোত্তরা নীলমুখা রক্তপীতাসিতপ্রভাঃ। তন্বস্রস্রাবিণো বিস্রাস্তনবো মৃদবঃ শ্লথাঃ॥ শুকজিহ্বাযকৃৎখণ্ডজলৌকোবক্ত্রসন্নিভাঃ। দাহপাকজ্বরস্বেদতৃষ্ণামূর্চ্ছারতিপ্রদাঃ॥ সোষ্মাণো দ্রবনীলোষ্ণপীতরক্তামবর্চ্চসঃ। যবমধ্যা হরিৎপীতহারিদ্রত্বঙ্‌নখাদয়ঃ॥ পিত্তোত্তরাঃ পিত্তোল্বণাঃ। তনু অঘনং। শ্লথা লম্বিনঃ। সন্নিভাঃ আকৃত্যা। পাকো গুদস্য। সোষ্মাণঃ উষ্ণস্পর্শাঃ। হরিচ্ছাকবর্ণং। পীতং হরিতালবর্ণং। হারিদ্রং হরিদ্রাবর্ণং। আদিশব্দান্মলমূত্রমুখানাং গ্রহণং॥ *॥ অথ কেচিদ্রুধিরস্যাপি দোষত্বং মন্যন্তে তন্মতমাশ্রিত্য রক্তার্শো-লক্ষণমাহ। রক্তোল্বণা গুদে কীলাঃ পিত্তাকৃতিসমন্বিতাঃ। বটপ্ররোহসদৃশা গুঞ্জাবিদ্রুমসন্নিভাঃ॥ তেঽত্যর্থং দুষ্টমুষ্ণঞ্চ গাঢ়বিট্‌কপ্রপীড়িতাঃ। স্রবন্তি সহসা রক্তং তস্য চাতিপ্রবৃত্তিতঃ॥ ভেকাভঃ পীড্যতে দুঃখৈঃ শোণিতক্ষয়সম্ভবৈঃ। হীনবর্ণবলোৎসাহো হতৌজাঃ কলুষেন্দ্রিয়ঃ॥ বিট্ শ্যাবং কঠিনং রূক্ষমধোবায়ুর্ন বর্ত্ততে। তনু চারুণবর্ণঞ্চ ফেনিলঞ্চাসৃগর্শসাং॥ কট্যূরুগুদশূলঞ্চ দৌর্ব্বল্যং যদি বাধিকং। তত্রানুবন্ধো বাতস্য হেতুর্যদি চ রূক্ষণং॥ শিথিলং শ্বেতপীতঞ্চ বিট্‌ স্নিগ্ধং গুরু শীতলং। যদ্যর্শসাং ঘনঞ্চাসৃক্ তন্তুমৎ পাণ্ডুপিচ্ছিলং॥ গুদং সপিচ্ছং স্তিমিতং গুরু স্নিগ্ধঞ্চ কারণং। শ্লেষ্মানুবন্ধো বিজ্ঞেয়স্তত্র রক্তার্শসাং বুধৈঃ॥ গুদে কীলা অর্শাংসি। পিত্তাকৃতিসমন্বিতাঃ পিত্তার্শো-লক্ষণযুক্তাঃ। আকারেণ চ বটপ্ররোহাদিসদৃশাঃ। দুঃখৈ রোগৈঃ। ত্বক্‌পারুষ্যাম্বুশীতপ্রার্থনাদিভিঃ। কলুষেন্দ্রিয়ঃ ব্যাকুলসর্ব্বেন্দ্রিয়ঃ॥ *॥ রক্তজস্যাপি বাতোল্বণস্য লক্ষণমাহ। তত্র রক্তার্শসি। অনুবন্ধঃ উল্বণত্বং। রূক্ষণং রূক্ষয়তীতি রূক্ষণং রূক্ষং দ্রব্যং। পিত্তোল্বণস্য তু লক্ষণং। রক্তোল্বণা গুদে কীলাঃ পিত্তাকৃতিসমন্বিতাঃ। ইত্যাদিনৈবোক্তং। রক্তপিত্তয়োঃ সমানলিঙ্গত্বাৎ॥ *॥ কফোল্বণস্য লক্ষণমাহ। সপিচ্ছং পিচ্ছিলার্দ্রং। স্তিমিতমার্দ্রচর্ম্মাবগুণ্ঠিতমিব॥ *॥ অথ শ্লেষ্মার্শো-লক্ষণমাহ। শ্লেষ্মোল্বণা মহামূলা ঘনা মন্দরুজঃ সিতাঃ। উৎপন্নোপচিতাঃ স্নিগ্ধাঃ স্তব্ধবৃত্তগুরুস্থিরাঃ॥ পিচ্ছিলাঃ স্তিমিতাঃ শ্লক্ষ্ণাঃ কণ্ড্বাঢ্যাঃ স্পর্শনপ্রিয়াঃ। করীরপনসাস্থ্যাভাস্তথা গোস্তনসন্নিভাঃ॥ বঙ্ক্ষণানাহিনঃ পায়ুবস্তিনাভিবিকর্ষিণঃ। সকাসশ্বাসহৃল্লাসপ্রসেকারুচিপীনসাঃ॥ মেহকৃচ্ছ্রশিরোজাড্যশিশিরজ্বরকারিণঃ। ক্লৈব্যাগ্নিমার্দ্দবচ্ছর্দ্দিরামপ্রায়বিকারদাঃ॥ বসাভসকফপ্রাজ্যপুরীষাঃ সপ্রবাহিকাঃ। ন স্রবন্তি

ন ভিদ্যন্তে পাণ্ডুস্নিগ্ধত্বগাদয়ঃ ॥ উৎপন্নাঃ উন্নতাঃ। উপচিতাঃ স্থূলাঃ। স্নিগ্ধাঃ সস্নেহাঃ। স্থিরা নিশ্চলাঃ। পিচ্ছিলাঃ কফারদ্ধত্বাৎ। স্তিমিতাঃ আর্দ্রবস্ত্রগুণ্ঠিতা ইব। শ্লক্ষ্ণা মণিবন্মসৃণা। করীরো বংশাঙ্কুরঃ। পনসাস্থিগোস্তনাঃ তদাকৃতয়ঃ। বঙ্ক্ষণানাহিনঃ বঙ্ক্ষণয়োরানাহকারিণঃ। পায্বাদিম্বাকর্ষণবৎ পীড়াকারিণঃ। কৃচ্ছ্রং মূত্রকৃচ্ছ্রং। শিরোজাড্যং শিরসো ভারাক্রান্তত্বমিব। ক্লৈব্যং স্ত্রীধ্বনিচ্ছা। অত্র ছর্দ্দিশব্দঃ সান্ত আর্ষত্বাৎ। আমপ্রায়বিকারদাঃ আমবহুলা ব্যাধয়োঽতীসারগ্রহণ্যাদয়ঃ তান্ দদাতি ॥*॥ অথ দ্বন্দ্বজার্শোলক্ষণমাহ। হেতুলক্ষণসংসর্গাদ্বিদ্যাৎ দ্বন্দ্বোল্বণানি চ ॥*॥ অত্র ত্রিদোষার্শসঃ সহজার্শসশ্চ লক্ষণমাহ। সর্বৈঃ সর্ব্বাত্মকান্যাহুর্ল্লক্ষণৈঃ সহজানি চ। সর্ব্বৈর্ল্লক্ষণৈর্ব্বাতপিত্তশ্লেষ্মার্শোলক্ষণৈঃ প্রাগুক্তৈঃ। সর্ব্বাত্মকানি সান্নিপাতিকান্যর্শাংস্যাহুঃ। তথা তৈরেব লক্ষণৈঃ সহজানি চার্শাংস্যাহুঃ ॥ * ॥ তন্ত্রান্তরে সহজার্শোলক্ষণং পৃথগাহ। অর্শাংসি সহজাতানি দারুণানি ভবন্তি হি। দুর্দ্দর্শনানি পাণ্ডূনি পরুষাণ্যরুণানি চ ॥ অন্তর্ম্মুখানি তৈরার্ত্তঃ ক্ষীণঃ ক্ষীণস্বরো ভবেৎ। ক্ষীণানলঃ ক্ষীণরেতাঃ শিরাসন্ততবিগ্রহঃ ॥ অল্পপ্রজঃ ক্রোধশীলঃ সন্ততাস্রস্বনান্বিতঃ। শিরোদৃক্কর্ণনাসাসু রোগী হৃল্লেপসেকবান্ ॥ * ॥ অথ সুখসাধ্যার্শোলক্ষণমাহ। বাহ্যায়াস্তু বলৌ জাতান্যেকদোষোল্বণানি চ। অর্শাংসি সুখসাধ্যানি ন চিরোৎপতিতানি চ ॥

বাহ্যায়াং বলৌ সম্বরণ্যাং। ন চিরোৎপতিতানি অনতিক্রান্তসম্বৎসরাণি। এতানি লক্ষণানি মিলিতানি সুখসাধ্যত্ববোধকানি ॥ * ॥ অথ কষ্টসাধ্যার্শোলক্ষণমাহ। দ্বন্দ্বজানি দ্বিতীয়ায়াং বলৌ যান্যাশ্রিতানি চ। কৃচ্ছ্রসাধ্যানি তান্যাহুঃ পরিসম্বৎসরাণি চ। দ্বিতীয়ায়াং বলৌ বিসর্জ্জন্যাং। পরিসম্বৎসরাণি পরিগতঃ সম্বৎসরো যেষাং তানি। অতিক্রান্তসম্বৎসরাণি ইতি যাবৎ। এতানি প্রত্যেকং কষ্টসাধ্যলক্ষণানি ॥*॥ অথাসাধ্যার্শোলক্ষণমাহ। সহজানি ত্রিদোষাণি যানি চাভ্যন্তরাং বলিং। জায়ন্তেঽর্শাংসি সংগৃহ্য তান্যসাধ্যানি নির্দ্দিশেৎ॥ অভ্যন্তরাং বলিং প্রবাহিণীং। এতান্যপি প্রত্যেকমসাধ্যলক্ষণানি। শেষত্বাদায়ুষস্তানি চতুষ্পাদসমন্বয়ে। যাপ্যন্তে দীপ্তকায়াগ্নেঃ প্রত্যাখ্যেয়ান্যতোঽন্যথা ॥ যদ্যায়ুষঃ শেষো বর্ত্ততে চিকিৎসায়াশ্চত্বারঃ পাদাস্তে যথা। বৈদ্যবচনকারী ধনবানুদারো জিতেন্দ্রিয়ো রোগী। ১। শাস্ত্রে কর্ম্মণি চ কুশলো বৈদ্যঃ। ২। অনলস আপ্তঃ প্রিয়ঃ পরিচারকঃ। ৩। নবং রসবীর্য্যাদিযুক্তমৌষধং। ৪। এষাং সমন্বয়ে সংযোগে সতি দীপ্তকায়াগ্নেঃ পুরুষস্য। তানি অর্শাংসি। যাপ্যন্তে চিকিৎসয়া। অতোঽন্যথা প্রত্যাখ্যেয়ানি ন চিকিৎস্যানীত্যর্থঃ ॥ * ॥ অথার্শসোঽরিষ্টমাহ। হস্তে পাদে মুখে নাভ্যাং গুদে বৃষণয়োস্তথা। শোথো হৃৎপার্শ্বশূলঞ্চ যস্যাসাধ্যোঽর্শসো হি সঃ ॥ অসাধ্যঃ সন্নিহিত-

মরণো বোদ্ধব্যঃ। অর্শসঃ অর্শোরোগযুক্তঃ। এতম্মিলিতমরিষ্টলক্ষণং। হৃৎপার্শ্বশূলং সংমোহচ্ছর্দ্দিরঙ্গস্য রুগ্জ্বরঃ। তৃষ্ণা গুদাস্যপাকশ্চ নিহন্যুর্গুদজাতুরং॥ গুদস্য যদাস্যমোষ্ঠদেশস্তস্য পাকঃ। হৃৎপার্শ্বশূলাদিসমস্তং ব্যস্তং চারিষ্টলক্ষণং॥ তৃষ্ণারোচকশূলার্ত্তমতিপ্রস্রুতশোণিতং। শোফাতীসারসংযুক্তমর্শাংসি ক্ষপয়ন্তি হি॥ *॥ অথ মেঢ্রাদিজার্শোলক্ষণমাহ। মেঢ্রাদিম্বপি বক্ষ্যন্তে যথাস্বং নাভিজানি চ। গণ্ডূপদাস্যরূপাণি পিচ্ছিলানি মৃদূনি চ॥ যথাস্বং যথাত্মীয়লক্ষণং। ন চাত্রোক্তনিদানপূর্ব্বরূপসংপ্রাপ্তিলক্ষণযুক্তং। তত্র তত্রার্শঃপদং তু মাংসাঙ্কুরসাম্যাৎ। গণ্ডূপদঃ কিঞ্চুলকঃ ॥ *॥ অত্র মাংসাঙ্কুরসাম্যাদত্রাধিকারে চর্ম্মকীলস্য সংপ্রাপ্তিপূর্ব্বকং লক্ষণমাহ। ব্যানো গৃহীত্বা শ্লেষ্মাণং করোত্যর্শস্ত্বচো বহিঃ। কীলোপমং স্থিরখরঞ্চর্ম্মকীলস্তু তদ্বিদুঃ॥ চর্ম্মা ইতি লোকে। খরং কর্কশং ॥ * ॥ তস্যৈব বাতাদিভেদেন লক্ষণমাহ। বাতেন তোদপারুষ্যং পিত্তাদসিতরক্ততা। শ্লেষ্মণা স্নিগ্ধতা তস্য গ্রথিতত্বং সবর্ণতা॥ সবর্ণতা শরীরসমানবর্ণতা ॥ * ॥ অথ সামান্যতঃ অর্শসশ্চিকিৎসা। যদ্বায়োরানুলোম্যায় যদগ্নিবলবৃদ্ধয়ে। অন্নপানৌষধং সর্ব্বং তৎ সেব্যং নিত্যমর্শসৈঃ॥ অর্শসৈঃ অর্শোরোগযুক্তৈঃ। শালিষষ্টিকগোধূমযবান্নানি ঘৃতৈঃ সহ। অজাক্ষীরেণ বা নিম্বপটোলানাং রসেন বা॥

কন্দৈর্বার্ত্তাকুমূলোত্থৈ রসৈর্মাংসরসেন বা। জীবন্ত্যুপোদিকাশাকৈস্তণ্ডুলীয়কবাস্তুকৈঃ॥ কন্দোঽত্র শূরণঃ। অত্র মূলং মূলকং। অন্যৈশ্চ সৃষ্টবিণ্মূত্রমরুদ্ভির্ব্বহ্নিদীপনৈঃ। অর্শাংসি ভিন্নবর্চ্চাংসি হন্যাদ্বাতাতিসারবৎ॥ সতক্রং লবণং দদ্যাদ্বাতবর্চ্চোঽনুলোমনং। ন প্ররোহন্তি গুদজাঃ পুনস্তক্রসমাহতাঃ॥ তক্রাভ্যাসোঽর্শসৈঃ কার্য্যো বলবর্ণাগ্নিবৃদ্ধয়ে। স্রোতঃসু তক্রশুদ্ধায় সম্যক্ চলতি যদ্রসঃ॥ তেন পুষ্টিস্তথা তুষ্টির্বলং বর্ণশ্চ জায়তে। বাতশ্লেষ্মবিকারাণাং শতঞ্চ বিনিবর্ত্তয়েৎ॥ মৃল্লিপ্তং শৌরণং কন্দং পক্ত্বাগ্নৌ পুটপাকবৎ। অদ্যাৎ সতৈললবণং দুর্নামবিনিবর্ত্তয়ে॥২॥ চিরিবিল্বাগ্নিসিন্ধূত্থনাগরেন্দ্রযবারলূন্ . । তক্রেণ পিবতোঽর্শাংসি নিপতন্ত্যসৃজা সহ॥ চিরিবিল্বঃ করঞ্জঃ তস্য ফলস্যাত্র মজ্জা গ্রাহ্যা। অরলুঃ শ্যোনকঃ। করঞ্জাদিচূর্ণং॥ ৩॥ লেপং রজনিচূর্ণেন স্নুধাদুগ্ধযুতেন চ। অর্শোরোগনিবৃত্ত্যর্থং কারয়েত্তচ্চিকিৎসকঃ॥ ৪॥ পিপ্পলী সৈন্ধবং কুষ্ঠং শিরীষস্য ফলং তথা। স্নুগ্দুগ্ধমর্কদুগ্ধং বা লেপোঽয়ং গুদজান্ হরেৎ॥ ৫॥ হরিদ্রাজালিনীচূর্ণং কটুতৈলসমন্বিতং। এষ লেপো বরঃ প্রোক্তো হ্যর্শসামস্তকারকঃ॥ জালিনী কটুতুরই ইতিলোকে ॥ ৬ ॥ অসিতানাং তিলানান্তু পলং শীতজলেন তু। খাদতোঽর্শাংসি শাম্যন্তি দৃঢ়া দন্তা ভবন্তি হি॥ ৭॥ শস্ত্রের্ব্বাথ জলৌকোভিঃ প্রোচ্ছূনকঠিনার্শসঃ।

শোণিতং সঞ্চিতং দৃষ্ট্বা হরেৎ প্রাজ্ঞঃ পুনঃ পুনঃ॥৮॥ কাসীসং সৈন্ধবং কৃষ্ণা শুণ্ঠী কুষ্ঠঞ্চ লাঙ্গলী। শিলাভিদশ্বমারশ্চ দন্তীজন্তুঘ্ন-চিত্রকং॥ তালকং কুনটী স্বর্ণক্ষীরী চৈতৈঃ পচেদ্ভিষক্। তৈলং স্নুহ্যর্কপয়সা গবাং মূত্রে চতুর্গুণে॥ এতদভ্যঙ্গতোঽর্শাংসি ক্ষারেণেব পতন্তি হি। ক্ষারকর্ম্মকরং হ্যেতন্ন চ সংদূষয়েদ্বলিং॥ কাসীসং কোসীস ইতি লোকে। লাঙ্গলী করহারী ইতি লোকে। শিলাভিৎ পাষাণভেদঃ। অশ্বমারঃ কনৈল ইতি লোকে। স্বর্ণক্ষীরী চোক ইতি লোকে। বৃহৎকাসীসাদ্যং তৈলং॥ ৯॥

শুণ্ঠীকণামরিচনাগদলত্বগেলং চূর্ণীকৃতং ক্রমবিবর্দ্ধিতমূর্দ্ধমন্ত্যাৎ। খাদেদিদং সমসিতং গুদজাগ্নিমান্দ্যং গুল্মারুচিশ্বসন-কণ্ঠহৃদাময়েষু॥ তদযথা। এলাত্র সূক্ষ্মা গ্রাহ্যা। যত আহ মদনপালঃ। এলা সূক্ষ্মা কফশ্বাসকাসার্শোমূত্রকৃচ্ছ্রহৃদিত্যাদি। তস্যা বীজভাগঃ ১ ত্বজভাগঃ ২ দলং পত্রং। যত আহ নিঘণ্টৌ ধন্বন্তরিঃ। তমাল-পত্রকং পত্রং স্যাৎ পলাশং দলাহ্বয়মিতি তস্য ভাগঃ ৩। নাগো নাগকেশরং। যত আহ নিঘণ্টৌ ধন্বন্তরিঃ। নাগপুষ্পং মতং নাগং কেশরং নাগকেশরমিত্যাদি। তস্য ভাগঃ ৪ মরীচভাগঃ ৫ পিপরিভাগঃ ৬ শুণ্ঠীভাগঃ ৭ চিনিভাগঃ ২৮। সমশর্কর-চূর্ণং॥ ১০॥ ত্রিপলং শৃঙ্গবেরস্য চতুষ্কং মরিচস্য চ। পিপ্পল্যাঃ কুড়বার্দ্ধঞ্চ চব্যায়াঃ পলমেব চ॥ তালীশপত্রস্য পলং পলার্দ্ধং কেশরস্য চ। দ্বিপলং পিপ্পলীমূলমর্দ্ধকর্ষঞ্চ পত্রকাৎ॥ সূক্ষ্মৈলাকর্ষমেকন্তু কর্ষঞ্চ ত্বগ্-মৃণালয়োঃ। গুড়াৎ পলানি ত্রিংশচ্চ চূর্ণ-মেকত্র কারয়েৎ॥ অক্ষপ্রমাণগুটিকা প্রাণদা চেতি সা স্মৃতা। পূর্ব্বং ভক্ষ্যঞ্চ পশ্চাচ্চ ভোজনস্য যথাবলং॥ মদ্যং মাংস-রসং যূষং ক্ষারতোয়ং পিবেদনু। হন্ত্যা-দর্শাংসি সর্ব্বাণি সহজান্যস্রজানি চ॥ বাতপিত্তকফোত্থানি সন্নিপাতোদ্ভবানি চ। পানাত্যয়ে মূত্রকৃচ্ছ্রে উরোরোগে গল-গ্রহে॥ বিষমজ্বরপিত্তে চ পাণ্ডুরোগে তথৈব চ। কৃমিহৃদ্রোগিণাঞ্চৈব গুল্ম-শূলার্ত্তিনাং তথা॥ ছর্দ্যতীসাররোগাণাং কামলাহিক্কিনাং তথা। শুণ্ঠীস্থানেঽভয়া দেয়া হৃদ্গ্রহে পিত্তজে গদে॥ প্রাণদেয়ং সিতাং দত্ত্বা গুড়মানাচ্চতুর্গুণাং। অম্ল-পিত্তাগ্নিমান্দ্যাদৌ প্রযোজ্যা গুদজাতুরে॥ অনুপানে প্রযোক্তব্যো ব্যাধৌ শ্লেষ্মভবে পলং। পলদ্বয়ং ত্বনিলজে পিত্তজে তু পলত্রয়ং॥ ফলাম্লধান্যাম্লরসাস্তু শস্তা মদ্যং মরুদ্রোগিণি চানুপানং। ইক্ষো রস-ক্ষারহিমাম্বু পিত্তে উষ্ণ্যম্বুযূষৌ কফজে বিদধ্যাৎ॥ গণ্ডূষমাত্রমাদেয়ং মৃদৌ ক্রূরে চ পঞ্চ বা। অনুপানং প্রযোক্তব্যং দেশ-কালমবেক্ষ্য বা॥ ইতি প্রাণদা গুটিকা॥ ১১॥

ত্রিকত্রয়ং বচা হিঙ্গু পাঠা ক্ষারৌ নিশা-দ্বয়ং। চব্যতিক্তা কলিঙ্গানি শতাহ্বা লব-ণানি চ॥ গ্রন্থিবিল্বাজমোদা চ গণোঽষ্টা-বিংশতির্ম্মতঃ। এতানি সমভাগানি সূক্ষ্ম-চূর্ণানি কারয়েৎ॥ চূর্ণং বিড়ালপদকং পিবেদুষ্ণেন বারিণা। এরণ্ডতৈলযুক্তং

বা লিহ্যাচ্চূর্ণমিদং নরঃ ॥ হন্যাদর্শাংসি সর্ব্বাণি শ্বাসশোষভগন্দরান্। হৃচ্ছূলং পার্শ্বশূলঞ্চ বাতগুল্মং তথোদরং ॥ হিক্কাং কাসং প্রমেহাংশ্চ পাণ্ডুরোগং সকামলং। আমবাতমুদাবর্ত্তমন্ত্রবৃদ্ধিং গুদক্রমীন্ ॥ অন্যে চ গ্রহণীদোষা ভিষগ্‌ভির্যে প্রকীর্ত্তিতাঃ। বিজয়ো নাম চূর্ণোঽয়ং তান্ সর্ব্বানাশু নাশয়েৎ ॥ মহাজ্বরোপসৃষ্টানাং ভূতোপহতচেতসাং। অপ্রজানাঞ্চ নারীণাং হিতমেতদ্ধি ভেষজং॥ ত্রিকত্রয়ং ত্রিফলা ত্রিকটু ত্রিসুগন্ধীনি। ক্ষারৌ স্বর্জ্জিকা যবক্ষারশ্চ। লবণানি পঞ্চ। গ্রন্থিঃ পিপ্পলীমূলং। বিড়ালপদকং কর্ষং। বিজয়চূর্ণং ॥ ১২ ॥ মরিচমহৌষধচিত্রকশূরণভাগা যথোত্তরং দ্বিগুণাঃ। সর্ব্বসমো গুড়ভাগা সেব্যোঽয়ং মোদকঃ প্রসিদ্ধফলঃ॥ জ্বলনং জ্বলয়তি জাঠরমুন্মূলয়তি শূলগুল্মগদান্। নিঃশেষয়তি শ্লীপদমর্শাংসি বিনাশয়ত্যাশু ॥ তদযথা। মরিচভাগঃ ১ শুণ্ঠীভাগঃ ২ চিতাভাগঃ ৪ শূরণভাগঃ ৮ গুড়ভাগঃ ১৫। লঘুশূরণমোদকঃ ॥ ১৩ ॥ ষোড়শশূরণতোঽংশা বহ্নেরষ্টৌ মহৌষধস্যাথ। অর্দ্ধেন ভাগযুক্তির্ম্মরিচস্য ততোঽপি চার্দ্ধেন ॥ ত্রিফলা কণা সমূলা তালীশারুস্করক্রিমিঘ্নানাং। ভাগা মহৌষধসমা দহনাংশতালমূলী চ ॥ ভাগঃ শূরণতুল্যো দাতব্যো বৃদ্ধদারকস্যাপি। ভৃঙ্গেলে মরিচাংশে সর্ব্বাণ্যেকত্র কারয়েৎ চূর্ণং ॥ দ্বিগুণেন গুড়েন যুতঃ সেব্যোঽয়ং মোদকঃ প্রকামধনৈঃ। গুরুবৃষ্যভোজ্যনিরতৈরিতরেযুপদ্রবং কুর্য্যাৎ॥ ভস্মকমনেন জনিতং পূর্ব্বমগস্ত্যস্য যোগরাজেন। ভীমস্য মারুতেরপি মহাশনৌ যেন তৌ জাতৌ ॥ অগ্নিবলমাত্রহেতুর্ন কেবলং শূরণো মহাবীর্য্যঃ। হন্তা শস্ত্রক্ষারানলৈর্বিনাপ্যর্শসামেষঃ॥ শ্বযথুশ্লীপদগদহৃদ্‌গ্রহণীঞ্চ কফানিলোদ্ভূতাং। নাশয়তি বলীপলিতং মেধাং কুরুতে জরাং হরতে॥ হিক্কাং কাসং শ্বাসং সরাজরোগান্ প্রমেহাংশ্চ। প্লীহানঞ্চ তথোগ্রং হন্যাদাশু রসায়নং পুংসাং॥ এষাং ভাগো যথা। শূরণভাগঃ ১৬ চিতাভাগঃ ৮ সোঠিভাগঃ ৪ মরিচভাগঃ ২। হররে বহেরা অবরা। পীপর পিপরামূল। তালীশং তালীশপত্রং। অরুস্করং ভল্লাতকং। তদসহত্বে রক্তচন্দনং। বিড়ঙ্গং প্রত্যেকং ভাগঃ ৪ তালমূলী মূষলী তস্যা ভাগঃ ৮ বিধারাভাগঃ ১৬ তজভাগঃ ২ এলাইচছোটাবীজভাগঃ২ গুড়ভাগঃ৪।৭২। বৃহচ্ছূরণো মোদকঃ ॥ ১৪ ॥ ত্রিবৃত্তেজোবতী দন্তী শ্বদংষ্ট্রা চিত্রকং শটী। গবাক্ষীমুস্তবিশ্বাহ্ববিড়ঙ্গানি হরীতকী॥ পলোন্মিতানি চৈতানি পলান্যষ্টাবরুস্করাৎ। বৃদ্ধদারাৎ পলান্যষ্টৌ শূরণস্য তু ষোড়শ॥ জলদ্রোণদ্বয়ে ক্বাথ্যং চতুর্ভাগাবশেষিতং। পূতং তু তং রসং ভূয়ঃ ক্বাথেভ্যঃ ত্রিগুণং গুড়ং॥ লেহং পচেৎ পুনস্তাবদ্‌যাবদ্দর্ব্বীপ্রলেপনং। অবতার্য্য ততঃ পশ্চাৎ চূর্ণানীমানি দাপয়েৎ॥ ত্রিবৃত্তেজোবতীকন্দচিত্রকান্ দ্বিপলাংশিকান্। এলাত্বঙ্‌মরিচং চাপি নাগাহ্বং চাপি ষট্‌পলং॥

দ্বাত্রিংশচ্চ পলান্যত্র চূর্ণয়িত্বা নিধাপয়েৎ। ততো মাত্রাং প্রযুঞ্জীত জীর্ণে ক্ষীররসাশিনঃ॥ তেজোবতী তেজবতী তেজবল্কল ইতি চ। কন্দঃ শূরণঃ। হন্যাদর্শাংসি সর্ব্বাণি তথা সর্ব্বোদরাণ্যপি। গুল্মানপি প্রমেহাংশ্চ পাণ্ডুরোগং হলীমকং॥ দীপয়েদনলং মন্দং যক্ষ্মাণং চাপকর্ষতি। আদ্যবাতে প্রতিশ্যায়ে পানসেহয়ং হিতো মতঃ॥ ভবন্ত্যনেন পুরুষাঃ শতং বর্ষাণ্যনাময়াঃ। দীর্ঘায়ুষঃ প্রজননা বলীপলিতবর্জ্জিতাঃ॥ গুড়ঃ শ্রীবাহুশালোহয়ং রসায়নবরো মতঃ। দুর্নামান্তকরো হ্যেষ দৃষ্টো বারসহস্রশঃ॥ যাবদ্দর্ব্বীপ্রলেপঃ স্যাদ্যাবদ্বা তন্তুলী ভবেৎ। তোয়পূর্ণে যদা পাত্রে ক্ষিপ্তো ন প্লবতে গুড়ঃ॥ ক্ষিপ্তস্তু নিশ্চলস্তিষ্ঠেৎ পতিতস্তু ন শীর্য্যতি। এষ পাকঃ সমস্তানাং গুড়ানাং পরিকীর্ত্তিতঃ॥ সার্দ্ধং পলং পলঞ্চার্দ্ধং ভক্ষয়েদগুড়খণ্ডয়োঃ। শ্রেষ্ঠা তু মধ্যমা হীনা মাত্রোক্তা মুনিভিস্ত্রিধা॥ বাহুশালো গুড়ঃ॥ ১৫॥ তিলা ভল্লাতকং পথ্যা গুড়শ্চেতি সমাংশকং। দুর্নামশ্বাসকাসঘ্নং প্লীহপাণ্ডুজ্বরাপহং॥ পিত্তশ্লেষ্মপ্রশমনী কচ্ছূদদ্রুরুজাপহা। গুদজান্নাশয়ত্যাশু ভক্ষিতা সগুড়াভয়া॥ ১৬॥ *॥ প্রণম্য শঙ্করং রুদ্রং দণ্ডপাণিং মহেশ্বরং। জীবিতারোগমন্বিচ্ছন্নারদোহপৃচ্ছদীশ্বরং॥ সুখোপায়েন হে নাথ শস্ত্রক্ষারাগ্নিভির্ব্বিনা। চিকিৎসামর্শসাং নৃণাং কারুণ্যাদ্বক্তুমর্হসি॥ নারদস্য বচঃ শ্রুত্বা নরাণাং হিতকাম্যয়া। অর্শসাং নাশনং শ্রেষ্ঠং ভৈষজ্যং শঙ্করোহবদৎ॥ পাণ্ড্যবজ্রাদিলোহানামাদায়ান্যতমং শুভং। কৃত্বা নির্ম্মলমাদৌ তু কুনট্যা মাক্ষিকেণ চ॥ পত্তুরমূলকল্কেন লিম্পেদ্রসযুতেন চ। কুনটী মনঃশিলা। মাক্ষিকং স্বর্ণমাক্ষিকং। পত্তুরং বকম ইতি লোকে। শালিঞ্চা ইতি রসেন্দ্রচিন্তামণৌ। রসঃ পারদঃ। বহ্নৌ নিঃক্ষিপ্য বিধিবৎ সারাঙ্গারেণ নির্ধমেৎ। জ্বালা চ তস্য রোদ্ধব্যা ত্রিফলায়া রসেন বা॥ সারঃ কাষ্ঠসারঃ। শালাঙ্গারেণ ইতি রসেন্দ্রচিন্তামণৌ পাঠঃ। ততো বিজ্ঞায় গলিতং শঙ্কুনোর্দ্ধং সমুৎক্ষিপেৎ। ত্রিফলায়া রসে পূতে তদাকৃষ্য তু নির্ব্বপেৎ॥ ন সম্যগ্‌গালিতং যত্তু তেনৈব বিধিনা পুনঃ। ধ্মাতং নির্ব্বাপয়েত্তস্মিন্ লোহং তত্ত্রিফলারসে॥ যল্লোহং ন মৃতং তত্র পাচ্যং ভূয়োহপি পূর্ব্ববৎ। মারণান্ন মৃতং যচ্চ তত্ত্যক্তব্যমলোহবৎ॥ ততঃ সংশোষ্য বিধিবৎ চূর্ণয়েল্লোহভাজনে। লোহেনৈব তথা বৎস দৃষদা সূক্ষ্মচূর্ণিতং॥ কৃত্বা লোহময়ে পাত্রে মার্দ্দে বা লিপ্তরন্ধ্রকে। রসৈঃ পঙ্কোপমং কৃত্বা তং পচেদ্গোময়াগ্নিনা॥ পুটানি ক্রমশো দদ্যাৎ পৃথগেষাং বিধানতঃ। ত্রিফলার্দ্রকভৃঙ্গাণাং কেশরাজস্য বুদ্ধিমান্॥ মাণকন্দকভল্লাতবহ্নীনাং শূরণস্য চ। হস্তিকর্ণপলাশস্য কুলিশস্য তথৈব চ॥ ভৃঙ্গভঙ্গরিয়া। কেশরাজঃ ভৃঙ্গরাজ ইতি দ্বিঃ। কুলিশং স্নুহীক্ষীরং। পুটে পুটে চূর্ণয়িত্বা লোহাৎ ষোড়শিকং পল। তস্মানং ত্রিফলায়াশ্চ পলেনাধিকমাহরেৎ।

অষ্টভাগাবশিষ্টে তু রসে তস্যাঃ পচেদ্বুধঃ। অষ্টৌ পলানি দত্ত্বা চ সর্পিষো লোহভাজনে ॥ তাম্রে বা লোহদর্ব্ব্যা তু চালয়েদ্বিধিপূর্ব্বকং। ততঃ পাকবিধানজ্ঞঃ স্বচ্ছে চোর্দ্ধে চ সর্পিষি ॥ মৃদুমধ্যাদিভেদেন গৃহ্নীয়াৎ পাকমাজ্যতঃ। আরভেত বিধানজ্ঞঃ কৃতকৌতুকমঙ্গলঃ ॥ ভ্রামরং ঘৃতসংযুক্তং বিলিহ্যাদ্রক্তিকাক্রমাৎ। বর্দ্ধমানানুপানঞ্চ গব্যক্ষীরেণ সংযুতং ॥ গব্যাভাবে ত্বজায়াশ্চ স্নিগ্ধবৃষ্যাদিভোজনং। সদ্যোবহ্নিকরঞ্চৈব ভস্মকঞ্চ নিযচ্ছতি ॥ হন্তি বাতং তথা পিত্তং কুষ্ঠানি বিবিধং জ্বরং। গুল্মাক্ষিপাণ্ডুরোগাংশ্চ নিদ্রালস্যমরোচকং ॥ শূলঞ্চ পরিণামঞ্চ প্রমেহমববাহুকং। শ্বযথুং রুধিরস্রাবং দুর্নামানং বিশেষতঃ ॥ বলকৃদ্বৃংহণঞ্চৈব কান্তিদং স্বরবর্দ্ধনং। শরীরলাঘবকরমারোগ্যং পুষ্টিবর্দ্ধনং ॥ আয়ুষ্যং শ্রীকরঞ্চৈব বয়স্তেজস্করং শুভং। সশ্রীকপুত্রজননং বলীপলিতনাশনং ॥ দুর্নামারিরয়ং নাম্না দৃষ্টো বারসহস্রশঃ। অনেনার্শাংসি দহ্যন্তে যথা তূলঞ্চ বহ্নিনা ॥ সৌকুমার্য্যাল্পকায়ত্বাৎ মদ্যসেবী যথা নরঃ। জীর্ণমদ্যাদিযুক্তাদিভোজনৈঃ সহ দাপয়েৎ ॥ রসেন্দ্রচিন্তামণৌ যথাস্থানে যদা তৃতীয়চরণস্থানে জীর্ণে মদ্যে প্রযোক্তব্যমিতি পাঠঃ। লাবতিত্তিরবর্ত্তীরময়ূরশশকাদয়ঃ। চটকঃ কলবিঙ্কশ্চ বর্ত্তকা হরিতালকঃ ॥ শ্যেনকশ্চ বৃহল্লাবো বনবিষ্কিরকাদয়ঃ। পারাবতমৃগাদীনাং মাংসং জাঙ্গলকং শুভং ॥ বর্ত্তীরঃ বগেরা ইতি লোকে। চটকো বন্যচটকঃ। কলবিঙ্কো গৃহচটকঃ বর্ত্তকা বটই ইতি লোকে। হরিতালকঃ হরিতাল ইতি লোকে। বিষ্কিরাবর্ত্তকাদয়ঃ। মদ্গুরো রোহিতঃ শ্রেষ্ঠঃ শকুলশ্চ বিশেষতঃ। মৎস্যরাজা ইমে প্রোক্তা হিতমৎস্যায় দেহিনে ॥ বৃন্তাকস্য ফলং শস্তং পটোলং বৃহতীফলং। প্রলম্বাভীরুবেত্রাগ্রং তালকস্তণ্ডুলীয়কং ॥ প্রলম্বা লম্বালাবুঃ। অভীরুঃ শতাবর্য্যাঃ পত্রশাকং। তালকঃ দেবদালী। তথা চ নিঘণ্টৌ ধন্বন্তরিঃ। জীমূতকো দেবতাড়ো বৃত্তকোশো গরা গরী। প্রোক্তাখুবিষহৃদ্বেণী দেবদালী চ তাড়কঃ ॥ দেবদালী রসে তিক্তা কফার্শঃশোথপাণ্ডুতাঃ। নাশয়েদিত্যাদি। বাস্তূকং ধান্যশাকঞ্চ কেমুকং চক্রবর্ত্তনং। চক্রবর্ত্তনং চকবতশাকং। নারিকেলঞ্চ খর্জ্জুরং দাড়িমং লবলীফলং। শৃঙ্গাটকঞ্চ পক্কাম্রং দ্রাক্ষা তালফলানি চ। জাতীকোশং লবঙ্গঞ্চ পূগং তাম্বূলপত্রকং ॥ হিতান্যেতানি বস্তূনি লোহমেতৎ সমশ্নতাং। নাম্নীয়াল্লকুচং কোলং কর্কন্ধুবদরাণি চ। জম্বীরং বীজপূরঞ্চ তিন্তিড়ী করমর্দ্দকং ॥ কোলং ক্ষুদ্রবদরং। কর্কন্ধুবদরাণি মহান্তি। আনূপানি চ মাংসানি ক্রকরং পুণ্ড্রকানপি। হংসসারসদাত্যূহশঙ্খকঙ্কবলাকিকাঃ ॥ মাণকন্দকরীরাণি কতকঞ্চ কলিঙ্গকং। কুষ্মাণ্ডকঞ্চ কর্কোটিং কেমুকঞ্চ বিশেষতঃ ॥ কটুকং কালশাকঞ্চ কশেরুং কর্কটীং তথা। ককারাদীনি সর্ব্বাণি দ্বিদলানি চ বর্জ্জয়েৎ ॥ শঙ্করেণ সমাখ্যাতশ্চূর্ণরাজো-

ঽনুকম্পয়া। জগতামুপকারায় দুর্নামারিরয়ং ধ্রুবং ॥ স্থানাদপৈতি মেরুশ্চ পৃথ্বী পর্য্যেতি বায়ুনা। পতন্তি চন্দ্রতারাশ্চ মিথ্যা চেদহমব্রুবং ॥ ব্রহ্মঘ্নাশ্চ কৃতঘ্নাশ্চ ক্রূরা যেঽসত্যবাদিনঃ। বর্জ্জনীয়াঃ স্বধর্ম্মেণ ভিষজা গুরুনিন্দকাঃ ॥ মুনিরসপিষ্টবিড়ঙ্গং মুনিরসলীঢ়ং চিরস্থিতং ঘর্ম্মে। দ্রাবয়তি লোহদোষান্ বহ্নির্ন্নবনীতপিণ্ডমিব ॥ মুনিরত্রাগস্তিঃ। কালে মলপ্রবৃত্তির্লাঘবমুদরে বিশুদ্ধিরুদগারে। অঙ্গেষু নাবসাদো মনঃপ্রসাদোঽস্য পরিপাকে ॥ কৃমিরিপুচূর্ণং লীঢ়ং সহিতং স্বরসেন বঙ্গসেনস্য। ক্ষপয়ত্যচিরাত্ত্রিতয়ং লোহাজীর্ণোত্থবং শূলং ॥ বঙ্গসেনস্য অগস্তেঃ। জীর্ণে লোহে পততি চূর্ণং ভুঞ্জীত সিদ্ধসারাখ্যং। লোহব্যাপন্নশ্যতি বিবর্দ্ধতে জাঠরো বহ্নিঃ॥ তদ্যথা। পথ্যাসৈন্ধবশুণ্ঠীমাগধিকানাং পৃথক্ সমো ভাগঃ। ত্রিবৃতো ভাগৌ নিম্বু ভাব্যং তৎ সিদ্ধসারাখ্যং ॥ ভবেদ্যদ্যতিসারস্তু দুগ্ধং পীত্বা রুজং জয়েৎ। গুঞ্জাদ্বাদশকাদূর্দ্ধং বৃদ্ধিরস্য ভয়প্রদা ॥ শঙ্করপ্রণীতং লোহং। ইতি সামান্যক্রিয়া॥ ১৭ ॥ * ॥ অথ রক্তার্শসাং চিকিৎসা। রক্তার্শসামুপেক্ষেত রক্তমাদৌ স্রবত্তিষক্। দুষ্টাস্রে নিগৃহীতে স্যুঃ শূলানাহাসৃগাময়াঃ ॥ চন্দনকিরাততিক্তকধন্বযবাসাঃ সনাগরাঃ ক্বথিতাঃ। রক্তার্শসাং প্রশমনা দার্ব্বীত্বগুশীরনিম্বা বা ॥ চন্দনমত্র রক্তচন্দনং। চন্দনাদিক্বাথঃ ॥ ১ ॥ নবনীততিলাভ্যাসাৎ ২ কেসরনবনীতশর্করাভ্যাসাৎ ৩। দধিসরমথিতাভ্যাসাৎ ৪ গুদজাঃ শাম্যন্তি রক্তাবহাঃ॥ দধ্নস্তূপরি যো ভাগো ঘনঃ স্নেহযুতঃ সরঃ। মথিতং সররহিতং নির্জ্জলং বস্ত্রপূতং দধি ॥ সপত্রকেসরং ক্ষৌদ্রং নবনীতং ত্বচং লিহন্। সিতাকেশরসংযুক্তং রক্তার্শসঃ সুখী ভবেৎ॥৫॥ পয়সা শৃতেন যূষৈঃ সতীনমুদ্গাঢ়কীমসূরাণাং। ওদনমদ্যাদম্লৈর্ম্মধুরৈরীষৎসুগন্ধৈশ্চ ॥ ৬ ॥ সমঙ্গোৎপলমোচাহ্বতিরীটতিলচন্দনৈঃ। সিদ্ধং ছাগীপয়ো দদ্যাদ্ গুদজে শোণিতাত্মকে ॥ সমঙ্গা লজ্জালুঃ। মোচাহ্বো মোচরসঃ। তিরীটো লোধ্রঃ। চন্দনমত্র রক্তং। সমঙ্গাদিদুগ্ধং ॥ ৭ ॥ ভাবিতং রজনীচূর্ণং স্নুহীক্ষীরৈঃ পুনঃ পুনঃ। বন্ধনাৎ সুদৃঢ়ং সূত্রং ছিনত্ত্যর্শোভগন্দরং ॥ ক্ষারসূত্রং ॥ ৮ ॥ নাসানাভিসমুত্থেষু তথা মেঢ্রাদিজেষ্বপি। ক্রিয়ামর্শঃসু কুর্ব্বীত তত্র তত্র যথোদিতাং ॥ চর্ম্মকীলন্তু সংছিদ্য দহেৎ ক্ষারেণ চাগ্নিনা। বেগাবরোধস্ত্রীপৃষ্ঠযানান্যুৎকটকাশনং ॥ যথাস্বং দোষলঙ্ঘান্নমর্শসঃ পরিবর্জ্জয়েৎ। ইত্যর্শোঽধিকারঃ ॥ * ॥ ইতি ভাবপ্রকাশঃ ॥

অর্শসঃ (ত্রি) অর্শোরোগযুক্তঃ। ইত্যমরঃ ॥

অর্শসানঃ (পুং) অগ্নিঃ। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ ॥

অর্শী [ন্] (ত্রি) অর্শোরোগযুতঃ। ইতি শব্দরত্নাবলী ॥

অর্শোঘ্নঃ (পুং) ওল্লঃ। ওল ইতি ভাষা। তৎপর্য্যায়ঃ। শূরণঃ ২ কন্দঃ ৩। ইত্যমরঃ ॥ সূরণঃ ৪। ইতি তট্টীকা ॥

অর্শোঘ্নী ( স্ত্রী ) তালমূলী। ইতি মেদিনী ॥

অর্শোহিতঃ ( পুং ) ভল্লাতকঃ। ভেলা ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ ॥

অর্হ যোগ্যত্বে। পূজনে। ইতি কবিকল্পদ্রুমঃ ॥ অর্হতি বিপ্রো বেদং পঠিতুং। সকর্ম্মকোঽপি। যজ্ঞদানতপাংস্যস্য কলাং নার্হন্তি ষোড়শীং। ইতি দুর্গাদাসঃ ॥

অর্হ ক পূজনে। ইতি কবিকল্পদ্রুমঃ ॥ ক অর্হয়তি। ইতি দুর্গাদাসঃ ॥

অর্হঃ ( পুং ) ইন্দ্রঃ। ইতি শব্দরত্নাবলী॥

অর্হঃ ( ত্রি ) যোগ্যঃ। উপযুক্তঃ। যথা। তস্মান্নার্হা বয়ং হন্তুং ধার্ত্তরাষ্ট্রান্ সবান্ধবান্। ইতি শ্রীভগবদ্গীতা ॥

অর্হণা ( স্ত্রী ) পূজা। ইত্যমরঃ ॥

অর্হন্ [ ৎ ] ( পুং ) ক্ষপণকঃ। বুদ্ধঃ। ইতি মেদিনী ॥ শেষস্য পর্য্যায়ঃ। জিনঃ ২ পারগতঃ ৩ ত্রিকালবিৎ ৪ ক্ষীণাষ্টকর্ম্মা ৫ পরমেষ্ঠী ৬ অধীশ্বরঃ ৭ শম্ভুঃ ৮ স্বয়ম্ভুঃ ৯ ভগবান্ ১০ জগৎপ্রভুঃ ১১ তীর্থঙ্করঃ ১২ তীর্থকরঃ ১৩ জিনেশ্বরঃ ১৪ বাদী ১৫ অভয়দঃ ১৬ সার্ব্বঃ ১৭ সর্ব্বজ্ঞঃ ১৮ সর্ব্বদর্শী ১৯ কেবলী ২০ দেবাধিদেবঃ ২১ বোধদঃ ২২ পুরুষোত্তমঃ ২৩ বীতরাগাপ্তঃ ২৪। ইতি হেমচন্দ্রঃ ॥

অর্হন্ [ ৎ ] ( ত্রি ) পূজ্যঃ। মান্যঃ। ইতি মেদিনী ॥ স্তুতঃ। ইতি শব্দরত্নাবলী ॥

অর্হন্তঃ ( পুং ) বুদ্ধঃ। ক্ষপণকঃ। মান্যে ত্রি। ইতি জটাধরঃ ॥ শিবঃ। ইতি শব্দরত্নাবলী ॥

অর্হিতঃ ( ত্রি ) পূজিতঃ। ইত্যমরঃ ॥

অল ঞ বারণপর্য্যাপ্তিভূষাসু। ইতি কবিকল্পদ্রুমঃ ॥ ঞ অলতি অলতে পাপং গঙ্গা নিবারয়তীত্যর্থঃ। পর্য্যাপ্তিঃ সামর্থ্যং। পর্য্যাপ্তস্তু যথেষ্টং স্যাৎ তৃপ্তে শক্তে নিবারণে। ইতি বিশ্বপ্রকাশাৎ। অলতি ঘোটকো ধাবিতুং সমর্থঃ স্যাদিত্যর্থঃ। অলতি হারো জনং ভূষয়তি ইত্যর্থঃ। ইতি দুর্গাদাসঃ ॥

অলং ( ক্লী ) বৃশ্চিকপুচ্ছকণ্টকঃ। বিছার হুল ইতি ভাষা। ইতি হেমচন্দ্রঃ ॥ হরিতালং। ইতি রত্নমালা অমরটীকা চ ॥

অলং ব্য ভূষণং। পর্য্যাপ্তিঃ। বারণং। নিরর্থকং। শক্তিঃ। ইতি মেদিনী ॥ অত্যর্থং। যথা। সর্ব্বং মে বিমলং বদামলমলং গোলং বিজানাসি চেৎ। ইতি লীলাবতী ॥

অলকঃ ( পুং ক্লী ) ভঙ্গিযুতঃ কেশঃ। কর্পূরাদেঃ ক্ষোদশ্চূর্ণং তস্য কুন্তলাশ্চূর্ণকুন্তলাঃ তদ্ধি তত্র ন্যস্যতে ইত্যন্যে। অলতি ভূষয়তি মুখং ইত্যলকং। ইতি ভরতঃ ॥ কুটিলকুন্তলঃ। ইতি স্বভূতিঃ। ইতি সারসুন্দরী ॥ তৎপর্য্যায়ঃ। চূর্ণকুন্তলঃ ২। ইত্যমরঃ ॥

অলকঃ ( পুং ) অলর্কঃ। ক্ষিপ্তকুক্কুরঃ। ইত্যমরটীকায়াং রায়মুকুটঃ ॥

অলকনন্দা (স্ত্রী) কুমারী। ইতি ত্রিকাণ্ডশেষঃ ॥ ভারতবর্ষীয়গঙ্গা। ইতি শব্দমালা ॥ তথৈবালকনন্দা দক্ষিণেন তু ব্রহ্মসদনাদ্বহুনি গিরিকূটান্যতিক্রম্য নিষধহেমকূটহিমকূটান্যতিরভসতররংহসা লুঠন্তী ভারতমপি বর্ষং দক্ষিণস্যাং দিশি লবণজলধিমভিপ্রবিশতি। ইতি শ্রীভাগবতং ॥

অলকপ্রভা ( স্ত্রী ) কুবেরপুরী। ইতি শব্দরত্নাবলী ॥

অলকপ্রিয়ঃ ( পুং ) বৃক্ষবিশেষঃ। ইতি জটাধরঃ ॥

অলকা ( স্ত্রী ) কুবেরনগরী। ইত্যমরঃ ॥ অষ্টবর্ষাবধিদশবর্ষপর্য্যন্তবয়স্কা কন্যা। ইতি শব্দরত্নাবলী ॥

অলকাধিপঃ ( পুং ) কুবেরঃ। ইতি জটাধরঃ ॥

অলকাধিপতিঃ ( পুং ) কুবেরঃ। ইতি শব্দরত্নাবলী ॥

অলক্তঃ ( পুং ) বৃক্ষনির্যাসবিশেষঃ। লাহা। জৌ ইতি চ ভাষা। তৎপর্য্যায়ঃ। রাক্ষা ২ লাক্ষা ৩ জতু ৪ যাবঃ ৫ দ্রুমাময়ঃ ৬। ইত্যমরঃ ॥ রক্ষা ৭। ইতি ভরতঃ ॥ অরক্তঃ ৮। ইত্যমরটীকায়াং ভরতঃ ॥ জতুকং ৯ যাবকঃ ১০ অলক্তকঃ ১১ রক্তঃ ১২। ইতি শব্দরত্নাবলী ॥ পলঙ্কষা ১৩ কৃমিঃ ১৪ বরবর্ণিনী ১৫। ইতি জটাধরঃ ॥ তস্য গুণাদিঃ। লাক্ষাপলঙ্কষালক্তো যাবো বৃক্ষাময়ো জতু। লাক্ষা বর্ণ্যা হিমা বল্যা স্নিগ্ধা চ তুবরা লঘুঃ ॥ অনুষ্ণা কফপিত্তাস্রহিক্কাকাসজ্বরপ্রণুৎ। ব্রণোরক্ষতবীসর্পকৃমিকুষ্ঠগদাপহা ॥ অলক্তকো গুণৈস্তদ্বদ্বিশেষাদ্ব্যঙ্গনাশনঃ। ইতি ভাবপ্রকাশঃ ॥ * ॥ লাক্ষারসঃ। আলতা ইতি ভাষা। তৎপর্য্যায়ঃ। অলক্তকঃ ২ জতুরসঃ ৩ রাগঃ ৪ নির্ভৎর্সনঃ ৫ জননী ৬ জনকরী ৭ সম্পাদ্যা ৮ চক্রবর্ত্তিনী ৯। অস্য গুণাঃ। তিক্তত্বং। উষ্ণত্বং। কফবাতরোগব্রণদোষনাশিত্বং। কণ্ঠরোগশমনত্বং। রুচিকারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

অলক্তকঃ ( পুং ) নির্ভৎর্সনং। অলক্তঃ। ইতি হলায়ুধো হারাবলী চ ॥ লাক্ষা। ইতি রাজনির্ঘণ্টঃ ॥

অলগর্দঃ ( পুং ) জলসর্পঃ। জলবোড়া ইতি কেচিৎ। অলাধ ইতি কেচিৎ। ইত্যমরটীকায়াং ভরতঃ ॥

অলগর্দ্দঃ ( পুং ) জলব্যালঃ। ইত্যমরঃ ॥ কেয়ুটিয়া ইতি খ্যাতঃ। জলবোড়া ইতি কেচিৎ। অলাধ ইতি কেচিৎ। ইতি ভরতঃ ॥

অলঙ্করণং ( ক্লী ) ভূষণং। ইতি শব্দরত্নাবলী ॥

অলঙ্করিষ্ণুঃ ( ত্রি ) অলঙ্কারকর্ত্তা। ভূষণশীলঃ। ইতি রঘুনাথচক্রবর্ত্ত্যাদয়ঃ ॥ তৎপর্য্যায়ঃ। মণ্ডনঃ ২। ইত্যমরঃ ॥ অলঙ্কর্ত্তা ৩। ইতি শব্দরত্নাবলী ॥ * ॥ অলঙ্কারযুক্তব্যক্তিঃ। ইতি সারসুন্দর্য্যাদয়ঃ ॥ তৎপর্য্যায়ঃ। অলংকর্ত্তা ২ মণ্ডিতঃ ৩ প্রসাধিতঃ ৪ অলঙ্কৃতঃ ৫ ভূষিতঃ ৬ পরিষ্কৃতঃ ৭। ইত্যমরঃ ॥

অলঙ্কর্ত্তা [ ঋ ] ( ত্রি ) অলঙ্করিষ্ণুঃ। ইত্যমরঃ ॥

অলঙ্কর্ম্মীণঃ ( ত্রি ) কার্য্যকুশলঃ। কর্ম্মক্ষমঃ। ইত্যমরঃ ॥

অলঙ্কারঃ ( পুং ) ভূষণং। তৎপর্য্যায়ঃ। আভরণং ২ পরিষ্কারঃ ৩ বিভূষণং ৪ মণ্ডনং ৫। ইত্যমরঃ ॥ অলঙ্ক্রিয়া ৬ ভূষা ৭ অলঙ্করণং ৮ ভূষণং ৯। ইতি শব্দরত্নাবলী ॥ কলাপঃ ১০ ইতি জটাধরঃ ॥ * ॥ অথালঙ্কারযুক্তিঃ। তদ্ধারণদিনমুচ্যতে। রেবত্যশ্বিধনিষ্ঠাসু হস্তাদিষ্বপি পঞ্চসু। গুরুশুক্রবুধস্যাহ্নি বস্ত্রালঙ্কারধারণং ॥ অনিষ্টেষ্বপি নির্দ্দিষ্টং বস্ত্রালঙ্কারধারণং। উদ্বাহে রাজসম্মানে ব্রাহ্মণানাঞ্চ সম্মতে ॥ শিরস্ত্রং মুকুটং

হারঃ কুণ্ডলকাঙ্গদস্তথা। কঙ্কণং বালকঞ্চৈব মেখলাষ্টাবিতি ক্রমাৎ॥ প্রধানভূষণান্যেষু যথাসংখ্যানি নিশ্চয়ঃ। পদ্মরাগশ্চ বজ্রঞ্চ বিজয়ো গোবিদাস্তথা॥ মুক্তা বৈদূর্য্যনীলঞ্চ তথা মরকতং ক্রমাৎ। আদিত্যাদিদশাজানাং সর্ব্বসম্পত্তিদায়কাঃ॥ সুবর্ণেনাপি ঘটনা সর্ব্বেষামুপযুজ্যতে। প্রধানভূষণেষ্বেবমপ্রধানে ন নির্ণয়ঃ॥ প্রধানভূষণং প্রায়ঃ শিরসো হ্যভিধীয়তে। তস্য প্রধানভূষত্বাদিত্যাহ ভৃগুনন্দনঃ॥ সুখদা মণয়ঃ শুদ্ধা দুঃখদা দোষশালিনঃ। অতো মণীনাং বক্ষ্যামি লক্ষণানি যথাক্রমং॥ ইতি যুক্তিকল্পতরুঃ॥ * ॥ মণিবিশেষাণাং লক্ষণানি তত্তচ্ছব্দে দ্রষ্টব্যানি॥ * ॥ কাব্যালঙ্কারঃ। স দ্বিবিধঃ। শব্দালঙ্কারঃ ১। অর্থালঙ্কারশ্চ ২। তস্য লক্ষণং। কাব্যশোভাকরধর্ম্মঃ। ইতি কাব্যাদর্শঃ॥ বৈচিত্র্যমলঙ্কার ইত্যলঙ্কারসামান্যলক্ষণং। বৈচিত্র্যঞ্চ ভঙ্গীবিশেষঃ প্রতীতিসাক্ষিকঃ। ইতি কাব্যপ্রকাশটীকায়াং মহেশ্বরঃ॥ অঙ্গদাদিবৎ শব্দার্থশোভাতিশয়জনকো রসাদ্যুপকারকোঽস্থিরধর্ম্মঃ। ইতি সাহিত্যদর্পণং॥ অস্য বিবরণং দণ্ডিকাব্যপ্রকাশসাহিত্যদর্পণালঙ্কারকৌস্তুভচন্দ্রালোকোজ্জ্বলনীলমণিকাব্যচন্দ্রিকাকুবলয়ানন্দসরস্বতীকণ্ঠাভরণাদিগ্রন্থেষু জ্ঞেয়ং। অলঙ্কারাণাং মধ্যে যে যে প্রসিদ্ধাস্তেষাং নামলক্ষণোদাহরণানি চন্দ্রালোকধৃতানি তদতিরিক্তানি সাহিত্যদর্পণোক্তানি চ লিখ্যন্তে॥

| অথালঙ্কারনামানি | তল্লক্ষণানি | তদুদাহরণানি |
|---|---|---|
| অক্রমাতিশয়োক্তিঃ—১ | অক্রমাতিশয়োক্তিঃ স্যাৎ সহত্বে হেতুকার্য্যয়োঃ। ১ | আলিঙ্গন্তি সমং দেবজ্যাং শরাশ্চ পরাংশ্চতে॥১ |
| অতদ্গুণঃ—২ | সঙ্গতানুগুণাসঙ্গীকারমাহুরতদ্গুণং। ২ | চিরং রাগিণি মচ্চিত্তে নিহিতাপি ন রজ্যসি॥২ |
| অত্যন্তাতিশয়োক্তিঃ ৩ | অত্যন্তাতিশয়োক্তিস্তু কার্য্যে হেতুপ্রশক্তিজে।৩ | যাস্যামীত্যুদিতে তস্যা বলয়ো ভবদূর্ম্মিকা॥৩ |
| অত্যুক্তিঃ—৪ | অত্যুক্তিরদ্ভুতাতথ্যসৌর্য্যৌদার্য্যাদিবর্ণনং। ৪ | ত্বয়ি দাতরি রাজেন্দ্র যাচকাঃ কল্পশাখিনঃ॥ ৪ |
| অধিকং—৫ | অধিকং পৃথুলাধারাদাধেয়াধিক্যবর্ণনং। ৫ | ব্রহ্মাণ্ডানি জলে যত্র তত্র মান্তি ন তে গুণাঃ॥৫ |
| অনন্বয়ঃ—৬ | উপমানোপমেয়ত্বং যদেকস্যৈব বস্তুনঃ। ৬ | ইন্দুরিবেন্দুঃ শ্রীমানিত্যাদৌ তদনন্বয়ঃ॥৬ |

| অথালঙ্কারনামানি | তল্লক্ষণানি | তদুদাহরণানি |
| --- | --- | --- |
| অনুকূলং—————— ৭ | অনুকূলংপ্রাতিকূল্যমনুকূলানুবন্ধি চেৎ। ৭ | কুপিতাসি যদা তম্বি নিধায় করজক্ষতং। বধান ভুজপাশাভ্যাং কণ্ঠমস্য দৃঢ়ং তদা ॥ ৭ |
| অনুগুণঃ—————— ৮ | প্রাক্‌সিদ্ধঃ স্বগুণোৎকর্ষোঽনুগুণঃ পরসন্নিধেঃ। ৮ | নীলোৎপলানি দধতে কটাক্ষৈরতিনীলতাং ॥ ৮ |
| অনুজ্ঞা——————৯ | দোষস্যাভ্যর্থনানুজ্ঞা তত্রৈব গুণদর্শনাৎ। ৯ | ময্যেব জীর্ণতাং যাতু যত্ত্বয়ৈব কৃতং হরে। নরঃ প্রত্যুপকারার্থী বিপত্তিমভিকাঙ্ক্ষতি ॥ ৯ |
| অনুপ্রাসঃ —————— ১০ | অনুপ্রাসঃ শব্দসাম্যং বৈষম্যেঽপি স্বরস্য যৎ। ১০ | আদায় বকুলগন্ধানন্ধীকুর্ব্বন্ পদে পদে ভ্রমরান্। অয়মেতি মন্দমন্দং কাবেরীবারিপাবনঃ পবনঃ ॥ ১০ |
| অনুপ্রাসস্তু পঞ্চবিধঃ। একস্য লক্ষণোদাহরণে উক্তে। অপরে যথা বৃত্ত্যনুপ্রাসঃ———— | অনেকস্যৈকধাসাম্যমসকৃদ্বাপ্যনেকধা। একস্য সকৃদপ্যেষ বৃত্ত্যনুপ্রাস ইষ্যতে ॥ | উন্মীলন্মধুগন্ধলুব্ধমধুপব্যাধূতচূতাঙ্কুরক্রীড়ৎকোকিলকাকলীকলকলৈরুদ্গীর্ণকর্ণজ্বরাঃ। নীয়ন্তে পথিকৈঃ কথংকথমপি ধ্যানাবধানক্ষণপ্রাপ্তপ্রাণসমাঃ সমাগমরসোল্লাসৈরমী বাসরাঃ॥ |
| শ্রুত্যনুপ্রাসঃ— | উচ্চার্য্যত্বাদ্যদেকত্র স্থানে তালুরদাদিকে। সাদৃশ্যং ব্যঞ্জনস্যৈতৎ শ্রুত্যনুপ্রাস উচ্যতে ॥ | দৃশা দগ্ধং মনসিজং জীবয়ন্তি দৃশৈব যাঃ। বিরূপাক্ষস্য জয়িনীস্তাঃ স্তমো বামলোচনাঃ ॥ |
| অন্ত্যানুপ্রাসঃ | ব্যঞ্জনঞ্চেদ্যথাবস্থং সহাদ্যেন স্বরেণ তু। আবর্ত্ততেঽন্ত্যযোজ্যত্বাদনুপ্রাসঃ স এব তৎ ॥ | কেশঃ কাশস্তবকবিকাশঃ কায়ঃ প্রকটিতকরভবিলাসঃ। চক্ষুর্দগ্ধবরাটককল্পং ত্যজতি ন চেতঃ কামমনল্পং ॥ |

| অথালঙ্কারনামানি | তল্লক্ষণানি | তদুদাহরণানি |
|---|---|---|
| লাটানুপ্রাসঃ- | শব্দার্থয়োঃ পৌনরুক্তং ভেদে তাৎপর্য্যমাত্রতঃ লাটানুপ্রাস ইত্যুক্তঃ ॥ | স্মেররাজীবনয়নে নয়নে কিং নিমীলিতে। পশ্য নির্জ্জিত-কন্দর্পং কন্দর্পবশগং প্রিয়ং ॥ |
| অনুমানং ———— ১১ | অনুমানন্তু বিচ্ছিত্ত্যা জ্ঞানং সাধ্যস্য সাধনাৎ। ১১ | জানীমহেঽস্যাঃ কিল সারসাক্ষ্যা বিরাজতেঽন্তঃপ্রিয়বক্তুচন্দ্রঃ। তৎকান্তিজালৈঃ প্রসৃতৈ-স্তদঙ্গেষ্বাপাণ্ডুতা কুট্মলতাক্ষি-পদ্মে ॥ ১১ |
| অন্যোন্যং ———— ১২ | অন্যোন্যং নাম যত্র স্যাদুপ-কারঃ পরস্পরং। ১২ | ত্রিযামা শশিনা ভাতি শশী ভাতি ত্রিযাময়া ॥ ১২ |
| অপহ্নবাতিশয়োক্তিঃ — ১৩ | রূপকাতিশয়োক্তিঃ স্যান্নি-গীর্য্যাধ্যবসানতঃ। যদাপহ্নুতি-গর্ভত্বং সৈব সাপহ্নবা মতা। ১৩ | ত্বৎসূক্তিষু সুধা রাজন্ ভ্রান্তাঃ পশ্যন্তি তাং বিধৌ ॥ ১৩ |
| অপ্রস্তুতপ্রশংসা——— ১৪ | অপ্রস্তুতপ্রশংসা স্যাৎ সা যত্র প্রস্তুতাশ্রয়া। ১৪ | একঃ কৃতী স কুন্তেষু যোঽন্যং শক্রান্ন যাচতে ॥ ১৪ |
| অভিধাহেতুঃ ——— ১৫ | অভেদেনাভিধাহেতুর্হেতোর্হেতু-মতা সহ। ১৫ | তারুণ্যবিলাসঃ। ইত্যত্র বশী-করণহেতুর্নায়িকাবশীকরণত্বে-নোক্তা। বিলাসহাসয়োস্ত্বধ্যব-সায়মূলোঽয়মলঙ্কারঃ ॥ ১৫ |
| অর্থান্তরন্যাসঃ———— ১৬ | উক্তিরর্থান্তরন্যাসঃ স্যাৎ সামান্যবিশেষয়োঃ। ১৬ | হনূমানব্ধিমতরৎ দুস্তরং কিং মহাত্মনাং॥ গুণবদ্বস্তু সংসর্গাৎ যাতি স্বল্পোঽপি গৌরবং। পুষ্পমালানুসংঙ্গেন সূত্রং শিরসি ধার্য্যতে ॥ ১৬ |

| | তল্লক্ষণানি | তদুদাহরণানি |
|---|---|---|
| অর্থাপত্তিঃ———১৭ | দণ্ডাপূপিকয়ান্যার্থাগমোঽর্থাপত্তিরিষ্যতে। কচিৎ প্রাকরণিকাদপ্রাকরণিকার্থস্যাপতনং। কচিৎ অপ্রাকরণিকাৎ প্রাকরণিকার্থস্যেতি দ্বৌ ভেদৌ। ১৭ | হারোঽয়ং হরিণাক্ষীণাং লুঠতি স্তনমণ্ডলে। মুক্তানামপ্যবস্থেয়ং কে বয়ং স্মরকিঙ্করাঃ॥ বিললাপ সবাষ্পগদ্গদং সহজামপ্যপহায় ধীরতাং। অতিতপ্তময়োঽপি মার্দ্দবং ভজতে কৈব কথা শরীরিণাং॥ ১৭ |
| অল্পং———১৮ | অল্পন্তু সূক্ষ্মাদাধেয়াদ্যদাধারস্য সূক্ষ্মতা। ১৮ | মণিমালোর্ম্মিকা তেঽদ্য করে জপবটায়তে॥ ১৮ |
| অবজ্ঞালঙ্কৃতিঃ———১৯ | তাভ্যাং তৌ যদি ন স্যাতামবজ্ঞালঙ্কৃতিস্তু সা। ১৯ | স্বল্পমেবাম্বু লভতে পান্থঃ প্রাপ্যাপি সাগরং। মীলন্তি যদি পদ্মানি কা হানিরমৃতদ্যুতেঃ॥ ১৯ |
| অসঙ্গতিঃ——— ২০ তস্য ত্রীণি লক্ষণানি। | বিরুদ্ধভিন্নদেশত্বং কার্য্যহেত্বোরসংগতিঃ। অন্যত্র করণীয়স্য ততোঽন্যত্র কৃতিশ্চ সা। অন্যৎ কর্ত্তুং প্রবৃত্তস্য তদ্বিরুদ্ধকৃতিশ্চ সা। ২০ | বিষং জলধরৈঃ পীতং মূর্চ্ছিতা পথিকাঙ্গনা। অপারিজাতাং বসুধাং চিকীর্ষন্ দ্যাং তথাকৃথাঃ। গোত্রোদ্ধারপ্রবৃত্তো হি গোত্রোদ্ধারং পুরাকরোঃ॥ ২০ |
| অসদর্থনিদর্শনা———২১ | অপরাং বোধনং প্রাহুঃ ক্রিয়য়াসৎসদর্থয়োঃ। অস্যার্থঃ। কস্যচিৎ কিঞ্চিৎক্রিয়াবিশিষ্টস্য স্বক্রিয়য়াপরান্ প্রতি অসতঃ সতো বার্থস্য বোধনবর্ণনং।২১ | নশ্যেদ্রাজবিরোধীতি ক্ষীণঃ চন্দ্রোদয়ে পুনঃ॥ ২১ |
| অসম্ভবঃ———২২ | অসম্ভবোর্থনিষ্পত্তেরসম্ভাব্যত্ববর্ণনং। ২২ | কো বেদ গোপশিশুকঃ শৈলমুৎপাটয়িষ্যতি॥ ২২ |

| অথালঙ্কারনামানি | তল্লক্ষণানি | তদুদাহরণানি |
|---|---|---|
| আবৃত্তিদীপকং——২৩ তৎ ত্রিবিধং। পদাবৃত্তিঃ। অর্থাবৃত্তিঃ। উভয়াবৃত্তিঃ | ত্রিবিধং দীপকাবৃত্তৌ ভবেদাবৃত্তিদীপকং। ২৩ | বর্ষত্যম্বুদমালেয়ং বর্ষত্যেষা চ শর্ব্বরী॥ উন্মীলন্তি কদম্বানি স্ফুটন্তি কুটজোদ্গমাঃ। মাদ্যন্তি চাতকাস্তৃপ্তা মাদ্যন্তি চ শিখাবলাঃ॥ ২৩ |
| আক্ষেপঃ——২৪ অস্য ত্রীণি লক্ষণানি লক্ষ্যাণি চ | আক্ষেপঃ স্বয়মুক্তস্য প্রতিষেধো বিচারণাৎ। নিষেধাভাস আক্ষেপং বুধাঃ কেচন মন্বতে। আক্ষেপোঽন্যো বিধৌ ব্যক্তে নিষেধে চ তিরোহিতে। ২৪ | চন্দ্রসন্দর্শয়াত্মানমথবাস্তিপ্রিয়ামুখং। নায়ং দুতিতনোস্তাপস্তস্যাঃ কালানলোপমঃ। গচ্ছ গচ্ছসি চেৎ কান্ত তত্রৈব স্যাজ্জনির্মম॥ ২৪ |
| উৎপ্রেক্ষা——২৫ সা বস্তুহেতুফলাত্মতা গোচরত্বেন ত্রিবিধা। বস্তূৎপ্রেক্ষা। হেতূৎপ্রেক্ষা। ফলোৎপ্রেক্ষা। তত্রাদ্যা উক্তবিষয়া অনুক্তবিষয়া চেতি দ্বিবিধা। পরে হেতুফলোৎপ্রেক্ষে সিদ্ধাসিদ্ধবিষয়তয়া প্রত্যেকং দ্বিবিধে। এবমুৎপ্রেক্ষা ষড়্বিধা। | সম্ভাবনাঃ স্যুরুৎপ্রেক্ষা বস্তুহেতুফলাত্মতা। উক্তানুক্তাস্পদাদ্যাত্র সিদ্ধাসিদ্ধাস্পদেঽপরে। ২৫ | ধূমস্তোমং তমঃ শঙ্কে কোকীবিরহলক্ষণং। লিম্পতীব তমোঽঙ্গানি বর্ষতীবাঞ্জনং নভঃ। রক্তৌ তবাঙ্ঘ্রী মৃদুলৌ ভুবি বিক্ষেপণাদ্ধ্রুবং। তন্মুখাভেচ্ছয়া নূনং পদ্মৈর্ব্বৈরায়তে শশী। মধ্যঃ কিং কুচয়োর্ধৃত্যৈ বদ্ধঃ কনকদামভিঃ। প্রায়োঽব্জং ত্বৎপদেনৈক্যং প্রাপ্তুং তোয়ে তপস্যতি॥ ২৫ |
| উত্তরং——২৬ | কিঞ্চিদাকূতসহিতং স্যাদ্গূঢ়োত্তরমুত্তরং। ২৬ | যত্রাসৌ বেতসী পান্থ তত্রেয়ং সুতরাং সরিৎ॥ ২৬ |
| উদাত্তং——২৭ | উদাত্তমৃদ্ধিরচিতং শ্লাঘ্যমাল্যোপলক্ষণং। ২৭ | সাসৌ যত্রাভবদ্যুদ্ধং তদ্ধূর্জটিনোঽর্জ্জুনঃ॥ ২৭ |

| অথালঙ্কারনামানি | তল্লক্ষণানি | তদুদাহরণানি |
|---|---|---|
| উপমা —— ২৮ | উপমা যত্র সাদৃশ্যলক্ষ্মীরুল্লসতি দ্বয়োঃ । ২৮ | হংসীব ভূপতেঃ কীর্ত্তিঃ স্বর্ণদীমবগাহতে ॥ ২৮ |
| উপমেয়োপমা —— ২৯ | পর্য্যায়েণ দ্বয়োস্তচ্চেদুপমেয়োপমা মতা । ২৯ | ধর্ম্মোঽর্থ ইব পূর্ণশ্রীরর্থো ধর্ম্ম ইব ত্বয়ি ॥ ২৯ |
| উল্লাসঃ —— ৩০ | একস্য গুণদোষাভ্যামুল্লাসোঽন্যস্য তৌ যদি । ৩০ | অপি মাং পাবয়েৎ সাধ্বী স্নাত্বেতীচ্ছতি জাহ্নবী ॥ কাঠিন্যং কুচয়োর্দৃষ্টং বাঞ্ছন্ত্যঃ পাদপদ্ময়োঃ । নিন্দন্তি বিশ্বধাতারং ত্বদ্ধাটীষ্বরিযোষিতঃ ॥ তদভাগ্যং ধনস্যৈব যন্নাশ্রয়তি সজ্জনং । লাভোঽয়মেব ভূপাল সেবকানাং ন চেদ্বধঃ ॥ ৩০ |
| উল্লেখঃ —— ৩১ লক্ষণভেদেন স দ্বিবিধঃ । | বহুভির্বহুধোল্লেখাদেকস্যোল্লেখ ইষ্যতে। একোনবহুধোল্লেখোঽপ্যসৌ বিষয়ভেদতঃ ॥ ৩১ | স্ত্রীভিঃ কামোঽর্থিভিঃ স্বর্দ্রুঃ কালঃ শত্রুভিরৈক্ষি সঃ। গুরুর্বচস্যর্জ্জুনোঽয়ং কীর্ত্তৌ ভীষ্মঃ শরাসনে ॥ ৩১ |
| একাবলী —— ৩২ | গৃহীতমুক্তরীত্যার্থশ্রেণীরেকাবলী মতা । ৩২ | নেত্রে কর্ণান্তবিশ্রান্তে কর্ণৌ দোঃস্তম্ভশাসনৌ ॥ দোঃস্তম্ভৌ জানুপর্য্যন্তপ্রলম্বনমনোহরৌ । জানুনী রত্নমুকুরাকারে তস্য মহীভুজঃ ॥ ৩২ |
| কারকদীপকং —— ৩৩ | ক্রমিকৈকগতানান্তু গুম্ফঃ কারকদীপকং । ৩৩ | গচ্ছত্যা গচ্ছতি পুনঃ পান্থঃ পশ্যতি পৃচ্ছতি ॥ ৩৩ |
| কারণমালা —— ৩৪ সা পূর্ব্বপূর্ব্বপদার্থানাং কারণত্ববর্ণনেন এবমুত্তরোত্তরপদার্থানাং কারণত্ববর্ণনেন চ দ্বিধা। | গুম্ফঃ কারণমালা স্যাদ্যথা প্রক্রান্তকারণৈঃ । ৩৪ | নয়েন শ্রীঃ শ্রিয়া ত্যাগস্ত্যাগেন বিপুলং যশঃ ॥ ভবন্তি নরকাঃ পাপাঃ পাপং দারিদ্র্যসম্ভবং। দারিদ্র্যমপ্রদানেন তস্মাদ্দানপরো ভব ॥ ৩৪ |

| অথালঙ্কারনামানি | তল্লক্ষণানি | তদুদাহরণানি |
|---|---|---|
| কাব্যলিঙ্গং————৩৫ | সমর্থনীয়স্যার্থস্য কাব্যলিঙ্গসমর্থনং। ৩৫ | জিতোঽসি মন্দ কন্দর্প মচ্চিত্তেঽস্তি ত্রিলোচনঃ॥ ৩৫ |
| কাব্যার্থাপত্তিঃ————৩৬ | কৈমুত্যেনার্থসংসিদ্ধিঃ কাব্যার্থাপত্তিরিষ্যতে। ৩৬ | স জিতস্ত্বন্মুখেনেন্দুঃ কা বার্ত্তা সরসীরুহাং॥ ৩৬ |
| কৈতবাপহ্নুতিঃ ——— ৩৭ | কৈতবাপহ্নুতির্ব্যক্তে ব্যাজাদ্যৈর্নিহ্নবে পদৈঃ। ৩৭ | নির্যান্তি স্মরনারাচা বালাদৃক্পাতকৈতবাৎ॥ ৩৭ |
| গূঢ়োক্তিঃ ———— ৩৮ | গূঢ়োক্তিরন্যোদ্দেশ্যাগীর্যদন্যং প্রতি কথ্যতে। ৩৮ | বৃষাপেহি পরক্ষেত্রাদায়াতি ক্ষেত্ররক্ষকঃ॥ ৩৮ |
| চপলাতিশয়োক্তিঃ —— ৩৯ | চপলাতিশয়োক্তিস্তৎপৌর্ব্বাপর্য্যব্যতিক্রমঃ। ৩৯ | অগ্রে মানো গতঃ পশ্চাদনুনীতা প্রিয়েণ সা॥ ৩৯ |
| চিত্রং ———— ৪০ চিত্রকাব্যমনেকবিধং যথা। পদ্মচ্ছত্রধনুঃখড়্গনাগপাশকবাটনৌকাবন্ধাঃ। অশ্বগতিত্রিপদীগোমূত্রিকাদয়ঃ। | পদ্মাদ্যাকারহেতুত্বে বর্ণানাং চিত্রমুচ্যতে। ৪০ | মারমা সুষমাচারুরুচা মারবধূত্তমা। মাত্তধূর্ত্ততমাবাসসা বামা মেঽস্তু মারমা॥ ৪০ |
| ছেকাপহ্নুতিঃ————৪১ | ছেকাপহ্নুতিরন্যস্য শঙ্কাতস্তস্য নিহ্নবে। ৪১ | প্রজল্পন্ মৎপদে লগ্নঃ কান্তঃ কিং ন হি নূপুরঃ॥ ৪১ |
| তদ্গুণঃ————৪২ | তদ্গুণঃ স্বগুণত্যাগাদন্যদীয়গুণগ্রহঃ। ৪২ | পদ্মরাগায়তে নাসা মৌক্তিকং তেঽধরত্বিষা॥ ৪২ |
| তুল্যযোগিতা———— ৪৩ সা ত্রিধা। | | |
| প্রথমা যথা ———— | বর্ণ্যানামিতরেষাং বা ধর্ম্মৈক্যং তুল্যযোগিতা। | সঙ্কুচন্তি সরোজানি স্বৈরিণীবদনানি চ॥ ত্বদঙ্গমার্দবে দৃষ্টে কস্য চিত্তে ন ভাসতে॥ মালতীশশভৃল্লেখা কদলীনাং কঠোরতা॥ |

| অথালঙ্কারনামানি | তল্লক্ষণানি | তদুদাহরণানি |
|---|---|---|
| দ্বিতীয়া যথা- | হিতাহিতে বৃত্তিতৌল্যমপরা তুল্যযোগিতা। | প্রদীয়তে পরাভূতির্মিত্রশাত্রবয়োস্ত্বয়া॥ |
| তৃতীয়া যথা- | গুণোৎকৃষ্টৈঃ সমীকৃত্য বচোঽন্যা তুল্যযোগিতা। ৪৩ | লোকপালো যমঃ পাশী শ্রীদঃ শক্রো ভবানপি॥ ৪৩ |
| দীপকং——————৪৪ | বদন্তি বর্ণ্যাবর্ণ্যানাং ধর্ম্মৈক্যং দীপকং বুধাঃ। ৪৪ | মদেন ভাতি কলভঃ প্রতাপেন মহীপতিঃ॥ ৪৪ |
| দৃষ্টান্তঃ——————৪৫ | চেদ্বিম্বপ্রতিবিম্বত্বং দৃষ্টান্তস্তদলঙ্কৃতিঃ। ৪৫ | ত্বমেব কীর্ত্তিমান্‌রাজন্‌ বিধুরেব হি কান্তিমান্‌॥ ৪৫ |
| নিদর্শনা——————৪৬<br>সা ত্রিধা। | বাক্যার্থয়োঃ সদৃশয়োরৈক্যারোপো নিদর্শনা। পদার্থগর্ভামপ্যন্যে বদন্ত্যন্যাং নিদর্শনাং॥ অপরাং বোধনং প্রাহুঃ ক্রিয়য়াসৎসদর্থয়োঃ। ৪৬ | যা দাতুঃ সৌম্যতা সেয়ং পূর্ণেন্দোরকলঙ্কতা॥ ত্বন্নেত্রযুগলং ধত্তে লীলাং নীলাম্বুজন্মনোঃ॥ নশ্যেদ্রাজবিরোধীতি ক্ষীণং চন্দ্রোদয়ে তমঃ॥ ৪৬ |
| নিরুক্তিঃ——————৪৭ | নিরুক্তির্যোগতো নাম্না মন্যার্থত্বপ্রকল্পনং। ৪৭ | ঈদৃশৈশ্চরিতৈর্জানে সত্যং দোষাকরো ভবান্‌॥ ৪৭ |
| পরিকরঃ——————৪৮ | অলঙ্কারঃ পরিকরঃ সাভিপ্রায়বিশেষণে। ৪৮ | সুধাংশুকলিতোত্তংসস্তাপং হরতু বঃ শিবঃ॥ ৪৮ |
| পরিকরাঙ্কুরঃ—————— ৪৯ | সাভিপ্রায়বিশেষ্যশ্চেদ্ভবেৎ পরিকরাঙ্কুরঃ। ৪৯ | চতুর্ণাং পুরুষার্থানাং দাতা দেবশ্চতুর্ভুজঃ॥ ৪৯ |
| পরিণামঃ——————৫০ | পরিণামঃ ক্রিয়ার্থশ্চেদ্বিষয়ী বিষয়াত্মনা। ৫০ | প্রসন্নেন দৃগব্জেন বীক্ষ্যতে মদিরেক্ষণা॥ ৫০ |
| পরিবৃত্তিঃ—————— ৫১ | পরিবৃত্তির্বিনিময়ো ন্যূনাভ্যধিকয়োর্ম্মিথঃ। ৫১ | যযাবেকং শরং মুক্ত্বা কটাক্ষান্‌ স রিপুস্ত্রিয়াঃ॥ ৫১ |

| অথালঙ্কারনামানি | তল্লক্ষণানি | তদুদাহরণানি |
|---|---|---|
| পরিসংখ্যা——৫২ | পরিসংখ্যা নিষিধ্যৈকমেকস্মিন্ বস্তুযন্ত্রণং। ৫২ | স্নেহক্ষয়ঃ প্রদীপেষু ন স্বান্তেষু নতভ্রুবাং ॥ ৫২ |
| পর্য্যস্তাপহ্নুতিঃ——৫৩ | অন্যত্র তস্যারোপার্থঃ পর্য্যস্তাপহ্নুতিস্তু সা। ৫৩ | নায়ং সুধাংশুঃ কিং তর্হি সুধাংশুঃ প্রেয়সীমুখং ॥ ৫৩ |
| পর্য্যায়ঃ——৫৪ স দ্বিবিধঃ। | পর্য্যায়ো যদি পর্য্যায়েণৈকস্যানেকসংশ্রয়ঃ। একস্মিন্ যদ্যানেকম্বা পর্য্যায়ঃ সোঽপি সম্মতঃ॥ ৫৪ | পদ্মং মুক্তা গতা চন্দ্রং কামিনীবদনপ্রভা ॥ অধুনা পুলিনং তত্র যত্র স্রোতঃ পুরাজনি ॥ ৫৪ |
| পর্য্যায়োক্তং——৫৫ তৎ দ্বিবিধং। | পর্য্যায়োক্তং তু গম্যশ্চেদ্বচোভঙ্গ্যান্তরাশ্রয়ঃ। পর্য্যায়োক্তং তদপ্যাহুর্যদ্ব্যাজেনেষ্টসাধনং ॥ ৫৫ | নমস্তস্মৈ কৃতৌ যেন মুধা রাহুবধূকুচৌ ॥ যামি চূতলতাং দ্রষ্টুং যুবাভ্যামাস্যতামিহ ॥ ৫৫ |
| পিহিতং——৫৬ | পিহিতং পরবৃত্তান্তজ্ঞাতুঃ সাকূতচেষ্টিতং। ৫৬ | প্রিয়ে গৃহাগতে প্রাতঃ কান্তা তল্পমকল্পয়ৎ ॥ ৫৬ |
| পুনরুক্তবদাভাসঃ——৫৭ | আপাততো যদর্থস্য পৌনরুক্ত্যাবভাষণং। পুনরুক্তবদাভাসঃ স ভিন্নাকারশব্দগঃ ॥৫৭ | ভুজঙ্গকুণ্ডলীব্যক্তশশিশুভ্রাংশুশীতগুঃ। জগন্ত্যপি সদা পায়াদব্যাচ্চেতোহরঃ শিবঃ॥ ৫৭ |
| পূর্ব্বরূপঃ——৫৮ স দ্বিবিধঃ। | পুনঃ স্বগুণসংপ্রাপ্তিঃ পূর্ব্বরূপমুদাহৃতং। পূর্ব্বাবস্থানুবৃত্তিশ্চ বিকৃতে সতি বস্তুনি॥ ৫৮ | হরকণ্ঠাংশুলিপ্তোঽপি শেষস্ত্বকৃশশাসিতঃ ॥ দীপে নির্ব্বাপিতেঽপ্যাসীৎ কাঞ্চীরত্নৈর্ম্মহর্ম্মহঃ ॥ ৫৮ |
| প্রতিবস্তূপমা——৫৯ | বাক্যয়োরেকসামান্যে প্রতিবস্তূপমা মতা। ৫৯ | তাপেন ভ্রাজতে সূর্য্যঃ শূরশ্চাপেন রাজতে ॥ ৫৯ |
| প্রতিষেধঃ——৬০ | প্রতিষেধঃ প্রসিদ্ধস্য নিষেধস্যানুকীর্ত্তনং। ৬০ | ন দ্যূতমেতৎ কিতবাক্রীড়নং নিশিতৈঃ শরৈঃ ॥ ৬০ |

| অথালঙ্কারনামানি | তল্লক্ষণানি | তদুদাহরণানি |
|---|---|---|
| প্রতীপং——————৬১ তল্লক্ষণভেদেন পঞ্চবিধং। ন তু নামভেদেন। | প্রতীপমুপমানস্যাপ্যুপমেয়ত্ব-কল্পনং। অন্যোপমেয়লাভেন বর্ণ্যস্যানাদরশ্চ তৎ॥ বর্ণ্যোপ-মানলাভেন তথান্যস্যাপ্যনা-দরঃ। বর্ণ্যেনান্যস্যোপমায়া অনিষ্পত্তির্বচশ্চ তৎ॥ প্র-তীপমুপমানস্য কৈমর্থ্যমপি মন্যতে।৬১ | তল্লোচনসমং পদ্মং ত্বদ্বক্ত্র-সদৃশো বিধুঃ। অলং গর্ব্বেণ তে বক্ত্রকান্ত্যা চন্দ্রো ভবাদৃশঃ॥ কঃ ক্রৌর্য্যদর্পস্তে মৃত্যো ত্বত্তুল্যাঃ সন্তি হি স্ত্রিয়ঃ। মিথ্যাবাদো হি মুগ্ধাক্ষি ত্বন্মুখাভং কিলাম্বুজং। দৃষ্টং চেদ্বদনং তস্যাঃ কিং পদ্মেন কিমিন্দুনা॥ ৬১ |
| প্রত্যনীকং——————৬২ | প্রত্যনীকং বলবতঃ শত্রোঃ পক্ষে পরাক্রমঃ। ৬২ | জৈত্রনেত্রানুগৌ কর্ণাবুৎপলা-ভ্যামধঃকৃতৌ॥ ৬২ |
| প্রস্তুতাঙ্কুরঃ——————৬৩ | প্রস্তুতেন প্রস্তুতস্য দ্যোতনে প্রস্তুতাঙ্কুরঃ। ৬৩ | কিং ভৃঙ্গ সত্যাং মালত্যাং কেতক্যা কণ্টকস্বয়া॥ ৬৩ |
| প্রহর্ষণং——————৬৪ তৎ ত্রিবিধং। | উৎকণ্ঠিতার্থসংসিদ্ধির্ব্বিনা যত্নং প্রহর্ষণং। বাঞ্ছিতাদধিকার্থস্য সংসিদ্ধিশ্চ প্রহর্ষণং॥ যত্না-দুপায়সিদ্ধার্থাৎ সাক্ষাল্লাভঃ ফলস্য তৎ। ৬৪ | তামেব ধ্যায়তে তস্মৈ বিসৃষ্টা সৈব দূতিকা॥ দীপমুদ্দীপয়েদ্-যাবত্তাবদভ্যুদিতো রবিঃ॥ নিধ্যঞ্জনৌষধীমূলং খনতাসা-দিতো নিধিঃ॥ ৬৪ |
| প্রৌঢ়োক্তিঃ——————৬৫ | প্রৌঢ়োক্তিরুৎকর্ষহেতৌ ত-দ্ধেতুত্বপ্রকল্পনং। ৬৫ | কচাঃ কলিন্দজাতীরতমাল-স্তোমমেচকাঃ॥ ৬৫ |
| ভাবিকং——————৬৬ | ভাবিকং ভূতভাব্যর্থসাক্ষাৎ-কারস্য বর্ণনং। ৬৬ | অহং বিলোকয়েঽদ্যাপি যুধ্য-ন্তেঽত্র সুরাসুরাঃ॥ ৬৬ |
| ভাষাসমাবেশঃ——————৬৭ | শব্দৈরেকবিধৈরেব ভাষাসু বিবিধাস্বপি। বাক্যং যত্র ভবেৎ সোঽয়ং ভাষাসম ইতীষ্যতে॥৬৭ | গুঞ্জন্মণিমঞ্জীরে কলগম্ভীরে বিহারসরসীতীরে। বিরসাসি কেলিকীরে কিমালি ধীরে চ গন্ধসারসমীরে॥ ৬৭ |
| ভেদকাতিশয়োক্তিঃ——৬৮ | ভেদকাতিশয়োক্তিঃ স্যাৎ তস্যৈবান্যত্বকল্পনং। ৬৮ | অন্যদেবাস্য গাম্ভীর্য্যমন্য-দ্ধৈর্য্যঞ্চ ভূপতেঃ॥ ৬৮ |

| অথালঙ্কারনামানি | তল্লক্ষণানি | তদুদাহরণানি। |
|---|---|---|
| ভ্রান্তাপহ্নুতিঃ——৬৯ | ভ্রান্তাপহ্নুতিরন্যস্য শঙ্কায়াং ভ্রান্তিবারণে। ৬৯ | তাপং করোতি সোৎকম্পং জ্বরঃ কিন্নু সখে স্মরঃ ॥ ৬৯ |
| ভ্রান্তিমান্——৭০ | স্যাৎ স্মৃতির্ভ্রান্তিসন্দেহৈস্তদঙ্কালঙ্কৃতিত্রয়ং। ৭০ | অয়ং প্রমত্তো মধুপস্ত্বন্মুখং বেত্তি পঙ্কজং ॥ ৭০ |
| মালাদীপকং——৭১ | দীপকৈকাবলীযোগাম্মালাদীপকমুচ্যতে। ৭১ | স্মরেণ হৃদয়ে তস্যাস্তেন ত্বয়ি কৃতা স্থিতিঃ ॥ ৭১ |
| মিথ্যাধ্যবসিতিঃ——৭২ | কিঞ্চিন্মিথ্যাত্বসিদ্ধ্যর্থং মিথ্যার্থান্তরকল্পনং। ৭২ | মিথ্যাধ্যবসিতির্বেশ্যাং বশয়েৎ খস্রজং বহন্ ॥ ৭২ |
| মীলিতং——৭৩ | মীলিতং যদি সাদৃশ্যাদ্ভেদ এব ন দৃশ্যতে। ৭৩ | রসো নালক্ষি লাক্ষায়াশ্চরণে সহজারুণে ॥ ৭৩ |
| মুদ্রা——৭৪ | সূচ্যার্থসূচনং মুদ্রা প্রকৃতার্থপরৈঃ পদৈঃ। ৭৪ | নিতম্বগুর্ব্বী তরুণী দৃগ্যুগ্মবিপুলা চ সা ॥ ৭৪ |
| যথাসংখ্যং——৭৫ | যথাসংখ্যং ক্রমেণৈব ক্রমিকাণাং সমন্বয়ঃ। ৭৫ | শত্রুং মিত্রং বিপত্তিঞ্চ জয় রঞ্জয় ভঞ্জয় ॥ ৭৫ |
| যমকং——৭৬ | সত্যর্থে পৃথগর্থায়াঃ স্বরব্যঞ্জনসংহতেঃ। ক্রমেণ তেনৈবাবৃত্তির্যমকং বিনিগদ্যতে। ৭৬ | নবপলাশপলাশবনং পুরঃস্ফুটপরাগপরাগতপঙ্কজং। মৃদুলতান্তলতান্তমলোকয়ৎ সসুরভিং সুরভিং সুমনোত্তরৈঃ॥৭৬ |
| যুক্তিঃ——৭৭ | যুক্তিঃ পরাভিসন্ধানং ক্রিয়য়া মর্ম্মগুপ্তয়ে। ৭৭ | ত্বামালিখন্তি দৃষ্ট্বান্যাং ধনুঃ পৌষ্পং করেঽলিখৎ ॥ ৭৭ |
| রত্নাবলী——৭৮ | ক্রমিকাপ্রকৃতার্থানাং ন্যাসং রত্নাবলীং বিদুঃ। ৭৮ | চতুরাস্যঃ পতির্লক্ষ্ম্যাঃ সর্ব্বজ্ঞস্ত্বং মহীপতে ॥ ৭৮ |
| রূপকং——৭৯ তৎ দ্বিবিধং। অভেদরূপকং। তাদ্রূপ্যরূপকঞ্চ। তচ্চ সমন্যূনাধিক্যকথনদ্বারা প্রত্যেকং | বিষয্যভেদতাদ্রূপ্যরঞ্জনং বিষয়শ্চ যৎ। রূপকং তৎ ত্রিধাধিক্যন্যূনত্বানুভয়োক্তিভিঃ॥৭৯ | অয়ং হি ধূর্জ্জটিঃ সাক্ষাদ্যেন দগ্ধাঃ পুরঃক্ষণাৎ। অয়মাস্তে বিনা শম্ভুস্তার্তীয়ৈকং বিলোচনং ॥ শম্ভুর্বিশ্বমবত্যদ্য |

| অথালঙ্কারনামানি | তল্লক্ষণানি | তদুদাহরণানি। |
|---|---|---|
| ত্রিবিধং। সমাভেদরূপকং। ন্যূনাভেদরূপকং। অধিকাভেদরূপকং। সমতাদ্রূপ্যরূপকং। ন্যূনতাদ্রূপ্যরূপকং। অধিকতাদ্রূপ্যরূপকং। এতেন ষড়্বিধং। | | স্বীকৃত্য সমদৃষ্টিতাং। অস্যা মুখেন্দুনা লব্ধে নেত্রানন্দে কিমিন্দুনা॥ সাধ্বীয়মপরা লক্ষ্মীরসুধাসাগরোত্থিতা।অয়ং কলঙ্কিনশ্চন্দ্রান্মুখচন্দ্রোঽতিরিচ্যতে॥ ৭৯ |
| রূপকাতিশয়োক্তিঃ——৮০ | রূপকাতিশয়োক্তিঃ স্যাৎ নিগীর্য্যাধ্যবসানতঃ। অস্যার্থঃ। বিষয়সম্বন্ধেন উল্লেখনং বিনা বিষয়িবাচকশব্দেন গ্রহণং বিষয়নিগরণং তৎপূর্ব্বকং বিষয়স্য বিষয়িরূপতয়া অধ্যবসানং তস্মিন্ সতি রূপকাতিশয়োক্তিঃ। ৮০ | পশ্য নীলোৎপলদ্বন্দ্বান্নিঃসরন্তি সিতাঃ শরাঃ॥ ৮০ |
| ললিতং————৮১ | প্রস্তুতে বর্ণ্যবাক্যার্থপ্রতিবিম্বস্য বর্ণনং। ৮১ | ললিতং নির্গতে নীরে সেতুমেষা চিকীর্ষতি॥ ৮১ |
| লুপ্তোপমা————৮২ সা চাষ্টধা। বাচকলুপ্তা। ধর্ম্মলুপ্তা। উপমানলুপ্তা। ধর্ম্মবাচকলুপ্তা। বাচকোপমেয়লুপ্তা। বাচকোপমানলুপ্তা। ধর্ম্মোপমানলুপ্তা। ধর্ম্মোপমানবাচকলুপ্তা। | বর্ণ্যোপমানধর্ম্মাণামুপমাবাচকস্য চ। একদ্বিত্র্যনুপাদানাৎ ভিন্না লুপ্তোপমাষ্টধা॥ ৮২ | তড়িদ্গৌরীন্দুতুল্যাস্যা কর্পূরন্তী দৃশোর্মম। কান্ত্যা স্মরবধূয়ন্তী দৃষ্টা তন্বী রহো ময়া॥ যৎ ত্বয়া মেলনং তত্র লাভো মে যশ্চ তদ্রতেঃ। তদেতৎ কাকতালীয়মবিতর্কিতসম্ভবং॥ ৮২ |
| লেশঃ————৮৩ | লেশঃ স্যাদ্দোষগুণয়োর্গুণদোষত্বকল্পনং। ৮৩ | অখিলেষু বিহঙ্গেষু হন্ত স্বচ্ছন্দচারিষু। শুকপঞ্জরবন্ধস্তে মধুরাণাং গিরাং ফলং॥ ৮৩ |

| অথালঙ্কারনামানি | তল্লক্ষণানি | তদুদাহরণানি |
|---|---|---|
| লোকোক্তিঃ———৮৪ | লোকপ্রবাদানুকৃতিং লোকোক্তিরিতি কথ্যতে। ৮৪ | সহস্ব কতিচিন্মাসান্মীলয়িত্বা বিলোচনে॥ ৮৪ |
| বক্রোক্তিঃ———৮৫ | বক্রোক্তিঃ শ্লেষকাকুভ্যামপূর্ব্বার্থপ্রকল্পনং। ৮৫ | মুঞ্চ মানং দিনং প্রাপ্তং নেহ নান্দী হরান্তিকে॥ ৮৫ |
| বিকল্পঃ ৮৬ | বিরোধে তুল্যবলয়োর্ব্বিকল্পালঙ্কৃতির্ম্মতা। ৮৬ | সদ্যঃ শিরাংসি চাপান্ বা নময়ন্তু মহীভুজঃ॥ ৮৬ |
| বিকস্বরঃ———৮৭ | যস্মিন্ বিশেষসামান্যবিশেষাঃ স বিকস্বরঃ। ৮৭ | স ন জিগ্যে মহান্তো হি দুর্দ্দশাঃ সাগরা ইব॥ ৮৭ |
| বিচিত্রং ৮৮ | বিচিত্রং তৎ প্রযত্নশ্চেৎ বিপরীতফলেচ্ছয়া। ৮৮ | নমন্তি সন্তস্ত্রৈলোক্যাদপি লব্ধুং সমুন্নতিং॥ ৮৮ |
| বিধিঃ ৮৯ | সিদ্ধস্যৈব বিধানং যত্তামাহুর্ব্বিধ্যলঙ্কৃতিং। ৮৯ | পঞ্চমোদঞ্চনে কালে কোকিলঃ কোকিলোঽভবৎ॥ ৮৯ |
| বিনোক্তিঃ———৯০ লক্ষণভেদেন সা দ্বিবিধা। | বিনোক্তিঃ স্যাদ্বিনা কিঞ্চিৎ প্রস্তুতং হীনমুচ্যতে। তচ্চেৎ কিঞ্চিদ্বিনা রম্যং বিনোক্তিঃ সাপি কথ্যতে॥ ৯০ | বিদ্যা হৃদ্যাপি সা বিদ্যা বিনা বিনয়সম্পদং॥ বিনা খলৈর্ব্বিভাত্যেষা রাজেন্দ্র ভবতঃ সভাঃ॥ ৯০ |
| বিভাবনা———৯১ অস্যা লক্ষণান্যুদাহরণানি চ ষট্। | বিভাবনা বিনাপি স্যাৎ কারণং কার্য্যজন্ম চেৎ। হেতূনামসমগ্রত্বে কার্য্যোৎপত্তিশ্চ সা মতা॥ কার্য্যোৎপত্তিস্তৃতীয়া স্যাৎ সত্যপি প্রতিবন্ধকে। অকারণাৎ কার্য্যজন্ম চতুর্থী স্যাদ্বিভাবনা॥ বিরুদ্ধাৎ কার্য্যসম্পত্তির্দৃষ্টা কাচিদ্বিভাবনা। কার্য্যাৎ কারণজন্মাপি দৃষ্টা কাচিদ্বিভাবনা॥ ৯১ | অপলাক্ষারসাসিক্তং রক্তং তে চরণদ্বয়ং॥ অস্ত্রৈরতীক্ষ্ণকঠিনৈর্জ্জগজ্জয়তি মন্মথঃ॥ নরেন্দ্রানেব তে রাজন্ দশত্যসিভুজঙ্গমঃ॥ শঙ্খাদ্বীণানিনাদোঽয়মুদেতি মহদদ্ভুতঃ॥ শীতাঙ্গকিরণাস্তন্বীং হন্ত সন্তাপয়ন্তি তাং॥ যশঃপয়োরাশিরভূৎ করকল্পতরোস্তব॥ ৯১ |

| অথালঙ্কারনামানি | তল্লক্ষণানি | তদুদাহরণানি |
|---|---|---|
| বিরোধঃ——————৯২ স দশধা। | জাতিশ্চতুর্ভির্জ্জাত্যাদ্যৈর্গুণো গুণাদিভিস্ত্রিভিঃ। ক্রিয়াক্রিয়া-দ্রব্যাভ্যাং যৎ দ্রব্যং দ্রব্যেণ বা মিথঃ। বিরুদ্ধমিব ভাসেত বিরোধোঽসৌ দশাকৃতিঃ॥ ৯২ | তব বিরহে মলয়মরুদ্দাবানলঃ শশিরুচোঽপি শোষমণিঃ। হৃদয়মনিরুতমপি ভিন্তে নলিনী-দলমপি নিদাঘরবিরস্যাঃ॥ সন্ততমুষলাসঙ্গাদ্বহুতরগৃহকর্ম্ম-ঘটনায়া নৃপতে। দ্বিজপত্নী-নাং কঠিনাঃ সতি ভবতি করাঃ সরোজকুমারাঃ॥ অজ-স্য গৃহ্ণতো জন্ম নিরীহস্য হত-দ্বিষঃ। স্বপতো জাগরূকস্য যাথার্থ্যং বদ কস্তব॥ বল্লভোৎ-সঙ্গসঙ্গেন বিনা হরিণচক্ষুষঃ। রাকাবিভাবরীজানির্বিষজ্বালা-কুলো ভবেৎ॥ নয়নযুগা-সেচনকং মানসবৃত্ত্যাপি দু-ষ্প্রাপং। রূপমিদং মদিরাক্ষ্যা মদয়তি হৃদয়ং দুনোতি চ মে॥ ৯২ |
| বিরোধাভাষঃ————৯৩ | আভাষত্বং বিরোধস্য বিরোধা-ভাষ ইষ্যতে। ৯৩ | বিনাপি তন্বি হারেণ বক্ষোজৌ তব হারিণৌ॥ ৯৩ |
| বিবৃতোক্তিঃ————৯৪ | বিবৃতোক্তিঃ শ্লেষগুপ্তং কবি-নাবিষ্কৃতং যদি। ৯৪ | বৃষাপেহি পরক্ষেত্রাদিতি বক্তি সসূচনং॥ ৯৪ |
| বিশেষঃ——————৯৫ স ত্রিবিধঃ। | বিশেষঃ খ্যাতমাধারং বিনাপ্যা-ধেয়বর্ণনং। বিশেষঃ সোঽপি যদ্যেকং বস্তুনেকত্র বর্ণ্যতে॥ কিঞ্চিদারম্ভতোঽশক্যবস্ত্বন্তর-কৃতিশ্চ সঃ। ৯৫ | গতে সূর্য্যেঽপি দীপস্থাস্তম-শ্ছিন্দন্তি তৎকরাঃ॥ অন্তর্বহিঃ পুরঃ পশ্চাৎ সর্ব্বদিশ্যপি সৈব মে॥ ত্বাং পশ্যতা ময়া লব্ধং কল্পবৃক্ষনিরীক্ষণং॥ ৯৫ |
| বিশেষোক্তিঃ————৯৬ | কার্য্যাজনির্বিশেষোক্তিঃ সতি পুষ্কলকারণে। ৯৬ | হৃদি স্নেহক্ষয়ো নাভূৎ স্মর-দীপে জ্বলত্যপি॥ ৯৬ |

| অথালঙ্কারনামানি | তল্লক্ষণানি | তদুদাহরণানি |
|---|---|---|
| বিষমং——————৯৭ তৎ ত্রিবিধং। | বিষমং বর্ণ্যতে যত্র ঘটনাননু-রূপয়োঃ। বিরূপকার্য্যস্যোৎপত্তিরপরং বিষমং মতং। অনিষ্টস্যাপ্যবাপ্তিশ্চেত্তদিষ্টার্থ-সমুদ্যমাৎ। ৯৭ | কেয়ং শিরীষমৃদ্বঙ্গী ক তাদৃঙ্-মদনজ্বরঃ ॥ কীর্ত্তিং প্রসূতে ধবলাং শ্যামা তব কৃপাণিকা॥ ভক্ষাশয়া হি মঞ্জূষাং দৃষ্ট্যাখু-স্তেন ভক্ষিতঃ ॥ ৯৭ |
| বিষাদনং——————৯৮ | ইষ্যমাণবিরুদ্ধার্থসংপ্রাপ্তিশ্চ বিষাদনং। ৯৮ | দীপমুদ্দীপয়েদ্‌যাবত্তাবন্নির্ব্বাণ এব সঃ ॥ ৯৮ |
| ব্যাঘাতঃ——————৯৯ স দ্বিবিধঃ। | স্যাদ্ব্যাঘাতোঽন্যথাকারি তথা-কারি ক্রিয়েত চেৎ। সৌকা-র্য্যেণ নিবদ্ধাপি ক্রিয়াকার্য্য-বিরোধিনঃ। ৯৯ | যৈর্জগৎ প্রীয়তে হন্তি তৈরেব কুসুমৈঃ স্মরঃ ॥ দয়া চেদ্‌বাল ইতি ময্যপরিত্যজ্য এব তে ॥ ৯৯ |
| ব্যাজনিন্দা——————১০০ | নিন্দায়া নিন্দয়া ব্যক্তির্ব্যাজ-নিন্দেতি গীয়তে। ১০০ | বিধে স নিন্দ্যো যস্তে প্রাগেক মেবাহরচ্ছিরঃ ॥ ১০০ |
| ব্যাজস্তুতিঃ——————১০১ স দ্বিবিধঃ। | উক্তির্ব্যাজস্তুতির্নিন্দাস্তুতিভ্যাং স্তুতিনিন্দয়োঃ। ১০১ | কঃ স্বর্ধুনি বিবেকস্তে নয়সে পাপিনো দিবং ॥ সাধু দূতি পুনঃ সাধু কর্ত্তব্যং কিমতঃ-পরং। যন্মদর্থে বিলূনাসি দন্তৈরপি নখৈরপি ॥ ১০১ |
| ব্যাজোক্তিঃ——————১০২ | ব্যাজোক্তিরন্যহেতূক্ত্যা যদা-কারস্য গোপনং। ১০২ | সখি পশ্য গৃহারামপরাগৈ-রস্মি ধূসরা॥ ১০২ |
| ব্যতিরেকঃ——————১০৩ | ব্যতিরেকো বিশেষশ্চেদুপ-মানোপমেয়য়োঃ। ১০৩ | শৈলা ইবোন্নতাঃ সন্ত কিন্তু প্রকৃতিকোমলাঃ ॥ ১০৩ |
| শুদ্ধাপহ্নুতিঃ——————১০৪ | শুদ্ধাপহ্নুতিরন্যস্যারোপার্থো ধর্ম্মনিহ্নবঃ। ১০৪ | নায়ং সুধাংশুঃ কিং তর্হি ব্যোমগঙ্গাসরোরুহং ॥ ১০৪ |

| অথালঙ্কারনামানি | তল্লক্ষণানি | তদুদাহরণানি |
|---|---|---|
| শ্লেষঃ ——১০৫ স চ ত্রিবিধঃ। প্রকৃতানেকবিষয়ঃ ১ অপ্রকৃতানেকবিষয়ঃ ২ প্রকৃতাপ্রকৃতানেকবিষয়ঃ ৩। | নানার্থসংশ্রয়ঃ শ্লেষো বর্ণ্যাবর্ণ্যোভয়াশ্রয়ঃ। ১০৫ | সর্ব্বদো মাধবঃ পায়াৎ স যো গঙ্গামদীধরৎ ॥ অজেন ত্বন্মুখং তুল্যং হরিণা হতশক্তিনা। উচ্চরদ্ভূরিকীলালঃ শুশুভে বাহিনীপতিঃ৩ ॥১০৫ |
| সদর্থনিদর্শনা ——১০৬ | বিভাবনং সম্বন্ধানাং ফলং সুহৃদনুগ্রহঃ। ১০৬ | উদয়ন্নেব সবিতা পদ্মেষর্পয়তি ত্বিষং ॥ ১০৬ |
| সন্দেহঃ ——১০৭ | স্যাৎ স্মৃতিভ্রান্তিসন্দেহৈস্তদঙ্কালঙ্কৃতিত্রয়ং। ১০৭ | পঙ্কজন্মা সুধাংশুর্ব্বেত্যস্মাকন্তু ন নির্ণয়ঃ ॥ ১০৭ |
| সমং ——১০৮ তৎ ত্রিবিধং। | সমং স্যাদ্বর্ণনং যত্র দ্বয়োরপ্যনুরূপয়োঃ। সারূপ্যমপি কার্য্যস্য কারণেন সমং বিদুঃ। বিনা যত্নেন তৎসিদ্ধির্যদর্থঃ কর্ত্তুমুদ্যমঃ। ১০৮ | স্বানুরূপং কৃতং পদ্মহারেণ কুচমণ্ডলং ॥ নীচপ্রবণতা লক্ষ্মি জলজায়াস্তবোচিতা ॥ যুক্তো বারণলাভোঽয়ং ভূপতের্বারণার্থিনঃ ॥ ১০৮ |
| সমাধিঃ ——১০৯ | সমাধিঃ কার্য্যসৌকার্য্যং কারণান্তরসন্নিধেঃ। ১০৯ | উৎকণ্ঠিতা চ কুলটা জগামাস্তঞ্চ ভানুমান্ ॥ ১০৯ |
| সমাসোক্তিঃ——১১০ | সমাসোক্তিঃ পরিস্ফূর্ত্তিঃ প্রস্তুতে প্রস্তুতস্য চেৎ। ১১০ | অয়মৈন্দ্রীমুখং পশ্য রক্তশ্চুম্বতি চন্দ্রমাঃ ॥ ১১০ |
| সমুচ্চয়ঃ ——১১১ স দ্বিবিধঃ। | বহূনাং যুগপদ্ভাজাং ভাবগুম্ফঃ সমুচ্চয়ঃ। অহং প্রথমিকাভাজামেককার্য্যান্বয়োঽপি সঃ। ১১১ | নশ্যন্তি পশ্চাৎ পশ্যন্তি ভ্রশ্যন্তি চ তব দ্বিষঃ ॥ কুলং শীলং বয়ো বিদ্যা ধনঞ্চ মদয়ন্ত্যমুং ॥ ১১১ |
| সম্বন্ধাতিশয়োক্তিঃ——১১২ লক্ষণভেদেন সা দ্বিধা। | সম্বন্ধাতিশয়োক্তিঃ স্যাদযোগে যোগকল্পনং। যোগেপ্যযোগসম্বন্ধাতিশয়োক্তিরিতীর্য্যতে। ১১২ | সৌধাগ্রাণি পুরস্যাস্য স্পৃশন্তি বিধুমণ্ডলং ॥ ত্বয়ি দাতরি রাজেন্দ্র স্বর্দ্রুমান্নাদ্রিয়ামহে ॥ ১১২ |

| অথালঙ্কারনামানি | তল্লক্ষণানি | তদুদাহরণানি |
|---|---|---|
| সম্ভাবনং ——————১১৩ | সম্ভাবনং যদীদং স্যাদিত্যূহো-ঽন্যস্য সিদ্ধয়ে। ১১৩ | যদি শেষোঽভবদ্বক্তা কথিতাঃ স্যুর্গুণাস্তব ॥ ১১৩ |
| সহোক্তিঃ——————১১৪ | সহোক্তিঃ সহভাবশ্চেদ্ভাসতে জনরঞ্জনঃ। ১১৪ | দিগন্তমগমৎ তস্য কীর্ত্তিঃ প্রত্যর্থিভিঃ সহ ॥ ১১৪ |
| সামান্যং ——————১১৫ | সামান্যং প্রকৃতস্যান্যতাদাত্ম্যং সদৃশৈর্গুণৈঃ। ১১৫ | মল্লিকাচিতধম্মিল্লাশ্চারুচন্দনচর্চ্চিতাঃ। অবিভাব্যাঃ সুখং যান্তি চন্দ্রিকা অভিসারিকাঃ ॥ ১১৫ |
| সারঃ——————১১৬ | উত্তরোত্তরমুৎকর্ষঃ সার ইত্যভিধীয়তে। ১১৬ | মধুরং মধুপীযূষং তস্মাৎ তস্মাৎ কবের্ব্বচঃ ॥ ১১৬ |
| -১১৭ | সূক্ষ্মং পরাশয়াভিজ্ঞে তরসাকৃতচেষ্টিতং। ১১৭ | ময়ি পশ্যতি সা কেশৈঃ সীমন্তমণিমাবৃণোৎ ॥ ১১৭ |
| স্তোকোক্তিঃ——————১১৮ | স্তোকোক্তির্যত্র লোকোক্তেঃ স্যাদর্থান্তরগর্ভিতা। ১১৮ | ভুজঙ্গ এব জানীতে ভুজঙ্গাচরণং সখে ॥ ১১৮ |
| স্বভাবোক্তিঃ——————১১৯ | স্বভাবোক্তিঃ স্বভাবস্য জাত্যাদিস্থস্য বর্ণনং। ১১৯ | কুরঙ্গৈরস্তরাঙ্গাক্ষৈঃ স্তব্ধকর্ণৈঃ সমীক্ষ্যতে ॥ ১১৯ |
| স্মৃতিমান্——————১২০ | স্যাৎ স্মৃতিভ্রান্তিসন্দেহৈস্তদঙ্কালঙ্কৃতিত্রয়ং। ১২০ | পঙ্কজং পশ্যতঃ কান্তা মুখং মে গাহতে মনঃ ॥ ১২০ |
| হেতুঃ——————১২১<br>স দ্বিবিধঃ। | হেতোর্হেতুমতা সার্দ্ধং বর্ণনং হেতুরুচ্যতে। হেতুর্হেতুমতোরৈক্যবর্ণনং হেতুরুচ্যতে। ১২১ | অসাবুদেতি শীতাংশুর্মানচ্ছেদায় সুভ্রুবাং ॥ লক্ষ্মীবিলাসো বিদুষাং কটাক্ষাবেঙ্কটপ্রভোঃ ॥ ১২১ |
| হেত্বপহ্নুতিঃ——————১২২ | শুদ্ধাপহ্নুতিরন্যস্যারোপার্থো ধর্ম্মনিহ্নবঃ। স এব যুক্তিপূর্ব্বশ্চেদুচ্যতে হেত্বপহ্নুতিঃ॥১২২ | নেন্দুস্তীব্রো ন নিশ্যর্কঃ সিন্ধোরৌর্ব্বোঽয়মুত্থিতঃ ॥ ১২২ |

অলঙ্ক্রিয়া (স্ত্রী) ভূষিতকরণং। তৎপর্য্যায়ঃ। ভূষা ২। ইত্যমরঃ॥

অলঙ্কৃতঃ (ত্রি) অলঙ্কারযুক্তঃ। তৎপর্য্যায়ঃ। ভূষিতঃ ২ প্রসাধিতঃ ৩ পরিষ্কৃতঃ ৪ মণ্ডিতঃ ৫। ইত্যমরঃ॥

অলঞ্জরঃ (পুং) মৃণ্ময়বহুজলধরপাত্রং। জালা ইতি খ্যাতঃ। তৎপর্য্যায়ঃ। অলিঞ্জরঃ ২ মণিকং ৩। ইত্যমরটীকায়াং ভরতঃ॥

অলতিঃ (পুং) গীতবিশেষঃ। ইত্যুণাদি-কোষঃ॥

অলদ্ধুমঃ (পুং) ধূমসমূহঃ। ইতি জটাধরঃ॥

অলম্ ব্য ভূষণং। পূর্ণতা। সামর্থ্যং। নিষেধঃ। ইত্যমরঃ॥ নিরর্থকং। ইতি ভরতঃ॥

অলম্বুষঃ (পুং) প্রহস্তঃ। বমনং। রাক্ষস-বিশেষঃ। ইতি মেদিনী॥

অলম্বুষা (স্ত্রী) মুণ্ডীরী। স্বর্গবেশ্যাভেদঃ। ইতি মেদিনী॥ লজ্জালুভেদঃ। তৎ-পর্য্যায়ঃ। খরত্বক্ ২ মেদঃ ৩ গলা ৪। অস্যা গুণাঃ। লঘুত্বং। স্বাদুত্বং। কৃমিপিত্ত-কফনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ অন্য-প্রবেশবারণার্থদত্তরেখাদিঃ॥

অলর্কঃ (পুং) ক্ষিপ্তকুক্কুরঃ। শ্বেতার্কবৃক্ষঃ শাদা আকন্দ ইতি ভাষা। তৎপর্য্যায়ঃ প্রতাপসঃ ২ রাজার্কঃ ৩ গণরূপী ৪। ইতি রত্নমালামরৌ॥ শূকরাকারাষ্টপাদতীক্ষ্ণ-দন্তসূচ্যাকৃতিলোমজন্তুবিশেষঃ। দংশ-নামাসুরো ভৃগুশাপাৎ অয়ং জন্তুর্ভূত্বা কর্ণ-স্যোরুং ভিত্ত্বা পরশুরামদৃষ্টিপাতাৎ শাপ-মুক্তঃ পূর্ব্বরূপো বভূব। ইতি মহাভারতে রাজধর্ম্মে॥

অললে ব্য পিশাচভাষায়াং সম্বোধনং। তৎ-পর্য্যায়ঃ। অলে ২ অলেলে ৩। ইতি শব্দ-রত্নাবলী॥

অলবালং (ক্লী) আলবালং। বৃক্ষমূলে জল-ধারণার্থং কৃতালিঃ। চারমাদা ইতি খ্যাতঃ। ইত্যমরটীকায়াং ভরতাদয়ঃ॥

অলবালকং (ক্লী) আলবালং। ইতি শব্দ-রত্নাবলী॥

অলসঃ (ত্রি) আলস্যযুক্তঃ। আল্‌স্যা ইতি ভাষা। তৎপর্য্যায়ঃ। মন্দঃ ২ তুন্দপরি-মৃজঃ ৩ আলস্যঃ ৪ শীতকঃ ৫ অনুষ্ণঃ ৬। ইত্যমরঃ॥ শীতলঃ ৭ কুণ্ঠঃ ৮ মুখনিরী-ক্ষকঃ ৯। ইতি শব্দরত্নাবলী॥

অলসঃ (পুং) বৃক্ষবিশেষঃ। পাদরোগভেদঃ। পাঁকুই ইতি ভাষা। ইতি মেদিনী॥ তস্য নিদানরূপে। ক্লিন্নাঙ্গুল্যন্তরৌ পাদৌ কণ্ডু-দাহরুজান্বিতৌ। দুষ্টকর্দ্দমসংস্পর্শাদলসং তং বিভাবয়েৎ॥ অলসং কাদঈ ইতি লোকে। অথ তস্য চিকিৎসা। পাদৌ সিৎকারনালেন লেপনং ত্বলসে হিতং। পটোলকুনটীনিম্বরোচনামরিচৈস্তিলৈঃ॥ ক্ষুদ্রাস্বরসসিদ্ধেন কটুতৈলেন লেপয়েৎ। ততঃ কাসীসকুনটীতিলচূর্ণৈর্ব্বিচূর্ণয়েৎ॥ অবধূলয়েৎ। করঞ্জবীজং রজনী কাসীসং পদ্মকং মধু। রোচনা হরিতালঞ্চ লেপো-ঽয়মলসে হিতঃ॥ ইতি ভাবপ্রকাশঃ॥

অলসকঃ (পুং) উদররোগবিশেষঃ। ইতি মাধবকরঃ॥ তস্য রূপং। কুক্ষিরানহ্যতে-ঽত্যর্থং প্রতাম্যেৎ পরিকূজতি। নিরুদ্ধো মারুতশ্চৈব কুক্ষাবুপরি ধাবতি॥ বাত-

বর্চ্চোনিরোধশ্চ যস্মাত্যর্থং ভবেদপি। তস্মালসকমাচষ্টে তৃষ্ণোদ্গারৌ তু যস্য চ॥ তন্ত্রান্তরে। প্রয়াতি নোর্দ্ধং নাধস্তাদাহারো ন চ পচ্যতে। আমাশয়েঽলসীভূতস্তেন সোঽলসকঃ স্মৃতঃ॥ অস্য লক্ষণং চিকিৎসা চ অজীর্ণশব্দে দ্রষ্টব্যা॥

অলসা (স্ত্রী) হংসপদীলতা। ইতি মেদিনী॥

অলসেক্ষণা (স্ত্রী) স্ত্রীবিশেষঃ। সা অলসদৃষ্টিযুক্তা। ইতি হেমচন্দ্রঃ॥

অলক্ষণং (ক্লী) দুর্লক্ষণং। মন্দচিহ্নং। তদ্বিশিষ্টে ত্রি॥

অলক্ষ্মীঃ (স্ত্রী) নরকদেবতা। তৎপর্য্যায়ঃ। নির্ঋতিঃ ২। ইত্যমরঃ॥ কালকর্ণী ৩ ইতি শব্দরত্নাবলী॥ কালকর্ণিকা ৪। ইতি জটাধরঃ॥ জ্যেষ্ঠাদেবী ৫। ইতি পাদ্মোত্তরখণ্ডং॥ তস্যা বিবরণং জ্যেষ্ঠাশব্দে দ্রষ্টব্যং॥ * ॥ দীপান্বিতামাবাস্যায়াং তস্যাঃ পূজাবিধির্যথা। তত্র প্রদোষে আদৌ আচারাদলক্ষ্মীপূজনং। ইত্যাচার্য্যচূড়ামণিপ্রভৃতয়ঃ॥ গোময়পুত্তলিকাং নির্ম্মায় বামহস্তেন কৃষ্ণপুষ্পং গৃহীত্বা ধ্যায়েৎ। অলক্ষ্মীং কৃষ্ণবর্ণাং দ্বিভুজাং কৃষ্ণবস্ত্রপরীধানাং লৌহাভরণভূষিতাং শর্করাচন্দনচর্চ্চিতাং গৃহসম্মার্জ্জনীহস্তাং গর্দ্দভারূঢ়াং কলহপ্রিয়াং। ইতি ধ্যাত্বা বিমুখেন ওঁ অলক্ষ্ম্যৈ নম ইত্যনেন নির্ম্মাল্যেন কৃষ্ণপুষ্পেণ সংপূজ্য প্রণমেৎ। ওঁ অলক্ষ্মীস্ত্বং কুরূপাসি কুৎসিতস্থানবাসিনী। সুখরাত্রৌ ময়া দত্তাং গৃহ্ণ পূজাঞ্চ শাশ্বতীং॥ দারিদ্র্যকলহপ্রিয়ে দেবি ত্বং ধননাশিনী। যাহি শত্রোর্গৃহে নিত্যং স্থিরা তত্র ভবিষ্যসি॥ যদি ত্বং মে মহাভাগে প্রীতা ভবসি সর্ব্বদা। পুত্রবন্ধুকলত্রেষু কদাচিন্নাগমিষ্যসি॥ গচ্ছ ত্বং মন্দিরং শত্রোর্গৃহীত্বা চাশুভং মম। মদাশ্রয়ং পরিত্যজ্য স্থিতা তত্র ভবিষ্যসি॥ ততঃ সূর্পবাদ্যেন সীমান্তে তাং বিসৃজেৎ। ইতি কৃত্যচন্দ্রিকা॥ * ॥ কিঞ্চ। এবং গতে নিশীথে তু নারী চ স্বগৃহাঙ্গনাৎ। অলক্ষ্মীশ্চ বহিষ্কার্য্যা অমন্ত্রঞ্চ যথাবিধি॥ ইতি কৃত্যতত্ত্বার্ণবধৃতব্রহ্মপুরাণং॥ * ॥ এবংগতে নিশীথে তু জনে নিদ্রার্দ্ধলোচনে। তাবন্নগরনারীভিঃ সূর্পডিণ্ডিমবাদনৈঃ। নিষ্কাশ্যতে প্রহৃষ্টাভিরলক্ষ্মীঃ স্বগৃহাঙ্গনাৎ॥ ইতি নির্ণয়সিন্ধৌ মদনরত্নধৃতভবিষ্যপুরাণং॥

অলাতং (ক্লী) অঙ্গারঃ। ইত্যমরঃ॥

অলাবুঃ (স্ত্রী) লতাবিশেষঃ তৎফলঞ্চ। লাউ ইতি খ্যাতা। তৎপর্য্যায়ঃ। তুম্বঃ ২ তুম্বকঃ ৩ তুম্বা ৪ তুম্বী ৫ পিণ্ডফলা ৬ মহাফলা ৭ আলাবুঃ ৮ এলাবুঃ ৯ লাবুঃ ১০ লাবুকা ১১। ইত্যমরঃ তট্টীকা চ॥ তুম্বিকা ১২ তুম্বিঃ ১৩ অলাবূঃ ১৪। ইতি শব্দরত্নাবলী॥ অস্যা গুণাঃ। অলাবুঃ কথিতা তুম্বী দ্বিধা দীর্ঘা চ বর্ত্তুলা। মিষ্টং তুম্বীফলং হৃদ্যং পিত্তশ্লেষ্মাপহং গুরু॥ বৃষ্যং রুচিকরং প্রোক্তং ধাতুপুষ্টিবিবর্দ্ধনং। ইতি ভাবপ্রকাশঃ॥ ভেদকত্বং কফকারিত্বং। গুরুপাকিত্বং। হিমত্বং। পিত্তনাশিত্বঞ্চ। তন্নাড়ীগুণাঃ। গুরুত্বং।

মধুরত্বং। মলভেদকত্বং। বাতশ্লেষ্মকারিত্বং। রূক্ষত্বং। শীতলত্বং। পিত্তনাশিত্বঞ্চ। ইতি রাজবল্লভঃ॥

অলারং (ক্লী) কবাটং। ইতি শব্দরত্নাবলী॥

অলিঃ (পুং স্ত্রী) ভ্রমরঃ। বৃশ্চিকঃ। ইত্যমরঃ॥ কাকঃ। কোকিলঃ। ইতি শব্দরত্নাবলী॥ মদিরা। ইতি মেদিনী॥

অলিকং (ক্লী) ললাটং। ইত্যমরঃ॥

অলিকুলসঙ্কুলঃ (পুং) কুব্জকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

অলিগর্দ্দঃ (পুং) জলসর্পঃ। আলাধ ইতি খ্যাতঃ। ইতি শব্দরত্নাবলী॥

অলিজিহ্বা (স্ত্রী) জিহ্বোপরিক্ষুদ্রজিহ্বা। আলজিব ইতি খ্যাতা। ইতি শব্দরত্নাবলী॥

অলিজিহ্বিকা (স্ত্রী) অলিজিহ্বা। ইতি শব্দরত্নাবলী॥

অলিঞ্জরঃ (পুং) মৃদাদিনির্ম্মিতজলাধারবিশেষঃ। জালা ইতি খ্যাতঃ। ইত্যমরঃ॥

অলিদূর্ব্বা (স্ত্রী) মালাদূর্ব্বা। ইতি রাজনির্ঘণ্টঃ॥

অলিন্দঃ (পুং) বহির্দ্বারসংলগ্নচতুরস্রকৃত্রিমভূমিঃ। তৎপর্য্যায়ঃ। প্রঘাণঃ ২ প্রঘণঃ ৩ বহির্দ্বারপ্রকোষ্ঠঃ ৪ আলিন্দঃ ৫। ইত্যমরঃ॥ গৃহদ্বারপিণ্ডকঃ। অলিন্দঃ নাম্নীতি অলঞ্ ইন্দ ভ্রস্বাদিঃ। যস্যামলিন্দেষু ন চক্রুরেবেতি মাঘঃ। স্বার্থে ঞে আলিন্দো দীর্ঘাদিরপি। গৃহৈকদেশে আলিন্দঃ প্রঘাণঃ প্রঘণস্তথেত্যমরদত্তঃ। অথ পিণ্ডক আলিন্দ ইতি হড্ডঃ। ইহ ভূভয়মেব শ্লেষাদিতি সাঞ্চঃ। ইত্যমরটীকায়াং ভরতঃ॥*॥ অন্যচ্চ। প্রঘাণপ্রঘণালিন্দা দ্বারবাহ্যপ্রকোষ্ঠকে। গৃহাভ্যন্তরশয্যার্থপিণ্ডিকায়ামপি ত্রয়ং॥ আলিন্দঃ স্যাদলিন্দোঽপি স্যাদলিন্দক ইত্যপি। ইতি শব্দরত্নাবলী॥

অলিপকঃ (পুং স্ত্রী) ভ্রমরঃ। কোকিলঃ। কুকুরঃ। ইতি মেদিনী॥

অলিপত্রিকা (স্ত্রী) বৃশ্চিকাখ্যক্ষুপঃ। ইতি রাজনির্ঘণ্টঃ॥

অলিপর্ণী (স্ত্রী) বৃশ্চিকালীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

অলিপ্রিয়ং (ক্লী) রক্তোৎপলং। রক্তপদ্মং। ইতি ত্রিকাণ্ডশেষঃ॥

অলিপ্রিয়া (স্ত্রী) পাটলাবৃক্ষঃ। ইতি রত্নমালা॥

অলিমকঃ (পুং) ভেকঃ। কোকিলঃ। ভ্রমরঃ। পদ্মকেশরঃ। মধুকবৃক্ষঃ। ইতি মেদিনী॥

অলিমোদা (স্ত্রী) গণিকারীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

অলিম্বকঃ (পুং) পদ্মকেশরঃ। ভেকঃ। ভ্রমরঃ। কোকিলঃ। ইতি শব্দরত্নাবলী॥

অলিবাহিনী (স্ত্রী) কেবিকাপুষ্পং। ইতি রাজনির্ঘণ্টঃ॥

অলী [ন্] (পুং) ভ্রমরঃ। বৃশ্চিকঃ। ইতি মেদিনী॥

অলীকং (ক্লী) অপ্রিয়ং। মিথ্যা। ইত্যমরঃ॥ স্বর্গঃ। ইতি মেদিনী॥ ললাটং। ইতি হেমচন্দ্রঃ॥

অলীকং ( ত্রি ) মিথ্যা। অপ্রিয়ং। অল্পং। ইতি শব্দরত্নাবলী ॥

অলীকমৎস্যঃ ( পুং ) অঙ্গারস্বিন্নতিলতৈল-ভৃষ্টমাষপিষ্টং। তত্র প্রমাণং রাজনির্ঘণ্টে যথা। মাষপিষ্টিকয়া লিঙ্গ্যনাগবল্লীদলৈর্ম্মহৎ। তত্তু সংস্বেদয়েদ্যুক্ত্যা স্থাল্যামঙ্গারকোপরি ॥ ততো নিষ্কাশিতং খণ্ড্যং তিলতৈলেন ভর্জ্জয়েৎ। অলীকমৎস্য উক্তোঽয়ং প্রকারঃ প্রাকপণ্ডিতৈঃ ॥ তং বৃন্তাকভর্টিত্রেণ বাস্তূকেন চ ভক্ষয়েৎ ॥

অলুঃ ( স্ত্রী ) আলুঃ। ক্ষুদ্রকলসী। ইত্যমরটীকায়াং রমানাথঃ ॥

অলুব্ধঃ ( ত্রি ) লোভরহিতঃ। যথা মনুঃ। একোঽপ্যলুব্ধঃ সাক্ষী স্যাৎ বহ্ব্যঃ শুচ্যোঽপি ন স্ত্রিয়ঃ। স্ত্রীবুদ্ধেরস্থিরত্বাত্তু দোষৈশ্চান্যেঽপি যে বৃতাঃ ॥ একোঽলুব্ধস্তু সাক্ষী স্যাদিতি কুল্লূকভট্টধৃতপাঠঃ। ইতি ব্যবহারতত্ত্বং

অলে ব্য পিশাচভাষয়া সম্বোধনং। ইতি শব্দরত্নাবলী ॥

অলেলে ব্য পিশাচভাষয়া সম্বোধনং। ইতি শব্দরত্নাবলী ॥

অলোভঃ ( পুং ) লোভাভাবঃ। যথা। ইজ্যাধ্যয়নদানানি তপঃ সত্যং ধৃতিঃ ক্ষমা। অলোভ ইতি মার্গোঽয়ং ধর্ম্মশ্চাষ্টবিধঃ স্মৃতঃ ॥ ইতি মহাভারতং ॥

অলোভী [ ন্ ] ( ত্রি ) লোভশূন্যব্যক্তিঃ। নাস্তি লোভো যস্য ইতি বহুব্রীহিসমাসাদিন্প্রত্যয়নিষ্পন্নঃ ॥

অলোহিতং (ক্লী) রক্তপদ্মং। ইতি রত্নমালা ॥

অলৌকিকঃ ( ত্রি ) লৌকিকপ্রত্যক্ষাবিষয়ঃ। অমানুষিকঃ। লোকাতীতঃ। যথা। অলৌকিকত্বাদমরঃ স্বকোষে ন যানি নামানি সমুল্লিলেখ। বিলোক্য তৈরপ্যধুনা প্রচারময়ং প্রযত্নঃ পুরুষোত্তমস্য ॥ ইতি ত্রিকাণ্ডশেষদ্বিতীয়শ্লোকঃ ॥

অল্পং ( ত্রি ) কিঞ্চিৎ। তৎপর্য্যায়ঃ। ঈষৎ ২ মনাক্ ৩ স্তোকং ৪ ক্ষুল্লকং ৫ শ্লক্ষ্ণং ৬ দভ্রং ৭ কৃশং ৮ তনুঃ ৯ তনুঃ ১০ ত্রুটিঃ ১১ ত্রুটী ১২ মাত্রা ১৩ লবঃ ১৪ লেশঃ ১৫ কণঃ ১৬ কণী ১৭ কণিকা ১৮ অণুঃ ১৯ সূক্ষ্মং ২০। ইত্যমরঃ ক্ষুল্লং ২১ ক্ষুল্লকং ২২ খুল্লং ২৩ কণা ২৪। ইতি শব্দরত্নাবলী ॥

অল্পকঃ ( পুং ) যবাসবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

অল্পকেশী ( স্ত্রী ) ভূতকেশীবৃক্ষঃ। ইতি রত্নমালা ॥

অল্পগন্ধং ( ক্লী ) রক্তকৈরবং। ইতি রত্নমালা

অল্পতনুঃ ( ত্রি ) খর্ব্বঃ। দুর্ব্বলঃ। অল্পাস্থিযুক্তঃ। ক্ষুদ্রদেহবান্। তৎপর্য্যায়ঃ। পৃশ্নিঃ ২। ইত্যমরঃ ॥

অল্পপত্রঃ ( পুং ) ক্ষুদ্রপত্রতুলসী। ইতি রত্নমালা ॥

অল্পপদ্মং ( ক্লী ) রক্তপদ্মং। ইতি রত্নমালা ॥

অল্পপ্রমাণকঃ ( পুং ) চেলানং। চেলো চেলা তরমুজ ইতি খ্যাতঃ। খরমুজ ইতি কেচিৎ। ইতি রত্নমালা

অল্পমারিষঃ (পুং) শাকবিশেষঃ। ক্ষুদ্রনটিয়া ইতি খ্যাতঃ। তৎপর্য্যায়ঃ। তণ্ডুলীয়ঃ ২। ইত্যমরঃ॥

অল্পসরঃ [স্] (ক্লী) ক্ষুদ্রসরোবরঃ। ডোবা গেড়ে ইতি ভাষা। তৎপর্য্যায়ঃ। বেশন্তঃ ২ পল্বলং ৩। ইত্যমরঃ॥

অল্পায়ুঃ [স্] (পুং) ছাগঃ। ইতি ত্রিকাণ্ডশেষঃ॥ অচিরজীবিতে ত্রি॥

অল্পিষ্ঠঃ }
অল্পীয়ঃ [স্] } (ত্রি) অত্যল্পং। ইত্যমরঃ॥

অল্লঃ (পুং) }
অল্লা (স্ত্রী) } পরমেশ্বরঃ। এতন্নাম্না যবনা উপাসতে। যথা। ওঁ অস্মল্লাং ইল্লে মিত্রাবরুণো দিব্যানি ধত্তে। ইলল্লে বরুণো রাজা পুনর্দদুঃ। হয়ামি মিত্রো ইল্লাং ইল্লল্লেতি ইল্লাল্লাং বরুণো মিত্রো তেজকামাঃ। হোবারমিন্দ্রো হোতারমিন্দ্রো মাহাসুরিন্দ্রাঃ। অল্লো জ্যেষ্ঠং শ্রেষ্ঠং পরমং পূর্ণং ব্রহ্মাণমল্লাং অল্লোরসুর মহমদরকং বরস্য অল্লো অল্লাং আদল্লাবুকমেককং। অল্লাং বুকং নিখাতকং। অল্লো যজ্ঞেন হুতহুত্বঃ অল্লা সূর্য্যচন্দ্রসর্ব্বনক্ষত্রাঃ অল্লো ঋষীণাং সদিব্যা ইন্দ্রায় পূর্ব্বং মায়াপরমন্ত অন্তরিক্ষাঃ অল্লো পৃথিব্যা অন্তরিক্ষং বিশ্বরূপং দিব্যানি ধত্তে ইল্লল্লে বরুণো রাজা পুনর্দদুঃ। ইল্লাকবর ইল্লাকবর ইল্লল্লেতি ইল্লাল্লাঃ ইল্লা ইল্লল্লা অনাদিস্বরূপা অথর্ব্বণী শাখাং হুঁ হ্রীঁ জনান্ পশূন্ সিদ্ধান্ জলচরান্ অদৃষ্টং কুরু কুরু ফট্ অসুরসংহারিণীং হুঁ অল্লো রসুরমহমদরকং বরস্য অল্লো অল্লাং ইল্লল্লেতি ইল্লল্লঃ। ইত্যাথর্ব্বণসূক্তং॥

অল্লা (স্ত্রী) নাট্যোক্তৌ মাতা। ইতি বোপদেবঃ॥

অব রক্ষণে। গতৌ। কান্তৌ। স্পৃহায়ামিতি যাবৎ। প্রীতৌ। তৃপ্তৌ। দ্যুতৌ। শোভায়ামিতি যাবৎ। শ্রুতৌ। আকর্ণনে ইতি যাবৎ। প্রাপ্তৌ। শ্লেষে। আলিঙ্গনে ইতি যাবৎ। অর্থনে। যাচ্ঞায়ামিতি যাবৎ। বেশে। প্রবেশে ইতি যাবৎ। ভাবে। সত্তায়ামিতি যাবৎ। বৃদ্ধৌ। গ্রহে। আদানে ইতি যাবৎ। বধে। সামর্থ্যে। অবগমে। কৃতৌ। করণে ইতি যাবৎ। কামে। ইচ্ছোৎপাদনে ইতি যাবৎ। ইতি বোপদেবীয়কবিকল্পদ্রুমঃ তট্টীকা চ॥ অব রক্ষে গতৌ কান্তৌ প্রীতৌ তৃপ্তৌ দ্যুতৌ স্তুতৌ। প্রাপ্তৌ শ্লেষেঽর্থনে বেশে ভাগে বৃদ্ধৌ গৃহে বধে। সামর্থ্যেঽবগমে কামে ধৃতৌ। ঊনবিংশতিরর্থাঃ। কান্তিরিচ্ছা। দ্যুতিঃ শোভা। কাম ইতি ণ্যন্তাদ্ব্যুৎপত্তেরিচ্ছোৎপাদানা ইতি ভেদঃ। শ্লেষ আলিঙ্গনং। সামার্থ্যং শক্তিঃ। রক্ষণে প্রসিদ্ধোঽয়ং। প্রীতৌ তু। ন মামবতি সদ্বীপা রত্নসূরপি মেদিনী॥ ইতি রঘুঃ॥ অন্যত্র বিরলপ্রয়োগঃ। কেচিত্তু স্তুতিভাগগৃহকামধৃতীর্ন পঠিত্বা ক্রিয়াশ্রবণদহমভাবানাহুঃ। অবতি। ইতি দুর্গাদাসঃ॥

অব ব্য উপসর্গবিশেষঃ। অস্যার্থঃ। নিশ্চয়ং। অসাকল্যং। অনাদরঃ। ইতি দুর্গাদাসঃ॥

আলম্বনং। বিজ্ঞাপনং। ব্যাপনং। শুদ্ধিঃ। অন্নং। পরিভবঃ। নিয়োগঃ। পালনং। ইতি শব্দরত্নাবলী ॥

অবকটং (ক্লী) বৈরূপ্যং। অবাৎ কুটারশ্চ বৈরূপ্যে চকারাৎ কটশ্চ। ইতি গোয়ীচন্দ্রকৃতলক্ষণ

অবকরঃ (পুং) সম্মার্জ্জন্যাদিনিঃক্ষিপ্তধুল্যাদিঃ। জঞ্জাল ইতি খ্যাতঃ। তৎপর্য্যায়ঃ। সঙ্করঃ ২। ইত্যমরঃ ॥ অবস্করঃ ৩। ইত্যমরটীকায়াং মথুরানাথঃ ॥ সঙ্কারঃ ৪। ইতি শব্দরত্নাবলী ॥

অবকলিতঃ (ত্রি) দৃষ্টঃ। ইতি ধরণী ॥

অবকাশঃ (পুং) অবস্থানদেশঃ। ফাঁক ইতি যাবৎ। অবসরঃ। ব্যাপ্তিরহিতস্থানং। ইত্যন্তরশব্দটীকায়াং ভরতঃ ॥ অপি চ। এবঞ্চ ষড়শীত্যাদিষ্বপ্যবকাশমলভমানং। ইতি তিথ্যাদিতত্ত্বং ॥ অন্যচ্চ। অবকাশেষু চোক্ষেষু নদীতীরেষু চৈব হি। বিবিক্তেষু চ তুষ্যন্তি দত্তেন পিতরঃ সদা ॥ ইতি মানবে ৩ অধ্যায়ে ২০৭ শ্লোকঃ ॥

অবকীর্ণঃ (ত্রি) অবচূর্ণিতঃ। তৎপর্য্যায়ঃ। অবধ্বস্তঃ ২। ইতি হেমচন্দ্রঃ ॥

অবকীর্ণী [ন্] (ত্রি) ক্ষতব্রতঃ। স্ত্রীসংসর্গাদিনা ত্যক্তনিয়মব্যক্তিঃ। ইত্যমরজটাধরৌ ॥

অবকুটারং (ক্লী) বৈরূপ্যং। ইতি সংক্ষিপ্তসারব্যাকরণস্য পরিশিষ্টং ॥

অবকৃষ্টঃ (ত্রি) বহিষ্কৃতঃ। দূরীকৃতঃ। তৎপর্য্যায়ঃ। নিষ্কাশিতঃ ২। ইত্যমরঃ ॥ নিঃসারিতঃ ৩। ইতি জটাধরঃ ॥ নির্গমিতঃ ৪। ইতি শব্দরত্নাবলী ॥

অবকেশী [ন্] (ত্রি) ফলকালেঽপ্যনুৎপন্নফলকবৃক্ষাদিঃ। ইত্যমরঃ ॥ তৎপর্য্যায়ঃ। বন্ধ্যঃ ২ অফলঃ ৩ ॥

অবক্তব্যং (ত্রি) বচনাযোগ্যং। অকথনীয়ং। ন বক্তব্যং অবক্তব্যমিতি নঞ্সমাসনিষ্পন্নং। যথা। অসম্ভব্যং ন বক্তব্যং প্রত্যক্ষমপি দৃশ্যতে। ইতি চাণক্যং ॥

অবক্রয়ঃ (পুং) ক্রয়সাধনদ্রব্যং। মূল্যং। ইত্যমরঃ ॥

অবগণিতং (ত্রি) অবজ্ঞাতং। অবমানিতং। ইত্যমরঃ ॥

অবগণ্ডঃ (পুং) গণ্ডস্থব্রণঃ। বয়েস্‌ফোড়া ইতি যাবৎ। তৎপর্য্যায়ঃ। বরগুঃ ২। ইতি ত্রিকাণ্ডশেষঃ ॥

অবগতং (ত্রি) জ্ঞাতং। তৎপর্য্যায়ঃ। বুদ্ধং ২ বুধিতং ৩ মনিতং ৪ বিদিতং ৫ প্রতিপন্নং ৬ অবসিতং ৭। ইত্যমরঃ ॥ প্রমিতং ৮ মতং ৯ প্রতীতং ১০। ইতি জটাধরঃ ॥

অবগতিঃ (স্ত্রী) জ্ঞানসামান্যং। ইতি জটাধরঃ ॥

অবগথঃ (ত্রি) প্রাতঃস্নাতঃ। প্রাতঃস্নায়ী। ইতি সিদ্ধান্তকৌমুদী ॥

অবগাদঃ (পুং) জলদ্রোণী। নৌকাজলসেচনকাষ্ঠপাত্রং। ইতি হলায়ুধঃ ॥

অবগাহঃ (পুং) স্নানং। স্নানগৃহং। ইতি বোপদেবঃ ॥

অবগাহনং (ক্লী) স্নানকরণং। তৎপর্য্যায়ঃ।

অবগাহঃ ২ বগাহঃ ৩ মজ্জনং ৪ নিমজ্জনং ৫। ডুব দিয়া নাওয়া ইতি ভাষা। শিরঃস্নানং। অম্ভসি মজ্জনং। যথা। অবগাহনস্তু চক্ষুঃকর্ণনাসিকামঙ্গুলীভিরাচ্ছাদ্য কুর্য্যাৎ। অঙ্গুলীভিঃ পিধায়ৈবং শ্রোত্রদৃঙ্নাসিকামুখং। নিমজ্জেত প্রতিস্রোতস্ত্রিঃ পঠেদঘমর্ষণং॥ ইতি সমুদ্রকরধৃতাৎ। অত্রানুক্তৌ বারত্রয়মেবাবগাহনং। নাভিমাত্রজলে গত্বা কৃত্বা কেশান্ দ্বিধা দ্বিজঃ। নিরুধ্য কর্ণৌ নাসাঞ্চ ত্রিকৃত্বো মজ্জনং ততঃ॥ ইতি বামনপুরাণাৎ। ইত্যাহ্নিকাচারতত্ত্বং॥ অন্যৎ স্নানশব্দে দ্রষ্টব্যং॥*॥ শ্রাদ্ধীয়ব্রাহ্মণস্য শ্রাদ্ধকর্ত্তুরপি অবগাহনস্নানকর্ত্তব্যত্বং। যথা গোভিলঃ। স্নাতান্ শুচীন্ আচান্তান্ ইত্যাদি। স্নাতান্ অবগাহিতান্ ন তু মন্ত্রাদিস্নাতান্। স্বয়মপি সূতকাদিরহিতঃ স্নাতঃ। ইতি শ্রাদ্ধতত্ত্বং॥

অবগীতং (ক্লী) নির্ব্বাদঃ। লোকাপবাদঃ। ইতি বিশ্বমেদিন্যৌ॥

অবগীতঃ (ত্রি) খ্যাতগর্হণঃ। নিন্দিতঃ। ইত্যমরঃ॥ দৃষ্টঃ। ইতি মেদিনী॥ মুহুর্দৃষ্টঃ। ইতি বিশ্বঃ॥

অবগুণ্ঠনং (ক্লী) যোষাননাবরকসরন্ধ্রবস্ত্রং। স্ত্রীমুখাচ্ছাদনবস্ত্রং। ঘোমটা ইতি খ্যাতা। ইতি শব্দরত্নাবলী॥ মুদ্রাবিশেষঃ। তথা চ তন্ত্রসারে। সব্যহস্তকৃতামুষ্টির্দীর্ঘাধোমুখতর্জ্জনী। অবগুণ্ঠনমুদ্রেয়মভিতো ভ্রামিতা মতা॥ ধূল্যাদিরক্ষণং॥

অবগুণ্ঠিকা (স্ত্রী) অবগুণ্ঠনং। স্ত্রীমুখাবরকবস্ত্রং। ইতি শব্দরত্নাবলী॥

অবগুণ্ডিতং (ত্রি) চূর্ণিতং। গুঁড়া করা ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ॥

অবগোরণং (ক্লী) তাড়নার্থদণ্ডাদীনামুদ্যমঃ। মারিবার নিমিত্তে ঠেঙ্গা উঠান ইতি ভাষা। ইতি ব্রাহ্মণং॥ যথা প্রায়শ্চিত্তবিবেকে। দণ্ডনিপাতপ্রায়শ্চিত্তেনৈব গুরুণা তন্মান্তরীয়কাবগোরণপ্রায়শ্চিত্তমপি সম্পাদ্যত ইত্যুক্তং। নমু দণ্ডনিপাতপ্রায়শ্চিত্তাৎ তদনন্তঃপাতিনোঽবগোরণপ্রায়শ্চিত্তস্য কথং সিদ্ধিঃ। তথাহি মনুঃ। অবগূর্য্য চরেৎ কৃচ্ছ্রমতিকৃচ্ছ্রং নিপাতনে। অবগূর্য্য ব্রাহ্মণতাড়নার্থং দণ্ডমুদ্যম্য শতযাতনাজনকং যৎ পাপমুৎপাদিতং তৎক্ষয়কামঃ কৃচ্ছ্রং প্রাজাপত্যব্রতং চরেৎ। তদুক্তং সংযুধিকরণে। শংযোঃ প্রজাপতেঃ প্রার্থনয়া দেবৈর্ব্রাহ্মণাবগোরণফলত্বেন শতযাতনাভিহিতা। তথা চ শ্রুতিঃ। শংযুঃ প্রজাপতিঃ প্রজাবিনেতা প্রজাহিতে রতশ্চ দেবানাং হবির্বহন্ আশিষোঽযাচত। দেবাস্ত্ববগোরণে শতযাতনাস্ত্বিত্যাশিষোঽদদতেতি। শাস্ত্রদীপিকাদৌ দর্শপৌর্ণমাসপ্রকরণে। দেবা বৈ শংযুং বার্হস্পত্যমব্রুবন্ হব্যং নো বহেতি কিং মে প্রজায়া ইতি তেঽব্রুবন্ যো ব্রাহ্মণায়াবগুরেত্তং শতেন যাতয়েৎ যো নিহন্যাৎ তং সহস্রেণ যো লোহিতমকরোৎ যাবতঃ পাংশূন্ ব্যনক্তি তাবতঃ পরিবৎসরান্ স স্বর্গাৎ প্রচ্যবেত। তস্মাৎ ব্রাহ্মণান্ নাবগুরেৎ ন হন্যাৎ ন লোহিতং কুর্য্যাৎ ইতি।

ইতিহাসাত্মকং ব্রাহ্মণঞ্চ। ইতি প্রায়শ্চিত্ততত্ত্বং ॥

অবগ্রহঃ (পুং) বৃষ্টিরোধঃ। প্রতিবন্ধকঃ। হস্তিললাটং। ইতি মেদিনী ॥ গজসমূহঃ। ইতি হারাবলী ॥ স্বভাবঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ জ্ঞানবিশেষঃ। ইতি হেমচন্দ্রঃ ॥ শাপঃ। ইত্যমরটীকায়াং ভরতাদয়ঃ ॥

অবগ্রহণং (ক্লী) প্রতিরোধঃ। অনাদরঃ। ইতি মেদিনী ॥

অবগ্রাহঃ (পুং) গ্রহদোষাদিজন্যবৃষ্টিব্যাঘাতঃ। শুকো ইতি ভাষা। তৎপর্য্যায়ঃ। বৃষ্টিবিঘাতঃ ২ অবগ্রহঃ ৩। ইত্যমরঃ ॥ হস্তিললাটং। শাপঃ। ইতি তট্টীকা ॥

অবঘট্টঃ (পুং) ভূরন্ধ্রং। গর্ত্তঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

অবঘাতঃ (পুং) আঘাতবিশেষঃ। তণ্ডুলাদিকুণ্ডনং। কাঁড়ান যস্য প্রসিদ্ধিঃ। ইতি হেমচন্দ্রঃ॥ যথা। চরুবিধৌ বিদ্যাকরবাজপেয়ী। শাস্ত্রাবধারণবেলায়াং হি যত্র প্রয়োজনাভাবাদিনিশ্চয়স্তত্রৈব তদুপাদানাদিলোপঃ শাস্ত্রার্থঃ। যথা কৃষ্ণলেঽবঘাতাদিলোপঃ। যত্র তদনুষ্ঠানবেলায়ামেব পুরুষদোষেণ প্রয়োজনাভাবো জ্ঞায়তে তদা প্রাক্ তন্নিশ্চয়াচ্ছাস্ত্রপ্রাপিতঃ পদার্থো নিয়মাপূর্ব্বমাত্রার্থমনুষ্ঠেয়মেব। অতএব প্রকৃতাবপি আলস্যাদিনা ব্রীহ্যাদিস্থানে তণ্ডুলাদিষু গৃহীতেষ্বাঘাতাদি সমাচরন্তি যাজ্ঞিকাঃ। ঘাতে ন্যূনে তথা ছিন্নে সান্নায্যে মান্ত্রিকে তথা। যজ্ঞে মন্ত্রাঃ প্রযোক্তব্যা মন্ত্রা যজ্ঞার্থসাধকাঃ॥ সান্নায্যে হবিষি মান্ত্রিকে মন্ত্রসাধ্যে অবঘাতাদৌ তৎকালে মন্ত্রপাঠাভাবেঽপি মন্ত্রাঃ প্রযোক্তব্যাঃ। ইতি শুদ্ধিতত্ত্বং ॥ অপমৃত্যুঃ ॥

অবচক্নরঃ (ত্রি) অবচনস্থঃ। কথার অবাধ্য ইতি ভাষা। ন বচঃ করোতীত্যর্থে বচঃশব্দপূর্ব্বককৃধাতোঃ টপ্রত্যয়েন নিষ্পন্নঃ॥

অবচূর্ণিতং (ত্রি) চূর্ণীকৃতদ্রব্যং। গুঁড়া করা ইতি ভাষা। তৎপর্য্যায়ঃ। অবধ্বস্তঃ ২ অপধ্বস্তঃ ৩। ইত্যমরঃ তট্টীকা চ ॥

অবচূলঃ (পুং) ধ্বজাগ্রবদ্ধাধোমুখবস্ত্রং। ইতি হেমচন্দ্রঃ ॥

অবচূলকং (ক্লী) চামরং। ইতি ত্রিকাণ্ডশেষঃ ॥

অবচ্ছিন্নং (ত্রি) অবচ্ছেদকতানিরূপকং। বিশিষ্টং। ইতি ন্যায়ভাষা। অবচ্ছেদাশ্রয়ঃ। যথা। প্রতিযোগ্যসমানাধিকরণযৎসমানাধিকরণাত্যন্তাভাবপ্রতিযোগিতাবচ্ছেদকাবচ্ছিন্নং যন্ন ভবতি তেন সমং তস্য সামানাধিকরণ্যং ব্যাপ্তিঃ। ইতি সিদ্ধান্তলক্ষণচিন্তামণিঃ ॥

অবচ্ছুরিতং (ক্লী) মহাহাস্যং। ইত্যমরটীকায়াং ভরতঃ ॥

অবচ্ছুরিতকং (ক্লী) মহাহাস্যং। ইতি শব্দরত্নাবলী ॥

অবচ্ছেদঃ (পুং) পরিচ্ছেদঃ। একদেশঃ। বিশেষণত্বং ॥

অবচ্ছেদকং (ত্রি) ন্যায়মতে অব্যাপ্যবৃত্ত্যধিকরণসম্বন্ধৈকদেশঃ। ইতরব্যাবর্ত্তকঃ। বিশেষণং। অবচ্ছিদ্যতেঽনেনেতি। যথা।

অব্যাপ্যবৃত্তেরবচ্ছেদকত্বমপি স্বরূপসম্বন্ধবিশেষঃ তদাশ্রয়াবচ্ছেদকঃ। ইতি ন্যায়শাস্ত্রং

অবচ্ছেদকত্বং (ক্লী) স্বরূপসম্বন্ধবিশেষঃ। যথা। ঘটকঞ্চাবচ্ছেদকত্বং স্বরূপসম্বন্ধবিশেষঃ। ইত্যবচ্ছেদকত্বনিরুক্তৌ শিরোমণিঃ॥ অনতিরিক্তবৃত্তিত্বং। যথা। অবচ্ছেদকত্বঞ্চ ইহানতিরিক্তবৃত্তিত্বং। তেন বিশিষ্টস্যাসত্বেপি ভ্রমাৎ প্রতিবন্ধেপি ন ক্ষতিঃ। ইতি সামান্যনিরুক্তৌ শিরোমণিঃ॥ অন্যূনানতিরিক্তবৃত্তিত্বং। যথা। নন্বু তাদৃশপ্রতিযোগিত্বান্যূনানতিরিক্তবৃত্তিত্বং বাচ্যং। বহ্নিত্বং ন ঘটবৃত্তি তাদৃশপ্রতিযোগিত্বান্যূনানতিরিক্তবৃত্তি অতআহ তার্ণাতার্ণেতি। ইত্যবচ্ছেদকত্বনিরুক্তৌ জগদীশঃ॥ অনতিরিক্তবৃত্তিত্বরূপাবচ্ছেদকত্বং পারিভাষিকং। যথা। তদবচ্ছিন্নাভাববদসম্বদ্ধস্ববিশিষ্টসামান্যকত্বং স্ববিশিষ্টসম্বন্ধিনিষ্ঠাভাবপ্রতিযোগিতানবচ্ছেদকতৎকত্বঞ্চা তদনতিরিক্তবৃত্তিত্বং বক্তব্যং। ইতি অবচ্ছেদকত্বনিরুক্তৌ শিরোমণিঃ॥ অব্যাপ্যবৃত্তেরবচ্ছেদকত্বমপি স্বরূপসম্বন্ধবিশেষঃ তদশ্রয়াবচ্ছেদকঃ। তচ্চাবচ্ছেদকত্বং ইহ শিখরিণি নিতম্বে হুতাশনোনশিখরে ইত্যাদিপ্রতীতিবলাৎ কুত্রচিদব্যাপ্যবৃত্ত্যধিকরণদেশবিশেষাদিদানীং গোষ্ঠে গৌর্নতু গৃহে ইত্যাদিপ্রতীতিবলাৎ কুত্রচিৎ দেশবৃত্তিতায়াঃ কালে কুত্রচিৎ কালবৃত্তিতায়া দেশে অপ্যস্তি। ইতি ন্যায়শাস্ত্রং॥

অবচ্ছেদাবচ্ছেদঃ (পুং) ব্যাপকত্বং। ইতি ন্যায়ভাষা॥

অবজ্ঞা (স্ত্রী) অনাদরঃ। অবহেলা। ইত্যমরঃ॥

অবজ্ঞাতং (ত্রি) অবমানিতং। অনাদৃতং। তিরস্কৃতং। ইত্যমরঃ॥

অবজ্ঞানং (ক্লী) অবজ্ঞা। যথা অবজ্ঞানং অবজ্ঞা আতো অন্তঃপ্রদেশোরিতি ঙঃ। সম্পাদিত্বাৎ কিবিতি মধুঃ। তন্মতে গোপাবদ্রূপং। ইত্যমরটীকায়াং ভরতঃ॥

অবটঃ (পুং) খিলং। গর্ত্তঃ। কূপঃ। কুহকজীবী। ইতি বিশ্বমেদিন্যৌ॥

অবটিঃ (পুং) গর্ত্তঃ। ইতি হলায়ুধঃ॥

অবটীটঃ (ত্রি) নতনাসিকঃ। খাঁদা ছেপড়ানেকো যস্য প্রসিদ্ধিঃ। তৎপর্য্যায়ঃ। অবনাটঃ ২ অবভ্রটঃ ৩। ইত্যমরঃ॥

অবটুঃ (পুং স্ত্রী) গ্রীবাপশ্চাদ্‌ভাগঃ। ঘাড় ইতিখ্যাতঃ। ইত্যমরঃ॥ কূপঃ। গর্ত্তঃ। ইতি হেমচন্দ্রঃ॥ বৃক্ষভেদঃ। ইত্যুণাদিকোষঃ॥

অবডঙ্গঃ (পুং) হট্টঃ। ইতিজটাধরঃ। কস্যচিন্মতে অবদ্রঙ্গ ইতি পাঠঃ॥

অবডীনং (ক্লী) পক্ষিণামধোগমনং। পক্ষিণামবরোহণং। ইতি জটাধরঃ॥

অবতংসঃ (পুং ক্লী) কর্ণপূরঃ। কর্ণভূষণং। শেখরঃ। শিরোভূষণং। তৎপর্য্যায়ঃ। বতংসঃ ২ উত্তংসঃ ৩। ইত্যমরঃ॥ মুকুটং ৪ মকুটং ৫ মৌলিঃ ৬ মৌলীকঃ ৭ শেখরং ৮ উষ্ণীষকঃ ৯ কৌটীরকং ১০ কোটীরং ১১ কিরীটং ১২ চূড়ামণিঃ ১৩ শিরোরত্নং ১৪ শিরোমণিঃ ১৫। কর্ণভূষণং। তৎপর্য্যায়ঃ। বতংসঃ ২ কর্ণপূরঃ ৩ কুণ্ডলং ৪ কর্ণবেষ্টনং ৫ উত্তংসঃ ৬ দন্তপত্রং ৭ কর্ণকং ৮। ইতি শব্দরত্নাবলী॥

অবতমসং (ক্লী) অল্পান্ধকারঃ। ইত্যমরঃ॥
অবতারঃ (পুং) অবতরণং। পুষ্করিণ্যাদিঃ। তীর্থঃ। ইতি মেদিনী॥ দেবানাং বিশেষতোবিষ্ণোর্মূর্ত্ত্যন্তরেণ পূর্ণাংশাবেশরূপেণ পৃথিব্যামবতরণং। অবতারাস্ত্বসংখ্যেয়াঃ তেষ্বেতে প্রসিদ্ধাঃ। ব্রহ্মা ১ বরাহঃ ২ নারদঃ ৩ নরনারায়ণৌ ৪ কপিলঃ ৫ দত্তাত্রেয়ঃ ৬ যজ্ঞঃ ৭ ঋষভদেবঃ ৮ পৃথুঃ ৯ মৎস্যঃ ১০ কূর্ম্মঃ ১১ ধন্বন্তরিঃ ১২ মোহিনী ১৩ নৃসিংহঃ ১৪ বামনঃ ১৫ পরশুরামঃ ১৬ বেদব্যাসঃ ১৭ রামঃ ১৮ বলরামঃ ১৯ কৃষ্ণঃ ২০ বুদ্ধঃ ২১ কল্কী ২২॥ ইতি শ্রীভাগবতে॥ যথা। সএব প্রথমং দেবঃ কৌমারং সর্গমাশ্রিতঃ। চচার দুশ্চরং ব্রহ্মা ব্রহ্মচর্য্যমখণ্ডিতং॥ দ্বিতীয়স্তু ভবায়াস্য রসাতলগতাং মহীং উদ্ধরিষ্যন্নুপাদত্ত যজ্ঞেশঃ শৌকরং বপুঃ॥ তৃতীয়মৃষিসর্গং বৈ দেবর্ষিত্বমুপেত্য সঃ। তন্ত্রং সাত্বতমাচষ্ট নৈষ্কর্ম্মং কর্ম্মণাং যতঃ॥ তুর্য্যে ধর্ম্মকলা সর্গে নরনারায়ণাবৃষী। ভূত্বাত্মোপশমোপেত মকরোদ্দুশ্চরং তপঃ॥ পঞ্চমঃ কপিলোনাম সিদ্ধেশঃ কালবিপ্লুতং। প্রোবাচাসুরয়ে সাংখ্যং তত্ত্বগ্রামবিনির্ণয়ং॥ ষষ্ঠমত্রেরপত্যত্বং বৃতঃ প্রাপ্তোঽনসূয়য়া। আন্বীক্ষিকীমলর্কায় প্রহ্লাদাদিভ্য উচিবান্॥ ততঃ সপ্তম আকূত্যাং রুচের্যজ্ঞোঽভ্যজায়ত। স যামাদ্যৈঃ সুরগণৈরপাৎ স্বায়ম্ভুবান্তরং॥ অষ্টমে মেরুদেব্যাস্তু নাভের্জাত উরক্রমঃ। দর্শয়ন্ বর্ত্ম ধীরাণাং সর্ব্বাশ্রমনমস্কৃতং॥ ঋষিভির্যাচিতোভেজে নবমং পার্থিবং বপুঃ। দুগ্ধেমামোষধীর্বিপ্রাস্তেনায়ং স উশত্তমঃ॥ রূপং স জগৃহে মাৎস্যং চাক্ষুষোদধিসংপ্লবে। নাব্যারোপ্য মহীময্যামপাদ্বৈবস্বতং মনুং॥ সুরাসুরাণামুদধিং মথ্নতাং মন্দরাচলং। দধ্রে কমঠরূপেণ পৃষ্ঠ একাদশে বিভুঃ॥ ধান্বন্তরং দ্বাদশমং ত্রয়োদশমমেব চ। অপায়য়ৎ সুরানন্যান্ মোহিন্যা মোহয়ন্ স্ত্রিয়া॥ চতুর্দশং নারসিংহং বিভ্রদ্দৈত্যেন্দ্রমূর্জ্জিতং। দদার করজৈরূরাবেরকাং কটকৃদ্যথা॥ পঞ্চদশং বামনকং কৃত্বাগাদধ্বরং বলেঃ। পদত্রয়ং যাচমানঃ প্রত্যাদিৎসুস্ত্রিপিষ্টপং॥ অবতারে ষোড়শমে পশ্যন্ ব্রহ্মদ্রুহোনৃপান্। ত্রিঃসপ্তকৃত্বঃ কুপিতোনিঃক্ষত্রামকরোন্মহীং॥ ততঃ সপ্তদশে জাতঃ সত্যবত্যাং পরাশরাৎ। চক্রে বেদতরোঃ শাখা দৃষ্ট্বা পুংসোঽল্পমেধসঃ॥ নরদেবত্বমাপন্নঃ সুরকার্য্যচিকীর্ষয়া। সমুদ্রনিগ্রহাদীনি চক্রে বীর্য্যাণ্যতঃপরং॥ একোনবিংশে বিংশতিমে বৃষ্ণিষু প্রাপ্য জন্মনী। রামকৃষ্ণাবিতি ভুবোভগবানহরদ্ভরং॥ ততঃ কলৌ সংপ্রবৃত্তে সংমোহায় সুরদ্বিষাং। বুদ্ধোনাম্নাঞ্জনসুতঃ কীকটেষু ভবিষ্যতি॥ অথাসৌ যুগসন্ধ্যায়াং দস্যুপ্রায়েষু রাজসু। জনিতা বিষ্ণুযশসোনাম্না কল্কির্জগৎপতিঃ॥ অবতারা হ্যসংখ্যেয়া হরেঃ সত্ত্বনিধের্দ্বিজাঃ। যথাবিদাসিনঃ কুল্যাঃ সরসঃ স্যুঃ সহস্রশঃ॥ ঋষয়োমনবোদেবা মনুপুত্রা মহৌজসঃ। কলাঃ সর্ব্বে হরেরেব সপ্রজাপতয়ঃ স্মৃতাঃ॥ এতে চাংশ-

কলাঃ পুংসঃ কৃষ্ণস্তু ভগবান্ স্বয়ং। ইন্দ্রারিব্যাকুলং লোকং মৃড়য়ন্তি যুগে যুগে॥ ইতি শ্রীভাগবতে ১ স্কন্ধে ৩ অধ্যায়ঃ॥

অবতারণং (ক্লী) ভূতাদিগ্রহঃ। বস্ত্রাঞ্চলং। অর্চ্চনং। ইতি বিশ্বমেদিন্যৌ॥

অবতীর্ণঃ (ত্রি) অবতরণবিশিষ্টঃ। প্রাদুর্ভূতঃ। জলাদৌ কৃতাবরোহঃ। যথা। জ্যোতিষে। নীলগ্রীব শুভগ্রীব সর্ব্বকামফলপ্রদ। পৃথিব্যামবতীর্ণোসি খঞ্জরীট নমোস্তুতে। ইতি তিথ্যাদিতত্ত্বং॥

অবতোকা (স্ত্রী) পতদ্গর্ভাগৌঃ। তৎপর্য্যায়ঃ। স্রবদ্গর্ভা ২। গাবড়াগাই। গাবফেলাগাই। ইতিভাষা॥ ইত্যমরঃ॥

অবদংশঃ (পুং) সুরাপানরুচিজনকচর্ব্বণদ্রব্যং। গজর ইতিভাষা। তৎপর্য্যায়ঃ ভক্ষণং ২। ইত্যমরঃ॥ বিদংশঃ ৩ সন্ধানং ৪ রোচকঃ ৫। ইতি রাজনির্ঘণ্টঃ॥

অবদাতঃ (পুং) শ্বেতবর্ণঃ। পীতবর্ণঃ। ইত্যমরঃ॥

অবদাতং (ত্রি) শুক্লগুণবিশিষ্টং। পীতবর্ণযুক্তং। নির্ম্মলং। মনোজ্ঞং। ইত্যমরহেমচন্দ্রৌ॥

অবদানং (ক্লী) বৃত্তং কর্ম্ম। প্রশস্তমথচনির্ব্যূঢ়ং কর্ম্ম। যে কর্ম্মে প্রবৃত্তিতে সকলে প্রশংসা করে সেই সমাপ্তকর্ম্ম ইতি ভাষা। তৎপর্য্যায়ঃ। অপদানং ২। ইত্যমরঃ তট্টীকাচ। খণ্ডনং। ইতি মেদিনী॥ বীরণমূলমিতি স্বামী॥

অবদারণং (ক্লী) খনিত্রং। খন্তা ইতিখ্যাতং। ইত্যমরঃ॥

অবদাহং (ক্লী) বীরণমূলং। ইত্যমরঃ॥

অবদাহেষ্টং (ক্লী) বীরণমূলং। ইত্যমরটীকায়াং ভরতাদয়ঃ॥

অবদাহেষ্টকাপথং (ক্লী) উশীরং। খস্ ইতি ভাষা। ইতি ভরতঃ॥

অবদীর্ণং (ত্রি) দ্রবীভূতঘৃতাদি। তৎপর্য্যায়ঃ। দ্রুতং ২। ইত্যমরঃ॥

অবদোহঃ (পুং) দুগ্ধং। ইতি ত্রিকাণ্ডশেষঃ॥

অবদ্যং (ত্রি) অধমং। কুৎসিতং। গর্হিতং। নিকৃষ্টং। ইত্যমরঃ॥

অবদ্যং (ক্লী) অনিষ্টং। ইতি বোপদেবঃ॥ পাপং। ইতি পাণিনিঃ॥

অবধানং (ক্লী) মনোযোগঃ। তৎপর্য্যায়ঃ। সমাধানং ২ প্রণিধানং ৩ সমাধিঃ ৪। ইতি হেমচন্দ্রঃ॥

অবধারণং (ক্লী) নিশ্চয়ঃ। যথা। হি হেতাবধারণে। ইত্যমরঃ॥

অবধারিতঃ (ত্রি) কৃতাবধারণঃ। যথা। ত্বয়া সুমুখি কিং প্রোক্তং ন ময়া হ্যবধারিতং। বিবেচয় মহাভাগে শক্কেতোবর্ত্ততে খলু॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ২০ অধ্যায়ঃ॥

অবধার্য্যঃ (ত্রি) অবধারণীয়ঃ। অবপূর্ব্বকধৃধাতোর্ণ্যৎপ্রত্যয়েন নিষ্পন্নঃ। নিধার্য্যঃ॥

অবধিঃ (পুং) অবধানং। সীমা। কালঃ। বিলং। ইতি বিশ্বমেদিন্যৌ॥

অবধীর ৎ ক অবজ্ঞায়াং। অবধীরয়তি। আবধীরয়ৎ সাধুমসাধুঃ। ইতি দুর্গাদাসঃ॥

অবধূতঃ (পুং) সন্ন্যাসাশ্রমী। তদ্বিধানং সন্ন্যাসিশব্দে দ্রষ্টব্যং। তদ্ভেদা যথা। দে-

ব্যুবাচ। দ্বিবিধাবাশ্রমৌ প্রোক্তৌ গার্হস্থ্যোভৈক্ষুকস্তথা। কিমিদং শ্রূয়তে চিত্রমবধূতাশ্চতুর্বিধাঃ॥ এতদ্বেদিতুমিচ্ছামি তত্ত্বতঃ কথয় প্রভো। চতুর্ব্বিধাবধূতানাং লক্ষণানি বিশেষতঃ॥ সদাশিব উবাচ। ব্রহ্মমন্ত্রোপাসকা যে ব্রাহ্মণক্ষত্রিয়াদয়ঃ। গৃহাশ্রমে বসন্তোপি জ্ঞেয়াস্তে যতয়ঃ প্রিয়ে॥ পূর্ণাভিষেকবিধিনা সংস্কৃতা যে চ মানবাঃ। শৈবাবধূতাস্তে জ্ঞেয়াঃ পূজনীয়াঃ কুলার্চ্চিতে॥ ব্রহ্মাবধূতঃ শৈবাশ্চ সাগ্রিমাচারবর্ত্তিনঃ। বিদধ্যুঃ সর্ব্বকর্ম্মাণি শশ্বদীরিতবর্ত্মনা॥ বিনা ব্রহ্মার্পিতঞ্চৈতে তথা চক্রার্পিতং বিনা। নিষিদ্ধমন্নং তোয়ঞ্চ নগৃহ্লীয়ুঃ কদাচন॥ ব্রহ্মাবধূতকৌলানাং কৌলানামভিষেকিণাং। প্রাগেব কথিতোধর্ম্ম আচারশ্চ বরাননে॥ স্নানং সংন্যাসনং পানং দানঞ্চ দাররক্ষণং। সর্ব্বমাগমমার্গেণ শৈবব্রহ্মাবধূতয়োঃ॥ ইতি মহানির্ব্বাণতন্ত্রে ১৪ উল্লাসঃ॥*॥ অন্যচ্চ। শঙ্কর উবাচ। শৃণু দেবি প্রবক্ষ্যামি অবধূতোযথা ভবেৎ। বীরস্য মূর্ত্তিং জানীয়াৎ সদা তত্ত্বপরায়ণঃ॥ যদ্রূপং কথিতং সর্ব্বং সন্ন্যাসধারণং পরং। তদ্রূপং সর্ব্বকর্ম্মাণি প্রকুর্য্যাদ্বীরবল্লভং॥ দণ্ডিনোমুণ্ডনং চামাবাস্যায়ামাচরেদ্যথা। তথা নৈব প্রকুর্য্যাত্তু বীরস্য মুণ্ডনং প্রিয়ে॥ অসংস্কৃতং কেশজালমুক্তালম্বিকচোচ্চয়ং। অস্থিমালা বিভূষা বা রুদ্রাক্ষানপি ধারয়েৎ॥ দিগম্বরোবা বীরেন্দ্রশ্চাথ বা কৌপিনী ভবেৎ। রক্তচন্দনসিক্তাঙ্গং কুর্য্যাদ্ভস্মাঙ্গভূষণং॥ ইতি নির্ব্বাণতন্ত্রে ১৪ পটলঃ॥*॥ অপিচ। নৃকরোটিং বিধার্য্যঞ্চ কাষ্ঠদণ্ডং তথা প্রিয়। পরশুঞ্চাজিনঞ্চৈব যোগাব ধারয়েৎ সদা॥ খট্টাঙ্গং ধারয়েদ্যোগী বাসরূপকবাসসী। কপালে ধারয়েচ্চন্দ্রং চন্দনাদ্যৈর্ব্বিশেষতঃ॥ ঈষৎপিঙ্গলকং বস্ত্রং ধারয়েৎ সর্ব্বদা সুত। সুত ইতি শিবস্য সম্বোধনং। সুদর্শনাখ্যং যচ্চক্রং তত্তু সংধারয়েদ্বুধঃ॥ বিপঞ্চীং কপিলঞ্চৈব মড্ডডিণ্ডিমঝর্ঝরান্। বাদয়ন্ ডমরুং যোগী যত্র কুত্রাশ্রমে স্থিতঃ॥ ইতি যোগসারে ২ পরিচ্ছেদঃ॥*॥ অপরঞ্চ। ক্ষমা দানং ততোধ্যানং বালভাবেন শৈলজে। শিবোঽহং ভৈরবানন্দোমুক্তোঽহং কুলনায়কঃ॥ এবং ভাবপরোমন্ত্রী হেতুযুক্তঃ সদাশিবঃ। সম্বিদাসেবনং কুর্য্যাৎ সদা কারণসেবনং॥ ভবেৎ সাক্ষাৎ স পুরুষঃ শম্ভুরূপোনসংশয়ঃ। ইতি নির্ব্বাণতন্ত্রং॥*॥ কিঞ্চ। ব্রাহ্মণঃ ক্ষত্রিয়োবৈশ্যঃ শূদ্রঃ সামান্য এব চ॥ কুলাবধূতসংস্কারে পঞ্চানামধিকারিতা। ইতি মহানির্ব্বাণতন্ত্রং॥*॥ অন্যচ্চ। নির্ব্বাণমুক্তিমাপ্নোতি ব্রাহ্মণোবীরভাবতঃ। অবধূতঃ ক্ষত্রিয়শ্চ মহাযোগা ন সংশয়ঃ॥ স্বরূপোঽপি ভবেদ্বৈশ্যঃ শূদ্রোঽপিসহলোকবান্। সম্পূর্ণফলমাপ্নোতি বিপ্রোনির্ব্বাণতাং ব্রজেৎ॥ ত্রিভাগং ফলমাপ্নোতি ক্ষত্রিয়োবীরভাবতঃ। পাদদ্বয়স্তু বৈশ্যস্য শূদ্রস্য চৈকপাদকং॥*॥ দশনামাবধূতানাং প্রত্যেকং নাম প্রাগুক্তমিদানীমপি তেষাং প্রধানত্বেনাঙ্গীকরণার্থং সংজ্ঞাক-

ধনগর্ব্ভং লক্ষণবিশেষমাহ। অবধূতস্য চাখ্যানং শৃণুষ্ব পর্ব্বতাত্মজে। বনারণ্যে ভারতী চ গিরিশ্চ পুরিরেব চ॥ একস্থানেতু সংস্থিত্য ইষ্টধ্যানাদিকঞ্চরেৎ। যোমন্ত্রদানং তপসা সবনঃ পরিকীর্ত্তিতঃ॥ শ্রস্তকেশোজটাজূটঃ সদা বাতুলবদ্ভবেৎ। অন্তর্যোগী মহাবীরোহরণ্যসংজ্ঞশ্চ শৈলজে॥ নানাশাস্ত্রেষু যোবিজ্ঞোনানাকর্ম্মবিশারদঃ। সদেষ্টদেবীভাবেন ভাবয়েদ্যোহিচাবলাং॥ সএব ভারতী বীরোমহাজ্ঞানী জিতেন্দ্রিয়ঃ। সদোর্দ্ধবাহুর্যো বীরো মুক্তকেশোদিগম্বরঃ॥ সর্ব্বত্র সমভাবেন ভাবয়েৎ যো নরোত্তমঃ। ইষ্টদেবীং বিনা নাস্তি স গিরিঃ পরিকীর্ত্তিতঃ॥ নানাদেশেষু পীঠেষু ক্ষেত্রেষু তীর্থভূমিষু। ভ্রমণং কুরুতে নিত্যং কুর্য্যাদ্যত্নেন পূজনং॥ দেবতায়াঃ সদা ধ্যানং শ্রীগুরোঃ পূজনং তথা। অন্তর্যাগেষু যোনিষ্ঠঃ স বীরঃপুরিরেবচ॥ অবধূতাশ্রমে দেবি যস্য ভক্তিঃ সুনিশ্চলা। তস্য তুষ্টা ভবেৎ কালী কিংন সিদ্ধ্যতি ভূতলে॥ অবধূতং সমালোক্য শম্ভুবৎ পূজনং চরেৎ। শক্তিতঃ পঞ্চতত্ত্বানি যত্নেনৈব নিবেদয়েৎ। অশক্তঃ পরমেশানি ভক্তিতঃ পরিতোষয়েৎ॥ ইতি নিব্বাণতন্ত্রং। *। অপিচ। ভক্তাবধূতোদ্বিবিধঃ পূর্ণাপূর্ণবিভেদতঃ। পূর্ণঃ পরমহংসাখ্যঃ পরিব্রাড়পরঃ স্মৃতঃ॥ কৃতাবধূতসংস্কারো যদি স্যাজ্জ্ঞানদুর্ব্বলঃ। তদা লোকালয়ে তিষ্ঠন্নাত্মানং স তু শোধয়েৎ॥ রক্ষন্ স্বজাতিচিহ্নঞ্চ কুর্ব্বন্ কর্ম্মাণিকেবলং। সদা ব্রহ্মপরোভূত্বা সাধয়েজ্জ্ঞানমুত্তমং। ইতি-মহানির্ব্বাণতন্ত্রং॥ *॥ অপিচ। অবধূতঃ শিবঃ সাক্ষাদবধূতঃ সদাশিবঃ। অবধূতী শিবাদেবী অবধূতাশ্রমং শৃণু॥ চতুরাশ্রমিণাং মধ্যে অবধূতাশ্রমোমহান্। অবধূতশ্চ দ্বিবিধোগৃহস্থশ্চ চিতানুগঃ॥ সচেলশ্চাপি দিগ্বাসা বিধিযোনিবিহারবান্। সদারঃ সর্ব্বদারস্থোহট্টহাসোদিগম্বরঃ॥ গৃহাবধূতোদেবেশি দ্বিতয়স্তু সদাশিবঃ। ইতি মুণ্ডমালাতন্ত্রে ২ পটলঃ॥ *॥ অবধূতস্যোম্ তৎ সদিতি মন্ত্রেণ কর্ম্মকর্ত্তব্যতামাহ। ওঁ তৎ সন্মন্ত্রমুচ্চার্য্য সোঽহমস্মীতি চিন্তয়ন্। কুর্য্যাদাত্মোচিতং কর্ম্ম সদা বৈরাগ্যমাশ্রিতঃ॥ কুর্ব্বন্ কর্ম্মাণ্যনাসক্তোনলিনীদলনীরবৎ। যতেতাত্মানমুদ্ধর্ত্তুং তত্ত্বজ্ঞানবিবেকতঃ॥ *॥ সর্ব্বেবামোম্ তৎ সদিতি নির্দ্দেশেন কর্ম্মফলমাহ। ওম্ তৎ সদিতি মন্ত্রেণ যোযৎ কর্ম্ম সমাচরেৎ। গৃহস্থোবাপ্যুদাসীনস্তস্যাভীষ্টায় তদ্ভবেৎ॥*॥ তন্মন্ত্রক্রিয়মাণকর্ম্মণঃ সম্পূর্ণত্বমপি। জপহোমপ্রতিষ্ঠাচ সংস্কারাদ্যখিলাঃক্রিয়াঃ। ওম্ তৎসদিতি নিষ্পন্নাঃ সংপূর্ণাঃস্যুর্ন সংশয়ঃ॥ কিমন্যৈর্ব্বহুভির্ম্মন্ত্রৈঃকিমন্যৈর্ভূরিসাধনৈঃ। ব্রাহ্মোণানেন মন্ত্রেণ সর্ব্বকর্ম্মাণি সাধয়েৎ॥ সুখসাধ্যমবাহুল্যং সংপূর্ণফলদায়কং। নাস্ত্যেতস্মান্মহামন্ত্রাদুপায়ান্তরমম্বিকে॥ পুরপ্রদেশে দেহে বা লিখিত্বা ধারয়েদিমং। গেহে তস্য মহাতীর্থং দেহঃ পুণ্যময়োভবেৎ॥ নিগমাগমতন্ত্রাণাং সারাৎ সারতরোমনুঃ। ওম্ তৎসদিতি দেবেশি তবা-

গ্রে সত্যমীরিতং ॥ চতুর্ব্বিধানাং তত্ত্বানামন্যেষামপি বস্তুনাং ॥ মন্ত্রান্যৈঃ শোধনেনালংস্যাচ্ছেদেতেন শোধিতং ॥ পশ্যন্ সর্ব্বত্র সদ্রূপং জপংস্তং সম্মহামনুং। স্বেচ্ছাচারঃ শুদ্ধচিত্তঃ স এব ভুবি কৌলরাট্ ॥ জপাদস্য ভবেৎ সিদ্ধোমুক্তঃ স্যাদর্থচিন্তনাৎ। সাক্ষাদ্ব্রহ্মময়োদেহী সার্থমেনং জপেন্মনুং ॥ ত্রিপদোহয়ং মহামন্ত্রঃ সর্ব্বকারণকারণং। সাধনাদস্য মন্ত্রস্য ভবেন্মৃত্যুঞ্জয়ঃ স্বয়ং ॥ যুগ্ম যুগ্মপদং বাপি প্রত্যেকংপদমেব বা। জপ্তেৎতস্য মহেশানি সাধকঃ সিদ্ধিভাগ্ভবেৎ। ইতি মন্ত্রপ্রশংসা ॥ * ॥ শৈবাবধূতস্য সর্ব্বকর্ম্মানধিকারমাহ। শৈবাবধূতসংস্কারবিধূতাখিলকর্ম্মণঃ। নাপি দৈবে নবা পিত্রে নার্ষে কৃত্যেহধিকারিতা ॥ * ॥ অথ পরমহংসঃ। চতুর্ণামবধূতানাং তুরীয়োহংস উচ্যতে। ত্রয়োহন্যে যোগভোগাঢ্যা মুক্তাঃ সর্ব্বে শিবোপমাঃ ॥ হংসোনকুর্য্যাৎ স্ত্রীসঙ্গংন বিধত্তে পরিগ্রহং। প্রারব্ধমশ্নন্ বিহরেৎ নিষেধবিধিবর্জ্জিতঃ ॥ ত্যজেৎ স্বজাতিচিহ্নানি কর্ম্মাণি গৃহমেধিনাং। তুরীয়োবিচরেৎ ক্ষৌণীং নিঃসঙ্কল্পোনিরুদ্যমঃ ॥ সদাত্মভাবসন্তুষ্টঃ শোকমোহবিবর্জ্জিতঃ। নির্নিকেতস্তিতিক্ষুঃ স্যান্নিঃসঙ্গোনিরুপদ্রবঃ ॥ নার্পণং ভক্ষ্যপেয়ানাং নতস্য ধ্যানধারণা। মুক্তোবিমুক্তোনির্দ্বন্দ্বোহংসাচারপরোযতিঃ ॥ ইতি তে কথিতং দেবি চতুর্ণাং কুলযোগিনাং। লক্ষণং সবিশেষেণ সাধূনাং মৎস্বরূপিণাং ॥ এতেষাং দর্শনাৎ স্পর্শাদালাপাৎ পরিতোষণাৎ। সর্ব্বতীর্থফলাবাপ্তির্জায়তে মনুজন্মনাং ॥ ইতি মহানির্ব্বাণতন্ত্রং ॥

অবধ্যং (ত্রি) মারণানর্হং। বধাযোগ্যং। অনর্থকবাক্যং। ইতি বিশ্বমেদিন্যৌ ॥ যথা। অবধ্যাশ্চ স্ত্রিয়ং প্রাহুস্তির্য্যগ্যোনিগতাস্বপি। শক্রস্ত্রীণামবধ্যত্বমাহ মৎস্যপুরাণং। কিংত্বয়া ন শ্রুতং লোকে অবধ্যাঃ শক্রযোষিতঃ। ইতি প্রায়শ্চিত্ততত্ত্বং ॥ * ॥ আত্মন অবধ্যত্বংযথা। দেহী নিত্যমবধ্যোহয়ং দেহে সর্ব্বস্য ভারত। তস্মাৎ সর্ব্বাণি ভূতানি ন ত্বং শোচিতুমর্হসি ॥ ইতি শ্রীভগবদ্গীতায়াং ২ অধ্যায়ঃ ॥* ॥ তদ্বধে পাপং যথা। যাবানবধ্যস্য বধে তাবান্ বধ্যস্য মোক্ষণে। অধর্ম্মোনৃপতের্দৃষ্টোধর্ম্মস্তু বিনিযচ্ছতঃ ॥ ইতি মানবে ৯অধ্যায়ে ২৪৯ শ্লোকঃ ॥

অবধ্বংসঃ (পুং) পরিত্যাগঃ। নিন্দনং। অবচূর্ণনং। ইতি মেদিনী ॥

অবধ্বস্তঃ (ত্রি) পরিত্যক্তঃ। নিন্দিতঃ। অবচূর্ণিতঃ। ইতি মেদিনী ॥

অবনং (ক্লী) প্রীণনং। ইত্যমরঃ ॥ রক্ষণং। ইতি হেমচন্দ্রঃ ॥ গমনং। স্পৃহা। তর্পণং। শোভনং। শ্রবণং। প্রাপ্তিঃ। আলিঙ্গনং যাচনং। প্রবেশনং। সত্তা। বৃদ্ধিঃ। গ্রহণং। বধঃ। শক্তিঃ। অবগমনং। কামঃ। করণং। এতে অবধাত্বর্থাঃ ॥

অবনতং (ত্রি) নম্রং। নতভাগঃ। নোয়া ইতি ভাষা। তৎপর্য্যায়ঃ। অবাগ্রং ২ আনতং ৩ নতং ৪। ইত্যমরঃ তট্টীকাচ ॥

অবনদ্ধং ( ক্লী ) আনদ্ধং। মৃদঙ্গাদিবাদ্যং। ইত্যমরটীকায়াং স্বামী ॥

অবনয়ঃ ( পুং ) অবনায়ঃ। নিপাতনং। অধঃপাতনং। ইতি ভরতঃ ॥

অবনাটঃ ( ত্রি ) নতনাসিকঃ। খাঁদা ছেপড়ানাকব্যক্তি ইতি ভাষা। তৎপর্য্যায়ঃ। অবটীটঃ ২ অবভ্রটঃ ৩। ইত্যমরঃ ॥

অবনায়ঃ ( পুং ) অবনয়ঃ। অধোনয়নং। নীচে ফেলান ইতি ভাষা। ইত্যমরঃ ॥

অবনিঃ ( স্ত্রী ) পৃথিবী। ইত্যমরঃ ॥

অবনী ( স্ত্রী ) পৃথ্বী। ইতি ভরতঃ ॥ ত্রায়মাণা লতা। ইতি রাজনির্ঘণ্টঃ ॥

অবনীপতিঃ ( পুং ) রাজা। ইতি জটাধরঃ ॥

অবনেজনং ( ক্লী ) পিণ্ডদানার্থমাস্তৃতকুশোপরি জলসেচনং। যথা। ব্রহ্মপুরাণং। সপুষ্পং জলমাদায় তেষাং পৃষ্ঠে পৃথক্ পৃথক্। অপ্রদক্ষিণং নেনিজ্যাৎ গোত্রনামানুমন্ত্রিতং ॥ পিতুরবনেজনং মূলদেশে পিতামহপ্রপিতামহয়োস্ত অবনেজনং মধ্যদেশাগ্রদেশয়োঃ। মাতামহাদীনামপ্যেবং। ইতি। পিণ্ডোপরি জলসেচনং। যথা ব্রহ্মপুরাণং। ততোদর্ভেষু বিধিবৎ সম্মার্জ্জ্য চ করস্ততঃ। প্রক্ষাল্য চ জলেনাথ ত্রিরাচম্য হরিং স্মরেৎ। তেভ্যঃ সংস্রবপ্রাত্রেভ্যোজলেনৈবাবনেজনং। দত্বাত্র পিতরশ্চেতি পঠেচ্চোদঙ্মুখস্থিতঃ ॥ ইতি চ শ্রাদ্ধতত্বং ॥

অবন্তিঃ (পুং) অবন্তীদেশঃ। ইতি হেমচন্দ্রঃ ॥ নদীবিশেষঃ। ইত্যুণাদিকোষঃ ॥ যথা। প্রাগ্‌জ্যোতিষাঃ কামরূপা মালবাঃ স্যুরবন্তয়ঃ। ইতি হেমচন্দ্রঃ ॥ অপিচ। অনূপা স্তুণ্ডিকেরাশ্চ বীতিহোত্রা অবন্তয়ঃ। এতে জনপদাঃ খ্যাতা বিন্ধ্যপৃষ্ঠনিবাসিনঃ ॥ ইতি মৎস্যপুরাণে ৯৫ অধ্যায়ঃ ॥

অবন্তিকা ( স্ত্রী ) উজ্জয়নীনগরী। অযোধ্যা মথুরা মায়া কাশী কাঞ্চী অবন্তিকা। পুরী দ্বারবতী চৈব সপ্তৈতা মোক্ষদায়িকাঃ ॥ ইতি স্কন্দপুরাণে ॥

অবন্তিসোমং ( ক্লী ) কাঞ্জিকং। কাঁজি ইতি ভাষা। ইত্যমরসিংহঃ ॥

অবন্তী (স্ত্রী) মালবদেশস্য নগরী। উজৈন ইতি খ্যাতা। তৎপর্য্যায়ঃ। উজ্জয়নী ২ বিশালা ৩ পুষ্করণ্ডিনী ৪। ইতি হেমচন্দ্রঃ ॥ যথা তাম্রপর্ণীং সমাসাদ্য শৈলার্দ্ধশিখরোর্দ্ধতঃ। অবন্তীসংজ্ঞকোদেশঃ কালিকা তত্র তিষ্ঠতি ॥ ইতি শক্তিসঙ্গমতন্ত্রে ৭ পটলঃ ॥ অন্যচ্চ। উৎপন্নোঽর্কঃ কলিঙ্গে তু যমুনায়াঞ্চ চন্দ্রমাঃ। অবন্ত্যাঞ্চ কুজোজাতোমাগধে চ হিমাংশুজঃ॥ ইতি সংস্কারতত্ত্বধৃতমৎস্যপুরাণং ॥ অন্যৎ পূর্ব্বলিখিতং ॥

অবন্ধ্যঃ ( ত্রি ) ফলবান্। ফলকালে ফলযুক্তবৃক্ষঃ। তৎপর্য্যায়ঃ। ফলেগ্রহিঃ২ ফলগ্রহিঃ ৩। ইত্যমরঃ ॥

অবপাতঃ ( পুং ) রন্ধ্রং। গর্ত্তঃ। ইতি হেমচন্দ্রঃ ॥ অধঃপতনং ॥

অবভৃথঃ ( পুং ) দীক্ষান্তযজ্ঞঃ। প্রধানযাগসমাপকাপরযজ্ঞঃ। যজ্ঞাদেন্যূনাধিকদোষশান্তিনিমিত্তকশেষকর্ত্তব্যহোম ইতিযাবৎ॥ ইত্যমরঃতট্টীকাচ ॥ যজ্ঞাবশেষস্নানং। ইতি ভরতঃ ত্রিকাণ্ডশেষশ্চ ॥

অবভ্রটঃ ( ত্রি ) নতনাসিকব্যক্তিঃ। খাঁদা ইতি ভাষা। ইত্যমরঃ॥

অবমঃ ( ত্রি ) অধমঃ। নিন্দিতঃ। ইত্যমরঃ॥

অবমং ( ক্লী ) তিথ্যন্তদ্বয়স্পৃষ্টৈকদিনবারঃ। একদিনে একতিথির শেষ অপরতিথিরআদ্যন্তস্পর্শ ইতি যাবৎ॥ ইতি জ্যোতিষশাস্ত্রে প্রসিদ্ধং॥ যথা তিথ্যন্তদ্বয়মেকোদিনবারঃ স্পৃশতি যত্র তদ্ভবত্যবমদিনং। ত্রিদিনস্পৃক্তিথিত্রয়স্য স্পর্শনাদহ্নঃ। ইতি জ্যোতিষতত্ত্বং॥

অবমতং ( ত্রি ) অবজ্ঞাতং। অবমানিতং। অনাদৃতং। ইত্যমরঃ॥

অবমতিঃ ( পুং ) স্বামী। ঈশ্বরঃ। পতিঃ। প্রভুঃ। নেতা। ইতি জটাধরঃ॥

অবমর্দঃ ( পুং ) পীড়নং। ব্যথনং। ইত্যমরঃ॥ শস্যাদিসম্পন্নদেশস্য পরচক্রেণ পীড়নং। ইতি ভরতঃ॥ শক্রকৃতগাঢ়প্রহার ইতিকেচিৎ॥ পদাক্রমণমিতিকেচিৎ॥

অবমানং ( ক্লী ) অপমানং। অমর্য্যাদা। যথা। সম্মানাদ্ব্রাহ্মণোনিত্যমুদ্বিজেত বিষাদিব। অমৃতস্যেব চাকাঙ্ক্ষেদবমানস্য সর্ব্বদা॥ ইতি মানবে ২ অধ্যায়ে ১৬২ শ্লোকঃ॥ মানাবমানদ্বন্দ্বসহিষ্ণুত্বমনেন বিধীয়তে। ইতি কুল্লূকভট্টঃ॥

অবমাননং (ক্লী ) অপমানং। যথা। অবমাননং অবমাননামান কি চার্চ্চে অবপূর্ব্বঃ ঞীবি শ্রুষ্টীতি অনঃ। ইত্যমরটীকায়াং ভরতঃ॥

অবমাননা ( স্ত্রী ) অবজ্ঞা। অনাদরঃ। ইত্যমরসিংহঃ॥

অবমানিতঃ ( ত্রি ) কৃতাপমানঃ। অবজ্ঞাতঃ অনাদৃতঃ। ইত্যমরঃ॥

অবমান্যঃ ( ত্রি ) অবমাননীয়ঃ। যথা। যা রোগিণী স্যাত্তু হিতা সম্পন্না চৈব শীলতঃ। সানুজ্ঞাপ্যাধিবেত্তব্যা নাবমান্যা চ কর্হিচিৎ। ইতি মানবে ৯ অধ্যায়ে ৮২শ্লোকঃ॥

অবমূর্দ্ধশয়ঃ ( ত্রি ) অধোমুখশায়ী। অবনতোমূর্দ্ধা অস্যেত্যবমূর্দ্ধঃ। তথাবিধঃ শেতে ইত্যবমূর্দ্ধশয়ঃ॥

অবমূর্দ্ধশায়ী [ ন্ ] ( ত্রি ) অধোমুখশায়ী। অবমূর্দ্ধং যথা স্যাৎ তথা শয়িতুং শীলমস্য ইত্যর্থে ণিন্ প্রত্যয়েন নিষ্পন্নঃ॥

অবয়বঃ ( পুং ) অঙ্গং। ইত্যমরঃ॥

অবরঃ ( ত্রি ) চরমঃ। ইতি মেদিনী॥ কনিষ্ঠঃ। অশ্রেষ্ঠঃ। যথা। শ্রীর্নরেশেন বিনা শম্ভুঃ পৃথগ্বিশ্বেন তৎপুনঃ। ন নানা শম্ভুনা রামাদ্বর্বেণাধোক্ষজোঽবরঃ॥ ইতি মুগ্ধবোধব্যাকরণে বোপদেবঃ॥ নিকৃষ্টঃ। যথা। দূরেণ হ্যবরং কর্ম্ম বুদ্ধিযোগাদ্ধনঞ্জয়। বুদ্ধৌ শরণমন্বিচ্ছ কৃপণাঃ ফলহেতবঃ॥ ইতি শ্রীভগবদ্গীতায়াং ২ অধ্যায়ে ৪৯ শ্লোকঃ॥

অবরং ( ক্লী ) গজাস্ত্যজঙ্ঘাদিদেশঃ। ইত্যমরমেদিন্যৌ॥

অবরজঃ (পুং ) কনিষ্ঠভ্রাতা। ইত্যমরসিংহঃ॥

অবরতঃ [স্] ব্য অবরস্তাৎ। চরমে। ইতি সিদ্ধান্তকৌমুদী॥

অবরতিঃ (স্ত্রী) বিরামঃ। নিবৃত্তিঃ। ইত্যমরঃ॥

অবরবর্ণঃ ( পুং স্ত্রী ) শূদ্রঃ। ইত্যমরঃ॥

অবরবর্ণকঃ ( পুং স্ত্রী ) চতুর্থবর্ণঃ। শূদ্রঃ। ইতি শব্দরত্নাবলী॥

অবরব্রতঃ ( পুং ) সূর্য্যঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

অবরস্তাৎ ব্য অবরতঃ। পশ্চাৎ। ইতি সিদ্ধান্তকৌমুদী ॥

অবরা ( স্ত্রী ) দুর্গা। ইতি বিশ্বঃ ॥

অবরার্দ্ধ্যঃ ( ত্রি ) অবরার্দ্ধভবঃ। শেষার্দ্ধজাতঃ। ইতি কেচিৎ ॥

অবরীণং ( ত্রি ) ধিক্কৃতং। তিরস্কৃতং। নিন্দিতং। ইত্যমরঃ ॥

অবরোধঃ ( পুং ) তিরোধানং। রাজস্ত্রীগৃহং। রাজগৃহং। ইতি বিশ্বহেমচন্দ্রৌ ॥ রাজদারাঃ। ইতি মেদিনী।

অবরোধকঃ ( ত্রি ) অবরোধ[illegible] ধকর্ত্তা। অবপূর্ব্বকরুধধাতো[illegible] ণ্বেন নিষ্পন্নঃ ॥

অবরোধনং ( ক্লী ) রাজ্ঞামন্তঃপুরং। ইত্যমরসিংহঃ ॥ [illegible] যথা কৃষ্ণ ত্বদীয়পদপঙ্কজপঞ্জরান্তে অদ্যৈব মে বিশতু মানসরাজহংসঃ। প্রাণপ্রয়াণসময়ে কফবাতপিত্তৈঃ কণ্ঠাবরোধনবিধৌ স্মরণং কুতস্তে ॥ ইতি পাণ্ডবগীতা ॥

অবরোধিকঃ ( পুং ) রাজ্ঞামন্তঃপুরাধ্যক্ষঃ। ইতি হেমচন্দ্রঃ ॥

অবরোহঃ ( পুং ) অবতরণং। আরোহণং। লতোদ্গমঃ। ইতি মেদিনী ॥ বৃক্ষমূলাদগ্রপর্য্যন্তং গতালতা। শাখাশিফা। বোয়া নামনা ইতি ভাষা। ইত্যমরঃ ॥ স্বর্গঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

অবরোহশাখী [ ন্ ] ( পুং ) প্লক্ষবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

অবরোহিকা (স্ত্রী) অশ্বগন্ধালতা। ইতি রাজনির্ঘণ্টঃ

অবরোহী [ ন্ ] ( পুং ) বটবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

অবর্ণঃ ( পুং ) নিন্দা। পরীবাদঃ। ইত্যমরসিংহঃ

অবলগ্নঃ ( পুং ক্লী ) মধ্যদেশঃ। মাজা ইতিভাষা। ইত্যমরঃ ॥

অবলগ্নঃ ( ত্রি ) সংলগ্নঃ। সংযুক্তঃ। ইতি মেদিনী ॥

অবলম্বঃ ( পুং ) অবলম্বনং। অবপূর্ব্বলম্বধাতোরল্‌প্রত্যয়েন নিষ্পন্নঃ ॥

অবলম্বনং ( ক্লী ) আশ্রয়ঃ। যথা। প্রতিকূলতামুপগতে হি বিধৌ বিফলত্বমেতি বহুসাধনতা। অবলম্বনায় দিনভর্ত্তুরভূন্ন পতিষ্যতঃ করসহস্রমপি ॥ ইতিমাঘে ৯ সর্গঃ

অবলম্বিতং ( ত্রি ) অবিলম্বিতং। শীঘ্রং। ইতি [illegible] ॥ অবোলম্ব্যমানং। কৃতাবলম্বনং। [illegible] ॥

অবলক্ষঃ ( পুং ) বলক্ষঃ। শ্বেতবর্ণঃ। তদ্বতি ত্রি। ইত্যমরটীকায়াং স্বামী ॥

অবলিপ্তঃ ( ত্রি ) ধনাদিগর্ব্বিতঃ। যথা। ন সংবসেচ্চ পতিতৈর্নচাণ্ডালৈর্নপুক্কশৈঃ। ন মূর্খৈর্নাবলিপ্তৈশ্চ নান্ত্যৈর্নান্ত্যাবশায়িভিঃ ॥ ইতি মানবে ৪ অধ্যায়ে ৭৯ শ্লোকঃ। অবলিপ্তা ধনাদিগর্ব্বিতা ইতি কুল্লূকভট্টঃ ॥ অবলিপ্তাসি মৈবং ত্বং দেবি জহি মমাগ্রতঃ। ইতি দেবীমাহাত্ম্যং ॥

অবলিপ্ততা (স্ত্রী) অহঙ্কারঃ। ইতি হেমচন্দ্রঃ ॥

অবলীঢ়ং ( ত্রি ) ভক্ষিতং। যথা মনুঃ। পত-

ত্রিণাবলীঢ়ঞ্চ শুনা সংস্পৃষ্টমেব চ। ইত্যাদি। পতত্রিণাবলীঢ়ং কাকাদিনা ভক্ষিতং। ইত্যাহ্নিকতত্ত্বং॥

অবলীলা (স্ত্রী) হেলা। অনায়াসঃ। যথা। রতিজ্ঞং নূতনং প্রাপ্য বিষতুল্যং পুরাতনং। কান্তং দৃষ্ট্বা হিনস্ত্যেব সোপায়েনাবলীলয়া॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ২৩ অধ্যায়ঃ। অপিচ। শূলঞ্চ ভ্রমণং কৃত্বা পপাত দানবোপরি। চকার ভস্মসাত্তঞ্চ সরথঞ্চাবলীলয়া॥ ইতি চ তত্রৈব প্রকৃতিখণ্ডে ১৮ অধ্যায়ঃ॥

অবলুণ্ঠনং (ক্লী) লুণ্ঠনং। লোটা গড়াগড়ী ইতিভাষা। অবপূর্ব্বকলুঠধাতোরনট্প্রত্যয়েন নিষ্পন্নং॥

অবলেপঃ (পুং) অহঙ্কারঃ। লেপনং। ভূষণং। ইতি মেদিনী॥ সঙ্গঃ। ইতি ত্রিকাণ্ডশেষঃ॥

অবলেপনং (ক্লী) বিলেপনং। ভ্রক্ষণং। মাখা ইতিভাষা। অবপূর্ব্বকলিপধাতোরনট্ প্রত্যয়েন নিষ্পন্নং॥

অবলেহঃ (পুং) লেহ্যৌষধং। তস্য লক্ষণং পর্য্যায়শ্চ যথা। ক্বাথাদের্যৎ পুনঃ পাকাৎ ঘনত্বং সারসক্রিয়া। সোঽবলেহশ্চলেহশ্চ প্রাশইত্যুচ্যতে বুধৈঃ॥ ইতি বৈদ্যকপরিভাষা। যথা। কট্ফলং পৌষ্করং শৃঙ্গী ব্যোষং যাসশ্চ কারবী। শ্লক্ষ্ণচূর্ণীকৃতং চৈতন্মধুনা সহ লেহয়েৎ॥ এষাবলেহিকা হন্তি সন্নিপাতং সুদারুণং। হিক্কাং শ্বাসঞ্চ কাসঞ্চ কণ্ঠরোগঞ্চ নাশয়েৎ॥ এতদেবাজ্যং কফোদ্রেকে চূর্ণমার্দ্রকজৈরসৈঃ। তন্ত্রান্তরে চ উক্তং। অষ্টাঙ্গং মধুনা লিহ্যাদার্দ্রকস্য রসেন বা। সংমোহং দারুণং হন্যাত্তন্দ্রাকাসসমন্বিতমিতি॥ সর্ব্বেষু সন্নিপাতেষু ন ক্ষৌদ্রমবচারয়েৎ। শীতোপচারি ক্ষৌদ্রং স্যাচ্ছীতঞ্চাত্র বিরুধ্যতে॥ অয়মভিপ্রায়ঃ। সন্নিপাতজ্বরেষু শ্লেষ্মনিগ্রহার্থং সর্ব্বদা স্বেদোহিত উক্তঃ। তত্রাগ্নিসম্বন্ধাদ্দেহস্যোষ্ণতা তিষ্ঠেদেব। উষ্ণেন মধুনা বিরোধঃ। উক্তঞ্চ সুশ্রুতেন। উষ্ণৈর্ব্বিরুধ্যতে সর্ব্বং বিষান্বয়তয়া মধু। উষ্ণার্ত্তমুষ্ণৈরুষ্ণঞ্চ তন্নিহন্তি যথা বিষমিতি॥ শীতোপচারি ক্ষৌদ্রমিতি। শীতেনোপচারোঽস্যাস্তীতি শীতোপচারি। শীতঞ্চাত্র সন্নিপাতে বিরুধ্যতে। অয়মবলেহঃ প্রায়েণোর্দ্ধজত্রুজরোগহরত্বাৎ সায়মুপযুজ্যতে। যত উক্তং চরকেণ। ঊর্দ্ধজত্রুগদঘ্নী যা সা সায়মবলেহিকা। অধোরোগহরী যা সা ভোজনাৎপ্রাক্প্রযুজ্যতে॥ পৌষ্করং পুষ্করমূলংতদলাভে কুষ্ঠংদেয়ং। শৃঙ্গী কর্কটশৃঙ্গী। ব্যোষং শুণ্ঠীপিপ্পলীমরিচানি চ। যাসোযবাসঃ। কেচিৎ যাসস্থানে যবানীং প্রক্ষিপন্তি। কারবী মগরেলা ইতিলোকে। অষ্টাঙ্গাবলেহিকা॥*॥ স্বিন্নমামলকং পিষ্ট্বা দ্রাক্ষয়া সহ লেহয়েৎ। বিশ্বভেষজসংযুক্তং মধুনা সহ লেহয়েৎ॥ তেনাস্য শাম্যতি শ্বাসঃ কাসো মূর্চ্ছারুচিস্তথা॥ ইত্যবলেহঃ॥*॥ অন্যৎ যথা। পিপ্পলীং ত্রিফলাঞ্চাপি সমভাগাং জ্বরী লিহন্। মধুনা সর্পিষা বাপি কাসী শ্বাসী সুখী ভবেৎ॥ কট্ফলং পৌষ্করং

শৃঙ্গী কৃষ্ণা চ মধুনা সহ। শ্বাসকাসজ্বরহরোলেহোঽয়ং কফনাশনঃ॥ চাতুর্ভদ্রিকা ॥ *॥ কট্ফলং পৌষ্করং শৃঙ্গী যবানী কারবী তথা। কটুত্রয়ঞ্চ সর্ব্বাণি সমভাগানি চূর্ণয়েৎ॥ আর্দ্রকস্য রসেনৈষ্লিহ্যাম্বুনা বা কফজ্বরী। কাসশ্বাসারুচিচ্ছর্দ্দিশ্লেষ্মানিলনিবৃত্তয়ে॥ অষ্টাঙ্গাবলেহঃ। ইতি ভাবপ্রকাশঃ॥

**অবলেহনং** (ক্লী) লেহনং। জিহ্বাদ্বারা স্বাদনং। চাটন ইতি ভাষা। অবলেহঃ। অবপূর্ব্বলিহধাতোর্ভাবেঽনট্প্রত্যয়েন নিষ্পন্নং॥

**অবলোকনং** (ক্লী) দর্শনং। আলোকনং। ইতি হেমচন্দ্রঃ॥

**অবলোকিতঃ** (পুং) লোকনাথঃ। বুদ্ধঃ। ইতি বিশ্বমেদিন্যৌ॥

**অবলোকিতং** (ত্রি) নিরীক্ষিতং। দৃষ্টং। ইতি বিশ্বমেদিন্যৌ। প্রেক্ষণক্রিয়ায়াং ক্লী॥

**অবল্গুজঃ** (পুং) সোমরাজী। ইত্যমরঃ॥ কৃষ্ণবর্ণসোমরাজী। হাকুচ যস্য প্রসিদ্ধিঃ। তস্যগুণাঃ। বায়ুকফকুষ্ঠত্বগ্দোষনাশিত্বং। ইতি রাজবল্লভঃ। অস্য বিবরণং বাকুচী শব্দে দ্রষ্টব্যং॥

**অববাদঃ** (পুং) আজ্ঞা। নিন্দা। বিশ্বাসঃ। ইতি মেদিনী॥

**অবশঃ** (ত্রি) অবশীভূতঃ। বিবশঃ। যথা। শ্লেষ্মাশ্রুবান্ধবৈর্মুক্তং প্রেতোভুঙ্ক্তে যতোঽবশঃ। অতোন রোদিতব্যঞ্চ ক্রিয়া কার্য্যা বিধানতঃ॥ ইতি শুদ্ধিতত্ত্বং॥

**অবশকৃথিকঃ** (ত্রি) বস্ত্রাদিদ্বারা পৃষ্ঠজানুজঙ্ঘাদ্বয়দৃঢ়বন্ধনপূর্ব্বকোপবিষ্টঃ। কাঁড়বান্ধিয়াবসা ইতিভাষা। যথা। কাত্যায়নঃ। আসনারূঢ়পাদস্তু জানুনোর্জ্জঙ্ঘয়োস্তথা। কৃতাবশকৃথিকোযস্তু পৌঢ়পাদঃ স উচ্যতে। আসনারূঢ়পাদঃ আসনারূঢ়পাদতলঃ। জানুনোর্জ্জঙ্ঘয়োঃ কৃতাবশকৃথিকোবস্ত্রাদিনা কৃতপৃষ্ঠজানুজঙ্ঘাবন্ধঃ। ইত্যাহ্নিকতত্ত্বং॥

**অবশিষ্টঃ** (ত্রি) শেষঃ। উদ্বর্ত্তঃ। অবশেষাশ্রয়ঃ। যথা। বল্মীকমূষিকোৎখাতাং মৃদমন্তর্জ্জলাং তথা। শৌচাবশিষ্টাং গেহাচ্চ নাদদ্যাৎ লেপসম্ভবাং॥ ইত্যাহ্নিকতত্ত্বং॥

**অবশ্যং** ব্য নিশ্চয়ঃ। তৎপর্য্যায়ঃ। নূনং ২ নিশ্চিতং ৩। ইত্যমরঃ॥ অনায়ত্তে ত্রি॥

**অবশ্যয়ঃ** (স্ত্রী) কুজ্ঝটিকা। ইতি শব্দরত্নাবলী॥

**অবশ্যায়ঃ** (পুং) হিমং। ইত্যমরঃ॥ গর্ব্বঃ ইতি বিশ্বপ্রকাশঃ॥

**অবষ্কয়ণী** (স্ত্রী) বষ্কয়ণা। চিরপ্রসূতাগৌঃ। ইত্যমরটীকায়াং সারসুন্দরী॥

**অবষ্টব্ধং**(ত্রি) অবিদূরঃ। সমীপং। অবলম্বিতং। আশ্রিতং। ইত্যমরঃ॥ বদ্ধঃ। রুদ্ধঃ। ইতি ভরতঃ॥ আক্রান্তঃ। ইতি মেদিনী॥

**অবষ্টম্ভঃ** (পুং) স্বর্ণং। স্তম্ভঃ। প্রারম্ভঃ। ইতি মেদিনী॥ সৌষ্ঠবং। ইতি হলায়ুধঃ॥

**অবষ্বাণং** (ক্লী) ভক্ষণং। ইতি হেমচন্দ্রঃ॥

**অবস্** ব্য ব্যতিরেকঃ। ইতি কেচিৎ॥

**অবসঃ** (পুং) রাজা। সূর্য্যঃ। ইতি সিদ্ধান্তকৌমুদী॥

**অবসং** (ক্লী) রক্ষণং। বৈদিকশব্দোয়ং॥

অবসক্থিকা ( স্ত্রী ) খট্বা। তৎপর্য্যায়ঃ। পর্য্যস্তিকা ২ পরিকরঃ ৩ পর্য্যঙ্কঃ ৪। ইতি হেমচন্দ্রঃ॥

অবসথঃ ( পুং ) ছাত্রনিলয়ঃ। পাঠশালা চৌপাড়ী যস্য প্রসিদ্ধিঃ। ইতি হেমচন্দ্রঃ॥ গ্রামঃ। ইতি শব্দরত্নাবলী॥ গৃহং। ইতি হলায়ুধঃ॥

অবসথ্যঃ ( পুং ) ছাত্রবেশ্ম। চৌপাড়ী ইতিভাষা। ইতি হেমচন্দ্রঃ॥

অবসন্নঃ ( ত্রি ) অবসাদপ্রাপ্তঃ। বিষণ্ণঃ। যথা। মহিম্নঃ পারন্তে পরমবিদুষোযদ্যসদৃশী স্তুতির্ব্রহ্মাদীনামপি তদবসন্নাস্ত্বয়ি গিরঃ। অথাবাচ্যঃ সর্ব্বঃ স্বমতিপরিণামাবধি গৃণন্ মমাপ্যেষ স্তোত্রে হর নিরপবাদঃ পরিকরঃ॥ ইতি পুষ্পদন্তকৃতশিবস্তোত্রং। অপি চ। আচারেণাবসন্নোপি পুনঃ প্রার্থয়তে যদি। ইতি ব্যবহারতত্ত্বং॥

অবসরঃ (পুং) প্রস্তাবঃ। মন্ত্রবিশেষঃ। বর্ষণং। ইতি মেদিনী॥ বৎসরঃ। ক্ষণং। ইতি হেমচন্দ্রঃ॥ অবকাশঃ। যথা। গোবধে একা চেদ্বহুভিরিত্যুপদেশেন দণ্ডবৎ প্রায়শ্চিত্তানি ভবন্তীত্যতিদেশানবসরাৎ। তদবসরত্বে প্রত্যেকং পূর্ণপ্রায়শ্চিত্তবৈগুণ্যং স্যাৎ। ইতি প্রায়শ্চিত্ততত্ত্বং॥

অবসর্গঃ ( পুং ) স্বেচ্ছাচারঃ। তৎপর্য্যায়ঃ। প্রকাম্যং ২ স্বচ্ছান্দ্যং ৩ অনুমননং ৪। ইতি ত্রিকাণ্ডশেষঃ॥

অবসর্পঃ ( পুং ) অপসর্পঃ। চরঃ। ইত্যমরটীকায়াং ভরতঃ॥

অবসর্পিণী ( স্ত্রী ) জিনানাং কালবিশেষঃ। স তু দশকোটিকোটিসাগরবর্ষেণ সমাপ্যতে। ইতি হেমচন্দ্রঃ॥

অবসব্যং ( ত্রি ) অপসব্যং। দক্ষিণং। ইতি রায়মুকুটঃ॥

অবসাদঃ ( পুং ) অবসন্নতা। তৎপর্য্যায়ঃ। বিষাদঃ ২ সাদঃ ৩ বিষণ্ণতা ৪। ইতি হেমচন্দ্রঃ॥

অবসানং ( ক্লী ) ক্রিয়াসমাপ্তিঃ। শেষঃ। তৎপর্য্যায়ঃ। সাতিঃ ২। ইত্যমরঃ॥ বিরামঃ ৩। ইতি জটাধরঃ॥ মৃত্যুঃ। সীমা। ইতি হেমচন্দ্রঃ॥

অবসায়ঃ ( পুং ) শেষঃ। সমাপ্তিঃ। নিশ্চয়ঃ। ইতি মেদিনী॥

অবসিতং ( ত্রি ) পরিপক্বমর্দ্দিতধান্যং। তৎপর্য্যায়ঃ। ঋদ্ধং ২। ইতি ভরতমেদিন্যৌ॥ জ্ঞাতং। অবসানগতং। সমাপ্তং। তৎপর্য্যায়ঃ। সিতঃ২। ইত্যমরমেদিন্যৌ॥

অবসেকিমঃ ( পুং ) বটকঃ। বড়া ইতিভাষা॥ ইতি হেমচন্দ্রঃ॥

অবস্কন্দঃ ( পুং ) বিজিগীষূণাংনিবেশস্থানং। শিবিরং। ইতি হলায়ুধঃ॥ অবগাহনং। যথা। লতানুপাতং কুসুমান্যগৃহ্লাৎ স নদ্যবস্কন্দমুপাস্পৃশচ্চ। কুতূহলাচ্চারুশিলোপবেশং কাকুৎস্থ ঈষৎস্ময়মান আস্ত॥ ইতি ভট্টৌ ২ সর্গে ১১ শ্লোকঃ॥ নদ্যাঅবস্কন্দোঽবগাহোযত্র স্নানক্রিয়ায়াং। ইতি তট্টীকায়াং ভরতঃ॥

অবস্কন্দনং ( ক্লী ) অবগাহনং। ইতি ভট্টিঃ॥ অবতরণং। ইতি মহাভারতং॥ অপূর্ব্বস্কন্দধাতোরনট্প্রত্যয়েন নিষ্পন্নং॥

অবস্করঃ ( পুং ) বিষ্ঠা। গুহ্যং। ইত্যমরমেদিন্যৌ ॥ সংমার্জ্জন্যাদিনিক্ষিপ্তধূল্যাদি। ইত্যমরটীকায়াং মথুরানাথঃসারসুন্দরীচ ॥

অবস্তাৎ ব্য অবরে। পশ্চাৎ। শেষে। অন্তে। ইতি পাণিনিঃ ॥

অবস্তারঃ ( পুং ) যবনিকাদিঃ। কানাৎ ইত্যাদিভাষা ॥ অবস্তীর্য্যতেঽনেনেতিস্তৃঞ আচ্ছাদনে ঘঞ্ ॥

অবস্তু ( ক্লী ) অসদ্বস্তু। বেদান্তমতে। অজ্ঞানাদিসকলজড়সমূহঃ ॥

অবস্থা ( স্ত্রী ) দশা। কালিকবিশেষঃ। ইত্যমরঃ॥ কৌমারংপঞ্চমাব্দান্তং পৌগণ্ডংদশমাবধি। কৈশোরমাপঞ্চদশাৎ যৌবনন্তু ততঃপরং ॥ আষোড়শাদ্ভবেদ্বালস্তরুণস্তত উচ্যতে।বৃদ্ধস্তসপ্ততেরূর্দ্ধংবর্ষীয়ান্নবতেঃ পরং ॥ ইতি স্মৃতিঃ ॥

অবস্থাচতুষ্টয়ং ( ক্লী ) কালকৃতচতুর্ব্বিধদশা। যথা। আপঞ্চদশবর্ষং বাল্যং। আত্রিংশদ্বর্ষং কৌমারং। আপঞ্চাশদ্বর্ষং যৌবনং। পঞ্চাশত ঊর্দ্ধং বৃদ্ধত্বং। ইতি বৈদ্যকশাস্ত্রে ॥

অবস্থানং ( ক্লী ) স্থিতিঃ। বাসঃ। যথা। পরঃ সন্নিকর্ষশ্চ উপর্য্যধোভাবাপন্নসমসূত্রপাতন্যায়েনৈকরাশ্যবচ্ছেদেন সহাবস্থানরূপঃ। ইতি তিথ্যাদিতত্ত্বং ॥

অবস্থিতঃ ( ত্রি ) কৃতাবস্থানঃ। অবস্থিতিবিশিষ্টং। স্থিতং। যথা। যানেব হত্বা ন জিজীবিষামস্তেঽবস্থিতাঃ প্রমুখে ধার্ত্তরাষ্ট্রাঃ। ইতি শ্রীভগবদ্গীতায়াং ২ অধ্যায়ে ৬ শ্লোকঃ ॥

অবস্থিতিঃ ( স্ত্রী ) অবস্থানং। থাকা। ইতি ভাষা ॥ অবপূর্ব্বক স্থাধাতোঃ ক্তিপ্রত্যয়েন নিষ্পন্না ॥

অবহস্তঃ ( পুং ) হস্তপৃষ্ঠং। ইতি হেমচন্দ্রঃ ॥

অবহারঃ ( পুং ) চৌরঃ। দ্যূতযুদ্ধাদিবিশ্রামঃ। নিমন্ত্রণং। উপনেতব্যদ্রব্যং। গ্রাহনামজলজন্তুঃ। ইতি বিশ্বমেদিন্যৌ ॥ ধর্ম্মান্তরং। ইতি শব্দরত্নাবলী ॥

অবহারকঃ (পুং) জলজন্তুবিশেষঃ। হাঙ্গরইতি খ্যাতঃ। জলহস্তীতি কেচিৎ। তৎপর্য্যায়ঃ। অবগ্রাহঃ ২ নক্ররাজঃ ৩ অবহারঃ ৪। ইতি শব্দরত্নাবলী ॥ যুদ্ধাদিনিবর্ত্তকে ত্রি।

অবহার্য্যঃ ( ত্রি) সমর্পণীয়ঃ। যথা। আধিশ্চোপনিধিশ্চোভৌ ন কালাত্যয়মর্হতঃ। অবহার্য্যৌ ভবেতাং তৌ দীর্ঘকালমবস্থিতৌ॥ ইতি মানবে ৮ অধ্যায়ে ১৪৫ শ্লোকঃ॥

অবহালিকা ( স্ত্রী ) প্রাচীরং। ইতি হারাবলী ॥

অবহিতং ( ত্রি ) বিজ্ঞাতং। অবধানংগতং। ইতি ধরণী ॥

অবহিত্থা ( স্ত্রী ক্লী ) আকারগুপ্তিঃ। রত্যাদিসূচকোমুখরাগাদিরাকারঃ। অঙ্গবৈকৃতনিতিবোপালিতঃ ॥ ভয়লজ্জাদিনা তস্য গোপনং। ইত্যমরটীকায়াং ভরতঃ

অবহেলং ( ক্লী স্ত্রী ) অনাদরঃ। অবজ্ঞা। ইত্যমরঃ ॥

অবহেলনং (ক্লী) অবহেলা। অবমাননা। ইতি শব্দরত্নাবলী ॥

অবহেলিতং ( ক্লী ) অনাদরঃ। অবহেলা। তদ্বিশিষ্টে ত্রি ॥ কৃতাবহেলনবস্তু। অবহেলং জাতমস্য ইত্যর্থে ইতপ্রত্যয়েন নিষ্পন্নং ॥

অবক্ষুতং (ক্লী) উপরিকৃতক্ষুতং। যথা মনুঃ। দ্বিষদন্নং নগর্য্যন্নং পতিতান্নমবক্ষুতং। ইত্যাহ্নিকতত্ত্বং ॥

অবাক্ [ চ্ ] ( ত্রি ) বাক্যরহিতঃ। বোবা ইতি ভাষা। ইত্যমরঃ॥ ক্বিবন্তবচধাতোর্নঞ্ সমাসেঽয়ংপ্রয়োগঃ॥ দক্ষিণং। অধোমুখং। এতদর্থয়োঃ অবপূর্ব্বান্চধাতোঃপ্রয়োগঃ ॥

অবাক্পুষ্পী ( স্ত্রী) শতপুষ্পা। শলুফা ইতি খ্যাতা। মিশ্রেয়া। মৌরী ইতি ভাষা॥ ইত্যমররত্নমালে ॥ বৃক্ষবিশেষঃ। হেঠাহুলী চোরহুলী চোরখড়্কী ইতি ভাষা। তৎপর্য্যায়ঃ। অধঃপুষ্পী ২ মঙ্গল্যা ৩ অমরপুষ্পিকা ৪। ইতি রত্নমালা ॥

অবাক্শিরাঃ [ স্ ] (পুং) অধোমুখঃ। যথা। অবাক্শিরাস্তমস্যন্ধে কিল্বিষী নরকং ব্রজেৎ। যঃ প্রশ্নং বিতথং ব্রূয়াৎ পৃষ্টঃ সন্ ধর্ম্মনিশ্চয়ে॥ ইতি মানবে ৮ অধ্যায়ে ৯৪ শ্লোকঃ ॥

অবাগ্রং ( ত্রি ) নম্রং। অবনতং। ইত্যমরঃ ॥

অবাঙ্ [ন্চ] (ত্রি) নীচবদনঃ। তৎপর্য্যায়ঃ। অধোমুখঃ২ অবাঙ্মুখঃ৩ অবাচীনঃ৪। ইত্যমরজটাধরৌ ॥

অবাঙ্মুখং ( ত্রি ) অধোবদনং। যথা। তৎশ্রুত্বা স বলঃ স্নেহহর্ষদুঃখত্রপাকুলঃ। অবাঙ্মুখঃ প্রাপ্তকালাং তামুবাচাশ্রুগদ্গদং ॥ ইতি কথাসরিৎসাগরে অলঙ্কারবতীলম্বকে ৬৩ রঙ্গঃ॥

অবাচী (স্ত্রী) দক্ষিণদিক্। ইতি বোপদেবাদয়ঃ॥ অধোদিক্। ইতি ব্যাড়িঃ ॥ অধোমুখী ॥

অবাচীনং (ত্রি) দক্ষিণদিগ্ভববস্তু। অধোমুখঃ। ইতি স্বামিজটাধরৌ ॥

অবাচ্যং ( ক্লী ) দুর্ব্বাক্যং। তৎপর্য্যায়ঃ। অনক্ষরং ২। ইত্যমরঃ॥ বচনানর্হং। অনক্ষরং গালি প্রভৃতি ইতি মধুঃ। নিন্দিতান্যক্ষরাণি অত্র অনক্ষরং অব্যয়ানামনেকার্থত্বাৎ নঞ্ নিন্দায়াং। এবমবাচ্যংবক্তুমযোগ্যং বচ্চো বাচি হস্যৃগ্যাসোরিতি ঘ্যণ্ ভুজবচেতি ক নিষেধঃ। ইতি ভরতঃ ॥

অবাচ্যঃ ( ত্রি ) অনিন্দিতঃ। ইতি স্মৃতিঃ॥ অবক্তব্যঃ। বচনানর্হং। যথা। অনক্ষরমবাচ্যন্তু বচনার্হং ন যদ্ভবেৎ। এষ বন্ধ্যাসুতোযাতি খপুষ্পকৃতশেখরঃ॥ মৃগতৃষ্ণাম্ভসি স্নাতঃ শশশৃঙ্গধনুর্দ্ধরঃ। ইতি শব্দরত্নাবলী ॥

অবাচ্যদেশঃ ( পুং ) যোনিঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

অবাদী [ ন্ ] ( ত্রি ) অবিরোধী। অবিবাদী। অবক্তা। অবদনশীলঃ। বদধাতোর্ণিন্প্রত্যয়ানন্তরং নঞ্ সমাসনিষ্পন্নঃ ॥

অবাধং ( ত্রি ) বাধাশূন্যং। অনর্গলং। তৎপর্য্যায়ঃ। নিরর্গলং ২। ইত্যমরঃ ॥

অবাধ্যঃ ( ত্রি ) বাধানর্হঃ। বাধাযোগ্যঃ। অবাধনীয়ঃ। অবাধিতব্যঃ। ন বাধ্যঃ অবাধ্য ইতি নঞ্ সমাসনিষ্পন্নঃ ॥

অবানং (ত্রি) শুষ্কফলাদি। ইতি শব্দরত্নাবলী ॥

অবান্তরং (ত্রি) প্রধানান্তঃপাতি। ইয়ং ফলশ্রুতির্ন শ্রেয়ঃপরমপুরুষার্থসাধনপরা ন ভবতি। কিন্তু বহির্ম্মুখানাং মোক্ষবিবক্ষয়া অবান্তরকর্ম্মফলৈঃ কর্ম্মসু রুচ্যুৎপাদনমা-

ত্রং । যথা ভৈষজ্যে ঔষধে রুচ্যুৎপাদনং । যথা । পিব নিম্বং প্রদাস্যামি খলু তে খণ্ডলড্ডুকান্‌। পিত্রৈবমুক্তঃ পিবতি তিক্তমপ্যতিবালকঃ ॥ অত্র তিক্তনিম্বাদিপানস্য ন খলু খণ্ডাদিলাভঃ এব প্রয়োজনং কিন্ত্বারোগ্যং তথা বেদোপ্যবান্তরফলৈঃ প্রলোভয়ন্‌ মোক্ষায়ৈব কর্ম্মাণি বিধত্তে। ইতি মলমাসতত্ত্বং ॥

অবাপিতধান্যং (ত্রি) অকৃতবপনধান্যং । রোপিতধান্যং । রোয়াধান ইতি ভাষা । তৎবাপিতধান্যাপেক্ষয়া কিঞ্চিদ্ধীনগুণং । ইতি রাজবল্লভঃ ॥

অবারং (ক্লী) অর্ব্বাকৃতটং । নদ্যাদেঃ পূর্ব্বতীবং । এপার ইতিভাষা । ইত্যমরঃ ॥

অবারপারঃ (পুং) সমুদ্রঃ । ইতি হেমচন্দ্রঃ ॥

অবারপারীণঃ (ত্রি) পারগঃ । নদ্যাদিপারগতব্যক্তিঃ । ইতি পাণিনিঃ ॥

অবারিকা (স্ত্রী) ধন্যাকং । ধনিয়া ইতি ভাষা । অবরিকাচপাঠঃ । ইতি রাজনির্ঘণ্টঃ ॥

অবারিতং (ত্রি) অকৃতবারণং । অনিবারিতং । যথা । অবারিতদ্বারতয়া তিরশ্চামন্তঃপুরে তস্য নিবিশ্য রাজ্ঞঃ । গতেষু রম্যেষ্বধিকং বিশেষমধ্যাপয়ামঃ পরমাণুমধ্যাঃ ॥ ইতি নৈষধে ৩ সর্গে ৪২ শ্লোকঃ ॥

অবারীণঃ (ত্রি) পারগঃ । নদীপারগতঃ । ইতি পাণিনিঃ ॥

অবার্য্যং (ত্রি) অনিবার্য্যং । অবারণীয়ং । অবারিতব্যং । বারণাযোগ্যং । যথা । নমস্তে নিত্যবিলসদ্বৈষ্ণবস্বনিকেতন । অবার্য্যবীর্য্যবদ্রূপং বিষ্ণোর্যৎ প্রণমাম্যহং ॥ ইত্যুৎকলখণ্ডে ২৭ অধ্যায়ঃ ॥

অবাসাঃ [স্‌] (ত্রি) বস্ত্ররহিতঃ । নগ্নঃ । ইত্যমরঃ ॥

অবাস্তবং (ত্রি) অযথার্থং । মিথ্যা । ন বাস্তবং অবাস্তবমিতি নঞ্‌ সমাসনিষ্পন্নং ॥

অবাক্ষঃ (ত্রি) পরিরক্ষকঃ । অবপূর্ব্বকাক্ষধাতোরল্‌প্রত্যয়েন নিষ্পন্নঃ ॥

অবিঃ (পুং) সূর্য্যঃ । পর্ব্বতঃ । মেষঃ । ইত্যমরঃ ॥ নাথঃ । মূষিককম্বলঃ । ইতি মেদিনী ॥ প্রাচীরং বায়ুঃ । ইতি দণ্ডী ॥

অবিঃ (স্ত্রী) ঋতুমতী । ইত্যমরঃ ॥

অবিকটঃ (পুং) মেষসমূহঃ । ভেড়ারপাল ইতি ভাষা । ইতি সংক্ষিপ্তসারপরিশিষ্টং ॥

অবিকটঃ (ত্রি) অবিশালঃ । অকরালঃ । অবিস্তারঃ । ন বিকটঃ অবিকটঃ ইতি নঞ্‌ সমাসনিষ্পন্নঃ ॥

অবিকং (ক্লী) হীরকং । ইতি রাজনির্ঘণ্টঃ ॥

অবিকারী [ন্‌] (ত্রি) বিকারাজনকঃ। যথা বৃহস্পতিঃ । কন্দমূলফলৈঃ পুষ্পৈঃ শস্তৈঃ শুক্তরসস্তু যৎ । অবিকারি ভবেন্মেধ্যমভক্ষ্যং তদ্বিকারকৃৎ ॥ ইত্যাহ্নিকাচারতত্ত্বং

অবিগন্ধিকা (স্ত্রী) অজগন্ধাবৃক্ষঃ । ইতি রাজনির্ঘণ্টঃ ॥

অবিগীতং (ত্রি) অনিন্দিতং । যথা । নাপি মঙ্গলং সফলমবিগীতশিষ্টাচারবিষয়ত্বাদ্দর্শবৎ । ইতি মঙ্গলবাদচিন্তামণিঃ ॥

অবিগ্নঃ (পুং) করমর্দকবৃক্ষঃ । ইত্যমরঃ । পানিআমলা ইতিখ্যাতঃ । ইতি সারসুন্দরী ॥

অবিচারঃ (পুং) অন্যায়ঃ । অত্যাচারঃ ।

বিচাররহিতে ত্রি। যথা। অবিচারেণ স-র্ব্বাভিরনুষ্ঠেয়স্তু তৎ পুনঃ। সংসারো-ত্তারণায়ালমেতদ্বেদবিদোবিদুঃ। ইতি ম-ৎস্যপুরাণং ॥

অবিচারিতঃ (ত্রি) অকৃতবিচারঃ। অবিবে-চিতঃ। অবিচারশব্দাদিতপ্রত্যয়েন নি-ষ্পন্নঃ ॥

অবিচ্ছিন্নং (ক্লী) বিচ্ছেদাভাববৎ। অনিষ্পত্তি-মৎ। যথা। অবিচ্ছিন্নে কথন্তাবে যৎ প্র-ধানস্য পঠ্যতে। অবিজ্ঞাতফলং কর্ম্ম তস্য প্রকরণাঙ্গতা। ইতি মলমাসতত্ত্বং ॥

অবিজ্ঞঃ (ত্রি) অপ্রবীণঃ। অনিপুণঃ। অনভি-জ্ঞঃ। অশিক্ষিতঃ। অকৃতী। যথা। এতে সর্ব্বে গুণাঃ কান্ত সন্তি কান্তে ত্বয়ি ধ্রুবং। ত্বাং ন বাঞ্ছন্তি যাঃ কান্তাস্তা অবিজ্ঞাশ্চ বঞ্চিতাঃ ॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্ম-খণ্ডে ২৩ অধ্যায়ঃ ॥

অবিজ্ঞেয়ং (ক্লী) দুর্জ্ঞেয়ং। যথা। আসীদি-দং তমোভূতমপ্রজ্ঞাতমলক্ষণং। অপ্রত-র্ক্যমবিজ্ঞেয়ং প্রসুপ্তমিব সর্ব্বতঃ। ইতি মানবে ১ অধ্যায়ঃ ॥

অবিডীনং (ক্লী) পক্ষিণাং আভিমুখ্যাভিগমনং। ইতি মহাভারতং ॥

অবিতং (ত্রি) ত্রাতং। রক্ষিতং। ইত্যমরঃ ॥

অবিতথং (ক্লী) সত্যং। তদ্বিশিষ্টে ত্রি। ইতি শব্দরত্নাবলী

অবিত্যজঃ (পুং ক্লী) পারদঃ। ইতি রাজনি-র্ঘণ্টঃ ॥

অবিদূসং (ক্লী) মেষদুগ্ধং। ইতি হেমচন্দ্রঃ ॥

অবিদ্ধকর্ণা (স্ত্রী) অম্বষ্ঠা। আকনাদি ইতিখ্যাতা। ভৃঙ্গরাজঃ। ইত্যমরটীকায়াং ভরতঃ ॥

অবিদ্ধকর্ণী (স্ত্রী) বিদ্ধকর্ণীলতা। ইতি ভরতঃ ॥

অবিদ্যঃ (ত্রি) বিদ্যারহিতঃ। অবিদ্বান্। বি-দ্যাহীনঃ। যথা। অবিদ্যোবা সবিদ্যোবা ব্রাহ্মণোমামকী তনুঃ। অপিচ। কাত্যায়-নঃ। নাবিদ্যানাস্তু বৈদ্যেন দেয়ং বিদ্যা-ধনাৎ কচিৎ। ইতি দায়তত্ত্বং ॥ অন্যচ্চ। অবিদ্যানাস্তু সর্ব্বেষামীহাতশ্চেদ্ধনং ভ-বেৎ। সমস্তত্র বিভাগঃ স্যাদপিত্র্য ইতি ধারণা ॥ ইতি মানবে ৯ অধ্যায়ে ২০৫ শ্লোকঃ ॥

অবিদ্যমানঃ (ত্রি) অবর্ত্তমানঃ। সত্তারহিতঃ। অভাবঃ। যথা। নারদঃ। অবিদ্যমানে পি-ত্রর্থে স্বাংশাদুদ্ধৃত্য বা পুনঃ। অবশ্যকা-র্য্যাঃ সংস্কারা ভ্রাতৃভিঃ পূর্ব্বসংস্কৃতৈঃ ॥ ইতি দায়তত্ত্বং ॥

অবিদ্যা (স্ত্রী) অজ্ঞানং। ইত্যমরঃ ॥ মায়া। ইতি বেদান্তে ॥

অবিধিঃ (পুং) অবিধানং। শাস্ত্রাবিহিতং। যথা। যে হপ্যন্যদেবতাভক্তা যজন্তে শ্র-দ্ধয়ান্বিতাঃ। তেহপি মামেব কৌন্তেয় যজন্ত্যবিধিপূর্ব্বকং ॥ ইতি শ্রীভগবদ্গী-তায়াং ৯ অধ্যায়ে ২৩ শ্লোকঃ ॥ অপিচ। যাজ্ঞবল্ক্যঃ। বসেৎ স নরকে ঘোরে দি-নানি পশুরোমভিঃ। অমিতানি দুরাচারো যোহন্ত্যবিধিনা পশূন্। ইত্যাহ্নিকতত্ত্বং ॥

অবিনঃ (পুং) যন্টা। যাগকর্ত্তা। ইত্যুণাদি কোষঃ ॥

অবিনয়ঃ (পুং) বিনয়াভাবঃ। অবিনীতে ত্রি ॥

যথা। বহবোঽবিনয়ান্নষ্টা রাজানঃ সপরিচ্ছদাঃ। বনস্থা অপি রাজ্যানি বিনয়াৎ প্রতিপেদিরে॥ বেণো বিনষ্টোঽবিনয়ান্নহুষশ্চৈব পার্থিবঃ। সুদাসো যবনশ্চৈব সুমুখো নিমিরেবচ। ইতি মানবে ৭ অধ্যায়ে ৪০।৪১ শ্লোকৌ॥

অবিনাভাবঃ (পুং) ব্যাপ্তিঃ। ব্যাপ্যনিষ্ঠব্যাপকনিরূপিতধর্ম্মঃ। যথা বহ্নিমান্ ধূমাৎ ইত্যাদৌ ধূমনিষ্ঠা বহ্নিনিরূপিতা ব্যাপ্তিঃ॥ ইতি ন্যায়মীমাংসয়োর্মতং॥ তৎপদার্থে তৎপদার্থাভাববদ্বৃত্তিত্বাভাবঃ। যথা। কেয়মাকাঙ্ক্ষা ন তাবদবিনাভাবঃ। নীলং সরোজমিত্যাদৌ তদভাবাৎ। বিমলং জলং নদ্যাঃ কচ্ছে মহিষ ইত্যত্র জলান্বিতনদ্যা অবিনাভাবাৎ কচ্ছে সাকাঙ্ক্ষতাপত্তেশ্চ। ইত্যাকাঙ্ক্ষাচিন্তামণিঃ। অবিনাভাব ইতি। তৎপদার্থেন বিনা যোভাবঃ সত্ত্বং তদভাব ইত্যর্থঃ। তৎপদার্থে তৎপদার্থাভাববদ্বৃত্তিত্বাভাবস্তৎপদার্থে তৎপদার্থাকাঙ্ক্ষা ইতি ভাবঃ। ইতি তট্টীকামাথুরী॥

অবিনীতঃ (ত্রি) বিনয়রহিতব্যক্তিঃ। তৎপর্য্যায়ঃ। সমুদ্ধতঃ ২। ইত্যমরঃ॥

অবিনীতা (স্ত্রী) পুংশ্চলী। অসতী। ইতি হেমচন্দ্রঃ॥

অবিপটঃ (পুং) অবীনাং বিস্তারঃ। ইতি সংক্ষিপ্তসার ব্যাকরণপরিশিষ্টং। কম্বলাদিঃ॥

অবিপ্রিয়ঃ (পুং) শ্যামাকতৃণং। ইতি রাজনির্ঘণ্টঃ॥

অবিপ্রিয়া (স্ত্রী) শ্বেতালতা। ইতি রাজনির্ঘণ্টঃ॥

অবিভক্তঃ (ত্রি) অপৃথক্। যথা। কৃত্যচিন্তামণৌ। বিভক্তা অবিভক্তা বা কুর্য্যুঃ শ্রাদ্ধমদৈবিকং। মঘাসু চ তথান্যত্র নাধিকারঃ পৃথগ্‌বিনা॥ ইতি মলমাসতত্ত্বং॥

অবিভাজ্যং (ত্রি) বিভাগাযোগ্যং। অথ বিভাজ্যাবিভাজ্যে। তত্র ব্যাসঃ। অনাশ্রিত্য পিতৃদ্রব্যং স্বশক্ত্যাপ্নোতি যদ্ধনং। দায়াদেভ্যো ন তদদ্যাৎ বিদ্যালব্ধঞ্চ যম্ভবেৎ॥ *॥ বিদ্যাধনমাহ কাত্যায়নঃ। উপন্যস্তে তু যল্লব্ধং বিদ্যয়া পণপূর্ব্বকং। বিদ্যাধনন্তু তদ্বিদ্যাৎ বিভাগে ন নিযোজয়েৎ॥ শিষ্যাদার্ত্বিজ্যতঃ প্রশ্নাৎ সন্দিগ্ধপ্রশ্ননির্ণয়াৎ। স্বজ্ঞানসংশনাদ্বাদাল্লব্ধং প্রাধ্যয়নাত্তু যৎ॥ বিদ্যাধনন্তু তৎপ্রাহুর্বিভাগে ন প্রযোজয়েৎ। শিল্পেষ্বপি হি ধর্ম্মোঽয়ং মূল্যাদ্যচ্চাধিকং ভবেৎ॥ পরং নিরস্য যল্লব্ধং বিদ্যয়া দ্যূতপূর্ব্বকং। বিদ্যাধনন্তু তদ্বিদ্যাৎ ন বিভাজ্যং বৃহস্পতিঃ॥ *॥ যদি ভবান্ ভদ্রমুপন্যস্যতি তদা ভবতএব ময়ৈতদ্দেয়মিতি পণিতং যত্রোপন্যাসং নিস্তীর্য্য লভতে তন্ন বিভাজ্যং। শিষ্যাদধ্যাপিতাৎ। আর্ত্বিজ্যতঃ যজমানাদ্দক্ষিণয়া লব্ধধনং ন প্রতিগ্রহলব্ধং বেতনরূপত্বাত্তস্য। তথা যৎকিঞ্চিদ্বিদ্যাপ্রশ্নে নিস্তীর্ণেঽপণিতং যদি কশ্চিৎ পরিতোষাদ্দদাতি। তথা যোঽস্মিন্ শাস্ত্রার্থে অস্মাকং সংশয়মপনয়তি তস্মৈ ধনমিদং দদানীত্যুপস্থিতস্য সংশয়মপনীয় যল্লব্ধং। বাদিনোর্ব্বা সন্দেহে ন্যায়করণার্থমাগতয়োঃ সম্যঙ্নিরূপণেন যল্লব্ধং ষষ্ঠাংশাদিকং

তথা শাস্ত্রাদিপ্রকৃষ্টজ্ঞানং সম্ভাব্য যৎ প্রতিগ্রহাদিনা লব্ধং । তথা শাস্ত্রজ্ঞানবিবাদে অন্যত্রাপি যত্র কুত্রচিদন্যোন্য- জ্ঞানবিবাদে নির্জ্জিত্য যল্লব্ধং । তথৈকস্মিন্ দেয়ে বহূনামুপপ্লবে যেন প্রহৃষ্টাৎ যল্লব্ধং । তথা শিল্পাদিবিদ্যয়া চিত্রকরসুবর্ণকারাদিভি র্যল্লব্ধং । তথা দ্যূতেনাপি পরং নির্জ্জিত্য যল্লব্ধং । তৎ সর্ব্বমবিভাজ্যমিতরৈঃ। তস্মাদ্যয়া কয়াচিদ্বিদ্যয়া লব্ধমর্জ্জকস্যৈব তন্নেতরেষামিতি । প্রদর্শনার্থন্তু কাত্যায়নেন বিস্তারিতমিতি দায়ভাগঃ ॥ * ॥ নারদঃ। কুটুম্বং বিভৃয়াদ্ভ্রাতু র্যো বিদ্যামধিগচ্ছতঃ। ভাগং বিদ্যাধনাত্তস্মাৎ সলভেতাশ্রুতো হ্পি সন্ ॥ বিভৃয়াদিত্যেকবচননির্দ্দেশান্ন বহবঃ। যদি বিদ্যামভ্যস্যতো ভ্রাতুঃ কুটুম্বমপরো ভ্রাতা স্বধনব্যয়শরীরায়াসাভ্যাং সম্বর্দ্ধয়তি ত তদ্বিদ্যার্জ্জিতধনে তস্যাধিকারঃ। অশ্রুতো মূর্খঃ। কল্পতরুমিতাক্ষরাদীপকলিকাসু। কাত্যায়নঃ। পরভক্তোপযোগেন বিদ্যা প্রাপ্তান্যতস্তু যা। তয়া লব্ধং ধনং যত্তু বিদ্যালব্ধং তদুচ্যতে ॥ অন্যতঃ পিতৃমাতৃকুলব্যতিরিক্তাৎ ॥ * ॥ অত্র বিশেষয়তি সএব। নাবিদ্যানাম্ভ বৈদ্যেন দেয়ং বিদ্যাধনাৎ কচিৎ । সমবিদ্যাধিকানান্তু দেয়ং বৈদ্যেন তদ্ধনং ॥ তত্রোচ্চরিতবিদ্যাপদমুভাভ্যাং সম্বধ্যতে তেন সমবিদ্যাধিকবিদ্যানাং ভাগো ন তু ন্যূনবিদ্যাবিদ্যয়োঃ। বৈদ্যেন বিদুষা ॥ * ॥ পুনর্ব্বিশেষয়তি । কুলে বিনীতবিদ্যানাং ভ্রাতৃণাং পিতৃতোহ্পি বা। শৌর্য্যপ্রাপ্তস্তু যদ্বিত্তং বিভাজ্যং তদ্বৃহস্পতিঃ ॥ কুলে স্বকুলে পিতামহপিতৃব্যাদিভ্যঃ। পিতৃত এব বা। শিক্ষিতবিদ্যানাং ভ্রাতৃণাং। যদ্বিদ্যাশৌর্য্যপ্রাপ্তং ধনং তদ্বিভজনীয়মিতি কল্পতরুরত্নাকরৌ ॥ পুনঃ কাত্যায়নঃ ॥ দ্ব্যংশহরোহর্দ্ধহরো বা পুত্রবিত্তার্জ্জনাৎ পিতা । পুত্রবিত্তার্জ্জনাৎ । কৃদভিহিতভাবো দ্রব্যবৎ প্রকাশত ইতি ন্যায়াৎ পুত্রার্জ্জিতবিত্তাৎ পিতু র্দ্ব্যংশিত্বং পিতৃধনানুপঘাতবিষয়ং ভ্রাতৃধনোপঘাতবিষয়ঞ্চ। অর্জ্জকস্য তু দ্ব্যংশিত্বং ভ্রাতৃধনোপঘাতে তু তেষামপ্যেকাংশিত্বং বক্ষ্যমাণব্যাসবচনাৎ। পিতুরর্দ্ধহরত্বন্তু পিতৃদ্রব্যোপঘাতাদ্গুণবত্ত্বাদেতি দায়ভাগঃ । অনুপঘাতে পিতা দ্ব্যংশহরঃ অর্জ্জকত্বাৎ স্বয়মপি দ্ব্যংশহরঃ ইতরেষামনংশিত্বং। ভ্রাতৃদ্রব্যোপঘাতে তু তস্যাপ্যেকাংশ ইতি দ্ব্যংশার্দ্ধাংশয়ো র্ভেদকথনং ॥ * ॥ পুনঃ কাত্যায়নঃ। গোপ্রচারশ্চ রথ্যা চ বস্ত্রং যচ্চাঙ্গযোজিতং। প্রাযোজ্যং ন বিভজ্যেত শিল্পার্থন্তু বৃহস্পতিঃ ॥ প্রাযোজ্যং যদ্যস্য প্রয়োজনার্হং পুস্তকাদি ন তন্মূর্খাদিভিঃ সহ পণ্ডিতাদিভি র্বিভজনীয়ং এবমেব দায়ভাগমদনপারিজাতাদয়ঃ । যাজ্ঞবল্ক্যঃ। পিতৃভ্যাঞ্চৈব যদ্দত্তং তত্তস্যৈব ধনং ভবেৎ। পুত্রদুহিত্রোর্যদলঙ্কারাদি দত্তং তত্তস্যৈবেতি শূলপাণ্যুপাধ্যায়াঃ ॥ নারদঃ। শৌর্য্যভার্য্যাধনে চোভে যচ্চ বিদ্যাধনন্তবেৎ। ত্রীণ্যেতান্যবিভাজ্যানি প্রসাদো যশ্চ

পৈতৃকঃ ॥ প্রাপ্তঞ্চ সহ ভার্য্যয়েতি ভরদ্বাজবচনাৎ ভার্য্যাপ্রাপ্তিকালে লব্ধং ধনং ভার্য্যাধনমৌদ্বাহিকমিত্যর্থঃ। চোভে ইত্যত্র হিত্বেতি পাঠে এতত্ত্রিকং হিত্বান্যদ্বিভজেদিত্যনুবর্ত্ততে অত এতান্যবিভাজ্যানীতি। ন বাস্তুবিভাগো নোদকপাত্রালঙ্কারোপযুক্তস্ত্রীবাসসামপাং প্রচাররথ্যানাং বিভাগশ্চ ইতি প্রজাপতিরিতি। যস্মিন্ বাস্তুনি যেন গৃহোদ্যানাদিকং কৃতং অপরেণাপি স্থানান্তরে তথা কৃতঞ্চেৎ তদা যেন যৎ কৃতং তত্তস্যৈব। অন্যত্রাপ্যেবং ॥ * ॥ সাধারণধনার্জ্জিতেপি বিশেষমাহ ব্যাসঃ। সাধারণং সমাশ্রিত্য যৎকিঞ্চিদ্বাহনায়ুধং। শৌর্য্যাদিনাপ্নোতি ধনং ভ্রাত রস্তত্র ভাগিনঃ ॥ তস্য ভাগদ্বয়ং দেয়ং শেষাস্তু সমভাগিনঃ। অত্র ভ্রাতর ইত্যুপলক্ষণং পিতৃব্যাদয়োঽপি বোদ্ধব্যাঃ। তস্যার্জ্জকস্য। সাধারণোপঘাতে যস্য যাবতোঽংশস্যাল্পস্য মহতো বা উপঘাতস্তস্য তদনুসারেণ ভাগকল্পনা কার্য্যেতি দায়ভাগঃ ॥ যাজ্ঞবল্ক্যঃ। ক্রমাদভ্যাগতং দ্রব্যং হৃতমভ্যুদ্ধরেত্তু যঃ। দায়াদেভ্যো ন তদ্দদ্যাৎ বিদ্যয়া লব্ধমেব চ ॥ পিতৃপিতামহাগতং বলাদন্যৈর্হৃতং যোঽংশ্যন্তরাণামনুজ্ঞয়া উদ্ধরতি তদংশ্যন্তরেভ্যো ন দদ্যাৎ ॥ * ॥ ভূমৌ তু বিশেষয়তি শঙ্খঃ। পূর্ব্বনষ্টাঞ্চ যো ভূমিমেকএবোদ্ধরেৎ শ্রমাৎ। যথাভাগং ভজন্ত্যন্যে দত্ত্বাংশন্তু তুরীয়কং ॥ এতদ্বচনং স্মৃতিমহার্ণবকামধেনুপারিজাতপ্রভৃতিদ্বলিখনাদযুক্তমেবেতি রত্নাকরঃ। তন্ন দায়ভাগমিতাক্ষরাপ্রভৃতিভি র্ধৃতত্বাৎ। ইতি দায়তত্ত্বং ॥

অবিমরীসং (ক্লী) মেষদুগ্ধং। ইতি হেমচন্দ্রঃ॥

অবিমুক্তং (ক্লী) বারাণসীক্ষেত্রং। যথা। মুনে প্রলয়কালেঽপি ন তৎ ক্ষেত্রং কদাচন। বিমুক্তং ন শিবাভ্যাং যদবিমুক্তং ততো বিদুঃ ॥ অবিমুক্তং তদারভ্য ক্ষেত্রমেতদুদীর্য্যতে। অস্যানন্দবনং নাম পুরা কারি পিনাকিনা। ক্ষেত্রস্যানন্দহেতুত্বাদবিমুক্তমনন্তরং ॥ আনন্দকন্দবীজানামঙ্কুরাণি যত স্ততঃ। জ্ঞেয়ানি সর্ব্বলিঙ্গানি তস্মিন্নানন্দকাননে ॥ অবিমুক্তমিতি খ্যাতমাসীদিত্থং ঘটোদ্ভব। ইতি কাশীখণ্ডে ২৬ অধ্যায়ঃ॥

অবিমুক্তঃ (পুং) বারাণসীক্ষেত্রং। ইতি কাশাখণ্ডে। অত্যক্তে ত্রি ॥

অবিরতং (ক্লী) সততং। অনবরতং। তদ্বতি ত্রি। ইত্যমরঃ॥

অবিরলং (ত্রি) বিরলত্বরহিতং। তৎপর্য্যায়ঃ। নিবিরীশং২ ঘনং৩ নিবিড়ং ৪ নিরন্তরং৫ সান্দ্রং ৬ নীরন্ধ্রং৭ বহলং ৮ দৃঢ়ং ৯ গাঢ়ং ১০। ইতি হেমচন্দ্রঃ॥

অবিরোধঃ (পুং) বিরোধাভাবঃ। যথা। শ্রুতিস্মৃতিবিরোধে তু শ্রুতিরেব গরীয়সী। অবিরোধে সদা কার্য্যং স্মার্ত্তং বৈদিকবৎ সতা ॥ ইতি শ্রাদ্ধতত্ত্বধৃতজাবালবচনং ॥ অপিচ। অপসর্পন্তু তে ভূতা যে ভূতা ভূমিপালকাঃ। ভূতানামবিরোধেন পূজাকর্ম্ম করোম্যহং ॥ ইত্যাহ্নিকতত্ত্বং ॥

অবিলম্বনং (ক্লী) শীঘ্রং। অবিলম্বিতং। ইতি রায়মুকুটঃ ॥

অবিলম্বিতং (ক্লী) বিলম্বাভাবঃ। তৎপর্য্যায়ঃ। শীঘ্রং২ ত্বরিতং৩ লঘু ৪ ক্ষিপ্রং৫ অরং৬ দ্রুতং ৭ সত্বরং ৮ চপলং ৯ তূর্ণং ১০ আশু ১১। ইত্যমরঃ॥

অবিলম্বিতঃ (ত্রি) ত্বরাযুক্তঃ। তৎপর্য্যায়ঃ। উচ্চণ্ডঃ ২। ইত্যমরঃ॥ অবলম্বিতং ৩। যথা। অবিলম্বিতমুচ্চণ্ডং কেপ্যাহু রবলম্বিতং। ইতি জটাধরঃ॥

অবিলা (স্ত্রী) মেষী। ভেড়ী। ইতি হেমচন্দ্রঃ॥

অবিবাদঃ (পুং) বিবাদাভাবঃ। যথা। যমো বৈবস্বতো দেবো য স্তবৈষ হৃদি স্থিতঃ। তেন চেদবিবাদ স্তে মা গঙ্গাং মা কুরূন্ গমঃ॥ ইতি মানবে ৮ অধ্যায়ে ৯২ শ্লোকঃ॥

অবিবাদী [ন্] (ত্রি) বিবাদরহিতঃ। নির্ব্বিবাদী। নঞ্ পূর্ব্ববিবাদশব্দাদিন্প্রত্যয়েন নিষ্পন্নঃ॥

অবিবাহিতঃ (পুং স্ত্রী) অনূঢ়ঃ। অকৃতোদ্বাহঃ। অকৃতোপযমঃ। অপরিনীতঃ। অকৃতপাণিগ্রহঃ। আইবড় ইতি ভাষা। নঞ্পূর্ব্ববিবাহশব্দাদিতপ্রত্যয়েন নিষ্পন্নঃ॥

অবিবাহ্যা (স্ত্রী) বিবাহানর্হা। যথা। সুমন্তুঃ। মাতৃপিতৃসম্বন্ধা আসপ্তমাদবিবাহ্যাঃ কন্যা ভবন্তি। আপঞ্চমাদন্যেষাং মতং। নারদোঽপি। আসপ্তমাৎ পঞ্চমাচ্চ বন্ধুভ্যঃ পিতৃমাতৃতঃ। অবিবাহ্যা সগোত্রা চ সমানপ্রবরা তথা॥ সপ্তমে পঞ্চমে বাপি যেষাং বৈবাহিকী ক্রিয়া। তে চ সন্তানিনঃ সর্ব্বে পতিতাঃ শূদ্রতাং গতাঃ॥ *॥ সর্ব্বাঃ পিতৃপত্ন্যো মাতর স্তদ্ভ্রাতরো মাতুলা স্তদ্দুহিতরো ভগিন্য স্তদপত্যানি ভাগিনেয়ানি তা শ্চাবিবাহ্যাঃ অন্যথা সঙ্করকারিণ্য স্তথাধ্যাপয়িতু রেতদেবেতি। তাশ্চ যথা। পিতৃপিতামহাদীনাং সপ্তানাং সন্ততিঃ সপ্তমীপর্য্যন্তা নোদ্বাহ্যা। এবং পিতৃবন্ধুপ্রভৃতিসম্বন্ধঘটকানাং সপ্তানাং সন্ততিঃ সপ্তমীপর্য্যন্তা নোদ্বাহ্যা। এবং মাতামহপ্রমাতামহাদীনাং পঞ্চানাং সন্ততিঃ পঞ্চমীপর্য্যন্তা নোদ্বাহ্যা। এবং মাতৃবন্ধুপ্রভৃতিসম্বন্ধঘটকানাং পঞ্চানাং সন্ততিঃ পঞ্চমীপর্য্যন্তা নোদ্বাহ্যা। বন্ধুতন্মাত্রো রসত্বেঽপি পিতৃমাতামহমাতৃমাতামহপ্রভৃত্যুপরিতনানাং পঞ্চানাং ত্রয়াণাং সপ্তমী পঞ্চমীপর্য্যন্তা নোদ্বাহ্যেতি। এবঞ্চ পিতু র্ম্মাতুশ্চ মাতামহকন্যান্তরসত্বে তামাদায় সপ্তমী পঞ্চমীপর্য্যন্তায়াঃ পরীহারঃ। এবং বন্ধ ন্তরেঽপ্যূহ্যং। বন্ধ্বপেক্ষয়া ত্রিগোত্রগণনং পরতঃ সর্ব্বত্র। পূর্ব্বতস্ত পিতু র্ম্মাতুশ্চ মাতুলপুত্ররূপবন্ধো রপি স্বাপেক্ষয়া অন্যেষাং বন্ধূনাং মাতামহগোত্রাপেক্ষয়া ত্রিগোত্রগণনং সর্ব্বসামঞ্জস্যং স্যাৎ। অন্যথা পিতুঃ পিতামহদৌহিত্রীকন্যায়াঃ পিতামহভগিনীপুত্রবন্ধপেক্ষয়া ত্রিগোত্রাৎ পরায়া বিবাহঃ প্রসজ্যেত স চাযুক্তঃ পিতৃগোত্রাপেক্ষয়া তস্যা স্ত্রিগোত্রমধ্যবর্ত্তিত্বাৎ। এবং পিতুঃ প্রমাতামহদৌহিত্রীকন্যায়াঃ পিতামহীভগিনীপুত্রবন্ধপেক্ষয়া ত্রিগোত্রাৎ পরায়া বিবাহঃ প্রসজ্যেত স চাপ্যযুক্তঃ পিতামহীভ্রাতৃপুত্রবন্ধপেক্ষয়া তস্যা স্ত্রিগোত্রমধ্যবর্ত্তিত্বাৎ। এবং মাতুঃ প্রপিতামহদৌহিত্রীকন্যায়া মাতামহভগিনীপুত্রবন্ধপে-

ক্ষয়া ত্রিগোত্রাৎ পরায়া বিবাহঃ প্রসজ্যেত স চাযুক্তঃ বরস্য মাতামহাপেক্ষয়া তস্যা স্ত্রিগোত্রমধ্যবর্ত্তিত্বাৎ। এবং মাতুঃ প্রমাতামহদৌহিত্রীকন্যায়া মাতামহীভগিনীপুত্রবন্ধপেক্ষয়া ত্রিগোত্রাৎ পরায়া বিবাহঃ প্রসজ্যেত স চাযুক্তঃ। মাতামহীভ্রাতৃপুত্রবন্ধপেক্ষয়া তস্যা স্ত্রিগোত্রমধ্যবর্ত্তিত্বাৎ। ইতি। এবং মাতৃসপত্নীভ্রাতৃসন্ততিঃ পিতৃমাতৃসগোত্রাদয়োঽপ্যবিবাহ্যাঃ ॥ * ॥ অসবর্ণায়া অবিবাহ্যত্বং যথা। কলৌ ত্বসবর্ণায়া অবিবাহ্যত্বমাহ বৃহন্নারদীয়ং। সমুদ্রযাত্রাস্বীকারঃ কমণ্ডলুবিধারণং। দ্বিজানামসবর্ণাসু কন্যাসূপযম স্তথা। ইত্যাদি। ইত্যুদ্বাহতত্ত্বং ॥

অবিবেকঃ (পুং) সদসদ্বিবেচনারাহিত্যং। তদ্বতি ত্রি। যথা। দেহাত্মনো রবিবেকাদস্যৈবং শোকো ভবতীতি তদ্বিবেকপ্রদর্শনার্থং শ্রীভগবানুবাচ অশোচ্যানিত্যাদি। ইতি শ্রীভগবদ্গীতা ২ অধ্যায়স্য ১১ শ্লোকটীকা ॥ তদ্বতি ত্রি ॥

অবিবেকী [ন্] (ত্রি) বিবেকশূন্যঃ। অবিবেচকঃ। যথা। তস্মাদবিবেকিনঃ সুখমাত্রলিপ্সবো নাত্রাধিকারিণঃ। ইতি মুক্তিবাদস্য গাদাধরীটীকা। অপিচ। অস্মিন্ প্রসন্নে দেবেন্দ্রে পরমং ধাম লভ্যতে। ময়া বিবেকিনা তস্য হৃদয়ে জনিতা ব্যথা ॥ সর্ব্বপাপহরো বিষ্ণুঃ স ময়া ব্যথিতঃ কৃতঃ। ইতি পাদ্মে ক্রিয়াযোগসারে ১১ অধ্যায়ঃ ॥

অবিবেচকঃ (ত্রি) বিবেচনারহিতঃ। অবিবেকী। ন বিবেচকঃ অবিবেচকঃ ইতি নঞ্‌সমাসনিষ্পন্নঃ ॥

অবিশেষঃ (ত্রি) বিশেষরহিতঃ। অভেদঃ। তুল্যঃ। বিশেষাভাবে পুং॥ বিশেষাভাবঃ। যথা। পিতরো যত্র পূজ্যন্তে তত্র মাতামহা ধ্রুবং। অবিশেষেণ কর্ত্তব্যং বিশেষান্নরকং ব্রজেৎ ॥ ইতি শ্রাদ্ধতত্ত্বং ॥

অবিশ্বস্তঃ (ত্রি) বিশ্বাসানর্হঃ। অকৃতবিশ্বাসঃ। প্রত্যয়াযোগ্যঃ। যথা। ন বিশ্বসেদবিশ্বস্তে বিশ্বস্তে নাতিবিশ্বসেৎ। বিশ্বাসাৎ ভয়মুৎপন্নং মূলান্যপি নিকৃন্ততি ॥ ইতি চাণক্যং ॥

অবিশ্বাসা (স্ত্রী) চিরপ্রসূতাগৌঃ। কেলেনগাই ইতিভাষা। ইতি শব্দচন্দ্রিকা ॥

অবিশ্রান্তঃ (ত্রি) বিশ্রামরহিতঃ। বিশ্রান্তিশূন্যঃ। অনবরতে ক্লী। বিপূর্ব্বশ্রমধাতোঃ ক্তপ্রত্যয়ানন্তরং নঞ্‌সমাসনিষ্পন্নঃ ॥

অবিশ্রামং (ক্লী) বিশ্রামরাহিত্যং। যথা। অবিশ্রামং বহেৎ ভারং শীতোষ্ণঞ্চ ন বিন্দতি। সসন্তোষ স্তথা নিত্যং ত্রীণি শিক্ষেত গর্দ্দভাৎ ॥ ইতি চাণক্যং ॥

অবিষঃ (পুং) সমুদ্রঃ। ইতি কাতন্ত্রীয়োণাদিবৃত্তিঃ। বিষশূন্যে ত্রি ॥

অবিষা (স্ত্রী) নির্ব্বিষাতৃণং। ইতি রাজনির্ঘণ্টঃ ॥

অবিষী (স্ত্রী) নদী। ইত্যুণাদিবৃত্তাবুজ্জলদত্তঃ ॥

অবিসোঢ়ং (ক্লী) মেষদুগ্ধং। ইতি হেমচন্দ্রঃ ॥

অবিস্পষ্টং (ক্লী) অস্পষ্টবাক্যং। তৎপর্য্যায়ঃ। ম্লিষ্টং ২। ইত্যমরঃ ॥

অবী (স্ত্রী) ঋতুমতী। ইতি হেমচন্দ্রঃ ॥

অবীচিঃ ( পুং ) নরকবিশেষঃ। ইতি শব্দ-রত্নাবলী ॥ বাচ্যলিঙ্গস্তু তরঙ্গশূন্যে ॥

অবীচিঃ পুং ) নরকবিশেষঃ। যথা। বৈত-
অবীচিমৎ ক্লী ) রণী পূয়োদঃ প্রাণরোধো বিশসনং লালাভক্ষঃ সারমেয়াদনমবীচি রয়ঃপানমিতি। য স্ত্বিহ বা অনৃতং বদতি সাক্ষ্যে দ্রব্যবিনিময়ে দানে বা কথঞ্চিৎ স বৈ প্রেত্য নরকে অবীচিমত্যধঃশিরা নিরবকাশে যোজনশতোচ্ছ্রায়াৎ গিরিমূর্দ্ধ্নঃ সংপাত্যতে। যত্র জলমিব স্থলমশ্মপৃষ্ঠমভাসতে তদবীচিমৎতিলশো বিশীর্য্যমাণশরীরো ন ম্রিয়মাণঃ পুনরারোপিতো নিপততি। ইতি শ্রীভাগবতে ৫ স্কন্ধে ২৬ অধ্যায়ঃ ॥

অবীচিময়ঃ ( পুং ) নরকভেদঃ। যঃ সাক্ষ্যাদৌ অনৃতং বদতি স নিরবলম্বেঽবীচিময়ে অধঃশিরা নিপাত্যতে যত্র। ইতি শ্রীভাগবতে ॥

অবীরঃ ( ত্রি ) সত্ত্বরহিতঃ। নির্ব্বীর্য্যঃ। ইতি মেদিনী ॥

অবীরা (স্ত্রী) অজাতাপত্যবিধবা। ইতি স্মৃতিঃ। নিষ্পতিসুতা। ইত্যমরমেদিন্যৌ ॥ তদন্নভোজনে দোষপ্রায়শ্চিত্তে যথা। যো বিপ্রোঽবীরান্নভোজী ঋতুস্নাতান্নভোজকঃ। ভগজীবী বার্দ্ধুষিকো বিষহীনো যথোরগঃ ॥ ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ২১ অধ্যায়ঃ ॥*॥ অপিচ। অবীরান্নঞ্চ যো ভুঙ্‌ক্তে যোনিজীবী চ ব্রাহ্মণঃ। য স্ত্রিসন্ধ্যাবিহীনশ্চ স গোহত্যাং লভেৎ ধ্রুবং ॥ ইতি চ তত্রৈব ২৭ অধ্যায়ঃ ॥ * ॥ বিষ্ণুঃ। গণিকা স্তেন গায়নকান্নানি ভুক্ত্বা সপ্তরাত্রং পয়সা বর্ত্তেত। অবীরাস্ত্রীস্বর্ণকারসংসর্গপতিতানাঞ্চ। ইতি প্রায়শ্চিত্তবিবেকঃ ॥ * ॥ সামান্যেনাভোজ্যান্নভোজনপ্রকরণে মনুঃ। নাশ্রোত্রিয়হুতে যজ্ঞে গ্রামযাজিহুতে তথা। ইত্যাদি। অনর্চ্চিতং বৃথামাংসমবীরায়াশ্চ যোষিতঃ। ইত্যাদিকঞ্চোপক্রম্য ভুক্ত্বা চান্যতমস্যান্নমমত্যা ক্ষপণং ত্র্যহং। মত্যা ভুক্ত্বা চরেৎ কৃচ্ছ্রং রেতো বিণ্মূত্রমেব চ ॥ ইতি। অবীরা পতিপুত্রবিহীনা নিঃসম্বন্ধিনী। স্বসম্বন্ধিন্যাস্তু শ্রাদ্ধাদিনাভ্যনুজ্ঞানাৎ ব্যবহারাৎ ধনাধিকারাচ্চ। ইতি চ প্রায়শ্চিত্তবিবেকঃ ॥ * ॥ অস্যা ধনাধিকারো যথা। যাজ্ঞবল্ক্যঃ। পত্নী দুহিতরশ্চৈব পিতরৌ ভ্রাতর স্তথা। তৎসুতো গোত্রজো বন্ধুঃ শিষ্যঃ সব্রহ্মচারিণঃ ॥ এষামভাবে পূর্ব্বস্য ধনভাগুত্তরোত্তরঃ। স্বর্যাতস্য হ্যপুত্রস্য সর্ব্ববর্ণেষ্বয়ং বিধিঃ ॥ তথা বিষ্ণুঃ। অপুত্রস্য ধনং পত্ন্যভিগামি তদভাবে দুহিতৃগামি। ইত্যাদি। তেন প্রপৌত্রপর্য্যন্তানামভাবে পত্নী ধনাধিকারিণী। যথা কাত্যায়নঃ। ভর্ত্তৃদায়ং মৃতে পত্যৌ বিন্যসেৎ স্ত্রী যথেষ্টতঃ। বিদ্যমানে তু সংরক্ষেৎ ক্ষপয়েৎ তৎকুলেঽন্যথা ॥ অপুত্রা শয়নং ভর্ত্তুঃ পালয়ন্তী ব্রতে স্থিতা। ভুঞ্জীতামরণাৎ ক্ষান্তা দায়াদা ঊর্দ্ধমাপ্নুয়ুঃ ॥ যথেষ্টেত ইতি ধর্ম্মার্থং। তথা চ ব্যাসঃ। লোকান্তরস্থং ভর্ত্তারমাত্মানঞ্চ বরাননে। তারয়ত্যুভয়ং নারী নিত্যং ধর্ম্মপরায়ণা ॥

মদনপারিজাতধৃতা স্মৃতিঃ। যদ্যদিষ্টতমং লোকে যদ্যৎ পত্যুঃ সমীহিতং। তত্তদ্‌গুণবতে দেয়ং পতিপ্রীণনকাম্যয়া॥ ভর্ত্তুঃ শয়নং পালয়ন্তী নান্যগামিনী। অতএব হরিবংশীয়পুণ্যকব্রতোপাখ্যানে। দানোপবাসপুণ্যানি স্বকৃতান্যপ্যরুন্ধতি। নিষ্ফলান্যসতীনাং হি পুণ্যকানি তথা শুভে॥ তথা বৃহন্মনুঃ। অপুত্রা শয়নং ভর্ত্তুঃ পালয়ন্তী ব্রতে স্থিতা। পত্ন্যেব দদ্যাৎ তৎপিণ্ডং কৃৎস্নমংশং লভেত চ। তৎপিণ্ডমিত্যত্র তদিত্যনুষজ্যতে। তচ্ছব্দেন ভর্ত্তুঃ পরামর্শাৎ ভর্ত্তুঃ কৃৎস্নমংশং যাবদংশং হরেৎ ন তু বর্ত্তনোচিতমাত্রং। ইতি দায়তত্ত্বং॥ *॥ অস্যাঃ পতিশ্রাদ্ধাধিকারো যথা। পুত্রপৌত্রপ্রপৌত্রাভাবে পত্নী। তথা চ শঙ্খঃ। পিতুঃ পুত্রেণ কর্ত্তব্যা পিণ্ডদানোদকক্রিয়া। তদভাবে তু পত্নী স্যাৎ তদভাবে সহোদরঃ। ভার্য্যাপিণ্ডং পতির্দদ্যাৎ ভর্ত্রে ভার্য্যা তথৈব চ। শ্বশ্র্বাদেশ্চ স্নুষা চৈব তদভাবে দ্বিজোত্তমঃ। ইত্যাদি॥ অপুত্রা স্ত্রী যথা পুত্রঃ পুত্রবত্যপি ভর্ত্তরি। পিণ্ডং দদ্যাৎ জলঞ্চৈব জলমাত্রন্তু পুত্রিণী॥ ইতি নির্মূলং সমূলত্বেঽপি বালদেশান্তরিতপুত্রসদ্ভাববিষয়মিতি শ্রাদ্ধবিবেকপ্রভৃতয়ঃ। ইতি॥*॥ অস্যা ভর্ত্রাদিতর্পণাধিকারো যথা স্মৃতিঃ। তর্পণং প্রত্যহং কার্য্যং ভর্ত্তুঃ কুশতিলোদকৈঃ॥ তৎপিতুস্তৎপিতুশ্চাপি নামগোত্রাদিপূর্ব্বকং॥ এতত্তু তর্পণং পুত্রপৌত্রাদ্যভাববিষয়মিতি মদনপারিজাতঃ। ইতি॥*॥ মৃতায়া স্তস্যা আদ্যশ্রাদ্ধাদি পঞ্চদশশ্রাদ্ধং কর্ত্তব্যং ন তু সপিণ্ডনং। যথা। অত্র সপত্নীপুত্রস্য পুত্রত্বাতিদেশাৎ তৎসত্ত্বেঽপি স্ত্রীণাং সপিণ্ডনং মৈথিলৈ রুক্তং তন্ন। পুত্রেণৈব তু কর্ত্তব্যং সপিণ্ডীকরণং স্ত্রিয়াঃ। পুরুষস্য পুন স্ত্বন্যে ভ্রাতৃপুত্রাদয়োঽপি যে॥ ইতি লঘুহারীতবচনে এবকারেণ অতিদিষ্টপুত্রনিষেধাৎ। পুত্রেণেতি তৎসত্ত্বমাত্রবিবক্ষিতং। সপিণ্ডীকরণং তাসাং পুত্রাভাবে ন বিদ্যতে। ইতি মার্কণ্ডেয়পুরাণৈকবাক্যত্বাৎ। যানি পঞ্চদশাদ্যানি অপুত্রস্যেতরাণি চ। একস্যৈব তু দাতব্যমপুত্রায়াশ্চ যোষিতঃ॥ ইতি ছন্দোগপরিশিষ্টেন আদ্যপঞ্চদশশ্রাদ্ধৈঃ প্রেতত্বপরীহারোক্তত্বাচ্চ। এতৎপত্যুরভাবে দ্রষ্টব্যং। ততশ্চ শিশৌ পুত্রে অন্যেনাপি সপিণ্ড্যতে। এবং পতিসত্ত্বেঽপি। অতএব মৈথিলৈ রবীরায়াঃ সপিণ্ডনং নাস্তীত্যুক্তং। ইতি চ শুদ্ধিতত্ত্বং॥

অবেদ্যঃ (পুং) গোবৎসকঃ। বাছুর ইতি ভাষা। ইতি শব্দচন্দ্রিকা॥ অজ্ঞেয়ে ত্রি॥

অবেলঃ (পুং) অপলাপঃ। অপহ্নবঃ। ইতি মেদিনী॥

অবেলা (স্ত্রী) পূগচর্ব্বিতং। চিবান গুয়া ইতি ভাষা। ইতি মেদিনী॥ অপরাহ্নঃ। ইতি লোকপ্রসিদ্ধং। বেলাশূন্যে ত্রি॥

অবেক্ষণং (ক্লী) অবেক্ষা। দর্শনং। যথা। কৃতাকৃতাবেক্ষণবৎ স্বয়ং তৎকুশোপবেশনস্য কর্ত্তব্যত্বাৎ। ইতি সংস্কারতত্ত্বং॥

অবেক্ষা (স্ত্রী) প্রত্যবেক্ষণং। প্রত্যক্ষদৃষ্টিঃ।

তৎপর্য্যায়ঃ। প্রতিজাগরঃ ২। ইত্যমরঃ ॥

অবেক্ষিতং (ত্রি) দৃষ্টং। যথা মনুঃ। কেশকীটাবপন্নঞ্চ পদা স্পৃষ্টঞ্চ কামতঃ। ভ্রূণঘ্নাবেক্ষিতঞ্চৈব সংস্পৃষ্টঞ্চাপ্যুদক্যয়া ॥ ইত্যাহ্নিকাচারতত্ত্বং ॥

অবৈধং (ত্রি) বিধ্যবিষয়ঃ। বিধিবিবর্জ্জিতং। বিধিপ্রাপ্তভিন্নং ॥

অবোদং (ত্রি) আর্দ্রং। ইতি জটাধরঃ ॥

অবোধঃ (ত্রি) নির্ব্বোধঃ। অজ্ঞানঃ ॥

অবোক্ষণং (ক্লী) প্রোক্ষণবিশেষঃ। ন্যুব্জহস্তেন জলক্ষেপণং। যথা হারীতঃ। তস্মাদদ্ভিরবোক্ষ্যেতদ্দদ্যাদালভ্য এব চ। অবোক্ষ্য প্রোক্ষ্য ইতি রত্নাকরঃ॥ নব্যবর্দ্ধমানধৃতং। উত্তানেন তু হস্তেন প্রোক্ষণং সমুদাহৃতং। ন্যুব্জতাভ্যুক্ষণং প্রোক্তং তিরশ্চাবোক্ষণং স্মৃতং। ইতি শুদ্ধিতত্ত্বং ॥

অব্দঃ (পুং) বৎসরঃ। মেঘঃ। মুস্তা। ইতি রায়মুকুটঃ সারসুন্দরী চ ॥

অব্যক্তঃ (পুং) বিষ্ণুঃ। শিবঃ। কন্দর্পঃ। ইতি মেদিনী ॥ মূর্খঃ। ইতি হেমচন্দ্রঃ ॥ অস্ফুটে ত্রি ॥

অব্যক্তং (ক্লী) প্রকৃতিঃ। আত্মা। ইতি হেমচন্দ্রঃ ॥ মহদাদি। পরমাত্মা। ইতি মেদিনী ॥

অব্যক্তরাগঃ (পুং) ঈষল্লোহিতবর্ণঃ। তৎপর্য্যায়ঃ। অরুণঃ২। ইত্যমরঃ ॥ তাম্রঃ ৩ গৌরঃ ৪। ইতি জটাধরঃ ॥

অব্যঙ্গঃ (ত্রি) ব্যঙ্গরহিতঃ। অবিকলাঙ্গঃ। যথা। তত আহূয় ধর্ম্মজ্ঞং ব্রাহ্মণং বেদপারগং। অব্যঙ্গাবয়বং পূজ্য গন্ধধূপার্চ্চনাদিভিঃ ॥ ইতি মৎস্যপুরাণে ৬৬ অধ্যায়ঃ ॥

অব্যঙ্গা (স্ত্রী) শূকশিম্বী। ইতি কেচিৎ ॥ অমরকোষে অধ্যণ্ডা ইতি তট্টীকায়াং অব্যণ্ডা ইতি চ পাঠঃ ॥ ব্যঙ্গরহিতে অবিকলাঙ্গে চ ত্রি ॥

অব্যঙ্গ্যং (ক্লী) ব্যঙ্গ্যালঙ্কাররহিতকাব্যং। যথা। সব্যঙ্গ্য মুত্তমং কাব্য মব্যঙ্গ্য মধমং স্মৃতং। কিঞ্চিদ্ব্যঙ্গ্যসমাযুক্তং মধ্যমং পরিকীর্ত্তিতং। ইতি কাব্যচন্দ্রিকা ॥

অব্যগ্রনঃ (পুং) শৃঙ্গহীনপশুঃ। ইতি হলায়ুধঃ॥ অস্ফুটে ত্রি ॥

অব্যণ্ডা (স্ত্রী) অধ্যণ্ডা। আলকুশীতি ভাষা। ইতি কুত্রচিদমরকোষে পাঠঃ ॥

অব্যথঃ (ত্রি) পীড়ারহিতঃ। ব্যথাশূন্যঃ। সর্পে পুং। ইতি মেদিনী ॥

অব্যথা (স্ত্রী) হরীতকী। পদ্মচারিণী। ইত্যমরঃ ॥

অব্যথিঃ (পুং) অশ্বঃ। সংগ্রামে ন বিভ্যতীতি অব্যথিঃ। ব্যথ ভয়সঞ্চলনয়োঃ সর্ব্বধাতুভ্য ইতি ইন্ প্রত্যয়ঃ ততো নঞ্ সমাসঃ। বেদপ্রয়োগোঽয়ং ॥

অব্যথিষঃ (পুং) সমুদ্রঃ। সূর্য্যঃ। ইতি সিদ্ধান্তকৌমুদ্যা উণাদিবৃত্তিঃ ॥

অব্যথিষী (স্ত্রী) পৃথিবী। অর্দ্ধরাত্রং। ইতি সিদ্ধান্তকৌমুদী ॥

অব্যথ্যঃ (ত্রি) ব্যথাশূন্যঃ। ইতি পাণিনিঃ ॥

অব্যয়ং (ক্লী পুং) শব্দবিশেষঃ। তৎপরে বিভক্তি র্ন তিষ্ঠতি অতএব লিঙ্গত্রয়াবিকৃতং।

তথাচ কাতন্ত্রে। সদৃশং ত্রিষু লিঙ্গেষু সর্ব্বাসু চ বিভক্তিষু। বচনেষু চ সর্ব্বেষু যন্ন ব্যেতি তদব্যয়ং ॥

অব্যয়ঃ ( পুং ) বিষ্ণুঃ। ব্যয়রহিতে ত্রি। ইতি মেদিনী ॥

অব্যর্থঃ ( ত্রি ) অমোঘঃ। সফলঃ। যথা। দুর্নি-বার্য্যঞ্চ দুর্দ্ধর্ষমব্যর্থংবৈরিঘাতকং। তেজসা চক্রতুল্যঞ্চ সর্ব্বশস্ত্রাস্ত্রঘাতকং ॥ ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ১৮ অধ্যায়ঃ ॥

অব্যবসায়বান্ [ ৎ ] ( ত্রি ) ব্যবসায়রহিতঃ। অব্যবসায়ী। তৎপর্য্যায়ঃ। শিঙ্কুঃ ২। ইতি ত্রিকাণ্ডশেষঃ ॥

অব্যবস্থা ( স্ত্রী ) অবসিদ্ধান্তঃ। অবিধিঃ। শাস্ত্র-বিরুদ্ধব্যবস্থা। ইতি নঞ্ সমাসনিষ্পন্না ॥

অব্যবস্থিতঃ (ত্রি) নীতিশাস্ত্রাদিব্যবস্থানভিজ্ঞঃ। সিদ্ধান্তরহিতঃ। যথা। কচিদ্রুষ্টঃ কচিত্তু-ষ্টো রুষ্ট স্তুষ্টঃ ক্ষণে ক্ষণে। অব্যবস্থিত-চিত্তস্য প্রসাদোঽপি ভয়ঙ্করঃ ॥ ইতি হিতোপদেশঃ ॥

অব্যবহার্য্যং ( ত্রি ) ব্যবহারাযোগ্যং। অব্যব-হরণীয়ং। যথা। জ্ঞানত শ্চাণ্ডালান্ত্যস্ত্রী-গমনে তত্তুল্যতয়া দ্বিগুণব্রতাচরণে কৃতেঽপি ন ব্যবহার্য্যঃ। যথা যাজ্ঞবল্ক্যঃ। প্রায়শ্চিত্তৈ রপৈত্যেনো যদজ্ঞানকৃতং ভবেৎ। কামতোঽব্যবহার্য্যস্ত বচনাদিহ জায়তে ॥ পাপান্তরেঽপ্যব্যবহার্য্যত্বং যাজ্ঞ-বল্ক্যোক্তং। শরণাগতবালস্ত্রীহিংসকান্ সংবসেন্ন তু। চীর্ণব্রতানপি সদা কৃতঘ্ন-সহিতানিমান্ ॥ অত্র চ কামতো মহাপাত-কাদিবৃহৎপাপকর্ত্তু রব্যবহার্য্যত্বদর্শনাৎ কামতো বহুতরগুণযুক্তশরণাগতাদিহন্তৄণা মব্যবহার্য্যত্বং নতু হীনতরহন্তৄণাং অন্যথা বিষমশিষ্টতাপত্তিঃ স্যাৎ। ইতি প্রায়-শ্চিত্ততত্ত্বং ॥

অব্যবহিতং (ত্রি) ব্যবধানশূন্যং। তৎপর্য্যায়ঃ। সংসক্তং ২ অপটান্তরং ৩ অপদা-ন্তরং ৪। ইত্যমরঃ ॥ তট্টীকা চ ॥ লগ্নং ৫। ইতি শব্দরত্নাবলী ॥

অব্যবহৃতঃ ( ত্রি ) অকৃতব্যবহারঃ। ইতি নঞ্ সমাসনিষ্পন্নঃ ॥

অব্যাজঃ ( পুং ) ছলাভাবঃ। শাঠ্যং। যথা। ইদং কিলাব্যাজমনোহরং বপুঃ তপঃক্ষমং সাধয়িতুং য ইচ্ছতি। ধ্রুবং স নীলোৎ-পলপত্রধারয়া শমীলতাং ছেত্তুমৃষির্ব্ব্যব-স্যতি। ইত্যভিজ্ঞানশকুন্তলানাটকে ১ অঙ্কঃ ॥ শীঘ্রং। যথা। সেক্তব্যো যদি মারব স্তরু রয়ং পাথোদ পাথোলবৈ রব্যাজং পরিষিঞ্চ কিং চিরয়সে কালঃ পরি-ক্রামতি। মূলে সিক্তরসে দলে বিগলিতে শীর্ণে তথা বল্কলে ন স্যাদস্য পরিস্থিতেঃ প্রভুরহো ধারাপি বারাং তব ॥ ইত্যু-স্তটঃ ॥

অব্যাপ্যং ( ত্রি ) অব্যাপনীয়ং। ব্যাপ্তিরহিতং। অনধীনং। যথা। নাপি সাধ্যব্যাপকাব্যা-প্যত্বেন ব্যাপ্তিবিরহোন্নায়কতয়া সাধ্য-ব্যাপ্যব্যাপকত্বেনোপাধে রেব সাধ্যব্যা-পকত্বসাধনাৎ। তস্মাদুপাধি র্হেত্বাভাসা-ন্তরমিতি। ইত্যুপাধিবাদচিন্তামণিঃ। অপি চ। অব্যাপ্যবৃত্তিক্ষণিকো বিশেষগুণ ইষ্যতে। ইতি ভাষাপরিচ্ছেদঃ ॥

অব্যাপ্যবৃত্তিঃ ( ত্রি ) কিঞ্চিদবচ্ছিন্নবৃত্তিঃ। স্বসমানাধিকরণাভাবপ্রতিযোগাতি যাবৎ। দৈশিককালিকভেদেন স দ্বিবিধঃ। তৎপর্য্যায়ঃ। প্রাদেশিকঃ ২। আত্মনো বিশেষগুণাঃ। বুদ্ধি ১ সুখ ২ দুঃখে ৩ চ্ছা ৪ দ্বেষ ৫ যত্ন ৬ ধর্ম্মা ৭ ধর্ম্ম ৮ ভাবনাখ্যসংস্কারাঃ ৯ আকাশস্য বিশেষগুণঃ। শব্দঃ ১০ সামান্যগুণৌ। সংযোগ ১১ বিভাগৌ ১২ এতে সর্ব্বে অব্যাপ্যবৃত্তয়ঃ স্যুঃ। ইতি ন্যায়ভাষা ॥

অব্যাহতং ( ত্রি ) ব্যাঘাতশূন্যং। যথা। যস্য ত্রিকালমমলং স্তান মব্যাহতং সদা। বেত্তি বিদ্যা মবিদ্যাঞ্চ স বাচ্যো ভগবানিতি ॥ ইতি শব্দমালা ॥ কিঞ্চ। বিষ্ণুপুরাণং। অন্নং বলায় মে ভূমেরপা মগ্ন্যনিলস্য চ। ভবত্বেতৎ পরিণতৌ মমাস্ত্বব্যাহতং সুখং ॥ প্রাণাপানসমানানা মুদানব্যানয়ো স্তথা। অন্নং তুষ্টিকরঞ্চাস্তু মমাস্ত্বব্যাহতং সুখং ॥ ইত্যাহ্নিকাচারতত্ত্বং ॥

অব্যাহৃতঃ ( ত্রি ) অকথিতঃ। ন ব্যাহৃতঃ অব্যাহৃতঃ নঞ্‌ সমাসনিষ্পন্নঃ ॥

অশ ঊ ঙ ন ব্যাপ্তিসংহত্যোঃ। ঊ ঙ অশিষ্যতে অক্ষ্যতে। ন অশ্নোতি। সংহতিঃ সমূহঃ। ইতি দুর্গাদাসঃ ॥

অশ গ ভোজনে। অশ্নাত্যন্নং বুভুক্ষিতঃ। ইতি দুর্গাদাসঃ ॥

অশকুম্ভী ( স্ত্রী ) পানীয়পৃষ্ঠজঃ। পানা ইতি ভাষা। ইতি রত্নমালা ॥

অশক্যং ( ত্রি ) অশকনীয়ং। অসাধ্যং। যথা। অশক্যে অধ্যবসায়ঃ সমর্থনা। ইতি মুগ্ধবোধব্যাকরণং ॥

অশক্তং ( ত্রি ) শক্তিরহিতং। অসমর্থং। যথা। মনুঃ। বিভূয়াদ্বেচ্ছতঃ সর্ব্বান্ জ্যেষ্ঠো ভ্রাতা যথা পিতা। ভ্রাতা শক্তঃ কনিষ্ঠো বা শক্ত্যপেক্ষা কুলে স্থিতিঃ॥ ইতি দায়তত্ত্বং ॥ উপবাসেষ্বশক্তানাং নক্তং ভোজনমিষ্যতে। ইতি তিথ্যাদিতত্ত্বং ॥

অশত্রুঃ ( পুং ) চন্দ্রঃ। ইতি শব্দচন্দ্রিকা ॥ শত্রুরহিতে মিত্রে চ ত্রি ॥

অশনং (ক্লী) ভক্ষণং। অন্নং। ইতি হেমচন্দ্রঃ॥

অশনঃ ( পুং ) অসনবৃক্ষঃ। পীতশালবৃক্ষঃ। ইতি রায়মুকুটঃ ॥

অশনপর্ণী ( স্ত্রী ) বৃক্ষবিশেষঃ। তৎপর্য্যায়ঃ। বাতকঃ ২ শীতলঃ ৩ শীতলবাতকঃ ৪ অসনপর্ণী ৫ সনপর্ণী ৬ শনপর্ণী ৭ শীতঃ ৮ শীতকঃ ৯ অপরাজিতা ১০। মারাটী ইতি খ্যাতা। ইতি শব্দরত্নাবলী ॥

অশনায়া (স্ত্রী) ভোজনেচ্ছা। ক্ষুধা। ইত্যমরঃ ॥

অশনায়িতং ( ত্রি ) ক্ষুধিতং। ইত্যমরঃ ॥

অশনিঃ ( পুং স্ত্রী ) বজ্রং। ইত্যমরঃ। বিদ্যুৎ ॥

অশর্ম্ম [ ন্ ] (ক্লী) কষ্টং। দুঃখং। তদ্বিশিষ্টে ত্রি। ইতি জটাধরঃ ॥

অশাখা ( স্ত্রী ) শূলীতৃণং। ইতি রাজনির্ঘণ্টঃ ॥

অশিতং ( ত্রি ) ভুক্তং। খাদিতং। তৃপ্তং। ইতি হেমচন্দ্রঃ ॥

অশিতঙ্গবীনং ( ত্রি ) আশিতঙ্গবীনং। পূর্ব্বগবাদিচরিতক্ষেত্রাদি। ইত্যমরটীকাসারসুন্দরী ॥

অশিত্রঃ ( ত্রি ) চৌরঃ। ইত্যুণাদিকোষঃ ॥

অশিরং (ক্লী) হীরকং। ইতি রাজনির্ঘণ্টঃ॥
অশিরঃ (পুং) অগ্নিঃ। রাক্ষসঃ। সূর্য্যঃ। ইতি মেদিনী॥
অশিরা (স্ত্রী) অশিররাক্ষসস্ত্রী। ইত্যুণাদিকোষঃ॥
অশিশ্বিকা (স্ত্রী) অনপত্যা। কন্যাপুত্রবিহীনা স্ত্রী। ইতি শব্দরত্নাবলী॥ আঁটকুড়ী ইতি ভাষা॥
অশিশ্বী (স্ত্রী) অশিশ্বিকা। ইত্যমরঃ॥
অশিক্ষিতং (ত্রি) শিক্ষারহিতং। অনিপুণঃ। অনভিজ্ঞঃ। যথা। যত্র সারথেরকৌশল্যাৎ যান মন্যথা গচ্ছতি তত্র হিংসায়াং অশিক্ষিতসারথিনিয়োগাৎস্বামী দ্বিশতং দণ্ডং দাপ্যঃ স্যাৎ ইতি কুল্লূকভট্টব্যাখ্যানাৎ। ইতি প্রায়শ্চিত্ততত্ত্বং॥
অশীতঃ (ত্রি) শীতাভাবযুক্তঃ। যথা। অশীতা স্তরবো মাঘে ফাল্গুনে পশুপক্ষিণৌ। চৈত্রে জলচরাঃ সর্ব্বে বৈশাখে নরবানরৌ॥ ইতি পুরাণং॥
অশীতিঃ (ত্রি) সংখ্যাবিশেষঃ। ৮০ আশী ইতি ভাষা। যথা মনুঃ। অশীতিভাগং গৃহ্লীয়াৎ মাসাৎ বার্দ্ধুষিকঃ শতাৎ। দ্বিকং শতং বা গৃহ্লীয়াৎ সতাং ধর্ম্ম মনুস্মরন্॥ ইত্যাহ্নিকাচারতত্ত্বং॥ অপিচ। অশীতির্যস্য বর্ষাণি বালো বাপ্যূনষোড়শঃ। প্রায়শ্চিত্তার্দ্ধ মর্হন্তি স্ত্রিয়ো রোগিণ এব চ॥ ইতি প্রায়শ্চিত্ততত্ত্বং॥
অশুদ্ধং (ত্রি) অপবিত্রং। অকৃতশোধনং। অশৌচযুক্তং। যথা। শঙ্খঃ। ততঃ শ্রাদ্ধ মশুদ্ধো তু কুর্য্যাদেকাদশে তথা। কর্ত্তুস্তাৎকালিকী শুদ্ধি রশুদ্ধঃ পুন রেব সঃ॥ ইতি। শুদ্ধা ভর্ত্তুশ্চতুর্থেঽহ্নি অশুদ্ধা দৈবপৈত্রয়োঃ দৈবে কর্ম্মণি পৈত্রে চ পঞ্চমে ঽহনি শুদ্ধ্যতি॥ ইতি চ শুদ্ধিতত্ত্বং॥
অশুভং (ক্লী) পাপং। ইতি হেমচন্দ্রঃ॥ অমঙ্গলং। তদযুক্তে ত্রি। যথা। সর্ব্বাশুভানাং পরিমোক্ষকারি সম্পূজনং দেববরস্য বিষ্ণোঃ। ইতি জ্যোতিস্তত্ত্বং॥ অপি চ। মদনপারিজাতধৃতং। অশুভং খঞ্জনং দৃষ্ট্বা দেবব্রাহ্মণপূজনং। দানং কুর্ব্বীত কুর্য্যাচ্চ স্নানং সর্ব্বৌষধীজলৈঃ॥ ইতি তিথ্যাদিতত্ত্বং॥
অশৃতং (ত্রি) অপক্কং। ইতি রত্নমালা॥
অশূন্যশয়নব্রতং (ক্লী) শ্রাবণকৃষ্ণদ্বিতীয়াকর্ত্তব্যব্রতবিশেষঃ। যথা। ব্রহ্মোবাচ। ভগবন্ পুরুষস্যেহ স্ত্রিয়াশ্চ বিরহাদিকং। শোকব্যাধিভয়ং দুঃখং ন ভবেদ্যেন তদ্বদ॥ ভগবানুবাচ। শ্রাবণস্য দ্বিতীয়ায়াং কৃষ্ণায়াং মধুসূদনঃ। ক্ষীরার্ণবে সলক্ষ্মীকঃ সদা বসতি কেশবঃ॥ তস্যাং সংপূজ্য গোবিন্দং সর্ব্বান্ কামান্ সমশ্নুতে। গোভূহিরণ্যদানাদি সপ্তকল্পশতানুগং॥ অশূন্যশয়না নাম দ্বিতীয়া যা প্রকীর্ত্তিতা। তস্যাং সম্পূজয়েদ্বিষ্ণু মেভি র্ম্মন্ত্রৈ র্ব্বিধানতঃ॥ শ্রীবৎসধারিন্ শ্রীকান্ত শ্রীধাম শ্রীপতে ঽব্যয়। গার্হস্থ্যং মা প্রণাশং মে যাতু ধর্ম্মার্থকামদ॥ অগ্নয়ো মা প্রণশ্যন্তু দেবতাঃ পুরুষোত্তম। পিতরো মা প্রণশ্যন্তু মত্তো দাম্পত্যভেদতঃ॥ লক্ষ্ম্যা বিযুজ্যতে দেবো ন কদাচিৎ যথা। ভবান্। তথা কলত্রসম্বন্ধো দেব মা মে

বিযুজ্যতু ॥ লক্ষ্ম্যা ন শূন্যং বরদ যথা তে শয়নং সদা। শয্যা মমাপ্যশূন্যাস্তু তথৈব মধুসূদন ॥ গীতবাদিত্রনির্ঘোষং দেবস্যাগ্রে তু কারয়েৎ। ঘণ্টা ভবেদশক্তস্য সর্ব্ববাদ্যময়ী যতঃ ॥ এবং সম্পূজ্য গোবিন্দমশ্নীয়াত্তৈলবর্জ্জিতং। নক্তমক্ষার লবণং যাবত্তৎ স্যাচ্চতুষ্টয়ং ॥ ততঃ প্রভাতে সংজাতে লক্ষ্মীপতিসমন্বিতাং। দীপান্নভাজনৈ র্যুক্তাং শয্যাং দদ্যাদ্বিলক্ষণাং ॥ পাদুকোপানহচ্ছত্রচামরাসনসংযুতাং। অভীষ্টোপস্করৈ র্যুক্তাং শুক্লপুষ্পাম্বরাবৃতাং ॥ সোপধানকবিশ্রামাং ফলৈ র্নানাবিধৈ র্যুতাং। তথাভরণধান্যৈশ্চ যথাশক্ত্যা সমন্বিতাং ॥ অব্যঙ্গাঙ্গায় বিপ্রায় বৈষ্ণবায় কুটুম্বিনে। দাতব্যা বেদবিদুষে ন বকব্রতিনে কচিৎ ॥ তত্রোপবেশ্য দাম্পত্যমলঙ্কৃত্য বিধানতঃ। পত্ন্যাস্তু ভাজনং দদ্যাৎ ভক্ষ্যভোজ্যসমন্বিতং। ব্রাহ্মণস্যাপি সৌবর্ণী মুপস্করসমন্বিতাং। প্রতিমাং দেবদেবস্য সোদকুম্ভাং নিবেদয়েৎ ॥ এবং যস্তু পুমান্ কুর্য্যাদশূন্যশয়নং হরেঃ। বিত্তশাঠ্যেন রহিতো নারায়ণপরায়ণঃ ॥ ন তস্য পত্ন্যা বিরহঃ কদাচিদপি জায়তে। নারী চাবিধবা ব্রহ্মন্ যাবচ্চন্দ্রার্কতারকং ॥ ন বিরূপং ন শোকার্ত্তং দাম্পত্যং জায়তে কচিৎ। ন পুত্রপশুরত্নানি ক্ষয়ং যান্তি পিতামহ ॥ সপ্তকল্পসহস্রাণি সপ্তকল্পশতানি চ। কুর্ব্বন্নশূন্যশয়নং বিষ্ণুলোকে মহীয়তে ॥ ইতি মৎস্যপুরাণে অশূন্যশয়নব্রতং ৬৭ অধ্যায়ঃ ॥

অশৃতং (ত্রি) অপক্বং ॥ ইতি রত্নমালা ॥

অশেষং (ত্রি) শেষরহিতং। নিঃশেষং ॥ সর্ব্বং। ইত্যমরঃ ॥

অশোকং (ক্লী) পারদং। ইতি মেদিনী ॥ শোকরহিতে ত্রি ॥

অশোকঃ (পুং) স্বনামখ্যাতপুষ্প বৃক্ষবিশেষঃ। তৎপর্য্যায়ঃ। শোকনাশঃ ২ বিশোকঃ ৩ বঞ্জুলদ্রুমঃ ৪ বঞ্জুলঃ ৫ মধুপুষ্পঃ ৬ অপশোকঃ ৭ কঙ্কেল্লিঃ ৮ কেলিকঃ ৯ রক্তপল্লবঃ ১০ চিত্রঃ ১১ বিচিত্রঃ ১২ কর্ণপূরঃ ১৩ সুভগঃ ১৪ দোহলী ১৫ তাম্রপল্লবঃ ১৬ রোগিতরুঃ ১৭ হেমপুষ্পঃ ১৮ রামা ১৯ বামাঙ্ঘ্রিঘাতনঃ ২০ পিণ্ডীপুষ্পঃ ২১ নটঃ ২২ পল্লবদ্রুঃ ২৩। অস্যগুণাঃ শাতলত্বং। হৃদ্যত্বং। পিত্তদাহশ্রমাপহত্বং। গুল্মশূলোদরাধ্মাননাশিত্বং। কৃমিকারকত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ অস্য পর্য্যায়গুণাঃ। অশোকো হেমপুষ্পশ্চ বঞ্জুল স্তাম্রপল্লবঃ। কঙ্কেল্লিঃ পিণ্ডপুষ্পশ্চ গন্ধপুষ্পো নট স্তথা ॥ অশোকঃ শাতল স্তিক্তো গ্রাহী বর্ণ্যঃ কষায়কঃ। দোষাপচীতৃষাদাহকৃমিশোষবিষাস্রজিৎ ॥ ইতি ভাবপ্রকাশঃ ॥ অস্য কলিকাভক্ষণবিধি রশোকাষ্টমীশব্দে দ্রষ্টব্যঃ ॥

অশোকঃ (ত্রি) শোকরহিতঃ। যথা। ত্বামশোক হরাভীষ্ট মধুমাসসমুদ্ভব। পিবামি শোকসন্তপ্তো মামশোকং সদা কুরু ॥ ইতি তিথ্যাদিতত্ত্বং ॥

অশোকরোহিণী (স্ত্রী) কটুরোহিণী। কটকীতি ভাষা। ইত্যমরঃ ॥

অশোকষষ্ঠী ( স্ত্রী ) চৈত্রস্য শুক্লাষষ্ঠী। তস্যাং ষষ্ঠীপূজা যথা। চৈত্রে মাস্যসিতে পক্ষে ষষ্ঠ্যাং ষষ্ঠীং সমর্চ্চয়েৎ। সুখায় পুত্ত্রলাভায় শুক্লপক্ষে তথৈব চ ॥ ইত্যুত্তরকামাখ্যাতন্ত্রে ১১ পটলঃ ॥*॥ প্রসূত্যা দ্বাদশে মাসি সম্পূজ্যাপত্যবৃদ্ধয়ে। সুতে জাতে তথা ষষ্ঠ্যাং ষষ্ঠী দ্বাদশরূপিণী ॥ বৈশাখে চান্দনী ষষ্ঠী জ্যৈষ্ঠে চারণ্যসংজ্ঞিতা। আষাঢ়ে কার্দ্দমী জ্ঞেয়া শ্রাবণে লুণ্ঠনী মতা ॥ ভাদ্রে চপেটী বিখ্যাতা দুর্গাখ্যাশ্বযুজে তথা। নাড্যাখ্যা কার্ত্তিকে মাসি মার্গে মূলকরূপিণী ॥ পৌষে মাস্যন্নরূপা চ শীতলা তপসি স্মৃতা। গোরূপিণী ফাল্গুনে চ চৈত্রেঽশোকা প্রকীর্ত্তিতা ॥ ইতি স্কন্দপুরাণং ॥

অশোকা ( স্ত্রী ) কটুকী। ইত্যমরঃ ॥ অর্হতাং শাসনদেবতাভেদঃ। ইতি হেমচন্দ্রঃ ॥

অশোকারিঃ ( পুং ) কদম্ববৃক্ষঃ। ইতি শব্দচন্দ্রিকা ॥

অশোকাষ্টমী ( স্ত্রী ) চৈত্রমাসীয়শুক্লাষ্টমী। তত্রাষ্টসংখ্যকাশোককলিকাযুক্তজলপানং কর্ত্তব্যং। যথা। অথাশোকাষ্টমী স্কান্দে। মীনে মধৌ শুক্লপক্ষে অশোকাখ্যাং তথাষ্টমীং। পিবেদশোককলিকাঃ স্নায়াল্লৌহিত্যবারিণি ॥ অশোকাখ্যেত্যুপাদানাত্তিথিমাত্রেঽপি তৎপানং। ফলন্তু মন্ত্রলিঙ্গাৎ শোকরাহিত্য মবগন্তব্যং। লৌহিত্যবারিণি ব্রহ্মপুত্রাখ্যনদজলে। পুনর্ব্বসুযোগে তু ফলাধিক্যং। আহ লিঙ্গগরুড়পুরাণয়োঃ। অশোককলিকাশ্চাষ্টৌ যে পিবন্তি পুনর্ব্বসৌ। চৈত্রে মাসি সিতাষ্টম্যাং ন তে শোক মবাপ্নুয়ুঃ ॥ পানমন্ত্রস্তু। ত্বামশোক হরাভীষ্ট মধুমাসসমুদ্ভব। পিবামি শোকসন্তপ্তো মামশোকং সদা কুরু ॥ স্ত্রীশূদ্রকর্ত্তৃকপানেঽপি প্রাগুক্তযুক্তেঃ স্বয়ং মন্ত্রঃ পঠনীয়ঃ। স্ত্রীপক্ষে ঊহোঽপি নাস্তি বিবৃত মেকাদশীতত্ত্বে। অশোকপানন্তু পঞ্চমার্দ্ধপ্রহরব্যাপিন্যামষ্টম্যাংভ্রাতৃদ্বিতীয়োক্তবৎ। ইতি তিথ্যাদিতত্ত্বং ॥ * ॥ অপি চ। অত্র স্রোতোজলে বুধবারে পুনর্ব্বসুনক্ষত্রযুক্তশুক্লাষ্টম্যাং বাজপেয়যজ্ঞজন্যফলসমফলপ্রাপ্তিকামঃ স্নায়াৎ। ব্রহ্মপুত্রে তু সর্ব্বপাপক্ষয়পূর্ব্বকতীর্থস্নানজন্যফলসমফলপ্রাপ্তিকামঃ স্নায়াৎ। স্নানেতিকর্ত্তব্যতাং বিধায়। ওঁ ব্রহ্মপুত্র মহাভাগ সান্তনোঃ কুলনন্দন। অমোঘাগর্ভসংভূত পাপং লৌহিত্য মে হর ॥ ইতি পঠিত্বা স্নায়াৎ। কেবলশুক্লাষ্টম্যাং ব্রহ্মপদগমনফলং। পঞ্চমার্দ্ধপ্রহরব্যাপিন্যাং পুনর্ব্বসুযুক্তায়াং কেবলায়াম্বা শুক্লাষ্টম্যাং শোকরহিতত্বকামঃ অষ্টাবশোককলিকা অহং পিবে ইতি সঙ্কল্প্য ত্বামশোক হরাভীষ্ট মধুমাসসমুদ্ভব। পিবামি শোকসন্তপ্তো মামশোকং সদা কুরু ॥ ইতি পঠিত্বা বিষ্ণুপদজলমিশ্রিতা অশোককলিকা অষ্টৌ পিবেৎ। স্ত্রীশূদ্রানুপনীতৈরপি মন্ত্রঃ পঠনীয়ঃ পৌরাণিকত্বাৎ। স্ত্রীপক্ষে লিঙ্গোহো নাস্তি প্রকৃতেঃ সমবেতার্থত্বাৎ। ইতি কৃত্যতত্ত্বং ॥

অশোচঃ ( পুং ) শোকাভাবঃ। তৎপর্য্যায়ঃ। অনহংকৃতিঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

অশোচ্যং (ত্রি) শোকাযোগ্যং। অশোচনীয় যথা। অশোচ্যানন্বশোচস্ত্বং প্রজ্ঞাবাদাংশ্চ ভাষসে। গতাসূনগতাসূংশ্চ নানুশোচন্তি পণ্ডিতাঃ ॥ ইতি শ্রীভগবদ্গীতায়াং ২ অধ্যায়ে ১১ শ্লোকঃ ॥

অশৌচং (ক্লী) শুচিত্বাভাবঃ। স্মৃতৌ তু। বৈদিককর্ম্মানর্হত্বপ্রযোজকীভূতসংস্কারবিশেষঃ। যথা। বৈদিককর্ম্মানর্হত্বপ্রযোজকসংস্কারবিশেষরূপ মশৌচং। বৈদিককর্ম্মার্হত্বপ্রযোজকসংস্কাররূপং শৌচং। ন চাশৌচাভাব এব শুদ্ধি র্নসংস্কারবিশেষ ইতি বাচ্যং। অঘানাং যৌগপদ্যেত্বিতি ন বর্দ্ধয়েদঘানি ইত্যেতাভ্যামশৌচে পাপপর্য্যায়াঘপদপ্রদর্শনাৎ অশৌচপদস্য যথাভাবরূপত্বং। তথা। দেবাশ্চ পিতর শ্চৈব পুত্রে জাতে দ্বিজন্মনাং। আয়ান্তি তস্মাত্তদহঃ পুণ্যং ষষ্ঠঞ্চ সর্ব্বদা ॥ ইত্যাদিত্যপুরাণীয়েণ শৌচে পুণ্যপদদর্শনাৎ শৌচস্যাপি ভাবরূপতা প্রতীয়তে। ইতি শুদ্ধিতত্ত্বং ॥ * ॥ মন্ত্রদগুরুমরণে অশৌচং যথা। গৃহীতো দেবতা মন্ত্রঃ সাবিত্রীগ্রহণং কৃতং। যস্মাত্তস্য ত্রিরাত্রন্তু ব্রহ্মবিদ্যাগ্রহো যতঃ॥ উপনীয়াধ্যাপকো যস্তস্মিন্নপি ত্রিরাত্রকং। বেদবেদাঙ্গশাস্ত্রাণাং ব্যাখ্যানং শিক্ষিতং যতঃ ॥ জ্ঞানং প্রতিষ্ঠিতং যেন বেদাভ্যাসো যতঃ কৃতঃ। তস্মিন্মৃতে চৈকরাত্রং গুরৌ শিষ্যে তথৈব চ॥ ইতি মৎস্যসূক্তে মহাতন্ত্রে ৩৫ পটলঃ॥ অপি চ। গুরাবুপরতে চৈব ত্র্যহাণি শিষ্যসন্ততৌ। ইতি বিজ্ঞানতন্ত্রং ॥ * ॥ অন্যং পূর্ব্বলিখিতং। বিহিতকর্ম্মবিরোধ্যদৃষ্টবিশেষঃ। তদনেকবিধং তত্র শুদ্ধিতত্ত্বোক্তাশৌচানি সংগৃহ্যন্তে ॥

অথসপিণ্ডাদ্যশৌচং ১॥

জননে মরণে চ সপ্তমপুরুষপর্য্যন্তং সম্পূর্ণাশৌচং। তচ্চ বিপ্রস্য দশাহঃ ক্ষত্রিয়স্য দ্বাদশাহঃ। বৈশ্যস্য পঞ্চদশাহঃ। শূদ্রস্য মাসঃ ॥

জননে মরণে চ দশমপুরুষপর্য্যন্তং সর্ব্বেষাং বর্ণানাং ত্র্যহঃ। চতুর্দ্দশপুরুষপর্য্যন্তং পক্ষিণী ॥

জননে মরণে চ জন্মনামস্মৃতিপর্য্যন্তং সর্ব্ববর্ণানা মেকাহঃ ॥ জন্মনামস্মৃতে রভাবে স্নানমাত্রং ॥

অশৌচং প্রতিকন্যায়া স্ত্রিপুরুষং সাপিণ্ডং॥

মাতামহমরণে সর্ব্বেষাং বর্ণানাং ত্রিরাত্রং ॥

মাতৃস্বস্রীয়পিতৃস্বস্রীয়মাতুলপুত্রভাগিনেয়মরণে সর্ব্ববর্ণানাং পক্ষিণী ॥

পিতামহভগিনীপুত্রপিতামহীভগিনীপুত্রপিতামহীভ্রাতৃপুত্ররূপপিতৃবান্ধবত্রয়মরণে সর্ব্ববর্ণানাং পক্ষিণী ॥

মাতামহভগিনীপুত্রমাতামহীভগিনীপুত্রমাতামহীভ্রাতৃপুত্ররূপমাতৃবান্ধবত্রয়মরণে সর্ব্ববর্ণানা মহোরাত্রং ॥

একগ্রামবাসিস্বগোত্রজমরণে সর্ব্ববর্ণানা মহোরাত্রং ॥

ঔরসব্যতিরিক্তপুত্রজননমরণয়োঃ পরপূর্ব্বভার্য্যাপ্রসবমরণয়োশ্চ সর্ব্ববর্ণানাং ত্রিরাত্রং ॥

আচার্য্যমরণে ব্রাহ্মণাদিবর্ণত্রয়াণাং ত্রিরাত্রং ॥

সমানজাতীয়োৎকৃষ্টজাতীয়পুরুষান্তরসংগৃহীতস্বভার্য্যামরণে সর্ব্বেষাংত্রিরাত্রং ॥

হীনবর্ণোপভুক্তামরণে তু নাশৌচং ॥

ভগিনীপুত্রগৃহে মাতৃস্বসু র্ভ্রাতৃপুত্রগৃহে পিতৃস্বসুঃ পৈতৃস্বস্রীয়গৃহে মাতুলপুত্রস্য জামাতৃগৃহে শ্বশ্রূশ্বশুরয়ো র্ম্মরণে ভগিনীপুত্রাদিচতুর্ণাং ত্রিরাত্রং ॥

শ্বশ্রূশ্বশুরয়োঃ সন্নিধিমরণে সর্ব্ববর্ণানাং ত্রিরাত্রং ॥

শ্বশ্রূশ্বশুরয়োরেক গ্রামস্থিতয়োর্ম্মরণে সর্ব্বেষাং পক্ষিণী ॥

শ্বশ্রূশ্বশুরয়ো র্ভিন্নগ্রামমরণে সর্ব্বেষা মহোরাত্রং ॥

ভগিনীমাতুলানীমাতুলপিতৃস্বসৃমাতৃস্বসৃগুর্ব্বঙ্গনামাতামহীমরণে সর্ব্বেষাং পক্ষিণী।'

আচার্য্যপত্নীপুত্রয়ো রুপাধ্যায়স্য মাতৃবৈমাত্রেয়স্য শ্যালকস্য সহাধ্যায়িনঃ শিষ্যস্য চ মরণে সর্ব্ববর্ণানা মহোরাত্রং ॥

মাতৃস্বসৃপুত্রপিতৃস্বসৃপুত্রমাতুলপুত্ররূপাত্মবান্ধবত্রয়মরণে সর্ব্ববর্ণানাং পক্ষিণী ॥

প্রথম মন্যেনোঢ়া তেনৈব জনিতপুত্রা পুত্রসহিতৈবান্য মাশ্রিতা পশ্চাত্তেনাপি জনিতপুত্রা তয়োঃ পুত্রয়ো র্যথাসম্ভবং প্রসবমরণয়ো র্দ্বিতীয়পুত্রপিতু স্ত্রিরাত্রং। তৎসপিণ্ডানা মেকরাত্রং। তদ্দ্বিতীয়পিতু র্ম্মরণে তথাবিধপুত্রয়ো রপি ত্রিরাত্রং। তথাবিধপুত্রয়োঃ পরস্পরপ্রসবমরণয়ো র্ম্মাতৃজাত্যুক্তাশৌচং ॥

দৌহিত্রমরণে সর্ব্বেষাং বর্ণানাং পক্ষিণী ॥

পিতৃমাতৃমরণে ঊঢ়ানাংকন্যানাংত্রিরাত্রং॥

যদি মাতুলমাতৃস্বসৃপিতৃস্বসৃপ্রভৃতীনাং দহনবহনং করোতি তদা সর্ব্বেষাং বর্ণানাং ত্রিরাত্রং ॥

মাতামহাদীনাং ত্রিরাত্রাভ্যন্তরংমরণশ্রবণে তচ্ছেষেণ শুদ্ধিঃ। তৎকালোত্তরশ্রবণে তু নাশৌচং। কিন্ত্বাচারাৎ স্নানমাত্রং ॥

## অথ বালাদ্যশৌচং ॥২

নবমাদিমাসজাতবালস্যাশৌচকালাভ্যন্তরে মরণে মাতাপিত্রো রস্পৃশ্যত্বমুক্তং তদেব স্বজাত্যুক্তজননাশৌচং ॥ জ্ঞাতীনান্ত্বশৌচং নাস্তি ॥

নবমাদিমাসমৃতজাতয়োঃ কন্যাপুত্রয়োঃ পিত্রাদিসপিণ্ডানাংমাতুশ্চ জননাশৌচং ॥

তচ্চ ব্রাহ্মণানাং দশাহং শূদ্রাণাং মাসঃ ॥

পুত্রজন্মনি পিতুঃ সচেলং স্নানং।'পুত্রমুখদর্শনাৎ পরংপুনঃ সচেলং স্নানং ॥ পুত্রকন্যাজননে ব্রাহ্মণ্যা দশাহানন্তরং লৌকিককর্ম্মাধিকারঃ ॥

পুত্রজননে ব্রাহ্মণ্যা বিংশতিরাত্রোত্তরস্নানাৎ বৈদিককর্ম্মাধিকারঃ ॥

কন্যাজননে ব্রাহ্মণ্যা মাসোত্তরস্নানাৎ বৈদিককর্ম্মাধিকারঃ ॥

শূদ্রায়াঃ কন্যাপুত্রজননে ত্রয়োদশাহোত্তরং লৌকিককর্ম্মাধিকারঃ। বৈদিককর্ম্মণি তু মাসোত্তরস্নানাৎ শুদ্ধিঃ ॥

এতৎ সর্ব্বং কন্যাপুত্রয়ো র্ব্বিদ্যমানত্বে বোধ্যং ॥

জননাশৌচোত্তরং ষণ্মাসাভ্যন্তর মজাতদন্ত-মরণে মাতাপিত্রো রেকাহঃ। সপিণ্ডানাস্তু সদ্যঃশৌচং॥

ষাণ্মাসাভ্যন্তরেঽপি জাতদন্তস্য মরণে মাতাপিত্রো স্ত্র্যহঃ। সপিণ্ডানা মেকাহঃ॥ ষণ্মাসোপরি দ্বিবর্ষপর্য্যন্তং বালকমরণে মাতাপিত্রো স্ত্র্যহঃ। সপিণ্ডানা মকৃতচূড়ে একাহঃ। কৃতচূড়ে ত্র্যহঃ॥

দ্বিবর্ষোপরি মাসত্রয়াধিকষড়্বর্ষপর্য্যন্ত মনু-পনীতবালকস্য মরণে মাতাপিত্রাদিস-পিণ্ডানাং ত্র্যহঃ॥

তন্মধ্যেঽপ্যুপনীতস্য মরণে দশাহঃ। মাস-ত্রয়াধিকষড়্বর্ষোপরি মরণে পিত্রাদিসপি-ণ্ডানাংদশাহঃ॥

শূদ্রস্য ষণ্মাসাভ্যন্তরে অনুৎপন্নদন্তস্য মরণে ত্রিরাত্রং। উৎপন্নদন্তস্য পঞ্চাহঃ॥ ষণ্মাসোপরি দ্বিবর্ষাভ্যন্তরে অকৃতচূড়মরণে পঞ্চাহঃ। তত্রাপি কৃতচূড়মরণে দ্বাদশাহঃ॥ দ্বিবর্ষোপরি ষড়্বর্ষাভ্যন্তরে মরণে দ্বাদ-শাহঃ। অত্রাপি দৈবাৎ কৃতোদ্বাহে মাসো ব্যবহ্রিয়তে॥ ষড়্বর্ষোপরি মাসঃ॥

অথস্ত্র্যশৌচং॥ ৩

কন্যায়া জন্মাবধিদ্বিবর্ষাভ্যন্তরে মরণে সর্ব্ব-বর্ণানাংপিত্রাদিসপিণ্ডানাংসদ্যঃ শৌচং। দ্বিবর্ষোপরি বাগ্দানপর্য্যন্ত মেকাহঃ॥ বাগ্দানোত্তরং বিবাহপর্য্যন্তং কন্যামরণে ভর্ত্কুলে পিতৃকুলে চ ত্রিরাত্রং॥ বিবাহোত্তরং মরণে ভর্ত্কুল এব সম্পূর্ণা-শৌচং॥

দন্তজন্মপর্য্যন্তংভগিনীমরণে সোদরভ্রাতুঃ সদ্যঃ শৌচং॥

চূড়াপর্য্যন্তং ভগিনীমরণে একরাত্রং। বিবাহপর্য্যন্তং ত্রিরাত্রং॥

দত্তকন্যায়াঃ পিতৃগৃহে প্রসবমরণয়োঃ পিত্রোঃ শয়নাসনাদিসংসর্গশূন্যয়ো স্ত্রি-রাত্রং। তথাবিধবন্ধুবর্গাণাং একরাত্রং। তথাবিধসংসর্গিণাস্তু সর্ব্বেষাং পূর্ণাশৌচং॥ এতৎসর্ব্বংসর্ব্ববর্ণসাধারণং॥

অথগর্ত্তস্রাবাশৌচং॥ ৪

ষণ্মাসাভ্যন্তরে গর্ত্তস্রাবে সর্ব্ববর্ণস্ত্রীণা মে-বাশৌচং। তচ্চ লৌকিকবৈদিককর্ম্মণো গর্ত্তমাসসমসংখ্যদিনব্যাপকং॥

দ্বিতীয়মাসাবধিগর্ত্তস্রাবে মাসসমসংখ্যদি-নাধিকা দেকদিনাৎপরং ব্রাহ্মণ্যা বৈদিক-কর্ম্মাধিকারঃ॥ ক্ষত্রিয়ায়া গর্ত্তমাসসম-সংখ্যদিনাধিকাৎ দিনদ্বয়াৎ। বৈশ্যায়া দিনত্রয়াৎ। শূদ্রায়াঃ ষড়্দিনাৎ॥

সপ্তমাষ্টমমাসয়ো গর্ত্তপতনে মাতুঃ সম্পূর্ণা-শৌচং। সগুণসপিণ্ডানাং সদ্যঃ শৌচং। নির্গুণপিত্রাদিসপিণ্ডানা মহোরাত্রং। যথে-ষ্টাচরণশীলানাং সপিণ্ডানাং ত্রিরাত্রং তত্র জাতস্য তদ্দিন এব মরণে এবং জ্ঞেয়ং॥ সপ্তমাষ্টমমাসজাতবালস্য জন্মদ্বিতীয়দি-নাদৌ মরণে নবমাদিমাসজাতবালকমরণ-বদশৌচং। তচ্চ বালাদ্যশৌচে বিবৃতং॥

অথমৃত্যুবিশেষাশৌচং॥৫

শাস্ত্রাননুমতবুদ্ধিপূর্ব্বকাত্মঘাতিনো না-শৌচদাহশ্রাদ্ধাদি॥

শাস্ত্রানুমত্যা অনশনাদিমৃতস্য প্রমাদাদনশনাশনিবহ্নিজলোচ্চদেশপ্রপতনসংগ্রামশৃঙ্গিদংষ্ট্রিনখিব্যালবিষচণ্ডালচৌরহতস্য চ ত্রিরাত্রং ॥

শৃঙ্গ্যাদিভিঃ স্ত্রিয়া চ ক্রীড়াং কুর্ব্বতঃ প্রমদাপ্রমাদমৃতস্য নাশৌচাদি ॥ নাগবিপ্রিয়কারিত্বেন তদ্ধতস্য মরণোদ্দেশ প্রবৃত্তবিদ্যুদ্ধতস্য চৌর্য্যদোষেণ রাজ্ঞা হতস্য কলহং কৃত্বা চাণ্ডালাদ্যৈ রসমানবর্ণৈ র্হতস্য বিপ্রাদে র্ব্যাধিজনকৌষধস্য বিষস্য বহ্নেশ্চ বা দাতু র্ম্মরণে পাষণ্ডাশ্রিতস্য নিত্যং পরাপকারিণঃ ক্রোধাৎ স্বয়ং প্রায়বিষবহ্ন্যাদিশস্ত্রোদ্বন্ধনজলগিরিবৃক্ষপ্রপাতমৃতস্য চর্ম্মাস্থ্যাদিময়পাত্রনির্ম্মাতৃবিপ্রাদে র্ম্মনুষ্যবধস্থানাধিকারিণঃ কণ্ঠদেশোৎপন্নভগরোগস্য পুংকর্ম্মাশক্তনপুংসকস্য ব্রাহ্মণবিষয়াপরাধকরণান্নিহতস্য বুদ্ধিপূর্ব্বকব্রাহ্মণহতস্য চ মহাপাতকিনো গলৎকুষ্ঠিনশ্চ এবংবিধপতিতানাং মরণে চ নদাহাশৌচাদিকং কার্য্যং ॥ তৎকৃত্বা তপ্তকৃচ্ছ্র দ্বয়ং কুর্য্যাৎ ॥

ম্লেচ্ছতস্করাদিভি র্যুদ্ধে স্বাম্যর্থহতবিপ্রাদে র্দাহাশৌচাদিক মস্ত্যেব ॥

কৃতপ্রায়শ্চিত্তগলৎকুষ্ঠিনো দাহাশৌচাদিকং কার্য্যং ॥

শস্ত্রেণাভিমুখহতস্য তু সদ্যঃশৌচং দাহাদি চ ॥

গবার্থে ব্রাহ্মণার্থে বা দণ্ডেন যুদ্ধে হতস্যাহোরাত্র মশৌচং ॥

নৃপতিরহিতযুদ্ধে লগুড়াদিহতস্য পরাঙ্মুখহতস্য চ ত্রিরাত্রাশৌচং ॥

গোবিপ্রপালনেঽভিমুখযুদ্ধহতস্য সদ্যঃশৌচং পরাঙ্মুখহতস্য তু ত্রিরাত্রং ॥

লৌকিকপারিভাষিকোভয়শস্ত্রঘাতেতরক্ষতমরণে সর্ব্ববর্ণানাং সপ্তাহমধ্যে ত্র্যহং সপ্তাহাদূর্দ্ধং সম্পূর্ণাশৌচং ॥

লৌকিকপারিভাষিকশস্ত্রঘাতমরণে ত্র্যহমধ্যে ত্র্যহং ত্র্যহাদূর্দ্ধং প্রকৃতাশৌচং ॥

লৌকিকশস্ত্রঘাতঃ খড়্গশরাদিঘাতঃ॥ পারিভাষিকশস্ত্রঘাতস্তু। পক্ষিমৎস্যমৃগৈ র্যে তু দংষ্ট্রিশৃঙ্গিনখৈ র্হতাঃ। পতনানশনপ্রায়ৈ র্ব্বজ্রাগ্নিবিষবন্ধনৈঃ ॥ মৃতাজলপ্রবেশেন তে বৈ শস্ত্রহতাঃ স্মৃতাঃ ॥ ইতি দেবীপুরাণোক্তঃ ॥

অথ বিদেশস্থাশৌচং ॥ ৬

অশৌচকালাভ্যন্তরে বিদেশস্থজননমরণাশৌচশ্রবণে শেষাহোভিঃ শুদ্ধিঃ ॥

অশৌচকালোত্তরং বিদেশস্থজ্ঞাতিজননশ্রবণেঽশৌচংনাস্ত্যেব। পুত্রজননশ্রবণে তু সচেলস্নানাং শুদ্ধিঃ ॥

সম্পূর্ণাশৌচিমরণে বর্ষাভ্যন্তরশ্রবণে সপিণ্ডানাং ত্রিরাত্রেণ শুদ্ধিঃ। সচেলস্নানাদঙ্গাস্পৃশ্যত্বনিবৃত্তিঃ। বর্ষোত্তরশ্রবণে তু সপিণ্ডানাং স্নানেন শুদ্ধিঃ ॥

মাতৃপিতৃভর্ত্তৃমরণে বর্ষোত্তরশ্রবণে পুত্রপত্ন্যো রেকাহেন শুদ্ধিঃ॥ দ্বিবর্ষোত্তরশ্রবণে স্নানমাত্রং ॥

পূর্ণাশৌচাতিক্রম এব বিদেশস্থমরণাশৌচশ্রবণে ত্র্যহাশৌচং। নখণ্ডাশৌচাতিক্রমে॥ যত্র মরণমাত্রং শ্রুতং বিশিষ্যমাসাদিক মজ্ঞাতং তত্র শ্রবণদিনাবধিস্বজাত্যুক্ত ম-

শৌচং। খণ্ডাশৌচেঽপি মহাগুরুনিপাতে একরাত্রং ॥

অথাশৌচসঙ্করঃ ॥ ৭

জননাশৌচমধ্যে জননাশৌচান্তরপাতে মরণাশৌচমধ্যে মরণাশৌচান্তরপাতে চ পূর্ব্বাশৌচকালেন সর্ব্ববর্ণানাং শুদ্ধিঃ ॥

পূর্ণজননাশৌচান্তদিনে পূর্ণজননাশৌচান্তরপাতে পূর্ণমরণাশৌচান্তদিনে পূর্ণমরণাশৌচান্তরপাতে চ পূর্ণাশৌচান্তিমদিনোত্তরদিনদ্বয়েন শুদ্ধিঃ ॥

পূর্ণজননাশৌচান্তিমদিবসীয়োত্তরপ্রভাতে সূর্য্যোদয়াৎ পূর্ব্বং তৎপাতে সূর্য্যোদয়াবধি দিনত্রয়েণ শুদ্ধিঃ ॥

এবংমরণাশৌচেঽপি ॥

পূর্ব্বোক্তবর্দ্ধিতদিনদ্বয়ত্রয়াভ্যন্তরেঽশৌচান্তরপাতে পূর্ব্বাশৌচকালেন শুদ্ধিঃ ॥

অশৌচত্রিতয়ান্তদিনকৃত্যংক্ষৌরাদিক মেকদৈব। তদ্দ্বিতীয়দিনকৃত্যং শ্রাদ্ধাদিকং তৎপরদিনে ॥

অত্র চ অশৌচান্তিমদিনতৎপ্রভাতয়োঃ স্বপুত্রজননে পিতৃমাতৃভর্তৃমরেণে চ ন দিনদ্বয়ত্রয়বৃদ্ধিঃ। কিন্তু স্বপুত্রজননাবধি পিতৃমাতৃভর্তৃমরণাবধি চ পূর্ণাশৌচং ॥

জ্ঞাতিজননাশৌচপূর্ব্বার্দ্ধে স্বপুত্রজননে জ্ঞাতিজননাশৌচকালেন শুদ্ধিঃ ॥ পরার্দ্ধে চেৎ স্বপুত্রজননাশৌচকালেন শুদ্ধিঃ ॥

জ্ঞাতিমরণাশৌচকালমধ্যে পিতৃমাতৃভর্তৃমরণে পূর্ব্বার্দ্ধে পূর্ব্বাশৌচকালেন পরার্দ্ধে পরাশৌচকালেন শুদ্ধিঃ ॥

স্বপুত্রজননাশৌচান্তিমদিনতৎপ্রভাতয়োর্জ্ঞাতিজননে পিতৃমাতৃভর্তৃমরণাশৌচান্তিমদিনতৎপ্রভাতয়োর্জ্ঞাতিমরণেঽপি ন দিনদ্বয়ত্রয়বৃদ্ধিঃ। কিন্তু পূর্ব্বাশৌচকালেন শুদ্ধিঃ ॥

স্বপুত্রজননাশৌচান্তিমদিনতৎপ্রভাতয়োঃ স্বপুত্রান্তরজননে এবং মাতৃমরণাশৌচান্তিমদিনতৎপ্রভাতয়োঃ পিতৃমরণে পিতৃমরণাশৌচান্তিমদিনতৎপ্রভাতয়োর্ম্মাতৃমরণে চ ক্রমেণ দিনদ্বয়ত্রয়বৃদ্ধিঃ ॥

জননাশৌচদ্বয়সন্নিপাতে পূর্ব্বজাতো যদাশৌচকালাভ্যন্তরে মৃত স্তদা সপিণ্ডানাং সদ্যঃশৌচেন পূর্ব্বাশৌচনাশঃ ॥ তন্নাশাদেব পরার্দ্ধজাতবালস্য মাতৃপিতৃব্যতিরিক্তসপিণ্ডানাং পূর্ব্বার্দ্ধজাতবালস্য মাতাপিত্রাদিসকলসপিণ্ডানাংপরজননাশৌচস্য নিবৃত্তিঃ ॥ পূর্ব্বজাতবালস্য মাতাপিত্রো স্বস্পৃশ্যত্বযুক্তস্বস্বজাত্যুক্তজননাশৌচং ॥

জননাশৌচদ্বয়সন্নিপাতে প্রথমজননাশৌচপূর্ব্বার্দ্ধজাতবালমরণে তন্মাতাপিত্রোঃপূর্ব্বাশৌকালপর্য্যন্তংঅঙ্গাস্পৃশ্যত্বযুক্ত মশৌচং॥ পরার্দ্ধজাতবালমরণেতু তজ্জননাবধি তন্মাতাপিত্রোরঙ্গাস্পৃশ্যত্বযুক্তস্বজাত্যুক্তজননাশৌচং। বিশেষাতিরিক্তসমসংখ্যদিবসীয়জননমরণাশৌচয়োঃ সন্নিপাতে মরণাশৌচকালেন শুদ্ধিঃ। অসমসংখ্যদিবসীয়জননমরণাশৌচয়োঃ সন্নিপাতে তু দীর্ঘাশৌচকালেন শুদ্ধিঃ ॥

শূদ্রেতরায়াঃ পুত্রজননপ্রযুক্তবিংশতিরাত্রাশৌচাভ্যন্তরে পত্যু র্ম্মরণেঽপি পুত্রজননাশৌচকালেন শুদ্ধিঃ ॥

পূর্ব্বোক্তসপিণ্ডদ্বয়জননবর্দ্ধিতাশৌচমধ্যে পিতৃমাতৃভর্ত্তৃমরণেঽপি বর্দ্ধিতসপিণ্ডদ্বয়-জননাশৌচকালেন শুদ্ধিঃ। একাহে পূর্ণাশৌচিসপিণ্ডদ্বয়মরণে যাবদশৌচং তা-বৎ সর্ব্বসপিণ্ডানামস্পৃশ্যত্বং ॥

সকুল্যপর্য্যায়সমানোদকমরণে বিদ্যুদাদি-মরণেঽপি অশৌচং ত্রিরাত্রং। অঙ্গাস্পৃশ্য-ত্ব মেকরাত্রং। তেনৈতৎত্রিরাত্রদ্বয়ং গুরু॥

বিদেশস্থমরণে অর্থাৎ অশৌচমধ্যে অ-শ্রুতসপিণ্ডমরণে ত্রিরাত্রাশৌচং অঙ্গা-স্পৃশ্যত্বস্নানাপনেয়ং। অতস্তল্লঘু। এষাং সন্নিপাতে গুরুণৈব শুদ্ধিঃ ॥

বিদেশমৃতজ্ঞাতিত্রিরাত্রাশৌচস্য লঘুনঃ বিদেশমৃতপিতৃমাতৃভর্ত্তৃ ত্রিরাত্রাশৌচেন শুদ্ধিঃ ॥

তুল্যত্রিরাত্রাশৌচসন্নিপাতে পূর্ব্বেণৈব শুদ্ধিঃ ॥

কন্যাপুত্রযমজোৎপত্তৌ সর্ব্ববর্ণায়া মাতু র্ম্মাসেন শুদ্ধিঃ পিত্রাদিসপিণ্ডানাং স্বজাত্যু-ক্তাশৌচং ॥

তয়ো রশৌচমধ্যে একতরমরণে শূদ্রাভিন্ন-মাতুঃ কন্যামরণাৎ সদ্যঃ শুদ্ধিঃ। ন তু পুত্র-মরণাৎ ॥ পিত্রাদিসপিণ্ডানাস্তু প্রথমজাত-মরণাৎ শুদ্ধিঃ। ন তু পরজাতমরণাৎ ॥ শূদ্রায়া যমজোৎপত্তৌ প্রথমজাতমরণা-শৌচেন শুদ্ধিঃ। ন তু পরজাতমরণাৎ ॥

পিত্রাদিসপিণ্ডানাস্তু প্রথমজাতমরণাৎ শুদ্ধিঃ ন তু পরজাতমরণাৎ ॥

এবমন্যত্তাব্যং সুধীভিঃ ॥

অথ শবানুগমনাদ্যশৌচং ॥ ৮

ব্রাহ্মণশবানুগমনে ব্রাহ্মণস্য সচেলস্নানা-গ্নিস্পর্শঘৃতপ্রাশনৈঃ শুদ্ধিঃ ॥

ক্ষত্রিয়শবানুগমনে ব্রাহ্মণস্য একাহেন শুদ্ধিঃ ॥

বৈশ্যশবানুগমনে ব্রাহ্মণস্য দ্ব্যহেন শুদ্ধিঃ॥

শূদ্রশবানুগমনে ব্রাহ্মণস্য প্রাণায়ামশতেন দিনত্রয়েণ চ শুদ্ধিঃ ॥

প্রমাদাৎ শূদ্রশবানুগমনে ব্রাহ্মণস্য জলাব-গাহনাগ্নিস্পর্শঘৃতপ্রাশনৈঃ শুদ্ধিঃ ॥

অনাথব্রাহ্মণস্য ধর্ম্মবুদ্ধ্যা দহনবহনয়োঃ স্নানঘৃতপ্রাশনাভ্যাং সদ্যঃ শৌচং ॥

লোভেন সজাতীয়দাহে স্বস্বজাত্যুক্তা-শৌচং ॥

অসজাতীয়শবদহনবহনস্পর্শৈঃ শবজাত্যু-ক্তাশৌচ

স্নেহাদসম্বন্ধিদাহকবিপ্রাদে স্তদ্গৃহবাসে ত্রিরাত্রং

অশৌচিকুলান্নভোজনে তত্তুল্যাশৌচং ॥

অশৌচান্নভোজনং বিনা তদ্গৃহবাসে ঽহোরাত্রং ॥

বিশেষবচনাভাবে সম্বন্ধিনো মাতুলাদে রস্নেহেনাপি দাহে ত্রিরাত্রং ॥

চিতাধূমসেবনে স্নানাৎ শুদ্ধিঃ ॥

শূদ্রে মৃতে ঽস্থিসঞ্চয়নকালাভ্যন্তরে তদ্-গৃহং গত্বাশ্রুনিপাতনে বিপ্রস্য ত্রিরাত্রং ॥ স্থানান্তরে ঽশ্রুপাতনেঽহোরাত্রং ॥

শূদ্রে মৃতেঽস্থিসঞ্চয়নকালাদূর্দ্ধং মাসাভ্য-ন্তরে তদ্গৃহেঽশ্রুপাতনে বিপ্রস্যাহো-রাত্রং সচেলস্নানঞ্চ ॥

অস্থিসঞ্চয়নাৎ পূর্ব্বং বিপ্রগৃহে রোদনে-বিপ্রস্য একাহেন শুদ্ধিঃ ॥

ক্ষত্রবৈশ্যয়ো র্গৃহে রোদনে বিপ্রস্য দ্ব্যহেন শুদ্ধিঃ ॥

শূদ্রস্তু সর্ব্বত্র রোদনে নক্তেন শুদ্ধঃ ॥

মৃতশূদ্রস্য বান্ধবৈঃ সহ রোদনরহিত বিলাপমাত্রে ব্রাহ্মণস্যাহোরাত্রং ॥

অস্থিসঞ্চয়নকালস্তু পূর্ণাশৌচে ব্রাহ্মণস্য চতুর্থাহঃ। ক্ষত্রিয়স্য ষষ্ঠাহঃ। বৈশ্যস্য অষ্টমাহঃ। শূদ্রস্য দশমাহঃ ॥ ত্র্যহাশৌচে সর্ব্বেষাং দ্বিতীয়াহঃ ॥

পূর্ণাশৌচিমরণে ব্রাহ্মণস্য চতুর্থাহে ঽস্পৃশ্যতানিবৃত্তিঃ ॥ ক্ষত্রিয়স্য ষষ্ঠদিনে। বৈশ্যস্য অষ্টমদিনে। শূদ্রস্য দশমদিনেঽস্পৃশ্যতানিবৃত্তিঃ ॥

সর্ব্বস্য খণ্ডাশৌচে ত্রিভাগকালেনাস্পৃশ্যতানিবৃত্তিঃ ॥

অতীতেঽশৌচে সচেলস্নানেনাস্পৃশ্যতানিবৃত্তিঃ ॥

জননাশৌচে সপিণ্ডানাং অস্পৃশ্যতা নাস্তি ॥

পুত্রোৎপত্তৌ স্নানাং পূর্ব্বং পিতুর্ব্বিমাতৃণাঞ্চাস্পৃশ্যত্বং ॥

সূতিকাস্পর্শে পিতুর্ব্বিমাতৃণাঞ্চ সূতিকাতুল্যকালাস্পৃশ্যত্বং। অন্যেষাং স্নানমাত্রং ॥

কন্যাপুত্রয়ো র্জ্জননে মাতুর্দশরাত্র মস্পৃশ্যত্বং ॥

কন্যাপুত্রয়োর্জ্জননে শূদ্রায়া স্ত্রয়োদশ রাত্র মস্পৃশ্যত্বং ॥

অথ ক্ষতাশৌচং ॥ ৯

নাভেরূর্দ্ধমধো বা রুধিরস্রবে সন্ধ্যাবন্দনাদ্যতিরিক্তকর্ম্মণ্যেকাহঃ ॥

দন্তরক্তস্রবে সর্ব্বত্র কর্ম্মণ্যেকাহঃ ॥

অথ রজস্বলাশৌচং ॥ ১০

তত্র প্রথমদিনাবধি ত্রিরাত্রমশৌচং॥ ত্রিরাত্রাৎ পরং সপ্তদশাহপর্য্যন্তং রজোদর্শনে ঽশৌচাভাবঃ ॥

অষ্টাদশাহে রজোদর্শনে একাহমশৌচং ॥

ঊনবিংশদিনে রজোদর্শনে দ্ব্যহাশৌচং ॥

ঊনবিংশতিদিনাৎ পরং রজোদর্শনে ত্রিরাত্রাশৌচং ॥

রজস্বলা চতুর্থেঽহ্নি ভর্তৃসেবনাদিলৌকিককর্ম্মণি শুদ্ধা। পঞ্চমেঽহনি দৈবপৈত্রকর্ম্মণোঃ শুদ্ধা ॥

রজস্বলায়া অশৌচমধ্যে সূতিকাস্পর্শে অন্ত্যজজাতিস্পর্শে চ ত্রিরাত্রোপবাসেন শুদ্ধিঃ ॥ উপবাসস্তু অশৌচাৎ পরং করণীয়ঃ ॥

ভর্তৃপূরকপিণ্ডদানকালে যদি রজস্বলা ভবতি তদা বস্ত্রং ত্যক্ত্বা পুনঃ স্নাত্বা, পূরকং দদ্যাৎ ॥ কিন্তু শুদ্ধ্যুত্তরাশৌচদিনাসত্ত্বএবায়ং বিধিঃ। তৎ সত্ত্বে তু শুদ্ধয়া ভূত্বা দেয়ং ॥

আব্দিকশ্রাদ্ধকালেঽপুত্রভার্য্যা যদি রজস্বলা ভবতি তদা পঞ্চমে ঽহনি তচ্ছ্রাদ্ধং কুর্য্যাৎ ॥ ইত্যশৌচ ব্যবস্থা সমাপ্তা ॥

অশ্মঃ ( পুং ) পর্ব্বতঃ। মেঘঃ। বৈদিকশব্দোঽয়ং ॥

অশ্মকদলী ( স্ত্রী ) কদলীবিশেষঃ। ইতি রাজ-

নির্ঘণ্টঃ ॥ অস্যা গুণপর্য্যায়ৌ কাষ্ঠকদলী-শব্দে দ্রষ্টব্যৌ ॥

অশ্মকেতুঃ ( স্ত্রী ) ক্ষুদ্রপাষাণভেদা বৃক্ষঃ ॥ ইতি রাজনির্ঘণ্টঃ ॥

অশ্মগর্ভঃ ( পুং ) হরিন্মণিঃ। মরকতং। ইত্যমরঃ ॥

অশ্মঘ্নঃ ( পুং ) পাষাণভেদনবৃক্ষঃ। হাথা-জুড়ী ইতি ভাষা॥ ইতি রাজনির্ঘণ্টঃ॥

অশ্মগর্ভজং ( ক্লী ) মরকতং। পান্না ইতি ভাষা ॥ ইতি রাজনির্ঘণ্টঃ ॥

অশ্মজং (ক্লী) শিলাজতু। ইত্যমরঃ ॥ লোহং ইতি রাজনির্ঘণ্টঃ ॥

অশ্মজতুকং (ক্লী) শিলাজতু। ইতি রাজ-নির্ঘণ্টঃ ॥

অশ্মদারণঃ ( পুং ) টঙ্কঃ। পাষাণবিদার-ণাস্ত্রং। টাঁকী ইতি পশ্চিমদেশে খ্যাতঃ ॥ ইতি জটাধরঃ ॥

অশ্মন্তং ( ক্লী ) চুল্লী। অশুভং। মরণং। অন-বধিঃ। ক্ষেত্রং। ইতি মেদিনী ॥

অশ্মন্তকং ( ক্লী ) চুল্লী। মল্লিকাচ্ছাদনং। দীপাধারাচ্ছাদনং। সেজ আঁধারিয়া ইত্যাদি ভাষা। ইতি মেদিনী ॥

অশ্মন্তকঃ ( পুং ) তৃণবিশেষঃ। অম্লকুচাই ইতিভাষা। তৎপর্য্যায়ঃ। অম্লোটকঃ ২। ইতি রত্নমালা॥ বৃক্ষবিশেষঃ। আবুটা ইতি পশ্চিমদেশে খ্যাতঃ। তৎপর্য্যায়ঃ। ইন্দুকঃ ২ কুরালী৩ অম্লপত্রঃ৪ শ্লক্ষ্ণত্বক্৫ নীলপত্রঃ ৬ যমলপত্রকঃ ৭। অস্য গুণাঃ। মধু-রত্বং।কষায়ত্বং। সুশীতলত্বং।পিত্তপ্রমেহ-বিদাহতৃষ্ণাবিষমজ্বরবিষার্ত্তিচ্ছর্দ্দিভূতনাশি-ত্বঞ্চ ॥ ইতি রাজনির্ঘণ্টঃ ॥

অশ্মপুষ্পং ( ক্লী ) শৈলেয়ং। শৈলজনামগন্ধ-দ্রব্যং। ইত্যমরঃ ॥

অশ্মভালং ( ক্লী ) দ্রব্যচূর্ণার্থলৌহাদিপাত্রং। তৎপর্য্যায়ঃ। লৌহভাণ্ডং ২। হামানদিস্তা ইতি ভাষা ॥ ইতি শব্দচন্দ্রিকা ॥

অশ্মভিৎ [ দ্ ] ( পুং ) পাষাণভেদী বৃক্ষঃ। ইতি রত্নমালা ॥ প্রস্তরভেদকে ত্রি ॥

অশ্মভেদঃ ( পুং ) পাষাণভেদী বৃক্ষঃ। ইতি রত্নমালা ॥

অশ্মযোনিঃ ( পুং ) মরকতমণিঃ। ইত্যমর-টীকায়াং ভরতঃ ॥

অশ্মরঃ (ত্রি) প্রস্তরসম্বন্ধীয়ঃ। পাতুরিয়া ইতি ভাষা। ইতি পাণিনিঃ ॥

অশ্মরী ( স্ত্রী ) মূত্রকৃচ্ছ্ররোগঃ। পাতরী ইতি ভাষা। যথা। অথাশ্মর্য্যধিকারঃ। অত্রা-শ্মর্য্যাঃ সন্নিকৃষ্টনিদানং সংখ্যাঞ্চাহ। বাত-পিত্তকফৈ স্তিস্র শ্চতুর্থী শুক্রজা মতা প্রায়ঃ শ্লেষ্মাশ্রয়াঃ সর্ব্বা অশ্মর্য্যঃ স্যু র্যমো-পমাঃ ॥ শ্লেষ্মাশ্রয়াঃ শ্লেষ্মসমবায়িকারণাঃ। শুক্রজাং বিনা। শুক্রজায়া স্তু শুক্রস্যৈব সমবায়িকারণত্বাৎ। অন্যে তু শুক্রাশ্মর্য্যা মপি কফকারণত্ব মিচ্ছন্তি। প্রায়ঃশব্দ শ্চাত্র বিশেষার্থঃ। যমোপমা শ্চিকিৎসাং বিনা ॥ * ॥ সম্প্রাপ্তিমাহ। বিশোষয়েদ্বস্তিগতং সশুক্রং মূত্রং সপিত্তং পবনঃ কফম্বা। যদা তদাশ্মর্য্যুপজায়তে তু ক্রমেণ পিত্তে-ষ্বিব রোচনা গোঃ ॥ পবনো বস্তিগতং স শুক্রং মূত্রং সপিত্তং কফং বা শোষমুপ-

নয়েৎ যদা তদা অশ্মরী ক্রমেণ ক্রমশো বর্দ্ধমানা। যথা গোঃ পিত্তেষু রোচনেবেত্যন্বয়ঃ ॥ * ॥ পূর্ব্বরূপ মাহ। নৈকদোষাশ্রয়াঃ সর্ব্বা অথাসাং পূর্ব্বলক্ষণং। বস্ত্যাধ্মানং তদাসন্নদেশেষু পরিতোঽতিরুক্ ॥ মূত্রে বস্তসগন্ধত্বং মূত্রকৃচ্ছ্রং জ্বরোঽরুচিঃ। বস্তঃ ছগলকঃ ॥ *॥ সামান্যলক্ষণ মাহ। সামান্যলিঙ্গং রুঙ্নাভিসেবনীবস্তিমূর্দ্ধসু। বিশীর্ণধারং মূত্রং স্যাৎ তয়া মার্গনিরোধনে ॥ তদ্ব্যপায়াৎ সুখং মেহেদচ্ছং গোমেদকোপমং। তৎসংক্ষোভাৎ ক্ষতে সাস্র মায়াসাচ্চাতিরুগ্‌ভবেৎ ॥ বস্তিমূর্দ্ধা-নাভে রধোদেশঃ। বিশীর্ণধারং সবিচ্ছেদধারং। তয়া অশ্মর্য্যা। মার্গঃ মূত্রবাহিস্রোতঃ। তদ্ব্যপায়াৎ কদাচিদ্বায়ুনা অশ্মর্য্যা মূত্রমার্গাদন্যত্র গমনাৎ। সুখং মেহেৎ মূত্রয়েৎ। গোমেদকোপমং গোমেদকো মণিঃ কিঞ্চিল্লোহিত স্তদ্বর্ণং। তৎসংক্ষোভাৎ তস্যা অশ্মর্য্যাঃ সঞ্চারাৎ। ঘর্ষণেন মূত্রবহে স্রোতসি ক্ষতে জাতে সাস্রং সরক্তং মেহেৎ। আয়াসাৎ প্রবাহনাদিজনিতাৎ ॥ * ॥ বাতোল্বণা মাহ। তত্র বাতাদ্ভৃশং ত্বার্ত্তো দন্তান্ খাদতি বেপতে। মৃদ্নাতি মেহনং নাভিং পীড়য়ত্যপি সঙ্কণন্ ॥ সানিলং মুঞ্চতি শকৃন্মুহু র্ম্মেহতি বিন্দুশঃ। শ্যাবারুণাশ্মরী চাস্য স্যাচ্চিতাকণ্টকৈ রিব ॥ সঙ্কণন্ আর্ত্তনাদং কুর্ব্বন্ নাভিদেশং পীড়য়তি। শকৃৎ পুরীষং সানিলং মুঞ্চতি। মুহু র্ব্বারংবারং। বিন্দুশঃ বিন্দুং বিন্দুং মেহতি মূত্রয়েৎ। শ্যাবেত্যাদি শ্যাবা কিঞ্চিৎ শ্যামা। অরুণা কিঞ্চিদ্রক্তা। এবং চাশ্মর্য্যা বর্ণাকারকথনং আকৃষ্যাণাং প্রত্যক্ষসংবাদিশাস্ত্রপ্রামাণ্যখ্যাপনার্থ মাহুঃ। চিতাকণ্টকৈ রিব বদরীবীজবৎ ক্ষুদ্রাঙ্কুরৈ র্বেষ্টিতা ॥ * ॥ পিত্তোল্বণা মাহ। পিত্তেন দহ্যতে বস্তিঃ পচ্যমান ইবোষ্মবান্। ভল্লাতকাস্থিসংস্থানা রক্তা পীতা সিতাশ্মরী ॥ দহ্যতে সাক্ষাদগ্নিনেব। বস্তিরিতি মূত্রকোষঃ। পচ্যমান ইব ক্ষারেণেব। উষ্মবান্ উষ্ণস্পর্শঃ ॥ * ॥ কফোল্বণা মাহ। বস্তি র্নিস্তুদ্যত ইব শ্লেষ্মণা শীতলো গুরুঃ। অশ্মরী মহতী শ্লক্ষ্মা মধবর্ণাথ বা সিতা ॥ মহতী কুক্কুটাণ্ডতুল্যা। মধুবর্ণা ঈষৎ পিঙ্গলশুক্লা ॥ এতা ভবন্তি বালানাং তেষা মেব হি ভূয়সা। আশ্রয়োপচয়াল্পত্বাৎ গ্রহণাহরণে সুখাঃ ॥ এতাঃ দোষত্রয়জনিতাঃ বালানাং স্যুঃ। যতঃ সর্ব্বা এবাশ্মর্য্যো বিশেষতঃ শ্লেষ্মসমবায়িকারণাঃ। বালা স্তু বিশেষত স্তন্নিদানসেবিনো ভবন্তি। উক্তঞ্চ সুশ্রুতেন। প্রায়েণৈতা অশ্মর্য্যো দিবাস্বপ্নসমশনাধ্যশনস্নিগ্ধশীতগুরুমধুরাহারপ্রিয়ত্বাৎ বিশেষেণ বালানাং ভবন্তীতি। ভূয়ঃ পদোপাদানাৎ মহতা মপি ত্রিদোষজনিতা ভবন্তি। তেষা মেব বালানা মেব। গ্রহণাহরণে সুখাঃ গ্রহণং নিষ্কাসনার্থ মঙ্গুলিভ্যাং। আহরণং পাচনাদিপূর্ব্বকং নিষ্কাসনং তত্র সুখাঃ সুখদাঃ। তত্র হেতু মাহ। আশ্রয়োপচয়াল্পত্বাদিতি আশ্রয়ো বস্তিঃ তস্যোপচয়ঃ স্থৌল্যং তস্যাল্পত্বাৎ ॥ *॥ শুক্রাশ্মরী মাহ।

শুক্রাশ্মরী তু মহতাং জায়তে শুক্রধারণাৎ। অব্যয়ানা মনেকার্থত্বাৎ তুশব্দোঽত্রাবধারণার্থঃ। তেন মহতা মেব ন তু বালানাং। তেষাং বক্ষ্যমাণসম্প্রাপ্তে রসম্ভবাৎ। ন তু শুক্রাভাবো বাচ্যঃ। শুক্রধারণাৎ বেগাৎ চ্যবমানস্য শুক্রস্য ধারণাৎ ॥ * ॥ শুক্রাশ্মর্য্যাঃ সম্প্রাপ্তি মাহ। স্থানাচ্চ্যুতমমুক্তং হি মুষ্কয়ো রন্তরেঽনিলঃ। শোষয়ত্যুপসংহৃত্য শুক্রং তচ্ছুক্রমশ্মরী॥ অনিলঃ মৈথুনবেগেন স্থানাচ্চ্যুতং। অমুক্তং মৈথুনবেগধারণেন ধৃতং শুক্রং। মুষ্কয়োঃ মেঢ্রসহিতয়োঃ। মেঢ্রবৃষণয়ো রন্তর ইতি সুশ্রুতবচনাৎ। তেন মেঢ্রবৃষণমধ্যগতবস্তিমুখে উপসংহৃত্য একীকৃত্য শোষয়তি। তচ্ছুক্রমশ্মরী তথাভূতং শুক্র মেবাশ্মরী ॥ *॥ অস্যা লক্ষণ মাহ। বস্তিরুঙ্মূত্রকৃচ্ছ্রত্বমুষ্কশ্বয়থুকারিণী। তস্যা মুৎপন্ন মাত্রায়াং শুক্র মেতি বিলীয়তে॥ পীড়িতে ত্ববকাশে ঽস্মিন্নশ্মর্য্যেব.চ শর্করা। তস্যাং শুক্রাশ্মর্য্যাং। উৎপন্নমাত্রায়াং যদা সা কথ মপি বিলীয়তে বিলয়ং যাতি। তদা শুক্রং এতি মূত্রমার্গাৎ প্রবর্ত্ততে। পীড়িতে ত্ববকাশেঽস্মিন্ তুশব্দো ঽবধারণে। তেন অস্মিন্নেব অবকাশে স্থানে মেঢ্রবৃষণয়ো রন্তরে পীড়িতে সতি সা বিলীয়তে অন্তর্লীনা ভবতি॥ অবস্থাভেদাদশ্মরী শর্করা সিকতা ভবতীত্যাহ। অশ্মর্য্যেব চ শর্করা চকরাৎ সিকতা চ ভবতি। শর্করা সিকতয়োশ্চ ভেদো মহত্বাল্পত্বাভ্যাং বোদ্ধব্যঃ॥

কথং অশ্মরী শর্করা ভবতীত্যাহ। সা ভিন্নমূর্ত্তি র্ব্বাতেন শর্করেত্যভিধীয়তে। সা অশ্মরী ॥ * ॥ শর্করায়াঃ পাত মবরোধঞ্চ সহেতুক মাহ। অণুশো বায়ুনা ভিন্না সা তস্মিন্ননুলোমগে। নিরেতি সহ মূত্রেণ প্রতিলোমে বিবধ্যতে॥ মূত্রস্রোতঃপ্রবৃত্তা সা সক্তা কুর্য্যাদুপদ্রবান্। সা অশ্মরী। তস্মিন্ বায়ৌ। অনুলোমগে মূত্রস্রোতঃসু সম্যক্প্রবৃত্তে মূত্রেণ সহ সা শর্করা নিরেতি পততি। প্রতিলোমগে ঊর্দ্ধপ্রবৃত্তে বায়ৌ বিবধ্যতে। তদা মূত্রস্রোতঃশিতা সক্তা লগ্না স্যাত্তদা উপদ্রবান্ কুর্য্যাৎ। তানেবোপদ্রবানাহ। দৌর্ব্বল্যং সদনং কার্শ্যং কুক্ষিশূল মথারুচিং। পাণ্ডুত্ব মুষ্ণবাতঞ্চ তৃষ্ণাং হৃৎপীড়নং বমিং॥ দৌর্ব্বল্য মিন্দ্রিয়াণাং। সদনং অবসন্নত্বং। কার্শ্য মঙ্গানাং। উদরৈকদেশে শূলং। উষ্ণবাতং মূত্রাঘাতবিশেষং ॥*॥ অশ্মরী শর্করা সিকতানা মরিষ্ট মাহ। প্রসূননাভিবৃষণং বদ্ধমূত্রং রুজান্বিতং। অশ্মরী ক্ষপয়ত্যাশু শর্করা সিকতান্বিতা॥ শর্করা সিকতেতি চ নামদ্বয় মন্বর্থং ॥*॥*॥ অথাশ্মর্য্যা শ্চিকিৎসা। শুণ্ঠ্যগ্নিমন্থপাষাণভিদ্রুশ্বরুণগোক্ষুরৈঃ। অভয়ারগ্বধফলৈঃ ক্বাথং কৃত্বা বিচক্ষণঃ॥ রামঠক্ষারলবণচূর্ণং ক্ষিপ্ত্বা পিবেন্নরঃ। অশ্মরী মূত্রকৃচ্ছ্রঞ্চ নাশ মায়াতি নিশ্চিতং॥ ক্বাথঃ শুণ্ঠ্যাদিনামায়ং দীপনঃ পাচনঃ পরং। হস্তি কোষ্ঠাশ্রিতং বাতং কণ্ঠরুগ্গদ মেঢ্রজং॥ রুক্ কুষ্ঠং। শুণ্ঠ্যাদিক্বাথঃ ॥ * ॥ এলোপ-

কুল্যামধুকাশ্মভেদকৌন্তীশ্বদংষ্ট্রাবৃষকোরুবূকৈঃ। শ্রিতং পিবেদশ্মজতু প্রগাঢ়ং সশর্করং মূত্রগদে হশ্মরীষু॥ উরুবুক এরণ্ড স্তস্যাত্র মূলং। মূত্রগদে মূত্রকৃচ্ছ্রে। এলাদিকাথঃ॥ *॥ কুষ্মাণ্ডকরসং হিঙ্গুযবক্ষারযুতং পিবেৎ। বস্তৌ মেঢ্রে শূলযুক্তে অশ্মরীশর্করাপ্লয়েৎ ॥ * ॥ বরুণত্বক্ শিলাভেদশুণ্ঠীগোক্ষুরকৈঃ কৃতঃ। কষায়ক্ষারসংযুক্তঃ শর্করাং পাতয়ত্যধঃ॥ ক্ষারো যবক্ষারঃ॥*॥ ত্রিকণ্টকস্য বীজানাং চূর্ণং মাক্ষিকসংযুতং। অবীক্ষীরেণ সপ্তাহাদশ্মরীনাশনং পিবেৎ॥ অবী মেষী॥ *॥ বরুণত্বক্ কষায়স্তু পীতো গুড়সমন্বিতঃ। অশ্মরীং পাতয়ত্যাশু বস্তিশূলঞ্চ নাশয়েৎ ॥ *॥ কাথো বরুণমূলস্য তস্য কল্কেন সংযুতঃ। শিগ্রুমূলস্য চ কাথঃ কটুষ্ণশ্চাশ্মরীং হরেৎ॥ *॥ শৃঙ্গবেরযবক্ষারপথ্যাকালীয়কান্বিতঃ। দধিমণ্ডো ভিনত্ত্যুগ্রা মশ্মরী মাশু পানতঃ॥ শৃঙ্গবেরং নাগরং॥*॥ নো জগ্ধং কৃমিভি র্ঘনং সুতরুণং স্নিগ্ধং শুচিস্থানজং ঘস্রে পুণ্যনিরীক্ষিতে বরুণকং ছিত্বা তুলাং গ্রাহয়েৎ। সংগৃহ্যাশু চতুর্গুণাম্বুপি পচেৎ পাদাবশেষং জলং তত্তুল্যেন গুড়েন বৈ দৃঢ়তরে ভাণ্ডে পচেত্তৎ পুনঃ॥ জ্ঞাত্বৈবং ঘনতাং গুড়ে পরিণতে প্রত্যেক মেষাং পলং শুণ্ঠ্যে র্বারুকবীজগোক্ষুরকণাপাষাণভিচ্ছীতলা।কুষ্মাণ্ডত্রপুষাক্ষবীজকুনটীবাস্তূকশোভাঞ্জনং দ্রাক্ষৈলাগিরিজাভয়াকৃমিহৃতাং চূর্ণীকৃতানাং ক্ষিপেৎ॥ পথ্যাশী ধৃতিবাসরং গুড়মমুং যো হক্ষপ্রমাণং নরঃ খাদেত্তস্য সমস্তদোষজনিতাশ্মর্য্যঃ পতন্তি দ্রুতং। এর্ব্বারুকবীজং কর্কটীবীজং। পাষাণভিৎ হাথাছোড়ীতি লোকে। শীতলা নীলদূর্ব্বা। তথাচ। নীলদূর্ব্বা স্মৃতা শস্যং সাদ্বলং হরিতং তথা। শতপর্ব্বা শীতকুম্ভী শীতলা বামনী তথা॥ ইতি নির্ঘণ্টো ধন্বন্তরিঃ॥ কুনটী ধান্যকং। গিরিজং শিলাজতু। কৃমিহৃৎ বিড়ঙ্গং। বরুণাদিগুড়ঃ॥*॥ মঞ্জিষ্ঠা ত্রাপুষং বীজং জীরকঃ শতপুষ্পিকা। ধাত্রীফলং বদরকং গন্ধকঞ্চ মনঃশিলা॥ এতেষাংসমভাগানাং চূর্ণং টঙ্কমিতং নরঃ। ভক্ষয়েন্মধুনা সার্দ্ধং পতেত্তস্যাশ্মরী ধ্রুবং॥ *॥ পলদ্বয়মিতে কোষ্ণে কুলত্থস্য শৃতে তু যঃ। লবণং শরপুঙ্খস্য সার্দ্ধমাষদ্বয়োন্মিতং ॥ ক্ষিপ্ত্বা পিবেৎ পতেত্তস্য মূত্রেণ সম মশ্মরী। শর্করা সিকতা চাপি দৃষ্ট মেতদনেকধা॥ ইত্যশ্মর্য্যধিকারঃ॥*॥ ইতি ভাবপ্রকাশঃ॥

অশ্মরীঘ্নঃ (পুং) বরুণবৃক্ষঃ। ইতি ত্রিকাণ্ডশেষঃ॥

অশ্মরীহরঃ (পুং) ধান্যবিশেষঃ। দে ধান ইতিখ্যাতঃ। ইতি রত্নমালা॥

অশ্মসারঃ (পুং ক্লী) লোহং। ইত্যমরঃ॥

অশ্মারঃ (পুং ক্লী) অশ্মরীরোগঃ। ইত্যুণাদিকোষঃ॥

অশ্মোত্থং (ক্লী) শিলাজতু। ইতি রাজনির্ঘণ্টঃ॥

অশ্রং (ক্লী) নেত্রজলং। ইত্যুণাদিকোষঃ॥ রক্তং। ইত্যমরটীকা॥

**অশ্রদ্ধধানঃ** ( ত্রি ) শ্রদ্ধাহীনঃ। যথা দেবলঃ। প্রত্যয়ো ধর্ম্মকার্য্যেষু তথা শ্রদ্ধেত্যুদাহৃতা। নাস্তি হ্যশ্রদ্দধানস্য ধর্ম্মকৃত্যে প্রয়োজনং॥ ইতি শ্রাদ্ধতত্ত্বং॥

**অশ্রদ্ধা** ( স্ত্রী ) শাস্ত্রার্থে অদৃঢ়প্রত্যয়ঃ। যথা। বিধিহীনং ভাবদুষ্টং কৃত মশ্রদ্ধয়া চ যৎ। তদ্ধরন্ত্যসুরা স্তস্য মূঢ়স্য দুষ্কৃতাত্মনঃ॥ ইতি শ্রাদ্ধতত্ত্বং॥

**অশ্রদ্ধেয়ং** ( ত্রি ) শ্রদ্ধানর্হং। আদরাযোগ্যং। শাস্ত্রার্থাদৃঢ়প্রত্যয়যোগ্যং। শ্রস্‌শব্দপূর্ব্বক ধাধাতোর্যপ্রত্যয়ে পশ্চান্নঞ্‌সমাসেন নিষ্পন্নং॥

**অশ্রপঃ** ( পুং ক্লী ) রাক্ষসঃ। ইত্যমরঃ॥

**অশ্রাদ্ধভোজী** [ন্] (ত্রি) শ্রাদ্ধান্নাভক্ষকঃ। যথা। দুর্গসিংহোহপি অশ্রাদ্ধভোজীত্যস্য সতি ভোজনে অশ্রাদ্ধ মেব ভুঙ্‌ক্তে ন শ্রাদ্ধ মিতি ন নিয়মঃ। তথাহে ব্রতলোপঃ স্যাৎ। ইতি প্রায়শ্চিত্ততত্ত্বং॥

**অশ্রাদ্ধী** [ন্] ( পুং ) শ্রাদ্ধপঞ্চযজ্ঞশূন্যঃ। যথা মনুঃ। নাদ্যাৎ শূদ্রস্য পকান্নং বিদ্বান-শ্রাদ্ধিনো দ্বিজঃ। আদদীতাম মেবাস্মাদ-বৃত্তাবেকরাত্রিকং॥ অশ্রাদ্ধিনঃ শ্রাদ্ধপঞ্চ-যজ্ঞশূন্যস্য। ইত্যাহ্নিকাচারতত্ত্বং॥

**অশ্রাদ্ধেয়ঃ** ( পুং ) শ্রাদ্ধানর্হঃ। শ্রাদ্ধা-যোগ্যব্রাহ্মণঃ। যথা। অত্রিকাশ্যপৌ। পিতু র্গেহে চ যা কন্যা রজঃ পশ্যত্য-সংস্কৃতা। ভ্রূণহত্যা পিতু স্তস্যাঃ সা কন্যা বৃষলী স্মৃতা॥ যস্ত তাং বরয়েৎ কন্যাং ব্রাহ্মণো জ্ঞানদুর্ব্বলঃ। অশ্রাদ্ধেয় মপাঙ্‌ক্তেয়ং তং বিদ্যাদ্বৃষলীপতিং॥ ইত্যুদ্বাহ-তত্ত্বং॥

**অশ্রান্তং** ( ক্লী ) অনবরতং। নিত্যং। ইত্যমরঃ॥ শ্রমরহিতে ত্রি॥

**অশ্রান্তঃ** ( ত্রি ) শ্রমরহিতঃ। যথা। অশ্রান্ত-শ্রুতিপাঠপূতরসনাবির্ভূতভূরিস্তবা জিহ্ম-ব্রহ্মমুখৌঘবিঘ্নিতনবস্বর্গক্রিয়াকেলিনা। পূর্ব্বং গাধিসুতেন সামিঘটিতা মুক্তানু-মন্দাকিনী যৎ প্রাসাদদুকূলবল্লিরনিলা-ন্দোলৈ রখেলদ্দিবি॥ ইতি নৈষধে ১ স্বর্গঃ॥

**অশ্রিঃ** ( স্ত্রী ) গৃহাদেঃ কোণঃ। ইতি হেম-চন্দ্রঃ॥ অস্ত্রাদে রগ্রভাগঃ। ইত্যমরঃ॥

**অশ্রী** ( স্ত্রী ) অশ্রিঃ। অস্ত্রাদে রগ্রভাগঃ॥ ইত্যমরটীকা॥

**অশ্রু** ( ক্লী ) চক্ষুর্জ্জলং। তৎপর্য্যায়ঃ। নেত্রাম্বু ২ রোদনং ৩ অশ্রং ৪ অস্রং ৫ অস্রু ৬ বাষ্পং ৭। ইত্যমরকোষশব্দরত্না-বল্যৌ॥ লোচং ৮। ইতি জটাধরঃ॥

**অশ্রুতং** ( ত্রি ) অকৃতশ্রবণং। অনাকর্ণিতং। অশুনা ইতি ভাষা। যথা। শ্রুতার্থস্য পরিত্যাগাৎ অশ্রুতার্থস্য কল্পনাৎ। প্রাপ্ত-স্য বাধাদিত্যেবং পরিসংখ্যা ত্রিদোষিকা। ইতি প্রায়শ্চিত্ততত্ত্বং॥

**অশ্লেষা** ( স্ত্রী ) অশ্বিন্যাদিসপ্তবিংশতিনক্ষ-ত্রান্তর্গতনবমনক্ষত্রং। অস্য রূপং। চক্রা-কৃতিষড়্‌নক্ষত্রাত্মকং। ইতি দীপিকা॥ তস্যাধিদেবতা সর্পঃ। যথা। অশ্বিযমদহন-কমলজশশিশূলভৃদদিতিজীবফণিপিতরঃ। ইত্যাদি জ্যোতিস্তত্ত্বং॥ সা কেতুগ্রহস্য

জন্মনক্ষত্রং। যথা। বিশাখানলতোয়ানি বৈষ্ণবং ভগদৈবতং। পুষ্যা পৌষ্ণং যমঃ সর্পো জন্মভান্যর্কতঃ ক্রমাৎ॥ ইতি দীপিকা॥ সা চ অধোমুখগণঃ। যথা। অশ্লেষবহ্নিযমপিত্র্য বিশাখযুক্তং পূর্ব্বাত্রয়ং শতভিষা চ নবাপ্যড়ূনি। এতান্যধোমুখগণানি শিবানি নিত্যং বিদ্যার্থভূমিখননেষু চ শোভিতানি॥ ইতি জ্যোতিস্তত্ত্বং॥ * ॥ তস্যা মস্তকোপরি উদয়ে রাত্রিলগ্ননিরূপণং যথা। মৌলিগে ভুজগভে শ্বপুচ্ছকে ভঙ্গুরাকৃতিনি সপ্ততারকে। মারকেলিরসিকে তুলোদয়াৎ নির্বযুর্জ্জলধিখাঙ্কিলিপ্তিকাঃ॥ ৩। ২৪। ইতি কালিদাসকৃতরাত্রিলগ্ননিরূপণং॥ তত্র জাতফলং॥ বৃথাটনঃ স্যাদতিদুষ্টচেতাঃ কষ্টপ্রদ শ্চাপি বৃথা জনানাং। সর্পে সদর্পো হি শঠার্পিতার্থঃ কন্দর্পসন্তপ্তমনা মনুষ্যঃ॥ ইতি কোষ্ঠীপ্রদীপঃ

অশ্লেষাভবঃ (পুং) কেতুগ্রহঃ। ইতি হারাবলী

অশ্বঃ (পুং) ঘোটকঃ। তৎপর্য্যায়ঃ। পীতিঃ পীতী ৩ বীতিঃ ৪ ঘোটঃ ৫ ঘোটকঃ ৬ তুরগঃ ৭ তুরঙ্গঃ ৮ তুরঙ্গমঃ ৯ বাজী ১০ বাহঃ ১১ অর্ব্বা ১২ গন্ধর্ব্বঃ ১৩ হয়ঃ ১৪ সৈন্ধবঃ ১৫ সপ্তিঃ ১৬। ইত্যমরঃ তট্টীকাচ॥ অশ্বেন ভ্রমণগুণাঃ। বাতকোপনাঙ্গস্থৈর্য্যবলাগ্নিকারিত্বং। ইতি রাজবল্লভঃ॥ পুং জাতিবিশেষঃ। তস্য লক্ষণং। কাষ্ঠতুল্যবপু র্ধৃষ্টো মিথ্যাচারশ্চ নির্ভয়ঃ। দ্বাদশাঙ্গুলমেঢ্রশ্চ দরিদ্র স্তু হয়ো মতঃ॥ ইতি রতিমঞ্জরী॥

অশ্বকন্দিকা (স্ত্রী) অশ্বগন্ধাবৃক্ষঃ। ইতি রত্নমালা॥

অশ্বকর্ণঃ (পুং) শালবৃক্ষবিশেষঃ। লতাশাল ইতি কেচিৎ॥ তৎপর্য্যায়ঃ। জরণদ্রুমঃ ২ তার্ক্ষ্যপ্রসবঃ ৩ শস্যসম্বরণঃ ৪ ধন্যঃ ৫ দীর্ঘপর্ণঃ ৬ কুশিকঃ ৭ কৌশিকঃ ৮। অস্য গুণাঃ। কটুত্বং। তিক্তত্বং। স্নিগ্ধত্বং। উরোবিস্ফোটপিত্তাস্রকণ্ডুশিরাদোষার্ত্তিনাশিত্বঞ্চ॥ ইতি রাজনির্ঘণ্টঃ॥

অশ্বকর্ণকঃ (পুং) শালবৃক্ষঃ। ইত্যমরঃ॥

অশ্বকিনী (স্ত্রী) অশ্বিনীনক্ষত্রং। ইতি হেমচন্দ্রঃ

অশ্বখুরঃ (পুং) নখীনামগন্ধদ্রব্যং। ইতি রত্নমালা॥

অশ্বখুরা (স্ত্রী) অপরাজিতালতা। ইতি রাজ-

অশ্বখুরী (স্ত্রী) অপরাজিতালতা। ইতি শব্দমালা

অশ্বগন্ধা (স্ত্রী) স্বনামখ্যাতক্ষুদ্রবৃক্ষবিশেষঃ। অশ্বগন্ধ ইতিখ্যাতা। তৎপর্য্যায়ঃ। হয়গন্ধা ২ বাজিগন্ধা ৩ অশ্বগন্ধিকা ৪ বল্যা ৫ তুরগগন্ধা ৬ কম্বুকা ৭ অশ্বাবরোহিকা ৮ কম্বুকাষ্ঠা ৯ অবরোহিকা ১০ বারাহকর্ণী ১১ তুরগা ১২ বনজা ১৩ বাজিনী ১৪ হয়া ১৫ পুষ্টিদা ১৬ বলদা ১৭ পুষ্টিঃ ১৮ পীবরা ১৯ পলাশপর্ণী ২০ বাতঘ্নী ২১ শ্যামলা ২২ কামরূপিণী ২৩ কালা ২৪ প্রিয়করী ২৫ গন্ধপত্রী ২৬ হয়প্রিয়া ২৭ বারাহপত্রী ২৮ অস্যা গুণাঃ। কটুত্বং। উষ্ণত্বং। তিক্তত্বং। মদগন্ধিত্বং। বলশুক্রকারিত্বং। বায়ুকাশ

শ্বাসক্ষয়ব্রণজরাব্যাধিনাশিত্বঞ্চ। ইতি রত্নমালারাজনির্ঘণ্টরাজবল্লভাঃ ॥ গন্ধান্তা বাজিনামাদি রশ্বগন্ধা হয়াহ্বয়া। বারাহকর্ণী বরদা বরদা কুষ্ঠগন্ধিনী ॥ কচিৎ পুস্তকে অন্ত্যবরদাস্থানে বদরীতি পাঠঃ। অশ্বগন্ধানিলশ্লেষ্মশ্বিত্রশোথক্ষয়াপহা। বল্যা রসায়নী তিক্তা কষায়োষ্ণাতিশুক্রলা ॥ ইতি ভাবপ্রকাশঃ ॥

অশ্বগোযুগং (ক্লী) অশ্বদ্বয়ং। এক যোড়া ঘোড়া ইতি ভাষা। ইতি পাণিনিঃ ॥

অশ্বগোষ্ঠং (ক্লী) অশ্বস্থানং। আস্তবল্ ইতি আরবীভাষা। যথা। পশুভ্যঃ স্থানদ্বিষট্কে গোষ্ঠগোযুগষড়্গবং। ইত্যনেন অশ্বশব্দাৎ গোষ্ঠপ্রত্যয়েন নিষ্পন্নং। ইতি মুগ্ধবোধব্যাকরণং ॥

অশ্বগ্রীবঃ (পুং) বিষ্ণুদ্বেষ্টাসুরবিশেষঃ। ইতি হেমচন্দ্রঃ ॥

অশ্বঘ্নঃ (পুং) করবীরপুষ্পবৃক্ষঃ। ইতি রত্নমালা ॥

অশ্বতরঃ (পুং স্ত্রী) অশ্বায়াং গর্দ্দভেন জাতঃ পশুবিশেষঃ। খচর ইতি ভাষা। ইতি স্মৃতিঃ ॥

অশ্বতরঃ (পুং) বেগসরঃ। নাগরাজবিশেষঃ। ইতি মেদিনী ॥ গন্ধর্ব্ববিশেষঃ। পুং বৎসঃ। ইতি ধরণিঃ ॥

অশ্বত্থঃ (পুং) স্বনামখ্যাতবৃক্ষবিশেষঃ। পিপর ইতি পশ্চিমদেশীয়ভাষা। তৎপর্য্যায়ঃ। বোধিদ্রুমঃ ২ চলদলঃ ৩ পিপ্পলঃ ৪ কুঞ্জরাশনঃ ৫। ইত্যমরঃ ॥ অচ্যুতাবাসঃ ৬ চলপত্রঃ ৭ পবিত্রকঃ ৮ শুভদঃ ৯ বোধিবৃক্ষঃ ১০ যাজ্ঞিকঃ ১১ গজভক্ষকঃ ১২ শ্রীমান্ ১৩ ক্ষীরদ্রুমঃ ১৪ বিপ্রঃ ১৫ মঙ্গল্যঃ ১৬ শ্যামলঃ ১৭ গুহ্যপুষ্পঃ ১৮ সেব্যঃ ১৯ সত্যঃ ২০ শুচিদ্রুমঃ ২১ ধনুর্বৃক্ষঃ ২২। অস্য গুণাঃ। সুমধুরত্বং। কষায়ত্বং। শীতলত্বং। কফপিত্তবিনাশিত্বং। রক্তদাহশমনকারিত্বঞ্চ ॥ তৎপক্কফলস্য গুণাঃ। সদ্যো যোনিদোষহারিত্বং। শীতলত্বং। অতিহৃদ্যত্বং। পিত্তরক্তবিষার্ত্তিদাহচ্ছর্দ্দিশোষারুচিদোষনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ অথাশ্বত্থবন্দনকালমন্ত্রাঃ। অশ্বত্থং বন্দয়েন্নিত্যং পূর্ব্বাহ্ণে প্রহরদ্বয়ে। অত ঊর্দ্ধং ন বন্দেত অশ্বত্থন্তু কদাচন ॥ ওঁ চক্ষুস্পন্দং ভুজস্পন্দং তথা দুঃস্বপ্নদর্শনং। শত্রূণাঞ্চ সমুত্থানমশ্বত্থ শময়াশু মে ॥ অশ্বত্থরূপী ভগবান্ প্রীয়তাং মে জনার্দ্দনঃ। যাং দৃষ্ট্বা নশ্যতে পাপং দৃষ্ট্বা লক্ষ্মীঃ প্রবর্ত্ততে ॥ প্রদক্ষিণে ভবেদায়ুঃ সদাশ্বত্থ নমোহস্তুতে ॥ ইতি স্মৃত্যর্থসারে হলায়ুধধৃতবচনং ॥ গর্দ্দভাণ্ডবৃক্ষঃ। ইতি বিশ্বঃ ॥ বোধিদ্রুঃ পিপ্পলোঽশ্বত্থশ্চলপত্রো গজাশনঃ। পিপ্পলো দুর্জ্জরঃ শীতঃ পিত্তশ্লেষ্মব্রণাস্রজিৎ ॥ গুরু স্তুবরকো রূক্ষো বর্ণ্যো যোনিবিশোধনঃ ॥*॥ অথ পিপ্পলভেদঃ। গজহণ্ড ইতি হিন্দিভাষা। পারিশোন্যঃ কপীতনঃ কপিচূতঃ কমণ্ডলুঃ। গর্দ্দভাণ্ডঃ কন্দরালকপীতনসুপার্শ্বকাঃ ॥ কলীশো দুর্জ্জরঃ স্নিগ্ধঃ ক্রিমিশুক্রকফপ্রদঃ। ফলেঽম্লমধুরো মূলে কষায়ঃ স্বাদুমজ্জকঃ ॥*॥ অথ বেলিয়াপিপ্পলঃ। নন্দীবৃক্ষো ঽশ্বত্থভেদঃ প্ররোহী

গজপাদপঃ। স্থালীবৃক্ষঃ ক্ষয়তরুঃ ক্ষীরী চ স্যাদ্বনস্পতিঃ ॥ নন্দীবৃক্ষো লঘুঃ স্বাদু স্তিক্ত স্তুবর উষ্ণকঃ। কটুপাকরসো গ্রাহী বিষপিত্তকফাস্রনুৎ ॥ ইতি ভাবপ্রকাশঃ ॥*॥ তস্য বিষ্ণুস্বরূপত্বং যথা। ঋষয় উচুঃ। কথং স্বয়াশ্বত্থবটৌ গোব্রাহ্মণসমৌ কৃতৌ। সর্ব্বেভ্যোঽপি তরুভ্য স্তৌ কথং পূজ্যতমৌ কৃতৌ ॥ সূত উবাচ। অশ্বত্থ-রূপো ভগবান্ বিষ্ণু রেব ন সংশয়ঃ। রুদ্ররূপো বট স্তদ্বৎ পলাশো ব্রহ্মরূপধৃক্ ॥ দর্শনস্পর্শসেবাসু তে বৈ পাপহরাঃ স্মৃতাঃ। দুঃখাপদ্ব্যাধিদুষ্টানাং বিনাশ-কারিণো ধ্রুবং ॥ ঋষয় উচুঃ। কথং বৃক্ষত্ব মাপন্না ব্রহ্মবিষ্ণুমহেশ্বরাঃ। এতৎ কথয় সর্ব্বজ্ঞ সংশয়োঽত্র মহান্ হি নঃ ॥ সূত উবাচ। পার্ব্বতীশিবয়ো র্দেবৈঃ সুরতং কুর্ব্বতোঃ কিল। অগ্নিং ব্রাহ্মণবেশেন প্রেষ্য বিঘ্নং কৃতং পুরা। ততস্তু পার্ব্বতী ক্রুদ্ধা শশাপ ত্রিদিবৌকসঃ। রেতঃসেক-সুখভ্রংশকম্পমানা তদা রুষা ॥ পার্ব্বত্যু-বাচ। কৃমিকীটাদয়ো ঽপ্যেতে জানন্তি সুরতেঃ সুখং। তস্মান্মম সুখভ্রংশাৎ যূয়ং বৃক্ষত্ব মাপ্স্যথ ॥ সূত উবাচ। এবং সা পার্ব্বতী দেবী অশপৎ ক্রুদ্ধমানসা। তস্মাদ্বৃক্ষত্ব মাপন্না ব্রহ্মবিষ্ণুমহেশ্বরাঃ ॥ তস্মাদিমৌ বিষ্ণুমহেশ্বরাবুভৌ বভূবতু র্বোধিবটৌ মুনীশ্বরাঃ। বোধি স্তুয়ং চার্কিদিনং বিনৈব ন সংস্পৃশ্যতা মর্ক-জবারযোগাৎ ॥ ইতি পাদ্মে উত্তরখণ্ডে ১৬০ অধ্যায়ঃ॥*॥ ঋষয় উচুঃ। অস্পৃশ্যত্বং কথং জাতং সূত বোধিতরুঃ স্বয়ং স্পৃশ্যত্বঞ্চ কথং প্রাপ্ত স্তথায়ং শনিবাসরে॥ সূত উবাচ। সমুদ্রমথনাদ্যানি রত্নান্যাপুঃ সুরোত্তমাঃ। শ্রেষ্ঠঞ্চ কৌস্তুভং তেষু বিষ্ণবে প্রদদুঃ সুরাঃ ॥ যাবদঙ্গীচকারাসৌ লক্ষ্মীং ভার্য্যার্থ মাত্মনঃ। তাবদ্বিজ্ঞাপয়া-মাস লক্ষ্মীস্তং চক্রপাণিনং॥ লক্ষ্মী রুবাচ। অসংস্কৃত্য কথং জ্যেষ্ঠাং কনিষ্ঠাং পরি-ণীয়তে। তস্মান্মমাগ্রজা মেতা মলক্ষ্মীং মধুসূদন ॥ বিবাহোদ্বাহ মাং পশ্চাৎ এষ ধর্ম্মঃ সনাতনঃ। তস্মাৎ ধর্ম্মব্যতিক্রামং ন কুর্য্যা মধুসূদন ॥ ইতি তদ্বচনং শ্রুত্বা স বিষ্ণু র্লোকভাবনঃ। উদ্দালকায় মুনয়ে সুদীর্ঘতপসে তদা॥ আপ্তবাক্যানুরোধেন তা মলক্ষ্মীং দদৌ কিল। স্থূলোষ্ঠীং শুক্ল-বদনাং বিরূপাং বিভ্রতীং তনুং ॥ স্রবদা-রক্তনয়নাং রূক্ষপিঙ্গশিরোরুহাং। স মুনি র্বিষ্ণুবাক্যাত্তা মঙ্গীকৃত্য স্বমাশ্রমং ॥ বেদধ্বনিসমাযুক্ত মানয়ামাস ধর্ম্মবিৎ হোমধূপসুগন্ধাঢ্যংবেদঘোষেণ নাদিতং॥ আশ্রমং তং বিলোক্যাথ ব্যথিতা সাব্র-বীদিদং। জ্যেষ্ঠোবাচ। নহি বাসানু-রূপোঽয়ংবেদধ্বনিযুতো মম॥ নাত্রাগমিষ্যে ভো ব্রহ্মন্ নয়স্বান্যত্র মাং ধ্রুবং। উদ্দা-লক উবাচ। কথং নায়াসি কিঞ্চাত্র বর্ত্ততে স্বমতং তব ॥ তব যোগ্যা চ বসতিঃ কা ভবেত্তদ্বদস্ব মাং। জ্যেষ্ঠোবাচ। বেদধ্বনি র্ভবেদযস্মিন্ অতিথীনাঞ্চ পূজনং ॥ যজ্ঞ দানাদিকং যত্র নৈব তত্র বসাম্যহং। পরস্পরানুরাগেণ দাম্পত্যং যত্র বিদ্যতে ॥

পিতৃদেবার্চ্চনং যত্র তত্র নৈব বসাম্যহং।
দানশৌচে ন বিদ্যেতে পরদ্রব্যাপহারিণঃ॥
পরদাররতা যত্র তত্র স্থানে রতি র্মম।
বৃদ্ধসজ্জনবিপ্রাণাং যত্র স্যাদবমাননং॥
নিষ্ঠুরং ভাষণং যত্র তত্র সম্যগ্বসাম্যহং।
সূত উবাচ। ইতি তদ্বচনং শ্রুত্বা বিসন্ন-
বদনোঽভবৎ। উদ্দালক স্ততো বাক্যং তা-
মলক্ষ্মীমুবাচ হ॥ উদ্দালক উবাচ। অশ্বত্থ-
বৃক্ষমূলেঽস্মিন্ অলক্ষ্মীঃ শ্রম্যতাং ক্ষণং।
আশ্রমস্থান মালোক্য যাবদায়াম্যহং পুনঃ॥
সূত উবাচ। ইতি তাং তত্র সংস্থাপ্য
জগামোদ্দালকো মুনিঃ। প্রতীক্ষন্তী চিরং
তত্র যদা ন তং দদর্শ সা॥ তদা রুরোদ
করুণং ভর্ত্তু স্ত্যাগেন দুঃখিতা। ততস্যাঃ
ক্রন্দিতং লক্ষ্মী র্বৈকুণ্ঠভবনেঽশৃণোৎ॥
তদা বিজ্ঞাপয়ামাস বিষ্ণু মুদ্বিগ্নমানসা।
লক্ষ্মী রুবাচ। স্বামিন্ মদ্ভগিনী জ্যেষ্ঠা
স্বামিত্যাগেন দুঃখিতা। তা মাশ্বাসয়িতুং
যাহি কৃপালো যদ্যহং প্রিয়া॥ সূত উবাচ।
লক্ষ্ম্যা সহ ততো বিষ্ণু স্তত্রাগাৎ কৃপয়া-
ন্বিতঃ। আশ্বাসয়ন্নলক্ষ্মীং তা মিদং বাক্য
মথাব্রবীৎ॥ বিষ্ণু রুবাচ। অশ্বত্থবৃক্ষ
মাসাদ্য সদালক্ষ্মীঃ স্থিরা ভব॥ মমাংশ-
সম্ভবো হ্যেষ আবাস স্তে ময়া কৃতঃ। মন্দ-
বারে সদা নূনং লক্ষ্মী রত্রাগমিষ্যতি॥
অস্পৃশ্যোঽসৌ ভবেত্তস্মাৎ মন্দবারং বিনা
কিল। ইতি পাদ্মে উত্তরখণ্ডে ১৬১ অধ্যায়ঃ
॥*॥ বৈশাখমাসে তস্য সেচনফলং যথা।
বৈশাখে সিঞ্চয়েন্নিত্যং বিষ্ণু মশ্বত্থরূপিণং।
চতুর্ব্বর্গফলাবাপ্তিহেতবে বৈষ্ণবো জনঃ॥
গণ্ডূষমাত্রতোয়েন কুর্য্যাদ্‌যো হ্যশ্বত্থসেচ-
নং। সোঽপি যাতি পরং স্থানং বিমুক্তঃ
পাপকোটিভিঃ॥ অশ্বত্থমূলং বিপ্রর্ষে যো
বধ্নাতি শিলাদিভিঃ। অশ্বত্থরূপী ভগবান্
কিং তস্মৈ ন হি যচ্ছতি॥ অশ্বত্থদ্রুম-
মালোক্য প্রণামং কুরুতে তু যঃ। আয়ু-
র্বৃদ্ধি র্ভবেত্তস্য বর্দ্ধন্তে সর্ব্বসম্পদঃ॥
যথাশ্বত্থতলে বিপ্র ধর্ম্মকর্ম্ম বিধীয়তে।
ন্যূনাতিরিক্ততা নস্যাত্তস্মিন্ কর্ম্মণি জৈ-
মিনে॥ তত্র তীর্থানি সর্ব্বাণি ত্রিস্রোতা-
দীনি জৈমিনে। যত্রাশ্বত্থতরু স্তিষ্ঠেৎ
একোঽপি শাখিনাং বরঃ॥ অশ্বত্থপূজকো
যস্তু স এব হরিপূজকঃ। অশ্বত্থমূর্ত্তি র্ভগ-
বান্ স্বয়মেব যতো দ্বিজ॥ তরুজ্ঞানাদ্দ্বিজ-
শ্রেষ্ঠ যোঽশ্বত্থং হন্তি মূঢ়ধীঃ। সংসারে
নাস্তি তৎকর্ম্ম যৎ কৃত্বা স চ শুদ্ধ্যতি॥
অশ্বত্থো বৃক্ষরাজোঽয়ং হরিমূর্ত্তিঃ প্রকী-
র্ত্তিতঃ। তস্মাদশ্বত্থহন্তৄণাং ত্রাতা কোঽপি
ন বিদ্যতে॥ অশ্বত্থং পশ্যতো বিপ্র
স্পৃশতঃ স্মরত স্তথা। দেহস্থং পাতকং
তস্য হরেৎ প্রণমতো হরিঃ॥ বিলোক্যা-
শ্বত্থহন্তারং যঃ শক্তো ন নিবারয়েৎ। তন্নে-
ত্রযুগ্মং বড়িশৈ র্যমেনোৎপাট্যতে স্বয়ং॥
অশ্বত্থচ্ছেদনং মূঢ় মা কুর্ব্বিতি বদেন্ন যঃ।
তস্য জিহ্বাং ছুরিকয়া স্বয়ং কৃন্ততি
ভাস্করিঃ॥ অশ্বত্থশাখা মেকাং যঃ স্বল্পা মপি
নিহন্তি যঃ। স কোটিব্রহ্মহত্যানাং ফলং
প্রাপ্নোতি মানবঃ॥ যৎপাপং ব্রহ্মহত্যায়াং
গুরুস্ত্রীগমনে চ যৎ। সুরাপানে তথা
স্তেয়ে ন্যাসাপহরণে তথা॥ যৎপাপং ভ্রূণ-

হত্যায়াং গোহত্যায়াং দ্বিজোত্তম। স্ত্রীহত্যায়াঞ্চ যৎপাপং পরস্ত্রীগমনে তথা॥ শরণাগতহত্যায়াং হত্যায়াং সুহৃদাং তথা। বিশ্বাসবাক্যাকথনে পরহিংসাবিধৌ চ যৎ॥ যৎপাপং পরনিন্দায়াং হরিবাসরভোজনে। অশ্বত্থচ্ছেদনাদ্‌ঘোরং তৎপাপং প্রাপ্যতে জনৈঃ॥ বিষ্ণুমূর্ত্তের্জ্জনো মোহাদশ্বত্থস্য নিহন্তা যঃ। তত্তুল্যঃ পাতকী কোঽপি ন শ্রুতঃ ক্ষিতিমণ্ডলে॥ বদাম্যশ্বত্থমাহাত্ম্যং সর্ব্বপাপপ্রণাশনং। সাক্ষাদেব স্বয়ং বিষ্ণু রশত্থো ঽখিলবিশ্বরাট্॥ তদ্ভক্তিং কুর্ব্বতঃ পুংসো বিদ্যতে নাশুভং ক্বচিৎ। অশ্বত্থং সেবতে যস্তু বিষ্ণুবুদ্ধ্যা নরোত্তমঃ॥ তস্য প্রসন্নো ভগবান্ দদাতি পরমং পদং। ইতি পাদ্মে ক্রিয়াযোগসারে অশ্বত্থসেচনং নাম ১১ অধ্যায়ঃ॥

অশ্বত্থভেদঃ (পুং) স্থালীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

অশ্বত্থা (স্ত্রী) পূর্ণিমাতিথিঃ। ইতি মেদিনী॥

অশ্বত্থামা [ন্] (পুং) দ্রোণাচার্য্যপুত্রঃ। স তু চিরজীবী মহারথী চ। তৎপর্য্যায়ঃ। কৃপীসুতঃ২ দ্রৌণায়নঃ৩। ইতি ত্রিকাণ্ডশেষঃ॥ দ্রৌণিঃ ৪। ইতি স্মার্ত্তাঃ॥ বৃদ্ধ্যভাবে দ্রোণিঃ ৫॥

অশ্বত্থী (স্ত্রী) বৃক্ষবিশেষঃ। পিপ্পলী ইতি লোকে। তৎপর্য্যায়ঃ। লঘুপত্রী ২ পবিত্রা ৩ হ্রস্বপত্রিকা ৪ পিপ্পলীকা ৫ বনস্থা ৬ অশ্বত্থিকা ৭। অস্যা গুণাঃ। মধুরত্বং। কষায়ত্বং। অস্রপিত্তনাশিত্বং। বিষদাহপ্রশমনকারিত্বং। গুর্ব্বিণ্যা হিতকারিত্বঞ্চ॥ ইতি রাজনির্ঘণ্টঃ॥

অশ্বদংষ্ট্রা (স্ত্রী) গোক্ষুরবৃক্ষঃ। ইত্যমরঃ॥

অশ্বস্তং (ক্লী) অশুভং। ক্ষেত্রং। চুল্লী। অনবধি। মৃতং। ইতি হেমচন্দ্রঃ॥

অশ্বপালঃ (পুং) ঘোটকরক্ষকঃ। সইস্ ইতি আরবীভাষা। ইতি আশ্বপালিকশব্দটীকায়াং দুর্গাদাসঃ॥

অশ্বপুচ্ছী (স্ত্রী) মাষপর্ণীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

অশ্ববালঃ (পুং) কাশঃ। কেশ্যা ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ॥

অশ্বমহিষিকা (স্ত্রী) অশ্বমহিষয়ো র্নিত্যবৈরতা। ইতি শব্দরত্নাবলী॥

অশ্বমারঃ, অশ্বমারকঃ (পুং) করবীরবৃক্ষঃ। ইতি শব্দরত্নাবলী॥

অশ্বমুখঃ (পুং) কিন্নরঃ। ইতি হলায়ুধঃ॥

অশ্বমেধঃ (পুং) যজ্ঞবিশেষঃ। ইতি জটাধরঃ॥ যত্র লক্ষণবিশেষাক্রান্ত মশ্বং সংপ্রোক্ষ্য কপালে জয়পত্রং বদ্ধা ত্যজেৎ তদ্রক্ষার্থং পুরুষবিশেষং নিযোজয়েৎ সংবৎসরান্তে অশ্বে আগতে সতি অথবা কেনাপি সংবন্ধে যুদ্ধং কৃত্বা তমানীয় যথাবিধি বধং কৃত্বা তদ্বপয়া হোমঃ কর্ত্তব্যঃ। কামনানুসারেণ তৎ ফলং। মোক্ষঃ ব্রহ্মহত্যাপাপক্ষয়ঃ স্বর্গশ্চ। যথা। আপস্তম্বঃ। রাজা সার্ব্বভৌমঃ অশ্বমেধেন যজেত নাপ্যসার্ব্বভৌমঃ ইতি॥ প্রায়শ্চিত্তাত্মকাশ্বমেধো যথা। বিষ্ণুঃ। অনুপাতকিন স্ত্বেতে মহাপাতকিনো যথা। অশ্বমেধেন শুদ্ধ্যন্তি তীর্থানুসরণেন বা॥ অপি চ। অশ্বমেধেন শুদ্ধ্যন্তি মহাপাতকিন স্ত্বিমে। ইতি বিষ্ণু-

ত্তাশ্বমেধস্য প্রায়শ্চিত্তত্বং । পাপক্ষয়-স্বর্গোভয়সাধকস্য তু তস্যাপি ন প্রায়শ্চিত্তত্বং। ইতি প্রায়শ্চিত্ততত্বং ॥ * ॥ কলৌ তস্য নিষেধো যথা। বৃহন্নারদীয়ে। দীর্ঘকালং ব্রহ্মচর্য্যং নরমেধাশ্বমেধকৌ। মহাপ্রস্থানগমনং গোমেধঞ্চ তথা মখং ॥ ইমান্ ধর্ম্মান্ কলিযুগে বর্জ্জ্যানাহু র্মনীষিণঃ। ইত্যুদ্বাহতত্বং ॥ অন্যচ্চ। ব্রহ্মপুরাণং। নরাশ্বমেধৌ মদ্যঞ্চ কলৌ বর্জ্জ্যা দ্বিজাতিভিঃ। ইতি তিথ্যাদিতত্বং ॥ * ॥ তৎফলজনককর্ম্মাণি যথা। বৈশাখে মাসি যঃ কুর্য্যাৎ প্রপাং মাধবতুষ্টয়ে। দিনে দিনে ঽশ্বমেধস্য ফলং প্রাপ্নোতি মানবঃ ॥ ইতি পাদ্মে ক্রিয়াযোগসারে ১১ অধ্যায়ঃ ॥ অপি চ। ব্রহ্মাণ্ডে। স্নানন্তু ভক্ত্যা গঙ্গায়াং কর্ত্তুকামস্য গচ্ছতঃ। পদে পদে ঽশ্বমেধস্য ফলং মর্ত্ত্যস্য জায়তে॥ ইতি প্রায়শ্চিত্ততত্বং ॥

অশ্বমেধিকঃ (পুং) অশ্বমেধযাগোপযুক্তঘোটকঃ। ইতি জটাধরঃ ॥

অশ্বমেধীয়ঃ (পুং) অশ্বমেধযজ্ঞীয়াশ্বঃ। তৎপর্য্যায়ঃ। যযুঃ ২। ইত্যমরঃ॥ তস্য লক্ষণং। কালাম্ভোধরসঙ্কাশঃ স্বর্ণবর্ণমুখো বলী। যস্য পার্শ্বাবুভাবর্দ্ধচন্দ্রাকারৌ সুশোভনৌ ॥ পুচ্ছং বিদ্যুৎপ্রতীকাশমুদরং কুন্দসন্নিভং। পাদা শ্চৈব হরিদ্বর্ণাঃ কর্ণৌ সিন্দূরসন্নিভৌ॥ জ্বলদগ্নিনিভা জিহ্বা চক্ষুষী ভাস্করোপমে। বিরাজিতো রোমরাজ্যা সানুলোমবিলোময়া ॥ বিচিত্রৈর্ব্বিবিধৈ র্বর্ণৈ শ্চিত্রো রজতবিন্দুভিঃ। যো বেগে বায়ুতুল্যঃ স্যাদুচ্চৈ রুচ্চৈঃশ্রবো যথা ॥ যস্য গাত্রোদ্ভবো গন্ধো গন্ধর্ব্বমপি মোহয়েৎ। এবং লক্ষণসংযুক্তো যজ্ঞীয়ঃ পশু রুচ্যতে॥ অশ্বস্য পালক শ্চাতিবলবান্ পুত্র উচ্যতে। পুত্রতুল্যঃ সুহৃদ্বাপি বহুবিঘ্নঃ ক্রতূত্তমঃ ॥ ইতি বাশিষ্ঠরামায়ণং ॥

অশ্বযুক্ [জ্] (স্ত্রী) অশ্বিনীনক্ষত্রং। ইত্যমরঃ ॥

অশ্বযুক্ [জ্] ⎫ (পুং) আশ্বিনমাসঃ। ইতি
অশ্বযুজঃ ⎭ শব্দরত্নাবলী ॥

অশ্বরক্ষঃ (পুং) ঘোটকরক্ষকঃ। অশ্বপালঃ। ইতি জটাধরঃ ॥

অশ্বরোধকঃ (পুং) করবীরবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

অশ্বলালা (স্ত্রী) সর্পবিশেষঃ। তৎপর্য্যায়ঃ। হলাহলঃ ২ ব্রহ্মসর্পঃ ৩। ইতি ত্রিকাণ্ডশেষঃ ॥

অশ্ববক্ত্রঃ (পুং) কিন্নরঃ। ইতি শব্দমালা ॥

অশ্ববড়বং (ক্লী) অশ্ববড়বানাং সমাহারঃ। অশ্ববড়বয়ো র্দ্বন্দ্বে অশ্ববড়বৌ। অশ্ববড়বানাং দ্বন্দ্বে অশ্ববড়বাঃ। ইত্যমরটীকায়াং ভরতঃ সারসুন্দরী চ ॥ ঘোড়া ঘুড়ীর সমাহারদ্বন্দ্বসমাসে ক্লীবলিঙ্গের একবচন হয় ইতরেতরদ্বন্দ্বে পুংলিঙ্গের দ্বিবচন বহুবচন হয় ইতি ভাষা ॥

অশ্ববহঃ (পুং) অশ্ববাহকঃ। ঘোড়সওয়ার ইতি ভাষা। ইতি জটাধরঃ ॥

অশ্ববারঃ (পুং) সাদী। ঘোড়সওয়ার ইতি ভাষা। ইতি হেমচন্দ্রঃ ॥

অশ্ববারণঃ ( পুং ) গলকম্বলরহিতগোসদৃশ-পশুবিশেষঃ। তৎপর্য্যায়ঃ। গবয়ঃ২ বনগবঃ ৩ গোসদৃক্ষঃ৪। ইতি হেমচন্দ্রঃ ॥

অশ্ববিৎ [ দ্ ] ( পুং ) নলরাজা। ইতি ত্রিকাণ্ড-শেষঃ ॥

অশ্ববৈদ্যঃ ( পুং ) ঘোটকচিকিৎসকঃ। সালোত্তরী ইতি হিন্দি ভাষা। অশ্বস্য বৈদ্যঃ ইতি ষষ্ঠীতৎপুরুষসমাসনিষ্পন্নঃ ॥

অশ্বশালা ( স্ত্রী ) ঘোটকগৃহং। ঘোড়ার পাই-শাল। আস্তবল্ ইতি ভাষা। যথা বাজিশালা তু মন্দুরা। ইত্যমরঃ ॥ দ্বে অশ্বাবস্থানগৃহে। বাজিনো ঽশ্বস্য শালা গৃহং বাজিশালা। অশ্বশালাদি চ। ইতি তট্টীকায়াং ভরতঃ ॥

অশ্বশৃগালিকা ( স্ত্রী ) অশ্বশৃগালয়ো বৈরতা। ইতি শব্দরত্নাবলী ॥

অশ্বষড়্গবং ( ক্লী ) অশ্বষট্কং। যড়শ্বাঃ। ইতি পাণিনিঃ ॥

অশ্বসেননৃপনন্দনঃ ( পুং ) সনৎকুমারঃ। ইতি হেমচন্দ্রঃ ॥

অশ্বা ( স্ত্রী ) ঘোটকী। ঘুড়ী ইতি ভাষা। তৎ-পর্য্যায়ঃ। বামী২ বড়বা ৩। ইত্যমরঃ ॥

অশ্বারিঃ ( পুং ) মহিষঃ। ইতি জটাধরঃ ॥

অশ্বারূঢ়ঃ ( পুং ) অশ্বারোহঃ। ঘোটকোপরি কৃতারোহণঃ। যথা। অশ্বারোহাস্ত সাদিনঃ। ইত্যমরঃ॥ দ্বে অশ্বারূঢ়ে। অশ্ব মারোহন্তি অশ্বারোহাঃ ঢাৎ ষণ্। সাদয়ন্তি ভ্রময়ন্তি অশ্বান্ সাদিনঃ গ্রহাদিত্বাৎ ণিন্। ইতি তট্টীকায়াং ভরতঃ ॥

অশ্বারোহঃ ( ত্রি ) অশ্বপৃষ্ঠস্থিতযোদ্ধা। ঘোড়-সওয়ার ইতি ভাষা। তৎপর্য্যায়ঃ। সাদী২ ইত্যমরঃ ॥ অশ্ববহঃ ৩। ইতি জটাধরঃ ॥ অশ্ববারঃ ৪ তুরগী ৫। ইতি হেমচন্দ্রঃ ॥

অশ্বারোহা ( স্ত্রী ) অশ্বগন্ধাবৃক্ষঃ। অশ্ববাহকে ত্রি। ইতি মেদিনী ॥

অশ্বারোহী [ ন্ ] ( ত্রি ) অশ্বারোহণবিশিষ্টঃ। অশ্বারূঢ়ঃ। অশ্বারোহণকর্ত্তা। অশ্বারোহণ-শীলঃ। ঘোড়সওয়ার ইতি ভাষা। অশ্ব মারোহিতুং শীল মস্যেত্যর্থে ণিন্প্রত্যয়েন নিষ্পন্নঃ ॥

অশ্বাবরোহকঃ ( পুং ) অশ্বগন্ধাবৃক্ষঃ। ইতি রত্নমালা ॥

অশ্বাক্ষঃ ( পুং ) দেবসর্ষপবৃক্ষঃ। ইতি রাজ-নির্ঘণ্টঃ ॥

অশ্বিনী ( স্ত্রী ) সপ্তবিংশতিনক্ষত্রান্তর্গত-প্রথমনক্ষত্রং। অশ্বিন্যাদয়ো রেবত্যন্তাঃ সপ্তবিংশতিতারা দক্ষস্যাপত্যত্বাৎ দাক্ষায়ণ্য উচ্যন্তে। তৎপর্য্যায়ঃ। অশ্বযুক্ ২ দাক্ষায়ণী ৩। ইত্যমরঃ॥ সা চন্দ্রস্য ভার্য্যা। নবপাদাত্মকমেষরাশে রাদিচতুষ্পাদরূপা চ॥ অস্যা রূপং। ঘোটক-মুখাকৃতিতারাত্রয়াত্মকং। অস্যা অধিষ্ঠাত্রী দেবতা অশ্বারূঢ়পুরুষঃ। ইতি জ্যোতিঃশাস্ত্রং ॥ তস্যাং জাতফলং। সদৈব দেবাভ্যুদিতো বিনীতঃ সত্যান্বিতঃ প্রাপ্তসমস্তসম্পৎ। যোষাবিভূষাত্মজভূরিতোষঃ স্যাদশ্বিনীজন্মনি মানবস্য। ইতি কোষ্ঠীপ্রদীপঃ ॥ তস্য মস্তকোপরি

উদয়ে কর্কটলগ্নস্য ১।৩০ ত্রিংশৎপলাধিকদণ্ডৈকো গতো ভবতি। যথা। তস্মিঘোটকমুখাকৃতৌ ত্রিভে মস্তকোর্দ্ধপথভাজি বাজিনি। চারুচন্দ্রমুখি কর্কটোদয়াৎ নির্গতা গগনরন্ধ্রলিপ্তিকাঃ॥ ইতি শ্রীকালিদাসকৃতরাত্রিলগ্ননির্ণয়ঃ॥

অশ্বিনীকুমারৌ (পুং) অশ্বিনীসুতৌ। অশ্বাভূতসংজ্ঞানাম সূর্য্যপত্ন্যাঃ যমজপুত্রৌ। তৌ দেবচিকিৎসকৌ। নিত্যদ্বিবচনান্তশব্দোঽয়ং॥

অশ্বিনীপুত্রৌ (পুং) স্বর্বৈদ্যৌ। ইতি হেমচন্দ্রঃ।

অশ্বিনীসুতৌ (পুং) অশ্বিনীপুত্রৌ। তয়োঃ পর্য্যায়ঃ। স্বর্বৈদ্যৌ ২ অশ্বিনৌ ৩ দস্রৌ ৪ নাসত্যৌ ৫ আশ্বিনেয়ৌ ৬। ইত্যমরঃ॥ নাসিক্যৌ ৭ গদাগদৌ ৮। ইতি জটাধরঃ॥ পুষ্করস্রজৌ ৯। ইতি শব্দরত্নাবলী॥

অশ্বিনৌ (পুং) অশ্বিনীকুমারৌ। ইত্যমরঃ॥

অশ্বীনঃ (ত্রি) একাশ্বকরণকদিনৈকগম্যস্থানাদিঃ। আশ্বিন ইত্যমরঃ॥ বৃদ্ধ্যভাবপক্ষে অশ্বিনঃ॥

অশ্বীয়ং (ক্লী) অশ্ববৃন্দং। অশ্বসমূহঃ। তৎপর্য্যায়ঃ। আশ্বং ২। ইত্যমরঃ॥

অশ্বীয়ঃ (ত্রি) অশ্বহিতঃ। অশ্বহিতকারী॥ ইতি মেদিনী॥ অশ্বসম্বন্ধীয়ঃ॥

অষ ঞ্ দীপ্তৌ। গ্রহণে। গতৌ। ইতি কবিকল্পদ্রুমঃ॥ ঞ্ অষতি অষতে। ইতি দুর্গাদাসঃ॥

অষড়ক্ষীণঃ (ত্রি) যো মন্ত্রাদির্দ্বাভ্যাং ক্রিয়তে ন তৃতীয়াদীনাং গোচরঃ। দুইজনে করা মন্ত্রণা ইতি ভাষা। ইত্যমরঃ॥

অষাঢ়ঃ (পুং) আষাঢ়মাসঃ। ব্রতে পালাশদণ্ডঃ। ইত্যমরটীকাধৃতদ্বিরূপকোষঃ॥

অষাঢ়কঃ (পুং) আষাঢ়মাসঃ। ইতি শব্দমালা॥

অষ্ট [ন্] (ত্রি) সংখ্যাবিশেষঃ। ৮ আট ইতি ভাষা। নিত্যবহুবচনান্তশব্দোঽয়ং। ইতি ব্যাকরণং॥ অথাষ্টবাচকশব্দাঃ। যোগাঙ্গং ১ বসুঃ ২ শিবমূর্ত্তিঃ ৩ দিগ্গজঃ ৪ সিদ্ধিঃ ৫ ব্রহ্মশ্রুতিঃ ৬ ব্যাকরণং ৭ দিক্পালঃ ৮ অহিঃ ৯ কুলাদ্রিঃ ১০ ঐশ্বর্য্যং ১১। ইতি কবিকল্পলতা॥

অষ্টকঃ (ত্রি) অষ্টসংখ্যা। অষ্টএবাষ্টকঃ স্বার্থে কপ্রত্যয়ঃ। অষ্টসংখ্যাবিশিষ্টং যথা। গঙ্গাষ্টকং পঠতি যঃ প্রযতঃ প্রভাতে বাল্মীকিনা বিরচিতং সুখদং মনুষ্যঃ। ইতি বাল্মীকীয়গঙ্গাষ্টকং॥ অপি চ। অচ্যুতং কেশবং বিষ্ণুং হরিং সত্যং জনার্দ্দনং। হংসং নারায়ণঞ্চৈব এতন্নামাষ্টকং শুভং। ইতি ব্রহ্মপুরাণে শ্রীবিষ্ণুনামাষ্টকং স্তোত্রং॥

অষ্টকর্ণঃ (পুং) ব্রহ্মা। ইতি শব্দরত্নাবলী॥

অষ্টকা (স্ত্রী) শ্রাদ্ধবিশেষঃ। তিথিভেদঃ। তদ্ যথা। গৌণচান্দ্রপৌষমাঘফাল্গুনমাসীয়কৃষ্ণাষ্টমী। আশ্বিনকৃষ্ণাষ্টমী চ। এতাসু শ্রাদ্ধমাবশ্যকং। যথা। আগ্রহায়ণ্যা ঊর্দ্ধং তিসৃষু কৃষ্ণাষ্টমীষু শ্রাদ্ধানি নিত্যানি। যথা গোভিলঃ। অষ্টকা যোর্দ্ধ মাগ্রহায়ণ্যা স্তমিস্রাষ্টমী। ইতি। ব্রহ্মপুরাণে। পিত্র্যদানায় মূলে স্যু রষ্টকা স্তিস্র এব চ। কৃষ্ণপক্ষে বরিষ্ঠা হি পূর্ব্বা চৈন্দ্রী বিভাব্যতে॥ প্রাজাপত্যা দ্বিতীয়া স্যাৎ তৃতীয়া বৈশ্ব-

দেবকী। আদ্যা পূপৈঃ সদা কার্য্যা মাংসৈ রন্যা ভবেত্তথা॥ শাকৈঃ কার্য্যা তৃতীয়া স্যাদেষ দ্রব্যগতো বিধিঃ। মূলে প্রধানস্থানে অমাবাস্যায়াং অমাবাস্যা হি শ্রাদ্ধস্য প্রধানকাল স্তদ্বদিতি যাবৎ। ঐন্দ্রী সাগ্নে রিন্দ্রদেবতাকযাগসম্বন্ধাৎ। এবং প্রাজাপত্যা বৈশ্বদেবকী চ। মাংসৈঃ পশোঃ। তথা চ গোভিলঃ। যদ্যপ্যল্পতরসম্ভারঃ স্যাত্তদাপি পশুনৈব কুর্য্যাৎ ইতি। যদ্যপীতি নিপাতসমুদায়ো যদ্যর্থে পশু রপি ছাগ এব। ছাগো হনাদেশে পশুঃ। ইতি গৌতমাৎ। ন চ তৈষ্যা ঊর্দ্ধ মষ্টম্যাং গৌঃ। ইতি গোভিলসূত্রেণ গবোপদেশাৎ কথ মনুপদিষ্টত্ব মিতি বাচ্যং। তদসম্ভবে পশু রিত্যনেন যঃ পশু রুপদিষ্ট স্তস্য বিশেষতো হনুপদিষ্টত্বাৎ। তৈষী পৌষী। বস্তুতস্তু হরিবংশে মৃগোহপি বিহিতঃ। যথা। ইক্ষাকুস্তু বিকুক্ষিং বৈ অষ্টকায়া মথাদিশৎ। মাংস মানয় শ্রাদ্ধায় মৃগং হত্বা মহাবলঃ॥ ইতি। স্ত্রিয়া বধাভাব মাহ সএব। অবধ্যাঞ্চ স্ত্রিয়ং প্রাহু স্তির্য্যগ্‌যোনিগতেষ্বপি। এতদৰ্দ্ধং ব্রহ্মপুরাণে হপি। আরণ্যানা মগস্ত্যপ্রোক্ষিতত্বং বক্ষ্যতে। পশ্বভাবে স্থালীপাকেন। যথা গোভিলঃ। অপি বা স্থালীপাকং কুর্ব্বীত ইতি। তদ্বিধানস্তু। স্থালীপাকং পশুস্থানে কুর্য্যাদ্‌যদ্যানুকল্পিকং। শ্রপয়েত্তং সবৎসায়া স্তরুণ্যা গোঃ পয়স্যনু॥ ইতি ছন্দোগপরিশিষ্টোক্তং গ্রাহ্যং। অন্বিতি ওদনচরোঃ পশ্চাৎ। অতএব সাতাতপঃ। নবোদকে নবান্নে চ গৃহপ্রচ্ছাদনে তথা। পিতরঃ স্পৃহয়ন্ত্যন্ন মষ্টকাসু মঘাসু চ॥ তস্মাদ্দদ্যাৎ সদা যুক্তো বিদ্বৎসু ব্রাহ্মণেষু চ। তস্মাদন্নং প্রধানং। পূপাদিকন্তূপকরণত্বেন শক্তানা মাবশ্যকং উভয়ত্র সদেতি শ্রবণাৎ। তথা চ। নিত্যং সদা যাবদায়ু র্ন কদাচিদতিক্রমেৎ। উপেত্যাতিক্রমে দোষশ্রুতে রত্যাগদর্শনাৎ॥ ফলাশ্রুতে র্বীপ্সয়া চ তন্নিত্য মিতি কীর্ত্তিতং। ইতি তিথ্যাদিতত্ত্বং॥ গৌণচান্দ্রপৌষস্য কৃষ্ণাষ্টমী পূপাষ্টকা। গৌণচান্দ্রমাঘস্য কৃষ্ণাষ্টমী মাংসাষ্টকা। গৌণচান্দ্রফাল্গুনস্য কৃষ্টাষ্টমী শাকাষ্টকা। কেচিন্মতে গৌণচান্দ্রাশ্বিনস্য কৃষ্ণাষ্টমী অষ্টকাপদবাচ্যা। তাসু ক্রমাৎ পূপমাংসশাকৈঃ ষাট্‌পৌরুষিকং শ্রাদ্ধং কর্ত্তব্যং। ইতি ব্রহ্মবায়ুবিষ্ণুধর্ম্মোত্তরপুরাণানি॥

**অষ্টকাঙ্গং** ( ক্লী ) নয়পীঠী। পাশার ছক্ ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ॥

**অষ্টপাৎ** [ দ্ ] ( পুং ) লূতা। মাকড়্সা ইতি ভাষা। শরভঃ। ইতি হেমচন্দ্রঃ॥

**অষ্টপাদঃ** (পুং) ঊর্ণনাভবিশেষঃ। তৎপর্য্যায়ঃ। কিন্তনুঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥

**অষ্টপাদিকা** ( স্ত্রী ) লতাবিশেষঃ। হাপরমালী ইতি ভাষা। ইতি রত্নমালা॥

**অষ্টমঃ** (ত্রি) অষ্টানাং পূরণঃ। ইতি ব্যাকরণং॥ যথা। কাত্যায়নঃ। অষ্টমেহংশে চতুর্দ্দশ্যাঃ ক্ষীণো ভবতি চন্দ্রমাঃ। অমাবাস্যাষ্টমাংশে চ ততঃ কিল ভবেদণুঃ॥

ইতি শ্রাদ্ধতত্ত্বং ॥ অপি চ। সাবর্ণিঃ সূর্য্যতনয়ো যো মনুঃ কথ্যতে ঽষ্টমঃ। নিশাময় তদুৎপত্তিং বিস্তরাদ্গদতো মম ইতি দেবীমাহাত্ম্যং ॥

অষ্টমঙ্গলং ( ক্লী ) অষ্টপ্রকারমঙ্গলদ্রব্যং। তদ্যথা। মৃগরাজো বৃষো নাগঃ কলসো ব্যজনস্তথা। বৈজয়ন্তী তথা ভেরী দীপ ইত্যষ্টমঙ্গলং ॥ ইতি বৃহন্নন্দিকেশ্বরপুরাণোক্তদুর্গোৎসবপদ্ধতৌ ॥ লোকে ঽস্মিন্ মঙ্গলান্যষ্টৌ ব্রাহ্মণো গৌ হুর্তাশনঃ। হিরণ্যং সর্পি রাদিত্য আপো রাজা তথাষ্টমঃ। ইতি শুদ্ধিতত্ত্বং ॥

অষ্টমঙ্গলঃ ( পুং ) শ্বেতবর্ণমুখবক্ষঃখুরকেশপুচ্ছযুক্তঘোটকঃ। ইতি হেমচন্দ্রঃ ॥

অষ্টমঙ্গলঘৃতং ( ক্লী ) অষ্টৌষধযুক্তপকঘৃতং। যথা। বচা কুষ্ঠং তথা ব্রাহ্মী সিদ্ধার্থক মথাপি চ। সারিবা সৈন্ধবঞ্চৈব পিপ্পলী ঘৃত মষ্টমং ॥ সিদ্ধং ঘৃত মিদং মেধ্যং পিবেৎ প্রাত র্দ্দিনে দিনে। দৃঢ়স্মৃতিঃ কুমারাণাং পিবতা মষ্টমঙ্গলং ॥ ইতি ভাবপ্রকাশঃ ॥

অষ্টমানং ( ক্লী ) কুড়বপরিমাণং। শরাবার্দ্ধং। ইতি বৈদ্যকপরিভাষায়াং ॥

অষ্টমিকা ( স্ত্রী ) শুক্তিপরিমাণং। চতুস্তোলকং। ইতি বৈদ্যকপরিভাষায়াং ॥

অষ্টমী (স্ত্রী) ক্ষীরকাকোলী। ইতি শব্দচন্দ্রিকা॥ তিথিবিশেষঃ। সা চন্দ্রস্যাষ্টমকলাক্রিয়ারূপা। তদুপলক্ষিতকালরূপা চ। সা চ শুক্লা নবমীযুতা গ্রাহ্যা যুগ্মাৎ। কৃষ্ণা চ সপ্তমীযুতা। যথা নিগমঃ। কৃষ্ণপক্ষে ঽষ্টমী চৈব কৃষ্ণপক্ষে চতুর্দ্দশী। পূর্ব্ববিদ্ধৈব কর্ত্তব্যা পরবিদ্ধা ন কুত্রচিৎ ॥ উপবাসাদিকার্য্যেষু এষ ধর্ম্মঃ সনাতনঃ ॥ * ॥ ভবিষ্যপুরাণে। চতুর্দ্দশ্যাং তথাষ্টম্যাং পক্ষয়োঃ শুক্লকৃষ্ণয়োঃ। যোঽব্দ মেকং ন ভুঞ্জীত শিবার্চ্চনপরো নরঃ॥ যৎ পুণ্য মক্ষয়ং প্রোক্তং সততং সত্রযাজিনাং। তৎপুণ্যং সকলং তস্য শিবলোকঞ্চ গচ্ছতি ॥ ততশ্চ সততসত্রযাজ্যক্ষয়পুণ্যসমপুণ্যপ্রাপ্তিঃ শিবলোকগতিশ্চ ফলং। ফাল্গুনশুক্লাষ্টমীচতুর্দ্দশ্যো রারভ্য বর্ষং যাবৎ প্রত্যষ্টমী প্রতিচতুর্দ্দশ্যুপবাসব্রতং ॥ * ॥ কালিকাপুরাণে। যৈষা ললিতকাস্তাখ্যা দেবী মঙ্গলচণ্ডিকা। বরদাভয়হস্তা চ দ্বিভুজা গৌরদেহিকা ॥ রক্তপদ্মাসনস্থা চ মুকুটকুণ্ডলমণ্ডিতা। রক্তকৌষেয়বস্ত্রা তু স্মিতবক্ত্রা শুভাননা ॥ নবযৌবনসম্পন্না চার্ব্বঙ্গী ললিতপ্রভা। উময়া ভাষিতং মন্ত্রং যৎ পূর্ব্বং ত্বেক মক্ষরং ॥ মন্ত্র মস্যাস্ত তজ্জ্ঞেয়ং তেন দেবীং প্রপূজয়েৎ। এক মক্ষরং শক্তিবীজরূপং। তথাষ্টম্যাং নবম্যাঞ্চ পূজা কার্য্যা বিবৃদ্ধয়ে ॥ পটেষু প্রতিমায়াম্বা ঘটে মঙ্গলচণ্ডিকাং। যঃ পূজয়েদ্ভৌমবারে শুভৈ দূর্ব্বাক্ষতৈঃ শিবাং ॥ সততং সাধকঃ সোঽপি কাম মিষ্ট মবাপ্নুয়াৎ ॥ * ॥ জ্যোতিষে। শনৈশ্চরস্য বারেণ বারেণাঙ্গারকস্য চ। কৃষ্ণাষ্টমী চতুর্দ্দশ্যৌ পুণ্যাৎ পুণ্যতরে স্মৃতে ॥ তথা। সোমবারে ঽপ্যমাবাস্যা আদিত্যাহে তু সপ্তমী। চতুর্থ্যঙ্গারবারে চ অষ্টমী চ বৃহস্পতৌ।

অত্র যৎ ক্রিয়তে পাপ মথ বা ধর্ম্মসঞ্চয়ঃ। ষষ্টিজন্মসহস্রাণি প্রতিজন্ম তদক্ষয়ং॥ ইতি তিথ্যাদিতত্ত্বং॥ *॥ শ্রীকৃষ্ণজন্মাষ্টমী-ব্রতং অষ্টকাশ্রাদ্ধং ভীষ্মাষ্টমীকৃত্যঞ্চ তত্তচ্ছব্দে দ্রষ্টব্যং॥ মহাষ্টমীকৃত্যং মহাষ্টমী-শব্দে দ্রষ্টব্যং॥ তত্র জাতফলং। ভূপালতঃ প্রাপ্তধনঃ কৃশাঙ্গঃ সুখী কৃপালুর্যুবতিপ্রিয়শ্চ। চতুষ্পদাঢ্যো ধনধান্য-যুক্তঃ স্যাদষ্টমীজো মনুজঃ সুধীরঃ॥ ইতি কোষ্ঠীপ্রদীপঃ॥

অষ্টমূর্ত্তিঃ (পুং) শিবঃ। ইতি হেমচন্দ্রঃ॥ তৎপ্রত্যেকমূর্ত্তি নামানি। ক্ষিতিমূর্ত্তিঃ সর্ব্বঃ ১ জলমূর্ত্তি র্ভবঃ ২ অগ্নিমূর্ত্তী রুদ্রঃ ৩ বায়ুমূর্ত্তি রুগ্রঃ ৪ আকাশমূর্ত্তি র্ভীমঃ ৫ যজমানমূর্ত্তিঃ পশুপতিঃ ৬ চন্দ্রমূর্ত্তি র্ম্মহা-দেবঃ ৭ সূর্য্যমূর্ত্তি রীশানঃ ৮। ইতি তন্ত্র-শাস্ত্রং॥ এতাঃ শরভরূপিশিবস্যাষ্টপাদাঃ ইতি কালিকাপুরাণং॥ যথা। অষ্টমূর্ত্তি র্নিধীশশ্চ জ্ঞানচক্ষু স্তমোময়ঃ। ইতি বটুকভৈরবস্তোত্রং॥ তস্যাষ্ট মূর্ত্তয়ো যথা। অথাগ্নি রবি রিন্দুশ্চ ভূমি রাপঃ প্রভঞ্জনঃ। যজমানঃ খমষ্টৌ চ মহাদেবস্য মূর্ত্তয়ঃ। ইতি শব্দমালা॥

অষ্টলোহকং (ক্লী) অষ্টধাতুবিশেষঃ। তদ্-যথা। সুবর্ণং ১ রজতং ২ তাম্রং ৩ রঙ্গং ৪ সীসং ৫ কান্তলোহং ৬ মুণ্ডলোহং ৭ তীক্ষ্ণলোহং ৮। ইতি রাজনির্ঘণ্টঃ॥

অষ্টবর্গঃ (পুং) ঔষধবিশেষাষ্টকং। তদ্যথা। ঋষভঃ ১ জীবকঃ ২ মেদঃ ৩ মহামেদঃ ৪ ঋদ্ধিঃ ৫ বৃদ্ধিঃ ৬ কাকোলী ৭ ক্ষীরকাকোলী ৮। ইতি বৈদ্যকপরিভাষা। একাকৃতৈতদোষধগুণাঃ। রক্তপিত্তব্রণবায়ু-পিত্তনাশিত্বং। ইতি রাজবল্লভঃ॥ জ্যোতিষশাস্ত্রোক্তগোচরবিশেষঃ। তদ্যথা। আদৌ রব্যাদিসপ্তগ্রহাণাং রাহো শ্চ অষ্ট-মাসকোষ্ঠং কৃত্বা প্রত্যেকমাসকোষ্ঠে জন্ম-কালীনগ্রহাধিষ্ঠিতরাশ্যবধি স্বাদ্দিনকৃচ্ছুভদ ইত্যাদি দীপিকোক্তবচনাঙ্কসংখ্যকগৃহে রেখাং বিন্যসেৎ তত্র রবে র্দ্বাদশকোষ্ঠে ৪৮ চন্দ্রস্য ৪৯ কুজস্য ৩৯ বুধস্য ৫৫ গুরোঃ ৫৬ ভৃগোঃ ৫২ শনেঃ ৩৯ রাহোঃ ৩৯ এতৎসংখ্যকা রেখা দেয়াঃ। ততঃ প্রত্যেকগৃহস্থরেখা দ্বিগুণী-কৃত্য অষ্টাধিকা শ্চেৎ অষ্টভিঃ শোধ-য়েৎ। শেষা রেখাঃ শুভাঃ খ্যাতাঃ। অষ্টোনা শ্চেত্তদা বিন্দুভি রষ্টানাং পূরণং কার্য্যং। তত্র বিন্দবোঽশুভাঃ খ্যাতাঃ। অষ্টৌ চেৎ তদা বিন্দুরেখয়ো রভাব স্তত্র সমং পরিকীর্ত্তিতং॥ তস্য নামগুণাঃ।

র্ভিকৌ মেদে কাকোল্যৌ বৃদ্ধি-ঋদ্ধিকে। অষ্টবর্গো ঽষ্টভি র্দ্রব্যৈঃ কথিত শ্চরকাদিভিঃ॥ অষ্টবর্গো হিমঃ স্বাদু র্বৃং-হণঃ শুক্রলো গুরুঃ। ভগ্নসন্ধানকৃৎ বল্যঃ শরীরবলবর্দ্ধনঃ॥ বাতপিত্তাস্রতৃট্দাহ-জ্বরমেহক্ষয়প্রণুৎ। ইতি ভাবপ্রকাশঃ॥ *॥ জ্যোতিঃশাস্ত্রোক্তগণনয়া রেখা-বিন্দুভ্যাং শুভাশুভফলসূচকজন্মকালী-নাষ্টগ্রহসমুদায়ঃ। যথা। অথাষ্টবর্গঃ। জন্মকালগ্রহস্থিত্যা ফলং বক্ষ্যে শুভা-শুভং। স্বাদ্দিনকৃৎ শুভদঃ ক্ষিতিপক্ষ-

সমুদ্রনগাদিকপঞ্চগতো ১। ২। ৪।৭। ৮। ৯। ১০। ১১। হথ বিভাবরিভর্ত্তু স্ত্র্যঙ্গদশেশগতো ৩।৬।১০।১১। হথ কুজাদ্রবিবৎ ১।২।৪।৭।৮।৯।১০। ১১। অথ সোমসুতাত্রিশরর্ত্তু নবাদিষু যাতঃ।৩।৫।৬।৯।১০।১১। ১২। দেবগুরো র্বিষয়র্ত্তু নবেশগতো ৫। ৬। ৯। ১১। হথ সুরারিগুরোঃ সময়াচল-ভাস্করযাতঃ।৬।৭।১২। তীক্ষ্ণমরীচি-সুতাদপি ভাস্করবৎ।১।২।৪।৭।৮। ৯।১০।১১। অথ লগ্নগৃহাৎ ত্রিকৃতাঙ্গ-দশাদিষু যাতঃ ৩।৪।৬।১০।১১।১২ রবিরেখাঃ। ৪৮। ভুজঙ্গবিলাসাভিধান-মালাদণ্ডকেনাদিত্যাষ্টবর্গঃ ॥ * ॥ চন্দ্রঃ শুভো হর্কাত্রিকালাদ্রিদন্তাবলাশশিবস্থ। ৩। ৬। ৭। ৮। ১০। ১১। স্তুতঃ স্বাৎ কুরামর্ত্ত্বগাশাশিবস্থঃ। ১। ৩।৬ ৭। ১০। ১১। ক্ষ্মাজাদ্দ্বিবহ্নীষুষড়্গো-দিগীশেম্ব।২। ৩। ৫। ৬।৯।১০। ১১। থ জ্ঞাৎ কুরামাব্ধিবাণাগদন্তা-বলাশাশিবস্থঃ ১। ৩।৪।৫।৭। ৮। ১০। ১১। জীবাৎ কুদৃখেদশৈলেভকাষ্ঠা-শিবস্থো ১। ২।৪।৭। ৮।১০। ১১। হথ শুক্রাত্রিবেদেষুশৈলগ্রহাশাশিবস্থঃ ৩।৪।৫।৭।৯। ১০।১১। তীক্ষ্ণাং-শুদেহোস্তবাদ্রামবাণর্ত্তু শস্তু স্থিতো ৩। ৫ । ৬। ১১। হথোদয়াদ্ধব্যবাহর্ত্তু কাষ্ঠা-শিবস্থঃ।৩।৬।১০।১১। চন্দ্ররেখাঃ। ৪৯। কামবাণাভিধানমালাদণ্ডকেন চন্দ্রাষ্ট-বর্গঃ ॥ * ॥ কুজো হর্কাচ্ছুভো বহ্নিবাণর্ত্তু-দিক্শম্ভুগো ৩।৫।৬।১০।১১। হথে-ন্দুতো রামকালেশগ ৩। ৬।১১। স্তুতঃ স্বাৎ কুদৃখেদসপ্তাষ্টদিক্শম্ভুগঃ স্যাৎ ১।২।৪।৭।৮।১০।১১। নিশানাথ-পুত্রাদ্গুণেম্বঙ্গরুদ্রোপযাতঃ। ৩। ৫। ৬।১১। ততো জীবতঃ কালকাষ্ঠাশিবা-র্কোপযাতো ৬। ১০। ১১। ১২। হথ দেবারিপূজ্যাদনেহো গজেশার্কসংস্থঃ। ৬।৮।১১।১২। ততঃ সূর্য্যপুত্রাৎ কু-বেদাগনাগগ্রহাশাশিবস্থো ১। ৪। ৭। ৮।৯।১০।১১। হথ লগ্নাৎ কুরামাঙ্গ-দিক্শম্ভুযাতঃ।১। ৩।৬। ১০। ১১। কুজরেখাঃ ৩৯। সিংহবিলাসাভিধান-মালাদণ্ডকেন ভৌমাষ্টবর্গঃ ॥ * ॥ জ্ঞঃ শুভো হর্কতঃ শরর্ত্তু গোশিবার্কগো ৫। ৬।৯। ১১।১২। হথ চন্দ্রতো দ্বিবেদ-কালনাগদিগ্মহেশ্বরেষু। ২। ৪। ৬। ৮।১০।১১। ভুমিজাৎ কুদৃক্কৃতাগনাগ-গোদশেশগঃ।১।২।৪।৭।৮। ৯। ১০। ১১। ততঃ স্বতঃ কুবহ্নিপঞ্চষণ্ণ-বাদিকেষু। ১। ৩।৫। ৬।৯। ১০। ১১।১২। বাক্পতে রসাষ্টশম্ভু সূর্য্যগো ৬।৮।১১।১২। হথ শুক্রতঃ কুবাহু-বহ্নিবেদপঞ্চনাগগোশিবেষু। ১। ২। ৩।৪। ৫। ৮। ৯।১১। পঙ্গুতঃ কু-দৃক্কৃতাগনাগপঞ্চকস্থিতো হথ। ১। ২।৪। ৭। ৮। ৯।১০। ১১। ১২। লগ্নতঃ ক্ষিতিদ্বিবেদকালনাগদিক্শিবেষু। ১। ২। ৪। ৬। ৮। ১০। ১১। বুধরেখাঃ। ৫৫। অশোকমঞ্জরীসংজ্ঞক-

মালাদশুকেন বুধাষ্টবর্গঃ ॥ * ॥ সুররাজ-
গুরুঃ শুভদো রবিতঃ কুযমানলবেদ-
নগাদিক্‌পঞ্চগতো ১। ২। ৩।৪।৭।
৮।৯।১০। ১১। ঽথ বিধো র্দ্বিশরা-
চলগোশিবগো ২। ৫। ৭। ৯। ১১।
বসুধাতনয়াৎ কুযমাব্ধিনগাষ্টদশেশগতো
১। ২। ৪। ৭। ৮। ১০। ১১। ঽথ
বুধাৎ ক্ষিতিযুগ্মকৃতেষুরসগ্রহদিক্‌গিরি-
শোপগত ১। ২। ৪। ৫। ৬। ৯।
১০। ১১। স্তদনু স্বত একযমানলবারিধি-
পর্ব্বতনাগদশেশগতো ১। ২। ৩। ৪।
৭। ৮। ১০। ১১। ঽথ সিতাদ্‌যমপঞ্চ-
রসগ্রহদিক্‌শিবগো ২। ৫। ৬। ৯।
১০। ১১। রবিনন্দনতো দহনেষুরসার্ক-
গত ৩। ৫। ৬। ১২। স্তথ লগ্নগৃহাৎ
কুযমাব্ধিশরর্ত্তুনগগ্রহদিগ্‌গিরিশোপগতঃ
১। ২। ৪। ৫। ৬। ৭। ৯। ১০।
১১। গুরুরেখাঃ ৫৬। কুসুমস্তবকাভি-
ধানমালাদশুকেন বৃহস্পতেরষ্টবর্গঃ ॥ * ॥
ভৃগুঃ শুভো রবে র্গজেশসূর্য্যগো। ৮।
১১। ১২। ঽথ চন্দ্রতঃ ক্ষ্মাদিপঞ্চকাষ্ট-
গোশিবার্কগঃ। ১। ২। ৩। ৪। ৫। ৮।
৯। ১১। ১২। কুজাৎ ত্রিবেদকালগো-
শিবার্কগো। ৩। ৪। ৬। ৯। ১১।
১২। ঽথ বোধনাৎ ত্রিবাণকালরন্ধ্ররুদ্র-
সংস্থিতঃ। ৩। ৫। ৬। ৯। ১১। গুরোঃ
শরাষ্টরন্ধ্রদিগ্মহেশগ। ৫। ৮। ৯। ১০
১১। স্ততঃ স্বতঃ কুপঞ্চকাষ্টরন্ধ্রদিক্-
শিবোপগঃ। ১। ৫। ৮। ৯। ১০। ১১।
শনে র্গুণাব্ধিপঞ্চনাগগোদশেশগো। ৩।
৪। ৫। ৮। ৯। ১০। ১১। ঽথ
লগ্নতঃ কুপঞ্চকাষ্টগোশিবস্থিতঃ। ১।
২। ৩। ৪। ৫। ৮। ৯। ১১। শুক্র-
রেখাঃ ৫২। অনঙ্গশেখরাভিধানমালা-
দশুকেন ভার্গবাষ্টবর্গঃ ॥ * ॥ শুভঃ পঙ্গু
ররর্কাৎ ক্ষ্মাযমাম্ভোধিশৈলাষ্টদিক্‌শম্ভুগ।
১। ২। ৪। ৭। ৮। ১০। ১১।
ইন্দুতো রামকালেশগতঃ। ৩। ৬।
১১। ক্ষ্মাসুতাদ্বহ্নিবাণর্ত্তুকাষ্ঠাশিবার্কো-
পগো। ৩। ৫। ৬। ১০। ১১। ১২।
ঽথ জ্ঞতঃ কালদন্তাবলাদিস্থিতো। ৬।
৮। ৯। ১০। ১১। ১২। জীবতো বাণ-
কালেশমার্ত্তণ্ডযাত। ৫। ৬। ১১। ১২।
স্ততো দৈত্যপূজ্যাদনেহঃশিবার্কোপযাতঃ।
৬। ১১। ১২। স্বতো বীতিহোত্রেষু-
কালেশযাত। ৩। ৫। ৬। ১১।
স্ততো লগ্নতঃ ক্ষ্মাগুণাম্ভোধিষড়্‌দিগ্ম-
হেশস্থিতঃ। ১। ৩। ৪। ৬। ১০। ১১।
শনিরেখাঃ ৩৯। মত্তমাতঙ্গলীলাভিধান-
দশুকেন শনৈশ্চরাষ্টবর্গঃ। ইতি দীপিকা
॥ * ॥ রাহুঃ শুভো ঽর্কাত্তুজবহ্নিবেদর্ত্তু-
রন্ধ্রগো। ২। ৩। ৪। ৬। ৯। অথ
চন্দ্রাৎ কুরামবেদাঙ্গগ। ১। ৩। ৪।
৬। স্ততঃ কুজাদ্বহ্নিবাণাঙ্গরন্ধ্রগতো।
৩। ৫। ৬। ৯। ঽথ বুধাচ্ছশিপক্ষবহ্নি-
বাণরন্ধ্রগ। ১। ২। ৩। ৫। ৯। স্ততো
জীবাদ্ধব্যবাহবেদাঙ্গরন্ধ্রগ। ৩। ৪। ৬।
৯। স্ততঃ শুক্রাৎ পক্ষবহ্নিবাণরন্ধ্র-
গত। ২। ৩। ৫। ৯। স্ততঃ সৌরাৎ
পক্ষবাণর্ত্তুগ। ২। ৫। ৬। স্ততঃ স্বতঃ

শশিবেদবাণরিপুরন্ধ্রগো ।১ । ৪। ৫। ৬। ৯ । হথ লগ্নাম্বেদরন্ধ্রদিগুদ্রসূর্য্যগতঃ। ৪। ৯। ১০। ১১। ১২। রাহুরেখাঃ ৩৯। মৃগেন্দ্রবিলাসাভিধানদণ্ডকেন রাহো রষ্টবর্গঃ ॥ * ॥ সূর্য্যাদেকদ্বিচতুঃসপ্তাষ্টদশৈকাদশেষু। ১। ২। ৪। ৭। ৮। ১০ । ১১ । সোমাত্রিষড়্দশৈকাদশেষু। ৩। ৬ । ১০ । ১১ । ভৌমাত্রিপঞ্চষড়েকাদশেষু । ৩ । ৫ । ৬ । ১১ । বুধাৎ ষড়ষ্টনবদশৈকাদশেষু । ৬। ৮। ৯ । ১০। ১১ । গুরোঃ পঞ্চষড়েকাদশদ্বাদশেষু ।৫। ৬। ১১। ১২। শুক্রাৎ ষড়েকাদশদ্বাদশেষু। ৬। ১১। ১২। শনে স্ত্রিপঞ্চাষ্টদশৈকাদশেষু। ৩ । ৫। ৮। ১০ । ১১ । লগ্নাদেকত্রিচতুঃষড়্দশৈকাদশেষু। ১। ৩। ৪। ৬। ১১। এবং লগ্নরেখাঃ ৩৭ ॥ * ॥ ইতি নিগদিত মিষ্টং নেষ্ট মন্যদ্বিশেষাদধিকফলবিপাকং জন্মভাত্তত্র দত্ত্যঃ। উপচয়গৃহমিত্রস্বোচ্চগাঃ পুষ্টমিষ্টং ত্বপচয়গৃহনীচারাতিভে নেষ্টসম্পৎ ॥ যাবতী যাবতী রেখা গ্রহাণামষ্টবর্গকে। তাবতীং দ্বিগুণীকৃত্য অষ্টাভিঃ পরিশোধয়েৎ ॥ অষ্টোপরি ভবেদ্রেখা অষ্টাভ্যন্তরবিন্দবঃ। অষ্টাভিস্তু সমো যত্র তৎ সমং পরিকীর্ত্তিতং ॥ রেখা গ্রহাচ্ছুভে দেয়া বিন্দব শ্চেতরত্র তু। রেখাবিন্দু সমানৌ চেৎ সম স্তত্র নিগদ্যতে ॥ রেখাধিক্যে শুভং জ্ঞেয়ং তদ্বদ্বিন্দো রথাশুভং। শ্রীরানন্দ স্তথা শ্রেয়ো ভোগো রাজ্যং ভবেত্তথা ॥ মলিনো হথ বিপচ্চৈব হানি র্ম্মৃত্যু র্ভবেত্তথা। দ্ব্যাদিরেখা দ্ব্যাদিবিন্দোঃ ফলান্যেতান্যনুক্রমাৎ ॥ রেখায়াং বৎসরো জ্ঞেয়ঃ সার্দ্ধসপ্তদিনং সমে। অষ্টবর্গ দশায়ুঃ স্যাৎ দিনং চতুর্থ বিন্দুষু ॥ ইত্যায়ুর্দায়ঃ। ইত্যষ্টবর্গঃ ॥ * ॥ নন্দী। অষ্টবর্গশুভৈঃ শ্রীমান্ কর্ম্ম কুর্য্যান্নভশ্চরৈঃ। গোচরস্থে স্তদপ্রাপ্তৌ স্তদপ্রাপ্তৌ চ বেধগৈঃ ॥ ব্রতারম্ভে বিবাহে চ যাত্রায়াং ক্ষুরকর্ম্মণি । অবিশুদ্ধাষ্টবর্গস্য সমস্তা নিষ্ফলাঃ ক্রিয়াঃ ॥ সততং দিশতি নরাণাং রাশৌ মধ্যেহষ্টবর্গফলং নিখিলং। ভাবফলং প্রথমার্দ্ধে দৃষ্টিফলান্যর্দ্ধভুক্তেষু ॥ ইত্যষ্টবর্গার্থকথনং। ইতি জ্যোতিস্তত্ত্বং ॥

অষ্টশ্রবাঃ [ স্ ] ( পুং) ব্রহ্মা। ইতি ত্রিকাণ্ডশেষঃ ॥

অষ্টাকপালঃ ( পুং ) যজ্ঞবিশেষঃ। যত্র অস্টসু কপালেষু পুরোডাশঃ পক্ত্বা হূয়তে। ইতি শ্রুতিঃ ॥

অষ্টাঙ্গার্ঘ্যঃ ( পুং ) অষ্টদ্রব্যঘটিতপূজোপকরণবিশেষঃ। যথা। আপঃ ক্ষীরং কুশাগ্রাণি দধি সর্পিঃ সতণ্ডুলাঃ। যবাঃ সিদ্ধার্থকাশ্চৈব অষ্টাঙ্গার্ঘ্যঃ প্রকীর্ত্তিতঃ ॥ ইতি তন্ত্রং ॥ আপঃ ক্ষীরং কুশাগ্রাণি ঘৃতং মধু তথা দধি। রক্তানি করবীরাণি তথা রক্তঞ্চ চন্দনং॥ অষ্টাঙ্গ এষ অর্ঘ্যো বৈ ভানবে পরিকীর্ত্তিতঃ। ইতি কাশীখণ্ডং ॥

অষ্টাদশ [ন্] ( ত্রি ) অষ্টাধিকদশসংখ্যা। ১৮ আঠার ইতি ভাষা। নিত্যবহুবচনান্তশব্দোহয়ং । ইতি সিদ্ধান্তকৌমুদী ॥ অথাষ্টাদশবাচকশব্দাঃ যথা। দ্বীপঃ ১

বিদ্যা ২ পুরাণং ৩ স্মৃতিঃ ৪ ধান্যং। ইতি কবিকল্পলতা ॥

অষ্টাদশাঙ্গঃ (পুং) অষ্টাদশদ্রব্যাত্মকপাচনং। স চতুর্ব্বিধঃ। দশমূল্যাদিঃ ১। ভূনিম্বাদিঃ ২। দ্রাক্ষাদিঃ ৩। মুস্তাদিঃ ৪। তদ্যথা। দশমূলী শঠী শৃঙ্গী পৌষ্করং সদুরালভা। ভার্গী কুটজবীজঞ্চ পটোলং কটুরোহিণী॥ অষ্টাদশাঙ্গ ইত্যেষ সন্নিপাতজ্বরাপহঃ। কাসহৃদ্গ্রহপার্শ্বার্ত্তিহিক্কাশ্বাসবমীহরঃ ॥১॥ ভূনিম্বদারুদশমূলমহৌষধাব্দতিক্তেন্দ্রবীজধনিকেভকণাকষায়ঃ। তন্দ্রীপ্রলাপকসনারুচিদাহমোহশ্বাসাদিযুক্তমখিলং জ্বরমাশু হন্তি ॥ ২ ॥ দ্রাক্ষামৃতা শঠী শৃঙ্গী মুস্তকং রক্তচন্দনং। নাগরং কটুকা পাঠা ভূনিম্বং সদুরালভং॥ উশীরং পদ্মকং ধান্যং বালকং কণ্টকারিকা। পুষ্করং পিচুমর্দ্দশ্চ ক্বাথং জীর্ণজ্বরাপহঃ॥ কাসং শ্বাসঞ্চ বিষমং শ্বয়থূদরনাশনং। অষ্টাদশাঙ্গ মুদিত মেতৎ স্যাৎ সন্নিপাতনুৎ ॥৩॥ মুস্তপর্পটকোশীরদেবদারুমহৌষধং। ত্রিফলা ধন্বযাসশ্চ নীলী কাম্পিল্লকং ত্রিবৃৎ॥ কিরাততিক্তকং পাঠা বলাকটুকরোহিণী।। মধুকং পিপ্পলীমূলং মুস্তাদ্যো গণ উচ্যতে ॥ অষ্টাদশাঙ্গ মুদিত মেতদ্বা সন্নিপাতনুৎ। পিত্তোত্তরে সন্নিপাতে হিতঞ্চোক্তং মনীষিভিঃ॥ মন্যাস্তম্ভ উরোঘাতে উরঃ পার্শ্বশিরোগ্রহে॥ ৪॥ ইতি সুখবোধঃ॥

অষ্টাপদং (পুং ক্লী) স্বর্ণং। ধুস্তূরঃ। শারীণাং ফলকঃ। পাশার ছক্ ইতিভাষা। ইত্যমরমেদিনীকরৌ ॥ যথা। ধুস্তূরঃ কনকাহ্বয়ঃ। ইত্যমরদর্শনাৎ। অষ্টাপদশব্দস্য কনকবাচকত্বাচ্চ ॥

অষ্টাপদঃ (পুং) শরভঃ। মর্কটঃ। ইতি মেদিনী ॥ লূতা। চন্দ্রমল্লী। ক্রিমিঃ। কৈলাসপর্ব্বতঃ। ইতি হেমচন্দ্রঃ ॥ কীলকঃ। ইতি ধরণিঃ॥

অষ্টাপদী (স্ত্রী) চন্দ্রমল্লী। ইতি মেদিনী॥

অষ্টারচক্রবান্ [ৎ] (পুং) জিনবিশেষঃ। তৎপর্য্যায়ঃ। মঞ্জুশ্রীঃ ২ জ্ঞানদর্পণঃ ৩ মঞ্জুভদ্রঃ ৪ মঞ্জুঘোষঃ ৫ কুমারঃ ৬ স্থিরচক্রঃ ৭ বজ্রধরঃ ৮ প্রজ্ঞাকায়ঃ ৯ বাদিরাট্ ১০ নীলোৎপলী ১১ মহারাজঃ ১২ নীলঃ ১৩ শার্দুলবাহনঃ ১৪ ধিয়াম্পতিঃ ১৫ পূর্ব্বজিনঃ ১৬ খড়্গী ১৭ দণ্ডী ১৮ বিভূষণঃ ১৯ বালব্রতঃ ২০ পঞ্চচীরঃ ২১ সিংহকেলিঃ ২২ শিখাধরঃ ২৩ বাগীশ্বরঃ ২৪। ইতি ত্রিকাণ্ডশেষঃ॥

অষ্ঠিঃ (স্ত্রী) বীজং। আঁঠি ইতি ভাষা। ইত্যুণাদিকোষঃ॥

অষ্ঠীবান্ [ৎ] (পুং ক্লী) জানু। আঁঠু ইতি ভাষা। ইত্যমরঃ॥

অস ল ভাবে। ভাবঃ সত্তা। সা চেহ বিদ্যমানতৈব। ল অস্তি বিষ্ণুঃ। ইতি দুর্গাদাসঃ॥

অস ই র্ য উ ক্ষেপে। ইতি কবিকল্পদ্রুমঃ॥ য অস্যতি। উ অসিত্বা অস্ত্বা। ইর্ আস্থৎ আসীৎ। অস্য মানং মহাগদা ইতিভট্টৌ তাচ্ছীল্যে শতুঃ শানঃ। ইতি দুর্গাদাসঃ॥

অস ঞ্ অর্থার্থে। অর্থার্থো দীপ্তিগ্রহণগতয়ঃ॥ বাসুদেবং পরিত্যজ্য যোঽন্যদেব মুপা-

সতে। উপগচ্ছতীত্যর্থঃ। লাবণ্য উৎপাদ্য ইবাস যত্ন ইত্যাদি সিদ্ধ্যৈ অনেকার্থত্বাৎ সত্তার্থোঽয় মপাতি রমানাথঃ। অনুপ্রয়োগাদন্যত্রাপি পরোক্ষায়া মন্তে ভূর্ভাবং কেচিন্নেচ্ছন্তীতি ধাতুপ্রদীপঃ। ইতি দুর্গাদাসঃ॥

অসংখ্যঃ (ত্রি) অসংখ্যনীয়ঃ। সংখ্যরহিতঃ। অপরিমিতঃ। ন বিদ্যতে সংখ্যা যস্যেতি বহুব্রীহিঃ। অগণনীয়ঃ। যথা। অসংখ্যং দ্বিপরার্দ্ধাদি পুদ্গলাত্মাদ্যনন্তকং। ইতি হেমচন্দ্রঃ॥ অপি চ। শতযোজনবিস্তীর্ণৈঃ শতস্কন্ধসমন্বিতৈঃ। অসংখ্যশাখানিকরৈ রসংখ্যফলসংযুতৈঃ॥ ইতি ব্রহ্মবৈবর্ত্তে গণপতিখণ্ডে ৪১ অধ্যায়ঃ॥

অসংখ্যাতং (ত্রি) সংখ্যারহিতং। যথা। মদনপারিজাতে। অঙ্গুল্যগ্রেণ যজ্জপ্তং যজ্জপ্তং মেরুলঙ্ঘিতং। অসংখ্যাতঞ্চ যজ্জপ্তং তৎ সর্ব্বং নিষ্ফলং ভবেৎ॥ ইত্যাহ্নিকাচারতত্ত্বং॥

অসংস্কৃতঃ (ত্রি) সংস্কাররহিতঃ। যথা। আপস্তম্বঃ। অসংস্কৃতঃ সুতঃ শ্রেষ্ঠো নাপরো বেদপারগঃ। ইতি শুদ্ধিতত্ত্বং॥ অন্যচ্চ। অসংস্কৃতপ্রমীতস্য পিতা ন শ্রাদ্ধ মাচরেৎ। যদি স্নেহাচ্চরেচ্ছ্রাদ্ধং সপিণ্ডীকরণং বিনা॥ ইতি। অসংস্কৃতৌ ন সংস্কার্য্যৌ পূর্ব্বৌ পৌত্রপ্রপৌত্রকৈঃ। পিতরং তত্র সংস্কুর্য্যাদিতি ধর্ম্মো ব্যবস্থিতঃ॥ইতি চ শ্রাদ্ধতত্ত্বং॥

অসংস্কৃতবাক্যং (ক্লী) সংস্কৃতেতরভাষা। তৎপর্য্যায়ঃ। অপভ্রংশঃ ২ অপশব্দঃ ৩। ইত্যমরটীকা॥

অসংস্থানং (ক্লী) অসংস্থিতিঃ। সংস্থানাভাবঃ। ন সংস্থান মসংস্থান মিতি নঞ্‌সমাসনিষ্পন্নং॥

অসংহতঃ (পুং) ব্যূহবিশেষঃ। স তু সেনানাং পৃথগ্‌বৃত্তিঃ। ইতি রায়মুকুটাদয়ঃ॥ অসম্হিতে অহতে চ ত্রি॥

অসংহতঃ (ত্রি) অসংলগ্নঃ। সংহতো লগ্নঃ ন সংহতঃ অসংহতঃ ইতি নঞ্‌সমাসনিষ্পন্নঃ॥

অসকৃৎ ব্য পুনঃ পুনঃ। বারং বারং। ইত্যমরঃ॥

অসঙ্কল্পিতঃ (ত্রি) সঙ্কল্পাবিষয়ঃ। যথা। বিষ্ণুপুরাণে। কর্ম্মাণ্যসঙ্কল্পিত তৎফলানি সংন্যস্য বিষ্ণৌ পরমাত্মরূপে। অবাপ্য তাং কর্ম্মমহী মনন্তে তস্মিল্লয়ং তে ত্বমলাঃ প্রয়ান্তি॥ ইতি মলমাসতত্ত্বং॥

অসঙ্কুলঃ (পুং) বিস্তৃতঃ পন্থাঃ। ইতি হেমচন্দ্রঃ॥

অসঙ্খ্যঃ (ত্রি) সংখ্যারহিতঃ। অগণনীয়ঃ। স তু দ্বিপরার্দ্ধাদিঃ। ইতি হেমচন্দ্রঃ॥

অসঙ্গতঃ (ত্রি) সঙ্গতিরহিতঃ। নাসঙ্গতং প্রযুঞ্জীতেতি প্রসিদ্ধিঃ॥ যথা। বস্তুতস্তু জিজ্ঞাসু মেকপুরুষং প্রতি সঙ্গত মপি অতাদৃশ মন্যং প্রতি অসঙ্গত মিতি যৎ প্রতিপাদয়িতু মানন্তর্য্যাভিধানং তাদৃশাভিধানপ্রযোজকতৎপুরুষীয়জিজ্ঞাসাজনকজ্ঞানবিষয়ো ঽর্থঃ তং প্রতি সংঙ্গতি রিতি পুরুষবিশেষনিযন্ত্রিতং সঙ্গতিত্বং

বাচ্যং। ইত্যনুমিতিগ্রন্থীয়গাদাধরী॥ অযুক্তঃ। যথা দেবীপুরাণং। ঘস্ত্রদ্বয়ে জন্মতিথি র্যদি স্যাৎ পূজ্যা তদা জন্মভসংযুতা চ। অসঙ্গতা ভেন দিনদ্বয়েঽপি পূজ্যা পরা যা ভবতীহ যত্নাৎ॥ ইতি তিথ্যাদিতত্ত্বং॥

অসতী (স্ত্রী) ভ্রষ্টা। ব্যভিচারিণী তৎপর্য্যায়ঃ। পুংশ্চলী ২ ধর্ষিণা ৩ বন্ধকী ৪ কুলটা ৫ ইত্বরী ৬ স্বৈরিণী ৭ পাংশুলা ৮। ইত্যমরঃ॥ ধ্বস্তা ৯ দুষ্টা ১০ ধর্ষিতা ১১। ইতি শব্দরত্নাবলী॥ লঙ্কা ১২ নিশাচরী ১৩ ত্রপারণ্ডা ১৪। ইতি জটাধরঃ॥

অসতীসুতঃ (পুং স্ত্রী) ব্যভিচারিণাপুত্রঃ। তৎপর্য্যায়ঃ। বান্ধকিনেয়ঃ ২ বন্ধুলঃ ৩ কৌলটেরঃ ৪ কৌলটেয়ঃ ৫। ইত্যমরঃ॥ বন্ধুলঃ কৌলটেরশ্চ কৌলটেয়োঽসতীসুতঃ। তথা বান্ধকিনেয়স্তু স্যাৎ কৌলকেয় ইত্যপি॥ অথ সত্যাস্তু ভিক্ষুক্যাং পুত্রো ভবতি যঃ পুনঃ। তত্র কৌলটিনেয়ঃ স্যাৎকৌলটেয়োঽপি স স্মৃতঃ॥ ইতি শব্দরত্নাবলী॥ অপি চ। অসতীসূনুঃ কৌলটেরশ্চ বন্ধুলঃ। অপি বান্ধকিনেয়ঃ স্যাৎ কৌলটেয়ো ঽর্তাভিক্ষুকা॥ কুলটাপি সতী সা চেৎ কৌলটেয় স্তদাত্মজঃ। অপি কৌলটিনেয়ঃ স্যাৎ। ইতি জটাধরঃ॥

অসতীসূনুঃ (পুং) কুলটাপুত্রঃ। ইতি জটাধরঃ॥

অসৎ (ত্রি) অবিদ্যমানং। অসাধুঃ। মূর্খঃ। ব্রহ্মভিন্নবস্তু। ইতি বেদান্তঃ॥ জড়বর্গঃ। যথা। যচ্চ কিঞ্চিৎ কচিদ্বস্তু সদসদ্বাখিলাত্মিকে। তস্য সর্ব্বস্য যা শক্তিঃ সা ত্বং কিং স্তূয়সে তদা॥ ইতি দেবীমাহাত্ম্যে ১ অধ্যায়ঃ॥ সৎ চেতনবর্গঃ। অসৎ জড়বর্গঃ। তস্য সর্ব্বস্য যা শক্তিঃ সা যদা ত্বং তদা কথং স্তব্যেত্যর্থঃ। ইতি তট্টীকায়াং নাগোজীভট্টঃ॥ * ॥ নিষ্ফলং। যথা। অশ্রদ্ধয়া হুতং দত্তং তপ স্তপ্তং কৃতঞ্চ যৎ। অসদিত্যুচ্যতে পার্থ ন চ তৎ প্রেত্য নো ইহ॥ ইতি শ্রীভগবদ্গীতায়াং ১৭ অধ্যায়ে ২৮ শ্লোকঃ॥*॥ নিন্দিতঃ। যথা। অসৎকুলপ্রসূতা যা কান্তং বিজ্ঞাতু মক্ষমা। ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডং॥ * ॥ অনিত্যং। যথা। অজ্ঞানন্তু সদসদ্ভ্যা মনির্ব্বচনীয়ং। ইত্যাদি বেদান্তসারঃ॥

অসৎপথঃ (পুং) মন্দপথঃ। তৎপর্য্যায়ঃ। কুপথঃ ২ কাপথঃ ৩ ব্যধ্বঃ ৪ দুরধ্বঃ ৫ অপথঃ ৬ কদধ্বা ৭ বিপথঃ ৮ কুৎসিতবর্ত্ম ৯। ইতি শব্দরত্নাবলী॥

অসদধ্যেতা [ঋ] (ত্রি) অসদধ্যয়নশালী। তৎপর্য্যায়ঃ। অজপঃ ২। ইতি হেমচন্দ্রঃ॥

অসদৃশঃ (ত্রি) অতুল্যঃ। অনুপমেয়ঃ। যদ্যসদৃশীস্তুতি রিতি পুষ্পদন্তঃ॥ যথা। ব্রহ্মবৈবর্ত্তে। বিত্তশাঠ্য মকুর্ব্বাণঃ সম্যক্‌ফল মবাপ্নুয়াৎ। কুর্ব্বাণো বিত্তশাঠ্যন্তু লভতে ঽসদৃশং ফলং॥ ইতি তিথ্যাদিতত্ত্বং॥

অসদ্গ্রহঃ (পুং) অর্থট্টিঃ। বালকাদীনাং খোইট আবদার ইত্যাদি ভাষা। ইতি ত্রিকাণ্ডশেষঃ॥

অসনং (ক্লী) ক্ষেপণং। ইতি মেদিনী ॥

অসনঃ (পুং) বৃক্ষবিশেষঃ। পিয়াশাল ইতি খ্যাতঃ। তৎপর্য্যায়ঃ। মহাসর্জ্জঃ ২ সৌরিঃ ৩ বধূকপুষ্পঃ ৪ প্রিয়কঃ ৫ বীজবৃক্ষঃ ৬ নীলকঃ ৭ প্রিয়সালকঃ ৮। অস্য গুণাঃ। কটুত্বং উষ্ণত্বং। তিক্তত্ব। বাতার্ত্তিদোষগলদোষরক্তমণ্ডলনাশিত্বং। সারকত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ বৃক্ষভেদঃ। আসন ইতি খ্যাতঃ। তৎপর্য্যায়ঃ। অজকর্ণঃ ২ বনেসর্জ্জঃ ৩ মহাসর্জ্জঃ ৪। ইতি রত্নমালা ॥ অস্য গুণাঃ। কফপিত্তনাশিত্বং। ইতি রাজবল্লভঃ ॥

অসনপর্ণী (স্ত্রী) বৃক্ষবিশেষঃ। তৎপর্য্যায়ঃ। বাতকঃ ২ শাতলঃ ৩ শাতলবাতকঃ ৪ অপরাজিতা ৫ শণপর্ণী ৬। ইত্যমরঃ ॥ শীতঃ ৭ শাতকঃ ৮ সনপর্ণী ৯। ইতি শব্দরত্নাবলী ॥ মারাটী ইতি ভরতঃ ॥ ওসান ইতি সারসুন্দরী

অসন্ [ৎ] (পুং) ইন্দ্রঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

অসন্তুষ্টঃ (ত্রি) সম্যক্ তুষ্টিরহিতঃ। সন্তোষ শূন্যঃ। যথা। অসন্তুষ্টাঃ দ্বিজা নষ্টাঃ সন্তুষ্টা ইব পার্থিবাঃ। ইতি চাণক্যং ॥

অসন্নদ্ধঃ (ত্রি) সমুদ্ধতঃ। পণ্ডিতাভিমানী। দর্পিতঃ। ইতি জটাধরঃ ॥ অকৃতসন্নাহঃ ॥

অসম্মানং (ক্লী) মানহানিঃ। অমর্য্যাদা। অনাদরঃ। অসাধুমানং। অসচ্চ তৎ মানঞ্চেতি কর্ম্মধারয়সমাসনিষ্পন্নং ॥

অসভ্যঃ (ত্রি) অসভাসৎ। সভানুপযুক্তঃ। অসামাজিকঃ ॥ ন সভ্যঃ অসভ্য ইতি নঞ্-সমাসনিষ্পন্নঃ। খলঃ। যথা। অয়ন্ত্বসভ্য স্তব জন্ম নো গৃহে শ্রুত্বাগ্রজাং স্তে ন্যবধীৎ সুরেশ্বর। স তে হবতারং পুরুষৈঃ সমর্পিতং শ্রুত্বাধুনৈবাভিসরত্যুদায়ুধঃ ॥ ইতি শ্রীভাগবতে ১০ স্কন্ধে ৩ অধ্যায়ে ২০ শ্লোকঃ ॥ অসভ্যঃ খলঃ। সমর্পিতং কথিতং। ইতি শ্রীধরস্বামী ॥

অসমঃ (পুং) বুদ্ধঃ। ইতি শব্দরত্নাবলী ॥

অসমঃ (ত্রি) বিষমঃ। অতুল্যঃ। যথা। ইত্যেষা সহকারিশক্তি রসমা মায়া দুরুন্নীতিতো মূলত্বাৎ প্রকৃতিঃ প্রবোধভয়তো হবিদ্যেতি যস্যোদিতা। ইতি কুসুমাঞ্জলৌ ১ স্তবকঃ ॥

অসমঞ্জসং (ক্লী) অসঙ্গতং। অনুপযুক্তং। তৎপর্য্যায়ঃ। দুর্জাতং ২ দুঃসমঞ্জং ৩। ইতি ত্রিকাণ্ডশেষঃ ॥

অসময়ঃ (পুং) অকালঃ। দুঃসময়ঃ। যথা। এতান্ জনান্ন সেবেত ব্যাধিসজ্ঞশ্চ দুর্জ্জয়ঃ। সর্ব্বং বোধ্যমসময়ে কালে সর্ব্বং প্রসিষ্যতি ॥ ইতি ব্রহ্মবৈবর্ত্তে ব্রহ্মখণ্ডে ১৬ অধ্যায়ঃ ॥

অসমর্থঃ (ত্রি) অশক্তঃ। দুর্ব্বলঃ। যথা। ব্রহ্মবৈবর্ত্তে। উপবাসাসমর্থশ্চেদেকং বিপ্রন্তু ভোজয়েৎ। তাবদ্ধনানি বা দদ্যাদ্ যদ্ভক্তদ্বিগুণং ভবেৎ ॥ ইতি তিথ্যাদিতত্ত্বং ॥

অসমবায়িকারণং (ক্লী) সমবায়িকারণাসন্নকারণং। সমবায়িকারণে প্রত্যাসন্নজনকং। যথা। ঘটংপ্রতি কপালদ্বয়সংযোগঃ। এতৎকারণং গুণঃ কর্ম্ম চ। সমবায়ি-

কারণে প্রত্যাসন্ন হইয়া যে কারণ হয়। ইতি ন্যায়ভাষা॥

অসমানং (ত্রি) অতুল্যং। বিজাতীয়ং। সজাতীয়ভিন্নং। যথা শঙ্খঃ। সমানাশৌচং প্রথমে প্রথমেন সমাপয়েৎ। অসমানং দ্বিতীয়েন ধর্ম্মরাজবচো যথা॥ ইতি শুদ্ধিতত্ত্বং॥

অসমাপ্তং (ত্রি) সমাপ্তিরহিতং। অসম্পূর্ণং। অনিষ্পন্নং। যথা। স্মৃতিঃ। অসমাপ্তে ব্রতে পূর্ব্বে নৈব কুর্য্যাদ্‌ব্রতান্তরং। ইতি তিথ্যাদিতত্ত্বং॥

অসমীক্ষ্যকারী [ন্] (ত্রি) অবিবেচনাপূর্ব্বককর্ম্মকর্ত্তা। তৎপর্য্যায়ঃ। জাল্মঃ ২। ইত্যমরঃ॥

অসম্বদ্ধং (ত্রি) অনর্থকবাক্যং। তৎপর্য্যায়ঃ। অবদ্ধং ২। ইতি জটাধরঃ॥

অসম্মতঃ (ত্রি) অনভিমতঃ। তৎপর্য্যায়ঃ। প্রণায্যঃ ২। ইতি হেমচন্দ্রঃ॥

অসম্মানং (ক্লী) অমর্য্যাদা। অপমানং। সম্যঙ্মানাভাবঃ। ন সম্মানং অসম্মান মিতি নঞ্‌সমাসনিষ্পন্নং॥

অসরুঃ (পুং) বৃক্ষবিশেষঃ। কুকুরসোঁকা ইতিখ্যাতঃ। ইতি শব্দচন্দ্রিকা॥

অসহনঃ (পুং স্ত্রী) শত্রুঃ। ইতি হেমচন্দ্রঃ॥

অসহ্যঃ (ত্রি) অসহনীয়ঃ। অসহিতব্যঃ। সহনাযোগ্যঃ। যথা। বরং রামশরাঃ সহ্যা ন চ বৈভীষণং বচঃ। অসহ্যং জ্ঞাতিদুর্ব্বাক্যং মেঘান্তরিতরৌদ্রবৎ॥ ইতি মহানাটকং॥ জ্ঞাতিদুর্ব্বাক্য মিত্যত্র দুর্ব্বচো জ্ঞাতে রিতি চ পাঠঃ॥

অসাধারণং (ত্রি) সাধারণভিন্নং। অসামান্যং। বিশেষঃ। ন্যায়মতে সাধ্যব্যাপকীভূতাভাবপ্রতিযোগিহেতুঃ। যথা বহ্নিমান্ জলত্বাদিত্যাদি। যথা। যত্তু প্রয়াগে ত্র্যহস্নানে ক্রোড়ীকৃতে মাঘসপ্তমীস্নানাদাবসাধারণসঙ্কল্পেন পুন স্তথৈব প্রাতঃস্নানাচরণং। ইতি তিথ্যাদিতত্ত্বং॥ কিঞ্চ। অসাধারণশরীরব্যাপারার্জ্জিতং অবিদ্বদ্ভ্যো দাতু মনিচ্ছন্ন দদ্যাৎ। ইতি দায়ভাগঃ॥ অতুল্যং। ইতি শূদ্রবর্গে সাধারণশব্দার্থদর্শনাৎ॥

অসাধ্যং (ত্রি) অসাধনীয়ং। সাধনাযোগ্যং। অশক্যং। অসাধিতব্যং। যথা। সহজানি ত্রিদোষাণি যানি চাভ্যন্তরা বলিৎ। জায়ন্তে হর্শাংসি সংগৃহ্য তান্যসাধ্যানি নির্দ্দিশেৎ॥ ইতি ভাবপ্রকাশঃ॥ অপি চ। য ইদং প্রপঠেন্নিত্যং দুর্গানামশতাত্মকং। নাসাধ্যং বিদ্যতে তস্য ত্রিষু লোকেষু পার্ব্বতি॥ ইতি বিশ্বসারতন্ত্রে দুর্গাশতনামাত্মকং স্তোত্রং॥

অসাধ্বী (স্ত্রী) অপতিব্রতা। যথা। কন্যাতুলাভৃন্মিথুনে চ সাধ্বী শেষেষ্বসাধ্বী ধনবর্জ্জিতা চ। নিন্দ্যেঽপি লগ্নে দ্বিপদাংশ ইষ্টঃ কন্যাদিলগ্নেষ্বপি নান্যভাগঃ॥ ইতি জ্যোতিস্তত্ত্বং॥

অসান্দ্রং (ত্রি) অনিবিড়ং। বিরলং। ইতি জটাধরঃ॥

অসাম্প্রতং ব্য অযুক্তং। অনুচিতং। যথাচ কালিদাসঃ। বিষবৃক্ষোঽপি সম্বর্দ্ধ্য স্বয়ং ছেত্তু মসাম্প্রতমিতি॥

অসারঃ (পুং) এরণ্ডবৃক্ষঃ। ইতি শব্দচন্দ্রিকা ॥
অসারং (ত্রি) সাররহিতবস্তু। স্থিরাংশশূন্যং। তৎপর্য্যায়ঃ। ফল্গু ২। ইত্যমরঃ॥ নিঃসারং ৩ নিষ্ফলং ৪। ইতি শব্দরত্নাবলী॥ বার্ত্তং ৫। ইতি জটাধরঃ।
অসারং (ক্লী) অগুরু। ইতি রাজনির্ঘণ্টঃ॥
অসাক্ষাৎ ব্য অপ্রত্যক্ষং। অদর্শনং। অগোচরং॥ অতুল্যং। ইতি সাক্ষাৎ শব্দার্থদর্শনাৎ॥
অসিঃ (স্ত্রী) নদীবিশেষঃ। সা চ কাশীদক্ষিণদিক্‌স্থিতা। যথা। তস্মাৎ বিশ্বেশ্বরাদ্যৈব কাশীবাসে হত্র কারণং। অসিশ্চ বরণা যত্র ক্ষেত্ররক্ষাকৃতৌ কৃতে॥ বারাণসীতি বিখ্যাতা তদারভ্য মহামুনে। অসেশ্চ বরণায়াশ্চ সঙ্গমং প্রাপ্য কাশিকা॥ বারাণসীহ করুণাময়দিব্যমূর্ত্তে রুৎসৃজ্য যত্র তু তনুং তনুভৃৎ সুখেন। বিশ্বেশদৃগ্ধ্বসি যৎ সহসা প্রবিশ্য রূপেণ তাং বিতনুতা পদবীং দধাতি॥ জাতো মৃতো বহুষু তীর্থবরেষু যে ত্বং জন্তো ন জাতু ভবশান্তি রভূন্নিমজ্জ্য। বারাণসীতি গদতীহ মৃতো হমৃতত্বং প্রাপ্যাধুনা মম বলাৎ স্মরশাসনঃ স্যাৎ॥ ইতি কাশীখণ্ডে ৩০ অধ্যায়ঃ॥
অসিঃ (পুং) অস্ত্রভেদঃ। খাঁড়া তরবাল ইত্যাদি ভাষা। তৎপর্য্যায়ঃ। খড়্গঃ ২ নিস্ত্রিংশঃ ৩ চন্দ্রহাসঃ ৪ রিষ্টিঃ ৫ কৌক্ষেয়কঃ ৬ মণ্ডলাগ্রঃ ৭ করপালঃ ৮ কৃপাণঃ ইত্যমরঃ॥ প্রবালকঃ ১০ ভদ্রাত্মজঃ ১১ রিষ্টঃ ১২ ঋষ্টিঃ ১৩ ধারাবিষঃ ১৪ কৌক্ষেয়ঃ ১৫ তরবারিঃ ১৬ তরবাজঃ ১৭ কৃপাণকঃ ১৮ করবালঃ ১৯ কৃপাণী ২০ শস্ত্রঃ ২১। ইতি শব্দরত্নাবলী॥ বিষসনঃ ২২। ইতি ত্রিকাণ্ডশেষঃ॥ *॥ তস্য স্তুতি র্যথা। অসি র্বিশসনঃ খড়্গ স্তীক্ষ্ণধারো দুরাসদঃ। শ্রীগর্ভো বিজয় শ্চৈব ধর্ম্মপালো নমো হস্তু তে॥ ইত্যষ্টৌ তব নামানি স্বয় মুক্তানি বেধসা। নক্ষত্রং কৃত্তিকা তে তু গুরু র্দেবো মহেশ্বরঃ॥ হিরণ্যঞ্চ শরীরন্তে ধাতা দেবো জনার্দ্দনঃ। পিতা পিতামহো দেব স্ত্বং মাং পালয় সর্ব্বদা॥ নীলজীমূতসংকাশ স্তীক্ষ্ণদংষ্ট্রঃ কৃশোদরঃ। ভাবশুদ্ধো হমর্ষণশ্চ অতিতেজা স্তথৈব চ॥ ইয়ং যেন ধৃতা ক্ষৌণী হতশ্চ মহিষাসুরঃ। তীক্ষ্ণধারায় শুদ্ধায় তস্মৈ খড়্গায় তে নমঃ॥ ইতি বৃহন্নন্দিকেশ্বরপুরাণীয়দুর্গোৎসবপদ্ধতিধৃতবারাহীতন্ত্রং॥
অসিক (ক্লী) অধরচিবুকয়ো র্মধ্যভাগঃ। ইতি হেমচন্দ্রঃ
অসিক্লিকা (স্ত্রী) অসিক্নী। দাসী। ইতি জটাধরঃ॥
অসিক্নী (স্ত্রী) অবৃদ্ধান্তঃপুরচারিণী প্রেষ্যা॥ ইত্যমরঃ॥ নদী বিশেষঃ। ইতি মেদিনী॥
অসিগণ্ডঃ (পুং) ক্ষুদ্রোপধানং। ছোটবালিশ ইতি ভাষা॥ ইতি জটাধরঃ॥
অসিতঃ (পুং) কৃষ্ণবর্ণঃ। তদ্বিশিষ্টে ত্রি। ইত্যমরঃ॥ শনিগ্রহঃ। কৃষ্ণপক্ষঃ। ইতি হলায়ুধঃ॥

অসিতা (স্ত্রী) নীলীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥ যা অবৃদ্ধা মহাদেবীভিঃ প্রেষ্যতে অন্তঃপুরে চ পুনঃ পুনশ্চরতি সা। ইত্যমরটীকায়াং ভরতঃ॥ যা অবৃদ্ধা যুবতী কৃষ্ণকেশা প্রেষ্যা দাসী অন্তঃপুরে চরতি সা ইতি সারসুন্দরী॥

অসিতাভ্রশেখরঃ (পুং) বুদ্ধবিশেষঃ। ইতি ত্রিকাণ্ডশেষঃ॥

অসিতার্চিঃ [স্] (পুং) অগ্নিঃ। ইতি ত্রিকাণ্ডশেষঃ॥

অসিতালুঃ (পুং) নীলালুঃ। ইতি রাজনির্ঘণ্টঃ॥

অসিতোৎপলং (ক্লী) নীলোৎপলং। ইতি রাজনির্ঘণ্টঃ॥

অসিদংষ্ট্রঃ (পুং) জলজন্তুবিশেষঃ। মকর ইতি খ্যাতঃ। ইতি শব্দরত্নাবলী॥

অসিদংষ্ট্রকঃ (পুং) অসিদংষ্ট্রঃ। মকরঃ। ইতি ত্রিকাণ্ডশেষঃ॥

অসিদ্ধং (ত্রি) অপক্বং। অস্বিন্নং। ইতি রত্নমালা॥ সিদ্ধিরহিতং॥

অসিদ্ধিঃ (স্ত্রী) অনিষ্পত্তিঃ। ন্যায়মতে সা ত্রিবিধা। পক্ষাসিদ্ধিঃ ১ যথা কাঞ্চনময়পর্ব্বতো বহ্নিমান্ ইত্যাদিঃ ১। স্বরূপাসিদ্ধিঃ ২ যথা পর্ব্বতঃ কাঞ্চনময়বহ্নিমান্ ইত্যাদিঃ ২। ব্যাপ্যত্বাসিদ্ধিঃ ৩ যথা পর্ব্বতো বহ্নিমান্ স্থলত্বাদিত্যাদিঃ ৩॥

অসিধাবঃ (পুং) শস্ত্রমার্জ্জকঃ। শিকলকর ইতি ভাষা। ইতি জটাধরঃ॥

অসিধাবকঃ (পুং) অসিধারকর্ত্তা। অস্ত্রমার্জকঃ। ইত্যমরঃ॥

অসিধেনুঃ (স্ত্রী) ছুরিকা। ছুরী ইতি ভাষা ইতি হলায়ুধঃ॥

অসিধেনুকা (স্ত্রী) ছুরিকা। ইত্যমরঃ॥

অসিপত্রঃ (পুং) ইক্ষুঃ। খড়্গকোষঃ। নরকবিশেষঃ। ইতি মেদিনী॥ গুণ্ডনাম তৃণং। ইতি রাজনির্ঘণ্টঃ॥

অসিপত্রকঃ (পুং) ইক্ষুঃ। ইতি ত্রিকাণ্ডশেষঃ॥

অসিপত্রবনং (ক্লী) নরকবিশেষঃ। পত্রৈর্যত্র বিদার্য্যতে। ইতি মনুঃ॥ যো নিজবেদমার্গাদপগতঃ পাষণ্ডোপগতঃ তং কষয়া প্রহরন্তি যত্র। ইতি শ্রীভাগবতে॥

অসিপুচ্ছকঃ (পুং) শিশুমারঃ। ইতি হারাবলী॥

অসিপুত্রিকা (স্ত্রী) ছুরিকা। ইতি হলায়ুধঃ॥

অসিপুত্রী (স্ত্রী) ছুরিকা। ছুরী ইতি ভাষা ইত্যমরঃ॥

অসিমেদঃ (পুং) বিট্খদিরঃ। ইতি শব্দরত্নাবলী॥

অসিহেতিঃ (পুং) খড়্গধারী যোদ্ধা। তৎপর্য্যায়ঃ। নৈস্ত্রিংশিকঃ ২। ইত্যমরঃ॥

অসু (ক্লী) চিত্তং। উপতাপঃ। ইত্যুণাদিকোষঃ॥

অসুঃ (পুং) প্রাণঃ। পঞ্চপ্রাণেষু বহুবচনান্তঃ অসবঃ। ইত্যমরঃ॥

অসুখং (ক্লী) দুঃখং। ইতি হেমচন্দ্রঃ॥

অসুধারণং (ক্লী) জীবনং। ইত্যমরঃ॥

অসুভৃৎ (ত্রি) প্রাণী। জীবঃ। যথা। দৃতয় ইব শ্বসন্ত্যসুভৃতো যদি তেঽনুবিধা মহদহমাদয়োঽগু মসৃজন্ যদনুগ্রহতঃ। ইতি

শ্রীভাগবতে দশমস্কন্ধে ৮৭ অধ্যায়ে ১৪ শ্লোকঃ ॥

অসুরঃ ( পুং স্ত্রী ) সুরবিরোধী। সতু কশ্যপাৎ দিতিগর্ব্ভজাতঃ। তৎপর্য্যায়ঃ। দৈত্যঃ ২ দৈতেয়ঃ ৩ দনুজঃ ৪ ইন্দ্রারিঃ ৫ দানবঃ ৬ শুক্রশিষ্যঃ ৭ দিতিসুতঃ ৮ পূর্ব্বদেবঃ ৯ সুরদ্বিট্ ১০ দেবরিপুঃ ১১ দেবারিঃ ১২ ইত্যমরঃ॥ সূর্য্যঃ। ইতি মেদিনী। রাহুঃ। ইতি জ্যোতিঃশাস্ত্রং ॥

অসুররিপুঃ ( পুং) বিষ্ণুঃ। ইতি শব্দরত্নাবলী ॥

অসুরসা ( স্ত্রী ) বর্ব্বরী। বাবুইতুলসী ইতি ভাষা। ইতিরত্নমালা ॥

অসুরা ( স্ত্রী ) রাত্রিঃ। রাশিঃ। ইতি মেদিনী ॥

অসুরাহ্বং ( ক্লী ) কাংস্যং। ইতি হেমচন্দ্রঃ ॥

অসুরী ( স্ত্রী) রাজিকা। রাইসর্ষা ইতি ভাষা। ইত্যমরটীকায়াং ভরতাদয়ঃ। অসুরপত্নী ॥

অসুর্ক্ষণং ( ক্লী ) অবজ্ঞা। অনাদরঃ। ইত্যমরঃ ॥

অসুস্থঃ ( ত্রি ) সুখস্থিতিরহিতঃ। রোগী ॥

অসুক্ষণং ( ক্লী ) অবজ্ঞা। অনাদরঃ। ইত্যমরঃ ॥

অসূয়া ( স্ত্রী ) গুণেষু দোষাবিষ্করণং। পরগুণে দোষারোপণং ইত্যমরঃ ॥

অসূর্য্যম্পশ্যা ( স্ত্রী ) রাজপত্ন্যাদিঃ। ইতি কলাপপাণিনী ॥

অসূর্ক্ষণং }
অসূক্ষণং } ( ক্লী ) অনাদরঃ। ইত্যমরঃ ॥

অসৃক্ [জ্] ( ক্লী ) রক্তং। ইত্যমরঃ ॥ কুঙ্কুমং। ইতি রাজনির্ঘণ্টঃ ॥ বিষ্কুম্ভাদিসপ্তবিংশতিযোগান্তর্গতষোড়শযোগঃ ॥ তত্র জাতফলং। ধনী কুরূপঃ কুমতির্দুরাত্মা বিদেশগামী রুধিরপ্রকোপঃ। মহাপ্রলোভী পুরুষো বলীয়ানসৃক্প্রসূতৌ কিল যস্য জন্তোঃ। ইতি কোষ্ঠীপ্রদীপঃ ॥

অসৃক্করঃ ( পুং ) শরীরস্থরসধাতুঃ। ইতি হেমচন্দ্রঃ ॥

অসৃক্পঃ (পুং স্ত্রী) রাক্ষসঃ। ইতি হেমচন্দ্রঃ ॥

অসৃগ্ধরা ( স্ত্রী ) চর্ম্ম। ইত্যমররাজনির্ঘণ্টৌ ॥

অসৃগ্ধারা ( স্ত্রী ) চর্ম্ম। ইত্যমরটীকায়াং ভরতাদয়ঃ ॥

অসৃপাটী ( স্ত্রী পুং ) রক্তধারা। ইত্যমরটীকাসারসুন্দরী ॥

অসেচনকং (ত্রি) যস্য দর্শনাৎ তৃপ্তে রন্তো নাস্তি তৎ। অত্যন্তপ্রিয়দর্শনং। ইত্যমরঃ॥ যাহাকে দেখিয়া তৃপ্তির শেষ না হয় এমন বস্তু ॥

অসৌম্যস্বরঃ ( ত্রি ) কাকবৎমন্দস্বরযুক্তঃ। তৎপর্য্যায়ঃ। অস্বরঃ ২। ইত্যমরসিংহঃ ॥

অসৌষ্ঠবং ( ক্লী ) অপ্রশংসনীয়ত্বং। অশোভনত্বং। অনাতিশয্যং। নঞ্পূর্ব্বসুষ্ঠুশব্দাৎ ভাবে ষ্ণপ্রত্যয়ঃ ॥

অস্তঃ ( পুং ) অস্তাচলঃ। পশ্চিমাচলঃ। তৎপর্য্যায়ঃ। চরমক্ষ্মাভৃৎ ২। ইত্যমরমেদিন্যৌ॥ লগ্নাৎ সপ্তমস্থানং। ইতি দীপিকা ॥

অস্তং ( ত্রি ) ক্ষিপ্তং। অবসানপ্রাপ্তং। ইতি মেদিনী ॥

অস্তং ( ক্লী ) মৃত্যুঃ। ইতি হেমচন্দ্রঃ ॥

অস্তকঃ ( পুং) মোক্ষঃ। নির্ব্বাণং। ইতি ত্রিকাণ্ডশেষঃ ॥

অস্তম্ ব্য অদর্শনং। ইত্যমরঃ॥

অস্তমতী (স্ত্রী) শালপর্ণীবৃক্ষঃ। ইতি শব্দরত্নাবলী॥

অস্তাঘঃ (ত্রি) অগাধঃ। অতিগভীরঃ। ইতি হেমচন্দ্রঃ॥

অস্তাচলঃ (পুং) অস্তগিরিঃ। পশ্চিমাচলঃ। ইতি শব্দরত্নাবলী॥

অস্তাদ্রিঃ (পুং) অস্তাচলঃ। ইতি ত্রিকাণ্ডশেষঃ॥

অস্তি ব্য বিদ্যমানতা। তৎপর্য্যায়ঃ। সত্ত্বং ২। ইত্যমরঃ॥ অসধাতোঃ তিপি কৃতে হপ্যেতদ্রূপং॥

অস্তিমান্ (ত্রি) ধনী। ইতি হেমচন্দ্রঃ॥

অস্তু ব্য অঙ্গীকারঃ। অসূয়া। পীড়া। ইতি বিশ্বমেদিন্যৌ॥ অসধাতোঃ পঞ্চম্যা স্তুপি কৃতেহপ্যেতদ্রূপং স্যাৎ॥

অস্ত্যানং (ক্লী) ভর্ৎসনং। নিন্দা। ইতি ত্রিকাণ্ডশেষঃ॥

অস্ত্রং (ক্লী) প্রহারযোগ্যদ্রব্যমাত্রং। হাতিয়ার ইতি ভাষা। তৎপর্য্যায়ঃ। আয়ুধং ২ প্রহরণং ৩ শস্ত্রং ৪। ইত্যমরঃ॥ খড়্গঃ। ধনুঃ। ইতি মেদিনী॥ ক্ষেপণযোগ্যবাণাদি। ইতি রায়মুকুটঃ॥ তন্নিরূপণং যথা। দণ্ডসাধ্যং যতো রাজ্যং স দণ্ডঃ শাস্ত্রসংশ্রিতঃ। অস্ত্রাণি ভুমিপালানাং নিরূপ্যন্তে ততঃ ক্রমাৎ॥ অথ গণনা। খড়্গচর্ম্ম ধনুর্ব্বাণৌ শল্যভল্লৌ তথাপরৌ। অর্দ্ধচন্দ্রশ্চ নারাচঃ শক্তিযষ্টী তথাপরে॥ পরশুশ্চক্রশূলে চ পরিঘ শ্চৈব মাদয়ঃ। অস্ত্রভেদাঃ সমুদ্দিষ্টাঃ শ্রীমদ্ভোজমহীভুজা॥ বাৎস্য স্তু। অস্ত্রন্তু দ্বিবিধং প্রোক্তং নির্ম্মায়ং মায়িকং তথা। খড়্গাদিকন্তু নির্ম্মায়ং মায়িকং দহনাদিকং॥ দহনো হথ জলং কাষ্ঠং লোষ্ট্রং শব্দাদয় স্তথা। তপ্তৈলাদিকঞ্চৈব মায়িকস্যাস্ত্র মুচ্যতে॥ খড়্গাদীনান্তু গণনা পূর্ব্ব মেব নিদর্শিতা। অস্ত্রাণ্যনৈব নির্দ্দিষ্টঃ কবচাদি রপীষ্যতে॥ ইতি যুক্তিকল্পতরুঃ॥ *॥ খড়্গচর্ম্মাদিপরীক্ষা তত্তচ্ছব্দে দ্রষ্টব্যা॥

অস্ত্রকণ্টকঃ (পুং) বাণঃ। ইতি ত্রিকাণ্ডশেষঃ॥

অস্ত্রকারকঃ (পুং) অস্ত্রনির্ম্মাতা। শস্ত্রনির্ম্মায়কঃ। আয়ুধকারঃ। অস্ত্রকারী॥

অস্ত্রচিকিৎসকঃ (পুং) শস্ত্রবৈদ্যঃ॥

অস্ত্রজিৎ (ক্লী) বৃক্ষবিশেষঃ। কবাটবেটু ইতি খ্যাতং। কবাডবেণ্টুয়া ইতি কেচিৎ। অস্য পর্য্যায়ঃ। কবাটবক্রশব্দে দ্রষ্টব্যঃ। অভ্রজিৎ ইতি চ পাঠঃ। ইতি রত্নমালা॥

অস্ত্রমার্জ্জঃ (পুং) অস্ত্রমার্জ্জকঃ। শানকরঃ। তৎপর্য্যায়ঃ। শস্ত্রমার্জ্জঃ ২ অসিধাবঃ ৩ অসিধাবকঃ ৪। ইতি শব্দরত্নাবলী॥

অস্ত্রসায়কঃ (পুং) নারাচাস্ত্রং। সমুদয়লোহময়বাণঃ। ইতি শব্দমালা॥

অস্ত্রাগারং (ক্লী) অস্ত্ররক্ষণগৃহং। সেলাখানা ইতি পারস্যভাষা। তৎপর্য্যায়ঃ। আয়ুধাগারং ২। যথা। স্থাপনা জাতিতত্ত্বজ্ঞঃ সততং প্রতিজাগৃতা। রাজ্ঞঃ স্যাদায়ুধাগারে দক্ষঃ কর্ম্মসু চোদ্যতঃ। ইতি মাৎস্যে ১৮৯ অধ্যায়ঃ॥

অস্ত্রাগারঃ (পুং) অস্ত্ররক্ষণগৃহং। সেলাখানা ইতি ভাষা ॥

অস্থাগং (ত্রি) অগাধং। অতিগভীরং। ইতি হেমচন্দ্রঃ ॥

অস্থাঘং (ত্রি) অতলস্পর্শং। ইতি হেমচন্দ্রঃ

অস্থানং (ত্রি) অতলস্পর্শং। ইতি জটাধরঃ ॥ মন্দস্থলে ক্লী ॥

অস্থায়ং (ত্রি) অগাধং। স্থীয়তে যত্রেত্যধিকরণবাচ্যে ঘঞি কৃতে পশ্চাদাদন্তাদ্যন্প্রত্যয়ে স্থায়ং ততো ন স্থায় মস্থায়মিতি নঞ্সমাসনিষ্পন্নং। ন সম্ভবতি স্থায়ং স্থিতি র্যত্র ইতি কেচিৎ ॥

অস্থায়ী [ন্] (ত্রি) স্থিতিরহিতঃ। নশ্বরঃ। স্থাতুং শীল মস্যেতি শীলার্থে ণিনি স্থায়ী ন স্থায়ী অস্থায়ীতি নঞ্সমাসনিষ্পন্নঃ ॥

অস্থারং (ত্রি) অতলস্পর্শং। অগাধং। ইতি শব্দরত্নাবলী ॥

অস্থাবরং (ত্রি) স্থাবরেতরদ্রব্যং। জঙ্গমবস্তু। ইতি স্মৃতিঃ ॥ ন স্থাবরং অস্থাবরং ইতি নঞ্সমাসনিষ্পন্নং ॥

অস্থি (ক্লী) শরীরস্থসপ্তধাত্বন্তর্গতধাতুবিশেষঃ হাড় ইতি ভাষা। তৎসঙ্খ্যাদি শারীরশব্দে দ্রষ্টব্যং ॥ তৎপর্য্যায়ঃ। কীকসং২ কুল্যং৩ মেদোজং৪। ইত্যমরাদয়ঃ ॥ বীজং। আঁটী ইতি ভাষা। ইতি রায়মুকুটঃ বৈদ্যকশ্চ ॥

অস্থিকুণ্ডং (ক্লী) অস্থিপূর্ণনরককুণ্ডবিশেষঃ। যথা। পিতৃণাং যো বিষ্ণুপদে পিণ্ডং নৈব দদাতি চ। স চ তিষ্ঠত্যস্থিকুণ্ডে স্বলোমাব্দং মহেশ্বরি ॥ ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ২৭ অধ্যায়ঃ ॥

অস্থিকৃৎ (পুং) শরীরস্থমেদোধাতুঃ। ইতি হেমচন্দ্রঃ ॥

অস্থিজঃ (পুং) মজ্জা। ইতি রাজনির্ঘণ্টঃ ॥

অস্থিতুণ্ডঃ (পুং স্ত্রী) পক্ষী। ইতি শব্দমালা ॥

অস্থিধন্বা [ন্] (পুং) শিবঃ। ইতি হেমচন্দ্রঃ ॥

অস্থিপঞ্জরঃ (পুং) শরীরাস্থিসমূহঃ। তৎপর্য্যায়ঃ। করঙ্কঃ২ কঙ্কালং৩। ইতি হেমচন্দ্রঃ

অস্থিভক্ষঃ (পুং স্ত্রী) কুক্কুরঃ। ইতি হারাবলী ॥

অস্থিভুক্ [জ্] (পুং স্ত্রী) কুক্কুরঃ। ইতি হেমচন্দ্রঃ

অস্থিমালী [ন্] (পুং) শিবঃ। ইতি হেমচন্দ্রঃ ॥

অস্থিরঃ (ত্রি) চঞ্চলপ্রকৃতিঃ। তৎপর্য্যায়ঃ। সঙ্কসুকঃ ২। ইত্যমরঃ ॥ অনিশ্চিতঃ। ইতি স্বামী ॥

অস্থিরমতিঃ (ত্রি) চঞ্চলবুদ্ধিঃ। যথা। বিক্রান্তং কুলমুখ্য মস্থিরমতিং বিত্তেশ্বরং সাঙ্গিরাঃ। ইতি জ্যোতিস্তত্ত্বে দ্বিগ্রহযোগফলং ॥

অস্থিরবিভূতিঃ (স্ত্রী) চঞ্চলৈশ্বর্য্যং। যথা। অস্থিরবিভূতি মৈত্রং চল মটনং স্খলিতনিয়ম মপি চরভে। ইতি জ্যোতিস্তত্ত্বে রাশিফলং ॥

অস্থিবিগ্রহঃ (পুং) ভৃঙ্গিনামকশিবসহচরঃ। ইতি হেমচন্দ্রঃ ॥

অস্থিশৃঙ্খলা (স্ত্রী) গ্রন্থিমান্ বৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

অস্থিসংহারঃ (পুং) বৃক্ষবিশেষঃ। হাড়ঞ্চ হাড়-জোড়া ইতি ভাষা। তৎপর্য্যায়ঃ। বজ্রবল্লী ২ গ্রন্থিমান্ ৩ কুলিশং ৪ অমরঃ ৫। ইতি রত্নমালা॥ হস্তিশুণ্ডী ৬ বনালিকা ৭। ইতি হারাবলী। অস্য গুণাঃ। বলাস্থি-ভগ্নহিতকারিত্বং। বায়ুনাশিত্বঞ্চ। ইতি রাজবল্লভঃ॥ যথা। গ্রন্থিমানস্থিসংহারী বজ্রাঙ্গী চাস্থিশৃঙ্খলা। অস্থিসংহারকঃ প্রোক্তো বাতশ্লেষ্মহরো হস্থিযুক্॥ উষ্ণঃ সরঃ কৃমিঘ্নশ্চ দুর্নামঘ্নো হক্ষিরোগজিৎ। রূক্ষঃ স্বাদু লঘু র্ব্বৃষ্যঃ পাচনঃ পিত্তলঃ স্মৃতঃ॥ কাণ্ডং ত্বগ্বিরহিত মস্থিশৃঙ্খলায়া মাষার্দ্ধং দ্বিদল মকঞ্চুকং তদর্দ্ধং। সংপিষ্টং সুতনু তত স্তিলস্য তৈলে সংপক্কং বটক মতীব বাতহারি॥ ইতি ভাবপ্রকাশঃ॥

অস্থিসংহারী (স্ত্রী) গ্রন্থিমান্ বৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

অস্থিসারঃ (পুং) মজ্জা। ইতি রাজনির্ঘণ্টঃ॥

অস্থিস্নেহসঞ্চকঃ (পুং) মজ্জা। ইতি রাজনির্ঘণ্টঃ॥

অস্থৈর্য্যং(ক্লী) অস্থিরতা। স্থিরস্য ভাবঃ ইত্যর্থে ষ্যপ্রত্যয়ে স্থৈর্য্যং ন স্থৈর্য্য মস্থৈর্য্য মিতি নঞ্সমাসেন নিষ্পন্নং॥

অস্নিগ্ধদারু (ক্লী) দেবকাষ্ঠং। দেবদারু-ভেদঃ। ইতি রাজনির্ঘণ্টঃ॥

অস্পষ্টং (ত্রি) অব্যক্তং। অস্ফুটং। যথা। ম্লিষ্টং। অস্পষ্টং। ইতি মুগ্ধবোধ-ব্যাকরণং॥

অস্পৃহা (স্ত্রী) ইচ্ছাভাবঃ। যথা। যথোৎপন্নেন সন্তোষঃ কর্ত্তব্যো হ্যল্পবস্তুনা। পরস্যাচিন্তয়িত্বার্থং সা স্পৃহা পরিকীর্ত্তিতা॥ ইত্যেকাদশীতত্ত্বং॥

অস্ফুটং (ত্রি) অস্পষ্টং। অব্যক্তং। ম্লিষ্ট-বাক্যং। ইতি হেমচন্দ্রঃ॥

অস্ফুটবাক্ [চ্] (ত্রি) অস্পষ্টবক্তা। তৎপর্য্যায়ঃ। লোহলঃ ২। ইত্যমরসিংহঃ

অস্মদ্ (ত্রি) আত্মবাচী সর্ব্বনামশব্দঃ। অস্য রূপং যথা। অহং আমি। আবাং আমরা দুই। বয়ং আমরা অনেক। ইত্যাদি ব্যাকরণং॥ একবিংশতিবিভক্তিষু তস্য রূপাণি যথা। অহং ১ আবাং ২ বয়ং ৩। ১। মাং ৪ আবাং ৫ অস্মান্ ৬। ২। ময়া ৭ আবাভ্যাং ৮ অস্মাভিঃ ৯। ৩। মহ্যং ১০ আবাভ্যাং ১১ অস্মভ্যং ১২। ৪ মৎ ১৩ আবাভ্যাং ১৪ অস্মৎ ১৫। ৫। মম ১৬ আবয়োঃ ১৭ অস্মাকং ১৮। ৬। ময়ি ১৯ আবয়োঃ অস্মাসু ২১। ৭। এতানি ত্রিষু লিঙ্গেষু সমানানি। দ্বিতীয়া-চতুর্থীষষ্ঠীনাং একবচনদ্বিবচনবহুবচনবি-ভক্তিষু তস্য রূপান্তরাণি যথা। দ্বিতীয়ৈ-কবচনে মা। চতুর্থীষষ্ঠ্যো রেকবচনে মে। আসাং দ্বিবচনে নৌ। আসাং বহু-বচনে নঃ। শ্লোকপাদবাক্যাদৌ এতানি রূপাণি ন স্যুঃ। চ বা হা হ এব শব্দযোগে অদর্শনার্থদৃশ্যর্থধাতুযোগে চ ন স্যুঃ। ইতি ব্যাকরণং॥

অস্মন্তং (ক্লী) অশ্মন্তং। চুল্লী। উনান আখা ইতি ভাষা॥ ইতি রায়মুকুটঃ॥

অস্রঃ ( পুং ) কোণঃ । কেশঃ । ইত্যমরঃ ॥

অস্রং ( ক্লী ) রক্তং । অশ্রু । ইত্যমরঃ ॥

অস্রকণ্ঠঃ ( পুং ) বাণঃ । ইতি হারাবলী ॥

অস্রখদিরঃ ( পুং ) রক্তখদিরবৃক্ষঃ । ইতি রাজনির্ঘণ্টঃ ॥

অস্রজং ( ক্লী ) মাংসং । ইতি রাজনির্ঘণ্টঃ ॥

অস্রপঃ ( পুং স্ত্রী ) রাক্ষসঃ । ইত্যমরঃ ॥

অস্রপত্রকঃ ( পুং ) ভিণ্ডাবৃক্ষঃ । ইতি রাজনির্ঘণ্টঃ ॥

অস্রপা ( স্ত্রী ) জলৌকাঃ । ইতি হেমচন্দ্রঃ ॥

অস্রফলা ( স্ত্রী ) সল্লকীবৃক্ষঃ । ইতি রাজনির্ঘণ্টঃ ॥

অস্রবিন্দুচ্ছদা ( স্ত্রী ) লক্ষ্মণা নাম কন্দঃ ॥ ইতি রাজনির্ঘণ্টঃ ॥

অস্রমাতৃকা ( স্ত্রী ) শরীররসঃ । ইতি রাজনির্ঘণ্টঃ ॥

অস্ররোধিনী ( স্ত্রী ) লজ্জালুলতা । ইতি রত্নমালারাজনির্ঘণ্টৌ

অস্রার্জ্জকঃ ( পুং ) শ্বেততুলসী । ইতি রত্নমালা ॥

অস্রু ( ক্লী ) চক্ষুর্জ্জলং । তৎপর্য্যায়ঃ । নেত্রাম্বু ২ রোদনং ৩ অস্রং ৪ অশ্রু ৫ । ইত্যমরঃ ॥ বাষ্পং ৬ । ইতি শব্দরত্নাবলী ॥ লোচং ৭ । ইতি জটাধরঃ ॥

অস্বচ্ছন্দঃ (ত্রি) অধীনঃ । আয়ত্তঃ । ইত্যমরঃ ॥

অস্বতন্ত্রঃ ( ত্রি ) পরতন্ত্রঃ । পরাধীনঃ । ইতি জটাধরঃ ॥

অস্বপ্নঃ ( পুং ) দেবতা । ইত্যমরঃ ॥

অস্বরঃ ( ত্রি ) মন্দস্বরযুক্তঃ । তৎপর্য্যায়ঃ । অসৌম্যস্বরঃ ২ । ইত্যমরঃ ॥

অস্বাধ্যায়ঃ ( পুং ) বিধিপূর্ব্বকবেদাধ্যয়নহীনঃ। তৎপর্য্যায়ঃ । নিরাকৃতিঃ ২ । ইত্যমরঃ ॥ অনধ্যায়ঃ । অধ্যয়নে নিষিদ্ধদিনং । তদ্যথা । চন্দ্রসূর্য্যগ্রহণদিনানি । তানি তু । গ্রস্তাস্তে ৩ দিনানি । অন্যত্র ১ দিনং । সন্ধ্যাগর্জ্জনে ১ দিনং। মাঘাদিমাসচতুষ্টয়ে গর্জ্জনমাত্রে তদ্দিনং । নির্ঘাতশব্দে ১ দিনং । ভূকম্পে ১ দিনং । উল্কাপাতে ১ দিনং । মহোল্কাপাতে আকালিকঃ । একবেদসমাপনানন্তরং ১ দিনং । আরণ্যকনামকবেদভাগসমাপনানন্তরং ১ দিনং । পঞ্চপর্ব্বাণি ৫ দিনানি । চৈত্রশুক্লপ্রতিপৎ ১ দিনং । শ্রাবণশুক্লপ্রতিপৎ ১ দিনং। মার্গশুক্লপ্রতিপৎ ১ দিনং । এতাঃ প্রতিপদো নিত্যাঃ অন্যাঃ কাম্যাঃ । বজ্রপাতে আকালিকঃ । বিদ্যুৎসমকালীনমেঘশব্দে আকালিকঃ । চতুর্দ্দশমন্বন্তরাঃ ১৪ তিথয়ঃ ! যুগাদ্যাঃ ৪ তিথয়ঃ । মাঘমাসস্যোভয়পক্ষীয়দ্বিতীয়া ২দিনে। আশ্বিনস্যোভয়পক্ষীয়দ্বিতীয়া ২ দিনে । চৈত্রকৃষ্ণপক্ষদ্বিতীয়া ১ দিনং । কার্ত্তিকস্যোভয়পক্ষীয়দ্বিতীয়া ২ দিনে । আষাঢ়স্যোভয়পক্ষীয়দ্বিতীয়া ২ দিনে । মার্গমাসস্যোভয়পক্ষীয়দ্বিতীয়া ২ দিনে । ফাল্গুনমাসস্যোভয়পক্ষীয়দ্বিতীয়া ২ দিনে। উৎসবদিনানি অনেকানি । অক্ষয়তৃতীয়া ১ দিনং । ইতি স্মৃতিঃ ॥

অস্বামিকং (ত্রি) স্বামিরহিতবস্তু । অকর্ত্তৃকং । বেওয়ারিস ইতি পারস্য ভাষা । যথা । এতচ্চ অগ্রদানং স্বভূমৌ অস্বামি

কায়াঞ্চ ন দদ্যাৎ। অস্বামিকান্যাহ যমঃ। অটব্যঃ পর্ব্বতাঃ পুণ্যা নদ্য স্তীর্থানি যানি চ। সর্ব্বাণ্যস্বামিকান্যাহু র্ন হি তেষু পরিগ্রহঃ ॥ পুণ্যা ইতি বিশেষণাৎ অটব্যো নৈমিষাদ্যাঃ পর্ব্বতা হিমালয়াদ্যাঃ। নদ্যো গঙ্গাদ্যাঃ। তীর্থাণি পুরুষোত্তমাদিক্ষেত্রাণি। বারাণস্যাদ্যায়তনানি চ। স্বাম্যভাবে হেতু মাহ ন হি তেষ্বিতি। ইতি শ্রাদ্ধতত্ত্বং ॥

অস্বামিবিক্রয়ঃ ( পুং ) অস্বামিকর্ত্তৃকবিক্রয়ঃ। যথা। সম্প্রত্যস্বামিবিক্রয়াখ্যং ব্যবহারপদ মুপক্রমতে। তস্য চ লক্ষণং নারদেনোক্তং। নিক্ষিপ্তং বা পরদ্রব্যং নষ্টং লব্ধ্বাপহৃত্য বা। বিক্রীয়তেঽসমক্ষং যৎ স জ্ঞেয়োঽস্বামিবিক্রয় ইতি ॥ তত্র কিমিত্যাহ। স্বয়ং লভেতান্যবিক্রীতং ক্রেতু র্দোষোঽপ্রকাশিতে। হীনাদ্রহোহীনমূল্যে বেলাহীনে চ তস্করঃ ॥ স্বং আত্মসম্বন্ধিদ্রব্যং অন্যবিক্রীত মস্বামিবিক্রীতং যদি পশ্যতি তদা লভেত গৃহ্লীয়াৎ। অস্বামিবিক্রয়স্য স্বত্বহেতুত্বাভাবাৎ। বিক্রীতগ্রহণং দত্তাহিতয়ো রুপলক্ষণার্থং। অস্বামিকৃতত্বেন তুল্যত্বাৎ। অতএবোক্তং। অস্বামিবিক্রয়ং দত্তং মাধিঞ্চ বিনিবর্ত্তয়েদিতি। ক্রেতুঃ পুন রপ্রকাশিতে গোপিতে ক্রয়ে দোষো ভবতি। তথা হীনাত্তদ্দ্রব্যাগমোপায়হীনাৎ। রহসি চৈকান্তে সম্ভাব্যদ্রব্যাদপি হীনমূল্যে অল্পতরেণ মূল্যেন ক্রয়ে। বেলাহীনে বেলয়া হীনো বেলাহীনঃ ক্রয়ো রাত্র্যাদৌ কৃতঃ তত্র চ ক্রেতা তস্করো ভবতি। তস্করবৎ দণ্ডভাক্ ভবতীত্যর্থঃ। যথোক্তং। দ্রব্যমস্বামিবিক্রীতং প্রাপ্য স্বামী তদাপ্নুয়াৎ। প্রকাশক্রয়তঃ শুদ্ধিঃ ক্রেতুঃ স্তেয়ং রহঃক্রয়াদিতি ॥ * ॥ স্বাম্যভিযুক্তেন ক্রেত্রা কিং কর্ত্তব্য মিত্যত আহ। নষ্টাপহৃত মাসাদ্য হর্ত্তারং গ্রাহয়েন্নরং। দেশকালাতিপত্তৌ চ গৃহীত্বা স্বয়মর্পয়েৎ ॥ নষ্ট মপহৃতং বান্যদীয়ং ক্রয়াদিনা প্রাপ্য হর্ত্তারং গ্রাহয়েৎ চৌরোদ্ধরণকাদিভিঃ। আত্মবিশুদ্ধ্যর্থং রাজদণ্ডাপ্রাপ্ত্যর্থঞ্চ। অর্থাবিদিতদেশান্তরং গতঃ কালান্তরে বা বিপন্ন স্তদা মূলসমাহরণাশক্তে বিক্রেতার মদর্শয়িত্বৈব স্বয়মেব তদ্ধনং নাষ্টিকস্য সমর্পয়েৎ। তাবতৈবাসৌ শুদ্ধো ভবতীতি শ্রীকরাচার্য্যেণ ব্যাখ্যাতং। তদিদমনুপপন্নং। বিক্রেতু র্দর্শনাচ্ছুদ্ধি রিত্যনেন পৌনরুক্ত্যপ্রসঙ্গাৎ। অতো ঽন্যথা ব্যাখ্যায়তে। নষ্টাপহৃত মিতি নাষ্টিকং প্রত্যয় মুপদেশঃ। নষ্ট মপহৃতং বা আত্মীয়ং দ্রব্য মাসাদ্য ক্রেতৃহস্তস্থং জ্ঞাত্বা তং হর্ত্তারং ক্রেতারং স্থানপালাদিভি র্গ্রাহয়েৎ। দেশকালাতিপত্তৌ দেশকালাতিক্রমে স্থানপালাদ্যসন্নিধানে তদ্বিজ্ঞাপনকালাৎ প্রাক্পলায়নাশঙ্কায়াং স্বয়মেব গৃহীত্বা তেভ্যঃ সমর্পয়েৎ ॥ * ॥ গ্রাহিতে হর্ত্তরি কিং কর্ত্তব্য মিত্যত আহ। বিক্রেতু র্দর্শনাচ্ছুদ্ধিঃ স্বামী দ্রব্যং নৃপো দমং। ক্রেতা মূল্য মবাপ্নোতি তস্মাদ্য স্তস্য বিক্রয়ী। যদ্যসৌ গৃহীতঃ

ক্রেতা ন ময়েদ মপহৃতং অন্যসকাশাৎ প্রাপ্ত মিতি বক্তি তদা তস্য ক্রেতু র্বিক্রেতৃদর্শনমাত্রেণ শুদ্ধি র্ভবতি। ন পুন রসাবভিযোজ্যঃ। কিন্তু তৎপ্রদর্শিতেন বিক্রেত্রা সহ নাষ্টিকস্য বিবাদঃ। যথাহ বৃহস্পতিঃ। মূলে সমাহৃতে ক্রেতা নাভিযোজ্যঃ কথঞ্চন। মূলেন সহ বাদস্তু নাষ্টিকস্য বিধীয়ত ইতি॥ তস্মিংশ্চ বিবাদে যদ্যস্বামিবিক্রয়নিশ্চয়ো ভবতি তদাস্য নষ্টাপহৃতস্য গবাদিদ্রব্যস্য যো বিক্রয়ী বিক্রেতা তস্য সকাশাৎ স্বামী নাষ্টিকঃ স্বীয়ং দ্রব্য মবাপ্নোতি নৃপশ্চাপরাধানুরূপং দণ্ডং ক্রেতা চ মূল্য মবাপ্নোতি। অথাসৌ দেশান্তরং গতঃ তদা যোজনসংখ্যয়ানয়নার্থং কালো দেয়ঃ। প্রকাশং বা ক্রয়ং কুর্য্যাৎ মূলং বাপি সমর্পয়েৎ। মূলানয়নকালশ্চ দেয় স্তত্রাধ্বসংখ্যয়েতি স্মরণাৎ ॥ * ॥ অথাবিজ্ঞাতদেশতয়া মূলং মাহর্ত্তুং ন শক্নোতি তদা ক্রয়ং শোধয়িত্বৈব শুদ্ধো ভবতি। অসমাহার্য্যমূলস্তু ক্রয় মেব বিশোধয়েদিতি মনুবচনাৎ। যদা পুনঃ সাক্ষ্যাদিভি র্দ্দিব্যেন বা ক্রয়ং ন শোধয়তি মূলঞ্চ ন প্রদর্শয়তি তদা স এব দণ্ডভাগ্‌ভবতীতি। অনুপস্থাপয়ন্মূলং ক্রয়ং বাপ্যবিশোধয়ন্। যথাভিযোগং ধনিনে ধনং দাপ্যো দমঞ্চ সঃ॥ ইতি স্মরণাৎ। স্বং লভেতান্যবিক্রীত মিত্যুক্তং ॥ * ॥ তল্লিপ্সুনা কিং কর্ত্তব্য মিত্যত আহ। আগমেনোপভোগেন নষ্টং ভাব্য মতো হন্যথা। পঞ্চবন্ধো দম স্তস্য রাজ্ঞে তেনাবিভাবিতে। আগমেন রিকৃথক্রয়াদিনা উপভোগেন চ মদীয় মিদং দ্রব্যং তচ্চৈবং নষ্ট মপহৃতং বেত্যপি ভাব্যং সাধনীয়ং তৎস্বামিনা অতোঽন্যথা তেন স্বামিনা অবিভাবিতে পঞ্চবন্ধো নষ্টদ্রব্যস্য পঞ্চমাংশো দমো নাষ্টিকেন রাজ্ঞে দেয়ঃ ॥ * ॥ অত্রৈবায়ং ক্রমঃ। পূর্ব্বস্বামী নষ্ট মাত্মীয়ং সাধয়েৎ ততঃ ক্রেতা চৌর্য্যপরিহারার্থং মূল্যলাভায় চ বিক্রেতার মানয়েৎ। অথানেতুং ন শক্নোতি তদাত্মদোষপরিহারায় ক্রয়ং শোধয়িত্বা নাষ্টিকস্য সমর্পয়েদিতি ॥ * ॥ তস্করস্য প্রচ্ছাদকং প্রত্যাহ। হৃতং প্রণষ্টং যো দ্রব্যং পরহস্তাদবাপ্নুয়াৎ। অনিবেদ্য নৃপে দণ্ড্যঃ স তু ষণ্ণবতিং পণান্॥ হৃতং প্রণষ্টং বা চৌরাদিহস্তস্থং দ্রব্য মনেন মদীয়ং দ্রব্য মপহৃত মিতি নৃপস্যানিবেদ্যৈব দর্পাদিনা যো গৃহ্লাত্যসৌ ষড়ুত্তরান্ নবতিপণান্ দণ্ডনীয়ঃ। তস্করপ্রচ্ছাদকত্বেন দুষ্টত্বাৎ ॥ * ॥ রাজপুরুষানীতং প্রত্যাহ। শৌল্কিকৈঃ স্থানপালৈ র্ব্বা নষ্টাপহৃতমাহৃতং। অর্ব্বাক্ সম্বৎসরাৎ স্বামী হরেত পরতো নৃপঃ॥ যদা তু শুল্কাধিকারিভিঃ স্থানরক্ষিভি র্ব্বা নষ্ট মপহৃতং দ্রব্যং রাজপার্শ্বং প্রত্যানীতং তদা সংবৎসরাদর্ব্বাক্ প্রাপ্ত শ্চেৎ নাষ্টিক স্তদ্দ্রব্য মবাপ্নুয়াৎ। ঊর্দ্ধং পুনঃ সংবৎসরাদ্রাজা গৃহ্লীয়াৎ। স্বপুরুষানীতঞ্চ দ্রব্যং জনসমূহেষূদ্ঘোষ্য যাবৎ সংবৎসরং রাজ্ঞা রক্ষণীয়ং। যথাহ গৌতমঃ। প্রণষ্ট মস্বামিক মধিগম্য রাজ্ঞে

প্রক্রয়ু র্বিখ্যাপ্য সম্বৎসরং রাজ্ঞা রক্ষ্য মিতি। যৎ পুন র্মনুনা বিধ্যন্তর মুক্তং প্রণষ্টস্বামিকং দ্রব্যং রাজা ত্র্যব্দং নিধাপয়েৎ। অর্ব্বাক্ ত্র্যব্দাৎ হরেৎ স্বামী পরতো নৃপতি র্হরেৎ॥ ইতি। তচ্ছ্রুত-বৃত্তসম্পন্নব্রাহ্মণবিষয়ং। রক্ষণনিমিত্তং ষড়্ভাগাদি গ্রহণঞ্চ তেনৈবোক্তং। আদদীতাথ ষড়্ভাগং প্রণষ্টাধিগতান্নৃপঃ। দশমং দ্বাদশং বাপি সতাং ধর্ম্ম মনুস্মরন্॥ ইতি। তৃতীয়দ্বিতীয়প্রথমবৎসরেষু যথাক্রমং ষষ্ঠাদয়ো ভাগা বেদিতব্যাঃ। প্রপঞ্চিতঞ্চৈতৎ পুরস্তাৎ॥*॥ মনূক্ত ষড়্ভাগাদিগ্রহণস্য দ্রব্যবিশেষে অপবাদ মাহ। পণানেকশফে দদ্যাৎ চতুরঃ পঞ্চ মানুষে। মহিষোষ্ট্রগবাং দ্বৌ দ্বৌ পাদং পাদ মজাবিকে॥ একশফে অশ্বাদৌ প্রণষ্টাধিগতে তৎস্বামী রাজ্ঞে রক্ষানিমিত্তং চতুরঃ পণান্ দদ্যাৎ। মানুষে মনুষ্যজাতীয়ে দ্রব্যে পঞ্চপণান্। মহিষোষ্ট্রগবাং রক্ষণনিমিত্তং প্রত্যেকং দ্বৌ দ্বৌ পণৌ। অজাবিকে পুনঃ প্রত্যেকং পাদং পাদং দদ্যাদিতি সর্ব্বত্রানুষজ্যতে। অজাবিক মিতি সমাসনির্দ্দেশেঽপি পাদং পাদ মিতি বীপ্সাবলাৎ প্রত্যেকং সম্বন্ধো গম্যতে॥ ইত্যস্বামিকবিক্রয়প্রকরণং। ইতি মিতাক্ষরায়াং ব্যবহারাধ্যায়ঃ॥

অস্বামী [ন্] (ত্রি) স্বামিভিন্নঃ। যথা। বৃহস্পতিঃ। অস্বামিনা তু যদ্ভুক্তং গৃহক্ষেত্রাপণাদিকং। সুহৃদ্বন্ধুসকুল্যস্য ন তদ্ভোগেন হীয়তে॥ ইতি দায়তত্ত্বং॥

অস্বাম্যং (ক্লী) স্বামিত্বাভাবঃ। যথা দেবলঃ। অস্বাম্যং হি ভবেদেষাং নির্দ্দোষে পিতরি স্থিতে। ইতি দায়তত্ত্বং॥

অস্বাস্থ্যং (ক্লী) সুস্থত্বাভাবঃ। সুস্থতারাহিত্যং। স্বাস্থ্যস্যাভাবঃ অস্বাস্থ্য মিত্যব্যয়ীভাবসমাসনিষ্পন্নং॥

অহ ই ক ভাসে। দীপ্তি রিতি যাবৎ। ইতি কবিকল্পদ্রুমঃ॥ ই ক অংহয়তি। ভাসো দীপ্তিঃ। ইতি দুর্গাদাসঃ॥

অহ ই ঙ গতৌ। ইতি কবিকল্পদ্রুমঃ ই অংহতে। ঙ অংহতে। ইতি দুর্গাদাসঃ॥

অহ ব্য প্রশংসা। ক্ষেপণং। নিয়োগঃ। বিনিগ্রহঃ। ইতি মেদিনী॥

অহং (ত্রি) অস্মদ্শব্দস্য প্রথমান্তস্য রূপং। আমি ইতি ভাষা। যথা। অহং দেবো ন চান্যোঽস্মি ব্রহ্মৈবাস্মি ন শোকভাক্। সচ্চিদানন্দরূপো ঽহং নিত্যমুক্তস্বভাববান্॥ ইত্যাহ্নিকতত্ত্বং॥

অহংযুঃ (ত্রি) অহঙ্কারযুক্তঃ। গর্ব্বান্বিতঃ। তৎপর্য্যায়ঃ। অহঙ্কারবান্ ২। ইত্যমরঃ॥

অহঃ [ন্] (ক্লী) দিবা। ইত্যমরঃ॥

অহঃপতিঃ (পুং) সূর্য্যঃ। ইত্যমরটীকা॥

অহঙ্কারঃ (পুং) অহঙ্কৃতিঃ। তৎপর্য্যায়ঃ। গর্ব্বঃ ২ অভিমানঃ ৩ ইত্যমরঃ॥ পুরাণমতে স ত্রিবিধঃ। সাত্ত্বিকঃ ১ রাজসঃ ২ তামসশ্চ ৩। সাত্ত্বিকাহঙ্কারাৎ ইন্দ্রিয়াধিষ্ঠাতারো দেবা মনশ্চ জাতং। রাজসাহঙ্কারাৎ দশেন্দ্রিয়াণি জাতানি। তামসাহঙ্কারাৎ সূক্ষ্মপঞ্চভূতানি জাতানি। বেদান্তমতে অভিমানাত্মিকান্তঃকরণবৃত্তিঃ॥

অহ মিত্যভিমানঃ। স চ শরীরাদিবিষয়কো মিথ্যাজ্ঞান মুচ্যতে। ইতি গোতমসূত্র-বৃত্তিঃ। অহ মিত্যব্যয়ং তস্য করণং। অহ মিতি কিরতি অত্রেতি বা অহঙ্কারঃ। করোতেঃ কিরতে র্ব্বা ঘঞ্। কারপ্রত্যয় ইত্যন্যে। ইত্যমরটীকায়াং ভরতঃ॥ মদঃ ৪ স্ময়ঃ ৫ অবলেপঃ ৬ দর্পঃ ৭। ইতি জটাধরঃ। অহঙ্কৃতিঃ ৮ উদ্ধতমনস্কত্বং ৯ মানঃ ১০ চিত্তসমুন্নতিঃ ১১। যথা। গর্ব্বো মদো ঽভিমানঃ স্যাদহঙ্কার স্ত্বহঙ্কৃতিঃ। স্যাদুদ্ধতমনস্কত্বে মান শ্চিত্তসমুন্নতিঃ॥ অহঙ্কারস্য পর্য্যায় ইতি কেচিৎ প্রচক্ষতে। ইতি শব্দরত্নাবলী॥

অহঙ্কারবান্ (ত্রি) গর্ব্বান্বিতঃ। ইত্যমরঃ॥ তৎপর্য্যায়ঃ। অহংযুঃ ২। ইত্য অহঙ্কারান্বিতঃ ৩। ইতি শব্দরত্নাবলী॥ গর্ব্বিতঃ ৪। ইতি জটাধরঃ॥

অহঙ্কারী [ন্] (ত্রি) গর্ব্বযুক্তঃ। অহঙ্কারো বিদ্যতে ঽস্যেতি অস্ত্যর্থে গিনৃপ্রত্যয়েন নিষ্পন্নঃ। অভিমানী। গর্ব্বান্বিতঃ॥

অহঙ্কৃতঃ (ত্রি) অহঙ্কারযুক্তঃ। ইতি হেমচন্দ্রঃ॥

অহঙ্কৃতিঃ (স্ত্রী) অহঙ্কারঃ। গর্ব্বঃ। ইতি শব্দরত্নাবলী॥

অহতং (ক্লী) নবাম্বরং। নূতনবস্ত্রং। ইতি হলায়ুধশব্দরত্নাবল্যৌ॥ অনাহতে ত্রি॥

অহমহমিকা (স্ত্রী) পরস্পরাহঙ্কারঃ। ইত্যমরঃ॥ পরস্পরং পরমপেক্ষ্যাপরস্যা-পরমপেক্ষ্যপরস্য যোঽহঙ্কারো ঽহমেব শ্রেষ্ঠোঽহমেব শ্রেষ্ঠ ইতি মানঃ। ইতি ভরতঃ॥ আমি বড় আমি বড় বলিয়া পরস্পর অহঙ্কার ইতি ভাষা॥

অহম্পূর্ব্বিকা (স্ত্রী) অহংপূর্ব্বং অগ্রে ভবামি অহংপূর্ব্বং অগ্রে ভবামি ইত্যন্যোঽন্যং যোধানাং ধাবনক্রিয়া। ইত্যমরঃ॥ আমি অগ্রে যাব বলিয়া যোদ্ধাদিগের পরস্পর আগে ধাওয়া ইতি ভাষা॥

অহম্মতিঃ (স্ত্রী) অবিদ্যা। অজ্ঞানং। ইত্যমরঃ॥

অহর্গণঃ (পুং) মাসঃ। ইতি হারাবলী॥ গ্রহাণাং মধ্যাদিজ্ঞানার্থং শ্বেতবারাহকল্পাবধি সৃষ্ট্যবধি ব্রহ্মসিদ্ধান্তোক্তকল্পাবধি কল্যাদ্যব্দাবধি বা ইষ্টকালপর্য্যন্তং পরিগণিত-দিনসমূহঃ। তৎপর্য্যায়ঃ। দ্যুবৃন্দং ২ দিনৌঘঃ ৩ দ্যুগণঃ ৪ দিনপিণ্ডঃ ৫। ইতি জ্যোতিঃশাস্ত্রং॥

অহর্জ্জরঃ (পুং) সংবৎসরঃ। যথা। যথাপঃ প্রবতা যন্তি যথা মাসা অহর্জ্জরং। এবং মাং ব্রহ্মচারিণঃ ধাতরায়ন্তু সর্ব্বতঃ স্বাহা। ইতি তৈত্তিরীয়োপনিষদি শিক্ষাবল্লী॥ যথা লোকে আপঃ প্রবতা প্রবণবতা নিম্নবতা দেশেন যন্তি গচ্ছন্তি। যথা বা মাসা অহর্জরং সংবৎসরো ঽহর্জরো ঽহোভিঃ পরিবর্ত্তমানো লোকান্ জরয়তীতি অহানি বা অস্মিন্ জীর্য্যন্তি অন্তর্ভবন্তি ইত্যহর্জরঃ। তঞ্চ যথা মাসা যন্তি এবং মাং ব্রহ্মচারিণঃ হে ধাতঃ

সর্ব্বস্য বিধাতঃ মা মায়স্তু সর্ব্বতঃ সর্ব্ব-দিগ্‌ভ্যঃ। ইতি তস্য শঙ্করাচার্য্যকৃত-ভাষ্যং ॥

অহর্পতিঃ (পুং) সূর্য্যঃ। ইত্যমরঃ ॥

অহর্ব্বান্ধবঃ } (পুং) সূর্য্যঃ। ইতি হেম-
অহর্ম্মণিঃ } চন্দ্রঃ ॥ অর্কবৃক্ষঃ ॥

অহর্ম্মুখং (ক্লী) প্রত্যূষঃ। ইত্যমরঃ ॥

অহল্যঃ (ত্রি) হলানাকৃষ্টক্ষেত্রাদিঃ। অকৃষ্ট-ভূমিঃ ॥

অহল্যা (স্ত্রী) অপ্সরোবিশেষঃ। গৌতমমুনি-পত্নী। ইতি মেদিনী ॥ সা চ মহাসাধ্বী। প্রাতঃকালে তস্যা নামস্মরণে মহাপাতক-নাশো ভবতি। যথা। অহল্যা দ্রৌপদী কুন্তী তারা মন্দোদরী তথা। পঞ্চকন্যাঃ স্মরেন্নিত্যং মহাপাতকনাশনং ॥ ইতি পুরাণং ॥ সত্যযুগে ইন্দ্রঃ গৌতমরূপ-ধারণং কৃত্বা তস্যাঃ সতীত্বং নাশিতবান্। ততো গৌতমশাপেন সা পাষাণদেহা বভূব। তত ত্রেতাযুগে শ্রীরামচন্দ্রস্য পাদস্পর্শাৎ শাপাদ্বিমুক্তা সতী পুনঃ পূর্ব্বরূপা মানবী ভূতা। ইতি রামায়ণং ॥

অহস্করঃ (পুং) সূর্য্যঃ। ইতি হেমচন্দ্রঃ ॥

অহস্পতিঃ (পুং) সূর্য্যঃ। ইত্যমরঃ ॥ অর্ক-বৃক্ষঃ। অমরে তৎপর্য্যায়ে অর্কাহ্ব ইতি দর্শনাৎ ॥

অহহ ব্য অদ্ভুতং। খেদঃ। পরিক্লেশঃ। প্রকর্ষঃ। সম্বোধনং। ইতি মেদিনী ॥

অহহা ব্য অদ্ভুতং। খেদং। ইত্যমরটীকায়াং রায়মুকুটাদয়ঃ ॥ অত্র অহহশব্দার্থোঽপি দ্রষ্টব্যঃ ॥

অহার্য্যঃ (পুং) পর্ব্বতঃ। ইত্যমরমেদিন্যৌ ॥

অহার্য্যং (ত্রি) হর্ত্তুমশক্যং। অহর্ত্তব্যং। অহরণীয়ং। ইতি মেদিনী ॥

অহিঃ (পুং) বৃত্রাসুরঃ। সর্পঃ। ইত্যমরঃ ॥ সূর্য্যঃ। পথিকঃ। রাহুঃ। ইত্যনেকার্থধ্বনি-মঞ্জরী ॥

অহিংস্রা (স্ত্রী) কুলিকবৃক্ষঃ। কুলেখাড়া ইতিখ্যাতা। অস্যা গুণাঃ। বিষরোগ-শোথনাশিত্বং। ইতি রাজবল্লভঃ ॥

অহিকা (স্ত্রী) শাল্মলীবৃক্ষঃ। ইতি শব্দ-চন্দ্রিকা ॥

অহিকান্তঃ (পুং) বায়ুঃ। ইতি হেমচন্দ্রঃ ॥

অহিচ্ছত্রঃ (পুং) দেশবিশেষঃ। তৎপর্য্যায়ঃ। প্রত্যগ্রথঃ ২। মেষশৃঙ্গীবৃক্ষঃ। ইতি হেমচন্দ্রঃ ॥

অহিচ্ছত্রা (স্ত্রী) শর্করা। চিনি ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ ॥ পুরীবিশেষঃ। ইতি জ্যোতিষতত্ত্বং ॥ যথা বৃদ্ধগার্গ্যঃ। কেশব মানর্ত্তপুরং পাটলিপুত্রং পুরী মহিচ্ছত্রাং। দিতি মদিতিঞ্চ স্মরতাং ক্ষৌরবিধৌ ভবতি কল্যাণং ॥ ইতি জ্যোতিস্তত্ত্বং ॥

অহিজিৎ (পুং) বিষ্ণুঃ। কালীয়নাগদমনাৎ। ইন্দ্রঃ। বৃত্রাসুরনাশাৎ ॥

অহিতঃ (ত্রি) শত্রুঃ। ইত্যমরঃ ॥ অপথ্যং। ইতি শব্দচন্দ্রিকা ॥

অহিতুণ্ডিকঃ (পুং) ভিক্ষার্থং সর্পখেলকঃ। তৎপর্য্যায়ঃ। ব্যালগ্রাহী ২। ইত্যমরঃ ॥ সাপুড়ে ইতি ভাষা ॥

অহিদ্বিট্ [ ষ্ ] ( পুং) ইন্দ্রঃ। গরুড়ঃ। ময়ূরঃ। নকুলঃ। ইতি মেদিনী॥

অহিনকুলতা } ( স্ত্রী) অহিনকুলয়োঃ বৈরতা। অহিনকুলিকা } নিত্যবিরোধিতেতি যাবৎ। অহিশ্চ নকুলশ্চ অহিনকুলৌ তয়োর্ভাব ইতি ভাবার্থে তষ্ঠিকপ্রত্যয়য়োঃ স্ত্রিয়া মাপা নিষ্পন্না॥

অহিপুত্রকঃ ( পুং ) নৌকাবিশেষঃ। তৎপর্য্যায়ঃ। পোতঃ ২ তরালুঃ ৩। ইতি হারাবলী॥

অহিপূতনঃ ( পুং ) ক্ষুদ্ররোগবিশেষঃ। তল্লক্ষণং যথা। শকৃন্মূত্রসমাযুক্তে হধৌতে হপানে শিশোর্ভবেৎ। স্বিন্নে বা স্নাপ্যমানস্য কণ্ডূরক্তকফোদ্ভবা॥ কণ্ডূয়নাত্ততঃ ক্ষিপ্রং স্ফোটঃ স্রাবশ্চ জায়তে। একীভূতং ব্রণং ঘোরং তং বিদ্যাদহিপূতনং॥ *॥ তচ্চিকিৎসা যথা। তত্র সংশোধনৈঃ পূর্ব্বং ধাত্রীস্তন্যং বিশোধয়েৎ। ত্রিফলাখদিরক্বাথৈ ব্র্ণানাং ক্ষালনং হিতং॥ শঙ্খসৌবীরযষ্ঠ্যাহ্বৈর্লেপঃ কার্য্যো হহিপূতনে। ইতি ভাবপ্রকাশঃ॥

অহিফেণং ( ক্লী ) অফেণং। আফিং ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥

অহির্ব্রধ্নঃ ( পুং ) শিবঃ। ইতি হেমচন্দ্রঃ॥ রুদ্রবিশেষঃ॥ ইতি জটাধরঃ॥

অহির্ব্রধ্নদেবতা ( স্ত্রী ) উত্তরভাদ্রপদনক্ষত্রং। ইতি জ্যোতিঃশাস্ত্রং॥

অহিভয়ং ( ক্লী ) রাজ্ঞাং স্বপক্ষোদ্ভবভয়ং। ইত্যমরঃ॥ সর্পভয়ং॥

অহিভয়দা ( স্ত্রী ) ভূম্যামলকী। ইতি রাজনির্ঘণ্টঃ॥

অহিভুক্ [ জ্ ] ( পুং ) গরুড়ঃ। ময়ূরঃ॥ ইত্যমরঃ॥ নাকুলী। গন্ধনাকুলী। ইতি রাজনির্ঘণ্টঃ॥

অহিমর্দ্দনী ( স্ত্রী ) গন্ধনাকুলীনামকন্দবিশেষঃ॥ ইতি রাজনির্ঘণ্টঃ॥

অহিমারঃ ( পুং ) অরিমেদকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

অহিমেদকঃ ( পুং ) অরিমেদকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

অহিলতা ( স্ত্রী ) গন্ধনাকুলী। তাম্বূলী। ইতি রাজনির্ঘণ্টঃ॥

অহীরণিঃ ( পুং ) দ্বিমুখসর্পঃ। ইতি ত্রিকাণ্ডশেষঃ॥

অহে ব্য ক্ষেপঃ। বিয়োগঃ। ইতি শব্দমালা॥

অহেরুঃ ( স্ত্রী ) শতমূলী। ইত্যমরঃ॥

অহো ব্য ধিগর্থঃ। শোকঃ। করুণার্থঃ। বিষাদঃ। সম্বোধনং। প্রশংসা। বিস্ময়ং। পদপূরণং। অসূয়া। বিতর্কঃ। ইতি মেদিনী॥

অহোরাত্রঃ ( পুং ) দিবানিশং। স তু সূর্য্যোদয়দ্বয়পরিচ্ছিন্নত্রিংশন্মুহূর্ত্তাত্মককালঃ। ইত্যমরঃ॥ মনুষ্যাণাং মাসেন পৈত্রো হহোরাত্রো ভবতি। মনুষ্যাণামেকবর্ষেণ দেবানামহোরাত্রো ভবতি। দ্বিসহস্রগুণিতমানুষ্যচতুর্যুগমানেন ব্রহ্মণো হহোরাত্রো ভবতি। তত্র মনুষ্যমানেন ৮৬৪০০০০০০০ বর্ষা ভবন্তি॥

অহোবত ব্য অনুকম্পা। খেদঃ। সম্বোধনং। ইতি বিশ্বমেদিন্যৌ॥

অহ্নায় ব্য ঝটিতি। দ্রুতং। ইত্যমরঃ॥

অত্রীকঃ (পুং) বৌদ্ধঃ। ক্ষপণকঃ। ইতি ত্রিকাণ্ডশেষঃ॥

অহ্বলা (স্ত্রী) ভল্লাতকবৃক্ষঃ। ভেলা ইতি ভাষা। ইতি শব্দচন্দ্রিকা॥

অক্ষ ন উ ব্যাপ্তৌ। সংহতৌ। ইতি কবিকল্পদ্রুমঃ॥ ন অক্ষোতি ধনং লোকঃ। ব্যাপ্নোতি রাশীকরোতি বা ইত্যর্থঃ। উ আক্ষিষ্টাং আষ্টাং। ইতি দুর্গাদাসঃ॥

অক্ষ উ ব্যাপ্তৌ। সংহতৌ। ইতি কবিকল্পদ্রুমঃ॥ অক্ষতি ধনং লোকঃ। ব্যাপ্নোতি রাশীকরোতি বা ইত্যর্থঃ। উ আক্ষিষ্টাং। আষ্টাং। ইতি দুর্গাদাসঃ॥

অক্ষং (ক্লী) ইন্দ্রিয়ং। সৌবর্চ্চলং। তুত্থং। ইতি মেদিনী

অক্ষঃ (পুং) কর্ষপরিমাণং। পাশকঃ। কলিদ্রুমঃ। ইত্যমরঃ॥ জ্ঞাতার্থং। শকটঃ। ব্যবহারঃ। রুদ্রাক্ষঃ। ইন্দ্রাক্ষঃ। সর্পঃ। চক্রং। ইতি মেদিনী॥ আত্মা। রাবণপুত্রঃ। ইতি হেমচন্দ্রঃ॥ জাতান্ধঃ। গরুড়ঃ। ইতি শব্দরত্নাবলী॥ সংস্কৃতপলভা তদ্যথা। চন্দ্রাশ্বিনিঘ্নাপলভার্দ্ধিতা চ লঙ্কাবধিঃ স্যাদিহ দক্ষিণোক্ষঃ। ইতি ভাস্বতী॥ প্রভা শরঘ্না স্বতুরীয়যোগাদক্ষঃ সদা দক্ষিণদিক্প্রদিষ্টঃ। ইতি জাতকার্ণবঃ॥ দক্ষিণোত্তররেখায়াং সা তত্র বিষুবৎপ্রভা। শঙ্কুচ্ছায়াহতে ত্রিজ্যে বিষুবৎকর্ণভাজিতে॥ লম্বাক্ষজ্যে তয়োশ্চাপে লম্বাক্ষৌ দক্ষিণৌ সদা॥ ইতি সূর্য্যসিদ্ধান্তঃ॥

অক্ষকঃ (পুং) তিনিশবৃক্ষঃ। ইতি রত্নমালা॥

অক্ষক্রীড়া (স্ত্রী) দ্যূতক্রীড়া। পাশকক্রীড়া। যথা। অক্ষক্রীড়ায়াং ব্যাসযুধিষ্ঠিরসংবাদঃ প্রচরতি। ইতি তিথ্যাদিতত্ত্বং॥ তদ্বিবরণং চতুরঙ্গশব্দে দ্রষ্টব্যং॥*॥ কার্ত্তিকশুক্লপ্রতিপদি অর্থাৎ দ্যূতপ্রতিপদি তৎক্রীড়াবিধির্যথা। ব্রহ্মপুরাণে। শঙ্করশ্চ পুরা দ্যূতং সসর্জ্জ সুমনোহরং। কার্ত্তিকে শুক্লপক্ষে তু প্রথমে২হনি ভূপতে॥ জিতশ্চ শঙ্করস্তত্র জয়ং লেভে চ পার্ব্বতী। অতো২র্থাচ্ছঙ্করো দুঃখী গৌরী নিত্যং সুখোষিতা॥ তস্মাৎ দ্যূতং প্রকর্ত্তব্যং প্রভাতে তত্র মানবৈঃ। তস্মিন্ দ্যূতে জয়ো যস্য তস্য সংবৎসরঃ শুভঃ॥ পরাজয়ো বিরুদ্ধস্তু লব্ধনাশকরো ভবেৎ। দ্যূতঞ্চাপ্রাণিভিঃ ক্রীড়নং। যথা মনুঃ। অপ্রাণিভির্যৎ ক্রিয়তে তল্লোকে দ্যূত মুচ্যতে। ইতি তিথ্যাদিতত্ত্বং॥*॥ দশমীদ্বাদশ্যো স্তৎকরণনিষেধো যথা। স্মৃতিঃ॥ শাকং মাষং মসূরঞ্চ পুনর্ভোজনমৈথুনে। দ্যূতমত্যম্বুপানঞ্চ দশম্যাং বৈষ্ণব স্ত্যজেৎ॥ কূর্ম্মপুরাণং। কাংস্যং মাংসং সুরাং ক্ষৌদ্রং হিংসাং তৈল মসত্যতাং। দ্যূতক্রীড়াং দিবানিদ্রাং ব্যায়ামং ক্রোধমৈথুনং॥ দ্বাদশ্যাং দ্বাদশৈতানি বৈষ্ণবঃ পরিবর্জ্জয়েৎ। ইত্যেকাদশীতত্ত্বং॥*॥ অন্যৎ দ্যূতশব্দে দ্রষ্টব্যং॥

অক্ষজঃ (পুং) বজ্রঃ। ইতি পুরুষোত্তমঃ॥ অস্থিজ ইতি ক্বচিৎ পাঠঃ॥

অক্ষতং (ক্লী) লাজাঃ। নপুংসকং। ইতি মেদিনী॥

অক্ষতঃ (ত্রি) অহিংসিতঃ। ইতি মেদিনী॥ অখণ্ডিতঃ। ইতি শব্দরত্নাবলী॥ ক্ষতশূন্যঃ॥

অক্ষতঃ (পুং) যবঃ। ইতি মেদিনী॥ আতপতণ্ডুলঃ। ইতি পুরাণং॥ শস্যমাত্রং। ইত্যমরটীকায়াং ভানুদীক্ষিতঃ॥ অক্ষতাঃ পুং ভূম্নীতি স্বামী॥

অক্ষতা (স্ত্রী) কর্কটশৃঙ্গী। কাঁকড়াশৃঙ্গী ইতি ভাষা। ইতি শব্দচন্দ্রিকা॥ পুরুষসংসর্গরহিতস্ত্রী। ইতি স্মৃতিঃ॥

অক্ষদর্শকঃ (পুং) ব্যবহারদ্রষ্টা। ব্যবহারাণাং ঋণদানাদিবিবাদানাং দ্রষ্টা নির্ণেতা। ধর্ম্মাধ্যক্ষ ইত্যর্থঃ। ইত্যমরঃ তট্টীকা চ॥ জজ্ ইতি ইংরাজীয়ভাষা॥

অক্ষদৃক্ [শ্] (পুং) অক্ষদর্শকঃ। ইতি হলায়ুধঃ॥

অক্ষদেবী [ন্] (ত্রি) দ্যূতক্রীড়াকারকঃ। ইত্যমরঃ॥

অক্ষদ্যূঃ (পুং) অক্ষক্রীড়কঃ। ইতি ব্যাকরণং॥

অক্ষধরঃ (পুং) শাখোটবৃক্ষঃ। ইতি ভূরিপ্রয়োগঃ

অক্ষধূর্ত্তঃ (পুং) দ্যূতক্রীড়কঃ। তৎপর্য্যায়ঃ। ধূর্ত্তঃ ২ অক্ষদেবী ৩ কিতবঃ ৪ দ্যূতকৃৎ ৫। ইত্যমরঃ॥ জুয়ারী ইতি ভাষা॥

অক্ষধূর্ত্তিলঃ (পুং) বৃষঃ। ইতি হারাবলী॥

অক্ষপাটকঃ (পুং) ধর্ম্মাধ্যক্ষঃ। ইতি জটাধরঃ॥ জজ্ ইতি ভাষা॥

[অ]ক্ষপাদঃ (পুং) তার্কিকঃ। তৎপর্য্যায়ঃ। নৈয়ায়িকঃ ২। ইতি হেমচন্দ্রঃ॥

অক্ষপীড়া (স্ত্রী) যবতিক্তালতা। ইতি রাজনির্ঘণ্টঃ॥

অক্ষমঃ (ত্রি) ক্ষমারহিতঃ। ক্ষমাশূন্যঃ। যথা। বিষ্ণুসেবী চ স্বপচো বংশানাং কোটি মুদ্ধরেৎ। হরে রভক্তো বিপ্রশ্চ স্বঞ্চ রক্ষিতু মক্ষমঃ॥ ইতি ব্রহ্মবৈবর্ত্তে ৩৩ অধ্যায়ঃ॥

অক্ষমা (স্ত্রী) অক্ষান্তিঃ। ঈর্ষা। ইতি শব্দরত্নাবলী॥

অক্ষমালা (স্ত্রী) অক্ষসূত্রং। বশিষ্ঠপত্নী। ইতি মেদিনী॥ অক্ষসূত্রেতি তান্ত্রিকভাষয়া অকারাদিক্ষকারান্তবর্ণমালা॥ রুদ্রাক্ষমালা চ। যথা গৌতমীয়ে। পঞ্চাশল্লিপিভির্মালা বিহিতা জপকর্ম্মসু। অকারাদিক্ষকারান্তা অক্ষমালা প্রকীর্ত্তিতা॥ ক্ষার্ণং মেরুমুখং তত্র কল্পয়েন্মুনিসত্তম। অনয়া সর্ব্বমন্ত্রাণাং জপঃ সর্ব্বসমৃদ্ধিদঃ॥ ইতি তন্ত্রসারঃ॥ *॥ অন্যৎ মালাশব্দে বর্ণমালাশব্দে চ দ্রষ্টব্যং॥

অক্ষয়ঃ (ত্রি) ক্ষয়রহিতঃ। অব্যয়ঃ। কল্পান্তস্থায়ি। যথা। অক্ষয়াণি ফলান্যাহু রমরাংস্ত্রিদশানিব। কল্পান্তস্থানসম্বন্ধান্নজন্যা নাশবর্জ্জিনঃ॥ ইতি মীমাংসককারিকা॥ অপি চ। ভবিষ্যপুরাণং। চতুর্দ্দশ্যাং তথাষ্টম্যাং পক্ষয়োঃ শুক্লকৃষ্ণয়োঃ। যো হব্দমেকং ন ভুঞ্জীত শিবার্চ্চনপরো নরঃ॥ যৎ পুণ্য মক্ষয়ং প্রোক্তং সততং সত্রবাজিনাং। তৎপুণ্যং সকলং তস্য শিবলোকঞ্চ গচ্ছতি॥ ইতি তিথ্যাদিতত্ত্বং॥*॥

পাপপুণ্যাক্ষয়জনকযোগবিশেষঃ। যথা। জ্যোতিষে। সোমবারে হ্যমাবাস্যা আদিত্যাহে তু সপ্তমী। চতুর্থ্যঙ্গারবারে তু অষ্টমী চ বৃহস্পতৌ॥ অত্র যৎ ক্রিয়তে পাপ মথ বা ধর্ম্মসঞ্চয়ঃ। ষষ্টিজন্মসহস্রাণি প্রতিজন্ম তদক্ষয়ং॥ ইতি তিথ্যাদিতত্ত্বং॥

অক্ষয়তৃতীয়া (স্ত্রী) বৈশাখশুক্লতৃতীয়া। সা তু সত্যযুগাদ্যা। তত্র স্নানদানাদাবক্ষয়ফলং। ইতি স্মৃতিঃ। যথা। বৈশাখে মাসি রাজেন্দ্র শুক্লপক্ষে তৃতীয়িকা। অক্ষয়া সা তিথিঃ প্রোক্তাকৃত্তিকারোহিণীযুতা। তস্যাং দানাদিকং পুণ্য মক্ষয়ং সমুদাহৃতং। ইতি তিথ্যাদিতত্ত্বং॥ *॥ বিবরণস্তু বৈশাখশব্দে দ্রষ্টব্যং॥

অক্ষয়া (স্ত্রী) বারতিথিঘটিতযোগবিশেষঃ। যথা। অমা বৈ সোমবারেণ রবিবারেণ সপ্তমী। চতুর্থী ভৌমবারেণ অক্ষয়াদপিচাক্ষয়া॥ ইতি ভবিষ্যপুরাণং॥

অক্ষরঃ (পুং) শিবঃ। বিষ্ণুঃ। ইতি শব্দরত্নাবলী॥

অক্ষরং (ক্লী) ব্রহ্ম। অত্র কস্যচিদমরটীকাকারস্য মতে পুংলিঙ্গোঽপি॥ অকারাদিক্ষকারান্তৈকপঞ্চাশদ্বর্ণঃ। ইতি মেদিনী॥ গগনং। ধর্ম্মঃ। তপস্যা। অপামার্গঃ। ইতি হেমচন্দ্রঃ॥ মোক্ষঃ। ইত্যমরঃ॥ জলং। ইতি বেদপ্রয়োগঃ। অস্যোৎপত্তিকারণং যথা। বৃহস্পতিঃ। ষান্মাসিকে তু সময়ে ভ্রান্তিঃ সংজায়তে নৃণাং। ধাত্রাক্ষরাণি সৃষ্টানি পত্রারূঢ়ান্যতঃ পুরা। ইত্যাহ্নিকতত্ত্বং॥ তচ্চ পঞ্চবিধং। যথা। মুদ্রালিপিঃ শিল্পলিপি র্লেখনিসম্ভবা। গুণ্ডিকা ঘুণসম্ভূতা লিপয়ঃ পঞ্চধা স্মৃতাঃ। ইতি বারাহীতন্ত্রং॥ *॥ অন্যৎ মুদ্রাশব্দে বর্ণশব্দে চ দ্রষ্টব্যং॥

অক্ষরঃ (ত্রি) অক্ষরণীয়ঃ। অচ্যুতঃ। যথা। তস্মৈ স বিদ্বানুপসন্নায় সম্যক্ প্রশান্তচিত্তায় শমান্বিতায়। যেনাক্ষরং পুরুষং বেদ সত্যং প্রোবাচ তং তত্ত্বতো ব্রহ্মবিদ্যাং॥ ইতি বেদান্তসারধৃতা শ্রুতিঃ॥ অপি চ। দ্বাবিমৌ পুরুষৌ লোকে ক্ষর শ্চাক্ষর এব চ। ক্ষরঃ সর্ব্বাণি ভূতানি কূটস্থো ঽক্ষর উচ্যতে॥ ইতি শ্রীভগবদ্গীতায়াং ১৫ অধ্যায়ে ১৭ শ্লোকঃ॥ ক্ষর শ্চাক্ষর শ্চেতি দ্বাবিমৌ পুরুষৌ লোকে প্রসিদ্ধৌ। তাবেবাহ। তত্র ক্ষরঃ পুরুষো নাম সর্ব্বাণি ভূতানি ব্রহ্মাদিস্থাবরান্তানি শরীরাণি অবিবেকিলোকস্য শরীরেষ্বেব পুরুষত্বপ্রসিদ্ধেঃ। কূটো রাশিঃ শিলারাশিঃ পর্ব্বত ইব একদেশেষু নশ্যৎস্বপি নির্ব্বিকারতয়া তিষ্ঠতীতি কূটস্থ শ্চেতনো ভোক্তা স ত্বক্ষরঃ পুরুষ উচ্যতে বিবেকিভিঃ। ইতি তট্টীকায়াং শ্রীধরস্বামী॥

অক্ষরচঞ্চুঃ (পুং) লেখকঃ। ইত্যমরটীকায়াং বাচস্পতিঃ॥

অক্ষরচণঃ (পুং) লিপিকরঃ। ইত্যমরঃ॥ মুন্‌শী ইতি ভাষা॥

অক্ষরচুঞ্চুঃ (পুং) অক্ষরচঞ্চুঃ। লেখকঃ॥ ইত্যমরঃ॥

অক্ষরজননী (স্ত্রী) লেখনী। কলমঃ। যথা।

লেখন্যক্ষরজননী বর্ণমালা মসিপ্রসূঃ। ইতি হারাবলীতি কেচিৎ ॥

অক্ষরজীবকঃ (পুং) লিপিকরঃ। ইতি হেমচন্দ্রঃ ॥

অক্ষরজীবিকঃ (পুং) কায়স্থঃ। লেখকঃ স্যাল্লিপিকরঃ কায়স্থোঽক্ষরজীবিকঃ ॥ ইতি হলায়ুধঃ। অক্ষরজীবিনি ত্রি ॥

অক্ষরতূলিকা (স্ত্রী) লেখনী। ইতি জটাধরঃ ॥

অক্ষরবিন্যাসঃ (পুং) লিপিঃ। লিখনং। ইত্যমরটীকায়াং ভরতাদয়ঃ ॥

অক্ষরমুখঃ (পুং) শিষ্যঃ। ছাত্রঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

অক্ষরসংস্থানং (ক্লী) লিপিঃ। লিখনং। ইত্যমরঃ ॥

অক্ষবতী (স্ত্রী) দ্যূতক্রীড়া। পাশাখেলা ইতি ভাষা। ইত্যমরঃ ॥

অক্ষবাটঃ (পুং) মল্লভূমিঃ। তৎপর্য্যায়ঃ। নিযুদ্ধভূঃ ২। ইতি হেমচন্দ্রঃ ॥ কুস্তির ফুল্‌কা ইতি ভাষা ॥

অক্ষবিৎ [দ্] (ত্রি) দ্যূতজ্ঞঃ। ব্যবহারজ্ঞঃ ॥

অক্ষসূত্রং (ক্লী) অক্ষমালা। জপমালা। ইতি জটাধরঃ ॥

অক্ষাগ্রকীলকঃ (পুং) শকটচক্রপুরোবর্ত্তিকীলকঃ। তৎপর্য্যায়ঃ। অণিঃ ২। ইত্যমরঃ ॥ অণী ৩ আণিঃ ৪। ইতি ভরতঃ ॥ চাকার খিল ইতি ভাষা ॥

অক্ষান্তিঃ (স্ত্রী) পরাভ্যুদয়াসহিষ্ণুত্বং। ভার্য্যাদেঃ পরদর্শনাদ্যসহিষ্ণুত্বং। ইতি ভরতঃ॥ তৎপর্য্যায়ঃ। ঈর্ষ্যা ২। ইত্যমরঃ ॥ ঈর্ষা ৩ অক্ষমা ৪। ইতি শব্দরত্নাবলী ॥

অক্ষারলবণং (ক্লী) হবিষ্যান্নবিশেষঃ। মহাহবিষ্য মিতি খ্যাতং। যথা। অশৌচাদিভক্ষ্যগোক্ষীরগোঘৃতধান্যমুদ্গতিলযবসৈন্ধবসামুদ্রলবণাত্মকদ্রব্যং। কৃত্রিমাৎ লবণাৎ ভিন্ন মক্ষারলবণং মতং। ইদং মতন্তু স্মার্ত্তস্য রত্নাকরমতং যথা। গোক্ষীরং গোঘৃতং চৈব ধান্যমুদ্গযবা স্তিলাঃ। সামুদ্রং সৈন্ধবঞ্চৈব মক্ষারলবণংমতং ॥ ইতি নারায়ণবন্দ্যঘটীয়কৃতশুদ্ধিকারিকা ॥

অক্ষি (ক্লী) চক্ষুঃ। ইত্যমরঃ ॥ চক্ষুর্গোলকঃ। ইতি কেচিৎ।

অক্ষিকঃ (পুং) রঞ্জনদ্রুঃ। আচ্‌ ইতি ভাষা। ইতি রত্নমালা ॥

অক্ষিকূটকঃ (পুং) চক্ষুস্তারা ॥

অক্ষিগতং (ত্রি) দ্বেষ্যং। ইত্যমরঃ ॥

অক্ষিভেষজঃ (পুং) পট্টিকালোধ্রঃ। ইতি রাজনির্ঘণ্টঃ ॥

অক্ষিবঃ (পুং) শোভাঞ্জনবৃক্ষঃ। সামুদ্রলবণে ক্লী। ইত্যমরটীকায়াং ভরতঃ ॥

অক্ষিবিকূণিতং (ক্লী) কটাক্ষঃ। অপাঙ্গদৃষ্টিঃ। ইতি হেমচন্দ্রঃ ॥

অক্ষীকঃ (পুং) রঞ্জনদ্রুঃ। আচ্‌ ইতি ভাষা। ইতি রত্নমালা ॥

অক্ষীবং (ক্লী) সামুদ্রলবণং। ইত্যমরকোষঃ ॥

অক্ষীবং (ত্রি) অমত্তং। ইতি মেদিনী ॥

অক্ষীবঃ (পুং) শোভাঞ্জনবৃক্ষঃ। ইত্যমরঃ ॥

অক্ষুণ্ণঃ (ত্রি) অক্ষোদিতঃ। অচূর্ণিতঃ। ইতি ক্ষুদধাত্বর্থদর্শনাৎ। অচ্ছিন্নঃ। যথা। অক্ষুণ্ণং পরিবপ। ইতি চূড়াকরণে পশুপতিঃ ॥

অক্ষুব্ধঃ ( ত্রি ) ক্ষোভরহিতঃ । অক্ষোভিতঃ । ইতি ক্ষুভধাতোঃ ক্তপ্রত্যয়ে ক্ষুব্ধ স্ততো ন ক্ষুব্ধঃ অক্ষুব্ধ ইতি নঞ্সমাসনিষ্পন্নঃ ॥

অক্ষেমং (ক্লী) অমঙ্গলং । যথা । কিন্নু তেষাং গৃহে ক্ষেম মক্ষেমং কিন্নু সাম্প্রতং। কথন্তে কিন্নু সদ্বৃত্তা দুর্ব্বৃত্তাঃ কিন্নু মে সুতাঃ॥ ইতি দেবীমাহাত্ম্যে ১অধ্যায়ঃ॥

অক্ষোটঃ (পুং) অক্ষোড়বৃক্ষঃ। স চ পর্ব্বতজ-পীলুবৃক্ষঃ । ইত্যমরটীকায়াং ভরতঃ ॥ আখরোট্ ইতি হিন্দি ভাষা । ইতি রাজ-নির্ঘণ্টঃ ॥ পীলুঃ শৈলভবো ঽক্ষোটঃ কর্পরালশ্চ কীর্ত্তিতঃ । অক্ষোটকোঽপি বাতাদসদৃশঃ কফপিত্তকৃৎ ॥ ইতি ভাব-প্রকাশঃ॥

অক্ষোড়ঃ ( পুং ) পর্ব্বতোৎপন্নপীলুবৃক্ষঃ । তৎ-পর্য্যায়ঃ । কর্পরালঃ ২ কন্দরালঃ ৩ আ-ক্ষোড়ঃ ৪ অক্ষোটঃ ৫ আক্ষোটঃ ৬ । ইত্য-মরঃ তট্টীকা চ ॥

অক্ষোড়কঃ ( পুং ) পর্ব্বতোৎপন্নপীলুবৃক্ষঃ । ইতি রত্নমালা ॥

অক্ষোভঃ ( পুং ) হস্তিবন্ধনস্তম্ভঃ । তৎপর্য্যায়ঃ। আলানং ২ শঙ্কুঃ ৩ । ইতি ত্রিকাণ্ডশেষঃ ॥ ক্ষোভরহিতে ত্রি

অক্ষৌরিভং ( ক্লী ) ক্ষুরিকর্ম্মাবিহিতনক্ষত্রং । যথা । উত্তরাত্রিতয়যাম্যরোহিণীরৌদ্রসর্প-পিতৃভেষু চাগ্নিভে । শ্মশ্রুকর্ম্ম সকলং বিবর্জ্জয়েৎপ্রেতকার্য্য মপি বুদ্ধিমান্ নরঃ॥ চন্দ্রশুদ্ধি র্যদা নাস্তি তারায়াশ্চ বিশেষতঃ। অক্ষৌরিভেঽপি কর্ত্তব্যং চন্দ্রচন্দ্রজয়ো র্দিনে ॥ ইতি জ্যোতিস্তত্ত্বং ॥

অক্ষৌহিণী ( স্ত্রী ) সংখ্যাবিশেষযুক্তসেনা । তদ্যথা । ২১৮৭০ হস্তিনঃ । ২১৮৭০ রথাঃ । ৬৫৬১০ ঘোটকাঃ । ১০৯৩৫০ পদাতয়ঃ । সমুদায়েন ২১৮৭০০ । তথাচোক্তং । অক্ষৌ-হিণ্যা মিত্যধিকৈঃ সপ্তত্যষ্টাষ্টভিঃ শতৈঃ । সংযুক্তানি সহস্রাণি গজানা মেকবিংশতিঃ । এবমেব রথানান্তু সং-খ্যানং কীর্ত্তিতং বুধৈঃ । পঞ্চষষ্টিসহস্রাণি ষট্শতানি দশৈব তু ॥ সংখ্যাতা স্তুরগা স্তজ্জ্ঞৈ র্বিনা রথ্যৈ স্তুরঙ্গমৈঃ । নৃণাং শতসহস্রন্তু সহস্রাণি নবৈব তু। শতানি ত্রীণি চান্যানি পঞ্চাশচ্চ পদাতয়ঃ । ইত্য-মরভরতৌ ॥

অক্ষ্ণং ( ক্লী ) কালঃ । ইত্যুণাদিকোষঃ ॥

## আ

আ আকারঃ । দ্বিতীয়স্বরবর্ণঃ। অস্যোচ্চারণ-স্থানং কণ্ঠঃ। সচ দীর্ঘঃ প্লুতশ্চ ভবতি। আকারং পরমাশ্চর্য্যং শঙ্খজ্যোতির্ম্ময়ং প্রিয়ে । ব্রহ্মবিষ্ণুময়ং বর্ণং তথা রুদ্র-ময়ং প্রিয়ে । পঞ্চপ্রাণময়ংবর্ণং স্বয়ং পরমকুণ্ডলী ॥ ইতি কামধেনুত অস্য লেখনপ্রকারো যথা । অকার-রূপ মাসদ্য দক্ষক্রোড়ায়তা ত্বধঃ । ব্রহ্মাদয় স্তথা শক্তি স্তাসু তিষ্ঠন্তি নিত্য-শঃ ॥ ইতি বর্ণোদ্ধারতন্ত্রং । তস্য নামানি যথা । আকারো বিজয়ানন্তো দীর্ঘচ্ছায়ো

বিনায়কঃ। ক্ষীরোদধিঃ পয়োদশ্চ পাশো দীর্ঘাস্যবৃভকৌ॥ প্রচণ্ড একজো রুদ্রো নারায়ণ ইভেশ্বরঃ। প্রতিষ্ঠা মানদা কান্তো বিশ্বান্তক গজান্তকঃ। পিতামহো দ্বিঠান্তো ভূঃ ক্রিয়া কান্তিশ্চ সম্ভবঃ। দ্বিতীয়া মানদা কাশী বিঘ্নরাজঃ কুজো বিয়ৎ। স্বরান্তকশ্চ হৃদয় মঙ্গুঠো ভগমালিনী। ইতি বর্ণাভিধানং

আ ব্য স্মৃতিঃ। যথা। আজ্ঞাতং সজটায়ুরেষঃ। বাক্যং। যথা আ এবং মন্যসে। ইত্যমরঃ॥ অনুকম্পা। সমুচ্চয়ঃ। ইতি মেদিনী॥ ক্বচিৎ নিষিদ্ধসন্ধিবর্ণঃ। আ শব্দ যোঽচা ন সন্ধীয়তে স ইত্যর্থঃ। ইতি ভরতঃ॥

আং ব্য এবং। স্বীকারঃ। ইত্যমরঃ॥

আঃ (পুং) মহেশ্বরঃ। ইতি পুরুষোত্তমঃ॥ পিতামহঃ। বাক্যং। যথা। অ বিষ্ণুঃ প্রতিষেধঃ স্যাদাঃ পিতামহবাক্যয়োঃ। সামায়া মথাব্যয়ং আ ভবেৎ সংক্রোধ পাড়য়োঃ। ইত্যগ্নিপুরাণে একাক্ষরাভিধানং॥

আঃ [স্] ব্য কোপঃ। যথা। আঃ পাপ দুর্ম্মুখঃ। পীড়া। যথা আঃ শীতং। ইত্যমরভরতৌ। স্মৃতিঃ। স্পর্দ্ধা। তর্জ্জনং। ইতি শব্দরত্নাবলী॥

আকম্পিতং (ত্রি) কম্পবিশিষ্টং। তৎপর্য্যায়ঃ। বেল্লিতং ২ প্রেঙ্খিতং ৩ আধুতং ৪ আধূতং ৫ চলিতং ৬ ইত্যমরঃ॥ কম্পিতং ৭ ধুতং ৮ ব্যাধুতং ৯ বিধুতং ১০ ধূতং ১১ প্রকম্পিতং ১২। ইতি শব্দরত্নাবলী॥

আকরঃ (পুং) ধাতুরত্নাদে রুৎপত্তিস্থানং। তৎপর্য্যায়ঃ। খনিঃ ২। ইত্যমরঃ॥ সমূহঃ। শ্রেষ্ঠঃ। ইতি মেদিনী॥

আকর্ণনং (ক্লী) শ্রবণং॥

আকর্ষঃ (পুং) পাশাকঃ। পাশা ইতি ভাষা। অক্ষক্রীড়া। পাশাখেলা ইতি ভাষা। সারিফলকঃ। ছক ইতি ভাষা। ইত্যমরঃ॥ ইন্দ্রিয়ং। ধনুরভ্যাসবস্তু। আকর্ষণং। ইতি মেদিনী॥ আকৃষ্যতে অনেন। আঁকুশী ইতি ভাষা। যথা। আকর্ষ ইব শ্বা আকর্ষশ্বঃ। ইতি মুগ্ধবোধব্যাকরণং॥ আকর্ষতুল্য ইতি জ্ঞাপনার্থ ইব শব্দঃ। ইতি দুর্গাদাসঃ॥

আকর্ষণং (ক্লী) আকর্ষঃ। বলাদানয়নং। টানন্ ইতি ভাষা। যথা। সা ত্বং গচ্ছ ময়ৈবোক্তা পার্শ্বং শুম্ভনিশুম্ভয়োঃ কেশাকর্ষণনির্ধূতগৌরবা মাগমিষ্যসি॥ ইতি মার্কণ্ডেয়ে দেবীমাহাত্ম্যং॥*॥ তন্ত্রোক্তকর্ম্মবিশেষদ্বারা যোষাদ্যানয়নং। যথা অথাকর্ষণং। আকর্ষণবিধানানি কথয়ামি সমাসতঃ। যদ্দৃষ্টং ত্রৈপুরে তন্ত্রে যদ্দৃষ্টং ভূতডামরে॥ শ্রীবীজং মান্মথং বীজং লজ্জাবীজং সমুদ্ধরেৎ। প্রথমং প্রণবং দত্ত্বা ত্রিপুরাদেবিপদং ততঃ॥ অমুকীতি পদং দত্ত্বা আকর্ষয় দ্বিধা পদং। স্বাহান্তং মন্ত্র মুদ্ধৃত্য জপেদ্দশসহস্রকং॥ ষট্কোণচক্র মালিখ্য রক্তচন্দনকুঙ্কুমৈঃ। ষড়ঙ্গং কারয়েন্মন্ত্রী লজ্জাবীজ সমন্বিতং॥ ষড় দীর্ঘ-

ভাক্ স্বরেণৈব নাদবিন্দুবিভূষিতং ॥ রক্ত-পুষ্পাক্ষতধূপাদিনৈবেদ্যৈঃ পরিপূজ্য তাং ভাবয়ন্ চেতসা দেবীং ত্রিনেত্রাং চন্দ্রশেখরাং। বালার্ককিরণপ্রখ্যাং সিন্দূরারুণবিগ্রহাং ॥ পদ্মঞ্চ দক্ষিণে পাণৌ জপমালাঞ্চ বামকে। মন্ত্রস্যাস্য প্রভাবেণ রম্ভা মপি তথোর্ব্বশীং ॥ আকর্ষয়েন্ন সন্দেহঃ কিং পুন র্মানবী মিহ ॥*॥ ভূর্জ্জপত্রে সমালিখ্য কুঙ্কুমালক্তবারিণা ॥ কাশ্মীরাগুরুকস্তূরীরোচনামিলিতেন চ। অনামারক্তমিশ্রেণ কমলাক্ষীমনুং লিখেৎ॥ ওঁ হ্রীং কমলাক্ষি অমুকী মাকর্ষয়াকর্ষয় ওঁ ফট্। ইমংমন্ত্রংজপেদাদৌ সহস্রৈকং ততঃ পুনঃ॥ তস্মূর্জপত্র মাদায় গুলিকাং কারয়েৎ সুধীঃ। তেনৈবং সাধ্যপাদোত্থ-মৃত্তিকাপঙ্কবেষ্টিতাং ॥ শোষিতাং তেজসা ভানো র্বেষ্টয়েৎ ত্রিকটুকৈঃ পুনঃ। প্রতিমাং স্ত্রীনিভাং কৃত্বা ক্ষিপেত্তস্যা স্তদোদরে ॥ গুলিকাং পাতয়েৎ পাত্রে প্রতিমাং সাধ্যরূপিণীং। তাদৃশাভিমুখো ভূত্বা নির্জনে নিশি সাধকঃ। তত স্তদ্গতচিত্তশ্চ তাবৎ কালং জপেন্মনুং। যাবদায়াতি সন্ত্রস্তা মদনালসবিগ্রহা ॥*॥ অথান্যৎ কথয়াম্যত্র নৃপাকর্ষণহেতবে। দেবস্যাপি নরস্যাপি মোহিনীমন্ত্রজাপতঃ॥ অথ মন্ত্রং মহেশান্যা স্তার মাদৌ তত স্ত্রপাং। পঞ্চশায়কবীজঞ্চ দত্ত্বাথ ভুবনেশ্বরীং॥ মোহিনীতি চ নামান্তে ফট্কারং পুন র্লিখেৎ। স্বাহান্তমন্ত্র মুক্তঞ্চ মধ্যবীজেন কারয়েৎ॥ ষড়ঙ্গান্ দীর্ঘযুক্তাদ্যে শ্চক্রেঽষ্ট-দলকে যজেৎ। প্রথমং সাধ্যনামানি লেখ্যানি চ কজোদরে॥ মহারজনরক্তেন পূর্ব্বমন্ত্রপদং যুতং। মোহিনীং পদ্মকিঞ্জল্কে জৃম্ভিণীং স্তম্ভিনীং তথা ॥ বশঙ্করীং কুলেশীঞ্চ ততো বৈ বিশ্ববাসিনীং। আকর্ষিণীং ততঃ ক্লিন্না মর্চ্চয়েদষ্টপত্রকে ॥ গন্ধপুষ্পাদিধূপাদ্যৈ র্ভক্তিযুক্তেন চেতসা। লক্ষজপ্তেন সর্ব্বেষাং শীঘ্র মাকর্ষণং ভবেৎ ॥*॥ হ্রীং কালিকায়ৈ ধীমহি তন্নঃ কালি প্রচোদয়াৎ। ওঁ আকর্ষিণী বজ্রধারিণী হুঁ ফট্ স্বাহা অমুকী মাকর্ষয়। প্রণবং পূর্ব্ব মুদ্ধৃত্য উগ্রসেনী ততঃ পরং। নিতম্বিনী বহ্নিজায়া বিদ্যা পরমদুর্লভা ॥ সিন্দূরপুত্তলিং কৃত্বা তস্যা নাম হৃদি বিলিখ্য পণমূল্যেন তাম্বূলং সমানীয় আমশরাবদ্বয়ে নৈবেদ্যং কৃত্বা কৃষ্ণাষ্টোত্তরশততুলস্যা মূলমন্ত্রপঠিতে পুত্তল্যা হৃদি নামস্থানে তাড়িতে সতি সা সমায়াতি। ইতি শ্রীকৃষ্ণানন্দবিদ্যাবাগীশকৃতষট্কর্ম্মদীপিকাতন্ত্রসারশ্চ ॥

আকর্ষণী ( স্ত্রী ) ফলপুষ্পাদ্যাকর্ষকযষ্টিকাবিশেষঃ। আঁকুশী ইতি ভাষা ॥

আকলনং ( ক্লী ) আকাঙ্ক্ষা। পরিসংখ্যা। বন্ধনং। ইতি মেদিনী ॥

আকল্পঃ ( পুং ) বেশঃ। ইত্যমরঃ ॥ কল্পনং। ইতি মেদিনী ॥ মণ্ডনং। রোগঃ। ইতি হেমচন্দ্রঃ ॥

আকল্পকঃ ( পুং ) তমঃ। মোহঃ। গ্রন্থিঃ। উৎকণ্ঠা। হর্ষঃ। ইতি মেদিনী ॥

আকষঃ (পুং) প্রস্তরবিশেষঃ। কষ্টিপাতর ইতি ভাষা। ইতি শব্দরত্নাবলী ॥

আকস্মিকং (ত্রি) অকস্মাদুদ্ভবং। হঠাজ্জাতং ॥

আকাঙ্ক্ষা (স্ত্রী) ইচ্ছা। অভিলাষঃ। ইত্যমরঃ ॥ ন্যায়মতে। যৎপদমৃতে যৎপদাম্বয়বোধো ন ভবতি তৎপদে তৎপদবত্তা। প্রতীতপর্য্যবসানবিরহঃ। ইত্যালঙ্কারিকাঃ॥

আকায়ঃ (পুং) নিবাসঃ। ইতি বোপদেবঃ ॥

আকারঃ (পুং) ইঙ্গিতং। অভিপ্রায়ানুরূপচেষ্টাবিষ্করণং। সংকেত ঠার ইত্যাদি ভাষা। আকৃতিঃ। মূর্ত্তিঃ। ইত্যমরঃ ॥

আকারগুপ্তিঃ (স্ত্রী) রত্যাদিসূচকো মুখরাগাদিরাকারঃ। আকারোঽঙ্গবৈকৃতমিতি বোপালিতঃ ॥ গুপ্তির্গোপনং। আকারস্য ভয়লজ্জাদিনা গুপ্তিরাকারগুপ্তিঃ। ইত্যমরটীকায়াং ভরতঃ ॥ তৎপর্য্যায়ঃ। অবহিত্থা ২। ইত্যমরঃ ॥ অঙ্গবিকৃতস্য রোমাঞ্চাদেরাচ্ছাদনাৎ অবহিঃস্থিতিরবহিত্থা। ইতি সারসুন্দরী ॥

আকারগোপনং (ক্লী) আকারগুপ্তিঃ। রত্যাদিসূচকমুখরাগাদিগোপনং। ইতি হেমচন্দ্রঃ ॥

আকারণং (ক্লী স্ত্রী) আহ্বানং। ডাকন ইতি ভাষা। ইত্য

আকালিকং (ত্রি) ক্ষণধ্বংসি। ইতি ধরণিঃ॥ সমানকালীনজন্মবিনাশশালী। ইতি সংক্ষিপ্তসারঃ॥ অকালসম্ভবং। আরম্ভকালাৎ তৎস্বজাতীয়কালস্থায়ি। নিমিত্তং কালমারভ্য পরেদ্যুর্যাবৎকালঃ স এব কালস্তাবদকালস্তত্র ভবঃ। ইতি তিথিতত্ত্বং॥

আকালিকপ্রলয়ঃ (পুং) প্রলয়বিশেষঃ। কপিলশাপেন অকালে জগৎপ্লাবনং। তদ্বিবরণং যথা। শ্রীমার্কণ্ডেয় উবাচ। আকালিকোঽয়ং প্রলয়ো যতো ভগবতা কৃতঃ। তৎ শৃণ্বন্তু মহাভাগা বারাহং লোকসংক্ষয়ং ॥ যথা বা মৎস্যরূপেণ বেদাস্ত্রাতাশ্চ শার্ঙ্গিণা। তদহং সংপ্রবক্ষ্যামি সর্ব্বপাপপ্রণাশনং ॥ শ্রীকপিল উবাচ। স্বায়ম্ভুব মনুশ্রেষ্ঠ ব্রহ্মরূপ মহামতে। মমৈকমীপ্সিতার্থং ত্বং দেহি প্রার্থয়তোঽধুনা ॥ জগৎ সর্ব্বং তবৈবেদং ত্বয়া চ পরিপালিতং। ত্বয়া সর্ব্বং জগৎ সৃষ্টং ত্বমেব জগতাং পতিঃ॥ তন্মে দেহি রহঃস্থানং ত্রিষু লোকেষু দুর্লভং। পুণ্যং পাপহরং রম্যং জ্ঞানপ্রভবমুত্তমং ॥ অহং হি সর্ব্বভূতানাং ভূত্বা প্রত্যক্ষদর্শিবান্। উদ্ধরিষ্যে জগজ্জাতান্ নির্মায় জ্ঞানদীপিকান্ ॥ অজ্ঞানসাগরে মগ্নমধুনা সকলং জগৎ। জ্ঞানদীপং প্রদায়াহং তারয়িষ্যে জগৎপ্লবং ॥ শ্রীমনুরুবাচ। যদি ত্বয়াখিলজগদ্ধিতার্থং জ্ঞানদীপিকাং। চিকীর্ষ্ণা তপঃ কার্য্যং কিং স্থানার্থনয়া তব ॥ দেবাগারাণি তীর্থানি ক্ষেত্রাণি সরিতস্তথা। বহূনি পুণ্যভাঞ্জ্যত্র তিষ্ঠন্তি কপিল ক্ষিতৌ ॥ তেষামেকতমং ত্বঞ্চেদাসাদ্য কুরুষে তপঃ। স্থানং ব্রহ্মন্ তপঃসিদ্ধৌ ন ভবিষ্যতি তত্র কিং ॥ কপিল উবাচ। ত্বয়ি বিশ্রব্ধমাধায় তপসঃ সিদ্ধয়েঽচিরাৎ। স্থানং ময়া প্রার্থিতং তে ত্বং মাং ক্ষিপসি হেতুভিঃ ॥ অক্ষাম্যস্তে বচো মেঽদ্য প্রার্থনায়াং

বিকত্থনং। যত্ত্বং বদসি তস্মাত্ত্বং ফল-
মেতদবাপ্নুহি॥ ইদং ত্রিভুবনং সর্ব্বং
সদেবাসুরমানুষং। হতপ্রহতবিধ্বস্ত-
মচিরেণ ভবিষ্যতি॥ ন চিরাৎ দ্রক্ষ্যসি
মনো জলপূর্ণং জগত্রয়ং। হতপ্র
বিধ্বস্তং তব গর্ব্ববিশাতনং॥ এবমুক্ত্বা
মুনীন্দ্রোঽসৌ কপিলস্তপসাং নিধিঃ। অন্ত-
র্দধে জগামাপি তদা ব্রহ্মসদো মুনিঃ॥
কপিলস্য বচঃ শ্রুত্বা বিসন্নবদনো মনুঃ।
ভাবীতি প্রতিপদ্যাশু মনুর্নোবাচ কিঞ্চন॥
বিশালাং বদরীং যাতো গঙ্গাদ্বারান্তিকং
মনুঃ। প্রবিশ্য তপসে যত্নমকরোল্লোক-
ভাবনঃ। আরাধয়ামাস হরিং জগৎকারণ-
কারণং॥ ওঁ নমো ভগবতে বাসুদেবায়
শুদ্ধজ্ঞানস্বভাবিনে। ইতি জপ্যং প্রজ-
পতো মনোঃ স্বায়ম্ভুবস্য তু॥ প্রসসাদ
জগন্নাথঃ কেশবো ন চিরাদথ। ততঃ ক্ষুদ্র-
ঝসো ভূত্বা দূর্ব্বাদলসমপ্রভঃ॥ কর্পূর-
কলিকাযুগ্মতুল্যনেত্রযুগোজ্জ্বলঃ। তপ-
স্যন্তং মহাত্মানং মনুং স্বায়ম্ভুবং মুনিং॥
আসসাদ তদা ক্ষুদ্রমৎস্যরূপী জনার্দনঃ।
উবাচ চ মহাত্মানং মনুং স্বায়ম্ভুবং তদা॥
তপোনিধে মহাভাগ ভীতং মাং ত্রাতু-
মর্হসি। নিত্যং যুদ্ধে জিতং মৎস্যৈর্বিশালৈ-
র্ভক্ষিতুং প্রতি॥ অথ প্রভূতৈর্বিপুলৈ-
র্দ্রাবিতঃ পৃথুরোমভিঃ। প্রাণাকাঙ্ক্ষী মহা-
ত্মানং ভবন্তং শরণং মুনিং॥ প্রাপ্তোঽহং
যদ্যনুক্রোশো ময়ি মাং পরিপালয়। ইতি
তস্য বচঃ শ্রুত্বা মনুঃ স্বায়ম্ভুবস্ততঃ॥
অলিঞ্জরে তোয়পূর্ণে ন্যধাদ্বিপুলভোগিনি।

স তস্মিন্ মলিকে মৎস্যো বর্দ্ধমানো দিনে
দিনে॥ সামান্যরোহিতপ্রায়দেহোঽভূন্ন-
চিরাদথ। দশঘটজলপূর্ণং প্রত্যহং স মহাত্মা
মলিকমসতি কুর্ব্বন্ বর্দ্ধয়ামাস মৎস্যং।
স চ সুবিষদনেত্রো মৎস্যরাজোঽচিরেণ
মলিকসলিলমধ্যে লোমশঃ পীনদেহঃ॥
ইতি কালিকাপুরাণে ৩১ অধ্যায়ঃ॥ *॥
শ্রীমার্কণ্ডেয় উবাচ। ততস্তথা পীনতনুং
দৃষ্ট্বা মৎস্যং মনুঃ স্বয়ং। গৃহীত্বা পাণিনা
ফুল্লনলিনীং সরসীং যযৌ॥ তৎসরস্তত্র
বিপুলং পুণ্যে নারায়ণাশ্রমে। একযোজন-
বিস্তীর্ণং সার্দ্ধযোজনমায়তং॥ নানামীন-
গণোপেতং শীতামলজলোৎকরং। তদা-
সাদ্য সরো মৎস্যং বিনিধায় মনুস্তদা॥
পালয়ামাস সুতবৎ কৃপয়া পরয়া যুতঃ।
সোঽচিরেণৈব কালেন পীনো বৈসারিণো-
ঽভবৎ॥ ন সমস্তত্র সরসি বৃহৎকায়ো
দ্বিজোত্তমাঃ। স একদা মহামৎস্যঃ পূর্ব্বা-
পরতটদ্বয়ে॥ শিরঃপুচ্ছে নিধায়াশু তুঙ্গ-
দেহঃ সমুচ্ছ্রিতঃ। স্বায়ম্ভুবং মহাত্মানং
চুক্রোশ ত্রাহি মামিতি॥ তং তথা স মনু-
র্জ্ঞাত্বা ক্রোশন্তং মীনপুঙ্গবং। আসসাদ
তদা মৎস্যং জগ্রাহ চ করেণ তং॥ ন
শক্নোম্যহমুদ্ধর্ত্তুং পৃথুরোমাণমদ্ভুতং। ইতি
সঞ্চিন্তয়ন্নেবং প্রোদ্দধার করেণ তং॥
ভগবানপি বিশ্বাত্মা মৎস্যরূপী জনার্দ্দনঃ।
স্বায়ম্ভুবকরং প্রাপ্য লঘিমানমুপাশ্রয়ৎ॥
ততঃ করাভ্যামুদ্ধৃত্য স্কন্ধে ধৃত্বাণ্ডজং মনুঃ।
নিনায় সাগরং তত্র তোয়ে চ নিদধে
ততঃ॥ যথেচ্ছমত্র বর্দ্ধস্ব ন কোঽপি ত্বাং

হনিষ্যতি। অচিরেণৈব সম্পূর্ণদেহত্বং সমবাপ্নুহি॥ ইত্যুক্ত্বা স মহাভাগঃ সর্ব্ব-প্রাণভৃতাম্বরঃ। লঘুত্বং চিন্তয়ংস্তস্য বিস্ময়ং পরমং গতঃ॥ মৎস্যোঽপি ন চিরাদেব পূর্ণকায়স্তদা মহান্। সর্ব্বতঃ পূরয়ামাস দেহাভোগেন সাগরং॥ তং পূর্ণকায়-মালোক্য ব্যতীত্যান্তঃ সমুচ্ছ্রিতং। শল্কৈঃ শিরাভী রচিতং মানসাচলসন্নিভং॥ রুদ্ধস্তং সাগরং সর্ব্বং দেহাভোগাচলীকৃতং। স্বায়ম্ভুবো মনুর্ধীমান্ মেনে মৎস্যং ন তং তদা॥ ততঃ পপ্রচ্ছ তং সাম্না মৎস্যং স্বায়ম্ভুবো মনুঃ। বিচিন্ত্য লঘিমানঞ্চ পশ্যন্মূর্ত্তিং তদাদ্ভুতাং॥ শ্রীমনুরুবাচ। ন ত্বাং মৎস্যমহং মন্যে কস্ত্বং মে বদ সত্তম। মহত্ত্বং লঘিমানন্তে চিন্তয়ন্ সুমহত্তম॥ ত্বং ব্রহ্মা হ্যথ বা বিষ্ণুঃ শম্ভুর্ব্বা মীনরূপধৃক্। ন চেদ্‌গুহ্যং মহাভাগ তন্মে বদ মহামতে॥ শ্রীমৎস্য উবাচ। আ-রাধ্যোঽহং ত্বয়া নিত্যং যো হরিঃ স সনা-তনঃ। তবেষ্টকামসিদ্ধ্যর্থং প্রাদুর্ভূতঃ সমাহিতঃ॥ যত্ত্বমিচ্ছসি দেবেশ মত্তঃ শান্তেন মূর্ত্তিনা। তৎকরিষ্যেঽদ্য তাং মূর্ত্তিমিমাং বিদ্ধি মনো মম॥ শ্রীমার্কণ্ডেয় উবাচ। ইতি তস্য বচঃ শ্রুত্বা বিষ্ণো-রমিততেজসঃ। জ্ঞাত্বা প্রত্যক্ষতো বিষ্ণুং মনুস্তুষ্টাব কেশবং॥ শ্রীমনুরুবাচ। নমস্তে জগদব্যক্ত পরাবরপতে হরে। পাবকা-দিত্যশীতাংশুনেত্রত্রয়ধরাব্যয়॥ জগৎ-কারণ সর্ব্বজ্ঞ জগদ্ধাম হরে পর। সুরৌঘ পরমেশান নারায়ণ সুরেশ্বর॥ ইত্যাদি স্তোত্রং। শ্রীমার্কণ্ডেয় উবাচ। স্বায়-ম্ভুবেন মনুনা সংস্তুতো মৎস্যরূপধৃক্। বাসুদেবস্তদা প্রাহ মেঘগম্ভীরনিস্বনঃ॥ শ্রীভগবানুবাচ। তুষ্টোঽস্মি তপসা তে-ঽদ্য ভক্ত্যা চাপি স্তুতো মুহুঃ॥ সপর্য্যয়া তথানেন বরং বরয় সুব্রত। ইষ্টার্থং সংপ্রদাস্যামি তুভ্যং নাত্র বিচারণা॥ বরয়াভীপ্সিতান্ কামান্ লোকানাং বা হিতঞ্চ যৎ। মনুরুবাচ। যদি দেয়ো বরো মেঽদ্য লোকানাং যো হিতো ভবেৎ। তন্মে দেহি বরং বিষ্ণো তং বক্ষ্যামি শৃণুষ্ব মে॥ শশাপ কপিলঃ পূর্ব্বং মদর্থে ভুবনত্রয়ং। হতপ্রহতবিধ্বস্তং সকলং তে ভবিষ্যতি॥ যেনেয়মুদ্ধৃতা পৃথ্বী যেনেয়ং পরিপালিতা। সংহরিষ্যতি য-স্তেনাং তেঽধুনা প্লাবয়ন্নিমাং॥ ততোঽহং দীনহৃদয়স্ত্বামেব শরণং গতঃ। ন যথেদং ত্রিভুবনং জলপ্লুতং ভবিষ্যতি॥ হতপ্রহত-বিধ্বস্তং তথা ত্বং দেহি মে বরং। শ্রীভগ-বানুবাচ। ন মত্তঃ কপিলো ভিন্নস্তথা ন কপিলাদহং। যদুক্তং মুনিনা তেন ময়োক্তং বিহিতং মনো॥ তস্মাদযদুদিতং তেন তৎ সত্যং নান্যথা ভবেৎ। করিষ্যে তত্র সাহায্যং স্বায়ম্ভুব নিবোধ তৎ॥ হতপ্রহত-বিধ্বস্তে তোয়মগ্নে জগত্রয়ে। ন চিরাদেব তত্তোয়ং শোষয়িষ্যামি বৈ মনো॥ যাব-জ্জলপ্লবস্তাবৎ যথা কার্য্যং ত্বয়া মনো। তন্মে নিগদিতং তথ্যং শৃণুষ্বাবহিতোঽধুনা॥ সর্ব্বযজ্ঞিয়কাষ্ঠৌঘৈরেকা নৌকা বিধী-য়তাং। তামহং দৃঢ়য়িষ্যামি যথা নো

ভিদ্যতে জলৈঃ ॥ দশযোজনবিস্তীর্ণাং ত্রিংশদ্যোজনমায়তাং। ধারিণীং সর্ব্ববীজানাং ভুবনত্রয়বর্দ্ধিনীং ॥ সর্ব্বযাজ্ঞিকবৃক্ষাণাং ভূরিবল্কলতন্তুভিঃ। নবযোজনদীর্ঘাস্তু ব্যামত্রয়সুবিস্তৃতাং ॥ কুরু স্বয়ং মনো তূর্ণং বৃহতীমীরিকাং বটীং। জগদ্ধাত্রী জগন্মায়া লোকমাতা জগন্ময়ী ॥ দৃঢ়য়িষ্যতি তাং রজ্জুং ন ত্রুট্যতি যথা তথা। সর্ব্বাণি বীজান্যাদায় সবেদান্ সপ্ত বৈ ঋষীন্ ॥ তস্যাং নাবি নিসন্নস্ত্বং বর্ত্তমানে জলপ্লবে। দক্ষেণ সহ সংগম্য স্মরিষ্যসি মনো মম ॥ স্মৃতোঽহং তূর্ণমায়াস্যে ভবতো নিকটং প্রতি। শ্যামলেনাথ শৃঙ্গেণ ত্বং মাং জ্ঞাস্যসি বৈ তদা ॥ যাবৎ প্রহতবিধ্বস্তং হতং স্যাদ্ভুবনত্রয়ং। তাবৎ পৃষ্ঠেন তাং নাবং বোঢ়াহং নাত্র সংশয়ঃ ॥ জলপ্লবে তু সংপূর্ণে শৃঙ্গে মম চ তাং তরিং। ত্বং তয়া বটিকয়া তূর্ণং সদা নেষ্যসি বৈ দৃঢ়ং ॥ বদ্ধায়াং নাবি মে শৃঙ্গে দৈবমানেন বৎসরান্। সহস্রং প্রেরয়িষ্যামি তাং নাবং শোষয়ন্ জলং ॥ ততঃ শুষ্কেষু তোয়েষু প্রোন্মগ্নে শিখরে গিরেঃ। হিমাচলস্য বদ্ধা তাং তস্মিন্নাবমহং মনো ॥ ত্বাং বৈ গোপয়িতা নিত্যং তাবত্তু শোষয়ে জলং। চিন্তিতোঽহং ত্বয়া যাস্যে যদাহং নিকটং তব ॥ শৃঙ্গেণ শ্যামলেনৈব ত্বং মাং জ্ঞাস্যসি পুষ্করে। পুনঃ সৃষ্টিং ততঃ কৃত্বা মৎপ্রসাদান্মহামতে ॥ ত্রৈলোক্যদুর্ল্লভামৃদ্ধিমবাপ্স্যসি সনাতনীং। অহমারাধিতো যেন জপ্যেন ভবতা মনো ॥ সর্ব্বসিদ্ধির্ভবেত্তস্য যস্তোষয়তি তেন মাং।

শ্রীমার্কণ্ডেয় উবাচ। ইতি দত্ত্বা বরং তস্মৈ মৎস্যস্তেন নমস্কৃতঃ। অন্তর্দ্দধে জগন্নাথো লোকানুগ্রহকারকঃ ॥ স্বায়ম্ভুবোঽপি ভগবানন্তর্দ্ধানং গতে হরৌ। যথোক্তং হরিণা পূর্ব্বং নাবং রজ্জুং তথাকরোৎ ॥ সর্ব্বযাজ্ঞিয়বৃক্ষৌঘান্ ছিত্ত্বা স্বায়ম্ভুবস্তদা। উদ্বেষ্ম কারয়ামাস নাবং দৃঢ়তরাং ততঃ ॥ তেষাং বল্কসমুদ্ভূতসূত্রসংঘৈর্বটীরিকাং। পূর্ব্বোক্তেন প্রমাণেন কারয়ামাস বৈ মনুঃ ॥ ততঃ কালেন মহতা বৃত্তং যুদ্ধং মহাদ্ভুতং। বিষ্ণোর্যজ্ঞবরাহস্য সরভস্য হরস্য চ ॥ ততো জলপ্লবে ভূতে বিধ্বস্তে ভুবনত্রয়ে। তয়া রজ্জ্বা তরিং বদ্ধা বীজান্যাদায় সর্ব্বশঃ ॥ বেদানৃষীন্ তথা সপ্ত দক্ষং চাদায় বৈ মনুঃ। তস্যাং নাবি সমাধায় তোয়মগ্নে চরাচরে ॥ স্বায়ম্ভুবস্তদা মৎস্যং হরিং সংস্মার বৈ ততঃ। ততো জলানামুপরি সশৃঙ্গ ইব পর্ব্বতঃ ॥ উদ্দীপ্তশ্চৈকশৃঙ্গেণ বিষ্ণুর্মৎস্যস্বরূপধৃক্। আগতস্তত্র ন চিরাদযত্রাস্তে স মনুর্হরিঃ ॥ তরিমারুহ্য বিপুলে তোয়রাশৌ ভয়ঙ্করে। যাবচ্চলাচলং তোয়ং তাবৎ পৃষ্ঠে তরিং ন্যধাৎ ॥ জলে প্রকৃতিমাপন্নে শৃঙ্গে বদ্ধা তরিং তদা। তাং নাবং চোদয়ামাস সহস্রং দৈববৎসরান্ ॥ স্বয়ং নাবমবষ্টভ্য দধার পরমেশ্বরঃ। যোগনিদ্রা জগদ্ধাত্রী সমাসীদ্বটীরিকাং ॥ ততঃ শনৈঃ শনৈস্তোয়ে শোষং গচ্ছতি বৈ চিরাৎ। পশ্চিমং হিমবৎশৃঙ্গমুন্মগ্নং তোয়মধ্যতঃ ॥ দ্বিসাহস্রে-

র্যোজনানামুচ্ছ্রিতস্য হিমপ্রভোঃ। পঞ্চাশত্তু সহস্রাণি শৃঙ্গং তস্তস্য চোচ্ছ্রিতং ॥ তস্মিন্ শৃঙ্গে ততো নাবং বদ্ধা মৎস্যাত্মধৃক্ হরিঃ। জগাম শোনণায়াশু জলানাং জগতাংপতিঃ ॥ এবং হি মৎস্যরূপেণ বেদাস্ত্রাতাশ্চ শার্ঙ্গিণা। কপিলস্য তু শাপেন কৃতোঽথাকালিকো লয়ঃ ॥ আকালিকোঽয়ং প্রলয়ো যতো ভগবতা কৃতঃ। ইতি বঃ কথিতং সর্ব্বং যথাবৎ দ্বিজসত্তমাঃ॥ ইতি কালিকাপুরাণে ৩২ অধ্যায়ঃ॥

আকালিকী (স্ত্রী) বিদ্যুৎ। ইতি হেমচন্দ্রঃ॥

আকাশঃ (পুং ক্লী) পঞ্চভূতান্তর্গতভূতবিশেষঃ। স তু শূন্যঃ। তৎপর্য্যায়ঃ। দ্যোঃ ২ দ্যৌঃ ৩ অভ্রং ৪ অন্তং ৫ ব্যোম ৬ পুষ্করং ৭ অম্বরং ৮ নভঃ ৯ অন্তরীক্ষং ১০ অন্তরিক্ষং ১১ গগনং ১২ অনন্তং ১৩ সুরবর্ত্ম ১৪ খং ১৫ বিয়ৎ ১৬ বিষ্ণুপদং ১৭ বিহায়ঃ ১৮। ইত্যমরঃ॥ নাকঃ ১৯ অনঙ্গঃ ২০ নভসং ২১ মেঘবেশ্ম ২২ মহাবিলং ২৩। ইতি জটাধরঃ॥ মরুদ্বর্ত্ম ২৪ মেঘবর্ত্ম ২৫ ত্রিপিষ্টপং ২৬। ইতি শব্দরত্নাবলী॥ ন্যায়মতে অস্য সামান্যগুণাঃ সংখ্যাদিপঞ্চ। বিশেষগুণঃ শব্দঃ। স তু নিত্যঃ অশরীরী চ। অস্যেন্দ্রিয়ং কর্ণঃ। সত্বেকঃ কিন্তু উপাধিভেদেন নানা ভবতি। বেদান্তমতে স জন্যঃ॥

আকাশগঙ্গা (স্ত্রী) স্বর্গগঙ্গা। যথা। আকাশগঙ্গাসলিলতরঙ্গগণনাদিতে। ত্রৈগুণ্যললিতৈশ্চারুমরুদ্ভিরুপবীজিতে॥ ইতি শিবরাত্রিব্রতকথা॥

আকাশজননী [ন্] (পুং) প্রগণ্ডীমধ্যস্থিতজনানাং বাহ্যার্থদর্শনার্থানি ক্ষুদ্রছিদ্রাণি। যদ্দ্বারা আগ্নেয়াস্ত্রগুলিকাঃ প্রক্ষিপ্যন্তে। ইতি রাজধর্ম্মঃ॥

আকাশদীপঃ (পুং) কার্ত্তিকমাসে ভগবদুদ্দেশেন নভসি দত্তপ্রদীপঃ। যথা। কার্ত্তিকে আকাশদীপ উক্তো নির্ণয়ামৃতে পুষ্করপুরাণে। তুলায়াং তিলতৈলেন সায়ংকালে সমাগতে। আকাশদীপং যো দদ্যাৎ মাসমেকং হরিং প্রতি॥ মহতীং শ্রিয়মাপ্নোতি রূপসৌভাগ্যসম্পদমিতি। তদ্বিধিশ্চ হেমাদ্রৌ আদিপুরাণে। দিবাকরেঽস্তাচলমৌলিভূতে গৃহাদদূরে পুরুষপ্রমাণং। যূপাকৃতিং যজ্ঞিয়বৃক্ষদারুমারোপ্য ভূমাবথ তস্য মূর্দ্ধ্নি॥ যবাঙ্গুলচ্ছিদ্রযুতাস্তু মধ্যে দ্বিহস্তদীর্ঘা অথ পট্টিকাস্তু। কৃত্বা চতস্রোঽষ্টদলাকৃতীস্তু যাভির্ভবেদষ্টদিশানুসারী॥ তৎকর্ণিকায়াস্তু মহাপ্রকাশো দীপঃ প্রদেয়ো দলগাস্তথাষ্টৌ। নিবেদ্য ধর্ম্মায় হরায় ভূম্যৈ দামোদরায়াপ্যথ ধর্ম্মরাজ্ঞে॥ প্রজাপতিভ্যস্ত্বথ সৎপিতৃভ্যঃ প্রেতেভ্য এবাথ তমঃস্থিতেভ্যঃ। ইতি। অপরার্কে ত্বন্যো মন্ত্রো যথা। দামোদরায় নভসি তুলায়াং লোলয়া সহ। প্রদীপং তে প্রযচ্ছামি নমোঽনন্তায় বেধসে॥ ইতি নির্ণয়সিন্ধৌ ২ পরিচ্ছেদে কার্ত্তিকমাহাত্ম্যং॥

আকাশপ্রদীপঃ (পুং) তুলায়াং দীয়মানলক্ষ্মীদামোদরসম্প্রদানাকাশদীপঃ। তথাচ ব্রহ্মাণ্ডপুরাণে। তুলায়াং তিলতৈলেন

সায়ংসন্ধ্যাসমাগমে। আকাশদীপং যো দদ্যাৎ মাসমেকং নিরন্তরং ॥ স শ্রীকায় শ্রীপতয়ে স শ্রীমান্ ভুবি জায়তে। ওঁং দামোদরায় নভসি তুলায়াং লোলয়া সহ। প্রদীপং তে প্রযচ্ছামি নমোঽনন্তায় বেধসে ॥ ইতি মন্ত্রেণ যো দদ্যাৎ প্রদীপং সর্পিরাদিনা। আকাশে মণ্ডপে বাপি স চাক্ষয়ফলং লভেৎ ॥ বিষ্ণুবেশ্মনি যো দদ্যাৎ কার্ত্তিকে মাসি দীপকং। অগ্নিষ্টোম-সহস্রস্য ফলমাপ্নোতি মানবঃ ॥

আকাশমাংসী (স্ত্রী) সূক্ষ্মজটামাংসী। কেদারে উৎপত্তিরস্যাঃ। তৎপর্য্যায়ঃ। নিরালম্বা ২ খসম্ভবা ৩ শেবালী ৪ সূক্ষ্ম-পত্রী ৫ গৌরী ৬ পর্ব্বতবাসিনী ৭ অভ্র-মাংসী ৮। অস্যা গুণাঃ। হিমত্বং। শোথ-ব্রণনাড়ীরোগনাশিত্বং। লূতাগর্দ্দভকজ্বালা-হারিত্বং। বর্ণকারিত্বঞ্চ। ইতি রাজ-নির্ঘণ্টঃ ॥

আকাশমূলী (স্ত্রী) কুম্ভিকা। পানা ইতি খ্যাতা। ইতি হারাবলী ॥

আকাশরক্ষী [ন্] (পুং) প্রগণ্ডীস্থিতপ্রণিধিঃ। দুর্গবহিঃপ্রাচীরোপরিস্থিতচরঃ। ইতি রাজ-ধর্ম্মঃ ॥

আকাশবল্লী (স্ত্রী) লতাবিশেষঃ। আকাশ-বেল অমরবেল ইতি খ্যাতা। তৎপর্য্যায়ঃ। খবল্লী ২ দুঃস্পর্শা ৩ ব্যোমবল্লিকা ৪। অস্যা গুণাঃ। মধুরত্বং। কটুত্বং। পিত্ত-নাশিত্বং। শুক্রবর্দ্ধকত্বং। রসায়নত্বং। বলকারিত্বং। দিব্যৌষধিপরত্বং। ইতি রাজনির্ঘণ্টঃ ॥ আকাশবল্লী তু বুধৈঃ কথিতামরবল্লরী। খবল্লী গ্রাহিণী তিক্তা পিচ্ছিলাক্ষ্যাময়াপহা ॥ তুবরাগ্নিকরী হৃদ্যা পিত্তশ্লেষ্মামনাশিনী। ইতি ভাবপ্রকাশঃ ॥

আকাশবাণী (স্ত্রী) অশরীরিণী বাক্। দৈব-বাণী। ইতি পুরাণং ॥

আকাশসলিলং (ক্লী) দিব্যোদকং। ইতি রাজনির্ঘণ্টঃ ॥

আকিঞ্চনং (ক্লী) অকিঞ্চনতা ॥

আকীর্ণং (ত্রি) ব্যাপ্তং। তৎপর্য্যায়ঃ। সংকীর্ণং ২ সঙ্কুলং ৩। ইত্যমরঃ ॥ সমা-কীর্ণং ৪। ইতি শব্দরত্নাবলী ॥ জলাদিভি-র্নিরবকাশং। ইতি ভরতঃ ॥

আকুঞ্চনং (ত্রি) ন্যায়মতে পঞ্চপ্রকার-কর্ম্মান্তর্গতকর্ম্মবিশেষঃ। সঙ্কোচঃ ॥

আকুলং (ত্রি) ব্যাকুলং। তৎপর্য্যায়ঃ। ব্যস্তং ২ অপ্রগুণং ৩। ইত্যমরঃ

আকূতং (ক্লী) অভিপ্রায়ঃ। আশয়ঃ। ইতি হেমচন্দ্রঃ ॥

আকৃতিঃ (স্ত্রী) রূপং। শরীরং। জাতিঃ। ইতি মেদিনী ॥

আকৃতিচ্ছত্রা (স্ত্রী) ঘোষাতকীবৃক্ষঃ। শ্বেত-ঘোষা ইতি ভাষা। ইতি রত্নমালা ॥

আকৃষ্টং (ত্রি) কৃতাকর্ষণং। আকর্ষিতং ॥

আকোকেরঃ (পুং) মকররাশিঃ। ইতি জ্যোতিস্তত্ত্বং ॥

আক্রন্দঃ (পুং) রোদনং। আহ্বানং। মিত্রং। দারুণযুদ্ধং। ভ্রাতা। ইতি মেদিনী ॥ ধ্বনিঃ। নাথঃ। পার্ষ্ণিগ্রাহাৎ পরো রাজা। ইতি ধরণিঃ ॥

আক্রমঃ (পুং) আক্রমণং। তৎপর্য্যায়ঃ।

অধিক্রমঃ ২ ক্রান্তিঃ ৩। ইতি হেমচন্দ্রঃ॥
আক্রমণং (ক্লী) আক্রমকরণং। ব্যাপনং॥
আক্রান্তঃ (ত্রি) কৃতাক্রমণঃ। অধিক্রান্তঃ। আক্রমবিশিষ্টঃ। ইতি হলায়ুধঃ॥
আক্রীড়ঃ (পুং) রাজোপবনং। রাজ্ঞঃ সাধারণং বনং। ইত্যমরঃ॥
আক্রোশঃ (পুং) ক্রোধাকর্ত্তব্যনিশ্চয়ঃ। তৎপর্য্যায়ঃ। আক্ষেপঃ ২ অভিষঙ্গঃ ৩ শাপঃ ৪। ইতি হেমচন্দ্রঃ॥
আক্রোশনং (ক্লী) অভিশাপঃ। তৎপর্য্যায়ঃ। অভিষঙ্গঃ ২ অভীষঙ্গঃ ৩। ইত্যমরঃ॥
আখণ্ডলঃ (পুং) ইন্দ্রঃ। ইত্যমরঃ॥
আখনিকঃ (পুং) চৌরঃ। উন্দুরুঃ। শূকরঃ। ইতি মেদিনী॥
আখাতং (পুং ক্লী) অখাতং। দেবখাতং। ইত্যমরটীকায়াং রায়মুকুটঃ॥
আখুঃ (পুং) মূষিকঃ। ইত্যমরঃ॥ শূকরঃ। চৌরঃ। ইতি হেমচন্দ্রঃ॥ দেবতাড় বৃক্ষঃ। ইতি রত্নমালা॥
আখুকর্ণী (স্ত্রী) লতাবিশেষঃ। মূষাকাণী। ইতি ভাষা। তৎপর্য্যায়ঃ। কৃশিকা ২ দ্রবন্তী ৩ চিত্রা ৪ সুবর্ণী ৫ উন্দুরুকর্ণী ৬ ন্যগ্রোধী ৭ মূষককর্ণী ৮ বৃশ্চিকর্ণী ৯ বহুকর্ণিকা ১০ মাতা ১১ ভূমিচরী ১২ চণ্ডা ১৩ শম্বরী ১৪ বহুপাদিকা ১৫ প্রত্যক্‌শ্রেণী ১৬ বৃষা ১৭ পুত্রশ্রেণী ১৮ অদ্রিভূঃ ১৯। অস্যা গুণাঃ। কটুত্বং। উষ্ণত্বং। কফপিত্তহরত্বং। সারকত্বং। আনাহজ্বরশূলনাশিত্বং। পরমপাচকত্বং। ইতি রাজনির্ঘণ্টঃ॥ আখুপর্ণী আকুকর্ণী কর্ণিকা ভূদরীভবা। আখুকর্ণী কটুস্তিক্তা কষায়া শীতলা লঘুঃ॥ বিপাকে কটুকা মূত্রকফাময়কৃমিপ্রণুৎ। ইতি ভাবপ্রকাশঃ॥
আখুগঃ (পুং) গণেশঃ। ইতি হেমচন্দ্রঃ॥
আখুপর্ণিকা (স্ত্রী) লতাবিশেষঃ। ইন্দুরকাণী ইতি ভাষা। ইতি রত্নমালা॥
আখুপর্ণী (স্ত্রী) আখুপর্ণিকা। ইতি রত্নমালা॥
আখুপাষাণঃ (পুং) পাষাণভেদঃ। আখুপাষাণনামোঽয়ং লোহসংকরকারকঃ। ইতি রাজনির্ঘণ্টঃ॥
আখুভুক্ [জ্] (পুং) বিড়ালঃ। ইত্যমরঃ॥
আখুরথঃ (পুং) গণেশঃ। ইতি হলায়ুধঃ॥
আখুবিষহা (স্ত্রী) দেবতাড়বৃক্ষঃ। ইতি জটাধরঃ॥ দেবদালীলতা। ইতি রাজনির্ঘণ্টঃ॥
আখেটঃ (পুং) মৃগয়া। শিকার ইতি ভাষা। ইত্যমরঃ॥
আখেটকঃ (পুং) মৃগয়া। ইতি শব্দরত্নাবলী॥
আখেটশীর্ষকং (ক্লী) কুট্টিমভেদঃ। শুড়ঙ্গ ইতি ভাষা। ইতি শব্দরত্নাবলী॥
আখেটিকঃ (পুং) মৃগয়াকুশলকুক্কুরঃ। তৎপর্য্যায়ঃ। অখেটিকঃ ২ বিশ্বকদ্রুঃ ৩। ইতি হারাবলী॥
আখোটঃ (পুং) ফলবৃক্ষবিশেষঃ। আখ্‌রোট্ ইতি ভাষা। তৎপর্য্যায়ঃ। পার্ব্বতীয়ঃ ২ ফলস্নেহঃ ৩ গুড়াশয়ঃ ৪ কীরেষ্টঃ ৫ কন্দরালঃ ৬ মধুমজ্জা ৭ বৃহচ্ছদঃ ৮। অস্য গুণাঃ। মধুরত্বং। বলকারিত্বং। স্নিগ্ধত্বং।

উষ্ণত্বং। বাতপিত্তনাশিত্বং। রক্তদোষপ্রশমনত্বং। শীতলত্বং। কফকোপনত্বং। ইতি রাজনির্ঘণ্টঃ॥

আখ্যা (স্ত্রী) নাম। সংজ্ঞা। ইত্যমরঃ॥

আখ্যাতং (ত্রি) কথিতং। উক্তং। ইত্যমরঃ॥ ব্যাকরণোক্তধাতূত্তরবিহিততিঙ্প্রত্যয়াদি॥

আখ্যানং (ক্লী) কথনং। যথা। কথিতং ষষ্ঠ্যুপাখ্যানং ব্রহ্মপুত্র যথাগমং। দেবী মঙ্গলচণ্ডী যা তদাখ্যানং নিশাময়॥ ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ৪১ অধ্যায়ঃ॥

আখ্যায়িকা (স্ত্রী) উপলব্ধার্থকথা। ইত্যমরঃ॥ ইতিহাস উপন্যাস ইতি খ্যাতা॥

আগঃ [স্] (ক্লী) পাপং। অপরাধঃ। ইত্যমরঃ॥

আগতং (ত্রি) আয়াতং। উপস্থিতং॥

আগন্তুঃ (ত্রি) অতিথিঃ। ইত্যমরঃ॥ আগমনশীলঃ। অনিয়তঃ॥

আগন্তুকং (ত্রি) আহার্য্যং। অনিত্যস্থায়ি। ইতি ত্রিকাণ্ডশেষঃ॥

আগমং (ক্লী) তন্ত্রশাস্ত্রং। অস্যার্থঃ। আগতং পঞ্চবক্ত্রাত্তু গতঞ্চ গিরিজাননে। মতঞ্চ বাসুদেবস্য তস্মাদাগমমুচ্যতে॥ ইতি তন্ত্রশাস্ত্রং॥

আগমঃ (পুং) শাস্ত্রমাত্রং। আগমনং। ইতি মেদিনীকরহেমচন্দ্রৌ॥ সাক্ষিপত্রাদিঃ। ইতি ব্যবহারমাতৃকা॥ প্রকৃতিপ্রত্যয়ানুপঘাতিকার্য্যং। ইতি ব্যাকরণং॥

আগমনং (ক্লী) আঙ্পূর্ব্বগমধাতোরনট্প্রত্যয়াস্তস্য রূপমিদং। আসা ইতি ভাষা॥

আগমাবর্ত্তা (স্ত্রী) বৃশ্চিকালীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

আগমিতং (ত্রি) অধীতং। পঠিতং। ইতি জটাধরঃ॥

আগাধং (ক্লী) অগাধং। অতিগভীরং। ইত্যমরটীকায়াং মথুরানাথঃ॥

আগান্তুঃ (ত্রি) আগন্তুকঃ। অতিথিঃ। ইত্যমরটীকায়াং নীলকণ্ঠঃ॥

আগামী [ন্] (ত্রি) ভবিষ্যৎকালঃ। ইতি রাজনির্ঘণ্টঃ॥

আগারং (ক্লী) গৃহং। ইত্যমরটীকা॥

আগুঃ [র্] (স্ত্রী) আগূঃ। প্রতিজ্ঞা। ইত্যমরটীকায়াং রমানাথঃ॥

আগূঃ (স্ত্রী) প্রতিজ্ঞা। ইত্যমরঃ

আগ্নীধ্রং (ক্লী) অগ্নীধ্রং। হোতৃগৃহং। ইত্যমরটীকায়াং রমানাথঃ॥ আগ্নেয্যা অগ্নী ধ্রমুপতিষ্ঠতে ইত্যত্র আগ্নীধ্রং মণ্ডপমিত্যাখ্যানদর্শনাৎ। ধনদ্বারা বরণীয় ঋত্বিজি পুং॥

আগ্নেয়ং (ক্লী) স্বর্ণং। ইতি রাজনির্ঘণ্টঃ॥ দেশবিশেষঃ। ইতি শব্দরত্নাবলী॥ রক্তং। ইতি হেমচন্দ্রঃ॥ ঘৃতং। ইতি পাণিনিঃ॥

আগ্নেয়ঃ (পুং) অগস্ত্যমুনিঃ। ইতি পাণিনিঃ॥ অগ্নিসম্বন্ধীয়ে ত্রি॥

আগ্নেয়ী (স্ত্রী) অগ্নিকোণং। স্বাহা। ইতি জটাধরঃ॥

আগ্রয়ণং (ক্লী) নবশস্যেষ্টিঃ। যথা। শরদ্বসন্তয়োঃ কেচিন্নবযজ্ঞং প্রচক্ষতে। ধান্যপাকবশাদন্যে শ্যামাকো বনিনঃ স্মৃতঃ॥ ইত্যনেন শরদ্বসন্তবিহিতনবশস্যেষ্টেঃ। শ্যামাকৈর্ব্রীহিভিশ্চৈব যবৈরন্যোন্যকালতঃ।

প্রাগ্‌যষ্টুং যুজ্যতেঽবশ্যং ন ত্বত্রাগ্রয়ণাত্যয়ঃ ॥ ইতি কালান্তরদর্শনাৎ শ্রাদ্ধেঽপি তথা ইতি। আগ্রয়ণং নবশস্যেষ্টিঃ'। ইতি মলমাসতত্ত্বং ॥

আগ্রহঃ (পুং) অনুগ্রহঃ। আসক্তিঃ। আক্রমঃ। গ্রহণং। ইতি মেদিনী ॥

আগ্রহায়ণঃ (পুং) মার্গশীর্ষমাসঃ। ইতি রায়মুকুটঃ ॥

আগ্রহায়ণিকঃ (পুং) অগ্রহায়ণমাসঃ। মতভেদে বৎসরাদ্যমাসোঽয়ং। অস্মিন্ মাসে বৃশ্চিকরাশিস্থো রবিঃ। তৎপর্য্যায়ঃ। মার্গশীর্ষঃ ২ সহাঃ ৩ মার্গঃ ৪। ইত্যমরঃ ॥ আগ্রহায়ী ৫ অলকঃ ৬ সহঃ ৭ মার্গশিরঃ ৮। ইতি শব্দরত্নাবলী ॥ অগ্রহায়ণসম্বন্ধিনি ত্রি ॥

আগ্রহায়ণী (স্ত্রী) মৃগশিরোনক্ষত্রং। ইত্যমরঃ ॥ অগ্রহায়ণমাসস্য পৌর্ণমাসী ॥

আঘট্টকঃ (পুং) রক্তাপামার্গঃ। ইতি রাজনির্ঘণ্টঃ ॥

আঘাটঃ (পুং) সীমা। ইতি হেমচন্দ্রঃ ॥ অপামার্গঃ। ইতি রাজনির্ঘণ্টঃ ॥

আঘাতঃ (পুং) বধস্থানং। ইতি ত্রিকাণ্ডশেষঃ ॥ হননং। ছেদনং। চোট কোপ ইত্যাদি ভাষা ॥

আঘাতনং (ক্লী) বধস্থানং। ইতি হারাবলী ॥ হননং ॥

আঘারঃ (পুং) ঘৃতং। ইতি হেমচন্দ্রঃ ॥ ঋগ্বেদিনাং স্রুবেণ চতুরাজ্যং স্রুচি দত্ত্বা প্রজাপতিং মনসা ধ্যাত্বা তূষ্ণীমগ্নের্বায়ব্যকোণাদারভ্যাগ্নেয়ীং যাবদবিচ্ছিন্নঘৃতধারাদানং। পুনঃ স্রুবেণ চতুরাজ্যং স্রুচি দত্ত্বা ইন্দ্রং ধ্যাত্বাগ্নের্নৈঋর্তকোণাদারভ্য ঐশানীং যাবদবিচ্ছিন্নঘৃতধারাদানং। ইতি কালেসিঃ ॥ যজুর্বেদিনাস্তু স্রুবেণ মন্ত্রোচ্চারণপূর্ব্বকপূর্ব্বোক্তক্রমেণ ঘৃতধারাদানং। ইতি পশুপতিঃ ॥

আঘূর্ণিতং (ত্রি) ঘূর্ণিতনেত্রাদিঃ। ঘূরাণ ইতি ভাষা। যথা। আঘূর্ণিতো বা বাতেন স্থিতঃ পোতে মহার্ণবে। ইতি দেবীমাহাত্ম্যং ॥

আঘ্রাণং (ক্লী) তৃপ্তিঃ। ইতি হেমচন্দ্রঃ ॥ গন্ধগ্রহণং। সোঁকা ইতি ভাষা ॥

আঘ্রাতঃ (ত্রি) শিঙ্ঘিতঃ। আক্রান্তঃ। ইতি মেদিনী ॥ তৃপ্তঃ। ইতি হেমচন্দ্রঃ ॥

আর্ঘ্যং (ক্লী) পীতবর্ণদীর্ঘতুণ্ডষট্‌পদসন্নিভমাক্ষিকোৎপন্নমধু। অস্য গুণাঃ। অতিশয়চক্ষুর্হিতকারিত্বং। কফপিত্তরক্তদোষনাশিত্বঞ্চ ॥ ইতি রাজনির্ঘণ্টঃ ॥ যথা। মধূকবৃক্ষা নির্যাসং জরৎকার্য্যাশ্রমোদ্ভবাঃ। স্রবন্ত্যার্ঘ্যং তদা খ্যাতং শ্বেতকং মালবে পুনঃ ॥ তীক্ষ্ণতুণ্ডাস্তু যাঃ পীতা মক্ষিকাঃ ষট্‌পদোপমাঃ। আর্ঘ্যাস্তাস্তৎকৃতং যত্তদার্ঘ্যমিত্যপরে জগুঃ ॥ ইতি ভাবপ্রকাশঃ ॥

আঙ্‌ (অব্য) উপসর্গবিশেষঃ। অল্পার্থঃ। ঈষৎ। যথা আপিঙ্গলঃ। অভিব্যাপ্তিঃ। যথা আজন্মব্রহ্মচারী। সীমা। যথা আসমুদ্রক্ষিতীশানাং। ধাতুযোগজঃ। যথা আরোহতি। ইত্যমরভরতৌ ॥ সমন্তাৎ। গ্রহণং। স্থিতিঃ। ইতি দুর্গাদাসঃ ॥

আঙ্গং (ক্লী) কোমলাঙ্গং। ইতি ত্রিকাণ্ডশেষঃ ॥

আঙ্গারং (ক্লী) অঙ্গারসমূহঃ। ইতি রায়-

আঙ্গিকঃ (ত্রি) অঙ্গনিষ্পন্নভাবব্যঞ্জকভ্রূক্ষে-পাদিঃ। ইত্যমরঃ॥ মার্দ্দঙ্গিকঃ। ইতি শব্দরত্নাবলী॥

আঙ্গিরসঃ (পুং) বৃহস্পতিঃ। ইত্যমরঃ॥

আচমনং (ক্লী) বৈধকর্ম্মারম্ভাৎ পূর্ব্বং বারত্রয়-জলপানানন্তরং যথাক্রমাষ্টাঙ্গস্পর্শরূপ-শুদ্ধিজনকক্রিয়া। তৎপর্য্যায়ঃ। উপ-স্পর্শঃ ২। ইত্যমরঃ॥ আচমঃ ৩ শুচি-প্রণীঃ ৪। ইতি শব্দরত্নাবলী॥ তদ্বিধানং যথা। ত্রিরাচামেদপঃ পূর্ব্বং দ্বিঃ প্রমৃজ্যা-ত্ততো মুখং। সংমৃজ্যাঙ্গুষ্ঠমূলেন ত্রিভ-রাস্যমুপস্পৃশেৎ॥ অঙ্গুষ্ঠেন প্রদেশিন্যা ঘ্রাণং পশ্চাদনন্তরং॥ অঙ্গুষ্ঠানামিকাভ্যাঞ্চ চক্ষুঃশ্রোত্রে পুনঃপুনঃ॥ কনিষ্ঠাঙ্গুষ্ঠয়ো-র্নাভিং হৃদয়ন্তু তলেন বৈ। সর্ব্বাভিস্তু শিরঃ পশ্চাদ্বাহূ চাগ্রেণ সংস্পৃশেৎ॥ ঋচো যজূংষি সামানি ত্রিঃ পিবন্ প্রীণয়েৎ ক্রমাৎ। অথর্ব্বাঙ্গিরসৌ পূর্ব্বং দ্বিঃ প্র-মার্ষ্ট্যা নয়েন্মুখং॥ সেতিহাসপুরাণানি বেদাঙ্গানি যথাক্রমং। খং মুখং নাসিকে বায়ুং নেত্রে সূর্য্যং শ্রুতী দিশঃ॥ প্রাণ-গ্রন্থিমথো নাভিং ব্রহ্মাণং হৃদয়ং স্পৃশেৎ। রুদ্রং মূর্দ্ধানমালভ্য প্রীণাত্যথ শিখা-মৃষীন্॥ বাহূ যমেন্দ্রবরুণকুবেরবসুধা-নলান্। অভ্যুক্ষ্য চরণৌ বিষ্ণুমিন্দ্রবিষ্ণু করদ্বয়ং॥ বাসুকিপ্রমুখান্ নাগান্ জলং ক্ষিপতি যৎ ক্ষিতৌ। যেঽন্তরা বিন্দবো যান্তি ভূতগ্রামঞ্চ তৈর্দ্বিজ॥ অগ্নিবায়ু-সূর্য্যেন্দ্রা গিরয়োঽঙ্গুলিপর্ব্বসু। গঙ্গাদ্যাঃ সরিতস্তাসু যা রেখাঃ করমধ্যগাঃ॥ তলে সোমঃ সতীর্থশ্চ স্মৃতোঽতঃ পাবনঃ করঃ। ইতি গারুড়ে ২১৫ অধ্যায়ঃ॥ *॥ অন্যচ্চ। অথাচমনং। পরাশরঃ। কৃত্বাথ শৌচং প্রক্ষাল্য পাদৌ হস্তৌ চ মৃজ্জলৈঃ। নিবদ্ধ-শিখ আসীনো দ্বিজ আচমনং চরেৎ॥ আপস্তম্বঃ। ইত্যেবমন্তিরাজানু প্রক্ষাল্য চরণৌ পৃথক্। হস্তৌ চামণিবন্ধাভ্যাং পশ্চাদাসীত সংযতঃ॥ আজান্বিতি অধ্ব-শ্রমাদিনা তৎপর্য্যন্তমশৌচে আজঙ্ঘাত ইতি হারীতোক্তং সামান্যতঃ। কৃত্বোপ-বীতং সব্যাংশে বাঙ্মনঃকায়সংযতঃ॥ *॥ শিখাবন্ধে বিশেষমাহ ব্রহ্মপুরাণং। গায়ত্র্যা তু শিখাং বদ্ধা নৈঋর্ত্যাং ব্রহ্মরন্ধ্রতঃ। জুটিকাঞ্চ ততো বদ্ধা ততঃ কর্ম্ম সমা-রভেৎ॥ যাজ্ঞবল্ক্যঃ। অন্তর্জানু শুচৌ দেশে উপবিষ্ট উদঙ্মুখঃ। প্রাগ্বা ব্রাহ্মোণ তীর্থেন দ্বিজো নিত্যমুপস্পৃশেৎ॥ অন্ত-র্জানু জানুনোর্মধ্যে হস্তৌ কৃত্বেতি শেষঃ। ভবিষ্যে। সমৌ তু চরণৌ কৃত্বা তথা বদ্ধ-শিখো নৃপ। আচামেদিত্যনুবৃত্তৌ দেবলঃ। শিখাং বদ্ধা বসিত্বা তু নির্ণিক্তে বাসসী শুভে। তূষ্ণীংভূত্বা সমাদায় নোদ্গচ্ছন্ন বিলোকয়ন্॥ *॥ ব্রাহ্ম্যাবরোধে তু মনুঃ। কায়ত্রৈদশিকাভ্যাস্তু ন পিত্রেণ কদাচন। মার্কণ্ডেয়ঃ। সপবিত্রেণ হস্তেন কুর্য্যাদাচ-মনক্রিয়াং। নোচ্ছিষ্টং তৎ পবিত্রন্তু ভুক্তোচ্ছিষ্টস্তু বর্জ্জয়েৎ॥ *॥ উদক-গ্রহণে পরিমাণমাহ ভরদ্বাজঃ। আয়তং

পর্ব্বণাং কৃত্বা গোকর্ণাকৃতিমৎ করং। সংহতাঙ্গুলিনা তোয়ং গৃহীত্বা পাণিনা দ্বিজঃ॥ মুক্তাঙ্গুষ্ঠকনিষ্ঠাভ্যাং শেষেণাচমনং চরেৎ। মাষমজ্জনমাত্রাস্তু সংগৃহ্য ত্রিঃ পিবেদপঃ॥ যাজ্ঞবল্ক্যঃ॥ অদ্ভিস্তু প্রকৃতিস্থাভির্হীনাভিঃ ফেনবুদ্বুদৈঃ। হৃৎকণ্ঠতালুগাভিশ্চ যথাসংখ্যং দ্বিজাতয়ঃ॥ শুদ্ধেরন্ স্ত্রী চ শূদ্রশ্চ সকৃৎ স্পৃষ্টাভিরন্ততঃ। অন্ততঃ ওষ্ঠপ্রান্তে। প্রচেতাঃ॥ অনুষ্ণাভিরফেনাভিঃ পূতাভির্বীক্ষ্য চক্ষুষা। হৃদ্গতাভিরশব্দাভিস্ত্রিশ্চতুর্ব্বাদ্ভিরাচমেৎ॥ চতুর্ব্বেতি ভাবশুদ্ধ্যপেক্ষয়া॥ *॥ আচমনপ্রকারমাহ দক্ষঃ। প্রক্ষাল্য হস্তৌ পাদৌ চ ত্রিঃ পিবেদম্বু বীক্ষিতং। সম্বৃত্যাঙ্গুষ্ঠমূলেন দ্বিঃ প্রমৃজ্যাত্ততো মুখং॥ সংহত্য তিসৃভিঃ পূর্ব্বমাস্যমেবমুপস্পৃশেৎ। অঙ্গুষ্ঠেন প্রদেশিন্যা ঘ্রাণং পশ্চাদনন্তরং॥ অঙ্গুষ্ঠানামিকাভ্যাঞ্চ চক্ষুঃশ্রোত্রে পুনঃ পুনঃ। নাভিং কনিষ্ঠাঙ্গুষ্ঠেন হৃদয়ন্তু তলেন বৈ॥ সর্ব্বাভিস্তু শিরোদেশং বাহূ চাগ্রেণ সংস্পৃশেৎ। পুনঃপুনরিতি ঘ্রাণাদীনাং গোলকদ্বয়াভিপ্রায়েণ। ইতি শ্রীদত্তঃ॥ *॥ বীক্ষণানুষ্ণয়োরপবাদমাহ যমঃ। রাত্রাবনীক্ষিতেনাপি শুদ্ধিরুক্তা মনীষিভিঃ। উদকেনাতুরাণাঞ্চ তথোষ্ণেনোষ্ণপায়িনাং॥ *॥ মুখমার্জ্জনানন্তরং ব্যাসঃ। বামহস্তং পাদৌ শিরশ্চ দক্ষিণেন পাণিনা জলেনাভ্যুক্ষয়েদিতি সামবেদিক্রমঃ। যজুর্ব্বেদিনাস্তু গোতমঃ। পাদৌ চাভ্যুক্ষয়েৎ খানি চোপস্পৃশেৎ শীর্ষাণি মূর্দ্ধ্নি দদ্যাৎ উদকবিন্দূন্॥ *॥ ইন্দ্রিয়স্পর্শে বিশেষমাহ মনুঃ। খানি চৈব স্পৃশেদদ্ভিরিতি। নাভিস্পর্শে ব্যাসঃ। ততঃ স্পৃশেন্নাভিদেশং পুনরপশ্চ সংস্পৃশেৎ। ইন্দ্রিয়স্পর্শানন্তরং ভবিষ্যে। যস্তু মাবুদকং বীর সমুৎসৃজতি দানব। বাসুকিপ্রমুখান্নাগান্ তেন প্রীণাতি মানবঃ॥ *॥ জলস্থলোভয়কর্ম্মানুষ্ঠানার্থঞ্চ জলস্থলৈকচরণেনাচমনং কর্ত্তব্যমাহ পৈঠীনসিঃ॥ অন্তরুদকে আচান্তো অন্তরেব শুদ্ধো ভবতি বহিরুদকে আচান্তো বহিরেব শুদ্ধঃ স্যাৎ তস্মাদন্তরেকং বহিরেকঞ্চ কৃত্বা পাদমাচামেৎ সর্ব্বত্র পূতো ভবতীতি॥ *॥ জলমাত্রে জানোরূর্দ্ধমুত্তিষ্ঠন্নাচমনমাহ বিষ্ণুঃ। জানোরূর্দ্ধং জলে তিষ্ঠন্নাচান্তঃ শুচিতামিয়াৎ। অধস্তাচ্ছতকৃত্বোঽপি সমাচান্তো ন শুদ্ধ্যতি॥ হারীতঃ। আর্দ্রবাসা জলে কুর্য্যাত্তর্পণাচমনং জপং। শুষ্কবাসাঃ স্থলে কুর্য্যাত্তর্পণাচমনং জপং॥ *॥ আচমননিষেধে দেবলঃ। সোপানৎকো জলস্থো বা মুক্তকেশোঽপি বা পুনঃ। উর্দ্ধশীর্ষী বাপি নাচামেদ্বস্ত্রেণোদ্বেষ্ট্য বা শিরঃ॥ ন গচ্ছন্ন শয়ানশ্চ ন চলন্ন পরান্ স্পৃশন্। ন হসন্ নৈব সংজল্পন্নাত্মানঞ্চৈব বীক্ষয়ন্॥ কেশান্নীবীমধঃকায়মস্পৃশন্ ধরণীমপি। যদি স্পৃশতি চৈতানি ভূয়ঃ প্রক্ষালয়েৎ করং॥ আত্মানং হৃদয়ং। তথা ব্যাসঃ। শিরঃ প্রাবৃত্য কণ্ঠং বা মুক্তকচ্ছশিখোঽপি বা। অকৃত্বা পাদয়োঃ শৌচমাচান্তোঽপ্যশুচির্ভবেৎ॥ মরীচিঃ। ন বহির্জানু ত্বরয়া

নাসনস্থো ন চোত্থিতঃ। ন পাদুকাস্থো নান্যচিত্তঃ শুচিঃ প্রযতমানসঃ॥ ভুক্ত্বাসনস্থোঽপ্যাচামেন্নান্যকালে কদাচন। জানুভ্যামূর্দ্ধমাচম্য জলে তিষ্ঠন্নদুষ্যতি॥ শাট্যায়নঃ। স্নানমাচমনং হোমং ভোজনং দেবতার্চ্চনং। প্রৌঢ়পাদো ন কুর্ব্বীত স্বাধ্যায়ং পিতৃতর্পণং॥ *॥ দ্বিরাচমননিমিত্তানি। স্নাত্বা পীত্বা ক্ষুতে সুপ্তে ভুক্ত্বা রথ্যোপসর্পণে। আচান্তঃ পুনরাচামেদ্বাসো বিপরিধায় চ॥ ব্রহ্মপুরাণং। হোমে ভোজনকালে চ সন্ধ্যয়োরুভয়োরপি। আচান্তঃ পুনরাচামেদন্যত্রাপি সকৃৎ সকৃৎ॥ *॥ অথাচমননিমিত্তানি। নিষ্ঠীবনে তথাভ্যঙ্গে তথা পাদাবসেচনে। উচ্ছিষ্টস্য চ সম্ভাষাদশুচ্যুপহতস্য চ॥ সন্দেহেষু চ সর্ব্বেষু শিখাং বদ্ধা তথৈব চ। বিনা যজ্ঞোপবীতেন নিত্যমেবমুপস্পৃশেৎ॥ উষ্ট্রবায়সসংস্পর্শে দর্শনে চান্ত্যবাসিনাং। হারীতঃ। স্ত্রীশূদ্রোচ্ছিষ্টসম্ভাষণে মূত্রপুরীষোৎসর্গদর্শনে দেবমভিগন্তুকাম আচামেৎ॥ *॥ অথ আচমনপ্রতিপ্রসবমাহ স্মৃতিঃ। ক্ষুতে নিষ্ঠীবনে সুপ্তে পরিধানেঽশ্রুপাতনে। কর্ম্মস্থ এষু নাচামেদ্দক্ষিণং শ্রবণং স্পৃশেৎ॥ বৃদ্ধশাতাতপঃ। বাতকর্ম্মণি নিষ্ঠীবেদন্তশ্লিষ্টে তথানৃতে। ক্ষুতে পতিতসংলাপে দক্ষিণশ্রবণং স্পৃশেৎ॥ মার্কণ্ডেয়পুরাণং। কুর্য্যাদালম্ভনং স্পর্শং গোপৃষ্ঠস্যার্কদর্শনং। কুর্ব্বীতালভনং বাপি দক্ষিণশ্রবণস্য চ॥ যথাবিভবতো হ্যেতৎ পূর্ব্বাভাবে ততঃ পরং॥ *॥ আচমনে জলাধারনিষেধমাহ উশনাঃ। কাংস্যায়সেন পাত্রেণ ত্রপুসীসকপিত্তলৈঃ। আচান্তঃ শতকৃত্বোঽপি ন কদাচিৎ শুচির্ভবেৎ॥ ইতি গোপালপঞ্চাননকৃতাচারনির্ণয়ঃ॥ আয়তং পর্ব্বণাং কৃত্বা গোকর্ণাকৃতিবৎ করং। সংহতাঙ্গুলিনা তোয়ং গৃহীত্বা পাণিনা দ্বিজঃ॥ মুক্তাঙ্গুষ্ঠকনিষ্ঠাভ্যাং শেষেণাচমনংচরেৎ। মাষমজ্জনমাত্রাস্তু সংগৃহ্য ত্রিঃ পিবেদপঃ॥ ইতি ভারদ্বাজঃ॥ অদ্ভিস্তু প্রকৃতিস্থাভির্হীনাভিঃ ফেনবুদ্বুদৈঃ। হৃৎকণ্ঠতালুগাভিশ্চ যথাসংখ্যং দ্বিজাতয়ঃ॥ শুদ্ধেরন্ স্ত্রী চ শূদ্রশ্চ সকৃৎস্পৃষ্টাভিরন্ততঃ। ইতি যাজ্ঞবল্ক্যঃ॥ হৃদ্গাভিঃ পূয়তে বিপ্রঃ কণ্ঠগাভিশ্চ ভূমিপঃ। বৈশ্যোঽদ্ভিঃ প্রাশিতাভিশ্চ শূদ্রঃ স্পৃষ্টাভিরন্ততঃ॥ ইতি মনুঃ॥ স্ত্রিয়াস্ত্রৈদশিকং তীর্থং শূদ্রজাতেস্তথৈব চ। সকৃদাচমনাচ্ছুদ্ধিরেতয়োরেব চোভয়োঃ॥ ইতি মিতাক্ষরা॥

আচমনকঃ (পুং) নিষ্ঠীবনপাত্রং। পিক্‌দান ডাবর ইতি ভাষা। তৎপর্য্যায়ঃ। প্রোষ্ঠঃ ২ কটকোলঃ ৩ পতদ্‌গ্রহঃ ৪। ইতি হারাবলী॥

আচমনীয়ং (ক্লী) মুখপ্রক্ষালনার্থজলং। তদ্দানবিধির্যথা। দদ্যাদাচমনীয়ন্তু সুগন্ধিসলিলৈঃ শুভৈঃ। কর্পূরবাসিতৈর্ব্বাপি কৃষ্ণাগুরুসুধূপিতৈঃ॥ যথা তথা সুগন্ধৈর্ব্বা প্রসন্নৈঃ ফেনবর্জ্জিতৈঃ। তৈজসেন পাত্রেণ শঙ্খেনাথ প্রদাপয়েৎ। উদকং দীয়তে যত্র প্রসন্নং ফেনবর্জ্জিতং। আচমনায় দেবেভ্যস্তদাচমনমুচ্যতে॥ কেবলং

তোয়পাত্রেণ তদা দদ্যান্নমিশ্রিতং। বাসিতন্তু সুগন্ধ্যাদ্যৈঃ কর্ত্তব্যং যদি লভ্যতে ॥ আয়ুর্ব্বলং যশোবৃদ্ধিং প্রদায়াচমনীয়কং। লভতে সাধকো নিত্যং কামাংশ্চৈব যথেপ্সিতান্ ॥ ইতি কালিকাপুরাণে ৬৭ অধ্যায়ঃ ॥

আচরণং (ক্লী) আচারঃ। ব্যবহারঃ ॥

আচরিতং (ত্রি) কৃতাচরণং। ব্যবহৃতং ॥

আচান্তঃ (ত্রি) কৃতাচমনঃ। যথা। বৌধায়নঃ। স্নাত্বা পীত্বা ক্ষুতে সুপ্তে ভুক্ত্বা রথ্যোপসর্পণে। আচান্তঃ পুনরাচামেৎ বাসো বিপরিধায় চ ॥ ইত্যাহ্নিকতত্ত্বং।

আচামঃ (পুং) আচমনং। ইতি শব্দরত্নাবলী ॥ ভক্তমণ্ডঃ। ইত্যমরঃ ॥

আচারঃ (পুং) ব্যবহারঃ। তৎপর্য্যায়ঃ। চরিত্রং ২ চরিতং ৩ চারিত্রং ৪ চরণং ৫ বৃত্তং ৬ শীলং ৭। ইতি হেমচন্দ্রঃ ॥ স্নানাচমনাদিঃ। ইতি মানবে ২ অধ্যায়ে ৬৯ শ্লোকটীকায়াং কুল্লূকভট্টঃ। ব্যবহারঃ। স তু বিচারঃ। যথা বৃহস্পতিঃ। আচারেণাবসন্নোঽপি পুনর্লেখয়তে যদি। সোঽভিধেয়ো জিতঃ পূর্ব্বং প্রাঙ্ন্যায়স্তু স উচ্যতে ॥ ইতি ব্যবহারতত্ত্বং ॥ চরিত্রং। এতদ্বিবরণং সদাচারশব্দে দ্রষ্টব্যং ॥

আচারবর্জ্জিতঃ (ত্রি) আচারবহির্ভূতঃ। ইতি জটাধরঃ ॥

আচারী (স্ত্রী) হিলমোচিকা। ইতি রাজনির্ঘণ্টঃ ॥ আচারবিশিষ্টে ত্রি।

আচার্য্যঃ (পুং) বেদাধ্যাপকঃ। বৈদিকমন্ত্রব্যাখ্যাকর্ত্তা। তৎপর্য্যায়ঃ। মন্ত্রব্যাখ্যাকৃৎ ২। ইত্যমরঃ ॥ দ্রোণাচার্য্যঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ তল্লক্ষণং যথা। উপনীয় তু যঃ শিষ্যং বেদমধ্যাপয়েৎ দ্বিজঃ। সকল্পং সরহস্যঞ্চ তমাচার্য্যং প্রচক্ষতে ॥ ইতি মানবে ২ অধ্যায়ঃ ॥

আচার্য্যা (স্ত্রী) মন্ত্রব্যাখ্যাকর্ত্রী। ইত্যমরসিংহঃ ॥

আচার্য্যাণী (স্ত্রী) আচার্য্যপত্নী। ইত্যমরঃ ॥

আচিতং (ক্লী) দশভারপরিমাণং। ২৫ মোন ইতি ভাষা। ইত্যমরঃ ॥

আচিতঃ (পুং) শাকটো ভারঃ. এক গাড়ির বোজা ইতি ভাষা। ইত্যমরঃ ॥ দ্ব্যযুতপলং। ইতি মেদিনী ॥

আচিতঃ (ত্রি) সংগৃহীতঃ। ছন্নঃ। ইতি মেদিনী ॥

আছ্ ই আয়ামে। ইতি কবিকল্পদ্রুমঃ ॥ ইত্যাদৌ দ্বিত্বাভাবঃ প্রকৃতিভ্রমনিরাসার্থঃ। ই আঞ্ছতে। আয়ামো দীর্ঘীকরণং। আঞ্ছতি কটং শিল্পী। ইতি। দুর্গাদাস ॥

আচ্ছকঃ (পুং) বৃক্ষবিশেষঃ। আচ ইতি ভাষা। তৎপর্য্যায়ঃ। রঞ্জনদ্রুঃ ২ পক্ষীকঃ ৩ পক্ষিকঃ ৪ আক্ষিকঃ ৫। ইতি রত্নমালা ॥

আচ্ছন্নং (ত্রি) আচ্ছাদিতং। আবৃতং। যথা। মেঘাচ্ছন্নেঽহ্নি দুর্দিনং। ইত্যমরঃ ॥

আচ্ছাদঃ (পুং) বস্ত্রং। ইতি হেমচন্দ্রঃ ॥

আচ্ছাদনং (ক্লী) বস্ত্রং। ইত্যমরঃ ॥ সংপিধানং। অপবারিতমাত্রং। ইতি মেদিনী ॥

আচ্ছাদিতং (ত্রি) কৃতাচ্ছাদনং। আবৃতং। ঢাকা ইতি ভাষা ॥

আচ্ছুরিতং (ক্লী) সশব্দহাস্যং। নখবাদ্যং। ইতি ধরণিঃ॥

আচ্ছুরিতকং (ক্লী) সোৎপ্রাসহাসঃ। ইত্যমরঃ॥ হাস্যং। নখাঘাতবিশেষঃ। ইতি মেদিনীকরহেমচন্দ্রৌ॥

আচ্ছোদনং (ক্লী) মৃগয়া। ইত্যমরঃ॥

আজং (ক্লী) ঘৃতং। ইতি জটাধরঃ॥

আজকং (ক্লী) অজসমূহঃ। ছাগলের পাল ইতি ভাষা। ইত্যমরঃ॥

আজকারঃ (পুং) শিববৃষঃ। ইতি শব্দরত্নাবলী॥

আজগবং (ক্লী) শিবধনুঃ। ইতি হেমচন্দ্রঃ॥

আজন্মসুরভিপত্রঃ (পুং) মরুবরক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

আজানেয়ঃ (পুং স্ত্রী) কুলীনাশ্বঃ। শ্রেষ্ঠঘোটকঃ। ইত্যমরঃ॥ শক্তিভির্ভিন্নহৃদয়াঃ স্খলন্তোঽপি পদে পদে। আজানন্তি যতঃ সংজ্ঞামাজানেয়াস্ততঃ স্মৃতাঃ॥ ইত্যশ্বতন্ত্রং॥

আজিঃ (স্ত্রী) যুদ্ধং। সমানভূমিঃ। ইত্যমরকোষমেদিন্যৌ। ক্ষণং। ইতি হেমচন্দ্রঃ। আক্ষেপঃ। ইতি শব্দরত্নাবলী॥

আজীবঃ (পুং) জীবিকা। ইত্যমরঃ॥

আজুঃ [র্] (স্ত্রী) আজুঃ। বিষ্টিঃ। ইতি স্বামী॥

আজূঃ (স্ত্রী) বেতনং বিনা কর্ম্মকারঃ। বেগার ইতি ভাষা। ইত্যমরঃ॥

আজ্ঞপ্তঃ (ত্রি) আজ্ঞাপ্রাপ্তঃ। যথা। আজ্ঞপ্তাস্তু ততো দৈত্যাশ্চণ্ডমুণ্ডপুরোগমাঃ। চতুরঙ্গবলোপেতা যযুরভ্যুদ্যতায়ুধাঃ॥ ইতি দেবীমাহাত্ম্যং॥

আজ্ঞা (স্ত্রী) আদেশঃ। তৎপর্য্যায়ঃ। অববাদঃ ২ নির্দ্দেশঃ ৩ নিদেশঃ ৪ শাসনং ৫ শিষ্টিঃ ৬। ইত্যমরঃ॥

আজ্ঞাকারী [ন্] (ত্রি) আজ্ঞয়া কর্ম্মকারী। আজ্ঞাবহঃ। আজ্ঞানুবর্ত্তী॥

আজ্ঞাচক্রং (ক্লী) ষট্‌চক্রান্তর্গতষষ্ঠচক্রং। তথাচ তন্ত্রে। আজ্ঞানামাম্বুজং তদ্ধিমকরসদৃশং ধ্যানধামপ্রকাশং হক্ষাভ্যাং বৈ কলাভ্যাং প্রবিলসিতবপুর্নেত্রপত্রং সুশুভ্রং। তন্মধ্যে হাকিনী সা শশিসমধবলা বক্ত্রষট্‌কং দধানা বিদ্যাং মুদ্রাং কপালং ডমরুজপবটীং বিভ্রতী শুদ্ধচিত্তা॥ এতৎ পদ্মান্তরালে নিবসতি চ মনঃ সূক্ষ্মরূপং প্রসিদ্ধং॥ ইতি শ্রীতত্ত্বচিন্তামণৌ ষষ্ঠপ্রকাশঃ॥

আজ্ঞাপকঃ (ত্রি) আজ্ঞাকর্ত্তা॥

আজ্ঞাপত্রং (ক্লী) আদেশলিপিঃ। নিদেশলিখনং। হুকুমনামা ইতি পারস্যভাষা॥

আজ্ঞাপনং (ক্লী) বিজ্ঞাপনং। জানান ইতি ভাষা॥

আজ্ঞাপ্তঃ (ত্রি) আজ্ঞাপ্তিবিশিষ্টঃ। লব্ধাজ্ঞঃ। আজ্ঞাপ্রাপ্তঃ॥

আজ্যং (ক্লী) ঘৃতং। ইত্যমরঃ॥ শ্রীবাসঃ। ইত্যজয়পালঃ॥

আজ্যভাগঃ (পুং) ঋগ্বেদিনাং অগ্নেরুত্তরভাগে স্রুবেণাগ্নিসম্প্রদানকঘৃতাহুতিঃ। তদ্দক্ষিণভাগে সোমসম্প্রদানকাহুতিশ্চ। ইতি কালেসিঃ॥ যজুর্ব্বেদিনাস্তু অগ্নেরুত্তরদক্ষিণয়োঃ পশ্চিমাদিপ্রাচ্যন্তঘৃতধারা। ইতি পশুপতিঃ॥

আঞ্জনেয়ঃ ( পুং ) অঞ্জনানামবানরীপুত্রঃ। স তু হনুমান্। ইতি ত্রিকাণ্ডশেষঃ ॥

আঞ্জিনেয়ঃ ( পুং ) জন্তুবিশেষঃ। আজনাই ইতি খ্যাতঃ। ইতি শব্দমালা ॥

আটিঃ ( পুং ) পক্ষিবিশেষঃ। শরালি ইতি খ্যাতঃ। ইত্যমরঃ ॥

আটীকনং ( ক্লী ) বৎসানাং গমনং। ইতি ত্রিকাণ্ডশেষঃ ॥

আটীকরঃ ( পুং ) বৃষঃ। ইতি ভূরিপ্রয়োগঃ ॥

আটোপঃ ( পুং ) দর্পঃ। ইতি হেমচন্দ্রঃ ॥ বায়ুজন্যউদরগুড়্গুড়াশব্দঃ। ইতি বৈদ্যকঃ ॥

আড়ম্বরঃ ( পুং ) পটহঃ। তূর্য্যরবঃ। গজেন্দ্রগর্জনং। ইত্যমরঃ ॥ আরম্ভঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ পক্ষ্ম। দর্পঃ। ইতি মেদিনী ॥ ক্রোধঃ। ইতি স্বামী ॥ হর্ষঃ। ইতি শব্দরত্নাবলী ॥

আড়িঃ ( স্ত্রী ) শরালিপক্ষী। ইত্যমরঃ ॥ স্বনামখ্যাতমৎস্যবিশেষঃ। অস্যা গুণাঃ। গুরুত্বং। স্নিগ্ধত্বং। বাতশ্লেষ্মপ্রকোপনত্বং। অতিবলশুক্রমেধাগ্নিবৃদ্ধিকারিত্বঞ্চ ॥ ইতি রাজবল্লভঃ ॥

আড়ূঃ ( পুং ) উড়ুপঃ। ভেলা মাড় ইত্যাদি ভাষা। ইত্যুণাদিকোষঃ ॥

আঢ়কং ( ক্লী ) পরিমাণবিশেষঃ। আঢ়া ইতি ভাষা। যথা। শতযোজনবিস্তীর্ণং ত্রিংশদ্যোজনমায়তং। আঢ়কস্য ভবেম্মানং মুনিভিঃ পরিকীর্ত্তিতং ॥ অপি চ। ত্রিংশদ্যোজনবিস্তীর্ণং শতযোজনমায়তং। বিংশযোজনগম্ভীরমাঢ়কং পরিকীর্ত্তিতং ॥ ইতি গণপতিভট্টঃ। ইতি জ্যোতিস্তত্ত্বং ॥

আঢ়কঃ ( পুং ক্লী ) চতুঃপ্রস্থপরিমাণং। আড়ী ইতি ভাষা। ইত্যমরঃ ॥ দ্রোণচতুর্থভাগঃ। ইতি লীলাবতী ॥ অষ্টমুষ্টির্ভবেৎ কুঞ্চিরিত্যাদিবচনাৎ ষট্পঞ্চাশদধিকদ্বিশতমুষ্টির্ভবতি। ব্যবহারে ষোড়শসেরো বিংশতিসেরো বা। বৈদ্যকমতে অষ্টশরাবপরিমাণং। তৎপর্য্যায়ঃ। পাত্রং ২ কংসং ৩ ভাজনং ৪। ইতি পরিভাষা ॥ অপচয়বিবক্ষায়াং আঢ়কিকেত্যপি স্যাৎ। ইত্যমরটীকাসারসুন্দরী ॥ আঢ়িকা। ইতি ভরতঃ ॥

আঢ়কিকঃ ( ত্রি ) আঢ়কপরিমিতবীজবপনাদিযোগ্যক্ষেত্রাদিঃ। ইত্যমরঃ ॥

আঢ়কী ( স্ত্রী ) শমীধান্যবিশেষঃ। অরহর ইতি ভাষা। তৎপর্য্যায়ঃ। তুবরী ২ বর্য্যা ৩ করবীরভুজা ৪ বৃত্তবীজা ৫ পীতপুষ্পা ৬। অস্যা গুণাঃ। কষায়ত্বং। মধুরত্বং। কফপিত্তনাশিত্বঞ্চ। তদ্দিদলগুণাঃ। ঈষদ্বাতরুচিকারিত্বং। গুরুত্বং। গ্রাহিত্বঞ্চ। পীতা রক্তা সিতা ত্রিবিধেয়ং। শ্বেতা দোষদা। লোহিতা রুচ্যা বল্যা পিত্ততাপাদিহন্ত্রী চ। পীতা দীপনী পিত্তদাহধ্বংসিনী চ ॥ তদ্যূষং বল্যং। ইতি রাজনির্ঘণ্টঃ ॥ অমরমতে তৎপর্য্যায়ঃ। কাক্ষী ২ মৃতস্না ৩ তুবরিকা ৪ মৃতালকং ৫ সুরাষ্ট্রজং ৬। ভরতমল্লিকমতে এতৎ ষট্কং অরহরস্য। সারসুন্দরীমতে তুবরিকাখ্যগন্ধদ্রব্যস্য। কেষাঞ্চিন্মতে সুগন্ধিমৃত্তিকায়াঃ ॥

আঢ়কীনঃ ( ত্রি ) আঢ়কিকঃ। ইত্যমরটীকা ॥

আঢ্যঃ ( ত্রি ) ধনবান্। ইত্যমরঃ ॥ যুক্তঃ।

বিশিষ্টঃ। অম্বিতঃ। যথা ধনাঢ্যঃ গুণাঢ্য ইত্যাদিঃ॥ [ মুকুটঃ॥

আণকঃ ( ত্রি ) অণকঃ। অধমঃ। ইতি রায়-

আণবীনং (ত্রি) অণব্যং। অণুধান্যোদ্ভবোচিত-ক্ষেত্রং। ইত্যমরটীকায়াং রায়মুকুটঃ॥

আণিঃ ( পুং স্ত্রী ) অক্ষাগ্রকীলকঃ। অশ্রিঃ। সীমা। ইতি মেদিনী॥

আতঙ্কঃ ( পুং ) রোগঃ। সন্তাপঃ। শঙ্কা। মুরজধ্বনিঃ। ইতি মেদিনীকরহেমচন্দ্রৌ॥ জ্বরঃ। ইতি রাজনির্ঘণ্টঃ॥

আতঞ্চনং (ক্লী) প্রতীবাপঃ। গলিতস্য স্বর্ণাদে-র্দ্রব্যান্তরেণাবচূর্ণনং। ইতি স্বামী॥ নিক্ষে-পণং। ইতি সুভূতিঃ॥ উপদ্রবঃ। ইতি রায়মুকুটঃ॥ দ্রবদ্রব্যপ্রক্ষেপণোচিতচূর্ণং। ইতি সারসুন্দরী॥ জবনং। বেগঃ। আপ্যা-য়নং। তর্পণং। ইত্যমরমেদিন্যৌ॥

আততায়ী [ন্] (ত্রি) বধোদ্যতঃ। ইত্যমরঃ॥ অগ্নিদো গরদশ্চৈব শস্ত্রপাণির্ধনাপহঃ। ক্ষেত্রদারাপহারী চ ষড়েতে আততায়িনঃ॥ আততায়িনমায়ান্তং হন্যাদেবাবিচারয়ন্। নাততায়িবধে দোষো হন্তুর্ভবতি কশ্চনঃ॥ ইতি ভগবদ্গীতাটীকায়াং শ্রীধরস্বামী॥

আতপঃ (পুং) রৌদ্রং। তৎপর্য্যায়ঃ। প্র-কাশঃ ২ দ্যোতঃ ৩। ইত্যমরঃ॥ দিন-জ্যোতিঃ ৪ সূর্য্যালোকঃ ৫ দিনপ্রভা ৬ রবিপ্রকাশঃ ৭ প্রদ্যোতঃ ৮ তমারিঃ ৯ তাপনঃ ১০ দ্যুতিঃ ১১। অস্য গুণাঃ। কটুত্বং। রূক্ষত্বং। স্বেদমূর্চ্ছাতৃষ্ণাদাহ-বৈবর্ণ্যজনকত্বং। নেত্ররোগপ্রকোপনত্বঞ্চ॥ ইতি রাজনির্ঘণ্টঃ॥

আতপত্রং ( ক্লী ) ছত্রং। ইত্যমরঃ॥

আতপত্রকং ( ক্লী ) ছত্রং। ইতি শব্দরত্না-বলী॥

আতপবারণং ( ক্লী ) ছত্রং। ইতি হেমচন্দ্রঃ॥

আতপাভাবঃ ( পুং ) ছায়া। ইতি রাজ-নির্ঘণ্টঃ॥

আতরঃ (পুং) নদ্যাদিতরণায় দেয়কপর্দকাদি। তৎপর্য্যায়ঃ। তরপণ্যং ২। ইত্যমরঃ পারাণিকড়ি নৌকাভাড়া ইতি ভাষা॥

আতর্পণং (ক্লী) প্রীণনং। তৃপ্তিঃ। মঙ্গলালে-পনং। আলিপনা ইতি ভাষা। ইতি মেদিনী॥

আতাপী [ন্] ( পুং ) আতায়ী। চিল্লঃ। ইত্যমরটীকায়াং স্বামী॥

আতায়ী [ন্] ( পুং ) চিল্লঃ। চিল ইতি ভাষা। ইত্যমরঃ॥

আতারঃ ( পুং ) আতরঃ। তরপণ্যং। ইতি শব্দরত্নাবলী॥

আতিঃ ( পুং ) পক্ষী। ইতি সিদ্ধান্তকৌমুদ্যা-মুণাদিবৃত্তিঃ॥

আতিথেয়ঃ ( ত্রি ) অতিথৌ সাধুঃ। অতিথি-সেবাকারকঃ। ইত্যমরঃ॥

আতিথ্যং ( ত্রি ) অতিথ্যর্থবস্তু। অতিথিভক্ষ-ণাদিদ্রব্যং। ইত্যমরঃ॥ অতিথিসেবা চ॥

আতিথ্যঃ ( পুং ) অতিথিঃ। ইতি মেদিনী॥

আতুঃ ( পুং ) ভেলকঃ। ভেলা মাড় ইত্যাদি ভাষা। ইতি শব্দমালা॥

আতুরঃ ( ত্রি ) রোগী। তৎপর্য্যায়ঃ। আম-য়াবী ২ বিকৃতঃ ৩ ব্যাধিতঃ ৪ অপটুঃ ৫ অভ্যমিতঃ ৬ অভ্যন্তঃ ৭। ইত্যমরঃ॥

আতৃপ্যং (ক্লী) ফলবিশেষঃ। আতা ইতি ভাষা। অস্য গুণাঃ। তৃপ্তিজনকত্বং। রক্তবর্দ্ধকত্বং। স্বাদুত্বং। শীতলত্বং। বলমাংসকারিত্বং। হৃদ্যত্বং। দাহরক্তপিত্তবায়ুনাশিত্বঞ্চ। ইতি দ্রব্যগুণঃ॥

আতোদ্যং (ক্লী) বাদ্যং। তচ্চতুর্ব্বিধং। বীণাদিবাদ্যং ততং ১ মুরজাদিবাদ্যং আনদ্ধং ২ বংশ্যাদিবাদ্যং শুষিরং ৩ কাংস্যতালাদিবাদ্যং ঘনং ৪। ইত্যমরঃ॥

আত্তগন্ধঃ (ত্রি) দূরীভূতাহঙ্কারঃ। তৎপর্য্যায়ঃ। অভিভূতঃ ২। ইতি হেমচন্দ্রঃ॥ গৃহীতগন্ধঃ॥

আত্তগর্ব্বঃ (ত্রি) অরিণা গৃহীতগর্ব্বঃ। দূরীভূতাহঙ্কারঃ। ভগ্নদর্পঃ। ইত্যমরঃ॥

আত্মগুপ্তা (স্ত্রী) লতাবিশেষঃ। আলকুশী ইতি ভাষা। তৎপর্য্যায়ঃ। মর্কটী ২ কণ্ডুরা ৩ অব্যণ্ডা ৪ কচ্ছুরা ৫ জটা ৬ জড়া ৭ শুকশিম্বা ৮ আমগুপ্তা ৯ ঋষভী ১০ কপিকচ্ছুরা ১১। ইতি রত্নমালা॥

আত্মগ্রাহী [ন্] (ত্রি) আত্মম্ভরিঃ। স্বার্থী॥

আত্মঘাতী [ন্] (ত্রি) আত্মহন্তা। ব্যাপাদয়েদ্বৃথাত্মানং স্বয়ং যোঽগ্ন্যুদকাদিভিঃ। বিহিতং তস্য নাশৌচং নাগ্নির্নাপ্যুদকাদিকং॥ ইতি কূর্ম্মপুরাণং॥ আত্মহননকর্ত্তা। অবৈধবুদ্ধিপূর্ব্বকাত্মহননস্য প্রায়শ্চিত্তং যথা। ইন্দ্রিয়ৈরপরিত্যক্তা যে চ মূঢ়া বিষাদিনঃ। ঘাতয়ন্তি স্বমাত্মানং চণ্ডালাদিহতাশ্চ যে॥ তেষাং পুত্রাশ্চ পৌত্রাশ্চ দয়য়া সমভিপ্লুতাঃ। যথা শ্রাদ্ধং প্রতন্বন্তি নামপ্রতিষ্ঠিতং॥ তথা তে সংপ্রবক্ষ্যামি নমস্কৃত্য স্বয়ম্ভুবে। ইতি হেমাদ্রৌ বৃদ্ধশাতাতপেনোক্তং॥ আত্মনো ঘাতশুদ্ধ্যর্থং চরেচ্চান্দ্রায়ণদ্বয়ং। তপ্তকৃচ্ছ্রচতুষ্কঞ্চ ত্রিংশৎ কৃচ্ছ্রাণি বা পুনঃ॥ অর্ব্বাক্ সংবৎসরাৎ কুর্য্যাদ্দহনাদি যথোদিতং॥ কৃত্বা নারায়ণবলিমনিত্যত্বাত্তদায়ুষঃ। ইদঞ্চাত্মবধনিমিত্তং তজ্জাতিবধপ্রায়শ্চিত্তেন সমুচ্চিতং কার্য্যং। ইতি নির্ণয়সিন্ধৌ ৫ পরিচ্ছেদঃ॥ অন্যৎ পতিতশব্দে দ্রষ্টব্যং॥ * ॥ আত্মত্যাগিষু বিশেষমাহ গৌতমঃ। প্রায়োঽনাশকশস্ত্রাগ্নিবিষোদকোদ্বন্ধনপ্রপতনৈশ্চেচ্ছতামিতি। প্রায়ো মহাপ্রস্থানং। অনাশকমনশনং। প্রপতনং শৈলশিখরাদবপাতনং। ইত্যাদিনিমিত্তৈঃ শাস্ত্রাবিহিতমার্গেণ ইচ্ছাপূর্ব্বকমৃতানামশৌচাদিকং ন কর্ত্তব্যমিত্যর্থঃ। অঙ্গিরাঃ। চাণ্ডালাদুদকাৎ সর্পাৎ ব্রাহ্মণাদ্বৈদ্যুতাদপি। দংষ্ট্রিভ্যশ্চ পশুভ্যশ্চ মরণং পাপকর্ম্মিণাং॥ উদকং পিণ্ডদানঞ্চ প্রেতেভ্যো যৎ প্রদীয়তে। নোপতিষ্ঠতি তৎসর্ব্বং অন্তরীক্ষে বিনশ্যতি॥ মনুঃ। বৃথাসঙ্করজাতানাং প্রব্রজ্যাসু চ তিষ্ঠতাং। আত্মনস্ত্যাগিনাং চৈব বিবর্ত্তেতোদকক্রিয়া॥ বৃথাসঙ্করজাতানামিতি বৃথাজাতাঃ পঞ্চমহাযজ্ঞাদিরহিতাঃ। সঙ্করজাতাঃ প্রতিলোমজাঃ॥ * ॥ প্রমাদাৎ পূর্ব্বোক্তনিমিত্তৈর্ম্মরণে বিদ্যত এবাশৌচাদিকং। অত এবাঙ্গিরাঃ। অথ কশ্চিৎ প্রমাদেন ম্রিয়েতাগ্ন্যুদকাদিভিঃ। তস্যাশৌচং বিধাতব্যং কর্ত্তব্যা চোদকক্রিয়া॥ চাণ্ডালাদিমৃতা-

হিতাগ্নেরগ্ন্যাদীনাং প্রতিপত্তিকর্ম্ম চ স্মৃত্যন্তরেঽভিহিতং। বৈতানং প্রক্ষিপেদপ্সু আবসথ্যং চতুষ্পথে। পাত্রাণি তু দহেদগ্নৌ যজমানে বৃথামৃতে॥ বৃথামৃতঃ অবিহিতমার্গেণ মৃতঃ। তথা। আত্মনস্ত্যাগিনাং নাস্তি পতিতানাং তথা ক্রিয়া। তেষামপি চ গঙ্গায়াস্তীরে সংস্থাপনং মতং॥ গঙ্গেতি পুণ্যনদ্যুপলক্ষণং ॥ * ॥ এবং পূর্ব্বোক্তনিন্দিতমরণে মৃতানাং স্নেহাদিনাগ্ন্যাদ্যৌর্দ্ধদেহিককরণে স্মৃত্যন্তরে প্রায়শ্চিত্তমাম্নাতং। স্পৃষ্ট্বাগ্নিমুদকং স্নানং স্পর্শনং হবনং তথা। রজ্জুচ্ছেদাশ্রুপাতঞ্চ তপ্তকৃচ্ছ্রেণ শুদ্ধ্যতি ইতি। এতচ্চ বুদ্ধিপূর্ব্বে প্রত্যেকমগ্ন্যাদিকরণে। অবুদ্ধিপূর্ব্বকে তু সম্বর্ত্তঃ। এষামন্যতমং প্রেতং যো বহেত দহেত বা। কটোদকক্রিয়াং কৃত্বা কৃচ্ছ্রং সান্তপনং চরেৎ॥ যচ্চ সুমন্ত্বাদির্মাসং ভৈক্ষাহারস্ত্রিসবনঞ্চ। তথা একরাত্রাভোজনাদিকং চাভিহিতং তদশক্তবিষয়ে দেশকালাদ্যপেক্ষানুসারেণ যোজনীয়ং ॥ * ॥ যস্তু বৃদ্ধাদির্লুপ্তভিষক্‌ক্রিয়স্তস্যাত্মহননমপ্যনুজ্ঞাতমাদিপুরাণে। বৃদ্ধঃ শৌচস্মৃতের্লুপ্তঃ প্রত্যাখ্যাতভিষক্‌ক্রিয়ঃ। আত্মানং ঘাতয়েদ্যস্তু ভৃগ্বগ্ন্যনশনাম্বুভিঃ॥ তস্য ত্রিরাত্রমাশৌচং দ্বিতীয়ে ত্বস্থিসঞ্চয়ঃ। তৃতীয়ে তূদকং কৃত্বা চতুর্থে শ্রাদ্ধমারভেৎ॥ তথা। গচ্ছেৎ মহাপথং বাপি তুষারগিরিমাদরাৎ। প্রয়াগে বটশাখায়াং দেহত্যাগং করোতি যঃ॥ স্বয়ং দেহবিনাশস্য কালে প্রাপ্তে মহামতিঃ। উত্তমান্ প্রাপ্নুয়াল্লোকান্নাত্মঘাতী ভবেৎ ক্বচিৎ॥ এতেষামধিকারস্তু সর্ব্বেষাং সর্ব্বজন্তুষু। নরাণামথ নারীণাং সর্ব্ববর্ণেষু সর্ব্বদা॥ অশৌচং স্যাৎ ত্র্যহং তেষাং বজ্রানলহতেষু চ। বারাণস্যাং ম্রিয়েদ্‌যস্তু প্রত্যাখ্যাতভিষক্‌ক্রিয়ঃ॥ প্রণবং তারকং ক্রতে নান্যথা কস্যচিৎ ক্বচিৎ। বিবস্বান্। সর্ব্বেন্দ্রিয়বিমুক্তস্য স্বব্যাপারাক্ষমস্য চ। প্রায়শ্চিত্তমনুজ্ঞাতমগ্নিপাতো মহাপথঃ॥ ধর্ম্মার্জ্জনাসমর্থস্য দ্বাদশবার্ষিকাদিরূপপ্রায়শ্চিত্তাসমর্থস্য। এবং শাস্ত্রাবিহিতমার্গেণ মৃতানাং চাণ্ডালাদিমৃতানাং সম্বৎসরাদূর্দ্ধমৌর্দ্ধদেহিকং কার্য্যং। ষট্‌ত্রিংশন্মতে। গোব্রাহ্মণহতানাঞ্চ পতিতানাং তথৈব চ। ঊর্দ্ধং সম্বৎসরাৎ কুর্য্যাৎ সর্ব্বমেবৌর্দ্ধদেহিকং॥ * ॥ অত্রাপরং বিশেষমাহ পরাশরঃ। চাণ্ডালেন শ্বপাকেন গোভির্ব্বিপ্রৈর্হতো যদি। আহিতাগ্নির্ম্মৃতো বিপ্রো বিশেষেণাত্মঘাতকঃ॥ দহেত ব্রাহ্মণং বিপ্রো লোকাগ্নৌ মন্ত্রবর্জ্জিতং। দগ্ধাস্থীনি পুনর্গৃহ্য ক্ষীরেণ ক্ষালয়েত্ততঃ॥ স্বেনাগ্নিনা স্বমন্ত্রেণ পৃথগেতৎ পুনর্দ্দহেৎ॥ * ॥ সম্বৎসরাদর্ব্বাগপি তত্তৎপাপানুসারেণ দ্বিগুণাদিপ্রায়শ্চিত্তং বিধায় নারায়ণবলিঞ্চ কৃত্বা ঔর্দ্ধদেহিকং কার্য্যং। আয়ুষোঽনিত্যত্বেন সম্বৎসরানন্তরমৌর্দ্ধদেহিকাদিলোপপ্রসঙ্গাৎ। তচ্চ নারায়ণবলিং কৃত্বা। তথাচ বৃদ্ধযাজ্ঞবল্ক্যঃ। নারায়ণবলিঃ কার্য্যো লোকগর্হাভয়ান্নরৈঃ। তথা তেষাং ভবেৎ শৌচং নান্যথেত্যব্রবীদ্যমঃ॥ নারায়ণবলৌ

কৃতে ঔর্দ্ধদেহিককরণে ভবতীত্যর্থঃ ॥ * ॥ সর্পহতে তু বিশেষঃ। সম্বৎসরং যাবৎ পঞ্চম্যাং নাগপূজাং বিধায় তদনন্তরং নারায়ণবলিং কৃত্বা সৌবর্ণনাগং প্রত্যক্ষাং গাঞ্চ ব্যাসোদ্দেশেন ব্রাহ্মণায় দত্ত্বা ঔর্দ্ধদেহিকং কুর্য্যাৎ॥ *॥ নারায়ণবলিস্বরূপঞ্চ বিষ্ণুনাভিহিতং। একাদশীং সমাসাদ্য শুক্লপক্ষস্য বৈ তিথিং। বিষ্ণুং সমর্চ্চয়েদ্দেবং যমং বৈবস্বতং তথা॥ দশপিণ্ডান্ ঘৃতাভ্যক্তান্ দর্ব্ভেষু মধুসংযুতান্। তিলমিশ্রান্ প্রদদ্যাদ্বৈ সংযতো দক্ষিণামুখঃ॥ বিষ্ণুং বুদ্ধৌ সমাসাদ্য নদ্যম্ভসি ততঃ ক্ষিপেৎ। নামগোত্রগ্রহং কৃত্বা পুষ্পৈরভ্যর্চ্চনং ততঃ॥ ধূপদীপপ্রদানঞ্চ ভক্ষ্যভোজ্যং তথাপরং। বিদ্যাতপঃসমৃদ্ধান্ বৈ কুলোৎপন্নান্ সমাহিতান্॥ নিমন্ত্রয়েত বিপ্রান্ বৈ পঞ্চ সপ্ত নবাপি বা। অপরেঽহনি সম্প্রাপ্তে মধ্যাহ্নে সমুপোষিতঃ॥ বিষ্ণোরভ্যর্চ্চনং কৃত্বা বিপ্রাংস্তানুপবেশয়েৎ। উদঙ্মুখান্ যথাজ্যেষ্ঠং পিতৃরূপমনুস্মরন্॥ মনো নিবেশ্য বিষ্ণৌ বৈ সর্ব্বং কুর্য্যাদতন্দ্রিতঃ। আবাহনাদি যৎ প্রোক্তং দৈবপূর্ব্বং তদাচরেৎ॥ তৃপ্তান্ জ্ঞাত্বা ততো বিপ্রস্তৃপ্তিং পৃষ্ট্বা যথাবিধি। হবিষ্যব্যঞ্জনেনৈব তিলাদিসহিতেন চ॥ পঞ্চপিণ্ডান্ প্রদদ্যাচ্চ দৈবরূপমনুস্মরন্। প্রথমং বিষ্ণবে দদ্যাৎ ব্রহ্মণে চ শিবায় চ॥ যমায় সানুসারায় চতুর্থং পিণ্ডমুৎসৃজেৎ। মৃতং সংকীর্ত্য মনসা গোত্রপূর্ব্বমতঃপরং॥ বিষ্ণোর্নাম গৃহীত্বৈবং পঞ্চমং পূর্ব্ববৎ ক্ষিপেৎ। বিপ্রানাচম্য বিধিবৎ দক্ষিণাভিঃ সমর্চ্চয়েৎ॥ একং বৃদ্ধতমং বিপ্রং হিরণ্যেন সমর্চ্চয়েৎ। গবা বস্ত্রেণ ভূম্যা চ প্রেতং তং মনসা স্মরেৎ॥ ততস্তিলাম্ভো বিপ্রাস্তু হস্তের্দর্ব্ভসমন্বিতৈঃ। ক্ষিপেয়ুর্গোত্রপূর্ব্বস্তু নাম বুদ্ধৌ নিবেশ্য চ॥ হবির্গন্ধতিলাম্ভস্তু তস্মৈ দদ্যুঃ সমাহিতাঃ। মিত্রভৃত্যজনৈঃ সার্দ্ধং পশ্চাদ্ভুঞ্জীত বাগ্‌যতঃ॥ ভবিষ্যপুরাণে। সুবর্ণতারনিষ্পন্নং নাগং কৃত্বা তথৈব গাং। ব্যাসায় দত্ত্বা বিধিবৎ পিতুরানৃণ্যমাপ্তবান্॥ ইতি মদনপারিজাতে ৫ স্তবকঃ॥

আত্মঘোষঃ (পুং) কাকঃ। ইত্যমরঃ॥ কুক্কুটঃ। ইতি শব্দচন্দ্রিকা॥

আত্মজঃ (পুং) পুত্রঃ। ইত্যমরঃ॥

আত্মজন্মা [ন্] (পুং) পুত্রঃ। ইতি শব্দরত্নাবলী॥

আত্মজা (স্ত্রী) কন্যা। ইত্যমরঃ॥ বুদ্ধিঃ। ইতি শব্দরত্নাবলী॥

আত্মতত্ত্বং (ক্লী) তত্ত্বস্তাসকং নিত্যশুদ্ধবুদ্ধমুক্তসত্যস্বভাবং প্রত্যক্‌চৈতন্যমেবাত্মতত্ত্বং। পুত্রাদিভাসকং নিত্যশুদ্ধত্বাদিস্বরূপমেবাত্মবস্ত্বিতি যাবৎ। এতদ্বিবরণং যথা। ইদানীং প্রত্যগাত্মনি ইদমিদময়ময়মারোপয়তীতি বিশেষ উচ্যতে। তথাচ। অতিপ্রাকৃতস্তু আত্মা বৈ জায়তে পুত্র ইত্যাদি শ্রুতেঃ স্বস্মিন্নিব স্বপুত্রেঽপি প্রেমদর্শনাৎ পুত্রে পুষ্টে নষ্টেঽহমেব পুষ্টো নষ্টশ্চেত্যাদ্যনুভবাচ্চ পুত্র আত্মেতি বদতি॥১॥ চার্ব্বাকস্তু স বা এষ পুরুষো-

হুন্নরসময় ইত্যাদি শ্রুতেঃ প্রদীপ্তগৃহাৎ। স্বপুত্রং পরিত্যজ্যাপি স্বস্য নির্গমদর্শনাৎ স্থূলোঽহং কৃশোঽহং ইত্যাদ্যনুভবাচ্চ স্থূলশরীরমাত্মেতি বদতি ॥ ২ ॥ অপরশ্চার্ব্বাকঃ তেঽপ্রাণাঃ প্রজাপতিং সমেত্য ব্রূয়ুরিত্যাদিশ্রুতেঃ ইন্দ্রিয়াণামভাবে শরীরচলনাভাবাৎ কাণোঽহং বধিরোঽহং ইত্যাদ্যনুভবাচ্চ ইন্দ্রিয়াণ্যাত্মেতি বদতি ॥ ৩ ॥ অন্যস্তু চার্ব্বাকঃ অন্যোঽন্তর আত্মা প্রাণময় ইত্যাদিশ্রুতেঃ প্রাণাভাবে ইন্দ্রিয়চলনাযোগাৎ অহমশনায়াবানহং পিপাসাবান্ ইত্যাদ্যনুভবাচ্চ প্রাণ আত্মেতি বদতি ॥ ৪ ॥ ইতরস্তু চার্ব্বাকঃ অন্যোঽন্তর আত্মা মনোময় ইত্যাদিশ্রুতেঃ মনসি সুপ্তে প্রাণাদেরভাবাৎ অহং সঙ্কল্পবানহং বিকল্পবানিত্যাদ্যনুভবাচ্চ মন আত্মেতি বদতি॥৫॥ বৌদ্ধস্তু অন্যোঽন্তর আত্মা বিজ্ঞানময় ইত্যাদিশ্রুতেঃ কর্ত্তুরভাবে করণস্য শক্ত্যভাবাৎ অহং কর্ত্তাহং ভোক্তা ইত্যাদ্যনুভবাচ্চ বুদ্ধিরাত্মেতি বদতি ॥৬॥ প্রাভাকরতার্কিকৌ তু অন্যোঽন্তর আত্মা আনন্দময় ইত্যাদিশ্রুতেঃ সুষুপ্তৌ বুদ্ধ্যাদীনামজ্ঞানে লয়দর্শনাৎ অহমজ্ঞোঽহং জ্ঞানীত্যাদ্যনুভবাচ্চ অজ্ঞানমাত্মেতি বদতঃ ॥৭॥ ভট্টস্তু প্রজ্ঞানঘন এবানন্দময় আত্মেত্যাদিশ্রুতেঃ সুষুপ্তৌ প্রকাশাপ্রকাশসদ্ভাবাৎ মামহং ন জানামি ইত্যাদ্যনুভবাচ্চ অজ্ঞানোপহিতং চৈতন্যমাত্মেতি বদতি ॥ ৮ ॥ অপরবৌদ্ধঃ অসদেবেদমগ্র আসীদিত্যাদিশ্রুতেঃ সুষুপ্তৌ সর্ব্বাভাবাদহং সুপ্তঃ সুষুপ্তৌ নাসমিত্যুত্থিতস্য স্বাভাবপরামর্শবিষয়ানুভবাচ্চ শূন্যমাত্মেতি বদতি ॥ ৯ ॥ এতেষাং পুত্রাদীনাং শূন্যপর্য্যন্তানামনাত্মত্বমুচ্যতে। এতৈরতিপ্রাকৃতাদিবাদিভিরুক্তেষু শ্রুতিযুক্ত্যনুভবাভাসেষু পূর্ব্বপূর্ব্বোক্ত শ্রুতিযুক্ত্যনুভবাভাসানামুত্তরোত্তরশ্রুতিযুক্ত্যনুভবাভাসৈরাত্মবাধদর্শনাৎ পুত্রাদীনামনাত্মত্বং স্পষ্টমেবেতি ॥ * ॥ কিঞ্চ প্রত্যগস্থূলোঽচক্ষুরপ্রাণোঽমনা অকর্ত্তা চৈতন্যং চিন্মাত্রং সদিত্যাদিপ্রবলশ্রুতিবিরোধাৎ অস্য পুত্রাদিশূন্যপর্য্যন্তস্য জড়স্য চৈতন্যভাস্যত্বেন ঘটাদিবদনিত্যত্বাৎ অহং ব্রহ্মেতি বিদ্বদনুভবপ্রাবল্যাচ্চ তত্তচ্ছ্রুতিযুক্ত্যনুভবাভাসানাং বাধিতত্বাদপি পুত্রাদিশূন্যপর্য্যন্তমখিলমনাত্মৈব। অতস্তত্তদ্ভাসকং নিত্যশুদ্ধবুদ্ধমুক্তসত্যস্বভাবং প্রত্যক্চৈতন্যমেবাত্মতত্ত্বমিতি বেদান্তবিদনুভবঃ। ইতি বেদান্তসারঃ ॥

আত্মদর্শঃ (পুং) দর্পণং। ইতি হেমচন্দ্রঃ ॥

আত্মনীনং (ত্রি) আত্মনে হিতং। ইতি ব্যাকরণং ॥ পথ্যং। ইতি রাজনির্ঘণ্টঃ ॥

আত্মনীনঃ (পুং) সুতঃ। শ্যালঃ। প্রাণাধারঃ। বিদূষকঃ। ইত্যজয়ঃ ॥

আত্মবন্ধুঃ (পুং) পিতৃষ্বসৃপুত্রঃ। মাতুলপুত্রঃ। মাতৃষ্বসৃপুত্রঃ। ইতি স্মৃতিঃ ॥

আত্মবীরঃ (পুং) প্রাণবান্। শ্যালকঃ। বিদূষকঃ। ইতি মেদিনী ॥

আত্মভূঃ (পুং) ব্রহ্মা। কামদেবঃ। ইত্যমরঃ ॥ বিষ্ণুঃ। শিবঃ। ইতি শব্দরত্নাবলী ॥

আত্মমূলী (স্ত্রী) দুরালভাবৃক্ষঃ। ইতি শব্দমালা॥

কৃতে ঔর্দ্ধদেহিককরণে ভবতীত্যর্থঃ ॥ * ॥ সর্পহতে তু বিশেষঃ। সম্বৎসরং যাবৎ পঞ্চম্যাং নাগপূজাং বিধায় তদনন্তরং নারায়ণবলিং কৃত্বা সৌবর্ণনাগং প্রত্যক্ষাং গাঞ্চ ব্যাসোদ্দেশেন ব্রাহ্মণায় দত্ত্বা ঔর্দ্ধদেহিকং কুর্য্যাৎ ॥ * ॥ নারায়ণবলিস্বরূপঞ্চ বিষ্ণুনাভিহিতং। একাদশীং সমাসাদ্য শুক্লপক্ষস্য বৈ তিথিং। বিষ্ণুং সমর্চ্চয়েদ্দেবং যমং বৈবস্বতং তথা ॥ দশপিণ্ডান্ ঘৃতাভ্যক্তান্ দর্ব্ভেষু মধুসংযুতান্। তিলমিশ্রান্ প্রদদ্যাদ্বৈ সংযতো দক্ষিণামুখঃ ॥ বিষ্ণুং বুদ্ধৌ সমাসাদ্য নদ্যম্ভসি ততঃ ক্ষিপেৎ। নামগোত্রগ্রহং কৃত্বা পুষ্পৈরভ্যর্চ্চনং ততঃ ॥ ধূপদীপপ্রদানঞ্চ ভক্ষ্যভোজ্যং তথাপরং। বিদ্যাতপঃসমৃদ্ধান্ বৈ কুলোৎপন্নান্ সমাহিতান্ ॥ নিমন্ত্রয়েত বিপ্রান্ বৈ পঞ্চ সপ্ত নবাপি বা। অপরেঽহনি সম্প্রাপ্তে মধ্যাহ্নে সমুপোষিতঃ ॥ বিষ্ণোরভ্যর্চ্চনং কৃত্বা বিপ্রাংস্তানুপবেশয়েৎ। উদঙ্মুখান্ যথাজ্যেষ্ঠং পিতৃরূপমনুস্মরন্ ॥ মনো নিবেশ্য বিষ্ণৌ বৈ সর্ব্বং কুর্য্যাদতন্দ্রিতঃ। আবাহনাদি যৎ প্রোক্তং দৈবপূর্ব্বং তদাচরেৎ ॥ তৃপ্তান্ জ্ঞাত্বা ততো বিপ্রস্তৃপ্তিং পৃষ্ট্বা যথাবিধি। হবিষ্যব্যঞ্জনেনৈব তিলাদিসহিতেন চ ॥ পঞ্চপিণ্ডান্ প্রদদ্যাচ্চ দৈবরূপমনুস্মরন্। প্রথমং বিষ্ণবে দদ্যাৎ ব্রহ্মণে চ শিবায় চ ॥ যমায় সানুসারায় চতুর্থং পিণ্ডমুৎসৃজেৎ। মৃতং সংকীর্ত্ত্য মনসা গোত্রপূর্ব্বমতঃপরং ॥ বিষ্ণোর্নাম গৃহীত্বৈবং পঞ্চমং পূর্ব্ববৎ ক্ষিপেৎ। বিপ্রানাচম্য বিধিবৎ দক্ষিণাভিঃ সমর্চ্চয়েৎ ॥ একং বৃদ্ধতমং বিপ্রং হিরণ্যেন সমর্চ্চয়েৎ। গবা বস্ত্রেণ ভূম্যা চ প্রেতং তং মনসা স্মরেৎ ॥ ততস্তিলাম্ভো বিপ্রাস্তু হস্তের্দর্ভসমন্বিতৈঃ। ক্ষিপেয়ুর্গোত্রপূর্ব্বস্তু নাম বুদ্ধৌ নিবেশ্য চ ॥ হবির্গন্ধতিলাম্ভস্তু তস্মৈ দদ্যুঃ সমাহিতাঃ। মিত্রভৃত্যজনৈঃ সার্দ্ধং পশ্চাদ্ভুঞ্জীত বাগ্‌যতঃ ॥ ভবিষ্যপুরাণে। সুবর্ণতারনিষ্পন্নং নাগং কৃত্বা তথৈব গাং। ব্যাসায় দত্ত্বা বিধিবৎ পিতুরানৃণ্যমাপ্তবান্ ॥ ইতি মদনপারিজাতে ৫ স্তবকঃ ॥

আত্মঘোষঃ (পুং) কাকঃ। ইত্যমরঃ। কুক্কুটঃ। ইতি শব্দচন্দ্রিকা ॥

আত্মজঃ (পুং) পুত্রঃ। ইত্যমরঃ ॥

আত্মজন্মা [ন্] (পুং) পুত্রঃ। ইতি শব্দরত্নাবলী ॥

আত্মজা (স্ত্রী) কন্যা। ইত্যমরঃ ॥ বুদ্ধিঃ। ইতি শব্দরত্নাবলী ॥

আত্মতত্ত্বং (ক্লী) তত্ত্বভাসকং নিত্যশুদ্ধবুদ্ধমুক্তসত্যস্বভাবং প্রত্যক্‌চৈতন্যমেবাত্মতত্ত্বং। পুত্রাদিভাসকং নিত্যশুদ্ধত্বাদিস্বরূপমেবাত্মবস্তিতি যাবৎ। এতদ্বিবরণং যথা। ইদানীং প্রত্যগাত্মনি ইদমিদময়ময়মারোপয়তীতি বিশেষ উচ্যতে। তথাচ। অতিপ্রাকৃতস্তু আত্মা বৈ জায়তে পুত্র ইত্যাদি শ্রুতেঃ স্বস্মিন্নিব স্বপুত্রেঽপি প্রেমদর্শনাৎ পুত্রে পুষ্টে নষ্টেঽহমেব পুষ্টো নষ্টশ্চেত্যাদ্যনুভবাচ্চ পুত্র আত্মেতি বদতি ॥ ১ ॥ চার্ব্বাকস্তু স বা এষ পুরুষো-

হন্নরসময় ইত্যাদি শ্রুতেঃ প্রদীপ্তগৃহাৎ স্বপুত্রং পরিত্যজ্যাপি স্বস্য নির্গমদর্শনাৎ স্থূলোঽহং কৃশোঽহং ইত্যাদ্যনুভবাচ্চ স্থূলশরীরমাত্মেতি বদতি ॥ ২ ॥ অপরশ্চার্ব্বাকঃ তেঽপ্রাণাঃ প্রজাপতিং সমেত্য ব্রূয়ুরিত্যাদিশ্রুতেঃ ইন্দ্রিয়াণামভাবে শরীরচলনাভাবাৎ কাণোঽহং বধিরোঽহং ইত্যাদ্যনুভবাচ্চ ইন্দ্রিয়াণ্যাত্মেতি বদতি ॥ ৩ ॥ অন্যস্তু চার্ব্বাকঃ অন্যোঽন্তর আত্মা প্রাণময় ইত্যাদিশ্রুতেঃ প্রাণাভাবে ইন্দ্রিয়চলনাযোগাৎ অহমশনায়াবানহং পিপাসাবান্ ইত্যাদ্যনুভবাচ্চ প্রাণ আত্মেতি বদতি ॥ ৪ ॥ ইতরস্তু চার্ব্বাকঃ অন্যোঽন্তর আত্মা মনোময় ইত্যাদিশ্রুতেঃ মনসি সুপ্তে প্রাণাদেরভাবাৎ অহং সঙ্কল্পবানহং বিকল্পবানিত্যাদ্যনুভবাচ্চ মন আত্মেতি বদতি ॥ ৫ ॥ বৌদ্ধস্তু অন্যোঽন্তর আত্মা বিজ্ঞানময় ইত্যাদিশ্রুতেঃ কর্ত্তুরভাবে করণস্য শক্ত্যভাবাৎ অহং কর্ত্তাহং ভোক্তা ইত্যাদ্যনুভবাচ্চ বুদ্ধিরাত্মেতি বদতি ॥ ৬ ॥ প্রাভাকরতার্কিকৌ তু অন্যোঽন্তর আত্মা আনন্দময় ইত্যাদিশ্রুতেঃ সুষুপ্তৌ বুদ্ধ্যাদীনামজ্ঞানে লয়দর্শনাৎ অহমজ্ঞোঽহং জ্ঞানীত্যাদ্যনুভবাচ্চ অজ্ঞানমাত্মেতি বদতঃ ॥ ৭ ॥ ভট্টস্তু প্রজ্ঞানঘন এবানন্দময় আত্মেত্যাদিশ্রুতেঃ সুষুপ্তৌ প্রকাশাপ্রকাশসদ্ভাবাৎ মামহং ন জানামি ইত্যাদ্যনুভবাচ্চ অজ্ঞানোপহিতং চৈতন্যমাত্মেতি বদতি ॥ ৮ ॥ অপরবৌদ্ধঃ অসদেবেদমগ্র আসীদিত্যাদিশ্রুতেঃ সুষুপ্তৌ সর্ব্বাভাবাদহং সুপ্তঃ সুষুপ্তৌ নাসমিত্যুত্থিতস্য স্বাভাবপরামর্শবিষয়ানুভবাচ্চ শূন্যমাত্মেতি বদতি ॥ ৯ ॥ এতেষাং পুত্রাদীনাং শূন্যপর্য্যন্তানামনাত্মত্বমুচ্যতে। এতৈরতিপ্রাকৃতাদিবাদিভিরুক্তেষু শ্রুতিযুক্ত্যনুভবাভাসেষু পূর্ব্বপূর্ব্বোক্তশ্রুতিযুক্ত্যনুভবাভাসানামুত্তরোত্তরশ্রুতিযুক্ত্যনুভবাভাসৈরাত্মবাধদর্শনাৎ পুত্রাদীনামনাত্মত্বং স্পষ্টমেবেতি ॥ * ॥ কিঞ্চ প্রত্যগস্থূলোঽচক্ষুরপ্রাণোঽমনা অকর্ত্তা চৈতন্যং চিন্মাত্রং সদিত্যাদিপ্রবলশ্রুতিবিরোধাৎ অস্য পুত্রাদিশূন্যপর্য্যন্তস্য জড়স্য চৈতন্যভাস্যত্বেন ঘটাদিবদনিত্যত্বাৎ অহং ব্রহ্মেতি বিদ্বদনুভবপ্রাবল্যাচ্চ তত্তচ্ছ্রুতিযুক্ত্যনুভবাভাসানাং বাধিতত্বাদপি পুত্রাদিশূন্যপর্য্যন্তমখিলমনাত্মৈব। অতস্তত্তদ্ভাসকং নিত্যশুদ্ধবুদ্ধমুক্তসত্যস্বভাবং প্রত্যক্চৈতন্যমেবাত্মতত্ত্বমিতি বেদান্তবিদনুভবঃ। ইতি বেদান্তসারঃ ॥

আত্মদর্শঃ (পুং) দর্পণং। ইতি হেমচন্দ্রঃ ॥

আত্মনীনং (ত্রি) আত্মনে হিতং। ইতি ব্যাকবিদূষকঃ। ইত্যজয়ঃ ॥

আত্মনীনঃ (পুং) সুতঃ। শ্যালঃ। প্রাণধারঃ। রণং ॥ পথ্যং। ইতি রাজনির্ঘণ্টঃ ॥

আত্মবন্ধুঃ (পুং) পিতৃস্বস্পুত্রঃ। মাতুলপুত্রঃ। মাতৃস্বস্পুত্রঃ। ইতি স্মৃতিঃ ॥

আত্মবীরঃ (পুং) প্রাণবান্। শ্যালকঃ। বিদূষকঃ। ইতি মেদিনী ॥

আত্মভূঃ (পুং) ব্রহ্মা। কামদেবঃ। ইত্যমরঃ ॥ বিষ্ণুঃ। শিবঃ। ইতি শব্দরত্নাবলী ॥

আত্মমূলী (স্ত্রী) দুরালভাবৃক্ষঃ। ইতি শব্দমালা ॥

আত্মম্ভরিঃ (ত্রি) আত্মোদরমাত্রভরণকর্ত্তা। তৎপর্য্যায়ঃ। কুক্ষিম্ভরিঃ ২ স্বোদরপূরকঃ ৩। ইত্যমরঃ॥

আত্মযোনিঃ (পুং) ব্রহ্মা। বিষ্ণুঃ। শিবঃ। কামদেবঃ। ইতি মেদিনীশব্দরত্নাবল্যৌ॥

আত্মরক্ষা (স্ত্রী) মহেন্দ্রবারুণীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

আত্মশল্যা (স্ত্রী) শতাবরী। ইতি রাজনির্ঘণ্টঃ॥

আত্মশ্লাঘা (স্ত্রী) আত্মগর্ব্বঃ। স্বীয়প্রশংসা॥

আত্মহত্যা (স্ত্রী) আত্মঘাতঃ। স্ববধঃ॥

আত্মহা [ন্] (পুং) দেবলঃ। ইতি শব্দরত্নাবলী॥ আত্মঘাতী। নৃদেহমাদ্যং সুলভং সুদুর্লভং প্লবং সুকল্পং গুরুকর্ণধারং। ময়ানুকূলেন নভস্বতেরিতং পুমান্ ভবাব্ধিং নতরেৎ স আত্মহা॥ ইতি শ্রীভাগবতং॥

আত্মা [ন্] (পুং) যত্নঃ। ধৃতিঃ। বুদ্ধিঃ। স্বভাবঃ। ব্রহ্ম। দেহঃ। ইত্যমরঃ॥ মনঃ। ইতি মেদিনী॥ পরব্যাবর্ত্তনং। ইতি ধরণী॥ পুত্রঃ। ইতি শব্দরত্নাবলী॥ জীবঃ। অর্কঃ। হুতাশনঃ। বায়ুঃ। ইতি হেমচন্দ্রঃ॥

আত্মাধীনঃ (পুং) পুত্রঃ। প্রাণাধারঃ। শ্যালকঃ। বিদূষকঃ। ইতি হেমচন্দ্রঃ॥

আত্মাশী [ন্] (পুং) মৎস্যঃ। ইতি ত্রিকাণ্ডশেষঃ॥

আত্মাশ্রয়ঃ (পুং) তর্কবিশেষঃ। তস্য লক্ষণং। স্বাপেক্ষাপাদকপ্রসঙ্গত্বং। অপেক্ষা চ জ্ঞাপ্তৌ উৎপত্তৌ স্থিতৌ চ গ্রাহ্যা। তত্রাদ্যা যথা। এতদ্ঘটজ্ঞানং যদ্যেতদ্ঘটজ্ঞানজন্যং স্যাৎ এতদ্ঘটজ্ঞানভিন্নং স্যাৎ। দ্বিতীয়াতু ঘটোঽয়ং যদ্যেতদ্ঘটজনকঃ স্যাৎ ত্রতদ্ঘটভিন্নঃ স্যাৎ। তৃতীয়াচ অয়ং ঘটো যদ্যেতদ্ঘটবৃত্তিঃ স্যাৎ তথাত্বেনোপলভ্যেত ইতি॥

আত্মীয়ঃ (ত্রি) স্বকীয়ঃ

ঃ২

আত্মোদ্ভবা (স্ত্রী) মাষপর্ণী। ইতি রাজনির্ঘণ্টঃ॥ কন্যা। পুত্রে পুং॥

আত্রেয়ঃ (পুং) অত্রিমুনিপুত্রঃ। স চ দত্তঃ। দুর্ব্বাসাঃ। চন্দ্রশ্চ। ইতি মেদিনী॥ শরীরস্থরসধাতুঃ। ইতি হেমচন্দ্রঃ॥

আত্রেয়িকা (স্ত্রী) ঋতুমতী। ইতি হলায়ুধঃ॥

আত্রেয়ী (স্ত্রী) পুষ্পবতী স্ত্রী। নদীবিশেষঃ। ইতি মেদিনী॥

আথর্ব্বণং (ক্লী) অথর্ব্বণাং সমূহঃ। অথর্ব্বনাম্না মুনিনা প্রোক্তো বেদঃ অথর্ব্বা তেষাং সঙ্ঘঃ। ইত্যমরঃ॥ শান্তিগৃহং। ইতি হেমচন্দ্রঃ॥

আথর্ব্বণঃ (পুং) পুরোহিতঃ। অথর্ব্ববেদজ্ঞব্রাহ্মণঃ। ইতি হেমচন্দ্রঃ॥

আদরঃ (পুং) আরম্ভঃ। ইতি ত্রিকাণ্ডশেষঃ॥ সমাদরঃ। সম্মানঃ॥

আদর্য্যঃ (ত্রি) আদরণীয়ঃ। আদর্ত্তব্যঃ। আদরোপযুক্তঃ॥

আদর্শঃ (পুং) দর্পণং। টীকা। প্রতিপুস্তকং। ইতি মেদিনী॥

আদানং (ক্লী) গ্রহণং। অশ্বাভরণং। ইতি মেদিনীহেমচন্দ্রৌ॥ রোগলক্ষণং। ইতি রাজনির্ঘণ্টঃ

আদানী (স্ত্রী) হস্তিঘোষাবৃক্ষঃ। ইতি রত্নমালা ॥

আদিঃ (পুং) পূর্ব্বঃ। প্রথমঃ। ইত্যমরঃ ॥ পদান্তে গণসূচকঃ। যথা ইত্যাদিঃ ॥

আদিকবিঃ (পুং) ব্রহ্মা। ইতি শ্রীভাগবতং ॥ বাল্মীকিমুনিঃ। ইতি হেমচন্দ্রঃ ॥

আদিকারণং (ক্লী) পূর্ব্বনিমিত্তং। মূলহেতুঃ। তৎপর্য্যায়ঃ। নিদানং ২। ইত্যমরঃ ॥

আদিগদাধরঃ (পুং) গয়াস্থদেবতাবিশেষঃ। যথা। গয়াশিরশ্ছাদয়িত্বা গুরুত্বাদাস্থিতা শিলা। কালান্তরেণ ব্যক্তশ্চ স্থিত আদিগদাধরঃ ॥ তথা ব্যক্তোঽব্যক্তরূপী আসীদাদৌ গদাধরঃ। আদিরাদৌ পূজিতোঽত্র দেবৈর্ব্রহ্মাদিভির্যতঃ ॥ পাদ্যাদ্যগন্ধপুষ্পাদ্যৈরত আদিগদাধরঃ ॥ ইতি গারুড়ে গয়ামাহাত্ম্যে ৮৫ অধ্যায়ঃ ॥ অপি চ। গদয়াদাববষ্টভ্য গয়াসুরশিরঃশিলাং। নিশ্চলার্থং স্থিতো যস্মাত্তস্মাদাদিগদাধরঃ ॥ ইতি বায়ুপুরাণীয়গয়ামাহাত্ম্যে ৮ অধ্যায়ঃ ॥

আদিতালঃ (পুং) তালবিশেষঃ। যথা। একএব লঘুর্যত্র আদিতালঃ স কথ্যতে। গুরুস্তৎপুরতো বাচ্যঃ প্রায়েণৈতন্নিদর্শনং ॥ ইতি সঙ্গীতদামোদরঃ ॥

আদিতেয়ঃ (পুং) অদিতিপুত্রঃ। দেবঃ। ইত্যমরঃ ॥

আদিত্যঃ (পুং) দেবঃ। সূর্য্যঃ। ইত্যমরমেদিন্যৌ ॥ দ্বাদশাদিত্যগণে বহুবচনান্তঃ। ইত্যমরঃ ॥ তৎপ্রত্যেকনামানি। বিবস্বান্ ১ অর্য্যমা ২ পূষা ৩ ত্বষ্টা ৪ সবিতা ৫ ভগঃ ৬ ধাতা ৭ বিধাতা ৮ বরুণঃ ৯ মিত্রঃ ১০ শক্রঃ ১১ উরুক্রমঃ ১২। এতে কশ্যপস্য অদিতিভার্য্যায়াং জাতাঃ। কল্পান্তরে ত্বষ্টৃকন্যা সংজ্ঞা আদিত্যপত্নী আদিত্যস্য তেজঃ সোঢ়ুমসমর্থা অতস্তস্যাঃ পিতৃকৃতাদিত্যদ্বাদশখণ্ডা দ্বাদশাদিত্যাঃ। তেষাং দ্বাদশমাসেষ্বেকৈকস্যোদয়ঃ। ইতি পুরাণং ॥ অর্কবৃক্ষঃ। আকন্দ ইতি ভাষা। ইত্যমরঃ ॥

আদিত্যপত্রঃ (পুং) ক্ষুপবিশেষঃ। তৎপর্য্যায়ঃ। অর্কপত্রঃ ২ অর্কদলঃ ৩ সূর্য্যপত্রঃ ৪ তপনচ্ছদঃ ৫ কুষ্ঠারিঃ ৬ বিটপঃ ৭ সুপত্রঃ ৮ রবিপ্রিয়ঃ ৯ রশ্মিপতিঃ ১০ রুদ্রঃ ১১। অস্য গুণাঃ। কটুত্বং। উষ্ণবীর্য্যত্বং। কফবাতরোগজাঠরগুল্মারোচকনাশিত্বং। অগ্নিসন্দীপনত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

আদিত্যপুষ্পিকা (স্ত্রী) লোহিতার্কবৃক্ষঃ। রাঙ্গা আকন্দ ইতি ভাষা। ইতি রত্নমালা ॥

আদিত্যভক্তা (স্ত্রী) ওষধীবিশেষঃ। হুড়হুড়িয়া ইতি ভাষা। তৎপর্য্যায়ঃ। বরদা ২ অর্কভক্তা ৩ সুবর্চ্চলা ৪ সূর্য্যলতা ৫ সূর্য্যাবর্ত্তা ৬ অর্ককান্তা ৭ মণ্ডূকপর্ণী ৮ সুরসম্ভবা ৯ সৌরী ১০ সুতেজাঃ ১১ অর্কহিতা ১২ বরিষ্ঠা ১৩ মণ্ডূকী ১৪ সপ্তনামা ১৫ দেবী ১৬ মার্ত্তণ্ডবল্লভা ১৭ বিক্রান্তা ১৮ ভাস্করেষ্টা ১৯। অস্যা গুণাঃ। হিমত্বং। তিক্তত্বং। কটুত্বং। উগ্রত্বং। কফত্বগ্দোষকণ্ডুব্রণকুষ্ঠভূতগ্রহোগ্রশীতজ্বরনাশিত্বঞ্চ। অম্লচ্চ। স্বাদুপাক-

রসত্বং। গুরুত্বং। অপিত্তবর্দ্ধকত্বং। ক্ষার-রসত্বং। বিষ্টম্ভবাতনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

আদিত্যসূনুঃ ( পুং ) সুগ্রীববানরঃ। ইতি হেমচন্দ্রঃ॥ যমঃ। শনৈশ্চরঃ। সাবর্ণিমনুঃ। বৈবস্বতমনুঃ। ইতি পুরাণং॥

আদিদেবঃ ( পুং ) নারায়ণঃ। ইতি ত্রিকাণ্ডশেষঃ॥

আদিবরাহঃ (পুং) বিষ্ণুঃ। ইতি ত্রিকাণ্ডশেষঃ॥

আদিমং ( ত্রি ) আদ্যং। প্রথমভববস্তু। ইত্যমরটীকা ব্যাকরণঞ্চ॥

আদিরাজঃ ( পুং ) পৃথুরাজা। ইতি হেমচন্দ্রঃ॥

আদিষ্টং ( ক্লী ) উচ্ছিষ্টং। ইতি মেদিনী॥

আদিষ্টঃ ( ত্রি ) আদেশিতঃ। আজ্ঞাপ্তঃ ইতি মেদিনী॥ কথিতঃ। কৃতাদেশবর্ণঃ

আদীনবঃ ( পুং ) ক্লেশঃ। ইত্যমরঃ॥ দোষঃ। দুরন্তঃ। ইতি মেদিনী॥

আদীপনং ( ক্লী ) আলিম্পনা। আলিপনা ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ॥

আদৃতঃ ( ত্রি ) কৃতাদরঃ। সাদরঃ। অর্চ্চিতঃ। পূজিতঃ। ইত্যমরঃ॥

আদৃত্যঃ ( ত্রি ) আদরণীয়ঃ। আদরযোগ্যঃ॥

আদেশঃ ( পুং ) আজ্ঞা। ইতি হেমচন্দ্রঃ॥ জ্যোতিঃশাস্ত্রফলং। ইতি সিদ্ধান্তশিরোমণিঃ॥ বর্ণস্য বর্ণান্তরোৎপত্তিঃ। প্রকৃতিপ্রত্যয়োপঘাতিকার্য্যং। ইতি ব্যাকরণং॥

আদেশী [ ন্ ] ( পুং ) দৈবজ্ঞঃ। গণকঃ। ইতি হেমচন্দ্রঃ॥

আদেষ্টা [ ঋ ] ( পুং ) যাগবিষয়ে মমেষ্টসম্পাদনায় যথার্থং কর্ম্ম কুর্ব্বিতি ঋত্বিজামাদেশকঃ। তৎপর্য্যায়ঃ। ব্রতী ২ যষ্টা ৩ যজমানঃ ৪। ইত্যমরঃ॥ অধ্বাদেষ্টা ৫ যাজকঃ ৬। ইতি হেমচন্দ্রঃ॥ আদেশ-

আদ্যং ( ক্লী ) ধান্যং। ইতি রাজনির্ঘণ্টঃ॥ অদনীয়দ্রব্যে ত্রি॥

আদ্যঃ ( ত্রি ) প্রথমঃ। ইত্যমরঃ॥

আদ্যকবিঃ ( পুং ) বাল্মীকিমুনিঃ। ইতি ভূরিপ্রয়োগঃ॥

আদ্যমাষকঃ ( পুং ) মাষকপরিমাণং। পঞ্চরক্তিকাঃ। ইত্যমরঃ॥

আদ্যবীজং (ক্লী) আদিকারণং। ইতি জটাধরঃ॥

আদ্যা (স্ত্রী) দুর্গা। ইতি শব্দরত্নাবলী। কালী। তারা। ত্রিপুরসুন্দরী। ভুবনেশ্বরী। ইতি তন্ত্রসারনীলতন্ত্রযোগিনীতন্ত্রাণি। প্রধানা শক্তিঃ। মহাবিদ্যা। যথা। সত্যে তু সুন্দরী আদ্যা ত্রেতায়াং ভুবনেশ্বরী। দ্বাপরে তারিণী আদ্যা কলৌ কালী প্রকীর্ত্তিতা॥ নামভেদং প্রবক্ষ্যামি রূপভেদং বরাননে। ন ভেদঃ কালিকায়াশ্চ তারায়া জগদম্বিকে॥ ষোড়শ্যা ভুবনায়াশ্চ ভৈরব্যাস্ত্রিপুরেশ্বরি। ছিন্নায়াশ্চৈব ধূমায়া ভীমায়াঃ পরমেশ্বরি॥ ততশ্চ বগলামুখ্যা মাতঙ্গ্যাশ্চ সুরেশ্বরি। ন চ ভেদো মহেশানি বিদ্যায়া বরবর্ণিনি॥ ইতি মুণ্ডমালাতন্ত্রে ১০ পটলঃ॥ *॥ আদিভূতে ত্রি॥

আদ্যূনঃ ( ত্রি ) ঔদরিকঃ। পেটুক ইতি ভাষা। ইত্যমরঃ॥ আদিহীনঃ॥

আদ্যোপান্তং (ক্লী) পূর্ব্বাপরং। ইস্তকনাগাদি ইতি ভাষা॥

আধমনং ( ক্লী ) বন্ধকং। ইতি স্মৃতিঃ ॥

আধানং ( ক্লী ) গর্ব্ভাধানং। অগ্ন্যাধানং। স্থাপিতদ্রব্যং। ইতি স্মৃতিঃ ॥

আধানিকং ( ক্লী ) গর্ব্ভাধানসংস্কারঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

আধারঃ ( পুং ) অধিকরণং। আলবালং। অম্বুধারণং। ইতি মেদিনী ॥ ক্ষেত্রাদিসেকার্থং সেতুনা বহুনালং জলং নিরুধ্য যত্র স্থাপ্যতে স আধারঃ বদ্ধকন্দরাদিঃ বাঁধ ইতি খ্যাতঃ। ইত্যমরটীকায়াং ভরতঃ ॥ শস্যাদ্যর্থং জলবন্ধনমাধারঃ। ইতি বৈকুণ্ঠঃ॥ ক্ষেত্রাদিসেকার্থং জলাধারস্থানমাধার ইতি মধুঃ ॥

আধার্ম্মিকঃ ( ত্রি ) অধার্ম্মিকঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

আধিঃ ( পুং ) মনঃপীড়া। প্রত্যাশা। বন্ধকং। ব্যসনং। অধিষ্ঠানং। ইতি মেদিনী ॥

আধিক্যং ( ক্লী ) অধিকস্য ভাবঃ। অধিকত্বং। অতিশয়তা। যথা। যুগ্মায়ামপি রাত্রৌ চেৎ শোণিতং প্রচুরং তদা। কন্যা চ পুম্বৎ ভবতি শুক্রাধিক্যে পুমান্ ভবেৎ ॥ ইতি জ্যোতিস্তত্ত্বং ॥

আধিজ্ঞঃ ( ত্রি ) বক্রঃ। ব্যথিতঃ। ইত্যজয়পালঃ ॥

আধিদৈবিকং ( ত্রি ) দুঃখবিশেষঃ। তদ্যথা। আধিদৈবিকং যক্ষরাক্ষসবিনায়কগ্রহাদ্যাবেশনিবন্ধনং। ইতি সাঙ্খ্যতত্ত্বকৌমুদী॥

আধিপত্যং ( ক্লী ) অধিপতের্ভাবঃ। স্বামিত্বং। প্রভুত্বং। ঐশ্বর্য্যং। যথা। নহি প্রপশ্যামি মমাপনুদ্যাৎ যচ্ছোকমুচ্ছোষণমিন্দ্রিয়াণাং। অবাপ্য ভূমাবসপত্নমৃদ্ধং রাজ্যং সুরাণামপি চাধিপত্যং ॥ ইতি শ্রীভগবদ্গীতায়াং ২ অধ্যায়ঃ ॥

আধিভোগঃ ( পুং ) বন্ধকদ্রব্যস্য ভোগঃ ॥

আধিভৌতিকং ( ত্রি ) দুঃখবিশেষঃ। যথা। বাহ্যোপায়সাধ্যং দুঃখং দ্বেধা। আধিভৌতিকং আধিদৈবিকঞ্চ। তত্রাধিভৌতিকং মানুষপশুমৃগপক্ষিসরীসৃপস্থাবরনিমিত্তং। ইতি সাঙ্খ্যতত্ত্বকৌমুদী ॥

আধিমন্যবঃ ( পুং ) জ্বরাগ্নিঃ। ইতি হারাবলী ॥

আধিবেদনিকং ( ত্রি ) দ্বিতীয়বিবাহার্থং প্রথমস্ত্রিয়ৈ দত্তধনাদি। যথা। অধিবিন্নস্ত্রিয়ৈ দেয়মাধিবেদনিকং সমং। নদত্তং স্ত্রীধনং যস্যৈ দত্তেত্বর্দ্ধং প্রকীর্ত্তিতং ॥ ইতি যাজ্ঞবল্ক্যঃ ॥

আধুতঃ ( ত্রি ) আধূতঃ। কম্পিতঃ। ইত্যমরটীকায়াং রায়মুকুটঃ ॥

আধুনিকঃ ( ত্রি ) অধুনাজাতঃ। নব্যঃ ॥

আধূতঃ ( ত্রি ) কম্পিতঃ। ইত্যমরঃ ॥

আধেয়ং ( ত্রি ) আধারস্থিতবস্তু। যথা। শাব্দবোধে চৈকপদার্থে অপরপদার্থসংসর্গঃ সংসর্গমর্য্যাদয়া ভাসতে। স চ ক্বচিদ্ভেদঃ ক্বচিদতিরিক্ত এবাধারাধেয়প্রতিযোগ্যনুযোগিবিষয়বিষয়িভাবাদিঃ। ইতি গদাধরভট্টাচার্য্যকৃতপ্রথমব্যুৎপত্তিবাদঃ ॥ উৎপাদ্যঃ। যথা। সত্ত্বে নিবিশতেঽপৈতি পৃথগ্জাতিষু দৃশ্যতে। আধেয়শ্চাক্রিয়াজশ্চ সোঽসত্ত্বপ্রকৃতির্গুণঃ ॥ ইতি বোপদেবকৃতমুগ্ধবোধীয়কারিকা ॥ আধেয় উৎপাদ্যঃ। যথা পকমৃণ্ময়পাত্রেষু রক্ততাগুণঃ

স বহ্নিসংযোগাদিনা নিষ্পাদ্যতে। ইতি তট্টীকায়াং দুর্গাদাসঃ॥

আধোরণঃ (পুং) হস্তিপকঃ। মাহুত ইতি ভাষা। ইত্যমরঃ॥

আধ্মাতঃ (পুং) শব্দিতঃ। দগ্ধঃ। বাতরোগবিশেষঃ। সংযতঃ। ইতি মেদিনী॥

আধ্মানঃ (পুং) বাতব্যাধিবিশেষঃ। তস্য রূপং। সাটোপমত্যুগ্ররুজমাধ্মাতমুদরং ভৃশং। আধ্মানমিতি জানীয়াদ্ঘোরং বাতনিরোধজং॥ ইতি নিদানং॥ পেটফাঁপা ইতি ভাষা। তস্য চিকিৎসা যথা। আধ্মানে লঙ্ঘনং পূর্ব্বং দীপনং পাচনং ততঃ। ফলবর্ত্তিক্রিয়াং কুর্য্যাৎ বস্তিকর্ম্ম চ শোধনং॥ কর্ষমাত্রা ভবেৎ কৃষ্ণা ত্রিবৃতা স্যাৎ পলোন্মিতা। খণ্ডাদপি পলং গ্রাহ্যং চূর্ণমেকত্র কারয়েৎ॥ মধুনাক্ষমিতং লিহ্যাৎ চূর্ণমাধ্মাননাশনং। নারায়ণচূর্ণং॥ ১॥ দারুহৈমবতীকুষ্ঠশতাহ্বাহিঙ্গুসৈন্ধবৈঃ। লিম্পেৎ কোষ্ণৈরম্লপিষ্টৈঃ শূলাধ্মানযুতোদরং॥ হৈমবতী বচা। দারুষট্কলেপঃ॥ ২॥ অভয়ারগ্বধো ধাত্রী দন্তী তিক্তা স্নুহী ত্রিবৃৎ। মুস্তা প্রত্যেকমেতানি গ্রাহ্যাণি পলমাত্রয়া॥ তানি সংক্ষুদ্য সর্ব্বাণি জলাঢ়কযুগে পচেৎ॥ তত্র তোয়েঽষ্টমং ভাগং কষায়মবশেষয়েৎ। নিস্ত্বগ্জৈপালবীজানি নবানি পলমাত্রয়া॥ তনুবস্ত্রধৃতান্যেব তস্মিন্ ক্বাথে শনৈঃ পচেৎ। জ্বালয়েদনলং মন্দং যাবৎ ক্বাথো ঘনো ভবেৎ॥ ততঃ খল্লে ক্ষিপেৎ ভাগানষ্টৌ জৈপালবীজতঃ। ভাগাংস্ত্রীন্ নাগরাদ্দ্বৌ চ মরিচাৎ দ্বৌ চ পারদাৎ॥ গন্ধকাৎ দ্বৌ চ তানীহ যাবদ্যামং বিমর্দয়েৎ। রসো নারাচনামায়ং ভক্ষিতো রক্তিকামিতঃ॥ জলেন শীতলেনৈব রোগানেতান্ বিনাশয়েৎ। আধ্মানং শূলমানাহং প্রত্যাধ্মানং তথৈব চ॥ উদাবর্ত্তং তথা গুল্মমুদরাণি হরত্যসৌ। বেগে শান্তে চ ভুঞ্জীত শর্করাসহিতং দধি॥ ততস্তৎসৈন্ধবেনাপি ততো দধ্যোদনং মনাক্। মহানারাচো রসঃ॥ ৩॥ ইতি ভাবপ্রকাশঃ॥

আধ্মানী (স্ত্রী) নলিকানামগন্ধদ্রব্যং। ইতি রাজনির্ঘণ্টঃ॥

আধ্যা (স্ত্রী) চিন্তা। স্মৃতিঃ। ইতি শব্দরত্নাবলী॥

আধ্যাত্মিকং (ত্রি) দুঃখবিশেষঃ। যথা। দুঃখানাং ত্রয়ং দুঃখত্রয়ং তৎখল্বাধ্যাত্মিকং চাধিভৌতিকং চাধিদৈবিকঞ্চ। তত্রাধ্যাত্মিকং দ্বিবিধং শারীরং মানসঞ্চ। শারীরং বাতপিত্তশ্লেষ্মণাং নিমিত্তং। মানসং কামক্রোধলোভমোহের্ষ্যাবিষাদবিশেষাদর্শননিবন্ধনং। সর্ব্বং চৈতদান্তরোপায়সাধ্যত্বাৎ আধ্যাত্মিকং দুঃখং। ইতি সাঙ্খ্যতত্ত্বকৌমুদী॥

আধ্যানং (ক্লী) ধ্যানং। চিন্তা। ইত্যমরঃ॥

আধ্যাপকঃ (পুং) অধ্যাপকঃ। ইতি শব্দরত্নাবলী॥

আনঃ (পুং) উচ্ছ্বাসঃ। বহির্মুখশ্বাসঃ। ইতি হেমচন্দ্রঃ॥

আনকঃ (পুং) পটহঃ। ভেরী। মৃদঙ্গঃ। শব্দযুক্তমেঘঃ। ইতি মেদিনী॥

আনকদুন্দুভিঃ ( পুং ) বসুদেবঃ। ইত্যমরঃ ॥

আনকদুন্দুভিঃ ( পুং স্ত্রী ) বৃহড্ঢক্কা। ইত্যমরটীকায়াং ভরতঃ ॥

আনতঃ ( ত্রি ) নতঃ। তৎপর্য্যায়ঃ। অবাগ্রঃ ২ অবনতঃ ৩। ইত্যমরঃ ॥

আনতিকরঃ ( ত্রি ) পারিতোষিকঃ। যথা। প্রায়শ্চিত্তোপদেশায় বস্ত্রাদিনা ব্রাহ্মণস্তোষণীয়ঃ। যথা মিতাক্ষরায়াং পরাশরঃ। পাপং প্রখ্যাপয়েৎ পাপী ধেনুং দত্ত্বা তথা বৃষং। এতচ্চোপলক্ষণং। প্রখ্যাপ্য পাপং বক্তৃভ্যঃ কিঞ্চিদ্দত্ত্বা ব্রতং চরেৎ। ইতি স্মৃতেঃ। দেবলবচনে তোষয়িত্বা দ্বিজোত্তমান্ ইতি। অত্র তোষয়িত্বা ইতি শ্রবণাৎ আনতিকরত্বেন তদ্গ্রহণান্নদোষঃ। ইতি প্রায়শ্চিত্ততত্ত্বং ॥

আনদ্ধং ( ক্লী ) চর্ম্মবদ্ধমুখবাদ্যমাত্রং। তত্তু মুরজাদি। ইত্যমরঃ ॥ কল্পমাত্রং। তত্তু বেশভূষাদি। ইত্যজয়পালঃ ॥

আনদ্ধঃ ( ত্রি ) সন্ধিতঃ। বদ্ধঃ। ইতি মেদিনী ॥

আননং ( ক্লী ) মুখং। ইত্যমরঃ ॥

আনন্দঃ ( পুং ) আহ্লাদঃ। তৎপর্য্যায়ঃ। আনন্দথুঃ ২ শর্ম্ম ৩ শাতং ৪ সুখং ৫ মুৎ ৬ প্রীতিঃ ৭ প্রমোদঃ ৮ হর্ষঃ ৯ প্রমদঃ ১০ আমোদঃ ১১ সম্মদঃ ১২। ইত্যমরঃ ॥ বাসুদেবস্য বলবিশেষঃ। ইতি হেমচন্দ্রঃ ॥

আনন্দঃ ( ত্রি ) আনন্দবিশিষ্টঃ। হর্ষযুক্তঃ। সুখী। ইত্যমরটীকা ॥

আনন্দথুঃ ( পুং ) আনন্দঃ। হর্ষঃ। ইত্যমরঃ ॥ তদ্যুক্তে ত্রি ॥

আনন্দনং ( ক্লী ) গমনাগমনসময়ে সুহৃদাদেরালিঙ্গনারোগ্যস্বাগতাদি প্রশ্নাদি দ্বারা আনন্দোৎপাদনং। তৎপর্য্যায়ঃ। সভাজনঃ২ স্বভাজনঃ ৩ সুভাজনঃ ৪ আপ্রশ্নঃ ৫ আমন্ত্রণং ৬ ॥ ইত্যমরঃ তট্টীকা চ ॥

আনন্দপটং ( ক্লী ) নবোঢ়াবস্ত্রং। ইতি হারাবলী

আনন্দপ্রভবং ( ক্লী ) রেতঃ। বীর্য্যং। ইতি

য়কোষঃ ( পুং ) সত্ত্বপ্রং

তৎপর্য্যায়ঃ। কারণশরীরং ২ সুষুপ্তিঃ ৩। ইতি বেদান্তঃ ॥

আনন্দা ( স্ত্রী ) বিজয়া। আরামশীলতা। ইতি রাজনির্ঘণ্টঃ ॥

আনন্দিঃ ( পুং ) আনন্দঃ। হর্ষঃ। ইতি শব্দমালা ॥

আনন্দিতঃ ( ত্রি ) আনন্দযুক্তঃ। হৃষ্টঃ। আহ্লাদিতঃ ॥

আনন্দী [ ন্ ] ( ত্রি ) আনন্দবিশিষ্টঃ ॥

আনন্দী ( স্ত্রী ) বৃক্ষবিশেষঃ। আকন্দপাতা ইতি খ্যাতা। ইতি শব্দচন্দ্রিকা ॥

আনয়ঃ ( পুং ) উপনয়নং। ইতি হেমচন্দ্রঃ ॥

আনয়নং ( ক্লী ) স্থানান্তরনয়নং। আনা ইতি ভাষা ॥

আনর্ত্তঃ ( পুং ) দেশবিশেষঃ। দ্বারকা ইতি খ্যাতা। নৃত্যস্থানং। যুদ্ধং। ইত্যমরঃ ॥ জলং। ইতি মেদিনী ॥ আনর্ত্তদেশবাসী লোকঃ। ইত্যমরটীকা ॥

আনায়ঃ ( পুং ) জালং। ইত্যমরঃ ॥

আনায্যঃ ( পুং ) দক্ষিণাগ্নিঃ। ইত্যমরঃ ॥ গার্হপত্যাদগ্নেরানীয় যো দক্ষিণাগ্নিরারোপ্যতে

তত্র। ইতি ভরতঃ॥ হোম করিবার নিমিত্তে ঘর হইতে আনিয়া দক্ষিণ দিকে রাখা আগুন্ ইতি ভাষা॥

আনাহঃ (পুং) মূত্রপুরীষরোধকরোগঃ। তৎপর্য্যায়ঃ। বিবন্ধঃ ২। ইত্যমরঃ॥ বিষ্টম্ভঃ ৩ মলরোধনঃ ৪। ইতি রাজনির্ঘণ্টঃ॥ তস্য সংপ্রাপ্তিরূপে। আমং শকৃদ্বা নিচিতং ক্রমেণ ভূয়োবিবদ্ধং বিগুণানিলেন। প্রবর্ত্তমানং ন যথা স্বমেনং বিকারমানাহমুদাহরন্তি॥ ইতি নিদানং॥ দৈর্ঘ্যং। ইতি রমানাথঃ॥

আনিলিঃ (পুং) হনূমান্। ইতি ত্রিকাণ্ডশেষঃ॥

আনিলী (স্ত্রী) স্বাতীনক্ষত্রং। ইতি হেমচন্দ্রঃ॥

আনীলঃ (পুং) নীলঘোটকঃ। ইতি হেমচন্দ্রঃ॥

আনুকূল্যং (ক্লী) অনুকূলতা॥

আনুগত্যং (ক্লী) অনুগতত্বং। অনুগতস্য ভাব ইত্যর্থে ষ্যপ্রত্যয়েন নিষ্পন্নং॥

আনুপূর্ব্বী (স্ত্রী ক্লী) পরিপাটী। অনুক্রমঃ। ইত্যমরঃ॥

আনুমানিকঃ (ত্রি) অনুমানসম্বন্ধীয়ঃ। অনুমানবিষয়ীভূতঃ॥

আনুরক্তিঃ (স্ত্রী) অনুরাগঃ॥

আনুবিধিৎসা (স্ত্রী) উপকৃতেরপ্রত্যুপকারেচ্ছা। ইতি পুরাণং॥

আনূপঃ (পুং) অনূপদেশস্থজন্তুমাত্রং। তচ্চ খড়্গিমহিষবরাহাদি। এষাং মাংসগুণাঃ। গুরুত্বং। উষ্ণত্বং। মধুরত্বং। স্নিগ্ধত্বং। শুক্রকারিত্বং। বায়ুনাশিত্বঞ্চ। ইতি রাজবল্লভঃ॥ অনূপদেশজলগুণাঃ। ঘনত্বং। গুরুত্বং। পিচ্ছিলত্বং। মধুরত্বং। শ্লেষ্মজনকত্বং। স্নিগ্ধত্বং। অগ্নিনাশিত্বং। প্রমেহশ্লীপদচ্ছর্দ্দিগলগণ্ডাদিরোগকারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ অনূপদেশস্থজন্তোর্লক্ষণং তন্মাংসস্য গুণাশ্চ। কুলেচরাঃ প্লবাশ্চাপি কোশস্থাঃ পাদিনস্তথা। মৎস্যা এতে সমাখ্যাতাঃ পঞ্চধানূপজাতয়ঃ॥ আনূপা মধুরাঃ স্নিগ্ধা গুরবো বহ্নিমর্দ্দনাঃ। শ্লেষ্মলাঃ পিচ্ছিলাশ্চাপি মাংসপুষ্টিপ্রদা ভৃশং॥ তথাভিষ্যন্দিনস্তে হি প্রায়োঽপথ্যতমাঃ স্মৃতাঃ। ইতি ভাবপ্রকাশঃ॥

আনৃশংস্যং (ক্লী) অনিষ্ঠুরতা॥

আন্তরীক্ষং (ক্লী) অন্তরীক্ষং। গগনং। ইতি দ্বিরূপকোষঃ॥ অন্তরীক্ষভববস্তুনি ত্রি॥

আন্তিকা (স্ত্রী) অন্তিকা। জ্যেষ্ঠা ভগিনী॥ ইতি দ্বিরূপকোষঃ॥

আন্ত্রিকঃ (ত্রি) অন্ত্রে ভবঃ। অন্ত্রসম্বন্ধীয়ঃ॥

আন্দোল ৎ ক্ দোলনে। ইতি কবিকল্পদ্রুমঃ॥ আন্দুদোলৎ। ইতি দুর্গাদাসঃ॥

আন্দোলনং (ক্লী) চলনং। কম্পনং॥

আন্দোলিতং (ত্রি) কৃতান্দোলনং। তৎপর্য্যায়ঃ। চলিতং ২ কম্পিতং ৩ ধূতং ৪ বেল্লিতং ৫। ইতি হেমচন্দ্রঃ॥

আন্ধসিকঃ (ত্রি) পাচকঃ। সূপকারঃ। ইত্যমরঃ॥

আন্বয়িকঃ (ত্রি) প্রশস্তকুলজঃ। সৎকুলোদ্ভবঃ। তৎপর্য্যায়ঃ। কৌলঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥ অন্বয়সম্বন্ধী॥

আন্বীক্ষিকী (স্ত্রী) তর্কবিদ্যা। ন্যায়বিদ্যা। ইত্যমরঃ॥ দুর্গা। যথা। আত্মবেদন-

শীলত্বাদন্বীক্ষণপরাথ বা। অন্বীক্ষং কুরুতে যস্মাত্তস্মাদান্বীক্ষিকী স্মৃতা ॥ ইতি দেবী-পুরাণে ৪৫ অধ্যায়ঃ ॥

আপ ৯ ন ঔ কি ব্যাপনে। ইতি কবিকল্প-দ্রুমঃ ॥ ৯ আপৎ। ন আপ্নোতি কীর্ত্তি-র্বন্ধাগুং। ঔ আপ্তা। কি আপয়তি আপতি। স্বরাজ্যং প্রাপ্স্যতে ভবান্। ইতি গণকৃতানিত্যত্বাৎ। ইতি দুর্গা-দাসঃ ॥

আপঃ (পুং) অষ্টবসুমধ্যে বসুবিশেষঃ। ইতি জটাধরঃ ॥

আপঃ [স্] (ক্লী) জলং। পাপং। ইত্যু-ণাদিকোষঃ

আপক্বং (ত্রি) ঈষৎপক্বকলায়াদি। তৎ-পর্য্যায়ঃ। পৌলিঃ ২ অভ্যূষঃ ৩। ইত্য-মরঃ ॥ রুটী ইতি কেচিৎ ॥

আপগা (স্ত্রী) নদী। ইত্যমরঃ ॥

আপণঃ (পুং) পণ্যবিক্রয়শালা। দোকান ইতি ভাষা। তৎপর্য্যায়ঃ। নিষদ্যা ২ বিপণিঃ ৩ পণ্যবীথিকা ৪। ইত্যমরঃ ॥ চতুষ্কং হট্টে ইত্যন্যে। আপণাদিদ্বয়ং হট্টে বিপণ্যাদিদ্বয়ং হট্টগৃহে ইতি কেচিৎ। ইত্যমরটীকায়াংভরতঃ ॥

আপণিকঃ (পুং) বণিকঃ। দোকানি মুদি ব্যবসায়ী ইত্যাদি ভাষা। ইত্যুণাদি-কোষঃ ॥

আপতিকঃ (পুং) শ্যেনপক্ষী। বাজ ইতি ভাষা। দৈবায়ত্তে ত্রি। ইত্যুণাদিকোষঃ ॥

আপৎ [দ্] (স্ত্রী) বিপৎ। বিপত্তিঃ। ইত্য-মরঃ ॥ যথা। আপৎসু মূঢ়ো দ্যুতিমান্ যঃ সম্যক্ প্রতিপদ্যতে। কর্ম্মাণ্যবশ্য-কার্য্যাণি তমাহুঃ পুরুষং বুধাঃ ॥ ইতি বহ্নিপুরাণং ॥ * ॥ কিঞ্চ। আপদি কিং শরণীয়ং শরণীয়ং চরণযুগলমম্বায়াঃ। তচ্ছরণং কিং কুরুতে ব্রহ্মাদীনপি কিঙ্ক-রান্ কুরুতে ॥ ইত্যুদ্ভটঃ ॥ * ॥ মনুঃ। বিশ্বৈশ্চ দেবৈঃ সাধ্যৈশ্চ ব্রাহ্মণৈশ্চ মহর্ষিভিঃ। আপৎসু মরণাদ্ভীতৈর্বিধিঃ প্রতিনিধিঃ কৃতঃ ॥ প্রভুঃ প্রথমকল্পস্য যোঽনুকল্পেন বর্ত্ততে। ন সাম্পরায়িকং তস্য দুর্মতের্বিদ্যতে ফলং ॥ ইত্যেকাদশী-তত্ত্বং ॥ আপৎকালে তু বিপ্রেণ ভুক্তং শূদ্রগৃহে যদি। মনস্তাপেন শুদ্ধ্যেত্তু দ্রুপদাং বা শতং জপেৎ ॥ ইতি প্রায়-শ্চিত্ততত্ত্বং ॥ * ॥ আপদর্থে ধনং রক্ষেৎ দারান্ রক্ষেৎ ধনৈরপি। আত্মানং সততং রক্ষেৎ দারৈরপি ধনৈরপি ॥ ইতি। জানীয়াৎ প্রেষণে ভৃত্যান্ বান্ধবান্ ব্যসনা-গমে। মিত্রঞ্চাপদি কালে চ ভার্য্যাঞ্চ বিভব-ক্ষয়ে ॥ ইতি চ চাণক্যং ॥

আপত্তিঃ (স্ত্রী) দোষঃ। ইতি হেমচন্দ্রঃ ॥ প্রাপণং। আপৎ। ইতি মেদিনী ॥

আপৎপ্রাপ্তঃ (ত্রি) বিপদ্‌গ্রস্তঃ। তৎপর্য্যায়ঃ। আপন্নঃ ২। ইত্যমরঃ ॥

আপদ্ (স্ত্রী) বিপত্তিঃ। ইত্যমরঃ ॥

আপদা (স্ত্রী) বিপত্তিঃ। ইতি রায়মুকুটঃ ॥

আপনং (ক্লী) মরীচং। ইতি শব্দচন্দ্রিকা। প্রাপণং ॥

আপনিকঃ (পুং) ইন্দ্রনীলমণিঃ। কিরাতঃ। ইত্যুণাদিকোষঃ ॥

আপন্নঃ (ত্রি) আপদ্‌গ্রস্তঃ। তৎপর্য্যায়ঃ। আপৎপ্রাপ্তঃ ২। ইত্যমরঃ॥ প্রাপ্তঃ। ইতি মেদিনী॥

আপন্নসত্ত্বা (স্ত্রী) গর্ব্ভবতী। ইত্যমরঃ॥

আপমিত্যকং (ক্লী) বিনিময়াৎ প্রাপ্তং। বদল করিয়া লওয়া দ্রব্য ইতি ভাষা। ইত্যমরঃ॥

আপবঃ (পুং) বশিষ্ঠমুনিঃ। ইতি মহাভারতং॥

আপস্তম্বঃ (পুং) ধর্ম্মশাস্ত্রপ্রযোজকমুনি-বিশেষঃ। যথা। মন্বত্রিবিষ্ণুহারীতযাজ্ঞ-বল্ক্যোশনোঽঙ্গিরাঃ। যমাপস্তম্বসম্বর্ত্তাঃ কাত্যায়নবৃহস্পতী॥ পরাশরব্যাসশঙ্খ-লিখিতা দক্ষগোতমৌ।শাতাতপো বশিষ্ঠশ্চ ধর্ম্মশাস্ত্রপ্রবোজকাঃ॥ ইতি যাজ্ঞবল্ক্য-বচনং॥

আপস্তম্ভিনী (স্ত্রী) লিঙ্গিনীলতা। ইতি রাজ-নির্ঘণ্টঃ॥

আপাকঃ (পুং) কুম্ভকারমৃৎপাত্রদহনস্থানং পোয়ান্ ইতি ভাষা। ইতি জটাধরঃ॥

আপাতঃ (পুং) পতনং। তৎকালঃ। ইতি মেদিনী॥ পাতনং। ইতি শব্দচন্দ্রিকা॥

আপানং (ক্লী) মদ্যপানার্থসভা। তৎপর্য্যায়ঃ। পানগোষ্ঠিকা ২। ইত্যমরঃ॥ মদ খাবার চক্র ইতি ভাষা॥

আপালিঃ (পুং) কেশকীটঃ। উকুন ইতি ভাষা। ইতি জটাধরঃ॥

আপিঞ্জরং (ক্লী) স্বর্ণং। ইতি রাজনির্ঘণ্টঃ॥

আপীড়ঃ (পুং) শিখাস্থিতমাল্যং। তৎ-পর্য্যায়ঃ। শেখরঃ ২। ইত্যমরঃ॥

আপীতং (ক্লী) মাক্ষিকধাতুঃ। ইতি রাজ-নির্ঘণ্টঃ॥

আপীনং (ক্লী) ঊধঃ। গরুর পালান্। ইতি ভাষা। ইত্যমরঃ॥

আপীনঃ (ত্রি) ঈষৎস্থূলঃ। সম্যক্‌স্থূলঃ॥

আপীনঃ (পুং) কূপঃ। ইতি বোপদেবঃ॥

আপূপিকং (ক্লী) অপূপসমূহঃ। বহুপিষ্টকং। ইত্যমরঃ॥

আপূপিকঃ (ত্রি) পিষ্টকজীবী। পিষ্টক-বিক্রয়কর্ত্তা। তৎপর্য্যায়ঃ। কান্দবিকঃ ২ ভক্ষ্যকারঃ ৩। ইত্যমরঃ॥ ময়রা হালুই-কর রুটিওয়ালা। ইত্যাদি ভাষা॥

আপূপ্যঃ (পুং) শক্তুঃ। চর্ণকঃ। ছাতু ময়দা বেসন ইত্যাদি ভাষা। ইতি ত্রিকাণ্ড-শেষঃ॥

আপূর্ত্তিঃ (স্ত্রী) ঈষৎপূরণং। সম্যক্‌পূরণং॥

আপূষং (ক্লী) রঙ্গং। রাং ইতি ভাষা॥ ইতি রাজনির্ঘণ্টঃ॥

আপৃচ্ছা (স্ত্রী) আভাষণং। আলাপঃ। ইতি হেমচন্দ্রঃ॥

আপোক্লিমং (ক্লী) লগ্নাৎ তৃতীয়ষষ্ঠনবম-দ্বাদশলগ্নং। ইতি জ্যোতিঃশাস্ত্রং॥

আপ্তঃ (ত্রি) প্রত্যয়িতঃ। বিশ্বস্তঃ। ইত্য-মরঃ॥ প্রাপ্তঃ। লব্ধঃ। সত্যং। ইতি হেমচন্দ্রঃ॥

আপ্তঃ (পুং) ভ্রমপ্রমাদবিপ্রলিপ্সাকরণাপাটব-রূপদোষচতুষ্টয়রহিতঃ। স চ ঋষ্যাদিঃ। ইতি স্মৃতিঃ॥

আপ্তগর্ব্বঃ (ত্রি) প্রাপ্তাহঙ্কারঃ॥

আপ্তা (স্ত্রী) জটা। ইতি হারাবলী॥

আপ্তিঃ (স্ত্রী) সম্বন্ধঃ। যোগঃ। লাভঃ। প্রাপ্তিঃ। ইতি হেমচন্দ্রঃ॥

আপ্তোক্তিঃ (স্ত্রী) সিদ্ধান্তবাক্যং। তৎপর্য্যায়ঃ। রাদ্ধং ২ সিদ্ধকৃতং ৩ অভ্যোতঃ ৪ সময়ঃ ৫ আগমঃ ৬। ইতি হেমচন্দ্রঃ ॥

আপ্যং (ত্রি) জলবিকারজং। ফেনাদি। তৎপর্য্যায়ঃ। অম্ময়ং ২। ইত্যমরঃ ॥

আপ্যং (ক্লী) বাপ্যবৃক্ষঃ। কুড় ইতি ভাষা। ইত্যমরটীকায়াং রায়মুকুটঃ ॥

আপ্যায়নং (ক্লী) তর্পণং। প্রীণনং। তৃপ্তিঃ। ইতি রাজনির্ঘণ্টঃ ॥

আপ্যায়িতঃ (ত্রি) তৃপ্তঃ। প্রীতঃ। বর্দ্ধিতঃ। যথা। এষা সূর্য্যস্য বীর্য্যেণ সোমস্যাপ্যায়িতা তনুঃ। পৌর্ণমাস্যাং স দৃশ্যেত সম্পূর্ণো দিবসক্রমাৎ॥ ইতি কৌর্ম্মে ৪০ অধ্যায়ঃ ॥ আনন্দিতঃ। ইতি লোকপ্রসিদ্ধং ॥

আপ্রচ্ছনং (ক্লী) গমনাগমনাদিসময়ে সুহৃদাদেরালিঙ্গনারোগ্যপ্রশ্নস্বাগতাদিনানন্দনং।

আপ্রচ্ছন্নং (ক্লী) আপ্রচ্ছনং। তৎপর্য্যায়ঃ আনন্দনং ২ সভাজনং ৩। ইতি হেমচন্দ্রঃ ॥

আপ্রপদং (ক্লী) পাদাগ্রপর্য্যন্তং ॥

আপ্রপদীনং (ত্রি) পাদাগ্রপর্য্যন্তপতিতবস্ত্রাদি। ইত্যমরঃ ॥

আপ্লবঃ (পুং) স্নানং। ইত্যমরঃ ॥

আপ্লবব্রতী [ন্] (পুং) আপ্লুতব্রতী। স্নাতকব্রাহ্মণঃ। ইত্যমরটীকায়াং ভরতঃ ॥

আপ্লাবঃ (পুং) স্নানং। ইত্যমরঃ ॥

আপ্লুতঃ (পুং) আপ্লুতব্রতী। স্নাতকঃ। ইতি মেদিনী ॥

আপ্লুতঃ (ত্রি) স্নাতঃ। কৃতস্নানঃ। ইতি মেদিনী ॥ স্নানে ক্লী ইতি হেমচন্দ্রঃ ॥

আপ্লুতব্রতী [ন্] (পুং) সমাপ্তবেদাধ্যয়নস্নানশীলঃ। ব্রহ্মচর্য্যং ত্যক্ত্বা যো গৃহাশ্রমং গতঃ সঃ। সমাপ্তবেদাধ্যয়নো যঃ স্নানশীল আশ্রমান্তরং ন গতঃ সোঽপি। আপ্লুতং স্নানং তত্র ব্রতী নিত্যস্নায়ী ইতি ব্যুৎপত্তিঃ। ইত্যমরটীকায়াং ভরতঃ ॥

আপ্বা [ন্] (পুং) বায়ুঃ। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ ॥

আফূকং (ক্লী) অফেনং। আফিং ইতি ভাষা। ইতি বৈদ্যকং ॥

আবদ্ধঃ (পুং) দৃঢ়বন্ধনং। প্রেম। অলঙ্কারঃ। ইতি বিশ্বমেদিন্যৌ ॥ যোক্ত্রং। ইতি মেদিনী ॥

আবন্ধঃ (পুং) যোক্ত্রং। যোৎদড়ী ইতি ভাষা। ইত্যমরহেমচন্দ্রৌ ॥ ভূষণং প্রেম। বন্ধনং। ইতি

আবলিঃ (স্ত্রী) আলিঃ। শ্রেণী। ইত্যমরঃ ॥

আবিদ্ধঃ (ত্রি) বক্রঃ। ক্ষিপ্তঃ। ইত্যমরঃ ॥ পরাহতঃ। ইতি মেদিনী ॥ মূর্খঃ। ইতি শব্দরত্নাবলী ॥

আবিধঃ (পুং) বেধনাস্ত্রং। ভোমর তুরপন ইত্যাদি ভাষা। ইত

আবিলঃ (ত্রি) অনচ্ছঃ। অনির্ম্মলঃ। ইত্যমরঃ ॥

আবিলকন্দঃ (পুং) মালাকন্দঃ। ইতি রাজনির্ঘণ্টঃ ॥

আবুত্তঃ (পুং) নাট্যোক্তৌ ভগিনীপতিঃ। ইত্যমরঃ ॥

আভরণং ( ক্লী ) ভূষণং । অলঙ্কারঃ । ইত্যমরঃ ॥

আভা ( স্ত্রী ) শোভা । কান্তিঃ । ইতি হেমচন্দ্রঃ ॥ দীপ্তিঃ । জ্যোতিঃ ॥

আভাতিঃ ( স্ত্রী ) ছায়া । ইতি রাজনির্ঘণ্টঃ ॥

আভাষণং ( ক্লী ) আলাপঃ । কথনং । ইত্যমরঃ ॥

আভাসঃ ( পুং ) সদৃশঃ । প্রতিবিম্বং । ইতি বেদান্তঃ ॥ দীপ্তিঃ । অভিপ্রায়ঃ ॥

আভাস্বরঃ ( পুং ) চতুঃষষ্টিসংখ্যকগণদেবতাবিশেষঃ । ইত্যমরঃ ॥

আভিজনঃ ( পুং ) অভিজনস্য ভাবঃ । কুলসম্বন্ধীয়ঃ । গাঁই পদবী ইত্যাদি ভাষা ॥

আভিজাত্যং ( ক্লী ) অভিজাতস্য ভাবঃ । কৌলিন্যং । পাণ্ডিত্যং ॥

আভিধা ( স্ত্রী ) শব্দঃ । ইতি শব্দরত্নাবলী ॥

আভিধাতকং ( ক্লী ) শব্দঃ । ইতি শব্দরত্নাবলী ॥

আভিরূপ্যং ( ক্লী ) অভিরূপস্য ভাবঃ । যথা । অর্চ্চকস্য তপোযোগাদর্চ্চনস্যাতিশায়নাৎ । আভিরূপ্যাচ্চ বিম্বানাং দেবঃ সান্নিধ্যমৃচ্ছতি ॥ ইতি তিথ্যাদিতত্ত্বধৃতহয়শীর্ষপঞ্চরাত্রীয়বচনং ॥

আভীরঃ ( পুং ) গোপঃ । আহির ইতি ভাষা । ইত্যমরঃ ॥ স চ ব্রাহ্মণাদম্বষ্ঠায়াংজাতঃ । ইতি মনুঃ ॥

আভীরপল্লিঃ ( স্ত্রী ) গোপপল্লী । গোয়ালাপাড়া ইতি ভাষা ॥ ইত্যমরটীকায়াং রায়মুকুটঃ ॥

আভীরপল্লী ( স্ত্রী ) গোপগৃহসমূহঃ । গোপগ্রামঃ । গোপগৃহং । গোপস্থানং । তৎপর্য্যায়ঃ । ঘোষঃ ২ । ইত্যমরঃ ॥

আভীরী ( স্ত্রী ) গোপস্ত্রীজাতিঃ । গোপপত্নী । তৎপর্য্যায়ঃ । মহাশূদ্রী ২ । ইত্যমরঃ ॥ আহিরিণী ইতি ভাষা ॥

আভীলং ( ক্লী ) কষ্টং । কৃচ্ছ্রং । ইত্যমরঃ ॥

আভীলঃ ( ত্রি ) কষ্টযুক্তঃ । ইত্যমরঃ ॥ ভয়ানকঃ । ইতি মেদিনী ॥

আভীক্ষ্ণং ( ক্লী ) অত্যর্থং । নিত্যং । তদ্‌যুক্তক্রিয়ায়াং ত্রি । ইতি শব্দরত্নাবলী ॥

আভেরী ( স্ত্রী ) রাগিণীবিশেষঃ । ইতি হলায়ুধঃ ॥

আভোগঃ ( পুং ) পরিপূর্ণতা । ইত্যমরঃ ॥ বরুণস্য ছত্রং । যত্নঃ । ইতি মেদিনী ॥ কবিনামযুক্তগানসমাপককবিতা । ভণিতা ইতি ভাষা । যথা । যত্রৈব কবিনাম স্যাৎ স আভোগ ইতীরীতঃ । ইতি সঙ্গীতদামোদরঃ ॥

আভ্যুদয়িকং ( ত্রি ) অভ্যুদয়নিমিত্তশ্রাদ্ধাদি । যথা । অথাভ্যুদয়িকশ্রাদ্ধং । তত্র গোভিলঃ । আভ্যুদয়িকে শ্রাদ্ধে যুগ্মানাশয়েৎ প্রদক্ষিণমুপচারঃ ঋজবো দর্ভাঃ যবৈস্তিলার্থঃ । সম্পন্নমিতি তৃপ্তিপ্রশ্নঃ । দধিবদরাক্ষতমিশ্রাঃ পিণ্ডাঃ নান্দীমুখাঃ পিতরঃ প্রীয়ন্তামিতি দৈবে বাচয়িত্বা নান্দীমুখেভ্য পিতৃভ্যঃ পিতামহেভ্যঃ প্রপিতামহেভ্যো মাতামহেভ্যঃ প্রমাতামহেভ্যো বৃদ্ধপ্রমাতামহেভ্যশ্চ প্রীয়ন্তাং ন স্বধাঞ্চ প্রযুঞ্জীত ইতি । অভ্যুদয়ো বিবাহাদিস্তদর্থং শ্রাদ্ধং আভ্যুদয়িকং । আভ্যুদয়িকে অভ্যুদয়-

নিমিত্তকে। অভ্যুদয়ঃ ইষ্টলাভঃ। স চ ভূতভবিষ্যদ্ভেদেন দ্বিবিধঃ। তত্র ভূতং পুত্রজন্মাদি ভবিষ্যৎ বিবাহাদি। এবঞ্চ শ্রাদ্ধবিবেকাদৌ শ্রাদ্ধভেদগণনে বৃদ্ধি-শ্রাদ্ধত্বেন কর্ম্মাঙ্গত্বেন চ যদুভয়ত্বমুক্তং তদুভয়মেবাত্রাভ্যুদয়িকত্বেনোপপন্নং তে-নাভিলাপে আভ্যুদয়িকশ্রাদ্ধমিতি প্র-যোজ্যং। অত্র যবৈস্তিতার্থ ইত্যনেন পার্ব্বণশ্রাদ্ধপ্রাপ্ততিলস্থানে যববিধানাৎ আভ্যুদয়িকস্যাপি পার্ব্বণপ্রকৃতিত্বং প্রতী-য়তে। অন্যথা তিলার্থ ইত্যুপাদানং ব্যর্থং স্যাৎ। ততশ্চ পার্ব্বণপ্রকৃতিকত্বেন পিত্রে অযুগ্মব্রাহ্মণপ্রাপ্তৌ তন্নিরাশায় পিতৃপক্ষে ব্রাহ্মণযুগ্মত্বোপদেশঃ দৈবে যুগ্মত্বস্য পার্ব্বণপ্রাপ্তত্বান্নতদর্থোপদেশঃ। অপ-সব্যং ততঃ কৃত্বা পিতৃণামপ্রদক্ষিণং ইতি যাজ্ঞবল্ক্যবচনেন দেবকর্ম্মানন্তরং পিতৃকর্ম্মকরণে প্রাপ্তবামোপচারনিরাশায় প্রদক্ষিণমুপচারঃ তেন দেবপিতৃকর্ম্মকর-ণায় দক্ষিণাবর্ত্তেন গন্তব্যং। দ্বিগুণভুগ্নত্ব-নিরাশায় ঋজবো দর্ভা ইতি ঋজুত্বোপ-দেশঃ। তৃপ্তাঃ স্থ ইত্যনেন তৃপ্তিপ্রশ্নে সম্পন্নমিতি প্রষ্টব্যং। যোগ্যত্বাৎ সুসম্পন্ন-মিতি প্রোক্তে ইতি বক্ষ্যমাণছন্দোগ-পরিশিষ্টবচনাচ্চ সুসম্পন্নমিত্যুত্তরং। এতদ্দর্ভময়ব্রাহ্মণপক্ষেপ্যবাধিতত্বাদ্বাচ্যং। দধিবদরাক্ষতমিশ্রা ইত্যনেন দধ্যাদিমিশ্রণ-মাবশ্যকং। অক্ষতো যবঃ। অক্ষতাশ্চ যবাঃ প্রোক্তা ভৃষ্টা ধানা ভবন্তি তে। ইতি ভট্টনারায়ণধৃতাৎ। অতএব বক্ষ্য-মাণছন্দোগপরিশিষ্টবচনে অক্ষতমমুক্ত্বা সংযোজ্য যবকর্কন্ধুদধিভিরিতি নিঃ-সন্দিগ্ধমুক্তং। স্বধাবাচনপ্রশ্ননিবৃত্তয়ে নান্দীমুখাঃ পিতরঃ প্রীয়ন্তামিত্যুপদেশঃ। তত্র স্বধাং বাচয়িষ্যে ইতি পিতৃপক্ষএব প্রশ্নঃ অতএব তন্নিবৃত্তয়ে দৈব ইতি আদৌ দেবপক্ষে নান্দীমুখাঃ পিতরঃ প্রীয়ন্তা-মিতি প্রশ্নঃ। উত্তরঞ্চ প্রীয়ন্তামিতি। ততঃ পিতৃপক্ষে স্বধাবাচনস্থানীয়ত্বেন বৃদ্ধপ্র-মাতামহেভ্যশ্চ ইতি চকারনির্দ্দেশেন চ স্বধোচ্যতামিতিবৎ প্রত্যেকমেব প্রীয়ন্তা-মিতি পৃচ্ছেৎ প্রত্যুত্তরঞ্চ অস্তু স্বধা ইতি-বৎ তন্ত্রেণৈব প্রীয়ন্তামিতি। অত্র নান্দী-মুখাঃ পিতর ইত্যাদি নান্দীমুখেভ্যঃ পিতৃভ্য ইতি নির্দ্দেশেন চ নান্দীমুখং পিতৃগণমিতি বিষ্ণুপুরাণেন চ মাতামহে-ভ্যশ্চ তথা নান্দীমুখেভ্য এব চ ইতি ব্রহ্ম-পুরাণেন চ নান্দীমুখপদশ্রুতেস্তদ্বিশেষণ-বিশিষ্টস্যৈবাভ্যুদয়িকে দেবতাত্বং তত-শ্চাত্রাপি প্রীয়ন্তামিতিবন্নান্দীমুখেভ্যঃ পিতামহেভ্য ইতি বাচ্যং। ন তু নান্দীমুখ-বিশেষণশূন্যং পিতামহেভ্যঃ প্রীয়ন্তামিতি পিতৃদয়িতোক্তং যুক্তং। নান্দীমুখেভ্যঃ পিতৃভ্যঃ প্রীয়ন্তামিত্যত্রান্বিতস্য নান্দী-মুখেভ্য ইত্যস্য পিতামহেভ্য ইত্যাদাব-নন্বয়িত্বেন প্রাগুক্তযুক্ত্যা প্রাপ্তস্য নান্দী-মুখবিশেষণস্য পিতামহেভ্য ইত্যাদাবপি-প্রাপ্তেঃ। এতেনাত্র মৈথিলোক্তং তন্ত্রতা-বিধানমপি নিরস্তং। পার্ব্বণবৎ স্বধাপ্রাপ্তেঃ তন্নিরাশায় ন স্বধাং প্রযুঞ্জীতেতি অত্র

বিশেষাদভিলাপে মন্ত্রে চ স্বধাপদনিবৃত্তিঃ। অভিলাপে নম ইতি ব্রূয়াৎ। অমুকামুকগোত্রৈতৎ তুভ্যমন্নং স্বধা নমঃ। ইতি ব্রহ্মপুরাণে শ্রাদ্ধে স্বধা নমঃ পদয়োস্ত্যাগবোধকত্বেন বিকল্পাদত্রাভ্যুদয়িকে স্বধানিষেধান্নম এবান্বেতি। পিতৃনপ্যত্র দেববদিত্যনেনাপি পার্ব্বণোক্তবিশ্বদেবপক্ষীয়নম এব প্রতীয়তে ন তু মৈথিলোক্তং স্বাহেতি। শ্রাদ্ধে তথা প্রয়োগে প্রমাণাভাবাৎ। এবমাশ্বলায়নগৃহ্যে যবোসীতি মন্ত্রে তু পুষ্ট্যা ইতি শ্রুতের্মন্ত্রমাত্রে স্বধাপদস্থানে পুষ্টিপদপ্রয়োগঃ। ইতি শ্রাদ্ধতত্ত্বং॥ অন্যৎ নান্দীমুখশব্দে দ্রষ্টব্যং॥

আমং (ত্রি) পাকরহিতং। কাঁচা ইতি ভাষা। তৎপর্য্যায়ঃ। অপক্কং ২ অসিদ্ধং ৩ অসৃতং ৪। ইতি রত্নমালা॥

আমং (ক্লী) ষট্‌প্রকারাজীর্ণরোগমধ্যে রোগবিশেষঃ। তস্য কারণরূপে। আমং বিদগ্ধং বিষ্টব্ধং কফপিত্তানিলৈস্ত্রিভিঃ। অজীর্ণং কেচিদিচ্ছন্তি চতুর্থং রসশেষতঃ॥ অজীর্ণং পঞ্চমং কেচিন্নির্দোষং দিনপাকি চ। বদন্তি ষষ্ঠং চাজীর্ণং প্রাকৃতং প্রতিবাসরং॥ তত্রামে গুরুতোৎক্লেদঃ শোথো গণ্ডাক্ষিকূটগঃ। উদ্গারশ্চ যথাভুক্তমবিদগ্ধঃ প্রবর্ত্ততে। ইতি নিদানং॥ অন্যচ্চ। ভুক্তমন্নাবশেষং যৎ রসং ভূয়স্ত্বপাচিতং। গতমামাশয়ে যস্মাত্তস্মাদামং তদুচ্যতে॥ অন্নমন্নরসং কেচিৎ কেচিচ্চ মলসঞ্চয়ং। প্রথমাং দোষদুষ্টিঞ্চ আমমিত্যভিধীয়তে॥ অপক্কং। যথা। শস্যং ক্ষেত্রগতং প্রাহুঃ সতুষং ধান্যমুচ্যতে। আমং বিতুষমিত্যুক্তং স্বিন্নমন্নমুদাহৃতং॥ ইতি শ্রাদ্ধতত্ত্বধৃতবশিষ্ঠবচনং॥ রোগবিশেষঃ। তল্লক্ষণাদি অজীর্ণশব্দে দ্রষ্টব্যং॥

আমঃ (পুং) রোগমাত্রং। রোগভেদঃ। ইতি মেদিনী॥ মলবৈষম্যরোগঃ। ইতি রাজনির্ঘণ্টঃ॥

আমগন্ধি (ক্লী) চিতাধূমাদিগন্ধযুক্তং। অপক্বমাংসাদিগন্ধবিশিষ্টং। তৎপর্য্যায়ঃ। বিস্রং ২ বিশ্রং ৩। ইত্যমরঃ॥

আমণ্ডঃ (পুং) এরণ্ডবৃক্ষঃ। ইতি রাজনির্ঘণ্টশব্দরত্নাবল্যৌ॥

আমনস্যং (ক্লী) পীড়া। দুঃখং। ইত্যমরঃ॥

আমন্ত্রণং (ক্লী) সম্বোধনং। ইতি হেমচন্দ্রঃ॥ আপ্রচ্ছনং। ইতি জটাধরঃ॥ নিমন্ত্রণং। ইতি স্মৃতিঃ॥ নিমন্ত্রণবিশেষঃ। যদকরণে প্রত্যবায়ো নাস্তি। যথা ইহ শয়ীতভবান্। ইতি মুগ্ধবোধব্যাকরণং॥

আময়ং (ক্লী) কুষ্ঠনামৌষধিঃ। কুড় ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥

আময়ঃ (পুং) রোগঃ। ইত্যমরঃ॥

আময়াবী [ন্] (ত্রি) রোগী। ইত্যমরঃ॥

আমর্ষঃ (পুং) ক্রোধঃ। ইত্যমরটীকায়াং ভরতঃ

আমলকং (ক্লী) আমলকীবিশেষঃ। কাঠআমলা ইতি ভাষা। তৎপর্য্যায়ঃ। কাষ্ঠধাত্রীফলং ২ ক্ষুদ্রামলকং ৩ ক্ষুদ্রজাতীফলং ৪। অস্য গুণাঃ। কষায়ত্বং। কটুত্বং।

শীতত্বং । পিত্তাস্রদোষনাশিত্বঞ্চ । ইতি রাজনির্ঘণ্টঃ ॥

আমলকঃ ( পুং ) বাসকবৃক্ষঃ । ইতি শব্দচন্দ্রিকা ॥

আমলকী ( স্ত্রী ) স্বনামখ্যাতফলবৃক্ষবিশেষঃ । আমলা ইতি ভাষা । তৎপর্য্যায়ঃ । তিষ্যফলা ২ অমৃতা ৩ বয়স্থা ৪ বয়ঃস্থা ৫ কায়স্থা ৬ । ইত্যমরস্তট্টীকা চ ॥ শ্রীফলা ৭ ধাত্রিকা ৮ শিবা ৯ শান্তা ১০ ধাত্রী ১১ অমৃতফলা ১২ বৃষ্যা ১৩ বৃত্তফলা ১৪ রোচনী ১৫ । ইতি রাজনির্ঘণ্টঃ ॥ কর্ষফলা ১৬ তিষ্যা ১৭ ইতি রত্নমালা ॥ অস্যা গুণাঃ । হরীতকীগুণবদ্‌গুণত্বং । বিশেষেণ শুক্রকারিত্বং । শীতবীর্য্যত্বং । অম্লত্বাৎ বায়ুনাশিত্বং । শৈত্যমাধুর্য্যাৎ পিত্তনাশিত্বং । কষায়রুক্ষত্বাৎ কফনাশিত্বং । সর্ব্বফলাধিকগুণত্বং । ভোজনাদ্যমধ্যান্তে প্রাশস্ত্যং । নিরত্যয়ত্বং । দোষহরত্বঞ্চ ॥ অস্য মজ্জগুণাঃ । তৃষ্ণাচ্ছর্দ্দিকফবায়ুনাশিত্বং । লঘুত্বং । কষায়ত্বং । বলকারিত্বঞ্চ । ইতি রাজবল্লভঃ ॥ অপিচ । লঘুত্বং । দাহবমিমেহশোষনাশিত্বং । রসায়নত্বং । কটুত্বং । রুচিকরত্বং । রক্তদোষনাশিত্বং । শ্রমবিবন্ধাধ্মানবিষ্টম্ভদোষপ্রশমনকারিত্বঞ্চ । অস্য মজ্জনো বিভীতকমজ্জবদ্‌গুণত্বঞ্চ । ইতি রাজনির্ঘণ্টঃ ॥ তৎশুষ্কফলগুণাঃ । কফপিত্তনাশিত্বং । অম্লত্বং । স্বাদুদ্রব্যদ্বারা পাকে পিত্তনাশিত্বঞ্চ । ইতি রাজবল্লভঃ ॥ তস্যা উৎপত্তির্যথা । সখ্যাবূচতুঃ । উক্তস্ত্বয়া মহেশানি তুলসীবিল্বসম্ভবঃ । অনয়োস্তুল্য একঃ কঃ শিববিষ্ণুপ্রিয়স্তরুঃ ॥ তদাবাং শ্রোতুমিচ্ছাবঃ শিবসুন্দরি কথ্যতাং । দেব্যুবাচ । অস্তি বিল্বতুলসীতরুতুল্যঃ পুণ্য এক উত বিষ্ণুশিবার্হঃ । নামতোঽমলক ইত্যপি সখ্যৌ রোপিতঃ কমলয়াথ ময়াপি ॥ কদাচিৎ দেবযাত্রায়াং প্রভাসে পুণ্যতীর্থকে । সর্ব্বে দেবাঃ সমায়াতা দিনে পুণ্যে চ কুত্রচিৎ ॥ তত্রাহঞ্চ স্বয়ং লক্ষ্মীরেকস্থানে সমাগতে । তত্রাবয়োর্মতির্জাতা শিববিষ্ণুপ্রপূজনে ॥ অহং শ্রিয়মবোচঞ্চ সামুদ্রি শৃণু মে মতিং । স্বকল্পিতেন দ্রব্যেণ পূজয়েঽহং হরিং প্রভুং ॥ মামুবাচ ততো লক্ষ্মীর্গদ্গদাক্ষরভাষিণী ॥ মমাপ্যেবং মতির্জাতা ত্বমবোচঃ স্বয়ং যথা । স্বকল্পিতেন দ্রব্যেণ পূজয়েঽহং ত্রিলোচনং ॥ দেব্যুবাচ । সজয়ে বিজয়ে দেবি নাবেবম্ভূতয়োস্তদা । নয়নেষু সুজাতানি অমলাশ্রুজলানি চ ॥ তানি নৌ নয়নেভ্যশ্চ নিপেতুর্ভুবি হে সখি । ততো জাতা ক্রমাঃ পৃথ্ব্যাং চত্বারো বিমলপ্রভাঃ । খ্যাতা আমলকী নাম্না জাতা কাদমলাদ্যতঃ ॥ শ্যামলচ্ছদবৃন্দান্তে কর্ব্বুরস্কন্ধমূলকাঃ । শিরাগ্রথিতপত্রালী পত্রমালাকপত্রকা । বিল্বস্য চ তুলস্যাশ্চ যে গুণাঃ কথিতাঃ সখি ॥ তে তে গুণাঃ সর্ব্বএব আমলক্যাং সমাহিতাঃ । পত্রমালাদলৈরস্যাঃ শিববিষ্ণু সুরেশ্বরৌ ॥ সর্ব্বথা পূজিতৌ স্যাতাং সখ্যৌ নাস্ত্যত্র সংশয়ঃ । মাঘে মাসি সিতায়াং তামেকাদশ্যাং

সমুদ্ভবাং ॥ শুভামামলকীং দৃষ্ট্বা সমেতাঃ সর্ব্বদেবতাঃ। ঋষয়স্তে সশিষ্যাশ্চ হর্ষমাপুঃ পরং তদা। শিবাচ্যুতস্বরূপাঞ্চ দদৃশুস্তুষ্টুবুস্তদা ॥ * ॥ অস্যা নমস্কারমন্ত্রাদিঃ। নমাম্যামলকীং দেবীং পত্রমালাদ্যলঙ্কৃতাং। শিববিষ্ণুপ্রিয়াং দিব্যাং শ্রীমতীং সুন্দরপ্রভাং ॥ এতেন খলু মন্ত্রেণ সর্ব্বা অস্যাঃ ক্রিয়া মতাঃ। এতামুদ্দিশ্য তীর্থানি ত্রীণ্যুক্তানি মনীষিভিঃ ॥ বিল্ববৃক্ষবদেবেহ পৃথিব্যাং কর্ম্মণাং স্থলে। সিষিচুস্তামামলকীং সর্ব্বতীর্থজলৈর্দ্বিজাঃ॥ অথ সর্ব্বসুরাণাঞ্চ মুনীনাঞ্চ তদাগ্রতঃ। ময়া সংপূজিতঃ কৃষ্ণঃ শ্রীশ্চ শম্ভুমপূজয়ৎ ॥ তদা জয়জয়ধ্বানো বভূব ক্ষিতিমণ্ডলে। আকাশে পুষ্পবৃষ্টিশ্চ শঙ্খশব্দাশ্চ পুষ্কলাঃ॥ দৃষ্ট্বা হ্যামলকী দেবী দধারানন্দমুত্তমং। তেন ধাত্রীতি নাম্নাপি রাজত্যামলকী শুভা ॥ নমস্কৃত্য হ্যামলকীং গতা দেবা দ্বিজাস্তথা। ব্রহ্মবিষ্ণুশিবাশ্চাপি তত্রাধিষ্ঠানমাস্থিতাঃ॥ জাতা হ্যামলকী দেবী পরমানন্দদায়িনী। মান্যা স্থাপ্যা চ পূজ্যা চ প্রণন্তব্যা সখীত্বিয়ং ॥ ইতি বৃহদ্ধর্ম্মপুরাণে আমলকীপ্রাদুর্ভাবঃ ১২ অধ্যায়ঃ ॥ * ॥ একাদশ্যাং তত্র বিষ্ণুপ্রীতির্যথা। তুষ্যত্যামলকৈর্বিষ্ণুরেকাদশ্যাং বিশেষতঃ। শ্রীকামঃ সর্ব্বদা স্নানং কুর্ব্বীতামলকৈর্ন্নরঃ ॥ ইতি গারুড়ে ২১৫ অধ্যায়ঃ ॥

**আমবাতঃ** (পুং) স্বনামখ্যাতরোগবিশেষঃ। তস্য নিদানপূর্ব্বিকাং সংপ্রাপ্তিমাহ। বিরুদ্ধাহারচেষ্টস্য মন্দাগ্নের্নিশ্চলস্য চ ॥ স্নিগ্ধং ভুক্তবতো হ্যন্নং ব্যায়ামং কুর্ব্বতস্তথা ॥ বায়ুনা প্রেরিতো হ্যামঃ শ্লেষ্মস্থানং প্রধাবতি। তেনাত্যর্থমপকোঽসৌ ধমনীভিঃ প্রপদ্যতে ॥ বাতপিত্তকফৈর্ভূয়ো দূষিতঃ সোঽন্নজো রসঃ। স্রোতাংস্যভিষ্যন্দয়তি নানাবর্ণোঽতিপিচ্ছিলঃ॥ জনয়ত্যগ্নিদৌর্ব্বল্যং হৃদয়স্য চ গৌরবং। ব্যাধীনামাশ্রয়ো হ্যেষ আমসংজ্ঞোঽতিদারুণঃ॥ বিরুদ্ধাহারচেষ্টস্য বিরুদ্ধাহারঃ ক্ষীরমৎস্যাদি। বিরুদ্ধা চেষ্টা ভুক্ত্বা ব্যায়ামাদি। তদ্যুক্তস্য। নিশ্চলস্য নির্ব্ব্যাপারস্য। স্নিগ্ধং ভুক্তবতো হ্যন্নং ব্যায়ামং কুর্ব্বত ইতি মিলিতো হেতুঃ। শ্লেষ্মস্থানং আমাশয়সন্ধ্যাদি। তেন শ্লেষ্মস্থানগতেন অত্যর্থং অপকঃ। পিত্তস্থানগমনে তু পকোঽভবিষ্যদিত্যভিপ্রায়ঃ। অসৌ আমঃ ধমনীভিঃ প্রপদ্যতে ধমনীমার্গৈশ্চলতি। ভূয়ো দূষিতঃ অতিশয়েন দূষিতঃ। সোঽন্নজো রসঃ। আমঃ স্রোতাংসি অভিষ্যন্দয়তি সংস্তভ্য রসবহশিরাবরোধং কৃত্বা স্রোতাংসি গুরূণি করোতি। নানাবর্ণঃ বাতাদিজনিতবর্ণভেদান্নানাবর্ণঃ ॥ * ॥ আমস্য লক্ষণমাহ। অজীর্ণাৎ যো রসো জাতঃ সঞ্চিতো হি ক্রমেণ বৈ। আমসংজ্ঞাং স লভতে শিরোগাত্ররুজাকরঃ ॥ অজীর্ণাৎ ভুক্তাদজীর্ণাৎ ॥ * ॥ আমবাতস্য সামান্যং লক্ষণমাহ। যুগপৎ কুপিতাবেতৌ ত্রিকসন্ধিপ্রবেশকৌ। স্তব্ধঞ্চ কুরুতে গাত্রমামবাতঃ স উচ্যতে ॥

এতৌ বাতকফৌ । ত্রিকসন্ধিপ্রবেশকৌ বেদনয়েতি বোদ্ধব্যৌ ॥ * ॥ তন্ত্রান্তরে তস্য লক্ষণান্তরমাহ। অঙ্গমর্দোঽরুচিস্তৃষ্ণা-স্যালস্যং গৌরবং জ্বরঃ। অপাকঃ শূল-তাঙ্গানাং আমবাতস্য লক্ষণং ॥ * ॥ অস্যৈবাতিবৃদ্ধস্য লক্ষণমাহ। স কষ্টঃ সর্ব্বরোগাণাং যদা প্রকুপিতো ভবেৎ। হস্ত-পাদশিরোগুল্‌ফত্রিকজানূরুসন্ধিষু॥করোতি সরুজং শোথং যত্র দোষঃ প্রপদ্যতে। স দেশো রুজ্যতেঽত্যর্থং ব্যাবিদ্ধইব বৃশ্চিকৈঃ ॥ জনয়েৎ সোঽগ্নিদৌর্ব্বল্যং প্রসেকারুচিগৌরবং। উৎসাহহানিং বৈরস্যং দাহঞ্চ বহুমূত্রতাং ॥ কুক্ষৌ কঠিনতাং শূলং তথা নিদ্রাবিপর্য্যয়ং। তৃট্‌ছর্দিশ্রমমূর্চ্ছাশ্চ হৃদ্‌গ্রহং বিড়্‌বিবদ্ধতাং॥ জাড্যান্ত্রকূজমানাহ কষ্টাংশ্চান্যানুপদ্রবান্। যদা প্রকুপিতো ভবেৎ প্রকর্ষেণ কুপিতঃ স্যাত্তদা বক্ষ্যমাণানুপদ্রবান্ করোতি। তানাহ হস্তেত্যাদি। যত্র দোষঃ দুষ্ট আমঃ প্রপদ্যতে গচ্ছতি। জাড্যং অকর্ম্মণ্যত্বং। অন্যানুপদ্রবান্ কলায়খঞ্জত্বাদীন্ ॥ * ॥ তস্যৈব বিশিষ্টানি লক্ষণান্যাহ। পিত্তা-দ্দাহং সরাগঞ্চ সশূলং পবনাত্মকং। স্তিমিতং গুরুকণ্ডূকং কফজুষ্টং তমা-দিশেৎ॥ গুরুকণ্ডূকং বহুকণ্ডূকং॥ * ॥ তস্যাসাধ্যত্বাদিকমাহ। একদোষানুগঃ সাধ্যো দ্বিদোষো যাপ্য উচ্যতে। সর্ব্বদেহচরঃ শোথঃ সকষ্টঃ সান্নিপাতিকঃ ॥ * ॥ * ॥ অথ আমবাতস্য চিকিৎসা। লঙ্ঘনং স্বেদনং তিক্তং দীপনানি কটূনি চ। রেচনং স্নেহনমপি বস্তয়শ্চামমারুতে ॥ রুক্ষস্বেদো বিধাতব্যো বালুকাপুটকৈ-রিহ। উপনাহাশ্চ কর্ত্তব্যাস্তেঽপি স্নেহ-বিবর্জ্জিতাঃ ॥ * ॥ বাস্তুকমত্র বৃন্তাকং পটোলং কারবেল্লকং। কোরদূষা যবাঃ পথ্যাঃ ষষ্টিকাঃ শালয়োঽনবাঃ॥ অনবাঃ পুরাণাঃ। লাবকানাং তথা মাংসং হিতং তক্রেণ সংস্কৃতং ॥ হিতশ্চ যূষঃ কৌলত্থঃ কলারশ্চণকস্য চ ॥ * ॥ চিত্রকং কটুকা পথ্যা নাগরাতিবিষামৃতাঃ॥ চূর্ণিতাঃ কোষ্ণ-তোয়েন পিবেদামানিলাপহাঃ। ১। শটী শুণ্ঠী শিবাসোগ্রা দেবাহ্বাতিবিষামৃতাঃ॥ ক্বথিতাঃ প্রপিবেদামবাতী রুক্ষঞ্চ ভোজ-য়েৎ। দেবাহ্বা দেবদারু।২। আম-বাতগজেন্দ্রস্য শরীরবনচারিণঃ। একএব নিহন্তায়মেরণ্ডস্নেহকেশরী। ৩। এরণ্ড-স্নেহযুক্তাং হরীতকীং ভক্ষয়েদ্বিধিবৎ। আমানিলার্ত্তিযুক্তো যুক্তো বৃদ্ধ্যা চ গৃধ্রস্যা। ৪। শ্বেতং পুনর্ণবামূলং তেন তৈলং প্রসাধয়েৎ। আমবাতরুজং হন্তি পাদাভ্যঞ্জনমর্দনাৎ। ৫। আরগ্বধস্য পত্রাণি ভৃষ্টানি কটুতৈলতঃ। আমবাতপ্রশান্ত্যর্থং খাদেদ্ভক্তাবৃতানি চ। ৬। শুণ্ঠীগোক্ষুরক-ক্বাথঃ প্রাতঃ প্রাতর্নিষেবিতঃ। আমবাতে কটীশূলে পাচনং রুক্‌প্রণাশনং। ৭। কটীশূলে পিবেত্তৈলং এরণ্ডফলসম্ভবং। মহৌষধগুড়ূচ্যোশ্চ ক্বাথং মাগধিকাযুতং॥ বিশোধ্যৈরণ্ডবীজানি পিষ্ট্বা ক্ষীরে বিপা-চয়েৎ। তৎপায়সং কটীশূলে গৃধ্রস্যাং পরমৌষধং ॥ ৮ ॥ রাস্না বাতারিমূলঞ্চ

বাসকঃ সত্বুরালভঃ। শটীদারুবলামুস্তনাগরাতিবিষাভয়াঃ ॥ শ্বদংষ্ট্রাব্যাধিঘাতশ্চ মিষিধান্যং পুনর্ণবা। অশ্বগন্ধামৃতা কৃষ্ণা বৃদ্ধদারঃ শতাবরী ॥ বচা সহচরশ্চৈব চবিকা বৃহতীদ্বয়ং। সমভাগানি সর্ব্বাণি রাস্নাত্র ত্রিগুণা মতা ॥ পিবেৎ কষায়মেতেষামষ্টভাগাবশেষিতং। ক্ষিপ্ত্বা নাগরচূর্ণঞ্চ প্রক্ষেপোঽত্র যথামলং ॥ সর্ব্বেষু বাতরোগেষু সামেষু তু বিশেষতঃ। পক্ষাঘাতেঽর্দিতে কম্পে কুব্জে সন্ধিগতেঽনিলে ॥ জানুজঙ্ঘাস্থিপীড়াসু গৃধ্রস্যাঞ্চ হনুগ্রহে। উরুস্তম্ভে বাতরক্তে বিসূচ্যাং ক্রোষ্টুশীর্ষকে॥ হৃদাময়ে চ ভুর্নাম্নি যোনিশুক্রাময়েষু চ। পুংসাং মেঢ্রগতে বাতে স্ত্রীণাং বন্ধ্যাময়ে তথা ॥ যোষিতাং গর্ভদং মুখ্যং নাস্ত্যস্মাৎ পরমৌষধং। মহারাস্নাদিকঃ ক্বাথো বেধসায়ং বিনির্ম্মিতঃ ॥ মহারাস্নাদিক্বাথঃ। ৯। অজমোদামরিচপিপ্পলীবিড়ঙ্গসুরদারুচিত্রকশতাহ্বাঃ। সৈন্ধবমাগধিমূলং ভাগা নবকস্য পলিকাঃ স্যুঃ ॥ শুণ্ঠী দশপলিকা স্যাৎ পলানি তাবন্তি বৃদ্ধদারস্য। অভয়া পলানি পঞ্চ শ্লক্ষ্ণং চূর্ণং বিধাপয়েদেষাং ॥ সমগুড়বটকানদতশ্চূর্ণং বা কোষ্ণবারিণা পিবতঃ। নশ্যন্ত্যামানিলজাঃ সর্ব্বে রোগাঃ সুদারুণাঃ শীঘ্রং ॥ আনাহশূলতূনী প্রতিতূনী গৃধ্রসী গুল্মঃ। কটিপৃষ্ঠপরিস্ফুটনং স্ফুটনং চৈবাস্থিজঙ্ঘয়োস্তীব্রং ॥ শ্বযথুস্তথাঙ্গসন্ধিষু যে চান্যেঽপ্যামবাতজা রোগাঃ। সর্ব্বে প্রয়ান্তি শান্তিং তমইব সূর্য্যাংশুবিধ্বস্তং ॥

অজমোদাদিচূর্ণমোদকঃ। ১০। আমবাতে হিতো হ্তীব পথ্যাদিগু গ্গুলুর্মতঃ। তথৈব যোগরাজাখ্যশ্চরকাদিচিকিৎসকৈঃ। ১১। নাগরস্য পলান্যষ্টৌ ঘৃতস্য কুড়বং তথা। ক্ষীরাঢ়কসমাযুক্তং খণ্ডস্যার্দ্ধশতং পলং ॥ ব্যোষত্রিজাতকদ্রব্যাৎ প্রত্যেকঞ্চ পলং পলং। নিঃক্ষিপেচ্চূর্ণিতং তত্র খাদেদগ্নিবলং যথা ॥ আমবাতপ্রশমনং ধাতুপুষ্টিকরং পরং। বল্যমায়ুষ্যমোজস্যং বলীপলিতনাশনং ॥ শুণ্ঠীখণ্ডঃ। ১২। মেথিকায়াঃ পলান্যষ্টৌ শুণ্ঠ্যা অষ্টপলানি চ। তয়োশ্চূর্ণং পটে পূতং দুগ্ধে মৃদ্বগ্নিনা পচেৎ ॥ দুগ্ধাঢ়কযুগে গব্যং ঘৃতমষ্টপলং ক্ষিপেৎ। তত্তাবৎ সুপচেৎ যাবৎ ভবেদতিঘনং পয়ঃ ॥ পুনঃ পচেৎ শনৈস্তত্র দত্ত্বাঢ়কমিতাং সিতাং। ততঃ পাকে সুবিজ্ঞাতে জ্বলনাদবতারয়েৎ ॥ মরিচং পিপ্পলী শুণ্ঠী কণামূলং সচিত্রকং। যবানী জীরকো ধান্যং কারবী শতপুষ্পিকা ॥ জাতীফলং শটীত্বক্ চ পত্রকং ভদ্রমুস্তকং। গৃহ্নীয়াৎ পলমেতেষাং সর্ব্বেষাঞ্চ পৃথক্ পৃথক্ ॥ ষড়ক্ষং নাগরং তত্র মরিচং চ ষড়ক্ষকং। এষাং চূর্ণং পরিক্ষিপ্য সর্ব্বং সংমিশ্র্য রক্ষয়েৎ॥ এতদ্ধি ভেষজং প্রোক্তং মেথিকাপাকসংজ্ঞকং। ভক্ষয়েৎ পলমাত্রং তৎ যথা চাগ্নিবলং তথা ॥ আমবাতং নিহন্ত্যেতৎ সর্ব্বাংশ্চ পবনাময়ান্। জ্বরাংশ্চ বিষমান্ হন্তি পাণ্ডুরোগং সকামলং ॥ হন্ত্যুন্মাদমপস্মারং প্রমেহান্ বাতশোণিতং। অম্লপিত্তং শীতপিত্তং শিরঃ-

পীড়াং দৃগাময়ং ॥ প্রদরং সূতিকারোগং হন্যাদেতন্ন সংশয়ঃ। বপুষঃ পুষ্টিকৃদ্বল্যং বীর্য্যবৃদ্ধিকরং পরং ॥ মেথিকাপাকঃ। ১৩। রসো রসোনস্য পিচুপ্রমাণঃ ক্ষিপেচ্চ তত্রাক্ষমিতং ঘৃতং গোঃ। পিবেত্তুভে তেন দহত্যবশ্যং শিখীব তূলং হি মহামবাতং ॥ সামান্যবাতব্যাধিচিকিৎসায়াং হি লিখিতং রসোনাষ্টকমামবাতে অতিগুণদং। ১৪। সৈন্ধবং শ্রেয়সী রাস্না শতপুষ্পা যবানিকা। স্বর্জিকা মরিচং কুষ্ঠং শুণ্ঠী সৌবর্চ্চলং বিড়ং ॥ বচাজমোদা জরণঃ পৌষ্করং মধুরং কণা। এতান্যর্দ্ধপলাংশানি সূক্ষ্মকল্কানি কারয়েৎ ॥ প্রস্থমেরণ্ডতৈলস্য প্রস্থোঽম্বু শতপুষ্পজং। কাঞ্জিকং দ্বিগুণং দত্ত্বা মস্তু চ দ্বিগুণং তথা ॥ এতৎ সংভৃত্য সংভারং শনৈর্মৃদ্বগ্নিনা পচেৎ। সিদ্ধমেতৎ প্রযোক্তব্যমামবাতহরং পরং ॥ পানে চাভ্যঞ্জনে বস্তৌ কুরুতেঽগ্নিবলং ভৃশং। বাতার্ত্তে বংক্ষণে শূলে কটীজানূরুসন্ধিজে ॥ তথা হৃৎপার্শ্বজে শূলে শস্তং শ্লেষ্মণি পীড়িতে। অন্যাংশ্চানিলজান্রোগান্ নাশয়ত্যাশু দেহিনাং॥ বৃহৎসৈন্ধবাদ্যং তৈলং। ১৫। দধিমৎস্যগুড়ক্ষীরপোতকীমাষপিষ্টকং। বর্জ্জয়েদামবাতার্ত্তো গুড়মাংসমনূপজং ॥ ইত্যামবাতাধিকারঃ। ইতি ভাবপ্রকাশঃ ॥

আমাতীসারঃ (পুং) ষট্প্রকারাতীসারমধ্যে রোগবিশেষঃ। তস্য সংপ্রাপ্তিরূপে। অন্নাজীর্ণাৎ প্রদ্রুতাঃ ক্ষোভয়ন্তঃ কোষ্ঠং দোষা ধাতুসংঘান্ মলাংশ্চ। নানাবর্ণং নৈকশঃ সারয়ন্তি শূলোপেতং ষষ্ঠমেনং বদন্তি ॥ সংসৃষ্টমেভির্দোষৈস্তু ন্যস্তমপ্স্ববসীদতি। পুরীষং ভৃশদুর্গন্ধি পিচ্ছিলং চামসংজ্ঞিতং ॥ ইতি নিদানং ॥

আমাত্যঃ (ত্রি) অমাত্যঃ। মন্ত্রী। ইতি দ্বিরূপকোষঃ ॥

আমানস্যং (ক্লী) আমনস্যং। পীড়া। দুঃখং। ইতি শব্দরত্নাবলী ॥

আমান্নং (ক্লী) অপক্কান্নং। কাঁচাচাউল ইতি ভাষা। তদ্দানমন্ত্রো যথা। আমান্নং তে প্রযচ্ছামি ফলতাম্বূলসংযুতং। সঘৃতং পরমং দিব্যং ময়া ভক্ত্যা নিবেদিতং ॥ ইতি বৃহন্নন্দিকেশ্বরপুরাণোক্তদুর্গোৎসবপদ্ধতিঃ ॥ * ॥ বলাৎ চাণ্ডালাদিস্বামিকাপকান্নভোজনপ্রায়শ্চিত্তং যথা। চাণ্ডালান্নং ভুক্ত্বা ত্রিরাত্রমুপবসেৎ সিদ্ধং ভুক্ত্বা পরাকঃ। ইতি বলাদ্ভোজনবিষয়ং। ইতি প্রায়শ্চিত্তবিবেকঃ ॥ ত্রিরাত্রমামান্নবিষয়ং। পরত্র সিদ্ধমিত্যুক্তেঃ। পরাকমাহ মনুঃ। যতাত্মনোঽপ্রমত্তস্য দ্বাদশাহমভোজনং। পরাকো নাম কৃচ্ছ্রোঽয়ং সর্ব্বপাপাপনোদনঃ ॥ তেনাত্রামান্নে সিদ্ধান্নপ্রায়শ্চিত্ততুরীয়ভাগবিধানাদজ্ঞানাদাবপি তত্তুরীয়কল্পনা ইতি। ইতি প্রায়শ্চিত্ততত্ত্বং ॥ * ॥ আমান্নদ্বারা কর্ত্তব্যশ্রাদ্ধানি যথা। আপদ্যনগ্নৌ তীর্থে চ চন্দ্রসূর্য্যগ্রহে তথা। আমশ্রাদ্ধং দ্বিজৈঃ কার্য্যং শূদ্রেণ তু সদৈব হি ॥ ইতি শ্রাদ্ধতত্ত্বধৃতপ্রচেতোবচনং ॥ অপিচ। যোগিনীতন্ত্রে। নিরগ্নেরামশ্রাদ্ধে তু অন্নং ন ক্ষালয়েৎ কচিৎ। বৃদ্ধৌ চ

ক্ষালয়েদন্নং সংক্রমে গ্রহণেষু চ ॥ ইতি তিথ্যাদিতত্ত্বং ॥

আমাশয়ঃ (পুং) অপক্কস্থানং। তত্তু নাভি-স্তনয়োর্ম্মধ্যভাগঃ। ইতি শব্দচন্দ্রিকা ॥

আমিষং (ক্লী পুং) মাংসং। ইত্যমরঃ ॥ ভোগ্যবস্তু। সংভোগঃ। উৎকোচঃ। ইতি মেদিনী ॥ সুন্দরাকাররূপাদি। লোভ-সঞ্চয়ঃ। ইতি হেমচন্দ্রঃ ॥ লাভঃ। কাম-গুণঃ। রূপং। ভোজনং। ইতি হারাবলী ॥

আমিষপ্রিয়ঃ (পুং) কঙ্কপক্ষী। ইতি রাজ-নির্ঘণ্টঃ ॥ মাংসাভিলাষিণি ত্রি ॥

আমিষাশী [ন্] (ত্রি) মৎস্যমাংসভোজন-শীলঃ। তৎপর্য্যায়ঃ। শৌষ্কলঃ ২। ইত্য-মরঃ ॥

আমিষী (স্ত্রী) মিষী। জটামাংসী। ইতি কেচিৎ। ইত্যমরটীকায়াং ভরতঃ

আমিক্ষা (স্ত্রী) শৃতোষ্ণদুগ্ধে দধিযোগসম্ভবা যা। ক্ষীরসা ইতি খ্যাতা। ছানা ইতি কেচিৎ। ইত্যমরঃ ॥ তৎপর্য্যায়ঃ। দধি-কূর্চ্চিকা ২ পয়স্যা ৩ ক্ষীরসন্তালিকা ৪। ইতি রাজবল্লভাদয়ঃ ॥

আমীক্ষা (স্ত্রী) আমিক্ষা। আবর্ত্তিতে তপ্তে ক্ষীরে দধিযোগাৎ যা বটিকাকারা বিকৃতি-র্জায়তে সা। ইতি পুরুষোত্তমঃ ॥

আমুক্তঃ (ত্রি) পিনদ্ধঃ। পরিহিতবস্ত্রাদিঃ। ইত্যমরঃ ॥ পরিহিতকবচব্যক্তিঃ ॥

আমুপঃ (পুং) কণ্টকযুক্তবংশবিশেষঃ। বেউড়বাঁশ ইতি খ্যাতঃ। ইতি শব্দচন্দ্রিকা ॥

আমুষ্যায়ণঃ (ত্রি) খ্যাতবংশোদ্ভবঃ। সৎকুল-জাতঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

আমূলং (ক্লী) মূলপর্য্যন্তং ॥

আমোদঃ (পুং) অতিদূরগামিগন্ধঃ। ইত্যমরঃ ॥ গন্ধঃ। হর্ষঃ। ইতি মেদিনী ॥ সুমহদ্গন্ধঃ। ইতি শব্দরত্নাবলী ॥

আমোদনং (ক্লী) আমোদকরণং। হর্ষণং ॥

আমোদিতঃ (ত্রি) আনন্দিতঃ। সুগন্ধিতঃ। সদ্গন্ধযুক্তঃ। যথা। পারিজাতপ্রসূনোত্থ-গন্ধামোদিতদিঙ্মুখে। ইতি শিবরাত্রিব্রত-কথা ॥ আনন্দিতঃ। আমোদশব্দাদিত-প্রত্যয়েন নিষ্পন্নঃ ॥

আমোদী [ন্] (ত্রি) মুখবাসনঃ। ইত্যমরঃ ॥ কর্পূরাদিবটিকাকৃতমুখগন্ধঃ। ইতি সার-সুন্দরী ॥ মুখবাসনবটিকাদিঃ। আমোদ-যুক্তঃ কর্পূরাদিরামোদী। ইতি ভরতঃ ॥ নানাদ্রব্যরচিত একৈকশ এব বা কর্পূরা-দিভির্মুখোপযোগ্যমুখবাসনবটিকাদিঃ। ইতি সর্ব্বস্বং ॥ গন্ধযুক্তঃ। হর্ষবিশিষ্টঃ ॥

আম্নায়ঃ (পুং) বেদঃ। সংপ্রদায়ঃ। গুরু-পরম্পরাপ্রাপ্তোপদেশ ইতি যাবৎ ॥ ইত্যমরঃ ॥ নিগমঃ। উপদেশঃ। ইতি মেদিনী ॥ কুলং। আগমঃ। ইতি হেম-চন্দ্রঃ ॥ কুলক্রমঃ। ইতি শব্দরত্নাবলী ॥

আম্বিকেয়ঃ (পুং) ধৃতরাষ্ট্রো রাজা। ইতি ত্রিকাণ্ডশেষঃ ॥ কার্ত্তিকেয়ঃ ॥

আম্রঃ (পুং) ফলবৃক্ষবিশেষঃ। আম আঁব ইতি ভাষা। তৎপর্য্যায়ঃ। চূতঃ ২ রসালঃ ৩। অতিসৌরভশ্চেৎ সহকারঃ ৪। ইত্যমরঃ ॥ কামশরঃ ৫ কামবল্লভঃ ৬ কামাঙ্গঃ ৭ কীরেষ্টঃ ৮ মাধবদ্রুমঃ ৯ ভৃঙ্গাভীষ্টঃ ১০ সীধুরসঃ ১১ মধূলী ১২

কোকিলোৎসবঃ ১৩ বসন্তদূতঃ ১৪ অম্লফলঃ ১৫ মোদাখ্যঃ ১৬ মন্মথালয়ঃ ১৭ মধ্বাবাসঃ ১৮ সুমদনঃ ১৯ পিকরাগঃ ২০ নৃপপ্রিয়ঃ ২১ প্রিয়াম্বুঃ ২২ কোকিলাবাসঃ ২৩। ইতি রাজনির্ঘণ্টঃ॥ মাকন্দঃ ২৪ ষট্পদাতিথিঃ ২৫ মধুব্রতঃ ২৬ বসন্তদ্রুঃ ২৭ পিকপ্রিয়ঃ ২৮ স্ত্রীপ্রিয়ঃ ২৯ গন্ধবন্ধুঃ ৩০ অলিপ্রিয়ঃ ৩১। ইতি শব্দরত্নাবলী ॥ মদিরাসখঃ ৩২। ইতি জটাধরঃ॥ বালাম্রফলগুণাঃ। বায়ুরক্তপিত্তকারিত্বং। ইতি রাজবল্লভঃ॥ অপিচ। কষায়ত্বং। অম্লরসত্বং। সুগন্ধিত্বং। কফাময়নাশিত্বং। অস্রকরত্বং। পিত্তপ্রকোপবায়ুরক্তদোষপটুত্বাদিরুচিপ্রদত্বঞ্চ। তচ্চ বদ্ধাস্থিতাদৃক্। ইতি রাজনির্ঘণ্টঃ॥ *॥ মধ্যাম্রগুণাঃ। পিত্তকারিত্বং॥ *॥ পক্কাম্রগুণাঃ। বর্ণরুচিমাংসশুক্রবলকারিত্বং। পিত্তাবিরোধিত্বং। বায়ুনাশিত্বং। হৃদ্যত্বং। গুরুত্বং। অনুলোমনত্বং। ইতি রাজবল্লভঃ॥ অপিচ। ত্রিদোষশমতাকারিত্বং। স্বাদুত্বং। পুষ্টিজনকত্বং। অধিকধাতুপ্রচয়দারিত্বং। তৃপ্তিকান্তিকারিত্বং। তৃষ্ণাশ্রমশমনত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ *॥ মধুযুক্তাম্রগুণাঃ। ক্ষয়রোগপ্লীহবাতশ্লেষ্মরোগনাশিত্বং॥ *॥ ঘৃতযুক্তাম্রগুণাঃ। বাতপিত্তনাশিত্বং। অগ্নিবলবর্ণকারিত্বঞ্চ॥ *॥ দুগ্ধযুক্তাম্রগুণাঃ। শীতলত্বং। স্বাদুত্বং। গুরুত্বং। স্নিগ্ধত্বং। ভেদকত্বং। বাতপিত্তহারিত্বং। শুক্ররক্তবলবর্দ্ধকত্বঞ্চ॥ *॥ তৎফলাস্থিগুণাঃ। তৃষ্ণাচ্ছর্দ্দিমেহাতীসারনাশিত্বং। ইতি রাজবল্লভঃ॥ *॥ তৎত্বগ্গুণঃ। কষায়ত্বং॥ *॥ তন্মূলগুণাঃ। সুগন্ধিত্বং। কষায়ত্বং। রুচিকারিত্বং। সংগ্রাহিত্বং। শীতলত্বঞ্চ॥ *॥ তৎপুষ্পগুণৌ। রুচিকারিত্বং। অগ্নিদীপনত্বঞ্চ॥ *॥ আম্রপেষীগুণাঃ। কাষায়ত্বং। অম্লত্বং। ভেদকত্বং। কফবাতনাশিত্বঞ্চ॥ *॥ কৃত্রিমপক্কাম্রগুণঃ॥ অম্লরসহানের্মধুরত্বাচ্চ পিত্তনাশিত্বং॥ *॥ চুষিতাম্রগুণাঃ॥ পরমরুচিবলবীর্য্যকারিত্বং। লঘুত্বং। শীতলত্বং। শীঘ্রপাকিত্বং। বাতপিত্তহারিত্বং। সারকত্বঞ্চ॥ *॥ তদ্গালিতরসগুণাঃ। বলকারিত্বং। গুরুত্বং। বাতহরত্বং। সারকত্বং। হৃদ্যত্বং। তৃপ্তিজনকত্বং। অতিশয়বৃংহণত্বং। কফবর্দ্ধকত্বঞ্চ॥ *॥ তৎখণ্ডগুণাঃ॥ গুরুত্বং। রোচকত্বং। গুরুপাকিত্বং। মধুরত্বং। বৃংহণত্বং। বলকারিত্বং। শীতলত্বং। বাতনাশিত্বঞ্চ॥ *॥ অতিশয়াম্রভক্ষণগুণাঃ॥ মন্দাগ্নিবিষমজ্বররক্তাময়বদ্ধগুদোদরনয়নাময়কারিত্বং। এতদম্লাম্রবিষয়ং নতু মধুরাম্রপরং। মধুরস্য পরং নেত্রহিতত্বাদিগুণত্বাৎ॥ যদ্যতিশয়ভক্ষণং করোতি তদা শুণ্ঠীজলানুপানং। অথবা সৌবর্চ্চলেন সহ ক্ষীরং প্রযোক্তব্যং॥ *॥ তৎপল্লবগুণাঃ। রুচিকারিত্বং। কফপিত্তনাশিত্বঞ্চ॥ *॥ আম্রমামংজলং স্বিন্নং মর্দ্দিতংদৃঢ়পাণিনা। সিতাশীতাম্বুসংযুক্তং কর্পূরমরিচান্বিতং॥ প্রপাণকমিদং শ্রেষ্ঠং ভীমসেনেন নির্ম্মিতং। সদ্যো রুচিকরং

বল্যং শীঘ্রমিন্দ্রিয়তর্পণং। ইতি রাজনির্ঘণ্টঃ॥

আম্রগন্ধকঃ (পুং) সমষ্ঠিলবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

আম্রপেষী (স্ত্রী) শুষ্কাম্রখণ্ডং। আমৃষী ইতি ভাষা। অস্যা গুণাঃ। অম্লত্বং। কষায়ত্বং। উষ্ণত্বং। ভেদকত্বং কফবাতনাশিত্বঞ্চ। ইতি রাজবল্লভঃ॥

আম্রাতঃ (পুং) আম্রাতকঃ। ইতি শব্দমালা॥

আম্রাতকঃ (পুং) বৃক্ষবিশেষঃ। আমড়া ইতি ভাষা। তৎপর্য্যায়ঃ। পীতনঃ ২ কপীতনঃ ৩। ইত্যমরঃ॥ বর্ষপাকী ৪। ইতি রত্নমালা॥ পীতনকঃ ৫ কপিচূড়ঃ ৬ অভ্রবাটিকঃ ৭ ভৃঙ্গীফলঃ ৮ বসাঢ্যঃ ৯ তনুক্ষীরঃ ১০ কপিপ্রিয়ঃ ১১ অম্বরাতকঃ ১২ অম্বরীয়ঃ ১৩ কপিচূড়ঃ ১৪। ইতি জটাধরঃ॥ তদপক্কফলগুণাঃ। কষায়ত্বং। অম্লত্বং। হৃৎকণ্ঠহর্ষণত্বঞ্চ। তৎপক্কফলগুণাঃ। মধুরাম্লত্বং। স্নিগ্ধত্বং। পিত্তকফনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ অপিচ। তৃপ্তিবলবিষ্টম্ভাজীর্ণকারিত্বং। গুরুত্বঞ্চ। ইতি রাজবল্লভঃ॥ আম্রাবর্ত্তঃ। ইতি রাজনির্ঘণ্টঃ॥

আম্রাবর্ত্তঃ (পুং) আম্রশুষ্করসঃ। তৎপর্য্যায়ঃ। আম্রাতকঃ ২। আমৃসত্ব ইতি ভাষা। অস্য গুণাঃ। তৃষ্ণাচ্ছর্দ্দিবাতপিত্তহরত্বং। সারকত্বং। রুচিকারিত্বং। সূর্য্যাংশুভিঃ পাকাৎ লঘুত্বঞ্চ। পক্বস্য সহকারস্য কটে বিস্তারিতো রসঃ। ঘর্ম্মশুষ্কো মুহুর্দত্ত আম্রাতক ইতি স্মৃতঃ॥ ইতি রাজনির্ঘণ্টঃ॥

আম্রেড়িতং (ক্লী) দ্বিস্ত্রিরুক্তং। দুই তিন বার বলা ইতি ভাষা। ইত্যমরঃ॥

আম্লবেতসঃ (পুং) অম্লবেতসবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

আম্লা (ত্রি) তিন্তিড়ীবৃক্ষঃ। ইতি শব্দরত্নাবলী॥ শ্রীবল্লী। ইতি রাজনির্ঘণ্টঃ॥

আম্লিকা (স্ত্রী) তিন্তিড়ীবৃক্ষঃ। ইত্যমরটীকায়াং রায়মুকুটঃ॥ অম্লোদগারঃ। ইতি শব্দমালা॥

আম্লীকা (স্ত্রী) তিন্তিড়ীবৃক্ষঃ। ইত্যমরটীকা॥

আয়ঃ (পুং) ধনাগমঃ। প্রাপ্তিঃ। লাভঃ। স্ত্র্যগাররক্ষকঃ। ইতি হলায়ুধঃ॥

আয়ঃশূলিকঃ (ত্রি) তীক্ষ্ণকর্ম্মা। ক্ষিপ্রকারী। ইতি ভূবিপ্রয়োগঃ॥

আয়তঃ (ত্রি) দীর্ঘঃ। লম্বা ইতি ভাষা। ইত্যমরঃ॥

আয়তচ্ছদা (স্ত্রী) কদলীবৃক্ষঃ। ইতি ত্রিকাণ্ডশেষঃ॥

আয়তনং (ক্লী) যজ্ঞস্থানং। দেবস্থানং। তৎপর্য্যায়ঃ। চৈত্যং ২। ইত্যমরঃ॥

আয়তিঃ (স্ত্রী) উত্তরকালঃ। ভবিষ্যৎকালঃ। প্রভাবঃ। কোষদণ্ডজং তেজঃ। ইত্যমরঃ॥ দৈর্ঘ্যং। সঙ্গঃ। ইতি বিশ্বহেমচন্দ্রৌ॥ প্রাপণং। ইতি ধরণী॥

আয়ত্তঃ (ত্রি) অধীনঃ। বশীভূতঃ। ইত্যমরঃ॥

আয়ত্তিঃ (স্ত্রী) দিনং। স্নেহঃ। বশিত্বং। সামর্থ্যং। সীমা। ইতি বিশ্বঃ হেমচন্দ্রশ্চ॥ শয়নং। দৈর্ঘ্যং। প্রভাবঃ। ভবিষ্যৎকালঃ। ইতি ধরণী॥

আয়ল্লকং (ক্লী) উৎকণ্ঠা। ইতি হেমচন্দ্রঃ॥

আয়সং (ক্লী) লৌহং। ইতি ভরতঃ রাজনির্ঘণ্টশ্চ॥ অয়োনির্ম্মিতে ত্রি॥

আয়সী (স্ত্রী) লৌহময়কবচঃ। তৎপর্য্যায়ঃ। অঙ্গরক্ষিণী ২ জালিকা ৩ জালপ্রায়া ৪। ইতি হেমচন্দ্রঃ॥

আয়স্তঃ (ত্রি) তেজিতঃ। ক্ষিপ্তঃ। ক্লেশিতঃ। কুপিতঃ। হতঃ। ইতি মেদিনী॥

আয়াতং (ত্রি) আগতং। যথা। হংসযুক্তবিমানাগ্রে সাক্ষসূত্রকমণ্ডলুঃ। আয়াতা ব্রহ্মণঃ শক্তির্ব্রহ্মাণী সাভিধীয়তে॥ ইতি মার্কণ্ডেয়ে দেবীমাহাত্ম্যং॥

আয়ানং (ক্লী) স্বভাবঃ। ইতি জটাধরঃ॥ আগমনং॥

আয়ামঃ (পুং) দৈর্ঘ্যং। ইত্যমরঃ॥

আয়াসঃ (পুং) শ্রান্তিঃ। তৎপর্য্যায়ঃ। শ্রমঃ ২ ক্লমঃ ৩ ক্লেশঃ ৪ পরিশ্রমঃ ৫ প্রয়াসঃ ৬ ব্যায়ামঃ ৭। ইতি হেমচন্দ্রঃ॥

আয়ুঃ (পুং ক্লী) জীবিতব্যাপ্যকালঃ। ইতি জটাধরঃ॥

আয়ুঃ [স্] (ক্লী) জীবিতকালঃ। পরমায়ুঃ। ইত্যমরঃ॥ তৎপর্য্যায়ঃ। বিজীবিতং ২ নিত্যগঃ ৩ অনুবন্ধঃ ৪। পুরুষাঃ সর্ব্বসিদ্ধাশ্চ চতুর্ব্বর্ষশতায়ুষঃ। কৃতে ত্রেতাদিকেহপ্যেবং পাদশো হ্রসতি ক্রমাৎ॥ ইতি বৈদ্যকং॥ অরোগাঃ সর্ব্বসিদ্ধার্থাশ্চতুর্ব্বর্ষশতায়ুষঃ। কৃতে ত্রেতাদিষু হ্যেষামায়ুর্হ্রসতি পাদশঃ॥ ইতি মনুঃ॥ ঘৃতং। ইতি রাজনির্ঘণ্টঃ॥

আয়ুক্তঃ (ত্রি) কর্ম্মাধ্যক্ষঃ। তৎপর্য্যায়ঃ। নিয়োগী ২ কর্ম্মসচিবঃ ৩ ব্যাপৃতঃ ৪। ইতি হেমচন্দ্রঃ॥

আয়ুধঃ (পুং) অস্ত্রং। ইত্যমরঃ॥

আয়ুধধর্ম্মিণী (স্ত্রী) জয়ন্তীবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥

আয়ুধাগারং (ক্লী) অস্ত্রগৃহং। সেলাখানা ইতি খ্যাতং। ইতি মহাভারতে রাজধর্ম্মঃ॥ তত্র নিযুক্তস্য লক্ষণং যথা। স্থাপনাজাতিতত্ত্বজ্ঞঃ সততং প্রতিজাগৃতা। রাজ্ঞঃ স্যাদায়ুধাগারে দক্ষঃ কর্ম্মসু চোদ্যতঃ॥ ইতি মাৎস্যে ১৮৯ অধ্যায়ঃ॥

আয়ুধিকঃ (পুং) অস্ত্রজীবী। তৎপর্য্যায়ঃ। শস্ত্রাজীবঃ ২ কাণ্ডপৃষ্ঠঃ ৩ আয়ুধীয়ঃ ৪। ইত্যমরঃ॥

আয়ুধীয়ঃ (পুং) আয়ুধিকঃ। ইত্যমরঃ॥

আয়ুর্দ্রব্যং (ক্লী) ঔষধং। ইতি রত্নমালা॥

আয়ুর্ব্বেদঃ (পুং) অষ্টাদশবিদ্যান্তর্গতধন্বন্তরিপ্রণীতবিদ্যাবিশেষঃ। বৈদ্যকশাস্ত্রং। চিকিৎসাশাস্ত্রং। তত্তু অথর্ব্ববেদান্তর্গতং। যথা। বিধাতাথর্ব্বসর্ব্বস্বমায়ুর্ব্বেদং প্রকাশয়ন্। স্বনাম্না সংহিতাং চক্রে লক্ষশ্লোকময়ীমৃজুং॥ ইতি ভাবপ্রকাশঃ॥ চরণব্যূহমতে ঋগ্বেদস্যোপবেদঃ আয়ুর্ব্বেদঃ। অথর্ব্ববেদস্য শস্ত্রশাস্ত্রাণ্যুপবেদঃ॥ * ॥ অথায়ুর্ব্বেদস্য বিবরণং। ঋগ্‌যজুঃসামাথর্ব্বাখ্যান্ দৃষ্ট্বা বেদান্ প্রজাপতিঃ। বিচিন্ত্য তেষামর্থং চৈবায়ুর্ব্বেদং চকার সঃ॥ কৃত্বা তু পঞ্চমং বেদং ভাস্করায় দদৌ বিভুঃ। স্বতন্ত্রসংহিতাং তস্মাৎ

ভাস্করশ্চ চকার সঃ॥ ভাস্করশ্চ স্বশিষ্যেভ্য আয়ুর্ব্বেদং স্বসংহিতাং। প্রদদৌ পাঠয়ামাস তে চক্রুঃ সংহিতাস্ততঃ॥ তেষাং নামানি বিদুষাং তন্ত্রাণি তৎকৃতানি চ। ব্যাধিপ্রণাশবীজানি সাধ্বি মত্তো নিশাময়॥ ধন্বন্তরির্দ্দিবোদাসঃ কাশীরাজোঽশ্বিনীসুতৌ। নকুলঃ সহদেবোঽর্কিশ্চ্যবনো জনকো বুধঃ॥ জাবালো জাজলিঃ পৈলঃ করথোঽগস্ত্য এব চ। এতে বেদাঙ্গবেদজ্ঞাঃ ষোড়শ ব্যাধিনাশকাঃ॥ চিকিৎসাতত্ত্ববিজ্ঞানং নাম তন্ত্রং মনোরমং। ধন্বন্তরিশ্চ ভগবান্ চকার প্রথমে সতি॥ চিকিৎসাদর্পণং নাম দিবোদাসশ্চকার সঃ। চিকিৎসাকৌমুদীং দিব্যাং কাশীরাজশ্চকার সঃ॥ চিকিৎসাসারতন্ত্রঞ্চ ভ্রমঘ্নং চাশ্বিনীসুতৌ। তন্ত্রং বৈদ্যকসর্ব্বস্বং নকুলশ্চ চকার সঃ॥ চকার সহদেবশ্চ ব্যাধিসিন্ধুবিমর্দ্দনং। জ্ঞানার্ণবং মহাতন্ত্রং যমরাজশ্চকার সঃ॥ চ্যবনো জীবদানঞ্চ চকার ভগবানৃষিঃ॥ চকার জনকো যোগী বৈদ্যসন্দেহভঞ্জনং। সর্ব্বসারং চন্দ্রসুতো জাবালস্তন্ত্রসারকং॥ বেদাঙ্গসারং তন্ত্রঞ্চ চকার জাজলির্মুনিঃ। পৈলো নিদানং করথস্তন্ত্রং সর্ব্বধরং পরং॥ দ্বৈধনির্ণয়তন্ত্রঞ্চ চকার কুম্ভসম্ভবঃ। চিকিৎসাশাস্ত্রবীজানি তন্ত্রাণ্যেতানি ষোড়শ॥ ব্যাধিপ্রণাশবীজানি বলাধানকরাণি চ। মথিত্বা জ্ঞানমন্থানৈরায়ুর্ব্বেদপয়োনিধিং॥ ততস্তন্ত্রাণ্যুজ্জহরুর্নবনীতানি কোবিদাঃ। এতানি ক্রমশো দৃষ্ট্বা দিব্যাং ভাস্করসংহিতাং॥ আয়ুর্ব্বেদং সর্ব্ববীজং সর্ব্বং জানামি সুন্দরি। ব্যাধেস্তত্ত্বপরিজ্ঞানং বেদনায়াশ্চ নিগ্রহঃ॥ এতদ্বৈদ্যস্য বৈদ্যত্বং ন বৈদ্যঃ প্রভুরায়ুষঃ। আয়ুর্ব্বেদস্য বিজ্ঞাতা চিকিৎসাসু যথার্থবিৎ॥ ধর্ম্মিষ্ঠশ্চ দয়ালুশ্চ তেন বৈদ্যঃ প্রকীর্ত্তিতঃ। ইতি ব্রহ্মবৈবর্ত্তে ব্রহ্মখণ্ডে ১৬ অধ্যায়ঃ॥ *॥ তস্য লক্ষণং যথা। আয়ুর্হিতাহিতং ব্যাধিনিদানং শমনং তথা। বিদ্যন্তে যত্র বিদ্বদ্ভিঃ স আয়ুর্ব্বেদ উচ্যতে॥ তস্য নিরুক্তির্যথা। অনেন পুরুষো যস্মাৎ আয়ুর্বিদন্তি বেত্তি চ। তস্মান্মুনিবরৈরেষ আয়ুর্ব্বেদ ইতি স্মৃতঃ॥ ইতি ভাবপ্রকাশঃ॥ *॥ অন্যৎ রোগশব্দে বেদশব্দে বৈদ্যশব্দে চ দ্রষ্টব্যং॥

আয়ুর্ব্বেদী [ ন্ ] ( ত্রি ) আয়ুর্বেদজ্ঞঃ। চিকিৎসকঃ। বৈদ্যঃ। ইতি হেমচন্দ্রঃ রাজনির্ঘণ্টশ্চ॥

আয়ুর্যোগঃ ( পুং ) ঔষধং। ইতি রাজনির্ঘণ্টঃ॥

আয়ুষ্মান্ [ৎ] ( ত্রি ) চিরজীবী। দীর্ঘায়ুঃ। তৎপর্য্যায়ঃ। জৈবাতৃকঃ ২। ইত্যমরঃ॥

আয়ুষ্মান্ ( পুং ) বিষ্কুম্ভাদিসপ্তবিংশতিযোগান্তর্গততৃতীয়যোগঃ। তত্র জাতফলং। যস্যায়ুষ্মান্ জন্মকালে ধনুষ্মান্ যানে যানং তস্য দেশেষু কার্য্যং। কুর্য্যাস্ম্যনং ক্রীড়নং পুষ্পবাট্যাং দাসৈর্ব্বাসৈরন্বিতো গর্ব্বিতশ্চ॥ ইতি দীপিকা॥

আয়ুষ্যং ( ত্রি ) পথ্যং। ইতি রাজনির্ঘণ্টঃ॥ আয়ুর্হিতকারকং॥

আয়ুষ্যসূক্তং ( ক্লী ) নান্দীশ্রাদ্ধাদৌ বসুধারাসম্পাতনানন্তরপাঠ্যো বৈদিকমন্ত্রবিশেষঃ।

সামগানাং তন্মন্ত্রো যথা। ওঁ আয়ুর্বিশ্বায়ুর্বিশ্বং বিশ্বমায়ুরসিমহি। প্রজাস্ত্বষ্টরধিনিধেহ্যস্মৈ শতং জীবেম শরদো বয়ন্তে। আয়ুষে মে পবস্ব বর্চ্চসে মে পবস্ব বিদুঃ পৃথিব্যা দিবো জনিত্র্যা শৃণ্বন্ত্বাপোধঃক্ষরন্তী সোমো হোদ্গায় মমায়ুষে মম ব্রহ্মবর্চ্চসায় যজমানস্যর্দ্ধ্যা অমুষ্য রাজ্যায়। অমুষ্য স্থানে যদর্থং বৃদ্ধিস্তস্য ষষ্ঠ্যন্তনাম প্রযোজ্যং। ইতি রঘুনন্দনভট্টাচার্য্যকৃতশ্রাদ্ধপ্রয়োগতত্ত্বং ॥ *॥ যজুর্বিদাং তন্মন্ত্রো যথা। ওঁ আয়ুষ্যং বর্চ্চস্যং রায়স্পোষমৌদ্ভিদং ইদং হিরণ্যং বর্চ্চস্ব জেত্রায়াবিশতাদুমাং। ন তদ্রক্ষাংসি ন পিশাচাস্তরন্তি বেদানামোজঃ প্রথমজংহ্যেতৎ। যো বিভর্ত্তি দাক্ষায়ণ্যংহিরণ্যং সহদেবেষু কৃণুতে দীর্ঘমায়ুঃ সমনুষ্যেষু কৃণুতে দীর্ঘমায়ুঃ। যদা বধ্নান্দাক্ষায়ণাংহিরণ্যং শতানীকায় সুমনস্যমানাঃ। তন্ন আবধ্নামি শতসারদয়া যুষ্মাঞ্জরদষ্টির্যথাসং। ইতি তৎকৃতযজুর্ব্বেদীয়শ্রাদ্ধপ্রয়োগতত্ত্বং ॥

আয়ুস্করঃ (ত্রি) পরমায়ুর্জনকঃ ॥

আয়োগঃ (পুং) গন্ধমাল্যোপহারঃ। ব্যাপারঃ। রোধঃ। ইতি হেমচন্দ্রঃ ॥

আয়োগবঃ (পুং) শূদ্রাদ্বৈশ্যায়াং জাতো জাতিবিশেষঃ। ইতি হেমচন্দ্রঃ ॥ তস্য কর্ম্ম কাষ্ঠতক্ষণং। ইতি মনুঃ ॥

আয়োজনং (ক্লী) উদ্যোগঃ। আহরণং। দ্রব্যাসাদনং। যথা। কুত্রচিৎ তণ্ডুলাঃ সন্তি কচ স্থালী কচেন্ধনং। তেষামায়োজনং কুর্ব্বন্ মুখ্যঃ কর্ত্তাভিধীয়তে। ইতি গোয়ীচন্দ্রধৃতকারিকা ॥

আয়োধনং (ক্লী) যুদ্ধং। বধঃ। ইতি মেদিনী ॥

আরং (ক্লী) মুণ্ডায়সং। মুণ্ডলোহং। ইতি রাজনির্ঘণ্টঃ ॥ পিত্তলং। ইত্যমরটীকা ॥ কোণঃ। প্রান্তভাগঃ। ইত্যানন্দলহরীটীকা ॥

আরঃ (পুং) মঙ্গলগ্রহঃ। শনিঃ। পিত্তলং। ইতি হেমচন্দ্রঃ॥ বৃক্ষভেদঃ। তৎপর্য্যায়ঃ। মধুরাম্লফলঃ ২। রেফল ইতি খ্যাতঃ ॥ ইতি রত্নমালা ॥

আরকূটঃ (পুং ক্লী) পিত্তলং। ইত্যমরঃ ॥

আরগ্বধঃ (পুং) বৃক্ষবিশেষঃ। সোনালু সোঁদালি ইতি খ্যাতঃ। তৎপর্য্যায়ঃ। রাজবৃক্ষঃ ২ সম্পাকঃ ৩ চতুরঙ্গুলঃ ৪ আরেবতঃ ৫ ব্যাধিঘাতঃ ৬ কৃতমালঃ ৭ সুবর্ণকঃ ৮। ইত্যমরঃ ॥ মন্থানঃ ৯ রোচনঃ ১০ দীর্ঘফলঃ ১১ নৃপদ্রুমঃ ১২ হিমপুষ্পঃ ১৩ রাজতরুঃ ১৪ কণ্ডুঘ্নঃ ১৫ জ্বরান্তকঃ ১৬ অরুজঃ ১৭ স্বর্ণপুষ্পঃ ১৮ স্বর্ণদ্রুঃ ১৯ কুষ্ঠসূদনঃ ২০ কর্ণাভরণকঃ ২১ মহারাজদ্রুমঃ ২২ কর্ণিকারঃ ২৩ স্বর্ণাঙ্গঃ ২৪। ইতি রাজনির্ঘণ্টঃ ॥ প্রগ্রহঃ ২৫। ইতি রত্নমালা ॥ অস্য গুণাঃ। অতিমধুরত্বং। শীতলত্বং। শূলজ্বরকণ্ডুকুষ্ঠমেহকফবিষ্টম্ভনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ অপিচ। জ্বরহৃদ্রোগবাতরক্তোদাবর্ত্তরোগে অতিশয়পথ্যত্বং। মৃদুত্বঞ্চ। অস্য ফলগুণাঃ। মধুরত্বং। শুক্রকারিত্বং। বাতপিত্তহারিত্বঞ্চ।

ইতি রাজবল্লভঃ ॥ আমলতাস ইতি হিন্দীভাষা। আরগ্বধো রাজবৃক্ষঃ সম্পাকশ্চতুরঙ্গুলঃ। আরেবতব্যাধিঘাতকৃতমালস্থবর্ণকাঃ ॥ কর্ণিকারো দীর্ঘফলঃ স্বর্ণাঙ্গঃ স্বর্ণভূষণঃ। আরগ্বধো গুরুঃ স্বাদুঃ শীতলঃ স্রংসনোত্তমঃ ॥ জ্বরহৃদ্রোগপিত্তাস্রবাতোদাবর্ত্তশূলনুৎ। তৎফলং স্রংসনং রুচ্যং কুষ্ঠপিত্তকফাপহং ॥ জ্বরে তু সততং পথ্যং কোষ্ঠশুদ্ধিকরং পরং। ইতি ভাবপ্রকাশঃ ॥

আরট্টঃ ( পুং ) দেশবিশেষঃ। ত্রিকাণ্ডশেষে ক্ষত্রিয়বর্গে আরট্টজশব্দদর্শনাৎ ॥ তত্র আবট্টজোঽপি পাঠঃ ॥

আরট্টজঃ ( পুং ) আরট্টদেশোদ্ভবঘোটকঃ। ইতি জটাধরঃ ত্রিকাণ্ডশেষভূরিপ্রয়োগৌ চ ॥

আরণিঃ ( পুং ) আবর্ত্তঃ। তৎপর্য্যায়ঃ। কুলহগুকঃ ২। ইতি হারাবলী ॥ পাকমারাজল ইত্যাদি ভাষা ॥

আরণ্যমুদ্গা ( স্ত্রী ) মুদ্গপর্ণী। মুগানী ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ ॥

আরণ্যপশুঃ ( পুং ) অরণ্যজাতপশুঃ। স চ সপ্তধা যথা। মহিষঃ ১ বানরঃ ২ ঋক্ষঃ ৩ সরীসৃপঃ ৪ রুরুঃ ৫ পৃষতঃ ৬ মৃগঃ ৭। ইতি তিথ্যাদিতত্ত্বে পৈঠীনসিঃ ॥

আরণ্যরাশিঃ ( পুং ) সিংহরাশিঃ। মকরপ্রথমার্দ্ধঃ। মীনমেষবৃষরাশয়ঃ। ইতি দীপিকা ॥

আরতিঃ (স্ত্রী) বিরতিঃ। নিবৃত্তিঃ। ইত্যমরঃ ॥

আরনালং ( ক্লী ) কাঞ্জিকং। ইতি হেমচন্দ্রঃ ॥ আরনালন্তু গোধূমৈরামৈঃ স্যান্নিস্তুষীকৃতৈঃ। পক্বৈর্ব্বা সন্ধিতৈস্তত্তু সৌবীরসদৃশং গুণৈঃ ॥ ইতি রাজনির্ঘণ্টঃ ॥

আরনালকং ( ক্লী ) কাঞ্জিকং। কাঁজি ইতি ভাষা। ইত্যমরঃ ॥

আরব্ধং ( ত্রি ) কৃতারম্ভং। আরম্ভে ক্লী। যথা। আরব্ধং মলমাসাৎ প্রাক্ যৎ কর্ম্ম ন সমাপিতং। আগতে মলমাসেঽপি তৎ সমাপ্যং ন সংশয়ঃ ॥ ইতি মলমাসতত্ত্বং ॥ * ॥ আরব্ধকর্ম্মণ্যশৌচাভাবো যথা। ব্রতযজ্ঞবিবাহেষু শ্রাদ্ধে হোমেঽর্চ্চনে জপে। আরব্ধে সূতকং ন স্যাদনারব্ধে তু সূতকং ॥ ইতি তিথ্যাদিতত্ত্বং ॥

আরম্ভঃ ( পুং ) প্রথমকৃতিঃ। তৎপর্য্যায়ঃ। প্রক্রমঃ ১ উপক্রমঃ ২ অভ্যাদানং ৩ উদ্ঘাতঃ ৪ আরম্ভঃ ৫। ইত্যমরঃ ॥ অভ্যাদানাদিত্রয়মারম্ভমাত্রে। প্রক্রমাদিপঞ্চ আরম্ভমাত্রে ইত্যেকে ॥ কেচিত্তু প্রক্রমাদিদ্বয়ং প্রথমারম্ভে ॥ অভ্যাদানাদিত্রয়ং আরম্ভমাত্রে। ইতি বহুভিরুক্তমপি ন সাধু যতঃ প্রথমকৃতিরেব আরম্ভঃ তৎপূর্ব্বদ্বয়ং আরম্ভে শেষত্রয়ং আরব্ধে ইত্যাহুঃ। ইতি ভরতঃ ॥ ত্বরা। উদ্যমঃ। বধঃ। দর্পঃ। ইতি মেদিনী ॥ প্রস্তাবনা। ইতি ত্রিকাণ্ডশেষঃ ॥ আদ্যকৃতিঃ। যথা। মীনাদিস্থো রবির্যেষামারম্ভপ্রথমক্ষণে। ভবেত্তেঽব্দে চান্দ্রমাসাশ্চৈত্রাদ্যা দ্বাদশ স্মৃতাঃ ॥ আরম্ভপ্রথমক্ষণে আদ্যকৃত্যাদ্যসময়ে। ইতি মলমাসতত্ত্বং ॥ পারিভাষিকারম্ভো যথা। আরম্ভো বরণং যজ্ঞে সঙ্কল্পো ব্রতজাপয়োঃ। নান্দীশ্রাদ্ধং

বিবাহাদৌ শ্রাদ্ধে পাকপরিক্রিয়া॥ ইতি তিথ্যাদিতত্ত্বং॥

আরবঃ (পুং) শব্দঃ। ইত্যমরঃ॥

আরবী (স্ত্রী) আরবনামকম্লেচ্ছদেশীয়ভাষা। যথা। জ্যেষ্ঠাশ্লেষা মঘা পূর্ব্বা রেবতী ভরণীদ্বয়ে। বিশাখার্দ্রোত্তরাষাঢ়শতভে পাপবাসরে॥ লগ্নে স্থিরে সচন্দ্রে চ পারসীমারবীং পঠেৎ। ইতি গণপতি-মুহূর্ত্তঃ॥

আরক্ষং (ত্রি) রক্ষাযুক্তং। ইতি শব্দরত্না-বলী॥ রক্ষণীয়ং। ইতি বিশ্বঃ॥

আরক্ষঃ (পুং) গজকুম্ভসন্ধিঃ। ইতি ত্রিকাণ্ড-শেষঃ॥

আরা (স্ত্রী) চর্ম্মভেদকাস্ত্রং। তৎপর্য্যায়ঃ। চর্ম্মপ্রভেদিকা ২। ইত্যমরঃ॥

আরাগ্রং (ক্লী) অর্দ্ধচন্দ্রাদ্যস্ত্রমুখং। অর্দ্ধচন্দ্র-খুরপ্রাদিধারাগ্রং মুখমুচ্যতে। আরাগ্রস্তু মুখস্তেষাং পুষ্পপত্রাদিভেদতঃ॥ ইতি হলায়ুধঃ॥

আরাৎ ব্য দূরং। নিকটঃ। ইত্যমরঃ॥

আরাতিঃ (পুং) অরাতিঃ। শত্রুঃ। ইতি ভরতঃ দ্বিরূপকোষশ্চ॥

আরাত্রিকং (ক্লী) নীরাজননিমিত্তদীপঃ। নীরাজনা। নীরাজনপাত্রঞ্চ। আরতি ইতি ভাষা। তথাচ হরিভক্তিবিলাসে। ততশ্চ মূলমন্ত্রেণ দত্ত্বা পুষ্পাঞ্জলিত্রয়ং। মহানীরা-জনং কুর্য্যাৎ মহাবাদ্যজয়স্বনৈঃ॥ প্রজ্বা-লয়েত্তদর্থঞ্চ কর্পূরেণ ঘৃতেন বা। আরা-ত্রিকং শুভে পাত্রে বিষমানেকবর্ত্তিকং॥ অন্যচ্চ। আদৌ চতুষ্পাদতলে চ বিষ্ণো-র্দ্বৌ নাভিদেশে মুখমণ্ডলৈকং। সর্ব্বেষু চাঙ্গেম্বপিসপ্তবারানারাত্রিকং ভক্তজনস্তু কুর্য্যাৎ॥

আরাধনং (ক্লী) সাধনং। প্রাপ্তিঃ। তোষণং। ইত্যমরঃ॥ পচনং। ইতি মেদিনী॥

আরাধনা (স্ত্রী) সাধনা। তৎপর্য্যায়ঃ। সেবা ২ ভক্তিঃ ৩ পরিচর্য্যা ৪ প্রসাদনা ৫ শুশ্রূষা ৬ উপাস্তিঃ ৭ বরিবস্যাঃ ৮ পরিষ্টিঃ ৯ উপ-চারঃ ১০। ইতি হেমচন্দ্রঃ॥

আরামঃ (পুং) উপবনং। বাগান্ ইতি ভাষা। ইত্যমরঃ॥

আরামশীতলা (স্ত্রী) সুগন্ধিপত্রিবিশেষঃ। বর্ব্ব-র্য্যাদিবর্গে লিখিতা। তৎপর্য্যায়ঃ। আনন্দী ২ শীতলা ৩ সুগন্ধিনী ৪ রামা ৫ মহানন্দা ৬ গন্ধাঢ্যা ৭ রামশীতলা ৮। অস্যা গুণাঃ। তিক্তত্বং। শীতলত্বং। পিত্তহারিত্বং। দাহশোথপ্রশমনত্বং। বিস্ফোটব্রণরোপণ-ত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

আরালিকঃ (ত্রি) সূপকারঃ। পাচকঃ। ইত্যমরঃ॥

আরাবঃ (পুং) শব্দঃ। ইত্যমরঃ॥

আরুঃ (পুং) বৃক্ষভেদঃ। কর্কটঃ। শূকরঃ। ইতি মেদিনী॥

আরুঃ (পুং) পিঙ্গলবর্ণঃ। তদ্যুক্তে ত্রি। ইত্যুণাদিকোষঃ॥

আরুকং (ক্লী) হিমাচলে প্রসিদ্ধৌষধীবিশেষঃ। আড় ইতি ভাষা। তৎপর্য্যায়ঃ। বীর-সেনং ২ বীরং ৩ বীরারুকং ৪। তৎপত্র-পুষ্পাদিভেদতঃ চতুর্জাতিঃ। তেষাং গুণাঃ মধুরত্বং। হিমত্বং। অর্শঃপ্রমেহগুল্মাস্র-দোষনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

আরূঢ়ঃ ( ত্রি ) কৃতারোহণঃ। বৃক্ষাদির উপর চড়া ব্যক্তি ইতি ভাষা। যথা। রাম রামেতি রামেতি কূজন্তং মধুরাক্ষরং। আরূঢ়কবিতাশাখং বন্দে বাল্মীকিকোকিলং॥ ইতি রামায়ণপাঠস্য পূর্ব্বপাঠ্যশ্লোকঃ॥

আরেবতং ( ক্লী ) পারাবতবৃক্ষফলং। ইতি রাজনির্ঘণ্টঃ॥

আরেবতঃ ( পুং ) আরগ্বধবৃক্ষঃ। ইত্যমরঃ॥

আরোগ্যং ( ক্লী ) অরোগস্য ভাবঃ। ব্যাধ্যভাবঃ। তৎপর্য্যায়ঃ। অনাময়ং ২। ইত্যমরঃ॥ পাটবং ৩ লাঘবং ৪ বার্ত্তং ৫। ইতি রাজনির্ঘণ্টঃ॥

আরোগ্যশালা ( স্ত্রী ) আরোগ্যদানগৃহং। চিকিৎসালয়ঃ। যথা। ধর্ম্মার্থকামমোক্ষাণামারোগ্যং সাধনং যতঃ। অতস্ত্বারোগ্যদাতা চ নরো ভবতি সর্ব্বদঃ॥ আরোগ্যশালাং কুর্ব্বীত মহৌষধপরিচ্ছদাং। বিদগ্ধবৈদ্যসংযুক্তাং বহ্বন্নরসসংযুতাং॥ বৈদ্যস্তু শাস্ত্রবিৎ প্রাজ্ঞো দৃষ্টৌষধপরাক্রমঃ। ওষধীমূলতত্ত্বজ্ঞঃ সমুদ্ধরণকালবিৎ॥ বলবীর্য্যবিপাকজ্ঞঃ শালিমাংসৌষধীগণে। ত্যাগিবদ্দেহিনাং তদ্বদনুকূলঃ প্রিয়ম্বদঃ॥ ইতি বৈদ্যকং॥

আরোপঃ ( পুং ) মিথ্যাজ্ঞানং। যথা। অসর্পভূতে রজ্জৌ সর্পারোপবৎ বস্তুন্যবস্ত্বারোপঃ অধ্যারোপঃ। ইতি বেদান্তসারঃ॥ মিথ্যাবিষ্করণং। যথা। অসূয়া তু দোষারোপো গুণেষ্বপি। ইত্যমরঃ॥

আরোপণং ( ক্লী ) ন্যাসঃ। সংস্থাপনং॥

আরোপিতং ( ত্রি ) কৃতারোপণং। নিহিতং। ন্যস্তং। ইতি হলায়ুধঃ॥ কল্পিতং॥

আরোহঃ ( পুং ) দৈর্ঘ্যং। বরস্ত্রিয়াঃ শ্রোণিঃ। ইত্যমরঃ॥ অবরোহঃ। আরোহণং। গজারোহঃ। সমুচ্ছ্রয়ঃ। ইতি মেদিনী॥ পরিমাণবিশেষঃ। নিতম্বঃ। ইতি হেমচন্দ্রঃ॥

আরোহকঃ ( ত্রি ) আরোহণকর্ত্তা॥

আরোহণং ( ক্লী ) সোপানং। সিড়ি ইতি ভাষা। সমারোহঃ। নীচাদূর্দ্ধগমনমিতি যাবৎ। প্ররোহণং। অঙ্কুরাদিজননমিতি যাবৎ। ইতি মেদিনী॥

আর্কিঃ ( পুং ) অর্কপুত্রঃ। শনৈশ্চরঃ। ইতি জ্যোতিঃশাস্ত্রং॥

আর্গলঃ ( পুং স্ত্রী ) অর্গলঃ। খিল ইতি ভাষা। ইতি দ্বিরূপকোষঃ॥

আর্গ্বধঃ ( পুং ) আরগ্বধবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥

আর্ঘা ( স্ত্রী ) পীতা দীর্ঘতুণ্ডা ষট্পদসন্নিভা মক্ষিকা। ইতি রাজনির্ঘণ্টঃ॥

আর্ঘ্যং ( ক্লী ) আর্ঘানামমক্ষিকোৎপন্নমধু। তস্য গুণাঃ। অতিশয়চক্ষুর্হিতকারিত্বং। কফপিত্তাস্রদোষনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

আর্ত্তঃ ( ত্রি ) পীড়িতঃ। অস্বস্থঃ। যথা। আর্ত্তানাং মার্গমাণানাং প্রায়শ্চিত্তানি যে দ্বিজাঃ। জানন্তো ন প্রযচ্ছন্তি তেঽপি তদ্দোষভাগিনঃ। ইতি প্রায়শ্চিত্ততত্ত্বং॥

আর্ত্তগলঃ ( পুং ) নীলঝিণ্টী। তৎপর্য্যায়ঃ। বাণঃ ২ বাণা ৩ দাসী ৪ অর্ত্তগলঃ ৫। ইত্যমরস্তট্টীকা চ॥

আর্ত্তবং (ক্লী) স্ত্রীরজঃ। ইত্যমরঃ॥ পুষ্পং। ইতি মেদিনী॥

আর্ত্তবঃ (ত্রি) ঋতূদ্ভবঃ। ইতি মেদিনীকর-হেমচন্দ্রৌ॥

আর্ত্তবী (স্ত্রী) বাজিনী। ঘোটকী। ইতি রাজনির্ঘণ্টঃ॥

আর্ত্তিঃ (স্ত্রী) পীড়া। ধনুষ্কোটিঃ। ইত্যমর-টীকায়াং ভরতঃ॥ রোগঃ। ইতি রাজ-নির্ঘণ্টঃ॥

আর্দ্রং (ত্রি) সজলবস্তু। ভিজা ইতি ভাষা। তৎপর্য্যায়ঃ। সার্দ্রং ২ ক্লিন্নং ৩ স্তিমিতং ৪ তিমিতং ৫ সমুন্নং ৬ উত্তং ৭। ইত্য-মরঃ॥

আর্দ্রকং (ক্লী) কটুমূলবিশেষঃ। আদা ইতি ভাষা। তৎপর্য্যায়ঃ। শৃঙ্গবেরং ২ ইত্য-মরঃ॥ কটুভদ্রং ৩ কটুংকটং ৪। ইতি কেচিৎ॥ গুল্মমূলং ৫ মূলজং ৬ কন্দরং ৭ বরং ৮ মহীজং ৯ সৈকতেষ্টং ১০ অনূ-পজং ১১ অপাকশাকং ১২ চান্দ্রাখ্যং ১৩ রাহুচ্ছত্রং ১৪ সুশাককং ১৫ শার্ঙ্গং ১৬ আর্দ্রশাকং ১৭ সচ্ছাকং ১৮। ইতি রাজনির্ঘণ্টঃ॥ অস্য গুণাঃ। কফবাত-বিবন্ধানাহশূলপিত্তনাশিত্বং। হৃদ্যত্বং। রুচিশুক্রকারিত্বঞ্চ। ইতি রাজবল্লভঃ॥ অপিচ। উষ্ণত্বং। কটুত্বং। বিপাকে শীতলত্বং। লঘুত্বং। অগ্নিদীপনত্বং। শোথকণ্ঠাময়নাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ লবণার্দ্রকগুণাঃ। ভোজনাগ্রে পথ্যত্বং। জিহ্বাকণ্ঠবিশোধনত্বং। অগ্নিসন্দীপনত্বং। হৃদ্যত্বং। বাতপিত্তকফেভানাং শরীরবন-চারিণাং। এক এব নিহন্তাস্তি লবণার্দ্রক-কেশরী॥ ইতি দ্রব্যগুণঃ॥ আর্দ্রকং শৃঙ্গ-বেরং স্যাৎ কটুভদ্রং তথার্দ্রিকা। আর্দ্রিকা ভেদিনী গুর্ব্বী তীক্ষ্ণোষ্ণা দীপনী তথা॥ কটুকা মধুরা পাকে রূক্ষবাতকফাপহা। যে গুণাঃ কথিতাঃ শুণ্ঠ্যাস্তেঽপি সন্ত্যার্দ্রকে-ঽখিলাঃ॥ ভোজনাগ্রে সদা পথ্যং লবণা-র্দ্রকভক্ষণং। অগ্নিসন্দীপনং রুচ্যং জিহ্বা-কণ্ঠবিশোধনং॥ কুষ্ঠে পাণ্ড্বাময়ে কৃচ্ছ্রে রক্তপিত্তে ব্রণে জ্বরে। দাহে নিদাঘ-শরদোর্নৈব পূজিতমার্দ্রকং॥ ইতি ভাব-প্রকাশ

আর্দ্রপটী [ন্] (পুং) আর্দ্ররক্তবস্ত্রাবৃত-কর্ত্তৃকশত্রুনাশফলকাভিচারকর্ম্মবিশেষঃ। যথা। অথার্দ্রপটী। প্রণবো হৃদয়ং ভগ-বতি চামুণ্ডে রক্তবাসসে অপ্রতিহতরূপ-পরাক্রমে অমুকবধায় বিচেতসে বহ্নি-বল্লভা। আর্দ্ররক্তপটেনাবৃতঃ সমুদ্রগামিনী-নদীতটে ঊষরভূমৌ বা দক্ষিণামুখ ঊর্দ্ধ-বাহুর্জ্জপেৎ যাবৎ পটঃ শুষ্যতি তাবৎ প্রাণাঃ শুষ্যন্তি শত্রোঃ। ইতি তন্ত্রসারঃ॥ আর্দ্রপটবিশিষ্টে ত্রি॥

আর্দ্রমাষা (স্ত্রী) মাষপর্ণী। মাষাণী ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥

আর্দ্রশাকং (ক্লী) আর্দ্রকং। ইতি রাজ-নির্ঘণ্টঃ॥

আর্দ্রা (স্ত্রী) অশ্বিন্যাদিসপ্তবিংশতিনক্ষত্রান্ত-র্গতষষ্ঠনক্ষত্রং। অস্য রূপং। পদ্মা-কৃত্যুজ্জ্বলৈকতারকাময়ং। অস্যা অধিষ্ঠাত্রী দেবতা শিবঃ। ইতি কালিদাসঃ॥

মণিতুল্যৈকতারাত্মকং। ইতি কেচিৎ॥ তত্র জাতফলং। ক্ষুধাধিকো রুক্ষশরীর-কান্তিঃ কলিপ্রিয়ঃ কোপযুতোঽবিনীতঃ। প্রসূতিকালে চ ভবেৎ কিলার্দ্রা নচার্দ্র-চেতাঃ শরণাগতেঽপি॥ ইতি কোষ্ঠী-প্রদীপঃ॥

আর্দ্রালুব্ধকঃ (পুং) কেতুগ্রহঃ। ইতি হলায়ুধঃ॥

আর্দ্রিকা (স্ত্রী) আর্দ্রকং। ইতি ভাবপ্রকাশঃ॥

আর্য্যঃ (ত্রি) সৎকুলোদ্ভবঃ। ইত্যমরঃ॥ পূজ্যঃ। শ্রেষ্ঠঃ। বুদ্ধঃ। ইতি শব্দরত্না-বলী॥ সঙ্গতঃ। ইত্যজয়ঃ॥

আর্য্যঃ (পুং) স্বামী। বুদ্ধঃ। ইতি হেম-চন্দ্রঃ॥ সুহৃৎ। ইত্যজয়ঃ॥

আর্য্যকং (ক্লী) পিণ্ডপাত্রাদিপিতৃকার্য্যং। ইতি ত্রিকাণ্ডশেষঃ॥

আর্য্যকঃ (পুং) পিতামহঃ। মাতামহঃ। ইতি শব্দমালা॥

আর্য্যকা (স্ত্রী) শ্রেষ্ঠাস্ত্রী। ইতি বোপ-দেবঃ॥

আর্য্যপুত্রঃ (পুং) ভর্ত্তা। স্বামী। ইতি হেমচন্দ্রঃ॥ গুরুপুত্রঃ॥

আর্য্যমিশ্রঃ (ত্রি) গৌরবিতঃ। ইতি ত্রিকাণ্ড-শেষঃ॥

আর্য্যা (স্ত্রী) পার্ব্বতী। ইতি ত্রিকাণ্ড-শেষঃ। ছন্দোবিশেষঃ। তস্যা লক্ষণং। যস্যাঃ পাদে প্রথমে দ্বাদশমাত্রাস্থিতা-স্তৃতীয়েঽপি। অষ্টাদশ দ্বিতীয়ে চতুর্থকে পঞ্চদশ সার্য্যা॥ ইতি শ্রুতবোধঃ॥ অপিচ। লক্ষ্মৈতৎসপ্তগণাগোপেতা ভবতি নেহ বিষমেজঃ। ষষ্ঠোজশ্চ ন লঘু বা প্রথমেঽর্দ্ধে নিয়তমার্য্যায়াঃ॥ ষষ্ঠে দ্বিতীয়লাৎ পর-কেল্লে মুখলাচ্চসয়তি পদনিয়মঃ। চরমে-ঽর্দ্ধেপঞ্চমকে তস্মাদিহ ভবতি ষষ্ঠোলঃ॥ সা নবধা। পথ্যা বিপুলা চপলা মুখচপলা জঘনচপলা চ। গীত্যুপগীত্যুদ্গীতয় আর্য্যা গীতিশ্চ নব ধার্য্যা॥ ইতি ছন্দোমঞ্জরী॥ শ্রেষ্ঠা॥

আর্য্যাবর্ত্তঃ (পুং) বিন্ধ্যহিমালয়য়োর্মধ্য-দেশঃ। তৎপর্য্যায়ঃ। পুণ্যভূমিঃ ২। ইত্য-মরঃ॥ যথা। আসমুদ্রাত্তু বৈ পূর্ব্বা-দাসমুদ্রাত্তু পশ্চিমাৎ। তয়োরেবান্তরং গির্য্যোরার্য্যাবর্ত্তং বিদুর্ব্বুধাঃ॥ ইতি মানবে ২ অধ্যায়ঃ॥ অপি চ আর্য্যাবর্ত্তঃ পুণ্যভূমির্মধ্যং বিন্ধ্যহিমাগয়োঃ। ইত্য-মরঃ॥

আর্য্যিকা (স্ত্রী) শ্রেষ্ঠাস্ত্রী। ইতি বোপ-দেবঃ॥

আর্ষঃ (পুং) বিবাহবিশেষঃ। যত্র বরাৎ গোদ্বয়ং গৃহীত্বা তেনৈব সহ কন্যাদানং। যজ্ঞস্থায়র্ত্বিজে দৈব আর্ষ আদায় গোযুগং। চতুর্দ্দশ প্রথমজঃ পুনাত্যুত্তরজশ্চ ষট্॥ ইতি যাজ্ঞবল্ক্যঃ॥ ঋষিপ্রণীতে ত্রি॥

আর্ষভিঃ (পুং) ঋষভপুত্রঃ। স তু ভরত-রাজচক্রবর্ত্তী। ইতি হেমচন্দ্রঃ॥

আর্ষভী (স্ত্রী) কপিকচ্ছুবৃক্ষঃ। ইতি রাজ-নির্ঘণ্টঃ॥

আর্ষভ্যঃ (পুং) ষণ্ডোপযুক্তবৃষঃ। তৎ-পর্য্যায়ঃ। ষণ্ডতাযোগ্যঃ ২। ইত্যমরঃ॥ ষাঁড়ের উপযুক্ত এঁড়ে ইতি ভাষা॥

আর্হতঃ (পুং) জিনবিশেষঃ। তৎপর্য্যায়ঃ। বাদবাদী ২। ইতি হেমচন্দ্রঃ॥

আলং (ক্লী) হরিতালং। ইত্যমরঃ॥ অনল্পে ত্রি। ইতি হেমচন্দ্রঃ॥

আলগর্দ্দঃ (পুং) অলগর্দ্দঃ। জলসর্পঃ॥

আলম্ভঃ (পুং) মারণং। বধঃ। ইত্যমরঃ॥

আলম্ভ্যা (স্ত্রী) বধার্হ্যা। হননীয়া। ইতি বোপদেবঃ॥

আলম্বঃ (পুং) অবলম্বঃ। আশ্রয়ঃ॥

আলম্বনং (ক্লী) অবলম্বনং। বিভাববিশেষঃ। যথা। আলম্বনোদ্দীপনাখ্যৌ তস্য ভেদাবুভৌ স্মৃতৌ। আলম্বনো নায়কাদিস্তমালম্ব্য রসোদ্গমাৎ॥ ইতি সাহিত্যদর্পণং॥

আলয়ঃ (পুং) গৃহং। ইত্যমরঃ॥

আলবালং (ক্লী) তরুমূলসেচনার্থস্বল্পজলাধারঃ। চারমাদা ইতি ভাষা। তৎপর্য্যায়ঃ। আবালং ২ আবাপঃ ৩। ইত্যমরঃ॥

আলসঃ (ত্রি) অলসঃ। আলস্যযুক্তঃ। ইতি দ্বিরূপকোষঃ॥

আলস্যং (ক্লী) অলসস্য ভাবঃ। অলসতা। তৎপর্য্যায়ঃ। তন্দ্রা ২ কৌসীদ্যং ৩। ইতি হেমচন্দ্রঃ॥ মন্দতা ৪ মান্দ্যং ৫ কার্য্যপ্রদ্বেষঃ ৬। ইতি রাজনির্ঘণ্টঃ॥

আলস্যঃ (ত্রি) অলসযুক্তঃ। তৎপর্য্যায়ঃ। মন্দঃ ২ তুন্দপরিমৃজঃ ৩ শীতকঃ ৪ অলসঃ ৫ অনুষ্ণঃ ৬। ইত্যমরঃ॥

আলাতং (ক্লী) অলাতং। অঙ্গারঃ॥

আলানং (ক্লী) গজবন্ধনস্তম্ভঃ। ইত্যমরঃ॥ গজবন্ধনরজ্জুঃ। ইতি নীলকণ্ঠঃ॥ বন্ধনং। ইতি রায়মুকুটঃ॥ রজ্জুঃ। ইতি মেদিনী॥

আলাপঃ (পুং) কথোপকথনং। সম্ভাষণং। তৎপর্য্যায়ঃ। আভাষণং ২। ইত্যমরঃ॥

আলাপ্যঃ (ত্রি) আলাপযোগ্যঃ। আলাপনীয়ঃ॥

আলাবর্ত্তং (ক্লী) বস্ত্রনির্ম্মিতব্যজনং। কাপড়ের পাখা ইতি ভাষা। ইতি হেমচন্দ্রঃ॥

আলাবুঃ (স্ত্রী) অলাবুঃ। লাউ ইতি ভাষা। ইতি শব্দরত্নাবলী॥

আলাবূঃ (স্ত্রী) অলাবূঃ। ইতি শব্দরত্নাবলী॥

আলাস্যঃ (পুং) কুম্ভীরঃ। ইতি হেমচন্দ্রঃ॥

আলিঃ (স্ত্রী) বয়স্যা। সেতুঃ। পংক্তিঃ। ইতি মেদিনী অমরশ্চ॥ সন্ততিঃ। ইতি শব্দরত্নাবলী॥

আলিঃ (পুং) বৃশ্চিকঃ। ভ্রমরঃ। ইতি হারাবলী অমরটীকা চ॥

আলিঃ (ত্রি) বিশদাশয়ঃ। নির্ম্মলান্তঃকরণঃ। ইতি মেদিনী॥ অনর্থঃ। ইতি হেমচন্দ্রঃ॥

আলিঙ্গনং (ক্লী) প্রীতিপূর্ব্বকপরস্পরাশ্লেষঃ। কোলাকোলী ইতি ভাষা। তৎপর্য্যায়ঃ। অঙ্গপালিঃ ২ শ্লিষা ৩। ইতি ত্রিকাণ্ডশেষঃ॥ পরিরম্ভঃ ৪ পরীরম্ভঃ ৫ পরিষ্বঙ্গঃ ৬ সংশ্লেষঃ ৭ উপগূহনং ৮। ইত্যমরঃ॥ তৎ সপ্তধা যথা। আমোদালিঙ্গনং ১ মুদিতালিঙ্গনং ২ প্রেমা-

লিঙ্গনং ৩ আনন্দালিঙ্গনং ৪ রুচ্যালিঙ্গনং ৫ মদনালিঙ্গনং ৬ বিনোদালিঙ্গনং ৭। ইতি কামশাস্ত্রং ॥

আলিঙ্গী [ন্] (পুং) আলিঙ্গ্যঃ। মৃদঙ্গবিশেষঃ। ইত্যমরটীকায়াং স্বামী শব্দরত্নাবলী চ ॥

আলিঙ্গ্যঃ (পুং) যবাকৃতিমৃদঙ্গঃ। মাদোল ইতি ভাষা। ইত্যমরঃ ॥ চতুরঙ্গুলহীনোহঙ্ক্যান্মুখে চৈকাঙ্গুলেন যঃ। যবাকৃতিঃ স আলিঙ্গ্য আলিঙ্গ্য স হি বাদ্যতে ॥ ইতি শব্দার্ণবঃ ॥

আলিঞ্জরঃ (পুং) অলিঞ্জরঃ। জালা ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ ॥

আলিন্দঃ (পুং) অলিন্দঃ। বহির্দ্বারপ্রকোষ্ঠঃ। গৃহান্তরশয্যার্থবেদিকা। ইতি রায়মুকুটঃ শব্দরত্নাবলী চ ॥ গৃহৈকদেশঃ। ইত্যমরমালা ॥

আলিন্দকঃ (পুং) আলিন্দঃ। ইতি শব্দরত্নাবলী ॥

আলিম্পনং (ক্লী) মঙ্গলালেপনং। আলিপনা ইতি ভাষা। তৎপর্য্যায়ঃ। আতর্পণং ২ আদীপনং ৩ মণ্ডোদকং ৪। ইতি ত্রিকাণ্ডশেষঃ ॥

আলী (স্ত্রী) সখী। পংক্তিঃ। বৃশ্চিকঃ। ইত্যমরটীকায়াং ভরতাদয়ঃ ॥ সেতুঃ। ইতি শব্দরত্নাবলী ॥

আলীঢ়ং (ক্লী) ধন্বিনাং দক্ষিণজঙ্ঘাপ্রসারবামপাদসংকোচরূপাবস্থানং। ইত্যমরঃ ॥

আলীঢ়ং (ত্রি) অশিতং। ভুক্তং। ইতি মেদিনী ॥

আলীঢ়কং (ক্লী) তর্ণকানাং স্থলীষু ক্রীড়নং। বাছুরের খেলা ইতি ভাষা। ইতি হারাবলী ॥ আটালকমিতি ক্বচিৎ পাঠঃ ॥

আলীনকং (ক্লী) বঙ্গং। রাং ইতি ভাষা। ইতি হেমচন্দ্রঃ ॥

আলু (ক্লী) ভেলকঃ। স্বনামখ্যাতমূলবিশেষঃ। ইতি মেদিনী ॥ অস্য গুণাঃ। রক্তপিত্তনাশিত্বং। গুরুত্বং। স্বাদুত্বং। শীতলত্বং। স্তনদুগ্ধশুক্রকারিত্বঞ্চ। ইতি দ্রব্যগুণঃ ॥

আলুঃ (স্ত্রী) স্বল্পবারিধানিকা। ঘটী ঝারী ইত্যাদি ভাষা। তৎপর্য্যায়ঃ। কর্করী ২ গলন্তিকা ৩। ইত্যমরঃ ॥

আলুঃ (পুং) পেচকঃ। ইতি শব্দরত্নাবলী ॥ কাসালুঃ। ইতি রাজনির্ঘণ্টঃ ॥

আলুকং (ক্লী) মূলবিশেষঃ। আলু ইতি ভাষা। ইতি রাজবল্লভঃ ॥ এলবালুকং। ইতি রাজনির্ঘণ্টঃ ॥ তদ্বিবরণং যথা। আলুকমপ্যালুকং তৎ কথিতং বীরসেনশ্চ। কাষ্ঠালুকশঙ্খালুকহস্ত্যালুকানি কথ্যন্তে ॥ পিণ্ডালুকমধ্বালুকরক্তালুকানি ব্যক্তানি। কাষ্ঠালুকং কাঠিন্যযুক্তকঠারু। শঙ্খালুকং শ্বেততাযুক্তশঙ্খালু। হস্ত্যালুকং দীর্ঘতাযুক্তমহাশরীরং। পিণ্ডালুকং বর্ত্তুলস্থথনী। মধ্বালুকং মধুরতাযুক্তরোমান্বিতদীর্ঘস্থথনী। রক্তালুকং রতারূ তরণ্ডা ইতি চ। এষাং গুণাঃ। আলুকং শীতলং সর্ব্বং বিষ্টম্ভি মধুরং গুরু। সৃষ্টমূত্রমলং রূক্ষং দুর্জ্জরং রক্তপিত্তনুৎ ॥ কফানিলকরং বল্যং বৃষ্যং স্তন্যবিবর্দ্ধনং। ইতি ভাবপ্রকাশঃ ॥

আলুকঃ ( পুং ) কাসালুঃ। ইতি রাজনির্ঘণ্টঃ॥ শেষনাগঃ। ইতি হেমচন্দ্রঃ॥

আলুকী ( স্ত্রী ) দীর্ঘাকারসূক্ষ্মরক্তালু। অরুঈ ইতি নাম। যথা। রক্তালুভেদো যা দীর্ঘা তন্বী চ প্রথিতালুকী। আলুকী বলকৃৎ স্নিগ্ধা গুর্ব্বী হৃৎকফনাশিনী। বিষ্টম্ভকারিণী তৈলে তলিতাতিরুচিপ্রদা॥ ইতি ভাবপ্রকাশঃ॥

আলেখ্যং ( ক্লী ) চিত্রং। ইতি হেমচন্দ্রঃ॥

আলেখ্যশেষঃ ( ত্রি ) মৃতঃ। ইতি হেমচন্দ্রঃ॥

আলোকঃ ( পুং ) দর্শনং। দেখা ইতি ভাষা। দ্যোতঃ। আলো ইতি ভাষা। বন্দিভাষণং। স্তুতিরিতি যাবৎ। ইতি মেদিনী॥

আলোকনং ( ক্লী ) দর্শনং। ইত্যমরঃ॥

আলোচনং ( ক্লী ) দর্শনং। বিবেচনং॥

আবনেয়ঃ ( পুং ) মঙ্গলগ্রহঃ। ইতি জ্যোতিঃশাস্ত্রং॥

আবপনং ( ক্লী ) দ্রব্যস্থাপনপাত্রং। ভাণ্ডং। ইত্যমরঃ॥ সম্যক্‌ক্ষুরিকর্ম্ম। সম্যং তন্তুবপনং॥

আবরণং ( ক্লী ) ফলকং। ঢাল ইতি ভাষা। ইতি হেমচন্দ্রঃ॥ আচ্ছাদনং। ঢাকা ইতি ভাষা॥

আবরণশক্তিঃ ( স্ত্রী ) মায়াশক্তিঃ। যথা। স্বল্পোঽপি মেঘো বহুযোজনবিস্তীর্ণমাদিত্যমণ্ডলং অবলোকয়িতৃজননয়নপথপিধায়কতয়াচ্ছাদয়তীব তথৈবাজ্ঞানং পরিচ্ছিন্নমপি আত্মানমপরিচ্ছিন্নমসংসারিণং অবলোকয়িতৃবুদ্ধিপিধায়কতয়াচ্ছাদয়তীব তাদৃশং সামর্থ্যং॥ ইতি বেদান্তঃ॥

আবর্ত্তং ( ক্লী ) মাক্ষিকধাতুঃ। ইতি রাজনির্ঘণ্টঃ॥

আবর্ত্তঃ ( পুং ) জলভ্রমঃ। ঘূর্ণা ইতি ভাষা। ইত্যমরঃ॥ চিন্তা। আবর্ত্তনং। ইতি মেদিনী॥ মেঘনায়কচতুষ্টয়ান্তর্গতমেঘাধিপবিশেষঃ। ইতি পুরাণং জ্যোতিষঞ্চ। রাজাবর্ত্তনামোপরত্নং। ইতি রাজনির্ঘণ্টঃ॥

আবর্ত্তকী ( স্ত্রী ) লতাবিশেষঃ। ভগতবল্লী ইতি কোকণে প্রসিদ্ধা। তৎপর্য্যায়ঃ। তিন্দুকিনী ২ বিভাণ্ডী ৩ বিষাণিকা ৪ রঙ্গলতা ৫ মনোজ্ঞা ৬ রক্তপুষ্পী ৭ মরুত্তালী ৮ পীতকীলা ৯ চর্ম্মরঙ্গা ১০। অস্যা গুণাঃ। কষায়ত্বং। অম্লত্বং। শীতবীর্য্যকারিত্বং। পিত্তনাশিত্বঞ্চ। ভদ্রদন্তিকাবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

আবর্ত্তনং ( ক্লী ) দুগ্ধাদেরালোড়নং। আওটান ইতি ভাষা। ধাতুদ্রব্যস্য দ্রবীকরণং। গলান ইতি ভাষা। ইত্যমরটীকা॥ সূর্য্যস্য পশ্চিমদিগবস্থিতচ্ছায়ায়াঃ পূর্ব্বদিগ্‌গমনারম্ভকালঃ। আবর্ত্তনাত্তু পূর্ব্বাহ্নো হ্যপরাহ্নস্ততঃপরং। ইতি স্মৃতিঃ॥

আবর্ত্তনী ( স্ত্রী ) ধাতুদ্রব্যদ্রাবণার্থমৃৎপাত্রং। মুছী ইতি ভাষা। তৎপর্য্যায়ঃ। তৈজসাবর্ত্তনী ২ মুষা ৩ মূষঃ ৪। ইতি শব্দরত্নাবলী॥

আবর্ত্তনমণিঃ ( পুং ) রাজাবর্ত্তনামোপরত্নং। ইতি রাজনির্ঘণ্টঃ॥

আবর্ত্তিনী ( স্ত্রী ) অজশৃঙ্গীবৃক্ষঃ। ইতি রত্নমালা॥

আবর্হিতঃ (ত্রি) উন্মূলিতঃ। উৎপাটিতঃ। ইতি হেমচন্দ্রঃ॥

আবলিঃ (স্ত্রী) শ্রেণী। পংক্তিঃ। ইত্যমরঃ॥

আবলী (স্ত্রী) আবলিঃ। ইত্যমরঃ॥

আবল্যং (ক্লী) অবলস্য ভাবঃ। দৌর্ব্বল্যং॥

আবশ্যকং (ত্রি) অবশ্যকর্ত্তব্যং। নৈশ্চয়িকং। উচিতং। যথা। ঘ্যণোরাবশ্যকে। উবর্ণান্তাদাবশ্যকেঽর্থে ঘ্যণ্ স্যাৎ। ইতি মুগ্ধবোধব্যাকরণং॥ কিঞ্চ। আবশ্যকপর্ব্বাদিক্রিয়মাণস্য নিত্যনৈমিত্তিকত্বং। ইতি তিথ্যাদিতত্ত্বং॥

আবসথং (ক্লী) গৃহং। ইতি হেমচন্দ্রঃ॥

আবসথঃ (পুং) গৃহং। আর্য্যাকোষঃ। আর্য্যাচ্ছন্দসো গ্রন্থভেদঃ। ব্রতবিশেষঃ। ইত্যুণাদিকোষঃ॥

আবসিতং (ত্রি) পরিপক্বমর্দ্দিতধান্যং। ইতি ভরতঃ॥ বহুলিতধান্যং। ইতি সুভূতিঃ॥ সম্পন্নধান্যং। ইত্যন্যে॥ তৎপর্য্যায়ঃ। ঋদ্ধং ২। ইত্যমরঃ॥

আবহঃ (পুং) সপ্তবায়ুন্তর্গতবায়ুবিশেষঃ। স চ ভূবায়ুঃ। ইতি পুরাণজ্যোতিষে॥

আবহমানং (ত্রি) ক্রমাগতং॥

আবাধা (স্ত্রী) দুঃখং। পীড়া। ইতি শব্দরত্নাবলী॥ ভূখণ্ডং। ত্রিকোণক্ষেত্রমধ্যরজ্জুনিক্ষেপেণ যৎ খণ্ডদ্বয়ং জায়তে তৎ। ইতি লীলাবতী॥

আবাপঃ (পুং) আলবালং। ইত্যমরঃ॥ বলয়ঃ। শত্রুচিন্তনং। পানভেদঃ। ইতি হেমচন্দ্রঃ॥ ভাণ্ডবপনং। পরিক্ষেপঃ। ইতি মেদিনী॥ নিম্নোন্নতভূমিঃ। ইত্যজয়ঃ॥ পাত্রং। ইতি শব্দরত্নাবলী॥ প্রধানহোমঃ। ইতি স্মৃতিঃ॥

আবাপকঃ (পুং) বলয়ঃ। ইত্যমরঃ॥

আবাপনং (ক্লী) সূত্রযন্ত্রং। তাঁৎ ইতি ভাষা। ইতি শব্দমালা॥

আবারি (ক্লী) হট্টবেশ্ম। দোকান হাটচালি ইত্যাদি ভাষা। ইত্যুণাদিকোষঃ॥

আবালং (ক্লী) আলবালং। ইত্যমরঃ॥ বালকপর্য্যন্তং॥

আবাল্যং (ক্লী) বাল্যাবস্থাপর্য্যন্তং॥

আবাসঃ (পুং) গৃহং। ইতি হেমচন্দ্রঃ॥

আবাহনং (ক্লী) আহ্বানং। নিমন্ত্রণং। যথা। প্রতিমাস্থানেম্বপ্স্বগ্নৌ নাবাহনবিসর্জ্জনে। ইতি। বিনায়কাদীনাং ব্যাহৃতিভিরাবাহনমাহ মৎস্যপুরাণং। বিনায়কং তথা দুর্গাং বায়ুমাকাশমেব চ। আবাহয়েদ্ব্যাহৃতিভিস্তথৈবাশ্বিকুমারকৌ॥ ইতি চ তিথ্যাদিতত্ত্বং॥ আবাহনীমুদ্রা মুদ্রাশব্দে দ্রষ্টব্যা॥

আবাহনী (স্ত্রী) মুদ্রাবিশেষঃ। যথা। হস্তাভ্যামঞ্জলিং বদ্ধানামিকামূলপর্ব্বণোঃ। অঙ্গুষ্ঠৌ নিঃক্ষিপেৎ সেয়ং মুদ্রা ত্বাবাহনী স্মৃতা॥ ইতি তন্ত্রশাস্ত্রং॥

আবিঃ [স্] ব্য প্রাকাশ্যং। প্রস্ফুটত্বং। তৎপর্য্যায়ঃ। প্রাদুঃ ২। ইত্যমরঃ॥

আবিকঃ (পুং) কম্বলং। ইতি হলায়ুধঃ॥

আবিগ্নঃ (পুং) অবিগ্নঃ। করমর্দ্দকঃ। ইতি শব্দরত্নাবলী॥ পাণিআমলা ইতি খ্যাতঃ। ইত্যমরটীকাসারসুন্দরী॥

আবির্ভাবঃ (পুং) প্রকাশঃ। দেবাবতরণং।

প্রাদুর্ভাবঃ। যথা। তদা মে মনসা ধ্যাতো দয়াসিন্ধুর্জনার্দনঃ। ভক্তানামনুকম্পার্থং যশ্চাবির্ভাবমিচ্ছতি॥ ইতি জৈমিনিভারতে আশ্বমেধিকে পর্ব্বণি ২ অধ্যায়ঃ॥

আবির্ভূতঃ (ত্রি) প্রকাশিতঃ। অধিষ্ঠিতঃ। জন্মযুক্তঃ। অবতীর্ণঃ। প্রাদুর্ভূতঃ। আবির্ভাববিশিষ্টঃ। যথা। উচ্চস্থে গ্রহপঞ্চকে সুরগুরৌ সেন্দৌ নবম্যাং তিথৌ লগ্নে কর্কটকে পুনর্ব্বসুদিনে মেষংগতে পূষণি। নির্দগ্ধুং নিখিলাঃ পলাশসমিধো মধ্যাদয়োধ্যারণেরাবির্ভূতমভূদপূর্ব্ববিভবং যৎকিঞ্চিদেকং মহঃ॥ ইতি। তত্রাষ্টম্যাং ভদ্রকালী দক্ষযজ্ঞবিনাশিনী। আবির্ভূতা মহাঘোরা যোগিনীকোটিভিঃ সহ॥ ইতি চ তিথ্যাদিতত্ত্বং॥

আবিষ্কারঃ (পুং) প্রকাশঃ॥

আবিষ্কৃতঃ (ত্রি) প্রকাশিতঃ। তৎপর্য্যায়ঃ। প্রকটিতঃ ২। ইতি হেমচন্দ্রঃ॥

আবিষ্টঃ (ত্রি) প্রেতবাহিতঃ। ভূতাদিগ্রস্তঃ। ইতি ত্রিকাণ্ডশেষঃ॥ আবেশযুক্তঃ। নিবিষ্টঃ

আবীরচূর্ণং (ক্লী) ফল্গু। ফাগু ইতি বঙ্গভাষা। আবীর ইতি হিন্দীভাষা। যথা। চন্দনাগুরুকস্তূরীকুঙ্কুমদ্রবসংযুতং। আবীরচূর্ণং রুচিরং গৃহ্যতাং পরমেশ্বর॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ৮ অধ্যায়ঃ॥

আবুকঃ (পুং) নাট্যোক্তৌ পিতা। ইত্যমরঃ॥

আবৃৎ (স্ত্রী) অনুক্রমঃ। পরিপাটী। ইত্যমরঃ॥

আবৃতঃ (ত্রি) কৃতাবরণঃ। তৎপর্য্যায়ঃ। বেষ্টিতং ২ বলয়িতং ৩ সংবীতং ৪ রুদ্ধং ৫। ইত্যমরঃ॥

আবৃত্তঃ (ত্রি) কৃতাবরণঃ। আবৃতঃ। ইত্যমরটীকা॥

আবেগঃ (পুং) ত্বরা। ইতি হেমচন্দ্রঃ॥

আবেগী (স্ত্রী) বৃদ্ধদারকবৃক্ষঃ। ইত্যমরঃ রাজনির্ঘণ্টশ্চ॥

আবেদনং (ক্লী) নিবেদনং॥

আবেশঃ (পুং) অহঙ্কারবিশেষঃ। তৎপর্য্যায়ঃ। সংরম্ভঃ ২ আটোপঃ ৩। অপস্মাররোগঃ। ইতি হেমচন্দ্রঃ॥ ভূতাদিনা রোগঃ। তৎপর্য্যায়ঃ। ভূতসঞ্চারঃ ২ ভূতক্রান্তিঃ ৩ গ্রহাময়ঃ ৪। ইতি রাজনির্ঘণ্টঃ॥ আসক্তিঃ। অভিনিবেশঃ॥

আবেশনং (ক্লী) শিল্পশালা। ইত্যমরঃ॥ ভূতাবেশঃ। প্রবেশঃ। ইতি মেদিনী॥ কোপঃ। ইতি ধরণী॥ পরিবেশঃ। ইতি হেমচন্দ্রঃ॥

আবেশিকঃ (ত্রি) আগন্তুঃ। অতিথিঃ। ইত্যমরঃ॥ স্বীয়ং। অসাধারণং। তৎপর্য্যায়ঃ। অন্যাসাধারণং ২ প্রাতিস্বিকং ৩। ইতি ত্রিকাণ্ডশেষঃ॥

আবেষ্টকঃ (পুং) প্রাচীরাদিঃ। ইতি হলায়ুধঃ॥ পাঁচিল বেড়া ইত্যাদি ভাষা॥

আবোধনং (ক্লী) জ্ঞানং। বুদ্ধিঃ॥

আশংসা (স্ত্রী) ইচ্ছা। আকাঙ্ক্ষা। ইতি হেমচন্দ্রঃ॥

আশংসিতা [ ঋ ] (ত্রি) আশংসাকর্ত্তা। আকাঙ্ক্ষাশীলঃ। ইত্যমরঃ॥

আশংসুঃ (ত্রি) আশংসিতা। ইচ্ছুঃ। ইত্যমরঃ॥

আশক্তঃ (ত্রি) সম্যক্‌শক্তিবিশিষ্টঃ॥

আশঙ্কা (স্ত্রী) ভয়ং। ত্রাসঃ। ইতি হেমচন্দ্রঃ॥

আশনঃ (পুং) অশনবৃক্ষঃ। ইতি ভরতঃ দ্বিরূপকোষশ্চ॥

আশয়ঃ (পুং) অভিপ্রায়ঃ। পনসবৃক্ষঃ। আধারঃ। ইতি বিশ্বমেদিন্যৌ॥ বিভবঃ। কিম্পচানঃ। চেতঃ। অজীর্ণং। কোষ্ঠাগারং। ইত্যজয়পালঃ॥ ধর্ম্মাধর্ম্মঃ। অদৃষ্টং। ইতি কুসুমাঞ্জলিঃ॥

আশয়াশঃ (পুং) আশ্রয়াশঃ। অগ্নিঃ। ইত্যমরটীকায়াং স্বামী॥

আশরঃ (পুং) অগ্নিঃ। রাক্ষসঃ। ইতি মেদিনী॥

আশা (স্ত্রী) দীর্ঘাকাঙ্ক্ষা। আয়তা তৃষ্ণা। দিক্। ইত্যমরঃ॥

আশাঢ়ঃ (পুং) আষাঢ়মাসঃ। ব্রতিনাং পলাশদণ্ডঃ। ইত্যমরটীকা দ্বিরূপকোষশ্চ॥

আশাঢ়া (স্ত্রী) পূর্ব্বাষাঢ়ানক্ষত্রং। উত্তরাষাঢ়া চ॥

আশাপুরসম্ভবঃ (পুং) ভূমিজগুগ্‌গুলুঃ ইতি রাজনির্ঘণ্টঃ॥

আশাবন্ধঃ (পুং) সমাশ্বাসঃ। প্রত্যাশা। মর্কটজালকং। মাকড়সার জাল ইতি ভাষা। ইতি মেদিনী॥

আশিতং (ত্রি) অশিতং। ভুক্তং। ইতি জটাধরঃ॥

আশিতঙ্গবীনং (ত্রি) অশিতঙ্গবীনং। গাবো যত্রাশিতাঃ পুরা। পূর্ব্বে যে স্থানে গরু চরিয়াছে ইতি ভাষা। ইত্যমরঃ॥

আশিতম্ভবং (ক্লী) অন্নাদি। তৃপ্তৌ পুং। ইতি মেদিনী॥

আশিতা [ ঋ ] (ত্রি) বহুভোজনশীলঃ। অতিশয়ভোক্তা। ইতি হেমচন্দ্রঃ॥

আশিরঃ (পুং) রাক্ষসঃ। অগ্নিঃ। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ॥

আশীঃ [ স্ ] (স্ত্রী) আশীর্ব্বাদঃ। সর্পদন্তঃ। ইত্যমরঃ॥ বৃদ্ধিনামৌষধিঃ। ইতি রাজনির্ঘণ্টঃ॥

আশী (স্ত্রী) হিতাশংসনং। অহিদন্তঃ। সর্পবিষং। ইতি শব্দরত্নাবলী॥ আশী তালুগতা দংষ্ট্রা তয়া দষ্টো নজীবতি। ইতি বিষবিদ্যা॥

আশীর্ব্বাদঃ (পুং) আশীর্ব্বচনং। মঙ্গলপ্রার্থনা॥

আশীবিষঃ (পুং) সর্পঃ। ইত্যমরঃ॥

আশুঃ (পুং ক্লী) প্রাবৃট্‌কালসমুদ্ভবধান্যং। আউশ ইতি ভাষা। তৎপর্য্যায়ঃ। ব্রীহিঃ ২ পাটলঃ ৩। অস্য গুণাঃ। মধুরত্বং। পাকে অম্লত্বং। পিত্তকারিত্বং। গুরুত্বঞ্চ। ইতি রাজবল্লভঃ॥

আশু (ক্লী) শীঘ্রং। দ্রুতং। সত্বগামি চেৎ ত্রি। ইত্যমরঃ॥

আশুগঃ (পুং) বায়ুঃ। বাণঃ। শীঘ্রগামিনি ত্রি। ইত্যমরঃ॥

আশুপত্রী (স্ত্রী) শল্লকীলতা। ইতি রত্নমালা॥

আশুব্রীহিঃ (পুং) আশুধান্যং। ইত্যমরটীকায়াং ভরতমুকুটৌ॥

আশুশুক্ষণিঃ ( পুং ) অগ্নিঃ । ইত্যমরঃ ॥ বায়ুঃ। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ ॥

আশেকুটী [ ন্ ] ( পুং ) পর্ব্বতঃ । ইতি শব্দমালা ॥

আশ্চর্য্যং ( ক্লী ) অপূর্ব্বং । তৎপর্য্যায়ঃ । বিস্ময়ঃ ২ অদ্ভুতং ৩ চিত্রং ৪ । ইত্যমরঃ ॥

আশ্মনঃ ( পুং ) অরুণঃ। সূর্য্যসারথিঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

আশ্রমঃ ( পুং ক্লী ) শাস্ত্রোক্তধর্ম্মবিশেষঃ । আশ্রাম্যন্তি স্বং স্বং তপশ্চরন্ত্যত্র । স চতুর্বিধঃ। ব্রহ্মচর্য্যং ১ গার্হস্থ্যং ২ বানপ্রস্থ্যং ৩ সন্ন্যাসঃ ৪ । ইতি স্মৃতিঃ ॥ ব্রহ্মচারী। গৃহী । বানপ্রস্থঃ । ভিক্ষুঃ। ইত্যমরঃ ॥ মুনীনাং বাসস্থানং। বনং। মঠঃ। ইতি মেদিনী ॥

আশ্রমিকঃ ( ত্রি ) আশ্রমযুক্তঃ । ইতি শব্দরত্নাবলী ॥

আশ্রয়ঃ ( পুং ) রাজ্ঞাং সন্ধ্যাদিষড়্গুণান্তর্গতগুণবিশেষঃ । ইত্যমরঃ ॥ ব্যপদেশঃ । সামীপ্যঃ । আধারঃ । ইতি জটাধরঃ ॥ গৃহং । ইতি হেমচন্দ্রঃ ॥ সংশ্রয়ণং । অবলম্বনং । রাজ্ঞাং তন্নির্ণয়ো যথা । অস্থিতৌ যদি কল্যাণং ভবেৎ সংশ্রয়ণং তথা । ভবতি শ্রেয়সে রাজ্ঞাং বিপরীতং ন কর্হিচিৎ ॥ উচ্ছিদ্যমানো বলিনা আশ্রয়েৎ বলবত্তরং। বিনীতবত্তত্র কালং নয়েদিতি মতির্ধ্রুবা ॥ দদৎ বলং বা কোষং বা ভূমিং বা ভূতিসম্ভবাং । আশ্রয়েদভিযোক্তারং সমাশ্রয়গুণান্বিতং ॥ বীতব্যসনমশ্রান্তং মহোৎসাহং মহামতিং । প্রবিশন্তি মহারাজমপাংপতিমিবাপগাঃ ॥ অব্যবসায়িনমলসং দৈবপরং সাহসাচ্চ পরিহীনং। প্রমদেব বৃদ্ধপতিং নেচ্ছন্ত্যুপগূহিতুং কমলা ॥ উৎসাহাৎ শ্রিয়মাপ্নোতি উৎসাহাচ্চ মহদ্যশঃ। তস্মাৎ সর্ব্বোপধাশুদ্ধমুৎসাহং নিত্যমাচরেৎ ॥ অমর্ষশ্চৈব শৌর্য্যঞ্চ শীঘ্রকারিত্বমেব চ । তৎকর্ম্মণি প্রবীণত্বমিত্যুৎসাহগুণা মতাঃ ॥ ব্যসনস্যাগমদ্বারমনুৎসাহো মহীপতেঃ। সামদানদণ্ডভেদা ইত্যুপায়চতুষ্টয়ং । সামসিদ্ধং প্রশংসন্তি সর্ব্বতশ্চ বিপশ্চিতঃ ॥ স্রবন্নিবামৃতং বাচা সামোপায়ং সমাচরেৎ। লুব্ধং ক্ষীণং প্রদানেন সৎকৃত্য বশমানয়েৎ। ভেদং কুর্ব্বীত যত্নেন মল্লামাত্যপুরোধসাং ॥ যথাবলং প্রকুর্ব্বীত দুষ্টদণ্ডনিপাতনং ॥ ইতি যুক্তিকল্পতরৌ ১ অধ্যায়ঃ ॥

আশ্রয়াশঃ ( পুং ) অগ্নিঃ । চিত্রকবৃক্ষঃ । ইত্যমরঃ ॥

আশ্রয়াশঃ ( ত্রি ) আশ্রয়নাশকঃ। আশ্রয়ধ্বংসী। ইতি মেদিনী ॥

আশ্রবং ( ত্রি ) বচনস্থিতঃ। কথার বাধ্য ইতি ভাষা। ইতি মেদিনী ॥

আশ্রবঃ ( পুং ) অঙ্গীকারঃ। ক্লেশঃ। ইতি মেদিনী ॥ দোষঃ। ইতি হেমচন্দ্রঃ ॥

আশ্রিঃ ( স্ত্রী ) অশ্রিঃ। কোণঃ ॥

আশ্রিতঃ ( ত্রি ) আশ্রয়প্রাপ্তঃ । শরণাগতঃ। ন্যায়মতে পরমাণ্বাকাশাদি নিত্যদ্রব্যভিন্ন সর্ব্বদ্রব্যাণাং আশ্রিতত্বং সাধর্ম্ম্যং ॥

আশ্রুতঃ (ত্রি) অঙ্গীকৃতঃ। স্বীকৃতঃ। ইত্যমরঃ॥ আকর্ণিতঃ। কৃতশ্রবণঃ॥

আশ্লেষঃ (পুং) আলিঙ্গনং। ইতি হলায়ুধঃ॥ একদেশসম্বন্ধঃ। যথা। কাননে রেমে। ইতি ব্যাকরণং॥

আশ্বং (ক্লী) অশ্ববৃন্দঃ। ঘোটকসমূহঃ। ইত্যমরঃ॥

আশ্বত্থং (ক্লী) অশ্বত্থবৃক্ষফলং। ইত্যমরঃ॥

আশ্বপালিকঃ (পুং) অশ্বপালস্য পুত্রঃ। ইতি ব্যাকরণং॥

আশ্বযুজঃ (পুং) আশ্বিনমাসঃ। ইত্যমরঃ॥ আশ্বিনসম্বন্ধিনি ত্রি

আশ্বযুজী (স্ত্রী) আশ্বিনী পূর্ণিমা। ইতি শব্দরত্নাবলী॥

আশ্বাসঃ (পুং) নির্বৃতিঃ। আখ্যায়িকাপরিচ্ছেদঃ। ইতি মেদিনী॥ আশাপ্রদানং॥

আশ্বিনঃ (পুং) বৈশাখাদিদ্বাদশমাসান্তর্গতষষ্ঠমাসঃ। অশ্বিনীনক্ষত্রযুক্তা পৌর্ণমাসী যত্র মাসে সঃ। রবেঃ কন্যারাশিস্থিতিকালঃ। তৎপর্য্যায়ঃ। ইষঃ ২ আশ্বযুজঃ ৩। ইত্যমরঃ॥ শারদঃ ৪। ইতি রাজনির্ঘণ্টঃ॥ তত্র জাতফলং। রাজ্ঞাং প্রিয়ঃ কাব্যকলাবিদগ্ধঃ স্যাদ্দর্প্তগর্ব্বাগ্রসুতীক্ষ্ণবুদ্ধিঃ। সুধী বদান্যো বহুমানশালী ভক্তো ভবেদাশ্বিনমাসজন্মা॥ ইতি কোষ্ঠীপ্রদীপঃ॥

আশ্বিনেয়ৌ (পুং) অশ্বিনীকুমারৌ। ইত্যমরঃ॥

আশ্বীনং (ত্রি) যদ্বর্ত্ম একেনাশ্বেন একেন দিনেন গম্যতে তৎ। এক ঘোড়ায় এক দিনে যাবার পথ ইতি ভাষা। ইত্যমরঃ

আষাঢ়ঃ (পুং) বৈশাখাদিদ্বাদশমাসান্তর্গততৃতীয়মাসঃ। রবের্মিথুনরাশিস্থিতিকালঃ। পূর্ব্বোত্তরাষাঢ়ান্যতরনক্ষত্রযুক্তা পৌর্ণমাসী যত্র মাসে সঃ। তৎপর্য্যায়ঃ। শুচিঃ ২। ইত্যমরঃ॥ তত্র জাতফলং। অনল্পজল্পী প্রমদাভিলাষী প্রমাদশীলো গুরুবৎসলশ্চ। বহুব্যয়ো মন্দহুতাশনঃ স্যাদাষাঢ়মাসপ্রভবো মনুষ্যঃ॥ ইতি কোষ্ঠীপ্রদীপঃ॥ ব্রতিনাং পলাশদণ্ডঃ। মলয়পর্ব্বতঃ। ইতি মেদিনী॥

আষাঢ়কঃ (পুং) আষাঢ়মাসঃ॥

আষাঢ়ভবঃ (পুং) মঙ্গলগ্রহঃ। ইতি হারাবলী॥ আষাঢ়মাসজাতে ত্রি॥

আষাঢ়া (স্ত্রী) পূর্ব্বাষাঢ়ানক্ষত্রং। উত্তরাষাঢ়ানক্ষত্রং। ইতি শব্দরত্নাবলী॥

আষাঢ়াভূঃ (পুং) মঙ্গলগ্রহঃ। ইতি হেমচন্দ্রঃ॥

আষাঢ়ী (স্ত্রী) আষাঢ়মাসস্য পূর্ণিমা। ইতি মেদিনী॥

আষ্ট্রং (ক্লী) আকাশং। ইত্যুণাদিকোষঃ॥

আস ঞি ঙ ল উপবেশনে। ইতি কবিকল্পদ্রুমঃ॥ বিদ্যমানতায়াং। ইতি তট্টীকা॥ ঞি আসিতোঽস্তি। ল ঙ আস্তে সিংহাসনে নৃপঃ। বিদ্যমানতায়ামপ্যয়ং। আকাশমাস্তে। ইতি দুর্গাদাসঃ॥

আসঃ (পুং) ধনুঃ। ইতি হেমচন্দ্রঃ॥

আসক্তঃ (ত্রি) আসক্তিবিশিষ্টঃ। তৎপর্য্যায়ঃ। তৎপরঃ ২ প্রসিতঃ ৩। ইত্যমরঃ॥

আসক্তং (ক্লী) নিত্যং। সততং। অবিরতং। ইতি জটাধরঃ॥

আসক্তিঃ (স্ত্রী) আনুরক্তিঃ। আসঙ্গঃ॥

আসঙ্গং ( ক্লী ) অনবরতং। নিত্যং। সততং। তদ্‌যুক্তে ত্রি। ইতি জটাধরঃ॥ তুবরী। সৌরাষ্ট্রমৃত্তিকা ইতি যাবৎ। ইতি রাজ-নির্ঘণ্টঃ॥ আসক্তিঃ॥

আসঙ্গিনী ( স্ত্রী ) চক্রবাতঃ। বাতভ্রমঃ। ঘুরুণিয়া বাতাস ইতি ভাষা। ইতি ত্রিকাণ্ড-শেষঃ॥

আসত্তিঃ ( স্ত্রী ) সঙ্গমঃ। লাভঃ। ইতি মেদিনী॥ ন্যায়মতে পদসন্নিধানকারণং। যৎপদার্থস্য যৎপদার্থেনান্বয়োঽপেক্ষিত-স্তয়োরব্যবধানেনোপস্থিতিঃ কারণং। ইতি সিদ্ধান্তমুক্তাবলী॥

আসনং ( ক্লী ) পীঠং। পিঁড়ি চৌকি ইত্যাদি ভাষা। হস্তিস্কন্ধদেশঃ। যত্র মহামাত্রো নিবসতি। বিজিগীষোর্দুর্গাদীনবর্দ্ধয়তঃ স্থিতিঃ। ইত্যমরঃ॥ যাত্রানিবর্ত্তনং। ইতি মেদিনী॥ অষ্টাঙ্গযোগস্য তৃতীয়-যোগাঙ্গং। তত্তু পঞ্চপ্রকারকরচরণাদি-সংস্থানবিশেষঃ। যথা। পদ্মাসনং স্বস্তি-কাখ্যং ভদ্রং বজ্রাসনং তথা। বীরাসন-মিতি প্রোক্তং ক্রমাদাসনপঞ্চকং॥ তেষাং ক্রমঃ। ঊর্ব্বোরুপরি বিন্যস্য সম্যক্ পাদ-তলে উভে। অঙ্গুষ্ঠৌ চ নিবধ্নীয়াৎ হস্তাভ্যাং ব্যুৎক্রমাত্তথা॥ পদ্মাসনমিতি প্রোক্তং যোগিনাং হৃদয়ঙ্গমং॥ ১॥ জানূর্ব্বোরন্তরে সম্যক্ কৃত্বা পাদতলে উভে। ঋজুকায়ো বিশেম্মন্ত্রী স্বস্তিকং তৎ প্রচক্ষ্যতে॥ ২॥ সীমন্যাঃ পার্শ্বয়োর্ন্যস্যেদ্‌গুল্‌ফযুগ্মং সু-নিশ্চলং। বৃষণাধঃপাদপার্ষ্ণিং পাণিভ্যাং পরিবন্ধয়েৎ। ভদ্রাসনং সমুদ্দিষ্টং যোগিভিঃ সারকল্পিতং॥ ৩॥ ঊর্ব্বোঃ পাদৌ ক্রমান্ন্যস্যেৎ কৃত্বা প্রত্যঙ্মুখাঙ্গুলী। করৌ নিদধ্যাদাখ্যাতং বজ্রাসনমনুত্তমং॥৪॥ একপাদমধঃ কৃত্বা বিন্যস্যোরৌ তথেতরঃ। ঋজুকায়ো বিশেম্মন্ত্রী বীরাসনমিতী-রিতং॥ ৫॥ ইতি তন্ত্রসারঃ॥ অন্যচ্চ। আসনানি কুলেশানি যাবন্তো জীবজন্তবঃ। চতুরশীতিলক্ষাণি চৈকৈকং সমুদাহৃতং॥ আসনেভ্যঃ সমস্তেভ্যঃ সাম্প্রতং দ্বয়-মুচ্যতে। একং সিদ্ধাসনং নাম দ্বিতীয়ং কমলাসনং॥ ইতি নিরুক্ততন্ত্রং॥ শৃঙ্গারাস-নানি বন্ধশব্দে দ্রষ্টব্যানি॥ উপবেশনা-ধারঃ। পীঠাদি। যথা। শ্রীভগবানুবাচ। উপচারান্ প্রবক্ষ্যামি শৃণু ষোড়শ ভৈরব। যৈঃ সম্যক্ তুষ্যতে দেবী দেবোঽপ্যন্যো হি ভক্তিতঃ॥ আসনং প্রথমং দদ্যাৎ পৌষ্পং দারুজমেব বা। বাস্ত্রং বা চার্ম্মণং কৌশং মণ্ডলস্যোত্তরে সৃজেৎ॥ পৌষ্পা-সনং যদ্বিহিতং যস্য তদযদি গর্ত্তকং॥ নিবেদয়েত্তদা পদ্মে বিপুলং দ্বারি চোৎ-সৃজেৎ। পৌষ্পং পুষ্পৌঘরচিতং কুশ-সূত্রাদিসংযুতং॥ অতিপ্রীতিকরং দেব্যা মমাপ্যন্যস্য ভৈরব। যজ্ঞদারুসমুদ্ভূত-মাসনং মসৃণং শুভং॥ নোচ্ছ্রায়ং নাতি-বিস্তীর্ণমাসনং বিনিযোজয়েৎ॥ অন্য-দারুভবঞ্চাপি দদ্যাদাসনমুত্তমং॥ সকণ্টকং ক্ষীরযুক্তং দারুসারবিবর্জ্জিতং। চৈত্য-শ্মশানসংভূতং বর্জয়িত্বা বিভীতকং॥ বাল্কলং কোষজং ফালং বস্ত্রমেতত্ত্রয়ং মতং। রোমজং কম্বলঞ্চৈব তদনেন

চতুষ্টয়ং ॥ অনেন রচিতং দদ্যাদাসনং চেষ্টভূতয়ে। সিংহব্যাঘ্রতরক্ষূণাং ছাগস্য মহিষস্য চ ॥ গজানাং তুরগাণাঞ্চ কৃষ্ণসারস্য চর্ম্মণঃ। স্মরস্যাথ রামস্য মৃগাণাং নবভেদিনাং ॥ চর্ম্মভিঃ সর্ব্বদেবানামাসনং প্রীতিদং স্মৃতং। বাস্ত্রেষু কম্বলং শস্তমাসনং দেবতুষ্টয়ে॥ রাঙ্কবং চার্ম্মণং শ্রেষ্ঠং দারবং চন্দনোদ্ভবং। যচ্চাসনং কুশময়ং তদাসনমনুত্তমং ॥ সর্ব্বেষামপি দেবানামৃষীণাঞ্চ যতাত্মনাং। যোগপীঠস্য সদৃশমাসনং স্থানমুচ্যতে ॥ আসনস্য প্রদানেন সৌভাগ্যং মুক্তিমাপ্নুয়াৎ। স্মরো রোহিতো ন্যঙ্কুঃ সম্বরো বভ্রুণো রুরুঃ ॥ শশৈণহরিণাশ্চেতি মৃগা নববিধা মতাঃ। হরিণশ্চাপি বিজ্ঞেয়ঃ পঞ্চভেদোঽত্র ভৈরব॥ ঋষ্যঃ খড়্গো রুরুশ্চৈব পৃষতশ্চ মৃগস্তথা। এতে বলিপ্রদানেষু চর্ম্মদানে চ কীর্ত্তিতাঃ॥ সর্ব্বেষাং তৈজসানাঞ্চ আসনং জ্যেষ্ঠমুচ্যতে। আয়সং বর্জ্জয়িত্বা তু কাংস্যং সীসকমেব বা॥ শিলাময়ং মণিময়ং তথা রত্নময়ং মতং। আসনং দেবতাভ্যস্তু ভুক্ত্যৈ মুক্ত্যৈ সমুৎসৃজেৎ ॥ * ॥ অত্রৈব সাধকানাঞ্চ আসনং শৃণু ভৈরব। যত্রাসীনঃ পূজকস্তু সর্ব্বসিদ্ধিমবাপ্নুয়াৎ ॥ ঐণঞ্চ চার্ম্মণং বাস্ত্রং তৈজসঞ্চ চতুষ্টয়ং। আসনং সাধকানাঞ্চ সততং পরিকীর্ত্তিতং॥ পূর্ব্বোক্তং যচ্চ দেবেভ্য আসনং পরিকীর্ত্তিতং। তৎসর্ব্বমাসনং শস্তং পূজাকর্ম্মণি সাধকে॥ ন যথেষ্টাসনো ভূয়াৎ পূজাকর্ম্মণি সাধকঃ। কাষ্ঠাদিকাসনং কুর্য্যাৎ মিতমেব সদা বুধঃ ॥ * ॥ চতুর্ব্বিংশত্যঙ্গুলেন দীর্ঘং কাষ্ঠাসনং মতং। ষোড়শাঙ্গুলবিস্তীর্ণমুৎসেধচতুরঙ্গুলং ॥ ষড়ঙ্গুলং বা কুর্য্যাত্তু নোচ্ছ্রিতং চাত্র কারয়েৎ। পূর্ব্বোক্তং বর্জ্জয়েদ্বর্জ্জ্যমাসনং পূজনেষ্বপি ॥ বাস্ত্রং দ্বিহস্তায়ো দীর্ঘং সার্দ্ধহস্তায় বিস্তৃতং। ন ত্র্যঙ্গুলাত্তথোচ্ছ্রায়ং পূজাকর্ম্মণি সংশ্রয়েৎ। যথেষ্টং চার্ম্মণং কুর্য্যাৎ পূর্ব্বোক্তং সিদ্ধিদায়কং ॥ ষড়ঙ্গুলাধিকং কুর্য্যান্নোচ্ছ্রিতন্তু কদাচন। কাম্বলং চার্ম্মণং চৈলং মহামায়াপ্রপূজনে॥ প্রশস্তমাসনং প্রোক্তং কামাখ্যায়াস্তথৈব চ। ত্রিপুরায়াশ্চ সততং বিষ্ণোশ্চাপি কুশাসনং ॥ বহুদীর্ঘং বহূচ্ছ্রায়ং তথৈব বহুবিস্তৃতং। দারুভূমিসমং প্রোক্তমশ্মাপি সর্ব্বকর্ম্মণি ॥ পৃথক্ পৃথক্ কল্পয়েচ্চ শোভনং তাদৃশাসনং। ন পত্রমাসনং কুর্য্যাৎ কদাচিদপি পূজনে॥ ন প্রাণ্যঙ্গসমুদ্ভূতমস্থিজং দ্বিরদাদৃতে। মাতঙ্গদন্তসঞ্জাতমাসনং কামিকে চরেৎ॥ চর্ম্ম পূর্ব্বোদিতং গ্রাহ্যং তথা গন্ধমৃগস্য চ ॥ * ॥ সলিলে যদি কুর্ব্বীত দেবতানাং প্রপূজনং ॥ তত্রাপ্যাসনমাসীনো নোত্থিতস্তু সমাচরেৎ। তোয়ে শিলাময়ং কুর্য্যাদাসনং কৌশমেব বা॥ দারবং তৈজসং বাপি নান্যদাসনমাচরেৎ। আসনারোপসংস্থানং স্থানাভাবে তু পূজকঃ॥ আসনং কল্পয়িত্বা তু মনসা পূজয়েজ্জলে। যদ্যাসনস্য সংস্থানং তোয়মধ্যে ন বিদ্যতে॥ অন্যত্র বা তদা স্থিত্বা দেবপূজাং সমাচরেৎ।

ইত্যেতৎ কথিতং পুত্র পূজ্যপূজকসঙ্গতং ॥ আসনং পাদ্যমধুনা শৃণু বেতালভৈরব ॥ ইতি কালিকাপুরাণে ৬৭ অধ্যায়ঃ ॥

আসনঃ (পুং) জীবকবৃক্ষঃ। ইতি মেদিনী ॥

আসনা (স্ত্রী) স্থিতিঃ। ইত্যমরঃ ॥

আসনী (স্ত্রী) বিপণিঃ। স্থিতিঃ। ইতি মেদিনী ॥

আসন্দঃ (পুং) বাসুদেবঃ। ইতি মেদিনী ॥

আসন্দী (স্ত্রী) ক্ষুদ্রখট্টা। ইতি মেদিনী ॥

আসন্নঃ (ত্রি) নিকটঃ। ইত্যমরঃ ॥

আসবঃ (পুং) মদ্যবিশেষঃ। তৎপর্য্যায়ঃ। মৈরেয়ং ২ শীধুঃ ৩। ইত্যমরঃ ॥ শীধুরিক্ষুরসৈঃ পক্কৈরপক্কৈরাসবো ভবেৎ। মৈরেয়ং ধাতকীপুষ্পগুড়ধানাম্লসংহিতং। ইতি মাধবেন ভেদঃ কৃতস্তথাপি সূক্ষ্মমনাদৃত্যেদমুক্তং। ইতি ভরতঃ ॥ মদ্যমাত্রং। ইতি রাজনির্ঘণ্টঃ ॥

আসবদ্রুঃ (পুং) তালবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

আসাদিতঃ (ত্রি) প্রাপ্তঃ। লব্ধঃ। ইত্যমরঃ ॥

আসারঃ (পুং) ধারাসংপাতঃ। বেগবৃষ্টিঃ। প্রসরণং। সৈন্যানাং সর্ব্বতো ব্যাপ্তিঃ। ইত্যমরঃ ॥ সুহৃদ্বলং। ইতি মেদিনী ॥

আসীনঃ (ত্রি) উপবিষ্টঃ। বসা লোক ইত্যাদি ভাষা। ইতি জটাধরঃ ॥

আসীনপ্রচলায়িতং (ক্লী) উপবিশ্য নিদ্রাবশেন দোলনং। ঢোলা ইতি ভাষা। ইতি রাজবল্লভঃ ॥

আসুতিঃ (পুং) মদ্যসন্ধানং। মদ চোয়ান ইতি ভাষা। ইতি হেমচন্দ্রঃ ॥

আসুতীবলঃ (পুং) যজ্বা। শৌণ্ডিকঃ। ইতি হেমচন্দ্রঃ ॥

আসুরঃ (পুং) অসুরঃ। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ ॥ ব্রাহ্ম্যাদ্যষ্টধাবিবাহান্তর্গতবিবাহবিশেষঃ। আসুরো দ্রবিণাদানাৎ ॥ ইতি যাজ্ঞবল্ক্যঃ ॥ জ্ঞাতিভ্যো দ্রবিণং দত্ত্বা কন্যায়ৈ চৈব শক্তিতঃ। কন্যাপ্রদানং স্বাচ্ছন্দ্যাদাসুরো ধর্ম্ম উচ্যতে ॥ ইতি মনুঃ ॥

আসুরং (ক্লী) বিড়্‌লবণং। ইতি রাজনির্ঘণ্টঃ ॥ অসুরস্য ভাবঃ। অসুরসম্বন্ধীয়ে ত্রি। ইতি ব্যাকরণং ॥

আসুরং (ত্রি) অসুরসম্বন্ধি। যথা। যস্মিন্ নবে পুরাণে চ বিশ্বেদেবা ন লেভিরে। আসুরং তদ্ভবেৎ শ্রাদ্ধং বৃষলং মন্ত্রবর্জিতং ॥ ইতি শ্রাদ্ধতত্ত্বে ঋগ্বেদীয়গৃহ্যপরিশিষ্টং ॥ অপি চ। স্নানং দানং তপঃ শ্রাদ্ধমনন্তং রাহুদর্শনে। আসুরী রাত্রিরন্যত্র তস্মাত্তাং পরিবর্জ্জয়েৎ॥ ইতি শ্রাদ্ধতত্ত্বধৃতযমবচনং ॥ * ॥ আসুরসর্গো যথা। দ্বৌ ভূতসর্গৌ লোকেঽস্মিন্ দৈব আসুর এব চ। দৈবো বিস্তরশঃ প্রোক্ত আসুরং পার্থ মে শৃণু ॥ প্রবৃত্তিঞ্চ নিবৃত্তিঞ্চ জনা ন বিদুরাসুরাঃ। ন শৌচং নাপি চাচারো ন সত্যং তেষু বিদ্যতে ॥ অসত্যমপ্রতিষ্ঠন্তে জগদাহুরনীশ্বরং। অপরস্পরসম্ভূতং কিমন্যৎ কামহেতুকং ॥ এতাং দৃষ্টিমবষ্টভ্য নষ্টাত্মানোঽল্পবুদ্ধয়ঃ। প্রভবন্ত্যুগ্রকর্ম্মাণঃ ক্ষয়ায় জগতোঽহিতাঃ ॥ কামমাশ্রিত্য দুষ্পূরং দম্ভমানমদান্বিতাঃ। মোহাদ্‌গৃহীত্বা

সদ্‌গ্রাহান্ প্রবর্ত্তন্তেঽশুচিব্রতাঃ ॥ চিন্তামপরিমেয়াঞ্চ প্রলয়ান্তামপাশ্রিতাঃ। কামোপভোগপরমা এতাবদিতি নিশ্চিতাঃ ॥ আশাপাশশতৈর্ব্বদ্ধাঃ কামক্রোধপরায়ণাঃ। ঈহন্তে কামভোগার্থমন্যায়েনার্থসঞ্চয়ান্ ॥ ইদমদ্য ময়া লব্ধমিদংপ্রাপ্স্যে মনোরথং। ইদমস্তীদমপি মে ভবিষ্যতি পুনর্ধনং ॥ অসৌ ময়া হতঃ শত্রুর্হনিষ্যে চাপরানপি। ঈশ্বরোঽহমহং ভোগী সিদ্ধোঽহং বলবান্ সুখী॥ আঢ্যোঽভিজনবানস্মি কোঽন্যোঽস্তি সদৃশো ময়া। যক্ষ্যে দাস্যামি মোদিষ্য ইত্যজ্ঞানবিমোহিতাঃ॥ অনেকচিত্তবিভ্রান্তা মোহজালসমাবৃতাঃ। প্রসক্তাঃ কামভোগেষু পতন্তি নরকেঽশুচৌ ॥ আত্মসম্ভাবিতাস্তব্ধা ধনমানমদান্বিতাঃ। যজন্তে নাম যজ্ঞৈস্তে দম্ভেনাবিধিপূর্ব্বকং ॥ অহঙ্কারং বলং দর্পং কামং ক্রোধঞ্চ সংশ্রিতাঃ। মামাত্মপরদেহেষু প্রদ্বিষন্তোঽভ্যসূয়কাঃ ॥ তানহং দ্বিষতঃ ক্রূরান্ সংসারেষু নরাধমান্। ক্ষিপাম্যজস্রমশুভানাসুরীষ্বেব যোনিষু ॥ আসুরীং যোনিমাপন্না মূঢ়া জন্মনি জন্মনি। মামপ্রাপ্যৈব কৌন্তেয় ততো যান্ত্যধমাং গতিং ॥ ইতি শ্রীভগবদ্গীতায়াং ১৬ অধ্যায়ঃ ॥

আসুরী (স্ত্রী) রাজিকা। রাইসর্ষা ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ ॥ ত্রিবিধচিকিৎসান্তর্গতচিকিৎসাবিশেষঃ। সা চ ছেদভেদাদ্যাত্মিকা। ইতি বৈদ্যকং শব্দচন্দ্রিকা চ ॥



আসেচনঃ (ত্রি) যস্য দর্শনে তৃপ্তেরন্তো ন জায়তে সঃ। তৎপর্য্যায়ঃ। অতৃপ্তিকৃৎ ২। ইতি হারাবলী ॥

আসেচনকঃ (ত্রি) অসেচনকঃ। আসেচনঃ। ইত্যমরটীকায়াং রায়মুকুটঃ ॥

আস্কন্দনং (ত্রি) তিরস্কারঃ। রণঃ। শোষণং। ইতি মেদিনী ॥

আস্কন্দিতং (ক্লী) অশ্বগতিবিশেষঃ। স চ সম্যগ্‌গতিঃ। ইত্যমরঃ ॥

আস্কন্দিতকং (ক্লী) আস্কন্দিতং। অশ্বানাং পঞ্চমগতিঃ। তৎপর্য্যায়ঃ। উত্তেরিতং ২ উপকণ্ঠং ৩। ইতি হেমচন্দ্রঃ ॥

আস্তরঃ (পুং) করিকম্বলং। ইতি হেমচন্দ্রঃ॥ বস্ত্রাদ্যাস্তরণং ॥

আস্তরণং (ক্লী) হস্তিপৃষ্ঠস্থিতচিত্রকম্বলং। ঝুল ইতি ভাষা। তৎপর্য্যায়ঃ। প্রবেণী ২ বর্ণঃ ৩ পরিস্তোমঃ ৪ কুথা ৫ কুথঃ ৬। ইত্যমরঃ॥ প্রবেণিঃ ৭ পরিষ্টোমঃ ৮ কুথং ৯। ইত্যমরটীকা ॥

আস্তিকঃ (পুং) মুনিবিশেষঃ। স তু জরৎকারুমুনিপুত্রঃ। তৎপিতা গর্ভস্থং তং জ্ঞাত্বাস্তীত্যুক্ত্বা গত ইত্যস্মাদাস্তিকঃ। ইতি মহাভারতং

আস্তিকঃ (ত্রি) নাস্তিকভিন্নঃ। ঈশ্বরোঽস্তীতি বাদী। বেদপ্রামাণ্যবাদী। তৎপর্য্যায়ঃ। শ্রদ্ধালুঃ ২ শ্রাদ্ধঃ ৩। ইতি হেমচন্দ্রঃ ॥

আস্তিকার্থদঃ (পুং) জনমেজয়ো রাজা। ইতি শব্দরত্নাবলী ॥

আস্তীকঃ (পুং) আস্তিকমুনিঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

আস্তীকজননী (স্ত্রী) আস্তিকমাতা। মনসা দেবী। ইতি শব্দরত্নাবলী॥

আস্থা (স্ত্রী) যত্নঃ। আলম্বনং। আস্থানং। অপেক্ষা। ইতি মেদিনীকারহেমচন্দ্রৌ॥

আস্থানং (ক্লী) সভা। ইত্যমরঃ। যত্নঃ। ইত্যজয়ঃ॥

আস্থানী (স্ত্রী) সভা। ইত্যমরঃ॥

আস্পদং (ক্লী) প্রতিষ্ঠা। কর্ম্ম। ইত্যমরঃ॥ প্রভুত্বং। ইতি ধরণী। স্থানং। ইতি হেমচন্দ্রঃ॥

আস্পন্দনং (ক্লী) স্পন্দনং। কম্পনং॥

আস্ফালঃ (পুং) হস্তিকর্ণাস্ফালনং। হাতির কাণ নাড়া ইতি ভাষা। তৎপর্য্যায়ঃ। ঝলঞ্ঝলা। ইতি হারাবলীত্রিকাণ্ডশেষৌ॥

আস্ফালনং (ক্লী) আটোপঃ। প্রাগল্ভ্যং॥

আস্ফুজিৎ (পুং) শুক্রাচার্য্যঃ। ইতি ত্রিকাণ্ডশেষঃ॥

আস্ফোটঃ (পুং) আস্ফোতবৃক্ষঃ। আকন্দ ইতি ভাষা। ইতি শব্দরত্নাবলী॥ শূরাদের্বাহ্বাদিশব্দঃ। ইতি শ্রীভাগবতং॥

আস্ফোটকঃ (পুং) পর্ব্বতজপীলুবৃক্ষঃ। আকরোট ইতি ভাষা। ইতি শব্দমালা॥

আস্ফোটনং (ক্লী) বিকাশঃ। মুদ্রণং। ইতি ধরণী॥ বাহ্বাদিশব্দঃ। তাল ঠোকা ইত্যাদি ভাষা॥

আস্ফোটনী (স্ত্রী) বেধনিকা। তুরপন ভ্রমর ইত্যাদি ভাষা। ইত্যমরঃ॥

আস্ফোটা (স্ত্রী) নবমল্লী। বনমল্লী। ইতি শব্দরত্নাবলী॥

আস্ফোতঃ (পুং) অর্কবৃক্ষঃ। কোবিদারকবৃক্ষঃ। ইতি মেদিনী॥ ভূপলাশবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥

আস্ফোতকঃ (পুং) অর্কবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

আস্ফোতা (স্ত্রী) অপরাজিতা। বনমল্লিকা। ইতি মেদিনী॥ সারিবাবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥ বৃক্ষবিশেষঃ। হাপরমালীতি খ্যাতা। অস্যা গুণৌ। কুষ্ঠবিষরোগনাশিত্বং। ইতি রাজবল্লভঃ॥

আস্যং (ক্লী) মুখং। মুখমধ্যং। মুখভবে ত্রি। ইতি মেদিনী॥

আস্যপত্রং (ক্লী) পদ্মং। ইতি শব্দচন্দ্রিকা॥

আস্যলাঙ্গলঃ (পুং) শূকরঃ। ইতি হেমচন্দ্রঃ॥

আস্যলোম [ন্] (ক্লী) শ্মশ্রুঃ। ইতি হেমচন্দ্রঃ॥

আস্যা (স্ত্রী) স্থিতিঃ। ইত্যমরো মেদিনী চ॥

আস্যাসবঃ (পুং) লালা। থুতু লাল ইত্যাদি ভাষা। ইতি হেমচন্দ্রঃ॥

আস্রপঃ (পুং) মূলানক্ষত্রং। ইতি হেমচন্দ্রঃ॥

আস্রবঃ (পুং) ক্লেশঃ। কষ্টং। ইত্যমরঃ॥

আহ ব্য ক্ষেপঃ। নিয়োগঃ। ইতি মেদিনী॥ দৃঢ়সম্ভাবনং। ইতি শব্দরত্নাবলী॥

আহকজ্বরঃ (পুং) নাসারোগবিশেষঃ। নাসাজ্বর ইতি খ্যাতঃ। তস্য লক্ষণং। তন্নুনা রক্তশোথেন যুক্তো নাসাপুটান্তরে। গাত্রশূলজ্বরকরঃ শ্লেষ্মণাহ্বাহকঃ স্মৃতঃ॥ ইতি বৈদ্যকং॥

আহতং (ক্লী) পুরাতনবস্ত্রং। নূতনবস্ত্রং। ইতি মেদিনী॥ মৃষার্থকবাক্যং। ইত্যমরঃ॥

আহতঃ (ত্রি) গুণিতঃ। তাড়িতঃ। ইতি মেদিনী ॥ জ্ঞাতঃ। মিথ্যোক্তঃ। ইত্যজয়ঃ ॥

আহতঃ (পুং) আনকঃ। ঢক্কা। ইতি মেদিনী ॥

আহতলক্ষণঃ (ত্রি) গুণৈঃ প্রতীতঃ। গুণেন খ্যাতঃ। তৎপর্য্যায়ঃ। কৃতলক্ষণঃ ২। ইত্যমরঃ ॥

আহরঃ (পুং) উচ্ছ্বাসঃ। অন্তর্ম্মুখশ্বাসঃ ॥ ইতি

আহরণং (ক্লী) দ্রব্যাদ্যানয়নং। আসাদনং। যথা। দেবীপুরাণং। মৃদাহরণসংঘট্ট-প্রতিষ্ঠাহ্বানমেব চ। স্নপনং পূজনঞ্চৈব বিসর্জনমতঃপরং ॥ ইতি তিথ্যাদিতত্ত্বং ॥

আহবঃ (পুং) যুদ্ধং। যজ্ঞঃ। ইতি শব্দরত্নাবলী ॥

আহবনীয়ঃ (পুং) যজ্ঞাগ্নিবিশেষঃ। ইত্যমরঃ ॥ গার্হপত্যাদুদ্ধৃত্য হোমার্থং যঃ সংস্ক্রিয়তে সঃ। ইতি ভরতঃ ॥

আহারঃ (পুং) দ্রব্যগলাধঃকরণং। তৎপর্য্যায়ঃ। জগ্ধিঃ ২ ভোজনং ৩ জেমনং ৪ লেপঃ ৫ নিঘষঃ ৬ ন্যাদঃ ৭। ইত্যমরঃ ॥ জমনং ৮ বিঘষঃ ৯ ইতি তট্টীকা ॥ প্রত্যবসানং ১০ ভক্ষণং ১১ অশনং ১২ ॥ ইতি রত্নমালা ॥ অভ্যবহারঃ ১৩ স্বদনং ১৪ নিগরঃ ১৫। ইতি রাজনির্ঘণ্টঃ ॥ অস্য গুণাঃ। সদ্যস্তৃপ্তিজনকত্বং। বলকারিত্বং। দেহধারকত্বঞ্চ। ইতি রাজবল্লভঃ ॥ স ত্রিবিধঃ। সাত্ত্বিকঃ ১ রাজসিকঃ ২ তামসিকঃ ৩। সাত্ত্বিকাহারো যথা। আয়ুঃসত্ত্ববলারোগ্যসুখপ্রীতিবিবর্দ্ধনাঃ। রস্যাঃ স্নিগ্ধাঃ স্থিরা হৃদ্যা আহারাঃ সাত্ত্বিকপ্রিয়াঃ ॥ রাজসিকাহারো যথা। কট্বম্ললবণাত্যুষ্ণ-তীক্ষ্ণরূক্ষবিদাহিনঃ। আহারা রাজসস্যেষ্টা দুঃখশোকাময়প্রদাঃ ॥ তামসিকাহারো যথা। যাতযামং গতরসং পূতিপর্য্যুষিতঞ্চ যৎ। উচ্ছিষ্টমপিচামেধ্যং ভোজনং তামসপ্রিয়ং ॥ ইতি শ্রীভগবদ্গীতা ॥ আহরণং। ইতি মেদিনী ॥

আহারসম্ভবঃ (পুং) শরীরস্থরসধাতুঃ। ইতি

আহার্য্যং (ত্রি) আগন্তুকং। ইতি ত্রিকাণ্ডশেষঃ ॥ আহরণীয়ং ॥

আহার্য্যঃ (পুং) নাট্যোক্তৌ ব্যঞ্জকবিশেষঃ। স তু ভূষাদিনা রচিতঃ। ইতি হেমচন্দ্রঃ ॥

আহার্য্যশোভা (স্ত্রী) কৃত্রিমশোভা। চিত্র-ভূষাদিনা কৃতদ্যুতিঃ। ইতি জটাধরঃ ॥

আহাবঃ (পুং) কূপসমীপে পশ্বাদিজল-পানার্থকৃতস্বল্পজলাশয়ঃ। চৌবাচ্চা ইতি ভাষা। ইত্যমরঃ ॥ যুদ্ধং। আহ্বানং। ইতি ধরণিঃ ॥

আহিকঃ (পুং) পাণিনিমুনিঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ কেতুগ্রহঃ। ইতি হেমচন্দ্রঃ ॥

আহিতঃ (ত্রি) ন্যস্তঃ। অর্পিতঃ। স্থাপিতঃ। ইতি হলায়ুধঃ ॥

আহিতলক্ষণঃ (ত্রি) আহতলক্ষণঃ। গুণাদি-দ্বারা খ্যাতঃ। ইত্যমরটীকায়াং রমানাথঃ ॥

আহিতাগ্নিঃ (পুং) সাগ্নিকঃ। অগ্নিহোত্রী। ইতি স্মৃতিঃ ॥

আহিতুণ্ডিকঃ (পুং) ব্যালগ্রাহী। সাপুড়িয়া ইতি ভাষা। ইত্যমরঃ শব্দরত্নাবলী চ ॥

আহুতং (ক্লী) গৃহস্থানাং পঞ্চমহাযজ্ঞান্তর্গত-যজ্ঞবিশেষঃ। স তু নৃযজ্ঞঃ। ইতি জটাধরঃ॥

আহুতিঃ (স্ত্রী) দেবোদ্দেশে মন্ত্রোচ্চারণ-পূর্ব্বকোঽগ্নৌ হবির্নিক্ষেপঃ। তৎপর্য্যায়ঃ। দেবযজ্ঞঃ ২ হোমঃ ৩ হোত্রং ৪ বষট্‌কারঃ ৫। ইতি

আহুল্যং (ক্লী) ক্ষুপবিশেষঃ। তরবট ইতি কাশ্মীরাদৌ খ্যাতং। তৎপর্য্যায়ঃ। হলরাখ্যং ২ তগরং ৩ তরবটং ৪ শিম্বীফলং ৫ সুপুষ্পং ৬ পীতপুষ্পং ৭ কাঞ্চনপুষ্পকং ৮ নৃপমাঙ্গল্যকং ৯ শরৎপুষ্পং ১০। তস্য গুণাঃ। তিক্তত্বং। শীতলত্বং। চক্ষুর্হিতত্বং। পিত্তদাহমুখ-রোগকুষ্ঠকণ্ডুতিজন্তুশূলব্রণনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

আহূতং (ক্লী) প্রলয়পর্য্যন্তং। যথা। কদম্বানি পটোলানি বৃন্তাকসহিতানি চ। ন ত্যজেৎ কার্ত্তিকে মাসি যাবদাহূতনারকী॥ আহূতানি আভূতানি প্রলয়পর্য্যন্তানীতি যাবৎ। ইতি তিথ্যাদিতত্ত্বং॥

আহূতঃ (ত্রি) কৃতাহ্বানঃ। যথা। প্রগায়তঃ স্ববীর্য্যাণি তীর্থপাদঃ প্রিয়শ্রবাঃ। আহূত ইব মে শীঘ্রং দর্শনং যাতি চেতসি॥ ইতি শ্রীভাগবতে ১ স্কন্ধে ৬ অধ্যায়ঃ॥

আহূতিঃ (স্ত্রী) আহ্বানং। ইতি শব্দরত্নাবলী॥

আহেয়ং (ত্রি) অহিসম্বন্ধি। তদ্বিষচর্ম্মাদি। ইত্যমরঃ॥

আহো ব্য বিকল্পঃ। ইত্যমরঃ॥ প্রশ্নঃ। বিচারঃ। ইতি মেদিনীকরহেমচন্দ্রৌ॥

আহোপুরুষিকা (স্ত্রী) দর্পাদযাত্মনি সম্ভাবনা সা। ইত্যমরঃ॥ অধিকার্থবচনেন শক্তেরপ্রতিঘাতাবিষ্করণং। আত্মবিষয়কার্য্য-সিদ্ধিজননশক্ত্যাবিষ্করণং। ইতি ভরতঃ॥

আহোস্বিৎ ব্য আহো। বিকল্পঃ। ইত্যমরটীকা॥

আহ্নঃ (পুং) দিনসমূহঃ। ইতি ব্যাকরণং॥

আহ্নিকং (ত্রি) দিননির্ব্বর্ত্ত্যং। দিনসাধ্যং। ইতি মেদিনী॥ দিনসম্বন্ধী॥

আহ্নিকং (ক্লী) ভোজনং। প্রকরণসমূহঃ। গ্রন্থভাগঃ। নিত্যক্রিয়া। ইতি মেদিনী-করহেমচন্দ্রৌ॥

অথ ৺ রঘুনন্দনভট্টাচার্য্যকৃতাহ্নিকাচার-তত্ত্বোক্তকর্ম্মাণি সংক্ষেপেণ লিখ্যন্তে॥

তত্র প্রথমযামার্দ্ধকৃত্যং।

ব্রাহ্মে মুহূর্ত্তে জাগরিত্বা ব্রহ্মবিষ্ণুশিবনবগ্রহান্ স্মৃত্বা গুরুপ্রণামং কৃত্বা আত্মানং ব্রহ্মত্বেন সংভাব্য তদ্দিবসকর্ত্তব্যধর্ম্ম-কর্ম্মার্থং চিন্তয়েৎ॥

ততঃ শয়নাদুত্থায় রাত্রিবাসস্ত্যক্ত্বা পৃথিবীং নমস্কৃত্য দক্ষিণচরণং ভূমৌ বিন্যস্য কর্কোটকনাগদময়ন্তীনলঋতুপর্ণরাজকার্ত্ত-বীর্য্যার্জ্জুনান্ স্মৃত্বা নেত্রমুখে প্রক্ষাল্য দ্বিরাচামেৎ

ততঃ নৈঋর্ত্যাং দক্ষিণস্যাম্বা দিশি মূত্রপুরী-ষোৎসর্গং জলমৃত্তিকাশৌচঞ্চ কৃত্বা দ্বিরাচম্য হরিং স্মৃত্বা দিবা সূর্য্যং রাত্রৌ চন্দ্রং তারাম্বা তদসম্ভবে অগ্নিং পশ্যেৎ॥

ততো দন্তধাবনং। দন্তকাষ্ঠাভাবে নিষিদ্ধ-দিনে চ দ্বাদশগণ্ডূষজলৈঃ পত্রৈর্ব্বা মুখং শোধয়িত্বা দ্বিরাচামেৎ॥

ততঃ প্রাতঃস্নানং তিলকং সন্ধ্যাতর্পণঞ্চ কৃত্বা সূর্য্যোদয়পর্য্যন্তং গায়ত্রীং জপেৎ ॥ স্নানাশক্তৌ আর্দ্রবস্ত্রেণ গাত্রমার্জ্জনং মন্ত্রস্নানঞ্চ কৃত্বা সন্ধ্যোপাসনং কুর্য্যাৎ ॥
তত আদর্শাদিদর্শনং দধিদূর্ব্বাদিমঙ্গলদ্রব্যস্পর্শনঞ্চ কুর্য্যাৎ ইতি ॥ * ॥

অথ দ্বিতীয়যামার্দ্ধকৃত্যং ॥

বেদবিদ্যাদ্যভ্যাসঃ । সমিৎপুষ্পাদ্যাহরণঞ্চ ॥ * ॥

অথ তৃতীয়যামার্দ্ধকৃত্যং ।

গুরুদেবধার্ম্মিকোপাসনং । কুটুম্বভরণার্থমীশ্বরোপাসনাদি চ ॥ * ॥

অথ চতুর্থযামার্দ্ধকৃত্যং ।

মধ্যাহ্নস্নানং । তত্র পরখাতোদকে চেৎ তদা সপ্ত পঞ্চ ত্রীন্ বা মৃৎপিণ্ডান্ তীরে ক্ষিপ্ত্বা নাভিমাত্রোদকে কুশহস্তঃ সশিরস্কমজ্জনং কৃত্বা দ্বিরাচম্য সঙ্কল্প্য যথাবিধি ত্রির্নিমজ্জেৎ ॥
ততঃ স্নানবস্ত্রপাণিব্যতিরেকেণ গাত্রমার্জনং তিলকং তর্পণঞ্চ কুর্য্যাৎ ॥
ততঃ অষ্টমমুহূর্ত্তে মধ্যাহ্নসন্ধ্যাং সমাপ্য ব্রহ্মযজ্ঞং বিধায় দেবপূজনং কৃত্বা পাদোদকং নৈবেদ্যঞ্চ যথাকালে উপযুঞ্জীত ॥*॥

অথ পঞ্চমযামার্দ্ধকৃত্যং ॥

বলিবৈশ্বদেবকর্ম্মণী কাম্যবলিকর্ম্ম বামদেব্যগানং গানাশক্তৌ তস্য ত্রিঃ পাঠঃ পার্ব্বণশ্রাদ্ধাদিদিনে পার্ব্বণশ্রাদ্ধানন্তরং বলিবৈশ্বদেবকর্ম্মণী কর্ত্তব্যে ॥
বলিকর্ম্মানন্তরমতিথিলাভার্থং মুহূর্ত্তং গোদোহনকালম্বা অভোজনেন প্রতীক্ষেত । তল্লাভে ভিক্ষাদিকং দত্ত্বা তদনুব্রজেৎ । তদানীমতিথ্যলাভে নিত্যশ্রাদ্ধান্তরমতিথীন্ ভোজয়েৎ । ভোজনাসামর্থ্যে ভিক্ষাং দদ্যাৎ । অতিথ্যলাভে ব্রাহ্মণায় দানং তদসম্ভবে অগ্নৌ জলে বা কিঞ্চিদন্নং ক্ষিপেৎ ॥
ততো নিত্যশ্রাদ্ধং । বামদেব্যগানং তদশক্তৌ ঋকৃত্রয়ং পঠেৎ । নিত্যশ্রাদ্ধকরণাসামর্থ্যে বলিতর্পণাভ্যাং পিতৃযজ্ঞসিদ্ধিঃ ॥
ততো গোগ্রাসদানং গোনমস্কারঞ্চ কুর্য্যাৎ ॥
ততো যথাবিধি ভোজনং । বিষ্ণুপাদোদকাদিকং পূর্ব্বমগৃহীতঞ্চেৎ ইদানীং গৃহ্ণীয়াৎ ॥
ততঃ স্থানান্তরং ন গত্বা মৃদ্ভির্ঘর্ষণৈর্মুখহস্তৌ শোধয়িত্বা তৃণাদিনা দন্তলগ্নরসদ্রব্যমপনীয় জলগণ্ডূষৈর্মুখাভ্যন্তরং সংশোধ্য পাণিপাদৌ প্রক্ষালয়েৎ ॥
তত আসনস্থ এব ভূমৌ পাদৌ সংস্থাপ্য দ্বিরাচম্য মুখং তুলসীপত্রাদিনা সংশোধ্য দক্ষিণপাদাঙ্গুষ্ঠে দক্ষিণহস্তেন মন্ত্রেণ জলং দদ্যাৎ ॥
ততো মহীমার্জনাভাবেঽশুচিত্বাদবিলম্বমেব ভোজনপাত্রমুদ্ধৃত্য উচ্ছিষ্টমপনীয় তৎস্থানং গোময়োদকাভ্যাং সিঞ্চেৎ ॥
ততঃ স্বস্থ আসনে উপবিশ্যেষ্টদেবতানাম স্মৃত্বা অন্নজীর্ণতার্থং মন্ত্রপাঠপূর্ব্বকবামহস্তেনোদরং পরিমৃজ্য পাদশতব্রজনানন্তরং বামপার্শ্বেন কিঞ্চিৎ কালং শয়িত্বা তাম্বূলাদিমুখবাসনদ্রব্যং ভোক্তব্যমিতি ॥*॥

অথ ষষ্ঠসপ্তমযামার্দ্ধকৃত্যং ॥

ইতিহাসপুরাণাদিশ্রবণং ॥

অথাষ্টমযামার্দ্ধকৃত্যং ॥
লৌকিকচিন্তাকরণং। সায়ংসন্ধ্যোপাসনং। ইষ্টদেবতাস্মরণাদিকঞ্চ কুর্য্যাৎ ॥ * ॥
অথ রাত্রিকৃত্যং।
সন্ধ্যানন্তরমিষ্টদেবতামন্ত্রজপত্রিকালপাঠ্যস্তবনারায়ণস্মরণানি কুর্য্যাৎ ॥
ততোঽন্নাদিপাকে জাতে পূর্ব্ববদ্বলিবৈশ্বদেবকর্ম্মণী কৃত্বা অতিথিলাভেঽন্নাদিকং তস্মৈ দত্ত্বা অবশ্যভরণীয়ৈঃ সহ সার্দ্ধপ্রহরাভ্যন্তরেঽনতিতৃপ্তং ভুঞ্জীত। অন্নভোজনাভাবে তাম্বূলাদিকং ভোক্তব্যং ॥
প্রথমযামাভ্যন্তরে বিদ্যাভ্যাসং কুর্য্যাৎ ॥
ততঃ শয়নং। শুচিদেশে খট্টোপরি শয্যাং কৃত্বা শিরোদেশে পূর্ণকুম্ভং নিধায় রাত্রিবাসঃ পরিধায় প্রক্ষালিতপাণিপাদো দ্বিরাচান্তঃ পূর্ব্বশিরা দক্ষিণশিরা বা পদ্মনাভং স্মৃত্বা যামদ্বয়াভ্যন্তরে শয়ীত ॥ * ॥
অথ দারোপগমনং।
ঋতৌ নিষিদ্ধেতরদিনে স্ত্রীসম্ভোগং কৃত্বা তাং দক্ষিণপার্শ্বেন স্বাপয়েৎ ॥
ততঃ অবিলম্বেন মূত্রপুরীষোৎসর্গবৎ মৃজ্জলাভ্যাং লিঙ্গং হস্তৌ পাদৌ চ প্রক্ষাল্য দ্বিরাচম্য স্নায়াৎ ॥
ঋতুভিন্নগমনে তু লিঙ্গপ্রক্ষালনমাচমনদ্বয়মাত্রঞ্চ কুর্য্যাৎ। স্ত্রিয়াস্তু ঋতাবনৃতাবপি লেপাদিক্ষালনানন্তরমাচমনমাত্রং ন স্নানং॥ ক্ষালনাদেঃ পূর্ব্বং মূত্রপুরীষোৎসর্গৌ ন কুর্য্যাৎ। সম্ভোগানন্তরং তস্যাং রাত্রৌ একশয্যায়াং ন শয়ীয়াতাং। অনৃতাবপি গর্ত্তবত্ত্বেঽপি কামুকীমুপেয়াৎ ॥
ঋতাবভিগম্য প্রাতর্নৈমিত্তিকমঙ্গশূন্যস্নানং কুর্য্যাৎ ॥
ঋতুগমনং পুত্রোৎপত্তিপর্য্যন্তমাবশ্যকং ॥
ইত্যাহ্নিকাচারতত্ত্বোক্তকর্ম্ম সমাপ্তং ॥ * ॥

আহ্লাদঃ (পুং) আনন্দঃ। হর্ষঃ। যথা। নন্দস্ত্বাত্মজ উৎপন্নে জাতাহ্লাদো মহামনাঃ। আহূয় বিপ্রান্ বেদজ্ঞান্ স্নাতঃ সুচিরলঙ্কৃতান্ ॥ ইতি শ্রীভাগবতে ১০ স্কন্ধে ৫ অধ্যায়ঃ ॥

আহ্লাদিতঃ (ত্রি) আনন্দিতঃ। হৃষ্টঃ। জাতাহ্লাদঃ। ইতোঽস্য জাতে ইত্যনেন আহ্লাদশব্দাৎ ইতপ্রত্যয়েন নিষ্পন্নঃ ॥

আহ্বয়ঃ (পুং) নাম। ইত্যমরঃ ॥

আহ্বা (স্ত্রী) নাম। সংজ্ঞা।

আহ্বানং (ক্লী) আবাহনং। ডাকা ইতি ভাষা। তৎপর্য্যায়ঃ। হূতিঃ ২ আকারণং ৩। ইত্যমরঃ ॥ নাম। ইতি শব্দরত্নাবলী ॥

আক্ষপাটিকঃ (পুং) অক্ষদর্শকঃ। ধর্ম্মাধ্যক্ষঃ। ইতি জটাধরঃ ॥

আক্ষপাদঃ (পুং) নৈয়ায়িকঃ। ইতি ভূরিপ্রয়োগঃ ॥

আক্কারণা (স্ত্রী ক্লী) মৈথুনং প্রতি আক্রোশঃ। ইত্যমরঃ ॥ পরস্ত্রীনিমিত্তং পুংসঃ পরপুরুষনিমিত্তং স্ত্রিয়া বা দূষণং। যথা কৃতাগম্যাগমনস্ত্বং স্থানান্তরং গচ্ছ। ইতি ভরতঃ ॥ ছেনালিঅপবাদ ইতি ভাষা ॥

আক্কারিতং (ত্রি) পরস্ত্রিয়াং পরপুরুষে বা মৈথুনং প্রতি মিথ্যাদূষিতং। অপবাদগ্রস্তং। ইত্যমরঃ ॥

আক্ষিকঃ ( পুং ) আচ্ছুকবৃক্ষঃ। আচের গাছ ইতি ভাষা। ইতি রত্নমালা ॥

আক্ষীবঃ ( পুং ) অক্ষীবঃ। শোভাঞ্জনবৃক্ষঃ। ইতি রায়মুকুটঃ ॥

আক্ষেপঃ ( পুং ) অপবাদঃ। ইত্যমরঃ ॥ ভৎ‍র্সনং। আকর্ষণং। কাব্যালঙ্কারঃ। ইতি মেদিনী ॥

আক্ষেপকঃ ( পুং ) নিন্দাকরঃ। ব্যাধঃ। ইতি মেদিনী ॥ বাতরোগবিশেষঃ। তস্য কারণলক্ষণে। যদা তু ধমনীঃ সর্ব্বাঃ কুপিতোঽভ্যেতি মারুতঃ। তদা ক্ষিপত্যাশু মুহুর্মুহুর্দ্দেহং মুহুশ্চরঃ ॥ মুহুর্মুহুস্তদাক্ষেপাদাক্ষেপক ইতি স্মৃতঃ। ইতি নিদানং ॥

আক্ষোটঃ (পুং) অক্ষোটবৃক্ষঃ। পর্ব্বতজপীলুবৃক্ষঃ। ইতি শব্দরত্নাবলী ॥

আক্ষোড়ঃ ( পুং ) আক্ষোটবৃক্ষঃ। ইত্যমরটীকায়াং ভরতঃ ॥

আক্ষোদনং ( ক্লী ) মৃগয়া। ইত্যমরঃ ॥

---

## ই

ই ইকারঃ। তৃতীয়স্বরবর্ণঃ। অস্যোচ্চারণস্থানং তালু। স চ হ্রস্বো দীর্ঘঃ প্লুতশ্চ ভবতি। ইকারং পরমানন্দসুগন্ধকুসুমচ্ছবিং। হরিব্রহ্মময়ং বর্ণং সদা রু প্রিয়ে ॥ সদা শক্তিময়ং দেবি গুরুব্রহ্মময়ং তথা। সদাশিবময়ং বর্ণং পরং ব্রহ্মসমন্বিতং ॥ হরিব্রহ্মাত্মকং বর্ণং গুণত্রয়সমন্বিতং। ইকারং পরমেশানি স্বয়ং কুণ্ডলী মূর্ত্তিমান্। ইতি কামধেনুতন্ত্রং ॥ তস্য লেখনপ্রকারো যথা। ঊর্দ্ধাধঃ কুঞ্চিতা মধ্যে রেখা তৎসঙ্গতা ভবেৎ। লক্ষ্মীর্ব্বাণী তথেন্দ্রাণী ক্রমাত্তাস্বেব সংবসেৎ ॥ শীর্ষাধঃকুঞ্চিতা রেখা দক্ষোর্দ্ধা কামরূপিণী। মাত্রাশক্তিঃ কোণযুতা ধ্যানমস্য প্রচক্ষ্যতে ॥ ইতি বর্ণোদ্ধারতন্ত্রং ॥ * ॥ তস্য নামানি যথা। ইঃ সূক্ষ্মা শাল্মলী বিদ্যা চন্দ্রঃ পূষা সুগুহ্যকঃ। সুমিত্রঃ সুন্দরো বীরঃ কোটরঃ কাটরঃ পয়ঃ ॥ ভ্রূমধ্যো মাধবস্তুষ্টির্দক্ষনেত্রঞ্চ নাসিকা। শান্তঃ কান্তঃ কামিনী চ কামো বিঘ্নবিনায়কঃ ॥ নেপালো ভরণী রুদ্রো নিত্যা ক্লিন্না চ পাবকা। ইতি বর্ণাভিধানতন্ত্রং ॥

ই } গতৌ। অয়তি। ল এতি। পৃথক্‌পাঠসামর্থ্যাৎ পূর্ব্বো ন লিৎ। শেষস্তু ইন
ই ল } গতাবিতি প্রসিদ্ধঃ। যিনোঽচ্যণাবিত্যাদিষু গ্রহণমস্যৈব। ইতি দুর্গাদাসঃ ॥

ই ল স্মৃত্যাং। অধিপূর্ব্বোঽয়ং। অধিগ্রহণং অন্যপূর্ব্বস্য কেবলস্য চ প্রয়োগনিরাসার্থং। এবং সর্ব্বত্র। ল অধ্যেতি তব লক্ষ্মণঃ। ইক স্মরণে ইতি প্রসিদ্ধোঽয়ং। ইনবদিক ইত্যত্রাস্যৈব গ্রহণং। ইতি দুর্গাদাসঃ ॥

ই ঙ ল অধ্যয়নে। অধিপূর্ব্বোঽয়ং। অধ্যয়নমর্থতঃ শব্দতশ্চ গুরুতো গ্রহণং। ঙ ল বেদমধীতে বিপ্রঃ। ইতি দুর্গাদাসঃ ॥

ই ব্য ভেদঃ। ক্রোধোক্তিঃ। অপাকরণং। অনুকম্পা। ইতি মেদিনী ॥ খেদঃ। ইতি হেমচন্দ্রঃ

ইংরেজঃ ( পুং ) লণ্ড্রদেশজাতম্লেচ্ছজাতিবিশেষঃ। যথা। অধিপা মণ্ডলানাঞ্চ সংগ্রামেষ্বপরাজিতাঃ। ইংরেজা নব ষট্

পঞ্চ লগুজাশ্চাপি ভাবিনঃ ॥ ইতি মেরুতন্ত্রে ২৩ প্রকাশঃ ॥

ইঃ [ স্ ] ব্য কোপঃ। সন্তাপঃ। দুঃখভাবনা। ইতি শব্দরত্নাবলী ॥

ইঃ ( পুং ) কামদেবঃ। ইতি পুরুষোত্তমহলায়ুধৌ ॥ যথা। ইঃ কামে রতিলক্ষ্ম্যোরী উঃ শিবে ব্রহ্মকাদ্য উঃ। ইত্যাগ্নেয়ে একাক্ষরাভিধানং ॥

ইক্কটঃ ( পুং ) তৃণবিশেষঃ। তৎপর্য্যায়ঃ। বহুমূলঃ ২। ইতি ত্রিকাণ্ডশেষঃ। কোশাঙ্গঃ ৩ ইৎকটঃ ৪। ইতি হারাবলী ॥

ইখ গতৌ। ইতি কবিকল্পদ্রুমঃ ॥ তৃতীয়স্বরাদিঃ। এখতি। ইতি দুর্গাদাসঃ ॥

ইখ ই গতৌ। ইতি কবিকল্পদ্রুমঃ ॥ তৃতীয়স্বরাদিঃ। ই ইঙ্খতে। ইতি দুর্গাদাসঃ ॥

ইগ ই গতৌ। ইতি কবিকল্পদ্রুমঃ ॥ তৃতীয়স্বরাদিঃ। ই ইঙ্গ্যতে ইঙ্গিতং। ইতি দুর্গাদাসঃ ॥

ইঙ্গং ( ত্রি ) অদ্ভুতং। জঙ্গমং। ইতি মেদিনীকরহেমচন্দ্রৌ ॥

ইঙ্গঃ ( পুং ) ইঙ্গিতং। জ্ঞানং। ইতি মেদিনীকরহেমচন্দ্রৌ ॥

ইঙ্গিতং ( ক্লী ) অভিপ্রায়ানুরূপচেষ্টাবিষ্করণং। ঠার সঙ্কেত ইত্যাদি ভাষা। তৎপর্য্যায়ঃ। আকারঃ ২ ইঙ্গঃ ৩। ইত্যমরঃ ॥ গমনং। চেষ্টা। ইতি হেমচন্দ্রঃ ॥

ইঙ্গুদঃ ( পুং ) ইঙ্গুদীবৃক্ষঃ। ইত্যমরভরতৌ ॥

ইঙ্গুদী ( স্ত্রী ) বৃক্ষবিশেষঃ। ইঙ্গৌট ইতি ভাষা। জীয়াপুতা ইতি তু বঙ্গদেশীয়াঃ প্রমাদেন বদন্তি তস্য তু পুত্রজীব ইত্যাদীনি নামানি প্রসিদ্ধানি। তৎপর্য্যায়ঃ। তাপসতরুঃ ২। ইত্যমরঃ ॥ হিঙ্গুপত্রঃ ৩ বিষকণ্টঃ ৪ অনিলান্তকঃ ৫ গৌরত্বক্ ৬ তনুপত্রঃ ৭ শূলারিঃ ৮ তাপসদ্রুমঃ ৯ তীক্ষ্ণকণ্টঃ ১০ তৈলফলঃ ১১ পূতিগন্ধঃ ১২ বিগন্ধকঃ ১৩ ক্রোষ্টুফলঃ ১৪। অস্যা গুণাঃ। মদগন্ধিত্বং। কটুত্বং। উষ্ণত্বং। ফেনিলত্বং। লঘুত্বং। রসায়নত্বং। জন্তুবাতাময়কফব্রণনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ জ্যোতিষ্মতীবৃক্ষঃ। নয়াফট্কী ইতি ভাষা। ইতি রত্নমালা ॥

ইঙ্গলঃ ( পুং স্ত্রী ) ইঙ্গুদীবৃক্ষঃ। ইতি ভরতো দ্বিরূপকোষশ্চ ॥

ইচ্ছা ( স্ত্রী ) মনোধর্ম্মবিশেষঃ। তৎপর্য্যায়ঃ। আকাঙ্ক্ষা ২ বাঞ্ছা ৩ দোহদঃ ৪ স্পৃহা ৫ ঈহা ৬ তৃট্ ৭ লিপ্সা ৮ মনোরথঃ ৯ কামঃ ১০ অভিলাষঃ ১১ তর্ষঃ ১২। ইত্যমরঃ ॥ রুক্ ১৩ ইষা ১৪ শ্রদ্ধা ১৫ তৃষ্ণা ১৬ রুচিঃ ১৭ মতিঃ ১৮ দোহলং ১৯ ছন্দঃ ২০ ইট্ ২১। ইতি জটাধরঃ ॥ ন্যায়মতে অস্যাঃ কারণং। নির্দুঃখত্বে সুখে চেচ্ছা তজ্জ্ঞানাদেব জায়তে। ইচ্ছা তু তদুপায়ে স্যাদিষ্টোপায়ত্বধীর্যদি ॥ চিকীর্ষাকৃতিসাধ্যত্বপ্রকারেচ্ছা তু যা ভবেৎ। তদ্ধেতুঃ কৃতিসাধ্যেষ্টসাধনত্বমতির্ভবেৎ ॥ অস্যাঃ প্রতিবন্ধঃ। বলবদ্দ্বিষ্টহেতুত্বমতিঃ স্যাৎ প্রতিবন্ধিকা। ইতি ভাষাপরিচ্ছেদঃ ॥

ইচ্ছাবতী ( স্ত্রী ) ধনাদীচ্ছাযুক্তা স্ত্রী। তৎপর্য্যায়ঃ। কামুকা ২। ইত্যমরঃ ॥

ইচ্ছাবসুঃ ( পুং ) কুবেরঃ। ইতি জটাধরঃ॥
ইচ্ছুঃ ( ত্রি ) ইচ্ছাবিশিষ্টঃ। আকাঙ্ক্ষাযুক্তঃ। ইতি ব্যাকরণং॥
ইচ্ছুকঃ ( পুং ) বৃক্ষবিশেষঃ। টাবালেবু ইতি খ্যাতঃ। ইতি শব্দচন্দ্রিকা॥
ইজ্জলঃ ( পুং ) হিজ্জলবৃক্ষঃ। হিজল গাছ ইতি ভাষা। তৎপর্য্যায়ঃ। নিচুলঃ ২ অম্বুজঃ ৩। ইত্যমরঃ॥
ইজ্যঃ ( পুং ) বৃহস্পতিঃ। ইতি জ্যোতিষং শব্দরত্নাবলী চ॥
ইজ্যঃ ( ত্রি ) গুরুঃ। ইতি মেদিনী॥
ইজ্যা ( স্ত্রী ) দানং। যজ্ঞঃ। পূজা। সঙ্গমঃ। ইতি মেদিনী॥ গৌঃ। ইতি রাজনির্ঘণ্টঃ॥ কুট্টনী। ইতি ত্রিকাণ্ডশেষঃ॥
ইজ্যাশীলঃ ( পুং ) পুনঃপুনর্যজ্ঞকর্ত্তা। তৎপর্য্যায়ঃ। যাযজুকঃ ২। ইত্যমরঃ॥
ইঞ্চাকঃ ( পুং ) মৎস্যবিশেষঃ। ইঁচলা মোচাচিঙড়ি ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ॥
ইট গত্যাং। ইতি কবিকল্পদ্রুমঃ॥ এটতি। ইতি দুর্গাদাসঃ॥
ইট্ [ ষ্ ] ( স্ত্রী ) ইচ্ছা। ইতি জটাধরঃ॥
ইট্চরঃ ( পুং ) ষণ্ডঃ। ষাঁড় ইতি ভাষা। ইত্যমরঃ॥
ইড়া ( স্ত্রী ) বুধগ্রহভার্য্যা। সা ইক্ষ্বাকুরাজকন্যা। গৌঃ। বচনং। পৃথ্বী। ইতি মেদিনী॥ স্বর্গঃ। শরীরস্থ বামভাগস্থা নাড়ী। ইতি হেমচন্দ্রঃ॥
ইড়াচিকা ( স্ত্রী ) বরটা। বোল্তা ইতি ভাষা। ইতি শব্দচন্দ্রিকা॥
ইড়িকা ( স্ত্রী ) পৃথ্বী। ইতি শব্দরত্নাবলী॥

ইড়িকঃ ( পুং ) বনচ্ছগলঃ। ইতি হেমচন্দ্রঃ॥
ইড্বরঃ ( পুং ) ইট্চরঃ। বৃষঃ। ইত্যমরটীকায়াং স্বামী॥
ইত ই বন্ধে। ই ইন্ত্যতে। ইতি দুর্গাদাসঃ॥
ইৎকটঃ ( পুং ) বৃক্ষবিশেষঃ। ওকড়া ইতি ভাষা। তৎপর্য্যায়ঃ। বহুমূলঃ ২ বাটীদীর্ঘঃ ৩ খরচ্ছদঃ ৪। ইতি রত্নমালা॥
ইৎকিলা ( স্ত্রী ) রোচনাখ্যগন্ধদ্রব্যং। ইতি শব্দচন্দ্রিকা॥
ইতঃ ( ত্রি ) গতঃ। স্মৃতঃ। ইতি মেদিনী॥
ইতঃ [ স্ ] ব্য নিয়মঃ। পঞ্চম্যর্থঃ। বিভাগঃ। ইতি বিশ্বঃ॥
ইতরঃ ( ত্রি ) অন্যঃ। নীচঃ। ইত্যমরঃ॥
ইতরবিশেষঃ ( পুং ) অন্যপ্রভেদঃ॥
ইতরেতরং ( ত্রি ) অন্যোঽন্যং। পরস্পরং। ইতি হেমচন্দ্রঃ॥
ইতরেদ্যুঃ [ স্ ] ব্য ইতরস্মিন্নহনি। অন্যদিনে। ইত্যমরঃ॥
ইতস্ততঃ ব্য অত্র তত্র। এখানে সেখানে ইতি ভাষা। যথা। দ্বে সহস্রে রথানাং স গজানামযুতং রণে। ইতস্ততো ধাবমানঃ সুরথো রথিনাং বরঃ॥ ইতি জৈমিনিভারতে আশ্বমেধিকে পর্ব্বণি ২০ অধ্যায়ঃ॥ অপি চ। তাড়িতাস্তেন বীরেণ ফণীন্দ্রাস্ত্রাসমাগতাঃ। ইতস্ততস্তে তন্মুক্তা গতাঃ পাতালমুজ্জবাঃ॥ ইতি পাদ্মে পাতালখণ্ডে ৪৪ অধ্যায়ঃ॥ অয়ং শব্দঃ ইত ধাতোঃ পরে লেখ্যঃ॥
ইতি ব্য হেতুঃ। প্রকরণং। প্রকাশঃ। আদিঃ। সমাপ্তিঃ। ইত্যমরঃ॥ নিদর্শনং।

প্রকারঃ। অনুকর্ষঃ। পরকৃতিঃ। ইতি মেদিনী ॥

ইতিকথং (ত্রি) অশ্রদ্ধেয়ং। নষ্টং। ইতি মেদিনী ॥

ইতিকথা (স্ত্রী) অর্থশূন্যবাক্যং। ইতি মেদিনী॥

ইতিহ ব্য পারম্পর্য্যোপদেশঃ। তৎপর্য্যায়ঃ। ঐতিহ্যং ২। ইত্যমরঃ॥

ইতিহাসঃ (পুং) পূর্ব্ববৃত্তান্তঃ। প্রাচীনকথা। তৎপর্য্যায়ঃ। পুরাবৃত্তঃ ২। ইত্যমরঃ॥ ব্যাসাদিপ্রণীতভারতাদিগ্রন্থঃ। ইতি ভরতঃ॥

ইত্থং ব্য ইদংপ্রকারং। এই প্রকার ইতি ভাষা। ইতি বোপদেবঃ॥

ইত্যঃ (ত্রি) গম্যঃ। ইতি ব্যাকরণং॥

ইত্বরঃ (ত্রি) ক্রূরকর্ম্মা। পথিকঃ। দুর্ব্বিধঃ। নীচঃ। ইতি হেমচন্দ্রঃ॥

ইত্বরী (স্ত্রী) অসতী। ইত্যমরো মেদিনী চ॥ অভিসারিকা। ইতি হেমচন্দ্রঃ॥

ইদ ই পরমৈশ্বর্য্যে। ইতি কবিকল্পদ্রুমঃ॥ ই ইন্দ্যতে ইন্দতি ইন্দ্রঃ। ইতি দুর্গাদাসঃ॥

ইদং [ম্] (ত্রি) পুরোবর্ত্তিবাচকসর্ব্বনাম। এই ইতি ভাষা। ইতি ব্যাকরণং॥

ইদংকার্য্যা (স্ত্রী) দুরালভাবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥

ইদা (স্ত্রী) সংবৎসরাদি বর্ষপঞ্চকান্তর্গততৃতীয়বৎসরঃ। ইতি মলমাসতত্ত্বং॥ অস্যা বিবরণং বৎসরশব্দে দ্রষ্টব্যং॥

ইদানীং [ন্] ব্য অস্মিন্ কালে। সম্প্রতি। ইত্যমরঃ॥ বাক্যভূষণং। ইতি শব্দরত্নাবলী॥

ইদানীন্তনং (ত্রি) ইদানীন্তবং। সম্প্রতিজাতং। আধুনিকং। ইতি ব্যাকরণং॥

ইদাবৎসরঃ (পুং) সম্বৎসরাদিপঞ্চান্তর্গতবৎসরবিশেষঃ। অস্মিন্ বৎসরে অন্নবস্ত্রদানং মহাফলং। ইতি বিষ্ণুধর্ম্মোত্তরং॥

ইদ্ধং (ক্লী) আতপঃ। দীপ্তিঃ। ইতি মেদিনী॥ আশ্চর্য্যং। ইতি জটাধরঃ॥

ইদ্ধঃ (ত্রি) নির্ম্মলঃ। ইতি শব্দরত্নাবলী॥

ইদ্বৎসরঃ (পুং) ইদাবৎসরঃ। যথা। সম্বৎসরস্তু প্রথমো দ্বিতীয়ঃ পরিবৎসরঃ। ইদ্বৎসরস্তৃতীয়স্তু চতুর্থস্ত্বনুবৎসরঃ॥ পঞ্চমো বৎসরস্তেষাং তদেভিঃ পঞ্চভির্যুগং। তেষু সম্বৎসরো হ্যগ্নিঃ সূর্য্যস্তু পরিবৎসরঃ॥ সোম ইদ্বৎসরস্তেষাং বায়ুশ্চৈবানুবৎসরঃ। রুদ্রস্তু বৎসরো জ্ঞেয়ঃ পঞ্চাব্দা যে যুগাত্মকাঃ॥ ইতি দেবীপুরাণে কালব্যবস্থানামাধ্যায়ঃ॥

ইধ্মং (ক্লী) অগ্নিসন্দীপনকাষ্ঠং। জালানি কাঠ ইতি ভাষা। ইত্যমরঃ॥

ইনঃ (পুং) সূর্য্যঃ। প্রভুঃ। নৃপভেদঃ। ইত্যুণাদিকোষঃ॥

ইনানী (পুং) বটপত্রীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

ইন্দম্বরং (ক্লী) ইন্দীবরং। নীলোৎপলং। ইতি শব্দমালা॥

ইন্দিন্দিরঃ (পুং) ভ্রমরঃ। ইতি হেমচন্দ্রঃ॥

ইন্দিরা (স্ত্রী) লক্ষ্মীঃ। ইতি জটাধরঃ ত্রিকাণ্ডশেষশ্চ॥

ইন্দিরামন্দিরং (ক্লী) বিষ্ণুঃ। ইতি রাজবল্লভঃ॥

ইন্দিরালয়ং (ক্লী) পদ্মং। ইতি শব্দরত্নাবলী॥ ক্লীবত্বমভিধানাৎ॥

ইন্দিরাবরং (ক্লী) নীলোৎপলং। ইতি শব্দরত্নাবলী॥

ইন্দিবরং (ক্লী) নীলোৎপলং। ইতি শব্দমালা॥

ইন্দীবরং (ক্লী) নীলপদ্মং। তৎপর্য্যায়ঃ। নীলাম্বুজন্ম ২। ইত্যমরঃ॥ কুবলয়ং ৩ নীলাব্জং ৪ নীলোৎপলং ৫। ইতি রত্নমালা॥

ইন্দীবরিণী (স্ত্রী) উৎপলিনী। ইতি রাজনির্ঘণ্টঃ॥

ইন্দীবরী (স্ত্রী) শতমূলী। ইতি মেদিনীরাজনির্ঘণ্টৌ॥

ইন্দীবারং (ক্লী) ইন্দীবরং। ইত্যমরটীকায়াং রায়মুকুটঃ॥

ইন্দুঃ (পুং) চন্দ্রঃ। কর্পূরঃ। ইত্যমরঃ॥

ইন্দুকঃ (পুং) অশ্মন্তকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

ইন্দুকমলং (ক্লী) সিতোৎপলং। ইতি রাজনির্ঘণ্টঃ॥

ইন্দুকলিকা (স্ত্রী) কেতকী। ইতি রাজনির্ঘণ্টঃ॥

ইন্দুকান্তঃ (পুং) চন্দ্রকান্তমণিঃ। ইতি রাজনির্ঘণ্টঃ॥

ইন্দুকান্তা (স্ত্রী) রাত্রিঃ। ইতি হেমচন্দ্রঃ॥

ইন্দুজনকঃ (পুং) সমুদ্রঃ। ইতি ত্রিকাণ্ডশেষঃ॥

ইন্দুজা (স্ত্রী) নর্ম্মদানদী। নর্ব্বদা ইতি খ্যাতা। ইতি হেমচন্দ্রঃ॥

ইন্দুপুত্রঃ (পুং) বুধগ্রহঃ। ইতি শব্দরত্নাবলী॥

ইন্দুপুষ্পিকা (স্ত্রী) কলিকারীবৃক্ষঃ। বিষলাঙ্গলা ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥

ইন্দুভৃৎ (পুং) শিবঃ। ইতি হেমচন্দ্রঃ॥

ইন্দুমতী (স্ত্রী) পূর্ণিমা। ইতি রাজনির্ঘণ্টঃ॥

ইন্দুরত্নং (ক্লী) মুক্তা। ইতি রাজনির্ঘণ্টঃ॥

ইন্দুলেখা (স্ত্রী) অমৃতা। সোমলতা। শশিকলা। ইতি মেদিনী॥ যমানিকা। ইতি শব্দমালা॥

ইন্দুলোহকং (ক্লী) রৌপ্যং। ইতি রাজনির্ঘণ্টঃ॥

ইন্দুবল্লী (স্ত্রী) সোমলতা। ইতি জটাধরঃ॥

ইন্দুব্রতং (ক্লী) চান্দ্রায়ণব্রতং। ইতি ত্রিকাণ্ডশেষঃ॥

ইন্দুরঃ (পুং) মূষিকঃ। ইঁদুর ইতি ভাষা। ইতি জটাধরঃ॥

ইন্দ্রঃ (পুং) দেবরাজঃ। স তু অদিতিপুত্রঃ। পূর্ব্বদিক্‌পতিশ্চ। তস্য ভার্য্যা শচী। পুত্রাঃ জয়ন্তঃ ১ ঋষভঃ ২ মীঢ্বাংশ্চ ৩। অস্ত্রং বজ্রং। বাহনং ঐরাবতঃ। পুরী অমরাবতী। বনং নন্দনং। তৎপর্য্যায়ঃ। মরুত্বান্ ২ মঘবা ৩ বিড়োজাঃ ৪ পাকশাসনঃ ৫ বৃদ্ধশ্রবাঃ ৬ সুনাসীরঃ ৭ পুরুহূতঃ ৮ পুরন্দরঃ ৯ জিষ্ণুঃ ১০ লেখর্ষভঃ ১১ শক্রঃ ১২ শতমন্যুঃ ১৩ দিবস্পতিঃ ১৪ সুত্রামা ১৫ গোত্রভিৎ ১৬ বজ্রী ১৭ বাসবঃ ১৮ বৃত্রহা ১৯ বৃষা ২০ বাস্তোষ্পতিঃ ২১ সুরপতিঃ ২২ বলারাতিঃ ২৩ শচীপতিঃ ২৪ জম্ভভেদী ২৫ হরিহয়ঃ ২৬ স্বারাট্ ২৭ নমুচিসূদনঃ ২৮

সংক্রন্দনঃ ২৯ দুশ্চ্যবনঃ ৩০ তুরাষাট্ ৩১ মেঘবাহনঃ ৩২ আখণ্ডলঃ ৩৩ সহস্রাক্ষঃ ৩৪ ঋভুক্ষা ৩৫। ইত্যমরঃ॥ মহেন্দ্রঃ ৩৬ কৌশিকঃ ৩৭ পূতক্রতুঃ ৩৮ বিশ্বম্ভরঃ ৩৯ হরিঃ ৪০ পুরদংশা ৪১ শতধৃতিঃ ৪২ পৃতনাষাড়্ ৪৩ অহিদ্বিষঃ ৪৪। ইতি জটাধরঃ॥ বজ্রপাণিঃ ৪৫ দেবরাজঃ ৪৬ পর্ব্বতারিঃ ৪৭ পর্য্যণ্যঃ ৪৮ দেবতাধিপঃ ৪৯ নাকনাথঃ ৫০ পূর্ব্বদিক্পতিঃ ৫১ পুলোমারিঃ ৫২ অর্হঃ ৫৩ প্রাচীনবর্হিঃ ৫৪ তপস্তক্ষঃ ৫৫। ইতি শব্দরত্নাবলী॥ তস্য চতুর্দ্দশনামভেদা যথা। ইন্দ্রশ্চ বিশ্বভুগ্‌জ্ঞেয়ো বিপশ্চিত্তদনন্তরং। বিভুঃ প্রভুঃ শিখিশ্চৈব তথৈব চ মনোজবঃ। তেজস্বী সাম্প্রতস্ত্বিন্দ্রো বলির্ভাব্যস্ত্বনন্তরং॥ অদ্ভুতস্ত্রিদিবশ্চৈব দশমস্ত্বিন্দ্র উচ্যতে। সুশান্তিশ্চ সুকীর্ত্তিশ্চ ঋতধাতা দিবস্পতিঃ॥ ইতি ভূতা ভবিষ্যাশ্চ ইন্দ্রা জ্ঞেয়াশ্চতুর্দ্দশ। ইতি দেবীপুরাণে কালব্যবস্থাধ্যায়ঃ॥ বিষ্কুম্ভাদিসপ্তবিংশতিযোগান্তর্গতষড়্বিংশযোগঃ। তত্র জাতফলং। প্রতাপশীলো বলবান্ গুণজ্ঞঃ শ্লেষ্মাধিকঃ শ্রীকমলাভ্যুপেতঃ। কিলেন্দ্রযোগো যদি জন্মকালে মহেন্দ্রতুল্যঃ পুরুষঃ প্রসন্নঃ॥ *॥ ইতি কোষ্ঠীপ্রদীপঃ॥ অন্তরাত্মা। আদিত্যবিশেষঃ। ইতি মেদিনী॥ কুটজবৃক্ষঃ। রাত্রিঃ। ইতি ধরণী॥ উপদ্বীপবিশেষঃ। ইতি শব্দমালা॥ পরমেশ্বরঃ। ইতি বেদান্তঃ॥

ইন্দ্রকং (ক্লী) সভাগৃহং। তৎপর্য্যায়ঃ। আস্থানগৃহং ২। ইতি হেমচন্দ্রঃ॥

ইন্দ্রকীলঃ (পুং) মন্দরপর্ব্বতঃ। ইতি হেমচন্দ্রঃ

ইন্দ্রকুঞ্জরঃ (পুং) ঐরাবতহস্তী। ইতি জটাধরঃ॥

ইন্দ্রকোষঃ (পুং) মঞ্চঃ। খট্বা। ইতি ত্রিকাণ্ডশেষঃ॥ তমঙ্গকঃ। ঘোঝলা গোঁজলা ইত্যাদি খ্যাতঃ। ইতি হেমচন্দ্রঃ॥ নির্য্যূহোঽপি। নির্য্যূহঃ শেখরে দ্বারে নির্যাসে নাগদন্তকে। ইতি মহেশ্বরঃ॥

ইন্দ্রগোপঃ (পুং) রক্তবর্ণকীটবিশেষঃ। মখমলী ইতি ভাষা। তৎপর্য্যায়ঃ। অগ্নিরজঃ ২ বৈরাটঃ ৩ তিতিভঃ ৪ অগ্নিকঃ ৫। ইতি হেমচন্দ্রঃ॥ শক্রগোপঃ ৬ বর্ষাভূঃ ৭ রক্তবর্ণঃ ৮। ইতি রাজনির্ঘণ্টঃ॥

ইন্দ্রচন্দনং (ক্লী) হরিচন্দনং। ইতি রাজনির্ঘণ্টঃ॥

ইন্দ্রচির্ভিটী (স্ত্রী) লতাবিশেষঃ। তৎপর্য্যায়ঃ। ইন্দীবরা ২ যুগ্মফলা ৩ দীর্ঘবৃন্তা ৪ উত্তমারণী ৫ পুষ্পমঞ্জরিকা ৬ দ্রোণী ৭ করম্ভা ৮ নলিকা ৯। অস্যা গুণাঃ। কটুত্বং। শীতত্বং। পিত্তশ্লেষ্মকাসদোষব্রণকৃমিনাশিত্বং। চক্ষুর্হিতকারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

ইন্দ্রচ্ছন্দঃ [স্] (ক্লী) সহস্রগুচ্ছহারঃ। ইতি হেমচন্দ্রঃ॥

ইন্দ্রজালং (ক্লী) মায়াকর্ম্ম। ভোজবাজি ভেল্‌কি ইত্যাদি ভাষা। তৎপর্য্যায়ঃ। কুহকং ২ জালং ৩ কুসৃতিঃ ৪। তদ্বিবরণ-

গ্রন্থো যথা। অথাতঃ সংপ্রবক্ষ্যামি চেন্দ্রজালমনুত্তমং। ব্যাধিদারিদ্রহরণং জরামৃত্যুবিনাশনং॥ ইন্দ্রস্য যো ন জানাতি জালেশং রুদ্রভাষিতং। নিগ্রহানুগ্রহে তস্য কা শক্তিঃ পরমেশ্বরি॥ ন তেষাং জায়তে সিদ্ধির্গোত্রে ক্ষেত্রে গৃহেঽপি বা। ইন্দ্রজালং ন জানাতি স ক্রুদ্ধঃ কিং করিষ্যতি॥ ন জীবতি বরারোহে সংসারে দুঃখসাগরে। ইন্দ্রজালং ন জানাতি কুতঃ সৌখ্যং ভবেত্ততঃ॥ কৌতূহলং কুতস্তেষাং কুতঃ কামা বরাননে। সংসারসাগরে ঘোরে কামলুব্ধাশ্চ মানবাঃ। রুদ্রকর্ম্ম নহি তেষাং কুতঃ সৌখ্যং বিধীয়তে॥ যথা নদীনদাঃ সর্ব্বে সাগরে সমুপাগতাঃ। তথা সর্ব্বাণি শাস্ত্রাণি ইন্দ্রজালস্থিতানি চ॥ তপ্তানাঞ্চ যথা ভানুঃ শীতলানাং যথা শশী। গম্ভীরাণাং যথা সিন্ধুর্জালেন্দ্রঞ্চ তথা প্রিয়ে॥ তথা কিং বহুনোক্তেন বর্ণনেন পুনঃপুনঃ। জালেন্দ্রস্য সমং শাস্ত্রং ন ভূতং ন ভবিষ্যতি ॥ * ॥ অথাতঃ সংপ্রবক্ষ্যামি ওষধীনাং বিধিং বরে। যেন বিজ্ঞানমাত্রেণ সর্ব্বসিদ্ধির্ভবিষ্যতি॥ মহাকালস্য বীজানি প্রস্থমেকং সমাহরেৎ। ধাত্রীরসেন দেবেশি সপ্তবারান্ বিভাবয়েৎ॥ গুটিকা কর্ত্তব্যা তাং গুটিকাং মুখে নিক্ষিপ্য পারাবতো ভবতি॥ ১॥ অথাতঃ সংপ্রবক্ষ্যামি শৃণু ত্বং মম বল্লভে। ছাগস্য শীর্ষং সংগৃহ্য কৃষ্ণমৃত্তিকাং পূরয়িত্বা পুনর্ধুস্তুরবীজানি বাপয়েৎ কালে তানি পুষ্পিতানি ভবন্তি তদা যস্যোপরি নিক্ষিপেৎ স ছাগো ভবতি॥ ২॥ ময়ূরশীর্ষমাদায় কৃষ্ণচতুর্দশ্যাং মৃত্তিকাং পূরয়েৎ শণবীজানি বাপয়েৎ যদা ফলিতো পুষ্পিতো ভবতি তদা শণবীজানি গ্রীবায়াং বন্ধয়েৎ ময়ূরো ভবতি॥৩॥ কৃষ্ণচতুর্দশ্যাং ময়ূরশীর্ষমাদায় কৃষ্ণমৃত্তিকাং পূরয়েৎ কার্পাসবীজানি বাপয়েৎ তদা ফলিতাঃ পুষ্পিতা ভবন্তি পুষ্পফলে সংগৃহ্য সমস্তং পেষয়িত্বা অঙ্গং বিলিপ্য পানীয়মধ্যে প্রবিশ্য তথা জলে তিষ্ঠতি যথা স্থলে॥ ৪॥ কৃষ্ণকাকশীর্ষমাদায় কাকমাচীবীজানি বাপয়েৎ যথা ফলিতাঃ পুষ্পিতা ভবন্তি তৎফলং সংগৃহ্য মুখে প্রক্ষিপ্য কাকো ভবতি কাক ইব গচ্ছতি মহ্যাং উদ্গীর্ণে মোক্ষঃ॥ ৫॥ পারাবতশীর্ষমাদায় কৃষ্ণমৃত্তিকাং পূরয়িত্বা তিলবীজানি বাপয়েৎ ক্ষীরোদকেন সিঞ্চনীয়ং যদা পুষ্পিতা ভবন্তি তদা মুখে সংস্থাপ্য অন্তর্হ্বতো ভবতি॥ ৬॥ তেষাং ফলানাং চূর্ণং কৃত্বা তেন চূর্ণেন যং স্পৃশতি স কিঙ্করো ভবতি। সর্ব্বস্বং দদাতি॥ ৭॥ তানি তিলানি সংগৃহ্য নেত্রাঞ্জনেন সহ পিষ্ট্বা কপিলাদুগ্ধেন গুটিকাং কারয়েৎ। সপ্তরাত্রং পাচয়েৎ। তাং গুটিকাং মুখে নিক্ষিপ্য অন্তর্হ্বতো ভবতি দেবৈরপি ন দৃশ্যতে মনুষ্যাণাং কা কথা। উদ্গীর্ণেন পুরুষো ভবতি। জীবেদ্বর্ষশতং স্ত্রিয়ঃ সর্ব্বে জনাশ্চ বশ্যা ভবন্তি॥ ৮॥ গৃধ্রশিরঃ সমাদায় কৃষ্ণচতুর্দশ্যাং কৃষ্ণমৃত্তিকাং নিক্ষিপেৎ লশুনবীজানি বাপয়েৎ যদা

ফলং পুষ্পং ভবতি তদা পুষ্যনক্ষত্রে পুষ্পং গৃহীত্বা অঞ্জনেন সহ কপিলাঘৃতেন কজ্জলং পাতয়েৎ চক্ষুরঞ্জনীয়ং তাবৎ যোজনশতং পশ্যতি মেদিনীং দিবা নক্ষত্রাণ্যপি পশ্যতি লাভস্তস্য। কিঞ্চিৎ কর্ত্তুমিচ্ছতি তৎ করোতি ন সংশয়ঃ ॥ ৯ ॥ অন্যে চ সর্ব্বে জীবাঃ এবং উষ্ট্রগর্দ্দভমহিষ্যাদিলঘুবৃহজ্জীবাঃ। যৎ যৎ বীজং যস্য শিরসি বাপয়েৎ যদা পুষ্পিতঃ ফলিতো ভবতি তদা যস্য বীজানি মুখে নিক্ষিপ্যন্তে স জীবো ভবতি নাত্র সন্দেহঃ ॥ ১০ ॥*॥ অথ সর্ব্বেষাং ধারণমন্ত্রঃ। ওঁ হ্রীং হ্রীং হ্রেং ঐং লং লং ওঁ ভৌ স্বাহা। একাদশাক্ষরো মনুরস্য পুরশ্চরণং লক্ষজপঃ। দশাংশহোমঃ ঘৃতেন তর্পণং মার্জনং ব্রাহ্মণভোজনাদিকং কারয়িত্বা সিদ্ধির্ভবতি ॥ * ॥ অথ বশ্যাধিকারঃ। মাতুলুঙ্গস্য মূলন্তু ধুস্তূরবীজকেন চ। পলাণ্ডুপুষ্পমাদায় সূক্ষ্মচূর্ণন্তু কারয়েৎ ॥ যোঽস্য গন্ধং সমাঘ্রাতি স চ স্নেহেন পশ্যতি। দুন্দুভিং পটহাংশ্চৈব শঙ্খাংশ্চৈব তু লেপয়েৎ ॥ এষ ভূতোপসৃষ্টানাং কুমারীণাং গৃহেষু চ। ভূপতেঃ সেব্যমানানাং তথাপৎ পাপজীবিনাং ॥ ন চাগ্নির্দহ্যতে বেশ্ম যত্রৈষ সোঽগদো ভবেৎ। অত্র মন্ত্রঃ। ওঁ রক্তচামুণ্ডে অমুকং মে বশমানয় হ্রীঁ হ্রীং হুং ফট্। অযুতং জপ্তব্যং। ওঁ নমোঽস্তু আদিত্যায় কিলি কিলি চিলি চিলি ধূমং লিহি যক্ষিণি মোদতে হি শাকিনি অনিত্নুক্র শূলপাণি স্বাহা ॥ বর্ণাঃ ৪০ শিলাকৃতিকে মন্ত্রে। ওঁ নমো গুহাবাসিন্যৈ গুহপতি গুহিলে মনোজবো ওঁ এং ওঁ বিদ্বে নমঃ। শিলায়াঃ কৃতিঃ করলিখিতা খদিরানলসন্তপ্তলিঙ্গা যতো নবযোষিতোঽপি আকর্ষণং। বর্ণাঃ ২৬। ওঁ নমঃ কপালরুদ্রায় সর্ব্বলোকবশঙ্করায় অনাথায়াপ্রতিহতবলবীর্য্যপরাক্রমপ্রভবায় হা হা হে হে পচ পচ মারয় মারয় কপট কপট কাট সর্প কর্ম্মকরি অমুকং মে বশমানয় স্বাহা ।৭৭। অযুতজপাদ্বশীকরোতি ॥ * ॥ অন্যপ্রকারঃ। পারাবতস্য হৃদয়ং চক্ষুর্জিহ্বা চ শোণিতং। অঞ্জনং রোচনযুতং বনিতাবশকৃৎ পরং ॥ তত্র মন্ত্রঃ। ওঁ নয় নয় মহারিণি নমো দেব্যৈ স্বাহা ॥ ১৫ ॥ একবিংশতিবারান্ পরিজপ্য সিদ্ধির্ভবতি ॥ * ॥ অন্যপ্রকারঃ। কপালং মানুষং গৃহ্য কনকস্য ফলানি চ। কর্পূরং মধুসংযুক্তং নিঘৃষ্য তিলকেন চ ॥ নারী বা পুরুষোঽনেন বশ্যো ভবতি নিত্যশঃ। এষ কাপালিকো যোগো বশিষ্ঠস্য শুভং মতং ॥ * ॥ অন্যপ্রকারঃ। পুরুষার্থী। কর্পূরং বালুকং লাক্ষা রজসা সপ্তভাবিতং। রতিকালে ভগং লিপ্য পতির্দাসো ভবিষ্যতি ॥ * ॥ অন্যপ্রকারঃ। নরজিহ্বাং সমুদ্ধৃত্য সূক্ষ্মচূর্ণন্তু কারয়েৎ। জলেন চ সুশীতেন দাপয়েৎ তদ্বিচক্ষণঃ ॥ পানে ফলে চ পুষ্পে চ ভক্ষ্যে ভোজ্যে চ দাপয়েৎ। প্রজাপতিকুলোদ্ভূতা যদি সাক্ষাদরুন্ধতী॥ সাভিসক্তা প্রিয়ং যাতি নান্যং পুরুষমিচ্ছতি ॥ * ॥

অন্যপ্রকারঃ। কনককাপ্যপামার্গং সুরসা গৌরসর্ষপাঃ। তিলতৈলেন পিষ্ট্বাপি যোনিলেপঃ প্রশস্যতে॥ অত্র মন্ত্রঃ। ওঁ নমঃ শয্যায়ৈ দরি বিদরি যামিনি অমুকং মে বশমানয় স্বাহা॥ *॥ অন্যপ্রকারঃ। হরিতালং শ্মশানে কৃষ্ণচতুর্দশ্যাং ক্ষিপ্ত্বা কুষ্ঠবিমিশ্রং গ্রাহ্যং অবশ্যং বশী ভবেৎ স নরঃ॥ *॥ অন্যপ্রকারঃ। ঋতুনবলোচনতালাললাটাস্থিবাণসাধিতং তৈলং সকলমনুজেন্দ্রললনাবশঙ্করং মকরালয়ে পুষ্যে। নরতৈলং প্রেতাম্বরবর্তিকং কৃত্বা মাত্রে রাত্রৌ প্রজ্বাল্যার্কবৃক্ষস্কন্ধে কজ্জলং কৃত্বা চক্ষুষী অভ্যঞ্জেৎ যং পশ্যতি স বশ্যো ভবতি॥ *॥ অন্যপ্রকারঃ। কর্ণদন্তমলং লালা স্বদেহাক্ষিমলত্রয়ং। নাসিকোদ্ভবরক্তঞ্চ চূর্ণমেতদ্বলাযুতং॥ এতৎ সর্ব্বং সমুদ্ধৃত্য গুটিকাং কারয়েদ্বুধঃ। পানভোজনকে দেয়া বশীকরণমুত্তমং॥ *॥ অন্যপ্রকারঃ। কাকজিহ্বা বচা কুষ্ঠং আত্মনো রুধিরং স্ত্রিয়ঃ। তদ্ভাবিতঞ্চ মঞ্জিষ্ঠা তগরং গৌরসর্ষপাঃ॥ শিবনির্মাল্যসংযুক্তং সমভাগানি কারয়েৎ। ভোজ্যে পানেঽথবা দেয়াঃ স্ত্রীণাস্তু বশকারকাঃ॥ নিত্যং পুরুষমিচ্ছন্তী মৃতমপ্যনুগচ্ছতি॥ *॥ অন্যপ্রকারঃ। কৃষ্ণসর্পমপ্যঙ্গুলপ্রমাণং শিরশ্ছিত্ত্বাস্যাস্যং সর্ষপাদিভিঃ পূরয়িত্বা ছায়াশুষ্কং শোষয়েৎ। পরতঃ সর্ষপান্ গ্রাহয়িত্বা তানি যস্মৈ দীয়তে স বশ্যো ভবতি॥ *॥ অন্যপ্রকারঃ। পূগীফলং নির্গিলিত্বাপানমার্গে নির্গতং গৃহ্য ধুস্তুররসান্তরিতং কৃত্বা সপ্তদিনানি পূজয়েৎ॥ পুনঃ কুঙ্কুমচন্দনৈরধিভাব্য যস্মৈ দীয়তে স বশ্যো ভবতি॥ *॥ অন্যপ্রকারঃ। দর্দ্দুরযুগ্মং গৃহীত্বা তন্দুমেন দাহয়েৎ। তদ্ভস্ম সহ পানেন বশ্যকৃৎ পরমো মতঃ॥ *॥ অন্যপ্রকারঃ। অজগন্ধস্য পত্রাণি বচা কুষ্ঠেন ভাবয়েৎ শ্মশানভস্মসংযুক্তং চূর্ণঞ্চৈত্রিষু দুর্লভং॥ অনেনৈব তু চূর্ণেন জোটয়েৎ ত্রিশ্চ পাদপং। পুষ্পিতং ফলিতং দৃষ্ট্বা চূর্ণং বৃক্ষাদ্বিলয়য়েৎ। তৎক্ষণাৎ ফলতে বৃক্ষো নরনারীষু কা কথা॥ *॥ অন্যপ্রকারঃ। জিহ্বামূলে সপ্তরাত্রং সৈন্ধবেনাপি মিশ্রিতং। দদাতি যস্য পানেষু সোঽপি বশ্যো ভবেৎ ক্ষণাৎ॥ *॥ অন্যপ্রকারঃ। গোপিত্তং সৈন্ধবঞ্চৈব বৃহতীফলমেব চ। লেপমেতৎ প্রযোক্তব্যং নরনারীবশঙ্করং॥ *॥ অন্যপ্রকারঃ। বালামূলং চূর্ণয়িত্বা রক্তরেতঃসমন্বিতঃ। দদ্যাৎ পানেন প্রমদাং ক্ষিপ্রমেব বশং নয়েৎ॥ পুত্রাদিঞ্চ ধনং ত্যক্ত্বা দাসীবৎ ভবতি তু সা। যত্র বা নীয়তে তত্র পশ্চাৎ ভ্রমতি বিহ্বলা॥ *॥ অন্যপ্রকারঃ। বল্মীকমৃত্তিকায়াঃ প্রতিকৃতিং কৃত্বা ক্ষীরেণ স্নাপ্যাজ্যেন বাভ্যজ্য তস্য লবণাহুতিমেকবিংশতিবারং জুহুয়াৎ ত্রিরাত্রেণ বশ্যো ভবতি সপ্তরাত্রেণাথবা। দেবীঞ্চ গান্ধারীং যক্ষিণীং শক্রস্যাপি পত্নীং বশমানয়তি॥ *॥ অন্যপ্রকারঃ। উদ্গাতুঃ পক্ষিণো মলমাত্মনো রুধিরান্বিতং। স্ত্রীপুংসয়োঃ প্রদাতব্যং বশীকরণমুত্তমং॥

অত্র মন্ত্রঃ। ত্রিশূলিনে ত্রিনেত্রায় হিলি হিলি স্বাহা। বর্ণাঃ ১৪। সপ্তজপ্তেন সিদ্ধিঃ ॥ * ॥ অন্যপ্রকারঃ। কৃষ্ণপক্ষ-চতুর্দশ্যাং মৃতভস্ম তু গ্রাহয়েৎ। স্ত্রীণাঞ্চ মূর্দ্ধ্নি দাতব্যং বিদ্যয়া পরিজপ্তয়া ॥ দহ্যতে মুহ্যতে নারী পচ্যতে শুষ্যতেঽপি চ। অঙ্গানি চৈব ভজ্যন্তে যদি তং ন সমাবিশেৎ ॥ অত্র মন্ত্রঃ। ওঁ নমশ্চামুণ্ডে শ্মশানবাসিনি স্বাহা। ১৪। সপ্তরাত্রেণ প্রেরকঃ ॥ * ॥ অন্যপ্রকারঃ। শ্বেতার্কং রোচনাযুক্তং আত্মমূত্রেণ পেষয়েৎ। ললাটে তিলকং কৃত্বা ত্রৈলোক্যং ক্ষোভয়েৎ ক্ষণাৎ। দৃষ্টমাত্রেণ তেনৈব সর্ব্বো ভবতি কিঙ্করঃ ॥ * ॥ অন্যপ্রকারঃ। শ্বেতার্কং চন্দনেনৈব রময়েৎ সহ লেপয়েৎ। দীয়তে কস্যচিদ্বাপি পশ্চাদ্দাসো ভবিষ্যতি ॥ * ॥ অথ পতিবশীকরণং। মধুকং সহ তৈলেন সার্ষপেণ তু পেষয়েৎ। এতেন পাণিমভ্যজ্য ভর্ত্রা সা সহিতা স্বপেৎ ॥ সংবৃত্তে মৈথুনীভাবে পতির্দাসো ভবিষ্যতি ॥ * ॥ অন্যচ্চ। মনঃশিলাকুঙ্কুমসর্ষপাশ্চ তথা চ কুষ্ঠং সহদেবদারু। রক্তঞ্চ রক্তং পলিতেন সার্দ্ধং প্রপেষয়েৎ সূক্ষ্মতরং মহান্তং ॥ প্রস্নাতপূর্ব্বাভিমুখোঽপি ভূত্বা সংস্মৃত্য লক্ষ্মীঞ্চরুকেণ পূজ্য। ততঃ প্রকুর্য্যাৎ তিলকং ললাটে বামাচ্চ হস্তাচ্চতুরঙ্গুলীভিঃ ॥ পুংদৃষ্টমাত্রেণ ভবেৎ স কান্তাদাসাতিদাসশ্চ কিমত্র চিত্রং ॥ * ॥ অথ লিঙ্গলেপাধিকারঃ। বৃহতীফলমূলানি পিপ্পলী মরিচানি চ। ভয়া রোচনয়া সার্দ্ধং লিঙ্গলেপোত্তমো মতঃ ॥ নিঃশেষস্ত্রীজগৎকর্ষং নাম্না স্ত্রীহৃদয়াঙ্কুশং। মোহনং শস্ত্রমেতদ্ধি মদনস্য স্মৃতং বুধৈঃ ॥ * ॥ অন্যচ্চ। কুষ্ঠঞ্চ ধাতকীপুষ্পং মরিচানি বচা তথা। অনেন লিঙ্গমালিপ্য কৃৎস্নাং শ্যামাং বশং নয়েৎ ॥ তাসাঞ্চিত্তহরোঽপ্যেষা মৃতমপ্যনুগচ্ছতি। বিবশা ভক্তিভাবেন পশ্চাৎ সর্ব্বং প্রযচ্ছতি ॥ * ॥ অন্যচ্চ। পঞ্চরক্তানি সংগৃহ্য শুভানি চ যথেচ্ছয়া। সর্ব্বাণি সমভাগানি প্রিয়ঙ্গুঞ্চাপি তৎসমং ॥ নাগরং দশভাগেন লেপঃ কান্তাবশঙ্করঃ ॥ * ॥ অন্যচ্চ। দেবদারু বচা কুষ্ঠং চতুর্থং বৈশ্বভেষজং। আম্রবীজরসৈর্যুক্তং গৌরীশ্যামাবশঙ্করং ॥ * ॥ অন্যচ্চ। হরিদ্রা বৃহতীমূলং ভদ্রমুস্তং তথোৎপলং। বিড়ঙ্গং কৃষ্ণং বৈরঞ্চ সমভাগানি কারয়েৎ ॥ লিঙ্গলেপোত্তমো হ্যেষ রক্তবল্লী বশঙ্করঃ ॥ * ॥ অন্যচ্চ। হরিদ্রা পিপ্‌লীমূলং পদ্মং মধুকমেব চ। এতানি সমভাগানি নবনীতেন পেষয়েৎ ॥ লিঙ্গলেপোত্তমো হ্যেষ গৌরীপ্রীতায় শাঙ্করঃ॥*॥ কৌশিকশোণিতলেপাৎ সেচনাদ্বা পুষ্টং ভবেল্লিঙ্গং। তদ্বশস্তেজস্তম্ভময়ঃকীলকসদৃশং ভবেচ্চ ॥ কৌশিকং রুধিরং গৃহ্য গোমূত্রেণ চ পেষয়েৎ। বীর্য্যং হি স্তম্ভয়েন্নিত্যং প্রহরার্দ্ধং ন সংশয়ঃ ॥ * ॥ সর্ব্বসাধারণো মন্ত্রঃ। ওঁ এং হ্রীং হ্রীং শ্রীং ফট্ স্বাহা। অনেন মন্ত্রেণ সর্ব্বযোগানভিমন্ত্র্য সিদ্ধিঃ। ইতি শ্রীপার্ব্বতীপুত্রশ্রীনিত্যনাথবিরচিতে

সিদ্ধখণ্ডে তন্ত্রসারে কৌতূহলবিদ্যানাম ইন্দ্রজালতন্ত্রং ॥ * ॥ পুস্তকত্রয়মালোচ্য যথাসাধ্যং শোধিতমেতৎ ॥ * ॥ * ॥ অপিচ। ঈশ্বর উবাচ। ইন্দ্রজালং বিনা রক্ষাং ন করোতীতি নিশ্চিতং। রক্ষামন্ত্রং মহামন্ত্রং সর্ব্বসিদ্ধিপ্রদায়কং ॥ ওঁ নমো নারায়ণায় বিশ্বম্ভরায় ইন্দ্রজালকৌতুকানি দর্শয় দর্শয় সিদ্ধিং কুরু কুরু স্বাহা। অষ্টোত্তরশতজপেন সিদ্ধিঃ ॥ * ॥ অথ রক্ষামন্ত্রঃ। ওঁ নমঃ পরব্রহ্ম পরাত্মনে মম শরীরে পাহি পাহি কুরু কুরু ॥ উল্লূকস্য কপালেন ঘৃতেনাহতকজ্জলং। তেন নেত্রাঞ্জনং কৃত্বা রাত্রৌ পঠতি পুস্তকং ॥ ১ ॥ অঙ্কোলবীজনিক্ষিপ্তে গুরুবারে মুখে গজে। মন্ত্রেণ সিঞ্চয়েন্নিত্যং যাবদ্বীজফলং হবে ॥ ত্রিলৌহবেষ্টিতং কৃত্বা একবীজং মুখে স্থিতং। মত্তমাতঙ্গবীর্য্যস্তু বায়ুতুল্যপরাক্রমঃ ॥ দশহেম দ্বিষট্তাম্রং ষোড়শং রূপ্যভাগকং। এবং সংখ্যা ত্রিলৌহী চ জ্ঞাতব্যা সর্ব্বকর্ম্মণি ॥ ২ ॥ যানি কানি চ বীজানি জঙ্গমং স্থলমেব চ। অঙ্কোলবীজনিক্ষিপ্তে মুখে ভূমিতলে ধ্রুবং ॥ তদ্বীজং মুখমধ্যস্থং ত্রিলৌহৈর্ব্বেষ্টিতং কুরু। তদ্রূপো হি ভবেন্মর্ত্ত্যো নান্যথা শঙ্করোদিতং ॥ ৩ ॥ যানি কানি চ বীজানি অঙ্কোলতৈলমেলনাৎ। সফলো জায়তে বৃক্ষঃ সিদ্ধিযোগমুদাহৃতং ॥ ৪ ॥ শবমুখে বিন্দুমাত্রং তত্তৈলং নিঃক্ষিপেদ্যদি। একযামং ভবেৎ জীবো নান্যথা শঙ্করোদিতং ॥ ৫ ॥ শিগ্রুবীজস্থিতং তৈলং পারাবতপুরীষকং। বরাহস্য বসাযুক্তং গৃহীত্বা চ সমং সমং ॥ গর্দভস্য বসাযুক্তং হরিতালং মনঃশিলা। এভিস্তু তিলকং কৃত্বা যথা লঙ্কেশরো নৃপঃ ॥ ৬ ॥ উল্লুবিষ্ঠাং গৃহীত্বা তু এরণ্ডতৈলপেষণাৎ। যস্যাঙ্গে নিক্ষিপেৎ বিন্দুং স ক্ষিপ্তো জায়তে ধ্রুবং ॥ ৭ ॥ সর্পদন্তং গৃহীত্বা তু কৃষ্ণবৃশ্চিককণ্টকং। কৃকলারক্তসংযুক্তং সূক্ষ্মচূর্ণন্তু কারয়েৎ ॥ যস্যাঙ্গে নিক্ষিপেচ্চূর্ণং সদ্যো যাতি যমালয়ং ॥ ৮ ॥ সিন্দুরং গন্ধকং তালং সমং পিষ্ট্বা মনঃশিলাং। তল্লিপ্তবস্ত্রং শিরসি অগ্নিবৎ দৃশ্যতে ধ্রুবং ॥ ৯ ॥ অর্কক্ষীরং বটক্ষীরং ক্ষীরং ডুম্বরসম্ভবং। গৃহীত্বা পাত্রকে লিপ্তে জলপূর্ণং করোতি চ। দুগ্ধং সংজায়তে তত্র মহাকৌতুককৌতুকং ॥ ১০ ॥ অঙ্কোলতৈললিপ্তাঙ্গো দৃশ্যতে রাক্ষসাকৃতিঃ। পলায়ন্তে নরাঃ সর্ব্বে পশুপক্ষিগজা হয়াঃ ॥ ১১ ॥ অঙ্কোলস্য তু তৈলেন দীপং প্রজ্বালয়েন্নরঃ। রাত্রৌ পশ্যতি ভূতানি খেচরাণি মহীতলে ॥ ১২ ॥ বুধে বা শনিবারে বা কৃকলাং পরিগৃহ্য চ। শক্রমূত্রেয়তে যত্র কৃকলাং তত্র নিঃক্ষিপেৎ ॥ নিখনেদ্ভূমিমধ্যেষু উদ্ধৃতে চ পুনঃ সুখী। নপুংসকং ভবেৎ সত্যং নান্যথা শঙ্করো দিতং ॥ ১৩ ॥ গন্ধকং হরিতালঞ্চ গোমূত্রঞ্চ বিষং তথা। সূক্ষ্মচূর্ণময়ং কৃত্বা কিঞ্চিদ্বহ্নিং বিনিঃক্ষিপেৎ ॥ বিপ্রাঃ সর্ব্বে পলায়ন্তে যথা যুদ্ধেষু কাতরাঃ ॥ ১৪ ॥ ইতি দত্তাত্রেয়তন্ত্রে ঈশ্বরদত্তাত্রেয়সংবাদে

ইন্দ্রজালকৌতুকদর্শনং নাম একাদশঃ পটলঃ ॥ * ॥ * ॥ অন্যচ্চ। বশ্যাকর্ষণকর্ম্মাণি বসন্তে যোজয়েৎ প্রিয়ে। গ্রীষ্মে বিদ্বেষণং কুর্য্যাৎ প্রাবৃষি স্তম্ভনং তথা ॥ শিশিরে মারণঞ্চৈব শান্তিকং শরদি স্মৃতং ॥ হেমন্তে পৌর্ণমাস্যাঞ্চ ঋতুকর্ম্মবিশারদঃ। বসন্তশ্চৈব পূর্ব্বাহ্ণে গ্রীষ্মো মধ্যাহ্ন উচ্যতে॥ বর্ষা জ্ঞেয়াপরাহ্ণে তু প্রদোষে শিশিরঃ স্মৃতঃ। অর্দ্ধরাত্রে চ হেমন্তঃ শরদং তৎপরং স্মৃতং ॥ * ॥ অথ পক্ষাদিনির্ণয়ঃ। কৃষ্ণপক্ষে মারণাদি শুক্লপক্ষে চ বর্দ্ধনং ॥ দ্বাদশ্যাং মারণং কর্ম্ম একাদশ্যাং তথৈব চ। তৃতীয়াং নবমীঞ্চৈব বশ্যাকর্ষঞ্চ কারয়েৎ। স্তম্ভনঞ্চ চতুর্দশ্যাং চতুর্থ্যাং প্রতিপদ্যপি॥ দ্বিতীয়াং ষষ্ঠীমষ্টম্যাং কারয়েৎ শান্তিকর্ম্ম চ। অশ্বিনীমৃগমূলাশ্চ পুষ্যা পুনর্ব্বসুস্তথা ॥ বশ্যাকর্ষঞ্চ কর্ত্তব্যং কারয়েচ্চ সদা বুধঃ। জ্যেষ্ঠা চ উত্তরাষাঢ়া অনুরাধা চ রোহিণী॥ কারয়েন্মারণং শান্তিং স্তম্ভনং বিজয়ং তথা। বিধিমন্ত্রসমাযুক্তমৌষধং সফলং ভবেৎ ॥ * ॥ অথ বশীকরণং। সিন্দুরমাক্ষিককপোতমলানি পিষ্ট্বা লিঙ্গং বিলিপ্য রমতে তরুণীং নবোঢ়াং। শান্তিং ন যাতি পুরুষো মনসাপি নূনং দাসী ভবেদিতি মনোহরদিব্যমূর্ত্তিঃ॥ পুষ্যে রুদ্রজটামূলং মুখস্থং কারয়েদ্বুধঃ। তাম্বুলাদৌ প্রদাতব্যং বশ্যা ভবতি নিশ্চিতং ॥ তথৈব পাটলীমূলং তাম্বুলেন তু বশ্যকৃৎ। নাগপুষ্পং প্রিয়ঙ্গুঞ্চ তগরং পদ্মকেশরং ॥ জটামাংসী সমং নীত্বা চূর্ণয়েৎ মন্ত্রবিত্তমঃ। স্বাঙ্গং ধূপয়তে তেন ভজতে কামবৎ স্ত্রিয়ঃ॥ ওঁ মূলী মূলী মহামূলী সর্ব্বং সংক্ষোভভয়েভ্য উপদ্রবেভ্যঃ স্বাহা। ধূপমন্ত্রঃ ॥ পানীয়স্যাঞ্জলীন্ সপ্ত দত্ত্বা বিদ্যামিমাং জপেৎ। সালঙ্কারাং নবাং কন্যাং লভতে মাসমাত্রতঃ॥ ওঁ বিশ্বাবসুর্নাম গন্ধর্ব্বঃ কন্যানামধিপতিঃ সুরূপাং সালঙ্কারাং দেহি মে নমস্তস্মৈ বিশ্বাবসবে স্বাহা ॥ কন্যাগৃহে শালকাষ্ঠং ক্ষিপেদেকাদশাঙ্গুলং। ঋক্ষে চ পূর্ব্বফল্গুন্যাং যস্তাং কন্যাং প্রযচ্ছতি ॥ * ॥ অথ সর্ব্বজনবশীকরণং। শিলা চ রোচনামূলং বারিণা তিলকে কৃতে। দৃষ্টমাত্রে বশং যাতি নারী বা পুরুষোঽপি বা ॥ স্বর্ণেন বেষ্টনং কৃত্বা তেনৈব তিলকে কৃতে। সম্ভাষণেন সর্ব্বেষাং ত্রৈলোক্যং বশমানয়েৎ ॥ ওঁ হ্রীঁ ক্লীঁ ঐঁ ক্ষ্রৌঁ ভোগপ্রদা ভৈরবী মাতঙ্গী ত্রৈলোক্যং বশমানয় স্বাহা। ঔষধোপরি সহস্রজপং কুর্য্যাৎ। পুনঃ সপ্তবারজপেন তিলকং কারয়েৎ শত্রুসমোঽপি বশ্যো ভবতি। ইতি কালনাথবিরচিতে ইন্দ্রজালে ১ অধ্যায়ঃ ॥ * ॥ অথাকর্ষণং। ওঁ হ্রীঁ চামুণ্ডে জ্বল জ্বল প্রজ্বল প্রজ্বল স্বাহা। অনেন মন্ত্রেণ স্ত্রিয়ং দৃষ্ট্বা জপং কুর্য্যাৎ তৎক্ষণাৎ পৃষ্ঠতঃ সমাগচ্ছতি। পূর্ব্বমেবাযুতজপেন সিদ্ধিঃ॥ অশ্লেষায়াং সমাদায় অর্জ্জুনস্য চ বন্ধকং। অজমূত্রেণ সংপিষ্য স্ত্রীণাং শিরসি দাপয়েৎ॥ পুরুষস্য পশূনাং

বা ক্ষিপেদাকর্ষণং ভবেৎ ॥ * ॥ অথ জয়ঃ। গোজিহ্বা শিখিমূলং বা মুখে শিরসি সংস্থিতা। কুরুতে সর্ব্ববাদেষু জয়ং পুষ্যে সমুদ্ধৃতে ॥ মার্গশীর্ষপৌর্ণমাস্যাং শিখিমূলং সমুদ্ধরেৎ। বাহৌ শিরসি বা ধার্য্যং বিবাদে বিজয়ো ভবেৎ ॥ গিরিকর্ণীং শমীং গুঞ্জাং শ্বেতবর্ণাং সমাহরেৎ। চন্দনেনান্বিতঞ্চৈব তিলকেন জয়ী নরঃ ॥ কণকার্কবটা বহ্নি-র্বিদ্রুমঃ পঞ্চমস্তথা। তিলকং কুরুতে যস্তু পশ্যেত্তং পঞ্চধা রিপুঃ ॥ আর্দ্রায়াং বট-বন্দাকং গৃহীত্বা ধারয়েৎ করে। সংগ্রামে জয়মাপ্নোতি জয়াং স্মৃত্বা জয়ী ভবেৎ ॥ অস্য মন্ত্রঃ। ওঁ নমো মহাবলপরাক্রম সমস্তবিদ্যাবিশারদ অমুকস্য ভুজবলং বন্ধয় বন্ধয় দৃষ্টিং স্তম্ভয় স্তম্ভয় অঙ্গানি ধূনয় ধূনয় পাতয় পাতয় মহীতলে হ্রীং ॥ * ॥ অথ সৌভাগ্যং। পুষ্যোদ্ধৃতং সিতার্কস্য মূলং বামেতরে ভুজে। বদ্ধা সৌভাগ্যমাপ্নোতি দুর্ভগাপি ন সংশয়ঃ ॥ রক্তচিতার্কমূলস্তু সোমগ্রস্তে সমুদ্ধৃতং। ক্ষৌদ্রেঃ পিষ্ট্বা বটীং কুর্য্যাৎ তিলকং শুভমঙ্গনা ॥ * ॥ অথ ঈশ্বরাদিক্রোধোপ-শমনং। ওঁ শান্তে প্রশান্তে সর্ব্বক্রোধোপ-শমনি স্বাহা। অনেন মন্ত্রেণ ত্রিঃসপ্তধা জপেন মুখং মার্জয়েৎ। ততঃ ক্রোধোপ-শমনং ভবতি ॥ * ॥ গজনিবারণং। শ্বেতাপরাজিতামূলং হস্তস্থং বারয়েৎ গজং। মূলং ত্রিশূল্যা বক্ত্রস্থং গজবশ্য-করং ভবেৎ ॥ * ॥ ব্যাঘ্রনিবারণং। মুখস্থং বৃহতীমূলং হস্তস্থং ব্যাঘ্রভীতিজিৎ।

হ্রীং হ্রীং হ্রীং শ্রীং শ্রো শ্রো স্বাহা। ইত্যষ্টাক্ষরমন্ত্রেণ লোষ্ট্রং পঠিত্বা ক্ষিপেৎ। তদা মুখং ন চালয়তি গন্তুমশক্যঃ ॥ মূলং কৃষ্ণচতুর্দশ্যাং গ্রাহয়েল্লাঙ্গলীভবং। হস্তস্থং ব্যাঘ্রভীতাদিভয়হৃৎ পরিকীর্ত্তিতং ॥ ইতি ইন্দ্রজালতন্ত্রে ৩ উপদেশঃ ॥ * ॥ অথ স্তম্ভনং। শ্বেতগুঞ্জোত্থিতং মূলং মুখস্থং দৃষ্টতুণ্ডজিৎ। ওঁ হ্রীঁ রক্ষ রক্ষ চামুণ্ডে তুরু তুরু অমুকং মে বশমানয় বশমানয় স্বাহা। অয়ং চণ্ডা মন্ত্রঃ। উক্তযোগ-সিদ্ধিঃ ॥ পুষ্যার্কে মধুবন্দাকং গৃহীত্বা প্রক্ষিপেদ্বধূঃ। সভামধ্যে চ সর্ব্বেষাং মুখস্তম্ভঃ প্রজায়তে ॥ * ॥ মেঘস্তম্ভনং। ইষ্টকদ্বয়সংপুটমধ্যে মেঘসংখ্যকচতুরস্রং বিলিখ্য উদ্যানে স্থাপয়েত্তদা মেঘান্ স্তম্ভয়তি। মন্ত্রঃ। মেঘান্ স্তম্ভয় স্তম্ভয় ॥ * ॥ নৌকাস্তম্ভনং। ভরণ্যাং ক্ষীরকাষ্ঠস্য কীলং পঞ্চাঙ্গুলং ক্ষিপেৎ। নৌকামধ্যে তদা নৌকাস্তম্ভনং জায়তে ধ্রুবং ॥ * ॥ নিদ্রাস্তম্ভনং। মূলং বৃহত্যা মধুকং পিষ্ট্বা নস্যং সমাচরেৎ। নিদ্রাস্তম্ভনমেতদ্ধি মূল-দেবেন ভাষিতং ॥ * ॥ শস্ত্রস্তম্ভনং। কপিত্থস্য চ বন্দাকং কৃত্তিকায়াং সমা-হরেৎ। বক্ত্রসংস্থস্তু দেবস্য শস্ত্রস্তম্ভনকং পরং ॥ করে সুদর্শনামূলবন্ধনাৎ স্তম্ভনং তথা। ওঁ অহো কুম্ভকর্ণ মহারাক্ষস নিকষাগর্ভসংভূত পরসৈন্যস্তম্ভন মহাভয় রণরুদ্র আজ্ঞাপয় স্বাহা। অষ্টোত্তর-সহস্রজপাৎ সিদ্ধিঃ ॥ গৃহীত্বা শুভনক্ষত্রে অপামার্গস্য মূলকং। লেপমাত্রে শরীরাণাং

সর্ব্বশস্ত্রনিবারণং ॥ পুষ্যার্কে শ্বেতগুঞ্জায়া মূলমুদ্ধৃত্য ধারয়েৎ। হস্তে কাণ্ডভয়ং নাস্তি সংগ্রামে চ কদাচন ॥ * ॥ গোমহিষ্যাদিস্তম্ভনং। উষ্ট্রস্যাস্থি চতুর্দিক্ষু নিখনেৎ ভূতলে ধ্রুবং। গাং মেষীং মহিষীং বাজীং স্তম্ভয়েৎ করিণীমপি ॥ * ॥ বুদ্ধিস্তম্ভনং। ভৃঙ্গরাজমপামার্গং সিদ্ধার্থং সহদেবিকাং। ওলং বচাঞ্চ শ্বেতার্কং ধ্রুবমেষাং সমাহরেৎ ॥ লৌহপাত্রে বিনিক্ষিপ্য দ্বিদিনান্তে সমুদ্ধরেৎ। তিলকৈঃ সর্ব্বভূতানাং বুদ্ধিস্তম্ভকরং পরং ॥ ওঁ নমো ভগবতে বিশ্বামিত্রায় নমঃ সর্ব্বমুখীভ্যাং বিশ্বামিত্র আগচ্ছ আগচ্ছ স্বাহা। উক্তযোগস্যায়ং মন্ত্রঃ ॥ * ॥ চৌরগতিস্তম্ভনং। ওঁ ব্রহ্মবেশিনি শিবে রক্ষ রক্ষ স্বাহা। অনেন মন্ত্রেণ সপ্তপাশান্ গৃহীত্বা ত্রীণি কট্যাং বদ্ধা অপরান্ মুষ্টিভ্যাং ধারয়েৎ। ইতি চৌরাণাং গতিস্তম্ভনং ॥*॥ গর্ভস্তম্ভনং। গ্রাহ্যং কৃষ্ণচতুর্দশ্যাং ধুস্তূরস্য তু মূলকং। কট্যাং বদ্ধা রমেৎ কান্তাং ন গর্ভং ধারয়েৎ কচিৎ ॥ মুক্তেন লভতে গর্ভং পুরা নাগার্জ্জুনোদিতং। তন্মূলচূর্ণং যোনিস্থং ন গর্ভং সম্ভবেৎ কচিৎ ॥ সিদ্ধার্থমূলং শিরসি বদ্ধা কান্তাং রমেত্তু যাং। ন গর্ভং ধারয়েৎ সা স্ত্রী মুক্তেন লভতে পুনঃ ॥ * ॥ শুক্রস্তম্ভনং। নীলীমূলং শ্মশানস্থং কট্যাং বদ্ধা তু বীর্য্যধৃক্। রক্তাপামার্গমূলন্তু সোমবারে নিমন্ত্রয়েৎ ভৌমে প্রাতঃ সমুদ্ধৃত্য কট্যাং বদ্ধা তু বীর্য্যধৃক্ ॥ ইতি কামরত্নে ৩

উপদেশঃ ॥ * ॥ মোহনং। শৃঙ্গীবচানলদসর্জ্জরসং সমানং কৃত্বা ত্রুটিং মলয়জঞ্চ যড়েকমিশ্রং। যো ধূপয়েন্নিজগৃহং বসনং শরীরং তস্যাপি দাস ইব মোহমুপৈতি লোকঃ ॥ ভৃঙ্গরাজঃ কেশরাজো লজ্জা চ সহদেবিকা। এভিস্তু তিলকং কৃত্বা ত্রৈলোক্যং মোহয়েন্নরঃ ॥ ওঁ অং আং ইং ঈং উং ঊং ঋং ৠং হুঁ ফট্। অনেনৈব তু মন্ত্রেণ কৃত্বা তাম্বুলভাবনং। সাধ্যস্য মুখনিক্ষিপ্তে মোহমায়াতি তৎক্ষণাৎ ॥ ওঁ ভীঁ ক্ষীঁ ভোঁ মোহয়। ইমং মন্ত্রং বারত্রয়ং জপেৎ। মোহমাপ্নোতি মানবঃ ॥ * ॥ দেহরঞ্জনং। কদম্বপত্রং লোধ্রঞ্চ অর্জ্জুনস্য চ পুষ্পকং। পিষ্ট্বা গাত্রোদ্বর্ত্তনাচ্চ কায়দুর্গন্ধনাশনং ॥ এলাশটীপত্রকচন্দনানি তোয়াভয়াশিগ্রুঘনাময়ানি। সসৌরভোহয়ং স্মররাজযোগঃ খ্যাতঃ সুগন্ধো নরমোহযোগ্যঃ ॥ * ॥ মুখরঞ্জনং। রসালজম্বুফলগর্ভসারঃ সকর্কটো মাক্ষিকসংযুতশ্চ। স্থিতো মুখান্তে পুরুষস্য রাত্রৌ করোতি পুংসাং মুখবাসমিষ্টং ॥ চূর্ণং মুরাকেশরকুষ্ঠকানাং প্রাতর্দিনান্তে পরিলেঢ়ি যা স্ত্রী। অপ্যর্দ্ধমাসেন মুখস্য বাসঃ কর্পূরতুল্যো ভবতি প্রকাশঃ ॥ * ॥ কেশকৃষ্ণীকরণাদি। লোহকিট্টং জবাপুষ্পং পিষ্ট্বা ধাত্রীফলং সমং। ত্রিদিনং লেপয়েৎ শীর্ষং ত্রিমাসং কেশরঞ্জনং ॥ ইতি কৃষ্ণীকরণং ॥ * ॥ কেশশুক্লীকরণং। রক্তার্কক্ষীরেণ সপ্তাহং অম্বহং ভাবয়েত্তিলং। তত্তৈললিপ্তাঃ কেশাঃ স্যুঃ শুক্লাশ্চ নাত্র

সংশয়ঃ ॥ ইতি কামরত্নে ৪ উপদেশঃ ॥*॥ অথ বাজীকরণং। অশ্বিন্যাং বটবন্দাকং ক্ষীরৈঃ পিষ্ট্বা মহাবলঃ। পুষ্যোদ্ধৃতং পিবেন্মূলং শ্বেতার্কস্য প্রযত্নতঃ ॥ সপ্তরাত্রন্তু গোক্ষীরৈর্বৃদ্ধোঽপি তরুণায়তে। চূর্ণং বিদার্য্যাঃ স্বরসেন তস্যা বিভাবিতং ভাস্কররশ্মিজালে। মধ্বাজ্যসংমিশ্রিতমেব লীঢ়েদ্দশস্ত্রিয়ো গচ্ছতি নির্বিশঙ্কঃ ॥*॥ জন্মবন্ধ্যাচিকিৎসা। সমূলপত্রাং সর্পাক্ষীং রবিবারে সমুদ্ধরেৎ। একবর্ণগবাং ক্ষীরৈঃ কন্যাহস্তেন পেষয়েৎ ॥ ঋতুকালে পিবেৎ বন্ধ্যা পলার্দ্ধং তদ্দিনে দিনে। ক্ষীরশাল্যন্নমুদ্গাঞ্চ লঘ্বাহারং প্রদাপয়েৎ ॥ এবং সপ্তদিনং কুর্য্যাৎ বন্ধ্যা ভবতি গর্ব্ভিণী। উদ্বেগং ভয়শোকঞ্চ দিবানিদ্রাং বিবর্জ্জয়েৎ ॥ ন কর্ম্ম কারয়েৎ কিঞ্চিৎ বর্জয়েৎ সাবগাহনং। পতিসঙ্গং চরেৎ সা চ নাত্র কার্য্যা বিচারণা ॥ কৃষ্ণাপরাজিতামূলং ছাগীক্ষীরেণ সংপিবেৎ। ঋতুকালে সমায়াতে ভুক্ত্বা গর্ব্ভধরা ভবেৎ ॥ গোক্ষুরস্য তু বীজন্তু পিবেন্নির্গুণ্ডিকারসৈঃ। ত্রিরাত্রং সপ্তরাত্রং বা বন্ধ্যা ভবতি গর্ব্ভিণী ॥ ইতীন্দ্রজালে জন্মবন্ধ্যাচিকিৎসা ॥*॥ অথ কাকবন্ধ্যাচিকিৎসা। অশ্বগন্ধীয়মূলন্তু গ্রাহয়েৎ পুষ্যভাস্করে। পেষয়েন্মহিষীক্ষীরৈঃ পলার্দ্ধং ভক্ষয়েৎ সদা ॥ সপ্তাহাল্লভতে গর্ব্ভং কাকবন্ধ্যা চিরায়ুষং। ইতীন্দ্রজালে কাকবন্ধ্যাচিকিৎসা ॥*॥ অথ মৃতবৎসাচিকিৎসা। প্রাঙ্মুখঃ কৃত্তিকা ঋক্ষে বন্ধ্যাকর্কোটকীং হরেৎ। তৎকন্দং পেষয়েত্তোয়ৈঃ কর্ষমাত্রং সদা পিবেৎ ॥ যা বীজপূরক্রমমূলমেকং ক্ষীরেণ পক্বং প্রপিবেৎ বিমিশ্রং। ঋতৌ নিজং যা তু পতিং প্রয়াতি দীর্ঘায়ুষং সা তনয়ং প্রসূতে ॥ মঞ্জিষ্ঠা মধুকং কুষ্ঠং ত্রিফলা শর্করা বলা। মেদা পয়স্যা কাকোলীমূলঞ্চৈবাশ্বগন্ধজং ॥ অজমোদা হরিদ্রে দ্বে হিঙ্গুঃ কটুকরোহিণী। উৎপলং কুমুদং দ্রাক্ষা কাকোল্যৌ তন্মূলদ্বয়ং ॥ এতেষাং কর্ষকৈর্ভাগৈর্ঘৃতপ্রস্থং বিপাচয়েৎ। শতাবরীরসং ক্ষীরং ঘৃতস্যেদং চতুর্গুণং ॥ সংপিবেন্নিয়তং নারী নিত্যং স্ত্রীষু চ শস্যতে। পুত্রান্ জনয়তে নারী মেধাঢ্যান্ প্রিয়দর্শনান্ ॥ যা চৈবাস্থিরগর্ব্ভা স্যাৎ যা নারী জনয়েৎ মৃতং। অল্পায়ুষঞ্চ জনয়েৎ যা চ কন্যাঃ প্রসূয়তে ॥ যোনিদোষে রজোদোষে গর্ব্ভস্রাবে চ শস্যতে। প্রজাবর্দ্ধনমায়ুষ্যং সর্ব্বগ্রহনিবারণং ॥ নাম্না ফলঘৃতং হ্যেতদায়ুষ্যং পরিকীর্ত্তিতং। নোক্তঞ্চ লক্ষ্মণামূলং বদন্ত্যত্র চিকিৎসকাঃ ॥ জীববৎসা শুক্লবর্ণা ঘৃতমত্র তু দীয়তে ॥ অরণ্যগোময়েনাত্র বহ্নের্জ্বালা প্রদীয়তে। অত্র পয়স্যা ক্ষীরযুক্তভূমিকুষ্মাণ্ডং। উৎপলং নীলং। ইতীন্দ্রজালে মৃতবৎসাচিকিৎসা ॥*॥ অথ গর্ব্ভস্রাবচিকিৎসা। প্রথমে মাসি। গোক্ষীরৈঃ পেষয়েত্তুল্যং পদ্মকেশরচন্দনং। পতনে তং পিবেন্নারী মহাগর্ব্ভঃ স্থিরো ভবেৎ ॥ অথবা মধুকং দারু শরবৃক্ষস্য বীজকং। সংপিষ্য ক্ষীরকাকোলীং পিবেৎ ক্ষীরৈশ্চ

গোভবৈঃ ॥ ১ ॥ নীলোৎপলং মৃণালঞ্চ যষ্টী কর্কটশৃঙ্গিকা। গোক্ষীরৈশ্চ দ্বিতীয়ে চ পীত্বা শাম্যতি বেদনা ॥ ২ ॥ শ্রীখণ্ডং তগরং কুষ্ঠং মৃণালং পদ্মকেশরং। পিবেৎ শীতোদকৈঃ পিষ্ট্বা তৃতীয়ে বেদনাবতী ॥ অথবা ক্ষীরকাকোলীবলানন্তাপয়ঃ পিবেৎ ॥ ৩ ॥ শীতোৎপলং মৃণালানি গোক্ষীরককশেরুকং। তুর্য্যমাসে গবাং ক্ষীরং পিবেৎ সা বেদনাপরা ॥ অথবা মধুকং রাস্না শ্যামা ব্রাহ্মণযষ্টিকা। অনন্তা পেষয়িত্বা তু গবাং ক্ষীরৈঃ সমং পিবেৎ ॥ ৪ ॥ পুনর্ণবা চ কাকোলী তগরং নীলমুৎপলং। গোক্ষীরং পঞ্চমে মাসি গর্ভক্লেশহরং ভবেৎ ॥ অথবা বৃহতীযুগ্মং যজ্ঞাঙ্গং কট্‌ফলং ত্বচঃ। গোঘৃতং ক্ষীরসংযুক্তং পিবেৎ পিষ্ট্বা চ পঞ্চমে ॥ ৫ ॥ সিতা কাশাখুমজ্জা চ শীততোয়েন পেষয়েৎ। যষ্ঠে মাসি গবাং ক্ষীরৈঃ পিবেৎ ক্লেশং নিবর্ত্তয়েৎ ॥ অথবা গোক্ষুরং শিগ্রুং মধুকং পৃশ্নিপর্ণিকাং। বলাযুক্তাং। পিবেৎ পিষ্ট্বা গোদুগ্ধৈঃ যষ্ঠমাসকে ॥ ৬ ॥ কাষ্ঠকং পৌষ্করং মূলং শৃঙ্গাটং নীলমুৎপলং। পিষ্ট্বা চ সপ্তমে মাসি ক্ষীরৈঃ পীত্বা প্রশাম্যতি ॥ অথবা মকরদ্রাক্ষাং শৃঙ্গাটঞ্চ সকেশরং। মৃণালং শর্করাযুক্তং ক্ষীরৈঃ পেয়ন্তু সপ্তমে ॥ ৭ ॥ যষ্টী পদ্মাক্ষার্কমুস্তং কেশরং গজপিপ্‌পলী। নীলোৎপলং গবাং ক্ষীরৈঃ পিবেদষ্টমমাসকে ॥ অথবা বিল্বমূলঞ্চ কপিত্থং বৃহতী শমী। ইক্ষুপাটলয়োর্মূলং এভিঃ ক্ষীরং প্রসাধয়েৎ। তৎক্ষীরমষ্টমে পীত্বা গর্ভে শাম্যতি বেদনা ॥ ৮ ॥ বিশালাবীজকক্কোলং মধুনা সহ লেপয়েৎ। বেদনা নবমে মাসি শান্তিমাপ্নোতি নান্যথা ॥ অথবা মধুকং শ্যামা হ্যনন্তা ক্ষীরকাকলী। এভিঃ সিদ্ধং পিবেৎ ক্ষীরং নবমে বেদনাবতী ॥ ৯ ॥ শর্করা গোস্তনী দ্রাক্ষা সক্ষৌদ্রং নীলমুৎপলং। পায়য়েৎ দশমে মাসি গবাং ক্ষীরৈঃ প্রশান্তয়ে ॥ অথবা শুদ্ধসংসিদ্ধং গোক্ষীরং দশমে পিবেৎ। অথবা মধুকং দারু শুদ্ধক্ষীরেণ সংপিবেৎ ॥ ১০ ॥ ক্ষৌদ্রং বৃষং চন্দনসিন্ধুজাতং মহেন্দ্ররাজং পয়সা সুপিষ্টং। গর্ভং ক্ষরন্তং প্রতিহন্তি শীঘ্রং যোগো বিভুঞ্জন্ কিল মূলদেবৈঃ ॥ ইতি ইন্দ্রজালে গর্ভস্রাবচিকিৎসা ॥ * ॥ অথ গর্ভশুষ্কং। গোক্ষীরং শর্করাযুক্তং গর্ভশুষ্কপ্রশান্তয়ে। পিবেদ্বা মধুকং চূর্ণং গাম্ভারীফলচূর্ণকং ॥ সমাংশং গব্যদুগ্ধেন গর্ভিণী চ প্রশান্তয়ে ॥ * ॥ অথ সুখপ্রসবযোগঃ। শ্বেতং পুনর্ণবামূলং চূর্ণং যোনৌ প্রবেশয়েৎ। তৎক্ষণাৎ প্রসবতে নারী গর্ভে সতি প্রপীড়িতে ॥ বাসকস্য তু মূলন্তু চোত্তরস্থং সমুদ্ধরেৎ। কট্যাং বদ্ধা সপ্তসূত্রৈঃ সুখং নারী প্রসূয়তে ॥ সহদেব্যাশ্চ মূলং বা কটিস্থং প্রসবেৎ সুখং। অপামার্গস্য মূলন্তু গ্রাহয়েচ্চতুরঙ্গুলং ॥ দ্বারি প্রবেশয়েৎ যোনৌ তৎক্ষণাৎ সা প্রসূয়তে ॥ * ॥ অথ স্তনবর্দ্ধনং স্তনোত্থাপনঞ্চ। তৈলং বচাদাড়িমকল্কসিদ্ধং সিদ্ধার্থজং

লেপনতো নিতান্তং। নারীকুচৌ চারুতরৌ সুপীনৌ কুর্য্যাদসৌ যোগবরঃ প্রদিষ্টঃ॥ শ্রীপর্ণিকায়া রসবল্কসিদ্ধং তিলোদ্ভবং তৈলবরং প্রদিষ্টং। তুলেন বক্ষোজযুগে প্রদেয়ং প্রয়াতি বৃদ্ধিং পতিতোঽপি নার্য্যাঃ॥ প্রথমকুসুমকালে নস্যযোগেন পীতং সনিয়মমমরাস্যং তণ্ডুলাম্ভো যুবত্যাঃ। কুচযুগলসুপীনং ক্বাপি নো যাতি পাতং কথিত ইতি পুরৈব চক্রদত্তেন যোগঃ ॥ * ॥ অথ যোনিসংস্কারঃ। প্রক্ষালয়েন্নিম্বুকষায়নীরৈঃ স্বিন্নাজ্যকৃষ্ণাগুরুগুগ্‌গুলানাং। ধূপেন যোনিং নিশি ধূপয়িত্বা নারী প্রমোদং বিদধাতু ভর্ত্তুঃ॥*॥ অথ লোমশাতনং। পলাশভস্মান্বিততালচূর্ণৈরম্ভাম্বুমিশ্রৈঃ পরিলিপ্য ভূয়ঃ। কন্দর্পগেহে মৃগলোচনানাং রোমাণি রোহন্তি কদাপি নৈব॥ ইতি ইন্দ্রজালতন্ত্রসংগ্রহঃ॥ যুদ্ধে ক্ষুদ্রোপায়বিশেষঃ। ইতি হেমচন্দ্রঃ॥

ইন্দ্রজালিকঃ (ত্রি) কুহককারী। বাজীকর ইতি ভাষা। ইতি জটাধরঃ॥

ইন্দ্রজিৎ (পুং) রাবণপুত্রঃ। তৎপর্য্যায়ঃ। মেঘনাদঃ ২ মন্দোদরীসুতঃ ৩। ইতি জটাধরঃ॥

ইন্দ্রজিদ্বিজয়ী [ন্] (পুং) লক্ষ্মণঃ। ইতি শব্দরত্নাবলী॥

ইন্দ্রতূলং (ক্লী) আকাশপতিতসূত্রং। আকাশবুড়ির সুতা ইতি ভাষা। তৎপর্য্যায়ঃ। বৃদ্ধসূত্রকং ২ গ্রীষ্মহাসং ৩ বংশকফং ৪ বাততূলং৫ মরুদ্ধ্বজং৬। ইতি হারাবলী॥

ইন্দ্রতূলকং (ক্লী) ইন্দ্রতূলং। ইতি ত্রিকাণ্ডশেষঃ॥

ইন্দ্রদারুঃ (পুং) দেবদারুবৃক্ষঃ। ইতি ভাবপ্রকাশঃ॥

ইন্দ্রদ্রুঃ (পুং) অর্জ্জুনবৃক্ষঃ। ইত্যমরঃ॥ কুটজবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

ইন্দ্রদ্রুমঃ (পুং) অর্জ্জুনবৃক্ষঃ। ইতি শব্দরত্নাবলী॥

ইন্দ্রনীলঃ (পুং) মরকতমণিঃ। পান্না ইতি ভাষা। ইতি হেমচন্দ্রঃ॥

ইন্দ্রনীলকঃ (পুং) মরকতমণিঃ। ইতি শব্দরত্নাবলী॥

ইন্দ্রপুষ্পা (স্ত্রী) লাঙ্গলিকীবৃক্ষঃ। বিষলাঙ্গলা ইতি খ্যাতা। ইতি রত্নমালা॥

ইন্দ্রপুষ্পিকা (স্ত্রী) কলিকারী। বিষলাঙ্গলা ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥

ইন্দ্রপ্রস্থং (ক্লী) রাজযুধিষ্ঠিরনির্ম্মিতনগরং। অধুনা দিল্লী ইতি খ্যাতং। ইতি মহাভারত

ইন্দ্রপ্রহরণং (ক্লী) ইন্দ্রস্যাস্ত্রং। বজ্রং। ইতি হলায়ুধঃ॥

ইন্দ্রভেষজং (ক্লী) শুণ্ঠী। ইতি শব্দরত্নাবলী॥

ইন্দ্রমহকামুকঃ (পুং) কুক্কুরঃ। ইতি ত্রিকাণ্ডশেষঃ॥

ইন্দ্রযবঃ (পুং ক্লী) স্বনামখ্যাততিক্তবীজবিশেষঃ। তৎপর্য্যায়ঃ। কলিঙ্গং ২ ভদ্রযবং ৩। ইত্যমরঃ॥ শক্রাহ্বঃ ৪ শক্রবীজং ৫ বৎসকঃ ৬ বৎসকবীজং ৭ ভদ্রজঃ ৮ কুটজঃ ৯ কুটজবীজং ১০

কলিঙ্গবীজং ১১। অস্য গুণাঃ। কটুত্বং। তিক্তত্বং। শীতত্বং। কফবাতরক্তপিত্তহরত্বং। দাহাতিসারশমনত্বং। জ্বরদোষশূলমূলনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ কুড়চির বিচি ইতি ভাষা। যথা। উক্তং কুটজবীজন্তু যবমিন্দ্রযবং তথা। কলিঙ্গঞ্চাপি কালিঙ্গং তথা ভদ্রযবং স্মৃতং॥ ইতি ক্লীবে অমরঃ প্রাহ। কচিদিন্দ্রস্য নাম্নৈব ভবেত্তদভিধায়কং। ফলানীন্দ্রযবাস্তস্য তথা ভদ্রযবা অপি॥ ইতি ধন্বন্তরিঃ প্রাহ। ঐন্দ্রং যবং ত্রিদোষঘ্নং সংগ্রাহি কটুশীতলং। জ্বরাতীসাররক্তার্শঃকৃমিবিসর্পকুষ্ঠনুৎ॥ দীপনং গুদকীলাস্রবাতাস্রশ্লেষ্মশূলজিৎ। ইতি ভাবপ্রকাশঃ॥

ইন্দ্রলুপ্তং (ক্লী) কেশরোগবিশেষঃ। টাক ইতি ভাষা। তস্য লক্ষণং। রোমকূপানুগং পিত্তং বাতেন সহ মূর্চ্ছিতং। প্রচ্যাবয়তি রোমাণি ততঃ শ্লেষ্মাসশোণিতঃ॥ রুণদ্ধি রোমকূপাংস্তু ততোঽন্যেষামসম্ভবঃ। তদিন্দ্রলুপ্তং খালত্যং রুজ্যেতি চ বিভাব্যতে॥ ইতি নিদানং॥ খালত্যং রুজ্যেতি চ তস্য পর্য্যায়কথনং। তথাচ ভোজঃ। তদিন্দ্রলুপ্তমিত্যাহুঃ খল্লীং রুজ্যাঞ্চ কেচন। কার্ত্তিকস্ত্বাহ। ইন্দ্রলুপ্তং শ্মশ্রুণি ভবতি খালত্যং শিরোরুহেষ্বেব রুজ্যা সবেদনেতি আগমস্তত্র নাস্তি। ইতি তট্টীকা॥ অথেন্দ্রলুপ্তস্য চিকিৎসা। তিক্তপটোলীপত্রস্বরসৈর্ঘৃষ্টা শমং যাতি। চিরকালজাপি রুজ্যা নিয়তং দিবসত্রয়েণৈব॥ গোক্ষুরস্তিলপুষ্পাণি তুল্যঞ্চ মধুসর্পিষঃ। শিরঃ প্রলেপিতং তেন কেশৈঃ সমুপচীয়তে॥ হস্তিদন্তমসীং কৃত্বা ছাগীদুগ্ধরসাঞ্জনৈঃ। লোমান্যনেন জায়ন্তে লেপাৎ পাণিতলেষ্বপি॥ যষ্টীন্দীবরমৃদ্বীকাতৈলাজ্যক্ষীরলেপনৈঃ। ইন্দ্রলুপ্তং শমং যাতি কেশাঃ স্যুশ্চ ঘনা দৃঢ়াঃ॥ জাতীকরঞ্জবরুণকরবীরাগ্নিপাচিতং। তৈলমভ্যঞ্জনাদ্ধন্তি ইন্দ্রলুপ্তং ন সংশয়ঃ॥ স্নুহীপয়ঃ পয়োঽর্কস্য লাঙ্গলীমার্কবো বিষং। অজামূত্রং সগোমূত্রং রত্তিকা সেন্দ্রবারুণী॥ সিদ্ধার্থকস্তীক্ষ্ণগন্ধা সম্যগেভির্বিপাচিতং। তৈলং ভবতি নিয়মাৎ খালিত্য ব্যাধিনাশনং॥ স্নুহীদুগ্ধাদিতৈলং। ইতি ভাবপ্রকাশঃ॥

ইন্দ্রলুপ্তঃ (পুং) কেশনাশকরোগঃ। তৎপর্য্যায়ঃ। ইন্দ্রলুপ্তকঃ ২ কেশঘ্নঃ ৩। ইতি রাজনির্ঘণ্টঃ॥

ইন্দ্রলুপ্তকং (ক্লী) ইন্দ্রলুপ্তরোগঃ। ইতি ভূরিপ্রয়োগো জটাধরহেমচন্দ্রৌ চ॥

ইন্দ্রবারুণিকা (স্ত্রী) ইন্দ্রবারুণীলতা। ইতি শব্দচন্দ্রিকা॥

ইন্দ্রবারুণী (স্ত্রী) লতাবিশেষঃ। রাখাল সসা ইতি ভাষা। তৎপর্য্যায়ঃ। বিশালা ২। ইত্যমরঃ॥ ঐন্দ্রী ৩ চিত্রা ৪ গবাক্ষী ৫ গজচির্ভটা ৬ মৃগের্ব্বারু ৭ পিটঙ্কোকী ৮ মৃগাদনী ৯। ইতি রত্নমালা॥ ইন্দ্রা ১০ অরুণা ১১ গবাদনী ১২ ক্ষুদ্রসহা ১৩ ইন্দ্রচির্ভিটী ১৪ সূর্য্যা ১৫ বিষঘ্নী ১৬ গণকর্ণিকা ১৭ অমরা ১৮ মাতা ১৯ সুকর্ণী ২০ সুফলা ২১ তারকা ২২

বৃষভাক্ষী ২৩ পীতপুষ্পা ২৪ ইন্দ্রবল্লরী ২৫ হেমপুষ্পী ২৬ ক্ষুদ্রফলা ২৭ বারুণী ২৮ বালকপ্রিয়া ২৯ রক্তৈর্ব্বারুঃ ৩০ বিষলতা ৩১ শক্রবল্লী ৩২ বিষাপহা ৩৩ অমৃতা ৩৪ বিষবল্লী ৩৫। চিত্রফলা ৩৬। ইতি জটাধরঃ॥ অপি চ। ঐন্দ্রীন্দ্রবারুণী চিত্রা গবাক্ষী চ গবাদনী। বারুণী চ পরাপ্যুক্তা সা বিশালা মহাফলা॥ শ্বেতপুষ্পা মৃগাক্ষী চ মৃগৈর্বারুর্মৃগাদনী। গবাদনীদ্বয়ং তিক্তং পাকে কটুরসং লঘু॥ বীর্য্যোষ্ণং কামলাপিত্তকফপ্লীহোদরাপহং। শ্বাসকাশাপহং কুষ্ঠগুল্মগ্রন্থিব্রণপ্রণুৎ॥ প্রমেহমূঢ়গর্ভামগণ্ডাময়বিষাপহং। ইতি ভাবপ্রকাশঃ॥ অস্যা গুণাঃ। তিক্তত্বং। কটুত্বং। শীতত্বং। রেচনত্বং। গুল্মপিত্তোদরশ্লেষ্মকৃমিকুষ্ঠজ্বরাপহত্বঞ্চ॥ ইতি রাজনির্ঘণ্টঃ॥

ইন্দ্রবৃদ্ধা (স্ত্রী) ব্রণরোগবিশেষঃ। তস্য লক্ষণং। পদ্মকর্ণিকবন্মধ্যে পিড়কাভিঃ সমাচিতাং। ইন্দ্রবৃদ্ধান্তু তাং বিদ্যাদ্বাতপিত্তোত্থিতাং ভিষক্॥ ইতি নিদানং॥ তস্যাশ্চিকিৎসা। বিবৃত্তামিন্দ্রবৃদ্ধাঞ্চ গর্দ্দভীং জালগর্দ্দভং। পৈত্তিকস্য বিসর্পস্য ক্রিয়য়া সাধয়েৎ ভিষক্॥ পাকে তু শোধয়েদাজ্যপকৈর্ম্মধুরভেষজৈঃ। ইতি ভাবপ্রকাশঃ॥

ইন্দ্রবৃক্ষঃ (পুং) দেবদারু। ইতি জটাধরঃ॥

ইন্দ্রসাবর্ণিঃ (পুং) চতুর্দ্দশমনুঃ। অস্মিন্ মন্বন্তরে বৃহদ্ভানুরবতারঃ। শুচিরিন্দ্রঃ। পবিত্রচাক্ষুষাদয়ো দেবাঃ। অগ্নিবাহুশুচিশুদ্ধমাগধাদ্যাঃ সপ্তর্ষয়ঃ। উরুগম্ভীরব্রধ্নাদ্যা মনুপুত্রা ভবিষ্যন্তি॥ ইতি শ্রীভাগবতং॥

ইন্দ্রসুতঃ (পুং) বালিনামবানররাজঃ। ইতি হেমচন্দ্রঃ॥ অর্জ্জুনবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥ জয়ন্তঃ। অর্জ্জুনঃ॥

ইন্দ্রসুরসঃ (পুং) সিন্দুবারবৃক্ষঃ। নিসিন্দা ইতি খ্যাতঃ। ইত্যমরঃ॥

ইন্দ্রসুরিসঃ (পুং) বৃক্ষবিশেষঃ। নিসিন্দা ইতি ভাষা। তৎপর্য্যায়ঃ। ইন্দ্রাণী ২ নির্গুণ্ডী ৩ সুরসা ৪। ইতি রত্নমালা॥ ইন্দ্রসুরসঃ ৫ সিন্দুবারঃ ৬ ইন্দ্রাণিকা ৭। ইত্যমরঃ॥ বিসুন্ধকঃ ৮ সিন্ধকং ৯ সুরসঃ ১০ সিন্ধুবারিতঃ ১১ ইন্দ্রালিকা ১২ সিন্ধুবারকঃ ১৩। ইতি শব্দরত্নাবলী॥

ইন্দ্রা (স্ত্রী) ফণিজ্ঝকবৃক্ষঃ। কাঁটা জামীর ইতি ভাষা। ইতি মেদিনী॥ ইন্দ্রপত্নী। শচী। ইতি শব্দরত্নাবলী॥

ইন্দ্রাগ্নিধূমঃ (পুং) হিমং। ইতি হারাবলী॥

ইন্দ্রাণিকা (স্ত্রী) ইন্দ্রসুরিসবৃক্ষঃ। ইত্যমরঃ॥

ইন্দ্রাণী (স্ত্রী) দুর্গা। যথা। ঐশ্বর্য্যং পরমং যস্যা বশে চৈব সুরাসুরাঃ। ইদি পরমৈশ্বর্য্যে চ ইন্দ্রাণী তেন সা শিবা॥ ইতি দেবীপুরাণে ৪৫ অধ্যায়ঃ॥ * ॥ ইন্দ্রভার্য্যা। তৎপর্য্যায়ঃ। পুলোজমা ২ শচী ৩। ইত্যমরঃ॥ পৌলোমী ৪। ইতি মেদিনী॥ পূতক্রতায়ী ৫। ইতি জটাধরঃ॥ মাহেন্দ্রী ৬ জয়বাহিনী ৭ ঐন্দ্রী ৮ শতাবরী ৯। ইতি শব্দরত্নাবলী॥ ইন্দ্রসুরিসবৃক্ষঃ। স্ত্রীণাং করণং। ইতি মেদিনী॥ নীলসিন্দুবারবৃক্ষঃ। স্থূলৈলা। সূক্ষ্মৈলা। ইতি রাজনির্ঘণ্টঃ॥ অষ্টমাতৃকান্তর্গতমাতৃকাবিশেষঃ॥ ইতি স্মৃতিঃ॥

ইন্দ্রানুজঃ (পুং) বিষ্ণুঃ। ইতি হেমচন্দ্রঃ॥

ইন্দ্রায়ুধং (ক্লী) ইন্দ্রধনুঃ। রামধনুক গণ্ডী ইত্যাদি ভাষা। ইত্যমরঃ॥

ইন্দ্রারিঃ (পুং) অসুরঃ। ইত্যমরঃ॥

ইন্দ্রাবরজঃ (পুং) বিষ্ণুঃ। ইত্যমরঃ॥

ইন্দ্রাশনঃ (পুং) সম্বিদাবৃক্ষঃ। সিদ্ধি ইতি ভাষা। ইতি শব্দমালা॥ গুঞ্জা। কুঁচ ইতি ভাষা। ইতি হারাবলী॥

ইন্দ্রিয়ং (ক্লী) জ্ঞানকর্ম্মসাধনং। তৎপর্য্যায়ঃ। হৃষীকং ২ বিষয়ি ৩। ইত্যমরঃ॥ অক্ষং৪ করণং ৫ গ্রহণং ৬। ইতি রাজনির্ঘণ্টঃ॥ তত্র তু জ্ঞানেন্দ্রিয়াণি পঞ্চ যথা। কর্ণঃ ১ ত্বক্ ২ চক্ষুঃ ৩ জিহ্বা ৪ নাসিকা ৫। কর্ম্মেন্দ্রিয়াণি পঞ্চ যথা। বাক্ ১ পাণিঃ ২ পাদঃ ৩ পায়ুঃ ৪ উপস্থঃ ৫। অন্তরিন্দ্রিয়াণি চত্বারি। মনঃ ১ বুদ্ধিঃ ২ অহঙ্কারঃ৩ চিত্তং ৪। মনস্তাবদিন্দ্রিয়াণাং নিয়ামকং। চতুর্দ্দশ দেবাঃ চতুর্দ্দশেন্দ্রিয়নিয়ন্তারঃ। তত্র শ্রোত্রস্য দেবতা দিক্। ত্বচো বাতঃ। চক্ষুষঃ সূর্য্যঃ। রসনায়াঃ প্রচেতাঃ। ঘ্রাণস্যাশ্বিনৌ। বাচো বহ্নিঃ। হস্তস্য ইন্দ্রঃ। পাদস্য বিষ্ণুঃ। পায়োর্ম্মিত্রঃ। উপস্থস্য প্রজাপতিঃ। মনসশ্চন্দ্রঃ। বুদ্ধেশ্চতুর্ম্মুখঃ। অহংকারস্য শঙ্করঃ। চিত্তস্যাচ্যুতঃ। ইতি বেদান্তঃ॥ ন্যায়মতে। পৃথিব্যা ইন্দ্রিয়ং ঘ্রাণং। জলস্য জিহ্বা। তেজসশ্চক্ষুঃ। বায়োস্ত্বক্। আকাশস্য কর্ণঃ। শুক্রং। বীর্য্যং। ইত্যমরঃ॥

ইন্দ্রিয়স্বাপঃ (পুং) প্রলয়ঃ। ইতি রাজনির্ঘণ্টঃ॥

ইন্দ্রিয়ার্থঃ (পুং) ইন্দ্রিয়জন্যজ্ঞানবিষয়ঃ। যথা। রূপং। শব্দঃ। গন্ধঃ। রসঃ। স্পর্শঃ। তৎপর্য্যায়ঃ। বিষয়ঃ ২ গোচরঃ ৩। ইত্যমরঃ॥

ইন্দ্রিয়ায়তনং (ক্লী) শরীরং। ইতি হেমচন্দ্রঃ॥

ইন্দ্রেজ্যঃ (পুং) বৃহস্পতিঃ। ইতি শব্দরত্নাবলী॥

ইন্ধ ঈ ধ ঙ ঞি দ্যুতৌ। ইতি কবিকল্পদ্রুমঃ॥ হ্রস্বাদিঃ। ঈ ঞি ইদ্ধোঽস্তি। ঙ ধ ইন্ধে। ইতি দুর্গাদাসঃ॥

ইন্ধনং (ক্লী) অগ্নিসন্দীপনতৃণকাষ্ঠাদি। জালানী কাঠ ইতি ভাষা। তৎপর্য্যায়ঃ। ইধ্মং ২ এধঃ ৩ সমিৎ ৪ এধং ৫। ইত্যমরঃ॥ সমিন্ধনং ৬। ইতি শব্দরত্নাবলী॥

ইল্বকাঃ (স্ত্রী) ইল্বলাঃ। মৃগশিরোনক্ষত্রোপরিস্থিতপঞ্চতারাঃ। ইত্যমরটীকায়াং স্বামী॥

ইভঃ (পুং স্ত্রী) হস্তী। উত্তরপদে শ্রেষ্ঠবাচকঃ। ইত্যমরঃ॥

ইভকণা (স্ত্রী) গজপিপ্পলী। ইতি রত্নমালা॥

ইভদন্তা (স্ত্রী) নাগদন্তীবৃক্ষঃ। ইতি রত্নমালা॥

ইভনিমীলিকা (স্ত্রী) বৈদগ্ধী। ভঙ্গিঃ। ইতি ত্রিকাণ্ডশেষঃ॥

ইভপালকঃ (পুং) হস্তিপকঃ। মাহুৎ ইতি ভাষা। ইতি হেমচন্দ্রঃ॥

ইভমাচলঃ (পুং) সিংহঃ। ইতি ভূরিপ্রয়োগঃ॥

ইভষা (স্ত্রী) স্বর্ণক্ষীরীবৃক্ষঃ। ইতি রত্নমালা॥

ইভাখ্যঃ (পুং) নাগকেশরবৃক্ষঃ। ইতি ত্রিকাণ্ড-শেষঃ ॥

ইভোষণা (স্ত্রী) ইভকণা। গজপিপ্‌পলী। ইতি শব্দচন্দ্রিকা ॥

ইভ্যঃ (ত্রি) ধনবান্। ইত্যমরঃ ॥

ইভ্যা (স্ত্রী) হস্তিনী। শল্লকী। ইতি মেদিনী॥

ইয়ং (স্ত্রী) ইদম্‌শব্দস্য স্ত্রীলিঙ্গে প্রথমায়াং রূপং। এই স্ত্রী ইতি ভাষা। ইতি ব্যাকরণং ॥

ইয়ৎ (ত্রি) কিয়ৎসংখ্যাবোধকং। এতো ইতি ভাষা। ইতি ব্যাকরণং ॥

ইয়ত্তা (স্ত্রী) ইয়তো ভাবঃ। সীমা। পরিমাণং। সংখ্যা। ইত্যাদি ॥

ইরণং (ত্রি) ঈরণং। শূন্যং। ঊষরভূমিঃ। ইত্যমরটীকায়াং রমানাথঃ ॥

ইরম্মদঃ (পুং) বজ্রাগ্নিঃ। তৎপর্য্যায়ঃ। মেঘজ্যোতিঃ ২। ইত্যমরঃ ॥ মেঘাগ্নিঃ ৩। ইতি জটাধরঃ ॥ অন্যোন্যসংঘট্টনেন মেঘাগ্নিঃস্যত্য যজ্জ্যোতির্বৃক্ষাদৌ পততি সঃ। মেঘেত্যুপলক্ষণং বাতজাগ্নিরপি। ইতি ভরতঃ ॥

ইরা (স্ত্রী) ভূমিঃ। বাক্যং। মদ্যং। জলং। ইত্যমরঃ ॥ সরস্বতী। ইতি শব্দরত্নাবলী ॥ কশ্যপপত্নীবিশেষঃ। যথা। ধর্ম্মপত্ন্যঃ সমাখ্যাতাঃ কশ্যপস্য বদাম্যহং। অদিতির্দিতির্দনুঃ কালা অমায়ুঃ সিংহিকা মুনিঃ। কদ্রুঃ প্রাধা ইরা ক্রোধা বিনতা সুরভিঃ খশা। তস্যাঃ সৃষ্টির্যথা। ইরা বৃক্ষলতা বল্লী তৃণজাতিশ্চ সর্ব্বশঃ। খশা চ যক্ষরক্ষাংসি মুনিরপ্সরসস্তথা। ইতি গারুড়ে ৬ অধ্যায়ঃ ॥

ইরাচরং (ক্লী) করকা। বৃষ্টির শীল ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ ॥ জলচরে ভূচরে চ ত্রি ॥

ইরাজঃ (পুং) কন্দর্পঃ। ইতি হলায়ুধঃ ॥

ইরাবতী (স্ত্রী) বটপত্রীবৃক্ষঃ। পাষাণভেদীবিশেষঃ। ইতি রাজনির্ঘণ্টঃ ॥

ইরিণং (ক্লী) শূন্যং। ঊষরভূমিঃ। ইত্যজয়ঃ ॥

ইরিবেল্লিকা (স্ত্রী) মস্তকোদ্ভবব্রণজন্যপীড়াবিশেষঃ। তস্য লক্ষণং। পিড়কামুক্তমাঙ্গস্থাং বৃত্তামুগ্ররুজাজ্বরাং। সর্ব্বাত্মিকাং সর্ব্বলিঙ্গাং জানীয়াদিরিবেল্লিকাং ॥ ইতি নিদানং ॥ চিকিৎসা যথা। পৈত্তিকস্য বিসর্পস্য যা চিকিৎসা প্রকীর্ত্তিতা। তয়ৈব ভিষগেতাঞ্চ চিকিৎসেদিরিবেল্লিকাং। ইতি ভাবপ্রকাশঃ ॥

ইরিমেদঃ (পুং) অরিমেদঃ। বিট্‌খদিরঃ। ইতি শব্দরত্নাবলী রাজনির্ঘণ্টশ্চ ॥

ইরেশঃ (পুং) বিষ্ণুঃ। ইতি শব্দরত্নাবলী ॥ রাজা। বাগীশঃ। বরুণঃ ॥

ইর্ব্বারুঃ (পুং স্ত্রী) কর্কটী। কাঁকুড় ইতি ভাষা। ইত্যমরঃ ॥ অস্য গুণাঃ। স্বাদুত্বং। গুরুত্বং। অজীর্ণকারিত্বং। শীতলত্বঞ্চ। তৎপক্বফলগুণাঃ। দাহচ্ছর্দিতৃষ্ণাক্লান্তিনাশিত্বং। ইতি রাজবল্লভঃ ॥

ইর্ব্বারুশুক্তিকা (স্ত্রী) ইর্ব্বারুবিশেষঃ। ফুটী ইতি ভাষা। ইতি হারাবলী ॥

ইর্ব্বালুঃ (পুং) ইর্ব্বারুঃ। ইত্যমরটীকায়াং রায়মুকুটঃ ॥

ইল শ শয়ে। গতৌ। ক্ষেপে। ইতি কবিকল্পদ্রুমঃ ॥ শ ইলতি। শয়ঃ শয়নং। ইতি দুর্গাদাসঃ ॥

ইল ক ক্ষেপে। ইতি কবিকল্পদ্রুমঃ॥ হ্রস্বাদিঃ। ক এলয়তি। ইতি দুর্গাদাসঃ॥

ইলবিলা (স্ত্রী) কুবেরমাতা। সা চ বিশ্রবঃপত্নী। ইতি পুরাণং॥

ইলা (স্ত্রী) বৈবস্বতমনুকন্যা। সা চ বিষ্ণুবরাৎ পুংস্ত্বং প্রাপ্য সুদ্যুম্ননাম্না খ্যাতা। পশ্চাৎ শঙ্করশপ্তকুমারবনং প্রবিশ্য পুনঃ স্ত্রীত্বং গতা। বুধস্তাং ভার্য্যাত্বেন স্বীকৃত্য পুরূরবসং জনয়ামাস। ততস্তস্যাঃ পুরোহিতো বশিষ্ঠঃ শঙ্করমারাধ্য তস্যৈ মাসং স্ত্রীত্বং মাসং পুস্ত্বং দত্তবান্ ইতি শ্রীভাগবতং॥ কর্দ্দমপ্রজাপতিপুত্র ইলঃ কার্ত্তিকেয়জন্মদেশং প্রবিশ্য স্ত্রীভূত্বা ইলানাম্না খ্যাতা ততঃ পার্ব্বতীমারাধ্য মাসং স্ত্রীত্বং মাসং পুংস্ত্বঞ্চ প্রাপ্তবান্। ইতি রামায়ণং॥ পৃথিবী। গৌঃ। বাক্যং। ইতি মেদিনী॥

ইলাবৃতং (ক্লী) জম্বুদ্বীপস্য নববর্ষান্তর্গতবর্ষবিশেষঃ। ইতি ত্রিকাণ্ডশেষঃ। তচ্চ সুমেরুপর্ব্বতং সংবেষ্ট্যাস্তে। তস্য সীমা উত্তরে নীলপর্ব্বতঃ। দক্ষিণে নিষধঃ। পশ্চিমে মাল্যবান্। পূর্ব্বে গন্ধমাদনপর্ব্বতঃ। ইতি শ্রীভাগবতং॥

ইলিকা (স্ত্রী) পৃথিবী। ইতি শব্দরত্নাবলী॥

ইলী (স্ত্রী) ঈলী। করপালিকা। হাত ছুরি ইতি ভাষা। ইত্যমরটীকায়াং রায়মুকুটঃ॥

ইলীশঃ (পুং) স্বনামখ্যাতমৎস্যবিশেষঃ। ইতি শব্দরত্নাবলী॥

ইল্ললঃ (পুং) পক্ষিবিশেষঃ। ইতি শব্দচন্দ্রিকা॥

ইল্লিশঃ (পুং) ইলীশমৎস্যঃ। তৎপর্য্যায়ঃ। বারিকর্পূরঃ ২ গাঙ্গেয়ঃ ৩ শফরাধিপঃ ৪ জলতালঃ ৫। ইতি ত্রিকাণ্ডশেষঃ॥ ইলীশঃ ৬ রাজশফরঃ ৭ ইল্লীশঃ ৮ জলতাপী ৯। ইতি শব্দরত্নাবলী॥ অস্য গুণাঃ পিত্তশ্লেষ্মাগ্নিবৃদ্ধিকারিত্বং। মধুরত্বং। হৃদ্যত্বঞ্চ। ইতি রাজবল্লভরাজনির্ঘণ্টৌ॥ ইল্লিশো মধুরঃ স্নিগ্ধো রোচনো বহ্নিবর্দ্ধনঃ। পিত্তকৃৎ কফকৃৎ কিঞ্চিৎ লঘুর্ব্বীর্য্যোঽনিলাপহঃ॥ ইতি ভাবপ্রকাশঃ॥

ইল্বকাঃ (স্ত্রী) ইল্বলাঃ। নিত্যবহুবচনান্তশব্দোঽয়ং। ইতি ভরতো দ্বিরূপকোষশ্চ॥

ইল্বলঃ (পুং) দৈত্যবিশেষঃ। স চ বাতাপের্ভ্রাতা। মৎস্যবিশেষঃ। ইতি মেদিনী॥

ইল্বলাঃ (স্ত্রী) মৃগশিরোনক্ষত্রশিরোদেশস্থিতাঃ পঞ্চতারাঃ। ইত্যমরঃ॥

ইব ই ব্যাপ্তৌ। প্রীণনে। ইতি কবিকল্পদ্রুমঃ॥ হ্রস্বাদিঃ। ই ইন্ব্যতে। দন্ত্যবকারপরত্বান্নানুস্বারঃ। প্রীণনং কৈশ্চিন্ন মন্যতে। ইতি দুর্গাদাসঃ॥

ইব ব্য সাদৃশ্যং। সাম্যং। ইত্যমরঃ॥

ইষীকা (স্ত্রী) ইষীকা। গজচক্ষুর্গোলকঃ। ইত্যমরটীকায়াং ভরতঃ॥

ইষ য সর্পণে। গতৌ। ইতি কবিকল্পদ্রুমঃ॥ হ্রস্বাদিঃ। য ইষ্যতি। সর্পণং গতিঃ। ইতি দুর্গাদাসঃ॥

ইষ উ শ বাঞ্ছে। ইতি কবিকল্পদ্রুমঃ॥ উ এষিত্বা ইষ্ট্বা। বেম সহলুভেত্যাদিসূত্রেণৈবেষ্টসিদ্ধেঽপ্যস্যোদনুবন্ধস্তৎসূত্রে ইষগাভীক্ষ্ণ্যে ইষ্য সর্পণে ইত্যেতয়োরপ্রাপ্তয়ে

বিশেষণার্থঃ। নচ পিবাদিগ্রহণবত্তত্র ইচ্ছ ইতি গ্রহণেনৈবেষ্টসিদ্ধিরিতি বাচ্যং লাঘবাভাবে প্রাচীনমতস্যৈব ন্যায্যত্বাৎ। শ ইচ্ছতী ইচ্ছন্তী। অস্যৈব ইচ্ছাদেশঃ। ইচ্ছতি ধনং লোকঃ। ইতি দুর্গাদাসঃ॥

ইষ গ আভীক্ষ্ণে। পৌনঃপুন্যেন করণে। ইতি কবিকল্পদ্রুমঃ॥ গ ইষ্ণাতি পণ্ডিতঃ। পুণ্যং পুনঃপুনঃ করোতীত্যর্থঃ। ইতি দুর্গাদাসঃ॥

ইষঃ (পুং) আশ্বিনমাসঃ। ইত্যমরঃ॥

ইষিকা (স্ত্রী) ইষীকা। গজচক্ষুর্গোলকঃ। তূলিকা। ইত্যমরটীকায়াং রায়মুকুটঃ॥

ইষিরঃ (পুং) অগ্নিঃ। ইত্যুণাদিকোষঃ॥

ইষীকা (স্ত্রী) গজাক্ষিকূটকঃ। হস্তিচক্ষুর্গোলকঃ। ইত্যমরঃ॥ তূলিকা। ইতি রায়মুকুটঃ॥ কাশতৃণং। ইতি হেমচন্দ্রঃ॥

ইষুঃ (পুং স্ত্রী) বাণঃ। ইত্যমরঃ॥

ইষুধিঃ (স্ত্রী) তূণঃ। ইত্যমরঃ॥

ইষুপুঙ্খা (স্ত্রী) শরপুঙ্খাবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

ইষ্টং (ক্লী) যজ্ঞাদিকর্ম্ম। যথেপ্সিতং। কামং। ইত্যমরঃ॥ সংস্কারঃ। ইতি মেদিনী॥

ইষ্টং (ত্রি) আশংসিতং। বাঞ্ছিতং। পূজিতং। প্রিয়ং। ইতি মেদিনী॥

ইষ্টঃ (পুং) যজ্ঞঃ। ইতি মেদিনী॥ এরণ্ডবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥

ইষ্টকা } (স্ত্রী) গৃহাদিনির্ম্মাণার্থদগ্ধমৃত্তিকা-
ইষ্টিকা } খণ্ডঃ। ইট ইতি ভাষা। ইতি চিতিব্যবহারে লীলাবতী॥ তদ্গৃহগুণঃ। কূপোদকং বটচ্ছায়া শ্যামাস্ত্রী ইষ্টকালয়ং। শীতকালে ভবেদুষ্ণং উষ্ণকালে চ শীতলং॥ ইতি চাণক্যং॥ * ॥ তদ্রচিতস্থানে পিতৃকর্ম্মনিষেধো যথা। শঙ্খলিখিতৌ। নেষ্টকারচিতে পিতৄন্ সন্তর্পয়েৎ। ইতি শ্রাদ্ধতত্ত্বং॥ * ॥ দেবোদ্দেশ্যকেষ্টকাময়গৃহদানফলং যথা। মৃণ্ময়াৎ কোটিগুণিতং ফলং স্যাৎ দারুভিঃ কৃতে। কোটিকোটিগুণং পুণ্যফলং স্যাদিষ্টকাময়ে॥ দ্বিপরার্দ্ধগুণং পুণ্যং শৈলজে তু বিদুর্ব্বুধাঃ। মৃচ্ছিলয়োঃ সমং জ্ঞেয়ং ফলমাঢ্যদরিদ্রয়োঃ॥ ইতি মঠাদিপ্রতিষ্ঠাতত্ত্বং॥

ইষ্টকাপথং (ক্লী) বীরণমূলং। ইষ্টকানির্ম্মিতপথে পুং॥

ইষ্টগন্ধং (ক্লী) বালুকা। ইতি মেদিনী॥

ইষ্টগন্ধঃ (ত্রি) সুগন্ধিদ্রব্যং। ইত্যমরঃ॥

ইষ্টা (স্ত্রী) শমীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

ইষ্টাপূর্ত্তং (ক্লী) যজ্ঞখাতাদিকর্ম্ম। ইতি হেমচন্দ্রঃ॥ যথা। অগ্নিহোত্রং তপঃ সত্যং বেদানাঞ্চানুপালনং। আতিথ্যং বৈশ্বদেবশ্চ ইষ্টমিত্যভিধীয়তে॥ বাপীকূপতড়াগাদিদেবতায়তনানি চ। অন্নপ্রদানমারামাঃ পূর্ত্তমিত্যভিধীয়তে॥ ইতি মলমাসতত্ত্বধৃতজাতূকর্ণঃ॥

ইষ্টার্থোদ্যুক্তঃ (ত্রি) উৎসুকঃ। উৎসাহযুক্তঃ। ইত্যমরঃ॥

ইষ্টিঃ (স্ত্রী) অভিলাষঃ। যাগঃ। ইত্যমরঃ॥ শ্লোকসংগ্রহঃ। ইতি মেদিনী॥

ইষ্টিকাপথিকং (ক্লী) লামজ্জকতৃণং। ইতি রাজনির্ঘণ্টঃ॥

ইষ্টিপচঃ (পুং) দনুজঃ। অসুরঃ। ইতি শব্দরত্নাবলী॥

ইষ্টিমুট্ [ ষ্ ] ( পুং ) দৈত্যঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

ইষ্টুঃ ( স্ত্রী ) ইচ্ছা। ইত্যুণাদিকোষঃ ॥

ইষ্মঃ ( পুং ) কামদেবঃ। বসন্তকালঃ। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ ॥

ইষ্যঃ ( পুং ) বসন্তকালঃ। ইতি হেমচন্দ্রঃ ॥

ইষ্বঃ ( পুং ) উপদেষ্টা। ইত্যুণাদিকোষঃ ॥

ইষ্বাসং ( ত্রি ) ইষুক্ষেপকং। তিরন্দাজ ইতি খ্যাতং। ইতি মেদিনী ॥

ইষ্বাসঃ ( পুং ) ধনুঃ। ইত্যমরঃ ॥

ইহ ব্য অস্মিন্। এই দেশে এই কালে ইত্যাদি ভাষা। ইতি ব্যাকরণং ॥

ইহামুত্রফলভোগবিরাগঃ ( পুং ) ঐহিকপারত্রিকবিষয়ভোগেভ্যো নিতরাং বিরতিঃ। ইতি বেদান্তঃ ॥

ইক্ষুঃ ( পুং ) স্বনামখ্যাততৃণং। আক্ ইতি ভাষা। তৎপর্য্যায়ঃ। রসালঃ ২। ইত্যমরঃ ॥ কর্কোটকঃ ৩ বংশঃ ৪ কান্তারঃ ৫ সুকুমারকঃ ৬ অধিপত্রঃ ৭ মধুতৃণঃ ৮ বৃষ্যঃ ৯ গুড়তৃণঃ ১০। ইতি রাজনির্ঘণ্টঃ ॥ মৃত্যুপুষ্পঃ ১১ মহারসঃ ১২ অসিপত্রঃ ১৩ কোশকারঃ ১৪ ইক্ষবঃ ১৫। ইতি শব্দরত্নাবলী ॥ পয়োধরঃ ১৬। ইতি জটাধরঃ ॥ * ॥ তস্য ভেদাঃ। বংশকঃ ১ কান্তারঃ ২ ভীরুঃ ৩ পৌণ্ড্রঃ ৪। ইতি রত্নমালা ॥ সামান্যেক্ষুগুণাঃ। রক্তপিত্তনাশিত্বং। বলশুক্রকফকারিত্বং। পাকে মধুরত্বং। স্নিগ্ধত্বং। গুরুত্বং। শীতলত্বং। মূত্রশুদ্ধিকারিত্বঞ্চ। তস্য মূলে অতিমধুরত্বং। মধ্যে মধুরত্বং। গ্রন্থিস্থজগ্রভাগেষু লবণরসত্বঞ্চ। ইতি রাজবল্লভঃ ॥ মূলাদূর্দ্ধে মধুরত্বং। মধ্যে অতিমধুরত্বং। অগ্রে ক্রমাল্লবণত্বং নীরসত্বঞ্চ ॥ অভুক্তে ইক্ষুভক্ষণগুণঃ। পিত্তদাতৃত্বং। ভুক্তে বাতপ্রকোপণত্বং। ভুক্তিমধ্যে গুরুতরত্বঞ্চ ॥ ইতি রাজনির্ঘণ্টঃ ॥ দন্তনিষ্পীড়িতেক্ষুরসগুণাঃ। হিমত্বং। শুক্রকারিত্বং। তৃপ্তিজনকত্বং। জীবনহিতকারিত্বং। বায়ুরক্তপিত্তনাশিত্বং। স্বাদুত্বং। স্নিগ্ধত্বং। প্রীতিদাতৃত্বং। রক্তবর্দ্ধকত্বং। মুখপ্রহ্লাদকারিত্বং। ধাতুবর্দ্ধকত্বঞ্চ। ইতি রাজবল্লভঃ ॥ অপিচ। রক্তদোষভ্রমশমনকারিত্বং। অল্পশ্লেষ্মদাতৃত্বং। হৃদ্যত্বং। রুচিজনকত্বং। মূত্রশুদ্ধিকারিত্বং। দেহস্য কান্তিদাতৃত্বং। বলকারিত্বং। পীযূষোপমত্বং। ত্রিদোষশমনত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ যন্ত্রনিষ্পীড়িতরসগুণাঃ। রক্তশুক্রকারিত্বং। শীতলত্বং। সারকত্বং। রুচিকরত্বং। দাহজনকত্বঞ্চ ॥ ইতি রাজবল্লভঃ ॥ অপিচ। দন্তনিষ্পীড়িতরসগুণবদ্গুণত্বং। কিঞ্চিৎ পিত্তবায়ুনাশিত্বং। অকোমলত্বং। অস্বাদুত্বং। ক্ষীরবিষ্টম্ভদাহকারিত্বঞ্চ। পর্য্যুষিততদ্রসগুণাঃ। বাস্তিহরত্বং। বাতজনকত্বং। জাড্যপ্রতিশ্যায়রোগদাতৃত্বং। কফবায়ুকারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ তৎপক্বরসগুণাঃ। গুরুত্বং। সুতীক্ষ্ণত্বং। কফবাতনাশিত্বঞ্চ। ইতি রাজবল্লভঃ ॥ স্নিগ্ধত্বং। অতিশয়গুরুত্বং। অতিপাকে বিদাহত্বং। পিত্তাস্রদোষশোষকারিত্বঞ্চ। ইতি রাজ-

নির্ঘণ্টঃ ॥ অস্য বিকারাঃ। লসীকাফাণিত-গুড়খণ্ডমৎস্যণ্ডিকাসিতাঃ। নির্ম্মলা লঘবো জ্ঞেয়াঃ শীতবীর্য্যা যথোত্তরং ॥ ইতি রাজবল্লভঃ ॥ অথেক্ষুবর্গঃ। তত্রেক্ষো-র্নামানি গুণাশ্চ। ইক্ষুর্দীর্ঘচ্ছদঃ প্রোক্ত-স্তথা ভূরিরসোঽপি চ। গুড়মূলোঽসিপত্রশ্চ তথা মধুতৃণঃ স্মৃতঃ ॥ ইক্ষবো রক্তপিত্তঘ্না বল্যা বৃষ্যাঃ কফপ্রদাঃ। স্বাদুপাকরসাঃ স্নিগ্ধা গুরবো মূত্রলা হিমাঃ ॥ * ॥ অথেক্ষু-ভেদাঃ। প্রৌণ্ড্রকো ভীরুকশ্চাপি বংশকঃ শতপোরকঃ। কান্তারস্তাপসেক্ষুশ্চ কাণ্ডেক্ষুঃ সূচিপত্রকঃ ॥ নৈপালো দীর্ঘপত্রশ্চ নীলপোরোঽথ কোশকৃৎ। ইত্যেতা জাতয়স্তেষাং কথয়ামি গুণানপি ॥ * ॥ অথ প্রৌণ্ড্রকভীরুকয়োর্গুণাঃ। বাতপিত্ত-প্রশমনো মধুরো রসপাকয়োঃ। সুশীতো বৃংহণো বল্যঃ প্রৌণ্ড্রকো ভীরুকস্তথা ॥*॥ অথ কোশকারগুণাঃ। কোশকারো গুরুঃ শীতো রক্তপিত্তক্ষয়াপহঃ ॥ * ॥ অথ কান্তা-রেক্ষুগুণাঃ। কান্তারেক্ষুর্গুরুর্বৃষ্যঃ শ্লেষ্মলো বৃংহণঃ সরঃ ॥ * ॥ অথ দীর্ঘপোরবংশ-কয়োর্গুণঃ। দীর্ঘপোরঃ সুকঠিনঃ সক্ষারো বংশকঃ স্মৃতঃ ॥ * ॥ অথ শতপোরকগুণাঃ। শতপর্ব্বা ভবেৎ কিঞ্চিৎ কোশকারগুণা-ন্বিতঃ। বিশেষাৎ কিঞ্চিদুষ্ণশ্চ সক্ষারঃ পবনাপহঃ ॥ * ॥ অথ মনোগুপ্তাগুণাঃ। মনোগুপ্তা বাতহরী তৃষ্ণাময়বিনাশিনী। সুশীতা মধুরাতীব রক্তপিত্তবিনাশিনী ॥*॥ অথ তাপসেক্ষুগুণাঃ। তাপসেক্ষুর্ভবেৎ মৃদ্বী মধুরা শ্লেষ্মকোপনা। তর্পণা রুচি-কৃচ্চাপি বৃষ্যা চ বলকারিণী ॥ * ॥ অথ বালযুবরদ্ধেক্ষুগুণাঃ। বাল ইক্ষুঃ কফং কুর্য্যান্মেদোমেহকরশ্চ সঃ। যুবা তু বাত-হৃৎ স্বাদুরীষত্তীক্ষ্ণশ্চ পিত্তনুৎ ॥ রক্ত-পিত্তহরো বৃদ্ধঃ ক্ষতহৃৎ বলবীর্য্যকৃৎ ॥ * ॥ অথাঙ্গভেদেন ভেদঃ। মূলে তু মধুরো-ঽত্যর্থং মধ্যেঽপি মধুরঃ স্মৃতঃ। অগ্রে গ্রন্থিষু চ জ্ঞেয়ং ইক্ষুঃ পটুরসো জনৈঃ ॥*॥ অথ দন্তপীড়িতেক্ষুরসগুণাঃ ॥ দন্তনিষ্পী-ড়িতস্যেক্ষো রসঃ পিত্তাস্রনাশনঃ। শর্করা-সমবীর্য্যঃ স্যাদবিদাহী কফপ্রদঃ ॥ * ॥ অথ যন্ত্রপীড়িতস্যেক্ষুরসস্য গুণাঃ। মূলাগ্রজন্তু গ্রন্থ্যাদিপীড়নান্মলসংকরাৎ। কিঞ্চিৎ কালং বিধৃত্যা চ বিকৃতিং যাতি যান্ত্রিকঃ ॥ তস্মাদ্বিদাহী বিষ্টম্ভী গুরুঃ স্যাদ্যান্ত্রিকো রসঃ ॥ * ॥ অথ পর্য্যুষিতস্যেক্ষুরসস্য গুণাঃ। রসঃ পর্য্যুষিতো নেষ্টো হ্যম্লো বাতাপহো গুরুঃ। কফপিত্তকরঃ শোষী ভেদনশ্চাতি-মূত্রলঃ ॥ * ॥ অথ পক্বস্যেক্ষুরসস্য গুণাঃ। পক্বো রসো গুরুঃ স্নিগ্ধঃ সুতীক্ষ্ণঃ কফ-বাতনুৎ ॥ গুল্মানাহপ্রশমনঃ কিঞ্চিৎপিত্ত-হরঃ স্মৃতঃ ॥ * ॥ অথেক্ষুরসস্য বিকারাণাং গুণাঃ। ইক্ষোর্বিকারাস্তৃড়্দাহমূর্চ্ছাপিত্তাস্র-নাশনাঃ। গুরবো মধুরা বল্যাঃ স্নিগ্ধা বাতহরাঃ সরাঃ ॥ বৃষ্যা মোহহরাঃ শীতা বৃংহণা বিষহারিণঃ। ইতি ভাবপ্রকাশঃ ॥ কোকিলাক্ষবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

**ইক্ষুকাণ্ডঃ** (পুং) মুঞ্জকঃ। শরমুঞ্জ ইতি খ্যাতঃ। ইতি শব্দচন্দ্রিকা ॥ কাশতৃণং। ইতি রাজনির্ঘণ্টঃ ॥

ইক্ষুগন্ধঃ ( পুং ) কাশতৃণং। ইতি ভাবপ্রকাশঃ ॥ ক্ষুদ্রগোক্ষুরকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

ইক্ষুগন্ধা ( স্ত্রী ) গোক্ষুরকবৃক্ষঃ। গোখুরী ইতি ভাষা। শুক্লভূমিকুষ্মাণ্ডঃ। কোকিলাক্ষবৃক্ষঃ। কুলিয়া খারা ইতি ভাষা। কাশতৃণং। কাশিয়া ইতি ভাষা। ইত্যমরো মেদিনী চ ॥

ইক্ষুগন্ধিকা ( স্ত্রী ) ভূমিকুষ্মাণ্ডঃ। ইতি শব্দরত্নাবলী ॥

ইক্ষুতুল্যা ( স্ত্রী ) তৃণবিশেষঃ। আনাখু ইতি খ্যাতা। তৎপর্য্যায়ঃ। ইক্ষ্বাণিকা ২ অনিক্ষুঃ ৩ ইক্ষুবালিকা ৪। ইতি রত্নমালা ॥

ইক্ষুদর্ভা ( স্ত্রী ) তৃণবিশেষঃ। তৎপর্য্যায়ঃ। সুদর্ভা ২ পত্রালুঃ ৩ তৃণপত্রিকা ৪। অস্যা গুণাঃ। সুমধুরত্বং। স্নিগ্ধত্বং। ঈষৎ কাষায়ত্বং। কফপিত্তহরত্বং। রুচিজনকত্বং। লঘুত্বং। পরমতৃপ্তিকারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

ইক্ষুনেত্রং ( ক্লী ) ইক্ষুমূলং। ইতি রাজনির্ঘণ্টঃ ॥

ইক্ষুপত্রঃ ( পুং ) যাবনালনামধান্যবিশেষঃ। জোয়ার ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ ॥

ইক্ষুপ্রঃ ( পুং ) শরতৃণং। ইতি রাজনির্ঘণ্টঃ ॥

ইক্ষুবালিকা ( স্ত্রী ) ইক্ষুতুল্যা। আনাখু ইতি খ্যাতা। ইতি রত্নমালা ॥ কাশঃ। কাশিয়া ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ ॥

ইক্ষুমূলং ( ক্লী ) বৃক্ষবিশেষঃ। তৎপর্য্যায়ঃ। ইক্ষুনেত্রং ২ মোরটকং ৩ বংশনেত্রং ৪ বংশমূলং ৫ মোরটং ৬ বংশপূরকং ৭। ইতি রাজনির্ঘণ্টঃ ॥

ইক্ষুযোনিঃ ( পুং ) পুণ্ড্রকইক্ষুঃ। ইতি রাজনির্ঘণ্টঃ ॥

ইক্ষুরঃ ( পুং ) কোকিলাক্ষবৃক্ষঃ। কুলিয়া খারা ইতি ভাষা। ইতি রত্নমালা॥ ইক্ষুঃ। গোক্ষুরকবৃক্ষঃ। ইতি শব্দরত্নাবলী ॥ কাশঃ। ইতি রাজনির্ঘণ্টঃ ॥

ইক্ষুরকঃ ( পুং ) কোকিলাক্ষবৃক্ষঃ। স্থূলশরঃ। কাশতৃণং। ইতি রাজনির্ঘণ্টঃ ॥

ইক্ষুরসঃ ( পুং ) কাশতৃণং। ইতি ভাবপ্রকাশঃ ॥

ইক্ষুরসকাথঃ ( পুং ) গুড়ঃ। ইতি হেমচন্দ্রঃ ॥

ইক্ষুরসোদঃ ( পুং ) ইক্ষুসমুদ্রঃ। ইতি জটাধরঃ ॥

ইক্ষুবল্লরী ( স্ত্রী ) ক্ষীরবিদারী। ক্ষীরকন্দঃ। ইতি রাজনির্ঘণ্টঃ ॥

ইক্ষুবল্লী ( স্ত্রী ) ক্ষীরবিদারী। ইতি রাজনির্ঘণ্টঃ ॥

ইক্ষুবাটিকা ( স্ত্রী ) পুণ্ড্রকঃ। পুড়ি আক্ ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ ॥

ইক্ষুবাটী ( স্ত্রী ) পুণ্ড্রকঃ। ইতি রাজনির্ঘণ্টঃ ॥

ইক্ষুবেষ্টনঃ ( পুং ) ভদ্রমুঞ্জঃ। ইতি রাজনির্ঘণ্টঃ

ইক্ষুশাকটং ( ক্লী ) ইক্ষুক্ষেত্রং। ইক্ষুর ভূমি ইতি ভাষা। ইতি ব্যাকরণং ॥

ইক্ষুশাকিনং ( ক্লী ) ইক্ষুক্ষেত্রং। ইতি ব্যাকরণং ॥

ইক্ষুসারঃ ( পুং ) গুড়ঃ। ইতি রাজনির্ঘণ্টঃ ॥

ইক্ষ্বাকুঃ ( পুং ) বৈবস্বতমনুপুত্রঃ। স তু

সত্যযুগে অযোধ্যায়াং সূর্য্যবংশীয়াদি-রাজঃ। ইতি পুরাণং ॥

ইক্ষ্বাকুঃ (স্ত্রী) কটুতুম্বী। তিতলাউ ইতি ভাষা। ইত্যমরো মেদিনী চ ॥

ইক্ষ্বারিঃ (পুং) কাশতৃণং। ইতি রাজনির্ঘণ্টঃ॥

ইক্ষ্বালিকঃ (পুং) কাশতৃণং। ইতি ভাবপ্রকাশঃ ॥

ইক্ষ্বালিকা (স্ত্রী) ইক্ষুতুল্যা। আনাখু ইতি ভাষা। ইতি রত্নমালা॥ খাগড়া ইতি কেচিৎ॥

## ঈ

ঈ দীর্ঘঈকারঃ। চতুর্থস্বরবর্ণঃ। অস্যোচ্চারণস্থানং তালু। ঈকারং পরমেশানি স্বয়ং পরমকুণ্ডলী। ব্রহ্মবিষ্ণুময়ং বর্ণং তথা রুদ্রময়ং সদা॥ পঞ্চদেবময়ং বর্ণং পীতবিদ্যুল্লতাকৃতিং। চতুর্জ্ঞানময়ং বর্ণং পঞ্চপ্রাণময়ং সদা॥ ইতি কামধেনুতন্ত্রং ॥ তস্য লেখনপ্রকারো যথা। ঊর্দ্ধাধঃকুঞ্চিতা মধ্যে ত্রিকোণাধোগতা পুনঃ। অধোগতা কোণশীর্ষা কুঞ্চিতা দক্ষতঃ শুভা॥ শীর্ষাদ্দক্ষে কোণযুতা কুঞ্চিতোর্দ্ধগতা পুনঃ। চন্দ্রসূর্য্যাগ্নিরূপা সা মাত্রাশক্তিঃ প্রকীর্ত্তিতা॥ ইতি বর্ণোদ্ধারতন্ত্রং ॥ * ॥ অস্য নামানি যথা। ঈ ত্রীমূর্ত্তির্মহামায়া লোলাক্ষী বামলোচনং। গোবিন্দঃ শেখরঃ পুষ্টিঃ সুভদ্রা রত্নসংজ্ঞকঃ॥ বিষ্ণুর্লক্ষ্মীঃ প্রহাসশ্চ বাগ্বিশুদ্ধঃ পরাপরঃ। কালোত্তরীয়ো ভেরুণ্ডা রতিশ্চ পৌণ্ড্রবর্দ্ধনঃ॥ শিবোত্তমঃ শিবা তুষ্টিশ্চতুর্থী বিন্দুমালিনী। বৈষ্ণবী বৈন্দবী জিহ্বা কামকলা সনাদকা॥ পাবকঃ কোটরঃ কীর্ত্তির্মোহনী কালকারিকা। কুচদ্বন্দ্বং তর্জ্জনী চ শান্তিস্ত্রিপুরসুন্দরী॥ ইতি তন্ত্রোক্তবর্ণাভিধানং॥

ঈ ল কান্তৌ। গতৌ। ব্যাপ্তৌ। ক্ষেপে। প্রজনে। খাদনে। ইতি কবিকল্পদ্রুমঃ॥ কান্তিরিচ্ছা। প্রজনো গর্ভগ্রহণং। ল এতি গৌর্গর্ভং গৃহ্নাতি ইত্যর্থঃ। ন হি তরণিরুদীতে দিক্ পরাধীনবৃত্তিঃ। ইতি গণকৃতানিত্যত্বাদাত্মনেপদং। ধাতুরয়ং কৈশ্চিন্ন মন্যতে। ইতি দুর্গাদাসঃ॥

ঈ ঙ য গতৌ। ইতি কবিকল্পদ্রুমঃ॥ ঙ য ঈয়তে। ইতি দুর্গাদাসঃ॥

ঈ ব্য বিষাদঃ। অনুকম্পা। ইতি মেদিনী॥ ক্রোধঃ। দুঃখভাবনং। প্রত্যক্ষং। সন্নিধিঃ। ইতি হেমচন্দ্রঃ॥

ঈঃ (পুং) কন্দর্পঃ। ইতি ত্রিকাণ্ডশেষঃ॥

ঈঃ (স্ত্রী) লক্ষ্মীঃ। ইতি বিশ্বমেদিন্যৌ॥

ঈখ ই গতৌ। ইতি কবিকল্পদ্রুমঃ॥ দীর্ঘাদিঃ। ই ঈঙ্খতে। ইতি দুর্গাদাসঃ॥

ঈজ ই কুৎসে। গতে। ইতি কবিকল্পদ্রুমঃ॥ ই ঈঞ্জতে। কুৎসঃ কৈশ্চিন্ন মন্যতে। ইতি দুর্গাদাসঃ॥

ঈজ ঙ কুৎসে। গতৌ। ইতি কবিকল্পদ্রুমঃ॥ দীর্ঘাদিঃ। ঙ ঈঞ্জতে ঈজতে। কুৎসঃ কৈশ্চিন্ন মন্যতে। ইতি দুর্গাদাসঃ॥

ঈড় ক স্তুতৌ। ইতি কবিকল্পদ্রুমঃ॥ ক ঈড়য়তি। ইতি দুর্গাদাসঃ॥

ঈড় ঙ ল স্তুতৌ। ইতি কবিকল্পদ্রুমঃ॥ ল ঙ ঈট্টে। ইতি দুর্গাদাসঃ॥

ঈড়া ( স্ত্রী ) স্তুতিঃ। ইতি হলায়ুধঃ ॥

ঈড়িতঃ ( ত্রি ) স্তুতঃ। কৃতস্তবঃ। ইত্যমরঃ ॥

ঈত ই বন্ধে। ই ঈত্যতে। ইতি দুর্গাদাসঃ ॥

ঈতিঃ (স্ত্রী) ডিম্বঃ। প্রবাসঃ। ইত্যমরো মেদিনী চ ॥ কৃষেঃ ষট্প্রকারোপদ্রববিশেষঃ। যথা। অতিবৃষ্টিরনাবৃষ্টিঃ শলভা মূষিকাঃ খগাঃ। প্রত্যাসন্নাশ্চ রাজানঃ ষড়েতে ঈতয়ঃ স্মৃতাঃ ॥ ইতি স্মৃতিঃ ॥

ঈদৃক্ [ শ্ ] ( ত্রি ) অয়মিব দৃশ্যতে। ইহার ন্যায় এইপ্রকার ইত্যাদি ভাষা। ইতি ব্যাকরণং ॥

ঈদৃশঃ ( ত্রি ) ঈদৃক্। এতৎসদৃশঃ। ইতি ব্যাকরণং ॥

ঈদৃক্ষঃ ( ত্রি ) ঈদৃশঃ। ইতি ব্যাকরণং ॥

ঈর কি গতৌ। প্রেরণে। ইতি কবিকল্পদ্রুমঃ॥ মুদি। কি ঈরয়তি ঈরতি। মুদি প্রেরণে। ইতি দুর্গাদাসঃ ॥

ঈর ঙ ল কম্পে। গতৌ। ইতি কবিকল্পদ্রুমঃ ॥ দীর্ঘাদিঃ। ঙ ল ঈর্ত্তে লতা বায়ুনা। ইতি দুর্গাদাসঃ ॥

ঈরিকা ( স্ত্রী ) বৃক্ষবিশেষঃ। যথা। ঈরিকাবণং। ইতি ণত্বপ্রকরণে দুর্গাদাসঃ ॥

ঈরিণং ( ত্রি ) শূন্যং। ঊষরভূমিঃ। ইতি মেদিনী ॥

ঈরিতং ( ত্রি ) ক্ষিপ্তং। ইত্যমরঃ॥ প্রেরিতং। কম্পিতং। গতং। কথিতং ॥

ঈর্ম্মং ( ক্লী ) ব্রণঃ। ইত্যমরঃ ॥

ঈর্য্যা ( স্ত্রী ) ভিক্ষুব্রতং। ইতি জটাধরঃ ॥

ঈর্ব্বারুঃ ( পুং স্ত্রী ) স্ফুটিঃ। ফুটী ইতি ভাষা। ইতি শব্দরত্নাবলী ॥

ঈর্ষা ( স্ত্রী ) অক্ষমা। ইতি শব্দমালা ॥

ঈর্ষালুঃ ( ত্রি ) ঈর্ষাবিশিষ্টঃ। ইতি হলায়ুধঃ ॥

ঈর্ষ্য ঈর্ষে। ইতি কবিকল্পদ্রুমঃ॥ দীর্ঘাদিঃ। রেফযুক্তঃ। ঈর্ষ ইতি ঈর্ষ্যস্য ঘঞি হসাল্লোপ ইতি যলোপে সিদ্ধং। ঈর্ষা পরাভ্যুদয়াসহিষ্ণুত্বং। পরদোষাসহিষ্ণুত্বমিতি কেচিৎ। ঈর্ষ্যতি খলঃ সাধবে। ষ্বয়ান্তঃ ইত্যেকে। ইতি দুর্গাদাসঃ ॥

ঈর্ষ্যা ( স্ত্রী ) পরোৎকর্ষাসহিষ্ণুতা। রীষ ইতি ভাষা। তৎপর্য্যায়ঃ। অক্ষান্তিঃ ২। ইত্যমরঃ ॥

ঈর্ষ্যালুঃ ( ত্রি ) ঈর্ষাবিশিষ্টঃ। অক্ষান্তিযুক্তঃ। তৎপর্য্যায়ঃ। কুহনঃ ২। ইতি হেমচন্দ্রঃ ॥

ঈর্ক্ষ্য ঈর্ষে। পরাভ্যুদয়াসহিষ্ণুতায়ামিতি যাবৎ। ইতি কবিকল্পদ্রুমঃ॥ দীর্ঘাদিঃ। রেফযুক্তঃ। ঈর্ষা পরাদোষাসহিষ্ণুত্বমিতি কেচিৎ। ঈর্ক্ষ্যতি খলঃ সাধবে। ষ্বয়ান্ত ইত্যেকে। ইতি দুর্গাদাসঃ ॥

ঈলিঃ ( স্ত্রী ) হ্রস্বগদাকারহস্তদণ্ডঃ। সোঁটা ইতি খ্যাতা। ইতি ভরতঃ॥ করচ্ছুরীতি খ্যাতে একধারা ইতি খ্যাতে যবনাস্ত্রে বা। ইতি সারসুন্দরী ॥

ঈলিকা ( স্ত্রী ) হ্রস্বগদাকারহস্তদণ্ডঃ। সোঁটা ইতি খ্যাতা। ইতি ভরতঃ॥ একধারেলীতি স্বামী। তৎপর্য্যায়ঃ। ঈলিঃ ২ ঈলী ৩ করপালী ৪ গুপ্তিকা ৫ করপালিকা ৬। ইতি শব্দরত্নাবলী ॥

ঈলিতঃ ( ত্রি ) স্তুতঃ। ইত্যমরঃ ॥

ঈলী (স্ত্রী) হ্রস্বগদাকারহস্তদণ্ডঃ। তৎপর্য্যায়ঃ। করপালিকা ২। ইত্যমরঃ ॥

ঈশ ঙ ল ঐশ্বর্য্যে। ইতি কবিকল্পদ্রুমঃ॥ দীর্ঘাদিঃ। ঐশ্বর্য্যমীশ্বরীভাবোঽধীনীকরণঞ্চ। ঙ ল ঈষ্টে ধনী। মায়ানামীশিষেণ চ। অত্র কর্ম্মণি ষষ্ঠী। ইতি দুর্গাদাসঃ॥

ঈশং (ত্রি) ঈশ্বরং। প্রভুঃ। ইতি মেদিনীকরহেমচন্দ্রৌ॥

ঈশঃ (পুং) মহাদেবঃ। ঈশানকোণাধিপতিঃ। ইত্যমরঃ॥

ঈশসখা (পুং) কুবেরঃ। ইতি হেমচন্দ্রঃ॥

ঈশা (স্ত্রী) লাঙ্গলদণ্ডঃ। ইত্যমরটীকা শব্দরত্নাবলী চ॥ দুর্গা॥

ঈশাদণ্ডঃ (পুং) অক্ষযুগয়োঃ সন্ধারণার্থো দণ্ডঃ। যথা। যোজনানাং সহস্রাণি ভাস্করস্য রথো নব। ঈষাদণ্ডস্তথৈবাস্য দ্বিগুণো মুনিসত্তম॥ ইতি বিষ্ণুপুরাণে ২ অংশে ৮ অধ্যায়ঃ॥

ঈশাদন্তঃ (পুং) বৃহদ্দন্তহস্তী। তৎপর্য্যায়ঃ। মহাদন্তঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥ হস্তিদন্তঃ। ইতি শব্দরত্নাবলী॥

ঈশানং (ক্লী) জ্যোতিঃ। ইতি মেদিনী॥

ঈশানঃ (পুং) মহাদেবঃ। ইত্যমরঃ॥ একাদশরুদ্রান্তর্গতরুদ্রবিশেষঃ। ইতি পুরাণং॥ শিবাষ্টমূর্ত্ত্যন্তর্গতসূর্য্যমূর্ত্তিঃ। ইতি স্মৃতিরাগমশ্চ॥ শমীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

ঈশানী (স্ত্রী) দুর্গা। ইতি তন্ত্রং॥ শমীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

ঈশিতা (স্ত্রী) ঈশিত্বং। অনিমাদ্যষ্টৈশ্বর্য্যান্তর্গতৈশ্বর্য্যবিশেষঃ। ইতি শব্দরত্নাবলী॥

ঈশিতা [ ঋ ] (ত্রি) ঈশ্বরঃ। প্রভুঃ। অধিপতিঃ। ইত্যমরঃ॥

ঈশিত্বং (ক্লী) ঈশিতা। দেবানামষ্টৈশ্বর্য্যান্তর্গতৈশ্বর্য্যবিশেষঃ। ইতি হেমচন্দ্রঃ॥ প্রভুত্বং। যেন স্থাবরাদিসর্ব্বভূতানি আজ্ঞাকারীণি ভবন্তি। ইত্যমরটীকাসারসুন্দরী॥

ঈশ্বরং (ত্রি) আঢ্যং। স্বামি। ইতি বিশ্বমেদিন্যৌ॥

ঈশ্বরঃ (পুং) শিবঃ। কন্দর্পঃ। ইতি মেদিনী॥ বিশুদ্ধসত্ত্বপ্রধানাজ্ঞানোপহিতচৈতন্যং। ইতি বেদান্তঃ॥ ন্যায়মতে ঈশ্বরগুণাঃ। সংখ্যাদিপঞ্চ বুদ্ধিঃ ইচ্ছা যত্নশ্চ। ঈশ্বরস্বরূপং ব্রহ্মশব্দে দ্রষ্টব্যং॥ ঐশ্বর্য্যশালী। তৎপর্য্যায়ঃ। রাষ্ট্রী ১ অর্য্যঃ ২ নিয়ুত্বান্ ৩ ইনইনঃ ৪। ইতি বেদনির্ঘণ্টৌ ২ অধ্যায়ঃ॥ শ্রীহরিঃ। যথা। রুদ্র উবাচ। হরে কথয় দেবেশ দেবদেবক ঈশ্বর। কো ধ্যেয়ঃ কশ্চ বৈ পূজ্যঃ কৈর্ব্রতৈস্তুষ্যতে পরঃ॥ ইত্যাদি। শ্রীহরিরুবাচ। শৃণু রুদ্র প্রবক্ষ্যামি ব্রহ্মণা চ সুরৈঃ সহ। অহং হি দেবো দেবানাং সর্ব্বলোকেশ্বরেশ্বরঃ॥ অহং ধ্যেয়শ্চ পূজ্যশ্চ স্তুত্যোঽহং স্তুতিভিঃ সুরৈঃ। অহং প্রপূজিতো রুদ্র দদামি পরমাং গতিং॥ ইত্যাদি চ গারুড়ে ২ অধ্যায়ঃ॥

ঈশ্বরা (স্ত্রী) দুর্গা। লক্ষ্মীঃ। সরস্বত্যাদিশক্তিঃ। ইতি শব্দরত্নাবলী॥

ঈশ্বরী (স্ত্রী) ঈশ্বরা। ইতি শব্দরত্নাবলী॥ লিঙ্গিনীবৃক্ষঃ। বন্ধ্যাকর্কোটকীবৃক্ষঃ। রুদ্রজটালতা। নাকুলীকন্দঃ। ইতি রাজনির্ঘণ্টঃ॥

ঈষ উ উঞ্ছে। ইতি কবিকল্পদ্রুমঃ॥ উঞ্ছ

উদ্ধৃতশস্য শেষাপহরণং। ঈষতি ধান্যং দীনঃ। ইতি দুর্গাদাসঃ॥

ঈষ ঙ দানে। ঈক্ষে। হিংসনে। সর্পণে। ইতি কবিকল্পদ্রুমঃ॥ দীর্ঘাদিঃ। ঙ ঈষতে। ঈক্ষো দর্শনং। ইতি দুর্গাদাসঃ॥

ঈষঃ (পুং) ইষঃ। আশ্বিনমাসঃ। ইত্যমরটীকায়াং মথুরানাথঃ॥

ঈষৎ ব্য অল্পং। কিঞ্চিৎ। মনাক্। ইত্যমরঃ॥

ঈষৎকরঃ (পুং) অত্যল্পঃ। তৎপর্য্যায়ঃ। লেশঃ ২ উপপদং ৩ গন্ধঃ ৪ অনুবন্ধঃ ৫। ইতি ত্রিকাণ্ডশেষঃ। ঈষৎক্রিয়মাণং বস্তু। ইতি ব্যাকরণং॥

ঈষৎপাণ্ডুঃ (পুং) ধূসরবর্ণঃ। ইত্যমরঃ॥

ঈষদুষ্ণং (ত্রি) অল্পতপ্তং। তৎপর্য্যায়ঃ। কোষ্ণং ২ কবোষ্ণং ৩ কদুষ্ণং ৪ মন্দোষ্ণং ৫। ইতি হেমচন্দ্রঃ॥

ঈষদ্রক্তঃ (পুং) অল্পলোহিতবর্ণঃ। তৎপর্য্যায়ঃ। অব্যক্তরাগঃ ২ অরুণঃ ৩। ইত্যমরঃ॥

ঈষা (স্ত্রী) লাঙ্গলদণ্ডঃ। ইত্যমরঃ॥ লাঙ্গলের ঈষ ইতি ভাষা॥

ঈষাদন্তঃ (পুং) দীর্ঘদন্তহস্তী। তৎপর্য্যায়ঃ। উদগ্রদন্তঃ ২। ইতি হেমচন্দ্রঃ॥

ঈষিকা (স্ত্রী) হস্তিচক্ষুর্গোলকঃ। ইত্যমরটীকায়াং রায়মুকুটঃ॥ তূলিকা। ইত্যমরঃ॥ অস্ত্রবিশেষঃ। যথা। সোঽভিমন্ত্র্য শরেষীকামীষিকাস্ত্রেণ বীর্য্যবান্। কাকং তমভিসন্ধায় সসর্জ পুরুষর্ষভঃ॥ ইতি রামায়ণং॥

ঈষিরঃ (পুং) অগ্নিঃ। ইতি ত্রিকাণ্ডশেষঃ॥

ঈষীকা (স্ত্রী) তূলিকা। বীরণাদিশলাকা ইত্যন্যে। আবর্ত্তিতমনাবর্ত্তিতম্বা সুবর্ণং জ্ঞাতুং যস্মিংক্ষিপ্যতে তত্রেত্যন্যে। আবর্ত্তিতসুবর্ণং দ্রবাকারং যত্র নিঃক্ষিপ্যতে তত্রেতি কেচিৎ। ইত্যমরটীকায়াং ভরতঃ॥

ঈষ্মঃ (পুং) কামদেবঃ। বসন্তকালঃ। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ॥

ঈহ ঙ চেষ্টে। ইতি কবিকল্পদ্রুমঃ॥ দীর্ঘাদিরকর্ম্মকঃ। ঙ ঐহিষ্ট তং কারয়িতুং কৃতাত্মা ক্রতুং নৃপ ইতি ভট্টিঃ॥ সকর্ম্মকোঽপি। ভামং ভ্রমাদপি নেহতে। ইতি জয়দেবঃ॥ সর্ব্বঃ স্বার্থং সমীহতে ইতি মাঘঃ॥ ইতি দুর্গাদাসঃ॥

ঈহা (স্ত্রী) চেষ্টা। উদ্যমঃ। বাঞ্ছা। ইচ্ছা। ইতি ত্রিকাণ্ডশেষঃ॥

ঈহামৃগঃ (পুং) কুক্কুরপ্রমাণহরিণস্বকপিলবর্ণজন্তুবিশেষঃ। ঘোঁঘ ইতি খ্যাতঃ। ইতি ভরতঃ॥ তৎপর্য্যায়ঃ। কোকঃ ২ বৃকঃ ৩। ইত্যমরঃ॥ নাটকরূপকভেদঃ। ইতি মেদিনীকরহেমচন্দ্রৌ॥

ঈহাবৃকঃ (পুং) ঈহামৃগঃ। ইতি শব্দরত্নাবলী॥

ঈক্ষ ঙ দর্শনে। ইতি কবিকল্পদ্রুমঃ॥ দর্শনমিহ চাক্ষুষজ্ঞানং প্রণিধানঞ্চ। ঙ ঈক্ষতে চন্দ্রং লোকঃ। ন কামবৃত্তির্ব্বচনীয়মীক্ষতে। ইতি কালিদাসঃ॥ নিরীক্ষিষ্যামি যাম্মুনীন্ ইতি গণকৃতানিত্যত্বাদিতি রমানাথঃ॥ বস্তুতস্তু নিরীক্ষ্যতে নিরীক্ষঃ পচাদিত্বাদন্ ততো নিরীক্ষ ইবাচরতীতি কৌ সাধ্যং। ইতি দুর্গাদাসঃ॥

ঈক্ষণং (ক্লী) দর্শনং। চক্ষুঃ। ইত্যমরঃ॥

ঈক্ষণিকা (স্ত্রী) দৈবজ্ঞা। লক্ষণাদিনা শুভাশুভনিরূপিণী। ইত্যমরঃ॥

---

## উ

উ উকারঃ। পঞ্চমস্বরবর্ণঃ। অস্যোচ্চারণস্থানং মূর্দ্ধা। স চ হ্রস্বো দীর্ঘঃ প্লুতশ্চ ভবতি। উকারং পরমেশানি অধঃকুণ্ডলিনী স্বয়ং। পীতচম্পকসঙ্কাশং পঞ্চদেবময়ং সদা॥ পঞ্চপ্রাণময়ং দেবি চতুর্ব্বর্গপ্রদায়কং। ইতি কামধেনুতন্ত্রং॥ অস্য লেখনপ্রকারো যথা। ঊর্দ্ধাধো মধ্যতঃ কুব্জা রেখা বামগতা শুভা। তিষ্ঠন্তি বায়ুবহ্নীন্দ্রাঃ শক্তির্মাত্রা পরা স্মৃতা॥ ইতি বর্ণোদ্ধারতন্ত্রং॥ অস্য নামান্তরাণি যথা। উঃ শঙ্করো বর্ত্তুলাক্ষী ভূতঃ কল্যাণবাচকঃ। অমরেশো দক্ষকর্ণঃ ষড়্বক্ত্রো মোহনঃ শিবঃ॥ উগ্রঃ প্রভুর্ধৃতির্বিষ্ণুর্বিশ্বকর্ম্মা মহেশ্বরঃ। শক্রঘ্নশ্চেটিকা পুষ্টিঃ পঞ্চমী বহ্নিবাসিনী॥ কামঘ্নঃ কামনা চেশো মোহিনী বিঘ্নহৃন্মহী। উঢ়সূঃ কুটিলা শ্রোত্রং পারদ্বীপো বৃষো হরঃ॥ ইতি তন্ত্রোক্তবর্ণাভিধানং॥

উ ঙ শব্দে। ইতি কবিকল্পদ্রুমঃ॥ ঙ অবতে গৌঃ। ইতি দুর্গাদাসঃ॥

উ ব্য সম্বোধনং। রোষোক্তিঃ। অনুকম্পা। নিয়োগঃ। পদপূরণং। পাদপূরণং। ইতি মেদিনী॥ প্রশ্নঃ। অঙ্গীকারঃ। ইতি হেমচন্দ্রঃ॥ ইদমেব উঙ ইতি খ্যাতং॥

উঃ (পুং) শিবঃ। ইতি ত্রিকাণ্ডশেষঃ॥ ব্রহ্মা। ইতি কশ্চিদেকাক্ষরকোষঃ॥

উকনাহঃ (পুং) পীতরক্তবর্ণাশ্বঃ। স এব ক্বচিৎ কৃষ্ণরক্তচ্ছবিঃ। ইতি হেমচন্দ্রঃ॥

উক্তং (ক্লী) একাক্ষরছন্দঃ। ইতি মেদিনী॥ বাক্যং॥

উক্তঃ (ত্রি) কথিতঃ। তৎপর্য্যায়ঃ। ভাষিতঃ২ উদিতঃ ৩ জল্পিতঃ ৪ আখ্যাতঃ ৫ অভিহিতঃ ৬ লপিতঃ ৭। ইত্যমরঃ॥ গদিতঃ ৮ নিগদিতঃ ৯ ঈরিতঃ ১০ উদীরিতঃ ১১ ভণিতঃ ১২ লড়িতঃ ১৩ রপিতঃ ১৪ রঠিতঃ ১৫ ভটিতঃ ১৬ রটিতঃ ১৭ ব্যাহৃতঃ ১৮॥

উক্তিঃ (স্ত্রী) কথনং। তৎপর্য্যায়ঃ। ব্যাহারঃ২ লপিতং ৩ ভাষিতং ৪ বচনং ৫ বচঃ ৬। ইত্যমরঃ॥

উক্থং (ক্লী) সামবেদঃ। ইত্যুণাদিকোষঃ॥

উক্থশাঃ [স্] (পুং) যজমানঃ। ইতি ব্যাকরণং॥

উক্থা (স্ত্রী) ছন্দোবিশেষঃ। এ ক্ত-মুক্থা। সা দ্বিবিধা। শ্রীঃ ১ সর্ব্বগুরুঃ। যথা শ্রীস্তে সাস্তাং। ইতি ছন্দোমঞ্জরী॥ উঃ ২ সর্ব্বলঘুঃ। যথা। উরবতু। ইতি ছন্দোঽর্ণবঃ॥

উখ গতৌ। ইতি কবিকল্পদ্রুমঃ॥ পঞ্চমস্বরী। ওখতি। ইতি দুর্গাদাসঃ॥

উখ ই গতৌ। ইতি কবিকল্পদ্রুমঃ॥ পঞ্চমস্বরী। ই উঙ্খতে। ইতি দুর্গাদাসঃ॥

উখর্ব্বলঃ (পুং) তৃণবিশেষঃ। তৎপর্য্যায়ঃ। উখলঃ ২ ভূরিপত্রঃ ৩ সুতৃণঃ ৪

তৃণোত্তমঃ ৫। অস্য গুণাঃ। বলদাতৃত্বং। রুচিকারিত্বং। পশূনাং সর্ব্বদা হিতকারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

উখা ( স্ত্রী ) স্থালী। হাঁড়ি ইতি ভাষা। ইত্যমরঃ॥

উখ্যং ( ত্রি ) স্থালীপক্বমাংসাদি। তৎপর্য্যায়ঃ। পৈঠরং ২। ইত্যমরঃ॥

উগ্রং ( ত্রি ) রৌদ্রং। উৎকটং। ইত্যমরো মেদিনী চ॥

উগ্রং ( ক্লী ) বৎসনাভনামবিষং। ইতি রাজনির্ঘণ্টঃ॥

উগ্রঃ ( পুং ) মহাদেবঃ। বায়ুমূর্ত্তিরয়ং। ইতি ভবিষ্যপুরাণং। ক্ষত্রিয়াৎ শূদ্রায়াং জাতঃ জাতিবিশেষঃ। আগুরি ইতি ভাষা। ইত্যমরঃ॥ অস্য কর্ম্ম বিলবাসিগোধাদিবধবন্ধনং। তথাচ মনুঃ। ক্ষত্ত্রোগ্রপুক্কসানান্তু বিলৌকোবধবন্ধনং। নক্ষত্রগণবিশেষঃ। স চ পূর্ব্বফল্গুনীপূর্ব্বাষাঢ়াপূর্ব্বভাদ্রপদমঘাভরণ্যাত্মকঃ। ইতি জ্যোতিষং॥ শোভাঞ্জনবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥ কেরলদেশঃ। ইতি হেমচন্দ্রঃ॥

উগ্রকাণ্ডঃ ( পুং ) কারবেল্লঃ। করেলা ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥

উগ্রগন্ধং ( ক্লী ) হিঙ্গু। ইতি রাজনির্ঘণ্টঃ॥

উগ্রগন্ধঃ ( পুং ) লশুনঃ। কট্ফলঃ। অর্জকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥ চম্পকঃ। ইতি শব্দচন্দ্রিকা॥ উৎকটগন্ধযুক্তে ত্রি॥

উগ্রগন্ধা ( স্ত্রী ) অজমোদা। বচা। ছিক্কিকৌষধী। ইতি মেদিনী॥ অজগন্ধা। যবানী। ইতি রাজনির্ঘণ্টঃ॥

উগ্রচণ্ডা ( স্ত্রী ) দেবীভেদঃ। যথা মহিষাসুরং প্রতি ভগবতীবাক্যং। উগ্রচণ্ডেতি যা মূর্ত্তির্ভদ্রকালী হ্যহং পুনঃ। যযা মূর্ত্ত্যা ত্বাং হনিষ্যে সা দুর্গেতি প্রকীর্ত্তিতা॥ এতাসু মূর্ত্তিষু সদা পাদলগ্নো নৃণাং ভবান্। পূজ্যো ভবিষ্যসি ত্বং বৈ দেবানামপি রক্ষসাং॥ আদিসৃষ্টৌ উগ্রচণ্ডামূর্ত্ত্যা ত্বং নিহতঃ পুরা। দ্বিতীয়সৃষ্টৌ তু ভবান্ ভদ্রকাল্যা ময়া হতঃ॥ দুর্গারূপেণাধুনা ত্বাং হনিষ্যামি সহানুগং। ইত্যাদি॥ *॥ তস্যাঃ প্রাদুর্ভাবো যথা। শ্রীভগবানুবাচ। উগ্রচণ্ডা তু যা মূর্ত্তিরষ্টাদশভুজাভবৎ। সা নবম্যাং পুরা কৃষ্ণপক্ষে কন্যাং গতে রবৌ॥ প্রাদুর্ভূতা মহাভাগা যোগিনীকোটিভিঃ সহ॥ *॥ অনয়া মূর্ত্ত্যা দক্ষযজ্ঞভঙ্গং কৃতং। যথা। আষাঢ়স্য তু পূর্ণায়াং সত্রং দ্বাদশবার্ষিকং। দক্ষঃ কর্ত্তুং সমারেভে বৃতাঃ সর্ব্বে দিবৌকসঃ॥ ততোঽহং ন বৃতস্তেন দক্ষেণ সুমহাত্মনা। কপালীতি সতী চাপি তজ্জায়েতি চ নো বৃতা॥ ততো রোষসমাযুক্তা প্রাণাংস্তত্যাজ সা সতী। ত্যক্তদেহা সতী চাপি চণ্ডমূর্ত্তিস্তদাভবৎ॥ ততঃ প্রবৃত্তে যজ্ঞে তু তস্মিন্ দ্বাদশবার্ষিকে। নবম্যাং কৃষ্ণপক্ষে তু কন্যায়াং চণ্ডমূর্ত্তিধৃক্॥ যোগনিদ্রা মহামায়া যোগিনীকোটিভিঃ সহ। সতীরূপং পরিত্যজ্য যজ্ঞভঙ্গমথাকরোৎ॥ শঙ্করস্য গণৈঃ সর্ব্বৈঃ সহিতা শঙ্করেণ চ। স্বয়ং বভঞ্জ সা দেবী মহাসত্রং মহাত্মনঃ॥ ততো দেব্যা মহাক্রোধে ব্যতীতে ত্রিদিবৌকসঃ।

পূজয়াঞ্চক্রুরতুলাং দেবীং পূর্ব্বোদিতেন বৈ ॥ পূর্ব্বোদিতবিধানেন পূজামস্যা দিবৌকসঃ। কৃত্বৈব পরমামাপুর্নির্বৃত্তিং দুঃখহানয়ে ॥ এবমন্যৈরপি সদা কার্য্যং দেব্যাঃ প্রপূজনং। বিভূতিমতুলাং প্রাপ্তুং চতুর্ব্বর্গপ্রদায়কং ॥ যো মোহাদথবালস্যাদ্দেবীং দুর্গাং মহোৎসবে। ন পূজয়তি দম্ভাদ্বা দ্বেষাদ্বাপ্যথ ভৈরব ॥ ক্রুদ্ধা ভগবতী তস্য কামানিষ্টান্নিহন্তি বৈ। পরত্র চ মহামায়াবলির্ভূত্বা স জায়তে ॥ অষ্টম্যাং রুধিরৈর্ম্মাংসৈর্ম্মহামাংসৈঃ সুগন্ধিভিঃ। পূজয়েদ্বহুজাতীয়ৈর্ব্বলিভির্ভোজনৈঃ শিবাং ॥ ইত্যাদি ॥*॥ তন্মন্ত্রো যথা। ভদ্রকালীমুগ্রচণ্ডাং মহামায়াং মহোৎসবে। নেত্রবীজন্তু সর্ব্বাসাং পূজনে পরিকীর্ত্তিতং। তন্ত্রং তথোগ্রচণ্ডায়াঃ পৃথক্ ত্বং শৃণু ভৈরব ॥ আদ্যদ্বয়ং নেত্রবীজং মন্ত্রস্যোপান্তমস্তবে। বহ্নিনান্তস্বরেণেন্দুবিন্দুভ্যাং তন্ত্রমৌগ্রকং ॥ ইত্যাদি চ কালিকাপুরাণে ৫৯। ৬০ অধ্যায়ৌ ॥

উগ্রতারা (স্ত্রী) দেবীবিশেষঃ। অস্যা উৎপত্ত্যাদি যথা। সর্ব্বেষামেব দেবানাং যজ্ঞভাগানপাহরৎ। স্বয়ং শুম্ভো নিশুম্ভশ্চ দিক্পালত্বং তথা গতৌ ॥ সর্ব্বে সুরগণাঃ সেন্দ্রাস্ততো গত্বা হিমাচলং। গঙ্গাবতারনিকটে মহামায়াং প্রতুষ্টুবুঃ ॥ অনেকসংস্তুতা দেবী তদা সর্ব্বামরোৎকরৈঃ। মাতঙ্গবনিতামূর্ত্তির্ভূত্বা দেবানপৃচ্ছত ॥ যুষ্মাভিরমরৈরত্র স্তূয়তে কাচ ভাবিনী। কিমর্থমাগতা যূয়ং মাতঙ্গস্যাশ্রমং প্রতি ॥ এবং ব্রুবন্ত্যা মাতঙ্গ্যাস্তস্যাস্তু কায়কোষতঃ। সমুদ্ভূতাব্রবীদ্দেবী মাং স্তুবন্তি সুরা ইতি ॥ শুম্ভো নিশুম্ভো হ্যসুরৌ বাধেতে সকলান্ সুরান্। তস্মাত্তয়োর্ব্বধায়াহং স্তূয়েঽদ্য সকলৈঃ সুরৈঃ ॥ বিনিঃসৃতায়াং দেব্যাস্তু মাতঙ্গ্যাঃ কায়তস্তদা। ভিন্নাঞ্জননিভা কৃষ্ণা সাভূদ্গৌরী ক্ষণাদপি ॥ কালিকাখ্যাভবৎ সাপি হিমাচলকৃতাশ্রয়া। তামুগ্রতারামৃষয়ো বদন্তীহ মনীষিণঃ ॥ উগ্রাদপি ভয়াত্রাতি যস্মাৎ ভক্তান্ সদাম্বিকা। এতস্যাঃ প্রথমং বীজং কথিতং তন্ত্রমেব চ ॥ * ॥ এষৈবৈকজটাখ্যাতির্যস্মাত্তস্যা জটাধিকা। শৃণু ত্বং চিন্তনং চাস্যাঃ সম্যক্ বেতালভৈরবৌ ॥ যথা ধ্যাত্বা মহাদেবীং ভক্তঃ প্রাপ্নোত্যভীপ্সিতং। চতুর্ভুজাং কৃষ্ণবর্ণাং মুণ্ডমালাবিভূষিতাং ॥ খড়্গং দক্ষিণপাণিভ্যাং বিভ্রতীন্দীবরং ত্বধঃ। কর্ত্রীঞ্চ খর্পরঞ্চৈব ক্রমাদ্বামেন বিভ্রতীং ॥ খং লিখন্তীং জটামেকাং বিভ্রতীং শিরসা স্বয়ং। মুণ্ডমালাং ধরাং শীর্ষে গ্রীবায়ামপি সর্ব্বদা ॥ বক্ষসা নাগহারন্তু বিভ্রতীং রক্তলোচনাং। কৃষ্ণবস্ত্রধরাং কট্যাং ব্যাঘ্রাজিনসমন্বিতাং ॥ বামপাদং শবহৃদি সংস্থাপ্য দক্ষিণং পদং। বিন্যস্য সিংহপৃষ্ঠে তু লেলিহানা শবং স্বয়ং ॥ সাট্টহাসমহাঘোরা রাবযুক্তাতিভীষণা। চিন্ত্যোগ্রতারা সততং ভক্তিমদ্ভিঃ সুখেপ্সুভিঃ ॥*॥ এতস্যাঃ সংপ্রবক্ষ্যামি যা অষ্টৌ যোগিনীস্তু

তাঃ। মহাকাল্যথ রুদ্রাণী উগ্রা ভীমা তথৈব চ। ঘোরা চ ভ্রামরী চৈব মহারাত্রিশ্চ সপ্তমী ॥ ভৈরবী চাষ্টমী প্রোক্তা যোগিনীস্তাঃ প্রপূজয়েৎ। ইতি কালিকাপুরাণে ৬০ অধ্যায়ঃ ॥ * ॥ অপি চ ব্রহ্মশৈলস্য পূর্ব্বস্যাং ভূমিপীঠে ব্যবস্থিতা। চারুনিম্নং শুভাবর্ত্তং কামাখ্যা নাভিমণ্ডলং ॥ যত্রোগ্রতারারূপেণ রমতে পরমেশ্বরী। তত্র তেনৈব রূপেণ পূজিতব্যা শুভাত্মিকা ॥ তস্যাস্ত বীজং পূর্ব্বস্মিন্ উত্তরে প্রতিপাদিতং। রূপং শৃণু নরশ্রেষ্ঠ যেন ধ্যেয়া সদা শিবা ॥ কৃষ্ণা লম্বোদরী দীর্ঘা বিরলা রক্তদন্তিকা। চতুর্ভুজা কৃশাঙ্গী তু দক্ষে কর্ত্তৃকখর্পরৌ ॥ খড়্গং চেন্দীবরং বামে শীর্ষে ত্বেকজটাং পুনঃ। বামপাদং শবস্যোর্ব্বোর্নিধায়োত্থায় দক্ষিণং ॥ শবস্য হৃদয়ে ন্যস্য সাট্টহাসং প্রকুর্ব্বতী। নাগহারশিরোমালা ভূষিতা কামদা পরা ॥ ত্রিকোণং মণ্ডলং চাস্যা হুংকারমধ্যবীজকং। দ্বারে নানাযোগিনীনাং নামান্যস্যাস্ত তন্ত্রকে ॥ জ্ঞেয়ানি নরশার্দ্দূল তৎপ্রোক্তং বাহ্যগোচরে। ইতি কালিকাপুরাণে কামাখ্যারূপনির্ণয়ে ৮১ অধ্যায়ঃ ॥ * ॥ সা চ বশিষ্ঠশাপাৎ বামা ভূতা। যথা। ঔর্ব্ব উবাচ। এতদ্বিষ্ণোর্ব্বচঃ শ্রুত্বা বিধিনা সহিতঃ স তু। অঙ্গীচকার হৃদয়ে তদ্বচঃ সাধ্যসাধনে ॥ বিসৃজ্য তান্ ব্রহ্মবিষ্ণুযমান্ বৃষভবাহনঃ। আদায় সগণান্ সর্ব্বান্ কামরূপান্তরং যযৌ ॥ উগ্রতারাং ততো দেবীং গণাংশ্চ প্রাহ শঙ্করঃ। উৎসারয়স্ব সকলান্ ইমান্ লোকান্ গণা দ্রুতং ॥ উগ্রতারে মহাদেবি ত্বঞ্চাপ্যুৎসারয় দ্রুতং। ততো গণাঃ কামরূপাদ্দেবীচাপ্যপরাজিতা। লোকামুৎসারয়ামাসুঃ পীঠং কর্ত্তুং রহস্যকং ॥ উৎসার্য্যমানে লোকে তু চতুর্ব্বর্ণৈর্দ্বিজাতিভিঃ। সন্ধ্যাচলো গতো বিপ্রো বশিষ্ঠঃ কুপিতো মুনিঃ ॥ সোঽপ্যুগ্রতারয়া দেব্যা উৎসারয়িতুমীশয়া। গণৈঃ সহবৃতঃ প্রাহ শাপং কুর্ব্বন্ সুদারুণং। যস্মাদহং ধৃতং বামে ত্বয়োৎসারয়িতুং মুনিঃ ॥ তস্মাত্ত্বং বাম্যভাবেন পূজ্যা ভব সমন্ত্রিকা। ভবৎস্যন্তি ম্লেচ্ছবৎ যস্মাদ্গণাস্তে মন্দবুদ্ধয়ঃ। ভবস্তু ম্লেচ্ছাস্তস্মাদ্বৈ ভবত্যা কামরূপকে ॥ মহাদেবোঽপি যস্মান্মাং নিঃসারয়িতুমুদ্যতঃ। তপোবলং মুনিং দান্তং ম্লেচ্ছবদ্বেদপারগং ॥ তস্মাৎ ম্লেচ্ছপ্রিয়ো ভূয়াৎ শঙ্করশ্চাস্থিভস্মধৃক্। এতত্তু কামরূপাখ্যং ম্লেচ্ছৈর্গুপ্তং ভবত্বলং ॥ স্বয়ং বিষ্ণুর্ন চায়াতি যাবৎ কালমিদং পুনঃ। বিরলাশ্চাগমাঃ সন্তু যত্র তৎ প্রতিপাদকাঃ ॥ বিরলং যস্তু জানাতি কামরূপাগমং বুধঃ। স এব প্রাপ্তকালেঽপি পূর্ব্বং ফলমবাপ্স্যতি ॥ এবমুক্ত্বা বশিষ্ঠস্তু তত্রৈবান্তরধীয়ত। তে গণাঃ ম্লেচ্ছতাং যাতাঃ কামরূপে সুরালয়ে ॥ বামাভূদুগ্রতারাপি শম্ভুর্ম্লেচ্ছরতোঽভবৎ। ইতি চ কালিকাপুরাণে ৮৩ অধ্যায়ঃ ॥

উগ্রত্বং (ক্লী) উগ্রতা। উৎকটতা। তৎপর্য্যায়ঃ। চণ্ডতা ২। ইতি হেমচন্দ্রঃ ॥

উগ্রধন্বা [ ন্ ] (পুং) ইন্দ্রঃ। ইতি হেমচন্দ্রঃ॥
উগ্রনাসিকঃ (ত্রি) দীর্ঘনাসিকাবিশিষ্টঃ। ইতি হেমচন্দ্রঃ॥
উগ্রশেখরা (স্ত্রী) গঙ্গা। ইতি শব্দরত্নাবলী॥
উগ্রসেনঃ (পুং) মথুরাদেশস্য রাজবিশেষঃ। স চ আহুকপুত্রঃ। কংসরাজপিতা চ। পরীক্ষিতপুত্রঃ। ইতি শ্রীভাগবতং॥
উগ্রসেনজঃ (পুং) কংসনামাসুররাজঃ। ইতি ত্রিকাণ্ডশেষঃ॥
উগ্রা (স্ত্রী) যবানী। বচা। ইতি রাজনির্ঘণ্টঃ॥ ছিক্কিকৌষধী। ইতি হেমচন্দ্রঃ॥ উগ্রজাতিস্ত্রী। ইতি মনুঃ॥ ধন্যাকং। ইতি রত্নমালা॥ প্রখরা নারী॥
উঙ্কুণঃ (পুং) উৎকুণঃ। উকুন্ ইতি ভাষা। ইতি শব্দমালা॥
উচ ই র য সমবায়নে। মিশ্রণে। ইতি কবিকল্পদ্রুমঃ॥ হ্রস্বাদিঃ। ই র ঔচৎ ঔচিৎ। অস্মাৎ পুষাদিত্বাৎ নিত্যং ঙ ইত্যন্যে। য উচ্যতে কেশঃ স্নানাৎ। ইতি দুর্গাদাসঃ॥
উচিতং (ত্রি) বিদিতং। ন্যস্তং। পরিমিতং। যুক্তং। ইতি হেমচন্দ্রঃ॥ গ্রাহ্যং। ইতি শব্দরত্নাবলী॥
উচ্চং (ত্রি) উপরি। উঁচু ইতি ভাষা। তৎপর্য্যায়ঃ। প্রাংশু ২ উন্নতং ৩ উদগ্রং ৪ উচ্ছ্রিতং ৫ তুঙ্গং ৬। ইত্যমরঃ॥ উত্তুঙ্গং ৭। ইতি তন্ত্রটীকা॥
উচ্চৈঃ [ স্ ] ব্য উচ্চৈঃ। অতিশয়োচ্চং। ইতি দ্বিরূপকোষঃ॥
উচ্চটা (স্ত্রী) গুঞ্জা। ভূম্যামলকী। নাগরমুস্তা। ইতি রাজনির্ঘণ্টঃ॥ দম্ভঃ। চর্য্যা। লশুনপ্রভেদঃ। ইতি হেমচন্দ্রঃ॥ তৃণবিশেষঃ। নির্ব্বিষী ইতি খ্যাতা। চেঁচুয়া ইতি কেচিৎ। ইত্যমরটীকায়াং ভরতঃ। তৎপর্য্যায়ঃ। চূড়ালা ২ চক্রলা ৩। ইত্যমরঃ॥ অম্বুপত্রা ৪ জটিলা ৫ শুক্রলা ৬ উত্তানকঃ ৭। ইতি রত্নমালা॥
উচ্চণ্ডঃ (ত্রি) ত্বরান্বিতঃ। অবিলম্বিতঃ। ইত্যমরঃ॥
উচ্চতরুঃ (পুং) নারিকেলবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥
উচ্চতালং (ক্লী) পানগোষ্ঠ্যাং নৃত্যং। ইতি হেমচন্দ্রঃ॥
উচ্চদেবঃ (পুং) শ্রীকৃষ্ণঃ। ইতি ত্রিকাণ্ডশেষঃ॥
উচ্চন্দ্রঃ (পুং) রাত্রিশেষঃ। ইতি শব্দরত্নাবলী॥
উচ্চয়ঃ (পুং) পরিধানবস্ত্রগ্রন্থিঃ। তৎপর্য্যায়ঃ। নীবী ২॥ ইতি হেমচন্দ্রঃ॥
উচ্চলং (ক্লী) মনঃ। ইতি হেমচন্দ্রঃ॥
উচ্চললাটা (স্ত্রী) উন্নতললাটবতী। ইতি ত্রিকাণ্ডশেষঃ॥
উচ্চাটনং (ক্লী) উৎখাতং। উচাটন ইতি ভাষা। ষট্কর্ম্মান্তর্গতাভিচারকর্ম্মবিশেষঃ। অস্য দেবতা দুর্গা। তিথিঃ কৃষ্ণাচতুর্দ্দশী অষ্টমী চ। বারঃ শনিঃ। জপমালা সাধ্যস্য কেশসূত্রগ্রথিততুরঙ্গদশনোদ্ভবা। ফলং। উচ্চাটনং স্বদেশাদের্ভ্রংশনং পরিকীর্ত্তিতং॥ ইতি শারদাতন্ত্রং॥
উচ্চারঃ (পুং) বিষ্ঠা। ইত্যমরঃ॥ উচ্চারণং॥
উচ্চারণং (ক্লী) কথনং। বাঙ্নিষ্পত্তিকরণং॥

যথা। হসে অকার উচ্চারণার্থঃ। ইতি মুগ্ধবোধব্যাকরণং ॥ অপিচ। কর্ম্মো-চ্চারণমাত্রেণ স্পষ্টমাত্রানুবন্ধতঃ। ইতি কবিকল্পদ্রুমঃ ॥

উচ্চাবচঃ (ত্রি) অনেকপ্রকারঃ। তৎপর্য্যায়ঃ। নৈকভেদঃ ২। ইত্যমরঃ ॥

উচ্চিঙ্গটঃ (পুং) তৃণগড়মৎস্যঃ। কোপন-পুরুষঃ। ইতি মেদিনী ॥

উচ্চূলঃ (পুং) ধ্বজোর্দ্ধমুখকূর্চ্চঃ। ইতি হেম-চন্দ্রঃ ॥ নিশানের পাগ ইতি ভাষা। ইহার পর্টুকা অবচুলঃ ॥

উচ্চৈঃ [ স্ ] ব্য উচ্চং। মহৎ। ইত্যমরঃ ॥

উচ্চৈঃশ্রবাঃ [ স্ ] (পুং) ইন্দ্রঘোটকঃ। ইত্য-মরঃ ॥ স তু শ্বেতবর্ণঃ সমুদ্রমন্থনোত্থিতঃ। ইতি শ্রীভাগবতং ॥

উচ্চৈর্ঘুষ্টং (ক্লী) ঘোষণা। ইত্যমরঃ ॥

উচ্ছ ই শ উঞ্ছে। ইতি কবিকল্পদ্রুমঃ ॥ হ্রস্বাদিঃ ই উঞ্ছতে। শ উঞ্ছতী উঞ্ছন্তী। উঞ্ছ উদ্ধৃতশস্যস্য শেষাপহরণং। স্থলভং শস্য-মুঞ্ছন্তি যদ্দেশে ব্রতিনো দ্বিজাঃ। ইতি হলায়ুধঃ। উঞ্ছঃ স্ফোটনমিত্যেকে। ইতি দুর্গাদাসঃ ॥

উচ্ছ ঈ শ বন্ধে। সমাপনে। অতিক্রমে। বর্জনে। ইতি কবিকল্পদ্রুমঃ ॥ ই উষ্টঃ। শ উচ্ছতী উচ্ছন্তী। চত্বারোঽর্থাঃ। সমা-পনে। উচ্ছতি রাত্রিঃ। ভরণ্যাং ব্যুষ্টায়া-মুষসি জনয়ামাস তনয়ং। ব্যুষ্টায়াং সমা-প্তায়ামিত্যর্থঃ। ইতি দুর্গাদাসঃ ॥

উচ্ছন্নং (ত্রি) নষ্টং। ইতি শ্রীভগবদ্গীতা ॥

উচ্ছাদনং (ক্লী) উৎসাদনং। উদ্বর্ত্তনং। গন্ধ-দ্রব্যদ্বারা শরীরনির্ম্মলীকরণং ॥ ইত্যমর-টীকা ॥

উচ্ছিলীন্ধ্রং (ক্লী) ছত্রিকা। কোঁড়ক ছাতা ইতি ভাষা। ইতি শ্রীভাগবতং ॥

উচ্ছিষ্টং (ত্রি) ভুক্তাবশিষ্টং। এঁটো ইতি ভাষা। ইতি পুরাণং ॥ তদ্ভোজনপ্রায়-শ্চিত্তং যথা। বিষ্ণুঃ। আমশ্রাদ্ধাশনে ত্রিরাত্রং পয়সা বর্ত্তেত ব্রাহ্মণঃ শূদ্রো-চ্ছিষ্টাশনে চ বমনং কৃত্বা সপ্তরাত্রমুপ-বশেৎ ইতি। এবং উচ্ছিষ্টে যঃ পরাক উক্তোঽঙ্গিরসা সোঽপি প্রাগুক্তসকৃদাপ-দাদিবিষয়ে বোধ্যঃ। বিষ্ণুনাপি অনু-চ্ছিষ্টে পরাকোক্তেঃ। তথাচাঙ্গিরাঃ। চাণ্ডালপতিতাদীনামুচ্ছিষ্টান্নস্য ভক্ষণে। দ্বিজঃ শুদ্ধ্যেৎ পরাকেণ শূদ্রঃ কৃচ্ছ্রেণ শুধ্যতি ॥ যত্তু মিতাক্ষরায়ামাপস্তম্বঃ। অন্ত্যানাং ভুক্তশেষন্তু ভক্ষয়িত্বা দ্বিজা-তয়ঃ। চান্দ্রং কৃচ্ছ্রং তদর্দ্ধন্তু ব্রহ্মক্ষত্র-বিশাং বিধিঃ ॥ চান্দ্রং চান্দ্রায়ণং। কৃচ্ছ্রং তপ্তকৃচ্ছ্রং। এতচ্চ ব্রাহ্মণস্য সকৃদজ্ঞান-বিষয়ং বলাৎকারানুভারেঽপ্যন্নেতরতাম্বু-লাদ্যুৎসৃষ্টপরঞ্চ। তত্রাজ্ঞানে আপস্তম্বেন উচ্ছিষ্টে চান্দ্রায়ণবিধানাৎ। অঙ্গিরসা অন্ত্যাবসায়িনামিত্যাদি প্রাগুক্তবচনে সামান্যতঃ তপ্তকৃচ্ছ্রবিধানাৎ অনুচ্ছিষ্টে ঽপি তথাত্বাদেব সর্ব্বত্রানুচ্ছিষ্টাদুচ্ছিষ্টে দ্বৈগুণ্যং বোধ্যং। প্রায়শ্চিত্তবিবেকে সং-সর্গপ্রকরণেঽপ্যেবং। ক্ষত্রিয়বিশোশ্চাপদি জ্ঞেয়ং ॥ * ॥ সর্ব্বত্রোচ্ছিষ্টে তু ব্রত-দ্বৈগুণ্যং আপদজ্ঞানভুক্তোত্তারিতে মাস-

যাবকব্রতং তদশক্তৌ ধেনুদ্বয়ং ষট্কার্ষাপণা বা দেয়াঃ। তত্রোচ্ছিষ্টান্নে পরাক ইতি। অভ্যাসভেদে স্বাবৃত্তিরূহণীয়া ইতি প্রায়শ্চিত্ততত্ত্বং ॥ * ॥ অথোচ্ছিষ্টস্য চাণ্ডালাদিস্পর্শপ্রায়শ্চিত্তং। আপস্তম্বঃ। ভুক্তোচ্ছিষ্টস্ত্বনাচান্তশ্চাণ্ডালৈঃ শ্বপচেন বা। প্রমাদাৎ স্পর্শনং গচ্ছেৎ তত্র কুর্য্যাদ্বিশোধনং ॥ গায়ত্র্যষ্টসহস্রন্তু দ্রুপদাং বা শতং জপেৎ। ত্রিরাত্রোপোষিতো ভূত্বা পঞ্চগব্যেন শুদ্ধ্যতি ॥ ভুক্তোচ্ছিষ্টোঽন্ত্যজৈঃ স্পৃষ্টঃ প্রাজাপত্যং সমাচরেৎ। অর্দ্ধোচ্ছিষ্টে স্মৃতঃ পাদঃ পাদ আমাশনে তথা ॥ প্রাজাপত্যং জ্ঞানে অর্দ্ধোচ্ছিষ্টো যেনাদ্যগ্রাস আস্যে নিক্ষিপ্তঃ ন তু নিগীর্ণঃ। দক্ষঃ। পানে মৈথুনসংসর্গে তথা মূত্রপুরীষয়োঃ। সংস্পর্শং যদি গচ্ছেত্তু শবোদক্যান্ত্যজৈঃ সহ ॥ দিনমেকং চরেন্মূত্রে পুরীষে তু দিনদ্বয়ং। দিনত্রয়ং মৈথুনে স্যাৎ পানে স্যাচ্চ চতুষ্টয়ং ॥ কাশ্যপঃ। শ্বশূকরান্ত্যচাণ্ডালমদ্যভাণ্ডরজস্বলাঃ। যদ্যুচ্ছিষ্টঃ স্পৃশেত্তত্র কৃচ্ছ্রং সান্তপনং চরেৎ ॥ এতৎ-জ্ঞানাভ্যাসে সান্তপনে ধেনুদ্বয়ং ॥ ব্রহ্মপুরাণে। উচ্ছিষ্টেন তু শূদ্রেণ বিপ্রঃ স্পৃষ্টস্তু তাদৃশঃ। উপবাসেন শুদ্ধিঃ স্যাৎ শুনা সংস্পৃষ্ট এব বা ॥ উচ্ছিষ্টেন তু বিপ্রেণ বিপ্রঃ স্পৃষ্টস্তু তাদৃশঃ। উভৌ স্নানং প্রকুর্ব্বতং সদ্য এব সমাহিতৌ ॥ অনুচ্ছিষ্টশূদ্রস্পর্শে উচ্ছিষ্টব্রাহ্মণস্য নক্তমিতি প্রায়শ্চিত্তবিবেকঃ ॥ ইতি প্রায়শ্চিত্ততত্ত্বং ॥ ত্যক্তং। ইতি হেমচন্দ্রঃ ॥

উচ্ছিষ্টভোজনঃ (পুং) *দেবনৈবেদ্যবলি*-ভোজনকর্ত্তা। ইতি হেমচন্দ্রঃ ॥

উচ্ছিষ্টমোদনং (ক্লী) সিক্থকং। মোম ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ ॥

উচ্ছীর্ষকং (ক্লী) উপধানং। বালিশ ইতি ভাষা। ইতি হলায়ুধঃ ॥

উচ্ছূনং (ত্রি) স্ফীতং। উন্নতং। বর্দ্ধিতং। তথাচ প্রাচীনাঃ। কামিন্যাঃ কিয়দুচ্ছূনমুরঃ প্রেয়ান্ সমীক্ষতে। নব্যং শালিমিবোৎপন্নমতিদীনঃ কৃষীবলঃ ॥

উচ্ছৃঙ্খলং (ত্রি) শৃঙ্খলারহিতং। তৎপর্য্যায়ঃ। অবাধং ২ উদ্দাম ৩ অনিয়ন্ত্রিতং ৪ অনর্গলং ৫ নিরঙ্কুশং ৬। ইতি হেমচন্দ্রঃ ॥

উচ্ছ্রয়ঃ (পুং) পর্ব্বতবৃক্ষাদেরুচ্চতা। তৎপর্য্যায়ঃ। উচ্ছ্রায়ঃ ২ উৎসেধঃ ৩। ইত্যমরঃ ॥

উচ্ছ্রায়ঃ (পুং) উচ্ছ্রয়ঃ। উচ্চতা। ইত্যমরঃ ॥

উচ্ছ্রিতং (ত্রি) সংজাতং। সমুন্নদ্ধং। উচ্চং। প্রবৃদ্ধং। ইতি মেদিনী ॥ ত্যক্তং। ইতি হেমচন্দ্রঃ ॥

[illegible]নতং (ত্রি) প্রফুল্লং। বিকসিতং। ইতি হেমচন্দ্রঃ

উচ্ছ্বাসঃ (পুং) অন্তর্মুখশ্বাসঃ। তৎপর্য্যায়ঃ। আহরঃ ২ আনঃ ৩। ইতি হেমচন্দ্রঃ ॥ আখ্যায়িকাপরিচ্ছেদঃ। আশ্বাসঃ। ইতি মেদিনী ॥

উজ্জয়নী (স্ত্রী) বিশালানগরী। উজৈন ইতি পশ্চিমদেশে খ্যাতা। বঙ্গদেশে তু উজনী।

ইতি ত্রিকাণ্ডশেষঃ॥ ইয়ং মালবদেশস্য নগরী। মোক্ষদসপ্তপুর্য্যন্তর্গতপুরী। পুরা বিক্রমাদিত্যরাজধানী চ। অধুনা মহারাষ্ট্রেণাধিকৃতা॥ [ চন্দ্রঃ॥

উজ্জয়ন্তঃ (পুং) রৈবতপর্ব্বতঃ। ইতি হেম-

উজ্জয়িনী (স্ত্রী) উজ্জয়নীনগরী। তৎপর্য্যায়ঃ। বিশালা ২ অবন্তী ৩ পুষ্করকরণ্ডিনী ৪। ইতি হেমচন্দ্রঃ॥

উজ্জাসনং (ক্লী) মারণং। বধঃ। ইত্যমরঃ॥

উজ্জৃম্ভং (ত্রি) প্রফুল্লং। প্রস্ফুটিতং। ইতি হেমচন্দ্রঃ

উজ্জৃম্ভিতং (ত্রি) প্রফুল্লং। চেষ্টায়াং ক্লী। ইতি মেদিনী॥

উজ্জ্বলং (ত্রি) দীপ্তং। বিশদং। বিকাশিতং। ইতি মেদিনী॥

উজ্জ্বলং (ক্লী) স্বর্ণং। ইতি রাজনির্ঘণ্টঃ॥

উজ্জ্বলঃ (পুং) শৃঙ্গাররসঃ। ইত্যমরঃ॥

উজ্ঝ শ ত্যাগে। ইতি কবিকল্পদ্রুমঃ॥ জোপধ ইত্যেকে। উজিজ্ঝিষতি। ঔজিজ্ঝৎ। শ উজ্ঝতী উজ্ঝন্তী। ইতি দুর্গাদাসঃ॥ অন্যৎ উদ্ঝধাতৌ দ্রষ্টব্যং॥

উজ্ঝঃ (পুং) ত্যাগঃ। বিসর্জনং॥

উজ্ঝিতং (ত্রি) উৎসৃষ্টং। ত্যক্তং। বর্জিতং। ইতি হলায়ুধঃ॥

উঞ্ছং (ক্লী) পক্ষিচঞ্চ্বাদানবৎ শস্যগ্রহণং। যথা। উপাত্তশস্যাৎ ক্ষেত্রাৎ শেষাবচয়নে। উঞ্ছেন পক্ষিচঞ্চ্বাদানবদ্গ্রহণেন শিল্যতে সঞ্চীয়তে উঞ্ছশিলং উচ্ছিগুঞ্ছে শিলগুঞ্ছে কৃত্ত্বোরিত্যুক্তেঃ কৃগৃজ্ঞেতি ইজুঙত্বাৎ কঃ উঞ্ছশিলং। সংঘাতং বিগৃহীতং বিপর্য্যস্তঞ্চ নাম। শক্যা ন চেদুঞ্ছশিলেন বৃত্তিঃ ফলেন মূলেন চ বারিণা চ। ইতি। সমাহারদ্বন্দ্বে উঞ্ছং শিলঞ্চ। উঞ্ছং ভৈক্ষঞ্চ যচ্চান্যত্তৎ পরিগ্রহণন্তু ঋতং। ইতি নিগমাভিধানে ক্লীবং। পুমানুঞ্ছঋতশিলং ইতি বোপালিতে পুংস্যুঞ্ছঃ। ভবভূতিকৃতশিলোঞ্ছে ইতি গোবর্দ্ধনঃ। কেচিদুঞ্ছশিলয়োর্ভেদমাহুঃ। প্রতিগ্রহাৎ শিলং শ্রেয়স্ততোহপ্যুঞ্ছঃ প্রশস্যতে। ইতি তত্র শাল্যাদের্নিপাতিতপরিত্যক্তমঞ্জরীণাং আদানং শিলং। শিলং ধান্যমঞ্জরীসংগ্রহঃ। ইতি স্বামী চ। একৈকশঃ কপোতবদ্ধান্যকণোদ্গ্রহণমুঞ্ছঃ। তদুক্তং উঞ্ছো ধান্যকণোচ্চয় ইতি। শিলং তালব্যাদি দন্ত্যাদি চ। ধর্ম্ম্যত্বাৎ সত্যমিতি ঋতং। ইতি উঞ্ছশিলশব্দটীকায়াং ভরতঃ॥

উঞ্ছঃ (পুং) উঞ্ছশিলং। ইতি জটাধরঃ॥

উঞ্ছনং (ক্লী) আপণাদিপতিতকণোপাদানং। ইতি শ্রীভাগবতং॥ উছন খুঁটিয়া লওন চুনিয়া লওন কুড়াইয়া লওন ইত্যাদি ভাষা॥

উঞ্ছশিলং (ক্লী) উঞ্ছবৃত্তিঃ। সা তু গৃহীতশস্যক্ষেত্রাৎ শেষাবচয়নং। তৎপর্য্যায়ঃ। ঋতং ২। ইত্যমরঃ॥ উঞ্ছসিলং ৩ উঞ্ছঃ ৪ উঞ্ছং ৫ শিলং ৬। ইতি তট্টীকা॥

উঞ্ছশীলঃ (ত্রি) উঞ্ছজীবী। উদ্ধৃতশস্যস্য শেষাহরণকর্ত্তা। ইতি পুরাণং॥ ছিচেরু ইতি ভাষা॥

উটঃ (পুং) তৃণপর্ণাদিঃ। ইত্যমরটীকায়াং ভরতঃ॥

উটজঃ ( পুং ক্লী ) মুনীনাং পত্ররচিতগৃহং। তৎপর্য্যায়ঃ। পর্ণশালা ২। ইত্যমরঃ॥ পর্ণোটজঃ ৩। ইতি শব্দরত্নাবলী॥ গৃহমাত্রং। ইত্যমরমালা॥

উঠ উপঘাতে। ইতি কবিকল্পদ্রুমঃ॥ হ্রস্বাদিঃ। ওঠতি খলঃ সাধুং। ইতি দুর্গাদাসঃ॥

উড সংহতৌ। সৌত্রধাতুরয়ং। ইতি কবিকল্পদ্রুমঃ॥ উড়ুপঃ। ইতি দুর্গাদাসঃ॥

উড়ু ( ক্লী স্ত্রী ) নক্ষত্রং। ইত্যমরঃ॥ জলে ক্লী। ইত্যমরটীকায়াং ভরতঃ॥

উড়ুপঃ ( পুং ক্লী ) ভেলকং। ভেলা মাড়্ ইত্যাদি ভাষা। তৎপর্য্যায়ঃ। প্লবঃ ২ কোলঃ৩। ইত্যমরঃ॥ ভেলকঃ ৪ উড়ুপঃ ৫ তরণঃ ৬ তারণঃ ৭ তারকঃ ৮। ইতি শব্দরত্নাবলী॥ চন্দ্রে পুং। ইতি মেদিনী॥

উড়ুপতিঃ ( পুং ) চন্দ্রঃ। ইতি পুরাণজ্যোতিষে॥

উড়ুপথঃ ( পুং ) আকাশং। ইতি হেমচন্দ্রঃ॥

উড়ুম্বরং ( ক্লী ) তাম্রং। ইতি মেদিনী॥ কর্ষপরিমাণং। ইতি বৈদ্যকপরিভাষা॥

উড়ুম্বরঃ ( পুং ) উদুম্বরবৃক্ষঃ। যজ্ঞডুমুর ইতি ভাষা। তৎপর্য্যায়ঃ। জন্তুফলঃ ২ যজ্ঞাঙ্গঃ৩ হেমদুগ্ধকঃ ৪। ইত্যমরঃ॥ ব্রহ্মবৃক্ষঃ ৫। ইতি রত্নমালা॥ হেমদুগ্ধী ৬ যজ্ঞফলঃ ৭ যজ্ঞোড়ুম্বরঃ ৮। ইতি শব্দরত্নাবলী॥ সদাফলঃ ৯ ক্ষীরবৃক্ষঃ ১০ সুচক্ষুঃ ১১ শ্বেতবল্কলঃ ১২। ইতি জটাধরঃ॥ অস্য গুণাঃ। উড়ুম্বরো হিমো রূক্ষো গুরুঃ পিত্তকফাস্রনুৎ। মধুরস্তুবরো বর্ণ্যো ব্রণশোধনরোপণঃ॥ ইতি ভাবপ্রকাশঃ॥ অন্যৎ উদুম্বরশব্দে দ্রষ্টব্যং॥ দেহলী। গোবরাটের নিচের কাঠ ইতি ভাষা। পণ্ডং। নপুংসকমিতি যাবৎ। কুষ্ঠরোগভেদঃ। ইতি মেদিনী॥

উড়ুম্বরপর্ণী ( স্ত্রী ) দন্তীবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥

উড়ূপঃ ( পুং ক্লী ) উড়ুপঃ। ভেলা ইতি ভাষা। চন্দ্রে পুং। ইতি দ্বিরূপকোষঃ॥

উড্ডয়নং ( ক্লী ) নভোগতিঃ। ওড়া ইতি ভাষা। গতো বিরুত্যোড্ডয়নে নিরাশতামিতি নৈষধঃ॥

উড্ডামরং ( ত্রি ) শ্রেষ্ঠং। তৎপর্য্যায়ঃ। উদ্ভটং ২ উত্তালং ৩। ইতি ত্রিকাণ্ডশেষঃ॥

উড্ডীনং ( ক্লী ) খগগতিক্রিয়া। পক্ষিণাং ঊর্দ্ধগমনং। ইত

উড্ডীয়মানঃ ( ত্রি ) উড্ডয়নবিশিষ্টপক্ষ্যাদিঃ। উড়ন্ত ওড়্তা ইত্যাদি ভাষা॥

উড্ডীশঃ ( পুং ) আগমশাস্ত্রবিশেষঃ। শিবঃ। ইতি মেদিনী॥

উৎ ব্য প্রশ্নঃ। বিতর্কঃ। ইতি মেদিনী॥ অত্যর্থং। সন্দেহঃ। ইতি শব্দরত্নাবলী॥

উত ব্য অত্যর্থং। বিকল্পঃ। সমুচ্চয়ঃ। বিতর্কঃ। প্রশ্নঃ। পাদপূরণং। ইতি মেদিনী॥

উতং ( ত্রি ) তন্তুসন্তানঃ। বোনা ইতি ভাষা। তৎপর্য্যায়ঃ। উতং ২ স্যূতং ৩। ইত্যমরঃ॥

উতথ্যঃ (পুং) মুনিবিশেষঃ। স চ অঙ্গিরঃপুত্রঃ। ইতি পুরাণং ॥

উতথ্যানুজঃ (পুং) বৃহস্পতিঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

উতথ্যানুজন্মা [ন্] (পুং) বৃহস্পতিঃ। ইতি ভূরিপ্রয়োগঃ ॥

উতাহো ব্য পরিপ্রশ্নঃ। বিচারঃ। ইতি মেদিনী॥ বিকল্পঃ। ইত্যমরঃ ॥

উতাহোস্বিৎ ব্য উতাহো। বিকল্পঃ। ইত্যমরটীকা॥

উৎকঃ (ত্রি) উন্মনাঃ। অন্যমনস্কঃ। ইত্যমরঃ ॥

উৎকটং (ত্রি) তীব্রং। মত্তং। ইতি মেদিনী॥ বিষমং। ইতি শব্দরত্নাবলী ॥

উৎকটং (ক্লী) গুড়ত্বক্। তেজপাত ইতি খ্যাতং ইতি কেচিৎ। ইত্যমরভরতৌ ॥ দারচিনি ইতি খ্যাতং। ইতি রাজনির্ঘণ্টঃ ॥

উৎকটঃ (পুং) মদঃ। ইতি শব্দরত্নাবলী ॥ সংজাতমদহস্তী। ইতি হারাবলী ॥ শরঃ। রক্তেক্ষুঃ। ইতি রাজনির্ঘণ্টঃ ॥

উৎকটা (স্ত্রী) সৈংহলীলতা। ইতি রাজনির্ঘণ্টঃ ॥

উৎকণ্ঠঃ (পুং) শৃঙ্গারস্য ষোড়শবন্ধান্তর্গতত্রয়োদশবন্ধঃ। আসন যস্য প্রসিদ্ধিঃ। তস্য লক্ষণং। নারীপাদৌ চ হস্তেন ধারয়েদ্গলকে পুনঃ। স্তনার্পিতকরঃ কামী বন্ধশ্চোৎকণ্ঠসংজ্ঞকঃ ॥ ইতি রতিমঞ্জরী ॥

উৎকণ্ঠা (স্ত্রী) উৎকলিকা। ইষ্টলাভে কালক্ষেপাসহিষ্ণুতা। ইত্যমরঃ ॥ কামাদিজাতস্মৃতিঃ। ইতি ভরতঃ॥ উদ্বাহুলকেন স্মরণং। ইতি মধুঃ॥ উৎকেন দয়িতস্মরণং। ইতি সুভূতিঃ॥ প্রিয়াভিলাষাদুন্মনস্কত্বং ইত্যন্যে

উৎকণ্ঠিতং (ত্রি) উৎকণ্ঠাযুক্তং। তৎপর্য্যায়ঃ। উৎকং ২ উৎসুকং ৩ উন্মনঃ ৪। ইতি হেমচন্দ্রঃ ॥

উৎকণ্ঠিতা (স্ত্রী) স্বীয়াদিনায়িকাভেদঃ। অস্যা লক্ষণং। সঙ্কেতস্থলং প্রতি ভর্ত্তুরনাগমনকারণং চিন্তয়তি যা। অস্যাশ্চেষ্টা। অরতিসন্তাপজৃম্ভাঙ্গাকুষ্ঠিকম্পরুদিতশ্বাসাবস্থাকথনাদয়ঃ। ইতি রসমঞ্জরী ॥

উৎকতা (স্ত্রী) গজপিপ্পলী। ইতি শব্দচন্দ্রিকা ॥ উৎকস্য ভাবঃ। উৎকণ্ঠা ॥

উৎকরঃ (পুং) ধান্যাদিরাশিঃ। স্তূপঃ। ইত্যমরঃ॥

উৎকর্ষঃ (পুং) অতিশয়ঃ। ইত্যমরঃ ॥ অতিশয়যুক্তে ত্রি॥ স্বকালাৎ পরকালকর্ত্তব্যঃ। ইতি স্মৃতিঃ ॥

উৎকলঃ (পুং) ওড্রদেশঃ। উড়িশ্যা ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ॥ ব্যাধঃ। পাখিমারা ইতি ভাষা। ইতি শব্দমালা ॥

উৎকলং (ত্রি) ভারবাহকং। মুটে ইতি ভাষা। ইতি শব্দমালা ॥

উৎকলিকা (স্ত্রী) উৎকণ্ঠা। ইত্যমরঃ ॥ কলিকা। ইতি ত্রিকাণ্ডশেষঃ॥ তরঙ্গঃ। হেলা। ইতি হেমচন্দ্রঃ ॥

উৎকলিতঃ (ত্রি) উন্মনাঃ। বুদ্ধিমান্। ইতি ধরণী ॥

উৎকা (স্ত্রী) উৎকণ্ঠিতানায়িকা। ইতি রসমঞ্জরী ॥

উৎকাকা (স্ত্রী) প্রতিবর্ষপ্রসূতাগৌঃ। ইতি শব্দচন্দ্রিকা ॥

উৎকারঃ (পুং) ধান্যোৎক্ষেপণং। তৎপর্য্যায়ঃ। নিকারঃ ২। ইত্যমরঃ॥ ধান সারা ইতি ভাষা। ধান্যস্য রাশীকরণং বা। ইতি ভরতঃ॥

উৎকুটং (ক্লী) উত্তানশয়নং। চিৎ হইয়া শোয়া ইতি ভাষা। ইতি হারাবলী॥

উৎকুণঃ (পুং) কেশকীটঃ। উকুণ ইতি ভাষা। তৎপর্য্যায়ঃ। মৎকুণঃ ২ কোণকুণঃ ৩ উদ্দংশঃ ৪ কির্টিভঃ ৫। ইতি হেমচন্দ্রঃ॥

উৎকূটঃ (পুং) ছত্রং। ইতি হারাবলী॥

উৎকৃষ্টং (ত্রি) উৎকর্ষবিশিষ্টং। অতিশয়যুক্তং। প্রকৃষ্টং। প্রশস্তং। যথা। উৎকৃষ্টমধ্যমনিকৃষ্টজনেষু মৈত্রী যদ্বৎ শিলাসু সিকতাসু জলেষু রেখা। বৈরং ক্রমাদধমমধ্যমসজ্জনেষু যদ্বৎ শিলাসু সিকতাসু জলেষু রেখা॥ ইত্যুদ্ভটঃ॥

উৎকৃষ্টভূমঃ (পুং) প্রশস্তভূমিঃ। ইতি জটাধরঃ॥

উৎকোচঃ (পুং স্ত্রী) ঘুস্ ইতি খ্যাতঃ। তৎপর্য্যায়ঃ। প্রাভৃতং ২ ঢৌকনং ৩ লম্বা ৪ কোশলিকং ৫ আমিষং ৬ উপাচ্চারঃ ৭ প্রদা ৮ আনন্দা ৯ হারঃ ১০ গ্রাহ্যং ১১ অয়নং ১২। ইতি হেমচন্দ্রঃ॥ উপদানকং ১৩। ইতি ত্রিকাণ্ডশেষঃ॥ অপপ্রদানং ১৪। ইতি ভূরিপ্রয়োগঃ॥

উৎক্রমঃ (পুং) ব্যতিক্রমঃ। বিপরীতিঃ। তৎপর্য্যায়ঃ। ব্যুৎক্রমঃ ২ অক্রমঃ ৩। ইতি হেমচন্দ্রঃ॥

উৎক্রোশঃ (পুং স্ত্রী) কুররপক্ষী। ইত্যমরঃ॥

উৎখলা (স্ত্রী) মুরানাম গন্ধদ্রব্যং। তৎপর্য্যায়ঃ। তালপর্ণী ২ তালপর্ণং ৩ তালাখ্যা ৪ খশা ৫। ইতি শব্দচন্দ্রিকা॥

উৎখাতং (ত্রি) উন্মূলিতং। উপ্ড়ান ইতি ভাষা। ইতি জটাধরঃ॥

উত্তং (ত্রি) আর্দ্রবস্তু। ইত্যমরঃ॥

উত্তংসঃ (পুং) কর্ণপূরঃ। কর্ণাভরণং। শেখরঃ। শিরোভূষণং। ইত্যমরঃ॥ মতান্তরে ক্লীবলিঙ্গোঽপি॥

উত্তপ্তং (ক্লী) শুষ্কমাংসং। ইত্যমরঃ॥

উত্তপ্তঃ (ত্রি) তপ্তঃ। সন্তপ্তঃ। পরিপ্লুতঃ। স্নাতঃ। ইতি মেদিনী॥

উত্তভিতং (ত্রি) উন্নমিতং। ইতি শ্রীভাগবতং॥

উত্তমঃ (ত্রি) ভদ্রঃ। উৎকৃষ্টঃ। তৎপর্য্যায়ঃ। প্রধানং ২ প্রমুখঃ ৩ প্রবেকঃ ৪ অনুত্তমঃ ৫ মুখ্যঃ ৬ বর্য্যঃ ৭ বরেণ্যঃ ৮ প্রবর্হঃ ৯ অনবরার্দ্ধ্যঃ ১০ পরার্দ্ধ্যঃ ১১ অগ্রঃ ১২ প্রাগ্রহরঃ ১৩ প্রাগ্র্যঃ ১৪ অগ্র্যঃ ১৫ অগ্রীয়ঃ ১৬ অগ্রিয়ঃ ১৭। ইত্যমরঃ॥ মুখঃ ১৮ অগ্রণীঃ ১৯। ইতি তট্টীকা॥

উত্তমঃ (পুং) বৈশিকনামনায়কভেদঃ। তস্য লক্ষণং। দয়িতাশ্রমপ্রকোপেঽপি উপচারপরায়ণঃ। ইতি রসমঞ্জরী॥ প্রিয়ব্রতরাজপুত্রঃ। স চ তৃতীয়মনুঃ। অস্মিন্ মন্বন্তরে সত্যসেনোঽবতারঃ। সত্যজিদিন্দ্রঃ। সত্যবেদশ্রুতভদ্রাদয়ো দেবাঃ। বশিষ্ঠসুতাঃ প্রমদাদয়ঃ সপ্তর্ষয়ঃ।

পবনস্থঞ্জয়যজ্ঞহোত্রাদ্যা মনুপুত্রাঃ। ইতি শ্রীভাগবতং॥

উত্তমফলিনী (স্ত্রী) দুগ্ধিকাবৃক্ষঃ। ক্ষীরাই ইতি ভাষা। ইতি রত্নমালা॥

উত্তমর্ণঃ (পুং) ঋণদাতা। মহাজন ইতি ভাষা। ইত্যমরঃ॥ তৎপর্য্যায়ঃ। ঋণদঃ ২। ইতি জটাধরঃ॥

উত্তমসংগ্রহঃ (পুং) সম্যক্‌সংগ্রহণং। তত্তু নির্জনে পরভার্য্যয়া সহ কেশাকেশি-পরস্পরালিঙ্গনসহাসনাদিরূপমিথুনীভাবঃ। ইতি মিতাক্ষরা॥

উত্তমসাহসঃ (পুং) দণ্ডবিশেষঃ। স তু সাশীতি-পণসাহস্রঃ। যথা। সাশীতিপণসাহস্রো দণ্ড উত্তমসাহসঃ। ইতি যাজ্ঞবল্ক্যঃ॥ সহস্রপণমিতোঽপি। যথা। পণানাং দ্বেশতে সার্দ্ধে প্রথমঃ সাহসঃ স্মৃতঃ। মধ্যমঃ পঞ্চবিজ্ঞেয়ঃ সহস্রং ত্বেব চোত্তমঃ॥ ইতি মনুঃ॥

উত্তমা (স্ত্রী) উৎকৃষ্টানারী। তৎপর্য্যায়ঃ। বরারোহা ২ মত্তকাশিনী ৩ বরবর্ণিনী ৪। ইত্যমরঃ॥ মত্তকাষিণী ৫ মত্তকাসিনী ৬। ইতি তট্টীকা॥ দুগ্ধিকাবৃক্ষঃ। ইতি মেদিনী॥ স্বীয়াদিনায়িকাভেদঃ। অস্যা লক্ষণং। অহিতকারিণ্যপি প্রিয়ে হিত-কারিণী। অস্যাশ্চেষ্টা উত্তমা এব। ইতি রসমঞ্জরী॥

উত্তমাঙ্গং (ক্লী) মস্তকং। ইত্যমরঃ॥

উত্তমারণী (স্ত্রী) ইন্দীবরী। ইতি রাজনির্ঘণ্টঃ॥

উত্তরং (ক্লী) প্রতিবাক্যং। ইত্যমরঃ॥ জবাব ইতি যাবনী ভাষা। তস্য ব্যুৎপত্তিঃ। উত্তীর্য্যতে নিস্তীর্য্যতে প্রকৃতাভিযোগো-ঽনেন। তস্য স্বরূপং। পক্ষস্য ব্যাপকং সারমসন্দিগ্ধমনাকুলং। অব্যাখ্যাগম্য মিত্যেবমুত্তরং তদ্বিদো বিদুঃ॥ তস্য ভেদাঃ। মিথ্যা সম্প্রতিপত্তিশ্চ প্রত্য-বস্কন্দনং তথা। প্রাঙ্ন্যায়শ্চোত্তরাঃ প্রোক্তাশ্চত্বারঃ শাস্ত্রবেদিভিঃ॥ ইতি নারদঃ॥

উত্তরঃ (পুং) বিরাটরাজপুত্রঃ। ইতি হেম-চন্দ্রঃ॥

উত্তরঃ (ত্রি) ঊর্দ্ধঃ। উদীচী। উত্তমঃ। ইতি মেদিনী অমরশ্চ॥ অনন্তরং॥

উত্তরকালঃ (পুং) ভবিষ্যৎকালঃ। গৌণ-কালঃ। যথা। এবমাগামিযাগীয়মুখ্য-কালাদধস্তনঃ। স্বকালাদুত্তরো গৌণঃ কালঃ পূর্ব্বস্য কর্ম্মণঃ॥ ইতি হরিহরপদ্ধতিঃ॥

উত্তরকুরুঃ (স্ত্রী) জম্বুদ্বীপস্য নববর্ষান্তর্গতবর্ষ-বিশেষঃ। ইতি ত্রিকাণ্ডশেষঃ॥

উত্তরকোশলা (স্ত্রী) অযোধ্যানগরী। ইতি ত্রিকাণ্ডশেষঃ॥

উত্তরক্রিয়া (স্ত্রী) অন্তিমক্রিয়া। সাম্বৎসরিক-শ্রাদ্ধাদিপিত্র্যক্রিয়া। যথা। প্রেতে পিতৃত্বমাপন্নে সপিণ্ডীকরণাদনু। ক্রিয়ন্তে যাঃ ক্রিয়াঃ পিত্র্যাঃ প্রোচ্যন্তে তা নৃপো-ত্তরাঃ॥ ইতি বিষ্ণুপুরাণং॥

উত্তরঙ্গং (ক্লী) দ্বারোর্দ্ধবক্রদারু। ইতি হেম-চন্দ্রঃ॥ উদ্গততরঙ্গে ত্রি॥

উত্তরণং (ক্লী) নদ্যাদিপারগমনং। উতরণ ইতি ভাষা॥

উত্তরতঃ [স্] ব্য উত্তরদিগ্দেশকালাৎ।

উত্তরহইতে ইতি ভাষা। ইতি রায়মুকুটঃ ॥

**উত্তরতারং** ( ক্লী ) উত্তরতীরং। ইতি সিদ্ধান্তকৌমুদী ॥

**উত্তরপক্ষঃ** ( পুং ) বিচারসিদ্ধান্তঃ। সমাধানং। তৎপর্য্যায়ঃ। সিদ্ধান্তঃ২ সমাধিঃ৩ কৃতান্তঃ ৪। ইতি ত্রিকাণ্ডশেষঃ ॥ সিদ্ধান্তানুকূলতর্কোপন্যাসঃ। ইতি স্মৃতিঃ ॥

**উত্তরপাদঃ** ( পুং ) চতুষ্পাদব্যবহারান্তর্গতদ্বিতীয়পাদঃ। উত্তরং। ইতি ব্যবহারতত্ত্বং ॥

**উত্তরফল্গুনী** ( স্ত্রী ) অশ্বিন্যাদিসপ্তবিংশতিনক্ষত্রান্তর্গতদ্বাদশনক্ষত্রং। অস্যা রূপং। দক্ষিণোত্তরমিলিততারকাদ্বয়ং। ইতি কালিদাসঃ ॥ পর্য্যঙ্করূপং তারকাদ্বয়ং। ইতি দীপিকাটীকা ॥ অস্যা অধিষ্ঠাত্রী দেবতা অর্য্যমা। অস্যা মিশ্রগুণঃ। অস্যাং জাতফলং। দাতা দয়ালুঃ স্বজনে সুশীলো বিশালকীর্ত্তিঃ সুমতিঃ প্রধানঃ। ধীরো নরো হ্যত্যন্তমৃদুস্বভাবশ্চেদুত্তরাফল্গুনিকাপ্রসূতিঃ ॥ ইতি কোষ্ঠীপ্রদীপঃ ॥

**উত্তরফাল্গুনী** (স্ত্রী) উত্তরফল্গুনীনক্ষত্রং। তৎপর্য্যায়ঃ। উত্তরা ২ অর্য্যমদেবা ৩। ইতি হেমচন্দ্রঃ ॥

**উত্তরভাদ্রপৎ** [ দ্ ] ( স্ত্রী ) উত্তরভাদ্রপদানক্ষত্রং। ইতি জ্যোতিষং ॥

**উত্তরভাদ্রপদা** ( স্ত্রী ) অশ্বিন্যাদিসপ্তবিংশতিনক্ষত্রান্তর্গতষড়্বিংশনক্ষত্রং। তৎপর্য্যায়ঃ। প্রোষ্ঠপদা ২ অহির্ব্রধ্নদেবতা ৩। ইতি হেমচন্দ্রঃ ॥ অস্যা রূপং। উত্তরে সুমুখি তারমূর্ত্তিভৃত্যুত্তমাঙ্গমিলিতদ্বিতারকে। নীলচামরকচে নৃযুগ্মতো লোচনাচলকলাঃ পলায়িতাঃ ॥ ইতি কালিদাসঃ ॥ পর্য্যঙ্করূপমষ্টতারাত্মকং। ইতি দীপিকাটীকা ॥ অস্যাং জাতফলং। ধনী কুলীনঃ কুশলঃ ক্রিয়াদৌ ভূপালমান্যো বলবান্ মহৌজাঃ। সৎকর্ম্মকর্ত্তা নিজবন্ধুভক্তো যদ্যুত্তরাভাদ্রপদাপ্রসূতঃ ॥ ইতি কোষ্ঠীপ্রদীপঃ ॥

**উত্তরবাদী** [ ন্ ] ( ত্রি ) উত্তরবক্তা। আসামী ইতি ভাষা। ইতি ব্যবহারতত্ত্বং ॥

**উত্তরসাক্ষী** [ ন্ ] ( ত্রি ) স্বপক্ষসম্বন্ধিসাক্ষ্যং পরিভাষতাং সাক্ষিণাং যঃ স্বয়ং শৃণোতি অর্থিনা শ্রাব্যতে বা সঃ। তথাচ নারদঃ। সাক্ষিণামপি যঃ সাক্ষ্যং স্বপক্ষং পরিভাষতাং। শ্রবণাৎ শ্রাবণাদ্বাপি স সাক্ষ্যুত্তরসংজ্ঞকঃ ॥ পরসাক্ষী ইতি ভাষা। ইতি ব্যবহারতত্ত্বং ॥

**উত্তরসাধকঃ** ( ত্রি ) সাধকসহায়ঃ। সহকারী ॥

**উত্তরা** ( স্ত্রী ) বিরাটরাজকন্যা। সাভিমন্যুপত্নী। ইতি মেদিনী ॥ উত্তরাদিক্। তৎপর্য্যায়ঃ। কৌবেরী ২ দেবী ৩ উদীচী ৪। ইতি রাজনির্ঘণ্টঃ ॥ অস্যা দিশোঽধিপতিঃ কুবেরঃ কর্কটবৃশ্চিকমীনরাশয়শ্চ। যথা। মেষসিংহধনুঃ প্রাচ্যাং দক্ষিণস্যাস্তু তৎপরে। প্রতীচ্যাং তৎপরে জ্ঞেয়া উদীচ্যাঞ্চ ততঃ পরে ॥ ইতি সময়প্রদীপঃ ॥

**উত্তরাৎ** ব্য উত্তরাদিক্। ইত্যমরটীকায়াং রায়মুকুটঃ ॥

**উত্তরাধিকারী** [ ন্ ] ( ত্রি ) প্রথমাধিকারিণঃ

পশ্চাদধিকারী। দায়াদঃ। ওয়ারিস্ ইতি যাবনী ভাষা॥

উত্তরাভাসঃ ( পুং ) দুষ্টোত্তরং । তথাচ কাত্যায়নঃ। প্রকৃতেন ত্বসম্বন্ধমত্যল্পমতিভূরি চ। পক্ষৈকদেশব্যাপ্যেব তচ্চ নৈবোত্তরং ভবেৎ॥ ইতি ব্যবহারতত্ত্বং॥

উত্তরায়ণং (ক্লী) সূর্য্যস্য উত্তরদিগ্‌গমনকালঃ। স তু মাঘাদিষণ্মাসাত্মকঃ। ইতি হেমচন্দ্রঃ॥ দেবানাং দিনং। ইতি স্মৃতিঃ॥

উত্তরাশাঢ়া (স্ত্রী) উত্তরাষাঢ়ানক্ষত্রং। ইতি ভরতো দ্বিরূপকোষশ্চ॥

উত্তরাশাপতিঃ (পুং) কুবেরঃ। ইতি হলায়ুধঃ॥

উত্তরাষাঢ়া (স্ত্রী) অশ্বিন্যাদিসপ্তবিংশতিনক্ষত্রান্তর্গতৈকবিংশনক্ষত্রং। অস্যা রূপং। সূর্পাকৃতিতারাচতুষ্টয়াত্মকং। অস্যা অধিদেবতা বিশ্বঃ। ইতি কালিদাসঃ॥ গজদন্তবদষ্টতারাময়ং। ইতি দীপিকাটীকা॥ তত্র জাতফলং। দাতা দয়াবান্ বিজয়ী বিনীতঃ সৎকর্ম্মচেতা বিভবৈঃ সমেতঃ। কান্তাসুতাবাপ্তসুখো নিতান্তং বৈশ্বে সুবেশঃ পুরুষো মনীষী॥ ইতি কোষ্ঠীপ্রদীপঃ॥

উত্তরাসঙ্গঃ (পুং) উত্তরীয়বস্ত্রং। ইত্যমরঃ॥

উত্তরীয়ং (ক্লী) উত্তরীয়বস্ত্রং। দোছোট্ দোব্জা ইত্যাদি ভাষা। তৎপর্য্যায়ঃ। প্রাবারঃ ২ উত্তরাসঙ্গঃ ৩ বৃহতিকা ৪ সংব্যানং ৫। ইত্যমরঃ॥ কক্ষা ৬। ইতি জটাধরঃ॥

উত্তরেণ ব্য উত্তরদিগ্দেশকালঃ। ইত্যমরটীকায়াং রায়মুকুটঃ॥

উত্তরেদ্যুঃ [স্] ব্য উত্তরস্মিন্নহনি। আগামিদিনে। ইতি শব্দরত্নাবলী॥

উত্তানং (ত্রি) অগম্ভীরং। ঊর্দ্ধমুখশয়িতং। চিৎ ইতি ভাষা। ইতি মেদিনী॥

উত্তানকঃ (পুং) উচ্চটাতৃণং। ইতি রত্নমালা॥

উত্তানপত্রকঃ (পুং) রক্তেরণ্ডবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

উত্তানপাদঃ (পুং) রাজবিশেষঃ। স তু স্বায়ম্ভুবমনুপুত্রঃ। ইতি পুরাণং॥

উত্তানপাদজঃ (পুং) উত্তানপাদরাজপুত্রঃ। তৎপর্য্যায়ঃ। জ্যোতীরথঃ ২ গ্রহাধারঃ ৩ ধ্রুবঃ ৪। ইতি হারাবলী॥

উত্তানশয়ঃ (ত্রি) অত্যন্তশিশুঃ। তৎপর্য্যায়ঃ। ডিম্ভা ২ স্তনপা ৩ স্তনন্ধয়ী ৪। ইত্যমরঃ॥ উত্তানসুপ্তঃ॥

উত্তাপঃ (পুং) তেজঃ। উষ্মা। সন্তাপঃ॥

উত্তারঃ (ত্রি) মহান্। তৎপর্য্যায়ঃ। উদীর্ণঃ ২ উদ্ভটঃ ৩ উদারঃ ৪ উত্তমরঃ ৫। ইতি জটাধরঃ॥ বমনং। ইতি প্রায়শ্চিত্তবিবেকাদয়ঃ॥

উত্তারী [ন্] (ত্রি) চপলঃ। ইতি ভূরিপ্রয়োগঃ॥

উত্তালঃ (ত্রি) উৎকটঃ। শ্রেষ্ঠঃ। বিকরালঃ। প্লবঙ্গমঃ। ইতি মেদিনী॥ ত্বরিতঃ। ইতি হেমচন্দ্রঃ॥

উত্তীর্ণং (ত্রি) মুক্তং। পারগতং॥

উত্তুঙ্গঃ (ত্রি) উচ্চঃ। ইতি জটাধরঃ॥

উত্তুষঃ (পুং) ভৃষ্টধান্যং। তৎপর্য্যায়ঃ। খাজিকঃ ২ লাজাঃ ৩। খই ইতি ভাষা। ইতি হারাবলী॥

উত্তেজনা ( স্ত্রী ) প্রেরণা। ব্যগ্রকরণং॥
উত্তেজিতং ( ক্লী ) অশ্বচতুর্থগতিঃ। সা চ মধ্যবেগেন যা গতিঃ। তৎপর্য্যায়ঃ। রেচিতং ২। ইতি হেমচন্দ্রঃ॥ প্রেরিতে ত্রি॥
উত্তেরিতং ( ক্লী ) অশ্বপঞ্চমগতিঃ। তৎপর্য্যায়ঃ। উপকণ্ঠং ২ আস্কন্দিতকং ৩। ইতি হেমচন্দ্রঃ॥
উত্তোলনং ( ক্লী ) ঊর্দ্ধনয়নং। তোলা। ইতি ভাষা॥
উত্ত্যক্তঃ ( ত্রি ) পরিত্যক্তঃ। ঊর্দ্ধক্ষিপ্তঃ। বিরক্তঃ॥
উত্ত্রাসঃ ( পুং ) ভয়ং। ইতি শব্দরত্নাবলী॥
উত্থানং ( ক্লী ) সৈন্যং। যুদ্ধং। পৌরুষং। পুস্তকং। উদ্যমঃ। উদ্গমঃ। হর্ষঃ। বাস্তুস্তঃ। অঙ্গনং। চৈত্যঃ। মলোৎসর্গঃ। ইতি হেমচন্দ্রঃ॥ তন্ত্রং। তন্তু স্বমণ্ডলং। সৈন্যং চিন্তা চ। সন্নিবিষ্টঃ। উপবিষ্টঃ। ইত্যমরভরতৌ॥ গাত্রোত্তোলনং। উঠন ইতি ভাষা। যথা। নিশি স্বাপো দিবোত্থানং সন্ধ্যায়াং পরিবর্ত্তনং। অন্যত্র পাদযোগেঽপি দ্বাদশ্যামেব কারয়েৎ॥ ইতি তিথ্যাদিতত্ত্বং॥
উত্থানৈকাদশী ( স্ত্রী ) কার্ত্তিকশুক্লৈকাদশী। অথ বিষ্ণুত্থানং। তত্র দিবসে রেবত্যন্তযুক্তায়াং দ্বাদশ্যাং। রাত্রৌ রেবত্যন্তপাদযোগে তু দিবাতৃতীয়ভাগে রেবতীযুক্তদ্বাদশ্যাং। দ্বাদশ্যামুক্তাভাবে একাদশীপ্রভৃতিপৌর্ণমাস্যন্তান্যতমতিথৌ রেবত্যন্তপাদযোগে। তদভাবে কেবলায়াং দ্বাদশ্যাং সন্ধ্যায়াং বিষ্ণুং সংপূজ্য। ওঁ মহেন্দ্ররুদ্রৈরভিনূয়মানো ভবানৃষির্বন্দিতবন্দনীয়ঃ। প্রাপ্তা তবেয়ং কিল কৌমুদাখ্যা জাগৃষ্ব জাগৃষ্ব চ লোকনাথ॥ মেঘা গতা নির্ম্মল এষ চন্দ্রঃ শারদ্যপুষ্পাণি চ লোকনাথ। অহং দদানীতি চ পুণ্যহেতোর্জাগৃষ্ব জাগৃষ্ব চ লোকনাথ॥ ততশ্চ। উত্তিষ্ঠোত্তিষ্ঠ গোবিন্দ ত্যজ নিদ্রাং জগৎপতে। ত্বয়া চোত্থীয়মানেন উত্থিতং ভুবনত্রয়ং॥ ইতি পঠেৎ। ইতি কৃত্যতত্ত্বং
উত্থাপনং (ক্লী) উত্তোলনং। উপস্থিতীকরণং॥
উত্থিতং ( ত্রি ) বৃদ্ধিমৎ। প্রোদ্যতং। উৎপন্নং। ইত্যমরমেদিনীকরৌ॥
উত্থিতাঙ্গুলিঃ ( পুং ) চপেটঃ। বিস্তৃতাঙ্গুলিকরতলঃ। চাপড় ইতি ভাষা। ইতি শব্দচন্দ্রিকা॥
উৎপতঃ ( পুং ) পক্ষী। ইতি ত্রিকাণ্ডশেষঃ॥
উৎপতনং ( ক্লী ) উৎপত্তিঃ। ঊর্দ্ধগমনং। ইতি মেদিনী॥
উৎপতিতা [ ঋ ] ( ত্রি ) ঊর্দ্ধগমনশীলঃ। উপরিগমনকর্ত্তা। ইত্যমরঃ॥
উৎপতিষ্ণুঃ (ত্রি) ঊর্দ্ধগমনশীলঃ। তৎপর্য্যায়ঃ। উৎপতিতা ২। ইত্যমরঃ॥
উৎপত্তিঃ ( স্ত্রী ) উৎপতনং। তৎপর্য্যায়ঃ। জন্মঃ ২ জননং ৩ জন্ম ৪ জনিঃ ৫ উদ্ভবঃ ৬। ইত্যমরঃ॥ সংসারঃ ৭ ভবঃ ৮ জাতিঃ ৯। ইতি জটাধরঃ॥ প্রভবঃ ১০ ভাবঃ ১১ সম্ভবঃ ১২ জনুঃ ১৩ ইতি শব্দরত্নাবলী॥

উৎপন্নঃ (ত্রি) উৎপত্তিবিশিষ্টঃ। জাতঃ। উদ্ভূতঃ॥

উৎপলং (ক্লী) নীলকমলং। কুষ্ঠৌষধিঃ। ইতি বিশ্বঃ॥ পুষ্পং। ইতি মেদিনী॥ জলজপুষ্পমাত্রং। তচ্চ পদ্মকুমুদাদি। তৎপর্য্যায়ঃ। কুবলয়ং ২। ইত্যমরঃ॥ কুবলং ৩। ইতি জটাধরঃ॥ কুবেলং ৪। ইতি শব্দরত্নাবলী॥ তস্য গুণাঃ। কষায়ত্বং। মধুরত্বং। শীতত্বং। পিত্তকফরক্তনাশিত্বঞ্চ। ইতি রাজবল্লভঃ॥ জলপুষ্পবিশেষঃ। কোঞি ইতি হিন্দী ভাষা। তৎপর্য্যায়ঃ। অম্বুঞ্জং ২ রাত্রিপুষ্পং ৩ জলাহ্বয়ং ৪ হিমাজং ৫ নিশাপুষ্পং ৬। অস্য গুণাঃ। শীতত্বং। স্বাদুত্বং। পিত্তরক্তার্ত্তিদোষনাশিত্বং। দাহশ্রমবমিভ্রান্তিকৃমিজ্বরহরত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

উৎপলঃ (ত্রি) মাংসশূন্যঃ। ইতি বিশ্বঃ হেমচন্দ্রশ্চ॥

উৎপলগন্ধিকং (ক্লী) চন্দনবিশেষঃ। তৎপর্য্যায়ঃ। কৃষ্ণতাম্রং ২ গোশীর্ষং ৩। ইতি শব্দমালা॥

উৎপলপত্রং (ক্লী) কুবলয়দলং। স্ত্রীনখক্ষতং। ইতি হেমচন্দ্রঃ॥ তিলকং। ইতি ধরণী॥

উৎপলশারিবা (স্ত্রী) শ্যামলতা। ইত্যমরঃ॥

উৎপলিনী (স্ত্রী) পদ্মসমূহঃ। ইতি শব্দরত্নাবলী॥ জলপুষ্পবিশেষঃ। ছোটী কোঞি ইতি হিন্দী ভাষা। তৎপর্য্যায়ঃ। কৈরবিণী ২ কুমুদ্বতী ৩ কুমুদিনী ৪ চন্দ্রেষ্টা ৫ কুবলয়িনী ৬ ইন্দীবরিণী ৭ নীলোৎপলিনী ৮। অস্যা গুণাঃ। হিমত্বং। তিক্তত্বং। রক্তাময়পিত্তনাশিত্বং। বাতকফকাসতৃষ্ণাশ্রমবমিশমতাকারিত্বঞ্চ। তস্যা বীজগুণাঃ। স্বাদুত্বং। রূক্ষত্বং। হিমত্বং। গুরুত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

উৎপলী (স্ত্রী) তুষচর্পটী। তুঁষের চাপ্‌ড়া ইতি ভাষা। ইতি মেদিনী॥

উৎপবনং (ক্লী) কুশণ্ডিকায়াং পবিত্রমধ্যেন জলাদেরুৎক্ষেপণং। তত্র ক্রমঃ। পবিত্রদ্বয়মগ্রে বামহস্তানামিকাঙ্গুষ্ঠাভ্যাং মূলে দক্ষিণহস্তানামিকাঙ্গুষ্ঠাভ্যাং উত্তানহস্তাভ্যাং গৃহীত্বা আজ্যে প্রক্ষিপ্য তয়োর্মধ্যে নাগ্রাবাজ্যোৎক্ষেপণং। ইতি কালেসিঃ॥ পবিত্রদ্বয়মগ্রে দক্ষিণহস্তানামিকাঙ্গুষ্ঠাভ্যাং মূলে বামহস্তানামিকাঙ্গুষ্ঠাভ্যাং গৃহীত্বা দক্ষিণহস্তোপরিভাবেন অধোমুখো ব্যস্তপাণিঃ পবিত্রমধ্যেন প্রোক্ষণীজলস্য কিঞ্চিদুত্তোলনং। ইতি পশুপতিঃ॥ পশুপত্যুক্তক্রমেণ সামগানাং মন্ত্রোচ্চারণপূর্ব্বকং পবিত্রদ্বয়মধ্যেনাগ্রাবাজ্যোৎক্ষেপণং॥ ইতি ভবদেবভট্টঃ॥

উৎপশ্যঃ (ত্রি) উন্মুখঃ। ঊর্দ্ধদৃষ্টিবিশিষ্টঃ। ইতি হেমচন্দ্রঃ॥

উৎপাটনং (ক্লী) উলনং। মূল উপ্‌ড়ান ইতি ভাষা॥

উৎপাটিতং (ত্রি) কৃতোৎপাটনং। তৎপর্য্যায়ঃ। উন্মূলিতং ২ উৎখাতং ৩। ইতি জটাধরঃ॥ আবর্হিতং ৪ উদ্ধৃতং ৫। ইতি হেমচন্দ্রঃ॥

উৎপাতঃ (পুং) উৎপততি অকস্মাদায়াতি

যঃ। প্রাণিনাং শুভাশুভসূচকমহাভূত-বিকারভূকম্পাদিঃ। ইত্যমরটীকায়াং ভরতঃ॥ তৎপর্য্যায়ঃ। অজন্যং ২ উপ-সর্গঃ ৩। ইত্যমরঃ॥ স ত্রিবিধঃ। দিব্যঃ ১ যথা অপর্ব্বণি চন্দ্রাদিত্যগ্রাসাদিঃ। আন্ত-রীক্ষ্যঃ ২ যথা উল্কাপাতনির্ঘাতাদিঃ। ভৌমঃ৩ যথা ভূকম্পাদিঃ। ইতি দীপিকা-চণ্ডীটীকে॥

উৎপাদকঃ (পুং) পশুবিশেষঃ। তৎপর্য্যায়ঃ। শরভঃ ২ কুঞ্জরারাতিঃ ৩ অষ্টপাদঃ ৪। ইতি হেমচন্দ্রঃ॥

উৎপাদকঃ (ত্রি) উৎপাদয়িতা। জনকঃ। তথাচ স্মৃতিঃ। উৎপাদকব্রহ্মদাত্রোর্গরী-য়ান্ ব্রহ্মদঃ পিতা॥

উৎপাদনং (ক্লী) জননং। উৎপন্নকরণং। ইতি ব্যাকরণং॥

উৎপাদশয়নঃ (পুং স্ত্রী) টিট্টিভপক্ষী। ইতি হেমচন্দ্রঃ॥

উৎপাদিকা (স্ত্রী) দেহিকানাম কীটঃ। ইতি ত্রিকাণ্ডশেষঃ॥ হিলমোচিকা ইতি শব্দ-চন্দ্রিকা॥ পূতিকা। ইতি ভরতো দ্বিরূপ-কোষশ্চ॥

উৎপালী (স্ত্রী) আরোগ্যং। ইতি শব্দ-চন্দ্রিকা॥

উৎপিঞ্জলঃ (ত্রি) ভৃশমাকুলঃ। অতিশয়-ব্যাকুলঃ। তৎপর্য্যায়ঃ। সমুৎপিঞ্জঃ ২ পিঞ্জলঃ ৩। ইতি হেমচন্দ্রঃ॥

উৎপ্রেক্ষা (স্ত্রী) অনবধানং। ইতি মেদিনী॥ কাব্যালঙ্কারবিশেষঃ। তস্য লক্ষণং। সম্ভা-বনমথোৎপ্রেক্ষা প্রকৃতস্য সমেন যৎ। অস্যার্থঃ। প্রকৃতস্য উপমেয়স্য সমেন উপমানেন যৎ সম্ভাবনং মিথ্যাত্বেন বর্ণনং। ইতি কাব্যপ্রকাশঃ॥

উৎপ্লবনং (ক্লী) উল্লম্ফনং। লাফান ইতি ভাষা॥

উৎপ্লবা (স্ত্রী) নৌকা। ইতি শব্দরত্না-বলী॥

উৎফালঃ (পুং) লম্ফঃ॥

উৎফুল্লঃ (ত্রি) প্রফুল্লঃ। বিকসিতঃ। ইত্য-মরঃ॥ স্ত্রীণাং করণং। উত্তানং। ইতি মেদিনী॥

উৎসঃ (পুং) প্রস্রবণং। উনই ইতি ভাষা। ইত্যমরঃ॥ যত্র স্থানে স্রুত্বা জলং গলতি তত্র। ইতি ভরতঃ॥ স্বাম্যাদয়স্তু অবি-চ্ছেদেন স্রবজ্জলং যত্র স্থানে পততি নিপত্য চ বহুলীভবতি তত্রেত্যাহুঃ। গিরে-রুপরি নির্ঝরাদিপ্রভবজলসংঘাতে। ইতি সাঞ্জঃ॥ অজস্রং মন্দবেগেন স্রবজ্জলে ইতি কোক্কটঃ॥

উৎসঙ্গঃ (পুং) ক্রোড়ং। ইতি জটাধরঃ॥

উৎসর্গঃ (পুং) ত্যাগঃ। দানং। বর্জ্জনং। সামান্যবিধিঃ। ইতি হেমচন্দ্রঃ॥ সাগ্নি-কর্ত্তব্যক্রিয়াবিশেষঃ। ইতি তিথ্যাদি-তত্ত্বং। অথ বৈধোৎসর্গবিধিঃ। স্নান-সন্ধ্যাচমনানি কৃত্বা নারায়ণনবগ্রহগুরূন্ সংপূজ্য দেয়দ্রব্যং বামহস্তেন ধৃত্বা দক্ষিণ-হস্তেন ত্রিরভ্যর্চ্চ্য তদ্দ্রব্যাধিপতিদেবতাং সম্প্রদানঞ্চ অর্চ্চয়িত্বা সংকল্প্য কুশতিল-জলত্যাগপূর্ব্বকদানং। ইতি স্মৃতিঃ॥

উৎসর্জনং (ক্লী) উৎসর্গঃ। তৎপর্য্যায়ঃ।

ত্যাগঃ ২ বিহাপিতং ৩ দানং ৪ বিসর্জ্জনং ৫ বিশ্রাণনং ৬ বিতরণং ৭ স্পর্শনং ৮ প্রতিপাদনং ৯ প্রাদেশনং ১০ নির্ব্বপণং ১১ অপবর্জনং ১২ অংহতিঃ ১৩। ?ত্য

উৎসর্পিণী (স্ত্রী) জিনানাং কালবিশেষঃ যথা। কালো দ্বিবিধোঽবসর্পিণ্যুৎসর্পিণীষু ভেদতঃ। সাগরকোটিকোটীনাং বিংশত্যা স সমাপ্যতে॥ অবসর্পিণ্যাং ষড়্বা উৎসর্পিণ্যাং ত এব বিপরীতাঃ। এবং দ্বাদশভিররৈর্ব্বিবর্ত্ততে কালচক্রমিদং। ইতি হেমচন্দ্রঃ॥

উৎসর্য্যা (স্ত্রী) প্রজনকালপ্রাপ্তা গৌঃ। পাল লওনের উপযুক্ত গাই ইতি ভাষা। ইতি জটাধরঃ॥

উৎসবঃ (পুং) নিয়তাহ্লাদজনকব্যাপারঃ। তৎপর্য্যায়ঃ। ক্ষণঃ ২ উদ্ধবঃ ৩ উদ্ধর্ষঃ ৪ মহঃ ৫। ইত্যমরঃ॥ উৎসেকঃ। ইচ্ছাপ্রসবঃ। কোপঃ। ইতি মেদিনী॥

উৎসাদনং (ক্লী) সমুল্লেখঃ। উদ্বাহনং। উদ্বর্ত্তনং। ইতি মেদিনী॥

উৎসাদিতং (ত্রি) কৃতোৎসাদনং। উদ্বর্ত্তিতং। নির্ম্মলীকৃতশরীরং॥

উৎসারকঃ (পুং) দ্বারপালঃ। ইতি হেমচন্দ্রঃ॥ উৎসারণকর্ত্তা॥

উৎসারণং (ক্লী) দূরীকরণং। চালনং। স্থানান্তরপ্রাপণং॥

উৎসাহঃ (পুং) উদ্যমঃ। তৎপর্য্যায়ঃ। অধ্যবসায়ঃ ২। ইত্যমরঃ॥ সূত্রং। ইতি মেদিনী॥ কল্যাণং। ভাববিশেষঃ। ইতি শব্দরত্নাবলী॥ ধ্রুবকবিশেষঃ। তল্লক্ষণং যথা। উৎসাহঃ স্যাৎ রসে হাস্যে তালে কেন্দুকসংজ্ঞকে। বংশবৃদ্ধিকরঃ পাদৈস্ত্রয়োদশমিতাক্ষরঃ॥ ইতি সঙ্গীতদামোদরঃ

উৎসাহবর্দ্ধনং (ক্লী) উদ্যমবৃদ্ধিঃ। বীররসঃ। ইত্যমরঃ॥

উৎসিচ্যমানঃ (ত্রি) উদ্রিচ্যমানঃ। বৃদ্ধিমান্। ইতি শ্রীভাগবতং॥

উৎসিক্তঃ (ত্রি) উদ্ধতঃ। ইতি ত্রিকাণ্ডশেষঃ॥ গর্ব্বিতঃ। বর্দ্ধিতঃ। উদ্রিক্তঃ। ইতি শ্রীভাগবতং॥

উৎসুকঃ (ত্রি) বাঞ্ছিতকর্ম্মোদ্যতঃ। তৎপর্য্যায়ঃ। ইষ্টার্থোদ্যুক্তঃ ২। ইত্যমরঃ॥ উৎকণ্ঠিতঃ। ইতি হেমচন্দ্রঃ॥

উৎসূরঃ (পুং) দিনাবসানং। ইতি হেমচন্দ্রঃ॥

উৎসৃষ্টঃ (ত্রি) কৃতোৎসর্গঃ। তৎপর্য্যায়ঃ। ত্যক্তঃ ২ হীনঃ ৩ বিধুতঃ ৪ সমুজ্ঝিতঃ ৫ ধূতঃ ৬। ইত্যমরঃ॥

উৎসেচনং (ক্লী) ঊর্দ্ধসেকঃ। উথ্লন উপ্চন ইত্যাদি ভাষা॥

উৎসেধঃ (পুং) পর্ব্বতবৃক্ষাদীনাং দৈর্ঘ্যং। উচ্ছ্রয়ঃ। শরীরং। ইত্যমরঃ॥ সংহননং। ইতি হেমচন্দ্রঃ॥

উৎক্ষিপ্তঃ (পুং) ধুস্তূরফলং। ইতি শব্দচন্দ্রিকা॥ ঊর্দ্ধত্যক্তে ত্রি॥

উৎক্ষিপ্তিকা (স্ত্রী) কর্ণভূষণবিশেষঃ। তৎপর্য্যায়ঃ। কর্ণান্দুঃ ২। ইতি হেমচন্দ্রঃ॥

উৎক্ষেপণং (ক্লী) ব্যজনং। ধান্যমর্দ্দনবস্ত্র।

ইতি মেদিনী ॥ উদঞ্চনং। ঊর্দ্ধক্ষেপণং। যোড়শপণং। ইতি হেমচন্দ্রঃ ॥

উদ্ ব্য বিং শত্যুপসর্গান্তর্গত উপসর্গবিশেষঃ। অস্যার্থঃ। ঊর্দ্ধং। উৎকর্ষঃ। প্রাকট্যং। নৈকট্যং। ইতি দুর্গাদাসঃ ॥ প্রকাশঃ। বিভাগঃ। প্রাবল্যং। অস্বাস্থ্যং। শক্তিঃ। প্রাধান্যং। বন্ধনং। ভাবঃ। মোক্ষঃ। লাভঃ। ঊর্দ্ধকর্ম্ম। ইতি মেদিনী ॥

উদং ( ক্লী ) জলং। ইতি শব্দরত্নাবলী ॥

উদক্ [ চ্ ] ব্য উত্তরদিগ্‌দেশকালাঃ। ইতি মেদিনী ॥

উদকং ( ক্লী ) জলং। ইত্যমরঃ ॥

উদকপরীক্ষা ( স্ত্রী ) দিব্যবিশেষঃ। যথা। অথোদকপরীক্ষা। পিতামহঃ। তোয়স্যাথ প্রবক্ষ্যামি বিধিং ধর্ম্ম্যং সনাতনং। মণ্ডলং পুষ্পধূপাভ্যাং কারয়েৎ সুবিচক্ষণঃ ॥ শরান্ সংপূজয়েদ্ভক্ত্যা বৈণবঞ্চ ধনুস্তথা। তত্র প্রথমতো বরুণং পূজয়েৎ। যথা নারদঃ। গন্ধমাল্যৈঃ সুরভিভির্মধুক্ষীরঘৃতাদিভিঃ। বরুণায় প্রকুর্ব্বীত পূজামাদৌ সমাহিতঃ ॥ ততো ধর্ম্মাবাহনাদিসকলদেবতাপূজাহোমসমন্ত্রকপ্রতিজ্ঞাপত্রশিরোনিবেশান্তং কর্ম্ম কুর্য্যাৎ। কাত্যায়নঃ। শরাংস্ত্বনায়সাগ্রাংস্তু প্রকুর্ব্বীত বিশুদ্ধয়ে। বেণুকাষ্ঠময়াংশ্চৈব ক্ষেপ্তা চ সুদৃঢ়ং ক্ষিপেৎ ॥ পিতামহঃ। ক্ষেপ্তা চ ক্ষত্রিয়ঃ কার্য্যস্তদ্বৃত্তির্ব্রাহ্মণোঽথবা। অক্রূরহৃদয়ঃ শান্তঃ সোপবাসস্তথা শুচিঃ ॥ ইষূন্ প্রক্ষিপেদ্ধীমান্ মারুতে বাতি বা ভূশং। বিষমে ভূপ্রদেশে চ বৃক্ষস্থাণুসমাকুলে ॥ * ॥ নারদঃ। ক্রূরং ধনুঃ সপ্তশতং মধ্যমং ষট্‌শতং মতং। মন্দং পঞ্চশতং প্রোক্তমেষ জ্ঞেয়ো ধনুর্বিধিঃ ॥ অঙ্গুলীনাং সপ্তাধিকং শতং যস্য ধনুষঃ পরিমাণং তৎ সপ্তশতং। এবং ষট্‌শতাদিকং ॥ * ॥ পিতামহঃ। মধ্যমেন তু চাপেন প্রক্ষিপেত্তু শরত্রয়ং। হস্তানাস্তু শতে সার্দ্ধে লক্ষ্যং কৃত্বা বিচক্ষণঃ ॥ তেষাঞ্চ প্রেষিতানাস্তু শরাণাং শাস্ত্রদর্শনাৎ। মধ্যমস্তু শরো গ্রাহ্যঃ পুরুষেণ বলীয়সা ॥ শরাণাং পতনং গ্রাহ্যং সর্পণং পরিবর্জয়েৎ। সর্পন্ সর্পন্ শরো যাতি দূরাদ্দূরতরং যতঃ ॥ পতনং গ্রাহ্যমিতি শরপতনস্থানপর্য্যন্তং গচ্ছেদিত্যর্থঃ। তেন প্রসরণপক্ষেঽপি পতনস্থানকশরগ্রহণং ততশ্চ প্রথমতঃ পুরুষান্তরেণ তৎস্থানে শর আনেতব্যঃ ॥ * ॥ নারদঃ। নদীষু নাতিবেগাসু তড়াগেষু সরস্সু চ। হ্রদেষু স্থিরতোয়েষু কুর্য্যাৎ পুংসাং নিমজ্জনং ॥ নাতিবেগাসু স্থিতিবিরোধিবেগশূন্যাসু ॥*॥ বিষ্ণুঃ। পঙ্কশৈবালদুষ্টগ্রাহমৎস্যজলৌকাদিবর্জ্জিতে তস্য নাভিমাত্রজলে মগ্নস্যারাগদ্বেষিণঃ পুরুষস্যান্যস্যোরূ গৃহীত্বা অভিমন্ত্রিতাম্ভঃ প্রবিশেৎ। তৎ সমকালঞ্চ নাতিক্রূরমৃদুনা ধনুষা পুরুষোঽপরঃ শরমোক্ষং কুর্য্যাদিতি তস্য শোধ্যস্যেত্যর্থঃ। অন্যথা তস্যেতি ব্যর্থং স্যাৎ ॥ * ॥ অন্যপুরুষস্য স্তম্ভধারণমাহ স্মৃতিঃ। উদকে প্রাঙ্মুখস্তিষ্ঠেদ্ধর্ম্মস্থূণাং প্রগৃহ্য চ ॥ * ॥ প্রাড়্‌বিবাককর্ত্তৃকজলাভিমন্ত্রণমাহ পিতা-

মহঃ। তোয় ত্বং প্রাণিনাং প্রাণঃ সৃষ্টে-রাদ্যন্তু নির্ম্মিতং। শুদ্ধেশ্চ কারণং প্রোক্তং দ্রব্যাণাং দেহিনাং তথা ॥ অত-স্তুং দর্শয়াত্মানং শুভাশুভপরীক্ষণে ॥ * ॥ শোধ্যকর্ত্তৃকাভিমন্ত্রণমাহ যাজ্ঞবল্ক্যঃ। সত্যেন মাভিরক্ষস্ব বরুণেত্যভিশাপ্য কং। নাভিমাত্রোদকস্থস্য গৃহীত্বোরূ জলং বিশেৎ ॥ মা মাং। অভিশাপ্য শপথং কারয়িত্বা। কং জলং। বিশেৎ নিম-জ্জেৎ ॥ * ॥ তোরণঞ্চ নিমজ্জনসমীপে সমে স্থানে শোধ্যকর্ণপ্রমাণোচ্ছ্রিতং কার্য্যং। যথা নারদঃ। গত্বা তু তজ্জল-স্থানং তটে তোরণমুচ্ছ্রিতং। কুর্ব্বীত কর্ণমাত্রন্তু ভূমিভাগে সমে শুচৌ ॥ * ॥ শরমোক্ষে বিশেষমাহতুর্ণারদবৃহস্পতী। শরপ্রক্ষেপণস্থানাদ্যুবা জবসমন্বিতঃ। গচ্ছেৎ পরময়া শক্ত্যা যত্রাসৌ মধ্যমঃ শরঃ ॥ মধ্যমং শরমাদায় পুরুষোঽন্য-স্তথাবিধঃ। প্রত্যাগচ্ছেত্তু বেগেন যতঃ স পুরুষো গতঃ ॥ আগতস্তু শরগ্রাহী ন পশ্যতি যদা জলে। অন্তর্জ্জলগতং সম্যক্ তদা শুদ্ধিং বিনির্দ্দিশেৎ ॥ অন্যথা ন বিশুদ্ধঃ স্যাদেকাঙ্গস্যাপি দর্শনাৎ। স্থানা-ত্বান্যত্র গমনাদ্যস্মিন্ পূর্ব্বং নিবেশয়েৎ ॥*॥ জবিনৌ বিশেষয়তি নারদঃ। পঞ্চাশতো ধাবকানাং যৌ স্যাতামধিকৌ জবে। তৌ চ তত্র নিযোক্তব্যৌ শরানয়নকর্ম্মণি ॥ একাঙ্গস্য দর্শনাদিতি কর্ণাদ্যভিপ্রায়েণ। শিরোমাত্রন্তু দৃশ্যেত ন কর্ণৌ নাপি নাসিকে। অপ্সু প্রবেশনে যস্য শুদ্ধং তমপি নির্দ্দিশেৎ ॥ ইতি বিশেষাভি-ধানাৎ। কাত্যায়নঃ। নিমজ্জ্যোৎপ্লবতে যস্তু দষ্টশ্চেৎ প্রাণিনা নরঃ। পুনস্তত্র নিমজ্জেত দংশচিহ্নবিভাবিতঃ ॥ জলান্ত-র্গতমৎস্যজলৌকাদিনা দষ্টঃ সমুৎপ্লবতে যদি তদা দষ্টে দৃষ্টে পুনর্নিমজ্জনীয় ইত্যর্থঃ ॥ * ॥ পিতামহঃ। গন্তুশ্চাপি চ কর্ত্তুশ্চ সমং গমনমজ্জনং। গচ্ছেৎ তোরণমূলাত্তু শরস্থানং জবী নরঃ ॥ তস্মিন্ গতে দ্বিতীয়োঽপি বেগাদাদায় শায়কং। গচ্ছেত্তোরণমূলন্তু যতঃ স পুরুষো গতঃ ॥ আগতস্তু শরগ্রাহী ন পশ্যতি যদা জলে। অন্তর্জ্জলগতং সম্যক্ ততঃ শুদ্ধিং বিনি-র্দ্দিশেৎ ॥ অত্র মজ্জনসমকালগমনাভিধানাৎ শরমোক্ষসমকালং গমনং শূলপাণ্যুক্ত-মযুক্তং। মজ্জনসমকালক্ষিপ্তং মধ্যমং শরমাদায়েত্যপরমুক্তমপি প্রমাণশূন্যং। ততশ্চ ত্রিষু শরেষু মুক্তেষু একো বেগবান্ মধ্যমশরপতনস্থানং গত্বা তমাদায় তত্রৈব তিষ্ঠতি। অন্যস্তু পুরুষো বেগবান্ শর-মোক্ষস্থানে তোরণমূলে তিষ্ঠতি এবং স্থিতয়োস্তৃতীয়ায়াং করতালিকায়াং প্রাড্-বিবাকদত্তায়াং শোধ্যো নিমজ্জতি তৎসম-কালমেব তোরণমূলস্থিতোঽপি দ্রুততরং মধ্যমশরপতনস্থানং গচ্ছতি শরগ্রাহী চ তস্মিন্ প্রাপ্তে দ্রুততরং তোরণমূলং প্রাপ্যান্তর্জ্জলগতং যদি ন পশ্যতি তদা শুদ্ধো ভবতীতি বর্ত্তুলার্থঃ ॥ * ॥ * ॥ তত্র প্রয়োগঃ। উক্তলক্ষণজলাশয়নিকটে তথা তোরণং বিধায় উক্তদেশে লক্ষ্যং

কৃত্বা তোরণসমীপে সশরং ধনুঃ সংপূজ্য জলাশয়ে বরুণমাবাহ্য পূজয়িত্বা তত্তীরে ধর্ম্মাদীংশ্চ দেবান্ হবনান্তমিষ্ট্বা দক্ষিণাং কৃত্বা শোধ্যস্য শিরসি প্রতিজ্ঞাপত্রং বদ্ধা প্রাড়্বিবাকো জলমভিমন্ত্রয়েৎ। ওঁ তোয় ত্বং প্রাণিনাং প্রাণঃ সৃষ্টেরাদ্যন্তু নির্ম্মিতং। শুদ্ধেশ্চ কারণংপ্রোক্তং দ্রব্যাণাংদেহিনাং তথা ॥ অতস্ত্বং দর্শয়াত্মানং শুভাশুভপরীক্ষণে। ইতি মন্ত্রেণ। শোধ্যস্তু ওঁ সত্যেন মাভিরক্ষস্ব বরুণেত্যনেন জলমভিমন্ত্র্য গৃহীতস্থূণস্য শোধ্যনাভিমাত্রোদকাবস্থিতস্য বলীয়সঃ প্রাঙ্মুখস্য পুরুষস্য সমীপং জলমধ্যে গচ্ছেৎ। ততঃ শরেষু ত্রিষু মুক্তেষু মধ্যমশরপাতস্থানে মধ্যমশরং গৃহীত্বা জবিন্যেকস্মিন্ পুরুষে স্থিতে অন্যস্মিংশ্চ তোরণমূলস্থিতে প্রাড়্বিবাকেন তালত্রয়ে দত্তে শোধ্যো গৃহীতস্থূণপ্রাঙ্মুখপুরুষস্যোরূ গৃহীত্বা নিমজ্জতি তৎসমকালমেব তোরণমূলস্থোঽপি মধ্যমশরস্থানং দ্রুতং গচ্ছতি। ততঃ শরগ্রাহী চ তস্মিন্ প্রাপ্তে দ্রুতং তোরণমূলং প্রাপ্য জলান্তঃস্থং যদি ন পশ্যতি তদা শুদ্ধঃ। কর্ণাদ্যঙ্গং বিনা শিরোমাত্রদর্শনেঽপি শুদ্ধঃ। মজ্জনস্থানাদন্যত্রগমনেঽপ্যশুদ্ধঃ। ততো দক্ষিণাদিকং দদ্যাৎ। ইতি দিব্যতত্ত্বং ॥

উদকীর্ণঃ (পুং) মহাকরঞ্জঃ। ইতি রাজনির্ঘণ্টঃ ॥

উদকীর্য্যঃ (পুং) করঞ্জবিশেষঃ। ডালকরমচা ডহরকরঞ্জ ইত্যাদি ভাষা। ইতি রত্নমালা ॥

উদক্যা (স্ত্রী) রজস্বলা। ঋতুমতী। ইত্যমরঃ ॥

উদগদ্রিঃ (পুং) হিমালয়পর্ব্বতঃ। ইতি হেমচন্দ্রঃ ॥

উদগয়নং (ক্লী) উত্তরায়ণং। ইতি স্মৃতিঃ ॥

উদগ্ভূমঃ (পুং) সদ্ভূমিঃ। উৎকৃষ্টস্থানং। ইতি জটাধরঃ ॥

উদগ্রং (ত্রি) উচ্ছ্রিতং। উচ্চং। ইত্যমরঃ ॥

উদগ্রদন্ [ৎ] (পুং) উচ্চদন্তহস্তী। বৃহদ্দন্তযুক্তে ত্রি। ইতি হেমচন্দ্রঃ ॥

উদজঃ (পুং) পশুপ্রেরণং। ইত্যমরঃ ॥

উদঞ্চনং (ক্লী) পিধানপাত্রং। ঢাকুনি ইতি ভাষা। ইতি হেমচন্দ্রঃ ॥ ঊর্দ্ধক্ষেপণং ॥

উদঞ্চিতং (ত্রি) ঊর্দ্ধক্ষিপ্তং। ইতি হেমচন্দ্রঃ ॥ পূজিতং ॥

উদগুপালঃ (পুং) মৎস্যবিশেষঃ। সর্পভেদঃ। ইতি মেদিনী ॥

উদধিঃ (পুং) সমুদ্রঃ। ইত্যমরঃ ॥

উদধিক্রাঃ (পুং) সমুদ্রাক্রমণকর্ত্তা। ইতি ব্যাকরণং ॥

উদধিমলঃ (পুং) সমুদ্রফেনঃ। অস্য গুণাঃ শীতলত্বং। কষায়ত্বং। অতিবাস্তিকারিত্বঞ্চ। ইতি রাজবল্লভঃ ॥

উদধিমেখলা (স্ত্রী) পৃথিবী। ইতি মহাভারতং ॥

উদন্তঃ (পুং) বার্ত্তা। সাধুঃ। ইতি মেদিনী ॥ বৃত্তিযাজনং। ইতি শব্দরত্নাবলী ॥

উদন্তকঃ (পুং) বৃত্তান্তঃ। বার্ত্তা। ইতি শব্দরত্নাবলী ॥

উদন্তিকা (স্ত্রী) তৃপ্তিঃ। ইতি হারাবলী ॥

উদন্যা (স্ত্রী) পিপাসা। ইত্যমরঃ ॥

উদন্বান্ [ৎ] (পুং) সমুদ্রঃ। ইত্যমরঃ ॥

উদপ আঘাতে। সৌত্রধাতুরয়ং। ইতি কবিকল্পদ্রুমঃ ॥ পঞ্চমস্বরাদিঃ। উদঞ্চঃ। ইতি দুর্গাদাসঃ॥ পানুবন্ধ উদধাতুরয়ং ভ্রমবশাৎ উদপেতি লিখিতঃ॥

উদপানং (ক্লী পুং) কূপঃ। ইত্যমরঃ॥

উদয়ঃ (পুং) পূর্ব্বপর্ব্বতঃ। উদয়াচলঃ। সমুন্নতিঃ। ইতি মেদিনী॥ দীপ্তিঃ। মঙ্গলং। ইতি শব্দরত্নাবলী॥ গ্রহাণামুদ্গমঃ। তত্র সূর্য্যস্যোদয়বিবরণং যথা। উদয়াস্তমনে চৈব সর্ব্বকালস্তু সংমুখে। দিশাস্বশেষাসু তথা মৈত্রেয় বিদিশাসু চ॥ যৈর্যত্র দৃশ্যতে ভাস্বান্ স তেষামুদয়ঃ স্মৃতঃ। তিরোভাবঞ্চ যত্রৈতি তত্রৈবাস্তমনং রবেঃ॥ নৈবাস্তমনমর্কস্য নোদয়ঃ সর্ব্বদা সতঃ। উদয়াস্তমনাখ্যঞ্চ দর্শনাদর্শনং রবেঃ॥ শক্রাদীনাং পুরে তিষ্ঠন্ স্পৃশত্যেষ পুরত্রয়ং। বিকর্ণৌ দ্বৌ বিকর্ণস্থস্ত্রীন্ কোণান্ দ্বে পুরে তথা॥ উদিতো বর্দ্ধমানাভিরামধ্যাহ্নাত্তপন্ রবিঃ। ততঃপরং হ্রসন্তীভির্গোভিরস্তং নিগচ্ছতি॥ উদয়াস্তমনাভ্যাঞ্চ স্মৃতে পূর্ব্বাপরে দিশৌ। যাবৎ পুরস্তাত্তপতি তাবৎ পৃষ্ঠেথ পার্শ্বয়োঃ॥ ঋতেঽমরগিরের্মেরোরুপরি ব্রহ্মণঃ সভাং। যে যে মরীচয়োঽর্কস্য প্রয়ান্তি ব্রহ্মণঃ সভাং। তে তে নিরস্তাস্তম্ভাসা প্রতীপমুপযান্তি বৈ। তস্মাদ্দিশ্যুত্তরস্যাং বৈ দিবারাত্রিঃ সদৈব হি॥ সর্ব্বেষাং দ্বীপবর্ষাণাং মেরুরুত্তরতো যতঃ। ইতি বিষ্ণুপুরাণে ২ অংশে ৮ অধ্যায়ঃ॥ *॥ উদয়াস্তমনে চ সর্ব্বকালং ভবতঃ। তে চ পরস্পরং সংমুখে সমানসূত্রস্থে ভবতঃ। তত্র হেতুমাহ। যৈর্যত্রেতি। রবেরুদয়াস্তময়ৌ সর্ব্বকালং মধ্যাহ্ন এব সতোঽর্কস্য ন স্ত এব অতো রবেরুদয়াস্তময়দ্বয়ং দর্শনাদর্শনমাত্রমেব॥ দর্শনাদর্শনয়োরবধিমাহ। শক্রাদীনামিতি। ইন্দ্রাদ্যন্যতমস্য পুরে মধ্যাহ্নে তিষ্ঠংস্তদেকং পুরং অভিতঃ পুরদ্বয়ং চেত্যেবং পুরদ্বয়ং তদন্তরালস্থৌ দ্বৌ চ বিকর্ণৌ কোণৌ উদয়াদ্যবস্থাভিঃ স্পৃশতি স্বরশ্মিভির্ভাসয়তি। তথা বিকর্ণস্থঃ অগ্ন্যাদ্যন্যতমকোণে মধ্যাহ্নে স্থিতস্তং কোণং অভিতঃ স্থিতং কোণদ্বয়ং চেত্যেবং ত্রীন্ কোণান্ তন্মধ্যবর্ত্তিদ্বে চ পুরে তথৈবোদয়াদ্যবস্থাভিঃ স্পৃশতি। ভূবলয়স্যার্দ্ধে প্রতপন্ দৃশ্যতে তাবদহঃ। অর্দ্ধে তু ন দৃশ্যতে তাবদ্রাত্রিরিত্যর্থঃ। তথাহি ঐন্দ্রে পুরে মধ্যাহ্নে যদা তিষ্ঠতি তদা সৌম্যপুরস্থানামস্তময়ঃ। ঐশকোণস্থানাং তৃতীয়ো যামঃ। অগ্নিকোণস্থানাং প্রথমঃ। যাম্যে স্থিতানামুদয়ঃ। এবং যদা যাম্যে মধ্যাহ্নে তিষ্ঠতি তদা ঐন্দ্রে অস্তময়ঃ। অগ্নিকোণে তৃতীয়ো যামঃ। নৈর্ঋতিকোণে প্রথমো যামঃ। বারুণে উদয়ঃ। যদা চ বারুণে মধ্যাহ্নঃ তদা যাম্যে অস্তময়ঃ। নৈর্ঋতিকোণে তৃতীয়ো যামঃ। বায়ব্যে প্রথমঃ। সৌম্যে উদয়ঃ। যদা সৌম্যে মধ্যাহ্নস্তদা বারুণে অস্তময়ঃ। বায়ব্যে তৃতীয়ো যামঃ। ঐশকোণে প্রথমঃ। ঐন্দ্রে উদয়ঃ। এবং অগ্নিকোণে যদা মধ্যাহ্নস্তদা ঐশকোণে অস্তময়ঃ।

ইন্দ্রপুরে তৃতীয়ো যামঃ। যমপুরে প্রথমঃ। নৈর্ঋতিকোণে উদয়ঃ। ইত্যাদি যোজ্যং। এবং মেরোঃ সর্ব্বতঃ পরিভ্রমন্ সূর্য্যো-ঽর্দ্ধভূবলয়ং প্রকাশয়ন্ দর্শনাদর্শনাদ্যপেক্ষয়া অহোরাত্রব্যবস্থাকারণমুক্তং ভবতি॥ সন্নিধানব্যবধানকৃতমেব রশ্মীনাং বৃদ্ধিহ্রাস-তীব্রত্বমন্দত্বাদিকমপীত্যাহ। উদিত ইতি গোভিরশ্মিভিঃ॥ দিগ্বিভাগোঽপ্যুদয়াস্ত-ময়নিমিত্ত এবেত্যাহ উদয়েতি। যত্র যস্যোদেতি সা তস্য পূর্ব্বা দিক্। যত্রাস্ত-মেতি সা অপরা প্রতীচী। তথা শ্রুতিঃ। তস্মাদসাবাদিত্যঃ সর্ব্বাঃ প্রজাঃ প্রত্য-ঙুদেতি। তস্মাৎ সর্ব্বা এবান্যতঃ প্রত্যু-দগাদিতি॥ পুরস্তাদুদ্যন্তং সূর্য্যং পশ্যতশ্চ দক্ষিণবামপার্শ্বভাগৌ দক্ষিণোত্তরে দিশা-বিতি দর্শয়ন্ রশ্মিবিস্তারাবধিমাহ। যাব-দিতি। চতুর্দ্দিক্ষু লোকালোকাচলপর্য্যন্তং তপতীত্যর্থঃ॥ মেরৌ তু বিশেষমাহ। ঋতে ইতি। ব্রহ্মসভাবর্জ্জং মেরোরুপর্য্যপি সর্ব্বতস্তপতি ন তু ব্রহ্মসভাং ভাসয়তি। তত্র হেতুমাহ। যে যে মরীচয় ইতি॥ মেরোঃ সর্ব্বতোঽপি বিশেষতান্তরমাহ। তস্মাদিতি। যতো যস্মাৎ সর্ব্বেষাং দ্বীপানাং বর্ষাণাঞ্চ মেরুরুত্তরত এব স্থিতঃ। তস্মান্মেরোরুত্তরস্যাং দিশি সদা দিবাপি অন্যেষাং দিনেঽপি নিত্যং রাত্রি-রেব। অয়ং ভাবঃ। মেরুং প্রদক্ষিণী-কুর্ব্বন্তং সূর্য্যং যে যত্র পশ্যন্তি সৈব তেষাং প্রাচী। তেষাঞ্চ বামভাগ এব মেরুঃ। অতঃ সর্ব্বেষাং সর্ব্বদা মেরু-রুত্তরত এব। দক্ষিণভাগে চ লোকালোকা-চলঃ। তস্মাদুত্তরস্যাং দিশি সদা রাত্রিঃ। দক্ষিণস্যাঞ্চ দিশি সদা দিনমিতি। যদ্বা। ভারতাদিবর্ষস্থানাং সম্মুখে সূর্য্যমুদ্যন্তং পশ্যতামুত্তরস্যাং দিশি বামভাগে মেরো-রেকতঃ সদা দিনং। অন্যতশ্চ সদা রাত্রিঃ। দক্ষিণভাগে তু সদা দিনমেবে-ত্যর্থাদুক্তং ভবতি। ইতি তট্টীকায়াং শ্রীধরস্বামী॥

উদয়নং (ক্লী) উদয়ঃ। ইতি মেদিনী॥

উদয়নঃ (পুং) অগস্ত্যমুনিঃ। বৎসরাজঃ। ইতি মেদিনী॥ উদয়নাচার্য্যঃ। স চ কুসুমাঞ্জলিগ্রন্থকর্ত্তা॥

উদরং (ক্লী) নাভিস্তনয়োর্মধ্যভাগঃ। পেট ইতি ভাষা। তৎপর্য্যায়ঃ। পিচিণ্ডঃ ২ ৩ জঠরঃ ৪ তুন্দং ৫। ইত্যমরঃ॥ যুদ্ধং। ইতি মেদিনী॥

উদরঃ (পুং) উদরস্থরোগবিশেষঃ। উদরী ইতি ভাষা। যথা। অথোদরাধিকারঃ। তত্রোদরস্য নিমিত্তমাহ। রোগাঃ সর্ব্বেঽপি মন্দেঽগ্নৌ সুতরামুদরাণি চ। অজীর্ণা-ম্ললিনৈশ্চান্যৈর্জ্জায়ন্তে মলসঞ্চয়াৎ॥ অগ্নৌ মন্দে সর্ব্বে রোগা জায়ন্তে কিন্তু সুতরা-মতিশয়েন উদরাণি জায়ন্তে। অপরানপি হেতূনাহ। অজীর্ণাম্ললিনৈশ্চান্যৈঃ অত্যন্ত-দোষজনকৈঃ মলসঞ্চয়াৎ মলানাং দোষাণাং পুরীষস্য চাতিবৃদ্ধেঃ অত্রোদরশব্দে-নোদরস্থো রোগ উচ্যতে। যত আহ। তাৎস্থ্যতদ্ধর্ম্মতাভ্যাঞ্চ তৎসমীপতয়াপি চ। তৎসাহচর্য্যাৎ শব্দানাং বৃত্তিরুক্তা

চতুর্ব্বিধা ॥ * ॥ সংপ্রাপ্তিমাহ। রুদ্ধাঃ স্বেদাম্বুবাহীনি দোষাঃ স্রোতাংসি সঞ্চিতাঃ। প্রাণাগ্ন্যপানান্ সংদুষ্য জনয়ন্ত্যুদরং নৃণাং ॥ * ॥ সামান্যরূপমাহ। আধ্মানং গমনেঽশক্তির্দ্দৌর্ব্বল্যং দুর্ব্বলাগ্নিতা। শোথঃ সদনমঙ্গানাং সঙ্গো বাতপুরীষয়োঃ। দাহস্তন্দ্রা চ সর্ব্বেষু জঠরেষু ভবন্তি হি ॥ * ॥ সন্নিকৃষ্টনিদানপূর্ব্বিকাং সংখ্যামাহ। পৃথক্দোষৈঃ সমস্তৈশ্চ প্লীহবদ্ধক্ষতোদকৈঃ। সংভবন্ত্যুদরাণ্যষ্টৌ তেষাং লিঙ্গং পৃথক্ শৃণু ॥ * ॥ বাতোদরস্য লক্ষণমাহ। তত্র বাতোদরে শোথঃ পাণিপান্নাভিকুক্ষিষু। কুক্ষিপার্শ্বোদরকটীপৃষ্ঠরুক্ পর্ব্বভেদনং। শুষ্ককাসোঽঙ্গমর্দ্দশ্চ গুরুতা মলসংগ্রহঃ। শ্যাবারুণত্বগাদিত্বমকস্মাদ্‌ হ্রাসবৃদ্ধিমৎ ॥ সতোদভেদমুদরং তনু কৃষ্ণসিরাততং। আধ্মানাদতিবচ্ছব্দমাহতং প্রকরোতি চ। বায়ুশ্চাত্র সরুক্ শব্দো বিচরেৎ সর্ব্বতোগতিঃ। পাণিপাদিত্যত্র ব্যঞ্জনান্তঃ পাচ্ছব্দ আর্ষত্বাৎ। কুক্ষিপার্শ্বোদরেত্যত্র কুক্ষিশব্দ উদরস্য বামদক্ষিণভাগদ্বয়বাচী। সর্ব্বতোগতিঃ সকলকোষ্ঠে সঞ্চরন্ ॥ * ॥ পৈত্তিকমাহ। পিত্তোদরে জ্বরো মূর্চ্ছা দাহস্তৃট্ কটুকাস্যতা। ভ্রমোঽতিসারঃ পীতত্বং ত্বগাদাবুদরং হরিৎ ॥ পীততাম্রসিরানদ্ধং সস্বেদং সোষ্ম দহ্যতে। ধূমায়তে মৃদুস্পর্শং ক্ষিপ্রপাকং প্রদূয়তে ॥ হরিৎ শাকবর্ণং। সোষ্ম অন্তস্তাপযুক্তং। দহ্যতে বহির্দাহযুক্তং। ধূমায়তে ধূমমিবোদ্বমতি। ক্ষিপ্রপাকং ক্ষিপ্রপাকাৎ জলোদরতাং যাতি। প্রদূয়তে ব্যথতে ॥ * ॥ কফোদরমাহ। শ্লেষ্মোদরেঽঙ্গসদনং স্বাপশ্বয়থুগৌরবং। তন্দ্রোৎক্লেশোঽরুচিঃ শ্বাসঃ কাসঃ শুক্লত্বগাদিতা ॥ উদরং স্তিমিতং স্নিগ্ধং শুক্লরাজীততং মহৎ। চিরাভিবৃদ্ধি কঠিনং শীতস্পর্শং গুরু স্থিরং ॥ স্বাপঃ স্পর্শাজ্ঞতা। গৌরবমঙ্গানাং। তন্দ্রানিদ্রাবাহুল্যং। উৎক্লেশো হৃল্লাসঃ। শুক্লরাজীততং শুক্লশিরাব্যাপ্তং ॥ * ॥ সন্নিপাতোদরমাহ। স্ত্রিয়োঽন্নপানং নখলোমমূত্রবিড়ার্ত্তবৈর্যুক্তমসাধুবৃত্তাঃ। যস্মৈ প্রযচ্ছন্ত্যরয়ো গরাংশ্চ দুষ্টাম্বুদূষীবিষসেবনাচ্চ ॥ তেনাশু রক্তং কুপিতাশ্চ দোষাঃ কুর্য্যুঃ সুঘোরং জঠরং ত্রিলিঙ্গং। তচ্ছীতবাতে ভৃশদুর্দ্দিনে চ বিশেষতঃ কুপ্যতি দহ্যতে চ ॥ স চাতুরো মূর্চ্ছতি হি প্রসক্তং পাণ্ডুঃ কৃশঃ শুষ্যতি তৃষ্ণয়া চ। দূষ্যোদরং কীর্ত্তিতমেতদেব প্লীহোদরং কীর্ত্তয়তো নিবোধ। স্ত্রিয় ইত্যবিবেকিসন্নিহিতজনোপলক্ষণং। তাশ্চ স্বসৌভাগ্যমিচ্ছন্ত্যঃ। বিট্ মার্জ্জারাদীনাং। আর্ত্তবং রজঃ। অরয়ো বা। গরান্ সংযোগজানি বিষাণি। দুষ্টাম্বু সবিষমৎস্যতৃণপর্ণাদিযুতং শটিতঞ্চ ॥ দূষীবিষং বিষমেবাগ্ন্যাত্যুপঘাতেন স্বল্পপ্রভাবং। যত উক্তং। জীর্ণং বিষঘ্নৌষধিভির্হতং বা দাবাগ্নিবাতাতপশোষিতঞ্চ। স্বভাবতো বা গুণবিপ্রযুক্তং বিষং হি দূষীবিষতামুপৈতি ॥ গুণবিপ্রযুক্তং গুণবিযুক্তং তৎ। উদরং শীতত্বাদিষু কুপ্যতি। দূষীবিষস্য কোপাৎ।

মূর্চ্ছাতিবিষযোগাৎ। প্রসক্তং নিরন্তরং এতদেব সন্নিপাতোদরং। তন্ত্রান্তরে দূষ্যোদরং কীর্ত্তিতং। অথবা পরস্পরং দূষয়ন্তীতি দোষা এব দূষ্যা তৈঃ কৃতমুদরং দূষ্যোদরং ॥ * ॥ প্লীহোদরমাহ। বর্দ্ধতে প্লীহবৃদ্ধ্যা যদ্বিদ্যাৎ প্লীহোদরং হি তৎ। তদ্বামে বর্দ্ধতে পার্শ্বে নিমিত্তং তস্য তত্র যৎ ॥ প্রবৃদ্ধপ্লীহলিঙ্গানি যান্যুক্তানি ভিষগ্বরৈঃ। প্লীহোদরেঽপি দৃশ্যন্তে তানি সর্ব্বাণি দেহিনাং ॥ প্লীহোদরস্যৈব ভেদো যকৃদ্দাল্যুদরং ন পুনরধিকমিত্যাহ। সব্যান্যপার্শ্বে যকৃতি প্রবৃদ্ধে জ্ঞেয়ং যকৃদ্দাল্যুদরং তদেব। যকৃদ্দালয়তি দোষৈর্ভেদয়তীতি যকৃদ্দাল্যুদরং তদেব উদরমেব ॥ * ॥ বদ্ধগুদমাহ। যস্যান্নমন্নৈরুপলেপিভির্ব্বা বালাশ্মভির্ব্বা পিহিতং যথাবৎ। সঞ্চীয়তে যস্য মলঃ সদোষঃ শনৈঃ শনৈঃ শঙ্করবচ্চ নাড্যাং ॥ নিরুদ্ধ্যতে যস্য গুদে পুরীষং নিরেতি কৃচ্ছ্রাদপি চাল্পমল্পং। হৃন্নাভিমধ্যে পরিবৃদ্ধিমেতি তস্যোদরং বদ্ধগুদং বদন্তি ॥ উপলেপিভিঃ পিচ্ছিলৈরন্নৈঃ শাকশালূকাদিভিঃ। বালাশ্মভিঃ বালুকাভিঃ কর্করৈর্ব্বা বালৈঃ কেশৈঃ অশ্মভিঃ পাষাণৈর্ব্বা। যথাবৎ যস্য যৎ সম্ভবতি। মলঃ পুরীষং। শঙ্করবৎ সংমার্জ্জনীক্ষিপ্তিতৃণধূল্যাদিবৎ। শঙ্করোঽবকরঃ পুমান্ ইত্যমরঃ। শঙ্করো ঘুণ ইতি লোকে। নাড্যাং অন্ত্রনাড্যাং। হৃন্নাভিমধ্যে হৃন্নাভ্যোর্মধ্যে ॥ * ॥ ক্ষতোদরমাহ। শল্যং যথান্নোপহতং যদন্ত্রং ভুক্তং ভিনত্ত্যাগতমন্যথা বা। তস্মাৎ ক্ষতোঽস্রাৎ সলিলপ্রকাশঃ স্রাবঃ স্রবেদ্বৈ গুদতস্তু ভূয়ঃ ॥ নাভেরধশ্চোদরমেতি বৃদ্ধিং নিস্তুদ্যতে দাল্যতি চাতিমাত্রং। এতৎ পরিস্রাব্যুদরং প্রদিষ্টং দকোদরং কীর্ত্তয়তো নিবোধ ॥ শল্যং কর্করাদি। অন্নোপহতং অন্ননিহিতং। ভুক্তং যদন্ত্রং ভিনত্তি। তথা অন্যথা আগতং ভোজনং বিনা আগতং শরাদি। তদপি যদন্ত্রং ভিনত্তি এতদুপলক্ষণং। জৃম্ভণমত্যশনং বা যদন্ত্রং ভিনত্তি। যত উক্তং চরকে। শর্করাতৃণকাষ্ঠাস্থিকণ্টকৈরন্নসংযুতৈঃ। ভিদ্যেতান্ত্রং যদা ভুক্তং জৃম্ভয়াত্যশনেন বেতি। তস্মাৎ ভিন্নাদন্ত্রাৎ। গুদতস্তু ভূয়ঃ অন্ত্রাৎ সংস্রুত্য পুনর্গুদতঃ স্রবেদিত্যর্থঃ। দাল্যতি বিদীর্য্যত ইব। পদসিদ্ধিরার্ষত্বাৎ। এতৎ ক্ষতোদরং তন্ত্রান্তরে পরিস্রাব্যুদরং প্রদিষ্টং ॥ * ॥ উদকোদরমাহ। যৎস্নেহপীতোঽপ্যনুবাসিতো বা বান্তো বিরিক্তোঽপ্যথবা নিরূঢ়ঃ। পিবেজ্জলং শীতলমাশু তস্য স্রোতাংসি দুষ্যন্তি হি তদ্বহানি ॥ স্নেহোপলিপ্তেষ্বথবাপি তেষূদকোদরং পূর্ব্ববদভ্যুপৈতি। স্নিগ্ধং মহত্তৎ পরিবৃত্তনাভি সমাততং পূর্ণমিবাম্বুনা চ ॥ যথা দৃতিঃ ক্ষুভ্যতি কম্পতে চ শব্দায়তে চাপি দকোদরং তৎ। স্নেহপীতঃ পীত ইত্যত্রাধ্যবসিতাদিত্বাৎ কর্ত্তরি ক্তঃ পশ্চাৎ স্নেহং পীতঃ স্নেহপীত ইতি তৎপুরুষঃ। তেন

স্নেহং পীতবানিত্যর্থঃ। অনুবাসিতো বা গৃহীতানুবাসনবস্তিঃ। বান্তঃ অত্রাপি পূর্ব্ববৎ কর্ত্তরি ক্তঃ তেন বান্তবানিত্যর্থঃ। এবং বিরিক্তঃ বিরিক্তবান্। তথা নিরূঢ়ঃ গৃহীতনিরূঢ়বস্তিঃ। স চেদাশু শীতলং জলং পিবেৎ। তস্য তদ্বহানি জলবহানি স্রোতাংসি দুষ্যন্তি স্বকর্ম্মদুষ্টানি ভবন্তি জলবহেষু স্রোতঃসু দুষ্টেষু সৎসু অন্নরসে উপস্নেহন্যায়েন বহির্ভূতে দকোদরমায়াতি। অথবা তেষু উদকবহেষু স্রোতঃসু স্নেহোপলিপ্তেষু পূর্ব্ববৎ যথাপূর্ব্বং। অন্নরসে উপস্নেহন্যায়েন বহির্নিঃসৃতে দকোদরমায়াতি। তথা জলেঽপি বহির্নিঃসৃতে দকোদরমায়াতি। তৎ উদরং। পরিবৃত্তনাভি গম্ভীরনাভি। সমাততং স্তব্ধং। যথা দৃতিঃ চর্ম্মময়ং জলাহরণপাত্রং। ক্ষুভ্যতি অন্তর্জলদোলনেন সঞ্চলতি কম্পতে বহিঃ শব্দায়তে কম্পমানং সৎ শব্দং করোতি ॥ * ॥ সাধ্যাসাধ্যলক্ষণমাহ। জন্মনৈবোদরং সর্ব্বং প্রায়ঃ কৃচ্ছ্রতমং মতং। বলিনস্তদজাতাম্বু যত্নসাধ্যং নবোত্থিতং ॥ বলিনঃ অজাতাম্বু নবোত্থিতঞ্চ যত্নসাধ্যমিত্যন্বয়ঃ। পশ্চাদ্বদ্ধগুদং তূর্দ্ধং সর্ব্বং জাতোদকং তথা। প্রায়ো ভবত্যভাবায় ছিদ্রান্ত্রঞ্চ দকোদরং ॥ ছিদ্রান্ত্রং শরাদিনা ছিদ্রমন্ত্রং যস্য তদুদরং অভাবায় ভবতি ॥ * ॥ জাতোদকস্যোদরস্য লক্ষণমাহ। চরকঃ। পয়ঃপূর্ণা দৃতিরিব ক্ষোভে শব্দকরং মৃদু। অপ্রব্যক্তশিরঃশূলং নিতান্তমুদরং মহৎ ॥ আলস্যমাস্যবৈরস্যং মূত্রং বহু সকৃচ্ছ্রতঃ। জাতোদকস্য লিঙ্গং স্যান্মন্দোঽগ্নিঃ পাণ্ডুতাপি চ ॥ শূলাক্ষং কুটিলোপস্থমুপক্লিন্নতনুত্বচং। বলশোণিতমাংসাগ্নিপরিক্ষীণঞ্চ বর্জ্জয়েৎ ॥ শূলাক্ষস্থানে শূনাক্ষমিতি চ পাঠঃ। কুটিলোপস্থং বক্রমেহনং। উপক্লিন্নতনুত্বচং উপরি আর্দ্রা তন্বী ত্বগ্যস্য। তং উদরিণং। পার্শ্বভঙ্গান্নবিদ্বেষশোফাতীসারপীড়িতং। বিরিক্তং চাপ্যুদরিণং পূর্য্যমাণং বিবর্জ্জয়েৎ ॥ বিরিক্তমপি পূর্য্যমাণং পূর্য্যমাণোদরং উদরিণং বিবর্জ্জয়েৎ ॥ * ॥ * ॥ অথোদরস্য চিকিৎসা। এরণ্ডতৈলং দশমূলমিশ্রং গোমূত্রযুক্তস্ত্রিফলারসো বা। নিহন্তি বাতোদরশোথশূলান্ কাথঃ সমূত্রো দশমূলজশ্চ ॥ কুষ্ঠং দন্তী যবক্ষারঃ পাঠা ত্রিলবণং বচা। শুণ্ঠী চোষ্ণাম্বুনা পীতা বাতোদররুজাপহা ॥ কুষ্ঠাদিচূর্ণং ॥ * ॥ লশুনস্য তুলামেকাং জলদ্রোণে বিপাচয়েৎ। ত্রিকটু ত্রিফলা দন্তী হিঙ্গু সৈন্ধবচিত্রকং ॥ দেবদারু বচা কুষ্ঠং মধু শিগ্রুঃ পুনর্নবা। সৌবর্চ্চলং বিড়ঙ্গানি দীপ্যকো গজপিপ্পলী ॥ এতেষাং পলিকান্ ভাগান্ ত্রিবৃতঃ ষট্পলানি চ। পিষ্ট্বা কষায়েণৈতেন তৈলং মৃদ্বগ্নিনা পচেৎ ॥ তৎ পিবেৎ প্রাতরুত্থায় যথাগ্নিবলমাত্রয়া। নিহন্তি সকলান্ রোগান্ উদরাণি বিশেষতঃ ॥ মূত্রকৃচ্ছ্রমুদাবর্ত্তমন্ত্রবৃদ্ধিগুদক্রমীন্। পার্শ্বকুক্ষিভবং শূলমামশূলমরোচকং ॥

যকৃদষ্ঠীলিকানাহান্ প্লীহানং চাঙ্গবেদনাং। মাসমাত্রেণ নশ্যন্তি অশীতির্বাতজা গদাঃ॥ রসোনতৈলং ॥ * ॥ পিত্তোদরেষু বলিনং পূর্ব্বমেব বিরেচয়েৎ। দুর্ব্বলং হনু বাস্পাদৌ শোধয়েৎ সৌরবস্তিনা। সংজাত-বলকায়াগ্নিং পুনঃস্নিগ্ধং বিরেচয়েৎ॥ পয়সা চ ত্রিবৃৎকল্কৈরুবুকস্য শৃতেন চ॥ পিপ্‌পল্যাদিগণেনাজ্যং পাচিতং পায়-য়েদ্ভিষক্। নরং পথ্যভুজং নিত্যং কফো-দরনিরস্তয়ে ॥ * ॥ নাগরত্রিফলাকল্কৈ-র্দধ্যম্বুপরিপেষিতৈঃ। পাচিতং তৈল-মাজ্যঞ্চ পিবেৎ সর্ব্বোদরাপহং ॥ নাগ-রাদিতৈলং ঘৃতঞ্চ ॥ * ॥ শালিযষ্টিক গোধূমযবনীবারভোজনং। নিরূহো রেচনং শ্রেষ্ঠং সর্ব্বেষু জঠরেষু চ॥ আনূপ-মোদনং মাংসং শাকং পিষ্টকৃতং তিলাঃ। ব্যায়ামঞ্চ দিবাস্বপ্নপানপানানি বর্জ্জয়েৎ॥ তথোগ্রলবণোষ্ণানি বিদাহীনি গুরূণি চ। নাদ্যাদন্নানি জঠরে তোয়পানঞ্চ বর্জ্জয়েৎ ॥ উদরাণাং মলাঢ্যত্বাদ্বহুশঃ শোধনং হিতং। ক্ষীরেণৈরণ্ডতৈলং বা পিবেন্মূত্রেণ বা সকৃৎ ॥ * ॥ বাতোদরী পিবেত্তক্রং পিপ্‌পলীলবণান্বিতং। শর্করা-মরিচোপেতং স্বাদু পিত্তোদরী পিবেৎ॥ যবানীহপুষাজাজীব্যোষযুক্তং কফোদরী। সন্নিপাতোদরী যুক্তং ত্রিকটুক্ষারসৈন্ধবৈঃ॥ যবানী হপুষা ধান্যং ত্রিফলা চোপ-কুঞ্চিকা। কারবী পিপ্‌পলীমূলমজগন্ধা শটী বচা ॥ শতাহ্বা জীরকো ব্যোষং স্বর্ণক্ষীরী চ চিত্রকং। দ্বৌ ক্ষারৌ পৌষ্করং

মূলং কুষ্ঠং লবণপঞ্চকং॥ বিড়ঙ্গঞ্চ সমাং-সানি দন্ত্যা ভাগত্রয়ং ভবেৎ। ত্রিবৃদ্বিশালে দ্বিগুণে সাতলা স্যাচ্চতুর্গুণা ॥ এষ নারা-য়ণো নাম্না চূর্ণো রোগগণাপহঃ। এনং প্রাপ্য নিবর্ত্তন্তে রোগা বিষ্ণুমিবাসুরাঃ ॥ তক্রেণোদরিভিঃ পেয়ো গুল্মিভির্বাদরা-ম্বুনা। আনদ্ধবাতে সুরয়া বাতরোগে প্রসন্নয়া ॥ দধিমণ্ডেন বিড়্‌বন্ধে দাড়ি-মাম্বুভিরর্শসে। পরিকর্ত্তেষু বৃক্ষাম্লৈ-রুষ্ণাম্বুভিরজীর্ণকে॥ ভগন্দরে পাণ্ডুরোগে কাসে শ্বাসে গলগ্রহে। হৃদ্রোগে গ্রহণী-রোগে কুষ্ঠে মন্দেহনলে জ্বরে॥ দংষ্ট্রা-বিষে মূলবিষে সগরে কৃত্রিমে বিষে। যথার্হং স্নিগ্ধকোষ্ঠেন পেয়মেতদ্বিরে-চনং॥ উপকুঞ্চিকা কারবী চ বৃহজ্জীরকঃ। যস্য মগরৈলা নাম ইতি লোকে। তস্য ভাগদ্বয়ং গ্রাহ্যং পুনরুক্তেঃ। স্বর্ণক্ষীরী চোক ইতি লোকে। বিশালা ইন্দ্রবারুণী। সাতলা সীহুণ্ডভেদঃ সাতলেত্যেব প্রসিদ্ধা। পরিকর্ত্তো গুদে পরিকর্ত্তনবৎ পীড়া। ইতি নারায়ণচূর্ণং ॥ * ॥ স্নুক্‌ক্ষীর-দন্তীত্রিফলাবিড়ঙ্গসিংহীত্রিবৃচ্চিত্রকসূর্য্য-কল্কৈঃ। ঘৃতং বিপক্বং কুড়বপ্রমাণং তোয়েন তস্যাক্ষসমেন কর্ষং॥ পীতোষ্ণ-মম্ভোঽনুপিবেদ্বিরেকে পেয়ং রসং বা প্রপিবেদ্বিধিজ্ঞঃ। নারাচমেনং জঠরা-ময়াণামুক্তং প্রযুক্তং প্রবদন্তি সন্তঃ ॥ নারাচঘৃতং ॥ * ॥ বজ্রাণ্যাঃ কর্ষমাত্রায়াঃ কল্কং দধ্যাদিবেষ্টিতং। নিগিলেদ্বারিণা নিত্যমুদরব্যাধিশান্তয়ে॥ বজ্রাণী শূরণ-

পত্রো মাণভেদঃ। বজ্রাণ্ডী ইতি লোকে॥*॥ পুনর্নবাদারুনিশাসবিশ্বাপটোলপথ্যাঃ পি,চু-মন্দদারু। সনাগরচ্ছিন্নরুহেতি সর্ব্বৈঃ কৃতঃ কষায়ো বিধিনা বিধিজ্ঞৈঃ॥ গোমূত্রযুক্ গুগ্গুলুনা চ যুক্তঃ পীতঃ প্রভাতে নিয়তং নরাণাং। সর্ব্বাঙ্গ-শোথোদরপার্শ্বশূলশ্বাসান্বিতং পাণ্ডুগদং নিহন্তি॥ পুনর্নবাদিকাথঃ। ইত্যুদরাধি-কারঃ। ইতি ভাবপ্রকাশঃ॥

উদরগ্রন্থিঃ (পুং) গুল্মরোগঃ। ইতি হেমচন্দ্রঃ॥

উদরত্রাণং (ক্লী) উদরবন্ধবস্ত্রাদি। তৎ পর্য্যায়ঃ। নাগোদং ২। ইতি হেমচন্দ্রঃ॥

উদরথিঃ (পুং) সমুদ্রঃ। সূর্য্যঃ। ইতি হেমচন্দ্রঃ॥

উদরপিশাচঃ (ত্রি) সর্ব্বান্নখাদকঃ। তৎ-পর্য্যায়ঃ। সর্ব্বান্নীনঃ ২ সর্ব্বান্নভক্ষকঃ ৩। ইতি হেমচন্দ্রঃ॥

উদরম্ভরিঃ (ত্রি) স্বোদরমাত্রপূরকঃ। তৎ-পর্য্যায়ঃ। কুক্ষিম্ভরিঃ ২ আত্মম্ভরিঃ ৩। ইতি হেমচন্দ্রঃ॥

উদরব্যাধিঃ (পুং) উদররোগবিশেষঃ। যথা। কদলী যবক্ষারস্তু পানীয়েন প্রসাধিতং। তদাস্বাদনান্নশ্যন্তি উদরব্যাধয়োঽখিলাঃ॥ ইতি গারুড়ে ১৯৪ অধ্যায়ঃ॥

উদররোগঃ (পুং) জঠরব্যাধিবিশেষঃ। উদরী ইতি ভাষা। অস্য নিদানাদি উদরশব্দে দ্রষ্টব্যং॥

উদরাময়ঃ (পুং) রোগবিশেষঃ। তৎপর্য্যায়ঃ। অন্নগন্ধিঃ ২ অতিসারঃ ৩। ইতি ত্রিকাণ্ড-শেষঃ॥

উদরাবর্ত্তঃ (পুং) নাভিঃ। ইতি রাজনির্ঘণ্টঃ॥

উদরিণী (স্ত্রী) গর্ব্ভবতী। ইতি হেমচন্দ্রঃ॥

উদরিলঃ (ত্রি) বৃহদুদরযুক্তঃ। ভুঁড়িয়া ইতি ভাষা। তৎপর্য্যায়ঃ। পিচিণ্ডিলঃ ২ বৃহৎ-কুক্ষিঃ ৩ তুন্দিঃ ৪ তুন্দিকঃ ৫ তুন্দিলঃ ৬ উদরী ৭। ইতি হেমচন্দ্রঃ॥

উদরী [ন্] (ত্রি) উদরিলঃ। ইতি হেমচন্দ্রঃ॥

উদর্কঃ (পুং) উত্তরকালোদ্ভবফলং। ইত্য-মরঃ॥ ভবিষ্যৎকালঃ। ইতি ধরণী॥ মদনকণ্টকং। ময়না গাছের কাঁটা ইতি ভাষা। ইতি মেদিনী॥

উদর্চ্চিঃ [স্] (ত্রি) উৎপ্রভঃ। ইতি মেদিনী॥

উদর্চ্চিঃ [স্] (পুং) অগ্নিঃ। ইতি মেদিনী॥ শিবঃ। কন্দর্পঃ। ইতি শব্দরত্নাবলী॥

উদর্দঃ (পুং) রোগবিশেষঃ। তস্য লক্ষণং। বটীদষ্টসংস্থানঃ শোথঃ সংজায়তে বহিঃ। সকণ্ডুস্তোদবহুলঃ ছর্দ্দিজ্বরবিদাহবান্॥ উদর্দ্দমিতি তং বিদ্যাচ্ছীতপিত্তমথাপরে। বাতাধিকং শীতপিত্তমুদর্দ্দঞ্চ কফাধিকং॥ ইতি নিদানং॥

উদলাবণিকঃ (ত্রি) লবণোদকসংসিদ্ধব্যঞ্জ-নাদিঃ। ইতি হলায়ুধঃ॥

উদবসিতং (ক্লী) গৃহং। ইত্যমরঃ॥

উদশ্বিৎ (ক্লী) অর্দ্ধজলযুক্তঘোলং। ইত্যমরঃ॥ অস্য গুণাঃ। লেপাৎ কুষ্ঠরোগনাশিত্বং। দাহতৃষ্ণামুখশোষনাশিত্বঞ্চ। ইতি রাজ-বল্লভঃ॥

উদাত্তং (ত্রি) দয়াত্যাগাদিসম্পন্নং। ইতি মেদিনী॥ হৃদ্যং। দাতৃ। মহৎ। ইতি হেমচন্দ্রঃ॥

উদাত্তঃ (পুং) স্বরভেদঃ। স তু বেদগানে

উচ্চৈঃস্বরঃ। ইত্যমরঃ॥ দানং। বাদ্য-বিশেষঃ। ইতি শব্দরত্নাবলী॥ কাব্যা-লঙ্কারভেদঃ। ইতি মেদিনী॥

উদানঃ (পুং) কণ্ঠস্থবায়ুঃ। ইত্যমরঃ॥ তস্য কর্ম্ম ঊর্দ্ধনয়নং। ইতি শ্রীধরস্বামী॥ ঊর্দ্ধগমনবান্ কণ্ঠস্থানীয়োৎক্রমণবায়ুঃ। ইতি বেদান্তঃ॥ উদরাবর্ত্তঃ। নাভিঃ। সর্পবিশেষঃ। ইতি মেদিনী॥ পক্ষ্ম। ইতি শব্দরত্নাবলী॥

উদারঃ (ত্রি) দাতা। মহান্। ঋজ্বাশয়ঃ। তৎপর্য্যায়ঃ। দক্ষিণঃ ২ সরলঃ ৩। ইত্যমরঃ॥

উদাবৎসরঃ (পুং) সংবৎসরাদিপঞ্চান্তর্গত-বৎসরবিশেষঃ। অস্মিন্ বর্ষে রৌপ্যদানং মহাফলং। ইতি বিষ্ণুধর্ম্মোত্তরং॥

উদাবর্ত্তঃ (পুং) রোগবিশেষঃ। তৎপর্য্যায়ঃ। গুদগ্রহঃ ২। ইতি হেমচন্দ্রঃ॥ মলমূত্র-বায়ুরোধকরোগঃ। তস্য নিদানং সং প্রাপ্তিশ্চ। বাতবিম্মূত্রজৃম্ভাশ্রুক্ষবোদ্গার-বমীন্দ্রিয়ং। ক্ষুত্তৃষ্ণোচ্ছ্বাসনিদ্রাণাং ধৃত্যো-দাবর্ত্তসম্ভবঃ॥ ইতি নিদানং॥

উদাসঃ (পুং) উৎক্ষেপঃ। উদ্ভাবঃ। ঔদাস্য-যুক্তে ত্রি॥

উদাসীনঃ (পুং) পরতরঃ। ইত্যমরঃ॥ বিজি-গীষোঃ শত্রুমিত্রভূমিতো ব্যবহিতঃ ব্যব-হিতত্বাদেব নোপকারী নাপ্যপকারী কেবল-মূর্দ্ধমাসীন ইব। ইতি ভরতঃ॥

উদাস্থিতঃ (পুং) চরঃ। দ্বারপালঃ। অধ্যক্ষঃ। ইতি হেমচন্দ্রঃ॥ প্রব্রজ্যাবসিতঃ। নষ্ট-সন্ন্যাসঃ। ইতি মেদিনী॥

উদাহরণং (ক্লী) দৃষ্টান্তঃ। তৎপর্য্যায়ঃ। উপোদ্ঘাতঃ ২ উদাহারঃ ৩ ইতি শব্দরত্না-বলী॥ পঞ্চন্যায়াবয়বান্তর্গতমিদং॥

উদাহারঃ (পুং) উদাহরণং। ইত্যমরঃ॥ প্রকৃতোপপাদকদৃষ্টান্তাদিঃ। ইতি ভরতঃ॥ যুক্তিপ্রাপ্ত্যর্থনিদর্শনং ইতি সাঙ্খ্যঃ॥ প্রকৃত-সিদ্ধার্থা চিন্তা। ইতি রায়মুকুটঃ॥

উদিতঃ (ত্রি) উক্তঃ। বদ্ধঃ। ইত্যমরঃ॥ উদ্গতঃ। প্রাপ্তোদয়ঃ। ইতি মেদিনী॥

উদিতোদিতঃ (ত্রি) শাস্ত্রজ্ঞঃ। ইতি স্মৃতিঃ॥

উদীচী (স্ত্রী) উত্তরা দিক্। ইত্যমরঃ॥

উদীচীনং (ত্রি) উদীচ্যাং ভবং। উত্তরদিগ্-জাতবস্তু। ইতি হেমচন্দ্রঃ॥

উদীচ্যং (ক্লী) বালনামগন্ধদ্রব্যং। বালা ইতি খ্যাতং। ইত্যমরঃ॥

উদীচ্যঃ (পুং) শরাবতিনদ্যাঃ পশ্চিমোত্তর-দেশঃ। ইত্যমরঃ॥

উদীরণং (ক্লী) কথনং। ইতি হলায়ুধঃ॥

উদীর্ণঃ (ত্রি) উদারঃ। মহান্। ইতি জটাধরঃ॥

উদুম্বরং (ক্লী) তাম্রং। ইত্যমরঃ॥

উদুম্বরঃ (পুং) উড়ুম্বরবৃক্ষঃ। যজ্ঞডুমুর ইতি ভাষা। তৎপর্য্যায়ঃ। ক্ষীরবৃক্ষঃ ২ হেম-দুগ্ধঃ ৩ সদাফলঃ ৪ কালস্কন্ধঃ ৫ যজ্ঞ-যোগ্যঃ ৬ যজ্ঞীয়ঃ ৭ সুপ্রতিষ্ঠিতঃ ৮ শীত-বল্কঃ ৯ জন্তুফলঃ ১০ পুষ্পশূন্যঃ ১১ পবি-ত্রকঃ ১২ সৌম্যঃ ১৩ শীতফলঃ ১৪। অস্য পক্কফলগুণাঃ। মধুরত্বং। হিমত্বং। কৃমিকারিত্বং। রক্তপিত্ততৃষ্ণামূর্চ্ছাদাহনাশি-ত্বঞ্চ। অস্য সুপক্কফলগুণাঃ। অতিশয়-শীতলত্বং। মধুরত্বং। পিত্তশ্রমশোষ-

হারিত্বঞ্চ। অস্যামফলগুণাঃ। কষায়ত্বং। অগ্নিদীপনত্বং। রুচিকারিত্বং। মাংসবর্দ্ধকত্বং। রক্তবিকারকারিত্বঞ্চ॥ অস্য ত্বগ্‌গুণাঃ। শীতত্বং। কষায়ত্বং। ব্রণনাশিত্বং। গর্ব্ভিণীগর্ব্ভসংরক্ষকত্বং। স্তনদুগ্ধদাতৃত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ কুষ্ঠবিশেষঃ। দেহলী। গোবরাটের নীচের কাঠ ইতি ভাষা। পশুকঃ। নপুংসকং। ইতি হেমচন্দ্রঃ॥

উদুম্বরদলা (স্ত্রী) দন্তীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

উদুম্বরপর্ণী (স্ত্রী) উড়ম্বরপর্ণী। দন্তিকাবৃক্ষঃ। ইত্যমরঃ॥

উদূখলং (ক্লী) গুগ্‌গুলুঃ। ইতি মেদিনী॥ তণ্ডুলকণ্ডনার্থকাষ্ঠনির্ম্মিতপাত্রং। উখলি ইতি ভাষা। তৎপর্য্যায়ঃ। উলূখলং ২। ইত্যমরঃ॥

উদূঢ়ঃ (ত্রি) ঊঢ়ঃ। স্থূলঃ। ইতি মেদিনী॥

উদ্গতং (ত্রি) উদ্বান্তং। ছর্দ্দিতবস্তু। ইত্যমরঃ॥ ঊর্দ্ধগতং। উদিতং॥

উদ্গমঃ (পুং) ঊর্দ্ধগমনং। উদয়ঃ॥

উদ্গমনীয়ং (ক্লী) ধৌতবস্ত্রদ্বয়ং। ধোয়া যোড় ইতি ভাষা। ইত্যমরঃ॥

উদ্গাঢ়ং (ক্লী) অতিশয়ঃ। তদ্‌যুক্তে ত্রি। ইত্যমরঃ॥

উদ্গাতা [ঋ] (পুং) সামবেদজ্ঞঃ। সামবেদবিদ্‌ব্রাহ্মণঃ। ইত্যমরঃ॥

উদ্গারঃ (পুং) উদ্বমনং। ইত্যমরঃ॥ শব্দঃ। ইতি ভরতঃ॥ কণ্ঠগর্জ্জনং। ঢেকুর ইতি ভাষা। ইতি জটাধরঃ॥ তত্তু নাগবায়ুকর্ম্ম। ইতি শ্রীধরস্বামী॥

উদ্গীতং (ত্রি) উচ্চৈর্গীতং। ইতি দেবীমাহাত্ম্যং॥

উদ্গীথঃ (পুং) সামবেদভেদঃ। প্রণবঃ। ইত্যমরটীকায়াং ভরতঃ॥ সামবেদধ্বনিঃ। ইত্যরুণঃ॥ সামগানং। ইতি সারসুন্দরী॥ সাম্নাং দ্বিতীয়োঽধ্যায়ঃ। ইতি ভগীরথঃ॥

উদ্গূর্ণং (ত্রি) উদ্যতং। ইত্যমরঃ॥ উত্তোল্যধৃতবস্ত্রাদি। ইতি ভরতঃ॥

উদ্গ্রাহঃ (পুং) উদ্‌গ্রহণং। ঊর্দ্ধীকৃত্য কস্যচিৎ গ্রহণং। ইত্যমরঃ॥ বিদ্যাবিচারঃ। ইতি ভরতঃ॥

উদ্গ্রাহিতঃ (ত্রি) উদীর্ণঃ। বদ্ধঃ। গ্রাহিতঃ। ইতি মেদিনী॥ উপন্যস্তঃ। ইতি হেমচন্দ্রঃ॥

উদ্ঘঃ (পুং) প্রশস্তঃ। প্রকাণ্ডঃ। ইত্যমরঃ॥

উদ্ঘনঃ (পুং) যত্র কাষ্ঠে কাষ্ঠং নিধায় তক্ষতে তৎ। পরকাঠ ইতি ভাষা। ইত্যমরঃ॥

উদ্ঘর্ষণং (ক্লী) গাত্রাদিঘর্ষণং। ইষ্টকয়া উদ্ঘর্ষণগুণাঃ। কণ্ডুকোঠনাশিত্বং। ত্বগ্‌গতাগ্নিতেজনত্বং। শিরাসুখকারকত্বঞ্চ। ইতি রাজবল্লভঃ॥

উদ্ঘসং (ক্লী) মাংসং। ইতি হারাবলী॥

উদ্ঘাটঃ (পুং) গৃহভেদঃ। চৌকির ঘর থানা ইত্যাদি ভাষা। ইতি ত্রিকাণ্ডশেষঃ॥

উদ্ঘাটকং (ক্লী) কূপাজ্জলোত্তোলনার্থযন্ত্রবিশেষঃ। তৎপর্য্যায়ঃ। ঘটীযন্ত্রং ২। ইতি হেমচন্দ্রঃ॥

উদ্ঘাটনং (ক্লী) কূপাৎজলোত্তোলনার্থং রজ্জুসহিতঘটঃ। তৎপর্য্যায়ঃ। ঘটীযন্ত্রং ২। ইত্যমরঃ॥ উত্তোলনং। ইতি ভরতঃ॥

উদ্ঘাটিতঃ ( ত্রি ) কৃতোদ্ঘাটনং। খোলা ইতি ভাষা ॥

উদ্ঘাটিতজ্ঞঃ (ত্রি) প্রাজ্ঞঃ। ইতি ত্রিকাণ্ডশেষঃ॥

উদ্ঘাতঃ ( পুং ) আরম্ভঃ। ইত্যমরঃ ॥ শস্ত্রং। গ্রন্থপরিচ্ছেদঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ পাদস্খলনং। সমুপক্রমঃ। পবনাভ্যাস-যোগায় কুম্ভকাদিত্রয়ং। উত্তুঙ্গঃ। মুদ্গরং। ইতি মেদিনী ॥

উদ্‌ঝ শ ত্যাগে। ইতি কবিকল্পদ্রুমঃ ॥ হ্রস্বাদির্দন্ত্যবর্গতৃতীয়োপধঃ। ক্বিপি সমুৎ-সমুদ্‌ভ্যাং। স্যাদোনবদ্র ইতি উজ্ঝি-ঝিষতি ঔজ্ঝিঝৎ। শ উজ্‌ঝতী উজ্‌ঝন্তী। ইতি দুর্গাদাসঃ ॥

উদ্দংশঃ ( পুং ) কীটবিশেষঃ। তৎপর্য্যায়ঃ। মৎকুণঃ ২ কোণকুণঃ ৩ কিটিভিঃ ৪ উৎ-কুণঃ ৫। ইতি হেমচন্দ্রঃ ॥

উদ্দগুপালঃ ( পুং ) সর্পবিশেষঃ। মৎস্যভেদঃ। ইতি মেদিনী ॥

উদ্দন্তুরঃ ( ত্রি ) উত্তুঙ্গঃ। করালঃ। উৎকট-দন্তঃ। ইতি মেদিনী ॥

উদ্দানং ( ক্লী ) বন্ধনং। ইত্যমরঃ ॥ উদ্দমঃ। চুল্লী। বাড়বাগ্নিঃ। মধ্যঃ। লগ্নঃ। ইতি বিশ্বঃ॥

উদ্দামঃ ( ত্রি ) বন্ধনরহিতঃ। স্বতন্ত্রঃ। ইতি মেদিনী ॥ মহান্। যথা। উদ্দামদন্তুর-বিধুন্তুদদন্তঘাতৈঃ। ইতি প্রব্রজ্যা ॥

উদ্দামঃ ( পুং ) বরুণঃ। ইতি মেদিনী ॥

উদ্দালঃ ( পুং ) বহুবারকবৃক্ষঃ। ইত্যমরঃ ॥ বনকোদ্রবঃ। ইতি রত্নমালা ॥

উদ্দালকঃ ( পুং ) বহুবারকবৃক্ষঃ। ইতি শব্দ-রত্নাবলী ॥

উদ্দিতঃ ( ত্রি ) বদ্ধঃ। ইত্যমরটীকায়াং ভরতঃ ॥

উদ্দীপকঃ ( ত্রি ) উদ্দীপনকর্ত্তা ॥

উদ্দীপনং ( ক্লী ) প্রকাশনং। বিভাববিশেষঃ। যথা আলম্বনোদ্দীপনাখ্যৌ তস্য ভেদাবুভৌ স্মৃতৌ। উদ্দীপনবিভাবাস্তে রসমুদ্দীপয়ন্তি যে ॥ তে চ। আলম্বনস্য চেষ্টাদ্যা দেশ-কালাদয়স্তথা। চেষ্টাদীত্যাদি শব্দাৎ রূপভূষণাদয়ঃ। কালাদি ইত্যাদি শব্দাৎ চন্দ্রচন্দনকোকিলালাপভ্রমরঝঙ্কারাদয়ঃ। ইতি সাহিত্যদর্পণং ॥

উদ্দীপ্তঃ ( ত্রি ) প্রকাশিতঃ ॥

উদ্দীপ্রং ( ক্লী ) গুগ্‌গুলুঃ। ইত্যমরটীকায়াং ভরতধৃতবাচস্পতিঃ ॥

উদ্দেশঃ ( পুং ) অনুসন্ধানং। অন্বেষণং ॥

উদ্দেশকঃ ( ত্রি ) উদ্দেশকর্ত্তা। উদাহরণং। ইতি লীলাবতী ॥

উদ্দেশ্যঃ ( ত্রি ) উদ্দেষ্টব্যঃ। উদ্দেশনীয়ঃ। প্রয়োজনং ॥

উদ্দেহিকা ( স্ত্রী ) কীটবিশেষঃ। তৎপর্য্যায়ঃ। উপজিহ্বিকা ২ উৎপাদিকা ৩ বর্টিঃ ৪ দিবী ৫। ইতি হারাবলী ॥

উদ্দ্রাবঃ ( পুং ) পলায়নং। ইত্যমরঃ ॥

উদ্ধতঃ ( পুং ) রাজমল্লঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

উদ্ধতং ( ত্রি ) অবিনীতং। ইতি হেমচন্দ্রঃ ॥

উদ্ধতমনস্কত্বং ( ক্লী ) গর্ব্বঃ। অভিমানঃ। ইতি শব্দরত্নাবলী ॥

উদ্ধরণং ( ক্লী ) উদ্ধারঃ। বান্তান্নং। উন্মূ-লনং। ইতি মেদিনী ॥ মুক্তিঃ। ইতি শব্দরত্নাবলী ॥

উদ্ধর্ষঃ ( পুং ) উৎসবঃ । ইত্যমরঃ ॥
উদ্ধর্ষণং ( ক্লী ) রোমাঞ্চঃ । ইতি হেমচন্দ্রঃ ॥
উদ্ধবঃ ( পুং ) উৎসবঃ। ইত্যমরঃ ॥ যজ্ঞাগ্নিঃ। যাদববিশেষঃ। ইতি মেদিনী ॥ বৃষ্ণীণাং সম্মতো মন্ত্রী কৃষ্ণস্য দয়িতঃ সখা। শিষ্যো বৃহস্পতেঃ সাক্ষাদুদ্ধবো বুদ্ধিসত্তমঃ ॥ ইতি শ্রীভাগবতং ॥
উদ্ধানং ( ক্লী ) চুল্লী। ইত্যমরঃ ॥
উদ্ধানঃ (ত্রি) উদ্গতঃ। বমিতঃ। ইতি মেদিনী ॥
উদ্ধান্তঃ ( পুং ) নির্মদহস্তী। ইত্যমরঃ ॥ উদ্বান্তঃ। ইতি রমানাথঃ ॥
উদ্ধারঃ ( পুং ) ঋণং। ইত্যমরঃ ॥ উদ্ধৃতিঃ। ইতি মেদিনী ॥
উদ্ধারং ( ক্লী ) উদ্ধানং। উনন্ আকা ইত্যাদি ভাষা। ইত্যমরটীকায়াং স্বামী ॥
উদ্ধারণং ( ক্লী ) উদ্ধারকরণং। উত্তোলনং ॥
উদ্ধারা ( স্ত্রী ) গুড়ূচী। ইতি শব্দচন্দ্রিকা ॥
উদ্ধূননং ( ক্লী ) একত্রিতৈলালবঙ্গকর্পূর-কস্তূরীমরিচত্বচচূর্ণং। ইতি পাকরাজেশ্বরঃ ॥
উদ্ধূষণং ( ক্লী ) রোমাঞ্চঃ। ইতি হলায়ুধঃ ॥
উদ্ধৃতঃ ( ত্রি ) কৃতোদ্ধরণং। তোলা ইতি ভাষা। তৎপর্য্যায়ঃ। সমুদক্তঃ ২। ইত্যমরঃ ॥ উৎক্ষিপ্তঃ। পরিভুক্তোজ্ঝিতঃ। ইতি মেদিনী ॥
উদ্ধ্মানং ( ক্লী ) চুল্লী। ইত্যমরটীকায়াং ভরতঃ
উদ্ধ্যঃ ( পুং ) নদঃ। ইতি ব্যাকরণং ॥
উদ্ধুরঃ ( ত্রি ) বিকসিতঃ। ইতি হলায়ুধঃ
উদ্বোধঃ ( পুং ) কিঞ্চিৎজ্ঞানং ॥
উদ্ভটঃ ( পুং ) কচ্ছপঃ। সূর্য্যঃ। ইতি মেদিনী ॥
উদ্ভটঃ ( ত্রি ) প্রবরঃ। ইতি নৈষধটীকা ॥ শ্রেষ্ঠাশয়ঃ। তৎপর্য্যায়ঃ। মহেচ্ছঃ ২ উদারঃ ৩ উদাত্তঃ ৪ উদীর্ণঃ ৫ মহাশয়ঃ ৬ মহামনাঃ ৭ মহাত্মা ৮। ইতি হেমচন্দ্রঃ ॥
উদ্ভবঃ ( পুং ) জন্ম। উৎপত্তিঃ। ইত্যমরঃ ॥
উদ্ভিজঃ ( ত্রি ) উদ্ভিজ্জঃ। ইত্যমরটীকায়াং রমানাথঃ ॥
উদ্ভিজ্জং (ত্রি) উদ্ভিদ্যজাতমাত্রং। তচ্চ তরুগুল্মাদি। ইত্যমরঃ ॥
উদ্ভিৎ [ দ্ ] ( ত্রি ) উদ্ভিজ্জং। ইত্যমরঃ ॥ তচ্চ পঞ্চধা। বৃক্ষঃ ১ গুল্মঃ ২ লতা ৩ বল্লী ৪ তৃণং ৫ ॥
উদ্ভিদং ( ত্রি ) তরুগুল্মাদি। তৎপর্য্যায়ঃ। উদ্ভিৎ ২ উদ্ভিজ্জং ৩। ইত্যমরঃ ॥ উদ্ভিজং ৪। ইতি রমানাথঃ ॥
উদ্ভিদং ( ক্লী ) পাংশুলবণং। পাঙা লুণ ইতি ভাষা। ইতি রত্নমালা ॥
উদ্ভূতঃ ( ত্রি ) উৎপন্নঃ। জাতঃ। যথা। ঈশানসংহিতায়াং। মাঘে কৃষ্ণচতুর্দ্দশ্যামাদিদেবো মহানিশি। শিবলিঙ্গতয়োদ্ভূতঃ কোটিসূর্য্যসমপ্রভঃ ॥ ইতি তিথ্যাদিতত্ত্বং ॥
উদ্ভূতরূপং ( ক্লী ) নয়নগোচররূপং। যথা। উদ্ভূতরূপং নয়নস্য গোচরং দ্রব্যাণি তদ্বন্তি পৃথক্ত্বসংখ্যা। বিভাগসংযোগপরাপরত্বস্নেহদ্রবত্বং পরিমাণযুক্তং ॥ ক্রিয়াজাতী যোগ্যবৃত্তী সমবায়ঞ্চ তাদৃশং। গৃহ্লাতি চক্ষুঃ সম্বন্ধাদালোকোদ্ভূতরূপয়োঃ ॥ ইতি ভাষাপরিচ্ছেদঃ ॥

উদ্ভ্রমঃ ( পুং ) উদ্বেগঃ। ইত্যমরঃ॥

উদ্ভ্রান্তং ( ক্লী ) বাহুমুদ্যম্য মণ্ডলাকারখড়্গভ্রামণং। ইতি মহাভারতং॥

উদ্যঃ ( পুং ) নদঃ। ইতি হেমচন্দ্রঃ॥

উদ্যতং ( ত্রি ) উত্তোল্যধৃতবস্ত্রাদি। উদ্যতশস্ত্রাদি। তৎপর্য্যায়ঃ। উদ্গূর্ণং ২। ইত্যমরঃ॥

উদ্যতঃ ( পুং ) গ্রন্থপরিচ্ছেদঃ। ইতি জটাধরঃ॥

উদ্যমঃ ( পুং ) উদ্যোগঃ। তৎপর্য্যায়ঃ। গুরণং ২। ইত্যমরঃ॥ গূরণং ৩ গোরণং ৪। ইতি তট্টীকা॥ উৎসাহঃ ৫ অধ্যবসায়ঃ৬ উদ্যোগঃ৭। ইতি জটাধরঃ॥

উদ্যানং ( ক্লী ) রাজ্ঞঃ সাধারণং বনং। তৎপর্য্যায়ঃ। আক্রীড়ঃ ২। নিঃসরণং। প্রয়োজনং। ইত্যমরঃ॥

উদ্যানপালঃ ( ত্রি ) উদ্যানরক্ষকঃ। মালী ইতি ভাষা॥

উদ্যুক্তঃ ( ত্রি ) উদ্যমযুক্তঃ। উদ্যোগবিশিষ্টঃ। ইত্যমরটীকায়াং ভরতঃ॥

উদ্যোগঃ ( পুং ) যত্নঃ। চেষ্টা। তৎপর্য্যায়ঃ। উৎসাহঃ ২ অধ্যবসায়ঃ ৩ উদ্যমঃ ৪। ইতি জটাধরঃ॥

উদ্যোগী [ ন্ ] ( ত্রি ) উদ্যোগবিশিষ্টঃ। উদ্যমী। তথাচ। উদ্যোগিনং পুরুষসিংহমুপৈতিলক্ষ্মীর্দৈবেন দেয়মিতি কাপুরুষা বদন্তি। দৈবং নিহত্য কুরু পৌরুষমাত্মশক্ত্যা যত্নে কৃতে যদি ন সিদ্ধ্যতি কোঽত্র দোষঃ॥ ইতি হিতোপদেশঃ॥

উদ্যোতঃ ( পুং ) আলোকঃ। জ্যোতিঃ। ইতি হলায়ুধঃ॥

উদ্রঃ ( পুং ) জলজন্তুবিশেষঃ। উদ্বিড়াল ইতি ভাষা। ইত্যমরঃ॥

উদ্রঙ্কঃ ( পুং ) পুরবিশেষঃ। ব্যোমচারি পুরং শৌভমুদ্রঙ্কঃ প্রতিমার্গকঃ। ইতি জটাধরঃ॥

উদ্রঙ্গঃ (পুং) ব্যোমচারি পুরং। তৎপর্য্যায়ঃ। খপুরং ২ উর্দ্ধগংপুরং ৩ হরিশ্চন্দ্রপুরং ৪ শৌভং ৫ প্রতিমার্গকঃ ৬ ত্রঙ্গা ৭ ত্রঙ্গঃ ৮। ইতি ত্রিকাণ্ডশেষঃ॥

উদ্রথঃ ( পুং ) রথকীলং। তাম্রচূড়পক্ষী। ইতি মেদিনী॥

উদ্রিক্তং (ত্রি) স্ফুটং। স্পষ্টং। ইতি জটাধরঃ॥

উদ্রেকঃ ( পুং ) উপক্রমঃ। বৃদ্ধিঃ। যথা। অধুনৈব কুরঙ্গাক্ষি জহার জগতাং মনঃ। ন জানে যৌবনোদ্রেকে জীবনস্থাপি কা গতিঃ॥ ইত্যুদ্ভটঃ॥ হরিস্তে সাহস্র্যং কমলবলিমাধায় পদয়োর্যদেকোনে তস্মিন্নিজমুদহরন্নেত্রকমলং। গতো ভক্ত্যুদ্রেকঃ পরিণতিমসৌ চক্রবপুষা ত্রয়াণাং রক্ষায়ৈ ত্রিপুরহর জাগর্ত্তি জগতাং॥ ইতি মহিম্নঃ স্তোত্রং॥

উদ্রেকা ( স্ত্রী ) মহানিম্বঃ। ইতি রাজনির্ঘণ্টঃ॥

উদ্বৎসরঃ ( পুং ) বৎসরঃ। ইতি হেমচন্দ্রঃ॥

উদ্বন্ধনং (ক্লী) ঊর্দ্ধবন্ধনং। গলায় দড়ি দেওন ফাঁসী দেওন টাঙ্গান ইত্যাদি ভাষা। ইতি স্মৃতিঃ॥

উদ্বমনং ( ক্লী ) উদ্গীরণং। তুলিয়া ফেলন বাঁতি করণ ইত্যাদি ভাষা॥

উদ্বর্ত্তঃ ( ত্রি ) অতিরিক্তঃ। উবরণ বাড়া ইত্যাদি ভাষা। যথা। উদ্বর্ত্তো হি গ্রন্থঃ সমধিকফলমাচষ্টে। ইতি ব্যাকরণটীকা॥

উদ্বর্ত্তনং ( ক্লী ) উৎপতনং। বিলেপনং। ঘর্ষণং। ইতি মেদিনী॥ শরীরনির্ম্মলী-করণগন্ধদ্রব্যাদি। তৎপর্য্যায়ঃ। উৎসাদনং ২। ইত্যমরঃ॥ হরিদ্রা বেসন আবটন ইত্যাদি ভাষা। সামান্যোদ্বর্ত্তনগুণাঃ। কফবায়ুমেদোবাতরোগনাশিত্বং। অঙ্গস্থৈর্য্য-চর্ম্মনির্ম্মলকারিত্বঞ্চ॥ হরিদ্রাদ্যুদ্বর্ত্তনগুণাঃ। কণ্ডূবৈবর্ণ্যরূক্ষতাহারিত্বং॥ তিলোদ্বর্ত্তনগুণাঃ। কণ্ডুরূক্ষতাত্বগ্দোষনাশিত্বং। ইতি রাজবল্লভঃ॥

উদ্বর্দ্ধনং ( ক্লী ) অন্তর্হাসঃ। ইতি ত্রিকাণ্ডশেষঃ॥

উদ্বর্হিতঃ ( ত্রি ) উদ্ধৃতঃ। ইতি ভূরিপ্রয়োগঃ॥ উদ্বাহিতো বা ইতি পাঠঃ॥

উদ্বহঃ ( পুং ) পুত্রঃ। ইতি হেমচন্দ্রঃ॥ সপ্তবায়ুন্তর্গতবায়ুবিশেষঃ। স তু প্রবহবায়োরূর্দ্ধস্থিতঃ। ইতি সিদ্ধান্তশিরোমণিঃ॥

উদ্বহা ( স্ত্রী ) কন্যা। পুত্রী। ইতি হেমচন্দ্রঃ॥

উদ্বানঃ ( ত্রি ) উদ্বমিতঃ। উদ্বান্তঃ। ইত্যমরটীকায়াং রায়মুকুটঃ॥

উদ্বান্তং ( ত্রি ) বমিতবস্তু। তৎপর্য্যায়ঃ। উদ্গতং ২। ইত্যমরঃ॥

উদ্বান্তঃ ( পুং ) নির্ম্মদহস্তী। ইতি মেদিনীকর-জটাধরৌ॥

উদ্বাসনং ( ক্লী ) মারণং। বধঃ। ইত্যমরঃ॥

উদ্বাহঃ ( পুং ) বিবাহঃ। ইত্যমরঃ॥ তস্যলক্ষণং ভার্য্যাত্বসম্পাদকগ্রহণং। তস্য স্বীকাররূপজ্ঞানবিশেষস্য সমবায়বিষয়তয়োর্ভেদাৎ বরকন্যয়োর্বিবাহকর্তৃত্বকর্ম্মত্বে। স তু অষ্টবিধঃ। বরমাহূয় যথাশক্ত্যলঙ্কৃতা কন্যা যত্র দীয়তে স ব্রাহ্মঃ ১। যত্র যজ্ঞস্থায়র্ত্বিজে কন্যাদানং স দৈবঃ ২। যত্র বরাৎ গোদ্বয়ং গৃহীত্বা তেনৈব সহ কন্যাদানং স আর্ষঃ ৩। যত্র অনয়া সহ ধর্ম্মং চরতাং ইতি নিয়মং কৃত্বা কন্যাদানং স কায়ঃ ৪। যত্র ধনং গৃহীত্বা কন্যাদানং স আসুরঃ ৫। যত্র কন্যাবরয়োরন্যোন্যানুরাগাৎ ত্বং মে ভার্য্যা ত্বং মে পতিরিতি নিশ্চয়ঃ স গান্ধর্ব্বঃ ৬। যত্র বলাৎকারেণ কন্যাহরণং স রাক্ষসঃ ৭। যত্র সুপ্তায়াং মত্তায়াং প্রমত্তায়াং বা কন্যায়াং নির্জনে গমনং স পৈশাচঃ ৮। তস্য নির্ণয়ঃ। সগোত্রামনবরবয়স্কাং সমানপ্রবরাং পিত্রপেক্ষয়োর্দ্ধতনষণ্ণাং পুরুষাণাং পুত্রকন্যাসন্ততিপরম্পরয়া প্রত্যেকসপ্তমীপর্য্যন্তাং অধস্তনে তদপেক্ষয়া সপ্তমী পর্য্যন্তাং পিতৃবন্ধপেক্ষয়োর্দ্ধতনষণ্ণাং প্রত্যেকাপেক্ষয়া সপ্তমীপর্য্যন্তাং অধস্তনে তদপেক্ষয়া সপ্তমীপর্য্যন্তাং মাতামহসমানোদকাং মাতামহাপেক্ষয়োর্দ্ধতনচতুর্ণাং পুরুষাণাং পুত্রকন্যাসন্ততিপরম্পরয়া প্রত্যেকাপেক্ষয়া পঞ্চমীপর্য্যন্তাং অধস্তনে তদপেক্ষয়া পঞ্চমীপর্য্যন্তাং মাতৃবন্ধপেক্ষয়োর্দ্ধতনচতুর্ণাং প্রত্যেকাপেক্ষয়া পঞ্চমীপর্য্যন্তাং অধস্তনে তদপেক্ষয়া পঞ্চমীপর্য্যন্তাঞ্চ কন্যাং পরিত্যজ্য উদ্বাহঃ কর্ত্তব্যঃ॥ পিতৃবন্ধুমাতৃবন্ধুবিরহেঽপি তয়োর্যোগ্যতামবলম্ব্য সপ্তমীপর্য্যন্তায়াঃ পঞ্চমীপর্য্যন্তায়াশ্চ কন্যায়াঃ পরিহারঃ। বর্জ্জনীয়ানাং কন্যানাং মধ্যেঽপি যা ত্রিগোত্রান্তরিতা সা বিবাহ্যা। অত্র

সপ্তমগণনপ্রতিযোগিপিতৃপিতৃবন্ধুপঞ্চমগণনপ্রতিযোগিমাতামহমাতৃবন্ধুগোত্রমাদায়ৈব ত্রিগোত্রগণনং। শূদ্রস্য সগোত্রা বিবাহে দোষাভাবঃ। মাতৃসপত্নীভ্রাতৃকন্যাং তদ্দৌহিত্রীং অধ্যাপয়িতৃকন্যাং শিষ্যকন্যাং ব্রহ্মদগুরুকন্যাঞ্চ পরিত্যজ্য বিবাহঃ কর্ত্তব্যঃ। অথ কন্যাদানাধিকারিণঃ। আদৌ পিতা। তদভাবে পিতামহঃ। তদভাবে ভ্রাতা। তদভাবে পিতৃজ্ঞাতিঃ। তদভাবে মাতামহঃ। তদভাবে মাতুলঃ। তদভাবে মাতা। তদভাবে মাতামহজ্ঞাতিঃ। এতেষামপ্যভাবে কন্যা স্বয়ংবরং কুর্য্যাৎ। অথ বিবাহপূর্ব্বকর্ত্তব্যকর্ম্ম। অবশ্যংভাবিশুভাশুভগ্রহাদিদোষশান্ত্যর্থং হোমো হিরণ্যগোবস্ত্রদানং। ততো নান্দীশ্রাদ্ধং। লগ্নসময়ে বরে উপস্থিতে স্বস্তিবাচনাদিকং বিধায় বরণং। স্ত্র্যাচারাদি। ততঃ কন্যাদানং যথাশক্তি ধনদানঞ্চ ততঃ স্বগৃহোক্তবিধিনাগ্নিং সংস্থাপ্য কুশণ্ডিকাং সমাপ্য পাণিগ্রহণং সপ্তপদীগমনঞ্চ কর্ত্তব্যং॥ * ॥ জ্যেষ্ঠেঽকৃতবিবাহে বিবাহকর্ত্তা কনিষ্ঠঃ পরিবেদনদোষবিশিষ্টো ভবতি। জ্যেষ্ঠঃ পরিবিন্নঃ। সা কন্যা পরিবেদনীয়া। কন্যাদাতা পরিদায়ী। তৎপুরোহিতঃ পরিকর্ত্তা। তে সর্ব্বে পতিতাঃ। কিন্তু দেশান্তরস্থক্লীবৈকাণ্ডবৈমাত্রেয়বেশ্যাসক্তশূদ্রতুল্যাতিরোগিজড়মূকান্ধবধিরকুব্জবামনকুণ্ঠাতিবৃদ্ধনৈষ্ঠিকব্রহ্মচারিবানপ্রস্থভিক্ষুকৃষিসক্তনৃপসক্তধনবৃদ্ধিপ্রসক্তকামকারিদত্তকোন্মত্তচৌরেষু জ্যেষ্ঠেষ্বনূঢ়েষ্বপি কনিষ্ঠবিবাহে ন দোষঃ। এবং বিকৃতরূপানূঢ়া জ্যেষ্ঠা কনিষ্ঠায়াঃ সোদরায়া ঊঢ়ায়াঃ পরিবেদনায় ন ভবতি। ইত্যুদ্বাহতত্ত্বং॥

উদ্বাহনং (ক্লী) বিবাহঃ। তৎপর্য্যায়ঃ। রণরণং ২। ইতি ত্রিকাণ্ডশেষঃ॥ দ্বিসীত্যং। দ্বিবারকৃষ্টক্ষেত্রং। ইতি হেমচন্দ্রঃ॥

উদ্বাহনী (স্ত্রী) বরাটকঃ। কড়ি ইতি ভাষা। ইতি হেমচন্দ্রঃ॥

উদ্বাহিকঃ (ত্রি) উদ্বাহসম্বন্ধী॥

উদ্বাহিতঃ (ত্রি) উদ্বর্হিতঃ। উদ্ধৃতঃ। বিবাহিতঃ। যথা। রাজমার্ত্তণ্ডে দেবলঃ। বালে বৃদ্ধে তথৈবাস্তে কুরুতে দৈত্যমন্ত্রিণি। উদ্বাহিতায়াং কন্যায়াং দম্পত্যোরেকনাশনং॥ ইতি জ্যোতিষতত্ত্বং॥

উদ্বাহিনী (স্ত্রী) রজ্জুঃ। ইতি মেদিনী॥

উদ্বাহুঃ (ত্রি) ঊর্দ্ধবাহুঃ। উদ্বেগশব্দার্থে হেমচন্দ্রেণ লিখিতঃ॥

উদ্বাহুলকং (ক্লী) ঊর্দ্ধীকৃতবাহুঃ। উদ্বেগশব্দার্থে মেদিনীকরেণ লিখিতং॥

উদ্বিগ্নঃ (ত্রি) উদ্বেগযুক্তঃ। যথা। তৈর্ব্রুক্রুগ্নসংভুগ্নক্ষুণ্ণভিন্নবিপন্নকৈঃ। নিমগ্নোদ্বিগ্নসংত্রীণৈঃ পপ্রে দীনৈশ্চ মেদিনী॥ ইতি ভট্টিকাব্যে ৪ সর্গঃ॥

উদ্বিবর্হণং (ক্লী) উদ্ধারকরণং। যথা। কঃ শ্রদ্দধীতান্যতমস্তব প্রভো রসাঙ্গতায়া ভুব উদ্বিবর্হণং। ইতি শ্রীভাগবতে ৩ স্কন্ধে ১৩ অধ্যায়ঃ॥ উদ্বিবর্হণং উদ্ধরণং। ইতি তট্টীকায়াং শ্রীধরস্বামী॥

উদ্বৃত্তঃ (ত্রি) উত্তোলিতঃ। উৎক্ষিপ্তঃ।

পরিভুক্তোজ্ঝিতঃ। উদ্বান্তঃ। ইতি হেমচন্দ্রো মেদিনী চ ॥ দুর্ব্বৃত্তঃ ॥

উদ্বেগং (ক্লী) গুবাকফলং। ইত্যমরঃ ॥

উদ্বেগঃ (পুং) উদ্বেজনং। তৎপর্য্যায়ঃ। উদ্‌ভ্রমঃ ২। ইত্যমরঃ ॥ চমৎকারঃ। ইতি ভরতঃ ॥ বিরহজন্যদুঃখং। ইতি রসমঞ্জরী ॥ ভয়ং। ইতি হেমচন্দ্রঃ ॥ উদ্বাহুলকং। উদ্গমনং। ইতি মেদিনী ॥

উদ্বেগঃ (ত্রি) স্তিমিতঃ। শীঘ্রগামী। ঊর্দ্ধবাহুঃ। ইতি হেমচন্দ্রঃ ॥

উদ্বেজনং (ক্লী) উদ্বেগঃ ॥

উধঃ [স্] (ক্লী) ঊধঃ। গরুর পালান্ ইতি ভাষা। ইত্যমরটীকায়াং রমানাথঃ ॥

উধ্রস গ উঞ্ছে। ইতি কবিকল্পদ্রুমঃ ॥ এতস্যাদৌ পঞ্চমস্বরঃ। মধ্যে কেবলধকারস্যাধো রেফঃ। ক্র্যাদাবুধ্রস উঞ্ছ ইত্যয়মুদিচ্চৌরাদিকঃ পঠ্যতে তস্য ধ্রাসয়তীতি রূপং অপরং ধ্রস্নাতি। যেষাং ধ্রসেঃ উৎপূর্ব্বস্য গণদ্বয়েঽপি পঠনং তেষাং মতে শ্নাবিধাবুধ্রস্নাতি নিগদ্যতে ণিচি কৃতে ঽপ্যুধ্রাসয়ত্যন্যতঃ। অত্র উৎপূর্ব্বস্যেতি তু উৎ উকারঃ নতূপসর্গঃ। গ উধ্রস্নাতি শস্যং দীনঃ। ইতি দুর্গাদাসঃ ॥

উধ্রস ক উৎক্ষেপে। উঞ্ছে। ইতি কবিকল্পদ্রুমঃ ॥ ক উধ্রাসয়তি ধূলিং বায়ুঃ। ইতি দুর্গাদাসঃ ॥

উন্দ ঈ ধ ক্লেদে। ইতি কবিকল্পদ্রুমঃ ॥ হ্রস্বাদিঃ। ক্লেদ আর্দ্রভাবঃ। ধ উনত্তি বস্ত্রং পয়সা। ঈ উন্নঃ উত্তঃ। উন্দিদিষতি। ইতি দুর্গাদাসঃ ॥

উন্দরুঃ (পুং) উন্দুরুঃ। ইতি দ্বিরূপকোষঃ ॥

উন্দুরঃ (পুং) মূষিকঃ। ইঁদুর ইতি ভাষা। ইতি ভরতো দ্বিরূপকোষশ্চ ॥

উন্দুরঃ (পুং) জন্তুবিশেষঃ। ইঁদুর ইতি ভাষা। তৎপর্য্যায়ঃ। মূষিকঃ ২ আখুঃ ৩। ক্ষুদ্রশ্চেৎ। গিরিকা ৪ বালমূষিকা ৫। নেঙ্‌টে ইঁদুর ইতি ভাষা। ইত্যমরঃ ॥ মূষকঃ ৬ মুষঃ ৭ মূষীকঃ ৮ উন্দুরুঃ ৯ খনকঃ ১০ বভ্রুঃ ১১ বৃষঃ ১২ আখনিকঃ ১৩ বৃশঃ ১৪ দীনা ১৫ মূষীকা ১৬ মুষা ১৭ মূষীকা ১৮ মূষিকা ১৯। ইতি শব্দরত্নাবলী ॥ বিলেশয়ঃ ২০ শুষিরঃ ২১ ইন্দুরঃ ২২। ইতি জটাধরঃ ॥ ক্ষুদ্রস্য তস্য পর্য্যায়ঃ। চিকঃ ২৩ বেশ্মনকুলঃ ২৪ চিকা ২৫। ইতি চ শব্দরত্নাবলী ॥ হালাহলা ২৬ অঞ্জনিকা ২৭। ইতি জটাধরঃ ॥

উন্দুরুঃ (পুং) মূষিকঃ। ইতি হেমচন্দ্রঃ ॥

উন্দুরুকর্ণী (স্ত্রী) আখুকর্ণীলতা। ইতি রাজনির্ঘণ্টঃ ॥

উন্নঃ (ত্রি) ক্লিন্নঃ। দয়াপরঃ। ইতি হেমচন্দ্রঃ ॥

উন্নতঃ (ত্রি) বর্দ্ধিতঃ। তৎপর্য্যায়ঃ। উচ্চঃ ২ প্রাংশুঃ ৩ উদগ্রঃ ৪ উচ্ছ্রিতঃ ৫ উত্তুঙ্গঃ ৬। ইত্যমরঃ ॥ উচ্চৈঃ ৭। ইতি শব্দরত্নাবলী ॥ তুঙ্গঃ ৮। ইতি জটাধরঃ ॥

উন্নতনাভিঃ (ত্রি) উচ্চনাভিযুক্তঃ। তৎপর্য্যায়ঃ। তুন্দিঃ ২। ইতি হলায়ুধঃ ॥

উন্নতানতং (ত্রি) উচ্চনীচস্থানাদি। তৎপর্য্যায়ঃ। বন্ধুরং ২। ইত্যমরঃ ॥

উন্নতিঃ (স্ত্রী) গরুড়ভার্য্যা। সমৃদ্ধিঃ। উদয়ঃ। ইতি হেমচন্দ্রঃ ॥

উন্নতীশঃ ( পুং ) গরুড়পক্ষী। ইতি ত্রিকাণ্ড-শেষঃ॥

উন্নমিতঃ (ত্রি) উত্তোলিতঃ। ঊর্দ্ধীকৃতঃ। ইতি শ্রীধরস্বামী॥

উন্নয়ঃ ( পুং ) ঊর্দ্ধনয়নং। ইত্যমরঃ॥

উন্নয়নং (ক্লী) বিতর্কঃ। ইতি হেমচন্দ্রঃ॥ ঊর্দ্ধপ্রাপণং। উত্তোলনং। তোলন উঠান ইত্যাদি ভাষা॥

উন্নায়ঃ ( পুং ) উন্নয়ঃ। উন্নয়নং। ইত্যমরঃ॥

উন্নাহং ( ক্লী ) কাঞ্জিকং। ইতি হেমচন্দ্রঃ॥

উন্নিদ্রঃ (ত্রি) প্রফুল্লঃ। বিকসিতঃ। ইতি হেমচন্দ্রঃ॥

উন্ভ প শ পূর্ব্বো। হ্রস্বাদিঃ। প শ উম্ভতি কুম্ভং জলেন লোকঃ। উম্ভামাস। ইতি দুর্গাদাসঃ॥

উন্মত্তঃ (ত্রি) উন্মাদযুক্তঃ। বায়ুকৃতচিত্ত-বিভ্রমবিশিষ্টঃ। পাগল ইতি ভাষা। তৎ-পর্য্যায়ঃ। উন্মাদবান্ ২। ইত্যমরঃ॥ তস্যৌষধং যথা। কূর্ম্মমৎস্যাখুমহিষগো-শৃগালাশ্চ বানরাঃ। বিড়ালবর্হিকাকাশ্চ বরাহোলূককুক্কুটাঃ॥ হংস এষাঞ্চ বিন্মূত্রং মাংসং বা রোমশোণিতং। ধূমং দদ্যা-জ্জ্বরার্ত্তস্য উন্মত্তেভ্যশ্চ শান্তয়ে॥ এতা-ন্যৌষধজাতানি ধূপিতানি মহেশ্বর। নিহন্তি জ্বরমুন্মাদং বৃক্ষমিন্দ্রাশনির্যথা॥ ইতি গারুড়ে ১৯৯ অধ্যায়ঃ॥ *॥ তদ্বাক্যপ্রামাণ্যং যথা। উন্মত্তানাঞ্চ যা গাথা শিশূনাং চেষ্টিতং চ যৎ। স্ত্রিয়ো যচ্চ প্রভাষন্তে নাস্তি তত্র ব্যতিক্রমঃ॥ আদৌ গচ্ছতি দেবেষু পশ্চাৎ গচ্ছতি মানুষান্। নাদেশিতা বাগ্বদতি সত্যা হ্যেষা সরস্বতী॥ ইতি মলমাসতত্ত্বং॥

উন্মত্তঃ ( পুং ) ধুস্তূরঃ। মুচুকুন্দবৃক্ষঃ। ইতি মেদিনী॥

উন্মদঃ ( ত্রি ) উন্মাদযুক্তঃ। উদ্গতমদঃ। তৎ-পর্য্যায়ঃ। উন্মদিষ্ণুঃ ২। ইত্যমরঃ॥

উন্মদিষ্ণুঃ ( ত্রি ) উন্মদঃ। উন্মাদশীলঃ। ইত্য-মরঃ॥

উন্মনাঃ [ স্ ] ( ত্রি ) উৎকণ্ঠিতচিত্তঃ। তৎ-পর্য্যায়ঃ। উৎকঃ ২। ইত্যমরঃ॥

উন্মন্থঃ ( পুং ) মারণং। বধঃ। ইতি হেম-চন্দ্রঃ॥

উন্মাথঃ ( পুং ) কূটযন্ত্রং। মৃগবধোপযুক্ত-যন্ত্রং। আমিষং দত্ত্বা মৃগপক্ষিবন্ধনার্থং যৎ সন্ধানযন্ত্রং নিবেশ্যতে সঃ। ইত্য-মরঃ॥ মারণং। ঘাতকঃ। ইতি মেদিনী॥

উন্মাদঃ ( পুং ) বাতিকরোগবিশেষঃ। তৎ-পর্য্যায়ঃ। চিত্তবিভ্রমঃ ২। ইত্যমরঃ॥ মতিভ্রংশঃ ৩ উন্মনাঃ ৪। ইতি রাজ-নির্ঘণ্টঃ॥ মানসরোগবিশেষঃ। তস্যৌ-ষধং যথা। বচা ত্রিকটুকঞ্চৈব করঞ্জং দেবদারু চ। মঞ্জিষ্ঠা ত্রিফলা শ্বেতা শিরীষো রজনীদ্বয়ং॥ প্রিয়ঙ্গুনিম্বত্রিকটু গোমূত্রেণাবঘর্ষিতং। নস্যমালেপনঞ্চৈব স্নানমুদ্বর্ত্তনং তথা॥ অপস্মারবিষোন্মাদ-শোষালক্ষীজ্বরাপহং। ভূতেভ্যশ্চ ভয়ং হন্তি রাজদ্বারে চ শাসনং॥ ইতি গারুড়ে ১৯৯ অধ্যায়ঃ॥ *॥ অথ উন্মাদাধিকারঃ। তত্র উন্মাদস্য নিরুক্তিমাহ। মদয়ন্ত্যুদ্ধতা দোষা যস্মাদুন্মার্গমাস্থিতাঃ। মানসোঽয়-

মতো ব্যাধিরুন্মাদ ইতি কীর্ত্তিতঃ ॥ অয়মর্থঃ। যস্মাদ্ধেতোরুদ্ধতাঃ প্রবৃদ্ধা দোষা উন্মার্গমাস্থিতাঃ মদয়ন্তি চিত্তং বিক্ষিপন্ত্যস্মিন্। অতোঽয়মুন্মাদ ইতি কীর্ত্তিতঃ। স উন্মাদঃ মানসো ব্যাধিঃ মনোবৈকৃত্যকরণাৎ ॥ * ॥ তস্যৈবাবস্থাভেদেন নামান্তরমাহ। স চাপ্রবৃদ্ধস্তরুণো মদসংজ্ঞাং বিভর্ত্তি চ। স উন্মাদস্তরুণো নবীনঃ ॥ * ॥ উন্মাদস্য বিপ্রকৃষ্টনিদানমাহ। বিরুদ্ধদুষ্টাশুচিভোজনানি প্রধর্ষণং দেবগুরুদ্বিজানাং। উন্মাদহেতুর্ভয়হর্ষপূর্ব্বো মনোঽভিঘাতো বিষমাশ্চ চেষ্টাঃ ॥ দুষ্টং ধত্তুরবীজাদিসহিতং। অশুচি রজস্বলাদিস্পৃষ্টং। প্রধর্ষণমভিভবঃ। বিষমাশ্চ চেষ্টাঃ বলবদ্বিগ্রহাদয়ঃ ॥ * ॥ সন্নিকৃষ্টং নিদানমাহ। একৈকশঃ সর্ব্বশশ্চ দোষৈরত্যর্থমুচ্ছ্রিতৈঃ। মানসেন চ দুঃখেন স পঞ্চবিধ উচ্যতে ॥ বিষাদ্ভবতি ষষ্ঠশ্চ যথাস্বং তত্র ভেষজং ॥*॥ তস্য সম্প্রাপ্তিমাহ। তৈরল্পসত্ত্বস্য মলাঃ প্রদুষ্টা বুদ্ধের্নিবাসং হৃদয়ং প্রদূষ্য। স্রোতাংস্যধিষ্ঠায় মনোবহানি প্রমোহয়ন্ত্যাশু নরস্য চেতঃ ॥ অল্পসত্ত্বস্য অল্পসত্ত্বগুণস্য। মলা বাতাদয়ঃ। বুদ্ধের্নিবাসং হৃদয়ং প্রদূষ্যেতি। এতেনাশ্রয়স্য দুষ্ট্যা তদাশ্রিতায়া বুদ্ধেরপি দুষ্টিরুক্তা। মনোবহানি স্রোতাংসি। হৃদয়াশ্রিতানি দশ। এতানি বিশেষতো বোদ্ধব্যানি। যতশ্চরকেণ সকলশরীরস্রোতাংস্যেব মনোঽধিষ্ঠানত্বেনোক্তানি। প্রমোহয়ন্তি বিকৃতং কুর্ব্বন্তি ॥ * ॥ উন্মাদস্য সামান্যং রূপমাহ। ধীবিভ্রমঃ সত্ত্বপরিপ্লবশ্চ পর্য্যাকুলাদৃষ্টিরধীরতা চ। অবদ্ধবাক্ত্বং হৃদয়ঞ্চ শূন্যং সামান্যমুন্মাদগদস্য লিঙ্গং ॥ ধীবিভ্রমঃ শুক্তিকায়াং রজতজ্ঞানং। সত্ত্বপরিপ্লবঃ সত্ত্বং মনস্তস্য চাঞ্চল্যং। অবদ্ধবাক্ত্বং অসম্বদ্ধভাষিত্বং। শূন্যং স্মৃতিশূন্যং ॥ * ॥ বাতিকোন্মাদস্য নিদানপূর্ব্বিকাং সম্প্রাপ্তিমাহ। রূক্ষাল্পশীতান্নবিরেকধাতুক্ষয়োপবাসৈরনিলোঽতিবৃদ্ধঃ। চিন্তাতিদুষ্টং হৃদয়ং প্রদূষ্য বুদ্ধিং স্মৃতিং বা প্যুপহন্তি শীঘ্রং ॥ প্রদূষ্য প্রকর্ষেণ দূষয়িত্বা ॥ * ॥ তস্যৈব রূপমাহ। অস্থানহাস্যস্মিতনৃত্যগীতবাগঙ্গবিক্ষেপণরোদনানি। পারুষ্যকার্শ্যারুণবর্ণতাশ্চ জীর্ণে বলঞ্চানিলজস্য রূপং ॥ অস্থানে অনবসরে। হাস্যাদীনি রোদনান্তানি। জীর্ণে আহারে। বলং ব্যাধেঃ ॥ * ॥ পৈত্তিকস্য নিদানপূর্ব্বিকাং সম্প্রাপ্তিমাহ। অজীর্ণকট্বম্লবিদাহ্যশীতৈর্ভোজ্যৈশ্চিতং পিত্তমুদীর্ণবেগং। উন্মাদমত্যুগ্রমনাত্মকস্য হৃদি স্থিতং পূর্ব্ববদাশু কুর্য্যাৎ ॥ হৃদি স্থিতং পিত্তং চিতং সঞ্চিতং। পুনঃ অজীর্ণকট্বম্লবিদাহ্যশীতৈর্ভোজ্যৈরুদীর্ণবেগং সৎ উন্মাদং কুর্য্যাৎ পূর্ব্ববৎ হৃদয়ং প্রদূষ্য ইত্যর্থঃ ॥ * ॥ তস্য রূপমাহ। অমর্ষসংরম্ভবিনগ্নভাবাঃ সন্তর্জনাভিদ্রবণৌষ্ণ্যচোষঃ। প্রচ্ছায়শীতান্নজলাভিলাষঃ পীতাবভাঃ পিত্তকৃতস্য লিঙ্গং ॥ অমর্ষোঽসহিষ্ণুতা। সংরম্ভঃ আরভটী আড়ম্বর ইতি

যাবৎ। সন্তর্জনং পরত্রাসনং। অভিদ্রবণং পলায়নং। ঔষ্ণ্যং গাত্রে। চোষো দাহবিশেষঃ। প্রচ্ছায় ইত্যাদি ছায়ায়াং শীতয়োরন্নজলয়োরভিলাষঃ ॥ * ॥ শ্লৈষ্মিকস্য নিদানপূর্ব্বিকাং সংপ্রাপ্তিমাহ। সম্পূরণৈর্মন্দবিচেষ্টিতস্য সোষ্মা কফো মর্ম্মণি সংপ্রবৃদ্ধঃ। বুদ্ধিং স্মৃতিং বাপ্যুপহন্তি চিত্তং প্রমোহয়ন্ সংজনয়েদ্বিকারং॥ সংপূরণৈর্ভোজনাদিভিঃ। মন্দবিচেষ্টিতস্য ব্যায়ামরহিতস্য। সোষ্মা কফ ইতি কফোঽপ্যুন্মাদং করিষ্যন্ পিত্তং সহায়মপেক্ষতে ব্যাধিস্বভাবাৎ। মর্মণি অত্র মর্ম্মশব্দেন হৃদয়মুচ্যতে। বিকারমুন্মাদরূপং ॥ * ॥ তস্য রূপমাহ। বাক্চেষ্টিতং মন্দমরোচকশ্চ নারীবিবিক্তপ্রিয়তা চ নিদ্রা। ছর্দ্দিশ্চ লালা চ বলঞ্চ ভুক্তে নখাদিশৌক্ল্যঞ্চ কফাত্মকে স্যাৎ॥ বাক্চেষ্টিতং মন্দং বচনমল্পং। নারীবিবিক্তপ্রিয়তা নারীপ্রিয়তা বিজনপ্রিয়তা চ। ভুক্তে সতি বলং ব্যাধেঃ ॥ * ॥ সান্নিপাতিকস্য নিদানপূর্ব্বকং লক্ষণমাহ। যঃ সন্নিপাতপ্রভবোঽতিঘোরঃ সর্ব্বৈঃ সমস্তৈঃ স তু হেতুভিঃ স্যাৎ। সর্ব্বাণি রূপাণি বিভর্ত্তি তাদৃগ্বিরুদ্ধভৈষজ্যবিধির্ব্বিবর্জ্যঃ ॥ স সান্নিপাতিক উন্মাদঃ। সন্নিপাতগ্রহণেনৈব সর্ব্বাত্মকত্বং লব্ধং। পুনঃ সর্ব্বৈরিতি যৎকৃতং তদ্রজস্তমঃপ্রাপণার্থং। তেন রজস্তমো মিলিতৈরিত্যর্থঃ। তেন বাতাদয়ো রজস্তমোভির্মনোদোষৈর্ম্মিলিতাঃ। সমস্তৈশ্চ নিদানৈঃ কুপিতা উন্মাদং জনয়ন্তি। সর্ব্বৈর্হেতুভিঃ সমস্তৈর্ম্মিলিতৈঃ স্যাৎ। যতোঽন্যো ব্যাধিঃ সর্ব্বৈর্হেতুভির্ম্মিলিতৈরেব ভবতীতি নিয়মো নাস্তি। অয়ন্তু ব্যাধিপ্রভাবাৎ সর্ব্বৈর্হেতুভির্ম্মিলিতৈঃ স্যাৎ। তাদৃগুন্মাদঃ বিরুদ্ধভৈষজ্যবিধিঃ। বিরুদ্ধভৈষজ্যবিধিরিতি কোঽর্থঃ। ত্রিদোষজে প্রত্যেকং বাতাদিপ্রত্যনীকা কার্য্যা। সা চ পরস্পরাবিরোধিনী ত্রিদোষং হন্তি কিঞ্চিদেবদ্রব্যমামলকাদি তচ্চাত্রাযৌগিকং। অতএব বিবর্জ্যঃ ন চিকিৎস্য ইত্যর্থঃ ॥ * ॥ মনোদুঃখজস্য বিপ্রকৃষ্টং নিদানমাহ। চৌরৈর্নরেন্দ্রপুরুষৈররিভিস্তথান্যৈর্বিত্রাসিতস্য ধনবান্ধবসংক্ষয়াদ্বা। গাঢ়ং ক্ষতে মনসি চ প্রিয়য়া রিরংসোর্জায়েত চোৎকটতরো মনসো বিকারঃ ॥ অন্যৈর্হিংস্রাদিভিঃ। গাঢ়মতিশয়েন। ক্ষতে অভিহতে। প্রিয়য়া প্রাপ্তুমশক্যয়া রিরংসোঃ পুরুষস্য বিকারঃ উন্মাদরূপঃ ॥ * ॥ তস্য রূপমাহ। চিত্রং ব্রবীতি চ মনোঽনুগতং বিসংজ্ঞো গায়ত্যথো হসতি রোদিতি চাতিমূঢ়ঃ। চিত্রমাশ্চর্য্যং। মনোঽনুগতং গোপ্যমপি। বিসংজ্ঞো বিরুদ্ধজ্ঞানঃ। অতীবমূঢ়ঃ অতীবজ্ঞানশূন্যঃ। অত্র বিকল্পো বোদ্ধব্যঃ ॥ * ॥ বিষজস্য রূপমাহ। রক্তেক্ষণো হতবলেন্দ্রিয়ভাঃ সুদীনঃ শ্যাবাননো বিষকৃতে তু ভবেৎ পরাসুঃ। পরাসুঃ মৃতঃ ॥ * ॥ অরিষ্টমাহ। অবাঙ্মুখস্তূন্মুখো বা ক্ষীণমাংসবলো নরঃ। জাগরূকো হ্যসন্দেহমুন্মাদেন বিনশ্যতি ॥ * ॥ অথ দেবাদিকৃতস্যোন্মাদস্য সামান্যং লক্ষণ-

মাহ। অমর্ত্যবাগ্বিক্রমবীর্য্যচেষ্টো জ্ঞানাদি-বিজ্ঞানবলাদিযুক্তঃ। প্রকোপকালো নিয়তশ্চ যস্য দেবাদিজন্মা স মনোবিকারঃ॥ অমর্ত্যবাগ্বিক্রমবীর্য্যচেষ্টঃ ন মর্ত্যস্যেব মনুষ্যস্যেব বাগাদয়ো যত্র সঃ। বিক্রমঃ পরাক্রমঃ। বীর্য্যং শৌর্য্যং। জ্ঞানাদি-বিজ্ঞানবলাদিযুক্তঃ। জ্ঞানং বুদ্ধিঃ। আদিপদেন তদ্ভেদা মেধা বিচারণা স্মৃত্যাদয়ো গৃহ্যন্তে। বিজ্ঞানং শিল্পাদিবিষয়কং জ্ঞানং। চেষ্টা পাটবং। আদিপদেনাভিমানাদি গৃহ্যতে। নিয়তঃ বক্ষ্যমাণতিথ্যাদিভিঃ। মনোবিকার উন্মাদঃ॥ * ॥ তত্র দেবাবিষ্টস্য লক্ষণমাহ। সন্তুষ্টঃ শুচি রতিদিব্যমাল্যগন্ধো নিস্তন্দ্রোঽবিতথ-সংস্কৃতপ্রভাষী। তেজস্বী স্থিরনয়নো বর-প্রদাতা ব্রহ্মণ্যো ভবতি নরঃ স দেব-জুষ্টঃ॥ অতিদিব্যমাল্যগন্ধঃ অতিশয়ো দিব্যমাল্যস্যেব গন্ধো যস্য সঃ। নিস্তন্দ্রঃ নিদ্রারহিতঃ। অবিতথং সত্যং। ব্রহ্মণ্যঃ ব্রাহ্মণভক্তঃ॥ * ॥ দৈত্যাবিষ্টমাহ। সংস্বেদী দ্বিজগুরুদেবদোষবক্তা জিহ্মাক্ষো বিগতভয়ো বিমার্গদৃষ্টিঃ। সন্তুষ্টো ভবতি ন চান্নপানজাতৈর্দুষ্টাত্মা ভবতি স দেব-শত্রুজুষ্টঃ॥ বিমার্গদৃষ্টিঃ কুমার্গরতঃ। দুষ্টাত্মা দুষ্টস্বভাবঃ॥ * ॥ গন্ধর্ব্বাবিষ্ট-মাহ। হৃষ্টাত্মা পুলিনবনান্তরোপসেবী স্বাচারঃ প্রিয়পরিগীতগন্ধমাল্যঃ। নৃত্যন্ বৈ প্রহসতি চারু চাল্পশব্দং গন্ধর্ব্বগ্রহ-পরিপীড়িতো মনুষ্যঃ॥ হৃষ্টাত্মা হৃষ্ট-জীবাত্মা। পুলিনং তোয়োত্থিতং তটং। বনান্তরং বনমধ্যং। তয়োঃ সেবী। স্বাচারঃ অনিন্দিতাচারঃ। প্রিয়াণি পরি সমন্ততো ভাবেন গীতগন্ধমাল্যানি যস্য স তথা। চারুচাল্পশব্দমিতি হসনক্রিয়ায়া বিশে-ষণং॥ * ॥ যক্ষাবিষ্টমাহ। তাম্রাক্ষঃ প্রিয়তনুরক্তবস্ত্রধারী গম্ভীরোঽদ্রুতগতি-রল্পবাক্ সহিষ্ণুঃ। তেজস্বী বদতি চ কিং দদামি কস্মৈ যো যক্ষগ্রহপরিপীড়িতো মনুষ্যঃ॥ * ॥ পিত্রাবিষ্টমাহ। প্রেতানাং স দিশতি সংস্তরেষু পিণ্ডান্ শান্তাত্মা জলমপি বাপসব্যবস্ত্রঃ। মাংসেক্ষুতিলগুড়-পায়সাভিকামস্তদ্ভক্তো ভবতি পিতৃগ্রহাভি-জুষ্টঃ॥ প্রেতানাং মৃতানাং পিতৃণাং। দিশতি দদাতি। অপসব্যবস্ত্রঃ দক্ষিণস্কন্ধ-ধৃতোত্তরীয়ঃ॥ * ॥ নাগাবিষ্টমাহ। যস্তূর্ব্ব্যাং প্রসরতি সর্পবৎ কদাচিৎ সৃক্কণ্যৌ মুহুরপি জিহ্বয়াবলেঢ়ি। ক্রোধালুর্গুড়মধু-দুগ্ধপায়সেপ্সুর্বিজ্ঞেয়ঃ স খলুভুজঙ্গমেন জুষ্টঃ॥ প্রসরতি সর্পবৎ উরসা চলতি। সৃক্কণ্যৌ ওষ্ঠপ্রান্তৌ॥*॥ রাক্ষসাবিষ্টমাহ। মাংসাসৃক্‌বিবিধসুরাবিকারলিপ্সুর্নির্লজ্জো ভৃশমতিনিষ্ঠুরোঽতিশূরঃ। ক্রোধালুর্বিপুল-বলো নিশাবিচারী শৌচদ্বিট্ ভবতি স রাক্ষসৈর্গৃহীতঃ॥ অতিনিষ্ঠুরোঽতি-নির্দয়ঃ॥ * ॥ ব্রহ্মরাক্ষসাবিষ্টমাহ। দেববিপ্রগুরুদ্বেষী বেদবেদাঙ্গবিচ্ছুচিঃ। আত্মপীড়াকরোঽহিংস্রো ব্রহ্মরাক্ষস-সেবিতঃ॥ অহিংস্রঃ অহিংসাশীলঃ॥ * ॥ পিশাচাবিষ্টমাহ। উদ্ধস্রঃ কৃশপরুষো বিরুদ্ধভাষী দুর্গন্ধো ভৃশমশুচিস্তথাতি-

লোলঃ। বহ্বাশী বিজনবনান্তরোপসেবী ব্যাচেষ্টন্ ভ্রমতি রুদন্ পিশাচজুষ্টঃ॥ উদ্বস্ত্রঃ নগ্নঃ। দিগম্বর ইতি বিদেহবচনাৎ। কৃশো নির্মাংসঃ। পরুষো রুক্ষঃ। অতিলোলঃ সর্ব্বস্মিন্ অন্নপানে লোলুপঃ। ব্যাচেষ্টন্ বিরুদ্ধমাচেষ্টন্। গ্রহা হিংসা ক্রীড়া পূজার্থং গৃহ্নন্তি। অতএবোক্তং। অশুচিং ভিন্নমর্য্যাদং ক্ষতং বা যদি বাক্ষতং। হিংস্যুর্হিংসাবিহারার্থং সৎকারার্থমথাপি বা ॥ * ॥ তত্র হিংসার্থং গৃহীতস্য লক্ষণমাহ। স্থূলাক্ষো দ্রুতমটনঃ সফেনবামী নিদ্রালুঃ পততি চ কম্পতে চ যোঽতি। যশ্চাদ্রিদ্বিরদনগাদিবিচ্যুতঃ স্যাৎ সোঽসাধ্যো ভবতি তথা ত্রয়োদশেঽব্দে॥ যশ্চাদ্রীত্যাদি যঃ পর্ব্বতাদিপতিতঃ সন্ গ্রহৈর্গৃহ্যত ইত্যর্থঃ। আদিশব্দেন ভিত্তিপ্রাসাদাদয়ো গৃহ্যন্তে। ত্রয়োদশেঽব্দে সর্ব্ব এব দেবাদিগৃহীতোঽসাধ্যঃ॥ * ॥ দেবাদীনামাবেশসময়মাহ। দেবগ্রহাঃ পৌর্ণমাস্যামসুরাঃ সন্ধ্যয়োরপি। গন্ধর্ব্বাঃ প্রায়শোঽষ্টম্যাং যক্ষাশ্চ প্রতিপদ্যপি॥ পিতরঃ কৃষ্ণপক্ষে চ পঞ্চম্যামপি চোরগাঃ। রক্ষঃপিশাচা রাত্রৌ চ চতুর্দ্দশ্যাং বিশন্তি হি॥ কৃষ্ণপক্ষে অমায়াং। প্রায়শঃ পদাদন্যত্রাপি। তিথ্যভিধানপ্রয়োজনং লক্ষণার্থং তত্র তিথৌ বলিদানার্থঞ্চ॥ * ॥ নম্বু যদি দেবাদয়ো বিশন্তি তদা বিশন্তস্তে দৃশ্যন্তে কথং নেত্যত আহ। দর্পণাদীন্ যথা ছায়া শীতোষ্ণং প্রাণিনো যথা। স্বমণিং ভাস্করার্চ্চিশ্চ যথা দেহঞ্চ দেহধৃক্॥ বিশন্তি ন চ দৃশ্যন্তে গ্রহাস্তদ্বচ্ছরীরিণাং। দর্পণাদীত্যাদিশব্দেনান্যদপি নির্ম্মলদ্রবদ্রব্যং গৃহ্যতে। ছায়া প্রতিবিম্বং। স্বমণিং সূর্য্যমণিং। দেহধৃক্ জীবাত্মা॥ * ॥ * ॥ অথোন্মাদস্য চিকিৎসা। বাতিকে স্নেহপানং প্রাক্ বিরেকঃ পিত্তসম্ভবে। কফজে বমনং কার্য্যং পরো বস্ত্যাদিকক্রমঃ॥ যচ্চোপদেক্ষ্যতে কিঞ্চিদপস্মারে চিকিৎসিতং। উন্মাদে তচ্চ কর্ত্তব্যং সামান্যাদ্দোষদূষ্যয়োঃ॥ জলাদিক্রমশৈলেভ্যো বিষমেভ্যশ্চ তং সদা। রক্ষেদুন্মাদিনং যত্নাৎ সদ্যঃপ্রাণহরা হি তে॥ তে জলাদয়ঃ॥ * ॥ ব্রাহ্মীকুষ্মাণ্ডীফলষড়্গ্রন্থাঃ শঙ্খপুষ্পিকাস্বরসাঃ। দৃষ্টা উন্মাদহৃতঃ পৃথগেতে কুষ্ঠমধুমিশ্রাঃ॥ অত্র ব্রাহ্মীতি পদং ব্রাহ্মী স্বরসপরং। কুষ্মাণ্ডীফলং তদ্বীজপরং। ষড়্গ্রন্থে তু যথাশ্রুতার্থমেব। তেনায়মর্থঃ। বরভীকরসতোরা ৪ কূটকচূর্ণমাসা ২ মধুমাসা ৮ পেয়ঃ। ইত্যেকো যোগঃ॥ কোহণ্ডকে বীজকচূর্ণমাসা ২ কূটকচূর্ণমাসা ২ মধুনা সংনীয়াবলেহ্যং। দ্বিতীয়ো যোগঃ। মহাতরীবচকচূর্ণমাসা ২ কূটকচূর্ণমাসা ২ মধুনাবলেহ্যং। তৃতীয়ো যোগঃ॥ শঙ্খপুষ্পী স্বরসতোরা ৪ কূটকচূর্ণমাসা ২ মধুমাসা ৮ পেয়ঃ। চতুর্থযোগঃ॥ * ॥ সিদ্ধার্থকো হিঙ্গু বচাকরঞ্জৌ দেবদারু চ। মঞ্জিষ্ঠা ত্রিফলা শ্বেতা কটভীত্বক্ কটুত্রিকং॥ সমাংশানি প্রিয়ঙ্গুশ্চ শিরীষো রজনীদ্বয়ং।

বস্তমূত্রেণ পিষ্টোঽয়মগদঃ পানমঞ্জনং ॥ নস্যমালেপনঞ্চৈব স্নানমুদ্বর্ত্তনং তথা। অপস্মারবিষোন্মাদকৃত্যালক্ষ্মীজ্বরাপহং ॥ ভূতেভ্যশ্চ ভয়ং হন্তি রাজদ্বারে চ শস্যতে। সর্পিরেতেন সংসিদ্ধং সগোমূত্রং তথার্থকৃৎ ॥ সিদ্ধার্থকাদি ॥ * ॥ ক্রিয়াদিষ্টবিনাশঞ্চ দর্শয়েদদ্ভুতানি চ। বদ্ধং সর্ষপতৈলাক্তং রক্ষেদুত্তানমাতপে॥ কপিকচ্ছ্বাথবা তপ্তৈর্লৌহতৈলজলৈঃ স্পৃশেৎ। কশাভিস্তাড়য়েত্তং বা সুবদ্ধং বিজনে গৃহে॥ সর্পেণোদ্ধৃতদন্তেন দংশৈঃ সিংহৈর্গজৈশ্চ তং। ত্রাসয়েচ্ছস্ত্রহস্তৈশ্চ শক্রভিস্তস্করৈস্তথা॥ অথবা রাজপুরুষা বহির্নীত্বা সুসংযতং। ত্রাসয়েয়ুর্ব্বধৈরেনং তর্জ্জয়ন্তো নৃপাজ্ঞয়া॥ দেহদুঃখভয়েভ্যো হি যতঃ প্রাণভয়ং মহৎ। ততস্তস্য শমং যাতি সর্ব্বতো বিপ্লুতং মনঃ॥ ইষ্টদ্রব্যবিনাশেন মনো যস্যাভিহন্যতে। তস্য তৎসদৃশপ্রাপ্ত্যা সান্ত্বাশ্বাসৈঃ শমং নয়েৎ ॥*॥ ত্র্যূষণং হিঙ্গু লবণং বচা কটুকরোহিণী। শিরীষস্য করঞ্জস্য বীজং গৌরাশ্চ সর্ষপাঃ॥ গোমূত্রপিষ্টৈরেভিস্তু বর্ত্তির্নেত্রাঞ্জনে হিতা। হন্ত্যুন্মাদমপস্মারং তথা চাতুর্থকং জ্বরং॥ ত্র্যূষণাদ্যঞ্জনং ॥ * ॥ কুষ্ঠাশ্বগন্ধে লবণাজমোদে দ্বে জীরকে ত্রীণি কটূনি পাঠা। মঙ্গল্যপুষ্পী চ সমান্যমূনি সর্ব্বৈঃ সমানাঞ্চ বচাং বিচূর্ণ্য॥ ব্রাহ্মীরসেনাখিলমেব ভাব্যং বারত্রয়ং শুষ্কমিদং হি চূর্ণং। অক্ষপ্রমাণং মধুনা ঘৃতেন লিহ্যান্নরঃ সপ্তদিনানি যাবৎ॥ সারস্বতমিদং চূর্ণং ব্রহ্মণা নির্ম্মিতং পুরা। হিতায় সর্ব্বলোকানাং দুর্ম্মেধানাং বিচেতসাং॥ এতস্যাভ্যাসতঃ পুংসাং বুদ্ধির্ম্মেধা ধৃতিঃ স্মৃতিঃ। সম্পত্তিঃ কবিতাশক্তিঃ প্রবর্দ্ধেতোত্তরোত্তরং॥ মঙ্গল্যপুষ্পী শঙ্খদূলী ইতি লোকে। সারস্বতং চূর্ণং ॥ * ॥ বিশ্বাজমোদরজনীদ্বয়সৈন্ধবোগ্রাষষ্ট্যাহ্বকুষ্ঠমগধোদ্ভবজীরকাণাং। চূর্ণং প্রভাতসময়ে লিহতঃ সসর্পির্বাগ্‌দেবতা নিবসতি স্বয়মেব বক্ত্রে॥ বিশ্বাদ্যং চূর্ণং ॥ * ॥ ক্বাথ্যে বিচূর্ণিতে ক্ষিপ্ত্বা তৎ ষোড়শগুণং জলং। পাদশেষং প্রকর্ত্তব্যমেষ ক্বাথবিধিঃ স্মৃতঃ॥ দশমূলী তথা রাস্না বাতারিস্ত্রিবৃতা বলা। মূর্ব্বা শতাবরী চেতি কাথ্যৈস্তু কুড়বৈঃ পৃথক্॥ কৃতে ক্বাথে ঘৃতং প্রস্থদ্বয়ং মৃদ্বগ্নিনা পচেৎ। কল্কীকৃতৈর্বক্ষ্যমাণদ্রব্যৈঃ সম্যক্ পুনঃ পচেৎ॥ বিশালা ত্রিফলা কৌন্তী দেবদার্ব্বেলবালুকং। স্থিরানন্তা রজন্যৌ দ্বে প্রিয়ঙ্গুঃ সারিবাদ্বয়ং॥ নীলোৎপলৈলামঞ্জিষ্ঠা দন্তীদাড়িমকেশরং। বিড়ঙ্গং হগ্নিপত্রী চ কুষ্ঠং চন্দনপদ্মকে॥ তালীসপত্রং বৃহতী মালতীকুসুমং নবং। অষ্টাবিংশতিভিঃ কল্কৈরেতৈঃ কর্ষমিতৈঃ পৃথক্॥ চতুর্গুণং জলং দত্ত্বা পিষ্টৈস্তদ্বিপচেদ্ঘৃতং। মহাচৈতসনামেদং সর্ব্বচেতোবিকারহৃৎ॥ অপস্মারে মহোন্মাদে মন্দেহগ্নৌ জ্বরকাসয়োঃ। বাতরক্তে প্রতিশ্যায়ে শোষে কার্শ্যে তৃতীয়কে॥ মূত্রকৃচ্ছ্রে কটীশূলে বিসর্পাভিহতেষু চ। পাণ্ড্বাময়ে তথা

কণ্ডূাং বিষে মেহে গরেঽপি চ ॥ দেবাদি-হতচিত্তানাং গদ্গদানামচেতসাং। শস্তং স্ত্রীণাঞ্চ বন্ধ্যানাং ধন্যমায়ুর্ব্বলপ্রদং ॥ অলক্ষ্মীপাপরক্ষোঘ্নং সর্ব্বগ্রহনিবারণং। হন্তি ভ্রমং মদং মূর্চ্ছাং মেধাস্মৃতিমতি-প্রদং ॥ অগ্নিপত্রী অগ্নিবতীতি লোকে অগিয়া ইতি চ। মহাচৈতসং ঘৃতং ॥ * ॥ অথ দেবাদ্যাবিষ্টানাং চিকিৎসা। পূজা-বল্যুপহারেষ্টিহোমমন্ত্রাঞ্জনাদিভিঃ। জয়ে-দাগন্তুমুন্মাদং যথাবিধি শুচির্ভিষক্ ॥ কৃষ্ণা-মরিচসিন্ধূত্থমধুগোরোচনাকৃতং। অঞ্জনং সর্ব্বদেবাদিকৃতোন্মাদহরং পরং ॥ কৃষ্ণা-দ্যঞ্জনং ॥ * ॥ ঋক্ষজম্বুকলোমানি শল্লকী লশুনং তথা। হিঙ্গু মূত্রঞ্চ বস্তস্য ধূপ-মস্য প্রযোজয়েৎ ॥ এতেন শাম্যতি ক্ষিপ্রং বলবানপি যো গ্রহঃ। ঋক্ষলোমাদি-ধূপঃ ॥ * ॥ কল্যাণকঞ্চ যুঞ্জীত মহদ্বা চৈতসং ঘৃতং। তৈলং নারায়ণং চাথ মহানারায়ণং তথা ॥ ঋতে পিশাচাদন্যেষু প্রতিকূলং ন চাচরেৎ। রোগিণং ভিষজং যত্তে ক্রুদ্ধা হন্যুর্ম্মহৌজসঃ ॥ ইত্যুন্মা-দাধিকারঃ। ইতি ভাবপ্রকাশঃ ॥ ঔৎ-সুক্যসন্তাপাদিকারিতমনোবিপর্য্যাসসমুত্থ-প্রিয়াশ্রিতবৃথাব্যাপারঃ। ইতি রস-মঞ্জরী ॥

উন্মাদঃ (ত্রি) উন্মাদরোগযুক্তঃ। ক্ষিপ্তঃ। উন্মত্তঃ। পাগল ইতি ভাষা। ইত্যমর-টীকায়াং নীলকণ্ঠঃ ॥

উন্মাদনঃ (পুং) কামদেবস্য পঞ্চবাণান্তর্গত-বাণবিশেষঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

উন্মাদবান্ (ত্রি) উন্মাদরোগবিশিষ্টঃ। উন্মত্তঃ। ইত্যমরঃ ॥

উন্মানঃ (পুং) দ্রোণপরিমাণং। ইতি বৈদ্যক-পরিভাষা ॥

উন্মিষিতঃ (ত্রি) প্রফুল্লঃ। বিকসিতঃ। ইতি হেমচন্দ্রঃ ॥

উন্মীলনং (ক্লী) উন্মেষঃ। চক্ষুমেলা ইতি ভাষা। ইতি হেমচন্দ্রঃ ॥ বিকাশঃ ॥

উন্মীলিতঃ (ত্রি) বিকসিতঃ। প্রস্ফুটিতঃ। ইতি হলায়ুধঃ ॥

উন্মুখঃ (ত্রি) ঊর্দ্ধমুখঃ। তৎপর্য্যায়ঃ। উৎ-পশ্যঃ ২। ইতি হেমচন্দ্রঃ ॥

উন্মুদ্রঃ (ত্রি) প্রফুল্লঃ। বিকসিতঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

উন্মূলিতং (ত্রি) উৎপাটিতং। ইতি হেমচন্দ্রঃ ॥

উন্মেষং (ক্লী) চক্ষুরুন্মীলনং। চক্ষু মেলা ইতি ভাষা। ইতি হেমচন্দ্রঃ ॥

উপ ব্য প্রাদিবিংশত্যুপসর্গান্তর্গত উপসর্গ-বিশেষঃ। অন্বার্থঃ। অনুগতিঃ। পশ্চা-দ্ভাবঃ। অনুকম্পা। আধিক্যং। হীনঃ। সামীপ্যং। প্রাথম্যং। ইতি দুর্গাদাসঃ ॥ দাক্ষিণ্যং। সামর্থ্যং। অত্যয়ঃ। ভূষণং। দোষাখ্যানং। নিদর্শনং। আশ্চর্য্যকরণং। দানং। মারণং। ব্যাপ্তিঃ। লিপ্সা। উপা-লম্ভনং। পূজা। উদ্যোগঃ। ইতি শব্দ-রত্নাবলী ॥

উপকণ্ঠং (ক্লী) গ্রামান্তং। তৎপর্য্যায়ঃ। উপশল্যং ২। ইতি ত্রিকাণ্ডশেষঃ ॥ আস্ক-ন্দিতং। অশ্বপঞ্চমগতিঃ। ইতি হেম-চন্দ্রঃ ॥ কণ্ঠসমীপং ॥

উপকণ্ঠঃ (ত্রি) নিকটঃ। ইত্যমরঃ॥

উপকরণং (ক্লী) প্রধানাঙ্গীভূতোপকারক-দ্রব্যং। নৃপাদীনাং ছত্রচামরাদি। তৎপর্য্যায়ঃ। পরিচ্ছদঃ ২ পরিবর্হঃ ৩ তন্ত্রং ৪। ইতি হেমচন্দ্রঃ॥ ভোজনাদৌ ব্যঞ্জনাদি॥ যথা। তস্মাদন্নং প্রধানং পূপাদিকন্তু উপকরণত্বেন শক্তানামাবশ্যকং। ইতি শ্রাদ্ধতত্ত্বং॥ পূজাদৌ নৈবেদ্যাদি। মৃগবন্ধনাদৌ জালাদি॥

উপকারঃ (পুং) উপকৃতিঃ। বিকীর্ণপুষ্পাদিঃ। ইতি হেমচন্দ্রো মেদিনী চ॥

উপকারিকা (স্ত্রী) উপকারকর্ত্রী। পিষ্টভেদঃ। ইতি মেদিনী॥ রাজগৃহং। ইত্যমরঃ॥ কুশূলঃ। মরায়ি ইতি ভাষা। ইতি কেচিদাহুরিতিভরতঃ॥

উপকারী (স্ত্রী) রাজগৃহং। ইতি ভরতধৃতদ্বিরূপকোষঃ॥

উপকারী [ন্] (ত্রি) উপকারবিশিষ্টঃ। উপকারকর্ত্তা। তত্র দানাদানবিধির্যথা। হারীতঃ। অথাসদ্দ্রব্যদানমস্বর্গ্যং যচ্চ দত্ত্বা পরিতপ্যতে তর্হ্দানমফলং যচ্চোপকারিণে দদাতি। উপকারিণে ব্যসনোপকারিণে। তদিতরোপকারিণে তু দক্ষঃ। মাতাপিত্রোর্গুরৌ মিত্রে বিনীতে চোপকারিণে। দীনানাথবিশিষ্টেভ্যো দত্তন্তু সফলং ভবেৎ॥ ইতি শুদ্ধিতত্ত্বং॥ কিঞ্চ। উপকারিষু যঃ সাধুঃ স সাধুঃ সদ্ভিরুচ্যতে। সমদৃষ্টির্ভবাশু ত্বং সর্ব্বভূতেষু কেশব॥ ইতি জৈমিনীয়ে আশ্বমেধিকে পর্ব্বণি ১১ অধ্যায়ঃ॥

উপকার্য্যঃ (ত্রি) উপকারোচিতঃ। ইতি মেদিনী॥

উপকার্য্যা (স্ত্রী) রাজগৃহং। ইত্যমরঃ॥ কুশূলঃ। মরায়ি ইতি ভাষা। ইতি কেচিদাহুরিতি ভরতঃ॥

উপকুঞ্চিঃ (স্ত্রী) সূক্ষ্মকৃষ্ণজীরকঃ। ইতি রত্নমালা॥

উপকুঞ্চিকা (স্ত্রী) কৃষ্ণজীরকঃ। সূক্ষ্মৈলা। ইত্যমরঃ॥

উপকুম্ভং (ক্লী) কুম্ভসমীপং। ইতি ব্যাকরণং॥

উপকুর্ব্বাণঃ (পুং) ব্রহ্মচর্য্যানন্তরং যো গৃহস্থো ভবতি সঃ। ইতি পুরাণং॥

উপকুল্যা (স্ত্রী) পিপ্পলী। পিপুল ইতি ভাষা। ইত্যমরঃ॥

উপকূপজলাশয়ঃ (পুং) কূপসমীপে শিলাদিনিবদ্ধপশুপানার্থকৃতকূপোদ্ধৃতাম্বুস্থান। ইত্যমরঃ॥

উপক্রন্তা [ঋ] (ত্রি) উপক্রমকর্ত্তা। আরম্ভকর্ত্তা। ইতি ব্যাকরণং॥

উপক্রমঃ (পুং) জ্ঞাত্বারম্ভঃ। অয়মস্তোপায়ঃ অনেনৈতৎ সিধ্যতীতি জ্ঞাত্বা প্রথমারম্ভঃ॥ উপধা। রাজ্ঞা ধর্ম্মকামার্থভয়ৈঃ অমাত্যাদের্যৎ পরীক্ষণং ভাবতত্ত্বনিরূপণং॥ প্রক্রমঃ। প্রথমারম্ভঃ। ইত্যমরঃ॥ বিক্রমঃ। চিকিৎসা। ইতি মেদিনী॥ পলায়নং। ইতি হেমচন্দ্রঃ॥

উপক্রোশঃ (পুং) নিন্দা। ইত্যমরঃ॥

উপক্রোষ্টা [ঋ] (পুং স্ত্রী) গর্দ্দভঃ। ইতি শ্রীভাগবতং॥ নিন্দকঃ॥

উপক্বণঃ ( পুং ) প্রক্বণঃ। বীণাশব্দঃ। ইত্যমরটীকায়াং রায়মুকুটঃ ॥

উপগতঃ ( ত্রি ) অঙ্গীকৃতঃ। স্বীকৃতঃ। ইত্যমরঃ ॥ কৃতমৈথুনঃ ॥

উপগমঃ (পুং) অঙ্গীকারঃ। নিকটগমনং। ইতি মেদিনী ॥

উপগূহনং ( ক্লী ) আলিঙ্গনং। ইত্যমরঃ ॥

উপগ্রহঃ ( পুং ) বন্দী। বঁদুয়ান্ ইতি ভাষা। ইত্যমরঃ ॥ উপযোগঃ। অনুকূলঃ। ইতি মেদিনী ॥

উপগ্রহণং ( ক্লী ) উপাকরণং। সংস্কারপূর্ব্বকশ্রুতিগ্রহণং। ইত্যমরটীকায়াং রায়মুকুটঃ ॥

উপগ্রাহ্যঃ ( পুং ) উপঢৌকনং। ভেটী ডালি ইত্যাদি ভাষা। ইত্যমরঃ ॥

উপঘাতঃ ( পুং ) রোগঃ। ইতি রাজনির্ঘণ্টঃ ॥

উপঘ্নঃ ( পুং ) নিকটাশ্রয়ঃ। ইত্যমরঃ ॥

উপচক্রঃ ( পুং ) চক্রবাকপক্ষিবিশেষঃ। অস্য মাংসগুণাঃ। লঘুত্বং। হৃদ্যত্বং। উষ্ণবীর্য্যত্বং। কটুপাকিত্বং। বলাগ্নিবৃদ্ধিকারিত্বঞ্চ। ইতি রাজবল্লভঃ ॥

উপচয়ঃ (পুং) বৃদ্ধিঃ। উন্নতিঃ। লগ্নাৎ তৃতীয়ষষ্ঠদশমৈকাদশস্থানানি। ইতি জ্যোতিষং ॥

উপচরিতং ( ত্রি ) উপাসিতং। সেবিতং। ইত্যমরঃ ॥

উপচর্য্যা ( স্ত্রী ) চিকিৎসা। ইতি হলায়ুধঃ ॥

উপচক্ষুঃ [স্] ( ক্লী ) দিব্যচক্ষুঃ। চশ্‌মা ইতি পারস্তভাষা। ইতি লোকপ্রসিদ্ধং ॥

উপচায্যঃ ( পুং ) যজ্ঞাগ্নিঃ। ইত্যমরঃ ॥

উপচারঃ ( পুং ) রোগপ্রতিকারঃ। তৎপর্য্যায়ঃ। উপচর্য্যা ২ চিকিৎসা ৩ রুক্‌প্রতিক্রিয়া ৪ নিগ্রহঃ ৫ বেদনানিষ্টা ৬ ক্রিয়া ৭ উপক্রমঃ ৮ শমঃ ৯। ইতি রাজনির্ঘণ্টঃ ॥ সেবা। ব্যবহারঃ। উৎকোচঃ। ইতি হেমচন্দ্রঃ ॥

উপচার্য্যঃ ( পুং ) চিকিৎসা। ইতি হেমচন্দ্রঃ ॥

উপচিতঃ ( ত্রি ) দগ্ধঃ। সমৃদ্ধঃ। ইতি বিশ্বমেদিন্যৌ ॥ সমাহিতঃ। ইতি বিশ্বঃ হেমচন্দ্রশ্চ ॥ নিদিগ্ধঃ। লেপাদিনা বর্দ্ধিতঃ। ইত্যমরঃ ॥

উপচিত্রা ( স্ত্রী ) মুষিকপর্ণী। ইঁদুরকানি ইতি ভাষা। ইত্যমরঃ ॥ দন্তীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

উপজাপঃ (পুং) ভেদঃ। বিচ্ছেদঃ। ইত্যমরঃ ॥

উপজিহ্বা (স্ত্রী) কীটবিশেষঃ। তৎপর্য্যায়ঃ। উপদেহিকা ২ বম্রী ৩ উপদীকা ৪। ইতি হেমচন্দ্রঃ ॥ আলজিহ্বা ইতি খ্যাতা চ ॥

উপজিহ্বিকা ( স্ত্রী ) ঘণ্টিকা। আলজিব ইতি ভাষা। তৎপর্য্যায়ঃ। প্রতিজিহ্বা ২। ইতি রাজনির্ঘণ্টঃ ॥ কীটভেদঃ। তৎপর্য্যায়ঃ। উৎপাদিকা ২ বর্টিঃ ৩ উদ্দেহিকা ৪ দিবী ৫। ইতি হারাবলী ॥

উপজীবিকা (স্ত্রী) উপজীব্যং। জীবনোপায়ঃ॥

উপজোষম্ ব্য আনন্দঃ। ইত্যমরঃ ॥

উপজ্ঞা ( স্ত্রী ) আদ্যজ্ঞানং। ইত্যমরঃ ॥ তত্তু বিনোপদেশেন প্রথমজ্ঞানং। যথা বাল্মীকেঃ শ্লোকনির্ম্মাণে জ্ঞানং ॥

উপঢৌকনং ( ক্লী ) পারিতোষিকদ্রব্যং। ভেটী

ডালি ইত্যাদি ভাষা। তৎপর্য্যায়ঃ। প্রাভৃতং ১ প্রদেশনং ২ উপায়নং ৩ উপগ্রাহ্যঃ ৪ উপহারঃ ৫ উপদা ৬। ইত্যমরঃ॥

উপতপ্তা [ ঋ্] (পুং) উপতাপকমাত্রং। তৎপর্য্যায়ঃ। স্পর্শঃ ২ স্প্রষ্টা ৩। ইত্যমরঃ॥ স্পশঃ ৪ স্পর্ষ্টা ৫। ইতি তট্টীকা॥ রোগ ইত্যন্যে। ইতি ভরতঃ॥

উপতাপঃ (পুং) ত্বরা। উত্তাপঃ। রোগঃ। ইতি মেদিনী॥ অশুভং। পীড়া। ইতি শব্দরত্নাবলী॥

উপত্যকা (স্ত্রী) পর্ব্বতনিকটভূমিঃ। ইত্যমরঃ॥

উপদংশঃ (পুং) মদ্যপানরোচকঃ ভক্ষ্যদ্রব্যং। তৎপর্য্যায়ঃ। অবদংশঃ ২ চক্ষণং ৩ মদ্যপাসনং ৪। ইতি হেমচন্দ্রঃ॥ মেঢ্ররোগবিশেষঃ। বাও ইতি ভাষা। অথোপদংশাধিকারঃ। তত্রোপদংশস্য বিপ্রকৃষ্টং নিদানমাহ। হস্তাবিঘাতান্নখদন্তঘাতাদধারণাদত্যুপসেবনাদ্বা। যোনিপ্রদোষাচ্চ ভবন্তি শিশ্নে পঞ্চোপদংশা বিবিধাপচারৈঃ॥ হস্তাবিঘাতাৎ হস্তেন মৈথুনাৎ। নখদন্তঘাতাৎ নখদন্তঘাতস্থানস্থেনানুক্তেঽপি মেহনে নখদন্তঘাতো বলবদনুরাগোদয়াৎ। উক্তঞ্চ কামশাস্ত্রে। শাস্ত্রস্য বিষয়স্তাবদ্যাবন্মন্দতরো রসঃ। রতিচক্রে প্রবৃত্তে তু ন শাস্ত্রং নাপি চ ক্রমঃ॥ কলহে দুষ্টস্ত্রীকৃতো বা মেহনে নখদন্তঘাতঃ। উৎকলাদৌ স্ত্রিয়ো মুখযোনয়ো ভবন্তি। তাভির্ব্বা মেহনে নখদন্তঘাতঃ। যোনিপ্রদোষাৎ দীর্ঘকর্কশযোনিলোমযোগাৎ। যোনিচ্ছিদ্রস্যাতিসূক্ষ্মত্বাদ্বা। বাতাদিকৃতাদ্বা যোনিদোষাৎ। বিবিধাপচারৈঃ। দুষ্টজলপ্রক্ষালনব্রহ্মচারিণীগমনাদিভিঃ পঞ্চোপদংশাঃ। বাতিকঃ পৈত্তিকঃ শ্লৈষ্মিকঃ সান্নিপাতিকঃ আগন্তুজশ্চেতি॥ *॥ তত্র বাতিকপৈত্তিকস্য চোপদংশস্য লক্ষণমাহ। সতোদভেদস্ফুরণৈস্তু কৃষ্ণৈঃ স্ফোটৈর্ব্যবস্যেন্মরুতোপদংশং। পীতৈর্ব্বহুক্লেদযুতৈঃ সদাহৈঃ পিত্তেন রক্তৈঃ পিসিতাবভাসৈঃ॥ ব্যবস্যেৎ জানীয়াৎ। পীতৈঃ রক্তৈর্ব্বেতি বিকল্পঃ॥*॥ শ্লৈষ্মিকং সান্নিপাতিকঞ্চাহ। সকণ্ডুরৈঃ শোফযুতৈর্ম্মহদ্ভিঃ শুক্লৈর্ঘনৈঃ স্রাবযুতৈঃ কফেন। নানাবিধস্রাবরুজোপপন্নমসাধ্যমাহুস্ত্রিমলোপদংশং॥ *॥ অসাধ্যমাহ। বিশীর্ণমাংসং কৃমিভিঃ প্রজগ্ধং মুষ্কাবশেষং পরিবর্জ্জয়েত্তং। বিশীর্ণমাংসং গলিতমাংসং। প্রজগ্ধং খাদিতং। মুষ্কাবশেষং বিশীর্ণসমস্তমেহনমাংসত্বেনাবশিষ্টফলকোষমাত্রং॥ *॥ উৎপন্নমাত্রচিকিৎসায়া অকরণে দোষমাহ। সঞ্জাতমাত্রে ন করোতি মূঢ়ঃ ক্রিয়াং নরো যো বিষয়ে প্রসক্তঃ। কালেন শোফক্রিমিদাহপাকৈঃ প্রশীর্ণশিশ্নো ম্রিয়তে স তেন॥ বিষয়ে প্রসক্তঃ অতিস্ত্রীরতঃ॥ *॥ লিঙ্গার্শমাহ। অঙ্কুরৈরিব সংজাতৈরুপর্য্যুপরি সংস্থিতৈঃ। ক্রমেণ জায়তে বর্ত্তিস্তাম্রচূড়শিখোপমা॥ কোষস্যাভ্যন্তরে সন্ধৌ পর্ব্বসন্ধিগতাপি চ। সবেদনা পিচ্ছিলা চ দুশ্চিকিৎস্যা

ত্রিদোষজা ॥ লিঙ্গবর্ত্তিরিতি খ্যাতা লিঙ্গার্শ ইতি চাপরে ॥ লিঙ্গবর্ত্তেঃ স্থানমাহ। কোষাভ্যন্তরে অণ্ডকোষাভ্যন্তরে। সন্ধৌ লিঙ্গরন্ধ্রসন্ধৌ। পর্ব্বসন্ধিগতা মণিপর্ব্বণোঃ সন্ধিগতা ॥ * ॥ * ॥ অথোপদংশস্য চিকিৎসা। উপদংশেষু সর্ব্বেষু স্নিগ্ধং স্বিন্নস্য দেহিনঃ। মেঢ্রমধ্যে শিরাং বিধ্যেৎ পাতয়েদ্বা জলৌকসঃ ॥ সদ্যো নির্হৃতদোষস্য রুক্‌শোথাবুপশাম্যতঃ। পাকো নিবার্য্যো যত্নেন শিশ্নক্ষয়করঃ স যৎ ॥ বটপ্ররোহার্জ্জুনজম্বুলোধ্রপথ্যাহরিদ্রারচিতঃ প্রলেপঃ। ব্যথাং তথা শোথমপাকরোতি সর্ব্বোপদংশেষু ততো হিতোঽয়ং ॥ উপদংশেষু পক্কেষু ব্রণপ্রক্ষালনং হিতং। ত্রিফলায়াঃ কষায়েণ ভৃঙ্গরাজরসেন বা ॥ নীলোৎপলং সকুমুদং পদ্মং সৌগন্ধিকং তথা। এষাং চূর্ণং ধূলনার্থং প্রলেপশ্চাত্র শস্যতে ॥ বব্বূকদলচূর্ণেন রজসা দাড়িমত্বচঃ। গুণ্ঠনং তদ্‌ব্রণে কুর্য্যাল্লেপং পূগফলেন বা ॥ দহেৎ কটাহে ত্রিফলাং তন্মসী মধুসংযুতা। প্রলেপেনোপদংশস্য ব্রণং সদ্যঃ প্ররোহয়েৎ ॥ পটোলনিম্বত্রিফলাকিরাতক্বাথং পিবেদ্বা খদিরাসনাভ্যাং। সগুগ্গুলুং বা ত্রিফলাযুতং বা সর্ব্বোপদংশাপহরঃ প্রয়োগঃ ॥ * ॥ ভূনিম্বনিম্বত্রিফলাপটোলকরঞ্জধাত্রীখদিরাসনানাং। কষায়-কল্কৈঃ স্বতমাশু চাজ্যং সর্ব্বোপদংশাপহরং প্রদিষ্টং ॥ ভূনিম্বাদিঘৃতং ॥ * ॥ ঘৃতানি যানি প্রোক্তানি কুষ্ঠে নাড়ীব্রণে ব্রণে। উপদংশে প্রযোজ্যানি সেকাভ্যঞ্জনভোজনে ॥ ক্ষারসূত্রেণ সংছিদ্য লিঙ্গবর্ত্তিমশেষতঃ। দহেচ্চ তাং ততস্তাভ্যাং চিকিৎসাং ব্রণবচ্চরেৎ ॥ ইত্যুপদংশাধিকারঃ। ইতি ভাবপ্রকাশঃ ॥ * ॥ অপিচ। পটোলনিম্বত্রিফলাগুড়ূচীক্বাথমাবিশেৎ। সগুগ্গুলুং সখদিরমুপদংশো বিনশ্যতি ॥ গ্রন্থান্তরে প্রথমার্দ্ধে পটোলনিম্বগুড়ূচীমরিচক্বাথমাপিবেৎ। ইতি চ পাঠঃ ॥ দহেৎ কটাহে ত্রিফলাং সা মসী মধুসংযুতা। উপদংশে প্রলেপোঽয়ং সদ্যো রোপয়তে ব্রণং ॥ * ॥ ত্রিফলানিম্বভূনিম্বকরঞ্জখদিরাদিভিঃ। কল্কৈঃ ক্বাথৈর্ঘৃতং পক্কমুপদংশহরং পরং ॥ ইতি গারুড়ে ১৭৫ অধ্যায়ঃ ॥ সমষ্ঠিলবৃক্ষঃ। শিগ্রুবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ। দংশনং ॥

উপদর্শকঃ (পুং) দ্বারপালঃ। ইত্যমরটীকাসারসুন্দরী ॥

উপদা (স্ত্রী) উপঢৌকনং। ইত্যমরঃ ॥

উপদানকং (ক্লী) উৎকোচঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

উপদিষ্টঃ (ত্রি) উপদেশপ্রাপ্তঃ। যথা। নন্বু শূদ্রস্যাপি সগোত্রা কথং ন নিষিধ্যতে ইতি চেদত্র উপদিষ্টাতিদিষ্টগোত্রস্যৈব নিষেধো ন ত্বতিদিষ্টাতিদিষ্টশূদ্রগোত্রাদেরিতি। ইত্যুদ্বাহতত্ত্বং ॥

উপদী (স্ত্রী) বন্দাকঃ। পরগাছা ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ ॥

উপদেবতা (স্ত্রী) যক্ষভূতাদিঃ ॥

উপদেশঃ (পুং) মন্ত্রকথনং। তৎপর্য্যায়ঃ। দীক্ষা ২। যথা। চন্দ্রসূর্য্যগ্রহে তীর্থে সিদ্ধক্ষেত্রে শিবালয়ে। মন্ত্রমাত্রপ্রকথনমুপদেশঃ স উচ্যতে॥ ইতি রামার্চ্চনচন্দ্রিকা॥ কলাবত্যাদিদীক্ষায়ামসামর্থ্যে সংক্ষেপো যথা। তত্রাপ্যশক্তঃ কশ্চিচ্চেদজমভ্যর্চ্চ্য সাক্ষতং। তদমুনাভিষিচ্যাষ্টবারং মূলেন কেকরং॥ নিধায়াষ্টৌ জপেৎ কর্ণে উপদেশেত্বয়ং বিধিঃ॥ ইতি বিশ্বসারতন্ত্রং॥ হিতকথনং। শিক্ষণং॥

উপদেশী [ন্] (ত্রি) উপদেষ্টা॥

উপদেষ্টা [ঋ] (ত্রি) উপদেশকর্ত্তা। যথা। তথোপদেষ্টারমপি পূজয়েচ্চ ততো গুরুং। ন পূজ্যতে গুরুর্যত্র নরৈস্তত্রাফলা ক্রিয়া॥ ইতি তিথ্যাদিতত্ত্বং॥ বৃহস্পতিঃ। উপদেষ্টানুমন্তা চ লোকে তুল্যফলৌ স্মৃতৌ। ইত্যাহ্নিকতত্ত্বঞ্চ॥

উপদেহিকা (স্ত্রী) কীটবিশেষঃ। তৎপর্য্যায়ঃ। উপজিহ্বা ২ বম্রী ৩ উপদীকা ৪। ইতি হেমচন্দ্রঃ॥

উপদ্রবঃ (পুং) উৎপাতঃ। ইতি হলায়ুধঃ॥ রোগারম্ভকদোষপ্রকোপজন্যোঽন্যো বিকারঃ। ইতি বৈদ্যকং॥

উপদ্রষ্টা [ঋ] (ত্রি) উপদর্শকঃ। উদাসীনবোধরূপত্বেন গুণপ্রচারদর্শী। ইতি গীতা-

উপধর্ম্মঃ (পুং) পাষণ্ডঃ। ইতি শ্রীভাগবতং॥

উপধা (স্ত্রী) রাজ্ঞাং ধর্ম্মকামার্থভয়ৈরমাত্যাদের্যৎ পরীক্ষণং। ইত্যমরঃ॥ ধর্ম্মার্থকামমোক্ষদ্বারা পরীক্ষা। যথা। ধর্ম্মার্থকামমোক্ষৈশ্চ প্রত্যেকং পরিশোধনৈঃ। উপেত্য ধীয়তে যস্মাদুপধা পরিকীর্ত্তিতা॥ অর্থকামোপধাভ্যাস্তু ভার্য্যাঃ পুত্রাংস্তু শোধয়েৎ। ধর্ম্মোপধাভির্বিপ্রাংস্তু সর্ব্বাভিঃ সচিবান্ পুনঃ॥ ইতি কালিকাপুরাণে ৮৫ অধ্যায়ঃ॥ পদানামুপান্ত্যবর্ণং। ইতি ব্যাকরণং॥

উপধাতুঃ (পুং) অষ্টপ্রধানধাতুসদৃশধাতুঃ। স তু সপ্তধা যথা। মাক্ষিকং ১ তুত্থকং ২ অভ্রং ৩ নীলাঞ্জনং ৪ মনঃশিলা ৫ হরিতালং ৬ রসাঞ্জনং ৭॥ শরীরস্থধাতুভবোপধাতুঃ সপ্তধা যথা। রসাৎ স্তনদুগ্ধং ১ রক্তাৎ স্ত্রীরজঃ ২ মাংসাৎ বসা ৩ মেদসো ঘর্ম্মঃ ৪ অস্থ্নো দন্তঃ ৫ মজ্জনঃ কেশঃ ৬ শুক্রাৎ ওজঃ ৭। ইতি বৈদ্যকং॥

উপধানং (ক্লী) শিরোধানং। বালিশ ইতি ভাষা। তৎপর্য্যায়ঃ। উপবর্হঃ ২। ইত্যমরঃ॥ গণ্ডুঃ ৩। ইতি জটাধরঃ। বিষং। প্রণয়ঃ। ইতি মেদিনী॥ ব্রতং। ইতি হেমচন্দ্রঃ॥

উপধানীয়ং (ক্লী) উপধানং। ইতি শব্দরত্নাবলী॥

উপধিঃ (পুং) কপটঃ। ইত্যমরঃ॥ রথচক্রং। ইতি হেমচন্দ্রঃ॥

উপধূপিতঃ (ত্রি) আসন্নমরণঃ। পরিধূপিতঃ। ইতি মেদিনী॥

উপধৃতিঃ (স্ত্রী) কিরণঃ। ইতি হেমচন্দ্রঃ॥

উপনতঃ (ত্রি) উপস্থিতঃ। ইতি হেমচন্দ্রঃ॥

উপনদং / উপনদি (ক্লী) নদ্যাঃ সমীপং। ইতি মুগ্ধবোধব্যাকরণং॥

উপনয়ঃ (পুং) উপনয়নং। ইতি হেমচন্দ্রঃ॥

উপনয়নং (ক্লী) ব্রাহ্মণক্ষত্রিয়বৈশ্যানাং যজ্ঞসূত্রধারণাদিরূপপ্রধানসংস্কারঃ। অধ্যাপনার্থমাচার্য্যসমীপং নীয়তে যেন কর্ম্মণা তদুপনয়নং। যথা। স্মৃতিঃ। গৃহ্যোক্তকর্ম্মণা যেন সমীপং নীয়তে গুরোঃ। বালো বেদায় তদ্যোগাদ্বালস্যোপনয়ং বিদুঃ॥ *॥ তৎপর্য্যায়ঃ। বটুকরণং ২। ইতি ত্রিকাণ্ডশেষঃ॥ উপনায়ঃ ৩ উপনয়ঃ ৪ আনয়ঃ ৫। ইতি হেমচন্দ্রঃ॥ তস্য কালঃ। গর্ভাষ্টমেঽষ্টমে বাব্দে ব্রাহ্মণস্যোপনায়নং। রাজ্ঞামেকাদশে সৈকে বিশামেকে যথাকুলং॥ ব্রহ্মবর্চ্চসকামস্য কার্য্যং বিপ্রস্য পঞ্চমে। ব্রাহ্মণস্য গর্ভাবধিষোড়শবর্ষপর্য্যন্তং। তত্র গর্ভাষ্টমবর্ষো মুখ্যঃ। ক্ষত্রিয়স্য দ্বাবিংশতিবর্ষপর্য্যন্তং। তত্রৈকাদশবর্ষো মুখ্যঃ। বৈশ্যস্য চতুর্ব্বিংশতিবর্ষপর্য্যন্তং। তত্র দ্বাদশবর্ষো মুখ্যঃ ইতি স্মৃতিঃ॥ সৈকে দ্বাদশে। তত্রাশক্তৌ প্রায়শ্চিত্তং কৃত্বা তদুত্তরে কার্য্যং। গৃহ্যোক্তকর্ম্মণা যেন সমীপং নীয়তে গুরোঃ। বালো বেদায় তদ্যোগাদ্বালস্যোপনয়ং বিদুঃ॥ রক্তস্রাবে তথা শস্ত্রক্ষতে পাঠনিষেধনাৎ। উপনয়নং ন তত্র স্যাৎ ইতি মন্বাদিসম্মতং॥ কৃত্যচিন্তামণৌ। জন্মোদয়ে জন্মসু তারকাসু মাসেঽথবা জন্মনি জন্মভে বা। ব্রতেন বিপ্রো ন বহুশ্রুতোঽপি বিদ্যাবিশেষৈঃ প্রথিতঃ পৃথিব্যাং॥ অস্তং গতে দৈত্যগুরৌ গুরৌ বা ঋক্ষেঽপি বা পাপযুতেঽপ্যমুক্তে। ব্রতোপনীতো দিবসে প্রণাশং প্রয়াতি দেবৈরপি রক্ষিতো যঃ॥ উদয়ে লগ্নে। ব্রতেন উপনয়নেন। ভুজবলভীমকৃত্যচিন্তামণ্যোঃ। স্বাতীশক্রধনাশ্বিমিত্রকরভে পৌষ্ণেজ্যচিত্রাহরিধিষ্ণ্যে তোয়পতৌ ভগে দিতিসুতে ভাদ্রদ্বয়ে সাগরে। কেন্দ্রস্থে ভৃগুজেঽঙ্গিরঃশশিসুতে চন্দ্রে চ তারে শুভে কর্ত্তব্যং ব্রতকর্ম্ম মঙ্গলতিথৌ বারাঃ সিতার্কেজ্যকাঃ॥ তোয়পতিঃ শতভিষা। অদিতিসুত উত্তরফল্গুনী। সাগরঃ পূর্ব্বাষাঢ়া। দীপিকায়াং। জীবার্কেন্দুভৃশুদ্ধৌ হরিশয়নবহির্ভাস্করে চোত্তরস্থে স্বাধ্যায়ে বেদবর্ণাধিপ ইহ শুভদে ক্ষৌরিভে নাদিতৌ চ। শুক্রার্কেজ্যর্ক্ষলগ্নে রবিমদনতিথিং প্রোহ্য ষষ্ঠাষ্টমেন্দুং নো জীবাস্তাতিচারেঽর্কসিতগুরুদিনে কালশুদ্ধৌ ব্রতং স্যাৎ॥ রবিমদনতিথিং সপ্তমীং ত্রয়োদশীং॥ *॥ কৃত্যচিন্তামণৌ। মাঘে দ্রবিণশীলাঢ্যঃ ফাল্গুনে চ দৃঢ়ব্রতঃ। চৈত্রে ভবতি মেধাবী বৈশাখে কোবিদো ভবেৎ॥ জ্যৈষ্ঠে গহননীতিজ্ঞ আষাঢ়ে ক্রতুভাজনঃ। শেষেষ্বন্যেষু রাত্রিঃ স্যাশ্বিবিদ্ধং নিশি চ ব্রতং॥ রাজমার্ত্তণ্ডে। পুনর্ব্বসৌ কৃতো বিপ্রঃ পুনঃসংস্কারমর্হতি। বৃদ্ধগর্গঃ। স্মৃতিযুক্তাননধ্যায়ান্ সপ্তমীঞ্চ ত্রয়োদশীং। পক্ষয়োর্মাঘমাসস্য দ্বিতীয়াং পরিবর্জয়েৎ॥ চৈত্রশুক্লতৃতীয়া আষাঢ়শুক্লদশমী মন্বন্তরাদিত্বেন নিষিদ্ধা বৈশাখশুক্লতৃতীয়া যুগাদিত্বেন নিষিদ্ধেতি। ষষ্ঠ্যামশুচিরভার্য্যো রিক্তাসু বহুদোষভাক্। শুক্লপক্ষ এব বিহিতঃ প্রাগুক্তাশ্বলায়নবচনাৎ॥ *॥

সামগানাং কুজবারেঽপ্যুপনয়নং শ্রীপতি-রত্নমালাকৃত্যচিন্তামণিধৃতবাৎস্যবচনাৎ । যথা । শাখাধিপে বলিনি কেন্দ্রগতেঽথ বাস্মিন্ বারেঽস্য চোপনয়নং কথিতং দ্বিজানাং । নীচস্থিতেঽরিগৃহগেঽথ পরাজিতে বা জীবে ভৃগাবুপনয়ঃ স্মৃতিকর্ম্মহীনঃ ॥ অস্য শাখাধিপস্য ॥ দীপিকায়াং । ঋগ্বেদাধিপতির্জ্জীবো যজুর্ব্বেদাধিপঃ সিতঃ। সামবেদাধিপো ভৌমঃ শশিজোঽথর্ব্ববেদরাট্ ॥ বেদাধিপকথনং ॥ * ॥ ব্রাহ্মণে শুক্রবাগীশৌ ক্ষত্রিয়ে ভৌমভাস্করৌ । চন্দ্রো বৈশ্যে বুধঃ শূদ্রে পতির্মন্দোঽন্ত্যজে জনে ॥ বর্ণাধিপকথনং ॥ * ॥ পরাজয়লক্ষণং বক্ষ্যে যাত্রায়াং । অত্রাপি বিবাহবদ্দশযোগভঙ্গবর্জ্জনং । বিষ্ণুধর্ম্মোত্তরে । ষোড়শাব্দো হি বিপ্রস্য রাজন্যস্য দ্বিবিংশতিঃ । বিংশতিঃ সচতুর্থী চ বৈশ্যস্য পরিকীর্ত্তিতা ॥ সাবিত্রী নাতিবর্ত্তেত অত ঊর্দ্ধং নিবর্ত্ততে । অত্র ষোড়শবর্ষস্য উপনয়নাঙ্গতা প্রতীয়তে । পতিতা যস্য সাবিত্রী দশবর্ষাণি পঞ্চ চ । ব্রাহ্মণস্য বিশেষেণ তথা রাজন্যবৈশ্যয়োঃ ॥ প্রায়শ্চিত্তং ভবেদেষাং প্রোবাচ বদতাং বরঃ । ইতি যমবচনে তদনঙ্গতা প্রতীয়তে । অনয়োর্গর্ভজন্মপ্রভৃতিগণনাভ্যামবিরুদ্ধার্থতা । তথাচ মাণ্ডব্যঃ । ব্রতবন্ধবিবাহে চ বৎসরপরিকল্পনমাহুরাচার্য্যাঃ । আধানপূর্ব্বমেকে প্রসূতিপূর্ব্বং সদান্যে তু ॥ * ॥ যত্তু দ্বিজানুপক্রম্য পৈঠিনসিবচনং দ্বাদশ-ষোড়শবিংশতিশ্চেদতীতা অবরুদ্ধকালা ভবন্তি ইতি দ্বাদশবর্ষাদ্যুপরি ব্রাহ্মণাদীনাং মহাব্যাহৃতিহোমপ্রায়শ্চিত্তার্থং । ষোড়শোপরি তু ব্রাত্যহোমাদিগুরুপ্রায়শ্চিত্তার্থমিতি । ইত্যুপনয়নং । ইতি জ্যোতিস্তত্ত্বং ॥ অথ উপনয়নস্যানুষ্ঠানক্রমঃ । তত্র প্রথমং প্রাতঃ কৃতস্নানঃ কৃতবৃদ্ধিশ্রাদ্ধঃ পিতা কৃতবৃদ্ধিশ্রাদ্ধেন পিত্রান্য এবাচার্য্যো বৃতস্তদসম্ভবে মাণবকবৃতো বা সমুদ্ভবনামানমগ্নিং সংস্থাপ্য বিরূপাক্ষজপান্তাং কুশণ্ডিকাং সমাপ্য মাণবকং প্রাতর্ভোজয়িত্বা অগ্ন্যুত্তরতো নীত্বা শিখয়া সহ মুণ্ডিতং স্নাপিতং কুণ্ডলাদ্যলঙ্কৃতং ক্ষৌমবস্ত্রাবৃতং তদসম্ভবে শুক্লাহতকার্পাসৈকবস্ত্রাবৃতং মাণবকং দক্ষিণে পূর্ব্বাভিমুখং নিধায় প্রকৃতকর্ম্মারম্ভে প্রাদেশপ্রমাণাং ঘৃতাক্তাং সমিধং তূষ্ণীমগ্নৌ হুত্বা তত্তন্মন্ত্রৈর্ব্যস্তসমস্তমহাব্যাহৃতিহোমং কুর্য্যাৎ । তত আচার্য্যঃ পঞ্চভির্ম্মন্ত্রৈঃ পঞ্চাহুতীর্জুহুয়াৎ । তত আচার্য্যঃ উদগগ্রেষু কুশেষু কৃতাঞ্জলিঃ প্রাঙ্মুখ ঊর্দ্ধস্তিষ্ঠেৎ। অগ্ন্যাচার্য্যয়োর্ম্মধ্যে মাণবকোঽপি কৃতাঞ্জলিরাচার্য্যাভিমুখ উদগগ্রেষু কুশেষু ঊর্দ্ধস্তিষ্ঠেৎ । মাণবকস্য দক্ষিণতঃ স্থিতো মন্ত্রবান্ ব্রাহ্মণো মাণবকস্য অঞ্জলিমুদকেন পূরয়তি পশ্চাৎ আচার্য্যস্যাপি । ততো গৃহীতজলাঞ্জলিরাচার্য্যো গৃহীতজলাঞ্জলিং মাণবকং পশ্যন্ মন্ত্রং জপতি । তত আচার্য্যো মাণবকং মন্ত্রং পাঠয়তি । ততো মাণবকস্যাভিবাদনার্থং দেবতাশ্রয়ং নক্ষত্রাশ্রয়ং গোত্রাশ্রয়ং বা মাণবকনাম

কল্পয়িত্বা আচার্য্যো মাণবকে কথয়তি। তত আচার্য্যো মাণবকং মন্ত্রেণ নামধেয়ং পৃচ্ছতি। মাণবকঃ পূর্ব্বাচার্য্যকল্পিতং নাম মন্ত্রেণ কথয়তি। তত আচার্য্যমাণবকৌ পূর্ব্বগৃহীতজলাঞ্জলী ত্যজেতাং। আচার্য্যস্তু দক্ষিণেন পাণিনা মাণবকস্য সাঙ্গুষ্ঠং দক্ষিণং পাণিং মন্ত্রেণ গৃহ্লাতি। ততো গৃহীতমাণবকহস্তো মন্ত্রং জপত্যাচার্য্যঃ। ততো মাণবকমাচার্য্যো মন্ত্রেণ প্রদক্ষিণেন ভ্রাময়িত্বা প্রাঙ্মুখং করোতি। ততো মাণবকস্য দক্ষিণস্কন্ধং স্পৃষ্ট্বা অবতীর্ণেন দক্ষিণপাণিনা অব্যবহিতং নাভিদেশং আচার্য্যো মন্ত্রেণ স্পৃশতি। ততো মাণবকস্য নাভে রুপরিদেশং মন্ত্রেণ আচার্য্যঃ স্পৃশতি। ততঃ মাণবকহৃদয়দেশং মন্ত্রেণাচার্য্যঃ স্পৃশতি। ততো দক্ষিণেন পাণিনা আচার্য্যো মাণবকস্য দক্ষিণস্কন্ধং স্পৃশন্ মন্ত্রং জপতি। ততো বামেন পাণিনা মাণবকস্য বামস্কন্ধং স্পৃশন্নাচার্য্যো মন্ত্রং জপতি। অথাচার্য্যো মাণবকং মন্ত্রেণ সম্বোধয়তি। অথ সম্বোধিতং মাণবকং আচার্য্যো মন্ত্রেণ প্রেষয়তি। ব্রহ্মচারী তু সর্ব্বত্র বাঢ়মিতি ব্রূয়াৎ। ততোঽগ্নেরুত্তরভাগে গত্বা আচার্য্য উদগগ্রেষু কুশেষু প্রাঙ্মুখ উপবিশতি। তত আচার্য্যাভিমুখো মাণবকঃ পাতিতদক্ষিণজানুঃ উদগগ্রেষু কুশেষু উপবিশতি। ততঃ প্রবরসংখ্যয়া পঞ্চ বা ত্রয়ো বা মেখলা যজ্ঞোপবীতরূপগ্রন্থয়ঃ কর্ত্তব্যাঃ। অথৈনং মাণবকমাচার্য্যস্ত্রিঃ প্রদক্ষিণং কারয়িত্বা ত্রিবৃতাং মুঞ্জমেখলাং পরিধাপয়ন্ মন্ত্রদ্বয়ং বাচয়তি। ততো যজ্ঞোপবীতং কৃষ্ণসারাজিনান্বিতং আচার্য্যো মাণবকং মন্ত্রেণ পরিধাপয়েৎ। ততো মাণবক আচার্য্যস্য উপসন্নো ভবতি। ততস্তমুপসন্নমাণবকং আচার্য্যঃ প্রথমং পাদং পাদং ততোঽর্দ্ধর্চ্চং ততঃ কৃৎস্নাং সাবিত্রীং অধ্যাপয়েৎ। তত আচার্য্যো মাণবকং মহাব্যাহৃতীঃ পৃথক্ পৃথক্ কৃত্বা প্রণবপূর্ব্বিকা অধ্যাপয়েৎ। ততো বৈল্বং পালাশং বা মাণবকপরিমাণং দণ্ডং মাণবকায় প্রযচ্ছন্ আচার্য্যো মাণবকং মন্ত্রং বাচয়তি। অথ গৃহীতদণ্ডো ব্রহ্মচারী প্রথমং মাতরং ভিক্ষাং প্রার্থয়তি। ততো মাতৃবন্ধূন্ ততঃ পিতরং ততঃ পিতৃবন্ধূন্ ততোঽন্যাংশ্চ প্রার্থয়েৎ। ততঃ সর্ব্বং লব্ধভৈক্ষং আচার্য্যায় নিবেদয়েৎ। ততঃ পূর্ব্ববদাচার্য্যো ব্যস্তসমস্তমহাব্যাহৃতিহোমং কৃত্বা প্রাদেশপ্রমাণাং ঘৃতাক্তাং সমিধং তূষ্ণীমগ্নৌ হুত্বা প্রকৃতং কর্ম্ম সমাপ্য উদীচ্যং শাট্যায়নহোমাদিবামদেব্যগানান্তং কর্ম্ম নির্ব্বর্ত্তয়েৎ। ততঃ যদি পিতৈবাচার্য্যস্তদা কর্ম্মকারয়িতৃব্রাহ্মণায় দক্ষিণাং দদ্যাৎ। অথান্য এবাচার্য্যো বৃতঃ তদা যেন বৃতঃ স তস্মৈ দক্ষিণাং দদ্যাৎ। ব্রহ্মচারী তু তত্রৈব স্থানে দিনান্তং যাবৎ বাগ্যতস্তিষ্ঠেৎ। ততঃ প্রাপ্তায়াং সন্ধ্যায়াং সন্ধ্যামুপাস্য কুশণ্ডিকোক্তবিধানেন সমুদ্ভবনামানমগ্নিং সংস্থাপ্য মন্ত্রং জপ্ত্বা দক্ষিণং জানু ভূমৌ নিধায় দক্ষিণপশ্চিমোত্তরক্রমেণ উদকাঞ্জলিসেকমগ্নি-

পর্য্যুক্ষণঞ্চ কৃত্বা সমিদ্ধোমং কুর্য্যাৎ। ততঃ প্রাদেশপ্রমাণঘৃতাক্তসমিত্রয়ং গৃহীত্বা আদ্যন্তয়োস্তূষ্ণীং মধ্যে সমন্ত্রকং অগ্নৌ জুহুয়াৎ। ততঃ কর্ম্মশেষোক্তবিধিনা পুনরপি অগ্নিপর্য্যুক্ষণোপক্রমং দক্ষিণ-পশ্চিমোত্তরক্রমেণ উদকাঞ্জলিসেকং কুর্য্যাৎ। ততঃ ব্রহ্মচারী অগ্নিমভিবাদ্য মন্ত্রেণাগ্নিং বিসৃজ্য অতীতায়াং সন্ধ্যায়াং ভিক্ষালব্ধমন্নং ক্ষারলবণবর্জ্জিতং সঘৃত-মুদকেনাভ্যুক্ষ্য ভক্ষণপ্রকরণোক্তবিধিনা ভুঞ্জীত। এতচ্চাগ্নিকর্ম্ম সমাবর্ত্তনপর্য্যন্তং প্রত্যহং সায়ং প্রাতঃ কর্ত্তব্যং॥ ইত্যুপ-নয়নকর্ম্ম সমাপ্তং॥ ইতি ভবদেবভট্টঃ॥

উপনায়ঃ (পুং) উপনয়নং। ইতি হেমচন্দ্রঃ॥

উপনায়কঃ (পুং) নায়কগুণোৎকর্ষকথকঃ। যথা। নায়কস্য গুণোৎকর্ষকথকা উপ-নায়কাঃ। ইতি সঙ্গীতদামোদরঃ॥ * ॥ উপপতিশ্চ॥

উপনাহঃ (পুং) বীণাদিতন্ত্রবন্ধনস্থানং। তৎপর্য্যায়ঃ। নিবন্ধনং ২। ইত্যমরঃ॥ ব্রণালেপপিণ্ডঃ। প্রলেপ ইতি ভাষা। ইতি মেদিনী॥

উপনিধিঃ (পুং) উপন্যস্তবস্তু। স্থাপ্যদ্রব্যং। তৎপর্য্যায়ঃ। ন্যাসঃ ২। ইত্যমরঃ॥

উপনিষৎ [দ্] (স্ত্রী) ধর্ম্মঃ। বেদান্তশাস্ত্রং। নির্জ্জনস্থানং। ইতি মেদিনী॥ সমীপ-সদনং। ইতি ত্রিকাণ্ডশেষঃ॥ তত্ত্বং। ইত্যমরটীকায়াং ভরতঃ॥

উপনিষ্করং (ক্লী) পুরপথঃ। ইত্যমরঃ॥ রাজ-পথঃ। ইতি হেমচন্দ্রঃ॥

উপনিষ্ক্রমণং (ক্লী) রাজপথঃ। ইতি হেম-চন্দ্রঃ॥ নিষ্ক্রমণনামসংস্কারঃ॥

উপনীতঃ (পুং) কৃতোপনয়নঃ। ইতি স্মৃতিঃ॥ নিকটপ্রাপ্তে ত্রি॥

উপন্যাসঃ (পুং) বাক্যোপক্রমঃ। তৎপর্য্যায়ঃ। বাঙ্মুখং ২। ইত্যমরঃ॥

উপপতিঃ (পুং) জারঃ। নাং ইতি ভাষা। ইত্যমরঃ॥ তস্য লক্ষণং। আচারহানি-হেতুঃ পতিঃ। স চতুর্ব্বিধঃ। সার্ব্বকালিক-পরাঙ্গনাপরাঙ্মুখত্বে সতি সর্ব্বকালমনুরক্তো ঽনুকূলঃ ১। সকলনায়িকাবিষয়সমসহ-জানুরাগো দক্ষিণঃ ২। ভূয়ো নিঃশঙ্কঃ কৃত-দোষোঽপি ভূয়ো নিবারিতোঽপি ভূয়ঃ প্রশ্রয়পরায়ণো ধৃষ্টঃ ৩। কামিনীবিষয়-কপটপটুঃ শঠঃ ৪। ইতি রসমঞ্জরী॥

উপপত্তিঃ (স্ত্রী) সঙ্গতিঃ। নির্ব্বৃতিঃ। সমা-ধানং। সিদ্ধান্তঃ। প্রকরণপ্রতিপাদ্যার্থ-সাধনে তত্র তত্র শ্রূয়মাণা যুক্তিঃ। ইতি বেদান্তসারঃ॥ হেতুঃ। যথা। শ্রোতব্যঃ শ্রুতিবাক্যেভ্যো মন্তব্যশ্চোপপত্তিভিঃ। ইত্যত্র উপপত্তিভির্বহুভির্হেতুভিরিতি পক্ষতাগ্রন্থমাথুরী॥ সঙ্গতিঃ। যথা। লক্ষণা শক্যসম্বন্ধস্তাৎপর্য্যানুপপত্তিতঃ। ইতি ভাষাপরিচ্ছেদঃ॥

উপপদং (ক্লী) লেশঃ। ইতি ত্রিকাণ্ডশেষঃ॥ সমীপোচ্চারণীয়পদং। যথা নামোত্তরে শর্ম্মবর্ম্মাদি। সমভিব্যাহৃতস্বার্থপোষক-পদং। যথা প্রহারাদৌ প্রাদি। ইতি ব্যাকরণং॥

উপপাতকং (ক্লী) পাপবিশেষঃ। তত্ত্ব

ঊনপঞ্চাশদ্বিধং যথা। গোবধঃ ১ অযাজ্য-যাজনং ২ পরদারগমনং ৩ আত্মবিক্রয়ঃ ৪ গুরুত্যাগঃ ৫ মাতৃত্যাগঃ ৬ পিতৃত্যাগঃ ৭ এষাং শুশ্রূষাদ্যকরণং ত্যাগঃ। স্বাধ্যায়-ত্যাগঃ ৮ স তু সর্ব্বদা ব্রহ্মযজ্ঞত্যাগঃ। অধীতবেদবিস্মরণঞ্চ। অগ্নিত্যাগঃ ৯ স তু স্মার্ত্তাগ্নিহোত্রত্যাগঃ। সুতত্যাগঃ ১০ স তু তস্য সংস্কারভরণাদ্যকরণং। পরি-বিত্তিতা ১১ সা তু কনিষ্ঠেন আদৌ বিবাহে কৃতে জ্যেষ্ঠস্য। পরিবেদনং ১২ তত্তু অকৃতদারজ্যেষ্ঠসত্ত্বে কনিষ্ঠস্য। তয়ো কন্যাদানং ১৩ তয়োর্যাজনং ১৪ তত্তু তয়োরেব বিবাহাদৌ পৌরহিত্যং। কন্যায়া দূষণং ১৫ তত্তু মৈথুনবর্জমঙ্গুলীপ্রক্ষে-পাদিনা রূষণং। অঙ্গুল্যা যোনিবিদারণ-মিতি যাবৎ। বার্দ্ধুষ্যং ১৬ তত্তু নিষিদ্ধ-বৃদ্ধিজীবনং। ব্রতলোপঃ ১৭ স তু ব্রহ্মচারিণো মৈথুনং। তড়াগবিক্রয়ঃ ১৮ আরামবিক্রয়ঃ ১৯ দারাবিক্রয়ঃ ২০ অপত্যবিক্রয়ঃ ২১ ব্রাত্যতা ২২ সা তু যথাকালমনুপনয়নং। বান্ধবত্যাগঃ ২৩ ভৃতাধ্যাপনং ২৪ তত্তু প্রতিনিয়তবেতন-গ্রহণপূর্ব্বমধ্যাপনং। ভৃতাধ্যয়নং ২৫ তত্তু বেতনপ্রদানপূর্ব্বকাধ্যয়নং। অপ-ণ্যানাং বিক্রয়ঃ ২৬ স তু তিললাক্ষা-গোরসাদীনাং ব্রাহ্মণেন বিক্রয়ঃ। সর্ব্বা-করেষ্বধীকারঃ ২৭ স তু সুবর্ণাদ্যুৎপত্তি-স্থানেষু রাজাজ্ঞয়া অধিকারঃ। মহাযন্ত্র-প্রবর্ত্তনং ২৮ তত্তু মহতাং উদকপ্রবাহ-প্রতিবন্ধহেতূনাং সেতুবন্ধাদীনাঞ্চ প্রবর্ত্তনং অথবা তৈলাদিযন্ত্রস্য শস্ত্রতেজনাদি-যন্ত্রস্য চ। ওষধিহিংসনং ২৯ তত্তু ধান্যা-দীনাং যথা কথঞ্চিন্নাশঃ। স্ত্র্যাজীবঃ ৩০ স তু ভার্য্যাদিস্ত্রীণাং বেশ্যাত্বং কৃত্বা তদুপ-জীবনং। অভিচারকর্ম্ম ৩১ তত্তু শ্যেনা-দিনা যজ্ঞেন অনপরাদ্ধস্য মারণং। মূল-কর্ম্ম ৩২ তত্তু মন্ত্রৌষধাদিনা বশীকরণং। ইন্ধনার্থমশুষ্কদ্রুমাণাং ছেদনং ৩৩ আত্মা-র্থং ক্রিয়ারম্ভঃ ৩৪ স তু অনাতুরস্য দেব-পিত্রাদ্যুদ্দেশমন্তরেণ পাকাদ্যনুষ্ঠানং। নিন্দিতান্নস্য ভক্ষণং ৩৫ তত্তু লশুনাদেঃ সকৃদনিচ্ছয়া অথবা গণকদেবলতস্করা-দ্যন্নভক্ষণং। অনাহিতাগ্নিতা ৩৬ সা তু সমর্থস্য শ্রৌতস্মার্ত্তাগ্ন্যপরিগ্রহঃ। স্তেয়ং ৩৭ তত্তু সুবর্ণদ্রব্যাদন্যসারদ্রব্যাপহরণং। দেবর্ষিপিতৃণাং ঋণাশোধনং ৩৮ অসৎ-শাস্ত্রাভিগমনং ৩৯ তত্তু শ্রুতিস্মৃতিবিরুদ্ধ-শাস্ত্রশিক্ষণং পাষণ্ডশাস্ত্রাভ্যাসো বা। কৌশীলব্যক্রিয়া ৪০ সা তু তৌর্য্যত্রিকস্য সততানুষ্ঠানং। ধান্যস্তেয়ং ৪১ পশু-স্তেয়ং ৪২ কুপ্যস্তেয়ং ৪৩ মদ্যপস্ত্রীনিষে-বনং ৪৪ স্ত্রীবধঃ ৪৫ শূদ্রবধঃ ৪৬ বৈশ্য-বধঃ ৪৭ ক্ষত্রিয়বধঃ ৪৮ নাস্তিক্যং ৪৯। তত্তু অদৃষ্টার্থকর্ম্মাভাববুদ্ধিঃ। নাস্তি পর-লোক ইতি বা। ইতি মনুঃ শূলপাণিশ্চ॥

উপপাপং (ক্লী) উপপাতকং। ইতি স্মৃতিঃ॥

উপপুরং (ক্লী) শাখানগরং। ইতি হেম-চন্দ্রঃ॥

উপপুরাণং (ক্লী) ব্যাসকৃতাষ্টাদশপুরাণসদৃশ-নানামুন্যাদিপ্রণীতাষ্টাদশপুরাণং। যথা।

অন্যান্যুপপুরাণানি মুনিভিঃ কথিতান্যপি। আদ্যং সনৎকুমারোক্তং নারসিংহং ততঃ পরং ॥ তৃতীয়ং বায়বীয়ঞ্চ কুমারেণ চ ভাষিতং। চতুর্থং শিবধর্ম্মাখ্যং সাক্ষান্নন্দীশভাষিতং ॥ দুর্ব্বাসসোক্তমাশ্চর্য্যং নারদীয়মতঃপরং। নন্দিকেশ্বরযুগ্মঞ্চ তথৈবোশনসেরিতং ॥ কাপিলং বারুণঞ্চৈব কালিকাহ্বয়মেব চ। মাহেশ্বরং তথা শাম্বং দৈবং সর্ব্বার্থসিদ্ধিদং ॥ পরাশরোক্তমপরং মারীচং ভাস্করাহ্বয়ং। দৈবং দেবীপুরাণং। ইতি মলমাসতত্ত্বধৃতকূর্ম্মপুরাণং ॥

উপপুষ্পিকা (স্ত্রী) জৃম্ভা। হাই ইতি ভাষা। তৎপর্য্যায়ঃ। হাফিকা ২। ইতি হারাবলী ॥

উপপ্রদানং (ক্লী) উৎকোচঃ। ঘুস ইতি ভাষা। ইতি হেমচন্দ্রঃ ॥

উপপ্লবঃ (পুং) রাহুগ্রহঃ। বিপ্লবঃ। উৎপাতঃ। ইতি মেদিনী॥ গ্রহণং। যথা উপপ্লবে চন্দ্রমসো রবেশ্চ। ইতি স্মৃতিঃ ॥

উপভূষণং (ক্লীং) ঘণ্টাচামরাদি। যথা। ঘণ্টাচামরকুম্ভাদিপাত্রোপকরণাদিকং। তদ্ভূষণান্তরে দদ্যাদযস্মাত্তদুপভূষণং ॥ ইতি। প্রাবারঃ পানপাত্রঞ্চ গেণ্ডুকো গৃহমেব চ। পর্য্যঙ্কাদি যদন্যচ্চ সর্ব্বং তদুপভূষণং ॥ ইতি চ কালিকাপুরাণে ৬৮ অধ্যায়ঃ ॥

উপভৃৎ (স্ত্রী) চক্রাকারযজ্ঞপাত্রং। ইত্যমরঃ ॥

উপভোগঃ (পুং) ভোজনাতিরিক্তভোগঃ। তৎপর্য্যায়ঃ। নির্ব্বেশঃ ২। ইত্যমরঃ ॥

উপমা (স্ত্রী) উপমানং। সাদৃশ্যং। ইত্যমরঃ॥ তস্য বৈদিকপর্য্যায়ঃ। ইদমিব ১ ইদংযথা ২ অগ্নির্ণয়ে ৩ চতুরশ্চিদ্দদমানাৎ ৪ ব্রাহ্মণাব্রতচারিণঃ ৫ বৃক্ষস্যনুতেপুরহূতবয়াঃ ৬ জারআভগং ৭ মেষোভূতোঽভীযন্নপঃ ৮ তদ্রূপঃ ৯ তদ্বর্ণঃ ১০ তদ্বৎ ১১ তথা ১২। ইতি দ্বাদশোপমাঃ। ইতি বেদনির্ঘণ্টৌ ৩ অধ্যায়ঃ ॥

উপমাতা [ঋ] (স্ত্রী) ধাত্রী। ইতি জটাধরঃ॥ মাতুঃ সদৃশী। সা ষড়্বিধা যথা। মাতুঃস্বসা মাতুলানী পিতৃব্যস্ত্রী পিতৃস্বসা। শ্বশ্রূঃ পূর্ব্বজপত্নী চ মাতৃতুল্যাঃ প্রকীর্ত্তিতাঃ॥ ইতি স্মৃতিঃ। উপমানকর্ত্তরি ত্রি ॥

উপমানং (ক্লী) উপমা। ইত্যমরঃ ॥

উপমালঙ্কারঃ (পুং) সাম্যালঙ্কারঃ। যথা। উপমামাহ। সাম্যবাচ্যমবৈধর্ম্ম্যং বাক্যৈক্যে উপমাদ্বয়োঃ। তদ্ভেদাঃ। সা দ্বিবিধা। পূর্ণা লুপ্তা চ। তল্লক্ষণং যথা। সা পূর্ণা যদি সামান্যধর্ম্ম ঔপম্যবাচি চ। ইয়ং পুনঃ শ্রৌত্যার্থী চ। তল্লক্ষণন্তু। শ্রৌতী যথেববা শব্দা ইবার্থো বা বতির্যদি। আর্থী তুল্যসমানাদ্যাস্তুল্যার্থো যত্র বা বতিঃ॥ দ্বে ত্রিধা। তদ্ধিতে সমাসেঽথবাক্যে। উদাহরণং। সৌরভমম্ভোরুহবন্মুখস্য কুম্ভাবিব স্তনৌ পীনৌ। হৃদয়ং মদয়তি বদনং তব শরদিন্দুর্যথা বালে ॥ অত্র ক্রমেণ ত্রিবিধা শ্রৌতী। মধুরঃ সুধাবদধরঃ পল্লবতুল্যোঽতিপেলবঃ পাণিঃ। চকিতমৃগলোচনাভ্যাং সদৃশী চপলে চ লোচনে তস্যাঃ॥ অত্র ক্রমেণ ত্রিবিধা

আর্থী পূর্ণা ষড়েব তৎ। লুপ্তা সামান্য-ধর্ম্মাদেরেকস্য যদি বা দ্বয়োঃ॥ ত্রয়াণাং বানুপাদানে শ্রৌত্যার্থী সাপি পূর্ব্ববৎ। ইয়ঞ্চ তদ্ধিতে শ্রৌত্যা অসম্ভবাৎ পূর্ব্বোক্ত-রীত্যা পঞ্চপ্রকারাঃ। উদাহরণং। মুখ-মিন্দুর্যথা পাণিঃ পল্লবেন সমঃ প্রিয়ে। বাচঃ সুধা ইবৌষ্ঠস্তে বিম্বতুল্যো মনো ঽশ্মবৎ॥ সা লুপ্তা পঞ্চধা পুনঃ। আধার-কর্ম্মবিহিতে দ্বিবিধে চ ক্যচি ক্যঙি। কর্ম্মকর্ত্রোর্ণমুলি চ স্যাদেবং পঞ্চধা পুনঃ॥ উদাহরণং। অন্তঃপুরীয়সি রণেষু সুতীয়সি ত্বং পৌরং জনং তব সদা রমণীয়তে শ্রীঃ। দৃষ্টঃ প্রিয়াভিরমৃতদ্যুতিদর্শমিন্দ্রসঞ্চার-মত্র ভুবি সঞ্চরসি ক্ষিতীশ॥ তদেবং দশপ্রকারা লুপ্তা। সা পুনর্দ্বিধা। বাক্য-গতা সমাসগতা চ। যথা। উপমানানুপা-দানে দ্বিধা বাক্যসমাসয়োঃ। শ্রৌত্যার্থীত্ব-ভেদেন চতুর্ব্বিধত্বসম্ভবেঽপি প্রাচীন-রীত্যা দ্বিপ্রকারত্বমেবোক্তং। পুনর্দ্বিধা। ঔপম্যবাচিনো লোপে সমাসে ক্বিপি চ দ্বিধা। উদাহরণং। বদনং মৃগশাবাক্ষ্যাঃ সুধাকরমনোহরং। গর্দ্দভতি শ্রুতিপরুষং ব্যক্তং নিনদন্মহাত্মনাং পুরতঃ॥ পুন-র্ধর্ম্মোপমানয়োর্লোপে দ্বিধা। তদ্যথা। দ্বিধা সমাসে বাক্যে চ লোপে ধর্ম্মোপ-মানয়োঃ। উদাহরণং। তস্যা মুখেন সদৃশং রম্যং নাস্তে নবা নয়নতুল্যং। পুনর্দ্বিধা। ক্বিপ্‌সমাসগতা দ্বেধা ধর্ম্মে বাদিবিলোপনে। উদাহরণং। বিধবতি মুখাব্জমস্যা ইত্যাদি। উপমেয়স্য লোপে তু স্যাদেকা প্রত্যয়ে ক্যচি। উদাহরণং। অরাতিবিক্রমালোকবিকশ্বরবিলোচনঃ। কৃপাণোদগ্রদোর্দ্দণ্ডঃ স সহস্রায়ুধীয়তি॥ ধর্ম্মোপমেয়লোপেঽন্যা চ। উদাহরণং। যশসি প্রসরতি ভবতঃ ক্ষীরোদীয়ন্তি সাগরাঃ সর্ব্বে। ত্রিলোপে চ সমাসগা। যথা। রাজতে মৃগলোচনেত্যাদি। তেনো-পমায়া ভেদাঃ স্যুঃ সপ্তবিংশতিসংখ্যকাঃ। পূর্ণা ষড়্‌বিধা। লুপ্তা চৈকবিংশতিবিধেতি মিলিত্বা সপ্তবিংশতিপ্রকারোপমা। ইতি সাহিত্যদর্পণে ১০ পরিচ্ছেদাৎ সংগৃ-হীতঃ॥

উপমিতিঃ (স্ত্রী) উপমা। ইতি শব্দরত্না-বলী॥ ন্যায়মতে সাদৃশ্যজ্ঞানজন্যজ্ঞানং। যথা গোসদৃশো গবয়পদবাচ্য ইত্যাকার-শক্তিজ্ঞানং। অস্য করণং গবাদিসাদৃশ্যবৎ পিণ্ডপ্রত্যক্ষং। অস্য ব্যাপারঃ অতিদিষ্ট-বাক্যার্থস্মরণং। ইত্যুপমানখণ্ডং॥ অপি চ। গ্রামীণস্য প্রথমতঃ পশ্যতো গবয়াদিকং। সাদৃশ্যধীর্গবাদীনাং যা স্যাৎ সোপমিতিঃ স্মৃতা॥ বাক্যার্থস্যাতিদেশস্য স্মৃতির্ব্যাপার উচ্যতে। গবয়াদিপদানাস্তু শক্তিধীরুপমা-ফলং॥ পদজ্ঞানন্তু করণং শক্তিধীরুপমা-ফলং। ইতি ভাষাপরিচ্ছেদঃ॥

উপমেতঃ (পুং) শালবৃক্ষঃ। ইতি শব্দ-চন্দ্রিকা॥

উপযন্তা [ ঋ ] (পুং) পতিঃ। ইতি জটা-ধরঃ॥

উপযমঃ (পুং) বিবাহঃ। ইত্যমরঃ॥

উপযাচকঃ (ত্রি) সমীপে যাচ্ঞাকর্ত্তা॥

উপযাচিতং (ত্রি) স্বেষ্টসিদ্ধয়ে দেবায় দেয়ং বস্তু। তৎপর্য্যায়ঃ। দিব্যদোহদং ২। ইতি ত্রিকাণ্ডশেষঃ ॥

উপযাচিতকং (ত্রি) উপযাচিতং। স্বেষ্টলব্ধয়ে দেবদেয়ং। ইতি জটাধরঃ ॥

উপযামঃ (পুং) বিবাহঃ। ইত্যমরঃ ॥

উপযুক্তঃ (ত্রি) যোগ্যঃ। উচিতঃ ॥

উপযোগঃ (পুং) আচরণং। ইতি বিজয়রক্ষিতঃ ॥ ইষ্টসিদ্ধ্যর্থব্যাপারঃ। ইতি বিষ্ণুমিশ্রঃ ॥

উপযোগিতা (স্ত্রী) উপযোগিনো ভাবঃ। ফলসাধনতা। প্রয়োজনং। আনুকূল্যং ॥

উপযোগী [ন্] (ত্রি) উপযুক্তদ্রব্যাদিঃ। ক্রিয়াসাধনং। অনুকূলঃ ॥

উপযোষং ব্য উপজোষং। আনন্দঃ। ইত্যমরটীকায়াং ভরতঃ ॥

উপরক্তঃ (পুং) রাহুগ্রস্তঃ সূর্য্যশ্চন্দ্রশ্চ। ইত্যমরঃ ॥ রাহুঃ। ইতি হেমচন্দ্রঃ ॥

উপরক্তঃ (ত্রি) ব্যসনার্ত্তঃ। দৈবমানুষান্যতরপীড়াযুক্তঃ। ইত্যমরঃ ॥

উপরতঃ (ত্রি) মৃতঃ। ইতি স্মৃতিঃ ॥ বিরতঃ ॥

উপরতস্পৃহঃ (ত্রি) সত্যপি সত্ত্বে স্বগতধনেচ্ছারহিতঃ। স্বসমানাধিকরণস্বত্বসমান কালীনেচ্ছা প্রাগভাবাসমানকালীনেচ্ছা ধ্বংসবান্। ইতি দায়তত্ত্বং ॥ ইচ্ছারহিতঃ ॥

উপরতিঃ (স্ত্রী) বিরতিঃ। ইতি হেমচন্দ্রঃ ॥ নিগৃহীতেন্দ্রিয়াণাং বিষয়েভ্য উপরমণং। অথবা বিহিতকর্ম্মণাং বিধিনা পরিত্যাগঃ। ইতি বেদান্তঃ ॥

উপরমঃ (পুং) উপরতিঃ। ইতি হেমচন্দ্রঃ ॥

উপরসঃ (পুং) উপধাতুঃ। তদ্যথা। খেচরং। অঞ্জনং। কঙ্কুষ্টং। গন্ধারী। গৈরিকং। ক্ষিতিনাগঃ। শৈলেয়ং ইতি রাজনির্ঘণ্টঃ ॥

উপরক্ষণং (ক্লী) রক্ষণার্থং সৈন্যস্থাপনং। চৌকী ইতি খ্যাতং। তৎপর্য্যায়ঃ। সজ্জনং ২। ইত্যমরঃ ॥

উপরাগঃ (পুং) রাহুগ্রস্তশ্চন্দ্রঃ। সূর্যশ্চ। ইত্যমরঃ ॥ রাহুঃ। বিগানং। পরীবাদঃ। ইতি হেমচন্দ্রঃ ॥ দুর্ণয়ঃ। গ্রহকল্লোলঃ। ব্যসনং। ইতি মেদিনী ॥

উপরামঃ (পুং) নিবৃত্তিঃ। তৎপর্য্যায়ঃ। আরতিঃ২ অবরতিঃ ৩ বিরতিঃ ৪ ইত্যমরঃ॥ বিরামঃ ৫ উপরমঃ ৬ ইতি ভরত ॥ আরামঃ ৭ উপরতিঃ ৮ ইতি হেমচন্দ্রঃ ॥

উপরি ব্য ঊর্দ্ধং। উপর ইতি ভাষা। ইতি ব্যাকরণং ॥

উপরিষ্টাৎ ব্য উপরি। ঊর্দ্ধং। ইতি হেমচন্দ্রঃ ॥

উপরীতকঃ (পুং) শৃঙ্গারবন্ধবিশেষঃ। আসন বাঁধন ইত্যাদি ভাষা। তস্য লক্ষণং যথা। একপাদমুরৌ কৃত্বা দ্বিতীয়ং স্কন্ধসংস্থিতং। নারীং কাময়তে কামী বন্ধঃ স্যাদুপরীতকঃ। ইতি রতিমঞ্জরী ॥ অত্র বিপরীতকোঽপি পাঠঃ ॥

উপরূপকং (ক্লী) নাটকবিশেষঃ। স তু অষ্টাদশবিধঃ। যথা। নাটিকা ত্রোটকং গোষ্ঠী সট্টকং নাট্যরাসকং। প্রস্থানোল্লাপ্যকাব্যানি প্রেঙ্খণং রাসকন্তথা ॥ সংলাপকংশ্রীগদিতং শিল্পকঞ্চ বিলাসিকা।

দুর্ম্মল্লিকা প্রকরণী হল্লীশো ভাণিকেতি চ॥ অষ্টাদশ প্রাহুরুপরূপকাণি মনীষিণঃ। বিনা বিশেষং সর্ব্বেষাং লক্ষ্ম নাটকবন্মতং॥ ইতি সাহিত্যদর্পণে ৬ পরিচ্ছেদঃ॥

উপরোধঃ (পুং) অনুরোধঃ॥

উপরোধকং (ক্লী) গর্ভাগারং। বাসগৃহং। ইতি শব্দরত্নাবলী॥

উপর্য্যুপরি ব্য ঊর্দ্ধোর্দ্ধং। উপর উপরি ইতি ভাষা। সামীপ্যং। যথা উপর্য্যুপরি গ্রামং। ইতি ব্যাকরণং॥

উপলঃ (পুং) পাষাণঃ। রত্নং। ইতি মেদিনী॥

উপলধিপ্রিয়ঃ (পুং) চমরনামবনজন্তুঃ। ইতি রাজনির্ঘণ্টঃ॥

উপলব্ধার্থা (স্ত্রী) আখ্যায়িকা। ইত্যমরঃ॥ হিতোপদেশাদিকথা॥

উপলব্ধিঃ (স্ত্রী) মতিঃ। প্রাপ্তিঃ। জ্ঞানং। ইতি মেদিনী॥

উপলভেদী (পুং) পাষাণভেদীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

উপলম্ভঃ (পুং) অনুভবঃ। ইত্যমরঃ॥

উপলভ্যঃ (ত্রি) স্তব্যঃ। স্তবোপযুক্তঃ। যথা উপলভ্যঃ সাধুঃ। ইতি মুগ্ধবোধব্যাকরণং॥

উপলক্ষণং (ক্লী) অজহৎস্বার্থলক্ষণা। একপদেন তদর্থান্যপদার্থকথনং যথা। দেশান্তরে মৃতে পত্যৌ সাধ্বী তৎপাদুকাদ্বয়ং। নিধায়োরসি সংশুদ্ধা প্রবিশেজ্জাতবেদসং॥ অত্র পাদুকাদ্বয়মিত্যুপলক্ষণং দ্রব্যান্তরমপি। ইতি শুদ্ধিতত্ত্বং॥ স্বসিদ্ধয়ে পরাক্ষেপঃ পরার্থে স্বসমর্পণং। উপাদানং লক্ষণঞ্চেত্যুক্তা শুদ্ধৈব সা দ্বিধা॥ যথা কুন্তাঃ প্রবিশন্তি। ইত্যুপাদানং। গঙ্গায়াং ঘোষঃ। ইত্যুপলক্ষণং। ইতি কাব্যপ্রকাশঃ॥

উপলক্ষ্যঃ (পুং) আশ্রয়ঃ। অবলম্বনং॥

উপলা (স্ত্রী) শর্করা। ইতি মেদিনী॥

উপলিঙ্গং (ক্লী) উপদ্রবঃ। অরিষ্টং। ইতি হেমচন্দ্রঃ॥

উপলেপনং (ক্লী) গোময়াদিলেপনং। ইতি ত্রিকাণ্ডশেষঃ॥

উপবটঃ (পুং) প্রিয়ালবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

উপবনং (ক্লী) কৃত্রিমবনং। বাগান ইতি ভাষা। তৎপর্য্যায়ঃ। আরামঃ ২। ইত্যমরঃ॥

উপবর্ত্তনং (ক্লী) জনপদঃ। জনপদসমুদায়ঃ। জনপদৈকদেশঃ। সজলনির্জ্জলস্থানমাত্রং। ইতি ভরতঃ॥ তৎপর্য্যায়ঃ। দেশঃ ২ বিষয়ঃ ৩। ইত্যমরঃ॥

উপবর্ষঃ (পুং) মুনিবিশেষঃ। তৎপর্য্যায়ঃ। হলভৃতিঃ ২ কৃতকোটিঃ ৩ অযাচিতঃ ৪। ইতি ত্রিকাণ্ডশেষঃ॥

উপবর্হঃ (পুং) উপধানং। বালিশ ইতি ভাষা। ইত্যমরঃ॥

উপবল্লিকা (স্ত্রী) অমৃতস্রবালতা। ইতি রাজনির্ঘণ্টঃ॥

উপবসথঃ (পুং) গ্রামঃ। ইতি হেমচন্দ্রঃ॥

উপবস্তং (ক্লী) উপবাসঃ। ইত্যমরঃ॥

উপবাসঃ (পুং) অগ্ন্যাধানং। ইতি মলমাস-

তত্ত্বং। অহোরাত্রভোজনাভাবঃ। তৎপর্য্যায়ঃ। উপবস্তং ২। ইত্যমরঃ॥ উপোষিতং ৩ উপোষণং ৪ ঔপবস্তং ৫। ইতি তট্টীকা॥ অস্য প্রমাণং। উপাবৃত্তস্য পাপেভ্যো যস্তু বাসো গুণৈঃ সহ। উপবাসঃ স বিজ্ঞেয়ঃ সর্ব্বভোগবিবর্জ্জিতঃ॥ অস্যার্থঃ। উপাবৃত্তস্য নিবৃত্তস্য। পাপেভ্যঃ পাপকর্ম্মভ্যঃ। গুণাঃ। সর্ব্বভূতেষু দয়া ক্ষান্তিঃ অনসূয়া শৌচং অনায়াসঃ মঙ্গলং অকার্পণ্যং অস্পৃহা চ। সর্ব্বভোগবিবর্জ্জিতঃ শাস্ত্রানমুমতনৃত্যগীতাদিসুখরহিতঃ। বৈধোপবাসে ভোজনচতুষ্টয়নিবৃত্তিমাহ মহাভারতে। সায়মাদ্যন্তয়োরহ্নোঃ সায়ং প্রাতশ্চ মধ্যমে। উপবাসফলং প্রেপ্সোর্বর্জ্জ্যং ভক্তচতুষ্টয়ং॥ উপবাসদিনে বর্জ্জনীয়ানি। অঞ্জনং। রোচনং। গন্ধঃ। পুষ্পং। মাল্যং। অলঙ্কারঃ। দন্তধাবনং। গাত্রাভ্যঙ্গঃ। শিরোভ্যঙ্গঃ। তাম্বুলং। যচ্চান্যৎ বলরাগকৃৎ। দিবাস্বাপঃ। অক্ষক্রীড়া। মৈথুনং। স্ত্রীণাং সরাগসম্প্রেক্ষণস্পর্শৌ। ব্রতাদিষু পুত্রোৎপত্তিপর্য্যন্তং ঋতৌ সকৃৎ স্ত্রীগমনে ন দোষঃ॥ তৎপূর্ব্বাপরদিনে বর্জ্জনীয়ানি। কাংস্যপাত্রে ভোজনং। মাংসভোজনং। সুরাপানং। মধুপানং। লোভঃ। বিতথভাষণং। ব্যায়ামঃ। ব্যবায়ঃ। দিবাস্বাপঃ। অঞ্জনং। শিলাপিষ্টভক্ষণং। মসূরভক্ষণং। পুনর্ভোজনং। অধ্বগমনং। যানং। আয়াসঃ। দ্যূতক্রীড়া। অভ্যঙ্গঃ। পরান্নং। তৈলং। চণকং। কোরদূষকং। শাকং। অধিকম্বুতং। অত্যম্বুপানং। ইতি একাদশীতত্ত্বং॥ উপবাসাসামর্থ্যে প্রতিনিধিঃ। পুত্রং বা বিনয়োপেতং ভগিনীং ভ্রাতরং তথা। এষামভাব এবান্যং ব্রাহ্মণং বিনিযোজয়েৎ। ইতি স্কন্দপুরাণং॥ ভার্য্যা ভর্ত্তৃব্রতং কুর্য্যাৎ ভার্য্যায়াশ্চ পতিস্তথা। অসামর্থ্যে দ্বয়োস্তাভ্যাং ব্রতভঙ্গো ন জায়তে॥ ইতি গরুড়পুরাণং॥ তদনুকল্পঃ। নক্তং হবিষ্যান্নমনোদনঞ্চ ফলং তিলাঃ ক্ষীরমথাম্বু চাজ্যং। যৎপঞ্চগব্যং যদি বাথ বায়ুঃ প্রশস্তমত্রোত্তরমুত্তরঞ্চ॥ ইতি বায়ুপুরাণং॥ উপবাসাসমর্থশ্চেদেকং বিপ্রন্তু ভোজয়েৎ। তাবদ্ধনানি বা দদ্যাদ্যন্তক্তাদ্দ্বিগুণং ভবেৎ॥ সহস্রসম্মিতাং দেবীং জপেদ্বা প্রাণসংযমান্। কুর্য্যাদ্দ্বাদশসংখ্যাকান্ যথাশক্তি ব্রতে নরঃ॥ ইতি ব্রহ্মবৈবর্ত্তপুরাণং॥ অষ্টৌ তান্যব্রতঘ্নানি আপো মূলং ফলং পয়ঃ। হবির্ব্রাহ্মণকাম্যা চ গুরোর্বচনমৌষধং॥ ইতি বৌধায়নঃ॥

উপবাসী [ ন্ ] ( ত্রি ) উপবাসযুক্তঃ। অহোরাত্রভোজনাভাববিশিষ্টঃ॥

উপবাহ্যঃ ( পুং ) রাজবাহকহস্তী। তৎপর্য্যায়ঃ। রাজবাহ্যঃ২। ইতি হেমচন্দ্রঃ॥

উপবিষং ( ক্লী ) কৃত্রিমবিষং। তৎপর্য্যায়ঃ। চারং ২। গরঃ ৩। ইতি হেমচন্দ্রঃ॥

উপবিষা ( স্ত্রী ) অতিবিষা। আতৈষ ইতি ভাষা। ইত্যমরঃ॥

উপবিষ্টঃ ( ত্রি ) আসীনঃ। বসা ইতি ভাষা। ইতি হেমচন্দ্রঃ॥

উপবীতং (ক্লী) বামস্কন্ধার্পিতং যজ্ঞসূত্রং। যজ্ঞসূত্রমাত্রং। পৈতা ইতি ভাষা। ইত্যমরঃ॥

উপবেদঃ (পুং) প্রধানবেদাতিরিক্তবেদঃ। স চতুর্বিধঃ। আয়ুর্ব্বেদঃ ১ ধনুর্ব্বেদঃ ২ গান্ধর্ব্ববেদঃ ৩ স্থাপত্যবেদঃ ৪। ইতি শ্রীভাগবতং॥

উপবেশনং (ক্লী) স্থিতিঃ। বৈসন ইতি ভাষা। অস্য গুণাঃ। মেদোদীপ্তিশ্লেষ্মসৌকুমার্য্যসুখকারিত্বং। ইতি রাজবল্লভঃ॥

উপব্যাঘ্রঃ (পুং) চিত্রকঃ। চিতাবাঘ ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥

উপশমঃ (পুং) শমতা। তৎপর্য্যায়ঃ। শমঃ ২ শান্তিঃ ৩ শমথঃ ৪ তৃষ্ণাক্ষয়ঃ ৫। ইতি হেমচন্দ্রঃ॥

উপশয়ঃ (পুং) নিদানপঞ্চকান্তর্গতরোগজ্ঞানজনকঃ। তস্য লক্ষণং। হেতুব্যাধিবিপর্য্যস্তবিপর্য্যস্তার্থকারিণাং। ঔষধান্নবিহারাণামুপযোগং সুখাবহং॥ বিদ্যাদুপশয়ং ব্যাধেঃ স হি সাত্ম্যমিতি স্মৃতঃ। ইতি নিদানং॥

উপশল্যং (ক্লী) গ্রামপ্রান্তভাগঃ। তৎপর্য্যায়ঃ। গ্রামান্তং ২। ইত্যমরঃ॥

উপশায়ঃ (পুং) পর্য্যায়শয়নার্থকঃ। প্রহরিকাদীনাং ক্রমেণ শয়নং। তৎপর্য্যায়ঃ। বিশায়ঃ ২। ইত্যমরঃ॥

উপশ্রুতং (ত্রি) প্রতিশ্রুতং। অঙ্গীকৃতং। ইত্যমরঃ॥

উপশ্রুতিঃ (স্ত্রী) দৈবপ্রশ্নঃ। যথা। নক্তং নির্গত্য যৎ কিঞ্চিচ্ছুভাশুভকরং বচঃ। শ্রূয়তে তদ্বিদুর্ধীরা দৈবপ্রশ্নমুপশ্রুতিং। ইতি হারাবলী॥

উপষ্টম্ভকঃ (পুং) আধিক্যং। যথা। উচ্চৈঃশ্রবাদীন্ তেজোভাগোপষ্টম্ভকতয়া প্রত্যক্ষযোগ্যত্বাৎ। ইতি বৌদ্ধাধিকারচিন্তামণিঃ॥

উপসংগ্রহঃ (পুং) পাদস্পর্শপূর্ব্বকনমস্কারঃ। তৎপর্য্যায়ঃ। পাদগ্রহণং২ অভিবাদনং৩। ইতি হেমচন্দ্রঃ॥

উপসংগ্রাহ্যং (ত্রি) উপসংগ্রহণীয়ং। অভিবাদ্যং। পাদে গ্রহীতব্যং। ইতি হলায়ুধঃ॥

উপসংব্যানং (ক্লী) পরিধানবস্ত্রং। ইত্যমরঃ॥

উপসংহারঃ (পুং) অন্তঃ। শেষঃ। যথা। উপক্রমোপসংহারয়োঃ শুক্লত্বকীর্ত্তনাচ্চ। ইতি সপ্তমীপ্রকরণে তিথ্যাদিতত্ত্বলিখনং॥

উপসত্তিঃ (স্ত্রী) সঙ্গমাত্রং। প্রতিপাদনং। সেবা। ইতি হেমচন্দ্রঃ॥

উপসদ্ (পুং) অগ্নিবিশেষঃ। যথা। গার্হপত্যো দক্ষিণাগ্নিস্তথৈবাহবনীয়কঃ। এতেঽগ্নয়স্ত্রয়ো মুখ্যাঃ শেষা শ্চোপসদস্ত্রয়ঃ॥ ইতি বহ্নিপুরাণে গণভেদনামাধ্যায়ঃ॥

উপসদনং (ক্লী) গৃহসমীপং॥

উপসন্নঃ (ত্রি) উপনতঃ। উপস্থিতঃ। ইতি হেমচন্দ্রঃ॥

উপসম্পন্নঃ (ত্রি) যজ্ঞার্থহতপশুঃ। তৎপর্য্যায়ঃ। প্রমীতঃ২ প্রোক্ষিতঃ৩। পাকেন রূপরসাদিসম্পন্নব্যঞ্জনাদিঃ। তৎপর্য্যায়ঃ। প্রণীতঃ২। ইত্যমরঃ॥ পর্য্যাপ্তঃ। সংস্কৃতঃ। প্রাপ্তঃ। মৃতঃ। ইতি হেমচন্দ্রঃ॥

উপসরঃ ( পুং ) স্ত্রীগব্যাদিষু পুঙ্গবাদীনাং প্রথমগর্ব্ভাধানায় মৈথুনাভিযোগঃ। তৎপর্য্যায়ঃ। প্রজনঃ ২। ইত্যমরঃ॥

উপসর্গঃ ( পুং ) রোগভেদঃ। উপপ্লবঃ। ইতি মেদিনী॥ ধাতোঃ পূর্ব্ববর্ত্তিবিংশতিসংখ্যকপ্রাদ্যব্যয়ং। যথা। প্র। পরা। অপ। সম্। নি। অব। অনু। নির্। দুর্। বি। অধি। সু। উদ্। পরি। প্রতি। অভি। অতি। অপি। উপ। আঙ্। অস্য প্রমাণং। নিপাতাশ্চাদয়ো জ্ঞেয়াঃ উপসর্গাস্তু প্রাদয়ঃ। দ্যোতকত্বাৎ ক্রিয়াযোগে লোকাদবগতা ইমে॥ স ত্রিধা। ধাত্বর্থং বাধতে কশ্চিৎ। যথা আদত্তে। কশ্চিত্তমনুবর্ত্ততে। যথা প্রসূতে। তমেব বিশিনষ্ট্যন্যঃ। যথা প্রণমতি। উপসর্গগতিস্ত্রিধা। অপিচ। উপসর্গেণ ধাত্বর্থো বলাদন্যত্র নীয়তে। নীহারাহারসংহারপ্রতীহারপ্রহারবৎ॥ ইতি মুগ্ধবোধটীকায়াং দুর্গাদাসঃ॥

উপসর্জ্জনং (ক্লী) প্রধানভিন্নং। তৎপর্য্যায়ঃ। অপ্রধানং ২ অপ্রাগ্র্যং ৩। ইত্যমরঃ॥

উপসর্পকঃ ( ত্রি ) উপসর্পণকর্ত্তা। উপাসকঃ॥

উপসর্য্যা ( স্ত্রী ) প্রাপ্তগর্ভগ্রহণকালা গৌঃ। ঋতুমতী গৌঃ। তৎপর্য্যায়ঃ। কাল্যা ২। ইত্যমরঃ॥ কালপ্রাপ্তা ৩ বৃষরতা ৪। ইতি শব্দরত্নাবলী॥

উপসার্য্যঃ ( ত্রি ) সমীপগমনীয়ঃ। ইতি পাণিনিঃ॥

উপসূর্য্যকং (ক্লী) চন্দ্রসূর্য্যমণ্ডলং। ইত্যমরঃ॥ সূর্য্যমুপগতং উপসূর্য্যং স্বার্থে কঃ। চন্দ্রপক্ষে উপসূর্য্যমিব উপসূর্য্যকং ইবার্থে কঃ॥

উপসৃষ্টং (ক্লী) মৈথুনং। ইতি ত্রিকাণ্ডশেষঃ। উপসর্গগ্রস্তে ত্রি। তথাচ যাজ্ঞবল্ক্যঃ। তেনোপসৃষ্টো লভতে ন রাজ্যং রাজনন্দনঃ॥

উপস্করঃ ( পুং ) ব্যঞ্জনাদিসংস্কারার্থধন্যাকসর্ষপপিষ্টাদিঃ। বেসার বাটনা ইত্যাদি ভাষা। তৎপর্য্যায়ঃ। বেসবারঃ ২। ইত্যমরঃ॥ গৃহবাসোপকরণং। তচ্চ দৃষদুপলসূর্পাদি। কনককুণ্ডলহারাদি। ইতি শ্রীকৃষ্ণতর্কালঙ্কারঃ॥ তথাচ যাজ্ঞবল্ক্যঃ। গৃহোপস্করবাহ্যানাং দোহ্যাভরণকর্ম্মিণাং। মূল্যং লব্ধন্তু যৎকিঞ্চিৎ শুল্কং তৎ পরিকীর্ত্তিতং॥

উপস্ত্রী ( স্ত্রী ) উপপত্নী। ঢেমনী ইতি ভাষা॥

উপস্থঃ ( পুং ) লিঙ্গং। ভগঃ। ক্রোড়ঃ। ইতি মেদিনী॥ গুহ্যদ্বারং। ইতি হেমচন্দ্রঃ॥ নিকটে ত্রি। ইতি শব্দরত্নাবলী॥

উপস্থাতা [ঋ] ( ত্রি ) ভৃত্যঃ। প্রেষ্যোভৃত্য উপস্থাতা সেবকোঽভিসরোঽনুগঃ। ইতি শব্দমালা॥

উপস্থিতঃ ( ত্রি ) সমীপস্থিতঃ। তৎপর্য্যায়ঃ। উপনতঃ ২ উপসন্নঃ ৩। ইতি হেমচন্দ্রঃ॥ মৃষ্টঃ। শোধিতঃ। ইতি জটাধরঃ॥

উপস্পর্শঃ ( পুং ) স্পর্শমাত্রং। স্নানং। আচমনং। ইতি মেদিনী॥

উপস্পর্শনং ( ক্লী ) উপস্পর্শঃ। ইতি ধরণিঃ॥

উপস্বত্বং ( ক্লী ) উৎপন্নং। লভ্যং। স্বত্বাস্পদীভূতভূম্যাদিলব্ধধনাদি॥

উপহতঃ ( ত্রি ) নষ্টঃ। উৎপাতগ্রস্তঃ। অশুদ্ধদ্রব্যং

উপহসিতং (ক্লী) হাস্যভেদঃ। ইতি জটাধরঃ॥

উপহারঃ (পুং) উপঢৌকনদ্রব্যং। তৎপর্য্যায়ঃ। প্রাভৃতং২ প্রদেশনং৩ উপায়নং ৪ উপগ্রাহ্যঃ ৫ উপদা ৬। ইত্যমরঃ॥

উপহালকঃ (পুং) কুন্তলদেশঃ। ইতি হেমচন্দ্রঃ॥

উপহাসঃ (পুং) পরীহাসঃ। নিন্দার্থবাক্যাদিঃ। বিদ্রূপ ঠাট্টা ইত্যাদি ভাষা। উপহাসায় কিং ন স্যাৎ অসৎসঙ্গো মনীষিণাং। ইতি মলমাসতত্ত্বং॥

উপহ্বরং (ক্লী) নির্জ্জনস্থানং। নিকটং। ইত্যমরঃ॥

উপহ্বরঃ (পুং) রথঃ। ইত্যুণাদিকোষঃ॥

উপক্ষেপণধর্ম্মঃ (পুং) শূদ্রস্বামিকামান্নস্য পাকার্থং ব্রাহ্মণগৃহে সমর্পণং। ইতি শুদ্ধিতত্ত্বে কল্পতরুঃ॥

উপাংশুঃ (পুং) জপভেদঃ। ইতি মেদিনী॥ জিহ্বৌষ্ঠৌ চালয়েৎ কিঞ্চিদ্দেবতাগতমানসঃ। নিজশ্রবণযোগ্যঃ স্যাদুপাংশুঃ স জপঃ স্মৃতঃ। ইত্যাগমঃ॥

উপাংশু ব্য বিজনং। রহঃ। ইত্যমরো মেদিনী চ॥

উপাকরণং (ক্লী) সংস্কারপূর্ব্বকশ্রুতিগ্রহণং। ইত্যমরঃ॥ পশূনাং সংস্কারপূর্ব্বকহননং। ইতি স্মৃতিঃ॥

উপাকর্ম্ম [ন্] (ক্লী) উপাকরণং। ইত্যমরটীকায়াং রায়মুকুটঃ॥

উপাকৃতং (ত্রি) উপদ্রুতং। ইতি মেদিনী॥

উপাকৃতঃ (পুং) যজ্ঞে অভিমন্ত্র্য হতঃ পশুঃ। ইত্যমরঃ॥ উপদ্রবঃ। ইতি হেমচন্দ্রঃ॥

উপাখ্যানং (ক্লী) পূর্ব্ববৃত্তান্তকথনং। আখ্যানং। বর্ণনং। বিশেষকথনং। যথা। সর্ব্বাখ্যানং শ্রুতং ব্রহ্মন্ অতীব পরমাদ্ভুতং। অধুনা শ্রোতুমিচ্ছামি দুর্গোপাখ্যানমুত্তমং॥ ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ৪৪ অধ্যায়ঃ॥ শৃণু নারদ বক্ষ্যামি স্বধোপাখ্যানমুত্তমং। ইতি চ তত্রৈব ৩৮ অধ্যায়ঃ॥

উপাগমঃ (পুং) স্বীকারঃ। নিকটগমনঃ দয়ঃ॥

উপাগ্রহণং (ক্লী) উপাকরণং। সংস্কারপূর্ব্বকবেদগ্রহণং। ইত্যমরটীকায়াং রায়মুকুটঃ॥

উপাঙ্গঃ (পুং) তিলকং। তৎপর্য্যায়ঃ। পত্রাবলী ২ পত্রলেখা ৩ পত্রাঙ্গুলিঃ ৪ পুণ্ড্রঃ ৫ তমালপত্রকং ৬ চিত্রকং ৭। ইতি জটাধরঃ॥

উপাত্তং (ত্রি) প্রাপ্তং। যথা। ক্ষয়ং কেচিদুপাত্তস্য দুরিতস্য প্রচক্ষতে। অনুৎপত্তিং তথা চান্যে প্রত্যবায়স্য মন্যতে॥ নিত্যক্রিয়াং তথা চান্যে হ্যনুষঙ্গফলাং শ্রুতিং। ইতি প্রায়শ্চিত্ততত্ত্বীয়জাবালভবিষ্যপুরাণবচনং॥

উপাত্তঃ (পুং) নির্ম্মদহস্তী। ইতি হলায়ুধঃ॥

উপাত্যয়ঃ (পুং) শাস্ত্রতো লোকব্যবহারাচ্চ ব্যতিক্রমঃ। অতিক্রমঃ। ক্রমোল্লঙ্ঘনং। দ্বয়োঃ পর্য্যায়ঃ। পর্য্যয়ঃ ২ অতিপাতঃ ৩। ইত্যমরঃ॥

উপাদানং (ক্লী) স্বস্ববিষয়েভ্য ইন্দ্রিয়াকর্ষণং। তৎপর্য্যায়ঃ। প্রত্যাহারঃ ২। ইত্যমরঃ॥ হেতুঃ। ইতি ত্রিকাণ্ডশেষঃ॥ ন্যায়মতে। সমবায়িকারণং। প্রবৃত্তিজনকজ্ঞানঞ্চ॥

উপাদেয়ঃ ( ত্রি ) গ্রাহ্যঃ। উত্তমঃ। উৎকৃষ্টঃ। ইতি বেদান্তঃ॥ বিধেয়কর্ম্ম। ইতি তিথি-তত্ত্বং॥

উপাধিঃ ( পুং ) ধর্ম্মচিন্তা। কুটুম্বব্যাপৃতঃ। ইত্যমরঃ॥ ছলং। বিশেষণং। ইতি মেদিনী॥ নামচিহ্নং। ইতি শব্দরত্নাবলী॥ ন্যায়মতে সাধ্যব্যাপকত্বে সতি হেতো-রব্যাপকঃ। যথা ধূমবান্ বহ্নিরিত্যত্র আর্দ্র-কাষ্ঠং উপাধিঃ। অস্য প্রয়োজনং। ব্যভি-চারস্যানুমানং। অলঙ্কারমতে জাতি-গুণক্রিয়াযদৃচ্ছাস্বরূপঃ॥

উপাধ্যায়ঃ ( পুং ) অধ্যাপকঃ। ইত্যমরঃ॥ বেদৈকদেশাধ্যাপকঃ। যথা। একদেশন্তু বেদস্য বেদাঙ্গান্যপি বা পুনঃ। যোঽধ্যা-পয়তি বৃত্ত্যর্থমুপাধ্যায়ঃ স উচ্যতে। ইতি ভবিষ্যে ২ অধ্যায়ঃ॥ মানবে ২ অধ্যায়শ্চ॥

উপাধ্যায়া ( স্ত্রী ) অধ্যাপিকা। বিদ্যোপ-দেশিনী। ইত্যমরঃ॥

উপাধ্যায়ানী (স্ত্রী) উপাধ্যায়পত্নী। ইত্যমরঃ॥

উপাধ্যায়ী ( স্ত্রী ) অধ্যাপকভার্য্যা। ইত্যমরঃ॥

উপানৎ [হ্] (স্ত্রী) চর্ম্মাদিনির্ম্মিতপাদ-কোষঃ। জুতা ইতি ভাষা। তৎপর্য্যায়ঃ। পাদুকা ২ পাদূঃ ৩। ইত্যমরঃ॥ পাদ-ব্যতিরেকেণান্যোপানদ্বহননিষেধো যথা। নাক্ষৈঃ ক্রীড়েৎ কদাচিত্তু স্বয়ং নোপা-নহৌ বহেৎ। শয়নস্থো ন ভুঞ্জীত ন পাণিস্থং ন চাসনে। ইতি মানবে ৪ অধ্যায়ে ৭৪ শ্লোকঃ॥ গ্রহং বিনা কদাচিদপি পরিহাসেনাপি নাক্ষাদিভিঃ ক্রীড়েৎ। স্বয়মিত্যভিধানাৎ আন্যোপানহৌ পাদব্যতিরিক্তেন হস্তাদিনা দেশান্তরং ন নয়েৎ। শয্যাবস্থিতশ্চ ন ভুঞ্জীত হস্তে চ প্রভূতমন্নং কৃত্বা ক্রমেণ ন খাদেৎ। আসনে ভোজনপাত্রং নিধায় ন ভুঞ্জীত। ইতি তট্টীকায়াং কুল্লুকভট্টঃ॥

উপান্তঃ ( ত্রি ) নিকটং। ইতি হেমচন্দ্রঃ॥

উপায়ঃ ( পুং ) রাজাদীনাং শত্রুবশীকরণ-হেতুচতুষ্টয়ং যথা। সাম ১ দানং ২ ভেদঃ ৩ দণ্ডঃ ৪। ইত্যমরঃ॥ উপগতিঃ। ইতি মেদিনী॥ স্বার্থসম্পাদকঃ। সাধনং। যথা। উপায়তঃ সমারম্ভাঃ সর্ব্বে সিদ্ধ্যন্ত্যুপ-ক্রমাঃ। উপায়ং পশ্য যেন ত্বং ধারয়েথাঃ প্রজা নৃপ॥ ইতি বহ্নিপুরাণে পৃথূপাখ্যান-নামাধ্যায়ঃ॥

উপায়নং ( ক্লী ) উপহারঃ। উপঢৌকনদ্রব্যং। ইত্যমরঃ॥ ব্রতাদিপ্রতিষ্ঠা। ইতি স্মৃতিঃ॥ সমীপগমনং॥

উপার্জ্জনং ( ক্লী ) অর্জ্জনং। ধনাদ্যাহরণং। সত্বহেতুভূতব্যাপারঃ। ইতি স্মৃতিঃ॥

উপালম্ভঃ ( পুং ) দুর্ব্বাক্যং। ইতি হলায়ুধঃ॥ স চ গুণাবিষ্করণেন স্তুতিপূর্ব্বকঃ। যথা মহাকুলস্য ভবতঃ কিমিদমুচিতমিতি। নিন্দা-পূর্ব্বকশ্চ। যথা বন্ধকীসুতস্য ভবত-স্তদিদমুচিতমিতি ভাগুরিঃ। ইত্যমরটীকা-সারসুন্দরী॥

উপাবৃত্তঃ (ত্রি) শ্রমশান্ত্যর্থং পুনঃপুনর্ভূমৌ লুঠিতাশ্বঃ। ইত্যমরঃ॥ নিবৃত্তঃ। তথা-চৈকাদশীতত্ত্বে। উপাবৃত্তস্য পাপেভ্যো যস্তু বাসো গুণৈঃসহ। উপবাসঃ স বিজ্ঞেয়ঃ সর্ব্বভোগবিবর্জ্জিতঃ॥

উপাসকঃ (পুং স্ত্রী) শূদ্রঃ। ইতি রাজনির্ঘণ্টঃ॥

উপাসকঃ (ত্রি) উপাসনাকর্ত্তা। স চ পঞ্চবিধঃ। বৈষ্ণবঃ ১ শাক্তঃ ২ শৈবঃ ৩ সৌরঃ ৪ গাণপত্যঃ ৫। ত্রিবিধশ্চ যথা। দিব্যঃ ১ বীরঃ ২ পশুঃ ৩। ইত্যাগমঃ॥ অপিচ। সাত্ত্বিকঃ ১ রাজসিকঃ ২ তামসিকশ্চ ৩॥

উপাসঙ্গঃ (পুং) তূণীরঃ। ইত্যমরঃ॥

উপাসনং (ক্লী) শরাভ্যাসঃ। শুশ্রূষা। ইত্যমরঃ॥ বিহিংসনং। ইতি বিশ্বঃ॥ আসনং। ইতি মেদিনী॥

উপাসনা (স্ত্রী) সেবা। তৎপর্য্যায়ঃ। বরিবস্যা ২ শুশ্রূষা ৩ পরিচর্য্যা ৪ উপাসনং ৫। ইত্যমরঃ॥

উপাসিতঃ (ত্রি) কৃতোপাসনঃ। তৎপর্য্যায়ঃ। বরিবসিতঃ ২ বরিবস্যিতঃ ৩ উপচরিতঃ ৪। ইত্যমরঃ॥

উপাস্তিঃ (স্ত্রী) সেবা। ইতি হেমচন্দ্রঃ॥

উপাহিতঃ (পুং) অগ্ন্যুৎপাতঃ। স তু উল্কাপাতাদিঃ। ইত্যমরঃ॥

উপাহিতঃ (ত্রি) সংযোজিতঃ। ইত্যমরঃ॥ আরোপিতঃ। ইতি মেদিনী॥

উপেন্দ্রঃ (পুং) বিষ্ণুঃ। ইত্যমরঃ॥

উপেক্ষণং (ক্লী) বর্জ্জনং। ত্যজনং॥

উপেক্ষা (স্ত্রী) অস্বীকারঃ। ত্যাগঃ। স তু যুদ্ধবিষয়ে ক্ষুদ্রোপায়ঃ। মায়োপেক্ষেন্দ্রজালানি ক্ষুদ্রোপায়া ইমে ত্রয়ঃ। ইতি হেমচন্দ্রঃ॥

উপোঢ়ঃ (ত্রি) নিকটঃ। বিবাহিতঃ। ইতি মেদিনী॥

উপোঢ়ঃ (পুং) ব্যূহঃ। ইতি ধরণী॥

উপোতী (স্ত্রী) পূতিকা। ইতি শব্দরত্নাবলী॥

উপোদকী (স্ত্রী) পূতিকা পুঁইশাক ইতি ভাষা। তৎপর্য্যায়ঃ। কলম্বী ২ পিচ্ছিলা ৩ পিচ্ছিলচ্ছদা ৪ মোহনী ৫ মদশাকঃ ৬ বিশালা ৭ বলিপোদকী ৮। অস্যা গুণাঃ। কষায়ত্বং। উষ্ণত্বং। কটুত্বং। মধুরত্বং। নিদ্রালস্যরুচিবিষ্টম্ভশ্লেষ্মকারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

উপোদিকা (স্ত্রী) পূতিকা। ইত্যমরঃ॥ অস্যা গুণাঃ। সারকত্বং। স্নিগ্ধত্বং। বলশ্লেষ্মকারিত্বং। হিমত্বঞ্চ। ইতি রাজবল্লভঃ॥

উপোদীকা (স্ত্রী) পূতিকা। ইতি ভরতঃ দ্বিরূপকোষশ্চ॥

উপোদ্ঘাতঃ (পুং) উদাহরণং। ইত্যমরঃ॥ আরম্ভঃ। ইতি ভরতঃ॥ সঙ্গতিবিশেষঃ। যথা। সপ্রসঙ্গ উপোদ্ঘাতো হেতুতাবসরস্তথা। নির্ব্বাহকৈককার্য্যত্বে ষোঢ়া সঙ্গতিরিষ্যতে॥ তল্লক্ষণং যথা। চিন্তাং প্রকৃতসিদ্ধ্যর্থামুপোদঘাতং বিদুর্ব্বুধাঃ। ইত্যনুমিতৌ জগদীশতর্কালঙ্কারঃ॥

উপোষণং (ক্লী) উপবাসঃ। ইতি ত্রিকাণ্ডশেষঃ॥

উপোষিতং (ক্লী) উপবাসঃ। ইত্যমরটীকায়াং ভরতঃ॥

উপোষিতঃ (ত্রি) কৃতোপবাসঃ। যথা। উপোষিতো দ্বিতীয়েঽহ্নি পূজয়েৎ পুনরেব তাং। ইতি দুর্গোৎসবপ্রকরণে তিথ্যাদিতত্ত্বং॥

উপ্তঃ (ত্রি) কৃতবপনঃ। বোনা ইতি ভাষা। যথা। তদ্বৈ ধনুস্ত ইষবঃ স রথো হয়াস্তে

সোঽহং রথী নৃপতয়ো যত আনমন্তি সর্ব্বং ক্ষণেন তদভূদসদীশরিক্তং ভস্মন্ হুতং কুহকরাদ্ধমিবোপ্তমূষ্যাং ॥ ইতি শ্রীভাগবতে ১ স্কন্ধে ১৫ অধ্যায়ঃ ॥ শ্রীকৃষ্ণবিয়োগ এবাত্র হেতুঃ নান্য ইত্যাহ তদ্বৈ ইতি। যতো যেভ্য ঈশেন রিক্তং শূন্যং অসৎ কার্য্যাক্ষমং সমন্ত্রবিধানৈ-রপি ভস্মনি হুতমিব ভস্মন্নিতি লুপ্ত-সপ্তম্যন্তং পদং। অতিপ্রীতাদপি কুহ-কাম্মায়াবিনঃ সকাশাদ্রাদ্ধং লব্ধং যথা। সম্যক্‌কর্ষণাদিনাপি উষরভূমৌ উপ্তং বীজ মিব। ইতি তট্টীকায়াং শ্রীধরস্বামী ॥ * ॥ কৃতমুণ্ডনং। যথা। সশিখং বপনং কার্য্য-মাম্নানাদ্ব্রহ্মচারিণা। ইতি কাত্যায়নকৃত-ছন্দোগপরিশিষ্টেঽপ্যেবং। তদেকশ্রুতি-মূলকত্বাৎ। তদ্ধৃতপারস্করীয়ে। পর্য্যুপ্ত-শিরসমিতি সূত্রেঽপি তথৈবার্থঃ তদ্ভাষ্য-কৃতা হরিশর্ম্মণাপি পরি সর্ব্বতোভাবে-নোপ্তশিরসং মুণ্ডিতশিরসমিতি ব্যাখ্যাতং। ইতি প্রায়শ্চিত্ততত্ত্বং ॥

উপ্তকৃষ্টং (ত্রি) বীজবপনানন্তরকর্ষিতক্ষেত্রং। তৎপর্য্যায়ঃ। বীজাকৃতং ২। ইত্য-মরঃ ॥

উব্জ শ আর্জ্জবে। ইতি কবিকল্পদ্রুমঃ ॥ হ্রস্বাদিঃ। ওষ্ঠ্যবকারোপধঃ। তেন র্ব্যনচ্-তয়ীতি দীর্ঘো ন স্যাৎ। স্যাদৌনবদ্র ইতি উব্জিজিষতি। উর্ণৌর্জ্জোর্দীর্ঘপাঠসামর্থ্যাৎ স্বরাদের্ন দীর্ঘ ইতি কেচিৎ। দন্ত্যবকা-রত্বান্ন উব্জতীত্যত্র দীর্ঘ ইত্যপ্যেকে। শ উব্জতী উব্জন্তী। আর্জ্জবমবক্রীভাবঃ। উব্জতি সাধুরবক্রঃ স্যাদিত্যর্থঃ। ইতি দুর্গাদাসঃ ॥

উভ শ পূর্ত্তৌ। ইতি কবিকল্পদ্রুমঃ॥ হ্রস্বাদিঃ। শ উভতি কুম্ভং জলেন লোকঃ। উবোভ। ইতি দুর্গাদাসঃ ॥

উভয়ঃ (ত্রি) যুগলং। দুই ইতি ভাষা। ইতি শব্দচন্দ্রিকা॥

উভয়তঃ [স্] ব্য পার্শ্বদ্বয়ে। উভয়পার্শ্বে। ইতি ব্যাকরণং ॥

উভয়দ্যুঃ [স্] ব্য উভয়দিনং। দিনদ্বয়ং।

উভয়েদ্যুঃ [স্] ব্য উভয়দিনং। ইত্য-মরঃ ॥

উম্ ব্য রোষঃ। অঙ্গীকারঃ। প্রশ্নঃ। ইতি মেদিনী ॥ ক্রোধবর্জ্জিতঃ। ইতি শব্দ-রত্নাবলী ॥

উমা (স্ত্রী) দুর্গা। অতসী। কীর্ত্তিঃ। হরিদ্রা। কান্তিঃ। ইতি মেদিনী ॥ শান্তিঃ। ইতি শব্দরত্নাবলী ॥ তন্নামব্যুৎপত্তির্যথা। যতো হি তপসে পুত্রি বনং গন্তুঞ্চ মেনকা। উমেতি তেন সোমেতি নাম প্রাপ তদা সতী ॥ ইতি কালিকাপুরাণে ৪২ অধ্যায়ঃ ॥

উমাকটঃ (পুং) উমাধূলিঃ। মসিনার ধূলা ইতি ভাষা। ইতি ব্যাকরণং ॥

উমাগুরুঃ (পুং) হিমালয়পর্ব্বতঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

উমাচতুর্থী (স্ত্রী) জ্যৈষ্ঠশুক্লচতুর্থী। যথা। জ্যৈষ্ঠশুক্লচতুর্থ্যান্তু জাতা পূর্ব্বমুমা সতী। তস্মাৎ সা তত্র সংপূজ্যা স্ত্রীভিঃ সৌভাগ্য-

বৃদ্ধয়ে ॥ ইতি সম্বৎসরকৌমুদীধৃতব্রহ্ম-পুরাণবচনং ॥

উমাপতিঃ ( পুং ) শিবঃ। ইত্যমরঃ ॥

উমাবনং ( ক্লী ) পুরবিশেষঃ। তৎপর্য্যায়ঃ। দেবীকোটঃ ২ কোটীবর্ষং ৩ বাণপুরং ৪ শোণিতপুরং ৫। ইতি হেমচন্দ্রঃ ॥

উমাসুতঃ (পুং) কার্ত্তিকেয়ঃ। ইতি হেমচন্দ্রঃ ॥

উমেশঃ ( পুং ) মহাদেবঃ। ইতি হেমচন্দ্রঃ ॥

উম্ভ পশ পূর্ণৌ ইতি কবিকল্পদ্রুমঃ। উন্ভ ইতি চ পাঠঃ ॥

উম্যং ( ক্লী ) ঔমীনং। অতসীক্ষেত্রং। হরিদ্রা-ক্ষেত্রঞ্চ। ইতি ভরতো দ্বিরূপকোষশ্চ ॥

উম্বরঃ ( পুং ) দ্বারোর্দ্ধকাষ্ঠং। তৎপর্য্যায়ঃ। গৃহাবগ্রহণী ২ দেহলী ৩ অম্বরঃ ৪ উদু-ম্বরঃ ৫। ইতি হেমচন্দ্রঃ ॥

উম্বী ( স্ত্রী ) অর্দ্ধপকতৃণানলসংভৃষ্টযবগোধুম-মঞ্জরী। অস্যা গুণাঃ। কফপ্রদত্বং। বল-কারিত্বং। লঘুত্বং। পিত্তানিলাপহত্বঞ্চ। ইতি ভাবপ্রকাশঃ ॥

উর গতৌ। সৌত্রধাতুরয়ং। ইতি কবিকল্প-দ্রুমঃ। পঞ্চমস্বরাদিঃ। উরসঃ। ইতি দুর্গাদাসঃ ॥

উরঃ [ স্ ] ( ক্লী ) বক্ষঃস্থলং। ইত্যমরঃ ॥ তৎপর্য্যায়ঃ। বক্ষঃ ২ বৎসং ৩ ক্রোড়ং ৪ হৃৎ ৫ ভুজান্তরং ৬। ইতি রাজনির্ঘণ্টঃ ॥

উরঃ [ স্ ] ( ত্রি ) উত্তমঃ। শ্রেষ্ঠঃ। ইতি মেদিনী ॥

উরঃসূত্রিকা (স্ত্রী) মুক্তারচিতহারঃ। ইত্যমরঃ ॥

উরগঃ ( পুং ) সর্পঃ। ইত্যমরঃ ॥ সীসকং। ইতি রাজনির্ঘণ্টঃ ॥

উরগস্থানং ( ক্লী ) পাতালং। ইতি শব্দরত্না-বলী ॥

উরগাশনঃ ( পুং ) গরুড়পক্ষী। ইতি জটাধরঃ ॥

উরঙ্গঃ ( পুং ) উরঙ্গমঃ। ইত্যমরটীকায়াং রায়মুকুটঃ ॥

উরঙ্গমঃ ( পুং স্ত্রী ) সর্পঃ। ইতি ব্যাকরণং ॥

উরণঃ ( পুং স্ত্রী ) মেষঃ। ইত্যমরঃ ॥ মেঘঃ। ইত্যুণাদিকোষঃ ॥

উরণাখ্যঃ (পুং) দদ্রুঘ্নবৃক্ষঃ। ইত্যমরটীকায়াং স্বামী ॥

উরণাখ্যকঃ ( পুং ) দদ্রুঘ্নবৃক্ষঃ। ইতি শব্দ-রত্নাবলী ॥

উরণাক্ষঃ ( পুং ) বৃক্ষবিশেষঃ। এড়াঁচি ইতি ভাষা। চাকুন্দা ইতি কেচিৎ। তৎ-পর্য্যায়ঃ। প্রপুন্নাড়ঃ ২ এড়গজঃ ৩ দদ্রু-ঘ্নঃ ৪ চক্রমর্দ্দকঃ ৫ পদ্মাটঃ ৬। ইত্য-মরঃ ॥ উরণাখ্যঃ ৭ প্রপুন্নড়ঃ ৮ প্রপু-নাড়ঃ ৯। ইতি তট্টীকা ॥

উরণাক্ষকঃ ( পুং ) উরণাক্ষবৃক্ষঃ। ইতি শব্দ-রত্নাবলী ॥

উরভ্রঃ ( পুং স্ত্রী ) মেষঃ। ইত্যমরঃ ॥

উররী ব্য স্বীকারঃ। বিস্তারঃ। ইত্যমরঃ ॥

উররীকারঃ ( পুং ) অঙ্গীকারঃ। ইতি জটা-ধরঃ ॥

উররীকৃতঃ ( ত্রি ) অঙ্গীকৃতঃ। বিস্তৃতঃ। ইত্যমরঃ ॥

উরশ্ছদঃ ( পুং ) কবচঃ। ইত্যমরঃ ॥

উরসিজঃ ( পুং ) স্ত্রীস্তনং। ইতি হলায়ুধঃ ॥

উরসিলঃ ( ত্রি ) প্রশস্তবক্ষোযুক্তঃ। ইত্য-মরঃ ॥

উরস্কটঃ ( পুং ) বালযজ্ঞোপবীতকং। বুক-বাছাড় ইতি খ্যাতং। পঞ্চবটশ্চ তৎ-পর্য্যায়ঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

উরস্ত্রাণং ( ক্লী ) বক্ষস্ত্রাণকবচং। তৎপর্য্যায়ঃ। নাগোদরং ২। ইতি হারাবলী ॥

উরস্যঃ ( ত্রি ) ঔরসজাতঃ। ইত্যমরঃ ॥

উরস্বান্ [ ৎ ] ( ত্রি ) প্রশস্তবক্ষোযুক্তঃ। তৎ-পর্য্যায়ঃ। উরসিলঃ ২। ইত্যমরঃ ॥

উরী ব্য স্বীকারঃ। বিস্তারঃ। ইত্যমরঃ ॥

উরীকৃতঃ ( ত্রি ) অঙ্গীকৃতঃ। বিস্তৃতঃ। ইত্য-মরঃ ॥

উরুঃ ( ত্রি ) মহান্। বড় ইতি ভাষা। তৎপর্য্যায়ঃ। বড্রং ২ বিপুলং ৩ বিশ-ঙ্কটং ৪ পৃথু ৫ বৃহৎ ৬ বিশালং ৭ পৃথুলং ৮ মহৎ ৯। ইত্যমরঃ ॥ বিস্তীর্ণং ১০ বিকটং ১১। ইতি জটাধরঃ ॥

উরুকালঃ ( পুং ) মহাকাললতা। মাকাল ফলের গাছ ইতি ভাষা। ইতি রত্নমালা ॥

উরুকালকঃ ( পুং ) মহাকাললতা। ইতি ত্রিকাণ্ডশেষঃ ॥

উরুগায়ঃ ( পুং ) শ্রীকৃষ্ণঃ। ইতি শ্রীভাগবতং ॥

উরুরী ব্য উররী। ইতি ভরতঃ দ্বিরূপ-কোষশ্চ ॥

উরুবুকঃ ( পুং ) এরণ্ডবৃক্ষঃ। ইত্যমরটীকায়াং রায়মুকুটঃ ॥

উরুবূকঃ ( পুং ) এরণ্ডবৃক্ষঃ। ইত্যমরঃ ॥ রক্তৈরণ্ডঃ। ইতি রাজনির্ঘণ্টঃ ॥

উরুব্যচাঃ [ স্ ] ( পুং ) রাক্ষসঃ। ইত্যুণাদি-কোষঃ ॥

উরোজঃ ( পুং ) স্তনঃ। ইতি হেমচন্দ্রঃ ॥

উর্জ্জিতং ( ত্রি ) বর্দ্ধিতং। ইতি শ্রীভাগবতং ॥

উর্ণনাভঃ ( পুং ) মর্কটকঃ। মাকড়্সা ইতি ভাষা। ইতি শব্দরত্নাবলী ॥

উর্ণা ( স্ত্রী ) মেষাদিলোম। ভ্রূদ্বয়মধ্যাবর্ত্তঃ। ইত্যমরটীকায়াং রমানাথঃ ॥

উর্দ ঙ পরিমাণে। ক্রীড়ায়াং। স্বাদে। ইতি কবিকল্পদ্রুমঃ ॥ হ্রস্বাদী রেফমধ্যঃ। দীর্ঘস্থ নিত্যত্বাৎ দীর্ঘাদিরিতি কশ্চিৎ। ঙ উর্দ্দতে কনকং বণিক্। ইতি দুর্গাদাসঃ ॥

উর্দ্রঃ ( পুং ) জলাখুঃ। উদ্বিড়াল ইতি ভাষা। ইতি শব্দরত্নাবলী ॥

উর্ব্ব ঈ হিংসে। ইতি কবিকল্পদ্রুমঃ ॥ হ্রস্বাদিঃ। র্ব্যনচ্‌তয়ীতি দীর্ঘে ঊর্ব্বতি। কিপি রাচ্ছো-র্লোপ ইতি বলোপে ঊঃ উরৌ উরঃ। এবং সর্ব্বত্র। ঈ ঊর্ণঃ। ইতি দুর্গাদাসঃ ॥

উর্ব্বটঃ ( পুং ) বৎসরঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

উর্ব্বরা ( স্ত্রী ) সর্ব্বশস্যাঢ্যা ভূমিঃ। ভূমীমাত্রং। ইতি হেমচন্দ্রঃ ॥

উর্ব্বশী ( স্ত্রী ) স্বনামখ্যাতস্বর্গবেশ্যা। ইত্য-মরঃ ॥ তস্যা উৎপত্তির্হরিবংশে। নারা-য়ণোরু নির্ভিদ্য সম্ভূতা বরবর্ণিনী। মনীষা-দিত্বাৎ হ্রস্বাদিঃ ॥

উর্ব্বশীরমণঃ ( পুং ) উর্ব্বশীপতিঃ। স তু চন্দ্র-বংশীয়রাজবিশেষঃ। তৎপর্য্যায়ঃ। পুরূ-রবাঃ ২ বৌধঃ ৩ ঐলঃ ৪। ইতি হেম-চন্দ্রঃ ॥

উর্ব্বশীবল্লভঃ ( পুং ) ঐলনৃপতিঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

উর্ব্বারুঃ ( পুং ) ইর্ব্বারুঃ। কাঁকুড় ইতি ভাষা। ইতি ভরতো দ্বিরূপকোষশ্চ ॥

উর্ব্বী ( স্ত্রী ) পৃথিবী। ইত্যমরঃ॥

উল দাহে। সৌত্রধাতুরয়ং। ইতি কবিকল্প-দ্রুমঃ॥ উল্কা। উলপং। ইতি দুর্গাদাসঃ॥

উলপঃ ( পুং ) বিস্তীর্ণা লতা। সা তু ত্রপুষী দ্রাক্ষা তাম্বূল্যাদিঃ। তৎপর্য্যায়ঃ। বীরুৎ ২ গুল্মিনী ৩। ইত্যমরঃ॥ প্রতানা ৪ ইতি জটাধরঃ॥ প্রতানিনী ৫ বীরুধা ৬ বরুৎ ৭। ইতি শব্দরত্নাবলী॥ মেদিনী-মতে ক্লীবমপি। তৃণবিশেষঃ। উলুখড় ইতি ভাষা। ইতি বিশ্বমেদিন্যৌ॥

উলিন্দঃ ( পুং ) দেশবিশেষঃ। ইত্যুণাদি-কোষঃ॥

উলুপঃ ( পুং ক্লী ) গুল্মিনী। শাখাপত্রপ্রচয়-যুক্তলতা। ইত্যমরটীকাসারসুন্দরী॥ কাচিন্মেদিনী চ॥

উলুপঃ ( পুং ) তৃণবিশেষঃ। উলুখড় ইতি ভাষা। ইতি কেচিদ্বিশ্বমেদিন্যৌ॥

উলুপী [ ন্ ] ( পুং ) শিশুকঃ। ইত্যমরঃ॥ তদাকৃতিমৎস্যঃ। ইতি শব্দরত্নাবলী॥

উলূকং ( ক্লী ) তৃণবিশেষঃ। উলুখড় ইতি ভাষা। তৎপর্য্যায়ঃ। সূচ্যগ্রঃ ২ স্থূলকঃ ৩ দর্ব্বঃ ৪ জুর্ণাখ্যঃ ৫ খরচ্ছদঃ ৬ উলপঃ ৭ উলুপঃ ৮। ইতি রত্নমালাদয়ঃ॥

উলূকঃ ( পুং ) পেচকপক্ষী। ইত্যমরঃ॥ তৎ-পর্য্যায়ঃ। তামসঃ ২ ঘূকঃ ৩ দিবান্ধঃ ৪ কৌশিকঃ ৫ কুশিঃ ৬ নক্তঞ্চরঃ ৭ নিশাটঃ ৮ কাকারিঃ ৯ ঘোরদর্শনঃ ১০। ইতি রাজ-নির্ঘণ্টঃ॥ ইন্দ্রঃ। ভারতযোধী। স চ শকুনিপুত্রঃ। ইতি হেমচন্দ্রঃ॥

উলূকী ( স্ত্রী ) তাম্রায়াঃ সুতা শুকী তস্যাঃ কন্যা। যথা। ষট্‌সুতাস্তু মহাসত্ত্বা-স্তাম্রায়াঃ পরিকীর্ত্তিতাঃ। শুকী শ্যেনী চ ভাসী চ সুগ্রীবী শুচি গৃধ্রিকাঃ॥ শুকী শুকানজনয়ৎ উলূকীপ্রত্যুলূককান্। শ্যেনী শ্যেনান্ তথা ভাসী ভাসান্ গৃধ্রাংশ্চ গৃধ্র্যপি॥ শুচ্যোদকান্ পক্ষিগণান্ সুগ্রীবী তু ব্যজায়ত। অশ্বান্ উষ্ট্রান্ গর্দ্দভাংশ্চ তাম্রাবংশঃ প্রকীর্ত্তিতঃ॥ ইতি বিষ্ণুপুরাণে ১ অংশে ২১ অধ্যায়ঃ॥ তাম্রায়া বংশ-মাহ ষড়িতি ত্রিভিঃ। সুতাঃ কন্যাঃ তা এবাহ শুকীতি। সুগ্রীবী চ শুচিশ্চ গৃধ্রিকা চ তাঃ। উলূকং প্রত্যুলূককান্ তৎপ্রতি-পক্ষান্ কাকাংশ্চ। উলূকীতি পাঠেঽপি উলূকীং প্রত্যুলূককাংশ্চ সৈবাজনয়-দিত্যর্থঃ ন পুনরুলূকীসংজ্ঞা অন্যা অনি-র্দ্দিষ্টত্বাৎ। শুকী শুকানজনয়ৎ উলূক-প্রত্যুলূককানিতি মাৎস্যোক্তেঃ। শুচ্যো-দকান্ শুচিরেব শুচী সা ঔদকান্ জলজান্ পক্ষিগণান্ ব্যজায়ত। সুগ্রীবী তু অশ্বা-দীন্ ব্যজায়ত ইত্যন্বয়ঃ। তাম্রায়া বংশঃ পরিকীর্ত্তিত ইত্যুপসংহারঃ। ইতি ত-ট্টীকায়াং শ্রীধরস্বামী॥

উলূখলং ( ক্লী ) উদূখলং। ইত্যমরঃ॥ গুগ্-গুলুঃ। ইতি ভরতো দ্বিরূপকোষশ্চ॥

উলূখলকং ( ক্লী ) গুগ্‌গুলুঃ। ইত্যমরঃ॥

উলূতঃ (পুং) অজগরসর্পঃ। ইতি ত্রিকাণ্ডশেষঃ॥

উলূপী [ ন্ ] ( পুং ) শিশুকঃ। ইত্যমরঃ॥ উপল ইতি খ্যাতঃ অতিচঞ্চলমৎস্যঃ। শিশুমারাকৃতির্মৎস্যভেদঃ। ইতি কলিঙ্গা-দয়ঃ॥ শোশু ইতি খ্যাতঃ মৎস্যবিশেষঃ।

ইত্যন্যে॥ ভাঁগাল ইতি খ্যাতঃ। ইত্যেকে॥ শিশুমার এব উচ্যতে। ইতি সর্ব্বস্বং॥ তথাচ রত্নকোষাদৌ॥ চুলুপী শিশুমারঃ স্যাদুলূপী শিশুকস্তথা। ইত্যমরটীকায়াং ভরতঃ॥

উলূপী (স্ত্রী) কৌরব্যনামনাগকন্যা সা তু অর্জ্জুনপত্নী। ইতি মহাভারতং॥

উল্কা (স্ত্রী) তেজঃপুঞ্জঃ। ইত্যমরটীকায়াং ভরতঃ॥ অগ্নিশিখা। অগ্নিঃ। ইত্যুণাদিকোষঃ॥ আকাশাৎ পতিতাগ্নিঃ। ইতি রায়মুকুটাদয়ঃ॥ অস্যা লক্ষণং। বৃহৎশিখা চ সূক্ষ্মাগ্রা রক্তনীলশিখোজ্জ্বলা। পৌরুষীয়প্রমাণেন উল্কা নানাবিধা স্মৃতা॥ ইতি কাশ্যপঃ॥

উল্কামুখী (স্ত্রী) জন্তুবিশেষঃ। খেঁকশ্যালি ইতি ভাষা। তৎপর্য্যায়ঃ। শৃগালিকা ২ লোমালিকা ৩ দীপ্তজিহ্বা ৪ কিখিঃ ৫। ইতি ত্রিকাণ্ডশেষঃ॥

উল্মুকং (ক্লী) অঙ্গারঃ। ইত্যমরঃ॥

উল্লঙ্ঘনং (ক্লী) অতিক্রমণং। ডিঙ্গান ইতি ভাষা। ইতি পুরাণং॥

উল্ললঃ (ত্রি) বহুরোমযুক্তঃ। তৎপর্য্যায়ঃ। রোমশঃ ২। ইতি হারাবলী॥

উল্ললিতঃ (ত্রি) তরলিতঃ। আন্দোলিতঃ। ইতি জটাধরঃ॥

উল্লসনকং (ক্লী) রোমাঞ্চঃ। ইতি হেমচন্দ্রঃ॥

উল্লাঘঃ (ত্রি) গদান্নির্গতঃ। নীরোগঃ। ইত্যমরঃ॥ শুচিঃ। দক্ষঃ। কৃষ্ণং। মরীচমিতি-যাবৎ। ইতি বিশ্বমেদিন্যৌ॥ কৃষ্ণমিত্যত্র হৃষ্টমিতি কস্যাঞ্চিন্মেদিন্যাং পাঠঃ॥

উল্লাপঃ (পুং) শোকরোগাদিনা ধ্বনিবিকারঃ। তৎপর্য্যায়ঃ। কাকুবাক্ ২। ইতি হেমচন্দ্রঃ॥

উল্লাসঃ (পুং) গ্রন্থপরিচ্ছেদঃ। ইতি ভূরিপ্রয়োগঃ॥ যথা কাব্যপ্রকাশে প্রথম উল্লাস ইতি প্রয়োগঃ। বৃদ্ধিঃ। ইতি শ্রীভাগবতং॥ আহ্লাদঃ। প্রকাশঃ॥

উল্লিখিতঃ (ত্রি) উৎকীর্ণঃ। তনূকৃতঃ। ইতি মেদিনী॥ চিত্রিতঃ। ইতি শব্দরত্নাবলী॥ ঊর্দ্ধে লিখিতঃ॥

উল্লেখঃ (পুং) উচ্চারণং। কথনং। ইতি স্মার্ত্তাঃ॥

উল্লেখনং (ক্লী) বমনং। ইতি রত্নমালা॥ খননং। যথা ভূমেরুল্লেখনং কুর্য্যাৎ। ইতি স্মৃতিঃ॥ উচ্চারণং। যথা মাসপক্ষতিথীনাঞ্চ নিমিত্তানাঞ্চ সর্ব্বশঃ। উল্লেখনমকুর্ব্বাণো ন তস্য ফলভাগ্‌ভবেৎ॥ ইতি তিথ্যাদিতত্ত্বং॥

উল্লোচঃ (পুং) চন্দ্রাতপঃ। চাঁদোয়া ইতি ভাষা। তৎপর্য্যায়ঃ। বিতানং ২। ইত্যমরঃ॥

উল্লোলঃ (পুং) মহাতরঙ্গঃ। বড় ঢেউ ইতি ভাষা। তৎপর্য্যায়ঃ। কল্লোলঃ ২। ইত্যমরঃ॥

উল্বং (ক্লী) জরায়ুঃ। ইত্যমরঃ॥ গর্ভঃ। ইত্যুণাদিকোষঃ॥

উল্বণং (ত্রি) ব্যক্তং। স্পষ্টং। ইত্যমরঃ॥

উশতী (ত্রি) অকল্যাণবাক্। ইতি শব্দরত্নাবলী॥

উশনাঃ [স্] (পুং) শুক্রাচার্য্যঃ। ইত্যমরঃ॥

উশিক্ [ জ্ ] ( পুং ) অগ্নিঃ। ঘৃতং। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ ॥

উশিক্ ( ত্রি ) কমনীয়ং। যথা। ন যদ্বচশ্চিত্র-পদং হরের্যশো জগৎপবিত্রং প্রগৃণীত কর্হিচিৎ। তদ্বায়সং তীর্থমুশন্তি মানসা ন যত্র হংসা নিরমন্ত্যুশিক্‌ক্ষয়াঃ॥ ইতি শ্রীভাগবতে ১ স্কন্ধে ৫ অধ্যায়ঃ। চিত্রপদমপি যদ্বচো হরের্যশো ন প্রগৃণীত তদ্ বায়সং তীর্থং কাকতুল্যানাং কামিনাং রতিস্থানং উশন্তি মন্যন্তে কুতঃ মানসাঃ সত্ত্বপ্রধানে মনসি বর্ত্তমানা হংসা যতয়ো যত্র ন নিরমন্তি কর্হিচিদপি নিতরাং ন রমন্তে। উশিক্‌ক্ষয়াঃ উশিক্ কমনীয়ং ব্রহ্ম ক্ষয়ো নিবাসো যেষাং তে। যথা প্রসিদ্ধা হংসা মানসসরসি চরন্তঃ। কমনীয়পদ্মষণ্ড-নিবাসাস্ত্যক্তবিচিত্রান্নাদিযুক্তে উচ্ছিষ্টগর্ত্তে কাকক্রীড়াস্থানে ন রমন্তে ইতি শেষঃ। ইতি তট্টীকায়াং শ্রীধরস্বামী ॥

উশী ( স্ত্রী ) বাঞ্ছা। ইত্যুণাদিকোষঃ ॥

উশীনরঃ ( পুং ) দেশভেদঃ। তৎপর্য্যায়ঃ। গান্ধারঃ ২। ইতি জটাধরঃ॥ চন্দ্রবংশোদ্ভবরাজবিশেষঃ। স তু শিবিরাজপিতা। ইতি শ্রীভাগবতং ॥

উশীরঃ ( পুং ক্লী ) বীরণমূলং। বেনার মূল খশ্ ইত্যাদি ভাষা। তৎপর্য্যায়ঃ। অভয়ং ২ নলদং ৩ সেব্যং ৪ অমৃণালং ৫ জলাশয়ং ৬ লামজ্জকং ৭ লঘুলয়ং ৮ অবদাহং ৯ ইষ্টকাপথং ১০। ইত্যমরঃ॥ উষীরং ১১ মৃণালং ১২ লঘু ১৩ লয়ং ১৪ অবদানং ১৫ ইষ্টং ১৬ কাপথং ১৭ অবদাহেষ্টকাপথং ১৮ ইন্দ্রগুপ্তং ১৯। ইতি তট্টীকায়াং ভরতাদয়ঃ॥ জলবাসং ২০ হরিপ্রিয়ং ২১ বীরং ২২ বীরণং ২৩ সমগন্ধিকং ২৪ রণপ্রিয়ং ২৫ বীরতরু ২৬ শিশিরং ২৭ শীতমূলকং ২৮ বিতানমূলকং ২৯ জলমেদং ৩০ সুগন্ধিকং ৩১ সুগন্ধিমূলকং ৩২ কম্বু ৩৩। ইতি রাজনির্ঘণ্টঃ ॥ অস্য গুণাঃ। ঘর্ম্মদৌর্গন্ধ্যদাহপিত্তরক্তরোগনাশিত্বং। ইতি রাজবল্লভঃ॥ অপিচ। শীতলত্বং। তিক্তত্বং। মোহভ্রমাপহত্বং। জ্বরার্ত্তি-পিত্তশমনকারিত্বং। জলসৌগন্ধ্যদায়কত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

উশীরকং ( ক্লী ) বীরণমূলং। ইতি রত্নমালা॥

উশীরী ( স্ত্রী ) লঘুকাশঃ। ছোটকাশ্যা ইতি ভাষা। তৎপর্য্যায়ঃ। মিষিঃ ২ গুড়া ৩ অশ্মালঃ ৪ নীরজঃ ৫ শরঃ ৬। অস্য গুণাঃ। মধুরত্বং। শীতত্বং। পিত্তদাহক্ষয়রোগ-নাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

উষ উ বধে। দহি। ইতি কবিকল্পদ্রুমঃ॥ হ্রস্বাদিঃ। উ ওষিত্বা উষ্ট্বা। ওষতি। ক্ত্বাবেট্ত্বান্নেমড়ীশ্বীত্যাদিনা ইমৌ নিষেধে নিষ্ঠায়াং উষ্টঃ। দহি ভস্মীকরণে। ইতি দুর্গাদাসঃ॥

উষ বধে। দহি। ইতি কবিকল্পদ্রুমঃ॥ ওষতি। উষিতঃ। দহি ভস্মীকরণে। ইতি দুর্গাদাসঃ॥

উষং ( ক্লী ) পাংশুজলবণং। ইতি রত্ন-মালা॥

উষঃ ( পুং ) কামী। গুগগুলুঃ। রাত্রিশেষঃ।

ইতি মেদিনী ॥ ক্ষারমৃত্তিকা। ইতি শব্দরত্নাবলী ॥

উষঃ [ স্ ] ( ক্লী ) প্রত্যূষঃ। ইত্যমরঃ ॥

উষণং ( ক্লী ) মরিচং। ইত্যমরঃ। পিপ্পলীমূলং। ইতি রাজনির্ঘণ্টঃ ॥

উষণা ( স্ত্রী ) পিপ্পলী। ইত্যমরঃ ॥ শুণ্ঠী। ইতি রাজনির্ঘণ্টঃ ॥ চবিকং। ইতি রত্নমালা ॥

উষতী ( স্ত্রী ) অকল্যাণবাক্। ইত্যমরঃ ॥

উষপঃ ( পুং ) সূর্য্যঃ। অগ্নিঃ। ইত্যুণাদিকোষঃ ॥

উষর্বুধঃ ( পুং ) অগ্নিঃ। ইত্যমরঃ ॥ রক্তচিত্রকঃ। রাংচিতা ইতি ভাষা ॥

উষসী ( স্ত্রী ) সন্ধ্যাকালঃ। ইতি মেদিনী ॥

উষা ( স্ত্রী ) বাণরাজসুতা। সা তু অনিরুদ্ধভার্য্যা। রাত্রিঃ। ইতি মেদিনী ॥ স্ত্রীগবী। ইতি হেমচন্দ্রঃ ॥ উখা। স্থালীতি যাবৎ। ইত্যমরটীকায়াং রমানাথঃ ॥

উষা ব্য রাত্রিশেষঃ। রাত্র্যবসানং।. ইত্যমরমেদিন্যৌ ॥ সা তু নক্ষত্রতেজঃপরিহানিমারভ্য ভানোরর্দ্ধোদয়ং যাবৎ ভবতি। যথা। অর্দ্ধাস্তময়াৎ সন্ধ্যাব্যক্তীভূতা ন তারকা যাবৎ। তেজঃপরিহানিরুষা ভানোরর্দ্ধোদয়ং যাবৎ। ইতি তিথিতত্ত্বে বরাহবচনং ॥

উষাকলঃ ( পুং ) কুক্কুটঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

উষাপতিঃ ( পুং ) অনিরুদ্ধঃ। স তু কামদেবপুত্ত্রঃ। ইত্যমরঃ ॥

উষারমণঃ ( পুং ) অনিরুদ্ধঃ। ইতি হলায়ুধঃ ॥

উষিতঃ ( ত্রি ) ব্যুষিতঃ। দগ্ধঃ। ইতি মেদিনী ॥ ত্বরিতং। ইতি ধরণিঃ ॥ স্থিতঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

উষিতঙ্গবীনঃ ( ত্রি ) আশিতঙ্গবীনঃ। যত্র পুরা গাবো ভোজিতাঃ। ইত্যমরটীকায়াং রমানাথঃ ॥

উষীরঃ ( পুং ক্লী ) উশীরঃ। বীরণমূলং। ইত্যমরটীকায়াং রায়মুকুটঃ ॥

উষেশঃ ( পুং ) অনিরুদ্ধঃ। ইতি হেমচন্দ্রঃ ॥

উষ্ট্রঃ ( পুং ) বাহুরথঃ। ইতি ধরণী ॥ পশুবিশেষঃ। উট্ ইতি ভাষা। তৎপর্য্যায়ঃ। ক্রমেলকঃ ২ ময়ঃ ৩ মহাঙ্গঃ ৪। ইত্যমরঃ ॥ দীর্ঘগতিঃ ৫ বলী ৬ করভঃ ৭ দাসেরকঃ ৮ ধূসরঃ ৯ লম্বোষ্ঠঃ ১০ রবণঃ ১১ মহাজঙ্ঘঃ ১২ জবী ১৩ জাঙ্ঘিকঃ ১৪ দীর্ঘঃ ১৫ শৃঙ্খলকঃ ১৬ মহান্ ১৭ মহাগ্রীবঃ ১৮ মহানাদঃ ১৯ মহাধ্বগঃ ২০ মহাপৃষ্ঠঃ ২১ বলিষ্ঠঃ ২২। ইতি রাজনির্ঘণ্টঃ ॥ দীর্ঘজঙ্ঘঃ ২৩ গ্রীবী ২৪ ধূম্রকঃ ২৫ শরভঃ ২৬। ইতি জটাধরঃ ॥ ক্রমেলঃ ২৭ কণ্টকাশনঃ ২৮ ভোলিঃ ২৯ বহুকরঃ ৩০ অধ্বগঃ ৩১ মরুদ্বিপঃ ৩২ বক্রগ্রীবঃ ৩৩। ইতি শব্দরত্নাবলী ॥ বাসন্তঃ ৩৪ কুলনাশঃ ৩৫। ইতি ত্রিকাণ্ডশেষঃ ॥ কুশনামা ৩৬ মরুপ্রিয়ঃ ৩৭ দ্বিককুৎ ৩৮ দুর্গলঙ্ঘনঃ ৩৯ ভূতঘ্নঃ ৪০ দাসেরঃ ৪১ দীর্ঘগ্রীবঃ ৪২ কেলিকীর্ণঃ ৪৩। ইতি হেমচন্দ্রঃ ॥

উষ্ট্রকাণ্ডী ( স্ত্রী ) পুষ্পজাতিভেদঃ। উঁটাটী ইতি খ্যাতা। তৎপর্য্যায়ঃ। রক্তপুষ্পী ২

করভকাণ্ডিকা ৩ রক্তা ৪ লোহিতপুষ্পী ৫ কর্ণপুষ্পী ৬। অস্যা গুণাঃ। তিক্তত্বং। উষ্ণত্বং। রুচিকারিত্বং। হৃদ্রোগহারিত্বঞ্চ। অস্যা বীজগুণাঃ। মধুরত্বং। শীতত্বং। গ্রীষ্মত্বং। বৃষ্যত্বং। সন্তর্পণত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

উষ্ট্রধূসরপুচ্ছিকা (স্ত্রী) বৃক্ষবিশেষঃ। বিচিটীতি ভাষা। ইতি রত্নমালা॥

উষ্ট্রপাদিকা (স্ত্রী) বৃক্ষবিশেষঃ। মদনমালীতি খ্যাতা। তৎপর্য্যায়ঃ। শাতভীরুঃ ২ ভদ্রবল্লী ৩ ভূমিমণ্ডা ৪। ইতি রত্নমালা॥

উষ্ট্রশিরোধরং (ক্লী) ভগন্দররোগবিশেষঃ। তস্য লক্ষণং। প্রকোপণৈঃ পিত্তমতিপ্রকোপিতং করোতি রক্তাং পিড়কাঙ্গুদাগতাং। তদাশুপাকা হিমপূতবাহিনী ভগন্দরন্তূষ্ট্রশিরোধরং বদেৎ॥ ইতি নিদানং॥

উষ্ট্রিকা (স্ত্রী) মৃত্তিকাভাণ্ডভেদঃ। উষ্ট্রভার্য্যা। ইতি মেদিনী॥ বৃশ্চিকালীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

উষ্ট্রী (স্ত্রী) মৃত্তিকাভাণ্ডঃ। উষ্ট্রস্ত্রী। ইতি হেমচন্দ্রঃ॥ তস্যাঃ ক্ষীরগুণাঃ। কুষ্ঠশোথপিত্তার্শঃকফাটোপানাহোদরস্থজন্তুগুল্মশ্বাসোল্লাসনাশিত্বং। তদ্দধিগুণাঃ। অর্শঃকুষ্ঠকৃমিশূলোদররোগনাশিত্বং। কটুত্বং। স্বাদুত্বঞ্চ। তন্নবনীতগুণাঃ। বিপাকে শীতলত্বং। লঘুত্বং। ব্রণকৃমিকফাস্রবাতবিষনাশিত্বঞ্চ। তদ্ঘৃতগুণাঃ। মধুরত্বং। বিপাকে কটুত্বং। শীতলত্বং। কুষ্ঠকৃমিবিষবাতকফগুল্মোদরনাশিত্বঞ্চ। তন্মাংসগুণাঃ। শিশিরত্বং। ত্রিদোষশমনত্বং। লঘুত্বং। বলপুষ্টিপ্রদত্বং। রুচিকারিত্বং। মধুরত্বং। বীর্য্যবর্দ্ধনত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

উষ্ণঃ (পুং) গ্রীষ্মঋতুঃ। তৎপর্য্যায়ঃ। গ্রীষ্মঃ ২ উষ্মকঃ ৩ নিদাঘঃ ৪ উষ্ণোপগমঃ ৫ উষ্ণাগমঃ ৬ তপঃ ৭। ইত্যমরঃ॥ আতপঃ। ইতি হেমচন্দ্রঃ॥ পলাণ্ডুঃ। ইতি রাজনির্ঘণ্টঃ॥ উষ্ণবীর্য্যদ্রব্যগুণাঃ। পিত্তবলকারিত্বং। লঘুত্বং। বাতশ্লেষ্মনাশিত্বঞ্চ। ইতি রাজবল্লভঃ॥

উষ্ণঃ (ত্রি) নিরালস্যব্যক্তিঃ। তৎপর্য্যায়ঃ। দক্ষঃ ২ চতুরঃ ৩ পেশলঃ ৪ পটুঃ ৫ সূত্থানঃ ৬। ইত্যমরঃ॥ অশীতঃ। ইতি মেদিনী॥

উষ্ণকঃ (পুং) গ্রীষ্মকালঃ। চংক্রমাদিঃ। তি ধরণী॥

উষ্ণকঃ (ত্রি) ক্ষিপ্রকারী। আতুরঃ। ইতি মেদিনী॥ প্রণতঃ। ইতি ধরণী॥

উষ্ণনদী (স্ত্রী) বৈতরণীনদী॥

উষ্ণরশ্মিঃ (পুং) সূর্য্যঃ। অর্কবৃক্ষঃ। ইত্যমরঃ

উষ্ণবারণঃ (পুং ক্লী) ছত্রং। ইতি হারাবলী॥

উষ্ণবীর্য্যঃ (পুং) শিশুমারঃ। ইতি হেমচন্দ্রঃ॥ তীক্ষ্ণতেজোযুক্তদ্রব্যাদিঃ॥

উষ্ণা (স্ত্রী) ক্ষয়ব্যাধিঃ। সন্তাপঃ। পিত্তং। ইতি রাজনির্ঘণ্টঃ॥

উষ্ণাংশুঃ (পুং) সূর্য্যঃ। ইতি হেমচন্দ্রঃ॥

উষ্ণাগমঃ (পুং) গ্রীষ্মকালঃ। ইত্যমরঃ॥

উষ্ণাভিগমঃ ( পুং ) গ্রীষ্মঋতুঃ। ইতি শব্দরত্নাবলী ॥

উষ্ণাসহঃ ( পুং ) হেমন্তঋতুঃ। ইতি রাজনির্ঘণ্টঃ ॥

উষ্ণিক্ [ হ্ ] ( স্ত্রী ) সপ্তাক্ষরচ্ছন্দঃ। যথা। রঙ্গে বাহুবিরুগ্নাৎ কুম্ভীন্দ্রাম্মদলেখা। লগ্নাভূন্মুরশত্রোঃ কস্তুরীরসচর্চ্চা ॥ ইতি ছন্দোমঞ্জরী ॥

উষ্ণিকা ( স্ত্রী ) যবাগুঃ। যাউ ইতি ভাষা। ইত্যমরঃ ॥

উষ্ণীষঃ ( পুং ক্লী ) শিরোবেষ্টঃ। পাগ ইতি ভাষা। ইত্যমরঃ ॥ অস্য গুণাঃ। কেশচক্ষুরায়ুর্বর্দ্ধকত্বং। ধূলিশীতোষ্ণনিবারকত্বঞ্চ। ইতি রাজবল্লভঃ ॥ যথা। উষ্ণীষং কান্তিকৃৎ কেশ্যং রজোবাতকফাপহং। লঘু চেচ্ছস্যতে যস্মাৎ গুরু পিত্তাক্ষিরোগকৃৎ ॥ ইতি ভাবপ্রকাশঃ ॥ কিরীটঃ। চিহ্নান্তরং। ইতি মেদিনী ॥

উষ্ণোদকং ( ক্লী ) তপ্তজলং। ক্বাথ্যমানপাদাবশেষার্দ্ধাবশেষপাদহীনং জলং। তদ্বিধির্যথা। অষ্টমেনাংশশেষেণ চতুর্থেনার্দ্ধকেন বা। অথবা ক্বথনেনৈব সিদ্ধমুষ্ণোদকং বদেৎ ॥ অস্য গুণাঃ। সদা পথ্যত্বং। কাসজ্বরবিবন্ধকফবাতামমেদোনাশিত্বং। দীপনত্বং। বস্তিশোধনত্বঞ্চ। শ্লেষ্মামবাতমেদোঘ্নং বস্তিশোধনদীপনং। কাসশ্বাসজ্বরান্ হন্তি পীতমুষ্ণোদকং নিশি। ইতি ভাবপ্রকাশে প্রথমখণ্ডঃ ॥ * ॥ অথোষ্ণোদকস্য লক্ষণং গুণাশ্চ। ক্বাথ্যমানস্তু নির্ব্বেগং নিষ্ফেনং নির্ম্মলন্তথা। অর্দ্ধাবশিষ্টং যত্তোয়ং তদুষ্ণোদকমুচ্যতে ॥ জ্বরকাসকফশ্বাসবাতপিত্তামমেদসাং। নাশনং বস্তিসংশোধি পথ্যমুষ্ণোদকং সদা ॥ * ॥ অথর্ত্তুভেদে জলস্য পাকভেদঃ। ত্রিপাদশেষং সলিলং গ্রীষ্মে শরদি শস্যতে। হিমেঽর্দ্ধশেষং শিশিরে তথা বর্ষাবসন্তয়োঃ ॥ অন্যে তু। নিদাঘে ত্বর্দ্ধপাদোনং পাদহীনন্তু শারদং। শিশিরে চ বসন্তে চ হিমে চার্দ্ধাবশেষিতং ॥ অষ্টমাংশাবশেষন্তু বারি বর্ষাসু শস্যতে। ইতি কেচিদ্বুধাঃ প্রাহুর্জ্জেজ্জটাগমদর্শনাৎ ॥ কেচিত্তু। বসুষঙ্গেষু বাণেষু বেদেষু ত্রিষু পক্ষয়োঃ। একভাগাবশেষং স্যাদম্বু বর্ষাদিষু ক্রমাৎ ॥ অত্র দোষাণাং যথোল্বণতা হীনতা বা তথা ব্যবস্থা কল্পনীয়া ॥ তৎ পাদহীনং পিত্তঘ্নমর্দ্ধহীনন্তু বাতনুৎ। ত্রিপাদহীনং শ্লেষ্মঘ্নং সংগ্রাহ্যগ্নিপ্রদং লঘু ॥ * ॥ ত্রিপাদহীনস্য তন্ত্রান্তরে আরোগ্যাম্বুসংজ্ঞা। তস্য লক্ষণগুণাঃ। পাদশেষন্তু যত্তোয়মারোগ্যাম্বু তদুচ্যতে। আরোগ্যাম্বু সদা পথ্যং কাসশ্বাসকফাপহং ॥ সদ্যোজ্বরহরং গ্রাহি দীপনং পাচনং লঘু। আনাহপাণ্ডুশূলার্শোগুল্মশোথোদরাপহং ॥ ইতি ভাবপ্রকাশে মধ্যমখণ্ডঃ ॥ রাত্রৌ উষ্ণোদকপানগুণাঃ। শ্লেষ্মসঙ্ঘাতভেদকত্বং। মারুতাপকর্ষিত্বং। আশু অজীর্ণজারকত্বঞ্চ। তৎ পাদহীনং বাতঘ্নং মধ্যহীনং তু পিত্তনুৎ। কফঘ্নং পাদশেষঘ্নং পানীয়ং লঘু দীপনং ॥ ইতি রাজনির্ঘণ্টঃ ॥

উষ্ণোপগমঃ ( পুং ) গ্রীষ্মকালঃ। ইত্যমরঃ ॥

উষ্মঃ ( পুং ) গ্রীষ্মকালঃ। বসন্তকালঃ। ইত্যুণাদিকোষঃ ॥ উষ্ণঃ। ক্রোধঃ ॥

উষ্মকঃ ( পুং ) গ্রীষ্মঋতুঃ। ইত্যমরঃ ॥

উষ্মা [ন্] ( পুং ) গ্রীষ্মকালঃ। উত্তাপঃ। ইত্যমরটীকায়াং নীলকণ্ঠঃ ॥

উষ্মাগমঃ ( পুং ) গ্রীষ্মকালঃ। ইত্যমরটীকায়াং রায়মুকুটঃ ॥

উস্রঃ ( পুং ) বৃষঃ। রশ্মিঃ। ইতি মেদিনী ॥

উস্রা ( স্ত্রী ) অর্জ্জুনী। গাই ইতি ভাষা। উপচিত্রা। ইন্দুরকাণীতি ভাষা। ইতি মেদিনী ॥

উহ ইর্ অর্দ্দে। ইতি কবিকল্পদ্রুমঃ॥ হ্রস্বাদিঃ। ইর্ ঔহৎ ঔহীৎ। অর্দ ইহ বধঃ। ইতি দুর্গাদাসঃ ॥

উহানঃ ( পুং ) দেশবিশেষঃ। ইতি ভূরিপ্রয়োগঃ ॥

উক্ষ বৃষি। ইতি কবিকল্পদ্রুমঃ ॥ উক্ষতি বৃক্ষং মেঘঃ। বৃট্ সেকঃ। ইতি দুর্গাদাসঃ ॥

উক্ষঃ ( ত্রি ) সিক্তঃ। ধৌতঃ ॥

উক্ষতরঃ ( পুং ) মহাবৃষঃ। ইতি হেমচন্দ্রঃ ॥

উক্ষা [ন্] ( পুং ) বৃষঃ। ইত্যমরঃ॥ ঋষভৌষধিঃ ॥ ইতি রাজনির্ঘণ্টঃ ॥

## ঊ

ঊ দীর্ঘোকারঃ। স চ ষষ্ঠস্বরবর্ণঃ। অস্য উচ্চারণস্থানং ওষ্ঠঃ। স চ দীর্ঘঃ প্লুতশ্চ ভবতি। শঙ্খকুন্দসমাকারং ঊকারং পরমকুণ্ডলী। পঞ্চপ্রাণময়ং বর্ণং পঞ্চদেবময়ং সদা ॥ পঞ্চপ্রাণযুতং বর্ণং পীতবিদ্যুল্লতা তথা। ধর্ম্মার্থকামমোক্ষঞ্চ সদা সুখপ্রদায়কং ॥ ইতি কামধেনুতন্ত্রং ॥ তস্য লেখনপ্রকারো যথা। তদ্রূপাধোগতা রেখা কুঞ্চিতা বামতঃ শুভা। তদ্রূপা পূর্ব্বোক্তোকাররূপা। তিষ্ঠন্তি তাসু রেখাসু যমাগ্নিবরুণাঃ ক্রমাৎ ॥ অধোর্দ্ধগামিনী মাত্রা লক্ষ্মীর্বাণী চ সা স্মৃতা। ইতি বর্ণোদ্ধারতন্ত্রং ॥ * ॥ তস্য নামানি যথা। ঊঃ কণ্ঠকো রতিঃ শান্তিঃ ক্রোধনো মধুসূদনঃ। কামরাজঃ কুজেশশ্চ মহেশো বামকর্ণকঃ ॥ অর্ঘীশো ভৈরবঃ সূক্ষ্মো দীর্ঘঘোণা সরস্বতী। বিলাসিনী বিঘ্নকর্ত্তা লক্ষ্মণো রূপকর্ষিণী ॥ মহাবিদ্যেশ্বরী ষষ্ঠা ষণ্ডোভূঃ কান্যকুব্জকঃ। ইতি তন্ত্রং ॥

ঊ ব্য বাক্যারম্ভঃ। রক্ষা। অনুকম্পা। ইতি মেদিনী ॥

ঊঃ ( পুং ) মহেশ্বরঃ। ইতি পুরুষোত্তমঃ ॥ চন্দ্রঃ। ইতি শব্দরত্নাবলী ॥

ঊঢ়ঃ ( ত্রি ) বিবাহিতঃ। ইতি স্মৃতিঃ ॥ কৃতবহনঃ ॥

ঊঢ়কঙ্কটঃ ( ত্রি ) কবচধারী। তৎপর্য্যায়ঃ। সন্নদ্ধঃ২ বর্ম্মিতঃ৩ সজ্জঃ৪ দংশিতঃ ৫। ইত্যমরঃ ॥

ঊঢ়া ( স্ত্রী ) ভার্য্যা। ইতি হেমচন্দ্রঃ ॥

ঊতং ( ত্রি ) তন্তুসন্ততং। তৎপর্য্যায়ঃ। স্যূতং২ উতং ৩। ইত্যমরঃ ॥ কাপড় বোনা ইতি ভাষা ॥

ঊতিঃ ( স্ত্রী ) রক্ষণং। স্যূতিঃ। বোনা সেলাই ইতি ভাষা। ইতি মেদিনী ॥ ক্ষারণ

ইতি শব্দরত্নাবলী ॥ জবনং। ইত্যমর-টীকায়াং স্বামী ॥ লীলা। ইতি শ্রীভাগবতং ॥

ঊধঃ [ স্ ] ( ক্লী ) আপীনং। গাইর পালান্ ইতি ভাষা। ইত্যমরঃ ॥

ঊধস্যং ( ক্লী ) দুগ্ধং। ইতি হেমচন্দ্রঃ ॥

ঊন ৎ ক পরিহানে। ইতি কবিকল্পদ্রুমঃ ॥ দীর্ঘাদির্দন্ত্যোপধঃ। তথাচ। ক্ষোভমাশু হৃদয়ং ন যদূনাং রাগবৃদ্ধিমকরোন্ন যদূনা-মিতি মাঘযমকং। পরিহানং ন্যূনক্রিয়া। ঊনয়তি বণিক্ স্বর্ণং প্রথমপরিমাণাৎ। পরিমাণমাত্রেঽয়মিতি কেচিৎ। মা ভবান্ ঊনিনৎ। ঊনধোঞ্চিঃ অঙ্ দ্বিত্বে স্বস্থানমেব নাস্তি অতো নাগ্লোপিত্বমিতি সন্দেহনিরাসার্থমাহ। ওনেশ্চ দন্ত্যবন্ধজ্ঞাপক-বলাৎ দ্বিত্বাৎ প্রাক্ প্রাপ্তো হ্রস্বো অগ্লোপিত্বান্ন স্যাৎ। ইতি দুর্গাদাসঃ ॥

ঊনং ( ত্রি ) হীনং। ন্যূনং ॥

ঊনবিংশঃ ( ত্রি ) ঊনবিংশতেঃ পূরণঃ। যথা। তিথ্যঙ্গবেদৈকদশোনবিংশভৈকাদশা-ষ্টাদশবিংশসংখ্যাঃ। ইষ্টোড়ুনা সূর্য্যযুতো-ড়ুনা চ যোগাদমূশ্চেদ্দশযোগতঙ্গঃ ॥ ইতি জ্যোতিস্তত্ত্বং ॥

ঊনবিংশতিঃ ( স্ত্রী ) একোনবিংশতিঃ। ঊনিশ ইতি ভাষা। যথা। ঊনবিংশতিদাস্যমান-পিণ্ডস্থানানি। ইতি তিথ্যাদিতত্ত্বং ॥

ঊম্ ব্য রোষোক্তিঃ। পৃচ্ছা। ইতি মেদিনী ॥ নিন্দা। স্পর্দ্ধা। ইতি শব্দরত্নাবলী ॥

ঊম্বং ( ক্লী ) দেশবিশেষঃ। ইতি সিদ্ধান্ত-কৌমুদী ॥

ঊয় ঈ ঙ সেবনে। তন্তুসন্তানে ইতি যাবৎ। ইতি কবিকল্পদ্রুমঃ ॥ দীর্ঘাদিঃ। সেবন-মিহ ষিব্যু তন্তুততাবিত্যস্য রূপং ঈ ঊতঃ। ঙ ঊয়তে পটং সৌচিকঃ। ইতি দুর্গা-দাসঃ ॥

ঊররী ব্য বিস্তারঃ। অঙ্গীকারঃ। ইতি ভরতো দ্বিরূপকোষশ্চ ॥

ঊরব্যঃ ( পুং ) বৈশ্যঃ। ইত্যমরঃ ॥

ঊরী ব্য বিস্তারঃ। অঙ্গীকারঃ। ইত্যমরঃ ॥

ঊরীকৃতঃ ( ত্রি ) অঙ্গীকৃতঃ। বিস্তৃতঃ। ইত্য-মরঃ ॥

ঊরুঃ ( পুং ) জানুপরিভাগঃ। উরৎ ইতি ভাষা। তৎপর্য্যায়ঃ। সক্থি ২। ইত্যমরঃ ॥

ঊরুজঃ ( পুং ) বৈশ্যঃ। স তু ব্রহ্মণ ঊরুভ্যাং জাতঃ। ইত্যমরঃ ॥

ঊরুপর্ব্বা [ ন্ ] ( পুং ক্লী ) জানু। হাঁটু ইতি ভাষা। ইত্যমরঃ ॥

ঊরুরী ব্য বিস্তারঃ। অঙ্গীকারঃ। ইতি ভরতো দ্বিরূপকোষশ্চ ॥

ঊরুস্তম্ভঃ ( পুং ) ঊরুরোগবিশেষঃ। যথা। অথোরুস্তম্ভাধিকারঃ। তত্রোরুস্তম্ভস্য বিপ্র-কৃষ্টসন্নিকৃষ্টনিদানসম্প্রাপ্তিপূর্ব্বকং লক্ষণ-মাহ। শীতোষ্ণদ্রবসংশুষ্কগুরুস্নিগ্ধৈর্নিষে-বিতৈঃ। জীর্ণাজীর্ণে তথায়াসসংক্ষোভ-স্বপ্নজাগরৈঃ ॥ সশ্লেষ্মমেদঃপবনঃ সাম-মত্যর্থসঞ্চিতং। অভিভূয়েতরং দোষমূরূ চেৎ প্রতিপদ্যতে। সক্থ্যস্থিনী প্রপূর্য্যান্তঃ-শ্লেষ্মণা স্তিমিতেন সঃ। তদা স্তভ্নাতি তে-নোরূ স্তব্ধৌ শীতাবচেতনৌ ॥ পরকীয়াবিব গুরূ স্যাতামতিশয়ব্যথৌ। ধ্যানাঙ্গমর্দ্দ-স্তৈমিত্যতন্দ্রাচ্ছর্দ্দ্যরুচিজ্বরৈঃ ॥ সংযুতো

পাদসদনকৃচ্ছ্রোদ্ধরণসুপ্তিভিঃ। তমূরুস্তম্ভমিত্যাহুরাঢ্যবাতমথাপরে ॥ জীর্ণাজীর্ণে কিঞ্চিজ্জীর্ণং কিঞ্চিদজীর্ণং তস্মিন্ ভোজনমিত্যর্থঃ। অতএব দৃঢ়বলেন জীর্ণাজীর্ণে. সমশ্নত ইতি পঠিতং। তত্র শীতাদিভির্নিযেবিতৈর্ভুক্তৈঃ। সংক্ষোভেণ সঞ্চলনেন। স্বপ্নেন দিবা। জাগরণেন রাত্রৌ। অভিভূয় দূষয়িত্বা। ইতরং দোষং পিত্তং। স্তিমিতেন আর্দ্রেণ দ্রুতেনেতি যাবৎ ন তু ঘনেন। এবং বিধেন শ্লেষ্মণা। সঃ পবনঃ। তদা ঊরূ স্তভ্নাতি তেন স্তম্ভেন। অচেতনৌ শূন্যৌ। পরকীয়াবিব অক্রিয়াবিত্যর্থঃ। ধ্যানং সংমূঢ়তা। পাদসম্বন্ধিনীভিঃ সদনকৃচ্ছ্রোদ্ধরণসুপ্তিভিশ্চ সংযুক্তৌ। অয়ং সুশ্রুতেন মহাবাতব্যাধিষু পঠিতঃ ॥ * ॥ প্রাগ্রূপমাহ প্রাগ্রূপং তস্য নিদ্রাতিধ্যানং স্তিমিততা জ্বরঃ। রোমহর্ষোঽরুচিশ্ছর্দ্দির্জঙ্ঘোর্বোঃ সদনং তথা ॥ * ॥ তস্যোপশয়মাহ। বাতশঙ্কিভিরজ্ঞানাত্তত্র স্যাৎ স্নেহনাৎ পুনঃ। পাদয়োঃ সদনং সুপ্তিঃ কৃচ্ছ্রাদুদ্ধরণং তথা ॥ জঙ্ঘোরুগ্লানিরত্যর্থং শশ্বদাদাহবেদনা। পদঞ্চ ব্যথতে ন্যস্তং শীতস্পর্শং ন বেত্তি চ ॥ সংস্থানে পীড়নে গত্যাং চালনে চাপ্যনীশ্বরঃ। অন্যনেয়ৌ হি সংভগ্নাবূরূ পাদৌ চ মন্যতে ॥ অন্যনেয়ৌ অন্যপুরুষচাল্যৌ ভবত ইত্যর্থঃ। অজ্ঞানাৎ অনিশ্চয়াৎ স্তম্ভসুপ্তিকম্পাদিদর্শনেন। বাতশঙ্কিভিঃ বাতব্যাধিশঙ্কিভিঃ। তত্র ঊরুস্তম্ভে। স্নেহনাৎ স্নেহাদিনা স্নেহন্যা চিকিৎসয়া। পাদসদনাদয় ঊরুভগ্নোপমত্বাৎ তে বিকারাঃ স্যুঃ। জঙ্ঘোরুগ্লানিঃ জঙ্ঘোর্বোর্গমনাদাবশক্তিঃ। আদাহবেদনা ঈষদ্দাহেন সহ বেদনা ॥ * ॥ ঊরুস্তম্ভস্যারিষ্টং লক্ষণমাহ। যদা দাহার্ত্তিতোদার্ত্তো বেপনঃ পুরুষো ভবেৎ। ঊরুস্তম্ভস্তদা হন্যাৎ সাধয়েদন্যথা নবং ॥ অন্যথা দাহাদ্যুক্তোপদ্রবরহিতং তমপি নবমুৎপন্নমাত্রং সাধয়েৎ ॥ * ॥ * ॥ অথোরুস্তম্ভস্য চিকিৎসা। স্নেহাসৃক্স্রাব বমনং বস্তিকর্ম্মবিরেচনং। বর্জয়েদাঢ্যবাতে তু যতস্তৈস্তস্য কোপনং ॥ তস্মাদত্র সদা কার্য্যং স্বেদনং ঘনরূক্ষণং। আমমেদঃকফাধিক্যান্মারুতং নয়তা সমং ॥ যৎ স্যাৎ কফপ্রশমনং ন তু মারুতকোপনং। তৎসর্ব্বং সর্ব্বদা কার্য্যমূরুস্তম্ভস্য ভেষজং ॥ সর্ব্বো রূক্ষক্রমঃ কার্য্যস্তত্রাদৌ কফনাশনঃ। পশ্চাদ্বাতবিনাশায় বিধাতব্যাখিলা ক্রিয়া ॥ ভোজ্যাঃ পুরাণাঃ শ্যামাককোদ্রবোদ্দালশালয়ঃ। জাঙ্গলৈরঘৃতৈর্ম্মাংসৈঃ শাকৈশ্চালবণৈর্হিতৈঃ ॥ উদ্দালো বনকোদ্রবঃ। দদ্যাদ্বাস্তুকশাকেন হীনেন লবণেন তু। জীর্ণশাল্যোদনং রূক্ষমূরুস্তম্ভবতে ভিষক্ ॥ রূক্ষণাদ্বাতকোপশ্চেন্নিদ্রানাশাদিসম্ভবঃ। স্নেহস্বেদক্রমস্তত্র কার্য্যো বাতাময়াপহঃ ॥ প্রতারয়েৎ প্রতিস্রোতঃ সরিতং শীতলোদকাং ॥ সরশ্চ বিমলং শীতং স্থিরতোয়ং পুনঃ পুনঃ ॥ মূলৈর্ব্বা বাজিগন্ধায়াঃ অথবার্কস্য কারয়েৎ। গাঢ়মুৎসাদনং বৈদ্য ঊরু-

স্তম্ভে সবেদনে ॥ ত্রিফলাগ্রন্থিকব্যোষ-চূর্ণং লিহ্যাৎ সমাক্ষিকং। ঊরুস্তম্ভবিনাশায় পুরং মূত্রেণ বা পিবেৎ ॥ নাগরং পিপ্পলীঞ্চাপি গুগ্গুলুম্বা শিলাজতু। ঊরুস্তম্ভী পিবেন্মূত্রৈর্দ্দশমূলীরসেন বা ॥ ইত্যুরুস্তম্ভাধিকারঃ। ইতি ভাবপ্রকাশঃ ॥ * ॥ অপিচ। ত্রিফলা চিত্রকং চিত্রং তথা কটুকরোহিণী। ঊরুস্তম্ভহরো হ্যেষ উত্তমস্তু বিরেচনং ॥ হরীতকীং শৃঙ্গবেরং দেবদারু চ চন্দনং। কাথয়েচ্ছাগদুগ্ধেন অপামার্গস্য মূলকং ॥ জঙ্ঘাশূলমুরুস্তম্ভং সপ্তরাত্রে তু নাশয়েৎ ॥ * ॥ ইতি গারুড়ে ১৮৭ অধ্যায়ঃ ॥

ঊরুস্তম্ভা (স্ত্রী) কদলীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

ঊর্জ্জ ক জীবনে। বলে। ইতি কবিকল্পদ্রুমঃ ॥ দীর্ঘাদিঃ। ক ঊর্জয়তি জনো জীবতি বলী স্যাদ্বেত্যর্থঃ। ইতি দুর্গাদাসঃ ॥

ঊর্জ্জং (ক্লী) জলং। ইতি শব্দরত্নাবলী ॥

ঊর্জ্জঃ (পুং) কার্ত্তিকমাসঃ। উৎসাহঃ। বলং। প্রাণনং। ইতি মেদিনী ॥ কার্ত্তিকনামসম্বৎসরঃ ॥

ঊর্জ্জস্বলঃ (ত্রি) অতিশয়বলবান্। ইত্যমরঃ ॥

ঊর্জ্জস্বি [ন্] (ক্লী) অলঙ্কারবিশেষঃ। তস্য লক্ষণং। সাহঙ্কারবস্তুভিধানং। তথাচোক্তং। ঊর্জ্জস্বি রূঢ়াহঙ্কারং। তস্যোদাহরণং যথা। প্রচপলমগুরুং ভরাসহিষ্ণুং জনমসমানমনূর্জ্জিতং বিবর্জ্জ্য। কৃতবসতিমিবার্ণবোপকণ্ঠে স্থিরমতুলোন্নতিমূঢ়তুঙ্গমেঘং ॥ ইতি ভট্টিঃ ॥

ঊর্জ্জস্বী [ন্] (ত্রি) অতিশয়বলবান্। ইত্যমরঃ ॥

ঊর্ণনাভঃ (পুং) কীটবিশেষঃ। মাকড়্সা ইতি ভাষা। তৎপর্য্যায়ঃ। লূতা ২ তন্তুবায়ঃ ৩ মর্কটকঃ ৪। ইত্যমরঃ ॥

ঊর্ণনাভিঃ (পুং) মর্কটকঃ। ইতি শব্দরত্নাবলী ॥

(স্ত্রী) মেষাদিলোম। পসম্ ইতি ভাষা। ভ্রুবোরন্তরাবর্ত্তঃ। ইত্যমরঃ ॥ স তু ভ্রূদ্বয়মধ্যে মৃণালতন্তুসূক্ষ্মঃ শুভায়ত একঃ প্রশস্তাবর্ত্তো মহাপুরুষলক্ষণং চক্রবর্ত্ত্যাদীনাং মহাযোগিনাঞ্চ ভবতি। ইতি ভরতঃ ॥

ঊর্ণায়ুঃ (পুং) মেষলোমকম্বলঃ। মেষঃ। ইত্যমরঃ ॥ ঊর্ণনাভঃ। ইতি হেমচন্দ্রঃ ॥ ক্ষণভঙ্গঃ। ইতি মেদিনী ॥

ঊর্ণু ঞ ল আচ্ছাদনে। ইতি কবিকল্পদ্রুমঃ ॥ দীর্ঘাদির্দন্ত্যোপধঃ। রেফযোগাম্মূর্দ্ধন্যঃ। তেন ঊর্ণুনাব ইত্যাদৌ নিমিত্তাভাবামূলধাতোর্ণত্বাভাবঃ। লঞ ঊর্ণোতি ঊর্ণৌতি ঊর্ণুতে দিশং মেঘঃ। ইতি দুর্গাদাসঃ ॥

ঊর্দ্দরঃ (পুং) শূরঃ। রাক্ষসঃ। ইত্যুণাদিকোষঃ ॥

ঊর্দ্ধঃ (ত্রি) উপরি। উচ্ছ্রিতঃ। তুঙ্গঃ। ইতি অন্ত্যস্থবকারান্তোর্দ্ধশব্দার্থে মেদিনী ॥ অত্র ঊর্দ্ধশব্দো নির্ব্বকারঃ। তদুক্তং বর্ণদেশনায়াং। উজ্জিহীতে উদগচ্ছতি উদো

হাণ্ডো ডপ্রত্যয়ঃ আদিবর্ণস্য ঊরাদেশঃ। ইতি মধুমাধবাদয়ঃ॥ ইতি মৃদঙ্গভেদোর্দ্ধ্বক-শব্দস্য টীকায়াং ভরতঃ॥

স্ফুর্দ্ধকঃ (পুং) ঊর্দ্ধকঃ। মৃদঙ্গবিশেষঃ। ইত্যমরটীকায়াং ভরতমুকুটৌ॥

ঊর্দ্ধঃ (পুং) দণ্ডবৎস্থিতঃ। যথা। আসীন ঊর্দ্ধঃ প্রহ্বো বা নিয়মো যত্র নেদৃশঃ। তদাসীনেন কর্ত্তব্যং ন প্রহ্বেন ন তিষ্ঠতা॥ ইত্যাদি ছন্দোগপরিশিষ্টাৎ। আসীনঃ উপবিষ্টঃ। ঊর্দ্ধো দণ্ডবৎ স্থিতঃ প্রহ্বোঽবনতপূর্ব্বকায়ঃ। ইতি শ্রাদ্ধতত্ত্বং॥

ঊর্দ্ধঃ (ত্রি) উচ্ছ্রিতঃ। তুঙ্গঃ। উপরিষ্টাৎ। ইতি মেদিনী॥ ঊর্দ্ধশব্দো দীর্ঘাদিঃ স-বকারো নির্ব্বকারশ্চ। তথাচ উপরি ধন্যতে ইতি কৃতনিরুক্তিরূর্দ্ধশব্দো বকারবানিতি সুভূত্যাদয়ঃ॥ কুর্ব্বতীরুপলৈস্তুঙ্গৈর্ভুবনং নীচমূর্দ্ধজৈঃ। তস্যা চলালীবাম্বেতি চিত্রা-নাগচ মূর্দ্ধজৈঃ॥ ইতি কীচকবধযমকং॥ ঊর্দ্ধং শব্দো মকারান্তোঽব্যয়ো দীর্ঘাদি-র্বকারবান্ তথা অদন্তোঽনব্যয়োঽপীতি জয়াদিত্যাদয়ঃ॥

ঊর্দ্ধকঃ (পুং) মৃদঙ্গবিশেষঃ। যথা। ঊর্দ্ধকো গোপুচ্ছবৎ স ত্রিতালোঽষ্টাঙ্গুলো মুখে। ধ্বস্তোর্দ্ধং বাদ্যতে তেষাং বাদনং দুর্জ্জনং ননা॥ ইতি ভরতধৃতশব্দার্ণবঃ॥ অপিচ। হরীতক্যাকৃতিস্ত্বঙ্ক্যস্তথালিঙ্গ্যো যবাকৃতিঃ। ঊর্দ্ধকো দণ্ডতুল্যঃ স্যাম্মুরজা ভেদতো মতাঃ॥ অন্যটীকায়াস্তু। যবমধ্যস্তথো-র্দ্ধকঃ। ইত্যমরটীকাসারসুন্দরী॥

ঊর্দ্ধকণ্টী (স্ত্রী) মহাশতাবরী। ইতি রাজনির্ঘণ্টঃ॥

ঊর্দ্ধজানুঃ (ত্রি) উপরিভাগে স্থূলজানুকঃ। তৎপর্য্যায়ঃ। ঊর্দ্ধজ্ঞুঃ ২। ইত্যমরঃ॥

ঊর্দ্ধজ্ঞঃ (ত্রি) ঊর্দ্ধজানুঃ। ইতি ভরতো দ্বিরূপকোষশ্চ॥

ঊর্দ্ধজ্ঞুঃ (ত্রি) ঊর্দ্ধজানুঃ। ইত্যমরঃ॥

ঊর্দ্ধদেবঃ (পুং) বিষ্ণুঃ। ইতি শব্দরত্নাবলী॥

ঊর্দ্ধন্দমঃ (ত্রি) ঊর্দ্ধস্থঃ। ইতি ত্রিকাণ্ডশেষঃ॥ ঊর্দ্ধঙ্গম ইতি যুক্তিসিদ্ধপাঠঃ॥

ঊর্দ্ধপাদঃ (পুং) শরভঃ। ইতি শব্দরত্নাবলী॥

ঊর্দ্ধপুণ্ড্রঃ (পুং) তিলকবিশেষঃ। স তু ব্রাহ্মণ-ললাটে পুণ্ড্রেক্ষুবৎ চন্দনাদিনা কৃতোর্দ্ধ-রেখাত্রয়ঃ। যথা। ঊর্দ্ধপুণ্ড্রে ত্রিপুণ্ড্রং স্যাৎ ত্রিপুণ্ড্রে নোর্দ্ধপুণ্ড্রকমিতি। ঊর্দ্ধ-পুণ্ড্রং দ্বিজঃ কুর্য্যাদ্বারিমৃদ্ভস্মচন্দনৈঃ। ইত্যাদি চ বহবঃ॥ ঊর্দ্ধপুণ্ড্রং মৃদা কুর্য্যাৎ ত্রিপুণ্ড্রং ভস্মনা সদা। তিলকং বৈ দ্বিজঃ কুর্য্যাচ্চন্দনেন যদৃচ্ছয়া॥ ঊর্দ্ধপুণ্ড্রং দ্বিজঃ কুর্য্যাৎ ক্ষত্রিয়স্তু ত্রিপুণ্ড্রকং। অর্দ্ধচন্দ্রস্তু বৈশ্যশ্চ বর্ত্তুলং শূদ্রযোনিজঃ॥ ইতি আহ্নিকতত্ত্বধৃতব্রহ্মাণ্ডপুরাণং॥

ঊর্দ্ধরেতাঃ [স্] (পুং) মহাদেবঃ। ইতি ত্রিকাণ্ডশেষঃ। ভীষ্মঃ। মুনিবিশেষঃ। তদ্যথা। সনকসনন্দসনাতনসনৎকুমারা-দয়ঃ। ইতি মহাভারতং॥ অস্য ব্যুৎপত্তিঃ। ঊর্দ্ধং রেতো যস্য ন পততি বীর্য্যং যস্যে-ত্যর্থঃ॥

ঊর্দ্ধলিঙ্গঃ (পুং) মহাদেবঃ। ইতি হেমচন্দ্রঃ॥

ঊর্দ্ধলোকঃ (পুং) স্বর্গঃ। ইতি হেমচন্দ্রঃ॥

ঊর্দ্ধস্থঃ (ত্রি) উপরিস্থিতঃ। তৎপর্য্যায়ঃ। ঊর্দ্ধন্দমঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥

উর্দ্ধস্থিতিঃ (স্ত্রী) উর্দ্ধাবর্ত্তঃ। স তু অশ্বস্য পৃষ্ঠস্থানং। তৎপর্য্যায়ঃ। পুরুষকং ২। ইতি ত্রিকাণ্ডশেষঃ॥ উপরিস্থিতিঃ। উপরিস্থানং॥

উর্দ্ধাসিতঃ (পুং) কারবেল্লঃ। করলা ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ॥

উর্ম্মিঃ (স্ত্রী পুং) তরঙ্গঃ। প্রকাশঃ। বেগঃ। ভঙ্গঃ। বস্ত্রসঙ্কোচরেখা। বেদনা। পীড়া। ইতি মেদিনী॥ উৎকণ্ঠা। ইতি হেমচন্দ্রঃ॥ শোকমোহৌ জরামৃত্যু ক্ষুৎপিপাসে ষড়ূর্ম্ময়ঃ। ইতি শ্রীভাগবতটীকা॥

উর্ম্মিকা (স্ত্রী) উৎকণ্ঠা। ভৃঙ্গনাদঃ। বস্ত্রভঙ্গঃ। অঙ্গুলীয়কং। বীচিঃ। ইতি হেমচন্দ্রঃ॥

উর্ম্মিমান্ [ৎ] (ত্রি) বক্রঃ। ঢেউ খেলানিয়া ইতি ভাষা। ইত্যমরঃ॥ তরঙ্গযুক্তঃ॥

উর্ম্মিমালী [ন্] (পুং) সমুদ্রঃ। ইতি ত্রিকাণ্ডশেষঃ॥

উর্ব্বরা (স্ত্রী) উর্ব্বরা। সর্ব্বশস্যাঢ্যা ভূমী। ইতি শব্দরত্নাবলী

উর্ব্বশী (স্ত্রী) উর্ব্বশী। স্বর্গবেশ্যাবিশেষঃ ইত্যমরটীকায়াং রায়মুকুটঃ॥

উর্ব্বসী (স্ত্রী) উর্ব্বশী। ইত্যমরটীকাসারসুন্দরী॥

উর্ব্যঙ্গং (ক্লী) গোময়চ্ছত্রিকা। তৎপর্য্যায়ঃ। দিলীরং ২ শিলীন্ধ্রকং ৩ বশারোহং ৪ গোলাসং ৫। ইতি হারাবলী॥

উর্ষা (স্ত্রী) দেবতাড়কতৃণং। ইতি শব্দচন্দ্রিকা॥

উলুপী [ন্] (পুং) উলুপী। শিশুমারঃ। ইত্যমরটীকাসারসুন্দরী॥

উলূকঃ (পুং) উলূকঃ। পেচকঃ। ইত্যমরটীকায়াং রায়মুকুটঃ॥

উষ রোগে। ইতি কবিকল্পদ্রুমঃ॥ দীর্ঘাদিঃ। উষতি সন্তং খলঃ। ইতি দুর্গাদাসঃ॥

উষং (ক্লী) প্রভাতং। ইতি শব্দরত্নাবলী॥

উষঃ (পুং) ক্ষারমৃত্তিকা। ইত্যমরঃ॥

উষকং (ক্লী) প্রত্যূষং। ইতি শব্দরত্নাবলী॥

উষণং (ক্লী) মরিচং। ইতি হেমচন্দ্রঃ॥

উষণা (স্ত্রী) উষণা। পিপ্পলী। ইতি শব্দরত্নাবলী

উষরঃ (ত্রি) ক্ষারভূমী। লোণা জায়গা ইতি ভাষা। তৎপর্য্যায়ঃ। উষবান্ ২। ইত্যমরঃ॥

উষরজং (ক্লী) পাংশবলবণং। রোমকনামায়স্কান্তভেদঃ। ইতি রাজনির্ঘণ্টঃ॥

উষবান্ [ৎ] (ত্রি) উষরভূমী। ইত্যমরঃ॥

উষা (স্ত্রী) উষা। অনিরুদ্ধভার্য্যা। ইতি শব্দরত্নাবলী॥

উহ ঙ বিতর্কে। সন্দেহাদ্বিচারে। ইতি কবিকল্পদ্রুমঃ॥ দীর্ঘাদিঃ। সন্দেহাদ্বিচারস্তর্কঃ। ঙ উহতে ধর্ম্মং ধীরঃ। যশঃ সমূহন্নিব দিগ্বিকীর্ণমিতি গের্ব্বাস্যোর্হোঢে চেতি পরস্মৈপদবিধানাচ্ছত্রন্তং। অনুক্তমপ্যূহতি পণ্ডিতো জনঃ। ইতি গণকৃতানিত্যত্বাদিতি রমানাথঃ। বস্তুতস্তু পচাদিত্বাদনি উহ ইবাচরতীতি কৌ সাধ্যং। ইতি দুর্গাদাসঃ॥

ঊহঃ (ত্রি) পূর্ব্বাপ্রাপ্তস্য উৎক্ষেপণং। তৎপর্য্যায়ঃ। অধ্যাহারঃ ২ তর্কঃ ৩। ইত্যমরঃ॥ বিতর্কঃ ৪। বূহঃ৫ বূ্যহঃ ৬ বিতর্কণং ৭ অধ্যাহরণং ৮ ঊহনং ৯ প্রতর্কণং ১০। ইতি শব্দরত্নাবলী॥ অপূর্ব্বোৎপ্রেক্ষণং। ইতি জৈমিনিঃ॥ অসমবেতার্থকপদত্যাগপূর্ব্বকসমবেতার্থকপদসমভিব্যাহারকরণং। ইতি শ্রাদ্ধতত্ত্বটীকা॥ সাকাঙ্ক্ষবাক্যস্য পদান্তরেণ আকাঙ্ক্ষাপূরণং॥

ঊহনী (স্ত্রী) সম্মার্জ্জনী। ঝাঁটা ইতি ভাষা। ইতি শব্দরত্নাবলী॥

## ঋ

ঋ ঋকারঃ। সপ্তমস্বরবর্ণঃ। অস্যোচ্চারণস্থানং মূর্দ্ধা। স তু হ্রস্বো দীর্ঘঃ প্লুতশ্চ ভবতি॥ ঋকারং পরমেশানি কুণ্ডলীমূর্ত্তিমান্ স্বয়ং। অত্র ব্রহ্মা চ বিষ্ণুশ্চ রুদ্রশ্চৈব বরাননে॥ সদাশিবযুতং বর্ণং সদা ঈশ্বরসংযুতং। পঞ্চবর্ণময়ং বর্ণং চতুর্জ্ঞানময়ং তথা॥ রক্তবিদ্যুল্লতাকারং ঋকারং প্রণমাম্যহং। ইতি কামধেনুতন্ত্রং॥ তস্য লেখনপ্রকারাদি যথা। ঊর্দ্ধাদক্ষগতা বক্রা ত্রিকোণা বামতস্ততঃ। পুনস্ত্বধোদক্ষগতা মাত্রা শক্তিঃ পরা স্মৃতা॥ মাত্রাসু ব্রহ্মবিষ্ণ্বীশাস্তিষ্ঠন্তি ক্রমতঃ পরাঃ। ইতি বর্ণোদ্ধারতন্ত্রং॥*॥ তস্য নামানি যথা। ঋঃ পূর্দীর্ঘমুখী রুদ্রো দেবমাতা ত্রিবিক্রমঃ। ভাবভূতিঃ ক্রিয়া ক্রূরা রেচিকা নাশিকা ধ্রুতঃ॥ একপাদশিরো মালা মণ্ডলা শান্তিনী জলং। কর্ণঃ কামলতা মেধো নিবৃত্তির্গণনায়কঃ॥ রোহিণী শিবদূতী চ পূর্ণগিরিশ্চ সপ্তমী। ইতি তন্ত্রং॥

ঋ প্রাপে। গত্যাং। ইতি কবিকল্পদ্রুমঃ॥ প্রাপঃ প্রাপ্তিঃ। ঋচ্ছতি ধনং কৃতী। ইতি দুর্গাদাসঃ॥

ঋ ইর ল গত্যাং। ইতি কবিকল্পদ্রুমঃ॥

ঋ র লি গত্যাং। র বৈদিকঃ। লি ইয়র্ত্তি। শপো লুক্করণাদস্য শতৃশানয়োরেব ঋচ্ছাদেশঃ। ইয়ৃচ্ছৎ সমিয়ৃচ্ছানঃ। ইতি দুর্গাদাসঃ॥

ঋ র ন হিংসনে। ইতি কবিকল্পদ্রুমঃ॥ রবৈদিকঃ। ন ঋণোতি। রেফাদিস্তৃতীয়স্বরান্তোঽয়মিতি কেচিৎ। ইতি দুর্গাদাসঃ॥

ঋ ব্য গর্হণং। বাক্যং। দেবমাতরি স্ত্রী। ইতি মেদিনী॥ পরিহাসঃ। বাক্যবিকারঃ। ইতি শব্দরত্নাবলী॥

ঋক্ [চ্] (স্ত্রী) বেদবিশেষঃ। ঋগ্বেদঃ। ইত্যমরঃ॥ অস্য একবিংশতিশাখাঃ। বেদমন্ত্রবিশেষঃ। তস্য লক্ষণং। যত্রার্থবশেন পাদব্যবস্থিতিঃ। অস্যার্থঃ। যত্রার্থবশেন একান্বয়িত্বেনানুষ্টুবাদিপাদস্থিতিঃ। ইতি জৈমিনিঃ॥

ঋক্থং (ক্লী) ধনং। ইত্যমরঃ॥ স্বর্ণং। ইত্যুণাদিকোষঃ॥

ঋচ শ স্তুত্যাং। ইতি কবিকল্পদ্রুমঃ॥ শ ঋচতি। আনর্চ্চ। ইতি দুর্গাদাসঃ॥

ঋচীষং (ক্লী) পিষ্টকভর্জ্জনপাত্রং। ইতি হেমচন্দ্র

ঋচ্ছ শ মূর্ত্তৌ। গমনে। মোহে। ইতি কবিকল্পদ্রুমঃ॥ শ ঋচ্ছতী ঋচ্ছন্তী। মূর্ত্তিঃ কঠিনীভাবঃ। মূর্ত্তিঃ কাঠিন্যকায়য়োরিত্যমরাৎ। ঋচ্ছতি ঘৃতং কঠিনং স্যাদিত্যর্থঃ। ঋচ্ছতি বৃদ্ধো গচ্ছতি মুহ্যতি বেত্যর্থঃ। মোহস্থানে ইন্দ্রিয়প্রলয়ং পঠন্তি প্রাঞ্চঃ। ঋচ্ছতি বৃদ্ধস্যেন্দ্রিয়ং প্রলীয়তে ইত্যর্থঃ। ইতি রমানাথঃ॥ ইতি দুর্গাদাসঃ॥

ঋচ্ছরা (স্ত্রী) বেশ্যা। ইত্যুণাদিকোষঃ॥

ঋজ ঙ গত্যাং। স্থৈর্য্যে। উর্জ্জনে। অর্জ্জনে। ইতি কবিকল্পদ্রুমঃ॥ ঙ অর্জ্জতে। উর্জ্জনং জীবনং বলবত্ত্বাবশ্চ। ইতি দুর্গাদাসঃ॥

ঋজ ই ঙ ভৃজি। ইতি কবিকল্পদ্রুমঃ॥ হ্রস্বাদিঃ। ভৃজি ভর্জ্জনে। ই ঋঞ্জ্যতে। ঙ ঋঞ্জতে মৎস্যং সূপকারঃ। ইতি দুর্গাদাসঃ॥

ঋজীষং (ক্লী) পিষ্টপচনং। পিষ্টকভর্জ্জনপাত্রং। ইতি হেমচন্দ্রামরৌ॥ নরকবিশেষঃ। অত্র পিষ্টপচনপ্রক্ষেপঃ। ইতি মনুঃ॥

ঋজু (ত্রি) অবক্রং। সোজা ইতি ভাষা। তৎপর্য্যায়ঃ। অজিহ্মং ২ প্রগুণং ৩। ইত্যমরঃ॥ প্রাঞ্জলঃ ৪ সরলঃ ৫। ইতি জটাধরঃ॥

ঋজুকায়ঃ (পুং) কশ্যপমুনিঃ। ইতি জটাধরঃ॥ অবক্রশরীরে ত্রি॥

ঋজ্রঃ (পুং) নায়কঃ। ইত্যুণাদিকোষঃ॥

ঋঞ্জাসনঃ (পুং) মেঘঃ। ইতি সিদ্ধান্তকৌমুদী॥

ঋণ দ উ ঞ গতৌ। ইতি কবিকল্পদ্রুমঃ॥ দ ঞ ঋণোতি অর্ণোতি ঋণুতে অর্ণুতে। উ অর্ণিত্বা ঋত্বা। ইতি দুর্গাদাসঃ॥

ঋণং (ক্লী) ধারঃ। দেনা ইতি ভাষা। তৎপর্য্যায়ঃ। পর্য্যুদঞ্চনং ২ উদ্ধারঃ ৩। ইত্যমরঃ॥ পুনর্দেয়ত্বেন স্বীকৃত্য যৎ গৃহীতং। ইতি জগদীশঃ॥ অস্য বিবরণং ঋণাদানশব্দে দ্রষ্টব্যং॥ * ॥ কুসীদাখ্য ঋণং যথা। স্থানলাভনিমিত্তং যদ্দানগ্রহণমিষ্যতে। তৎকুসীদমিতি জ্ঞেয়ং তেন বৃত্তিঃ কুসীদিনাং॥ ইতি নারদঃ॥ অস্যার্থঃ। স্থানং মূলধনাবস্থানং। লাভো বৃদ্ধিঃ। দানগ্রহণপদে কর্ম্মণ্যনটা সাধ্যে তেন মূলধনাবস্থানে সত্যেব যো লাভস্তদর্থং যদ্দানং ধনিকেন দীয়মানং মূলধনং অধমর্ণেন চ গ্রহণং তথা স্বীকৃত্য গৃহ্যমাণং যত্তদৃণং। ইতি রত্নাকরাদয়ঃ॥ কলাশূন্যে তু অবশ্যাপাকরণীয়ত্বরূপগুণযোগাদ্‌গৌণপ্রয়োগঃ। অতএব বাণিজ্যার্থপ্রযুক্তস্য নর্ণত্বং ইতি মিশ্রাঃ॥ * ॥ অপিচ। কুৎসিতাৎ সীদতশ্চৈব নির্বিশঙ্কৈঃ প্রগৃহ্যতে। চতুর্গুণং বাষ্টগুণং কুসীদাখ্যমৃণং স্মৃতঃ॥ ইতি বৃহস্পতিঃ॥ অস্যার্থঃ। কুৎসিতাৎ সীদতশ্চাধমর্ণাৎ সকলং ধনং যৎ গৃহ্যতে নির্বিশঙ্কৈরুত্তমর্ণৈঃ। চতুর্গুণং বেতি বাকারোঽনাস্থায়াং তেন দ্বৈগুণ্যাদিলাভঃ॥ * ॥ ঋণত্রয়বিশেষো যথা। দেবানাঞ্চ পিতৄণাঞ্চ ঋষীণাঞ্চ তথা নরঃ। ঋণবান্ জায়তে যস্মাত্তন্মোক্ষে প্রযতেৎ সদা॥ * ॥ তৎপরিশোধনমাহ।

দেবানামনৃণো জন্তুর্যজ্ঞৈর্ভবতি মানবঃ।
অল্পবিত্তশ্চ পূজাভিরুপবাসব্রতৈস্তথা ॥
শ্রাদ্ধেন প্রজয়া চৈব পিতৃণামনৃণো ভবেৎ।
ঋষীণাং ব্রহ্মচর্য্যেণ শ্রুতেন তপসা তথা ॥
ইতি বিষ্ণুধর্ম্মোত্তরং ॥

ঋণমৎকুণঃ (পুং) লগ্নকঃ। জামিন ইতি ভাষা। ইতি শব্দরত্নাবলী ॥

ঋণমার্গণঃ (পুং) প্রতিভূঃ। জামিন ইতি ভাষা। ইতি হারাবলী ॥

ঋণমুক্তিঃ (স্ত্রী) ঋণপরিশোধনং। তৎপর্য্যায়ঃ। বিগণনং ২। ইতি ত্রিকাণ্ডশেষঃ॥

ঋণমোক্ষঃ (পুং) ঋণপরিশোধনং। ইতি হারাবলী ॥

ঋণাদানং (ক্লী) অধমর্ণাৎ উত্তমর্ণেন সলাভধনগ্রহণং। তত্তু অষ্টাদশবিবাদান্তর্গতাদ্যবিবাদঃ। তচ্চ সপ্তবিধং যথা। ঈদৃশমৃণং দেয়ং ১ ঈদৃশমদেয়ং ২ অনেনাধিকারিণা দেয়ং ৩ অস্মিন্ সময়ে দেয়ং ৪ অনেন প্রকারেণ দেয়ং ৫ ইত্যধমর্ণে পঞ্চবিধং। উত্তমর্ণে তু দানবিধিঃ ৬ আদানবিধিশ্চ ৭ ইতি দ্বিবিধং। তথাচ নারদঃ।
ঋণন্দেয়মদেয়ঞ্চ যেন যত্র যথা ভবেৎ।
দানগ্রহণধর্ম্মাশ্চ ঋণাদানমিতি স্মৃতং ॥
অদেয়মিতি যদুক্তং তদাহ কাত্যায়নঃ।
ন স্ত্রীভ্যো দাসবালেভ্যঃ প্রদদ্যাৎ কিঞ্চিদুদ্ধৃতং। দাতা ন লভতে তত্তু তেভ্যো দত্তন্ত যদ্বসু ॥ তত্র বিশেষমাহ বৃহস্পতিঃ।
পরিপূর্ণং গৃহীত্বাধিং বন্ধং বা সাধুলগ্নকং।
লেখ্যারূঢ়ং সাক্ষিমদ্বা ঋণং দদ্যাৎ ধনী সদা ॥ ইতি বিবাদার্ণবসেতুঃ ॥ অস্য যদবশিষ্টং ঋণোদ্‌গ্রাহণশব্দে দ্রষ্টব্যং ॥

ঋণান্তকঃ (পুং) মঙ্গলগ্রহঃ। ইতি শব্দরত্নাবলী ॥

ঋণাপনোদনং (ক্লী) ঋণাপনয়নং। ধারশোধনং ॥

ঋণী [ন্] (ত্রি) ঋণগ্রস্তঃ। ধারী ॥

ঋণোদ্‌গ্রাহণং (ক্লী) অধমর্ণগৃহীতর্ণগ্রহণং। যত্র ঋণং প্রার্থনকালে প্রার্থিতোঽপি ঋণী ন দদাতি তত্র ধনিকেন যৎ কর্ত্তব্যং তদাহ মনুঃ। যৈর্যৈরুপায়ৈরর্থং স্বং প্রাপ্নুয়াদুত্তমর্ণিকঃ। তৈস্তৈরুপায়ৈঃ সংগৃহ্য সাধয়েদধমর্ণিকং ॥ ধর্ম্মেণ ব্যবহারেণ ছলেনাচরিতেন চ। প্রযুক্তং সাধয়েদর্থং পঞ্চমেন বলেন চ॥ অয়মর্থঃ। পূর্ব্বপূর্ব্বসামর্থ্যাভাবে উত্তরোত্তরং। সংগৃহ্য বশীকৃত্য। ধর্ম্মে বৃহস্পতিরাহ। সুহৃৎসম্বন্ধিসন্দিষ্টৈঃ সামোক্ত্যানুগমেন চ। প্রায়েণ বা ঋণী দাপ্যো ধর্ম্ম এষ উদাহৃতঃ॥ অস্যার্থঃ। ঋণিকস্য যে সুহৃৎসম্বন্ধিনস্তেষ্ সন্দেশো যো যচ্চ সামবচনং যচ্চানুগমনং প্রায়োপবেশনং বা ধনিকস্য সধর্ম্ম ঋণোদ্‌গ্রাহণোপায়ঃ ॥ ব্যবহারে কাত্যায়নঃ।
ধার্য্যোঽবরুদ্ধ ঋণিকঃ প্রকাশং জনসংসদি।
যাবন্ন দদ্যাদ্দেয়ঞ্চ দেশাচারস্থিতির্যথা ॥
অস্যার্থঃ। যাবদ্দানং জনসংসদি ঋণিকস্য ধনিকেন ধারণং ব্যবহারঃ॥ ছলাচরিতবলাৎকারেষু বৃহস্পতিঃ। ছদ্মনা যাচয়িত্বার্থমানীয় ঋণিকাদৃণী। অন্বাহিতাদি বাহৃত্য দাপ্যতে যত্র সোপধিঃ॥ অস্যার্থঃ। ঋণিকস্য ধনমন্বাহিতাদি বা ছদ্মনা আহৃত্য বা যত্র দাপ্যতে তত্র সাধনোপায়ঃ সোপধিঃ সছল-

মুচ্যতে॥ পুত্রদারপশূন্ রুদ্ধ্বা কৃত্বা দ্বারোপবেশনং। যত্রর্ণী দাপ্যতেঽর্থং স্বং তদাচরিতমুচ্যতে॥ বদ্ধা স্বগৃহমানীয় তাড়নাদ্যৈরুপক্রমৈঃ। ঋণিকো দাপ্যতে যত্র বলাৎকারঃ স উচ্যতে॥ অনয়োরর্থঃ। পুত্রদারপশুরোধো দ্বারোপবেশনঞ্চ য উদ্‌গ্রাহণোপায়স্তদাচরিতমুচ্যতে। স্বগৃহমানীয় তাড়নাদিলক্ষণ উদ্‌গ্রাহণোপায়ো বলাৎকার উচ্যতে॥ * ॥ কোঽধমর্ণঃ কেনোপায়েন সাধ্যস্তদাহ কাত্যায়নঃ। রাজানং স্বামিনং বিপ্রং সান্ত্বেনৈব প্রসাধয়েৎ। ঋকৃথিনং ত্বুর্হ্দং বাপি ছলেনৈব প্রসাধয়েৎ॥ ঋকৃথিনং দায়াদং॥ তথা বণিজঃ কর্ষকাংশ্চৈব শিল্পিনশ্চাব্রবীদ্ ভৃগুঃ। দেশাচারেণ দাপ্যাঃ স্যুর্দুষ্টান্ সংপীড্য দাপয়েৎ॥ * ॥ যত্র ধনং ন লভ্যতে তত্রাহ বৃহস্পতিঃ। নির্ধনং ঋণিকং কর্ম্ম গৃহমানীয় কারয়েৎ শৌণ্ডিকাদ্যং ব্রাহ্মণস্তু দাপনীয়ঃ শনৈঃ শনৈঃ॥ যাজ্ঞবল্ক্যঃ। হীনজাতিং পরিক্ষীণমৃণার্থং কর্ম্ম কারয়েৎ। ব্রাহ্মণস্তু পরিক্ষীণঃ শনৈর্দাপ্যো যথোদয়ং॥ যথোদয়ং যথা ধনোৎপত্তিরিত্যর্থঃ॥ * ॥ ব্যাপারদ্বারা ন ব্রাহ্মণস্য ঋণশোধনমাহ কাত্যায়নঃ। কর্ম্মণা ক্ষত্রবিটশূদ্রান্ সমহীনাংস্তু দাপয়েৎ॥*॥ ঋণশোধনায় নিন্দিতং কর্ম্মকারয়িতুরুত্তমর্ণস্য দণ্ডমাহ কাত্যায়নঃ। যদি হ্যাদাবনাদিষ্টমশুভং কর্ম্ম কারয়েৎ। প্রাপ্নুয়াৎ সাহসং পূর্ব্বমৃণাম্মুচ্যেত চর্ণিকঃ॥ * ॥ যদি পরমবৃদ্ধিপ্রাপ্তং ধনমৃণিকো দাতুং ন শক্নোতি তদা চক্রবৃদ্ধ্যা স্বেচ্ছয়া ধারয়েৎ যথা বৃহস্পতিঃ। পূর্ণাবধৌ শান্তলাভমৃণমুদ্‌গ্রাহয়েদ্ধনী। কারয়েদ্বা ধনী লেখ্যং চক্রবৃদ্ধিব্যবস্থয়া॥ তথাচ বৃহস্পতিঃ। হিরণ্যে দ্বিগুণীভূতে মৃতে নষ্টেঽধমর্ণিকে। দ্রব্যং তদীয়ং সংগৃহ্য বিক্রীণীত সসাক্ষিকং॥ রক্ষেদ্বা কৃতমূল্যন্তু দশাহং জনসংসদি। ঋণানুরূপং পরতো গৃহ্নীতান্যত্তু বর্জয়েৎ॥ স্বধনঞ্চ স্থিরীকৃত্য গণনাকুশলৈর্নরৈঃ। তদ্বন্ধুজ্ঞাতিবিদিতং প্রগৃহ্নন্নাপরাধ্নুয়াৎ॥ * ॥ যথাবিষয়ং ধর্ম্মাদীন্ ধনসাধনোপায়ান্ প্রযুঞ্জানো ন রাজ্ঞা নিবর্ত্তনীয় ইত্যাহ মনুঃ। যঃ স্বয়ং সাধয়েদর্থমুত্তমর্ণোঽধমর্ণিকাৎ। স রাজ্ঞা নাভিযোক্তব্যঃ স্বকং সংসাধয়ন্ ধনং॥ * ॥ ধনবতা ঋণিকেনাদত্তে ঋণে রাজা স্বয়ং বিংশতিতমভাগং গৃহীত্বা উত্তমর্ণায় দাপয়েৎ ইত্যাহ নারদঃ। ঋণিকঃ সধনো যস্তু দৌরাত্ম্যান্ন প্রযচ্ছতি। রাজ্ঞা দাপয়িতব্যঃ স্যাৎ গৃহীত্বাংশস্তু বিংশকং॥ * ॥ যদা অধমর্ণিকঃ সকলমৃণদাতুমসমর্থঃ শক্ত্যনুসারেণ দত্ত্বা পূর্ব্বকৃতস্য লেখ্যস্য পৃষ্ঠেঽভিলিখেৎ এতাবদ্দত্তং উত্তমর্ণেন উপগতং প্রাপ্তমিতি ধনী তস্যৈব লেখ্যস্য পৃষ্ঠে দদ্যাদভিলিখেৎ ইত্যাহ যাজ্ঞবল্ক্যঃ। লেখ্যস্য পৃষ্ঠেঽভিলিখেৎ দত্ত্বা দত্ত্বা ধনং ঋণী। ধনী চোপগতং দদ্যাৎ স্বহস্তপরিচিহ্নিতং॥ * ॥ ইতি বিবাদার্ণবসেতুঃ॥

ঋত গত্যাং। স্পর্দ্ধনে। ঐশ্বর্য্যে। ঘৃণায়াং। ইতি কবিকল্পদ্রুমঃ॥ ঘৃণা দয়া। ঋতীয়তে জনঃ স্পর্দ্ধতে ঈশ্বরো ভবতি। কিঞ্চিদ্দয়তে

গচ্ছতি বেত্যর্থঃ। অরে তু ঈয়ঙোঽপ্রাপ্তি-পক্ষে পরস্মৈপদমেব। আর্ত্তীৎ আনর্ত্ত ইত্যাদি। ইতি দুর্গাদাসঃ ॥

ঋতং (ক্লী) উঞ্ছশিলং। জলং। সত্যং ইতি মেদিনী ॥

ঋতঃ (ত্রি) দীপ্তঃ। পূজিতঃ। ইতি মেদিনী ॥

ঋতজিৎ (পুং) যক্ষবিশেষঃ। যথা। ত্বষ্টা চ যমদগ্নিশ্চ কম্বলোঽথ তিলোত্তমা। ব্রহ্মাপেতোঽথ ঋতজিৎ ধৃতরাষ্ট্রশ্চ সপ্তমঃ ॥ মাঘমাসে বসন্ত্যেতে সপ্ত মৈত্রেয় ভাস্করে। শ্রূয়তাং চাপরে সূর্য্যে ফাল্গুনে নিবসন্তি যে ॥ ইতি শ্রীবিষ্ণুপুরাণে ২ অংশে ১০ অধ্যায়ঃ ॥ ত্বষ্টা সূর্য্যঃ। কম্বলঃ সর্পঃ। ব্রহ্মাপেতো রাক্ষসঃ। ঋতজিদ্যক্ষঃ। ধৃতরাষ্ট্রো গন্ধর্ব্বঃ। ইতি তট্টীকায়াং শ্রীধরস্বামী ॥

ঋতধামা [ন্] (পুং) বিষ্ণুঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

ঋতিঃ (স্ত্রী) কল্যাণং। বর্ত্ম। জুগুপ্সা। স্পর্দ্ধা। ইতি মেদিনী ॥ গমনং। অশুভং। ইতি ধরণী ॥

ঋতীয়া (স্ত্রী) ঘৃণার্থকঃ। জুগুপ্সা। তৎপর্য্যায়ঃ। অর্ত্তনং ২ হ্রিণীয়া ৩। ইত্যমরঃ ॥

ঋতুঃ (পুং) কালবিশেষঃ। স তু ষড়্বিধঃ যথা। মার্গপৌষৌ হিমঃ ১ মাঘফাল্গুনৌ শিশিরঃ ২ চৈত্রবৈশাখৌ বসন্তঃ ৩ জ্যেষ্ঠাষাঢ়ৌ গ্রীষ্মঃ ৪ শ্রাবণভাদ্রৌ বর্ষা ৫ আশ্বিনকার্ত্তিকৌ শরৎ ৬। ইত্যমরঃ ॥ স ত্রিবিধোঽপি। কার্ত্তিকাগ্রহায়ণপৌষমাঘাঃ শীতঃ ১ ফাল্গুনচৈত্রবৈশাখজ্যৈষ্ঠাঃ গ্রীষ্মঃ ২ আষাঢ়শ্রাবণভাদ্রাশ্বিনাঃ বর্ষা ৩। দ্বিবিধোঽপি। কার্ত্তিকাদিষণ্মাসাঃ শীতঃ ১ বৈশাখাদিষণ্মাসাঃ গ্রীষ্মঃ ২ ॥ ইতি স্মৃতিঃ ॥ * ॥ স্ত্রীকুসুমং। ইতি বিশ্বমেদিন্যৌ ॥ তৎপর্য্যায়ঃ। রজঃ ১ পুষ্পং ২ আর্ত্তবং ৩। ইত্যমরঃ ॥ দীপ্তিঃ। ইতি মেদিনী উণাদিকোষশ্চ। মাসঃ। সুবীরঃ। ইতি বিশ্বঃ ॥

ঋতুপ্রাপ্তঃ (ত্রি) ফলেগ্রহিঃ। অবন্ধ্যবৃক্ষাদিঃ। ইতি শব্দচন্দ্রিকা ॥

ঋতুমতী (স্ত্রী) ঋতুযুক্তা স্ত্রী। তৎপর্য্যায়ঃ। রজস্বলা ২ স্ত্রীধর্ম্মিণী ৩ অবী ৪ আত্রেয়ী ৫ মলিনী ৬ পুষ্পবতী ৭ উদক্যা ৮। ইত্যমরঃ ॥

ঋতুরাজঃ (পুং) বসন্তকালঃ ॥ ইতি রাজনির্ঘণ্টঃ ॥

ঋতুবৃত্তিঃ (পুং) বৎসরঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

ঋতুসন্ধিঃ (পুং) ঋতুদ্বয়সন্ধিকালঃ। স চ ঋত্বোরন্ত্যাদিসপ্তাহৌ। তথাচ বাভটঃ। ঋত্বোরন্ত্যাদিসপ্তাহাবৃতুসন্ধিরিতি স্মৃতঃ। তত্র পূর্ব্বো বিধিস্ত্যাজ্যঃ সেবনীয়ঃ পরো বিধিঃ ॥

ঋতুস্নানং (ক্লী) রজস্বলাস্ত্রিয়াঃ চতুর্থাহকর্ত্তব্যস্নানং। ইতি স্মৃতিঃ ॥ তৎস্নানানন্তরং ভর্ত্তৃবদনং দ্রষ্টব্যং নান্যস্য ভর্ত্তৃসন্নিধানে ভর্ত্তারং মনসি ধ্যাত্বা সূর্য্যং বিলোকয়েৎ। ইতি কাশীখণ্ডং ॥

ঋতে ব্য বিনা। বর্জনং। ইত্যমরঃ॥

ঋত্বিক্ [জ্] (পুং) পুরোহিতঃ। যথা। অগ্ন্যাধেয়ং পাকযজ্ঞানগ্নিষ্টোমাদিকান্মখান্। যঃ করোতি বৃতো যস্য স তস্যর্ত্বিগিহোচ্যতে॥ ইতি মানবে ২ অধ্যায়ে ১৪৩ শ্লোকঃ॥ তৎপর্য্যায়ঃ। যাজকঃ ২। ইত্যমরঃ॥ ভরতাঃ ৩ কুরবঃ ৪ বাগ্যতঃ ৫ বৃক্তবর্হিষঃ ৬ যতশ্রুচঃ ৭ মরুতঃ ৮ সবাধঃ ৯ দেবযবঃ ১০। ইত্যষ্টাবৃত্বিঙ্নামানি। ইতি বেদনির্ঘণ্টৌ ৩ অধ্যায়ঃ॥

ঋদ্ধং (ক্লী) সম্পন্নধান্যং। ইতি মেদিনী॥ পরিপক্কমর্দ্দিতধান্যং। ইত্যমরটীকায়াং ভরতঃ॥ বহুলিতধান্যং। ইতি সুভূতিঃ॥ তৎপর্য্যায়ঃ। আবসিতং ২। ইত্যমরঃ॥ অবসিতং ৩। ইতি তট্টীকা॥ সিদ্ধান্তঃ। ইতিহেমচন্দ্রঃ॥

ঋদ্ধঃ (ত্রি) সমৃদ্ধঃ। সম্পন্নঃ। ইতি মেদিনীকরহেমচন্দ্রৌ॥

ঋদ্ধিঃ (স্ত্রী) অষ্টবর্গান্তর্গতৌষধবিশেষঃ। তৎপর্য্যায়ঃ। যোগ্যং ২ সিদ্ধিঃ ৩ লক্ষ্মীঃ ৪। ইত্যমরঃ॥ প্রাণপ্রদা ৫ বৃষ্যা ৬। ইতি রত্নমালা॥ প্রাণদা ৭ জীবদাত্রী ৮ সিদ্ধা ৯ যোগ্যা ১০ চেতনীয়া ১১ রথাঙ্গী ১২ মঙ্গল্যা ১৩ লোককান্তা ১৪ জীবশ্রেষ্ঠা ১৫ যশস্যা ১৬। অস্যা গুণাঃ। মধুরত্বং। সুস্নিগ্ধত্বং। অতিতিক্তত্বং। শীতলত্বং। রুচিমেধাকারিত্বং। শ্লেষ্মকুষ্ঠক্রিমিনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ অস্যা রূপং যথা। ঋদ্ধির্বৃদ্ধিশ্চ কন্দৌ দ্বৌ ভবতঃ কোশযামলে। শ্বেতলোমান্বিতঃ কন্দো লতাজালঃ সরন্ধ্রকঃ। স এব ঋদ্ধির্বৃদ্ধিশ্চ ভেদমপ্যেতয়োর্ব্বে। তুলগ্রন্থিসমা ঋদ্ধির্বামাবর্ত্তফলা চ সা॥ বৃদ্ধিস্তু দক্ষিণাবর্ত্তফলা প্রোক্তা মহর্ষিভিঃ। ঔষধকরণে ঋদ্ধিবৃদ্ধিস্থানে বারাহীকন্দঃ অথবা বলা দেয়া। ইতি পরিভাষা॥ * ॥ সমৃদ্ধিঃ। ইতি মেদিনী॥ পার্ব্বতী। ইতি শব্দরত্নাবলী॥

ঋধ উ য ন ইর বৃদ্ধৌ। ইতি কবিকল্পদ্রুমঃ॥ য ঋধ্যতি। উ অর্দ্ধিত্বা ঋদ্ধা। ন ঋধ্নোতি। ইর আর্ধৎ আর্ধীৎ। ক্বচিত্তৃপ্তৌ চায়ং। সোঽহং প্রাগ্ভবতৈব ভূতজননীমৃধ্নোমীতি ভবভূতিঃ॥ অন্তর্ভূতণ্যর্থত্বাদিদং সিদ্ধমিতি কেচিৎ। ইতি দুর্গাদাসঃ॥

ঋফ শ দানে। শ্লাঘায়াং। হিংসায়াং। নিন্দায়াং। যুদ্ধে। ইতি কবিকল্পদ্রুমঃ॥ শ ঋফতি জনো দদাতি শ্লাঘতে হিনস্তি নিন্দতি যুধ্যতে বেত্যর্থঃ। আনর্ফ। হিংসায়ামপ্যয়মিত্যন্যে। ইতি দুর্গাদাসঃ॥

ঋভুঃ (পুং) দেবতা। ইত্যমরঃ॥

ঋভুক্ষঃ (পুং) ইন্দ্রঃ। স্বর্গঃ। বজ্রং। ইতি রায়মুকুটঃ॥

ঋভুক্ষাঃ [ন্] (পুং) ইন্দ্রঃ। ইত্যমরঃ॥

ঋম্ফ পশ বধে। ইতি রিম্ফধাতোষ্টীকায়াং দুর্গাদাসঃ॥

ঋশ গতিস্মৃত্যোঃ। সৌত্রধাতুরয়ং। ঋশ্যঃ। ইতি দুর্গাদাসঃ॥

ঋশ্যঃ (পুং স্ত্রী) মৃগবিশেষঃ। ইতি শব্দরত্নাবলী॥

ঋষ ঈ শ গতৌ। ইতি কবিকল্পদ্রুমঃ॥

হ্রস্বাদিঃ। ঈ ঋষ্টঃ। শ ঋষতি। ইতি দুর্গাদাসঃ॥

ঋষভঃ (পুং) বৃষঃ। কর্ণরন্ধ্রং। কুম্ভীরপুচ্ছঃ। উত্তরপদে শ্রেষ্ঠঃ। ইতি মেদিনী॥ পর্ব্বতবিশেষঃ। ইতি ধরণী॥ বরাহপুচ্ছঃ। আদিজিনঃ। ইতি হেমচন্দ্রঃ॥ ভগবদবতারবিশেষঃ। স তু সত্যযুগে অগ্নীধ্রসুতনাভিরাজপুত্রত্বেন জাতঃ। তস্য পুত্রঃ জড়ভরতঃ। ইতি শ্রীভাগবতং॥ অষ্টবর্গান্তর্গতৌষধবিশেষঃ। তৎপর্য্যায়ঃ। বৃষঃ ১ ঋষভকঃ ২ বীরঃ ৩। ইতি রত্নমালা॥ গোপতিঃ ৪ ধীরঃ ৫ বিষাণী ৬ দুর্দ্ধরঃ ৭ ককুদ্মান্ ৮ পুঙ্গবঃ ৯ বোঢ়া ১০ শৃঙ্গী ১১ ধুর্য্যঃ ১২ ভূপতিঃ ১৩ কামী ১৪ রক্ষপ্রিয়ঃ ১৫ উক্ষা ১৬ লাঙ্গুলী ১৭ গৌঃ ১৮ বন্ধুরঃ ১৯ গোরক্ষঃ ২০ বনবাসী ২১। অস্য গুণাঃ। মধুরত্বং। শীতত্বং। রক্তপিত্তবিরেকনাশিত্বং। শুক্রশ্লেষ্মকারিত্বং। দাহক্ষয়জ্বরহরত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ *॥ সপ্তস্বরান্তর্গতদ্বিতীয়স্বরঃ। স তু গোস্বরতুল্যস্বরঃ। চাতকস্বরতুল্যস্বর ইতি কেচিৎ। অস্যোৎপত্তিঃ। নাভিমূলাদ্যদা বর্ণ উত্থিতঃ কুরুতে ধ্বনিং। বৃষভস্যেব নির্যাতি হেলয়া ঋষভঃ স্মৃতঃ। ইতি সঙ্গীতদামোদরঃ॥

ঋষভধ্বজঃ (পুং) শিবঃ। অর্হদ্বিশেষঃ। ইতি মেদিনী॥

ঋষভী (স্ত্রী) নরাকারস্ত্রী। শূকশিম্বী। শিরালা। বিধবা। ইতি মেদিনী॥

ঋষিঃ (পুং) জ্ঞানসংসারয়োঃ পারগন্তা। শাস্ত্রকৃদাচার্য্যঃ। রিরিবির্হংসাদিশ্চ। বিদ্যাবিদগ্ধমতয়ো রিষয়ঃ প্রসিদ্ধাঃ। ইতি প্রয়োগাৎ। ইতি ভরতঃ॥ তৎপর্য্যায়ঃ। সত্যবচাঃ ২ শাপাস্ত্রঃ ৩। স তু সপ্তবিধঃ যথা। ব্যাসাদ্যা মহর্ষয়ঃ ১ ভেলাদ্যাঃ পরমর্ষযঃ ২ কণ্বাদয়ো দেবর্ষযঃ ৩ বশিষ্ঠ্যাদ্যা ব্রহ্মর্ষয়ঃ ৪ সুশ্রুতাদ্যাঃ শ্রুতর্ষয়ঃ ৫ ঋতপর্ণাদয়ো রাজর্ষয়ঃ ৬ জৈমিন্যাদ্যাঃ কাণ্ডর্ষয়ঃ ৭। ইতি ত্রিকাণ্ডশেষঃ॥ তথাচ রত্নকোষে। সপ্ত ব্রহ্মর্ষিদেবর্ষিমহর্ষিপরমর্ষয়ঃ। কাণ্ডর্ষিশ্চ শ্রুতর্ষিশ্চ রাজর্ষিশ্চ ক্রমাবরাঃ॥ *॥ মন্বন্তরভেদে সপ্তর্ষিনামানি যথা। ১ স্বায়ম্ভুবমন্বন্তরে মরীচিঃ। অত্রিঃ। অঙ্গিরাঃ। পুলস্ত্যঃ। পুলহঃ। ক্রতুঃ। বশিষ্ঠঃ। ২ স্বারোচিষে ঊর্জ্জস্তম্ভাদয়ঃ। ৩ উত্তমে বশিষ্ঠসুতাঃ প্রমদাদয়ঃ। ৪ তামসে জ্যোতির্ধামাদয়ঃ। ৫ রৈবতে হিরণ্যরোমা বেদশিরা ঊর্দ্ধবাহুরিত্যাদয়ঃ। ৬ চাক্ষুষে হর্য্যশ্মবীরকাদয়ঃ। ৭ বৈবস্বতাখ্যবর্ত্তমানমন্বন্তরে কশ্যপঃ। অত্রিঃ। বশিষ্ঠঃ। বিশ্বামিত্রঃ। গোতমঃ। জমদগ্নিঃ। ভরদ্বাজঃ॥ ৮ সাবর্ণিকে গালবঃ। দীপ্তিমান্। পরশুরামঃ। অশ্বত্থামা। কৃপঃ। ঋষ্যশৃঙ্গঃ। ব্যাসঃ। ৯ দক্ষসাবর্ণিকে দ্যুতিমদাদ্যাঃ। ১০ ব্রহ্মসাবর্ণিকে হবিষ্মৎসুকৃতসত্যজয়মূর্ত্ত্যাদ্যাঃ। ১১ ধর্ম্মসাবর্ণিকে অরুণাদয়ঃ। ১২ রুদ্রসাবর্ণিকে তপোমূর্ত্ত্যাদয়ঃ। ১৩ দেবসাবর্ণিকে নির্ম্মোকতত্ত্বদর্শাদ্যাঃ। ১৪ ইন্দ্রসাবর্ণিকে অগ্নিবাহু-

শুচিশুদ্ধমাগধাদ্যাঃ সপ্তর্ষয়ঃ। ইতি শ্রীভাগবতং ॥ * ॥ জ্যোতিঃশাস্ত্রমতে বশিষ্ঠপত্ন্যরুন্ধতীসহিত বর্ত্তমানমন্বন্তরীয়-সপ্তর্ষীণাং মঘানক্ষত্রে স্থিতিঃ তস্যোদয়ে তেষাঞ্চোদয়ো ভবতি। কাশীখণ্ডমতে শনিলোকাদূর্দ্ধং ধ্রুবলোকাৎ অধঃ তেষাং স্থিতিঃ ॥ * ॥ বেদঃ। কিরণং। ইতি মেদনী ॥ ভৃগ্বাদিমহর্ষিসন্তানঃ। যথা। ভৃগুর্ম্মরীচিরত্রিশ্চ অঙ্গিরাঃ পুলহঃ ক্রতুঃ। মনুর্দক্ষো বশিষ্ঠশ্চ পুলস্ত্যশ্চেতি তে দশ ॥ ব্রহ্মণো মানসা হ্যেতে উৎপন্নাঃ স্বয়-মীশ্বরাঃ। পরত্বেনর্ষয়স্তস্মাদ্ভূতাস্তস্মান্মহ-র্ষয়ঃ ॥ ঈশ্বরাণাং সুতাস্তেষামৃষয়স্তান্ নিবোধত। কাব্যো বৃহস্পতিশ্চৈব কশ্যপ-শ্চ্যবনস্তথা ॥ উতথ্যো বামদেবশ্চ অগস্ত্য-শ্চৌষিজস্তথা। ঔষিজস্থানে কৌশিক ইতি বা পাঠঃ। কর্দ্দমো বালিখিল্যাশ্চ বিশ্রবাঃ শক্তিবর্চ্চসঃ ॥ ইত্যেতে ঋষয়ঃ প্রোক্তা-স্তপসা ঋষিতাঙ্গতা। ইতি। তস্য ব্যুৎপত্তি-র্যথা। ঋষি হিংসাগতৌ ধাতুর্ব্বিদ্যাসত্য-তপঃশ্রুতিঃ। এষ সন্নিচয়ো যস্মাৎ ব্রাহ্ম-ণশ্চ ততঃ স্বৃষিঃ॥ বিবৃত্তিসমকালস্তু বুদ্ধ্যা ব্যক্তিমৃষিস্ত্বয়ং। ঋষন্তে পরমাং যস্মাৎ পরমর্ষিস্ততঃ স্মৃতঃ ॥ গত্যর্থাদৃষতের্ধাতো-র্নামনির্বৃত্তিকারণং। যস্মাদেষ স্বয়ম্ভূত-স্তস্মাচ্চ ঋষিতা মতা ॥ ইতি মৎস্যপুরাণে ১২০ অধ্যায়ঃ ॥

ঋষিকঃ, ঋষীকঃ (পুং) কাব্যাদিঋষিপুত্রঃ। যথা। ঋষিপুত্রা ঋষীকাস্তু মৈথুনাদ্গর্ভ-সম্ভবাৎ। পরত্বেনর্ষয়স্তে বৈ ভূতাদি ঋষিকাস্ততঃ ॥ ঋষীকাণাং সুতা যে বৈ বিজ্ঞেয়া ঋষিপুত্রকাঃ। ইত্যেতে ঋষয়ঃ প্রোক্তাস্তপসা ঋষিতাঙ্গতাঃ ॥ তেষাং পুত্রানৃষীকাংস্তু গর্ভোৎপন্নান্নিবোধত। বৎসরো নহুষশ্চৈব ভারদ্বাজশ্চ বীর্য্যবান্। ঋষির্দীর্ঘতপাশ্চৈব বৃহদ্দ্যুম্নঃ শরদ্বতঃ ॥ বাজিশ্রবাঃ সুচিত্তশ্চ শ্যাবোঽশ্বশ্চ পরা-শরঃ। শৃঙ্গী চ কশ্যপশ্চৈব রাজা বৈশ্রবণ-স্তদা ॥ ইত্যেতে ঋষিকাঃ সর্ব্বে সত্যেন ঋষিতাঙ্গতাঃ। ইতি মাৎস্যে ১২০ অধ্যায়ঃ॥

ঋষিকুল্যা (স্ত্রী) নদী। ইতি হেমচন্দ্রঃ ॥

ঋষিজাঙ্গলিকী (স্ত্রী) ঋক্ষগন্ধাবৃক্ষঃ। ঋষিজাঙ্গল ইতি খ্যাতঃ। ইতি রত্ন-মালা ॥

ঋষিপ্রোক্তা (স্ত্রী) মাষপর্ণীবৃক্ষঃ। ইতি রত্নমালা ॥

ঋষ্টিঃ (স্ত্রী) খড়্গঃ। ইত্যমরঃ ॥

ঋষ্যঃ (পুং স্ত্রী) মৃগবিশেষঃ। ইত্যমরঃ ॥

ঋষ্যকেতুঃ (পুং) অনিরুদ্ধঃ। ইতি ত্রিকাণ্ড-শেষঃ ॥ অস্য রূপান্তরাণি। ঋশ্যকেতুঃ। ঋষ্যকেতনঃ। রিষ্যকেতুঃ। বিশ্বকেতুঃ ॥

ঋষ্যগতা (স্ত্রী) ঋষ্যপ্রোক্তাবৃক্ষঃ। ইতি শব্দরত্নাবলী ॥

ঋষ্যগন্ধা (স্ত্রী) বৃক্ষবিশেষঃ। ঋষিজাঙ্গল ইতি খ্যাতঃ। তৎপর্য্যায়ঃ। ঋক্ষগন্ধা ২ ঋষিজাঙ্গলিকী ৩। ইতি রত্নমালা ॥

ঋষ্যপ্রোক্তা (স্ত্রী) শতমূলী। শূকশিম্বী। অতিবলা। ইতি মেদিনী ॥

ঋষ্যমূকঃ (পুং) পর্ব্বতবিশেষঃ। ইতি জটা-ধরঃ ॥ স তু দক্ষিণদেশে পম্পাসরোবর-

কূলে স্থিতঃ। যত্র বালিভয়াৎ সুগ্রীবাদয়ঃ পঞ্চবানরাঃ স্থিতাঃ ॥ ইতি রামায়ণং৲

ঋষ্যশৃঙ্গঃ (পুং) মুনিবিশেষঃ। স তু বিভাণ্ডকসুতঃ। তস্য ভার্য্যা লোমপাদরাজকন্যা শান্তা। ইতি রামায়ণং ॥

ঋক্ষ ন র বধে। ইতি কবিকল্পদ্রুমঃ॥ র বৈদিকঃ। ন ঋক্ষোতি। ইতি দুর্গাদাসঃ ॥

ঋক্ষং (ক্লী পুং) নক্ষত্রং। ইতি মেদিনী ॥ রাশিঃ। ইতি জ্যোতিষং ॥

ঋক্ষঃ (পুং) পর্ব্বতবিশেষঃ। ভল্লুকঃ। শোণকবৃক্ষঃ। ইতি মেদিনী ॥ শ্যোনাকপ্রভেদঃ। ইতি রাজনির্ঘণ্টঃ ॥

ঋক্ষগন্ধা (স্ত্রী) বৃক্ষবিশেষঃ। বীরতাড় ইতি খ্যাতঃ। তৎপর্য্যায়ঃ। ছগলান্ত্রী ২ আবেগী ৩ বৃদ্ধদারকঃ ৪ জুঙ্গঃ ৫ ইত্যমরঃ ॥ ঋষিজাঙ্গল ইতি খ্যাতো বৃক্ষশ্চ তৎপর্য্যায়ঃ। ঋষ্যগন্ধা ২ ঋষিজাঙ্গলিকী ৩ ইতি রত্নমালা ॥ ক্ষীরবিদারীবৃক্ষঃ। তৎপর্য্যায়ঃ। মহাশ্বেতা ২ ক্ষীরিকা ৩ ঋক্ষগন্ধিকা ৪। ইতি শব্দরত্নাবলী ॥

ঋক্ষগন্ধিকা (স্ত্রী) কৃষ্ণভূমিকুষ্মাণ্ডঃ। তৎপর্য্যায়ঃ। ক্ষীরবিদারী ২ মহাশ্বেতা ৩। ইত্যমরঃ ॥

ঋক্ষরং (ক্লী) বারিধারা। ইতি মেদিনী ॥

ঋক্ষরঃ (পুং) ঋত্বিক্। ইতি মেদিনী ॥

ঋক্ষরাজঃ (পুং) জাম্ববান্। ইতি রামায়ণং ॥

ঋক্ষেশঃ (পুং) চন্দ্রঃ। ইতি হলায়ুধঃ ॥

---

## ৠ

ৠ দীর্ঘৠকারঃ। স তু অষ্টমস্বরবর্ণঃ। অস্যোচ্চারণস্থানং মূর্দ্ধা। স প্লুতশ্চ ভবতি ॥ ইতি ব্যাকরণং ॥ ৠকারং পরমেশানি স্বয়ং পরমকুণ্ডলং। পীতবিদ্যুল্লতাকারং পঞ্চদেবময়ং সদা ॥ চতুর্জ্ঞানময়ং বর্ণং পঞ্চপ্রাণযুতং সদা। ত্রিশক্তিসহিতং বর্ণং প্রণমামি সদা প্রিয়ে। ইতি কামধেনুতন্ত্রং ॥ তস্য লেখনপ্রকারো যথা। তদ্রূপাধোগতা দক্ষা বামতঃ কুঞ্চিতা ত্বধঃ। পুনর্দক্ষগতা রেখা তাসু ব্রহ্মেশবিষ্ণবঃ ॥ মাত্রা শক্তিঃ পরা জ্ঞেয়া ধ্যানমস্য প্রবক্ষ্যতে। ইতি বর্ণোদ্ধারতন্ত্রং ॥ * ॥ তস্য নামানি যথা ৠঃ ক্রোধোঽতিথিশো বাণী বামনো গোঽপশ্রীর্ধৃতিঃ। ঊর্দ্ধমুখী নিশানাথঃ পদ্মমালা বিনষ্টধীঃ ॥ শশিনী মোচিকা শ্রেষ্ঠা দৈত্যমাতা প্রতিষ্ঠিতা। একদন্তাহ্বয়ো মাতা হরিতা মিথুনোদয়া ॥ কোমলঃ শ্যামলা মেধী প্রতিষ্ঠা পতিরষ্টমী। ব্রহ্মণ্যমিব কীলালে পাবকো গন্ধকর্ষিণী ॥ ইতি তন্ত্রশাস্ত্রং ॥ বামনাসিকা। ইতি বীজবর্ণাভিধানং ॥

ৠ গি গত্যাং। ইতি কবিকল্পদ্রুমঃ ॥ গি ৠণাতি। ঈর্ঞ্চঃ ঈর্ণিঃ। ইতি দুর্গাদাসঃ ॥

ৠ ব্য বাক্যারম্ভঃ। রক্ষা। ইতি মেদিনী ॥ নিন্দা। ভয়ং। ইতি শব্দরত্নাবলী ॥

ৠ (ক্লী) বক্ষঃ। ইতি মেদিনী ॥

ৠঃ (স্ত্রী) দেবমাতা। দানবমাতা। স্মৃতিঃ। গতিঃ। ইতি মেদিনী ॥

ৠঃ (পুং) ভৈরবঃ। দনুজঃ। ইতি মেদিনী

## ঌ

ঌ ঌকারঃ। স তু নবমস্বরবর্ণঃ। অস্যোচ্চারণস্থানং দন্তঃ। স হ্রস্বো দীর্ঘঃ প্লুতশ্চ ভবতি। ইতি ব্যাকরণং ॥ ঌকারং চঞ্চলাপাঙ্গি কুণ্ডলী পরদেবতা। অত্র ব্রহ্মাদয়ঃ সর্ব্বে তিষ্ঠন্তি সততং প্রিয়ে ॥ পঞ্চদেবময়ং বর্ণং চতুর্জ্ঞানময়ং সদা। পঞ্চপ্রাণযুতং বর্ণং তথা গুণত্রয়াত্মকং ॥ বিন্দুত্রয়াত্মকং বর্ণং পীতবিদ্যুল্লতা তথা। ইতি কামধেনুতন্ত্রং ॥ তস্য লেখনপ্রকারো যথা। রেখাধঃ কুণ্ডলী বক্রা দক্ষতো বামতো গতা। বহ্নীশবায়বস্তাসু নিত্যং সন্তি চ নিত্যশঃ॥ ইতি বর্ণোদ্ধারতন্ত্রং ॥ * ॥ অস্য নামানি যথা। ঌঃ স্থাণুঃ শ্রীধরঃ শুদ্ধো মেধা ধূম্রাবকো বিয়ৎ। দেবযোনির্দ্দক্ষগণ্ডো মহেশঃ কৌস্তুভরুদ্রকৌ ॥ বিশ্বেশ্বরো দীর্ঘজিহ্বা মহেন্দ্রো লাঙ্গলিঃ পরা। চন্দ্রিকা পার্থিবো ধূম্রা দ্বিদন্তঃ কামবর্দ্ধনঃ॥ শুচিস্মিতা চ নবমী কান্তিরায়াতকেশ্বরঃ। চিত্তাকর্ষিণী কাশশ্চ তৃতীয়কুলসুন্দরী। ইতি তন্ত্রশাস্ত্রং ॥

ঌ ব্য দেবমাতা। ইতি মেদিনী একাক্ষরকোষশ্চ ॥ ভূমিঃ। কুধ্রঃ। পর্ব্বতঃ। ইতি মেদিনী

---

## ৡ

দীর্ঘ ৡকারঃ। স তু দশমস্বরবর্ণঃ। অস্যোচ্চারণস্থানং দন্তঃ। স প্লুতশ্চ ভবতি। ইতি ব্যাকরণং॥ ৡকারং পরমেশানি পূর্ণচন্দ্রসমপ্রভং। পঞ্চদেবাত্মকং বর্ণং পঞ্চপ্রাণাত্মকং সদা॥ গুণত্রয়াত্মকং বর্ণং তথা বিন্দুত্রয়াত্মকং। চতুর্ব্বর্গপ্রদং দেবি স্বয়ং পরমকুণ্ডলী ॥ ইতি কামধেনুতন্ত্রং॥ তস্য লেখনপ্রকারো যথা। তৎক্রোড়তুল্যরূপা চ রেখা সা বৈষ্ণবী স্মৃতা। তাসু বন্দ্যাঃ সুরেশানি দুর্গা বাণী সরস্বতী ॥ ইতি বর্ণোদ্ধারতন্ত্রং ॥ * ॥ তন্নামানি যথা। ৡকারঃ কমলা হর্ষা হৃষীকেশো মধুব্রতঃ। সূক্ষ্মা কান্তির্ব্বামগণ্ডো রুদ্রঃ কামোদরী সুরা ॥ শান্তিকৃৎ স্বস্তিকা শক্রো মায়াবী লোলুপো বিয়ৎ। কুশমী সুস্থিরো মাতা নীলপীতো গজাননঃ ॥ কামিনী বিশ্বথা কালো নিত্যা শুদ্ধঃ শুচিঃ কৃতী। সূর্য্যো ধৈর্য্যোৎকর্ষিণী চ একাকী দনুজপ্রসূঃ॥ ইতি তন্ত্রশাস্ত্রং ॥

ৡ ব্য দেবনারী। নার্য্যাত্মা। মাতা। ইতি মেদিনী ॥

ৡঃ (স্ত্রী) দৈত্যস্ত্রী। ইত্যেকাক্ষরকোষঃ ॥ দনুজমাতা। কামধেনুমাতা। ইতি কশ্চিদেকাক্ষরকোষঃ ॥

ৡঃ (পুং) সর্ব্বঃ। মহাদেবঃ। ইতি কশ্চিদেকাক্ষরকোষঃ ॥

## এ

এ একারঃ। স তু একাদশস্বরবর্ণঃ। অস্যোচ্চারণস্থানং তালু কণ্ঠশ্চ। স দীর্ঘঃ প্লুতশ্চ ভবতি। ইতি ব্যাকরণং ॥ একারং পরমং দিব্যং ব্রহ্মবিষ্ণুশিবাত্মকং। রঞ্জিনীকুসুমপ্রখ্যং পঞ্চদেবময়ং সদা॥ পঞ্চ-

প্রাণাত্মকং বর্ণং তথা বিন্দুত্রয়াত্মকং। চতুর্ব্বর্গপ্রদং দেবি স্বয়ং পরমকুণ্ডলী॥ ইতি কামধেনুতন্ত্রং॥ তস্য লেখনপ্রকারো যথা। কুঞ্চিতা বামতো রেখা দক্ষকোণায়তা স্বধঃ। পুনর্ব্বামগতা সৈব তাসু বহ্নীশবায়বঃ॥ ইতি বর্ণোদ্ধারতন্ত্রং॥ *॥ অস্য নামানি যথা। একারো বাস্তবঃ শক্তির্ঝিণ্টী সোষ্ঠো ভগং মরুৎ। সূক্ষ্মা ভূতোহর্দ্ধকেশী চ জ্যোৎস্না শ্রদ্ধা প্রমর্দ্দনঃ॥ ভয়ং জ্ঞানং কৃষা ধীরা জঙ্ঘা সর্ব্বসমুদ্ভবঃ। বহ্নির্বিষ্ণুর্ভগবতী কুণ্ডলী মোহিনী বসঃ॥ যোষিদাধারশক্তিশ্চ ত্রিকোণা ঈশসংজ্ঞকঃ। সন্ধিরেকাদশী ভদ্রা পদ্মনাভঃ কুলাচলঃ॥ ইতি তন্ত্রশাস্ত্রং॥ *॥ অন্যচ্চ। একারো বামগণ্ডান্তঃ শক্তির্ঝিণ্টী ভগস্তথা। মাক্ষবীজঞ্চ বিজয়া ওষ্ঠ একাদশস্বরঃ॥ ইতি বীজবর্ণাভিধানং॥

এ ব্য স্মৃতিঃ। অসূয়া। অনুকম্পা। আমন্ত্রণং। আহ্বানং। ইতি মেদিনী॥

এঃ (পুং) বিষ্ণুঃ। ইত্যেকাক্ষরকোষঃ॥

একং (ত্রি) মুখ্যং। অন্যৎ। কেবলং। ইত্যমরঃ॥ আদিসংখ্যা। ইতি মেদিনী॥ অথৈকবাচকানি। পরমাত্মা ১ বিধুঃ ২ ক্ষিতিঃ ৩ গণেশদন্তঃ ৪ শুক্রচক্ষুঃ ৫। ইতি কবিকল্পলতা॥ অগ্নিঃ ৬ সূর্য্যঃ ৭ দেবরাজঃ ৮ যমঃ ৯। ইতি মহাভারতে বনপর্ব্ব॥

এককঃ (ত্রি) অসহায়ঃ। একলা ইতি ভাষা। তৎপর্য্যায়ঃ। একঃ ২ একাকী ৩। ইত্যমরঃ॥

এককুণ্ডলঃ (পুং) বলরামঃ। কুবেরঃ। ইতি মেদিনী॥

একগুরুঃ (পুং) সতীর্থঃ। একগুরুর শিষ্য ইতি ভাষা। ইত্যমরঃ॥

একচক্রং (ক্লী) পুরীবিশেষঃ। তৎপর্য্যায়ঃ। হরিগৃহং ২ শুম্ভপুরী ৩। ইতি ত্রিকাণ্ডশেষঃ॥

একচরঃ (পুং) হিংস্রপশুবিশেষঃ। গণ্ডার ইতি ভাষা। তৎপর্য্যায়ঃ। বার্দ্ধীনসঃ ২ গণোৎসাহঃ ৩ গণ্ডকঃ ৪। ইতি ত্রিকাণ্ডশেষঃ॥

একচারী [ন্] (পুং) বুদ্ধসহচারী। ইতি ত্রিকাণ্ডশেষঃ॥

একজটা (স্ত্রী) উগ্রতারা। তস্যা আবির্ভাবো যথা। সর্ব্বে সুরগণাঃ সেন্দ্রাস্ততো গত্বা হিমাচলং। গঙ্গাবতারনিকটে মহামায়াং প্রতুষ্টুবুঃ॥ অনেকসংস্তুতা দেবী তদা সর্ব্বামরোৎকরৈঃ। মাতঙ্গবনিতামূর্ত্তি র্ভূত্বা দেবানপৃচ্ছত॥ যুষ্মাভিরমরৈরত্র স্তূয়তে কা চ ভাবিনী। কিমর্থমাগতা যূয়ং মাতঙ্গস্যাশ্রমং প্রতি॥ এবং ব্রুবন্ত্যা মাতঙ্গ্যাস্তস্যাস্ত কায়কোষতঃ। সমুদ্ভূতাব্রবীদ্দেবী মাং স্তবন্তি সুরা ইতি॥ শুম্ভো নিশুম্ভো হ্যসুরৌ বাধেতে সকলান্ সুরান্। তস্মাত্তয়োর্ব্বধায়াহং স্তূয়েহদ্য সকলৈঃ সুরৈঃ॥ বিনিঃসৃতায়াং দেব্যাস্তু মাতঙ্গ্যাঃ কায়তস্তদা। ভিন্নাঞ্জননিভা কৃষ্ণা সাভূৎ গৌরী ক্ষণাদপি॥ কালিকাখ্যাভবৎ সাপি হিমাচলকৃতাশ্রয়া। তামুগ্রতারামৃষয়ো বদন্তীহ মনীষিণঃ॥ উগ্রাদপি ভয়াৎ

ত্রাতি যস্মাদ্ভক্তান্ সদাম্বিকা। এতস্যাঃ প্রথমং বীজং কথিতং তন্ত্রমেব চ ॥ এষৈবৈকজটা খ্যাতা যস্মাত্তস্যা জটাধিকা। শৃণুতং চিন্তনং চাস্যাঃ সম্যক্ বেতালভৈরবৌ ॥ যথা ধ্যাত্বা মহাদেবীং ভক্তঃ প্রাপ্নোত্যভীপ্সিতং। চতুর্ভুজাং কৃষ্ণবর্ণাং মুণ্ডমালাবিভূষিতাং ॥ খড়্গং দক্ষিণপাণিভ্যাং বিভ্রতীন্দীবরং দ্বয়ং। কর্ত্রীঞ্চ খর্পরঞ্চৈব ক্রমাদ্বামেন বিভ্রতীং ॥ খং লিখন্তীং জটামেকাং বিভ্রতীং শিরসা স্বয়ং। মুণ্ডমালাধরাং শীর্ষে গ্রীবায়ামপি সর্ব্বদা ॥ বক্ষসা নাগহারন্তু বিভ্রতীং রক্তলোচনাং। কৃষ্ণবস্ত্রধরাং কট্যাং ব্যাঘ্রাজিনসমন্বিতাং ॥ বামপাদং শবহৃদি সংস্থাপ্য দক্ষিণং পদং। বিন্যস্য সিংহপৃষ্ঠে তু লেলিহানাসবং স্বয়ং ॥ সাট্টহাসমহাঘোরা রাবযুক্তাতিভীষণা। চিন্ত্যোগ্রতারা সততং ভক্তিমদ্ভিঃ সুখেপ্সুভিঃ ॥*॥ এতস্যাঃ সংপ্রবক্ষ্যামি যা অষ্টৌ যোগিনীস্তু তাঃ। মহাকাল্যথ রুদ্রাণী উগ্রা ভীমা তথৈব চ ॥ ঘোরা চ ভ্রামরী চৈব মহারাত্রিশ্চ সপ্তমী ভৈরবী চাষ্টমী প্রোক্তা যোগিনীস্তাঃ প্রপূজয়েৎ ॥ ইতি কালিকাপুরাণে ৬১ অধ্যায়ঃ ॥

একজন্মা [ ন্ ] ( পুং ) রাজা। ইতি ত্রিকাণ্ডশেষঃ ॥

একতমঃ ( ত্রি ) বহূনাং মধ্যে একঃ। ইতি ব্যাকরণং ॥

একতরঃ ( ত্রি ) দ্বয়োর্ম্মধ্যে একঃ। ইতি ব্যাকরণং। ভিন্নঃ। ইত্যমরটীকায়াং ভরতঃ ॥

একতা ( স্ত্রী ) একত্বং। ঐক্যং। ইতি ব্যাকরণং ॥

একতানঃ ( ত্রি ) একাগ্রঃ। একবিষয়াসক্তচিত্তঃ। ইত্যমরঃ ॥ একতালে পুং ইত্যমরটীকায়াং স্বামী ॥

একতালঃ ( পুং ) সমন্বিতলয়ঃ। নৃত্যগীতবাদ্যানাং সাম্যং যত্র। সমতাল ইতি যস্যাখ্যা। ইত্যমরভরতৌ ॥

একতীর্থী [ ন্ ] ( পুং ) সতীর্থঃ। গুরুভাই ইতি ভাষা ॥

একত্র ব্য একস্মিন্। একসঙ্গে ইতি ভাষা। ইতি ব্যাকরণং ॥

একদংষ্ট্রঃ ( পুং ) গণেশঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

একদন্তঃ ( পুং ) গণেশঃ। ইত্যমরঃ ॥

একদা ব্য একস্মিন্ কালে। তৎপর্য্যায়ঃ। যুগপৎ ২। ইত্যমরঃ ॥

একদৃক্ [ শ্ ] ( পুং ) মহাদেবঃ। কাকঃ। কাণে ত্রি। ইতি হেমচন্দ্রঃ ॥

একদেহঃ ( পুং ) বুধগ্রহঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

একধা ব্য একপ্রকারং। ইতি ব্যাকরণং ॥

একধুরঃ ( ত্রি ) একভারবাহকগবাদিঃ। একপিঠা গরু ইতি ভাষা। তৎপর্য্যায়ঃ। একধুরীণঃ ২ একধুরাবহঃ ৩। ইত্যমরঃ ॥

একধুরাবহঃ ( ত্রি ) একধুরঃ। ইত্যমরঃ ॥

একধুরীণঃ ( ত্রি ) একধুরঃ। একভারবোঢ়া। ইত্যমরঃ ॥ একস্য রথস্য লাঙ্গলাদের্ব্বা ধুরং বহতি যঃ। ইত্যমরটীকায়াং ভরতঃ ॥

একনটঃ ( পুং ) মুখ্যনটঃ। তৎপর্য্যায়ঃ

কথকঃ ২। ইতি ত্রিকাণ্ডশেষঃ ॥ কথাপ্রাণঃ ৩। ইতি শব্দরত্নাবলী ॥

একপত্নী (স্ত্রী) পতিব্রতা। ইতি ত্রিকাণ্ডশেষঃ

একপত্রিকা (স্ত্রী) গন্ধপত্রবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

একপদং (ক্লী) তৎকালঃ। ইতি মেদিনী ॥

একপদঃ (পুং) শৃঙ্গারবন্ধবিশেষঃ। তস্য লক্ষণং। পাদমেকং হৃদি স্থাপ্য দ্বিতীয়ং স্কন্ধসংস্থিতং। স্তনৌ ধৃত্বা রমেৎ কামী বন্ধস্ত্বেকপদঃ স্মৃতঃ ॥ ইতি রতিমঞ্জরী ॥

একপদী (স্ত্রী) পন্থাঃ। ইত্যমরঃ ॥

একপর্ণিকা (স্ত্রী) দুর্গা। যথা। অপর্ণাশা নিরাহারা একাশী একপর্ণিকা। পাটলা পাটলাহারা দেবী লোকেষু গীয়তে ॥ ইতি দেবীপুরাণে দেবীনিরুক্তং নাম ৪৫ অধ্যায়ঃ ॥

একপক্ষঃ (ত্রি) সহায়ঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

একপাৎ [দ্] (পুং) শিবঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

একপিঙ্গঃ (পুং) কুবেরঃ। ইত্যমরঃ ॥

একপিঙ্গলঃ (পুং) কুবেরঃ। ইত্যমরটীকায়াং ভরতঃ ॥

একভক্তব্রতং (ক্লী) রাত্রিভোজনাভাববিশিষ্টদিবাভোজনং। তথাচ স্কন্দপুরাণে। দিনার্দ্ধসময়েঽতীতে ভুজ্যতে নিয়মেন যৎ। একভক্তমিতি প্রোক্তং রাত্রৌ তন্ন কদাচন ॥

একমূলা (স্ত্রী) শালপর্ণী। অতসী। ইতি বৈদ্যকং ॥

একযষ্টিকা (স্ত্রী) হারবিশেষঃ। একনরি হার ইতি ভাষা। তৎপর্য্যায়ঃ। একাবলী ২। ইত্যমরঃ ॥

একরজঃ (পুং) ভৃঙ্গরাজবৃক্ষঃ। ইতি জটাধরঃ ॥

একলঃ (ত্রি) একাকী। একলা ইতি ভাষা। ইতি পদ্যাবলী ॥

একলিঙ্গং (ক্লী) স্থানবিশেষঃ। তথাচ আগমে। পঞ্চক্রোশান্তরে যত্র ন লিঙ্গান্তরমীক্ষ্যতে। তদেকলিঙ্গমাখ্যাতং তত্র সিদ্ধিরনুত্তমা ॥

একলিঙ্গঃ (পুং) কুবেরঃ। ইতি শব্দরত্নাবলী ॥

একবর্ণী (স্ত্রী) বাদ্যভেদঃ। তৎপর্য্যায়ঃ। করতালী ২ কঙ্কমালা ৩ কলঙ্কষা ৪। ইতি শব্দরত্নাবলী ॥

একবর্ষিকা (স্ত্রী) একহায়নী গৌঃ। এক-বৎসরের বক্না ইতি ভাষা। ইতি হেমচন্দ্রঃ ॥

একবাদঃ (পুং) ডিণ্ডিমবাদ্যং। ইতি শব্দরত্নাবলী ॥

একবিংশতিঃ (স্ত্রী) একাধিকবিংশতিসংখ্যা। একুশ ইতি ভাষা। যথা। নিযুক্তস্তু যথান্যায়ং যো মাংসং নাত্ত্যলোলুপঃ। স প্রেত্য পশুতাং যাতি সম্ভবানেকবিংশতিং ॥ ইতি তিথ্যাদিতত্ত্বধৃতমনুবচনং ॥

একবীরঃ (পুং) বৃক্ষভেদঃ। তৎপর্য্যায়ঃ। মহাবীরঃ ২ সরুদ্বীরঃ ৩ সুবীরকঃ ৪। অস্য গুণাঃ। মদকারিত্বং। অত্যুষ্ণত্বং। কটুত্বং। তোদবাতনাশিত্বং। চটুলীকটিপৃষ্ঠাদিচলপক্ষাভিঘাতহারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

একবৃক্ষঃ ( পুং ) স্থানভেদঃ । যথা । চতুঃক্রোশান্তরে যত্র ন বৃক্ষান্তরমীক্ষ্যতে । একবৃক্ষঃ স বিজ্ঞেয় ইতি আগমঃ ॥

একশফঃ ( পুং ) ঘোটকঃ । উতি ত্রিকাণ্ডশেষঃ ॥ একখুরজন্তুমাত্রং । যথা । খরোঽশ্বোঽশ্বতরো গৌরঃ শরভশ্চমরী তথা । এতে চৈকশফাঃ ক্ষত্তঃ শৃণু পঞ্চনখান্ পশূন্ ॥ ইতি শ্রীভাগবতং ॥

একশৃঙ্গঃ ( পুং ) বিষ্ণুঃ । ইতি ত্রিকাণ্ডশেষঃ ॥ একশৃঙ্গযুক্তপশুমাত্রং ॥

একষষ্টিঃ ( স্ত্রী ) সংখ্যাসংখ্যেয়বিশেষঃ । ৬১ একষট্টি ইতি ভাষা । ইত্যমরঃ ॥

একসর্গঃ ( ত্রি ) একাগ্রঃ । ইত্যমরঃ ॥

একসূত্রঃ ( পুং ) ডমরুবাদ্যং । ইতি শব্দরত্নাবলী ॥

একহায়নী ( স্ত্রী ) একবর্ষীয়গবী । এক-বৎসরের বাছুর ইতি ভাষা । তৎপর্য্যায়ঃ । একাব্দা ২ । ইত্যমরঃ ॥

একা ( স্ত্রী ) দুর্গা । যথা । একা গুণার্থা ত্রৈলোক্যে তস্মাদেকা স উচ্যতে । দেবী সা পরমার্থেতি বদন্তে ভিন্নদর্শিনঃ ॥ ইতি । একা সা তু পৃথক্‌ত্বেন বিনা সর্ব্বত্র বিশ্রুতা । যথা তু ব্যজ্যতে বর্ণৈর্বিচিত্রৈঃ স্ফটিকো মণিঃ ॥ তথা গুণবশাদ্দেবী নানাভাবেষু বর্ণ্যতে ॥ ইতি চ দেবীপুরাণে দেবীনিরুক্তং নাম ৪৫ অধ্যায়ঃ ॥

একাকী [ ন্ ] (ত্রি) সহায়রহিতঃ । অসহায়ঃ । যথা । একাদাকিন্ চাসহায়ে । ইতি সংক্ষিপ্তসারব্যাকরণং ॥ একলা ইতি ভাষা । তৎপর্য্যায়ঃ । একঃ ২ এককঃ ৩ । ইত্যমরঃ ॥ একলঃ ৪ । ইতি শব্দরত্নাবলী ॥

একাগ্রঃ ( ত্রি ) অনন্যচিত্তঃ । তৎপর্য্যায়ঃ । একতানঃ ২ অনন্যবৃত্তিঃ ৩ একায়নঃ ৪ একসর্গঃ ৫ একাগ্র্যঃ ৬ একায়নগতঃ ৭ । ইত্যমরঃ ॥ অনাকুলঃ । ইতি মেদিনী ॥

একাগ্র্যঃ ( ত্রি ) একাগ্রঃ । ইত্যমরঃ ॥

একাঙ্গং ( ক্লী ) চন্দনং । ইতি হারাবলী ॥

একাঙ্গঃ ( পুং ) বুধগ্রহঃ । ইতি ত্রিকাণ্ডশেষঃ ॥

একাদশ [ ন্ ] (ত্রি) সংখ্যাবিশেষঃ । ১১ এগার ইতি ভাষা । তদ্বাচকৌ । রুদ্রঃ ১ দুর্য্যোধনসেনাপতিঃ ২ । ইতি কবিকল্পদ্রুমঃ ॥

একাদশী ( স্ত্রী ) তিথিবিশেষঃ । সা তু শুক্লপক্ষে সূর্য্যমণ্ডলাৎ চন্দ্রমণ্ডলস্য নির্গমরূপৈকাদশকলাক্রিয়ারূপা । কৃষ্ণপক্ষে সূর্য্যমণ্ডলে চন্দ্রমণ্ডলস্য প্রবেশরূপৈকাদশকলাক্রিয়ারূপা । তৎপর্য্যায়ঃ । হরিবাসরং ২ হরিদিনং ৩ । ইতি স্মৃতিঃ ॥ তত্র জাতফলং । ক্রোধোৎকটঃ ক্লেশসহঃ সুভাষী যাগাদিকর্ত্তা স্বজনৈকভর্ত্তা । মহামতির্দেবগুরুপ্রিয়ঃ স্যাদেকাদশীজো মনুজোঽতিহৃষ্টঃ॥ ইতি কোষ্ঠীপ্রদীপঃ ॥ * ॥ তত্র উপবাসবিধিঃ । পারণদিনে দ্বাদশীলাভে সর্ব্ব এব পূর্ণাং ত্যক্ত্বা খণ্ডামুপবসেয়ুঃ । তদলাভে গৃহী পূর্ব্বাং তনন্যঃ পরাং বিধবাপি উপবসেৎ । পূর্ণা তু । উদয়াৎ প্রাক্ যদা বিপ্র মুহূর্ত্তদ্বয়সংযুতা । সংপূর্ণৈকাদশী জ্ঞেয়া তত্রৈবোপবসেৎ গৃহী ॥ ইতি গারুড়োক্তা ॥ যদা তু পূর্ব্বদিনে

দশম্যা পরদিনে দ্বাদশ্যা যুক্তৈকাদশী তদা
উত্তরামুপোষ্য দ্বাদশ্যাং পারণং কুর্য্যাৎ।
পরদিনে দ্বাদশ্যনির্গমে ত্রয়োদশ্যামপি।
যদা তু সূর্য্যোদয়ানন্তরং দশমীযুতৈকাদশী
অথচ পরদিনে ন নিঃসরতি তদা তাং
বিহায় দ্বাদশীমুপবসেৎ। যদা তু সূর্য্যোদয়-
প্রাক্কালীনদশমীবিদ্ধৈকাদশী পরদিনে চ
ন নিঃসরতি তদা তামুপবসেৎ। যদা
তদ্বিধা সতী পরদিনেঽপি নিঃসরতি তৎ-
পরদিনে চ দ্বাদশী তদা তাং বিহায় খণ্ডা-
মুপোষ্য দ্বাদশ্যাং পারয়েৎ। যদা তূভয়দিনে
তদ্বিধৈকাদশী পরদিনে চ ন দ্বাদশী তদা
ষষ্টিদণ্ডাত্মিকাং বিদ্ধামুপোষ্য পরদিনে
দ্বাদশ্যাদ্যপাদমুত্তীর্য্য পারয়েৎ। বৈষ্ণবস্তু
তত্রাপি শুক্লপক্ষে পরামুপোষ্য ত্রয়োদশ্যাং
পারয়েৎ। সর্ব্বস্যাং কৃষ্ণৈকাদশ্যাং বৈষ্ণ-
বানাং সপুত্ত্রাণাং গৃহস্থানামপ্যুপবাসো
নিত্যঃ। ব্রাহ্মণস্য বিশেষতো নিত্যঃ।
বৈষ্ণবেতরেষাং তাদৃশানাং হরিশয়নমধ্য-
বর্ত্তিনীষু কৃষ্ণৈকাদশীষু উপবাসো নিত্যঃ। অ-
পুত্ত্রবতাং গৃহিণাস্তু সর্ব্বাস্বেব নিত্যাধিকারঃ।
কাম্যোপবাসে ত্ববিশেষেণৈব সর্ব্বেষা-
মধিকারঃ। নিত্যোপবাসে রবিশুক্রাদি-
দোষো নাস্তি। অষ্টাব্দাদধিকো মর্ত্ত্যো-
ঽপূর্ণাশীতিবৎসরো নিত্যাধিকারী। বিধবা-
নাস্তু সর্ব্বাস্বেব নিত্যাধিকারঃ তত্র মল-
মাসাদিদোষো নাস্তি। ইত্যেকাদশীতত্ত্বোক্ত-
ব্যবস্থা॥ * ॥ অথ হরিভক্তিবিলাসোক্তৈ-
কাদশীব্যবস্থা লিখ্যতে। তত্রাদৌ উপ-
বাসপূর্ব্বদিনকৃত্যং। প্রাতঃস্নানাদিকং কৃত্বা
সুবেশো ধৌতবস্ত্রকঃ। ব্রতং সংকল্প্য
কুর্ব্বীত বৈষ্ণবৈশ্চ মহোৎসবং॥ ইতি
কারিকা॥ সংকল্পমন্ত্রঃ। দশমীদিনমারভ্য
করিষ্যেঽহং ব্রতং তব। ত্রিদিনং দেব-
দেবেশ নির্ব্বিঘ্নং কুরু কেশব॥ * ॥ তত্র
রুক্মাঙ্গদরাজবাক্যং নারদীয়ে। প্রাতর্হরি-
দিনং লোকাস্তিষ্ঠধ্বং চৈকভোজনাঃ।
অক্ষারলবণাঃ সর্ব্বে হবিষ্যান্ননিষেবিনঃ॥
অবনীতল্পশয়নাঃ প্রিয়াসঙ্গবিবর্জ্জিতাঃ।
স্মরধ্বং দেবমীশানং পুরাণং পুরুষো-
ত্তমং॥ * ॥ অথান্যনিয়মাঃ। স্কান্দে।
কাংস্যং মাংস্যং মসূরঞ্চ ক্ষৌদ্রং চানৃত-
ভাষণং। পুনর্ভোজনমায়াসং দশম্যাং পরি-
বর্জ্জয়েৎ॥ পারণদিনোক্তনিষিদ্ধদ্রব্যান্য-
ত্রাপি নিষিদ্ধানি॥ * ॥ ততো ব্রতস্য
নিত্যত্বমাহ কণ্বঃ। একাদশ্যামুপবসেন্ন
কদাচিদতিক্রমেৎ॥ আগ্নেয়ঞ্চ। উপোষ্যৈ-
কাদশীং রাজন্ যাবদায়ুঃপ্রবৃত্তিভিঃ॥ * ॥
ভোজননিষেধো নারদীয়ে পাদ্মোত্তরখণ্ডে
চ॥ রটন্তীহ পুরাণানি ভূয়োভূয়ো বরা-
ননে। ন ভোক্তব্যং ন ভোক্তব্যং
সংপ্রাপ্তে হরিবাসরে॥ * ॥ পক্ষদ্বয়েঽপি
নিত্যত্বং। বিষ্ণুরহস্যং। শুক্লে বা যদি বা
কৃষ্ণে বিষ্ণুপূজনতৎপরঃ। একাদশ্যাং
ন ভুঞ্জীত পক্ষয়োরুভয়োরপি॥ * ॥
সংক্রান্ত্যাদাবপি নিত্যত্বং। কাত্যায়নঃ।
সংক্রান্তৌ রবিবারে বা যদা চৈকাদশী
ভবেৎ। উপোষ্যা সা মহাপুণ্যা সর্ব্বপাপ-
হরা তিথিঃ॥ * ॥ উপবাসদিনে শ্রাদ্ধ-
নিষেধঃ। পাদ্মোত্তরখণ্ডে। একাদশ্যান্তু

প্রাপ্তায়াং মাতাপিত্রোর্মৃতেহহনি। দ্বাদশ্যাং তৎ প্রদাতব্যং নোপবাসদিনে কচিৎ ॥*॥ অথ অধিকারিণঃ। পাদ্মোত্তরখণ্ডে। বর্ণানামাশ্রমাণাঞ্চ স্ত্রীণাঞ্চ বরবর্ণিনি। একাদশ্যুপবাসস্তু কর্ত্তব্যো নাত্র সংশয়ঃ ॥ কাত্যায়নস্মৃতৌ চ। অষ্টবর্ষাধিকো মর্ত্যো হপূর্ণাশীতিবৎসরঃ। একাদশ্যামুপবসেৎ পক্ষয়োরুভয়োরপি ॥ * ॥ অশক্তৌ প্রতিনিধিঃ। বায়ুপুরাণে। উপবাসে ত্বশক্তস্য আহিতাগ্নেরথাপি বা। পুত্রান্ বা কারয়েদন্যান্ ব্রাহ্মণান্ বাপি কারয়েৎ ॥ অথবা বিপ্রমুখ্যেভ্যো দানং দদ্যাৎ স্বশক্তিতঃ। উপবাসস্তু কুর্ব্বাণঃ পুণ্যং শতগুণং ভবেৎ॥ মার্কণ্ডেয়পুরাণে চ। একভক্তেন নক্তেন বালবৃদ্ধাতুরঃ ক্ষিপেৎ। পয়োমূলফলৈর্ব্বাপি ন নির্দ্বাদশিকো ভবেৎ ॥ * ॥ অনুকল্পাপবাদঃ। গরুড়পুরাণে। মচ্ছয়নে মদুত্থানে মৎপার্শ্বপরিবর্ত্তনে। ফলমূলজলাহারী হৃদি শল্যং মমার্পয়েৎ ॥ * ॥ একাদশীমাহাত্ম্যং। তত্ত্বসাগরে। একাদশীসমং কিঞ্চিৎ পাবনং ন চ বিদ্যতে। স্বর্গমোক্ষপ্রদা হ্যেষা রাজ্যপুত্রপ্রদায়িনী ॥ গারুড়ে চ। একাদশীব্রতং ভক্ত্যা যঃ করোতি নরঃ সদা। স বিষ্ণুলোকং ব্রজতি যাতি বিষ্ণোঃ সরূপতাং ॥ * ॥ উপবাসদিননির্ণয়ঃ। সৌরধর্ম্মোত্তরে। একাদশীমুপবসেৎ দ্বাদশীমথবা পুনঃ। বিমিশ্রাং বাপি কুর্ব্বীত ন দশম্যা যুতাং কচিৎ ॥*॥ বিদ্ধোপবাসদোষমাহ বশিষ্ঠঃ। দশম্যেকাদশী যত্র তত্র নোপবসেদ্বুধঃ। অপত্যানি বিনশ্যন্তি স্বর্গলোকং ন গচ্ছতি ॥ * ॥ দ্বাদশ্যুপবাসফলং। স্কান্দে। ঊর্দ্ধং হরিদিনং ন স্যাৎ দ্বাদশীং গ্রাহয়েত্ততঃ। দ্বাদশ্যামুপবাসোহত্র ত্রয়োদশ্যাস্তু পারণং॥ এবং কুর্ব্বন্ নরো ভক্ত্যা বিষ্ণুসাযুজ্যমাপ্নুয়াৎ। অন্যথা কুরুতে যস্তু স যাতি নরকং ধ্রুবং ॥ * ॥ সম্পূর্ণালক্ষণেন বিদ্ধালক্ষণং। ভবিষ্যপুরাণে। আদিত্যোদয়বেলায়াঃ প্রাঙ্মুহূর্ত্তদ্বয়ান্বিতা। একাদশী চ সংপূর্ণা বিদ্ধান্যা পরিকীর্ত্তিতা ॥ * ॥ অরুণোদয়বিদ্ধাপরিত্যাগমাহ কণ্বঃ। অরুণোদয়বেলায়াং দশমীসংযুতা যদি। অত্রোপোষ্যা দ্বাদশী স্যাৎ ত্রয়োদশ্যাস্তু পারণং ॥ * ॥ বেধশ্চতুর্ব্বিধঃ। ব্রহ্মবৈবর্ত্তে। অরুণোদয়বেধঃ স্যাৎ সার্দ্ধস্তু ঘটিকাত্রয়ং। অতিবেধো দ্বিঘটিকঃ প্রভাসন্দর্শনাদ্রবেঃ ॥ মহাবেধোহপি তত্রৈব দৃশ্যতেহর্কো ন দৃশ্যতে। তুরীয়স্তত্র বিহিতো যোগঃ সূর্য্যোদয়ে বুধৈঃ ॥ * ॥ অরুণোদয়বিদ্ধোপবাসদোষঃ। পাদ্মে। অরুণোদয়কালে তু বেধং দৃষ্ট্বা চতুর্ব্বিধং। মদ্দিনং যে প্রকুর্ব্বন্তি যাবদাহূত নারকাঃ॥*॥ শুদ্ধাবিশেষপরিত্যাগঃ। গারুড়ে। সম্পূর্ণৈকাদশী যত্র প্রভাতে পুনরেবসা। বৈষ্ণবী চ ত্রয়োদশ্যাং ঘটিকৈকাপি দৃশ্যতে॥ গৃহস্থোহপি পরাং কুর্য্যাৎ পূর্ব্বাং নোপবসেত্তদা ॥*॥ অথাষ্টমহাদ্বাদশীনাং বিশেষতো নিরূপণং। ব্রহ্মবৈবর্ত্তে। উন্মীলনী বঞ্জুলী চ ত্রিস্পৃশা পক্ষবর্দ্ধিনী। জয়া চ বিজয়া চৈব জয়ন্তী পাপনাশিনী॥ দ্বাদশ্যোহষ্টৌ

মহাপুণ্যাঃ সর্ব্বপাপহরা দ্বিজ। তিথিযোগেন জায়ন্তে চতস্রশ্চাপরাস্তথা নক্ষত্রযোগাচ্চ বলাৎ পাপং প্রশময়ন্তি তাঃ ॥ * ॥ অথোন্মীলনী। ব্রহ্মবৈবর্ত্তে। একাদশী চ সংপূর্ণা বর্দ্ধতে পুনরেব সা। দ্বাদশী চ ন বর্দ্ধেত কথিতোন্মীলনী চ সা ॥ পাদ্মে ॥ সর্ব্বত্রৈকাদশী কার্য্যা দ্বাদশীমিশ্রিতা নরৈঃ। প্রাতর্ভবতু বামা বা যতো নিত্যমুপোষণং ॥ * ॥ অথ বঞ্জুলী। ব্রহ্মবৈবর্ত্তে। দ্বাদশ্যেব বিবর্দ্ধেত নচৈবৈকাদশী যদা। বঞ্জুলীতি ভৃগুশ্রেষ্ঠ কথিতা পাপনাশিনী॥ ভাগবতাদিতন্ত্রে। সংপূর্ণৈকাদশী ত্যাজ্যা পরতো দ্বাদশী যদি। উপোষ্যা দ্বাদশী শুদ্ধা দ্বাদশ্যামেব পারণং ॥ * ॥ অথ ত্রিস্পৃশা। ব্রহ্মবৈবর্ত্তপুরাণে। অরুণোদয় আদ্যা স্যাৎ দ্বাদশী সকলং দিনং। অন্তে ত্রয়োদশী প্রাতস্ত্রিস্পৃশা সা হরেঃ প্রিয়া ॥ নারদীয়ে। একাদশী দ্বাদশী চ রাত্রিশেষে ত্রয়োদশী। ত্রিস্পৃশা নাম সা প্রোক্তা ব্রহ্মহত্যাং ব্যপোহতি॥*॥ অথ পক্ষবর্দ্ধিনী। দর্শশ্চ পৌর্ণমাসী চ সংপূর্ণা বর্দ্ধতে যদি। দ্বিতীয়েঽহ্নি দ্বিজশ্রেষ্ঠ সা ভবেৎ পক্ষবর্দ্ধিনী ॥ * ॥ ব্রহ্মবৈবর্ত্তে। কুহূরাকে যদা বৃদ্ধিং প্রয়াতে পক্ষবর্দ্ধিনী। বিহায়ৈকাদশীং তত্র দ্বাদশীং সমুপোষয়েৎ ॥ * ॥ অথ জয়াদিঃ। ব্রহ্মবৈবর্ত্তে। পুষ্যশ্রবণপুষ্যাদ্যরোহিণীসংযুতাস্তু তাঃ। উপোষিতাঃ সমফলা দ্বাদশ্যোঽষ্টৌ পৃথক্ পৃথক্ ॥ * ॥ অথোপবাসদিনকৃত্যং। দেবলঃ। গৃহীত্বৌডুম্বরং পাত্রং বারিপূর্ণমুদঙ্মুখঃ। উপবাসন্তু গৃহ্ণীয়াদযদ্বা সংকল্পয়েদ্বুধঃ ॥ তত্র সঙ্কল্পমন্ত্রঃ। একাদশ্যাং নিরাহারঃ স্থিত্বাহমপরেঽহনি। ভোক্ষ্যামি পুণ্ডরীকাক্ষ শরণং মে ভবাচ্যুত ॥ * ॥ পুষ্পাঞ্জলিত্রয়দানং মন্ত্রপূতজলপানঞ্চাহ মার্কণ্ডেয়ঃ। অষ্টাক্ষরেণ মন্ত্রেণ ত্রিজপ্তেনাভিমন্ত্রিতং। উপবাসফলং প্রেপ্সুঃ পিবেত্তোয়ং সমাহিতঃ॥ দেবার্চ্চনং ততঃ কৃত্বা পুষ্পাঞ্জলিমথাপি বা। সংকল্পমন্ত্রমুচ্চার্য্য দেবায় বিনিবেদয়েৎ ॥ * ॥ সংকল্পাদৌ বিশেষঃ। নারদীয়ে। পূর্ব্বায়াঃ সঙ্গদোষেণৈকাদশ্যাঃ স্নানপূজনে। বর্জ্জয়ন্তি নরাঃ পূর্ব্বান্ যামাংশ্চ চতুরো দ্বিজ॥ তদূর্দ্ধং স্নানপূজাদি কর্ত্তব্যং ভদুপোষিতৈঃ। ন দিবা শুদ্ধিমাপ্নোতি তদা রাত্রৌ বিধীয়তে ॥ দিনকার্য্যমশেষঞ্চ কর্ত্তব্যং শর্ব্বরীমুখে ॥ * ॥ পূজাজাগরণবিধিঃ। ব্রাহ্মে। একাদশ্যামুভৌ পক্ষৌ নিরাহারঃ সমাহিতঃ। স্নাত্বা সম্যগ্বিধানেন ধৌতবাসা জিতেন্দ্রিয়ঃ ॥ সংপূজ্য বিধিবদ্‌বিষ্ণুং শ্রদ্ধয়াতিসমাহিতঃ। পুষ্পৈর্গন্ধৈস্তথা ধূপৈর্দীপৈর্নৈবেদ্যকৈঃ পরৈঃ ॥ উপহারৈর্ব্বহুবিধৈর্জপহোমপ্রদক্ষিণৈঃ। স্তোত্রৈর্নানাবিধৈর্নৃত্যগীতবাদ্যৈর্মনোরমৈঃ॥ এবং সংপূজ্য বিধিবদ্রাত্রৌ কুর্য্যাৎ প্রজাগরং ॥ * ॥ অথজাগরণলক্ষণং। স্কান্দে। শৃণু নারদ বক্ষ্যামি জাগরস্য তু লক্ষণং। যেন বিজ্ঞাতমাত্রেণ দুর্লভো ন জনার্দ্দনঃ ॥ গীতং বাদ্যঞ্চ নৃত্যঞ্চ পুরাণপঠনস্তথা।

ধূপং দীপঞ্চ নৈবেদ্যং পুষ্পগন্ধানুলেপনং॥ ফলমর্ঘ্যঞ্চ শ্রদ্ধা চ দানমিন্দ্রিয়নিগ্রহঃ। সত্যান্বিতং বিনিদ্রঞ্চ মুদাযুক্তং ক্রিয়ান্বিতং ॥ সাশ্চর্য্যঞ্চৈব সোৎসাহং পাপালস্যাদিবর্জ্জিতং। প্রদক্ষিণাভিঃ সংযুক্তং নমস্কারপুরঃসরং ॥ নীরাজনসমাযুক্তমনির্ব্বিণ্ণেন চেতসা। যামে যামে মহাভাগে কুর্য্যাদারাত্রিকং হরেঃ ॥ এতৈর্গুণৈঃ সমাযুক্তং কুর্য্যাজ্জাগরণং হরেঃ ॥ * ॥ অথ পারণদিনকৃত্যং। কাত্যায়নঃ। প্রাতঃ স্নাত্বা হরিং পূজ্য উপবাসং সমর্পয়েৎ। পারণন্তু ততঃ কুর্য্যাৎ ব্রতসিদ্ধ্যৈ হরিং স্মরন্॥ তত্র সমর্পণমন্ত্রঃ। অজ্ঞানতিমিরান্ধস্য ব্রতেনানেন কেশব। প্রসীদ সুমুখো নাথ জ্ঞানদৃষ্টিপ্রদো ভব ॥*॥ অথ পারণে দ্বাদশীলঙ্ঘনে দোষঃ। স্কান্দে। পারণাহনি সংপ্রাপ্তে দ্বাদশীং যো ব্যতিক্রমেৎ। ত্রয়োদশ্যান্তু ভুঞ্জানঃ শতজন্মানি নারকী॥ * ॥ অথ দ্বাদশ্যত্যল্পত্বে কৃত্যসমাধানং। দেবীরহস্যে। অল্পা চেদ্দ্বাদশী কুর্য্যাৎনিত্যকর্ম্মারুণোদয়ে। অত্যল্পা চেন্নিশীথোর্দ্ধমামধ্যাহ্নিকমেব তৎ॥*॥ অথ সঙ্কটে পারণসমাধানং। কাত্যায়নঃ। মন্ত্রং জপিত্বা হরয়ে নিবেদ্যোপোষণং ব্রতী। অদ্ভিস্তু পারণং কুর্য্যাৎ সঙ্কটে বিষমে সতি ॥*॥ অথ হরিবাসরকালপারণানিষেধঃ। বিষ্ণুধর্ম্মোত্তরে। দ্বাদশ্যাঃ প্রথমঃ পাদো হরিবাসরসংজ্ঞকঃ। তমতিক্রম্য কুর্ব্বীত পারণং বিষ্ণুতৎপরঃ ॥ * ॥ অথ দ্বাদশীদিনে বর্জ্জনীয়ানি। স্কান্দে। ক্ষৌদ্রং মাংসং সুরাং তৈলং ব্যায়ামং ক্রোধমৈথুনে। পরান্নং কাংস্যতাম্বূলে লোভং নির্ম্মাল্যলঙ্ঘনং॥ দ্বাদশ্যাং দ্বাদশৈতানি বৈষ্ণবঃ পরিবর্জ্জয়েৎ ॥ অপিচ। বিতথভাষণং। প্রবাসঃ। দিবাস্বপ্নঃ। অঞ্জনং। শিলাপিষ্টং। মসূরং। দ্যূতং। হিংসা। চণকং। কোরদূষকং। ঔষধং। এতানি পুরাণান্তরোক্তান্যপি বর্জ্জনীয়ানি ॥ * ॥ ইতি শ্রীহরিভক্তিবিলাসোক্তৈকাদশীব্যবস্থা সমাপ্তা ॥ * ॥ অথ পশ্চিমদেশপ্রসিদ্ধনানাপুরাণোক্তষড়্বিংশত্যেকাদশীনামানি লিখ্যন্তে। অগ্রহায়ণস্য কৃষ্ণৈকাদশী উৎপন্না ১ শুক্লা মোক্ষা ২। পৌষস্য কৃষ্ণৈকাদশী সফলা ৩ শুক্লা পুত্রদা ৪। মাঘস্য কৃষ্ণৈকাদশী ষট্তিলা ৫ শুক্লা জয়া ৬। ফাল্গুনস্য কৃষ্ণৈকাদশী বিজয়া ৭ শুক্লা আমর্দকী ৮। চৈত্রস্য কৃষ্ণৈকাদশী পাপমোচনী ৯ শুক্লা কামদা ১০। বৈশাখস্য কৃষ্ণৈকাদশী বরূথিনী ১১ শুক্লা মোহনী ১২। জ্যৈষ্ঠস্য কৃষ্ণৈকাদশী অপরা ১৩ শুক্লা নির্জলা ১৪। আষাঢ়স্য কৃষ্ণৈকাদশী যোগিনী ১৫ শুক্লা পদ্মা ১৬। শ্রাবণস্য কৃষ্ণৈকাদশী কামিকা ১৭ শুক্লা পুত্রদা ১৮। ভাদ্রস্য কৃষ্ণৈকাদশী অজা ১৯ শুক্লা বামনা ২০। আশ্বিনস্য কৃষ্ণৈকাদশী ইন্দিরা ২১ শুক্লা পাপাঙ্কুশা ২২। কর্ত্তিকস্য কৃষ্ণৈকাদশী রমা ২৩ শুক্লা প্রবোধিনী ২৪। মলমাসস্য শুক্লৈকাদশী সুভদ্রা ২৫ কৃষ্ণা কমলা ২৬ ॥ * ॥ ইত্যেকাদশীপ্রকরণং সমাপ্তং ॥

একাদ্নবিংশতিঃ ( ত্রি ) একোনবিংশতিঃ ১৯। ইতি ব্যাকরণং ॥

একানংশা (স্ত্রী) পার্ব্বতী। ইতি ত্রিকাণ্ডশেষঃ॥

একান্তং ( ক্লী ) অত্যন্তং। তৎপর্য্যায়ঃ। অতিশয়ঃ ২ ভরঃ ৩ অতিবেলং ৪ ভৃশং ৫ অত্যর্থং ৬ অতিমাত্রং ৭ উদ্গাঢ়ং ৮ নির্ভরং ৯ তীব্রং ১০ নিতান্তং ১১ গাঢ়ং ১২ বাঢ়ং ১৩ দৃঢ়ং ১৪। ভেদ্যগামিনি ত্রি। ইত্যমরঃ ॥ নির্জ্জনং ॥

একান্তী [ন্] ( ত্রি ) বিষ্ণুভক্তবিশেষঃ। যথা। একান্তেনাসমো বিষ্ণুর্যস্মাদেষাং পরায়ণঃ। তস্মাদেকান্তিনঃ প্রোক্তাস্তদ্ভাগবতচেতসঃ॥ প্রিয়াণামপি সর্ব্বেষাং দেবদেবস্য স প্রিয়ঃ। আপৎস্বপি সদা যস্য ভক্তিরব্যভিচারিণী ॥ ইতি গারুড়ে ১৩১ অধ্যায়ঃ ॥

একান্নঃ ( ত্রি ) একভক্তঃ। যথা। কাশীখণ্ডে। ঊর্জ্জে যবান্নমশ্নীয়াদেকান্নমথবা পুনঃ। বৃন্তাকং শূরণঞ্চৈব শূকশিম্বীঞ্চ বর্জ্জয়েৎ॥ ইতি তিথ্যাদিতত্ত্বং ॥ একপাকাবস্থিতঃ। অবিভক্তঃ। যথা। একং অবিভক্তমন্নং যস্য ইতি ব্যুৎপত্তিঃ। তথা চ। একপাকেন বসতাং পিতৃদেবদ্বিজার্চ্চনং। একং ভবেদ্বিভক্তানাং তদেব স্যাদ্গৃহে গৃহে॥ ইতি প্রায়শ্চিত্ততত্ত্বধৃতবৃহস্পতিবচনং ॥

একান্নবিংশতিঃ ( ত্রি ) একোনবিংশতিঃ ১৯। ইতি ব্যাকরণং ॥

একাব্দা ( স্ত্রী ) একহায়নী। একবৎসরবয়স্কগবী। ইত্যমরঃ ॥

একায়নঃ ( ত্রি ) একাগ্রঃ। একবিষয়াসক্তচিত্তঃ। ইত্যমরঃ ॥

একায়নগতঃ ( ত্রি ) একাগ্রঃ। ইত্যমরঃ ॥

একাবলী (স্ত্রী) একযষ্টিকা। একনর হার ইতি ভাষা। ইত্যমরঃ ॥

একাশ্রিতগুণঃ ( পুং ) একবৃত্তিধর্ম্মঃ। তদ্যথা। রূপং ১ রসঃ ২ গন্ধঃ ৩ স্পর্শঃ ৪ একত্বং ৫ একপৃথক্ত্বং ৬ পরিমাণং ৭ পরত্বং ৮ অপরত্বং ৯ বুদ্ধিঃ ১০ সুখং ১১ দুঃখং ১২ ইচ্ছা ১৩ দ্বেষঃ ১৪ যত্নঃ ১৫ গুরুত্বং ১৬ দ্রবত্বং ১৭ স্নেহঃ ১৮ সংস্কারঃ ১৯ অদৃষ্টং ২০ শব্দঃ ২১। ইতি সিদ্ধান্তমুক্তাবলী

একাষ্ঠীলঃ ( পুং ) বকবৃক্ষঃ। ইতি কশ্চিদমরঃ ॥

একাষ্ঠীলা ( স্ত্রী ) বকবৃক্ষঃ। ইত্যমরঃ॥ পাঠা। আকনাদি ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥

একাহঃ ( পুং ) একদিনং। ইতি মুগ্ধবোধব্যাকরণং ॥

একাহারঃ ( পুং ) একদিনবৃত্ত্যেকবারভোজনং। যথা। একাহারঃ সদা কার্য্যো ন দ্বিতীয়ঃ কদাচন। পর্য্যঙ্কশায়িনী নারী বিধবা পাতয়েৎ পতিং॥ ইতি শুদ্ধিতত্ত্বধৃতস্মৃতিঃ ॥

একাক্ষঃ ( পুং ) কাকঃ। ইতি শব্দচন্দ্রিকা ॥ কাণে ত্রি ॥

একীয়ঃ ( ত্রি ) একপক্ষঃ। সহায়ঃ। সহভাবী। ইতি ত্রিকাণ্ডশেষঃ ॥

একোদ্দিষ্টং ( ক্লী ) প্রেতোদ্দেশ্যকশ্রাদ্ধং। যথা। গোভিলঃ। অথৈকোদ্দিষ্টমেকং পবিত্রমেকোঽর্ঘ্যঃ একঃ পিণ্ডো নাবাহনং নাগ্নৌকরণং নাত্র বিশ্বেদেবাঃ স্বদিতমিতি তৃপ্তিপ্রশ্নঃ সুস্বদিতমিতি প্রত্যুত্তরং।

উপতিষ্ঠতামিত্যক্ষয্যস্থানে অভিরম্যতামিতি বিসর্গেঽভিরতোঽস্মীতি প্রতিবচনমেতৎ প্রেতশ্রাদ্ধমিতি ॥ * ॥ এতৎ প্রেতশ্রাদ্ধমিত্যুপসংহারাৎ একং প্রেতমুদ্দিশ্য যদ্দীয়তে শ্রাদ্ধং তদেকোদ্দিষ্টমিতি বৈদিকপ্রয়োগাধীনং যৌগিকং। অতএব প্রতিসাম্বৎসরিকস্য নৈকোদ্দিষ্টত্বং কিন্ত্বেকোদ্দিষ্টবিধিকত্বং অত্রার্ঘ্যৈক্যাদ্দ্বিদলরূপশঙ্কেতিতপবিত্রৈক্যপ্রাপ্তৌ একং পবিত্রমিতি পুনরভিধানসার্থকত্বায় তদবয়বৈকদলপরং। অত্র নাবাহনং নাগ্নৌকরণমিতি নিষেধয়োঃ পৌর্ব্বাপর্য্যাদগ্নৌকরণপূর্ব্বকালীনং প্রধানসম্বন্ধি শ্রাদ্ধসূত্রোদ্দিষ্টং শ্রাদ্ধার্থাবাহনমেব নিষিধ্যতে ন ত্বপ্রধানসম্বন্ধি পিতৃযজ্ঞবদিত্যতিদেশপ্রাপ্তং পিণ্ডার্থাবাহনমিতি। এতেন পিণ্ডার্থাবাহননিষেধো মৈথিলোক্তো হেয়ঃ। অত্রাগ্নৌকরণনিষেধেন হুতশেষস্যালাভে হুতশেষং দত্ত্বা পাত্রমালভ্য জপতি পৃথিবীত্যাদি স্বাহা ইত্যন্তসূত্রোক্তপাত্রালম্ভনস্যাপি বাধঃ। আনন্তর্য্যাভাবাৎ অমৃতমিতি মন্ত্রলিঙ্গবিরোধাচ্চ। স্বদিতমিতি তৃপ্তিপ্রশ্ন ইতি তৃপ্তাঃ স্থ ইতি তৃপ্তিপ্রশ্নে স্বদিতমিতি প্রশ্নঃ। কুশময়ব্রাহ্মণপক্ষে তু প্রতিবচনানুপপত্ত্যা প্রশ্নস্যাপি নিবৃত্তিঃ। অক্ষয্যশব্দস্থানে উপতিষ্ঠতামিতি প্রয়োগঃ অত্রোপতিষ্ঠতামিত্যনেন অম্নাদিকমিত্যস্যান্বয়ে অস্তিত্যস্য অন্বয়ানুপপত্ত্যা তস্যাপ্যপ্রয়োগঃ। অতএব পিতৃদয়িতায়ামন্নাদিকমুপতিষ্ঠতামিতি লিখিতং। অভিরম্যতামিতি বাজে বাজে ইতি স্থানে অভিরম্যতামিত্যনেন বিসর্জ্জনমিতি। এতদিতি পূর্ব্বোক্তেতিকর্ত্তব্যতাকশ্রাদ্ধমিত্যর্থঃ। প্রেতশ্রাদ্ধং প্রেতস্য শ্রাদ্ধং ন তু পার্ব্বণবিকৃতিত্বেন প্রাপ্তপিতৃলোকরূপপিতুঃ শ্রাদ্ধং অকৃতসপিণ্ডীকরণস্য তথাবিধপিতৃত্বাভাবাৎ। অতএবৈতন্ন্যায়মূলকমেবাশ্বলায়নগৃহ্যপরিশিষ্টেঽপি পিতৃশব্দং ন যুঞ্জীত পিতৃহা চোপজায়তে ইত্যুক্তং। অতএব বিষ্ণুনা প্রেতস্য নামগোত্রাভ্যাং দত্তাক্ষয্যোদকেষু ইত্যত্র প্রেতনামগোত্রাভ্যামিত্যনেন প্রেতস্যেত্যুক্তং ন তু সম্বন্ধিন ইত্যুক্তং। ততশ্চ মন্ত্রে প্রাপ্তপিতৃলোকোপাধিক এব পিতৃপদস্থানে প্রেতপদোহো ন তু অগ্নিস্বাত্তাদ্যুপাধিকে এবমভিলাপবাক্যেঽপি সম্বন্ধিত্বেন নোল্লেখঃ কিন্তু প্রেতত্বেন অসম্বন্ধিনোঽপি মঠচ্ছাত্রাদেরপি প্রেতশ্রাদ্ধাধিকারিত্বাৎ। সাম্বৎসরিকশ্রাদ্ধে একোদ্দিষ্টবিকৃতীভূতেঽপি প্রাপ্তপিতৃলোকোপাধিকপিতৃপদবন্মন্ত্রে অভিলাপে চ সম্বন্ধিবোধকপিতৃত্বেনৈবোল্লেখঃ। এবঞ্চ দেবতাভ্যঃ পিতৃভ্যশ্চ ইত্যত্র ন প্রেতপদোহঃ পিতৃপদস্য দিব্যপিতৃপরত্বাৎ। এবং নৈকবচনোহোঽপি তথা মধু দ্যৌরস্তু নঃ পিতা ইত্যস্য দ্যৌঃ স্বর্গঃ পিতা পিতেব সর্ব্বস্যাধিগম্যত্বাৎ মধ্বস্তু মধুময়ী ভবত্বিতি ভাষ্যব্যাখ্যানে দ্যৌরিতি পিতেতি পদয়োঃ সামানাধিকরণ্যং প্রতীয়তে অত্র চ দ্যুত্বপিতৃত্বয়োর্ভেদেঽপি সামানাধিকরণ্যেনাভেদাবগমাৎ

দিবঃ পিতৃসাধর্ম্ম্যপ্রাপ্তিরিতি পিতৃপদং পিতৃতুল্যপরং ন তু জনকপরং প্রাপ্তপিতৃলোকপরঞ্চেতি। তেনাত্র মন্ত্রে পিতেত্যেব বক্তব্যং ন তু প্রেতপদোহঃ। ন বা পিতৃশব্দং ন যুঞ্জীত ইত্যনেন নিষেধঃ। এবমামাবেতি মন্ত্রে পিতরা ইত্যত্র নোহঃ। এবং বৃদ্ধিশ্রাদ্ধেঽপ্যেতেষু নান্দীমুখবিশেষণং ন দেয়মেবেতি। অন্যত্র সর্ব্বত্রোৎসর্গবাক্যে মন্ত্রে চ পিতৃপদপ্রয়োগনিষেধাৎ প্রেতপদোহঃ কার্য্যঃ। বিষ্ণুঃ। একবন্মন্ত্রানূহেত একোদ্দিষ্টে ইতি একবৎ একবচনবৎ যথাস্যাত্তথোহেত যথা পবিত্রে স্থো বৈষ্ণব্যাবিত্যত্র পবিত্রাসি বৈষ্ণবীতি এবং বিষ্ণোর্মনসা পূতে স্থ ইত্যত্রাপি পূতমসীতি। অত্র পিতরো মাদয়ধ্বং যথাভাগ মা বৃষায়ধ্বং ইতি মন্ত্রে অত্র প্রেত মাদয়স্ব যথাভাগ মা বৃষায়স্ব ইত্যূহং। অমী মদন্তঃ পিতর ইত্যত্র অমী মদৎ প্রেত ইতি। বৃষায়িষত ইত্যত্র বৃষায়িষ্টেতি। এত পিতর ইতি পিণ্ডার্থাবাহনমন্ত্রে এহি প্রেত ইতি। সৌম্যাস ইত্যত্র সৌম্যেতি। দত্তাস্মভ্যমিত্যত্র দেহ্যস্মভ্যমিতি। নিযচ্ছত ইত্যত্র নিযচ্ছেতি। নমো ব ইত্যাদিমন্ত্রেষু পিতর ইতি স্থানচতুষ্টয়ে প্রেতেত্যূহং। এবং ব ইত্যত্র তে ইতি। আশীঃপ্রার্থনে যেভ্য ইত্যত্র যস্মৈ ইতি। তেষামিত্যত্র তস্যেত্যূহং। এতদ্বঃ পিতর ইত্যত্র তু প্রেতা ইতি বিকৃতাবূহো ন তু বহুবচনস্য। এতদ্বঃ পিতরো বাস ইতি জল্পন্ পৃথক্ পৃথক্ ইতি ব্রহ্মপুরাণেন প্রকৃতাবেব পার্ব্বণে পিত্রাদিষু প্রত্যেকমেতদ্বঃ পিতর ইতি বহুবচনান্তমন্ত্রপ্রয়োগাৎ অত্রানর্থক্যেন তদ্বিকৃতাবেকোদ্দিষ্টেঽপ্যসমবেতার্থবহুবচনস্যৈব যুক্তত্বাৎ। ততশ্চ প্রকৃতৌ সমবেতার্থস্যৈব বিকৃতাবূহঃ। সাম্বৎসরিকে ত্বেকবচনস্যৈবোহো ন তু পিতৃপদস্য তত্র প্রাপ্তপিতৃলোকত্বেন তস্যৈব যুক্তত্বাৎ। স্মৃতিঃ। প্রেতশ্রাদ্ধে যদুচ্ছিষ্টং গ্রহে পর্য্যুষিতঞ্চ যৎ। দম্পত্যোর্ভুক্তশেষঞ্চ ন ভুঞ্জীত কদাচন॥ উচ্ছিষ্টং পাকপাত্রে অবশিষ্টং। গ্রহে উপরাগে। পর্য্যুষিতং স্থিতং। দম্পত্যোরাশ্রমস্বামিনোর্ভোজনানন্তরং পাকস্থাল্যামবশিষ্টমিতি শ্রাদ্ধচিন্তামণিঃ॥ যত্তু দেবলবচনং। একোদ্দিষ্টস্য শেষন্তু ব্রাহ্মণেভ্যঃ সমুৎসৃজেৎ। পশ্চাৎ স্বয়ঞ্চ ভুঞ্জীত পুনর্মঙ্গলভোজনং॥ ইতি। তস্যৈকোদ্দিষ্টশেষং ব্রাহ্মণেভ্যঃ সমুৎসৃজেৎ ন ত্ববশেষয়েৎ পুনর্মঙ্গলভোজনং পাকান্তরকৃতান্নং ভুঞ্জীতেত্যন্বয় ইতি॥ * ॥ তৎকরণকালো যথা। ব্রহ্মপুরাণং। পূর্ব্বাহ্ণে মাতৃকং শ্রাদ্ধমপরাহ্ণে তু পৈত্রিকং। একোদ্দিষ্টন্তু মধ্যাহ্নে প্রাতর্বৃদ্ধিনিমিত্তকং॥ মধ্যাহ্নে তু বিশেষমাহ কালমাধবীয়ে ব্যাসঃ। কুতপপ্রথমে ভাগে একোদ্দিষ্টমুপক্রমেৎ। আবর্ত্তনসমীপে বা তত্রৈব নিয়তাত্মবান্॥ আবর্ত্তনং পশ্চিমদিগবস্থিতচ্ছায়ায়াঃ পূর্ব্বদিগ্গমনারম্ভকালঃ। তৎসমীপে কুতপশেষদণ্ডে। গোতমঃ। আরভ্য কুতপে শ্রাদ্ধং কুর্য্যাদারৌহিণং

বুধঃ। বিধিজ্ঞো বিধিমাস্থায় রৌহিণন্তু ন লঙ্ঘয়েৎ ॥ তেন পূর্ব্বদিবসীয়কুতপ-রৌহিণয়োস্তত্তিথের্লাভে পরত্র কুতপ-মাত্রলাভে শুক্লপক্ষেঽপি পূর্ব্বদিনে একো-দ্দিষ্টং উভয়প্রাপ্ত্যনুরোধাৎ। পূর্ব্বদিনে কুতপালাভে পরত্র তল্লাভে কৃষ্ণপক্ষেঽপি পরদিন এব সমাপ্তিকালাদারম্ভকালস্য বলবত্ত্বাৎ। তথা চ। বৌধায়নঃ। যো যস্য বিহিতঃ কালঃ কর্ম্মণস্তদুপক্রমে। তিথির্যাভিমতা সা তু কার্য্যা নোপক্রমো-জ্ঝিতা ॥ উভয়ত্র কুতপমাত্রালাভে শুক্ল-পক্ষেঽপি পূর্ব্বদিনে সমাপ্তিকালানুরোধাৎ পূর্ব্বদিনে রৌহিণালাভে পরত্র সপ্তমমুহূর্ত্ত-লাভে কৃষ্ণপক্ষেঽপি পরদিনে মধ্যাহ্নানু-রোধাৎ। ইতি শ্রাদ্ধতত্ত্বং ॥ * ॥ একো-দ্দিষ্টবিধিকসাম্বৎসরিকশ্রাদ্ধং। যথা। একোদ্দিষ্টং পুরাবশ্যং তদ্বিশেষং বদে শৃণু। প্রথমং নিমন্ত্রণং পাদপ্রক্ষালনং আসনং অদ্য অমুকগোত্রস্য মৎপিতু-রমুকদেবশর্ম্মণঃ প্রতিসাম্বৎসরিকমেকো-দ্দিষ্টং শ্রাদ্ধং সিদ্ধান্নেন যুষ্মাস্বহং করিষ্যে শ্রাদ্ধকরণানুজ্ঞাপনং। আসনং অর্ঘ্যঃ। গন্ধাদিদানং নিত্যশ্রাদ্ধং। অন্নসঙ্কল্পনং জপ্যং নিবীতী উত্তরাভিমুখীভূয়াতিথি-শ্রাদ্ধং কুর্য্যাৎ। ততস্তৃপ্তিং জ্ঞাত্বা দক্ষি-ণাভিমুখো বামোপবীতী উচ্ছিষ্টসমীপে যে অগ্নিদগ্ধা ইতি অন্নবিকিরণং। ওঁ অমুকগোত্র মৎপিতরমুকদেবশর্ম্মন্। এতত্তে জলমবনে নিক্ষ্ব যে চাত্র ত্বামনু-যাংশ্চ ত্বমনু তস্মৈ তে স্বধা। ইতি রেখোপরি দক্ষিণামুখবারিধারাদানং। ইতি গারুড়ে ২২৩ অধ্যায়ঃ ॥

একোশিকা (স্ত্রী) বৃক্ষবিশেষঃ। আকনাদি ইতি ভাষা। ইতি রত্নমালা ॥

এজ ঋ ঙ দীপ্তৌ। ইতি কবিকল্পদ্রুমঃ ॥ ঋ মা ভবান্ এজিজৎ। ঙ এজতে। ইতি দুর্গাদাসঃ ॥

এজ ঋ কম্পে। ইতি কবিকল্পদ্রুমঃ ॥ ঋ মা ভবান্ এজিজৎ। এজতি বায়ুনা বৃক্ষঃ। ইতি দুর্গাদাসঃ ॥

এঠ ঙ বাধনে। ইতি কবিকল্পদ্রুমঃ ॥ বাধনং বিহতিঃ। ঙ এঠতে বৎসরং লোকঃ। ইতি দুর্গাদাসঃ ॥

এড়ঃ (ত্রি) বধিরঃ। ইত্যমরঃ ॥

এড়কঃ (পুং) মেষঃ। ইত্যমরঃ ॥ বনচ্ছগলঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

এড়কা (স্ত্রী) মেষী। ইত্যমরটীকায়াং রায়-মুকুটঃ ॥

এড়গজঃ (পুং) চক্রমর্দ্দকঃ। চাকুন্দিয়া ইতি ভাষা। ইত্যমরঃ ॥ অস্য গুণাঃ। বায়ুকফ-কুষ্ঠত্বগ্দোষগুল্মোদররোগার্শোনাশিত্বং। কটুত্বঞ্চ। ইতি রাজবল্লভঃ ॥

এড়মূকঃ (ত্রি) বধিরঃ মূকশ্চ। বক্তুং শ্রোতু-মশিক্ষিতঃ। বাক্শ্রুতিবর্জ্জিতঃ। ইত্য-মরঃ ॥ শঠঃ। ইতি মেদিনী ॥

এড়ূকং (ক্লী) এড়ূকং। ইতি ভরতো দ্বিরূপ-কোষশ্চ ॥

এড়ূকং (ক্লী) অন্তর্ন্যস্তকীকসকুড্যং। ইত্য-মরঃ ॥ কীকসমিব কীকসং যৎ কুড্যং ছিটাবেড়া ইতি খ্যাতমিত্যন্যে। ইতি

সারসুন্দরী ॥ কীকসমস্থি এতৎ কাষ্ঠাদি-কঠিনদ্রব্যোপলক্ষণং কীকসমিব কীকসং কিলিঞ্জাদীতি মধুঃ ॥ মধ্যসংস্থাপিতাস্থ্যাদি কুড্যমেড়ূকমুচ্যতে। ইতি মাধবঃ ॥

এড়োকং (ক্লী) এড়ূকং। ইতি ভরতধৃত-দ্বিরূপকোষঃ ॥

এণঃ (পুং স্ত্রী) হরিণঃ। ইতি রাজনির্ঘণ্টঃ ॥ মৃগবিশেষঃ। ইত্যমরঃ॥ অস্য মাংসগুণাঃ। কষায়ত্বং। মধুরত্বং পিত্তরক্তকফজ্বর-নাশিত্বং। সংগ্রাহিত্বং। রোচনত্বং। হৃদ্য-ত্বং। বলকারিত্বঞ্চ। ইতি রাজবল্লভঃ ॥

এণকঃ (পুং) এণঃ। ইতি শব্দরত্নাবলী ॥

এণতিলকঃ (পুং) চন্দ্রঃ। ইতি হারাবলী ॥

এণভৃৎ (পুং) চন্দ্রঃ। ইতি হেমচন্দ্রঃ ॥

এতং (ত্রি) আগতং। ইতি মেদিনী॥ কর্ব্বূর-বর্ণযুক্তং। ইত্যমরঃ ॥

এতঃ (পুং) মৃগঃ। ইতি শব্দরত্নাবলী ॥ কর্ব্বূরবর্ণঃ। ইতি মেদিনী ॥

এতদ্ (ত্রি) পুরোবর্ত্তিবাচকসর্ব্বনামশব্দঃ। এই ইতি ভাষা। ইতি ব্যাকরণং ॥

এতনঃ (পুং) নিশ্বাসঃ। ইতি হেমচন্দ্রঃ ॥

এতর্হি ব্য এতস্মিন্ কালে। সম্প্রতি। ইত্য-মরঃ ॥

এতশঃ (পুং) ব্রাহ্মণঃ। ইত্যুণাদিকোষঃ ॥

এতসাঃ [স্] (পুং) ব্রাহ্মণঃ। ইত্যুণাদি-কোষঃ ॥

এতাবৎ (ত্রি) এতৎপরিমাণং। ইতি ব্যা-করণং

এধ ঙ বৃদ্ধৌ। ইতি কবিকল্পদ্রুমঃ ॥ ঙ এধতে। ইতি দুর্গাদাসঃ ॥

এধঃ (পুং) ইন্ধনং। জ্বালানি কাঠ ইতি ভাষা। ইত্যমরঃ ॥

এধঃ [স্] (ক্লী) ইন্ধনং। ইত্যমরঃ ॥

এধতু (ত্রি) বর্দ্ধিতং। বৃদ্ধিযুক্তং। ইতি শব্দ-রত্নাবলী ॥

এধতুঃ (পুং) পুরুষঃ। অগ্নিঃ। ইতি মেদিনী ॥

এধিতঃ (ত্রি) বর্দ্ধিতঃ। বৃদ্ধিপ্রাপ্তঃ। ইত্য-মরঃ ॥

এনঃ [স্] (ক্লী) পাপং। অপরাধঃ ইতি মেদিনী ॥ নিন্দা। ইতি শব্দরত্নাবলী ॥

এরকা (স্ত্রী) তৃণবিশেষঃ। তৎপর্য্যায়ঃ। গুন্দ্র-মূলা ২ শিম্বী ৩ গুন্দ্রা ৪ শরী ৫। অস্যা গুণাঃ। হিমত্বং। শুক্রবৃদ্ধিকারিত্বং। চক্ষুর্হিতত্বং। বাতকোপনত্বং। মূত্রকৃচ্ছ্রা-শ্মরীদাহপিত্তশোণিতনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

এরঙ্গঃ (পুং) মৎস্যভেদঃ। রঙ্গা ইতি খ্যাতঃ। অস্য গুণাঃ। মধুরত্বং। স্নিগ্ধত্বং। বিষ্ট-ম্ভিত্বং। শীতলত্বং। গুরুত্বঞ্চ। ইতি ভাবপ্রকাশঃ ॥

এরণ্ডঃ (পুং) বৃক্ষবিশেষঃ। ভেরেণ্ডা ইতি ভাষা। তৎপর্য্যায়ঃ। ব্যাঘ্রপুচ্ছঃ২ গন্ধর্ব্ব-হস্তকঃ ৩ উরুবুকঃ ৪ রুবুকঃ ৫ চিত্রকঃ ৬ চঞ্চুঃ ৭ পঞ্চাঙ্গুলঃ ৮ মণ্ডঃ ৯ বর্দ্ধমানঃ১০ ব্যড়ম্বকঃ ১১। ইত্যমরঃ ॥ উরুবুকঃ ১২ রুবুকঃ ১৩ রূবুকঃ ১৪ রুবকঃ ১৫ বুকঃ ১৬ অমণ্ডঃ ১৭ আমণ্ডঃ ১৮ ব্যড়ম্বনঃ ১৯। ইতি তট্টীকায়াং ভরতঃ ॥ কান্তঃ ২০ তরুণঃ ২১ শুক্লঃ ২২ বাতারিঃ ২৩ দীর্ঘ-পত্রকঃ ২৪। ইতি রাজনির্ঘণ্টঃ ॥ অস্য

তৈলস্য গুণাঃ। মধুরত্বং। গুরুত্বং। অতিশ্লেষ্মবর্দ্ধনত্বং। বাতরক্তগুল্মহৃদ্রোগজীর্ণজ্বরনাশিত্বঞ্চ। ইতি রাজবল্লভঃ॥ অপিচ। কৃমিদোষসকলাঙ্গশূলকুষ্ঠনাশিত্বং। স্বাদুত্বং। রসায়নোত্তমত্বং। পিত্তপ্রকোপনত্বং। অতিদীপনত্বং। আমবাতনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ অস্য ভেদকত্বগুণোঽপ্যস্তি॥ শ্বেতৈরগুগুণাঃ। কটুত্বং। তিক্তত্বং। উষ্ণত্বং। কফার্ত্তিজ্বরবায়ুকাসনাশিত্বং। রসার্হত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ অস্য মূলগুণাঃ। শূলবায়ুকফনাশিত্বং। শুক্রকারিত্বঞ্চ। ইতি রাজবল্লভঃ॥

এরণ্ডকঃ (পুং) এরণ্ডবৃক্ষঃ। ইতি ভরতো দ্বিরূপকোষশ্চ॥

এরণ্ডজং (ত্রি) এরণ্ডবৃক্ষজাতং। তত্তৈলং স্নেহমধ্যে শ্রেষ্ঠবিরেচকং। যথা। চূর্ণমধ্যে ত্রিবৃৎচূর্ণং স্বোরসে কারবেল্লকং। স্নেহেম্বেরণ্ডজং তৈলং ফলেষ্বেব হরীতকী॥ ইতি বাগ্‌ভটঃ॥

এরণ্ডপত্রিকা (স্ত্রী) দন্তীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

এরণ্ডফলা (স্ত্রী) দন্তীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

এরণ্ডা (স্ত্রী) পিপ্‌পলী। ইতি শব্দচন্দ্রিকা॥

এর্ব্বারুঃ (পুং) কর্কটীভেদঃ। তৎপর্য্যায়ঃ। ব্যালপত্রা ২ লোমশা ৩ স্থূলা ৪ তোয়ফলা ৫ হস্তিদন্তফলা ৬ কর্কটী ৭। অস্য গুণাঃ। পিত্তহরত্বং। সুশীতলত্বং। মধুরত্বং। মূত্রামযঘ্নত্বং। রুচিপ্রদত্বং। সন্তাপমূর্চ্ছাপহরত্বং। তৃপ্তিদাতৃত্বং। অতিসেবিতশ্চেৎ বাতপ্রকোপকারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

এলকঃ (ত্রি) মেষঃ। ইতি রাজনির্ঘণ্টঃ॥

এলঙ্গঃ (পুং) মৎস্যভেদঃ। রায়কড়া ইতি ভাষা। রায়খাঁড়া এলাঙ্গা ইত্যপি খ্যাতঃ। অস্য গুণাঃ। মধুরত্বং বৃষ্যত্বং। সংগ্রাহিত্বং। কফবাতনাশিত্বং। মেধাগ্নিপুষ্টিকারিত্বং। শীতলত্বং। গুরুত্বং। শ্লেষ্মপ্রসাদনত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

এলবালু (ক্লী) এলবালুকং। ইতি শব্দরত্নাবলী॥

এলবালুকং (ক্লী) সুগন্ধিদ্রব্যবিশেষঃ। লালুকা ইতি খ্যাতং। তৎপর্য্যায়ঃ। ঐলেয়ং ২ সুগন্ধি ৩ হরিবালুকং ৪ বালুকং ৫। ইত্যমরঃ॥ হরিবাস্থকং ৬। ইতি তট্টীকা॥ আলুকং ৭ এল্ববালুকং ৮ কপিথত্বক্ ৯ গন্ধত্বক্ ১০ কুষ্ঠগন্ধি ১১। অস্য গুণাঃ। অত্যুগ্রত্বং। কষায়ত্বং। কফবাতমূর্চ্ছাতিজ্বরদাহনাশিত্বং। পরমরুচিকারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

এলবিলঃ (পুং) ঐলবিলঃ। কুবেরঃ। ইত্যমরটীকা॥

এলা (স্ত্রী) ফলবৃক্ষবিশেষঃ। এলাচি ইতি ভাষা। তৎপর্য্যায়ঃ। বহুলগন্ধা ২ ঐন্দ্রী ৩ দ্রাবিড়ী ৪ কপোতপর্ণী ৫ বালা ৬ বলবতী ৭ হিমা ৮ চন্দ্রিকা ৯ সাগরগামিনী ১০ গন্ধালীগর্ভঃ ১১ এলীকা ১২ কায়স্থা ১৩। ইতি রাজনির্ঘণ্টঃ॥ সা দ্বিবিধা সূক্ষ্মা। গুজরাটী এলাচি ইতি ভাষা। স্থূলা চ। বড় এলাচি ইতি ভাষা।

আদ্যায়াঃ পর্য্যায়ঃ। উপকুঞ্চিকা ১ তুত্থা ২ কোরঙ্গী ৩ ত্রিপুটা ৪ ত্রুটিঃ ৫। ইত্যমরঃ॥ বয়স্থা ৬ তীক্ষ্ণগন্ধা ৭ সূক্ষ্মৈলা ৮ ত্রিপুটী ৯। ইতি রত্নমালা॥ দ্বিতীয়ায়াঃ পর্য্যায়ঃ। পৃথ্বীকা ২ চন্দ্রবালা ৩ নিষ্কুটিঃ ৪ বহুলা ৫। ইত্যমরঃ॥ স্থূলা ৬ মালেয়া ৭ তাড়কাফলং ৮। ইতি রত্নমালা॥ এলাদ্বয়গুণাঃ। শীতলত্বং। তিক্তত্বং। উষ্ণত্বং। সুগন্ধিত্বং। পিত্তরোগকফনাশিত্বং। হৃদ্রোগকারিত্বং। মলার্ত্তিবাস্তিপুংস্ত্বঘ্নত্বং। স্থবিরস্য গুণাঢ্যত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ অপিচ। শূলকোষ্ঠবদ্ধতৃষ্ণাচ্ছর্দ্দিবায়ুনাশিত্বং। ইতি রাজবল্লভঃ॥ সূক্ষ্মৈলাবিশেষগুণাঃ। কফশ্বাসকাসার্শো-মূত্রকৃচ্ছ্রনাশিত্বং। ইতি রাজনির্ঘণ্টঃ॥

এলাপত্রঃ (পুং) নাগভেদঃ। ইতি জটাধরঃ॥

এলাপর্ণী (স্ত্রী) বৃক্ষবিশেষঃ। কাঁটা আমরুলী এলানী ইতি চ ভাষা। তৎপর্য্যায়ঃ। সুবহা ২ রাস্না ৩ যুক্তরসা ৪। ইত্যমরঃ॥

এলীকা (স্ত্রী) সূক্ষ্মৈলা। ইতি রাজনির্ঘণ্টঃ॥

এব ব্য অবধারণং। যথা। ত্বমেব জানাসি। তৎপর্য্যায়ঃ। এবং ২ তু ৩ পুনঃ ৪ বা ৫। ইত্যমরঃ॥ বৈ ৬ চ ৭। ইতি সুভূতিঃ॥ সাদৃশ্যং। ইতি ভরতঃ॥ নিয়োগঃ। বাক্যপূরণং। চারনিয়োগঃ। বিনিগ্রহঃ। ইতি মেদিনী॥ গমনকর্ত্তরি ত্রি। ইতি সিদ্ধান্তকৌমুদী॥

এবং ব্য সাম্যং। সাদৃশ্যং। যথা। অগ্নিরেবং বিপ্রঃ। অগ্নিরিবেত্যর্থঃ। তৎপর্য্যায়ঃ। বৎ ২ বা ৩ যথা ৪ তথা ৫ ইব ৬। বৎস্থানে ব ইতি কেচিৎ পঠন্তি। ইদং প্রকারং। যথা। এবং বাদিনি বিপ্রর্ষৌ। তৎপর্য্যায়ঃ। ইত্থং ২। অবধারণং। যথা। এবমেতৎ। অস্য পর্য্যায়ঃ এবশব্দে লিখিতঃ। ইত্যমরঃ॥ অঙ্গীকারঃ। অর্থপ্রশ্নঃ। পরকৃতিঃ। পৃচ্ছা। ইতি মেদিনী॥

এষ ঋ ঙ গতৌ। ইতি কবিকল্পদ্রুমঃ॥ ঋ মা ভবান্ এষিষৎ। ঙ এষতে। ইতি দুর্গাদাসঃ॥

এষঃ (পুং) পুরোবর্ত্তিপুরুষঃ। এতদ্‌শব্দস্য পুংলিঙ্গে রূপোঽয়ং॥

এষণঃ (পুং) লৌহময়বাণঃ। ইতি হলায়ুধঃ॥

এষণিকা (স্ত্রী) স্বর্ণকারাদীনাং তুলা। নিক্তি ইতি ভাষা। তৎপর্য্যায়ঃ। নারাচী ২। ইত্যমরঃ॥

এষণী (স্ত্রী) ব্রণমার্গানুসারিণী। বেলকার ইতি ভাষা। তুলাভেদঃ। নিক্তি ইতি ভাষা। ইতি মেদিনী॥

এষা (স্ত্রী) ইচ্ছা। ইতি জটাধরঃ॥ এতদ্‌শব্দস্য স্ত্রীলিঙ্গেঽপি রূপোঽয়ং॥

## ঐ

ঐ ঐকারঃ। স তু দ্বাদশস্বরবর্ণঃ। অস্যোচ্চারণস্থানং তালু কণ্ঠশ্চ। স চ হ্রস্বো ন ভবতি। ঐকারং পরমং দিব্যং মহাকুণ্ডলিনী স্বয়ং। কোটিচন্দ্রপ্রতীকাশং পঞ্চপ্রাণময়ং সদা॥ ব্রহ্মবিষ্ণুময়ং বর্ণং তথা রুদ্রময়ং প্রিয়ে। সদাশিবময়ং বর্ণং বিন্দুত্রয়সমন্বিতং॥

ইতি কামধেনুতন্ত্রং ॥ তস্য লেখন-প্রকারো যথা। একাররূপমধ্যে তু কিঞ্চিদ্দক্ষে তদোর্দ্ধতঃ। চন্দ্রেন্দ্রভানবস্তাস্থ মাত্রা শক্তিঃ ক্রমাৎ স্মৃতাঃ ॥ ত্রিধা-শক্তিময়ী পূর্ব্বা দুর্গা বাণী সরস্বতী। ইতি বর্ণোদ্ধারতন্ত্রং ॥ * ॥ তন্নামানি যথা। ঐর্লজ্জা ভৌতিকঃ কান্তা বায়বী মোহিনী বিভুঃ। দক্ষা দামোদরপ্রজ্ঞোঽধরো বিকৃত-মুখ্যপি ॥ ক্ষমাত্মকো জগদ্যোনিঃ পরঃ পরনিবোধকৃৎ। জ্ঞানামৃতা কপর্দ্দিশ্রীঃ পীঠেশোঽগ্নিঃ সমাতৃকঃ॥ ত্রিপুরা লোহিতা রাজ্ঞী বাগ্‌ভবো ভৌতিকাসনঃ। মহেশ্বরো দ্বাদশী চ বিমলশ্চ সরস্বতী ॥ কামকোটো বামজানুরংশুমান্ বিজয়ো জটা। ইতি তন্ত্রশাস্ত্রং ॥ দন্তান্তঃ। যোনিঃ। ইতি বীজ-বর্ণাভিধানং ॥

ঐ ব্য আহ্বানং। স্মরণং। আমন্ত্রণং। ইতি মেদিনী ॥

ঐঃ (পুং) মহেশ্বরঃ। ইতি একাক্ষরকোষঃ ॥

ঐকাগারিকঃ (ত্রি) চৌরঃ। একাগারবাসী ॥

ঐকাহিকং (ত্রি) একাহনিষ্পন্নং। একদিনা-ন্তরভবং। ইতি বৈদ্যকং ॥ একাহভবং। যথা। ঐকাহিকং দ্বিতীয়স্থং তৃতীয়ক-চতুর্থকং। ইত্যাদি মাহেশ্বরকবচং ॥

ঐকাহিকজ্বরঃ (পুং) একদিনান্তরাগতজ্বরঃ। তস্যৌষধং যথা। পীতং বৃশ্চিকমূলন্ত পর্য্যুষিতজলেন বৈ। সার্দ্ধং বিনাশয়েদ্দাহং জ্বরঞ্চ পরমেশ্বর ॥ শিখায়াঞ্চৈব তদ্বদ্ধং ভবেদৈকাহিকাদিমুৎ। এতৎ সকাঞ্জিকং পীতং রক্তকুষ্ঠজ্বরাদিমুৎ ॥ বাস্যোদকেন পীতং তৎ বৃহদ্বিষহরং ভবেৎ। ইতি গারুড়ে ১৯৩ অধ্যায়ঃ ॥

ঐক্যং (ক্লী) একস্য ভাবঃ। একতা। একত্বং। একীভাবঃ। যথা। শারদায়াং। গুরো-র্লব্ধ্বা পুনর্ব্বিদ্যামষ্টকৃত্বো জপেৎ সুধীঃ। গুরুবিদ্যাদেবতানামৈক্যং সম্ভাবয়ন্ ধিয়া ॥ প্রণমেদ্দণ্ডবদ্ভূমৌ গুরুং তং দেবতাত্মকং। ইতি দীক্ষাতত্ত্বং ॥

ঐঙ্গুদং (ক্লী) ইঙ্গুদীবৃক্ষস্য ফলং। ইত্যমরঃ ॥

ঐড়ূকং (ক্লী) এড়ূকং। ইতি ভরতো দ্বিরূপ-কোষশ্চ ॥

ঐণং (ত্রি) এণস্য চর্ম্মাদি। ইত্যমরঃ ॥

ঐণিকঃ (ত্রি) এণহন্তা। ইতি ব্যাকরণং ॥

ঐণেয়ং (ত্রি) এণ্যাশ্চর্ম্মাদি। ইত্যমরঃ ॥ স্ত্রীণাং রতিবন্ধবিশেষঃ। ইতি হেমচন্দ্রঃ ॥

ঐতিহ্যং (ক্লী) পারম্পর্য্যোপদেশঃ। তৎ-পর্য্যায়ঃ। ইতিহ ২। ইত্যমরঃ ॥

ঐন্দবং (ক্লী) মৃগশিরোনক্ষত্রং। ইতি জ্যোতিষং ॥ যথা। মাৎস্যে। অশ্বিনী রেবতী মূলমুত্তরত্রয়মৈন্দবং। স্বাতী হস্তানু-রাধা চ গৃহারম্ভে প্রশস্যতে ॥ ঐন্দবং মৃগশিরঃ। ইতি মঠপ্রতিষ্ঠাতত্ত্বং ॥

ঐন্দবী (স্ত্রী) সোমরাজী। ইতি বৈদক্যং ॥

ঐন্দ্রং (ক্লী) জ্যেষ্ঠানক্ষত্রং। ইতি জটাধরঃ ॥ মূলবিশেষঃ। বনআদা ইতি ভাষা। তৎ-পর্য্যায়ঃ। বনার্দ্রকা ২ বনজা ৩ অরণ্য-জার্দ্রকা ৪। অস্য গুণাঃ। কটুত্বং। অম্লত্বং। রুচিবলাগ্নিকারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ ইন্দ্রসম্বন্ধিনি ত্রি। বালিবানরে পুং ॥

ঐন্দ্রজালিকঃ ( পুং ) ইন্দ্রজালকারকঃ। তৎপর্য্যায়ঃ। প্রতীহারকঃ ২ মায়াকারকঃ ৩ কৌসৃতিকঃ ৪ মায়াবী ৫ ব্যংসকঃ ৬ মায়ী ৭ মায়িকঃ ৮। ইতি জটাধরঃ॥

ঐন্দ্রলুপ্তিকঃ ( ত্রি ) কেশঘ্নরোগবিশিষ্টঃ। টেকো ইতি ভাষা। তৎপর্য্যায়ঃ। খল্লীটঃ২ খলতিঃ ৩। ইতি ভূরিপ্রয়োগঃ॥

ঐন্দ্রিঃ ( পুং ) জয়ন্তনামা ইন্দ্রপুত্রঃ। কাকঃ। ইতি মেদিনী॥ বালিনামবানররাজঃ। ইতি ত্রিকাণ্ডশেষঃ॥ অর্জ্জুনঃ। ইতি হেমচন্দ্রঃ॥

ঐন্দ্রিয়কং ( ত্রি ) প্রত্যক্ষং। ইন্দ্রিয়গ্রাহ্যং। ইত্যমরঃ॥

ঐন্দ্রী ( স্ত্রী ) শচী। দুর্গা। ইতি শব্দরত্নাবলী॥ অলক্ষ্মীঃ। ইতি ত্রিকাণ্ডশেষঃ॥ ইন্দ্রবারুণী। রাখাল শসা ইতি ভাষা। ইতি রত্নমালা॥ পূর্ব্বা দিক্। ইত্যমরটীকায়াং রমানাথঃ॥ এলা। এলাচি ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥

ঐভী ( স্ত্রী ) হস্তিঘোষা লতা। ইতি রাজনির্ঘণ্টঃ॥

ঐরাবণঃ ( পুং ) ঐরাবতহস্তী। ইত্যমরঃ॥

ঐরাবতং ( ক্লী ) ইন্দ্রস্য ঋজুদীর্ঘধনুঃ। রামধনুক্ ইতি ভাষা। ইতি মেদিনী॥

ঐরাবতঃ ( পুং ) ইন্দ্রহস্তী। স তু শুক্লবর্ণঃ চতুর্দ্দন্তঃ সমুদ্রমথনোত্থিতঃ পূর্ব্বদিগ্গজশ্চ। তৎপর্য্যায়ঃ। অভ্রমাতঙ্গঃ ২ ঐরাবণঃ ৩ অভ্রমুবল্লভঃ ৪। ইত্যমরঃ॥ শ্বেতহস্তী ৫ চতুর্দন্তঃ ৬ মল্লনাগঃ ৭ ইন্দ্রকুঞ্জরঃ ৮ হস্তিমল্লঃ ৯ সদাদানঃ ১০। ইতি জটাধরঃ॥ সুদামা ১১ শ্বেতকুঞ্জরঃ ১২ গজাগ্রণীঃ ১৩ নাগমল্লঃ ১৪। ইতি শব্দরত্নাবলী॥ নাগরঙ্গঃ। লকুচবৃক্ষঃ। নাগভেদঃ। ইতি মেদিনী॥

ঐরাবতী ( স্ত্রী ) বিদ্যুৎ। বিদ্যুদ্বিশেষঃ। ইতি মেদিনী॥ ঐরাবতভার্য্যা। ইত্যমরটীকায়াং স্বামী॥ বটপত্রীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥ পঞ্চালদেশীয়নদীবিশেষঃ। অধুনা রাবী ইতি খ্যাতা॥

ঐরিণং ( ক্লী ) পাংশবলবণং। ইতি রাজনির্ঘণ্টঃ॥

ঐরেয়ং ( ক্লী ) মদ্যং। ইরা এব ঐরেয়ং স্বার্থে ঢেয়প্রত্যয়ে বৃদ্ধিঃ॥

ঐলঃ ( পুং ) ইলাপুত্রঃ। স তু চন্দ্রবংশীয়ো রাজা পুরূরবাঃ। ইতি হেমচন্দ্রঃ॥

ঐলবালুকং ( ক্লী ) এলবালুকং। ইতি শব্দরত্নাবলী॥

ঐলবিলঃ ( পুং ) ইলবিলাপুত্রঃ। স তু কুবেরঃ। ইত্যমরঃ॥ তস্য রূপান্তরাণি। ঐড়বিড়ঃ। ঐড়বিলঃ। এলবিলঃ॥

ঐলেয়ং ( ক্লী ) এলবালুকনামগন্ধদ্রব্যং। ইত্যমরঃ॥

ঐশানী ( স্ত্রী ) ঈশানকোণঃ। ইতি জটাধরঃ॥

ঐশিকঃ ( ত্রি ) ঈশ্বরসম্বন্ধী। ঈশ্বরের ইতি ভাষা॥

ঐশী, ঐশ্বরী ( ত্রি ) ঈশ্বরসম্বন্ধী। ঈশ্বরের ইতি ভাষা॥

ঐশ্বর্য্যং ( ক্লী ) ঈশ্বরধর্ম্মঃ। তৎপর্য্যায়ঃ। বিভূতিঃ ২ ভূতিঃ ৩। স চাষ্টবিধো যথা। অণিমা ১ লঘিমা ২ প্রাপ্তিঃ ৩ প্রাকাম্যং ৪ মহিমা ৫ ঈশিত্বং ৬ বশিত্বং ৭ কামাবশায়িতা ৮। ইত্যমরঃ॥

ঐশ্বর্য্যকর্ম্মা [ন্] (পুং) ঈশ্বরসম্বন্ধিকর্ম্ম-যুক্তঃ। তৎপর্য্যায়ঃ। ইরজ্যতি ১ পত্যতে ২ ক্ষয়তি ৩ রাজতি ৪। ইতি চত্বার ঐশ্বর্য্যকর্ম্মাণঃ। ইতি বেদনির্ঘণ্টৌ ২ অধ্যায়ঃ॥

ঐষমঃ [স্] ব্য বর্ত্তমানবৎসরঃ। ইত্যমরঃ॥

ঐষমস্তনঃ (ত্রি) ঐষমঃসম্বন্ধী। এই বৎসরের ইতি ভাষা। ইতি পাণিনিঃ॥

ঐষমস্ত্যঃ (ত্রি) ঐষমস্তনঃ। ইতি পাণিনিঃ॥

ঐহিকং (ত্রি) ইহ ভবং। ইহকালের ইতি ভাষা। ইতি ব্যাকরণং॥

ঐক্ষবং (ত্রি) ইক্ষুবিকারঃ। ইক্ষুসম্বন্ধি-গুড়াদি। ইতি স্মৃতিঃ॥

ঐক্ষবং (ক্লী) ইক্ষুভবগুড়াদি। যথা। কদলী লবণী ধাত্রী ফলান্যগুড়মৈক্ষবং। অতৈল-পক্বং মুনয়ো হবিষ্যান্নং বিদুর্ব্বধাঃ॥ ইতি তিথ্যাদিতত্ত্বং॥

## ও

ও ওকারঃ। স তু ত্রয়োদশস্বরবর্ণঃ। অস্যো-চ্চারণস্থানং ওষ্ঠঃ কণ্ঠশ্চ। স তু হ্রস্বো ন ভবতি। দীর্ঘঃ প্লুতশ্চ ভবতি। ওকারং চঞ্চলাপাঙ্গি পঞ্চদেবময়ং সদা। রক্ত-বিদ্যুল্লতাকারং ত্রিগুণাত্মানমীশ্বরং॥ পঞ্চ-প্রাণময়ং বর্ণং নমামি দেবমাতরং। এতদ্বর্ণং মহেশানি স্বয়ং পরমকুণ্ডলী। ইতি কামধেনুতন্ত্রং॥ তস্য লেখন-প্রকারো যথা। বামতঃ কুণ্ডলী ভূত্বা দক্ষাদ্মধ্যে তু কুঞ্চিতা। কিঞ্চিদ্দক্ষগতা যা তু কুঞ্চিতা বামতস্ত্বধঃ॥ ব্রহ্মেশবিষ্ণব-স্তাসু মাত্রা তু ব্রহ্মরূপিণী। শক্তিশ্চ পরমা সৈব ধ্যানমস্য প্রবক্ষ্যতে॥ ইতি বর্ণোদ্ধারতন্ত্রং॥ *॥ তস্য নামানি যথা। ওকারঃ সত্যপীযূষো পশ্চিমাস্যঃ শ্রুতিঃ স্থিরা। সদ্যোজাতো বাসুদেবো গায়ত্রী দীর্ঘজঙ্ঘকঃ। আপ্যায়নী চোর্দ্ধদন্তো লক্ষ্মী-র্বাণী মুখী দ্বিজঃ॥ উদ্দেশ্যদর্শকস্তীব্রঃ কৈলাসো বসুধাক্ষরঃ। প্রণবাংশো ব্রহ্ম-সূত্রমজেশঃ সর্ব্বমঙ্গলা। ত্রয়োদশী দীর্ঘ-নাসা রতিনাথো দিগম্বরা॥ ত্রৈলোক্য-বিজয়া প্রজ্ঞা প্রীতিবীজাদিকর্ষিণী। ইতি তন্ত্রশাস্ত্রং॥

ও ব্য সম্বোধনং। আহ্বানং। স্মরণং। অনুকম্পা। ইতি মেদিনী॥

ওঁ ব্য ওম্। প্রণবঃ। ইতি বেদাগমৌ॥

ওঃ (পুং) ব্রহ্মা। ইত্যেকাক্ষরকোষঃ॥

ওকং (ক্লী) গৃহং। আশ্রয়ঃ। ইত্যমর-টীকায়াং ভরতাদয়ঃ॥

ওকঃ [স্] (ক্লী) আশ্রয়ঃ। গৃহং। ইত্য-মরঃ॥

ওকণঃ (পুং) কেশকীটঃ। উকুণ্ ইতি ভাষা। ইতি শব্দরত্নাবলী॥

ওকণিঃ (পুং) যূকঃ। উকুণ্ ইতি ভাষা। ইতি শব্দরত্নাবলী॥

ওকুলঃ (পুং) গোধূমকৃতঅপূপকঃ। অস্য গুণাঃ। গুরুত্বং। বৃষ্যত্বং। মধুরত্বং। বলকারিত্বং। রক্তবাতাপহত্বং। স্নিগ্ধত্বং। হৃদ্যত্বং। মদবিবর্দ্ধনত্বঞ্চ। ইতি রাজ-নির্ঘণ্টঃ॥

ওকোদনী (স্ত্রী) যুকঃ। ইতি শব্দরত্নাবলী॥
ওক্কণী (স্ত্রী) ওকণঃ। উকুণ্ ইতি ভাষা। ইতি শব্দরত্নাবলী॥
ওখ ঋ শোষণে। ভূষণে। সামর্থ্যে। নিবারণে। ইতি কবিকল্পদ্রুমঃ॥ ঋ মা ভবান্ ওচিখৎ। অত্র ঋদিত্বাৎ প্রাক্প্রাপ্তো হ্রস্ব ঋদিত্বান্ন স্যাৎ। শোষঃ স্নেহরহিতীভাবঃ। ওখতি পঙ্ক আতপাৎ। অলমর্থো ভূষণং সামর্থ্যং বারণঞ্চ। ইতি দুর্গাদাসঃ॥
ওঘঃ (পুং) দ্রুতনৃত্যগীতবাদ্যং। সমূহঃ। ইত্যমরঃ॥ জলবেগঃ। পরম্পরা। উপদেশঃ। ইতি মেদিনী॥
ওঙ্কারঃ (পুং) প্রণবঃ। ইত্যমরঃ॥
ওঙ্কারা (স্ত্রী) বুদ্ধশক্তিবিশেষঃ। ইতি ত্রিকাণ্ডশেষঃ॥
ওজ ৎক বলে। তেজসি। ইতি কবিকল্পদ্রুমঃ॥ মা ভবান্ ওজিজৎ। ইতি দুর্গাদাসঃ॥
ওজঃ [স্] (ক্লী) দীপ্তিঃ। অবষ্টম্ভঃ। প্রকাশঃ। বলং। ইতি মেদিনী॥ প্রথমতৃতীয়পঞ্চমসপ্তমনবমৈকাদশরাশয়ঃ। ইতি জ্যোতিষং॥ গৌড়ীরীতিঃ কাব্যগুণঃ। তস্য লক্ষণং। বহুসমাসসংযুক্তবর্ণপদাড়ম্বরঃ। তদ্যথা। ওজঃ প্রসাদমাধুর্য্যগুণত্রিতয়ভেদতঃ। গৌড়বৈদর্ভপাঞ্চালীরীতয়ঃ পরিকীর্ত্তিতাঃ॥ ওজঃ সমাসভূয়স্ত্বং মাংসলং পদড়ম্বরং। তস্যোদাহরণং যথা। গঙ্গোত্তুঙ্গতরঙ্গসঙ্গতজটাজুটাগ্রজাগ্রৎফণিস্ফূর্জৎস্ফূৎকৃতিভীতিসম্ভূতচমৎকারস্ফুরৎসম্ভ্রমা। আনন্দামৃতবাপিকাং বিদধতী চিত্তং গিরীশপ্রভোস্তাং পায়াম্নবসঙ্গমে ভগবতী লজ্জাবতী পার্ব্বতী॥ ইতি কাব্যচন্দ্রিকা॥ * ॥ রসাদিসপ্তধাতুসারভাগজধাতুবিশেষঃ। তস্য গুণাঃ। সর্ব্বশরীরস্থিতত্বং। স্নিগ্ধত্বং। শীতলত্বং। স্থিরত্বং। শুক্লবর্ণত্বং। কফাত্মকত্বং। শরীরস্য বলপুষ্টিকারিত্বঞ্চ॥ হৃদি তিষ্ঠতি যচ্ছুদ্ধং রক্তমীষৎ সপীতকং। ওজঃ শরীরে সংজাতং তন্নাশান্নাশমৃচ্ছতি॥ ভ্রমরৈঃ ফলপুষ্পেভ্যো যথা সংভ্রিয়তে মধু। তদ্বদোজঃ শরীরেভ্যো ধাতুঃ সংভ্রিয়তে নৃণাং॥ ইতি বৈদ্যকং॥ ওজোঽদন্তোঽপি। ইতি ভরতঃ॥
ওড়বঃ (পুং) পঞ্চস্বরযুক্তরাগঃ। স তু ঋপবর্জ্জিত। ষগমধনিযুক্তঃ। যথা মল্লারাদয়ঃ। ইতি সংগীতদামোদরঃ॥
ওড়িকা (স্ত্রী) ধান্যবিশেষঃ। উড়ি ধান ইতি ভাষা। তৎপর্য্যায়ঃ। ওড়ী ২ নীবারঃ ৩। ইতি রত্নমালা॥ অস্য গুণাঃ। শোষণত্বং। রূক্ষত্বং। কফবায়ুবর্দ্ধকত্বং। পিত্তনাশিত্বং চ। ইতি রাজবল্লভঃ॥
ওড়ী (স্ত্রী) ওড়িকাধান্যং। ইতি রত্নমালা॥
ওড্রঃ (পুং) জবাপুষ্পবৃক্ষঃ। দেশবিশেষঃ। উড়িস্যা। ইতি খ্যাতঃ। তত্র বহুবচনান্তঃ। ইতি মেদিনী॥
ওড্রপুষ্পং (ক্লী) জবা। ইত্যমরঃ॥ বৃদ্ধাস্তু ওড্রপুষ্পশব্দেন তথা জবাশব্দেন ওড্রবৃক্ষঃ ওড্রস্য পুষ্পঞ্চোচ্যতে ইত্যাহুঃ। বৃক্ষে ব্যুৎপত্তির্যথা। ওড্রং পুষ্পমস্য ইতি। ওড্রঃ স্যাদোড্রপুষ্পঞ্চ জবাথ হয়মারকঃ।

ইতি রায়মুকুটঃ ॥ ওড্রপুষ্পকুসুমপ্রিয়েঽম্বিকে। ইতি হরানন্দঃ ॥ ইত্যমরটীকায়াং ভরতঃ ॥

ওড্রাখ্যা (স্ত্রী) জবাপুষ্পবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

ওণ ঋ অপসারণে। দূরীকরণে। ইতি কবিকল্পদ্রুমঃ ॥ অপসারণমপনয়নং। মা ভবান্ ওণিনৎ। ওণতি ধনং চৌরঃ। ইতি দুর্গাদাসঃ ॥

ওতুঃ (পুং স্ত্রী) বিড়ালঃ। ইত্যমরঃ ॥

ওদনঃ (পুং ক্লী) অন্নং। ভক্তং। ভাত ইতি ভাষা। ইত্যমরঃ ॥

ওদনাহ্বা (স্ত্রী) মহাসমঙ্গা। ইতি রাজনির্ঘণ্টঃ॥

ওদনিকা (স্ত্রী) মহাসমঙ্গা। বলা। ইতি রাজনির্ঘণ্টঃ ॥

ওদনী (স্ত্রী) বলা। বেলেড়া ইতি ভাষা। ইতি মেদিনী ॥

ওম্ ব্য প্রণবঃ। স তু অকারোকারমকারবর্ণত্রয়াত্মকঃ। তথাচ উক্তং। অকারো বিষ্ণুরুদ্দিষ্ট উকারস্তু মহেশ্বরঃ। মকারেণোচ্যতে ব্রহ্মা প্রণবেন ত্রয়ো মতাঃ॥ অনুমতিঃ। ইতি বিশ্বঃ॥ উপক্রমঃ। অঙ্গীকারঃ। অপাকৃতিঃ। মঙ্গলং। ইতি মেদিনী ॥

ওম্ (ক্লী) ব্রহ্মণো নামবিশেষঃ। যথা। ওঁ তৎসদিতি নির্দ্দেশো ব্রহ্মণস্ত্রিবিধঃ স্মৃতঃ। ব্রাহ্মণাশ্চৈব বেদাশ্চ যজ্ঞাশ্চ বিহিতাঃ পুরা ॥ তস্মাদোমিত্যুদাহৃত্য যজ্ঞদানতপঃক্রিয়াঃ। প্রবর্ত্তন্তে বিধানোক্তাঃ সততং ব্রহ্মবাদিনাং॥ ইতি শ্রীভগবদ্গীতায়াং ১৭ অধ্যায়ঃ ॥

ওলং (ত্রি) আর্দ্রং। ভিজা ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ ॥

ওলঃ (পুং) স্বনামখ্যাতমূলবিশেষঃ। শূরণঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

ওলজ ই ক্ষেপণে। ইতি কবিকল্পদ্রুমঃ ॥ অন্তস্থতৃতীয়যুক্তঃ। ই ওলঞ্জ্যতে ধূলির্বায়ুনা। ইতি দুর্গাদাসঃ ॥

ওলড ই কি উৎক্ষেপে। ইতি কবিকল্পদ্রুমঃ ॥ অন্তস্থতৃতীয়োপধঃ। ই ওলণ্ড্যতে। কি ওলণ্ডয়তি ওলণ্ডতি তণ্ডুলং লোকঃ। কর্পূরমোলণ্ডয়তীতি দর্শনাৎ। ইতি দুর্গাদাসঃ ॥

ওল্লঃ (পুং) ওলঃ। তৎপর্য্যায়ঃ। শূরণঃ ২ কন্দঃ ৩ অর্শোঘ্নঃ ৪ চিত্রদণ্ডকঃ ৫। ইতি রত্নমালা ॥ অস্য গুণাঃ। অগ্নিদীপনত্বং। রুচিকারিত্বং। কফনাশিত্বং। বিশদত্বং। লঘুত্বং। অর্শোরোগপথ্যত্বঞ্চ। গ্রাম্যকন্দস্তু দোষলঃ॥ ইতি রাজবল্লভঃ ॥

ওষঃ (পুং) দাহঃ। তৎপর্য্যায়ঃ। প্লোষঃ ২। ইত্যমরঃ ॥ প্লোষঃ ৩। ইতি ভরতঃ ॥

ওষণঃ (পুং) কটুরসঃ। ঝাল ইতি ভাষা। ইতি হেমচন্দ্রঃ ॥

ওষণী (স্ত্রী) শাকবিশেষঃ। পুড্যাতি ইতি ভাষা। অস্যা গুণঃ। কফবায়ুনাশিত্বং। ইতি রাজবল্লভঃ ॥

ওষধিঃ (স্ত্রী) ফলপাকান্তবৃক্ষাদিঃ। কদলী ধান্যমিত্যাদিঃ। ইত্যমরঃ ॥

ওষধিপ্রস্থঃ (পুং) হিমালয়স্য নগরং। যথা। এতস্মিন্নন্তরে শম্ভুঃ শিপ্রং ত্যক্ত্বা তদা সরঃ। গঙ্গাবতারমগমদ্বিমবৎপ্রস্থমুত্তমং॥

যত্র গঙ্গা নিপতিতা পুরা ব্রহ্মপুরাৎ স্থতা। ওষধিপ্রস্থনগরস্যাদূরে সানুরুত্তমঃ॥ তত্র ভর্গঃ স্বমাত্মানমক্ষরং পরমাৎপরং। একাগ্রং চিন্তয়ামাস ভগবান্ বৃষভধ্বজঃ॥ ইতি কালিকাপুরাণে ৪১ অধ্যায়ঃ॥

ওষধী (স্ত্রী) ওষধিঃ। ইতি ভরতঃ॥

ওষধীপতিঃ (পুং) চন্দ্রঃ। ইতি হেমচন্দ্রঃ॥

ওষধীশঃ (পুং) চন্দ্রঃ। কর্পূরং। ইত্যমরঃ॥

ওষ্ঠঃ পুং) দন্তাচ্ছাদকাবয়বঃ। উপর ঠোঁট ইতি ভাষা। তৎপর্য্যায়ঃ। রদনচ্ছদঃ ২ দশনবাসঃ ৩। ইত্যমরঃ॥ দন্তবাসঃ ৪ দন্তবস্ত্রং ৫ রদচ্ছদঃ ৬ ইতি রাজনির্ঘণ্টঃ॥ তস্য দ্বিবচনে ওষ্ঠৌ ওষ্ঠাধরাবিতি যাবৎ॥

ওষ্ঠপুষ্পঃ (পুং) বন্ধূকপুষ্পবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ "

ওষ্ঠরোগঃ (পুং) আস্যরোগান্তর্গতোষ্ঠভবব্যাধিঃ। স চ বাতপিত্তকফসন্নিপাতরক্তমাংসমেদোঽভিঘাতজত্বেনাষ্টবিধঃ। তেষাং যথাক্রমং লক্ষণানি যথা। কর্কশৌ পরুষৌ স্তব্ধৌ সংপ্রাপ্তানিলবেদনৌ। দাল্যেতে পরিপোট্যেতে ওষ্ঠৌ মারুতকোপতঃ॥ চীয়েতে পিড়কাভিশ্চ সরুজাভিঃ সমন্ততঃ। সদাহপাকপিড়কৌ পীতাভাসৌ চ পিত্ততঃ॥ সবর্ণাভিস্তু চীয়েতে পিড়কাভিরবেদনৌ। ভবতস্তু কফাদোষ্ঠৌ পিচ্ছিলৌ শীতলৌ গুরূ॥ সকৃৎ কৃষ্ণৌ সকৃৎ পীতৌ সকৃৎ শ্বেতৌ তথৈবচ। সন্নিপাতেন বিজ্ঞেয়াবনেকপিড়কাচিতৌ॥ খর্জ্জুরফলবর্ণাভিঃ পিড়কাভির্নিপীড়িতৌ। রক্তোপসৃষ্টৌ রুধিরং স্রবতঃ শোণিতপ্রভৌ॥ গুরূ স্থূলৌ মাংসদুষ্টৌ মাংসপিণ্ডবদুন্নতৌ। জন্তবশ্চাত্র মূর্চ্ছন্তি নরস্যোভয়তো মুখাৎ॥ সর্পির্মণ্ডপ্রতীকাশৌ মেদসাকণ্ডুরৌ গুরূ। স্বচ্ছং স্ফটিকসঙ্কাশমাস্রাবং স্রবতো ভৃশং॥ তয়োর্ব্রণো ন সংরোহেন্মৃদুত্বঞ্চ ন গচ্ছতি। ওষ্ঠৌ পর্য্যবদীর্য্যেতে পোট্যেতে চাভিঘাততঃ॥ ইতি নিদানং॥ তচ্চিকিৎসা মুখরোগশব্দে দ্রষ্টব্যা॥

ওষ্ঠী (স্ত্রী) বিম্বফলং। তেলাকুচা ইতি ভাষা। ইতি রত্নমালা॥

ওষ্ঠোপমফলা (স্ত্রী) বিম্বিকা। ইতি জটাধরঃ॥

## ঔ

ঔ ঔকারঃ। স তু চতুর্দ্দশস্বরবর্ণঃ। অস্যোচ্চারণস্থানং ওষ্ঠঃ কণ্ঠশ্চ। স দীর্ঘঃ প্লুতশ্চ ভবতি ন হ্রস্বঃ॥ রক্তবিদ্যুল্লতাকারং ঔকারং কুণ্ডলী স্বয়ং। অত্র ব্রহ্মাদয়ঃ সর্ব্বে তিষ্ঠন্তি সততং প্রিয়ে॥ পঞ্চপ্রাণময়ং বর্ণং সদাশিবময়ং সদা। সদা ঈশ্বরসংযুক্তং চতুর্ব্বর্গপ্রদায়কং॥ ইতি কামধেনুতন্ত্রং॥ তস্য লেখনপ্রকারো যথা। ওকারমধ্যদক্ষে তু গতা তূর্দ্ধগতায়তা। কিঞ্চিৎ সা বামতো বক্রা তাসু ব্রহ্মেশবিষ্ণবঃ॥ শক্তিমধ্যগতা রেখা ধ্যানমস্য প্রচক্ষ্যতে। ইতি বর্ণোদ্ধারতন্ত্রং॥ * ॥ অস্য নামানি যথা। ঔকারঃ শক্তিকো নাদস্তেজসো বামজঙ্ঘকঃ। মনুরূর্দ্ধগ্রহেশশ্চ শঙ্কুকর্ণঃ সদাশিবঃ॥ অধোদন্তশ্চ কণ্ঠৌষ্ঠৌ সঙ্কর্ষণঃ

সরস্বতী। আজ্ঞা চোর্দ্ধমুখী শান্তো ব্যাপিনী প্রকৃতঃ পয়ঃ ॥ অনন্তা জ্বালিনী ব্যোমা চতুর্দ্দশী রতিপ্রিয়ঃ। নেত্রমাত্মাকর্ষিণী চ জ্বালামালিনিকা ভৃগুঃ ॥ ইতি তন্ত্রশাস্ত্রং ॥ শেষদশনঃ। সত্যান্তঃ। ইতি বীজবর্ণাভিধানং ॥

ঔ ব্য আহ্বানং। সম্বোধনং। ইতি মেদিনী ॥ বিরোধঃ। নির্ণয়ঃ। ইতি শব্দরত্নাবলী ॥

ঔঁ ব্য শূদ্রাণাং প্রণবঃ। যথা। চতুর্দ্দশস্বরো যোঽসৌ সেতুরৌকারসংজ্ঞিতঃ। স চানুস্বারনাদাভ্যাং শূদ্রাণাং সেতুরুচ্যতে ॥ ইতি তন্ত্রসারধৃতকালিকাপুরাণং ॥

ঔঃ (পুং) অনন্তঃ। ইত্যেকাক্ষরকোষঃ ॥ নিস্বনঃ। ইতি মেদিনী ॥

ঔঃ (স্ত্রী) বিশ্বম্ভরা। ইতি মেদিনী ॥

ঔখ্যং (ত্রি) স্থালীপক্বান্নাদি। উখায়াং নিষ্পন্নং ইত্যর্থে ষ্যপ্রত্যয়ঃ ॥

ঔচিতী (স্ত্রী) ঔচিত্যং। ইতি লিঙ্গাদিসংগ্রহে অমরঃ ॥

ঔচিত্যং (ক্লী) উচিতস্য ভাবঃ। উপযুক্ততা। যোগ্যত্বং। ইত্যমরঃ ॥

ঔড়বঃ (পুং) ওড়বস্বরঃ। স চ রাগস্য জাতিবিশেষঃ। পঞ্চস্বরমিশ্রিতরাগরাগিণ্য ইতি যাবৎ। যথা। ঔড়বঃ পঞ্চভিঃ প্রোক্তঃ স্বরৈঃ ষড়্ভিস্তু ষাড়বঃ। সম্পূর্ণা সপ্তভিঃ প্রোক্তা রাগজাতিস্ত্রিধা মতা ॥ ইতি সঙ্গীতরত্নাকরঃ ॥ অপি চ। সম্পূর্ণস্বরাঃ ষ ঋ গ ম প ধ নি ॥ ষাড়বস্বরাঃ নিষাদোজ্ঝিতাঃ ষ ঋ গ ম প ধ ॥ ওড়বস্বরাঃ ঋ প বর্জিতাঃ ষ গ ম ধ নি ॥ সম্পূর্ণরাগাঃ সপ্তভিঃ স্বরৈর্যথা। নটবসন্তাদয়ঃ। ষাড়বরাগাঃ ষড়্ভিঃ স্বরৈর্যথা। সৈরিন্ধ্রীপ্রভৃতয়ঃ। ওড়বরাগাঃ পঞ্চভিঃ স্বরৈর্যথা মল্লারাদয়ঃ। ইতি সঙ্গীতদামোদরঃ ॥

ঔড়ুম্বরং (ক্লী) কুষ্ঠরোগবিশেষঃ। ইতি মেদিনী ॥ তস্য লক্ষণং। রুগ্দাহরাগকণ্ডূভিঃ পরীতং রোমপিঞ্জরং। উড়ুম্বরফলাভাসং কুষ্ঠমৌড়ুম্বরং বদেৎ ॥ ইতি নিদানং ॥ তাম্রং। ইতি জটাধরঃ ॥ তাম্রপাত্রাদৌ ত্রি ॥

ঔড়ুম্বরঃ (পুং) চতুর্দ্দশযমান্তর্গতযমবিশেষঃ। ইতি মেদিনী ॥ মুনিবিশেষঃ। যথা। বৈখানসা বালিখিল্যৌড়ুম্বরাঃ ফেনপা বনে ন্যাসে কুটীচকঃ পূর্ব্বং বহ্বোদো হংসনিষ্ক্রিয়ৌ ॥ ইতি শ্রীভাগবতে ৩ স্কন্ধে ১২ অধ্যায়ঃ ॥ ঔড়ুম্বরাঃ প্রাতরুত্থায় যাং দিশং প্রথমং পশ্যন্তি তত আহৃতৈঃ ফলাদিভির্জীবন্তঃ। ইতি তট্টীকায়াং শ্রীধরস্বামী ॥

ঔৎকর্ষ্যং (ক্লী) উৎকর্ষতা ॥

ঔত্তানপাদিঃ (পুং) ধ্রুবঃ। ইত্যমরঃ ॥ স তু উত্তানপাদরাজপুত্রঃ। স্বায়ম্ভুবমনুপৌত্রঃ। গ্রহাণামুপরিস্থিতনিশ্চলতারা চ ॥

ঔৎসর্গিকঃ (ত্রি) সামান্যবিধিরুৎসর্গস্তস্য ভাবঃ। সামান্যত্বং। ইতি স্মার্ত্তাঃ ॥

ঔৎসুক্যং (ক্লী) উৎকণ্ঠা। ইতি হেমচন্দ্রঃ ॥

ঔদনিকঃ (ত্রি) সূপকারঃ। ইত্যমরঃ ॥

ঔদরিকঃ (ত্রি) বিজিগীষাবিবর্জ্জিতঃ। উদরমাত্রপূরকঃ। পেটুক ইতি ভাষা। তৎপর্য্যায়ঃ। আদ্যূনঃ ২। ইত্যমরঃ ॥

বিজিগীষাব্যবহারঃ কশ্চিৎ প্রকর্ষো বা আলস্যাৎ তেন বিহীনো যঃ কেবলমুদরাধীনঃ। ইতি ভরতঃ ॥ স্বোদরপূরণাশক্তিনিমিত্তক নিন্দাত্যাগেচ্ছা বিজিগীষা তয়া রহিতঃ। ইতি রমানাথঃ ॥

ঔদশ্বিতং (ক্লী) অৰ্দ্ধজলযুক্তঘোলং। ইতি হেমচন্দ্রঃ ॥

ঔদশ্বিৎকং (ক্লী) অৰ্দ্ধজলমিশ্রিতঘোলং। ইতি হেমচন্দ্রঃ ॥

ঔদার্য্যং (ক্লী) উদারতা। ইতি হেমচন্দ্রঃ ॥

ঔদাস্যং (ক্লী) উদাসস্য ভাবঃ। বৈরাগ্যং। অনুরাগাদিশূন্যতা। যথা। ঔদাস্যসম্বিদবলম্বিতশূন্যমুদ্রামস্মিন্ দৃশোঃ পতিততামবলোক্য ভৈম্যাঃ। ইত্যাদি নৈষধং ॥ ক্ষৌণীবিলিখনহেতোর্বয়মপি কুজাঃ কিমৌদাস্যমিতি পদ্যাবলী ॥

ঔদ্দালকং (ক্লী) বল্মীককারিকীটনির্ম্মিতমধু। তস্য গুণাঃ। কষায়ত্বং। উষ্ণত্বং। কটুত্বং। কুষ্ঠবিষরোগনাশিত্বঞ্চ। ইতি রাজবল্লভঃ ॥

ঔদ্ধত্যং (ক্লী) উদ্ধতস্য ভাবঃ। যথা। অসূয়ান্যগুণর্দ্ধীনামৌদ্ধত্যাদসহিষ্ণুতা। ভ্রূভঙ্গদোষসংঘোষরক্তাক্ষিবৈকৃতাদিকৃৎ ॥ ইতি সাহিত্যদর্পণং ॥

ঔদ্ভিজ্জং (ক্লী) পাংশবলবণং। ইতি রাজনির্ঘণ্টঃ ॥

ঔদ্ভিদং (ক্লী) সাম্ভরিলবণং। অস্য গুণাঃ তীক্ষ্ণত্বং। উৎক্লেদকারিত্বং। ক্ষারযুক্তত্বং। কটুত্বং। তিক্তত্বং। কোষ্ঠবদ্ধতানাহশূলনাশিত্বঞ্চ। ইতি রাজবল্লভঃ ॥ উদ্ভিদো জাতং জলং। তস্য গুণাঃ। মধুরত্বং। পিত্তশমনত্বং। অবিদাহিত্বং। ইতি রাজবল্লভঃ

ঔদ্বাহিকং (ক্লী) ভার্য্যাপ্রাপ্তিকালে লব্ধং ভার্য্যাধনং। ইতি দায়ভাগঃ ॥ তৎ ভ্রাতৃভিরবিভাজ্যং। যথা। পিতৃদ্রব্যাবিনাশেন যদন্যৎ স্বয়মর্জ্জয়েৎ। মৈত্রমৌদ্বাহিকঞ্চৈব দায়াদানাং ন তদ্ভবেৎ ॥ ইতি যাজ্ঞবল্ক্যঃ ॥

ঔপগবঃ (পুং) উপগোরপত্যং। ইতি ভরতঃ ॥ উপ সমীপে গৌর্যস্য ইতি উপগুর্গোপঃ। লক্ষণয়া তৎপুরোহিতে উপগুশব্দঃ। যথা হারীতঃ। যং বর্ণং যাজয়েদ্ যস্তু স তদ্বর্ণত্বমাপ্নুয়াৎ। সদ্যোবর্ষেণ বর্ষৈশ্চেত্যেবমেবাব্রবীদ্ভৃগুঃ ॥ * ॥ তথাচ লক্ষণয়া ব্রাহ্মণ উপগুপদবাচ্যঃ। তস্যাপত্যমৌপগবঃ। ইতি শ্রীভাগবতটীকায়াং স্বামী ॥

ঔপগবকং (ক্লী) ঔপগবসমূহঃ। ইত্যমরঃ ॥

ঔপগ্রস্তিকঃ (পুং) রাহুগ্রস্তশ্চন্দ্রঃ সূর্য্যশ্চ। ইতি শব্দরত্নাবলী ॥

ঔপনিধিকং (ক্লী) উপনিধিঃ। প্রীত্যা ভোগার্থমর্পিতদ্রব্যং। ইতি স্মৃতিঃ ॥

ঔপম্যং (ক্লী) সাদৃশ্যং। তৎপর্য্যায়ঃ। অনুকারঃ ২ অনুহারঃ ৩ সাম্যং ৪ তুলা ৫ উপমা ৬ কক্ষঃ ৭ উপমানং ৮। ইতি হেমচন্দ্রঃ

ঔপয়িকঃ (ত্রি) ন্যায্যঃ। উপযুক্তঃ। ইত্যমরঃ ॥

ঔপরোধিকঃ (পুং) পীলুদণ্ডঃ। তৎপর্য্যায়ঃ পৈলবঃ ২। ইতি হেমচন্দ্রঃ ॥ উপরোধসম্বন্ধিনি ত্রি ॥

ঔপবস্তং ( ক্লী ) উপবাসঃ। ইতি হেমচন্দ্রঃ॥

ঔপসর্গিকঃ ( পুং ) সন্নিপাতরোগবিশেষঃ। তস্য লক্ষণং। কফোনুলোমবাতেন যদি পিত্তানুগো ভবেৎ। স্বেদশৈত্যাদিভির্জুষ্ট-স্তদা ভবতি মানবঃ॥ প্রতিলোমঃ পুনস্তেন স্বাস্থ্যমায়াতি তৎক্ষণাৎ। ঔপসর্গিক এবান্যঃ সন্নিপাত উদাহৃতঃ। ইতি বৈদ্যকং॥ উপসর্গসম্বন্ধিনি ত্রি॥

ঔপস্থ্যং ( ক্লী ) উপস্থেন্দ্রিয়সুখং। ইতি শ্রী-ভাগবতং॥

ঔমীনং ( ত্রি ) উম্যং। উমাক্ষেত্রং। ইত্য-মরটীকায়াং ভরতঃ॥ মসিনার ক্ষেত ইতি ভাষা॥

ঔরগং ( ক্লী ) অশ্লেষানক্ষত্রং। ইতি জটাধরঃ। সর্পসম্বন্ধিবস্তুনি ত্রি॥

ঔরভ্রঃ ( পুং ) কম্বলঃ। তৎপর্য্যায়ঃ। ঊর্ণায়ুঃ ২ আবিকঃ ৩ রল্লকঃ ৪। ইতি হেমচন্দ্রঃ॥

ঔরভ্রকং ( ক্লী ) মেষসমূহঃ। ভেড়ার পাল ইতি ভাষা। ইত্যমরঃ॥

ঔরসঃ ( পুং স্ত্রী ) স্বজাতপুত্রঃ। তৎপর্য্যায়ঃ। ঔরস্যঃ ২। ইত্যমরঃ॥ উরস্যঃ ৩। ইতি তন্ত্রীকা॥ দ্বাদশবিধপুত্রান্তর্গতশ্রেষ্ঠ-পুত্রোঽয়ং। স তু সবর্ণায়াং ভার্য্যায়াং স্বয়ং জনিতঃ। যথা। সবর্ণায়াং সং-স্কৃতায়াং স্বয়মুৎপাদিতমৌরসং বিদ্যাৎ। ইতি বৌধায়নঃ॥ ঔরসো ধর্ম্মপত্নীজ ইত্যাদি যাজ্ঞবল্ক্যঃ॥

ঔরস্যঃ ( পুং স্ত্রী ) ঔরসপুত্রঃ। ইত্যমরঃ॥

ঔর্দ্ধদেহিকং ( ত্রি ) মৃতার্থং তদহর্দানং। ইত্যমরঃ॥ যদহ্নি মৃতস্তদহঃপ্রভৃতি সপিণ্ডীকরণাৎ পূর্ব্বং প্রেততৃপ্তিহেতুকং যৎ পিণ্ডাদিদানং তৎ। ইতি ভরতঃ॥

ঔর্দ্ধস্রোতসিকঃ ( ত্রি ) শৈবঃ। ইতি ত্রিকাণ্ড-শেষঃ॥

ঔর্ব্বং ( ক্লী ) পাংশবলবণং। ইতি রাজ-নির্ঘণ্টঃ॥

ঔর্ব্বঃ ( পুং ) বাড়বানলঃ। ইত্যমরঃ॥ স তু ভূগোলস্য দক্ষিণসীমা। তত্র সর্ব্বে নরকাঃ দৈত্যাশ্চ বসন্তি। ইতি সিদ্ধান্তশিরো-মণিঃ॥ পঞ্চপ্রবরান্তর্গতমুনিবিশেষঃ। ইতি পুরাণং॥

ঔর্ব্বশেয়ঃ ( পুং ) অগস্ত্যমুনিঃ। ইতি হেম-চন্দ্রঃ॥

ঔলূকং ( ক্লী ) উলূকসমূহঃ। পেচার ঝাঁক্ ইতি ভাষা। ইতি জটাধরঃ॥

ঔলূক্যঃ ( পুং ) বৈশেষিকঃ। বৈশেষিকদর্শন-বেত্তা। ইতি হেমচন্দ্রঃ॥

ঔশীরং ( ক্লী ) শয়নাসনং। ইত্যমরঃ॥ শয়নং স্বাপঃ শয্যা বা আসনং পীঠাদি। শয়না-সনং সমুদিতমিতি স্বামী। পৃথগিতি সুভূতিঃ। ইত্যমরটীকায়াং ভরতঃ॥ উশী-রজং। চামরং। দণ্ডঃ। ইতি হেমচন্দ্রঃ॥

ঔশীরঃ ( পুং ) চামরদণ্ডঃ। ইত্যমরঃ॥

ঔষণং ( ক্লী ) কটুরসঃ। উষণং মরীচং তস্য ভাবঃ॥

ঔষধং ( ক্লী ) রোগনাশকদ্রব্যং। ওষধি ভবং ভবার্থে ষ্ণপ্রত্যয়ঃ। তৎপর্য্যায়ঃ। ভেষজং ২ ভৈষজ্যং ৩ অগদঃ ৪ জায়ুঃ ৫। ইত্য-মরঃ॥ জৈত্রং ৬ আয়ুর্যোগঃ ৭ গদা-রাতিঃ ৮ অমৃতং ৯ আয়ুর্দ্রব্যং ১০। ইতি

বৈদ্যকং ॥ নানারোগহরৌষধাদির্যথা । রুদ্র উবাচ । এবং ধন্বন্তরির্বিষ্ণুঃ সুশ্রুতাদীনুবাচ হ । হরিঃ পুনর্হরায়াহ নানারোগান্ রুগর্দ্দনান্ ॥ হরিরুবাচ । সর্ব্বজ্বরেষু প্রথমং কার্য্যং শঙ্কর লঙ্ঘনং । ক্বথিতোদকপানঞ্চ তথা নির্ব্বাতসেবনং ॥ অগ্নিস্বেদো জ্বরাস্ত্বেবং নাশমায়াস্তি হীশ্বর। বাতজ্বরহরঃ ক্বাথো গুড়ূচ্যা মুস্তকেন চ। ছুরালভয়ৈব কৃতং পিত্তজ্বরহরং শৃণু। শুণ্ঠীপর্পটমুস্তৈশ্চ বালকোশীরচন্দনৈঃ ॥ সাজ্যঃ ক্বাথঃ শ্লেষ্মজস্তু সশুণ্ঠিঃ সদুরালভঃ। সবালকঃ সর্ব্বজ্বরং সশুণ্ঠিঃ সহ পর্পটঃ॥ কিরাততিক্তকৈর্বাপি গুড়ূচীশুণ্ঠিতিক্তকৈঃ । পিত্তজ্বরহরঃ স্যাচ্চ শৃণ্বন্যং যোগমুত্তমং ॥ বালকোশীরপাঠাভিঃ কণ্টকারিকমুস্তকৈঃ । জ্বরমুচ্চ কৃতক্বাথস্তথা বৈ সুরদারুণা ॥ ধন্যাকনিম্বমুস্তানাং সমধুঃ স চ শঙ্কর। পটোলপত্রযুক্তশ্চ গুড়ূচীত্রিফলাযুতঃ ॥ পীতোঽখিলজ্বরহরঃ ক্ষুধাকৃদ্বাতমুদ্বিদং । হরীতকীপিপ্পলীনামামলীচিত্রকোদ্ভবং ॥ চূর্ণং জলঞ্চ ক্বথিতং ধন্যাকোশীরপর্পটৈঃ। আমলক্যা গুড়ূচ্যা চ মধুযুক্তং সচন্দনং ॥ সমস্তজ্বরমুৎ স্যাচ্চ সন্নিপাতহরং শৃণু। হরিদ্রানিম্বত্রিফলামুস্তকৈর্দেবদারুণা ॥ কষায়ং কটুরোহিণ্যা সপটোলং সপত্রকং । ত্রিদোষজ্বরমুৎ স্যাচ্চ পীতস্তু ক্বথিতং জলং ॥ কণ্টকারিনাগরেণ গুড়ূচ্যা পুষ্করেণ চ। জগ্ধ্বা নাগবলাচূর্ণং শ্বাসকাসাদিমুদ্ভবেৎ ॥ কফবাতজ্বরে দেয়ং জলমুষ্ণং পিপাসিনে। মণ্ডো বা মুদ্গযূষং বা শাল্যন্নং বাথ যূষবৎ ॥ জ্বরার্ত্তমানুষে দেয়ং জ্বরহানিস্তদা ভবেৎ । বিশ্বপর্পটকোশীরঘনচন্দনসাধিতং॥ দদ্যাৎ সুশীতলং বারি তৃট্‌ছর্দ্দিজ্বরদাহনুৎ। বিল্বাদিপঞ্চমূলস্য ক্বাথঃ স্যাদ্বাতিকে জ্বরে॥ পাচনং পীপ্পলীমূলং গুড়ূচী বিশ্বভেষজং। বাতজ্বরে ত্বয়ং ক্বাথো দত্তঃ শান্তিকরঃ পরঃ॥ পিত্তজ্বরমুৎ সমধুঃ ক্বাথঃ পর্পটনিম্বয়োঃ । বিধানে ক্রিয়মাণেঽপি যস্য সংজ্ঞা ন জায়তে ॥ পাদয়োস্তু ললাটে বা দহেল্লোহশলাকয়া। তিক্তা পাঠা পটোলশ্চ বিশালা ত্রিফলা ত্রিবৃৎ॥ সক্ষীরো ভেদনঃ ক্বাথঃ সর্ব্বজ্বরবিশোধনঃ। ইতি গারুড়ে ১৭৯ অধ্যায়ঃ॥ * ॥ ভগবানুবাচ। সপ্তরাত্রাৎ প্রজায়ন্তে খল্বীটস্য কচাঃ শুভাঃ। দগ্ধহস্তিদন্তলেপাৎ সাজাক্ষীররসাঞ্জনাৎ॥ ভৃঙ্গরাজরসেনৈব চতুর্ভাগেণ সাধিতং । কেশবৃদ্ধিকরং তৈলং গুঞ্জাচূর্ণান্বিতেন চ। এলা মাংসী কুষ্ঠমুরাযুক্তমভ্যঙ্গতঃ শিব। গুঞ্জাফলং সমাপ্যৈব লেপনং চেন্দ্রলুপ্তনুৎ॥ আম্রাস্থিচূর্ণলেপাদ্ধি কেশাঃ সূক্ষ্মা ভবন্তি বৈ। বদ্ধমূলা ঘনা দীর্ঘাঃ স্নিগ্ধাঃ স্যুর্নোৎপতন্তি চ॥ বিড়ঙ্গগন্ধপাষাণসাধিতং তৈলমুত্তমং। সচতুর্গুণগোমূত্রং সমনঃশিলমেব চ ॥ শিরোঽভ্যঙ্গাচ্ছিরোজন্মযূকালিখ্যাক্ষয়ং নয়েৎ। নবদগ্ধশঙ্খচূর্ণঘৃষ্টসীসকলেপিতাঃ ॥ কচাঃ শ্লক্ষ্ণা মহাকৃষ্ণা ভবন্তি বৃষভধ্বজ। ভৃঙ্গরাজং লোহচূর্ণং ত্রিফলা বীজপূরকং॥ নীলী চ

করবীরঞ্চ গুড়মেতৈঃ সমৈঃ শৃতং। পলিতানীহ কৃষ্ণানি কুর্য্যাল্লেপান্মহৌষধং॥ আম্রাস্থিমজ্জা ত্রিফলা নীলী চ ভৃঙ্গ-রাজকং। জীর্ণং পক্কলৌহচূর্ণং কাঞ্জিকং কৃষ্ণকেশকৃৎ॥ চক্রমর্দকবীজানি কুষ্ঠমেরণ্ড-মূলকং। অত্যুষ্ণকাঞ্জিকং পিষ্ট্বা লেপান্-মস্তকরোগনুৎ॥ সৈন্ধবঞ্চ বচা হিঙ্গু কুষ্ঠং নাগেশ্বরং তথা। শতপুষ্পা দেবদারু এভি-স্তৈলস্ত সাধিতং॥ গোপুরীষরসেনৈব চতু-র্ভাগেণ সংযুতং। তৎকর্ণভরণাদ্রুদ্র কর্ণ-শূলং ক্ষয়ং নয়েৎ॥ মেষমূত্রসৈন্ধবাভ্যাং কর্ণয়োর্ভরণাৎ শিব। কর্ণয়োঃ পূতিনাশঃ স্যাৎ কৃমিস্রাবাদিকস্য চ॥ মালতীপুষ্প-দলয়ো রসেন ভরণাৎ তথা। গোজলেনৈব পূরেণ কর্ণস্রাবো বিনশ্যতি॥ কুষ্ঠমাষমরী-চানি তগরং মধু পিপ্পলী। অপামার্গোঽশ্ব-গন্ধা চ বৃহতী সিতসর্ষপাঃ॥ যবাস্তিলাঃ সৈন্ধবঞ্চ পাদিকোদ্বর্ত্তনং শুভং। লিঙ্গবাহু-স্তনানাঞ্চ কর্ণয়োর্বৃদ্ধিকৃদ্ভবেৎ॥ কটু-তৈলং ভল্লাতকং বৃহতীফলদাড়িমং। বল্কলৈঃ সাধিতং লিপ্তং লিঙ্গং তেন বিব-র্দ্ধতে॥ ইতি গারুড়ে ১৮০ অধ্যায়ঃ॥*॥ হরিরুবাচ। শোভাঞ্জনপত্ররসং মধুযুক্তং হি চক্ষুষোঃ। ভরণাদ্রোগহরণং ভবে-ন্নাস্ত্যত্র সংশয়ঃ॥ অশীতিতিলপুষ্পাণি জাত্যাশ্চ কুসুমানি চ। ভয়া নিম্বামলা শুণ্ঠী পিপ্পলী তণ্ডুলীয়কং॥ ছায়াশুষ্কাং বর্টিং কুর্য্যাৎ পিষ্ট্বা তণ্ডুলবারিণা। মধুনা সহ সা চাক্ষোরঞ্জনাত্তিমিরাদিনুৎ॥ বিভীতকাস্থিমজ্জা তু শঙ্খনাভির্মনঃশিলা

নিম্বপত্রমরীচানি অজামূত্রেণ পেষয়েৎ॥ পুষ্পং রাত্র্যন্ধতাং হন্তি তিমিরং পটলং তথা। চতুর্ভাগানি শঙ্খস্য তদর্দ্ধেন মনঃ-শিলা॥ সৈন্ধবঞ্চ তদর্দ্ধেন এতৎ পিষ্টো-দকেন তু। ছায়াশুষ্কাস্তু বটিকাং কৃত্বা নয়নমঞ্জয়েৎ॥ তিমিরং পটলং হন্তি পিটকস্য মহৌষধং। ত্রিকটু ত্রিফলা চৈব করঞ্জস্য ফলানি চ॥ সৈন্ধবং রজনী দ্বে চ ভৃঙ্গরাজরসেন হি। পিষ্ট্বা তদঞ্জনা-দেব তিমিরাদিবিনাশনং॥ অটরূষকমূলস্তু কাঞ্জিকাপিষ্টমেব চ। তেনাক্ষিভূরি-লেপাচ্চ চক্ষুঃশূলং বিনশ্যতি॥ সতক্রং বদরীমূলং পীতমক্ষিব্যথাং হরেৎ। সৈন্ধবং কটুতৈলঞ্চ অপামার্গস্য মূলকং॥ ক্ষীরকাঞ্জিকসংঘৃষ্টং তাম্রপাত্রে চ তেন চ। অঞ্জনাৎ পিটকস্যৈব নাশো ভবতি শঙ্কর॥ বিলুনীলীকারমূলং পিষ্টমশ্ব-জলেন চ। অনেনাঞ্জিতমাত্রেণ নশ্যন্তি তিমিরাণি হি॥ পিপ্পলী কতকঞ্চৈব হরিদ্রামলকং বচা। খদিরপিষ্টবর্ত্তিশ্চ অঞ্জনং নেত্ররোগনুৎ॥ নীরপূর্ণমুখো ধৌতি বৃহদ্বাতেন যোঽক্ষিণী। প্রভাতে নেত্র-রোগৈশ্চ নিত্যং সর্ব্বৈঃ প্রমুচ্যতে॥ শুক্লৈ-রণ্ডস্য মূলেন পত্রেণাপি প্রসাধিতং। ছাগদুগ্ধং সেকযুক্তং চক্ষুষোর্বাতরোগনুৎ॥ চন্দনং সৈন্ধবং বৃদ্ধপলাশশ্চ হরীতকী। পটোলকুসুমং নীলী চক্রিকা হরতে-ঽঞ্জনাৎ॥ গুঞ্জামূলং ছাগমূত্রঘৃষ্টং তিমির-নুচ্চ তৎ। রৌপ্যতাম্রসুবর্ণানাং হস্তঘৃষ্টং শলাকয়া॥ ঘৃতং তদ্বমনং রুদ্র কামলা-

ব্যাধিনাশনং। ঘোষাফলমথাঘ্রাতং পীতং কামলনাশনং ॥ দূর্ব্বাদাড়িমপুষ্পস্তু অলক্তকহরীতকী। নাসাশিরারক্তনুৎ স্যান্ন স্যাদ্বৈ স্বরসেন হি॥ সুপিষ্টং জিঙ্গিনীমূলং তদ্রসেন বৃষধ্বজ। নস্যদানাদ্বিনশ্যেত নাসার্শো নীললোহিত ॥ গব্যং ঘৃতং সর্জ্জরসং রুদ্র ধন্যাকসৈন্ধবং। ধুস্তুরকং গৈরিকঞ্চ এতৈঃ সাধিতসিক্‌থকং ॥ সতৈলং ব্রণনুৎ স্যাচ্চ স্ফুটিতোচ্চটিতোধরে। জাতীপত্রঞ্চ চর্ব্বিত্বা বিধৃতং মুখরোগনুৎ॥ ভক্ষ্যাৎ কেশরবীজস্য দন্তাঃ স্যুশ্চলিতাঃ স্থিরাঃ। মুস্তকং কুষ্ঠমেলা চ যষ্টীমধুকবালুকং ॥ ধন্যাকমেতদদনান্মুখদুর্গন্ধনুদ্ধর। কষায়ং কটুকং বাপি তিক্তং বৈ তস্য ভক্ষণাৎ ॥ তৈলযুক্তস্য নিত্যং স্যাৎ মুখদুর্গন্ধতাক্ষয়ঃ। দন্তব্রণানি সর্ব্বাণি ক্ষয়ং গচ্ছন্ত্যনেন তু ॥ কাঞ্জিকস্য সতৈলস্য গণ্ডূষকবলাস্থিতিঃ। তাম্বুলচূর্ণদগ্ধস্য মুখস্য ব্যাধিনুচ্ছিব ॥ পরিত্যক্তঃ শ্লেষ্মগণঃ শুণ্ঠীচর্বণতো যথা মাতুলুঙ্গদলান্যেলা যষ্টীমধু চ পিপ্পলী ॥ জাতীপত্রমথৈষাঞ্চ চূর্ণং লীঢ়ং তথা কৃতং। শেফালিকাজটায়াশ্চ চর্বণং গলশুণ্ঠিনুৎ ॥ নাসাশিরারক্তকর্ষান্নশ্যেৎ শঙ্কর জিহ্বিকা। রসঃ শিরীষবীজানাং হলদস্য চতুর্গুণঃ ॥ তেন পক্কেন ভূতেশ নস্যং মস্তকরোগনুৎ। গলরোগা বিনশ্যন্তি নস্যমাত্রেণ তৎক্ষণাৎ॥ দন্তকীটবিনাশঃ স্যাৎ গুঞ্জামূলস্য চর্ব্বণাৎ। কাকজঙ্ঘা স্নুহী নীলী কষায়াম্রকমূলকং॥ দন্তাক্রান্তং দন্তজাংশ্চ ক্রিমীন্নাশয়তে শিব। ঘৃতং কর্কটপাদেন দুগ্ধোন্মিশ্রেণ সাধিতং ॥ তেন চাভ্যঙ্গিতা দন্তাঃ কুর্য্যুঃ কটকটান্নহি। লিপ্তাঃ কর্কটপাদেন কেবলেনাথ বা দ্বিজাঃ ॥ ত্রিসপ্তাহং বারিপিষ্টা জ্যোতিষ্মত্যাঃ ফলস্য হি। মজ্জাভয়া চ শুক্রস্য লেপাদঙ্গকলঙ্কনুৎ ॥ লোধ্রকুঙ্কুমমঞ্জিষ্ঠা লোহকালীয়কানি চ। যবতণ্ডুলমেতৈশ্চ যষ্টীমধুসমন্বিতৈঃ ॥ বারিপিষ্টৈর্বক্ত্রলেপঃ স্ত্রীণাং শোভনবক্ত্রকৃৎ। দ্বিভাগচ্ছাগদুগ্ধেন তৈলপ্রস্থস্তু সাধিতং ॥ রক্তচন্দনমঞ্জিষ্ঠালাক্ষাণাং কর্ষকেণ বা। যষ্টীমধুকুঙ্কুমাভ্যাং সপ্তাহান্মুখকান্তিকৃৎ ॥ শুণ্ঠী চ পিপ্পলীচূর্ণং গুড়ূচী কণ্টকারিকা। এভিশ্চ ক্বথিতং বারি পীতঞ্চাগ্নিং করোতি বৈ ॥ বাতশূলক্ষয়ঞ্চৈব সুরযক্ষমখেশ্বর। করঞ্জপর্পটোশীরং বৃহতী কটুরোহিণী ॥ গোক্ষুরং ক্বথিতং ত্বেভির্বারি পীতং শ্রমাপহং। দাহপিত্তজ্বরং শোষং মূর্চ্ছাঞ্চৈব ক্ষয়ং নয়েৎ ॥ মধ্বাজ্যপিপ্পলীচূর্ণং ক্বথিতং ক্ষীরসংযুতং। পীতং হৃদ্রোগকাসস্য বিষমজ্বরনুদ্ভবেৎ॥ ক্বাথৌষধীনাং সর্ব্বাসাং কর্ষার্দ্ধং গ্রাহ্যমেব চ। বয়োহনুরূপতো জ্ঞেয়ো বিশেষো বৃষভধ্বজ ॥ দুগ্ধং পীতন্তু সংযুক্তং গোপুরীষরসেন চ। বিষমজ্বরনুৎ স্যাচ্চ কাকজংঘারসস্তথা ॥ সশুণ্ঠীকথিতং ক্ষীরমজায়া জ্বরনুদ্‌ভবেৎ। যষ্টীমধু মুস্তকঞ্চ সৈন্ধবং বৃহতীফলং ॥ এতৈর্নস্যপ্রদানাচ্চ নিদ্রা স্যাৎ পুরুষস্য চ। মরীচমধুশুণ্ঠীনাং নস্যান্নিদ্রা ভবেচ্ছিব ॥ মূলন্তু কাকজঙ্ঘায়া নিদ্রাকৃৎ স্যাৎ শিরঃস্থিতং। সিদ্ধং

তৈলং কাঞ্জিকেন তথা সর্জ্জরসেন চ ॥ শীতোদকসমাযুক্তং লেপাৎ সন্তাপনাশনং। শোণিতজ্বরদাহেভ্যো জাতসন্তাপমুত্তথা ॥ শূকশৈবালমম্বাশ্চ শুণ্ঠীপাষাণভেদকং। শোভাঞ্জনং গোক্ষুরং বা বরুণচ্ছদমেব চ ॥ শোভাঞ্জনস্য মূলঞ্চ এতৈঃ ক্বথিতবারি চ। দত্ত্বা হিঙ্গু যবক্ষারং পীতং বাতবিনাশনং॥ পিপ্পলী পিপ্পলীমূলং তথা ভল্লাতকং শিব। বার্ষ্যৈতৈঃ ক্বথিতং পীতং বরশূলাপসারকৃৎ ॥ অশ্বগন্ধামূলকাভ্যাং সিদ্ধা বল্মীকমৃত্তিকা। এতয়া মর্দ্দনাৎ রুদ্র উরুস্তম্ভঃ প্রশাম্যতি ॥ বৃহতীকস্য বৈ মূলং সংপিষ্টমুদকেন চ। পীতং ঝিঞ্জিনিবাতস্য বিপাটনকৃদেব চ ॥ পীতং তক্রেণ মূলং চ আর্দ্রস্য তগরস্য চ। হরেৎ ঝিঞ্জিনিবাতং বৈ বৃক্ষমিন্দ্রাশনির্যথা ॥ অস্থিসংহারমেকেন ভক্তেন সহ খাদিতং। পীতং মাংসরসেনাপি বাতমুচ্চাস্থিভঙ্গহৃৎ ॥ ঘৃতলিপ্তং শক্তুকঞ্চ ছাগক্ষীরেণ সংযুতং। তল্লেপাৎ পাদয়োর্নশ্যেৎ সন্তাপো নাত্র সংশয়ঃ॥ মধ্বাজ্যং সৈন্ধবং সিক্থং গুড়গৈরিকগুগ্গুলৈঃ। সসর্জ্জরসঃ স্ফুটিতঃ কোমলোঽঙ্ঘ্রিব্রশ্চ লেপনাৎ ॥ কটুতৈলেন লিপ্তো বৈ বিধূমাগ্নৌ প্রতাপিতঃ। মৃত্তিকাখাদিতঃ পাদঃ সমঃ স্যাদ্বৃষভধ্বজ॥ সর্জ্জরসঃ সিক্থকঞ্চ ক্ষীরকঞ্চ হরীতকী। তৎসাধিতঘৃতাভ্যঙ্গো হ্যগ্নিদগ্ধব্যথাপনুৎ ॥ তিলতৈলঞ্চাগ্নিদগ্ধযবভস্মসমন্বিতং। অগ্নিদগ্ধং ব্রণং নশ্যেদ্বহুশঃ কৃতলেপতঃ॥ নবনীতং মাহিষঞ্চ

দুগ্ধপিষ্টতিলানি চ। ভল্লাতকব্রণং নশ্যেৎ হৃচ্ছল্যং তস্য লেপতঃ॥ শরপুঙ্খা লজ্জালুকা পাঠা চৈষাস্তু মূলকং। জলপিষ্টং তস্য লেপাৎ শস্ত্রাঘাতঃ প্রশাম্যতি ॥ মূলঞ্চ কাকজঙ্ঘায়াস্ত্রিরাত্রেণৈব শেষতঃ। পাকপূতিবেদনাঞ্চ হন্তি বৈ রোহিতে ব্রণে ॥ সজলং তিলতৈলঞ্চ অপামার্গস্য মূলকং। তৎসেকদানান্নশ্যেত প্রহারোদ্ভববেদনা ॥ অভয়া সৈন্ধবং শুণ্ঠিরেতৎ পিষ্টোদকেন তু। ভক্ষয়িত্বা হ্যজীর্ণস্য নাশো ভবতি শঙ্কর॥ কটিবদ্ধং নিম্বমূলমক্ষিশূলহরং ভবেৎ। শণমূলং সতাম্বূলং পীতমিন্দ্রিয়কম্পহৃৎ ॥ অম্লসিদ্ধং হরিদ্রা চ শ্বেতসর্ষপমূলকং। বীজানি মঙ্গলদিনে এষামুদ্বর্ত্তনং সমং॥ সপ্তরাত্রপ্রয়োগেণ শুভদেহকরং ভবেৎ। শ্বেতাপরাজিতাপত্রং নিম্বপত্ররসেন তু॥ নস্যদানাৎ ডাকিনীনাং মাতৃণাং ব্রহ্মরক্ষসাং। মোক্ষঃ স্যান্মধুসারেণ নস্যাচ্চ বৃষভধ্বজ॥ মূলং শ্বেতজয়ন্ত্যাশ্চ পুষ্যর্ক্ষে তু সমাহৃতং। শ্বেতাপরাজিতার্কস্য তথা চিত্রস্য মূলকং॥ কৃত্বা তু বটিকাং নারী তিলকেন বশী ভবেৎ। পিপ্পলী লোহচূর্ণস্তু শুণ্ঠিশ্চামলকানি চ ॥ সমানি রুদ্র জানীয়াৎ সৈন্ধবং মধু শর্করা। উদুম্বরপ্রমাণেন সপ্তাহং ভক্ষণাৎ সমং ॥ পুমাংশ্চ বলবান্ স্যাচ্চ জীবেদ্বর্ষশতদ্বয়ং। ওঁ ঠ ঠ ঠ ইতি। সর্ব্ববশ্যপ্রয়োগেষু প্রযুক্তঃ সর্ব্বকামকৃৎ॥ সংগৃহ্য বৃক্ষাৎ কাকস্য নিলয়ং প্রদহেচ্চ তৎ। চিতাগ্নৌ

ভস্ম তচ্ছত্রোর্দত্তং শিরসি শঙ্কর ॥ তমুচ্চাটয়তে রুদ্র শৃণু তং যোগমুত্তমং। নিক্ষিপ্তঞ্চ পুরীষং বৈ বনমূষিকচর্ম্মণি ॥ কট্যাং তস্ত নিবদ্ধং বৈ কুর্য্যান্মলনিরোধনং। কৃষ্ণকাকস্য রক্তেন যস্য নাম প্রলিখ্যতে ॥ চূতদলেঽমেধ্যমধ্যে ততো নিক্ষিপ্যতে হর। স খাদ্যতে কাকবৃন্দৈর্নারী পুরুষ এব বা ॥ শর্করা মধ্বজাক্ষীরং তিলগোক্ষুরকং সমং। পাণ্ডুত্বং নাশয়েদ্রুদ্র আস্বাদিতমিদং হর ॥ উলূককৃষ্ণকাকস্য চিল্লস্যাথ সমিচ্ছতং। রুধিরেণ সমাযুক্তং যয়োর্নাম্না চ হুয়তে ॥ তয়োর্দ্বয়োর্মহাবৈরং ভবেন্নাস্ত্যত্র সংশয়ঃ। ভাবিতং ঋক্ষতুগ্নেন রোহিতস্য শশস্য চ॥ মাংসং তৎসাধিতং তৈলং তদভ্যঙ্গশ্চ রোগনুৎ। চন্দনোদকনস্যাত্তু রোমোত্থানং ভবেৎ পুনঃ॥ হস্তে লাঙ্গলিকাকন্দং গৃহীতং তেন লেপিতং। শরীরং যেন স পুমান্ বুদ্ধের্দর্পং ব্যপোহতি ॥ পরাক্রমেণ যুক্তস্য শূরস্য পুরুষস্য হি। বর্ত্তির্যস্য পুরীষেণ কৃতগর্ত্তা তু ভাবিতা ॥ ময়ূররুধিরেণৈব জীবমাহরতে শিব। ত্বরিতানাং ভুজঙ্গানাং বিলস্থানামপীশ্বর॥ দেহশ্চিতাগ্নৌ দগ্ধস্তু সর্পস্যাজগরস্য হি। তদ্ভস্ম সংমুখে ক্ষিপ্তং শত্রূণাং ভঙ্গকৃদ্ভবেৎ ॥ মন্ত্রেণানেন তৎ ক্ষিপ্তং মহাভঙ্গকরং রিপোঃ। ওঁ ঠ ঠ ঠ ঠাহী ঠাহী ঠাহী স্বাহা। ওঁ উদরঃ পাহী পাহী স্বাহা ॥ সুদর্শনায়া মূলন্তু পুষ্যর্ক্ষে তু সমাহৃতং। নিঃক্ষিপ্তং গৃহমধ্যে তু ভুজঙ্গা বর্জয়ন্তি তং ॥ মার্জ্জারপললং বিষ্ঠা হরিতালঞ্চ ভাবিতং। ছাগমূত্রেণ তল্লিপ্তো মূষিকো মূষিকান্ হরেৎ ॥ যুক্তো হি মন্দিরে রুদ্র নাত্র কার্য্যা বিচারণা। ত্রিফলার্জ্জুনপুষ্পাণি ভল্লাতকশিরীষকং ॥ লাক্ষা সর্জ্জরসশ্চৈব বিড়ঙ্গশ্চৈব গুগ্‌গুলুঃ। এতৈর্ধূপো মক্ষিকাণাং মশকানাং বিনাশনঃ ॥ ইতি গারুড়ে ১৮১ অধ্যায়ঃ ॥ * ॥ হরিরুবাচ। ব্রহ্মদণ্ডী বচা কুষ্ঠং প্রিয়ঙ্গুর্নাগকেশরং। দদ্যাত্তাম্বূলসংযুক্তং স্ত্রীণাং মন্ত্রেণ তদ্বশং ॥ ওঁ নারায়ণায়েতি স্বাহা। তাম্বূলং যস্য দীয়েত স বশী স্যাৎ সমন্ত্রতঃ। ওঁ হরি হরি স্বাহা ॥ গোদন্তহরিতালঞ্চ সংযুক্তং কাকজিহ্বয়া। চূর্ণং কৃত্বা যস্য শিরে দীয়তে স বশী ভবেৎ ॥ শ্বেতসর্ষপনির্ম্মাল্যং যদ্‌গৃহে তদ্বিচালকৃৎ। বৈভীতকং শাখোটকং মূলং পত্রঞ্চ সংযুতং ॥ স্থাপ্যতে যদ্গৃহদ্বারে তত্র বৈ কলহো ভবেৎ। খঞ্জরীটস্য মাংসন্তু মধুনা সহ পেষয়েৎ ॥ ঋতুকালে যোনিলেপাৎ পুরুষো দাসতামিয়াৎ। অগুরু গুগ্‌গুলুশ্চৈব নীলোৎপলসমন্বিতং ॥ গুড়েন ধূপয়িত্বা তু রাজদ্বারে প্রিয়ো ভবেৎ। শ্বেতাপরাজিতামূলং পিষ্টং রোচনয়া যুতং ॥ যং পশ্যেত্তিলকেনৈব বশীকুর্য্যান্নৃপালয়ে। কাকজিহ্বা বচা কুষ্ঠং নিম্বপত্রং সকুঙ্কুমং। আত্মরক্তং সভাবেয়ং বশী ভবতি মানবঃ ॥ আরণ্যস্য বিড়ালস্য গৃহীত্বা রুধিরং শুভং। করঞ্জতৈলে তদ্ভাব্য রুদ্রাগ্নেঃ কজ্জলং ততঃ ॥ পাতয়েৎ পদ্মসূত্রেণ অদৃশ্যঃ স্যাৎ তদঞ্জনাৎ।

ওঁ নমঃ খড়্গবজ্রপাণয়ে মহাযক্ষসেনাপতয়ে স্বাহা। ওঁ বজ্র হ্রীং হ্রীং বরসংযুক্তা ত্বরিতা বিদ্যা ওঁ মাতশ্চোরং স্তম্ভয় স্বাহা। সহস্রং পরিজপ্যা তু বিদ্যেয়ং চৌরবারিণী। মহাসুগন্ধিকামূলং শুক্রং স্তম্ভেৎ কটৌ স্থিতং॥ ওঁ নমঃ সর্ব্বসত্ত্বেভ্যো নমঃ সিদ্ধিং কুরু কুরু স্বাহা। সপ্তাভিমন্ত্রিতং কৃত্বা করবীরস্য পুষ্পকং। স্ত্রীণামগ্রে ভ্রাময়েচ্চ ক্ষণাদ্বৈ সা বশা ভবেৎ॥ ব্রহ্মদণ্ডী বচা পত্রং মধুনা সহ পেষয়েৎ। অঙ্গলেপাচ্চ বনিতা নান্যং ভর্ত্তারমিচ্ছতি॥ পুত্রদণ্ডীশিফা বক্ত্রে ক্ষিপ্তা শুক্রস্য স্তম্ভনং। মূলং জয়ন্ত্যা বক্ত্রস্থং ব্যবহারে জয়প্রদং॥ অপরাজিতাশিফাং দদ্যান্নীলোৎপলসমন্বিতাং। তাম্বূলেন প্রদানাচ্চ বশীকরণমুত্তমং॥ রোচনানাগপুষ্পাণি বিল্বপুষ্পং প্রিয়ঙ্গবঃ। কুঙ্কুমং চন্দনঞ্চৈব তিলকেন জগদ্বশেৎ॥ ওঁ হ্রীঁ গৌরি দেবি সৌভাগ্যং পুত্রবশ্যাদি দেহি মে। ওঁ হ্রীঁ লক্ষ্মি দেহি সৌভাগ্যং সর্ব্বত্রৈলোক্যমোহনং॥ দুরালভা বচা কুষ্ঠং কুঙ্কুমঞ্চ শতাবরী। তিলতৈলেন সংযুক্তং যোনিলেপাদ্বশো নরঃ॥ নিম্বকাষ্ঠস্য ধূপেন ধূপয়িত্বা ভগং স্ত্রিয়াঃ। সুভগা স্যাৎ সা চ রুদ্র পতির্দাসো ভবিষ্যতি॥ মাহিষং নবনীতঞ্চ কুষ্ঠঞ্চ মধুযষ্টিকা। সৌভাগ্যং ভগলেপাচ্চ পতির্দাসো ভবেত্তদা॥ মধুযষ্টিঞ্চ তৈর্দদ্যাদ্গোক্ষীরং কণ্টকারিকা। এতানি সমভাগানি পিবেদুষ্ণেন বারিণা॥ চতুর্ভাগাবশেষেণ গর্ভসম্ভবমুত্তমং। মাতুলুঙ্গস্য বীজানি ক্ষীরেণ সহ ভাবয়েৎ॥ তৎ পীত্বা লভতে গর্ভং নাত্র কার্য্যা বিচারণা। মাতুলুঙ্গস্য বীজানি মূলাম্বেরশুকস্য চ॥ ঘৃতেন সহ সংযোজ্য পায়য়েৎ পুত্রকাঙ্ক্ষিণীং। অশ্বগন্ধা ঘৃতং দুগ্ধং কথিতং পুত্রকারকং॥ পলাশস্য তু বীজানি ক্ষৌদ্রেণ সহ পেষয়েৎ। রজস্বলা তু পীত্বা স্যাৎ পুষ্পগর্ভবিবর্জ্জিতা॥ ইতি গারুড়ে ১৮২ অধ্যায়ঃ॥ * ॥ হরিরুবাচ। হরিতালং যবক্ষারং পত্রাঙ্গং রক্তচন্দনং। জাতী হিঙ্গুলকং লাক্ষা পক্বতৈলেন পেষয়েৎ॥ হরীতকীকষায়েন ঘৃষ্ট্বা দন্তান্ প্রলেপয়েৎ। দন্তাঃ স্যুর্লোহিতাঃ পুংসঃ শ্বেতা রুদ্র ন সংশয়ঃ॥ মূলকং স্বেদমগ্নৌ তু রসং তস্য প্রপেষয়েৎ। কর্ণয়োঃ পূরণাত্তেন কর্ণস্রাবো বিনশ্যতি॥ অর্কপত্রং গৃহীত্বা তু মন্দাগ্নৌ তাপয়েচ্ছনৈঃ। নিষ্পীড্য পূরয়েৎ কর্ণে কর্ণশূলং বিনশ্যতি॥ প্রিয়ঙ্গুমধুকাম্বষ্ঠাধাতক্যুৎপলপঙ্ক্তিভিঃ। মঞ্জিষ্ঠালোধ্রলাক্ষাভিঃ কপিত্থস্য রসেন চ॥ পচেত্তৈলং তথা শুক্তক্ষারো হিঙ্গু মহৌষধং। শতপুষ্পা বচা কুষ্ঠং দারু শিগ্রু রসায়নং॥ সৌবর্চ্চলং যবক্ষারং তথা সর্জ্জিকসৈন্ধবং। ভূজগ্রন্থি বিড়ং মুস্তং মধুযুক্তং চতুর্গুণং॥ মাতুলুঙ্গরসস্তদ্বৎ কদল্যাশ্চ রসো হি তৈঃ। পক্বতৈলং হরেদাশু স্রাবাদীংশ্চ ন সংশয়ঃ॥ কর্ণয়োঃ কৃমিনাশঃ স্যাৎ কটুতৈলস্য পূরণাৎ। হরিদ্রা নিম্বপত্রাণি পিপ্পল্যো মরিচানি চ॥ বিড়ঙ্গং ভদ্রমুস্তঞ্চ সপ্তমং

বিশ্বভেষজং। গোমূত্রেণ চ পিষ্টৈব কৃত্বা চ বটিকাং হর ॥ অজীর্ণহৃদ্ভবেচ্চৈকা দ্বয়ং বিষ্টম্ভিকাপহং । পটলং মধুনা হন্তি গোমূত্রেণ তথার্ব্বুদং ॥ এষা চ শঙ্করী বর্ত্তিঃ সর্ব্বনেত্রাময়াপহা । ইতি গারুড়ে ১৮৩ অধ্যায়ঃ ॥ * ॥ হরিরুবাচ। বচা মাংসী চ বিল্বঞ্চ তগরং পদ্মকেশরং। নাগপুষ্পং প্রিয়ঙ্গুঞ্চ সমভাগানি চূর্ণয়েৎ॥ অনেন ধূপিতো মর্ত্ত্যঃ কামবদ্বিচরেন্মহীং। কর্পূরং দেবদারুঞ্চ মধুনা সহ যোজয়েৎ॥ লিঙ্গ-লেপাচ্চ তেনৈব বশীকুর্য্যাৎ স্ত্রিয়ং কিল। মৈথুনং পুরুষো গচ্ছেৎ গৃহ্লীয়াৎ স্বক-মিন্দ্রিয়ং ॥ বামহস্তেন বামঞ্চ হস্তং যস্যাঃ স্ত্রিয়া লিপেৎ। আলিপ্তা স্ত্রী বশং যাতি নান্যং পুরুষমিচ্ছতি॥ ওম্ রক্তচামুণ্ডে অমুকং মে বশমানয় বশমানয় হ্রীঁ হ্রৌঁ হ্রঃ ফট্। ইমং জপ্ত্বাযুতং মন্ত্রং তিলকেন চ শঙ্কর। গোরোচনাসংযুতেন স্বরক্তেন বশী ভবেৎ। সৈন্ধবং কৃষ্ণলবণং সৌবীরং মৎস্যপিত্তকং। মধু সর্পিঃ সিতাযুক্তং স্ত্রীণাং তন্তুগলেপনং। যঃ পুমান্ মৈথুনং গচ্ছেৎ নান্যাং নারীং গমিষ্যতি। শঙ্খপুষ্পী বচা মাংসী সোমরাজী চ ফল্গুকং॥ মাহিষং নবনীতঞ্চ গাঢ়ীকরণ-মুত্তমং। সনালানি চ পদ্মানি ক্ষীরে-ণাজ্যেন পেষয়েৎ ॥ গুটিকাং শোষিতাং কৃত্বা নারীযোন্যাং প্রবেশয়েৎ। দশবারং প্রসূতাপি পুনঃ কন্যা ভবিষ্যতি॥ সর্ষ-পাশ্চ বচা চৈব মদনস্য ফলানি চ । মার্জ্জারবিষ্ঠাধুস্তূরস্ত্রীকেশেন সমন্বিতঃ ॥

চাতুর্থকহরো ধূপো ডাকিনীজ্বরনাশনঃ। অর্জ্জুনস্য তু পুষ্পাণি ভল্লাতকবিড়ঙ্গকে ॥ হ্রীবেরকং সর্জ্জরসং সৌবীরং সর্ষপাস্তথা। সর্পযূকামক্ষিকাণাং ধূপো মশকনাশনঃ॥ ভূলতায়াশ্চ চূর্ণেন স্তম্ভঃ স্যাৎ যোনি-পূরণাৎ । তেন লেপয়তো যোনৌ ভগস্তম্ভশ্চ জায়তে ॥ ইতি গারুড়ে ১৮৪ অধ্যায়ঃ ॥ * ॥ হরিরুবাচ। সাঞ্জনঞ্চ ঘৃতং ক্ষৌদ্রং লবণং তাম্রভাজনে। ঘৃষ্টং পয়ঃসমাযুক্তং চক্ষুঃশূলহরং পরং ॥ হরীতকী বচা কুষ্ঠং পিপ্পল্যো মরিচানি চ। বিভীতকস্য বীজানি হরিতালং মনঃ-শিলা ॥ সর্ব্বাক্ষিরোগাম্নশ্যেয়ুরজাক্ষীরসম-ন্বিতাঃ। তৎক্ষণাৎ পুষ্পনাশঃ স্যাৎ মালতী-কুসুমাঞ্জনাৎ ॥ বিড়ঙ্গং সৈন্ধবং কুষ্ঠং ব্যোষং হিঙ্গু মনঃশিলা। কাসে শ্বাসে চ হিক্কায়াং লিহ্যাৎ ক্ষৌদ্রং ঘৃতপ্লুতং ॥ পিপ্পলীত্রিফলাচূর্ণং মধুনা লেহয়েন্নরঃ। নশ্যতে পীনসঃ কাসঃ শ্বাসশ্চ বলবত্তরঃ॥ সমূলচিত্রকং ভস্ম পিপ্পলীচূর্ণকং হরেৎ। কাসং শ্বাসঞ্চ হিক্কাঞ্চ মধুমিশ্রং বৃষধ্বজ ॥ নীলোৎপলং শর্করা চ মধুকং পদ্মকং সমং। তণ্ডুলোদকসংমিশ্রং প্রশমেদ্রক্ত-বিক্রিয়াং॥ শুণ্ঠী চ শর্করা চৈব তথা ক্ষৌদ্রেণ সংযুতা। কোকিলস্বর এব স্যাৎ গুলিকাভক্ষমাত্রতঃ॥ হরিতালং শঙ্খচূর্ণং কদলীদলভস্মনা। এতদ্দ্রব্যেণ চোদ্বর্ত্ত্য লোমশাতনমুত্তমং॥ লবণং হরিতালঞ্চ তণ্ডুল্যাশ্চ ফলানি চ। লাক্ষারসসমাযুক্তং লোমশাতনমুত্তমং॥ সুধা চ হরিতালঞ্চ

শঙ্খশ্চৈব মনঃশিলা। সৈন্ধবেন সহৈকত্র ছাগমূত্রেণ পেষয়েৎ॥ তৎক্ষণোদ্বর্ত্তনাদেব লোমশাতনমুত্তমং। শঙ্খমামলকীপত্রং ধাতক্যাঃ কুসুমানি চ॥ পিষ্ট্বা তৎ পয়সা সার্দ্ধং সপ্তাহং ধারয়েন্মুখে। স্নিগ্ধাঃ শ্বেতাশ্চ দন্তাশ্চ ভবন্তি বিমলপ্রভাঃ॥ ইতি গারুড়ে ১৮৫ অধ্যায়ঃ॥ *॥ শরদ্‌-গ্রীষ্মবসন্তেষু প্রায়শো দধি গর্হিতং। হেমন্তে শিশিরে চৈব বর্ষাসু দধি শস্যতে॥ ভুক্তে তু শর্করা পীতা নবনীতেন বুদ্ধি-কৃৎ। গুড়স্য তু পুরাণস্য পলমেকন্তু ভক্ষয়েৎ॥ প্রত্যহং বর্ষমেকন্তু নিরন্তর-মথো হর। স্ত্রীসহস্রঞ্চ গচ্ছেচ্চ পুমান্ বল-যুতো হর॥ কুষ্ঠং সুচূর্ণিতং কৃত্বা ঘৃত-মাক্ষিকসংযুতং। ভক্ষণাৎ স্বপ্নবেলায়াং বলীপলিতনাশনং॥ অতসীমাষগোধূমং চূর্ণং কৃত্বা চ পিপ্পলীং। ঘৃতেন লেপয়ে-দ্গাত্রমেভিঃ সার্দ্ধং বিচক্ষণঃ॥ কন্দর্প-সদৃশো মর্ত্ত্যো ভবতে নিত্যভক্ষণাৎ। যবাস্তিলা অশ্বগন্ধা মুষলা শরলা গুড়ং॥ এভিশ্চ বটিকাং জগ্ধ্বা তরুণো বলবান্ ভবেৎ। হিঙ্গু সৌবর্চ্চলং শুণ্ঠীং পীত্বা তু ক্বথিতোদকৈঃ॥ পরিণামাখ্যশূলঞ্চ অজীর্ণ-ঞ্চৈব নশ্যতি। ধাতকীং সোমরাজীঞ্চ মধুনা সহ পেষয়েৎ॥ দুর্ব্বলশ্চ ভবেৎ স্থূলো নাত্র কার্য্যা বিচারণা। শর্করামধু-সংযুক্তং নবনীতং বলী লিহেৎ॥ ক্ষীরাশী চ ক্ষয়ী পুষ্টিমেবাজ্যেরতুলাং লভেৎ। কুলীরচূর্ণং সক্ষীরং পীতঞ্চ ক্ষয়রোগনুৎ॥ ভল্লাতকং বিড়ঙ্গঞ্চ যবক্ষারঞ্চ সৈন্ধবং।

মনঃশিলা শঙ্খচূর্ণং তৈলপক্বং তথৈব চ॥ লোমানি শাতয়ত্যেব নাত্র কার্য্যা বিচা-রণা। মালূরস্য রসং গৃহ্য জলৌকাং তত্র পেষয়েৎ॥ হস্তৌ তু লেপয়েত্তেন অগ্নি-স্তম্ভনমুত্তমং। শাল্মলীরসমাদায় খরমূত্রে নিধায় তং॥ অগ্ন্যাগারে ক্ষিপেত্তেন অগ্নি-স্তম্ভনমুত্তমং। বায়সীউদরং গৃহ্য মণ্ডূক-বশয়া সহ॥ গুটিকাং কারয়েত্তেন ততো-ঽগ্নৌ প্রক্ষিপেদ্বশী। এবমেতৎ প্রয়োগেণ অগ্নিস্তম্ভনমুত্তমং॥ মুণ্ডীতকবচাযুক্তং মরীচং নাগরং তথা। চর্ব্বিত্বা চ ইমং সদ্যো জিহ্বয়া জ্বলনং লিহেৎ॥ গোরো-চনাভৃঙ্গরাজং চূর্ণীকৃত্য ঘৃতং সমং। দিব্যাস্তসস্তু স্তম্ভঃ স্যাৎ মন্ত্রেণানেন বৈ তথা॥ ওঁ হ্রং অগ্নিস্তম্ভনং কুরু। ওঁ নমো ভগবতে জলং স্তম্ভয় স্তম্ভয় সংস সংস কেক কেক চর চর। জল-স্তম্ভনমন্ত্রোঽয়ং জলং স্তম্ভয়তে শিব। গৃধ্রাস্থিঞ্চ গবাস্থিঞ্চ মৃতনির্ম্মাল্যমেব চ॥ অরের্যো নিখনেৎ দ্বারে পঞ্চত্বমুপযাতি সঃ। ব্রহ্মদণ্ডী তু পুষ্পেণ খানে পানে বশীকরা॥ যষ্টীমধুপলৈকেন পকমুষ্ণোদকং পিবেৎ। বিষ্টম্ভিকাঞ্চ হৃচ্ছূলং হরত্যেব মহেশ্বর॥ ওঁ হ্রঃ জঃ। মন্ত্রোঽয়ং হরতে রুদ্র সর্পবৃশ্চিকজং বিষং। পিপ্পলী নবনীতঞ্চ শৃঙ্গবেরঞ্চ সৈন্ধবং॥ মরীচং দধি কুষ্ঠঞ্চ নস্যে পানে বিষং হরেৎ। ত্রিফলার্দ্রককুষ্ঠঞ্চ চন্দনং ঘৃতসংযুতং॥ এতৎপানাচ্চ লেপাচ্চ বিষনাশো ভবে-চ্ছিব। পারাবতস্য চাক্ষীণি হরিতালং

মনঃশিলা ॥ এষ যোগো বিষং হন্তি বৈনতেয় ইবোরগান্। সৈন্ধবং ত্র্যূষণং চূর্ণং দধিমধ্বাজ্যসংযুতং ॥ বৃশ্চিকস্য বিষং হন্তি লেপোঽয়ং বৃষভধ্বজ। ব্রহ্মদণ্ডীতিলান্ ক্বাথ্য চূর্ণং ত্রিকটুকং পিবেৎ ॥ নাশয়েদ্রুদ্র গুল্মানি নিরোধং রক্তমেব চ। পীত্বা ক্ষীরং ক্ষৌদ্রযুতং নাশয়েদ্‌হৃদস্‌গ্রুজং ॥ অটরূষকমূলেন ভগং নাভিঞ্চ লেপয়েৎ। সুখং প্রসূয়তে নারী নাত্র কার্য্যা বিচারণা ॥ শর্করা মধুসংযুক্তা পীতা তণ্ডুলবারিণা। রক্তাতিসারশমনং ভবতীতি বৃষধ্বজ ॥ ইতি গারুড়ে ১৮৬ অধ্যায়ঃ ॥ * ॥ হরিরুবাচ। মরীচং শৃঙ্গবেরঞ্চ কুটজত্বচমেব চ। পানাচ্চ গ্রহণী নশ্যেৎ শশাঙ্ককৃতশেখর ॥ পিপ্পলীং পিপ্পলীমূলং মরীচং তগরং বচাং। দেবদারুরসং পাঠাং ক্ষীরেণ সহ পেষয়েৎ ॥ অনেনৈব প্রয়োগেণ অতীসারো বিনশ্যতি। মরীচতিলপুষ্পাভ্যামঞ্জনং কামলাপহং ॥ হরীতকীসমগুড়া মধুনা সহ যোজিতা। বিরেচনকরী রুদ্র ভবতীতি ন সংশয়ঃ ॥ ত্রিফলা চিত্রকং চিত্রং তথা কটুকরোহিণী। ঊরুস্তম্ভহরো হ্যেষ উত্তমস্তু বিরেচনং ॥ হরীতকীং শৃঙ্গবেরং দেবদারু চ চন্দনং। ক্বাথয়েচ্ছাগদুগ্ধেন অপামার্গস্য মূলকং ॥ জঙ্ঘাশূলমূরুস্তম্ভং সপ্তরাত্রেণ নাশয়েৎ। নাটাঞ্চ শৃঙ্গবেরঞ্চ সূক্ষ্মচূর্ণানি কারয়েৎ ॥ গুগ্‌গুলং গুড়তুল্যঞ্চ গুলিকামুপযুজ্য তু। বায়ুং স্নায়ুগতঞ্চৈব অগ্নিমান্দ্যঞ্চ নাশয়েৎ ॥ শঙ্খপুষ্পীং তু পুষ্যেণ সমুদ্ধৃত্য সপত্রিকাং। সমূলীং ছাগদুগ্ধেন অপস্মারহরাং পিবেৎ ॥ অশ্বগন্ধাভয়ে চৈব উদকেন সমং পিবেৎ। রক্তপিত্তং বিনশ্যেত নাত্র কার্য্যা বিচারণা ॥ হরীতকী-র্ণং কৃত্বা আস্যঞ্চ পূরয়েৎ। শীতং পীত্বাথ পানীয়ং সর্ব্বচ্ছর্দ্দিনিবারণং ॥ গুড়ূচী পদ্মকারিষ্টং ধন্যাকং রক্তচন্দনং। পিত্তশ্লেষ্মজ্বরচ্ছর্দ্দিদাহতৃষ্ণাঘ্নমগ্নিকৃৎ ॥ ওঁ হ্রূঁ নম ইতি। শ্রোত্রে বদ্ধা শঙ্খপুষ্পীং জ্বরং মন্ত্রেণ বৈ হরেৎ। ওঁ জম্ভনি স্তম্ভনি বিমোহয় সর্ব্বব্যাধীন্ মে বজ্রেণ ঠ ঠ সর্ব্বব্যাধীন্ মে বজ্রেণ ফট্। ইতি ॥ পুষ্পমষ্টশতং জপ্ত্বা হস্তে দত্ত্বাথ ন স্পৃশেৎ। চাতুর্থকো জ্বরো রুদ্র অন্যো চৈব জ্বরাস্তথা ॥ জম্বুফলং হরিদ্রা চ সর্পস্যৈব চ কঞ্চুকং। সর্ব্বজ্বরাণাং ধূপোঽয়ং হর চাতুর্থকস্য চ ॥ করবীরং ভৃঙ্গপত্রং লবণং কুষ্ঠকর্কটং। চতুর্গুণেন মূত্রেণ পচেত্তৈলং হরেচ্চ তৎ ॥ পামাং বিচর্চ্চিকাং কুষ্ঠমভ্যঙ্গাদ্ধি ব্রণানি বৈ। পিপ্পলীমধুপানাচ্চ তথা মধুরভোজনাৎ ॥ প্লীহা বিনশ্যতে রুদ্র তথা শূরণসেবনাৎ। পিপ্পলীঞ্চ হরিদ্রাঞ্চ গোমুত্রেণ সমন্বিতাং ॥ প্রক্ষিপেচ্চ গুদদ্বারে অর্শাংসি বিনিবারয়েৎ। অজাদুগ্ধমার্দ্রকঞ্চ পীতং প্লীহাপহং ভবেৎ ॥ সৈন্ধবঞ্চ বিড়ঙ্গানি সোমরাজী তু সর্ষপাঃ। রজনী দ্বে বিষাঞ্চৈব গোমূত্রেণ চ পেষয়েৎ ॥ কুষ্ঠনাশশ্চ তৎক্ষেপান্নিম্বপত্রাদনাত্তথা। ইতি গারুড়ে ১৮৭ অধ্যায়ঃ ॥ * ॥ হরিরুবাচ। রজনী-

কদলীক্ষারলেপঃ সিধ্মবিনাশনঃ। কুষ্ঠস্য ভাগমেকন্তু পথ্যাভাগদ্বয়ং তথা ॥ উষ্ণোদকেন সংপীত্বা কটিশূলবিনাশনং। অভয়া নবনীতঞ্চ শর্করা পিপ্পলীযুতং ॥ পানাদর্শোহরং স্যাচ্চ নাত্র কার্য্যা বিচারণা। অটরূষকপত্রেণ ঘৃতং মৃদ্বগ্নিনা পচেৎ ॥ চূর্ণং কৃত্বা তু লেপোহয়ং অর্শোরোগহরঃ পরঃ। গুগ্‌গুলুং ত্রিফলাযুক্তং পীত্বা নশ্যেৎ ভগন্দরং ॥ অজাজীং শৃঙ্গবেরঞ্চ দধিমণ্ডেন পায়য়েৎ। লবণেন তু সংযুক্তং মূত্রকৃচ্ছ্রবিনাশনং ॥ যবক্ষারঃ শর্করা চ মূত্রকৃচ্ছ্রবিনাশনং। চিতাগ্নিঃ খঞ্জরীটস্য বিষ্ঠা ফেনো হয়স্য চ ॥ শোভাঞ্জনং চাসনেত্রং নর এতৈস্তু ধূপিতঃ। অদৃশ্যস্ত্রিদশৈঃ সর্ব্বৈঃ কিং পুনর্মানবৈঃ শিব ॥ তিলতৈলং যবান্দগ্ধ্বা মসিং কৃত্বা তু লেপয়েৎ। তেনৈব সহ তৈলেন অগ্নিদগ্ধঃ সুখী ভবেৎ ॥ লজ্জালুঃ শরপুংখা চ লেপঃ সাজ্যো হরাগ্নিহা। পঞ্চাঙ্গং কনকং গৃহ্য শ্লক্ষ্ণচূর্ণন্তু কারয়েৎ ॥ তুষ্কং ধূপং তত্র দত্ত্বা তৎক্ষণাৎ পততে ধ্রুবং। ওঁ নমো ভগবতে ছিন্দ ছিন্দ জ্বরস্য শিরঃ প্রজ্বলিতপরশুপাণিপুরুষায় ফট্‌। করে বদ্ধা তু নির্গুণ্ড্যা মূলং জ্বরহরং ততঃ। মূলঞ্চ শ্বেতগুঞ্জায়াঃ কৃত্বা তৎ সপ্তখণ্ডকং ॥ হস্তে বদ্ধং নাশয়েচ্চ অর্শাংস্যেব ন সংশয়ঃ। বিষ্ণুক্রান্তাজমূত্রেণ চৌরব্যাঘ্রাদিরক্ষণং ॥ ব্রহ্মদণ্ড্যাস্তু মূলেন সর্ব্বকর্ম্মাণি কারয়েৎ। ত্রিফলায়াস্তু চূর্ণন্তু সাজ্যং কুষ্ঠং বিনাশয়েৎ ॥ আজ্যং পুনর্ণবাবিল্বৈঃ পিপ্পলীভিশ্চ সাধিতং। হরেৎ হিক্কাশ্বাসকাসং পীতং স্ত্রীণাঞ্চ গর্ভকৃৎ ॥ ভক্ষয়েচ্চৈবমাদীনি পয়সাজ্যেন পাচিতং। ঘৃতশর্করয়া যুক্তং শুক্রং স্যাদক্ষয়ং ততঃ ॥ বিড়ঙ্গং মধুকং পাঠাং মাংসীং সর্জ্জরসস্তথা। হরিদ্রাং ত্রিফলাঞ্চৈব অপামার্গং মনঃশিলাং ॥ উড়ুম্বরং ধাতকীপুষ্পং তিলতৈলেন পেষয়েৎ। যোনিং লিঙ্গঞ্চ ম্রক্ষেত স্ত্রীপুংসোঃ স্যাৎ প্রিয়ং মিথঃ ॥ পুনর্ণবামৃতা দূর্ব্বা কনকং চেন্দ্রবারুণী। বীজেনৈষাং জাতিকায়া রসেন রসমর্দনং ॥ কৃত্বা ধমেচ্চ মূষায়াং রসমারণমীরিতং। মধ্বাজ্যসহিতং দুগ্ধং বলীপলিতনাশনং ॥ মধ্বাজ্যং গুড়তাম্রঞ্চ করেণামাক্ষিকং রসং। ধমনাচ্চ ভবেদ্রৌপ্যং সুবর্ণকরণং শৃণু ॥ পীতং ধুস্তুরপুষ্পঞ্চ সীসকস্য পলং মতং। পাঠা লাঙ্গলশাখা চ মূলমাবর্ত্তনাদ্ভবেৎ ॥ তৈলং ধুস্তুরবৃক্ষস্য তেন দীপং প্রদাপয়েৎ। সমাধাবুপবিষ্টস্তু গগনস্থো ন পশ্যতি ॥ রাত্রৌ চ সার্ষপং তৈলং কর্ণং খদ্যোতসম্ভবং। তদ্দীপঃ প্রজ্বলেৎ সম্যক্‌ অগ্নিজ্বালাকলাপবৎ ॥ কুঞ্জরস্য মদার্ত্তস্য স্বয়ং নেত্রে শিবাঞ্জয়েৎ। সংগ্রামং জয়তে সোহপি মহাশূরশ্চ জায়তে ॥ দন্তং ডুণ্ডুভসর্পস্য মুখে সংগৃহ্য বৈ ক্ষিপেৎ। তিষ্ঠতে জলমধ্যে তু নির্ব্বিকল্পং স্থলে যথা ॥ কুম্ভীরনেত্রদংষ্ট্রাণি সাস্থীনি রুধিরং তথা। বংশাতৈলসমাযুক্তমেকত্র তন্নিযোজয়েৎ ॥ আত্মানং

ত্রক্ষয়েত্তেন জলে তিষ্ঠেদ্দিনত্রয়ং। কুম্ভীরকস্য নেত্রাণি হৃদয়ং কচ্ছপস্য চ॥ মূষকস্য বশাস্থীনি শিশুমারবশা তথা। এতান্যেকত্র সংস্থানি জলে তিষ্ঠেৎ যথা গৃহে॥ লোহচূর্ণং তক্রপীতং পাণ্ডুরোগহরং ভবেৎ। তণ্ডুলীয়কগোক্ষুরমূলং পীতং পয়োঽন্বিতং॥ কামলাদিহরং প্রোক্তং মুখরোগহরং তথা। জাতীমূলং তক্রপীতং কোলিমূলস্তু জীর্ণকৃৎ॥ সতক্রকাশমূলং বা বাকুচীমূলমেব বা। কাঞ্জিকেন চ বাকুচ্যা মূলং বৈ দন্তরোগনুৎ॥ অথেন্দ্রবারুণীমূলং বারিপীতং বিষাদিহৃৎ। বলা চাতিবলা যষ্টী শর্করা মধুসংযুতা॥ বন্ধ্যাগর্ভকরং পীতং নাত্র কার্য্যা বিচারণা। শ্বেতাপরাজিতামূলং পিপ্পলীশুণ্ঠিসংযুতং॥ পরিপিষ্টং শিরোলেপাৎ শিরঃশূলবিনাশনং। শিরোরোগহরং লেপাৎ গুঞ্জামূলং সকাঞ্জিকং॥ নির্গুণ্ডিকাশিফাং পীত্বা গণ্ডমালাবিনাশনং। কেতকীপত্রজং ক্ষারং গুড়েন সহ ভক্ষয়েৎ॥ তক্রেণ শরপুঙ্খাং বা পীত্বা প্লীহাং বিনাশয়েৎ। মাতুলুঙ্গস্য নির্যাসং গুড়াজ্যেন সমন্বিতং॥ বাতপিত্তজশূলানি হন্তি বৈ পানযোগতঃ। শুণ্ঠীং সৌবর্চ্চলং হিঙ্গু পীত্বা হৃদয়রোগনুৎ॥ ইতি গারুড়ে ১৮৮ অধ্যায়ঃ॥ *॥ হরিরুবাচ। ওঁ গং গণপতয়ে স্বাহেতি। অয়ং গণপতের্মন্ত্রো ধনবিদ্যাপ্রদায়কঃ। ইমমষ্টসহস্রঞ্চ জপ্ত্বা বদ্ধা শিখাস্ততঃ॥ ব্যবহারে জয়ঃ স্যাচ্চ শতং জাপ্যান্নৃণাং প্রিয়ঃ। তিলানাস্তু ঘৃতাক্তানাং কৃষ্ণানাং রুদ্র হোময়েৎ॥ অষ্টোত্তরসহস্রন্তু রাজা বশ্যস্ত্রিভির্দিনৈঃ। অষ্টম্যাঞ্চ চতুর্দশ্যামুপোষ্যাভ্যর্চ্য বিঘ্নরাট্॥ তিলাক্ষতানাং জুহুয়াদষ্টোত্তরসহস্রকং। অপরাজিতঃ স্যাদযুদ্ধে চ অথ চেচ্ছুদ্যমে শিব॥ জপ্ত্বা চাষ্টসহস্রন্তু ততশ্চাষ্টশতেন হ। শিখাং বদ্ধা রাজকুলে ব্যবহারে জয়ো ভবেৎ॥ হ্রীকারং সবিসর্গঞ্চ প্রাতঃসূর্য্যসমদ্যুতিং। স্ত্রীণাং ললাটে বিন্যস্য বশ্যতাং নয়তে ধ্রুবং॥ তথৈব নাসামুরসি ধ্যাতশ্চৈবোপকারকৃৎ। সুসমাহিতচিত্তেন ন্যস্তস্তু প্রমদালয়ে॥ সকামাং কামিনীং কুর্য্যাৎ স্খলন্মদজলাকুলাং। যস্তু জুহুয়াদযুতং শুচিঃ প্রযতমানসঃ॥ দৃষ্টিমাত্রে সদা তস্য বশমায়াস্তি যোষিতঃ। মনঃশিলা পত্রকঞ্চ সগোরোচনকুঙ্কুমং॥ এভিঃ কৃতে চ তিলকে সদা স্ত্রী বশতামিয়াৎ। সহদেবো ভৃঙ্গরাজঃ সিতাপরাজিতা বচা॥ তেনৈব তিলকং কৃত্বা ত্রৈলোক্যং বশতাং নয়েৎ। গোরোচনা মীনপিত্তমাভ্যাঞ্চ কৃতবর্ত্তিকাং॥ যঃ পুমাংস্তিলকং কুর্য্যাদ্বামহস্তকনিষ্ঠয়া। স করোতি বশং সর্ব্বং ত্রৈলোক্যং নাত্র সংশয়ঃ॥ গোরোচনা মহাদেব ঋতুশোণিতভাবিতা। ততো যা কৃততিলকা সা নারী যং নিরীক্ষতে॥ তঞ্চ শর্ব্ব বশং কুর্য্যান্নাত্র কার্য্যা বিচারণা। নাগেশ্বরঞ্চ শৈলেয়ং ত্বক্‌পত্রঞ্চ হরীতকী॥ চন্দনং কুষ্ঠসূক্ষ্মেলা রক্তশালিসমন্বিতা। এতৈর্ধূপো বশকরঃ স্মরবাণ ইবেশ্বর॥ রতিকালে মহাদেব পার্ব্বতীপ্রিয় শঙ্কর। নিজশুক্রং গৃহীত্বা

তু বামহস্তেন যঃ পুমান্ ॥ কামিনীচরণং বামং লিম্পেৎ স স্যাৎ স্ত্রিয়াঃ প্রিয়ঃ। সৈন্ধবঞ্চ মহাদেব পারাবতমলং মধু ॥ এভির্লিপ্তস্তু লিঙ্গং বৈ কামিনীবশকৃস্তবেৎ। পুষ্পাণি পঞ্চ রক্তানি গৃহীত্বা যানি কানি চ ॥ তণ্ডুলঞ্চ প্রিয়ঙ্গুঞ্চ পেষয়েদেকযোগতঃ। অনেন লিপ্তলিঙ্গস্য কামিনী বশতামিয়াৎ॥ হয়লালা চ মঞ্জিষ্ঠা মালতীকুসুমানি চ। শ্বেতসর্ষপাণ্যেতৈশ্চ লিপ্তলিঙ্গঃ স্ত্রিয়াঃ প্রিয়ঃ ॥ মূলস্তু কাকজঙ্ঘায়া দুগ্ধপীতস্তু শোষনুৎ। অশ্বগন্ধা নাগবলা গুড়মাংসনির্ষেবিণাং ॥ রূপং ভবেৎ যথা তদ্বন্নবযৌবনচারিণাং। লৌহচূর্ণসমাযুক্তং ত্রিফলাচূর্ণমেব বা ॥ মধুনা খাদিতং রুদ্র পরিণামাখ্যশূলনুৎ। কথিতোদকপানন্তু শম্বুকাক্ষারকং তথা ॥ মৃগশৃঙ্গং হ্যগ্নিদগ্ধং গব্যাজ্যেন সমন্বিতং। পীতং হৃৎপৃষ্ঠশূলানাং ভবেন্নাশকরং শিব ॥ হিঙ্গু সৌবর্চ্চলং রুদ্র বৃষধ্বজ মহৌষধং। এভিস্তু কথিতং বারি পীতং বৈ সর্ব্বশূলনুৎ ॥ অপামার্গস্য বৈ মূলং সামুদ্রলবণান্বিতং। আস্বাদিতমজীর্ণস্য শূলস্য স্যাদ্বিমর্দ্দকং ॥ বটরোহাঙ্কুরো রুদ্র তণ্ডুলোদকঘর্ষিতঃ। পীতঃ সতক্রোঽতীসারং ক্ষয়ং নয়তি শঙ্কর॥ অঙ্কোঠমূলং কর্ষার্দ্ধং পিষ্টং তণ্ডুলবারিণা। সর্ব্বাতিসারগ্রহণীং পীতং হরতি ভূতপ ॥ মরীচশুণ্ঠিকুটজত্বকৃচূর্ণন্তু গুড়ান্বিতং। ক্রমাত্তদ্বিগুণং পীতং গ্রহণীব্যাধিনাশনং ॥ শ্বেতাপরাজিতামূলং হরিদ্রাসিকৃথতণ্ডুলং। অপামার্গ-

ত্রিকটুকমেষান্তু বটিকাং শিব ॥ বিসূচিকামহাব্যাধিং হরত্যেব ন সংশয়ঃ। ত্রিফলা ত্রিকটুশ্চৈব শিলাজতু হরীতকী ॥ একৈকমেষাং চূর্ণন্তু মধুনা চ বিমিশ্রিতং। পীতং সর্ব্বপ্রমেহস্তু ক্ষয়ং নয়তি শঙ্কর ॥ অর্কক্ষীরং প্রস্থমেকং তিলতৈলং তথৈব চ। মনঃশিলা মরীচানাং সিন্দুরস্য পলং পলং ॥ চূর্ণং কৃত্বা তাম্রপাত্রে স্বাতপে শোষয়েত্ততঃ। পীতং স্নুহীগতং দুগ্ধং সৈন্ধবং শূলনুস্তবেৎ ॥ ত্রিকটুত্রিফলাযুক্তং পলাশাষ্টকসৈন্ধবং। মনঃশিলা নিম্বপত্রং জাতীপুষ্পমজাপয়ঃ ॥ তন্মূত্রং শঙ্খনাভিঞ্চ চন্দনং ঘর্ষয়েত্ততঃ। এভিশ্চ বটিকাং কৃত্বা অক্ষিণী চাঞ্জয়েত্ততঃ ॥ নশ্যতে পটলং কাচং পুষ্পঞ্চ তিমিরাদিকং। বিভীতকস্য বৈ চূর্ণং সমধু শ্বাসনাশনং ॥ পিপ্পলীত্রিফলাচূর্ণং মধুসৈন্ধবসংযুতং। সর্ব্বরোগজ্বরশ্বাসশোষপীনসহৃস্তবেৎ ॥ দেবদারোশ্চ বৈ চূর্ণং অজামূত্রেণ ভাবয়েৎ। একবিংশতি বৈ বারমক্ষিণী তেন চাঞ্জয়েৎ ॥ রাত্র্যন্ধতা পটলতা নশ্যেদিতি বিনিশ্চয়ঃ। পিপ্পলী কেতকং রুদ্র হরিদ্রামলকং বচা ॥ সর্ব্বাক্ষিরোগা নশ্যেয়ুঃ সক্ষীরাদঞ্জনাত্ততঃ। কাকজঙ্ঘাশিগ্রুমূলে মুখেন বিধৃতে শিব ॥ চর্ব্বিত্বা দন্তরোগাণাং বিনাশো হি ভবেদ্হর। ইতি গারুড়ে ১৮৯ অধ্যায়ঃ ॥ * ॥ হরিরুবাচ। পীতং সারং গুড়ূচ্যাশ্চ মধুনা চ প্রমেহনুৎ। পীতং গোহালিয়ামূলং তিলদধ্যাজ্যসংযুতং॥ নিরুদ্ধমূত্রং কথিতং

প্রবর্ত্তয়তি শঙ্কর। তথা হিক্কাং হরেৎ পীতা সৌবর্চ্চলযুতা মুরা॥ গোরক্ষকর্ক টী-মূলং পিষ্টং বাস্তোদকেন চ। পীতং দিনত্রয়েণৈব নাশয়েৎ দন্তশর্ক রাং॥ পিষ্টং বৈ মালতীমূলং গ্রীষ্মকালে সমাহৃতং। সাধিতং ছাগদুগ্ধেন পীতং শর্ক রয়ান্বিতং॥ হরেন্মূত্রনিরোধঞ্চ হরেদ্বৈ পাণ্ডুশর্ক রাং। দ্বিজযষ্ট্যাশ্চ বৈ মূলং পিষ্টং তণ্ডুলবারিণা॥ গণ্ডমালাং হরেল্লেপাৎ কুরুগুগলগণ্ডকং। রসাঞ্জনহরীতক্যাশ্চূর্ণং তেনৈব গুণ্ডনাৎ॥ নশ্যেদ্বৈ পুরুষব্যাধিং নাত্র কার্য্যা বিচারণা। করবীরমূললেপাৎ লেপাৎ পূগফলস্য চ॥ পুংব্যাধির্নশ্যতে রুদ্র যোগমন্যং বদাম্যহং। দন্তীমূলং হরিদ্রা চ চিত্রকং তস্য লেপনাৎ॥ ভগন্দরবিনাশঃ স্যাদন্যং যোগং বদাম্যহং। জলৌকাজগ্ধরক্তস্তু ভগন্দরমুমাপতে॥ ত্রিফলাজলঘৃষ্টঞ্চ মার্জারাস্থিবিলেপিতং। ততো ন প্রসবেৎ রুদ্র নাত্র কার্য্যা বিচারণা॥ হরিদ্রা ত্বেকবারস্তু স্নুহীক্ষীরেণ ভাবিতা। ঝটিত্যর্শো নিপততি তল্লেপাৎ বৃষভধ্বজ॥ ঘোষাফলং সৈন্ধবঞ্চ তল্লিপ্তার্শঃ পতেত্তথা। গব্যাজ্যং সাধিতং পীতং পলাশক্ষারবারিণা॥ ত্রিগুণেন ত্রিকটুকমর্শাংসি ক্ষয়য়েচ্ছিব। বিল্বস্য চ ফলং দগ্ধং রক্তার্শসো বিনাশনং॥ জগ্ধা কৃষ্ণতিলান্যেব নবনীতযুতানি চ। যবক্ষারং শুণ্ঠিচূর্ণং যুক্তং তুল্যঘৃতান্বিতং॥ লীঢ়মগ্নিং করোত্যেষ প্রত্যূষে বৃষভধ্বজ। শুণ্ঠ্যা চ কথিতং বারি পীতঞ্চাগ্নিং করোতি বৈ॥ হরীতকী সৈন্ধবঞ্চ চিত্রকং রুদ্র পিপ্পলী। চূর্ণমুষ্ণোদকেনৈষাং পীতঞ্চাতিক্ষুধাকরং॥ সাজ্যং শূকরমাংসং বৈ পীতং চাতিক্ষুধাকরং। ইতি গারুড়ে ১৯০ অধ্যায়ঃ॥ * ॥ হরিরুবাচ। হস্তিকর্ণস্য বৈ মূলং গৃহীত্বা চূর্ণয়েদ্ধর। সর্ব্বরোগবিনির্মুক্তং চূর্ণং পলশতং শিব॥ সক্ষীরং ভক্ষিতং কুর্য্যাৎ সপ্তাহেন বৃষধ্বজ। নরং শ্রুতিধরং শূরং মৃগেন্দ্রগতিবিক্রমং॥ পদ্মগৌরপ্রতীকাশং যুক্তং দশশতায়ুষা। ষোড়শাব্দাকৃতিং রুদ্র সততং দুগ্ধভোজনং॥ মধুসর্পিঃসমাযুক্তং জগ্ধমায়ুষ্করং ভবেৎ। তজ্জগ্ধং মধুনা সার্দ্ধং দশবর্ষসহস্রিণং॥ কুর্য্যান্নরং শ্রুতিধরং প্রমদাজনবল্লভং। দধ্না নিত্যং ভক্ষিতস্তু বজ্রদেহকরং শিব॥ কৃষ্ণকেশসমাযুক্তং নরং বর্ষসহস্রিণং। তচ্চ কাঞ্জিকসংযুক্তং নরং কুর্য্যাচ্চ ভক্ষিতং॥ শতবর্ষং দিব্যদেহং বলীপলিতবর্জ্জিতং। জগ্ধং ত্রিফলয়া যুক্তং চক্ষুষ্মন্তং করোতি বৈ॥ অন্ধঃ পশ্যেত্তু চূর্ণস্য সাজ্যস্যৈব তু ভক্ষণাৎ। মহিষক্ষীরসংযুক্তং তল্লেপঃ কৃষ্ণকেশকৃৎ॥ খল্লীটস্য চ বৈ কেশা ভবন্তি বৃষভধ্বজ। তৈলযুক্তেন চূর্ণেন বলীপলিতবর্জ্জিতং॥ তদুদ্বর্ত্তনমাত্রেণ সর্ব্বরোগৈঃ প্রমুচ্যতে। সচ্ছাগক্ষীরচূর্ণেন দৃষ্টিঃ ষন্মাসতোঽঞ্জনাৎ॥ পলাশস্য তু বীজানি শ্রাবণে বিতুষাণি চ। গৃহীত্বা নবনীতেন তেষাং চূর্ণন্তু ভক্ষয়েৎ॥ কর্ষার্দ্ধমেব কুল্মাষং নত্বা নিত্যং হরিং প্রভুং। যষ্টিং পুরাণধান্যং স্যাদম্বু-

বর্জ্জং বৃষধ্বজ ॥ জীবেদ্বর্ষসহস্রাণি বলী-পলিতবর্জিতঃ । ভৃঙ্গরাজস্য বৈ চূর্ণং পুষ্যর্ক্ষে তু সমাহৃতং ॥ বিড়ালপদমাত্রস্তু সসৌবীরঞ্চ ভক্ষয়েৎ। মাসমাত্রপ্রয়োগেণ বলীপলিতবর্জিতঃ ॥ শতানি পঞ্চ জীবেচ্চ নবনাগবলো ভবেৎ। ভবেৎ শ্রুতিধরো রুদ্র পুষ্যর্ক্ষে চৈব ভক্ষয়েৎ ॥ ইতি গারুড়ে ১৯১ অধ্যায়ঃ ॥ * ॥ হরিরুবাচ। নির্ব্রণঃ স্যাৎ পূযহীনঃ প্রহারো ঘৃতপূরিতঃ। অপামার্গস্য বৈ মূলং হস্তাভ্যাঞ্চ বিমর্দ্দয়েৎ ॥ তদ্রসেন প্রহারস্য রক্তশ্রাবো ন পূরণাৎ। রুদ্র লাঙ্গলিকামূলং হিজ্জলস্য তথৈব চ ॥ তেন ব্রণমুখং লিপ্তং শল্যো নিঃসরতি ব্রণাৎ । চিরকালপ্রবিষ্টোঽপি তেন মার্গেণ শঙ্কর ॥ দধ্না মাহিষেণ যুক্তং জগ্ধং কোদ্রবভক্তকং। কঙ্গুমূলস্য বৈ চূর্ণং দত্তং নাড়ীব্রণাপহং ॥ ব্রহ্মযষ্টিফলং পিষ্টং বারিণা তেন লেপতঃ। তেন ঘৃষ্টং রক্তদোষঃ প্রণশ্যতি ন সংশয়ঃ ॥ যবভস্ম বিড়ঙ্গঞ্চ গন্ধপাষাণমেব চ। শুণ্ঠি-রেষাঞ্চৈব চূর্ণং ভাবিতং রুধিরেণ বৈ ॥ কৃকলাশস্য তল্লিপ্তং অর্ব্বুদং বিদ্রবেচ্ছিব। শোভাঞ্জনস্য বীজানি অতসীমসিনা সহ ॥ গোরসস্তু প্রপিষ্ট্বান্যৎ গ্রন্থিকং নাশয়েদ্ধি বৈ। শ্বেতাপরাজিতামূলং পিষ্টং তণ্ডুল-বারিণা ॥ তেন নস্যপ্রদানাৎ স্যাদ্ভূতরন্দস্য বিদ্রবঃ। অগস্ত্যপুষ্পনস্যো বৈ সমরীচশ্চ ভূতহৃৎ ॥ ভুজঙ্গবর্ম্ম বৈ হিঙ্গু নিম্বপত্রাণি বৈ যবাঃ। গৌরসর্ষপ এভিঃ স্যাল্লেপো ভূতহরঃ কৃতঃ ॥ গোরোচনা মরীচানি পিপ্পলী সৈন্ধবং মধু। অঞ্জনং কৃতমেভিঃ স্যাৎ গ্রহভূতহরং শিব ॥ গুগ্গুলূলূক-পুচ্ছাভ্যাং ধূপো গ্রহহরঃ কৃতঃ। চাতু-র্থিকজ্বরৈর্মুক্তঃ কৃষ্ণবস্ত্রাবগুণ্ঠিতঃ ॥ ইতি গারুড়ে ১৯২ অধ্যায়ঃ ॥ * ॥ হরিরুবাচ। শ্বেতাপরাজিতাপুষ্পরসেনাক্ষোশ্চ পূরণে। পটলং নাশমায়াতি হেতদুত্তমমৌষধং ॥ মূলং গোক্ষুরকস্যৈব চর্ব্বিত্বা নীল-লোহিত। দন্তকীটব্যথাং নশ্যেদদন্ধাসুর-বিমর্দ্দন ॥ নারী পুষ্পদিনে পীত্বা গোক্ষীরে-ণোপবাসতঃ। শ্বেতার্কস্য তু বৈ মূলং তস্যাস্তদ্গর্ভশূলনুৎ ॥ শ্বেতার্কমূলং বিধিনা গৃহীতং পূর্ব্বসংস্থিতং। ঋতুশুদ্ধা চ ললনা কটৌ বদ্ধ্বা নরোঽথ বা ॥ নারী পুত্রং হি লভতে সুরতে বৃষভধ্বজ। হস্তবদ্ধং পলা-শস্য অপামার্গস্য বা হর ॥ মূলং সর্ব্বজ্বর-হরং ভূতপ্রেতাদিনুদ্ভবেৎ। পীতং বৃশ্চিক-মূলন্তু পর্য্যুষিতজলেন বৈ ॥ সার্দ্ধং বিনা-শয়েদ্দাহজ্বরঞ্চ পরমেশ্বর ।শিখায়াঞ্চৈব তদ্বদ্ধং ভবেদেকাহিকাদিনুৎ ॥ এতৎ সকা-ঞ্জিকং পীতং রক্তকুষ্ঠজ্বরাদিনুৎ। বাস্যো-দকেন পীতং তদ্বৃহদ্বিষহরং ভবেৎ ॥ যস্য লজ্জালুকামূলং দীয়তে বহুবেতসা। সার্দ্ধং স বৈ বশং যাতি পুমান্ স্ত্রী বা ন সংশয়ঃ ॥ পিষ্ট্বা গব্যঘৃতেনৈব পাঠামূলং পিবেত্তু যঃ। গরং বিষং তস্য নশ্যেন্নাত্র কার্য্যা বিচারণা ॥ বাস্যোদকযুতং মূলং শিরীষস্য যথা তথা। রক্তচিত্রকমূলস্য শমনং ভরণা-ন্ধর ॥ কর্ণয়োঃ কামলাব্যাধিবিনাশঃ স্যান্ন সংশয়ঃ। শ্বেতকোকিলাক্ষমূলং ছাগী-

ক্ষীরেণ সংযুতং ॥ ত্রিসপ্তাহেন বৈ পীতং ক্ষয়রোগং ক্ষয়ং নয়েৎ। নারিকেলস্য বৈ পুষ্পং ছাগীক্ষীরেণ সংযুতং॥ পিবেচ্চ ত্রিবিধস্তস্য রক্তবাতো বিনশ্যতি। কুর্য্যাৎ সুদর্শনামূলং আদিত্যে তু সমাহৃতং ॥ কণ্ঠবদ্ধং ত্র্যাহিকাদিগ্রহভূতবিনাশনং। পুষ্যে ধবলগুঞ্জায়া গৃহীতং মূলমুত্তমং ॥ মুখে তু নিহিতং রুদ্র হরেৎ গরবিষং বহু। হস্তে বদ্ধং কাণ্ডমুচ্চ কণ্ঠবদ্ধং গ্রহাদিনুৎ॥ ইতি গারুড়ে ১৯৩ অধ্যায়ঃ ॥ * ॥ হরিরুবাচ। অপরাজিতায়া মূলঞ্চ গোমূত্রেণ সমন্বিতং। পীতঞ্চাপি হরত্যেব গণ্ডমালাং ন সংশয়ঃ॥ তথেন্দ্রবারুণীমূলং বিধিনা পীতমীশ্বর। জিঙ্গিন্যেরণ্ডকং রুদ্র শূকশিম্বীসমন্বিতং॥ শীতোদকঞ্চ তন্নস্যো বাহুগ্রীবাব্যথাং হরেৎ। মাহিষং নবনীতঞ্চ অশ্বগন্ধা চ পিপ্পলী॥ বচা কুষ্ঠং স্বয়ং লেপো লিঙ্গশ্রোত্রস্তনর্দ্ধিকৃৎ। কুষ্ঠনাগবলাচূর্ণং নবনীতসমন্বিতং॥ তল্লেপো যুবতীনাঞ্চ কুর্য্যান্মনোহরং স্তনং। বিটপেন্দ্রবারুণীমূলং যস্য নাম্না সুদূরতঃ॥ নিক্ষিপ্যতে সমুৎপাট্য তস্য প্লীহা বিনশ্যতি। পুনর্ণবায়াঃ শুক্লায়া মূলং তণ্ডুলবারিণা॥ পীতং বিদ্রধি নশ্যেচ্চ নাত্র কার্য্যা বিচারণা। কদলী যবক্ষারস্তু পানীয়েন প্রসাধিতং॥ তদাস্বাদনান্নশ্যন্তি উদরব্যাধয়োঽখিলাঃ। বদরীকারবীমূলং গুড়াজ্যেন সমন্বিতং॥ অগ্নিনা সাধিতং জগ্ধ্বা কৃমীন্ সর্ব্বান্ হরেৎ শিব। নিত্যং নিম্বদলানাঞ্চ চূর্ণমামলকস্য চ॥ প্রত্যূষে ভক্ষয়েচ্চৈব তস্য কুষ্ঠং বিনশ্যতি। হরীতকী বিড়ঙ্গঞ্চ হরিদ্রা সিতসর্ষপাঃ॥ সোমরাজস্য বীজানি করঞ্জস্য চ সৈন্ধবং। গোমূত্রপিষ্টান্যেতানি কুষ্ঠরোগহরাণি চ॥ একশ্চ ত্রিফলাভাগস্তথা ভাগদ্বয়ং শিব। সোমরাজস্য বীজানাং জগ্ধং পথ্যা চ দদ্রুনুৎ॥ অমৃতক্রং সগোমূত্রং কথিতং লবণান্বিতং। কাংস্যঘৃষ্টং খরং লেপাৎ কুষ্ঠদদ্রুবিনাশনং॥ হরিদ্রা হরিতালঞ্চ দূর্ব্বাগোমূত্রসৈন্ধবং। অয়ং লেপো হন্তি দদ্রু পামানং বৈ গরং তথা॥ সোমরাজস্য বীজানি নবনীতযুতানি চ। মধুনাস্বাদিতানি স্যুঃ শুক্লকুষ্ঠহরাণি বৈ। তক্রানুপানতো রুদ্র নাত্র কার্য্যা বিচারণা॥ সিতাপরাজিতামূলং বর্ত্তিতং বাস্যবারিণা। তল্লেপো রুদ্র মাসেন শুক্লকুষ্ঠবিনাশনঃ॥ মাহিষং নবনীতঞ্চ সিন্দূরঞ্চ মরীচকং। পামা বিলেপিতা নশ্যেদ্বহুলাপি বৃষধ্বজ॥ বিশুষ্কগম্ভারিমূলং পক্কক্ষীরেণ সংযুতং। ভক্ষিতং শুক্রপিত্তস্য বিনাশকরমীশ্বর॥ মূলকস্য চ বীজানি অপামার্গরসেন বৈ। পিষ্টানি তেন লেপেন সিহ্লিকা রুদ্র নশ্যতি॥ কদলীক্ষারসংযুক্তা হরিদ্রা সিহ্লিকাপহা। রম্ভাপামার্গয়োঃ ক্ষার একস্তৈলবিমিশ্রিতঃ॥ তদভ্যঙ্গান্মহাদেব সদ্যঃ সিধ্ম বিনশ্যতি। কুষ্মাণ্ডনালক্ষারস্তু সগোমূত্রশ্চ তত্ত্বচঃ॥ জলপিষ্টা হরিদ্রা চ সিদ্ধা মন্দানলেন হি। মাহিষেণ পুরীষেণ বেষ্টিতা বৃষভধ্বজ॥ অস্যা উদ্বর্ত্তনং কুর্য্যাদঙ্গগৌরত্বমীশ্বর। তিলসর্ষপসংযুক্তং

হরিদ্রাদ্বয়কুষ্ঠকং ॥ তেনোদ্বর্ত্তিতদেহঃ স্যাদুজ্জ্বলঃ সুরভিঃ পুমান্। মনোহরশ্চামুদিনং দূর্ব্বাণাং কাকজজ্ময়া॥ অর্জ্জুনস্য তু পুষ্পাণি জম্বুপত্রযুতানি চ। সলোধ্রাণি চ তল্লেপো দেহদুর্গন্ধতাং হরেৎ॥ মন্দোষ্ণলোধ্রনীরং বৈ চূর্ণস্তু কনকস্য চ। তেনোদ্বর্ত্তিতদেহস্য হরেদ্‌গ্রীষ্মপ্রসারিকাং ॥ ত্বগ্দোষশ্চৈব দেবেন্দ্র ঘর্ম্মদোষশ্চ নশ্যতি। কাকজঙ্ঘোদ্বর্ত্তনঞ্চ অঙ্গরাগকরং ভবেৎ॥ যষ্টীমধু শর্করা চ বাসকস্য রসো মধু। এতৎ পীতং রক্তপিত্তকামলাপাণ্ডুরোগনুৎ॥ রক্তপিত্তং হরেৎ পীতো বাসকস্য রসো মধু। স্বাপকালে তোয়পানাৎ পীনসং প্রহিতং হরেৎ॥ বিভীতকস্য বৈ চূর্ণং পিপ্পলীসৈন্ধবস্য চ। পীতং সকাঞ্জিকং হন্তি স্বরভেদং মহেশ্বর॥ চূর্ণমামলকস্যৈব পীতং শূলহরং পরং। মনঃশিলা বলামূলং কাকপর্ণঞ্চ গুগ্‌গুলুং॥ জাতীপত্রং কোলিপত্রং তথা চৈব মনঃশিলা। এভিশ্চৈব কৃতা বর্ত্তির্বদরাগ্নৌ মহেশ্বর॥ ধূমপানং কাশহরং নাত্র কার্য্যা বিচারণা। ত্রিফলাপিপ্পলীচূর্ণং ভক্ষিতং মধুনা যুতং॥ ভোজনাদৌ হি সমধু পিপাসাং ত্বরিতং হরেৎ। বিল্বমূলঞ্চ সমধু গুড়ূচীকথিতং জলং॥ পীতং হরেচ্চ ত্রিবিধং ছর্দ্দি বৈ নাত্র সংশয়ঃ। পীতা দূর্ব্বা ছর্দ্দিনুৎ স্যাৎ পিষ্টা তণ্ডুলবারিণা॥ ইতি গারুড়ে ১৯৪ অধ্যায়ঃ॥*॥ হরিরুবাচ। পুনর্ণবায়া মূলঞ্চ শ্বেতং পুষ্যে সমাহৃতং। বারিপীতং তস্য পার্শ্বে ভবনেষু ন পন্নগাঃ॥ তার্ক্ষ্যং মূর্ত্তিং বহেদ্যো বৈ ভল্লুকদন্তনির্ম্মিতাং। স পন্নগৈর্ন দশ্যেত যাবজ্জীবং বৃষধ্বজ॥ পিবেদ্গরুড়মূলং যঃ পুষ্যর্ক্ষে রুদ্র বারিণা। তস্মিন্নপাস্তদশনা নাগাঃ স্যুর্নাত্র সংশয়ঃ॥ পুষ্যে লজ্জালুকামূলে হস্তবন্ধে তু পন্নগান্। গৃহ্ণীয়াল্লেপতো বাপি নাত্র কার্য্যা বিচারণা॥ পুষ্যে শ্বেতার্কমূলঞ্চ পীতং শীতেন বারিণা। নশ্যেত দন্তকবিষং করবীরাদিজং বিষং॥ মহাকালস্য বৈ মূলং পিষ্টং তৎ কাঞ্জিকেন বৈ। বোড্রমগুলিকানাঞ্চ তল্লেপো হরতে বিষং॥ তণ্ডুলীয়কমূলঞ্চ পিষ্টং তণ্ডুলবারিণা। ঘৃতেন সহ পীতস্তু হরেৎ সর্পবিষাণি চ॥ নীলী লজ্জালুকামূলং পিষ্টং তণ্ডুলবারিণা। পীত্বা তদ্দষ্টকবিষং নশ্যেদেকেন চোভয়োঃ॥ কুষ্মাণ্ডকফলরসঃ সগুড়ঃ সহ শর্করঃ। পীতঃ সদুগ্ধো মোহস্তু তদ্দষ্টস্য বিষস্য বৈ॥ তথা কাদ্রবভূতস্য মোহস্য হর এব চ।• যষ্টীমধুসমাযুক্তা পীতা চ সিতশর্করা॥ সদুগ্ধা চ ত্রিরাত্রেণ মূষাবিষহরা ভবেৎ। চুম্বুকত্রয়পানাচ্চ বারিণঃ শীতলস্য বৈ॥ তাম্বুলজগ্ধরোমাঞ্চ মুখলালা বিনশ্যতি। ঘৃতং সশর্করং পীত্বা মদ্যপানমদো ন বৈ॥ কৃষ্ণাঙ্কোঠস্য মূলেন পীতমুৎকথিতং জলং। ততো নশ্যেদ্দারুবিষং ত্রিরাত্রেণ মহেশ্বর॥ উষ্ণং গব্যঘৃতং পীতং সৈন্ধবেন সমন্বিতং। নাশয়েত্তন্মহাদেব বেদনাং বৃশ্চিকোত্তবাং॥ কুসুম্ভং কুঙ্কুমঞ্চৈব হরিতালং মনঃশিলা। করঞ্জপিশিতঞ্চৈব অর্ককীটঞ্চ

শাল্মলী॥ বিষং নৃণাং বিনশ্যেত এতেষাং ভক্ষণাচ্ছিব। দীপতৈলপ্রদানাচ্চ দংশে বৃশ্চিকজে শিব॥ খর্জ্জুরকবিষং নশ্যেত্তদা বৈ নাত্র সংশয়ঃ। দংশস্থানং বৃশ্চিকস্য রুদ্র গুগগুলুধূপিতং॥ বিষং নশ্যেত্ততো রুদ্র নাত্র কার্য্যা বিচারণা। অঙ্কোঠপত্রধূপেন নশ্যেন্মূষিকজং বিষং॥ নাগেশ্বরমরীচানি শুণ্ঠী তগরপাদিকা। নশ্যেন্মধুমক্ষিকায়া এতেষাং লেপতো বিষং॥ শতপুষ্পা সৈন্ধবঞ্চ সাজ্যং বা তেন লেপতঃ। শিরীষস্য চ বীজং বৈ সিতক্ষীরেণ ঘর্ষিতং॥ তল্লেপেন মহাদেব নশ্যেদুন্দুরুজং বিষং। জ্বলিতাগ্নিনা বিসেকী তথা দর্দ্দুরজং বিষং॥ ধুস্তূরকরসোম্মিশ্রং ক্ষীরাজ্যগুড়পানতঃ। শূনাং বিষং বিনশ্যেত শশাঙ্ককৃতশেখর॥ বটনিম্বশমীনাঞ্চ বল্কলৈঃ ক্বথিতং জলং। তৎসেকান্নখদন্তানাং নশ্যেদ্বৈ বিষবেদনাং॥ দেবদারু হরিদ্রা চ গৈরিকস্য চ লেপনাৎ। নাগেশ্বরং হরিদ্রে দ্বে মঞ্জিষ্ঠা দেবদারুকং॥ এভির্লেপাদ্বিনশ্যেত লূতাবিষমুমাপতে। ইতি গারুড়ে ১৯৫ অধ্যায়ঃ॥ *॥ হরিরুবাচ। একং পুনর্ণবামূলং অপামার্গস্য বা শিব। সরসং যোনিবিক্ষিপ্তং বরাঙ্গস্য ব্যথাং হরেৎ॥ প্রসূতিবেদনাঞ্চৈব তরুণীনাং ব্যথাং হরেৎ। ভূমিকুষ্মাণ্ডমূলং বৈ শালিতণ্ডুলবারিণা॥ সপ্তাহং দুগ্ধপীতং স্যাৎ স্ত্রীণাং বহুপয়স্করং। রুদ্রেন্দ্রবারুণীমূললেপাৎ স্ত্রীস্তনবেদনা॥ নশ্যেৎ ঘৃতবিপক্বা চ কার্য্যাবশ্যং তু পালিকা। ভক্ষিতা সা মহেশান যোনিশূলং বিনাশয়েৎ॥ প্রলেপিতা কারবেল্লমূলেনৈব বিনির্গতা। যোনিঃ প্রবেশমায়াতি নাত্র কার্য্যা বিচারণা॥ নীলীপটোলমূলানি সাজ্যানি তিলবারিণা। পিষ্টান্যেষাং প্রলেপো বৈ জ্বালাগর্দ্দভরোগনুৎ॥ পাঠামূলং রুদ্র পীতং পিষ্টং তণ্ডুলবারিণা। পাপরোগহরং স্যাচ্চ কুষ্ঠপানস্তথৈব চ॥ বাস্যোদকঞ্চ সমধু পীতমন্তর্গতস্য বৈ। পাপরোগস্য সন্তাপনিবৃত্তিং কুরুতে শিব॥ কদলীমেকুচং পীতং পিষ্ট্বা তণ্ডুলবারিণা। স্ত্রীণাঞ্চৈব মহাদেব রক্তস্রাবং হি বারয়েৎ॥ ঘৃততুল্যা রুদ্র লাক্ষা পীতা ক্ষীরেণ বৈ সহ। প্রদরং হরতে রোগং নাত্র কার্য্যা বিচারণা॥ দ্বিজযষ্টীত্রিকটুকং চূর্ণং পীতং হরেচ্ছিব। তিলক্বাথেন সংযুক্তং রক্তগুল্মং স্ত্রিয়া হর॥ কুসুমস্য নিবদ্ধঞ্চ তরুণীনাং মহেশ্বর। রক্তোৎপলস্য বৈ কন্দং শর্করাতিলসংযুতং॥ পীতং সশর্করং স্ত্রীণাং ধারয়েৎ গর্ভপাতনং। রক্তস্রাবস্য নাশঃ স্যাৎ শীতোদকনিষেবনাৎ॥ পীতস্তু কাঞ্জিকং রুদ্র ক্বথিতং শরপুংখয়া। হিঙ্গুসৈন্ধবসংযুক্তং শীঘ্রং স্ত্রীণাং প্রসূতিকৃৎ॥ মাতুলুঙ্গস্য বৈ মূলং কটিবদ্ধং প্রসূতিকৃৎ। অপামার্গস্য বৈ মূলং যোনিস্থঞ্চ প্রসূতিকৃৎ॥ অপামার্গস্য বৈ মূলে গর্ভবত্যাস্তু নামতঃ। উৎপাট্যমানে সকলে পুত্রঃ স্যাদন্যথা সুতা॥ অপামার্গস্য বৈ মূলে নারীণাং শিরসি স্থিতে। গর্ভশূলং বিনশ্যেত নাত্র কার্য্যা বিচারণা॥ কর্পূরমদনফলমধুকৈঃ পূরিতঃ শিব। যোনিঃ

শুভা স্যাদ্বৃদ্ধায়া যুবত্যাঃ কিং পুনর্হর ॥ যস্য বালস্য তিলকঃ কৃতো গোরোচনা-খ্যয়া। শর্করাকুষ্ঠপানঞ্চ দত্তং স স্যাচ্চ নির্ভয়ঃ ॥ বিষভূতগ্রহাদিভ্যো ব্যাধিভ্যো বালকঃ শিব। শঙ্খনাভিবচাকুষ্ঠলোহানাং ধারণং সদা॥ বালানামুপসর্গেভ্যো রুদ্র রক্ষাকরং ভবেৎ। পলাশচূর্ণং সমধুগব্যা-জ্যামলকান্বিতং ॥ সবিড়ঙ্গং পীতমাত্রং নরং কুর্য্যান্মহামতিং। মাসৈকেন মহাদেব জরামরণবর্জ্জিতং ॥ পলাশবীজং সঘৃতং তিলমধ্বন্বিতং সমং। সপ্তাহং ভক্ষিতং রুদ্র জরাং নয়তি সংক্ষয়ং॥ রুদ্রামলকচূর্ণং বৈ মধুতৈলঘৃতান্বিতং। জগ্ধ্বা মাসং যুবা স্যাচ্চ নরো বাগীশ্বরো ভবেৎ॥ শিবামলকচূর্ণস্থৈ মধুনা উদকেন বা। বলানি কুর্য্যান্নাসায়াঃ প্রত্যূষে ভক্ষিতং শিব॥ কুষ্ঠচূর্ণং সাজ্যমধু প্রাত-র্জগ্ধ্বা ভবেন্নরঃ। সাক্ষাৎ সুরভিদেহো বৈ জীবেদ্বর্ষসহস্রকং॥ মাষস্য বিদলান্যেব বিতুষাণি মহেশ্বর। ঘৃতভাবিতশুষ্কাণি পয়সা সাধিতানি বৈ॥ শর্করাজ্যপয়োভিশ্চ ভক্ষয়িত্বা চ কাময়েৎ। স্ত্রীণাং শতং মহাদেব তৎক্ষণান্নাত্র সংশয়ঃ॥ রসশ্চৈরণ্ডতৈলেন গন্ধকেন শুভো ভবেৎ। ত্রিফলোদকসংঘৃষ্টো বলকৃদ্ভক্ষণাদ্ভবেৎ॥ দুগ্ধং বিতুষমাষৈশ্চ শিম্বীবীজৈশ্চ সাধিতং। অপামার্গস্য তৈলেন পীতং স্ত্রীশতকামকৃৎ॥ ইতি গারুড়ে ১৯৬ অধ্যায়ঃ ॥ * ॥ হরিরুবাচ। যা গৌর্ব্বৎস্থিতি স্বকং বৎসং তস্যা দেয়ং স্বকং পয়ঃ। লবণেন সমাযুক্তং তস্যা বৎসঃ প্রিয়ো ভবেৎ॥ শুনোঽস্থি কণ্ঠবদ্ধং হি মহিষীণাং গবাস্তথা। কৃমিজালং পাতয়তি সকলং নাত্র সংশয়ঃ॥ গোজঙ্গলাভিপাতঃ স্যাৎ গুঞ্জা-মূলস্য ভক্ষণাৎ। বরুণফলস্য রসং করেণ মথিতং শিব॥ চতুষ্পাদদ্বিপদয়োঃ কৃমি-জালং নিপাতয়েৎ। ব্রণঞ্চ শময়েদ্রুদ্রে যবানাং পূরণাত্তথা॥ গজমূত্রস্য বৈ পানং গোমহিষ্যুপসর্গনুৎ। সমসূরং শালিবীজং পীতং তক্রেণ ঘর্ষিতং॥ ক্ষীরং গোমহিষস্যৈব গোঃ পুংসশ্চ হিতং ভবেৎ। পত্রঞ্চ শরপুঙ্খায়া দত্তং সলবণং শিব॥ বারিস্ফোটং হয়ানাঞ্চ বেশ-রাণাং বিনাশয়েৎ। অশ্বাশ্চ সুন্দরচ্ছায়া ভবন্তি চ ন সংশয়ঃ॥ গৃহকুমারীপত্রস্থৈ দত্তং সলবণং হর। তুরঙ্গমবেশরাণাং কণ্ডুনুৎ স্যাদ্দশাহতঃ॥ ইতি গারুড়ে ১৯৭ অধ্যায়ঃ॥ * ॥ হরিরুবাচ। চিত্রক-স্যাষ্টভাগানি শূরণস্য চ ষোড়শ। শুণ্ঠ্যা-শ্চত্বারি ভাগানি মরীচানাং দ্বয়ং তথা॥ পিপ্পলী পিপ্পলীমূলং বিড়ঙ্গানাং চতুষ্টয়ং। অষ্টৌ মুষলীভাগাশ্চ ত্রিফলায়াশ্চতুষ্টয়ং॥ দ্বিগুণেন গুড়েনৈষাং মোদকানি হি কারয়েৎ। তদ্ভক্ষণমজীর্ণং হি পাণ্ডুরোগঞ্চ কামলাং ॥ অতিশ্রোণি চ মন্দাগ্নিং প্লীহাদ্যঞ্চ নিবারয়েৎ। বিল্বাগ্নিমন্থ-শ্যোনাকপাটলাপারিভদ্রকং॥ প্রসারণ্যশ্ব-গন্ধা চ বৃহতী কণ্টকারিকা। বলা চাতি-বলা রাস্না শ্বদংষ্ট্রা চ পুনর্ণবা॥ এরণ্ড-শারিবা পর্ণী গুড়ুচী কপিকচ্ছুরা। এষাং

দশপলান্ ভাগান্ কাথয়েৎ সলিলেঽমলে ॥ তেন পাদাবশেষেণ তৈলপাত্রে বিপাচয়েৎ। আজং বা যদি বা গব্যং ক্ষীরং দত্ত্বা চতুর্গুণং ॥ শতাবরীরসঞ্চৈব তৈলতুল্যং প্রদাপয়েৎ। দ্রব্যাণি যানি পেষ্যাণি তানি বক্ষ্যামি তচ্ছৃণু ॥ শতপুষ্পা দেবদারু বলা পর্ণী বচাগুরু। কুষ্ঠং মাংসী সৈন্ধবঞ্চ পলমেকং পুনর্ণবা ॥ পানে নস্যে তথাভ্যঙ্গে তৈলমেতৎ প্রদাপয়েৎ। হৃচ্ছূলং পার্শ্বশূলঞ্চ গণ্ডমালাঞ্চ নাশয়েৎ ॥ অপস্মারং বাতরক্তমায়ুষ্মাংশ্চ পুমান্ ভবেৎ। গর্ব্বমশ্বতরী বিন্দ্যাৎ কিং পুনর্মানুষী শিব ॥ অশ্বানাং বাতভগ্নানাং কুঞ্জরাণাং নৃণাং তথা। তৈলমেতৎ প্রযোক্তব্যং সর্ব্ববাতবিকারিণাং ॥ হিঙ্গু তুম্বুরু শুণ্ঠ্যা চ সাধ্যং তৈলন্তু সার্ষপং। এতদ্ধি পূরণং শ্রেষ্ঠং কর্ণশূলাপহং পরং ॥ শুষ্কমূলকশুণ্ঠীনাং ক্ষারো হিঙ্গুলনাগরং। শুক্তং চতুর্গুণং দদ্যাত্তৈলমেতৈর্বিপাচয়েৎ ॥ বাধির্য্যং কর্ণশূলঞ্চ পূযস্রাবশ্চ কর্ণয়োঃ। ক্রমশশ্চ বিনশ্যন্তি তৈলস্যাস্য প্রপূরণাৎ ॥ শুষ্কমূলকশুণ্ঠীনাং ক্ষারো হিঙ্গুলনাগরং। শতপুষ্পী বচা কুষ্ঠং দারু শিগ্রু রসাঞ্জনং ॥ সৌবর্চ্চলং যবক্ষারং সামুদ্রং সৈন্ধবং তথা। ভূজগ্রন্থি বিড়ং মুস্তং মধু শুক্তং চতুর্গুণং ॥ মাতুলুঙ্গরসঞ্চৈব কদলীরসমেব চ। তৈলমেভির্বিপক্তব্যং কর্ণশূলাপহং পরং ॥ ব্যাধিজঃ কর্ণনাদশ্চ পূযস্রাবশ্চ দারুণঃ। পূরণাদস্য তৈলস্য ক্রমশঃ কর্ণয়োঃ খিলাঃ ॥

ক্ষিপ্রং বিনাশমায়ান্তি শশাঙ্ককৃতশেখর। ক্ষারতৈলমিদং শ্রেষ্ঠং মুখদন্তাময়াপহং ॥ চন্দনং কুঙ্কুমং মাংসী কর্পূরো জাতিপত্রিকা। জাতীককোলপূগানাং লবঙ্গস্য ফলানি চ ॥ অগুরুশীরকস্তূর্য্যঃ কুষ্ঠং তগরনালিকা। গোরোচনা প্রিয়ঙ্গুশ্চ চোলো দমনকং নখং ॥ সরলঃ সপ্তপর্ণশ্চ লাক্ষা চামলকী তথা। কর্পূরকঃ পদ্মকঞ্চ এতৈস্তৈলং প্রসাধিতং ॥ প্রস্বেদমলদৌর্গন্ধ্যকণ্ডূকুষ্ঠহরং পরং। পুমান্ যুবা স্যাৎ শুক্রাঢ্যঃ স্ত্রীণাং চাত্যন্তদুর্ল্লভঃ ॥ স্ত্রীশতং গচ্ছতে রুদ্র বন্ধ্যাপি লভতে সুতং। যমানী চিত্রকং ধান্যং ত্র্যূষণং জীরকং তথা ॥ সৌবর্চ্চলং বিড়ং বচ্যং পিপ্পলীমূলরাজিকং। এভিঃ পচেৎ ঘৃতপ্রস্থং জলপ্রস্থাষ্টসংযুতং ॥ মর্ম্মার্শো গুল্মশ্বযথুং হন্তি বহ্নিং করোতি বৈ। মরীচং ত্রিবৃতং কুষ্ঠং হরিতালং মনঃশিলা ॥ দেবদারুহরিদ্রে দ্বে কুষ্ঠং মাংসী চ চন্দনং। বিশালা করবীরঞ্চ অর্কক্ষীরং শকৃদ্রসং ॥ এষাঞ্চ কার্ষিকো ভাগো বিষস্যার্দ্ধপলং ভবেৎ। প্রস্থং কটুকতৈলস্য গোমূত্রেঽষ্টগুণে পচেৎ ॥ মৃৎপাত্রে লৌহপাত্রে বা শনৈর্মৃদ্বগ্নিনা পচেৎ। পামা বিচর্চ্চিকা চৈব দদ্রুবিস্ফোটকানি চ ॥ অভ্যঙ্গেন প্রণশ্যন্তি কোমলত্বঞ্চ জায়তে। প্রসূতান্যপি শ্বিত্রাণি তৈলেনানেন ম্রক্ষয়েৎ ॥ চিরোত্থিতমপি শ্বিত্রং বিবর্ণং তৎক্ষণাদ্ভবেৎ। পটোলপত্রং কটুকা মঞ্জিষ্ঠা শারিবা নিশা ॥ জাতী শমী নিম্বপত্রং

মধুকং ক্বথিতং ঘৃতং। এভির্লেপাৎ স্যু-
রুরুজো ব্রণা বৈ স্রাবিণঃ শিব॥ শঙ্খপুষ্পী
বচা সোমা ব্রাহ্মী ব্রহ্মসুবর্চ্চলা। অভয়া
চ গুড়ূচী চ অটরূষকবাকুচী॥ এতৈরক্ষ-
সমৈর্ভাগৈর্ঘৃতপ্রস্থং বিপাচয়েৎ। কণ্ট-
কার্য্যা রসং প্রস্থং ক্ষীরপ্রস্থসমন্বিতং॥
এতদ্ব্রাহ্মীঘৃতং নাম স্মৃতিমেধাকরং
পরং। অগ্নিজিহ্বা বচা বাসা পিপ্পলী মধু
সৈন্ধবং॥ সপ্তরাত্রপ্রয়োগেণ কিন্নরৈঃ সহ
গীয়তে। অপামার্গো গুড়ূচী চ কুষ্ঠং শতা-
বরী বচা॥ শঙ্খপুষ্প্যভয়া সাজ্যং বিড়ঙ্গং
ভক্ষিতং সমং। ত্রিভির্দিনৈর্নরং কুর্য্যাদ্-
গ্রন্থাষ্টশতধারিণং॥ অস্থির্বা পয়সাজ্যেন
মাসমেকন্তু সেবিতা। বচা কুর্য্যান্নরং প্রাজ্ঞং
শ্রুতিধারণসংযুতং॥ চন্দ্রসূর্য্যগ্রহে পীতং
পলমেকং পয়োঽন্বিতং। বচায়াস্তৎক্ষণং
কুর্য্যাৎ মহাপ্রজ্ঞান্বিতং নরং॥ ভূনিম্বনিম্ব-
ত্রিফলাপর্পটৈশ্চ শৃতং জলং। পটোলী-
মুস্তকাভ্যাঞ্চ বাসকেন চ নাশয়েৎ॥ বিস্ফো-
টকানি ব্যক্তানি নাত্র কার্য্যা বিচারণা।
কতকস্য ফলং শঙ্খং সৈন্ধবং ত্র্যুষণং
বচা॥ ফেনো রসাঞ্জনং ক্ষৌদ্রং বিড়ঙ্গানি
মনঃশিলা। এষাং বর্ত্তির্হন্তি কাচং তিমিরং
পটলং তথা॥ প্রস্থে দ্বে গণ্ডমালানাং
ক্বাথয়েদ্দ্রোণমম্ভসাং। চতুর্ভাগাবশেষেণ
তৈলপ্রস্থং বিপাচয়েৎ॥ কাঞ্জিকস্যাঢ়কং
দত্ত্বা পিষ্টান্যেতানি দাপয়েৎ। পুনর্ণবা
গোক্ষুরকং সৈন্ধবং ত্র্যুষণং বচা॥ সরলং
সুরদারুশ্চ মঞ্জিষ্ঠা কণ্টকারিকা। নস্য-
পানাদ্ধরত্যেব কর্ণশূলং হনুগ্রহং॥
বাধির্য্যং সর্ব্বরোগাংশ্চ অভ্যঙ্গাচ্চ মহে-
শ্বর। পলদ্বয়ং সৈন্ধবঞ্চ শুণ্ঠী চিত্রক-
পঞ্চকং॥ পঞ্চপ্রস্থং ত্বারনালং তৈলপ্রস্থং
পচেত্ততঃ। গ্রহগৃহ্যস্বরপ্লীহসর্ব্ববাতবিকার-
নুৎ॥ উডুম্বরং বটপ্লক্ষং জম্বুদ্বয়মথা-
র্জ্জুনং। পিপ্পলঞ্চ কদম্বঞ্চ পলাশং লোধ্র-
তিন্দুকং॥ মধুকমাত্রসর্জ্জঞ্চ বদরং পদ্ম-
কেশরং। শিরীষবীজং কতকমেতৎ-
ক্বাথেন সাধিতং॥ তৈলং হন্তি ব্রণা-
ন্লেপাচ্চিরকালভবানপি। ইতি গারুড়ে
১৯৮ অধ্যায়ঃ॥ * ॥ হরিরুবাচ। পাঠা
দ্বে রজনী কুষ্ঠমশ্বগন্ধাজমোদকং। বচা
ত্রিকটুকঞ্চৈব লবণং চূর্ণমুত্তমং॥ ব্রাহ্মী-
রসে ভাবিতঞ্চ সর্পির্মধুসমন্বিতং। সপ্তাহং
ভক্ষিতং কুর্য্যাম্মদৈশ্বর্য্যং মতিং পরাং॥
সিদ্ধার্থকবচাহিঙ্গুকরঞ্জং দেবদারু চ।
মঞ্জিষ্ঠা ত্রিফলা শ্বেতা শিরীষো রজনী-
দ্বয়ং॥ প্রিয়ঙ্গুনিম্বত্রিকটু গোমূত্রেণাব-
ঘর্ষিতং। নস্যমালেপনঞ্চৈব স্নানমুদ্বর্ত্তনং
তথা॥ অপস্মারবিষোন্মাদশোষালক্ষ্মীজ্বরা-
পহং। ভূতেভ্যশ্চ ভয়ং হন্তি
চ শাসনং॥ নিম্বকুষ্ঠে হরিদ্রে দ্বে শিগ্রু
সর্ষপজস্তরুঃ। দেবদারু পটোলঞ্চ ধান্যং
তক্রেণ ঘর্ষিতং॥ দেহং তৈলাক্তগাত্রং
বৈ অনেনোদ্বর্ত্তয়েত্ততঃ। পামাঃ কুষ্ঠানি
নশ্যেয়ুঃ কণ্ডুং পিটকসকৃথিকীং॥ সামুদ্রং
সৈন্ধবং ক্ষারো রাজিকা লবণং বিড়ং।
কটুলোহরজঃ কীটং ত্রিবৃৎ শূরণকং সমং॥
দধিগোমূত্রপয়সা মন্দপাবকপাচিতং।
এতচ্চাগ্নিবলং চূর্ণং পিবেদুষ্ণেন বারিণা॥

জীর্ণে জীর্ণে চ ভুঞ্জীত মাসাদিঘৃত-ভোজনং। নাভিশূলং মূত্রশূলং গুল্ম-প্লীহভবঞ্চ যৎ॥ সর্ব্বশূলহরং চূর্ণং জঠরা-নলদীপনং। পরিণামসমুত্থস্য শূলস্য চ হিতং পরং॥ অভয়ামলকং দ্রাক্ষা পিপ্পলী কণ্টকারিকা। শৃঙ্গং পুনর্ণবা শুণ্ঠী জগ্ধা কাশং নিহন্তি বৈ॥ অভয়ামলকং দ্রাক্ষা পাঠা চৈব বিভীতকং। শর্করা চ সমঞ্চৈব জগ্ধং জ্বরহরং ভবেৎ॥ ত্রিফলা বদরং দ্রাক্ষা পিপ্পলী চ বিরেচকৃৎ। হরীতকী সোষ্ণনীরা লবণঞ্চ বিরেচকৃৎ॥ কূর্ম্ম-মৎস্যাখুমহিষগোশৃগালাশ্চ বানরাঃ। বিড়ালবর্হিকাকাশ্চ বরাহোলূককুক্কুটাঃ॥ হংস এষাঞ্চ বিণ্মূত্রং মাংসং বা রোম শোণিতং। ধূপং দদ্যাৎ জ্বরার্ত্তেভ্য উন্মত্তেভ্যশ্চ শান্তয়ে॥ অপস্মারাভি-ভূতেভ্যো গ্রহার্ত্তেভ্যশ্চ শান্তয়ে। এতা-ন্যৌষধজাতানি কথিতানি মহেশ্বর॥ নিহন্তি যানি রোগাণি বৃক্ষমিন্দ্রাশনির্যথা। ঔষধে ভগবান্ বিষ্ণুঃ স্মৃতোঽসৌ রোগনুত্তবেৎ॥ ধ্যাতোঽর্চ্চিতঃ স্তুতো বাপি নাত্র কার্য্যা বিচারণা। ইতি গারুড়ে ১৯৯ অধ্যায়ঃ॥

ঔষরং (ক্লী) পাংশবলবণং। অয়স্কান্তভেদঃ। ইতি রাজনির্ঘণ্টঃ॥

ঔষরকং (ক্লী) মৃত্তিকালবণং। খারী লুণ ইতি ভাষা। তৎপর্য্যায়ঃ। সার্ব্বগুণং ২ সর্ব্বসংসর্গলবণং ৩ ঊষরকং ৪ সাম্বরং ৫ বহুলবণং ৬ মেলকলবণং ৭ মিশ্রং ৮। অস্য গুণাঃ। পটুত্বং। ক্ষারত্বং। তিক্তত্বং। বাতকফনাশিত্বং। বিদাহিত্বং। পিত্ত-মলবন্ধমূত্রসংশোষকারিত্বঞ্চ। ইতি রাজ-নির্ঘণ্টঃ॥

ঔষ্ট্রকং (ক্লী) উষ্ট্রসমূহঃ। উটের পাল ইতি ভাষা। ইত্যমরঃ॥

ঔষ্ম্যং (ক্লী) উষ্মণো ভাবঃ। উষ্ণতা॥

ঔক্ষকং (ক্লী) উক্ষ্ণাং সমূহঃ। এঁড়ে গরুর পাল ইতি ভাষা। ইত্যমরঃ॥

## অং

অং অংকারঃ। স তু অনুস্বারঃ। পঞ্চদশস্বর-বর্ণঃ। বিন্দুমাত্রানুনাসিকবর্ণোঽয়ং অকার উচ্চারণার্থঃ। বোপদেবেনাস্য স্বুরিতি সংজ্ঞা কৃতা। স তু নকারমকারস্থানেঽপি ভবতি॥ *॥ স্বুবীপূর্ব্বেণ সংবদ্ধৌ মূর্দ্ধ্যৌ তু পরগামিনৌ। চত্বারো যোগবাহাখ্যা ণত্বকর্ম্মণ্যচো মতাঃ॥ ইতি দুর্গাদাসঃ॥*॥ অংকারং বিন্দুসংযুক্তং পীতবিদ্যুৎসম-প্রভং। পঞ্চপ্রাণাত্মকং বর্ণং ব্রহ্মাদিদেবতা-ময়ং॥ সর্ব্বজ্ঞানময়ং বর্ণং বিন্দুত্রয়সম-ন্বিতং॥ ইতি কামধেনুতন্ত্রং॥ তস্য লেখন-প্রকারো যথা। অকাররূপশীর্ষে তু দক্ষিণে বিন্দুরূপিণী। ব্রহ্মা বিষ্ণুশ্চ রুদ্রশ্চ ক্রমশ-স্তাসু তিষ্ঠতি॥ যা তু বিন্দুময়ী রেখা সৈবাদ্যা শক্তিরীরিতা। ইতি বর্ণোদ্ধার-তন্ত্রং॥ *॥ অস্য নামানি যথা। অংকার-শ্চক্ষুষো দন্তো ঘটিকা সমগুহ্যকঃ। প্রদ্যুম্নঃ শ্রীমুখী প্রীতির্বীজযোনির্বৃষধ্বজঃ॥ পরং শশী প্রমাণীশঃ সোমবিন্দুঃ কলানিধিঃ। অক্রূরশ্চেতনা নাদপূর্ণা দুঃখহরঃ শিবঃ॥

শিরঃ শম্ভুর্নরেশশ্চ সুখদুঃখপ্রবর্ত্তকঃ। পূর্ণিমা রেবতী শুদ্ধঃ কন্যাচরবিয়দ্রবিঃ॥ অমৃতাকর্ষিণী শূন্যং বিচিত্রা ব্যোমরূপিণী। কেদারো রাত্রিনাশশ্চ কুব্জিকা চৈব বুদ্বুদঃ॥ ইতি তন্ত্রশাস্ত্রং॥

অং (ক্লী) পরং ব্রহ্ম। ইত্যেকাক্ষরকোষঃ॥

## অঃ

অঃ অঃকারঃ স চ বিসর্গঃ। দ্বিবিন্দুমাত্রকণ্ঠ্য-বর্ণোঽয়ং অকার উচ্চারণার্থঃ। স চ ষোড়শস্বরবর্ণঃ। বোপদেবেনাস্য বিরিতি সংজ্ঞা কৃতা। স তু সকাররকারয়োঃ স্থানেঽপি ভবতি॥ *॥ অঃকারং পরমেশানি বিসর্গসহিতং সদা। অঃকারং পরমেশানি রক্তবিদ্যুৎপ্রভাময়ং॥ পঞ্চদেবময়ো বর্ণঃ পঞ্চপ্রাণময়ঃ সদা। সর্ব্বজ্ঞানময়ো বর্ণ আত্মাদিতত্ত্বসংযুতঃ॥ বিন্দুত্রয়ময়ো বর্ণঃ শক্তিত্রয়ময়ঃ সদা। কিশোরবয়সাঃ সর্ব্বে গীতবাদ্যাদিতৎপরাঃ॥ শিবস্য যুবতী এতাঃ স্বয়ং কুণ্ডলী মূর্ত্তিমান্॥ ইতি কামধেনুতন্ত্রং॥ তস্য লেখনপ্রকারো যথা। অকাররূপদক্ষে তু দ্বিবিন্দুরধ ঊর্দ্ধতঃ। ব্রহ্মেশবিষ্ণবস্তাসু মাত্রা শক্তিঃ সমীরিতা॥ বিন্দুদ্বয়াম্বিতা রেখা সৈবাদ্যা শক্তিরীরিতা॥ ইতি বর্ণোদ্ধারতন্ত্রং॥*॥ অস্য নামানি যথা। অঃ কণ্ঠকো মহাসেনঃ কালাপূর্ণামৃতা হরিঃ। ইচ্ছা ভদ্রা গণেশশ্চ রতির্বিদ্যামুখী সুখং॥ দ্বিবিন্দুরসনা সোমোঽনিরুদ্ধো দুঃখসূচকঃ। দ্বিজিহ্বঃ কুণ্ডলং বক্ত্রং সর্গঃ শক্তির্নিশাকরঃ। সুন্দরী সুযশানন্তা গণনাথো মহেশ্বরঃ॥ ইতি তন্ত্রশাস্ত্রং॥

অঃ (পুং) মহেশ্বরঃ। ইত্যেকাক্ষরকোষঃ॥

# ক

ক ককারঃ। স তু ব্যঞ্জনপ্রথমবর্ণঃ। অস্যোচ্চারণস্থানং কণ্ঠঃ। ইতি ব্যাকরণং ॥ * ॥ তস্য লেখনপ্রকারো যথা। বামরেখা ভবেদ্‌ব্রহ্মা বিষ্ণুর্দ্দক্ষিণরেখিকা। অধোরেখা ভবেদ্রুদ্রো মাত্রা সাক্ষাৎ সরস্বতী॥ কুণ্ডলী চাঙ্কুশাকারা মধ্যশূন্যং সদাশিবঃ। কদম্বগোলকাকারং ককারং ভাবয়েৎ সুধী॥ ইতি বর্ণোদ্ধারতন্ত্রং ॥ * ॥ তস্য নামানি যথা। কঃ ক্রোধীশো মহাকালী কামদেবপ্রকাশকঃ। কপালী তেজসঃ শান্তির্বাসুদেবো জয়ানলঃ॥ চক্রী প্রজাপতিঃ সৃষ্টির্দক্ষস্কন্ধো বিশাম্পতিঃ। অনন্তঃ পার্থিবো বিন্দুস্তাপিনী পরমাত্মকঃ॥ বর্গাদ্যশ্চ মুখী ব্রহ্মা সখাদ্যোঽন্তঃ শিবো জলং। মাহেশ্বরী তুলা পুষ্পা মঙ্গলশ্চরণং করঃ॥ নিত্যা কামেশ্বরী মুখ্যঃ কামরূপো গজেন্দ্রকঃ। শ্রীপুরং রমণো রঙ্গকুসুমা পরমাত্মকঃ॥ ইতি তন্ত্রশাস্ত্রং ॥ অধুনা সংপ্রবক্ষ্যামি ককারতত্ত্বমুত্তমং। রহস্যং পরমাশ্চর্য্যং ত্রৈলোক্যানাঞ্চ সংশৃণু ॥ বামরেখা ভবেদ্‌ব্রহ্মা বিষ্ণুর্দ্দক্ষিণরেখিকা। অধোরেখা ভবেৎ রুদ্রো মাত্রা সাক্ষাৎ সরস্বতী॥ কুণ্ডলী অঙ্কুশাকারা মধ্যে শূন্যঃ সদাশিবঃ। জবাযাবকসংকাশা বামরেখা বরাননে॥ শরচ্চন্দ্রপ্রতীকাশা দক্ষরেখা চ মূর্ত্তিমান্। অধোরেখা বরারোহে মহামরকতদ্যুতিঃ ॥ শঙ্খকুন্দসমাকীর্ত্তির্ম্মাত্রা সাক্ষাৎ সরস্বতী। কুণ্ডলী অঙ্কুশা যা তু কোটিবিদ্যুল্লতাকৃতিঃ॥ কোটিচন্দ্রপ্রতীকাশো মধ্যে শূন্যঃ সদাশিবঃ। শূন্যগর্ভে স্থিতা কালী কৈবল্যপদদায়িনী॥ ককারাজ্জায়তে সর্ব্বং কামং কৈবল্যমেব চ। অর্থশ্চ জায়তে দেবি তথা ধর্ম্মশ্চ নান্যথা॥ ককারঃ সর্ব্ববর্ণানাং মূলপ্রকৃতিরেব চ। ককারঃ কামদা কামরূপিণী স্ফুরদব্যয়া॥ কামনীয়া মহেশানি স্বয়ং প্রকৃতিসুন্দরী। মাতা সা সর্ব্বদেবানাং কৈবল্যপদদায়িনী॥ ঊর্দ্ধকোণে স্থিতা কামা ব্রহ্মশক্তিরিতীরিতা। বামকোণে স্থিতা জ্যেষ্ঠা বিষ্ণুশক্তিরিতীরিতা॥ দক্ষকোণে স্থিতা বিন্দু রৌদ্রী সংহাররূপিণী। জ্ঞানাত্মা স তু চার্ব্বঙ্গি কলাচতুষ্টয়াত্মকং॥ ইচ্ছাশক্তির্ভবেদ্‌ব্রহ্মা বিষ্ণুশ্চ জ্ঞানশক্তিমান্। ক্রিয়াশক্তির্ভবেৎ রুদ্রঃ সর্ব্বে প্রকৃতিমূর্ত্তিমান্ ॥ আত্মবিদ্যা শিবস্তত্র সদা মন্ত্রঃ প্রতিষ্ঠিতঃ। আসনং ত্রিপুরাদেব্যাঃ ককারং পঞ্চদৈবতং॥ ঈশ্বরো যস্ত দেবেশি ত্রিকোণে তস্য সংস্থিতিঃ। ত্রিকোণমেতৎ কথিতং যোনিমণ্ডলমুত্তমং॥ কেবলং প্রপদে যস্যাঃ কামিনী সা প্রকীর্ত্তিতা। ওঁ জবাযাবকসিন্দূরসদৃশীং কামিনীং পরাং॥ চতুর্ভুজাং ত্রিনেত্রাঞ্চ বাহুবল্লীবিরাজিতাং। কদম্বকোরকাকারস্তনদ্বয়বিভূষিতাং॥ রত্নকঙ্কণকেয়ূরমঙ্গদৈরুপশোভিতাং। রত্নহারৈঃ পুষ্পহারৈঃ শোভিতাং পরমেশ্বরীং॥ এবং হি কামিনীং ধ্যাত্বা ককারং দশধা জপেৎ। প্রফুল্লঞ্চ ততো ধ্যাত্বা জপস্য ফলভাগ্‌ভবেৎ॥ এতত্তে কথিতং

দেবি ককারতত্ত্বমুত্তমং। ইতি কামধেনুতন্ত্রং॥

কং (ক্লী) শিরঃ। জলং। সুখং। ইতি মেদিনী॥ কেশঃ। ইতি ধরণী॥

কঃ (পুং) ব্রহ্মা। বিষ্ণুঃ। কামদেবঃ। অগ্নিঃ। বায়ুঃ। যমঃ। সূর্য্যঃ। আত্মা। দক্ষঃ। রাজা। গ্রন্থিঃ। ময়ূরঃ। ইতি মেদিনী॥ মনঃ। শরীরং। কালঃ। ধনং। শব্দঃ। ইত্যনেকার্থকোষঃ॥ প্রকাশঃ। ইত্যেকাক্ষরকোষঃ॥

কঃ (ত্রি) সর্ব্বনাম। কে কি ইত্যাদি ভাষা। ইতি বিশ্বঃ॥

কংশঃ (পুং ক্লী) কংসঃ। পানপাত্রং। ইত্যমরটীকা॥

কংসং (ক্লী পুং) মদ্যাদিপানপাত্রং। তৎপর্য্যায়ঃ। পানভাজনং ২। ইত্যমরঃ॥ কংশং ৩ কাংস্যং ৪। ইতি তট্টীকা॥ তৈজসদ্রব্যং। স্বর্ণরজতাদিনির্ম্মিতপাত্রমাত্রং। মানবিশেষঃ। তত্তু আঢ়কপরিমাণং। ইতি মেদিনী॥ তাম্রবঙ্গমিশ্রিতধাতুবিশেষঃ। কাঁসা ইতি ভাষা॥ তৎপর্য্যায়ঃ। কাংস্যং ২ কংসাস্থি ৩ তাম্রার্দ্ধং ৪। ইতি ত্রিকাণ্ডশেষঃ॥

কংসঃ (পুং) বিষ্ণুদ্বেষ্টৃস্থরবিশেষঃ। ইতি হেমচন্দ্রঃ॥ স তু মথুরাদেশরাজা। যদুবংশীয়োগ্রসেনরাজপুত্রঃ। শ্রীকৃষ্ণমাতুলঃ। তেন বধঃ প্রাপ্তঃ। ইতি শ্রীভাগবতং॥

কংসকং (ক্লী) চক্ষুরৌষধধাতুবিশেষঃ। স তু হীরাকসীপ্রভেদঃ। তৎপর্য্যায়ঃ। পুষ্পকাসীসং ২ নয়নৌষধং ৩। ইতি হেমচন্দ্রঃ॥

কংসকারঃ (পুং স্ত্রী) জাতিবিশেষঃ। কাঁসারি ইতি ভাষা॥ তস্যোৎপত্তির্যথা। বৈশ্যায়াং ব্রাহ্মণাজ্জাতো অম্বষ্ঠো গান্ধিকো বণিক্। কংসকারশঙ্খকারৌ ব্রাহ্মণাৎ সম্বভূবতুঃ। ইতি বৃহদ্ধর্ম্মপুরাণং॥ অপিচ বিশ্বকর্ম্মা চ শূদ্রায়াং বীর্য্যাধানং চকার সঃ। ততো বভূবুঃ পুত্রাশ্চ নবৈতে শিল্পকারিণঃ॥ মালাকরঃ কর্ম্মকারঃ শঙ্খকারঃ কুবিন্দকঃ। কুম্ভকারঃ কংসকারঃ ষড়েতে শিল্পিনো নরাঃ॥ ইতি ব্রহ্মবৈবর্ত্তপুরাণং॥

কংসজিৎ (পুং) শ্রীকৃষ্ণঃ। ইতি হলায়ুধঃ॥

কংসবতী (স্ত্রী) কংসভগিনী। সা উগ্রসেনসুতা। বসুদেবানুজপত্নী চ। ইতি শ্রীভাগবতং॥

কংসহা [ন্] (পুং) বিষ্ণুঃ। ইতি হেমচন্দ্রঃ॥

কংসা (স্ত্রী) কংসভগিনী। সা উগ্রসেনসুতা। বসুদেবানুজপত্নী চ। ইতি শ্রীভাগবতং॥

কংসারাতিঃ (পুং) বিষ্ণুঃ। ইত্যমরঃ॥

কংসারিঃ (পুং) শ্রীকৃষ্ণঃ। ইতি শব্দরত্নাবলী॥

কংসাস্থি (ক্লী) কাংস্যধাতুঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কংসোদ্ভবা (স্ত্রী) সুগন্ধিমৃত্তিকাবিশেষঃ। তৎপর্য্যায়ঃ। আঢ়কী ২ তুবরী ৩ কাক্ষী ৪ মৃদাহ্বয়া ৫ সৌরাষ্ট্রী ৬ পার্ব্বতী ৭ কালিকা ৮ পর্পটী ৯ সতী ১০। ইতি হেমচন্দ্রঃ॥

কক ই ঙ ব্রজনে। ইতি কবিকল্পদ্রুমঃ॥ ই কঙ্ক্যতে। ঙ কঙ্কতে। ইতি দুর্গাদাসঃ॥

কক ঙ ইচ্ছায়াং। গর্ব্বে। চাপলে। ইতি

কবিকল্পদ্রুমঃ ॥ ইচ্ছেহ তৃষ্ণা। চাপলং চঞ্চলীভাবঃ। ও ককতে কাকঃ। সতৃষ্ণশ্চঞ্চলো বা স্যাদিত্যর্থঃ। গর্ব্বঃ কৈশ্চিন্ন পঠ্যতে। ইতি দুর্গাদাসঃ ॥

ককন্দঃ ( পুং ) স্বর্ণঃ। ইত্যুণাদিকোষঃ ॥

ককুণ্ডলঃ ( পুং স্ত্রী ) চাতকপক্ষী। ইতি রাজবল্লভঃ ॥

ককুৎ [ দ্ ] ( স্ত্রী ) বৃষাঙ্গবিশেষঃ। ষাঁড়ের ঝুঁট্ ইতি ভাষা। ধ্বজঃ। বরঃ। ইতি মেদিনী ॥

ককুৎস্থঃ (পুং ) সূর্য্যবংশীয়রাজবিশেষঃ। স তু অযোধ্যাধিপতিঃ। শশাদরাজপুত্রঃ। ইক্ষ্বাকুরাজপৌত্রশ্চ। ইতি শ্রীভাগবতং ॥

ককুদঃ ( পুং ক্লী ) প্রাধান্যং। রাজচিহ্নং। তত্তু শ্বেতচ্ছত্রাদি। বৃষাঙ্গং। ঝুঁট ইতি ভাষা। ইত্যমরঃ ॥ পর্ব্বতাগ্রভাগঃ। ইতি তট্টীকায়াং স্বামী ॥

ককুদ্মান্ [ ৎ ] ( পুং ) বৃষঃ। ইতি হেমচন্দ্রঃ ॥ পর্ব্বতঃ। ইত্যমরটীকায়াং স্বামী ॥ ঋষভৌষধং। ইতি রাজনির্ঘণ্টঃ ॥ অত্র কচিদপবাদবিষয়েঽপ্যুৎসর্গোঽভিনিবিশতে ইতি ন্যায়াৎ বতুপ্রাপ্তৌ মতুপ্রত্যয়ঃ ॥

ককুদ্মতী ( স্ত্রী ) কটিঃ। পাছা ইতি ভাষা ইত্যমরঃ

ককুন্দরং ( ক্লী ) কুকুন্দরং। নিতম্বস্থকূপকদ্বয়ং। ইত্যমরটীকায়াং রমানাথঃ রাজনির্ঘণ্টশ্চ ॥

ককুপ্ [ ভ্ ] ( স্ত্রী ) দিক্। ইত্যমরঃ ॥ প্রবেণী। শোভা। চম্পকমালা। ইতি মেদিনী ॥ শাস্ত্রং। ইতি বিশ্বঃ ॥

ককুভ্ ( স্ত্রী ) রাগিণীবিশেষঃ। তস্যা নামাস্তরং। কুহুঃ। তস্যা লক্ষণং। পীতং বসানা বসনং সুকেশী বনে রুদন্তী পিকনাদদূনা। বিলোকয়ন্তী ককুভোঽতিভীতা মূর্ত্তিঃ প্রদিষ্টা ককুভস্তথেয়ং ॥ ইতি সঙ্গীতদামোদরঃ ॥

ককুভঃ ( পুং ) অর্জ্জুনবৃক্ষঃ। বীণাঙ্গং। তৎপর্য্যায়ঃ। প্রসেবকঃ ২। ইত্যমরঃ ॥ বীণাপ্রান্তবক্রকাষ্ঠং। দণ্ডাধঃশব্দগাম্ভীর্য্যার্থং দারুময়ং ভাণ্ডং যচ্চর্ম্মণাচ্ছাদ্য দীয়তে তত্রেত্যন্যে। বীণাস্থিতালাবুফলে ইত্যপরে। ইতি ভরতঃ ॥ রাগবিশেষঃ। ইতি মেদিনী ॥

ককুভা ( স্ত্রী ) দিক্। ইত্যমরটীকায়াং রায়মুকুটঃ ॥ রাগিণীবিশেষঃ। ইতি হলায়ুধঃ ॥

ককুভাদনী ( স্ত্রী ) নলীনামগন্ধদ্রব্যং। ইতি শব্দচন্দ্রিকা ॥

কক্ক হাসে। ইতি কবিকল্পদ্রুমঃ ॥ কোপধঃ। কক্কতি। ইতি দুর্গাদাসঃ ॥

কক্কোলঃ ( পুং ক্লী ) সুগন্ধিদ্রব্যবিশেষঃ। কাঁকলা ইতি ভাষা। অস্য গুণাঃ। কটুত্বং। হৃদ্যত্বং। সুগন্ধিত্বং। কফবাতনাশিত্বঞ্চ। ইতি রাজবল্লভঃ ॥

কক্কোলকং ( ক্লী ) গন্ধদ্রব্যবিশেষঃ। কাঁকলা ইতি খ্যাতং। তৎপর্য্যায়ঃ। কোলকং ২ কোষফলং ৩। ইত্যমরঃ ॥ কৃতফলং ৪ কটুকফলং ৫ দ্বেষ্যং ৬ স্থূলমরিচং ৭ কক্কোলং ৮ মাধবোচিতং ৯ কালং ১০ কট্ফলং ১১ মরিচং ১২। অস্য গুণাঃ। কটুত্বং। তিক্তত্বং। উষ্ণত্বং। বক্তৃজাড্য-

হরত্বং। দীপনত্বং। পাচনত্বং। রুচিকারিত্বং। কফবাতরোগনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

ককৃখ হাসে। ইতি কবিকল্পদ্রুমঃ॥ কোপধঃ। ককৃখতি। ইতি দুর্গাদাসঃ॥

ককৃখটঃ (ত্রি) কঠিনঃ। ইত্যমরঃ॥

ককৃখটপত্রকঃ (পুং) বৃক্ষবিশেষঃ। পাট ইতি ভাষা। তৎপর্য্যায়ঃ। পট্টঃ ২ বাজশলঃ ৩ শাণিঃ ৪ চিমঃ ৫। ইতি শব্দমালা॥

ককৃখটী (স্ত্রী) খটিকা। খড়ী ইতি ভাষা। তৎপর্য্যায়ঃ। বর্ণলেখা ২ কঠিনী ৩ খটী ৪। ইতি ত্রিকাণ্ডশেষঃ॥

কখ এ ম হাসে। ইতি কবিকল্পদ্রুমঃ॥ ম কখয়তি এ অকখীৎ। ইতি দুর্গাদাসঃ॥

কখ্যা (স্ত্রী) কক্ষা। হর্ম্ম্যাদিপ্রকোষ্ঠঃ। ইতি শব্দরত্নাবলী॥

কগ ম এ ক্রিয়াসু। ক্রিয়ামাত্রে। ইতি কবিকল্পদ্রুমঃ॥ ম কগয়তি। এ অকগীৎ। ক্রিয়ামাত্রে। কগতি লোকঃ গচ্ছতীত্যর্থঃ। ইতি দুর্গাদাসঃ॥

কঙ্কঃ (পুং) পক্ষিবিশেষঃ। কাঁক্ ইতি ভাষা। তৎপর্য্যায়ঃ। লোহপৃষ্ঠঃ ২। ইত্যমরঃ॥ সদংশবদনঃ ৩ খরঃ ৪ রণালঙ্করণঃ ৫ ক্রূরঃ ৬ আমিষপ্রিয়ঃ ৭। ইতি রাজনির্ঘণ্টঃ॥ অরিষ্টঃ ৮ কালপুষ্টঃ ৯ কিংশারুঃ ১০ লোহপৃষ্ঠকঃ ১১। ইতি জটাধরঃ॥ দীর্ঘপাদঃ ১২ দীর্ঘপাৎ ১৩। ইতি শব্দরত্নাবলী॥ যমঃ। ছদ্মদ্বিজঃ। ইতি মেদিনী॥ যুধিষ্ঠিররাজঃ। ইতি ত্রিকাণ্ডশেষঃ॥ ক্ষত্রিয়ঃ। ইতি শব্দমালা॥ কংসাসুরভ্রাতা। স তু উগ্রসেনপুত্রঃ। ইতি শ্রীভাগবতং॥ মহারাজচূতঃ। ইতি রাজনির্ঘণ্টঃ॥

কঙ্কটঃ (পুং) কবচঃ। ইত্যুণাদিকোষঃ॥ প্রতিসংস্কৃতেনামরশ্চ॥

কঙ্কটকঃ (পুং) সন্নাহঃ। সাঁজোয়া ইতি ভাষা। ইত্যমরঃ॥

কঙ্কণং (ক্লী) স্বনামখ্যাতহস্তাভরণং। তৎপর্য্যায়ঃ। করভূষণং ২। ইত্যমরঃ॥ কৌতুকং ৩। ইতি শব্দরত্নাবলী॥ হস্তসূত্রং। মণ্ডনং। শেখরং। ইতি বিশ্বঃ॥

কঙ্কণী (স্ত্রী) কিঙ্কিণী। ক্ষুদ্রঘণ্টিকা। ইত্যমরটীকায়াং ভরতঃ॥

কঙ্কণীকা (স্ত্রী) ক্ষুদ্রঘণ্টিকা। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ॥

কঙ্কতং (ক্লী) কঙ্কতিকা। চিরুণী ইতি খ্যাতং। ইত্যমরটীকায়াং ভরতঃ

কঙ্কতঃ (পুং) বৃক্ষঃ। ইত্যুণাদিকোষঃ॥

কঙ্কতিকা (স্ত্রী) কেশপ্রসাধনার্থকাষ্ঠাদিনির্ম্মিতদ্রব্যং। চিরুণী কাঁকুই ইত্যাদি ভাষা। তৎপর্য্যায়ঃ। প্রসাধনী ২। ইত্যমরঃ॥ কঙ্কতী ৩ কঙ্কতং ৪ প্রসাধনং ৫। ইতি তট্টীকা॥ কেশমার্জনং ৬। ইতি জটাধরঃ॥ ফলী ৭ ফলিকা ৮ ফলিঃ ৯। ইতি শব্দরত্নাবলী॥ অস্য গুণাঃ। ধূলীজন্তুমলকণ্ডুশিরোরোগনাশিত্বং। কান্তিকেশবৃদ্ধিকেশপ্রসন্নতাকারিত্বঞ্চ। ইতি রাজবল্লভঃ॥ নাগবলা। ইতি বৈদ্যকং॥

কঙ্কতী (স্ত্রী) কঙ্কতিকা। ইত্যমরটীকায়াং ভরতঃ॥

কঙ্কত্রোটঃ ( পুং ) মৎস্যবিশেষঃ। কাঁকিলা ইতি ভাষা। তৎপর্য্যায়ঃ। জলব্যধঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥

কঙ্কত্রোটিঃ ( পুং ) মৎস্যবিশেষঃ। কাঁকিলা ইতি ভাষা। তৎপর্য্যায়ঃ। জলসূচিঃ ২। ইতি জটাধরঃ॥

কঙ্কপত্রঃ ( পুং ) বাণবিশেষঃ। ইতি হলায়ুধঃ॥

কঙ্কমালা ( স্ত্রী ) করতালীবাদ্যং। ইতি শব্দরত্নাবলী॥

কঙ্কমুখঃ ( পুং ) সন্দংশঃ। সাঁড়াশি ইতি ভাষা। ইতি হেমচন্দ্রঃ॥ নির্ব্বর্ত্ততে সাধ্ববগাহনে চ শল্যং প্রগৃহ্যোদ্ধরতে চ যস্মাৎ। যন্ত্রেষ্বতঃ কঙ্কমুখং প্রধানং স্থানেষু সর্ব্বেষ্ববিকারি চৈব॥ ইতি সুশ্রুতে ক্লীবং॥

কঙ্করং ( ক্লী ) তক্রং। ইতি হেমচন্দ্রঃ॥

কঙ্করঃ ( ত্রি ) কুৎসিতঃ। ইতি হেমচন্দ্রঃ॥

কঙ্করোলঃ ( পুং ) নিকোচকবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥ কাঁকরোল ইতি খ্যাত লতা চ॥

কঙ্কলোড্যং ( ক্লী ) অঙ্কলোড্যং। চর্টিঞ্চিতা চিঞ্চোড়মূল ইতি চ ভাষা। অস্য গুণাঃ। গুরুত্বং। অজীর্ণকারিত্বং। শীতলত্বঞ্চ। ইতি কশ্চিদ্রাজবল্লভঃ॥

কঙ্কশত্রুঃ ( পুং ) পৃশ্নিপর্ণী। ইতি শব্দচন্দ্রিকা॥

কঙ্কশায়ঃ ( পুং ) কুক্কুরঃ। ইতি শব্দমালা॥

কঙ্কা ( স্ত্রী ) উগ্রসেনরাজকন্যা। সা তু বসুদেবানুজপত্নী। ইতি শ্রীভাগবতং॥ গোশীর্ষচন্দনং। তদ্যথা। গোশীর্ষং চন্দনং কৃষ্ণতাম্রমুৎপলগন্ধিকং। কঙ্কা ইত্যাদি শব্দমালা॥

কঙ্কালঃ ( পুং ) শরীরাস্থি। ইত্যমরঃ॥ সমুদিতশরীরাস্থিসংঘাতস্ত্বঙ্মাংসরহিতঃ। ইতি ভরতঃ॥ তৎপর্য্যায়ঃ। করঙ্কঃ ২ অস্থিপঞ্জরঃ ৩। ইতি বৈদ্যকং॥

কঙ্কালমালী [ন্] ( পুং ) মহাদেবঃ। ইতি শব্দরত্নাবলী॥

কঙ্কুঃ ( পুং ) উগ্রসেনপুত্রঃ। স তু কংসাসুরভ্রাতা। ইতি শ্রীভাগবতং॥ কঙ্গুতৃণং। ইতি দ্বিরূপকোষঃ॥

কঙ্কুষ্টং ( ক্লী ) পর্ব্বতীয়মৃত্তিকাবিশেষঃ। তৎপর্য্যায়ঃ। কালকুষ্টং ২ বিরঙ্গং ৩ রঙ্গদায়কং ৪ রেচকং ৫ পুলকং ৬ শোধকং ৭ কালপালকং ৮। তদ্দ্বিধা রজতাভং স্বর্ণাভঞ্চ। অস্য গুণাঃ। কটুত্বং। উষ্ণত্বং। কফবাতব্রণশূলনাশিত্বং। রেচকত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ অপিচ। পীতপ্রভং গুরু স্নিগ্ধং শ্রেষ্ঠং কঙ্কুষ্টমাদিমং। শ্যামং পীতং লঘু ত্যক্তসত্ত্বং নেষ্টং হি রেণুকং॥

কঙ্কেরুঃ ( পুং ) কাকবিশেষঃ। তৎপর্য্যায়ঃ। দ্বারবলিভুক্ ২। ইতি ত্রিকাণ্ডশেষঃ॥

কঙ্কেলিঃ ( পুং ) অশোকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কঙ্কেল্লঃ ( পুং ) বাস্তূকং। ইতি শব্দমালা॥

কঙ্কেল্লিঃ ( পুং ) অশোকবৃক্ষঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কঙ্খং ( ক্লী ) ভোগঃ। ইতি শব্দমালা॥

কঙ্গুঃ ( স্ত্রী ) পীততণ্ডুলা। কাঙ্গনি ইতি ভাষা।

তৎপর্য্যায়ঃ। প্রিয়ঙ্গুঃ ২। ইত্যমরঃ॥ কঙ্গূঃ ৩ প্রিয়ঙ্গূঃ ৪। ইতি তট্টীকা॥

কঙ্গুকা (স্ত্রী) কঙ্গুঃ। অস্য গুণাঃ। ধাতুশোষণত্বং। পিত্তশ্লেষ্মনাশিত্বং। রূক্ষত্বং। বায়ুবর্দ্ধকত্বং। পুষ্টিকারিত্বং। গুরুত্বং। ভগ্নসন্ধানকারিত্বঞ্চ। ইতি রাজবল্লভঃ॥

কঙ্গুনী (স্ত্রী) ধান্যবিশেষঃ। কাঙ্গনি ইতি ভাষা। তৎপর্য্যায়ঃ। প্রিয়ঙ্গুঃ ২ কঙ্গুঃ ৩ চীনকঃ ৪ পীততণ্ডুলঃ ৫ অত্যন্তসুকুমারঃ ৬। অস্যা গুণাঃ। মধুরত্বং। রুচিকারিত্বং। কষায়ত্বং। স্বাদুত্বং। শীতলত্বং। বাতকারিত্বং। পিত্তদাহনাশিত্বং। রূক্ষত্বং। ভগ্নাস্থিবন্ধকারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

কঙ্গুনীপত্রা (স্ত্রী) পণ্যান্ধাতৃণং। ইতি রাজনির্ঘণ্টঃ॥

কঙ্গুলঃ (পুং) পাণিঃ। ইতি শব্দচন্দ্রিকা॥

কচ রবে। ইতি কবিকল্পদ্রুমঃ॥ কচতি। রবঃ শব্দঃ। ইতি দুর্গাদাসঃ॥

কচ ই বন্ধে। ভিষি। ইতি কবিকল্পদ্রুমঃ॥ ই কঞ্চতে। ইতি দুর্গাদাসঃ॥

কচ ঙ বন্ধে। ভিষি। ইতি কবিকল্পদ্রুমঃ॥ ঙ কঞ্চতে কচতে। ভিট্ দীপ্তিঃ। ইতি দুর্গাদাসঃ॥

কচঃ (পুং) কেশঃ। ইত্যমরঃ॥ বৃহস্পতিপুত্রঃ। বন্ধঃ। শুষ্কব্রণঃ। ইতি মেদিনী॥ মেঘঃ। ইতি শব্দমালা॥

কচঙ্গনং (ক্লী) বিক্রয়স্থানং। তৎপর্য্যায়ঃ। নির্ম্মুটঃ ২ পণ্যাজিরং ৩। ইতি ত্রিকাণ্ডশেষঃ॥

কচঙ্গলঃ (পুং) সমুদ্রঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কচপং (ক্লী) তৃণং। পত্রং। ইত্যুণাদিকোষঃ॥

কচপক্ষঃ (পুং) কেশসমূহঃ। ইত্যমরঃ॥

কচপাশঃ (পুং) কেশসমূহঃ। ইত্যমরঃ॥

কচমালঃ (পুং) ধূমঃ। ইতি হারাবলী॥ খতমাল ইতিচ পাঠঃ॥

কচরিপুফলা (স্ত্রী) শমীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কচহস্তঃ (পুং) কেশসমূহঃ। ইত্যমরঃ॥

কচা (স্ত্রী) হস্তিনী। ইতি মেদিনী॥ শোভা। ইতি শব্দরত্নাবলী॥

কচাকু (ত্রি) দুরাধর্ষং। দুঃশীলং। ইতি মেদিনী॥

কচাকুঃ (পুং) সর্পঃ। ইতি মেদিনী॥

কচাটুরঃ (পুং) পক্ষিবিশেষঃ। ডাক্ ইতি ভাষা। তৎপর্য্যায়ঃ। শিতিকণ্ঠঃ ২ দাত্যূহঃ ৩ কাকমদ্গুঃ ৪। ইতি ত্রিকাণ্ডশেষঃ॥

কচামোদং (ক্লী) বালকং। বালা ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥

কচুঃ (স্ত্রী) কচ্বী। স্বনামখ্যাতগুল্মঃ। ইতি পুরাণং॥ মূলশাকবিশেষঃ। যথা। কদলী দাড়িমী ধান্যং হরিদ্রা মাণকং কচুঃ। বিল্বোঽশোকো জয়ন্তী চ বিজ্ঞেয়া নবপত্রিকা॥ ইতি তিথ্যাদিতত্ত্বে দুর্গোৎসবতত্ত্বং

কচ্চটং (ক্লী) জলপিপ্পলী। ইতি বৈদ্যকং॥

কচ্চরং (ত্রি) মলিনং। ইত্যমরঃ॥ কুৎসিতং। ইতি মেদিনী॥

কচ্চরং ( ক্লী ) তক্রং। ইতি মেদিনী ॥

কচ্চিৎ ব্য কামপ্রবেদনং। ইষ্টপরিপ্রশ্নঃ। ইত্যমরঃ ॥ যথা। কচ্চিৎ জীবতি মে তাতঃ ॥

কচ্ছঃ ( পুং ) অনূপপ্রায়স্থানং। কাছাড় ইতি ভাষা। ইত্যমরঃ॥ সিন্ধূনাং সরসাঞ্চ প্রান্তভাগঃ। ইতি মধুঃ ॥ জলাশয়প্রান্তদেশঃ। ইতি রমানাথঃ॥ নদীপর্ব্বতাদিসমীপং। ইতি সাগ্রঃ॥ তুন্নবৃক্ষঃ। তুঁদ্ ইতি ভাষা। পরিধানাঞ্চলং। কাছা কোঁচা কঁড়সী ইতি ভাষা। ইত্যমরমেদিনীকরৌ ॥ শেষস্য পর্য্যায়ঃ। কক্ষা ২ কচ্ছা ৩ কচ্ছোটিকা ৪। ইতি হেমচন্দ্রঃ ॥ কচ্ছটিকা ৫ কচ্ছাটিকা ৬। ইতি শব্দরত্নাবলী॥ তস্য প্রমাণং। বামে পৃষ্ঠে তথা নাভৌ কক্ষাত্রয়মুদাহৃতং। এভিঃ কক্ষৈঃ পরীধত্তে যো বিপ্রঃ স শুচিঃ স্মৃতঃ ॥ ইতি স্মৃতিঃ॥ পরিধানাদ্বহিঃকক্ষা নিবদ্ধা হ্যাসুরী ভবেৎ। ইতি যোগিযাজ্ঞবল্ক্যঃ॥ নৌকাঙ্গং। ইতি হেমচন্দ্রঃ ॥

কচ্ছঃ ( ত্রি ) জলপ্রান্তঃ। ইতি নানার্থে অমরঃ ॥

কচ্ছটিকা ( স্ত্রী ) কচ্ছঃ। কাছা ইতি ভাষা। ইতি শব্দরত্নাবলী ॥

কচ্ছপঃ ( পুং ) স্বনামখ্যাতজলজন্তুঃ। কাছিম্ ইতি ভাষা। তৎপর্য্যায়ঃ। কূর্ম্মঃ ২ কমঠঃ ৩। ইত্যমরঃ ॥ গূঢ়াঙ্গঃ ৪ ধরণীধরঃ ৫ কচ্ছেষ্টঃ ৬ পল্বলাবাসঃ ৭ কঠিনপৃষ্ঠকঃ ৮। পঞ্চস্থপ্তঃ ৯ ক্রোড়াঙ্গঃ ১০। ইতি শব্দরত্নাবলী ॥ পঞ্চনখঃ ১১ গুহ্যঃ ১২ পীবরঃ ১৩ জলগুল্মঃ ১৪। ইতি জটাধরঃ ॥ অস্য মাংসগুণাঃ। বাতহরত্বং। শুক্রবৃদ্ধিকারিত্বং। চক্ষুর্হিতত্বং। বলবর্দ্ধনত্বং। মেধাস্মৃতিকারিত্বং। পথ্যত্বং। শোথদোষনাশিত্বঞ্চ। তস্য চর্ম্ম পিত্তনাশকং। পাদঃ কফহারকঃ। অণ্ডং স্বাদু বাজীকরঞ্চ॥ নন্দীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥ কুবেরস্য নিধিবিশেষঃ। মল্লস্য বন্ধবিশেষঃ। ইতি মেদিনী ॥ মদিরাযন্ত্রবিশেষঃ। ইতি শব্দচন্দ্রিকা ॥

কচ্ছপিকা ( স্ত্রী ) ক্ষুদ্ররোগবিশেষঃ। তস্য লক্ষণং। গ্রথিতাঃ পঞ্চ বা ষড়্ বা দারুণাঃ কচ্ছপোন্নতাঃ। কফানিলাভ্যাং পিড়কা জ্ঞেয়াঃ কচ্ছপিকা বুধৈঃ ॥ * ॥ প্রমেহোপেক্ষয়া জাতদশপিড়কান্তর্গতপিড়কাবিশেষঃ। তস্য লক্ষণং। সদাহা কূর্ম্মসংস্থানা জ্ঞেয়া কচ্ছপিকা বুধৈঃ। ইতি নিদানং ॥

কচ্ছপী ( স্ত্রী ) কূর্ম্মী। তৎপর্য্যায়ঃ। ডুলিঃ ২ দুলিঃ ৩ কমঠী ৪। বীণাবিশেষঃ। সা তু সরস্বতীবীণা। ইত্যমরঃ ॥ ক্ষুদ্ররোগবিশেষঃ। ইতি মেদিনী॥ কচ্ছপিকারোগঃ। তচ্চিকিৎসা যথা। কচ্ছপীং স্বেদয়েৎ পূর্ব্বং তত এভিঃ প্রলেপয়েৎ। কল্কীকৃতৈর্নিশাকুষ্ঠসিতাতালকদারুভিঃ ॥ তাং পকাং সাধয়েচ্ছীঘ্রং ভিষগ্ ব্রণচিকিৎসয়া। ইতি ভাবপ্রকাশঃ ॥

কচ্ছরুহা ( স্ত্রী ) দূর্ব্বা। ইতি জটাধরঃ ॥

কচ্ছা ( স্ত্রী ) পরিধানাপরাঞ্চলং। ইতি হেম-

চন্দ্রঃ॥ চীরিকা। ঝিঁঝীপোকা ইতি ভাষা। বারাহী। ইতি মেদিনী॥

কচ্ছাটিকা (স্ত্রী) কচ্ছটিকা। ইতি শব্দরত্নাবলী॥

কচ্ছুঃ (স্ত্রী) রোগবিশেষঃ। তস্য লক্ষণং। সূক্ষ্মা বহ্ব্যঃ পিড়কাঃ স্রাববত্যঃ পামেত্যুক্তা কণ্ডূমত্যঃ সদাহাঃ। সৈব স্ফোটৈস্তীব্রদাহৈরুপেতা জ্ঞেয়া পাণ্যোঃ কচ্ছুরুগ্রাস্ফিচোশ্চ॥ ইতি নিদানং॥ তচ্চিকিৎসা যথা। অর্কপত্ররসে পক্বং হরিদ্রাকল্কসংযুতং। নাশয়েৎ সার্ষপং তৈলং পামাকচ্ছুবিচর্চ্চিকাং॥ অর্কতৈলং॥ ১॥ মনঃশিলালং কাসীসং গন্ধাশ্মা সিন্ধুজন্ম চ। স্বর্ণক্ষীরী শিলাভেদী শুণ্ঠী কুষ্ঠঞ্চ মাগধী॥ লাঙ্গলী করবীরশ্চ দদ্রুস্নঃ কৃমিহানলঃ। দন্তী নিম্বদলৈশ্চৈভিঃ পৃথক্ কর্ষমিতৈর্ভিষক্॥ কল্কীকৃতৈঃ পচেত্তৈলং কটুপ্রস্থদ্বয়োন্মিতং। অর্কসীহুণ্ডদুগ্ধেন পৃথক্ পলমিতেন চ॥ গোমূত্রস্যাঢ়কেনাপি শনৈর্মৃদ্বগ্নিনা পচেৎ। অভ্যঙ্গেন হরেদেতৎ কচ্ছুদুঃসাধ্যতামপি॥ পামানঞ্চ তথা কণ্ডুং ত্বগ্ব্যাধিবধিরাময়ান্। কচ্ছুরাক্ষসনামেদং তৈলং হারীতভাষিতং॥ কচ্ছুরাক্ষসনাম তৈলং॥ ২॥ ইতি ভাবপ্রকাশঃ॥

কচ্ছুঘ্নী (স্ত্রী) পটোলঃ। হপুষাভেদঃ। ইতি রাজনির্ঘণ্টঃ॥

কচ্ছুরঃ (ত্রি) কচ্ছুরোগযুক্তঃ। খোসরোগী ইতি ভাষা। তৎপর্য্যায়ঃ। পামনঃ ২। ইত্যমরঃ॥ পুংশ্চলঃ। ইতি মেদিনী॥

কচ্ছুরা (স্ত্রী) শূকশিম্বী। শটী। দুরালভা। ইতি মেদিনী॥ যবাসঃ। ইতি রাজনির্ঘণ্টঃ॥ গ্রাহিণীবৃক্ষঃ। ক্ষীরুই ইতি ভাষা। ইতি রত্নমালা॥

কচ্ছূঃ (স্ত্রী) রোগবিশেষঃ। খোস্ পাঁচ্ড়া ইতি ভাষা। তৎপর্য্যায়ঃ। পাম ২ পামা ৩ বিচর্চ্চিকা ৪। ইত্যমরঃ॥

কচ্ছূমতী (স্ত্রী) শূকশিম্বী। ইতি শব্দচন্দ্রিকা॥

কচ্ছোটিকা (স্ত্রী) কচ্ছঃ। কাছা ইতি ভাষা। ইতি হেমচন্দ্রঃ॥

কচ্ছোরং (ক্লী) শটী। ইতি রত্নমালা॥

কচ্বী (স্ত্রী) কন্দবিশেষঃ। কচু ইতি খ্যাতা। তৎপর্য্যায়ঃ। বিতণ্ডা ২। ইতি জটাধরঃ॥ অস্যা গুণাঃ। ভেদকত্বং। গুরুত্বং। কটুত্বং। আমবায়ুপিত্তকারিত্বং। পিচ্ছিলত্বঞ্চ। ইতি রাজবল্লভঃ॥ কচ্চু ইতি হিন্দীভাষা। যথা। মহিষাসুরযুদ্ধেষু কচ্বীরূপাসি সুব্রতে। মম বিঘ্নবিনাশায় পূজাং গৃহ্ন প্রসীদ মে॥ ইতি শারদীয়দুর্গার্চ্চাপদ্ধতিঃ॥

কজ ই রুহে। জন্মনি। সৌত্রধাতুরয়ং। ইতি কবিকল্পদ্রুমঃ॥ ই কঞ্জারঃ। রুহো জন্ম। কৃদ্ধোঃ কভাবে ইতি ভাবে কঃ। ইতি দুর্গাদাসঃ॥

কজং (ক্লী) কমলং। ইতি রাজনির্ঘণ্টঃ॥

কজ্জলং (ক্লী) অঞ্জনং। কাজল ইতি ভাষা। ইতি হেমচন্দ্রঃ॥ তৎপর্য্যায়ঃ। লোচকঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥

কজ্জলঃ (পুং) মেঘঃ। ইতি শব্দমালা॥

কজ্জলধ্বজঃ (পুং) দীপঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কজ্জলরোচকঃ (পুং ক্লী) দীপাধারঃ। পিলসুজ্

দেরকো ইত্যাদি ভাষা। তৎপর্য্যায়ঃ। কৌমুদীবৃক্ষঃ ২ দীপবৃক্ষঃ ৩ শিখাতরুঃ ৪ দীপধ্বজঃ ৫। ইতি জটাধরঃ॥ জ্যোৎস্নাবৃক্ষঃ ৬। ইতি ত্রিকাণ্ডশেষঃ॥

কজ্জলী (স্ত্রী) মৎস্যবিশেষঃ। তৎপর্য্যায়ঃ। কজ্জলা ২ অনন্তা ৩। ইতি শব্দরত্নাবলী॥ মিশ্রিতরসগন্ধকং। ইতি বৈদ্যকং॥

কজ্বলং (ক্লী) কজ্জলং। ইতি ত্রিকাণ্ডশেষঃ॥

কঞ্চটং (ক্লী) জলজশাকবিশেষঃ। কাঁচড়াদাম ইতি ভাষা। তৎপর্য্যায়ঃ। জলভূঃ ২ লাঙ্গলী ৩। ইতি শব্দচন্দ্রিকা॥ শারদী ৪ তোয়পিপ্পলী ৫ শকুলাদনী ৬। ইতি রত্নমালা॥ জলতণ্ডুলীয়ং ৭। ইতি ভাবপ্রকাশঃ॥ তস্য গুণাঃ। শ্লেষ্মকারিত্বং। ধারকত্বং। হিমত্বং। পিত্তরক্তনাশিত্বং। লঘুত্বঞ্চ। ইতি রাজবল্লভঃ॥ অপিচ। তিক্তত্বং। বায়ুহরত্বঞ্চ। ইতি ভাবপ্রকাশঃ॥

কঞ্চড়ঃ (পুং) কঞ্চটপ্রভেদঃ। তৎপর্য্যায়ঃ। কঞ্চটঃ ২ কাচঃ ৩ চক্রমর্দ্দঃ ৪ অম্বুপঃ ৫। ইতি শব্দচন্দ্রিকা॥

কঞ্চারঃ (পুং) সূর্য্যঃ। ইতি জটাধরঃ॥

কঞ্চিকা (স্ত্রী) বেণুশাখা। কঞ্চী ইতি ভাষা। তৎপর্য্যায়ঃ। কুঞ্চিকা ২ ধ্বঙ্ক্ষুঃ ৩। ইতি শব্দচন্দ্রিকা॥ ক্ষুদ্রস্ফোটঃ। ইতি বৈদ্যকং॥

কঞ্চুকঃ (পুং) সর্পত্বক্। সাপের খোলোস ইতি ভাষা। তৎপর্য্যায়ঃ। নির্ম্মোকঃ ২। ভটাদেশ্চোলাকৃতিসন্নাহঃ। সাঁজোয়া ইতি ভাষা। তৎপর্য্যায়ঃ। বারবাণঃ ২ বাণবারঃ ৩। ইত্যমরভরতৌ॥ চোলকং। কাঁচুলি ইতি ভাষা। তৎপর্য্যায়ঃ। চোলঃ ২ কঞ্চুলিকা ৩ কূর্পাসকঃ ৪ অঙ্গিকা ৫। বর্দ্ধাপকগৃহীতাঙ্গস্থিতবস্ত্রং। ইতি হেমচন্দ্রঃ॥ বস্ত্রং। ইত্যুণাদিকোষঃ॥

কঞ্চুকালুঃ (পুং) সর্পঃ। ইতি শব্দচন্দ্রিকা॥

কঞ্চুকী [ন্] (পুং) মহল্লরক্ষকঃ। অন্তঃপুরাধ্যক্ষঃ। স তু বহিঃসঞ্চরন্তীনাং পুরস্ত্রীণাং প্রেক্ষকপুরুষান্তরবারণায় রাজ্ঞা স্ত্র্যগারে যো বেত্রধরো নিযুক্তঃ। তৎপর্য্যায়ঃ। সৌবিদল্লঃ ২ স্থাপত্যঃ ৩ সৌবিদঃ ৪। ইত্যমরঃ॥ যবঃ। চণকঃ। সর্পঃ। ইতি রাজনির্ঘণ্টঃ॥ বিড়্গঃ। জোঙ্গকদ্রুমঃ। ইতি মেদিনী॥

কঞ্চুকী (স্ত্রী) ওষধিভেদঃ। ইতি মেদিনী॥ ক্ষীরীশবৃক্ষঃ। ইতি রত্নমালা॥

কঞ্চুলিকা (স্ত্রী) কঞ্চুকঃ। স্ত্রীণামঙ্গরক্ষিণী। কাঁচুলি ইতি ভাষা। ইতি হেমচন্দ্রঃ॥

কঞ্জং (ক্লী) অমৃতং। পদ্মং। ইতি মেদিনী॥

কঞ্জঃ (পুং) ব্রহ্মা। কেশঃ। ইতি মেদিনী॥

কঞ্জকঃ (পুং) পক্ষিবিশেষঃ। ময়না ইতি ভাষা। ইতি শব্দচন্দ্রিকা॥

কঞ্জজঃ (পুং) ব্রহ্মা। ইতি শব্দরত্নাবলী॥

কঞ্জনঃ (পুং) কন্দর্পঃ। ইতি ত্রিকাণ্ডশেষঃ॥ পক্ষিবিশেষঃ। ময়না ইতি ভাষা। ইতি শব্দচন্দ্রিকা॥

কঞ্জরঃ (পুং) ব্রহ্মা। সূর্য্যঃ। উদরং। হস্তী। ইত্যুণাদিকোষঃ॥

কঞ্জলঃ ( পুং ) মদনপক্ষী। ময়না ইতি ভাষা। ইতি শব্দচন্দ্রিকা ॥

কঞ্জারঃ ( পুং ) জঠরং। সূর্য্যঃ। বিরিঞ্চিঃ। বারণঃ। মুনিঃ। ইতি মেদিনী ॥

কঞ্জিকা ( স্ত্রী ) ব্রাহ্মণযষ্টিকাবৃক্ষঃ। বামন্ হাটী ইতি ভাষা। ইতি শব্দরত্নাবলী ॥

কট গত্যাং। ইতি কবিকল্পদ্রুমঃ ॥ কটতি। ইতি দুর্গাদাসঃ ॥

কট ই গত্যাং। ইতি কবিকল্পদ্রুমঃ ॥ ই কণ্ট্যতে। ইতি দুর্গাদাসঃ ॥

কট ঈ গত্যাং। ইতি কবিকল্পদ্রুমঃ ॥ ঈ কট্টঃ ইতি দুর্গাদাসঃ ॥

কট এ বৃতৌ। বৃষি। বৃতিরাবরণং। বৃট্ বর্ষণং। এ অকটীৎ পটো গাত্রং। কটতি মেঘঃ। ইতি দুর্গাদাসঃ ॥

কটঃ ( পুং ) হস্তিগণ্ডস্থলং। কটিদেশঃ তৎপার্শ্বশ্চ। কিলিঞ্জকঃ। মাঁদুর দরমা ইত্যাদি ভাষা। ইত্যমরঃ ॥ কাশাদিরচিতরজ্জুঃ যেন কুসূলং বেষ্ট্যতে। কুসূলঞ্চ মরায়ি ইতি টীকান্তরং ॥ তৃণরচিতটাটী ইতি খ্যাত ইত্যন্যে। ইতি তট্টীকায়াং ভরতঃ ॥ অতিশয়ঃ। শরঃ। সময়ঃ। ইতি মেদিনী ॥ তৃণং। ইতি ধরণী ॥ শবঃ। শবরথঃ। ওষধী। শ্মশানং। ইতি হেমচন্দ্রঃ ॥ তক্ষিতকাষ্ঠং। তক্তা ইতি ভাষা। ইতি শব্দরত্নাবলী ॥

কটঃ ( ত্রি ) ক্রিয়াকারঃ। ইতি হেমচন্দ্রঃ ॥

কটকঃ ( পুং ক্লী ) পর্ব্বতমধ্যভাগঃ। তৎপর্য্যায়ঃ। নিতম্বঃ ২। ইত্যমরঃ ॥ মেখলা ৩। ইতি ভরতঃ ॥ বলয়ঃ। চক্রং। ইত্যমরঃ ॥ হস্তিদন্তমণ্ডনং। সামুদ্রলবণং। রাজধানী। ইতি মেদিনী ॥ নগরী। ইতি শব্দরত্নাবলী ॥ সেনা। ইতি হেমচন্দ্রঃ ॥ সানুঃ। পর্ব্বতস্য সমভূভাগঃ। ইতি বিশ্বঃ ॥

কটকী [ ন্ ] ( পুং ) পর্ব্বতঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

কটকোলঃ ( পুং ) নিষ্ঠীবনপাত্রং। পিক্‌দানী ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ ॥

কটখাদকং ( ত্রি ) খাদকং। ভক্ষকং। ইতি মেদিনী ॥

কটখাদকঃ ( পুং ) কাচকলসঃ। কাকঃ। জম্বুকঃ। ইতি মেদিনী ॥

কটঙ্কটঃ ( পুং ) অগ্নিঃ। যথা। কটঙ্কটায় ভীমায় নমঃ পঞ্চপলায় চ। অঘোরঘোররূপায় ঘোরঘোরতরায় চ ॥ ইতি বহ্নিপুরাণে অগ্নিস্তবনামাধ্যায়ঃ ॥

কটঙ্কটেরী ( স্ত্রী ) হরিদ্রা। ইতি ত্রিকাণ্ডশেষঃ ॥ দারুহরিদ্রা। ইতি রত্নমালা ॥

কটপ্রূঃ ( পুং ) মহাদেবঃ। রাক্ষসঃ। বিদ্যাধরঃ। অক্ষদেবনঃ। ইতি মেদিনী ॥ কীটঃ। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ ॥

কটভঙ্গঃ ( পুং ) শস্যানাং হস্তচ্ছেদঃ। হাত দিয়া শস্য ছেঁড়া কুড়ন ইত্যাদি ভাষা। নৃপাত্যয়ঃ। রাজবিনাশঃ। ইতি মেদিনী ॥

কটভী ( স্ত্রী ) জ্যোতিষ্মতী লতা। নয়া ফটিকী ইতি ভাষা। ইত্যমরঃ ॥ অপরাজিতা। বৃক্ষভেদঃ। তৎপর্য্যায়ঃ। নাভিকা ২ শৌণ্ডী ৩ পাটলী ৪ কিণিহী ৫ মধুরেণুঃ ৬ ক্ষুদ্রশ্যামা ৭ কৈড়র্য্যঃ ৮ শ্যামলা ৯ অস্যা

গুণাঃ। কটুত্বং। উষ্ণত্বং। গুল্মবিষাধ্মান-শূলদোষনাশিত্বং। বাতকফাজীর্ণরোগ-শমতাকারিত্বং। শ্বেতা চেৎ গুণযুক্তত্বঞ্চ। তৎফলং তদ্গুণং জ্ঞেয়ং বিশেষাৎ কফশুক্রকৃৎ। ইতি রাজনির্ঘণ্টঃ॥ বৃক্ষভেদঃ। কাঁটাশিরীষ ইতি খ্যাতঃ। ইতি রত্নমালা॥

কটমালিনী (স্ত্রী) মদিরা। ইতি শব্দমালা॥

কটম্বঃ (পুং) বাদ্যভেদঃ। বাণঃ। ইত্যুণাদিকোষঃ॥

কটম্বরা (স্ত্রী) কটুকী। ইত্যমরঃ॥ কটম্ভরা ইতি চ পাঠঃ॥

কটম্ভরঃ (পুং) শ্যোনাকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥ কটভীবৃক্ষঃ। ইতি বৈদ্যকং॥

কটম্ভরা (স্ত্রী) রাজবলা। ইত্যমরঃ॥ প্রসারণী। গন্ধভাদালিয়া ইতি ভাষা। রোহিণী। কট্‌কী ইতি ভাষা। হস্তিনী। কলম্বিকা। গোলা। বর্ষাভূঃ। মূর্ব্বা। ইতি মেদিনী॥

কটব্রণঃ (পুং) ভীমসেনঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কটশর্করা (স্ত্রী) গাঙ্গেষ্টী লতা। নাটা ইতি খ্যাতা। ইতি হারাবলী॥

কটাকুঃ (পুং) পক্ষী। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ॥

কটায়নং (ক্লী) বীরণং। ইতি শব্দরত্নাবলী॥

কটারঃ (পুং) নাগরঃ। কামী। ইতি শব্দমালা॥

কটাহঃ (পুং) কূর্ম্মকর্পরঃ॥ দ্বীপপ্রভেদঃ। তৈলাদিপাকপাত্রং। জায়মানবিষাণাগ্রমহিষীশাবকঃ। ইতি মেদিনী॥ নরকঃ। ইতি হারাবলী॥ কর্ব্বূরঃ। ইতি জটাধরঃ॥ কূপঃ। ইতি শব্দরত্নাবলী॥

কটাক্ষঃ (পুং) অপাঙ্গদর্শনং। আড়্ চকে দেখন ইতি ভাষা। ইত্যমরঃ॥

কটিঃ (পুং স্ত্রী) শরীরাবয়ববিশেষঃ। কাঁকালি ইতি ভাষা। তৎপর্য্যায়ঃ। কটঃ ২ শ্রোণিফলকং ৩ শ্রোণী ৪ ককুদ্মতী ৫। ইত্যমরঃ॥ শ্রোণিফলং ৬ কটী ৭ শ্রোণিঃ ৮। ইতি তট্টীকা॥ কলত্রং ৯ কটীরং ১০ কাঞ্চীপদং ১১। ইতি হেমচন্দ্রঃ॥ করভঃ ১২। ইতি জটাধরঃ॥ অত্র পূর্ব্বদ্বয়ং কটিপার্শ্বঃ। ইতি ভরতঃ॥

কটিত্রং (ক্লী) রসনা। কটিবস্ত্রং। কটিবর্ম্ম। ইতি মেদিনীকরহেমচন্দ্রৌ॥

কটিপ্রোথঃ (পুং) কটিদেশস্থমাংসপিণ্ডং। গুদপুলা পোঁদের পেলো ইতি ভাষা। তৎপর্য্যায়ঃ। স্ফিক্ ২। ইত্যমরঃ॥ পূলকঃ ৩ কটীপ্রোথঃ ৪। ইতি রভসঃ॥ কটিঃ ৫ প্রোথঃ ৬। ইতি কেচিৎ॥ পূলঃ ৭। ইতি ভরতঃ॥

কটিরোহকঃ (পুং) হস্তিপশ্চাদ্ভাগারোহকঃ। ইতি শব্দমালা॥

কটিল্লকঃ (পুং) কারবেল্লঃ। করলা ইতি ভাষা। ইত্যমরঃ॥

কটিশীর্ষকঃ (পুং) কটিদেশঃ। ইতি হলায়ুধঃ॥

কটিশূলঃ (পুং) কটিদেশস্থশূলরোগঃ। তস্যৌষধং যথা। রজনীকদলীক্ষারলেপঃ সিধ্মবিনাশনঃ। কুষ্ঠস্য ভাগমেকন্তু পথ্যাভাগদ্বয়ং তথা॥ উষ্ণোদকেন সংপীত্বা কটিশূলবিনাশনং। ইতি গারুড়ে ১৮৮ অধ্যায়ঃ॥

কটিশৃঙ্খলা ( স্ত্রী ) চিতিকা । কটিধার্য্যক্ষুদ্র-ঘণ্টিকা । ইতি হারাবলী ॥

কটিসূত্রং ( ক্লী ) কট্যলঙ্কারবিশেষঃ । চন্দ্রহার গোট্ ইত্যাদি ভাষা । ইতি হলায়ুধঃ ॥

কটী [ন্] ( পুং ) হস্তী । ইতি ত্রিকাণ্ডশেষঃ ॥

কটী ( স্ত্রী ) পিপ্পলী । শ্রোণিদেশঃ । ইতি মেদিনী ॥

কটীতলঃ ( পুং ) ন্যুব্জখড়্গঃ । বাঁকা খাঁড়া ইতি ভাষা । ইতি ত্রিকাণ্ডশেষঃ ॥

কটীরং ( ক্লী ) কটিঃ । ইতি হেমচন্দ্রঃ ॥

কটীরঃ ( পুং ) জঘনং । কন্দরঃ । ইত্যুণাদি-কোষঃ ॥ কটিঃ । ইতি জটাধরঃ ॥

কটীরকঃ ( পুং ) নিতম্বঃ । ইতি ত্রিকাণ্ড-শেষঃ ॥

কটু ( ক্লী ) অকার্য্যং । ইত্যমরঃ ॥ দূষণং । ইতি বিশ্বঃ ॥

কটুঃ ( পুং ) রসবিশেষঃ । ঝাল ইতি ভাষা । ইত্যমরঃ ॥ অস্য গুণাঃ । কণ্ঠজদোষশোথ-মন্দাগ্নিশ্বিত্ররোগনাশিত্বং । অস্য বহু-সেবনে ক্ষয়দাতৃত্বং । বীর্য্যবলাপহত্বঞ্চ । ইতি রাজনির্ঘণ্টঃ ॥ অপিচ । আরোগ্য-পিত্তাগ্নিবায়ুকারিত্বং । কৃমিকণ্ডুবিষরোগ-স্তনদুগ্ধমেদঃস্থৌল্যনাশিত্বং । লঘুত্বং । অতিশয়ভক্ষণে শ্রমস্থৈর্য্যতালুশোষাতি-দাহকারিত্বঞ্চ । ইতি রাজবল্লভঃ ॥ চম্পক-বৃক্ষঃ । ইতি শব্দচন্দ্রিকা ॥ চীনকর্পূরঃ । পটোলঃ । কটুীলতা । ইতি রাজনির্ঘণ্টঃ ॥

কটুঃ ( স্ত্রী ) কটুকী । ইত্যমরঃ ॥ প্রিয়ঙ্গুবৃক্ষঃ । রাজিকা । ইতি বিশ্বমেদিন্যৌ ॥

কটুঃ ( ত্রি ) মৎসরঃ । তীক্ষ্ণঃ । ইত্যমরঃ ॥ কটুরসযুক্তঃ । সুগন্ধিঃ । ইতি মেদিনী ॥ অপ্রিয়ঃ । ইতি ত্রিকাণ্ডশেষঃ ॥ দুর্গন্ধঃ । ইত্যমরটীকায়াং স্বামী ॥

কটুকং ( ক্লী ) ত্রিকটু । ইতি মেদিনী ॥ তত্তু শুণ্ঠী পিপ্পলী মরিচঞ্চ ॥

কটুকঃ ( পুং ) পটোলঃ । ইতি রাজনির্ঘণ্টঃ ॥ সুগন্ধিতৃণং । ইতি শব্দরত্নাবলী ॥ কুটজ-বৃক্ষঃ । অর্কবৃক্ষঃ । ইতি শব্দচন্দ্রিকা ॥ রাজসর্ষপঃ । ইতি হারাবলী ॥

কটুকন্দঃ ( পুং ) শিগ্রুবৃক্ষঃ । আর্দ্রকং । লশুনং । ইতি মেদিনী ॥

কটুকফলং ( ক্লী ) কক্কোলকং । ইতি রাজ-নির্ঘণ্টঃ ॥

কটুকা ( স্ত্রী ) ক্ষুদ্রচঞ্চুবৃক্ষঃ । বৃক্ষবিশেষঃ । কট্‌কী ইতি ভাষা । তৎপর্য্যায়ঃ । জননী ২ তিক্তা ৩ রোহিণী ৪ তিক্তরোহিণী ৫ চক্রাঙ্গী ৬ মৎস্যপিত্তা ৭ বকুলা ৮ । শকু-লাদনী ৯ সাদনী ১০ শতপর্ব্বা ১১ দ্বিজাঙ্গী ১২ মলভেদিনী ১৩ অশোক-রোহিণী ১৪ কৃষ্ণা ১৫ কৃষ্ণভেদী ১৬ মহৌষধী ১৭ কট্বী ১৮ অঞ্জনী ১৯ কাণ্ড-রুহা ২০ কটুঃ ২১ কটুরোহিণী ২২ কেদার-কটুকা ২৩ অরিষ্টা ২৪ পামঘ্নী ২৫ । ইতি রাজনির্ঘণ্টঃ ॥ কটম্বরা ২৬ কটু-স্তরা ২৭ অশোকা ২৮ । ইত্যমরঃ তট্টীকা চ ॥ অস্য গুণাঃ । অতিকটুত্বং । তিক্তত্বং । শীতত্বং । পিত্তরক্তদাহবলাশা-রোচকশ্বাসজ্বরনাশিত্বং । রুচিকারিত্বঞ্চ । ইতি রাজনির্ঘণ্টঃ ॥ সারকত্বং । রূক্ষত্বং । কফনাশিত্বঞ্চ । ইতি রাজবল্লভঃ ॥ তাম্বুলী ।

ইতি শব্দচন্দ্রিকা॥ কুলিকবৃক্ষঃ। ইতি রত্নমালা॥

কটুকালাবুঃ (পুং) কটুতুম্বী। তিৎলাউ ইতি ভাষা। ইতি রত্নমালা॥

কটুকী (স্ত্রী) কটুকা। কট্‌কী ইতি ভাষা। ইতি মেদিনীশব্দরত্নাবল্যৌ॥

কটুকীটকঃ (পুং) মশকঃ। ইতি জটাধরঃ॥

কটুক্বাণঃ (পুং) টিট্টিভপক্ষী। ইতি হেমচন্দ্রঃ॥

কটুগ্রন্থি (ক্লী) পিপ্পলীমূলং। শুণ্ঠী। ইতি রাজনির্ঘণ্টঃ॥

কটুচাতুর্জাতকং (ক্লী) এলাত্বক্‌পত্রকমরিচাত্মকচতুষ্কং। ইতি রাজনির্ঘণ্টঃ॥

কটুচ্ছদঃ (পুং) তগরবৃক্ষঃ। ইতি শব্দরত্নাবলী॥

কটুতিক্তকঃ (পুং) শণবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥ ভূনিম্বঃ। ইতি বৈদ্যকং॥

কটুতিক্তিকা (স্ত্রী) কটুতুম্বী। ইতি শব্দরত্নাবলী॥

কটুতুণ্ডী (স্ত্রী) লতাপ্রভেদঃ। কটুতরাই ইতি খ্যাতা। তৎপর্য্যায়ঃ। তিক্ততুণ্ডী ২ তিক্তাখ্যা ৩ কটুকা ৪ কটুতুণ্ডিকা ৫ বিষা ৬। অস্যা গুণাঃ। কটুত্বং। তিক্তত্বং। কফবাস্তিবিষারোচকরক্তপিত্তনাশিত্বং। সদা পথ্যত্বং। রেচনত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

কটুতুম্বী (স্ত্রী) লতাবিশেষঃ। তিৎলাউ ইতি ভাষা। তৎপর্য্যায়ঃ। ইক্ষ্বাকুঃ ২। ইত্যমরঃ॥ কটুকালাবুঃ ৩ নৃপাত্মজা ৪। ইতি রত্নমালা॥ কটুতিক্তিকা ৫। ইতি শব্দরত্নাবলী॥ কটুফলা ৬ তুম্বিনী ৭ কটুতুম্বিনী ৮ বৃহৎফলা ৯ রাজপুত্রী ১০ তিক্তবীজা ১১ তুম্বিকা ১২। অস্যা গুণাঃ। কটুত্বং। তীক্ষ্ণত্বং। বান্তিকারিত্বং। শ্বাসবাতকাসশোথব্রণশূকবিষনাশিত্বং। শোধনত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ পাণ্ডুকৃমিকফবায়ুনাশিত্বং। লঘুপাকিত্বঞ্চ। ইতি রাজবল্লভঃ॥

কটুত্রয়ং (ক্লী) ত্রিকটু। ইতি রাজনির্ঘণ্টঃ॥

কটুদলা (স্ত্রী) কর্কটী। কাঁকুড় ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥

কটুনিষ্পাবঃ (পুং) নদীনিষ্পাবধান্যং। ইতি রাজনির্ঘণ্টঃ॥

কটুপত্রঃ (পুং) পর্পটঃ। সিতার্জকঃ। ইতি রাজনির্ঘণ্টঃ॥

কটুপত্রিকা (স্ত্রী) কারীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কটুফলঃ (পুং) পটোলঃ। ইতি রাজনির্ঘণ্টঃ॥

কটুফলা (স্ত্রী) শ্রীবল্লীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কটুভঙ্গঃ (পুং) শুণ্ঠী। ইতি ত্রিকাণ্ডশেষঃ॥

কটুভদ্রং (ক্লী) শুণ্ঠী। ইতি রাজনির্ঘণ্টঃ॥ আর্দ্রকং। ইতি কেচিৎ॥

কটুমঞ্জরিকা (স্ত্রী) অপামার্গঃ। ইতি রাজনির্ঘণ্টঃ॥

কটুমোদং (ক্লী) জবাদিনামসুগন্ধিদ্রব্যং। ইতি রাজনির্ঘণ্টঃ॥

কটুরং (ক্লী) তক্রং। ইতি জটাধরঃ॥ কট্বর ইত্যপি পাঠঃ॥

কটুরবঃ (পুং) মণ্ডুকঃ। ইতি রাজনির্ঘণ্টঃ॥

কটুরোহিণী (স্ত্রী) কটুকী। ইত্যমরঃ॥

কটুবার্ত্তাকী (স্ত্রী) শ্বেতকণ্টকারী। ইতি রাজনির্ঘণ্টঃ॥

কটুবীজা (স্ত্রী) পিপ্পলী। ইতি রাজনির্ঘণ্টঃ॥

কটুশৃঙ্গালং (ক্লী) গৌরসুবর্ণশাকং। ইতি রাজনির্ঘণ্টঃ॥

কটুস্নেহঃ (পুং) সর্ষপঃ। ইতি ত্রিকাণ্ডশেষঃ॥ গৌরসর্ষপঃ। ইতি রাজনির্ঘণ্টঃ॥

কটূৎকটং (ক্লী) আর্দ্রকং। ইতি রত্নমালা॥

কটূৎকটকং (ক্লী) শুণ্ঠী। ইতি রাজনির্ঘণ্টঃ॥

কটোরং (ক্লী) পাত্রবিশেষঃ। কটোরা ইতি ভাষা। যথা। মৃৎকর্পটে সংযুতকাচকূপ্যাং দত্ত্বা মুখং লোহপলোহসূত্রৈঃ। নিষ্কাসিতো ধূমরসস্তু তস্য সৌগন্ধিকৈঃ কাচকটোরকে যঃ॥ ইত্যাদি মেরুতন্ত্রে পঞ্চমপ্রকাশঃ॥*॥ কিঞ্চ। রম্যান্নং দেবকীদত্তং পাত্রে কাঞ্চননির্ম্মিতে। কটোরাণাং চতুঃষষ্টিঃ পাত্রস্যোভয়তঃ স্থিতা॥ ইতি জৈমিনিভারতে আশ্বমেধিকে পর্ব্বণি ৯ অধ্যায়ঃ॥

কটোরা (স্ত্রী) স্বনামখ্যাতপাত্রং। বাটি ইতি ভাষা। ইতি ব্রহ্মবৈবর্ত্তপুরাণং॥

কটোলঃ (পুং) চণ্ডালঃ। ইত্যুণাদিকোষঃ॥ কটুরসঃ। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ॥

কটোলবীণা (স্ত্রী) বীণাবিশেষঃ। কেন্দুড়া ইতি খ্যাতা। ইতি শব্দরত্নাবলী॥

কট্ফলঃ (পুং) স্বনামখ্যাতফলবৃক্ষবিশেষঃ। কায়ফল ইতি ভাষা। তৎপর্য্যায়ঃ। শ্রীপর্ণিকা ২ কুমুদিকা ৩ কুম্ভী ৪ কৈটর্য্যঃ ৫। ইত্যমরঃ॥ সোমবল্কঃ ৬ সোমবৃক্ষঃ ৭ রোহিণী ৮। ইতি রত্নমালা॥ কৃষ্ণগর্ভঃ ৯ প্রচেতসী ১০ ভদ্রাবতী ১১ মহাকুম্ভী ১২ রামসেনকঃ ১৩ কুমুদা ১৪ উগ্রগন্ধঃ ১৫ ভদ্রা ১৬ রঞ্জনকঃ ১৭ লঘুকাশ্মর্য্যঃ ১৮ শ্রীপর্ণী ১৯। কাফলঃ ২০ পরুষঃ ২১ ণী ২২। ইতি শব্দরত্নাবলী॥ অপিচ। কট্ফলঃ সোমবল্কশ্চ কৈটর্য্যঃ কুম্ভিকাপি চ। শ্রীপর্ণিকা কুমুদিকা ভদ্রা ভদ্রবতীতি চ॥ কট্ফলস্তুবরস্তিক্তঃ কটুর্ব্বাতকফজ্বরান্। হন্তি শ্বাসপ্রমেহার্শঃকাসকণ্ঠাময়ারুচীঃ॥ ইতি ভাবপ্রকাশঃ॥ অস্য গুণাঃ। কটুত্বং। উষ্ণত্বং। কাসশ্বাসজ্বরো গ্রদাহনাশিত্বং। রুচিকারিত্বং। মুখরোগশমপ্রদত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ কফরোগনাশিত্বং। ইতি রাজবল্লভঃ॥

কট্ফলা (স্ত্রী) গম্ভারীবৃক্ষঃ। ইতি রত্নমালা॥ বৃহতী। কাকমাচী। দেবদালী। বার্ত্তাকী। মৃগের্ব্বারুঃ। ইতি রাজনির্ঘণ্টঃ॥

কট্বঙ্গঃ (পুং) শ্যোনাকবৃক্ষঃ। ইত্যমরঃ॥ দিলীপরাজঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কট্বরং (ক্লী) দধিসরঃ। ইতি রত্নমালা॥ ব্যঞ্জনং। ইত্যুণাদিকোষঃ॥ তক্রং যথা। দধ্নঃ সসারকস্যাত্র তক্রং কট্বরমুচ্যতে। ইতি বৈদ্যকং॥

কট্বী (স্ত্রী) কটুকা। লতাবিশেষঃ। তৎপর্য্যায়ঃ। কটুকবল্লী ২ সুকাষ্ঠা ৩ কাষ্ঠবল্লিকা ৪ সুবল্লী ৫ মহাবল্লী ৬ পশুমোহনিকা ৭ কটুঃ ৮। অস্যা গুণাঃ। মধুরত্বং। শীতত্বং। কফশ্বাসনানাজ্বরহারিত্বং। রুচিকারিত্বং। রাজযক্ষ্মনিবারণত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

কঠ ই কি আধ্যানে। উৎকণ্ঠাপূর্ব্বকস্মরণে। ইতি কবিকল্পদ্রুমঃ ॥ ই কণ্ঠ্যতে। কি কণ্ঠয়তি। আধ্যানং স্ম ম ঔৎক্যে ইত্যত্র ব্যাখ্যাতং। ইতি দুর্গাদাসঃ ॥

কঠ তঙ্কনে। তঙ্কনং দুঃখেন জীবনং। ইতি কবিকল্পদ্রুমঃ ॥ কঠতি দীনঃ। ইতি দুর্গাদাসঃ ॥

কঠ ই ঙ আধ্যানে। ইতি কবিকল্পদ্রুমঃ ॥ ই কণ্ঠ্যতে। ঙ কণ্ঠতে। রেবারোধসি বেতসীতরুতলে চেতঃ সমুৎকণ্ঠ্যতে। ইতি দুর্গাদাসঃ ॥

কঠঃ (পুং) মুনিবিশেষঃ। কঠশাখাধ্যয়নকর্ত্তা। কঠশাখাজ্ঞঃ। ঋগ্‌ভেদঃ। স্বরঃ। ইতি হেমচন্দ্রঃ॥ ব্রাহ্মণঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

কঠমর্দ্দঃ (পুং) শিবঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

কঠরঃ (ত্রি) কঠিনঃ। ইতি জটাধরঃ ॥

কঠশাখা (স্ত্রী) যজুর্ব্বেদস্য শাখাবিশেষঃ। এতদ্বিবরণং বেদশব্দে দ্রষ্টব্যং ॥

কঠাহকঃ (পুং) দাত্যুহপক্ষী। ইতি শব্দরত্নাবলী ॥

কঠিঞ্জরঃ (পুং) তুলসীবৃক্ষঃ। তৎপর্য্যায়ঃ। পর্ণাসঃ ২ কুঠেরকঃ ৩। ইত্যমরঃ ॥

কঠিনং (ত্রি) কঠরং। তৎপর্য্যায়ঃ। কক্খটং ২ ক্রূরং ৩ কঠোরং ৪ নিষ্ঠুরং ৫ দৃঢ়ং ৬ জঠরং ৭ মূর্ত্তিমৎ ৮ মূর্ত্তং ৯। ইত্যমরঃ ॥ খক্খটং ১০ কঠোলং ১১ জরঠং ১২। ইতি তট্টীকা ॥ কর্করং ১৩ কঠরং ১৪। ইতি জটাধরঃ ॥ কাঠরং ১৫ কমঠায়িতং ১৬। ইতি শব্দরত্নাবলী ॥ স্তব্ধং। ইতি মেদিনী ॥

কঠিনং (ক্লী স্ত্রী) স্থালী। ইতি মেদিনীশব্দরত্নাবল্যৌ ॥

কঠিনপৃষ্ঠকঃ (পুং) কচ্ছপঃ। ইতি রাজনির্ঘণ্টঃ ॥

কঠিনা (স্ত্রী) গুড়শর্করা। ইতি বিশ্বমেদিন্যৌ॥

কঠিনিকা (স্ত্রী) কঠিনী। খড়ী ইতি ভাষা। ইতি হারাবলী ॥

কঠিনী (স্ত্রী) খড়িকা। খড়ী ইতি ভাষা। ইতি মেদিনী ॥ তৎপর্য্যায়ঃ। পাকশুক্লা ২ অমিলাধাতুঃ ৩ কক্খটী ৪ খটী ৫ খড়ী ৬ বর্ণলেখিকা ৭। ইতি রত্নমালা ॥ ধাতূপলঃ ৮ কঠিনিকা ৯। ইতি হারাবলী ॥

কঠিল্লঃ (পুং) কারবেল্লঃ। করলা ইতি ভাষা। ইত্যুণাদিকোষঃ ॥

কঠিল্লকঃ (পুং) কারবেল্লঃ। পুনর্ণবা। তুলসী। ইতি ত্রিকাণ্ডশেষঃ ॥

কঠী (স্ত্রী) ব্রাহ্মণী। ইতি জটাধরঃ ॥

কঠেরঃ (পুং) কৃচ্ছ্রজীবী। দরিদ্রঃ। ইতিসিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ ॥

কঠোরঃ (ত্রি) কঠিনঃ। ইত্যমরঃ ॥

কঠোলঃ (ত্রি) কঠোরঃ। ইত্যমরটীকায়াং নীলকণ্ঠঃ ॥

কড ই ঙ ঞ দর্পে। হর্ষে ইত্যর্থঃ। ইতি কবিকল্পদ্রুমঃ ॥ ই কণ্ড্যতে। ঞ কণ্ডতি কণ্ডতে। ঙ কণ্ডতে জনো হৃষ্টঃ স্যাদিত্যর্থঃ। অয়মাত্মনেপদীত্যন্যে। কদাচিৎ পরস্মৈপদার্থো ঞকারঃ। অনেকার্থত্বাৎ

তুষাপনয়নে চ। কণ্ডতে তণ্ডুলং লোকঃ। ইতি দুর্গাদাসঃ॥

কড শ অদনে। দর্পে। ইতি কবিকল্পদ্রুমঃ॥ শ কড়তী কড়ন্তী। প্রাঞ্চস্তু বেদে তুচ্চারণভেদার্থং ভ্বাদাবপ্যেবং পঠন্তি। তথা চ। কড মদ ইতি ধাতুঃ পঠ্যতে ভ্বতুদাদ্যোঃ কড়তি কড়তি রূপং তুল্যমেব দ্বয়োঃ স্যাৎ। তদুভয়গণপাঠে কিং ফলং নেতি বাচ্যং স্বরকৃত ইহ ভেদঃ শপ্শয়োরস্তি যস্মাদিতি॥ স্বরকৃত ইতি উদাত্তানুদাত্তস্বরিতবিরিষ্কসংজ্ঞকচতুর্ব্বিধস্বরকৃত ইত্যর্থঃ। ইতি দুর্গাদাসঃ॥

কড ই ক ভেদে। রক্ষণে। ইতি কবিকল্পদ্রুমঃ॥ ই কণ্ডয়তি। ইতি দুর্গাদাসঃ॥

কড়ঃ (ত্রি) মূর্খঃ। ইতি হলায়ুধঃ॥

কড়কং (ক্লী) লবণবিশেষঃ। করকচ্ ইতি ভাষা। তৎপর্য্যায়ঃ। সামুদ্রং ২ ত্রিকূটং ৩। ইতি রত্নমালা॥ অস্য গুণঃ সামুদ্রশব্দে দ্রষ্টব্যঃ॥

কড়ঙ্গঃ (পুং) সুরাবিশেষঃ। ইত্যুণাদিকোষঃ॥

কড়ঙ্গরঃ (পুং) বুসং। আগড়া ইতি ভাষা। ইত্যমরঃ॥

কড়ত্রং (ক্লী) পাত্রবিশেষঃ। ইতি উণাদিকোষঃ॥

কড়ম্বঃ (পুং) শাকনাড়িকা। ডাঁটা ইতি ভাষা। তৎপর্য্যায়ঃ। কলম্বঃ ২। ইত্যমরঃ॥ কোণং। প্রান্তভাগঃ। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ॥

কড়ম্বী (স্ত্রী) কলম্বীশাকং। ইতি শব্দরত্নাবলী॥

কড়ারঃ (পুং) পিঙ্গলবর্ণঃ। তদ্বর্ণযুক্তে ত্রি। ইত্যমরঃ॥ কড়ারস্তৃণবহ্নিবৎ ইত্যন্যে ইতি ভরতঃ॥ দাসঃ। ইতি মেদিনী॥

কড়িতুলঃ (পুং) খড়্গঃ। ইতি শব্দরত্নাবলী॥

কড্ড কার্কশ্যে। ইতি কবিকল্পদ্রুমঃ॥ টবর্গতৃতীয়োপধঃ। ক্বিপি সংযোগান্তলোপে কড্। কড্ডতি পদ্মমৃণালং কর্কশং স্যাদিত্যর্থঃ। ইতি দুর্গাদাসঃ॥

কণ ঋ আর্ত্তস্বরে। ইতি কবিকল্পদ্রুমঃ॥ ঋ অচীকণৎ অচকাণৎ। কণতি ভীতঃ। ইতি দুর্গাদাসঃ॥

কণ ম গতৌ। ইতি কবিকল্পদ্রুমঃ। ম কণয়তি। ইতি দুর্গাদাসঃ॥

কণ ক নিমীলনে। ইতি কবিকল্পদ্রুমঃ॥ নিমীলনং পক্ষ্মাবরণং। ক কাণয়তি চক্ষুঃ পক্ষ্মাবৃতং স্যাদিত্যর্থঃ। ইতি দুর্গাদাসঃ॥

কণঃ (পুং) অতিসূক্ষ্মঃ। ধান্যাংশঃ। ইত্যমরঃ॥ তস্য স্ত্রীলিঙ্গে কণী কণিকা। বনজীরকঃ। ইতি রাজনির্ঘণ্টঃ॥

কণগুগ্গুলুঃ (পুং) গুগ্গুলুপ্রভেদঃ। তৎপর্য্যায়ঃ। গন্ধরাজঃ ২ স্বর্ণকর্ণঃ ৩ সুবর্ণঃ ৪ কনকঃ ৫ বংশপীতঃ ৬ সুরভিঃ ৭ পলঙ্কষঃ ৮। অস্য গুণাঃ। কটুত্বং। উষ্ণত্বং। সুগন্ধিত্বং। বাতশূলগুল্মোদরাধ্মানকফনাশিত্বং। রসায়নত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

কণজীরঃ (পুং) শ্বেতজীরকঃ। ইতি রাজনির্ঘণ্টঃ॥

কণজীরকং (ক্লী) ক্ষুদ্রজীরকং। তৎপর্য্যায়ঃ।

হৃদ্যগন্ধি ২ সুগন্ধং ৩। ইতি রত্নমালা শব্দচন্দ্রিকা চ॥

কণভক্ষকঃ (পুং) ভারিটপক্ষী। ইতি রাজনির্ঘণ্টঃ॥

কণলাভঃ (পুং) আবর্ত্তঃ। জলের ঘূর্ণা ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ॥

কণা (স্ত্রী) জীরকং। কুম্ভীরমক্ষিকা। পিপ্পলী। ইতি মেদিনী॥ শ্বেতজীরকং। ইতি রাজনির্ঘণ্টঃ॥ অল্পং। যথা। কদলীফলমধ্যস্থং কণামাত্রমপক্ককং। ইতি তিথ্যাদিতত্ত্বং॥

কণাটীনঃ (পুং) খঞ্জনপক্ষী। ইতি ত্রিকাণ্ডশেষঃ॥

কণাটীরঃ (পুং) খঞ্জনপক্ষী। ইতি শব্দরত্নাবলী॥

কণাটীরকঃ (পুং) খঞ্জনপক্ষী। ইতি শব্দরত্নাবলী॥

কণাদঃ (পুং) স্বনামখ্যাতমুনিবিশেষঃ, তৎপর্য্যায়ঃ। কাশ্যপঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥ স চ বৈশেষিকদর্শনকর্ত্তা। স্বর্ণকারঃ। কলাদো রুক্মকারক ইত্যমরোপরি কণাদ ইত্যপি পাঠঃ। ইতি সারসুন্দরী॥

কণিকঃ (পুং) কণা। শত্রুঃ। নীরাজনবিধিঃ। ইতি সারস্বতঃ॥ শুষ্কগোধূমচূর্ণং। ইতি রাজনির্ঘণ্টঃ॥

কণিকা (স্ত্রী) অত্যন্তসূক্ষ্মবস্তু। অগ্নিমন্থবৃক্ষঃ। ইতি মেদিনী॥ কণা। তণ্ডুলবিশেষঃ। ইত্যমরটীকায়াং রায়মুকুটঃ॥

কণিতং (ক্লী) পীড়িতানাং শব্দঃ। ইতি হেমচন্দ্রঃ॥

কণিশং (ক্লী) শস্যমঞ্জরী। ধান্যাদির শিষ ইতি ভাষা। ইত্যমরঃ॥

কণী (স্ত্রী) কণিকা। ইত্যমরটীকায়াং ভরতঃ॥

কণীকং (ত্রি) অল্পং। ইত্যুণাদিকোষঃ॥

কণীয়ঃ [স্] (ত্রি) অত্যল্পং। ইত্যমরঃ॥ কনিষ্ঠং। ইতি তট্টীকা॥

কণেরঃ (পুং) কর্ণিকারবৃক্ষঃ। ইত্যুণাদিকোষঃ॥

কণেরা (স্ত্রী) বেশ্যা। হস্তিনী। ইত্যুণাদিকোষঃ॥

কণেরুঃ (স্ত্রী) বেশ্যা। করিণী। কর্ণিকারবৃক্ষে পুং। ইতি মেদিনী॥

কণ্টকঃ (পুং ক্লী) ক্ষুদ্রশত্রুঃ। মৎস্যাদ্যস্থি। নৈয়ায়িকাদিদোষোক্তিঃ। রোমাঞ্চঃ। দ্রুমাঙ্গং। কাঁটা ইতি ভাষা। ইতি মেদিনী॥ কেন্দ্রং। ইতি দীপিকা॥

কণ্টকঃ (পুং) সূচ্যগ্রং। ক্ষুদ্রশত্রুঃ। লোমহর্ষঃ। ইত্যমরঃ॥ কর্ম্মস্থানং। দোষঃ। ইতি জটাধরঃ॥ মকরঃ। ইতি বিশ্বঃ॥ বেণুঃ। ইতি হেমচন্দ্রঃ॥

কণ্টকদ্রুমঃ (পুং) শাল্মলিবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কণ্টকপ্রাবৃতা (স্ত্রী) গৃহকন্যা। ঘৃতকুমারী ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥

কণ্টকফলঃ (পুং) পনসবৃক্ষঃ। ইত্যমরটীকায়াং ভরতঃ॥ গোক্ষুরবৃক্ষঃ। ইতি রত্নমালা॥

কণ্টকবৃন্তাকী (স্ত্রী) বার্ত্তাকী। ইতি রাজনির্ঘণ্টঃ॥

কণ্টকশ্রেণী (স্ত্রী) কণ্টকারী। ইতি শব্দচন্দ্রিকা॥

কণ্টকাগারঃ ( পুং ) সরটজন্তুঃ। ইতি রাজনির্ঘণ্টঃ ॥

কণ্টকাঢ্যঃ ( পুং ) কুব্জকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কণ্টকারিকা (স্ত্রী) স্বনামখ্যাতক্ষুদ্রবৃক্ষঃ। তৎপর্য্যায়ঃ। নিদিগ্ধিকা ২ স্পৃশী ৩ ব্যাঘ্রী ৪ বৃহতী ৫ প্রচোদনী ৬ কুলী ৭ ক্ষুদ্রা ৮ দুস্পর্শা ৯ রাষ্ট্রিকা ১০। ইত্যমরঃ॥ অনাক্রান্তা ১১ ভণ্টাকী ১২ সিংহী ১৩ধাবনিকা ১৪। ইতি রত্নমালা॥ কণ্টকারী ১৫ কণ্টকিনী ১৬ দুষ্প্রধর্ষিণী ১৭ নিদিগ্ধা ১৮ ধাবনী ১৯ ক্ষুদ্রকণ্টিকা ২০ বহুকণ্টা ২১ ক্ষুদ্রফলা ২২ কণ্টালিকা ২৩ চিত্রফলা ২৪। অস্যা গুণাঃ। কটুত্বং। উষ্ণত্বং। দীপনত্বং। শ্বাসকাশপ্রতিশ্যায়দোষকফবাতজ্বরনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ তৃষ্ণানাশিত্বং। ইতি রাজবল্লভঃ॥ তস্যাঃ ফলগুণাঃ। পিত্তকফকণ্ডূকুষ্ঠকৃমিনাশিত্বং। লঘুত্বং। উষ্ণত্বং। কটুত্বং। তিক্তত্বঞ্চ। ইতি রাজনির্ঘণ্টরাজবল্লভৌ॥

কণ্টকারী (স্ত্রী) কণ্টকারিকাবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥ শাল্মলীবৃক্ষঃ। ইতি জটাধরঃ॥ বিকঙ্কতবৃক্ষঃ। বঁইচি ইতি ভাষা। ইতি শব্দরত্নাবলী॥ তৎপর্য্যায়গুণাঃ। কণ্টকারী তু দুস্পর্শা ক্ষুদ্রা ব্যাঘ্রী নিদিগ্ধিকা। কণ্টালিকা কণ্টকিনী ধাবনী বৃহতী তথা॥ উভে চ বৃহত্যৌ। যদাহ শাশ্বতঃ॥ ক্ষুদ্রায়াং ক্ষুদ্রভণ্টাক্যাং বৃহতীতি নিগদ্যতে॥ শ্বেতা ক্ষুদ্রা চন্দ্রহাসা লক্ষ্মণা ক্ষেত্রদূতিকা। গর্ভদা চন্দ্রভা চন্দ্রা চন্দ্রপুষ্পা প্রিয়ঙ্করী॥ কণ্টকারী সরা তিক্তা কটুকা দীপনী লঘু। রূক্ষোষ্ণা পাচনী কাসশ্বাসজ্বরকফানিলান্॥ নিহন্তি পীনসং পার্শ্বপীড়াকৃমিহৃদাময়ান্। তয়োঃ ফলং কটুরসে পাকে চ কটুকং ভবেৎ॥ শুক্রস্য রেচনং ভেদি তিক্তং পিত্তাগ্নিকৃল্লঘু। হন্যাৎ কফমরুৎকণ্ডূকাশমেদকৃমিজ্বরান্॥ তদ্বৎ প্রোক্তা সিতা ক্ষুদ্রা বিশেষাদ্গর্ভকারিণী। ইতি ভাবপ্রকাশঃ॥

কণ্টকালঃ ( পুং ) পনসবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥

কণ্টকালুকঃ ( পুং ) যবাসবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কণ্টকাশনঃ (পুং) উষ্ট্রঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কণ্টকাষ্ঠীলঃ ( পুং ) মৎস্যবিশেষঃ। তৎপর্য্যায়ঃ। কুলিশং ২। ইতি ত্রিকাণ্ডশেষঃ॥

কণ্টকিনী ( স্ত্রী ) বার্ত্তাকী। শোণঝিণ্টী। মধুখর্জ্জুরী। ইতি রাজনির্ঘণ্টঃ॥

কণ্টকিফলঃ ( পুং ) বৃক্ষবিশেষঃ। কাঁটাল ইতি ভাষা। তৎপর্য্যায়ঃ। পনসঃ ২। ইত্যমরঃ॥ পলসঃ ৩ কণ্টকীফলঃ ৪ কণ্টকফলঃ ৫। ইতি তট্টীকা॥ মহাসর্জ্জঃ ৬ ফলিনঃ ৭ ফলবৃক্ষকঃ ৮ স্থূলঃ ৯ কণ্টাফলঃ ১০ মূলফলদঃ ১১ অপুষ্পফলদঃ ১২ পূতফলঃ ১৩। চম্পকোষঃ ১৪ চম্পালুঃ ১৫ রসালঃ ১৬ মৃদঙ্গফলঃ ১৭ পানসঃ ১৮। ইতি শব্দরত্নাবলী॥ অস্য গুণাঃ কণ্টাফলশব্দে দ্রষ্টব্যাঃ॥ সমষ্ঠিলবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কণ্টকিলঃ (পুং) বংশবিশেষঃ। বেড়ু বাঁশ ইতি ভাষা। ইতি শব্দচন্দ্রিকা ॥

কণ্টকিলতা ( স্ত্রী ) ত্রপুষী। শসা ইতি ভাষা। :তি রাজনির্ঘণ্টঃ ॥

কণ্টকী [ন্] ( পুং ) মৎস্যঃ। ইতি শব্দরত্নাবলী॥ খদিরবৃক্ষঃ। ইতি শব্দমালা ॥ মদনবৃক্ষঃ। ইতি রত্নমালা ॥ গোক্ষুরবৃক্ষঃ। বংশঃ। বদরবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কণ্টকী ( স্ত্রী ) বার্ত্তাকীবিশেষঃ। কাঁটা বেগুন ইতি ভাষা। অস্যা গুণাঃ। কটুত্বং। তিক্তত্বং। উষ্ণত্বং। রক্তপিত্তপ্রকোপণত্বং। কণ্ডুকচ্ছহরত্বং। দোষলত্বঞ্চ। ইতি রাজবল্লভঃ ॥

কণ্টকীদ্রুমঃ ( পুং ) খদিরবৃক্ষঃ। ইতি রত্নমালা ॥

কণ্টকীফলঃ ( পুং ) কণ্টকিফলঃ। কাঁটাল ইতি ভাষা। ইত্যমরটীকায়াং ভরতঃ ॥

কণ্টকুরণ্টঃ (পুং) ঝিণ্টী। ইতি রাজনির্ঘণ্টঃ ॥

কণ্টতনুঃ ( স্ত্রী ) বৃহতী। ইতি রাজনির্ঘণ্টঃ ॥

কণ্টদলা ( স্ত্রী ) কেতকী। ইতি রাজনির্ঘণ্টঃ ॥

কণ্টপত্রঃ ( পুং ) বিকঙ্কতবৃক্ষঃ। বঁইচি ইতি ভাষা। ইতি শব্দমালা ॥

কণ্টপত্রফলা ( স্ত্রী ) ব্রহ্মদণ্ডীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কণ্টপাদঃ ( পুং ) বিকঙ্কতবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কণ্টফলঃ ( পুং ) ক্ষুদ্রগোক্ষুরঃ। পনসঃ। ধুস্তূরঃ। লতাকরঞ্জঃ। ইতি রাজনির্ঘণ্টঃ ॥ তেজঃখলঃ। এরণ্ডঃ। ইতি কেচিৎ ॥

কণ্টফলা ( স্ত্রী ) দেবদালীলতা। ইতি রাজনির্ঘণ্টঃ ॥

কণ্টলঃ ( পুং ) বৃক্ষবিশেষঃ। বাবলা ইতি ভাষা। তৎপর্য্যায়ঃ। বাবলঃ ২ স্বর্ণপুষ্পঃ ৩ সূক্ষ্মপত্রঃ ৪। ইতি শব্দচন্দ্রিকা ॥

কণ্টবল্লী ( স্ত্রী ) শ্রীবল্লীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কণ্টবৃক্ষঃ ( পুং ) তেজঃফলবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কণ্টাফলঃ ( পুং ) পনসবৃক্ষঃ। কাঁটাল ইতি ভাষা। ইতি শব্দমালা ॥ অস্য পক্বফলগুণাঃ। সুমধুরত্বং। রক্তবর্দ্ধকত্বং। স্নিগ্ধত্বং। শীতলত্বং। দুর্জ্জরত্বং। বায়ুপিত্তনাশিত্বং। শ্লেষ্মশুক্রবলপ্রদত্বঞ্চ। ইতি রাজবল্লভঃ ॥ পিচ্ছিলত্বং। গুরুত্বং। হৃদ্যত্বং। শ্রমদাহবিশোষনাশিত্বং। রুচিকারিত্বং। গ্রাহিত্বং চ। ইতি রাজনির্ঘণ্টঃ ॥ * ॥ তদ্বীজগুণাঃ। রক্তপিত্তনাশিত্বং। স্বাদুত্বং। ফলতুল্যগুণত্বঞ্চ। ইতি রাজবল্লভঃ ॥ ঈষৎ কষায়ত্বং। মধুরত্বং। রুচিবায়ুবৃদ্ধিকারিত্বং। গুরুত্বং। ত্বগ্দোষতৎফলবিকারনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ * ॥ তস্যাপক্বস্য গুণাঃ। কষায়ত্বং। স্বাদুত্বং। বায়ুকারিত্বং। ইতি রাজবল্লভঃ ॥ শীতলত্বঞ্চ ॥ * ॥ ঘৃতযুক্তস্য তস্য গুণাঃ। স্নিগ্ধত্বং। হৃদ্যত্বং। বলপ্রদত্বং। ছর্দ্দিনাশিত্বং। অচক্ষুষ্যত্বং। শুক্রকারিত্বং। বাতপিত্তনাশিত্বঞ্চ ॥ তন্মজ্জগুণাঃ। শুক্রকারিত্বং। বাতপিত্তকফনাশিত্বং চ ॥ বিশেষাৎ পনসং

বৰ্জ্যং গুল্মিভির্মন্দবহ্নিভিঃ॥ ইতি রাজ-নির্ঘণ্টঃ॥

কণ্টার্ত্তগলা (স্ত্রী) নীলঝিণ্টী। ইতি রাজ-নির্ঘণ্টঃ॥

কণ্টালুঃ (পুং) বংশঃ। বৃহতী। বার্ত্তাকী। বর্ব্বূরঃ। ইতি রাজনির্ঘণ্টঃ॥

কণ্টাহ্বয়ং (ক্লী) পদ্মকন্দঃ। ইতি রাজ-নির্ঘণ্টঃ॥

কণ্টী [ন্] (পুং) কলায়ঃ। অপামার্গঃ। খদিরঃ। গোক্ষুরঃ। ইতি রাজনির্ঘণ্টঃ॥

কণ্ঠঃ (ত্রি) গ্রীবাপুরোভাগঃ। তৎপর্য্যায়ঃ। গলঃ ২। ইত্যমরঃ॥ অত্র বিশুদ্ধনাম-ষোড়শদলপদ্মমস্তি। যথা। তদূর্দ্ধন্তু বিশু-দ্ধাখ্যং দলষোড়শপঙ্কজং। স্বরৈঃ ষোড়শ-ভির্যুক্তং ধূম্রবর্ণৈর্ম্মহাপ্রভং॥ বিশুদ্ধপদ্ম-মাখ্যাতমাকাশাখ্যং মহাদ্ভুতং॥ ইতি গৌতমতন্ত্রং॥ নিকটঃ। ধ্বনিঃ। ইতি মেদিনী॥

কণ্ঠঃ (পুং) মদনবৃক্ষঃ। ইতি মেদিনী॥ হোমকুণ্ডাদ্বহিরঙ্গুলিপরিমিতস্থানং। যথা। খাতাদ্বাহ্যেহঙ্গুলঃ কণ্ঠঃ সর্ব্বকুণ্ডেষ্বয়ং বিধিঃ। ইতি তিথ্যাদিতত্ত্বং॥

কণ্ঠকূণিকা (স্ত্রী) বীণা। ইতি হেম-চন্দ্রঃ॥

কণ্ঠতলাসিকা (স্ত্রী) অশ্বগ্রীবাবেষ্টকরজ্জু-চর্ম্মাদি। ইতি শব্দমালা॥

কণ্ঠনীড়কঃ (পুং) চিল্লপক্ষী। চিল ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ॥

কণ্ঠনীলকঃ (পুং) উল্কা। মসাল ইতি ভাষা। ইতি শব্দমালা॥

কণ্ঠপাশকঃ (পুং) হস্তিগলবেষ্টকরজ্জুঃ। ইতি শব্দমালা॥

কণ্ঠভূষা (স্ত্রী) কণ্ঠাভরণং গ্রীবালঙ্কারঃ। তৎপর্য্যায়ঃ। গ্রৈবেয়কং ২। ইত্যমরঃ॥ গ্রৈবেয়ং ৩ গ্রৈবং ৪। ইতি শব্দরত্না-বলী॥ রুচকঃ ৫ নিষ্কং ৬। ইতি জটা-ধরঃ॥

কণ্ঠমণিঃ (পুং) গলদেশধারণীয়মণিঃ। তৎ-পর্য্যায়ঃ। কাকলং ২। ইতি ত্রিকাণ্ড-শেষঃ॥

কণ্ঠ্যঃ (ত্রি) কণ্ঠোদ্ভবশব্দাদিঃ। ইতি ব্যাকরণং॥

কণ্ঠাগ্নিঃ (পুং) পক্ষী। ইতি ত্রিকাণ্ড-শেষঃ॥

কণ্ঠালঃ (পুং) শূরণঃ। যুদ্ধং। নৌকা। খনিত্রং। ইতি বিশ্বঃ॥ ক্রমেলকঃ। গোণী-প্রভেদঃ। ইতি মেদিনী॥

কণ্ঠালা (স্ত্রী) জালগোণিকা। ইতি ত্রিকাণ্ড-শেষো মেদিনী চ॥

কণ্ঠিকা (স্ত্রী) কণ্ঠাভরণং। একনরী কণ্ঠী ইতি ভাষা। ইতি হেমচন্দ্রঃ॥

কণ্ঠী (স্ত্রী) অশ্বকণ্ঠবেষ্টনরজ্জুচর্ম্মাদি। ইতি শব্দমালা॥ গলঃ। ইত্যমরটীকায়াং ভরতঃ॥

কণ্ঠীরবঃ (পুং) সিংহঃ। ইতি ত্রিকাণ্ডশেষঃ॥ পারাবতঃ। ইতি রাজনির্ঘণ্টঃ॥ মত্তহস্তী ইতি সারস্বতঃ॥

কণ্ঠীরবী (স্ত্রী) বাসকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কণ্ঠেকালঃ (পুং) মহাদেবঃ। ইতি ত্রিকাণ্ড-শেষঃ॥

কণ্ডনং (ক্লী) উদূখলাদিনা তণ্ডুলাদের্নির্ম্মলী-করণং কাঁড়ান ইতি ভাষা। ইতি হেম-চন্দ্রঃ ॥

কণ্ডনী (স্ত্রী) উদূখলং। ইতি ত্রিকাণ্ডশেষঃ ॥

কণ্ডরা (স্ত্রী) মহাস্নায়ুঃ। মহানাড়ী। ইতি হেমচন্দ্রঃ ॥

কণ্ডুঃ (স্ত্রী) কণ্ডূঃ। ইতি রায়মুকুটঃ ॥

কণ্ডুরঃ (পুং) কারবেল্ললতা। কুন্দরতৃণং। ইতি রাজনির্ঘণ্টঃ ॥

কণ্ডুরা (স্ত্রী) কপিকচ্ছুঃ। অত্যম্লপর্ণী। ইতি রাজনির্ঘণ্টঃ ॥

কণ্ডূঃ (স্ত্রী) রোগবিশেষঃ। চুল্‌কনি খোস্ ইত্যাদি ভাষা। তৎপর্য্যায়ঃ। খর্জ্জুঃ ২ কণ্ডূয়া ৩। ইত্যমরঃ ॥ কণ্ডূতিঃ ৪। ইতি তট্টীকা॥ কণ্ডূয়নং ৫। ইতি রাজনির্ঘণ্টঃ ॥ তচ্চিকিৎসা যথা। দূর্ব্বানিশাযুতো লেপঃ কণ্ডূপামাবিনাশনঃ। কৃমিদদ্রুহরশ্চৈব শীতপিত্তাপহঃ স্মৃতঃ ॥ ১ ॥ হরিদ্রায়াঃ পলান্যষ্টৌ ষট্‌পলং হবিষস্তথা। ক্ষীরা-ঢ়কেন সংযুক্তং খণ্ডস্যার্দ্ধশতং তথা ॥ পচেন্মৃদ্বগ্নিনা বৈদ্যো ভাজনে মৃণ্ময়ে দৃঢ়ে। ত্রিকটুস্ত্রিজাতকঞ্চৈব কৃমিঘ্নং ত্রিবৃতা তথা ॥ ত্রিফলা কেশরং মুস্তং লৌহং প্রতি পলং পলং। সংচূর্ণ্য প্রক্ষিপেত্তত্র কর্ষমেকন্তু ভক্ষয়েৎ॥ কণ্ডূবিস্ফোটদদ্রূণাং নাশনং পরমৌষধং। প্রতপ্তকাঞ্চনাভাসো দেহো ভবতি নান্যথা ॥ শীতপিত্তোদর্দ্দ-কোঠান্ সপ্তাহাদেব নাশয়েৎ। হরিদ্রা-নামতঃ খণ্ডঃ কণ্ডূনাং পরমৌষধং॥ হরিদ্রা-খণ্ডঃ ॥ ২ ॥ অমৃতবৃষপটোলং মুস্তকং সপ্তপর্ণং খদিরমসিতবেত্রং নিম্বপত্রং হরিদ্রে। বিবিধবিষবিসর্পান্ কুষ্ঠবিস্ফোট-কণ্ডূরপনয়তি মসূরীং শীতপিত্তং জ্বরঞ্চ ॥ অমৃতাদিঃ ॥ ৩ ॥ ইতি ভৈষজ্যরত্নাবলী ॥

কণ্ডূকরী (স্ত্রী) শূকশিম্বীবৃক্ষঃ। ইতি শব্দ-চন্দ্রিকা ॥

কণ্ডূঘ্নঃ (পুং) আরগ্বধঃ। গৌরসর্ষপঃ। ইতি রাজনির্ঘণ্টঃ ॥

কণ্ডূতিঃ (স্ত্রী) কণ্ডূঃ। চুল্‌কনি ইতি ভাষা। ইতি ভরতহলায়ুধৌ ॥

কণ্ডূয়নং (ক্লী) কণ্ডূঃ। ইতি হলায়ুধঃ ॥

কণ্ডূয়া (স্ত্রী) কণ্ডূঃ। ইত্যমরঃ ॥

কণ্ডূরা (স্ত্রী) বৃক্ষবিশেষঃ। আলকুশী ইতি ভাষা। তৎপর্য্যায়ঃ। আত্মগুপ্তা ২ জড়া ৩ অধ্যণ্ডা ৪ প্রাবৃষায়ণী ৫ ঋষ্যপ্রোক্তা ৬ শূকশিম্বিঃ ৭ কপিকচ্ছুঃ ৮ মর্কটী ৯। ইত্যমরঃ ॥ অজহা ১০ অব্যণ্ডা ১১ কণ্ডুরা ১২ শূকশিম্বী ১৩ শূকশিম্বা ১৪ কপিকচ্ছুঃ ১৫। ইতি তট্টীকা॥ ঋষভঃ ১৬ স্বগুপ্তা ১৭। ইতি রত্নকোষঃ ॥

কণ্ডূলঃ (পুং) শূরণঃ। ইতি রাজনির্ঘণ্টঃ ॥ কণ্ডূযুক্তে ত্রি ॥

কণ্ডোলঃ (পুং) নলবংশাদিরচিতধান্যাদি-স্থাপনপাত্রং। ডোল ইতি ভাষা। তৎ-পর্য্যায়ঃ। পিটঃ ২। ইত্যমরঃ ॥ পিটকঃ ৩ পেটকঃ ৪। ইতি ভরতঃ ॥ উষ্ট্রঃ। ইত্যু-ণাদিকোষঃ ॥

কণ্ডোলকঃ (পুং) কণ্ডোলঃ। ইতি হেম-চন্দ্রঃ ॥

কণ্ডোলবীণা (স্ত্রী) চণ্ডালবীণা। কেঁদ্‌ড়া

ইতি খ্যাতা। তৎপর্য্যায়ঃ। চাণ্ডালিকা ২ চণ্ডালবল্লকী ৩। ইত্যমরঃ॥ চণ্ডালিকা ৪ কটোলবীণা ৫। ইতি ভরতঃ॥

কণ্ডোলী (স্ত্রী) কণ্ডোলবীণা। ইতি শব্দরত্নাবলী॥

কণ্ড্রোঘঃ (পুং) শুককীটঃ। শূয়াপোকা ইতি ভাষা। ইতি শব্দচন্দ্রিকা॥

কণ্বং (ক্লী) পাপং। ইতি মেদিনী॥

কণ্বঃ (পুং) মুনিবিশেষঃ। ইতি মেদিনী॥ স তু পুরুবংশজাতাপ্রতিরথনামক্ষত্রিয়পুত্রঃ। যথা। সুমতির্ধ্রুবোঽপ্রতিরথঃ কণ্বোঽপ্রতিরথাত্মজঃ। তস্য মেধাতিথিস্তস্মাৎ প্রস্কণ্বাদ্যা দ্বিজাতয়ঃ॥ ইতি শ্রীভাগবতং॥

কতঃ (পুং) মুনিবিশেষঃ। ইত্যুণাদিকোষঃ॥ কতকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কতকঃ (পুং) বৃক্ষবিশেষঃ। নির্ম্মলী ইতি ভাষা। তৎপর্য্যায়ঃ। অম্বুপ্রসাদঃ ২ কতঃ ৩ তিক্তফলঃ ৪ রুচ্যঃ ৫ ছেদনীয়ঃ ৬ গুচ্ছফলঃ ৭ কতফলঃ ৮ তিক্তমরিচঃ ৯। অস্য গুণাঃ। কটুত্বং। তিক্তত্বং। উষ্ণত্বং। চক্ষুর্হিতত্বং। রুচিকারিত্বং। কৃমিদোষশূলদোষনাশিত্বঞ্চ। তস্য বীজং অম্বুপ্রসাদনং। ইতি রাজনির্ঘণ্টঃ॥

কতফলঃ (পুং) কতকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কতমালঃ (পুং) অগ্নিঃ। ইতি শব্দমালা॥ কচমালঃ খতমালশ্চ পাঠঃ॥

কতি (ত্রি) কিয়ৎপরিমাণং। কত ইতি ভাষা। ইতি ব্যাকরণং॥

কতিপয়ঃ (ত্রি) কতি। কতকগুলি ইতি ভাষা। ইতি ব্যাকরণং॥

কত্তৃণং (ক্লী) সুগন্ধিতৃণবিশেষঃ। রামকর্পূর ইতি খ্যাতং। তৎপর্য্যায়ঃ। পৌরং ২ সৌগন্ধিকং ৩ ধ্যাম ৪ দেবজগ্ধকং ৫ রৌহিষং ৬। ইত্যমরঃ॥ সুগন্ধং ৭ তৃণশীতং ৮ সুশীতলং ৯। ইতি রত্নমালা॥ রোহিষতৃণং ১০ কাতৃণং ১১ ভূতি ১২ ভূতিকং ১৩ শ্যামকং ১৪ ধ্যামকং ১৫ পূতি ১৬ মুদ্গলং ১৭ দেবদগ্ধকং ১৮। অস্য গুণাঃ। কটুত্বং। তিক্তত্বং। কফশস্ত্রশল্যাদিদোষবালগ্রহবিনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ পৃশ্নিঃ। চাকুলিয়া ইতি ভাষা। ইতি মেদিনী॥

কত্তোয়ং (ক্লী) মদ্যং। ইতি ত্রিকাণ্ডশেষঃ॥

কথ ঙ শ্লাঘে। ইতি কবিকল্পদ্রুমঃ॥ দন্ত্যবর্গাদ্যোপধঃ। শ্লাঘঃ প্রশংসা। ঙ কথতে গুণিনং গুণী। ইতি দুর্গাদাসঃ॥

কত্র ৎ ক শৈথিল্যে। ইতি কবিকল্পদ্রুমঃ॥ কত্রয়তি কত্রাপয়তি। ইতি দুর্গাদাসঃ॥

কৎসবরং (ক্লী) স্কন্ধঃ। ইতি শব্দচন্দ্রিকা॥

কথ ৎ ক বাক্যপ্রবন্ধে। ইতি কবিকল্পদ্রুমঃ॥ কথয়তি। ইতি দুর্গাদাসঃ॥

কথং ব্য কথম্। কিংপ্রকারং। ইতি ব্যাকরণং॥

কথকঃ (ত্রি) বক্তা। কথোপজীবী। নাটকবর্ণনকর্ত্তা। তৎপর্য্যায়ঃ। একনটঃ ২ কথাপ্রাণঃ ৩। ইতি শব্দরত্নাবলী॥

কথঙ্কথিকঃ (ত্রি) প্রষ্টা। প্রশ্নকর্ত্তা। ইতি ত্রিকাণ্ডশেষভূরিপ্রয়োগৌ॥

কথঙ্কথিকতা ( স্ত্রী ) পৃচ্ছা। প্রশ্নঃ। ইতি হেমচন্দ্রঃ ॥

কথনং ( ক্লী ) কথা। কহন ইতি ভাষা। ইতি হলায়ুধঃ ॥

কথম্ ব্য হর্ষঃ। গর্হা। প্রকারার্থঃ। সম্ভ্রমঃ। প্রশ্নঃ। সম্ভাবনা। ইতি মেদিনী ॥

কথা ( স্ত্রী ) প্রবন্ধকল্পনা। ইত্যমরঃ ॥ প্রবন্ধেন কল্পনা অথবা প্রবন্ধস্য অভিধেয়স্য কল্পনা স্বয়ং রচনা ইতি সারসুন্দরী ॥ প্রবন্ধস্য কল্পনা রচনা বহ্বনৃতাস্তোকসত্যা। ইতি ভরতঃ ॥ প্রবন্ধকল্পনাং স্তোকসত্যাং প্রাজ্ঞাঃ কথাং বিদুঃ। পরম্পরাশ্রয়া যা স্যাৎ সা মতাখ্যায়িকা কচিৎ ॥ ইতি কোলাহলাচার্য্যঃ ॥

কথাপ্রসঙ্গঃ ( ত্রি ) জল্পাকঃ। ইতি শব্দরত্নাবলী ॥ বাতুলঃ। বিষবৈদ্যঃ। ইতি মেদিনী ॥

কথাপ্রাণঃ ( ত্রি ) কথকঃ। স তু নাটকবক্তা। ইতি শব্দরত্নাবলী ॥

কথিতঃ ( ত্রি ) উক্তঃ। কহা বলা ইত্যাদি ভাষা। যথা। কথিতো বংশবিস্তারো ভবতা সোমসূর্য্যয়োঃ। ইতি শ্রীভাগবতং ॥

কদ ই রোদনে। আহ্বানে। বৈক্লব্যে। ইতি কবিকল্পদ্রুমঃ ॥ ই কন্দ্যতে। ইতি দুর্গাদাসঃ ॥

কদ ষ ম ঙ বৈক্লব্যে। বিহ্বলীভাবে। ইতি কবিকল্পদ্রুমঃ ॥ ষ কদা। ম কদয়তি। ঙ কদতে। ইতি দুর্গাদাসঃ ॥

কদঃ ( পুং ) মেঘঃ। ইতি শব্দরত্নাবলী ॥

কদকঃ ( পুং ) বিতানং। চাঁদোয়া ইতি ভাষা। ইতি হেমচন্দ্রঃ ॥

কদধ্বা [ ন্ ] ( পুং ) নিন্দিতপথঃ। তৎপর্য্যায়ঃ। ব্যধ্বঃ ২ দুরধ্বঃ ৩ বিপথঃ ৪ কাপথঃ ৫। ইত্যমরঃ ॥

কদনং ( ক্লী ) পাপং। মর্দ্দঃ। যুদ্ধং। ইতি মেদিনী ॥ মারণং। ইতি ভূরিপ্রয়োগঃ জটাধরশ্চ ॥

কদন্নং ( ক্লী ) কুৎসিতান্নং। ইতি ব্যাকরণং ॥

কদম্বং ( ক্লী ) নিকুরম্বং। সমূহঃ। ইতি মেদিনী ॥

কদম্বঃ ( পুং ) বৃক্ষবিশেষঃ। কদম্ ইতি ভাষা। তৎপর্য্যায়ঃ। নীপঃ ২ প্রিয়কঃ ৩ হলিপ্রিয়ঃ ৪। ইত্যমরঃ ॥ কাদম্বঃ ৫। ইতি তট্টীকা ॥ ষট্পদেষ্টঃ ৬ প্রাবৃষেণ্যঃ ৭ হরিপ্রিয়ঃ ৮। ইতি রত্নমালা ॥ বৃত্তপুষ্পঃ ৯ সুরভিঃ ১০ ললনাপ্রিয়ঃ ১১ কাদম্বর্য্যঃ ১২ সীধুপুষ্পঃ ১৩ মহাঢ্যঃ ১৪ কর্ণপূরকঃ ১৫। অস্য গুণাঃ। তিক্তত্বং। কটুত্বং। কষায়ত্বং। বাতকফপিত্তার্ত্তিনাশিত্বং। শীতলত্বং। শুক্রবর্দ্ধনত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ অত্র নীপহলিপ্রিয়ৌ ধারাকদম্ববাচিনাবপি কদম্বসাম্যাৎ পঠিতৌ। যথা সাগ্গঃ ॥ নীপো মহাকদম্বঃ স্যাদ্ধারা কদম্ব ইত্যপি। দ্বিতীয়োহল্পপ্রসরশ্চ বৃত্তপুষ্পঃ কদম্বকঃ ॥ ইত্যস্য ভেদঃ। তথা রত্নেহপি। হারিদ্রস্তু রজো বলঃ। ধূলীকদম্বকা ধারা কদম্বঃ ষট্পদপ্রিয়ঃ ॥ বৃত্তপুষ্পঃ কেশরাঢ্যঃ প্রাবৃষেণ্যঃ কদম্বকঃ। নীপো মহা কদম্বোহপি তথা বহুফলো মতঃ ॥ ইত্যমরটীকায়াং

ভরতঃ ॥ * ॥ সর্ষপঃ। ইতি মেদিনী ॥ দেবতাড়কতৃণং। ইতি রত্নমালা ॥

কদম্বকং (ক্লী) সমূহঃ। ইত্যমরঃ ॥

কদম্বকঃ (পুং) হরিদ্রুঃ। সর্ষপঃ। ইতি রাজনির্ঘণ্টঃ॥ কদম্ববৃক্ষঃ। ইতি শব্দরত্নাবলী ॥

কদম্বদঃ (পুং) সর্ষপঃ। ইতি শব্দচন্দ্রিকা ॥

কদম্বপুষ্পা (স্ত্রী) মুণ্ডিতিকাবৃক্ষঃ। মুণ্ডিরী ইতি ভাষা। ইতি রত্নমালা ॥

কদম্বপুষ্পী (স্ত্রী) মহাশ্রাবণিকাবৃক্ষঃ। মুণ্ডিরী ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ শব্দচন্দ্রিকা চ ॥

কদম্বী (স্ত্রী) দেবদালীলতা। ইতি রাজনির্ঘণ্টঃ ॥

কদরং (ক্লী) পায়সভেদঃ। ইতি শব্দমালা ॥

কদরঃ (পুং) শ্বেতখদিরঃ। কাঁটা বাবলা ইতি ভাষা। তৎপর্য্যায়ঃ। সোমবল্কঃ ২। ইত্যমরঃ ॥ ব্রহ্মশল্যঃ ৩ খদিরোপমঃ ৪। ইতি রত্নমালা ॥ ক্রকচঃ। করাৎ ইতি ভাষা। ব্যাধিভেদঃ। কড়া জামুড়া ইতি ভাষা। ইতি মেদিনী ॥ তস্য লক্ষণং। শর্করোন্মথিতে পাদে ক্ষতে বা কণ্টকাদিতঃ। গ্রন্থিঃ কোলবদুৎসন্নো জায়তে কদরস্তু তৎ॥ ইতি নিদানং॥ তচ্চিকিৎসা যথা। দহেৎ কদরমুৎকৃত্য তৈলেন দহনেন বা। ইতি ভাবপ্রকাশঃ॥ অঙ্কুশঃ। ইতি হারাবলী ॥

কদর্য্যঃ (ত্রি) ক্ষুদ্রঃ। কৃপণঃ। ইত্যমরঃ ॥ আত্মানং ধর্ম্মকৃত্যঞ্চ পুত্ত্রদারাংশ্চ পীড়য়ন্। যো লোভাৎ সঞ্চিনোত্যর্থান্ স কদর্য্য ইতি স্মৃতঃ ॥ ইতি স্মৃতিঃ ॥

কদলঃ (পুং) কদলীবৃক্ষঃ। পৃশ্নীলতা। ইতি মেদিনী ॥

কদলকঃ (পুং) কদলীবৃক্ষঃ। ইতি শব্দরত্নাবলী ॥

কদলা (স্ত্রী) পৃশ্নী। চাকুলিয়া ইতি ভাষা। ডিম্বিকা। শাল্মলীবৃক্ষঃ। ইতি মেদিনী ॥

কদলী (স্ত্রী) স্বনামপ্রসিদ্ধৌষধিবিশেষঃ। কলা ইতি ভাষা। তৎপর্য্যায়ঃ। বারণবুসা ২ রম্ভা ৩ মোচা ৪ অংশুমৎফলা ৫ কাষ্ঠীলা ৬। ইত্যমরঃ ॥ কদলঃ ৭ বারণবুষা ৮ বারবুষা ৯। ইতি তট্টীকা ॥ সুফলা ১০ সুকুমারা ১১ সকৃৎফলা ১২ গুচ্ছফলা ১৩ হস্তিবিষাণী ১৪ গুচ্ছদন্তিকা ১৫ নিঃসারা ১৬ রাজেষ্টা ১৭ বালকপ্রিয়া ১৮ উরুস্তম্ভা ১৯ ভানুফলা ২০ বনলক্ষ্মীঃ ২১। কদলকঃ ২২ মোচকঃ ২৩ রোচকঃ ২৪ লোচকঃ ২৫ বারবুষা ২৬। ইতি শব্দরত্নাবলী ॥ বারণবল্লভা ২৭ চর্ম্মণ্বতী ২৮। ইতি জটাধরঃ ॥ অস্যাঃ পক্বফলগুণাঃ। কষায়ত্বং। মধুরত্বং। বলকারিত্বং। শীতলত্বং। পিত্তাস্রবিমর্দ্দনত্বং। গুরুতরত্বং। মন্দানলে অপথ্যত্বং। সদ্যঃ শুক্রবিবর্দ্ধনত্বং। ক্লমতৃষ্ণাহরত্বং। কান্তিদাতৃত্বং। দীপ্তাগ্নৌ সুখদত্বং। কফাময়করত্বং। সন্তর্পণত্বং। দুর্জ্জরত্বঞ্চ ॥ * ॥ মোচকগুণাঃ। হৃদ্যত্বং। কফকৃমিনাশিত্বং। কুষ্ঠপ্লীহজ্বরহরত্বং। অগ্নিদীপনত্বং। বস্তিশোধনত্বঞ্চ ॥ * ॥ অস্যা মূলগুণাঃ। বলকারিত্বং। বাতপিত্তনাশিত্বং। গুরুত্বঞ্চ ॥ * ॥ মাণিক্যমর্ত্ত্যামৃত-

চম্পকাদ্যা ভেদাঃ কদল্যা বহবোঽপি সন্তি। উক্তা গুণাস্তেষ্বধিকা ভবন্তি নির্দ্দোষতা স্যাল্লঘুতা চ তেষাং॥ ইতি রাজনির্ঘণ্টঃ ॥ * ॥ চম্পকাখ্যকদলীফল-গুণাঃ। বাতপিত্তহরত্বং। গুরুত্বং। শুক্র-বৃদ্ধিকারিত্বং। অতিশীতলত্বং। রসে পাকে মধুরত্বঞ্চ। দুগ্ধদধিতক্রতালযুক্তং কদলং দুর্জ্জরং। ইতি রাজবল্লভঃ ॥ * ॥ হরিণবিশেষঃ। পতাকা। ইতি মেদিনী ॥

• করিবৈজয়ন্তী। হাতির উপরের নিশান ইতি ভাষা। ইতি হলায়ুধঃ ॥

কদক্ষরং (ক্লী) কুৎসিতবর্ণঃ ॥

কদা ব্য কস্মিন্ কালে। কবে কখন ইতি ভাষা। ইতি ব্যাকরণং ॥

কদাকারঃ (ত্রি) কুৎসিতাকারঃ ॥

কদাখ্যং (ক্লী) কুষ্ঠবৃক্ষঃ। কুড়্ ইতি ভাষা। তৎপর্য্যায়ঃ। কৌবেরং ২ দুষ্টং ৩ বাপ্যং ৪। ইতি শব্দচন্দ্রিকা ॥

কদাচন ব্য কস্মিন্ কালে। কোন সময়ে ইতি ভাষা। ইতি ব্যাকরণং ॥

কদাচিৎ ব্য কস্মিংশ্চিৎ কালে। তৎপর্য্যায়ঃ। জাতু ২। ইত্যমরঃ ॥ কর্হিচিৎ ৩। ইতি হেমচন্দ্রঃ ॥

কদুষ্ণং (ক্লী) ঈষদুষ্ণং। তৎপর্য্যায়ঃ। কোষ্ণং ২ কবোষ্ণং ৩ মন্দোষ্ণং ৪। তদ্বতি ত্রি। ইত্যমরঃ ॥

কদ্ড কার্কশ্যে। তবর্গতৃতীয়োপধঃ। ক্বিপি সংযোগান্তলোপে কদ্। ইতি। কড্ডতি পদ্মমৃণালং কর্কশং স্যাদিত্যর্থঃ। ইতি দুর্গাদাসঃ ॥

কদ্রথঃ (পুং) কুৎসিতরথঃ। ইতি ব্যাকরণং ॥

কদ্রুঃ (পুং) পিঙ্গলবর্ণঃ। তদ্বতি ত্রি। ইত্যমরঃ ॥

কদ্রুঃ (স্ত্রী) নাগমাতা। ইতি মেদিনী ॥ সা তু দক্ষকন্যা কশ্যপপত্নী চ। ইতি পুরাণং ॥

কদ্রুপুত্রঃ (পুং) নাগঃ। ইতি শব্দচন্দ্রিকা ॥

কদ্রুসুতঃ (পুং) নাগঃ। তৎপর্য্যায়ঃ। কাদ্রবেয়ঃ ২। ইতি শব্দরত্নাবলী ॥ কশ্রু-কালুঃ ৩ কদ্রুপুত্রঃ ৪। ইতি শব্দচন্দ্রিকা ॥

কদ্বদঃ (ত্রি) কুৎসিতবক্তা। তৎপর্য্যায়ঃ। গর্হ্যবাদী ২। ইত্যমরঃ ॥ দুর্ব্বাক্ ৩। অতিকুৎসিতঃ। ইতি হেমচন্দ্রঃ ॥

কন ঈ ঞি প্রীতৌ। গতৌ। দ্যুতৌ। ইতি কবিকল্পদ্রুমঃ ॥ ঈ ঞি কান্তোঽস্তি। ইতি দুর্গাদাসঃ ॥

কনকং (ক্লী) স্বর্ণং। ইত্যমরঃ ॥

কনকঃ (পুং) পলাশবৃক্ষঃ। নাগকেশরবৃক্ষঃ। ধুস্তূরবৃক্ষঃ। কাঞ্চনালবৃক্ষঃ। কালীয়বৃক্ষঃ। চম্পকবৃক্ষঃ। ইতি মেদিনী ॥ কাসমর্দ্দ-বৃক্ষঃ। কণগুগ্গুলুবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥ লাক্ষাতরুঃ। ইতি শব্দমালা ॥

কনকদণ্ডকং (ক্লী) রাজচ্ছত্রং। ইতি ত্রিকাণ্ডশেষঃ

কনকপলঃ (পুং) পলপরিমাণং। তত্ত্ব সুবর্ণাদিপরিমাণকষোড়শমাষকং। তৎপর্য্যায়ঃ। কুরুবিস্তঃ ২। ইতি হারাবলী ॥

কনকপ্রভা (স্ত্রী) মহাজ্যোতিষ্মতী। ইতি রাজনির্ঘণ্টঃ ॥

কনকপ্রসবা (স্ত্রী) স্বর্ণকেতকী। ইতি রাজনির্ঘণ্টঃ ॥

কনকরম্ভা (স্ত্রী) সুবর্ণকদলী। ইতি রাজনির্ঘণ্টঃ ॥

কনকরসঃ (পুং) হরিতালং। ইতি রাজনির্ঘণ্টঃ ॥

কনকলোদ্ভবঃ (পুং) রালঃ। ধুনা ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ ॥

কনকক্ষারঃ (পুং) টঙ্কণঃ। সোয়াগা ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ ॥

কনকাচলঃ (পুং) অস্তাচলঃ। সুমেরুপর্ব্বতঃ। ইতি সিদ্ধান্তশিরোমণিঃ ॥ দানবিশেষঃ। ইতি স্মৃতিঃ ॥

কনকাধ্যক্ষঃ (পুং) সুবর্ণরক্ষকঃ। তৎপর্য্যায়ঃ। ভৌরিকঃ ২। ইত্যমরঃ

কনকারকঃ (পুং) কোবিদারবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কনকালুকা (স্ত্রী) স্বর্ণকলসঃ। তৎপর্য্যায়ঃ। ভৃঙ্গারঃ ২। ইত্যমরঃ ॥

কনকাহ্বং (ক্লী) নাগকেশরপুষ্পং। ইতি রাজনির্ঘণ্টঃ ॥

কনকাহ্বয়ঃ (পুং) ধুস্তূরবৃক্ষঃ। ইত্যমরঃ ॥ নাগকেশরবৃক্ষঃ। ইতি শব্দচন্দ্রিকা ॥

কননঃ (ত্রি) কাণঃ। ইতি হেমচন্দ্রঃ ॥

কনিষ্ঠঃ (ত্রি) অতিযুবা। অল্পঃ। পশ্চাজ্জাতঃ। তৎপর্য্যায়ঃ। জঘন্যজঃ ২ যবীয়ান্ ৩ অবরজঃ ৪ অনুজঃ ৫। ইত্যমরঃ ॥ কনীয়ান্ ৬ কন্যসঃ ৭ যবিষ্ঠঃ ৮। ইতি তট্টীকাসারসুন্দরী ॥

কনিষ্ঠকং (ক্লী) শূকতৃণং। ইতি রাজনির্ঘণ্টঃ ॥

কনিষ্ঠা (স্ত্রী) ক্ষুদ্রাঙ্গুলিঃ। কড়ে আঙ্গুল ইতি ভাষা। ইত্যমরমেদিনীকরৌ ॥ ধীরাদিতিস্থণাং দ্বিধাভেদান্তর্গতনায়িকাবিশেষঃ। অস্যা লক্ষণং। পরিণীতত্বে সতি ভর্ত্তুর্ন্যূনস্নেহা। ইতি রসমঃ

কনী (স্ত্রী) কন্যা। ইতি হেমচন্দ্রঃ ॥

কনীচিঃ (স্ত্রী) গুঞ্জা। কুঁচ ইতি ভাষা। ইতি শব্দরত্নাবলী ॥ পুষ্পযুক্তলতা। শকটঃ। ইত্যুণাদিকোষঃ ॥ মূর্দ্ধন্যণমধ্যোঽপি পাঠঃ ॥

কনীনিকা (স্ত্রী) চক্ষুস্তারা। কনিষ্ঠাঙ্গুলিঃ। ইতি মেদিনী ॥

কনীনী (স্ত্রী) কনিষ্ঠাঙ্গুলিঃ। ইত্যমরটীকা ॥

কনীয়সং (ক্লী) তাম্রং। ইতি হেমচন্দ্রঃ ॥

কনীয়ান্ [স্] (ত্রি) অনুজঃ। অতি যুবা। অত্যল্পঃ। ইতি মেদিনী ॥

কন্তুঃ (পুং) কামদেবঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ হৃদয়ং। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ ॥

কন্থা (স্ত্রী) স্যূতকর্পটঃ। কাঁথা ইতি ভাষা। ইতি স্ত্রীলিঙ্গসংগ্রহে অমরঃ ॥ মৃণ্ময়ভিত্তিঃ। কাঁথ্ ইতি ভাষা। ইতি মেদিনী ॥ উসীনরাখ্যজনপদপ্রসিদ্ধগ্রামাণাং নামসু বিষয়ভূতেষু ষষ্ঠ্যন্তাৎ পরা কন্থা ক্লীবে স্যাৎ। যথা সৌসমীনাং কন্থা সৌসমিকন্থং। আহ্বীনাং কন্থা আহ্বিকন্থং। ইত্যমরটীকায়াং ভরতঃ ॥

কন্থারী (স্ত্রী) বৃক্ষবিশেষঃ। তৎপর্য্যায়ঃ। কন্থরী ২ কন্থা ৩ দুর্দ্ধর্ষা ৪ তীক্ষ্ণকণ্টকা ৫ তীক্ষ্ণগন্ধা ৬ ক্রূরগন্ধা ৭ দুষ্প্রবেশা ৮। অস্যা গুণাঃ। কটুত্বং। তিক্তত্বং। উষ্ণত্বং।

কফবাতশোথরক্তগ্রন্থিজ্বরনাশিত্বং। দীপনত্বং। রুচিকারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

কন্দং (ক্লী পুং) শূরণঃ। শস্যমূলং। ইতি মেদিনী॥ গৃঞ্জনং। ইতি রাজনির্ঘণ্টঃ॥

কন্দঃ (পুং) মেঘঃ। ইতি মেদিনী॥ যোনিরোগবিশেষঃ। তস্য নিদানলক্ষণে। যথা। দিবাস্বপ্নাদতিক্রোধাদ্ব্যায়ামাদতিমৈথুনাৎ। ক্ষতাচ্চ নখদন্তাদ্যৈর্বাতাদ্যাঃ কুপিতা যদা॥ পূযশোণিতসঙ্কাশং লকুচাকৃতিসন্নিভং। উৎপদ্যতে যদা যোনৌ নাম্না কন্দস্তু যোনিজঃ॥ স চতুর্বিধঃ। বাতিকঃ ১ পৈত্তিকঃ ২ শ্লৈষ্মিকঃ ৩ সান্নিপাতিকশ্চ ৪। এষাং যথাক্রমং লক্ষণানি। রূক্ষং বিবর্ণং স্ফুটিতং বাতিকং তং বিনির্দ্দিশেৎ। দাহরাগজ্বরযুতং বিদ্যাৎ পিত্তাত্মকন্তু তং॥ নীলপুষ্পপ্রতীকাশং কণ্ডুমন্তং কফাত্মকং। সর্ব্বলিঙ্গসমাযুক্তং সন্নিপাতাত্মকং বিদুঃ॥ সন্নিপাতাত্মকোঽসাধ্যঃ শেষাঃ কৃচ্ছ্রপ্রসাধনাঃ। ইতি মাধবকরঃ॥ তচ্চিকিৎসা যোনিশব্দে দ্রষ্টব্যা॥

কন্দগুড়ূচী (স্ত্রী) গুড়ূচীবিশেষঃ। তৎপর্য্যায়ঃ। কন্দোদ্ভবা ২ কন্দামৃতা ৩ বহুচ্ছিন্না ৪ বহুরুহা ৫ পিণ্ডালুঃ ৬ কন্দরোহিণী ৭। ইতি রাজনির্ঘণ্টঃ॥

কন্দটং (ক্লী) শ্বেতোৎপলং। সাদা সুঁদি ইতি ভাষা। ইতি শব্দরত্নাবলী॥

কন্দফলা (স্ত্রী) ক্ষুদ্রকারবেল্লী। ইতি রাজনির্ঘণ্টঃ॥

কন্দমূলং (ক্লী) মূলকং। ইতি রাজনির্ঘণ্টঃ॥

কন্দরং (ক্লী) আর্দ্রকং। ইতি রাজনির্ঘণ্টঃ॥

কন্দরঃ (পুং স্ত্রী) গুহা। ইতি মেদিনী॥ কৃত্রিমোঽকৃত্রিমো বা সজলো নির্জলো বা গুহাকারো গিরিনিতম্বদেশঃ। ইতি ভরতঃ॥ তৎপর্য্যায়ঃ। দরী ২ কন্দরা ৩। ইত্যমরঃ॥ কন্দরী ৪। ইতি পঞ্জিকা॥ দরঃ ৫। ইতি স্বামী॥

কন্দরঃ (পুং) অঙ্কুশঃ। ইতি মেদিনী॥

কন্দরা (স্ত্রী) গুহা। ইত্যমরঃ॥

কন্দরাকরঃ (পুং) পর্ব্বতঃ। ইতি হারাবলী॥

কন্দরালঃ (পুং) গর্দ্দভাণ্ডবৃক্ষঃ। প্লক্ষবৃক্ষঃ। ইতি মেদিনী॥ আখোটবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কন্দরালকঃ (পুং) প্লক্ষবৃক্ষঃ। ইতি শব্দরত্নাবলী॥

কন্দরী (স্ত্রী) গুহা। ইত্যমরঃ॥

কন্দরোদ্ভবা (স্ত্রী) ক্ষুদ্রপাষাণভেদীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কন্দর্পঃ (পুং) কামদেবঃ। ইত্যমরঃ॥ ধ্রুবকভেদঃ। যথা। ত্রয়োবিংশতিবর্ণাঙ্ঘ্রি-র্ধ্রুবঃ কন্দর্পসংজ্ঞকঃ। বীরে বা করুণে বা স্যাৎ খণ্ডতালে বিধীয়তে॥ ইতি সঙ্গীতদামোদরঃ॥

কন্দর্পকূপঃ (পুং) যোনিঃ। ইতি জটাধরঃ॥

কন্দর্পজীবঃ (পুং) কামবৃদ্ধিনামবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কন্দর্পমুষলঃ (পুং) লিঙ্গঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কন্দর্পশৃঙ্খলঃ (পুং) শৃঙ্গারবন্ধবিশেষঃ। তস্য লক্ষণং। নারী পদদ্বয়ং স্থাপ্য কান্তস্যোরুদ্বয়োপরি। কটিঞ্চেদ্দোলয়েদাশু বন্ধঃ কন্দর্পশৃঙ্খলঃ॥ ইতি রতিমঞ্জরী॥

কন্দলং (ত্রি) কপালঃ। উপরাগঃ। নবাঙ্কুরঃ। কলধ্বনিঃ। ইতি মেদিনী ॥ অপবাদঃ। ইতি শব্দরত্নাবলী ॥

কন্দলঃ (পুং) কনকং। যুদ্ধং। কপালঃ ইতি ধরণী ॥

কন্দলতা (স্ত্রী) মালাকন্দঃ। ইতি রাজনির্ঘণ্টঃ ॥

কন্দলী (স্ত্রী) মৃগবিশেষঃ। যস্য চর্ম্ম ব্যবহ্রিয়তে। গুল্মপ্রভেদঃ। কদলী। ইতি মেদিনী ॥ পতাকা। ইতি ত্রিকাণ্ডশেষঃ ॥ পদ্মবীজং। ইতি রাজনির্ঘণ্টঃ ॥

কন্দলীকুসুমং (ক্লী) শিলীন্ধ্রং। ইতি জটাধরঃ ॥

কন্দবর্দ্ধনঃ (পুং) শূরণঃ। ইতি রাজনির্ঘণ্টঃ॥

কন্দবল্লী (স্ত্রী) বন্ধ্যাকর্কোটকী। ইতি রাজনির্ঘণ্টঃ ॥

কন্দবহুলা (স্ত্রী) ত্রিপর্ণিকা। ইতি রাজনির্ঘণ্টঃ ॥

কন্দশূরণঃ (পুং) ওল্লঃ। ইতি রাজনির্ঘণ্টঃ ॥

কন্দসংজ্ঞং (ক্লী) যোনিরক্তরোগবিশেষঃ। তৎপর্য্যায়ঃ। যোন্যর্শঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥ তস্য নিদানাদি কন্দশব্দে দ্রষ্টব্যং॥

কন্দসারং (ক্লী) নন্দনবনং। ইতি ত্রিকাণ্ডশেষঃ ॥

কন্দাঢ্যঃ (পুং) ধরণীকন্দঃ। ইতি রাজনির্ঘণ্টঃ ॥

কন্দার্হঃ (পুং) শূরণঃ। ইতি রাজনির্ঘণ্টঃ ॥

কন্দালুঃ (পুং) কাসালুঃ। ধরণীকন্দঃ। ত্রিপর্ণিকা। ইতি রাজনির্ঘণ্টঃ ॥

কন্দিরী (স্ত্রী) লজ্জালুবৃক্ষঃ। ইতি বৈদ্যকং ॥

কন্দী [ন্] (পুং) শূরণঃ। ইতি রাজনির্ঘণ্টঃ॥

কন্দুঃ (পুং স্ত্রী) লৌহময়পাকপাত্রং। তাওয়া ইতি লোহতা ইতি চ ভাষা। তৎপর্য্যায়ঃ স্বেদনী ২। ইত্যমরঃ ॥

কন্দুকঃ (পুং) গেণ্ডুকঃ। গেঁডু ইতি ভাষা। ইত্যমরঃ ॥

কন্দুপক্বং (ক্লী) জলোপসেকং বিনা কেবলপাত্রে যৎ বহ্নিনা পক্বং ভৃষ্টতণ্ডুলাদি। যথা। কন্দুপক্বানি তৈলেন পায়সং দধি শক্তবঃ। দ্বিজৈরেতানি ভোজ্যানি শূদ্রগেহকৃতান্যপি ॥ ইতি তিথ্যাদিতত্ত্বে কূর্ম্মপুরাণং ॥

কন্দোটং (ক্লী) নীলোৎপলং। ইতি শব্দরত্নাবলী ॥

কন্দোটঃ (পুং) শুক্লোৎপলং। ইতি শব্দরত্নাবলী ॥

কন্দোতঃ (পুং) কুমুদং। ইতি ত্রিকাণ্ডশেষঃ ॥

কন্ধঃ (পুং) মেঘঃ। ইতি শব্দরত্নাবলী ॥

কন্ধরঃ (পুং) মেঘঃ। ইতি মেদিনী ॥ মারিষবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥ গ্রীবা। ইত্যমরটীকাসারসুন্দরী ॥

কন্ধরা (স্ত্রী) গ্রীবা। ইত্যমরঃ ॥

কন্ধিঃ (স্ত্রী) গ্রীবা। সমুদ্রে পুং। ইতি রাজনির্ঘণ্টঃ ॥

কন্নং (ক্লী) পাতকং। মূর্চ্ছা। ইতি শব্দমালা ॥ কল্পমিতি চ পাঠঃ ॥

কন্যকা (স্ত্রী) কুমারী। ইতি ত্রিকাণ্ডশেষঃ ॥ যথা। অষ্টবর্ষা ভবেদ্গৌরী নববর্ষা চ রোহিণী। দশমে কন্যকা প্রোক্তা অত ঊর্দ্ধং রজস্বলা ॥ ইতি স্মৃতিঃ ॥

পরকীয়ানায়িকাবিশেষঃ। যথা। অপ্রকট-পরপুরুষানুরাগা পরকীয়া। সা চ দ্বিবিধা পরোঢ়া কন্যকা চ। কন্যায়াঃ পিত্রাদ্যধীনতয়া পরকীয়ত্বং। অস্যা গুপ্তৈব সকলা চেষ্টা। ইতি রসমঞ্জরী ॥

কন্যকাজাতঃ (পুং স্ত্রী) অবিবাহিতাপুত্রঃ। তৎপর্য্যায়ঃ। কানীনঃ ২। ইত্যমরঃ ॥

কন্যকাপতিঃ (পুং) জামাতা। ইতি শব্দরত্নাবলী ॥

কন্যসঃ (পুং) কনিষ্ঠভ্রাতা। ইত্যমরটীকাসারসুন্দরী ॥

কন্যসা (স্ত্রী) কনিষ্ঠভগিনী। ইত্যমরটীকা ॥

কন্যা (স্ত্রী) কুমারী। ইত্যমরঃ ॥ সা তু দশমবর্ষীয়া। ইতি স্মৃতিঃ ॥ নারী। ওষধীবিশেষঃ। ঘৃতকুমারী ইতি খ্যাতা। ইতি মেদিনী ॥ স্থূলৈলা। বারাহীকন্দঃ। বন্ধ্যাকর্কোটকী। ইতি রাজনির্ঘণ্টঃ ॥ * ॥ মেষাদিদ্বাদশরাশ্যন্তর্গতষষ্ঠরাশিঃ। সা তু উত্তরফল্গুনীশেষপাদত্রয় হস্তাসমুদায় যুক্তচিত্রাপ্রথমার্দ্ধেন ভবতি। তদধিষ্ঠাতৃদেবতায়াঃ স্বরূপং যথা। জলে নৌকাস্থশস্যাগ্নিধারিণী স্ত্রী। ইতি দীপিকা ॥ অপি চ। পাণ্ডুর্দ্বিপাৎ স্ত্রীদ্বিতনুর্যমাশানিশামরুৎশীতসমোদয়ক্ষ্মা। কন্যার্দ্ধশব্দা শুভভূমিবৈশ্যরূক্ষাল্পসঙ্গপ্রসবাশুভা চ ॥ ইতি নীলকণ্ঠীজাতকঃ ॥ * ॥ মতান্তরে সা তু শীর্ষোদয়া। দিনবলা। পিঙ্গলবর্ণা। দক্ষিণদিকৃস্বামিনী। বায়ুপ্রকৃতিঃ। শীতলস্বভাবা। শুদ্ধভূমিচরা। বৈশ্যবর্ণা। রূক্ষা। শ্লথাঙ্গা। খট্‌্ৎশব্দা। অল্পসন্তানা। অল্পপুংসঙ্গা চ ॥ * ॥ তত্র জাতফলং। বেদশাস্ত্রে শ্রদ্ধাবান্ স্থানরোষে খেদিতঃ ভার্য্যায়াং সদা বিরসশ্চ। ইতি জ্যোতিষং ॥ * ॥ জন্মকালীনচন্দ্রাশ্রিতৈতদ্রাশিফলং। যুবতিগে শশিনি প্রমদাজনপ্রবলকেলিবিলাসকুতূহলৈঃ। বিমলশীলযুতা জনোৎসবৈঃ সুবিধিনা বিধিনা সহিতঃ পুমান্ ॥ ইতি কোষ্ঠীপ্রদীপঃ ॥ * ॥ তস্যা উদয়ে তন্নামকলগ্নং ভবতি। তস্য গণিতপ্রাপ্তপরিমাণং দশব্যঙ্গুলাধিকপঞ্চাঙ্গুলপ্রভে দেশে বর্ত্তমানোনবিংশায়নাংশে ঊনত্রিংশৎপলাধিকপঞ্চদণ্ডাঃ। ইতি জ্যোতিষং ॥ * ॥ তত্র জাতফলং। কন্যালগ্নোদ্ভবো মর্ত্ত্যো নানাশাস্ত্রবিশারদঃ। সৌভাগ্যগুণসম্পন্নঃ সুন্দরঃ সুরতপ্রিয়ঃ ॥ ইতি কোষ্ঠীপ্রদীপঃ ॥ সুতা। তস্যা বিবাহং বিনান্যসংস্কারকর্ম্মণি বৃদ্ধিশ্রাদ্ধনিষেধো যথা। কন্যায়া নিষ্ক্রমো নাস্তি বৃদ্ধিশ্রাদ্ধং ন বিদ্যতে। নামান্নপ্রাশনং চূড়াং কুর্য্যাৎ স্ত্রীণামমন্ত্রকং ॥ ইতি। জাতকর্ম্মাদিচূড়ান্তং কুমার্য্যাশ্চাপ্যমন্ত্রকং। কর্ত্তব্যং পঞ্চভির্ব্বর্ণৈরেকং নিষ্ক্রমণং বিনা ॥ ইতি চ মহানির্ব্বাণতন্ত্রে নবমোল্লাসঃ ॥

কন্যাকা (স্ত্রী) কুমারী। ইতি শব্দরত্নাবলী ॥

কন্যাকুব্জঃ (পুং) কান্যকুব্জদেশঃ। ইতি হেমচন্দ্রঃ ॥

কন্যাটঃ (পুং) বাসগৃহং। ইতি ত্রিকাণ্ডশেষঃ ॥

কন্যাদানং (ক্লী) বরায় কন্যাসম্প্রদানং তদ্দানফলাদি যথা। যম উবাচ। কন্যাং যে তু প্রযচ্ছন্তি যথাশক্ত্যা স্বলঙ্কৃতাং

ব্রহ্মদেয়াং দ্বিজশ্রেষ্ঠ ব্রহ্মলোকং ব্রজন্তি তে ॥ কন্যাদানস্তু সর্ব্বেষাং দানানামুত্তমং স্মৃতং ॥ * ॥ তদ্‌গ্রহণে দশকুলত্যাগো যথা। মহান্ত্যপি সমৃদ্ধানি গোঽজাবিধন-ধান্যতঃ। স্ত্রীসম্বন্ধে দশৈমানি কুলানি পরিবর্জয়েৎ ॥ হীনজাতিষু পাষণ্ডে মুনে উদ্বেগকারিণাং। ছদ্মাময়সদাবাচ্যচিত্রি-কুষ্ঠিকুলানি চ ॥ যস্যাস্তু ন ভবেৎ ভ্রাতা ন চ বিজ্ঞায়তে পিতা। নোপযচ্ছেত তাং প্রাজ্ঞঃ পুত্রিকাধর্ম্মশঙ্কয়া ॥ ততোঽষ্টপ্রকারবিবাহানন্তরং। কন্যাং যে তু প্রযচ্ছন্তি যথাশক্ত্যা স্বলঙ্কৃতাং। বিবাহকালে সংপ্রাপ্তে যথোক্তে সদৃশে বরে ॥ ক্রমাৎ ক্রমং ক্রতুশতমনুপূর্ব্বং লভন্তি তে। শ্রুত্বা কন্যাপ্রদানন্তু পিতরঃ প্রপিতামহাঃ ॥ বিমুক্তাঃ সর্ব্বপাপেভ্যো ব্রহ্মলোকং ব্রজন্তি তে। ব্রাহ্মেণ তু বিবাহেন যস্তু কন্যাং প্রযচ্ছতি ॥ ব্রহ্ম-লোকং ব্রজেচ্ছীঘ্রং ব্রহ্মাদ্যৈঃ পূজিতঃ সুরৈঃ। দিব্যেন তু বিবাহেন যস্তু কন্যাং প্রযচ্ছতি ॥ ভিত্বা দ্বারন্তু সূর্য্যস্য স্বর্গ-লোকঞ্চ গচ্ছতি। গান্ধর্ব্বেণ বিবাহেন যস্তু কন্যাং প্রযচ্ছতি ॥ গন্ধর্ব্বলোকমাসাদ্য ক্রীড়তে দেববচ্চিরং। শুল্কেন দত্ত্বা যো কন্যাং তাং পশ্চাৎ সম্যগর্চ্চয়েৎ ॥ স কিন্নরৈশ্চ গন্ধর্ব্বৈঃ ক্রীড়তে কালমক্ষয়ং। ন মন্যুং কারয়েত্তাসাং পূজ্যাশ্চ সততং গৃহে ॥ ব্রহ্মদেয়া বিশেষেণ ব্রাহ্মভোজ্যা সদা ভবেৎ। কন্যায়াং ব্রহ্মদেয়ায়া-মভুঞ্জন্ সুখমশ্নুতে ॥ অথ ভুঞ্জতি যো মোহাৎ ভুক্ত্বা স নরকং ব্রজেৎ। অপ্রজা-য়াঞ্চ কন্যায়াং ন ভুঞ্জীয়াৎ কদাচন ॥ দৌহিত্রস্য মুখং দৃষ্ট্বা কিমর্থমনুশোচসি। মহাসত্বসমাকীর্ণান্নাস্তি তে নরকাস্তয়ং ॥ তীর্ণস্ত্বং সর্ব্বদুঃখেভ্যঃ পরং স্বর্গমবা-প্স্যসি। দৌহিত্রস্য তু দানেন নন্দন্তি পিতরঃ সদা ॥ যৎকিঞ্চিৎ কুরুতে দানং তদানন্ত্যায় কল্প্যতে। মাতাপিতৃশ্চ বিজ্ঞেয়ং তচ্ছুভস্যাভিগামিনঃ ॥ মাতুঃ পিতুর্হিরণ্যস্য দৌহিত্রোঽর্দ্ধমবাপ্নুতে। দত্ত্বা কন্যাং ন শোচেত ক্ষুধিতাং মুদিতাং তথা ॥ নগ্নাং দুঃখাভিভূতাং বা তথৈব কৃপণাং কৃশাং। কুর্য্যান্মন্যুং নচৈবাস্যা আগতাঞ্চাপি পোষয়েৎ ॥ যদ্ভূতমর্থয়েৎ কিঞ্চিৎ সর্ব্বং তৎ প্রতিপাদয়েৎ। অপ্র-যচ্ছন্ পতেৎ ব্রহ্মন্ নরকে নাত্র সংশয়ঃ॥*॥ শোচন্তি যাময়ো যত্র বিনশ্যত্যাশু তৎ-কুলং। ন ভুঞ্জন্তি চ যত্রৈব নির্দহন্ত্যপ্র-পূজিতাঃ ॥ তস্মাদেতাঃ সমভ্যর্চ্চ্যা ভূষণা-চ্ছাদনাশনৈঃ। ভূতিকামৈর্নরৈর্নিত্যং সুত-যুক্তাস্তু সর্ব্বদা ॥ সংতৃপ্তাঃ স্যুস্তথা পূজ্যাঃ শ্রাদ্ধে চৈবোৎসবেষু চ। যস্মিন্নেবং কুলে নিত্যং কল্যাণং তত্র বৈ ধ্রুবং ॥ ইহ কীর্ত্তির্ভবেৎ স্বর্গে পরত্র দ্বিজসত্তম। তিল-রাশিঃ কৃতো যাবৎ দিবাকরসমং কৃতঃ ॥ বর্ষান্তে গৃহ্যমানস্তু তিল একো ভবেৎ যদা। সোঽক্ষয়ং লভতে তাবৎ ব্রহ্মলোকং সনা-তনং ॥ শতগব্যাঃ প্রমাণেন সুকৃতে রোম-সঞ্চয়ে। বিশীর্য্যতে তু বা লোকং বর্ষে পূর্ণে সুতাপ্রদঃ ॥ তাবৎ স্বর্গং লভেৎ

সোঽপি যাবল্লোম্নশ্চ সংক্ষয়ঃ। মহীদাতুশ্চ গোদাতুঃ কন্যাদাতুস্ত্রয়ো রথাঃ ॥ কন্যা-দাত্রনুগাঃ পশ্চাৎ সমং যান্তি ত্রয়ো রথাঃ। কন্যাদানং দরিদ্রস্য যো দদাতি সুসৎ-কৃতৈঃ ॥ পূর্ব্বং ধর্ম্মমবাপ্নোতি যথাবৎ বিধিকল্পিতং। তস্মাৎ কন্যা প্রযত্নেন দাতব্যা শ্রেয় ইচ্ছতা ॥ ইত্যাদ্যে বহ্নি-পুরাণে কন্যাদাননামাধ্যায়ঃ ॥

কন্যাপতিঃ (পুং) জামাতা। ইতি জটাধরঃ ॥

কন্যাপালঃ (পুং) পালবণিক্। শূদ্রজাতি-বিশেষঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

কন্যারামঃ (পুং) বুদ্ধভেদঃ। ইতি ত্রিকাণ্ড-শেষঃ ॥

কন্যিকা (স্ত্রী) কন্যকা। ইতি শব্দরত্নাবলী ॥

কন্যুষং (ক্লী) হস্তপুচ্ছঃ। হাতের পোঁছা ইতি ভাষা। ইতি হারাবলী ॥

কপ চলনে। সৌত্রধাতুরয়ং। ইতি কবি-কল্পদ্রুমঃ ॥ কপোলঃ। ইতি দুর্গাদাসঃ ॥

কপ ই ঙ সঞ্চলনে। ইতি কবিকল্পদ্রুমঃ ॥ ই কম্প্যকে ॥ ঙ কম্পতে বায়ুনা বৃক্ষঃ। ইতি দুর্গাদাসঃ ॥

কপটঃ (পুং ক্লী) অযথার্থব্যবহারঃ। প্রতা-রণা। তৎপর্য্যায়ঃ। ব্যাজঃ ২ দম্ভঃ ৩ উপধিঃ ৪ ছদ্ম ৫ কৈতবং ৬। ইত্য-মরঃ ॥ কূটং ৭ কল্কং ৮ ছলং ৯ মিষং ১০ কৈরবং ১১। ইতি শব্দরত্নাবলী ॥

কপটিকঃ (ত্রি) কপটবিশিষ্টঃ। ইতি শব্দ-রত্নাবলী ॥

কপটিনী (স্ত্রী) চীড়ানামগন্ধদ্রব্যং। ইতি রাজনির্ঘণ্টঃ ॥

কপটী (স্ত্রী) পরিমাণবিশেষঃ। এক আঁকাড়্ ইতি ভাষা। ইতি শব্দরত্নাবলী ॥

কপটী [ন্] (ত্রি) কপটবিশিষ্টঃ। কপট-ধারী। ইতি শব্দরত্নাবলী ॥

কপটেশ্বরী (স্ত্রী) শ্বেতকণ্টকারী। ইতি রাজ-নির্ঘণ্টঃ ॥

কপর্দ্দঃ (পুং) শিবজটা। ইত্যমরঃ ॥ বরা-টকঃ। ইতি মেদিনী ॥

কপর্দ্দকঃ (পুং) শিবস্য জটাজূটঃ। বরাটকঃ। কড়ি ইতি ভাষা। ইতি মেদিনী ॥ শেষস্য পর্য্যায়ঃ। বরাটঃ ২ কপর্দ্দঃ ৩ বরাটিকা ৪ চরাচরঃ ৫ চরঃ ৬ বর্জ্যঃ ৭ বালক্রীড়কঃ ৮। অস্য গুণাঃ। কটুত্বং। তিক্তত্বং। উষ্ণত্বং। কর্ণশূলব্রণগুল্মশূলনেত্রদোষনাশিত্বঞ্চ॥ তস্য ভেদাঃ। স্বর্ণবর্ণা সিংহী ১ ধূম্রবর্ণা ব্যাঘ্রী ২ পীতপৃষ্ঠাসিতোদরা মৃগী ৩ শ্বেতবর্ণা হংসী ৪ নাতিদীর্ঘিকা বিদস্তা ৫। ইতি রাজনির্ঘণ্টঃ ॥

কপর্দ্দী [ন্] (পুং) শিবঃ। ইত্যমরঃ ॥

কপাটং (ত্রি) স্বনামখ্যাতদ্বারাচ্ছাদককাষ্ঠাদি। তৎপর্য্যায়ঃ। অররং ২। ইত্যমরঃ ॥ কবাটঃ ৩ কপাটী ৪ কবাটী ৫ অররী ৬ অররিঃ ৭। ইতি তট্টীকা ॥ দ্বারকণ্টকং ৮ অসারং ৯। ইতি শব্দরত্নাবলী ॥

কপালঃ (পুং ক্লী) শিরোঽস্থি। মাতার খুলি ইতি ভাসা। তৎপর্য্যায়ঃ। কর্পরঃ ২। ইত্যমরঃ ॥ ঘটাদেঃ খণ্ডং। খাপরা খোলা ইত্যাদি ভাষা ॥ সমূহঃ। ইতি মেদিনী ॥ কুষ্ঠরোগবিশেষঃ। ইতি হেমচন্দ্রঃ ॥ তস্য লক্ষণং। যথা। কৃষ্ণারুণকপালাভং

যদ্রূক্ষং পরুষং তনু। কাপালং তোদ-বহুলং তৎকুষ্ঠং বিষমং স্মৃতং ॥ ইতি মাধবকরঃ ॥

কপালনালিকা (স্ত্রী) তর্কুঃ। টেকো ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ ॥

কপালভৃৎ (পুং) শিবঃ। ইত্যমরঃ ॥

কপালিকা (স্ত্রী) দন্তরোগবিশেষঃ। তস্য লক্ষণং। কপালেম্বিব দীর্য্যৎস্থ দন্তানাং সৈব শর্করা। কপালিকেতি পঠিতা সদা দন্তবিনাশিনী ॥ ইতি মাধবকরঃ ॥ তস্যাশ্চিকিৎসা দন্তরোগশব্দে দ্রষ্টব্যা ॥

কপালিনী (স্ত্রী) দুর্গা। ইতি হেমচন্দ্রঃ ॥

কপালী [ন্] (পুং) মহাদেবঃ। ইতি হলায়ুধঃ ॥ স্বনামখ্যাতজাতিবিশেষঃ। স তু ব্রাহ্মণকন্যায়াং তীবরাজ্জাতঃ। ইতি পরাশরপদ্ধতিঃ ॥

কপিঃ (পুং) বানরঃ। ইত্যমরঃ ॥ সিহ্লকঃ। মধুসূদনঃ। ইতি মেদিনী ॥ ধাত্রিকা। ইতি শব্দমালা ॥ করঞ্জভেদঃ। ইতি শব্দচন্দ্রিকা ॥

কপিকচ্ছুঃ (স্ত্রী) বৃক্ষবিশেষঃ। আলকুশী ইতি ভাষা। কেওঁয়াচ ইতি হিন্দীভাষা। তৎপর্য্যায়ঃ। আত্মগুপ্তা ২ জড়া ৩ অধ্যণ্ডা ৪ কণ্ডূরা ৫ প্রাব্রষায়ণী ৬ ঋষ্যপ্রোক্তা ৭ শূকশিম্বিঃ ৮ মর্কটী ৯। ইত্যমরঃ ॥ স্বগুপ্তা ১০ অজহা ১১ কণ্ডুরা ১২ প্রাবৃষায়িণী ১৩ প্রাবৃষা ১৪ শূকশিম্বী ১৫ শূকশিম্বা ১৬ কপিকচ্ছুঃ ১৭। ইতি ভরতঃ ॥ স্বয়ংগুপ্তা ১৮ মর্হর্ষভী ১৯ লাঙ্গলী ২০ কুণ্ডলী ২১ চণ্ডা ২২ দুরভিগ্রহা ২৩ কপিরোমফলা ২৪ গুপ্তা ২৫ দুস্পর্শা ২৬ অজড়া ২৭ প্রাবৃষেণ্যা ২৮ বদরী ২৯ গুরুঃ ৩০ আর্ষভী ৩১ শিম্বী ৩২ বরাহিকা ৩৩ তীক্ষ্ণা ৩৪ রোমালুঃ ৩৫ বনশূকরী ৩৬ কীশরোমা ৩৭ রোমবল্লী ৩৮। শুকশিম্বিঃ ৩৯ বানরী ৪০ কপীকচ্ছুঃ ৪১ শুকপিণ্ডী ৪২ শূকপিণ্ডী ৪৩ কপিপ্রভা ৪৪। ইতি শব্দরত্নাবলী ॥ অস্যা গুণাঃ। স্বাদুরসত্বং। শুক্রবৃদ্ধিকারিত্বং। বাতক্ষয়পিত্তাস্রবিকৃতব্রণনাশিত্বং। শীতত্বঞ্চ। তস্যা বীজগুণৌ। বাতশমনত্বং। পরমবাজীকরত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

কপিকচ্ছুফলোপমা (স্ত্রী) জতুকালতা। ইতি রাজনির্ঘণ্টঃ ॥

কপিকচ্ছুরা (স্ত্রী) কপিকচ্ছুঃ। ইতি শব্দমালা ॥

কপিকন্দুকং (ক্লী) শিরোহস্থি। মাতার খুলি ইতি ভাষা। ইতি শব্দচন্দ্রিকা ॥

কপিকা (স্ত্রী) নীলসিন্দুবারবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কপিকোলিঃ (পুং) কোলিবিশেষঃ। শেয়াকুল ইতি ভাষা। ইতি রত্নমালা ॥

কপিচূড়া (স্ত্রী) আম্রাতকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কপিচূতঃ (পুং) আম্রাতকবৃক্ষঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

কপিজঃ (পুং) তুরুষ্কঃ। শিলারস ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ ॥

কপিজিহ্বিকা (স্ত্রী) তৈলপিপীলিকা। ইতি রাজনির্ঘণ্টঃ ॥

কপিঞ্জলঃ ( পুং ) চাতকপক্ষী। তন্মাংসগুণাঃ। লঘুত্বং। শীতত্বং। কফরক্তপিত্তনাশিত্বং। অগ্নিদাতৃত্বঞ্চ। ইতি রাজবল্লভঃ॥ পক্ষিবিশেষঃ। তৎপর্য্যায়ঃ। তেজলঃ ২। তস্য মাংসং শুক্রবৃদ্ধিকরং। ইতি রাজনির্ঘণ্টঃ॥ তিত্তিরিপক্ষী। ইতি ত্রিকাণ্ডশেষঃ॥

কপিতৈলং ( ক্লী ) তুরুষ্কনামগন্ধদ্রব্যং। ইতি ভাবপ্রকাশঃ॥

কপিত্থঃ ( পুং ) বৃক্ষবিশেষঃ। কৎবেল ইতি ভাষা। তৎপর্য্যায়ঃ। দধিত্থঃ ২ গ্রাহী ৩ মন্মথঃ ৪ দধিফলঃ ৫ পুষ্পফলঃ ৬ দন্তশঠঃ ৭। ইত্যমরঃ॥ কপিত্থঃ ৮। ইতি ভরতঃ॥ মালূরঃ ৯ মঙ্গল্যঃ ১০ নীলমল্লিকা ১১ গ্রাহিফলঃ ১২ চিরপাকী ১৩ গ্রন্থিফলঃ ১৪ কুচফলঃ ১৫ কপীষ্টঃ ১৬ গন্ধফলঃ ১৭ দন্তফলঃ ১৮ করভবল্লভঃ ১৯ কাঠিন্যফলঃ ২০ করঞ্জফলকঃ ২১। অস্যামফলগুণাঃ। অম্লত্বং। উষ্ণত্বং। কফনাশিত্বং। গ্রাহিত্বং। বায়ুবর্দ্ধকত্বং। কণ্ঠরোগজিহ্বাধিকজড়তাকারিত্বং। ত্রিদোষবর্দ্ধকত্বং। বিষহরত্বং। রোচকত্বঞ্চ। তৎপক্কফলগুণাঃ। দোষত্রয়হরত্বং। মধুরাম্লরসত্বং। গুরুত্বং। শ্বাসবমিশ্রমক্লমহরত্বং। হিক্কাপনোদক্ষমত্বং। গ্রাহিত্বং। রুচিপ্রদত্বং। ততঃ সর্ব্বদা সেব্যং। ইতি রাজনির্ঘণ্টঃ॥ কপিত্থমামং কণ্ঠঘ্নং বিষদং গ্রাহি বাতলং। মধুরাম্লকষায়ত্বাৎ সৌগন্ধ্যাচ্চ রুচিপ্রদং॥ ইতি রাজবল্লভঃ॥

কপিত্থত্বক্ ( ক্লী ) এলবালুকং। ইতি রাজ-

কপিত্থপর্ণী ( স্ত্রী ) বৃক্ষবিশেষঃ। কপিত্থানীতি খ্যাতা। তৎপর্য্যায়ঃ। বিরজা ২ সুরসা ৩ চিত্রপত্রিকা ৪। ইতি রত্নমালা॥

কপিত্থাস্যঃ ( পুং ) বানরবিশেষঃ। তৎপর্য্যায়ঃ। গোলাঙ্গূলঃ ২ দধিশোণঃ ৩ নগাটনঃ ৪। ইতি ত্রিকাণ্ডশেষঃ॥

কপিধ্বজঃ ( পুং ) অর্জ্জুনঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কপিনামা [ ন্ ] ( পুং ) সিহ্লকঃ। ইতি রত্নমালা॥

কপিপিপ্পলী ( স্ত্রী ) রক্তাপামার্গঃ। ইতি বৈদ্যকং॥ সূর্য্যাবর্ত্তবৃক্ষঃ। ইতি রত্নমালা॥

কপিপ্রভা ( স্ত্রী ) কপিকচ্ছুঃ। ইতি শব্দরত্নাবলী॥

কপিপ্রভুঃ ( পুং ) রঘুনাথঃ। ইতি শব্দরত্নাবলী॥

কপিপ্রিয়ঃ ( পুং ) আম্রাতকঃ। ইতি রাজনির্ঘণ্টঃ॥ কপিত্থঃ। ইতি জটাধরঃ॥

কপিরথঃ ( পুং ) শ্রীরামঃ। ইতি শব্দরত্নাবলী॥

কপিলঃ ( পুং ) মুনিবিশেষঃ। স তু জ্ঞানভক্তিসাংখ্যযোগপ্রচারার্থভগবদবতারঃ। কর্দ্দমপ্রজাপতেরৌরসাদ্দেবহূতিগর্ব্ভজাতঃ। ইতি শ্রীভাগবতং॥ অগ্নিঃ। কুক্কুরঃ। ইতি হেমচন্দ্রঃ॥ সিহ্লকনামগন্ধদ্রব্যং। ইতি রত্নমালা॥ পিঙ্গলবর্ণঃ। তদ্যুক্তে ত্রি। ইত্যমরঃ॥ নীলপীতঃ কপিলঃ। ইতি রভসঃ॥ কপিলো রোচনাচ্ছবিরিত্যন্যে। ইতি ভরতঃ॥

কপিলদ্যুতিঃ ( পুং ) সূর্য্যঃ। ইতি শব্দচন্দ্রিকা॥

কপিলদ্রাক্ষা ( স্ত্রী ) দ্রাক্ষাবিশেষঃ। তৎপর্য্যায়ঃ। মৃদ্বীকা ২ গোস্তনী ৩ কপিল-

ফলা ৪ অমৃতরসা ৫ দীর্ঘফলা ৬ মধুবল্লী ৭ মধুফলা ৮ মধুলী ৯ হরিতা ১০ হারহারা ১১ সুফলা ১২ মৃদ্বী ১৩ হিমোত্তরা ১৪ পথিকা ১৫ হৈমবতী ১৬ শতবীর্য্যা ১৭ কাশ্মরী ১৮। অস্যা গুণাঃ। মধুরত্বং। শীতত্বং। হৃদ্যত্বং। মদহর্ষদাতৃত্বং। দাহমূর্চ্ছাজ্বরশ্বাসতৃষ্ণাহৃল্লাসনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

কপিলদ্রুমঃ (পুং) কাক্ষীনামসুগন্ধিকাষ্ঠং। ইতি শব্দচন্দ্রিকা ॥

কপিলধারা (স্ত্রী) স্বর্ণদী। তীর্থভেদঃ ইতি

কপিলশিংশপা (স্ত্রী) শিংশপাবৃক্ষবিশেষঃ। তৎপর্য্যায়ঃ। কপিলা ২ পীতা ৩ সারিণী ৪ কপিলাক্ষী ৫ ভস্মগর্ব্বা ৬ কুশিংশপা ৭। অস্যা গুণাঃ। তিক্তত্বং। শীতবীর্য্যত্বং। আময়বাতপিত্তজ্বরচ্ছর্দ্দিহিক্কানাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

কপিলা (স্ত্রী) পুণ্ডরীকনামদিগ্‌গজপত্নী। ভস্মগর্ব্বা শিংশপা। রেণুকানাম গন্ধদ্রব্যং। ইত্যমরঃ ॥ গোবিশেষঃ। ইতি হেমচন্দ্রঃ ॥ সা তু স্বর্ণবর্ণা। ইতি পুরাণং ॥ গৃহকন্যা। শিংশপা। রাজরীতিঃ। ইতি রাজনির্ঘণ্টঃ ॥ নদীবিশেষঃ। যথা। কজ্জলাচলশৈলাত্তু পূর্ব্বস্মিন্ শুভ্রপর্ব্বতঃ। শচ্যা সহ পুরা রেমে যত্র শক্রঃ সুরেশ্বরঃ ॥ তৎপূর্ব্বস্যাং মহাদেবী নদী কপিলসংজ্ঞিতা। তস্যাং স্নাত্বা নরো গঙ্গাস্নানজং ফলমাপ্নুয়াৎ ॥ ইতি কালিকাপুরাণে ৮১ অধ্যায়ঃ ॥

কপিলাশ্বঃ (পুং) ইন্দ্রঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

কপিলাক্ষী (স্ত্রী) মৃগের্ব্বারুঃ। কপিলশিংশপা। ইতি রাজনির্ঘণ্টঃ ॥

কপিলোমফলা (স্ত্রী) কপিকচ্ছূঃ। ইতি রাজনির্ঘণ্টঃ ॥

কপিলোমা (স্ত্রী) রেণুকা। ইতি রাজনির্ঘণ্টঃ ॥

কপিলোহং (ক্লী) পিত্তলং। ইতি হেমচন্দ্রঃ ॥

কপিল্লিকা (স্ত্রী) গজপিপ্পলী। ইতি রত্নমালা ॥

কপিবক্ত্রঃ (পুং) নারদঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

কপিবল্লী (স্ত্রী) গজপিপ্পলী। ইত্যমরঃ ॥

কপিশঃ (পুং) শ্যাবঃ। কৃষ্ণপীতমিশ্রিতবর্ণঃ। তদ্‌যুক্তে ত্রি। ইত্যমরঃ ॥ সিহ্লকনাম গন্ধদ্রব্যং। ইতি মেদিনী ॥

কপিশাঞ্জনঃ (পুং) শিবঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

কপিশাপুত্রঃ (পুং) পিশাচঃ। ইতি শব্দমালা ॥

কপিশী (স্ত্রী) মাধবী। মদিরা। ইতি মেদিনী জটাধরশ্চ ॥

কপিশীকা (স্ত্রী) মদিরা। ইতি ত্রিকাণ্ডশেষঃ ॥

কপিশীর্ষং (ক্লী) প্রাকারাগ্রং। তৎপর্য্যায়ঃ। খোড়কশীর্ষকং ২ ক্রয়শীর্ষং ৩। ইতি ত্রিকাণ্ডশেষঃ ॥

কপিশীর্ষকং (ক্লী) হিঙ্গুলং। ইতি শব্দচন্দ্রিকা ॥

কপীকচ্ছূঃ (পুং) কপিকচ্ছূঃ। ইতি শব্দরত্নাবলী ॥

কপীজ্যঃ (পুং) ক্ষীরিকাবৃক্ষঃ। ইতি জটাধরঃ ॥

কপীতঃ (পুং) শ্বেতবুহ্নাবৃক্ষঃ। ইতি রত্নমালা ॥

কপীতনঃ ( পুং ) আম্রাতকবৃক্ষঃ। গর্দ্দভাণ্ডবৃক্ষঃ। শিরীষবৃক্ষঃ। ইত্যমরঃ॥ অশ্বত্থবৃক্ষঃ। ইতি মেদিনী॥ গুবাকবৃক্ষঃ। বিল্ববৃক্ষঃ। ইতি শব্দরত্নাবলী॥

কপীন্দ্রঃ ( পুং ) হনুমান্। ইতি শব্দরত্নাবলী॥

কপাষ্টঃ ( পুং ) রাজাদনীবৃক্ষঃ। কপিত্থঃ। ইতি রাজনির্ঘণ্টঃ॥

কপোতঃ ( পুং ) গৃহকপোতঃ। পায়রা ইতি ভাষা। তৎপর্য্যায়ঃ। কলরবঃ ২ পারাবতঃ ৩। ইত্যমরঃ॥ পারাপতঃ ৪ ছেদ্যঃ ৫ রক্তলোচনঃ ৬। ইতি রভসঃ॥ গৃহকুক্কুটঃ ৭। যথা। মার্জাররক্ষিতে দুঃখং যাদৃশং গৃহকুক্কুটে। ইতি প্রয়োগাৎ। ইতি সারসুন্দরী॥ বনকপোতঃ। ঘুঘু ইতি ভাষা। তৎপর্য্যায়ঃ। চিত্রকণ্ঠঃ ২। ইতি মেদিনী॥ কোকদেবঃ ৩ ধূসরঃ ৪ ধূম্রলোচনঃ ৫ দহনঃ ৬ অগ্নিসহায়ঃ ৭ ভীষণঃ ৮ গৃহনাশনঃ ৯। তম্মাংসগুণাঃ। বীর্য্যবলবৃদ্ধিকারিত্বং। স্বাদুত্বং। কফপিত্তাস্রনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ মধুরত্বং। শীতত্বং। কষায়ত্বং। বাতপিত্তনাশিত্বং। সার্ষপতৈলভর্জনেন বিরুদ্ধত্বঞ্চ। ইতি রাজবল্লভঃ॥

কপোতকং ( ক্লী ) সৌবীরাঞ্জনং। ইতি রাজনির্ঘণ্টঃ॥

কপোতচরণা ( স্ত্রী ) নলীনামগন্ধদ্রব্যং। ইতি জটাধরঃ॥

কপোতপালিকা ( স্ত্রী ) বিটঙ্কঃ। সৌধাদিপ্রান্তকাষ্ঠাদিরচিতপক্ষিস্থানং। পায়রার খোপ ইতি ভাষা। ইত্যমরঃ॥

কপোতপালী ( স্ত্রী ) কপোতপালিকা। ইতি হলায়ুধঃ॥

কপোতবঙ্কা ( স্ত্রী ) ব্রাহ্মীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কপোতবর্ণী ( স্ত্রী ) সূক্ষ্মৈলা। ইতি রাজনির্ঘণ্টঃ॥

কপোতবাণা ( স্ত্রী ) নলিকানামগন্ধদ্রব্যং। ইতি রাজনির্ঘণ্টঃ॥

কপোতসারং ( ক্লী ) স্রোতোঽঞ্জনং। ইতি রাজনির্ঘণ্টঃ॥

কপোতাঙ্ঘ্রিঃ ( স্ত্রী ) নলীনামগন্ধদ্রব্যং। ইত্যমরঃ॥

কপোতাভঃ ( পুং ) কপোতবর্ণঃ। ইতি হেমচন্দ্রঃ॥

কপোতারিঃ ( পুং ) শ্যেনপক্ষী। ইতি শব্দরত্নাবলী॥

কপোলঃ ( পুং ) সৃকতির্য্যক্সন্নিধিভাগঃ। গাল ইতি ভাষা। তৎপর্য্যায়ঃ। গণ্ডঃ ২। ইত্যমরঃ॥ গল্লঃ ৩। ইতি রাজনির্ঘণ্টঃ॥

কফঃ ( পুং ) শরীরস্থধাতুবিশেষঃ। তৎপর্য্যায়ঃ। শ্লেষ্মা ২ সংঘাতঃ ৩ সৌম্যধাতুঃ ৪ ঘনঃ ৫ বলী ৬। অস্য গুণাঃ। গুরুত্বং। সন্ধিবিশ্লেষকারিত্বং। মৃদুত্বং। প্রমর্দ্দনত্বং। স্নিগ্ধত্বং। কটুত্বং। শীতত্বং। জড়তাকারিত্বং। শুক্লত্বং। শীতে বসন্তে নিশামুখে পূর্ব্বাহ্নে ভুক্তে চ প্রকোপণত্বং। ইতি রাজনির্ঘণ্টঃ॥ * ॥ অস্য প্রকোপহেতুঃ। গুরুমধুররসাতিস্নিগ্ধদুগ্ধেক্ষুভক্ষ্যদ্রবদধিদিননিদ্রাপূপসর্পিঃপ্রপূরৈঃ। তুহিনপতনকালে শ্লেষ্মণঃ সংপ্রকোপঃ প্রভবতি

দিবসাদৌ ভুক্তমাত্রে বসন্তে ॥ * ॥ তস্য কর্ম্মাণি। স্তৈমিত্যং মধুরাস্যতা শিশিরতা শৌক্ল্যং প্রসেকো মলপ্রাচুর্য্যং স্থিরতা রসশ্চ লবণঃ কণ্ডুরতিস্বপ্নতা। আলস্যং চিরকারিতা কঠিনতা শোথারুচিস্নিগ্ধতা তন্দ্রাতৃপ্ত্যুপদেহকাসগুরুতা এতাঃ কফোত্থা রুজঃ ॥ * ॥ অস্য প্রশমতাকারণং। গুরুশীতমৃদুস্নিগ্ধমধুরস্থিরপিচ্ছিলাঃ। শ্লেষ্মণঃ প্রশমং যান্তি বিপরীতগুণৈর্গুণাঃ ॥ রুক্ষক্ষারকষায়তিক্তকটুকব্যায়ামনিষ্ঠীবনস্ত্রীসেবাধ্বনিযুদ্ধজাগররতিক্রীড়াপদাঘাতনং। ধূমাত্যুষ্ণশিরো বিরেকবমনস্বেদোপনাহাদিকং পানাহারবিহারভেষজমিদং শ্লেষ্মাণমুগ্রং জয়েৎ ॥*॥ স চ পঞ্চবিধো যথা। অবলম্বক ইতে ক্লেদকঃ শ্লেষকোঽপরঃ। বোধকস্তর্পকশ্চেতি শ্লেষ্মা পঞ্চবিধঃ স্মৃতঃ ॥ * ॥ এতেষাং লক্ষণানি যথা। কফধাম্নাস্ত শেষাণাং যৎ করোত্যবলম্বনং। ততোঽবলম্বকাখ্যাতিং শ্লেষ্মা প্রাপ্নোত্যুরঃস্থিতঃ ॥ ১ ॥ আমাশয়াশ্রিতঃ সোঽন্নক্লেদনাৎ ক্লেদকঃ স্মৃতঃ ॥ ২ ॥ শ্লেষকশ্লেষণাৎ সন্ধেঃ স চ সন্ধৌ ব্যবস্থিতঃ ॥ ৩ ॥ রসনাবস্থিতস্ত্বেষ বোধকো রসবোধনাৎ ॥ ৪ ॥ শিরসি প্রস্থিতশ্চাসৌ তর্পকো নেত্রতর্পণাৎ ॥ ৫ ॥ * ॥ অস্য স্থানানি। উরঃকণ্ঠশিরঃক্লোমপর্ব্বাণ্যামাশয়ো রসঃ। মেদো ঘ্রাণঞ্চ জিহ্বা চ কফস্থানমুরঃ পরং ॥ * ॥ তৎপ্রকৃতিকস্য লক্ষণং। গম্ভীরবুদ্ধিঃ স্থূলাঙ্গঃ স্নিগ্ধকেশো মহাবলঃ। স্বপ্নে জলাশয়ালোকী শ্লেষ্মপ্রকৃতিকো নরঃ ॥ * ॥ তস্যাবিকৃতস্য কর্ম্ম। স্নেহো বন্ধঃ স্থিরত্বঞ্চ গৌরবং বৃষতা বলং। ক্ষমা ধৃতিরলোভশ্চ কফকর্ম্মাবিকারজং ॥ * ॥ ইতি সুখবোধঃ ॥ ফেনঃ। যথা অব্ধিকফঃ ইত্যাদি ॥

কফকূর্চ্চিকা (স্ত্রী) লালা। লাল্ থুতু সিক্‌নি ইত্যাদি ভাষা। তৎপর্য্যায়ঃ। সৃণীকা ২ স্যন্দিনী ৩ লালা ৪ আস্যাসবঃ ৫। ইতি হেমচন্দ্রঃ ॥

কফঘ্নী (স্ত্রী) হপুষাভেদঃ। ইতি রাজনির্ঘণ্টঃ ॥

কফণিঃ (পুং স্ত্রী) কফোণিঃ। ইতি হেমচন্দ্রঃ ॥

কফবর্দ্ধনঃ (পুং) পিণ্ডীতগরবৃক্ষঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ শ্লেষ্মবৃদ্ধিকারকে ত্রি ইতি বৈদ্যকং ॥

কফবিরোধি (ক্লী) মরিচং। ইতি রাজনির্ঘণ্টঃ ॥

কফান্তকঃ (পুং) বর্ব্বূরবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কফারিঃ (পুং) শুণ্ঠী। ইতি রাজনির্ঘণ্টঃ ॥

কফী [ন্] (ত্রি) শ্লেষ্মযুক্তঃ। তৎপর্য্যায়ঃ। শ্লেষ্মলঃ ২ শ্লেষ্মণঃ ৩। ইত্যমরঃ ॥ গজে পুং। ইতি সারস্বতঃ ॥

কফেলূঃ (ত্রি) কফযুক্তঃ। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ ॥

কফোণিঃ (পুং) ভুজমধ্যগ্রন্থিঃ। কনুই ইতি ভাষা। তৎপর্য্যায়ঃ। কূর্পরঃ ২। ইত্যমরঃ ॥

কব ঋ ঙ স্তুতৌ। বর্ণে। ইতি কবিকল্পদ্রুমঃ ॥

বর্ণঃ শুক্লাদিক্রিয়া। ঋ অচকাবৎ। ও কবতে কবির্বিষ্ণুঃ। কবতে প্রতিমাং চিত্রকারঃ। ইতি দুর্গাদাসঃ॥

কবন্ধং (ক্লী) জলং। ইত্যমরঃ॥

কবন্ধঃ (পুং) রাহুঃ। রক্ষোবিশেষঃ। উদরং। ইতি মেদিনী॥

কবন্ধঃ (পুং ক্লী) ক্রিয়াযুক্তাপমূর্দ্ধকলেবরং। ইত্যমরঃ॥ যথা। কবন্ধাশ্ছিন্নশিরসঃ খড়্গশক্ত্যৃষ্টিপাণয়ঃ। ইতি দেবীমাহাত্ম্যং॥ অপিচ। নাগানামযুতং তুরঙ্গনিযুক্তং সার্দ্ধং রথানাং শতং পত্তীনাং দশকোটয়ো নিপতিতা একঃ কবন্ধো রণে। তাদৃক্ কোটিকবন্ধনর্ত্তনবিধৌ খেলচ্চলৎ খে শিরস্তেষাং কোটিনিপাতনে রঘুপতেঃ কোদণ্ডঘণ্টারবঃ॥ ইতি প্রাচীনাঃ॥

কবিত্থঃ (পুং) কপিত্থবৃক্ষঃ। ইত্যমরটীকা॥ কপিত্থঃ। ইত্যমরমালায়াং পাঠঃ॥

কবিলঃ (পুং) কপিলবর্ণঃ। ইতি ভরতো দ্বিরূপকোষশ্চ॥

কম উ ক ঙ স্পৃহি। ইতি কবিকল্পদ্রুমঃ॥ উ কমিত্বা কান্ত্বা। ক ঙ কাময়তে। অন্যে-ভ্বাদৌ পঠ্যমানস্যাপ্যস্য কিংকরণং কম ঋত ইত্যাদিনা বিহিতস্য ঞিঙো জ্ঞাপনার্থং। তেন অরে ঞিঙোঽপ্রাপ্তিপক্ষে অচকমত। চকমে কমিতা ইত্যাদি সিদ্ধং। ইতি দুর্গাদাসঃ॥

কম উ ঙ কান্তৌ। ইতি মুগ্ধবোধব্যাকরণং॥

কম্ ব্য জলং। শিরঃ। সুখং। মঙ্গলং। পাদপূরণং। ইতি শব্দরত্নাবলী॥

কমঠং (ক্লী) ভাণ্ডভেদঃ। তত্তু মুনীনাং জলপাত্রং। ইতি মেদিনী॥

কমঠঃ (পুং) কচ্ছপঃ। ইত্যমরঃ॥ বংশঃ। ইতি শব্দরত্নাবলী॥ দৈত্যবিশেষঃ। মুনিভাজনং। ইতি হেমচন্দ্রঃ॥ শল্লকী। ইতি ধরণী॥

কমঠী (স্ত্রী) কচ্ছপী। ইত্যমরঃ॥

কমণ্ডলুঃ (পুং ক্লী) সন্ন্যাসিনাং মৃৎকাষ্ঠাদিময়-পাত্রং। তৎপর্য্যায়ঃ। কুণ্ডী ২। ইত্যমরঃ॥ করকঃ ৩। প্লক্ষবৃক্ষঃ। ইতি মেদিনী॥

কমণ্ডলুতরুঃ (পুং) প্লক্ষবৃক্ষঃ। ইতি রত্নমালা॥

কমনং (ত্রি) কামুকং। অভিরূপং। ইতি মেদিনী॥

কমনঃ (পুং) কামঃ। অশোকবৃক্ষঃ। ইতি মেদিনী॥ ব্রহ্মা। ইতি হেমচন্দ্রঃ॥

কমনচ্ছদঃ (পুং) কঙ্কপক্ষী। ইতি হেমচন্দ্রঃ॥

কমনীয়ং (ত্রি) কামনাযোগ্যং। তৎপর্য্যায়ঃ। চারু ২ হারি ৩ রুচিরং ৪ মনোহরং ৫ বল্গু ৬ কান্তং ৭ অভিরামং ৮ বন্ধুরং ৯ বামং ১০ রুচ্যং ১১ সুষমং ১২ শোভনং ১৩ মঞ্জু ১৪ মঞ্জুলং ১৫ মনোরমং ১৬ সাধু ১৭ রম্যং ১৮ মনোজ্ঞং ১৯ পেশলং ২০ হৃদ্যং ২১ সুন্দরং ২২ কাম্যং ২৩ কম্রং ২৪ সৌম্যং ২৫ মধুরং ২৬ প্রিয়ং ২৭। ইতি হেমচন্দ্রঃ॥

কমন্ধং (ক্লী) কবন্ধং। জলং। ইত্যমরটীকায়াং রায়মুকুটঃ॥

কমরঃ (ত্রি) কামী। ইত্যুণাদিকোষঃ॥

কমলং (ক্লী) জলজপুষ্পবিশেষঃ। তৎপর্য্যায়ঃ।

পদ্মং ২ পাথোজং ৩ নলং ৪ নলিনং ৫ অম্ভোজং ৬ অম্বুজন্ম ৭ অম্বুজং ৮ শ্রীঃ ৯ অম্বুরুহং ১০ অম্বুপদ্মং ১১ সুজলং ১২ অম্ভোরুহং ১৩ সারসং ১৪ পঙ্কজং ১৫ সরসীরুহং ১৬ কুটপং ১৭ পাথোরুহং ১৮ পুষ্করং ১৯ বার্জ্জং ২০ তামরসং ২১ কুশেশয়ং ২২ কঞ্জং ২৩ কজং ২৪ অরবিন্দং ২৫ শতপত্রং ২৬ বিসকুসুমং ২৭ সহস্রপত্রং ২৮ মহোৎপলং ২৯ বারিরুহং ৩০ সরসিজং ৩১ সলিলজং ৩২ পঙ্কেরুহং ৩৩ রাজীবং ৩৪। অস্য গুণাঃ। শীতলত্বং। স্বাদুত্বং। রক্তপিত্তভ্রমার্ত্তিনাশিত্বং। সুগন্ধিত্বং। ভ্রান্তিসন্তাপশান্তিপরমতৃপ্তিকারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥*॥ জলং। তাম্রং। ক্লোম। ঔষধং। ইতি মেদিনী॥ সারসপক্ষী। ইত্যমরঃ॥

কমলঃ (পুং) মৃগবিশেষঃ। ইতি মেদিনী॥ ধ্রুবকভেদঃ। যথা। উক্তো মলয়তালেন লঘুমধ্যে স্ফুরেদ্‌গুরুঃ। সপ্তদশাক্ষরৈর্যুক্তঃ কমলোঽয়ং ভয়ানকে॥ ইতি সঙ্গীতদামোদরঃ॥

কমলা (স্ত্রী) লক্ষ্মীঃ। বরস্ত্রী। ইতি মেদিনী॥ স্বনামখ্যাতনিম্বুকঃ। কমলালেবু ইতি ভাষা। যথা। রম্ভাফলং তিন্তিড়ীকং কমলা নাগরঙ্গকং। ফলান্যেতানি ভোজ্যানি এভ্যোঽন্যানি বিবর্জ্জয়েৎ॥ ইতি তন্ত্রসারে পুরশ্চরণপ্রকরণং॥

কমলাসনঃ (পুং) ব্রহ্মা। ইত্যমরঃ॥

কমলিনী (স্ত্রী) পদ্মিনী। পদ্মাকরঃ। ইতি শব্দরত্নাবলী॥

কমলোত্তরং (ক্লী) কুসুম্ভপুষ্পং। ইত্যমরঃ॥

কমা (স্ত্রী) শোভা। ইতি রাজনির্ঘণ্টঃ॥

কমিতা [ ঋ ] (ত্রি) কামুকঃ। ইত্যমরঃ॥

কম্পঃ (পুং) গাত্রাদিচলনং। তৎপর্য্যায়ঃ। বেপথুঃ ২। ইত্যমরঃ॥ বেপনং ৩ বেপঃ ৪ কম্পনং ৫। ইতি রাজনির্ঘণ্টঃ॥

কম্পনং (ত্রি) কম্পযুক্তঃ। কাঁপনে ইতি ভাষা। তৎপর্য্যায়ঃ। চলনং ২ কম্প্রং ৩ চলং ৪ লোলং ৫ চলাচলং ৬ চঞ্চলং ৭ তরলং ৮ পারিপ্লবং ৯ পরিপ্লবং ১০। ইত্যমরঃ॥ চপলং ১১ চটলং ১২। ইতি তট্টীকা॥ কম্পে ক্লী। ইতি মেদিনী॥

কম্পনঃ (পুং) শিশিরঋতুঃ। ইতি রাজনির্ঘণ্টঃ॥

কম্পলক্ষ্মা [ ন্ ] (পুং) বায়ুঃ। ইতি শব্দরত্নাবলী॥

কম্পাকঃ (পুং) বায়ুঃ। ইতি হেমচন্দ্রঃ॥

কম্পিতং (ক্লী) চলনং। তৎপর্য্যায়ঃ। কম্পনং ২ কম্পঃ ৩ বেপনং ৪ বেপথুঃ ৫। ইতি শব্দরত্নাবলী॥ কম্পযুক্তে ত্রি॥

কম্পিলঃ (পুং) রোচনী। কমলা গুঁড়ি ইতি ভাষা। তস্য রূপান্তরাণি কাম্পিল্লঃ। কম্পিল্লঃ। কম্পীলঃ। কম্পিল্যঃ। ইত্যমরটীকায়াং মুকুটাদয়ঃ॥

কম্পিল্লকঃ (পুং) বৃক্ষবিশেষঃ। কমিলা ইতি দেশান্তরভাষা। তৎপর্য্যায়ঃ। রক্তাঙ্গঃ ২ রেচী ৩ রেচনকঃ ৪ রঞ্জকঃ ৫ লোহিতাঙ্গঃ ৬ কম্পিল্লঃ ৭ রক্তচূর্ণকঃ ৮। তস্য গুণাঃ। বিরেচকত্বং। কটুত্বং। উষ্ণত্বং।

ব্রণকফকাসতন্তুকৃমিনাশিত্বং। লঘুত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

কম্প্রঃ (ত্রি) কম্পযুক্তঃ। কম্পান্বিতঃ। ইত্যমরঃ॥

কম্ব গতৌ। ইতি কবিকল্পদ্রুমঃ॥ কম্বতি। ইতি দুর্গাদাসঃ॥

কম্বরঃ (পুং) চিত্রবর্ণঃ। কর্ব্বুরবর্ণঃ। তদ্বতি ত্রি। ইতি শব্দরত্নাবলী॥

কম্বলং (ক্লী) জলং। ইতি মেদিনী॥

কম্বলঃ (পুং) স্বনামখ্যাতমেষাদিলোমরচিত-বস্ত্রাসনাদি। তৎপর্য্যায়ঃ। রল্লকঃ ২। ইত্যমরঃ॥ বেশকঃ ৩ রোমযোনিঃ ৪ রেণুকা ৫। ইতি শব্দরত্নাবলী॥ প্রাবারঃ ৬। ইতি জটাধরঃ॥ নাগরাজঃ। সাস্না। প্রাবারঃ। কৃমিঃ। উত্তরাসঙ্গঃ। ইতি মেদিনী॥ মৃগবিশেষঃ। ইতি জটাধরঃ॥

কম্বলিবাহ্যকং (ক্লী) বৃষবহনীয়শকটং। তৎপর্য্যায়ঃ। গন্ত্রী ২। ইত্যমরঃ॥ গান্ত্রী ৩। ইতি তট্টীকা॥

কম্বাতায়ী [ন্] (পুং) শঙ্খচিল্লঃ। ইতি মহাভারতং॥

কম্বিঃ (স্ত্রী) দর্ব্বিঃ। হাতা ইতি ভাষা। ইত্যমরঃ॥ বংশাংশঃ। বাঁশের পাব্ ইতি ভাষা। ইতি মেদিনী॥

কম্বুঃ (পুং ক্লী) শঙ্খঃ। ইত্যমরঃ॥

কম্বুঃ (পুং) বলয়ং। শম্বুকঃ। হস্তী। ইতি মেদিনী॥ কর্ব্বুরবর্ণঃ। গ্রীবা। নলকং। ফাঁপা হাড় ইতি ভাষা। ইতি হেমচন্দ্রঃ॥

কম্বুকা (স্ত্রী) অশ্বগন্ধাবৃক্ষঃ। ইতি রত্নমালা॥

কম্বুকাষ্ঠা (স্ত্রী) অশ্বগন্ধাবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কম্বুগ্রীবা (স্ত্রী) কম্ব্বাকৃতিরেখাত্রয়যুক্তগ্রীবা। ইত্যমরঃ॥

কম্বুপুষ্পী (স্ত্রী) শঙ্খপুষ্পীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কম্বুমালিনী (স্ত্রী) শঙ্খপুষ্পী। ইতি রাজনির্ঘণ্টঃ॥

কম্বোজঃ (পুং) শঙ্খবিশেষঃ। দেশভেদঃ। হস্তিপ্রভেদঃ। ইতি মেদিনী॥

কম্ভারী (স্ত্রী) গম্ভারীবৃক্ষঃ। ইতি শব্দমালা-রাজনির্ঘণ্টৌ॥

কম্ভু (ক্লী) উশীরং। ইতি রাজনির্ঘণ্টঃ॥

কম্রঃ (ত্রি) কামুকঃ। মৈথুনেচ্ছাবিশিষ্টঃ। ইত্যমরঃ॥

কয়স্থা (স্ত্রী) বয়স্থা। কাকোলী ইতি খ্যাতা। ইত্যমরটীকায়াং স্বামী॥

করঃ (পুং) রাজস্বং। খাজানা ইতি পারস্য ভাষা। তৎপর্য্যায়ঃ। ভাগধেয়ঃ ২ বলিঃ ৩। ইত্যমরঃ॥ কারঃ ৪। ইতি তট্টীকা॥ প্রত্যায়ঃ ৫। ইতি মেদিনী॥ *॥ অথ রাজ্ঞাং করগ্রহণপ্রকারঃ। ক্রয়বিক্রয়াদিনা লাভাদীন্ সংপ্রেক্ষ্য রাজ্ঞা করো গ্রহীতব্যঃ। যথা। ক্রয়বিক্রয়মধ্বানং ভক্তঞ্চ সপরিব্যয়ং। যোগক্ষেমঞ্চ সংপ্রেক্ষ্য বণিজো দাপয়েৎ করান্॥ যথা ফলেন যুজ্যেত রাজা কর্ত্তা চ কর্ম্মণাং। তথাবেক্ষ্য নৃপো রাষ্ট্রে কল্পয়েৎ সততং করান্॥ *॥ রাজ্ঞা রাজ্যাৎ বার্ষিকঃ করোঽল্পাল্পং কৃত্বা গ্রহীতব্যঃ যথা। যথাল্পাল্পমদন্ত্যাদ্যং বার্য্যোকোবৎসষট্পদাঃ।

তথাম্লাম্নো গ্রহীতব্যো রাষ্ট্রাদ্রাজ্ঞাব্দিকঃ করঃ ॥ * ॥ মূলাদধিকয়োঃ পশুহিরণ্যয়োঃ পঞ্চাশদ্ভাগরূপঃ করো গ্রাহ্যঃ ॥ ধান্যানাং ভূম্যুৎকর্ষাপকর্ষাপেক্ষয়া কর্ষকাণাং ক্লেশ-লাঘবগৌরবাপেক্ষয়া চ ষষ্ঠোঽষ্টমো দ্বাদশো বা ভাগো রাজ্ঞা গ্রহীতব্যঃ। যথা। পঞ্চাশদ্ভাগ আদেয়ো রাজ্ঞা পশুহির-ণ্যয়োঃ। ধান্যানামষ্টমো ভাগঃ ষষ্ঠো দ্বাদশ এব বা ॥ * ॥ দ্রুমাশ্মমধুসর্পিরাদীনাং ষড়্ভাগো লাভাৎ গ্রহণীয়ঃ। যথা। আদদী-তাথ ষড়্ভাগং দ্রুমাশ্মমধুসর্পিষাং। গন্ধৌষধিরসানাঞ্চ পুষ্পমূলফলস্য চ। পত্রশাকতৃণানাঞ্চ চর্ম্মণাং বৈদলস্য চ। মৃণ্ময়ানাঞ্চ ভাণ্ডানাং সর্ব্বস্যাশ্মময়স্য চ ॥*॥ অতিক্ষীণধনোঽপি রাজা শ্রোত্রিয়-ব্রাহ্মণাৎ করং ন গৃহ্লীয়াৎ। যথা। ম্রিয়-মাণোঽপ্যাদদীত ন রাজা শ্রোত্রিয়াৎ করং। ন চ ক্ষুধাস্য সংসীদেচ্ছোত্রিয়ো বিষয়ে বসন্ ॥ ইতি মনুঃ ॥ * ॥ বর্ষো-পলঃ। কিরণঃ। হস্তঃ। হস্তিশুণ্ডঃ। ইতি মেদিনী ॥ কর্ম্মোপপদে কর্ত্তৃবাচকঃ। যথা। সুখকর ইত্যাদি ॥

করকং (ক্লী পুং) করঙ্কঃ। কমণ্ডলুঃ। ইতি মেদিনী ॥

করকঃ (পুং) দাড়িমবৃক্ষঃ। রাজকরঃ। পক্ষি-বিশেষঃ। লট্বাকরঞ্জবৃক্ষঃ। ইতি হেম-চন্দ্রঃ ॥ পলাশবৃক্ষঃ। ইতি হারাবলী ॥ কোবিদারবৃক্ষঃ। বকুলবৃক্ষঃ। করীর-বৃক্ষঃ। নারিকেলাস্থি। মালা ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ ॥

করকচ্ছপিকা (স্ত্রী) কূর্ম্মমুদ্রা। যথা। কর-কচ্ছপিকাং কুর্য্যাৎ কূর্ম্মমন্ত্রেণ সাধকঃ। তত্র সংস্কৃতপুষ্পেণ পূজয়েদাত্মনো বপুঃ ॥ ইতি কালিকাপুরাণে ৫৬ অধ্যায়ঃ ॥

করকণ্টকঃ (পুং) নখঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

করকা (স্ত্রী পুং) মেঘভবশিলা। শিল ইতি ভাষা। তৎপর্য্যায়ঃ। বর্ষোপলঃ ২। ইত্য-মরঃ ॥ মেঘোপলঃ ৩। ইতি মেদিনী ॥ বীজোদকং ৪ ঘনকফঃ ৫ মেঘাস্থি ৬ বার্চরঃ ৭ করঃ ৮ করকঃ ৯। ইতি শব্দ-রত্নাবলী ॥ রাধরঙ্কুঃ ১০ ধারাঙ্কুরঃ ১১। ইতি জটাধরঃ ॥ মেদিন্যাং রাধরঙ্ক ইতি পাঠঃ ॥

করকান্তাঃ [স্] (পুং) নারিকেলবৃক্ষঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

করগ্রহঃ (পুং) বিবাহঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ করগ্রহণঞ্চ ॥

করগ্রহারম্ভঃ (পুং) রাজ্ঞাং প্রজাভ্যো নব-বর্ষীয়করস্য প্রথমাদানং। তদ্দিনং পুণ্যাহ ইতি খ্যাতং। তস্যাপভাষা পুণ্যা। তস্য শুভদিননিরূপণং যথা। তীক্ষ্ণোগ্রবহ্নীতর-ভেষু লগ্নে শীর্ষোদয়ে ভানুদিনে শুভাহে। কুর্য্যাদমুক্তানি সমীহিতানি করগ্রহারম্ভ-মপি প্রজ্ঞাভ্যঃ ॥ ইতি জ্যোতিষং ॥ অস্যার্থঃ। অশ্লেষার্দ্রাজ্যেষ্ঠামূলাপূর্ব্বফল্গুনী-পূর্ব্বাষাঢ়া পূর্ব্বভাদ্রপদ মঘা ভরণী কৃত্তিকা-ভিন্ননক্ষত্রেষু। মিথুনসিংহকন্যাতুলা-বৃশ্চিককুম্ভমীনলগ্নেষু। রবিসোমবুধবৃহ-স্পতিশুক্রবারেষু করগ্রহারম্ভঃ কর্ত্তব্যঃ ॥

করঘর্ষণঃ (পুং) দধিমন্থনদণ্ডঃ। তৎপর্য্যায়ঃ।

বৈশাখঃ ২ দধিচারঃ ৩ তক্রাটঃ ৪। ইতি হারাবলী ॥ হস্তঘর্ষণে ক্লী ॥

করঘর্ষী [ন্] (পুং) মন্থানদণ্ডঃ। ইতি শব্দমালা ॥

করঙ্কঃ (পুং) মস্তকং। অশস্যনারিকেলফলাস্থি। নারিকেলের খোল ইতি ভাষা। ইতি মেদিনী ॥ শরীরাস্থি। ইতি হেমচন্দ্রঃ ॥ ইক্ষুভেদঃ। ইতি রাজনির্ঘণ্টঃ ॥

করঙ্কশালিঃ (পুং) করঙ্কনামেক্ষুঃ। ইতি রাজনির্ঘণ্টঃ ॥

করচ্ছদঃ (পুং) শাখোটবৃক্ষঃ। শেওড়া ইতি ভাষা। ইতি ভাবপ্রকাশঃ ॥

করচ্ছদা (স্ত্রী) সিন্দুরপুষ্পীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

করজং (ক্লী) ব্যাঘ্রনখনামগন্ধদ্রব্যং। ইত্যমরঃ

করজঃ (পুং) করঞ্জবৃক্ষঃ। নখঃ। ইতি মেদিনী ॥

করজাখ্যঃ (পুং) নখীনামগন্ধদ্রব্যং। ইতি রত্নমালা ॥

করজ্যোড়িঃ (পুং) হস্তজ্যোড়িবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

করঞ্জঃ (পুং) স্বনামখ্যাতবৃক্ষবিশেষঃ। করমচা ইতি ভাষা। তৎপর্য্যায়ভেদো যথা। করঞ্জকঃ স্যাৎ করজঃ পত্রসূচী ফলাশনঃ। অঙ্গারমঞ্জী ষড়্গ্রন্থো মর্কট্যঙ্গারবল্লরী ॥ করঞ্জভেদাশ্চত্বারো বিজ্ঞেয়া লোকতস্ত্বিমে। ইতি শব্দরত্নাবলী ॥ অপি চ। চিরবিল্বো নক্তমালঃ করজশ্চ করঞ্জকঃ। সোমবল্কঃ কলিঙ্গস্তু পূতিকঃ কলিকারকঃ ॥ প্রকীর্য্যঃ পূতিকরজঃ পট্টিলঃ সুমনা অপি। করঞ্জভেদাঃ ষড়্গ্রন্থো মর্কট্যঙ্গারবল্লরী ॥ ইতি জটাধরঃ ॥ স ষড়্বিধঃ। তত্র ভরকরঞ্জপর্য্যায়ঃ। নক্তমালঃ ২ পূতিকঃ ৩ চিরবিল্বকঃ ৪ পূতিপর্ণঃ ৫ বদ্ধফলঃ ৬ রোচনঃ ৭। ইতি রাজনির্ঘণ্টঃ ॥ চিরবিল্বঃ ৮ করজঃ ৯ করঞ্জকঃ ১০। ইত্যমরঃ ॥ চিরিবিল্বঃ ১১। ইতি তট্টীকা ॥ উদকীর্য্যঃ ১২। ইতি রত্নমালা ॥ * ॥ অস্য ফলগুণাঃ। কটুত্বং। উষ্ণত্বং। চক্ষুর্হিতত্বং। বাতনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ বাতকফমেহার্শঃকৃমিকুষ্ঠনাশিত্বঞ্চ ॥ * ॥ তৎপত্রগুণাঃ। কফবাতার্শঃকৃমিশোথনাশিত্বং। ভেদকত্বং। পাকে কটুত্বং। বীর্য্যোষ্ণত্বং। পিত্তবর্দ্ধকত্বং। লঘুত্বঞ্চ। ইতি ভাবপ্রকাশঃ ॥*॥ তত্তৈলগুণাঃ। অতিস্নিগ্ধত্বং। বাতনাশিত্বং। স্থিরদীপ্তিদাতৃত্বং। নয়নাময়বাতরোগকুষ্ঠকণ্ডুবিসূচিকানাশিত্বং। তীক্ষ্ণত্বং। উষ্ণত্বং। লেপেন নানাবিধচর্ম্মদোষনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ কিটিমত্বং। কৃমিনাশিত্বং। রক্তপিত্তদোষকারিত্বঞ্চ। ইতি রাজবল্লভঃ ॥ * ॥ অথ নাটাকরঞ্জপর্য্যায়ঃ। প্রকীর্য্যঃ ১ পূতিকরজঃ ২ পূতিকঃ ৩ কলিকারকঃ ৪। ইত্যমরঃ ॥ পূতীকরঞ্জঃ ৫ প্রকীর্য্যঃ ৬ সকণ্টকঃ ৭। ইতি রত্নমালা ॥ * ॥ ষড়্গ্রন্থঃ। কাঁটাকরঞ্জ গাঁঠিয়া করঞ্জ ইতি ভাষা ॥ * ॥ মর্কটী। মাকড়াকরঞ্জ ইতি ভাষা ॥*॥ অঙ্গারবল্লরী। বিষকরঞ্জ ইতি ভাষা। ইত্যমরভরতৌ ॥ * ॥ অথ অম্ল-

করঞ্জপর্য্যায়ঃ ॥ করমর্দ্দী ১ বনেক্ষুদ্রা ২ করাম্লঃ ৩ করমর্দ্দকঃ ৪। ইতি রত্নমালা ॥ কৃষ্ণপাকফলঃ ৫ অবিগ্নঃ ৬ সুষেণঃ ৭। ইত্যমরঃ ॥ অস্য ফলগুণাঃ। পিপাসা-নাশিত্বং। রুচিপিত্তকারিত্বং। গুরুত্বঞ্চ। ইতি রাজবল্লভঃ ॥ রাজনির্ঘণ্টোক্তগুণ-পর্য্যায়ৌ করমর্দ্দকশব্দে দ্রষ্টব্যৌ ॥

করঞ্জকঃ (পুং) করঞ্জবৃক্ষঃ। ইত্যমরঃ ॥ ভৃঙ্গ-রাজবৃক্ষঃ। ইতি জটাধরঃ ॥

করঞ্জফলকঃ (পুং) কপিত্থবৃক্ষঃ। ইতি রাজ-নির্ঘণ্টঃ ॥

করটঃ (পুং) কাকঃ। হস্তিগণ্ডঃ। ইত্যমরঃ ॥ কুসুম্ভবৃক্ষঃ। নিন্দ্যজীবনঃ। একাদশাহাদি-শ্রাদ্ধং। দুর্দ্দুরূটঃ। নাস্তিক ইতি যাবৎ। বাদ্যবিশেষঃ। ইতি মেদিনী ॥

করটকঃ (পুং) কাকঃ। ইতি শব্দরত্নাবলী ॥

করটা (স্ত্রী) দুঃখদোহ্যা গবী। ইতি হেমচন্দ্রঃ ॥

করটী [ন্] (পুং স্ত্রী) হস্তী। ইতি হেম-চন্দ্রঃ ॥

করটুঃ (পুং) পক্ষিবিশেষঃ। করকটিয়া ইতি ভাষা। ইতি হেমচন্দ্রঃ ॥

করণং (ক্লী) সাধকতমং। ইত্যমরঃ ॥ তত্তু ষট্কারকান্তর্গতকারকবিশেষঃ। তস্য লক্ষণং। ক্রিয়ায়াং সাধ্যায়াং বহূনাং কারণানাং মধ্যে কারণান্তরব্যবধানাভাবে যদ্বস্তু ক্রিয়ানিষ্পত্তিকারণং বিবক্ষিতং তস্মিন্ করণত্বং প্রকীর্ত্তিতং। তেন দাত্রেণ ধান্যং লুনাতীত্যত্র হস্তাদেঃ কারণত্বেঽপি দাত্রস্যৈব করণত্বং বিবক্ষিতং। তথা-চোক্তং। কারণাব্যবধানেঽপি ক্রিয়া-নিষ্পত্তিকারণং। যদ্বৈ বিবক্ষিতং তেষু করণত্বং প্রকীর্ত্তিতং ॥ ইতি মুগ্ধবোধ-টীকায়াং দুর্গাদাসঃ ॥ * ॥ তিথ্যর্দ্ধপরি-মিতববাদ্যেকাদশসংজ্ঞককালবিশেষঃ। তেষাং নামানি। ববঃ ১ বালবঃ ২ কৌলবঃ ৩ তৈতিলঃ ৪ গরঃ ৫ বণিজঃ ৬ বিষ্টিঃ ৭ শকুনিঃ ৮ চতুষ্পদঃ ৯ কিন্তুঘ্নঃ ১০ নাগঃ ১১। তেষাং যথাক্রমেণাধিষ্ঠাতৃ-দেবাঃ। ইন্দ্রঃ ১ কমলজঃ ২ মিত্রঃ ৩ অর্য্যমা ৪ ভূঃ ৫ শ্রীঃ ৬ যমঃ ৭ কলিঃ ৮ বৃষঃ ৯ ফণী ১০ মারুতঃ ১১। একৈকস্মিন্ তিথৌ দ্বে দ্বে করণে ভবতঃ। তেষাং ববাদয়ঃ সপ্ত অষ্টাবৃত্ত্যা শুক্লপ্রতিপ-চ্ছেষার্দ্ধমারভ্য কৃষ্ণপক্ষীয়চতুর্দ্দশীপ্রথমার্দ্ধ-পর্য্যন্তং ভবন্তি। শেষাশ্চত্বারঃ কৃষ্ণ-চতুর্দ্দশীশেষার্দ্ধাবধিশুক্লপ্রতিপৎপ্রথমার্দ্ধ-পর্য্যন্তং নিয়মেন ভবন্তি অতো ধ্রুবাণি করণানি। পূর্ব্বে সপ্তাধ্রুবাণি ॥ তেষা-মানয়নক্রমো যথা। তিথির্দ্বিঘ্না করোনাগ-শিষ্টাকরণমাদিমে। পরে দলে তু সৈকং তৎ করণং ববপূর্ব্বকং॥ ইতি জ্যোতিষং॥*॥ ক্ষেত্রং। গাত্রং। ইন্দ্রিয়ং। ইত্যমরঃ ॥ হেতুঃ। কর্ম্ম। হস্তলেপঃ। নৃত্যপ্রভেদঃ। গীতবিশেষঃ। ক্রিয়াভেদঃ। সংবেশনং। কায়স্থঃ। ইতি মেদিনী ॥ কায়স্থসংহতিঃ ॥ বর্ণানাং স্পষ্টতাদি। যোগিনামাসনাদি। কৃতাদি। ইতি হেমচন্দ্রঃ ॥

করণঃ (পুং) শূদ্রাবৈশ্যয়োর্জাতজাতি-বিশেষঃ। ইত্যমরঃ ॥ অয়ং লিখনবৃত্তিঃ কায়স্থ ইতি খ্যাতঃ। ইতি ভরতঃ ॥

যথা। শূদ্রাবিশোস্ত করণোঽম্বষ্ঠো বৈশ্যাদ্বিজন্মনোঃ। ইতি ব্রহ্মবৈবর্ত্তে ব্রহ্মখণ্ডে ১০ অধ্যায়ঃ ॥*॥ অপি চ। কায়স্থে সাধনে ক্লীবং পুংসি শূদ্রাবিশোঃ স্থতে। ইতি করণশব্দার্থে মেদিনী ॥*॥ অন্যচ্চ। ঝল্লো মল্লশ্চ রাজন্যাৎ ব্রাত্যান্নিচ্ছিবিরেব চ। নটশ্চ করণশ্চৈব খসদ্রবিড় এব চ ॥ ইতি মানবে ১০ অধ্যায়ে ২২ শ্লোকঃ ॥ ঝল্লো মল্লশ্চেতি। ক্ষত্রিয়াৎ ব্রাত্যাৎ সবর্ণায়াং ঝল্লমল্লনিচ্ছিবিনটকরণখসদ্রবিড়াখ্যা জায়ন্তে। এতান্যপ্যেকস্যৈব নামানি। ইতি তট্টীকায়াং কুল্লূকভট্টঃ ॥*॥ তস্য কর্ম্মবিপাকো যথা। তৈলচৌরস্তৈলকীটো মূর্দ্ধ্নি কীটস্ত্রিজন্মকং। ততো ভবেৎ স্বর্ণকারো জন্মৈকং দুষ্টমানসঃ॥ তমঃকুণ্ডে বর্ষশতং স্থিত্বা স্বর্ণবণিক্ ভবেৎ। জন্মৈকঞ্চ দুরাচারো জন্মৈকং করণো ভবেৎ॥ বিশ্বৈকলিপিকর্ত্তা চ ভক্ষদাতুর্ধনং হরেৎ॥ কায়স্থেনোদরস্থেন মাতুর্ম্মাংসং ন খাদিতং। তত্র নাস্তি কৃপা তস্য দন্তাভাবেন কেবলং॥ স্বর্ণকারঃ স্বর্ণবণিক্ কায়স্থশ্চ ব্রজেশ্বর। নরেষু মধ্যে তে ধূর্ত্তাঃ কৃপাহীনা মহীতলে॥ হৃদয়ং ক্ষুরধারাভং তেষাঞ্চ নাস্তি সাদরং। শতেষু সজ্জনঃ কোঽপি কায়স্থো নেতরৌ চ তৌ॥ স্ববুদ্ধিঃ শিবযুক্তিশ্চ শাস্ত্রজ্ঞো ধর্ম্মমানসঃ। ন বিশ্বসেত্তেষু তাত স্বাত্মকল্যাণহেতবে॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ৮৫ অধ্যায়ঃ॥

করণত্রাণং (ক্লী) মস্তকং। ইতি হেমচন্দ্রঃ॥

করণীয়ং (ত্রি) কর্ত্তব্যং। কার্য্যং। ইতি ব্যাকরণং॥

করণ্ডঃ (পুং) মধুকোষঃ। মৌচাক্ ইতি ভাষা। অসিঃ। কারণ্ডবপক্ষী। দলাঢ়কং। ইতি মেদিনী হেমচন্দ্রশ্চ॥ বংশাদিরচিতভাণ্ডবিশেষঃ সমুদ্গশ্চ। সাজি ঝাঁপি ইত্যাদি ভাষা। ইত্যমরঃ॥

করণ্ডী [ন্] (পুং) মৎস্যঃ। ইতি ত্রিকাণ্ডশেষঃ॥

করতলঃ (পুং) হস্ততলঃ। হাতের তেলো ইতি ভাষা। যথা। করতলতালতরলবলয়েতি জয়দেবঃ॥ অপিচ। ততঃ করতলীকৃত্য ব্যাপি হালাহলং বিষং। অভক্ষয়ন্ মহাদেবঃ কৃপয়া ভূতভাবনঃ॥ ইতি শ্রীভাগবতং॥

করতালং (ক্লী) বাদ্যবিশেষঃ। যথা। শিবাগারে ঝল্লকঞ্চ সূর্য্যাগারে চ শঙ্খকং। দুর্গাগারে বংশিবাদ্যং মধুরীঞ্চ ন বাদয়েৎ॥ ঝল্লকং কাংস্যনির্ম্মিতকরতালকং। ইতি তিথ্যাদিতত্ত্বে রঘুনন্দনভট্টাচার্য্যেণ ব্যাখ্যাতং॥

করতালী (স্ত্রী) বাদ্যবিশেষঃ। করতাল। খরতাল ইতি খ্যাতা। তৎপর্য্যায়ঃ। করর্দ্ধিঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥ করতলধ্বনিঃ। তথাচ। যথা ন স্যাদালীকপটকরতালীপটুরবঃ। ইত্যুদ্ভটঃ॥

করতোয়া (স্ত্রী) স্বনামখ্যাতউত্তরদেশস্থনদীবিশেষঃ। তৎপর্য্যায়ঃ। সদানীরা ২। ইত্যমরঃ॥ সদানীরবহা ৩। ইতি শব্দরত্নাবলী॥*॥ গৌরীবিবাহসময়ে শঙ্কর-

করগলিতসংপ্রদানতোয়প্রভবত্বাৎ করস্য তোয়ং বিদ্যতেঽত্র ইতি করতোয়া অর্শ আদিত্বাদঃ। শ্রাবণে এতদ্বর্জ্জং সর্ব্বা নদ্যো রজস্বলাঃ ইয়ং তু ন রজস্বলা অতএব সদা সর্ব্বদা নীরমস্যা ইতি সদানীরা। তথা চ স্মৃতিঃ। অথাদৌ কর্কটে দেবী ত্র্যহং গঙ্গা রজস্বলা। সর্ব্বা রক্তবহা নদ্যঃ করতোয়াম্বুবাহিনী ॥ ইত্যমরটীকায়াং ভরতঃ ॥

করদ্রুমঃ (পুং) কারস্করবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

করপত্রং (ক্লী) ক্রকচঃ। করাৎ ইতি ভাষা। ইত্যমরঃ ॥ জলক্রীড়া। ইতি জটাধরঃ ॥

করপত্রবান্ [ৎ] (পুং) তালবৃক্ষঃ। ইতি শব্দচন্দ্রিকা ॥

করপত্রিকা (স্ত্রী) জলক্রীড়া। ইতি জটাধরঃ ॥

করপর্ণঃ (পুং) ভিণ্ডাবৃক্ষঃ। রক্তৈরণ্ডঃ। ইতি রাজনির্ঘণ্টঃ ॥

করপল্লবঃ (পুং) অঙ্গুলিঃ। যথা। করপল্লবসঙ্গীনি তৈরস্মান্রক্ষ সর্ব্বতঃ। ইতি দেবীমাহাত্ম্যং ॥

করপাত্রং (ক্লী) জলক্রীড়া। ইতি হারাবলী ॥

করপালঃ (পুং) খড়্গঃ। ইত্যমরঃ ॥

করপালিকা (স্ত্রী) হ্রস্বগদাকারহস্তদণ্ডঃ। সোঁটা ইতি খ্যাতঃ। ইতি ভরতঃ ॥ একধারাস্ত্রং। ইতি স্বামী। তৎপর্য্যায়ঃ। ঈলী ২। ইত্যমরঃ ॥ ইলী ৩ ঈলিঃ ৪ করবালিকা ৫। ইতি তট্টীকা ॥

করবালঃ (পুং) নখং। ইতি শব্দমালা ॥ খড়্গঃ। তরবাল ইতি ভাষা। ইত্যমরটীকায়াং ভরতাদয়ঃ ॥

করবালিকা (স্ত্রী) করপালিকা। ইত্যমরটীকায়াং রায়মুকুটাদয়ঃ ॥

করভঃ (পুং) মণিবন্ধাবধি কনিষ্ঠাপর্য্যন্তং করস্য বহির্ভাগঃ। উষ্ট্রশিশুঃ। ইত্যমরঃ ॥ করিশাবকঃ। ইত্যমরটীকাসারসুন্দরী ॥ উষ্ট্রঃ। ইতি মেদিনী॥ নখনাম গন্ধদ্রব্যং। ইতি রাজনির্ঘণ্টঃ ॥ কটিঃ। ইতি জটাধরঃ ॥

করভকাণ্ডিকা (স্ত্রী) উষ্ট্রকাণ্ডীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

করভপ্রিয়া (স্ত্রী) ক্ষুদ্রদুরালভা। ইতি রাজনির্ঘণ্টঃ ॥

করভবল্লভঃ (পুং) কপিত্থবৃক্ষঃ। পীলুবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

করভাদনী (স্ত্রী) ক্ষুদ্রদুরালভা। ইতি রাজনির্ঘণ্টঃ ॥

করভী [ন্] (পুং) হস্তী। ইতি রাজনির্ঘণ্টঃ ॥

করভী (স্ত্রী) উষ্ট্রী। তৎপর্য্যায়ঃ। বামী ২। ইতি জটাধরঃ ॥

করভীরঃ (পুং) সিংহঃ। ইতি শব্দরত্নাবলী ॥

করভূষণং (ক্লী) কঙ্কণং। ইত্যমরঃ ॥ হস্তাভরণমাত্রঞ্চ ॥

করমট্টঃ (পুং) গুবাকবৃক্ষঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

করমরী [ন্] (পুং) বন্দী। কয়েদী ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ ॥

করমর্দ্দঃ ( পুং ) করমর্দ্দকবৃক্ষঃ। ইতি শব্দরত্নাবলী ॥

করমর্দ্দকঃ ( পুং ) বৃক্ষবিশেষঃ। পাণি আমলা ইতি ভাষা। ইত্যমরটীকাসারসুন্দরী॥ করৌন্দা ইতি করমৃচা ইতি চ ভাষা। ইতি রত্নমালারাজনির্ঘণ্টাদয়ঃ ॥ তৎপর্য্যায়ঃ। কৃষ্ণপাকফলঃ ২ অবিগ্নঃ ৩ সুষেণঃ ৪। ইত্যমরঃ ॥ কৃষ্ণপাকঃ ৫ পাকফলঃ ৬ কৃষ্ণফলঃ ৭ পাককৃষ্ণফলঃ ৮ কৃষ্ণফলপাকঃ ৯ পাককৃষ্ণঃ ১০ ফলকৃষ্ণঃ ১১ পাকফলকৃষ্ণঃ ১২ বনালয়ঃ ১৩ বলালকঃ ১৪ করাম্বুকঃ ১৫ বোলঃ ১৬ বশঃ ১৭ আবিগ্নঃ ১৮। ইতি তট্টীকায়াং ভরতঃ ॥ করমর্দ্দী ১৯ বনেক্ষুদ্রা ২০ করাম্লঃ ২১। ইতি রত্নমালা ॥ করমর্দ্দঃ ২২ পাণিমর্দ্দঃ ২৩। তদ্বালফলগুণাঃ। তিক্তত্বং। অম্লত্বং। দীপনত্বং। দাহদাতৃত্বঞ্চ। তৎপক্কফলগুণঃ। ত্রিদোষশমনত্বং। অরুচিবিষনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ পিপাসানাশিত্বং। অম্লত্বং। রুচিপিত্তকারিত্বং। গুরুত্বঞ্চ। ইতি রাজবল্লভঃ ॥

করমর্দ্দী ( স্ত্রী ) করমর্দ্দকবৃক্ষঃ। ইতি রত্নমালা ॥

করমালঃ ( পুং ) খতমালঃ। ধূমঃ। ইতি হেমচন্দ্রঃ ॥

করমালা ( স্ত্রী ) করপর্ব্বরূপমালা। যথা। অনামিকাত্রয়ং পর্ব্ব কনিষ্ঠাত্রিতয়ং তথা। তর্জ্জনীমূলপর্য্যন্তং করমালা প্রকীর্ত্তিতা ॥ ইতি মুণ্ডমালাতন্ত্রে সামান্যবিষয়ং ॥ * ॥ তর্জ্জনী মধ্যমানামা কনিষ্ঠা চেতি তাঃ ক্রমাৎ। তিস্রোঽঙ্গুল্যস্ত্রিপর্ব্বাণো মধ্যমা চৈকপর্ব্বিকা ॥ পর্ব্বদ্বয়ং মধ্যমায়া মেরুত্বেনোপকল্পয়েৎ। ইতি শিবরহস্যীয়ং শক্তিভিন্নবিষয়ং ॥ * ॥ অনামামূলমারভ্য কনিষ্ঠাদিক্রমেণ তু। তর্জ্জনীমধ্যপর্য্যন্তমষ্টপর্ব্বসু সংজপেৎ ॥ ইতি সনৎকুমারসংহিতাবচনং শক্তীতরেষামষ্টবারবিষয়ং ॥ * ॥ অনামিকাত্রয়ং পর্ব্ব কনিষ্ঠা চ ত্রিপর্ব্বিকা। মধ্যমায়াশ্চ ত্রিতয়ং তর্জ্জনীমূলপর্ব্বিকা ॥ করমালা সমাখ্যাতা আরভ্যানামিকাস্তরাৎ। তর্জ্জন্যগ্রে তথা মধ্যে যো জপেৎ স তু পাপকৃৎ ॥ ইতি শক্তিবিষয়ে মুণ্ডমালাতন্ত্রং ॥ * ॥ তথা। অনামামূলমারভ্য প্রাদক্ষিণ্যক্রমেণ তু। মধ্যমামূলপর্য্যন্তং জপেদষ্টসু পর্ব্বসু ॥ ইদমপি শক্তিবিষয়ে অষ্টবারপরং। ইতি শ্যামারহস্যং ॥

করমুক্তং ( ক্লী ) অস্ত্রবিশেষঃ। বরছী ভালা ইত্যাদি ভাষা। ইতি হলায়ুধঃ ॥

করম্বঃ ( পুং ) করম্ভঃ। ইত্যমরটীকায়াং নীলকণ্ঠঃ ॥ মিশ্রিতে ত্রি। ইতি হেমচন্দ্রঃ ॥

করম্বিতঃ ( ত্রি ) মিশ্রিতঃ। খচিতঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

করম্ভঃ ( পুং ) দধিমিশ্রিতশক্তুঃ। ইত্যমরঃ ॥

করম্ভকং ( ক্লী ) করম্ভঃ। দধিসক্তবঃ। তৎপর্য্যায়ঃ। কর্কসারং ২। ইতি হারাবলী ॥

করম্ভা ( স্ত্রী ) শতাবরী। প্রিয়ঙ্গুবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কররুহঃ ( পুং ) নখঃ। ইত্যমরঃ ॥

করর্দ্ধিঃ ( স্ত্রী ) করতালী। ইতি ত্রিকাণ্ডশেষঃ ॥

করবালিকা (স্ত্রী) করপালিকা। ইত্যমরটীকায়াং ভরতঃ॥

করবী (স্ত্রী) কবরী। হিঙ্গুপত্রং। ইতি শব্দচন্দ্রিকা॥

করবীরঃ (পুং) খড়্গঃ। দৈত্যবিশেষঃ। ইতি মেদিনী॥ শ্মশানং। ইতি হেমচন্দ্রঃ॥ ব্রহ্মাবর্ত্তে দৃশদ্বতীনদীতীরে চন্দ্রশেখররাজপুরং। ইতি কালিকাপুরাণে ৪৬ অধ্যায়ঃ॥ বৃক্ষবিশেষঃ। করবী ইতি ভাষা। তৎপর্য্যায়ঃ। প্রতিহাসঃ ২ শতপ্রাসঃ ৩ চণ্ডাতঃ ৪ হয়মারকঃ ৫। ইত্যমরঃ॥ প্রতীহাসঃ ৬। ইতি তট্টীকা॥ অশ্বঘ্নঃ ৭ হয়ারিঃ ৮ অশ্বমারকঃ ৯ শীতকুম্ভঃ ১০ তুরঙ্গারিঃ ১১। ইতি রত্নমালা॥ অশ্বহা ১২ বীরঃ ১৩ হয়মারঃ ১৪ হয়ঘ্নঃ ১৫ শতকুন্দঃ ১৬ অশ্বরোধকঃ ১৭ বীরকঃ ১৮ কুন্দঃ ১৯ শকুন্দঃ ২০ শ্বেতপুষ্পকঃ ২১ অশ্বান্তকঃ ২২ নখরাহ্বঃ ২৩ অশ্বনাশনঃ ২৪ স্থলকুমুদঃ ২৫ দিব্যপুষ্পঃ ২৬ হরিপ্রিয়ঃ ২৭ গৌরীপুষ্পঃ ২৮ সিদ্ধপুষ্পঃ ২৯। অস্য গুণাঃ। কটুত্বং। তীক্ষ্ণত্বং। কুষ্ঠকণ্ডূতিনাশিত্বং। ব্রণার্ত্তিবিষবিস্ফোটকশমনত্বং। অশ্বমৃতিপ্রদত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

করবীরকঃ (পুং) অর্জ্জুনবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥ খড়্গঃ। ইতি শব্দমালা॥ বিষভেদঃ। স তু করবীরস্য মূলং। ইতি হেমচন্দ্রঃ॥

করবীরকন্দসংজ্ঞঃ (পুং) তৈলকন্দঃ। ইতি রাজনির্ঘণ্টঃ॥

করবীরভুজা (স্ত্রী) আঢ়কীবৃক্ষঃ। অরহর ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥

করবীরী (স্ত্রী) অদিতিঃ। শ্রেষ্ঠগবী। পুত্রবতী। ইতি মেদিনী॥

করশাখা (স্ত্রী) অঙ্গুলী। ইত্যমরঃ॥ তাসাং পরিমাণং যথা। অষ্টভির্স্তৈর্ভবেৎ জ্যৈষ্ঠং মধ্যমং সপ্তভির্যবৈঃ। কন্যসং ষড়্ভিরুদ্দিষ্টমঙ্গুলং মুনিসত্তম॥ মানস্তু পার্শ্বেন। ষড়্যবাঃ পার্শ্বসম্মিতাঃ। ইতি কাত্যায়নদর্শনাৎ। ইতি তিথ্যাদিতত্ত্বং॥ তৎপর্য্যায়ঃ। অগ্রুবঃ ১ অল্ব্যঃ ২ ক্ষিপঃ ৩ ব্রিশঃ ৪ শর্য্যাঃ ৫ রশনাঃ ৬ ধীতয়ঃ ৭ অথর্য্যঃ ৮ বিপঃ ৯ কক্ষ্যাঃ ১০ অবনয়ঃ ১১ হরিতঃ ১২ স্বসারঃ ১৩ জাময়ঃ ১৪ সনাভয়ঃ ১৫ যোক্ত্রাণি ১৬ যোজনানি ১৭ ধুরঃ ১৮ শাখাঃ ১৯ অভীশবঃ ২০ দীধিতয়ঃ ২১ গভস্তয়ঃ ২২। ইতি দ্বাবিংশতিরঙ্গুলিনামানি। ইতি বেদনিঘণ্টৌ ২ অধ্যায়ঃ॥

করশীকরঃ (পুং) হস্তিশুণ্ডনির্গতজলকণা। তৎপর্য্যায়ঃ। বমথুঃ ২। ইত্যমরঃ॥

করশূকঃ (পুং) নখঃ। ইতি ত্রিকাণ্ডশেষঃ॥

করহাটঃ (পুং) পদ্মমূলং। মদনবৃক্ষঃ। ইতি মেদিনী॥ মহাপিণ্ডীতরুঃ। ইতি রাজনির্ঘণ্টঃ॥

করহাটকঃ (পুং) মদনবৃক্ষঃ। হস্তীয়স্বর্ণে ক্লী॥

করামর্দ্দঃ (পুং) করমর্দ্দবৃক্ষঃ। করমৃচা ইতি ভাষা। ইতি শব্দরত্নাবলী॥

করাম্বুকঃ (পুং) কৃষ্ণপাকফলবৃক্ষঃ। পাণি

আমলা ইতি ভাষা। ইতি শব্দচন্দ্রিকা ভরতধৃতবাচস্পতিশ্চ ॥

করাম্লকঃ (পুং) করমর্দ্দকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

করায়িকা (স্ত্রী) বলাকাপক্ষী। ক্ষুদ্রবকঃ। ইতি ভূরিপ্রয়োগঃ ॥

করারোটঃ (পুং) অঙ্গুরীয়কং। ইতি ত্রিকাণ্ডশেষঃ ॥

করালং (ক্লী) কৃষ্ণকুঠেরকঃ। কাল তুলসী ইতি ভাষা। ইতি মেদিনী ॥

করালঃ (পুং) সর্জ্জরসযুক্ততৈলং। গর্জন তেল ইতি ভাষা। ইতি মেদিনী ॥ তৈলে ঘৃতে বা পক্কবেসবারঃ। ইতি পাকরাজেশ্বরঃ ॥

করালঃ (ত্রি) দন্তুরঃ। দেঁতো ইতি ভাষা ॥ তুঙ্গঃ। উঁচু ইতি ভাষা ॥ ভীষণঃ। ভয়ানক ইতি যাবৎ। ইতি মেদিনী ॥

করালকঃ (পুং) কৃষ্ণতুলসী। ইতি রত্নমালা ॥ করালশব্দার্থশ্চাত্র ॥

করালত্রিপুটা (স্ত্রী) লঙ্কাধান্যং। ইতি রাজনির্ঘণ্টঃ ॥

করালা (স্ত্রী) শারিবা। অনন্তমূল ইতি খ্যাতা। ইতি রত্নমালা ॥

করালিকঃ (পুং) বৃক্ষঃ। ইতি হেমচন্দ্রঃ ॥

করালী (স্ত্রী) অগ্নেঃ সপ্তজিহ্বান্তর্গতজিহ্বাবিশেষঃ। ইতি জটাধরঃ ॥

করিকণাবল্লী (স্ত্রী) চবিকাবৃক্ষঃ। চই ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ ॥

করিকুসুম্ভঃ (পুং) নাগকেশরচূর্ণকং। ইতি হারাবলী ॥

করিগর্জ্জিতং (ক্লী) হস্তিগর্জনং। তৎপর্য্যায়ঃ। বৃংহিতং ২। ইত্যমরঃ ॥

করিজঃ (পুং) হস্তিশিশুঃ। ইতি শব্দমালা ॥

করিণী (স্ত্রী) হস্তিনী। তৎপর্য্যায়ঃ। ধেনুকা২ বশা ৩। ইত্যমরঃ ॥ করেণূঃ ৪ করেণুঃ ৫ করেণুকা ৬ রেণুকা ৭ বাসিতা ৮ বাসা ৯ হস্তিনী ১০। ইতি শব্দরত্নাবলী ॥ কটম্ভরা ১১ পুষ্করিণী ১২ কচা ১৩ গণিকা ১৪ গজযোষিৎ ১৫। ইতি জটাধরঃ ॥ পদ্মিনী ১৬। ইত্যমরটীকা ॥

করিদারকঃ (পুং) সিংহঃ। ইতি শব্দরত্নাবলী ॥

করিপত্রং (ক্লী) তালীশপত্রং। ইতি রাজনির্ঘণ্টঃ ॥

করিপিপ্পলী (স্ত্রী) গজপিপ্পলী। ইত্যমরঃ ॥

করিপোতঃ (পুং) করিশাবকঃ। ইতি হলায়ুধঃ ॥

করিবন্ধঃ (পুং) হস্তিবন্ধনস্তম্ভঃ। তৎপর্য্যায়ঃ। প্রারব্ধিঃ ২। ইতি হারাবলী ॥

করিমাচলঃ (পুং) সিংহঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

করিমুখঃ (পুং) গণেশঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

করিরঃ (পুং ক্লী) করীরঃ। ইতি শব্দরত্নাবলী ॥

করিশাবকঃ (পুং) হস্তিশিশুঃ। তৎপর্য্যায়ঃ। কলভঃ ২। করভ ইত্যপি পাঠঃ। ইত্যমরঃ ॥ করিপোতঃ ৩। ইতি হলায়ুধঃ ॥ করিজঃ ৪। ইতি শব্দমালা ॥ বিক্কঃ ৫। ধিক্কঃ ৬। যথা। যাবৎ পঞ্চাব্দমেতস্মিন্ করভঃ কলভোঽপি চ। বিক্কধিক্কৌ তথা

স্ত্রী তু করভী কলভীত্যপি॥ ইতি শব্দরত্নাবলী॥
করী [ন্] (পুং) হস্তী। ইত্যমরঃ॥
করীরঃ (পুং ক্লী) বংশাঙ্কুরঃ। বাঁশের কোঁড়া ইতি ভাষা। ইত্যমরঃ॥ অস্য গুণাঃ। শ্লেষ্মনাশিত্বং। কষায়ত্বং। দাহজনকত্বঞ্চ। ইতি রাজবল্লভঃ॥
করীরঃ (পুং) ঘটঃ। ইতি মেদিনী॥ মরুভূমিজ উষ্ট্রপ্রিয়ঃ কণ্টকিবৃক্ষঃ। করীল ইতি ভাষা। তৎপর্য্যায়ঃ। ক্রকরঃ ২ গ্রন্থিলঃ ৩। ইত্যমরঃ॥ ক্রকচঃ ৪। ইতি তট্টীকা॥ নিষ্পত্রিকা ৫ করিরঃ ৬ গূঢ়পত্রঃ ৭ করকঃ ৮ তীক্ষ্ণকণ্টকঃ ৯। অস্য গুণাঃ। আধ্মানকারিত্বং। কষায়ত্বং। কটুত্বং। উষ্ণত্বং। অতিশয়কফকারিত্বং শ্বাসানিলারোচকসর্ব্বশূলবিচ্ছর্দ্দিখর্জুব্রণদোষনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥
করীরা (স্ত্রী) চীরিকা। ঝিঁঝি পোকা ইতি ভাষা। হস্তিদন্তমূলং। ইত্যুণাদিকোষঃ॥
করীরিকা (স্ত্রী) হস্তিদন্তমূলং। ইতি ত্রিকাণ্ডশেষঃ॥
করীরী (স্ত্রী) চীরিকা। হস্তিদন্তমূলং। ইতি মেদিনী॥
করীষঃ (পুং ক্লী) শুষ্কগোময়ং। ঘুঁটে ইতি ভাষা। ইত্যমরঃ॥ তৎপর্য্যায়ঃ। গোগ্রন্থিঃ ২ ছগণঃ ৩। ইতি হেমচন্দ্রঃ॥
করীষাগ্নিঃ (পুং) শুষ্কগোময়বহ্নিঃ। ঘুঁটের আগুন ইতি ভাষা। তৎপর্য্যায়ঃ। ছাগণঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥
করুণঃ (পুং) বৃক্ষবিশেষঃ। করুণা লেবুর গাছ ইতি ভাষা। তৎফলগুণঃ। কফবায্বামমেদোনাশিত্বং। পিত্তপ্রকোপকত্বঞ্চ। ইতি রাজবল্লভঃ॥ বুদ্ধভেদঃ। ইতি ত্রিকাণ্ডশেষঃ॥ শৃঙ্গারাদ্যষ্টরসান্তর্গততৃতীয়রসঃ। ইত্যমরঃ॥ তস্য লক্ষণং। ইষ্টনাশাদনিষ্টাপ্তেঃ করুণাখ্যো রসো ভবেৎ। ধীরৈঃ কপোতবর্ণোঽয়ং কথিতো যমদৈবতঃ॥ শোকোঽত্র স্থায়িভাবঃ স্যাচ্ছোচ্যমালম্বনং মতং। তস্য দাহাদিকাবস্থা ভবেদুদ্দীপনং পুনঃ॥ অনুভাবা দৈবনিন্দা ভূপাতক্রন্দিতাদয়ঃ। বৈবর্ণোচ্ছ্বাসনিশ্বাসস্তম্ভপ্রলপনানি চ॥ নির্ব্বেদমোহাপস্মারব্যাধিগ্লানিস্মৃতিশ্রমাঃ। বিষাদজড়তোন্মাদচিন্তাদ্যা ব্যভিচারিণঃ॥ শোচ্যং বিনষ্টবন্ধুপ্রভৃতি। যথা রাঘববিলাসে। বিপিনে ক জটানিবন্ধনং তব চেদং ক মনোহরং বপুঃ। অনয়োর্ঘটনা বিধেঃ স্ফুটং ননু খড়্গেন শিরীষকর্ত্তনং॥ অত্র রামবনবাসজনিতশোকার্ত্তস্য দশরথস্য দৈবনিন্দা। এবং বন্ধুবিয়োগবিত্তনাশাদাবপি উদাহার্য্যং॥ পরিপোষস্তু মহাভারতে স্ত্রীপর্ব্বণি বোদ্ধব্যঃ। ইতি সাহিত্যদর্পণং॥
করুণমল্লী (স্ত্রী) নবমল্লিকা। ইতি শব্দচন্দ্রিকা॥
করুণবিপ্রলম্ভঃ (পুং) পূর্ব্বরাগাদিচতুর্ভেদবিপ্রলম্ভশৃঙ্গারমধ্যে বিপ্রলম্ভবিশেষঃ। অস্য লক্ষণং। যূনোরেকতরস্মিন্ গতবতি লোকান্তরং পুনর্লভ্যে। বিমনায়তে যদৈকস্তদা ভবেৎ করুণবিপ্রলম্ভাখ্যঃ॥

যথা কাদম্বর্য্যাং পুণ্ডরীকমহাশ্বেতাবৃত্তান্তে পুনরলভ্যে শরীরান্তরে বা লভ্যে করুণাখ্য এব রসঃ। কিঞ্চাত্রাকাশসরস্বতীভাষানন্তরমেব শৃঙ্গারঃ। সঙ্গমপ্রত্যাশায়াং রতেরুদ্ভাবাৎ প্রথমস্তু করুণ এবেত্যভিযুক্তা মন্যন্তে যচ্চাত্র সঙ্গমপ্রত্যাশানন্তরমপি ভবতো বিপ্রলম্ভশৃঙ্গারস্য প্রবাসাখ্যো ভেদ এবেতি কেচিদাহুঃ তদন্যে মরণরূপবিশেষসম্ভবাত্তম্ভিন্নমপি মন্যন্তে। ইতি সাহিত্যদর্পণং ॥

করুণা ( স্ত্রী ) পরদুঃখহানীচ্ছা। তৎপর্য্যায়ঃ। কারুণ্যং ২ ঘৃণা ৩ কৃপা ৪ দয়া ৫ অনুকম্পা ৬ অনুক্রোশঃ ৭। ইত্যমরঃ ॥ শূকঃ ৮। ইতি হেমচন্দ্রঃ ॥

করুণাপরঃ ( ত্রি ) দয়াপরঃ। তৎপর্য্যায়ঃ। দয়ালুঃ ২ কৃপালুঃ ৩ সূরতঃ ৪। ইতি হেমচন্দ্রঃ ॥

করুণী ( স্ত্রী ) পুষ্পবৃক্ষবিশেষঃ। ককরখিরুণি ইতি কোকণে প্রসিদ্ধা। তৎপর্য্যায়ঃ। গ্রীষ্মপুষ্পী ২ রক্তপুষ্পী ৩ চারিণী ৪ রাজপ্রিয়া ৫ রাজপুষ্পী ৬ সূক্ষ্মা ৭ ব্রহ্মচারিণী ৮। অস্যা গুণাঃ। কটুত্বং। তিক্তত্বং। উষ্ণত্বং। কফমারুতাধ্মানবিষবিচ্ছর্দ্দিজন্তূর্দ্ধশ্বাসনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

করেটঃ ( পুং ) নখঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

করেটব্যা (স্ত্রী) ধনচ্ছু পক্ষী। ইতি ত্রিকাণ্ডশেষঃ॥

করেটুঃ ( পুং ) পক্ষিবিশেষঃ। করকটিয়া ইতি ভাষা। তৎপর্য্যায়ঃ। কর্করেটুঃ ২। ইত্যমরঃ॥ করটুঃ ৩ কর্করাটুকঃ ৪। ইতি হেমচন্দ্রঃ ॥

করেণুঃ ( পুং ) হস্তী। ইত্যমরঃ ॥ কর্ণিকারবৃক্ষঃ। ইতি বিশ্বঃ ॥

করেণুঃ ( স্ত্রী ) হস্তিনী। ইত্যমরঃ ॥

করেণুভূঃ ( পুং ) পালকাপ্যমুনিঃ। ইতি হেমচন্দ্রঃ

করেণুসুতঃ ( পুং ) মুনিবিশেষঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

করেণূঃ ( পুং স্ত্রী ) হস্তী। হস্তিনী। ইত্যমরটীকায়াং রায়মুকুটঃ ॥

করেন্দুকঃ ( পুং ) ভূতৃণং। ইতি রাজনির্ঘণ্টঃ ॥

করেবরঃ ( পুং ) তুরুষ্কঃ। শিলারস ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ ॥

করোটং ( ক্লী ) শিরোঽস্থি। ইতি ভরতো দ্বিরূপকোষশ্চ ॥

করোটিঃ ( স্ত্রী ) শিরোঽস্থি। মাতার খুলি ইতি ভাষা। ইত্যমরঃ ॥

করোটী ( স্ত্রী ) শিরোঽস্থি। ইতি ভরতো দ্বিরূপকোষশ্চ ॥

কর্ক হাসে। সৌত্রধাতুরয়ং। ইতি কবিকল্পদ্রুমঃ ॥ কর্কশঃ। ইতি দুর্গাদাসঃ ॥

কর্কঃ ( পুং ) শুক্লাশ্বঃ। ইত্যমরঃ ॥ কুলীরঃ। দর্পণঃ। ঘটঃ। কর্কটরাশিঃ। অগ্নিঃ। ইতি হেমচন্দ্রঃ শব্দরত্নাবলী চ ॥ কর্কটবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কর্কচির্ভিটী ( স্ত্রী ) চির্ভিটা। কর্কটীভেদঃ। ইতি রাজনির্ঘণ্টঃ ॥

কর্কটঃ ( পুং ) বৃক্ষবিশেষঃ। তৎপর্য্যায়ঃ। কর্কঃ ২ ক্ষুদ্রধাত্রী ৩ ক্ষুদ্রামলকসংজ্ঞঃ ৪ কর্কফলং ৫ ॥ * ॥ জলজন্তুবিশেষঃ। কাঁকড়া ইতি ভাষা। তৎপর্য্যায়ঃ।

কর্কটকঃ ২ কুলীরঃ ৩ কুলীরকঃ ৪ সদংশকঃ ৫ পঙ্কবাসঃ ৬ তির্য্যগ্গামী ৭। অস্য গুণাঃ। সৃষ্টবিণ্মূত্রত্বং। ভগ্নসন্ধানকৃত্বং। বায়ুপিত্তনাশিত্বঞ্চ। কৃষ্ণকর্কটগুণাঃ। বলকারিত্বং। ঈষদুষ্ণত্বং। অনিলাপহত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ * ॥ পক্ষিবিশেষঃ। করকটিয়া ইতি ভাষা। ইতি মেদিনী ॥ পদ্মকন্দঃ। তুম্বী। ইতি জটাধরঃ ॥ * ॥ মেষাদিদ্বাদশরাশ্যন্তর্গতচতুর্থরাশিঃ। স তু পুনর্ব্বসুশেষপাদেন সহ পুষ্যাশ্লেষাভ্যাং ভবতি। অস্য দেবতা কুলীরাকৃতিঃ। স তু পৃষ্ঠোদয়ঃ। শ্বেতবর্ণঃ। কফপ্রকৃতিঃ। স্নিগ্ধঃ। জলচরঃ। বিপ্রবর্ণঃ। উত্তরদিক্স্বামী। বহুস্ত্রীসঙ্গঃ। বহুসন্তানশ্চ। অত্র জাতস্য ফলং। কপটমনস্ত্বং মৃদুভাষিত্বং মন্ত্রিত্বং অপ্রবাসিত্বং অঋণিত্বঞ্চ। ইতি জ্যোতিষং ॥ * ॥ জন্মকালীনচন্দ্রাশ্রিতৈতদ্রাশিফলং। শ্রুতকলামলনির্ম্মলবৃত্তয়ঃ সুকৃশগন্ধজলাশয়কেলয়ঃ। কিল নরাস্তু কুলীরগতে বিধৌ বসুমতঃ সুমতোঽর্থিলব্ধয়ঃ ॥ ইতি কোষ্ঠীপ্রদীপঃ ॥*॥ তস্যোদয়ে তন্নামকলগ্নং ভবতি। তস্য গণিতপ্রাপ্তপরিমাণং যথা। দশব্যঙ্গুলাধিকপঞ্চাঙ্গুলপ্রভে কলিকাতাখ্যদেশে বর্ত্তমানোনবিংশায়নাংশে চত্বারিংশদধিকপঞ্চদণ্ডাঃ। ইতি জ্যোতিষং ॥ তত্র জাতফলং। কর্কিলগ্নে সমুৎপন্নো ভোগী সর্ব্বজনপ্রিয়ঃ। মিষ্টান্নপানভোগী চ জায়তে স্বজনপ্রিয়ঃ ॥ ইতি কোষ্ঠীপ্রদীপঃ ॥

কর্কটকঃ (পুং) কুলীরঃ। ইত্যমরঃ ॥

কর্কটশৃঙ্গিকা (স্ত্রী) কর্কটশৃঙ্গীবৃক্ষঃ। ইতি শব্দরত্নাবলী ॥

কর্কটশৃঙ্গী (স্ত্রী) বৃক্ষবিশেষঃ। কাঁকড়াশিঙ্গী ইতি ভাষা। তৎপর্য্যায়ঃ। কর্কটাখ্যা ২ মহাঘোষা ৩ শৃঙ্গী ৪ কুলীরশৃঙ্গী ৫ চক্রাঙ্গী ৬ কুলিঙ্গী ৭ কাসনাশিনী ৮। ইতি রত্নমালা ॥ ঘোষা ৯ বনমূর্দ্ধজা ১০ চক্রা ১১ শিখরী ১২ কর্কটাঙ্গা ১৩ কর্কটী ১৪ বিষাণিকা ১৫ কৌলীরা ১৬ চন্দ্রাস্পদা ১৭ বলাঙ্গা ১৮। অস্যা গুণাঃ। তিক্তত্বং। গুরুত্বং। উষ্ণত্বং। বায়ুহিক্কাতিসারকাসশ্বাসপিত্তাস্রনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

কর্কটাখ্যা (স্ত্রী) কর্কটশৃঙ্গীবৃক্ষঃ। ইতি রত্নমালা ॥

কর্কটাহ্বঃ (পুং) বিল্ববৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কর্কটাহ্বা (স্ত্রী) কর্কটশৃঙ্গীবৃক্ষঃ। ইতি বৈদ্যকং ॥

কর্কটিঃ (স্ত্রী) কর্কটী। কাঁকুড় ইতি ভাষা। ইতি শব্দরত্নাবলী ॥

কর্কটিনী (স্ত্রী) দারুহরিদ্রা। ইতি রাজনির্ঘণ্টঃ ॥

কর্কটী (স্ত্রী) শাল্মলিফলং। ইতি মেদিনী ॥ সর্পঃ। ইতি শব্দরত্নাবলী ॥ দেবদালীলতা। কর্কটশৃঙ্গীবৃক্ষঃ। এর্ব্বারুঃ। বড় কাঁকুড় ইতি ভাষা। ঘোটিকাবৃক্ষঃ। ফললতাবিশেষঃ। কাঁকুড় ইতি ভাষা। তৎপর্য্যায়ঃ। কটুদলী ২ ছর্দ্দাপনিকা ৩ পীনসা ৪ মূত্রফলা ৫ ত্রপুষা ৬

হস্তিপর্ণী ৭ লোমশকাণ্ডা ৮ মূত্রলা ৯ বহুকন্দা ১০। ইতি রাজনির্ঘণ্টঃ ॥ কর্কটাক্ষঃ ১১ শাস্তনুঃ ১২। ইতি রত্নমালা ॥ চির্ভটী ১৩ বালুকী ১৪ এর্ব্বারুঃ ১৫ ত্রপুষী ১৬। ইতি হেমচন্দ্রঃ ॥ অস্যা গুণাঃ। মধুরত্বং। শীতত্বং। তিক্তায়াস্ত রক্তপিত্তনাশিত্বং। কফদোষকারিত্বঞ্চ। পক্কায়াস্ত মূত্ররোধার্ত্তিনাশিত্বং। ইতি রাজনির্ঘণ্টঃ ॥

কর্কটুঃ (পুং) করেটুপক্ষী। করকটিয়া ইতি ভাষা। ইতি শব্দরত্নাবলী ॥

কর্কন্ধুঃ (পুং স্ত্রী) কোলিবৃক্ষঃ। ইত্যমরটীকায়াং স্বামী ॥

কর্কন্ধূঃ (পুং স্ত্রী) বদরীবৃক্ষঃ। ইত্যমরঃ ॥

কর্করং (ত্রি) কঠিনং। ইতি মেদিনী ॥

কর্করং (ক্লী) চূর্ণজনকক্ষুদ্রপাষাণখণ্ডং। তৎপর্য্যায়ঃ। চূর্ণখণ্ডং ২। কাঁকর ঘুটিং ইত্যাদি ভাষা। ইতি হারাবলী ॥

কর্করঃ (পুং) দর্পণঃ। ইতি মেদিনী ॥

কর্করাঙ্গঃ (পুং) কালকণ্ঠপক্ষী। ইতি শব্দমালা ॥

কর্করাটুঃ (পুং) কটাক্ষঃ। ইতি জটাধরঃ ॥

কর্করাটুকঃ (পুং) কর্করেটুপক্ষী। করকটিয়া ইতি ভাষা। ইতি শব্দরত্নাবলী ॥

কর্করান্ধকঃ (পুং) অন্ধকূপঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

কর্করালঃ (পুং ক্লী) চূর্ণকুন্তলঃ। ইতি হেমচন্দ্রঃ ॥

কর্করী (স্ত্রী) স্বল্পবারিধানিকা। ঝারী ইতি ভাষা। তৎপর্য্যায়ঃ। আলুঃ ২ গলন্তিকা ৩। ইত্যমরঃ ॥ অলুঃ ৪ আরুঃ ৫। ইতি তট্টীকা ॥

কর্করীকা (স্ত্রী) কর্করী। ইত্যাদিকোষঃ ॥

কর্করেটং (ক্লী) গলে হস্তাধানং। গলাটিপি ইতি ভাষা। তৎপর্য্যায়ঃ। অর্দ্ধচন্দ্রং ২ অঙ্গুলিতোরণং ৩। ইতি হারাবলী ॥

কর্করেটুঃ (পুং) করেটুপক্ষী। করকটিয়া ইতি ভাষা। ইত্যমরঃ ॥

কর্কশঃ (পুং) কাম্পিল্যবৃক্ষঃ। গুঁড়া রোচনী ইতি ভাষা। ইত্যমরঃ ॥ কাসমর্দ্দঃ। ইক্ষুঃ। খড়্গঃ। ইতি হেমচন্দ্রঃ ॥

কর্কশঃ (ত্রি) সাহসিকঃ। কঠোরঃ। অমসৃণঃ। দুষ্পর্শঃ। ইত্যমরঃ ॥ ক্রূরঃ। নির্দ্দয়ঃ। ইতি মেদিনী ॥ কৃপণঃ। ইতি বিশ্বঃ ॥

কর্কশচ্ছদঃ (পুং) পটোলঃ। ইতি শব্দমালা ॥ শাকোটবৃক্ষঃ। শেওড়া ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ ॥

কর্কশচ্ছদা (স্ত্রী) কোশাতকী। ঝিঙ্গা ইতি ভাষা। দগ্ধাবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কর্কশদলঃ (পুং) পটোলঃ। ইতি রত্নমালা ॥

কর্কশদলা (স্ত্রী) দগ্ধাবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কর্কশবাক্যং (ক্লী) নিষ্ঠুরবচনং। পরুষা বাক্। ইতি শব্দরত্নাবলী ॥

কর্কশা (স্ত্রী) বৃশ্চিকালীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কর্কশিকা (স্ত্রী) বনকোলিঃ। ইতি রত্নমালা ॥

কর্কসারং (ক্লী) করম্ভকং। দধিসক্তুঃ। ইতি হারাবলী ॥

কর্কারুঃ (পুং) কুষ্মাণ্ডঃ। ইত্যমরঃ ॥

কর্কারুকঃ (পুং) কালিঙ্গবৃক্ষঃ। ইতি হারাবলী ॥

কর্কিঃ (পুং) কর্কটরাশিঃ। ইতি জ্যোতিষং ॥

কর্কেতনং (ক্লী পুং) রত্নবিশেষঃ। তদুৎপত্ত্যাদি যথা। সূত উবাচ। বায়ুর্নখান্ দৈত্যপতের্গৃহীত্বা চিক্ষেপ সম্পদ্য বনেষু হৃষ্টঃ। ততঃ প্রসূতং পবনোপপন্নং কর্কেতনং পূজ্যতমং পৃথিব্যাং ॥ বর্ণেন তক্রুধিরসোমমধুপ্রকাশমাতাম্রপীত দহনোজ্জ্বলিতং বিভাতি। নীলং পুনঃ খলসিতং পরুষং বিভিন্নং ব্যাধ্যাদিদোষকরণেন ন তদ্বিভাতি ॥ স্নিগ্ধা বিশুদ্ধাঃ সমরাগিণশ্চ আপীতবর্ণা গুরবো বিচিত্রাঃ। ত্রাসব্রণব্যাধিবিবর্জ্জিতাশ্চ কর্কেতনাস্তে পরমাঃ পবিত্রাঃ ॥ পত্রেণ কাঞ্চনময়েন তু বেষ্টয়িত্বা হস্তে গলেঽথ ধৃতমেতদতিপ্রকাশং। রোগপ্রণাশনকরং কলিনাশনঞ্চ আয়ুষ্করং কুলকরঞ্চ সুখপ্রদঞ্চ ॥ এবম্বিধং বহুগুণং মণিমাবহন্তি কর্কেতনং শুভমলং কৃতয়ে নরা যে। তে পূজিতা বহুধনা বহুবান্ধবাশ্চ নিত্যোজ্জ্বলাঃ প্রমুদিতা অপি তে ভবন্তি ॥ একেঽপনম্ভ বিকৃতাকুলনীলভাসঃ প্রম্লানরাগ লুলিতাঃ কলুষা বিরূপাঃ। তেজোঽতিদীপ্তিকুলপুষ্টিবিহীনবর্ণাঃ কর্কেতনস্য সদৃশং বপুরুদ্বহন্তি ॥ কর্কেতনং যদি পরীক্ষিতবর্ণরূপং প্রত্যগ্রভাস্বরদিবাকরসুপ্রকাশং। তস্যোত্তমস্য মণিশাস্ত্রবিদা মহিম্না তুল্যস্তু মূল্যমুদিতং তুলিতস্য কার্য্যং ॥ ইতি গারুড়ে ৭৫ অধ্যায়ঃ ॥*॥ হস্তে গলেঽথধৃতমেতদতিপ্রকাশমিত্যত্র তপ্তং যদা হুতবহে ভবতি প্রকাশমিতি পুস্তকান্তরে পাঠঃ ॥

কর্কোটঃ (পুং) নাগরাজবিশেষঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

কর্কোটকঃ (পুং) বিল্ববৃক্ষঃ। কদ্রুপুত্রনাগরাজবিশেষঃ। ইতি মেদিনী ॥ ইক্ষুঃ। ইতি রাজনির্ঘণ্টঃ॥ ফললতাবিশেষঃ। কাঁকরোল ইতি ভাষা। তৎপর্য্যায়ঃ। কিলাসঘ্নঃ ২ তিক্তপত্রঃ ৩ সুগন্ধকঃ ৪। ইতি হেমচন্দ্রঃ॥ অস্য গুণঃ। শুক্রকফপিত্তনাশিত্বং। রুচিকারিত্বঞ্চ। ইতি রাজবল্লভঃ ॥

কর্কোটকী (স্ত্রী) পীতঘোষাবৃক্ষঃ। ইতি রত্নমালা ॥

কর্কোটিকা (স্ত্রী) কর্কোটকঃ। কাঁকরোল ইতি ভাষা। তৎপর্য্যায়ঃ। কুষ্মাণ্ডী ২ কর্কোটী ৩। তৎফলং কারবেল্লকতুল্যগুণং। ইতি রাজনির্ঘণ্টঃ ॥

কর্চ্চরিকা (স্ত্রী) পিষ্টকবিশেষঃ। কচুরী ইতি ভাষা। ইতি পাকরাজেশ্বরঃ ॥

কর্চ্চূরং (ক্লী) কর্ব্বুরং। স্বর্ণং। কচ্চুরমপি-পাঠঃ। ইত্যমরটীকা ॥

কর্চ্চূরঃ (পুং) বৃক্ষবিশেষঃ। কচুর ইতি ভাষা। তৎপর্য্যায়ঃ। দ্রাবিড়ঃ ২ কর্শ্যঃ ৩ দুর্লভঃ ৪ গন্ধমূলকঃ ৫ বেধমুখ্যঃ ৬ গন্ধসারঃ ৭ জটালঃ ৮। অস্য গুণাঃ। কটুত্বং। তিক্তত্বং। উষ্ণত্বং। কফকাসগলগণ্ডাদিদোষনাশিত্বং। মুখবৈশদ্যজননত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

কর্চ্চূরকঃ (পুং) কর্ব্বুরকঃ। কাঁচা হলুদ ইতি ভাষা। ইত্যমরটীকায়াং স্বামী ॥

কর্জ্জ পীড়ে। ইতি কবিকল্পদ্রুমঃ ॥ কর্জতি। ইতি দুর্গাদাসঃ ॥

কর্ণ ৎক ভিদি। ইতি কবিকল্পদ্রুমঃ ॥ কর্ণয়তি কর্ণাপয়তি। আঙপূর্ব্বোঽয়ং শ্রবণে। দেবাকর্ণয় যেন যেন সহসা যদ্যৎ সমাসাদিতমিতি। উপসর্গাস্তত্তদর্থানাং দ্যোতকা এব ন তু বাচকাঃ। কেবলধাতোরনেকার্থত্বেঽবশ্যবক্তব্যে উপসর্গপূর্ব্বস্যাপ্যন্যার্থো ধাতোরেব কল্প্যতে লাঘবাৎ। ক্বচিদুপসর্গা ধাত্বর্থমেবানুবর্ত্তন্তে। তথা চ। ধাত্বর্থং বাধতে কশ্চিৎ কশ্চিত্তমনুবর্ত্ততে। তমেব বিশিনষ্ট্যন্য উপসর্গগতিস্ত্রিধা ॥ ইতি বিস্তরবৃত্তিঃ ॥ ক্রমেণোদাহরণানি। আদত্তে গৃহ্লাতীত্যর্থঃ। প্রসূয়তেঽত্র প্রসব এব ধাত্বর্থঃ। প্রশব্দস্তমেবার্থং দ্যোতয়তি। প্রণমতি প্রকর্ষেণ নমতীত্যর্থঃ। কেচিত্তু অনর্থকোঽন্যঃ প্রযুজ্যতে: ইতি চতুর্থচরণং পঠন্তি তচ্চিন্ত্যং। ইতি দুর্গাদাসঃ ॥

কর্ণঃ (পুং) শ্রবণেন্দ্রিয়ং। কাণ্ ইতি ভাষা। তৎপর্য্যায়ঃ। শব্দগ্রহঃ ২ শ্রোত্রং ৩ শ্রুতিঃ ৪ শ্রবণং ৫ শ্রবঃ ৬। ইত্যমরঃ॥ শ্রোত্রং ৭। ইতি তট্টীকা ॥ বচোগ্রহঃ ৮। ইতি রাজনির্ঘণ্টঃ ॥ কর্ণস্তু শ্রবণেন্দ্রিয়স্য গোলকং স্থানং। তত্র শ্রোত্রমিন্দ্রিয়ং। তত্তু কর্ণশস্কুল্যবচ্ছিন্ননভোভাগঃ। তস্য দেবতাদিক্। বিষয়ঃ শব্দঃ। ইতি শ্রীভাগবতং ॥ যুধিষ্ঠিরাগ্রজঃ। স তু কুন্ত্যাঃ কন্যাকালে সূর্য্যৌরসজাতঃ। তৎপর্য্যায়ঃ। রাধেয়ঃ ২ বসুষেণঃ ৩ অর্কনন্দনঃ ৪ ঘটোৎকচান্তকঃ ৫ চাম্পেশঃ ৬ সূতপুত্রকঃ ৭। ইতি ত্রিকাণ্ডশেষঃ ॥ চাম্পাধিপঃ ৮ অঙ্গরাট্ ৯ রাধাসুতঃ ১০ অর্কতনয়ঃ ১১। ইতি হেমচন্দ্রঃ ॥ অঙ্গাধিপঃ ১২। ইতি ভূরিপ্রয়োগঃ ॥ সুবর্ণালিবৃক্ষঃ। ইতি মেদিনী ॥

কর্ণকণ্ডূঃ (পুং) কর্ণরোগবিশেষঃ। তস্য নিদানং। মারুতঃ কফসংযুক্তঃ কর্ণকণ্ডুং করোতি চ। ইতি মাধবকরঃ ॥

কর্ণকীটী (স্ত্রী) কীটবিশেষঃ। কাণকোটারী কেন্নাই ইত্যাদি ভাষা। তৎপর্য্যায়ঃ। কর্ণজলৌকা ২ শতপদী ৩। ইতি হেমচন্দ্রঃ ॥ চিত্রাঙ্গী ৪। ইতি রাজনির্ঘণ্টঃ ॥ পৃথিকা ৫ কর্ণদুন্দুভিঃ ৬। ইতি শব্দমালা ॥

কর্ণগূথং (ক্লী) কর্ণমলং। কাণের খলি ইতি ভাষা। ইতি হারাবলী ॥

কর্ণগূথকঃ (পুং) কর্ণরোগবিশেষঃ। তস্য নিদানং। পিত্তোষ্মশোষিতঃ শ্লেষ্মা জায়তে কর্ণগূথকঃ। ইতি মাধবকরঃ ॥

কর্ণজলূকা (স্ত্রী) কর্ণকীটী। ইতি শব্দরত্নাবলী ॥

কর্ণজলৌকা (স্ত্রী) শতপদী। ইত্যমরঃ॥

কর্ণজলৌকাঃ [স্] (স্ত্রী) কর্ণজলৌকা। ইত্যমরটীকায়াং ভরতঃ ॥

কর্ণজাহং (ক্লী) কর্ণমূলং। ইতি মুগ্ধবোধব্যাকরণং ॥

কর্ণজিৎ (পুং) অর্জ্জুনঃ। ইতি হেমচন্দ্রঃ ॥

কর্ণদর্পণঃ (পুং) তাড়ঙ্কনামকর্ণভূষণং। কাণতড়ুকা ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ ॥

কর্ণদুন্দুভিঃ (স্ত্রী) কর্ণকীটী। ইতি শব্দমালা॥

কর্ণধারঃ (পুং) নাবিকঃ। কাণ্ডারি মাজি ইত্যাদি ভাষা। ইত্যমরঃ॥

কর্ণপালী (স্ত্রী) কর্ণান্দুঃ। কাণ্‌বালা ইতি ভাষা। ইতি হারাবলী॥

কর্ণপিশাচী (স্ত্রী) দেবীবিশেষঃ। তন্মন্ত্রাদি যথা। অথ কর্ণপিশাচীমন্ত্রঃ। তদুক্তং তন্ত্রান্তরে। কর্ণাস্যেক্ষণলোহিতো বকগতোঽনন্তশ্চিকারো বদাতীতানাগতশব্দযুক্তভুবনেশী বহ্নিজায়ান্বিতা। তারাদ্যো মনুরেষ লক্ষজপতো ব্যাসেন সংসেবিতঃ সার্ব্বজ্ঞং লভতেঽচিরেণ নিয়তং পৈশাচিকী ভক্তিতঃ॥ অস্যার্থঃ। কর্ণঃ স্বরূপঃ। আস্যে আদৌ ঈক্ষণং ইকারঃ। তদ্‌যুক্তো লোহিতঃ পকারঃ। বকঃ শকারঃ। স অনন্তযুক্ত আকারযুক্তঃ। চি স্বরূপং। বদাতীতানাগতং স্বরূপং। ততো হ্রীঁ স্বাহা। এতেন ওঁ কর্ণপিশাচি বদাতীতানাগতং হ্রীঁ স্বাহা॥ * ॥ মন্ত্রান্তরং। কহ যুগ্মং কালিকে চ গৃহ্ণ যুগ্মং তথৈব চ। পিণ্ডং পিশাচি স্বাহেতি নৃপার্ণঃ কথিতঃ প্রিয়ে॥ কহ কহ কালিকে গৃহ্ণ গৃহ্ণ পিণ্ডং পিশাচি স্বাহা॥ * ॥ ধ্যানং যথা। কৃষ্ণাং রক্তবিলোচনাং ত্রিনয়নাং খর্ব্বাঞ্চ লম্বোদরীং বন্ধূকারুণজিহ্বিকাং বরবরাভীযুক্করামুন্মুখীং। ধূম্রার্চ্চির্জটিলাং কপালবিলসৎপাণিদ্বয়াং চঞ্চলাং সর্ব্বজ্ঞাং শবহৃৎকৃতাধিবসতীং পৈশাচিকীং তাং স্মরঃ॥ * ॥ অথ পূজা। নিশায়ামর্দ্ধরাত্রৌ চ হৃদি ন্যস্য পিশাচিকীং। দগ্ধমীনং বলিং দত্ত্বা রাত্রৌ সংপূজ্য সংজপেৎ॥ ওম্ কর্ণপিশাচি দগ্ধমীনবলিং গৃহ্ণ গৃহ্ণ মম সিদ্ধিং কুরু কুরু স্বাহেতি দগ্ধমীনং বলিং দদ্যাৎ। রক্তচন্দনবন্ধূকজবাপুষ্পাদিকঞ্চ যৎ। অমৃতং কুরু দেবেশি স্বাহেতি প্রোক্ষয়েজ্জলৈঃ॥ পূর্ব্বাহ্নে কিঞ্চিজ্জপ্ত্বা মধ্যাহ্নে একভক্তং নিরামিষং ভুক্ত্বা রাত্রাবপি তৎ সংখ্যং জপেৎ। অন্যৎ কিঞ্চিন্ন ভোক্তব্যং তাম্বূলাদিকং বিনা। জপস্য দশাংশং তর্পণং। ওম্ কর্ণপিশাচীং তর্পয়ামি হ্রীঁ স্বাহা। এবং ক্রমেণ লক্ষমেকং পুরশ্চরণং কৃত্বা দশাংশং হোময়েৎ। তদভাবে দশাংশং তর্পণং কৃত্বা বরং প্রার্থয়েৎ। মূলং রক্তচন্দনেন লিখিত্বা যন্ত্রোপরি ইষ্টদেবতাং পূজয়েৎ॥ * ॥ অথ সিদ্ধিলক্ষণমুচ্যতে। গগনে হুঁকারাদিশ্রবণদীর্ঘাগ্নিশিখারূপসন্দর্শনাৎ সিদ্ধির্ভবিষ্যতীতি জ্ঞাত্বা তথাবিধমাচরেৎ॥ * ॥ মন্ত্রান্তরং। প্রণবং মায়া কর্ণপিশাচি মে কর্ণে কথয় হুঁ ফট্ স্বাহা। ইতি প্রদীপতৈলং পাদয়োর্দত্ত্বা রাত্রৌ লক্ষং জপেৎ। ততঃ সর্ব্বজ্ঞো ভবতি। নাস্য পূজা ধ্যানং॥ * ॥ তথা তারং কামবীজং জয়াদেবী স্বাহা। অস্যাপি ঋষ্যাদিন্যাসাদেরভাবঃ। পূর্ব্বং লক্ষং জপ্ত্বা গৃহগোধিকাং নিপাত্য তদুপরি জয়াদেবীং যথাশক্তি সম্পূজ্য তাবৎ জপেৎ যাবৎ সা জীবতি। ততঃ সিদ্ধ্যতি। সিদ্ধিস্তু মানসাদিপ্রশ্নে কৃতে সা আয়াতি

ততস্তস্যাঃ পৃষ্ঠে সর্ব্বং ভূতভবিষ্যদাদিকং পশ্যতি। ইতি কৃষ্ণানন্দকৃততন্ত্রসারঃ॥

কর্ণপুষ্পঃ (পুং) মোরটলতা। ইতি রাজনির্ঘণ্টঃ॥

কর্ণপূঃ [র্] (স্ত্রী) কর্ণরাজপুরং। তৎপর্য্যায়ঃ। চম্পা ২ মালিনী ৩ লোমপাদপূঃ ৪। ইতি হেমচন্দ্রঃ॥

কর্ণপূরঃ (পুং) শিরীষবৃক্ষঃ। নীলোৎপলং। অবতংসঃ। ইতি মেদিনী॥ অশোকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কর্ণপূরকঃ (পুং) কদম্ববৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কর্ণপ্রতিনাহঃ (পুং) কর্ণরোগবিশেষঃ। তস্য সম্প্রাপ্তিরূপে। সকর্ণগূথো দ্রবতাং যদা গতো বিলায়িতো ঘ্রাণমুখং প্রপদ্যতে। তদা স কর্ণপ্রতিনাহসংজ্ঞিতো ভবেদ্‌বিকারঃ শিরসোঽর্দ্ধভেদকৃৎ॥ ইতি মাধবকরঃ॥

কর্ণফলঃ (পুং) মৎস্যবিশেষঃ। কাণলিমাচ্ ইতি ভাষা। অস্য গুণঃ। অজীর্ণরোগশ্লেষ্মকারিত্বং। ইতি রাজবল্লভঃ॥

কর্ণমলং (ক্লী) কর্ণজমলং। তৎপর্য্যায়ঃ কর্ণগূথং ২। ইতি হারাবলী॥

কর্ণমুকুরঃ (পুং) তাড়ঙ্কনামকর্ণভূষণং। ইতি ভূরিপ্রয়োগঃ॥

কর্ণমোটী (স্ত্রী) চামুণ্ডাদেবী। ইতি হেমচন্দ্রঃ

কর্ণরোগঃ (পুং) শ্রবণব্যাধিঃ। যথা। অথ কর্ণরোগাধিকারঃ। তত্র কর্ণরোগাণাং নামানি সংখ্যাঞ্চাহ। কর্ণশূলং প্রণাদশ্চ বাধির্য্যং ক্ষ্বেড় এব চ। কর্ণস্রাবঃ কর্ণকণ্ডূঃ কর্ণগূথস্তথৈব চ॥ প্রতিনাহো জন্তুকর্ণৌ বিদ্রধির্বিবিধস্তথা। কর্ণপাকঃ পূতিকর্ণস্তথৈবার্শশ্চতুর্ব্বিধং॥ তথার্ব্বুদং সপ্তবিধং শোফশ্চাপি চতুর্ব্বিধঃ। এতে কর্ণগতা রোগা অষ্টাবিংশতিরীরিতাঃ॥ *॥ তেষু কর্ণশূলস্য সংপ্রাপ্তিপূর্ব্বকং লক্ষণমাহ। সমীরণঃ শ্রোত্রগতোঽন্যথা চরন্ সমন্ততঃ শূলমতীব কর্ণয়োঃ। করোতি দোষৈশ্চ যথাস্বমাবৃতঃ স কর্ণশূলঃ কথিতো দুরাচরঃ॥ অন্যথাচরন্ প্রতিলোমং চরন্। দোষৈঃ পিত্তকফরক্তৈঃ। রক্তস্যাপি রুজাদিকর্তৃত্বেন দোষসাম্যাৎ দোষত্বমেব। যথাস্বং যথাত্মীয়নিদানং কুপিতৈঃ অথবা যথাস্বমিতি শূলবিশেষণং। দুরাচরঃ দুরুপচরঃ মূর্চ্ছাদ্যুপদ্রবযোগাৎ॥ *॥ কর্ণশূলস্যাসাধ্যতাং চাহ। মূর্চ্ছা দাহো জ্বরঃ কাশঃ ক্লমোঽথবমথুস্তথা। উপদ্রবাঃ কর্ণশূলে ভবন্ত্যেতে মরিষ্যতঃ॥ *॥ কর্ণনাদস্য লক্ষণমাহ। কর্ণস্রোতঃস্থিতে বাতে শৃণোতি বিবিধান্ স্বনান্। ভেরীমৃদঙ্গশঙ্খানাং কর্ণনাদঃ স উচ্যতে॥ * বাধির্য্যলক্ষণমাহ। যদা শব্দবহো বায়ুঃ স্রোতসাবৃত্য তিষ্ঠতি। শুদ্ধশ্লেষ্মান্বিতো বাপি বাধির্য্যং তেন জায়তে॥ *॥ অসাধ্যবাধির্য্যমাহ। বাধির্য্যং বালবৃদ্ধোত্থং চিরোত্থঞ্চ বিবর্জ্জয়েৎ॥ *॥ ক্ষ্বেড়মাহ। বায়ুঃ পিত্তাদিভির্যুক্তো বেণুঘোষসমস্বনং। করোতি কর্ণয়োঃ ক্ষ্বেড়ং কর্ণক্ষ্বেড়ঃ স উচ্যতে॥ ক্ষ্বেড়শব্দার্থং ব্যনক্তি। বেণু-

ঘোষসমস্বনমিতি। যত উক্তং। ক্ষ্বেড়নং বেণুঘোষবদিতি। নম্ন কর্ণনাদকর্ণক্ষ্বেড়য়োঃ কো ভেদঃ। উচ্যতে। কর্ণনাদঃ কেবলেন বাতেন জন্যতে তত্র নানাশব্দাংশ্চ শৃণোতি। কর্ণক্ষ্বেড়স্তু পিত্তাদিযুক্তেন বাতেন জন্যতে তত্র নিয়মেন বেণুঘোষমিব শৃণোতীতি ভেদঃ॥ *॥ কর্ণস্রাবমাহ। শিরোভিঘাতাদথবা নিমজ্জতো জলপ্রপাকাদথবাপি বিদ্রধেঃ। স্রবেদ্বিপূনং শ্রবণোঽনিলার্দিতঃ স কর্ণসংস্রাব ইতি প্রকীর্ত্তিতঃ॥ পূযমিত্যুপলক্ষণং জলং রসঞ্চ স্রাবয়েৎ। শ্রবণশব্দঃ পুংলিঙ্গোঽপ্যস্তি॥ *॥ কর্ণকণ্ডুমাহ। মারুতঃ কফসংযুক্তঃ কর্ণে কণ্ডুং করোতি হি॥ *॥ কর্ণগূথমাহ। পিত্তোষ্মশোষিতঃ শ্লেষ্মা কুরুতে কর্ণগূথকং॥ কর্ণে গূথং যস্মাৎ স কর্ণগূথব্যাধিঃ॥ *॥ প্রতিনাহমাহ। স কর্ণগূথো দ্রবতাং যদা গতো বিলাপিতো ঘ্রাণমুখং প্রপদ্যতে। তদা স কর্ণপ্রতিনাহসংজ্ঞিতো ভবেদ্বিকারঃ শিরসোঽর্দ্ধভেদকৃৎ॥ ঘ্রাণঞ্চ মুখঞ্চ একত্বং দ্বন্দ্বে। শিরসোঽর্দ্ধভেদকৃৎ অর্দ্ধাবভেদকাখ্যশিরোরোগকৃৎ॥ *॥ কৃমিকর্ণমাহ। যদা তু মূর্চ্ছত্যথবাত্র জন্তবঃ সৃজত্যপত্যান্যথবাপি মক্ষিকাঃ॥ তদঞ্জনত্বাৎ শ্রবণো নিরুধ্যতে ভিষগ্‌ভিরাদ্যৈঃ কৃমিকর্ণকো গদঃ। তদঞ্জনত্বাৎ কৃমিলক্ষণত্বাৎ॥ শ্রবণে কৃমিকর্ণকো গদো নিরুধ্যত ইত্যন্বয়ঃ॥ *॥ পতঙ্গাদিষু কর্ণপ্রবিষ্টেষু লক্ষণমাহ। পতঙ্গাঃ শতপদ্যশ্চ কর্ণস্রোত্রং প্রবিশ্য হি॥ অরতিং ব্যাকুলত্বঞ্চ ভৃশং কুর্ব্বন্তি বেদনাং। কর্ণৌ নিস্তুদ্যতে তস্য তথা ফরফরায়তে॥ কীটে চরতি রুক্ তীব্রা নিস্পন্দে মন্দবেদনা। নিস্পন্দে নিশ্চলে॥ *॥ দ্বিবিধকর্ণবিদ্রধিমাহ। ক্ষতাভিঘাতপ্রভবস্তু বিদ্রধির্ভবেত্তথা দোষকৃতোঽপরঃ পুনঃ॥ সরক্তপীতারুণমস্রমাস্রবেৎ প্রতোদধূমায়নদাহচোষবান্। ক্ষতপ্রভবো ঘাতপ্রভবশ্চ তয়োরথাগন্তুজত্বাদৈক্যং॥ অস্রং আস্রাবমিত্যর্থঃ॥ *॥ কর্ণপাকমাহ। কর্ণপাকস্তু পিত্তেন কোথবিক্লেদকৃদ্ভবেৎ॥ কোথঃ পূতিভাবঃ। ক্লেদ আর্দ্রতা॥ *॥ পূতিকর্ণমাহ। কর্ণবিদ্রধিপাকাদ্বা সকর্ণো বারিপূরণাৎ॥ পূযং স্রবতি যৎ পূতিং স জ্ঞেয়ঃ পূতিকর্ণকঃ॥ *॥ কর্ণস্রাবাদ্ভেদার্থমাহ। পূতন্তি নিয়মেন পূতি যথা স্যাদেবং স্রবতি॥ *॥ কর্ণগতানাং শোথার্ব্বুদার্শসাং লক্ষণান্যাহ। কর্ণশোথার্ব্বুদার্শাংসি জানীয়াদুক্তলক্ষণৈঃ। কর্ণশোথাশ্চ চত্বারো বাতপিত্তকফরক্তজাঃ॥ এবমর্শোঽপি চতুর্ব্বিধং। অন্যেষাং শোথানামর্শসাঞ্চাত্রাসম্ভব আধারপ্রভাবাৎ॥ অর্ব্বুদং সপ্তবিধং। বাতপিত্তকফরক্তমাংসমেদঃসিরাজং॥ এতে কর্ণরোগা অষ্টাবিংশতিঃ সুশ্রুতোক্তা উক্তাঃ॥ *॥ ইদানীং চরকোক্তকর্ণরোগচতুষ্টয়ং বাতপিত্তকফসন্নিপাতকৃতমাহ। তত্র বাতজমাহ। নাদোঽতিরুক্ কর্ণতলে তু শোথঃ স্রাবস্তনুশ্চাস্রবণঞ্চ বাতাৎ॥ *॥ পিত্তজমাহ। শোথঃ সরাগো দরণং বিদাহঃ সপূতি পীতস্রবণঞ্চ পিত্তাৎ॥ *॥ কফজ-

মাহ। বৈস্রুত্য কণ্ডুস্থিরশোথশুক্লস্নিগ্ধ-স্রুতিস্বল্পরুজঃ কফাচ্চ॥ বৈস্রুত্য অন্যথা স্রাবণং ॥ * ॥ ত্রিদোষজমাহ। সর্ব্বাণি রূপাণি চ সন্নিপাতাৎ স্রাবশ্চ তত্রাধিক-দোষবর্ণঃ॥ * ॥ কর্ণপাল্যাঃ সকর্ণাবয়বত্বাৎ তদ্বিকারমপ্যত্রৈবাহ। তত্র সনিদানং পরিপোটকলক্ষণমাহ ॥ সৌকুমার্য্যাৎ চিরোৎসৃষ্টে সহসৈবাতিবর্দ্ধিতে। কর্ণ-শোথো ভবেৎ পাল্যাং সরুজঃ পরিপোট-বান্॥ কৃষ্ণারুণানিভঃ স্তব্ধঃ সবাতাৎ পরি-পোটকঃ॥ * ॥ উৎপাতমাহ। গুর্ব্বাভরণ-সংযোগাৎ তাড়নাৎ ঘর্ষণাদপি। শোথঃ পাল্যাং ভবেৎ স্রাবো দাহপাকরুজা-ন্বিতঃ॥ রক্তে বা রক্তপিত্তাভ্যামুৎপাতঃ স গদঃ স্মৃতঃ ॥ * ॥ উন্মন্থকমাহ। কর্ণং বলাদ্বর্দ্ধয়তঃ পাল্যাং বায়ুঃ প্রকুপ্যতি। কফং সংগৃহ্য কুরুতে শোথস্তব্ধমবেদনং॥ উন্মন্থকঃ সকণ্ডূকো বিকারঃ কফবাতজঃ। অবেদনং ঈষদ্বেদনং ॥ * ॥ দুঃখবর্দ্ধন-মাহ। সংবর্দ্ধ্যমানে দুর্ব্বিদ্ধে কণ্ডুদাহরুজা-ন্বিতঃ॥ শোথো ভবতি পাকশ্চ ত্রিদোষো দুঃখবর্দ্ধনঃ। সংবর্দ্ধ্যমানে দুর্ব্বিদ্ধে কর্ণ ইতি শেষঃ॥ * ॥ পরিলেহিনমাহ। কফা-সৃক্ কৃময়ঃ ক্রুদ্ধাঃ সর্ষপাভা বিসারিণঃ। কুর্ব্বন্তি পিড়কাং পাল্যাং কণ্ডুদাহসম-ন্বিতাং॥ কফাসৃকৃকৃমিসম্ভূতঃ স বিসর্পা-ন্বিতস্ততঃ। লিহ্যাৎ সশষ্কুলীং পালীং পরিলেহী স চ স্মৃতঃ॥ স পিড়কাত্মকঃ পরিলেহিসংজ্ঞো গদঃ। লিহ্যাৎ নির্মাংসী-কুর্য্যাৎ ॥ * ॥ * ॥ অথ কর্ণরোগাণাং চিকিৎসা। কর্ণশূলে কর্ণনাদে বাধির্য্যে ক্ষ্বেড় এব চ ॥ চতুর্ষ্বপি চ রোগেষু সামান্যং ভেষজং স্মৃতং। শৃঙ্গবেরঞ্চ মধু চ সৈন্ধবং তৈলমেব চ। কদুষ্ণং কর্ণয়ো-র্ধার্য্যমেতৎ স্যাদ্বেদনাপহং ॥ ১ ॥ লশুনা-র্দ্রকশিগ্রূণাং বারুণ্যা মূলকস্য চ। কদল্যাঃ স্বরসঃ শ্রেষ্ঠঃ কদুষ্ণঃ কর্ণপূরণে॥ বারুণী বরুণঃ॥ ২ ॥ অর্কাঙ্কুরানম্লপিষ্টান্ সতৈ-লান্ লবণান্বিতান্। সন্নিদধ্যাৎ সুধাকাণ্ডে কোরিতে মৃতয়াবৃতে॥ পুটপাকক্রমস্বিন্নং পীড়য়েদারসাগমাৎ। সুখোষ্ণং তদ্রসং কর্ণে প্রক্ষিপেচ্ছূলশান্তয়ে॥ ৩ ॥ অর্কস্য পত্রং পরিণামপীতমাজ্যেন লিপ্তং শিখি-যোগতপ্তং। আপীড্য তস্যাম্বুসুখোষ্ণ-মেব কর্ণে নিষিক্তং হরতেঽতিশূলং ॥ ৪ ॥ তীব্রশূলাতুরে কর্ণে সশব্দে ক্লেদবাহিনি। ছাগমূত্রং প্রশংসন্তি কোষ্ণং সৈন্ধবসং-যুতং॥ ৫ ॥ তৈলং শ্যোণাকমূলেন মন্দে-ঽগ্নৌ বিধিনা শৃতং। হরেদাশু ত্রিদো-ষোত্থং কর্ণশূলং প্রপূরণাৎ ॥ ৬ ॥ হিঙ্গু-সৈন্ধবশুণ্ঠীভিস্তৈলং সর্ষপসম্ভবং। বিপক্বং হরতেঽবশ্যং কর্ণশূলং প্রপূরণাৎ॥ ৭ ॥ কর্ণশূলে কর্ণনাদে বাধির্য্যে ক্ষ্বেড় এব চ। পূরণং কটুতৈলেন হিতং বাতঘ্ন-মৌষধং ॥ ৮ ॥ শিখরীক্ষারজবারা তৎ-কৃতকল্কেন সাধিতং তৈলং। অপহরতি কর্ণনাদং বাধির্য্যঞ্চাপি পূরণতঃ॥ শিখরী অপামার্গঃ ॥ ৯ ॥ গবাং মূত্রেণ বিল্বানি পিষ্ট্বা তৈলং বিপাচয়েৎ। সজলঞ্চ স-দুগ্ধঞ্চ তদ্বাধির্য্যহরং পরং॥ ক্ষীরমাত্রং

গ্রাহ্যং। বিল্বতৈলং ॥ ১০ ॥ কর্ণস্রাবে পূতি-কর্ণে তথৈব কৃমিকর্ণকে। সামান্যং কর্ম্ম কুর্ব্বীত যোগান্ বৈশেষিকানপি ॥ ১১ ॥ স্বর্জিকাচূর্ণসংযুক্তবীজপূররসং ক্ষিপেৎ। কর্ণস্রাবরুজা দাহাস্তেন নশ্যন্ত্যসংশয়ং ॥ ১২ ॥ আম্রজম্বুপ্রবালানাং মধুকস্য বটস্য চ। এভিস্তু সাধিতং তৈলং পূতিকর্ণগদং হরেৎ ॥ ১৩ ॥ জাতীপত্ররসে তৈলং বিপক্বং পূতিকর্ণজিৎ ॥ ১৪ ॥ স্পৃষ্টং রসাঞ্জনং নার্য্যাঃ ক্ষীরক্ষৌদ্রেণ সংযুতং। প্রশস্যতে চিরোত্থে তৎ সস্রাবে পূতিকর্ণকে ॥ ১৫ ॥ কুষ্ঠহিঙ্গুবচা দারুশতাহ্বাবিশ্বসৈন্ধবৈঃ। পূতিকর্ণাপহং তৈলং বস্তমূত্রেণ সাধিতং ॥ কুষ্ঠাদিতৈলং ॥ ১৬ ॥ শম্বুকস্য তু মাংসেন কটুতৈলং বিপাচয়েৎ। তস্য পূরণমাত্রেণ কর্ণনাড়ী প্রশাম্যতি ॥ শম্বূকাদ্যং তৈলং ॥ ১৭ ॥ চূর্ণেন গন্ধকশিলারজনীভবেন মুষ্ট্যংশকেন কটুতৈলপলাষ্টকে তু। ধত্তূরপত্ররসতুল্যমিদং বিপক্বং নাড়ীং জয়েচ্চিরভবামপি কর্ণজাতাং ॥ মুষ্টিঃ পলং। নিশা তৈলং ॥ ১৮ ॥ কৃমিকর্ণবিনাশায় কৃমিঘ্নীং কারয়েৎ ক্রিয়াং। বার্ত্তাকুধূমশ্চ হিতঃ সার্ষপস্নেহ এব চ ॥ ১৯ ॥ পূরণং হরিতালেন গব্যমূত্রযুতেন চ। ধূপনে কর্ণদৌর্গন্ধে গুগ্‌গুলুঃ শ্রেষ্ঠ উচ্যতে ॥ ২০ ॥ চিকিৎসা কর্ণশোথানাং তথা কর্ণার্শসামপি। কর্ণার্ব্বুদানাং কুর্ব্বীত শোথার্শোর্ব্বুদবস্তিবৎ ॥ * ॥ অথ কর্ণপালীবিকারাণাং চিকিৎসা। পালীসংশোষণে কুর্য্যাৎ বাতকর্ণরুজক্রিয়াং। স্বেদয়েদথমূতস্তাঞ্চ স্বিন্নাং সংবর্দ্ধয়েত্তিলৈঃ ॥ ১ ॥ শতাবরীবাজিগন্ধাপয়স্যৈরণ্ডবীজকৈঃ। তৈলং বিপক্বং সক্ষীরং পালীং সংবর্দ্ধয়েৎ সুখং ॥ পয়স্যাত্র ক্ষীরকাকোলী। শতাবরীতৈলং ॥ ২ ॥ জীবনীয়স্য কল্কেন তৈলং দুগ্ধেন পাচয়েৎ। চিকিৎসেত্তেন তৈলেন হতাস্রং পরিপোটকং ॥ ৩ ॥ শীতলৈর্লেপৈর্জলৌকাভিরুৎপাতং সমুপাচরেৎ ॥ ৪ ॥ হলিনীস্বরসাভ্যাঞ্চ গোধাকঙ্কবসান্বিতং। তৈলং বিপক্কমভ্যঙ্গাদুন্মন্থং নাশয়েদ্ধ্রুবং ॥ ৫ ॥ দুঃখবর্দ্ধনকং সিক্ত্বা জম্ব্বাম্রবিল্বপত্রজৈঃ। কাথৈস্তৈলেন সুস্নিগ্ধং তচ্চূর্ণৈশ্চাবধূনয়েৎ ॥ বহুশো গোময়ৈস্তপ্তৈঃ স্বেদিতং পরিলেপিতং। ঘনসারৈঃ সমালিম্পেদজামূত্রেণ কল্কিতৈঃ ॥ ৬ ॥ ইতি কর্ণরোগাধিকারঃ। ইতি ভাবপ্রকাশঃ ॥

কর্ণলতিকা (স্ত্রী) পালিঃ। কাণের পাতা ইতি ভাষা। ইতি হেমচন্দ্রঃ ॥

কর্ণবংশঃ (পুং) মঞ্চঃ। ইতি হারাবলী ॥

কর্ণবর্জ্জিতঃ (পুং) সর্পঃ। ইতি শব্দচন্দ্রিকা ॥ কর্ণহীনে ত্রি ॥

কর্ণবেধঃ (পুং) কর্ণয়োশ্ছিদ্রকরণং। কাণ্‌বিঁধান ইতি ভাষা। তস্য বিধির্যথা। মদনরত্নে বশিষ্ঠশ্রীধরৌ। মাসে ষষ্ঠে সপ্তমে বাষ্টমে বা বেধ্যৌ কর্ণৌ দ্বাদশে ষোড়শেঽহ্নি। মধ্যেনাহ্নঃ পূর্ব্বভাগে ন রাত্রৌ নক্ষত্রে দ্বে দ্বে তিথী বর্জ্জয়িত্বা ॥ অত্র জন্মমাসো বর্জ্জ্যঃ। জ্যোতির্নিবন্ধে

গর্গঃ। মাসে ষষ্ঠে সপ্তমে বাপ্যষ্টমে মাসি বৎসরে। কর্ণবেধং প্রশংসন্তি পুষ্ট্যায়ুঃশ্রীবিবৃদ্ধয়ে ॥ মদনরত্নে। প্রথমে সপ্তমে মাসি অষ্টমে দশমেঽথবা। দ্বাদশে চ তথা কুর্য্যাৎ কর্ণবেধং শুভাবহং ॥ হেমাদ্রৌ ব্যাসঃ। কার্ত্তিকে পৌষমাসে বা চৈত্রে বা ফাল্গুনেঽপি বা। কর্ণবেধং প্রশংসন্তি শুক্লপক্ষে শুভে দিনে ॥ শ্রীধরঃ। হরিহরকরচিত্রাসৌম্যপৌষ্ণোত্তরার্য্যাদিতিবসুষু ঘটালী সিংহবর্জ্জ্যেষু লগ্নে। শশিগুরুবুধকাব্যানাং দিনে পর্ব্বরিক্তারহিততিথিষু শুদ্ধে নৈধনে কর্ণবেধঃ॥ মদনরত্নে বৃহস্পতিঃ। দ্বিতীয়া দশমী সপ্তমী চ ত্রয়োদশী। দ্বাদশী পঞ্চমী শস্তা তৃতীয়া কর্ণবেধনে॥ সৌবর্ণী রাজপুত্রস্য রাজতী বিপ্রবৈশ্যয়োঃ। শূদ্রস্য চায়সী সূচী মধ্যমাষ্টাঙ্গুলাত্মিকা ॥ হেমাদ্রৌ দেবলঃ। কর্ণরন্ধ্রং রবেশ্ছায়া ন বিশেদগ্রজন্মনঃ। তং দৃষ্ট্বা বিলয়ং যান্তি পুণ্যৌঘাশ্চ পুরাতনাঃ ॥ শঙ্খঃ। অঙ্গুষ্ঠমাত্রশুষিরৌ কর্ণৌ ন ভবতো যদি। তস্মৈ শ্রাদ্ধং ন দাতব্যং দত্তঞ্চেদাসুরং ভবেৎ ॥ ইতি নির্ণয়সিন্ধুঃ ॥ কর্ণষট্কদোষনিবারণার্থং কর্ণস্য বেধনং। সোদরভ্রাতৄণাং সংস্কারাণাঞ্চ পৌর্ব্বাপর্য্যক্রমঃ কর্ণবেধস্যাসংস্কাররূপত্বাৎ ন তথা নিয়মঃ। যথা। যদাপত্যদ্বয়ং তিষ্ঠেৎ সম্ভবোঽপ্যপরস্য চ। কর্ণষটকং বিজানীয়াদগর্হিতং তত্রয়স্য চ॥ ইত্যাশঙ্ক্য তয়োর্ম্মধ্যে শুদ্ধির্যস্যাথ বৎসরে। কর্ণবেধো হিতস্তস্য নাত্র জ্যেষ্ঠবিচারণা ॥ ষট্কর্ণোৎপত্তিমাশঙ্ক্য ভানোঃ শুদ্ধ্যাসমেঽপি চ। কর্ণৌ বেধ্যৌ ন দোষঃ স্যাদন্যথা মরণং ভবেৎ ॥ ইতি মলমাসতত্ত্বে মাণ্ডব্যবচনং ॥ অস্য কালনিয়মো যথা। রাজমার্ত্তণ্ডে। ন জন্মমাসে ন চ চৈত্রপৌষে ন বর্ষযুগ্মে ন হরৌ প্রসুপ্তে। রবৌ চ দুষ্টে ন চ কৃষ্ণপক্ষে ন জন্মভে কর্ণবিধিঃ প্রশস্তঃ॥ দীপিকায়াং। নো জন্মেন্দুভমাসসূর্য্যরবিজক্ষ্মাজাহসুপ্তাচ্যুতে শস্তেঽর্কে লঘুবিষ্ণুযুগ্মমৃদুভস্বাত্যুত্তরাদিত্যভৈঃ। সৌম্যৈস্ত্র্যায়ত্রিকোণকণ্টকগতৈঃ পাপৈস্ত্রিলাভারিগৈরোজোঽব্দে শ্রুতিবেধ ইজ্যসিতভে লগ্নে তু কালে শুভে॥ অত্রাপি তিথ্যাদিবিদ্ধমৃক্ষং বর্জয়েৎ ॥ গর্গঃ। কর্ণবেধব্রতে কুর্য্যাদুদগ্মার্গস্থিতে রবৌ। দক্ষিণাশাস্থিতে ভানৌ নৈব কুর্য্যাৎ কথঞ্চন ॥ ইতি জ্যোতিষতত্ত্বং ॥

কর্ণবেধনী (স্ত্রী) হস্তিকর্ণবেধনাস্ত্রং। তৎপর্য্যায়ঃ। নালী ২ কর্ণারা ৩। ইতি ত্রিকাণ্ডশেষঃ॥

কর্ণবেষ্টকং (ক্লী) কুণ্ডলং। ইতি হেমচন্দ্রঃ॥

কর্ণবেষ্টনং (ক্লী) কুণ্ডলং। ইত্যমরঃ॥

কর্ণশষ্কুলী (স্ত্রী) কর্ণগোলকং। তৎপর্য্যায়ঃ। বেষ্টনং ২। ইতি হেমচন্দ্রঃ॥

কর্ণশূলঃ (পুং) কর্ণরোগবিশেষঃ। তস্যৌষধং যথা। হিঙ্গুতুম্বুরুশুণ্ঠ্যা চ সাধ্যং তৈলন্তু সার্ষপং। এতদ্ধি পূরণং শ্রেষ্ঠং কর্ণশূলাপহং পরং ॥ ১ ॥ শুষ্কমূলকশুণ্ঠীনাং ক্ষারো হিঙ্গুলনাগরং। শুক্ত

চতুর্গুণং দদ্যাত্তৈলমেতৈর্ব্বিপাচয়েৎ ॥ বাধির্য্যং কর্ণশূলঞ্চ পূযস্রাবশ্চ কর্ণয়োঃ। কৃময়শ্চ বিনশ্যন্তি তৈলস্যাস্য প্রপূরণাৎ ॥ ২ ॥ শুষ্কমূলকশুণ্ঠীনাং ক্ষারো হিঙ্গুলনাগরং। শতপুষ্পী বচা কুষ্ঠং দারু শিগ্রু রসাঞ্জনং ॥ সৌবর্চ্চলং যবক্ষারং সামুদ্রং সৈন্ধবং তথা। ভুজগ্রন্থি বিড়ং মুস্তং মধু শুক্তঞ্চতুর্গুণং ॥ মাতুলুঙ্গরসঞ্চৈব কদলীরসমেব চ। তৈলমেভির্ব্বিপক্তব্যং কর্ণশূলাপহং পরং ॥ বাধির্য্যং কর্ণনাদশ্চ পূযস্রাবশ্চ দারুণঃ। পূরণাদস্য তৈলস্য কৃময়ঃ কর্ণয়োঃ খিলাঃ॥ ক্ষিপ্রং বিনাশমায়ান্তি শশাঙ্ককৃতশেখর। ক্ষারতৈলমিদং শ্রেষ্ঠং মুখদন্তাময়াপহং ॥ ৩ ॥ প্রস্থে দ্বে গণ্ডমালানাং ক্বাথয়েৎ দ্রোণমম্ভসাং। চতুর্ভাগাবশেষেণ তৈলপ্রস্থং বিপাচয়েৎ ॥ কাঞ্জিকস্যাঢ়কং দত্ত্বা পিষ্টান্যেতানি দাপয়েৎ। পুনর্ণবা গোক্ষুরকং সৈন্ধবং ত্র্যূষণং বচা ॥ সরলং সুরদারুশ্চ বৃহতী কণ্টকারিকা। নস্যপানাদ্ধরত্যেব কর্ণশূলং হনুগ্রহং ॥ বাধির্য্যং সর্ব্বরোগাংশ্চ অভ্যঙ্গাচ্চ মহেশ্বর ॥ ৪ ॥ ইতি গারুড়ে ১৯৮ অধ্যায়ঃ ॥

কর্ণসংস্রাবঃ (পুং) কর্ণরোগবিশেষঃ। তস্য নিদানসম্প্রাপ্তিরূপাণি। শিরোঽভিঘাতাদথবা নিমজ্জতো জলে প্রপাকাদথবাপি বিদ্রধেঃ। স্রবেদ্ধি পূযং শ্রবণোঽনিলার্দ্দিতঃ স কর্ণসংস্রাব ইতি প্রকীর্ত্তিতঃ॥ ইতি মাধবকরঃ ॥

কর্ণস্ফোটা (স্ত্রী) লতাবিশেষঃ। কাণফাটা ইতি ভাষা। তৎপর্য্যায়ঃ। শ্রুতিস্ফোটা ২ ত্রিপুটা ৩ কৃষ্ণতণ্ডুলা ৪ চিত্রপর্ণী ৫ কোপলতা ৬ চন্দ্রিকা ৭ অর্দ্ধচন্দ্রিকা ৮। অস্যা গুণাঃ। কটুত্বং। তিক্তত্বং। হিমত্বং। সর্ব্ববিষগ্রহভূতাদিদোষসর্ব্বব্যাধিনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

কর্ণক্ষ্বেড়ঃ (পুং) কর্ণরোগবিশেষঃ। তস্য লক্ষণং। বায়ুঃ পিত্তাদিভির্যুক্তো বেণুঘোষোপমং স্বনং। করোতি কর্ণয়োঃ ক্ষ্বেড়ং কর্ণক্ষ্বেড়ঃ স উচ্যতে ॥ ইতি মাধবকরঃ ॥

কর্ণাটঃ (পুং) স্বনামখ্যাতদেশবিশেষঃ। ইতি শব্দরত্নাবলী ॥

কর্ণাটী (স্ত্রী) রাগিণীবিশেষঃ। ইতি হলায়ুধঃ ॥ সা তু মালবরাগস্য পত্নী। ইতি সঙ্গীতদামোদরঃ ॥ হংসপদীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কর্ণানুজঃ (পুং) যুধিষ্ঠিররাজঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

কর্ণান্দুঃ (স্ত্রী) কর্ণপালী। কাণতড়কা ইতি ভাষা। উৎক্ষিপ্তিকা। কাণকড়া ইতি খ্যাতা। ইতি হেমচন্দ্রঃ ॥

কর্ণান্দূঃ (স্ত্রী) কর্ণান্দুঃ। কর্ণপালী। ইতি হারাবলী ॥

কর্ণাভরণকঃ (পুং) আরগ্বধবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কর্ণারা (স্ত্রী) কর্ণবেধনী। ইতি ত্রিকাণ্ডশেষঃ ॥

কর্ণারিঃ (পুং) অর্জ্জুনঃ। ইতি পুরাণং ॥ নদীসর্জবৃক্ষঃ। আজন্ ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ ॥

কর্ণাস্ফালঃ ( পুং ) ঝলঞ্ঝলা । হস্তিকর্ণাস্ফালনং । ইতি ত্রিকাণ্ডশেষঃ ॥

কর্ণিকা ( স্ত্রী ) কর্ণাভরণবিশেষঃ । কাণতড়্কা ইতি ভাষা । তৎপর্য্যায়ঃ । তালপত্রং ২ । ইত্যমরঃ ॥ তাড়ঙ্কঃ ৩ দন্তপত্রং ৪ । ইতি ভরতঃ ॥ করিহস্তাঙ্গুলিঃ । করিণঃ শুণ্ডাগ্রবর্ত্ত্যঙ্গুলাকৃতিঃ । পদ্মবীজকোষী । ইত্যমরঃ ॥ করমধ্যাঙ্গুলিঃ । ক্রমুকাদিচ্ছটাংশঃ । বোঁটা ইতি ভাষা । ইতি মেদিনী ॥ লেখনী । ইতি হারাবলী ॥ অগ্নিমন্থবৃক্ষঃ । অজশৃঙ্গীবৃক্ষঃ । ইতি রাজনির্ঘণ্টঃ ॥

কর্ণিকাচলঃ ( পুং ) সুমেরুপর্ব্বতঃ । ইতি হেমচন্দ্রঃ ॥

কর্ণিকারঃ ( পুং ) বৃক্ষবিশেষঃ । কণিয়ার ইতি ভাষা । তৎপর্য্যায়ঃ । দ্রুমোৎপলঃ ২ পরিব্যাধঃ৩ । ইত্যমরঃ ॥ বৃক্ষোৎপলঃ ৪ । ইতি রত্নমালা ॥ আরগ্বধবিশেষঃ । ছোট সোনালু ইতি ভাষা । তৎপর্য্যায়ঃ । রাজতরুঃ ২ প্রগ্রহঃ ৩ কৃতমালকঃ ৪ সুফলঃ ৫ চক্রঃ ৬ পরিব্যাধঃ ৭ ব্যাধিরিপুঃ ৮ পিণ্ডবীজকঃ ৯ লঘ্বারগ্বধঃ ১০ । অস্য গুণাঃ । সারকত্বং । তিক্তত্বং । কটুত্বং । উষ্ণত্বং । কফশূলোদরকৃমিমেহনাশিত্বং । ব্রণগুল্মনিবারণত্বঞ্চ । ইতি রাজনির্ঘণ্টঃ ॥

কর্ণিকী [ ন্ ] ( পুং ) হস্তী । ইতি জটাধরঃ ॥

কর্ণী [ ন্ ] (পুং) বর্ষপর্ব্বতসপ্তকান্তর্গতপর্ব্বতবিশেষঃ । যথা । হিমবান্ হেমকূটশ্চ নিষধো মেরুরেবচ । চৈত্রঃ কর্ণী চ শৃঙ্গী চ সপ্তৈতে বর্ষপর্ব্বতাঃ । ইতি হারাবলী ॥ বাণবিশেষঃ । যথা । করোতি কর্ণিনো যস্তু যস্তু খড়্গাদিকৃন্নরঃ । প্রয়াস্তি তে বিশসনে নরকে ভৃশদারুণে ॥ ইতি বিষ্ণুপুরাণে ২ অংশে ৬ অধ্যায়ঃ ॥ কর্ণিনো বাণবিশেষান্ । ইতি তট্টীকা ॥

কর্ণীরথঃ (পুং) ক্রীড়ার্থনির্ম্মিতস্বল্পরথঃ । পুরুষস্কন্ধনীয়মানরথঃ । ইতি ভগীরথঃ ॥ স্ত্রীবহনার্থমুপরি বস্ত্রাচ্ছাদিতরথবিশেষঃ । ইতি মঞ্জরী ॥ চতুর্দোল ইতি খ্যাত ইতি পিতৃচরণাঃ ॥ ইতি সারসুন্দরী ॥ স্ত্রীরত্নবহনার্থমুপরিবস্ত্রাচ্ছাদিতমনুষ্যবাহ্যযানবিশেষঃ । ইতি ভরতঃ ॥ তৎপর্য্যায়ঃ । প্রবহনং ২ হয়নং ৩ । ইত্যমরঃ ॥ প্রহরণং ৪ ডয়নং ৫ । ইতি তট্টীকা ॥

কর্ণীসুতঃ ( পুং ) কংসাসুরঃ । ইতি ত্রিকাণ্ডশেষঃ ॥

কর্ণেজপঃ ( ত্রি ) অপ্রকাশেনানুচিতপ্রবোধকঃ । কর্ণে লগিত্বা পরাপকারং বদতি যো জনঃ । ঠক্ ইতি খ্যাতঃ । তৎপর্য্যায়ঃ । সূচকঃ ২ পিশুনঃ ৩ দুর্জ্জনঃ ৪ খলঃ ৫ । ইত্যমরঃ ॥ কর্ণে জপাদিদ্বয়ং পরাপকারবাদিনি । পিশুনাদিত্রয়ং পরস্পরভেদনশীলে ॥ কর্ণে জপাদিপঞ্চকং সূচকে ইতি কেচিৎ ॥ ত্রয়মিতি কেচিৎ । ইতি ভরতঃ ॥

কর্ণেন্দুঃ ( পুং ) কর্ণান্দুঃ । অর্দ্ধচন্দ্রাকৃতিকর্ণভূষণং । ইতি শব্দরত্নাবলী ॥

কর্ত্ত ৎ ক শৈথিল্যে । ইতি কবিকল্পদ্রুমঃ ॥ রেফস্যাধস্তকারঃ । কর্ত্তয়তি কর্ত্তাপয়তি ধূলির্জ্জলেন । ইতি দুর্গাদাসঃ ॥

কর্ত্তঃ ( পুং ) ভেদঃ । যথা । সধ্র্যঙ্ নিয়ম্য যতয়ো যমকর্ত্তহেতিং জহ্যুঃ স্বরাড়িব

নিপানখনিত্রমিন্দ্রঃ। ইতি শ্রীভাগবতে ২ স্কন্ধে ৭ অধ্যায়ঃ ॥ কর্ত্তো ভেদঃ তন্নিরাসো অকর্ত্তঃ তত্র হেতিং সাধনং জহ্নুঃ। ইতি তট্টীকায়াং শ্রীধরস্বামী ॥

কর্ত্তনং (ক্লী) ছেদনং। নারীণাং সূত্রনির্ম্মিতিঃ। কাট্‌না কাটা ইতি ভাষা। ইতি মেদিনী ॥

কর্ত্তরী (স্ত্রী) কৃপাণী। ইত্যমরঃ ॥ পত্রীকৃতস্বর্ণাদেঃ কর্ত্তনোপায়ঃ। কাতি ইতি খ্যাতঃ॥ নাপিতকেশকর্ত্তনিকা। কাঁচি ইতি ভাষা। কাটারী ইতি খ্যাতা চ। ইতি ভরতঃ ॥

কর্ত্তব্যং (ত্রি) করণীয়ং। করণযোগ্যং। কার্য্যং। ইতি ব্যাকরণং ॥

কর্ত্তব্যঃ (ত্রি) করণযোগ্যঃ। যথা। হীনসেবা ন কর্ত্তব্যা কর্ত্তব্যো মহদাশ্রয়ঃ। অজা সিংহপ্রসাদেন বনে চরতি নির্ভয়ং॥ ইতি চাণক্যং ॥

কর্ত্তা [ ঋ ] (ত্রি) কারকঃ। ইতি মেদিনী ॥ ষট্‌কারকান্তর্গতকারকবিশেষঃ। বোপদেবেনাস্য ঘসংজ্ঞা কৃতা। অত্র উক্তার্থে প্রথমা অনুক্তার্থে তৃতীয়া বিভক্তির্ভবতি ॥ তস্য লক্ষণং। ক্রিয়ানুকূলকৃতিমত্ত্বং। ইতি সারমঞ্জরী ॥ যঃ করোতি সঃ। ইতি সর্ব্ববর্ম্মা ॥ কৃত্যাশ্রয়ঃ। ইতি তার্কিকাঃ ॥ চেতনান্তরব্যাপারাব্যবধানেন ধাত্বর্থনিষ্পাদকশ্চেতনঃ কর্ম্মকরণাদিকারকচক্রপ্রযোক্তা বা। ইতি প্রায়শ্চিত্তবিবেকঃ ॥ ক্রিয়ামুখ্যপ্রযোজকৌ কর্ত্তা। ইতি ক্রমদীশ্বরঃ ॥ স তু পঞ্চবিধঃ। ক্রিয়ামুখ্যঃ ১ হেতুকর্ত্তা ২ প্রযোজকঃ ৩ অনুমন্তা ৪ গ্রহীতা ৫। তথা চ। ক্রিয়ামুখ্যো ভবেৎ কর্ত্তা হেতুকর্ত্তা প্রযোজকঃ ॥ অনুমন্তা গ্রহীতা চ কর্ত্তা পঞ্চবিধঃ স্মৃতঃ। ইতি গোয়ীচন্দ্রটীকাকৃদ্গোপালচক্রবর্ত্তী ॥ স চ ত্রিবিধঃ। সাত্ত্বিকঃ ১ রাজসঃ ২ তামসঃ ৩। সাত্ত্বিকো যথা। মুক্তসঙ্গোঽনহংবাদী ধৃত্যুৎসাহসমন্বিতঃ। সিদ্ধ্যসিদ্ধ্যোর্নির্বিকারঃ কর্ত্তা সাত্ত্বিক উচ্যতে ॥ রাজসো যথা। রাগী কর্ম্মফলপ্রেপ্সুর্লুব্ধো হিংসাত্মকোঽশুচিঃ। হর্ষশোকান্বিতঃ কর্ত্তা রাজসঃ পরিকীর্ত্তিতঃ॥ তামসো যথা। অযুক্তঃ প্রাকৃতঃ স্তব্ধঃ শঠো নৈকৃতিকোঽলসঃ। বিষাদী দীর্ঘসূত্রী চ কর্ত্তা তামস উচ্যতে॥ ইতি শ্রীভগবদ্গীতা ॥

কর্ত্তা [ ঋ ] (পুং) পরমেষ্ঠী। ব্রহ্মা। ইতি মেদিনী ॥ ক্রিয়ানুকূলকৃতিমান্। স চ ত্রিবিধঃ। যথা। ত্রিধৈব জ্ঞায়তে কর্ত্তা বিশেষেণ প্রতিক্রিয়াং। যোগ্যত্বপ্রতিষিদ্ধত্ববিশেষণপদান্বয়ৈঃ॥ অস্যার্থঃ। ক্রিয়াং প্রতি প্রকারত্রয়েণ কর্ত্তা বিজ্ঞায়তে তস্য বিবরণং। স্বাধ্যায়োঽধ্যেতব্য ইত্যত্র যোগ্যত্বেন লব্ধবিদ্যস্ত্রৈবর্ণিকঃ ॥ ১ ॥ অহরহর্দদ্যাৎ দীক্ষিতো ন দদাতীত্যত্র প্রতিষিদ্ধত্বেন দীক্ষিতেতরপরঃ ॥ ২ ॥ স্বর্গকামো যজেতেত্যত্র বিশেষণপদান্বয়েন স্বর্গকামঃ কর্ত্তা জ্ঞায়তে ॥ ৩ ॥ * ॥ নিত্যে নিষেধে চ যদ্যৎ সাধনং তদভাবস্তদভাবসাধনং ইত্যনুভবসিদ্ধ্যা নিত্যাকরণং নিষিদ্ধাচরণঞ্চ প্রত্যবায়সাধনং শাস্ত্রাবগতং অতস্তদভাবো নিত্যাচরণং নিষিদ্ধাকরণঞ্চ প্রত্যবায়াভাবসাধনমিতি প্রত্যবায়পরি-

হারার্থী নিযোজ্যোঽন্বেতি তদ্বোধক-বিশেষণপদাধ্যাহারাদিতি বোধ্যং তত-শ্চেয়ং বিধিবাক্যশাব্দধীঃ। যথা। কাম্যে স্বর্গকামো যজেতেত্যত্র স্বর্গকামস্য কর্ত্ত-র্যাগবিষয়কং কার্য্যং। নিত্যে অহরহঃ সন্ধ্যামুপাসীত ইত্যত্র প্রত্যবায়পরিহারা-র্থিনঃ কর্ত্তুঃ প্রত্যহং সন্ধ্যাবন্দনবিষয়কং কার্য্যং। ন কলঞ্জং ভক্ষয়েদিত্যত্রাপি প্রত্য-বায়পরিহারার্থিনঃ কর্ত্তুঃ কলঞ্জভক্ষণাভাব-বিষয়কং কার্য্যমিত্যেবং রূপা। ইতি ধর্ম্মদীপিকা॥

কর্ত্তৃকা (স্ত্রী) ক্ষুদ্রখড়্গঃ। যথা। হাস্যযুক্তাং ত্রিনেত্রাঞ্চ কপালকর্ত্তৃকাকরাং। ইতি তন্ত্রসারে শ্যামাধ্যানং॥

কর্ত্তৃত্বং (ক্লী) কর্ত্তুর্ভাবঃ। কর্ত্তৃধর্ম্মঃ। যথা। ন কর্ত্তৃত্বং ন কর্ম্মাণি লোকস্য সৃজতি প্রভুঃ। ইতি শ্রীভগবদ্গীতা॥

কত্র্ত্র ৎ ক শৈথিল্যে। ইতি কবিকল্পদ্রুমঃ॥ রেফদ্বয়যুক্তস্তকারঃ। কত্র্ত্রয়তি কত্র্ত্রা-পয়তি ধূলির্জলেন। ইতি দুর্গাদাসঃ॥

কত্র্ত্রী (স্ত্রী) কর্ত্তরী। ইতি শব্দরত্নাবলী॥ কারিকা। ইতি মুগ্ধবোধব্যাকরণং॥

কর্দ্দ কুৎসিতরবে। ইতি কবিকল্পদ্রুমঃ। উদরশব্দে। ইতি রমানাথঃ॥ একো-ঽর্থঃ। কর্দ্দতি কাকঃ। রমানাথস্তু কৌক্ষে কর্দ্দতীতি ভট্টমল্লদর্শনাদুদরসম্বন্ধিশব্দ এব অস্য প্রয়োগ ইতি মন্বানঃ কর্দ্দতি শিশু-রিতি যদুদাজহার তদ্ধেয়ং। যত্তন্মতে কর্দ্দত্যুদরমিত্যেব স্যাৎ। ইতি দুর্গা-দাসঃ॥

কর্দ্দঃ (পুং) কর্দ্দমঃ। কাদা ইতি ভাষা। ইতি শব্দরত্নাবলী॥

কর্দ্দটঃ (পুং) করহাটঃ। পঙ্কঃ। পঙ্কারঃ। ইতি মেদিনী॥

কর্দ্দনং (ক্লী) উদরশব্দঃ। পেটের ডাক্ ইতি ভাষা। ইতি হেমচন্দ্রঃ॥

কর্দ্দমং (ক্লী) মাংসং। ইতি শব্দচন্দ্রিকা॥

কর্দ্দমঃ (পুং) কর্দ্দঃ। কাদা ইতি ভাষা। তৎপর্য্যায়ঃ। নিষদ্বরঃ ২ জম্বালঃ ৩ পঙ্কঃ ৪ শাদঃ ৫। ইত্যমরঃ॥ অস্য গুণাঃ। শীত-লত্বং। রূক্ষত্বং। বিষরোগবেদনাদাহ-শোথনাশিত্বং। ব্রণশোধনরোপণত্বঞ্চ। ইতি রাজবল্লভঃ॥ প্রজাপতিবিশেষঃ। স তু ব্রহ্মণশ্ছায়ায়াং জাতঃ। তস্য ভার্য্যা স্বায়ম্ভুবমনুকন্যা দেবহূতিঃ। পুত্রঃ কপিলদেবঃ কন্যাঃ কলাদ্যা নব। ইতি শ্রীভাগবতং॥ পাপং। ইত্যুণাদিকোষঃ॥ ছায়া। যথা। বেদেষু কর্দ্দমঃ শব্দশ্ছায়ায়াং বর্ত্ততে স্ফুটং। বভূব কর্দ্দমাদ্বালঃ কর্দ্দম-স্তেন কীর্ত্তিতঃ॥ ইতি ব্রহ্মবৈবর্ত্তে ব্রহ্ম-খণ্ডে ২২ অধ্যায়ঃ॥

কর্দ্দমাটকঃ (পুং) বিষ্ঠাদিনিক্ষেপস্থানং। ইতি শব্দরত্নাবলী॥

কর্দ্দ্রুমী (স্ত্রী) মুদ্গরবৃক্ষঃ। ইতি বৈদ্যকং॥

কর্পটঃ (পুং) মলিনত্বাদিদুষ্টজীর্ণবস্ত্রখণ্ডং। নেকড়া ইতি খ্যাতঃ। তৎপর্য্যায়ঃ। লক্তকঃ ২। ইত্যমরঃ॥ নক্তকঃ ৩। ইতি ভরতঃ॥ পর্ব্বতবিশেষঃ। যথা। নীলশৈলস্য পূর্ব্বস্মিন্ স্বরূপং প্রতি-পাদিতং। নাভিমণ্ডলপূর্ব্বস্যাং ভস্মকূটস্য

দক্ষিণে ॥ পূর্ব্বস্যাং কর্পটো নাম পর্ব্বতো যমরূপধৃক্ । তত্র যাম্যশিলা কৃষ্ণা নীলাঞ্জনসমপ্রভা॥ অধিত্যকায়াং রাজেন্দ্র ব্যামপঞ্চস্য বিস্তৃতা। পূজয়েত্তত্র শমনং পার্শ্বে দণ্ডং সদৈব যঃ ॥ ধত্তে তু প্রাণিনাং নিত্যং প্রাণদণ্ডস্য সাধনং । কৃষ্ণবর্ণস্তু দ্বিভুজং কিরীটমুকুটোজ্জ্বলং ॥ দধতঞ্চাসি-পুত্রীঞ্চ বামপার্শ্বে সদৈব হি। কৃষ্ণবস্ত্রং স্থূলপদং বহির্নিঃসৃতদন্তকং ॥ বরাভয়-করং নিত্যং নৃণাং মহিষবাহনং। পূজ-য়েৎ পরয়া ভক্ত্যা যাম্যবীজেন সাধকঃ॥ উপান্ত্যবর্গস্যাদির্যো বর্ণো বিন্দিন্দু-সংযুতঃ । যমবীজমিতি খ্যাতং যমস্য প্রীতিকারকং॥ অনেনৈব তু মন্ত্রেণ শমনং যস্তু পূজয়েৎ। কর্পটাখ্যেঽচলবরে নাপ-মৃত্যুং সমাপ্নুয়াৎ ॥ ইতি শ্রীকালিকা-পুরাণে ৮১ অধ্যায়ঃ ॥

কর্পটধারী [ ন্ ] ( ত্রি ) মলিনজীর্ণবস্ত্রখণ্ড-ধারী। ভিক্ষুকঃ। ইতি শব্দরত্নাবলী ॥

কর্পটিকঃ ( ত্রি ) কর্পটধারী। ইতি শব্দরত্না-বলী ॥

কর্পটী [ ন্ ] ( ত্রি ) কর্পটধারী। ইতি শব্দ-রত্নাবলী ॥

কর্পরঃ ( পুং ) কপালঃ। মাতার খুলি ইতি ভাষা। ইত্যমরঃ॥ শস্ত্রভেদঃ। কটাহঃ। ইতি মেদিনী ॥ উড়ুম্বরঃ। ইতি শব্দ-চন্দ্রিকা

কর্পরাংশঃ ( পুং ) শর্করা। খোলাকুচি ইতি ভাষা। ইতি শব্দরত্নাবলী ॥

কর্পরালঃ ( পুং ) কন্দরালঃ। পর্ব্বতজপীলু-বৃক্ষঃ। আখরোট্ ইতি ভাষা। ইত্যমর-টীকায়াং রমানাথঃ ॥

কর্পরিকাতুত্থং ( ক্লী ) তুত্থবিশেষঃ। কর্পরী। ইতি হেমচন্দ্রঃ ॥

কর্পরী (স্ত্রী) ক্বাথোদ্ভবং তুত্থং। দারুহরিদ্রার ক্বাথের তুতিয়া ইতি ভাষা। তৎপর্য্যায়ঃ। দার্ব্বিকা ২। ইত্যমরঃ ॥ তুত্থাঞ্জনং। ইতি তট্টীকায়াং স্বামী ॥

কর্পাসঃ ( পুং ক্লী ) কার্পাসঃ। কাপাস্ ইতি ভাষা। ইত্যমরটীকা ॥

কর্পাসী ( স্ত্রী ) কার্পাসী। কাপাসগাছ ইতি ভাষা। ইতি ভরতঃ ॥

কর্পূরঃ ( পুং ক্লী ) স্বনামখ্যাতসুগন্ধিদ্রব্যং। কাফুর ইতি পারস্যভাষা। কপূর্ ইতি হিন্দী ভাষা। তৎপর্য্যায়ঃ। ঘনসারঃ ২ চন্দ্রসংজ্ঞঃ ৩ সিতাভ্রঃ ৪ হিমবালুকা ৫। ইত্যমরঃ॥ সিতাভঃ ৬। ইতি তট্টীকা ॥ ঘনসারকঃ ৭ সিতকরঃ ৮ শীতঃ ৯ শশাঙ্কঃ ১০ শিলা ১১ শীতাংশুঃ ১২ হিম-বালুকঃ ১৩ হিমকরঃ ১৪ শীতপ্রভঃ ১৫ শাম্ভবঃ ১৬ শুভ্রাংশুঃ ১৭ স্ফটিকাভ্রঃ ১৮ কারমিহিকা ১৯ তারাভ্রঃ ২০ চন্দ্রা-র্দ্ধকঃ ২১ চন্দ্রঃ ২২ লোকতুষারঃ ২৩ গৌরঃ ২৪ কুমুদঃ ২৫ হন্দুঃ ২৬ হিমা-হ্বয়ঃ ২৭ চন্দ্রভস্ম ২৮ বেধকঃ ২৯ রেণু-সারকঃ ৩০। ইতি শব্দরত্নাবলী ॥ অস্য গুণাঃ। শিশিরত্বং। তিক্তত্বং। কটুত্বং। শ্লেষ্মরক্তপিত্ততৃষ্ণাবিদাহকণ্ঠস্বদোষোষ্ণ-রোগনাশিত্বঞ্চ॥ কর্পূরো নূতনস্তিক্তঃ স্নিগ্ধ-শ্চোষ্ণাস্রদাহদঃ । চিরস্থো দাহশোষঘ্নঃ

স ধৌতঃ শুভকৃৎপরঃ॥ ইতি রাজনির্ঘণ্টঃ ॥ অপিচ । পাকে শীতলত্বং । চক্ষুর্হিত-কারিত্বং । পক্ককর্পূরাদপকস্যাধিকগুণ-ত্বঞ্চ । ইতি রাজবল্লভঃ ॥ তদ্ভেদা যথা । পোতাসঃ ১ ভীমসেনঃ ২ সিতকরঃ ৩ শঙ্করাবাসসংজ্ঞঃ ৪ পাংশুঃ ৫ পিঞ্জঃ ৬ অব্দসারঃ ৭ হিমবালুকঃ ৮ জূতিকা ৯ তুষারঃ ১০ হিমঃ ১১ শীতলঃ ১২ পত্রি-কাখ্যঃ ১৩। ইতি রাজনির্ঘণ্টঃ ॥

কর্পূরকঃ ( পুং ) কর্ব্বুরকঃ । কর্চ্চূরকঃ । ইতি শব্দচন্দ্রিকা ॥

কর্পূরতিলকা ( স্ত্রী ) উমাসখীভেদঃ । জয়া । ইতি শব্দমালা ॥

কর্পূরতৈলং ( ক্লী ) কর্পূরস্নেহঃ। তৎপর্য্যায়ঃ । হিমতৈলং ২ সুধাংশুতৈলং ৩ শীতাংশু-তৈলং ৪ তুহিনাংশুতৈলং ৫ সিতাংশু-তৈলং ৬। অস্য গুণাঃ। কটুত্বং। উষ্ণত্বং। কফবাতাময়নাশিত্বং। রদদার্ঢ্যপিত্তকারি-ত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

কর্পূরনালিকা ( স্ত্রী ) পক্বান্নবিশেষঃ । কপূর-নারি ইতি নেওয়ালা ইতি চ খ্যাতা। যথা। ঘৃতাঢ্যয়া সমিতয়া কৃত্বা লম্বপুটং ততঃ। লবঙ্গোষণকর্পূরযুতয়া সিতয়ান্বিতং ॥ পচেদাজ্যেন সিদ্ধৈষা জ্ঞেয়া কর্পূর-নালিকা । সংযাবসদৃশী জ্ঞেয়া গুণৈঃ কর্পূরনালিকা ॥ ইতি ভাবপ্রকাশঃ ॥

কর্পূরমণিঃ ( পুং ) পাষাণভেদঃ । কর্পূরমণি-নামায়ং যুক্ত্যা বাতাদিদোষনুৎ। ইতি রাজনির্ঘণ্টঃ ॥

কর্ফরঃ ( পুং ) দর্পণঃ। ইতি জটাধরঃ ॥

কর্ব্ব গতৌ। ইতি কবিকল্পদ্রুমঃ ॥ রেফো-পধঃ। কর্ব্বতি। ইতি দুর্গাদাসঃ ॥

কর্ব্বরঃ ( পুং ) ব্যাঘ্রঃ। ইতি মেদিনী ॥

কর্ব্বরী ( স্ত্রী ) শিবা। ব্যাঘ্রী। ইতি মেদিনী॥

কর্ব্বুদারঃ ( পুং ) কোবিদারবৃক্ষঃ। ইতি শব্দ-মালা ॥ শ্বেতকাঞ্চনঃ । অস্য গুণৌ । গ্রাহিত্বং । রক্তপিত্তরোগে বিশেষেণ পথ্যত্বঞ্চ। ইতি রাজবল্লভঃ॥ নীলঝিণ্টী। ইতি শব্দচন্দ্রিকা ॥

কর্ব্বুদারকঃ ( পুং ) শ্লেষ্মান্তকবৃক্ষঃ । ইতি রাজনির্ঘণ্টঃ ॥

কর্ব্বুরং ( ক্লী ) স্বর্ণং। ধুস্তূরবৃক্ষঃ। ইত্যমরঃ ॥ জলং। ইতি মেদিনী ॥

কর্ব্বুরঃ ( পুং ) রাক্ষসঃ । নানাবর্ণঃ। তৎ-পর্য্যায়ঃ। চিত্রং ২ কির্ম্মীরঃ ৩ কল্মাষঃ ৪ শবলঃ ৫ এতঃ ৬। তদ্বতি ত্রি। ইত্য-মরঃ ॥ শটী। ইত্যমরটীকা ॥ পাপং । ইতি মেদিনী ॥ নদীনিষ্পাবধান্যং। ইতি রাজনির্ঘণ্টঃ ॥

কর্ব্বুরফলঃ ( পুং ) সাকুরুণ্ডবৃক্ষঃ। ইতি রাজ-নির্ঘণ্টঃ ॥

কর্ব্বুরা ( স্ত্রী ) কৃষ্ণবৃন্তাবৃক্ষঃ। পারুল ইতি ভাষা। ইতি মেদিনী ॥ বর্ব্বরা। বাবুই তুলসী ইতি ভাষা। ইতি জটাধরঃ ॥

কর্ব্বুরী ( স্ত্রী ) দুর্গা। ইতি ত্রিকাণ্ডশেষঃ ॥

কর্ব্বূরং ( ক্লী ) স্বর্ণং। ইতি মেদিনী ॥ হরি-তালং। ইতি ত্রিকাণ্ডশেষঃ ॥

কর্ব্বূরঃ ( পুং ) শটী। ইত্যমরঃ ॥ রাক্ষসঃ। ইত্যুণাদিকোষঃ ॥ দ্রাবিড়কঃ। কাঁচহলদি ইতি ভাষা। ইতি শব্দরত্নাবলী ॥

কর্বূরকঃ ( পুং ) হরিদ্রাভবৃক্ষঃ। কাঁচহল্দি ইতি খ্যাতঃ। ইতি ভরতঃ ॥ কালহরিদ্রা। ইতি সারসুন্দরী ॥ কর্পূরহরিদ্রা। ইতি সারমঞ্জরী ॥ কাকবসন্তঃ। ইতি ভগীরথঃ ॥ কাঞ্চিতা হরিদ্রেতি খ্যাতঃ। ইতি টীকাসর্ব্বস্বং ॥ হরিদ্রাভকচোরা ইতি খ্যাতঃ। ইতি মধুমাধবী ॥ তৎপর্য্যায়ঃ। দ্রাবিড়কঃ ২ কাল্পকঃ ৩ বেধমূখ্যকঃ ৪। ইত্যমরঃ ॥ কাল্যকঃ ৫। ইতি টীকাসর্ব্বস্বং ॥

কর্ম্ম [ন্] (ক্লী) ষট্কারকান্তর্গতকারকবিশেষঃ। বোপদেবনাস্য ঢ ইতি সংজ্ঞা কৃতা। অত্র দ্বিতীয়া বিভক্তির্ভবতি। তস্মিন্ উক্তে প্রথমা। তস্য লক্ষণং। পরসমবেতধাত্বর্থজন্যফলশালিত্বং কর্ম্মত্বং। ইতি সারমঞ্জরী ॥ যৎ ক্রিয়তে তৎ। ইতি প্রসিদ্ধং। করোতের্নিখিলক্রিয়াবাচকত্বাৎ কর্ত্র্ব্যাপারৈর্যৎ সাধ্যতে তদিত্যর্থঃ। অতএব ক্রিয়াব্যাপ্যং কর্ম্মেতি ক্রমদীশ্বরঃ ॥ তচ্চতুর্ব্বিধং। নির্ব্বর্ত্ত্যং ১ যথা ঘটং করোতি পুত্রং প্রসূতে ॥ বিকার্য্যং ২ তচ্চ দ্বিবিধং। প্রকৃতেরুচ্ছেদকং প্রকৃতের্গুণান্তরাধায়কঞ্চ। আদ্যং যথা কাষ্ঠং ভস্ম করোতি। অন্ত্যং যথা সুবর্ণং কুণ্ডলং করোতি। তথাচোক্তং ভর্ত্তৃহরিণা। যদসজ্জায়তে পূর্ব্বং জন্মনা যৎ প্রকাশতে। তন্নির্ব্বর্ত্ত্যং বিকার্য্যঞ্চ কর্ম্মদ্বেধা ব্যবস্থিতং ॥ প্রকৃত্যুচ্ছেদসম্ভূতং বিকার্য্যং কাষ্ঠভস্মবং। অন্যদ্গুণান্তরোৎপত্ত্যা সুবর্ণাদিবিকারবৎ ॥ প্রাপ্যং ৩ যথা গ্রামং গচ্ছতি চন্দ্রং পশ্যতীত্যাদি ॥ অনীপ্সিতঞ্চ ৪ যথা পাপং ত্যজতি ইত্যাদি। ইতি মুগ্ধবোধটীকায়াং দুর্গাদাসঃ ॥ * ॥ সপ্তপদার্থান্তর্গততৃতীয়পদার্থঃ। তত্তু পঞ্চবিধং। যথা। উৎক্ষেপণং ততোঽবক্ষেপণমাকুঞ্চনং তথা। প্রসারণঞ্চ গমনং কর্ম্মাণ্যেতানি পঞ্চচ ॥ ভ্রমণং রেচনং স্যন্দনোর্দ্ধজ্বলনমেব চ। তির্য্যগ্গমনমপ্যত্র গমনাদেব লভ্যতে ॥ ইতি ভাষাপরিচ্ছেদঃ ॥ * ॥ কুসুমাঞ্জলিমতে যাগহিংসাদি ॥ * ॥ তত্তু ত্রিবিধং। সাত্ত্বিকং ১ রাজসং ২ তামসং ৩। সাত্ত্বিকং যথা। নিয়তং সঙ্গরহিতমরাগদ্বেষতঃ কৃতং। অফলপ্রেপ্সুনা কর্ম্ম যত্তৎ সাত্ত্বিকমুচ্যতে ॥ রাজসং যথা। যত্তু কামেপ্সুনা কর্ম্ম সাহংকারেণ বা পুনঃ। ক্রিয়তে বহুলায়াসং তদ্রাজসমুদাহৃতং ॥ তামসং যথা। অনুবন্ধং ক্ষয়ং হিংসামনপেক্ষ্য চ পৌরুষং। মোহাদারভ্যতে কর্ম্ম যত্তত্তামসমুচ্যতে ॥ ইতি শ্রীভগবদ্গীতা। লগ্নাৎ দশমলগ্নং। ইতি জ্যোতিষং ॥ ক্রিয়া। ইত্যমরঃ ॥ তচ্চ পঞ্চবিধং। নিত্যনৈমিত্তকাম্যপ্রায়শ্চিত্তনিষিদ্ধভেদাৎ। তত্র আদ্যানি চত্বারি ধর্ম্ম্যাণি। অন্ত্যং অধর্ম্ম্যং। তচ্চ জন্মভেদাৎ ত্রিবিধং। সঞ্চিতং প্রারব্ধং ক্রিয়মাণঞ্চ। ইতি বেদান্তমতং ॥ * ॥ সাত্ত্বিকাদিভেদেন তত্ত্রিবিধং যথা। নিয়তং সঙ্গরহিতমরাগদ্বেষতঃ কৃতং। অফলপ্রেপ্সুনা কর্ম্ম যত্তৎ সাত্ত্বিকমুচ্যতে ॥ যত্তু কামেপ্সুনা কর্ম্ম সাহঙ্কারেণ বা পুনঃ। ক্রিয়তে বহুলায়াসং তদ্রাজসমুদাহৃতং ॥

অনুবন্ধং ক্ষয়ং হিংসামনপেক্ষ্য চ পৌরুষং। মোহাদারভ্যতে কর্ম্ম যত্তত্তামসমুচ্যতে ॥ * ॥ ব্রাহ্মণাদীনাং স্বাভাবিককর্ম্মাণি যথা। শমো দমস্তপঃ শৌচং ক্ষান্তিরার্জবমেব চ। জ্ঞানং বিজ্ঞানমাস্তিক্যং ব্রহ্মকর্ম্ম স্বভাবজং ॥ শৌর্য্যং তেজো ধৃতির্দাক্ষ্যং যুদ্ধে চাপ্যপলায়নং। দানমীশ্বরভাবশ্চ ক্ষত্রকর্ম্ম স্বভাবজং ॥ কৃষিগোরক্ষ্যবাণিজ্যং বৈশ্যকর্ম্ম স্বভাবজং। পরিচর্য্যাত্মকং কর্ম্ম শূদ্রস্যাপি স্বভাবজং ॥ * ॥ স্বকর্ম্মাভিরতস্য ফলং যথা। স্বে স্বে কর্ম্মণ্যভিরতঃ সংসিদ্ধিং লভতে নরঃ। স্বকর্ম্মনিরতঃ সিদ্ধিং যথা বিন্দতি তচ্ছৃণু ॥ যতঃ প্রবৃত্তির্ভূতানাং যেন সর্ব্বমিদং ততং। স্বকর্ম্মণা তমভ্যর্চ্চ্য সিদ্ধিং বিন্দতি মানবঃ॥ শ্রেয়ান্ স্বধর্ম্মো বিগুণঃ পরধর্ম্মাৎ স্বনুষ্ঠিতাৎ। স্বভাবনিয়তং কর্ম্ম কুর্ব্বন্নাপ্নোতি কিল্বিষং ॥ সহজং কর্ম্ম কৌন্তেয় সদোষমপি ন ত্যজেৎ। সর্ব্বারম্ভা হি দোষেণ ধূমেনাগ্নিরিবাবৃতাঃ ॥ অসক্তবুদ্ধিঃ সর্ব্বত্র জিতাত্মা বিগতস্পৃহঃ। নৈষ্কর্ম্ম্যসিদ্ধিং পরমাং সন্ন্যাসেনাধিগচ্ছতি ॥ ইতি শ্রীভগবদ্গীতায়াং ১৮ অধ্যায়ঃ ॥

কর্ম্মকরঃ (ত্রি) মূল্যং গৃহীত্বা কর্ম্মকারকঃ। মজুর ঠিকা চাকর ইত্যাদি ভাষা। তৎপর্য্যায়ঃ। ভৃতকঃ ২ ভৃতিভুক্ ৩ বৈতনিকঃ ৪ ॥ বেতনোপজীবী। তৎপর্য্যায়ঃ ॥ ভরণ্যভুক্ ২। ইত্যমরঃ ॥ কর্ম্মণ্যভুক্ ৩। ইতি তট্টীকা ॥ কর্ম্মকর্ত্তৃমাত্রঞ্চ ॥

কর্ম্মকরঃ (পুং) যমঃ। ইতি মেদিনী ॥

কর্ম্মকরী (স্ত্রী) মূর্ব্বা লতা। বিম্বিকা লতা। ইতি মেদিনী ॥ দাসী। ইতি শব্দরত্নাবলী ॥

কর্ম্মকারঃ (পুং) বর্ণসঙ্করজাতিবিশেষঃ। লোহকারঃ। কামার ইতি ভাষা। স তু শূদ্রায়াং বিশ্বকর্ম্মণো জাতঃ। ইতি ব্রহ্মবৈবর্ত্তপুরাণং ॥ বৃষঃ। ইতি শব্দচন্দ্রিকা ॥

কর্ম্মকারঃ (ত্রি) বেতনং বিনা ভারবহনাদিকর্ম্মকারকঃ। বেগার ইতি ভাষা। তৎপর্য্যায়ঃ। কর্ম্মক্রিয়ঃ ২। ইত্যমরঃ ॥

কর্ম্মকীলকঃ (পুং) রজকঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

কর্ম্মজঃ (পুং) কলিযুগঃ। ইতি শব্দরত্নাবলী ॥ বটবৃক্ষঃ। ইতি জটাধরঃ ॥ ক্রিয়াজন্যে ত্রি ॥

কর্ম্মজগুণঃ (পুং) ক্রিয়াজন্যগুণঃ। তদ্যথা। সংযোগঃ। বিভাগঃ। বেগঃ। ইতি ভাষাপরিচ্ছেদঃ ॥

কর্ম্মঠঃ (ত্রি) কর্ম্মকুশলঃ। যথা। স কর্ম্মঠঃ কর্ম্মসুতানুবন্ধি। ইতি ভট্টিঃ ॥ প্রযত্নেন প্রারব্ধং কর্ম্ম সমাপয়তি যঃ। তৎপর্য্যায়ঃ। কর্ম্মশূরঃ ২। ইত্যমরঃ ॥

কর্ম্মণ্যঃ (ত্রি) কর্ম্মযোগ্যঃ। ক্রিয়ার্হঃ। কেজুয়া ইতি ভাষা। কর্ম্মণা ভ্রাজতে ইত্যর্থে য প্রত্যয়ঃ। ইতি সংক্ষিপ্তসারব্যাকরণং ॥

কর্ম্মণ্যভুক্ (ত্রি) ভরণ্যভুক্। বেতনোপজীবী। ইত্যমরটীকায়াং স্বামী ॥

কর্ম্মণ্যা (স্ত্রী) বেতনং। মূল্যং। ইত্যমরঃ ॥

কর্ম্মন্দী [ন্] (পুং) ভিক্ষুঃ। সন্ন্যাসী ইত্যমরঃ॥

কর্ম্মফলং (ক্লী) কর্ম্মবিপাকঃ। কর্ম্মরঙ্গফলং ইতি মেদিনী॥

কর্ম্মভূঃ (স্ত্রী) কৃষ্টভূমিঃ। তৎপর্য্যায়ঃ। কর্ম্মান্তঃ ২। ইতি হেমচন্দ্রঃ॥

কর্ম্মভূমিঃ (স্ত্রী) আর্য্যাবর্ত্তদেশঃ। ইতি হেমচন্দ্রঃ॥

কর্ম্মমূলং (ক্লী) কুশতৃণং। ইতি শব্দচন্দ্রিকা॥

কর্ম্মযুগং (ক্লী) কলিযুগং। ইতি ত্রিকাণ্ড-শেষঃ॥

কর্ম্মযোগঃ (পুং) চিত্তশুদ্ধিজনকবৈদিক-কর্ম্ম। যথা। নিষ্কামকর্ম্মণাত্মজ্ঞানমিত্যুক্তং যথা। অয়মেব ক্রিয়াযোগো জ্ঞানযোগস্য সাধকঃ। কর্ম্মযোগং বিনা জ্ঞানং কস্যচি-ন্নৈব দৃশ্যতে॥ সোঽপি দুরিতক্ষয়দ্বারা ন সাক্ষাৎ। ইতি মলমাসতত্ত্বং॥*॥ তদনু-ষ্ঠানস্যাবশ্যকত্বং যথা। শ্রীভগবানুবাচ॥ লোকেঽস্মিন্ দ্বিবিধা নিষ্ঠা পুরা প্রোক্তা ময়ানঘ। জ্ঞানযোগেন সাংখ্যানাং কর্ম্ম-যোগেণ যোগিনাং॥ ন কর্ম্মণামনারম্ভা-ন্নৈষ্কর্ম্ম্যং পুরুষোঽশ্নুতে। ন চ সন্ন্যসনা-দেব সিদ্ধিং সমধিগচ্ছতি॥ নহি কশ্চিৎ ক্ষণমপি জাতু তিষ্ঠত্যকর্ম্মকৃৎ। কার্য্যতে হ্যবশঃ কর্ম্ম সর্ব্বঃ প্রকৃতিজৈর্গুণৈঃ॥ কর্ম্মেন্দ্রিয়াণি সংযম্য য আস্তে মনসা স্মরন্। ইন্দ্রিয়ার্থান্ বিমূঢ়াত্মা মিথ্যাচারঃ স উচ্যতে॥ যস্ত্বিন্দ্রিয়াণি মনসা নিয়ম্যা-রভতেঽর্জ্জুন। কর্ম্মেন্দ্রিয়ৈঃ কর্ম্মযোগ-মসক্তঃ স বিশিষ্যতে॥ নিয়তং কুরু কর্ম্ম ত্বং কর্ম্ম জ্যায়ো হ্যকর্ম্মণঃ। শরীরযাত্রাপি চ তে ন প্রসিদ্ধ্যেদকর্ম্মণঃ॥ যজ্ঞার্থাৎ কর্ম্মণোঽন্যত্র লোকোঽয়ং কর্ম্মবন্ধনঃ। তদর্থং কর্ম্ম কৌন্তেয় মুক্তসঙ্গঃ সমাচর॥ সহযজ্ঞাঃ প্রজাঃ সৃষ্ট্বা পুরোবাচ প্রজা-পতিঃ। অনেন প্রসবিষ্যধ্বমেষ বোঽস্ত্বিষ্ট-কামধুক্॥ দেবান্ ভাবয়তানেন তে দেবা ভাবয়ন্তু বঃ। পরস্পরং ভাবয়ন্তঃ শ্রেয়ঃ পরমবাপ্স্যথ॥ ইষ্টান্ ভোগান্ হি বো দেবা দাস্যন্তে যজ্ঞভাবিতাঃ। তৈ-র্দত্তানপ্রদায়ৈভ্যো যো ভুঙ্ক্তে স্তেন এব সঃ॥ যজ্ঞশিষ্টাশিনঃ সন্তো মুচ্যন্তে সর্ব্ব-কিল্বিষৈঃ। ভুঞ্জতে তে ত্বঘং পাপা যে পচন্ত্যাত্মকারণাৎ॥ অন্নাদ্ভবন্তি ভূতানি পর্জ্জন্যাদন্নসম্ভবঃ। যজ্ঞাদ্ভবতি পর্জ্জন্যো যজ্ঞঃ কর্ম্মসমুদ্ভবঃ॥ কর্ম্ম ব্রহ্মোদ্ভবং বিদ্ধি ব্রহ্মাক্ষরসমুদ্ভবং। তস্মাৎ সর্ব্বগতং ব্রহ্ম নিত্যং যজ্ঞে প্রতিষ্ঠিতং॥ এবং প্রবর্ত্তিতং চক্রং নানুবর্ত্তয়তীহ যঃ। অঘায়ুরিন্দ্রিয়া-রামো মোঘং পার্থ স জীবতি॥ যস্ত্বাত্মরতি-রেব স্যাদাত্মতৃপ্তশ্চ মানবঃ। আত্মন্যেব চ সন্তুষ্টস্তস্য কার্য্যং ন বিদ্যতে॥ নৈব তস্য কৃতে নার্থো নাকৃতেনেহ কশ্চন। ন চাস্য সর্ব্বভূতেষু কশ্চিদর্থব্যপাশ্রয়ঃ॥ তস্মা-দসক্তঃ সততং কার্য্যং কর্ম্ম সমাচর। অসক্তো হ্যাচরন্ কর্ম্ম পরমাপ্নোতি পূরুষঃ॥ কর্ম্মণৈব হি সংসিদ্ধিমাস্থিতা জনকাদয়ঃ। লোকসংগ্রহমেবাপি সংপশ্যন্ কর্ত্তু-মর্হসি॥ যদ্যদাচরতি শ্রেষ্ঠস্তত্তদেবেতরো জনঃ। স যৎ প্রমাণং কুরুতে লোকস্তদনু-

বর্ত্ততে॥ ন মে পার্থাস্তি কর্ত্তব্যং ত্রিষু লোকেষু কিঞ্চন। নানবাপ্তমবাপ্তব্যং বর্ত্ত এব চ কর্ম্মণি॥ যদি হ্যহং ন বর্ত্তেয়ং জাতু কর্ম্মণ্যতন্দ্রিতঃ। মম বর্ত্মানুবর্ত্তন্তে মনুষ্যাঃ পার্থ সর্ব্বশঃ॥ উৎসীদেয়ুরিমে লোকা ন কুর্য্যাং কর্ম্ম চেদহং। সঙ্করস্য চ কর্ত্তা স্যামুপহন্যামিমাঃ প্রজাঃ॥ সক্তাঃ কর্ম্মণ্যবিদ্বাংসো যথা কুর্ব্বন্তি ভারত। কুর্য্যাদ্বিদ্বাংস্তথাসক্তশ্চিকীর্ষুর্লোকসংগ্রহং ॥ ন বুদ্ধিভেদং জনয়েদজ্ঞানাং কর্ম্মসঙ্গিনাং। জোষয়েৎ সর্ব্বকর্ম্মাণি বিদ্বান্ যুক্তঃ সমাচরন্ ॥ প্রকৃতেঃ ক্রিয়মাণানি গুণৈঃ কর্ম্মাণি সর্ব্বশঃ। অহঙ্কারবিমূঢ়াত্মা কর্ত্তাহমিতি মন্যতে ॥ তত্ত্ববিত্তু মহাবাহো গুণকর্ম্মবিভাগয়োঃ। গুণা গুণেষু বর্ত্তন্ত ইতি মত্বা ন সজ্জতে॥ প্রকৃতের্গুণসংমূঢ়াঃ সজ্জন্তে গুণকর্ম্মসু। তানকৃৎস্নবিদো মন্দান্ কৃৎস্নবিন্ন বিচালয়েৎ ॥ ময়ি সর্ব্বাণি কর্ম্মাণি সংন্যস্যাধ্যাত্মচেতসা। নিরাশীর্নির্ম্মমো ভূত্বা যুধ্যস্ব বিগতজ্বরঃ॥ যে মে মতমিদং নিত্যমনুতিষ্ঠন্তি মানবাঃ। শ্রদ্ধাবন্তোঽনসূয়ন্তো মুচ্যন্তে তেঽপি কর্ম্মভিঃ॥ যে ত্বেতদভ্যসূয়ন্তো নানুতিষ্ঠন্তি মে মতং। সর্ব্বজ্ঞানবিমূঢ়াংস্তান্ বিদ্ধি নষ্টানচেতসঃ॥ সদৃশং চেষ্টতে স্বস্যাঃ প্রকৃতের্জ্ঞানবানপি। প্রকৃতিং যান্তি ভূতানি নিগ্রহঃ কিং করিষ্যতি॥ ইন্দ্রিয়স্যেন্দ্রিয়স্যার্থে রাগদ্বেষৌ ব্যবস্থিতৌ। তয়োর্ন বশমাগচ্ছেত্তৌ হ্যস্য পরিপন্থিনৌ॥ শ্রেয়ান্ স্বধর্ম্মো বিগুণঃ পরধর্ম্মাৎ স্বনুষ্ঠিতাৎ। স্বধর্ম্মে নিধনং শ্রেয়ঃ পরধর্ম্মো ভয়াবহঃ॥ ইতি শ্রীভগবদ্গীতায়াং কর্ম্মযোগো নাম ৩ অধ্যায়ঃ॥ *॥ অন্যৎ ভগবন্মন্দিরাদিকরণং বহ্নিপুরাণে যমানুশাসননামাধ্যায়ে দ্রষ্টব্যং॥

কর্ম্মরঙ্গঃ (পুং ক্লী) ফলবৃক্ষবিশেষঃ। কামরাঙ্গা ইতি ভাষা। তৎপর্য্যায়ঃ। শিরালঃ ২ বৃহদম্লঃ ৩ রুজাকরঃ ৪। ইতি শব্দচন্দ্রিকা॥ কর্ম্মারঃ ৫ কর্ম্মরকঃ ৬ পীতফলঃ ৭ কর্ম্মরঃ ৮ মুদ্গরকঃ ৯ মুদ্গরঃ ১০ ধরাফলঃ ১১ কর্ম্মারকঃ ১২। অস্য গুণাঃ। অম্লত্বং। উষ্ণত্বং। বাতহারিত্বং। পিত্তকারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ তীক্ষ্ণত্বং। কটুপাকিত্বং। অম্লপিত্তকারিত্বঞ্চ। ইতি রাজবল্লভঃ॥ তৎপক্কফলগুণঃ। মধুরাম্লত্বং। বলপুষ্টিরুচিপ্রদত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

কর্ম্মরী (স্ত্রী) বংশরোচনা। ইতি রাজনির্ঘণ্টঃ॥

কর্ম্মবজ্রঃ (পুং) শূদ্রঃ। ইতি মহাভারতং॥

কর্ম্মবাটী (স্ত্রী) তিথিঃ। ইতি হেমচন্দ্রঃ॥

কর্ম্মবিপাকঃ (পুং) সদসৎকর্ম্মজন্যফলস্য পরিপাকঃ। রোগাদিরূপজন্মান্তরীয়াশুভকর্ম্মফলভোগ ইতি যাবৎ তদ্বিবরণং যথা। নরকাৎ প্রতিমুক্তস্তু পাপযোনিষু জায়তে। পতিতাৎ প্রতিগৃহ্যাথাবরযোনিং ব্রজেদ্বুধঃ॥ নরকাৎ প্রতিমুক্তস্তু কৃমির্ভবতি পাতকঃ। উপাধ্যায়ব্যলীকস্তু কৃত্বা শ্বা ভবতি দ্বিজঃ॥ তজ্জায়াং মনসা বাঞ্ছংস্তদ্দ্রব্যং বাপ্যসংশয়ং। গর্দ্দভো জায়তে জন্তু-

শ্বিত্রস্যৈবাপমানকৃৎ ॥ মাত্রাদীতরমাক্রম্য শারিকা সংপ্রজায়তে। পিতরৌ পীড়য়িত্বা তু কচ্ছপত্বঞ্চ জায়তে ॥ ভর্ত্তুঃ পিণ্ডমুপাশ্বস্তো হিত্বান্যানি নিষেবয়েৎ। সোঽপি মোহসমাপন্নো জায়তে বানরো মৃতঃ ॥ ন্যাসাপহর্ত্তা নরকাৎ বিমুক্তো জায়তে কৃমিঃ। অসূয়কশ্চ নরকান্মুক্তো ভবতি রাক্ষসঃ ॥ বিশ্বাসহর্ত্তা চ নরো মীনযোনৌ প্রজায়তে। যবধান্যানি হৃত্বা তু জায়তে মূষিকো মৃতঃ ॥ পরদারাভিমর্ষাত্তু বৃকো ঘোরোঽভিজায়তে। ভ্রাতৃভার্য্যাপ্রসঙ্গন্তে কোকিলো জায়তে নরঃ ॥ গুর্ব্বাদিভার্য্যাগমনাৎ শূকরো জায়তে নরঃ। যজ্ঞদানবিবাহানাং বিঘ্নকর্ত্তা ভবেৎ কৃমিঃ ॥ দেবতাপিতৃবিপ্রাণামদত্ত্বা যোঽন্নমশ্নুতে। প্রমুক্তো নরকাদ্বাপি বায়সঃ স প্রজায়তে ॥ জ্যেষ্ঠভ্রাত্রবমানাচ্চ ক্রৌঞ্চযোনৌ প্রজায়তে। শূদ্রশ্চ ব্রাহ্মণীং গত্বা কৃমিযোনৌ প্রজায়তে॥ তস্যামপত্যমুৎপাদ্য কাষ্ঠান্তঃকীটকো ভবেৎ। কৃতঘ্নঃ কৃমিকঃ কীটঃ পতঙ্গো বৃশ্চিকস্তথা ॥ অশস্ত্রং পুরুষং হত্বা নরঃ সংজায়তে খরঃ। কৃমিঃ স্ত্রীবধকর্ত্তা চ বালহন্তা চ জায়তে॥ ভোজনং চোরয়িত্বা তু মক্ষিকা জায়তে নরঃ। হৃত্বান্নঞ্চৈব মার্জ্জারস্তিলহৃচ্চৈব মূষিকঃ ॥ ঘৃতং হৃত্বা চ নকুলঃ কাকো মদ্গুরমামিষং। মধু হৃত্বা নরো দংশঃ পূপং হৃত্বা পিপীলকঃ ॥ অপো হৃত্বা তু পাপাত্মা বায়সঃ সংপ্রজায়তে। হৃতে কাংস্যে চ হারীতঃ কপোতো বা প্রজায়তে ॥ হৃত্বা তু কাঞ্চনং ভাণ্ডং কৃমিযোনৌ প্রজায়তে। কার্পাসিকে হৃতে ক্রৌঞ্চো বহ্নিহর্ত্তা বকস্তথা ॥ ময়ূরো বর্ণকং হৃত্বা শাকং পত্রঞ্চ জায়তে। জীবঞ্জীবকতাং যাতি রক্তবস্ত্রাপহৃন্নরঃ ॥ ছুছুন্দরিঃ শুভান্ গন্ধান্ বংশং হৃত্বা শশো ভবেৎ। ষণ্ডঃ কলাপহরণে কাষ্ঠহৃৎ কাষ্ঠকীটকঃ ॥ পুষ্পাপহৃদ্দরিদ্রস্তু পঙ্গুর্যাবাপহৃন্নরঃ। শাকহর্ত্তা চ হারীতস্তোয়হর্ত্তা চ চাতকঃ ॥ গৃহহৃন্নরকান্ গত্বা রৌরবাদীন্ সুদারুণান্। তৃণগুল্মলতাবল্লীত্বক্সারতরুতাং ব্রজেৎ ॥ এষ এব ক্রমো দৃষ্টো গোসুবর্ণাদিহারিণাং। বিদ্যাপহারী মূকশ্চ গত্বা চ নরকান্ বহূন্ ॥ অসমিদ্ধেঽগ্নৌ হুতে চ মন্দাগ্নিঃ সংপ্রজায়তে। পরনিন্দা কৃতঘ্নত্বং পরমর্ম্মাবঘাতনং ॥ নৈষ্ঠুর্য্যং নির্ঘৃণত্বঞ্চ পরদারোপসেবনং। পরস্বহরণাশৌচং দেবতানাঞ্চ কুৎসনং ॥ নিকৃত্যা বঞ্চনং নৃণাং কার্পণ্যঞ্চ নৃণাং বুধঃ। উপলক্ষণাদি জানীয়াৎ মুক্তানাং নরকাদনু ॥ দয়াভূতেষু সংবাদঃ পরলোকং প্রতিক্রিয়া। সত্যং হিতার্থতা চোক্তির্বেদপ্রামাণ্যদর্শনং ॥ গুরুদেবর্ষিপূজা চ কেবলং সাধুসঙ্গমঃ। সৎক্রিয়াভ্যসনং মৈত্রী স্বর্গিণাং লক্ষণং বিদুঃ ॥ অষ্টাঙ্গযোগবিজ্ঞানাৎ প্রাপ্নোত্যাত্যন্তিকং ফলং। ইতি গারুড়ে কর্ম্মবিপাকঃ ২২৯ অধ্যায়ঃ ॥ শাতাতপভৃগুভরতোক্তঃ পাপরোগপ্রায়শ্চিত্তানাং বিবরণগ্রন্থঃ। প্রায়শ্চিত্তবিহীনপাপিনাং নরকান্তে প্রতিজন্ম তৎপাপসূচিতরোগযুক্তং শরীরং ভবতি। নৃণাং

দুষ্কর্ম্মজা রোগা জপদেবার্চ্চনহোমদানাদিভিঃ শমং যান্তি ॥ * ॥ মহাপাতকজা রোগাঃ সপ্তজন্মসু জায়ন্তে। তদ্যথা। কুষ্ঠং। রাজযক্ষ্মা। প্রমেহঃ। গ্রহণী। মূত্রকৃচ্ছ্রং। অশ্মরী। কাসঃ। অতীসারঃ। ভগন্দরঃ। দুষ্টব্রণঃ। গণ্ডমালা। পক্ষাঘাতঃ। অক্ষিনাশনং। ইত্যাদয়ঃ। অত্র সম্পূর্ণং প্রায়শ্চিত্তং ॥ * ॥ উপপাপোদ্ভবা রোগাঃ পঞ্চজন্মসু জায়ন্তে। তদ্যথা। জলোদরং। যকৃৎ। প্লীহা। শূলং। ব্রণঃ। শ্বাসঃ। জীর্ণজ্বরঃ। ছর্দ্দিঃ। ভ্রমঃ। মোহঃ। গলগ্রহঃ। রক্তার্ব্বুদং। বিসর্পঃ। ইত্যাদয়ঃ। অত্র অর্দ্ধং প্রায়শ্চিত্তং ॥ * ॥ পাপসমুদ্ভবা রোগাঃ ত্রিষু জন্মসু জায়ন্তে। তদ্যথা। দণ্ডাপতানকঃ। চিত্রবপুঃ। কম্পঃ। বিচর্চ্চিকা। বল্মীকঃ। পুণ্ডরীকং। ইত্যাদয়ঃ। অত্র ষষ্ঠাংশং প্রায়শ্চিত্তং ॥*॥ অতিপাপাৎ অর্শ আদ্যাঃ রোগা ভবন্তি অন্যে বহুধা রোগসঙ্করাশ্চ ॥ * ॥ অথ দানাদিষু সাধারণবিধিঃ। গোদানে সুশীলা সবৎসা পয়স্বিনী গৌঃ। বৃষদানে শুক্লবস্ত্রকাঞ্চনসহিতঃ শুভোঽনড্বান্। ভূদানে দশনিবর্ত্তনপরিমিতা ভূঃ। সুবর্ণদানে শতনিষ্কং স্বর্ণং তদর্দ্ধার্দ্ধং বা। অশ্বদানে উপস্করসহিতসুশীলাশ্বঃ। মহিষদানে স্বর্ণায়ুধযুক্তমহিষী। গজমহাদানে সুবর্ণফলসহিতগজঃ। দেবার্চ্চনে লক্ষোচ্চাবচপুষ্পদানং। ব্রাহ্মণভোজনে সহস্রদ্বিজেভ্যো মিষ্টান্নদানং। রুদ্রজপে লক্ষসংখ্যকপুষ্পকরণকত্র্যম্বকপূজনানন্তরং একাদশরুদ্রজপঃ তদ্দশাংশসঘৃতগুগ্গুলহোমঃ বরুণমন্ত্রেরভিষেচনঞ্চ। ধান্যদানে ষষ্টিসংখ্যকখারীপরিমিতধান্যং। বস্ত্রদানে কর্পূরমিশ্রিতপট্টবস্ত্রদ্বয়ং ॥ * ॥ অথ প্রায়শ্চিত্তগ্রহণানুষ্ঠানাদি। দশ পঞ্চাষ্ট চতুরো বা ব্রাহ্মণানুপবেশ্য তেষামনুজ্ঞয়া প্রায়শ্চিত্তমুপক্রম্য বিষ্ণুং সম্পূজ্য নিজকাম্যয়া সংকল্প্য দ্বিজেভ্যো ধেনুং শক্তিতো দক্ষিণাঞ্চ দত্ত্বা তান্ বস্ত্রালঙ্করণৈরলঙ্কৃত্য দণ্ডপ্রমাণেন প্রায়শ্চিত্তং যাচেৎ ; তেযামনুজ্ঞয়া প্রায়শ্চিত্তং যথাবিধি কৃত্বা পরিপূর্ণার্থান্ তান্ যথাবিধি অর্চ্চয়িত্বা তেভ্যোঽনুজ্ঞামাশিষশ্চ প্রতিগৃহ্য ব্রাহ্মণান্ ভোজয়িত্বা বন্ধুভিঃ সহ ভোক্তব্যং। ইতি শাতাতপীয়কর্ম্মবিপাকপ্রথমাধ্যায়বিবরণং ॥ *॥ জন্মান্তরীয়মহাপাতকশেষচিহ্নকুনখাদিরোগাণাং প্রায়শ্চিত্তং পরাকব্রতং মহাপাতকাদতিপাতকস্য গুরুস্ত্রাস্তচ্ছেষজন্যগলৎকুষ্ঠরোগস্য প্রায়শ্চিত্তং দ্বিগুণং। ইতি স্মার্ত্তাঃ ॥ * ॥ অথ শাতাতপোক্তহিংসাস্তেয়াঽগম্যাগমনাঽগতিপ্রায়শ্চিত্তানি ক্রমেণ লিখ্যন্তে ॥

| পাপী | রোগী | প্রায়শ্চিত্তং |
|---|---|---|
| ব্রহ্মহা— | পাণ্ডুকুষ্ঠী— | যজমানশ্চতুর্দিক্ষু পঞ্চপল্লবপঞ্চবর্ণসংযুক্তচতুরঃ কলসান্ সংস্থাপ্য তন্মধ্যে কুম্ভোপরি রৌপ্যমষ্টদলপদ্মং বিন্যস্য তদুপরি |

| পাপী | রোগী | প্রায়শ্চিত্তং |
|---|---|---|
| | | পলার্দ্ধার্দ্ধপরিমিতসুবর্ণনির্ম্মিতদশহস্তং চতুর্ম্মুখদেবং সংন্যস্য প্রত্যহং ত্রিকালং পুরুষসূক্তেন পূজয়েৎ। ততঃ পূর্ব্বাদি-কুম্ভেষু ব্রহ্মচারিণো ব্রাহ্মণাঃ ঋগ্বেদপ্রভৃতীন্ স্বস্ববেদান্ শনৈঃ পঠেয়ুঃ। ততো মধ্যকুম্ভে তিলাক্তঘৃতহেমভির্গ্রহশান্তিপুরঃসরং দশাংশেন হোমং কুর্য্যাৎ। ততো ব্রাহ্মণো দ্বাদশাহমিদং কর্ম্ম সমাপ্য তত্র পীঠে যথাবিধি যজমানমভিষিঞ্চেৎ। ততো যজমানো ব্রাহ্মণেভ্যো যথাশক্তি গোভূহেমতিলোদকানি দত্ত্বা কুম্ভাদীন্ আচার্য্যায় নিবেদয়েৎ ॥ * ॥ |
| গোবধী— | কুষ্ঠী— | পঞ্চপল্লবসংযুক্তপঞ্চবর্ণসমন্বিতরক্তচন্দনলিপ্তাঙ্গরক্তপুষ্পাম্বরান্বিতৈকরক্তকুম্ভং দক্ষিণস্যাং দিশি সংস্থাপ্য তত্র তিলচূর্ণপূরিততাম্রপাত্রং বিন্যস্য তদুপরি নিষ্কমিতসুবর্ণনির্ম্মিতযমদেবং পুরুষসূক্তমন্ত্রেণ সংপূজ্য পাপং মে শাম্যতামিতি বদেৎ। ততঃ সামবিদ্ ব্রাহ্মণস্তত্র কলসে সামপারায়ণং কুর্য্যাৎ। ততো দশাংশং সর্ষপং দত্ত্বা পাত্রমাল্যাভিষেচনং কুর্য্যাৎ। ততো যমোঽপি মহিষারূঢ়ো দণ্ডপাণির্ভয়ানকঃ। দক্ষিণাশাপতির্দ্দেবো মম পাপং ব্যপোহতু॥ ইতি মন্ত্রেণ যজমানো যমং বিসৃজ্য তং আচার্য্যায় নিবেদ্য সম্ভক্তিমাচরেৎ ॥ * ॥ |
| পিতৃহা— | চেতনাহীনঃ— | ত্রিংশৎ প্রাজাপত্যানি কৃত্বা পলপরিমিতাং সুবর্ণনাবং কারয়িত্বা তাম্রপাত্রে রূপ্যময়ং কুম্ভং স্থাপয়িত্বা নিষ্কপরিমিতস্বর্ণনির্ম্মিতং বিষ্ণুং পট্টবস্ত্রেণ সংবেষ্ট্য বিধানতঃ পূজয়েৎ। তৎ সর্ব্বং ব্রাহ্মণায় দত্ত্বা ব্রাহ্মণং বিসর্জ্জয়েৎ। অন্যেভ্যোঽপি বিপ্রেভ্যো ভূয়সীং দক্ষিণাং দদ্যাৎ ॥ * ॥ |
| মাতৃহা— | অন্ধঃ— | পিতৃহবৎ প্রায়শ্চিত্তং কুর্য্যাৎ ॥ * ॥ |
| ভ্রাতৃহা— | মূকঃ— | চান্দ্রায়ণব্রতং চরিত্বা। সরস্বতি জগন্মাতঃ শব্দব্রহ্মাদিদেবতে। দুষ্কর্ম্মকরণাৎ পাপাৎ পাহি মাং পরমেশ্বরি॥ ইমং মন্ত্রমুচ্চার্য্য পলপরিমিতসুবর্ণসহিতপুস্তকং ব্রাহ্মণায় দত্ত্বা তং ব্রাহ্মণং বিসর্জ্জয়েৎ ॥ * ॥ |
| বালঘাতী— | মৃতবৎসঃ— | ব্রাহ্মণোদ্বাহনং যথাবিধি হরিবংশশ্রবণঞ্চ কুর্য্যাৎ। মহারুদ্র- |

| পাপী | রোগী | প্রায়শ্চিত্তং |
|---|---|---|
| | | জপান্ কারয়েৎ। তদ্দশাংশেন অযুতসংখ্যকদূর্ব্বয়া চ হুত্বা দক্ষিণাসহিতনিষ্কপরিমিতৈকাদশস্বর্ণানি দ্বিজানুসারতঃ একাদশপলানি চ দদ্যাৎ। অন্যব্রাহ্মণেভ্যো যথাশক্তি দক্ষিণাং দদ্যাৎ। তত আচার্য্যো বরুণদৈবতমন্ত্রৈর্দম্পতীঃ স্নাপয়েৎ। যজমান আচার্য্যায় বস্ত্রালঙ্করণানি দদ্যাৎ ॥ * ॥ |
| গোত্রহা— | কুষ্ঠী নির্ব্বংশশ্চ | শতপ্রাজাপত্যব্রতঞ্চরিত্বা ব্রাহ্মণায় ভূমিং দক্ষিণাং দত্ত্বা ভারতং শৃণুয়াৎ ॥ * ॥ |
| স্ত্রীহন্তা— | অতিসারী— | দশাশ্বত্থবৃক্ষান্ রোপয়েৎ শর্করাধেনুং দদ্যাৎ শতং ব্রাহ্মণাংশ্চ ভোজয়েৎ ॥ * ॥ |
| রাজহা— | ক্ষয়রোগী— | গোভূহিরণ্যমিষ্টান্নজলবস্ত্রাণি ঘৃতধেনুং তিলধেনুঞ্চ দদ্যাৎ ॥ |
| বৈশ্যহন্তা— | রক্তার্ব্বুদী— | চত্বারি প্রাজাপত্যব্রতানি চরিত্বা সপ্তধান্যানি উৎসৃজেৎ ॥ |
| শূদ্রহন্তা— | দণ্ডাপতানকঃ | একং প্রাজাপত্যব্রতঞ্চরিত্বা সদক্ষিণৈকধেনুং দদ্যাৎ ॥ |
| কারুহন্তা— | রূক্ষঃ— | শুক্লবর্ণবৃষভং দদ্যাৎ ॥ |
| গজঘাতী — | সর্ব্বকার্য্যে-ষ্বসিদ্ধার্থঃ | প্রাসাদং কারয়িত্বা গণেশপ্রতিমাং স্থাপয়েৎ অথবা কুলত্থশাকৈঃ পূপৈশ্চ গণশান্তিপূর্ব্বকং লক্ষসংখ্যকগণেশমন্ত্রং জপেৎ ॥ |
| উষ্ট্রহন্তা— | বিকৃতস্বরঃ— | কর্পূরকং ফলং দদ্যাৎ ॥ |
| অশ্বহন্তা— | বক্রতুণ্ডঃ— | শতপলানি চন্দনানি দদ্যাৎ ॥ |
| মহিষীঘাতী— | কৃষ্ণগুল্মী— | নিষ্কত্রয়পরিমিতস্বর্ণময়ীং প্রকৃতিং দদ্যাৎ ॥ |
| খরহন্তা— | খররোমা— | কৃষ্ণগুল্মিবৎ প্রায়শ্চিত্তং কুর্য্যাৎ ॥ |
| তরক্ষুহন্তা— | কেকরেক্ষণঃ | গুল্মময়ীং ধেনুং দদ্যাৎ ॥ |
| শূকরহন্তা— | দন্তুরঃ— | সদক্ষিণং ঘৃতকুম্ভং দদ্যাৎ ॥ |
| হরিণঘাতী— | খঞ্জঃ— | পলপরিমিতস্বর্ণাশ্বং দদ্যাৎ ॥ |
| শৃগালহা — | বিপাদকঃ— | খঞ্জবৎ প্রায়শ্চিত্তং কুর্য্যাৎ ॥ |
| অজাঘাতী— | অধিকাঙ্গঃ— | বিচিত্রবস্ত্রযুক্তাং অজাং দদ্যাৎ ॥ |
| উরভ্রঘাতী— | পাণ্ডুরোগী— | ব্রাহ্মণায় পলপরিমিতকস্তূরিকাং দদ্যাৎ ॥ |
| মার্জারহা— | পীতপাণিঃ— | নিষ্কমিতস্বর্ণনির্ম্মিতং পারাবতং দদ্যাৎ ॥ |
| শুকশারিকা-ঘাতী | স্খলিতবাক্— | ব্রাহ্মণায় সদক্ষিণং সচ্ছাস্ত্রপুস্তকং দদ্যাৎ ॥ |

| পাপী | রোগী | প্রায়শ্চিত্তং |
|---|---|---|
| বকঘাতী— | দীর্ঘনসঃ— | শুক্লাং গাং দদ্যাৎ ॥ |
| কাকঘাতী— | কর্ণহীনঃ— | কৃষ্ণাং গাং দদ্যাৎ ॥ * ॥ হিংসায়াং নিষ্কৃতিরিয়ং ব্রাহ্মণে সমুদাহৃতা। তদর্দ্ধার্দ্ধপ্রমাণেন ক্ষত্রিয়াদিম্বনুক্রমাৎ ॥ ইতি শাতাতপোক্তকর্ম্মবিপাকদ্বিতীয়াধ্যায়হিংসাপ্রায়শ্চিত্তবিবরণং ॥ * ॥ |
| সুরাপঃ— | শ্যাবদন্তঃ— | প্রাজাপত্যব্রতঞ্চরিত্বা সপ্ততুলাপরিমিতশর্করাং দত্ত্বা মহারুদ্রং জপ্ত্বা তদ্দশাংশং তিলৈর্হুত্বা বরুণদৈবতমন্ত্রৈরভিষেকং কুর্য্যাৎ॥ |
| মদ্যপঃ— | রক্তপিত্তী— | সর্পিষো ঘটং সহিরণ্যং মধুনোঽর্দ্ধঘটঞ্চ দদ্যাৎ ॥ |
| অভক্ষ্য-ভোক্তা }— | কৃমিকোদরঃ— | ভীমপঞ্চকোপবাসং কুর্য্যাৎ ॥ |
| রজস্বলা-দৃষ্টান্ন-ভোক্তা }— | কৃমিলোদরঃ— | ত্রিরাত্রং গোমূত্রযাবকং ভুঞ্জীত ॥ |
| অস্পৃশ্য-স্পৃষ্টান্ন-ভোক্তা }— | কৃমিলোদরঃ— | ত্রিরাত্রমুপবসেৎ ॥ |
| পরান্নবিঘ্ন-কর্ত্তা } | অজীর্ণী— | যথাবিধি লক্ষহোমং কুর্য্যাৎ ॥ |
| দ্রব্যে সতি কদন্নদঃ } | মন্দোদরাগ্নিঃ | প্রাজাপত্যত্রয়ং কৃত্বা শতং দ্বিজান্ ভোজয়েৎ ॥ |
| বিষদঃ— | ছর্দ্দিরোগী— | দশপয়স্বিনীর্গা দদ্যাৎ ॥ |
| মার্গহা— | পাদরোগী— | অশ্বং দদ্যাৎ ॥ |
| পিশুনঃ— | শ্বাসকাসী— | সহস্রপলসম্মিতং ঘৃতং দদ্যাৎ ॥ |
| ধূর্ত্তঃ— | অপস্মারী— | ব্রহ্মকূর্চ্চময়ীং ধেনুং দত্ত্বা সদক্ষিণাং গাং দদ্যাৎ ॥ |
| পরোপতাপী | শূলী— | অন্নদানং রুদ্রজপঞ্চ প্রকুর্ব্বীত ॥ |
| দাবাগ্নিদঃ— | রক্তাতিসারী | উদপানং বটবৃক্ষরোপণঞ্চ কুর্য্যাৎ ॥ |
| সুরালয়ে জলে বা শকৃন্মূত্র-কারী }— | গুদরোগী— | মাসংব্যাপ্য সুরার্চ্চনং গোদ্বয়দানং প্রাজাপত্যমেকঞ্চ কুর্য্যাৎ ॥ |

| পাপী | রোগী | প্রায়শ্চিত্তং |
|---|---|---|
| গর্ভপাতকর্ত্তা | যকৃৎপ্লীহ-জলোদর-রোগী | পলত্রয়পরিমিতসুবর্ণরূপ্যতাম্রান্বিতজলধেনুদানং কুর্য্যাৎ ॥ |
| প্রতিমা-ভঙ্গকারী | অপ্রতিষ্ঠঃ— | বৎসরত্রয়পর্য্যন্তং প্রতিদিনং অশ্বত্থসেচনানন্তরং গৃহ্যোক্ত-বিধিনা সমাং গম্যামুদ্বাহয়েৎ সুপূজিতং বিঘ্নরাজঞ্চ সংস্থা-পয়েৎ ॥ |
| দুষ্টবাগ্মী— | খণ্ডিতঃ— | দুগ্ধসমন্বিতঘটদ্বয়ং পলদ্বয়পরিমিতরূপ্যঞ্চ দ্বিজাতয়ে দদ্যাৎ ॥ |
| পরনিন্দাবান্ | খল্লীটঃ— | কাঞ্চনসহিতধেনুং দদ্যাৎ ॥ |
| সভায়াং পক্ষপাতী | পক্ষঘাতবান্ | সত্যবর্ত্তিনে নিষ্কত্রয়পরিমিতং হেম দদ্যাৎ ॥ |
| পরোপহাস-কৃৎ | কাণঃ— | সকাঞ্চনাং গাং দদ্যাৎ ॥ * ॥ ইতি শাতাতপোক্তকর্ম্মবিপাক-তৃতীয়াধ্যায়প্রকীর্ণপ্রায়শ্চিত্তবিবরণং ॥ * ॥ |
| বিপ্রহেমহৃৎ | কুলঘ্নঃ— | চান্দ্রায়ণত্রয়ানন্তরং সুবর্ণশতং দদ্যাৎ ॥ |
| তাম্রচৌরঃ— | ঔড়ুম্বরী— | প্রাজাপত্যব্রতং শতপলপরিমিততাম্রদানঞ্চ কুর্য্যাৎ ॥ |
| কাংস্যহারী— | পুণ্ডরীক-সমন্বিতঃ | ব্রাহ্মণমলঙ্কৃত্য তস্মৈ শতপলং কাংস্যং দদ্যাৎ ॥ |
| শুক্তিহারী— | পাণ্ডুমূর্দ্ধজঃ— | উপবাসানন্তরং পলশতশুক্তিং দদ্যাৎ ॥ |
| ত্রপুহারী— | নেত্ররোগবান্ | উপোষ্য বিধিবদ্ঘৃতধেনুং দদ্যাৎ ॥ |
| দুগ্ধহারী— | বহুমূত্রকঃ— | ব্রাহ্মণায় যথাবিধি দুগ্ধধেনুং দদ্যাৎ ॥ |
| দধিচৌরঃ— | মদবান্— | বিপ্রায় দধিধেনুং দদ্যাৎ ॥ |
| মধুচৌরঃ— | নেত্ররোগবান্ | উপবাসং কৃত্বা মধুধেনুং দদ্যাৎ ॥ |
| ইক্ষো-র্বিকার-হারী— | উদরগুল্মবান্ | গুড়ধেনুং প্রদদ্যাৎ ॥ |
| লৌহহারী— | কর্ব্বূরাঙ্গঃ— | একদিনমুপোষ্য শতপললৌহং দদ্যাৎ ॥ |
| তৈলচৌরঃ— | কণ্ড্বাদি-পীড়িতঃ— | উপোষ্য বিপ্রায় তৈলঘটদ্বয়ং দদ্যাৎ ॥ |
| আমান্নহারী— | হীনদীপ্তিঃ— | নিষ্কদ্বয়স্বর্ণনির্ম্মিতাশ্বিনীকুমারৌ দদ্যাৎ ॥ |

| পাপী | রোগী | প্রায়শ্চিত্তং |
|---|---|---|
| পক্বান্নহারী— | জিহ্বারোগী— | লক্ষসংখ্যকগায়ত্রীং জপেৎ তিলকরণকং তদ্দশাংশহোমঞ্চ কুর্য্যাৎ ॥ |
| ফলহারী— | ব্রণিতাংগুলিঃ | দ্বিজাতয়ে অযুতসংখ্যকনানাফলং দদ্যাৎ ॥ |
| তাম্বূলহারী— | শ্বেতৌষ্ঠঃ— | সদক্ষিণোত্তমবিদ্রুমদ্বয়ং দদ্যাৎ ॥ |
| শাকহারী— | নীললোচনঃ— | ব্রাহ্মণায় মহানীলমণিদ্বয়ং দদ্যাৎ ॥ |
| কন্দমূলহারী | হ্রস্বপাণিঃ— | যথাশক্তি দেবগৃহং উদ্যানঞ্চ কুর্য্যাৎ ॥ |
| সৌগন্ধিক-হারী | দুর্গন্ধাঙ্গঃ— | অগ্নৌ লক্ষসংখ্যকপদ্মৈর্হোমং কুর্য্যাৎ ॥ |
| দারুহারী— | স্বিন্নপাণিঃ— | বিদুষে পলদ্বয়পরিমিতকুঙ্কুমং দদ্যাৎ ॥ |
| বিদ্যাপুস্তক-হারী | মূকঃ— | ব্রাহ্মণায় সদক্ষিণং ন্যায়েতিহাসং দদ্যাৎ ॥ |
| বস্ত্রহারী— | কুষ্ঠী— | নিষ্কমিতহেমনির্ম্মিতপ্রজাপতিং বস্ত্রযুগ্মঞ্চ দদ্যাৎ ॥ |
| ঊর্ণাহারী— | লোমশঃ— | কম্বলান্বিতনিষ্কমিতস্বর্ণনির্ম্মিতবহ্নিমূর্ত্তিং অর্চ্চয়িত্বা ব্রাহ্মণায় দদ্যাৎ ॥ |
| পট্টসূত্রহর্ত্তা— | বিলোমা— | ধেনুং দদ্যাৎ ॥ |
| ঔষধাপহর্ত্তা— | সূর্য্যাবর্ত্তরোগী | মাসং ব্যাপ্য সূর্য্যার্ঘ্যং কাঞ্চনঞ্চ দদ্যাৎ ॥ |
| রক্তবস্ত্র-প্রবাল-হারী | রক্তবাতবান্ | মণিরাগসমন্বিতাং সবস্ত্রাং মহিষীং দদ্যাৎ ॥ |
| বিপ্ররত্নাপ-হারী | অনপত্যঃ— | মহারুদ্রজপাদিকং কুর্য্যাৎ তদ্দশাংশপলাশসমিদ্ভির্যথাবিধি জুহুয়াৎ মৃতবৎসোক্তসর্ব্বকর্ম্ম চ কুর্য্যাৎ ॥ |
| দেবহারী— | বিবিধজ্বরী— | তত্র জ্বরে কর্ণে রুদ্রং জপেৎ মহাজ্বরে মহারুদ্রং রৌদ্রজ্বরে অতিরৌদ্রং বৈষ্ণবজ্বরেমহারুদ্রাতিরৌদ্রৌ চ জপেৎ ॥ |
| নানাবিধ-দ্রব্যচৌরঃ | গ্রহণীযুতঃ— | শক্ত্যনুসারেণান্নোদকবস্ত্রাণি হেম চ দদ্যাৎ ॥ * ॥ ইতি শাতাতপীয়কর্ম্মবিপাকচতুর্থাধ্যায়োক্তস্তেয়প্রায়শ্চিত্তবিবরণং ॥ * ॥ |
| মাতৃগামী— | লিঙ্গহীনঃ— | উত্তরতঃ কৃষ্ণমাল্যাদিভূষিতকৃষ্ণবস্ত্রসমাচ্ছন্নকুম্ভং বিন্যস্য তদুপরি কাংস্যপাত্রে নিষ্কষট্‌কমিতস্বর্ণনির্ম্মিতনরবাহনকুবেরং পুরুষসূক্তেন যজেৎ অথর্ব্ববেদবিদ্‌ব্রাহ্মণস্তত্র অথর্ব্বোক্তকর্ম্ম কুর্য্যাৎ। ব্রাহ্মণায় বিংশতিনিষ্কপরিমিতস্বর্ণনির্ম্মিতপুত্রিকাং |

| পাপী | রোগী | প্রায়শ্চিত্তং |
|---|---|---|
| | | নিষ্পাপোঽহমিতি ব্রুবন্ দদ্যাৎ। নিধীনামধিপো দেবঃ শঙ্করস্য প্রিয়ঃ সখা। সৌম্যাশাধিপতিঃ শ্রীমান্ মম পাপং ব্যপোহতু॥ ইতি মন্ত্রেণ তং কুবেরং আচার্য্যায় দদ্যাৎ॥ |
| চাণ্ডালীগামী | হীনমুষ্কঃ— | মাতৃগামিবৎ প্রায়শ্চিত্তং কুর্য্যাৎ॥ |
| গুরুজায়াভিগামী | মূত্রকৃচ্ছ্রী— | নীলমাল্যাদিভূষিতনীলবস্ত্রাচ্ছন্নঘটং পশ্চিমস্যাং দিশি সংস্থাপ্য তদুপরি তাম্রপাত্রে ষড়্‌নিষ্কস্বর্ণনির্ম্মিতবরুণং পুরুষসূক্তেন যজেৎ সামবেদী ব্রাহ্মণস্তত্র সামবেদমাচরেৎ বিংশতিনিষ্কমিতস্বর্ণপুত্তলিকাং নিষ্পাপোঽহমিত্যুচ্চার্য্য ব্রাহ্মণায় দদ্যাৎ। যাদসামধিপো দেবো বিশ্বেষামধিপো বরঃ। সংসারনৌকর্ণধারো বরুণঃ পাবনোঽস্তু মে॥ ইতি মন্ত্রেণ আচার্য্যায় স্বর্ণবরুণং দদ্যাৎ॥ |
| স্বসৃতাগামী— | রক্তকুষ্ঠী— | পূর্ব্ববতঃ পীতমাল্যাদিভূষিতপীতবস্ত্রসমাচ্ছন্নকলসং সংস্থাপ্য তস্যোপরি স্বর্ণপাত্রে নিষ্কষট্‌কমিতসুবর্ণনির্ম্মিতবাসবং পুরুষসূক্তেন যজেৎ তত্র ঋগ্‌যজুঃসামানি সমাচরেৎ ব্রাহ্মণং সম্পূজ্য নিষ্পাপোঽহমিতি ব্রুবন্ তস্মৈ শতসুবর্ণনির্ম্মিতপুত্রিকাং দদ্যাৎ। দেবানামধিপো দেবো বজ্রী বিষ্ণুনিকেতনঃ। শতযজ্ঞঃ সহস্রাক্ষঃ পাপং মম নিকৃন্ততু॥ ইতি মন্ত্রং পঠেৎ॥ |
| ভ্রাতৃজায়াভিগামী | গুল্মকুষ্ঠী— | স্বসৃতাগমনপ্রায়শ্চিত্তস্যার্দ্ধং ঘৃতাক্তভিলকরণকদশাংশহোমঞ্চ কুর্য্যাৎ॥ |
| পুত্রজায়াভিগামী | কৃষ্ণকুষ্ঠী— | এতদেব প্রায়শ্চিত্তং কুর্য্যাৎ॥ |
| অগম্যাভিগামী | ধ্রুবমণ্ডলী— | কার্পাসভারকাংস্যদোহসংযুক্তসবৎসকতিলষষ্টিমিতহেমধেনুং সুরভী বৈষ্ণবী মাতা মম পাপং ব্যপোহতু ইমং মন্ত্রমুচ্চার্য্য দদ্যাৎ॥ |
| তপস্বিনীসঙ্গমী | অশ্মরীগদী— | মধুধেনুং হিরণ্যসহিতশতদ্রোণপরিমিততিলঞ্চ দদ্যাৎ॥ |
| পিতৃস্বসৃগন্তা | দক্ষিণাংশব্রণী | শক্তিতঃ অজাং দদ্যাৎ॥ |
| মাতুলানীগন্তা | পৃষ্ঠকুব্জঃ— | কৃষ্ণাজিনং প্রদদ্যাৎ॥ |
| মাতৃস্বসৃগন্তা— | নানাঙ্গেব্রণবান্ | দাসদানং অগম্যাগমনপ্রায়শ্চিত্তঞ্চ কুর্য্যাৎ॥ |
| মৃতভার্য্যাভিগামী | মৃতভার্য্যঃ— | একব্রাহ্মণং বিবাহয়েৎ॥ |

| পাপী | রোগী | প্রায়শ্চিত্তং |
|---|---|---|
| স্বগোত্রস্ত্রী-প্রসঙ্গী | ভগন্দররোগী | মহিষীং দদ্যাৎ ॥ |
| তপস্বিনী-প্রসঙ্গী | প্রমেহগদী— | মাসং ব্যাপ্য রুদ্রং জপেৎ যথাশক্তি কাঞ্চনঞ্চ দদ্যাৎ ॥ |
| দীক্ষিতস্ত্রী-প্রসঙ্গী | দুষ্টরক্ত-দৃক্‌রোগী — | প্রাজাপত্যদ্বয়ং কুর্য্যাৎ ॥ |
| স্বজাতিস্ত্রীগামী | হৃদয়ব্রণী— | প্রাজাপত্যদ্বয়ং কুর্য্যাৎ ॥ |
| পশুযোনিগামী | মূত্রাঘাতী— | তিলপাত্রদ্বয়ং দদ্যাৎ ॥ |
| অশ্বযোনিগামী | গুদস্তম্ভী— | মাসং ব্যাপ্য প্রতিদিনং সহস্রসংখ্যকমলকরণকশিরঃস্নানং কুর্য্যাৎ স্ত্রীণামপি তত্তৎপুরুষসংসর্গাত্তত্তৎপ্রায়শ্চিত্তং ॥ * ॥ ইতি শাতাতপীয়কর্ম্মবিপাকপঞ্চমাধ্যায়োক্তাগম্যাগমনপ্রায়শ্চিত্তবিবরণং ॥ * ॥ |

| পাপ-যুক্তঃ— | মরণবিশেষ-বিশিষ্টঃ— | ঔর্দ্ধদেহিকপূর্ব্বকালীনতৎপুত্রাদিকর্ত্তব্যপ্রায়শ্চিত্তং |
|---|---|---|
| কুমারীগন্তা— | ব্যাঘ্রাদিহতঃ | পরকন্যাং বিবাহয়েৎ ॥ |
| বিষদঃ— | সর্পদষ্টঃ— | নাগবলিদানং কাঞ্চনদানঞ্চ কুর্য্যাৎ ॥ |
| নৃপনাশকঃ— | গজহতঃ— | চতুর্নিষ্কমিতহেমগজং দদ্যাৎ ॥ |
| রাজকুমারঘ্নঃ | রাজহতঃ— | হিরণ্ময়পুরুষং দদ্যাৎ ॥ |
| পশুহিংসকঃ | চৌরহতঃ— | ধেনুং দদ্যাৎ ॥ |
| মিত্রভেদী— | বৈরিহতঃ— | বৃষং দদ্যাৎ ॥ |
| করবৃত্তিঃ— | বৃকহতঃ বৃষহতঃ — | যথাশক্তি কাঞ্চনং দদ্যাৎ ॥ |
| গুরুঘাতী— | শয্যামৃতঃ— | নিষ্কমিতসুবর্ণনির্ম্মিতপাত্রস্থিতবিষ্ণ্বধিষ্ঠিততূলীসমন্বিতশয্যাং দদ্যাৎ ॥ |
| মৎসরী— | শৌচহীনমৃতঃ | দ্বিনিষ্কস্বর্ণজহরিং দদ্যাৎ ॥ |
| দ্রোহী— | সংস্কার-হীনমৃতঃ — | কুমারং বিবাহয়েৎ ॥ |

| পাপ-যুক্তঃ— | মরণবিশেষ-বিশিষ্টঃ— | ঔর্দ্ধ্বদেহিকপূর্ব্বকালীনপুত্ত্রাদিকর্ত্তব্যপ্রায়শ্চিত্তং |
|---|---|---|
| নিক্ষেপহারকঃ | কুক্কুরহতঃ— | অত্র প্রায়শ্চিত্তস্যানুক্তত্বাৎ ব্যাঘ্রাদিহত ইত্যত্রাদিপদদর্শনাচ্চ তত্রোক্তপ্রায়শ্চিত্তং যুক্তং ॥ |
| পাশিকঃ | অরণ্যে শূকরহতঃ | পূর্ব্ববৎ ॥ |
| কৃতবাসাঃ নিকৃন্তনশ্চ | কৃমিহতঃ— | দ্বিজায় গোধূমান্নং দদ্যাৎ ॥ |
| শঙ্করদ্রোহী— | শৃঙ্গিহতঃ— | বস্ত্রসংযুক্তবৃষভং দদ্যাৎ ॥ |
| সূচকঃ— | শকটহতঃ— | উপস্করান্বিতং অশ্বং দদ্যাৎ ॥ |
| মেদিনীচৌরঃ | ভৃগুপাতহতঃ | ধান্যপর্ব্বতং দদ্যাৎ ॥ |
| যজ্ঞহানিকর্ত্তা | বহ্নিহতঃ— | স্বশক্তিত উপানহং দদ্যাৎ ॥ |
| দক্ষিণাচৌরঃ | দবহতঃ দারুহতঃ | সদনে সভাং কুর্য্যাৎ ॥ |
| ক্রতুনিন্দকঃ শ্রুতিনিন্দকোপিপাঠঃ | শস্ত্রহতঃ | সদক্ষিণাং মহিষীং দদ্যাৎ ॥ |
| দ্বিজনিন্দাকর্ত্তা | [illegible] | সবৎসাং পয়স্বিনীং গাং দদ্যাৎ ॥ |
| কুমতিপ্রদঃ— | বিষহতঃ— | ক্ষেত্রসংযুতাং মেদিনীং দদ্যাৎ ॥ |
| হিংস্রঃ— | উদ্বন্ধনমৃতঃ— | পয়স্বিনীং গাং দদ্যাৎ ॥ |
| সেতুভেদী— | জলহতঃ— | নিষ্কত্রয়মিতস্বর্ণবরুণং দদ্যাৎ ॥ |
| রাজদণ্ডিহৃৎ | বৃক্ষহতঃ— | স্বর্ণসংযুতং সৌবর্ণবৃক্ষং দদ্যাৎ ॥ |
| লৌহহৃৎ— | অতীসারমৃতঃ | সংযতো লক্ষসংখ্যকগায়ত্রীং জপেৎ ॥ |
| স্বদর্পকার্য্যকারকঃ | সাকিন্যাদিহতঃ | যথোচিতং রুদ্রং জপেৎ ॥ |
| অনধ্যায়েঽধ্যয়নকর্ত্তা | বিদ্যুদাহতঃ— | বিদ্যাদানং কুর্য্যাৎ ॥ |
| অস্পৃশী— | অস্পর্শসঙ্গী মৃতঃ | বেদপারায়ণং কুর্য্যাৎ ॥ |

| পাপ-যুক্তঃ— | মরণবিশেষ-বিশিষ্টঃ— | ঔর্দ্ধদেহিকপূর্ব্বকালীনপুত্রাদিকর্ত্তব্যপ্রায়শ্চিত্তং |
|---|---|---|
| শাস্ত্রহৃৎ— | বাস্তমাশ্রিত্য মৃতঃঅস্পৃশ্য-স্পর্শনমৃতশ্চ | সচ্ছাস্ত্রপুস্তকং দদ্যাৎ ॥ |
| মদ্যবিক্রেতা | পতিতমৃতঃ— | ষোড়শপ্রাজাপত্যানি কুর্য্যাৎ ॥ |
| দ্বিজবস্ত্রহৃৎ— | অনপত্যমৃতঃ | নবতিং কৃচ্ছ্রাণি চরেৎ ॥ |
| | হয়াহতঃ— | নিষ্কত্রয়মিতং স্বর্ণং দদ্যাৎ ॥ |
| | কপিহতঃ— | কনকনির্ম্মিতকপিং দদ্যাৎ ॥ |
| | বিসূচিকামৃতঃ | শতং দ্বিজান্ ভোজয়েৎ ॥ |
| | কণ্ঠকবলমৃতঃ | তিলধেনুং দদ্যাৎ ॥ |
| | কেশরোগমৃতঃ | অষ্টৌ কৃচ্ছ্রান্ সমাচরেৎ। ইত্যগতীনাং বিশেষপ্রায়শ্চিত্তং ॥ * ॥ |

অগতীনাং সাধারণপ্রায়শ্চিত্তং। সফলসপ্তধান্যোপরি পঞ্চপল্লবসর্ব্বৌষধি-সংযুক্তং কৃষ্ণবস্ত্রসমাচ্ছন্নমকালমূলং কলসং সংস্থাপ্য তত্র মহিষাসনসংস্থিতং চতুর্ভুজং দণ্ডহস্তং স্বর্ণকুণ্ডলসংযুতং নিষ্ক-পরিমিতং প্রেতরূপিণং পুরুষং সংস্থাপ্য পূজয়েৎ। প্রত্যহং পুরুষসূক্তেন দুগ্ধেন তর্পয়েৎ তত্র কলসে ষড়ঙ্গরুদ্রং জপেৎ। যমসূক্তেন যমপূজাদিকং আত্মবিশুদ্ধ্যর্থং গায়ত্রীজপং গ্রহশান্তিপূর্ব্বকদশাংশতিল-হোমঞ্চ কুর্য্যাৎ। অজ্ঞাতগোত্রবিপ্রায় সতিলমুদকং দদ্যাৎ। ইমং তিলময়ং পিণ্ডং মধুসর্পিঃসমন্বিতং। দদামি তস্মৈ প্রেতায় যঃ পীড়াং কুরুতে মম॥ ইতি মন্ত্রেণ মধুশর্করাযুক্তপ্রস্থমিতকৃষ্ণতিল-পিষ্টপিণ্ডং প্রেতরূপায় দদ্যাৎ। যজমানঃ প্রেতমুদ্দিশ্য তিলপাত্রসংযুতান্ দ্বাদশ-কৃষ্ণকলসান্ বিষ্ণুমুদ্দিশ্যৈকং কলসঞ্চ দদ্যাৎ। বরায়ুধধরঃ শুচিরাচার্য্যঃ বরুণ-দৈবতমন্ত্রৈঃ কলসোদকৈর্দম্পতী অভি-ষিঞ্চেৎ। ততো যজমান আচার্য্যায় দক্ষিণাং দদ্যাৎ নারায়ণবলিঞ্চ কুর্য্যাৎ ॥ * ॥ এবং কৃতে বিধানেন প্রকুর্য্যাদৌর্দ্ধদেহিকং। ততঃ প্রেতত্বনির্ম্মুক্তাঃ পাবিতাস্তর্পিতাস্তথা ॥ দদ্যুঃ পুত্রাংশ্চ পৌত্রাংশ্চ আয়ুরারোগ্য-সম্পদঃ ॥ ইতি শাতাতপীয়কর্ম্মবিপাক-ষষ্ঠাধ্যায়োক্তাগতিপ্রায়শ্চিত্তবিবরণং ॥*॥

কর্ম্মশীলঃ (ত্রি) যঃ ফলনিরপেক্ষঃ স্বভাবেন কর্ম্ম করোতি সঃ। তৎপর্য্যায়ঃ। কার্ম্মঃ ২। ইত্যমরঃ ॥

কর্ম্মশূরঃ (ত্রি) কর্ম্মঠঃ। ফলপর্য্যন্তকর্ম্মসমা-পকঃ। ইত্যমরঃ ॥

কর্ম্মসচিবঃ (পুং) কর্ম্মোপযুক্তসচিবঃ। অক্ষ-পটলাধ্যক্ষাদিঃ। ইত্যমরঃ ॥

কর্ম্মসন্ন্যাসিকঃ (পুং) যতিঃ। সন্ন্যাসী। ইতি হলায়ুধঃ॥

কর্ম্মসাক্ষী [ন্] (পুং) সূর্য্যঃ। ইতি হেমচন্দ্রঃ

কর্ম্মক্ষমঃ (ত্রি) কর্ম্মকরণসমর্থঃ। তৎপর্য্যায়ঃ। অলংকর্ম্মীণঃ ২। ইত্যমরঃ॥

কর্ম্মান্তঃ (পুং) কর্ম্মভূঃ। কৃষ্টভূমিঃ। ইতি হেমচন্দ্রঃ॥

কর্ম্মারঃ (পুং) কর্ম্মকারঃ। কামার ইতি ভাষা। বংশঃ। বাঁশ ইতি খ্যাতঃ। কর্ম্মরঙ্গঃ। কামরাঙ্গা ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥

কর্ম্মার্হঃ (পুং) পুরুষঃ। ইতি রাজনির্ঘণ্টঃ॥ ক্রিয়াযোগ্যে ত্রি॥

কর্ম্মিষ্ঠঃ (ত্রি) ক্রিয়াবান্। অতিশয়কর্ম্মবিশিষ্টঃ। ইতি ব্যাকরণং॥

কর্ম্মী [ন্] (ত্রি) কর্ম্মবিশিষ্টঃ। কর্ম্ম বিদ্যতে অস্যেতি ব্যুৎপত্তিঃ॥

কর্ম্মীরঃ (পুং) কির্ম্মীরবর্ণঃ। ইত্যমরটীকা॥

কর্ম্মেন্দ্রিয়ং (ক্লী) কর্ম্মনিষ্পাদকবিষয়িপঞ্চকং। যথা। বাক্ ১ পাণিঃ ২ পাদঃ ৩ পায়ুঃ ৪ উপস্থঃ ৫। ইতি বেদান্তঃ॥

কর্ব্ব দর্পে। ইতি কবিকল্পদ্রুমঃ॥

কর্ব্বঃ (পুং) কামঃ। উন্দুরুঃ। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ॥

কর্ব্বটং (ক্লী) পুরং। নগরং। ইতি জটাধরঃ॥

কর্ব্বটঃ (পুং ক্লী) দ্বিশতগ্রামমধ্যে মনোরমস্থানং। গ্রামশতস্থজনাঃ ক্রয়বিক্রয়াদিনা সেবাদিনা বা যেন গ্রামেণ জীবন্তি সঃ। ইতি কেচিৎ॥ চতুঃসমগ্রামঃ। ইত্যেকে॥ চতুঃসমং গৃহস্থানং। ইত্যপরে॥ ইত্যমরটীকায়াং ভরতঃ॥ চতুঃশতগ্রামসংগ্রহস্থানং। ইতি সারসুন্দরী॥

কর্ব্বরঃ (পুং) রাক্ষসঃ। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ॥ ব্যাঘ্রঃ। ইতি মেদিনী॥

কর্ব্বরী (স্ত্রী) শিবা। ইতি বিশ্বমেদিন্যৌ॥ হিঙ্গুপত্রী। ইতি জটাধরঃ॥

কর্ব্বুরঃ (পুং) রাক্ষসঃ। ইতি শব্দার্ণবঃ॥ চিত্রবর্ণঃ। ইত্যমরঃ॥ শটী। ইতি ভরতঃ॥

কর্ব্বূরঃ (পুং) রাক্ষসঃ। শটী। ইত্যমরঃ॥

কর্শ্যঃ (পুং) কর্চ্চূরঃ। কচূর ইতি হিন্দী ভাষা। ইতি রাজনির্ঘণ্টঃ॥

কর্ষঃ (পুং ক্লী) ষোড়শমাষকপরিমাণং। অশীতিরক্তিকাঃ। তৎপর্য্যায়ঃ। অক্ষঃ ২। ইত্যমরঃ॥ বৈদ্যকমতে তোলকদ্বয়ং। তৎপর্য্যায়ঃ। সুবর্ণং ২ অক্ষঃ ৩ বিড়ালপদকং ৪ পিচুঃ ৫ পাণিতলং ৬ উড়ম্বরং ৭ তিন্দুকং ৮ কবড়গ্রহঃ ৯। ইতি পরিভাষা॥ দশমাষকঃ। ইতি রাজনির্ঘণ্টঃ॥

কর্ষঃ (পুং) কর্ষণং। ইতি মেদিনী॥ বিভীতকবৃক্ষঃ। ইতি শব্দরত্নাবলী॥

কর্ষকঃ (ত্রি) কৃষিজীবী। কৃষাণ ইতি ভাষা। তৎপর্য্যায়ঃ। ক্ষেত্রাজীবঃ ২ কৃষিকঃ ৩ কৃষীবলঃ ৪। ইত্যমরঃ॥ কার্ষকঃ ৫। ইতি তট্টীকা॥ আকর্ষণকর্ত্তা চ॥

কর্ষণং (ক্লী) কৃষিকর্ম্ম। লাঙ্গলাদিনা ভূম্যাদিখননং। চাস ইতি ভাষা। ইতি হেমচন্দ্রঃ॥ আকর্ষণং। টানন্ ইতি ভাষা॥

কর্ষণিঃ (স্ত্রী) অসতী। ইত্যুণাদিকোষঃ॥

কর্ষণী (স্ত্রী) ক্ষীরিণীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কর্ষফলঃ ( পুং ) বিভীতকবৃক্ষঃ। ইত্যমরঃ॥
কর্ষফলা ( স্ত্রী ) আমলকীবৃক্ষঃ। ইতি রত্নমালা॥
কর্ষার্দ্ধং ( ক্লী ) তোলকপরিমাণং। ইতি বৈদ্যকপরিভাষা॥
কর্ষিণী ( স্ত্রী ) ক্ষীরিণীবৃক্ষঃ। অশ্বমুখবন্ধনরজ্জুস্থিতলৌহং। তৎপর্য্যায়ঃ। খলীনঃ ২ কবীয়ং ৩ কবিকা ৪। ইতি জটাধরঃ॥
কর্ষূঃ ( পুং ) বার্ত্তা। করীষাগ্নিঃ। ইত্যমরঃ॥ বার্ত্তা অত্র কৃষিঃ। ইতি রমানাথঃ॥ জীবিকা। ইতি ভরতঃ॥
কর্ষূঃ ( স্ত্রী ) কুল্যা। অল্পা কৃত্রিমা সরিৎ। ইত্যমরঃ॥ নদীমাত্রং। ইতি রত্নকোষঃ॥ ইষ্টখাতঃ। ইতি মেদিনী॥ তদ্যথা। চতুরঙ্গুলপৃথ্বীস্তাবদন্তরাস্তথাধঃখাতা বিতস্ত্যায়তাস্তিস্রঃ কর্ষূঃ কুর্য্যাৎ। কর্ষূসমীপে অগ্নিত্রয়মুপসমাধায় পরিস্তীর্য্য তত্রৈকৈকস্মিন্নাহুতিত্রয়ং জুহুয়াৎ। ইতি শ্রাদ্ধবিবেকধৃতবিষ্ণুসূত্রং॥
কর্হি ব্য কদা। কস্মিন্ কালে। কখন কবে ইতি ভাষা। ইতি ব্যাকরণং॥
কর্হিচিৎ ব্য কস্মিংশ্চিৎ কালে। কোন কালে ইতি ভাষা। তৎপর্য্যায়ঃ। জাতু ২ কদাচিৎ ৩। ইতি হেমচন্দ্রঃ॥
কল ৎ ক গতৌ। সংখ্যায়াং। ইতি কবিকল্পদ্রুমঃ॥ অন্ত্যস্থতৃতীয়োপধঃ। কলয়তি কালং ধীরঃ। ইতি দুর্গাদাসঃ॥
কল ঙ সংখ্যারুতোঃ। ইতি কবিকল্পদ্রুমঃ॥ ঙ কলতে দিবসং বৃদ্ধঃ গণয়তীত্যর্থঃ। রুৎ শব্দঃ। ইতি দুর্গাদাসঃ॥
কল ক ক্ষুদৌ। ইতি কবিকল্পদ্রুমঃ॥ ক কালয়তি। ক্ষুদিরিতি ক্ষুদ ক্রৌশ্ প্রেরণে ইত্যস্য ঔণাদিককিপ্রত্যয়ে রূপং। ইতি দুর্গাদাসঃ॥
কলং ( ক্লী ) শুক্রং। ইতি মেদিনী॥ কোলিবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥
কলঃ ( পুং ) মধুরাস্ফুটধ্বনিঃ। ইত্যমরঃ॥ সালবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥
কলঃ ( ত্রি ) অজীর্ণঃ। ইতি মেদিনী॥
কলকঃ ( পুং ) শকুলমৎস্যঃ। ইতি হেমচন্দ্রঃ॥
কলকণ্ঠঃ ( পুং ) কলধ্বনিঃ। হংসঃ। পারাবতঃ। পিকঃ। ইতি মেদিনী॥
কলকলঃ ( পুং ) কোলাহলঃ। সালনির্যাসঃ। ইতি মেদিনী॥
কলঘোষঃ ( পুং ) কোকিলঃ। ইতি শব্দরত্নাবলী॥
কলঙ্কঃ ( পুং ) চিহ্নং। অপবাদঃ। লৌহমলং। ইতি মেদিনী॥
কলঙ্কষঃ ( পুং ) সিংহঃ। ইতি শব্দমালা॥
কলঙ্কষা ( স্ত্রী ) করতালী। ইতি শব্দরত্নাবলী॥
কলঙ্কী [ ন্ ] ( ত্রি ) অপবাদগ্রস্তঃ। যথা। কলঙ্কী জায়তে বিপ্রে তির্য্যগ্‌যোনিশ্চ নিম্বকে। ইতি তিথ্যাদিতত্ত্বং॥ চিহ্নযুক্তঃ। লৌহমলবিশিষ্টঃ। অত্র কলঙ্কশব্দাদস্ত্যর্থে ণিন্॥
কলঙ্কুরঃ ( পুং ) আবর্ত্তঃ। জলভ্রমঃ। ইতি ত্রিকাণ্ডশেষঃ॥
কলঞ্জঃ ( পুং ) বিষাস্ত্রহতমৃগপক্ষিণৌ। ইতি ত্রিকাণ্ডশেষঃ॥ তাম্রকূটঃ। দোক্তা তামাক ইতি ভাষা। যথা। বিষ্ণুসিদ্ধান্তসারাবল্যাং

বৈদ্যকে। অথ ধূমপর্ণীধূমপানগুণঃ। কলঞ্জসংবেষ্টনধূমপানাৎ স্যাদ্দন্তশুদ্ধির্মুখরোগহানিঃ। কফঘ্নমামজ্বরহানিকৃচ্চ গান্ধর্ব্ববিদ্যাপ্রবণৈকসেব্যং॥

কলটং (ক্লী) গৃহাচ্ছাদনং। চাল ইতি ভাষা। ইতি শব্দরত্নাবলী॥ কুটলমিতি চ পাঠঃ॥

কলতূলিকা (স্ত্রী) ইচ্ছাবতী। কামুকা। তৎপর্য্যায়ঃ। বাঞ্ছিনী ২ লঞ্জিকা ৩। ইতি ত্রিকাণ্ডশেষঃ॥

কলত্রং (ক্লী) শ্রোণিঃ। ভার্য্যা। ইত্যমরঃ॥ রাজ্ঞাং দুর্গস্থানং। ইতি হেমচন্দ্রঃ॥

কলধূতং (ক্লী) রূপ্যং। ইতি রাজনির্ঘণ্টঃ॥

কলধৌতং (ক্লী) স্বর্ণং। রজতং। ইতি মেদিনী॥ কলধ্বনিঃ। ইতি বিশ্বঃ॥

কলধ্বনিঃ (পুং) পারাবতঃ। কোকিলঃ। ময়ূরঃ। ইতি মেদিনী॥ মধুরাব্যক্তশব্দঃ। ইতি কলশব্দার্থে অমরঃ॥

কলনং (ক্লী) চিহ্নং। দোষঃ। ইতি হলায়ুধঃ॥ গর্ভে মিশ্রিতং শুক্রশোণিতং। তত্তু একরাত্রেণ ভবতি। ইতি শ্রীভাগবতং॥

কলনঃ (পুং) বেতসবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কলনা (স্ত্রী) বশীভূতত্বং। বশতা। যথা। করালং যৎ ক্ষ্বেড়ং কবলিতবতঃ কালকলনা। ইত্যানন্দলহরী॥ জল্পনা চ॥

কলন্দরঃ (পুং) বর্ণশঙ্করজাতিবিশেষঃ। স তু লেটাৎ তীবরকন্যায়াং জাতঃ। ইতি ব্রহ্মবৈবর্ত্তপুরাণং॥

কলন্দিকা (স্ত্রী) সর্ব্ববিদ্যা। ইতি হেমচন্দ্রঃ॥

কলম্বুঃ (স্ত্রী) ঘোলীশাকঃ। ইতি রাজনির্ঘণ্টঃ॥

কলভঃ (পুং) করভঃ। হাতির ছা ইতি ভাষা। স তু পঞ্চবর্ষপর্য্যন্তঃ। ইতি সুভূতিঃ॥ তৎপর্য্যায়ঃ। করিশাবকঃ ২। ইত্যমরঃ॥ দুর্দ্দান্তঃ ৩ ব্যালঃ ৪। ধত্তূরবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কলভবল্লভঃ (পুং) পীলুবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কলভী (স্ত্রী) চঞ্চুবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কলমঃ (পুং) স্বনামখ্যাতলিপিসাধনবস্তু। তৎপর্য্যায়ঃ। লেখনী ২ বর্ণতূলী ৩ অক্ষরতূলিকা ৪। ইতি জটাধরঃ॥ স্বনামখ্যাতশালিধান্যবিশেষঃ। অস্য গুণাঃ। রক্তদোষত্রিদোষনাশিত্বং। চক্ষুর্হিতকারিত্বং। কষায়ত্বঞ্চ। ইতি রাজবল্লভঃ॥ চৌরঃ। ইতি মেদিনী॥

কলমোত্তমঃ (পুং) গন্ধশালিঃ। ইতি রাজনির্ঘণ্টঃ॥

কলম্বঃ (পুং) শরঃ। শাকনাড়িকা। ইত্যমরঃ॥ কদম্বঃ। ইতি বিশ্বঃ॥

কলম্বকঃ (পুং) ধারাকদম্বঃ। ইতি রাজনির্ঘণ্টঃ॥

কলম্বিকা (স্ত্রী) কলম্বীশাকঃ। ইতি শব্দরত্নাবলী॥ গ্রীবাপশ্চান্নাড়ী। তৎপর্য্যায়ঃ। মন্যা ২। ইতি হেমচন্দ্রঃ॥

কলম্বী (স্ত্রী) জলজলতাশাকবিশেষঃ। কলমী ইতি ভাষা। তৎপর্য্যায়ঃ। কড়ম্বী ২ কলম্বুঃ ৩ কলম্বিকা ৪। ইতি শব্দরত্নাবলী॥ অস্যা গুণাঃ। স্তন্যত্বশুক্রশ্লেষ্মকারিত্বং। মধুরত্বং। কষায়ত্বং। গুরুতরত্বঞ্চ। ইতি রাজবল্লভঃ॥

কলম্বুটং ( ক্লী ) হৈয়ঙ্গবীনং। নবনীতং। ইতি হারাবলী ॥

কলম্বুঃ ( স্ত্রী ) কলম্বীশাকঃ। ইতি শব্দ-রত্নাবলী ॥

কলরবঃ ( পুং ) কপোতঃ। পায়রা ইতি ভাষা। ইত্যমরঃ ॥ কোকিলঃ। ইতি রাজনির্ঘণ্টঃ ॥ মধুরাব্যক্তধ্বনিঃ। ইতি কলশব্দার্থে অমরঃ ॥

কললঃ ( পুং ক্লী ) জরায়ুঃ। গর্ব্ভবেষ্টনচর্ম্ম। ইত্যমরঃ ॥

কললজঃ ( পুং ) রালঃ। ধুনা ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ ॥

কললজোদ্ভবঃ ( পুং ) সালবৃক্ষঃ। ইতি রাজ-নির্ঘণ্টঃ ॥

কলবিঙ্কঃ ( পুং ) চটকঃ। ইত্যমরঃ ॥ কলিঙ্গক-বৃক্ষঃ। ইতি মেদিনী ॥ কলঙ্কঃ। শ্বেত-চামরঃ। ইতি সারস্বতঃ ॥

কলশঃ ( ত্রি ) জলাধারবিশেষঃ। কলশী ইতি খ্যাতঃ। তৎপর্য্যায়ঃ। ঘটঃ ২ কুটঃ ৩ নিপঃ ৪। ইত্যমরঃ ॥ কলসঃ ৫ কলসিঃ ৬ কলসী ৭ কলসং ৮ কলশিঃ ৯ কলশী ১০ কলশং ১১। ইতি তট্টীকা ॥ কুম্ভঃ ১২ করীরঃ ১৩। ইতি হেমচন্দ্রঃ ॥ কলাবতী-দীক্ষাপ্রকরণোক্তং তস্য পরিমাণং যথা। পঞ্চাশদঙ্গুলব্যাম উৎসেধঃ ষোড়শাঙ্গুলঃ। কলসানাং প্রমাণন্তু মুখমষ্টাঙ্গুলং স্মৃতং ॥ ষট্ ত্রিংশদঙ্গুলং কুম্ভং বিস্তারোন্নতি-শালিনং। ষোড়শং দ্বাদশং বাপি ততো ন্যূনং ন কারয়েৎ ॥ ইতি তন্ত্রসারঃ ॥

কলশিঃ ( স্ত্রী ) পৃশ্নিপর্ণী। চাকুলিয়া ইতি ভাষা। ইত্যমরঃ ॥ ঘটঃ। ইত্যমরটীকায়াং রায়মুকুটঃ ॥

কলশী ( স্ত্রী ) স্বনামখ্যাতজলপাত্রং। পৃশ্নি-পর্ণী। ইত্যমরটীকায়াং রায়মুকুটঃ ॥

কলসঃ ( ত্রি ) কলশঃ। ঘটঃ। ইতি হেমচন্দ্রঃ ॥ দ্রোণপরিমাণে পুং। ইতি বৈদ্যকপরিভাষা ॥

কলসঃ ( পুং ) কুম্ভঃ। অস্যোৎপত্ত্যাদির্যথা। সাগরে মথ্যমানে তু পীযূষার্থং সুরাসুরৈঃ। পীযূষধারণার্থায় নির্ম্মিতা বিশ্বকর্ম্মণা ॥ কলাঃ কলাস্তু দেবানামসিতাস্তাঃ পৃথক্ পৃথক্। যতঃ কৃতাস্তু কলসাস্ততস্তে পরি-কীর্ত্তিতাঃ ॥ নবৈব কলসাঃ প্রোক্তা নামত-স্তান্নিবোধত। গোহোপগোহো মরুতো ময়ুখশ্চ তথাপরঃ ॥ মনোহা কৃষিভদ্রশ্চ বিজয়স্তনুশোধকঃ। ইন্দ্রিয়ঘ্নোঽথ বিজয়ো নবমঃ পরিকীর্ত্তিতঃ ॥ তেষামেব ক্রমাদ্ ভূপ নব নামানি যানি তু। শৃণু তান্য-পরাণ্যেব শান্তিদানি সদৈব হি ॥ ক্ষিতীন্দ্রঃ প্রথমঃ প্রোক্তো দ্বিতীয়ো জল-সম্ভবঃ। পবনাগ্নী ততো দ্বৌ তু যজমান-স্ততঃ পরঃ। কোষসম্ভবনামা তু ষষ্ঠঃ স পরিকীর্ত্তিতঃ ॥ সোমস্তু সপ্তমঃ প্রোক্ত-শ্চাদিত্যস্তু তথাষ্টমঃ। বিজয়ো নাম-কলসো যোঽসৌ নবম উচ্যতে ॥ স তু পঞ্চমুখঃ প্রোক্তো মহাদেবস্বরূপধৃক্। ঘটস্য পঞ্চবক্ত্রেষু পঞ্চবক্ত্রঃ স্বয়ং তথা ॥ যথা কাষ্ঠাস্থিতঃ সম্যক্ বামবেদাদি-নামতঃ। মণ্ডলস্য চ পদ্মাস্তঃ পঞ্চবক্ত্র-ঘটং ন্যসেৎ ॥ ক্ষিতীন্দ্রং পূর্ব্বতো ন্যস্য পশ্চিমে জলসম্ভবং। বায়ব্যে বায়বং ন্যস্য

আগ্নেয়ে হ্যগ্নিসম্ভবং ॥ নৈর্ঋত্যে যজমানস্ত ঐশ্যান্যাং কোষসম্ভবং । সোমমুত্তরতো ন্যস্য সৌরং দক্ষিণতো ন্যসেৎ ॥ ন্যস্যৈবং কলসাংশ্চৈব তেষু চৈতান্ বিচিন্তয়েৎ । কলসানাং মুখে ব্রহ্মা গ্রীবায়াং শঙ্করঃ স্থিতঃ । মূলে তু সংস্থিতো বিষ্ণুর্মধ্যে মাতৃগণাঃ স্থিতাঃ ॥ দিক্পালা দেবতাঃ সর্ব্বে বেষ্টয়ন্তি দিশো দশ । কুক্ষৌ তু সাগরাঃ সপ্ত সপ্তদ্বীপাশ্চ সংস্থিতাঃ ॥ নক্ষত্রাণি গ্রহাঃ সর্ব্বে তথৈব কুলপর্ব্বতাঃ। গঙ্গাদ্যাঃ সরিতঃ সর্ব্বা বেদাশ্চত্বার এবচ ॥ কলসে সংস্থিতাঃ সর্ব্বে তেষু তানি বিচিন্তয়েৎ । রত্নানি সর্ব্ববীজানি পুষ্পাণি চ ফলানি চ ॥ বজ্রমৌক্তিকবৈদূর্য্যমহাপদ্মেন্দ্রস্ফাটিকৈঃ । সর্ব্বধামময়ং বিল্বং নাগরোড়ুম্বরং তথা ॥ বীজপূরকজম্বীরকাম্রাম্রাতকদাড়িমান্ । যবং শালিঞ্চ নীবারং গোধূমং সিতসর্ষপং ॥ কুঙ্কুমাগুরুকর্পূরমদনং রোচনং তথা । চন্দনঞ্চ তথা মাংসীমেলাং কুষ্ঠং তথৈব চ ॥ কর্পূরপত্রচণ্ডঞ্চ জলং নির্যাসকাম্বুদং । শৈলেয়ং বদরং জাতীপত্রপুষ্পে তথৈব চ ॥ কালশাকং তথা পৃক্কাং দেবীং পর্ণকমেব চ । বচাং ধাত্রীং সমঞ্জিষ্ঠাং তুরুষ্কং মঙ্গলাষ্টকং ॥ দূর্ব্বাং মোহনিকাং ভদ্রাং শতমূলীং শতাবরীং । পর্ণানাং শবলাং ক্ষুদ্রাং সহদেবাং গজাঙ্কুশাং ॥ পূর্ণকোষাং সিতাং পাঠাং গুঞ্জাং সুরসিকালসৌ । ব্যামকং গজদন্তঞ্চ শতপুষ্পাং পুনর্ণবাং ॥ ব্রাহ্মীং দেবীং শিবাং রুদ্রাং সর্ব্বসন্ধানিকাং তথা । সমাহৃত্য শুভানেতান্ কলসেষু নিধাপয়েৎ ॥ কলসস্য যথাদেবান্ বিধিং শম্ভুং গদাধরং । যথাক্রমং পূজয়িত্বা শম্ভুং মুখ্যতয়া যজেৎ ॥ প্রাসাদেন তু মন্ত্রেণ শম্ভুতন্ত্রেণ শঙ্করং । প্রথমং পূজয়েন্মধ্যে নানানৈবেদ্যবেদনৈঃ ॥ দিক্পালানাং ঘটেষ্বেব দিক্পালানপি পূজয়েৎ । পূর্ব্বং বহিঃস্থাপিতেষু গ্রহাণাং কলসেষু চ ॥ নবগ্রহান্ পূজয়েত্তু মাতৃর্মাতৃঘটেষু চ । সর্ব্বে দেবা ঘটে পূজ্যা ঘটস্তেষাং পৃথক্ পৃথক্ ॥ নবৈব তত্র পূর্ব্বোক্তাঃ স্মৃতা মুখ্যতমা নৃপ । ভক্ষ্যৈর্ভোজ্যৈশ্চ পেয়ৈশ্চ পুষ্পৈর্নানাবিধৈঃ ফলৈঃ ॥ যাবকৈঃ পায়সৈশ্চাপি যথাসম্ভবযোজিতৈঃ । পুষ্যস্নানায় নৃপতিঃ পূজয়েৎ সকলান্ সুরান্ ॥ ইতি কালিকাপুরাণে পুষ্যাভিষেকঃ ৮৭ অধ্যায়ঃ ॥ * ॥ অন্যৎ দ্বারকশব্দে দ্রষ্টব্যং ॥

কলসিঃ ( পুং ) পৃশ্নিপর্ণী । ইত্যমরটীকা শব্দরত্নাবলী চ ॥ গর্গরী । ইত্যমরটীকা হারাবলী চ ॥

কলসী ( স্ত্রী ) পৃশ্নিপর্ণী । ইতি শব্দরত্নাবলী ॥ কলসঃ । ইত্যমরটীকা ॥

কলসীসুতঃ ( পুং ) অগস্ত্যমুনিঃ । ইত্যমরটীকায়াং বাচস্পতিঃ ॥

কলসোদধিঃ (পুং ) সমুদ্রঃ । কলস ইব উদধিঃ মন্থনাধারত্বাৎ । ইতি মহাভারতং ॥

কলহঃ ( পুং ক্লী ) বিবাদঃ । লড়াই ঝগড়া ইতি ভাষা । তৎপর্য্যায়ঃ । যুদ্ধং ২ আয়োধনং ৩ জন্যং ৪ প্রধনং ৫ প্রবিদারণং ৬

মৃধং ৭ আস্কন্দনং ৮ সংখ্যং ৯ সমীকং ১০ সাম্পরায়িকং ১১ সমরঃ ১২ অনীকঃ ১৩ রণঃ ১৪ বিগ্রহঃ ১৫ সম্প্রহারঃ ১৬ অভিসম্পাতঃ ১৭ কলিঃ ১৮ সংস্ফোটঃ ১৯ সংযুগঃ ২০ অভ্যামর্দ্দঃ ২১ সমাঘাতঃ ২২ সংগ্রামঃ ২৩ অভ্যাগমঃ ২৪ আহবঃ ২৫ সমুদায়ঃ ২৬ সংযৎ ২৭ সমিতিঃ ২৮ আজিঃ ২৯ সমিৎ ৩০ যুধ্ ৩১। ইত্যমরঃ ॥ শমীকং ৩২ সাম্পরায়কং ৩৩ সংস্ফেটঃ ৩৪ যুৎ ৩৫। ইতি তট্টীকা ॥

কলহঃ (পুং) বাটঃ। খড়্গকোষঃ। ভণ্ডনং। ইতি মেদিনী ॥

কলহংসঃ (পুং) হংসবিশেষঃ। বালিহাঁস ইতি ভাষা। তৎপর্য্যায়ঃ। কাদম্বঃ ২। ইত্যমরঃ ॥ কলনাদঃ ৩ মরালকঃ ৪। ইতি রাজনির্ঘণ্টঃ ॥ রাজহংসঃ। নৃপোত্তমঃ। ইতি বিশ্বমেদিন্যৌ ॥ পরাত্মা। ব্রহ্ম। ইতি শব্দরত্নাবলী ॥

কলহনাশনঃ (পুং) পূতিকরঞ্জঃ। ইতি শব্দমালা ॥

কলহপ্রিয়া (স্ত্রী) সারিকাপক্ষী। ইতি রাজনির্ঘণ্টঃ ॥ নারদে পুং। ইতি মহাভারতং ॥

কলহান্তরিতা (স্ত্রী) নায়িকাভেদঃ। অস্যা লক্ষণং। পতিমবমন্য পশ্চাৎ পরিতপ্তা। অস্যাঃ ক্রিয়া। ভ্রান্তিঃ। সন্তাপঃ। সম্মোহঃ। নিশ্বাসঃ। জ্বরঃ। প্রলাপাদিঃ। ইতি রসমঞ্জরী ॥

কলা (স্ত্রী) মূলধনবৃদ্ধিঃ। সুদ ইতি ভাষা। শিল্পাদি। অংশমাত্রং। চন্দ্রস্য ষোড়শাংশঃ। কালমানঃ। স তু ত্রিংশৎকাষ্ঠাত্মকঃ। ইতি মেদিনী ॥ স্ত্রীরজঃ। নৌকা। কপটঃ। ইতি বিশ্বঃ ॥ রাশেস্ত্রিংশস্তাগোহংশস্তস্য ষষ্টিভাগঃ। যথা। বিকলানাং কলা ষষ্ট্যা তৎষষ্ট্যা ভাগ উচ্যতে। তত্রিংশতা ভবেদ্রাশির্ভগণো দ্বাদশৈব তে ॥ ইতি সূর্য্যসিদ্ধান্তঃ ॥ অথ শৈবতন্ত্রোক্তাশ্চতুঃষষ্টিকলা লিখ্যন্তে। গীতং ১ বাদ্যং ২ নৃত্যং ৩ নাট্যং ৪ আলেখ্যং ৫ বিশেষকচ্ছেদ্যং ৬ তণ্ডুলকুসুমবলিবিকারাঃ ৭ পুষ্পাস্তরণং ৮ দশনবসনাঙ্গরাগাঃ ৯ মণিভূমিকাকর্ম্ম ১০ শয়নরচনং ১১ উদকবাদ্যং ১২ উদকঘাতঃ ১৩ চিত্রাযোগাঃ ১৪ মাল্যগ্রথনবিকল্পাঃ ১৫ শেখরাপীড়যোজনং ১৬ নেপথ্যযোগাঃ ১৭ কর্ণপত্রভঙ্গাঃ ১৮ গন্ধযুক্তিঃ ১৯ ভূষণযোজনং ২০ ঐন্দ্রজালং ২১ কৌচুমারযোগাঃ ২২ হস্তলাঘবং ২৩ চিত্রশাকপূপভক্ষ্যবিকারক্রিয়া ২৪ পানকরসরাগাসবযোজনং ২৫ সূচীবাপকর্ম্মাণি ২৬ সূত্রক্রীড়া ২৭ প্রহেলিকা ২৮ প্রতিমালা ২৯ দুর্ব্বচকযোগাঃ ৩০ পুস্তকবাচনং ৩১ নাটিকাখ্যায়িকাদর্শনং ৩২ কাব্যসমস্যাপূরণং ৩৩ পট্টিকাবেত্রবাণবিকল্পাঃ ৩৪ তর্কুকর্ম্মাণি ৩৫ তক্ষণং ৩৬ বাস্তুবিদ্যা ৩৭ রূপ্যরত্নপরীক্ষা ৩৮ ধাতুবাদঃ ৩৯ মণিরাগজ্ঞানং ৪০ আকরজ্ঞানং ৪১ বৃক্ষায়ুর্ব্বেদযোগাঃ ৪২ মেষকুক্কুটলাবকযুদ্ধবিধিঃ ৪৩ শুকসারিকাপ্রলাপনং ৪৪ উৎসাদনং ৪৫ কেশমার্জনকৌশলং ৪৬ অক্ষরমুষ্টিকা-

কথনং ৪৭ ম্লেচ্ছিতকবিকল্পাঃ ৪৮ দেশভাষাজ্ঞানং ৪৯ পুষ্পশকটিকানিমিত্তজ্ঞানং ৫০ যন্ত্রমাতৃকা ৫১ ধারণমাতৃকা ৫২ সংপাট্যং ৫৩ মানসীকাব্যক্রিয়া ৫৪ ক্রিয়াবিকল্পাঃ ৫৫ ছলিতকযোগাঃ ৫৬ অভিধানকোষচ্ছন্দোজ্ঞানং ৫৭ বস্ত্রগোপনানি ৫৮ দ্যূতবিশেষঃ ৫৯ আকর্ষক্রীড়া ৬০ বালকক্রীড়নকানি ৬১ বৈনায়িকীনাং বিদ্যানাং জ্ঞানং ৬২ বৈজয়িকীনাং বিদ্যানাং জ্ঞানং ৬৩ বৈতালিকীনাং বিদ্যানাং জ্ঞানং ৬৪। ইতি শ্রীভাগবতটীকায়াং শ্রীধরস্বামী॥ ক্বচিৎ পুস্তকে সূচীবাপকর্ম্মসূত্রক্রীড়া ইত্যেকং পদং তদুত্তরং বীণাডমরুকবাদ্যানি। বৈতালিকীনামিত্যত্র বৈয়াসিকীনামিতি চ পাঠঃ॥

কলাকূলং (ক্লী) বিষং। ইতি রাজনির্ঘণ্টঃ॥

কলাকেলিঃ (পুং) কামদেবঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কলাঙ্কুরঃ (পুং) সারসপক্ষী। কংসাস্থরঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কলাচিকা (স্ত্রী) প্রকোষ্ঠঃ। স তু কফোণেরধো মণিবন্ধপর্য্যন্তঃ। ইতি হেমচন্দ্রঃ॥

কলাচী (স্ত্রী) কলাচিকা। ইতি হারাবলী॥

কলাদঃ (পুং) স্বর্ণকারঃ। ইত্যমরঃ॥

কলানিধিঃ (পুং) চন্দ্রঃ। ইত্যমরঃ॥

কলানুনাদী [ন্] (পুং) রোলম্বঃ। ভ্রমরঃ কলবিঙ্কঃ। চটকঃ। কপিঞ্জলঃ। চাতকঃ ইতি মেদিনী॥

কলান্তরং (ক্লী) বৃদ্ধিঃ। লাভঃ। সুদ ইতি ভাষা। ইতি লীলাবতী॥

কলাপঃ (পুং) সমূহঃ। ময়ূরপিচ্ছঃ। কাঞ্চী। ভূষণং। তূণঃ। চন্দ্রঃ। বিদগ্ধঃ। ব্যাকরণবিশেষঃ। ইতি মেদিনী॥ গ্রামবিশেষঃ। যথা। দেবাপির্যোগমাস্থায় কলাপগ্রামমাশ্রিতঃ। সোমবংশে কলৌ নষ্টে কৃতাদৌ স্থাপয়িষ্যতি॥ ইতি শ্রীভাগবতং॥

কলাপকঃ (পুং) হস্তিকণ্ঠবন্ধঃ। ইতি হেমচন্দ্রঃ॥

কলাপিনী (স্ত্রী) রাত্রিঃ। নাগরমুস্তা। ইতি রাজনির্ঘণ্টঃ॥

কলাপী [ন্] (পুং) প্লক্ষবৃক্ষঃ। ময়ূরঃ। ইতি মেদিনী॥ কোকিলঃ। ইতি ধরণী॥

কলাপূর্ণঃ (পুং) চন্দ্রঃ। ইতি শব্দচন্দ্রিকা॥

কলাভৃৎ (পুং) চন্দ্রঃ। ইতি হেমচন্দ্রঃ॥

কলামকঃ (পুং) কলমধান্যং। ইতি হেমচন্দ্রঃ॥

কলাম্বিকা (স্ত্রী) অর্থানাং প্রয়োগঃ। ঋণদানং। ধার দেওয়া ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ॥

কলায়ঃ (পুং) শমীধান্যবিশেষঃ। মটর বাঁটুলা ইতি ভাষা। তৎপর্য্যায়ঃ। সতীলকঃ হরেণুঃ ৩ খণ্ডিকঃ ৪। ইত্যমরঃ॥ ত্রিপুটঃ ৫ অতিবর্ত্তুলঃ ৬। ইতি রত্নমালা॥ মুণ্ডচণকঃ ৭ শমনঃ ৮ নীলকঃ ৯ কণ্টী ১০ সতীলঃ ১১ হরেণুকঃ ১২ সতীনঃ ১৩ সতীনকঃ ১৪। অস্য গুণাঃ। বাতরুচিপুষ্ট্যামদোষকারিত্বং। পিত্তদাহকফনাশিত্বং। শীতত্বং। কষায়ত্বঞ্চ। অস্য

শাকগুণাঃ। মধুরত্বং। পিত্তশ্লেষ্মহরত্বং। গুরুত্বং। কষায়ানুরসত্বং। রুক্ষত্বং। মলভেদিত্বং। বায়ুকোপনত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

কলায়নঃ (পুং) নর্ত্তকঃ। ইতি শব্দরত্নাবলী॥

কলায়া (স্ত্রী) গণ্ডদূর্ব্বা। ইতি রাজনির্ঘণ্টঃ॥

কলালাপঃ (পুং) ভ্রমরঃ। ইতি রাজনির্ঘণ্টঃ॥

কলাবতী (স্ত্রী) তুম্বুরুগন্ধর্ব্বস্য বীণা। ইতি হেমচন্দ্রঃ॥ শ্রীরাধামাতা। সা তু বৃষভানুপত্নী। ইতি ব্রহ্মবৈবর্ত্তপুরাণং॥ অপ্সরো বিশেষঃ। যথা রতিস্তব কলাবতীতি শ্লিষ্টকাব্যে জয়দেবঃ। দীক্ষাবিশেষঃ। তস্যাঃ ক্রমো মন্ত্রং বিনা লিখ্যতে। শিষ্যঃ পূর্ব্বমুপোষিতঃ কৃতনিত্যক্রিয়ঃ স্বস্তিবাচনপূর্ব্বকং সঙ্কল্পং কুর্য্যাৎ। ততো গুরুং বৃণুয়াৎ। অথ গুরুরাচম্য দ্বারদেশে সামান্যার্ঘ্যং কুর্য্যাৎ। তদর্ঘ্যজলেন দ্বারমভ্যুক্ষ্য দ্বারপূজাং কুর্য্যাৎ। ততো দক্ষিণপাদপুরঃসরং দ্বারবামশাখাং স্পৃশন্ দক্ষিণাঙ্গং সঙ্কোচয়ন্ মণ্ডপান্তঃ প্রবিশ্য নৈঋর্ত্যাং বাস্তুপুরুষং ব্রহ্মাণঞ্চ সংপূজ্য দেয়মন্ত্রেণ দিব্যদৃষ্ট্যাবলোকনেন দিব্যান্ বিঘ্নানুৎসার্য্য অস্ত্রমন্ত্রেণ জলেনান্তরীক্ষগান্ বিঘ্নানুৎসার্য্য বামপার্ষ্ণিঘাতত্রয়েণ ভৌমান্ বিঘ্নানুৎসার্য্য সপ্তধাস্ত্রমন্ত্রাভিমন্ত্রিতবিকিরানাদায় ভূতনিবারণার্থমন্ত্রেণ তান্ বিকিরেৎ। তত আসনশুদ্ধিং কৃত্বা মন্ত্রেণ স্বস্তিকাদিক্রমেণোপবিশেৎ। উপবিশ্য বা বিঘ্নানুৎসারয়েৎ। ততঃ পঞ্চগব্যেন মূলেন মণ্ডপং শোধয়েৎ। ততঃ স্বদক্ষিণে পূজাদ্রব্যাণি বামে সুবাসিতাম্বুপূর্ণকুম্ভং হস্তপ্রক্ষালনার্থং পাত্রমেকং পৃষ্ঠদেশে স্থাপয়েৎ। সর্ব্বদিক্ষু ঘৃতপ্রদীপাংশ্চ স্থাপয়িত্বা। পুটাঞ্জলির্ভূত্বা বামে গুরুপরমগুরুপরাপরগুরূন্ প্রণম্য দক্ষিণে গণেশং মধ্যে স্বেষ্টদেবতাঞ্চ প্রণম্য অস্ত্রমন্ত্রেণ গন্ধপুষ্পাভ্যাং করৌ সংশোধ্য ঊর্দ্ধোর্দ্ধতালত্রয়ং দত্ত্বা ছোটিকাভির্দশদিগ্বন্ধনং কৃত্বা বহ্নিবীজেন জলধারয়া বহ্নিপ্রাকারং বিচিন্ত্য ভূতশুদ্ধিং কুর্য্যাৎ। ততো মাতৃকান্যাসঃ প্রাণায়ামঃ পীঠন্যাসঃ ঋষ্যাদিন্যাসঃ মন্ত্রন্যাসঃ। ততো মুদ্রাং প্রদর্শ্য ধ্যানং মানসপূজাং অর্ঘ্যস্থাপনঞ্চ কুর্য্যাৎ। ততোঽর্ঘ্যপাত্রাৎ কিঞ্চিৎ জলং প্রোক্ষণীপাত্রে নিক্ষিপ্য তেনোদকেনাত্মানং পূজোপকরণঞ্চ মূলেন ত্রিরভ্যুক্ষ্য পীঠমন্ত্রেণ শরীরে ধর্ম্মাদীন্ পূজয়েৎ। ততো হৃৎপদ্মস্য পূর্ব্বাদিকেশরেষু পীঠশক্তীঃ সংপূজ্য মধ্যে পীঠমনুং যজেৎ। তত্র হৃদয়ে মূলদেবতাং নৈবেদ্যং বিনা গন্ধাদ্যৈঃ পূজয়েৎ। তত উত্তমাঙ্গহৃদয়মূলাধারপাদসর্ব্বাঙ্গেযু মূলেন পঞ্চপুষ্পাঞ্জলীন্ দত্ত্বা যথাশক্তি মন্ত্রং জপ্ত্বা জপং সমর্পয়েৎ। সর্ব্বমেতৎ প্রোক্ষণীপাত্রস্থবারিণা বিদধ্যাৎ। ততঃ প্রোক্ষণ্যাস্তোয়ং বিসৃজ্য পূর্ব্ববদাপূর্য্য বহিঃপূজামারভেৎ। তত্র শারদোক্তসর্ব্বতোভদ্রমণ্ডলাদ্যন্যতমমণ্ডলং বিধায় তত্র ঘটং সংস্থাপ্য মণ্ডলং সংপূজ্য শালিভিঃ কর্ণিকামাপূর্য্য তদুপরি

তণ্ডুলানাস্তীর্য্য তেষু দর্ভানাস্তীর্য্য বিষ্টরং চাক্ষতসংযুক্তং তদুপরি ন্যসেৎ। ততো মণ্ডলে পীঠোক্তদেবতাঃ পূজয়েৎ। ততো মণ্ডলে প্রাদক্ষিণ্যেন বহ্নের্দশকলা বিন্যস্য পূজয়েৎ। ততো হেমাদিরচিতং কুম্ভং অস্ত্রমন্ত্রেণ প্রক্ষাল্য চন্দনাগুরুকর্পূরৈ- র্ধূপয়িত্বা ত্রিগুণতন্তুনা সংবেষ্ট্য কুম্ভং সংপূজ্য তত্র বিষ্টরাক্ষতং নবরত্নানি চ প্রক্ষিপ্য প্রণবমুচ্চরন্ কুম্ভপীঠয়োরৈক্যং বিভাব্য পীঠে স্থাপয়েৎ। কুম্ভে প্রাদ- ক্ষিণ্যেন সূর্য্যস্য দ্বাদশকলা বিন্যস্য সং- পূজয়েৎ। ততঃ ক্ষীরিদ্রুমকষায়েণ পলাশ- ত্বগ্‌ভবেন বা তীর্থজলৈর্ব্বা সুবাসিত- জলৈর্ব্বা আত্মাভেদেন মাতৃকাং মন্ত্রঞ্চ প্রতিলোমতো জপন্ পূরয়েৎ কুম্ভং দেবতাধিয়া। ততশ্চন্দ্রস্যামৃতাদিষোড়শ- কলা জলে প্রাদক্ষিণ্যেন বিচিন্ত্য মন্ত্রেণ সংপূজ্য শঙ্খান্তরং ক্ষীরিদ্রুমকষায়াদি- দ্রব্যেণাপূর্য্য গন্ধাষ্টকং বিলোড্য তস্মিন্ জলে সকলাঃ কলা আবাহ্য পূজয়েৎ। তত্রাদৌ বহ্নের্দশকলাঃ পূজয়েৎ। ততো মূলমন্ত্রং প্রতিলোমেন জপন্ মন্ত্রস্য দেবতাং মনসা ধ্যায়ন্ আসাং প্রাণ- প্রতিষ্ঠাং কৃত্বা গন্ধাদিভিঃ পূজয়েৎ। ততঃ প্রত্যেকেন পূজয়েৎ। ততঃ সূর্য্যস্য তপিন্যাদিদ্বাদশকলাঃ আবাহনাদিকং কৃত্বা সংপূজ্য প্রত্যেকং পূজয়েৎ। ততশ্চন্দ্রস্যা- মৃতাদিষোড়শকলাঃ প্রাণপ্রতিষ্ঠাদিকং কৃত্বা সংপূজ্য প্রত্যেকেন পূজয়েৎ। ততঃ পঞ্চাশৎকলাঃ পূজয়েৎ। যথা সৃষ্ট্যাদি- কচবর্গদশকলাঃ প্রাণপ্রতিষ্ঠাদিকং কৃত্বা পূর্ব্ববৎ সংপূজ্য প্রত্যেকেন পূজয়েৎ। ততো জরাদিটতবর্গদশকলাঃ প্রাণপ্রতিষ্ঠা- দিকং কৃত্বা সংপূজ্য প্রত্যেকেন পূজয়েৎ। ততস্তীক্ষ্ণাদিপযবর্গদশকলাঃ প্রাণপ্রতিষ্ঠা- দিকং কৃত্বা সংপূজ্য প্রত্যেকেন পূজয়েৎ। ততঃ পীতাদিযবর্গপঞ্চকলাঃ প্রাণপ্রতিষ্ঠা- দিকং কৃত্বা সংপূজ্য প্রত্যেকেন পূজ- য়েৎ। ততো নিবৃত্ত্যাদিঅবর্গষোড়শকলাঃ প্রাণপ্রতিষ্ঠাদিকং কৃত্বা পূজয়েৎ। শক্ত- শ্চেৎ প্রত্যেকমাবাহ্য পাদ্যাদিভিঃ পূজ- য়েৎ। ততঃ কলাত্মকং তৎ শঙ্খস্থং ক্বাথং কুম্ভে নিঃক্ষিপেৎ। ততোঽশ্বত্থপনসচূত- পল্লবৈরিন্দ্রবল্লীবেষ্টিতৈঃ কল্পবৃক্ষবুদ্ধ্যা কুম্ভবক্ত্রং পিধায় তস্মিন্ বক্ত্রে সফলা- ক্ষতং চষকং কল্পবৃক্ষফলবুদ্ধ্যা স্থাপয়েৎ। ততঃ কুম্ভং নির্ম্মলেন ক্ষৌমযুগ্মেন সংবেষ্ট্য মূলেন কুম্ভে মূর্ত্তিং সঙ্কল্প্য যথোক্তরূপেণ দেবতাং ধ্যাত্বা তস্যামাবাহনাদিকং কৃত্বা পূজয়েৎ। দেবতাঙ্গে অঙ্গন্যাসং কৃত্বা ধেনুমুদ্রাপরমীকরণমুদ্রে প্রদর্শ্য প্রাণ- প্রতিষ্ঠাং কৃত্বা ষোড়শোপচারাদিভিঃ পূজ- য়েৎ। ততোঽষ্টোত্তরং সহস্রং শতং বা সংজপ্য জপং সমর্পয়েৎ। ততো মন্ত্রস্য দশসংস্কারান্ কৃত্বা গুরুঃ শিষ্যমানীয় মন্ত্রেণ শিষ্যনেত্রং বস্ত্রেণাচ্ছাদ্য শিষ্যা- ঞ্জলিং পুষ্পৈঃ পূরয়িত্বা গুরুঃ স্বয়মেব মন্ত্রং জপন্ কলসে দেবতাপ্রীত্যৈ ক্ষিপেৎ। ততো নেত্রবন্ধনং দূরীকৃত্য দর্ভাস্তরে আসীনং শিষ্যং স্বকৃতপূজা-

ক্রমাদ্ভূতশুদ্ধ্যাদিকং বিধায় তত্তন্মন্ত্রোক্তন্যাসান্ শিষ্যস্য দেহে কুর্য্যাৎ। কুম্ভস্থাং দেবতাং পুনঃ পঞ্চোপচারৈঃ সংপূজ্যালঙ্কৃতং শিষ্যমন্যস্মিন্নুপবেশয়েৎ। ততো মঙ্গলাচারপূর্ব্বকং তৎকুম্ভং সমুদ্ধৃত্য তন্মুখস্থান্ সুরদ্রুমরূপান্ পল্লবান্ শিষ্যশিরসি নিধায় মাতৃকাং মনসা জপন্ মূলেন সাধিতৈস্তোয়ৈর্বশিষ্ঠসংহিতোক্তাভিষেকমন্ত্রৈস্তমভিষিঞ্চেৎ। শিষ্যোঽবশিষ্টজলেনাচম্য বাসসী পরিধায় গুরোঃ সন্নিধাবুপবিশেৎ ! ততস্তামেব গুরুরাত্মনো দেবতাং শিষ্যসংক্রান্তাং তয়োরৈক্যং বিভাব্য গন্ধাদিভিঃ পূজয়েৎ। ততো মন্ত্রেণ শিষ্যস্য শিখাং বদ্ধা সংরক্ষ্য শিষ্যশরীরে কলান্যাসং কুর্য্যাৎ। ততঃ শিষ্যশিরসি হস্তং দত্ত্বা অষ্টোত্তরশতং জপ্ত্বা অমুকমন্ত্রং তেঽহং দদামীতি শিষ্যহস্তে জলং দদ্যাৎ। দদস্বেতি শিষ্যো ব্রূয়াৎ। তত ঋষ্যাদিযুক্তং মন্ত্রং গুরুর্দ্বিজাতীনাং দক্ষিণকর্ণে ত্রিঃ শ্রাবয়েৎ বামে সকৃৎ। স্ত্রীশূদ্রাণাং বামকর্ণে ত্রিঃ শ্রাবয়েৎ দক্ষিণে সকৃৎ। ততঃ শিষ্যো গুরুচরণে পতিত এব তিষ্ঠেৎ। ততো গুরুর্ম্মন্ত্রেণ তমুত্থাপয়েৎ। ততঃ শিষ্যো লব্ধমন্ত্রং অষ্টোত্তরশতং জপেৎ। ততঃ শিষ্যঃ কুশতিলজলান্যাদায় গুরবে দক্ষিণাং সুবর্ণং কাঞ্চনং বা দদ্যাৎ। দীক্ষাগ্রহণসামগ্রীশ্চ নিবেদয়েৎ। অন্যাংশ্চ ব্রাহ্মণান্ পরিতোষয়েৎ। গুরুঃ স্বশক্তিরক্ষণার্থায় অষ্টাধিকং সহস্রং শতং বা মন্ত্রং জপেৎ। ততঃ শিষ্যো মিষ্টান্নপানাদিনা ব্রাহ্মণান্ পরিতোষ্য স্বয়ং ভুঞ্জীত। দীক্ষাদিবসে গুরুশিষ্যয়োরুপবাসে দোষঃ। ইতি তন্ত্রসারোক্তা কলাবতীদীক্ষা সমাপ্তা ॥

কলাবিকঃ (পুং) কুক্কুটঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

কলাবিকলঃ (পুং) চটকঃ। ইতি শব্দরত্নাবলী ॥

কলাহকঃ (পুং) কাহলবাদ্যং। ইতি শব্দরত্নাবলী ॥

কলিঃ (পুং) বিভীতকবৃক্ষঃ। শূরঃ। বিবাদঃ। যুদ্ধং। অন্ত্যযুগং। ইতি হেমচন্দ্রঃ ॥ তস্যোৎপত্তির্যথা। প্রলয়ান্তে জগৎস্রষ্টা ব্রহ্মা লোকপিতামহঃ। সসর্জ্জ ঘোরং মলিনং পৃষ্ঠদেশাৎ সপাতকং ॥ সচাধর্ম্ম ইতি খ্যাতস্তস্য বংশানুকীর্ত্তনাৎ। শ্রবণাৎ স্মরণাল্লোকঃ সর্ব্বপাপৈঃ প্রমুচ্যতে ॥ অধর্ম্মস্য প্রিয়া রম্যা মিথ্যা মার্জ্জারলোচনা। তস্যাঃ পুত্রোঽতিতেজস্বী দম্ভঃ পরমকোপনঃ ॥ স মায়ায়াং ভগিন্যান্তু লোভং পুত্রঞ্চ কন্যকাং। নিকৃতিং জনয়ামাস তয়োঃ ক্রোধঃ সুতোঽভবৎ ॥ স হিংসায়াং ভগিন্যান্তু জনয়ামাস তং কলিং। বামহস্তধৃতোপস্থং তৈলভ্যক্তাঞ্জনপ্রভং ॥ কাকোদরং করালাস্যং লোলজিহ্বং ভয়ানকং। পূতিগন্ধং দ্যূতমদ্যস্ত্রীসুবর্ণকৃতাশ্রয়ং ॥ ভগিন্যান্তু দুরুক্ত্যাং স ভয়ং পুত্রঞ্চ কন্যকাং। মৃত্যুং সংজনয়ামাস তয়োশ্চ নিরয়োঽভবৎ ॥ যাতনায়াং ভগিন্যান্তু লোভপুত্রায়ুতাযুতং।

ইত্থং কলিকুলে জাতা বহবো ধর্ম্মনিন্দকাঃ॥ ইতি কল্কিপুরাণে ১ অধ্যায়ঃ ॥ * ॥ কলিধর্ম্মো যথা। যদা সদানৃতং তন্দ্রী নিদ্রা হিংসা বিষাদনং। শোকমোহভয়ং দৈন্যং স কলিস্তু তদা স্মৃতঃ ॥ যস্মিন্ জনাঃ কামিনঃ স্যুঃ শশ্বৎকটুকভাষিণঃ। দস্যুকৃষ্টা জনপদা বেদাঃ পাষণ্ডদূষিতাঃ॥ রাজানশ্চ প্রজাভক্ষ্যাঃ শিশ্নোদরপরা দ্বিজাঃ। অব্রতা বটবোঽশৌচা ভিক্ষবশ্চ কুটুম্বিনঃ॥ তপস্বিনো গ্রামবাসা ন্যাসিনো হ্যর্থলোলুপাঃ। হ্রস্বকায়া মহাহারাশ্চৌর্য্যমায়োরুসাহসাঃ ॥ ত্যক্ষ্যন্তি ভৃত্যাশ্চ পতিং তাপসাস্ত্বখিলং ব্রতং। শূদ্রাঃ প্রতিগ্রহীষ্যন্তি তপোবেশোপজীবিনঃ ॥ উদ্বিগ্নাশ্চানলঙ্কারাঃ পিশাচসদৃশাঃ প্রজাঃ। অস্নাতভোজনেনাগ্নিদেবতাতিথিপূজনং ॥ করিষ্যন্তি কলৌ প্রাপ্তে ন চ পিণ্ডোদকক্রিয়াং। স্ত্রীপরাশ্চ জনাঃ সর্ব্বে শূদ্রপ্রায়াশ্চ শৌনক॥ বহুপ্রজাল্পভাগ্যাশ্চ ভবিষ্যন্তি কলৌ স্ত্রিয়ঃ। শিরঃকণ্ডূয়নপরা আজ্ঞাং ভেৎস্যন্তি সৎপতেঃ॥ বিষ্ণুং ন পূজয়িষ্যন্তি পাষণ্ডোপহতা জনাঃ। কলের্দ্দোষনিধের্ব্বিপ্র অস্তি হ্যেকো মহান্ গুণঃ॥ কীর্ত্তনাদেব কৃষ্ণস্য মুক্তবন্ধঃ পরং ব্রজেৎ। কৃতে যদ্ধ্যায়তো বিষ্ণুং ত্রেতায়াং যজতঃ ফলং॥ দ্বাপরে পরিচর্য্যায়াং কলৌ তদ্ধরিকীর্ত্তনাৎ। তস্মাদ্ধ্যেয়ো হরির্নিত্যং ধ্যেয়ঃ পূজ্যশ্চ শৌনক॥ ইতি গারুড়ে যুগধর্ম্মে ২২৭ অধ্যায়ঃ॥ তদ্‌যুগমানং। দ্বাত্রিংশৎসহস্রাধিকচতুর্লক্ষবৎসরাণি। তস্য গতাব্দাঃ ১৭৪০ শাকপর্য্যন্তং ৪৯১৯। তত্র ধর্ম্ম একপাদঃ। অধর্ম্মশ্চতুষ্পাদঃ। আয়ুঃ শতবর্ষাণি। অবতারঃ শ্রীকৃষ্ণঃ। তদ্‌যুগশেষে পাপিনাং বিনাশায় ভগবদ্দশমাবতারঃ কল্কির্ভবিষ্যতি। তদ্‌যুগধর্ম্মো যথা। কলৌ তু ধর্ম্মপাদানাং তুর্য্যাংশোঽধর্ম্মহেতুভিঃ। এধমানৈঃ ক্ষীয়মাণো হ্যন্তে সোঽপি বিনঙ্ক্ষ্যতি ॥ তস্মিন্ লুব্ধা দুরাচারা নির্দয়াঃ শুষ্কবৈরিণঃ। দুর্ভগা ভূরিতর্ষাশ্চ শূদ্রদাসোত্তরাঃ প্রজাঃ॥ যদা মায়ানৃতং তন্দ্রা নিদ্রা হিংসা বিষাদনং। শোকমোহৌ ভয়ং দৈন্যং স কলিস্তামসঃ স্মৃতঃ॥ যস্মাৎ ক্ষুদ্রদৃশো মর্ত্যাঃ ক্ষুদ্রভাগ্যা মহাশনাঃ। কামিনো বিত্তহীনাশ্চ স্বৈরিণ্যশ্চ স্ত্রিয়োঽসতীঃ ॥ দস্যুৎকৃষ্টা জনপদা বেদাঃ পাষণ্ডদূষিতাঃ। রাজানশ্চ প্রজাভক্ষ্যাঃ শিশ্নোদরপরা দ্বিজাঃ ॥ অব্রতা বটবোঽশৌচা ভিক্ষবশ্চ কুটুম্বিনঃ। তপস্বিনো গ্রামবাসা ন্যাসিনোঽত্যর্থলোলুপাঃ॥ হ্রস্বকায়া মহাহারা বহ্বপত্যা গতহ্রিয়ঃ। শশ্বৎকটুকভাষিণ্যশ্চৌর্য্যমায়োরুসাহসাঃ ॥ পণয়িষ্যন্তি বৈ ক্ষুদ্রাঃ কিরাটাঃ কূটকারিণঃ। অনাপদ্যপি মংস্যন্তে বার্ত্তাং সাধুজুগুপ্সিতাং॥ পতিং ত্যক্ষ্যন্তি নির্দ্রব্যং ভৃত্যা অপ্যখিলোত্তমং। ভৃত্যং বিপন্নং পতয়ঃ কৌলং গাশ্চাপয়স্বিনীঃ॥ পিতৄন্ ভ্রাতৄন্ সুহৃজ্জ্ঞাতীন্ হিত্বা সৌরতসৌহৃদাঃ। ননান্দৃশ্যালসম্বাদা দীনাঃ স্ত্রৈণাঃ কলৌ নরাঃ॥ শূদ্রাঃ প্রতিগ্রহীষ্যন্তি তপোবেশোপজীবিনঃ। ধর্ম্মং

বক্ষ্যন্ত্যধর্ম্মজ্ঞা অধিরুহ্যোত্তমাসনং॥ নিত্য-মুদ্বিগ্নমনসো দুর্ভিক্ষকরকর্ষিতাঃ। নিরন্নে ভূতলে রাজন্নানাবৃষ্টিভয়াতুরাঃ॥ বাসোঽন্নপানশয়নব্যবায়স্নানভূষণৈঃ। হীনাঃ পিশাচসন্দর্শা ভবিষ্যন্তি কলৌ প্রজাঃ॥ কলৌ কাকিণিকেঽপ্যর্থে বিগৃহ্য ত্যক্ত-সৌহৃদাঃ। ত্যক্ষ্যন্তি হি প্রিয়ান্ প্রাণান্ হনিষ্যন্তি স্বকানপি॥ ন রক্ষিষ্যন্তি মনুজাঃ স্থবিরৌ পিতরাবপি। পুত্রান্ ভার্য্যাঞ্চ কুলজাং ক্ষুদ্রাঃ শিশ্নোদরম্ভরাঃ॥ কলৌ ন রাজন্ জগতাং পরং গুরুং ত্রিলোকনাথানতপাদপঙ্কজং। প্রায়েণ মর্ত্ত্যা ভগবন্তমচ্যুতং যক্ষ্যন্তি পাষণ্ড-বিভিন্নচেতসঃ॥ * ॥ কলিকৃতদোষ-বিনাশোপায়ঃ। যথা। যন্নামধেয়ং ম্রিয়-মাণ আতুরঃ পতন্ স্খলন্ বা বিবশো গৃণন্ পুমান্। বিমুক্তকর্ম্মার্গল উত্তমাং গতিং প্রাপ্নোতি যক্ষ্যন্তি ন তং কলৌ জনাঃ॥ পুংসাং কলিকৃতান্ দোষান্ দ্রব্যদেশাত্মসম্ভবান্। সর্ব্বান্ হরতি চিত্তস্থো ভগবান্ পুরুষোত্তমঃ॥ শ্রুতঃ সংকীর্ত্তিতো ধ্যাতঃ পূজিতস্বাদৃতোঽপি বা। নৃণাং ক্ষিণোতি ভগবান্ হৃৎস্থো জন্মাযুতাশুভং॥ যথা হেম্নি স্থিতো বহ্নি-র্দুর্ব্বর্ণং হন্তি ধাতুজং। এবমাত্মগতো বিষ্ণুর্যোগিনামশুভাশয়ং॥ বিদ্যাতপঃপ্রাণ-নিরোধমৈত্রীতীর্থাভিষেকব্রতদানজপ্যৈঃ। নাত্যন্তশুদ্ধিং লভতেঽন্তরাত্মা যথা হৃদি-স্থে ভগবত্যনন্তে॥ তস্মাৎ সর্ব্বাত্মনা রাজন্ হৃদিস্থং কুরু কেশবং। ম্রিয়-মাণো হ্যবহিতস্ততো যাহি পরাং গতিং॥ কলের্দোষনিধে রাজন্নস্তি হ্যেকো মহান্ গুণঃ। কীর্ত্তনাদেব কৃষ্ণস্য মুক্তসঙ্গঃ পরং ব্রজেৎ॥ কৃতে যদ্ধ্যায়তো বিষ্ণুং ত্রেতায়াং যজতো মখৈঃ। দ্বাপরে পরি-চর্য্যায়াং কলৌ তদ্ধরিকীর্ত্তনাৎ॥ * ॥ তদ্যুগশেষধর্ম্মাঃ। সৌরাষ্ট্রাবন্ত্যাভীরাশ্চ শূরা অর্ব্বুদমালবাঃ। ব্রাত্যা দ্বিজা ভবি-ষ্যন্তি শূদ্রপ্রায়া জনাধিপাঃ॥ সিন্ধোস্তটং চন্দ্রভাগাং কান্তীং কাশ্মীরমণ্ডলং। ভোক্ষ্যন্তি শূদ্রা ব্রাত্যাদ্যা ম্লেচ্ছা অব্রহ্ম-বর্চ্চসঃ॥ তুল্যকালা ইমে রাজন্ ম্লেচ্ছ-প্রায়াশ্চ ভূভৃতঃ। এতেঽধর্ম্মানৃতপরাঃ ফল্গুদাস্তীব্রমন্যবঃ॥ স্ত্রীবালগোদ্বিজঘ্নাশ্চ পরদারধনাদৃতাঃ। উদিতাস্তমিতপ্রায়া অল্পসত্ত্বাল্পকায়ুষঃ॥ অসংস্কৃতাঃ ক্রিয়াহীনা রজসা তমসা বৃতাঃ। প্রজাস্তে ভক্ষয়ি-ষ্যন্তি ম্লেচ্ছা রাজন্যরূপিণঃ॥ তন্নাথাস্তে জনপদাস্তচ্ছীলাচারবাদিনঃ। অন্যোন্যতো রাজভিশ্চ ক্ষয়ং যাস্যন্তি পীড়িতাঃ॥ ততশ্চানুদিনং ধর্ম্মঃ সত্যং শৌচং ক্ষমা দয়া। কালেন বলিনা রাজন্ নংক্ষ্যত্যায়ু-র্ব্বলং স্মৃতিঃ॥ বিত্তমেব কলৌ নৃণাং জন্মাচারগুণোদয়ঃ। ধর্ম্মন্যায়ব্যবস্থায়াং কারণং বলমেব হি॥ দাম্পত্যেঽভিরুচি-র্হেতুর্মায়ৈব ব্যাবহারিকে। স্ত্রীত্বে পুংস্ত্বে চ হি রতির্বিপ্রত্বে সূত্রমেব হি॥ লিঙ্গমেবাশ্রমাখ্যাতাবন্যোন্যাপত্তিকারণং। অবৃত্ত্যা ন্যায়দৌর্ব্বল্যং পাণ্ডিত্যে চাপলং বচঃ॥ অনাঢ্যতৈবাসাধুত্বে সাধুত্বে দম্ভ

এব হি। স্বীকার এব চোদ্বাহে স্নানমেব প্রসাধনং ॥ দূরে বার্য্যয়নং তীর্থং লাবণ্যে কেশধারণং। উদরম্ভরতাস্বার্থঃ সত্যত্বে ধার্ষ্ট্যমেব হি ॥ দাক্ষ্যে কুটুম্বভরণং যশোহর্থে ধর্ম্মসেবনং। এবং প্রজাভির্দুষ্টাভিরাকীর্ণে ক্ষিতিমণ্ডলে ॥ ব্রহ্মবিট্‌ক্ষত্রশূদ্রাণাং যো বলী ভবিতা নৃপঃ। প্রজা হি লুব্ধৈ রাজন্যৈর্নির্ঘৃণৈর্দস্যুধর্ম্মভিঃ॥ আচ্ছিন্নদারদ্রবিণা যাস্যন্তি গিরিকাননং। শাকমূলামিষক্ষৌদ্রফলপুষ্পাষ্টিভোজনাঃ ॥ অনাবৃষ্ট্যা বিনঙ্ক্ষ্যন্তি দুর্ভিক্ষকরপীড়িতাঃ। শীতবাতাতপপ্রাবৃড়্‌হিমৈরন্যোঽন্যতঃ প্রজাঃ ॥ ক্ষুৎতৃড়্‌ভ্যাং ব্যাধিভিশ্চৈব সন্তপ্স্যন্তে চ চিন্তয়া। ত্রিংশদ্বিংশতিবর্ষাণি পরমায়ুঃ কলৌ নৃণাং ॥ ক্ষীয়মাণেষু দেহেষু দেহিনাং কলিদোষতঃ। বর্ণাশ্রমবতাং ধর্ম্মে নষ্টে বেদপথে নৃণাং ॥ পাষণ্ডপ্রচুরে ধর্ম্মে দস্যুপ্রায়েষু রাজসু। চৌর্য্যানৃতবৃথাহিংসানানাবৃত্তিষু বৈ নৃষু ॥ শূদ্রপ্রায়েষু বর্ণেষু ছাগপ্রায়াসু ধেনুষু। গৃহপ্রায়েষ্বাশ্রমেষু যৌনপ্রায়েষু বন্ধুষু ॥ অনুপ্রায়াস্বোষধীষু শমীপ্রায়েষু স্থাম্নুষু। বিদ্যুৎপ্রায়েষু মেঘেষু শূন্যপ্রায়েষু সদ্মসু ॥ ইত্থং কলৌ গতপ্রায়ে জনেষু খরধর্ম্মিষু। ধর্ম্মত্রাণায় সত্বেন ভগবান্ বতরিষ্যতি ॥ ইতি শ্রীভাগবতং ॥

কলিঃ (স্ত্রী) কলিকা। ইতি মেদিনী ॥

কলিকঃ (পুং) ক্রৌঞ্চপক্ষী। ইতি শব্দরত্নাবলী ॥

কলিকা (স্ত্রী) অস্ফুটিতপুষ্পং। তৎপর্য্যায়ঃ। কোরকঃ ২। ইত্যমরঃ॥ কলিঃ ৩ কলী ৪। কোরকং ৫। ইতি তট্টীকা ॥ বীণামূলং। ইতি হেমচন্দ্রঃ ॥ পদসন্ততিযুক্তরচনাবিশেষঃ। তদ্বিবরণং যথা। স্যুর্ম্মহাকলিকারম্ভে শ্লোকাস্তু যুগশঃ স্মৃতাঃ। অন্যাসাং কলিকানাস্তু ভবন্ত্যেকৈকশো হি তে ॥ পূর্ব্বৌ দ্বৌ কলিকাভিস্তু বিরুদাস্তুল্যসংখ্যকাঃ ॥ * ॥ কলিকালক্ষণং। কলা নাম ভবেত্তালনিয়তা পদসন্ততিঃ। কলাভিঃ কলিকা প্রোক্তা তদ্ভেদাঃ ষট্ সমীরিতাঃ॥ কলিকা চণ্ডবৃত্তাখ্যা দ্বিগাদিগণবৃত্তকা। তথা ত্রিভঙ্গী বৃত্তাখ্যা মধ্যা মিশ্রা চ কেবলেতি ॥ চণ্ডবৃত্তে দশধা সংযুক্তবর্ণাঃ। অত্র সংযুক্তবর্ণানাং নিয়মো দশধা চ তে। মধুরং শ্লিষ্টবিশ্লিষ্টশিথিলহ্রাদিনস্ত্বমী ॥ ভিদ্যন্তে হ্রস্বদীর্ঘাভ্যাং তে দর্শ্যন্তে স্ফুটং যথা। হ্রস্বান্মধুরসংযোগাঃ শঙ্করাঙ্কুশকিঙ্করাঃ ॥ তস্মাত্তু শ্লিষ্টসংযুক্তা দর্পকর্পরসর্পবৎ। ততো বিশ্লিষ্টসংযুক্তা ভল্লকল্যাণচিল্লয়ঃ ॥ তথা শিথিলসংযুক্তাঃ পশ্য কশ্যপ বশ্যবৎ। প্রোক্তা হ্রাদিযুতা মহ্যং সহ্যং গুহ্যং প্রসহ্যবৎ ॥ গর্হাদীন্ হ্রাদিসংযুক্তভেদান্ কেচিৎ সমূচিরে। দীর্ঘাত্তুঙ্গাঙ্গকার্পাসং বাল্যং বৈশ্যশ্চ বাহ্যকমিতি ॥ কলাপরিমাণমুক্তং। অধিকাশ্চেচ্চতুঃষষ্টির্ন্যূনা দ্বাদশ তাঃ কলাঃ। এতাভ্যো নাধিকাঃ কার্য্যা ন্যূনাশ্চাপি ন পণ্ডিতৈরিতি ॥ তত্র তাবচ্চণ্ডবৃত্তকলিকা দ্বিবিধা। নখো বিশিখশ্চেতি ভেদাৎ। তত্র নগাদিবিংশতিভেদস্য

নখস্মেহ বর্দ্ধিতাদয়ো নববেদা গৃহীতাঃ। বর্দ্ধিতং বীরভদ্রশ্চ সমগ্রোঽচ্যুত উৎপলং। তুরঙ্গঃ শ্রীগুণরতিস্তথা মাতঙ্গখেলিতং॥ তিলকশ্চেতি কলিকা নখস্মেহোদিতা নব ইত্যুক্তেঃ॥ *॥ অথ বিশিখঃ। পদ্মকুন্দচম্পকবঞ্জুলবকুলভেদাৎ পঞ্চবিধঃ। তেষ্বাদিমং পদ্মং পঙ্কেরুহসিতকঞ্জপাণ্ডুৎপলেন্দীবরারুণাম্ভোরুহকহ্লারভেদাৎ ষড়্বিধং। অন্তিমং বকুলস্তু ভাস্বরমঙ্গলভেদাৎ দ্বিবিধমিত্যেকাদশভেদো বিশিখঃ। পঙ্কেরুহং সিতকঞ্জং তথা পাণ্ডুৎপলং পরং। ইন্দীবরারুণাম্ভোজে কহ্লারঞ্চেতি ষড়্বিধং॥ ঈষদ্ভেদেন কথিতং পদ্মমেব মনীষিভিঃ। চম্পকং বঞ্জুলং কুন্দং বকুলং দ্বিবিধং তথা॥ ইতি পঞ্চবিধস্যাপি বিশিখস্যেশসংখ্যকা ইত্যুক্তেঃ। এবং চণ্ডবৃত্তকলিকা বিংশতিধা গৃহীতাঃ॥ *॥ অথ পঞ্চধা দ্বিগাদিগণবৃত্তকা কলিকা মঞ্জরীত্যভিহিতা ক্রমাৎ কোরকগুচ্ছকসংফুল্লকুসুমগন্ধাখ্যা। তস্যাশ্চাত্র কোরকগুচ্ছকুসুমানি গৃহীতানি। কোরকো গুচ্ছকুসুমৈর্মঞ্জরী ত্রিবিধাত্র হিত্যুক্তেঃ। ত্রিভঙ্গী কলিকা তু শিখরিণ্যাদিপূর্ব্বা যোঢ়া। তস্যাশ্চাত্র দণ্ডকপূর্ব্বা বিদগ্ধপূর্ব্বা চ। গৃহীতা। দণ্ডকাখ্যা বিদগ্ধাখ্যা ত্রিভঙ্গীহ দ্বিধা মতেত্যুক্তেঃ॥ *॥ অথ মিশ্রকলিকা তু কলিকাগদ্যসংপৃক্তা সপ্তবিভক্তিকা বা। অক্ষময়ী সর্ব্বলঘ্বী চেতি দ্বিভেদা কেবলা চেত্যষ্টৌ। তদেবং ষড়্ভ্যো মহাকলিকাভ্যো অষ্টাবিংশতিরিহ কলিকা গৃহীতাঃ। রণাদয় একাদশ নখভেদাঃ। সংফুল্লগন্ধৌ মঞ্জরীভেদৌ। শিখরিণ্যাদয়ঃ ত্রিভঙ্গীভেদা মধ্যকলিকা চ ত্যক্তাশ্চারুতাধিক্যবিরহাৎ। ইতি রূপগোস্বামিকৃতগোবিন্দবিরুদাবলীভাষ্যে বলদেববিদ্যাভূষণঃ॥

কলিকাপূর্ব্বং (ক্লী) অঙ্গপ্রধানান্যতরবহুকর্ম্মসাধ্যস্বর্গাদিফলজনকাপূর্ব্বোৎপত্তৌ তত্তৎপ্রত্যেককর্ম্মজন্যমদৃষ্টং। ইতি স্মৃতিঃ॥

কলিকারঃ (পুং) ধূম্যাটপক্ষী। পীতমস্তকপক্ষী। পূতিকরঞ্জঃ। ইতি মেদিনী॥

কলিকারকঃ (পুং) পূতিকরজঃ। কাঁটাকরঞ্জ নাটাকরঞ্জ ইতি চ ভাষা। ইত্যমরঃ॥ নারদমুনিঃ। ইতি হেমচন্দ্রঃ॥

কলিকারী (স্ত্রী) উপবিষভেদঃ। বিষলাঙ্গলীয়া ইতি ভাষা। তৎপর্য্যায়ঃ। লাঙ্গলী ২ হলিনী ৩ গর্ভপাতনী ৪ দীপ্তা ৫ বিশল্যা ৬ অগ্নিমুখী ৭ হলী ৮ নক্তা ৯ ইন্দ্রপুষ্পিকা ১০ বিদ্যুজ্জ্বালা ১১ অগ্নিজিহ্বা ১২ ব্রণহৃৎ ১৩ পুষ্পসৌরভা ১৪ স্বর্ণপুষ্পা ১৫ বহ্নিশিখা ১৬। অস্যা গুণাঃ। কটুত্বং। উষ্ণত্বং। কফবাতনাশিত্বং। গর্ভান্তঃশল্যনিষ্ক্রামকারিত্বং। পরমসারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

কলিঙ্গং (ক্লী) ইন্দ্রযবং। ইত্যমরঃ॥

কলিঙ্গঃ (পুং) পূতিকরজবৃক্ষঃ। ধূম্যাটপক্ষী। দেশবিশেষঃ। ইতি হেমচন্দ্রঃ॥ মেদিনীমতে এতদর্থে পুং ভূম্নি। কুটজবৃক্ষঃ। শিরীষবৃক্ষঃ। প্লক্ষবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কলিঙ্গকঃ ( পুং ) ইন্দ্রযবং। ইতি রত্নমালা ॥

কলিঙ্গা ( স্ত্রী ) নিতম্বিনী। মহিলা। ইতি মেদিনীকরহেমচন্দ্রৌ ॥ ত্রিবৃৎ। তেউড়ি ইতি ভাষা। ইতি শব্দচন্দ্রিকা ॥

কলিঞ্জঃ ( পুং ) কটঃ। চাঁচ দরমা ইত্যাদি ভাষা। ইতি হেমচন্দ্রঃ ॥

কলিতং ( ত্রি ) বিদিতং। আপ্তং। ইতি মেদিনী ॥ ভেদিতং। গণিতং। ইতি শব্দরত্নাবলী ॥ ধৃতং। যথা। করকলিতকপালঃ কুণ্ডলী দণ্ডপাণিরিতি ভৈরবধ্যানং ॥

কলিদ্রুমঃ ( পুং ) বিভীতকবৃক্ষঃ। বয়ড়া ইতি ভাষা। ইত্যমরঃ ॥

লিন্দঃ ( পুং ) বিভীতকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥ সূর্য্যঃ। পর্ব্বতবিশেষঃ। যস্মাৎ যমুনা নির্গতা। ইতি কালিন্দীশব্দব্যুৎপত্তৌ ভরতঃ ॥

কলিন্দকন্যা ( স্ত্রী ) যমুনানদী। ইতি রাজনির্ঘণ্টঃ ॥

কলিন্দনন্দিনী ( স্ত্রী ) যমুনানদী। ইতি শব্দরত্নাবলী ॥

কলিপ্রিয়ঃ ( পুং ) নারদমুনিঃ। যথা। কলিপ্রিয়স্য প্রিয়শিষ্যবর্গঃ। ইতি রঘুঃ ॥ বানরঃ। ইতি শব্দরত্নাবলী ॥

কলিমারকঃ ( পুং ) কলিকারকঃ। ইত্যমরটীকায়াং রমানাথঃ ॥

কলিমালকঃ ( পুং ) কলিকারকঃ। ইতি স্বামী ইত্যমরটীকায়াং ভরতঃ ॥

কলিমাল্যঃ ( পুং ) পূতিকরঞ্জঃ। ইতি রাজনির্ঘণ্টঃ ॥

কলিযুগং ( ক্লী ) চতুর্থযুগং। তস্যোৎপত্ত্যাদি যথা। মাঘীপূর্ণিমায়াং শুক্রবারে কলিযুগোৎপত্তিঃ। তত্র অবতারঃ কল্কী। পুণ্যমেকপাদং ॥ পাপং ত্রিপাদং। গঙ্গা তীর্থং। ব্রাহ্মণো নিরগ্নিঃ। অন্নগতাঃ প্রাণাঃ। সার্দ্ধত্রিহস্তপরিমিতো মনুষ্যদেহঃ। অষ্টাধিকশতবর্ষং পরমায়ুঃ। ভোজনপাত্রস্য নিয়মো নাস্তি। ইতি কলিযুগস্য লক্ষণং ॥ কলিযুগাব্দাঃ ৪৩২০০০। আদৌ কলিরাজা ধর্ম্মপুত্রো যুধিষ্ঠিরঃ। হরিশ্চন্দ্রঃ মনিশ্চন্দ্রঃ ভেজশেখরঃ বিক্রমাদিত্যঃ বিক্রমসেনঃ লাউসেনঃ বল্লালসেনঃ দেবপালঃ ভূপালঃ মহীপালঃ। এতে রাজচক্রবর্ত্তিনঃ ॥ তন্মাহাত্ম্যং যথা। ধর্ম্মঃ সঙ্কুচিতস্তপো বিরহিতং সত্যঞ্চ দূরং গতং লোকা ধর্ম্মহতা দ্বিজাশ্চ লুভিতা নারীবশা মানবাঃ ॥ তত্র তারকব্রহ্মনাম। হরে কৃষ্ণ হরে কৃষ্ণ কৃষ্ণ কৃষ্ণ হরে হরে। হরে রাম হরে রাম রাম রাম হরে হরে ॥ ইতি কেচিৎ ॥

কলিযুগাদ্যা (স্ত্রী) মাঘীপৌর্ণমাসী। তৎপ্রমাণং যুগাদ্যাশব্দে দ্রষ্টব্যং ॥

কলিলঃ ( ত্রি ) গহনঃ। ইত্যমরঃ ॥ মিশ্রঃ। ইত্যুণাদিকোষঃ ॥

কলিবৃক্ষঃ ( পুং ) কলিদ্রুমঃ। বহেড়কবৃক্ষঃ। ইতি হেমচন্দ্রঃ

কলী ( স্ত্রী ) কলিকা। ইত্যমরটীকায়াং ভরতঃ

কলুষং ( ক্লী ) পাপং। ইত্যমরঃ ॥

কলুষঃ ( পুং স্ত্রী ) মহিষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কলুষঃ ( ত্রি ) অনচ্ছঃ। আবিলঃ। ইত্যমরঃ ॥

কলেবরং ( ক্লী ) শরীরং । ইত্যমরঃ ॥

কল্কঃ ( পুং ক্লী ) ঘৃততৈলাদিশেষঃ । দম্ভঃ । বিভীতকবৃক্ষঃ । বিষ্ঠা । কিট্টং । পাপং । ইতি মেদিনী ॥ কর্ণমলঃ । ইতি শব্দরত্নাবলী ॥ তুরুষ্কনামগন্ধদ্রব্যং । ইতি রাজনির্ঘণ্টঃ ॥ ঘৃততৈলাদিপাকে দেয়মৌষধদ্রব্যং । তত্তু পঞ্চকষায়াস্তর্গতদৃশদি পেষিতং । অস্য পূর্ণবীর্য্যং যামমেকং তিষ্ঠতি । যথা । দ্রব্যমাত্রং শিলাপিষ্টং শুষ্কং বা জলমিশ্রিতং । তদেব সূরিভিঃ পূর্ব্বৈঃ কল্ক ইত্যভিধীয়তে॥ তৎপর্য্যায়ঃ । পিষ্টঃ ২ বিনীয়ঃ ৩ । ইতি রত্নমালা ॥ আবাপঃ ৪ প্রক্ষেপঃ ৫ । ইতি বৈদ্যকপরিভাষা ॥ শাঠ্যং । ইতি মোক্ষধর্ম্মটীকায়াং নীলকণ্ঠঃ ॥

কল্কঃ ( ত্রি ) পাপাশয়ঃ । পাপাত্মা । ইতি মেদিনী ॥

কল্কফলঃ ( পুং ) দাড়িমবৃক্ষঃ । ইতি রাজনির্ঘণ্টঃ ॥

কল্কিঃ ( পুং ) বিষ্ণোর্দশমাবতারঃ । স তু কলিশেষে পাপাত্মনাং বিনাশায় সম্ভলগ্রামে ভবিষ্যতি । যথা । সম্ভলগ্রামমুখ্যস্য ব্রাহ্মণস্য মহাত্মনঃ । ভবনে বিষ্ণুযশসঃ কল্কিঃ প্রাদুর্ভবিষ্যতি ॥ তস্য কর্ম্ম যথা । অশ্বমাশুগমারুহ্য দেবদত্তং জগৎপতিঃ । অসিনাসাধুদমনমষ্টৈশ্বর্য্যগুণান্বিতঃ ॥ বিচরন্নাশুনা ক্ষৌণ্যাং হয়েনাপ্রতিমদ্যুতিঃ । নৃপলিঙ্গচ্ছদো দস্যূন্ কোটিশো নিহনিষ্যতি ॥ ইতি শ্রীভাগবতং ॥ তস্যোৎপত্তির্যথা । স্তুত্বা প্রাহ পুরো ব্রহ্মা দেবানাং হৃদয়েপ্সিতং । তৎ শ্রুত্বা পুণ্ডরীকাক্ষো ব্রহ্মাণমিদমব্রবীৎ ॥ সম্ভলে বিষ্ণুযশসো গৃহে প্রাদুর্ভবাম্যহং । সুমত্যাং মাতরি বিভো কন্যায়াং ত্বন্নিদেশতঃ ॥ চতুর্ভির্ভ্রাতৃভির্দেব করিষ্যামি কলিক্ষয়ং । ভবন্তো বান্ধবা দেবাঃ স্বাংশেনাবতরিষ্যথ॥ ইয়ং মম প্রিয়া লক্ষ্মীঃ সিংহলে সংভবিষ্যতি । বৃহদ্রথস্য ভূপস্য কৌমুদ্যাং কমলেক্ষণা। ভার্য্যায়াং মম ভার্য্যৈষা পদ্মা নাম্নী জনিষ্যতি ॥ যাত যূয়ং ভুবং দেবাঃ স্বাংশাবতরণে রতাঃ । রাজানৌ মরুদেবাপী স্থাপয়িষ্যাম্যহং ভুবি ॥ পুনঃ কৃতযুগং কৃত্বা ধর্ম্মান্ সংস্থাপ্য পূর্ব্ববৎ । কলিব্যালং সংনিরস্য প্রযাস্যে স্বালয়ং বিভো ॥ ইত্যুদীরিতমাকর্ণ্য ব্রহ্মা দেবগণৈর্ব্বৃতঃ । জগাম ব্রহ্মা সদনং দেবাশ্চ ত্রিদিবং যযুঃ ॥ মহীমাশ্বাস্য ভগবান্ নিজজন্মকৃতোদ্যমঃ । সম্ভলগ্রামবিপ্রর্ষিমাবিবেশ পরাত্মকঃ ॥ সুমত্যাং বিষ্ণুযশসা গর্ভমাধত্ত বৈষ্ণবং । গ্রহনক্ষত্ররাশ্যাদিসেবিতশ্রীপদাম্বুজং ॥ সরিৎ সমুদ্রা গিরয়ো লোকাঃ সস্থাণুজঙ্গমাঃ । সহর্ষা ঋষয়ো দেবা জাতে বিষ্ণৌ জগৎপতৌ ॥ বভূব সর্ব্বসত্বানামানন্দো বিবিধাশ্রয়ঃ । নৃত্যন্তি পিতরো হৃষ্টাস্তুষ্টা দেবা জগুর্যশঃ ॥ চক্রুর্ব্বাদ্যাদি গন্ধর্ব্বা ননৃতুশ্চাপ্সরোগণাঃ । দ্বাদশ্যাং শুক্লপক্ষস্য মাধবে মাসি মাধবঃ । জাতো দদৃশতুঃ পুত্ত্রং পিতরৌ হৃষ্টমানসৌ ॥ ধাত্রী মাতা মহাষষ্ঠী নাড়ীচ্ছেত্রী তদম্বিকা । গঙ্গোদকক্লেদমোক্ষা সাবিত্রী

মার্জ্জনোদ্যতা ॥ তস্য বিষ্ণোরনন্তস্য। বসুধাদাৎ পয়ঃ সুধাং। মাতৃকা মাঙ্গল্যবচঃ কৃষ্ণজন্মদিনেঽভবন্॥ ব্রহ্মা তদুপধার্য্যাশু স্বাশুগং প্রাহ সেবকং। যাহীতি সূতিকাগারং গত্বা বিষ্ণুং প্রবোধয়॥ চতুর্ভুজমিদং রূপং দেবানামপি দুর্ল্লভং। ত্যক্ত্বা মানুষবদ্রূপং কুরু নাথ বিচারিতং॥ ইতি ব্রহ্মবচঃ শ্রুত্বা পবনঃ সুরভিঃ সুখং। সুশীতঃ প্রাহ তরসা ব্রহ্মণো বচনাদৃতঃ। তচ্ছুত্বা পুণ্ডরীকাক্ষস্তৎক্ষণাৎ দ্বিভুজোঽভবৎ। তদা তৎপিতরৌ দৃষ্ট্বা বিস্ময়াপন্নমানসৌ॥ ভ্রমসংস্কারবত্তত্র মেনাতে তস্য মায়য়া। ততস্তু সম্ভলগ্রামে সোৎসবা জীবজাতয়ঃ॥ মঙ্গলাচারবহুলাঃ পাপতাপবিবর্জ্জিতাঃ। সুমতিস্তং সুতং লব্ধ্বা বিষ্ণুং জিষ্ণুং জগৎপতিং ॥ পূর্ণকামা বিপ্রমুখ্যানাহুয়াদাদ্গবাং শতং। হরেঃ কল্যাণকৃদ্বিষ্ণুযশাঃ শুদ্ধেন চেতসা॥ সামর্গ্যজুর্ব্বিস্তিরগ্র্যৈস্তন্নামকরণে রতঃ। তদা রামঃ কৃপো ব্যাসো দ্রৌণির্ভিক্ষুঃ শরীরিণঃ॥ সমায়াতা হরিং দ্রষ্টুং বালকত্বমুপাগতং। তানাগতান্ সমালোক্য চতুরঃ সূর্য্যসন্নিভান্॥ হৃষ্টরোমা দ্বিজবরঃ পূজাং চক্রে স ঈশ্বরান্। পূজিতাস্তে স্বাসনেষু সংবিষ্টাঃ স্বসুখাশ্রয়াঃ॥ হরিং ক্রোড়গতং তস্য দদৃশুঃ সর্ব্বমূর্ত্তয়ঃ। তং বালকং নরাকারং বিষ্ণুং নত্বা মুনীশ্বরাঃ॥ কল্কিং কল্কবিনাশার্থমাবির্ভূতং বিদুর্ব্বুধাঃ। নামাকুর্ব্বংস্ততস্তস্য কল্কিরিত্যভিবিশ্রুতং॥ কৃত্বা সংস্কারকর্ম্মাণি যযুস্তে হৃষ্টমানসাঃ। ততঃ স ববৃধে তত্র সুমত্যা পরিপালিতঃ॥ কালেনাল্পেন কংসারিঃ শুক্লপক্ষে যথা শশী। কল্কের্জ্জ্যেষ্ঠাস্ত্রয়ঃ শূরাঃ কবিপ্রাজ্ঞসুমন্ত্রকাঃ॥ তাতমাতৃপ্রিয়করা গুরুবিপ্রপ্রতিষ্ঠিতাঃ। কল্কেরংশাঃ পুরো জাতাঃ সাধবো ধর্ম্মতৎপরাঃ॥ গার্গ্যভর্গ্যবিশালাদ্যা জ্ঞাতয়স্তদনুব্রতাঃ। বিশাখযূপভূপালপালিতাস্তাপবর্জ্জিতাঃ॥ ব্রাহ্মণাঃ কল্কিমালোক্য পরাং প্রীতিমুপাগতাঃ। ততো বিষ্ণুযশাঃ পুত্রং ধীরং সর্ব্বগুণাকরং॥ কল্কিং কমলপত্রাক্ষং প্রোবাচ পঠনাদৃতং। তাত তে ব্রহ্মসংস্কারং যজ্ঞসূত্রমনুত্তমং॥ সাবিত্রীং বাচয়িষ্যামি ততো বেদান্ পঠিষ্যসি। ইতি শ্রীকল্কিপুরাণেঽনুভাগবতে ভবিষ্যে কল্কিজন্মোপনয়নং ২ অধ্যায়ঃ॥

কল্কী [ন্] (পুং) কল্কিঃ। যথা। মৎস্যঃ কূর্ম্মো বরাহশ্চ নরসিংহোঽথ বামনঃ। রামো রামশ্চ রামশ্চ বুদ্ধঃ কল্কী চ তে দশ॥ ইতি পুরাণং॥

কল্পঃ (পুং) বিধিঃ। প্রলয়ঃ। ব্রাহ্মং দিনং। তত্তু দৈবদ্বিসহস্রযুগং। ইত্যমরঃ॥ ত্রিংশৎকল্পৈর্ব্রহ্মণ একো মাসো ভবতি তেষাং নামানি যথা। শ্বেতবারাহঃ১নীললোহিতঃ২ বামদেবঃ ৩ গাথান্তরঃ ৪ রৌরবঃ ৫ প্রাণঃ ৬ বৃহৎকল্পঃ ৭ কন্দর্পঃ ৮ সত্যঃ ৯ ঈশানঃ ১০ ধ্যানঃ ১১ সারস্বতঃ ১২ উদানঃ ১৩ গরুড়ঃ ১৪ কৌর্ম্মঃ ১৫ অয়ং ব্রহ্মণঃ পৌর্ণমাসী। নারসিংহঃ ১৬ সমাধিঃ ১৭ আগ্নেয়ঃ ১৮ বিষ্ণুজঃ ১৯

সৌরঃ ২০ সোমকল্পঃ ২১ ভাবনঃ ২২ সুপ্তমালী ২৩ বৈকুণ্ঠঃ ২৪ আর্চ্চিষঃ ২৫ বল্মীকল্পঃ ২৬ বৈরাজঃ ২৭ গৌরীকল্পঃ ২৮ মাহেশ্বরঃ২৯ পিতৃকল্পঃ ৩০ অয়ং ব্রহ্মণো-ঽমাবাস্যা। ইতি ক্রমসন্দর্ভে প্রভাসখণ্ডং॥ এতাদৃশৈর্দ্দশমাসৈর্ব্রহ্মণঃ সম্বৎসরো ভবতি। এবং বর্ষশতং ব্রহ্মণ আয়ুঃ। তত্র পঞ্চাশদ্বর্ষা ব্যতীতাঃ একপঞ্চাশদারম্ভে অধুনা শ্বেতবারাহকল্পঃ। ইতি মহাভারতং॥ বিকল্পঃ। কল্পবৃক্ষঃ। ন্যায়ঃ। শাস্ত্রবিশেষঃ। স তু বেদষড়ঙ্গান্তর্গতো যাগক্রিয়াণামুপদেশকঃ। ইতি হেমচন্দ্রঃ॥ ব্যাকরণস্য প্রত্যয়বিশেষঃ। স চ স্যাদ্যন্তত্যাদ্যন্তপদাভ্যামীষদূনার্থে ভবতি। তত্র বাচ্যলিঙ্গঃ। যথা ঈষদূনো বিদ্বান্ বিদ্বৎকল্পঃ। ঈষদূনং পচতি পচতিকল্পং। ইতি মুগ্ধবোধব্যাকরণং॥

কল্পকঃ (পুং) নাপিতঃ। ইতি শব্দমালা॥ কর্চ্চূরঃ। ইতি ভাবপ্রকাশঃ॥

কল্পনং (ক্লী) কৃপ্তিঃ। ছেদনং। ইতি ত্রিকাণ্ডশেষঃ॥

কল্পনা (স্ত্রী) হস্তিসজ্জনা। নায়কস্যারোহণার্থং গজসজ্জীকরণং। ইত্যমরঃ॥ অনুমিতিঃ। ইতি ন্যায়শাস্ত্রং॥ রচনা। যথা প্রবন্ধকল্পনা কথা। ইত্যমরঃ॥

কল্পনী (স্ত্রী) কর্ত্তনী। কাঁচি ইতি ভাষা। ইতি হেমচন্দ্রঃ॥

কল্পপাদপঃ (পুং) কল্পবৃক্ষঃ। যথা। মৃষা ন চক্রেঽল্পিতকল্পপাদপঃ। ইতি নৈষধং॥

কল্পপাদপদানং (ক্লী) মহাদানবিশেষঃ। তদ্বিধানং যথা। কল্পপাদপদানাখ্যমতঃ পরমনুত্তমং। মহাদানং প্রবক্ষ্যামি সর্ব্বপাতকনাশনং॥ পুণ্যন্দিনমথাসাদ্য তুলাপুরুষদানবৎ। পুণ্যাহবাচনং কৃত্বা লোকেশাবাহনন্তথা॥ ঋত্বিঙ্মণ্ডপসম্ভারভূষণাচ্ছাদনাদিকং। কাঞ্চনং কারয়েদ্বৃক্ষং নানাফলসমন্বিতং॥ নানাবিহগবস্ত্রাণি ভূষণানি চ কারয়েৎ। শক্তিতস্ত্রিপলাদূর্দ্ধমাসহস্রাৎ প্রকল্পয়েৎ॥ অর্দ্ধকৃপ্তং সুবর্ণস্য কারয়েৎ কল্পপাদপং। গুড়প্রস্থোপরিষ্টাচ্চ সিতবস্ত্রযুগাবৃতং॥ অর্দ্ধকৃপ্তং যাবদুপাত্তসুবর্ণস্যার্দ্ধেন নির্ম্মিতং। ব্রহ্মবিষ্ণুশিবোপেতং পঞ্চশাখং সভাস্করং। কামদেবমধস্তাচ্চ সকলত্রং প্রকল্পয়েৎ॥ সন্তানং পূর্ব্বতস্তদ্বত্তুরীয়াংশেন কল্পয়েৎ। মন্দারং দক্ষিণে পার্শ্বে শ্রিয়া সার্দ্ধং ঘৃতোপরি॥ সন্তানং পূর্ব্বতস্তদ্বদিতি গুড়প্রস্থস্থং সিতবস্ত্রযুগাবৃতমিত্যর্থঃ। কামদেবমধস্তাচ্চেতি সন্তানবৃক্ষস্যাধস্তাৎ সকলত্রং কামদেবং প্রকল্পয়েদিতি যোজনং। মন্দারাদিষ্বেকৈকদেবতাসম্বন্ধশ্রুতেঃ॥ পশ্চিমে পারিভদ্রস্তু সাবিত্র্যা সহ জীরকে। সুরভীসংযুতং তদ্বত্তিলেষু হরিচন্দনং॥ তৃতীয়াংশেন কুর্ব্বীত সৌম্যেন ফলসংযুতং। কৌষেয়বস্ত্রসংযুক্তানিক্ষুমাল্যফলান্বিতান্॥ তৃতীয়াংশেন সন্তানঘটনাবস্থিতসুবর্ণতৃতীয়ভাগেন। সৌম্যেন উত্তরদিগ্বিভাগেন। তথাষ্টপূর্ণকলসান্ পাদুকাসনভাজনান্। দীপিকোপানহচ্ছত্রচামরাসনসংযুতং॥ পাদুকাসনভাজনান্ পাদুকা-

সনভাজনসহিতানিত্যর্থঃ। আসনপদঞ্চাত্র কলসাবস্থানোচিতাসনপরং। চামরাসন-সংযুতমিতি পুনরাসনপদশ্রবণাৎ। ফল-পক্ষিযুতং তদ্বদুপরিষ্টাদ্বিতানকং। তথা-ষ্টাদশধান্যানি সমন্তাৎ পরিকল্পয়েৎ॥ হোমাধিবাসনান্তে তু স্নাপিতো বেদ-পুঙ্গবৈঃ। ত্রিঃ প্রদক্ষিণমাবৃত্য মন্ত্রমেত-মুদীরয়েৎ॥ নমস্তে কল্পবৃক্ষায় চিন্তিতান্ন-প্রদায় চ। বিশ্বম্ভরায় দেবায় নমস্তে বিশ্ব-মূর্ত্তয়ে॥ যস্মাত্ত্বমেব বিশ্বাত্মা ব্রহ্মা স্থাণু-র্দ্দিবাকরঃ। মূর্ত্তামূর্ত্তপরং বীজমতঃ পাহি সনাতন॥ ত্বমেবামৃতসর্ব্বস্বমনন্তপুরুষো-ঽব্যয়ঃ। সন্তানাদ্যৈরুপেতঃ সন্ পাহি সংসারসাগরাৎ॥ এবমামন্ত্র্য তং দদ্যাদ্-গুরুবে কল্পপাদপং। চতুর্ভ্যশ্চাপি ঋত্বিগ্-ভ্যঃ সন্তানাদীনি কল্পয়েৎ॥ এতেন চত্বার এবর্ত্বিজঃ কর্ত্তব্যাঃ। কুশময়াশ্চত্বারো ব্রহ্মাণ ইত্যুক্তং সম্ভবতি॥ স্বল্পেম্বেকাগ্নি-বৎ কুর্য্যাৎ গুরুরেবাভিপূজিতঃ। ন বিত্ত-শাঠ্যং কুর্ব্বীত ন চ বিস্ময়বান্ ভবেৎ॥ ন চ বিস্ময়বান্ ইদন্ময়া দত্তমিতি নাহঙ্কার-বান্ ভবেদিত্যর্থঃ। অনেন বিধিনা যস্তু মহাদানং নিবেদয়েৎ। সর্ব্বপাপবিনির্মুক্তঃ সোঽশ্বমেধফলং লভেৎ॥ অপ্সরোভিঃ পরিবৃতঃ সিদ্ধচারণকিন্নরৈঃ। ভূতান্ ভব্যাংশ্চ মনুজাংস্তারয়েদাত্মসম্মিতান্॥ স্তূয়মানো দিবঃ পৃষ্ঠে পুত্রপৌত্রপ্রপৌত্র-বান্। বিমানেনার্কবর্ণেন বিষ্ণুলোকং স গচ্ছতি॥ দিবি কল্পশতং তিষ্ঠেদ্রাজরাজো ভবেত্ততঃ। নারায়ণবলোপেতো নারায়ণ-পরায়ণঃ॥ নারায়ণকথাসক্তো নারায়ণপুরং ব্রজেৎ। যো বা পঠেৎ কনককল্পতরু-প্রদানং যো বা শৃণোতি পুরুষোঽল্পধনঃ স্মরেদ্বা। সোঽপীন্দ্রলোকমধিগম্য সহাপ্স-রোভির্ম্মন্বন্তরং বসতি পাপবিমুক্তদেহঃ॥*॥ অত্র যজমানঃ সমুপজাতকল্পপাদপমহা-দানদানেচ্ছস্তুলাপুরুষলিখিতং খড়্গচর্ম্ম-ময়াচ্ছন্নসন্নাহতুলাস্থাপ্যহরিপ্রতিমালঙ্কার-তুলাহস্তগ্রাহ্যপ্রতিমাঋত্বিক্‌চতুষ্টয়বরণাদি-দক্ষিণাসামগ্রীবহিঃসর্ব্বসম্ভারং অধিকত্বেন পলত্রয়াদূর্দ্ধসহস্রপলাবধিযথেষ্টকাঞ্চনমুপা-দায় তস্যার্দ্ধেন কল্পপাদপমপরার্দ্ধেন সম-ভাগেন সন্তানং মন্দারং পারিভদ্রং হরি-চন্দনমেবং পঞ্চতরূন্ পঞ্চশাখান্ সৌবর্ণ-নানাফলপক্ষিস্বর্ণনির্ম্মিতানেকবসনাকার-সহিতান্ কেয়ূরকুণ্ডলাদ্যভিমতালঙ্কারভূ-ষিতান্ এষামাচ্ছাদনার্থং শ্বেতবস্ত্রযুগপঞ্চকং তরূণামবস্থাপনার্থং গুড়প্রস্থদ্বয়ং প্রত্যেকং প্রস্থপরিমিতান্ পাত্রস্থঘৃতজীরকতিলাং-শ্চ কল্পবৃক্ষাধঃস্থাপনার্থমভীষ্টস্বর্ণাস্তর-যন্ত্রোৎখাটিতা ব্রহ্মবিষ্ণুশিবভাস্করপ্রতিমাঃ যথোক্তক্রমতরুচতুষ্টয়াধঃস্থাপনার্থমভিমত-স্বর্ণাস্তরযন্ত্রোৎখাটিতাঃ সরতিকামদেব-লক্ষ্মীসাবিত্রীসুরভিপ্রতিমাশ্চ কল্পতরু-পার্শ্বস্থাপনার্থমষ্টৌ কুম্ভান্ তদধঃস্থাপনার্থং কুশাদিনির্ম্মিতাসনাষ্টকং কুম্ভাচ্ছাদনার্থং কৌষেয়বস্ত্রাষ্টকং কুম্ভপার্শ্বস্থাপনার্থমিক্ষু-দণ্ডাষ্টকং পুষ্পমালাষ্টকসামগ্রীং যথেষ্ট-ফলাষ্টকং পাদুকাযুগাষ্টকং কাংস্যভাজনা-ষ্টকঞ্চ কল্পতরুপার্শ্বার্পণার্থং দীপিকো-

পানদ্যুগচ্ছত্রচামরাসনাষ্টাদশধান্যানি চ উৎপাদয়েৎ। ততস্তুলাপুরুষোক্তসময়ানামন্যতমস্য পূর্ব্বতরদিনে যজমানগুর্ব্বৃত্বিগ্‌জাপকাস্তুলাপুরুষবদ্ধবিষ্যভোজনাদিকং কৃত্বা নিবেদনসঙ্কল্পবাক্যয়োস্তুলাপুরুষপদস্থানে কল্পপাদপপদং প্রক্ষিপ্য যথাযথং নিবেদনং সঙ্কল্পঞ্চ কুর্য্যুঃ। ততোঽপরদিনে যজমানস্তুলাপুরুষবদ্গোবিন্দাদ্যারাধনাদিমধুপর্কদানান্তং গোবিন্দাদ্যভ্যর্চ্চনব্রাহ্মণানুজ্ঞাপনদানসঙ্কল্পপুণ্যাহাদিবাচনবরণবাক্যেষু তুলাপুরুষপদস্থানে কল্পপাদপপদং প্রক্ষিপ্য কুর্য্যাৎ। ততো গুর্ব্বৃত্বিগ্‌যজমানজাপকা উপবসেয়ুঃ। অপরদিনে চ কৃতনিত্যাস্তুলাপুরুষবদগ্নিস্থাপনাদিমধ্যব্রাহ্মণবাচনান্তং কর্ম্ম যথাযথং কুর্য্যুঃ। এবঞ্চ মধ্যব্রাহ্মণবাচনান্তং কর্ম্ম তুলাপুরুষগ্রন্থং অনুসন্ধায়ানুষ্ঠাতব্যং। তত ঋত্বিজঃ কল্পতরুং আনীয় প্রধানবেদ্যাং লিখিতচক্রমধ্যে গুড়প্রস্থং দত্ত্বা তদুপরি স্থাপয়েয়ুঃ। ততস্তস্যাধো গুড়প্রস্থোপরি পংক্তিক্রমেণ স্বর্ণযন্ত্রোৎখাটিতা ব্রহ্মবিষ্ণুশিবভাস্করপ্রতিমাঃ স্থাপয়েয়ুঃ। তৎপূর্ব্বতঃ অধস্তাদারোপিতসরতিকামদেবপ্রতিমাং গুড়প্রস্থোপরি সন্তানং কল্পতরুদক্ষিণতঃ অধঃসমারোপিতলক্ষ্মীপ্রতিমাং ঘৃতপ্রস্থোপরি মন্দারং কল্পতরোঃ পশ্চিমতঃ অধঃসমারোপিতসাবিত্রীপ্রতিমাং জীরকপ্রস্থোপরি পারিভদ্রং কল্পতরুত্তরতঃ অধঃসমারোপিতসুরভিপ্রতিমাং তিলপ্রস্থোপরি হরিচন্দনঞ্চারোপয়েয়ুঃ। সর্ব্বাংশ্চ বৃক্ষান্ প্রত্যেকং সিতবস্ত্রযুগেনাচ্ছাদয়েয়ুঃ। অষ্টাসু দিক্ষু প্রত্যেকং কৌষেয়বস্ত্রাচ্ছাদিতান্ ইক্ষুদগুফলান্বিতান্ মাল্যালঙ্কৃতানষ্টৌ পূর্ণকুম্ভান্ পার্শ্বারোপিতপাদুকাযুগভাজনানাসনেষ্বারোপ্য কল্পতরুপার্শ্বে পূর্ব্বোক্তদীপিকাদ্যুপকরণমারোপয়েয়ুঃ। ততো মঙ্গলতূর্য্যগীতবন্দিঘোষেষু সৎসু ঋত্বিজঃ কুণ্ডসমীপস্থকুম্ভচতুষ্টয়জলেন যজমানং স্নাপয়েয়ুঃ। ততো যজমানঃ শুক্লমাল্যাম্বরধরো ধৃতসর্ব্বালঙ্কারঃ পুষ্পাঞ্জলিমাদায় কল্পপাদপং ত্রিঃ প্রদক্ষিণীকৃত্য নমস্তে কল্পবৃক্ষায়েত্যাদি পাহি সংসারসাগরাদিত্যন্তমন্ত্রান্ পঠিত্বা পুষ্পাঞ্জলিনাভ্যর্চ্য গুর্ব্বৃত্বিগ্‌ভ্যো যথাযথং দদ্যাৎ॥ওঁ অদ্যামুকামুকসগোত্রেভ্যোঽমুকামুকবেদামুকামুকশাখাধ্যায়িভ্যঃ অমুকামুকদেবশর্ম্মভ্যো যুষ্মভ্যং মৎস্যপুরাণোক্তকল্পপাদপমহাদানদানফলপ্রাপ্তিকামোঽহং মৎস্যপুরাণোক্তভাগব্যবস্থয়া এতৎ গুড়প্রস্থারোপিতসৌবর্ণব্রহ্মবিষ্ণুমহেশ্বরভাস্করপ্রতিমাসিতবসনযুগান্বিতগুড়প্রস্থারোপিতসৌবর্ণসরতিকামদেবপ্রতিমাসিতবসনযুগান্বিতসৌবর্ণসন্তানসহিতং ঘৃতপ্রস্থারোপিতসৌবর্ণলক্ষ্মীপ্রতিমাসিতবস্ত্রযুগান্বিতসৌবর্ণমন্দারসহিতং জীরকপ্রস্থারোপিতসৌবর্ণসাবিত্রীপ্রতিমাসিতবসনযুগলান্বিতসৌবর্ণপারিভদ্রসহিতং তিলপ্রস্থারোপিতসৌবর্ণসুরভিপ্রতিমাসিতবসনযুগান্বিতসৌবর্ণহরিচন্দনসহিতং কৌষেয়বস্ত্রযুগবেষ্টিতগ্রীবেক্ষুমাল্যফলান্বিতকুশাসনপাদুকাযুগকাংস্য-

ভাজনযুতপূর্ণকুম্ভাষ্টকদীপিকোপানদ্যুগ-চ্ছত্রচামরাসনফলমাল্যযুতপঞ্চবর্ণবিতান-কাষ্টাদশধান্যযুতং কল্পপাদপমহাদানমহং দদানি ॥ প্রতিগ্রহীতারঃ স্বস্তীত্যুক্ত্বা সাবিত্রীং পঠিত্বা যথাযথং অমুকপাদপো-ঽয়ং বিষ্ণুদৈবতমিত্যুক্ত্বা যথাশাখং কাম-স্তুতিং পঠেয়ুঃ। ততো দক্ষিণাদানং। ওঁ অদ্য কৃতৈতদ্দানপ্রতিষ্ঠার্থং যুষ্মভ্য-মহন্দক্ষিণামিমাং যদুৎপত্তিযোগ্যাং ভূমি-মেতানি চ রত্নানি দদানি ॥ প্রতিগ্রহী-তারঃ স্বস্তীত্যুক্ত্বা প্রত্যেকং তরূন্ মূলেষু স্পৃশেয়ুঃ। ততো যজমানস্তুলাপুরুষবজ্-জাপকেভ্যো দক্ষিণাদানং দীনানাথাদি-তর্পণং ব্রাহ্মণবাচনঞ্চ কুর্য্যাৎ। ততঃ কল্প-পাদপং গুরবে সন্তানকাদীংশ্চতুরো বৃক্ষান্ ঋগ্বেদ্যাদিক্রমেণ চতুর্ভ্য ঋত্বিগ্‌ভ্যো নিবে-দয়েৎ। স্বল্পকল্পপাদপদানে তু গুরুরেবৈ-কাগ্নিবৎ স্বগৃহ্যোক্তবিধিনা সর্ব্বং ব্রহ্মাণ্ড-দানবৎ কুর্য্যাৎ। ইতি কল্পপাদপমহাদানং সমাপ্তং ॥ ইতি মহারাজাধিরাজনিঃশঙ্ক-সঙ্করশ্রীমদ্বল্লালসেনদেববিরচিতে শ্রীদান-সাগরে মহাদানদানাবর্ত্তঃ ॥

কল্পলতাদানং (ক্লী) মহাদানবিশেষঃ। তস্য বিধির্যথা। অথাতঃ সংপ্রবক্ষ্যামি মহা-দানমনুত্তমং। মহাকল্পলতং নাম পাতকা-বলিনাশনং ॥ পুণ্যাং তিথিমথাসাদ্য কৃত্বা ব্রাহ্মণবাচনং। ঋত্বিগ্মণ্ডপসম্ভারভূষণাচ্ছা-দনাদিকং ॥ তুলাপুরুষবৎ কুর্য্যাৎ লোকেশাবাহনাদিকং। চামীকরময়ীঃ কুর্য্যাদ্দশকল্পলতাঃ শুভাঃ ॥ নানাপুষ্প-ফলোপেতা নানাংশুকবিভূষিতাঃ। বিদ্যা-ধরসুপর্ণানাং মিথুনৈরুপশোভিতাঃ ॥ সুপ-র্ণানাং কিন্নরাণাং। হারানাদিৎসুভিঃ সিদ্ধৈঃ ফলানি চ বিহঙ্গমৈঃ। লোক-পালানুসারিণ্যঃ কর্ত্তব্যাস্তাশ্চ দেবতাঃ ॥ লোকপালানুসারিণ্য ইতি লোকপাল-সমানাকৃতয়ঃ। ব্রাহ্মীমনন্তশক্তিঞ্চ লবণ-স্যোপরি ন্যসেৎ। অধস্তাচ্চ তয়োর্মধ্যে মহাখড়্গধরে শুভে ॥ পদ্মশঙ্খকরে ইতি কচিৎ পাঠঃ ॥ স্বর্ণাসনস্থা মাহেন্দ্রী পূর্ব্বতঃ কুলিশায়ুধা। রজনীসংস্থিতাগ্নেয়ী স্রুবপাণিরথাচলা ॥ রজনী হরিদ্রা। যাম্যা তু মহিষারূঢ়া গদিনী তণ্ডুলোপরি। নৈর্ঋত্যাং নৈর্ঋতী স্থাপ্যা সখড়্গা চ ঘৃতোপরি ॥ বারুণে বারুণী ক্ষীরে সর্পস্থা নাগপাশিনী। পতাকিনী চ বায়ব্যে মৃগস্থা শর্করোপরি ॥ সৌম্যা তিলেষু সংস্থাপ্যা কৌবেরদিশি সংস্থিতা। মাহে-শ্বরী বৃষগতা নবনীতে তু শূলিনী ॥ মৌলিন্যো বরদাস্তদ্বৎ কর্ত্তব্যা বালকা-ন্বিতাঃ। শক্ত্যা পঞ্চপলাদূর্দ্ধমাসহস্রাৎ প্রকল্পয়েৎ ॥ মৌলিন্যো মুকুটবত্যঃ। বরদাঃ প্রসন্নমূর্ত্তয়ঃ। বালকান্বিতাঃ ক্রোড়নিহিতপুত্রকাঃ। এতেন ক্রোড়-নিবিষ্টবামকরধৃতপুত্রিকা দক্ষিণহস্তবিধৃত-যথোক্তশস্ত্রাঃ প্রসন্নমূর্ত্তয়ো বদ্ধমুকুটাঃ সবাহনা ঘটনীয়াঃ। অনুক্তবাহনানাস্তু ব্রাহ্ম্যাগ্নেয়ী নৈর্ঋতীনান্তত্তল্লোকপালবাহ-নানি। লোকপালানুসারিণ্য ইতি শ্রুতেঃ ॥ তেন হংসারূঢ়া ব্রাহ্মী ছাগা-

রূঢ়াগ্নেয়ী নরারূঢ়া নৈর্ঋতী ঘটনীয়া। অনন্তস্য তু কচিদ্বাহনাদর্শনাৎ অনন্তশক্তির্ব্বাহনশূন্যৈব কর্ত্তব্যা। সর্ব্বাসামুপরিষ্টাচ্চ পঞ্চবর্ণবিতানকং। ধেনবো দশকুম্ভাশ্চ বস্ত্রপুষ্পাণি চৈব হি॥ মধ্যমে দ্বে তু গুরবে ঋত্বিগ্‌ভ্যোহন্যাস্তথৈব চ। ততো মঙ্গলশব্দেন স্নাতঃ শুক্লাম্বরো বুধঃ॥ ত্রিঃ প্রদক্ষিণমাবৃত্য মন্ত্রমেতমুদীরয়েৎ। নমো নমঃ পাপবিনাশিনীভ্যো ব্রহ্মাণ্ডলোকেশ্বরপালনীভ্যঃ। আসংশিতাধিক্যফলপ্রদাভ্যো দিগ্‌ভ্যস্তথা কল্পলতাবধূভ্যঃ॥ ইতি সকলদিগঙ্গনাপ্রদানং ভবভয়সূদনকারি যঃ করোতি। অভিমতফলদে স নাকলোকে বসতি পিতামহবৎসরাণি বিংশৎ॥ পিতৃশতমথ তারয়েদ্‌ভবাব্ধের্গুরুদুরিতৌঘবিঘাতশুদ্ধদেহং। সুরপতিবনিতাসহস্রসংঘৈঃ পরিবৃতমম্বুরু হোস্তবাভিনন্দ্যং॥ ইতি বিধানমিদং সদিগঙ্গনাকনককল্পলতাবিনিবেদনে। পঠতি যঃ স্মরতীহ তথেক্ষতে স পদমেতি পুরন্দরসেবিতং ॥*॥ অত্র যজমানঃ সমুপজাতমহাকল্পলতামহাদানদানেচ্ছঃ তুলাপুরুষলিখিতং খড়্গচর্ম্মময়াচ্ছন্নসন্নাহতুলাপুরুষস্থাপনীয়হরিপ্রতিমাসালঙ্কারতুলাহস্তগ্রাহ্যপ্রতিমা বহিঃসর্ব্বসম্ভারমধিকত্বেন পলপঞ্চকাদূর্দ্ধ্বপলসহস্রাবধিযথেষ্টহেমনির্ম্মিতাঃ স্থানস্থানঘটিতবিদ্যাধরকিন্নরমিথুনসিদ্ধগণাঃ পল্লবাগ্রনির্ম্মিতযথেচ্ছাকৃতিফলকুসুমফলগ্রহশোভিতপক্ষিণ্যঃ সিদ্ধহস্তাসক্তযথেচ্ছসখ্যমুক্তাহারসহিতা নানাবিধচিত্রনেত্রাদিবস্ত্রোপশোভিতা দশলতাঃ। তাসামধঃস্থাপনার্থং যথেচ্ছহেমযন্ত্রোৎখাটিতা যথোক্তরূপা ব্রাহ্ম্যাদিদশপ্রতিমাঃ। তদারোপণার্থং লবণগুড়হরিদ্রাতণ্ডুলঘৃতক্ষীরশর্করাতিলনবনীতানি। লতাপার্শ্বস্থাপনার্থং ধেনুদশকং কুম্ভদশকঞ্চ বস্ত্রযুগদশকঞ্চোৎপাদয়েৎ। ততো যজমানস্তুলাপুরুষোক্তসময়ানামন্যতমস্য পূর্ব্বতরদিনে গুর্ব্বৃত্বিগ্‌যজমানজাপকাস্তুলাপুরুষবদ্ধবিষ্যভোজনাদিকং কৃত্বা নিবেদনসঙ্কল্পবাক্যয়োস্তুলাপুরুষপদস্থানে মহাকল্পলতাপদং নিবেশ্য নিবেদনং সঙ্কল্পঞ্চ কুর্য্যুঃ। অপরদিনে চ যজমানঃ পূর্ব্ববদ্‌গোবিন্দাদ্যারাধনাদিমধুপর্কদানান্তং কর্ম্ম গোবিন্দাদ্যভ্যর্চ্চনব্রাহ্মণানুজ্ঞাপনদানসংকল্পপুণ্যাহাদিবাচনবরণবাক্যেষু তুলাপুরুষপদস্থানে মহাকল্পলতাপদং প্রক্ষিপ্য কুর্য্যাৎ। ততো গুর্ব্বৃত্বিগ্‌যজমানজাপকা উপবসেয়ুঃ। অপরদিনে কৃতনিত্যাস্তুলাপুরুষবদগ্নিস্থাপনাদি মধ্যব্রাহ্মণবাচনান্তং কর্ম্ম যথাযথং কুর্য্যুঃ। এবঞ্চ মধ্যব্রাহ্মণবাচনান্তং কর্ম্ম তুলাপুরুষগ্রন্থমনুসন্ধায়ানুষ্ঠাতব্যং। তত ঋত্বিজঃ প্রধানবেদ্যাং লিখিতচক্রোপরি লতানাং মধ্যে পূর্ব্বাদিদিক্‌ক্রমেণাষ্টৌ লতাঃ সমারোপ্য লতামণ্ডলমধ্যে লতাদ্বয়ঞ্চারোপ্য তদধো লবণং দত্ত্বা তত্র ব্রাহ্মীমনন্তশক্তিঞ্চ আরোপ্য পূর্ব্বাদিদিক্‌ক্রমারোপিতাষ্টলতাধঃক্রমেণ গুড়াদিদ্রব্যাণি দত্ত্বা তেষু ক্রমাৎ কুলিশায়ুধাদিশক্তিপ্রতিমাঃ সমারোপয়েয়ুঃ। লতাপার্শ্বে দশধেনুঃ পূর্ণকুম্ভ-

দশকং দশবস্ত্রযুগানি চ স্থাপয়েয়ুঃ। ততো মঙ্গলগীতবাদ্যবন্দিঘোষেষু সৎসু কুণ্ড-সমীপস্থ কুম্ভচতুষ্টয়জলেন যজমানং স্নাপ-য়েয়ুঃ। ততো যজমানঃ শুক্লমাল্যাম্বরধরো ধৃতসর্ব্বালঙ্কারঃ পুষ্পাঞ্জলিমাদায় লতাস্ত্রিঃ প্রদক্ষিণীকৃত্য নমো নমঃ পাপবিনাশিনীভ্য ইত্যাদিমন্ত্রেণ পুষ্পাঞ্জলিনাভ্যর্চ্চ্য গুর্ব্বৃত্বি-গেভ্যো দদ্যাৎ। তদ্‌যথা। ওঁ অদ্যামুকা-মুকসগোত্রেভ্যঃ অমুকামুকবেদামুকামুক-শাখাধ্যায়িভ্যোঽমুকামুকদেবশর্ম্মভ্যো যুষ্ম-ভ্যং মৎস্যপুরাণোক্তকল্পলতামহাদানদান-ফলপ্রাপ্তিকামোঽহং মৎস্যপুরাণোক্তভাগ-ব্যবস্থয়ৈতা লবণগুড়হরিদ্রাতণ্ডুলঘৃতক্ষীর-শর্করাতিলনবনীতার্পিতকলধৌতব্রহ্মানন্ত-কুলিশায়ুধবহ্নিশমননির্ঋতিবরুণবায়ুসোম-মহেশ্বরশক্তিপ্রতিমাসহিতাঃ পঞ্চবর্ণবিতা-নকধেনুদশককুম্ভদশকবসনযুগদশকান্বিতাঃ দশকল্পলতা দদানি॥ প্রতিগ্রহীতারঃ স্বস্তী-ত্যুক্ত্বা সাবিত্রীং পঠেয়ুঃ। ততো গুরুঃ কল্প-লতেয়ং বিষ্ণুদৈবতেতি ব্রূয়াৎ। ঋত্বিজস্তু প্রত্যেকং কল্পলতেয়ং বিষ্ণুদৈবতেতি ব্রূয়ুঃ। ততো যথাশাখং কামস্তুতিং পঠেয়ুঃ। ততঃ ওঁ অদ্য কৃতৈতদ্দানপ্রতিষ্ঠার্থং যুষ্মভ্যমহং দক্ষিণামিমাং যদুৎপত্তিযোগ্যাং ভূমি-মেতানি চ রত্নানি দদানি॥ ব্রাহ্মণাঃ স্বস্তী-ত্যুক্ত্বা কল্পলতাঃ স্পৃশেয়ুঃ। ততস্তুলাপুরুষ-বজ্জাপকেভ্যো দক্ষিণাং দীনানাথাদি-তর্পণং ব্রাহ্মণবাচনং ত্বরয়া কল্পলতানাং যথাযথং প্রতিপাদনঞ্চ কুর্য্যাৎ। ইতি কল্প-লতামহাদানং সমাপ্তং। ইতি দানসাগরঃ॥

কল্পবৃক্ষঃ (পুং) দেবতরুঃ। ইত্যমরঃ॥ কল্পস্য সঙ্কল্পস্য দাতা বৃক্ষঃ। কল্পস্থায়ী বৃক্ষ ইতি বা ব্যুৎপত্তিঃ। ইতি সারসুন্দরী॥

কল্পান্তঃ (পুং) ব্রহ্মণো দিনান্তঃ। প্রলয়ঃ। ইত্যমরঃ॥

কল্পিতঃ (পুং) সজ্জিতহস্তী। ইতি হেম-চন্দ্রঃ॥ রচিতে ত্রি॥

কল্মষং (ক্লী) পাপং। ইত্যমরঃ॥ হস্তপুচ্ছং। ইতি ত্রিকাণ্ডশেষঃ॥

কল্মষঃ (পুং) নরকবিশেষঃ। ইতি মেদিনী॥ মলিনে ত্রি। ইতি জটাধরঃ॥

কল্মাষঃ (পুং) চিত্রবর্ণঃ। তদ্বতি ত্রি। ইত্যমরঃ॥ কৃষ্ণপাণ্ডুরবর্ণঃ। কৃষ্ণবর্ণঃ। রাক্ষসঃ। ইতি মেদিনী॥ গন্ধশালিঃ। ইতি রাজনির্ঘণ্টঃ॥

কল্মাষকণ্ঠঃ (পুং) শিবঃ। ইতি হারাবলী॥

কল্মাষপাদঃ (পুং) সৌদাসরাজঃ। ইতি শ্রীভাগবতং॥

কল্যং (ক্লী) প্রত্যূষঃ। ইত্যমরঃ॥ মধু। ইতি হেমচন্দ্রঃ॥

কল্যঃ (ত্রি) সজ্জঃ। নিরাময়ঃ। ইত্যমরঃ॥ বাক্‌শ্রুতিবর্জিতঃ। দক্ষঃ। কল্যাণ-বচনং। উপায়বচনং। ইতি মেদিনী॥

কল্যজগ্ধিঃ (স্ত্রী) প্রাতরাশঃ। প্রাতর্ভোজনং। ইতি জটাধরঃ॥

কল্যত্বং (ক্লী) আরোগ্যং। ইতি জটাধরঃ॥

কল্যপালঃ (পুং) শৌণ্ডিকঃ। ইতি হেম-চন্দ্রঃ॥

কল্যপালকঃ (পুং) শৌণ্ডিকঃ। ইতি শব্দ-মালা॥

কল্যবর্ত্তঃ ( পুং ) প্রাতর্ভোজনং। ইতি ত্রিকাণ্ডশেষঃ ॥

কল্যা ( স্ত্রী ) মদ্যং। ইতি মেদিনী ॥ শুভাত্মিকা বাণী। কল্যাণবচনং। ইত্যমরঃ ॥ হরীতকী। ইতি শব্দরত্নাবলী ॥

কল্যাণং ( ক্লী ) মঙ্গলং। তৎপর্য্যায়ঃ। শ্বঃ ২ শ্রেয়সং ৩ শিবং ৪ ভদ্রং ৫ শুভং ৬ ভাবুকং ৭ ভবিকং ৮ ভব্যং ৯ কুশলং ১০ ক্ষেমং ১১ শস্তং ১২। তদ্‌যুক্তে ত্রি। ইত্যমরঃ ॥ স্বর্ণং। ইতি মেদিনীকরহেমচন্দ্রৌ ॥

কল্যাণবীজঃ ( পুং ) মসূরঃ। ইতি রাজনির্ঘণ্টঃ ॥

কল্যাণিকা ( স্ত্রী ) মনঃশিলাঃ। ইতি রাজনির্ঘণ্টঃ ॥

কল্যাণিনী ( স্ত্রী ) বলা। ইতি রাজনির্ঘণ্টঃ ॥ কল্যাণবিশিষ্টে ত্রি ॥

কল্যাণী ( স্ত্রী ) মাষপর্ণী। গৌঃ। ইতি রাজনির্ঘণ্টঃ ॥

কল্যাপালঃ ( পুং ) শৌণ্ডিকঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

কল্ল ঙ কূজনে। শব্দে। অশব্দে। ইতি কবিকল্পদ্রুমঃ ॥ লদ্বয়ান্তঃ। ঙ কল্লতে লোকঃ অব্যক্তশব্দং করোতি শব্দং ন করোতি বেত্যর্থঃ। কূজনে ইতি চান্দ্রা জৌমরাশ্চ ॥ শব্দমাত্রে ইতি কেচিৎ। অশব্দে ইতি কালাপাঃ। ইতি দুর্গাদাসঃ ॥

কল্লঃ ( ত্রি ) বধিরঃ। কালা ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ ॥

কল্লত্বং ( ক্লী ) স্বরভেদঃ। ইতি হেমচন্দ্রঃ ॥ বধিরতা চ ॥

কল্লোলঃ ( পুং ) মহাতরঙ্গঃ। বড় ঢেউ ইতি ভাষা। তৎপর্য্যায়ঃ। উল্লোলঃ ২। ইত্যমরঃ ॥ হর্ষঃ। শত্রৌ ত্রি। ইতি মেদিনী ॥

কব ঋ ঙ স্তুতৌ। বর্ণে। ইতি কবিকল্পদ্রুমঃ ॥ ঋ অচকাবৎ। ঙ কবতে। ইতি দুর্গাদাসঃ ॥

কবকং ( ক্লী ) ছত্রাকং। যথা। দেবতার্থং হবিঃ শিগ্রুং লোহিতান্ ব্রশ্চনাংস্তথা। অনুপাকৃতমাংসানি বিড়্জানি কবকানি চ ॥ কবকানি ছত্রাকারাণি। বর্জ্জয়েদিতি প্রত্যেকমভিসম্বধ্যতে। ইতি মিতাক্ষরায়া মাচারাধ্যায়ঃ ॥

কবকঃ ( পুং ) কবলঃ। গ্রাসঃ। ইতি হেমচন্দ্রঃ

কবচঃ ( পুং ক্লী ) সন্নাহঃ। সাঁজোয়া ইতি ভাষা। তৎপর্য্যায়ঃ। তনুত্রং ২ বর্ম্ম ৩ দংশনং ৪ উরশ্ছদঃ ৫ কঙ্কটকঃ ৬ জগরঃ ৭। ইত্যমরঃ ॥ দংসনং ৮ জাগরঃ ৯ অজগরঃ ১০। ইতি তট্টীকা ॥ কটকঃ ১১ যোগঃ ১২ সন্নাহঃ ১৩ কঞ্চুকঃ ১৪। ইতি জটাধরঃ ॥ * ॥ তস্য যুক্তির্যথা। খড়্গাদীনান্তু গণনা পূর্ব্বমেব নিদর্শিতা। অস্ত্রাত্মনৈব নির্দ্দিষ্টকবচাদিরপীষ্যতে ॥ তল্লক্ষণং সংগ্রহেণ প্রবক্ষ্যামি নিবোধত। কাষ্ঠং চর্ম্ম চ সকলং ত্রয়মেতত্তু দুস্তরং ॥ যথোত্তরং গুণযুতং তথা পূর্ব্বস্তু নিন্দিতং। শরীরাবরকত্বন্তু লঘুত্বং দৃঢ়তা তথা ॥ দুর্ভেদ্যতেতি কথিতঃ কবচে গুণসংগ্রহঃ।

সচ্ছিদ্রতাতিগুরুতা তনুতা সুখভেদ কবচানাং বিনির্দ্দিষ্টঃ সমাসাদ্দোষসংগ্রহঃ। অত্র বর্ণো বিনির্দ্দিষ্টঃ ক্রমাদেবং চতুর্ব্বিধঃ॥ সিতো রক্তস্তথা পীতঃ কৃষ্ণো ব্রহ্মাদিষু ক্রমাৎ। কেচিৎ কুর্ব্বন্তি কুশলাঃ কবচং ধাতুসম্ভবং ॥ কনকং রজতং তাম্রং লৌহং তেষু যথাক্রমং। ইতি যুক্তিকল্পতরুঃ ॥ * ॥ যথা শস্ত্রপ্রহারাণাং কবচং প্রতিবারণং। তথা দৈবোপঘাতানাং শান্তির্ভবতি বারণং ॥ ইতি মলমাসতত্ত্বং ॥ লৌহাদিবর্ম্মবৎ অঙ্গাদিরক্ষণার্থং দেবতামন্ত্রবিগ্রহং। তত্তু পূজায়াং পাঠ্যং ভূর্জ্জে বিলিখ্য কণ্ঠাদৌ ধার্য্যঞ্চ। ইতি তন্ত্রং ॥ গর্দ্দভাণ্ডবৃক্ষঃ। পটহবাদ্যং। ইতি মেদিনী ॥

কবচপত্রং (ক্লী) ভূর্জ্জপত্রং। ইতি শব্দচন্দ্রিকা ॥

কবটী (স্ত্রী) কবাটঃ। ইতি ভরতো দ্বিরূপকোষশ্চ

কবয়ী (স্ত্রী) মৎস্যবিশেষঃ। কয়ী মাচ ইতি ভাষা। তৎপর্য্যায়ঃ। ক্রকচপৃষ্ঠী ২। ইতি ত্রিকাণ্ডশেষঃ ॥ অস্যা গুণাঃ। মধুরত্বং। স্নিগ্ধত্বং। বলকারিত্বং। বায়ুকফনাশিত্বঞ্চ। ইতি রাজবল্লভঃ॥ কিঞ্চিৎপিত্তকরীতি কেচিৎ ॥

কবরং (ত্রি) কেশপাশঃ। ইত্যমরটীকা॥ সংপৃক্তং। খচিতং। ইতি হলায়ুধঃ ॥

কবরঃ (পুং ক্লী) লবণঃ। অম্লঃ। ইতি মেদিনী হেমচন্দ্রশ্চ ॥

কবরকী (স্ত্রী) কারাগারবদ্ধঃ। কয়েদী ইতি ভাষা। ইতি হারাবলী ॥

কবরা (স্ত্রী) খরপুষ্পা। বাবুই ইতি ভাষা। ইতি শব্দচন্দ্রিকা ॥

কবরী (স্ত্রী) কেশবিন্যাসঃ। চুলের খোপা টিকী ইতি ভাষা। তৎপর্য্যায়ঃ। কেশবেশঃ ২ কবরঃ ৩ কেশগর্ভকঃ ৪। ইতি শব্দরত্নাবলী॥ বর্ব্বরা। বাবুই ইতি ভাষা। কারবী। হিঙ্গের পাতা ইতি ভাষা। ইত্যমরো মেদিনী চ ॥

কবলঃ (পুং) গ্রাসঃ। ইত্যমরঃ ॥ মৎস্যবিশেষঃ। বেলে মাচ ইতি ভাষা। ইতি শব্দচন্দ্রিকা ॥

কবলিতঃ (ত্রি) ভুক্তঃ। ইতি জটাধরঃ ॥

কবসঃ (পুং) কবচঃ। ইত্যুণাদিকোষঃ ॥

কবাটঃ (ত্রি) কপাটঃ। ইত্যমরটীকায়াং বাচস্পতিঃ ॥

কবাটবক্রং (ক্লী) বৃক্ষবিশেষঃ। কবাটবেটু ইতি ভাষা। কবাডবেণ্টুয়া ইতি কেচিৎ॥ তৎপর্য্যায়ঃ। বক্রাগ্রং ২ কপোতবক্রং ৩ অশ্রজিৎ ৪। ইতি রত্নমালা ॥

কবাটী (স্ত্রী) কপাটং। ইত্যমরটীকায়াং ভরতঃ ॥

কবারং (ক্লী) পদ্মং। ইতি ত্রিকাণ্ডশেষঃ ॥

কবিঃ (পুং) ব্রহ্মা। ইতি হেমচন্দ্রঃ ॥ বাল্মীকিমুনিঃ। শুক্রাচার্য্যঃ। সূর্য্যঃ। কাব্যকরঃ। খলীনে স্ত্রী। ইতি মেদিনী ॥ কল্কিদেবস্য জ্যেষ্ঠভ্রাতা। যথা। কল্কের্জ্যেষ্ঠাস্ত্রয়ঃ শূরাঃ কবিপ্রাজ্ঞসুমন্ত্রকাঃ। তাতমাতৃপ্রিয়করা গুরুবিপ্রপ্রতিষ্ঠিতাঃ ॥

ইতি কল্কিপুরাণে ২ অধ্যায়ঃ ॥ * ॥ অপি চ। বিশাখযূপভূপালঃ প্রায়াৎ সাধুজনপ্রিয়ঃ। কল্কিং দ্রষ্টুং হরেরংশমাবির্ভূতঞ্চ সম্ভলে॥ কবিং প্রাজ্ঞং সুমন্ত্রঞ্চ পুরস্কৃত্য মহাপ্রভং। গার্গ্যভাগ্যবিশালৈশ্চ জ্ঞাতিভিঃ পরিবারিতং ॥ বিশাখযূপো দদৃশে চন্দ্রং তারাগণৈরিব। ইতি তত্রৈব ৩ অধ্যায়ঃ ॥ *॥ চৌরযোদ্ধা। যথা। বেধস্থানে রণে ভঙ্গো দুর্গে খণ্ডিঃ প্রজায়তে। কবিপ্রেবশনং তত্র যোধাঘাতশ্চ তত্র বৈ॥ ইতি সর্ব্বতোভদ্রচক্রে জ্যোতিস্তত্ত্বং ॥

কবিঃ (ত্রি) পণ্ডিতঃ। ইত্যমরঃ ॥

কবিঃ (স্ত্রী) খলীনঃ। লাগাম্ ইতি ভাষা। ইতি মেদিনী ॥

কবিকং (ক্লী) খলীনঃ। ইতি হলায়ুধঃ ॥

কবিকা (স্ত্রী) খলীনঃ। লাগাম্ ইতি ভাষা। ইত্যমরঃ ॥ কেবিকাপুষ্পং। ইতি রাজনির্ঘণ্টঃ ॥ কবয়ী মৎস্যঃ। ইতি ভাবপ্রকাশঃ ॥

কবিজ্যেষ্ঠঃ (পুং) বাল্মীকিমুনিঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

কবিতা (স্ত্রী) কবিত্বং। কাব্যং। যথা। কবিতা বনিতা বাপি আয়াতা সুখদায়িনী ইত্যুদ্ভটঃ ॥

কবিবেদী [ন্] (ত্রি) কবিঃ। ইতি জটাধরঃ ॥

কবিয়ং (ক্লী পুং) খলীনঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কবিরামায়ণঃ (পুং) বাল্মীকিমুনিঃ। ইতি শব্দরত্নাবলী ॥

কবিলাসিকা (স্ত্রী) বীণাবিশেষঃ। ইতি শব্দরত্নাবলী ॥

কবিবাল্মীকিঃ (পুং) বাল্মীকিমুনিঃ। ইতি শব্দরত্নাবলী ॥

কবী (স্ত্রী) খলীনঃ। ইতি মেদিনী ভরতশ্চ ॥

কবীয়ং (ক্লী) খলীনঃ। ইতি জটাধরঃ ॥

কবেলং (ক্লী) কুবলয়ং। উৎপলং। ইতি শব্দচন্দ্রিকা ॥

কবোষ্ণং (ক্লী) ঈষদুষ্ণং। তদ্বতি ত্রি। ইত্যমরঃ ॥

কব্যং (ক্লী) পিত্রন্নং। পিতৃসম্প্রদানকান্নং। ইত্যমরঃ ॥

কব্যবালঃ (পুং) পিতৃগণবিশেষঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

কশ শব্দে। ইতি কবিকল্পদ্রুমঃ ॥ কশতি। ইতি দুর্গাদাসঃ ॥

কশা (স্ত্রী) অশ্বাদেস্তাড়নী। কোড়া চাবুক্ ইতি চ ভাষা। ইত্যমরঃ ॥ মাংসরোহিণী। ইতি ভাবপ্রকাশঃ ॥

কশার্হঃ (ত্রি) কশাঘাতযোগ্যঃ। কোড়া মারিবার উপযুক্ত ইতি ভাষা। তৎপর্য্যায়ঃ। কশ্যঃ ২। ইত্যমরঃ ॥

কশিপুঃ (পুং) ভক্তং। আচ্ছাদনং। একোক্ত্যান্নবস্ত্রে কশিপূ ইতি দ্বিবচনান্তং। ইতি মেদিনী ॥

কশেরু (ক্লী পুং) পৃষ্ঠাস্থি। পিঠের দাঁড়া ইতি ভাষা। ইতি হলায়ুধঃ ॥

কশেরু (ক্লী) কশেরুকা। কেশুর ইতি ভাষা। ইতি রত্নমালা ॥ রাজনির্ঘণ্টে দন্ত্যসকারবান্ পুংলিঙ্গোঽপ্যয়ং শব্দঃ ॥

কশেরুঃ (পুং) জম্বুদ্বীপস্য খণ্ডবিশেষঃ। ইতি শব্দমালা ॥

কশেরুকং (ক্লী) তৃণকন্দঃ। কেশুর ইতি ভাষা। অস্য গুণাঃ। গুরুত্বং। বিষ্টম্ভকারিত্বং। শীতলত্বঞ্চ। ইতি রাজবল্লভঃ॥

কশেরুকা (স্ত্রী) পৃষ্ঠাস্থি। পিঠের দাঁড়া ইতি ভাষা। ইত্যমরঃ॥ কশেরু। কেশুর ইতি ভাষা। ইতি রত্নমালা॥

কশেরুঃ (স্ত্রী) তৃণকন্দঃ। কেশুর ইতি ভাষা। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ॥

কশ্চন ব্য কশ্চিৎ। কোন। কেহ ইতি চ ভাষা। ইতি ব্যাকরণং॥

কশ্চিৎ ব্য কশ্চন। ইতি ব্যাকরণং॥

কশ্মলং (ক্লী) মূর্চ্ছা। ইত্যমরঃ॥ পাপং। ইতি শব্দমালা॥ মলিনে ত্রি। ইতি হেমচন্দ্রঃ॥

কশ্মীরঃ (পুং) কাশ্মীরদেশঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কশ্মীরজন্মা [ন্] (পুং) কাশ্মীরজন্মা। কুঙ্কুমং। ইত্যমরটীকায়াং রায়মুকুটঃ॥

কশ্যং (ক্লী) অশ্বমধ্যভাগঃ। মদ্যং। যথা। ব্রহ্মণস্তনয়ো যোঽভূৎ মরীচিরিতি বিশ্রুতঃ। কশ্যপস্তস্য পুত্ত্রোঽভূৎ কশ্যপানাৎ স কশ্যপঃ॥ ইতি মার্কণ্ডেয়পুরাণে বিশ্বকর্ম্মকৃতসূর্য্যস্তবাধ্যায়ঃ॥ কশার্হে ত্রি। ইত্যমরঃ॥

কশ্যপঃ (পুং) মুনিভেদঃ। কলাগর্ভজো মরীচিমুনেরৌরসঃ পুত্ত্রঃ। তস্য ভার্য্যা দক্ষস্য দপ্তদশকন্যাঃ। তাসাং তৎপুত্ত্রাণাঞ্চ নামানি যথা। অদিতের্দেবাঃ ১ দিতের্দৈত্যাঃ ২ দনোর্দানবাঃ ৩ কাষ্ঠায়া অশ্বাদয়ঃ ৪ অরিষ্টায়া গন্ধর্ব্বাঃ ৫ সুরসায়া রাক্ষসাঃ ৬ ইলায়া বৃক্ষাঃ ৭ মুনেরপ্সরোগণাঃ ৮ ক্রোধবশায়াঃ সর্পাঃ ৯ তাম্রায়াঃ শ্যেনগৃধ্রাদয়ঃ ১০ সুরভের্গোমহিষাঃ ১১ সরমায়াঃ শ্বাপদাঃ ১২ তিমের্যাদোগণাঃ ১৩ বিনতায়া গরুড়ারুণৌ ১৪ কদ্রোর্নাগাঃ ১৫ পতঙ্গ্যাঃ পতঙ্গাঃ ১৬ যামিন্যাঃ শলভাঃ ১৭। ইতি শ্রীভাগবতং॥ *॥ মৃগবিশেষঃ। ইতি মেদিনী॥ মৎস্যভেদঃ। ইতি বিশ্বঃ॥

কশ্যপনন্দনঃ (পুং) গরুড়ঃ। ইতি হলায়ুধঃ॥

কষ বধে। ইতি কবিকল্পদ্রুমঃ॥ কষতি। অয়মুভয়পদীতি চতুর্ভুজজুমরৌ॥ রমানাথরামৌ তু ইমং পরস্মৈপদিনং মত্বা উভয়পদিনং তালব্যান্তং অন্যং মন্যেতে। ইতি দুর্গাদাসঃ॥

কষঃ (পুং) কষপট্টিকা। কষ্টিপাতর ইতি ভাষা। তৎপর্য্যায়ঃ। শানঃ ২ নিকষঃ ৩। ইত্যমরঃ॥

কষণঃ (ত্রি) অপক্বঃ। ইতি শব্দচন্দ্রিকা॥

কষা (স্ত্রী) কশা। চাবুক্ ইতি ভাষা। ইত্যমরটীকায়াং রমানাথঃ॥

কষাকুঃ (পুং) সূর্য্যঃ। অগ্নিঃ। ইত্যুণাদিকোষঃ॥

কষায়ঃ (পুং ক্লী) রসবিশেষঃ। কষা ইতি ভাষা। পৃথিব্যনিলগুণবাহুল্যাত্তস্যোৎপত্তিঃ। ইতি শিবদাসঃ॥ তৎপর্য্যায়ঃ। তুবরঃ ২ তদ্যুক্তে ত্রি। ইত্যমরঃ॥ কুবরঃ ৩ তুবরঃ ৪। ইতি তট্টীকা॥ অস্য গুণাঃ। ব্রণাদিরোপণত্বং। গ্রাহিত্বং। শোষণত্বং। বায়ুকোপকারিত্বঞ্চ। অতিযুক্তস্য তস্য গুণঃ। মলমূত্রগ্রহাধ্মানহৃৎ-

পীড়াক্ষেপণাদিরোগকারিত্বং। অন্যচ্চ। কষায়ঃ শোষণঃ স্তম্ভী ব্রণপাকার্ত্তিনাশনঃ। কফশোণিতবাতঘ্নো রূক্ষঃ শীতো গুরুস্তথা॥ ইতি রাজবল্লভঃ॥ অপিচ। কষায়নামা নিরুণদ্ধি শোফং বর্ণন্তনোর্দীপনপাচনশ্চ। সন্তাপহোঽসৌ শিথিলত্বকারী নিষেবিতঃ পাণ্ডু করোতি মাত্রং॥ ইতি রাজনির্ঘণ্টঃ॥ *॥ পাচনাদিঃ। তস্য পূর্ণবীর্য্যং যামমেকং তিষ্ঠতি। তৎপর্য্যায়ঃ। ক্বাথঃ ২ নির্য্যূহঃ ৩। স তু পঞ্চবিধো যথা। স্বরসঃ ১ কল্কঃ ২ ক্বথিতঃ ৩ শীতঃ ৪ ফাণ্টং ৫। ইতি বৈদ্যকপরিভাষা॥ *॥ নির্যাসঃ। বিলেপনং। অঙ্গরাগঃ। ইতি মেদিনী॥ লয়বিক্ষেপাভাবেঽপি চিত্তস্য রাগাদিবাসনয়া স্তব্ধীভাবাদখণ্ডবস্ত্বনবলম্বনং। ইতি বেদান্তসারঃ॥

কষায়ঃ (পুং) শ্যোনাকবৃক্ষঃ। ইতি ধরণী॥ রাগঃ। ইত্যমরটীকায়াং স্বামী॥ কলিযুগং। ইত্যমরটীকাসারসুন্দরী॥ লয়বিক্ষেপাভাবেঽপি চিত্তবৃত্তে রাগাদিবাসনয়া স্তব্ধীভাবাৎ অখণ্ডবস্ত্বনবলম্বনং। ইতি বেদান্তসারঃ॥

কষায়ঃ (ত্রি) সুরভিঃ। লোহিতঃ। ইতি মেদিনী॥ রক্তপীতমিশ্রিতবর্ণঃ। ইত্যমরটীকায়াং স্বামী॥ ধববৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কষায়কৃৎ (পুং) রক্তলোধ্রঃ। ইতি জটাধরঃ॥

কষায়যাবনালঃ (পুং) তুবরযাবনালধান্যং। ইতি রাজনির্ঘণ্টঃ॥

কষায়া (স্ত্রী) ক্ষুদ্রদুরালভা। ইতি রাজনির্ঘণ্টঃ॥

কষায়িতঃ (ত্রি) কৃতলোহিতঃ। কষায়ো জাতোঽস্যেত্যর্থে ইতপ্রত্যয়ঃ॥

কষায়ী [ন্] (পুং) শালবৃক্ষঃ। ইতি জটাধরঃ॥ লকুচবৃক্ষঃ। খর্জ্জুরীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কষিঃ (ত্রি) হিংসকঃ। ইত্যুণাদিকোষঃ॥

কষিকা (স্ত্রী) পক্ষিজাতিঃ। ইত্যুণাদিকোষঃ॥

কষীকা (স্ত্রী) পক্ষিজাতিঃ। যথা। কষীকা পক্ষিজাতৌ স্যাৎ দূষিকা নেত্রয়োর্ম্মলে। ইত্যুণাদিকোষঃ॥

কষেরুকা (স্ত্রী) কশেরুকা। পৃষ্ঠাস্থি। ইত্যমরটীকায়াং রায়মুকুটঃ॥

কষ্টং (ক্লী) পীড়ামাত্রং। তৎপর্য্যায়ঃ। পীড়া ২ বাধা ৩ ব্যথা ৪ দুঃখং ৫ অমানস্যং ৬ প্রসূতিজং ৭ কৃচ্ছ্রং ৮ আভীলং ৯। ইত্যমরঃ॥ আবাধা ১০ বেদনা ১১ দুখং ১২ আমানস্যং ১৩। ইতি তট্টীকায়াং ভরতঃ॥ কলাকলং ১৪। ইতি বাচস্পতিঃ॥ অর্ত্তিঃ ১৫ আর্ত্তিঃ ১৬ পীড়নং ১৭ বাধনং ১৮ আমনস্যং ১৯ বিবাধনং ২০ বিহেঠনং ২১ বিধানকং ২২ পীড়িতং ২৩। ইতি শব্দরত্নাবলী॥ ক্বাথঃ ২৪ অশর্ম্ম ২৫। ইতি জটাধরঃ॥

কষ্টঃ (ত্রি) পীড়াযুক্তঃ। গহনঃ। ইত্যমরমেদিনীকরৌ॥

কষ্টকারকঃ (পুং) সংসারঃ। ইতি ত্রিকাণ্ডশেষঃ॥ পীড়াকরে ত্রি॥

কষ্টস্থানং (ক্লী) দুঃখজনকস্থানং। ইতি হারাবলী॥

কস ক্ষ গতৌ। ইতি কবিকল্পদ্রুমঃ॥ ক্ষ কাসঃ কসঃ। বিপূর্ব্বোঽয়ং প্রফুল্লীভাবে। তথা চ। প্রফুল্লোৎফুল্লসংফুল্লব্যাকোষবিকচস্ফুটাঃ। ফুল্লশ্চৈতে বিকসিতে ইত্যমরঃ॥ বিকসতি পঙ্কজকলিকা। ইতি দুর্গাদাসঃ॥

কস ই ল ঙ ধ্বংসে। গতৌ। ইতি কবিকল্পদ্রুমঃ॥ শাতে চ। ই কংস্যতে। ল ঙ কংস্তে হরিঃ কংসং। চকারাৎ গতৌ চ। শাত ইহ ধ্বংসনা। ইতি দুর্গাদাসঃ॥

কস ল ঙ ধ্বংসে। গতৌ। ইতি কবিকল্পদ্রুমঃ॥ শাতে চ। ল ঙ কস্তে হরিঃ কংসং। চকারাৎ গতৌ চ। শাত ইহ ধ্বংসনা। ইতি দুর্গাদাসঃ॥

কসঃ (পুং) কষঃ। কষ্টিপাতর ইতি ভাষা। ইত্যমরটীকায়াং ভরতঃ॥ পূর্ব্বোক্তধাত্বর্থোঽপ্যত্র॥

কসনোৎপাটনঃ (পুং) বাসকবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥

কসিপুঃ (পুং) কশিপুঃ। অন্নং। ইতি জটাধরঃ॥

কসেরুঃ (পুং) কশেরুঃ। কেশুর ইতি ভাষা। তৎপর্য্যায়ঃ। গুণ্ডকন্দঃ ২ ক্ষুদ্রমুস্তা ৩ কসেরুকা ৪ শূকরেষ্টঃ ৫ সুগন্ধিঃ ৬ সুকন্দঃ ৭ কসেরুকঃ ৮। অস্য গুণাঃ। কষায়ত্বং। অল্পমধুরত্বং। অতিকটুত্বং। রক্তপিত্তপ্রশমনত্বং। শীতত্বং। দাহশ্রমাপহত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

কসেরুকা (স্ত্রী) কসেরুঃ। পৃষ্ঠাস্থি। ইতি রাজনির্ঘণ্টঃ॥

কস্তীরং (ক্লী) রঙ্গং। ইতি হেমচন্দ্রঃ॥

কস্তুরিকা (স্ত্রী) কস্তূরী। ইতি ভূরিপ্রয়োগঃ॥

কস্তূরিকা (স্ত্রী) কস্তূরী। ইতি রত্নমালা॥

কস্তূরী (স্ত্রী) মৃগস্য নাভৌ জাতসুগন্ধিদ্রব্যং। তৎপর্য্যায়ঃ। মৃগনাভিঃ ২ মৃগমদঃ ৩। ইত্যমরঃ॥ মৃগঃ ৪ মৃগী ৫ নাভিঃ ৬ মদঃ ৭। ইতি ভরতঃ॥ বাতামোদঃ ৮ যোজনগন্ধিকা ৯। ইতি রভসঃ॥ মদনী ১০ গন্ধকেলিকা ১১ বেধমুখ্যা ১২ মার্জারী ১৩ সুভগা ১৪ বহুগন্ধদা ১৫ সহস্রবেধী ১৬ শ্যামা ১৭ কামান্ধা ১৮ মৃগাণ্ডজা ১৯ কুরঙ্গনাভিঃ ২০ ললিতা ২১ শ্যামলা ২২ মোদিনী ২৩ কস্তূরিকা ২৪ কস্তুরিকা ২৫ নাভী ২৬ লতা ২৭ যোজনগন্ধা ২৮ মার্গঃ ২৯ গন্ধবোধিকা ৩০ কালাঙ্গী ৩১ ধূপসঞ্চারী ৩২ মিশ্রা ৩৩ গন্ধপিশাচিকা ৩৪ ইতি শব্দরত্নাবলী॥ অস্যা গুণাঃ। সুরভিত্বং। তিক্তত্বং। চক্ষুর্হিতত্বং। মুখরোগকিলাসকফদৌর্গন্ধ্যবন্ধালক্ষ্মীমলাপহত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ রক্তপিত্তচ্ছর্দ্দিনাশিত্বং। ইতি রাজবল্লভঃ॥ তদ্ভেদাঃ খরিকা ১ তিলকা ২ কুলত্থা ৩ পিণ্ডা ৪ নায়িকা ৫। অপিচ। কপিলা পিঙ্গলা কৃষ্ণা কস্তূরী ত্রিবিধা ক্রমাৎ। নেপালেঽপি চ কাশ্মীরে কামরূপেঽপি জায়তে॥ কামরূপোদ্ভবা শ্রেষ্ঠা নৈপালী মধ্যমা ভবেৎ। কাশ্মীরদেশসম্ভূতা কস্তূরী হ্যধমা স্মৃতা॥ ইতি রাজনির্ঘণ্টঃ॥

কস্তূরীমল্লিকা (স্ত্রী) মৃগমদবাসা। ইতি রাজনির্ঘণ্টঃ

কশ্মলং (ক্লী) কশ্মলং। মোহঃ। ইত্যমরটীকায়াং রায়মুকুটঃ ॥

কহ্লারং (ক্লী) শ্বেতোৎপলং। সুঁদি ইতি ভাষা। তৎপর্য্যায়ঃ। সৌগন্ধিকং ২। ইত্যমরঃ ॥ তৎপুষ্পগুণাঃ। কষায়ত্বং। মধুরত্বং। শীতত্বং। পিত্তকফরক্তনাশিত্বঞ্চ। ইতি রাজবল্লভঃ ॥

কহ্বঃ (পুং) বকপক্ষী। ইত্যমরঃ ॥

কক্ষঃ (পুং) বাহুমূলং। কাঁক্ বগল্ ইতি চ ভাষা। তৃণং। বীরুৎ। ইত্যমরঃ ॥ শুষ্কতৃণং। ইতি ধরণী ॥ কচ্ছঃ। শুষ্কবনং। পাপং। ইতি হেমচন্দ্রঃ ॥ অরণ্যং। ইতি রুদ্রঃ ॥ ভিত্তিঃ। পার্শ্বঃ। ইতি ভরতধৃতাজয়ঃ ॥

কক্ষরুহা (স্ত্রী) নাগরমুস্তা। ইতি রাজনির্ঘণ্টঃ ॥

কক্ষা (স্ত্রী) হস্তিরজ্জুঃ। কাঞ্চী। গেহপ্রকোষ্ঠকঃ। ভিত্তিঃ। সাম্যং। রথভাগঃ। অন্তরীয়পশ্চিমাঞ্চলং। পরিধানবস্ত্রস্য পৃষ্ঠতো নিহিতাঞ্চলং। উদ্‌গ্রাহিণী। ইতি হেমচন্দ্রঃ ॥ স্পর্দ্ধাপদং। ইতি মেদিনী রুদ্রশ্চ ॥ কক্ষ্যা। হস্তিমধ্যদেশবন্ধনরজ্জুঃ। ইত্যমরটীকায়াং ভরতঃ ॥ ক্ষুদ্ররোগবিশেষঃ। তস্য লক্ষণং যথা। বাহুপার্শ্বাংসকক্ষেষু কৃষ্ণস্ফোটাং সবেদনাং। পিত্তপ্রকোপসম্ভূতাং কক্ষামিত্যভিনির্দ্দিশেৎ ॥ ইতি মাধবকরঃ ॥ তচ্চিকিৎসা যথা। কক্ষাঞ্চ গন্ধনাম্নীঞ্চ চিকিৎসতি চিকিৎসকঃ। পৈত্তিকস্য বিসর্পস্য ক্রিয়য়া পূর্ব্বমুক্তয়া ॥ ইতি ভাবপ্রকাশঃ ॥

কক্ষাপটঃ (পুং) কৌপীনং। ইতি হলায়ুধঃ ॥

কক্ষাবান্ [ৎ] (পুং) মুনিবিশেষঃ। ইতি হেমচন্দ্রঃ ॥

কক্ষাবেক্ষকঃ (পুং) শুদ্ধান্তপালঃ। উদ্যানপালঃ। রঙ্গাজীবঃ। কবিঃ। ষিড়্গঃ। দ্বাঃস্থঃ। ইতি মেদিনী ॥

কক্ষোত্থা (স্ত্রী) ভদ্রমুস্তা। ইতি রাজনির্ঘণ্টঃ ॥

কক্ষ্যং (ক্লী) এষণিকাস্থকটোরা। নিক্তির বাটী ইতি ভাষা। ইতি মিতাক্ষরা ॥

কক্ষ্যা (স্ত্রী) কক্ষরজ্জুঃ। কাছদড়ী ইতি খ্যাতা। চর্ম্মরজ্জুঃ। ইত্যন্যে। ইতি ভরতঃ ॥ গজমধ্যবন্ধনচর্ম্মরজ্জুঃ। ইতি সারসুন্দরী ॥ তৎপর্য্যায়ঃ। চূষা ২ বরত্রা ৩। ইত্যমরঃ ॥ বূষা ৪ দূষ্যা ৫ দূষ্যা ৬ কক্ষা ৭। ইতি তট্টীকা ॥ হর্ম্ম্যাদিপ্রকোষ্ঠঃ। রাজগৃহাদের্বেষ্টনাবচ্ছিন্নো দেশঃ। কাঞ্চী। ইত্যমরঃ ॥ অন্তর্গৃহমিতি সুভূতিঃ ॥ সাদৃশ্যং। উদ্‌যোগঃ। বৃহতিকা। উত্তরীয়বস্ত্রং। ইতি হেমচন্দ্রঃ ॥ গুঞ্জা। ইতি শব্দরত্নাবলী ॥

কাংসীয়ং (ক্লী) কাংস্যং। ইতি রাজনির্ঘণ্টঃ ॥

কাংস্যং (ক্লী) তাম্রবঙ্গমিশ্রিতধাতুঃ। কাঁসা ইতি ভাষা। তৎপর্য্যায়ঃ। কংসং ২ কংসাস্থি ৩ তাম্রার্দ্ধং ৪। ইতি ত্রিকাণ্ডশেষঃ ॥ সৌরাষ্ট্রকং ৫ ঘোষং ৬ কাংসীয়ং ৭ বহ্নিলোহকং ৮ দীপ্তিলোহং ৯ ঘোরঘুষ্যং ১০ দীপ্তিকাংস্যং ১১ কাস্যং ১২। অস্য গুণাঃ। তিক্তত্বং। উষ্ণত্বং। চক্ষুর্হিতকারিত্বং। বাতকফবিকারনাশিত্বং। রূক্ষত্বং। কষায়ত্বং।

রুচিকারিত্বং। লঘুত্বং। দীপনত্বং। পাচনত্বং। পথ্যত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ অম্লরসত্বং। বিশদত্বং। লেখনত্বং। সারকত্বং। পিত্তনাশিত্বং। ইতি রাজবল্লভঃ॥ দৃঢ়দেহায়ুর্ব্বৃদ্ধিকারিত্বং। ইতি সুখবোধঃ॥ তৎশোধনমারণমাহ। অনেনৈব বিধানেন কাংস্যং বিড়্গন্ধলেপিতং। মারয়েদ্‌বুদ্ধিমান্ বৈদ্যো মৃতং ভবতি চূর্ণবৎ॥ অন্যচ্চ। দ্বিক্ষারং পঞ্চলবণং সপ্তধাম্লেন ভাবয়েৎ। কাংস্যারকূটপত্রাণি তেন কল্কেন লেপয়েৎ। বদ্ধা গজপুটে পচ্যাচ্ছুদ্ধিমায়াতি নান্যথা॥ অন্যচ্চ। তাম্রবচ্ছোধনং কৃত্বা তাম্রবন্মারয়েদ্‌বুধঃ॥ অন্যচ্চ। কজ্জলীং তৎসমাং দত্ত্বা মর্দ্দয়েন্নিম্বুকদ্রবৈঃ। এবং পুটত্রয়েণৈব নিরুত্থং ভস্ম জায়তে॥ ইতি সুখবোধঃ॥

কাংস্যকারঃ (পুং) কংসকারঃ। কাঁসারি ইতি ভাষা। ইতি জটাধরঃ॥

কাংস্যনীলঃ (পুং) অঞ্জনভেদঃ। নীলতুত্থং। তৎপর্য্যায়ঃ। মূষাতুত্থং ২ হেমতারং ৩ বিতুন্নকং ৪। ইতি হেমচন্দ্রঃ॥

কাকং (ক্লী) সুরতবন্ধঃ। কাকসমূহঃ। ইতি মেদিনী॥

কাকঃ (পুং) স্বনামখ্যাতপক্ষিবিশেষঃ। কাগ্ ইতি ভাষা। তৎপর্য্যায়ঃ। করটঃ ২ অরিষ্টঃ ৩ বলিপুষ্টঃ ৪ সকৃৎপ্রজঃ ৫ ধ্বাঙ্ক্ষঃ ৬ আত্মঘোষঃ ৭ পরভৃৎ ৮ বলিভুক্ ৯ বায়সঃ ১০। ইত্যমরঃ॥ বাতজবঃ ১১ বলঃ ১২ দীর্ঘায়ুঃ ১৩ সূচকঃ ১৪ কৃষ্ণঃ ১৫ গ্রামীণঃ ১৬ পিশুনঃ ১৭ কটখাদকঃ ১৮ দ্বিকঃ ১৯ কাগঃ ২০। ইতি জটাধরঃ॥ কাণঃ ২১ ধূলিজঙ্ঘঃ ২২ নিমিত্তকৃৎ ২৩ কৌশিকারিঃ ২৪ চিরায়ুঃ ২৫ মুখরঃ ২৬ খরঃ ২৭ মহালোলঃ ২৮ চিরঞ্জীবী ২৯ চলাচলঃ ৩০ করটকঃ ৩১ নাগবীরকঃ ৩২ গূঢ়মৈথুনঃ ৩৩ লুণ্টাকঃ ৩৪ শ্রাবকঃ ৩৫ রতজ্বরঃ ৩৬। ইতি শব্দরত্নাবলী॥ * ॥ অস্য শাকুনং কাকচরিত্রং। তদ্যথা। অথোচ্যতে কাকরুতং রুতানাং মূর্দ্ধ্নি স্থিতং শাকুনভাষিতানাং। অচিন্তিতাবেদিতকার্য্যসিদ্ধিং পূর্ব্বাদিকাষ্ঠাপ্রহরক্রমেণ॥ যে ব্রাহ্মণক্ষত্রিয়বৈশ্যশূদ্রাঃ কাকা ভবন্ত্যন্ত্যজপঞ্চমাস্তে। বর্ণাকৃতিভ্যাং ঋষিভাষিতাভ্যাং সদাভিযুক্তৈরুপলক্ষণীয়াঃ॥ বৃহৎপ্রমাণো গুরুদীর্ঘতুণ্ডো দৃঢ়স্বরঃ কৃষ্ণবপুঃ স বিপ্রঃ। পিঙ্গাক্ষনীলাক্ষবিমিশ্রবর্ণঃ স্যাৎ ক্ষত্রিয়স্তীক্ষ্ণরবোঽতিশূরঃ॥ যঃ পাণ্ডুনীলঃ সিতনীলচঞ্চুর্নাত্যর্থরূঢ়ো রটিতশ্চ বৈশ্যঃ। ভস্মচ্ছবির্ভৈরিককারশব্দঃ শূদ্রঃ কৃশাঙ্গশ্চপলো নিরূক্ষঃ॥ বিরূক্ষসূক্ষ্মাস্যতনুর্ব্বিশঙ্কো যঃ কন্দরাদীপ্তনবং বিভর্ত্তি। স্থিরারবঃ স্থৈর্য্যসমেতবুদ্ধিঃ কাকোঽন্ত্যজাতিঃ খলু পঞ্চমোঽত্র॥ দ্রোণাভিধঃ কৃষ্ণবপুর্দ্বিজো যো গ্রাহ্যঃ স কাকঃ খলু মুখ্যবৃত্ত্যা। তস্মাদৃতে শ্যামগলো নিরীক্ষ্যঃ শ্বেতশ্চ নিন্দ্যোঽদ্ভুতদর্শনোঽসৌ॥ বিপ্রঃ স্ফুটে জল্পতি পৃচ্ছ্যমানে ন্যূনং ততঃ ক্ষত্রিয়জাতিরাহুঃ। আখ্যাতি বৈশ্যস্ত্বধিবাসনৈন ব্রবীতি শূদ্রো বলিদানলোভাৎ॥ প্রশ্নং কৃতং জল্পতি

কৃষ্ণবর্ণঃ সদা সমস্তং বিহগোঽন্ত্যজাতিঃ। সদ্যস্ত্রিসপ্তাহদশাহপক্ষৈঃ পঞ্চাপি কাকাঃ ফলদাঃ ক্রমেণ ॥ শান্তে প্রদীপ্তে চ রটন্ বিহঙ্গঃ শুভপ্রদো দীপ্তপরাঙ্মুখঃ সন্। ন কাপি রৌদ্রো রটিতঃ প্রশস্তঃ সর্ব্বত্র শস্তো মধুরশ্চ রক্তঃ ॥ দীপ্তস্থিতো যঃ পরুষস্বরেণ বিরৌতি দীপ্তাভিমুখঃ স কার্য্যং। নিষ্পাদ্য নির্নাশয়তে চ সম্যগ্দীপ্তোন্মুখঃ শান্তরবো হি সিদ্ধ্যৈ ॥ শান্তপ্রদীপ্তাভিমুখো বিধায় শব্দং প্রবিশ্যাথ পুনঃ প্রদীপ্তং। যো রৌতি কাকো মধুরস্বরেণ হত্বা বিরুদ্ধং স দদাতি সিদ্ধিং ॥ বিধায় দীপ্তাভিমুখো বিরাবং ততঃ প্রশান্তাভিমুখো বিরৌতি। যো বায়সোঽসৌ বিনিহন্ত্যসম্যক্ কার্য্যাণি সর্ব্বাণি পুনঃ করোতি ॥ সূর্য্যোদয়ে পূর্ব্বদিশি প্রশস্তস্থানে স্থিতো যোঽভিমুখং বিরৌতি। নাশং রিপোশ্চিন্তিতকার্য্যসিদ্ধিং স্ত্রীরত্নলাভং স করোতি কাকঃ ॥ ধ্বাঙ্ক্ষঃ প্রভাতে যদি বহ্নিভাগে বিরৌতি তিষ্ঠন্ রমণীয়দেশে। শত্রূন্ প্রণশ্যত্যচিরাদ্বিশঙ্কঃ প্রয়াতি যোষিৎ সমবাপ্যতে তৎ ॥ রুবন্ প্রভাতে দিশি দক্ষিণস্যাং কাকঃ সমাবেদয়তেঽতিদুঃখং। রোগার্ত্তিমৃত্যুং পরুষস্বরেণ রম্যেণ চেষ্টাগমযোষিদাপ্তিং ॥ নৈঋর্ত্যভাগে যদি চ প্রভাতে করোতি কাকঃ সহসা বিরাবং। ক্রূরং ততঃ কর্ম্ম সমভ্যুপৈতি দূতাগমো মধ্যমিকা চ সিদ্ধিঃ ॥ প্রাতঃ প্রতীচ্যাং যদি রৌতি কাকো ধ্রুবং তদা বর্ষতি বারিবাহঃ। স্ত্রীবস্ত্রভূভৃৎপুরুষাগমশ্চ কলিঃ কলত্রেণ সমং তদা স্যাৎ ॥ ধ্বাঙ্ক্ষস্য শব্দে পবনালয়স্থে বস্ত্রান্নযানাভিমতাগমাঃ স্যুঃ। পান্থাগমঃ প্রাক্তনবৃত্তিনাশঃ স্যাদন্যদেশে গমনং স্বদেশাৎ ॥ দিশ্যুত্তরস্যাং সুরবঃ প্রভাতে নিরীক্ষমাণো বলিভুগ্নরাণাং। দদাতি দুঃখং ভুজগাচ্চ ভীতিং দরিদ্রতাং নষ্টধনেষ্টলাভং ॥ দিশীশবত্যাং যদি রৌতি কাক আগচ্ছতস্তদ্বনিতান্ত্যজাতী। ব্যাধের্নিমিত্তং প্রিয়বস্ত্রলাভো ভবেত্তদা রোগবলেঽবসানং ॥ ব্রহ্মপ্রদেশে স্থিতবায়সস্য প্রভাতকালে মধুরস্বরেণ। অভীপ্সিতার্থাগমনং ধ্রুবং স্যাৎ স্বামিপ্রসাদো দ্রবিণস্য লাভঃ ॥ ইতি বসন্তরাজে দিক্প্রহরে সূর্য্যোদয়ঃ ॥ * ॥ পূর্ব্বত্র যামে প্রথমে সশব্দঃ কাকো ভবেচ্চিন্তিতকার্য্যসিদ্ধ্যৈ। অভীষ্টলোকাগমনং তথাস্যান্নষ্টার্থলাভো নিয়তং নরাণাং ॥ আগ্নেয়ভাগে যদি চাদ্যযামে স্ত্রীলাভবিদ্বেষিবধৌ ভবেতাং। কৃতান্তভাগে বলিভুগ্বিরাবঃ স্ত্রীলাভসৌখ্যপ্রিয়সঙ্গকারী ॥ নৈঋর্ত্যকোণে প্রিয়যোষিদাপ্তির্মিষ্টাশনং সিধ্যতি চিন্তিতোঽর্থঃ। দিশি প্রতীচ্যাং বিরুতে ভবেতামভ্যর্থনীয়াগমনাম্বুবৃষ্টী ॥ বায়ব্যকোণে করটঃ শুভঃ স্যাৎ নৃপপ্রসাদোঽধ্বগদর্শনং চ। সৌম্যে চ ভীস্তস্করশোকবার্ত্তা সৌম্যা চ বার্ত্তা ধনলাভবার্ত্তাঃ ॥ ঐশানদেশেঽভিমতেন শংসন্ত্রাসো হুতাশাদ্বহুলোকসঙ্গঃ। ব্রহ্মপ্রদেশে সুখকামভোগঃ সম্মানসম্পদ্দ্রবিণাষ্টসিদ্ধিঃ ॥ ইতি প্রথমপ্রহরঃ ॥ * ॥

প্রাচ্যাং দ্বিতীয়ে প্রহরে বিরাবৈঃ কাকস্য কশ্চিৎ পথিকোঽভ্যুপৈতি। চৌরাস্তয়ং ব্যাকুলতা চ বহ্বী জায়েত কাচিন্মহতী চ শঙ্কা॥ হুতাশদেশে নিয়তং কলিস্যাৎ প্রিয়াগমাকর্ণনযোষিদাপ্তিঃ। যাম্যে তু বৃষ্টির্মহতী চ ভীতিঃ প্রিয়স্য চেষ্টস্য সমাগমঃ স্যাৎ॥ রক্ষোদিশি প্রাণভয়ং তদা স্যুঃ স্ত্রীভোজ্যলাভাখিলরুক্প্রণাশাঃ। ভবেৎ প্রতীচ্যাং প্রবলাবলাপ্তির্যোষাগমো বৃদ্ধিকুবর্ষণঞ্চ॥ সমীরভাগে ধ্বজচৌরসঙ্গো দূতাগমস্ত্রীপিশিতান্নলাভঃ। সৌম্যে গণেষ্টাগমনং জয়ঞ্চ রম্যে রবে চৌরভয়ং ত্বরণ্যে॥ মহেশ্বরাশাবিরুতশ্চ কাকশ্চৌরাগ্নিসংত্রাসবিরুদ্ধবার্ত্তাঃ। ব্রবীতি রূক্ষৈরটনৈররূক্ষৈঃ সদার্য্যগুর্ব্বাগমনং জয়ঞ্চ॥ ব্রহ্মপ্রদেশে প্রহরে দ্বিতীয়ে কাকঃ সুশব্দো নৃপতিপ্রসাদং। মিষ্টান্নভোজ্যঞ্চ দদাতি পুংসাং করোত্যসৌ চৌরভয়ং কুশব্দঃ॥ ইতি দ্বিতীয়প্রহরঃ॥ * ॥ ঐন্দ্র্যাং বিরুক্ষঃ প্রহরে তৃতীয়ে বৃদ্ধিং তথা চৌরভয়ং ব্রবীতি। কৃষ্ণস্তু রাজাগমনং জয়ঞ্চ করোতি যাত্রাং শুভকার্য্যসিদ্ধিং॥ অগ্নের্বিভাগেঽগ্নিভয়ং কলিশ্চ বিরুদ্ধবার্ত্তা বিফলা চ যাত্রা। ভবেদ্বিরুদ্ধৈর্ব্বলিভুথিরাবৈর্জয়াদিবার্ত্তা চ ভবেদ্বিশুদ্ধিঃ॥ কাকুভ্যবাচ্যাং কুরুতেঽতিতূর্ণং রোগং তথাপ্তাগমনং বিহঙ্গঃ। ক্ষুদ্রাণি কার্য্যাণি চ যান্তি সিদ্ধিং সর্ব্বাণি তন্মুখ্যতয়া নরাণাং॥ ক্রব্যাদদেশে জলদাগমঃ স্যান্মিষ্টান্নলাভো রিপবো ন সন্তি। শূদ্রাগমঃ স্বামিবিরুদ্ধবার্ত্তা ভবন্তি যাত্রাসু চ কার্য্যনাশঃ॥ স্যাৎ পশ্চিমে নষ্টধনস্য লাভো দূরাধ্বযানং সুহৃদাগমশ্চ। যোষাগমোঽভীষ্টজয়াদিবার্ত্তা যাত্রাসু রম্যে রটিতেঽর্থসিদ্ধিঃ॥ বাতালয়ে দুর্দিনমেব বার্ত্তা চৌরাভিনষ্টার্থসমাগমশ্চ। সন্তোষবার্ত্তা বরযোষিদাপ্তির্যাত্রা রবে স্যান্মধুরে প্রশস্তা॥ যামে তৃতীয়ে বিরুবন্ত্যুদীচ্যাং কার্য্যার্থলাভো নৃপসেবকানাং। ভোজ্যপ্রবৃদ্ধ্যৈ শুভদা চ বার্ত্তা প্রয়াণকং বৈশ্যসমাগমশ্চ॥ দিশ্যন্ধকারেঃ কুরুতে সুশব্দং ভোজ্যং জয়ং হানিকলী কুশব্দং। ব্রহ্মপ্রদেশে তিলতণ্ডুলাভ্যাং ভোজ্যং চ তাম্বূলযুতং দদাতি॥ ইতি তৃতীয়প্রহরঃ॥ * ॥ ঐন্দ্র্যাং তুরীয়প্রহরেঽর্থলাভো ভূমীশপূজাভয়রদ্ধিরোগাঃ। বহ্নের্ব্বিভাগে ভয়রোগমৃত্যুঃ শিষ্টাগমো বায়সরাসিতেন॥ যাম্যে রবে তস্করবৈরিভীতী স্যাতাং বিশিষ্টাগমরোগমৃত্যুঃ। স্যাৎ যাতুধান্যাং মহতী প্রবৃদ্ধিরভীষ্টসিদ্ধিঃ পথি চৌরযুদ্ধং॥ দিশি প্রতীচ্যাং প্রহরে চতুর্থে দ্বিজাতিরভ্যেতি ততোঽর্থলাভঃ। আয়াতি যোষিদ্বিজয়াম্বুবৃষ্টিঃ সিদ্ধিঃ প্রয়াণে নৃপতের্ব্বরশ্চ॥ বায়ব্যভাগে করটস্য শব্দৈরায়াতি যোষিৎ প্রিয়মানিনী যা। ধ্রুবং প্রবাসো দিনসপ্তকেন শীঘ্রাগমঃ স্যাৎ গমনে কৃতে চ॥ ৲রভাগে পথিকোঽভ্যুপৈতি তাম্বূললাভঃ কুশলস্য বার্ত্তা। বৈশ্যাদ্ধনাপ্তিস্তুরগাদিরূঢ়া যাত্রাবিরুদ্ধে ম্রিয়তে চ রোগী॥

স্থাণৌ স্থিতঃ স্যাদ্বলিভুগ্বিরাবৈঃ স্বুবর্ণবার্ত্তা সরুজো বিনাশঃ। ব্রহ্মপ্রদেশে প্রহরে চতুর্থে বার্ত্তা ভবেন্মধ্যমিকা চ সিদ্ধিঃ॥ ইতি চতুর্থপ্রহরঃ ॥ * ॥ যস্তাষিতং শাকুনিকৈর্ব্বিমিশ্রং শুভাশুভং দিক্প্রহরক্রমেণ। তত্রাশুভং যচ্ছতি দীপ্তশব্দঃ শ্রেয়স্করঃ শান্তরবশ্চ কাকঃ ॥ রম্যং রবং দীপ্তদিশি প্রসর্পন্ শান্তাং দিশং ভূরি ফলং দদাতি। তদৈব তুচ্ছং বিতরত্যসৌ বৈ দীপ্তস্থিতঃ পশ্যতি দীপ্তকাষ্ঠাং ॥ যথোপদিষ্টং ফলমত্র তুষ্টং তথৈব তদ্দীপ্তদিশি স্থিতঃ সন্।ধ্বাঙ্ক্ষোঽধিরূঢ়ো বিরুবন্ করোতি নিরীক্ষমাণঃ ককুভং প্রদীপ্তাং ॥ কাকঃ প্রশান্তাভিমুখোঽতিতুচ্ছং দীপ্তাশ্রিতো তুষ্টফলং দদাতি। শাভাশ্রিতঃ শান্তদিগীক্ষণেন রূক্ষারবোঽল্পং কথয়ত্যনিষ্টং ॥ শান্তস্বরঃ শান্তককুপ্প্রদেশে তিষ্ঠন্ প্রদীপ্তাং ককুভঞ্চ পশ্যন্। দদাত্যভীষ্টং ফলমেবমল্পং দীপ্তাং স পশ্যংস্তু তদেব তূর্ণং ॥ আকারচেষ্টারবভাগবিজ্ঞাশ্চত্বারি কাষ্ঠাদিনয়োঃ ক্রমেণ। সদাভিযুক্তাশ্চ নিরূপয়ন্তি যস্মাচ্চ তে কাকরুতং মনুষ্যাঃ॥ ইতি কাকরুতে দিক্চক্রপ্রকরণং ॥ * ॥ বর্ষাকালমধিকৃত্য কিঞ্চন প্রোচ্যতে বলিভুজো যথাক্রমাৎ। আলপাণ্ডকবিচারসুন্দরং শাকুনং সকলশাকুনোত্তমং॥ বৈশাখমাসে নিরুপদ্রবেষু দ্রুমেষু কাকস্য শুভায় নীড়ং। নিন্দ্যেষু শুষ্কেষু সকণ্টকেষু দ্রুমেষু দুর্ভিক্ষপ্রয়ায়হেতুঃ ॥ প্রশস্তবৃক্ষে যদি পূর্ব্বশাখামাশ্রিত্য কাকেন কৃতং কুলায়ং। তদ্বৃষ্টিরিষ্টাশকুনপ্রমোদো নীরোগতা স্যাদ্বিজয়শ্চ রাজ্ঞঃ ॥ আগ্নেয়শাখারচিতে চ নীড়ে স্যাদ্বৃষ্টিরিষ্টাস্তি ভয়ং কলিশ্চ। দুর্ভিক্ষশত্রূদ্ভবদেশভঙ্গো ভবন্তি রোগাশ্চ চতুষ্পদানাং॥ যাম্যাসু শাখাসু চ বায়সেন নীড়ে কৃতেঽল্পং জলপাতমাহুঃ। ব্যাধিপ্রকোপং মরণং সমন্তাদন্নক্ষয়ং শত্রুবিরোধিতাং চ॥ নৈঋর্ত্যশাখারচিতে চ নীড়ে যস্মাচ্ছনৈর্ব্বর্ষতি বর্ষকালে। পীড়া নৃণাং বিধ্বরচৌরভীতিদুর্ভিক্ষযুদ্ধানি ভবন্ত্যবশ্যং ॥ নীড়ে কৃতে পশ্চিমবৃক্ষশাখামাশ্রিত্য কাকৈঃ কথিতা চ বৃষ্টিঃ। নীরোগতাক্ষেমসুভিক্ষবৃদ্ধিসম্পৎপ্রমোদাশ্চ ভবন্তি লোকে॥ বায়ব্যশাখাসু কৃতে চ নীড়ে প্রভূতবাতাল্পজলাশ্চ মেঘাঃ। সুমূর্ষিকোপদ্রবশস্যনাশপক্ষদ্বয়োদ্বেগমহারিরোধাঃ ॥ কৌবেরশাখামধিকৃত্য নীড়ে কৃতে ভবেৎ প্রাবৃষি বৃষ্টিরিষ্টা। ভবন্তি চ ক্ষেমসুভিক্ষসৌখ্যনীরোগতাবৃদ্ধিসমৃদ্ধয়োঽস্মিন্ ॥ ঈশানশাখাসু চ বৃষ্টিরল্পা বৈরং প্রজানামুপসর্গদোষঃ। স্যাদ্বান্ধবানাং কলহপ্রবৃত্তির্ম্মর্য্যাদয়া হীয়ত এষ লোকঃ ॥ বৃক্ষাগ্রনীড়ে ত্বতিবর্ষকালে মধ্যে পুনর্মধ্যমতোয়পাতঃ। তুচ্ছাপি বৃষ্টির্ন প্রবত্যধস্তাৎ স্ফুটং দিশোক্তং ন দিশঃ স্ফুটত্বং॥ অবৃষ্টিরোগাদিভয়াদিবৃদ্ধিং বিদ্যাচ্চ ভূমৌ বলিভুক্কুলায়ে। শুষ্কে চ বৃক্ষে ডমরান্ননাশৌ প্রাকাররন্ধ্রেষু ভয়ং প্রভূতং ॥ নিম্নপ্রদেশে তরুকোটরে বা বল্মীকরন্ধ্রে

ব্রততিষ্বপীহ। কাকস্য নীড়ে রুগবৃষ্টিদোষৈর্ভবন্তি শূন্যা নিয়মেন দেশাঃ॥ ইতি বসন্তরাজে কাকরুতপ্রকরণং ॥ * ॥ অথ কাকাণ্ডবিচারঃ। একং ভবেদ্বারুণমগ্নিসংজ্ঞং দ্বিতীয়কং মারুতকং তৃতীয়ং। ঐন্দ্রং তথা নাম চতুর্থমেবমণ্ডানি কাক্যাঃ পরিকীর্ত্তিতানি॥ কাক্যা ভবেদ্বারুণমণ্ডকং চেৎ পৃথ্বী তদা নন্দতি সর্ব্বশস্যৈঃ। মন্দপ্রবর্ষোঽনলসংজ্ঞকেঽণ্ডে নোপ্তস্য বীজস্য ভবেৎ প্ররোহঃ॥ জাতানি শস্যানি সমীরণেঽণ্ডে খাদন্তি কীটাঃ শলভাঃ শুকাদ্যাঃ। ক্ষেমং সুভিক্ষং সুখিতা ধরিত্রী স্যাদৈন্দ্রজেঽণ্ডেঽভিমতা চ সিদ্ধিঃ॥ ইত্যণ্ডপ্রকরণং ॥ * ॥ যাত্রানিমিত্তানি চ কীর্ত্তয়ামঃ সকৃৎপ্রজানাং শকুনানি তানি। বিজ্ঞায় যানি প্রজহাত্যনর্থানর্থাংশ্চ সর্ব্বান্ কুরুতেঽধ্বনীনঃ॥ ভুঙ্ক্ষে বলিং পক্ষিষু মন্ত্রপূতং ত্বং প্রাণিষু প্রাণিষি বর্ষলক্ষং। গুপ্তেন চ স্ত্রীং ভজসে নমোঽস্তু তুভ্যং খগেন্দ্রায় সকৃৎপ্রজায়॥ বিলোক্য কাকং বিনিবেদ্য তস্মৈ মন্ত্রেণ পূজাং দধিভক্তযুক্তাং। উদীর্য্য কার্য্যং নিজমধ্বগেন বিলোকনীয়ং শকুনং তদর্থং॥ বামেন শব্দং মধুরং বিমুঞ্চন্ ব্রজংস্তুবামেন করোতি কাকঃ। সর্ব্বার্থসিদ্ধিং পুনরাগমঞ্চ শুভপ্রদেশে তু তদন্যরূপঃ॥ প্রদক্ষিণং সংপ্রবিধায় মার্গে বামেন কাকো বিনিবর্ত্ততেঽসৌ। যাতুঃ করোতীহিতকার্য্যসিদ্ধিং ক্ষেমঞ্চ শীঘ্রং পুনরাগমঞ্চ॥ বামে কলং রৌত্যনুলোমযায়ী যো বায়সোঽসৌ সকলার্থসিদ্ধ্যৈ। স্যাতাং ক্রমাদ্দক্ষিণবামশব্দৌ সিদ্ধ্যৈ বিরুদ্ধৌ বিপরীতভূতৌ॥ পৃষ্ঠে বিরাবং মধুরং বিমুঞ্চন্নমুব্রজংশ্চাপি মতো হিতায়। প্রায়েণ যাতারমনুব্রজন্তঃ সর্ব্বেঽপি কাকৈঃ কথিতা বিহঙ্গাঃ॥ কৃত্বা রবং যঃ পুরতঃ প্রয়াতি উপস্থিতো যো মুদমাদধাতি। কণ্ডূয়তে যঃ স্বশিরোঽঙ্ঘ্রিণাসৌ পুংসাং তদাভীষ্টফলং দদাতি॥ স্তম্ভে গজানাং নিয়তং গজাপ্তিং গজেঽধিরূঢ়ঃ পৃথিবীপতিত্বং। তুরঙ্গমে বাহনভূমিলাভং করোতি কাকো বিজয়ং ধ্বজেন॥ প্রণষ্টলাভং বিজয়ং চ কূপে ক্ষিপ্রং নদীরোধসি কার্য্যসিদ্ধিঃ। পূর্ণে ঘটেন্দ্রে চ ধনাপ্তিবৃদ্ধিং ধ্বাঙ্ক্ষোঽধিরূঢ়ঃ কুরুতে সশব্দঃ॥ প্রাসাদধান্যোশ্রয়হর্ম্ম্যপৃষ্ঠনিষ্পন্নশস্যাবনিশাদ্বলাদৌ। ধ্বাঙ্ক্ষোঽধিরূঢ়ো ধনসাধনায় রৌতি শ্রিয়ং যচ্ছতি যুগ্মরাবঃ॥ পৃষ্ঠে পুরো বা যদি গোময়স্থো তথা বটাদ্যেষু তরুষ্বপীহ। স্থিতো রুবন্ ভোজনপানমিষ্টং বিষ্ঠাং চ কুর্ব্বন্ বিতরত্যবশ্যং॥ অন্নাদ্যবিষ্ঠাফলমূলপুষ্পমৎস্যাদিভিঃ পূর্ণমুখঃ সদৈব। সংদৃষ্টমাত্রোঽভিমতার্থসিদ্ধ্যৈ মিষ্টান্নভোজ্যায় সদৈব কাকঃ॥ নারীশিরঃপূর্ণঘটস্থিতস্য কাকস্য শব্দৈর্ব্বনিতাধনাপ্তিঃ॥ শয্যাধিরূঢ়স্য চ তস্য শব্দৈঃ সমাগমঃ স্যাৎ স্বজনেন সার্দ্ধং॥ গোপৃষ্ঠদূর্ব্বাতরুগোময়েষু তৃণানি ঘর্ষন্নবলোকিতাগ্রে। আহারমন্যস্য তথা দদানো দদাতি ভোজ্যং

বলিভুখিচিত্রং ॥ ধান্যং যবং বা দধি বাপি চাজ্যং বিরৌতি পশ্চান্নিধিলাভকারী। করোতি লাভং পুরতঃ স দৃষ্টো যস্যাস্তি বক্ত্রে তৃণমপ্যশুষ্কং ॥ বৃক্ষেষু রম্যাঙ্কুর-পত্রপুষ্পচ্ছায়াফলাঢ্যেষু সকৃৎপ্রজস্য। শব্দেন সিদ্ধ্যন্ত্যসকৃন্নরাণাং সদৈব সর্ব্বাণি সমীহিতানি ॥ প্রশান্তনাদঃ শিখরে তরূণাং স্ত্রীসঙ্গসৌখ্যং করটোঽভিধত্তে। ধান্যাদি-কূটেষু তথান্নলাভো গোপৃষ্ঠগো গোবনিতা-ধনাপ্তিং ॥ ক্ষেমং বিধত্তে করভস্য পৃষ্ঠে খরস্য পৃষ্ঠেঽরিভয়ং বধঞ্চ। ক্রোড়স্য পৃষ্ঠে বধমর্থলাভং তস্যৈব পৃষ্ঠে ঘনলগ্ন-পঙ্কে ॥ সদ্যো জ্বরং সৈরিভপৃষ্ঠসংস্থো মৃতাঙ্গসংস্থো মরণং করোতি। কার্য্য-ক্ষতিং রিক্তঘটস্য সংস্থঃ কাকঃ কলিং কাষ্ঠমধিষ্ঠিতশ্চ ॥ যো দক্ষিণং কূজতি দক্ষিণেন প্রয়াতি যশ্চাভিমুখোঽভ্যু-পৈতি। যো যাতি পৃষ্ঠে প্রতিলোম-গত্যা কৃতারবঃ পাতয়তে স রক্তং ॥ বামে রবো দক্ষিণতস্ততো যঃ সোঽনর্থহেতু-র্ব্বলিভোজনস্য। বামপ্রদেশে প্রতিলোম-গানং বিশ্লায় লাভো গৃহ এব তেন ॥ প্রয়াতি পৃষ্ঠে যদি দক্ষিণেন কৃতারব-স্তদ্রুধিরং পুরঃ স্যাৎ। বল্লীবরত্রাদি চ যো গৃহীত্বা প্রদক্ষিণং যাতি স সর্পভীত্যৈ ॥ গোপুচ্ছবল্মীককৃতাস্পদশ্চ রুবন্ ভবেৎ সর্পবিলোকনায়। স্যান্মৃত্যবেঽঙ্গার-চিতাস্থিসংস্থঃ কাকঃ প্রকুর্ব্বন্ করচর্ব্বণং চ ॥ রুবন্ পুরো হানিরুজৌ করোতি মৃত্যুং পুনর্নিষ্ঠুরপৃষ্ঠশব্দঃ। প্রসার্য্য রিক্তং বদনং য আস্তে সর্ব্বত্র নিন্দ্যো বলি-ভোজনোঽসৌ ॥ বামোঽপ্যস্থগ্যাতভয়ং মৃতিং বা সংতাড়য়িত্বা রসচর্ম্মখণ্ডং। চঞ্চ্বাস্থিভঙ্গং ধ্রুবমস্থিভঙ্গবন্ধে বধং জল্পতি যুধ্যমানঃ ॥ বামোঽপি রোগং কুরুতে বিশুষ্কে তিক্তেঽপি বৃক্ষে কলিকার্য্য-নাশৌ। পক্ষৌ বিধুন্বন্ বিরুবংশ্চ রূক্ষং সকণ্টকে মৃত্যুমুপাদদাতি ॥ বধো ভবেদ্ভূরুহভগ্নশাখে বন্ধো লতাভিঃ পরি-বেষ্টিতে স্যাৎ। রম্যে তরৌ কণ্টকযুক্ত-বৃক্ষে সদা ভবেতাং কলিকার্য্যসিদ্ধী ॥ ছন্নাধিরূঢ়ো ন রবেণ যায়াৎ প্রয়াতি চেৎ স্যাৎ খলু রক্তপাতঃ। অবস্করং ভুস্তৃণকাষ্ঠকূপভস্মাদিসংস্থো বিনিহন্তি কার্য্যং ॥ বল্লীবরত্রাকচশুষ্ককাষ্ঠচর্ম্মাস্থি-জীর্ণাম্বরবল্কলানি। অঙ্গাররক্তোৎপল-কর্পরাণি দৃষ্টানি চেৎ কাকমুখে তদানীং ॥ পুণ্যক্ষয়ঃ পাপসমাগমশ্চ মহদ্ভয়ং রোগ-সমুদ্ভবশ্চ। বন্ধো বধঃ সর্ব্বধনাপহার ইত্যাদিকং স্যাৎ পথি মন্দিরে চ ॥ ঊর্দ্ধাননশ্চঞ্চলপক্ষযুগ্মঃ কাকঃ কুনাদো বিদধাতি মৃত্যুং। ছায়ায়ুধচ্ছত্রঘটাস্থিযান-বাদিত্রকাষ্ঠাদিককুট্টকানি ॥ সঙ্কোচিতৈ-কাঙ্ঘ্রিরূপেতবিত্তো দীপ্তস্বরো ভাস্কর-মীক্ষতে চ। কাষ্ঠাদিকং কুট্টয়তেঽথবা যো যুদ্ধাধিকানর্থকরঃ খগোঽসৌ ॥ তুণ্ডেন পিচ্ছং বিলিখন্ রবেণ যো রৌতি তূর্ণঞ্চ নিরীক্ষতে কং। একেন পাদেন তথোপ-বিষ্টো ব্রূতে স বন্ধং পুরতো জনস্য ॥ বিড়্গোময়ৌ ন্যস্যতি যস্য মূর্দ্ধ্নি তস্যানল-

ত্রাসরুজৌ ভবেতাং। যস্যাস্থিখণ্ডং বিসৃজত্যসৌ তু প্রয়াতি তূর্ণং নগরীং যমস্য ॥ ব্রহ্মপ্রদেশে বিরুবন্ যিযাসোঃ কলত্রদোষং জনয়ত্যবশ্যং। মনুষ্যমাতঙ্গতুরঙ্গমাণাং শিরোঽধিরূঢ়ো নিধনায় তেষাং ॥ নদীতটে বাথ রটন্নটব্যাং খরস্বরো ব্যাঘ্রভয়ায় গন্তুঃ। নৈবাতুরঃ ক্বাপি মতো হিতায় ন দুষ্টচেষ্টো বিতনোতি শান্তিং ॥ যাত্রোদ্যমে সৈন্যবধায় কাকো দৃষ্টো রথে সাশ্বনৃমস্তকেষু। আয়াতি যস্যাভিমুখো বলস্য যুদ্ধোদ্যমে তস্য পরাজয়ঃ স্যাৎ ॥ সগৃধ্রকঙ্কৈঃ কটকে নৃপস্য কাকৈঃ প্রবিষ্টৈঃ পিশিতং বিনাপি। সংযুধ্যমানৈররিভিঃ সমং স্যান্মহাহবঃ সন্ধিরযুধ্যমানৈঃ ॥ চিহ্নধ্বজচ্ছন্নকৃতাধিরোহঃ সমুদ্যতং শত্রুবলং প্রপশ্যন্। আজৌ জয়ং জল্পতি ভূমিপানাং কৃতধ্বনিঃ ক্ষীরতরৌ চ কাকঃ ॥ গতিস্বরৌ বায়সসংপ্রযুক্তৌ প্রাচ্যাং ফলায়োদিতবৈপরীত্যাৎ। এবং জনোঽপ্যাচরতি প্রভূতৌ যথোদিতং তত্র তথাগমার্থং ॥ দিগ্যামচক্রেঽপি শুভাশুভানি ফলানি যানি প্রতিপাদিতানি। প্রতিষ্ঠমানস্য ভবন্তি যানি তথাবিধানীতি বদন্তি তজ্জ্ঞাঃ ॥ ইতি কাকরুতে যাত্রাপ্রকরণং ॥ * ॥ স্থানস্থিতানাং কথয়ন্তি কাকাশ্চেষ্টাবিশেষেণ শুভাশুভানি। প্রবোধিতাঃ প্রাক্তনকর্ম্মভির্যে তল্লক্ষণায় ক্রিয়তে প্রযত্নঃ ॥ নিষ্কারণং সংবলিতা রুবন্তো গ্রামেঽন্ননাশায় ভবন্তি কাকাঃ। রোধঞ্চ চক্রাকৃতয়ো বদন্তি সব্যাপসব্যভ্রমণাস্তয়ঞ্চ ॥ বিঘাতমাহুর্ব্বহুবর্গসংস্থা রাত্রৌ রুবন্তো জনতাবিনাশং। লোকঞ্চ চঞ্চুচরণপ্রহারৈরুদ্বেজয়ন্তঃ পরচক্রবৃদ্ধিং ॥ যঃ স্নাতি ধূল্যাস্তু বিলোক্য রৌতি বৃষ্টিং সমাশংসতি বায়সোঽসৌ। জলস্থলপ্রাণিবিপর্য্যয়েণ বর্ষাসু বৃষ্টিং ভয়মন্যদা তু ॥ মধ্যংদিনে বেশ্মনি যস্য কাকো বিরৌতি রৌদ্রং বিধুনোতি বাঙ্গে। হরন্তি চৌরা দ্রবিণানি তস্য ধ্রুবং তথান্যো ভবতি প্রমাদঃ ॥ রুবন্নদৃষ্টস্তৃণপূর্ণবক্ত্রো হুতাশভীতিং করটঃ করোতি। স্যাৎ প্রস্থিতস্যাপ্যথবা স্থিতস্য দুঃখং প্রভূতং দিবসত্রয়েণ ॥ ছায়াসু লাভং ভুবি ভূমিলাভং বিঘ্নং জলে গ্রাবণি কার্য্যনাশং। করোতি কাকো বিরুবন্নরস্য প্রস্থায়িনঃ স্থানগতস্য বাপি ॥ দ্বারপ্রদেশে রুধিরানুলিপ্তো বিরৌতি কাকঃ শিশুনাশনায়। পক্ষৌ বিধুন্বন্ বিরুবংশ্চ রূক্ষং শান্তে চ দীপ্তে ভবনে ন শস্তঃ ॥ ভূয়স্তথোর্দ্ধে প্রবিধায় পক্ষৌ কাকঃ কুনাদং প্রলয়ং করোতি। ক্রুদ্ধোঽধিরূঢ়ঃ করটান্তরঞ্চ রোগেণ মৃত্যুং কুরুতে নরাণাং ॥ দ্রব্যে হৃতে বাপহৃতে খগেন বিনাশলাভাবপি তাদৃশস্য। রুক্মস্য পীতে রজতস্য শুক্লে চৌলস্য কার্পাসময়ে ভবেতাং ॥ প্রশ্নে কৃতে রোগবিনাশবুদ্ধ্যা হন্ত্যাশু রোগং স্বরবঃ প্রদীপ্তে। শান্তে প্রদেশে করটশ্চিরেণ বন্যারবো রোগমপাকরোতি ॥ প্রশ্নে শুভে শান্তদিগাশ্রয়স্থঃ শান্তস্বরো যঃ শুভমাদধাতি। যো

বায়সস্তং শুভদং বদন্তি তদ্ব্যত্যয়ে ব্যত্যয়হেতুরুক্তঃ ॥ বিরৌতি কুম্ভে মণিকেঽথবা যঃ স গর্ভবত্যাঃ সুতজন্মহেতুঃ। উড্ডীয়তে কণ্টকিনীঞ্চ শাখামাদায় রাজাগমনায় কাকঃ ॥ অন্নাদিবিষ্ঠাপিশিতাদিভির্যঃ পূর্ণাননোঽভীষ্টফলপ্রদোঽসৌ। মন্ত্রাদিসিদ্ধৌ বণিজাদিলাভে শস্তো বিবাহাদিবিধৌ চ কাকঃ ॥ ইষ্টার্থদোখাদিকবাহনস্থশ্ছত্রাদিসংস্থস্তদবাপ্তকারী। বধ্বাগমং জল্পতি তোরণস্থো হৃদ্যার্থদো হৃদ্যতরুস্থিতশ্চ ॥ বায়সঃ কুলকুলধ্বনিং যদা ব্যাহরেত্তবনসংমুখং তদা। অভ্যুপৈতি পথিকস্তদা ধ্বনিং সর্ব্বকার্য্যশুভদং বদত্যসৌ ॥ ইদং দ্বিহোৎপাতযুগং পৃথিব্যাং মহাভয়ং শাকুনিকা বদন্তি। যদ্বায়সো মৈথুনসন্নিবিষ্টো দৃশ্যেত যদ্বা ধবলঃ কদাচিৎ ॥ উদ্বেগবিদ্বেষভয়প্রবাসধনক্ষয়ব্যাধিভয়প্রহারাঃ। বুদ্ধিপ্রণাশাকুলতাপ্রবাদা নৃণাং ভবন্ত্যদ্ভুতদর্শনেন ॥ শমায় তৎসূচিতদুঃখরাশেঃ স্নানং বহিস্তৎক্ষণমেব কুর্য্যাৎ। আত্মীয়শক্ত্যা চ সদক্ষিণানি দ্বিজায় দদ্যাৎ বসনানি তানি ॥ নয়েদহঃশেষমপুণ্যহান্যা শয়ীত ভূমাবকৃতান্নভক্ষঃ। হবিষ্যভোজী ন ভজেচ্চ নারীং দিনানি সপ্ত ত্রিগুণানি যাবৎ ॥ অকাকঘাতব্রতমাদধীত বলিং চ দদ্যাদ্বলিভোজনেভ্যঃ। স্নাত্বা প্রভাতে বিদধীত শান্তিং দদ্যাৎ স্বশক্ত্যা দ্রবিণং গুণিভ্যঃ ॥ দেশে তু যত্রাদ্ভুতমেতদুগ্রমালোক্যতে তত্র সমাপতন্তি। অবৃষ্টিদুর্ভিক্ষভয়োপসর্গচৌরাগ্নিশত্রূদ্ভবধর্ম্মনাশাঃ ॥ কর্ম্মাণি তস্যোপশমায় রাজা প্রবর্ত্তয়েৎ শান্তিকপৌষ্টিকানি। অন্নাদ্যগোভূমিবসূনি দদ্যাৎ যুদ্ধং বিদধ্যান্ন চ যাবদব্দং ॥ ইতি কাকরুতে স্থানস্থিতপ্রকরণং পঞ্চমং ॥ * ॥ অথ স্বরবিচারঃ। ককামিতি ক্ষেমবিধো বিরাবঃ কেকামিতীষ্টাশনযানহেতুঃ। করোতি কূং কূমিতি চার্থলাভং কং কং ধ্বনিঃ কাঞ্চনলাভমাহ ॥ কেং কেমিতি স্ত্রীবরযোষিদাপ্ত্যৈ ভোগায় কাং কামিতি শব্দিতঃ স্যাৎ। অপত্যলাভঃ কুকু ইত্যনেন গন্তুঃ ফলং কেকব ইত্যনেন ॥ ক্রৌং কোমিতীদং শুভলাভকারি কুং কুং নিনাদঃ প্রিয়সঙ্গমায়। ক্রাং ক্রূমিতি ক্রামিতি চ ত্রয়োঽমী ক্রাংক্রামিতি দ্বৌ চ রবৌ রণায় ॥ ক্রাং ক্রামিতি ক্রৌমিতি চ দ্বিরুক্তং ক্রূং ক্রূমিতি ক্রৌ কুকু কূ ইতীদং। রুতং প্রদিষ্টং মরণায় নৃণাং গন্তুঃ প্রণাশং কুরুতে খগাখ্যঃ ॥ ক্রী ক্রীমিতীষ্টার্থবিনাশনায় জ্বলজ্জ্বলেত্যগ্নিভয়ায় শব্দঃ। কীকীতি কোকাবিতি যঃ কথঞ্চিন্মুহুর্ম্মুহুঃ স্যাৎ স মতো বধায় ॥ স্যাৎ কা ইতীদং বিফলং সদৈব মিত্রাপ্তয়ে স্যাৎ ক ইতীদৃশঞ্চ। কাকা ইতীদং তু বিঘাতকারি করোতি কাকো বদতি স্বতুষ্ট্যৈ ॥ আহারদোষায় চ কাকটীতি স্যাদাকুলং কুক্কু নিভং রণায়। কেকেধ্বনিষ্কাকুটি কিং টিকীতি ত্রয়ং ত্বিদং স্যাৎ পুরদূষণায় ॥ যৎ কা ইতি ত্রিস্তদনুস্বরেণ শব্দদ্বয়ং স্যান্মহতে রণায়। কামিত্যয়ং বাহননাশনঞ্চ

দদাতি হর্ষং কুকুকুর্ব্বিতীদং ॥ যৎকা ইতীদং বিরুতং সুদীর্ঘকৃতস্বরেণোচ্চরিতং প্রমাদাৎ। উৎসাহহীনঃ শ্রমদৈন্যযুক্তঃ স বায়সঃ কার্য্যবিনাশনায় ॥ সামিষং বকবকেতি ভোজয়েদ্বারয়েৎ কলিকলীতি রাসনং। অভ্যুপৈতি স্বররুক্ষভাষিতে প্রোষিতঃ শবশবারবে শবঃ ॥ স্যাৎ কলিঃ কবকবধ্বনৌ নৃণাং জায়তে কণকণাধ্বনৌ স্বরঃ। আব্রজেৎ কুলুকুলুধ্বনৌ প্রিয়ঃ সৌদনং কটকটধ্বনৌ দধি ॥ এবংপ্রকারা বহবোঽপরেঽপি প্রশান্তদীপ্তাবলিভোজনানাং। ভবন্তি শব্দাঃ খলু তেষু কেচিদস্মাভিরুক্তাঃ খলু লক্ষণীয়াঃ॥ ইতি কাকরুতে স্বরপ্রকরণং ষষ্ঠং ॥ * ॥ হিতং নরেভ্যো মুনিভিঃ পুরাণৈর্জ্ঞানং যদুক্তং বলিপিণ্ডযুক্ত্যা। তদুচ্যতে সংপ্রতি যেন কাকা বদন্তি নিত্যং বলিলাভতুষ্টাঃ॥ অদক্ষিণস্যাং দিশি যত্র কাকৈর্যুতো ভবেৎ ক্ষীরতরুঃ প্রভূতৌ। গত্বা নিবৃত্তেঽহনি তত্র কাকা নিমন্ত্রণীয়া বলিপিণ্ডভোজ্যে ॥ প্রাতস্ততঃ ক্ষীরতরোরধস্তাদ্বিশোধ্য লিখ্যেৎ সহ গোময়েন। ভূমিপ্রদেশে চতুরস্রমস্য মধ্যেঽর্চ্চয়েৎ ব্রহ্মমুরারিভানূন্ ॥ ইন্দ্রাগ্নিবৈবস্বতযাতুধানজলেশবায়ুদ্রবিণেশশম্ভূন্। অভ্যর্চ্চয়েদষ্টসু দিক্ষু ভক্ত্যা ক্রমেণ চাষ্টাবপি লোকপালান্ ॥ নমোযুতৈঃ সপ্রণবৈশ্চ সর্ব্বান্নিজাভিধানৈঃ প্রযতো মনুষ্যঃ। অর্ঘাসনালেপনপুষ্পধূপনৈবেদ্যদীপাক্ষতদক্ষিণাভিঃ ॥ আব্রহ্মকাকাংস্তরুসন্নিবিষ্টানাধ্যায় তৎপ্রাক্তনমন্ত্রযুক্ত্যা। ততস্তদর্থং বলিমাজ্যসিক্তং মন্ত্রেণ দদ্যাৎ দধিপিণ্ডযুক্তং ॥ মন্ত্রঃ। ইন্দ্রায় যমায় বরুণায় ধনদায় ভূতবায়সায় বলিং গৃহ্লাতু মে স্বাহা ॥ উদীর্য্য কার্য্যং স্বমথাবস্থত্য ততঃ প্রদেশে করটস্য চেষ্টাঃ। স্পৃষ্টীকৃতাঙ্গানি শুভাশুভার্থং সংলক্ষয়েন্নিশ্চলপাণিপাদঃ ॥ পূর্ব্বেণ খাদন্ সুখবিত্তবৃদ্ধিং করোতি বহ্নের্দিশি বহ্নিভীতিং। কাকোঽর্থনাশং দিশি দক্ষিণস্যাং নৈর্ঋত্যগো দিগ্বরকৃত্যদিষ্টঃ ॥ জলেশদেশেঽভিমতার্থসিদ্ধির্ব্বায়োর্দিশীতি প্রভবাম্লবৃষ্টিঃ। সৌম্যে সুখারোগ্যসমীহিতার্থমীশানদেশে বিতরত্যভীষ্টং ॥ বলৌ বিলুপ্তে করটঃ সমন্তাৎ কার্য্যে বিমিশ্রং পরিভাবনীয়ং। বলিং বিকীর্য্যাপি ন ভক্ষয়ন্তি কাকাস্তদানীং ভয়দা ভবন্তি॥ ক্ষীরদ্রুমারামচতুষ্পদেষু সরিৎসমীপে ত্রিদশালয়েষু। দেয়ো বলির্ভূতদিনাষ্টমীষু কুল্মাষদধ্যোদনতণ্ডুলাদ্যৈঃ ॥ ইতি কাকরুতে পিণ্ডপ্রকরণং সপ্তমং ॥ * ॥ পিণ্ডত্রয়স্যাথ বিধানমেতদাখ্যায়তে যৎ কিল নারদাদ্যৈঃ। দৃষ্টং মুনীন্দ্রৈরশুভং শুভঞ্চ যথাবদস্মিন্ কথয়ন্তি কাকাঃ ॥ গত্বা শুভেঽহ্নি প্রহরে চতুর্থে দেশেষু পূর্ব্বপ্রতিপাদিতেষু। নরেণ পিণ্ডত্রয়ভোজনার্থং কাকাঃ প্রযত্নেন নিমন্ত্রণীয়াঃ ॥ ততঃ প্রভাতে হ্যুপলিপ্য ভূমিং তস্যাঞ্চ পূর্ব্বোদিতমন্ত্রযুক্ত্যা। ব্রহ্মাচ্যুতেশাপ্পতিলোকপালাঃ কাকাশ্চ পুংসাং ক্রমতোঽর্চ্চনীয়াঃ ॥ দধ্যোদনাদ্যৈর্ব্বিহিতং প্রবেশ্য পিণ্ডত্রয়ে মণ্ডলকস্য

মধ্যে । অভ্যর্চ্চয়েদক্ষতপুষ্পধূপৈর্মনো-
হরৈর্যত্নপরো মনুষ্যঃ ॥ তেষু ক্ষিপেৎ
প্রাগ্দিগনুক্রমেণ পিণ্ডেষু হেমপ্রথমে
দ্বিতীয়ে । রূপ্যং তথা লৌহলবং তৃতীয়ে
শেষঞ্চ কুর্য্যাদ্বলিপিণ্ডতুল্যং ॥ ত্রিঃ সপ্ত-
কৃত্বো বিনিবেশ্য পিণ্ডে পিণ্ডা নিবেশ্যা
বলিভোজনেভ্যঃ। মন্ত্রোক্তমাবাহনতোষি-
তেভ্যঃ কার্য্যং বিচার্য্যাপসরেত্ততশ্চ ॥
মন্ত্রঃ । ওঁ হিবি টিমি বিটি কাকচাণ্ডালায়
স্বাহা । ইতি পিণ্ডাভিমন্ত্রণার্থং ॥ ওঁ
ব্রহ্মণে বিশ্বায় কাকচাণ্ডালায় স্বাহা ।
কাকাহ্বানমন্ত্রঃ ॥ কাকেন ভুক্তে সসুবর্ণ-
পিণ্ডে জ্ঞেয়ং নরেণোত্তমমাত্মকার্য্যং ।
ভুক্তে সরূপ্যে খলু মধ্যমং স্যাদ্ভুক্তে স-
লোহে ত্বধমং প্রদিষ্টং ॥ বিবাদবাণিজ্য-
বিবাহবৃষ্টিক্ষেমাশ্চ বিত্তাঃ কৃষিভোগ-
রোগাঃ । সংগ্রামসেবানৃপকার্য্যদেশা
ইত্যাদয়োঽস্মিন্ পরিভাবনীয়াঃ ॥ চেষ্টা-
মবামাং বিদধাতি যাতি প্রদক্ষিণং দক্ষিণ-
পক্ষমুচ্চৈঃ । গ্রীবাং তথোচ্চাং কুরুতে
সশব্দঃ স্থানং মনোজ্ঞং শ্রয়তি ক্রমঞ্চ ॥
এবংবিধাং যো বিদধাতি চেষ্টাং পিণ্ডং
সমাদায় শুভং খগোঽসৌ । অভীষ্টকার্য্যা-
দধিকং করোতি চেষ্টাবিপর্য্যাসতয়ান্যথা-
ত্বং ॥ পিণ্ডং সমাদায় যদি প্রধানং
শান্তং দিশং গচ্ছতি কাকপক্ষী । পূর্ণং
ফলং তৎ কুরুতে নরাণাং চিকীর্ষিতে
বস্তুনি যত্র তত্র ॥ কাকো গৃহীত্বা যদি
মুখ্যপিণ্ডং প্রয়াতি দীপ্তাং ককুভং
তদানীং । অত্যুত্তমং কার্য্যফলং প্রদর্শ্য
ততঃ সমস্তং বিনিহন্ত্যবশ্যং ॥ দ্বিতী-
য়কং যদ্যপহৃত্য পিণ্ডমুড্ডীয়তে শান্ত-
দিগাশ্রয়েণ । ফলং তদানীং শুভদং
নরাণাং যাপ্যং খগো জল্পতি কার্য্যজাতং ॥
কাকে সমাদায় জঘন্যপিণ্ডং যাতে প্রদীপ্তাং
ককুভং বদন্তি । কার্য্যং জঘন্যাদধিকং
জঘন্যং স্যান্মধ্যমং মধ্যমপিণ্ডভাগে ॥ ইতি
বসন্তরাজে পিণ্ডত্রয়প্রকরণমষ্টমং ॥ * ॥
মহর্ষয়ো বায়সশাকুনস্য বদন্তি সারাদপি
সারভূতং । পিণ্ডাষ্টকং যত্তদশেষমেত-
দাখ্যায়তে কার্য্যবিনিশ্চয়ার্থং ॥ শুভেঽহ্নি
কাকানধিবাস্য সায়ং পিণ্ডাষ্টকং ভোক্তু-
মথ প্রভাতে । তৎকালযোগ্যানি সমস্ত-
বস্তূন্যাদায় যায়াদ্বহিরপ্রমত্তঃ ॥ একান্ত-
দেশে তরুপার্শ্বভূমৌ মৃদ্গোময়াভ্যামুপ-
লেপিতায়াং । সৎপঞ্চগব্যেন সমুক্ষিতায়াং
সৌম্যোপহারৈরুপশোভিতায়াং ॥ বিধায়
পূজাং কুলদেবতানাং মধ্যে ততোঽষ্টস্বপি
দিক্ষু দেয়ং । ভক্তেন সর্পির্দধিমিশ্রিতেন
পিণ্ডাষ্টকং প্রাগ্দিগনুক্রমেণ ॥ পক্ষীন্দ্র-
বহ্ন্যন্তকরাক্ষসেন্দ্রান্ বিষ্ণুং বিরিঞ্চিং
ধনদং মহেশং । পূর্ব্বাদিকাষ্ঠাক্রমযোজি-
তেষু ন্যসেৎ ক্রমাদষ্টসু পিণ্ডকেষু ॥
নমোযুতৈস্তান্ প্রণবৈশ্চ সর্ব্বাংস্ততো-
ঽর্চ্চয়েত্তন্নিজনামমন্ত্রৈঃ । অর্ঘ্যাসনালেপন-
পুষ্পধূপৈর্নৈবেদ্যদীপাক্ষতদক্ষিণাভিঃ ॥
অভ্যর্চ্চিতেভ্যো বিধিনোদিতেন পিণ্ডা-
ষ্টকং তৎ দদতু দ্বিজেভ্যঃ । মন্ত্রেণ সং-
মন্ত্র্য নিবেদনার্থং কার্য্যং বিচিন্ত্যাপসরে-
চ্চ কিঞ্চিৎ ॥ অথ মন্ত্রঃ । ওঁ নমঃ

খগপতয়ে গরুড়ায় দ্রোণায় পক্ষিরাজায় স্বাহা ॥ দ্রোণাঢ়কসমং পিণ্ডং গৃহাণ ত্বমশঙ্কিতঃ। যথাদৃষ্টং নিমিত্তং চ কথয়স্বাধমে স্ফুটং ॥ কাকেন পিণ্ডে প্রথমে গৃহীতে তিষ্ঠন্ ব্রজন্ বাপি ভবেৎ কৃতার্থঃ। উদ্বেগশোকৌ বিফলঃ প্রয়াণে হানিঃ কলির্ব্বা ভবতি দ্বিতীয়ে ॥ যাম্যে রুগাপন্তয়মৃত্যবঃ স্যুঃ পিণ্ডে চতুর্থে বিজয়ো রণেষু। স্যাদ্বৈষ্ণবেহভীষ্টমকষ্টসাধ্যং ভবেৎ প্রবাসো বিফলশ্চ ষষ্ঠে ॥ নাস্তীহ তন্নিশ্চয়মেব কার্য্যং ভুক্তে ন যৎ সিদ্ধ্যতি সৌম্যপিণ্ডে। সন্তাপশোকৌ বিফলা চ যাত্রা পিণ্ডেহষ্টমে বায়সভক্ষিতে চ ॥ পিণ্ডং ন গৃহ্লাত্যথবা ন ভুঙ্‌ক্তে চঞ্চূনখৈর্ব্বিক্ষিপতি দ্বিজো যঃ। কার্য্যেষু সর্ব্বেষু স ন প্রশস্তো ব্রবীতি ঘোরং সমরং স পুংসাং ॥ ইতি বসন্তরাজে কাকরুতে পিণ্ডাষ্টকপ্রকরণং নবমং ॥ * ॥ আদ্যং পঞ্চাশতা দ্বাভ্যাং বৃত্তৈর্দিক্‌চক্রমীরিতং। কাকালয়পরীক্ষা চ দ্বিতীয়ে দশভিস্ত্রিভিঃ ॥ বৃত্তৈস্ত্রিভিস্তৃতীয়ে চ কাকাণ্ডকনিরূপণং। দ্বাচত্বারিংশতা বৃত্তৈর্যাত্রা তুর্য্যে প্রকীর্ত্তিতাঃ ॥ বৃত্তানি বিংশতিস্ত্রীণি স্থানং স্থাপ্যে চ পঞ্চমঃ। স্বরপ্রকরণং ষষ্ঠং বৃত্তৈর্দ্দশভিস্ততঃ ॥ একাদশভিরাখ্যানং বলিসংজ্ঞঞ্চ সপ্তমং। পিণ্ডত্রয়বিধানায় চতুর্দ্দশভিরষ্টমং ॥ পিণ্ডাষ্টকবিধানায় নবমে যদুদাহৃতং। অন্ত্যপ্রকরণং তচ্চ বৃত্তান্যেকাদশৈব তু ॥ বসন্তরাজশাকুনে সদাগমার্থশোভনে। সমস্তসত্যকৌতুকে বিচারিতো-ঽত্র বায়সঃ॥ * ॥ সমুদায়েন ১৮১ বৃত্তানি। ইতি বসন্তরাজশাকুনান্তর্গতবায়সশাকুননামককাকচরিত্রং সমাপ্তং ॥ তন্মাংসগুণাঃ। দোষক্ষয়াপহত্বং। চক্ষুর্হিতত্বং। বৃংহণত্বং। বলায়ুর্হিতকারিত্বং। লঘুত্বং। দীপনত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ পীঠসর্পী। খোঁড়া ইতি ভাষা ॥ দ্বীপবিশেষঃ। পরিমাণভেদঃ। বৃক্ষবিশেষঃ। শিরোঽবক্ষালনং। ইতি হেমচন্দ্রমেদিনীকরৌ ॥ তিলকঃ। অতিধৃষ্টঃ। ইতি শব্দরত্নাবলী॥

কাককঙ্গুঃ (স্ত্রী) চীনকঃ। ইতি হেমচন্দ্রঃ ॥

কাককলা (স্ত্রী) কাকজঙ্ঘাবৃক্ষঃ। ইতি জটাধরঃ ॥

কাকঘ্নী (স্ত্রী) মহাকরঞ্জঃ। ইতি রাজনির্ঘণ্টঃ॥

কাকচিঞ্চা (স্ত্রী) গুঞ্জা। কুঁচ্ ইতি ভাষা। ইতি শব্দরত্নাবলী ॥

কাকচিঞ্চিঃ (স্ত্রী) গুঞ্জা। ইতি শব্দরত্নাবলী ॥

কাকচিঞ্চী (স্ত্রী) গুঞ্জা। ইত্যমরঃ ॥

কাকচ্ছদঃ (পুং) খঞ্জনপক্ষী। ইতি শব্দরত্নাবলী ॥

কাকচ্ছদিঃ (পুং) খঞ্জনপক্ষী। ইতি ত্রিকাণ্ডশেষঃ ॥

কাকজঙ্ঘা (স্ত্রী) স্বনামখ্যাতবৃক্ষবিশেষঃ। কেউয়া ঠেঙ্গা ইতি ভাষা। তৎপর্য্যায়ঃ। কাকাঙ্গী ২ কাকাঙ্ঘ্রী ৩ কাকনাসিকা ৪। ইতি শব্দরত্নাবলী॥ কৃষীবলঃ ৫। ইতি রত্নমালা ॥ ধ্বাঙ্ক্ষজঙ্ঘা ৬ কাকাহ্বা ৭ সুলোমশা ৮ পারাবতপদী ৯ দাসী ১০ নদীকান্তা ১১। অস্যা গুণাঃ। তিক্তত্বং। উষ্ণত্বং। কৃমিব্রণকফবাধির্য্যাজীর্ণজীর্ণ-

বিষমজ্বরনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ গুঞ্জা। ইতি রত্নমালা॥

কাকজম্বুঃ (স্ত্রী) ভূমিজম্বুঃ। ক্ষুদ্রজম্বুঃ। বন জাম্ ইতি ভাষা। ইতি শব্দমালা॥

কাকজম্বুঃ (স্ত্রী) জম্বুপ্রভেদঃ। তৎপর্য্যায়ঃ। কাকফলা ২ নাদেয়ী ৩ কাকবল্লভা ৪ ভৃঙ্গেষ্টা ৫ কাকনীলা ৬ ধ্বাঙ্ক্ষজম্বুঃ ৭ ধনপ্রিয়া ৮। অস্যা গুণাঃ। কষায়ত্বং। অম্লত্বং। পাকে মধুরত্বং। গুরুত্বং। দাহশ্রমাতিসারনাশিত্বং। বীর্য্যবৃদ্ধিবলপ্রদত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

কাকণং (ক্লী) কুষ্ঠবিশেষঃ। তস্য লক্ষণং। যথা। যৎ কাকণন্তিকাবর্ণমপাকং তীব্রবেদনং। ত্রিদোষলিঙ্গং তৎ কুষ্ঠং কাকণং নৈব সিধ্যতি॥ ইতি মাধবকরঃ॥

কাকণন্তিকা (স্ত্রী) গুঞ্জা। কুঁচ্ ইতি ভাষা। ইতি রত্নমালা॥

কাকতিক্তা (স্ত্রী) কাকচিঞ্চা। কুঁচ্ ইতি ভাষা। ইতি রত্নমালা॥

কাকতিন্দুকঃ (পুং) বৃক্ষবিশেষঃ। মাকড়া কেন্দু। মাকড়া গাব্। কাকতেঁদু ইতি চ ভাষা। তৎপর্য্যায়ঃ। কাকেন্দুঃ ২ কুলকঃ৩ কাকপীলুকঃ৪। ইত্যমরঃ॥ কাকপীলুঃ ৫ কাকাণ্ডঃ ৬ কাকস্ফূর্জ্জঃ ৭ কাকাহ্বঃ ৮ কাকবীজকঃ ৯। অস্য গুণাঃ। কষায়ত্বং। অম্লত্বং। গুরুত্বং। বাতবিকারনাশিত্বঞ্চ। পক্কস্য তস্য গুণাঃ। মধুরত্বং। কিঞ্চিৎকফকারিত্বং। বাস্তিপিত্তনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

কাকতুণ্ডঃ (পুং) কালাগুরু। ইতি হেমচন্দ্রঃ॥

কাকতুণ্ডিকা (স্ত্রী) কাকচিঞ্চা। গুঞ্জা। ইতি হলায়ুধঃ॥

কাকতুণ্ডী (স্ত্রী) রাজরীতিঃ। রাজপিতল ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥ বৃক্ষবিশেষঃ। কৌআঠোড়ী। ইতি হিন্দী ভাষা। তৎপর্য্যায়ঃ। কাকাদনী ২ কাকপীলুঃ ৩ কাকশিম্বী ৪ রক্তলা ৫ ধ্বাঙ্ক্ষাদনী ৬ বক্রশল্যা ৭ দুর্মোহা ৮ বায়সাদনী ৯ ধ্বাঙ্ক্ষনখী ১০ বায়সী ১১ কাকদন্তিকা ১২ ধ্বাঙ্ক্ষদন্তী ১৩। অস্যা গুণাঃ। কটুত্বং। উষ্ণত্বং। তিক্তত্বং। দ্রবত্বং। রসায়নত্বং। বাতদোষহারিত্বং। রুচিকারিত্বং। পলিতস্তম্ভিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

কাকধ্বজঃ (পুং) বাড়বাগ্নিঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কাকনামা [ন্] (পুং) বকবৃক্ষঃ। ইতি রত্নমালা॥

কাকনাসঃ (পুং) বিকণ্টকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কাকনাসা (স্ত্রী) কাকজঙ্ঘাবৃক্ষঃ। ইতি জটাধরঃ॥

কাকনাসিকা (স্ত্রী) কাকজঙ্ঘাবৃক্ষঃ। ইত্যমরঃ॥ রক্তত্রিবৃৎ। ইতি রাজনির্ঘণ্টঃ॥

কাকপদঃ (পুং) রতিবন্ধবিশেষঃ। তস্য লক্ষণং। যথা। পাদৌ যৌ স্কন্ধযুগ্মস্থৌ ক্ষিপ্ত্বা লিঙ্গং ভগে লঘু। কাময়েৎ কামুকীং কামী বন্ধঃ কাকপদো মতঃ॥ ইতি রতিমঞ্জরী॥

কাকপর্ণী (স্ত্রী) মুদ্গপর্ণী। ইতি ভাবপ্রকাশঃ॥

কাকপক্ষঃ ( পুং ) মস্তকপার্শ্বদ্বয়ে কেশরচনাবিশেষঃ। কাণ্পাটা জুল্পী ইতি চ ভাষা। তৎপর্য্যায়ঃ। শিখণ্ডকঃ ২। ইত্যমরঃ॥ শিখাণ্ডকঃ ৩ শিখণ্ডঃ ৪। ইতি তট্টীকা॥

কাকপীলুঃ ( পুং ) কাকতিন্দুকঃ। কাকতুণ্ডী। শ্বেতগুঞ্জা। ইতি রাজনির্ঘণ্টঃ॥

কাকপীলুকঃ (পুং) কাকতিন্দুকবৃক্ষঃ। মাকড়া কেন্দু ইতি ভাষা। ইত্যমরঃ॥

কাকপুচ্ছঃ ( পুং ) কোকিলঃ। ইতি শব্দরত্নাবলী॥

কাকপুষ্টঃ ( পুং ) কোকিলঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কাকপুষ্পং (ক্লী) গন্ধপর্ণং। ইতি রাজনির্ঘণ্টঃ॥

কাকফলঃ ( পুং ) নিম্ববৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কাকবলিঃ ( পুং ) কাকসম্প্রদানকান্নাদি। তদ্দানবিধির্যথা। ওঁ যমদ্বারাবস্থিতনানাদিগ্দেশীয়বায়সেভ্যো নমঃ। ইতি পাদ্যাদিভিরভ্যর্চ্য প্রার্থয়েৎ। ওঁ কাক ত্বং যমদূতোঽসি গৃহাণ বলিমুত্তমং। যমলোকগতং প্রেতং ত্বমাপ্যায়িতুমর্হসি॥ ওঁ কাকায় কাকপুরুষায় বায়সায় মহাত্মনে। অত্র পিণ্ডং প্রযচ্ছামি কথ্যতাং ধর্ম্মরাজনি॥ ইতি পূরকপিণ্ডদানান্তে হলায়ুধঃ॥ *॥ বলিবৈশ্বদেবান্তর্গততদ্বিধির্যথা। ঐন্দ্রবারুণবায়ব্যাঃ সৌম্যা বৈ নৈঋর্তাস্তথা। বায়সাঃ প্রতিগৃহ্ণন্তু ভূমৌ পিণ্ডং ময়ার্পিতং॥ ওঁ কাকেভ্যো নমঃ। ইতি দদ্যাৎ তদুপরি অদ্ভিঃ সিঞ্চেৎ। ইত্যাহ্নিকাচারতত্ত্বং॥ *॥ গয়ায়াং তদ্বিধির্যথা। বলিঃ কাকশিলায়াঞ্চ কাকমোক্ষণমোক্ষদঃ। ইতি শ্রীবায়ুপুরাণে শ্বেতবারাহকল্পে গয়ামাহাত্ম্যে ৪ অধ্যায়ঃ॥ তত্র তৃতীয়দিনকৃত্যে কাকবলিদানং যথা। ততঃ কাকবলিং ক্ষিপ্ত্বা পুনঃ স্নানং সমাচরেৎ। ঐন্দ্রবারুণবায়ব্যা যাম্যা বৈ নৈঋর্তাস্তথা॥ বায়সাঃ প্রতিগৃহ্ণন্তু ভূমৌ পিণ্ডং ময়ার্পিতং॥ ইতি শ্রীবায়ুপুরাণে ৭ অধ্যায়ঃ॥

কাকভাণ্ডী ( স্ত্রী ) মহাকরঞ্জঃ। ইতি রাজনির্ঘণ্টঃ॥

কাকভীরুঃ ( পুং ) পেচকঃ। ইতি ত্রিকাণ্ডশেষঃ

কাকমদ্গুঃ (পুং) দাত্যূহপক্ষী। ইতি ত্রিকাণ্ডশেষঃ॥

কাকমর্দ্দঃ ( পুং ) মহাকালবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কাকমর্দ্দকঃ ( পুং ) মহাকাললতা। মাকাল্ ইতি ভাষা। ইতি রত্নমালা॥

কাকমাচিকা ( স্ত্রী ) কাকমাচীবৃক্ষঃ। ইতি শব্দরত্নাবলী॥

কাকমাচী (স্ত্রী) ক্ষুদ্রবৃক্ষবিশেষঃ। গুড়কামাই ইতি ভাষা। তৎপর্য্যায়ঃ। বায়সী ২। ইত্যমরঃ॥ ধ্বাঙ্ক্ষমাচী ৩ বায়সাহ্বা ৪ সর্ব্বতিক্তা ৫ বহুফলা ৬ কটুফলা ৭ রসায়নী ৮ গুচ্ছফলা ৯ কাকমাতা ১০ স্বাদুপাকা ১১ সুন্দরী ১২ তিক্তিকা ১৩ বহুতিক্তা ১৪। অস্যা গুণাঃ। কটুত্বং। তিক্তত্বং। উষ্ণত্বং। কফশূলার্শঃশোথদোষকুষ্ঠকণ্ডূনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

ত্রিদোষশমতাকারিত্বং। বৃষ্যত্বং। রসায়নত্বং। নাতিশীতত্বং। নাত্যুষ্ণত্বং। হৃদ্যত্বং। ভেদকত্বঞ্চ। ইতি রাজবল্লভঃ

কাকমাতা (স্ত্রী) কাকমাচী। ইতি রাজনির্ঘণ্টঃ॥

কাকমুদ্গা (স্ত্রী) মুদ্গপর্ণীবৃক্ষঃ। মুগাণী ইতি ভাষা। ইত্যমরঃ॥

কাকযবঃ (পুং) তণ্ডুলশূন্যধান্যং। আগড়া ইতি ভাষা। ইতি মহাভারত

কাকরুহা (স্ত্রী) বন্দাবৃক্ষঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কাকরুকঃ (পুং) স্ত্রীজিতঃ। উলূকঃ। দম্ভঃ। দিগম্বরভীরুকনির্ধনেষু ত্রি। ইতি হেমচন্দ্রঃ

কাকলং (ক্লী) কণ্ঠমণিঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কাকলঃ (পুং) দ্রোণকাকঃ। ইতি শব্দরত্নাবলী

কাকলকঃ (পুং) কণ্ঠমণিঃ। ইতি হেমচন্দ্রঃ॥

কাকলিঃ (স্ত্রী) সূক্ষ্মমধুরাস্ফুটধ্বনিঃ। ইত্যমরটীকায়াং ভরতঃ॥

কাকলী (স্ত্রী) সূক্ষ্মমধুরাস্ফুটধ্বনিঃ। ইত্যমরঃ॥

কাকলীদ্রাক্ষা (স্ত্রী) দ্রাক্ষাপ্রভেদঃ। বেদানা কিষ্মিষ্ ইতি চ খ্যাতা। তৎপর্য্যায়ঃ। জম্বুকা ২ ফলোত্তমা ৩ লঘুদ্রাক্ষা ৪ নির্বীজা ৫ সুবৃত্তা ৬ রসাধিকা ৭। তস্যা গুণাঃ। মধুরত্বং। অম্লত্বং। রসালত্বং। রুচিকারিত্বং। শিশিরত্বং। শ্বাসহৃল্লাসনাশিত্বং। জনবল্লভত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

কাকলীরবঃ (পুং) কোকিলঃ। ইতি রাজনির্ঘণ্টঃ॥

কাকবল্লরী (স্ত্রী) স্বর্ণবল্লী। ইতি রাজনির্ঘণ্টঃ॥

কাকশীর্ষঃ (পুং) বকবৃক্ষঃ। ইতি জটাধরঃ॥

কাকস্ফূর্জঃ (পুং) কাকতিন্দুকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কাকা (স্ত্রী) কাকনাসালতা। কাকোলীবৃক্ষঃ॥ কাকজঙ্ঘাবৃক্ষঃ। রক্তিকালতা। মলপূবৃক্ষঃ। কাকমাচীবৃক্ষঃ। ইতি মেদিনী॥

কাকাঙ্গা (স্ত্রী) কাকাঙ্গীবৃক্ষঃ। ইত্যমরটীকায়াং রমানাথঃ॥

কাকাঙ্গী (স্ত্রী) কাকজঙ্ঘাবৃক্ষঃ। ইত্যমরঃ॥

কাকাক্ষী (স্ত্রী) কাকজঙ্ঘাবৃক্ষঃ। ইতি শব্দরত্নাবলী॥

কাকাণ্ডঃ (পুং) মহানিম্বঃ। কাকতিন্দুঃ। ইতি রাজনির্ঘণ্টঃ॥

কাকাণ্ডা (স্ত্রী) কোলশিম্বী। ইতি রাজনির্ঘণ্টঃ॥

কাকাণ্ডী (স্ত্রী) মহাজ্যোতিষ্মতী লতা। ইতি রাজনির্ঘণ্টঃ॥

কাকাণ্ডোলা (স্ত্রী) কোলশিম্বী। ইতি রাজনির্ঘণ্টঃ॥

কাকাদনী (স্ত্রী) গুঞ্জা। ইতি শব্দরত্নাবলী॥ শ্বেতগুঞ্জা। ইতি রাজনির্ঘণ্টঃ॥ বৃক্ষবিশেষঃ। কালিয়াকড়া ইতি ভাষা। তৎপর্য্যায়ঃ। হিংস্রা ২ গৃধ্রনখী ৩ তুণ্ডী ৪ কালা ৫ অহিংস্রা ৬ কটুকা ৭ পাশিঃ ৮ কাপালঃ ৯ কুলিকঃ ১০। ইতি রত্নমালা॥

কাকাহ্বঃ ( পুং ) স্বর্ণবল্লী। ইতি রাজনির্ঘণ্টঃ॥
কাকারিঃ ( পুং ) পেচকঃ। ইতি হেমচন্দ্রঃ॥
কাকালঃ ( পুং ) দ্রোণকাকঃ। ইতি শব্দরত্নাবলী॥
কাকিণী ( স্ত্রী ) পণচতুর্থাংশঃ। পাঁচ গণ্ডা কড়ি ইতি ভাষা। মানদণ্ডঃ। কাঠা নল ইত্যাদি ভাষা। কৃষ্ণলা। কুঁচ ইতি ভাষা। একবরাটী। এক কড়া ইতি ভাষা। উন্মানস্যাংশকঃ। ইতি মেদিনী॥
কাকিনী ( স্ত্রী ) কাকিণী। ইত্যমরটীকায়াং রায়মুকুটঃ॥
কাকিলঃ ( পুং ) কাকলঃ। কণ্ঠমণিঃ। ইতি শব্দমালা॥
কাকুঃ ( স্ত্রী ) শোকভয়াদিভির্ধ্বনিবিকারঃ। ইত্যমরঃ॥ জিহ্বা। ইতি ত্রিকাণ্ডশেষঃ॥
কাকুৎস্থঃ ( পুং ) শ্রীরামচন্দ্রঃ। ইতি রামায়ণং॥ পুরঞ্জয়রাজঃ। ইতি ত্রিকাণ্ডশেষঃ॥
কাকুদং ( ক্লী ) তালু। ইত্যমরঃ॥
কাকেন্দুঃ ( পুং ) কুলকবৃক্ষঃ। মাকড়া কেন্দু ইতি খ্যাতঃ। ইত্যমরঃ॥
কাকেষ্টঃ ( পুং ) নিম্ববৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥
কাকেক্ষুঃ ( পুং ) খগ্‌গড়ঃ। খাগ্‌ড়া ইতি ভাষা। ইতি রত্নমালা ত্রিকাণ্ডশেষশ্চ॥ কাশঃ। ইতি রাজনির্ঘণ্টঃ॥
কাকোচিকঃ ( পুং ) কাকোচীমৎস্যঃ। কাউচী ইতি ভাষা। ইতি হারাবলী॥
কাকোচী ( স্ত্রী ) কাকোচিকমৎস্যঃ। ইতি হারাবলী॥



কাকোডুম্বরঃ ( পুং ) কাকোডুম্বরিকা। কাকডুমুর ইতি ভাষা। ইতি শব্দরত্নাবলী॥
কাকোডুম্বরিকা ( স্ত্রী ) বৃক্ষবিশেষঃ। কোঠ ডুমুরি ডুমুরি ইতি চ খ্যাতা। কাকডুমুর ইতি ভাষা। তৎপর্য্যায়ঃ। কন্তুঃ ২ মলপূঃ ৩ জঘনেফলা ৪। ইত্যমরঃ॥ মলয়ূঃ ৫ ফল্গুফলা ৬ কাকোডুম্বরঃ ৭। ইতি শব্দরত্নাবলী॥ ফলবাটিকা ৮ বহুফলা ৯। ইতি জটাধরঃ॥ অস্যা গুণাঃ। কাকোডুম্বরিকাশব্দে দ্রষ্টব্যাঃ॥
কাকোদরঃ ( পুং ) সর্পঃ। ইত্যমরঃ॥
কাকোডুম্বরিকা ( স্ত্রী ) কাকোডুম্বরিকা। কাক ডুমুরি ইতি ভাষা। অস্যাঃ পর্য্যায়ঃ। কৃষ্ণোডুম্বরিকা ২ খরপত্রী ৩ রাজিকা ৪ ক্ষুদ্রোডুম্বরিকা ৫ কুষ্ঠঘ্নী ৬ ফল্গুবাটিকা ৭ অজাজী ৮ ফল্গুনী ৯ মলপূঃ ১০ চিত্রভেষজা ১১ ধ্বাঙ্ক্ষনাম্নী ১২। অস্যা গুণাঃ। শীতত্বং। কষায়ত্বং। ব্রণনাশিত্বং। গর্ভরক্ষাহিতত্বং। স্তনদুগ্ধপ্রদত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥
কাকোলং ( ক্লী ) নরকবিশেষঃ। ইতি মেদিনী॥
কাকোলঃ ( পুং ক্লী ) কৃষ্ণবর্ণস্থাবরবিষবিশেষঃ। ইত্যমরঃ॥ কাকোলমুগ্রতেজঃ স্যাৎ কৃষ্ণচ্ছবিমহাবিষং। ইতি বৈদ্যকং॥
কাকোলঃ ( পুং ) কুলালঃ। দ্রোণকাকঃ। ইতি মেদিনী॥ সর্পঃ। শূকরভেদঃ। ইতি শব্দরত্নাবলী॥ কাকোলীনামখ্যাতৌষধিবিশেষঃ। ইতি ধরণী॥
কাকোলী ( স্ত্রী ) অষ্টবর্গে প্রসিদ্ধৌষধিবিশেষঃ। তৎপর্য্যায়ঃ। মধুরা ২ কাকী ৩ কালিকা ৪

বায়সোলী ৫ ক্ষীরা ৬ ধ্বাঙ্ক্ষিকা ৭ বীরা ৮ শুক্লা ৯ ধীরা ১০ মেদুরা ১১ ধ্বাঙ্ক্ষোলী ১২ স্বাদুমাংসী ১৩ বয়ঃস্থা ১৪ জীবনী ১৫ শুক্লক্ষীরা ১৬ পয়স্বিনী ১৭। ইতি রাজনির্ঘণ্টঃ॥ পয়স্যা ১৮ শীতপাকী ১৯। ইতি রত্নমালা॥ অস্যা গুণাঃ। শীতত্বং। মধুরত্বং। ক্ষয়পিত্তানিলার্ত্তিরক্তদাহজ্বরনাশিত্বং। কফশুক্রবর্দ্ধকত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

কাকোলূকিকা (স্ত্রী) কাকোলূকয়োর্বৈরতা। ইতি শব্দরত্নাবলী॥

কাগঃ (পুং) কাকঃ। ইতি জটাধরঃ॥

কাগদং (ক্লী) লেখনপত্রবিশেষঃ। কাগজ ইতি আরবী ভাষা। যথা। ভূর্জ্জে বা বসনে রক্তে ক্ষৌমে বা তালপত্রকে। কাগদে চাষ্টগন্ধেন পঞ্চগন্ধেন বা পুনঃ॥ ত্রিগন্ধেনাথ বৈকেন বিলিখ্য ধারয়েন্নরঃ। পঞ্চসপ্তত্রিলোকৈর্ব্বা শোধিতং কবচং শুভং॥ ইতি শ্রীঘনানন্দদাসবিরচিতমন্ত্রকল্পদ্রুমে হনূমৎকবচং॥

কাঙ্গা (স্ত্রী) বচা। ইতি শব্দচন্দ্রিকা

কাচং (ক্লী) সিক্থকং। মোম ইতি ভাষা কাচলবণং। ইতি রাজনির্ঘণ্টঃ॥

কাচঃ (পুং) মৃত্তিকাবিশেষঃ। কাঁচ ইতি ভাষা। তৎপর্য্যায়ঃ। ক্ষারঃ ২। ইত্যমরঃ॥ অস্য গুণাঃ। ক্ষাররসত্বং। উষ্ণবীর্য্যত্বং। অঞ্জনাৎ দৃষ্টিকারিত্বঞ্চ। ইতি রাজবল্লভঃ॥ শিক্যং। শিকা ইতি ভাষা। মণিঃ। নেত্ররোগবিশেষঃ। ইতি মেদিনী॥ তস্য লক্ষণং। অস্মিন্নপি তমোভূতে নাতিরূঢ়ে মহাগদে। চন্দ্রাদিত্যৌ সনক্ষত্রাবন্তরীক্ষে চ বিদ্যুতঃ॥ নির্ম্মলানি চ তেজাংসি ভ্রাজিষ্ণূনীব পশ্যতি। স এব লিঙ্গনাশস্তু নীলিকাকাচসংজ্ঞিতঃ॥ ইতি মাধবকরঃ॥

কাচনং (ক্লী) পত্রনিবন্ধনং। ইতি ত্রিকাণ্ডশেষঃ॥ কচেল ইত্যপি পাঠো দৃষ্টঃ॥ স্ত্রীলিঙ্গকিমৃশব্দার্থে ব্য। ইতি ব্যাকরণং॥

কাচনকং (ক্লী) লেখো নিবধ্যতে যেন তত্র। পত্রনিবন্ধনং। ইতি হারাবলী॥

কাচনকী [ন্] (পুং) লিপিঃ। তৎপর্য্যায়ঃ। বর্ণদূতঃ ২ স্বস্তিমুখঃ ৩ লেখঃ ৪ বাচিকহারকঃ ৫ তালিকঃ ৬। ইতি জটাধরঃ॥

কাচভাজনং (ক্লী) কাচপাত্রং। কাঁচের বাসন ইতি ভাষা। তৎপর্য্যায়ঃ। শিঞ্জানং ২ ইতি ত্রিকাণ্ডশেষঃ॥

কাচমলং (ক্লী) কাচলবণং। ইতি রাজনির্ঘণ্টঃ॥

কাচলবণং (ক্লী) লবণবিশেষঃ। কালালুণ ইতি ভাষা। তৎপর্য্যায়ঃ। নীলং ২ কাচোদ্ভবং ৩ কাচং ৪ নীলকং ৫ কাচসম্ভবং ৬ কাচসৌবর্চ্চলং ৭ কৃষ্ণলবণং ৮ পাকজং ৯ কাচোত্থং ১০ হয়গন্ধং ১১ কাললবণং ১২ কুরুবিন্দং ১৩ কাচমলং ১৪ কৃত্রিমং ১৫। অস্য গুণাঃ। রুচিকারিত্বং। ঈষৎক্ষারত্বং। পিত্তবৃদ্ধিকারিত্বং। দাহদাতৃত্বং। কফবাতগুল্মশূলনাশিত্বং। অগ্নিদীপনত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

কাচসম্ভবং (ক্লী) কাচলবণং। ইতি রাজনির্ঘণ্টঃ॥

কাচসৌবর্চ্চলং (ক্লী) কাচলবণং। ইতি রাজনির্ঘণ্টঃ॥

কাচস্থালী (স্ত্রী) ফলেরুহাবৃক্ষঃ। পারুল গাছ ইতি ভাষা। ইত্যমরঃ॥ কাচপাত্রঞ্চ॥

কাচিঘঃ (পুং) কাঞ্চনং। ছেমণ্ডঃ। ছিগড়া। ইতি ভাষা। মূষিকঃ। ইতি মেদিনী॥

কাচিৎ ব্য কাচন। কাপি স্ত্রী। ইতি ব্যাকরণং॥

কাচিতং (ত্রি) শিক্যিতং শিক্যারোপিতবস্তু। শিকায় তোলা দ্রব্য ইতি ভাষা। ইত্যমরঃ॥

কাচিমঃ (পুং) দেবকুলোদ্ভববৃক্ষঃ। তৎপর্য্যায়ঃ। ভঞ্জরুঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥

কাঞ্চনং (ক্লী) স্বর্ণং। ইত্যমরঃ॥ পদ্মকেশরং। ইতি মেদিনী॥ ধনং। নাগকেশরপুষ্পং। ইতি রাজনির্ঘণ্টঃ॥

কাঞ্চনঃ (পুং) স্বনামখ্যাতপুষ্পবৃক্ষবিশেষঃ। রক্তশ্বেতভেদেন স দ্বিবিধঃ। আদ্যস্য পর্য্যায়ঃ। রক্তপুষ্পঃ ২ কোবিদারঃ ৩ যুগ্মপত্রঃ ৪ কুণ্ডলঃ ৫॥ দ্বিতীয়স্য পর্য্যায়ঃ। কাঞ্চনালঃ ২ কর্ব্বুদারঃ ৩ পাকারিঃ ৪। ইতি রত্নমালা॥ অস্য রাজনির্ঘণ্টোক্তগুণপর্য্যায়ৌ কোবিদারশব্দে দ্রষ্টব্যৌ॥*॥ চম্পকঃ। নাগকেশরঃ। উডুম্বরঃ। ধুস্তুর ইতি মেদিনী॥

কাঞ্চনকং (ক্লী) হরিতালং। ইতি রাজনির্ঘণ্টঃ॥

কাঞ্চনকঃ (পুং) কোবিদারবৃক্ষঃ। ইতি বৈদ্যক

কাঞ্চনকদলী (স্ত্রী) সুবর্ণকদলী। চাঁপাকলা ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥

কাঞ্চনকারিণী (স্ত্রী) শতমূলী। ইতি শব্দচন্দ্রিকা॥

কাঞ্চনগিরিঃ (পুং) সুমেরুপর্ব্বতঃ। ইতি হেমচন্দ্রঃ॥

কাঞ্চনপুষ্পকং (ক্লী) আহুল্যবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কাঞ্চনপুষ্পী (স্ত্রী) গণিকারীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কাঞ্চনক্ষীরী (স্ত্রী) ক্ষীরিণীলতা। ইতি রাজনির্ঘণ্টঃ॥

কাঞ্চনারঃ (পুং) কোবিদারবৃক্ষঃ। কচ্নার ইতি হিন্দী ভাষা। ইতি রাজনির্ঘণ্টঃ॥

কাঞ্চনালঃ (পুং) কোবিদারবৃক্ষঃ। ইতি শব্দরত্নাবলী॥

কাঞ্চনাহ্বয়ঃ (পুং) নাগকেশরবৃক্ষঃ। ইত্য-

কাঞ্চনী (স্ত্রী) হরিদ্রা। ইতি মেদিনী॥ স্বর্ণক্ষীরীবৃক্ষঃ। গোরোচনা। ইতি রাজনির্ঘণ্টঃ॥

কাঞ্চনীয়া (স্ত্রী) গোরোচনা। ইতি রাজনির্ঘণ্টঃ॥

কাঞ্চিঃ (স্ত্রী) কাঞ্চী। ইত্যুণাদিকোষঃ॥

কাঞ্চিকং (ক্লী) কাঞ্জিকং। ইতি হেমচন্দ্রঃ॥

কাঞ্চী (স্ত্রী) স্ত্রীকট্যাভরণং। চন্দ্রহার গোট্ ইত্যাদি ভাষা। তৎপর্য্যায়ঃ। মেখলা ২

সপ্তকী ৩ রসনা ৪ সারসনং ৫। ইত্যমরঃ ॥ কাঞ্চিঃ ৬ রশনা ৭ কক্ষা ৮ কক্ষ্যা ৯ সপ্তকা ১০ সারশনং ১১ রসনং ১২ বন্ধনং ১৩। ইতি শব্দরত্নাবলী ॥ কেচিত্তু একযষ্টির্ভবেৎ কাঞ্চী মেখলাত্বষ্টযষ্টিকা। রসনা ষোড়শ জ্ঞেয়া কলাপঃ পঞ্চবিংশকঃ ॥ ইতি পঠন্তি ইহ স্বভেদাৎ পর্য্যায়তা। ইতি তট্টীকা ॥ মোক্ষদসপ্তপুর্য্যন্তর্গতপুরীবিশেষঃ। ইতি মেদিনী ॥ গুঞ্জা। ইতি বিশ্বঃ ॥

কাঞ্চীপদং (ক্লী) জঘনং। ইতি হলায়ুধহেমচন্দ্রৌ ॥

কাঞ্জিকং (ক্লী) বারিপর্য্যুষিতান্নাম্লজলং। কাঁজী ইতি ভাষা। তৎপর্য্যায়ঃ। আরনালকং ২ সৌবীরং ৩ কুল্মাষং ৪ অভিষুতং ৫ অবন্তিসোমং ৬ ধান্যাম্লং ৭ কুঞ্জলং ৮। ইত্যমরঃ ॥ কুল্মাসং ৯ কুল্মাষাভিষুতং ১০ কাঞ্চিকং ১১ কাঞ্জীকং ১২ কাঞ্জিকা ১৩ কঞ্জিকং ১৪ কাঞ্জী ১৫ ভক্তবারি ১৬ ধান্যমূলং ১৭ ধান্যযোনি ১৮ তুষাম্বু ১৯। ইতি তট্টীকা ॥ গৃহাম্লং ২০ মহারসং ২১। ইতি রত্নমালা ॥ তুষোদকং ২২ শুক্তং ২৩ চুক্রং ২৪ ধাতুঘ্নং ২৫ উন্নাহং ২৬ রক্ষোঘ্নং ২৭ কুণ্ডগোলকং ২৮ সুবীরাম্লং ২৯। ইতি হেমচন্দ্রঃ ॥ বীরং ৩০ অভিষবং ৩১ অম্লসারকং ৩২। অস্য গুণঃ। বাতশোথপিত্তজ্বরদাহমূর্চ্ছাশূলাধ্মানবিবন্ধনাশিত্বং। কাঞ্জিকং দধি তৈলন্তু বলীপলিতনাশনং। দাহকং গাত্রশৈথিল্যং বল্যং সন্তর্পণং পরং ॥ মর্দ্দনান্ন চ ভক্ষণাৎ। ইতি রাজনির্ঘণ্টঃ ॥ অপি চ। ভেদকত্বং। তীক্ষ্ণত্বং। উষ্ণত্বং। পিত্তরুচিবস্তিশুদ্ধ্যগ্নিবৃদ্ধিকারিত্বং। স্পর্শে শীতলত্বং। শ্রমক্লমনাশিত্বঞ্চ। পুরাতনস্য তস্য গুণঃ। হৃৎপাণ্ডুকৃমিরোগনাশিত্বং। অগ্নিবৃদ্ধিকারিত্বঞ্চ। ইতি রাজবল্লভঃ ॥ * ॥ কুল্মাষধান্যমণ্ডেন চাশৃতং কাঞ্জিকং ভবেৎ ॥ যন্মস্ত্বাদিশুচৌ ভাণ্ডে সগুড়ক্ষৌদ্রকাঞ্জিকং। ধান্যরাশৌ ত্রিরাত্রস্থং শুক্তং চুক্রং তদুচ্যতে ॥ ইতি বৈদ্যকপরিভাষা ॥

কাঞ্জিকবটকঃ (পুং) বটকবিশেষঃ। কাঁজি বড়া ইতি ভাষা। তস্য পাকপ্রকারো যথা। মস্থনী নূতনা ধার্য্যা কটুতৈলেন লেপিতা। নির্ম্মলেনাম্বুনাপূর্য্য তস্যাঞ্চূর্ণং বিনিক্ষিপেৎ ॥ রাজিকাজীরলবণহিঙ্গুশুণ্ঠীনিশাকৃতং। নিক্ষিপেদ্বটকাংস্তত্র ভাণ্ডস্যাস্যঞ্চ মুদ্রয়েৎ ॥ ততো দিনত্রয়াদূর্দ্ধমম্লাঃ স্যুর্বটকা ধ্রুবং ॥ অস্য গুণাঃ। কাঞ্জিকবটকো রুচ্যো বাতহরঃ শ্লেষ্মকারকঃ শীতঃ। দাহং শূলমজীর্ণং হরতে নেত্রাময়েঘহিতঃ ॥ ইতি ভাবপ্রকাশঃ ॥

কাঞ্জিকা (স্ত্রী) জীবন্তীলতা। পলাশীলতা। ইতি রাজনির্ঘণ্টঃ ॥

কাঞ্জী (স্ত্রী) মহাদ্রোণাবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥ কাঞ্জিকং। ইত্যমরটীকা ॥

কাঠঃ (পুং) পাষাণঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

কাঠিন্যং (ক্লী) কঠিনতা। যথা। শীতে মা কুরু সম্ভ্রমঞ্চ মৃদুনা কাঠিন্যমঙ্গীকৃতং। ইত্যুদ্ভটঃ ॥

কাঠিন্যফলঃ ( পুং ) কপিত্থবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কাণঃ ( পুং ) কাকঃ। ইতি মেদিনী ॥

কাণঃ ( ত্রি ) একচক্ষুঃ। কাণা ইতি ভাষা। ইতি মেদিনী ॥

কাণূকঃ ( পুং ) কাকঃ। ইত্যুণাদিকোষঃ ॥

কাণ্ডং ( ক্লী ) সন্ধিবিচ্ছিন্নৈকখণ্ডাস্থি। যথা। ভগ্নং সমাসাদ্দ্বিবিধং হুতাশকাণ্ডে চ সন্ধৌ চ হি তত্র সন্ধৌ। উৎপিষ্টবিশ্লিষ্টবিবর্ত্তিতঞ্চ তির্য্যগ্‌গতং ক্ষিপ্তমধশ্চ ষট্ চ ॥ ইতি রোগবিনিশ্চয়ঃ ॥ সন্ধিবিচ্ছিন্নমেকখণ্ডমস্থিকাণ্ডং। কাণ্ডেন চ নলককপালবলয়তরুণরুচকানাং গ্রহণং। তত্র ভগ্নং কাণ্ডভগ্নং। ইতি তট্টীকাব্যাখ্যামধুকোষঃ ॥

কাণ্ডঃ ( পুং ক্লী ) দণ্ডঃ। নালং। বাণঃ। শরঃ। অর্ব্বা। কুৎসিতঃ। বর্গঃ। পরিচ্ছেদঃ। অবসরঃ। প্রস্তাবঃ। বারি। জলং। ইত্যমরঃ ॥ স্তম্বঃ। তৃণাদিগুচ্ছঃ। তরুস্কন্ধঃ। গুঁড়ি ইতি ভাষা। বৃন্দঃ। সমূহঃ। রহঃ। নির্জনস্থানং। ইতি মেদিনী ॥ শ্লাঘা। ইতি হেমচন্দ্রঃ ॥ পাপীয়ান্। ইতি ধরণিঃ ॥

কাণ্ডকটুকঃ ( পুং ) কারবেল্লঃ। ইতি রাজনির্ঘণ্টঃ ॥

কাণ্ডকাণ্ডকঃ ( পুং ) কাশতৃণং। ইতি রাজনির্ঘণ্টঃ ॥

কাণ্ডকারং ( ক্লী ) গুবাকঃ। ইতি শব্দমালা ॥

কাণ্ডকীলকঃ ( পুং ) লোধ্রঃ। লোধকাঠ ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ ॥

কাণ্ডগুণ্ডঃ ( পুং ) গুণ্ডনামতৃণং। ইতি রাজনির্ঘণ্টঃ ॥

কাণ্ডগোচরঃ ( পুং ) নারাচঃ। লৌহময়বাণঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

কাণ্ডণী ( স্ত্রী ) সূক্ষ্মপর্ণীলতা। রামদূতী ইতি খ্যাতা। ইতি শব্দচন্দ্রিকা ॥

কাণ্ডতিক্তঃ ( পুং ) ভূনিম্বঃ। ইতি রাজনির্ঘণ্টঃ ॥

কাণ্ডতিক্তকঃ ( পুং ) ভূনিম্ববৃক্ষঃ। চিরাতা ইতি ভাষা। ইতি শব্দচন্দ্রিকা ॥

কাণ্ডনীলঃ ( পুং ) লোধ্রঃ। ইতি রাজনির্ঘণ্টঃ ॥

কাণ্ডপটঃ ( পুং ) যবনী। তিরস্করিণী। কানাৎ ইতি ভাষা। ইতি হেমচন্দ্রঃ ॥

কাণ্ডপুঙ্খা ( স্ত্রী ) শরপুঙ্খা। ইতি রাজনির্ঘণ্টঃ ॥

কাণ্ডপুষ্পং ( ক্লী ) ক্ষুদ্রসুগন্ধিপুষ্পবিশেষঃ। দোনা ইতি ভাষা। ইতি শব্দচন্দ্রিকা ॥

কাণ্ডপৃষ্ঠং ( ক্লী ) কর্ণধনুঃ। ইতি মহাভারতং ॥

কাণ্ডপৃষ্ঠঃ ( ত্রি ) কাণ্ডস্পৃষ্টঃ। শস্ত্রাজীবঃ। ইত্যমরটীকায়াং স্বামী ॥ বৈশ্যাপতৌ পুং। ইতি দানধর্ম্মঃ ॥

কাণ্ডবারিণী ( স্ত্রী ) দুর্গা। যথা। মহাগজঘটাটোপসংযুগে নরবাজিনাং। স্মরণাদ্বারতে বাণান্ তেন সা কাণ্ডবারিণী ॥ ইতি দেবীপুরাণে দেবীনিরুক্তনাম ৪৫ অধ্যায়ঃ ॥

কাণ্ডরুহা ( স্ত্রী ) কটুকী। ইতি রত্নমালা ॥

কাণ্ডর্ষিঃ ( পুং ) বেদকাণ্ডবিশেষাধ্যাপকমুনিভেদঃ। স তু জৈমিন্যাদিঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

কাণ্ডবান্ [ ৎ ] ( ত্রি ) কাণ্ডীরঃ। তীরান্দাজ ইতি ভাষা। ইত্যমরঃ ॥

কাণ্ডসন্ধিঃ ( পুং ) গ্রন্থিঃ। পাব্ গাঁট ইতি চ ভাষা। ইতি রাজনির্ঘণ্টঃ॥

কাণ্ডস্পৃষ্টঃ (ত্রি) কাণ্ডপৃষ্ঠঃ। শস্ত্রাজীবী। ইত্যমরঃ॥

কাণ্ডহীনং (ক্লী) ভদ্রমুস্তকং। ইতি শব্দচন্দ্রিকা॥

কাণ্ডিকা (স্ত্রী) লঙ্কানামকধান্যবিশেষঃ। বালুকীনামকর্কটীভেদঃ। ইতি রাজনির্ঘণ্টঃ॥

কাণ্ডীরঃ ( ত্রি ) কাণ্ডাস্ত্রবান্। তীরান্দাজ ইতি ভাষা। ইত্যমরঃ॥

কাণ্ডীরঃ ( পুং ) অপামার্গবৃক্ষঃ। লতাপ্রভেদঃ। কাণ্ডবেল ইতি খ্যাতঃ। তৎপর্য্যায়ঃ। কাণ্ডকটুকঃ ২ নাসাসংবেদনঃ ৩ পটুঃ ৪ অগ্রকাণ্ডঃ ৫ স্তোমবল্লী ৬ কারবল্লী ৭ সুকাণ্ডিকা ৮। অস্য গুণাঃ। কটুত্বং। তিক্তত্বং। উষ্ণত্বং। সারকত্বং। দুষ্টব্রণলূতাগুল্মোদরপ্লীহশূলমন্দাগ্নিনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

কাণ্ডীরী (স্ত্রী) মঞ্জিষ্ঠা। ইতি রত্নমালা॥ কাণ্ডীরা ইত্যপি পাঠঃ॥

কাণ্ডেরী (স্ত্রী) নাগদন্তীবৃক্ষঃ। ইতি রত্নমালা॥

কাণ্ডেরুহা ( স্ত্রী ) কটুকী। ইতি রত্নমালা॥

কাণ্ডেক্ষুঃ ( পুং ) কোকিলাক্ষবৃক্ষঃ। কুলিয়া খাড়া ইতি ভাষা। ইত্যমরঃ॥ কাশতৃণং। ইতি রাজনির্ঘণ্টঃ॥

কাতরঃ (ত্রি) ব্যসনাকুলচিত্তঃ। ব্যাকুলঃ। তৎপর্য্যায়ঃ। অধীরঃ ২। ইত্যমরঃ॥

কাতরঃ ( পুং ) কাতলমৎস্যঃ। ইতি শব্দরত্নাবলী॥

কাতলঃ ( পুং ) মৎস্যবিশেষঃ। কাৎলা ইতি ভাষা। তস্য গুণাঃ। উষ্ণত্বং। মধুরত্বং। গুরুপাকিত্বং। ত্রিদোষকারিত্বঞ্চ। ইতি রাজবল্লভঃ॥

কাতৃণং (ক্লী) রোহিষতৃণং। ইতি রাজনির্ঘণ্টঃ॥

কাত্যঃ ( পুং ) কাত্যায়নমুনিঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কাত্যায়নঃ ( পুং ) ধর্ম্মশাস্ত্রকর্ত্তৃমুনিবিশেষঃ। বররুচিঃ। ইতি মেদিনী॥

কাত্যায়নী (স্ত্রী) দুর্গা। অর্দ্ধবৃদ্ধা কাষায়বসনা বিধবা। ইত্যমরঃ॥

কাদম্বঃ (পুং) কলহংসঃ। বালি হাঁস্ ইতি ভাষা। ইত্যমরঃ॥ অস্য মাংসস্য গুণাঃ। বায়ুরক্তপিত্তনাশিত্বং। ভেদকত্বং। শুক্রকারিত্বং। শীতত্বঞ্চ। ইতি রাজবল্লভঃ॥ কদম্ববৃক্ষঃ। ইত্যমরটীকায়াং ভরতঃ॥ বাণঃ। ইতি মেদিনী॥

কাদম্বকঃ ( পুং ) বাণঃ। ইতি হারাবলী॥

কাদম্বরং ( ক্লী ) কদম্বপুষ্পোদ্ভবমদ্যং। ইতি মেদিনী॥ দধিসারঃ। ইতি হেমচন্দ্রঃ॥ শীধুঃ। ইতি বিশ্বঃ॥

কাদম্বরঃ (পুং) দধ্যগ্রং। দধিসরঃ। ইতি মেদিনী॥

কাদম্বরী (স্ত্রী) মদিরা। কোকিলা। সরস্বতী। শারিকাপক্ষিণী। ইতি মেদিনী॥

কাদম্বরীবীজং (ক্লী) সুরাবীজং। ইতি রত্নমালা॥

কাদম্বর্য্যঃ ( পুং ) কদম্ববৃক্ষঃ। ইতি জটাধরঃ॥

কাদম্বা ( স্ত্রী ) কদম্বপুষ্পীবৃক্ষঃ। মুণ্ডিরী ইতি ভাষা। ইতি শব্দচন্দ্রিকা॥

কাদম্বিনী (স্ত্রী) মেঘমালা। মেঘশ্রেণিঃ। ইত্যমরঃ॥

কাদাচিৎকং (ক্লী) কদাচিদ্ভবং। ইতি ব্যাকরণং॥

কাদ্রবেয়ঃ (পুং) কদ্রুসন্তানঃ। নাগঃ। ইত্যমরঃ॥

কানকং (ক্লী) জয়পালবীজং। অস্য গুণাঃ। তীক্ষ্ণত্বং। উষ্ণত্বং। সারকত্বং। উৎক্লেদকারিত্বঞ্চ। ইতি রাজবল্লভঃ॥

কাননং (ক্লী) বনং। ব্রহ্মণো মুখং। গৃহং। ইতি মেদিনী॥

কাননারিঃ (পুং) শমীবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥

কানীনঃ (পুং স্ত্রী) অনূঢ়াপুত্রঃ। তৎপর্য্যায়ঃ। কন্যকাজাতঃ ২। ইত্যমরঃ॥ সা কন্যা যদ্যনূঢ়া পিতৃগৃহ এব তিষ্ঠতি তদা তৎপুত্রো মাতামহস্যৈব যথা। কানীনঃ কন্যকাজাতো মাতামহসুতো মতঃ। ইতি যাজ্ঞবল্ক্যঃ॥ যদ্যূঢ়া তদা বোঢ়ুরেব যথা। পিতৃবেশ্মনি কন্যা তু যং পুত্রং জনয়েদ্রহঃ। তং কানীনং বদেন্নাম্না বোঢ়ুঃ কন্যাসমুদ্ভবং॥ ইতি মনুঃ॥ ব্যাসে·কর্ণে চ পুং। ইতি মেদিনী॥

কান্তং (ক্লী) কুঙ্কুমং। ইতি রাজনির্ঘণ্টঃ॥ লৌহবিশেষঃ। তস্য লক্ষণং যথা। স্বাদুর্যত্র ভবেন্নিম্বকল্কো রাত্রিন্দিবোষিতঃ। কান্তং তদুত্তমং যচ্চ রূপ্যেণাবর্ত্তিতং মিলেৎ॥ তস্য পরীক্ষা। যথা। পাত্রে যস্মিন্ বিসরতি জলে তৈলবিন্দুর্নিষিক্তো বিন্ধং গন্ধং বিসৃজতি নিজং রূষিতং নিম্বকল্কৈঃ। পাকে দুগ্ধং ভজতি শিখরাকারতাং নৈতি ভূমৌ কান্তং লৌহং তদিদমুদিতং লক্ষণোক্তং ন চান্যৎ॥ ইতি সুখবোধঃ॥ অপি চ। যৎপাত্রে ন প্রসরতি জলে তৈলবিন্দুর্নিষিক্তো হিঙ্গুর্গন্ধং ত্যজতি ভজতে স্বাদুতাং নিম্বকল্কঃ। পাচ্যং দুগ্ধং ভবতি সিকতাপুঞ্জবন্নৈতি ভূমৌ কৃষ্ণাঙ্গঃ স্যাৎ সজলচণকঃ কান্তলৌহং বদন্তি॥ ইতি বৈদ্যকং॥

কান্তঃ (ত্রি) মনোরমঃ। শোভনঃ। ইত্যমরমেদিনীকরৌ॥

কান্তঃ (পুং) শ্রীকৃষ্ণঃ। চন্দ্রঃ। ইতি শব্দরত্নাবলী॥ পতিঃ। চন্দ্রসূর্য্যায়ঃপর্য্যায়ান্তঃ শিলা। যথা। চন্দ্রকান্তসূর্য্যকান্তায়স্কান্তাদয়ঃ। ইতি মেদিনী॥ হিজ্জলবৃক্ষঃ। বসন্ত ঋতুঃ। ইতি রাজনির্ঘণ্টঃ॥

কান্তপক্ষী [ন্] (পুং) ময়ূরঃ। ইতি শব্দচন্দ্রিকা॥

কান্তপুষ্পঃ (পুং) কোবিদারবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কান্তলকঃ (পুং) নন্দীবৃক্ষঃ। তুঁদ ইতি ভাষা। ইত্যমরঃ॥

কান্তলোহং (ক্লী) অয়স্কান্তঃ। ইতি রাজনির্ঘণ্টঃ॥

কান্তা (স্ত্রী) নারী। প্রিয়ঙ্গুবৃক্ষঃ। ইতি মেদিনী॥ সর্ব্বাঙ্গসুন্দরী স্ত্রী। ইত্যমরঃ॥ বৃহদেলা। রেণুকা। নাগরমুস্তা। ইতি রাজনির্ঘণ্টঃ॥

কান্তাঙ্ঘ্রিদোহদঃ (পুং) অশোকবৃক্ষঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কান্তাচরণদোহদঃ (পুং) অশোকবৃক্ষঃ। ইতি ভূরিপ্রয়োগঃ॥

কান্তায়সং (ক্লী) অয়স্কান্তঃ। ইতি রাজনির্ঘণ্টঃ॥

কান্তারং (ক্লী) উপসর্গাদি। কাননং। অজবিশেষঃ। ইতি হেমচন্দ্রঃ॥

কান্তারঃ (পুং) ইক্ষুবিশেষঃ। কতারে ইতি হিন্দী ভাষা। অস্য গুণাঃ। গুরুত্বং। শুক্রশ্লেষ্মবৃদ্ধিকারিত্বং। বৃংহণত্বং। সারকত্বঞ্চ। ইতি ভাবপ্রকাশঃ॥ কোবিদারবৃক্ষঃ। বংশঃ। ইতি রাজনির্ঘণ্টঃ॥

কান্তারঃ (পুং ক্লী) মহাবনং। দুর্গমপথঃ। ইত্যমরঃ॥ বিলং। ছিদ্রং। ইতি মেদিনী॥

কান্তারকঃ (পুং) ইক্ষুবিশেষঃ। কাজ্‌লে আক ইতি ভাষা। ইত্যমরঃ॥

কান্তারী (স্ত্রী) ইক্ষুভেদঃ। কাজ্‌লে আক ইতি ভাষা। অস্যা গুণাঃ। মধুরত্বং। লঘুত্বং। ক্ষাররসত্বং। কফবাতকারিত্বঞ্চ। ইতি রাজবল্লভঃ॥

কান্তিঃ (স্ত্রী) দীপ্তিঃ। তৎপর্য্যায়ঃ। শোভা২ দ্যুতিঃ ৩ ছবিঃ ৪। ইত্যমরঃ॥ শুভা ৫ দীপ্তিঃ ৬ ভা ৭ শ্রীঃ ৮ ভাসা ৯ ভাঃ ১০। ইতি শব্দরত্নাবলী॥ অভিখ্যা ১১। ইতি জটাধরঃ॥ *॥ কান্তিকারকপর্য্যায়া যথা। রশ্মি ১ উশ্মসি ২ বেতি ৩ বেনতি ৪ বেসতি ৫ বাঞ্ছতি ৬ বষ্টি ৭ বনোতি ৮ জুষতে৯ হর্য্যতি ১০ আচকে১১ উশিক্‌১২ মন্যতে ১৩ ছন্তসং ১৪ চাকনৎ ১৫ চকমানঃ ১৬ কমতি ১৭ কানিষৎ ১৮। ইত্যষ্টাদশকান্তিকর্ম্মাণঃ। ইতি বেদনিঘণ্টৌ ২ অধ্যায়ঃ॥ স্ত্রীশোভা। ইতি হেমচন্দ্রঃ॥ ইচ্ছা। স্পৃহার্থকমধাতোর্ভাবে ক্তিপ্রত্যয়ঃ। দুর্গা। যথা। স্তুতিঃ সিদ্ধিরিতি খ্যাতা শ্রিয়া সংশ্রয়ণাচ্চ যা। লক্ষ্মীর্বা ললনা বাপি ক্রমাৎ সা কান্তিরুচ্যতে॥ ইতি দেবীপুরাণে দেবীনিরুক্তনাম ৪৫ অধ্যায়ঃ॥

কান্তিদং (ক্লী) পিত্তং। ইতি শব্দচন্দ্রিকা॥ শোভাদায়কে ত্রি॥

কান্তিদা (স্ত্রী) বাকুচীবৃক্ষঃ। সোমরাজী ইতি খ্যাতা। ইতি রাজনির্ঘণ্টঃ॥

কান্তিদায়কং (ক্লী) কালীয়কবৃক্ষঃ। ইতি জটাধরঃ॥ শোভাদায়কে ত্রি॥

কান্দবিকঃ (ত্রি) আপূপিকঃ। পূপবিক্রয়কর্ত্তা। ইত্যমরঃ॥

কান্দিগ্‌ভূতঃ (ত্রি) ভয়েন পলায়িতঃ। ইতি পুরাণং॥

কান্দিশীকঃ (ত্রি) ভয়দ্রুতঃ। ভয়েন পলায়িতঃ। ইত্যমরঃ॥

কান্যকুব্জং (ক্লী) পুরবিশেষঃ। কনজ্‌ ইতি ভাষা। তৎপর্য্যায়ঃ। মহোদয়ং ২ কন্যাকুব্জং ৩ গাধিপুরং ৪ কৌশং ৫ কুশস্থলং ৬। ইতি হেমচন্দ্রঃ॥

কান্যজা (স্ত্রী) নলীনামগন্ধদ্রব্যং। ইতি শব্দচন্দ্রিকা॥

কাপটিকঃ (পুং) ছাত্রঃ। অন্যমর্ম্মজ্ঞঃ। শঠে ত্রি। ইতি মেদিনী॥

কাপট্যং (ক্লী) কপটতা। শঠতা। কপটশব্দাৎ ভাবার্থে ষ্যপ্রত্যয়ঃ॥

কাপথঃ ( পুং ) কুৎসিতপথঃ। তৎপর্য্যায়ঃ। ব্যধ্বঃ ২ দুরধ্বঃ ৩ বিপথঃ ৪ কদধ্বা ৫। ইত্যমরঃ॥ কুপথঃ ৬ অসৎপথঃ ৭ কুৎসিতবর্ত্ম ৮। ইতি শব্দরত্নাবলী॥

কাপালং ( ক্লী ) অষ্টাদশকুষ্ঠান্তর্গতবাতিককুষ্ঠং। ইতি মাধবকরঃ॥ অস্য নিদানং কপালশব্দে দ্রষ্টব্যং॥

কাপালঃ ( পুং ) কর্কটা। কালিয়া কড়া ইতি ভাষা। ইতি শব্দচন্দ্রিকা রত্নমালা চ॥

কাপালিকঃ ( পুং ) বর্ণসঙ্করজাতিবিশেষঃ। কপালি ইতি ভাষা। ইতি তন্ত্রসারঃ॥ বামাচারিবিশেষঃ। যথা। অথ তীর্ণকরাগ্রণীঃ প্রতস্থে কাপালিকজালকং বিজেতুং ইতি শঙ্করবিজয়ঃ॥

কাপালী ( স্ত্রী ) বিড়ঙ্গা। ইতি রাজনির্ঘণ্টঃ

কাপিলঃ ( পুং ) সাংখ্যশাস্ত্রজ্ঞঃ। ইতি হেমচন্দ্রঃ॥ পিঙ্গলবর্ণঃ। তদ্বতি ত্রি। ইত্যমরটীকায়াং ভরতঃ॥

কাপিশং ( ক্লী ) মদ্যং। ইতি হেমচন্দ্রঃ॥

কাপিশায়নং ( ক্লী ) মদ্যং। ইতি জটাধরঃ॥ দেবতা। ইতি ধরণী॥

কাপিশেয়ঃ ( পুং ) পিশাচঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কাপুরুষঃ ( পুং ) কুপুরুষঃ। কুৎসিতপুরুষঃ। ইতি ব্যাকরণং॥ উদ্যোগিনং পুরুষসিংহমুপৈতি লক্ষ্মীর্দৈবেন দেয়মিতি কাপুরুষা বদন্তি। ইতি হিতোপদেশশ্চ॥

কাপেয়ঃ (ত্রি) কপিসম্বন্ধী। ইতি হলা-

কাপোতং ( ক্লী ) কপোতগণঃ। পায়রার ঝাঁক ইতি ভাষা। ইত্যমরঃ॥ সৌবীরাঞ্জনং। ইতি রাজনির্ঘণ্টঃ॥

কাপোতঃ ( পুং ) সর্জিকাক্ষারঃ। ইত্যমরঃ॥ রুচকঃ। ইতি মেদিনী॥ কপোতাভবর্ণঃ। তদ্বতি ত্রি। ইতি হেমচন্দ্রঃ॥

কাপোতাঞ্জনং ( ক্লী ) সৌবীরাঞ্জনং। স্রোতোঞ্জনং। ইত্যমরঃ॥

কাপ্যকরঃ ( পুং ) স্বয়ং কৃতং পাপং চিত্তে আধায় যঃ কথয়তি সঃ। ইতি শব্দরত্নাবলী॥

কাপ্যকারঃ ( পুং ) চিত্তে পাপং আধায় যৎ শংসনং সঃ। ইতি ত্রিকাণ্ডশেষঃ॥ স্বপাপবক্তা। ইতি শব্দরত্নাবলী॥

কাফলঃ ( পুং ) কট্‌ফলঃ। ইতি শব্দরত্নাবলী॥

কাম ব্য অভ্যনুজ্ঞা। ইতি বিশ্বঃ॥

কামং ( ক্লী ) রেতঃ। নিকামঃ। কাম্যং। ইতি মেদিনী॥ বাঢ়ং। অনুমতিঃ। ইতি হেমচন্দ্রঃ॥

কামঃ ( পুং ) কাম্যং। ইচ্ছা। ইতি হেমচন্দ্রঃ॥ কামস্তু ব্রহ্মণো হৃদয়াজ্জাতঃ। যথা। হৃদি কামো ভ্রুবোঃ ক্রোধো লোভশ্চাধরদচ্ছদাৎ। ইতি শ্রীভাগবতং॥ বলদেবঃ। ইতি শব্দরত্নাবলী॥ মহারাজচূতঃ। ইতি রাজনির্ঘণ্টঃ॥ কামদেবঃ। স তু শ্রীকৃষ্ণপুত্রঃ। তৎপর্য্যায়ঃ। মদনঃ ২ মন্মথঃ ৩ মারঃ ৪ প্রদ্যুম্নঃ ৫ মীনকেতনঃ ৬ কন্দর্পঃ ৭ দর্পকঃ ৮ অনঙ্গঃ ৯ পঞ্চশরঃ ১০ স্মরঃ ১১ শম্বরারিঃ ১২ মনসিজঃ ১৩ কুসুমেষুঃ ১৪ অনন্যজঃ ১৫ পুষ্পধন্বা ১৬ রতিপতিঃ ১৭ মকরধ্বজঃ ১৮ আত্মভূঃ ১৯ ব্রহ্মসূঃ ২০

বিশ্বকেতুঃ ২১। ইত্যমরঃ॥ * ॥ স তু পঞ্চাশদ্বিধো যথা। কাম ১ কামদ ২ কান্তাশ্চ ৩ কান্তিমান্ ৪ কামগন্তথা ৫। কামচারশ্চ ৬ কামী চ ৭ কামুকঃ ৮ কামবর্দ্ধনঃ ৯॥ রামো ১০ রমশ্চ ১১ রমণো ১২ রতিনাথো ১৩ রতিপ্রিয়ঃ ১৪। রাত্রিনাথো ১৫ রমাকান্তো ১৬ রমমাণো ১৭ নিশাচরঃ ১৮॥ নন্দকো ১৯ নন্দনশ্চৈব ২০ নন্দী ২১ নন্দয়িতা ২২ পুনঃ। পঞ্চবাণো ২৩ রতিসখঃ ২৪ পুষ্পধন্বা ২৫ মহাধনুঃ ২৬॥ ভ্রামণো ২৭ ভ্রমণশ্চৈব ২৮ ভ্রমমাণো ২৯ ভ্রমোঽপরঃ ৩০। ভ্রান্তশ্চ ৩১ ভ্রামকো ৩২ ভৃঙ্গো ৩৩ ভ্রান্তচারো ৩৪ ভ্রমাবহঃ ৩৫॥ মোহনো ৩৬ মোহকো ৩৭ মোহো ৩৮ মোহবর্দ্ধন এবচ ৩৯। মদনো ৪০ মন্মথশ্চৈব ৪১ মাতঙ্গো ৪২ ভৃঙ্গনায়কঃ ৪৩॥ গায়নো ৪৪ গীতিজশ্চৈব ৪৫ নর্ত্তকঃ ৪৬ খেলকস্তথা ৪৭। উন্মত্তোন্মত্তকশ্চৈব ৪৮ বিলাসো ৪৯ লোভবর্দ্ধনঃ ৫০॥ দাড়িমীকুসুমাভাশ্চ বামাঙ্কে শক্তিসংযুতাঃ। সৌম্যা রক্তাম্বরাঃ সর্ব্বে পুষ্পবাণেক্ষুকার্ম্মুকে॥ বিভ্রাণাঃ সর্ব্বভূষাঢ্যাঃ কামাঃ পঞ্চাশদীরিতাঃ। ইতি শারদাতিলকটীকায়াং রাঘবভট্টঃ॥ তেষামেকপঞ্চাশৎ শক্তয়ো রতিশব্দে দ্রষ্টব্যাঃ॥ * ॥ তস্য স্থানানি যথা। পাদে গুল্ফে তথোরৌ চ ভগে নাভৌ কুচে হৃদি। কক্ষে কণ্ঠে চ ওষ্ঠে চ গণ্ডে নেত্রে শ্রুতাবপি॥ ললাটে শীর্ষকেশেষু কামস্থানং তিথিক্রমাৎ। দক্ষে পুংসাং স্ত্রিয়া বামে শুক্লে কৃষ্ণে বিপর্য্যয়ঃ॥ পাদাঙ্গুষ্ঠে প্রতিপদি দ্বিতীয়ায়াঞ্চ গুল্ফকে। ঊরুদেশে তৃতীয়ায়াং চতুর্থ্যাং ভগদেশতঃ॥ নাভিস্থানে চ পঞ্চম্যাং ষষ্ঠ্যাস্তু কুচমণ্ডলে। সপ্তম্যাং হৃদয়ে চৈব অষ্টম্যাং কক্ষদেশতঃ॥ নবম্যাং কণ্ঠদেশে চ দশম্যাং চোষ্ঠদেশতঃ। একাদশ্যাং গণ্ডদেশে দ্বাদশ্যাং নয়নে তথা॥ শ্রবণে চ ত্রয়োদশ্যাং চতুর্দ্দশ্যাং ললাটকে। পৌর্ণমাস্যাং শিখায়াঞ্চ জ্ঞাতব্যঞ্চ ইতি ক্রমাৎ॥ যত্র স্থানে বসেৎ কামস্তত্রৈব নখচুম্বনং। মন্ত্রেণানেন কর্ত্তব্যং জ্ঞাতব্যং রতিকোবিদৈঃ॥ ইতি স্মরদীপিকা॥ মন্ত্রস্তু প্রণবাদিসবিন্দুপ্রত্যেকষোড়শস্বরযুক্তনমোঽস্তপ্রত্যেকচন্দ্রষোড়শকলারূপঃ॥ উৎপন্নমাত্রশরীরিষু কামস্যানুৎপত্তিকারণং যথা। মার্কণ্ডেয় উবাচ। ব্রহ্মাপি তনয়াং সন্ধ্যাং দৃষ্ট্বা পূর্ব্বমথাত্মনঃ। কামায়াশু মনশ্চক্রে ত্যক্ত্বা সা চ সুতেতি বৈ॥ তস্যাশ্চ চলিতং চিত্তং কামবাণবিলোড়িতং। ঋষীণাং প্রেক্ষতাং তেষাং মানসানাং মহাত্মনাং॥ ভর্গস্য বচনং শ্রুত্বা সোপহাসং বিধিং প্রতি। আত্মনশ্চলচিত্তত্বমমর্য্যাদমৃষীন্ প্রতি॥ কামস্য তাদৃশং ভাবং মুনিমোহকরং মুহুঃ। দৃষ্ট্বা সন্ধ্যা স্বয়ং তত্র ত্রপামাপাতিদুঃখিতা॥ ততস্তু ব্রহ্মণা শপ্তে মদনে তদনন্তরং। অন্তর্ভূতে বিধৌ শম্ভৌ গতে চাপি নিজাস্পদে॥ অমর্ষবশমাপন্না সন্ধ্যা ধ্যানপরাভবৎ। ধ্যায়ন্তী ক্ষণমেবাত্র পূর্ব্ববৃত্তং

মনস্বিনী ॥ ইদং বিময়ৃষে সন্ধ্যা তস্মিন্ কালে যথোদিতং । উৎপন্নমাত্রাং মাং দৃষ্ট্বা যুবতীং মদনেরিতঃ ॥ অকার্ষীৎ সানুরাগোঽয়মভিলাষং পিতামহঃ। দৃষ্ট্বৈব মামমর্য্যাদং সকামমভবন্মনঃ ॥ মমাপি মথিতং চিত্তং মদনেন দুরাত্মনা। যেন দৃষ্ট্বা মুনীন্ সর্ব্বাংশ্চলিতং মন্মনো ভৃশং॥ ফলমেতস্য পাপস্য মদনঃ স্বয়মাপ্তবান্। যত্তং শশাপ কুপিতঃ শম্ভোরগ্রে পিতামহঃ ॥ মমোচিতং ফলমহমাপ্তুমিচ্ছামি সাম্প্রতং। যস্মাং পিতা ভ্রাতরশ্চ সকামামপরোক্ষতঃ ॥ দৃষ্ট্বা চক্রুঃ স্পৃহাং তস্মান্ন মত্তঃ কাপি পাপকৃৎ। মমাপি কামভাবোঽভূদমর্য্যাদং সমীক্ষ্য তান্ ॥ পত্যাবিব স্বকে তাতে সর্ব্বেষু সহজেষ্বপি। করিষ্যাম্যস্য পাপস্য প্রায়শ্চিত্তমহং স্বয়ং ॥ আত্মানমগ্নৌ হোষ্যামি বেদমার্গানুসারতঃ। কিন্ত্বেকাং স্থাপয়িষ্যামি মর্য্যাদামিহ ভূতলে ॥ উৎপন্নমাত্রা ন যথা সকামাঃ স্যুঃ শরীরিণঃ । এতদর্থমহং কৃত্বা তপঃ পরমদারুণং ॥ মর্য্যাদাং স্থাপয়িত্বৈব পশ্চাৎ ত্যক্ষ্যামি জীবিতং। যস্মিন্ শরীরে পিত্রা মে হ্যভিলাষঃ স্বয়ং কৃতঃ॥ ভ্রাতৃভিস্তেন কায়েন কিঞ্চিন্নাস্তি প্রয়োজনং। যেন স্বেন শরীরেণ তাতেঽথ সহজে স্বকে ॥ উদ্ভাবিতঃ কামভাবো ন তৎ সুকৃতসাধনং । ইতি সংচিন্ত্য মনসা সন্ধ্যা শৈলবরং ততঃ। জগাম চন্দ্রভাগাখ্যং চন্দ্রভাগা যতঃ সৃতা ॥ তয়া স শৈলঃ সমধিষ্ঠিতঃ সদা সৌবর্ণগৌর্য্যাদিসমপ্রভাভৃতা। সোমেন সন্ধ্যাসময়োদিতেন যথোদয়াদ্রির্ব্বিররাজ শশ্বৎ॥ ইতি কালিকাপুরাণে ১৯ অধ্যায়ঃ ॥ * ॥ মার্কণ্ডেয় উবাচ। অথ তস্যাঃ শরীরন্তু বল্কলাজিনসংবৃতং । পরিক্ষীণং জটাব্রাতৈঃ পবিত্রং মূর্দ্ধি রাজিতং ॥ হিমানীতর্জ্জিতাম্ভোজসদৃশং বদনং তদা । নিরীক্ষ্য কৃপয়াবিষ্টো হরিঃ প্রোবাচ তামিদং ॥ শ্রীভগবানুবাচ। প্রীতোঽস্মি তপসা ভদ্রে ভবত্যাঃ পরমেণ বৈ। স্তবেন চ শুভে প্রজ্ঞে বরং বরয় সাম্প্রতং॥ যেন তে বিদ্যতে কার্য্যং বরেণাস্তি মনোগতং। তৎ করিষ্যে চ ভদ্রং তে প্রসন্নোঽহং তব ব্রতৈঃ ॥ সন্ধ্যোবাচ। যদি দেব প্রসন্নোঽসি তপসা মম সংপ্রতি। বৃতস্তদায়ং প্রথমং বরো মম বিধীয়তাং ॥ উৎপন্নমাত্রা দেবেশ প্রাণিনোঽস্মিন্ ভুবস্থলে। ন ভবন্তু ক্রমেণৈব সকামাঃ সম্ভবন্তু বৈ॥ শ্রীভগবানুবাচ । প্রথমং শৈশবো ভাবঃ কৌমারাখ্যো দ্বিতীয়কঃ। তৃতীয়ো যৌবনো ভাবশ্চতুর্থং বার্দ্ধকং তথা ॥ তৃতীয়ে ত্বথ সংপ্রাপ্তে বয়োভাগে শরীরিণঃ। সকামাঃ স্যুর্দ্বিতীয়ান্তে ভবিষ্যন্তি কচিৎ কচিৎ॥ তপসা তব মর্য্যাদা জগতি স্থাপিতা ময়া। উৎপন্নমাত্রা ন যথা সকামাঃ স্যুঃ শরীরিণঃ॥ ইত্যাদি শ্রীকালিকাপুরাণে ২২ অধ্যায়ঃ॥ * ॥ অভিলাষঃ। তস্য রজোগুণাদুৎপত্তির্যথা। কাম এষ ক্রোধ এষ রজোগুণসমুদ্ভবঃ। মহাশনো মহাপাপ্মা বিদ্ধ্যেনমিহ বৈরিণং॥ ইতি

শ্রীভগবদ্গীতায়াং ৩ অধ্যায়ে ৩৭ শ্লোকঃ॥
কামকলা ( স্ত্রী ) রতিঃ। কামদেবপত্নী। ইতি শব্দরত্নাবলী॥ চন্দ্রস্য যাঃ ষোড়শকলাস্তা এব কামকলাঃ॥
কামকূটঃ (পুং) বেশ্যাপ্রিয়ঃ। বেশ্যাবিভ্রমঃ। ইতি মেদিনী॥
কামকেলিঃ (ত্রি) ষিড়্গঃ। ইতি ত্রিকাণ্ডশেষঃ॥ সুরতে পুং। ইতি হেমচন্দ্রঃ॥
কামখড়্গদলা ( স্ত্রী ) স্বর্ণকেতকী। ইতি রাজনির্ঘণ্টঃ॥
কামগামী [ ন্ ] ( ত্রি ) কামঙ্গামী। স্বেচ্ছাগমনশীলঃ। ইত্যমরটীকা॥
কামগুণঃ ( পুং ) রাগঃ। বিষয়ঃ। আভোগঃ। ইতি মেদিনী॥
কামঙ্গামী [ ন্ ] ( ত্রি ) স্বেচ্ছাগমনশীলঃ। তৎপর্য্যায়ঃ। অনুকামীনঃ ২। ইত্যমরঃ॥
কামচারী [ ন্ ] ( ত্রি ) কামুকঃ। স্বচ্ছন্দঃ॥ কলবিঙ্কঃ। ইতি মেদিনী॥
কামচারী [ ন্ ] ( পুং ) গরুড়ঃ। ইতি শব্দরত্নাবলী॥
কামজানঃ ( পুং ) কোকিলঃ। ইতি শব্দরত্নাবলী॥ কামজনি ইতি চ পাঠঃ॥
কামতালঃ ( পুং ) কোকিলঃ। ইতি ত্রিকাণ্ডশেষঃ
কামদঃ ( ত্রি ) কামদাতা। অভিলাষদঃ। ইতি মেদিনী॥
কামদা ( স্ত্রী ) কামধেনুঃ। ইতি মেদিনী॥
কামদুঘা ( স্ত্রী ) কামধেনুঃ। ইতি মুগ্ধবোধব্যাকরণং
কামদূতিকা (স্ত্রী) নাগদন্তীবৃক্ষঃ। ইতি রত্নমালা॥
কামদূতী ( স্ত্রী ) পাটলাবৃক্ষঃ। ইতি শব্দরত্নাবলী॥
কামধরঃ ( পুং ) কামরূপস্থ মৎস্যধ্বজপর্ব্বতস্থসরোবরঃ। যথা। মণিকূটাচলাৎ পূর্ব্বং মৎস্যধ্বজকুলাচলঃ। নির্দ্দগ্ধো যত্র মদনো হরনেত্রাগ্নিনা পুনঃ॥ শরীরং প্রাপ্য তপসা সমারাধ্য বৃষধ্বজং। তত্র মৎস্যস্বরূপস্তু কামদেবেন সংস্থিতঃ॥ অধিত্যকায়াং পৃথিবীং বীক্ষ্যমাণঃ সমন্ততঃ। তদা তু শাশ্বতী নাম তত্রাস্তে দক্ষিণস্রবা॥ সরঃ কামধরো নাম তস্মিন্ শৈলে ব্যবস্থিতঃ শাশ্বত্যাং বিধিবৎ স্নাত্বা পীত্বা কামধরাম্ভসি॥ বিমুক্তপাপঃ শুদ্ধাত্মা শিবলোকে মহীয়তে। ইতি শ্রীকালিকাপুরাণে ৮১ অধ্যায়ঃ॥
কামধেনুঃ ( স্ত্রী ) স্বনামখ্যাতগৌঃ। তস্যা উৎপত্তির্যথা। দক্ষস্য তনয়া যাভূৎ সুরভির্নাম নামতঃ। গবাং মাতা মহাভাগা সর্ব্বলোকোপকারিণী॥ তস্যাস্তু তনয়া জজ্ঞে কশ্যপাত্তু প্রজাপতেঃ। নাম্না সা রোহিণী শুভ্রা সর্ব্বকামদুঘা নৃণাং॥ তস্যাং জজ্ঞে শূরসেনাদ্বসোরতিতপোজ্জ্বলাৎ। কামধেনুরিতি খ্যাতা সর্ব্বলক্ষণসংযুতা॥ তস্যাং জজ্ঞে শুনঃশেফাম্মুনেরতিতমোজ্জ্বলাৎ। ইতি পুস্তকান্তরে পাঠঃ॥ সা সিতাভ্রপ্রতীকাশা চতুর্ব্বেদচতুষ্পদা। স্তনৈশ্চতুর্ভির্ধর্ম্মার্থকামাপ্রসবকারিণী॥ * ॥ তস্যা গর্ভে শিববাহনবৃষোৎপত্তির্যথা। সা স্বয়ম্ভুশরীরাত্তু কালেন মহতা সতী। নির্ম্মলং যৌবনং কামধেনুরূপ

মনোহরং ॥ তাং চরন্তীং মেরুপৃষ্ঠে চারুরূপাং মনোহরাং। দদর্শ স তু বেতালঃ কামুকশ্চাভ্যপদ্যত ॥ তং কামুকস্তু বেতালং বিদিত্বা কামধেনুকা। পশুধর্ম্মাৎ স্বয়ং ভেজে তং পুত্রং শশভৃদ্‌ভৃতঃ॥ সোঽবাপ তস্যাং পরমমামোদং শঙ্করাত্মজঃ। সা চাপি পরমং তস্মিন্ মদনাৎ প্রতিহর্ষিতা॥ তয়োঃ প্রবৃত্তে সুরতে তস্যা গর্ব্ভোঽভবত্তদা। কালে প্রাপ্তে তু সুসুবে কামধেনুর্ম্মহাবৃষং ॥ সোঽচিরেণৈব কালেন সুমহান্ বৃষভোঽভবৎ। মহাককুদসংযুক্তশ্চারুশৃঙ্গদ্বয়ান্বিতঃ ॥ উৎক্ষিপ্তবিচলৎকর্ণযুগলো দীর্ঘবালধিঃ। ককুদেন চ শৃঙ্গাভ্যাং কর্ণাভ্যাং স সিতাভ্রবৎ॥ বিচরন্ দদৃশে দেবৈঃ শৃঙ্গৈরিব হিমাচলঃ। বেতালস্তুকরোত্তস্য নাম ভৃঙ্গ ইতি দ্বিজাঃ॥ স তু ভৃঙ্গো জ্ঞানশালী সমারাধয়দীশ্বরং। সোঽপি তুষ্টো বরং তস্মৈ দদাবিষ্টং মহেশ্বরঃ॥ তমেব বাহনং চক্রে কৃত্বা দেবতনুং বৃষং। স চিরায়ুশ্চ বলবান্ পৃথিবীধরণক্ষমঃ॥ ভৃঙ্গো নাম মহাতেজাঃ কেতুশ্চাপ্যভবৎ পতেঃ। ভৃঙ্গোঽভুদ্বাহনো যস্মাচ্ছঙ্করস্য মহাবৃষঃ॥ অতো ভৃঙ্গিরিতি খ্যাতিং স চ প্রাপ মহেশ্বরাৎ॥ ইতি শ্রীকালিকাপুরাণে ৯১ অধ্যায়ঃ ॥ * ॥ অভীষ্টপ্রদা ধেনুঃ। তদ্দানফলং যথা। বর্ষে হরিঃ সর্ব্ব এব পবিত্রস্তত্রাপি বর্ষে শরদেব শুদ্ধা। তস্যাং শুভঃ কার্ত্তিকো নাম মাসস্তত্রাপি পুণ্যো হি বভুব দর্শঃ॥ যস্যাং হরের্দ্দৈত্যভয়াদ্বিমুক্তা উরঃস্থলং প্রাপ্য সুখং সুশেতে। লক্ষ্মীঃ পুরাদ্যাপি বিনির্ম্মিতা বৈ কামপ্রদা ধেনব এব যত্র ॥ অহর্ম্মুখে যত্র দিনে সমস্তাঃ সুধেনবো ভুমিতলে ভ্রমন্তি। গৃহে ন যস্মিন্ কথয়ন্তি লীলাং হানিঃ ক্ষয়স্তত্র চ প্রত্যয়ো মে ॥ তস্মাত্ত্বমত্রৈব চ কামধেনুং দদ্যাঃ সমুদ্দিশ্য তু কেশবস্য। বিপ্রায় বৈ সর্ব্বগুণোপপন্নাং কৃত্বা ব্রতং কৃচ্ছ্রমতো হরেস্তু॥ সম্যক্ প্রদত্তৈস্তু গবাং সহস্রৈঃ সবৎসবস্ত্রৈঃ সহিতৈশ্চ হেম্না। কালে ফলং যল্লভতে মনুষ্যো ন কামধেনোশ্চ সমং দ্বিজেভ্যঃ ॥ কন্যারথানাং করিবাজিযুক্তৈঃ শতৈঃ সহস্রৈঃ সততং দ্বিজেভ্যঃ। দত্তৈঃ ফলং যল্লভতে মনুষ্যঃ সমং তথা স্যান্নতু কামধেনোঃ ॥ * ॥ তদ্ভেদাঃ তদ্দানবিধিশ্চ যথা। নন্দা সুনন্দা সুরভী সুশীলা সুমনাস্তথা। নির্গতামথ্যমানেঽব্ধৌ উষঃস্নানং শুভপ্রদং ॥ তত্র স্নাত্বা সমভ্যর্চ্চ্য ধেনুং পূজ্য প্রযত্নতঃ। গোদানফলমাপ্নোতি নরো বিগতকল্মষঃ॥ একাদশ্যামুপোষ্যাথ নরো দিনচতুষ্টয়ং। ঘৃতেন স্নাপয়েদ্বিষ্ণুং গব্যেন পয়সাপি বা॥ নক্তাশী গোরসৈর্হব্যৈঃ পূজয়েন্মধুসূদনং। গন্ধপুষ্পৈঃ সুনৈবেদ্যৈর্বস্ত্রাভরণকুণ্ডলৈঃ ॥ শঙ্খাসিচক্রোদ্যতবাহুবিষ্ণোর্গদাব্জহস্তস্য তু শঙ্খপাণেঃ। অর্ঘং প্রযচ্ছামি জনার্দ্দনস্য শ্রিয়া যুতস্যাপি ধরাধরস্য ॥ শ্রিয়ঃ পতিং শ্রীধরমেব কান্তং শ্রিয়াঃ সখায়ং হি শ্রিয়োঽধিমূলং। নমাম্যহং শ্রীধরং শ্রীনিবাসং সমর্চ্চিতো মে প্রদদাতু কামান্॥ এবং পূজ্য বিধানেন

শ্রিয়া যুক্তেস্তু নামভিঃ। পৃথক্ জাগরণং কুর্য্যাৎ শ্রিয়া সার্দ্ধং জগৎপতেঃ॥ যা দেবী ভার্গবং ভেজে কুলং সর্ব্বত্র পূজিতা। আয়াতু সা গৃহং নন্দা সুপ্রীতা বরদা মম॥ যাঙ্গিরসঞ্চ সা দেবী সুনন্দা প্রত্যুপস্থিতা। আয়াতু মে গৃহে সা তু সুপ্রীতা বরদা সতী॥ সুরভী যা ভরদ্বাজং কামধেনুঃ সুকামদা। সদাভবদ্গৃহং সাত্র মমায়াতু সুরার্চ্চিতা॥ সুশীলা কশ্যপং যা তু ভেজে সর্ব্বত্র কামদা। সা মে ভবতু সুপ্রীতা কামধেনুর্গৃহে সদা॥ সুমনা যা বশিষ্ঠস্তু সংপ্রাপ্য মুমুদে শুভা। সা মে গৃহং সদায়াতু কামদা দেবপূজিতা॥ এবং পূজ্য বিধানেন প্রভাতে বিমলে শুভে। শুক্লাম্বরধরঃ স্নাতঃ শুক্লমাল্যানুলেপনঃ॥ কৃতনিত্যক্রিয়ো হৃষ্টঃ কুণ্ডলাঙ্গদভূষিতঃ। অনুলিপ্তে মহীপৃষ্ঠে কৃষ্ণাজিনসুসংস্তৃতে॥ তিলপ্রস্থেন চাকীর্ণে চতুঃস্বর্ণবিভূষিতে। ক্ষৌমবস্ত্রান্বিতে শুভ্রে মধ্বাজ্যপাত্রসংযুতে॥ শুভবস্ত্রৈঃ সমাবৃত্য সর্ব্বরত্নৈরলঙ্কৃতাং। সুবর্ণশৃঙ্গীং সুখুরাং চতুঃস্বর্ণাং মনোরমাং॥ ক্ষীরাব্ধিপয়সোপেতাং ধেনুং মন্ত্রৈঃ প্রপূজয়েৎ। যা ধেনুঃ সর্ব্বদেবানাং ঋষীণাং ভাবিতাত্মনাং॥ ক্ষীরাব্ধের্নির্গতা যা চ সা মে ভবতু সুস্থিরা। ঘৃতক্ষীরাভিষেকঞ্চ কৃত্বা বিষ্ণোঃ প্রযত্নতঃ॥ সমভ্যর্চ্চ্য যথান্যায়ং গন্ধপুষ্পাদিভিঃ ক্রমাৎ। গাবো মমাগ্রতঃ সন্তু গাবঃ পার্শ্বে চ পৃষ্ঠতঃ॥ গাবো মে হৃদয়ে নিত্যং গবাং মধ্যে বসাম্যহং। প্রাঙ্মুখোদঙ্মুখো বাপি সিতযজ্ঞোপবীতিনীং॥ ইমাং ত্বং প্রতিগৃহ্ণীষ দেবদেব জগৎপতে। সবৎসালঙ্কৃতাং ধেনুং গোবিন্দ প্রীয়তামিতি॥ এবং বিপ্রায় তাং দদ্যাৎ কৃত্বা চৈব প্রদক্ষিণং। অনুব্রজেচ্চ গচ্ছন্তং পদান্যষ্টৌ নরাধিপ॥ অনেন বিধিনা যস্তু কামধেনুং প্রযচ্ছতি। সর্ব্বকামসমৃদ্ধার্থঃ স্বর্গলোকঞ্চ গচ্ছতি॥ কিং দত্ত্বা শতশোর্বীস্তু রাহুগ্রস্তে দিবাকরে। তৎফলং প্রাপ্যতে রাজন্ কামধেন্বা যদশ্নুতে॥ ইত্যাদ্যে বহ্নিপুরাণে কামধেনুপ্রদাননামাধ্যায়ঃ॥ * ॥ অন্যৎ বাল্মীকীয়রামায়ণে বালকাণ্ডে ৫৩ সর্গে মহাভারতে আদিপর্ব্বণি ১০১ অধ্যায়ে চ দ্রষ্টব্যং॥ * ॥ অথ কামধেনুমহাদানং। অথাতঃ সংপ্রবক্ষ্যামি কামধেনুবিধিং পরাং। সর্ব্বকামফলং নৃণাং মহাপাতকনাশনং॥ লোকেশাবাহনং তদ্বদ্ধোমকর্ম্মাধিবাসনং। তুলাপুরুষবৎকার্য্যং কুণ্ডমণ্ডপবেদিকং॥ স্বল্পে হ্যেকাগ্নিবৎ কুর্য্যাৎ গুরুরেব সমাহিতঃ। কাঞ্চনস্যাতিশুদ্ধস্য ধেনুং বৎসঞ্চ কারয়েৎ॥ ধেনুং বৎসঞ্চেত্যনেন ধেন্বর্থোপাত্তসুবর্ণেনৈব স্বেচ্ছয়া বৎসকল্পনমুক্তং। উত্তমা পলসাহস্রী তদর্দ্ধেন তু মধ্যমা। কনীয়সী তদর্দ্ধেন কামধেনুঃ প্রকীর্ত্তিতা॥ শক্তিতস্ত্রিপলাদূর্দ্ধমশক্তোঽপীহ কারয়েৎ। বেদ্যাং কৃষ্ণাজিনং ন্যস্য গুড়প্রস্থসমন্বিতং॥ ন্যসেদুপরি তাং ধেনুং মহারত্নৈরলঙ্কৃতাং। কুম্ভাষ্টকসমোপেতাং নানাফলসমন্বিতাং॥ মহারত্নৈরুৎকৃষ্টরত্নৈঃ॥ তথাষ্টাদশ ধান্যানি

সমস্তাৎ পরিকল্পয়েৎ। ইক্ষুদণ্ডাষ্টকং তদ্বন্নানাফলসমন্বিতং ॥ ভাজনকাসনং তদ্বত্তাম্রদোহনকন্তথা। কৌষেয়বস্ত্রদ্বয়সংপ্রযুক্তাং দীপাতপত্রাভরণাভিরামাং ॥ সচামরাং কুণ্ডলিনীং সঘণ্টাং মণিত্রিকাং চন্দ্রকরৌপ্যপাদাং। মণিত্রিকা অক্ষমালা। রসৈশ্চ সর্ব্বৈঃ পুরতোহভিজুষ্টাং হরিদ্রয়া পুষ্পফলৈরনেকৈঃ॥ অজাজিকুস্তুম্বুরুশর্করাভির্ব্বিতানকঞ্চোপরি পঞ্চবর্ণং। রসৈঃ সর্ব্বৈরিতি লবণাদিভিঃ ষড়্‌ভিঃ। অজাজী জীরকঃ। কুস্তুম্বুরু ধন্যাকং। স্নাতস্ততো মঙ্গলবেদঘোষৈঃ প্রদক্ষিণীকৃত্য সপুষ্পহস্তঃ। আবাহয়েত্তাং গুড়ধেনুমন্ত্রৈর্দ্বিজায় দদ্যাদথ দর্ভপাণিঃ॥ বহুতরমৎস্যপুরাণপুস্তকেষু গুড়ধেনুমন্ত্রৈরিতি পাঠদর্শনাৎ গুড়ধেনূক্তয়া লক্ষ্মীরিত্যাদিমন্ত্রপাঠশ্চাত্র কর্ত্তব্যঃ। দ্বিজায় দদ্যাদিতি শ্রুতেঃ কৃৎস্নৈব কামধেনুর্গুরবে দেয়া ঋত্বিগ্‌ভ্যস্তু দক্ষিণামাত্রং॥ ত্বং সর্ব্বদেবগণমন্দিরমঙ্গভূতা বিশ্বেশ্বর ত্রিপথগোদধিপর্ব্বতানাং। তদ্দানশস্ত্রশকলীকৃতপাতকৌঘঃ প্রাপ্তোহস্মি নির্বৃতিমতীব পরাং নমামি॥ লোকে যথেপ্সিতফলার্থবিধায়িনীং ত্বামাসাদ্য কো হি ভবদুঃখমুপৈতি মর্ত্ত্যঃ। সংসারদুঃখশমনায় যতস্ব কামং ত্বাং কামধেনুমিতি দেবগণা বদন্তি॥ আমন্ত্র্য শীলকুলরূপগুণান্বিতায় বিপ্রায় যঃ কনকধেনুমিমাং প্রদদ্যাৎ। প্রাপ্নোতি ধাম স পুরন্দরদেবজুষ্টং কন্যাগণৈঃ পরিবৃতঃ পদমিন্দুমৌলেঃ॥ *॥ অত্র যজমানঃ সমুপজাতকামধেনুমহাদানেচ্ছঃ তুলাপুরুষলিখিতং খড়্গচর্ম্মময়াচ্ছন্নসন্নাহতুলাপুরুষস্থাপনীয়হরিপ্রতিমাসালঙ্কারতুলাহস্তপ্রাপ্তপ্রতিমাবহিঃসর্ব্বসম্ভারমধিকন্তেন সুবর্ণপলসহস্রনির্ম্মিতামুত্তমাং সুবর্ণপলশতপঞ্চকনির্ম্মিতাং মধ্যমাং সুবর্ণসার্দ্ধপলশতদ্বয়নির্ম্মিতাং কনীয়সীং অশক্তৌ পলত্রয়াদূর্দ্ধং যথাশক্ত্যুপাত্তসুবর্ণঘটিতামুৎকৃষ্টরত্নালঙ্কৃতাং সবৎসাং ধেনুং। ধেন্বস্থাপনার্থং কৃষ্ণাজিনং গুড়প্রস্থঞ্চ ধেন্বলঙ্করণার্থং যথেচ্ছকাঞ্চনবটিতচন্দ্রতিলকললাটপট্টিকাকুণ্ডলযুগঘণ্টারৌপ্যখুরচতুষ্টয়স্ফাটিকাক্ষমালাচামরাণি। ধেন্বাচ্ছাদনার্থং কৌষেয়বস্ত্রযুগং। ধেনুপার্শ্বস্থাপনার্থং কুম্ভাষ্টকাতিপ্রচুরবিবিধফলাষ্টাদশধান্যেক্ষুদণ্ডাষ্টককাংস্যপাত্রাসনতাম্রদোহনদীপসামগ্রীছত্রপাদুকাযুগানি। ধেন্বগ্রতঃ স্থাপনার্থং মধুরাদিরসষট্‌কহরিদ্রানানাবিধকুসুমার্হণদ্রব্যজীরকধান্যাকশর্করাশ্চোৎপাদয়েৎ। ততস্তুলাপুরুষোক্তসময়ানামন্যতমস্য পূর্ব্বতরদিনে গুর্ব্বৃত্বিগ্‌যজমানজাপকাস্তুলাপুরুষবদ্ধবিষ্যভোজনাদিকং কৃত্বা নিবেদনসঙ্কল্পবাক্যয়োস্তুলাপুরুষপদস্থানে হিরণ্যকামধেনুপদং প্রক্ষিপ্য নিবেদনং সঙ্কল্পঞ্চ কুর্য্যুঃ। অপরদিনে চ যজমানস্তুলাপুরুষবদ্‌গোবিন্দাদ্যারাধনাদিমধুপর্কদানান্তং গোবিন্দাদ্যভ্যর্চ্চনব্রাহ্মণানুজ্ঞাপনদানসংকল্পপুণ্যাহাদিবাচনবরণবাক্যেষু তুলাপুরুষপদস্থানে হিরণ্যকামধেনুপদং প্রক্ষিপ্য কুর্য্যাৎ ততো গুর্ব্বৃত্বিগ্‌যজমানজাপকা

উপবসেয়ুঃ। অপরদিনে চ কৃতনিত্যাস্তুলাপুরুষবদগ্নিস্থাপনাদি মধ্যব্রাহ্মণবাচনান্তং কর্ম্ম যথাযথং কুর্য্যুঃ। এবঞ্চ মধ্যব্রাহ্মণবাচনান্তং কর্ম্ম তুলাপুরুষগ্রন্থমনুসন্ধায়ানুষ্ঠাতব্যং। তত ঋত্বিজঃ সবৎসাং ধেনুং প্রধানবেদীমধ্যলিখিতচক্রোপরি কৃষ্ণাজিনমাস্তীর্য্য তদুপরি গুড়প্রস্থং নিধায় তত্রারোপ্য পূর্ব্বোক্তালঙ্কারৈরলঙ্কৃত্য কৌষেয়বস্ত্রযুগেনাচ্ছাদ্য ধেনুপার্শ্বে চ পূর্ণকুম্ভাষ্টকং নানাবিধফলানি অষ্টাদশধান্যানি রত্ননানাবিধফলমিক্ষুদণ্ডাষ্টককাংস্যভাজনপট্টিকাতাম্রদোহনদীপাতপত্রপাদুকাযুগান্যারোপয়েয়ুঃ। ধেন্বগ্রতঃ মধুরাদিরসষট্কহরিদ্রাবিবিধপুষ্পার্হণসামগ্রীজীরকধান্যাকশর্করাশ্চারোপ্য মঙ্গলগীতবাদ্যবন্দিঘোষেষু যজ্ঞকুণ্ডসমীপস্থকুম্ভচতুষ্টয়জলেন স্বস্ববেদোক্তাভিষেচণিকমন্ত্রৈর্যজমানং স্নাপয়েয়ুঃ। ততো যজমানঃ শুক্লমাল্যাম্বরধরো ধৃতসর্ব্বালঙ্কারঃ কুশহস্তঃ পুষ্পাঞ্জলিমাদায় কামধেনুং প্রদক্ষিণীকৃত্য যা লক্ষ্মীরিত্যাদি দেবগণা বদন্তীত্যন্তং পঠিত্বা কামধেনুং পুষ্পাঞ্জলিনা সম্পূজ্য গুরবে দদ্যাৎ। তদ্যথা ওঁ অদ্যামুকসগোত্রায়ামুকবেদামুকশাখাধ্যায়িনে অমুকশর্ম্মণে তুভ্যং মৎস্যপুরাণোক্তহিরণ্যকামধেনুমহাদানফলপ্রাপ্তিকামোঽহং এতাং কৃষ্ণাজিনন্যস্তগুড়প্রস্থারোপিতাং উৎকৃষ্টরত্নসৌবর্ণচন্দ্রতিলকপট্টককুণ্ডলযুগলঘণ্টারৌপ্যখুরস্ফাটিকাক্ষমালাচামরালংকৃতাং কৌষেয়বস্ত্রযুগাচ্ছাদিতাং পূর্ণকুম্ভাষ্টকনানাফলাষ্টাদশধান্যফলসহিতেক্ষুদণ্ডাষ্টককাংস্যপাত্রাসনতাম্রদোহনদীপছত্রপাদুকাযুগসর্ব্বরসহরিদ্রানানাবিধকুসুমফলজীরকধান্যাকশর্করাযুতাং পঞ্চবর্ণবিতানকসহিতাং সবাসসাং হিরণ্যকামধেনুং দদানি। গুরুঃ স্বস্তীত্যুক্ত্বা সাবিত্রীং পঠিত্বা হিরণ্যকামধেনুরিয়ং বিষ্ণুদৈবতেতি উক্ত্বা যথাশাখং কামস্তুতিং পঠেৎ। ততো গুরুর্ব্বৃত্বিগ্‌ভ্যো দক্ষিণান্দদ্যাৎ। ওঁ অদ্য কৃতৈতদ্দানদক্ষিণামিমাং উৎপত্তিযোগ্যাং ভূমিমেতানি চ রত্নানি দদানি স্বস্তীতি ব্রাহ্মণা ব্রূয়ুঃ। গুরুস্তু স্বস্ত্যনন্তরং ধেনুপুচ্ছং গৃহ্ণীয়াৎ। ততো যজমানস্তুলাপুরুষবজ্জাপকেভ্যো দক্ষিণাং দত্ত্বা দীনানাথাদীংস্তর্পয়িত্বা ব্রাহ্মণবাচনঞ্চ কৃত্বা ত্বরয়া গুরবে কামধেনুং প্রতিপাদয়েৎ। পলত্রয়াদূর্দ্ধং যথাশক্তি স্বল্পমহাদানদানে তু গুরুরেব স্বগৃহোক্তবিধিনা সর্ব্বং ব্রহ্মাগুবৎ কুর্য্যাৎ। ইতি হিরণ্যকামধেনুমহাদানং সমাপ্তং। ইতি দানসাগরঃ॥

কামধ্বংসী [ ন্ ] ( পুং ) শিবঃ। ইতি হলায়ুধঃ॥

কামনঃ ( ত্রি ) কামুকঃ। ইত্যমরঃ॥

কামনা ( স্ত্রী ) ইচ্ছা। ইতি হলায়ুধঃ॥

কামন্ধমী [ ন্ ] ( পুং ) কাংস্যকারঃ। ইতি জটাধরঃ॥

কামপত্নী ( স্ত্রী ) রতিঃ। ইতি শব্দরত্নাবলী॥

কামপালঃ ( পুং ) বলদেবঃ। ইত্যমরঃ॥

কামপ্রদঃ ( পুং ) রতিবন্ধবিশেষঃ। যথা। যো

পাদৌ স্কন্ধসংলগ্নৌ ক্ষিপ্ত্বা লিঙ্গং ভগে তথা। কাময়েৎ কামুকঃ প্রীত্যা বন্ধঃ কামপ্রদো হি সঃ ॥ ইতি স্মরদীপিকা ॥

কামফলঃ ( পুং ) মহারাজাম্রবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কামম্ ব্য অকামানুমতিঃ। ইত্যমরঃ ॥ অনুমতিঃ। প্রকামং। অসূয়া। অনুগমনং। ইতি মেদিনীকরহেমচন্দ্রৌ ॥

কামমহঃ ( পুং ) চৈত্রীপূর্ণিমা। ইতি ত্রিকাণ্ডশেষঃ ॥

কাময়িতা [ ঋ ] ( ত্রি ) কামুকঃ। ইত্যমরঃ ॥

কামরূপঃ ( পুং ) স্বনামখ্যাতদেশঃ। তৎপর্য্যায়ঃ। প্রাগ্‌জ্যোতিষঃ ২। ইতি ত্রিকাণ্ডশেষঃ ॥ তত্র কামগিরৌ যোনিপীঠে কামাখ্যা দেবী বর্ত্ততে। যথা। যোনিপীঠং কামগিরৌ কামাখ্যা তত্র দেবতা। ইত্যুপক্রম্য সর্ব্বত্র বিরলা চাহং কামরূপে গৃহে গৃহে। ইতি তন্ত্রচূড়ামণৌ পীঠমালা ॥

কামরূপঃ ( ত্রি ) মনোজ্ঞরূপঃ। স্বেচ্ছারূপঃ। যথা। জাতং বংশে ভুবনবিদিতে পুষ্করাবর্ত্তকানাং জানামি ত্বাং প্রকৃতিপুরুষং কামরূপং মঘোনঃ। ইতি মেঘদূতঃ ॥

কামরূপিণী ( স্ত্রী ) অশ্বগন্ধাবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কামরূপী [ ন্ ] ( পুং ) বিদ্যাধরঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ জাহকজন্তুঃ। ইতি রাজনির্ঘণ্টঃ ॥ মনোজ্ঞরূপিণি স্বেচ্ছারূপিণি চ ত্রি। যথা। সর্ব্বমাশু বিচেতব্যং হরিভিঃ কামরূপিভিঃ। ইতি রামায়ণং ॥

কামরেখা ( স্ত্রী ) বেশ্যা। ইতি শব্দমালা ॥

কামলঃ ( পুং স্ত্রী ) রোগবিশেষঃ। কাঁওল কামলা ইতি চ প্রসিদ্ধিঃ। ইতি মেদিনী ॥ তস্য নিদানসম্প্রাপ্তী যথা। পাণ্ডুরোগী চ যোঽত্যর্থং পিত্তলানি নিষেবতে। তস্য পিত্তমসৃঙ্মাংসং দগ্ধ্বা রোগায় কল্পতে ॥ তস্য লক্ষণং। হারিদ্রনেত্রঃ সুভৃশং হারিদ্রত্বঙ্‌নখাননঃ। রক্তপীতশকৃন্মূত্রো ভেকবর্ণো হতেন্দ্রিয়ঃ ॥ দাহাবিপাকদৌর্ব্বল্যসদনারুচিকর্ষিতঃ। কামলা বহুপিত্তৈষা কোষ্ঠশাখাশ্রয়া মতা ॥ কালান্তরাৎ খরীভূতা কৃচ্ছ্রা স্যাৎ কুম্ভকামলা ॥ তস্যারিষ্টলক্ষণং। কৃষ্ণপীতশকৃন্মূত্রো ভৃশং শূনশ্চ মানবঃ। সরক্তাক্ষিমুখচ্ছর্দ্দিবিণ্মূত্রো যশ্চ তাম্যতি ॥ দাহারুচিতৃড়ানাহতন্দ্রামোহসমন্বিতঃ। নশ্যতি শ্বাসকাসার্ত্তো বিড়্‌ভেদী কুম্ভকামলী ॥ ইতি মাধবকরঃ ॥

কামলঃ ( পুং ) বসন্তকালঃ। মরুভূমিঃ। কামুকে ত্রি। ইতি মেদিনী ॥

কামলতা ( স্ত্রী ) শিশ্নঃ। ইতি হেমচন্দ্রঃ ॥

কামলা ( স্ত্রী পুং ) স্বনামখ্যাতরোগঃ। অথ পাণ্ডুরোগভেদস্য কামলায়া নিদানপূর্ব্বিকাং সংপ্রাপ্তিমাহ। পাণ্ডুরোগী তু যোঽত্যর্থং পিত্তলানি নিষেবতে। তস্য পিত্তমসৃঙ্মাংসং দগ্ধ্বা রোগায় কল্পতে ॥ পিত্তং কর্ত্তৃ। দগ্ধ্বা সংদূষ্য। রোগায় কামলারূপায়। পাণ্ডুরোগিণ এবাতিশয়িতপিত্তলসেবয়া কামলা ভবতি। নায়ং নিয়মঃ। কিন্তু কামলা স্বতন্ত্রাপি ভবতি। যথা রাজযক্ষ্মা

কাসাছুপেক্ষিতাস্তবতি। নায়ং নিয়মঃ। কিন্তু রাজযক্ষ্মা স্বতন্ত্রাপি ভবতি। তদ্দেষাপি ॥ * ॥ কামলায়া লক্ষণমাহ। হারিদ্রনেত্রঃ সুভৃশং হারিদ্রত্বঙ্নখাননঃ। পীতরক্তশকৃন্মূত্রো ভেকবর্ণো হতেন্দ্রিয়ঃ॥ দাহাবিপাকদৌর্ব্বল্যসদনারুচিকর্ষিতঃ। হারিদ্রং হরিদ্রাবর্ণং। পীতরক্তশকৃন্মূত্রঃ। পীতে রক্তে বা শকৃন্মূত্রে যস্য সঃ। ভেকবর্ণঃ বৃহদ্ভেকবর্ণঃ। তস্যা ভেদাবাহ। কামলা বহুপিত্তৈষা কোষ্ঠশাখাশ্রয়া মতা। এষা কোষ্ঠাশ্রয়া অপরা শাখাশ্রয়া। তত্র কোষ্ঠকামলামাহ। কালান্তরাৎ খরীভূতা কৃচ্ছ্রা স্যাৎ কুম্ভকামলা। কালান্তরাৎ খরীভূতা অতিরুক্ষীকৃতসর্ব্বধাতুঃ। কুম্ভকামলা কোষ্ঠকামলেত্যর্থঃ। সা কৃচ্ছ্রা কষ্টসাধ্যা ॥ * ॥ কুম্ভকামলিনোঽরিষ্টলক্ষণমাহ। ছর্দ্যরোচকহৃল্লাসজ্বরক্লমনিপীড়িতঃ। নশ্যতি শ্বাসকাসার্ত্তো বিড়্ভেদী কুম্ভকামলী ॥ উভয়োরপি কামলয়োররিষ্টলক্ষণমাহ। কৃষ্ণপীতশকৃন্মূত্রো ভৃশং শূনশ্চ মানবঃ। সরক্তাক্ষিমুখচ্ছর্দ্দিবিণ্মূত্রো যশ্চ তাম্যতি ॥ দাহারুচিতৃড়ানাহতন্দ্রামোহসমন্বিতঃ। নষ্টাগ্নিসংজ্ঞঃ ক্ষিপ্রং হি কামলাবান্ বিপদ্যতে ॥ * ॥ অথ কামলাচিকিৎসা। ত্রিফলায়া গুড়ূচ্যা বা দার্ব্ব্যা নিম্বস্য বা রসঃ। প্রাতর্ম্মাক্ষিকসংযুক্তঃ শীতলঃ কামলাপহঃ ॥ অঞ্জনে কামলার্ত্তানাং দ্রোণীপুষ্পীরসো হিতঃ। গুড়ূচীপত্রকল্কং বা পিবেত্তক্রেণ কামলী॥ ধাত্রীলোহরজোব্যোষনিশাক্ষৌদ্রাজ্যশর্করাঃ। লীঢ়া নিবারয়ন্ত্যাশু কামলামুদ্ধতামপি॥ কুম্ভাখ্যকামলায়াস্তু হিতঃ কামলিকো বিধিঃ। গোমূত্রেণ পিবেৎ কুম্ভকামলায়াং শিলাজতু ॥ দগ্ধ্বাক্ষকাষ্ঠৈর্মলমায়সস্তু গোমূত্রনির্ব্বাপিতমষ্টবারান্। বিচূর্ণলীঢ়ং মধুনাচিরেণ কুম্ভাহ্বয়ং পাণ্ডুগদং নিহন্তি॥ ইতি ভাবপ্রকাশঃ ॥ * ॥ মরীচতিলপুষ্পাভ্যামঞ্জনং কামলাপহং। ইতি গারুড়ে ১৮৭ অধ্যায়ঃ ॥ তণ্ডুলীয়কগোক্ষুরমূলং পীতং পয়োঽন্বিতং। কামলাদিহরং প্রোক্তং মুখরোগহরং তথা॥ ইতি তত্রৈব ১৮৮ অধ্যায়ঃ ॥

কামবতী (স্ত্রী) দারুহরিদ্রা। ইতি রাজনির্ঘণ্টঃ ॥

কামবল্লভঃ (পুং) আম্রঃ। ইতি রাজনির্ঘণ্টঃ ॥

কামবল্লভা (স্ত্রী) জ্যোৎস্না। ইতি রাজনির্ঘণ্টঃ ॥

কামবৃদ্ধিঃ (পুং) ক্ষুপবিশেষঃ। কামজ ইতি কর্ণাটকে প্রসিদ্ধঃ। তৎপর্য্যায়ঃ। স্মরবৃদ্ধিসংজ্ঞঃ ২ মনোজবৃদ্ধিঃ ৩ মদনায়ুধঃ ৪ কন্দর্পজীবঃ ৫ জিতেন্দ্রিয়াহ্বঃ ৬ কামৈকজীবঃ ৭ জীবসংজ্ঞঃ ৮। অস্য বীজগুণাঃ। মধুরত্বং। বলবর্দ্ধনত্বং। কামবৃদ্ধিরুচিকারিত্বং। বহুলেন্দ্রিয়বৃদ্ধিদত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

কামবৃন্তা (স্ত্রী) পাটলাবৃক্ষঃ। ইতি শব্দমালা ॥

কামবৃক্ষঃ (পুং) বন্দাকঃ। ইতি রাজনির্ঘণ্টঃ॥

কামশরঃ (পুং) আম্রঃ। ইতি রাজনির্ঘণ্টঃ ॥

কামসখঃ (পুং) বসন্তকালঃ। ইতি রাজনির্ঘণ্টঃ॥

কামসুতঃ (পুং) অনিরুদ্ধঃ। ইতি হেমচন্দ্রঃ ॥

কামাখ্যা (স্ত্রী) দেবীবিশেষঃ। তন্নামকারণং যথা। শ্রীভগবানুবাচ। কামার্থমাগতা যস্মান্ময়া সার্দ্ধং মহাগিরৌ। কামাখ্যা প্রোচ্যতে দেবী নীলকূটেরহোগতা ॥ কামদা কামিনী কামা কান্তা কামাঙ্গদায়িনী। কামাঙ্গনাশিনী যস্মাৎ কামাখ্যা তেন চোচ্যতে ॥ * ॥ তৎপীঠকারণং যথা। অথ কালে বহুতিথে ব্যতীতে প্রাণিসর্জ্জনে। অগৃহ্লাং দক্ষতনয়াং ভার্য্যার্থেঽহং বধূবরাং ॥ সা মেঽভূৎ প্রেয়সী ভার্য্যা প্রদায় সময়ং পিতুঃ। অনিষ্টকারী ত্বঞ্চেৎ স্যাঃ প্রাণাংস্ত্যক্ষ্যে তদা ত্বহং ॥ ততো যজ্ঞে সমস্তস্তু স চ বব্রে চরাচরং। ন মাং নাপি সতীং বব্রে তদনিষ্টান্মৃতা তু সা ॥ ততো মোহসমাপন্নস্তামাদায় মৃতামহং। প্রাপ্তঃ পীঠবরং তত্ত্ব ভ্রমমাণ ইতস্ততঃ ॥ তস্যাস্ত্বঙ্গানি পর্য্যায়াৎ পতিতানি যতো যতঃ। তত্তৎ পুণ্যতমং জাতং যোগনিদ্রাপ্রভাবতঃ ॥ তস্মিংস্তু কুব্জিকাপীঠে সত্যাস্তদ্যোনিমণ্ডলং। পতিতং তত্র সা দেবী মহামায়া ব্যলীয়ত ॥ লীনায়াং যোগনিদ্রায়াং ময়ি পর্ব্বতরূপিণি। স নীলবর্ণঃ শৈলোঽভূৎ পতিতে যোনিমণ্ডলে ॥ স তু শৈলো মহাতুঙ্গঃ পাতালতলমাবিশৎ। তস্যা আক্রমণাদ্বাঢ়ং ততস্তং দ্রুহিণোঽভ্যয়াৎ ॥ স তু পূর্ব্বং ব্রহ্মশক্তিশিলাং ধর্ত্তুং চতুর্ম্মুখঃ। শৈলরূপোঽভবত্তেন শৈলরূপেণ মামধাৎ ॥ ব্রহ্মা পর্ব্বতরূপেণ ময়ি পর্ব্বতরূপিণি। সংসক্তোঽধোঽগমদ্গাঢ়মাক্রান্তো মায়য়া বিধেঃ ॥ ততো বরাহঃ সংসক্তো ময়ি মাং স তু মাধবঃ। শৈলরূপঃ শৈলরূপং ধর্ত্তুং সমুপচক্রমে ॥ সোঽপ্যধোঽযান্ময়া সার্দ্ধং তদা পর্ব্বতরূপিণা। আক্রম্য দেবীং পৃথিবীং স্থিতো ভুবি নিখাতকঃ ॥ শতং শতং যোজনানাং তুঙ্গমাসীদ্গিরিত্রয়ং। তদাক্রান্তং মহাদেব্যা সর্ব্বমেব হ্যধোগতং ॥ ক্রোশমাত্রে স্থিতং তুঙ্গং শেষং তন্ত্রিতয়স্য তু। একা সমস্তজগতাং প্রকৃতিঃ সা যতস্ততঃ ॥ ব্রহ্মবিষ্ণুশিবৈর্দ্দেবৈর্ধৃতা সা জগতাং প্রসূঃ। তত্র পূর্ব্বো ব্রহ্মশৈলঃ শ্বেত ইত্যুচ্যতে বুধৈঃ ॥ মদ্রূপধারী শৈলস্তু নীল ইত্যুচ্যতে তথা। স তু মধ্যগতঃ শৈলস্ত্রিকোণোদুখলাকৃতিঃ ॥ বিভ্রাজমানঃ সততং মধ্যে ব্রহ্মবরাহয়োঃ। বরাহঃ শৈলরূপো যঃ স চিত্র ইতি কথ্যতে ॥ স সর্ব্বেষাং স্থিতঃ পশ্চাৎ দীর্ঘঃ সর্ব্বেভ্য এব তু। ঐশান্যাং যোঽভবৎ কূর্ম্মঃ শৈলরূপো মহাদ্যুতিঃ ॥ মণিকর্ণঃ স নাম্না তু খ্যাতো দেবৌঘসেবিতঃ। যোঽনন্তরূপঃ শৈলস্তু বায়ব্যাং সমবস্থিতঃ ॥ মণিপর্ব্বতসংজ্ঞোঽসৌ পর্ব্বতো মাধবপ্রিয়ঃ। মহামায়াগিরির্যস্তু নৈর্ঋত্যাং সমবস্থিতঃ ॥ স গন্ধমাদনো নাম্না সর্ব্বদা শঙ্করপ্রিয়ঃ। বরাহপৃষ্ঠভবনে যত্র ছিন্নৌ মহাসুরৌ ॥ হরিণা তত্র সংজাতঃ পাণ্ডুনাথ ইতি স্মৃতঃ। ব্রহ্মশক্তিশিলায়াস্তু পূর্ব্বভাগে তু মধ্যতঃ ॥ যস্তু পর্ব্বতরূপো-

হহং স তু ভস্মাচলাহ্বয়ঃ। এবং পুণ্যতমে পীঠে কুব্জিকাপীঠসংজ্ঞকে॥ নীলকূটে ময়া সার্দ্ধং দেবী রহসি সংস্থিতা। সত্যাস্তু পতিতং তত্র বিশীর্ণং যোনিমণ্ডলং॥ শিলাত্বমগমৎ শৈলে কামাখ্যা তত্র সংস্থিতা। সংস্পৃশ্য তাং শিলাং মর্ত্ত্যো হ্যমর্ত্ত্যত্বমবাপ্নুয়াৎ॥ অমর্ত্ত্যো ব্রহ্মসদনং তৎস্থো মোক্ষমবাপ্নুয়াৎ। তস্যাঃ শিলায়া মাহাত্ম্যং যত্র কামেশ্বরী স্থিতা॥ অদ্ভুতং যস্য গুহে তু লোহং ভস্ম ভবেদ্গতং। সা চাপি প্রত্যহং তত্র পঞ্চমূর্ত্তিধরা ভবেৎ॥ মোহার্থং সর্ব্বলোকানাং মমাপি প্রীতয়ে শিবা। অহং পঞ্চমুখেনাশু পঞ্চভাগে ব্যবস্থিতঃ॥ ঈশানঃ পূর্ব্বভাগস্থঃ কামেশ্বর্য্যাঃ প্রধানতঃ। ঐশান্যাং বৈ তৎপুরুষো হ্যঘোরস্তস্য সন্নিধৌ॥ সদ্যোজাতোঽথ বায়ব্যাং বামদেবস্তু সঙ্গতঃ। দেব্যাশ্চাপি নরশ্রেষ্ঠ পঞ্চরূপাণি ভৈরব॥ শৃণু বেতাল গুহ্যানি দেবৈরপি সদৈব হি। কামাখ্যা ত্রিপুরা চৈব তথা কামেশ্বরী শিবা॥ সারদাথ মহোৎসাহা কামরূপগুণৈর্যুতা। ময়ি লিঙ্গত্বমাপন্নে শিলায়াং যোনিমণ্ডলে॥ সর্ব্বে শিলাত্বমগমন্ শৈলরূপাশ্চ নির্জ্জরাঃ। যথাহং নিজরূপেণ রেমে বৈ সহ কাময়া॥ শিলারূপপ্রতিচ্ছন্নাস্তদা সর্ব্বাস্তু দেবতাঃ। শিলারূপপ্রতিচ্ছন্নাঃ শৈলে শৈলে ব্যবস্থিতাঃ॥ রমন্তে চ স্বরূপেণ নিত্যং রহসি সঙ্গতাঃ। ব্রহ্মা বিষ্ণুরহঞ্চাত্র দিক্পালাঃ সর্ব্ব এব তে॥ অন্যেঽপ্যত্র স্থিতা দেবাঃ সানুকূলাঃ সদা ময়ি। উপাসিতুং তদা দেবীং কামাখ্যাং কামরূপিণীং॥ নীলশৈলস্ত্রিকোণস্তু মধ্যে নিম্নঃ সদাশিবঃ। তন্মধ্যে মণ্ডলং চারু ষষ্টিশক্তিসমন্বিতং॥ গুহা মনোভবা তত্র মনোভববিনির্ম্মিতা। যোনিস্তস্যাং শিলায়াস্তু শিলারূপা মনোহরা॥ বিতস্তিমাত্রবিস্তীর্ণা একবিংশাঙ্গুলায়তা। ক্রমসূক্ষ্মবিনির্ম্মাণভস্মশৈলানুগামিনী॥ সিন্দুরকুঙ্কুমারক্তা সর্ব্বকামপ্রদায়িনী। তস্যাং যোনৌ পঞ্চরূপা নিত্যং তিষ্ঠতি কামিনী॥ মহামায়া জগদ্ধাত্রী মূলভূতা সনাতনী। তত্রাষ্টৌ যোগিনীর্নিত্যং মূলভূতাঃ সনাতনীঃ॥ পূর্ব্বোক্তাঃ শৈলপুত্র্যাদ্যাঃ স্থিতা দেব্যাঃ সমন্ততঃ। তাসাস্তু পীঠনামানি শৃণু চৈকত্র ভৈরব॥ গুপ্তকামা চ শ্রীকামা তথা চ বিন্ধ্যবাসিনী। কোটীশ্বরী ধনস্থা তু পাদদুর্গা তথাপরা॥ দীর্ঘেশ্বরী ক্রমাদেব প্রকটা ভুবনেশ্বরী। স্বযোগিন্যঃ পীঠনাম্না খ্যাতা অষ্টৌ চ দেবতাঃ॥ সর্ব্বতীর্থানি চৈকত্র জলরূপাণি ভৈরব। স্থিতানি নাম্না সৌভাগ্যা বরেণ্যা প্রাণিপুণ্যদা॥ বিষ্ণুস্তু তীরে তস্যাঃ স নাম্না কমল ইত্যুত। কামুকায়াস্তু বটুকঃ কামাখ্যাভ্যর্ণসংস্থিতঃ॥ লক্ষ্মীঃ সরস্বতী দেব্যৌ দেব্যা অঙ্গে ব্যবস্থিতে। ললিতাখ্যাভবল্লক্ষ্মীর্মাতঙ্গী তু সরস্বতী॥ গণাধ্যক্ষঃ পূর্ব্বভাগে তস্য শৈলস্য সংস্থিতঃ। সিদ্ধঃ স নাম্না বিখ্যাতো দ্বারি দেব্যাঃ প্রিয়ঃ সুতঃ॥ কল্পবৃক্ষঃ কল্পবল্লী তিন্তিড়ী চাপরাজিতা। ভূতাস্তস্মিন্মহাশৈলে স্থিতে দেব্যা

ধৃতপ্রিয়ে ॥ বরাহঃ পাণ্ডুনাথাখ্যঃ স্থিতস্তত্র হরির্বতঃ। জঘনে শিরসী কৃত্বা জঘান মধু-কৈটভৌ ॥ তস্যাসন্নে ব্রহ্মকুণ্ডং ব্রহ্মণা নির্ম্মিতং পুরা। ঈশানাখ্যং শিরোরত্নং তৎ সিদ্ধেশ্বরসংজ্ঞকং ॥ শিলারূপং সিদ্ধ-কুণ্ডং মধ্যস্থং বিদ্ধি ভৈরব। তস্যাসন্নে গয়াক্ষেত্রং ক্ষেত্রং বারাণসী তথা ॥ যোনি-মণ্ডলসঙ্কাশং কুণ্ডং ভূত্বা ব্যবস্থিতং। তত্রৈবামৃতকুণ্ডস্তু সুধাসংঘপ্রপূরিতং ॥ মম প্রিয়ার্থমিন্দ্রেণ স্থাপিতং সহ নির্জ্জরৈঃ। বামদেবাহ্বয়ং শীর্ষং শ্রীকামেশ্বরসংজ্ঞকং ॥ কামকুণ্ডং মহাপুণ্যং তস্যাসন্নে ব্যবস্থিতং। কেদারসংজ্ঞকং ক্ষেত্রং মধ্যস্থং সিদ্ধ-কাময়োঃ ॥ দীর্ঘং চতুর্দ্দশব্যামং ছায়া-চ্ছত্রাহ্বয়ং তু তৎ। তস্যাসন্নে শৈলপুত্রী গুপ্তকামাহ্বয়া তু সা ॥ গুপ্তকুণ্ডস্য মধ্যস্থা কামেশগ্রাবি সঙ্গতা। কামেশ্বরশিলাসক্তা কামাখ্যাসংজ্ঞিতা সদা ॥ পূর্ব্বভাগেণ সংসক্তা যোনেস্তু পরভাগতঃ। কাম-কামাখ্যয়োর্ম্মধ্যে কালরাত্রির্ব্যবস্থিতা ॥ পীঠে দীর্ঘেশ্বরী নাম্না সীমাভাগে প্রচ-ণ্ডিকা। কামাখ্যাপ্রস্তরপ্রান্তে কুষ্মাণ্ডী নাম যোগিনী ॥ পীঠে কোটীশ্বরী নাম্না যোনিরূপেণ সংস্থিতা। যচ্চাঘোরাহ্বয়ং শীর্ষং তৎ কামায়াস্তু দক্ষিণে ॥ পীঠে ভৈরব-নাম্না তু গীয়তে পরমার্থিভিঃ। চামুণ্ডা-ভৈরবী নাম্না ভৈরবাসন্নসংস্থিতা ॥ নায়িকা কামদা ভক্তে চণ্ডমুণ্ডবিনাশিনী। কামা-ভৈরবয়োর্ম্মধ্যে স্বয়ং দেবী সুরাপগা ॥ হিতায় সর্ব্বজগতাং দেব্যাস্তু প্রীতয়ে স্থিতা। সদ্যোজাতাহ্বয়ং শীর্ষং পীঠে ত্বাম্রা-তকেশ্বরং ॥ ভৈরবাখ্যে গহ্বরে তু স্থিতং দেবর্ষিসেবিতং। বিদ্ধি তত্রৈব দুর্গাখ্যাং নায়িকাং যোগরূপিণীং ॥ সিদ্ধকামেশ্বরী নাম্না খ্যাতা দেবেষু নিত্যশঃ। অজীর্ণপত্রঃ সুচ্ছায়ো বৃক্ষস্তত্র তু সংস্থিতঃ ॥ আম্রা-তকঃ কল্পবৃক্ষঃ কল্পবল্লীসমন্বিতঃ। পীঠে তু সিদ্ধগঙ্গাখ্যা স্বয়ং গঙ্গা সমুত্থিতা ॥ আম্রা-তকস্য নিকটে মম প্রীতিবিবৃদ্ধয়ে। পুষ্করা-খ্যস্তু তৎ ক্ষেত্রং পীঠে ত্বাম্রাতকাহ্বয়ং ॥ ঐশান্যাং তৎপুরুষাখ্যং মম শীর্ষং ব্যব-স্থিতং। ভুবনেশ্বরনাম্না তু পীঠে খ্যাতঞ্চ ভৈরব ॥ গহ্বরং ভুবনেশস্য ভুবনানন্দ-সংজ্ঞকং। তস্যাসন্নে তু সুরভিঃ শিলা-রূপেণ সংস্থিতা ॥ কামধেনুরিতি খ্যাতা পীঠে কামপ্রদায়িনী। যোঽসৌ সরভ-মূর্ত্তির্শ্মে মধ্যখণ্ডঃ প্রচণ্ডকঃ ॥ মহাভৈরব-নামাভূৎ কোটিলিঙ্গাহ্বয়স্তু সঃ। মূর্ত্তিভিঃ পঞ্চভিঃ পঞ্চভাগেষু সমমাস্থিতঃ ॥ অহং পশ্চাদতিপ্রীত্যা ভৈরবাখ্যঃ স্থিতোঽধরে। মহাগৌরী তু যা দেবী যোগিনী সিদ্ধ-রূপিণী ॥ সা ব্রহ্মপর্ব্বতে চাস্তে শিলা-রূপেণ চোর্দ্ধতঃ। অতীবরূপসম্পন্না নাম্না সা ভুবনেশ্বরী ॥ যত্র ব্রহ্মা তু সংসক্তো ময়ি পর্ব্বতরূপিণি। কল্পবল্লী তু তত্রাস্তে নাম্না সা ত্বপরাজিতা ॥ কামধেনোরদূরস্থা পূর্ব্বভাগে মহেশ্বরী। শ্রীকামাখ্যা যোনি রূপা চণ্ডিকা সা তু যোগিনী ॥ আগ্নেয্যাং বিদ্ধি তাং সংস্থাং সর্ব্বকামপ্রদাং শুভাং। যোগিনী চণ্ডঘণ্টাখ্যা পীঠেঽভূৎ বিদ্ধ্য-

বাসিনী ॥ যোগিনী স্কন্দমাতা তৎপীঠে-
ঽভুবনবাসিনী। কাত্যায়নী পীঠনাম্না
পাদদুর্গেতি গদ্যতে॥ নৈঋ‌র্ত্যাং নীল-
শৈলস্য প্রান্তে সা সংস্থিতা শিবা।
যোঽসৌ নন্দী মম তনুঃ স তু পাষাণ-
রূপধৃক্ ॥ সংস্থিতঃ পশ্চিমদ্বারি হনুমান্
পীঠনামতঃ ॥ * ॥ শ্রীঔর্ব্ব উবাচ। ইতি
তস্য বচঃ শ্রুত্বা শম্ভোরমিততেজসঃ।
ভৈরবস্তং তু পপ্রচ্ছ বেতালোঽপি সমুৎ-
সুকঃ ॥ শ্রীবেতালভৈরবাবূচতুঃ। শ্রুতঃ
পীঠক্রমস্তাত দেব্যাঃ পূজাক্রমস্ততঃ।
শ্রোতুমিচ্ছামি মূর্ত্তীনাং পঞ্চানামপি
শঙ্কর ॥ রূপাণি পঞ্চমূর্ত্তীনাং মন্ত্রাণি চ
সমস্ততঃ। তথা যন্ত্রাণি তন্ত্রাণি বদ নৌ
বৃষভধ্বজ ॥ ঈশ্বর উবাচ। শৃণু বক্ষ্যামি
বেতাল মন্ত্রং তন্ত্রং পৃথক্ পৃথক্।
কামাখ্যাপঞ্চমূর্ত্তীনাং রূপং কল্পঞ্চ ভৈরব ॥
কামস্থং কামমধ্যস্থং কামদেবপুটীকৃতং।
কামেন কাময়েৎ কামী কামং কামে
নিযোজয়েৎ ॥ জ্যেষ্ঠস্তু ব্যঞ্জনং ব্রহ্ম ন
পরঃ শান্ত উচ্যতে। প্রথমং ক্রমতঃ কুর্য্যাৎ
তৎসংসক্তং সুধাময়ং ॥ প্রজাপতিস্তথা
শক্রবীজসংস্থাদিসংযুতং। চন্দ্রার্দ্ধসহিতং
বীজং কামাখ্যায়াঃ প্রচক্ষতে ॥ ইদং ধর্ম্ম-
প্রদং কামমোক্ষার্থানাং প্রদায়কং। ইদং
রহস্যং পরমমন্যত্র তু সুদুর্ল্লভং ॥ শ্রোত্রে-
ণেদং যঃ শৃণুয়াদগুরুবক্ত্রান্নরোত্তমঃ। স
কামানখিলান্ প্রাপ্য শিবলোকে মহী-
য়তে ॥ * ॥ শ্রুতিসকলিতসারং দেব-
রুগৌঘহারং সকলকলুষহারি শ্রীধরামর্ত্ত্য-
কারি। সুনয়শুভযশোভির্যোজয়েদ্যস্তু
গোভিস্তদিহ শিবলমন্তং বিশ্বধর্ম্মাঙ্কিতা-
স্তং ॥ নয়নকলিতকারি ধ্যানিনাং দন্ত-
পারি প্রণয়সুনয়সংস্থং দেবসত্যাদিকস্থং।
পরমপদবিশীর্ণং শুদ্ধদৌর্ভাগ্যজীর্ণং শৃণু
শিবপদরূপং কামদেব্যাঃ স্বরূপং ॥ শ্রবণ-
গমনমাত্রাম্মার্গিতং যস্য নাম প্রভবতি
বহুভূত্যৈ নীতিমার্গৈকধাম। সুরগণগণ-
সংঘা কুণ্ডলী যস্য শক্তিস্তদিহ পরমরূপং
চিন্তনীয়ং কৃতীশৈঃ ॥ রবিশশিযুতকর্ণা
কুঙ্কুমাপীতবর্ণা মণিকনকবিচিত্রা লোলকর্ণা
ত্রিনেত্রা। অভয়বরদহস্তা সাক্ষসূত্রপ্রশস্তা
প্রণতসুরবরেশা সিদ্ধকামেশ্বরী সা ॥ অরুণ-
কমলসংস্থা রক্তপদ্মাসনস্থা নবতরুণশরীরা
মুক্তকেশী সুহারা। শবহৃদি পৃথুতুঙ্গস্তন্য-
যুগ্মা মনোজ্ঞা শিশুরবিসমবস্ত্রা সিদ্ধকামে-
শ্বরী সা ॥ বিপুলবিভবদাত্রী স্মেরবক্ত্রা
সুকেশী দলিতকরকদন্তা সাসিচন্দ্রাবনম্রা।
মনসিজদৃশদিস্থা যোনিমুদ্রাং লসন্তী পবন-
চলনশক্তা সংশ্রুতস্থানভাগা ॥ চিন্ত্যা
চৈবং বিদ্যুদগ্নিপ্রকাশা ধর্ম্মার্থাদ্যৈঃ সাধিতা
বাঞ্ছিতার্থৈঃ। কল্পং তন্ত্রং শৃণ্বিদং সম্য-
গর্থং বেতালস্থং ভৈরবস্থং প্রতিষ্ঠং ॥
তস্মিন্নাদ্যং মণ্ডলং বিদ্ধি পশ্চাৎ কার্য্যং
তত্রৈ চন্দনৈঃ পুষ্পগন্ধৈঃ। তৎপর্য্যায়ো
লেখনে পূর্ব্বমুক্তো দেবীতন্ত্রে সোঽত্র
পূর্ব্বং বিধেয়ঃ ॥ ইতি শ্রীকালিকা-
পুরাণে ৬১ অধ্যায়ঃ ॥

কামাগ্নিসন্দীপনমোদকং (ক্লী) ঔষধবিশেষঃ।
যথা। কর্ষো রসো গন্ধকমভ্রকঞ্চ বিকার-

চিত্রে লবণানি পঞ্চ। শটী যমানীদ্বয়কীট-হারি তালীশপত্রাণ্যপরং দ্বিকর্ষং ॥ জীরং চতুর্জ্জাতলবঙ্গজাতীকলঞ্চ কর্ষত্রয়মেব-মন্যৎ। সমুদ্ধদারং কটুকত্রয়ঞ্চ তথা চতুঃ-কর্ষমিতং নিবোধ ॥ ধন্যাকযষ্টীমধুকং কশেরুকর্ষাঃ পৃথক্ পঞ্চ বরী বিদারী। বরেভ-কণেভবলাত্মগুপ্তাবীজং তথা গোক্ষুর-বীজযুক্তং ॥ সবীজপত্রেন্দ্ররজঃসমানং সমা-সিতা ক্ষৌদ্রঘৃতঞ্চ তুল্যং। কর্ষৈকমিন্দো-রথমোদকং তৎ কামাগ্নিসন্দীপনমেত-দুক্তং ॥ * ॥ বৃষ্যং ততঃ পরতরং সততং ন দৃষ্টমেনং নিষেব্য মনুজঃ প্রমদাসহস্রং। গচ্ছন্ন লিঙ্গশিথিলত্বমবাপ্নুয়াচ্চ নাগাধিপং বিজয়তে বলতঃ প্রমত্তঃ ॥ কান্ত্যা হুতা-শনমপি স্মরতো ময়ূরান্ বাহং যবেন নয়নেন মহাবিহঙ্গং। বাতানশীতিমথ পিত্ত-গদং সমগ্রং শেষ্মোত্থবিংশতিরুজঃ পর-মগ্নিমান্দ্যং ॥ তুর্নামকামলভগন্দরপাণ্ডু-রোগমেহাতিসারকৃমিহৃদ্গ্রহণীপ্রদোষান্। কাসজ্বরশ্বসনপীনসপার্শ্বশূলশূলাম্লপিত্তসহি-তাংশ্চিরজান্ সমস্তান্ ॥ হত্বা গদানপি চ তৎ পুনরপত্যকারি সর্ব্বর্ত্তুপথ্যমথ সর্ব্ব-সুখপ্রদায়ি। বৃষ্যং বলীপলিতহারি রসা-য়নং স্যাৎ শ্রীমূলদেবকথিতং পরমং প্রশস্তং ॥ ইতি ভৈষজ্যরত্নাবলী ॥

কামাঙ্কুশঃ (পুং) নখঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ শিশ্নঃ। ইতি জটাধরঃ ॥

কামাঙ্গঃ (পুং) আম্রবৃক্ষঃ। ইতি জটা-ধরঃ ॥

কামাতুরঃ (ত্রি) কামার্ত্তঃ। যথা। অর্থী লাঘব-মুচ্ছ্রিতো নিপতনং কামাতুরো লাঞ্ছনং। ইতি নবরত্নমধ্যে ধন্বন্তরিঃ ॥

কামান্ধঃ (পুং) কোকিলঃ। ইতি রাজনির্ঘণ্টঃ ॥

কামান্ধা (স্ত্রী) কস্তূরী। ইতি রাজনির্ঘণ্টঃ ॥

কামায়ুঃ [স্] (পুং) গরুড়ঃ। ইতি ত্রিকাণ্ড-শেষঃ ॥

কামায়ুধঃ (পুং) মহারাজচূতঃ। ইতি রাজ-নির্ঘণ্টঃ ॥ কামদেবাস্ত্রে ক্লী ॥

কামারণ্যং (ক্লী) মনোজ্ঞবনং। ইতি শব্দমালা ॥

কামারিঃ (পুং) বিটমাক্ষিকধাতুঃ। ইতি হেমচন্দ্রঃ ॥ মহাদেবঃ কন্দর্পনাশকত্বাৎ ॥

কামার্ত্তঃ (ত্রি) কামপীড়িতঃ। কামাতুরঃ। যথা। কামার্ত্তা হি প্রকৃতিকৃপণাশ্চেতনা-চেতনেষু। ইতি মেঘদূতঃ ॥

কামালুঃ (পুং) রক্তকাঞ্চনবৃক্ষঃ। ইতি শব্দ-চন্দ্রিকা ॥

কামাবসায়িতা (স্ত্রী) শিবস্যাণিমাদ্যষ্টৈধ-শ্বর্য্যান্তর্গতৈশ্বর্য্যবিশেষঃ। ইত্যমরঃ শব্দরত্নাবলী চ ॥ সা তু সত্যসঙ্কল্পতা। কামান্ স্বেচ্ছয়া অবসায়য়িতুং শীলমস্য কামাবসায়ী তস্য ভাবঃ। ইতি সার-সুন্দরী ॥

কামাবসায়িত্বং (ক্লী) কামাবসায়িতা। ইতি হেমচন্দ্রঃ ॥

কামিঃ (পুং) কামুকঃ। রত্যাং স্ত্রী। ইতি মেদিনী ॥

কামিকঃ (পুং) কারণ্ডবপক্ষী। ইতি শব্দ-রত্নাবলী ॥

কামিনী (স্ত্রী) অতিশয়কামযুক্তানারী। ইত্য-মরঃ ॥ ভীরুস্ত্রী। বন্দা। ইতি মেদিনী ॥

দারুহরিদ্রা। মদিরা। স্ত্রীসামান্যং। ইতি রাজনির্ঘণ্টঃ॥

কামিনীশঃ (পুং) শোভাঞ্জনবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥

কামী [ন্] (পুং) চক্রবাকঃ। পারাবতঃ। কামুকঃ। ইতি মেদিনী॥ চটকঃ। ইতি শব্দরত্নাবলী॥ চন্দ্রঃ। ইতি ত্রিকাণ্ডশেষঃ॥ ঋষভৌষধিঃ। সারসপক্ষী। ইতি রাজনির্ঘণ্টঃ॥

কামীলঃ (পুং) রামগুবাকঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কামুকঃ (ত্রি) কামী। তৎপর্য্যায়ঃ। কমিতা ২ অনুকঃ ৩ কম্রঃ ৪ কাময়িতা ৫ অভীকঃ ৬ কমনঃ ৭ কামনঃ ৮ অভিকঃ ৯। ইত্যমরঃ

কামুকঃ (পুং) অশোকবৃক্ষঃ। অতিমুক্তকলতা। ইতি মেদিনী॥ চটকঃ। ইতি রাজনির্ঘণ্টঃ॥

কামুককান্তা (স্ত্রী) অতিমুক্তকলতা। ইতি রাজনির্ঘণ্টঃ॥

কামুকা (স্ত্রী) ধনাদীচ্ছাবিশিষ্টা। তৎপর্য্যায়ঃ। ইচ্ছাবতী ২। ইত্যমরঃ॥

কামুকী (স্ত্রী) মৈথুনেচ্ছাবতী। তৎপর্য্যায়ঃ। বৃষস্যন্তী ২। ইত্যমরঃ॥

কামেশ্বরী (স্ত্রী) কামাখ্যাপঞ্চমূর্ত্ত্যন্তর্গতমূর্ত্তিবিশেষঃ। যথা। দেব্যাশ্চাপি নরশ্রেষ্ঠ পঞ্চ রূপাণি ভৈরব। শৃণু বেতাল গুহ্যানি দেবৈরপি সদৈব হি॥ কামাখ্যা ত্রিপুরা চৈব তথা কামেশ্বরী শিবা। সারদাথ মহোৎসাহা কামরূপগুণৈর্বৃতা॥ ইতি কালিকাপুরাণে ৬১ অধ্যায়ঃ॥ *॥ অস্যা মন্ত্রং যথা। শ্রীভগবানুবাচ। দেব্যাঃ কামেশ্বরীং মূর্ত্তিং শৃণু বক্ষ্যামি ভৈরব। যস্যাশ্চিন্তনমাত্রেণ সাধকো লভতে প্রিয়ান্॥ তন্ত্রং তস্যাঃ প্রথমতস্ততোঽস্মুধ্যানগোচরং। ততঃ পূজাক্রমং বক্ষ্যে ক্রমাদ্বেতালভৈরব॥ প্রজাপতিস্ততো বহ্নিরিন্দ্রবীজং ততঃ পরং॥ চূড়াচন্দ্রার্দ্ধসহিতং চতুর্থস্বরসংযুতং। ইদং কামেশ্বরীমন্ত্রং সর্ব্বকামার্থসাধনং॥ *॥ তস্যা ধ্যানং যথা। রূপস্তু চিন্তয়েদ্দেব্যাঃ কামেশ্বর্য্যা মনোহরং। প্রভিন্নাঞ্জনসংকাশাং নীলস্নিগ্ধশিরোরুহাং॥ যড়্বক্ত্রাং দ্বাদশভুজাং অষ্টাদশবিলোচনাং। প্রত্যেকং ষট্সু শীর্ষেষু চন্দ্রার্দ্ধকৃতশেখরাং॥ মণিমুক্তাদিমাণিক্যকৃতাং মালামুরঃস্থলে। কণ্ঠে চ বিভ্রতীং নিত্যং সর্ব্বালঙ্কারমণ্ডিতাং॥ পুস্তকং সিদ্ধসূত্রঞ্চ পঞ্চবাণবরং তথা। খড়্গং শক্তিঞ্চ শূলঞ্চ বিভ্রতীং দক্ষিণৈঃ করৈঃ॥ অক্ষমালাং মহাপদ্মং কোদণ্ডঞ্চাভয়ং তথা। চর্ম্ম পশ্চাৎ পিণাকঞ্চ বিভ্রতীং বামপাণিভিঃ॥ শুক্লং রক্তঞ্চ পীতঞ্চ হরিতং কৃষ্ণমেব চ। বিচিত্রং ক্রমতঃ শীর্ষং ঐশান্যাং পূর্ব্বমেব চ॥ দক্ষিণং পশ্চিমঞ্চৈব তথৈবোত্তরশীর্ষকং। মধ্যঞ্চেতি মহাভাগ ক্রমাৎ শীর্ষাণি বর্ণতঃ॥ শুক্লং মাহেশ্বরীবক্ত্রং কামাখ্যারক্তমুচ্যতে। ত্রিপুরাপীতসংকাশং সারদাহরিতং তথা॥ কৃষ্ণং কামেশ্বরীবক্ত্রং চণ্ডায়াশ্চিত্রমিষ্যতে। ধম্মিল্ল-

সংযতকচং প্রতিশীর্ষং প্রকীর্ত্তিতং ॥ সিংহোপরিসিতপ্রেতং তস্মিঁল্লোহিত-পঙ্কজং। কামেশ্বরী স্থিতা তত্র ঈষৎ-প্রহসিতাননা ॥ বিচিত্রাংশুকসংপ্রীতা ব্যাঘ্রচর্ম্মাম্বরা তথা। এবং কামেশ্বরীং ধ্যায়েদ্ধর্ম্মকামার্থসিদ্ধয়ে ॥ ইত্যাদি কালিকাপুরাণে ৬৩ অধ্যায়ঃ ॥

কামোদকং (ক্লী) মৃতোদ্দেশে স্বেচ্ছয়া দত্তো-দকং। ইতি মিতাক্ষরা ॥

কামোদা (স্ত্রী) রাগিণীবিশেষঃ। ইতি হলা-য়ুধঃ ॥

কাম্পিলঃ (পুং) কাম্পিল্যদেশঃ। ইতি শব্দ-রত্নাবলী ॥

কাম্পিল্যঃ (পুং) গুণ্ডারোচনীনাম সুগন্ধি-দ্রব্যং। ইত্যমরটীকায়াং ভরতঃ ॥ উত্তর-দেশবিশেষঃ। ইতি শব্দরত্নাবলী ॥

কাম্পিল্লঃ (পুং) গুণ্ডারোচনী। কমলাগুঁড়ী ইতি ভাষা। ইত্যমরঃ ॥ তস্য রূপা-ন্তরাণি। কম্পিল্লঃ। কম্পীলঃ। কম্পিলঃ। কাম্পিল্যঃ। ইতি ভরতঃ ॥

কাম্পিল্লকা (স্ত্রী) কাম্পিল্লঃ। ইতি হারা-বলী ॥

কাম্পীলঃ (পুং) কাম্পিল্লঃ। ইতি শব্দরত্না-বলী ॥

কাম্পীলকঃ (পুং) কাম্পিল্লঃ। ইতি রত্নমালা ॥

কাম্বলঃ (পুং) কম্বলাবৃতরথঃ। ইত্যমরঃ ॥

কাম্ববিকঃ (পুং) শঙ্খকারঃ। শাঁখারী ইতি ভাষা। ইত্যমরঃ ॥

কাম্বুকা (স্ত্রী) অশ্বগন্ধা। ইতি রত্নমালা ॥

কাম্বোজঃ (পুং) কম্বোজদেশজঘোটকঃ। ইত্যমরঃ ॥ সোমবল্কঃ। পুন্নাগবৃক্ষঃ। ইতি মেদিনী ॥ ম্লেচ্ছজাতিবিশেষঃ। স তু যবনতুল্যঃ সগররাজেনাস্য সর্ব্বশিরো-মুণ্ডনং কৃতং। যথা। অর্দ্ধং শকানাং শিরসো মুণ্ডয়িত্বা ব্যসর্জ্জয়ৎ। যবনানাং শিরঃ সর্ব্বং কাম্বোজানাং তথৈব চ। ইতি হরিবংশঃ ॥

কাম্বোজী (স্ত্রী) মাষপর্ণী। মাষাণী ইতি ভাষা। ইত্যমরঃ ॥ বলক্ষখদিরঃ। পাপিড়ি খএর ইতি ভাষা ইতি মেদিনী ॥ গুঞ্জা। কুঁচ ইতি ভাষা। বাকুচী। হাকুচ্ ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ ॥

কাম্যং (ত্রি) কমনীয়ং। সুন্দরং। ইতি হেম-চন্দ্রঃ ॥ কামনাযুক্তব্যক্তিঃ। কর্ত্তব্যকর্ম্ম। যথা। যৎকিঞ্চিৎ ফলমুদ্দিশ্য যজ্ঞদানজপা-দিকং। ক্রিয়তে কায়িকং যচ্চ তৎ কাম্যং পরিকীর্ত্তিতং ॥ ইতি মুগ্ধবোধটীকাকৃদ্রাম-তর্কবাগীশধৃতা স্মৃতিঃ ॥

কাম্যদানং (ক্লী) কমনীয়স্য বস্তুনো বরস্ত্রী-রত্নাদিনো দানং কামনয়া বা দানং। ইতি ভরতঃ ॥ তৎপর্য্যায়ঃ। প্রবারণং ২। ইত্যমরঃ ॥

কায়ং (ক্লী) মনুষ্যতীর্থং। ইতি মেদিনী ॥ প্রাজাপত্যতীর্থং। তত্তু স্বল্পাঙ্গুল্যোর্ম্মূলং। কনিষ্ঠানামিকয়োরধোভাগ ইতি যাবৎ। ইত্যমরভরতৌ ॥

কায়ঃ (পুং) কদৈবতং। স তু ব্রাহ্মতীর্থং। মূর্ত্তিঃ। সংঘঃ। লক্ষ্যঃ। স্বভাবঃ। ইতি মেদিনী ॥ প্রাজাপত্যবিবাহঃ। ইতি স্মৃতিঃ ॥ অস্য লক্ষণং উদ্বাহশব্দে দ্রষ্টব্যং ॥

মূলধনং । যথা । কায়াবিরোধিনী শশ্বৎ পণার্দ্ধাদ্যা তু কায়িকা । ইতি নারদঃ ॥

কায়বলনং ( ক্লী ) কবচং । ইতি হারাবলী ॥

কায়মানং ( ক্লী ) তৃণকুটী । ইতি ত্রিকাণ্ডশেষঃ ॥

কায়স্থঃ ( পুং ) পরমাত্মা । নরজাতিবিশেষঃ । ইতি মেদিনী ॥ তৎপর্য্যায়ঃ । কূটকৃৎ ২ পঞ্জীকরঃ ৩ । ইতি ত্রিকাণ্ডশেষঃ ॥ করণঃ ৪ পঞ্জিকারকঃ ৫ । ইতি জটাধরঃ ॥ তস্যোৎপত্ত্যাদির্যথা † ।

শ্রীহর উবাচ । ভূয়স্তেঽহং প্রবক্ষ্যামি বগলেতি মনূত্তমং । যস্য গ্রহণমাত্রেণ কায়স্থো বিপ্রসেবকঃ ॥ পার্ব্বত্যুবাচ । অতীব চিত্রং শম্ভো ত্বমুক্তবানাবয়োরূপ ।

† কায়স্থোৎপত্ত্যাদৌ গ্রন্থকৃতা রাজ্ঞা যানি প্রমাণানি সংগৃহীতানি তদিতরাণ্যধুনা প্রাপ্তানি কতিপয়প্রশস্তপ্রামাণ্যপ্রমাণান্যত্রোদ্ধৃতানীতি যথা— ক্ষণং ধ্যানস্থিতস্যাস্য সর্ব্বকায়াদ্বিনির্গতঃ । দিব্যরূপঃ পুমান্ হস্তে মসীপাত্রঞ্চ লেখনী ॥ চিত্রগুপ্ত ইতি খ্যাতো ধর্ম্মরাজসমীপতঃ । প্রাণিনাং সদসৎকর্ম্মলেখ্যায় স নিরূপিতঃ ॥ ব্রহ্মণাতীন্দ্রিয়জ্ঞানী দেবাগ্ন্যোর্যজ্ঞভুক্ স বৈ । ভোজনাচ্চ সদা তস্মাদাহুতির্দীয়তে দ্বিজৈঃ ॥ ব্রহ্মকায়োদ্ভবো যস্মাৎ কায়স্থো বর্ণ উচ্যতে । নানাগোত্রাশ্চ তদ্বংশ্যাঃ কায়স্থা ভুবি সন্তি বৈ ॥ * ॥ ইতি পদ্মপুরাণে সৃষ্টিখণ্ডং ॥ দত্তাত্রেয় উবাচ । ত্রিকালজ্ঞং মহাপ্রাজ্ঞং পুলস্ত্যমুনিপুঙ্গবং । উপসংগম্য পপ্রচ্ছ ভীষ্মঃ শাস্ত্রভৃতাম্বরঃ ॥ চতুর্ণামপি বর্ণানামাশ্রমাণাং তথৈব চ । সম্ভবঃ সঙ্করাদীনাং শ্রুতো বিস্তরতো ময়া ॥ কায়স্থোৎপত্তয়ো লোকে খ্যাতাশ্চৈব মহামুনে । ত্বয় এব মহাপ্রাজ্ঞ শ্রোতুমিচ্ছামি তত্ত্বতঃ ॥ বৈষ্ণবা দানশীলাশ্চ পিতৃযজ্ঞপরায়ণাঃ । সুধিয়ঃ সর্ব্বশাস্ত্রেষু কাব্যালঙ্কারবোধকাঃ ॥ পোষ্টারো নিজবর্গাণাং ব্রাহ্মণানাং বিশেষতঃ । তানহং শ্রোতুমিচ্ছামি কথয়স্ব মহামুনে এতন্মে সংশয়ং বিপ্র বক্তুমর্হস্যশেষতঃ । ইতি পৃষ্টো মুনিপ্রাজ্ঞঃ গাঙ্গেয় শৃণু তত্ত্বতঃ ॥ * ॥ পুলস্ত্য উবাচ । শৃণু গাঙ্গেয় বক্ষ্যামি কায়স্থোৎপত্তিকারণং । ন শ্রুতং যৎ ত্বয়া পূর্ব্বং তন্মে কথয়তঃ শৃণু ॥ যেনেদং সকলং বিশ্বং স্থাবরং জঙ্গমং তথা । উৎপাদ্য পাল্যতে ভূয়ো নিধনায় প্রকল্প্যতে ॥ অব্যক্তঃ পুরুষঃ শান্তো ব্রহ্মা লোকপিতামহঃ । যথাসৃজৎ পুরা বিশ্বং কথয়ামি তব প্রভো ॥ * ॥ মুখতোঽস্য দ্বিজা জাতা বাহুভ্যাং ক্ষত্রিয়াস্তথা । ঊরুভ্যাঞ্চ তথা বৈশ্যাঃ পদ্ভ্যাং শূদ্রাঃ সমুদ্ভবাঃ ॥ দ্বিচতুঃষট্পদাদীংশ্চ প্লবঙ্গমসরীসৃপান্ । এককালেঽসৃজৎ সর্ব্বং চন্দ্রসূর্য্যগ্রহাংস্তথা ॥ এবং বহুবিধানেন বিশ্বমুৎপাদ্য ভারত । উবাচ তং সুতং জ্যেষ্ঠং কশ্যপং চাতিতেজসং ॥ প্রতিযত্নেন ভোঃ পুত্র জগৎ পালয় সুব্রত । ইত্যাজ্ঞাপ্য সুতং জ্যেষ্ঠং ঋষিসম্ভব হেতুকং ॥ ততস্তু ব্রহ্মণা তেন যৎ কৃতং তন্নিবোধ মে ॥ * ॥ দশবর্ষসহস্রাণি দশবর্ষশতানি চ । সমাধিস্থোঽভবৎ প্রাণান্ সংযম্য শান্তমানসঃ ॥ ততঃ সমাহিতমতের্যদ্ভূতং তদ্বদামি তে । তচ্ছরীরান্ মহাবাহুঃ শ্যামঃ কমললোচনঃ ॥ কম্বুগ্রীবো গূঢ়শিরাঃ পূর্ণচন্দ্রনিভাননঃ । লেখনীচ্ছেদনীহস্তো মসীভাজনসংযুতঃ ॥ নিঃসৃত্য দর্শনে তস্থৌ ব্রহ্মণোঽব্যক্তজন্মনঃ । উত্তমঃ সুবিচিত্রাঙ্গঃ ধ্যানস্তিমিতলোচনঃ ॥ ত্যক্ত্বা সমাধিং গাঙ্গেয় তং দদর্শ পিতামহঃ । অধোর্দ্ধস্তন্নিরীক্ষ্যাথ পুরুষশ্চাগ্রতঃ স্থিতঃ ॥ নামধেয়ং হি মে তাত বক্তুমর্হস্যতঃপরং । যথোচিতঞ্চ যৎ কার্য্যং তৎ ত্বং মামনুশাসয় ॥ * ॥ পুলস্ত্য উবাচ । ইত্যাকর্ণ্য ততো ব্রহ্মা পুরুষং স্বশরীরজং । প্রহৃষ্য প্রত্যুবাচেদমানন্দিতমতিঃ পুনঃ ॥ স্থিরচিত্তং সমাধায় ধ্যানস্থমতিসুন্দরং । মচ্ছরীরাৎ সমুদ্ভূতস্তস্মাৎ কায়স্থসংজ্ঞকঃ ॥ চিত্রগুপ্তেতি নাম্না বৈ খ্যাতো ভুবি ভবিষ্যসি । ধর্ম্মাধর্ম্মবিবেকার্থং ধর্ম্মরাজপুরে সদা । স্থিতির্ভবতু তে বৎস মমাজ্ঞাং প্রাপ্য নিশ্চলাং । ক্ষত্রবর্ণোচিতো ধর্ম্মঃ পালনীয়ো যথাবিধি ॥ প্রজাঃ সৃজস্ব ভোঃ পুত্র ভুবি ভারসমন্বিতাঃ । তস্মৈ দত্ত্বা বরং ব্রহ্মা তত্রৈবান্তরধীয়ত ॥ * ॥ পুলস্ত্য উবাচ । চিত্রগুপ্তান্বয়ে জাতাঃ শৃণু তান্ কথয়ামি তে । শ্রীমন্ত্রা, নাগরা গৌরাঃ শ্রীবৎসশ্চৈব মাথুরাঃ ॥ অহিফণাঃ সৌরসেনাঃ শৈবসেনাস্তথৈব চ । বর্ণাবর্ণদ্বয়শ্চৈব অম্বষ্ঠাদ্যাশ্চ সত্তম ॥ শৃণু তেষাঞ্চ কর্ম্মাণি কুরুবংশবিবর্দ্ধন । পুত্রান্ বৈ স্থাপয়ামাস চিত্রগুপ্তো মহীতলে ॥ ধর্ম্মাধর্ম্মবিবেকজ্ঞশ্চিত্রগুপ্তো মহামতিঃ । ভুক্তানং বোধয়ামাস সর্ব্বসাধনমুত্তমং ॥ পূজনং দেবতানাঞ্চ পিতৄণাং যজ্ঞসাধনং । বর্ণানাং ব্রাহ্মণা-

শূদ্রাৎ কনীয়সী জাতিয়ভবদ্বিপ্রসেবকঃ ॥ শ্রোষ্যাম্যাদৌ হি কায়স্থবৃত্তান্তং ব্রূহি বিস্তরাৎ। কায়স্থঃ ক্ষত্রবিট্‌শূদ্রানৃতে বিপ্রার্চ্চকঃ কথং ॥ কেন প্রকারেণ চ বা বগলেতি গৃহীতবান্। ততশ্চ সিদ্ধবিদ্যায়া বগলায়া বরেশ্বর ॥ শ্রোষ্যামি মহিমানঞ্চ সাধনং ত্বত্ত এব হি ॥ * ॥ হর উবাচ। ব্রহ্মপাদাংশতো জন্ম চাতঃ কায়স্থনামভৃৎ। ককারং ব্রাহ্মণং বিদ্যাদাকারং নিত্যসংজ্ঞকং ॥ আয়স্তু নিকটং জ্ঞেয়ং তত্র কায়ে হি তিষ্ঠতি। কায়স্থোঽতঃ সমাখ্যাতো মসীশং প্রোক্তবাংশ্চ যং ॥

জীবেক্ষণে ভৃগুপদে জন্মত্বাৎ শোভনা ধিয়ঃ। শঠশ্চ শূরতা কিঞ্চিদনেকপ্রতিপালকৃৎ ॥ জন্মাবধি দ্বিজার্চ্চায়াং মতিরেব নিরন্তরং। কুশাসনাদি সকলং গৃহীত্বা মস্তকোপরি ॥ অনুগচ্ছামি সততমিতি চিন্তামনাঃ সদা। শঠত্বাচ্চতুরত্বাচ্চ বিপ্রসেবামনুক্ষণং ॥ বাঞ্ছত্যেব মসীশঃ স সদোদ্বেগীতিমাবহন্। ব্রাহ্মণং হীশ্বরং জ্ঞাত্বা ভক্ত্যা স্তৌতি পুটাঞ্জলিঃ ॥ যং যং গচ্ছতি বিপ্রশ্চ মসীশশ্চানুগচ্ছতি। নদ্যাদৌ গত্বা চেদ্বিপ্রঃ স্নাত্বা কুর্য্যাত্তপোঽপি চ ॥ যাবত্তাবচ্চ তিষ্ঠেৎ স ক্ষুধয়া পীড়িতোঽপি চ। তথাপি নাসনং লাতি শিরে ধর্ত্তুং দ্বিজোঽপি চ ॥ মসীশায়াদীক্ষিতায় ক্ষত্রবৈশ্যোপমায় চ। অশূদ্রায়েতি বোঢ়ুং ন দদাত্যেবাসনাদিকং ॥ * ॥

নাঞ্চ সর্ব্বদাতিথিসেবনং ॥ প্রজাভ্যঃ করমাদায় ধর্ম্মাধর্ম্মবিলোকনং। কর্ত্তব্যং হি প্রযত্নেন পুত্রাঃ স্বর্গস্য কাম্যয়া ॥ যা মায়া প্রকৃতিঃ শক্তিশ্চণ্ডী চণ্ডপ্রমর্দ্দিনী। তস্যাস্তু পূজনং কার্য্যং সিদ্ধিং প্রাপ্য দিবং গতাঃ ॥ স্বর্গাধিকারমাসাদ্য যতো যজ্ঞভুজঃ সদা। ভবদ্ভিঃ সা সদা পূজ্যা ধ্যাতব্যা সকলাদিভিঃ ॥ ভবত্বং সিদ্ধিদা নিত্যং পুত্রদা সা তু চণ্ডিকা। তথাচোক্তা সুরাপেয়া যানপেয়া দ্বিজাতিভিঃ ॥ বৈষ্ণবং ধর্ম্মমাশ্রিত্য মদ্বাক্যং প্রতিপালয়। কর্ত্তব্যং হি প্রযত্নেন লোকদ্বয়হিতায় বৈ ॥ অনুশাস্য সুতানেবং চিত্রগুপ্তো দিবং যযৌ। ধর্ম্মরাজস্যাধিকারী চিত্রগুপ্তো বভূব হ ॥ স্বয়ং ভীম সমুৎপন্নাঃ কায়স্থা যে প্রকীর্ত্তিতাঃ। যে পৃষ্টাস্তে ময়াখ্যাতাঃ সংবাদং শৃণু তৎপরঃ ॥ অহং তে কথয়িষ্যামি বিচিত্রং পরমাদ্ভুতং। প্রভাবং চিত্রগুপ্তস্য সমুদ্ভূতং যথা পুনঃ ॥ * ॥ পুলস্ত্য উবাচ। সৌদাসো নাম রাজাভূৎ সমস্তে ক্ষিতিমণ্ডলে। সদা পাপরতঃ সোঽথ ধর্ম্মাধর্ম্মং ন বিন্দতি ॥ স যথা স্বর্গমাসাদ্য লেভে পুণ্যফলং শৃণু। সর্ব্বপাপো দুরাচারঃ সর্ব্বধর্ম্মবিবর্জ্জিতঃ ॥ রাজনীতিগতং ধর্ম্মং ন জানাতি কথঞ্চন। আতিথ্যজয়কর্ম্মাণি তত্তৎসাধনমুত্তমং ॥ ন কর্ত্তব্যং দ্বিজৈঃ কাপি ময়াজ্ঞপ্তে মহীতলে। এবমাজ্ঞপ্তবাংল্লোকে দৈবপিত্র্যেয়কর্ম্মণি ॥ পরিত্যজ্য স্বকং দেশং ততো দেশান্তরং যযৌ। যে কেচিদ্বসতিং চক্রুর্লোকেষু ব্রাহ্মণাদিষু ॥ ততঃপ্রভৃতি গাঙ্গেয় ন যজ্ঞহবনং ক্বচিৎ ॥ * ॥ ন কোঽপি কুরুতে ভীষ্ম পুণ্যং তত্র নিষেবিতং। গৃহীত্বা ব্রাহ্মণাদিভ্যঃ করং কর্ম্মবিদূষকঃ ॥ অহো ধর্ম্মভৃতাং শ্রেষ্ঠ শৃণু কর্ম্ম বিপাকজং। কালেনানেন গাঙ্গেয় সৌদাসো বিচরন্ মহীং ॥ কার্ত্তিকে শুক্লপক্ষে চ দ্বিতীয়া চোত্তমা তিথিঃ। তস্যাং কার্য্যঞ্চ কায়স্থৈশ্চিত্রগুপ্তস্য পূজনং ॥ মহতীভক্তিভাবেন ধূপদীপাদিভিস্তথা। দৈবযোগাত্তথায়াতঃ সৌদাসঃ পর্য্যটন্মহীং ॥ শ্রদ্ধাযুক্তশরীরেণ দৃষ্ট্বা চ পূজনং ততঃ। কৃত্বা সুপূজনং তত্র চিত্রগুপ্তস্য ভক্তিতঃ ॥ গতপাপোঽভবৎ সদ্যঃ সৌদাসোঽসৌ মহীপতিঃ। চিত্রগুপ্তপ্রভাবেণ গতো লোকং সুরালয়ং ॥ ইদং বিচিত্রমাহাত্ম্যং চিত্রগুপ্তপ্রভাবজং। কথিতং নৃপশার্দ্দূল কিমন্যৎ শ্রোতুমিচ্ছসি ॥ * ॥ ভীষ্ম উবাচ। ইত্যাকর্ণ্য ততো ভীষ্মঃ প্রত্যুবাচ মুনিং ততঃ। বিধিনা কেন তত্রাপি পূজা কার্য্যা মহামুনে ॥ কো মন্ত্রঃ কো বিধিস্তত্র সর্ব্বং তদ্বদ মে প্রভো। যামাসাদ্য মুনিশ্রেষ্ঠ সৌদাসঃ স্বর্গমাপ্তবান্ ॥ * ॥ পুলস্ত্য উবাচ। চিত্রগুপ্তস্য পূজায়া বিধানং কথয়াম্যহং। নৈবেদ্যৈর্ম্মৃতপক্বৈশ্চ যথাকালোদ্ভবৈঃ ফলৈঃ ॥ গন্ধপুষ্পোপহারৈশ্চ ধূপ-

পার্ব্বত্যুবাচ । চিত্রং ব্রবীষি হে নাথ কায়স্থোঽশূদ্র এব কিং । জানে শূদ্রকনিষ্ঠং তং শূদ্রতুল্যঃ কথং স ন ॥ ক্ষত্রবৈশ্যোপমো হ্যুক্তস্ত্বয়ৈষ কথমীশ্বর ॥ * ॥ হর উবাচ । ব্রহ্মপাদাংশতঃ শূদ্রমসীশৌ দ্বৌ বভূবতুঃ । শূদ্রাৎ পরঃ কনিষ্ঠঃ স চাতঃ কালি শ্রুতঞ্চ তৎ ॥ কিন্তু সামাদিবেদান্ হি ক্ষত্রো বিট্ শূদ্র এব হি । গৃহীতবান্ন তৎ কিঞ্চিন্মসীশোঽলসতঃ শিবে ॥ অতো যজ্ঞোপবীতী ন তে হি যজ্ঞোপবীতিনঃ । এতে স্যুর্বৈদিকাচারা মসীশো হি স্বভাবতঃ ॥ মস্যা সহ তু লেখন্যা সর্ব্বং লেখিতুমীশ্বরঃ । লেখিতুং নৈব শক্নোতি বৈদিকং কিঞ্চিতং কিল ॥ অতো হৃদি

দীপৈঃ সমাসতঃ । চিত্রগুপ্তঞ্চ সংপূজ্য শ্রদ্ধাভক্তিসমন্বিতঃ ॥ নবকুম্ভং সমানীয় পানীয়পরিপূরিতং । শর্করাপূরিতং কৃত্বা পাত্রং তস্যোপরি ন্যসেৎ ॥ পূজান্তে চ প্রযত্নেন দাতব্যঞ্চ দ্বিজন্মনে । ব্রাহ্মণান্ ভোজয়েত্তত্র কায়স্থানপি মন্ত্রবিৎ ॥ * ॥ মসীভাজনসংযুক্তঃ সদা চরসি ভূতলে । লেখনীচ্ছেদনীহস্তচিত্রগুপ্ত নমোঽস্তু তে ॥ চিত্রগুপ্ত নমস্তুভ্যং নমস্তে ধর্ম্মরূপিণে । তেষাং ত্বং পালকো নিত্যং নমঃ শান্তিং প্রযচ্ছ মে ॥ মন্ত্রেণানেন রাজেন্দ্র চিত্রগুপ্তস্য পূজনং । এবং সংপূজ্য বিধিবৎ সৌদাসো ভক্তিভাবতঃ ॥ অচিরাৎ পাপসংমুক্তো রাজ্যং কৃত্বা মৃতো নৃপঃ । নীতোঽসৌ যমদূতৈশ্চ যমলোকং ভয়ানকং ॥ চিত্রগুপ্তস্তদাপৃচ্ছদ্ধর্ম্মরাজোঽপি ভারত ॥ * ॥ ধর্ম্মরাজ উবাচ । সৌদাসোঽসৌ দুরাচারঃ পাপকর্ম্মসদারতঃ । যানি কানি চ পাপানি রাজাসৌ কৃতবান্ ভুবি ॥ পৃষ্টোঽসৌ যমরাজেন ধর্ম্মাধর্ম্মবিশারদঃ । ধর্ম্মরাজং ততঃ প্রাহ চিত্রগুপ্তো মহামতিঃ ॥ বিপাকং ধর্ম্মজ্ঞং জ্ঞাত্বা তং প্রহস্যাব্রবীদ্বচঃ ॥ * ॥ চিত্রগুপ্ত উবাচ । জানেঽহং পাপকর্ম্মাসৌ রাজায়ং বিদিতঃ সদা । ত্বৎপ্রসাদাদহং সৌরে পূজ্যোঽস্মি বসুধাতলে ॥ ত্বয়া দত্তং বরং স্থানং ভক্তস্তেঽহং সদা প্রিয়ঃ । ইতি জ্ঞাত্বা বদাম্যত্র রাজাপাপোঽস্তি মে মতিঃ ॥ পূজাং চকার

বিচার্য্যাথ খেদেন বিপ্রমীশ্বরং । জ্ঞাত্বা ভক্ত্যানুগচ্ছেদ্ধি যত্র যাতি ধরাসুরঃ ॥ কৃতত্রেতাদ্বাপরেষু গতেষ্বপি মসীশকঃ । তদপি ত্যক্তবান্নৈব দৃঢ়াং ভক্তিং দ্বিজেষু চ ॥ ততো হি কৃপয়া বিপ্রঃ কায়স্থমনুগৃহ্য হি । সালসং প্রাদদদ্বিদ্যাং বগলেতি তব প্রিয়ে ॥ যতো দীক্ষামাত্রমেব পবিত্রঃ কার্য্যসিদ্ধিতা । ততঃ কুশাসনাদীংশ্চ বোঢ়ুং প্রাদাৎ শিরোপরি ॥ এবংপ্রকারেণ কালি বিপ্রাণামনুগাঃ কলৌ ॥ * ॥ কায়স্থাঃ কালিকে দেবি পুনস্তদ্বিভবং শৃণু ॥ কলিপ্রথমতো রাজা ক্ষত্রিয়াণাং মহাবলঃ । সুযজ্ঞনামা গোমেধমখমারব্ধবান্ প্রিয়ে ॥ আহূতবাংশ্চ সর্ব্বান্ স চতুর্যোজনমধ্যতঃ । ব্রাহ্মণান্ ভ্রান্তিবশতঃ কেবলং সুতপসং বিনা ॥ প্রাপ্তাহ্বানদ্বিজান্ যাতো দৃষ্ট্বা সুতপসঃ প্রিয়া । ধবং তিরস্কৃতবতী যথৈতচ্ছৃণু কালিকে ॥ হে

রাজাসৌ দৃষ্ট্বা পূজাঞ্চ মামকীং । অতস্তুষ্টোঽস্মি হে দেব যাতু বিষ্ণুপদং নৃপঃ ॥ যমেনাজ্ঞাপিতো রাজা বৈষ্ণবং পদমাপ্তবান্ । যে চান্যে পূজয়িষ্যন্তি চিত্রগুপ্তং মহীতলে ॥ কায়স্থাঃ পাপনির্ম্মুক্তা যাস্যন্তি পরমাং গতিং । তস্মাৎ ত্বমপি গাঙ্গেয় পূজাং কুরু বিধানতঃ ॥ * ॥ দত্তাত্রেয় উবাচ । মুনের্বচনমাকর্ণ্য ভীষ্মঃ প্রযতমানসঃ । চকার পূজনং তত্র চিত্রগুপ্তস্য তৎপরঃ ॥ কার্ত্তিকে শুক্লপক্ষে তু দ্বিতীয়ায়াঞ্চ ভারত । যমঞ্চ চিত্রগুপ্তঞ্চ যমদূতাংশ্চ পূজয়েৎ ॥ * ॥ অতো যমদ্বিতীয়েতি সংজ্ঞা লোকে বভূব হ । তেনৈব ভগিনীহস্তে ভোক্তব্যং পুষ্টিবর্দ্ধনং ॥ নিত্যং যশস্যমায়ুষ্যসর্ব্বকামার্থসিদ্ধিদং । দানানি দাপয়েদ্যত্ন ভগিন্যৈ চ বিশেষতঃ ॥ কালে তত্র চ সংপূজ্য চিত্রগুপ্তঞ্চ লেখকং । চিত্রৈশ্চ চিত্রপুষ্পৈশ্চ রক্তচন্দনমিশ্রিতৈঃ ॥ নৈবেদ্যং দীয়তে তস্মৈ মোদকং গুড়মিশ্রিতং ॥ * ॥ ভীষ্মোক্তপ্রার্থনা যথা । উৎপত্তৌ প্রলয়ে চৈব তোগ্যে দানে কৃতা-

স্বামিংস্ত্বাং নৃপো মূর্খং মত্বা নাহূতবান্ মখে। কেবলং তব পাণ্ডিত্যং মদন্তি ন হি শোভতে ॥*॥ সুতপা উবাচ। কান্তে ব্রবীমি বিপ্রাণাং যৎ কর্ত্তব্যং শৃণুষ্ব তৎ। যাত্রামাত্রং বহ্বন্নং কাঙ্ক্ষিতব্যং ন চাধিকং ॥ বিদ্বাংশ্চেদ্বিদ্যা দাতব্যা কাপি নানার্জ্জবং চরেৎ। মূর্খশ্চেৎ কেবলা সন্ধ্যা সদোপাস্যা প্রযত্নতঃ ॥ প্রিয়ে তেন চ বক্তব্যমৃতমেবাপ্রিয়ন্ত্বপি। বিপ্রেণ সততং কার্য্যং বৈদ্যমাগমিকঞ্চ তৎ ॥ ঋতৌ গচ্ছেচ্চ স্বাং কান্তাং মুদা কালঞ্চ পাতয়েৎ। কালীং কালাদিকং বাপি জপেদ্বিপ্রো নিরন্তরং ॥ স্বয়ং স্বভাবতো নৃণাং ক্ষত্রাদীনাং শিবং বচঃ। বক্তব্যং চেন্ন গৃহ্লন্তি বিপ্রহানির্ন তৎক্ষতিঃ ॥ * ॥ ব্রাহ্মণ্যুবাচ। সুমানুষস্ত্বং তে কান্ত সুবিপ্রস্ত্বং ধব ত্বয়ি। তিষ্ঠত্যেব চিরং বিপ্র তেহন্তৌ মে মরণং শিবং ॥ কাংস্যকঙ্কণবলয়ৌ সঙ্গিনৌ মে মৃতাবধি ॥*॥ সুতপা উবাচ। প্রিয়ে তে হ্যধুনা তীব্রং ধনান্তঃকরণং সদা। বিনা নিমন্ত্রিতেনাপি গত্বা চানীয়তে ধনং ॥ ইত্যুক্ত্বা সুতপাঃ কান্তাং গত্বা রাজসভাং প্রিয়ে। রাস্তং সুযজ্ঞং বরণং প্রোবাচ নৃপতিং দ্বিজঃ ॥ রে সুযজ্ঞ বিনাহ্বানৈরগচ্ছং তে সভামহং। বিপ্রাণাং বরণং রাজন্ ক্ষত্রিয়াণাং তথৈব চ ॥ কৃতং তদপি নাহং রে ত্বয়া দৃষ্টঃ স্বচক্ষুষা। ভ্রষ্টো ভবতু তে যজ্ঞঃ শ্রীশ্চ যাতু স্থলান্তরং ॥ ক্রুধৈতদুক্ত্বা সুতপাস্ততো নৃপসদঃ স্থলাৎ। বিপ্রো নিঃসৃতবান্ রাজা ভীতেন মনসাব্রবীৎ ॥*॥ হে পুরোহিত হে বিপ্র হেঽঙ্গিরোঽসৌ গতঃ স কঃ। রে ইত্যুক্ত্বা সভামধ্যে বৃত্তান্তং বদ বিস্তরাৎ ॥ ইদং ব্রুবন্তং রাজানং কুর্ব্বন্তং বরণং মুদা। নৃপাজ্ঞয়া ক্ষত্রিয়ার্থং পট্টাদিবস্ত্রসংকুলং ॥ স্বর্ণাঙ্গুরীয়কমপি চানেতুং গতবান্ হি যঃ। কোষমন্দিরমালোক্য রাজান্তিং শীঘ্রমারয়ন্ ॥ ইত্যব্রবীচ্চ হে রাজন্ চিত্রন্তে কোষমন্দিরে। কিঞ্চিচ্চ বস্তু দৃষ্টং ন দৃষ্টং ভস্মতৃণাদিকং ॥ * ॥ শ্রুত্বৈতৎ বিস্ময়ো রাজাব্রবীচ্চৈতৎ পুরোহিতং। হে পুরোহিত বিপ্র ত্বং কৃতবান্ যত্ত্বভূচ্চ তৎ ॥ কোঽপরাধোঽস্তি মে বিপ্রঃ কথং শপ্ত্বা গতঃ প্রভো। কোষমন্দিরপাতৈত্য সংবাদং দত্তবানিদং ॥ কোষে নাস্তি ধনং রাজন্ দৃষ্টং ভস্মতৃণাদিকং। শ্রুত্বৈতদঙ্গিরা ব্রূতে সুতপা যত্র তৎপট ॥ ততো দুর্গে স রাজা চ তূর্ণং স্বর্ণকুঠারকং। গলে বদ্ধা দ্বিজকুলৈর্গতবান্ সুতপোঽন্তিকং ॥ * অঙ্গিরাদিদ্বিজাঃ সর্ব্বে তত্রাট্য সুতপোদ্বিজং। স্তুতিঞ্চক্রুঃ স রাজা চ দূরস্থো ভক্তিতো-

কৃতে। লেখকত্বং সদা শ্রীমাংশ্চিত্রগুপ্ত নমোঽস্তু তে ॥ প্রিয়া সহ সমুৎপন্নসমুদ্রমথনোদ্ভব। চিত্রগুপ্ত মহাবাহো মমাদ্য বরদো ভব ॥ * ॥ চিত্রগুপ্তস্তু সন্তুষ্টো ভীষ্মায় চ বরং দদৌ। মৎপ্রসাদান্মহাবাহো মৃত্যুস্তে ন ভবিষ্যতি। স্মরিষ্যসি যদা মৃত্যুং তদা মৃত্যুর্ভবিষ্যতি। ইতি তস্মৈ বরং দত্বা চিত্রগুপ্তো দিবং যযৌ ॥ অনেন বিধিনা যস্তু চিত্রগুপ্তস্য পূজনং। করিষ্যতি মহাবুদ্ধে তস্য পুণ্যফলং শৃণু ॥ ইহৈব বিপুলান্ ভোগান্ ভুক্ত্বা সর্ব্বান্ মনোরথান্। অক্ষয়ং বিষ্ণুলোকঞ্চ নরো যাতি ন সংশয়ঃ ॥ চিত্রগুপ্তকথাং দিব্যাং কায়স্থোৎপত্তিসংজ্ঞকাং। ভক্তি-

হব্রবীৎ ॥ * ॥ অঙ্গিরঃপ্রভৃতয় ঊচুঃ। ধরামরবর প্রাজ্ঞ নো বরস্ত্বং ধরাতলে। রাজ্ঞঃ শিবং নো মানং ত্বদ্যাচামহ উমেশহৃৎ॥ দেবস্ত্বং দেবতাজ্ঞস্ত্বং পণ্ডিতানাঞ্চ পণ্ডিতঃ। দয়ালো নো দয়স্ব ত্ত নমস্তে বরতো বর॥ ব্রহ্ম ব্রহ্মজ্ঞ এব ত্বং ব্রাহ্মণেশ্বর মানদ। রাজ্ঞঃ শিবং নো মানং ত্বদ্যাচামহ উমেশহৃৎ॥ * ॥ সুযজ্ঞরাজ উবাচ। হে নাথ হে ধরেশেশ ধর্ম্মকর্ম্মবিধায়ক॥ বর্ণেশ্বর নমস্তুভ্যং বন্দে তে চরণাম্বুজং। হে ব্রহ্মণ্যদেব হে নাথ হে ধরামর হে প্রভো॥ কৃপাং কুরু নমস্তুভ্যং প্রণমামি পদং তব। নাহং জানামি তে পূজাং নাহং জানামি তে স্তুতিং॥ নাহং জানামি তে ধ্যানং মূঢ়ং মাং কৃপয়া দয়॥ * ॥ সুতপা উবাচ। কিমর্থং স্তুথ হে বিপ্রাঃ কিমর্থং স্তৌষি হে নৃপ। গচ্ছ যাথ মখং গাবং সুখেন শিবদং কুরু॥ শ্রুত্বেতি সুতপোবাক্যং সুযজ্ঞঃ সুখমানসঃ। কৃতাঞ্জলিপুটো রাজা চাব্রবীদিদমুত্তমং॥ * ॥ রাজা উবাচ। নিমন্ত্রণস্তু বিপ্রেন্দ্র ভোজ্যঞ্চ সকলোত্তমং। গৃহ্নাপরাধসাহস্রং মে ক্ষমস্ব কৃপাং কুরু॥ অপরাধসহস্রাণি কৃতবানহমব্যয়। গৃহ্ণ মদ্রাজতীং মুদ্রামযুতাং মাং

যুক্তেন মনসা যে শৃণ্বন্তি নরোত্তমাঃ॥ দীর্ঘায়ুষো ভবিষ্যন্তি সর্ব্বব্যাধিবিবর্জিতাঃ। সর্ব্বে বিষ্ণুপদং যান্তি যত্র যান্তি তপোধনাঃ॥ চিত্রগুপ্তকায়স্থোৎপত্তিমাহাত্ম্যকথা সমাপ্তা॥ * ॥ ইতি ভবিষ্যপুরাণং॥ এবং হত্বার্জ্জুনং রামঃ সন্ধায় নিশিতান্ শরান্। এক এব যযৌ হন্তুং সর্ব্বানেবাতুরান্ নৃপান্॥ কেচিৎ গহনমাশ্রিত্য কেচিৎ পাতালমাবিশন্। সগর্ব্বা চন্দ্র-

কৃপাং কুরু॥ মৎসভাস্থদ্বিজা হেতে প্রোচুঃ পাণ্ডিত্যমদ্ভুতং। গুণাংশ্চ তে বহুবিধান্ শ্রুত্বাহং সুখমানসঃ॥ ক্ষম্যাপরাধং মে নাথ প্রশ্নমেকং ব্রবীষি চেৎ। মৎসভাস্থবুধঃ কোঽপি ব্রবীতি ন কৃপাং কুরন্॥ আগচ্ছতি কলির্ঘোরস্তত্র কে ভক্তিতো দ্বিজান্। অর্চ্চিষ্যন্তীতি শ্রুত্বা মে বরঞ্চ মরণং শিবং॥ শ্রুত্বৈতৎ সুতপা বিপ্রোঽব্রবীচ্চ সদয়ো নৃপং॥ * ॥ সুতপা উবাচ। হে সুযজ্ঞ নৃপশ্রেষ্ঠ ব্রাহ্মণাতিপ্রিয়ো নৃপ। পশ্যৈতান্ বিপ্রভৃত্যাংস্তুমাসনাদিশিরোধৃতান্॥ এতদ্দেবারকলাবেতে ভবিষ্যন্তি দ্বিজার্চ্চকাঃ। জাত্যা মসীশাঃ কায়স্থা ব্রাহ্মণেশ্বরমানসাঃ॥ মহাবিদ্যোপাসকাশ্চ গুণতঃ ক্ষত্রিয়োপমাঃ। কলৌ হি ক্ষত্রিয়াভাবাৎ বৈশ্যাভাবাচ্চ সুব্রত॥ এতে ভক্ত্যা ভবিষ্যন্তি বিপ্রামানাসহিষ্ণবঃ। বিপ্রপ্রিয়া বিপ্রভক্তা বিপ্রমানপ্রদা যতঃ॥ মহাবিদ্যাপ্তিতশ্চৈতে ক্ষত্রকর্ম্মকৃতঃ কলৌ। মস্যা এবেশমস্যেতি মসীশ ইতি সংজ্ঞকঃ॥ ব্রহ্মণো বিপ্রমূর্ত্তেস্তু পাদাংশে সম্ভবন্তি তৎ। কায়স্থা ইতি সংজ্ঞাঃ স্যুঃ সুযজ্ঞৈষাং শিবা মতিঃ॥ * ॥ শ্রুত্বৈতৎ সকলং রাজা বৃত্তান্তং সুতপোমুখাৎ। প্রেমাশ্রুভির্নৃত্যকারী কৃতাঞ্জলিপুটোঽব্রবীৎ॥ * ॥ রাজা উবাচ। ইতঃ পরম্নুষেঽহ্নুক্ষেৎ ত্রিয়ে তদপি

সেনস্য ভার্য্যা দালভ্যাশ্রমং যযৌ॥ * । ততো রামঃ সমায়াতো দাল্‌ভ্যাশ্রমমদ্ভুতমং। পূজিতো মুনিনা সদ্যঃ পাদ্যার্ঘ্যাচমনাদিভিঃ॥ দদৌ মধ্যাহ্নসময়ে তস্মৈ ভোজনমাদরাৎ। রামস্ত যাচয়ামাস

মচ্ছিবং। শ্রুতং যত্তব জাতীনাং ক্ষত্রহীন-কলৌ সুখং॥ ততোঽতিতুষ্টঃ সুতপা উবাচ মধুরং নৃপং। সুযজ্ঞ সুমতিস্ত্বং হি ত্বত্তো বিপ্রপ্রিয়ো ন হি॥ মানেন ব্রাহ্মণানাং হি বরঞ্চ মরণং নয়েঃ॥ *॥ সুযজ্ঞ উবাচ। হে নাথ সুতপো বিপ্র শ্রুতং যন্মেঽঙ্কমুখাৎ। কৃপয়া শৃণু তৎ সর্ব্বং তে জাতের্ম্মহিমানমু॥ ব্রাহ্মণো ব্রহ্ম জানাতি নান্যজাতিরিতি শ্রুতিঃ। ব্রহ্মজ্ঞানী সদা বিপ্রো ন চেদ্ব্রাহ্মণসংজ্ঞকঃ॥ বিনা প্রযুক্তিং যো বিপ্র উপকারী স্বয়ং ভবেৎ। আশীঃ করোতি ব্রূতে চ ক্ষত্রাদীনাং শিবং বচঃ॥ স এব সাক্ষাদ্ব্রহ্মেতি বিপ্রাণাং জাতিলক্ষণং। ব্রাহ্মণাজ্ঞাবচো যে ন গৃহ্নন্তি পালয়ন্তি চ॥ গুর্ব্বাজ্ঞালঙ্ঘনং পাপং স্পৃশেত্তেষাং শরীরতঃ। পিত্রেতি সকলং চোক্তং তে চ সন্দিগ্ধজাতয়ঃ॥ বশীকারাদি সকলং সৃষ্টিস্থিতিলয়ঞ্চ যৎ। শক্নুবন্তি হি কর্ত্তুং তে বিপ্রাঃ পিত্রেতি চোক্তমু॥ বিনায়াসৈর্ম্মুদা যো যৎ বিপ্রায় শক্তিতো দদেৎ। মুদা তদেব গৃহ্নাতি বিপ্রাণামিতি লক্ষণং॥ কেষামপি ন কাপট্যং কুরুতে ব্রাহ্মণঃ কচিৎ। বিনাপরাধৈর্ন শপেদিতি তজ্জাতিলক্ষণং॥ হিংস্রে ভবতি হিংস্রঃ স শঠে শাঠ্যং সমাচরেৎ। আর্জ্জবঞ্চেন্দ্রিয়গ্রামান্ স্ববশে স্থাপয়েচ্চিরং॥ দয়ালুশ্চ সদা বিপ্র ইতি পুত্র হৃদি স্মরন্। ভীত্যা ভক্ত্যা সদা পূজ্যঃ পিতেতি ব্রতবাংশ্চ যে॥ কটূক্ত্যা যদি গৃহ্নাতি হৃদা দুঃখেন রাত্তি চেৎ। তদ্বিপ্রো দুঃখং ভজতে দাতুর্নৈব শিবং কচিৎ॥ বিত্তশাঠ্যং গৃহ্নশাঠ্যং কার্য্যং নোভয়তঃ কচিৎ। ইত্যপ্যাত্মজ বিপ্রাচ্চ শ্রুতং শাসনসম্মতং॥ শৃণু পুত্র প্রবক্ষ্যামি সাবধানং সমাচর। স্বল্পং বহুশপস্তুং বা নৈব দ্রুহ্যতি ভুসুরং॥ সুতপো নাথ মে পিত্রা যদ্যদুক্তং তদুক্তবান্। ত্বঞ্চাপি ব্রাহ্মণ ব্রহ্ম যথারুচি তথা কুরু॥ শ্রুত্বৈতৎ সুতপা বিপ্র উবাচ পরমাদরং। রাজন্ বরং বৃণু বৃণু যত্তে মনসি বাঞ্ছিতং॥ *॥ সুযজ্ঞ উবাচ। ঋষে বরেণ তে নৈক উপকার ইহাধুনা। যজ্ঞে সমাপ্তৌ মে মস্তচ্ছেত্তা রামো ভবিষ্যতি ॥ *॥ সুতপা উবাচ। যজ্ঞং সমাপ্য সুখতঃ প্রগচ্ছের্বিন্ধ্যনৈর্ঋতিং। তত্র বৈ স্বর্ণদানদ্যা মধ্যে দ্বীপোঽস্তি সুন্দরঃ॥ দ্বাদশক্রোশমানী হি তদ্গত্বা বসতিং কুরু। যদা পরশুরামস্তে কচ্চিচ্ছেত্তা ভবিষ্যতি॥ ভবিষ্যতি চ কাণঃ স নয় তে বাঞ্ছিতং বরং। ততঃ পুনঃ কৃতে রাজন্ জম্বুদ্বীপেশ্বরো ভবান্॥ ভবিষ্যতীতি ত্বং বীজরূপেণ তিষ্ঠ তত্র হি। বরং তে বাঞ্ছিতং গৃহ্ন তুষ্টোঽহং ভক্তিত-

হৃদিস্থং স্বমনোরথং॥ যাচয়ামাস রামাচ্চ কামং দাল্ভ্যো মহামুনিঃ। ততস্তৌ পরমপ্রীতৌ ভোজনং চক্রতুর্মুদা॥ ভোজনানন্তরং দাল্ভ্যঃ পপ্রচ্ছ ভার্গবং প্রতি। ত্বয়া প্রার্থিতং দেব তৎ ত্বং শংসিতু-মর্হসি॥*॥ রাম উবাচ। তবাশ্রমে মহাভাগ সগর্ভা স্ত্রী সমাগতা। চন্দ্রসেনস্য রাজর্ষেঃ ক্ষত্রিয়স্য মহাত্মনঃ॥ তন্মে ত্বং প্রার্থিতং দেহি হিংসেয়ং তাং মহামুনে। ততো দাল্ভ্যঃ প্রত্যুবাচ দদামি তব বাঞ্ছিতং॥ *॥ দাল্ভ্য উবাচ। স্ত্রিয়ং গর্ভময়ং বালং তন্মে ত্বং দাতুমর্হসি। ততো রামোঽব্রবীদ্দাল্ভ্যং যদর্থমহমাগতঃ॥ ক্ষত্রিয়ান্তকরশ্চাহং তৎ ত্বং

স্তব ॥ ইহতঃ পরতো যদ্যৎ পরমানন্দমুত্তমং ॥ * ॥ সূযজ্ঞরাজ উবাচ। নাথ নাহং বরং যাচে যাচে কেবলমঙ্ঘ্রি তে। চিরং মম মতিস্তিষ্ঠেদিতি দেহি বরোত্তমং ॥ তেহঙ্ঘ্রৌ পবিত্রে পরমে সর্ব্বত্র সুখদে কিল। তদেবাস্তু ইতি প্রোচ্য সুতপা গতবান্ গৃহং ॥ রাজাপি চ মখং কৃত্বা বিপ্রেভ্যো দক্ষিণাং দদন্। পরিবারযুতোঽগচ্ছদ্দীপে কাঞ্চনদাস্তরে॥ বসতিং বরতঃ প্রাপ্তাং চতুর্দ্দিক্ষু জলপ্লুতাং। অত্রেস্থাঃ প্রাপটন্ বিপ্রাঃ পণ্ডিতাঃ স্বস্ববাসভূং ॥ একো মসীশঃ সর্ব্বাখ্যঃ সর্ব্বাণীহৃদয়দ্বিজাৎ। কুলপ্রদীপঃ স্বীয়ানাং জাতীনাং পূততাস্পৃহঃ ॥ বগলেতি মহাবিদ্যাং গৃহীত্বা সাধয়ন্ মুদা। সর্ব্বাণীহৃদয়াখ্যস্য পণ্ডিতস্য প্রসাদতঃ ॥ বরং যাচিতবান্ ভক্ত্যা ত্রিলোকাধিপতিং গুরো। কৃপয়া কুরু মাং নাথ ত্বমেব বগলা মম ॥ গুরুস্তুপি বরং দত্তো রাজ্যং ভুক্ত্বা পুনর্ভবন্। ত্রিলোকাধিপতির্ভূয় মুদা তত্র সুখিষ্যসি ॥ গুর্ব্বাজ্ঞয়া মসীশঃ স রাজ্যভোগী দ্বিজার্চ্চিতঃ। বিহায় দেহং ভূয়শ্চ ত্রিধারূপো বভূব হ ॥ চিত্রগুপ্তশ্চিত্রসেনশ্চিত্রাঙ্গদ ইতি ত্রয়ঃ। স্বর্গে মর্ত্ত্যে চ পাতালে রাজতে চিরমুত্তমঃ ॥ * ॥ চিত্রগুপ্তো মহাবিদ্যাং প্রাপ্য কুল্লাখ্যবিপ্রতঃ। পুত্রান্ যাচিতবান্নৈব গুরোর্দেবত্বমাবহন্ ॥ যমাস্তিষ্ঠো বভূবাপি স্বর্মর্ত্ত্যাধোবিবেচকঃ। চিরং শুভাশুভং কর্ম্ম বিবিচ্য শমনান্তিকে ॥ যদ্বদেৎ সকলানাং তু তদেবাভোজয়ৎ যমঃ। চিত্রসেনো মহাবিদ্যাং বগলেতি গুরোর্নয়ন্ ॥ জপ্ত্বা সংতোষ্য পুত্রাদীন্ যাচিত্বা প্রাপ্য মর্ত্ত্যতঃ। রাজ্যং চকার মুদ্যুক্তশ্চিত্রাঙ্গদ অধোগতঃ ॥ * ॥ অধোগতস্য হেতুং ত্বং বগলে শৃণু কালিকে। বগলেতি মনুং প্রাপ্য বিপ্রোঽস্মি ইতি বাঞ্ছয়া ॥ তপশ্চকার পঞ্চাব্দং নাম্নং কিঞ্চিৎ গৃহীতবান্। ফলমূলাদিকং কিঞ্চিৎ সায়মত্তি যথা মিলেৎ ॥ বিহায় বিপ্রস্য গুরোরপি পূজাঞ্চ পার্ব্বতি। জপেন্নিত্যং হি বগলামন্যবিপ্রঞ্চ নেক্ষয়ন্ ॥ জ্ঞাত্বেতি ব্রাহ্মণাঃ সর্ব্বে উচুশ্চিত্রাঙ্গদং ক্রুধা। বচো হি মধুরং কিঞ্চিৎ প্রিয়াদ্ভক্তাচ্চ সুন্দরি ॥ রে চিত্রাঙ্গদ অজ্ঞস্ত্বং বৎস বিপ্রত্বমিচ্ছসি। কদাপ্যুপানম্যস্তস্মো নৈবেতি ন হি বুধ্যসি॥ বৎস শীঘ্রমধো গচ্ছ চিরং কুরু তপো মুদা। ততঃ শ্রুত্বেতি শাপং স ভক্ত্যাতিশয়মানসঃ ॥ কৃতাঞ্জলিপুটো ব্রূতে চিত্রাঙ্গদ ইতীশ্বরি ॥ * ॥ চিত্রাঙ্গদ উবাচ। হে ব্রাহ্মণা হে গুরবো মামেবাতিনিরাগসং। কথং শেপুর্ভবন্তো হি বিপ্ররূপা হ ঈশ্বরাঃ ॥ বো মুখাৎ

যাচিতবানসি। প্রার্থিতশ্চ ত্বয়া বিপ্র কায়স্থো গর্ত্ত উত্তমঃ ॥ তস্মাৎ কায়স্থ ইত্যাখ্যা ভবিষ্যতি শিশোঃ শুভা ॥ এবং রামো মহাবাহুর্হিত্বা তং গর্ত্তমুত্তমং। নির্জ্জগামাশ্রমাৎ তস্মাৎ ক্ষত্রিয়ান্তকরঃ প্রভুঃ ॥ * ॥ কায়স্থ এব উৎপন্নঃ ক্ষত্রিয়াং ক্ষত্রিয়াত্মতঃ। রামাজ্ঞয়া স দাল্ভ্যেন ক্ষত্রধর্ম্মাদ্বহিষ্কৃতঃ ॥ কায়স্থধর্ম্মোঽস্মৈ দত্তশ্চিত্রগুপ্তশ্চ যঃ স্মৃতঃ। তদ্গোত্রজাশ্চ কায়স্থা দাল্ভ্যগোত্রাস্ততোঽভবন্ ॥ দাল্ভ্যোপদেশতস্তে বৈ ধর্ম্মিষ্ঠাঃ সত্যবাদিনঃ। সদাচারপরা নিত্যং রতা হরিহরার্চ্চনে ॥ দেববিপ্রপিতৃণাঞ্চ অতিথীনাঞ্চ পূজকাঃ ॥ * ॥ ইতি স্কান্দে রেণুকামাহাত্ম্যং ॥ * ॥

শ্রুতবান্ যদয়ং ক্ষতিঃ কা তৎ সমাচরন্। উপাস্যো যস্তস্তবিতুং সর্ব্বে হ্যুদ্যোগিনঃ স্থ্যরু ॥ জানেঽহং ব্রাহ্মণো ব্রহ্ম স্বেচ্ছয়া বিবিধাকৃতিঃ। নানালীলামাচরিতুং মানুষাকৃতিরপ্যভূৎ ॥ তদ্ব্রহ্ম ব্রাহ্মণং জানে জানে তৎ সর্ব্বরূপধৃক্। রাজেতি সংজ্ঞাধারি ক্ব ক্বাপি তচ্চ প্রজাভিধং তদেব সকলস্থায়ি তদেব সর্ব্বকর্তৃ চ। তদেব সর্ব্বপাতৃ স্যাত্তদেব সর্ব্বহন্তৃ চ ॥ পুংরূপং চৈব স্ত্রীরূপং ক্লীবরূপঞ্চ নান্যথা। আত্মা এবৈকরূপং তৎ স্বমেবানেকমাকরোৎ ॥ নানাপ্রকারজীবাদি চাত্মনাত্মানমেব হি। স্থাবরং জঙ্গমং বিপ্রাস্তদেব নাত্র সংশয়ঃ ॥ ভবন্তো হীশ্বরাঃ সর্ব্বে কিমর্চ্চয়থ তৎ কথং। কথং চিন্তয়থাত্মানং দেবমর্চ্চনকালতঃ ॥ ছলেন ভূতশুদ্ধ্যাদি কৃত্বা দেবাঃ স্থ্যরেব কিং। ঈশোঽপি মানুষাকৃত্যা ঈশত্বপ্রাপ্তয়ে পুনঃ ॥ যদ্ব্যদ্যোগী ভবেত্তৎ কিং মানুষোঽহং ন তচ্চরে। অন্যায়ি ন ভবেদ্ব্রহ্ম যুয়মন্যায়িনঃ কথং ॥ বগলাপি চ যা জপ্যা সা চ ব্রাহ্মণ এব হি। কিঞ্চিদ্বিশেষো ভেদোঽপি বগলায়াং দ্বিজেঽপি ন ॥ অতস্তদ্ভবিতুং বিপ্রা অহমপ্যেব তাপসঃ। গুর্ব্বাজ্ঞা মে পুরাভূচ্চ সর্ব্বং ত্যক্ত্বা জপং কুরু ॥ অতোঽহং সকলং ত্যক্ত্বা কেবলাং বগলাং জপে। বগলায়াং দ্বিজে নৈব কিঞ্চিদ্ভেদোঽস্তি শাসনে ॥ অতো বিপ্রোঽস্মীতি কামং কৃতবান্ জপকর্ম্মণি। গুরৌ বিপ্রে মনৌ চাপি দেবে চাত্মনি ভূসুরাঃ ॥



মসীশজাতিঃ কিঞ্চিচ্চ ন বিশেষং বিচিন্তয়েৎ। ব্রাহ্মণোঽপ্যবিশেষশ্চ তস্মিংস্তস্মিংশ্চ ভূসুরাঃ ॥ আত্মন্যাত্মনি কীটেঽপি চেতি বো জাতিলক্ষণং। মূর্খোঽহং যচ্চ শ্রুতবান্ প্রভবো ব্রাহ্মণাস্ততঃ ॥ তদাচরিতবান্ মে কো দোষোঽস্তি বদত দ্বিজাঃ। বিনাপরাধতো বিপ্রা যুয়ং বামনরূপতঃ ॥ বলিঞ্চাতিপ্রিয়ং ভক্তমধঃ প্রাস্থাপয়ন্ যদি। অহং কীটোঽত্র নাশ্চর্য্যং কিমধো ন পটে কথং ॥ কৃতাঞ্জলিপুটোঽহং বশ্চরণং শতসংখ্যয়া। প্রণমে স্বগৃহং বিপ্রা গচ্ছতাহমধঃ পটে ॥ অধো গচ্ছাম্যহং তত্র কিঞ্চিৎ খেদং করোমি ন। বাঞ্ছয়ামীতি চাজ্ঞা বো ন লজ্জ্যা ভবতু ক্বচিৎ ॥ * ॥ ইত্যাদি শ্রুত্বা হে কালি লজ্জাং প্রাপ্যাতিখেদিতাঃ। ব্রুবন্তি চাতিমধুরং ক্রন্দন্ত ইব তে দ্বিজাঃ ॥ হে চিত্রাঙ্গদ হে তাত বৎস ত্বং নোৎসবঃ কিল। দুশ্চিন্তাং কুরু মা তাত ভদ্রং তে কথয়ামি তে ॥ জনস্তপোবলেনৈব সর্ব্বং ভবিতুমর্হতি। নার্হতীশং বিনা তাত ব্রাহ্মণো ভবিতুং কিল ॥ ইতীশ্বরাজ্ঞা বেদেঽস্তি প্রতিজানীহি তত্ত্বতঃ। বরং প্রাপ্নোতি দেবত্বং ব্রাহ্মণত্বং কদাপি ন ॥ যথামরত্বমীশেন বিনা ক্বাপি ন শাসনে। নোৎসবস্ত্বমধো গচ্ছ সুখেন বগলাং জপ ॥ কলের্দশসহস্রাণি নাগলোকেশ্বরো ভব। ততস্ত্রিলোকনাথস্ত্বমিন্দ্রতুল্যো ভবিষ্যসি ॥ রাজ্যং ভুক্ত্বা ততো নৈব পুনরাবর্ত্তনং তব। সদা বয়ং তব শিবং চিন্তয়ামো

ন ভীঃ কুরু ॥ কে জানন্তীদৃশং ত্বাং হি ভক্তশ্রেষ্ঠং বিবেচকং। শাপং দারুণমাহুস্ত্বামধুনা তন্ন খণ্ডিতি ॥ তাত গচ্ছ সুখং ভুঙ্ক্ষ্ব নাগলোকেঽপি বিস্তরাৎ। তত আনন্দমনসা গতশ্চিত্রাঙ্গদস্তলং ॥ স্বস্থানং ব্রাহ্মণাশ্চাপি চাগচ্ছল্লজ্জিতান্তরাঃ। ভূয়ো মসীশঃ সর্ব্বোঽপি বিপ্রদাসাভিধোঽভবৎ ॥ বিপ্রপ্রসাদাৎ শূদ্রাণামপি শ্রেষ্ঠো বভূব হ। বগলেতি মহামন্ত্রং সর্ব্বেষাং সর্ব্বকামদং ॥ কেবলেন জপেনৈব লক্ষেণ কালি সিধ্যতি। বশীকরণকর্ম্মাদি দশসাহস্রতো ভবেৎ ॥ * ॥ অথ বক্ষ্যে মহেশানি বগলাসাধনং তব। বগলেতি মনোঃ সংখ্যা পুরশ্চরণকর্ম্মণি ॥ লক্ষেণ মন্ত্রসিদ্ধিঃ স্যাৎ নাস্ত্যত্র যুগসংখ্যকং। ততো বশ্যাদি কর্ত্তব্যং দশসাহস্রসংখ্যয়া ॥ শরীরারোগ্যতো বাপি ধনেচ্ছুশ্চাযুতং জপেৎ। কলাবেতস্য হি মনোঃ প্রভাবং কিং ব্রবীমি তে ॥ সহস্রমাত্রহোমেন সর্ব্বসিদ্ধির্ন চান্যথা। নাস্ত্যপেক্ষা হি ঋষ্যাদেঃ স্তুতিপাঠাদিকস্য বা ॥ স্তুতির্ব্বা কবচং বাপি ঋষ্যাদিন্যাস এব বা। বগলেতি স্বয়ং সর্ব্বং সিদ্ধবিদ্যা ইতি প্রিয়ে ॥ ত্বয়াদ্যারূপয়া কালি স্বয়মুক্তং পুরৈকদা। শরীরারোগ্যতো দেবি বৈরিনিগ্রহতোঽপি বা ॥ দিবা নক্তঞ্চ কর্ত্তব্যা সহস্রস্নানতো হুতিঃ। কেবলাহুতিমাত্রেণ রাজ্ঞারারোগ্যতাং লভেৎ ॥ বগলে ইতি যো বিশ্চাপ্যুচ্চৈচ্চৈর্যত্র বারয়েৎ। পথিস্থা রিপবঃ সর্ব্বে পলায়ন্তে ভয়ান্বিতাঃ ॥

ভবেদ্ধি সফলং কর্ম্ম বগলেতি স্মরন্ জনঃ। বগলাজাপিনং দৃষ্ট্বা সর্ব্বে ভীতিমবাপ্নুয়ুঃ॥*॥ কেবলং পটলমিদং পঠন্ শৃণ্বন্ মনোরথং। লভেৎ কালি বপুস্ত্যক্ত্বা বগলাঞ্চ ন সংশয়ঃ ॥ এষা বিদ্যা মসীশেন সদোপাস্যা ন সংশয়ঃ। ব্রাহ্মণে বগলায়াঞ্চ চিন্তয়েদেকরূপতঃ ॥ বিনা প্রযুক্তিমপি চ মসীশং শ্রাবয়েদ্দ্বিজঃ। শ্রাবণায়াং ধনাকাঙ্ক্ষী ন ভবেদ্ব্রাহ্মণোত্তমঃ ॥ আলস্যাদ্বা প্রমাদাদ্বা শ্রাবয়েন্ন যদি দ্বিজঃ। মসীশহত্যাভাগী স্যাচ্ছ্রাবয়িত্বা তব প্রিয়ঃ ॥ ব্রাহ্মণোঽপি বরারোহে শৃণুয়াৎ ভক্তিতৎপরঃ। নির্ব্বাণং লভতে কালি নিষ্কামী কোঽপি চেৎ পঠেৎ ॥ এতদুক্তেঽপি কায়স্থঃ শৃণুয়ান্ন যদি প্রিয়ে। পটলং কাম্যদঞ্চাশু ব্রহ্মহত্যাফলং লভেৎ ॥ ইতি আচারনির্ণয়তন্ত্রে বাসুদেবসম্মতে হরপার্ব্বতীসংবাদে সপ্তত্রিংশত্তমঃ পটলঃ ॥ চাটচারণচৌরেভ্যো বধবন্ধভয়াদিভিঃ। পীড্যমানাঃ প্রজা রক্ষেৎ কায়স্থেভ্যো বিশেষতঃ ॥ ইতি বহ্নিপুরাণে পাশুপতদানাধ্যায়ঃ ॥*॥ গৌড়দেশে তেষামাগমনকারণং। তত্রাদৌ মঙ্গলাচরণং যথা। যস্যাভূদ্ভূমিদেবো বদনসরসিজে যদ্ভুজে ভূমিপালো যস্যোর্ব্বোর্ব্বৈশ্য এব দ্বিজভজনরতির্যস্য শূদ্রঃ পদাব্জে। সৃষ্ট্বা পাতিষ্যতীদং জগদিতি প্রকৃতির্যঃ স্বয়ং পুরুষস্তং বন্দেঽহং দেবদেবং ত্রিগুণময়বরং সর্ব্বলোকানুকম্পং ॥ * ॥ অথ আদিশূররাজপ্রশংসা। শ্রীমদ্রাজাদিশূরো ভবদবনিপতির্ব্রহ্মরাজো

বশান্তী সপ্লোকঃ সদ্বিচারৈরদিতিসুতপতিঃ স্বর্যথাসীৎ তথাসীৎ। প্রাতাপাদিত্যতপ্তাখিলতিমিররিপুস্তত্ত্ববেত্তা মহাত্মা জিত্বা যুদ্ধাংশ্চকার স্বয়মপি নৃপতির্গৌড়রাজ্যাম্নিরস্তান্ ॥ * ॥ অথাদিশূরস্য পাত্রং প্রতি ক্রতুভুজব্রাহ্মণকুলীনশূদ্রয়োঃ প্রশ্নস্তস্যোত্তরঞ্চ। পাত্রং পপ্রচ্ছ পূতং পরমসুরপদদ্বন্দ্বপদ্মার্চ্চকোঽসৌ কাসন্তে কাশ্যপীশাঃ ক্রতুকৃতিকুশলাঃ কাপি শূদ্রাঃ কুলীনাঃ। পাত্রস্তেষামবোচৎ পরিচয়মখিলং ভূপবাক্যাৎ দ্বিজাস্তে কোলাঞ্চস্থাঃ কুরঙ্গা ইব কিল তপসা নৈব কেষামধীনাঃ ॥ কোলাঞ্চস্য মহীপতিঃ ক্ষিতিভুজামেকপ্রধানঃ প্রধীঃ স্বেষ্টে নিষ্ঠমতির্মহাশয়বরঃ শ্রীবীরসিংহঃ স্বভূৎ। তদ্দেশাবসিনঃ সমাধিকৃতিনঃ পাপালিসংহারিণঃ সন্তি ব্যাসসমাঃ সভাসদ ইতো গৌড়েন্দ্রভূমীশ্বরাঃ॥ *॥ অথ বীরসিংহ প্রতি লিপিপ্রেরণং। ভূপোঽভূদ্ভবনে স্বচেষ্টিতপরঃ সদ্‌ভৃত্যভার্য্যান্বিতান্ ভূদেবান্ বৃষবান্ বিচিত্রলিখনৈরানেতুকামঃ স্বয়ং। পাত্রেণ প্রণয়প্রমোদরচিতাং শ্রীবীরসিংহে লিপিং গৌড়ক্ষ্মাপতিরেব পুণ্যসুমতির্দূতেন প্রাস্থাপয়ৎ ॥ * ॥ অথ লিপিপ্রকারঃ। সুকৃতসুকৃতসংহাঃ সর্ব্বশাস্ত্রার্থদক্ষা লপিতহতবিপক্ষাঃ স্বস্তিবাক্যাঃ শ্রুতিজ্ঞাঃ। সুজিতসুগতবৃন্দে গৌড়রাজ্যে মদীয়ে দ্বিজকুলবরজাতাঃ সানুকম্পাঃ প্রয়ান্তু ॥ নৃপতিসুকৃতিসারঃ স্বীয়বংশাবতারঃ প্রবলখলবিচারো বীরসিংহোঽতিধীরঃ। অয়ি বঙ্গখিতাস্তে ভূমিদেবান্ সশূদ্রান্ পুনরপি মম গৌড়ে প্রাপয় ত্বং নিতান্তং ॥ * ॥ অথ ব্রাহ্মণশূদ্রাণাং গৌড়দেশে গমনেচ্ছা। মুদা গন্তুকামাঃ পুরাবাসগৌড়াঃ সমাহায় কোলাঞ্চদেশং ক্ষিতীশং। নৃপাজ্ঞাঞ্চ লব্ধা সদারাদিভৃত্যা মহাযোগিনস্তে বভূবুঃ সশূদ্রাঃ ॥ * ॥ অথাদিশূরসমীপে ব্রাহ্মণপ্রেরণং। মহারাজরাজাদিশূরো মহাত্মা ত্বয়া বীরসিংহস্য মেঽস্ত্বাদিসখ্যং। তবাজ্ঞানুসারাদ্ধি প্রস্থাপয়ামি দ্বিজান্ পঞ্চগোত্রান্ সদারাদিভৃত্যান্ ॥ * ॥ অথ ব্রাহ্মণানাং গমনং। চলচ্চঞ্চলাশ্বালিযানাঃ প্রধানা বৃহৎশ্মশ্রুগুল্ফাতিশোভানলাভাঃ। ক্রতুজ্ঞাঃ শ্রুতিজ্ঞাঃ প্রতিজ্ঞানসাধ্যাঃ সবর্ম্মাশ্বশস্ত্রাঃ প্রয়াতাঃ প্রয়াগং ॥ ততঃ স্নানদানাদি কৃত্বা চ বিপ্রাঃ যযুস্তেঽপি বারাণসীং পঞ্চগোত্রাঃ। ততো বিশ্বনাথং সমালোক্য দানৈর্যশঃ প্রাপ্য তস্মাদ্গয়াভূমিমাপুঃ ॥ * ॥ অথ ব্রাহ্মণানাং গৌড়রাজ্যপ্রবেশো রাজসমীপে আশির্দ্দং গমনঞ্চ। পিতৄন্ বান্ধবাংস্তারয়িত্বা গয়ায়াং গতাঃ শাসিতং গৌড়রাজ্যেশরাজ্যং। ততস্তেজসা তে দিশো ভাসয়ন্তঃ শ্রুতিং ব্যাহৃতিং ভারতীং পাঠয়ন্তঃ ॥ ততো হস্তদূর্ব্বাক্ষতাঃ পঞ্চগোত্রা নৃপঞ্চাশিষং কর্ত্তুমেব প্রতস্থুঃ। অমী পঞ্চ মধ্যাহ্নমার্ত্তণ্ডতুল্যা দ্বিজাঃ স্থাপিতাশ্বাঃ পরশ্রেয়সঞ্চ ॥ * ॥ অথৈষাং বেশং দৃষ্ট্বা রাজ্ঞোঽবজ্ঞা তেষাং শুষ্কবৃক্ষে আশিষো নিক্ষেপশ্চ। দৃষ্ট্বৈবং বেশমেষামবনিপতিরসৌ ভ্রান্তচিত্তো দ্বিজানাং

তৈরালাপং ন কৃত্বা স্বগৃহমপি যযৌ গন্তুকামাঃ পুনস্তে। বুদ্ধা ভূপালবুদ্ধিং ক্ষণমপি চ বুধাঃ শুক্লবৃক্ষাশিষস্তে তস্মাত্তাং প্রাপ্য দূর্ব্বাক্ষতমপি স বভৌ শুক্লবৃক্ষঃ সুবৃক্ষঃ ॥ * ॥ অথ রাজকর্ত্তৃকব্রাহ্মণানাং প্রশান্তনং গোত্রনামপ্রশ্নশ্চ। সবিস্ময়া বৈ গলবদ্ধবস্ত্রা ভূপাদয়স্তে চরণারবিন্দং। পবিত্রকীর্ত্তিং ভুবি ভূসুরাণাং শ্রুত্বা চ পেতুঃ সকলাঃ প্রণত্য ॥ ক্ষমধ্বমস্মাকমু চিত্তবাদং মূঢ়াত্মনাঞ্চাপরাধং হি বিপ্রাঃ। বো ব্রূত যূয়ং কিমু নাম গোত্রং ততশ্চ সর্ব্বে গদিতুং প্রবৃত্তাঃ ॥ * ॥ অথ পঞ্চব্রাহ্মণানাং পরিচয়ঃ। অভূদ্বন্দ্যবংশোদ্ভবো ভট্টনারায়ণোঽয়ঞ্চ শাণ্ডিল্যগোত্রে গরীয়ান্। তপস্বান্ যশস্বান্ দয়াবান্ সুবিদ্বান্ বিবস্বানিবাস্যাং সভায়াং বিভাতি ॥ শ্রুতিতত্ত্বতদঙ্গবিচারকরোঽবনিপালক কাশ্যপগোত্রবরঃ। ক্রতুদক্ষসমঃ কিল দক্ষমহাশয়নাম ইতি ভুবি ভাতি যতিঃ ॥ সমস্তশাস্ত্রপণ্ডিতস্তথাগতপ্রখণ্ডিতঃ প্রচণ্ডসর্ব্ববৈরিদর্পখর্ব্বকারকঃ। সাবর্ণগোত্রসম্ভবোঽত্র ভাতি বেদগর্ভকঃ ছান্দড়ঃ প্রভাতি ভূপ বাৎস্যগোত্রসম্ভবঃ ॥ যশঃসুধাকরোত্তপৎসপত্নিসঙ্গযোষিতাননাম্বুজে মহাতপস্তপোবশীকৃতেন্দ্রিয়ঃ। অয়ং শ্রীলহর্ষোঽনিশং দানহর্ষো মহর্ষের্যথাস্যাং তপোভিঃ প্রভাতি। ক্ষিতীন্দ্র ক্ষিতৌ যো ভরদ্বাজগোত্রেশ্বরো বিপ্রবর্য্যঃ প্রতাপারিশৌর্য্যঃ ॥ * ॥ অথ শূদ্রপরিচয়প্রশ্নঃ। কে যূয়ং নাম কিম্বা কথয়ত কৃতিনঃ স্বাগতাঃ কাপি দেশাৎ কোলাঞ্চাৎ পঞ্চ শূদ্রা বয়মপি নৃপতে কিঙ্করা ভূসুরাণাং। ধন্যা যূয়ং পৃথিব্যাং পরিচয়মখিলং ব্রূত ভো বিপ্রভক্তাঃ শ্রুত্বোচুর্ব্বিপ্রবর্য্যাঃ সকলপরিচয়ং ভূপতেরস্তি চৈষাং ॥ * ॥ অথ পঞ্চশূদ্রাণাং পরিচয়ঃ। সুকৃতালিকৃতাম্বর এষ কৃতী ক্ষিতিদেবপদাম্বুজচারুরতিঃ। মকরন্দ ইতি প্রতিভাতি যতির্দ্বিজবন্দ্যকুলোদ্ভবভট্টগতিঃ ॥ স চ ঘোষকুলাম্বুজভানুরয়ং প্রথিমেন্দুযশঃসুরলোকবশঃ। সততং সুসুখী সুমতিশ্চ সুধীঃ শরদিন্দুপয়োঽম্বুধিকুন্দযশাঃ ॥ বসুধাধিপচক্রবর্ত্তিনো বসুতুল্যা বসুবংশসম্ভবাঃ। বসুধাবিদিতাগুণার্ণবৈর্নিয়তং তে জয়িনো ভবন্তু নঃ ॥ দশরথো বিদিতো জগতীতলে দশরথপ্রথিতঃ প্রথমঃ কুলে। দশদিশাং জয়িনাং যশসা জয়ী বিজয়তে বিভবৈঃ কুলসাগরে ॥ যশস্বিনাং যশোধরঃ সদা হি সর্ব্বসাদরঃ প্রমত্তসত্বমত্তহঃ শরৎসুধাংশুবদ্‌যশঃ। প্রতাপতাপনোত্তপদ্দ্বিষালিযোষিদালিকো বিভাতি মিত্রবংশসিন্ধুকালিদাসচন্দ্রকঃ ॥ দ্বিজালিপালনার্থকোঽপ্যসৌ চ হর্ষসেবকঃ। কুলাম্বুজপ্রকাশকো যথান্ধকারদীপকঃ ॥ অয়ং গুহকুলোদ্ভবো দশরথাভিধানো মহান্ কুলাম্বুজমধুব্রতো বিবিধপুণ্যপুঞ্জান্বিতঃ। নিশম্য গুহভাষিতং সকলসখ্যহাস্যং ব্যভূৎ স বঙ্গগমনোদ্যতো বিবিধমানভঙ্গো যতঃ ॥ অহঞ্চ পুরুষোত্তমঃ কুলভৃদগ্রগণ্যঃ কৃতী সুদত্তকুলসম্ভবো নিখিলশাস্ত্রবিদ্যোত্তমঃ। বিলোকিতুমিহাগতো দ্বিজবরৈশ্চ রাজ্যং

প্রভো চকার নৃপতিঃ স তং বিনয়হীনতো নিষ্কুলং ॥ * ॥ অথাষ্টৌ সিদ্ধমৌলিকাঃ। গৌড়েহষ্টৌ কীর্ত্তিমন্তশ্চিরবসতিকৃতা মৌলিকা যে হি সিদ্ধান্তে দত্তাঃ সেনদাসাঃ করগুহসহিতাঃ পালিতাঃ সিংহদেবাঃ। যে বাপাদ্যাভিমুখ্যাঃ স্থিতিবিনয়জুষঃ সপ্তত্তিস্তে দ্বিপূর্ব্বা হোড়াদ্যা বীক্ষ্য রাজ্ঞা চরণগুণযুতা মৌলিকত্বেন সাধ্যাঃ ॥ * ॥ অথ দ্বিসপ্ততিঃ সাধ্যমৌলিকাঃ। হোড়ঃ স্বর ধর ধরণী বান আইচ সোমঃ পৈ সুর সামঃ। ভঞ্জো বিন্দো গুহ বল লোধঃ শর্ম্মা বর্ম্মা হুই ভুই চন্দ্রঃ ॥ রুদ্রো রক্ষিত রাজাদিত্যো বিষ্ণুর্নাগঃ খিল পিল গুতঃ। ইন্দ্রো গুপ্তঃ পালো ভদ্র ওমশ্চাঙ্কুর বন্ধুর নাথঃ ॥ শাঁই হেশশ্চ মনো গণ্ডো রাহা রাণা রাহুত সানা দাহা দানা গণ উপমানা। খামঃ ক্ষোমো ঘর বৈওষো বীদন্তেজশ্চার্ণব আশঃ ॥ শক্তির্ভূতো ব্রহ্মঃ শানঃ ক্ষেমো হেমো বর্দ্ধন রঙ্গঃ। গুইঃ কীর্ত্তির্যশঃ কুণ্ডুর্নন্দী শীলো ধনুর্গুণঃ ॥ * ॥ ইতি দক্ষিণরাঢ়ীয়ঘটককারিকা ॥ * ॥ * ॥ * ॥ অথ বঙ্গজকুলাচার্য্যকারিকা লিখ্যন্তে। অথ শূদ্রোৎপত্তিঃ। তথা চাগ্নিপুরাণোক্তজাতিমালায়াং আদৌ প্রজাপতের্জাতা মুখাদ্বিপ্রাঃ সদাক্লকাঃ। বাহ্বোশ্চ ক্ষত্রিয়া জাতা ঊর্ব্বোর্বৈশ্যা বিজজ্ঞিরে ॥ পাদাচ্ছূদ্রশ্চ সম্ভূতস্ত্রিবর্ণস্ত চ সেবকঃ। ভীমনামা সুতস্তস্য প্রদীপস্তস্য পুত্রকঃ ॥ কায়স্থস্তস্য পুত্রো-ভূভূব লিপিকারকঃ। কায়স্থস্য ত্রয়ঃ পুত্রাঃ বিখ্যাতা জগতীতলে ॥ চিত্রগুপ্তশ্চিত্রসেনো বিচিত্রশ্চ তথৈব চ। চিত্রগুপ্তো গতঃ স্বর্গে বিচিত্রো নাগসন্নিধৌ ॥ চিত্রসেনঃ পৃথিব্যাং বৈ ইতি শূদ্রঃ প্রচক্ষ্যতে ॥ * ॥ অথ চিত্রসেনাদিসুতাঃ। বসুর্ঘোষো গুহো মিত্রো দত্তঃ করণ এব চ। মৃত্যুঞ্জয়শ্চ সপ্তৈতে চিত্রসেনসুতা ভুবি ॥ করণস্য সুতা জাতা নাগো নাথশ্চ দাসকঃ। মৃত্যুঞ্জয়তনূভূতা দেবঃ সেনশ্চ পালিতঃ ॥ সিংহশ্চৈব তথা খ্যাতশ্চৈতে পদ্ধতিকারকাঃ। এতে পদ্ধতিকারাশ্চ মুনিভিঃ কথিতাঃ পুরা ॥ * ॥ অথ দ্বাদশশুদ্ধবংশজাঃ। বসুর্ঘোষো গুহো মিত্রো দত্তো নাগশ্চ নাথকঃ। দাসো দেবস্তথা সেনঃ পালিতঃ সিংহ এব চ ॥ এতে দ্বাদশনামানঃ প্রসিদ্ধাঃ শুদ্ধবংশজাঃ ॥ * ॥ অথ সপ্তাশীতিঃ পদ্ধতিকারাঃ। মৃত্যুঞ্জয়বংশভূতো নিত্যানন্দো নৃপেশ্বরঃ। তস্যাপি বংশসংজাতাঃ সপ্তাশীতিঃ প্রকীর্ত্তিতাঃ ॥ তেহপি পদ্ধতিকারাশ্চ মুনিভিঃ কথিতাঃ পুরা ॥ * ॥ তেষাং নামানি। করো ভদ্রো ধরো নন্দী পালশ্চাঙ্কুরদামকঃ। স্মারো ধরণিহোড়ৌ চ বানশ্চাইচসোমকৌ ॥ পৈ সুরঃ শোনকশ্চৈব ভঞ্জো বিন্দুর্গুহস্তথা। বলশ্চ লোদকশ্চৈব শর্ম্মা বর্ম্মা চ ভূমিকঃ ॥ হুইশ্চ রুদ্রকশ্চৈব চন্দ্রো রক্ষিতরাজকৌ। আদিত্যবিষ্ণুগুপ্তাশ্চ খিলশ্চ পীলকস্তথা ॥ চাক্রির্হেশশ্চ বন্ধুশ্চ শাঞ্জিশ্চ স্থূরমুস্তথা। গণ্ডকো রাহকশ্চৈব রাণারাহুতদাহকাঃ ॥ দানা গণশ্চ মানাশ্চ খামাপকেমবারকাঃ।

বৈ তোষবেদকাশ্চৈন্দশ্চার্ণবশ্চাবশক্তিকঃ॥ ভূতো ব্রহ্মঃ সংজ্ঞঃ কোমো বর্দ্ধনো হেমরঙ্গকৌ। ভূঞিঃ কীর্ত্তির্যশঃ কুণ্ডঃ শীলশ্চৈব ধনুর্গুণঃ॥ দাঁড়ির্মনোরিতিশ্চৈব চাকিশ্চ নন্দনস্তথা। শ্যামশ্চাঢ্যশ্চ পূঞ্চিশ্চ তেজকো নাদ এব চ॥ রোইহ্রোমশ্চ হাথিশ্চ ঢোলশ্চ দূতকস্তথা। এতে পদ্ধতিকারাশ্চ সপ্তাশীতিঃ প্রকীর্ত্তিতাঃ॥ এতাঃ সপ্তাশীতিপদ্ধতয়ঃ দ্বাদশ শুদ্ধপদ্ধতয়শ্চ মিলিত্বা নবাধিকনবতিপদ্ধতয়ো ভবন্তি॥ এতেষাং পুরোহিতগোত্রপ্রবরেণ গোত্রপ্রবরত্বং মুনিভিরুক্তং॥ *॥ অথ কান্যকুব্জাৎ পঞ্চানাং বিপ্রাণাং শূদ্রাণাঞ্চাগমনমাহ দেবীবরঃ। অম্বষ্ঠকুলসম্ভূত আদিশূরো নৃপেশ্বরঃ। রাঢ়গৌড়বরেন্দ্রাশ্চ বঙ্গদেশস্তথৈব চ॥ এতেষাং নৃপতিশ্চৈব সর্ব্বভূমীশ্বরো যথা। অমাত্যৈর্বান্ধবৈশ্চৈব মন্ত্রিভির্দ্বিজবৃন্দকৈঃ॥ এতৈঃ সহ মহীপাল একদা স নিজালয়ে। উপবিষ্টো দ্বিজান্ প্রষ্টুং ধর্ম্মশাস্ত্রপরায়ণঃ॥ কেন যজ্ঞেন ভগবৎপ্রীতির্ভবতি নিশ্চিতং। তৎ সর্ব্বং শ্রোতুমিচ্ছামি কথয়ধ্বং দ্বিজোত্তমাঃ॥ ইতি শ্রুত্বা দ্বিজাঃ সর্ব্বে খর্ব্বীকৃতকলেবরাঃ। কথয়ন্তি নৃপাগ্রে তু সর্ব্বে বিকৃতমানসাঃ॥ কেন কেন বিধানেন যজ্ঞো বা ক্রিয়তে বুধৈঃ। বয়ং সর্ব্বে ন জানীমো বিধানং কীদৃশং ক্রতোঃ॥ ইতি তেষাং বচঃ শ্রুত্বা চিন্তাযুক্তো মহীপতিঃ। কিং করোমি ক্ব গচ্ছামি বিললাপ পুনঃ পুনঃ॥ কান্যকুব্জাৎ সমানীতান্ দূতেন দ্বিজপঞ্চকান্। বেদশাস্ত্রেষু নিপুণান্ সর্ব্বশাস্ত্রে চ বিশারদান্॥ গোযানারোহিতান্ বিপ্রান্ খড়্গচর্ম্মাদিভির্যুতান্। পরিবেশান্ সমালোচ্য বিষাদো জায়তে হৃদি॥ অশ্রদ্ধা জায়তে রাজ্ঞ ইতি জ্ঞাত্বা দ্বিজোত্তমাঃ। আশীর্ব্বাদার্থনির্ম্মাল্যং মল্লকাষ্ঠোপরি স্থিতং॥ তদা কাষ্ঠং সজীবং স্যাৎ ফলপল্লবসংযুতং। ইতি দৃষ্ট্বা নৃপস্তস্মিন্ কম্পান্বিতকলেবরঃ॥ স্তোত্রঞ্চ বহুধা তেষামকরোৎ স নৃপোত্তমঃ। আসনং পাদ্যমানীয় দদৌ বিনয়পূর্ব্বকং। উপবিষ্টা দ্বিজাঃ পঞ্চ তথা চ শূদ্রপঞ্চকাঃ॥ রাজংস্তে কুশলং সর্ব্বং প্রোচুশ্চেত্যবদৎ স তান্। অদ্য মে সফলং জন্ম জীবিতঞ্চ সুজীবিতং॥ পূতঞ্চ ভবনং জাতং যুষ্মাকং গমনং যতঃ। এবঞ্চ ক্রিয়তে স্তোত্রং পৃষ্টবান্ স শূদ্রপঞ্চকে॥ যুষ্মাকং গোত্রমাখ্যা চ কিমর্থে বা দ্বিজৈঃ সহ। তৎ সর্ব্বং শ্রোতুমিচ্ছামি ব্রূত ভোঃ শূদ্রপুঙ্গবাঃ॥ ইতি রাজ্ঞো বচঃ শ্রুত্বা কথয়ন্ নামগোত্রকে। কাশ্যপে চৈব গোত্রে চ দক্ষনামা মহামতিঃ॥ তস্য দাসো গৌতমস্য গোত্রে দশরথো বসুঃ। শাণ্ডিল্যগোত্রে সম্ভূতো ভট্টনারায়ণঃ কৃতী॥ সৌকালিনশ্চ দাসোঽয়ং ঘোষঃ শ্রীমকরন্দকঃ। ভরদ্বাজেষু বিখ্যাতঃ শ্রীহর্ষো মুনিসত্তমঃ॥ দাসস্তস্য বিরাটাখ্যো গুহকঃ কাশ্যপঃ স্মৃতঃ। সাবর্ণগোত্রনির্দ্দিষ্টো বেদগর্ভমুনিস্ত্বয়ং॥ তস্য দাসো মিত্রবংশো বিশ্বামিত্রশ্চ গোত্রকঃ। কালিদাস ইতি

খ্যাতঃ শূদ্রবংশসমুদ্ভবঃ ॥ বাৎস্যগোত্রেষু সম্ভূতশ্ছান্দড়শ্চেতি সংজ্ঞিতঃ। মৌদ্গল্যগোত্রজো দত্তঃ পুরুষোত্তমসংজ্ঞকঃ॥ এতেষাং রক্ষণার্থায় আগতোঽস্মি তবালয়ে। ইতি শ্রুত্বা নৃপস্তত্র মনসা হর্ষমাগতঃ ॥ বিধানেনৈব নির্বর্ত্ত্য ক্রতুঞ্চ ধর্ম্মসংজ্ঞিতং। গ্রামং সুবর্ণং গাশ্চৈব বস্ত্রাণি বিবিধানি চ ॥ দক্ষিণার্থে দ্বিজাতিভ্যঃ প্রদদৌ স নৃপোত্তমঃ। অত্র দেশে কৃতাবাসাঃ সর্ব্বে চ দ্বিজশূদ্রকাঃ॥ বহবশ্চ প্রজা জাতা নানাদেশনিবাসিনঃ ॥ * ॥ অথ বল্লালকৃতশ্রেণিবিভাগঃ। অথ বল্লালভূপশ্চ অম্বষ্ঠকুলনন্দনঃ। কুরুতেঽতিপ্রযত্নেন কুলশাস্ত্রনিরূপণং ॥ আদিশূরানীতবিপ্রান্ শূদ্রাংশ্চৈব তথাপরান্। এতেষাং সন্ততীঃ সর্ব্বা আনয়ৎ স নিজালয়ে॥ যত্র যত্র স্থিতা বিপ্রাস্তত্র গ্রামে নিরোপিতাঃ। শ্রেণিদ্বয়ন্তু নির্ণীতং রাঢ়ীবারেন্দ্রসংজ্ঞিতং ॥ তথৈব দ্বিবিধং প্রোক্তং কুলঞ্চ সদ্দ্বিজোত্তমে। শূদ্রস্যাথ চতস্রশ্চ নৃপেণ শ্রেণয়ঃ কৃতাঃ॥ উদগ্দক্ষিণরাঢ়ৌ চ বঙ্গবারেন্দ্রকৌ তথা। ইতি চতস্রঃ সংজ্ঞাঃ স্যুস্তত্তদ্দেশনিবাসনাৎ॥ কুলং চতুর্ব্বিধং তেষাং শ্রেণিশ্রেণিবিশেষতঃ ॥ * ॥ অথ বঙ্গজকায়স্থশ্রেণিনির্ণয়ঃ। তত্র বঙ্গেষু যৈঃ শূদ্রৈর্নিবাসঃ ক্রিয়তেঽধুনা। তেষাং নির্ণয়মাচক্ষে কুলঞ্চৈব বিশেষতঃ॥ বসুবংশে চ মুখ্যৌ দ্বৌ নাম্না লক্ষণপূষণৌ। ঘোষেষু চ সমাখ্যাতশ্চতুর্ভুজমহাকৃতী ॥ গুহে দশরথশ্চৈব মিত্রে তারাপতিস্তথা। দত্তে নারায়ণশ্চৈব এতে চ বঙ্গজাঃ স্মৃতাঃ॥ অপরন্তু নাগে দশরথশ্চৈব মহানন্দস্তু নাথকঃ। চন্দ্রশেখরদাসস্তু সেনে গঙ্গাধরস্তথা॥ দামোদরকরঃ খ্যাতো দামস্তূষাপতিস্তথা। পালিতে জনসংজ্ঞঃ স্যাৎ চন্দ্রে নারায়ণাখ্যকঃ॥ পালে আবঃ সমাখ্যাতো রাহাবংশে চ কৃষ্ণকঃ। ভদ্রে দিগম্বরশ্চৈব ধরে তু ব্যাসসংজ্ঞকঃ॥ প্রভাকরন্তু নন্দী স্যাৎ কেশবো দেববংশজঃ। অবীপতিরিতি খ্যাতঃ কুণ্ডুবংশে প্রকীর্ত্তিতঃ॥ সোমে বংশধরশ্চৈব সিংহে রত্নাকরস্তথা। নারায়ণঃ সমাখ্যাতো রক্ষিতে চ তথাপরে॥ বেদগর্ব্ভাঙ্কুরশ্চৈব দৈত্যারির্বিষ্ণুসংজ্ঞকঃ। আঢ্যে ত্রিলোচনঃ খ্যাতো নন্দনে চ উষাপতিঃ॥ এতে বঙ্গজনির্দ্দিষ্টা বল্লালেন মহাত্মনা। অন্যেঽপি শূদ্রা বিখ্যাতাস্তত্র দেশনিবাসিনঃ॥ তে বঙ্গজাঃ সমাখ্যাতাঃ করণেষু প্রতিষ্ঠিতাঃ ॥ * ॥ অথ বঙ্গজকুলীনাদিনিরূপণং। কুলীন ইতি সংজ্ঞা স্যাৎ মধ্যল্যশ্চ তথাপরঃ। মহাপাত্রোঽচলশ্চৈব ইতি সংজ্ঞাচতুষ্টয়ং॥ তদ্যথা। বসুর্ঘোষো গুহো মিত্রো দত্তো নাগশ্চ নাথকঃ। দাসঃ সেনঃ করো দামঃ পালিতশ্চন্দ্রপালকৌ॥ রাহো ভদ্রো ধরো নন্দী দেবঃ কুণ্ডুশ্চ সোমকঃ। রক্ষিতাঙ্কুরসিংহাশ্চ বিষ্ণুরাঢ্যশ্চ নন্দনঃ। চত্বারোঽগ্র্যাস্ত্রয়ো মধ্যা মহাপাত্রাঃ পরে তথা। সপ্তবিংশতিঃ শূদ্রাণাং বল্লালেন প্রশংসিতাঃ ॥ * ॥ ইতি কুলীনমধ্যল্যমহা-

পাত্রাঃ । অচলান্ বক্ষ্যামি । হোড়শ্চ স্মারকশ্চৈব ধরণীবানএব চ। আইচঃ পৈপুরশ্চৈব শানশ্চ ভঞ্জবিন্দুকৌ ॥ গুহশ্চ বললোধৌ চ শর্ম্মা বর্ম্মা চ ভূমিকঃ। হুইশ্চ রুদ্রকশ্চৈব রাণাদিত্যৌ চ পীলকঃ ॥ খিলশ্চ গুপ্তচাপ্রী চ বন্ধুশ্চ শাঞ্জিসংজ্ঞকঃ। হেশশ্চ স্বমন্নুর্গপ্তৌ রাণারাহুতদাহকাঃ ॥ দানাগণাপমানাখ্যাঃ খামঃ ক্ষেমশ্চ তোষকঃ। বৈশ্চাপি ঘরবেদৌ চ ভূতার্ণবক-ব্রহ্মকাঃ॥ এন্দশ্চ শক্তিসঙ্গৌ চ ক্ষেমাশৌ বৰ্দ্ধনস্তথা। হেমশ্চ বন্ধকশ্চৈব ভূঞিঃ কীৰ্ত্তিশ্চ শীলকঃ॥ ধন্নুর্গুণো যশশ্চৈব মনো রীতিশ্চ দাঁড়িকঃ। চাকিশ্চ শ্যাম পূঞিশ্চ গগুকো নাদকস্তথা॥ রোইশ্চ হোমকশ্চৈব চাশকশ্চ তথৈব চ। ঢোলশ্চ দূতকশ্চেতি দ্বিসপ্তত্যচলাঃ স্মৃতাঃ॥ এতেষাং প্রতি-পুরুষক্রমেণ কুলার্চ্চনাৎ মহাপাত্রভাবো জায়তে ॥ * ॥ ইতি বঙ্গজঘটকরামানন্দ-শর্ম্মকৃতকুলদীপিকা ॥

কায়স্থা (স্ত্রী) হরীতকী । ইতি মেদিনী॥ ধাত্রীবৃক্ষঃ। ইতি জটাধরঃ॥ কাকোলী। ইত্যমরটীকায়াং ভরতঃ ॥ এলাবয়ং । তুলসী। ইতি রাজনির্ঘণ্টঃ॥ কায়স্থস্ত্রী-জাতিঃ। কায়স্থপত্ন্যাং কায়স্থী ॥

কায়িকঃ (ত্রি) শারীরিকঃ। কায়নিষ্পন্নঃ। যথা। অদত্তানামুপাদানং হিংসা চৈবা-বিধানতঃ। পরদারোপসেবা চ কায়িকং ত্রিবিধং স্মৃতং ॥ ইতি তিথ্যাদিতত্ত্বং ॥

কায়িকাবৃদ্ধিঃ (স্ত্রী) গবাদিবলীবর্দ্দাদিকর্ম্ম-যুতা বৃদ্ধিঃ । যথা । দোহবাহকর্ম্মযুতা কায়িকা সমুদাহৃতা। ইতি ব্যাসঃ॥ মূল-ধনাবিরোধিনী প্রত্যব্দদেয়পণতদৰ্দ্ধাদি-রূপা বৃদ্ধিঃ। যথা। কায়াবিরোধিনী শশ্বৎ পণার্দ্ধাদ্যা তু কায়িকা । ইতি নারদঃ ॥ হলায়ুধস্তু পণার্দ্ধাদ্যা ইত্যত্র পণবাহেতি পঠিত্বা পণস্য মূলধনস্য যাবদবস্থানং তাবৎ শশ্বৎ বর্ষসহস্রমপি উত্তমর্ণেন যা বাহ্যতে প্রাপ্যতে সা কায়িকেতি ব্যাখ্যাতবান্ তত্রাদ্যা ভোগলাভান্তর্গতা অপরা চ তস্তিন্না ইতি মিশ্রাঃ । ইতি বিবাদার্ণব-সেতুঃ ॥

কারঃ (পুং) বধঃ। নিশ্চয়ঃ। বলিঃ। যত্নঃ। যতিঃ। পতিঃ। ইতি শব্দরত্নাবলী॥ তুষার-শৈলঃ । ইতি মেদিনীকরহেমচন্দ্রৌ ॥ কর্ম্মোপপদে কর্তৃবাচকঃ। যথা কর্ম্মকারঃ স্বর্ণকার ইত্যাদি । ইতি ব্যাকরণং ॥ ক্রিয়া। যথা করণং কারঃ ক্রিয়া। ইতি রামতর্কবাগীশঃ ॥

কারকং (ক্লী) ক্রিয়ানিমিত্তং লোকতঃ সিদ্ধং। ইতি দুর্গসিংহঃ ॥ ফণিভাষ্যমতে পুং যথা ভবিতুঃ স প্রযোজকঃ কারকঃ। তত্তু ষড়্বিধং । কর্ম্ম ১ যথা রামং নমতি। করণং ২ যথা নেত্রৈঃ শিবো দৃষ্টঃ । কর্ত্তা ৩ যথা জনৈঃ শিবো দৃষ্টঃ। সম্প্র-দানং ৪ যথা হরিঃ সদ্ভ্যঃ সুখং দদাতু। অপাদানং ৫ যথা বিভীষণঃ পদাদ্ভ্রষ্টঃ। অধিকরণং ৬ যথা রেমে শরদি গোবিন্দঃ। ইতি বোপদেবঃ॥ বর্ষোপলোত্তবং জলং। ইতি রাজনির্ঘণ্টঃ ॥

কারকঃ (ত্রি) কর্ত্তা। ইতি মেদিনী ॥

কারকুক্ষীয়ঃ ( পুং ) শাল্বদেশঃ। তদ্দেশীয়জনে বহুবচনান্তঃ। ইতি হেমচন্দ্রঃ॥

কারণং (ক্লী) যেন বিনা যন্ন ভবতি তৎ। তৎপর্য্যায়ঃ। হেতুঃ ২ বীজং ৩। ইত্যমরঃ॥ নিমিত্তং ৪ প্রত্যয়ঃ ৫। ইতি জটাধরঃ॥ কারণত্বমাহ। অন্যথাসিদ্ধিশূন্যত্বে সতি নিয়তপূর্ব্ববর্ত্তিত্বং। তত্রিবিধং। সমবায়িকারণত্বং ১ অসমবায়িকারণত্বং ২ নিমিত্তকারণত্বং ৩। পরমাণুপরিমাণভিন্নানাং কারণত্বং। ইতি ভাষাপরিচ্ছেদঃ॥ অণুপরিমাণস্তু ন কস্যাপি কারণং। ইতি সিদ্ধান্তমুক্তাবলী॥ করণং। বধঃ। ইতি মেদিনী॥ ইন্দ্রিয়ং। দেহঃ। সাধনং। কর্ম্ম। কায়স্থঃ। বাদ্যপ্রভেদঃ। গীতপ্রভেদঃ। ইতি ভরতধৃতরত্নকোষঃ॥

কারণগুণোদ্ভবগুণঃ ( পুং ) কারণগুণপূর্ব্বকগুণঃ। তদ্যথা। রূপং ১ রসঃ ২ গন্ধঃ ৩ অপাকজস্পর্শঃ ৪ দ্রবত্বং ৫ স্নেহঃ ৬ বেগঃ ৭ গুরুত্বং ৮ একত্বং ৯ পৃথক্ত্বং ১০ পরিমাণং ১১ স্থিতিস্থাপকসংস্কারঃ ১২। ইতি ভাষাপরিচ্ছেদঃ॥

কারণশরীরং ( ক্লী ) সত্ত্বপ্রধানমজ্ঞানং। তৎপর্য্যায়ঃ। আনন্দময়কোষঃ ২ সুষুপ্তিঃ ৩। ইতি বেদান্তসারঃ॥

কারণা ( স্ত্রী ) যাতনা। গাঢ়বেদনা। ইত্যমরঃ॥ নরকরুজা যমযাতনা। ইতি কেচিৎ। ইতি ভরতঃ॥

কারণিকঃ ( ত্রি ) পরীক্ষকঃ। ইত্যমরঃ॥

কারণোত্তরং ( ক্লী ) প্রত্যবস্কন্দনং। সত্যম্বেনাঙ্গীকৃত্য তৎপ্রতিকূলরূপকারণং ক্রয়াৎ তদা তদুত্তরং। তত্রিবিধং। বলবৎ ১ তুল্যবলং ২ দুর্ব্বলং ৩। আদ্যং যথা ময়া ত্বত্তঃ শতং গৃহীতমিতি সত্যং কিন্তু তৎ পরিশোধিতং। দ্বিতীয়ং যথা মদীয়েয়ং ভূমিঃ ক্রমাগতত্বাদিতি বাদ্যুক্তে প্রতিবাদিনোঽপি তথোত্তরং। তৃতীয়ং যথা মমেয়ং ভূমিঃ ক্রমাগতত্বাৎ ইতি বাদ্যুক্তে মমেয়ং ভূমিঃ দশবর্ষোপভুজ্যমানত্বাৎ ইতি প্রত্যুত্তরং। ইতি ব্যবহারতত্ত্বং॥

কারণ্ডবঃ ( পুং স্ত্রী ) হংসবিশেষঃ। খড়হাঁস ইতি ভাষা। ইত্যমরঃ॥

কারণ্ডব্যূহঃ ( পুং ) বুদ্ধভেদঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কারন্ধমী [ ন্ ] ( পুং ) কাংস্যকারঃ। ধাতুবাদরতঃ। ইতি মেদিনী॥

কারম্ভা ( স্ত্রী ) প্রিয়ঙ্গুবৃক্ষঃ। ইত্যমরঃ॥

কারবঃ ( পুং ) কাকঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কারবল্লী ( স্ত্রী ) কারবেল্লঃ। কাণ্ডীরঃ। ইতি রাজনির্ঘণ্টঃ॥

কারবী ( স্ত্রী ) মধুরা। মৌরী ইতি ভাষা। দীপ্যঃ। ময়ূরশিখা। রুদ্রজটা ইতি ভাষা। ক্ষেত্রযমানিকা ইতি কেচিৎ। সুষবী। কেলেজীরা ইতি ভাষা। হিঙ্গুপত্রী। হিঙ্গের পাতা ইতি ভাষা। ইত্যমরভরতৌ॥ ক্ষুদ্রকারবেল্লী। ছোট করলা ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥

কারবেল্লং ( ক্লী ) কঠিল্লকং। করলা ইতি ভাষা। তৎপর্য্যায়গুণাঃ। কারবেল্লং কঠিল্লং স্যাৎ কারবেল্লী ততো লঘুঃ।

কারবেল্লং হিমং ভেদি লঘু তিক্তমবাতলং॥ জ্বরপিত্তকফাস্রঘ্নং পাণ্ডুমেহকৃমীন্ হরেৎ। তদ্গুণা কারবেল্লী স্যাদ্বিশেষাদ্দীপনী লঘুঃ ॥ ইতি ভাবপ্রকাশঃ ॥ অমরে পুংলিঙ্গোঽয়ং ॥

কারবেল্লঃ ( পুং ) লতাবিশেষঃ। করলা ইতি ভাষা। তৎপর্য্যায়ঃ। কঠিল্লকঃ২ সুষবী ৩। ইত্যমরঃ॥ শুষবী ৪ সুশবী ৫। ইতি তট্টীকা॥ কণ্ডুরঃ ৬ কাণ্ডকটুকঃ ৭ সুকাণ্ডঃ ৮ উগ্রকাণ্ডঃ ৯ কঠিল্লঃ ১০ নাসাসম্বেদনঃ ১১ পটুঃ ১২। ইতি রাজনির্ঘণ্টঃ॥ তৎপুষ্পগুণঃ। ধারকত্বং। রক্তপিত্তরোগে সুপথ্যত্বঞ্চ ॥ তৎফলগুণঃ। শুক্রকফপিত্তনাশিত্বং। রুচিকরত্বঞ্চ। ইতি রাজবল্লভঃ॥

কারবেল্লকঃ (পুং) কারবেল্লঃ। ইতি রত্নমালা॥

কারবেল্লী ( স্ত্রী ) ক্ষুদ্রকারবেল্লং। করেলী ইতি হিন্দী ভাষা। উচ্ছে ইতি বঙ্গভাষা। অস্যা গুণপ্রমাণে কারবেল্লশব্দে দ্রষ্টব্যে॥

কারমিহিকা ( স্ত্রী ) কর্পূরং। ইতি রাজনির্ঘণ্টঃ॥

কারস্করঃ ( পুং ) বৃক্ষবিশেষঃ। তৎপর্য্যায়ঃ। কিম্পাকঃ ২ বিষতিন্দুঃ ৩ করদ্রুমঃ ৪ রম্যফলঃ ৫ কুপীলুঃ ৬ কালকূটঃ ৭। অস্য গুণাঃ। কটুত্বং। উষ্ণত্বং। তিক্তত্বং। কুষ্ঠবাতাময়াস্রকণ্ডূতিকফার্শোব্রণনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

কারস্করাটিকা ( স্ত্রী ) কর্ণজলৌকা। কের্ণো কেন্নুই ইতি চ ভাষা। ইতি ত্রিকাণ্ডশেষঃ॥

কারা ( স্ত্রী ) কারাগারং। তৎপর্য্যায়ঃ। বন্ধনালয়ঃ ২। ইত্যমরঃ॥ দূতী। প্রসেবকঃ। সুবর্ণকারিকা। বন্ধনং। ইতি মেদিনী॥ পীড়া। ইতি ত্রিকাণ্ডশেষঃ॥

কারাগারং ( ক্লী ) বন্ধনগৃহং। যথা। রিপুঃ কারাগারং কলয়তি চ তং কেলিকলয়েতি তন্ত্রসারে শ্যামাস্তোত্রং॥

কারাগুপ্তঃ ( ত্রি ) কারাগারস্থঃ। কয়েদী ইতি ভাষা। ইতি হেমচন্দ্রঃ॥

কারায়িকা ( স্ত্রী ) বলাকা। ইতি জটাধরঃ॥

কারাবেশ্ম [ ন্ ] ( ক্লী ) কারাগারং। তৎপর্য্যায়ঃ। বধাঙ্গকং ২। ইতি ত্রিকাণ্ডশেষঃ॥

কারিঃ ( স্ত্রী ) ক্রিয়া। শিল্পিনি ত্রি। ইতি মেদিনী॥

কারিকা (স্ত্রী) নটস্ত্রী। কৃতিঃ। বিবরণশ্লোকঃ। শিল্পং। যাতনা। ইতি মেদিনী॥ বৃদ্ধিঃ। সুদ ইতি ভাষা। ইত্যমরটীকায়াং রমানাথঃ॥ স্বল্পাক্ষরবৃত্ত্যা বহ্বর্থজ্ঞাপিকা কবিতা। যথা। কারিকা তু স্বল্পবৃত্তৌ বহোরর্থস্য সূচনী। ইতি হেমচন্দ্রঃ॥

কারিতঃ ( ত্রি ) কুর্ব্বন্ প্রেরিতঃ। করাণ ইতি ভাষা। যথা। বিষ্ণুঃ শরীরগ্রহণমহমীশান এব চ। কারিতাস্তে যতোঽতস্ত্বাং কঃ স্তোতুং শক্তিমান্ ভবেৎ॥ ইতি দেবীমাহাত্ম্যং॥

কারিতা ( স্ত্রী ) ঋণিকেন যা স্বকার্য্যসাধকতয়া অশীতিতমভাগদ্বিকশতাদিতোঽধিকা বৃদ্ধির্ব্যবস্থাপিতা সা। অধিক সুদ ইতি ভাষা। যথা। ঋণিকেন তু যা বৃদ্ধিরধিকা সংপ্রকীর্ত্তিতা। আপৎকালকৃতা নিত্যং দাতব্যা সা তু কারিতা॥ ইতি বিবাদার্ণবসেতৌ

কাত্যায়নঃ ॥ তৎপর্য্যায়ঃ। কারিকা ২ কারিতাবৃদ্ধিঃ ৩। ইতি মিতাক্ষরা ॥

কারী (স্ত্রী) বৃক্ষবিশেষঃ। কন্টকারী আকর্ষকারীত্যেষা দ্বিধা। তৎপর্য্যায়ঃ। কারিকা ২ কার্য্যা ৩ গিরিজা ৪ কটুপত্রিকা ৫। অস্যা গুণাঃ। কষায়ত্বং। মধুরত্বং। পিত্তনাশিত্বং। দীপনত্বং। গ্রাহিত্বং। রুচিকণ্ঠশোষকারিত্বং। গুরুত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

কারীষং (ক্লী) করীষসমূহঃ। ঘুটের রাশি ইতি ভাষা। ইত্যমরঃ ॥

কারুঃ (পুং) বিশ্বকর্ম্মা। ইতি মেদিনী ॥ শিল্পং। ইতি হেমচন্দ্রঃ ॥

কারুঃ (ত্রি) কারকঃ। শিল্পী। ইতি মেদিনী ॥

কারুকঃ (ত্রি) শিল্পী। ইতি মনুঃ ॥

কারুজঃ (পুং) করভঃ। ফেনঃ। বল্মীকঃ। নাগকেশরঃ। গৈরিকং। শিল্পিনাং চিত্রং। স্বয়ংজাততিলঃ। ইতি হেমচন্দ্রঃ ॥

কারুণিকঃ (ত্রি) দয়ালুঃ। ইত্যমরঃ ॥

কারুণ্ডী (স্ত্রী) জলৌকাঃ। ইতি শব্দচন্দ্রিকা ॥ কারুণ্ডিকা ইতি চ পাঠঃ ॥

কারুণ্যং (ক্লী) করুণা। ইত্যমরঃ ॥

কারূষাঃ (পুং) করূষদেশবাসিনঃ। তৎপর্য্যায়ঃ। বৃহদগৃহাঃ ২। ইতি হেমচন্দ্রঃ ॥ বহুবচনান্তোঽয়ং শব্দঃ ॥

কারোত্তমঃ (পুং) কারোত্তরঃ। ইত্যমরটীকায়াং স্বামী ॥

কারোত্তরঃ (পুং) সুরাগ্রভাগঃ। তৎপর্য্যায়ঃ। সুরামণ্ডঃ ২। ইত্যমরঃ ॥ কূপঃ। ইতি

কার্কশ্যং (ক্লী) কর্কশতা। কর্কশশব্দাৎ ভাবে ষ্যপ্রত্যয়ঃ ॥

কার্ত্তবীর্য্যঃ (পুং) চন্দ্রবংশীয়কৃতবীর্য্যরাজপুত্রঃ। তৎপর্য্যায়ঃ। হৈহয়ঃ ২ দোঃসহস্রভৃৎ ৩ অর্জ্জুনঃ ৪। জৈনরাজচক্রবর্ত্তিবিশেষঃ। তৎপর্য্যায়ঃ। সুভূমঃ ২। ইতি হেমচন্দ্রঃ ॥

কার্ত্তস্বরং (ক্লী) স্বর্ণং। ধুস্তূরঃ। ইত্যমরঃ ॥

কার্ত্তান্তিকঃ (পুং) জ্যোতির্ব্বিৎ। দৈবজ্ঞঃ। ইত্যমরঃ ॥

কার্ত্তিকঃ (পুং) বৈশাখাদিদ্বাদশমাসান্তর্গতসপ্তমমাসঃ। কৃত্তিকানক্ষত্রযুক্তা পৌর্ণমাসী যত্র মাসে সঃ। অয়ং তুলাস্থরবিপ্রারব্ধশুক্লপ্রতিপদাদিদর্শান্তরূপমুখ্যচান্দ্রঃ। সৌরস্তু তুলারাশিস্থরবিককালঃ। ইতি স্মৃতিঃ ॥ তৎপর্য্যায়ঃ। বাহুলঃ ২ ঊর্জ্জঃ ৩ কার্ত্তিকিকঃ ৪। ইত্যমরঃ ॥ কৌমুদঃ ৫। ইতি শব্দরত্নাবলী ॥ * ॥ অথ কার্ত্তিককৃত্যং। পদ্মপুরাণে। তুলামকরমেষেষু প্রাতঃস্নানং বিধীয়তে। তত্র সংকল্পঃ অরুণোদয়কালে মজ্জনং কৃত্বাচম্য ওম্ তৎসদদ্য কার্ত্তিকে মাসি অমুকপক্ষে অমুকতিথাবারভ্য তুলাস্থরবিং যাবৎ প্রত্যহং অমুকগোত্রঃ শ্রীঅমুকদেবশর্ম্মা শ্রীবিষ্ণুপ্রীতিকামঃ প্রাতঃস্নানমহং করিষ্যে ইতি সংকল্প্য যথোক্তবিধিনা ইতিকর্ত্তব্যতাং বিধায়। ওম্ কার্ত্তিকেঽহং করিষ্যামি প্রাতঃস্নানং জনার্দ্দন। প্রীত্যর্থং তব দেবেশ দামোদর ময়া সহ ॥ ইতি মন্ত্রাৎ। ময়া লক্ষ্ম্যা। প্রতিদিনসংকল্পে তু আরভ্য তুলাস্থরবিং যাবৎ

প্রত্যহং ইতি ন বক্তব্যং। কিন্তু মাসী-
ত্যনন্তরং তুলাস্থরবাবিত্যধিকং বক্তব্যং।
চান্দ্রস্নানবাক্যন্তু বৈশাখকৃত্যে অনু-
সন্ধেয়ং। তথা বায়ুপুরাণে। যদীচ্ছেদ্
বিপুলান্ ভোগান্ চন্দ্রসূর্য্যগ্রহোপমান্।
কার্ত্তিকং সকলং ব্যাপ্য প্রাতঃস্নায়ী ভবে-
ন্নরঃ ॥ * ॥ গারুড়ে। গবামযুতদানেন
যৎ ফলং লভতে খগ। তুলসীপত্রকৈকেন
তৎ ফলং কার্ত্তিকে স্মৃতং ॥ ওমদ্যেত্যাদি
তুলসীপত্রৈকৈকসমসংখ্যাযুতধেনুদানজন্য-
ফলসমফলপ্রাপ্তিকামঃ এতানি তুলসী-
পত্রাণি শ্রীবিষ্ণবেঽহং দদে। ইত্যভিলপ্য
এতানি তুলসীপত্রাণি শ্রীবিষ্ণবে নমঃ।
ইত্যনেন দদ্যাৎ ॥ * ॥ ব্রহ্মাণ্ডে। বিষ্ণু-
বেশ্মনি যো দদ্যাৎ কার্ত্তিকে মাসি দীপকং।
অগ্নিষ্টোমসহস্রস্য ফলমাপ্নোতি মানবঃ॥
ওম্ দামোদরায় নভসি তুলায়াং লোলয়া
সহ। প্রদীপন্তে প্রযচ্ছামি নমোঽনন্তায়
বেধসে॥ লোলয়া লক্ষ্ম্যা। ইতি মন্ত্রেণ
যো দদ্যাৎ প্রদীপং সর্পিরাদিনা। আকাশে
মণ্ডপে বাপি স চাক্ষয়ফলং লভেৎ॥
স্নানবৎ। ওমদ্যেত্যাদি অমুকতিথাবারভ্য
তুলাস্থরবিং যাবৎ প্রত্যহং অমুকগোত্রো-
ঽমুকদেবশর্ম্মা অক্ষয়দীপদানফলপ্রাপ্তি-
কামঃ শ্রীবিষ্ণুপ্রীতিকামো বা আকাশে
মণ্ডপে বাপি শ্রীবিষ্ণবে দীপদানমহং
করিষ্যে। ইতি সংকল্প্য দামোদরায়েত্যা-
দিনা দদ্যাৎ। দ্বিতীয়াদিদিনে ওম্ দামো-
দরায়েত্যনেনেতি বিশেষঃ। বিষ্ণুগৃহে তু।
ওমদ্যেত্যাদি অমুকতিথাবারভ্য তুলাস্থ-
রবিং যাবৎ প্রত্যহং অমুকগোত্রোঽমুক-
দেবশর্ম্মা অগ্নিষ্টোমসহস্রজন্যফলসমফল-
প্রাপ্তিকামঃ শ্রীবিষ্ণুপ্রীতিকামো বা
শ্রীবিষ্ণুবেশ্মনি শ্রীবিষ্ণবে দীপদানমহং
করিষ্যে। ইতি সংকল্প্য। ওম্ দামোদরা-
য়েত্যাদিনা দদ্যাৎ। দ্বিতীয়াদিদিনে ওম্
দামোদরায়েত্যনেনেতি বিশেষঃ ॥ * ॥
হবিষ্যান্নাদৌ তু ব্রহ্মপুরাণে। ব্রতোপ-
বাসনিয়মৈঃ কার্ত্তিকো যস্য গচ্ছতি।
দেবো বৈমানিকো ভূত্বা স যাতি পরমং
পদং ॥ তত্র অদ্যেত্যাদি অমুকতিথাবারভ্য
তুলাস্থরবিং যাবৎ প্রত্যহং অমুকগোত্রো-
ঽমুকদেবশর্ম্মা বৈমানিকদেবত্বভবনপূর্ব্বক-
পরমপদপ্রাপ্তিকামঃ শ্রীবিষ্ণুপ্রীতিকামো
বা হবিষ্যেতরভোজননিবৃত্তিমহং করিষ্যে।
ইত্যাদিবাক্যে বিশেষঃ। এবং ফলাহারা-
দাবপি ॥ * ॥ হবিষ্যদ্রব্যাণি চ। হৈম-
ন্তিকং সিতাস্বিন্নং ধান্যং মুদ্গাস্তিলা
যবাঃ। কলায়কঙ্গুনীবারা বাস্তূকং হিল-
মোচিকা॥ ষষ্টিকা কালশাকঞ্চ মূলকং
কেমুকেতরৎ। লবণে সৈন্ধবসামুদ্রে গব্যে
চ দধিসর্পিষী॥ পয়োঽনুদ্ধৃতসারঞ্চ পনসা-
ম্রহরীতকী। তিন্তিড়ী জীরকঞ্চৈব নাগ-
রঙ্গঞ্চ পিপ্পলী॥ কদলী লবলী ধাত্রী
ফলান্যগুড়মৈক্ষবং। অতৈলপক্বং মুনয়ো
হবিষ্যান্নং বিদুর্ব্বুধাঃ॥ হৈমন্তিকমিত্য-
ভিধায়াগস্ত্যসংহিতায়াং। নারিকেলফল-
ঞ্চৈব কদলীং লবলীন্তথা। আম্রমামলক-
ঞ্চৈব পনসঞ্চ হরীতকীং॥ ব্রতান্তরপ্রশস্ত-
ঞ্চ হবিষ্যং মন্যতে বুধাঃ। অত্র চ আরব্ধ-

ব্রতোপবাসাদৌ ফলজলাদিভক্ষণমপ্যাহতু-রন্যেষামপর্ব্ববৌধায়নৌ ।. অষ্টৌ তান্যব্রতঘ্নানি আপো মূলং ফলং পয়ঃ। হবির্ব্রাহ্মণকাম্যা চ গুরোর্ব্বচনমৌষধং ॥ * ॥ ফলাহারাদাবপি তুলসীরাহিত্যে দোষমাহ । তুলসীং বিনা যা ক্রিয়তে ন পূজা স্নানং ন তদ্যৎ তুলসীং বিনা কৃতং। ভুক্তং ন তদ্যৎ তুলসীবিবর্জ্জিতং পীতং ন তদ্যত্তুলসীবিবর্জ্জিতং ॥ * ॥ নারদীয়ে। ন মাৎস্যং ভক্ষয়েন্মাসং ন কৌর্ম্মং নান্যদেব হি। চণ্ডালো জায়তে রাজন্ কার্ত্তিকে মাংসভক্ষণাৎ ॥ মহাভারতে। কৌমুদস্তু বিশেষেণ শুক্লপক্ষে নরাধিপ। বর্জ্জয়েৎ সর্ব্বমাংসানি ধর্ম্মো হ্যত্র বিধীয়তে ॥ কৌমুদং কার্ত্তিকং। কার্ত্তিকমধিকৃত্য ব্রহ্মপুরাণং। একাদশ্যাদিষু তথা তাসু পঞ্চসু রাত্রিষু। দিনে দিনে চ স্নাতব্যং শীতলাসু নদীষু চ॥ বর্জ্জিতব্যা তথা হিংসা মাংসভোজনমেব চ। ততশ্চ মাংসভোজননিষেধে কার্ত্তিকমাসতৎশুক্লপক্ষতদেকাদশ্যাদিপঞ্চদিনানি শক্তাশক্তভেদাৎ পাপতারতম্যাদ্বা নিষিদ্ধানি। কার্ত্তিকে শৌকরং মাংসং যস্তু ভুঞ্জীত দুর্ম্মতিঃ। ষষ্টিবর্ষসহস্রাণি রৌরবে পরিপচ্যতে ॥ ওলপটোলকদম্ববৃন্তাককাংস্যসন্ধিজানি বর্জ্জয়েৎ । পটোলানি কদম্বানি বৃন্তাকসহিতানি চ। ভুঞ্জানঃ কার্ত্তিকে মাসি যাবদাহূতনারকী ॥ * ॥ ভূতচতুর্দ্দশীকৃত্যং তৎশব্দে দ্রষ্টব্যং। তত্র দীপদানে বিশেষো যথা । ততঃ প্রদোষসময়ে দীপান্দদ্যাৎ প্রযত্নতঃ। ব্রহ্মবিষ্ণুশিবাদীনাং ভবনেষু মঠেষু চ ॥ কূটাগারেষু চৈত্যেষু গুহাসু চ নদীষু চ। দীপদানমন্ত্রঃ । ওম্ নমঃ পিতৃভ্যঃ প্রেতেভ্যো নমো ধর্ম্মায় বিষ্ণবে। নমো ধর্ম্মায় রুদ্রায় কান্তারপতয়ে নমঃ ॥ * ॥ দীপান্বিতাকৃত্যং তৎশব্দে দ্রষ্টব্যং। তত্র বিশেষো যথা। তত্র বালাতুরবৃদ্ধব্যতিরেকেণ দিবা ন ভোক্তব্যং। তত্র পার্ব্বণশ্রাদ্ধং কৃত্বা প্রদোষে প্রাচীনাবীতী দক্ষিণামুখো জ্বলদুল্কাং ওম্ শস্ত্রাশস্ত্রহতানাঞ্চ ভূতানাং ভূতদর্শয়োঃ। উজ্জ্বলজ্জ্যোতিষা দেহং দহেয়ং ব্যোমবহ্নিনা ॥ ইত্যনেন গৃহ্লীয়াৎ । ওম্ অগ্নিদগ্ধাশ্চ যে জীবা যেঽপ্যদগ্ধাঃ কুলে মম। উজ্জ্বলজ্জ্যোতিষা দগ্ধাস্তে যান্তু পরমাং গতিং ॥ ইত্যনেন ভূমৌ স্থাপয়েৎ। ওম্ যমলোকং পরিত্যজ্য আগতা যে মহালয়ে। উজ্জ্বলজ্জ্যোতিষা বর্ত্ম প্রপশ্যন্তো ব্রজন্তু তে ॥ ইত্যনেন পিতৄন্ বিসর্জ্জয়েৎ । যদ্যেবং পূর্ব্বদিন এব প্রদোষব্যাপিন্যমাবাস্যা তদা পূর্ব্বদিন এব শ্রাদ্ধমকৃত্বাপি উল্কাদানং কর্ত্তব্যং। আচারাৎ পঞ্চভূতোপাখ্যানঞ্চ শ্রোতব্যং । উভয়তঃ প্রদোষব্যাপ্তৌ পরদিন এব যুগ্মাৎ । উভয়তঃ প্রদোষাপ্রাপ্তাবপি উল্কাদানং পরদিনে পার্ব্বণানুরোধাৎ। অত্রৈব পূর্ব্বদিনে লক্ষ্মী রাত্রৌ পূজ্যা। অমাবস্যা যদা রাত্রৌ দিবাভাগে চতুর্দ্দশী। পূজনীয়া তদা লক্ষ্মীর্ব্বিজ্ঞেয়া সুখরাত্রিকা॥ ইতি বচনাৎ। লক্ষ্মীপূজাবিষয়েঽপ্যেবং ব্যবস্থা । ততো গৃহমধ্যে

উত্তরাভিমুখো লক্ষ্মীং পূজয়েৎ। ততঃ স্বস্তিবাচনপূর্ব্বকং ওম্ সূর্য্যঃ সোম ইতি ওম্ তদ্বিষ্ণোরিতি চ পঠিত্বা তিলপুষ্প-জলান্যাদায় ওম্ তৎসদিত্যুচ্চার্য্য ওম্ অদ্যেত্যাদি অমুকগোত্রোঽমুকদেবশর্ম্মা পরমবিভূতিলাভকামো লক্ষ্মীপূজনমহং করিষ্যে। ইতি সংকল্প্য শালগ্রামে ঘটাদিস্বজলে বা ভূতশুদ্ধ্যাদিকং কৃত্বা লক্ষ্মীং পূজয়েৎ। তদ্যথা। ওম্ পাশাক্ষমালিকাম্ভোজ ইত্যাদিনা ধ্যাত্বা। ওম্ ভূর্ভুবঃ স্বর্মহালক্ষ্মি ইহাগচ্ছ ইত্যাদ্যাবাহ্য এতৎ পাদ্যং ওম্ লক্ষ্ম্যৈ নমঃ। এবমর্ঘ্যাচমনীয়গন্ধপুষ্পধূপদীপনৈবেদ্যপুনরাচমনীয়তাম্বুলাদি প্রত্যেকং দদ্যাৎ। ওম্ নমস্তে সর্ব্বদেবানাং বরদাসি হরিপ্রিয়ে। যা গতিস্ত্বৎপ্রপন্নানাং সা মে ভূয়াত্ত্বদর্চ্চনাৎ॥ ইত্যনেন পুষ্পাঞ্জলিত্রয়ং দত্ত্বা প্রণমেৎ। ওম্ বিশ্বরূপস্য ভার্য্যাসি পদ্মে পদ্মালয়ে শুভে। সর্ব্বতঃ পাহি মাং দেবি মহালক্ষ্মি নমোঽস্তু তে॥ ততঃ। সুখরাত্র্যাঃ প্রদোষে তু কুবেরং পূজয়ন্তি যে। ইতি রুদ্রধরবচনাৎ। কুবেরমপি পাদ্যাদিভিঃ পূজয়েৎ। ওম্ ধনদায় নমস্তুভ্যং নিধিপদ্মাধিপায় চ। ভবন্তু ত্বৎপ্রসাদান্মে ধনধান্যাদিসম্পদঃ॥ ইতি পঠিত্বা। ওম্ কুবেরায় নম ইতি ত্রিঃ পূজয়েৎ। ততো গৃহাদিষু দীপান্দদ্যাৎ। তত্র মন্ত্রঃ। ওম্ অগ্নির্জ্যোতী রবির্জ্যোতিশ্চন্দ্রজ্যোতিস্তথৈব চ। উত্তমঃ সর্ব্বজ্যোতীনাং দীপোঽয়ং প্রতিগৃহ্যতাং। ততো ব্রাহ্মণান্ বন্ধূংশ্চ ভোজয়িত্বা স্বয়ং ভুঞ্জীত। তত্র প্রত্যূষে ভবিষ্যোক্তং কর্ম্ম কর্ত্তব্যং। গোরোচনাতিলকধারণং প্রদীপবন্দনং কৃত্বা লক্ষ্মীং ত্রিঃ পূজয়েৎ॥ তত্র মন্ত্রঃ। ওম্ বিশ্বরূপস্য ভার্য্যাসি পদ্মে পদ্মালয়ে শুভে। মহালক্ষ্মি নমস্তুভ্যং সুখরাত্রিং কুরুষ্ব মে॥ বর্ষাকালে মহাঘোরে যন্ময়া দুষ্কৃতং কৃতং। সুখরাত্রিপ্রভাতেঽদ্য তন্মে লক্ষ্মীর্ব্যপোহতু॥ যা রাত্রিঃ সর্ব্বভূতানাং যা চ দেবেষ্ববস্থিতা। সম্বৎসরপ্রিয়া যা চ সা মমাস্তু সুমঙ্গলা॥ মাতা ত্বং সর্ব্বলোকানাং দেবানাং সৃষ্টিসম্ভবা। আখ্যাতা ভূতলে দেবি সুখরাত্রি নমোঽস্তু তে॥ ওম্ লক্ষ্ম্যৈ নমঃ ইতি ত্রিঃ পূজয়েৎ॥ অন্যৎ সুখরাত্রিশব্দে দ্রষ্টব্যং॥*॥ অথ দ্যূতপ্রতিপৎ। তত্র প্রভাতে অক্ষক্রীড়াদিকং কার্য্যং। তত্র জয়ে বর্ষং শুভং। পরাজয়ে বর্ষমশুভং। ততঃ সংকল্প্য শালগ্রামে জলে বা এতৎ পাদ্যং ওম্ বলয়ে নমঃ। ইত্যাদি সংপূজ্য। ওম্ বলিরাজ নমস্তুভ্যং বিরোচনসুত প্রভো। ভবিষ্যেন্দ্র সুরারাতে পূজেয়ং প্রতিগৃহ্যতাং॥ অনেন পুষ্পাঞ্জলিত্রয়ং দদ্যাৎ। যো যো যাদৃশভাবেন তিষ্ঠত্যস্যাং যুধিষ্ঠির। হর্ষদৈন্যাদিনা তেন তস্য বর্ষং প্রযাতি হি॥ তথা। মহাপুণ্যা তিথিরিয়ং বলিরাজ্যবিবর্দ্ধিনী। স্নানং দানং শতগুণং কার্ত্তিকেঽস্যাং তিথৌ ভবেৎ॥*॥ অথ ভ্রাতৃদ্বিতীয়া। তত্রাষ্টধাবিভক্তদিনপঞ্চমযামার্দ্ধপ্রাপ্তায়াং দ্বিতীয়ায়াং উত্তরদিনে

তথা চেৎ পরদিনে কৃত্যং যুগ্মাৎ। তত ওম্ তৎসদিত্যুচ্চার্য্য ওম্ অদ্যেত্যাদি অমুকগোত্রোঽমুকদেবশর্ম্মা স্বরক্ষণকামো যমাদিপূজনমহং করিষ্যে। ইতি সংকল্প্য শালগ্রামে ঘটাদিস্থজলে বা পূজয়েৎ। এতৎ পাদ্যং ওম্ যমায় নমঃ। এবং ক্রমেণ সংপূজ্য। এহ্যেহি মার্ত্তণ্ডজ পাশহস্ত যমান্তকালোকধরামরেশ। ভ্রাতৃদ্বিতীয়াকৃতদেবপূজাং গৃহাণ চার্ঘ্যং ভগবন্নমস্তে॥ ইদমর্ঘ্যং ওম্ যমায় নমঃ তত আচমনীয়াদিকং দত্ত্বা প্রণমেৎ। ওম্ ধর্ম্মরাজ নমস্তভ্যং নমস্তে যমুনাগ্রজ। পাহি মাং কিঙ্করৈঃ সার্দ্ধং সূর্য্যপুত্র নমোঽস্তু তে॥ তত ওম্ চিত্রগুপ্তায় নমঃ। ইত্যনেন পূজয়েৎ। তত ওম্ যমদূতেভ্যো নমঃ। ইত্যনেন পাদ্যাদিভিঃ পূজয়েৎ। যমুনাঞ্চ পাদ্যাদিভিঃ সংপূজ্য প্রণমেৎ। ওম্ যমস্বসর্নমস্তেঽস্তু যমুনে লোকপূজিতে। বরদা ভব মে নিত্যং সূর্য্যপুত্রি নমোঽস্তু তে॥ ততো ভ্রাতৃভোজনকালে অন্নাদিকং দত্ত্বা ভগিনী পঠেৎ। ভ্রাতস্তবানুজাতাহং ভুঙ্ক্ষ্ব ভক্তমিদং শুভং। প্রীতয়ে যমরাজস্য যমুনায়া বিশেষতঃ॥ জ্যেষ্ঠা চেৎ তবাগ্রজাতাহমিতি বদেৎ। ততঃ পুষ্টিকামো ভ্রাতা ভুঞ্জীত। যত্নেন ভগিনীহস্তাৎ ভোক্তব্যং পুষ্টিবর্দ্ধনং ইতি বচনাৎ॥ *॥ বিষ্ণুত্থানং পরিশিষ্টে উত্থানশব্দে দ্রষ্টব্যং। তত্র কার্ত্তিকশুক্লৈকাদশ্যাদিতিথিপঞ্চকে বকপঞ্চকং। বকোঽপি তত্র নাশ্নীয়াম্মৎস্যঞ্চৈব কদাচন। ইতি বচনাৎ। কার্ত্তিক্যাং গোদানাদৌ ফলাধিক্যং। কার্ত্তিক্যাং গোপ্রদো ভবেৎ। ইতি বচনাৎ। ইতি কৃত্যতত্ত্বং॥ *॥ *॥ অপি চ। অথ কার্ত্তিকব্রতনিত্যতা। স্কান্দে ব্রহ্মনারদসংবাদে। দুষ্প্রাপ্যং প্রাপ্য মানুষ্যং কার্ত্তিকোক্তং চরেন্ন হি। ধর্ম্মং ধর্ম্মভৃতাং শ্রেষ্ঠ স মাতৃপিতৃঘাতকঃ॥ অব্রতেন ক্ষিপেদ্যস্তু মাসং দামোদরপ্রিয়ং। তির্য্যগ্‌যোনিমবাপ্নোতি সর্ব্বধর্ম্মবহিষ্কৃতঃ॥ স ব্রহ্মহা স গোঘ্নশ্চ স্বর্ণস্তেয়ী সদানৃতী। ন করোতি মুনিশ্রেষ্ঠ যো নরঃ কার্ত্তিকে ব্রতং॥ বিধবা চ বিশেষেণ ব্রতং যদি ন কার্ত্তিকে। করোতি মুনিশার্দ্দূল নরকং যাতি সা ধ্রুবং॥ ব্রতন্তু কার্ত্তিকে মাসি যদা ন কুরুতে গৃহী। ইষ্টাপূর্ত্তং বৃথা তস্য যাবদাহূতনারকী॥ সংপ্রাপ্তে কার্ত্তিকে মাসে দ্বিজো ব্রতপরাঙ্মুখঃ। ভবন্তি বিমুখাঃ সর্ব্বে তস্য দেবাঃ সবাসবাঃ॥ ইষ্ট্বা চ বহুভির্যজ্ঞৈঃ কৃত্বা শ্রাদ্ধশতানি চ। স্বর্গং নাপ্নোতি বিপ্রেন্দ্র অকৃত্বা কার্ত্তিকে ব্রতং॥ যতিশ্চ বিধবা চৈব বিশেষেণ বনাশ্রমী। কার্ত্তিকে নরকং যান্তি অকৃত্বা বৈষ্ণবং ব্রতং॥ বেদৈরধীতৈঃ কিং তস্য পুরাণপঠনৈশ্চ কিং। কৃতং যদি ন বিপ্রেন্দ্র কার্ত্তিকে বৈষ্ণবং ব্রতং॥ জন্মপ্রভৃতি যৎ পুণ্যং বিধিবৎ সমুপার্জ্জিতং। ভস্মীভবতি তৎ সর্ব্বমকৃত্বা কার্ত্তিকে ব্রতং॥ যদ্দত্তঞ্চ পরং জপ্তং কৃতঞ্চ সুমহত্তপঃ। সর্ব্বং বিফলতামেতি অকৃত্বা কার্ত্তিকে ব্রতং॥ সপ্তজন্মার্জ্জিতং

পুণ্যং বৃথা ভবতি নারদ। অকৃত্বা কার্ত্তিকে মাসি বৈষ্ণবং ব্রতমুত্তমং॥ পাপভূতাস্তু তে জ্ঞেয়া লোকে মর্ত্যা মহামুনে। বৈষ্ণবাখ্যং ব্রতং যৈস্তু ন কৃতং কার্ত্তিকে শুভং॥ কিঞ্চ। অকৃত্বা নিয়মং বিষ্ণোঃ কার্ত্তিকং যঃ ক্ষিপেন্নরঃ। জন্মার্জ্জিতস্য পুণ্যস্য ফলং নাপ্নোতি নারদ॥ কিঞ্চ। নিয়মেন বিনা চৈব যো নয়েৎ কার্ত্তিকং মুনে। চাতুর্ম্মাস্যং তথা চৈব ব্রহ্মহা স কুলাধমঃ॥ কিঞ্চ। পিণ্ডদানং পিতৃণাঞ্চ পিতৃপক্ষে ন বৈ কৃতং। ব্রতং ন কার্ত্তিকে মাসি শ্রাবণ্যাম্বিতর্পণং॥ চৈত্রে নান্দোলিতো বিষ্ণুর্ম্মাঘস্নানং ন সজ্জলে। ন কৃতা মর্দ্দকী পুষ্যে শ্রাবণে রোহিণাষ্টমী॥ সঙ্গমে ন কৃতা যেন দ্বাদশী শ্রবণান্বিতা। কুত্র যাস্যন্তি তে মূঢ়া নাহং বেদ্মি কলিপ্রিয়॥ পাদ্মে চ। শ্রীসৌনকাদিমুনিগণসংবাদে। মানুষঃ কর্ম্মভূমৌ যঃ কার্ত্তিকং নয়তে মুধা। চিন্তামণিং করে প্রাপ্য ক্ষিপতে কর্দ্দমাম্বুনি॥ নিয়মেন বিনা বিপ্রাঃ কার্ত্তিকং যঃ ক্ষিপেন্নরঃ। কৃষ্ণঃ পরাঙ্মুখস্তস্য যস্মাদূর্জ্জোঽস্য বল্লভঃ॥ *॥ তত্র বিশেষেণ স্নানদানাদিসৎকর্ম্মনিত্যতা। স্কান্দে তত্রৈব। যৈর্ন দত্তং হুতং জপ্তং ন স্নানং ন হরের্ব্রতং। ন কৃতং কার্ত্তিকে পুত্র দ্বিজাস্তে বৈ নরাধমাঃ॥ কিঞ্চ। যৈর্ন দত্তং হুতং জপ্তং কার্ত্তিকে ন ব্রতং কৃতং। তেনাত্মা হারিতো নূনং ন প্রাপ্তং প্রার্থিতং ফলং॥ কিঞ্চ। সংপ্রাপ্তে কার্ত্তিকে মাসি যে রতা ন জনার্দ্দনে।

তেষাং সৌরিপুরে বাসঃ পিতৃভিঃ সহ নারদ॥ কিঞ্চ। কার্ত্তিকে নার্চ্চিতো যৈস্তু ভক্তিভাবেন কেশবঃ। নরকং তে গমিষ্যন্তি যমদূতৈস্তু যন্ত্রিতাঃ॥ জন্মকোটিসহস্রৈস্তু মানুষ্যং প্রাপ্য দুর্লভং। কার্ত্তিকে নার্চ্চিতো বিষ্ণুর্হারিতং তেন জন্ম বৈ॥ বিষ্ণোঃ পূজা কথা বিষ্ণোর্বৈষ্ণবানাঞ্চ দর্শনং। ন ভবেৎ কার্ত্তিকে যস্য হন্তি পুণ্যং দশাব্দিকং॥ *॥ অথ কার্ত্তিকমাহাত্ম্যং। স্কান্দে। কার্ত্তিকস্য তু মাহাত্ম্যং প্রাক্ সামান্যেন লিখ্যতে। ততো বিশেষতস্তত্র কর্ম্ম দেশাদিভেদতঃ॥ অথ সামান্যতঃ স্কান্দে তত্রৈব। কার্ত্তিকস্য তু মাসস্য কোট্যংশেনাপি নার্হতি। সর্ব্বতীর্থেষু যৎ স্নানং সর্ব্বদানেষু যৎ ফলং॥ একতঃ সর্ব্বতীর্থানি সর্ব্বে যজ্ঞাঃ সদক্ষিণাঃ। একতঃ পুষ্করে বাসঃ কুরুক্ষেত্রে হিমাচলে॥ মেরুতুল্যসুবর্ণানি সর্ব্বদানানি চৈকতঃ। একতঃ কার্ত্তিকো বৎস সর্ব্বদা কেশবপ্রিয়ঃ॥ যৎ কিঞ্চিৎ ক্রিয়তে পুণ্যং বিষ্ণুমুদ্দিশ্য কার্ত্তিকে। তদক্ষয়ং ভবেৎ সর্ব্বং সত্যোক্তং তব নারদ॥ কার্ত্তিকং খলু বৈ মাসং সর্ব্বমাসেষু চোত্তমং। পুণ্যানাং পরমং পুণ্যং পাবনানাঞ্চ পাবনং॥ যথা নদীনাং বিপ্রেন্দ্র শৈলানাঞ্চৈব নারদ। উদধীনাঞ্চ বিপ্রর্ষে ক্ষয়ো নৈবোপপদ্যতে॥ পুণ্যং কার্ত্তিকমাসে তু যৎ কিঞ্চিৎ ক্রিয়তে মুনে। ন তস্যাস্তি ক্ষয়ো ব্রহ্মন্ পাপস্যাপ্যেবমেব চ॥ ন কার্ত্তিকসমো মাসো ন কৃতেন সমং যুগং।

ন বেদসদৃশং শাস্ত্রং ন তীর্থং গঙ্গয়া সমং ॥ কার্ত্তিকঃ প্রবরো মাসো বৈষ্ণবানাং প্রিয়ঃ সদা । কার্ত্তিকং সকলং যস্তু ভক্ত্যা সেবেত বৈষ্ণবঃ ॥ পিতৃনুদ্ধরতে সর্ব্বান্ নরকস্থান্ মহামুনে । পাদ্মে চ তত্রৈব । দ্বাদশস্বপি মাসেষু কার্ত্তিকঃ কৃষ্ণবল্লভঃ । তস্মিন্ সংপূজিতো বিষ্ণুরল্পকৈরপ্যুপায়নৈঃ ॥ দদাতি বৈষ্ণবং লোকমিত্যেবং নিশ্চিতং ময়া । যথা দামোদরো ভক্তবৎসলো বিদিতো জনৈঃ ॥ তস্যায়ন্তাদৃশো মাসঃ স্বল্পমপ্যুরুকারকঃ । দুর্ল্লভো মানুষো দেহো দেহিনাং ক্ষণভঙ্গুরঃ ॥ তত্রাপি দুর্ল্লভঃ কালঃ কার্ত্তিকো হরিবল্লভঃ । দীপেনাপি হি যত্রাসৌ প্রীয়তে হরিরীশ্বরঃ ॥ সুগতিঞ্চ দদাত্যেব পরদীপপ্রবোধনাৎ ॥ * ॥ অথ ব্রতমাহাত্ম্যং স্কান্দে তত্রৈব । ব্রতানামিহ সর্ব্বেষামেকজন্মানুগং ফলং । কার্ত্তিকে তু ব্রতস্যোক্তং ফলং জন্মশতানুগং ॥ অক্রূরতীর্থে বিপ্রেন্দ্র কার্ত্তিক্যাং সমুপোষ্য চ । স্নাত্বা যৎ ফলমাপ্নোতি তচ্ছ্রুত্বা বৈষ্ণবং ব্রতং ॥ বারাণস্যাং কুরুক্ষেত্রে নৈমিষে পুষ্করেঽর্ব্বুদে । গত্বা যৎ ফলমাপ্নোতি ব্রতং কৃত্বা তু কার্ত্তিকে ॥ অনিষ্ট্বা চ সদা যজ্ঞৈর্ন কৃত্বা পিতৃভিঃ স্বধাং । ব্রতেন কার্ত্তিকে মাসি বৈষ্ণবস্তু পদং ব্রজেৎ ॥ প্রবৃত্তানাঞ্চ ভক্ত্যাণাং কার্ত্তিকে নিয়মে কৃতে । অবশ্যং কৃষ্ণরূপত্বং প্রাপ্যতে মুক্তিদং শুভং ॥ কিঞ্চ । ব্রাহ্মণঃ ক্ষত্রিয়ো বৈশ্যঃ শূদ্রো বা মুনিসত্তম । বিযোনিং ন ব্রজত্যেব ব্রতং কৃত্বা তু কার্ত্তিকে ॥ কিঞ্চ । কার্ত্তিকে মুনিশার্দ্দূল স্বশক্ত্যা বৈষ্ণবং ব্রতং । যঃ করোতি যথোক্তন্তু মুক্তিস্তস্য করে স্থিতা ॥ সুপুণ্যে কার্ত্তিকে মাসি দেবর্ষিপিতৃসেবিতে । ক্রিয়মাণে ব্রতে নৃণাং স্বল্পেঽপি স্যান্মহাফলং ॥ * ॥ অথ কর্ম্মবিশেষমাহাত্ম্যং । স্কান্দে তত্রৈব । দানং দত্তং হুতং জপ্তং তপশ্চৈব তথা কৃতং । তদক্ষয়ফলং প্রোক্তং কার্ত্তিকে চ দ্বিজোত্তম ॥ কিঞ্চ । যৎ কিঞ্চিৎ কার্ত্তিকে দত্তং বিষ্ণুমুদ্দিশ্য মানবৈঃ । তদক্ষয়ং লভ্যতে বৈ অন্নদানং বিশেষতঃ ॥ কিঞ্চ । যস্তু সম্বৎসরং পূর্ণমগ্নিহোত্রমুপাসতে । কার্ত্তিকে স্বস্তিকং কৃত্বা সমমেতন্ন সংশয়ঃ ॥ কার্ত্তিকে যা করোত্যেবং কেশবালয়মণ্ডলং । স্বর্গস্থা শোভতে সা তু কপোতী পক্ষিণী যথা ॥ যঃ করোতি নরো নিত্যং কার্ত্তিকে পত্রভোজনং । ন স দুর্গতিমাপ্নোতি যাবদিন্দ্রাশ্চতুর্দ্দশ ॥ জন্মপ্রভৃতি যৎ পাপং মানবৈশ্চ কৃতং ভবেৎ । তৎ সর্ব্বং নাশমাপ্নোতি ব্রহ্মপত্রেষু ভোজনাৎ ॥ সর্ব্বকামফলং তস্য সর্ব্বতীর্থফলং লভেৎ । ন বাপি নরকং পশ্যেদ্ব্রহ্মপত্রেষু ভোজনাৎ ॥ ব্রহ্ম চৈষ স্মৃতঃ সাক্ষাৎ পলাশঃ সর্ব্বকামদঃ । মধ্যমং বর্জ্জিতং পত্রং শূদ্রস্য মুনিসত্তম ॥ ভুঞ্জন্নরকমাপ্নোতি যাবদিন্দ্রাশ্চতুর্দ্দশ । তিলদানং নদীস্নানং সৎকথা সাধুসেবনং ॥ ভোজনং ব্রহ্মপত্রেষু কার্ত্তিকে মুক্তিদায়কং । জাগরং কার্ত্তিকে মাসি যঃ করোত্যরুণোদয়ে ॥

দামোদরাগ্রে বিপ্রেন্দ্র গোসহস্রফলং লভেৎ। জাগরং পশ্চিমে যামে যঃ করোতি মহামুনে॥ কার্ত্তিকে সন্নিধৌ বিষ্ণোস্তৎ-পদং করসংস্থিতং। সাধুসেবা গবাং গ্রাসঃ কথা বিষ্ণোরথার্চ্চনং॥ জাগরঃ পশ্চিমে যামে দুর্লভঃ কার্ত্তিকে কলৌ। কিঞ্চ। জলধেনুসহস্রঞ্চ বৃষসংস্থে দিবাকরে। তোয়ং দত্ত্বা যদাপ্নোতি স্নানং কৃত্বা তু কার্ত্তিকে॥ সন্নিহত্যাং কুরুক্ষেত্রে রাহু-গ্রস্তে দিবাকরে। সূর্য্যবারেণ যৎ স্নানং তদেকাহেন কার্ত্তিকে॥ পিতৄনুদ্দিশ্য যদ্দত্তং কার্ত্তিকে কৃষ্ণবল্লভে। অম্বোদকং মুনি-শ্রেষ্ঠ অক্ষয়ং জায়তে নৃণাং॥ কিঞ্চ। গীতশাস্ত্রবিনোদেন কার্ত্তিকং যো নয়েন্নরঃ। ন তস্য পুনরাবৃত্তির্ময়া দৃষ্টা কলিপ্রিয়॥ কিঞ্চ। প্রদক্ষিণঞ্চ যঃ কুর্য্যাৎ কার্ত্তিকে বিষ্ণুসদ্মনি। পদে পদেঽশ্বমেধস্য ফল-ভাগী ভবেন্নরঃ॥ গীতং বাদ্যঞ্চ নৃত্যঞ্চ কার্ত্তিকে পুরতো হরেঃ। যঃ করোতি নরো ভক্ত্যা লভতে চাক্ষয়ং ফলং॥ হরের্নাম সহস্রাখ্যং গজেন্দ্রস্য চ মোক্ষণং। কার্ত্তিকে পঠতে যস্তু পুনর্জন্ম ন বিদ্যতে॥ কার্ত্তিকে পশ্চিমে যামে স্তবং গানং করোতি যঃ। বসতে শ্বেতদ্বীপে তু পিতৃভিঃ সহ নারদ॥ নৈবেদ্যদানেন তু হরেঃ কার্ত্তিকে যবসংখ্যয়া। যুগানি বসতে স্বর্গে তাবন্তি মুনিসত্তম॥ অগুরুন্তু স-কর্পূরং যো দহেৎ কেশবাগ্রতঃ। কার্ত্তিকে তু মুনিশ্রেষ্ঠ যুগান্তে ন পুনর্ভবঃ॥ কিঞ্চ। নিয়মেন কথাং বিষ্ণোর্যে শৃণ্বন্তি চ ভাবিতাঃ। শ্লোকার্দ্ধং শ্লোকপাদম্বা কার্ত্তিকে গোশতং ফলং॥ সর্ব্বধর্ম্মান্ পরিত্যজ্য কার্ত্তিকে কেশবাগ্রতঃ। শাস্ত্রস্যোচ্চারণং পুণ্যং শ্রোতব্যঞ্চ মহামুনে॥ শ্রেয়সা লোভবুদ্ধ্যা বা যঃ করোতি হরেঃ কথাং। কার্ত্তিকে মুনিশার্দ্দূল কুলানাং তারয়ে-চ্ছতং॥ নিত্যং শাস্ত্রবিনোদেন কার্ত্তিকং যঃ ক্ষিপেন্নরঃ। নির্দ্দহেৎ সর্ব্বপাপানি যজ্ঞাযুতফলং লভেৎ॥ ন তথা তুষ্যতে দানৈর্ন যজ্ঞৈর্গোগজাদিকৈঃ। যথাশাস্ত্র-কথালাপৈঃ কার্ত্তিকে মধুসূদনঃ॥ কার্ত্তিকে মুনিশার্দ্দূল যঃ শৃণোতি হরেঃ কথাং। স নিস্তরতি দুর্গাণি জন্মকোটিশতানি চ॥ যঃ পঠেৎ প্রযতো নিত্যং শ্লোকং ভাগবতং মুনে। অষ্টাদশপুরাণানাং কার্ত্তিকে ফল-মাপ্নুয়াৎ॥ কিঞ্চ। সর্ব্বান্ ধর্ম্মান্ পরি-ত্যজ্য ইষ্টাপূর্ত্তাদিকান্নরঃ। কার্ত্তিকে পরয়া ভক্ত্যা বৈষ্ণবৈঃ সহ সংবসেৎ॥ পাদ্মে চ তত্রৈব। কার্ত্তিকে ভূমিশায়ী যো ব্রহ্মচারী হবিষ্যভুক্। পলাশপত্রে ভুঞ্জানো দামোদরমথার্চ্চয়েৎ॥ স সর্ব্ব-পাতকং হিত্বা বৈকুণ্ঠে হরিসন্নিধৌ। মোদতে বিষ্ণুসদৃশো ভজনানন্দনির্বৃতঃ॥ কিঞ্চ। কার্ত্তিকং সকলং মাসং প্রাতঃ-স্নায়ী জিতেন্দ্রিয়ঃ। জপন্ হবিষ্যভুক্ দান্তঃ সর্ব্বপাপৈঃ প্রমুচ্যতে॥ কার্ত্তিকন্তু নরো মাসং যঃ কুর্য্যাদেকভোজনং। শূরশ্চ বহুবীর্য্যশ্চ কীর্ত্তিমাংশ্চ স জায়তে॥ কিঞ্চ। পলাশপত্রভোজী চ কার্ত্তিকে পুরুষো নরঃ। নিষ্পাপঃ স্যাত্তু নৈবেদ্যং

হরের্মুক্তা বিমুচ্যতে ॥ মধ্যাহ্নৈর্বেশ্বরং পত্রং বর্জ্জয়েদ্‌ব্রাহ্মণেতরঃ। কিঞ্চ। অপরাধসহস্রাণি পাতকানি মহান্ত্যপি। ক্ষমতেঽস্য হরির্দ্দেবঃ পূজিতঃ কার্ত্তিকে প্রভুঃ ॥ নৈবেদ্যং পায়সং বিষ্ণোঃ প্রিয়ং খণ্ডং ঘৃতান্বিতং। বিভজ্য তচ্চ ভুঞ্জানো যজ্ঞসাম্যং দিনে দিনে ॥ তত্রৈব শ্রীকৃষ্ণসত্যাসংবাদে। স্নানং জাগরণং দীপং তুলসীবনপালনং। কার্ত্তিকে যে প্রকুর্ব্বন্তি তে নরা বিষ্ণুমূর্ত্তয়ঃ ॥ ইত্থং দিনত্রয়মপি কার্ত্তিকে যে প্রকুর্ব্বতে। দেবানামপি তে বন্দ্যাঃ কিং যৈরাজন্ম তৎ কৃতং ॥ * ॥ তত্রৈব কার্ত্তিকব্রতাঙ্গানি। হরিজাগরণং প্রাতঃস্নানং তুলসিসেবনং। উদ্যাপনং দীপদানং ব্রতান্যেতানি কার্ত্তিকে ॥ কিঞ্চ। পঞ্চভির্ব্রতকৈরেভিঃ সম্পূর্ণং কার্ত্তিকে ব্রতী। ফলমাপ্নোতি তৎ প্রোক্তং ভুক্তিমুক্তিফলপ্রদং ॥ বিষ্ণোঃ শিবস্য বা কুর্য্যাদালয়ে হরিজাগরং। কুর্য্যাদশ্বত্থমূলে বা তুলসীনাং বনেষু চ ॥ আপদ্গতো যদাপ্যম্ভো ন লভেৎ সবনায় সঃ। ব্যাধিতো বা পুনঃ কুর্য্যাদ্বিষ্ণোর্নামাপমার্জ্জনং ॥ উদ্যাপনবিধিং কর্ত্তুমশক্তো যো ব্রতে স্থিতঃ। ব্রাহ্মণান্ ভোজয়েচ্ছক্ত্যা ব্রতসম্পূর্ণহেতবে ॥ অশক্তো দীপদানস্য পরদীপান্ প্রবোধয়েৎ। তেষাং বা রক্ষণং কুর্য্যাদ্বাতাদিভ্যঃ প্রযত্নতঃ ॥ অভাবে তুলসীনাঞ্চ পূজয়েদ্বৈষ্ণবং দ্বিজং। সর্ব্বাভাবে ব্রতী কুর্য্যাদ্‌ব্রাহ্মণানাং গবামপি ॥ সেবাং বা বোধিবটয়োর্ব্রতসম্পূর্ণহেতবে ॥ * ॥

অথ দীপদানমাহাত্ম্যং। স্কান্দে তত্রৈব। কৃত্বা কোটিসহস্রাণি পাতকানি বহূন্যপি। নিমেষার্দ্ধেন দীপস্য বিলয়ং যান্তি কার্ত্তিকে ॥ কিঞ্চ। শৃণু দীপস্য মাহাত্ম্যং কার্ত্তিকে কেশবপ্রিয়ং। দীপদানেন বিপ্রেন্দ্র ন পুনর্জায়তে ভুবি ॥ রবিগ্রহে কুরুক্ষেত্রে নর্ম্মদায়াং শশিগ্রহে। তৎ ফলং কোটিগুণিতং দীপদানেন কার্ত্তিকে ॥ ঘৃতেন দীপকো যস্য তিলতৈলেন বা পুনঃ। জ্বলতে মুনিশার্দ্দূল অশ্বমেধেন তস্য কিং ॥ মন্ত্রহীনং ক্রিয়াহীনং শৌচহীনং জনার্দ্দনে। সর্ব্বং সম্পূর্ণতাং যাতি কার্ত্তিকে দীপদানতঃ ॥ তেনেষ্টং ক্রতুভিঃ সর্ব্বৈঃ কৃতং তীর্থাবগাহনং। দীপদানং কৃতং যেন কার্ত্তিকে কেশবাগ্রতঃ ॥ তাবদ্গর্জ্জন্তি পুণ্যানি স্বর্গে মর্ত্ত্যে রসাতলে। যাবন্ন জ্বলতে জ্যোতিঃ কার্ত্তিকে কেশবাগ্রতঃ ॥ শ্রূয়তে চাপি পিতৃভির্গাথা গীতা পুরা দ্বিজ। ভবিষ্যতি কুলেঽস্মাকং পিতৃভক্তঃ সুতো ভুবি ॥ কার্ত্তিকে দীপদানেন যস্তোষয়তি কেশবং। মুক্তিং প্রাপ্স্যামহে নূনং প্রসাদাচ্চক্রপাণিনঃ ॥ কিঞ্চ। মেরুমন্দরমাত্রাণি কৃত্বা পাপান্যশেষতঃ। দহতে নাত্র সন্দেহো দীপদানাত্তু কার্ত্তিকে ॥ গৃহে বায়তনে বাপি দীপং দদ্যাচ্চ কার্ত্তিকে। পুরতো বাসুদেবস্য মহাফলবিধায়িনঃ ॥ স জাতো মানুষো লোকে স ধন্যঃ স চ কীর্ত্তিমান্। প্রদত্তঃ কার্ত্তিকে মাসি দীপো বৈ মধুহাগ্রতঃ ॥ নিমিষার্দ্ধার্দ্ধমাত্রেণ দীপদানেন কার্ত্তিকে। ন তৎ ক্রতুশতৈঃ প্রাপ্যং ফলং

তীর্থশতৈরপি॥ সর্ব্বানুষ্ঠানহীনোঽপি সর্ব্বপাপরতোঽপি সন্। পূয়তে নাত্র সন্দেহো দীপং দত্ত্বা তু কার্ত্তিকে॥ তন্নাস্তি পাতকং কিঞ্চিৎ ত্রিষু লোকেষু নারদ। যন্ন শোধয়তে দীপঃ কার্ত্তিকে কেশবাগ্রতঃ॥ পুরতো বাসুদেবস্য দীপং দত্ত্বা তু কার্ত্তিকে। প্রাপ্নোতি শাশ্বতং স্থানং সর্ব্বাবাধাবিবর্জ্জিতং॥ যঃ কুর্য্যাৎ কার্ত্তিকে মাসি কর্পূরেণ তু দীপকং। দ্বাদশ্যাঞ্চ বিশেষেণ তস্য পুণ্যং বদামি তে॥ কুলে তস্য প্রসূতা যে যে ভবিষ্যন্তি নারদ। সমতীতাশ্চ যে কেচিদেষাং সংখ্যা ন বিদ্যতে॥ ক্রীড়িত্বা সুচিরং কালং দেবলোকে যদৃচ্ছয়া। তে সর্ব্বে মুক্তিমায়ান্তি প্রসাদাচ্চক্রপাণিনঃ॥ কিঞ্চ। দ্যূতব্যাজেন বিপ্রেন্দ্র কার্ত্তিকে কেশবালয়ং। দ্যোতয়েদ্যো মহাভাগ পুনাত্যাসপ্তমং কুলং॥ কার্ত্তিকে দীপদানন্তু কুর্য্যাদ্যো বৈষ্ণবালয়ে। ধনং পুত্ত্রো যশঃ কীর্ত্তির্ভবেত্তস্য চ সর্ব্বদা॥ যথা চ মথনাদ্বহ্নিঃ সর্ব্বকাষ্ঠেষু দৃশ্যতে। তথা চ দৃশ্যতে ধর্ম্মো দীপদানে ন সংশয়ঃ॥ কিঞ্চ। নির্দ্ধনেনাপি বিপ্রেন্দ্র কৃত্বা চৈবাত্মবিক্রয়ং। কর্ত্তব্যং দীপদানন্তু যাবৎ কার্ত্তিকপূর্ণিমা॥ বৈষ্ণবো ন স মন্তব্যঃ সংপ্রাপ্তে কার্ত্তিকে মুনে। যো ন যচ্ছতি মূঢ়াত্মা দীপং কেশবসদ্মনি॥ নারদীয়ে শ্রীরুক্মাঙ্গদমোহিনীসংবাদে। একতঃ সর্ব্বদানানি দীপদানানি চৈকতঃ। কার্ত্তিকে ন সমং প্রোক্তং দীপদো হ্যধিকঃ স্মৃতঃ॥ পাদ্মে চ তত্রৈব। কার্ত্তিকে খণ্ডদীপং যো দদাতি হরিসন্নিধৌ। দিব্যকান্তির্বিমানাগ্রে রমতে স হরেঃ পুরে॥ * ॥ অথ তত্র পরদীপপ্রবোধনমাহাত্ম্যং। স্কান্দে তত্রৈব। পিতৃপক্ষেঽন্নদানেন জ্যৈষ্ঠাষাঢ়ে চ বারিণা। কার্ত্তিকে তৎ ফলং পুংসাং পরদীপপ্রবোধনাৎ॥ বোধনাৎ পরদীপস্য বৈষ্ণবানাঞ্চ সেবনাৎ। কার্ত্তিকে ফলমাপ্নোতি রাজসূয়াশ্বমেধয়োঃ॥ দীয়মানন্তু যে দীপং বোধয়ন্তি হরের্গৃহে। পরেণ নৃপশার্দ্দূল নিস্তীর্ণা যমযাতনা॥ ন তন্তবতি বিপ্রেন্দ্র ইষ্টৈরপি মহামখৈঃ। কার্ত্তিকে যৎ ফলং প্রোক্তং পরদীপপ্রবোধনাৎ॥ একাদশ্যাং পরৈর্দ্দত্তং দীপং প্রজ্বাল্য মূষিকা। মানুষ্যং দুর্ল্লভং প্রাপ্য পরাং গতিমবাপ সা॥ * ॥ অথ শিখরদীপমাহাত্ম্যং। স্কান্দে তত্রৈব। যদা যদা ভাসয়তে দীপকঃ কলসোপরি। তদা তদা মুনিশ্রেষ্ঠ দ্রবতে পাপসঞ্চয়ঃ॥ যো দদাতি দ্বিজাতিভ্যো মহীমুদধিমেখলাং। হরেঃ শিখরদীপস্য কলাং নার্হতি ষোড়শীং॥ যো দদাতি গবাং কোটিং সবৎসাং ক্ষীরসংযুতাং। হরেঃ শিখরদীপস্য কলাং নার্হতি ষোড়শীং॥ সর্ব্বস্বদানং কুরুতে বৈষ্ণবানাং মহামুনে। শিখরোপরি দীপস্য কলাং নার্হতি ষোড়শীং॥ কিঞ্চ। যঃ করোতি পরং দীপং মূল্যেনাপি মহামুনে। শিখরোপরি মধ্যে চ কুলানাং তারয়েচ্ছতং॥ বিমানং জ্যোতিষা দীপ্তং যে নিরীক্ষন্তি কার্ত্তিকে। কেশবস্য মহাভক্ত্যা কুলে তেষাং ন নারকী॥ দিবি দেবা নিরীক্ষন্তে বিষ্ণুদীপপ্রদং নরং। কদা

ভবিষ্যত্যস্মাকং সঙ্গমঃ পুণ্যকর্ম্মণা ॥ কার্ত্তিকে কার্ত্তিকীং যাবৎ প্রাসাদোপরি দীপকং। যো দদাতি মুনিশ্রেষ্ঠ তস্যেন্দ্রত্বং ন দুর্ল্লভং ॥*॥ অথ তত্র দীপমালামাহাত্ম্যং। স্কান্দে তত্রৈব। দীপপঙ্‌ক্তেশ্চ রচনাং সবাহ্যাভ্যন্তরে হরেঃ। বিষ্ণোর্ব্বিমানে কুরুতে স নরঃ শঙ্খচক্রধৃক্ ॥ দীপপঙ্‌ক্তেশ্চ রচনাং কুরুতে কেশবালয়ে। তস্যালয়ে প্রসূতানাং লক্ষাণাং নরকং ন হি ॥ বিষ্ণোর্ব্বিমানং দীপাঢ্যং সবাহ্যাভ্যন্তরে মুনে। দীপোদ্যতকরে মার্গে তেন প্রাপ্তং পরং পদং ॥ ভবিষ্যে চ। যঃ কুর্য্যাৎ কার্ত্তিকে মাসি শোভনাং দীপমালিকাং। প্রবোধে চৈব দ্বাদশ্যামেকাদশ্যাং বিশেষতঃ ॥ সূর্য্যায়তপ্রকাশস্তু তেজসা ভাসয়ন্ দিশঃ। তেজোরাশিবিমানস্থো জগদুদ্যোতয়ংস্ত্বিষা ॥ যাবৎ প্রদীপসংখ্যা তু ঘৃতেনাপূর্য্য বোধিতা। তাবদ্বর্ষসহস্রাণি বিষ্ণুলোকে মহীয়তে ॥*॥ অথ আকাশাদিদীপমাহাত্ম্যং। পাদ্মে তত্রৈব। উচ্চৈঃ প্রদীপমাকাশে যো দদ্যাৎ কার্ত্তিকে নরঃ। সর্ব্বং কুলং সমুদ্ধৃত্য বিষ্ণুলোকমবাপ্নুয়াৎ ॥ বিষ্ণুকেশবমুদ্দিশ্য দীপং দদ্যাত্তু কার্ত্তিকে। আকাশস্থং জলস্থঞ্চ শৃণু তস্যাপি যৎ ফলং ॥ ধনং ধান্যং সমৃদ্ধিশ্চ পুত্রবানীশ্বরো গৃহে। লোচনে চ শুভে তস্য বিদ্বানপি চ জায়তে ॥ কিঞ্চ। বিপ্রবেশ্মনি যো দদ্যাৎ কার্ত্তিকে মাসি দীপকং। অগ্নিষ্টোমফলং তস্য প্রবদন্তি মনীষিণঃ ॥ চতুষ্পথেষু রথ্যাসু ব্রাহ্মণাবসথেষু চ। বৃক্ষমূলেষু গোষ্ঠেষু কান্তারে গহনেষু চ ॥ দীপদানাদ্ধি সর্ব্বত্র মহাফলমবাপ্নুয়াৎ ॥*॥ আকাশদীপদানমন্ত্রঃ। তত্রৈব। দামোদরায় নভসি তুলায়াং লোলয়া সহ। প্রদীপন্তে প্রযচ্ছামি নমোঽনন্তায় বেধসে ॥ ইতি ॥ * ॥ অথ দেশবিশেষে কার্ত্তিকমাহাত্ম্যবিশেষঃ। পাদ্মে তত্রৈব। যত্র কুত্রাপি দেশেঽয়ং কার্ত্তিকঃ স্নানদানতঃ। অগ্নিহোত্রসমফলঃ পূজায়াঞ্চ বিশেষতঃ ॥ কুরুক্ষেত্রে কোটিগুণো গঙ্গায়াঞ্চাপি তৎসমঃ। ততোঽধিকঃ পুষ্করে স্যাদ্দ্বারকায়াঞ্চ ভার্গব ॥ কৃষ্ণসালোক্যদো মাসঃ পূজাস্নানৈশ্চ কার্ত্তিকঃ। অন্যাঃ পূর্য্যস্তৎসমানা মুনয়ো মথুরাং বিনা ॥ দামোদরত্বং হি হরেস্তত্রৈবাসীদ্যতঃ কিল। মথুরায়াং ততশ্চোর্জ্জো বৈকুণ্ঠপ্রীতিবর্দ্ধনঃ ॥ কার্ত্তিকো মথুরায়াং বৈ পরমাবধিরিষ্যতে। যথা মাঘে প্রয়াগঃ স্যাদ্বৈশাখে জাহ্নবী যথা ॥ কার্ত্তিকে মথুরা সেব্যা ততোৎকর্ষঃ পরো ন হি। মথুরায়াং নরৈরূর্জ্জে স্নাত্বা দামোদরোঽর্চ্চিতঃ ॥ কৃষ্ণরূপা হি তে জ্ঞেয়া নাত্র কার্য্যা বিচারণা। দুর্ল্লভঃ কার্ত্তিকো বিপ্র মথুরায়াং নৃণামিহ ॥ যত্রার্চ্চিতঃ স্বকং রূপং ভক্তেভ্যঃ সংপ্রযচ্ছতি। ভুক্তিং মুক্তিং হরির্দ্দদ্যাদর্চ্চিতোঽন্যত্র সেবিনাং ॥ ভক্তিঞ্চ ন দদাত্যেষ যতো বশ্যকরী হরেঃ। সা ত্বঞ্জসা হরের্ভক্তির্লভ্যতে কার্ত্তিকে নরৈঃ ॥ মথুরায়াং সকৃদপি শ্রীদামোদরপূজনাৎ। মন্ত্রদ্রব্যবিহীন-

ঞ্চ বিধিহীনঞ্চ পূজনং॥ মন্যতে কার্ত্তিকে দেবো মথুরায়াং সদর্চ্চনং। যস্য পাপস্য যুজ্যেত মরণান্তা হি নিষ্কৃতিঃ॥ তচ্ছুদ্ধ্যর্থমিদং প্রোক্তং প্রায়শ্চিত্তং সুনিশ্চিতং। কার্ত্তিকে মথুরায়াং বৈ শ্রীদামোদরপূজনং॥ কার্ত্তিকে মথুরায়াং বৈ পূজনাদ্দর্শনং ধ্রুবঃ। শীঘ্রং সংপ্রাপ্তবান্ বালো দুর্ল্লভং যোগতৎপরৈঃ॥ সুলভা মথুরা ভূমৌ প্রত্যব্দং কার্ত্তিকস্তথা। তথাপি সংসরন্তীহ নরা মূঢ়া ভবাম্বুধৌ॥ কিং যজ্ঞৈঃ কিং তপোভিশ্চ তীর্থৈরন্যৈশ্চ সেবিতৈঃ। কার্ত্তিকে মথুরায়াঞ্চেদর্চ্চ্যতে রাধিকাপ্রিয়ঃ॥ যানি সর্ব্বাণি তীর্থানি নদা নদ্যঃ সরাংসি চ। কার্ত্তিকে নিবসন্ত্যত্র মাথুরে সর্ব্বমণ্ডলে॥ কার্ত্তিকে জন্মসদনে কেশবস্য চ যে নরাঃ। সকৃৎপ্রবিষ্টাঃ শ্রীকৃষ্ণং তে যান্তি পরমব্যয়ং॥ পরোপহাসমুদ্দিশ্য কার্ত্তিকে হরিপূজয়া। মথুরায়াং লভেদ্ভক্তিং কিং পুনঃ শ্রদ্ধয়া নরঃ॥ ইতি॥ ইত্থং কার্ত্তিককৃত্যানি ব্যক্তান্যেব স্বতোঽভবন্। তত্র কিঞ্চিদ্বিশেষেণ তদ্বিধির্লিখ্যতেঽধুনা॥*॥ অথ কার্ত্তিককৃত্যবিধিঃ। তত্রোপক্রমকালশ্চোক্তঃ শ্রীকৃষ্ণসত্যাসংবাদীয়কার্ত্তিকমাহাত্ম্যে। আশ্বিনস্য তু মাসস্য যা শুক্লৈকাদশী ভবেৎ। কার্ত্তিকস্য ব্রতানীহ তস্যাং কুর্য্যাদতন্দ্রিতঃ॥ নিত্যং জাগরণায়ান্তে যামে রাত্রেঃ সমুত্থিতঃ। শুচির্ভূত্বা প্রবোধ্যাথ স্তোত্রৈর্নীরাজয়েৎ প্রভুং॥ নিশম্য বৈষ্ণবান্ ধর্ম্মান্ বৈষ্ণবৈঃ সহ হর্ষিতঃ। কৃত্বা গীতাদিকং প্রাতর্দেবং নীরাজয়েৎ পুনঃ॥ নদ্যাদৌ চ ততো গত্বাচম্য সঙ্কল্পমাচরেৎ। প্রভুং প্রার্থ্যাথ তস্মৈ চ দদ্যাদর্ঘ্যং যথাবিধি॥ তত্র সঙ্কল্পমন্ত্রঃ। কার্ত্তিকেঽহং করিষ্যামি প্রাতঃস্নানং জনার্দ্দন। প্রীত্যর্থং তব দেবেশ দামোদর ময়া সহ॥ ইতি॥ প্রার্থনমন্ত্রস্তু। তব ধ্যানেন দেবেশ জলেঽস্মিন্ স্নাতুমুদ্যতঃ। ত্বৎপ্রসাদাচ্চ মে পাপং দামোদর বিনশ্যত্বিতি॥ অর্ঘ্যমন্ত্রঃ। ব্রতিনঃ কার্ত্তিকে মাসি স্নাতস্য বিধিবন্মম। অর্ঘ্যং গৃহাণ দেবেশ নমামি ত্বাং সুরেশ্বর॥ কাশীখণ্ডে। ব্রতিনঃ কার্ত্তিকে মাসি স্নাতস্য বিধিবন্মম। দামোদর গৃহাণার্ঘ্যং দনুজেন্দ্রনিসূদন॥ নিত্যে নৈমিত্তিকে কৃৎস্নে কার্ত্তিকে পাপশোষণে। গৃহাণার্ঘ্যং ময়া দত্তং রাধয়া সহিতো হরে॥ ইতি॥ তিলৈরালিপ্য দেহং স্বং নামোচ্চারণপূর্ব্বকং। স্নাত্বা স বিধিনা সন্ধ্যামুপাস্য গৃহমাব্রজেৎ॥ উপলিপ্যাথ দেবাগ্রে নির্ম্মায় স্বস্তিকং প্রভুং। তুলসীমালতীপদ্মাগস্ত্যপুষ্পাদিনার্চ্চয়েৎ॥ নিত্যং বৈষ্ণবসঙ্গত্যা সেবেত ভগবৎকথাং। সর্পিসাহর্ন্নিশং দীপং তিলতৈলেন চার্চ্চয়েৎ॥ বিশেষতশ্চ নৈবেদ্যান্যর্পয়েদাচরেত্তথা। প্রণামাংশ্চ যথাশক্ত্যা একভক্তাদিকং ব্রতং॥ তথা চ পাদ্মে তত্রৈব। প্রাতরুত্থায় শৌচাদি কৃত্বা গত্বা জলাশয়ে। কৃত্বা চ বিধিবৎ স্নানং ততো দামোদরার্চ্চনং॥ কিঞ্চ। মৌনেন ভোজনং কার্য্যং কার্ত্তিকে ব্রতধারিণা। ঘৃতেন দীপদানং স্যাত্তিল-

তৈলেন বা পুনঃ॥ দিনঞ্চ কৃষ্ণকথয়া বৈষ্ণবানাঞ্চ সঙ্গমৈঃ। নীয়তাং কার্ত্তিকে মাসি সঙ্কল্পব্রতপালনং॥ আশ্বিনে শুক্লপক্ষস্য প্রারম্ভো হরিবাসরে। অথ বা পৌর্ণমাসীতঃ সংক্রান্তৌ বা তুলাগমে॥ দীপদানমখণ্ডঞ্চ দদ্যাদ্বৈ বিষ্ণুসন্নিধৌ। দেবালয়ে তুলস্যাম্বা আকাশে বা তদুত্তমং॥ কিঞ্চ। রজতং কনকং দীপান্ মণিমুক্তাফলাদিকং। দামোদরস্য প্রীত্যর্থং প্রদদ্যাৎ কার্ত্তিকে নরঃ॥ স্কান্দে চ শ্রীরুক্মাঙ্গদমোহিনীসংবাদে। ন গৃহে কার্ত্তিকে কুর্য্যাদ্বিশেষেণ তু কার্ত্তিকীং। তীর্থে তু কার্ত্তিকীং কুর্য্যাৎ সর্ব্বযত্নেন ভাবিনীতি॥ *॥ অথ কার্ত্তিকে বর্জ্যানি। তত্রৈব ব্রহ্মনারদসংবাদে। কার্ত্তিকে তু বিশেষেণ রাজমাষাংশ্চ ভক্ষয়ন্। নিষ্পাবান্ মুনিশার্দ্দূল যাবদাহূতনারকী॥ কলিঙ্গানি পটোলানি বৃন্তাকং সন্ধিতানি চ। ন ত্যজেৎ কার্ত্তিকে মাসি যাবদাহূতনারকী॥ কার্ত্তিকে মাসি ধর্ম্মাত্মা মৎস্যমাংসং ন ভক্ষয়েৎ। তত্রৈব যত্নতস্ত্যাজ্যং শাশকং শৌকরং তথা॥ কিঞ্চ। পরান্নং পরশয্যাঞ্চ পরবাদং পরাঙ্গনাং। সর্ব্বদা বর্জ্জয়েৎ প্রাজ্ঞো বিশেষেণ তু কার্ত্তিকে॥ তৈলাভ্যঙ্গং তথা শয্যাং পরান্নং কাংস্যভোজনং। কার্ত্তিকে বর্জ্জয়েদ্‌যস্তু পরিপূর্ণব্রতী ভবেৎ॥ সংপ্রাপ্তং কার্ত্তিকং দৃষ্ট্বা পরান্নং যস্তু বর্জ্জয়েৎ। দিনে দিনে তু কৃচ্ছ্রস্য ফলং প্রাপ্নোতি মানবঃ॥ তত্রৈব শ্রীরুক্মাঙ্গদমোহিনীসংবাদে।

কার্ত্তিকে বর্জ্জয়েত্তৈলং কার্ত্তিকে বর্জ্জয়েন্মধু। কার্ত্তিকে বর্জ্জয়েৎ কাংস্যং কার্ত্তিকে শুক্লসন্ধিতং॥ ন মাৎস্যং ভক্ষয়েন্মাংসং ন কৌর্ম্মং নান্যদেব হি। চাণ্ডালঃ স ভবেৎ সুভ্রু কার্ত্তিকে মাংসভক্ষণাৎ॥ *॥ অথ শ্রীরাধাদামোদরপূজাবিধিঃ। পাদ্মে তত্রৈব। ততঃ প্রিয়তমা বিষ্ণো রাধিকা গোপিকাসু চ। কার্ত্তিকে পূজনীয়া চ শ্রীদামোদরসন্নিধৌ॥ দ্বিজং দামোদরং কৃত্বা তৎপত্নীং রাধিকাং তথা। কার্ত্তিকে পূজনীয়ৌ তৌ বাসোঽলঙ্কারভোজনৈঃ॥ রাধিকাপ্রতিমাং বিপ্রাঃ পূজয়েৎ কার্ত্তিকে তু যঃ। তস্য তুষ্যতি তৎপ্রীত্যৈ শ্রীমান্ দামোদরো হরিরিতি॥ দামোদরাষ্টকং নাম স্তোত্রং দামোদরার্চ্চনে। নিত্যং দামোদরাকর্ষি পঠেৎ সত্যব্রতোদিতং॥*॥ অথ শ্রীদামোদরাষ্টকং। তত্রৈব। নমামীশ্বরং সচ্চিদানন্দরূপং লসৎকুণ্ডলং গোকুলে ভ্রাজমানং। যশোদাভিয়োলূখলাদ্ধাবমানং পরামৃষ্টমত্যন্ততো দ্রুত্য গোপ্যা॥ রুদন্তং মুহুর্নেত্রযুগ্মং মৃজন্তং করাম্ভোজযুগ্মেন সাতঙ্কনেত্রং। মুহুঃ শ্বাসকম্পত্রিরেখাঙ্ককণ্ঠস্থিতগ্রৈবদামোদরং ভক্তিবদ্ধং॥ ইতীদৃক্স্বলীলাভিরানন্দকুণ্ডে স্বঘোষং নিমজ্জন্তমাখ্যাপয়ন্তং। তদীয়ে শিতজ্ঞেষু ভক্তৈর্জ্জিতত্বং পুনঃ প্রেমতস্ত্বাং শতাবৃত্তি বন্দে॥ বরং দেব মোক্ষং ন মোক্ষাবধিং বা ন চান্যং বৃণেঽহং বরেশাদপীহ। ইদন্তে বপুর্নাথ গোপালবালং সদা মে

মনস্যাবিরাস্তাং কিমন্যৈঃ ॥ ইদন্তে মুখাম্ভোজমত্যন্তনীলৈর্ব্বৃতং কুন্তলৈঃ স্নিগ্ধরক্তৈশ্চ গোপ্যা। মুহুশ্চুম্বিতং বিম্বরক্তাধরং মে মনস্যাবিরাস্তামলং লক্ষলাভৈঃ॥ নমো দেব দামোদরানন্ত বিষ্ণো প্রসীদ প্রভো দুঃখজালাব্ধিমগ্নং। কৃপাদৃষ্টিবৃষ্ট্যাতিদীনং বতানুগৃহাণেশ মামঙ্গ মেঽধ্যক্ষিদৃশ্যঃ ॥ কুবেরাত্মজৌ বদ্ধমূর্ত্তৈব যদ্বত্ত্বয়া মোচিতৌ ভক্তিভাজৌ কৃতৌ চ। তথা প্রেমভক্তিং স্বকাং মে প্রযচ্ছ ন মোক্ষে গ্রহো মেঽস্তি দাঁমোদরেহ ॥ নমস্তেঽস্তু দাম্নে স্ফুরদ্দীপ্তিধাম্নে ত্বদীয়োদরায়াথ বিশ্বস্য ধাম্নে। নমো রাধিকায়ৈ ত্বদীয়প্রিয়ায়ৈ নমোঽনন্তলীলায় দেবায় তুভ্যং॥*॥ অথ তত্র শ্রীকৃষ্ণাষ্টমীকৃত্যং। পাদ্মে তত্রৈব। গোবর্দ্ধনে গিরৌ রম্যে রাধাকুণ্ডং প্রিয়ং হরেঃ। কার্ত্তিকে বহুলাষ্টম্যাং তত্র স্নাত্বা হরেঃ প্রিয়ঃ॥ নরো ভক্তো ভবেদ্বিপ্রাস্তদ্ধি তস্য প্রতোষণং। যথা রাধা প্রিয়া বিষ্ণোস্তস্যাঃ কুণ্ডং প্রিয়ং তথা ॥ সর্ব্বগোপীষু সৈবৈকা বিষ্ণোরত্যন্তবল্লভা। কিঞ্চ। তত্রৈব শ্রীরাধিকোপাখ্যানান্তে। বৃন্দাবনাধিপত্যঞ্চ দত্তং তস্যাঃ প্রতুষ্যতা। কৃষ্ণেনান্যত্র দেবী তু রাধা বৃন্দাবনে বনে॥ তৎকুণ্ডে কার্ত্তিকাষ্টম্যাং স্নাত্বা পূজ্যো জনার্দ্দনঃ। সুবোধস্তাং যথা প্রীতস্তথা প্রীতস্ততো ভবেৎ॥*॥ অথ তত্র কৃষ্ণত্রয়োদশীকৃত্যং। পাদ্মে চ তত্রৈব। কার্ত্তিকে কৃষ্ণপক্ষে তু ত্রয়োদশ্যাং নিশামুখে। যমদীপং বহির্দ্দদ্যাদপমৃত্যুর্বিনশ্যতি ॥ তত্র মন্ত্রঃ। মৃত্যুনা পাশদণ্ডাভ্যাং কালঃ শ্যামলয়া সহ। ত্রয়োদশ্যাং দীপদানাৎ সূর্য্যজঃ প্রীয়তামিতি ॥ * ॥ অথ কৃষ্ণচতুর্দ্দশীকৃত্যং। তত্রৈব। চতুর্দ্দশ্যাং ধর্ম্মরাজপূজা কার্য্যা প্রযত্নতঃ। স্নানমাবশ্যকং কার্য্যং নরৈর্নরকভীরুভিঃ ॥ অরুণোদয়তোঽন্যত্র রিক্তায়াং স্নাতি যো নরঃ। তস্যাব্দিকভবো ধর্ম্মো নশ্যত্যেব ন সংশয়ঃ ॥ স্কান্দে চ তত্রৈব। কার্ত্তিকে কৃষ্ণপক্ষে তু চতুর্দ্দশ্যাং বিধূদয়ে। অবশ্যমেব কর্ত্তব্যং স্নানং নরকভীরুভিঃ ॥ কিঞ্চ। পাদ্মে তত্রৈব। ততশ্চ তর্পণং কার্য্যং ধর্ম্মরাজস্য নামভিঃ। জীবৎপিতা ন কুর্ব্বীত তর্পণং যমভীষ্ময়োঃ॥ যজ্ঞোপবীতিনা কার্য্যং প্রাচীনাবীতিনা তথা। দেবত্বঞ্চ পিতৃত্বঞ্চ যমস্যাস্তে দ্বিরূপতা ॥ নক্তং যমচতুর্দ্দশ্যাং যঃ কুর্য্যাচ্ছিবসন্নিধৌ। ন তৎ ক্রতুশতেনাপি প্রাপ্যতে পুণ্যমীদৃশং ॥ কুমারীবটুকান্ পূজ্য তথা শৈবতপোধনান্। রাজসূয়ফলং তেন প্রাপ্যতে নাত্র সংশয়ঃ ॥ কার্ত্তিকে ভৌমবারেণ চিত্রা কৃষ্ণা চতুর্দ্দশী। তস্যাং ভূতেশমভ্যর্চ্চ্য গচ্ছেচ্ছিবপুরং নরঃ ॥ কিঞ্চ। অমাবস্যাচতুর্দ্দশ্যোঃ প্রদোষে দীপদানতঃ। যমমার্গান্ধকারেভ্যো মুচ্যতে কার্ত্তিকে নরঃ ॥ * ॥ অথামাবাস্যাকৃত্যং। পাদ্মে তত্রৈব। দিবা তত্র ন ভোক্তব্যং বিনা বালাতুরান্ জনান্। প্রদোষসময়ে লক্ষ্মীং পূজয়েচ্চ যথাক্রমং॥ কিঞ্চ। প্রদোষসময়ে বিপ্রাঃ কর্ত্তব্যা দীপ-

মালিকাঃ। দীপদানাৎ ততঃ পশ্চাল্লক্ষ্মীং সুপ্তাং প্রবোধয়েৎ॥ ত্বং জ্যোতিঃ শ্রী রবিশ্চন্দ্রো বিদ্যুৎ সৌবর্ণতারকাঃ। সর্ব্বেষাং জ্যোতিষাং জ্যোতির্দীপজ্যোতিঃস্থিতে নমঃ॥ মন্ত্রেণানেন কমলাং দীপহস্তাঃ স্ত্রিয়ো দ্বিজাঃ। দেবীং প্রবোধয়েয়ুশ্চ ততঃ কুর্য্যুশ্চ ভোজনং॥ প্রদোষসময়ে লক্ষ্মীং ভোজয়িত্বা ভুনক্তি যঃ। পুমান্ সংবৎসরং যাবৎ লক্ষ্মীস্তং নৈব মুঞ্চতি॥*॥ অথামাবাস্যানির্ণয়ঃ। যথা নির্ণয়ামৃতে। উপবাসাদিষ্বমাবাস্যা প্রতিপদ্যুতৈব গ্রাহ্যা তদুক্তং। অমাবাস্যা তৃতীয়া চ তা উপোষ্যাঃ পরান্বিতা ইতি। চতুর্দ্দশীবিদ্ধানিষেধশ্চ নিগমে। ভূতবিদ্ধা ত্বমাবাস্যা নিষ্ফলং স্যাত্রয়ং ত্বিদমিতি। স্কান্দেঽপি। ভূতবিদ্ধা ত্বমাবাস্যা ন গ্রাহ্যা মুনিপুঙ্গবৈরিতি ॥*॥ অথ শুক্লপ্রতিপৎকৃত্যং। স্কান্দে। প্রাতর্গোবর্দ্ধনং পূজ্য দ্যূতঞ্চৈব সমাচরেৎ। ভূষণীয়াস্তথা গাবঃ পূজ্যাশ্চ দোহবাহনাঃ॥ শ্রীকৃষ্ণদাসবর্য্যোঽয়ং শ্রীগোবর্দ্ধনভূধরঃ। শুক্লপ্রতিপদি প্রাতঃ কার্ত্তিকেঽর্চ্চ্যোঽত্র বৈষ্ণবৈঃ॥ প্রাতর্গোবর্দ্ধনং পূজ্য রাত্রৌ জাগরণং চরেদিতি ক্বচিৎ পাঠঃ। তস্মাত্তদিদং কর্ম্ম গোবর্দ্ধনপ্রাধান্যেন গোপ্রাধান্যেন চ খ্যাতমপ্যেকমেব জ্ঞেয়ং। অত্র দিননির্ণয়ঃ। যদাহ দেবলঃ। প্রতিপদ্দর্শসংযোগে ক্রীড়নন্তু গবাং স্মৃতং। পরবিদ্ধাস্তু যঃ কুর্য্যাৎ পুত্রদারধনক্ষয়ঃ॥ নির্ণয়ামৃতধৃতপুরাণান্তরবচনং। যা কুহুঃ প্রতিপন্মিশ্রা তত্র গাঃ পূজয়েন্নৃপ। পূজামাত্রেণ বর্দ্ধন্তে প্রজা গাবো মহীপতেঃ॥ ততঃ প্রাতর্গোবর্দ্ধনং পূজ্যেতি পূর্ব্বাহ্লতাৎপর্য্যকং। দ্বিতীয়াসময়ে তু সর্ব্বথা নিষিদ্ধং তত্রৈব। তদ্যথা। নন্দায়াং দর্শনে রক্ষাবলিদানদশাসু চ। ভদ্রায়াং গোকুলক্রীড়া দেশনাশায় জায়তে॥ পুরাণসমুচ্চয়ে তু সম্ভাবিতচন্দ্রোদয়দ্বিতীয়াসংযোগ এব নিষিধ্যতে। গবাং ক্রীড়াদিনে যত্র রাত্রৌ দৃশ্যেত চন্দ্রমাঃ। সোমো রাজা পশূন্ হন্তি সুরভীপূজকাংস্তথা॥ তদুদয়সম্ভাবনঞ্চ নির্ণয়ামৃতে নির্ণীতং। প্রতিপদ্যাপরাহ্লিকত্রিমুহূর্ত্তব্যাপিন্যাং দ্বিতীয়ায়াং চন্দ্রদর্শনং সম্ভাব্যতে। তদুক্তমগ্ন্যাধানবিষয়ে বৃদ্ধশাতাতপেন। দ্বিতীয়া ত্রিমুহূর্ত্তা চেৎ প্রতিপদ্যাপরাহ্লিকী। অগ্ন্যাধানঞ্চতুর্দ্দশ্যাং পরতঃ সোমদর্শনাৎ ইতি॥ অপরাহ্লশ্চ পঞ্চধাবিভক্তস্যাহ্নশ্চতুর্থো ভাগঃ। ততশ্চ যত্র প্রতিপদি ষণ্মুহূর্ত্তব্যাপিনী দ্বিতীয়া তত্র চন্দ্রদর্শনসম্ভাবনমিতি। অন্যদা ভূক্তৈব প্রতিপত্তত্র গৃহীতা। তথৈব পুরাণসমুচ্চয়ে। বর্দ্ধমানতিথৌ নন্দা যদা সার্দ্ধত্রিযামিকা। দ্বিতীয়াবৃদ্ধিগামিত্বাদুত্তরা তত্র চোচ্যতে॥ কিঞ্চ। যদা পূর্ণপ্রতিপৎ পরত্র চ নিষ্ক্রামতি তদাপ্যুত্তরৈব কার্য্যা। যথোক্তং ভবিষ্যোত্তরে। যথা দ্বাদশভির্মাসৈর্মাসো বৃদ্ধো মলিম্লুচঃ। তথৈবাহোরাত্রিবৃদ্ধ্যা তিথিঃ প্রোক্তো মলিম্লুচঃ॥ যথা মলিম্লুচঃ পূর্ব্বো মাসো দৈবস্তথাপরঃ। ত্যাজ্যা তিথিস্তথা পূর্ব্বা গ্রাহ্যা চৈব তথোত্তরা। ইতি

নির্ণয়ামৃতমতং। কিন্তু বঞ্জুলীন্যায়েন পূর্ব্বৈব মন্তুং শক্যতে। তদ্বদত্রাপি দেবলাদিবচন-প্রামাণ্যমস্তীতি ॥ * ॥ অথ গোবর্দ্ধনপূজা-বিধিঃ। পাদ্মে তত্রৈব। মথুরায়াং তথা-ন্যত্র কৃত্বা গোবর্দ্ধনং গিরিং। গোময়েন মহাস্থূলং তত্র পূজ্যো গিরির্যথা ॥ মথুরায়াং তথা সাক্ষাৎ কৃত্বা চৈব প্রদক্ষিণং। বৈষ্ণবং ধাম সংপ্রাপ্য মোদতে হরিসন্নিধৌ ॥ পূজা-মন্ত্রঃ। গোবর্দ্ধন ধরাধার গোকুলত্রাণ-কারক। বিষ্ণুবাহুকৃতোচ্ছ্রায় গবাং কোটি-প্রদো ভব ইতি ॥ গোপূজামন্ত্রঃ। স্কান্দে তত্রৈব। লক্ষ্মীর্যা লোকপালানাং ধেনু-রূপেণ সংস্থিতা। ঘৃতং বহতি যজ্ঞার্থং যমপাশং ব্যপোহতু ॥ অগ্রতঃ সন্তু মে গাবো গাবো মে সন্তু পৃষ্ঠতঃ। গাবো মে পার্শ্বতঃ সন্তু গবাং মধ্যে বসাম্যহমিতি ॥ * ॥ অথ গোক্রীড়া তত্রৈব। ক্রোধাপয়েদ্ধাব-য়েচ্চ গোমহিষ্যাদিকং ততঃ। বৃষান্ কর্ষা-পয়েদ্গোপৈরুক্তিপ্রত্যুক্তিবাদনাৎ ॥ পাদ্মে চ তত্রৈব। মহিষ্যাদেস্তথা ভূষা ক্রীড়নং বারণস্তথা। তন্মাহাত্ম্যঞ্চ তত্রৈব। এবং গোবর্দ্ধনং গাশ্চ পূজনীয়া বিধানতঃ। গোব-র্দ্ধনমখো রম্যঃ কৃষ্ণসন্তোষকারকঃ ॥ * ॥ অথ শ্রীবলিদৈত্যরাজপূজা। লিখিত্বা শ্রীবলিং পট্টে বিন্ধ্যাবল্যান্বিতং মুদা। প্রদোষে তৎপ্রতিপদো ভগবন্তক্তমর্চ্চ-য়েৎ ॥ তথা চ স্কান্দে। বলিমালিখ্য দৈত্যেন্দ্রং বর্ণ কৈঃ পঞ্চরঙ্গকৈঃ। সর্ব্বা-ভরণসম্পূর্ণং বিন্ধ্যাবল্যা সহাসিতং ॥ কুষ্মাণ্ড-ময়জম্ভোরু মুরদানবসংবৃতং। সম্পূর্ণ-হৃষ্টবদনং কিরীটোৎকটকুণ্ডলং ॥ দ্বিভুজং দৈত্যরাজানং কারয়িত্বার্চ্চয়েন্নৃপ। তৎ-পূজাকারণং। পাদ্মে তত্রৈব। যথার্পিতং দেহমনেন বিষ্ণবে ভীতেন মিথ্যাবচসো মহাত্মনা। দৈত্যেন তেনাথ কঠোরচেষ্টয়া বদ্ধো বলির্ব্বামনমূর্ত্তিনা বত ॥ বদ্ধা-নীতোঽথ পাতালং বিমনাঃ খিন্নমানসঃ। নাভ্যসূয়দ্ধরিং দৈত্যস্ত্যক্তাহংমমতঃ সুধীঃ ॥ তদোবাচ হরিঃ প্রীতস্তস্মৈ দৈত্যায় ভাগকৃৎ। অশ্রোত্রিয়ে দত্তমম-ন্ত্রকং হুতং জপ্তং তথা ব্যগ্রধিয়া জনেন যৎ। তথোর্জ্জশুক্লপ্রতিপদ্দিনে ন তু ত্বা-মর্চ্চয়েত্তৎসুকৃতং তবাস্তু ॥ ইতি তস্মৈ বরো দত্তো হরিণা দিতিজায় চ। ততো-ঽবশ্যং প্রপূজ্যোঽসৌ বলিরাজদিনে মুদা ॥ কৃষ্ণসান্নিধ্যতশ্চাপি পূজনীয়ঃ প্রযত্নতঃ ॥ * ॥ অথ বলিপূজাবিধিঃ। স্কান্দে তত্রৈব। গৃহস্য মধ্যে শালায়াং বিশালায়াং ততো-ঽর্চ্চয়েৎ। ভ্রাতৃমাতৃজনৈঃ সার্দ্ধং সন্তুষ্টো বন্ধুভিস্তথা ॥ কমলৈঃ কুমুদৈঃ পুষ্পৈঃ কহ্লারৈ রক্তকোৎপলৈঃ। গন্ধপুষ্পাদি-নৈবেদ্যৈরক্ষতৈর্গুড়পূপকৈঃ ॥ তত্র পূজা-মন্ত্রঃ। বলিরাজ নমস্তুভ্যং বিরোচনসুত প্রভো। ভবিষ্যেন্দ্রসুরারাতে পূজেয়ং প্রতিগৃহ্যতাং ॥ দীপোৎসবৈর্জনিতসর্ব্ব-জনপ্রমোদৈঃ কুর্ব্বন্তি যে সুমতয়ো বলি-রাজপূজাং। দানোপভোগসুখবৃদ্ধিশতা-কুলানাং নূনং প্রয়াতি সকলং প্রমুদৈব বর্ষং ॥ * ॥ অথ যমদ্বিতীয়াকৃত্যং। স্কান্দে পাদ্মে চ। ঊর্জ্জে শুক্লদ্বিতীয়ায়াং মধ্যাহ্নে

যমমর্চ্চয়েৎ। স্নানং কৃত্বা ভানুজায়াং যমলোকং ন পশ্যতি ॥ কিঞ্চ। তস্যাং নিজগৃহে বিপ্র ন ভোক্তব্যং ততো বুধৈঃ। স্নেহেন ভগিনীহস্তাদ্ভোক্তব্যং পুষ্টিবর্দ্ধনং ॥ দানানি চ প্রদেয়ানি ভগিনীভ্যো বিধানতঃ। সর্ব্বা ভগিন্যঃ সংপূজ্যা অভাবে প্রতিপন্নজাঃ॥ কিঞ্চ। যস্যাং তিথৌ যমুনয়া যমরাজদেবঃ সংভোজিতস্ত্বতিশয়স্বসৃসৌহৃদেন। তস্যাং স্বসুঃ করতলাদিহ যো ভুনক্তি প্রাপ্নোতি বিত্তসুভগং ধনমুত্তমং সঃ ॥ * ॥ অথ শুক্লাষ্টমীকৃত্যং। পাদ্মে তত্রৈব কূর্ম্মপুরাণে চ। কার্ত্তিকে শুক্লপক্ষে তু স্মৃতা গোপাষ্টমী বুধৈঃ। তদ্দিনে বাসুদেবোঽভূদ্গোপঃ পূর্ব্বন্তু বৎসপঃ। তত্র কুর্য্যাদ্গবাং পূজাং গোগ্রাসং গোপ্রদক্ষিণং। গবানুগমনং কার্য্যং সর্ব্বান্ কামানভীপ্সতা ॥ * ॥ প্রবোধনীকৃত্যং তৎশব্দে দ্রষ্টব্যং। ইতি শ্রীগোপালভট্টবিলিখিতে লিখিতে ভগবদ্ভক্তিবিলাসে শ্রীদামোদরপ্রিয়ো নাম ১৬ ষোড়শবিলাসঃ ॥ তত্র জাতস্য ফলং। দক্ষঃ ক্রয়ে বিক্রয়ণে ধনাঢ্যঃ স্যাদ্বাবদূকোঽখিলকৌশলজ্ঞঃ। যঃ কার্ত্তিকে কার্ত্তিকরূপধারী জাতো ভবেদ্যুদ্ধবিশারদশ্চ ॥ ইতি কোষ্ঠীপ্রদীপঃ ॥ * ॥ বর্ষবিশেষঃ। স চ কৃত্তিকারোহিণ্যোরেকতরস্মিন্ বৃহস্পতেরস্তোদয়ৈকতরসম্বন্ধে ভবতি। ইতি মলমাসতত্ত্বং ॥ কার্ত্তিকেয়ঃ। যথা। দৃষ্ট্বা তান্ কৃত্তিকাঃ সর্ব্বা ভয়বিহ্বলমানসাঃ। কার্ত্তিকং কথয়ামাসুর্ব্বলন্তং ব্রহ্মতেজসা ॥ ইতি ব্রহ্মবৈবর্ত্তে গণেশখণ্ডং ॥

কার্ত্তিকিকঃ (পুং) কার্ত্তিকমাসঃ। ইত্যমরঃ ॥

কার্ত্তিকেয়ঃ (পুং) শিবপুত্রঃ। যথা। যা বভূব রহঃক্রীড়া পার্ব্বতীশিবয়োঃ পুরা। দৃষ্টস্য চ সুরৈঃ শম্ভোর্ব্বীর্য্যং ভূমৌ পপাত হ ॥ ভূমিস্তদক্ষিপৎ বহ্নৌ বহ্নিশ্চ শরকাননে। তত্ত্বং লব্ধঃ কৃত্তিকাভিরধুনাগচ্ছ সাম্প্রতং ॥ তবাভিষেকং বিষ্ণুশ্চ করিষ্যতি সুরৈঃ সহ। হনিষ্যসি তারকাখ্যং সর্ব্বশস্ত্রং লভিষ্যসি ॥ পুত্রস্ত্বং বিশ্বসংহর্ত্তুস্ত্বাং গোপ্তুমক্ষমা ইমাঃ। নাগ্নিং গোপ্তুং যথাশক্তঃ শুষ্কবৃক্ষঃ স্বকোটরে ॥ ইতি ব্রহ্মবৈবর্ত্তে গণেশখণ্ডং ॥ * ॥ স এব কল্পভেদে অগ্নিপুত্রঃ। যথা। কুমারশ্চাভবৎ তত্র তরুণার্কসমদ্যুতিঃ। বহ্নিতেজোভবঃ শ্রীমান্ গঙ্গাকুক্ষিপরিচ্যুতঃ ॥ তং কুমারং ততো জাতং দৃষ্ট্বা সেন্দ্রা মরুদ্গণাঃ। তদা ক্ষীরপ্রদানার্থং কৃত্তিকাঃ সংন্যযোজয়ন্ ॥ তাঃ ক্ষীরং তস্য দেবস্য সময়েন দদুস্তদা। স্যাদস্মাকময়ং পুত্রঃ খ্যাতো নাম্নেতি রাঘব ॥ অন্যোন্যং পিবতস্তাসাং তনয়স্য মুখানি ষট্। সমভূবন্ মহাবাহো ষণ্মুখস্তেন বিশ্রুতঃ ॥ ততস্তা দেবতা ঊচুঃ কার্ত্তিকেয় ইতি প্রভুঃ। পুত্রোঽয়ং জগতি খ্যাতো ভবিষ্যতি ন সংশয়ঃ ॥ ইতি বাল্মীকীয়রামায়ণং ॥ * ॥ তৎপর্য্যায়ঃ। মহাসেনঃ ২ শরজন্মা ৩ ষড়াননঃ ৪ পার্ব্বতীনন্দনঃ ৫ স্কন্দঃ ৬ সেনানীঃ ৭ অগ্নিভূঃ ৮ গুহঃ ৯ বাহুলেয়ঃ ১০ তারক-

জিৎ ১১ বিশাখঃ ১২ শিখিবাহনঃ ১৩ যাণ্মাতুরঃ ১৪ শক্তিধরঃ ১৫ কুমারঃ ১৬ ক্রৌঞ্চদারণঃ ১৭। ইত্যমরঃ ॥ আগ্নেয়ঃ ১৮ দীপ্তকীর্ত্তিঃ ১৯ অনমেয়ঃ ২০ ময়ূরকেতুঃ ২১ ধর্ম্মাত্মা ২২ ভূতেশঃ ২৩ মহিষার্দ্দনঃ ২৪ কামজিৎ ২৫ কামদঃ ২৬ কান্তঃ ২৭ সত্যবাক্ ২৮ ভুবনেশ্বরঃ ২৯ শিশুঃ ৩০ শীঘ্রঃ ৩১ শুচিঃ ৩২ চণ্ডঃ ৩৩ দীপ্তবর্ণঃ ৩৪ শুভাননঃ ৩৫ অমোঘঃ ৩৬ অনঘঃ ৩৭ রৌদ্রঃ ৩৮ প্রিয়ঃ ৩৯ চন্দ্রাননঃ ৪০ দীপ্তশক্তিঃ ৪১ প্রশান্তাত্মা ৪২ ভদ্রকৃৎ ৪৩ কূটমোহনঃ ৪৪ ষষ্ঠীপ্রিয়ঃ ৪৫ পবিত্রঃ ৪৬ মাতৃবৎসলঃ ৪৭ কন্যাহর্ত্তা ৪৮ বিভক্তঃ ৪৯ স্বাহেয়ঃ ৫০ রেবতীসুতঃ ৫১ প্রভুঃ ৫২ নেতা ৫৩ নৈগমেয়ঃ ৫৪ সুদুশ্চরঃ ৫৫ সুব্রতঃ ৫৬ ললিতঃ ৫৭ বালক্রীড়নপ্রিয়ঃ ৫৮ খচারী ৫৯ ব্রহ্মচারী ৬০ শূরঃ ৬১ শরবনোদ্ভবঃ ৬২ বিশ্বামিত্রপ্রিয়ঃ ৬৩ দেবসেনাপ্রিয়ঃ ৬৪ বাসুদেবপ্রিয়ঃ ৬৫ প্রিয়কঃ ৬৬। ইতি বনপর্ব্ব ॥ গাঙ্গঃ ৬৭ স্বামী ৬৮ দ্বাদশলোচনঃ ৬৯। ইতি জটাধরঃ ॥ সিদ্ধসেনঃ ৭০ শম্ভুতনয়ঃ ৭১ দেবসেনাপতিঃ ৭২ বালচর্য্যঃ ৭৩ কুক্কবাকুধ্বজঃ ৭৪ মহাবাহুঃ ৭৫ যুদ্ধরঙ্গঃ ৭৬ শিখিধ্বজঃ ৭৭। ইতি শব্দরত্নাবলী ॥ * ॥ অস্য ধ্যানং। যথা। কার্ত্তিকেয়ং মহাভাগং ময়ূরোপরিসংস্থিতং। তপ্তকাঞ্চনবর্ণাভং শক্তিহস্তং বরপ্রদং ॥ দ্বিভুজং শত্রুহন্তারং নানালঙ্কারভূষিতং। প্রসন্নবদনং দেবং সর্ব্বসেনাসমাবৃতং ॥ ইতি কার্ত্তিকেয়পূজাপদ্ধতিঃ ॥

কার্ত্তিকেয়প্রসূঃ (স্ত্রী) দুর্গা। ইতি শব্দরত্নাবলী ॥

কার্ত্তিকোৎসবঃ (পুং) কৌমুদী। কার্ত্তিকী পূর্ণিমা। ইতি ত্রিকাণ্ডশেষঃ ॥

কার্পটঃ (পুং) জতু। জৌ ইতি ভাষা। কার্য্যী। দরবারী উমেদওয়ার ইত্যাদি পারস্যভাষা। ইতি হেমচন্দ্রঃ ॥

কার্পটিকঃ (পুং) মর্ম্মবেত্তা। ইতি ত্রিকাণ্ডশেষঃ ॥ তীর্থসেবী। ইতি কাশীখণ্ডঃ ॥

কার্পণ্যং (ক্লী) কৃপণতা। তৎপর্য্যায়ঃ। দৈন্যং ২। ইতি হেমচন্দ্রঃ ॥

কার্পাসং (ত্রি) কার্পাসজাতবস্ত্রাদি। তৎপর্য্যায়ঃ। ফালং ২ বাদরং ৩। ইত্যমরঃ ॥ হেমচন্দ্রমতে ক্লীবলিঙ্গোঽয়ং শব্দঃ ॥

কার্পাসধেনুঃ (স্ত্রী) দানার্থকার্পাসাদিনির্ম্মিতধেনুঃ। যথা। হোতোবাচ। অথাতঃ সংপ্রবক্ষ্যামি ধেনুং কার্পাসিকীং নৃপ। যৎপ্রদানান্নরা যান্তি ঐন্দ্রলোকমনুত্তমং ॥ বিষুবে ত্বয়নে পুণ্যে যুগাদিগ্রহণে তথা। গ্রহপীড়াসু চোগ্রাসু দুঃস্বপ্নারিষ্টদর্শনে ॥ পুণ্যে হ্যায়তনে রাজন্ শুচিদেশে গবাং গণে। গোময়েনোপলিপ্তায়াং দর্ভানাস্তীর্য্য বৈ তিলান্ ॥ তন্মধ্যে স্থাপয়েৎ ধেনুং বস্ত্রমাল্যানুলেপনৈঃ। নৈবেদ্যধূপদীপাদ্যৈঃ পূজয়েচ্চ বিমৎসরঃ ॥ উত্তমা চতুর্ভির্ভারৈস্তদর্দ্ধেন তু মধ্যমা। ভারেণ চাধমা প্রোক্তা বিত্তশাঠ্যং বিবর্জয়েৎ ॥ চতুর্থাংশেন কৃত্বা বৈ বৎসস্তু পরিকল্পয়েৎ। কর্ত্তব্যা রুক্ম-

শৃঙ্গৈস্তু রজতক্ষুরসংযুতা ॥ নানাফলময়া দন্তা রত্নগর্ভসমন্বিতা। ইত্যেবং সর্ব্বসংপূর্ণং কৃত্বা শ্রদ্ধাসমন্বিতঃ ॥ আবাহয়েত্তাং কার্পাসধেনুং মন্ত্রৈর্দ্বিজাতয়ে। দদ্যাদথ দর্ভপাণিঃ প্রযতঃ শ্রদ্ধয়ান্বিতঃ ॥ পূর্ব্বোক্তস্তু বিধিঃ কার্য্যো দানমন্ত্রপুরঃসরঃ। পূর্ব্বোক্তবিধিঃ লবণধেনূক্তবিধিঃ। যথা দেবগণঃ সর্ব্বস্ত্বয়া হীনো ন বর্ত্ততে। তথা মামুদ্ধরেদ্দেবি পাহি সংসারসাগরাৎ॥ ইত্যাদিবরাহপুরাণে শ্বেতোপাখ্যানে কার্পাসধেনুমাহাত্ম্যং ॥

কার্পাসনাসিকা (স্ত্রী) তর্কুঃ। টেকো ইতি ভাষা। ইতি শব্দরত্নাবলী ॥

কার্পাসিকা (স্ত্রী) কার্পাসী। ইতি শব্দরত্নাবলী ॥

কার্পাসী (স্ত্রী) কার্পাসবৃক্ষঃ। কাপাস ইতি ভাষা। তৎপর্য্যায়ঃ। বদরা ২ তুণ্ডিকেরী ৩ সমুদ্রান্তা ৪। ইত্যমরঃ ॥ পটদঃ ৫। ইতি রত্নমালা ॥ সারিণী ৬ চব্যা ৭ তূলা ৮ গুড়ঃ ৯ তুণ্ডকেরিকা ১০ মরুদ্ভবা ১১ পিচুঃ ১২ বাদরঃ ১৩। অস্যা গুণাঃ। মধুরত্বং। শীতত্বং। স্তনদুগ্ধকারিত্বং। পিত্তকফতৃষ্ণাদাহশ্রমভ্রান্তিমূর্চ্ছানাশিত্বং। বলকারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ তৎপত্রগুণাঃ। বায়ুনাশিত্বং। রক্তকারিত্বং। মূত্রবর্দ্ধকত্বং। কর্ণপিণ্ডিকানাদপূযাস্রাবনাশিত্বঞ্চ। তদ্বীজগুণাঃ। স্তন্যদত্বং। বৃষ্যত্বং। স্নিগ্ধত্বং। কফকরত্বং। গুরুত্বঞ্চ। ইতি ভাবপ্রকাশঃ ॥

কার্ম্মঃ (ত্রি) কর্ম্মশীলঃ। ইত্যমরঃ ॥

কার্ম্মণং (ক্লী) মূলকর্ম্ম। ইত্যমরঃ ॥ ঔষধ্যাদিমূলেন যৎ ত্রাসনোচ্চাটনস্তম্ভনবশীকরণাদিকর্ম্ম তৎ। ইতি ভরতঃ ॥ মন্ত্রতন্ত্রাদিযোজনং। কর্ম্মঠে ত্রি। ইতি মেদিনী ॥

কার্ম্মিকঃ (ত্রি) বিচিত্রবস্ত্রাদি। ইতি মিতাক্ষরা ॥

কার্ম্মুকং (ক্লী) ধনুঃ। ধনুক ইতি ভাষা। ইত্যমরঃ ॥

কার্ম্মুকঃ (পুং) বংশঃ। বাঁশ ইতি ভাষা। কর্ম্মক্ষমে ত্রি। ইতি মেদিনী ॥ শ্বেতখদিরঃ। হিজ্জলঃ। মহানিম্বঃ। ইতি রাজনির্ঘণ্টঃ ॥

কার্য্যং (ক্লী) হেতুঃ। প্রয়োজনং। ইতি মেদিনী ॥ ক্রিয়তে যৎ। কাজ ইতি ভাষা। ইতি ব্যাকরণং ॥ তৎপ্রতি কারণং ত্রিবিধং। সমবায়িকারণং ১ যথা ঘটকার্য্যং প্রতি কপালং। অসমবায়িকারণং ২ যথা ঘটকার্য্যং প্রতি কপালসংযোগাদি। নিমিত্তকারণং ৩ যথা ঘটং প্রতি দণ্ডচক্রাদি। ইতি তর্কশাস্ত্রং ॥ বিবাদঃ যথা। যস্মাৎ কার্য্যসমারম্ভশ্চিরাত্তেন বিনিশ্চিতঃ। তস্মান্ন লভতে কালমভিযুক্তশ্চ কালভাক্। ইতি ব্যবহারতত্ত্বে কাত্যায়নঃ ॥ অপূর্ব্বং। যথা। বিধিপ্রত্যয়স্য কার্য্যে শক্তিরিতি মীমাংসকাঃ ॥ ব্যাকরণমতে আদেশপ্রত্যয়াগমাঃ। ইতি দুর্গাদাসঃ ॥

কার্য্যকুশলঃ (ত্রি) কর্ম্মঠঃ। ইতি ভূরিপ্রয়োগঃ ॥

কার্য্যপুটঃ ( পুং ) ক্ষপণঃ। উন্মত্তঃ। অনর্থকরঃ। ইতি বিশ্বমেদিন্যৌ॥

কার্য্যপ্রদ্বেষঃ ( পুং ) আলস্যং। ইতি রাজনির্ঘণ্টঃ॥

কার্য্যা ( স্ত্রী ) কারীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কার্য্যী [ন্] (পুং) যস্য নির্দিশ্যতে কার্য্যং সঃ। ইতি দুর্গাদাসঃ॥ কর্ম্মার্থী। ইতি কার্পটশব্দার্থে হেমচন্দ্রঃ॥

কার্শ্যঃ ( পুং ) কার্ষ্যঃ। সালবৃক্ষঃ। ইত্যমরটীকায়াং ভরতঃ॥ কচ্চূরঃ। লকুচঃ। ইতি রাজনির্ঘণ্টঃ॥ কৃশতায়াং ক্লী॥

কাশ্মরী (স্ত্রী) কাশ্মরী। গম্ভারীবৃক্ষঃ। ইত্যমরটীকায়াং ভরতঃ॥

কার্ষকঃ ( পুং ) কর্ষকঃ। ইত্যমরটীকায়াং রায়মুকুটঃ॥

কার্ষাপণঃ ( পুং ক্লী ) কার্ষিকঃ। ষোড়শপণঃ। ইতি মেদিনী॥ রূপ্যকর্ষকৃতব্যবহারদ্রব্যং। লোকে তু তন্মূল্যে ষোড়শপণসমুদায়ে কার্ষাপণস্যোপচারেণ প্রবৃত্তিঃ তথাহি শাস্ত্রীয়ো রজতমাষো দ্বিকৃষ্ণলঃ। দ্বে কৃষ্ণলে সমধৃতে বিজ্ঞেয়ো রূপ্যমাষকঃ। ইতি মনুঃ॥ আদ্যে কৃতযুগে রজতকৃষ্ণলয়োর্দ্দশগণ্ডা মূল্যমিতি দ্বাত্রিংশতা কৃষ্ণলাভী রজতকর্ষস্য ষোড়শপণা এব মূল্যং। কর্ষস্যায়ং কার্ষঃ ষঃ কার্ষ আপণে ব্যবহারোঽত্রেতি কার্ষাপণঃ। পুরাণশব্দশ্চাত্র কার্ষিকং পুরাণঞ্চ কার্ষাপণ ইতি বোপালিতঃ। ইত্যমরটীকায়াং ভরতঃ॥

কার্ষিকঃ ( পুং ) কার্ষাপণঃ। ইত্যমরঃ॥ কৃষকঃ। ইতি হেমচন্দ্রঃ॥

কার্ষ্ণিঃ ( পুং ) কামদেবঃ। ইতি ত্রিকাণ্ডশেষঃ॥ কৃষ্ণস্যাপত্যং। ইতি মুগ্ধবোধং॥

কার্ষ্ণী ( স্ত্রী ) শতাবরী। ইতি রাজনির্ঘণ্টঃ॥

কার্ষ্যঃ ( পুং ) সালবৃক্ষঃ। ইত্যমরঃ॥

কাল ৎ ক কালোপদেশে। ইতি কবিকল্পদ্রুমঃ॥ যথা অচকালৎ কালমিয়ত্তয়া গণকঃ। এতাবতী বেলেতি কথিতবানিত্যর্থঃ। ইতি দুর্গাদাসঃ॥

কালং ( ক্লী ) লৌহং। ইতি বাচস্পতিরিত্যমরটীকায়াং ভরতঃ॥ ককোলকং। ইতি রাজনির্ঘণ্টঃ॥ কালীয়কং। ইতি শব্দচন্দ্রিকা॥

কালঃ ( পুং ) ক্ষণদণ্ডমুহূর্ত্তপ্রহরদিনরাত্রিপক্ষমাসায়নবৎসরাদিঃ। ইতি দুর্গাদাসঃ॥ তৎপর্য্যায়ঃ। দিষ্টঃ ২ অনেহা ৩ সময়ঃ ৪। ইত্যমরঃ॥ জন্যানাং জনকঃ কালো জগতামাশ্রয়ো মতঃ। পরাপরত্বধীহেতুঃ ক্ষণাদিঃ স্যাদুপাধিতঃ॥ অস্য গুণাঃ। সংখ্যা ১ পরিমিতিঃ ২ পৃথক্ত্বং ৩ সংযোগঃ ৪ বিভাগঃ ৫। ইতি ভাষাপরিচ্ছেদঃ॥ অনাদিনিধনঃ কালো রুদ্রঃ সঙ্কর্ষণঃ স্মৃতঃ। কলনাৎ সর্ব্বভূতানাং স কালঃ পরিকীর্ত্তিতঃ॥ ইতি তিথ্যাদিতত্ত্বং॥ *॥ যমঃ। কৃষ্ণবর্ণঃ। কৃষ্ণগুণবতি ত্রি। ইত্যমরঃ॥ মৃত্যুঃ। মহাকালঃ। ইতি মেদিনী॥ শনিঃ। ইতি দীপিকা॥ কাসমর্দ্দঃ। রক্তচিত্রকঃ। রালঃ। কোকিলঃ। ইতি রাজনির্ঘণ্টঃ॥

কালকং (ক্লী) কালশাকং। ইতি ভাবপ্রকাশঃ॥ যকৃৎ। ইতি হেমচন্দ্রঃ॥

কালকঃ (পুং) জতুকঃ। জড়ুর ইতি ভাষা। ইত্যমরঃ॥ অলগর্দ্দসর্পঃ। ইতি শব্দরত্নাবলী॥

কালকটঙ্কটঃ (পুং) শিবঃ। শালকটঙ্কটোঽপি পাঠঃ। ইতি দানধর্ম্মে শিবসহস্রনামসু পঠিতঃ॥

কালকণ্ঠঃ (পুং) শিবঃ। পীতসারঃ। ময়ূরঃ। খঞ্জনঃ। কলবিঙ্কঃ। দাত্যূহপক্ষী। ইতি মেদিনী॥

কালকণ্ঠকঃ (পুং) দাত্যূহপক্ষী। ইত্যমরঃ॥

কালকন্দকঃ (পুং) জলসর্পঃ। ইতি শব্দরত্নাবলী॥

কালকর্ণিকা (স্ত্রী) অলক্ষ্মীঃ। ইতি হেমচন্দ্রঃ॥

কালকর্ণী (স্ত্রী) অলক্ষ্মীঃ। ইতি শব্দরত্না-

কালকা (স্ত্রী) কালকেয়নামাসুরগণমাতা। ইতি জটাধরঃ॥

কালকীলঃ (পুং) কোলাহলঃ। ইতি শব্দরত্নাবলী॥

কালকুণ্ঠঃ (পুং) যমঃ। ইতি শব্দমালা॥

কালকুষ্টং (ক্লী) কঙ্কুষ্টং। পর্ব্বতীয়মৃত্তিকাবিশেষঃ। ইতি রাজনির্ঘণ্টঃ॥

কালকূটং (ক্লী) বোলং। বিষং। ইতি রাজনির্ঘণ্টঃ॥

কালকূটঃ (পুং ক্লী) স্থাবরবিষভেদঃ। ইত্যমরঃ॥

কালকূটকঃ (পুং) কারস্করবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কালকৃৎ (পুং) সূর্য্যঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কালকৃতঃ (পুং) সূর্য্যঃ। ইতি শব্দরত্নাবলী॥ কালজাতে ত্রি। যথা। সর্ব্বং কালকৃতং মন্যে কালো হি বলবত্তরঃ। ইতি পুরাণং॥

কালখঞ্জনং (ক্লী) যকৃৎ। ইতি হেমচন্দ্রঃ॥

কালখণ্ডং (ক্লী) যকৃৎ। দক্ষিণকুক্ষিস্থমাংসখণ্ডং। ইত্যমরঃ॥

কালগ্রন্থিঃ (পুং) বৎসরঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কালঙ্কতঃ (পুং) বৃক্ষবিশেষঃ। কালকাসুন্দে ইতি ভাষা। তৎপর্য্যায়ঃ। অরিমর্দ্দঃ ২ কাসমর্দ্দঃ ৩ কর্কশঃ ৪। ইতি রত্নমালা॥

কালচক্রং (ক্লী) কালরূপচক্রং। যথা। কালো দ্বিবিধোঽবসর্পিণ্যুৎসর্পিণীবভেদতঃ। সাগরকোটিকোটীনাং বিংশত্যা স সমাপ্যতে॥ অবসর্পিণ্যাং ষড়রা উৎসর্পিণ্যাং ত এব বিপরীতাঃ। এবং দ্বাদশভিররৈর্বিবর্ত্ততে কালচক্রমিদং॥ ইতি হেমচন্দ্রঃ॥ জ্যোতিশ্চক্রবিশেষঃ। যথা। ত্রিনাভিমতি পঞ্চারে ষণ্নেমিন্যক্ষয়াত্মকে। সম্বৎসরময়ে কৃৎস্নং কালচক্রং প্রতিষ্ঠিতং॥ ইতি বিষ্ণুপুরাণে ২ অংশে ৮ অধ্যায়ঃ॥ চক্রমেবোপাসনার্থং বিশিন্যন্নাহ। ত্রিনাভিমতীতি। নাভিঃ স্তম্ভঃ যত্রাক্ষঃ প্রোতঃ স চ ত্রিমেখলঃ। অহশ্চাত্র নাভিত্বেনোপাস্যত্বাৎ মেখলারূপাস্তিস্রো নাভয়ঃ পূর্ব্বাহ্নমধ্যাহ্নাপরাহ্না স্তদ্যুক্তে। পঞ্চারে পঞ্চ সম্বৎসরপরিবৎসরাদয়ো বক্ষ্যমাণা অরাঃ শলাকা যস্য সঃ তস্মিন্। ষণ্নেমিনি ষট্ ঋতবো নেময়ঃ

প্রান্তবলয়ানি ভবতি। কালাত্মকত্বাদক্ষয়াত্মকে। সংবৎসরময়ে সংবৎসরাবয়বমাসারম্ভকত্বাৎ সম্বৎসরম্বেনোপাস্যত্বাচ্চ তন্ময়ং। তদুক্তং মাৎস্যে। অহস্ত্রিনাভিঃ সূর্য্যস্য হ্যেকচক্রস্য বৈ স্মৃতং। অরাঃ সংবৎসরাঃ পঞ্চ নেম্যঃ ষড়্‌তবঃ স্মৃতাঃ॥ ইতি। তস্মিন্ কালচক্রং কালোপলক্ষণভূতং কৃৎস্নং জ্যোতিশ্চক্রং প্রতিষ্ঠিতং আশ্রিতং। সূর্য্যগত্যধীনত্বাৎ কালচক্রফলস্য। ইতি তট্টীকায়াং শ্রীধরস্বামী॥

কালজ্ঞঃ (পুং) কুক্কুটঃ। ইতি রাজনির্ঘণ্টঃ॥

কালঞ্জরঃ (পুং) যোগিচক্রমেলকং। ভৈরবঃ। পর্ব্বতবিশেষঃ। ইতি মেদিনী॥ দেশবিশেষঃ। ইতি ধরণী॥

কালঞ্জরী (স্ত্রী) চণ্ডী। ইতি ধরণী॥ কালঞ্জরা ইতি রূপান্তরং॥

কালতালঃ (পুং) তমালবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কালধর্ম্মঃ (পুং) মৃত্যুঃ। ইত্যমরঃ॥ সময়স্য স্বভাবঃ॥

কালনির্যাসঃ (পুং) গুগ্‌গুলুঃ। ইতি রত্নমালা॥

কালনেমিঃ (পুং) স্বনামখ্যাতরাক্ষসঃ। যথা। কালনেমিং দুরাধর্ষং রক্ষঃপরমদুর্জ্জয়ং। চতুরাস্যং চতুর্হস্তমষ্টনেত্রং ভয়াবহং॥ ইতি রামায়ণং॥ দৈত্যবিশেষঃ। যথা। আত্মানমিহ সংজাতং জানন্ প্রাগ্বিষ্ণুনা হতং। মহাসুরং কালনেমিং যদুভিঃ স ব্যরুধ্যত॥ ইতি শ্রীভাগবতং॥ স তু হিরণ্যকশিপুপুত্রঃ। ইতি হরিবংশঃ॥

কালনেমিরিপুঃ (পুং) বিষ্ণুঃ। ইতি শব্দরত্নাবলী॥

কালনেমিহা [ন্] (পুং) বিষ্ণুঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কালনেমী [ন্] (পুং) কালনেমিঃ। ইতি দ্বিরূপকোষঃ॥

কালনেম্যরিঃ (পুং) বিষ্ণুঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কালপর্ণঃ (পুং) তগরবৃক্ষঃ। ইতি শব্দরত্নাবলী॥

কালপালকং (ক্লী) কঙ্কুষ্টমৃত্তিকা। ইতি রাজনির্ঘণ্টঃ॥

কালপীলুকঃ (পুং) কুপীলুঃ। ইতি ভাবপ্রকাশঃ॥

কালপুরুষঃ (পুং) যমসহায়ঃ। ইতি জটাধরঃ॥ জ্যোতিঃশাস্ত্রং। যথা। কিন্ত্বস্য কালপুরুষাখ্যমহার্ণবস্য গচ্ছেৎ কদাচিদনৃষির্মনসাপি পারং। কালপুরুষঃ স চাখ্যা নাম যস্যাসৌ তস্য জ্যোতিঃশাস্ত্রবিস্তীর্ণসমুদ্রস্য। ইতি ভট্টোৎপলঃ॥ *॥ নরাণাং শুভাশুভজ্ঞানার্থং জন্মলগ্নাদিদ্বাদশরাশিকল্পিতপুরুষাকারঃ। যথা। শীর্ষমুখবাহুহৃদয়োদরাণি কটিবস্তিগুহ্যসংজ্ঞকানি। ঊরূ জানুকজঙ্ঘে চরণাবিতি চ রাশয়োঽজাদ্যাঃ॥ ইতি দীপিকা॥ *॥ নরাণাং শুভাশুভজ্ঞানার্থং জন্মলগ্নাদিরাশিদ্রেক্কাণঘটিতপুরুষাকারঃ। যথা। কং দৃক্‌শ্রোত্রনসাকপোলহনবো বক্ত্রঞ্চ হোরাদয়স্তে কণ্ঠাংশকবাহুপার্শ্বহৃদয়ক্রোড়ানি নাভিস্ততঃ। বস্তিঃ শিশ্নগুদে ততশ্চ বৃষণাবূরূ ততো

জামুনী জঙ্ঘাজ্ঘ্রী হৃভৃভয়ত্র বামমুদিতৈ-
দ্রেক্কাণভাগৈস্ত্রিধা॥ ইতি কালনরস্যাঙ্গে
সদসদ্‌গ্রহযোগতঃ। পুংসামপি তদঙ্গেষু
শুভাশুভফলং বদেৎ ॥ ইতি বৃহ-
জ্জাতকং ॥

কালপৃষ্ঠং (ক্লী) কর্ণধনুঃ। ধনুর্মাত্রং। ইতি
হেমচন্দ্রঃ ॥

কালপৃষ্ঠঃ (পুং) কঙ্কপক্ষী। মৃগবিশেষঃ।
ইতি হেমচন্দ্রঃ ॥

কালপেষী (স্ত্রী) শ্যামালতা। ইতি রত্নমালা॥

কালপ্রভাতং (ক্লী) শরদৃতুঃ। শরৎকালঃ।
ইতি ত্রিকাণ্ডশেষঃ ॥

কালবলনং (ক্লী) বর্ম্ম। ইতি ত্রিকাণ্ডশেষঃ ॥
কায়বলনমিতি সাধুপাঠঃ ॥

কালভাণ্ডিকা (স্ত্রী) মঞ্জিষ্ঠা। ইতি রাজ-
নির্ঘণ্টঃ ॥

কালমানঃ (পুং) কৃষ্ণার্জকঃ। কালতুলসী
ইতি ভাষা। ইতি রত্নমালা ॥ রাজনির্ঘণ্টে
লাস্তশব্দোঽয়ং ॥

কালমুষ্ককঃ (পুং) ঘণ্টাপারলিবৃক্ষঃ। ইতি
রত্নমালা ॥

কালমূলঃ (পুং) রক্তচিত্রকবৃক্ষঃ। ইতি
রাজনির্ঘণ্টঃ ॥

কালমেশিকা (স্ত্রী) কালমেষিকা। ইত্যমর-
টীকায়াং রায়মুকুটঃ ॥

কালমেশী (স্ত্রী) কালমেষিকা। ইত্যমর-
টীকায়াং ভরতঃ ॥

কালমেষিকা (স্ত্রী) মঞ্জিষ্ঠা। কৃষ্ণত্রিবৃতা।
ইত্যমরঃ

কালমেষী (স্ত্রী) সোমরাজী। ইত্যমরঃ ॥

মঞ্জিষ্ঠা। ইতি শব্দরত্নাবলী॥ ত্রিবৃৎ।
ইতি রাজনির্ঘণ্টঃ ॥

কালরাত্রিঃ (স্ত্রী) ভীমরথী। ইতি হারাবলী ॥
রাত্রিবিশেষঃ। সা তু কালঃ সংহারঃ
মরণং তদুপলক্ষিতা রাত্রিঃ কল্পান্তরাত্রি-
রিত্যর্থঃ। ইতি দেবীমাহাত্ম্যটীকায়াং
বিদ্যাবিনোদঃ॥ দুর্গায়াঃ শক্তিবিশেষঃ।
যথা। সা দুর্গা শক্তিভিঃ সার্দ্ধং কাশীং
রক্ষতি সর্ব্বতঃ। তাঃ প্রযত্নেন সংপূজ্যাঃ
কালরাত্রিমুখানরৈঃ॥ ইতি কাশীখণ্ডং ॥

কালরুদ্রঃ (পুং) কালাগ্নিরুদ্রঃ। যথা। যেয়ু
নঃ কালরুদ্রস্য নানাস্ত্রীশতসঙ্কুলা। বিচিত্র-
হর্ম্ম্যবিন্যাসা কৃতস্তে মেরুপৃষ্ঠতঃ ॥ সা
এব কালরুদ্রস্য তনুরূপেণ সংস্থিতা।
ইতি দেবীপুরাণং ॥

কাললবণং (ক্লী) বিড়্‌লবণং। ইতি রত্নমালা॥

কাললৌহং (ক্লী) কালায়সং। তিখা ইতি
ভাষা। তৎপর্য্যায়ঃ। কৃষ্ণায়সং ২ রুক্মং ৩
তীক্ষ্ণং ৪। ইতি রত্নমালা ॥

কালবৃন্তঃ (পুং) কুলত্থবৃক্ষঃ। ইতি রত্নমালা॥

কালবৃন্তী (স্ত্রী) পাটলাবৃক্ষঃ। ইতি রাজ-
নির্ঘণ্টঃ ॥

কালবেলা (স্ত্রী) ক্রিয়ানর্হকালবিশেষঃ। সা
তু রব্যাদিবারে কালস্য শনেস্তত্তদ্‌যামার্দ্ধ-
রূপবেলা। যথা। রবৌ দিবা পঞ্চমযামার্দ্ধং
নক্তং ষষ্ঠযামার্দ্ধং। সোমে দিবা দ্বিতীয়-
যামার্দ্ধং নক্তং চতুর্থযামার্দ্ধং। কুজে
দিবা ষষ্ঠযামার্দ্ধং নক্তং দ্বিতীয়যামার্দ্ধং।
বুধে দিবা তৃতীয়যামার্দ্ধং নক্তং সপ্তম-
যামার্দ্ধং। গুরৌ দিবা সপ্তমযামার্দ্ধং নক্তং

পঞ্চমযামার্দ্ধং। শুক্রে দিবা চতুর্থযামার্দ্ধং নক্তং তৃতীয়যামার্দ্ধং। শনৌ দিবা প্রথমাষ্টমযামার্দ্ধং নক্তং তদেব। ইতি দীপিকা॥

কালশাকং (ক্লী) স্বনামখ্যাতশাকং। নরচা ইতি হিন্দী ভাষা। তৎপর্য্যায়ঃ। নাড়িকং ২ শ্রাদ্ধশাকং ৩ কালকং ৪। অস্য গুণাঃ। সারকত্বং। রুচিবায়ুবলকারিত্বং। কফশোথরক্তপিত্তনাশিত্বং। মেধ্যত্বং। হিমত্বঞ্চ। ইতি ভাবপ্রকাশঃ॥ তিক্তপূতিকা। কুলত্থশাকং ইতি কেচিৎ। অস্য গুণাঃ। কটুত্বং। অগ্নিদীপনত্বং। গুরুত্বং। শোথনাশিত্বঞ্চ। ইতি রাজবল্লভঃ॥

কালশালিঃ (পুং) কৃষ্ণশালিঃ। ইতি রাজনির্ঘণ্টঃ॥

কালশেয়ং (ক্লী) কালসেয়ং। ঘোলং। ইত্যমরটীকায়াং ভরতঃ॥

কালসংরোধঃ (পুং) চিরকালাবস্থানং। ইতি মিতাক্ষরা॥ যথা। ন চাধেঃ কালসংরোধান্নিসর্গোঽস্তি ন বিক্রয়ঃ। ইতি যাজ্ঞবল্ক্যঃ॥

কালসর্পঃ (পুং) কৃষ্ণসর্পঃ। তৎপর্য্যায়ঃ। অলগর্দ্ধঃ ২ মহাবিষঃ ৩। ইতি ত্রিকাণ্ডশেষঃ॥

কালসারং (ক্লী) পীতচন্দনং। ইতি ভাবপ্রকাশঃ॥

কালসারঃ (পুং) স্বনামখ্যাতহরিণঃ। তৎপর্য্যায়ঃ। কৃষ্ণসারঃ ২। ইতি শব্দরত্নাবলী॥

কালসূত্রং (ক্লী) নরকবিশেষঃ। ইত্যমরঃ॥ তত্তু কুলালচক্রসূত্রচ্ছেদনরূপং। ইতি মনুঃ॥

কালসেয়ং (ক্লী) ঘোলং। ইত্যমরঃ॥

কালস্কন্ধঃ (পুং) তমালবৃক্ষঃ। তিন্দুকবৃক্ষঃ। জীবকক্রমঃ। ইতি মেদিনী॥ তুম্বুখদিরঃ। উডুম্বরঃ। ইতি রাজনির্ঘণ্টঃ॥

কালা (স্ত্রী) নীলিনী। কৃষ্ণত্রিবৃতা। কৃষ্ণজীরকঃ। ইত্যমরঃ॥ মঞ্জিষ্ঠা। ইতি মেদিনী॥ কুলিকবৃক্ষঃ। কালিয়াকড়া ইতি ভাষা। ইতি রত্নমালা॥ অশ্বগন্ধাবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥ পাটলাবৃক্ষঃ। ইতি ভাবপ্রকাশঃ॥

কালাগুরু (ক্লী) কৃষ্ণাগুরু। ইত্যমরঃ॥

কালাগ্নিঃ (পুং) পঞ্চমুখরুদ্রাক্ষঃ। যথা স্কান্দে। পঞ্চবক্ত্রঃ স্বয়ং রুদ্রঃ কালাগ্নির্নাম নামতঃ। অগম্যাগমনাচ্চৈব অভক্ষ্যস্য চ ভক্ষণাৎ॥ মুচ্যতে সর্ব্বপাপেভ্যঃ পঞ্চবক্ত্রস্য ধারণাৎ। ইতি তিথ্যাদিতত্ত্বং॥

কালাগ্নিরুদ্রঃ (পুং) সংহারকারিরুদ্রঃ। যথা। কালাগ্নিরুদ্র ঋষিরিত্যাদি বৈদিকসন্ধ্যায়াং রুদ্রোপস্থানং॥ *॥ তদ্বিবরণং যথা। শক্র উবাচ। ভগবংস্তব বাক্যানাং ন তৃপ্তির্ভবতে মম। কালাগ্নিপার্থিবং মানং শ্রোতুমিচ্ছামি তত্ত্বতঃ॥ ভগবানুবাচ। ন হি পার্থিবদ্বীপেষু মেরুপৃষ্ঠেঽপি বাসব। ভোগাহ্লাদকরা নৃণাং তথা পাতালবাসিষু॥ যেষু নঃ কালরুদ্রস্য নানাস্ত্রীশতসংকুলা। বিচিত্রহর্ম্ম্যবিন্যাসা কৃতস্তে মেরুপৃষ্ঠতঃ॥ সা এব কালরুদ্রস্য

তন্মুরূপেণ সংস্থিতা। সা পরাশিবভাবেন পরমাপদদায়িকা ॥ তস্যা যদ্দুঃসহং তেজো ব্রহ্মাদীনাং ক্ষয়ংকরং। তং বিদ্ধি কালরুদ্রেতি সৌম্যরূপং সদাশিবং ॥ কালাগ্নিব্যসনং লক্ষং যোজনানাং প্রমাণতঃ। অর্দ্ধেনোচ্ছ্রয়তস্তস্য পাদাঃ পাদেন বাসব ॥ সিংহরূপা মহাঘোরা মহানক্রা মহাবলাঃ। কালাগ্নিরুদ্ররূপো যো বহুরূপসমাবৃতঃ ॥ অনন্তপদ্মরূপশ্চ ধাতারঃ কারণেশ্বরঃ। দারুণাগ্নিশ্চ রুদ্রশ্চ যমহন্তা ক্ষমান্তকঃ ॥ লোহিতঃ ক্রূরতেজাত্মা ঘনো বৃষ্টির্বলাহকঃ। বিদ্যুতশ্চলশীঘ্রশ্চ প্রসন্নঃ শান্তসৌম্যদৃক্ ॥ সর্ব্বজ্ঞো বিবিধো বুদ্ধো দ্যুতিমান্ দীপ্তিসুপ্রভঃ। এতে রুদ্রা মহাত্মানঃ কালিকাশক্তিবৃংহিতাঃ ॥ সংহরন্তি সমস্তেদং ব্রহ্মাদ্যং সচরাচরং। কালাগ্নিভুবনীশোঽয়ং বহুকোটিভিরাবৃতঃ ॥ তস্যাঃ পুরস্য বিস্তারং শতকোটিসুবর্ত্তুলা। দেবগন্ধর্ব্বসিদ্ধানাং তত্র ভোগাঃ সুদুর্লভাঃ ॥ পূর্ব্বোত্তরপরা পঙ্ক্তির্যাম্যোত্তরস্থিতা পরা। অনলানিলপরা চ নৈর্ঋতীশানগাপরা ॥ এতেষাং মধ্যতো রাজন্ কালরুদ্রস্তু শোভনে। পঙ্ক্ত্যাকারৈঃ পুরৈঃ সর্ব্বং কটকং তস্য সংস্থিতং ॥ সমন্তাদ্বেষ্টিতবনং প্রাকারাট্টালগোপুরৈঃ। বজ্রেন্দ্রনীলবৈদূর্য্যৈঃ প্রাকারৈঃ সর্ব্বতোঽন্বিতং ॥ কালাগ্নিনরকান্তে তু পুরং কালস্য সংস্থিতং। পঞ্চাশল্লক্ষবিস্তারং সমন্তাৎ পরিবর্ত্তুলং ॥ জাম্বুনদময়ৈর্হৈমৈঃ খচিতং রত্নধাতুভিঃ। প্রমদাজনসংজুষ্টং নানাবর্ণসমাবৃতং ॥ কামোন্মত্তপ্রমত্তৈশ্চ তত্রাতি জনসংকুলং। কালস্য ভুবনং দিব্যং বৃত্তাকারং মনোহরং ॥ বেষ্টিতং হেমপ্রাকারৈর্যোজনাযুতমুচ্ছ্রিতং। প্রাকারাবহির্দণ্ডান্তে অন্তরং যোজনাযুতং ॥ অগ্নিজ্বালৈশ্চ নিবিড়ৈর্ভয়দৈঃ কিংশুকপ্রভৈঃ। হরিতালনিভা জ্বালা সিন্দুরগৈরিকাপ্রভা ॥ অত ঊর্দ্ধং প্রজজ্বাল বাতোদ্ধূতাগ্নিভাস্বরা। বীচিতরঙ্গকল্লোলজ্বালামালাকুলাম্বরা ॥ প্রবৃত্তাস্তাঃ প্রমাণেন যোজনদ্বয়কোটয়ঃ। অষ্টানবতিলক্ষাণি জ্বালা ঊর্দ্ধস্ততঃ শিলা ॥ বজ্রভূতা সদা তপ্তা তস্য তেজোনিয়ামিকা। চত্বারি কোটিমানেন কারণেন তু স্থাপিতা ॥ তস্যার্দ্ধেন ভবেৎ কিঞ্চিৎ কোট্যশ্চত্বারি বাসব। এবং কালাগ্নিরুদ্রস্য মাহাত্ম্যং কীর্ত্তিতং ময়া ॥ শ্রবণাৎ সর্ব্বপাপানি শমন্তে কালজান্যপি। ইত্যাদ্যে দেবীপুরাণে কালাগ্নিরুদ্রপুরকথনং ॥

কালাঞ্জনী (স্ত্রী) ক্ষুপবিশেষঃ। কালিকর্পাসিকিনী ইতি খ্যাতা। তৎপর্য্যায়ঃ। অঞ্জনী ২ রেচনী ৩ শিলাঞ্জনী ৪ নীলাঞ্জনী ৫ কৃষ্ণাভা ৬ কালী ৭ কৃষ্ণাঞ্জনী ৮। অস্যা গুণাঃ। কটুত্বং। উষ্ণত্বং। অমলত্বং। কৃমিশোধনত্বং। অপানাবর্ত্তশমনত্বং। জাঠরাময়নাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

কালাম্বুনাদী [ ন্ ] ( পুং ) রোলম্বঃ। ভ্রমরঃ। কলবিঙ্কঃ। চটা ইতি ভাষা। কপিঞ্জলঃ। চাতকপক্ষী। ইতি মেদিনী ॥

কালানুশারিবা (স্ত্রী) তগরপাদিকং। তগর-মূল ইতি ভাষা॥ শীতলীজটা। শীউলী-ছোপ্ ইতি ভাষা। ইতি রত্নমালা॥

কালানুসারকং (ক্লী) তগরং। ইতি রাজ-নির্ঘণ্টঃ॥ পীতচন্দনং। ইতি ভাব-প্রকাশঃ॥

কালানুসারিঃ (পুং) শৈলেয়ং। শৈলজনাম-গন্ধদ্রব্যং। ইতি শব্দরত্নাবলী॥

কালানুসার্য্যং (ক্লী) শৈলেয়ং। শৈলজ ইতি ভাষা। কালীয়কং। কালীয়ানামপীতবর্ণ-সুগন্ধিকাষ্ঠং। ইত্যমরঃ॥ শিংশপাবৃক্ষঃ। শিশু ইতি ভাষা। ইতি মেদিনী॥ তগরং। ইতি ভাবপ্রকাশঃ॥

কালানুসার্য্যকং (ক্লী) শৈলেয়ং। ইতি রাজ-নির্ঘণ্টঃ॥

কালান্তরবিষঃ (পুং) মুষিকাদিঃ। ইতি হেম-চন্দ্রঃ॥

কালাপঃ (পুং) সর্পভোগঃ। রাক্ষসঃ। ইতি ধরণী॥ কলাপব্যাকরণবেত্তরি ত্রি॥

কালায়সং (ক্লী) লৌহং। ইত্যমরঃ॥

কালিকং (ক্লী) কৃষ্ণচন্দনং। তৎপর্য্যায়ঃ। কালীয়ং ২ কালীয়কং ৩ হরিপ্রিয়ং ৪। ইতি শব্দচন্দ্রিকা॥ সাময়িকে ত্রি॥

কালিকঃ (পুং) ক্রৌঞ্চঃ। ইতি শব্দ-রত্নাবলী॥

কালিকা (স্ত্রী) চণ্ডিকাভেদঃ। কালী। তন্নামকারণং যথা। সর্ব্বে সুরগণাঃ সেন্দ্রাস্ততো গত্বা হিমাচলং। গঙ্গাবতার-নিকটে মহামায়াং প্রতুষ্টুবুঃ॥ অনেক-সংস্তুতা দেবী তদা সর্ব্বামরোৎকরৈঃ। মাতঙ্গবনিতামূর্ত্তির্ভূত্বা দেবানপৃচ্ছত॥ যুষ্মাভিরমরৈরত্র স্তূয়তে কা চ ভাবিনী। কিমর্থমাগতা যূয়ং মাতঙ্গস্যাশ্রমং প্রতি। এবং ব্রুবন্ত্যা মাতঙ্গ্যাস্তস্যাস্তু কায়-কোষতঃ। সমুদ্ভূতাব্রবীদ্দেবী মাং স্তুবন্তি সুরা ইতি॥ শুম্ভো নিশুম্ভো হ্যসুরৌ বাধেতে সকলান্ সুরান্। তস্মাত্তয়ো-র্ব্বধায়াহং স্তূয়েঽদ্য সকলৈঃ সুরৈঃ॥ বিনিঃসৃতায়াং দেব্যাস্তু মাতঙ্গ্যাঃ কায়ত-স্তদা। ভিন্নাঞ্জননিভা কৃষ্ণা সাভূৎ গৌরী ক্ষণাদপি॥ কালিকাখ্যাভবৎ সাপি হিমাচল-কৃতাশ্রয়া। তামুগ্রতারাং ঋষয়ো বদন্তীহ মনীষিণঃ॥ উগ্রাদপি ভয়াত্রাতি যস্মাদ্-ভক্তান্ সদাম্বিকা। এতস্যাঃ প্রথমং বীজং কথিতং তন্ত্রমেব চ॥ এষৈবৈক-জটা খ্যাতা যস্মাত্তস্যা জটৈকিকা। শৃণুতং চিন্তনং চাস্যাঃ সম্যগ্বেতাল-ভৈরবৌ॥ যথা ধ্যাত্বা মহাদেবীং ভক্তঃ প্রাপ্নোত্যভীপ্সিতং। চতুর্ভুজাং কৃষ্ণবর্ণাং মুণ্ডমালাবিভূষিতাং॥ খড়্গং দক্ষিণ-পাণিভ্যাং বিভ্রতীন্দীবরং দ্বয়ং। কর্ত্রীঞ্চ খর্পরঞ্চৈব ক্রমাদ্বামেন বিভ্রতীং॥ খং লিখন্তীং জটামেকাং বিভ্রতীং শিরসা স্বয়ং। মুণ্ডমালাধরাং শীর্ষে গ্রীবায়ামপি সর্ব্বদা॥ বক্ষসা নাগহারন্তু বিভ্রতীং রক্তলোচনাং। কৃষ্ণবস্ত্রধরাং কট্যাং ব্যাঘ্রাজিনসমন্বিতাং॥ বামপাদং শবহৃদি সংস্থাপ্য দক্ষিণং পদং। বিন্যস্য সিংহ-পৃষ্ঠে তু লেলিহানাসবং স্বয়ং॥ সাট্টহাস-মহাঘোররাবযুক্তাতিভীষণা। চিন্ত্যোগ্র-

তারা সততং ভক্তিমদ্ভিঃ সুখেপ্সুভিঃ॥ এতস্যাঃ সংপ্রবক্ষ্যামি যা অষ্টৌ যোগিনী-স্তু তাঃ। মহাকাল্যথ রুদ্রাণী উগ্রা ভীমা তথৈব চ॥ ঘোরা চ ভ্রামরী চৈব মহারাত্রিশ্চ সপ্তমী। ভৈরবী চাষ্টমী প্রোক্তা যোগিনীস্তাঃ প্রপূজয়েৎ॥ ইতি কালিকাপুরাণে উত্তরতন্ত্রে ৬০ অধ্যায়ঃ॥ কাঞ্চ্যং। বৃশ্চিকপত্রবৃক্ষঃ। ক্রমদেয়-বস্তুমূল্যং। ধূসরী। নবমেঘঃ। পটোল-শাখা। রোমালী। মাংসী। কাকী। শিবা। মেঘাবলিঃ। ইতি মেদিনী॥ স্বর্ণদোষঃ। ইতি জটাধরঃ॥ ক্ষীরকীটঃ। ইতি হারাবলী॥ মসী। ইতি শব্দরত্না-বলী॥ কাকোলী। শ্যামাপক্ষী। ইতি রাজনির্ঘণ্টঃ॥ প্রতিমাসীয়া বৃদ্ধিঃ। যথা। প্রতিমাসং স্রবতি যা বৃদ্ধিঃ সা কালিকা মতা। ইতি বিবাদার্ণবসেতৌ নারদঃ॥ সুরা। ইতি হেমচন্দ্রঃ॥ কুজ্ঝটিকা। ইত্যমরটীকায়াং ভরতঃ॥ হিমাচলভবা ত্রিশিরা হরীতকী। সা গন্ধযোগকরণে প্রশস্তা। ইতি রাজবল্লভঃ॥

কালিকাব্রতং (ক্লী) অমাবাস্যায়াং স্ত্রীকর্ত্তব্য-ব্রতবিশেষঃ। যথা। যুধিষ্ঠির উবাচ। কালিকাব্রতমাহাত্ম্যং বদ বেদবিদাম্বর। কিমেতস্য ফলং দেব কো বা তদ্বিধি-রেব চ॥ কস্মাদ্ব্রতমিদং ভূতং মর্ত্যে কেন প্রকাশিতং। ত্বত্তস্তৎ শ্রোতুমিচ্ছামি তৎ সর্ব্বং ব্রূহি কেশব॥ শ্রীকৃষ্ণ উবাচ। পুরা ভবিষ্যশাস্ত্রেষু যদুক্তং ধর্ম্মসংহিতং। তৎ সর্ব্বং শৃণু রাজেন্দ্র কালিকাব্রতমুত্তমং॥ স্বর্গে পুরন্দরশ্চাসীত্তস্যৈব রাজসদ্মনি যদ্বৃত্তান্তমভূত্তত্র তচ্ছৃণুষ্ব যুধিষ্ঠির॥ সভায়াং সংস্থিতো রাজা নৃত্যাসক্তো হি নিত্যশঃ। দিনৈকস্য চ বৃত্তান্তং শ্রুত্বা হৃষ্টো বভূব সঃ॥ অত্যামোদং সমভ্যেত্য পুষ্পবৃষ্টি-রভূত্তদা। পুরন্দরঃ স্বয়ং প্রাপ্য পারি-জাতং গৃহীতবান্॥ ব্রাহ্মা রাজ্ঞা তদা পুষ্পং প্রদত্তং তদ্দ্বিজাতয়ে। লজ্জিতো ব্রাহ্মণঃ সোঽপি মানহীনোঽভবত্তদা॥ ক্রোধেন মহতাবিষ্টঃ শপ্তুং কামসম-ন্বিতঃ। ক্ষণং বিমৃষ্য চেন্দ্রায় শাপো দত্তঃ সুদারুণঃ॥ ব্যাধালয়েষু মার্জ্জারো দ্বাদ-শাব্দং ভবিষ্যসি। তেন কর্ম্মবিপাকেন মদযুক্তো বিচেতনঃ॥ প্রাপ্তমার্জ্জারদেহো-ঽসৌ রাজা বিপিনমাস্থিতঃ। পত্নী তস্য চ তত্রাসীৎ পত্যুঃ সর্ব্বাধিকারিণী॥ ততো ব্যাধগৃহে রাজা মার্জ্জারীভূয় তিষ্ঠতি। ততঃ পুরন্দরপুরং রাজশূন্যমভূত্তদা॥ শচী তু চিন্তয়ামাস অন্নপানং বিহায় সা। উপ-বাসং সমাচর্য্য মাসমেকন্তু তিষ্ঠতি॥ ততো দেবগণাঃ সর্ব্বে চিন্তয়া ব্যাকুলে-ন্দ্রিয়াঃ। গত্বা তু রাজভবনং ব্যাকুলাং তাং বিলোক্য চ॥ বিমৃষ্য চামরাঃ সর্ব্বে শচ্যৈ বাক্যমুদাহরন্। শচি ত্বং রাজ-জায়াসি কথমেতৎ করোষি চ॥ মাসমেক-মনাহারং কৃত্বা তিষ্ঠসি সুব্রতে। কিম্বা ত্বদীপ্সিতং দেবি সত্যেন বদ পণ্ডিতে॥ তচ্ছ্রুত্বা তু তদা দেবী কৃতাঞ্জলিরভাষত। যূয়মেব জগন্নাথাঃ সৃষ্টিস্থিত্যন্তকারকাঃ॥ ক গতো মম ভর্ত্তা চ তন্ন জানামি কথ্যতা

পরিচিন্ত্যামরাঃ সর্ব্বে ধ্যানমাস্থায় সংস্থিতাঃ॥ মার্জ্জাররূপমাস্থায় স্বীয়তে চান্ত্যজাশ্রমে। তচ্ছ্রুত্বা রাজপত্নী চ বেপমানা মুহুর্মুহুঃ॥ উবাচ কুশলং প্রশ্নং রাজার্থং কিং করোম্যহং। পত্যুর্যথা বিমোক্ষঃ স্যাৎ তৎ কুরুধ্বং সুধাশনাঃ॥ প্রত্যুচুশ্চামরাঃ সর্ব্বে যাহি ত্বং দ্বিজসন্নিধিং। সংভাব্য মধুরং প্রশ্নং দ্বিজসেবাং সমাচর॥ দ্বিজগেহং সমাগত্য দ্বিজসেবাপরাভবৎ। স তস্যাঃ প্রিয়কার্য্যেণ সন্তুষ্টো দ্বিজসত্তমঃ॥ হিংসাদ্রোহবিমুক্তশ্চ বলিহোমপরায়ণঃ। শান্তো দান্তঃ ক্ষমাযুক্তঃ সদা মধুরভাষিতঃ॥ সর্ব্বপ্রাণি হিতার্থী চ লোভমোহবিবর্জ্জিতঃ। জিতেন্দ্রিয়ো জিতক্রোধো বৃদ্ধোঽসৌ ব্রাহ্মণোত্তমঃ॥ রাজপত্ন্যাঃ সুসেবাভিঃ প্রীতোঽসৌ দ্বিজসত্তমঃ। প্রত্যুবাচ স তাং প্রীত্যা শচি ত্বং চাতিদুর্ল্লভে॥ কিম্বা ত্বদীপ্সিতং দেবি সত্যেন বদ পণ্ডিতে। শচ্যুবাচ। পাপং যজ্জ্ঞানতো ভর্ত্রা সমস্তং কর্ম্মণা কৃতং॥ তৎ ক্ষমস্ব মহাভাগ রক্ষস্ব সুরপালকং। বাসবস্তব শাপেন মার্জ্জারত্বমুপাগতঃ॥ ইন্দ্রো ব্যাধগৃহে দেব বিদ্যতে হি ন সংশয়ঃ। পুরন্দরস্য শাপান্তঃ কেনোপায়েন সিদ্ধ্যতি॥ ব্রাহ্মণ উবাচ। শচি ত্বং পতিভক্তাসি মদ্বাক্যমবধারয়। পতিব্রতে মহাভাগে কালিকাব্রতমাচর॥ দারুণং যৎ কৃতং তেন ব্রতেনৈব বিমুচ্যতে। কোপাৎ শাপো ময়া দত্তো তন্মোক্ষং কুরু সুব্রতে॥ শচ্যুবাচ।

বিধানং ব্রুহি মে ব্রহ্মন্ কালিকায়া ব্রতস্য চ। তদা তব প্রসাদেন করোমি তদ্ব্রতং দ্বিজ॥ ব্রাহ্মণ উবাচ। অশ্বত্থতরুমূলেঽস্তি বটকো নাম হিংসকঃ। তস্যৈব ভবনং গচ্ছ শাপান্মোক্ষং চ কারয়॥ পত্নী সুভদ্রা তস্যাস্তি পতিশুশ্রূষণে রতা। তস্যাঃ কুলব্রতং কর্ম্ম তৎপরা ভব শোভনে॥ ততশ্চ প্রাঙ্মুখীভূয় গত্বা সা তস্য মন্দিরং। দৃষ্ট্বা ব্যাধঃ শচীং দেবীং প্রত্যুবাচ সুভদ্রিকাং॥ আয়াস্তীয়ং শচী দেবী তস্যাঃ সম্ভাষণং কুরু। ইতি তস্য বচঃ শ্রুত্বা সুভদ্রা হৃষ্টমানসা॥ তস্যাঃ সম্ভাষণার্থন্তু সুভদ্রা চাগতা বহিঃ। তাঞ্চ দৃষ্ট্বা শচীং দেবীং সার্ঘ্যপাদ্যাদিকং দদৌ॥ শচি ত্বং রাজভার্য্যাসি কস্মাদাগমনং তব। কিং কার্য্যং কথয় ত্বং হি ইত্যুবাচ শচীং প্রতি॥ প্রত্যুবাচ শচী তান্তু ভর্ত্তা মে সুরপালকঃ। স চ ব্রাহ্মণশাপেন মার্জ্জারশ্চাভবদ্দ্রুতং॥ ক গতঃ প্রাণনাথোঽসাবিতি চিন্তাপরানিশং। জ্ঞাত্বা কেনাপ্যুপায়েন প্রাপ্তা চ ভবতীগৃহং॥ ইত্যুক্ত্বা রাজপত্ন্যা চ দৃষ্টো মার্জ্জারকস্তদা। সা জ্ঞাত্বা তং প্রিয়ং শক্রং চিন্তাং প্রাপ্তা দুরত্যয়াং॥ দৃষ্ট্বা মার্জ্জারতাং প্রাপ্তং বিললাপাকুলেন্দ্রিয়া। বিলপন্তীং শচীং দৃষ্ট্বা সুভদ্রা প্রত্যুবাচ তাং॥ পতিব্রতে মহাভাগে ত্বমেব রাজগেহিনী। ত্বং দুঃখেন বিলিপ্তাসি সন্দেহো নাস্তি তত্র বৈ॥ কিল তস্যাপ্যুপায়োঽস্তি কালিকাব্রতমাচর। অতিপ্রত্যক্ষরূপা সা অস্মাকং কুলদেবতা॥

কালিকা সা মহাদেবী শুভসন্ততিদায়িনী। ব্রতস্যাস্য প্রভাবেণ সাকল্যমুপজায়তে॥ শচ্যুবাচ। বিধানং চাস্য মে ব্রূহি কালিকায়া ব্রতস্য চ। মমোপদিশ্যতামেব তদ্ব্রতঞ্চ করোম্যহং॥ তস্যাস্তদ্বচনং শ্রুত্বা প্রত্যুবাচাথ সা তদা। শুদ্ধকালে সমারভ্য কৃষ্ণপক্ষে চতুর্দ্দশীং॥ সংকল্প্য বিধিনা পূর্ব্বমমাবাস্যাং ব্রতং চরেৎ। সমারভ্য গুণৈকেন দ্বিগুণং পরিশোধয়েৎ॥ ন রাত্রৌ ভোজনং কার্য্যং বামহস্তে ভুজিক্রিয়া। সিদ্ধমন্নং রাত্রিকালে দগ্ধমীনঞ্চ সর্ব্বদা॥ বর্জ্জয়েৎ পিষ্টকং কিঞ্চিৎ রক্তশাকস্য চাম্লকং। দ্বিষট্কাং বিপ্রজায়াঞ্চ সধবাং ভোজয়েত্ততঃ॥ এবং ক্রমেণ কৃত্বা তু কতিকালং নয়েদ্ব্রতং। ততঃ শুদ্ধদিনে প্রাপ্তে ভৌমাহে মন্দবাসরে॥ যথাশক্ত্যুপচারৈশ্চ পূজাং কুর্য্যাদ্বিধানতঃ। তথাপরাহ্ণকালে তু সন্ধ্যোপসময়ে তথা॥ রাত্রৌ তু কদলীকাণ্ডে গৃহং নির্ম্মায় প্রাঙ্গণে। তস্য মধ্যে সমারোপ্য কালিকাং পূজয়েৎ সদা॥ পাদ্যার্ঘ্যাচমনীয়ৈশ্চ গন্ধপুষ্পাদিভিস্তথা। ধূপৈর্দ্দিব্যপ্রদীপৈশ্চ নৈবেদ্যৈর্বিবিধৈস্তথা॥ পিষ্টকং চৈব সিদ্ধান্নং ব্যঞ্জনং দগ্ধমীনকং। নিবেদ্য সকলং দেব্যৈ বলিং দত্ত্বা প্রণম্য চ॥ তদন্নং ব্যঞ্জনং সর্ব্বং নৈবেদ্যাদিবলিং তথা। মহারণ্যে প্রদাতব্যং কৃত্বৈতৎ ব্রতমুত্তমং॥ বৈশবে কদলীমূলে যা কুর্য্যাৎ কালিকাব্রতং। কার্য্যসিদ্ধির্ভবেৎ তস্যা ভবিতা গতিরুত্তমা॥ এতদ্ব্রতবিধানস্তু কৃত্বা সিদ্ধির্ভবিষ্যতি। এতদ্ব্রতমিদং ভদ্রে কুরু গত্বা নিজালয়ং॥ তস্যাস্তদ্বচনং শ্রুত্বা সা শচী হর্ষমানসা। গৃহমাগত্য সা তস্যা বার্ষিকং ব্রতমাচরৎ॥ গন্ধপুষ্পৈর্ধূপদীপৈর্নৈবেদ্যৈরুত্তমৈস্তথা। কৃত্বা অশ্মময়ীং দেবীং পূজয়েৎ ভক্তিসংযুতা॥ নানাসুগন্ধিপুষ্পাণি দিব্যরত্নাদ্যলঙ্কৃতং। সিদ্ধান্নং পায়সঞ্চৈব শর্করান্বিতপিষ্টকং॥ অমৃতায়ুতহাবঞ্চ দীয়তে চ প্রযত্নতঃ। লুলাপচ্ছাগমেষাদিবলিং দত্ত্বা প্রভূতকং॥ নানাবাদ্যোদ্যমৈর্গীতৈঃ প্রণিপত্য পুনঃ পুনঃ। কৃতাঞ্জলিপুটা স্তোত্রং ভক্তিনম্রা চকার সা॥ তুষ্টা প্রাহ মহাকালী বরং বৃণু শুভাননে। তৎ শ্রুত্বা রাজপত্নী সা বভাষে চ মুদান্বিতা॥ মৎপ্রভুরাখুভুক্ প্রাপ তন্মোক্ষং কুরু চেশ্বরি। বরং দত্ত্বা হৈমবতী বভূবান্তর্হিতা নৃপ॥ দ্বাদশাব্দাচ্চ তৎশাপান্মোচিতো বৎসরে তদা। মার্জ্জাররূপং সংত্যজ্য স গতোঽন্তেঽমরাবতীং॥ পুষ্পবৃষ্টিশ্চ দুন্দুভ্যা বাদ্যং দেবগণৈঃ কৃতং। কালিকায়াঃ প্রসাদেন গতঃ শক্রো নিজালয়ং॥ অনেনৈব বিধানেন যা কুর্য্যাৎ কালিকাব্রতং। সত্বরং কার্য্যসিদ্ধিঃ স্যাত্তস্যা অত্র ন সংশয়ঃ॥ ইতি ভবিষ্যপুরাণে কালিকাব্রতকথা সমাপ্তা॥

কালিঙ্গং (ক্লী) ফলবিশেষঃ। তরমুজ ইতিখ্যাতং। তৎপর্য্যায়ঃ। কালিন্দকং ২ কৃষ্ণবীজং ৩ ফলবর্ত্তুলং ৪। অস্য গুণাঃ। শীতলত্বং। গ্রাহিত্বং। স্বাদুপাকরসত্বং।

গুরুত্বং। বিষ্টম্ভিত্বং। স্যন্দিত্বং। দৃক্-শুক্রপিত্তনাশিত্বং। কফবাতকারিত্বঞ্চ। পকস্য তস্য গুণাঃ। পিত্তবৃদ্ধিকারিত্বং। উষ্ণত্বং। ক্ষারত্বং। কফবাতনাশিত্বঞ্চ। তৎপত্রগুণৌ। রুধিরস্থাপনত্বং। তিক্তত্বঞ্চ। ইতি পথ্যাপথ্যবিবেকঃ ॥

কালিঙ্গঃ (পুং) ভূমিকর্কারুঃ। হস্তী। সর্পঃ। ইতি মেদিনী ॥ লৌহভেদঃ। অস্য লক্ষণং। কালিঙ্গো লিঙ্গবান্ যঃ স্যাদ্ঘনঃ সূক্ষ্মাঙ্গকো মতঃ। ইতি সুখবোধঃ ॥

কালিঙ্গিকা (স্ত্রী) ত্রিবৃৎ। ইতি রাজনির্ঘণ্টঃ ॥

কালিঙ্গী (স্ত্রী) রাজকর্কটী। ইতি মেদিনী ॥

কালিদাসঃ (পুং) স্বনামখ্যাতকবিঃ। তৎপর্য্যায়ঃ। রঘুকারঃ ২ মেধারুদ্রঃ ৩ কোটিজিৎ ৪। ইতি ত্রিকাণ্ডশেষঃ ॥ স তু রঘুকুমারসম্ভবশ্রুতবোধমেঘদূতাভিজ্ঞানশকুন্তলানলোদয়শৃঙ্গারতিলকাদিগ্রন্থকর্ত্তা বিক্রমাদিত্যরাজসভাস্থনবরত্নমধ্যে সপ্তমরত্নঞ্চ ॥

কালিদাসকঃ (পুং) কালিদাসঃ। ইতি শব্দরত্নাবলী ॥

কালিনী (স্ত্রী) আর্দ্রানক্ষত্রং। ইতি হেমচন্দ্রঃ ॥

কালিন্দকং (ক্লী) কালিঙ্গং। ইতি রাজনির্ঘণ্টঃ ॥

কালিন্দী (স্ত্রী) যমুনা নদী। ইত্যমরঃ ॥ রক্তত্রিবৃৎ। ইতি রাজনির্ঘণ্টঃ ॥

কালিন্দীকর্ষণঃ (পুং) বলদেবঃ। ইতি হলায়ুধঃ ॥

কালিন্দীভেদনঃ (পুং) বলদেবঃ। ইত্যমরঃ ॥

কালিন্দীসূঃ (স্ত্রী) সূর্য্যপত্নী। যমুনামাতা। ইতি ত্রিকাণ্ডশেষঃ ॥

কালিন্দীসোদরঃ (পুং) যমঃ। ইতি হেমচন্দ্রঃ ॥

কালী (স্ত্রী) শান্তনুরাজপত্নী। ইতি ত্রিকাণ্ডশেষঃ ॥ কালিকা। অম্বিকাললাটনিষ্ক্রান্তা দেবী। যথা। ততঃ কোপং চকারোচ্চৈরম্বিকা তানরীন্ প্রতি। কোপেন চাস্যা বদনং মসীবর্ণমভূত্তদা ॥ ভ্রূকুটীকুটিলাত্তস্যা ললাটফলকাদ্দ্রুতং। কালী করালবদনা বিনিষ্ক্রান্তাসিপাশিনী ॥ ইতি মার্কণ্ডেয়পুরাণীয়দেবীমাহাত্ম্যং ॥ * ॥ অন্যচ্চ। দেব্যা ললাটনিষ্ক্রান্তা যা কালীতি চ বিশ্রুতা। তস্যাস্তন্ত্রং প্রবক্ষ্যামি কামদং শৃণু ভৈরব ॥ সমাপ্তিসহিতো দন্ত্যঃ প্রান্ত্যস্তস্মাৎ পুরঃসরঃ। ষষ্ঠস্বরাগ্নিবিন্দ্বিন্দুসহিতো মাদিরেব চ ॥ কালীতন্ত্রমিতি প্রোক্তং ধর্ম্মকামার্থদায়কং। এতন্মূর্ত্তিং প্রবক্ষ্যামি বৎসৈকাগ্রমনাঃ শৃণু ॥ নীলোৎপলদলশ্যামা চতুর্ব্বাহুসমন্বিতা। খট্টাঙ্গং চন্দ্রহাসঞ্চ বিভ্রতী দক্ষিণে করে ॥ বামে চর্ম্ম চ পাশঞ্চ ঊর্দ্ধাধো ভাবতঃ পুনঃ। দধতী মুণ্ডমালাঞ্চ ব্যাঘ্রচর্ম্মবরাম্বরা ॥ কৃশাঙ্গী দীর্ঘদংষ্ট্রা চ অতিদীর্ঘাতিভীষণা। লোলজিহ্বা নিম্নরক্তনয়না নাদভৈরবা ॥ কবন্ধবাহনা পীনবিস্তারশ্রবণাননা। এষা তারাহ্বয়া দেবী চামুণ্ডেতি চ কথ্যতে ॥ এতস্যা যোগিনীশ্চাষ্টৌ পূজয়েচ্চিন্তয়েদপি। ত্রিপুরা ভীষণা চণ্ডী কর্ত্রী হর্ত্রী বিধাতৃকা ॥ করালা শূলিনী চেতি অষ্টৌ

তাঃ পরিকীর্ত্তিতাঃ। এষাতিকামদা দেবী জাড্যহানিকরী সদা॥ এতস্যাঃ সদৃশী কাচিৎ কামদা ন হি বিদ্যতে। ইতি শ্রীকালিকাপুরাণে উত্তরতন্ত্রে ৬০ অধ্যায়ঃ॥ ক্ষীরকীটঃ। মাতৃভেদঃ। উমা। নবমেঘসমূহঃ। পরীবাদঃ। ইতি হেমচন্দ্রঃ॥ কালাঞ্জনী। ভুবরী। ত্রিবৃৎ। রাত্রিঃ। ইতি রাজনির্ঘণ্টঃ॥ অগ্নিশিখাভেদঃ। ইতি জটাধরঃ॥ বৃশ্চিকালীবৃক্ষঃ। বিছাটী ইতি ভাষা। ইতি রত্নমালা॥ * ॥ মাতৃকাধ্যানং চামুণ্ডাশব্দে দ্রষ্টব্যং। উমাধ্যানং লিখ্যতে যথা। করলবদনাং ঘোরাং মুক্তকেশীং চতুর্ভুজাং। কালিকাং দক্ষিণাং দিব্যাং মুণ্ডমালাবিভূষিতাং॥ সদ্যশ্ছিন্নশিরঃখড়্গবামাধোর্দ্ধকরাম্বুজাং। অভয়ং বরদঞ্চৈব দক্ষিণাধোর্দ্ধপাণিকাং। মহামেঘপ্রভাং শ্যামাং তথা চৈব দিগম্বরীং। কণ্ঠাবসক্তমুণ্ডালীগলদ্রুধিরচর্চ্চিতাং॥ কর্ণাবতংসতানীতশবযুগ্মভয়ানকাং। ঘোরদংষ্ট্রাং করালাস্যাং পীনোন্নতপয়োধরাং॥ শবানাং করসংঘাতৈঃ কৃতকাঞ্চীং হসন্মুখীং। সৃক্কয়গলদ্রক্তধারাবিস্ফুরিতাননাং॥ ঘোররাবাং মহারৌদ্রীং শ্মশানালয়বাসিনীং। বালার্কমণ্ডলাকারলোচনত্রিতয়ান্বিতাং॥ দন্তুরাং দক্ষিণব্যাপিমুক্তালম্বিকচোচ্চয়াং শবরূপমহাদেবহৃদয়োপরিসংস্থিতাং॥ শিবাভির্ঘোররাবাভিশ্চতুর্দিক্ষু সমন্বিতাং। মহাকালেন চ সমং বিপরীতরতাতুরাং॥ সুখপ্রসন্নবদনাং স্মেরাননসরোরুহাং। এবং সঞ্চিন্তয়েৎ কালীং সর্ব্বকামার্থসিদ্ধিদাং॥ ইতি তন্ত্রসারধৃতকালীতন্ত্রং॥

কালীকঃ (পুং) ক্রৌঞ্চঃ। ইতি শব্দরত্নাবলী॥

কালীচী (স্ত্রী) যমবিচারভূমিঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কালীতনয়ঃ (পুং) মহিষঃ। ইতি হেমচন্দ্রঃ॥

কালীয়ং (ক্লী) কৃষ্ণচন্দনং। ইতি শব্দচন্দ্রিকা॥

কালীয়কং (ক্লী) কালিয়া ইতি খ্যাতং পীতবর্ণসুগন্ধিকাষ্ঠং। ইত্যমরটীকাসারসুন্দরী॥ তৎপর্য্যায়ঃ। জায়কং ২ কালানুসার্য্যং ৩। ইত্যমরঃ॥ জাষকং ৪। ইতি টীকাসর্ব্বস্বং॥ কালেয়ং ৫ বর্ণকং ৬ কান্তিদায়কং ৭। ইতি ভরতধৃতব্যাড়িঃ॥ রাজনির্ঘণ্টোক্তগুণপর্য্যায়ৌ পীতচন্দনশব্দে দ্রষ্টব্যৌ॥ কৃষ্ণচন্দনং। তৎপর্য্যায়ঃ। কালীয়ং ২ কালিকং ৩ হরিপ্রিয়ং ৪। ইতি শব্দচন্দ্রিকা॥ দারুহরিদ্রা। ইতি রাজনির্ঘণ্টঃ॥

কালীয়কঃ (পুং) দারুহরিদ্রা। ইতি শব্দরত্নাবলী॥

কালেয়ং (ক্লী) কালিয়ানামপীতবর্ণসুগন্ধিকাষ্ঠং ইতি ব্যাড়িঃ রমানাথশ্চ॥ কালখণ্ডং। যকৃৎ ইতি যাবৎ। ইতি মেদিনী॥

কালেয়ঃ (পুং) দৈত্যভেদঃ। ইতি মেদিনী॥

কালেয়কং (ক্লী) কালীয়কং। কালিয়ানাম পীতবর্ণসুগন্ধিকাষ্ঠং। ইত্যমরটীকা॥

কালেয়কঃ (পুং) দারুহরিদ্রা। ইত্যমরঃ॥ কুক্কুরঃ। ইতি রাজনির্ঘণ্টঃ॥

কাল্লঃ (পুং) হরিদ্রাবিশেষঃ। কাঁচা হলুদ

ইতি ভাষা। তৎপর্য্যায়ঃ। কর্ব্বূরঃ ২ দ্রাবিড়কঃ ৩ দ্রাবিড়ভূতিকঃ ৪। ইতি শব্দরত্নাবলী॥

কাল্পকঃ (পুং) কর্ব্বূরকঃ। কাঁচা হলুদ্ ইতি ভাষা। ইত্যমরঃ॥

কাল্পনিকঃ (ত্রি) কল্পনাভবঃ। কল্পিতঃ। যথা। রসঃ স্বাদ্যতে ইতি কাল্পনিকং ভেদমুরীকৃত্য কর্ম্মকর্ত্তরি বা প্রয়োগঃ। ইতি সাহিত্যদর্পণং॥

কাল্যং (ক্লী) প্রত্যূষঃ। ইতি হেমচন্দ্রঃ॥

কাল্যকঃ (পুং) কাল্পকঃ। ইতি শব্দরত্নাবলী॥

কাল্যা (স্ত্রী) গর্ভগ্রহণপ্রাপ্তকালা ঋতুমতী গৌঃ। তৎপর্য্যায়ঃ। উপসর্য্যা ২। ইত্যমরঃ॥

কাবচিকং (ক্লী) বর্ম্মভৃতাং গণঃ। কবচধারিযোদ্ধৃসমূহঃ। ইত্যমরঃ॥

কাবারং (ক্লী) শৈবলঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কাবারী (স্ত্রী) তৃণাদিচ্ছত্রং। তৎপর্য্যায়ঃ। জঙ্গমকুটী ২ ভ্রমৎকুটী ৩। ইতি ত্রিকাণ্ডশেষঃ॥

কাবৃকঃ (পুং) কুক্কুটঃ। চক্রবাকঃ। পীতমস্তকপক্ষী। ইতি বিশ্বমেদিন্যৌ॥

কাবেরং (ক্লী) কুঙ্কুমং। ইতি জটাধরঃ॥

কাবেরী (স্ত্রী) নদীবিশেষঃ। ইত্যমরঃ॥ বেশ্যা। হরিদ্রা। ইতি মেদিনী॥

কাব্যং (ক্লী) গ্রন্থঃ। ইতি মেদিনী॥ রসযুক্তবাক্যং। যথা। বাক্যং রসাত্মকং কাব্যং দোষাস্তস্যাপকর্ষকাঃ। উৎকর্ষহেতবঃ প্রোক্তা গুণালঙ্কাররীতয়ঃ॥ এষাং প্রত্যেকং লক্ষণানি লিখ্যন্তে। তত্রাদৌ বাক্যলক্ষণং যথা। বাক্যং স্যাদ্যোগ্যতাকাঙ্ক্ষাসত্তিযুক্তঃ পদোচ্চয়ঃ। রসলক্ষণং যথা। বিভাবেনানুভাবেন ব্যক্তঃ সঞ্চারিণা তথা। রসতামেতি রত্যাদিঃ স্থায়ী ভাবঃ সচেতসাং॥ দোষলক্ষণং যথা। রসাপকর্ষকা দোষাস্তে পুনঃ পঞ্চধা মতাঃ। পদে তদংশে বাক্যার্থে সম্ভবন্তি রসেঽপি যৎ॥ গুণলক্ষণং যথা। রসস্যাঙ্গিত্বমাপ্তস্য ধর্ম্মাঃ শৌর্য্যাদয়ো যথা। গুণা মাধুর্য্যমোজোঽথ প্রসাদ ইতি তে ত্রিধা। অলঙ্কারলক্ষণং যথা। শব্দার্থয়োরস্থিরা যে ধর্ম্মাঃ শোভাতিশায়িনঃ। রসাদীনুপকুর্ব্বন্তোঽলঙ্কারাস্তেঽঙ্গদাদিবৎ॥ রীতিলক্ষণং যথা। পদসংঘটনারীতিরঙ্গসংস্থাবিশেষবৎ। উপকর্ত্রী রসাদীনাং সা পুনঃ স্যাচ্চতুর্ব্বিধা। বৈদর্ভী চাথ গৌড়ী চ পাঞ্চালী লাটিকা তথা॥ ইতি সাহিত্যদর্পণং॥ *॥ তৎ কাব্যং ত্রিবিধং ধ্বনিগুণীভূতব্যঙ্গ্যচিত্রভেদেন। তত্রাদ্যস্য লক্ষণং। ইদমুত্তমমতিশয়িনি ব্যঙ্গ্যে বাচ্যাৎ ধ্বনির্বুধৈঃ কথিতঃ। দ্বিতীয়স্য লক্ষণং। অতাদৃশি গুণীভূতব্যঙ্গ্যং ব্যঙ্গ্যে তু মধ্যমং। তৃতীয়স্য লক্ষণং। শব্দচিত্রং বাচ্যচিত্রমব্যঙ্গ্যং ত্ববরং স্মৃতং॥ ইতি কাব্যপ্রকাশঃ॥ এতেষাং বিবরণানি তত্তচ্ছব্দে দ্রষ্টব্যানি॥

কাব্যঃ (পুং) শুক্রাচার্য্যঃ। ইতি মেদিনী॥

কাব্যচৌরঃ (পুং) চন্দ্ররেণুঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কাব্যা (স্ত্রী) পূতনা। বুদ্ধিঃ। ইতি মেদিনী॥

কাশ ঋ ঙ দ্যুতৌ। ইতি কবিকল্পদ্রুমঃ ॥ ঋ অচকাশৎ। ঙ কাশতে চন্দ্রঃ। দন্ত্যান্ত ইতি কেচিৎ। ইতি দুর্গাদাসঃ ॥

কাশ য উ ঋ ঙ দ্যুতৌ। ইতি কবিকল্পদ্রুমঃ ॥ য ঙ কাশ্যতে। উ কাশিত্বা কাষ্ট্বা। ঋ অচকাশৎ। ইতি দুর্গাদাসঃ ॥

কাশঃ (পুং ক্লী) তৃণভেদঃ। কেশ্যা ইতি ভাষা। ইতি মেদিনী ॥ তৎপর্য্যায়ঃ। ইক্ষুগন্ধা ২ পোটগলঃ ৩। ইত্যমরঃ ॥ কাসঃ ৪। ইতি ভরতঃ ॥ কাশী ৫। ইতি মুকুটাদয়ঃ ॥ কাশা ৬। ইতি নয়নানন্দঃ ॥ বায়সেক্ষুঃ ৭ কাণ্ডেক্ষুঃ ৮ অমরপুষ্পকঃ ৯। ইতি রত্নমালা ॥ কাশকঃ ১০ বনহাসকঃ ১১। ইতি শব্দরত্নাবলী ॥ ইক্ষ্বারিঃ ১২ কাকেক্ষুঃ ১৩ ইক্ষুরঃ ১৪ ইক্ষুকাণ্ডঃ ১৫ শারদঃ ১৬ সিতপুষ্পকঃ ১৭ নাদেয়ঃ ১৮ দর্ব্ভপত্রঃ ১৯ লেখনঃ ২০ কাণ্ডকাণ্ডকঃ ২১ কচ্ছলকারকঃ ২২। অস্য গুণাঃ। শিশিরত্বং। গৌল্যত্বং। রুচিকারিত্বং। পিত্তদাহনাশিত্বং। তৃপ্তিবলশুক্রকারিত্বং। শ্রমশোষকফাপহত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ কণ্ঠকণ্ডূয়নং। ইতি শব্দরত্নাবলী ॥ তৎপর্য্যায়গুণাঃ। কাশঃ কাকেক্ষুরুদ্দিষ্টঃ স স্যাদিক্ষুরসস্তথা। ইক্ষ্বালিকেক্ষুগন্ধা চ তথা পোটগলঃ স্মৃতঃ ॥ কাশঃ স্যান্মধুরস্তিক্তঃ স্বাদুপাকে হিমঃ সরঃ। মূত্রকৃচ্ছ্রাশ্মদাহাস্রক্ষয়পিত্তজরোগজিৎ ॥ ইতি ভাবপ্রকাশঃ ॥

কাশঃ (পুং) ক্ষুতং। ইতি শব্দরত্নাবলী ॥ স্বনামখ্যাতরোগবিশেষঃ। কাশী ইতি ভাষা। ইত্যমরটীকায়াং ভরতঃ ॥ তৎপর্য্যায়ঃ। ক্ষবথুঃ ২ কাশিকা ৩। ইতি শব্দরত্নাবলী ॥ কাসঃ ৪। ইত্যমরঃ ॥ কাসয়তি কুৎসিতশব্দং কারয়তি কাসঃ। কাস্ঙ্ কুশব্দে ণ্যন্তাৎ পচাদ্যন্ কাসো দন্ত্যান্তঃ। কশশব্দে ইত্যস্মাৎ ণ্যন্তাৎ পচাদ্যনি কাশস্তালব্যান্তশ্চ। শালূরকাশশল্লক্য ইত্যুষ্মভেদে দন্ত্যতালব্যান্তমধ্যে পাঠাৎ। বারাণস্যাং ভবেৎ কাশী ক্ষবথৌ না তৃণে স্ত্রিয়ামিতি তালব্যান্তেষু রভসঃ। ইতি তট্টীকায়াং ভরতঃ ॥ * ॥ তস্য নিদানং যথা। ধন্বন্তরিরুবাচ। আশুকারী যতঃ কাশঃ স এবাতঃ প্রবক্ষ্যতে। পঞ্চ কাশাঃ স্মৃতা বাতপিত্তশ্লেষ্মক্ষতক্ষয়ৈঃ ॥ ক্ষয়ায়োপেক্ষিতাঃ সর্ব্বে বলিনশ্চোত্তরোত্তরং। তেষাং ভবিষ্যতাং রূপং কণ্ঠে কণ্ডূররোচকঃ ॥ শূককর্ণাস্যকণ্ঠত্বং তত্রাধো বিহিতোঽনিলঃ। ঊর্দ্ধং প্রবৃত্তঃ প্রাপ্যোরস্তস্মিন্ কণ্ঠে চ সংস্থজন্ ॥ শিরঃস্রোতাংসি সংপূর্য্য ততোঽঙ্গান্যুৎক্ষিপন্তি চ। ক্ষিপন্নিবাক্ষিণী পৃষ্ঠমুরঃ পার্শ্বে চ পীড়য়ন্ ॥ প্রবর্ত্ততে স বক্ত্রেণ ভিন্নকাংস্যোপমধ্বনিঃ। হৃৎপার্শ্বোরঃশিরঃশূলমোহক্ষোভস্বরক্ষয়ান্ ॥ করোতি শুষ্ককাশঞ্চ মহাবেগরুজা স্বনং। সোঽঙ্গহর্ষী কফং শুষ্কং কৃচ্ছ্রান্মুক্তোঽল্পতাং ব্রজেৎ ॥ পিত্তাৎ পীতাক্ষিকতা তিক্তাস্যত্বং জ্বরো ভ্রমঃ। পিত্তাসৃগ্বমনং তৃষ্ণা বৈস্বর্য্যং ধূমকো মদঃ ॥ প্রততং কাশবেগে চ জ্যোতিষা-

মিব দর্শনং। কফাদুরোঽল্লরুঙ্মূর্দ্ধহৃদয়ং স্তিমিতং গুরু॥ কণ্ঠে প্রলেপদমনং পীনসচ্ছর্দ্দ্যরোচকঃ। রোমহর্ষঘনস্নিগ্ধশ্লেষ্মণশ্চ প্রবর্দ্ধনং॥ যুদ্ধাদ্যৈঃ সাহসৈস্তৈস্তৈঃ সেবিতৈরযথাবলং। উরস্যন্তঃক্ষিতো বায়ুঃ পিত্তে চানুগতো বলী॥ কুপিতঃ কুরুতে কাশং কফং তেন সশোণিতং। পীতশ্যাবঞ্চ শুষ্কঞ্চ গ্রথিতং ক্বথিতং বহু॥ ষ্ঠীবেৎ কণ্ঠেন রুজতা বিভিন্নেনৈব চোরসা। সূচীভিরিব তীক্ষ্ণাভিস্তুদ্যমানেন শূলিনা॥ পর্ব্বভেদজ্বরশ্বাসতৃষ্ণাবৈস্বর্য্যকম্পবান্। পারাবত ইবোৎকূজন্ পার্শ্বশূলী ততোঽস্য চ॥ কফাদ্যৈর্বমনং পক্তির্বলং বর্ণশ্চ হীয়তে। ক্ষীণস্য সাসৃঙ্মূত্রত্বং শ্যাবপৃষ্ঠকটীগ্রহঃ॥ বায়ুপ্রধানাঃ কুপিতা ধাতবো রাজযক্ষ্মণঃ। কুর্ব্বন্তি যক্ষ্মায়তনৈঃ কাশং ষ্ঠীবেৎ কফং ততঃ॥ পূতিপূযোপমং পীতং বিস্রং হরিতলোহিতং। লুপ্যতে তুদ্যত ইব হৃদয়ং পচতীব চ॥ অকস্মাদুষ্ণং শীতেচ্ছা বহ্বাশিত্বং বলক্ষয়ঃ। স্নিগ্ধপ্রসন্নবক্ত্রত্বং শ্রীমদ্দর্শননেত্রতা॥ ততোঽস্য ক্ষয়রূপাণি সর্ব্বাণ্যাবির্ভবন্তি চ। ইত্যেবং ক্ষয়জঃ কাশঃ ক্ষীণানাং দেহনাশনঃ॥ যাপ্যো বা বলিনাং তদ্বৎ ক্ষতজোঽপি নবৌ চ তৌ। সিদ্ধ্যেতামপি সামর্থ্যাৎ সাধ্যাদৌ চ পৃথক্ক্রমঃ॥ মিশ্রায়াপ্যাশু যে সর্ব্বে জরসঃ স্থবিরস্য চ। কাশশ্বাসক্ষয়চ্ছর্দ্দিস্বরসাদাদয়ো গদাঃ॥ ভবন্ত্যপেক্ষয়া যস্মাৎ তস্মাত্তং ত্বরয়া জয়েৎ। ইতি গারুড়ে কাশরোগনিদানং ১৫৪

অধ্যায়ঃ॥ *॥ অথ কাশস্য চিকিৎসা। তত্র বাতকাশস্য চিকিৎসা। বাস্তূকো বায়সীশাকং মূলকং সুনিষণ্ণকং। স্নেহাস্তৈলাদয়ো ভক্ষ্যাঃ ক্ষীরেক্ষুরসগৌড়িকাঃ॥ দধ্যারণালাম্লফলং প্রসন্নাপানমেব চ। শস্যতে বাতকাশেষু স্বাদ্বম্ললবণানি চ॥ বায়সী কাকমাচী কবঙ্গ ইতি লোকে। সুনিষণ্ণকং সিমুয়ারি ইতি লোকে শাকবিশেষঃ। চাঙ্গেরীসদৃশচতুষ্পত্রা সজলদেশে ভবতি। চৌপতি ইতি লোকে॥ গ্রাম্যানূপোদকৈঃ শালিযবগোধূমষষ্টিকান্। রসৈর্ম্মাষাত্মগুপ্তানাং যূষৈর্ব্বা ভোজয়েদ্ধিতান্॥ গ্রাম্যানূপোদকৈঃ রসৈরিত্যন্বয়ঃ। আত্মগুপ্তা কিবাছ ইতি লোকে॥ দশমূলীকৃতা কাশশ্বাসহিক্কারুজাপহা। যবাগূর্দীপনী বৃষ্যা বাতরোগবিনাশিনী॥ রসঃ কর্কটকানাং বা ঘৃতভৃষ্টঃ স নাগরঃ। বাতকাশপ্রশমনঃ শৃঙ্গিমৎস্যস্য বা পুনঃ॥ *॥ অথ পিত্তকাশস্য চিকিৎসা। কণ্টকারীযুগদ্রাক্ষাবাসাকর্চূরবালকৈঃ। নাগরেণ চ পিপ্পল্যা ক্বথিতং সলিলং পিবেৎ॥ শর্করামধুসংযুক্তং পিত্তকাশহরং পরং॥ *॥ অথ কফকাশস্য চিকিৎসা। পিপ্পলী কট্ফলং শুণ্ঠী শৃঙ্গী ভার্গী তথোষণং। কাস্নবী কণ্টকারী চ সিন্ধুবারো যবানিকা॥ চিত্রকো বাসকশ্চৈষাং কষায়ং বিধিবৎ কৃতং। কফকাশবিনাশায় পিবেৎ কৃষ্ণারজোযুতং॥ পিপ্পল্যাদিকাথঃ॥ *॥ অথ ক্ষতজকাশস্য চিকিৎসা। ইক্ষুরালিকা-

পদ্মমৃণালোৎপলচন্দনং। মধুকং পিপ্পলী দ্রাক্ষা লাক্ষা শৃঙ্গী শতাবরী॥ দ্বিগুণা চ তুগাক্ষীরী সিতা সর্ব্বচতুর্গুণা। লিহ্যাত্তন্মধুসর্পিভ্যাং ক্ষতকাশনিবৃত্তয়ে॥ ইক্ষুরালিকা ইক্ষুভেদঃ। চন্দ্র ইতি লোকে। পদ্মং পদ্মকাষ্ঠং। মৃণালং বিশং। উৎপলং কমলং। চন্দনমত্র ধবলং। চূর্ণং স্যাৎ। শৃঙ্গী কর্কটশৃঙ্গী। তুগাক্ষীরী বংশলোচনা। সা চেক্ষোর্দ্বিগুণা॥ *॥ অথ ক্ষয়কাশচিকিৎসা। চূর্ণং কাকুভমিষ্টং বাসকরসভাবিতং বহূন্ বারান্। মধুঘৃতসিতোপলাভির্লেহ্যং ক্ষয়কাশরক্তপিত্তহরং॥ কাকুভং চূর্ণং ককুভত্বক্‌চূর্ণং॥*॥ অথ কাশস্য সামান্যতশ্চিকিৎসা। তাম্যমানস্য কাশেন নাসাস্রাবে স্বরে জড়ে। ক্ষবথৌ গন্ধনাশে চ ধূমপানং প্রযোজয়েৎ॥ মনঃশিলালমরিচং মাংসীমুস্তেঙ্গুদৈঃ পিবেৎ। ধূমং ত্র্যহং চ তস্যানু পয়শ্চ সগুড়ং পিবেৎ॥ এষ কাশান্ পৃথক্ দ্বন্দ্বসর্ব্বদোষসমুদ্ভবান্। শতৈরপি প্রয়োগাণামসাধ্যান্ সাধয়েৎ ধ্রুবং॥ আলং হরিতালং॥ ইঙ্গুদমিহ পুত্রঞ্জীবকফলং॥ বদরীদলমালিপ্তং শিলায়া ঘর্ম্মশোষিতং। তদ্ধূমপানং সক্ষীরং মহাকাশনিবারণং॥ কণ্টকারিকৃতক্বাথঃ সকৃষ্ণঃ সর্ব্বকাশহা। কণ্টকার্য্যাঃ কণায়াশ্চ চূর্ণং সমধু কাশহৃৎ॥ লবঙ্গজাতীফলপিপ্পলীনাং ভাগান্ প্রকল্প্যাক্ষসমানমীষাং। পলার্দ্ধমানং মরিচং প্রদেয়ং পলানি চত্বারি মহৌষধস্য॥ সিতাসমস্তেন সমাপ্য চূর্ণং রোগানিমানাশু বলাগ্নিহন্তি। কাশজ্বরারোচকমেহগুল্মশ্বাসাগ্নিমান্দ্যগ্রহণীবিকারান্॥ সমশর্করচূর্ণং বটিকা বা॥ কুনটীসৈন্ধবব্যোষবিড়ঙ্গাময়হিঙ্গুভিঃ। লেহঃ সাজ্যমধুঃ কাশশ্বাসহিক্কানিবারণঃ॥ *॥ হরীতকীকণা শুণ্ঠী মরিচং গুড়সংযুতং। কাশঘ্নো মোদকঃ প্রোক্তঃ পরং বহ্নেঃ প্রদীপনঃ॥ *॥ কর্ষঃ কর্ষাংশৌ পলং পলদ্বয়ং স্যাত্ততোঽর্দ্ধকর্ষশ্চ। মরিচস্য পিপ্পলীনাং দাড়িমগুড়যাবশূকানাং॥ সর্ব্বৌষধৈরসাধ্যাঃ কাশা যে বৈদ্যনির্ম্মুক্তাঃ। অপি যুয়ং ছর্দ্দয়তাং তেষামিদমৌষধং পথ্যং॥ বঙ্গসেনস্তু কর্ষাংশ ইতি পাঠে কর্ষাংশঃ কর্ষার্দ্ধমিতি ব্যাচষ্টে॥ মরিচং কর্ষমাত্রং স্যাৎ পিপ্পলী কর্ষসংমিতা। অর্দ্ধকর্ষো যবক্ষারঃ কর্ষযুগ্মঞ্চ দাড়িমং॥ এতচ্চূর্ণীকৃতং যুঞ্জ্যাদষ্টকর্ষগুড়েন হি। শাণপ্রমাণাং গুটিকাং কৃত্বা বক্ত্রে বিধারয়েৎ॥ অস্যাঃ প্রভাবাৎ সর্ব্বেঽপি কাসা যান্ত্যেব সংক্ষয়ং। দাড়িমং দাড়িমফলবল্কলং গ্রাহ্যং। মরিচাদিবটিকা॥ *॥ সমূলবল্কচ্ছদকণ্টকার্য্যাস্তুলাং ততো দ্রোণমিতং জলঞ্চ। হরীতকীনাং শতমেকপাত্রে বিপচ্য কুর্য্যাচ্চরণাম্বুশেষং॥ তস্মিন্ কষায়ে তনুবস্ত্রপূতে হরীতকীভিঃ সহিতো গুড়স্য। তুলাং বিনিঃক্ষিপ্য পচেৎ সুপক্বমেতৎ সমুত্তার্য্য সুশীতলে চ॥ পলং পলঞ্চাপি কটুত্রয়ঞ্চ তথা চতুর্জাতপলং বিচূর্ণ্য। পলানি ষট্ পুষ্পরসস্য চাপি বিনিঃক্ষিপে-

ত্তত্র বিমিশ্রয়েচ্চ ॥ প্রযুজ্যমানো বিধিনৈষ লেহো যথাবলঞ্চাপি যথানলঞ্চ। বাতাত্মকং পিত্তকৃতং কফোত্থং দ্বিদোষজাতানপি চ ত্রিদোষং ॥ ক্ষতোদ্ভবঞ্চ ক্ষয়জঞ্চ কাশং শ্বাসঞ্চ হন্যাৎ সহ পীনসেন। যক্ষ্মাণমেকাদশমুগ্ররূপং হরীতকীয়ং ভৃগুণোপদিষ্টা ॥ পুষ্পরসো মধু। চতুর্জাতং ত্বগেলাপত্রনাগকেশরাঃ। ভৃগুহরীতকী॥*॥ কণ্টকারীতুলাং নীরদ্রোণে পক্ত্বা কষায়কং। পাদশেষং গৃহীত্বা চ তত্র চূর্ণানি দাপয়েৎ॥ পৃথক্ পলাংশান্যেতানি গুড়ূচীচব্যচিত্রকাঃ। মুস্তং কর্কটশৃঙ্গী চ ত্র্যূষণং ধন্বযাসকঃ ॥ ভার্গী রাস্না সটী চৈব শর্করা পলবিংশতিঃ। প্রত্যেকঞ্চ পলান্যষ্টৌ প্রদদ্যাদ্ঘৃততৈলয়োঃ ॥ পক্ত্বা লেহত্বমানীয় শীতে মধুপলাষ্টকং। চতুষ্পলং তুগাক্ষীর্য্যাঃ পিপ্পলীঞ্চ চতুষ্পলাং ॥ ক্ষিপ্ত্বা নিদধ্যাৎ সুদৃঢ়ে মৃণ্ময়ে ভাজনে শুভে। লেহোঽয়ং হন্তি হিক্কার্ত্তিকাসশ্বাসানশেষতঃ॥ কণ্টকার্য্যাবলেহঃ। ইতি কাসাধিকারঃ। ইতি ভাবপ্রকাশঃ ॥ * ॥ অপি চ। হরীতকীকণা শুণ্ঠী মরিচং গুড়সংযুতং। কাশঘ্নো মোদকঃ প্রোক্তস্তৃষ্ণারোচকনাশনঃ॥ কণ্টকারীগুড়ূচীভ্যাং পৃথক্ ত্রিংশৎপলাদ্রসে। প্রস্থসিদ্ধো ঘৃতাদ্বাতকাশনুদ্বহ্নিদীপনঃ॥ ইতি গারুড়ে ১৭৪ অধ্যায়ঃ ॥ মনঃশিলা বলামুলং কাকপর্ণঞ্চ গুগ্‌গুলুং। জাতিপত্রং কোলিপত্রং তথা চৈব মনঃশিলা ॥ এভিশ্চৈব কৃতা বর্ত্তির্বদরাগ্নৌ মহেশ্বর। ধূমপানং কাশহরং নাত্র কার্য্যা বিচারণা ॥ ইতি চ গারুড়ে ১৯৪ অধ্যায়ঃ ॥ কতকস্য ফলং শঙ্খং সৈন্ধবং ত্র্যূষণং বচা। ফেনো রসাঞ্জনং ক্ষৌদ্রং বিড়ঙ্গানি মনঃশিলা ॥ এষা বর্ত্তির্হন্তি কাশং তিমিরং পটলং তথা। ইতি তত্রৈব ১৯৮ অধ্যায়ঃ॥ অভয়ামলকং দ্রাক্ষা পিপ্পলী কণ্টকারিকা। শৃঙ্গং পুনর্নবা শুণ্ঠী জগ্ধা কাশং নিহন্তি বৈ ॥ ইতি চ তত্রৈব ১৯৯ অধ্যায়ঃ ॥

কাশকঃ (পুং) কাশঃ। কেশ্যা ইতি ভাষা। ইতি শব্দরত্নাবলী ॥

কাশমর্দ্দঃ (পুং) কাসমর্দ্দবৃক্ষঃ। ইত্যমরটীকায়াং রায়মুকুটঃ ॥

কাশা (স্ত্রী) কাশতৃণং। ইত্যমরটীকায়াং ভরতঃ ॥

কাশাল্মলিঃ (স্ত্রী) কূটশাল্মলিঃ। ইতি জটাধরঃ ॥

কাশিঃ (স্ত্রী) কাশী। ইত্যুণাদিকোষঃ ॥ সূর্য্যে পুং। ইতি জুমরব্যাকরণং ॥

কাশিকা (স্ত্রী) কাশী। ইতি শব্দরত্নাবলী ॥

কাশিকাপ্রিয়ঃ (পুং) দিবোদাসঃ। ইতি শব্দরত্নাবলী ॥

কাশিরাজঃ (পুং) বারাণসীরাজঃ। তৎপর্য্যায়ঃ। ধন্বন্তরিঃ ২ দিবোদাসঃ ৩ সুধোদ্ভবঃ ৪। ইতি ত্রিকাণ্ডশেষঃ ॥

কাশী (স্ত্রী) স্বনামখ্যাততীর্থং। শিবপুরী। তৎপর্য্যায়ঃ। বারাণসী ২ তীর্থরাজী ৩ তপঃস্থলী ৪। ইতি জটাধরঃ ॥ কাশিকা ৫। ইতি শব্দরত্নাবলী ॥ কাশিঃ ৬। ইত্যুণাদিকোষঃ॥ অবিমুক্তং ৭ আনন্দবনং ৮ আনন্দ-

কাননং ৯ অপুনর্ভবভূমিঃ ১০ রুদ্রাবাসঃ ১১ মহাশ্মশানং ১২। তস্যা উৎপত্তির্যথা। ততস্তদৈকলেনাপি স্বৈরং বিহরতা ময়া। স্ববিগ্রহাৎ স্বয়ং সৃষ্টা স্বশরীরানপায়িনী॥ প্রধানং প্রকৃতিং ত্বাং তু মায়াং গুণবতীং পরাং। বুদ্ধিতত্ত্বস্য জননীমাহুর্বিকৃতিবর্জিতাং॥ যুগপচ্চ ত্বয়া শক্ত্যা শাকং কালস্বরূপিণা। ময়াদ্য পুরুষেণৈতৎ ক্ষেত্রঞ্চাপি বিনির্ম্মিতং॥ স্কন্দ উবাচ। সা শক্তিঃ প্রকৃতিঃ প্রোক্তা স পুমানীশ্বরঃ পরঃ। তাভ্যাঞ্চ রমমাণাভ্যাং তস্মিন্ ক্ষেত্রে ঘটোদ্ভব॥ পরমানন্দরূপাভ্যাং পরমানন্দরূপিণি। পঞ্চক্রোশপরীমাণে স্বপাদতলনির্ম্মিতে॥ মুনে প্রলয়কালেঽপি ন তৎ ক্ষেত্রং কদাচন। বিমুক্তং ন শিবাভ্যাং যদবিমুক্তং ততো বিদুঃ॥ ন যদা ভূমিবলয়ং ন যদাপাং সমুদ্ভবঃ। তদা বিহর্ত্তুমীশেন ক্ষেত্রমেতৎ বিনির্ম্মিতং॥ ইতি কাশীখণ্ডং॥ তত্র কর্ত্তব্যযাত্রাবিধানং যথা। সূত উবাচ। যাত্রাপরিক্রমং ব্রূহি জনানাং হিতকাম্যয়া। যথাবৎ সিদ্ধিকামানাং সত্যবত্যাঃ সুতোত্তম॥ ব্যাস উবাচ। নিশাময় মহাপ্রাজ্ঞ লোমহর্ষণ বচ্মি তে। যথা প্রথমতো যাত্রা কর্ত্তব্যা যাত্রিকৈর্ম্মুদা॥ সচেলমাদৌ সংস্নায় চক্রপুষ্করিণীজলে। সন্তর্প্য দেবান্ সপিতৃন্ ব্রাহ্মণাংশ্চ তপস্বিনঃ॥ আদিত্যং দ্রৌপদীং বিষ্ণুং দণ্ডপাণিমহেশ্বরং। নমস্কৃত্য ততো গচ্ছেৎ দ্রষ্টুং ঢুণ্ঢিবিনায়কং॥ জ্ঞানবাপীমুপস্পৃশ্য নন্দিকেশং ততোঽর্চ্চয়েৎ। তারকেশং সমভ্যর্চ্চ্য মহাকালেশ্বরং ততঃ॥ ততঃ পুনর্দণ্ডপাণিমিত্যেষা পঞ্চতীর্থিকা। দৈনন্দিনী বিধাতব্যা মহাফলমভীপ্সুভিঃ॥ *॥ ততো বৈশ্বেশ্বরী যাত্রা কার্য্যা সর্ব্বার্থসিদ্ধয়ে। দ্বিসপ্তায়তনানাঞ্চ কার্য্যা যাত্রা প্রযত্নতঃ॥ কৃষ্ণাং প্রতিপদং প্রাপ্য ভূতাবধি যথাবিধি। অথবা প্রতিভূতঞ্চ ক্ষেত্রশুদ্ধিমভীপ্সুভিঃ॥ তত্তত্তীর্থকৃতস্নানস্তত্তল্লিঙ্গকৃতার্চ্চনঃ। মৌনেন যাত্রাং কুর্ব্বাণঃ ফলং প্রাপ্নোতি যাত্রিকঃ॥ ওঙ্কারং প্রথমং পশ্যেন্মৎস্যোদর্য্যাং কৃতোদকঃ ত্রিপিষ্টপং মহাদেবং ততো বৈ কৃত্তিবাসসং॥ রত্নেশঞ্চাথ চন্দ্রেশং কেদারঞ্চ ততো ব্রজেৎ। ধর্ম্মেশ্বরঞ্চ বীরেশং গচ্ছেৎ কামেশ্বরং ততঃ॥ বিশ্বকর্ম্মেশ্বরং চাথ মণিকর্ণীশ্বরং ততঃ। অবিমুক্তেশ্বরং দৃষ্ট্বা ততো বিশ্বেশমর্চ্চয়েৎ॥ এষা যাত্রা প্রযত্নেন কর্ত্তব্যা ক্ষেত্রবাসিভিঃ। যস্তু ক্ষেত্রমুষিত্বাপি নৈতাং যাত্রাং সমাচরেৎ॥ বিঘ্নাস্তস্যোপজায়ন্তে ক্ষেত্রোচ্চাটনসূচকাঃ॥ *॥ অষ্টায়তনযাত্রান্যা কর্ত্তব্যা বিঘ্নশান্তয়ে॥ দক্ষেশঃ পার্ব্বতীশশ্চ তথা পশুপতীশ্বরঃ। গঙ্গেশো নর্ম্মদেশশ্চ গভস্তীশঃ সতীশ্বরঃ॥ অষ্টমস্তারকেশশ্চ প্রত্যষ্টমি বিশেষতঃ। দৃশ্যান্যেতানি লিঙ্গানি মহাপাপোপশান্তয়ে॥ *॥ অপরাপি শুভা যাত্রা যোগক্ষেমকরী সদা। সর্ব্ববিঘ্নোপহর্ত্রী চ কর্ত্তব্যা ক্ষেত্রবাসিভিঃ॥

শৈলেশং প্রথমং বীক্ষ্য বরণাস্নানপূর্ব্বকং। স্নানন্তু সঙ্গমে কৃত্বা দ্রষ্টব্যঃ সঙ্গমেশ্বরঃ॥ স্বর্নীলতীর্থে সুস্নাতঃ পশ্যেৎ স্বর্নীলমাশ্বরং। স্নাত্বা মন্দাকিনীতীর্থে দ্রষ্টব্যো মধ্যমেশ্বরঃ॥ পশ্যেদ্ধিরণ্যগর্ভেশং তত্র তীর্থকৃতোদকঃ। পঞ্চচূড়হ্রদে স্নাত্বা জ্যেষ্ঠস্থানং ততোঽর্চ্চয়েৎ॥ চতুঃসমুদ্রকূপে তু স্নাত্বা দেবং ততোঽর্চ্চয়েৎ। দেবস্যাগ্রে তু যা বাপী তত্রোপস্পর্শনে কৃতে॥ শুক্রেশ্বরং ততঃ পশ্যেৎ তৎকূপবিহিতোদকঃ। দণ্ডখাতে নরঃ স্নাত্বা ব্যাঘ্রেশং পূজয়েত্ততঃ॥ মৌনকেশ্বরকুণ্ডে তু স্নানং কৃত্বা ততোঽর্চ্চয়েৎ। জম্বুকেশং মহালিঙ্গং কৃত্বা যাত্রামিমাং নরঃ॥ কচিন্ন জায়তে ভূয়ঃ সংসারে দুঃখসাগরে। সমারভ্য প্রতিপদং যাবৎ কৃষ্ণাং চতুর্দ্দশীং॥ এতৎক্রমেণ কর্ত্তব্যান্যেতদায়তনানি বৈ। ইমাং যাত্রাং নরঃ কৃত্বা ন ভূয়োঽপ্যভিজায়তে॥ * ॥ অন্যা যাত্রা প্রকর্ত্তব্যৈকাদশায়তনোদ্ভবা। অগ্নীধ্রকুণ্ডে সুস্নাতঃ পশ্যেদগ্নীধ্রমীশ্বরং॥ উর্ব্বশীশং ততো গচ্ছেত্ততস্তু নকুলীশ্বরং। আষাঢ়ীশং ততো দৃষ্ট্বা ভারভূতেশ্বরং ততঃ॥ লাঙ্গলীশমথালোক্য ততস্তু ত্রিপুরান্তকং। ততো মনঃপ্রকামেশং প্রীতিকেশমথো ব্রজেৎ॥ মদালসেশ্বরং তস্মাৎ তিলপর্ণেশ্বরং ততঃ। যাত্রৈকাদশলিঙ্গানামেষা কার্য্যা প্রযত্নতঃ॥ ইমাং যাত্রাং প্রকুর্ব্বাণো রুদ্রত্বং প্রাপ্নুয়ান্নরঃ॥ * ॥ অতঃ পরং প্রবক্ষ্যামি গৌরীযাত্রামনুত্তমাং॥ শুক্লপক্ষতৃতীয়ায়াং যা যাত্রা বিশ্ববৃদ্ধিকা। গোপ্রেক্ষ্যতীর্থে সুস্নায় মুখনির্ম্মালিকাং ব্রজেৎ॥ জ্যেষ্ঠবাপ্যাং নরঃ স্নাত্বা জ্যেষ্ঠাং গৌরীং সমর্চ্চয়েৎ। সৌভাগ্যগৌরী সংপূজ্যা জ্ঞানবাপ্যাং কৃতোদকৈঃ॥ ততঃ শৃঙ্গারগৌরীঞ্চ তত্রৈব চ কৃতোদকঃ। স্নাত্বা বিশালগঙ্গায়াং বিশালাক্ষীং ততো ব্রজেৎ॥ সুস্নাতো ললিতাতীর্থে ললিতাং পূজয়েত্ততঃ। স্নাত্বা ভবানীতীর্থে তু ভবানীং পরিপূজয়েৎ॥ মঙ্গলা চ ততোঽভ্যর্চ্চ্যা বিন্দুতীর্থকৃতোদকৈঃ। ততো গচ্ছেন্মহালক্ষ্মীং স্থিরলক্ষ্মীসমৃদ্ধয়ে॥ ইমাং যাত্রাং নরঃ কৃত্বা ক্ষেত্রেঽস্মিন্ মুক্তিজন্মনি। ন দুঃখৈরভিভূয়েত ইহামুত্রাপি কুত্রচিৎ॥ কুর্য্যাৎ প্রতিচতুর্থীহ পূজাং বিঘ্নেশিতুঃ সদা। ব্রাহ্মণেভ্যস্তদুদ্দেশাদ্দেয়া বৈ মোদকা মুদে॥ * ॥ ভৌমে ভৈরবযাত্রা চ কার্য্যা পাতকহারিণী। রবিবারে রবের্যাত্রাং ষষ্ঠ্যাং বা রবিসংযুজি॥ তথৈব রবিসপ্তম্যাং সর্ব্ববিঘ্নোপশান্তয়ে। নবম্যামথবা ষষ্ঠ্যাং চণ্ডীযাত্রা শুভাবহা॥ * ॥ অন্তর্গৃহস্য যাত্রা বৈ কর্ত্তব্যা প্রতিবৎসরং। প্রাতঃ স্নানং বিধায়াদৌ নত্বা পঞ্চ বিনায়কান্॥ নমস্কৃত্যাথ বিশ্বেশং স্থিত্বা নির্ব্বাণমণ্ডপে। অন্তর্গৃহস্য যাত্রাং হি করিষ্যেঽঘৌঘশান্তয়ে॥ গৃহীত্বা নিয়মঞ্চেতি গত্বাথ মণিকর্ণিকাং। স্নাত্বা মৌনেন চাগত্য মণিকর্ণীশমর্চ্চয়েৎ॥ কম্বলাশ্বতরৌ নত্বা বাসুকীশং প্রণম্য চ। পর্ব্বতেশং ততো দৃষ্ট্বা গঙ্গাকেশবমপ্যথ॥ ততস্তু ললিতাং দৃষ্ট্বা

জরাসন্ধেশ্বরং ততঃ। ততো বৈ সোমনাথঞ্চ বরাহঞ্চ ততো ব্রজেৎ ॥ ব্রহ্মেশ্বরং ততো নত্বা নত্বাগস্তীশ্বরং ততঃ। কশ্যপেশং নমস্কৃত্য হরিকেশবনস্ততঃ ॥ বৈদ্যনাথং ততো গত্বা ধ্রুবেশমথ বীক্ষ্য চ। গোকর্ণেশং ততোঽভ্যর্চ্চ্য হাটকেশমথো ব্রজেৎ ॥ অস্থিক্ষেপতড়াগঞ্চ দৃষ্ট্বা বৈ কীকশেশ্বরং। ভারভূতং ততো নত্বা চিত্রগুপ্তেশ্বরং ততঃ ॥ চিত্রঘণ্টাং প্রণম্যাথ ততঃ পশুপতীশ্বরং। পিতামহেশ্বরং গত্বা ততস্তু কলসেশ্বরং ॥ চন্দ্রেশস্ত্বথ বীরেশো বিঘ্নেশোঽগ্নীশ এব চ। নাগেশ্বরো হরিশ্চন্দ্রশ্চিন্তামণিবিনায়কঃ ॥ সেনাবিনায়কশ্চাথ দ্রষ্টব্যঃ সর্ব্ববিঘ্নহৃৎ। বশিষ্ঠবামদেবৌ চ মূর্ত্তিরূপধরাবুভৌ ॥ দ্রষ্টব্যৌ যত্নতঃ কাশ্যাং মহাবিঘ্নবিনাশনৌ। সীমাবিনায়কং নাথং করুণেশং ততো ব্রজেৎ ॥ ত্রিসন্ধ্যেশো বিশালাক্ষী ধর্ম্মেশো বিশ্ববাহুকা। আশাবিনায়কশ্চাথ বৃদ্ধাদিত্যস্ততঃ পুনঃ ॥ চতুর্ব্বক্ত্রেশ্বরং লিঙ্গং ব্রহ্মেশস্তু ততঃ পরং। ততো মনঃপ্রকামেশ ঈশানেশস্ততঃ পরং ॥ চণ্ডীচণ্ডেশ্বরৌ দৃশ্যৌ ভবানীশঙ্করৌ ততঃ। ঢুণ্ঢিং প্রণম্য চ ততো রাজরাজেশমর্চ্চয়েৎ ॥ লাঙ্গলীশস্ততোঽভ্যর্চ্চ্য ততস্তু নকুলীশ্বরং। পরান্নেশমথো নত্বা পরদ্রব্যেশ্বরং ততঃ ॥ প্রতিগ্রহেশ্বরঞ্চাপি নিষ্কলঙ্কেশমেব চ। মার্কণ্ডেয়েশমভ্যর্চ্চ্য ততো অপ্সরসেশ্বরং ॥ গঙ্গেশোঽর্চ্চ্যস্ততো জ্ঞানবাপ্যাং স্নানং সমাচরেৎ। নন্দিকেশং তারকেশং মহাকালেশ্বরং ততঃ ॥ দণ্ডপাণিং মহেশঞ্চ মোক্ষেশং প্রণমেত্ততঃ। বীরভদ্রেশ্বরং নত্বা অবিমুক্তেশ্বরং ততঃ ॥ বিনায়কাংস্ততঃ পঞ্চ বিশ্বনাথং ততো ব্রজেৎ। ততো মৌনং বিসৃজ্যাথ মন্ত্রমেনমুদীরয়েৎ ॥ অন্তর্গৃহস্য যাত্রেয়ং যথাবৎ যা ময়া কৃতা। ন্যূনাতিরিক্তয়া শম্ভুঃ প্রীয়তামনয়া বিভুঃ॥ ইতি মন্ত্রং সমুচ্চার্য্য ক্ষণং বৈ মুক্তিমণ্ডপে। বিশ্রাম্য যায়াৎ ভবনং নিষ্পাপঃ পুণ্যবান্ নরঃ ॥ * ॥ সংপ্রাপ্য বাসরং বিষ্ণোর্বিষ্ণুতীর্থেষু সর্ব্বতঃ। কার্য্যা যাত্রা প্রযত্নেন মহাপুণ্যসমৃদ্ধয়ে ॥ নভস্যপঞ্চদশ্যাঞ্চ কুলস্তম্ভং সমর্চ্চয়েৎ। দুঃখং রুদ্রপিশাচত্বং ন ভবেদযস্য পূজনাৎ ॥ শ্রদ্ধাপূর্ব্বমিমা যাত্রাঃ কর্ত্তব্যাঃ ক্ষেত্রবাসিভিঃ। পর্ব্বস্বপি বিশেষেণ কার্য্যা যাত্রাশ্চ সর্ব্বতঃ ॥ ন বন্ধ্যং দিবসং কুর্য্যাদ্বিনা যাত্রাং কচিৎ কৃতী। যাত্রাদ্বয়ং প্রযত্নেন কর্ত্তব্যং প্রতিবাসরং ॥ আদৌ স্বর্গতিরঙ্গিণ্যাস্ততো বিশ্বেশিতুর্দ্ধ্বং। যস্য বন্ধ্যং দিনং যাতং কাশ্যাং নিবসতঃ সতঃ ॥ নিরাশাঃ পিতরস্তস্য তস্মিন্নেব দিনে ভবেৎ। স দষ্টঃ কালসর্পেণ স দষ্টো মৃত্যুনা স্ফুটং ॥ স মুষ্টস্তত্র দিবসে বিশ্বেশো যত্র নেক্ষিতঃ। সর্ব্বতীর্থেষু সস্নৌ স সর্ব্বযাত্রা ব্যধাৎ স চ ॥ মণিকর্ণ্যাস্তু যঃ স্নাতো যো বিশ্বেশং নিরৈক্ষত। সত্যং সত্যং পুনঃ সত্যং সত্যং সত্যং পুনঃ পুনঃ ॥ দৃশ্যো বিশ্বেশ্বরো নিত্যং স্নাতব্যা মণিকর্ণিকা। ইতি শ্রীস্কন্দপুরাণে

কাশীখণ্ডে ১০০ অধ্যায়ঃ ॥ কাশতৃণং ইত্যমরটীকায়াং ভরতঃ ॥

কাশী [ন্] (ত্রি) কাশরোগযুক্তঃ। ইতি রাজবল্লভঃ ॥

কাশীনাথঃ (পুং) শিবঃ। ইতি শব্দরত্নাবলী ॥

কাশীরাজঃ (পুং) দিবোদাসঃ। ইতি শব্দরত্নাবলী ॥

কাশীশং (ক্লী) উপধাতুবিশেষঃ। হিরাকসী ইতি ভাষা। তৎ দ্বিবিধং। ধাতুকাশীশং ১। তৎ হরিদ্বর্ণং লোহিতঞ্চ। পুষ্পকাশীশং ২। তৎশুক্লবর্ণং কৃষ্ণঞ্চ। ইতি রত্নমালা ॥ দ্বিদন্ত্যসকারোঽপি পাঠঃ ॥

কাশ্মরী (স্ত্রী) গম্ভারীবৃক্ষঃ। ইত্যমরঃ ॥

কাশ্মর্য্যঃ (পুং) গম্ভারী। ইত্যমরঃ ॥ ক্লীবলিঙ্গোঽপ্যয়ং। ইতি ভরতঃ ॥

কাশ্মীরং (ক্লী) পুষ্করমূলং। ইত্যমরঃ ॥ টঙ্কঃ। কুঙ্কুমং। ইতি মেদিনী ॥

কাশ্মীরঃ (পুং) স্বনামখ্যাতদেশঃ। ইতি জটাধরঃ ॥

কাশ্মীরজং (ক্লী) কুষ্ঠং। কুঙ্কুমং। ইতি মেদিনী ॥ পুষ্করমূলং। ইতি বিশ্বঃ ॥

কাশ্মীরজন্ম [ন্] (ক্লী) কুঙ্কুমং। ইত্যমরঃ ॥

কাশ্মীরা (স্ত্রী) অতিবিষা। ইতি মেদিনী ॥ কপিলদ্রাক্ষা। ইতি রাজনির্ঘণ্টঃ ॥

কাশ্মীরী (স্ত্রী) গম্ভারী। ইতি ভাবপ্রকাশঃ ॥

কাশ্যং (ক্লী) মদ্যং। ইতি রাজনির্ঘণ্টঃ ॥

কাশ্যপং (ক্লী) মাংসং। ইতি হেমচন্দ্রঃ ॥

কাশ্যপঃ (পুং) কণাদমুনিঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ মৃগভেদঃ। ইতি মেদিনী ॥ গোত্রবিশেষঃ। তৎপ্রবরান্তর্গতমুনিবিশেষঃ ইতি স্মৃতিঃ ॥ কশ্যপস্যাপত্যমাত্রঞ্চ ॥

কাশ্যপিঃ (পুং) অরুণঃ। ইত্যমরঃ ॥ গরুড়ঃ ইতি হৈমচন্দ্র

কাশ্যপী (স্ত্রী) পৃথিবী। ইত্যমরঃ ॥

কাশ্যপেয়ঃ (পুং) সূর্য্যঃ। ইতি শব্দরত্নাবলী ॥

কাশ্বরী (স্ত্রী) কাশ্মরী। ইতি ভরতো দ্বিরূপকোষশ্চ ॥

কাষ্ঠং (ক্লী) দারু। কাঠ্ ইতি ভাষা। ইত্যমরঃ ॥

কাষ্ঠকং (ক্লী) অগুরু। ইতি রাজনির্ঘণ্টঃ ॥

কাষ্ঠকদলী (স্ত্রী) কদলীভেদঃ। কাঠ্কলা ইতি ভাষা। তৎপর্য্যায়ঃ। সুকাষ্ঠা ২ বনকদলী ৩ কাষ্ঠিকা ৪ শিলারম্ভা ৫ দারুকদলী ৬ ফলাঢ্যা ৭ বনমোচা ৮ অশ্মকদলী ৯। অস্যা গুণাঃ। রুচিকারিত্বং। রক্তপিত্তনাশিত্বং। হিমত্বং। গুরুত্বং। মন্দাগ্নিজনকত্বং। দুর্জ্জরত্বং। মধুরত্বং। হিতত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

কাষ্ঠকীটঃ (পুং) ঘুণঃ। ইতি হেমচন্দ্রঃ ॥

কাষ্ঠকুট্টঃ (পুং) পক্ষিবিশেষঃ। কাঠ্ঠোকরা ইতি ভাষা। তৎপর্য্যায়ঃ। শতচ্ছদঃ ২। ইতি ত্রিকাণ্ডশেষঃ ॥

কাষ্ঠকুদ্দালঃ (পুং) নৌকাদের্মলাপনয়নার্থং কাষ্ঠঘটিতকুদ্দালঃ। তৎপর্য্যায়ঃ। অব্ভ্রিঃ২। ইত্যমরঃ ॥

কাষ্ঠজম্বূঃ (স্ত্রী) ভূমিজম্বূঃ। ইতি রাজনির্ঘণ্টঃ ॥

কাষ্ঠতট্ [ক্] (পুং) বর্ণসঙ্করজাতিবিশেষঃ। ছুতার ইতি ভাষা। তৎপর্য্যায়ঃ। তক্ষা ২ বর্দ্ধকিঃ ৩ ত্বষ্টা ৪ রথকারঃ ৫। ইত্যমরঃ ॥

কাষ্ঠতন্তুঃ ( পুং ) কাষ্ঠকৃমিঃ। তৎপর্য্যায়ঃ। কোষকারঃ ২। ইতি হারাবলী ॥

কাষ্ঠতক্ষকঃ ( পুং ) কাষ্ঠতট্। ইতি শব্দরত্নাবলী ॥

কাষ্ঠদারুঃ ( পুং ) দেবকাষ্ঠং। ইতি রাজনির্ঘণ্টঃ ॥

কাষ্ঠদ্রুঃ ( পুং ) পলাশবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কাষ্ঠধাত্রীফলং ( ক্লী ) আমলকং। ইতি রাজনির্ঘণ্টঃ ॥

কাষ্ঠপাটলা ( স্ত্রী ) সিতপাটলিকা। ইতি রাজনির্ঘণ্টঃ ॥

কাষ্ঠমঠী ( স্ত্রী ) চিতা। ইতি ত্রিকাণ্ডশেষঃ ॥

কাষ্ঠমল্লঃ ( পুং ) শববানং। ইতি হারাবলী ॥

কাষ্ঠলেখকঃ ( পুং ) ঘুণঃ। ইতি হারাবলী ॥

কাষ্ঠলোহী [ন্] ( পুং ) লৌহযুক্তমুদ্গরঃ। তৎপর্য্যায়ঃ। বার্তদ্দিঃ ২। ইতি ত্রিকাণ্ডশেষঃ ॥

কাষ্ঠবল্লিকা ( স্ত্রী ) কটুকা। ইতি বৈদ্যকং ॥

কাষ্ঠশারিবা ( স্ত্রী ) শারিবা। অনন্তমূল ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ ॥

কাষ্ঠা (স্ত্রী) দিক্। স্থিতিঃ। সীমা। উৎকর্ষঃ। অষ্টাদশনিমেষাত্মককালঃ। ইত্যমরঃ ॥ দারুহরিদ্রা। ইতি মেদিনী ॥

কাষ্ঠাম্বুবাহিনী (স্ত্রী) কাষ্ঠাদিকৃতচ্ছিন্নাগ্রনৌকাকৃতিজলসেচনী। সেঁওৎ ইতি ভাষা। তৎপর্য্যায়ঃ। দ্রোণী ২। ইত্যমরঃ ॥

কাষ্ঠীলঃ ( পুং ) রাজার্কঃ। ইতি রাজনির্ঘণ্টঃ ॥

কাষ্ঠীলা ( স্ত্রী ) কদলীবৃক্ষঃ। ইত্যমরঃ ॥

কাস ঋ ঙ কুশব্দে। ইতি কবিকল্পদ্রুমঃ ॥ কুশব্দ ইহ রোগহেতুককুৎসিতশব্দঃ। ঋ অচকাসৎ। ঙ কাসতে বৃদ্ধঃ। ইতি দুর্গাদাসঃ ॥

কাসঃ ( পুং ) রোগবিশেষঃ। কাসী ইতি ভাষা। তৎপর্য্যায়ঃ। ক্ষবথুঃ ২। ইত্যমরঃ ॥ তস্য নিদানং যথা। ধূমোপঘাতাদ্রজসস্তথৈব ব্যায়ামরূক্ষান্ননিষেবণাচ্চ। বিমার্গগত্বাচ্চ হি ভোজনস্য বেগাবরোধাৎ ক্ষবথোস্তথৈব ॥ সম্প্রাপ্তির্যথা। প্রাণো হ্যুদানানুগতঃ প্রদুষ্টঃ ॥ লক্ষণং যথা। সংভিন্নকাংস্যস্বনতুল্যঘোষঃ। নিরেতি বক্ত্রাৎ সহসা সদোষো মনীষিভিঃ কাস ইতি প্রদিষ্টঃ ॥ স চ পঞ্চবিধো যথা। পঞ্চ কাসাঃ স্মৃতা বাতপিত্তশ্লেষ্মক্ষতক্ষয়ৈঃ। ক্ষয়ায়োপেক্ষিতাঃ সর্ব্বে বলিনশ্চোত্তরোত্তরং ॥ তেষাং পূর্ব্বরূপং যথা। পূর্ব্বরূপং ভবেত্তেষাং শূকপূর্ণগলাস্যতা। কণ্ঠে কণ্ডুশ্চ ভোজ্যানামবরোধশ্চ জায়তে॥ বাতিকো যথা। হৃচ্ছঙ্খমূর্দ্ধোদরপার্শ্বশূলী ক্ষামাননঃ ক্ষীণবলস্বরৌজাঃ। প্রসক্তবেগস্তু সমীরণেন ভিন্নস্বরঃ কাসতি শুষ্কমেব ॥ পৈত্তিকো যথা। উরোবিদাহজ্বরবক্ত্রশোষৈরভ্যর্দ্দিতস্তিক্তমুখস্তৃষার্ত্তঃ। পিত্তেন পীতানি বমেৎ কটূনি কাসেৎ সপাণ্ডুঃ পরিদহ্যমানঃ ॥ শ্লৈষ্মিকো যথা। প্রলিপ্যমানেন মুখেন সীদন্ শিরোরুজার্ত্তঃ কফপূর্ণদেহঃ। অভক্তরুগ্গৌরবসাদযুক্তঃ কাসেত্তু শং সান্দ্রকফঃ কফেন ॥ ক্ষতজো যথা। অতিব্যবায়ভারাধ্বযুদ্ধাশ্বগজবিগ্রহৈঃ ।

রূক্ষস্যোরঃ ক্ষতং বায়ুর্গৃহীত্বা কাসমাবহেৎ ॥ স পূর্ব্বং কাসতে শুষ্কং ততঃ ষ্ঠীবেৎ সশোণিতং। কণ্ঠেন রুজতাত্যর্থং বিরুগ্নেনেব চোরসা॥ সূচীভিরিব তীক্ষ্ণাভিস্তুদ্যমানেন শূলিনা। দুঃখস্পর্শেন শূলেন ভেদপীড়াভিতাপিনা ॥ পর্ব্বভেদজ্বরশ্বাসতৃষ্ণাবৈস্বর্য্যপীড়িতঃ। পারাবত ইবাকূজন্ কাসবেগাৎ ক্ষতোদ্ভবাৎ ॥ ক্ষয়জো যথা। বিষমাসাত্ম্যভোজ্যাতিব্যবায়াদ্বেগনিগ্রহাৎ। ঘৃণিনাং শোচতাং নৃণাং ব্যাপন্নেঽগ্নৌ ত্রয়ো মলাঃ॥ কুপিতাঃ ক্ষয়জং কাসং কুর্য্যুর্দ্দেহক্ষয়প্রদং। সগাত্রশূলজ্বরদাহমোহান্ প্রাণক্ষয়ঞ্চোপলভেত কাসী ॥ শুষ্যন্ বিনিষ্ঠীবতি দুর্ব্বলস্তু প্রক্ষীণমাংসো রুধিরং সপূযং। তং সর্ব্বলিঙ্গং ভৃশদুশ্চিকিৎস্যং চিকিৎসিতজ্ঞাঃ ক্ষয়জং বদন্তি ॥ ইত্যেষঃ ক্ষয়জঃ কাসঃ ক্ষীণানাং দেহনাশনঃ। সাধ্যো বলবতাং বা স্যাদ্যাপ্যস্ত্বেবং ক্ষতোত্থিতঃ ॥ নবৌ কদাচিৎ সিধ্যেতামপি পাদগুণান্বিতৌ। স্থবিরাণাং জরাকাসঃ সর্ব্বো যাপ্যঃ প্রকীর্ত্তিতঃ॥ ত্রীন্ পূর্ব্বান্ সাধয়েৎ সাধ্যান্ পথ্যৈর্যাপ্যাংস্তু যাপয়েৎ। ইতি মাধবকরঃ ॥ ✱ ॥ কাশতৃণং। ইত্যমরটীকায়াং ভরতঃ ॥ শোভাঞ্জনঃ। ইতি শব্দচন্দ্রিকা ॥

কাসকন্দঃ (পুং) কাসালুঃ। ইতি রাজনির্ঘণ্টঃ ॥

কাসঘ্নী (স্ত্রী) কণ্টকারী। ইতি শব্দচন্দ্রিকা ॥

কাসজিৎ (স্ত্রী) ভার্গী। ইতি রাজনির্ঘণ্টঃ ॥

কাসনাশিনী (স্ত্রী) কর্কটশৃঙ্গীবৃক্ষঃ। ইতি রত্নমালা ॥

কাসুন্দীবটিকা (স্ত্রী) বেসবারবিশেষঃ। গোটা কাসুন্ ইতি ভাষা। অস্যা গুণাঃ। হৃদ্যত্বং। বাতশ্লেষ্মরোগনাশিত্বং। রুচ্যগ্নিকারিত্বং। বায়ুমলানুলোমকারিত্বঞ্চ। ইতি রাজবল্লভঃ ॥

কাসমর্দ্দঃ (পুং) পেষিতজলমিশ্রিতবস্ত্রগলিতবেসবারঃ। ইতি পাকরাজেশ্বরঃ ॥ কাসুন্দী ইতি খ্যাতঃ। গুল্মভেদঃ। কাল কাসুন্দা ইতি ভাষা। ইত্যমরভরতৌ ॥ শেষস্য পর্য্যায়ঃ। অরিমর্দ্দঃ ২ কাসারিঃ ৩ কাসমর্দ্দকঃ ৪ কালঃ ৫ কনকঃ ৬ জরণঃ ৭ দীপনঃ ৮। অস্য গুণাঃ। তিক্তত্বং। উষ্ণত্বং। মধুরত্বং। কফবাতাজীর্ণকাসপিত্তনাশিত্বং। পাচকত্বং। কণ্ঠশোধনত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ অগ্নিদীপনত্বং। স্বাদুত্বঞ্চ। ইতি রাজবল্লভঃ ॥ অস্য পত্রগুণাঃ। রুচিকারিত্বং। শুক্রবর্দ্ধকত্বং। কাসবিষরক্তকফবাতপিত্তনাশিত্বং। মধুরত্বং। পাচনত্বং। কণ্ঠশোধনত্বং। লঘুত্বং। বিশেষতঃ কাসহরত্বং। গ্রাহকত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

কাসমর্দ্দনঃ (পুং) পটোলঃ। ইতি রাজনির্ঘণ্টঃ ॥

কাসরঃ (পুং) মহিষঃ। ইত্যমরঃ ॥

কাসারঃ (পুং) সপদ্মো নিষ্পদ্মো বা মহাজলাশয়ঃ। সরোবরঃ। ইত্যমরঃ ॥

কাসারিঃ (পুং) কাসমর্দ্দঃ। ইতি রাজনির্ঘণ্টঃ ॥

কাসালুঃ (পুং) কোকণদেশে প্রসিদ্ধ আলুবিশেষঃ। তৎপর্য্যায়ঃ। কাসকন্দঃ ২ কন্দালুঃ ৩ আলুকঃ ৪ আলুঃ ৫ বিশাল-

পত্রঃ ৬ পত্রালুঃ ৭। অস্য গুণাঃ। উগ্রত্বং। কণ্ডুবাতশ্লেষ্মাময়ারোচকনাশিত্বং। স্বাদুত্বং। পথ্যত্বং। অগ্নিদীপনত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

কাসীসং (ক্লী) উপধাতুবিশেষঃ। হিরাকসী ইতি ভাষা। তৎপর্য্যায়ঃ। ধাতুকাসীসং ২ খেচরং ৩ ধাতুশেখরং ৪। ইতি হেমচন্দ্রঃ॥ কেসরং ৫ হংসলোমশং ৬ শোধনং ৭ পাংশুকাসীসং ৮ শুভ্রং ৯। অস্য গুণাঃ। কষায়ত্বং। শিশিরত্বং। বিষকুষ্ঠকৃমিখর্জ্জুনাশিত্বং। চক্ষুর্হিতত্বং। কান্তিবর্দ্ধনত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

কাসূঃ (স্ত্রী) বিকলবাক্। শক্ত্যস্ত্রং। ইতি মেদিনী॥ দীপ্তিঃ। ভাষা। ইতি শব্দরত্নাবলী॥ রোগঃ। বুদ্ধিঃ। ইতি হেমচন্দ্রঃ॥

কাহকা (স্ত্রী) কাহলাবাদ্যং। ইতি দ্বিরূপকোষঃ॥

কাহলং (ক্লী) অব্যক্তবাক্যং। ইতি হেমচন্দ্রঃ॥

কাহলঃ (পুং) কুক্কুটঃ। শব্দমাত্রং। ইতি মেদিনী॥ বিড়ালঃ। ইতি শব্দমালা॥ বৃহড্ঢক্কা। তৎপর্য্যায়ঃ। মহানাদঃ ২। ইতি হারাবলী॥

কাহলঃ (ত্রি) শুষ্কঃ। ভৃশং। খলঃ। ইতি মেদিনী॥

কাহলা (স্ত্রী) বাদ্যভাণ্ডভেদঃ। অপ্সরোবিশেষঃ। ইতি মেদিনী॥

কাহলাপুষ্পঃ (পুং) ধুস্তূরঃ। ইতি শব্দমালা॥

কাহলী (স্ত্রী) তরুণী। যুবতী। ইতি মেদিনী॥

কাহারকঃ (পুং) শিবিকাবাহকজাতিঃ। কাহার ইতি বেহারা ইতি চ ভাষা। যথা। তথা গারুড়িকা বীরাঃ ক্ষুরকর্ম্মোপজীবকাঃ। ব্যাধাঃ কাহারকাঃ পুষ্টাঃ কৃষ্ণং সংবাহয়ন্তি যে॥ ইতি জৈমিনিভারতে আশ্বমেধিকে পর্ব্বণি ১০ অধ্যায়ঃ॥

কাহী (স্ত্রী) কুটজবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কাক্ষ ই কাঙ্ক্ষণে। আকাঙ্ক্ষায়ামিতি যাবৎ। ইতি কবিকল্পদ্রুমঃ॥ ই কাঙ্ক্ষতি ধনং লোকঃ। নমধ্যপাঠেনৈবেষ্টসিদ্ধে ইদমুবন্ধো বেদেষূচ্চারণভেদার্থঃ। ইতি দুর্গাদাসঃ॥

কাক্ষঃ (পুং) কটাক্ষঃ। ইতি হেমচন্দ্রঃ॥

কাক্ষী (স্ত্রী) তুবরিকা। অড়র ইতি ভাষা। সৌরাষ্ট্রমৃত্তিকা। ইতি মেদিনী॥

কাক্ষীবঃ (পুং) শোভাঞ্জনবৃক্ষঃ। ইত্যমরঃ॥

কাক্ষীবকঃ (পুং) শোভাঞ্জনঃ। ইতি শব্দরত্নাবলী॥

কি র লি জ্ঞানে। ইতি কবিকল্পদ্রুমঃ॥ র বৈদিকঃ। লি চিকেতি। ইতি দুর্গাদাসঃ॥

কিং ব্য কিম্। ইতি মেদিনী॥

কিং [ম্] (ত্রি) জিজ্ঞাসার্থং। কি ইতি ভাষা। সর্ব্বনামকিম্শব্দস্য ক্লীবলিঙ্গে রূপমিদং। ইতি ব্যাকরণং॥ অস্যার্থান্তরাণি কিম্শব্দে দ্রষ্টব্যানি॥

কিংসারুঃ (পুং) শস্যশূকং। শুঁয়া ইতি ভাষা। ইত্যমরঃ॥ বাণঃ। কঙ্কপক্ষী। ইতি মেদিনী॥

কিংশুকঃ (পুং) পলাশবৃক্ষঃ। ইত্যমরঃ॥ নন্দীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কিংশুলুকঃ ( পুং ) পলাশবৃক্ষবিশেষঃ। ইতি শব্দরত্নাবলী ॥

কিকিঃ ( পুং ) কিকীদিবিঃ। ইতি শব্দমালা নারিকেলঃ। ইতি রাজনির্ঘণ্টঃ ॥

কিকিদিবিঃ (পুং) চাষপক্ষী। ইতি শব্দমালা ॥

কিকীদিবঃ ( পুং ) চাষপক্ষী। ইতি শব্দমালা॥

কিকীদিবিঃ ( পুং ) স্বর্ণচাতকঃ। সোণাচড়া ইতি ভাষা। নীলকণ্ঠ ইতি কচিৎ খ্যাতঃ। ইতি ভরতঃ ॥ তৎপর্য্যায়ঃ। চাষঃ ২। ইত্যমরঃ ॥ চাসঃ ৩ কিকীদীবিঃ ৪। ইতি ভরতঃ ॥ কিকী ৫ দিবিঃ ৬। ইতি স্বামী ॥ কিকিঃ ৭ কিকিদিবঃ ৮ কিকিদীবিঃ ৯। ইতি শব্দমালা ॥ কিকীদিবঃ ১০ স্বর্ণচূড়ঃ ১১ ইতি জটাধরঃ ॥

কিকীদীবিঃ (পুং) চাষপক্ষী। ইতি শব্দমালা ॥

কিখিঃ ( স্ত্রী ) লঘুশৃগালঃ। খ্যাকৃশেয়ালি ইতি ভাষা। ইতি হেমচন্দ্রঃ ॥

কিখিঃ ( পুং ) কপিঃ। ইতি ভূরিপ্রয়োগঃ ॥

কিঙ্করঃ ( ত্রি ) দাসঃ। ইত্যমরঃ ॥

কিঙ্কিণী (স্ত্রী) কট্যাভরণবিশেষঃ। ঘাঘর ইতি ভাষা। তৎপর্য্যায়ঃ। ক্ষুদ্রঘণ্টিকা ২। ইত্যমরঃ ॥ কঙ্কণী ৩। ইতি ভরতঃ ॥ কিঙ্কিণিকা ৪ কিঙ্কিণিঃ ৫। ইতি কেচিৎ ॥ ক্ষুদ্রঘণ্টী ৬ প্রতিসরা ৭ কিঙ্কিণীকা ৮ কঙ্কণিকা ৯ ক্ষুদ্রিকা ১০। ইতি শব্দরত্নাবলী ॥ ঘর্ঘরী ১১। ইতি জটাধরঃ ॥ বিকঙ্কতবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কিঙ্কিরং ( ক্লী ) গজকুম্ভঃ। ইতি সারস্বতঃ ॥

কিঙ্কিরঃ (পুং) কোকিলঃ। ভ্রমরঃ। ঘোটকঃ। কামদেবঃ। ইতি সারস্বতঃ ॥

কিঙ্কিরা ( স্ত্রী ) রক্তং। ইতি সারস্বতঃ ॥

কিঙ্কিরাতঃ ( পুং ) অশোকবৃক্ষঃ। কামদেবঃ শুকপক্ষী। কোকিলঃ। ইতি সারস্বতঃ রক্তাম্লানঃ। রাঙ্গা ঝাঁটী ইতি ভাষা। ইতি জটাধরঃ ॥ পুষ্পবৃক্ষবিশেষঃ। তৎপর্য্যায়ঃ। হেমগৌরঃ ২ পীতকঃ ৩ পীতভদ্রকঃ ৪ বিপ্রলোভী ৫ পীতাম্লানঃ ৬ ষট্পদানন্দঃ ৭। অস্য গুণাঃ। কষায়ত্বং। উষ্ণত্বং। তিক্তত্বং। অগ্নিদীপনত্বং। কফবায়ুকণ্ডুশোথরক্তত্বগ্দোষনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ তৎপর্য্যায়গুণাঃ। কিঙ্কিরাতো হেমগৌরঃ পীতকঃ পীতভদ্রকঃ। কিঙ্কিরাতো হিমস্তিক্তঃ কষায়শ্চ হরেদসৌ ॥ কফপিত্তপিপাসাস্রদাহশোষবমিক্রিমীন্। ইতি ভাবপ্রকাশঃ ॥

কিঙ্কিরালঃ ( পুং ) বর্ব্বূরবৃক্ষঃ। ইতি বৈদ্যকং ॥

কিঙ্কিরী [ ন্ ] ( পুং ) বিকঙ্কতবৃক্ষঃ। বঁইচি ইতি ভাষা। ইতি জটাধরঃ ॥

কিঞ্চ ব্য আরম্ভঃ। সাকল্যং। ইতি মেদিনী ॥ অবান্তরং। ইতি জটাধরঃ ॥

কিঞ্চন ব্য অসাকল্যং। অকার্ৎস্ন্যং। ইত্যমরঃ ॥

কিঞ্চনঃ ( পুং ) হস্তিকর্ণপলাশঃ। ইতি শব্দরত্নাবলী ॥

কিঞ্চিৎ ব্য অল্পং। তৎপর্য্যায়ঃ। ঈষৎ ২ মনাক্ ৩। অসাকল্যং। যথা। অসাকল্যে তু চিচ্চন। ইত্যমরঃ ॥

কিঞ্চিলিকঃ ( পুং ) কিঞ্চুলুকঃ। ইত্যমরটীকা ॥

কিঞ্চুলুকঃ ( পুং ) কীটবিশেষঃ। কেঁচো ইতি ভাষা। তৎপর্য্যায়ঃ। মহীলতা ২ গণ্ডূপদঃ ৩। ইত্যমরঃ ॥

কিঞ্জং ( ক্লী ) কিঞ্জল্কং। ইতি রাজনির্ঘণ্টঃ ॥

কিঞ্জলঃ ( পুং ) কিঞ্জল্কঃ। ইতি শব্দরত্নাবলী ॥

কিঞ্জল্কং ( ক্লী ) নাগকেশরপুষ্পং। পদ্মাভ্যন্তরস্থং কেশাকারং করহাটকবেষ্টনং। কেসর ইতি খ্যাতং। তৎপর্য্যায়ঃ। মকরন্দং ২ কেশরং ৩ পদ্মকেশরং ৪ কিঞ্জং ৫ পীতপরাগং ৬ তুঙ্গং ৭ চাম্পেয়কং ৮। অস্য গুণাঃ। মধুরত্বং। রূক্ষত্বং। কটুত্বং। আস্যব্রণাপহত্বং। শিশিরত্বং। রুচ্যত্বং। পিত্ততৃষ্ণাদাহবিনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

কিঞ্জল্কঃ ( পুং ) কেশরঃ। ইত্যমরঃ ॥ পদ্মকেশরঃ। তৎপর্য্যায়গুণাঃ। কিঞ্জল্কঃ কেশরঃ প্রোক্তশ্চাম্পেয়শ্চাপি স স্মৃতঃ। কিঞ্জল্কঃ শীতলো রূক্ষঃ কষায়ো গ্রাহকোঽপি সঃ ॥ কফপিত্ততৃষাদাহরক্তার্শোবিষশোথজিৎ। ইতি ভাবপ্রকাশঃ ॥

কিট গতৌ। ভয়ভীষয়োঃ। ইতি কবিকল্পদ্রুমঃ ॥ ভীষা স্বতো ভয়োৎপাদনা। কেটতি জনো ব্যাঘ্রাদ্বিভেতি ইত্যর্থঃ। কেটতি ব্যাঘ্রো জনং ভীষয়তীত্যর্থঃ। ইতি দুর্গাদাসঃ ॥

কিটিঃ ( পুং ) শূকরঃ। ইত্যমরঃ ॥

কিটিভঃ ( পুং ) কেশকীটঃ। উকুণ ইতি ভাষা। ইতি হেমচন্দ্রঃ ॥

কিট্টং ( ক্লী ) মলঃ। ইত্যমরঃ ॥

কিট্টবর্জ্জিতং ( ক্লী ) শুক্রং। ইতি হেমচন্দ্রঃ ॥

কিট্টালঃ ( পুং ) তাম্রকলসঃ। লোহগুথকং। ইতি মেদিনী ॥

কিণঃ ( পুং ) মাংসগ্রন্থিঃ। নির্ঘর্ষণজব্যথাচিহ্নং। কড়া ইতি ভাষা। ইতি লিঙ্গাদিসংগ্রহে অমরভরতৌ ॥ ঘুণঃ। ইতি হারাবলী ॥

কিণিঃ (স্ত্রী) অপামার্গঃ। ইতি শব্দরত্নাবলী ॥

কিণিহী ( স্ত্রী ) অপামার্গবৃক্ষঃ। ইত্যমরঃ ॥

কিণ্বং ( ক্লী ) সুরাবীজং। পাপং। ইতি মেদিনী ॥

কিণ্বঃ ( পুং ক্লী ) সুরাবীজং। ইতি বাচস্পতিরিত্যমরটীকায়াং ভরতঃ ॥

কিত সংশয়ে। ইচ্ছায়াং। বাসে। আরোগ্যে। ইতি কবিকল্পদ্রুমঃ ॥ বিচিকিৎসতি মনঃ সংশেতে ইত্যর্থঃ। আরোগ্যে চিকিৎসত্যাতুরং বৈদ্যঃ। ইচ্ছানিবাসয়োস্তু কেততীতি বোপদেবঃ ॥ তত্র তিবাদয়ো ন প্রযুজ্যন্তে। ইতি রমানাথঃ ॥ ইতি ন বনিতামেতাং হন্তং মনো বিচিকিৎসতে। ইতি তু অন্তর্ভূতণ্যর্থতয়া কর্ম্মকর্ত্তরি সন্ শ্রন্থগ্রন্থইত্যাদিনা যক্‌নিষেধে সিদ্ধং। ইতি দুর্গাদাসঃ ॥

কিত র লি মতৌ। ইতি কবিকল্পদ্রুমঃ ॥ র বৈদিকঃ। লি চিকেত্তি। ইতি দুর্গাদাসঃ ॥

কিতবঃ ( পুং ) অক্ষদেবী। ধুস্তূরঃ। ইত্যমরঃ ॥ মত্তঃ। বঞ্চকঃ। ইতি মেদিনী ॥ খলঃ। ইতি শব্দরত্নাবলী ॥ রোচননামগন্ধদ্রব্যং। ইতি জটাধরঃ রাজনির্ঘণ্টশ্চ ॥

কিন্তনুঃ ( পুং ) অষ্টপাদঃ। মাকড়্সা ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ ॥

কিন্তমাম্ ব্য পৃষ্টৈকতমং। ইতি শব্দরত্নাবলী ॥ ইদমেষামতিশয়েন কিং। ইতি ব্যাকরণং ॥

কিন্তরাং ব্য পৃষ্টৈকতরং। ইতি শব্দরত্নাবলী ॥ ইদমনয়োরতিশয়েন কিং। কিম্শব্দোঽত্র কুৎসার্থঃ। অতিকুৎসিতং রূপমিত্যর্থঃ। ইতি মুগ্ধবোধটীকায়াং দুর্গাদাসঃ ॥

কিন্তু ব্য কিম্পুনঃ। প্রাগুক্তিবিরুদ্ধার্থং। যথা। ভৃত্যাভাবে ভবতি মরণং কিন্তু সম্ভাবিতানাং। ইতি প্রাচীনাঃ ॥

কিন্তুঘ্নঃ ( পুং ) ববাদ্যেকাদশকরণান্তর্গতশেষকরণং। ইতি দীপিকা ॥ তত্র জাতফলং। মিত্রামিত্রে নৈব কিঞ্চিৎ বিশেষো ধর্ম্মাধর্ম্মে তুল্যতা মানবস্য। স্তোত্রে বাদে সর্ব্বদা প্রীতিযুক্তঃ কিন্তুঘ্নাখ্যে যস্য নূনং জনিঃ স্যাৎ ॥ ইতি কোষ্ঠীপ্রদীপঃ ॥

কিন্ধী [ন্] (পুং) অশ্বঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কিন্নরঃ ( পুং স্ত্রী ) স্বনামখ্যাতদেবযোনিঃ। স তু অশ্বমুখত্বাৎ কুৎসিতনরঃ স্বর্গগায়কঃ তুম্বুরুপ্রভৃতিঃ। তৎপর্য্যায়ঃ। কিম্পুরুষঃ ২ তুরঙ্গবদনঃ ৩ ময়ুঃ ৪। ইত্যমরঃ॥ অশ্বমুখঃ ৫ গীতমোদী ৬ হরিণনর্ত্তকঃ ৭। ইতি শব্দরত্নাবলী ॥ অর্হদুপাসকবিশেষঃ। ইতি হেমচন্দ্রঃ ॥

কিন্নরেশঃ ( পুং ) কুবেরঃ। ইত্যমরঃ ॥

কিন্নরেশ্বরঃ (পুং) কুবেরঃ। ইতি হলায়ুধঃ ॥

কিম্ ব্য প্রশ্নঃ। বিতর্কঃ। স্থানং। সাদৃশ্যং। করণং। ইতি জটাধরঃ ॥

কিম্ ব্য কুৎসা। বিতর্কঃ। নিষেধঃ। প্রশ্নঃ। ইতি মেদিনী ॥

কিম্ ( ত্রি ) ক্ষেপঃ। বিতর্কঃ। নিন্দা। পরিপ্রশ্নঃ। ইতি মেদিনী ॥

কিমিচ্ছকঃ ( পুং ) ব্রতবিশেষঃ। তদ্বিবরণং যথা। মার্কণ্ডেয় উবাচ। অথ সাবীক্ষিতো মাতা বীরা বীরপ্রজাবতী। পুণ্যেঽহনি সমাহূয় প্রাহ পুত্রমবীক্ষিতং ॥ পুত্রাহমভ্যনুজ্ঞাতা তব পিত্রা মহাত্মনা। উপবাসং করিষ্যামি দুষ্করোঽয়ং কিমিচ্ছকঃ ॥ স চায়ত্তস্তব পিতুস্ত্বয়া সাধ্যো ময়াপি বা। প্রতিজ্ঞাতে ত্বয়া পুত্র ততস্তত্র যতাম্যহং ॥ দ্রব্যস্যার্দ্ধং মহাকোষাৎ তব দাস্যাম্যহং পিতুঃ। ধনং তে পিতুরায়ত্তমনুজ্ঞাতাস্মি তেন চ ॥ ক্লেশসাধ্যো মমায়ত্তঃ স হি শ্রেয়ো ভবিষ্যতি। সাধ্যো ভবিষ্যো যদি তে কশ্চিদ্বলপরাক্রমৈঃ ॥ স তে সাধ্যোঽন্যথা বাপি দুঃখসাধ্যো ভবিষ্যতি। তত্ত্বং প্রতিজ্ঞাং কুরুষে যদি পুত্রাদ্য বৈ ব্রতে ॥ তদেতদহমারপ্স্যে কথ্যতাং যন্মতং তব। অবীক্ষিদুবাচ। বিত্তং মে পিতুরায়ত্তং মমেশত্বং ন তত্র বৈ। যন্মচ্ছরীরনিষ্পাদ্যং তৎ করিষ্যে ত্বয়োদিতং ॥ কিমিচ্ছকং ব্রতং মাতর্নিশ্চিত্য ভব নির্ব্যথা। রাজ্ঞা পিত্রাভ্যনুজ্ঞাতং যদি বিত্তেশ্বরেণ মে ॥ মার্কণ্ডেয় উবাচ। ততঃ সা রাজমহিষী তদ্ব্রতং সমুপোষিতা। যথোক্তং সাকরোৎ পূজাং রাজরাজস্য সংযতা ॥

নিধীনামপ্যশেষাণাং নিধিপালবলস্য চ। লক্ষ্ম্যাশ্চ পরয়া ভক্ত্যা যতবাক্‌কায়-মানসা ॥ বিবিক্তে তু গৃহান্তঃস্থঃ সোঽথ রাজা করন্ধমঃ। আসীন উক্তঃ সচিবৈ-র্নীতিশাস্ত্রবিশারদৈঃ ॥ সচিবা ঊচুঃ। রাজন্ বয়ঃপরিণতং তবৈবং শাসতো মহীং। একস্তে তনয়োঽবীক্ষিৎ ত্যক্ত-দারপরিগ্রহঃ ॥ অপুত্রঃ স বনে নিষ্ঠাং যদা ভূপ গমিষ্যতি। তদারিপক্ষং পৃথিবী নিশ্চিতং তব যাস্যতি ॥ বংশক্ষয়স্তে ভবিতা পিতৃপিণ্ডোদকক্ষয়ঃ। এতস্মহত্তে বিবরং ক্রিয়াহান্যা ভবিষ্যতি ॥ তস্মাৎ কুরু তথা ভূপ যথা তে তনয়ঃ পুনঃ। করোতি সততং বুদ্ধিং পিতৃণামুপ-কারিণীং ॥ শ্রীমার্কণ্ডেয় উবাচ। এতস্মি-ন্নন্তরে শব্দং শুশ্রাব জগতীপতিঃ। পুরোহিতস্য বীরায়া গদতোঽর্থিজনং প্রতি ॥ কঃ কিমিচ্ছতি দুঃসাধ্যং কস্য কিং সাধ্যতামিতি। করন্ধমস্য মহিষী কিমিচ্ছকমুপোষিতা ॥ রাজপুত্রোঽপ্য-বীক্ষিত্তু শ্রুত্বা পৌরোহিতং বচঃ। প্রত্যু-বাচার্থিনঃ সর্ব্বান্ রাজদ্বারমুপাগতান্ ॥ ময়া সাধ্যং শরীরেণ যস্য কিঞ্চিৎ ব্রবীতু সঃ। মম মাতা মহাভাগা কিমিচ্ছকমুপো-ষিতা ॥ শৃণ্বন্তু মেঽর্থিনঃ সর্ব্বে প্রতিজ্ঞাতং ময়াত্র চ। কিমিচ্ছথ দদাম্যেষ ক্রিয়-মাণে কিমিচ্ছকে ॥ মার্কণ্ডেয় উবাচ। ততো রাজা নিশম্যৈতৎ বাক্যং পুত্র-মুখাচ্চ্যুতং। সমুপেত্যাব্রবীৎ পুত্রমহ-মর্থী প্রযচ্ছ মে ॥ অবীক্ষিদুবাচ। দাতব্যং যন্ময়া তাত ভবতে তদ্‌ব্রবীহি মাং। কর্ত্তব্যং দুষ্করং বা তে সাধ্যং দুঃসাধ্যমেব চ ॥ রাজোবাচ। যদি সত্যপ্রতিজ্ঞস্ত্বং দদাসি চ কিমিচ্ছকং। পৌত্রস্য দর্শয় মুখং মমোৎসঙ্গগতস্য তৎ ॥ অবীক্ষি-দুবাচ। অহং তবৈব তনয়ো ব্রহ্মচর্য্যঞ্চ মে নৃপ। ন মে পুত্রোঽস্তি পৌত্রস্য দর্শ-য়ামি কথং মুখং ॥ রাজোবাচ। পাপায় ব্রহ্মচর্য্যং তে যদিদং ধার্য্যতে ত্বয়া। তস্মাত্ত্বং মোচয়াত্মানং মম পৌত্রং প্রদ-র্শয় ॥ অবীক্ষিদুবাচ। বিরমাস্মান্মহারাজ যদন্যত্তৎ সমাদিশ। বৈরাগ্যেণ ময়া ত্যক্তঃ স্ত্রীসম্ভোগস্তথা রসঃ ॥ রাজোবাচ। বহুভি-র্যুধ্যমানস্য ন দৃষ্টো বৈরিভির্জ্জয়ঃ। তত্রাপি যদি বৈরাগ্যমুপৈষি তদপণ্ডিতঃ ॥ কিম্বা নো বহুনোক্তেন ব্রহ্মচর্য্যং পরি-ত্যজ। মাতুস্ত্বমিচ্ছয়া বক্তুং পৌত্রস্য মম দর্শয় ॥ মার্কণ্ডেয় উবাচ। যদা স বহুশস্তেন প্রোক্তঃ পুত্রেণ পার্থিবঃ। নান্যৎ প্রার্থয়তে কিঞ্চিৎ তদা পুত্রোঽব্র-বীৎ পুনঃ ॥ দত্ত্বা কিমিচ্ছকং তুভ্যং প্রাপ্তোঽহং তাত সঙ্কটং। তৎ করিষ্যামি নির্লজ্জো ভূয়ো দারপরিগ্রহং ॥ স্ত্রিয়াঃ সমক্ষং বিজিতঃ পতিতো ধরণীতলে। স্ত্রীপতির্ভবিতা ভূয়স্তাতৈতদতিদুষ্করং ॥ তথাপি কিং করোম্যেষ সত্যপাশবশং-গতঃ। করিষ্যামি যথাত্থ ত্বং ভুজ্যতাং নিজশাসনং ॥ ইতি শ্রীমার্কণ্ডেয়পুরাণে অবীক্ষিচ্চরিতনামাধ্যায়ঃ ॥

কিমু ব্য সম্ভাবনা। বিমর্ষঃ। ইতি মেদিনী ॥

কিমুত ব্য প্রশ্নঃ। বিতর্কঃ। বিকল্পঃ। অতিশয়ঃ। ইতি মেদিনী ॥

কিম্পচঃ (ত্রি) কিম্পচানঃ। ইত্যমরটীকায়াং রায়মুকুটঃ ॥

কিম্পচানঃ (ত্রি) কৃপণঃ। ইত্যমরঃ ॥

কিম্পাকঃ (ত্রি) মাতৃশাসিতঃ। ইতি জটাধরঃ ॥

কিম্পাকঃ (পুং) মহাকাললতা। মাকাল ইতি ভাষা। ইতি রত্নমালা ॥

কিম্পুরুষঃ (পুং) কিন্নরঃ। ইত্যমরঃ ॥ লোকভেদঃ। ইতি মেদিনী ॥ জম্বুদ্বীপস্য নবখণ্ডান্তর্গতং হিমাচলহেমকূটয়োর্মধ্যবর্ত্তি বর্ষং। ইতি শ্রীভাগবতং ॥ কুৎসিতপুরুষঃ। ইতি ব্যুৎপত্তিলব্ধোঽর্থঃ ॥

কিম্পুরুষেশ্বরঃ (পুং) কুবেরঃ। ইতি হেমচন্দ্রঃ ॥

কিম্পুরুষং (ক্লী) কিম্পুরুষবর্ষং। ইতি ত্রিকাণ্ডশেষঃ ॥

কিস্তরা (স্ত্রী) নলীনামগন্ধদ্রব্যং। ইতি শব্দচন্দ্রিকা ॥

কিম্বদন্তিঃ (স্ত্রী) কিম্বদন্তী। ইত্যমরটীকায়াং ভরতঃ ॥

কিম্বদন্তী (স্ত্রী) জনশ্রুতিঃ। সত্যমসত্যম্বা লোকবাদঃ। ইত্যমরঃ ॥

কিম্বা ব্য বিকল্পঃ। অথবা। তৎপর্য্যায়ঃ। উতাহো ২ যদিবা ৩ যদ্বা ৪ নেতি ৫। ইতি ত্রিকাণ্ডশেষঃ ॥

কিয়ৎ (ত্রি) কিম্পরিমাণমস্য। কতো ইতি ভাষা। ইতি ব্যাকরণং

কিয়দেতিকা (স্ত্রী) উৎসাহঃ। উদ্যোগঃ। ইতি হেমচন্দ্রঃ ॥

কিয়াহঃ (পুং) রক্তবর্ণঘোটকঃ। ইতি হেমচন্দ্রঃ ॥

কিরঃ (পুং) শূকরঃ। ইত্যমরঃ ॥

কিরকঃ (পুং) লেখকঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

কিরণঃ (পুং) সূর্য্যঃ। ইতি হেমচন্দ্রঃ ॥ সূর্য্যরশ্মিরিতি ভগীরথমাধবৌ ॥ চন্দ্রসূর্য্যয়োরশ্মিরিতি রায়মুকুটঃ ॥ রত্নরশ্মৌ গভস্তিশব্দপ্রয়োগাৎ সামান্যরশ্মিঃ। তথা চ ভট্টিঃ ঊর্দ্ধস্ফুরদ্রত্নগভস্তিভির্যেতি মঞ্জরী। ইত্যমরটীকাসারসুন্দরী ॥ তৎপর্য্যায়ঃ। অস্রঃ ২ ময়ূখঃ ৩ অংশুঃ ৪ গভস্তিঃ ৫ ঘৃণিঃ ৬ ধৃষ্ণিঃ ৭ ভানুঃ ৮ করঃ ৯ মরীচিঃ ১০ দীধিতিঃ ১১। ইত্যমরঃ ॥ ত্বিট্‌ ১২ দ্যুতিঃ ১৩ আভা ১৪ প্রভা ১৫ বিভা ১৬ রুক্‌ ১৭ রুচিঃ ১৮ ভাঃ ১৯ ছবিঃ ২০ দীপ্তিঃ ২১ রশ্মিঃ ২২ অভীষুঃ ২৩ মহঃ ২৪ জ্যোতিঃ ২৫ সহঃ ২৬ রোচিঃ ২৭ শোচিঃ ২৮ ত্বিষা ২৯ পৃশ্নিঃ ৩০ প্রকাশঃ ৩১ আতপঃ ৩২ দ্যোতঃ ৩৩। ইতি শব্দরত্নাবলী ॥ পাদঃ ৩৪ আলোকঃ ৩৫ বসুঃ ৩৬ ঋষিঃ ৩৭ ভামঃ ৩৮ ঘর্ম্মঃ ৩৯ লোকঃ ৪০ অর্চ্চিঃ ৪১ ভাসঃ ৪২ বীচিঃ ৪৩ হেতিঃ ৪৪ ধাম ৪৫ বর্চ্চঃ ৪৬ শুষ্ম ৪৭ তেজঃ ৪৮ ওজঃ ৪৯। ইতি জটাধরঃ ॥

কিরণমালী [ন্] (পুং) সূর্য্যঃ। ইতি হারাবলী ॥

কিরাতঃ (পুং) ম্লেচ্ছভেদঃ। ভূনিম্বঃ। অল্পতনুঃ। ইতি মেদিনী ॥ ঘোটকরক্ষকঃ ইতি সারস্বতঃ ॥

কিরাতকঃ ( পুং ) ভূনিম্বঃ। ইতি রাজনির্ঘণ্টঃ॥
কিরাততিক্তঃ ( পুং ) বৃক্ষবিশেষঃ। চিরাতা ইতি ভাষা। তৎপর্য্যায়ঃ। ভূনিম্বঃ ২ অনার্য্যতিক্তঃ ৩। ইত্যমরঃ॥ কৈরাতং ৪ কাণ্ডতিক্তকঃ ৫। ইতি রত্নমালা॥ কিরাতকঃ ৬। ইতি জটাধরঃ॥ চিরতিক্তঃ ৭ চিরাতিক্তঃ ৮ তিক্তকঃ ৯ সুতিক্তকঃ ১০। ইতি শব্দরত্নাবলী॥ কটুতিক্তঃ ১১ রামসেনকঃ ১২॥ অস্য গুণাঃ। বায়ুবৃদ্ধিকারিত্বং। রূক্ষত্বং। কফপিত্তজ্বরনাশিত্বঞ্চ। ইতি রাজবল্লভঃ॥ কিরাতকোঽন্যো নৈপালঃ সার্দ্ধতিক্তো জ্বরান্তকঃ। কিরাতঃ সারকো রূক্ষঃ শীতলস্তিক্তকো লঘুঃ॥ সন্নিপাতজ্বরশ্বাসকফপিত্তাস্রদাহনুৎ। কাশশোষতৃষাকুষ্ঠজ্বরব্রণক্রিমিপ্রণুৎ॥ ইতি ভাবপ্রকাশঃ॥ রাজনির্ঘণ্টোক্তগুণপর্য্যায়ৌ ভূনিম্বশব্দে দ্রষ্টব্যৌ॥
কিরাতাশী [ ন্ ] ( পুং ) গরুড়ঃ। ইতি শব্দ-

কিরাতিঃ ( স্ত্রী ) গঙ্গা। ইতি জটাধরঃ॥
কিরাতিনী ( স্ত্রী ) জটামাংসী। ইতি শব্দরত্নাবলী॥
কিরাতী ( স্ত্রী ) দুর্গা। গঙ্গা। কুট্টনী। ইতি মেদিনী॥ স্বর্গগঙ্গা। ইতি শব্দমালা॥
কিরিঃ (পুং) শূকরঃ। ইত্যমরটীকায়াং ভরতঃ॥
কিরিটি ( ক্লী ) হিন্তালফলং। ইতি ত্রিকাণ্ডশেষঃ॥
কিরীটঃ ( পুং ক্লী ) মুকুটঃ। ইত্যমরঃ॥
কিরীটী [ ন্ ] ( পুং ) অর্জ্জুনঃ। ইতি ত্রিকাণ্ডশেষঃ॥ কিরীটযুক্তে ত্রি॥

কির্ম্মী ( স্ত্রী ) পলালঃ। গৃহং। স্বর্ণপুত্তলিকা। ইতি মেদিনী॥ লোহপুত্তলিকা। ইতি বিশ্বঃ॥
কির্ম্মীরঃ (পুং) নাগরঙ্গবৃক্ষঃ। রাক্ষসবিশেষঃ। কর্ব্বুরবর্ণঃ। ইতি মেদিনী॥ তদ্বর্ণযুক্তে ত্রি। ইত্যমরঃ॥
কির্ম্মীরজিৎ ( পুং ) ভীমসেনঃ। ইতি ত্রিকাণ্ডশেষঃ॥
কির্ম্মীরত্বক্ [ চ্ ] ( স্ত্রী ) নারঙ্গবৃক্ষঃ। ইতি ত্রিকাণ্ডশেষঃ॥
কির্ম্মীরভিৎ [ দ্ ] ( পুং ) ভীমসেনঃ। ইতি ভূরিপ্রয়োগঃ॥
কির্ম্মীরসূদনঃ ( পুং) ভীমসেনঃ। ইতি হেমচন্দ্রঃ
কিল ক নুদৌ। ইতি কবিকল্পদ্রুমঃ॥ ক কেলয়তি। নুদিরিতি ণুদ ক্রৌশ্ প্রেরণে ইত্যস্য ঔণাদিককিপ্রত্যয়ে রূপং। ইতি দুর্গাদাসঃ॥
কিল শ শৌক্ল্যে। ক্রীড়ে। ইতি কবিকল্পদ্রুমঃ॥ শ কিলতি প্রাসাদঃ শিশুর্ব্বা। কেলিতা। ইতি দুর্গাদাসঃ॥
কিল ব্য বার্ত্তা। সম্ভাব্যং। ইত্যমরঃ॥ নিশ্চয়ঃ ইতি তট্টীকাসারসুন্দরী॥ অমুনয়ার্থং ইতি মেদিনী
কিলকিঞ্চিতং (ক্লী) হাবঃ। শৃঙ্গারভাবজা ক্রিয়া। ইতি জটাধরঃ॥ তস্য লক্ষণং। গর্ব্বাভিলাসরুদিতস্মিতাসূয়াভয়ক্রুধাং। সঙ্করীকরণং যৎ স্যাত্তদুচ্যতে কিলকিঞ্চিতং॥ ইত্যলঙ্কারকৌস্তুভং॥
কিলকিলা ( স্ত্রী ) হর্ষধ্বনিঃ। কিলকিলশব্দ

ইতি যাবৎ। তৎপর্য্যায়ঃ। হর্ষস্বনঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥

কিলাটঃ (পুং) ক্ষীরবিকৃতিঃ। ইতি জটাধরঃ॥ দধিকূর্চ্চিকাতক্রকূর্চ্চিকয়োঃ পিণ্ডঃ। অস্য গুণাঃ। শীতত্বং। স্নিগ্ধত্বং। গুরুত্বং। গৌল্যত্বং। বৃষ্যত্বং। পিত্তাপহত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

কিলাটী (স্ত্রী) ক্ষীরবিকৃতিঃ। তৎপর্য্যায়ঃ। কূর্চ্চিকা ২। ইতি হেমচন্দ্রঃ॥

কিলাটী [ন্] (পুং) বংশঃ। বাঁশ্ ইতি ভাষা। ইতি হারাবলী॥

কিলাসং (ক্লী) রোগবিশেষঃ। ছুলী ইতি ভাষা। তৎপর্য্যায়ঃ। সিধ্মা ২। ইত্যমরঃ॥ সিধ্মং ৩। ইতি ভরতঃ॥ ত্বক্‌পুষ্পং ৪ ত্বক্‌পুষ্পী ৫। ইতি হেমচন্দ্রঃ॥

কিলাসঘ্নঃ (পুং) বৃক্ষবিশেষঃ। কাঁকরোল ইতি ভাষা। তৎপর্য্যায়ঃ। কর্কোটকঃ ২ তিক্তপত্রঃ ৩ সুগন্ধকঃ ৪। ইতি হেমচন্দ্রঃ॥

কিলাসী [ন্] (ত্রি) কিলাসরোগযুক্তঃ। তৎপর্য্যায়ঃ। সিধ্মলঃ ২। ইত্যমরঃ॥

কিলিঞ্চং (ক্লী) সূক্ষ্মদারু। ইতি জটাধরঃ॥ কিলিঞ্জমিতি চ পাঠঃ॥

কিলিঞ্জঃ (পুং) সূক্ষ্মদারু। ইতি ত্রিকাণ্ডশেষঃ॥

কিলিঞ্জকঃ (পুং) কাশাদিরজ্জুঃ। যেন কুসূলং বেষ্ট্যতে কুসূলঞ্চ মরায়িরিতি টীকান্তরং। তৃণরচিতটাটী ইতি খ্যাত ইত্যন্যে। ইত্যমরটীকায়াং ভরতঃ॥ তৎপর্য্যায়ঃ। কটঃ ২। ইত্যমরঃ॥

কিলিমং (ক্লী) দেবদারু। ইতি শব্দরত্নাবলী রাজনির্ঘণ্টশ্চ॥

কিল্বিষং (ক্লী) পাপং। অপরাধঃ। ইত্যমরঃ॥ রোগঃ। ইতি মেদিনী॥

কিল্বী [ন্] (পুং) ঘোটকঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কিশলং (ক্লী পুং) পল্লবঃ। ইতি শব্দরত্নাবলী॥

কিশলয়ং (ক্লী পুং) পল্লবঃ। ইতি শব্দরত্নাবলী॥

কিশোরঃ (পুং) অশ্বশিশুঃ। তৈলপর্ণ্যোষধিঃ। সূর্য্যঃ। তরুণাবস্থঃ। স তু একাদশবর্ষাবধিপঞ্চদশবর্ষপর্য্যন্তবয়স্কঃ। ইতি মেদিনী॥ কৈশোরাবস্থাযুক্তে বাচ্যলিঙ্গোঽপি॥

কিষ্ক ক ঙ বধে। ইতি কবিকল্পদ্রুমঃ॥ মূর্দ্ধন্যোপধঃ। ক ঙ কিষ্কয়তে। ইতি দুর্গাদাসঃ॥

কিষ্কিন্ধঃ (পুং) ওড্রদেশস্থপর্ব্বতবিশেষঃ। তৎপর্ব্বতগুহা চ। ইতি শব্দরত্নাবলী॥

কিষ্কিন্ধী (স্ত্রী) কিষ্কিন্ধপর্ব্বতগুহা। ইতি শব্দরত্নাবলী॥

কিষ্কিন্ধ্যঃ (পুং) স্বনামখ্যাতপর্ব্বতঃ। ইতি শব্দরত্নাবলী॥

কিষ্কিন্ধ্যা (স্ত্রী) কিষ্কিন্ধ্যপর্ব্বতগুহা। ইতি শব্দরত্নাবলী॥ সা তু পুরা বালিনামবানররাজধান্যাসীৎ শ্রীরামচন্দ্রস্তং হত্বা সুগ্রীবায় তদ্রাজধানীং দত্তবান্। ইতি রামায়ণং॥

কিষ্কিন্ধ্যাধিপঃ (পুং) বালিনামবানররাজঃ। ইতি জটাধরঃ॥

কিষ্কুঃ (পুং স্ত্রী) বিতস্তিঃ। দ্বাদশাঙ্গুলিপরিমাণং। প্রকোষ্ঠঃ। কফোণেরধোমণিবন্ধপর্য্যন্তঃ। হস্তঃ। ইতি মেদিনী॥ কুৎসিতে ত্রি। ইতি বিশ্বো হেমচন্দ্রশ্চ॥

কিষ্কুপর্ব্বা [ন্] (পুং) ইক্ষুঃ। বেণুঃ। পোটগলঃ। নল ইতি ভাষা। ইতি মেদিনী

কিসলং (ক্লী পুং) কিসলয়ং। ইতি শব্দরত্নাবলী ভরতশ্চ ॥

কিসলয়ং (ক্লী পুং) পল্লবঃ। ইত্যমরঃ॥ স তু নবপত্রাদিযুক্তশাখাগ্রপর্ব্বণি নবপত্রস্তবকঃ ইতি মধুঃ। ইতি ভরতঃ ॥

কীকটঃ (পুং) ঘোটকঃ। দেশভেদঃ। ইতি বিশ্বঃ ॥

কীকটঃ (ত্রি) নির্ধনঃ। কৃপণঃ। ইতি মেদিনী ॥

কীকটাঃ (পুং) দেশবিশেষঃ। বহুবচনান্তশব্দোঽয়ং। ইতি মেদিনী ॥ বেহার ইতি খ্যাতঃ। ইতি কেচিৎ ॥

কীকসং (ক্লী) অস্থি। ইত্যমরঃ ॥

কীকসঃ (পুং) কৃমিজাতিঃ। ইতি মেদিনী.॥ কর্কশে ত্রি। ইতি শব্দরত্নাবলী ॥

কীকসাস্যঃ (পুং) পক্ষী। ইতি হারাবলী ॥

কীকিঃ (পুং) কিকিঃ। চাষপক্ষী। ইত্যমরটীকা

কীচকঃ (পুং) অনিলযোগাৎ শব্দায়মানবংশঃ। ইত্যমরঃ॥ সরন্ধ্রকবংশঃ। রাক্ষসবিশেষঃ। ইতি শব্দরত্নাবলী॥ দৈত্যভেদঃ। বৃক্ষবিশেষঃ। ইতি বিশ্বঃ ॥ নলঃ। ইতি রাজনির্ঘণ্টঃ॥ কেকয়রাজপুত্রঃ। স চ বিরাটরাজশ্যালঃ। ইতি মহাভারতং ॥

কীচকজিৎ (পুং) ভীমসেনঃ। ইতি ত্রিকাণ্ডশেষঃ

কীচকনিসূদনঃ (পুং) ভীমসেনঃ। ইতি হেমচন্দ্রঃ ॥

কীচকভিৎ (পুং) ভীমসেনঃ। ইতি ভূরিপ্রয়োগঃ ॥

কীট ক বন্ধে। বর্ণে। ইতি কবিকল্পদ্রুমঃ ॥ ক কীটয়তি কীটঃ। বর্ণঃ কৈশ্চিন্ন মন্যতে। ইতি দুর্গাদাসঃ ॥

কীটঃ (পুং) কৃমিজাতিঃ। ইতি শব্দরত্নাবলী ॥

কীটকঃ (পুং) মাগধজাতিঃ। ইতি ধরণী ॥ কৃমিজাতিঃ। নিষ্ঠুরে ত্রি। ইতি মেদিনী ॥

কীটঘ্নঃ (পুং) গন্ধকঃ। ইতি রাজনির্ঘণ্টঃ ॥

কীটজা (স্ত্রী) লাক্ষা। ইতি রত্নমালা ॥

কীটপাদিকা (স্ত্রী) হংসপদীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কীটমাতা (স্ত্রী) হংসপদীবৃক্ষঃ। ইতি ভাবপ্রকাশঃ ॥

কীটমারী (স্ত্রী) হংসপদীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কীড়েরঃ (পুং) তণ্ডুলীয়শাকঃ। ইতি ভাবপ্রকাশঃ ॥

কীদৃক্ [শ্] (ত্রি) কিম্প্রকারঃ। ইতি ব্যাকরণং ॥

কীদৃশঃ (ত্রি) কিম্প্রকারঃ। ইতি ব্যাকরণং ॥

কীনাশঃ (পুং) যমঃ। ইত্যমরঃ॥ বানরবিশেষঃ। ইতি তট্টীকায়াং স্বামী ॥

কীনাশঃ (ত্রি) কর্ষকঃ। ক্ষুদ্রঃ। পশুঘাতী। ইতি মেদিনীকরহেমচন্দ্রৌ ॥

কীরং (ক্লী) মাংসং। ইতি রাজনির্ঘণ্টঃ ॥

কীরঃ (পুং) শুকপক্ষী। ইত্যমরঃ ॥

কীরকঃ (পুং) বৃক্ষভেদঃ। ক্ষপণকঃ। প্রাপণং। ইতি ধরণী ॥

কীরবর্ণকং (ক্লী) স্থৌণেয়কনামসুগন্ধিদ্রব্যং। ইতি রাজনির্ঘণ্টঃ॥

কীরাঃ (পুং) কাশ্মীরদেশঃ। তদ্দেশস্থজনঃ। বহুবচনান্তোঽয়ং শব্দঃ। ইতি মেদিনী-ত্রিকাণ্ডশেষৌ॥

কীরেষ্টঃ (পুং) আম্রবৃক্ষঃ। আখোটবৃক্ষঃ। জলমধূকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কীর্ণঃ (ত্রি) আচ্ছন্নঃ। বিক্ষিপ্তঃ। হিংসিতঃ। ইতি মেদিনী॥

কীর্ত্তনং (ক্লী) কথনং। বচনং। ইতি জটা-ধরঃ॥

কীর্ত্তনা (স্ত্রী) যশঃ। ইতি শব্দরত্নাবলী॥

কীর্ত্তিঃ (স্ত্রী) সুখ্যাতিঃ। তৎপর্য্যায়ঃ। যশঃ ২ সমজ্ঞা ৩। ইত্যমরঃ॥ সমাজ্ঞা ৪ সমাখ্যা ৫ সমজ্যা ৬। ইতি তট্টীকায়াং ভরতঃ॥ অভিখ্যা ৭ শ্লোকঃ ৮ বর্ণঃ ৯। ইতি জটা-ধরঃ॥ কীর্ত্তনা ১০। ইতি শব্দরত্নাবলী॥ দানাদিপ্রভবা কীর্ত্তিঃ শৌর্য্যাদিপ্রভবং যশ ইতি মাধবী॥ অতএব যশঃকীর্ত্ত্যোর্ভেদ-স্যাপি দর্শনাৎ যশঃকীর্ত্তিপ্রবিভ্রষ্টো জীব-ন্নপি ন জীবতি ইতি কস্যচিৎ প্রয়োগঃ। জীবতঃ খ্যাতির্যশো মৃতস্য খ্যাতিঃ কীর্ত্তি-রিতি কেচিত্তন্ন সাধুকীর্ত্তিস্তে নৃপ দুতি-কেতি প্রয়োগদর্শনাৎ। ইতি ভরতঃ॥ *॥ প্রসাদঃ। ইতি মেদিনী॥ শব্দঃ। দীপ্তিঃ। মাতৃকাবিশেষঃ। ইতি শব্দরত্নাবলী॥ বিস্তারঃ। কর্দ্দমঃ। ইতি বিশ্বঃ॥

কীর্ত্তিতঃ (ত্রি) কথিতঃ। খ্যাতঃ। যথা। কুষ্মাণ্ডী তু ভৃশং লঘ্বী কর্কারুরপি কীর্ত্তিতা। ইতি ভাবপ্রকাশঃ॥

কীর্ত্তিভাক্ [জ্] (পুং) দ্রোণাচার্য্যঃ। ইতি শব্দরত্নাবলী॥ কীর্ত্তিযুক্তে ত্রি॥

কীর্ত্তিমান্ [ৎ] (পুং) বসুদেবজ্যেষ্ঠপুত্রঃ। ইতি শ্রীভাগবতং॥ কীর্ত্তিবিশিষ্টে ত্রি॥

কীর্ত্তিশেষঃ (পুং) মরণং। ইতি জটাধরঃ॥

কীল বন্ধে। ইতি কবিকল্পদ্রুমঃ॥ চতুর্থস্বরী। কীলতি। ইতি দুর্গাদাসঃ॥

কীলঃ (পুং স্ত্রী) অগ্নিশিখা। শঙ্কুঃ। ইত্য-মরঃ॥ স্তম্ভঃ। লেশঃ। কফোণিঃ। ইতি মেদিনী॥ কফোণিনির্ঘাতঃ। ইতি বিশ্বঃ॥

কীলকঃ (পুং) কীলঃ। খোঁটা গোঁজ খিল ইত্যাদি ভাষা। গবাং গাত্রকণ্ডূয়নার্থং গোষ্ঠে নিখাতস্তম্ভঃ। ইতি সুভূতিঃ॥ কণ্ডূয়নার্থং কাষ্ঠং। ইতি কেচিৎ। বন্ধন-খণ্টঃ। ইতি কেচিৎ। যত্র বদ্ধা গৌর্দুহ্যতে সঃ। ইতি কেচিৎ। ইতি ভরতঃ॥ তৎ-পর্য্যায়ঃ। শিবকঃ ২। ইত্যমরঃ॥

কীলসংস্পর্শঃ (পুং) বৃক্ষবিশেষঃ। গাব ইতি ভাষা। ইতি শব্দচন্দ্রিকা॥

কীলা (স্ত্রী পুং) কীলঃ। ইত্যমরমেদিনী-করৌ॥

কীলালং (ক্লী) জলং। রক্তং। ইত্যমরঃ॥ অমৃতং। মধু। ইতি শব্দরত্নাবলী॥

কীলালধিঃ (পুং) সমুদ্রঃ। ইতি শব্দরত্নাবলী॥

কীলালপঃ (পুং) রাক্ষসঃ। ইতি শব্দরত্না-বলী॥

কীলিতঃ (ত্রি) বদ্ধঃ। ইত্যমরঃ॥

কীশঃ (পুং) বানরঃ। ইত্যমরঃ॥ সূর্য্যঃ। পক্ষী। ইতি শব্দরত্নাবলী॥ নগ্নে ত্রি। ইতি মেদিনী॥

কীশপর্ণঃ ( পুং ) অপামার্গঃ। ইতি শব্দরত্নাবলী ॥

কীশপর্ণী ( স্ত্রী ) অপামার্গঃ। ইত্যমরঃ ॥

কু ঙ শব্দে। ইতি কবিকল্পদ্রুমঃ ॥ ঙ কবতে ইতি দুর্গাদাসঃ॥

কু ল শব্দে। ইতি কবিকল্পদ্রুমঃ ॥ ল কৌতি। ইতি দুর্গাদাসঃ ॥

কু শি ঙ আর্ত্তস্বরে। ইতি কবিকল্পদ্রুমঃ ॥ শি ঙ কুবতে অকুত। ইতি দুর্গাদাসঃ ॥

কু ব্য পাপং। কুৎসা। ঈষদর্থঃ। নিবারণং। ইতি মেদিনী ॥

কুঃ ( স্ত্রী ) পৃথিবী। ইত্যমরঃ ॥

কুক্ ঙ আদানে। ইতি কবিকল্পদ্রুমঃ ॥ ঙ কোকতে। ইতি দুর্গাদাসঃ ॥

কুকভং ( ক্লী ) মদ্যং। ইতি শব্দচন্দ্রিকা ॥

কুকরঃ ( ত্রি ) কুৎসিতহস্তযুক্তঃ। রোগাদিনা কুঞ্চিতকরঃ। তৎপর্য্যায়ঃ। কুণিঃ ২। ইত্যমরঃ ॥ কূণিঃ ৩ কোণিঃ ৪। ইতি তট্টীকা ॥

কুকীলঃ ( পুং ) পর্ব্বতঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

কুকুটঃ ( পুং ) সিতাবরঃ। সুষণি শাক ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ ॥

কুকুদঃ ( পুং ) কুকুদঃ। সৎকারপূর্ব্বকালঙ্কৃতকন্যাদানকর্ত্তা। ইত্যমরটীকায়াং রায়মুকুটঃ ॥

কুকুন্দরং ( ক্লী ) নিতম্বস্থকূপকদ্বয়ং। পৃষ্ঠবংশাদধোগর্ত্তদ্বয়ং। ইত্যমরঃ ॥ কুকুন্দরে ইতি দ্বিবচনান্তোঽপি প্রয়োগঃ ॥

কুকুন্দরঃ ( পুং ) কুক্কুরদ্রুঃ। কুকুরোঁদা ইতি হিন্দী ভাষা। তৎপর্য্যায়গুণাঃ। কুকুন্দরস্তাম্রচূড়ঃ সূক্ষ্মপত্রো মৃদুচ্ছদঃ। কুকুন্দরঃ কটুস্তিক্তো জ্বররক্তকফাপহঃ ॥ তন্মূলমার্দ্রং নিঃক্ষিপ্তং বদনে মুখশোষহৃৎ। ইতি ভাবপ্রকাশঃ ॥

কুকুভা ( স্ত্রী ) রাগিণীবিশেষঃ। ইতি হলায়ুধঃ ॥

কুকুরঃ ( পুং ) কুক্কুরঃ। ক্ষত্রিয়বিশেষঃ। ইত্যুণাদিকোষঃ ॥ স তু যদুবংশীয়ান্ধকরাজপুত্রঃ। ইতি শ্রীভাগবতং ॥ গ্রন্থিপর্ণীবৃক্ষঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

কুকুরাঃ ( পুং ) দেশবিশেষঃ। তদ্দেশস্থলোকশ্চ। তৎপর্য্যায়ঃ। যদবঃ ২ দশার্হাঃ ৩ সাত্বতাঃ ৪। বহুবচনান্তোঽয়ং শব্দঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

কুকূটী ( পুং ) শাল্মলিবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কুকূলং ( ক্লী ) শঙ্কুভিঃ সংকীর্ণং শ্বভ্রং। ইত্যমরঃ ॥ তন্মুত্রং। ইতি হারাবলী ॥

কুকূলঃ ( পুং ) তুষানলঃ। ইত্যমরঃ ॥

কুকোলং ( ক্লী ) কোলিবৃক্ষঃ। ইতি শব্দচন্দ্রিকা ॥

কুক্কুটঃ ( পুং স্ত্রী ) পক্ষিবিশেষঃ। কুকুড়া ইতি ভাষা। তৎপর্য্যায়ঃ। কৃকবাকুঃ ২ তাম্রচূড়ঃ ৩ চরণায়ুধঃ ৪। ইত্যমরঃ॥ কালজ্ঞঃ ৫ নিযোদ্ধা ৬ বিষ্কিরঃ ৭ নখরায়ুধঃ ৮ তাম্রশিখী ৯। ইতি জটাধরঃ ॥ স্বাত্রিবেদঃ ১০ উষাকরঃ ১১ বৃতাক্ষঃ ১২ কাহলঃ ১৩। ইতি শব্দরত্নাবলী॥ দক্ষঃ ১৪ যামনাদী ১৫ শিখণ্ডিকঃ ১৬। তন্মাংসগুণাঃ। কুক্কুটো বৃংহণঃ স্নিগ্ধো বীর্য্যোষ্ণো-

হনিলঘ্নঃ গুরুঃ। চক্ষুষ্যঃ শুক্রকফকৃদ্বল্যো রূক্ষঃ কষায়কঃ॥ আরণ্যকুক্কুটঃ স্নিগ্ধো বৃংহণঃ শ্লেষ্মলো গুরুঃ। বাতপিত্তক্ষয়বমিবিষমজ্বরনাশনঃ॥ ইতি ভাবপ্রকাশঃ॥ অরণ্যকুক্কুটমাংসগুণাঃ। হৃদ্যত্বং। শ্লেষ্মহরত্বং। লঘুত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ রূক্ষত্বং। কষায়ত্বং। স্বাদুত্বং। শীতলত্বঞ্চ। ইতি রাজবল্লভঃ॥ গ্রাম্যকুক্কুটমাংসগুণাঃ। স্নিগ্ধত্বং। বাতহরত্বং। দীপনত্বং। গুরুত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ বলকারিত্বং। উষ্ণত্বং। মধুরত্বঞ্চ। ইতি রাজবল্লভঃ॥*॥ নিষাদপুত্রঃ। শূদ্রপুত্রঃ। তৃণোল্কা। কুক্কুভপক্ষী। ইতি মেদিনী॥ বহ্নিকণঃ। ইতি হেমচন্দ্রঃ॥

কুক্কুটকঃ (পুং) কুক্কুভপক্ষী। ইতি শব্দরত্নাবলী॥ স্বার্থে কপ্রত্যয়ে কুক্কুটশব্দার্থোঽপ্যত্র॥

কুক্কুটব্রতং (ক্লী) সন্তানার্থং স্ত্রীকর্ত্তব্যব্রতং। ইতি শব্দমালা॥ কুক্কুটীব্রতমপি পাঠঃ। ললিতাসপ্তমীব্রতমিদং। যথা। ভাদ্রে মাসি সিতে পক্ষে সপ্তম্যাং নিয়মেন যা। স্নাত্বা শিবং লেখয়িত্বা মণ্ডলে চ সহাম্বিকং॥ পূজয়েচ্চ তদা তস্যা দুষ্প্রাপং নৈব বিদ্যতে। ইতি তিথ্যাদিতত্ত্বে ভবিষ্যপুরাণং॥

কুক্কুটমণ্ডপঃ (পুং) মুক্তিমণ্ডপঃ। যথা। ততো লোকান্তদারভ্য কথয়িষ্যন্তি সর্ব্বতঃ। মুক্তিমণ্ডপনামৈতদেষ কুক্কুটমণ্ডপঃ॥ ইতি কাশীখণ্ডং॥

কুক্কুটমস্তকং (ক্লী) চব্যং। চৌই ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥

কুক্কুটশিখঃ (পুং) কুসুম্ভবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥

কুক্কুটাভঃ (পুং) কুক্কুটতুল্যবর্ণচরণসর্পবিশেষঃ। তৎপর্য্যায়ঃ। কুক্কুটাহিঃ ২। ইতি হেমচন্দ্রঃ॥

কুক্কুটাহিঃ (পুং) কুক্কুটাভসর্পঃ। ইতি হেমচন্দ্রঃ॥

কুক্কুটিঃ (স্ত্রী) দম্ভচর্য্যা। ইতি হেমচন্দ্রঃ॥

কুক্কুটী (স্ত্রী) অনৃতচর্য্যা। ইতি মেদিনী॥ জ্যেষ্ঠী। টিকৃটিকি ইতি ভাষা। ইতি শব্দরত্নাবলী॥ শাল্মলীবৃক্ষঃ। ইতি জটাধরঃ॥

কুক্কুটীব্রতং (ক্লী) ভাদ্রশুক্লসপ্তমীকর্ত্তব্যনিয়মবিশেষঃ। তদ্বিবরণং ললিতাসপ্তমীশব্দে দ্রষ্টব্যং॥

কুক্কুভঃ (পুং) পক্ষিবিশেষঃ। পাৎকুকা ইতি ভাষা। ইত্যমরঃ॥

কুক্কুরং (ক্লী) গ্রন্থিপর্ণং। গাঁঠিয়ালা ইতি ভাষা। ইত্যমরঃ॥

কুক্কুরঃ (পুং) জন্তুবিশেষঃ। কুকুর ইতি ভাষা। তৎপর্য্যায়ঃ। কৌলেয়কঃ ২ সারমেয়ঃ ৩ মৃগদংশকঃ ৪ শুনকঃ ৫ ভষকঃ ৬ শ্বা ৭। ইত্যমরঃ॥ কুর্কুরঃ ৮ শুনঃ ৯ শুনিঃ ১০ শ্বানঃ ১১। ইতি তট্টীকা॥ ভষণঃ ১২ ভল্লুকঃ ১৩ বক্রলাঙ্গূলঃ ১৪ বৃকারিঃ ১৫ রাত্রিজাগরঃ ১৬ কালেয়কঃ ১৭ গ্রাম্যমৃগঃ ১৮ মৃগারিঃ ১৯ শূরঃ ২০ শয়ালুঃ ২১। ইতি রাজনির্ঘণ্টঃ॥ তস্য গুণাঃ। বহ্বাশী স্বল্পসন্তুষ্টঃ সুনিদ্রঃ শীঘ্রচেতনঃ। প্রভুভক্তশ্চ শূরশ্চ ষড়েতে চ

শুনো গুণাঃ ॥ ইতি চাণক্যং ॥ তস্য পরীক্ষা যথা। মৃগয়ার্থং শাকুনার্থং কৌতুকার্থিমহীক্ষিতা। শ্বানঃ পোষ্যাস্ততস্তেষামত্র বক্ষ্যামি লক্ষণং ॥ গুণজাতিপ্রভেদেন শুনো ভেদো হ্যনেকধা। তদ্যথা। সাত্ত্বিকা রাজসাশ্চৈব তামসাশ্চ ত্রিধা মতাঃ ॥ অশ্রান্তা অপরিক্ষীণাঃ পবিত্রাঃ স্বল্পভোজিনঃ। শ্বানস্তে সাত্ত্বিকাঃ প্রোক্তা দৃশ্যন্তে চ কচিৎ কচিৎ ॥ ১ ॥ ক্রুদ্ধা বহুভুজো দীর্ঘা গুরুবক্ষস্তনূদরাঃ। জাঙ্গলস্থা জাঙ্গিকাশ্চ শ্বানস্তে রাজসা মতাঃ ॥ ২ ॥ অল্পশ্রমেণ যে শ্রান্তা ললজ্জিহ্বা গুরূদরাঃ। শ্বানস্তে তামসা জ্ঞেয়াঃ সন্ধ্যাবনসমাশ্রয়াঃ ॥ ৩ ॥ ব্রহ্মাদিজাতিভেদেন চতুর্দ্ধা সর্ব্ব এব হি। শুভ্রা দীর্ঘা স্তব্ধকর্ণা লঘুপুচ্ছাস্তনূদরাঃ ॥ সুশুক্লখরদন্তাশ্চ শ্বানস্তে ব্রহ্মজাতয়ঃ। ১। রক্তাঙ্গাস্তনুলোমানো ললৎকর্ণাস্তনূদরাঃ ॥ দীর্ঘা দীর্ঘা নখরদাঃ শ্বানস্তে ক্ষত্রজাতয়ঃ। ২। যে পীতবর্ণা মৃদবস্তনুলোমান এব চ॥ ক্রুদ্ধা ক্রুদ্ধা ললজ্জিহ্বাস্তে শ্বানো বৈশ্যজাতয়ঃ। ৩। কৃষ্ণবর্ণাস্তনুমুখা দীর্ঘরোমাণ এব চ ॥ অক্রুদ্ধাঃ শ্রমযুক্তাশ্চ তে শ্বানঃ শূদ্রজাতয়ঃ। ৪। লঘুপ্রমাণাস্তু গুরূদরা যে যেঽমেধ্যভক্ষা বহুপুত্রকাশ্চ। প্রবৃদ্ধপুচ্ছা লঘুসূক্ষ্মদন্তাস্তে চান্ত্যজাঃ কুক্কুরজাতয়ঃ স্যুঃ ॥ ৫ ॥ দ্বিজাতিচিহ্নসংসর্গাৎ দ্বিজাতিঃ শ্বা ভয়াবহঃ। লক্ষণত্রয়সম্বন্ধাৎ ত্রিজাতির্ধননাশনঃ ॥ ভোজোঽপি। দ্বিজাতির্ব্বা ত্রিজাতির্ব্বা বিজাতিঃ শ্বা মহীভৃতাং। ভয়ং ধনক্ষয়ং শোকং বিদধাতি যথাক্রমং ॥ ইতি ভোজরাজকৃতযুক্তিকল্পতরুঃ ॥

কুক্কুরদ্রুঃ (পুং) বৃক্ষবিশেষঃ। কুক্কুরশোঁকা ইতি ভাষা। তৎপর্য্যায়ঃ। তাম্রচূড়ঃ ২ সূক্ষ্মপত্রঃ ৩ মৃদুচ্ছদঃ ৪। অস্য গুণাঃ। কটুত্বং। তিক্তত্বং। জ্বররক্তকফনাশিত্বঞ্চ। ইতি মদনবিনোদঃ ॥ তম্মূলমার্দ্রং নিক্ষিপ্তং বদনে মুখশোষহৃৎ। ইতি ভাবপ্রকাশঃ ॥

কুক্কুরী (স্ত্রী) কুক্কুরস্ত্রী। কুত্তী ইতি ভাষা। তৎপর্য্যায়ঃ। সরমা ২ শ্বানী ৩ সারমেয়ী ৪ শুনী ৫ ভষী ৬। ইতি শব্দরত্নাবলী ॥

কুক্কুবাক্ (পুং) সারঙ্গমৃগঃ। ইতি রাজনির্ঘণ্টঃ ॥

কুঙ্কুমং (ক্লী) স্বনামখ্যাতগন্ধদ্রব্যং। কুম্‌কুম্ ইতি কেশর ইতি চ ভাষা। তৎপর্য্যায়ঃ। কাশ্মীরজন্ম ২ অগ্নিশিখং ৩ বরং ৪ বাহ্লীকং ৫ পীতনং ৬ রক্তং ৭ সঙ্কোচং ৮ পিশুনং ৯ ধীরং ১০ লোহিতচন্দনং ১১। ইত্যমরঃ ॥ চারু ১২ বাহ্লিকং ১৩ বরবাহ্লীকং ১৪ রক্তচন্দনং ১৫। ইতি তট্টীকা ॥ অগ্নিশেখরং ১৬ অসৃক্ ১৭ কাশ্মীরজং ১৮ পীতকং ১৯ কাশ্মীরং ২০ রুচিরং ২১ শঠং ২২ শোণিতং ২৩ ঘুসৃণং ২৪ বরেণ্যং ২৫ অরুণং ২৬ কালেয়কং ২৭ জাগুড়ং ২৮ কান্তং ২৯ বহ্নিশিখং ৩০ কেশরবরং ৩১ গৌরং ৩২ কেসরং ৩৩ হরিচন্দনং ৩৪ খলং ৩৫ রক্তং ৩৬ দীপকং ৩৭ লোহিতং ৩৮ সৌরভং ৩৯ চন্দনং ৪০। ইতি শব্দরত্নাবলী ॥ অস্য গুণাঃ। সুরভিত্বং। তিক্তত্বং।

কটুত্বং। উষ্ণত্বং। কাসবাতকফকণ্ঠরোগমূর্দ্ধশূলবিষদোষনাশিত্বং। রোচনত্বং। তনুকান্তিকরত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ রেচকত্বং। বিবর্ণতাকণ্ডূনাশিত্বঞ্চ। ইতি রাজবল্লভঃ॥ স্নিগ্ধত্বং। শিরোরুগ্‌ব্রণজন্তুবমিব্যঙ্গদোষত্রয়াপহত্বং। বল্যত্বঞ্চ। ইতি ভাবপ্রকাশঃ॥ ত্বগ্দোষনাশিত্বং। ইতি রত্নাবলী তত্ত্বচন্দ্রিকা চ॥ দেশভেদে তৎ ত্রিবিধং। যথা। কাশ্মীরদেশজে ক্ষেত্রে কুঙ্কুমং যদ্ভবেদ্ধি তৎ। সূক্ষ্মকেশরমারক্তং পদ্মগন্ধি তদুত্তমং॥ ১॥ বাহ্লীকদেশসংজাতং কুঙ্কুমং পাণ্ডুরং ভবেৎ। কেতকীগন্ধযুক্তং তন্মধ্যমং সূক্ষ্মকেশরং॥ ২॥ কুঙ্কুমং পারসীকেয়ং মধুগন্ধি তদীরিতং। ঈষৎপাণ্ডুরবর্ণং তদধমং স্থূলকেশরং॥৩॥ ইতি ভাবপ্রকাশঃ॥

কুঙ্গনী (স্ত্রী) মহাজ্যোতিষ্মতী। ইতি রাজনির্ঘণ্টঃ॥

কুচ ঞ রোধপর্ককৌটিল্যলেখনে। ইতি কবিকল্পদ্রুমঃ॥ ঞ কোচঃ কুচঃ। রোধঃ ক্রিয়ারোধঃ জড়ীভাব ইত্যর্থঃ। অস্মিন্নর্থ এব প্রায়ো বর্ত্ততে। যস্মিন্ প্রমুদিতে রাজ্ঞি তমঃ সঙ্কোচতি ক্ষিতৌ। পর্কঃ সম্পর্কঃ। ইতি দুর্গাদাসঃ॥

কুচ শি সঙ্কোচে। ইতি কবিকল্পদ্রুমঃ॥ প্রায়ঃ সংপূর্ব্বস্য প্রয়োগঃ। শি সংকুচতি অকুচীৎ চুকোচ। ইতি দুর্গাদাসঃ॥

কুচ তারশব্দে। উচ্চৈঃশব্দ ইতি যাবৎ। ইতি কবিকল্পদ্রুমঃ॥ কোচতি ঢক্কা। ভট্টমল্লস্তু তারে শব্দে চ কোচতি ইতি নানার্থে পঠতি। তন্মতে তারশ্চিক্কণতা। কোচতি কাঞ্চীং বণিক্ চিক্কণয়তীত্যর্থঃ। ইতি দুর্গাদাসঃ॥

কুচঃ (পুং) স্তনঃ। ইত্যমরঃ॥

কুচণ্ডিকা (স্ত্রী) মূর্ব্বালতা। ইতি শব্দচন্দ্রিকা॥

কুচন্দনং (ক্লী) রক্তচন্দনং। ইত্যমরঃ॥ পত্রাঙ্গং। বকম্ কাঠ্ ইতি ভাষা। বৃক্ষভেদঃ। ইতি মেদিনী॥ কুঙ্কুমং। ইতি শব্দচন্দ্রিকা॥

কুচফলঃ (পুং) দাড়িমবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কুচরঃ (ত্রি) কুবাদঃ। পরদোষকথনশীলঃ। ইত্যমরঃ॥

কুচাগ্রং (ক্লী) স্তনাগ্রভাগঃ। মাইর বোঁটা ইতি ভাষা। তৎপর্য্যায়ঃ। চূচুকং ২। ইত্যমরঃ॥ চুচুকং ৩। ইতি তট্টীকা॥

কুচাঙ্গেরী (স্ত্রী) চুক্রিকা। চুকাপালং ইতি ভাষা। ইতি রত্নমালা॥

কুচিকঃ (পুং স্ত্রী) মৎস্যবিশেষঃ। কুঁচিয়া ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ॥

কুচেলঃ (ত্রি) কুবাসাঃ। পরিহিতকুৎসিতবস্ত্রো জনঃ। ইতি মেদিনী॥

কুচেলা (স্ত্রী) বিদ্ধকর্ণী। ইতি মেদিনী॥

কুচেলী (স্ত্রী) অম্বষ্ঠা। আকনাদি ইতি ভাষা ইতি রত্নমালা॥

কুচ্ছং (ক্লী) কুমুদং। ইতি শব্দচন্দ্রিকা॥

কুজ উ স্তেয়ে। ইতি কবিকল্পদ্রুমঃ॥ উ কোজিত্বা কুক্ত্বা। স্তেয়ং চৌর্য্যং। ইতি দুর্গাদাসঃ॥

কুজ ই অব্যক্তশব্দে। ইতি চন্দ্রঃ॥ কুঞ্জতি কুঞ্জরঃ। ইতি দুর্গাদাসঃ॥

কুজঃ (পুং) মঙ্গলগ্রহঃ। নরকাসুরঃ। বৃক্ষঃ। ইতি হেমচন্দ্রঃ॥

কুজম্ভলঃ (ত্রি) চৌরবিশেষঃ। সিঁদেল চোর ইতি ভাষা। ইতি হারাবলী॥

কুজম্ভিলঃ (ত্রি) কুজম্ভলঃ। ইতি শব্দরত্নাবলী॥

কুজা (স্ত্রী) কাত্যায়নী দেবী। ইতি মেদিনী॥

কুজ্জিশঃ (পুং) মৎস্যভেদঃ। অস্য গুণাঃ। মধুরত্বং। হৃদ্যত্বং। কষায়ত্বং। দীপনত্বং। বলকারিত্বং। স্নিগ্ধত্বং। গুরুত্বং। গ্রাহিত্বং। বাতে হিতত্বং। রোচনত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

কুজ্‌ঝটিঃ (স্ত্রী) কুজ্‌ঝটিকা। কুয়া। কুয়াসা ইতি চ ভাষা। তৎপর্য্যায়ঃ। ধূমমহিষী ২ রতান্ধ্রী ৩ কুহেলিকা ৪ ধূমিকা ৫ নভোরেণুঃ ৬। ইতি ত্রিকাণ্ডশেষঃ॥ অস্য গুণাঃ। রূক্ষত্বং। তমোগুণপ্রায়ত্বং। কফপিত্তকারিত্বঞ্চ। ইতি রাজবল্লভঃ॥

কুজ্‌ঝটিকা (স্ত্রী) কুজ্‌ঝটিঃ। ইতি শব্দরত্নাবলী॥

কুজ্‌ঝটী (স্ত্রী) কুজ্‌ঝটিঃ। ইতি শব্দরত্নাবলী॥

কুঞ্চনং (ক্লী) নেত্ররোগবিশেষঃ। তস্য লক্ষণং যথা। বাতাদ্যা বর্ত্মসঙ্কোচং জনয়ন্তি যদা মলাঃ। তদা দ্রষ্টুং ন শক্নোতি কুঞ্চনং নাম তদ্বিদুঃ॥ ইতি মাধবকরঃ॥

কুঞ্চফলা (স্ত্রী) কুষ্মাণ্ডী। ইতি রাজনির্ঘণ্টঃ॥

কুঞ্চিঃ (পুং) অষ্টমুষ্টিপরিমাণং। যথা। অষ্টমুষ্টির্ভবেৎ কুঞ্চিঃ কুঞ্চয়োঽষ্টৌ চ পুষ্কলং। ইতি স্মৃতিঃ॥

কুঞ্চিকা (স্ত্রী) গুঞ্জা। কুঁচ্ ইতি ভাষা। বংশশাখা। কঞ্চি ইতি ভাষা। ইতি শব্দচন্দ্রিকা॥ কৃষ্ণজীরকঃ। ইতি জটাধরঃ॥ কূর্চ্চিকা। কুঁজি চাবি ইতি চ ভাষা। ইতি হেমচন্দ্রঃ॥ মেথিকা। ইতি রাজনির্ঘণ্টঃ॥ মৎস্যভেদঃ। কুঁচে ইতি ভাষা। যথা। কুঞ্চিকয়ৈনং বিস্মায়য়তি ভায়য়তি। ইতি মুগ্ধবোধং॥

কুঞ্চিতং (ত্রি) বক্রং। ইত্যমরঃ॥ তগরপুষ্পে ক্লী। ইতি রাজনির্ঘণ্টঃ॥

কুঞ্জঃ (পুং ক্লী) পর্ব্বতাদের্লতাপল্লবাদিভিঃ সমন্তাদাচ্ছাদিতগর্ভো গহ্বরাদিদেশঃ। ইতি মধুপ্রভৃতয়ঃ॥ উপরি চতুর্দিক্ষু চ লতাদিভিরাচ্ছাদিতস্য স্থানস্য মধ্যে শূন্যদেশঃ। ইত্যন্যে। ইতি ভরতঃ॥ তৎপর্য্যায়ঃ। নিকুঞ্জঃ ২। ইত্যমরঃ॥ হনুঃ। হস্তিদন্তঃ। ইতি মেদিনী॥

কুঞ্জরঃ (পুং) হস্তী। উত্তরপদে শ্রেষ্ঠবাচকঃ। যথা পুরুষকুঞ্জরঃ ইত্যাদি। ইত্যমরঃ॥ কেশঃ। ইতি মেদিনী॥ দেশভেদঃ। ইতি শব্দরত্নাবলী॥

কুঞ্জরপিপ্পলী (স্ত্রী) গজপিপ্পলী। ইতি শব্দমালা॥

কুঞ্জরক্ষারমূলং (ক্লী) মূলকং। ইতি রাজনির্ঘণ্টঃ॥

কুঞ্জরা (স্ত্রী) ধাতকী। ধাইফুল ইতি ভাষা। পাটলাবৃক্ষঃ। ইতি মেদিনী॥ হস্তিনী। ইতি শব্দচন্দ্রিকা॥

কুঞ্জরারাতিঃ (পুং) শরভঃ। ইতি হেমচন্দ্রঃ।

কুঞ্জরালুকং (ক্লী) আলুকবিশেষঃ। হস্ত্যালু। ইতি শব্দচন্দ্রিকা॥

কুঞ্জরাশনঃ (পুং) অশ্বত্থবৃক্ষঃ। ইত্যমরঃ॥

কুঞ্জরী (স্ত্রী) হস্তিনী। ইতি শব্দচন্দ্রিকা॥

কুঞ্জলং (ক্লী) কাঞ্জিকং। ইত্যমরঃ॥

কুঞ্জবল্লরী (স্ত্রী) নিকুঞ্জিকাম্লাবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কুঞ্জিকা (স্ত্রী) কৃষ্ণজীরকঃ। কুঞ্চিকা ইতি ক্বচিৎ পাঠঃ। ইতি জটাধরঃ॥ নিকুঞ্জিকাম্লাবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কুট ই বৈকল্যে। ইতি কবিকল্পদ্রুমঃ॥ পঞ্চমস্বরী। ই কুণ্ট্যতে। বৈকল্যমিহ বিকলীকরণং। কুণ্টতি জনং শোকঃ। ইতি দুর্গাদাসঃ॥

কুট শি কৌটিল্যে। ইতি কবিকল্পদ্রুমঃ॥ শি কুটতি অকুটীৎ চুকোট। কৌটিল্যমিহ কুটিলীভাবঃ কুটিলীকরণঞ্চ। ইতি দুর্গাদাসঃ॥

কুট ক ঙ প্রতাপনে। ইতি কবিকল্পদ্রুমঃ॥ পঞ্চমস্বরী। ক ঙ কোটয়তে। এষোঽন্যৈর্ন মন্যতে। ইতি দুর্গাদাসঃ॥

কুটঃ (পুং ক্লী) কলশঃ। ইত্যমরঃ॥

কুটঃ (পুং) কোটঃ। গড় ইত্যাদি ভাষা। ইতি মেদিনী॥ শিলাকুট্টং। পাতরভাঙ্গা হাতুড়ী ইতি ভাষা। বৃক্ষঃ। ইতি হেমচন্দ্রঃ॥ পর্ব্বতঃ। ইতি হারাবলী॥

কুটঙ্কঃ (পুং) গৃহাচ্ছাদনং। চাল ইতি খ্যাতঃ। ইতি শব্দমালা॥

কুটঙ্গকঃ (পুং) বৃক্ষলতাগহনং। ছদিঃ। চাল ইতি ভাষা। গৃহভেদঃ। কুঁড়ে ইতি ভাষা। ইত্যমরটীকায়াং মুকুটাদয়ঃ॥

কুটচঃ (পুং) কুটজবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥

কুটজঃ (পুং) পুষ্পবৃক্ষবিশেষঃ। যস্য ফলং ইন্দ্রযবঃ। কুড়চী ইতি ভাষা। তৎপর্য্যায়ঃ। শক্রঃ ২ বৎসকঃ ৩ গিরিমল্লিকা ৪। ইত্যমরঃ॥ কৌটজঃ ৫। ইতি তট্টীকা॥ বৃক্ষকঃ ৬ শক্রপর্য্যায়ঃ ৭। ইতি রত্নমালা॥ কূটজঃ ৮ কাহী ৯ কালিঙ্গঃ ১০ মল্লিকাপুষ্পঃ ১১ প্রাবৃষ্যঃ ১২ শক্রপাদপঃ ১৩ বরতিক্তঃ ১৪ যবফলঃ ১৫ সংগ্রাহী ১৬ পাণ্ডুরদ্রুমঃ ১৭ প্রাবৃষেণ্যঃ ১৮ মহাগন্ধঃ ১৯ পাণ্ডরঃ ২০। ইতি শব্দরত্নাবলী॥ অপি চ। কুটজঃ কূটজঃ কৌটো বৎসকো গিরিমল্লিকা। কালিঙ্গঃ শক্রশাখী চ মল্লিকাপুষ্প ইত্যপি॥ ইন্দ্রো যবফলঃ প্রোক্তো বৃক্ষকঃ পাণ্ডুরদ্রুমঃ। কুটজঃ কটুকো রূক্ষো দীপনস্তুবরো হিমঃ॥ ইতি ভাবপ্রকাশঃ॥ অস্য গুণাঃ। কটুত্বং। তিক্তত্বং। উষ্ণত্বং। কষায়ত্বং। অতিসারনাশিত্বঞ্চ। অসিতস্য তস্য গুণঃ। রক্তপিত্তত্বগ্দোষার্শোনাশিত্বং। ইতি রাজনির্ঘণ্টঃ॥ কফনাশকত্বং। ইতি রাজবল্লভঃ॥ অগস্ত্যমুনিঃ। দ্রোণাচার্য্যঃ। ইতি মেদিনী॥

কুটন্নটং (ক্লী) কৈবর্ত্তীমুস্তকং। ইত্যমরঃ॥ কেঊটিয়া মুতা ইতি খ্যাতং। কেশুর ইতি নীচোক্তিঃ। ইতি তট্টীকা॥

কুটন্নটঃ (পুং) শ্যোনাকবৃক্ষঃ। ইত্যমরঃ॥

কুটপঃ ( পুং ) মুনিঃ। নিষ্কুটঃ। গৃহসমীপোপবনং। মানভেদঃ। স তু কুড়বপরিমাণং। ইতি হেমচন্দ্রঃ॥ কমলে ক্লী। ইতি রাজনির্ঘণ্টঃ॥

কুটরং ( ক্লী ) কুঠরঃ। মন্থানদণ্ডবন্ধনস্তম্ভঃ ইত্যমরটীকায়াং নীলকণ্ঠঃ॥

কুটরুঃ ( পুং ) বস্ত্রগৃহং। কানাৎ ইতি ভাষা। ইত্যুণাদিকোষঃ॥

কুটরুণা ( স্ত্রী ) ত্রিবৃতা। তেউড়ী ইতি ভাষা। ইতি রত্নমালা॥

কুটলং ( ক্লী ) পটলং। চাল ইতি ভাষা। ইতি হারাবলী॥

কুটহারিকা ( স্ত্রী ) দাসী। ইতি হেমচন্দ্রঃ॥

কুটিঃ ( স্ত্রী ) গৃহং। ইত্যমরটীকায়াং

কুটিঃ ( পুং ) বৃক্ষঃ। ইতি শব্দরত্নাবলী॥ শরীরং। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ॥

কুটিচরঃ (পুং) জলশূকরঃ। শুশুক ইতি ভাষা। ইতি শব্দরত্নাবলী॥

কুটিতং ( ত্রি ) কুটিলং। ইত্যুণাদিকোষঃ॥

কুটিরং ( ক্লী ) কুটীরং। লঘুকুটী। ইত্যমরটীকায়াং ভরতঃ॥

কুটিলং ( ত্রি ) অনৃজু। বাঁকা ইতি ভাষা। তৎপর্য্যায়ঃ। অরালং ২ বৃজিনং ৩ জিহ্মং ৪ ঊর্ম্মিমৎ ৫ কুঞ্চিতং ৬ নতং ৭ আবিদ্ধং ৮ ভুগ্নং ৯ বেল্লিতং ১০ বক্রং ১১। ইত্যমরঃ॥ ভঙ্গুরং ১২। ইতি হেমচন্দ্রঃ॥ বেহ্লু ১৩ বিনতং ১৪ উন্দুরং ১৫। ইতি শব্দরত্নাবলী॥ তগরপুষ্পে ক্লী। ইতি রাজনির্ঘণ্টঃ॥

কুটিলা ( স্ত্রী ) নদীবিশেষঃ। ইতি মেদিনী॥ সরস্বতী নদী। স্পৃক্কানামগন্ধদ্রব্যং। ইতি রাজনির্ঘণ্টঃ॥

কুটী ( স্ত্রী পুং ) কুটঃ। গৃহং। ইত্যমরঃ॥

কুটী ( স্ত্রী ) কুম্ভদাসী। কুটিনী ইতি ভাষা মুরানামগন্ধদ্রব্যং। চিত্রগুচ্ছঃ। ইতি মেদিনী॥

কুটীচকঃ ( পুং ) পুত্রান্নজীবী। তৎপর্য্যায়ঃ। পুত্রান্নাদঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥

কুটীচরকঃ ( পুং ) যতিবিশেষঃ। ইতি যতিধর্ম্মসংগ্রহঃ॥

কুটীরঃ ( পুং ) ক্ষুদ্রগৃহং। কুঁড়ে ইতি ভাষা। তৎপর্য্যায়ঃ। স্বল্পবেশ্ম ২। ইতি জটাধরঃ॥

কুটুঙ্গকঃ ( পুং ) বৃক্ষলতাগহনং। পিটঃ। ডোল ইতি ভাষা। ছদিঃ। চাল ইতি ভাষা। ইত্যমরটীকায়াং ভরতঃ॥ বৃক্ষলতা। গৃহভেদঃ। কুঁড়ে ইতি ভাষা। ইত্যমরটীকাসারসুন্দরী॥

কুটুম্ব ক ঙ ধৃত্যাং। ইতি কবিকল্পদ্রুমঃ॥ ওষ্ঠবর্গশেষোপধঃ। ক ঙ কুটুম্বয়তে। অয়ং কৈশ্চিন্ন মন্যতে। ইতি দুর্গাদাসঃ॥

কুটুম্বঃ ( পুং ক্লী ) নাম। জ্ঞাতিঃ। বান্ধবঃ। সন্ততিঃ। ইতি শব্দরত্নাবলী॥ পোষ্যবর্গঃ। ইত্যমরমালা॥

কুটুম্বব্যাপৃতঃ ( ত্রি ) কুটুম্বপোষণাসক্তঃ। তৎপর্য্যায়ঃ। অভ্যাগারিকঃ ২ উপাধিঃ ৩। ইত্যমরঃ

কুটুম্বিনী ( স্ত্রী ) কুটুম্ববিশিষ্টা। পতিপুত্রদুহিত্রাদিমতী প্রতিষ্ঠিতা স্ত্রী। তৎপর্য্যায়ঃ।

পুরন্ধ্রী ২। ইত্যমরঃ॥ পুরন্ধ্রিঃ ৩। ইতি ভরতঃ॥ পুরন্ধ্রিকা ৪। ইতি শব্দরত্নাবলী॥ ক্ষুদ্রক্ষুপবিশেষঃ। তৎপর্য্যায়ঃ। পয়স্যা ২ ক্ষীরিণী ৩ জলকামুকা ৪ বক্রশল্যা ৫ দুরাধর্ষা ৬ ক্রূরকর্ম্মা ৭ সিরিণ্টিকা ৮ শীতা ৯ প্রহরকুটুম্বী ১০ শীতলা ১১ জলেরুহা ১২। অস্যা গুণাঃ। মধুরত্বং। গ্রাহিত্বং। কফপিত্তব্রণরক্তদোষকণ্ডূনাশিত্বং। রসায়নত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

কুটুম্বী [ন্] (পুং) গার্হস্থ্যাশ্রমবিশিষ্টঃ। তৎপর্য্যায়ঃ। গৃহী ২ গৃহমেধী ৩ গৃহস্থঃ ৪। ইতি জটাধরঃ॥

কুটুম্বী [ন্] (ত্রি) কৃষকঃ। ইতি শব্দচন্দ্রিকা॥ কুটুম্ববিশিষ্টশ্চ॥

কুটুম্বৌকঃ [স্] (ক্লী) কুটুম্ববাসস্থানং। ইতি জটাধরঃ

ক কুৎসায়াং। ছিদি। ইতি কবিকল্পদ্রুমঃ॥ ক কুট্টয়তি। ইতি দুর্গাদাসঃ॥

কুট্ট ক ঙ প্রতাপনে। ইতি কবিকল্পদ্রুমঃ॥ পঞ্চমস্বরী। টদ্বয়ান্তঃ। ক ঙ কুট্টয়তে। এযোঽন্যৈর্ন মন্যতে। ইতি দুর্গাদাসঃ॥

কুট্টকঃ (পুং) অঙ্কবিশেষঃ। তস্য সূত্রং যথা। ভাজ্যো হারঃ ক্ষেপকশ্চাপবর্ত্যঃ কেনাপ্যাদৌ সংভবেৎ কুট্টকার্থং। যেন চ্ছিন্নৌ ভাজ্যহারৌ ন তেন ক্ষেপশ্চৈতদ্দুষ্টমুদ্দিষ্টমেব॥ উদাহরণং যথা। একবিংশতিযুতং শতদ্বয়ং যদ্গুণং গণক পঞ্চষষ্টিযুক্। পঞ্চবর্জিতশতদ্বয়োদ্ধৃতং শুদ্ধিমেতি গুণকং বদাশু তং॥ ইতি লীলাবতী॥

কুট্টনং (ক্লী) ছেদনং। কোটা ইতি ভাষা কুৎসনং। প্রতাপনং। ইতি কুট্টধাতোর্ভাবেঽনট্প্রত্যয়ঃ॥

কুট্টনী (স্ত্রী) পুরুষেণ সহ পরস্ত্রীযোগকর্ত্রী। কুট্নী ইতি ভাষা। তৎপর্য্যায়ঃ। শম্ভলী২। ইত্যমরঃ॥ কুটনী ৩ সম্ভলী ৪। ইতি তট্টীকা॥ মাধবী ৫ রঙ্গমাতা ৬ অর্জ্জুনী ৭। ইতি জটাধরঃ॥ কুম্ভদাসী ৮ গণেরুকা ৯। ইতি শব্দরত্নাবলী॥

কুট্টমিতং (ক্লী) স্ত্রীণাং দশধাশৃঙ্গারচেষ্টান্তর্গতচেষ্টাবিশেষঃ। স্ত্রীণাং স্বাভাবিকদশালঙ্কারান্তর্গতমিদং। ইতি হেমচন্দ্রঃ॥ তস্য লক্ষণং যথা। কেশস্তনাধরাদীনাং যত্তু হর্ষোঽপি সম্ভ্রমাৎ। প্রাহুঃ কুট্টমিতং নাম শিরঃকরবিধূননং॥ ইতি সাহিত্যদর্পণং॥

কুট্টারং (ক্লী) কেবলং। রতিঃ। ইতি মেদিনী॥ কম্বলং। ইতি বিশ্বঃ॥

[illegible]ারঃ (পুং) পর্ব্বতঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কুট্টিমঃ (পুং ক্লী) মণিভূঃ। ইত্যমরটীকায়াং ভরতঃ॥ সুধাঘটিতভূতলং। ইতি সুভূতিঃ॥ কুটীরঃ। ইতি মথুরানাথঃ॥ দাড়িমবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কুট্টিহারিকা (স্ত্রী) দাসী। ইতি হলায়ুধঃ॥

কুট্টীরঃ (পুং) পর্ব্বতঃ। ইতি হারাবলী॥

কুট্মলং (ক্লী) নরকভেদঃ। ইতি মেদিনী॥ যত্র রজ্জুভিঃ পীড়নং। ইতি মনুঃ॥

কুট্মলঃ (পুং ক্লী) বিকাসোন্মুখপ্রৌঢ়কলিকা। ঈষদ্বিকসিতা কলিকা। তৎপর্য্যায়ঃ।

মুকুলঃ ২। ইত্যমরঃ॥ কোষঃ ৩। ইতি জটাধরঃ॥

কুঠ ছিদি। সৌত্রধাতুরয়ং। ইতি কবিকল্পদ্রুমঃ॥ কুঠেরঃ কুঠারঃ কুঠাকুঃ। ইতি দুর্গাদাসঃ॥

কুঠ ই খোটনে। বৈকল্যে। আলস্যে। ইতি কবিকল্পদ্রুমঃ॥ পঞ্চমস্বরী। ই কুণ্ঠ্যতে। বৈকল্যং বিকলীভাবঃ। আলস্যং মন্দীভাবঃ। কুণ্ঠতি খঞ্জঃ শোকার্ত্তো বৃদ্ধো বা। ইতি দুর্গাদাসঃ॥

কুঠঃ (পুং) বৃক্ষঃ। ইত্যমরঃ॥

কুঠরঃ (পুং) মন্থানদণ্ডবন্ধনার্থস্তম্ভঃ। তৎপর্য্যায়ঃ। দণ্ডবিষ্কম্ভঃ ২। ইত্যমরঃ॥

কুঠাকুঃ (পুং) পক্ষিবিশেষঃ। কাঠ্‌ঠোক্‌রা ইতি ভাষা। ইত্যুণাদিকোষঃ॥

কুঠাটঙ্কঃ (পুং স্ত্রী) কুঠারঃ। ইতি জটাধরঃ॥

কুঠারঃ (পুং স্ত্রী) অস্ত্রবিশেষঃ। কুড়াল ইতি ভাষা। তৎপর্য্যায়ঃ। স্বধিতিঃ ২ পরশুঃ ৩ পরশ্বধঃ ৪। ইত্যমরঃ॥ কুঠারী ৫ পর্শুঃ ৬ পরস্বধঃ ৭ পর্শ্বধঃ ৮। ইতি তট্টীকা॥ কুঠাটঙ্কঃ ৯ দ্রুঘনঃ ১০। ইতি জটাধরঃ॥

কুঠারঃ (পুং) বৃক্ষঃ। ইতি শব্দরত্নাবলী॥

কুঠারুঃ (পুং) বৃক্ষঃ। বানরঃ। ইতি মেদিনী॥ শস্ত্রকারঃ। ইতি শব্দরত্নাবলী॥

কুঠিঃ (পুং) পর্ব্বতঃ। বৃক্ষঃ। ইত্যুণাদিকোষঃ॥

কুঠিকঃ (পুং) কুষ্ঠং। কুড় ইতি ভাষা। ইতি হারাবলী॥

কুঠেরঃ (পুং) অগ্নিঃ। ইতি শব্দমালা॥ তুলসী। ইত্যুণাদিকোষঃ॥ অর্জকঃ। বর্ববরী ইতি খ্যাতঃ। ইতি রাজনির্ঘণ্টঃ॥

কুঠেরকঃ (পুং) পর্ণাসঃ। তুলসী ইতি খ্যাতঃ। ইত্যমরঃ॥ শ্বেতচ্ছদঃ। শ্বেততুলসী বাবুই তুলসী ইতি চ খ্যাতঃ। ইতি শব্দচন্দ্রিকা॥ নন্দীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কুঠেরজঃ (পুং) কুঠেরকঃ। শ্বেততুলসী। ইতি শব্দরত্নাবলী॥

কুঠেরুঃ (পুং) চামরবাতঃ। চামরের বাতাস ইতি ভাষা। তৎপর্য্যায়ঃ। মস্বরুঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥

কুড শি বাল্যে। অদনে। ইতি কবিকল্পদ্রুমঃ॥ এতদাদ্যাশ্চত্বারঃ পঞ্চমস্বরিণঃ। বাল্যমিহ শিশুব্যাপারঃ। শি কুড়তি অকুড়ীৎ সিতাভিঃ শিশুঃ। ইতি দুর্গাদাসঃ॥

কুড ই বৈকল্যে। ইতি কবিকল্পদ্রুমঃ॥ ই কুণ্ড্যতে কুণ্ডতি জনং দৈবঃ বিকলং করোতীত্যর্থঃ। ইতি দুর্গাদাসঃ॥

কুড ই ঙ দাহে। ইতি কবিকল্পদ্রুমঃ॥ ই কুণ্ড্যতে। ঙ কুণ্ডতে। ইতি দুর্গাদাসঃ॥

কুড ই ক রক্ষে। ইতি কবিকল্পদ্রুমঃ॥ ই ক কুণ্ডয়তি। ইতি দুর্গাদাসঃ॥

কুড়পঃ (পুং) কুড়বপরিমাণং। ইত্যমরটীকায়াং স্বামী॥

কুড়বঃ (পুং) পরিমাণবিশেষঃ। স তু প্রস্থচতুর্থাংশঃ। ইতি লীলাবতী॥ বৈদ্যকমতে দ্বিপ্রসৃতপরিমাণং। দ্বাত্রিংশত্তোলকমিতি যাবৎ। তৎপর্য্যায়ঃ। অঞ্জলিঃ ২ অষ্টমানং ৩ শরাবার্দ্ধং ৪। ইতি পরিভাষা॥

কুড়িঃ ( পুং ) শরীরং। ইতি সিদ্ধান্তকৌমুদ্যা-মুণাদিবৃত্তিঃ ॥

কুড়িশঃ ( পুং ) মৎস্যবিশেষঃ। কুড়চি মাচ ইতি ভাষা। অস্য গুণাঃ। মধুরত্বং। হৃদ্যত্বং। কষায়ত্বং। অগ্নিদীপনত্বং। লঘুত্বং। স্নিগ্ধত্বং। বাতরোগে পথ্যত্বং। রোচনত্বং। বলকোষ্ঠবন্ধকারিত্বঞ্চ। ইতি রাজবল্লভঃ ॥

কুড়হুঞ্চী ( স্ত্রী ) ক্ষুদ্রকারবেল্লী। ইতি রাজ-নির্ঘণ্টঃ ॥

কুড়ুলঃ (পুং) কুটন্নলঃ। ইত্যমরটীকা সিদ্ধান্ত-কৌমুদী চ ॥

কুড্যং ( ক্লী ) ভিত্তিঃ। ভিৎ দেয়াল ইত্যাদি ভাষা। ইত্যমরঃ ॥ বিলেপনং। ইতি মেদিনী॥ কৌতূহলং। ইতি শব্দরত্নাবলী ॥

কুড্যকং ( ক্লী ) কুড্যং। ভিত্তিঃ। ইতি শব্দ-রত্নাবলী ॥

কুড্যচ্ছেদী [ ন্ ] ( পুং ) চৌরবিশেষঃ। সিঁদেল চোর ইতি ভাষা। ইতি শব্দরত্না-বলী ॥

কুড্যচ্ছেদ্যং ( ক্লী ) খানিকং। দেয়ালের গর্ত্ত ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ॥

কুড্যমৎসী ( স্ত্রী ) গৃহগোধিকা। ইতি শব্দ-রত্নাবলী ॥

কুড্যমৎস্যঃ ( পুং ) গৃহগোধিকা। ইতি হেম-চন্দ্রঃ ॥

কুণ ৎ ক আভাষে। মন্ত্রে। ইতি কবিকল্প-দ্রুমঃ ॥ হ্রস্বী মূর্দ্ধন্যোপধঃ। কুণয়তি। মন্ত্রোঽভিমুখীকরণং। গুপ্তোক্তিরিত্যেকে। ইতি দুর্গাদাসঃ ॥

কুণ শ উপকরণে। শব্দে। ইতি কবিকল্প-দ্রুমঃ ॥ উপকরণং দানাদিনা পোষণং শ কুণতি দীনং দয়ালুঃ। কোণিতা। ইতি দুর্গাদাসঃ ॥

কুণঞ্জরঃ ( পুং ) বৃক্ষবিশেষঃ। বনবেতুয়া ইতি ভাষা। তৎপর্য্যায়ঃ। কুণঞ্জা ২ কৃণঞ্জঃ ৩ অরণ্যবাস্তূকঃ ৪। অস্য গুণাঃ। মধুরত্বং। রুচিকারিত্বং। দীপনত্বং। পাচনত্বং। হিতত্বঞ্চ। এতচ্ছাকগুণাঃ। ত্রিদোষনাশিত্বং। মধুরত্বং। রুচিকারিত্বং। দীপনত্বং। ঈষৎকষায়ত্বং। সংগ্রাহিত্বং পিত্তশ্লেষ্মহরত্বং। লঘুত্বঞ্চ। ইতি রাজ-নির্ঘণ্টঃ ॥

কুণপঃ ( পুং ) শবং। মৃতশরীরং। ইত্যমরঃ ॥ ইত্যর্থে নপুংসকলিঙ্গোঽপীতি নয়না-নন্দঃ ॥ পূতিগন্ধিঃ। ইতি মেদিনী ॥ অস্ত্র-বিশেষঃ। বড়শা ইতি ভাষা। ইত্যমর-টীকায়াং রায়মুকুটঃ॥ পূতিগন্ধৌ ত্রিলিঙ্গো-ঽপি যথা। কুণপং মস্তলুঙ্গাভং স্রগন্ধং কথিতং বহু। ইতি মাধবকরঃ

কুণপী ( স্ত্রী ) বিট্‌শারিকা। গুয়েশালিক ইতি ভাষা। ইতি মেদিনী ॥

কুণালঃ ( পুং ) দেশভেদঃ। ইতি সিদ্ধান্ত-কৌমুদ্যামুণাদিবৃত্তিঃ ॥

কুণিঃ ( পুং ) তুন্নবৃক্ষঃ। তুঁদ ইতি ভাষা। ইত্যমরমেদিনীকরৌ ॥

কুণিঃ ( ত্রি ) কুকরঃ। কোপা ইতি ভাষা। ইতি মেদিনী ॥

কুণিন্দঃ ( পুং ) শব্দঃ। ইতি সিদ্ধান্তকৌমুদ্যা-মুণাদিবৃত্তিঃ ॥

কুণ্টকঃ ( ত্রি ) স্থূলঃ। মোটা ইতি ভাষা। ইতি শব্দমালা॥

কুণ্ঠঃ ( ত্রি ) ক্রিয়াসু মন্দঃ। অকর্ম্মণ্যঃ। ইত্যমরঃ॥ মূর্খঃ। ইতি মেদিনী॥

কুণ্ঠকঃ ( ত্রি ) মূর্খঃ। ইতি শব্দমালা॥

কুণ্ঠিতঃ ( ত্রি ) সঙ্কুচিতঃ। যথা। দশবদনভুজানাং কুণ্ঠিতা যত্র শক্তিরিতি মহানাটকং॥

কুণ্ডং ( ক্লী ) মানভেদঃ। দেবজলাশয়ঃ। ইতি মেদিনী॥ জলাধারবিশেষঃ। চৌবাচ্চা ইতি ভাষা। তজ্জলগুণাঃ। অগ্নিকফকারিত্বং। রূক্ষত্বং। মধুরত্বং। লঘুত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ কফাজনকত্বং। ইতি রাজবল্লভঃ॥*॥ হোমীয়াগ্ন্যাধারঃ। তস্য বিধিঃ। তত্র মৎস্যপুরাণং। প্রাগুদক্প্লবনাং ভূমিং কারয়েদ্যত্নতো নরঃ। প্রাগুদকপ্লবনাং পূর্ব্বনীচাং উত্তরনীচাম্বা॥ তত্র বশিষ্ঠপঞ্চরাত্রে বিজ্ঞানললিতায়াঞ্চ। সর্ব্বাধিকারিকং কুণ্ডং চতুরস্রন্তু সর্ব্বদং। চতুরস্রং চতুষ্কোণং॥ ভবিষ্যোত্তরং। সহস্রে ত্বথ হোতব্যে কুর্য্যাৎ কুণ্ডং করাত্মকং। দ্বিহস্তময়ুতে তচ্চ লক্ষহোমে চতুষ্করং॥ দ্বিহস্তাদিকে যামলঃ। পূর্ব্বপূর্ব্বস্য কুণ্ডস্য কোণসূত্রেণ নির্ম্মিতং। উত্তরোত্তরকুণ্ডানাং মানং তৎ পরিকীর্ত্তিতং॥ পূর্ব্বপূর্ব্বস্য কুণ্ডস্য হস্তদ্বিহস্তাদিমিতস্য কোণসূত্রেণ ঈশানান্নির্ঋতিকোণদত্তসূত্রেণ পরিমিতং যন্মানং উত্তরোত্তরকুণ্ডানাং তদেব পারিভাষিকং দ্বিহস্তাদিমানং ন তু প্রকৃতহস্তদ্বৈগুণ্যাদিমিতং। তথাহ্যে দ্বিহস্তাদিমিতস্য চতুর্হস্তপরিমাণাপত্তেঃ। কৃষকস্য ভূমেঃ পরিমাণবৎ॥ বশিষ্ঠপঞ্চরাত্রে। যাবান্ কুণ্ডস্য বিস্তারঃ খননং তাবদিষ্যতে। হস্তৈকে মেখলাস্তিস্রো বেদাগ্নিনয়নাঙ্গুলাঃ॥ কুণ্ডে দ্বিহস্তে তা জ্ঞেয়া রসবেদগুণাঙ্গুলাঃ। চতুর্হস্তে তু কুণ্ডে তা বসুতর্কযুগাঙ্গুলাঃ॥ মেখলা ব্রহ্মচারিমেখলাবৎ কুণ্ডবেষ্টিতা মৃদ্বটিতাঃ। তাশ্চ খাতদেশাদ্বাহ্যে একাঙ্গুলরূপং কণ্ঠং পরিত্যজ্য উচ্ছ্রায়েণ বিস্তারেণ চেত্যাদিক্রমেণ বেদাদ্যঙ্গুলাঃ। এতদ্বিপরীতাস্তন্ত্রান্তরোক্তা ব্যবহারবিরুদ্ধাঃ। বেদাশ্চত্বারঃ অগ্নয়স্ত্রয়ঃ নয়নে দ্বে রসাঃ ষট্ গুণাস্ত্রয়ঃ বসুতর্কযুগানি অষ্টষট্চত্বারি॥ পিঙ্গলামতে। খাতাদেকাঙ্গুলং ত্যক্ত্বা মেখলানাং বিধির্ভবেৎ॥ এককুণ্ডস্য পশ্চিমদিক্কর্ত্তব্যতামাহ মহাদাননির্ণয়ে বশিষ্ঠপঞ্চরাত্রং। ভুক্তৌ মুক্তৌ তথা পুষ্টৌ জীর্ণোদ্ধারে তথৈব চ। সদা হোমে সদা শান্তাবেকং বারুণদিগ্গতং॥ শারদাতিলকে। হোতুরগ্রে যোনিরাসামুপর্য্যশ্বত্থপত্রবৎ। মুষ্ট্যরত্ন্যেকহস্তানাং কুণ্ডানাং যোনিরীরিতা। ষট্চতুর্দ্ব্যঙ্গুলায়ামবিস্তারোন্নতিশালিনী। একাঙ্গুলন্তু যোন্যগ্রং কুর্য্যাদীষদধোমুখং॥ একৈকাঙ্গুলতো যোনিং কুণ্ডেষ্বন্যেষু বর্দ্ধয়েৎ। যবদ্বয়ক্রমেণৈব যোন্যগ্রমপি বর্দ্ধয়েৎ॥ স্থূলাদারভ্য নালং স্যাদেযোন্যা মধ্যে সরন্ধ্রকং। আসাং মেখলানাং অশ্বত্থপত্রবদিত্যনেন চতুরঙ্গুলবিস্তৃতমূলাৎ যথোক্তক্রমেণ একাঙ্গুলান্তঃসংকুচিতবিস্তারা॥

যামলে। নালমেখলয়োর্ম্মধ্যে পরিধেঃ স্থাপনায় চ। রন্ধ্রং কুর্য্যাত্তথা বিদ্বান্ দ্বিতীয়মেখলোপরি॥ পরিধীংস্তদ্বিন্যাসানাহ ছন্দোগপরিশিষ্টং। বাহুমাত্রাঃ পরিধয় ঋজবঃ সত্বচোঽব্রণাঃ। ত্রয়ো ভবন্ত্যশীর্ণাগ্রা একেষাস্তু চতুর্দ্দিশং॥ প্রাগগ্রাবভিতঃ পশ্চাদুদগগ্রমথাপরং। ন্যসেৎ পরিধিমন্যশ্চেদুদগগ্রঃ সপূর্ব্বতঃ॥ অব্রণাঃ ছিদ্ররহিতাঃ অভিতোঽগ্নেঃ পার্শ্বদ্বয়ে দক্ষিণতঃ উত্তরতঃ পশ্চাৎ পশ্চিমে উদগগ্রং উত্তরাগ্রং॥ ত্রৈলোক্যসারেঽপি। কুম্ভদ্বয়সমাযুক্তা অশ্বত্থদলবন্নতা। অঙ্গুষ্ঠমেখলাযুক্তা মধ্যে স্বাজ্যস্থিতির্যথা॥ কুম্ভদ্বয়সমাযুক্তা গজকুম্ভাকারমূলদেশযুক্তা নতা নম্রা অঙ্গুষ্ঠমিতমৃদ্ঘটিতমেখলাবেষ্টনযুক্তা তথাত্বে হস্তগলিতাজ্যস্থিত্যা কুণ্ডে তৎপাতো ভবতীত্যর্থঃ॥ পঞ্চরাত্রে। কল্পয়েদন্তরে নাভিং কুণ্ডস্যাম্বুজসন্নিভাং। মুষ্ট্যরত্ন্যেকহস্তানাং নাভিরুৎসেধবিস্তৃতা॥ নেত্রবেদাঙ্গুলোপেতা কুণ্ডেম্বন্যেষু বর্দ্ধয়েৎ। যবদ্বয়ক্রমেণৈব নাভিং পৃথগুদারধীঃ॥ নাভিক্ষেত্রং ত্রিধা কৃত্বা মধ্যে কুর্ব্বীত কর্ণিকাং। বহিরংশদ্বয়ে নাষ্টৌ পত্রাণি পরিকল্পয়েৎ॥ *॥ তত্র কুণ্ডস্য দোষানাহ বিশ্বকর্ম্মা। খাতাধিকে ভবেদ্রোগী হীনে ধেনুধনক্ষয়ঃ। বক্রকুণ্ডে চ সন্তাপো মরণং ছিন্নমেখলে॥ মেখলারহিতে শোকো হ্যধিকে বিত্তসংক্ষয়ঃ। ভার্য্যাবিনাশকং কুণ্ডং প্রোক্তং যোন্যা বিনাকৃতং॥ অপত্যধ্বংসনং প্রোক্তং কুণ্ডং যৎ কণ্ঠবর্জ্জিতং॥ অতএব বশিষ্ঠসংহিতায়াং। তস্মাৎ সম্যক্ পরীক্ষ্যৈবং কর্ত্তব্যং শুভমেদিকং। হস্তমাত্রং স্থণ্ডিলম্বা সংক্ষিপ্তে হোমকর্ম্মণি॥ ইতি তিথ্যাদিতত্ত্বং॥

কুণ্ডং (ক্লী স্ত্রী) স্থালী। ইত্যমরভরতৌ॥

কুণ্ডঃ (পুং) অমৃতে ভর্ত্তরি জারজঃ। জীবতি ভর্ত্তরি উপপতিজাতঃ। স্বামী বাঁচিয়া থাকিতে যে হয় বিজন্ম সন্তান ইতি ভাষা। ইত্যমরঃ॥

কুণ্ডকীটঃ (পুং) চার্ব্বাকবচনাভিজ্ঞপুরুষঃ। পতিতব্রাহ্মণীপুত্রঃ। দাসীকামুকঃ। ইতি মেদিনী॥

কুণ্ডগোলকং (ক্লী) কাঞ্জিকং। ইতি হেমচন্দ্রঃ॥

কুণ্ডঙ্গঃ (পুং) কুঞ্জং। বৃক্ষাচ্ছাদিতস্থানং। ইতি হেমচন্দ্রঃ॥

কুণ্ডপায্যঃ (পুং) ক্রতুঃ। কুণ্ডৈঃ পীয়তেঽত্র সোম ইতি মুগ্ধবোধং॥

কুণ্ডলং (ক্লী) স্বনামখ্যাতকর্ণভূষণং। তৎপর্য্যায়ঃ। কর্ণবেষ্টনং ২। ইত্যমরঃ॥ পাশঃ। বলয়ঃ। ইতি মেদিনী॥

কুণ্ডলিনী (স্ত্রী) কুলকুণ্ডলিনী শক্তিঃ। যথা। ধ্যায়েৎ কুণ্ডলিনীং সূক্ষ্মাং মূলাধারনিবাসিনীং। তামিষ্টদেবতারূপাং সার্দ্ধত্রিবলয়ান্বিতাং॥ কোটিসৌদামিনীভাসাং স্বয়ম্ভুলিঙ্গবেষ্টিনীং। তামুত্থাপ্য মহাদেবীং প্রাণমন্ত্রেণ সাধকঃ॥ উদ্যদ্দিনকরোদ্যোতাং যাবচ্ছ্বাসং দৃঢ়াসনঃ। অশেষাশুভশান্ত্যর্থং সমাহিতমনাশ্চিরং॥ তৎপ্রভাপটলব্যাপ্তং শরীরমপি চিন্তয়েৎ। ইতি তন্ত্রসারঃ॥ *॥

গুড়ূচী। ইতি রাজনির্ঘণ্টঃ॥ মিষ্টান্নবিশেষঃ জিলেপী ইতি ভাষা। তস্য পাকপ্রকারো যথা। নূতনং ঘটমানীয় তস্যান্তঃ কুশলো জনঃ। প্রস্থার্দ্ধপরিমাণেন দধ্যম্লেন প্রলেপয়েৎ॥ দ্বিপ্রস্থাং সমিতাং তত্র দধ্যম্লং প্রস্থসম্মিতং। ঘৃতমর্দ্ধশরাবঞ্চ ঘোলয়িত্বা ঘটে ক্ষিপেৎ॥ আতপে স্থাপয়েত্তাবদ্যাবদ্যাতি তদম্লতাং। তাং সুপক্কাং ঘৃতান্নীত্বা সিতাপাকে তদুদ্রবে॥ কর্পূরাদিসুগন্ধে চ স্নপয়িত্বোদ্ধরেত্ততঃ॥ অস্যা গুণাঃ। এষা কুণ্ডলিনী নাম্না পুষ্টিকান্তিবলপ্রদা। ধাতুবৃদ্ধিকরী বৃষ্যা রুচ্যা চেন্দ্রিয়তর্পণী॥ ইতি ভাবপ্রকাশঃ॥

কুণ্ডলী (স্ত্রী) মিষ্টান্নবিশেষঃ। জিলেপা ইতি ভাষা। ইতি পাকরাজেশ্বরঃ॥ *॥ কুলকুণ্ডলিনী শক্তিঃ। যথা। ত্রিকোণং তত্র বিজ্ঞেয়ং শক্তিপীঠং মনোহরং। তদগহ্বরে কামবায়ুর্জীবরূপোঽতিচঞ্চলঃ॥ অধোমুখস্তত্র লিঙ্গঃ স্বয়ম্ভুস্তেন চাল্যতে। নীবারশূকবত্তন্বী কুণ্ডলী পরদেবতা॥ শঙ্খতুল্যনিভা দেবী সার্দ্ধত্রিবলয়ান্বিতা। মুখেনাচ্ছাদ্য ব্রহ্মাস্যং তয়া সংবেষ্টিতঃ প্রভুঃ॥ ডাকিনী হ্যত্র বসতি দ্বারপালী সযষ্টিকা। যঃ সাধকোঽত্র রমতে স দিব্যো নৈব মানুষঃ॥ ইতি সম্মোহনতন্ত্রং॥ গুড়ূচী। কাঞ্চনবৃক্ষঃ। ইতি মেদিনী॥ কপিকচ্ছুঃ। সর্পিণীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কুণ্ডলী [ন্] (পুং) সর্পঃ। ইত্যমরঃ॥ বরুণঃ। ময়ূরঃ। ইতি মেদিনী॥ চিত্তলমৃগঃ। ইত্যজয়পালঃ॥ কুণ্ডলযুক্তে ত্রি। ইতি মেদিনী॥

কুণ্ডাশী [ন্] (ত্রি) ভগভক্ষকঃ। কোট্না ইতি ভাষা।*ইতি মহাভারতে দানধর্ম্মঃ॥ কুণ্ডান্নভোজী। তস্য নরকো যথা। রঙ্গোপজীবী কৈবর্ত্তঃ কুণ্ডাশী গরদস্তথা। সূচী মাহিষকশ্চৈব পর্ব্বকারী চ যো দ্বিজঃ॥ আগারদাহী মিত্রঘ্নঃ শাকুনির্গ্রামযাজকঃ। রুধিরান্ধে পতন্ত্যেতে সোমং বিক্রীণতে চ যে॥ ইতি বিষ্ণুপুরাণে ২ অংশে ৬ অধ্যায়ঃ॥ রঙ্গোপজীবী নটমল্লাদিবৃত্তিঃ। কৈবর্ত্তঃ ধীবরবৃত্তিঃ। পত্যৌ জীবতি জারাজ্জাতঃ কুণ্ডঃ তদন্নভোজী কুণ্ডাশী। সূচী পিশুনঃ। মাহিষো মহিষোপজীবী। যদ্বা। মহিষীত্যুচ্যতে ভার্য্যা ভগেনোপার্জ্জিতং ধনং। উপজীবতি যস্তস্যাঃ স বৈ মাহিষকঃ স্মৃতঃ॥ ইতি স্মৃতিপ্রোক্তঃ। পর্ব্বকারী ধনাদিলোভেনা-পর্ব্বসু অমাবস্যাদিক্রিয়াপ্রবর্ত্তকঃ। পর্ব্বগামীতি পাঠে পর্ব্বসু স্ত্রীগামী। শাকুনিঃ পক্ষিজীবী। শুভনিমিত্তশকুনোপজীবী বা। গ্রামযাজকঃ গ্রামার্থে যষ্টা। ইতি তট্টীকায়াং শ্রীধরস্বামী॥

কুণ্ডিকা (স্ত্রী) কমণ্ডলুঃ। ইতি হেমচন্দ্রঃ॥ পিঠরঃ। কুঁড়ি ইতি ভাষা। ইতি শব্দচন্দ্রিকা॥

কুণ্ডিনং (ক্লী) বিদর্ভনগরং। ইতি হেমচন্দ্রঃ॥

কুণ্ডিনঃ (পুং) মুনিবিশেষঃ। ইত্যুণাদিকোষঃ॥

কুণ্ডী (স্ত্রী) কমণ্ডলুঃ। ইত্যমরঃ॥ স্থালী। ইত্যমরটীকায়াং ভরতঃ॥

কুণ্ডীরঃ ( পুং ) মনুষ্যঃ। বলবতি ত্রি। ইতি ধরণী ॥

কুৎ আস্তৃতৌ। সৌত্রধাতুরয়ং। ইতি কবিকল্পদ্রুমঃ ॥ কুতপঃ। ইতি দুর্গাদাসঃ ॥ কুৎ অপস্যঃ কুতপঃ কালবিশেষঃ। কৃত্তিরচিতস্নেহপাত্রঞ্চ। ইতি কেচিৎ ॥

কুতঃ [ স্ ] ব্য প্রশ্নঃ। পঞ্চম্যর্থঃ। নিহ্নবঃ। ইতি বিশ্বঃ ॥

কুতনুঃ ( পুং ) কুবেরঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কুতপঃ ( পুং ক্লী ) অহ্নোঽষ্টমোঽংশঃ। দিবসস্যাষ্টমো মুহূর্ত্তঃ। যথা। অহ্নো র্ত্তা বিখ্যাতা দশ পঞ্চ চ সর্ব্বদা। তত্রাষ্টমো মুহূর্ত্তো যঃ স কালঃ কুতপঃ স্মৃতঃ ॥ ইতি শ্রাদ্ধতত্ত্বে মৎস্যপুরাণবচনং ॥ * ॥ পারিভাষিককুতপা যথা। মধ্যাহ্নঃ খড়্গপাত্রঞ্চ তথা নেপালকম্বলঃ। রৌপ্যং দর্ভাস্তিলা গাবো দৌহিত্রশ্চাষ্টমঃ স্মৃতঃ ॥ পাপং কুৎসিতমিত্যাহুস্তস্য সন্তাপকারিণঃ। অষ্টাবেতে যতস্তস্মাৎ কুতপা ইতি বিশ্রুতাঃ ॥ ইতি মিতাক্ষরায়ামাচারাধ্যায়ঃ ॥ স চ ত্রিংশদ্দণ্ডদিনমানে দ্বিতীয়প্রহরশেষদণ্ডাবধিতৃতীয়প্রহরপ্রথমদণ্ডপর্য্যন্তকালঃ। ইত্যমরঃ ॥ স তু একোদ্দিষ্টশ্রাদ্ধারম্ভকালঃ। যথা। আরভ্য কুতপে শ্রাদ্ধং কুর্য্যাদারৌহিণং বুধঃ। বিধিজ্ঞো বিধিমাস্থায় রৌহিণন্তু ন লঙ্ঘয়েৎ ॥ ইতি শ্রাদ্ধতত্ত্বং। দিবসস্যাষ্টমে ভাগে মন্দীভবতি ভাস্করঃ। স কালঃ কুতপো জ্ঞেয়ঃ পিতৄণামন্নমক্ষয়ং ॥ ইতি শাতাতপঃ ॥*॥ দৌহিত্রঃ। বাদ্যং। ছাগলোমজকম্বলং। কুশতৃণং। ইতি মেদিনী ॥

কুতপঃ ( পুং ) সূর্য্যঃ। বৈশ্বানরঃ। দ্বিজন্মা। অতিথিঃ। গৌঃ। ভাগিনেয়ঃ। ইতি হেমচন্দ্রঃ ॥

কুতুকং ( ক্লী ) কৌতুকং। ইত্যমরঃ ॥

কুতুপং ( ক্লী পুং ) কুতপঃ। দিনস্যাষ্টমমুহূর্ত্তঃ। ইতি শব্দরত্নাবলী ॥

কুতুপঃ ( পুং ) চর্ম্মনির্ম্মিতাল্পস্নেহপাত্রং। ছোট কুপো ইতি ভাষা। ইত্যমরঃ ॥

কুতূঃ ( স্ত্রী ) চর্ম্মনির্ম্মিতস্নেহপাত্রং। মসক ইতি কুপো ইতি চ ভাষা। ইত্যমরঃ ॥

কুতূণকঃ ( পুং ) বালরোগবিশেষঃ। স তু নেত্ররোগঃ। কতুয়া ইতি ভাষা। তস্য লক্ষণং। কুতূণকঃ ক্ষীরদোষাচ্ছিশূনামেব বর্ত্মনি। জায়তে তেন তন্নেত্রং কণ্ডুরঞ্চ স্রবেন্মুহুঃ ॥ শিশুঃ কুর্য্যাল্ললাটাক্ষিকূটনাসাবঘর্ষণং। শক্তো নার্কপ্রভাং দ্রষ্টুং ন বর্ত্মোন্মীলনক্ষমঃ ॥ ইতি মাধবকরঃ ॥ কুকূণক ইত্যপি পাঠঃ ॥

কুতূহলং ( ক্লী ) অপূর্ব্ববস্তুদিদৃক্ষাদ্যতিশয়ঃ। তৎপর্য্যায়ঃ। কৌতূহলং ২ কৌতুকং ৩ কুতুকং ৪। ইত্যমরঃ ॥ চিত্রং ৫। ইতি শব্দরত্নাবলী ॥

কুতূহলঃ ( ত্রি ) প্রশস্তঃ। অদ্ভুতঃ। ইতি হেমচন্দ্রঃ ॥

কুতৃণং ( ক্লী ) কুম্ভী। পানা ইতি ভাষা। ইতি হারাবলী ॥

কুত্র ব্য কস্মিন্। কোথায় ইতি ভাষা। ইতি ব্যাকরণং ॥

কুত্রচিৎ ব্য কুত্র। কোনখানে ইতি ভাষা। ইতি ব্যাকরণং

কুৎস ঙ ক ঞ অবক্ষেপে। ইতি কবিকল্পদ্রুমঃ॥ পঞ্চমস্বরী। দন্ত্যবর্গাদ্যোপধঃ। অবক্ষেপো নিন্দা। ঙ ক যো ন কুৎসয়তে কুৎস্যমিতি হলায়ুধঃ॥ ঞ কুৎসয়তি কুৎসয়তে। অয়মাত্মনেপদীত্যন্যে। কদাচিৎ পরস্মৈপদার্থো ঞকারঃ। ইতি দুর্গাদাসঃ॥

কুৎসনং (ক্লী) নিন্দনং। ইতি শব্দরত্নাবলী॥

কুৎসলা (স্ত্রী) নীলীবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥

কুৎসা (স্ত্রী) কুৎসনং। তৎপর্য্যায়ঃ। অবর্ণঃ ২ আক্ষেপঃ ৩ নির্ব্বাদঃ ৪ পরীবাদঃ ৫ অপবাদঃ ৬ উপক্রোশঃ ৭ জুগুপ্সা ৮ নিন্দা ৯ গর্হণং ১০। ইত্যমরঃ॥ গর্হা ১১ নিন্দনং ১২ কুৎসনং ১৩ পরিবাদঃ ১৪ জুগুপ্সনং ১৫ অপক্রোশঃ ১৬ ভৎর্সনং ১৭ অববাদঃ ১৮। ইতি শব্দরত্নাবলী॥ উপরাগঃ ১৯ অবধ্বংসঃ ২০ ঘৃণা ২১ ধিক্ ২২ সাম্রি ২৩। ইতি জটাধরঃ॥

কুৎসিতং (ক্লী) কুষ্ঠনামৌষধং। ইতি রাজনির্ঘণ্টঃ॥

কুৎসিতঃ (ত্রি) নিন্দিতঃ। তৎপর্য্যায়ঃ। নিকৃষ্টঃ ২ প্রতিকৃষ্টঃ ৩ অর্ব্বা ৪ রেফঃ ৫ যাপ্যঃ ৬ অবমঃ ৭ অধমঃ ৮ কুপূয়ঃ ৯ অবদ্যঃ ১০ খেটঃ ১১ গর্হ্যঃ ১২ অণকঃ ১৩ ইত্যমরঃ॥ রেপঃ ১৪ অরমঃ ১৫ আণকঃ ১৬ অনকঃ ১৭। ইতি তট্টীকা॥ কুপ্রিয়ঃ ১৮। ইতি জটাধরঃ॥ আখেটঃ ১৯ রেপসঃ ২০ কাণ্ডঃ ২১ গর্হিতঃ ২২ অপকৃষ্টকঃ ২৩ ইতি শব্দরত্নাবলী॥

কুথ ই ক্লেশে। বধে। ইতি কবিকল্পদ্রুমঃ॥ পঞ্চমস্বরী। ই কুন্থ্যতে। ক্লেশ ইহ দুঃখানুভবঃ। শীতার্ত্তশ্চ ন কুন্থতীতি হলায়ুধঃ। ইতি দুর্গাদাসঃ॥

কুথ য পূতিত্বে। ইতি কবিকল্পদ্রুমঃ॥ পূতিত্বং দুর্গন্ধীভাবঃ। য কুথ্যতি মীনো দুর্গন্ধঃ স্যাদিত্যর্থঃ। চুকোথ। ইতি দুর্গাদাসঃ॥

কুথঃ (পুং স্ত্রী) গজপৃষ্ঠস্থিতচিত্রকম্বলং। হাতির পিঠের ঝুল ইতি ভাষা। তৎপর্য্যায়ঃ। প্রবেণী ২ আস্তরণং ৩ বর্ণঃ ৪ পরিস্তোমঃ ৫। ইত্যমরঃ॥ প্রবেণিঃ ৬ পরিষ্টোমঃ ৭ কুথা ৮ কুথং ৯। ইতি তট্টীকা॥ বোলঃ ১০ আস্তরঃ ১১। ইতি শব্দরত্নাবলী॥

কুথঃ (পুং) কুশতৃণং। ইত্যমরঃ॥

কুথোদরী (স্ত্রী) নিকুম্ভদুহিতা। কুম্ভকর্ণপৌত্রী। সা চ কল্কিদেবেন হতা। যথা। মুনয় ঊচুঃ। শৃণু বিষ্ণুযশঃপুত্র কুম্ভকর্ণাত্মজাত্মজা। কুথোদরীতি বিখ্যাতা গগনার্দ্ধসমুত্থিতা॥ কালকঞ্জস্য মহিষী বিকঞ্জজননী চ সা। হিমালয়ে শিরঃ কৃত্বা পাদৌ চ নিষধাচলে॥ শেতে স্তনং পায়য়ন্তী বিকঞ্জং প্রস্নুতস্তনী। তস্যা নিশ্বাসবাতেন বিবশা বয়মাগতাঃ॥ দৈবেনৈব সমানীতাঃ প্রাপ্তাস্তব পদাম্বুজং। মুনয়ো রক্ষণীয়াস্তে রক্ষঃসু চ বিপৎসু চ॥ ইতি তেষাং বচঃ শ্রুত্বা কল্কিঃ পরপুরঞ্জয়ঃ। সেনাগণৈঃ

পরিবৃতো জগাম হিমবদ্গিরিং ইত্যাদি ॥ সা কুথোথায় সহসা ননর্দ্দ পরমাদ্ভুতং। তেন নাদেন মহতা বিত্রস্তাশ্চাভবন্ জনাঃ। নিপেতুঃ সৈনিকাঃ সর্ব্বে মূর্চ্ছিতা ধরণীতলে ॥ সা রথাংশ্চ গজাংশ্চাপি বিবৃতাস্যা ভয়ানকা। জঘাস প্রশ্বাসবাতৈঃ সমানীয় কুথোদরী ॥ সেনাগণাস্তদুদরং প্রবিষ্টাঃ কল্কিনা সহ। যথর্ক্ষমুখবাতেন প্রবিশন্তি পিপীলিকাঃ ॥ তদ্দৃষ্টা দেব-গন্ধর্ব্বা হাহাকারং প্রচক্রিরে। তত্রস্থা মুনয়ঃ শেপুর্ব্বেপুশ্চান্যে মহর্ষয়ঃ ॥ নিপেতুরন্যে দুঃখার্ত্তা ব্রাহ্মণা ব্রহ্মবাদিনঃ। রুরুদুঃ পৃষ্ঠযোধা যে জহৃষুস্তন্নিশাচরাঃ ॥ জগতাং কদনং দৃষ্ট্বা সম্মারাত্মানমাত্মনা। কল্কিঃ কমলপত্রাক্ষঃ সুরারাতিনিসূদনঃ ॥ বাণাগ্নিং চেলচর্ম্মভ্যাং কম্বলৈর্যান-দারুভিঃ। প্রজ্বাল্যোদরমধ্যেন করবালং সমাদদে ॥ তেন খড়্গেন মহতা কুক্ষিং নির্ভিদ্য বন্ধুভিঃ। বলিভিভ্রাতৃভির্ব্বাহৈ-র্বৃতঃ শস্ত্রাস্ত্রপাণিভিঃ ॥ বহির্ব্বভূব সর্ব্বেশঃ কল্কিঃ কল্কবিনাশনঃ। সহস্রাক্ষো যথা বৃত্রকুক্ষিং দম্ভোলিনেমিনা ॥ যোনিরন্ধ্রাদ্-গজরথাস্তুরগাশ্চাভবন্ বহিঃ। নাসিকা-কর্ণবিবরাৎ কেঽপি তস্যা বিনির্গতাঃ ॥ তে নির্গতাস্ততস্তস্যাঃ সৈনিকা রুধিরোক্ষিতাঃ। তাং বিব্যধুর্নিঃক্ষিপন্তীং তরসা চরণৌ করৌ ॥ মমার সা ভিন্নদেহা ভিন্নকুক্ষি-শিরোধরা। নাদয়ন্তী দিশো দ্যোঃ খং চূর্ণ-য়ন্তী চ পর্ব্বতান্ ॥ ইতি কল্কিপুরাণে ১৬ অধ্যায়ঃ ॥

কুদালঃ (পুং) কুদ্দালঃ। ইত্যমরটীকায়াং রমানাথঃ ॥

কুদ্দারঃ (পুং) কুদ্দালঃ। ইতি জটাধরঃ ॥

কুদ্দালঃ (পুং) কোবিদারবৃক্ষঃ। ইত্যমরঃ ॥ ভূমিদারণাস্ত্রং। কোদাল ইতি ভাষা। ইতি মেদিনী ॥

কুদ্যং (ক্লী) কুড্যং। ভিত্তিঃ। ইত্যমরটীকা ॥

কুদ্র ই ক মিথ্যোক্তৌ। ইতি কবিকল্পদ্রুমঃ ॥ পঞ্চমস্বরী। দন্তবর্গতৃতীয়োপধঃ। ই ক কুন্দ্রয়তি নীচঃ। মিথ্যাং বদতীত্যর্থঃ। কুন্দ্র ইত্যনেনৈবেষ্টসিদ্ধে ইদনুবন্ধো বেদেযূচ্চারণভেদার্থঃ। ইতি দুর্গাদাসঃ ॥

কুদ্রঙ্কঃ (পুং) গৃহবিশেষঃ। মঞ্চোপরিমণ্ডপঃ। তৎপর্য্যায়ঃ। উদ্ঘাটঃ ২ পিঠরঃ ৩। ইতি ত্রিকাণ্ডশেষঃ ॥

কুদ্রঙ্গঃ (পুং) মঞ্চমণ্ডপঃ। ইতি হারাবলী ॥

কুদ্রবঃ (পুং) কোদ্রবঃ। ইত্যমরটীকায়াং ভরতঃ ॥

কুধ্রঃ (পুং) পর্ব্বতঃ। ইতি হলায়ুধঃ ॥

কুনখঃ (পুং) ক্ষুদ্ররোগবিশেষঃ। তস্য লক্ষণং যথা। নখমাংসমধিষ্ঠায় বাতঃ পিত্তঞ্চ দেহিনাং। কুর্ব্বাতে দাহপাকৌ চ তং ব্যাধিং চিপ্পমাদিশেৎ ॥ তদেবাল্পতরৈ-র্দোষৈঃ পরুষং কুনখং বদেৎ। ইতি মাধবকরঃ ॥ কুৎসিতনখযুক্তে ত্রি ॥

কুনখী [ন্] (ত্রি) কুনখরোগযুক্তঃ। সঙ্কুচিত-নখঃ। যথা। সুবর্ণহারী কুনখী। কুনখী শ্যাবদন্তশ্চ দ্বাদশরাত্রং ব্রতং চরিত্বা তদ্দন্তনখাবুদ্ধরেয়াতাং। ইতি শুদ্ধিতত্ত্বং ॥

কুনটঃ ( পুং ) শ্যোনাকপ্রভেদঃ। ইতি রাজনির্ঘণ্টঃ ॥

কুনটী (স্ত্রী) মনঃশিলা। ইত্যমরঃ ॥ ধন্যাকং। ইতি রাজনির্ঘণ্টঃ ॥ নেপালদেশজমনঃশিলা। ইতি কেচিৎ। ইতি ভরতঃ ॥

কুনলী [ন্] ( পুং ) বকবৃক্ষঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

কুনাভিঃ ( পুং ) বাতমণ্ডলী। ঘূর্ণেবাতাস ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ ॥ নিধিঃ। ইতি হেমচন্দ্রঃ ॥

কুনাশকঃ ( পুং ) যবাসঃ। ইত্যমরঃ ॥

কুন্চ বক্রণে। তৌচ্ছ্যে। ইতি কবিকল্পদ্রুমঃ ॥ পঞ্চমস্বরী। বক্রণমিতি বক্র ইবাচরতীতি কৌ বক্রং করোতীতি ণৌ চ রূপং। তেন কুটিলীভাবঃ কুটিলীকরণঞ্চ। তৌচ্ছ্যমল্পীভাবঃ অল্পীকরণঞ্চ। কুঞ্চতি খলঃ কুটিলোঽল্পো বা স্যাদিত্যর্থঃ। কুঞ্চতি লতাং বায়ুঃ কুটিলামল্পাং বা করোতীত্যর্থঃ। ইতি দুর্গাদাসঃ ॥

কুন্তঃ ( পুং ) গবেধুকা। প্রাসাস্ত্রং। ইতি মেদিনী ॥ চণ্ডভাবঃ। ক্ষুদ্রজন্তুঃ। ইতি বিশ্বঃ

কুন্তলঃ ( পুং ) কেশঃ। হ্রীবেরং। ইত্যমরঃ ॥ চষকঃ। যবঃ। ইতি মেদিনী ॥ লাঙ্গলং। ইতি বিশ্বঃ ॥ ধ্রুবকভেদঃ। যথা। বর্ণৈঃ ষোড়শভিঃ কার্য্যঃ কুন্তলো লঘুশেখরে। শৃঙ্গারে চ রসে প্রোক্তমানন্দফলদায়কঃ ॥ ইতি সঙ্গীতদামোদরঃ ॥

কুন্তলবর্দ্ধনঃ (পুং) ভৃঙ্গরাজবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কুন্তলাঃ (পুং) দেশবিশেষঃ। বহুবচনান্ত শব্দোঽয়ং। ইতি মেদিনী ॥

কুন্তলিকা ( স্ত্রী ) দধ্যাদিচ্ছেদনী। দইকাটা ছুরি ইতি ভাষা। তৎপর্য্যায়ঃ। পালিকা২। ইতি হারাবলী ॥

কুন্তলোশীরং (ক্লী) বালকং। বালা ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ ॥

কুন্তী ( স্ত্রী ) পাণ্ডুরাজভার্য্যা। সা শূরসেনরাজকন্যা পৃথা নাম্না খ্যাতা। তৎপিতা তাং কুন্তিভোজরাজ্ঞে দত্তবান্ অতঃ কুন্তীতি বিশ্রুতা। সা চ মৃগীভূতস্য মুনেঃ শাপামৈথুনরহিতস্য স্বামিন আজ্ঞয়া ধর্ম্মাদ্যুধিষ্ঠিরং পবনাদ্ভীমং ইন্দ্রাদর্জ্জুনং জনয়ামাস। ইতি মহাভারতং ॥ গুগ্‌গুলুবৃক্ষঃ। শল্লকী। ইতি বিশ্বমেদিন্যৌ ॥ ব্রাহ্মণী ইতি জটাধরঃ ॥

কুন্থ গ শ্লিষি। ক্লিশি। ইতি কবিকল্পদ্রুমঃ ॥ পঞ্চমস্বরী। ক্লিশি দুঃখানুভবে। গ কুথ্নাতি বুভুক্ষার্ত্তঃ। ইতি হলায়ুধঃ। চুকুন্থ। ইতি দুর্গাদাসঃ ॥

কুন্থুঃ ( পুং ) বৌদ্ধবিশেষঃ। জিনচক্রবর্ত্তিবিশেষঃ। ইতি হেমচন্দ্রঃ ॥

কুন্দঃ (পুং ক্লী) পুষ্পবৃক্ষবিশেষঃ। কুঁদফুলের গাছ্ ইতি ভাষা। তৎপর্য্যায়ঃ। মাঘ্যং২ ইত্যমরঃ ॥ শুক্লপুষ্পঃ ৩। ইতি রত্নমালা ॥ মকরন্দঃ ৪ মহামোদঃ ৫ মনোহরঃ ৬ মুক্তাপুষ্পঃ ৭ সদাপুষ্পঃ ৮ তারপুষ্পঃ ৯ অট্টহাসকঃ ১০ দমনঃ ১১ বনহাসঃ ১২ মনোজ্ঞঃ ১৩ বোরটং ১৪ বরটং ১৫। ইতি শব্দরত্নাবলী ॥ অপি চ।

কুন্দস্তু কথিতং মাঘ্যং সদাপুষ্পঞ্চ তৎ স্মৃতং। কুন্দং শীতং লঘু শ্লেষ্মশিরোরুগ্বিষপিত্তহৃৎ॥ ইতি ভাবপ্রকাশঃ॥ অস্য গুণাঃ। অতিমধুরত্বং। শীতত্বং। কষায়ত্বং। কৈশ্যভাবনত্বং। কফপিত্তহরত্বং। সারকত্বং। দীপনত্বং। পাচনত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ তৎপুষ্পগুণৌ। শ্লেষ্মকারিত্বং। গ্রাহিত্বঞ্চ। ইতি রাজবল্লভঃ॥

কুন্দঃ (পুং) কুন্দুরুনামগন্ধদ্রব্যং। ভ্রমিযন্ত্রং। কুঁদ ইতি ভাষা। কুবেরস্য নিধিবিশেষঃ। ইতি মেদিনী॥ করবীরবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কুন্দকঃ (পুং) কুন্দুরুকঃ। ইতি রাজনির্ঘণ্টঃ॥

কুন্দমঃ (পুং) বিড়ালঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কুন্দরঃ (পুং) তৃণভেদঃ। কুন্দরা ইতি কলিঙ্গে খ্যাতঃ। তৎপর্য্যায়। কণ্ডুরঃ ২ ঝিণ্টী ৩ দীর্ঘপত্রঃ ৪ খরচ্ছদঃ ৫ রসালঃ ৬ ক্ষেত্রসম্ভূতঃ ৭ সুতৃণঃ ৮ মৃগবল্লভঃ ৯। অস্য মূলগুণাঃ। গৌল্যত্বং। শীতত্বং। পিত্তাতিসারনাশিত্বং। গোধনানাং প্রশস্তত্বং। বলপুষ্টিবিবর্দ্ধনত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

কুন্দিনী (স্ত্রী) পদ্মিনী। পদ্মসমূহঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কুন্দুঃ (স্ত্রী) কুন্দুরুনামগন্ধদ্রব্যং। ইতি শব্দমালা অমরটীকা চ॥ মূষিকে পুং। ইতি শব্দরত্নাবলী॥

কুন্দুরঃ (পুং) কুন্দুরুনামগন্ধদ্রব্যং। ইত্যমরটীকায়াং ভরতঃ॥

কুন্দুরুঃ (পুং স্ত্রী) স্বনামখ্যাতসুগন্ধিদ্রব্যং। যস্য নির্য্যাসে কুন্দুরুখোটি ইতি খ্যাতিঃ। তৎপর্য্যায়ঃ। পালঙ্ক্যা ২ মুকুন্দঃ ৩ কুন্দঃ ৪। ইত্যমরঃ॥ পালঙ্কী ৫ মুকুন্দুঃ ৬ কুন্দুঃ ৭ কুন্দুরঃ ৮। ইতি তট্টীকায়াং ভরতঃ॥ কুন্দুরুকঃ ৯ সৌরাষ্ট্রঃ ১০ শিখরী ১১ কুন্দকঃ ১২ তীক্ষ্ণঃ ১৩ গোপুরকঃ ১৪ বহুগন্ধঃ ১৫ পালিন্দঃ ১৬ ভীষণঃ ১৭ তীক্ষ্ণগন্ধঃ ১৮ বলী ১৯। ইতি জটাধরঃ॥ অপি চ। কুন্দুরুস্তু মুকুন্দঃ স্যাৎ সুগন্ধঃ কন্দ ইত্যপি। কুন্দুরুর্ম্মধুরস্তিক্তস্তীক্ষ্ণস্ত্বচ্যঃ কটুর্হরেৎ। জ্বরস্বেদগ্রহালক্ষ্মীমুখরোগকফানিলান্॥ ইতি ভাবপ্রকাশঃ॥ অস্য গুণাঃ। মধুরত্বং। তিক্তত্বং। কফপিত্তার্ত্তিদাহনাশিত্বঞ্চ। অস্য পানলেপনয়োর্গুণঃ। শিশিরত্বং। প্রদরাময়শান্তিকারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ অলক্ষ্মীরক্ষোজ্বরনাশিত্বং। ইতি রাজবল্লভঃ॥

কুন্দুরুকঃ (পুং স্ত্রী) কুন্দুরুনাম সুগন্ধিদ্রব্যং। ইতি রাজনির্ঘণ্টঃ॥

কুন্দুরুকী (স্ত্রী) শল্লকীবৃক্ষঃ। ইত্যমরঃ॥

কুপ ই কি স্তৃতৌ। ইতি কবিকল্পদ্রুমঃ॥ পঞ্চমস্বরী। ই কুম্প্যতে। কি কুম্পয়তি কুম্পতি। স্তৃতিরাচ্ছাদনং। ইতি দুর্গাদাসঃ॥

কুপ ক দ্যুতৌ। ইতি কবিকল্পদ্রুমঃ॥ ক কোপয়তি। ইতি দুর্গাদাসঃ॥

কুপ য ইর্ কোপে। ইতি কবিকল্পদ্রুমঃ॥ কোপো নেত্রলৌহিত্যাদিহেতুশ্চিত্তবিকারঃ। য কুপ্যতি মাতা শিশবে। ইর্

অকুপৎ অকোপীৎ। অস্মাৎ পুষাদিত্বা-ন্নিত্যং ঙ ইত্যন্যে। কদাচিৎ কুপ্যতে মাতা নোদরস্থা হরীতকী। ইতি তু কুপ্যতীতি কুপ্ ততঃ স ইবাচরতি ইতি ঙ্যে সাধ্যং। ইতি দুর্গাদাসঃ॥

কুপথঃ (পুং) কুৎসিতঃ পন্থাঃ। ইতি শব্দরত্নাবলী॥

কুপাণিঃ (ত্রি) বক্রহস্তঃ। কোপা ইতি ভাষা। ইতি জটাধরঃ॥

কুপিনী [ন্] (পুং) কৈবর্ত্তঃ। জালিয়া ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ॥

কুপিনী (স্ত্রী) স্বল্পমৎস্যধানী। খালুই ইতি ভাষা। ইতি শব্দরত্নাবলী॥

কুপিন্দঃ (পুং) তন্ত্রবায়ঃ। ইত্যুণাদিকোষঃ॥

কুপীলুঃ (পুং) কারস্করবৃক্ষঃ। তিন্দুকবিশেষঃ। মধুরতেন্দু মাকড়াকেঁদু ইতি চ ভাষা। তৎপর্য্যায়ঃ। জলজঃ ২ দীর্ঘপত্রকঃ ৩ কুলকঃ ৪ কালতিন্দুকঃ ৫ কালপীলুকঃ ৬ কাকেন্দুঃ ৭ বিষতিন্দুঃ ৮ মর্কটতিন্দুকঃ ৯। অস্য গুণাঃ। শীতলত্বং। তিক্তত্বং। বাতমদকারিত্বং। লঘুত্বং। ব্যথাহরত্বং। গ্রাহিত্বং। কফপিত্তাস্রনাশিত্বঞ্চ। ইতি ভাবপ্রকাশঃ॥

কুপূয়ঃ (ত্রি) কুৎসিতঃ। জাত্যাচারাদিনিন্দিতঃ। ইত্যমরভরতৌ॥

কুপ্যং (ক্লী) স্বর্ণরূপ্যভিন্নধাতুঃ। ইত্যমরঃ॥ দস্তা ইতি খ্যাতধাতুঃ। ইত্যষ্টধাতুমধ্যে বৈদ্যকং॥

কুপ্যশালা (স্ত্রী) স্বর্ণরূপ্যভিন্নধাতুপাত্রাদিনির্ম্মাণাদিগৃহং। কাঁসারির দোকান ইতি ভাষা। তৎপর্য্যায়ঃ। সন্ধানী ২। ইতি হেমচন্দ্রঃ॥

কুপ্রিয়ঃ (ত্রি) জঘন্যঃ। ইতি হলায়ুধঃ॥

কুব ই কি স্তৃতৌ। ইতি কবিকল্পদ্রুমঃ॥ পঞ্চমস্বরী। ই কুম্ব্যতে। কি কুম্বয়তি কুম্বতি। স্তৃতিরাচ্ছাদনং। ইতি দুর্গাদাসঃ॥

কুবেরঃ (পুং) যক্ষরাজঃ। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ॥

কুব্জঃ (ত্রি) বায়ুনোন্নতহৃদয়ঃ। উন্নতপৃষ্ঠশ্চ। কুজা ইতি ভাষা। তৎপর্য্যায়ঃ। গড়ুঃ ২ গড়ুলঃ ৩। ইত্যমরঃ॥ ন্যুব্জঃ ৪ গড়ুরঃ ৫ ইতি শব্দরত্নাবলী॥ কু ঈষৎ উব্জ আর্জ্জবমস্য কুব্জঃ উব্জ আর্জবে ঘঞ্ মনীষাদিত্বাদ্বলোপঃ। গড়ুঃ পৃষ্ঠগুড়কো বিদ্যতে অস্যেতি গোতৃণেত্যাদিনা চূড়াদিত্বাৎ লে গড়ুলঃ। ইতি তট্টীকায়াং ভরতঃ॥ * ॥ তস্য লক্ষণমাহ। হৃদয়ং যদি বা পৃষ্ঠমুন্নতং ক্রমশঃ সরুক্। ক্রুদ্ধো বায়ুর্যদা কুর্য্যাত্তদা তং কুব্জমাদিশেৎ॥ ইতি মাধবকরঃ॥ যদেত্যুক্ত্বা যদিবেতি বিকল্পার্থত্বেন ন পুনরুক্তিদোষঃ। নম্বন্তরায়ামঃ ক্রোড়নতো ভবতি বহিরায়ামঃ পৃষ্ঠনতো ভবতি তাভ্যামস্য কো ভেদঃ। উচ্যতে। অন্তরায়ামবহিরায়ামেয়োঃ প্রকৃতস্যৈবান্তঃশরীরস্য বহিঃশরীরস্য চাবনমনমত্র তু হৃদয়ং পৃষ্ঠং বা শরীরাদ্বহির্ভবতীতি ভেদঃ॥ * ॥ অথ চিকিৎসা। বাহ্যায়ামেঽন্তরায়ামে ধন্বন্তরে চ কুব্জকে। যোজ্যং প্রসারিণীতৈলং তেন তেষাং শমো ভবেৎ॥ বাতব্যাধিষু

সামান্যা যাঃ ক্রিয়াঃ কথিতাঃ পুরা ।
কর্ত্তব্যা এব তাঃ সর্ব্বাস্তৈলমেতদ্বিশেষতঃ ॥
ইতি ভাবপ্রকাশঃ ॥

কুব্জঃ (পুং) অপামার্গঃ। ইতি রাজনির্ঘণ্টঃ ॥ খড়্গঃ। ইতি শব্দমালা ॥

কুব্জকঃ (পুং) পুষ্পবৃক্ষবিশেষঃ। কুজা ইতি খ্যাতঃ। তৎপর্য্যায়ঃ। ভদ্রতরুণী ২ বৃত্তপুষ্পঃ ৩ অতিকেশরঃ ৪ মহাসহঃ ৫ কণ্টকাঢ্যঃ ৬ খর্ব্বঃ ৭ অলিকুলসঙ্কুলঃ ৮ বারিকণ্টকঃ ৯। ইতি ত্রিকাণ্ডশেষঃ ॥ অপি চ। কুব্জকো ভদ্রতরণির্বৃহৎপুষ্পো-ঽতিকেশরঃ। মহাসহা কণ্টকাঢ্যা নীলালি-কুলসঙ্কুলা ॥ রাজনির্ঘণ্টে মহাসহেত্যাদি-শব্দাঃ পুংলিঙ্গাঃ। অস্য গুণাঃ। কুব্জকঃ সুরভিঃ স্বাদুঃ কষায়ানুরসঃ সরঃ। ত্রিদোষশমনো বৃষ্যঃ শীতহর্ত্তা চ স স্মৃতঃ॥ ইতি ভাবপ্রকাশঃ॥ অস্য গুণাঃ। সুর-ভিত্বং। রক্তপিত্তকফনাশিত্বঞ্চ। তৎ-পুষ্পগুণাঃ। শীতলত্বং। বর্ণকারিত্বং। দাহবাতপিত্তনাশিত্বঞ্চ। ইতি রাজ-নির্ঘণ্টঃ ॥

কুব্জকণ্টকঃ (পুং) শ্বেতখদিরঃ। ইতি রাজ-নির্ঘণ্টঃ ॥

কুত্রং (ক্লী) বনং। ইত্যুণাদিকোষঃ ॥ কুণ্ডং। কুণ্ডলং। তন্তুঃ। শরণং। শকটং। ইতি সংক্ষিপ্তসারে উণাদিবৃত্তিঃ ॥

কুমার ৎ ক কেলৌ। ইতি কবিকল্পদ্রুমঃ ॥ দ্রস্বী। অচুকুমারৎ। ইতি দুর্গাদাসঃ ॥

কুমারং (ক্লী) জাত্যকাঞ্চনং। খাটি সোণা ইতি ভাষা। ইতি মেদিনী ॥

কুমারঃ (পুং) কার্ত্তিকেয়ঃ। নাট্যোক্তৌ যুব-রাজঃ। ইত্যমরঃ ॥ শুকঃ। অশ্ববারকঃ। পঞ্চবর্ষীয়বালকঃ। বরুণবৃক্ষঃ। ইতি মেদিনী ॥ অর্হদুপাসকবিশেষঃ। ইতি হেমচন্দ্রঃ ॥ সিন্ধুনদঃ। ইতি শব্দরত্নাবলী ॥

কুমারকঃ (পুং) বরুণবৃক্ষঃ। ইত্যমরঃ ॥ বালকঃ। ইতি হেমচন্দ্রঃ ॥

কুমারজীবঃ (পুং) পুত্রঞ্জীবকবৃক্ষঃ। জীয়া-পুতা ইতি ভাষা। ইতি রত্নমালা ॥

কুমারপালঃ (পুং) শালিবাহনরাজঃ। ইতি হেমচন্দ্রঃ ॥

কুমারভৃত্যা (স্ত্রী) গর্ব্ভিণ্যাঃ পরিচর্য্যা। ইতি হারাবলী ॥ তৎপর্য্যায়ঃ। বালতন্ত্রং ২ গর্ব্ভিণ্যবেক্ষণং ৩। ইতি ত্রিকাণ্ডশেষঃ ॥

কুমারযুঃ (পুং) যুবরাজঃ। ইত্যুণাদিকোষঃ ॥

কুমারবাহী [ন্] (পুং) ময়ূরঃ। ইতি শব্দ-রত্নাবলী ॥

কুমারসূঃ (স্ত্রী) গঙ্গা। ইতি হেমচন্দ্রঃ ॥ দুর্গা। ইতি ব্যুৎপত্তিলভ্যোঽর্থঃ ॥

কুমারিকা (স্ত্রী) কুমারী। ইতি শব্দরত্নাবলী ॥ নবমল্লিকা। ইতি রত্নমালা ॥ ভারতবর্ষস্য খণ্ডবিশেষঃ। যথা। বর্ণব্যবস্থিতিরিহৈব কুমারিকাখ্যে। শেষেষু চান্ত্যজজনা নিব-সন্তি সর্ব্বে ॥ ইতি সিদ্ধান্তশিরোমণৌ গোলাধ্যায়ঃ ॥ স্থূলৈলা। ইতি রাজ-নির্ঘণ্টঃ ॥

কুমারী (স্ত্রী) দ্বাদশবর্ষীয়া কন্যা। যথা। অষ্ট-বর্ষা ভবেদ্গৌরী দশবর্ষা চ কন্যকা। সম্প্রাপ্তে দ্বাদশে বর্ষে কুমারীত্যভিধীয়তে ॥ ইতি স্মৃতৌ ভেদঃ। ইহ অভেদোপচারাৎ

কন্যা কুমারীত্যমরঃ ॥ ইতি ভরতঃ ॥ আগমে তু কুমারীপূজনে অজাতপুষ্পা চেৎ তদা ষোড়শবর্ষপর্য্যন্তবয়স্কা। তস্যা বয়োভেদেন নামভেদাঃ। যথা। একবর্ষা ভবেৎ সন্ধ্যা দ্বিবর্ষা চ সরস্বতী। ত্রিবর্ষা তু ত্রিধামূর্ত্তিশ্চতুর্ব্বর্ষা তু কালিকা ॥ সুভগা পঞ্চবর্ষা চ ষড়্‌বর্ষা চ উমা ভবেৎ। সপ্তভির্মালিনী সাক্ষাদষ্টবর্ষা চ কুব্জিকা ॥ নবভিঃ কালসঙ্কর্ষা দশভিশ্চাপরাজিতা। একাদশে তু রুদ্রাণী দ্বাদশাব্দে তু ভৈরবী ॥ ত্রয়োদশে মহালক্ষ্মীর্দ্বিসপ্তা পীঠনায়িকা। ক্ষেত্রজ্ঞা পঞ্চদশভিঃ ষোড়শে চান্নদা মতা ॥ এবং ক্রমেণ সম্পূজ্যা যাবৎ পুষ্পং ন জায়তে। পুষ্পিতাপি চ সম্পূজ্যা তৎপুষ্পাদানকর্ম্মণি ॥ * ॥ তৎপূজাবিধির্যথা। অথান্যৎ সাধনং বক্ষ্যে মহাচীনক্রমোদ্ভবং। যেনানুষ্ঠিতমাত্রেণ শীঘ্রং দেবী প্রসীদতি ॥ অষ্টম্যাঞ্চ চতুর্দশ্যাং কুহ্বাং বা রবিসংক্রমে। কুমারীপূজনং কুর্য্যাদ্‌যথা বিভবমাত্মনঃ ॥ বস্ত্রালঙ্করণাদ্যৈশ্চ ভক্ষ্যৈর্ভোজ্যৈঃ সুবিস্তরৈঃ। পঞ্চতত্ত্বাদিভিঃ সম্যগ্‌দেবীবুদ্ধ্যা সুসাধকঃ ॥ ইত্যন্নদাকল্পঃ ॥ * ॥ পার্ব্বতী। নবমল্লিকা। নদীবিশেষঃ। সহা। ঘৃতকুমারী ইতি খ্যাতা। অপরাজিতা। জম্বুদ্বীপঃ। ইতি মেদিনী ॥ সীতা। ইতি হেমচন্দ্রঃ ॥ বন্ধ্যাকর্কোটকী। স্থূলৈলা। মোদিনীপুষ্পং। তরুণীপুষ্পং। শ্যামাপক্ষী। ইতি রাজনির্ঘণ্টঃ ॥

কুমাল ৎ ক কেলৌ। ইতি কবিকল্পদ্রুমঃ ॥ হ্রস্বী। অচুকুমালৎ। ইতি দুর্গাদাসঃ ॥

কুমালকঃ (পুং) সৌবীরদেশঃ। ইতি হেমচন্দ্রঃ ॥

কুমুৎ [দ্] (ক্লী) কুমুদং। হেলা ইতি ভাষা। ইতি মেদিনী ॥ রক্তোৎপলং। ইতি ত্রিকাণ্ডশেষঃ ॥

কুমুৎ [দ্] (ত্রি) কৃপণঃ। ইতি মেদিনী ॥ অপ্রীতঃ। ইতি শব্দরত্নাবলী ॥

কুমুদং (ক্লী) শ্বেতোৎপলং। হেলা শুঁদি ইত্যাদি ভাষা। তৎপর্য্যায়ঃ। কৈরবং ২। ইত্যমরঃ ॥ চন্দ্রকান্তং ৩ গর্দ্দভং ৪ কুমুৎ ৫। ইতি রত্নমালা ॥ ধবলোৎপলং ৬ কহ্লারং ৭ শীতলকং ৮ শশিকান্তং ৯ ইন্দুকমলং ১০ চন্দ্রিকাম্বুজং ১১ গন্ধসোমং ১২। ইতি শব্দরত্নাবলী ॥ অপি চ। শ্বেতং কুবলয়ং প্রোক্তং কুমুদং কৈরবং তথা। কুমুদং পিচ্ছিলং স্নিগ্ধং মধুরং হ্লাদি শীতলং ॥ ইতি ভাবপ্রকাশঃ ॥ অস্য গুণাঃ। শীতলত্বং। স্বাদুত্বং। পাকে তিক্তত্বং। কফরক্তদোষদাহশ্রমপিত্তনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ রক্তপদ্মং। ইতি মেদিনী ॥ রূপ্যং। ইতি হেমচন্দ্রঃ ॥

কুমুদঃ (পুং) নৈর্ঋতকোণস্থদিগ্‌হস্তী। ইত্যমরঃ ॥ বানরবিশেষঃ। নাগবিশেষঃ। দৈত্যভেদঃ। সিতোৎপলং। ইতি হেমচন্দ্রঃ ॥ কর্পূরঃ। ইতি রাজনির্ঘণ্টঃ ॥ ধ্রুবকভেদঃ। যথা। একবিংশতিবর্ণাঙ্ঘ্রি র্ভবেৎ শৃঙ্গারকে রসে। কুমুদোঽভীষ্টদশ্চৈব তালে তুরগলীলকে ॥ ইতি সঙ্গীতদামোদরঃ ॥

কুমুদবান্ধবঃ (পুং) চন্দ্রঃ। কর্পূরঃ। ইত্যমরঃ ॥

কুমুদবতী ( স্ত্রী ) কুমুদ্বতী। কুমুদসমূহঃ। ইত্যমরটীকায়াং ভরতঃ ॥

কুমুদা ( স্ত্রী ) কুম্ভিকা। পানা ইতি ভাষা। গম্ভারীবৃক্ষঃ। ইতি মেদিনীকরহেমচন্দ্রৌ॥ শালপর্ণীবৃক্ষঃ। ধাতকীবৃক্ষঃ। কট্‌ফলঃ। ইতি রাজনির্ঘণ্টঃ॥

কুমুদাবাসঃ (পুং) কুমুদপ্রায়দেশঃ। ইতি হেমচন্দ্রঃ॥

কুমুদিকা ( স্ত্রী ) কট্‌ফলঃ। ইত্যমরঃ॥

কুমুদিনী ( স্ত্রী ) কুমুদযুক্তপুষ্করিণ্যাদিঃ। কুমুদসমূহঃ। কুমুদলতা। ইতি ভরতঃ॥ তৎপর্য্যায়ঃ। কুমুদ্বতী ২। ইত্যমরঃ॥ উৎপলিনী। ছোট শুঁদি ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥

কুমুদিনীপতিঃ ( পুং ) চন্দ্রঃ। ইতি হেমচন্দ্রঃ॥

কুমুদী ( স্ত্রী ) কট্‌ফলঃ। ইতি শব্দরত্নাবলী॥

কুমুদেশঃ ( পুং ) চন্দ্রঃ। ইতি শব্দরত্নাবলী॥

কুমুদ্বতী ( স্ত্রী ) কুমুদিনী। ইত্যমরঃ॥

কুমুদ্বান্ ( ত্রি ) কুমুদবহুলদেশঃ। ইত্যমরঃ॥

কুমোদকঃ ( পুং ) বিষ্ণুঃ। ইতি হেমচন্দ্রঃ॥

কুম্পঃ ( ত্রি ) বাহুকুণ্ঠঃ। কোপা ইতি ভাষা। ইতি জটাধরঃ॥

কুম্বা ( স্ত্রী ) সুগহনাবৃতিঃ। অস্পৃশ্যাদিদর্শনবারণায় বেষ্টনং। ইত্যমরঃ॥

কুম্ভং ( ক্লী ) গুগ্‌গুলুঃ। ইত্যমরঃ॥ ত্রিবৃৎ। ইতি হেমচন্দ্রঃ॥

কুম্ভঃ ( পুং ) ঘটঃ। অস্য পরিমাণং কলসশব্দে দ্রষ্টব্যং॥ গজকুম্ভঃ। হস্তিশিরসঃ পিণ্ডদ্বয়ং। ইত্যমরঃ॥ কুম্ভকর্ণপুত্রঃ। বেশ্যাপতিঃ। ইতি বিশ্বমেদিন্যৌ॥ সমাধিবিশেষঃ। প্রাণায়ামাঙ্গকুম্ভক ইতি যাবৎ। ইতি ধরণী॥ দ্রোণদ্বয়পরিমাণং। ৬৪ সের ইতি ভাষা। তৎপর্য্যায়ঃ। সূর্পঃ ২। ইতি বৈদ্যকপরিভাষা॥ মেষাদিদ্বাদশরাশ্যন্তর্গতৈকাদশরাশিঃ। তস্য পর্য্যায়ঃ। হৃদ্রোগঃ ২। ইতি দীপিকা॥ স চ ধনিষ্ঠাশেষার্দ্ধসম্পূর্ণশতভিষাযুক্তপূর্ব্বভাদ্রপদা প্রথমপাদত্রয়েণ ভবতি। অস্যাধিষ্ঠাত্রী দেবতা কলসধারী পুরুষঃ। স তু শীর্ষোদয়ঃ। চরণরহিতঃ। মধ্যসন্তানঃ। মধ্যমস্ত্রীসঙ্গঃ। কর্ব্বুরবর্ণঃ। বনচারী। বায়ুরাশিঃ। স্নিগ্ধঃ। উষ্ণঃ। অর্দ্ধস্বরঃ। বাতপিত্তকফপ্রকৃতিঃ। শূদ্রবর্ণঃ। পশ্চিমদিক্‌স্বামী। শ্লথাঙ্গঃ। তত্র জাতফলং। মেধাবী হস্তিঘোটকধনেশ্বরো দন্তপীড়াযুক্তঃ স্নেহশূন্যঃ। ইতি জ্যোতিষং॥ জন্মকালীনচন্দ্রাশ্রিতৈতদ্রাশিফলং। অলসতাসহিতোঽন্যসুতপ্রিয়ঃ কুশলতাকলিতোঽতিবিচক্ষণঃ। কলসগামিনি শীতকরে নরঃ সদসি সজ্জনমানসুরোচনঃ॥ ইতি কোষ্ঠীপ্রদীপঃ॥ তস্যোদয়ে তন্নামকলগ্নং ভবতি। তস্য গণিতপ্রাপ্তপরিমাণং যথা। দশব্যঙ্গুলাধিকপঞ্চাঙ্গুলপ্রভে দেশে বর্ত্তমানোনবিংশায়নাংশে অষ্টপঞ্চাশৎপলাধিকত্রিদণ্ডাঃ। ইতি জ্যোতিষং॥ তত্র জাতফলং। কুম্ভলগ্নে সমুদ্ভূতশ্চলচিত্তোঽতিসৌহৃদঃ। পরদাররতো নিত্যং সম্বকায়ো মহাসুখী॥ ইতি কোষ্ঠীপ্রদীপঃ॥

কুম্ভকঃ ( পুং ) দক্ষিণহস্তেন নাসাপুটদ্বয়ংধৃত্বা প্রাণায়ামাঙ্গং বায়ুস্তম্ভনং। ইতি তন্ত্রং॥

কুম্ভকারঃ ( পুং ) জাতিবিশেষঃ। কুমোর ইতি ভাষা। স তু শূদ্রাগর্ব্ভে বিশ্বকর্ম্মৌরসজাতঃ। ইতি ব্রহ্মবৈবর্ত্তপুরাণং ॥ তৎপর্য্যায়ঃ। কুলালঃ২। ইত্যমরঃ ॥ চক্রী৩। ইতি জটাধরঃ ॥ কুক্কুভপক্ষী। ইতি হেমচন্দ্রঃ

কুম্ভকারিকা (স্ত্রী) কুলত্থা। ইতি রাজনির্ঘণ্টঃ ॥

কুম্ভকারী ( স্ত্রী ) কুলত্থাঞ্জনং। কুলত্থিকা। ইতি রাজনির্ঘণ্টঃ ॥ মনঃশিলা। ইতি জটাধরঃ ॥ কুম্ভকারভার্য্যা চ ॥

কুম্ভতুম্বী ( স্ত্রী ) অলাবুপ্রভেদঃ। গোল লাউ ইতি ভাষা। তৎপর্য্যায়ঃ। কুম্ভালাবুঃ ২ গোরক্ষতুম্বী ৩ গোরক্ষী ৪ নাগালাবুঃ ৫ ঘটাভিধা ৬ ঘটালাবুঃ ৭। অস্যা গুণাঃ। মধুরত্বং। শীতত্বং। পিত্তশ্বাসকফাস্রজ্বরকাসনাশিত্বং। রম্যত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

কুম্ভদাসী ( স্ত্রী ) কুট্টনী। ইতি শব্দরত্নাবলী ॥

কুম্ভযোনিঃ ( পুং ) অগস্ত্যমুনিঃ। বশিষ্ঠমুনিঃ। দ্রোণাচার্য্যঃ। ইতি মেদিনী ॥ দ্রোণপুষ্পীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কুম্ভলা ( স্ত্রী ) মুণ্ডিতিকা। মুণ্ডিরী ইতি ভাষা। ইতি রত্নমালা ॥

কুম্ভবীজকঃ ( পুং ) রীঠাকরঞ্জঃ। ইতি রাজনির্ঘণ্টঃ ॥

কুম্ভশালা ( স্ত্রী ) কুম্ভনির্ম্মাণাদিগৃহং। তৎপর্য্যায়ঃ। পাকপুটী ২। ইতি হেমচন্দ্রঃ ॥

কুম্ভসন্ধিঃ ( পুং ) হস্তিকুম্ভদ্বয়মধ্যস্থানং। তৎপর্য্যায়ঃ। আরক্ষঃ ২। ইতি ত্রিকাণ্ডশেষঃ

কুম্ভসম্ভবঃ ( পুং ) অগস্ত্যমুনিঃ। ইত্যমরঃ ॥

কুম্ভা ( স্ত্রী ) বেশ্যা। ইতি শব্দমালা ॥

কুম্ভাণ্ডঃ ( পুং ) বাণাসুরস্যামাত্যবিশেষঃ। ইতি শ্রীভাগবতং ॥ কুষ্মাণ্ডং। কুষ্মাণ্ডীপর্য্যায়ে কুম্ভাণ্ডীদর্শনাৎ ॥

কুম্ভাণ্ডী ( স্ত্রী ) কুষ্মাণ্ডী। ইতি রাজনির্ঘণ্টঃ ॥

কুম্ভিকা ( স্ত্রী ) জলজতৃণবিশেষঃ। পানা ইতি ভাষা। তৎপর্য্যায়ঃ। বারিপর্ণী ২। ইত্যমরঃ ॥ শ্বেতপর্ণা ৩ অশকুম্ভী ৪ পানীয়পৃষ্ঠজঃ ৫। ইতি রত্নমালা ॥ আকাশমূলী ৬ কুতৃণং ৭ জলবল্কলং ৮। ইতি হারাবলী ॥ বারিমূলী ৯ খমূলিকা ১০ পর্ণী ১১ পৃশ্নী ১২ খমূলী ১৩ খমূলিঃ ১৪ বারিকর্ণিকা ১৫। ইতি শব্দরত্নাবলী ॥ কুমুদা ১৬ দলাঢ়কঃ ১৭। ইতি জটাধরঃ ॥ অস্যা গুণাঃ বারিপর্ণীশব্দে দ্রষ্টব্যাঃ। পাটলাবৃক্ষঃ। দ্রোণপুষ্পী। ইতি রাজনির্ঘণ্টঃ ॥ নেত্ররোগবিশেষঃ। তস্য লক্ষণং যথা। বর্ত্মান্তে পিড়কাধ্মাতা ভিদ্যন্তে চ স্রবন্তি চ। কুম্ভীকবীজসদৃশাঃ কুম্ভিকাঃ সন্নিপাতজাঃ ॥ ইতি মাধবকরঃ ॥

কুম্ভিনীবীজং ( ক্লী ) জয়পালঃ। ইতি রাজনির্ঘণ্টঃ ॥

কুম্ভিপাকী ( স্ত্রী ) কট্‌ফলঃ। ইতি ভাবপ্রকাশঃ ॥

কুম্ভিমদঃ (পুং) হস্তিমদঃ। ইতি রাজনির্ঘণ্টঃ ॥

কুম্ভিলঃ ( পুং ) চোরঃ। শালমৎস্যঃ। শ্লোকার্থচৌরঃ। শ্যালঃ। ইতি হেমচন্দ্রঃ ॥

কুম্ভী [ ন্ ] ( পুং ) হস্তী। কুম্ভীরঃ। ইতি হেমচন্দ্রঃ ॥ গুগ্‌গুলুঃ। ইতি জটাধরঃ ॥

কুম্ভী (স্ত্রী) উখা। পাটলাবৃক্ষঃ। বারিপর্ণী। কট্ফলঃ। ইতি হেমচন্দ্রঃ॥ বৃক্ষবিশেষঃ। কুম্ভীপুষ্প ইতি কোকণে প্রসিদ্ধা। তৎপর্য্যায়ঃ। রোমালুবিটপী ২ রোমশঃ ৩ পর্পটদ্রুমঃ ৪। অস্য গুণাঃ। কটুত্বং। কষায়ত্বং। উষ্ণত্বং। গ্রাহিত্বং। বাতকফাপহত্বঞ্চ। দন্তীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কুম্ভীকঃ (পুং) পুন্নাগবৃক্ষঃ। ইতি রত্নমালা॥ কুম্ভিকা। যথা। দূর্ব্বাকশেরুপূতীককুম্ভীকপ্লবশৈবলং। ইতি চক্রপাণিদত্তঃ॥

কুম্ভীনসঃ (পুং) ক্রূরসর্পঃ। ইতি মেদিনী॥

কুম্ভীনসী (স্ত্রী) লবণদানবমাতা। ইতি মেদিনী॥

কুম্ভীপাকঃ (পুং) নরকবিশেষঃ। ইতি জটাধরঃ॥ তৎপর্য্যায়ঃ। সংপ্রতাপনঃ ২। ইতি মনুঃ॥ য ইহ পশূন্ পক্ষিণো বা প্রাণতো রন্ধয়তি তং পরত্র যমদূতাস্তপ্ততৈলে রন্ধয়ন্তি যত্র। ইতি শ্রীভাগবতং॥

কুম্ভীরঃ (পুং) জলজন্তুবিশেষঃ। কুমীর ইতি ভাষা। তৎপর্য্যায়ঃ। নক্রঃ ২। ইত্যমরঃ॥ কুম্ভীলঃ ৩। ইতি তট্টীকা॥ গিলগ্রাহঃ ৪ মহাবলঃ ৫। ইতি রাজনির্ঘণ্টঃ॥ বার্ভটঃ ৬ অম্বুকিরাতঃ ৭ অম্বুকণ্টকঃ ৮। ইতি শব্দরত্নাবলী॥

কুম্ভীরমক্ষিকা (স্ত্রী) মক্ষিকাবিশেষঃ। কুমীরা পোকা ইতি ভাষা। তৎপর্য্যায়ঃ। কণা ২। ইতি হারাবলী॥

কুম্ভীলঃ (পুং) কুম্ভীরঃ। ইত্যমরটীকা॥

কুম্ভীবীজং (ক্লী) জয়পালঃ। ইতি রাজনির্ঘণ্টঃ॥

কুর শ শব্দে। ইতি কবিকল্পদ্রুমঃ॥ শ কুরতি কোরিতা। ইতি দুর্গাদাসঃ॥

কুরকা (স্ত্রী) সল্লকীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কুরঙ্করঃ (পুং) সারসপক্ষী। ইতি হেমচন্দ্রঃ॥

কুরঙ্কুরঃ (পুং) সারসপক্ষী। ইতি হারাবলী॥

কুরঙ্গঃ (পুং) হরিণঃ। ইত্যমরঃ॥ কুরঙ্গকোঽপি॥

কুরঙ্গনয়না (স্ত্রী) মৃগনয়না। নারী। ইতি রাজনির্ঘণ্টঃ॥

কুরঙ্গনাভিঃ (পুং) কস্তুরী। ইতি রাজনির্ঘণ্টঃ॥

কুরঙ্গমঃ (পুং) হরিণবিশেষঃ। তৎপর্য্যায়ঃ। এণঃ ২ ঋশ্যঃ ৩ রিশ্যঃ ৪ চারুলোচনঃ ৫। ইতি ত্রিকাণ্ডশেষঃ॥

কুরঙ্গিকা (স্ত্রী) মুদ্গপর্ণী। ইতি রাজনির্ঘণ্টঃ॥

কুরচিল্লঃ (পুং) কর্কটঃ। ইতি হেমচন্দ্রঃ॥

কুরটঃ (পুং) চর্ম্মকারঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কুরণ্টকঃ (পুং) পীতাম্লানঃ। পীতঝিণ্টী। ইতি রাজনির্ঘণ্টঃ॥

কুরণ্ডঃ (পুং) মুষ্কবৃদ্ধিরোগঃ। কোরণ্ড ইতি ভাষা। তৎপর্য্যায়ঃ। বৃদ্ধিঃ ২ অণ্ড-বর্দ্ধনঃ ৩। ইতি হেমচন্দ্রঃ॥ তস্য সম্প্রাপ্তিপূর্ব্বকং লক্ষণং যথা। ক্রুদ্ধোঽনূর্দ্ধগতির্বায়ুঃ শোথশূলকরশ্চরন্। মুষ্কৌ বঙ্ক্ষণতঃ প্রাপ্য ফলকোষাভিবাহিনীঃ॥ প্রপীড্য ধমনীর্বৃদ্ধিং করোতি ফলকোষয়োঃ। দোষাস্রমেদোমূত্রান্ত্রৈঃ সবৃদ্ধিঃ সপ্তধা মতঃ॥ মূত্রান্ত্রজাবপ্যনিলাদ্ধেতুভেদস্চ কেবলং। বাতপূর্ণদৃতিস্পর্শো রূক্ষো বাতাদহেতুরুক্॥ পক্বোড়ুম্বরসঙ্কাশঃ

পিত্তাদ্দাহোষ্মপাকবান্। কফাচ্ছীতো গুরুঃ স্নিগ্ধঃ কণ্ডুমান্ কঠিনোঽল্পরুক্ ॥ কৃষ্ণস্ফোটাবৃতঃ পিত্তবৃদ্ধিলিঙ্গশ্চ রক্তজঃ। কফবন্মেদসা বৃদ্ধির্মৃদুস্তালফলোপমঃ॥ মূত্রধারণশীলস্য মূত্রজঃ স তু গচ্ছতঃ। অম্ভোভিঃ পূর্ণদৃতিবৎ ক্ষোভং যাতি সরুঙ্মৃদুঃ॥ মূত্রকৃচ্ছ্রমধঃ স্যাচ্চ চালয়ন্ ফলকোষয়োঃ। বাতকোপিভিরাহারৈঃ শীততোয়াবগাহনৈঃ ॥ ধারণে রণভারাধ্ববিষমাঙ্গপ্রবর্ত্তনৈঃ। ক্ষোভণৈঃ ক্ষুভিতশ্চান্যৈঃ ক্ষুদ্রান্ত্রাবয়বং যদা ॥ পবনো বিগুণীকৃত্য স্বনিবেশাদধো নয়েৎ। কুর্য্যাদ্বঙ্ক্ষণসন্ধিস্থো গ্রন্থ্যাভং শ্বয়থুং তদা ॥ উপেক্ষ্যমাণস্য চ মুষ্কবৃদ্ধিমাধ্মানরুক্ স্তম্ভবতীং স বায়ুঃ। প্রপীড়িতোঽন্তঃস্বনবান্ প্রয়াতি প্রধ্মাপয়ন্নেতি পুনশ্চ মুক্তঃ॥ অন্ত্রবৃদ্ধিরসাধ্যোঽয়ং বাতবৃদ্ধিসমাকৃতিঃ। ইতি বৃদ্ধিনিদানং ॥ ইতি মাধবকরঃ ॥ * ॥ তস্যৌষধং যথা। দ্বিজযষ্ট্যাশ্চ বৈ মূলং পিষ্টং তণ্ডুলবারিণা। গণ্ডমালাং হরেল্লেপাৎ কুরণ্ডগলগণ্ডকং॥ রসাঞ্জনং হরীতক্যাশ্চূর্ণং তেনৈব গুণ্ঠনাৎ। নশ্যেদ্বৈ পুরুষব্যাধিং নাত্র কার্য্যা বিচারণা॥ ইতি গারুড়ে ১৯০ অধ্যায়ঃ ॥ * ॥ অন্যচ্চ। গব্যং ঘৃতং সৈন্ধবসংপ্রযুক্তং শম্বুকভাণ্ডে নিহিতং তদেব। সপ্তাহমাদিত্যকরৈর্ব্বিপক্বং হন্যাৎ কুরণ্ডং চিরজং প্রবৃদ্ধং ॥ গব্যঘৃত কর্ষ ১। সৈন্ধব মা ৪। শম্বুকভাণ্ডে কৃত্বা সপ্তদিনং যাবৎ রৌদ্রে ভাবয়েৎ তেন কুরণ্ডম্রক্ষণং। সৈন্ধবঞ্চ ঘৃতাভ্যক্তং তাম্রভাজন আতপে। প্রতপ্তমূর্ণয়া ঘৃষ্টং তন্মলঞ্চ সমাহরেৎ ॥ কুরণ্ডং ম্রক্ষয়েত্তেন স নির্ব্বিঘ্নং দিবানিশং। কুরণ্ডং তেন সংলিপ্তং নাস্তীত্যাহ পুনর্ব্বসুঃ ॥ তাম্রভাজনে ঘৃতং সৈন্ধবং দত্ত্বা রৌদ্রে তপ্তং কৃত্বা মেষলোমলুণ্ডিকয়া ঘৃষ্ট্বা মলগ্রহং কৃত্বা তেন ম্রক্ষয়েৎ ॥ বহুবারস্য বীজঞ্চ পিষ্ট্বা তচ্চার্দ্রকৈঃ সহ। কুরণ্ডং নাশয়েত্তদ্রে লেপনান্নাত্র সংশয়ঃ॥ ঘৃতৈর্নীলোৎপলং মূলং পিষ্ট্বা লিম্পেৎ কুরণ্ডকং। অথবা লেপনং কুর্য্যাৎ গৃহমণ্ডূকশোণিতৈঃ ॥ ইতি ভৈষজ্যরত্নাবলী ॥ * ॥ অপরঞ্চ। গুগ্‌গুলুং রুবুতৈলম্বা গোমূত্রেণ পিবেন্নরঃ। বাতবৃদ্ধিং নিহন্ত্যাশু চিরকালানুবন্ধিনীং ॥ সক্ষীরম্বা পিবেত্তৈলং মাসমেরণ্ডসম্ভবং। পুনর্নবায়াস্তৈলম্বা তৈলং নারায়ণন্তথা ॥ পানে বস্তৌ রুবোস্তৈলং পেয়ম্বা দশকাম্ভসা। চন্দনং মধুকং পদ্মমুশীরং নীলমুৎপলং ॥ ক্ষীরপিষ্টৈঃ প্রদেহঃ স্যাদ্দাহশোথরুজাপহঃ। পঞ্চবল্কলকল্কেন সঘৃতেন প্রলেপনং॥ সর্ব্বং পিত্তহরং কার্য্যং রক্তজে রক্তমোক্ষণং। শ্লেষ্মবৃদ্ধিং তুষ্ণবীর্য্যৈর্মূত্রপিষ্টৈঃ প্রলেপয়েৎ ॥ পীতদারুকষায়ঞ্চ পিবেন্মূত্রেণ সংযুতং। স্বিন্নাং মেদঃসমুত্থান্তু লেপয়েৎ সুরসাদিনা ॥ শিরোবিরেকদ্রব্যৈর্ব্বা সুখোষ্ণৈর্মূত্রসংযুতৈঃ। সংস্বেদ্য মূত্রপ্রভবাং বস্ত্রপট্টেন বেষ্টয়েৎ ॥ সেবন্যাঃ পার্শ্বতোঽধস্তাদ্বিধ্যেদ্ব্রীহিমুখেন বৈ। শঙ্খোপরি

চ কর্ণান্তে ত্যক্ত্বা সেবনিমাদরাৎ ॥ ব্যত্যাসাদ্বা সিরাং বিধ্যেদন্ত্রবৃদ্ধিনিবৃত্তয়ে। অঙ্গুষ্ঠমধ্যে ত্বক্ ছিত্ত্বা দহেদঙ্গবিপর্য্যয়ে ॥ রাস্নাযষ্ট্যমৃতৈরণ্ডবলাগোক্ষুরসাধিতঃ। ক্বাথোঽন্ত্রবৃদ্ধিং হন্ত্যাশু রুবুতৈলেন মিশ্রিতঃ॥ তৈলমেরণ্ডজং পীত্বা বলাসিদ্ধপয়োঽন্বিতং। আধ্মানশূলোপচিতামন্ত্রবৃদ্ধিং জয়েন্নরঃ॥ হরীতকীং মূত্রসিদ্ধাং সতৈললবণান্বিতাং। প্রাতঃ প্রাতশ্চ সেবেত কফবাতাময়াপহাং॥ গোমূত্রপিষ্টাং রুবুতৈলভৃষ্টাং হরীতকীং সৈন্ধবচূর্ণযুক্তাং। খাদেন্নরঃ কোষ্ণজলানুপানাং নিহন্তি বৃদ্ধিং চিরজাং প্রবৃদ্ধাং॥ ত্রিফলাক্বাথগোমূত্রং পিবেৎ প্রাতরতন্দ্রিতঃ। কফবাতোদ্ভবং হন্তি শ্বয়থুং বৃষণোত্থিতং ॥ সরলাগুরুকুষ্ঠানি দেবদারু মহৌষধং। মূত্রারনালসংপিষ্টং শোথঘ্নং কফবাতনুৎ ॥ ত্রিফলাক্বাথগোমূত্রং কল্কঃ পথ্যাসমুদ্ভবঃ। কৃষ্ণাসৈন্ধবসংযুক্তো বৃদ্ধিরোগহরঃ পরঃ ॥ গব্যং ঘৃতং সৈন্ধবসংপ্রযুক্তং শম্বুকভাণ্ডে নিহিতং প্রযত্নাৎ। সপ্তাহমাদিত্যকরৈর্ব্বিপক্বং নিহন্তি কুরণ্ডমতিপ্রবৃদ্ধং ॥ ঐন্দ্রীমূলভবং চূর্ণং রুবুতৈলেন মর্দ্দিতং। ত্র্যহাদ্গোপয়সা পীতং সর্ব্ববৃদ্ধিনিবারণং ॥ রুদ্রজটামূললিপ্তা করটব্যঙ্গচর্ম্মণা। বদ্ধা বৃদ্ধিঃ শমং যাতি চিরজাপি ন সংশয়ঃ॥ নিপিষ্টেনারনালেন রূপিকামূলবল্কলং। লেপো বৃদ্ধ্যাময়ং হন্তি বদ্ধমূলমপি দৃঢ়ং॥ বচা সর্ষপকল্কেন লেপো বৃদ্ধিবিনাশনঃ। লজ্জাগৃধ্রমলাভ্যাস্তু লেপো বৃদ্ধিহরঃ পরঃ॥ * ॥ মূলং বিল্বকপিত্থয়োরলকস্যাগ্নের্ব্বৃহত্যোর্দ্বয়োঃ। শ্যামাপূতিকরঞ্জশিগ্রুকতরোর্ব্বিশ্বৌষধারুষ্করং॥ কৃষ্ণাগ্রন্থিকচব্যপঞ্চলবণং ক্ষারাজমোদান্বিতং। পীতং কাঞ্জিককোষ্ণতোয়মথিতৈশ্চূর্ণীকৃতং ব্রধ্নজিৎ॥ অবীক্ষীরেণ গোধূমকল্কং কুন্দুরুকস্য বা। প্রলেপনং সুখোষ্ণং স্যাৎ ব্রধ্নশূলহরং পরং ॥ মৃৎপাত্রে তু বৈ কাকোদরে তত্তু প্রবেশয়েৎ। ব্রধ্নং মুহূর্ত্তং মেধাবী তৎক্ষণাদরুজো ভবেৎ॥ অজাজী হবুষা কুষ্ঠং গোধূমং বদরাণি চ। কাঞ্জিকেন সমং পিষ্ট্বা কুর্য্যাদ্ব্রধ্নপ্রলেপনং॥ সৈন্ধবং মদনং কুষ্ঠং শতাহ্বাং নিচুলং বচাং। হ্রীবেরং মধুকং ভার্গী দেবদারু সনাগরং॥ কট্ফলং পৌষ্করং মেদাং চবিকাং চিত্রকং শটীং। বিড়ঙ্গাতিবিষে শ্যামাং রেণুকাং নীলিনীং স্থিরাং॥ বিল্বাজমোদাং কৃষ্ণাঞ্চ দন্তীং রাস্নাং প্রপিষ্য চ। সাধ্যমেরণ্ডজং তৈলং তৈলম্বা কফবাতনুৎ ॥ ব্রধ্নোদরার্ত্তগুল্মার্শঃপ্লীহমেহাঢ্যমারুতান্। আনাহমশ্মরীঞ্চৈব হন্যাত্তদনুবাসনাৎ ॥ বৃহৎসৈন্ধবাদ্যং তৈলং। সৌরেশ্বরঘৃতং যোজ্যং ব্রধ্নবৃদ্ধিনিবৃত্তয়ে॥ ইতি ব্রধ্নবৃদ্ধ্যধিকারঃ। ইতি চক্রপাণিদত্তঃ॥ * ॥ ভাবপ্রকাশোক্তচিকিৎসাদিঃ অন্ত্রবৃদ্ধিশব্দে দ্রষ্টব্যঃ॥ সাকরুণ্ডবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কুরণ্ডকঃ (পুং) কুরণ্টকবৃক্ষঃ। ইত্যমরটীকায়াং রায়মুকুটঃ॥

কুররঃ ( পুং ) কুরলপক্ষী। তৎপর্য্যায়ঃ। উৎক্রোশঃ ২। ইত্যমরঃ ॥ খরশব্দঃ ৩ ক্রৌঞ্চঃ ৪ পংক্তিচরঃ ৫ খরঃ ৬। ইতি

কুররাঙ্ঘ্রিঃ ( পুং ) দেবসর্ষপঃ। ইতি রাজনির্ঘণ্টঃ ॥

কুররী ( স্ত্রী ) মেষী। ইতি হেমচন্দ্রঃ ॥ কুররপক্ষিস্ত্রী। ইত্যমরঃ ॥

কুরলঃ ( পুং ) কুররপক্ষী। চূর্ণকুন্তলঃ। ইতি ধরণী ॥

কুরবঃ (পুং) সিতমন্দারঃ। ইতি রাজনির্ঘণ্টঃ ॥ কুরবকঃ। রক্তঝিণ্টী। ইতি শব্দরত্নাবলী ॥ পীতঝিণ্টী। ইতি হেমচন্দ্রঃ ॥ কুৎসিতশব্দঃ। কুৎসিতশব্দযুক্তে ত্রি ॥

কুরবকঃ ( পুং ) রক্তাম্লানঃ। রক্তঝিণ্টী। ইতি রাজনির্ঘণ্টঃ ॥ কুৎসিতরবে ত্রি ॥

কুরসঃ ( পুং ) মদ্যভেদঃ। ইতি হারাবলী ॥ কুৎসিতরসঃ। কুৎসিতরসযুক্তে ত্রি ॥

কুরসা ( স্ত্রী ) গোজিহ্বালতা। ইতি শব্দচন্দ্রিকা ॥

কুরাহঃ (পুং) কুলাহঃ। ঈষৎপাণ্ডুঃ কৃষ্ণজঙ্ঘো ঘোটকঃ। ইতি হেমচন্দ্রঃ ॥

কুরী ( স্ত্রী ) তৃণধান্যভেদঃ। ইতি রাজনির্ঘণ্টঃ॥

কুরীরং (ক্লী) মৈথুনং। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ ॥

কুরুঃ ( পুং ) আগ্নীধ্ররাজপুত্রঃ। স তু প্রিয়ব্রতরাজপৌত্রঃ। চন্দ্রবংশীয়রাজবিশেষঃ। স তু সম্বরণরাজভার্য্যায়াং সূর্য্যকন্যায়াং তপত্যাং জাতঃ। ইতি শ্রীভাগবতং ॥ ভক্তং। দেশবিশেষঃ। তত্র বহুবচনান্তঃ। ইতি মেদিনী ॥ স তু জম্বুদ্বীপস্য নববর্ষান্তর্গতবর্ষবিশেষঃ। ইতি জ্যোতিষং ॥ কণ্টকারিকা। ইতি শব্দচন্দ্রিকা ॥

কুরুকন্দকং ( ক্লী ) মূলকং। ইতি শব্দমালা ॥

কুরুটঃ ( পুং ) সিতাবরশাকঃ। ইতি রাজনির্ঘণ্টঃ ॥

কুরুণ্টঃ (পুং) পীতঝিণ্টী। পীতাম্লানঃ। ইতি মেদিনী ॥

কুরুণ্টকঃ ( পুং ) পীতাম্লানঃ। পীতঝিণ্টী। তৎপর্য্যায়ঃ। সহচরী ২ সহচরঃ ৩। ইত্যমরঃ ॥ সহাচরঃ ৪ কুরণ্টকঃ। ইতি ভরতঃ ॥

কুরুণ্টী (স্ত্রী) দারুপুত্তলিকা। ইতি মেদিনী ॥ ব্রাহ্মণী। ইতি জটাধরঃ ॥

কুরুম্বং ( ক্লী ) কূলপালকং। কমলালেবু ইতি ভাষা। ইতি শব্দচন্দ্রিকা ॥

কুরুম্বা ( স্ত্রী ) দ্রোণপুষ্পী। ইতি রাজনির্ঘণ্টঃ॥

কুরুম্বিকা ( স্ত্রী ) দ্রোণপুষ্পী। ইতি রাজনির্ঘণ্টঃ ॥

কুরুম্বী ( স্ত্রী ) সৈংহলীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কুরুরাট্ [ জ্ ] ( পুং ) দুর্য্যোধনঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

কুরুলঃ ( পুং ) ভালস্থিতচূর্ণকুন্তলঃ। তৎপর্য্যায়ঃ। ভ্রমরকঃ২ ভ্রমরালকঃ ৩। ইতি হেমচন্দ্রঃ ॥

কুরুবকঃ (পুং) রক্তঝিণ্টী। রক্তাম্লানঃ। ইত্যমরঃ ॥ পীতঝিণ্টী। ইতি হেমচন্দ্রঃ ॥

কুরুবিন্দং ( ক্লী ) কাচলবণং। মাণিক্যং। ইতি রাজনির্ঘণ্টঃ॥ কুরুবিল্বরত্নং। কুল্মাষশস্যং। ইতি মেদিনী ॥

কুরুবিন্দঃ ( পুং ) মুস্তকং । ইত্যমরঃ ॥ মাষঃ । ইতি রাজনির্ঘণ্টঃ ॥

কুরুবিল্বঃ ( পুং ) পদ্মরাগমণিঃ । ইতি ত্রিকাণ্ডশেষঃ ॥

কুরুবিল্বকঃ ( পুং ) কুল্মাষঃ । বনকুলত্থিকা । ইতি রত্নমালা ॥

কুরুবিস্তঃ ( পুং ) স্বর্ণপলং । চারি তোলা সোণা । ইতি ভাষা । ইত্যমরঃ ॥

কুরুক্ষেত্রং ( ক্লী ) দেশবিশেষঃ । তত্তু ধর্ম্মক্ষেত্রং । যত্র কুরুপাণ্ডবানাং যুদ্ধমাসীৎ । ইতি মহাভারতং ॥

কুরুক্ষেত্রীযোগঃ ( পুং ) একস্মিন্ সাবনদিনে তিথিত্রয়নক্ষত্রত্রয়যোগত্রয়াণাঞ্চ স্পর্শঃ । ইতি স্মৃতিঃ ॥ কুরুক্ষেত্রে মৃত্যুযোগঃ । যথা । পঞ্চগ্রহযুতে মৃত্যৌ লগ্নসংস্থে বৃহস্পতৌ । সৌম্যক্ষেত্রগতে লগ্নে কুরুক্ষেত্রে মৃতির্ভবেৎ ॥ ইতি জাতকামৃতসংগ্রহে যোগাধ্যায়ঃ ॥

কুরূপ্যং ( ক্লী ) রঙ্গং । ইতি রাজনির্ঘণ্টঃ ॥

কুর্কুরঃ ( পুং স্ত্রী ) কুক্কুরঃ । ইত্যমরটীকায়াং রায়মুকুটঃ ॥

কুর্ণজঃ (পুং) কুলঞ্জনবৃক্ষঃ । ইতি রাজনির্ঘণ্টঃ ॥

কুর্দ্দ ঙ ক্রীড়ায়াং । ইতি কবিকল্পদ্রুমঃ ॥ পঞ্চমস্বরী । দীর্ঘিণঃ পৃথক্‌পাঠসামর্থ্যাৎ পূর্ব্বস্য বর্নচ্ছত্বয়ীতি দীর্ঘো ন স্যাৎ । ঙ কুর্দ্দতে । ইতি দুর্গাদাসঃ ॥

কূর্দ্দনং ( ক্লী ) ক্রীড়া । খেলা । ইত্যমরটীকায়াং স্বামী ॥

কূর্পরঃ ( পুং ) কফোণিঃ । জানু । ইতি মেদিনীকরহেমচন্দ্রৌ ॥

কূর্পাসঃ ( পুং ) অর্দ্ধচোলকঃ । ইতি হারাবলী ॥

কূর্পাসকঃ ( পুং ) কঞ্চুলিকা । কাঁচুলি ইতি ভাষা । ইত্যমরঃ ॥

কুর্ব্বৎ ( ত্রি ) কর্ম্মকারঃ । ভৃত্যঃ । ইতি বিশ্বঃ ॥

কুল জ বন্ধৌ । সংহতৌ । ইতি কবিকল্পদ্রুমঃ ॥ জ কোলঃ কুলঃ । কোলতি কুলীনঃ সর্ব্বেষাং বন্ধুঃ স্যাদিত্যর্থঃ । সংহতী রাশীকরণমিতি চতুর্ভুজঃ ॥ কেচিত্তু সংহতিস্থানে সংখ্যানং পঠিত্বা কোলতি কুলালঃ গণয়তি ইত্যর্থঃ ইত্যাহুঃ । সংস্ত্যানং পঠিত্বা সংস্ত্যানং উপচয়ঃ । ইতি রামঃ ॥ অন্যে তু বন্ধুষু জ্ঞাতিষু বর্ত্তমানোহয়ং অন্যত্রাস্য ন প্রয়োগঃ । গড়ি গণ্ডে ইতিবদিত্যাহুঃ । ইতি দুর্গাদাসঃ ॥

কুলং ( ক্লী ) বংশঃ । তন্নাশকারণং যথা । গোভিশ্চ দৈবতৈর্বিপ্রকৃষ্যা রাজোপসেবয়া । কুলান্যকুলতাং যান্তি যানি হীনানি বৃত্ততঃ ॥ কুবিবাহৈঃ ক্রিয়ালোপৈর্বেদানধ্যয়নেন চ । কুলান্যকুলতাং যান্তি ব্রাহ্মণাতিক্রমেণ বৈ ॥ অনৃতাৎ পারদার্য্যাচ্চ তথাভক্ষস্য ভক্ষণাৎ । অশ্রোত্রধর্ম্মাচরণাৎ ক্ষিপ্রং নশ্যতি বৈ কুলং ॥ অশ্রোত্রিয়ে বৈ বেদানাং বৃষলেষু তথৈব চ । বিহিতাচারহীনেষু ক্ষিপ্রং নশ্যতি বৈ কুলং ॥ ইতি কূর্ম্মপুরাণে উপরিভাগে ১৫ অধ্যায়ঃ ॥ স্বজাতীয়গণঃ । ইত্যমরঃ ॥ জনপদঃ । গৃহং । শরীরং । ইতি মেদিনী ॥ অগ্রং । ইতি মহাভারতং ॥

কুলঃ ( পুং ) কুলিকঃ । শিল্পিকুলপ্রধানঃ । ইত্যমরটীকায়াং ভরতঃ ॥

কুলকং (ক্লী) পটোললতা। সম্বন্ধশ্লোকসমূহঃ। ইতি মেদিনী॥

কুলকঃ (পুং) কাকেন্দুঃ। ইত্যমরঃ॥ বল্মীকঃ। কুলশ্রেষ্ঠঃ। ইতি মেদিনী॥ মরুবকবৃক্ষঃ। ইতি রত্নমালা॥ হরিতসর্পঃ। ইতি রাজনির্ঘণ্টঃ॥ কুপীলুঃ। ইতি ভাবপ্রকাশঃ॥ শিল্পিকুলপ্রধানঃ। ইত্যমরটীকায়াং ভরতঃ॥

কুলকর্কটী (স্ত্রী) চীনাকর্কটী। ইতি রাজনির্ঘণ্টঃ॥

কুলকুণ্ডলিনী } কুলকুণ্ডলী } (স্ত্রী) মূলাধারপদ্মস্থিতশিবশক্তিবিশেষঃ। যথা। কূজন্তী কুলকুণ্ডলী চ মধুরং মত্তালিমালাস্ফুটং বাচঃ কোমলকাব্যবন্ধরচনাভেদাতিভেদক্রমৈঃ। শ্বাসোচ্ছ্বাসবিবর্ত্তনেন জগতাং জীবো যয়া ধার্য্যতে সা মূলাম্বুজগহ্বরে বিলসতি প্রোদ্দামদীপ্তাবলী॥ ইতি পূর্ণানন্দকৃতষট্চক্রপ্রকাশঃ॥ * ॥ কূজন্তীতি সা মূলাম্বুজগহ্বর ইত্যাদি ব্যাখ্যাতং। কীদৃশী কোমলকাব্যবন্ধরচনাভেদাতিভেদক্রমৈঃ কোমলা কমনীয়ত্ববিশিষ্টা যা কাব্যবন্ধরচনা তস্যাঃ ভেদাতিভেদক্রমৈঃ ভেদাতিশয়ভেদক্রমৈর্ব্বিশিষ্টা বাচঃ মত্তালিমালাস্ফুটং মত্তা যা অলিমালা ভ্রমরসমূহস্তদ্বদস্ফুটং যথা স্যাৎ এবং মধুরং যথা স্যাৎ তথা কূজন্তী অব্যক্তমধুরধ্বনিং কুর্ব্বন্তীত্যর্থঃ। সা কা ইত্যাকাঙ্ক্ষায়ামাহ যয়া কুলকুণ্ডলিন্যা শ্বাসোচ্ছ্বাসবিবর্ত্তনেন শ্বাসোচ্ছ্বাসয়োঃ পরিবর্ত্তনেন গমনাগমনেন জগতাং সংসারাণাং জীবঃ প্রাণো ধার্য্যতে। পুনঃ কীদৃশী প্রোদ্দামদীপ্তাবলী প্রকৃষ্টোত্তুঙ্গদীপ্তিশ্রেণীস্বরূপা। তথা চ মূলাধারপদ্মে সর্পাকারসার্দ্ধত্রিতয়বেষ্টনবিশিষ্টা বিদ্যুৎসমূহরূপা কুলকুণ্ডলিনী তিষ্ঠতীত্যর্থঃ। ইতি তট্টীকা॥ * ॥ অন্যৎ চক্রশব্দে মূলাধারশব্দে ষট্চক্রশব্দে চ দ্রষ্টব্যং॥

কুলকঃ (পুং) করতালী। তৎপর্য্যায়ঃ। তালমর্দ্দলঃ ২। ইতি হারাবলী॥

কুলজঃ (পুং) কুলীনঃ। সৎকুলোদ্ভবঃ। ইতি শব্দরত্নাবলী॥

কুলঞ্জঃ (পুং) কুলঞ্জনবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কুলঞ্জনঃ (পুং) স্বনামখ্যাতবৃক্ষঃ। তৎপর্য্যায়ঃ। কুর্ণজঃ ২ গন্ধমূলঃ ৩ কুলঞ্জঃ ৪। অস্য গুণাঃ। কটুত্বং। তিক্তত্বং। উষ্ণত্বং। দীপনত্বং। মুখদোষনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

কুলটা (স্ত্রী) ব্যভিচারিণী। ভ্রষ্টা। তৎপর্য্যায়ঃ। পুংশ্চলী ২ *ধর্ষিণী* ৩ বন্ধকী ৪ অসতী ৫ ইত্বরী ৬ স্বৈরিণী ৭ পাংশুলা ৮। ইত্যমরঃ॥ ধর্ষণী ৯ পাংসুলা ১০। ইতি তট্টীকা॥ ধৃষ্টা ১১ দুষ্টা ১২ ধর্ষিতা ১৩। ইতি শব্দরত্নাবলী॥ লঙ্কা ১৪ নিশাচরী ১৫ ত্রপারণ্ডা ১৬। ইতি জটাধরঃ॥ * ॥ পরকীয়ান্তর্গতনায়িকাবিশেষঃ। যথা। এতে বারিকণান্ কিরন্তি পুরুষান্ বর্ষন্তি নাম্ভোধরাঃ শৈলাঃ শাদ্বলমুদ্বহন্তি ন সৃজন্ত্যেতে পুনর্নায়কান্। ত্রৈলোক্যে তরবঃ ফলানি সুবতে নৈবারভন্তে জনান্

ধাতঃ কাতরমালপামি কুলটাহেতোস্ত্বয়া কিং কৃতং ॥ ইতি রসমঞ্জরী ॥ * ॥ অস্যা অন্নভোজনপ্রায়শ্চিত্তং প্রায়শ্চিত্তশব্দে অভোজ্যান্নভক্ষণপ্রকরণে দ্রষ্টব্যং ॥

কুলটী ( স্ত্রী ) মনঃশিলা। ইতি রত্নমালা অমরটীকা চ ॥

কুলতিথিঃ ( স্ত্রী পুং ) চতুর্থ্যষ্টমীদ্বাদশীচতুর্দ্দশ্যঃ। যথা। দ্বিতীয়া দশমী ষষ্ঠী কুলাকুলমুদাহৃতং। বিষমাশ্চাকুলাঃ সর্ব্বে শেষাশ্চ তিথয়ঃ কুলাঃ ॥ ইতি তন্ত্রসারঃ ॥

কুলত্থঃ ( পুং ) শস্যভেদঃ। কুলত্থকড়াই ইতি ভাষা। তৎপর্য্যায়ঃ। কালবৃন্তঃ ২ তাম্রবৃক্ষঃ ৩ কুলত্থিকা ৪। ইতি রত্নমালা ॥ তাম্রবৃন্তঃ ৫। ইতি ত্রিকাণ্ডশেষঃ॥ তাম্রবীজঃ ৬ সিতেতরঃ ৭। ইতি রাজনির্ঘণ্টঃ॥ অস্য গুণাঃ। কফবাতগুল্মশুক্রাশ্মরীমেদঃশ্বাসকাসপ্রমেহনাশিত্বং। বৃংহণত্বং। উষ্ণত্বং। কটুত্বং। গ্রাহিত্বঞ্চ। ইতি রাজবল্লভঃ॥ কষায়ত্বং। রূক্ষত্বং। রক্তপিত্তকারিত্বং। বলনাশিত্বঞ্চ। অস্য যূষগুণঃ। বায়ুশর্করাশ্মরীনাশিত্বং। ইতি রাজনির্ঘণ্টঃ ॥

কুলত্থা ( স্ত্রী ) বনকুলত্থঃ। তৎপর্য্যায়ঃ। দৃক্‌প্রসাদা ২ অরণ্যকুলত্থিকা ৩ কুলালী ৪ লোচনহিতা ৫ চক্ষুষ্যা ৬ কুম্ভকারিকা ৭ কুলত্থিকা ৮। ইতি রাজনির্ঘণ্টঃ ॥ কুল্মাষঃ ৯ কুরুবিল্বকঃ ১০। ইতি রত্নমালা ॥ অস্যা গুণাঃ। কটুত্বং। তিক্তত্বং। অর্শঃশূলনাশিত্বং। বিবন্ধাধ্মানশমনত্বং। চক্ষুর্হিতত্বং। ব্রণরোপণত্বঞ্চ। কুলত্থাঞ্জনং। অস্য পর্য্যায়ঃ পূর্ব্ববত্তদধিকস্তু। কুম্ভকারী ১ প্রলাপহা ২। অস্য গুণাঃ। চক্ষুর্হিতত্বং। কষায়ত্বং। কটুত্বং। হিমত্বং। বিষবিস্ফোটকণ্ডুব্রণদোষনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ

কুলত্থিকা (স্ত্রী) কুলত্থাকারাঞ্জনপ্রস্তরবিশেষঃ। ইত্যমরঃ॥ অস্য গুণপর্য্যায়ৌ কুলত্থাশব্দে দ্রষ্টব্যৌ। বনকুলত্থঃ। ইতি রাজনির্ঘণ্টঃ ॥

কুলধর্ম্মঃ ( পুং ) স্বজাতীয়ধর্ম্মঃ। কুলাচারঃ। যথা। উৎসন্নকুলধর্ম্মাণাং মনুষ্যাণাং জনার্দ্দন। নরকে নিয়তং বাসো ভবতীত্যনুশুশ্রুমঃ॥ ইতি শ্রীভগবদ্গীতা ॥

কুলধারকঃ (পুং) পুত্রঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

কুলনায়িকা (স্ত্রী) পঞ্চমকারযজনে পূজ্যা স্ত্রী। যথা। রক্তমাল্যেন সম্বীতো রক্তপুষ্পবিভূষিতঃ। পঞ্চীকরণসঙ্কেতৈঃ পূজয়েৎ কুলনায়িকাং॥ সা নববিধা যথা। নটী কাপালিকী বেশ্যা রজকী নাপিতাঙ্গনা। ব্রাহ্মণী শূদ্রকন্যা চ তথা গোপালকন্যকা॥ মালাকারস্য কন্যা চ নব কন্যাঃ প্রকীর্ত্তিতাঃ। ইতি তন্ত্রসারঃ ॥

কুলনক্ষত্রং ( ক্লী) ভরণীরোহিণীপুষ্যমঘোত্তরফল্গুনীচিত্রাবিশাখাজ্যেষ্ঠাপূর্ব্বাষাঢ়াশ্রবণোত্তরভাদ্রপদঃ। যথা। বারুণার্দ্রাভিজিন্মূলং কুলাকুলমুদাহৃতং। কুলানি সমধিষ্ণ্যানি শেষাণি চাকুলানি চ॥ ইতি তন্ত্রসারঃ ॥

কুলনাশঃ ( পুং ) উষ্ট্রঃ। ইতি হেমচন্দ্রঃ॥ কুলধ্বংসশ্চ ॥

কুলপতিঃ ( পুং ) কুলস্বামী। গোত্রপ্রধানঃ। কুলনাথঃ। যথা। অথ সিন্ধুসৌবীরপতেরহূগণস্য ব্রজত ইক্ষুমত্যাস্তটে তৎকুলপতিনা শিবিকাবাহপুরুষান্বেষণসময়ে দৈবেনোপসাদিতঃ স দ্বিজবর উপলব্ধঃ। ইতি শ্রীভাগবতং ॥

কুলপত্রঃ ( পুং ) দমনকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কুলপালকং ( ক্লী ) কুরুম্বং। কমলালেবু ইতি ভাষা। ইতি শব্দচন্দ্রিকা ॥ বংশপ্রতিপালকে ত্রি ॥

কুলপালিঃ ( স্ত্রী ) কুলবতী। ইতি শব্দমালা ॥

কুলপালিকা ( স্ত্রী ) কুলস্ত্রী। ইত্যমরঃ ॥

কুলভৃত্যা ( স্ত্রী ) গর্ব্বিণীপর্য্যুপাসনা। ইতি জটাধরঃ ॥

কুলম্ভরঃ ( পুং ) কুজম্ভলঃ। চৌরঃ। ইতি হারাবলী ॥

কুলবর্ণা ( স্ত্রী ) রক্তত্রিবৃৎ। ইতি রাজনির্ঘণ্টঃ ॥

কুলবারঃ ( পুং ) মঙ্গলশুক্রবারৌ। যথা। রবিশ্চন্দ্রো গুরুঃ সৌরিশ্চত্বারশ্চাকুলা ইমে। ভৌমশুক্রৌ কুলাখ্যৌ হি বুধবারঃ কুলাকুলঃ ॥ ইতি তন্ত্রসারঃ ॥

কুলবিপ্রঃ ( পুং ) কুলপুরোহিতঃ। ইত্যমরটীকায়াং স্বামী ॥

কুলশ্রেষ্ঠী [ন্] ( ত্রি ) শিল্পিকুলপ্রধানঃ। তৎপর্য্যায়ঃ। কুলিকঃ২। ইত্যমরঃ ॥ কুলকঃ৩ কুলঃ৪ শ্রেষ্ঠী ৫। ইতি তট্টীকায়াং ভরতঃ ॥

কুলসম্ভবঃ (পুং) যস্য কস্যচিৎ কুলে জাতঃ। তৎপর্য্যায়ঃ। বীজ্যঃ ২। ইত্যমরঃ ॥

কুলসৌরভং ( ক্লী ) মরুবকবৃক্ষঃ। ইতি শব্দমালা ॥

কুলস্ত্রী ( স্ত্রী ) কুলপালিকা। অনন্যগামিনী কুলরক্ষিকা স্ত্রী। ইত্যমরঃ ॥

কুলহণ্ডকঃ ( পুং ) আরণিঃ। আবর্ত্তঃ। ইতি হারাবলী ॥

কুলক্ষয়া ( স্ত্রী ) শূকশিম্বী। ইতি শব্দচন্দ্রিকা ॥

কুলাকুলতিথিঃ ( পুং স্ত্রী ) দ্বিতীয়াষষ্ঠীদশম্যঃ। যথা। দ্বিতীয়া দশমী ষষ্ঠী কুলাকুলমুদাহৃতং। ইতি তন্ত্রসারঃ ॥

কুলাকুলনক্ষত্রং ( ক্লী ) আর্দ্রামূলাভিজিচ্ছতভিষানক্ষত্রাণি। যথা বারুণার্দ্রাভিজিন্মূলং কুলাকুলমুদাহৃতং। ইতি তন্ত্রসারঃ ॥

কুলাকুলবারঃ ( পুং ) বুধবারঃ। যথা। ভৌমশুক্রৌ কুলাখ্যৌ হি বুধবারঃ কুলাকুলঃ। ইতি তন্ত্রসারঃ ॥

কুলাচলঃ ( পুং ) কুলপর্ব্বতঃ। যথা। অষ্টকুলাচলসপ্তসমুদ্রা ব্রহ্মপুরন্দরদিনকররুদ্রাঃ। ন ত্বেবাহং নায়ং লোকস্তদপি কিমর্থং ক্রিয়তে শোকঃ ॥ ইতি মোহমুদ্গরশ্লোকঃ ॥ সপ্তকুলপর্ব্বতা যথা। সপ্ত যেঽস্মিন্ মহাপর্ব্বাঃ বিস্তৃতাঃ কুলপর্ব্বতাঃ। মাহেন্দ্রো মলয়ঃ সহ্যঃ শুক্তিমানৃক্ষবানপি ॥ বিন্ধ্যশ্চ পারিপাত্রশ্চ ইত্যেতে কুলপর্ব্বতাঃ। ইতি মাৎস্যে ৯৫ অধ্যায়ঃ ॥

কুলাচার্য্যঃ ( পুং ) কুলজ্ঞঃ। কুলীনাদীনাং বংশাংশব্যাখ্যাকর্ত্তৃব্রাহ্মণঃ। অস্য বিবরণং ঘটকশব্দে দ্রষ্টব্যং ॥

কুলাটঃ ( পুং ) ক্ষুদ্রমৎস্যভেদঃ। ইতি শব্দমালা ॥

কুলাদ্রিঃ ( পুং ) কুলাচলঃ। ইতি সিদ্ধান্তশিরোমণিঃ ॥

কুলাধারকঃ ( পুং ) পুত্রঃ। ইতি শব্দরত্নাবলী ॥

কুলায়ং ( ক্লী ) শরীরং। ইতি পুরাণং ॥

কুলায়ঃ ( পুং ) নীড়ঃ। স্থানমাত্রং। ইতি মেদিনী ॥

কুলায়স্থঃ ( পুং ) পক্ষী। ইতি শব্দচন্দ্রিকা ॥

কুলায়িকা ( স্ত্রী ) পক্ষিশালা। ইতি ত্রিকাণ্ডশেষঃ ॥

কুলালঃ (পুং) কুম্ভকারঃ। ইত্যমরঃ॥ তস্যোৎপত্তির্যথা। মালাকারাৎ কর্ম্মকার্য্যাং কুম্ভকারো ব্যজায়ত। ইতি পরাশরসংহিতা॥ পট্টিকারাচ্চ তৈলিক্যাং কুম্ভকারো বভূব হ। ইতি পরাশরপদ্ধতিঃ ॥ ব্রহ্মবৈবর্ত্তোক্তা চ কুম্ভকারশব্দে দ্রষ্টব্যা ॥ কুক্কুভপক্ষী। ইতি মেদিনী ॥

কুলালী ( স্ত্রী ) কুলত্থাকারাঞ্জনপ্রস্তরবিশেষঃ। কুলত্থাঞ্জনমিতি খ্যাতা। ইত্যমরঃ ॥ অরণ্যকুলত্থিকা বনকুলত্থকড়াই ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ ॥ কুলালভার্য্যা চ ॥

কুলাহঃ ( পুং ) ঈষৎপীতবর্ণঃ কৃষ্ণজানুর্ঘোটকঃ। ইতি হেমচন্দ্রঃ ॥

কুলাহকঃ ( পুং ) কৃকলাসঃ। ইতি শব্দমালা॥ বৃক্ষবিশেষঃ। রাঙ্গা কুলে খাড়া ইতি ভাষা। অস্য গুণঃ। আমবাতবাতরক্তরোগনাশিত্বং। ইতি রাজবল্লভঃ ॥

কুলাহলঃ ( পুং ) ক্ষুদ্রবৃক্ষবিশেষঃ। কোকসীমা ইতি ভাষা। তৎপর্য্যায়ঃ। অলম্বুষঃ ২ গোচ্ছালঃ ৩ ভূকদম্বঃ ৪। ইতি রত্নমালা ॥

কুলিঃ ( পুং ) হস্তঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

কুলিঃ ( স্ত্রী ) কণ্টকারী। ইতি শব্দরত্নাবলী ॥

কুলিকঃ ( ত্রি ) শিল্পিকুলপ্রধানঃ। ইত্যমরঃ ॥ কুলসত্তমঃ। ইতি মেদিনী ॥

কুলিকঃ ( পুং ) অষ্টমহানাগান্তর্গতনাগবিশেষঃ। বৃক্ষবিশেষঃ। কেলেকড়া ইতি ভাষা। ইতি মেদিনী ॥

কুলিকবেলা ( স্ত্রী ) রব্যাদিবারেষু শুভকর্ম্মসু নিষিদ্ধকালবিশেষঃ। যথা। রবৌ সপ্তমযামার্দ্ধং। সোমে ষষ্ঠযামার্দ্ধং। মঙ্গলে পঞ্চমযামার্দ্ধং। বুধে চতুর্থযামার্দ্ধং। গুরৌ তৃতীয়যামার্দ্ধং। শুক্রে দ্বিতীয়যামার্দ্ধং। শনৌ প্রথমযামার্দ্ধং। রাঘবভট্টমতে তু পূর্ব্বোক্তযামার্দ্ধানাং দিবাশেষভাগঃ। রাত্রৌ প্রথমভাগঃ। ইতি জ্যোতিষতত্ত্বং ॥

কুলিঙ্গঃ ( পুং ) পক্ষিবিশেষঃ। ফিঙ্গা ইতি ভাষা। তৎপর্য্যায়ঃ। কলিঙ্গঃ ২ ধূম্যাটঃ ৩ ফিঙ্গকঃ ৪। ইতি শব্দমালা॥ ভৃঙ্গঃ ৫। ইত্যমরঃ॥ অস্য মাংসগুণাঃ। মধুরত্বং। স্নিগ্ধত্বং। কফপিত্তকারিত্বঞ্চ। ইতি রাজবল্লভঃ ॥

কুলিঙ্গকঃ ( পুং ) চটকপক্ষী। ইতি হেমচন্দ্রঃ ॥

কুলিঙ্গাক্ষী ( স্ত্রী ) পেটিকাবৃক্ষঃ। পেটারী ইতি ভাষা। ইতি রত্নমালা ॥

কুলিঙ্গী (স্ত্রী) কর্কটশৃঙ্গীবৃক্ষঃ। ইতি রত্নমালা ॥

কুলিরঃ (পুং) কর্কটঃ। ইতি শব্দরত্নাবলী ॥

কুলিশং (ক্লী পুং) বজ্রং। ইত্যমরভরতৌ ॥ মৎস্যবিশেষঃ। তৎপর্য্যায়ঃ। কণ্ট-কাষ্ঠীলঃ ২। ইতি ত্রিকাণ্ডশেষঃ ॥ অস্থি-সংহারবৃক্ষঃ। ইতি রত্নমালা ॥

কুলিশনায়কঃ (পুং) শৃঙ্গারবন্ধবিশেষঃ। তস্য লক্ষণং। স্ত্রীপাদদ্বয়মাকৃষ্য বিমুমুক্ষিত-লিঙ্গকঃ। যোনিঞ্চ পীড়য়েৎ কামী বন্ধঃ কুলিশনায়কঃ ॥ ইতি রতিমঞ্জরী ॥

কুলিশাঙ্কুশা (স্ত্রী) বৌদ্ধানাং বিদ্যাদেবী-বিশেষঃ। ইতি হেমচন্দ্রঃ ॥

কুলিশাসনঃ (পুং) শাক্যমুনিঃ। ইতি ত্রিকাণ্ড-শেষঃ ॥

কুলী (স্ত্রী) কণ্টকারী। ইত্যমরঃ ॥ পত্নী-জ্যেষ্ঠভগিনী। ইতি হেমচন্দ্রঃ ॥ বৃহতী। ইতি রাজনির্ঘণ্টঃ ॥

কুলীনঃ (পুং) শ্রেষ্ঠঘোটকঃ। তৎপর্য্যায়ঃ। আজানেয়ঃ ২। ইত্যমরঃ ॥ অজানেয়ঃ ৩। ইতি তট্টীকা ॥ স্বজানেয়ঃ ৪ জাত্যঃ ৫ বালাশ্বিঃ ৬। ইতি শব্দরত্নাবলী ॥ উত্তম-কুলোদ্ভবে ত্রি। তৎপর্য্যায়ঃ। মহাকুলঃ ২ আর্য্যঃ ৩ সভ্যঃ ৪ সজ্জনঃ ৫ সাধুঃ ৬। ইত্যমরঃ ॥ * ॥ অথাধুনিককুলীনলক্ষণং। কুলং উৎকর্ষবিশেষবংশঃ। ইতি সঙ্কেতং। অথবা রূঢ্যর্থং। তস্যাপত্য-মিত্যর্থে কুলশব্দাদীনপ্রত্যয়েন কুলীন ইতি পদসিদ্ধিরিতি। অর্থাৎ কুলীনশব্দেন উৎকর্ষবিশেষবংশজাতকব্যক্তিরিতি। তথা চ লক্ষণং। উৎকর্ষবিশেষধর্ম্মাবচ্ছিন্নবংশ-জাতকত্বে সতি তদ্ধর্ম্মবত্ত্বং কুলীনত্ব-মিতি। উৎকর্ষবিশেষস্তু নবধা গুণাঃ। তদ্যথা। আচারো বিনয়ো বিদ্যা প্রতিষ্ঠা তীর্থদর্শনং নিষ্ঠা বৃত্তিস্তপো দানং নবধা কুললক্ষণং ॥ অতএব উৎকর্ষবিশেষাত্মক-নবধাগুণবিশিষ্টত্বং কুলীনত্বং। এতেন ইদানীং সাধারণসামান্যজনানাং যদি নবধা গুণা বর্ত্তন্তে তদা তেঽপি কুলীনাঃ স্যুস্তন্ন। অনবচ্ছিন্নপর্য্যায়ত্বং কুলীনত্বং। প্রমাণং যথা। সপর্য্যায়ং সমাসাদ্য দান-গ্রহণমুত্তমং। কন্যাভাবে কুশত্যাগঃ প্রতিজ্ঞা বা পরস্পরং ॥ তথা চ। কুলীনস্য সুতাং লব্ধা কুলীনায় সুতাং দদৌ। পর্য্যায়ক্রমতশ্চৈব স এব কুলদীপকঃ ॥ তথা চ। আদানঞ্চ প্রদানঞ্চ কুশত্যাগ-স্তথৈবচ। প্রতিজ্ঞা ঘটকাগ্রে চ কুলকর্ম্ম চতুর্ব্বিধং ॥ ইতি কুলদীপিকা ॥ * ॥ অথ বল্লালভূপালকৃতাঃ পঞ্চগোত্রজরাঢ়ীয়-ব্রাহ্মণস্য গ্রামবিশিষ্টস্য মুখ্যগৌণভেদেন দ্বাবিংশতিকুলীনাঃ যথা। শাণ্ডিল্যগোত্রে ভট্টনারায়ণবংশজ আদিবরাহবন্দ্যঃ স মুখ্যঃ। রামগড়গড়ঃ নিপকেশরকোণী গুঁয়ী কুলভী বটু দির্ঘাটিঃ বৈকুণ্ঠপারিয়ালঃ এতে পঞ্চ গৌণাঃ ॥ কাশ্যপগোত্রে দক্ষ-বংশজঃ সুলোচনচট্টঃ স মুখ্যঃ। জগহড়ঃ ধীরগুড়ঃ কাকপীতমণ্ডী এতে ত্রয়ো গৌণাঃ ॥ ভরদ্বাজগোত্রে শ্রীহর্ষবংশজঃ ধুরন্ধর মুখয়টী স চ মুখ্যঃ। বিনায়ক-দিণ্ডীসাঁয়ী গন্ধর্ব্বরায়ী এতৌ দ্বৌ গৌণৌ ॥

সার্বর্ণগোত্রে বেদগর্ব্ববংশজঃ বীরব্রত-গাঙ্গলী সুধীরকুন্দঃ এতৌ দ্বৌ মুখ্যৌ বীরসূদনঘণ্টেশ্বরঃ এষ গৌণঃ॥ বাৎস্য-গোত্রে ছান্দড়বংশজঃ সুরভিঘোষবালঃ কবিকাঞ্জিলালঃ রবিপূতিতগুঃ এতে মুখ্যাঃ। ভানুচৌটখণ্ডী পনিকালুমহিন্ত্যা বনমালিপিপ্পলী এতে গৌণাঃ॥ অধুনা এষাং মধ্যে মুখ্যা অষ্টৌ কুলীনাঃ গৌণাশ্চতুর্দ্দশশ্রোত্রিয়াঃ। অন্যেঽপি পঞ্চগোত্রাজ্জাতাঃ সপ্তত্রিংশচ্ছ্রোত্রিয়াঃ সন্তি॥ ততো লক্ষ্মণসেনেন মুখ্যাষ্টকুলীনো ন বিংশতি-পুত্ত্রাণাং সমীকরণং কৃতং। তত এতেষাং নানাদোষদর্শনাৎ দেবীবরেণ ফুলিয়া খড়দহবল্লবীসর্ব্বানন্দী ইত্যাদ্যাঃ ষট্ত্রিংশন্মেলাঃ কৃতাঃ। ততো ভাগযূথথাক ইতি তিস্রঃ সংজ্ঞা জাতাঃ কুলাচার্য্য-গ্রন্থাজ্জ্ঞেয়াঃ॥ ❊॥ অথ বারেন্দ্রব্রাহ্মণ-কুলীনাঃ। আদৌ মৈত্রস্ততো ভীমো রুদ্রঃ সংজ্ঞামিনিস্তথা। লাহিড়ির্ভাদুড়িঃ সাধুর্ভাদড়াঃ পঙ্ক্তিপূরকাঃ॥ এষাং নানা-দোষদর্শনাৎ কুলাচার্য্যেণ অষ্টৌ পটী ইতি সংজ্ঞা কৃতা। তদ্যথা। নিরাবিলা ১ রোহিলা ২ ভূষণা ৩ আলেখানী ৪ কুতলখানী ৫ বেণী ৬ জোনালী ৭ ভবানীপুর ৮। এতেষাং কুলাঘাতাৎ কাপ ইতি সংজ্ঞা জাতা॥ ❊॥ অথ বৈদ্যস্যাদি-কুলীনাঃ। ধন্বন্তরিগোত্রে বিনায়কসেনঃ। মৌদ্গল্যগোত্রে চায়ুদাসঃ। কাশ্যপে কায়ুগুপ্তঃ। বল্লালেনৈষাং কুলং মহা-মধ্যমকনিষ্ঠকুলভেদেন ত্রিধা কৃতং। তত্র মহাকুলীনাঃ পঞ্চ। যথা। কৃষ্ণসেনখানঃ ১ হরিহরসেনখানঃ ২ চণ্ডীবরদাসঃ ৩ গণ-পতিদাসঃ ৪ দুর্জয়দাসঃ ৫। অধুনৈষাং কুলস্য হ্রাসবৃদ্ধিভঙ্গা ন সন্তি॥ ❊॥ অথ দক্ষিণরাঢ়ীয়কায়স্থকুলীনাঃ। তত্রাদিশূর-রাজেন কান্যকুব্জদেশাদানীতৈর্ব্রাহ্মণ-পঞ্চকৈঃ সহ ঘোষবসুমিত্রদত্তগুহাঃ পঞ্চা-গতা আদিকুলীনাঃ যথা। সৌকালীন-গোত্রে মকরন্দঘোষঃ ১। গৌতমে দশরথ-বসুঃ ২। বিশ্বামিত্রে কালিদাসমিত্রঃ ৩। কাশ্যপগোত্রে দশরথগুহঃ স্বাহঙ্কারাদব-মানিতো বঙ্গে গতঃ ৪। ভরদ্বাজগোত্রে পুরুষোত্তমদত্তঃ বিনয়হীনতো নিষ্কুলঃ ৫। বঙ্গজকুলাচার্য্যগ্রন্থে স এব মৌদ্গল্য-গোত্রঃ॥ ❊॥ অথ বল্লালসেনকৃতসমাজা-দয়ঃ। তত্রাদ্যস্য ষষ্ঠ পুরুষয়োর্নিশাপতি-প্রভাকরঘোষয়োর্বাসস্থানে ক্রমেণ বালী-আকনাখ্যৌ গ্রামৌ। দ্বিতীয়স্য পঞ্চম-পুরুষয়োঃ শুক্তিমুক্তিবস্বোর্বাসস্থানে ক্রমেণ বাগাণ্ডিমাহিনগরাখ্যৌ গ্রামৌ। তৃতীয়স্যাষ্টমপুরুষয়োঃ ধুঁই গুঁই মিত্রয়ো-র্বাসস্থানে ক্রমেণ বড়িশাটেকানামগ্রামৌ॥ অপরেঽষ্টাদশ সমাজাস্তৎস্থানাং কুলা-ভাবাৎ ন লিখিতাঃ॥ ❊॥ তেষাং কুলস্তু নববিধং। মুখ্য ১। কনিষ্ঠ ২ ছভায়া ৩ মধ্যাংশ ৪ তেওজ ৫ এতানি প্রধানানি। কনিষ্ঠদ্বিতীয়পুত্ত্র ৬ ছভায়াদ্বিতীয়পুত্ত্র ৭ মধ্যাংশদ্বিতীয়পুত্ত্র ৮ তেওজদ্বিতীয়-পুত্ত্র ইতি চ ৯। নবরঙ্গানুরোধাৎ ছভায়া-জ্যেষ্ঠপুত্ত্রস্য মধ্যশ্রেষ্ঠ ইতি সংজ্ঞা

জাতা ॥ * ॥ অথ কুলানাং বিবরণং। মুখ্যকুলীনস্য প্রথমপুত্রঃ পিতৃতুল্যঃ দ্বিতীয়ঃ কনিষ্ঠনামকুলবিশিষ্টঃ তৃতীয়ো মধ্যাংশনামকুলযুক্তঃ চতুর্থঃ তেওজনাম-কুলান্বিতঃ পঞ্চমাদিযাবৎপুত্রাঃ মধ্যাংশ-দ্বিতীয়পুত্রনামকুলযুক্তা ভবন্তি ॥ কনিষ্ঠ-কুলীনস্য জ্যেষ্ঠপুত্রঃ ছভায়ানামকুলযুক্তঃ তস্য জ্যেষ্ঠপুত্রঃ মধ্যশ্রেষ্ঠনামকুলযুক্তঃ তস্য জ্যেষ্ঠপুত্রঃ মধ্যাংশনামকুলবিশিষ্টঃ স এব অপরমধ্যাংশবারভায়ামধ্যাংশ ইতি সংজ্ঞাদ্বয়যুক্তঃ ॥ * ॥ এষাং কর্ম্মণা বৃদ্ধির্যথা। মুখ্যকুলীনস্য দ্বিতীয়তৃতীয়-পুত্রয়োঃ কুলস্য বাড়িমুখ্য ইতি সংজ্ঞা চতুর্থপঞ্চমষষ্ঠপুত্রাণাং কুলস্য বাড়িকনিষ্ঠ ইতি সংজ্ঞা সপ্তমাষ্টমনবমপুত্রাণাং কুলস্য বাড়িমধ্যাংশ ইতি সংজ্ঞা দশ-মৈকাদশদ্বাদশপুত্রাণাং কুলস্য বাড়ি-তেওজ ইতি সংজ্ঞা ভবতি ॥ কনিষ্ঠনাম-কুলীনস্য দ্বিতীয়পুত্রস্য কুলস্য তেওজ ইতি সংজ্ঞা ভবতি ॥ মুখ্যকুলীনস্য তৃতীয়পুত্রস্য দ্বিতীয়পুত্রস্য কুলস্য তেওজ ইতি সংজ্ঞা ॥ মধ্যাংশদ্বিতীয়পুত্র ইতি সংজ্ঞং কুলং মুখ্যকনিষ্ঠছভায়া মধ্যশ্রেষ্ঠ-মধ্যাংশ ইতি কুলপঞ্চকাৎ ভবতি ॥ * ॥ মুখ্যকুলস্তু ত্রিবিধং যথা। প্রকৃতং ১. সহজং ২ কোমলং ৩। আদৌ ষট্-সমাজে ষট্ প্রকৃতমুখ্যা অভুবন্। তত-স্তেষাং দ্বিতীয়তৃতীয়পুত্রয়োঃ কুলস্য বৃদ্ধ্যা ক্রমেণ সহজকোমল ইতি সংজ্ঞা জাতা। প্রকৃতমুখ্যকুলে দানগ্রহণাভ্যাং সহজ ইতি সংজ্ঞা কোমলমুখ্যকুলে দান-গ্রহণাভ্যাং কোমল ইতি সংজ্ঞা ভবতি। সহজঃ সহজেন কোমলঃ কোমলেনাপি কুলং কৃত্বা তত্তদ্ভাবাপন্নৌ ভবতঃ ॥ পিতৃ-কুলানুসারেণ জ্যেষ্ঠপুত্রাণাং কুলস্য জন্ম-মুখ্যজন্মকনিষ্ঠাদিসংজ্ঞা ॥ * ॥ প্রকৃত-মুখ্যকুলস্য হ্রাসবৃদ্ধী ন ভবতঃ। সহজ-মুখ্যকুলস্য হ্রাসবৃদ্ধী ভবতঃ। কোমল-মুখ্যকুলস্যাপি হ্রাসবৃদ্ধী ন ভবতঃ। কনিষ্ঠকুলস্য মুখ্যত্বং ছভায়াকুলস্য কনিষ্ঠত্বং ভবতি। মধ্যাংশকুলস্য স্থির-তরত্বং। কনিষ্ঠদ্বিতীয়পুত্রঃ বাড়িতেওজ ইতি সংজ্ঞাং প্রাপ্নোতি। মুখ্যতৃতীয়-পুত্রস্য দ্বিতীয়পুত্রঃ তেওজ ইতি সংজ্ঞা-মপি প্রাপ্তুমর্হতি। ছভায়াদ্বিতীয়পুত্র-মধ্যাংশদ্বিতীয়পুত্রয়োঃ কুলে হ্রাসবৃদ্ধী ন স্তঃ। সর্ব্বে কুলীনাঃ কুলনাশাৎ বংশজ-ভাবাপন্না ভবন্তি ॥ * ॥ আদৌ যদি পিতৃ-পর্য্যায়ায় অথবা মৌলিকায় কন্যাং দদ্যাৎ তদ্দানং প্রামাণিকসংজ্ঞং ভবতি। পশ্চাৎ কুলকর্ম্ম কর্ত্তব্যং। তদযথা। মুখ্যস্য কন্যায়াঃ প্রদানে তস্যাঃ ছেই ইতি সংজ্ঞা ষষ্ঠ-কন্যাবধি গরছেই ইতি সংজ্ঞা ভবতি। অন্যকুলানাং জ্যেষ্ঠকন্যায়াঃ প্রদানে তস্যা আকৃতিরিতি সংজ্ঞা তদনন্তরং যাবৎকন্যানাং প্রদানে তাসাং ক্রমেণ প্রতিসারণী জঘন্যা ইতি সংজ্ঞাদ্বয়ং ভবতি ॥ আত্মসমকুলীনায় আকৃতিনাম-কন্যাদানে কুলস্য শ্রেষ্ঠত্বং। অনুজকন্যা-গ্রহণে তু কুলহ্রাসো ভবতি। মুখ্যস্য

গরছেই ইতি নাম্নীং কন্যাং অন্যকুলীনস্য প্রতিসারণীঞ্চ কন্যাং মৌলিকো বংশজশ্চ গ্রহীতুমর্হতি। উত্তমমধ্যমাধমকর্ম্মভিঃ শৌর্য্যসমাবেশনিন্দা ইতি ত্রয়ং কুলস্যাংশকর্ম্ম ॥ *॥ পূর্ব্বং বিপর্য্যায়ে বিবাহো জাতঃ। পুরন্দরবসুনৈষাং ত্রয়োদশপর্য্যায়াবধিশ্রেণীপর্য্যায়বন্ধভ্রমকৃতকুলোদ্ধরণে কৃতে। যথা। বিপর্য্যায়ে কুলং নাস্তি ন কুলং রণ্ডপিণ্ডয়োঃ ॥ *॥ অথ মুখ্যেতরকুলীনানাং পাণিদোষাঃ। দেবী গঙ্গা তথা গৌরী ভৈরবী ভাস্করী তথা। বলায়ী চণ্ডিদাসী চ সপ্তৈতে কুলকণ্টকাঃ॥ অপি চ। শ্রীনাথী শ্রীকরী বিষ্ণুদাসী হৃদয় এব চ। কন্দর্পী চ সদানন্দী ষড়েতে কুলকণ্টকাঃ ॥ ইতি কুলাচার্য্যকারিকা ॥ *॥ অথ মুখ্যকুলীনস্য কার্য্যং। স চ আগছেই অর্থাদগ্রিমাং কন্যাং আত্মতুল্যায় দ্বিতীয়াং কনিষ্ঠকুলীনায় তৃতীয়াং ছভায়ানামকুলযুক্তায় চতুর্থীং মধ্যশ্রেষ্ঠনামকুলবিশিষ্টায় অথবা মুখ্যতৃতীয়পুত্রমধ্যাংশকুলীনায় পঞ্চমীং তেওজনামকুলযুক্তায় দদ্যাৎ। তদনন্তরজাতানাং গরছেই ইতি সংজ্ঞা তাঃ মৌলিকমধ্যাংশদ্বিতীয়পুত্রমুখ্যকুলীনেভ্যো দাতুমর্হতি। স এবাদৌ মুখ্যকুলীনস্যাগ্রিমাং কন্যাং ততঃ কনিষ্ঠকুলীনস্য কন্যাং ততো মধ্যাংশ ইতিনামকুলযুক্তস্য কন্যাং ততো জম্মতেওজ ইতিনামকুলবিশিষ্টস্য কন্যাং গৃহ্লীয়াৎ ॥ *॥ অথ কনিষ্ঠকুলীনস্য কার্য্যং। স প্রথমাং কন্যাং আত্মতুল্যকুলীনায় দ্বিতীয়াং তেওজ ইতিনামকুলযুক্তায় দদ্যাৎ। মুখ্যতৃতীয়পুত্রায় মধ্যাংশনামকুলযুক্তায় অথবা মুখ্যদ্বিতীয়পুত্রায় কন্যাং দাতুমর্হতি। মুখ্যকুলীনস্য দ্বিতীয়াং কন্যাং অথবা কনিষ্ঠকুলীনস্য প্রথমাং গৃহ্লীয়াৎ। ততো মুখ্যকুলীনস্য তৃতীয়পুত্রস্য মধ্যাংশনামকুলযুক্তস্য কন্যাং গৃহ্লীয়াৎ॥ *॥ অথ ছভায়াকুলীনস্য কার্য্যং। স মধ্যাংশনামকুলবিশিষ্টায় প্রথমাং কন্যাং মধ্যাংশ ইতিকুলযুক্তানুজায় অর্থাৎ বাড়িতেওজনামকুলবিশিষ্টায় দ্বিতীয়াং দদ্যাৎ। মুখ্যকুলীনস্য তৃতীয়কন্যাং অথবা কনিষ্ঠকুলীনস্য প্রথমাং কন্যাং গৃহ্লীয়াৎ। ততঃ তেওজনামকুলবিশিষ্টস্য কন্যাং গৃহ্লীয়াৎ ॥ *॥ অথ মুখ্যতৃতীয়পুত্রস্য মধ্যাংশনামকুলীনস্য কার্য্যং। স প্রথমকন্যাং জম্মতেওজনামকুলবিশিষ্টায় দ্বিতীয়াং মধ্যাংশকুলবিশিষ্টস্য দ্বিতীয়পুত্রায় দদ্যাৎ। কনিষ্ঠস্য প্রথমাং কন্যাং ততস্তেওজকুলযুক্তস্য প্রথমাং কন্যাং ততস্তেওজানুজকুলীনস্য প্রথমাং কন্যাং গৃহ্লীয়াৎ। মুখ্যস্য তৃতীয়কন্যাগ্রহণং তস্য মহৎ কর্ম্ম ॥ *॥ অথ জম্মতেওজনামকুলীনস্য কার্য্যং। স প্রথমাং কন্যাং মুখ্যকুলীনস্য চতুর্থপুত্রায় অথবা মধ্যাংশনামকুলবিশিষ্টস্য দ্বিতীয়পুত্রায় দ্বিতীয়াং তেওজনামকুলবিশিষ্টস্য দ্বিতীয়পুত্রায় দদ্যাৎ। মুখ্যকুলীনস্য পঞ্চমকন্যাং অথবা মধ্যাংশনামকুলীনস্য প্রথমকন্যাং গৃহ্লীয়াৎ ॥ *॥ অথ কনিষ্ঠ-

কুলীনস্য দ্বিতীয়পুত্রস্য কার্য্যং। স আত্মতুল্যায় অথবা তেওজনামকুলবিশিষ্টদ্বিতীয়পুত্রায় প্রথমাং কন্যাং দদ্যাৎ। মুখ্যচতুর্থপুত্রজন্মতেওজনামকুলযুক্তস্য প্রথমাং অথবা কনিষ্ঠনামকুলীনস্য দ্বিতীয়াং কন্যাং গৃহ্লীয়াৎ ॥ * ॥ অথ ছভায়ানামকুলীনস্য দ্বিতীয়পুত্রস্য কার্য্যং। স আত্মতুল্যায় অথবা তেওজনামকুলবিশিষ্টদ্বিতীয়পুত্রায় প্রথমাং কন্যাং দদ্যাৎ তেওজনামকুলবিশিষ্টস্য প্রথমাং কন্যাং অথবা ছভায়ানামকুলযুক্তস্য দ্বিতীয়াং গৃহ্লীয়াৎ ॥ * ॥ অথ মধ্যাংশনামকুলীনস্য দ্বিতীয়পুত্রস্য কার্য্যং। স আত্মতুল্যায় অথবা তেওজনামকুলবিশিষ্টস্য দ্বিতীয়পুত্রায় প্রথমাং কন্যাং দদ্যাৎ। তেওজনামকুলবিশিষ্টস্য প্রথমাং অথবা অন্যকুলীনানাং মধ্যাংশনামকুলবিশিষ্টস্য বা দ্বিতীয়াং কন্যাং গৃহ্লীয়াৎ ॥*॥ অথ তেওজনামকুলীনস্য দ্বিতীয়পুত্রস্য কার্য্যং। স আত্মতুল্যায় অথবা বংশজায় প্রথমাং কন্যাং দদ্যাৎ। মধ্যাংশনামকুলবিশিষ্টস্য দ্বিতীয়পুত্রস্য প্রথমাং কন্যাং অথবা তেওজনামকুলবিশিষ্টস্য দ্বিতীয়াং গৃহ্লীয়াৎ ॥ * ॥ অথ মধ্যশ্রেষ্ঠনামকুলীনস্য কার্য্যং। স মধ্যশ্রেষ্ঠপুত্রবারভায়ামধ্যাংশনামকুলীনায় প্রথমাং মধ্যাংশকুলবিশিষ্টস্য দ্বিতীয়পুত্রায় তেওজনামকুলীনায় দ্বিতীয়াং কন্যাং দদ্যাৎ। মুখ্যকুলীনস্য চতুর্থীং কন্যাং অথবা কনিষ্ঠকুলীনস্য প্রথমাং কন্যাং গৃহ্লীয়াৎ। ততঃ তেওজনামকুলবিশিষ্টস্য প্রথমাং কন্যাং গৃহ্লীয়াৎ ততঃ তেওজানুজকুলীনস্য অগ্রিমাং কন্যাং গৃহ্লীয়াৎ ॥ * ॥ অথ মধ্যশ্রেষ্ঠপুত্রবারভায়ামধ্যাংশনামকুলীনস্য কার্য্যং। স তেওজনামকুলযুক্তায় প্রথমাং কন্যাং দদ্যাৎ। কনিষ্ঠকুলবিশিষ্টস্য অথবা ছভায়ানামকুলযুক্তস্য কিম্বা মধ্যশ্রেষ্ঠকুলীনস্য প্রথমাং কন্যাং গৃহ্লীয়াৎ ॥ * ॥

অথ চতুস্ত্রিংশদধিকসপ্তদশশতশকাব্দে মৎপিত্রা তাবৎকুলীনকুলাচার্য্যমতেন মুখ্যকুলীনস্য দ্বিতীয়তৃতীয়য়োঃ কন্যয়োঃ ক্রমেণ গ্রহণেন তদলাভে শৌর্য্যকুলে দানেন সমানকুলে গ্রহণেন চ কনিষ্ঠছভায়ানামকুলয়োঃ পুরুষানুক্রমেণ স্থিরতরত্বং নির্ণীতং। তদযথা। কনিষ্ঠকুলবেশ্মনি কচন কেঽপি কেঽপীচ্ছয়া পরেঽপি পুরুষত্রয়াদগমনেব দোচ্ছেয়িকাং। নিষেধমিহ নেক্ষতে কমপি তত্র ষড়্ভ্রাতৃজঃ সুতঃ পিতৃপদং কথং জননতো হি ন প্রাপ্স্যতি ॥ শাকে পদ্যপদত্রিসপ্তবসুধাগণ্যে বরেণ্যে তথা পর্য্যায়ে পরিপূরিতে হি বিষমে ধন্যে ত্রয়োবিংশকে। গোপীমোহনদেববংশতিলকেনাপূর্ব্বকং শ্রীমতা নির্ণীতং যদপীহ তচ্চ ঘটকৈঃ সর্ব্বৈঃ কুলীনৈর্ম্মতং ॥ কনিষ্ঠষড়্ভ্রাতৃকুলস্য তত্ত্বৎ স্বচ্ছেয়িকায়ামিদমেব মূলং। আদানতঃ পিত্র্যপদস্য লাভো জ্যেষ্ঠত্বভাবঃ পুরুষক্রমেণ ॥ ছেয়িকায়ামশক্তস্য দানঞ্চেৎ প্রবলং ভবেৎ। পর্য্যায়স্য সমানস্য গ্রহণাদপি তিষ্ঠতি ॥ শৌর্য্যং নিন্দা সমাবেশ-

ত্রিবিধোঽংশঃ কুলস্য বৈ। তস্য ধ্বংসো ন হি ভবেদযত্নতো রক্ষিতঃ স হি ॥ অত্র যদ্যন্যথাভাবো ভবেদপি যথাবিধি। ক্রমাগতেষু বর্গেষু তদা হানির্ভবিষ্যতি ॥ সর্ব্বৈঃ কুলজ্ঞৈশ্চ কুলীনবর্গৈর্গোষ্ঠীপতীনাং পুরতঃ সহর্ষৈঃ। ইদং হি পত্রং লিখিতং প্রযত্নাৎ নির্ণীত এষ প্রচলিষ্যতীতি ॥ * ॥ অথ বঙ্গজকুলীনাঃ। বসুবংশে চ মুখ্যৌ দ্বৌ নাম্না লক্ষ্মণপূষণৌ। ঘোষেষু চ সমাখ্যাতশ্চতুর্ভুজমহাকৃতী ॥ দশরথো গুহকশ্চৈব মিত্রস্তারাপতিস্তথা ॥ এতেষামাদিপুরুষনির্ণয়ো যথা। গৌতমগোত্রে সর্ব্বাদৌ দশরথবসুসুতৌ কৃষ্ণবসুপরমবসুকৌ কৃষ্ণবসুর্দক্ষিণরাঢ়ে খ্যাতস্তস্য সুতঃ ভববসুঃ তৎসুতঃ হংসবসুঃ তৎসুতাঃ শুক্তিমুক্ত্যলঙ্কারবসুকাঃ। অলঙ্কারবসুঃ রাঢ়াৎ বঙ্গে গতঃ তস্য বঙ্গে কুলহানির্জাতা তস্য সুতঃ মধুবসুঃ তৎসুতঃ গুণাকরবসুঃ তৎসুতা অনন্তাদয়ঃ। দশরথসুতঃ পরমবসুস্তৎসুতৌ লক্ষ্মণবসুপূষণবসুকৌ বঙ্গে খ্যাতৌ ॥ সৌকালীনগোত্রে মকরন্দঘোষসুতৌ ভবনাথঘোষসুভাষিতঘোষৌ ভবনাথঘোষো দক্ষিণরাঢ়ে খ্যাতঃ সুভাষিতঘোষো বঙ্গে খ্যাতঃ তস্য সুতশ্চতুর্ভুজঘোষঃ ॥ বিশ্বামিত্রগোত্রে সর্ব্বাদৌ কালিদাসমিত্রসুতৌ অশ্বপতিমিত্রশ্রীধরমিত্রৌ শ্রীধরমিত্রো দক্ষিণরাঢ়ে খ্যাতঃ অশ্বপতিমিত্রো বঙ্গে খ্যাতস্তস্য সুতস্তারাপতিমিত্রঃ ॥ ইতি বঙ্গজকুলাচার্য্যগ্রন্থঃ কুলদীপিকা ॥

কুলীনকঃ (পুং) বনমুদ্গঃ। ইতি হেমচন্দ্রঃ ॥

কুলীনসং (ক্লী) জলং। ইতি হেমচন্দ্রঃ ॥

কুলীরঃ (পুং) কর্কটঃ। কাঁকড়া ইতি ভাষা। ইত্যমরঃ॥ কর্কটরাশিঃ। ইতি জ্যোতিষং ॥

কুলীরশৃঙ্গী (স্ত্রী) কর্কটশৃঙ্গীবৃক্ষঃ। ইতি রত্নমালা ॥

কুলীরাৎ [দ্] (পুং) কর্কটশিশুঃ। তৎপর্য্যায়ঃ। স্নেগবিঃ ২। ইতি ত্রিকাণ্ডশেষঃ ॥

কুলীশঃ (পুং ক্লী) কুলিশং। ইত্যমরটীকাসারসুন্দরী ॥

কুলুকং (ক্লী) জিহ্বামলং। ইতি হেমচন্দ্রঃ॥

কুলুকগুঞ্জা (স্ত্রী) উল্কাগ্নিঃ। ইতি হারাবলী॥

কুলেশ্বরঃ (পুং) শিবঃ। কুলপতিঃ। ইতি শব্দমালা ॥

কুলোৎকটঃ (পুং) কুলীনাশ্বঃ। ইতি শব্দচন্দ্রিকা ॥ উৎকটকুলোদ্ভবে ত্রি ॥

কুল্ফঃ (পুং ক্লী) রোগঃ। গুল্ফে পুং ইত্যুণাদিকোষঃ ॥

কুল্মলং (ক্লী) পাপং। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ ॥

কুল্মাষং (ক্লী) কাঞ্জিকং। ইত্যমরঃ ॥

কুল্মাষঃ (পুং) যাবকঃ। ইত্যমরঃ ॥ বোরবধান্যং। কুলত্থ ইত্যন্যে। মাষাকৃতিপত্রঃ কাশ্মীরেষু তুলসী ইতি খ্যাতঃ ইতি সুভূতিঃ। ইতি ভরতঃ॥ রাজমাষ ইত্যন্যে। ইতি নয়নানন্দঃ ॥ মাষাদিমিশ্রমর্দ্ধস্বিন্নভক্তং। খিঞ্চড়ী ইতি খ্যাতশ্চ। ইতি লিঙ্গাদিসংগ্রহটীকায়াং ভরতঃ ॥ পাচিতমাষাদিরিতি ভীমঃ। ইতি সারসুন্দরী ॥

অর্দ্ধস্বিন্নগোধূমচণকাদয়ঃ। অস্য গুণাঃ। গুরুত্বং। রুক্ষত্বং। বাতকারিত্বং। মলভেদিত্বঞ্চ। ইতি ভাবপ্রকাশঃ॥ রোগবিশেষঃ। ইতি শব্দরত্নাবলী॥ বনকুলত্থঃ। ইতি রত্নমালা॥

কুল্মাষাভিষুতং (ক্লী) কাঞ্জিকং। ইত্যমরটীকায়াং স্বামী॥

কুল্মাসং (ক্লী) কুল্মাষং। ইত্যমরটীকায়াং ভরতঃ॥

কুল্যং (ক্লী) অস্থি। ইত্যমরঃ॥ অষ্টদ্রোণপরিমাণং। সূর্পং। আমিষং। ইতি মেদিনী॥

কুল্যঃ (ত্রি) কুলোদ্ভবঃ। কুলহিতঃ। মান্যে পুং। ইতি মেদিনী॥

কুল্যা (স্ত্রী) ক্ষুদ্রা কৃত্রিমা নদী। ইত্যমরঃ॥ পয়ঃপ্রণালী। পয়নালা ইতি ভাষা। জীবন্তিকৌষধিঃ। নদীমাত্রং। ইতি মেদিনী॥ কুলস্ত্রী। ইতি হলায়ুধঃ॥ স্থূলবার্ত্তাকুঃ। ইতি রত্নমালা॥

কুবং (ক্লী) উৎপলং। জলজপুষ্পমাত্রং। ইতি হেমচন্দ্রঃ॥

কুবকালুকা (স্ত্রী) ঘোলীশাকং। ইতি রাজনির্ঘণ্টঃ॥

কুবঙ্গং (ক্লী) সীসকং। ইতি রাজনির্ঘণ্টঃ॥

কুবচঃ (ত্রি) কুবাদঃ। পরদোষকথনশীলঃ। ইত্যমরঃ॥

কুবজ্রকং (ক্লী) বৈক্রান্তমণিঃ। ইতি রাজনির্ঘণ্টঃ॥

কুবরঃ (পুং) তুবরঃ। ইত্যমরটীকায়াং রায়মুকুটঃ

কুবলং (ক্লী) উৎপলং। মুক্তাফলং। বদরীফলং। ইতি মেদিনী॥

কুবলয়ং (ক্লী) উৎপলং। ইত্যমরঃ॥ নীলোৎপলং। ইতি রাজনির্ঘণ্টঃ॥

কুবলয়াপীড়ঃ (পুং) কংসস্য হস্তিরূপো দৈত্যবিশেষঃ। ইতি শ্রীভাগবতং॥

কুবলয়িনী (স্ত্রী) উৎপলিনী। ইতি রাজনির্ঘণ্টঃ॥

কুবলাশ্বঃ (পুং) ধুন্ধুমাররাজঃ। ইতি হেমচন্দ্রঃ॥

কুবলী (স্ত্রী) কোলিবৃক্ষঃ। ইতি রত্নমালা॥

কুবাদঃ (ত্রি) কুবচঃ। পরদোষকথনশীলঃ। ইত্যমরঃ॥

কুবাহুলঃ (পুং) উষ্ট্রঃ। ইতি শব্দচন্দ্রিকা॥

কুবিন্দঃ (পুং) তন্তুবায়ঃ। স তু শূদ্রাগর্ভে বিশ্বকর্ম্মৌরসজাতঃ। ইতি ব্রহ্মবৈবর্ত্তপুরাণং॥

কুবৃত্তিকৃৎ (পুং) পূতিকঃ। কাঁটা করঞ্জ ইতি ভাষা। ইতি শব্দচন্দ্রিকা॥

কুবেণী (স্ত্রী) মৎস্যধানী। খালই ইতি ভাষা। ইত্যমরঃ॥ কুৎসিতা বেণী। নিন্দিতবেণীনারী চ॥

কুবেরঃ (পুং) দেবতাবিশেষঃ। স তু বিশ্রবোমুনেরিড়বিড়াভার্য্যায়াং জাতঃ। ধনযক্ষোত্তরদিশাং পতিশ্চ। ইতি শ্রীভাগবতং॥ ত্রিচরণোঽষ্টদংষ্ট্রোঽয়ং জাতঃ। কুৎসিতং বেরং শরীরমস্য সঃ। তথা চ বায়ুমার্কণ্ডেয়পুরাণে। কুৎসায়াং ক্বিতি শব্দোঽয়ং শরীরং বেরমুচ্যতে। কুবেরঃ কুশরীরত্বাৎ নাম্না তেনৈব সোঽঙ্কিতঃ॥ ইত্যমর-

টীকায়াং ভরতঃ ॥ তৎপর্য্যায়ঃ। ত্র্যম্বকসখঃ ২ যক্ষরাট ৩ গুহ্যকেশ্বরঃ ৪ মনুষ্যধর্ম্মা ৫ ধনদঃ ৬ রাজরাজঃ ৭ ধনাধিপঃ ৮ কিন্নরেশঃ ৯ বৈশ্রবণঃ ১০ পৌলস্ত্যঃ ১১ নরবাহনঃ ১২ যক্ষঃ ১৩ একপিঙ্গঃ ১৪ ঐলবিলঃ ১৫ শ্রীদঃ ১৬ পুণ্যজনেশ্বরঃ ১৭। ইত্যমরঃ ॥ হর্য্যক্ষঃ ১৮ অলকাধিপঃ ১৯। ইতি জটাধরঃ ॥ * ॥ নন্দীবৃক্ষঃ। ইতি মেদিনী ॥ অর্হদুপাসকবিশেষঃ। ইতি হেমচন্দ্রঃ ॥

কুবেরঃ (ত্রি) মন্দঃ। ইতি ধরণী ॥ কুশরীরঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

কুবেরকঃ (পুং) নন্দীবৃক্ষঃ। ইত্যমরঃ ॥

কুবেরাচলঃ (পুং) কৈলাসপর্ব্বতঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

কুবেরাদ্রিঃ (পুং) কৈলাসপর্ব্বতঃ। ইতি জটাধরঃ ॥

কুবেরাক্ষী (স্ত্রী) পাটলাবৃক্ষঃ। ইত্যমরঃ ॥ লতাকরঞ্জঃ। সিতপাটলিকাবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কুবেলং (ক্লী) কুবলয়ং। ইতি হেমচন্দ্রঃ ॥

কুশ ই কি দ্রুতৌ। ইতি কবিকল্পদ্রুমঃ ॥ পঞ্চমস্বরী। ই কুংশ্যতে। কি কুংশয়তি কুংশতি। ইতি দুর্গাদাসঃ ॥

কুশ য ইর্ শ্লিষি। আলিঙ্গন ইতি যাবৎ। ইতি কবিকল্পদ্রুমঃ ॥ য কুশ্যতি বালা কান্তং। ইর্ অকুশৎ অকোশীৎ। অস্যাৎ পুষাদিত্বান্নিত্যং ঙ ইত্যন্যে। ইতি দুর্গাদাসঃ ॥

কুশং (ক্লী পুং) স্বনামখ্যাততৃণং। তৎপর্য্যায়ঃ। কুথঃ ২ দর্ভঃ ৩ পবিত্রং ৪। ইত্যমরঃ ॥ যাজ্ঞিকঃ ৫ হ্রস্বগর্ভঃ ৬ বর্হিঃ ৭ কুতুপঃ ৮। ইতি শব্দরত্নাবলী ॥ অপি চ। কুশো দর্ভস্তথা বর্হিঃ সূচ্যগ্রো যজ্ঞভূষণঃ। ততোঽন্যো দীর্ঘপত্রঃ স্যাৎ ক্ষুরপত্রস্তথৈব চ ॥ তস্যোৎপত্তির্যথা। বর্হিষ্মতী নাম পুরী সর্ব্বসম্পৎসমন্বিতা। ন্যপতন্ যত্র রোমাণি যজ্ঞস্যাঙ্গং বিধুন্বতঃ ॥ কুশকাশাস্ত এবাসন্ শশ্বদ্ধরিতবর্চ্চসঃ। ঋষয়ো যৈঃ পরাভাব্য যজ্ঞঘ্নান্ যজ্ঞমীজিরে ॥ ইতি শ্রীভাগবতং ॥ অস্য গুণাঃ। দর্ভদ্বয়ং ত্রিদোষঘ্নং মধুরং তুবরং হিমং। মূত্রকৃচ্ছ্রাশ্মরীতৃষ্ণাবস্তিরুক্প্রদরাস্রজিৎ ॥ ইতি ভাবপ্রকাশঃ ॥ * ॥ তস্য ধারণবিধিস্তৎপ্রতিনিধিশ্চ যথা। পূজাকালে সর্ব্বদৈব কুশহস্তো ভবেচ্ছুচিঃ। তর্জ্জন্যা রজতং ধার্য্যং স্বর্ণং ধার্য্যমনামরা ॥ কুশকার্য্যকরং যস্মান্ন তু বন্যাঃ কুশাঃ কুশাঃ। কুশেন রহিতা পূজা বিফলা কথিতা ময়া ॥ নান্যস্য রজতং স্বর্ণং ধার্য্যং হি নিজমঙ্গলে। ইতি বরদাতন্ত্রে ১ পটলঃ ॥ * ॥ সধবায়াস্তৎস্পর্শনিষেধো যথা। ন স্পৃশেত্তিলদর্ভাংশ্চ সধবা তু কথঞ্চন। ইতি হলায়ুধকৃতব্রাহ্মণসর্ব্বস্বং ॥ অন্যৎ দর্ভশব্দে দ্রষ্টব্যং ॥

কুশং (ক্লী) জলং। ইতি মেদিনী ॥

কুশঃ (পুং) রামসুতঃ। যোক্ত্রং। ইতি মেদিনী ॥ দ্বীপভেদঃ। স তু ঘৃতসমুদ্রেণাবৃতঃ। তত্র দেবনির্ম্মিতোঽগ্নিতুল্যঃ কুশস্তম্বোঽস্তি। তদধিপঃ প্রিয়ব্রতরাজপুত্রো

হিরণ্যরেতাঃ তদ্দ্বীপং বিভজ্য সপ্ত-পুত্রেভ্যো দত্তবান্। তেষাং নামানি যথা। বসুঃ ১ বসুদানঃ ২ দৃঢ়রুচিঃ ৩ নাভিগুপ্তঃ ৪ স্তুত্যব্রতঃ ৫ বিপ্রনামা ৬ দেবনামা ৭। এষাং বর্ষেষু সপ্ত সীমাগিরয়ঃ যথা। বভ্রুঃ ১ চতুঃশৃঙ্গঃ ২ কপিলঃ ৩ চিত্রকূটঃ ৪ দেবানীকঃ ৫ ঊর্দ্ধরোমা ৬ দ্রবিণঃ ৭। সপ্ত নদ্যশ্চ যথা। রসকুল্যা ১ মিত্রবিন্দা ২ শ্রুতবৃন্দা ৩ দেবগর্ভা ৪ ঘৃতচ্যুতা ৫ মধুঃ ৬ মালা ৭। তত্র স্থিতাঃ কুশলকোবিদাভিযুক্তকুলকসংজ্ঞাঃ ক্রমেণ ব্রাহ্মণক্ষত্রিয়বৈশ্যশূদ্রাঃ ভগবন্তমগ্নিরূপিণং আসাং নদীনাং পয়োভির্যজন্তে। ইতি শ্রীভাগবতং॥

কৃশঃ (ত্রি) পাপিষ্ঠঃ। মত্তঃ। ইতি মেদিনী॥

কুশণ্ডিকা (স্ত্রী) সর্ব্বহোমার্থাগ্নিসংস্কারকক্রিয়া। তত্র সর্ব্বেষামাহুতিযুক্তকর্ম্মণাং কুশণ্ডিকাসংস্কৃতাগ্নিসাধ্যত্বাৎ সৈব প্রথমমভিধীয়তে। তত্র হস্তপ্রমাণং চতুরস্রং স্থণ্ডিলং শর্করাঙ্গারাস্থিকেশতুষাদিরহিতং পূর্ব্বোত্তরপ্লবং সমং বা ছায়ামণ্ডপসহিতং গোময়েনোপলিপ্য স্নাতঃ শুচিরাচান্তঃ প্রাঙ্মুখঃ কুশসহিতাসনোপবিষ্টঃ কর্ত্তা উত্তরস্যাং দিশ্যভ্যুক্ষণার্থং কুশকুসুমসহিতজলপাত্রং নিধায় দক্ষিণং জানু ভূমৌ পাতয়িত্বা উত্তরাগ্রকুশোপরি সব্যহস্তপ্রাদেশমুত্তানং বহ্নিস্থাপনপর্য্যন্তং ভূমৌ নিধায় দক্ষিণহস্তানামিকাঙ্গুষ্ঠগৃহীতকুশমূলেন স্থণ্ডিলদক্ষিণপ্রান্তে দ্বাদশাঙ্গুলপ্রমাণাং প্রাঙ্মুখীং রেখামুল্লিখ্য রেখেয়ং পৃথ্বীদেবতাকা পীতবর্ণা ইতি ধ্যায়েৎ তন্মূলতঃ প্রভৃত্যেকবিংশত্যঙ্গুলপ্রমাণাং উত্তরাভিমুখীং রেখামুল্লিখ্য রেখেয়ং অগ্নিদেবতাকা লোহিতবর্ণা ইতি ধ্যায়েৎ। ততঃ প্রথমরেখায়াঃ উত্তরতঃ সপ্তাঙ্গুলান্তরিতাং প্রাদেশপ্রমাণাং পূর্ব্বাভিমুখীং রেখামুল্লিখ্য রেখেয়ং প্রজাপতিদেবতাকা কৃষ্ণবর্ণা ইতি ধ্যায়েৎ। ততঃ সপ্তাঙ্গুলান্তরিতাং প্রাদেশপ্রমাণাং পূর্ব্বাভিমুখীং রেখামুল্লিখ্য রেখেয়ং ইন্দ্রদেবতাকা নীলবর্ণা ইতি ধ্যায়েৎ। ততোঽপি সপ্তাঙ্গুলান্তরিতাং প্রাদেশপ্রমাণাং পূর্ব্বাভিমুখীং রেখামুল্লিখ্য রেখেয়ং সোমদেবতাকা শুক্লবর্ণা ইতি ধ্যায়েৎ। ততঃ ক্রমেণ দক্ষিণহস্তাঙ্গুষ্ঠানামিকাভ্যাং রেখাসূৎকরং গৃহীত্বা প্রজাপতির্ঋষিস্ত্রিষ্টুপ্‌ছন্দোঽগ্নির্দ্দেবতা রেখাসূৎকরনিরসনে বিনিয়োগঃ। ওম্ নিরস্তঃ পরাবসুরিত্যৈশান্যাং দিশি অরত্নিমাত্রান্তরিতে দেশে প্রক্ষিপেৎ। ততঃ পূর্ব্বস্থাপিতজলেন রেখাভ্যুক্ষণং কৃত্বা দক্ষিণদিক্‌স্থকাংস্যপাত্রস্থাগ্নের্নবশরাবস্থাগ্নের্ব্বা জ্বলদিন্ধনং গৃহীত্বা প্রজাপতির্ঋষিস্ত্রিষ্টুপ্‌ছন্দঃ অগ্নির্দ্দেবতাগ্নিসংস্কারে বিনিয়োগঃ। ওম্ ক্রব্যাদমগ্নিং প্রহিণোমি দূরং যমরাজ্যং গচ্ছতু রিপ্রবাহঃ। অনেন দক্ষিণপশ্চিমকোণে প্রক্ষিপেৎ। ততোঽপরমগ্নিং গৃহীত্বা প্রজাপতির্ঋষির্বৃহতীচ্ছন্দঃ প্রজাপতির্দ্দেবতা অগ্নিস্থাপনে বিনিয়োগঃ। ওম্ ভূর্ভুবঃ স্বরোম্। ইত্যনেনাগ্নিমাত্মাভিমুখং তৃতীয়রেখোপরি

স্থাপয়েৎ। ততো বামহস্তমুত্তোল্যাঙ্গুলিং বদ্ধা পঠেৎ। প্রজাপতির্ঋষিস্ত্রিষ্টুপ্‌ছন্দো-ঽগ্নির্দ্দেবতাগ্নিস্থাপনে বিনিয়োগঃ। ওম্ ইহৈবায়মিতরো জাতবেদা দেবেভ্যো হব্যং বহতু প্রজানন্। ততোঽগ্নে ত্বং বিশ্বরূপনামাসি ইতি নাম কৃত্বা ধ্যাত্বা-বাহ্য বিশ্বরূপনাম্নে অগ্নয়ে নমঃ ইতি পাদ্যা-দিনাভ্যর্চ্চ্য। ওম্ সর্ব্বতঃ পাণিপাদান্তঃ সর্ব্বতোঽক্ষিশিরোমুখঃ। বিশ্বরূপো মহা-নগ্নিঃ প্রণীতঃ সর্ব্বকর্ম্মসু ইতি পঠেৎ॥ ততঃ প্রাদেশপ্রমাণাং ঘৃতাক্তাং সমিধং তূষ্ণীমগ্নৌ হুত্বা ব্রহ্মস্থাপনং কুর্য্যাৎ। সমাগ্রপঞ্চাশৎকুশপত্ররচিতং দ্বির্দক্ষিণা-বর্ত্তমূর্দ্ধমুখং দর্ব্ভবটুং অধীতবেদং ব্রাহ্মণ-ম্বা ছত্রমুত্তরাসঙ্গং বা কমণ্ডলুং বা ব্রহ্ম-ত্বেন পরিকল্প্য ধারাসহিতমুদকপাত্রং গৃহীত্বা অগ্নেরুত্তরতঃ প্রভৃতিদক্ষিণাবর্ত্তেন দক্ষিণদেশং গত্বা অরত্নিমাত্রান্তরিতে দেশে পূর্ব্বাভিমুখীং বারিধারাং দত্ত্বা তদুপরি প্রাগগ্রান্ কুশানাস্তীর্য্য পশ্চিমাভিমুখো-ঽনুপবিষ্টস্তিষ্ঠেৎ। বামহস্তানামিকাঙ্গুষ্ঠা-ভ্যামাস্তীর্ণকুশপত্রমেকং গৃহীত্বা প্রজাপতি-র্ঋষিরনুষ্টুপ্‌ছন্দোঽগ্নির্দ্দেবতা তৃণনিরসনে বিনিয়োগঃ। ওম্ নিরস্তঃ পরাবসুরিত্যনেন দক্ষিণপশ্চিমকোণে প্রক্ষিপেৎ। ততোঽপ উপস্পৃশ্য দক্ষিণপাদেন সব্যপাদমবষ্টভ্য উত্তরাভিমুখীভূয় আস্তীর্ণকুশানস্থিরভ্যুক্ষ্য প্রজাপতির্ঋষিরনুষ্টুপ্‌ছন্দঃ অগ্নির্দ্দেবতা ব্রহ্মোপবেশনে বিনিয়োগঃ। ওম্ আবসোঃ সদনে সীদ ইতি। ব্রাহ্মণব্রহ্মপক্ষে তু

ব্রাহ্মণ এব সীদামীতি ব্রূয়াৎ। অনেন কুশোপরি পূর্ব্বাগ্রং কুশব্রাহ্মণং ব্রাহ্মণ-ব্রহ্মপক্ষে তু উত্তরাভিমুখং স্থাপয়িত্বা তদুপরি কুশান্ দত্ত্বা অস্তিরভ্যুক্ষ্য কুশ-কুসুমৈরর্চ্চয়েৎ। ততস্তেনৈব পথা প্রত্যা-বৃত্যাসনে পূর্ব্বাভিমুখ উপবিষ্টো ভূমি-জপাদিকং কুর্য্যাৎ। যদি তু ব্রহ্মত্বে-নারোপিতো ব্রাহ্মণঃ অযজ্ঞীয়বাচং বদে-ত্তদা ইমং মন্ত্রং জপেৎ। প্রজাপতির্ঋষি-র্গায়ত্রীচ্ছন্দো বিষ্ণুর্দ্দেবতা অযজ্ঞীয়-বাগ্বচননিমিত্তজপে বিনিয়োগঃ। ওম্ ইদং বিষ্ণুর্বিচক্রমে ত্রেধা নিদধে পদং সমূঢ়-মস্য পাংশুলে। ইতি জপেৎ। কুশাদি-ব্রহ্মপক্ষে তু কর্ম্মকর্ত্তুরেব কৃতাকৃতা-বেক্ষণাদিব্রহ্মকার্য্যকর্তৃত্বাদযজ্ঞীয়বাগ্বচন-নিমিত্তং স এব জপেৎ। যদি প্রকৃতে কর্ম্মণি চরুহোমোঽস্তি তদা অস্মিন্নেব সময়ে চরুং শ্রপয়িত্বা তদুপরি ঘৃতং দত্ত্বা অগ্নেরুত্তরতঃ কুশোপরি সংস্থাপ্য ভূমি-জপাদিকং কুর্য্যাৎ। দক্ষিণজানু ভূমৌ পাতয়িত্বা দক্ষিণহস্তোপরিভাবেন অধো-মুখৌ হস্তৌ ভূমৌ নিধায়। পরমেষ্ঠী ঋষি-রনুষ্টুপ্‌ছন্দোঽগ্নির্দ্দেবতা ভূমিজপে বিনি-য়োগঃ। ওম্ ইদং ভূমের্ভজামহ ইদং ভদ্রং সুমঙ্গলং। পরাসপত্নান্ বাধ-স্বান্যেষাং বিন্দতে ধনং। ইতি জপ্ত্বা রাত্রৌ চেৎ কর্ম্ম তদা ধনমিতিস্থানে বস্বিতি প্রযোক্তব্যং। ততো দক্ষিণহস্তেন কুশান্ গৃহীত্বা অগ্নেরুত্তরতঃ প্রভৃতি দক্ষিণাবর্ত্তেন তৃণাদিকমনেন মন্ত্রেণ

পরিশোধয়েৎ। ত্রয়াণাং মন্ত্রাণামৃষ্যাদয়ঃ সাধারণাঃ। কৌৎসঋষির্জগতীচ্ছন্দোঽগ্নির্দ্দেবতা পৃষ্ঠস্য ষড়হস্য ষষ্ঠেঽহন্যগ্নিমারুতে শস্তে পরিসমূহনে বিনিয়োগঃ। ওম্ ইমং স্তোমমর্হতে জাতবেদসে রথমিব সম্মহে মা মনীষয়া ভদ্রা হি নঃ প্রমতিরস্য সংসদ্যগ্নে সখ্যে মা রিষামা বয়ন্তব। ওম্ ভরামেধ্মং কৃণবামা হবীংষি তে চিতয়ন্তঃ পর্ব্বণা পর্ব্বণা বয়ং। জীবাতবে প্রতরাং সাধয়া ধিয়োঽগ্নে সখ্যে মা রিষামা বয়ন্তব। ওম্ শকে মত্বা সমিধং সাধয়া ধিয়স্তে দেবা হবিরদস্ত্যাহুতং ত্বমাদিত্যানাবহতাং হ্যুশ্মস্যগ্নে সখ্যে মা রিষামা বয়ন্তব। ততস্তান্ কুশান্ ঐশান্যাং দিশি প্রক্ষিপেৎ। ততোঽগ্নেঃ পূর্ব্বতঃ উত্তরান্তাদ্দক্ষিণান্তং যাবৎ উপমূলমূলান্ একপত্রীকৃতান্ কুশান্ অগ্রেণ মূলমাচ্ছাদয়ন্ বারত্রয়মাস্তরেৎ। এবং দক্ষিণস্যাং পূর্ব্বান্তাৎ পশ্চিমান্তং যাবৎ। প্রতীচ্যাঞ্চ দক্ষিণাদুত্তরান্তং যাবৎ। এবমুত্তরস্যাং পশ্চিমান্তাৎ পূর্ব্বান্তং যাবৎ ক্রমেণাস্তরেৎ। ততো ঘৃতাক্তস্বস্তিকান্ দশদিক্ষু পূর্ব্বাদিক্রমেণ দদ্যাৎ। ওম্ ইন্দ্রায় লোকপালায় স্বাহা। এবং অগ্নয়ে ইত্যাদি। ততঃ প্রাদেশদ্বয়প্রমাণাং ধবখদিরপলাশোডুম্বরাণামন্যতমস্য বিংশতিকাষ্ঠিকাং মধ্যে ঘৃতস্রুবং দত্ত্বা প্রজাপতিং মনসা ধ্যাত্বা তূষ্ণীমগ্নৌ জুহুয়াৎ। ততঃ স্তরণকুশাদেব সমাগ্রকুশপত্রদ্বয়ং গৃহীত্বা প্রজাপতির্ঋষিঃ পবিত্রে দেবতে



পবিত্রচ্ছেদনে বিনিয়োগঃ। ওম্ পবিত্রে স্থো বৈষ্ণব্যৌ ইতি মন্ত্রেণ প্রাদেশপ্রমাণং কৃত্বা কুশান্তরেণ বেষ্টয়িত্বা নখব্যতিরেকেণ ছিত্বা প্রজাপতির্ঋষিঃ পবিত্রে দেবতে পবিত্রমার্জ্জনে বিনিয়োগঃ। ওম্ বিষ্ণোর্ম্মনসা পূতে স্থঃ ইত্যনেনাভ্যুক্ষ্য তাম্রাদিপাত্রে পবিত্রমুত্তরাগ্রং নিধায় তত্র হোমার্থং ঘৃতং নিঃক্ষিপেৎ। ততস্তৎকুশপত্রদ্বয়মগ্রে দক্ষিণহস্তানামিকাঙ্গুষ্ঠাভ্যাং মূলে চ বামহস্তানামিকাঙ্গুষ্ঠাভ্যাং গৃহীত্বা দক্ষিণহস্তোপরিভাবেনাধোমুখব্যস্তপাণিঃ প্রজাপতির্ঋষিরাজ্যং দেবতা আজ্যোৎপবনে বিনিয়োগঃ। ওম্ দেবস্ত্বা সবিতোৎপুনাত্বছিদ্রেণ পবিত্রেণ বসোঃ সূর্য্যস্য রশ্মিভিঃ স্বাহা। ইত্যনেন কুশপত্রদ্বয়মধ্যেন ঘৃতমগ্নৌ সকৃজ্জুহুয়াৎ। তূষ্ণীং বারদ্বয়ং। ততস্তৎকুশপত্রদ্বয়মদ্ভিরভ্যুক্ষ্যাগ্নৌ নিঃক্ষিপেৎ। ততস্তস্যাজ্যপাত্রস্যোদকেনানুমার্জ্জনমগ্নেরুপরি নিধানং উত্তরস্যাং দিশ্যবতারণং ইত্থমেব বারত্রয়ং সংস্কুর্য্যাৎ ইত্যাজ্যসংস্কারঃ। ততো ধবখদিরপলাশোডুম্বরাণামন্যতমস্য অরত্নিমাত্রং ভ্রমিতাঙ্গুষ্ঠপর্ব্ববিলং নাসারন্ধ্রবন্মধ্যস্থিতমর্য্যাদং স্রুবং ইত্থমেব বারত্রয়ং সংস্কুর্য্যাদিতি স্রুবসংস্কারঃ। এবং স্রুগ্মেক্ষণাদিকং সংস্কুর্য্যাৎ। ততো দক্ষিণং জানু ভূমৌ পাতয়িত্বা উদকাঞ্জলিং গৃহীত্বা প্রজাপতির্ঋষিরদিতির্দ্দেবতা উদকাঞ্জলিসেকে বিনিয়োগঃ। ওম্ অদিতে অনুমন্যস্ব

ইত্যনেনাগ্নের্দ্দক্ষিণতঃ পশ্চিমান্তাৎ পূর্ব্বান্তং যাবদুদকাঞ্জলিনা সিঞ্চেৎ। ততঃ প্রজাপতির্ঋষিরনুমতির্দ্দেবতা উদকাঞ্জলিসেকে বিনিয়োগঃ। ওমনুমতে অনুমন্যস্ব ইত্যনেনাগ্নেঃ পশ্চিমতো দক্ষিণান্তাদুত্তরান্তং যাবদুদকাঞ্জলিনা সিঞ্চেৎ। ততঃ প্রজাপতির্ঋষিঃ সরস্বতী দেবতা উদকাঞ্জলিসেকে বিনিয়োগঃ। ওম্ সরস্বত্যনুমন্যস্ব ইত্যনেনাগ্নেরুত্তরতঃ পশ্চিমান্তাৎ পূর্ব্বান্তং যাবদুদকাঞ্জলিনা সিঞ্চেৎ। ততঃ প্রজাপতির্ঋষিঃ সবিতা দেবতা অগ্নিপর্য্যুক্ষণে বিনিয়োগঃ। ওম্ দেব সবিতঃ প্রসুবযজ্ঞং প্রসুবযজ্ঞপতিং ভগায় দিব্যো গন্ধর্ব্বঃ কেতপূঃ কেতন্নঃ পুনাতু বাচস্পতির্বাচন্নঃ স্বদতু ইত্যনেনোদকাঞ্জলিনা দক্ষিণাবর্ত্তেনাগ্নিং বেষ্টয়েৎ। ততো দক্ষিণং জানূত্থাপ্য উপর্য্যধঃস্থিতদক্ষিণবামমুষ্টিভ্যাং ফলপুষ্পকুশান্ গৃহীত্বা বিরূপাক্ষজপং কুর্য্যাৎ। পরমেষ্ঠী ঋষী রুদ্ররূপোঽগ্নির্দ্দেবতা বিরূপাক্ষজপে বিনিয়োগঃ। ওম্ ভূর্ভুর্বঃ স্বরোম্ মহান্তমাত্মানং প্রপদ্যে বিরূপাক্ষোঽসি দন্তাঞ্জিস্তস্য তে শয্যা পর্ণে গৃহান্তরীক্ষে বিমিতং হিরণ্ময়ং তদ্দেবানাং হৃদয়ান্যয়স্ময়ে কুম্ভেঽন্তঃ সন্নিহিতানি তানি বলভৃচ্চ বলসাচ্চ রক্ষতোঽপ্রমণী অনিমিষতত্ সত্যং যত্তে দ্বাদশপুত্রাস্তে ত্বা সংবৎসরে সংবৎসরে কামপ্রেণ যজ্ঞেন যাজয়িত্বা পুনর্ব্রহ্মচর্য্যমুপযন্তি ত্বং দেবেষু ব্রাহ্মণোঽস্ম্যহং মনুষ্যেষু ব্রাহ্মণো বৈ ব্রাহ্মণমুপধাবত্যুপধাবামি জপন্তং মা মা প্রতিজাপীর্জ্জুহ্বন্তং মা মা প্রতিহৌষীঃ কুর্ব্বন্তং মা মা প্রতিকার্ষীস্ত্বাং প্রপদ্যে ত্বয়া প্রসূত ইদং কর্ম্ম করিষ্যামি তন্মে রাধ্যতাং তন্মে সমৃদ্ধ্যতাং তন্ম উপপদ্যতাং সমুদ্রো মা বিশ্বব্যচা ব্রহ্মানুজানাতু তুথো মা বিশ্ববেদা ব্রহ্মণঃ পুত্রোঽনুজানাতু শ্বাত্রো মা প্রচেতা মৈত্রাবরুণোঽনুজানাতু তস্মৈ বিরূপাক্ষায় দন্তাঞ্জয়ে সমুদ্রায় বিশ্বব্যচসে তুথায় বিশ্ববেদসে শ্বাত্রায় প্রচেতসে সহস্রাক্ষায় ব্রহ্মণঃ পুত্রায় নমঃ। ইতি জপিত্বা গৃহীতকুশান্ প্রাগুদীচ্যাং দিশি ক্ষিপেৎ। ফলপুষ্পে ব্রহ্মণে নিবেদয়েৎ ॥ * ॥ অথ কাম্যকর্ম্মার্থং কুশণ্ডিকা তদা প্রাণান্ সংযম্য প্রথমং পুটাঞ্জলিঃ। ওম্ তপশ্চ তেজশ্চ শ্রদ্ধা চ হ্রীশ্চ সত্যঞ্চাক্রোধশ্চ ত্যাগশ্চ ধৃতিশ্চ ধর্ম্মশ্চ সত্ত্বঞ্চ বাক্ চ মনশ্চাত্মা চ ব্রহ্ম চ তানি প্রপদ্যে তানি মামবন্তু। ইতি জপিত্বা পশ্চাৎ বিরূপাক্ষজপং কুর্য্যাৎ। ইতি সামবেদিনাং সর্ব্বসাধারণী কুশণ্ডিকা সমাপ্তা। ইতি ভবদেবভট্টঃ ॥ * ॥ অন্যৎ রঘুনন্দনভট্টাচার্য্যকৃতসংস্কারতত্ত্বে দ্রষ্টব্যং ॥ যজুর্ব্বেদিনাং কুশণ্ডিকা পশুপতিকৃতদশকর্ম্মপদ্ধতৌ ঋগ্বেদিনাং কুশণ্ডিকা কালেশিকৃতদশকর্ম্মপদ্ধতৌ চ দ্রষ্টব্যা ॥ * ॥ * ॥ অথ কুশণ্ডিকানন্তরং প্রকৃতং কর্ম্ম কর্ত্তব্যং। তত্র প্রথমং প্রাদেশপ্রমাণাং ঘৃতাক্তাং সমিধং তূষ্ণীমগ্নৌ হুত্বা মহাব্যাহৃতিহোমং

কুর্য্যাৎ। প্রজাপতিঋ র্ষির্গায়ত্রীচ্ছন্দো-ঽগ্নির্দেবতা মহাব্যাহৃতিহোমে বিনিয়োগঃ। ওঁ ভূঃ স্বাহা। প্রজাপতিঋ র্ষিরুষ্ণিক্‌ছন্দো বায়ুর্দেবতা মহাব্যাহৃতিহোমে বিনিয়োগঃ। ওঁ ভুবঃ স্বাহা। প্রজাপতিঋ র্ষিরনুষ্টুপ্‌-ছন্দঃ সূর্য্যো দেবতা মহাব্যাহৃতিহোমে বিনিয়োগঃ। ওঁ স্বঃ স্বাহা। ইতি স্রুবেণাজ্যাহুতিত্রয়ন্দদ্যাৎ। যদি প্রকৃতে কর্ম্মণি চরুহোমোঽস্তি তদা আজ্যতন্ত্রোপ-ক্রমবিহিতত্বাৎ মহাব্যাহৃতিহোমস্য প্রথমং মহাব্যাহৃতিহোমো ন কর্ত্তব্যোঽন্তে তু কর্ত্তব্য এব বিহিতত্বাৎ। ততঃ প্রকৃতং কর্ম্ম সমাপ্য পুনর্মহাব্যাহৃতিহোমং কৃত্বা প্রাদেশপ্রমাণাং সমিধং তূষ্ণীমগ্নৌ হুত্বা শাট্যায়নহোমাদিবামদেব্যগানান্তং উদীচ্যং সাধারণং কর্ম্ম করণীয়ং। তদভিধীয়তে। তত্র প্রথমং ওঁ অদ্যেত্যাদি অত্রামুক-কর্ম্মণি যৎকিঞ্চিদ্বৈগুণ্যং জাতং তদ্দোষ-প্রশমনায় শাট্যায়নহোমমহং কুর্ব্বীয় ইতি সঙ্কল্পং কৃত্বা অগ্নে ত্বং বিধুনামাসি ইতি নাম কৃত্বা সংপূজ্য পুনর্ঘৃতাক্তাং প্রাদেশপ্রমাণাং সমিধং তূষ্ণীমগ্নৌ হুত্বা মহাব্যাহৃতিহোমঞ্চ পূর্ব্ববৎ কৃত্বা প্রায়-শ্চিত্তহোমং কুর্য্যাৎ। প্রজাপতিঋ র্ষিরগ্নি-র্দ্দেবতা প্রায়শ্চিত্তহোমে বিনিয়োগঃ। ওঁ পাহি নোঽগ্ন এনসে স্বাহা। প্রজাপতি-ঋ র্ষির্বিশ্বেদেবা দেবতাঃ প্রায়শ্চিত্তহোমে বিনিয়োগঃ। ওঁ পাহি নো বিশ্ববেদসে স্বাহা। প্রজাপতিঋ র্ষির্বিভাবসুর্দেবতা প্রায়শ্চিত্তহোমে বিনিয়োগঃ। ওঁ যজ্ঞং পাহি বিভাবসো স্বাহা। প্রজাপতিঋ র্ষিঃ শতক্রতুর্দেবতা প্রায়শ্চিত্তহোমে বিনি-য়োগঃ। ওঁ সব্যং পাহি শতক্রতো স্বাহা। প্রজাপতিঋ র্ষিরনুষ্টুপ্‌ছন্দঃ অগ্নির্দেবতা প্রায়শ্চিত্তহোমে বিনিয়োগঃ। ওঁ পাহি নো অগ্ন একয়া পাহ্যুত দ্বিতীয়য়া পাহি গীর্ভিস্তিসৃভিরূর্জাংপতে পাহি চতসৃভি-র্বসো স্বাহা। প্রজাপতিঋ র্ষির্গায়ত্রীচ্ছন্দো-ঽগ্নির্দেবতা প্রায়শ্চিত্তহোমে বিনিয়োগঃ। ওঁ পুনরূর্জ্জা নিবর্ত্তস্ব পুনরগ্ন ইষায়ুষা পুনর্নঃ পাহ্যংহসঃ স্বাহা। প্রজাপতিঋ র্ষি-র্গায়ত্রীচ্ছন্দোঽগ্নির্দেবতা প্রায়শ্চিত্তহোমে বিনিয়োগঃ। ওঁ সহর্জ্জা নিবর্ত্তস্বাগ্নে পিনুস্ব ধারয়া বিশ্বপ্স্ন্যা বিশ্বতঃ পরি স্বাহা। প্রজাপতিঋ র্ষিরনুষ্টুপ্‌ছন্দোঽগ্নি-র্দেবতা প্রায়শ্চিত্তহোমে বিনিয়োগঃ। ওঁ অজ্ঞাতং যদনাজ্ঞাতং যজ্ঞস্য ক্রিয়তে মিথঃ অগ্নে তদস্য কল্পয় ত্বং হি বেত্থ যথা-যথং স্বাহা। প্রজাপতিঋ র্ষিঃ পংক্তিচ্ছন্দঃ প্রজাপতির্দেবতা প্রায়শ্চিত্তহোমে বিনি-য়োগঃ। ওঁ প্রজাপতে ন ত্বদেতান্যন্যো বিশ্বা জাতানি পরিতা বভূব। যৎকামাস্তে জুহুমস্তন্নোঽস্তু বয়ং স্যামঃ পতয়ো রয়ীণাং স্বাহা। ততঃ পূর্ব্ববদেব মহাব্যাহৃতিহোমঃ সমিৎপ্রক্ষেপশ্চ। প্রজাপতিঋ র্ষির্গায়ত্রী-চ্ছন্দোঽগ্নির্দেবতা মহাব্যাহৃতিহোমে বিনি-য়োগঃ। ওঁ ভূঃ স্বাহা। প্রজাপতিঋ র্ষি-রুষ্ণিক্‌ছন্দো বায়ুর্দেবতা মহাব্যাহৃতি-হোমে বিনিয়োগঃ। ওঁ ভুবঃ স্বাহা। প্রজাপতিঋ র্ষিরনুষ্টুপ্‌ছন্দঃ সূর্য্যো দেবতা

মহাব্যাহৃতিহোমে বিনিয়োগঃ। ওঁ স্বঃ স্বাহা ॥*॥ ততো নবগ্রহহোমঃ। ওঁ আকৃষ্ণেন রজসা বর্ত্তমানো নিবেশয়ন্নমৃতং মর্ত্ত্যঞ্চ হিরণ্যয়েন সবিতা রথেনা দেবো যাতি ভুবনানি পশ্যন্ স্বাহা। ওঁ আপ্যায়স্ব সমেতু তে বিশ্বতঃ সোমবৃষ্ণ্যং ভবা বাজস্য সঙ্গথে স্বাহা। ওঁ অগ্নির্মূর্দ্ধা দিবঃ ককুৎপতিঃ পৃথিব্যা অয়ং অপাং রেতাংসি জিন্বতি স্বাহা। ওঁ অগ্নে বিবস্বদুষসশ্চিত্রং রাধোঽমর্ত্ত্য আদাশুষে জাতবেদো বহা ত্বমদ্যা দেবা উষর্বুধঃ স্বাহা। ওঁ বৃহস্পতে পরিদীয়া রথেন রক্ষোহামিত্রাং অপবাধমানঃ প্রভঞ্জৎসেনাঃ প্রমৃণো যুধা যজন্নস্মাকমেধ্যবিতা রথানাং স্বাহা। ওঁ শুক্রন্তেঽন্যদ্যজতন্তেঽন্যদ্বিষুরূপেঽহনী দ্যৌরিবাসি। বিশ্বা হি মায়া অবসি স্বধাবন্ ভদ্রা তে পূষন্নিহ রাতিরস্তু স্বাহা। ওঁ শন্নো দেবী রভিষ্টয়ে শন্নো ভবন্তু পীতয়ে। শংযো রভিস্রবন্তু নঃ স্বাহা। ওঁ কয়া নশ্চিত্র আভুবদূতী সদা বৃধঃ সখা কয়া শচীষ্টয়াবৃতা স্বাহা। ওঁ কেতুং কৃণ্বন্নকেতবে পেশো মর্য্যা অপেশসে স মুশদ্ভিরজায়থাঃ স্বাহা ॥*॥ ততঃ ইন্দ্রাদ্যষ্টলোকপালহোমং প্রত্যক্ষদেবতাহোমঞ্চ কৃত্বা ঘৃতাক্তাং প্রাদেশপ্রমাণাং সমিধং তূষ্ণীমগ্নৌ হুত্বা উদকাঞ্জলিসেকং কুর্য্যাৎ। প্রজাপতিঋর্ষিঃ সবিতা দেবতাগ্নিপর্য্যুক্ষণে বিনিয়োগঃ। ওঁ দেব সবিতঃ প্রসুবযজ্ঞং প্রসুবযজ্ঞপতিং ভগায় দিব্যো গন্ধর্ব্বঃ কেতপূঃ কেতন্নঃ পুনাতু বাচস্পতির্ব্বাচন্নঃ স্বদতু। অনেনোদকাঞ্জলিনা দক্ষিণাবর্ত্তেনাগ্নিং বেষ্টয়েৎ। প্রজাপতিঋর্ষিরদিতির্দেবতা উদকাঞ্জলিসেকে বিনিয়োগঃ। ওঁ অদিতেঽনুমন্যস্ব অনেনাগ্নেদক্ষিণতঃ পশ্চিমান্তাৎ পূর্ব্বান্তং যাবদুদকাঞ্জলিনা সিঞ্চেৎ। প্রজাপতিঋর্ষিরনুমতির্দেবতা উদকাঞ্জলিসেকে বিনিয়োগঃ। ওঁ অনুমতেঽনুমন্যস্ব অনেনাগ্নেঃ পশ্চিমতো দক্ষিণান্তাদুত্তরান্তং যাবদুদকাঞ্জলিনা সিঞ্চেৎ। প্রজাপতিঋর্ষিঃ সরস্বতী দেবতা উদকাঞ্জলিসেকে বিনিয়োগঃ। ওঁ সরস্বত্যনুমন্যস্ব। অনেনাগ্নেরুত্তরতঃ পশ্চিমান্তাৎ পূর্ব্বান্তং যাবদুদকাঞ্জলিনা সিঞ্চেৎ। তত উত্তানহস্তদ্বয়েন কতিপয়াস্তরণকুশান্ গৃহীত্বা প্রজাপতিঋর্ষির্ব্বয়ো দেবতা দর্ভতৃণাভ্যঞ্জনে বিনিয়োগঃ। ওঁ অক্তং রিহাণা ব্যন্তু বয়ঃ। অনেনাগ্রমধ্যমূলানি ঘৃতেনাভ্যনক্তি বারত্রয়ং মন্ত্রশ্চ বারত্রয়মেব পঠনীয়ঃ। ততস্তান্ কুশানগ্নিরভ্যুক্ষ্য প্রজাপতিঋর্ষিরনুষ্টুপ্ছন্দো রুদ্ররূপোঽগ্নির্দেবতা দর্ভজুটিকাহোমে বিনিয়োগঃ। ওঁ যঃ পশূনামধিপতী রুদ্রস্তন্তিচরো বৃষা। পশূনস্মাকং মা হিংসীরেতদস্তু হুতন্তব স্বাহা। অনেনাগ্নৌ ক্ষিপেৎ। তত অগ্নে ত্বং মৃড়নামাসীতি নাম কৃত্বা গন্ধমাল্যবস্ত্রতাম্বূলৈরগ্নিমভ্যর্চ্চ্য প্রজাপতিঋর্ষির্ব্বিরাট্ছন্দ ইন্দ্রো দেবতা যশস্কামস্য যজনীয়প্রয়োগে বিনিয়োগঃ। ওঁ পূর্ণহোমং যশসে জুহোমি যোঽস্মৈ জুহোতি বরমস্মৈ দদাতি বরং বৃণে যশসা

ভামি লোকে স্বাহা। অনেন পূর্ণাহুতিং দদ্যাৎ। ততো ব্রহ্মণে পূর্ণপাত্রাদি দক্ষিণাং দত্ত্বা হোমদক্ষিণাং কুর্য্যাৎ। ততঃ প্রদক্ষিণেন দক্ষিণং দেশং গত্বা ব্রহ্মগ্রন্থিং মুক্ত্বা প্রত্যাবৃত্যাসনে পুনরুপবিশ্য কুশকুসুমসহিতজলপাত্রে হস্তং নিধায় মহাবামদেব্য ঋষির্ব্বিরাড়্গায়ত্রীচ্ছন্দ ইন্দ্রো দেবতা শান্তিকর্ম্মণি জপে বিনিয়োগঃ। ওঁ কয়া ন শ্চিত্র আভুবদূতী সদা বৃধঃ সখা কয়া সচীষ্টয়াবৃতা। ওঁ কস্ত্বা সত্যো মদানাং মংহিষ্ঠো মৎসদন্ধসঃ দৃঢ়াচিদারুজে বসু। ওঁ অভীষুণঃ সখীনামবিতা জরিতৄণাং শতন্তবাস্যূতয়ে। ওঁ স্বস্তি ন ইন্দ্রো বৃদ্ধশ্রবাঃ স্বস্তি নঃ পূষা বিশ্ববেদাঃ স্বস্তি নস্তার্ক্ষ্যোঽরিষ্টনেমিঃ স্বস্তি নো বৃহস্পতির্দধাতু। এতা ঋচো গীত্বা শান্তিং কুর্য্যাৎ। গানাশক্তৌ এতা এব ঋচস্ত্রিরাবৃত্ত্যা পঠেদিতি। ততো দক্ষিণাং দত্ত্বা অচ্ছিদ্রাবধারণং কুর্য্যাৎ। ইতি সর্ব্বকর্ম্মসাধারণমুদীচ্যং কর্ম্ম সমাপ্তং ॥

কুশপঃ (পুং) পানপাত্রং। ইত্যুণাদিকোষঃ ॥

কুশপুষ্পং (ক্লী) গ্রন্থিপর্ণং। গাঁঠিয়ালা ইতি ভাষা। ইতি রত্নমালা ॥

কুশলং (ক্লী) কল্যাণং। পর্য্যাপ্তিঃ। পুণ্যং। শিক্ষিতে ত্রি। ইত্যমরঃ ॥

কুশলবৌ (পুং) একযোক্ত্যা রামপুত্রৌ। ইতি হেমচন্দ্রঃ ॥ তয়োর্নামকারণং যথা। যস্তয়োঃ প্রথমং জাতঃ স কুশৈর্ম্মন্ত্রসংস্কৃতৈঃ। নির্ম্মার্জ্জনীয়ো নাম্না হি ভবিতা কুশ ইত্যসৌ ॥ যশ্চাবরজ এবাসীল্লবণেন সমাহিতঃ। নির্ম্মার্জ্জনীয়ো বৃদ্ধাভির্নাম্না স ভবিতা লবঃ ॥ এবং কুশলবৌ নাম্না যমৌ তৌ সম্বভূবতুঃ। ভগবৎকৃতনামানৌ সুখিনাবক্ষয়ৌ চ তৌ ॥ ইতি রামায়ণং ॥

কুশলপ্রশ্নঃ (পুং) কুশলজিজ্ঞাসা। তৎপর্য্যায়ঃ। কৌশলী ২। ইতি ত্রিকাণ্ডশেষঃ ॥

কুশলী (স্ত্রী) অশ্মন্তকবৃক্ষঃ। ক্ষুদ্রাম্লিকা। ইতি বৈদ্যকং ॥

কুশস্থলং (ক্লী) কান্যকুব্জদেশঃ। ইতি হেমচন্দ্রঃ ॥

কুশস্থলী (স্ত্রী) দ্বারিকা। ইতি জটাধরঃ ॥

কুশা (স্ত্রী) রজ্জুঃ। ইতি মেদিনী। মধুকর্কটিকা। ইতি শব্দচন্দ্রিকা ॥ বল্গা। ইতি হেমচন্দ্রঃ ॥

কুশাকরঃ (পুং) অগ্নিঃ। ইতি শব্দমালা ॥

কুশাগ্রীয়মতিঃ (ত্রি) তীক্ষ্ণবুদ্ধিঃ। তৎপর্য্যায়ঃ। সূক্ষ্মদর্শী ২ তৎকালধীঃ ৩ প্রত্যুৎপন্নমতিঃ ৪। ইতি হেমচন্দ্রঃ ॥ সূক্ষ্মায়াং বুদ্ধৌ স্ত্রী ॥

কুশারণিঃ (পুং) দুর্ব্বাসাঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

কুশাল্মলিঃ (পুং) রোহিতকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কুশাক্ষঃ (পুং) বানরঃ। ইতি শব্দমালা ॥

কুশিংশপা (স্ত্রী) কপিলশিংশপা। ইতি রাজনির্ঘণ্টঃ ॥

কুশিকঃ (পুং) মুনিভেদঃ। স তু জমদগ্নিপিতা। ফালঃ। সর্জবৃক্ষঃ। বিভীতকবৃক্ষঃ। ইতি হেমচন্দ্রঃ ॥ অশ্বকর্ণবৃক্ষঃ।

ইতি রাজনির্ঘণ্টঃ ॥ তৈলশেষঃ । ইতি বিশ্বঃ ॥ কেকরে ত্রি । ইতি শব্দমালা ॥

কুশিতং ( ত্রি ) জলমিশ্রিতং । ইত্যুণাদি-কোষঃ ॥

কুশী ( স্ত্রী ) ফালঃ । ইতি মেদিনী ॥

কুশী [ন্] ( পুং ) বাল্মীকিমুনিঃ । ইতি হেমচন্দ্রঃ ॥

কুশীদং ( ক্লী ) বৃদ্ধিজীবিকা । ইত্যমরটীকায়াং ভরতঃ ॥ রক্তচন্দনং । ইতি মুণ্ডমালা-তন্ত্রং ॥

কুশীলবঃ ( পুং ) চারণঃ । ইত্যমরঃ ॥ নট-বিশেষঃ । কথকাদিঃ । ইত্যন্যে । দেশান্তরে কীর্ত্তিং প্রচারয়তি যঃ । ইত্যন্যে । ইতি ভরতঃ ॥

কুশীলবৌ ( পুং ) একযোক্ত্যা রামপুত্রৌ । ইতি হেমচন্দ্রঃ ॥

কুশীবশঃ ( পুং ) বাল্মীকিমুনিঃ । ইতি ত্রিকাণ্ড-শেষঃ ॥

কুশূলঃ ( পুং ) তুষানলঃ । ইতি জটাধরঃ ॥ ধান্যাগারং । তৎপর্য্যায়ঃ । অন্নকোষ্ঠকঃ২ । ইতি হেমচন্দ্রঃ ॥ ব্রীহ্যগারং ৩ । ইতি ত্রিকাণ্ডশেষঃ ॥

কুশেশয়ং ( ক্লী ) পদ্মং । সারসপক্ষী । ইত্যমরঃ ॥

কুশেশয়ঃ ( পুং ) কর্ণিকারবৃক্ষঃ । ইতি শব্দ-চন্দ্রিকা ॥

কুষ গ নিষ্কর্ষে । ইতি কবিকল্পদ্রুমঃ ॥ গ কুষ্ণাতি চুকোষ । নিষ্কর্ষ ইয়ত্তাপরিচ্ছেদঃ । তূলৈরবকুষ্ণাতীতি বোপদেবঃ ॥ নিষ্কর্ষোঽন্তঃ-প্রকাশনমিতি গোবিন্দভট্টঃ ॥ ততোঽকুষ্ণাদ্দশগ্রীবঃ ক্রুদ্ধঃ প্রাণান্ বনৌকসামিতি ভট্টৌ অনেকার্থত্বান্নিষ্কোষণার্থঃ । ইতি দুর্গাদাসঃ ॥

কুষলঃ ( ত্রি ) কুশলঃ । ইত্যমরটীকায়াং ভরতঃ

কুষাকুঃ ( পুং ) কপিঃ । অগ্নিঃ । অর্কঃ । পরোতাপিনি ত্রি । ইতি মেদিনী ॥

কুষিতঃ (ত্রি) জলমিশ্রিতঃ । ইত্যুণাদিকোষঃ

কুষীদং ( ক্লী ) কুসীদং । ইত্যমরটীকায়াং ভরতঃ

কুষ্ঠং ( ক্লী ) বিষভেদঃ । ইতি হেমচন্দ্রঃ ॥ ঔষধবিশেষঃ । কুড় ইতি ভাষা । তৎপর্য্যায়ঃ । ব্যাধিঃ ২ পারিভাব্যং ৩ ব্যাপ্যং ৪ পাকলং ৫ উৎপলং ৬ । ইত্যমরঃ ॥ আপ্যং ৭ । ইতি তট্টীকা ॥ জরণং ৮ । ইতি রত্নমালা ॥ রুজা ৯ গদঃ ১০ আময়ঃ ১১ পারিভদ্রকং ১২ রামং ১৩ বাণীরজং ১৪ পাবনং ১৫ কুৎসিতং ১৬ পদ্মকং ১৭ গদাহ্বং ১৮ গদাহ্বয়ং ১৯ কৌবেরং ২০ ভাস্বরং ২১ । ইতি শব্দ-রত্নাবলী ॥ কাকলং ২২ নীরুজং ২৩ । ইতি জটাধরঃ ॥ কুষ্ঠং রোগাহ্বয়ং বাপ্যং পারিভব্যং তথোৎপলং । কুষ্ঠমুষ্ণং কটু স্বাদু শুক্রলং তিক্তকং লঘু ॥ হন্তি বাতাস্রবীসর্পকাসকুষ্ঠমরুৎকফান্ ॥ * ॥ অথ কুষ্ঠভেদপুষ্করমূলং । উক্তং পুষ্কর-মূলন্তু পুষ্করং পৌষ্করঞ্চ তৎ । পদ্মপত্রঞ্চ কাশ্মীরং কুষ্ঠভেদমিদং জগুঃ ॥ পৌষ্করং কটুকং তিক্তমুষ্ণং বাতকফজ্বরান্ । হন্তি শোথারুচিশ্বাসান্ বিশেষাৎ পার্শ্বশূলনুৎ ॥

ইতি ভাবপ্রকাশঃ ॥ অস্য গুণাঃ। কটুত্বং। উষ্ণত্বং। তিক্তত্বং। কফবায়ুকুষ্ঠরোগ-বিসর্পবিষকণ্ডুখর্জ্জুদদ্রুনাশিত্বং। কান্তি-কারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ শ্বাসকাস-জ্বরহিক্কানাশিত্বং। ইতি রাজবল্লভঃ॥ *॥ স্বনামখ্যাতরোগঃ। কুঠ ইতি ভাষা। তৎ-পর্য্যায়ঃ। শ্বিত্রং ২। ইত্যমরঃ॥ শ্বেতং ৩ শ্বেত্রং ৪। ইতি তট্টীকা॥ তস্য নিদান-পূর্ব্বিকা সংপ্রাপ্তির্যথা। বিরোধীন্যন্ন-পানানি দ্রবস্নিগ্ধগুরূণি চ। ভজতামাগতাং ছর্দ্দিং বেগাংশ্চান্যান্ প্রতিঘ্নতাং॥ ব্যায়ামমতিসন্তাপমতিভুক্ত্বা নিষেবিণাং। শীতোষ্ণলঙ্ঘনাহারান্ ক্রমং মুক্ত্বা নিষে-বিণাং॥ ঘর্ম্মশ্রমভয়ার্ত্তানাং দ্রুতং শীতাম্বু-সেবিনাং। অজীর্ণাধ্যশিনাঞ্চৈব পঞ্চ-কর্ম্মাপচারিণাং॥ নবান্নদধিমৎস্যাতি-লবণাম্লনিষেবিণাং। মাংসমূলকপিষ্টান্ন-তিলক্ষীরগুড়াশিনাং॥ ব্যায়ামঞ্চাপ্যজীর্ণে-ঽন্নে নিদ্রাঞ্চ ভজতাং দিবা। বিপ্রান্ গুরূন্ ধর্ষয়তাং পাপং কর্ম্ম চ কুর্ব্বতাং॥ বাতাদয়স্ত্রয়ো দুষ্টাস্ত্বগ্রক্তং মাংসমম্বু চ। দূষয়ন্তি স কুষ্ঠানাং সপ্তকো দ্রব্য-সংগ্রহঃ॥ অতঃ কুষ্ঠানি জায়ন্তে সপ্ত চৈকাদশৈব তু। কুষ্ঠানি সপ্তধা দোষৈঃ পৃথগ্দ্বন্দ্বৈঃ সমাগতৈঃ॥ সর্ব্বেষ্বপি ত্রিদোষেষু ব্যপদেশোঽধিকত্বতঃ॥ *॥ তস্য পূর্ব্বরূপং যথা। অতিশ্লক্ষ্ণঃ খরঃ স্পর্শঃ স্বেদাস্বেদৌ বিবর্ণতা। দাহঃ কণ্ডূ-স্ত্বচি স্বাপস্তোদঃ কোঠোন্নতির্ভ্রমঃ॥ ব্রণানা-মধিকং শূলং শীঘ্রোৎপত্তিশ্চিরস্থিতিঃ। রূঢ়ানামতিরূক্ষত্বং নিমিত্তেঽল্পেঽপি কোপনং॥ রোমহর্ষোঽসৃজঃ কার্ষ্ণ্যং কুষ্ঠলক্ষণমগ্রজং॥ *॥ তচ্চ বাতাদি-ভেদেন অষ্টাদশপ্রকারং। তত্র সপ্ত মহা-কুষ্ঠানি যথা। কৃষ্ণারুণকপালাভং যদ্রূক্ষং পরুষং তনু। কাপালং তোদবহুলং তৎ কুষ্ঠং বিষমং স্মৃতং॥ ১॥ রুগ্দাহরাগ-কণ্ডূভিঃ পরীতং রোমপিঞ্জরং। উড়ুম্বর-ফলাভাসং কুষ্ঠমৌড়ুম্বরং বদেৎ॥ ২॥ শ্বেতং রক্তং স্থিরং স্ত্যানং স্নিগ্ধমুৎসন্ন-মণ্ডলং। কৃচ্ছ্রমন্যোন্যসংযুক্তং কুষ্ঠং মণ্ডলমুচ্যতে॥ ৩॥ কর্কশং রক্তপর্য্যন্ত-মন্তঃশ্যাবং সবেদনং। যদৃষ্যজিহ্বাসংস্থান-মৃষ্যজিহ্বং তদুচ্যতে॥ ৪॥ সশ্বেতং রক্ত-পর্য্যন্তং পুণ্ডরীকদলোপমং। সোৎসেধঞ্চ সরাগঞ্চ পুণ্ডরীকং প্রচক্ষতে॥ ৫॥ শ্বেতং তাম্রং তনু চ যদ্রজো ঘৃষ্টং বিমুঞ্চতি। প্রায়শ্চোরসি তৎ সিধ্মমলাবুকুসুমো-পমং॥ ৬॥ যৎ কাকণন্তিকাবর্ণমপাকং তীব্রবেদনং। ত্রিদোষলিঙ্গং তৎ কুষ্ঠং কাকণং নৈব সিধ্যতি॥ ৭॥ *॥ একা-দশ ক্ষুদ্রকুষ্ঠানি যথা। অস্বেদনং মহাবাস্তু যন্মৎস্যসকলোপমং। তদেব কুষ্ঠং চর্ম্মাখ্যং বহুলং হস্তিচর্ম্মবৎ॥ ১॥ শ্যাবং কিণখরস্পর্শং পরুষং কিটিমং স্মৃতং॥ ২॥ বৈপাদিকং পাণিপাদস্ফুটিতং তীব্র-বেদনং॥ ৩॥ কণ্ডুমদ্ভিঃ সরাগৈশ্চ গণ্ডৈ-রলসকং চিতং॥ ৪॥ সকণ্ডূরাগপিড়কং দদ্রুমণ্ডলমুদ্গতং॥ ৫॥ রক্তং সশূলং কণ্ডুমৎ সস্ফোটং যদ্গলত্যপি। তচ্চর্ম্ম-

দলমাখ্যাতং সংস্পর্শাসহমুচ্যতে ॥ ৬ ॥ সূক্ষ্মা বহ্ব্যঃ পিড়কাঃ স্রাববত্যঃ পামেত্যুক্তাঃ কণ্ডুমত্যঃ সদাহাঃ ॥ ৭ ॥ সৈব স্ফোটৈস্তীব্রদাহৈরুপেতা জ্ঞেয়া পাণ্যোঃ কচ্ছুরুগ্রাস্ফিচোশ্চ ॥ ৮ ॥ স্ফোটাঃ শ্যাবারুণা ভাসা বিস্ফোটাঃ স্যুস্তনুত্বচঃ ॥ ৯ ॥ রক্তং শ্যাবং সদাহার্ত্তি শতারুঃ স্যাদ্বহু- ॥ ১০ ॥ সকণ্ডুপিড়কা শ্যাবা বহুস্রাবা বিচর্চ্চিকা ॥ ১১ ॥ ইতি মাধবকরঃ ॥

কুষ্ঠঃ ( পুং ) স্বনামখ্যাতরোগঃ। তস্য নিদানং পূর্ব্বলিখিতং। ঔষধং যথা। সর্ব্বকুষ্ঠেষু বমনং রেচনং রক্তমোক্ষণং। বচাবাসাপটোলানাং নিম্বস্য ফলিনীত্বচঃ ॥ কষায়ো মধুনা পীতো বাতহৃন্মদনান্বিতঃ। বিরেচনং প্রযোক্তব্যং ত্রিবৃদ্দন্তীফলত্রিকৈঃ ॥ মনঃশিলা মরীচানি তৈলপাকং পয়ো হরেৎ। সর্ব্বকুষ্ঠানুলেপোঽয়ং শিবা পঞ্চগুড়োদনং ॥ করঞ্জৈড়গজৌ কুষ্ঠং গোমূত্রেণ প্রলেপতঃ। করবীরোদ্বর্ত্তনঞ্চ তৈলাক্তস্য তু কুষ্ঠহৃৎ ॥ হরিদ্রা মলয়ং রাস্না গুড়ূচ্যেড়গজস্তথা। আরগ্বধঃ করঞ্জশ্চ লেপঃ কুষ্ঠহরঃ পরঃ ॥ মনঃশিলা বিড়ঙ্গানি বাকুচী সর্ষপস্তথা। করঞ্জো মূত্রপিষ্টোঽয়ং লেপঃ কুষ্ঠহরোঽর্কবৎ ॥ বিড়ঙ্গৈড়গজাকুষ্ঠনিশাসিন্ধূত্থসর্ষপৈঃ। মূত্রাম্লপিষ্টো লেপোঽয়ং দদ্রুকুষ্ঠবিনাশনঃ ॥ প্রপুন্নাটকবীজানি ধাত্রী সর্জ্জরসঃ স্নুহী। সৌবীরপিষ্টং দদ্রূণামেতদুদ্বর্ত্তনং পরং ॥ আরগ্বধস্য পত্রাণি আরনালেন পেষয়েৎ। দদ্রূকিট্টিমকুষ্ঠানি হন্তি সিধ্মানমেব চ ॥ উষ্ণা পীতা বাকুচী চ কুষ্ঠজিৎ ক্ষীরভোজিনঃ। তিলাজ্যত্রিফলাক্ষৌদ্রব্যোষভল্লাতশর্করাঃ ॥ বৃষ্যঃ সপ্তসমো মেধ্যঃ কুষ্ঠহা কামচারিণঃ। বিড়ঙ্গত্রিফলাকৃষ্ণাচূর্ণং লীঢ়ং সমাক্ষিকং ॥ হন্তি কুষ্ঠং কৃমীন্মেহনাড়ীব্রণভগন্দরান্। যঃ খাদেদভয়ারিষ্টামলকানি তথা নিশা ॥ স জয়েৎ সর্ব্বকুষ্ঠানি মাসাদূর্দ্ধং ন সংশয়ঃ। দহ্যমানাচ্যুতঃ কুম্ভে মূলগে খদিরাঙ্কুরঃ ॥ সাক্ষধাত্রীরসক্ষৌদ্রং হন্যাৎ কুষ্ঠং রসায়নং। ধাত্রীখদিরয়োঃ ক্বাথং পীত্বাবল্গুজসংযুতং ॥ শঙ্খেন্দুধবলং শ্বিত্রং হন্তি তূর্ণং ন সংশয়ঃ। পীত্বা ভল্লাতকং তৈলং মাংসব্যাধিং জয়েন্নরঃ ॥ সেবিতং খাদিরং বারি পানাদ্যৈঃ কুষ্ঠজিদ্ভবেৎ। বাসা গুড়ূচী ত্রিফলা পটোলঞ্চ করঞ্জকং ॥ নিম্বাসনং কৃষ্ণবেত্রং ক্বাথকল্কেন যদ্ঘৃতং। বজ্রকং তদ্ধরেৎ কুষ্ঠং শতং বর্ষাণি জীবতি ॥ স্বরসেন চ দূর্ব্বায়াঃ পচেত্তৈলং চতুর্গুণং। কচ্ছুর্বিচর্চ্চিকা পামা অভ্যঙ্গাদেব নশ্যতি ॥ দ্রুমত্বগর্ককুষ্ঠানি লবণানি চ মূত্রকং। গণ্ডীরিকা চিত্রকৈস্তৈস্তৈলং কুষ্ঠব্রণাদিনুৎ ॥ ইতি গারুড়ে ১৭৫ অধ্যায়ঃ ॥ কুষ্ঠেন্দ্রযবসিদ্ধার্থনিশা দূর্ব্বা চ কুষ্ঠজিৎ। ইতি তত্রৈব ১৭৬ অধ্যায়ঃ ॥ করবীরং ভৃঙ্গরাজং লবণং কুষ্ঠমর্দ্দকং। চতুর্গুণেন মূত্রেণ পচেত্তৈলং হরেচ্চ তৎ ॥ পামাং বিচর্চ্চিকাং কুষ্ঠমভ্যঙ্গাদ্ধি ব্রণানি বৈ। ইতি ॥ সৈন্ধবঞ্চ বিড়ঙ্গানি সোমরাজী তু

সর্ষপাঃ। রজনী দ্বে বিষাঞ্চৈব গোমূত্রেণ। চ পেষয়েৎ ॥ কুষ্ঠনাশশ্চ তৎক্ষেপান্নিম্ব-পত্রাদনাত্তথা। ইতি চ গারুড়ে ১৮৭ অধ্যায়ঃ ॥ সতক্রকাশমূলং বা বাকুচীমূলমেব বা। কাঞ্জিকেন চ বাকুচ্যা মূলদ্বৈ কুষ্ঠরোগনুৎ ॥ ইতি গারুড়ে ১৮৮ অধ্যায়ঃ॥ পীতং বৃশ্চিকমূলন্তু পর্য্যু-ষিতজলেন বৈ। সার্দ্ধং বিনাশয়েদ্দাহ-জ্বরঞ্চ পরমেশ্বর॥ শিখায়াঞ্চৈব তদ্বদ্ধং ভবেদৈকাহিকাদিনুৎ। এতৎ সকাঞ্জিকং পীতং বাতকুষ্ঠজ্বরাদিনুৎ ॥ ইতি গারুড়ে ১৯৩ অধ্যায়ঃ ॥ নিত্যং নিম্বদলানাঞ্চ চূর্ণমামলকস্য চ। প্রত্যূষে ভক্ষয়েচ্চৈব তস্য কুষ্ঠং বিনশ্যতি॥ হরীতকী বিড়ঙ্গঞ্চ হরিদ্রা সিতসর্ষপাঃ। সোমরাজস্য বীজানি করঞ্জস্য চ সৈন্ধবং॥ গোমূত্রপিষ্টান্যেতানি কুষ্ঠরোগহরাণি চ। বীজানি স্থানে মূলানি বা পাঠঃ। ইতি তত্রৈব ১৯৪ অধ্যায়ঃ॥ চন্দনং কুঙ্কুমং মাংসী কর্পূরো জাতি-পত্রিকা। জাতীকক্কোলপূগানাং লবঙ্গস্য ফলানি চ॥ অগুরুশ্চীরকস্তূর্য্যঃ কুষ্ঠং তগরনালিকা। গোরোচনা প্রিয়ঙ্গুশ্চ বোলং মদনকং নখং॥ সরলঃ সপ্ত-পর্ণশ্চ লাক্ষা চামলকী তথা। কর্ব্বূরকঃ পদ্মকঞ্চ এতৈস্তৈলং প্রসাধিতং॥ প্রস্বেদ-মলদৌর্গন্ধ্যকণ্ডুকুষ্ঠহরং পরং। ইতি গারুড়ে ১৯৮ অধ্যায়ঃ॥ *॥ অথ বৈদ্যক-মতে কুষ্ঠচিকিৎসামাহ। বাতোত্তরেষু সর্পির্ব্বমনং শ্লেষ্মোত্তরেষু কুষ্ঠেষু। পিত্তো-ত্তরেষু মোক্ষো রক্তস্য বিরেচনং শ্রেষ্ঠং॥ পুরাণধান্যানি চ জাঙ্গলানি মাংসানি মুদ্গাশ্চ পটোলযুক্তাঃ। যবাদয়শ্চাত্র হিতাঃ পুরাণা ঘৃতানি শাকানি চ তিক্ত-কানি॥ তন্ত্রান্তরে। পুরাণাঃ শালিগোধূম-মুদ্গাদ্যাঃ কুষ্ঠিনো হিতাঃ। তিক্তশাকং জাঙ্গলঞ্চ পানাদৌ খদিরোদকং॥ যে লেপাঃ কুষ্ঠানাং যুজ্যন্তে নির্গতাস্র-দোষাণাং। সংশোধিতাশয়ানাং সদ্যঃ সিদ্ধির্ভবেত্তেষাং॥ দূর্ব্বাভয়াসৈন্ধবচক্র-মর্দ্দকুঠেরকাঃ কাঞ্জিকতক্রপিষ্টাঃ। এভিঃ প্রলেপৈরপি বদ্ধমূলাং কণ্ডুঞ্চ দদ্রুঞ্চ নিবারয়ন্তি॥ তুল্যো রসঃ শালতরোস্তুষেণ সচক্রমর্দ্দোঽপ্যভয়াবিমিশ্রঃ। পানীয়-ভুক্তেন তদম্লপিষ্টো লেপঃ কৃতো দদ্রু-গজেন্দ্রসিংহঃ॥ বিড়ঙ্গৈড়গজাকুষ্ঠনিশা-সিন্ধূত্থসর্ষপৈঃ। ধান্যাম্লপিষ্টৈর্লেপোঽয়ং দদ্রুকুষ্ঠবিনাশনঃ॥ এড়গজকুষ্ঠসৈন্ধব-সৌবীরসর্ষপৈঃ ক্রিমিঘ্নৈঃ। ক্রিমিসিধ্মদদ্রু-মণ্ডলকুষ্ঠানাং নাশনো লেপঃ॥ পর্ণানি পিষ্ট্বা চতুরঙ্গুলস্য তক্রেণ পর্ণান্যথ কাক-মাচ্যাঃ। তৈলাক্তগাত্রস্য নরস্য কুষ্ঠা-ন্যুদ্বর্ত্তয়েদশ্বহনচ্ছদৈশ্চ॥ ৫॥ বিড়ঙ্গসৈন্ধব-শিবাশশিরেখাসর্ষপকরঞ্জরজনীভিশ্চ। গো-জলপিষ্টো লেপঃ কুষ্ঠহরো দিবসনাথ-সমঃ॥ ৬॥ কাসমর্দ্দকমূলঞ্চ কাঞ্জিকেন প্রপেষিতং। দদ্রুকিটিমকুষ্ঠানি জয়েদেতৎ-প্রলেপনাৎ॥ ৭॥ আরগ্বধস্য পত্রাণি আরনালেন পেষয়েৎ। দদ্রুকিটিমকুষ্ঠানি হন্তি সিধ্মানমেব চ॥ ৮॥ চক্রাহ্বয়ং সুহীক্ষীরং ভাবিতং মূত্রসংযুতং

রবিতপ্তং হি কিঞ্চিত্তু লেপনং কিট্টিমাপহং ॥ ৯ ॥ * ॥ শিখরীরসেন সুপিষ্টং মূলকবীজং প্রলেপতঃ সিধ্ম। ক্ষারেণ বা কদল্যা রজনীমিশ্রেণ নাশয়তি ॥১০॥১১॥ সক্ষারং গন্ধকং লেপাৎ কটুতৈলেন সিধ্মজিৎ। কাসমর্দ্দকবীজানি মূলকানাং তথৈব চ॥১২॥ ১৩ ॥ গন্ধাশ্মচূর্ণমিশ্রাণি সিধ্মনাং পরমৌষধং। উপদেশাৎ কাঞ্জিকপিষ্টৈর্লেপঃ ॥ ১৪ ॥ গন্ধপাষাণচূর্ণেন যবক্ষারেণ লেপিতং। সিধ্মনাশং ব্রজত্যাশু কটুতৈলযুতেন চ ॥ দ্বয়ং সমং কটুতৈলেন লেপঃ ॥ ১৫ ॥ কুষ্ঠং মূলকবীজং প্রিয়ঙ্গবঃ সর্ষপাস্তথা রজনী। এতৎ কেশরষষ্ঠং নিহন্তি বহুবার্ষিকং সিধ্ম ॥ ১৬ ॥ নীলকুরুণ্টকপত্রৈরালিপ্য গাত্রমতিবহুশঃ। লিম্পেন্মূলকবীজৈঃ পিষ্টৈস্তক্রেণ সিধ্মনাশায় ॥ ১৭ ॥ * ॥ এড়গজাতিলসর্ষপকুষ্ঠং মাগধিকালবণত্রয়মস্তু। পূতিকৃতং দিবসত্রয়মেতদ্ধন্তি বিচর্চ্চিকদদ্রুককুষ্ঠং ॥ ১৮॥ সিন্দূরমরিচচূর্ণং মহিষীনবনীতসংযুতং বহুশঃ। লেপান্নিহন্তি পামাং তৈলং করবীরসিদ্ধং বা॥ ১৯॥ ২০॥ পারদং শঙ্খগন্ধঞ্চ শিলা চোত্তরবারুণী। প্রপুন্নাড়শ্চ সর্পাক্ষিমেঘনাদাগ্নিলাঙ্গলী॥ উত্তরবারুণী রাখালশশা ইতি খ্যাতা॥ ভল্লাতং গৃহধূমঞ্চ মুনিগুঞ্জা স্নুহীপয়ঃ। অরিষ্টঞ্চ গুড়ঃ ক্ষৌদ্রং বাগুজীবীজতুল্যকং॥ গোমূত্রৈরারনালৈর্ব্বা পিষ্ট্বা লেপঞ্চ কারয়েৎ। দদ্রুমণ্ডলকণ্ডুঞ্চ বিচর্চ্চিঞ্চ বিনাশয়েৎ॥ ২১ ॥ * ॥ মনঃশিলালে মরিচঞ্চ তৈলমার্কং পয়ঃ কুষ্ঠহরঃ প্রলেপঃ ॥ ২২ ॥ বিষবরুণহরিদ্রাচিত্রকাগারধূমমনলমরিচদূর্ব্বাক্ষীরমর্কস্নুহীভ্যাং। দহতি পতিতমাত্রাৎ কুষ্ঠজাতীরশেষাঃ কুলিশমিব সরোষাচ্ছক্রহস্তাদ্বিমুক্তং ॥ অত্র অনলং ভল্লাতকঃ ॥ ২৩ ॥ ভল্লাতকা দ্বীপি সুধার্কমূলং গুঞ্জাফলত্র্যূষণশঙ্খচূর্ণং। তুত্থং সকুষ্ঠং লবণানি পঞ্চ ক্ষারদ্বয়ং লাঙ্গলিকাঞ্চ পক্ত্বা॥ স্নুহ্যর্কদুগ্ধং ঘনমায়সস্থং শলাকয়া তদ্বিদধীত লেপং। কুষ্ঠে কিলাসে তিলকালকে চ অশেষদুর্নামসচর্ম্মকীলে॥ ভল্লাতকা দ্বীপি চিত্রকং তন্মূলং। এষাং সমভাগচূর্ণং সিজার্কয়োঃ ক্ষীরে দত্ত্বা কিঞ্চিৎ পাকং কুর্য্যাৎ। অথ বা ক্ষীরদ্বয়ং চতুর্গুণং চূর্ণং পাদিকং লেপযোগ্যং পাকং কুর্য্যাৎ। শলাকয়া কুষ্ঠস্থানে দদ্যাৎ॥ ২৪ ॥ * ॥ স্নুককাণ্ডশুশিরে দগ্ধ্বা গৃহধূমং সসৈন্ধবং। অন্তর্ধূমং তৈলযুক্তং লেপাদ্ধন্তি বিচর্চ্চিকাং ॥ সিজনলকে সৈন্ধবগৃহধূমং সমভাগং প্রপূর্য্য স্থাল্যভ্যন্তরে কৃত্বা শরাবেণ পিধায় দগ্ধ্বা পিষ্ট্বা কটুতৈলেন লেপঃ॥ ২৫ ॥ স্নুককাণ্ডে সর্ষপাৎ কল্কঃ কুকূলানলপাচিতঃ। লেপাদ্বিচর্চ্চিকাং হন্তি রাগবেগ ইব ত্রপাং ॥ সিজনলকে রাইকল্কং প্রপূর্য্য শুষ্কগোময়াগ্নৌ দগ্ধ্বা কটুতৈলেন লেপঃ॥ ২৬॥ * ॥ নারিকেলোদরে ন্যস্তস্তণ্ডুলঃ পূতিতাং গতঃ। লেপাদ্বিপাদিকাং হন্তি চিরকালানুবন্ধিনীং॥ ২৭ ॥ তিলকুসুমলবণগোজলকটুতৈলং লৌহভাজনে

কৃত্বা। শোষিতমর্কময়ূখৈঃ পাদস্ফুটনং নিহন্তি লেপেন ॥ ২৮॥ উন্মত্তকস্য বীজেন মাণকক্ষারবারিণা। কটুতৈলং বিপক্তব্যং শীঘ্রং হন্তি বিপাদিকাং ॥ কটুতৈল শং ৪ মাণনালপত্রাণাং ক্ষার পল ৬৪ জল শং ৬৪ শেষ শং ১৬ কল্ক ধুস্তুরবীজ পল ৮। উন্মত্ততৈলং॥ ২৯ ॥ * ॥ অবল্গুজং কাসমর্দ্দং চক্রমর্দ্দং নিশাযুগং। মাণিমন্থঞ্চ তুল্যাংশং মস্তুকাঞ্জিকপেষিতং। কণ্ডুং কচ্ছূং জয়ত্যুগ্রাং সিদ্ধ এষ প্রয়োগরাট্ ॥ ৩০ ॥ কোমলসিংহাস্যদলং সনিশং সুরভীজলেন পিষ্টং। দিবসত্রয়েণ নিয়তং ক্ষপয়তি কচ্ছুং বিলেপনতঃ ॥ ৩১ ॥ * ॥ বায়স্যেড়গজাকুষ্ঠকৃষ্ণাভির্গুড়িকা কৃতা। বস্তমূত্রেণ সংপিষ্টা লেপাচ্ছিত্রবিনাশিনী॥ সমভাগচূর্ণং ছাগমূত্রেণ পিষ্ট্বা গুড়িকা কার্য্যা। তেনৈব লেপঃ ॥ ৩২ ॥ পূতিকার্কস্নুকনরেন্দ্রদ্রুমাণাং মূত্রৈঃ পিষ্ট্বা পল্লবাঃ সৌমনাশ্চ। লেপাচ্ছিত্রং হন্তি দদ্রুব্রণাংশ্চ কুষ্ঠান্যর্শাংস্যগ্রনাড়ীব্রণাংশ্চ ॥ সৌমনা জাতীপত্রী। সর্ব্বেষাং পল্লবান্ গোমূত্রেণ পিষ্ট্বা লেপো দেয়ঃ ॥ ৩৩ ॥ গজচিত্রব্যাঘ্রচর্ম্মমসীতৈলবিলেপনাৎ। শ্বিত্রং নাশং ব্রজেৎ কিম্বা পূতিকীটবিলেপনাৎ ॥ গজচর্ম্ম চিত্ররোমব্যাঘ্রচর্ম্ম অনয়োর্ভস্ম কটুতৈলঞ্চ লেপঃ। অথবা পাচুড়িয়াকীটং পিষ্ট্বা লেপঃ ॥ ৩৪ ॥ ৩৫ ॥ কুড়বোঽবল্গুজবীজাৎ হরিতালচতুর্থভাগসংমিশ্রঃ। গবাং মূত্রেণ পিষ্টঃ স্ববর্ণকরণঃ পরং শ্বিত্রে ॥ আয়ুর্ব্বেদসারেঽপি। কুড়বো বাগুজীবীজাৎ হরিতালপলান্বিতঃ। গবাং মূত্রেণ সংপিষ্য লেপনাৎ শ্বিত্রনাশনং ॥ ৩৬ ॥ ধাত্রীখদিরয়োঃ কাথং পীত্বা চ মধুসংযুতং। শঙ্খকুন্দেন্দুধবলং জয়েচ্ছ্বিত্রং ন সংশয়ঃ ॥ ৩৭ ॥ ধাত্রীখদিরয়োঃ কাথমবল্গুজরজোঽন্বিতং। পীত্বা শঙ্খেন্দুকুন্দাভং হন্তি শ্বিত্রং ন সংশয়ঃ ॥ ৩৮ ॥ ক্ষারে সুদগ্ধে গজলণ্ডজে চ গজস্য মূত্রেণ বহুশ্রুতে চ। দ্রোণপ্রমাণং দশভাগযুক্তং দত্ত্বা পচেৎ বীজমবল্গুজস্য ॥ এতদ্যদা চিক্কণতামুপৈতি তদাশু সিদ্ধাং গুড়িকাং প্রকুর্য্যাৎ। শ্বিত্রং প্রলিম্পেদথ তেন ঘৃষ্টং তদা ব্রজত্যাশু স্ববর্ণভাবং ॥ ৩৯ ॥ শ্বেতজয়ন্তীমূলং পীতং পিষ্টঞ্চ পয়সৈব। শ্বিত্রং নিহন্তি নিয়তং রবিবারে বৈদ্যনাথাজ্ঞা॥ ৪০ ॥ গুঞ্জাফলাগ্নিচূর্ণস্তু লেপিতং শ্বেতকুষ্ঠনুৎ। শিলাপামার্গভস্মাপি লিপ্তা শ্বিত্রং বিনাশয়েৎ ॥ ৪১ ॥ ৪২ ॥ এরণ্ডতুলসীবীজং বাগুজী চক্রমর্দ্দকং। তিক্তকোষাতকীবীজং কৃষ্ণাস্কোঠস্য বীজকং ॥ গোমূত্রদধিদুগ্ধৈশ্চ পচেদপ্যাজমূত্রকৈঃ। কল্কং দত্ত্বা শিলা কাশী পথ্যা কুষ্ঠং বিড়ঙ্গকং ॥ কটুতৈলঞ্চ তল্লেপাদবৃষ্ট্বা ঘৃষ্ট্বা বিলেপনৈঃ। পঞ্চাননমিদং তৈলং শ্বেতকুষ্ঠকুলাপহং ॥ কটুতৈল শং ৪ কাথ্য-এরণ্ডবীজাদীনাং মিলিত্বা শং ২ কল্ক-শিলাকাশ্যাদীনাং মিলিত্বা শং ১। শ্বিত্রে পঞ্চাননতৈলং ॥ ৪৩ ॥ আরগ্বধং ধবং কুষ্ঠং হরিতালং মনঃশিলা। রজনীদ্বয়-

সংযুক্তং পচেত্তৈলং বিধানবিৎ ॥ এতে-নাভ্যঞ্জনাদেব ক্ষিপ্রং শ্বিত্রং বিনশ্যতি। তিলতৈল শং ৪ পা শং ১৬ কল্কমিলিত শং ১। আরগ্বধাদ্যং তৈলং ॥ ৪৪ ॥ শুদ্ধসূতং সমং গন্ধং ত্রিফলা ভৃঙ্গবাগুজী। ভল্লাতকং তিলঃ কৃষ্ণো নিম্ববীজং সমং সমং। মর্দ্দয়েদ্ভৃঙ্গজদ্রাবৈঃ শোষ্যং পেষ্যং পুনঃ পুনঃ ॥ ইত্থং কুর্য্যাস্ত্রিসপ্তাহং রসঃ শ্বেতারিকো ভবেৎ। মধ্বাজ্যৈর্নিষ্ক-মাত্রস্তু খাদেৎ শ্বেতং বিনাশয়েৎ ॥ শ্বেতারিঃ ॥ ৪৫ ॥ পিবতি সকটুতৈলং গন্ধপাষাণচূর্ণং রবিকিরণসুতপ্তঃ পামনো যঃ পলার্দ্ধং। ত্রিদিনতদনুসিক্তঃ ক্ষীর-ভোজী চ শীঘ্রং ভবতি কনকদীপ্তিঃ কাম-রূপী মনুষ্যঃ ॥ ৪৬ ॥ * ॥ তীব্রেণ কুষ্ঠেন পরীতদেহো যঃ সোমরাজীং নিয়মেন খাদেৎ। সম্বৎসরং কৃষ্ণতিলদ্বিতীয়াং স সোমরাজীং বপুষাতিশেতে ॥ ৪৭ ॥ ঘর্ম্ম-সেবী কদুষ্ণেন বারিণা বাগুজীং পিবেৎ। ক্ষীরভোজী চ সপ্তাহাৎ কুষ্ঠী কুষ্ঠং ব্যপোহতি ॥ ৪৮ ॥ অবল্গুজবীজকর্ষং পীত্বা কোষ্ণেন বারিণা। ভোজনং সর্পিষা কার্য্যং সর্ব্বকুষ্ঠবিনাশনং ॥ ৪৯ ॥ ছিন্নায়াঃ স্বরসো বাপি সেব্যমানো যথা-বলং। জীর্ণে ঘৃতেন ভুঞ্জীত মুদ্গযূষৌদনেন চ ॥ অপি পূতিশরীরোঽপি দিব্যরূপী ভবেন্নরঃ ॥৫০॥ যঃ খাদেদভয়ারিষ্টমরিষ্টা-মলকানি বা। স জয়েৎ সর্ব্বকুষ্ঠানি মাসাদূর্দ্ধং ন সংশয়ঃ ॥ ৫১ ॥ ৫২ ॥ নিম্বস্য পত্রং মূলানি সত্বক্‌পুষ্পফলানি চ। চূর্ণিতানি ঘৃতক্ষৌদ্রসংযুতানি দিনে দিনে ॥ লিহ্যাৎ পিবেদ্বা মূত্রেণ সংযুক্তা-ন্যুদকেন বা। মদিরামলতোয়েন পয়সা বা যথাবলং ॥ ভুঞ্জীত ঘৃতযূষাদ্যৈঃ শাল্যন্নং পয়সাপি বা। সর্ব্বকুষ্ঠবিসর্পার্শোনাড়ীদুষ্ট-ব্রণানপি ॥ কামলাঞ্চ গদানন্যাংস্তথা পিত্ত-কফাস্রজান্। সম্বৎসরপ্রয়োগেণ সর্ব্ববর্জ্জ্য-বিবর্জ্জিতঃ ॥ জয়ত্যেতৎ পঞ্চনিম্বং রসা-য়নমনুত্তমং। পঞ্চনিম্বং ॥ ৫৩॥ পুষ্পকালে চ পুষ্পাণি ফলকালে ফলানি চ। সংচূর্ণ্য পিচুমর্দ্দস্য ত্বঙ্মূলানি দলানি চ ॥ দ্বি-রংশানি সমাহৃত্য ভাগিকানি প্রকল্পয়েৎ ত্রিফলাত্র্যূষণং ব্রাহ্মী শ্বদংষ্ট্রারুষ্করাগ্নিকাঃ॥ বিড়ঙ্গসারবারাহীলৌহচূর্ণামৃতাঃ সমাঃ। হরিদ্রাদ্বয়াবল্গুজব্যাধিঘাতাঃ সশর্করাঃ॥ কুষ্ঠেন্দ্রযবপাঠাশ্চ কৃত্বা চূর্ণং সুসংযুতং খদিরাসননিম্বানাং ঘনকাথেন ভাবয়েৎ॥ সপ্তধা পঞ্চনিম্বঞ্চ মার্করস্বরসেন চ। স্নিগ্ধ-শুদ্ধতনুর্ধীমান্ যোজয়েচ্চ শুভে দিনে ॥ মধুনা তিক্তহবিষা খদিরাসনবারিণা। সেব্য-মুষ্ণাম্বুনা বাপি কোলবৃদ্ধ্যা পলং পিবেৎ ॥ তিক্তহবিষা বক্ষ্যমাণপঞ্চতিক্তঘৃতেন ॥ জীর্ণে চ ভোজনং কার্য্যং স্নিগ্ধং লঘু হিতঞ্চ যৎ। বিচর্চ্চিকোড়ুম্বরপুণ্ডরীক-কপালদদ্রুকিটিমালসাদি॥ শতারুবিস্ফোট-বিসর্পপামাং কুষ্ঠপ্রকোপং বিবিধং কিলাসং। ভগন্দরং শ্লীপদবাতরক্তং জড়ান্ধ্যনাড়ীব্রণশীর্ষরোগান্॥ সর্ব্বপ্রমেহান্ প্রদরাংশ্চ সর্ব্বান্ দংষ্ট্রাবিষং মূলবিষং নিহন্তি। স্থূলোদরঃ সিংহকৃশোদরশ্চ

সুশ্লিষ্টসন্ধির্মধুনোপযোগাৎ ॥ সমোপ-যোগাদপি যে দশন্তি সর্পাদয়ো যান্তি বিনাশমাশু। জীবেচ্চিরং ব্যাধিজরা-বিমুক্তঃ শুভে রতশ্চন্দ্রসমানকান্তিঃ ॥ পঞ্চনিম্বঃ ॥ ৫৪ ॥ অমৃতায়াঃ পলশতং দশমূল্যাস্তথা শতং। পাঠামূর্ব্বাবলা-তিক্তাদার্ব্বীগন্ধর্ব্বহস্তকাঃ ॥ এষাং দশ-পলান্ ভাগান্ বিভীতক্যাঃ শতং হরেৎ। দ্বে শতে চ হরীতক্যা আমলক্যাস্তথা শতং ॥ জলদ্রোণদ্বয়ে পক্ত্বা অষ্টভাগাব-শেষিতং। প্রস্থং গুগ্‌গুলুমাহৃত্য প্রস্থা-র্দ্ধঞ্চ ঘৃতং পচেৎ ॥ পাকসিদ্ধৌ প্রদাতব্যং গুড়ূচ্যাঃ সত্ত্বমেব চ। পলদ্বয়ং তথা শুণ্ঠ্যাঃ পিপ্পল্যাশ্চ পলদ্বয়ং ॥ ততো মাত্রাং প্রযুঞ্জীত জ্ঞাত্বা দোষবলাবলং। অষ্টাদশসু কুষ্ঠেষু বাতরক্তগদেষু চ ॥ কামলামাম-বাতঞ্চ অগ্নিমান্দ্যং ভগন্দরং। পীনসঞ্চ প্রতিশ্যায়ং প্লাহানমুদরং তথা ॥ এতান্ রোগান্নিহন্ত্যাশু ভাস্করস্তিমিরং যথা। অমৃতাগুগ্‌গুলুঃ। অয়ং বাতরক্তে প্রশস্তঃ ॥ ৫৫ ॥ নিম্বামৃতাবৃষপটোলনিদিগ্ধি-কানাং ভাগান্ পৃথগ্দশপলান্ বিপচেদ্ঘটে-ঽপাং। অষ্টাংশশেষিতরসেন সু-নিশ্চিতেন প্রস্থং ঘৃতস্য বিপচেৎ পিচুভাগ-কল্কৈঃ ॥ পাঠাবিড়ঙ্গসুরদারুগজোপকুল্যা-দ্বিক্ষারনাগরনিশামিষিচব্যকুষ্ঠৈঃ। তেজো-বতীমরিচবৎসকদীপ্যকাগ্নিরোহিণ্যরুষ্কর-বচাকণমূলযুক্তৈঃ ॥ মঞ্জিষ্ঠযাতিবিষয়া বরয়া যমান্যা সংশুদ্ধগুগ্‌গুলুপলৈরপি পঞ্চ-সংখ্যৈঃ। তৎ সেবিতং বিধমতি প্রবলং সমীরং সন্ধ্যস্থিমজ্জগতমপ্যথ কুষ্ঠমীদৃক্ ॥ নাড়ীব্রণার্ব্বুদভগন্দরগণ্ডমালাজত্রূর্দ্ধসর্ব্ব-গদগুল্মগুদোত্থমেহান্। যক্ষ্মারুচিশ্বসন-পীনসকাসশোষহৃৎ পাণ্ডুরোগগলবিদ্রধি-বাতরক্তং ॥ পঞ্চতিক্তঘৃতগুগ্‌গুলুঃ॥৫৬॥*॥ শ্বেতকরবীরমূলং বিষাংশকং সাধিতং গোমূত্রে। চর্ম্মদলসিধ্মপামাবিস্ফোটক্রিমি-কিটিমজিৎতৈলং ॥ তিলতৈল ৪ শের গোমূত্র ১৬ শের শ্বেতকরবীরমূল ৪ পল বিষ ৪ পল। করবীরতৈলং ॥ ৫৭ ॥ মৃতস্য কৃষ্ণসর্পস্য শিরঃপুচ্ছান্ত্রবর্জ্জিতং। অন্ত-র্ধূমং কৃতং ভস্ম বাগুজীতৈলমিশ্রিতং ॥ এতেন মর্দনাদেব গলৎকুষ্ঠং বিনশ্যতি। কৃষ্ণসর্পতৈলং ॥ ৫৮ ॥ সূতকং গন্ধকং কুষ্ঠং সপ্তপর্ণঞ্চ চিত্রকং। সিন্দুরঞ্চ রসো-নঞ্চ হরিতালমবল্গুজং ॥ আরগ্বধস্য বীজানি জীর্ণতাম্রং মনঃশিলা। প্রত্যেকং কর্ষ-মেতেষাং কটুতৈলং পলাষ্টকং ॥ সাধয়েৎ সূর্য্যতাপেন সর্ব্বকুষ্ঠবিনাশনং। শ্বিত্রমৌড়ু-ম্বরঃ কচ্ছূং মাংসরদ্ধিং ভগন্দরং ॥ বিচর্চ্চিকাঞ্চ পামানং বাতরক্তং সু-দারুণং। গম্ভীরঞ্চ তথোত্তানং নাশয়েৎ যস্য ত্রক্ষণাৎ ॥ কুষ্ঠরাক্ষসনামেদং স্ববর্ণ-করণং পরং। অশ্বিভ্যাং নির্ম্মিতং হ্যেতৎ লোকানুগ্রহহেতবে ॥ কুষ্ঠরাক্ষস-তৈলং ॥ ৫৯ ॥ সূতং গন্ধং শিলা তালং কাঞ্জিকৈর্ম্মর্দয়েদ্দিনং। তল্লিপ্তবস্ত্রবর্ত্তীং তাং তৈলাক্তাং জ্বালয়েদধঃ ॥ স্থিতে পাত্রে পচেত্তৈলং গৃহীত্বা লেপয়েত্ততঃ। কুষ্ঠস্থানং বিশেষেণ সর্ব্বকুষ্ঠং হরত্যলং ॥

ইদং কালানলং তৈলং বাতকুষ্ঠে মহৌষধং। এষাং সমং কাঞ্জিকং সর্ব্বেষাং দ্বিগুণং তিলতৈলং। কল্কং বস্ত্রে সংলিপ্য সংশোষ্য বর্ত্তীং কুর্য্যাৎ তাং তৈলাক্তাং সন্দংশিকয়া জ্বালয়িত্বা উপরি তৈলং দত্ত্বা ততঃ পতিতং তৈলং অধঃপাত্রে গৃহ্লীয়াৎ কুষ্ঠস্থানে দদ্যাৎ। কুষ্ঠকালানলতৈলং ॥ ৬০ ॥ সিন্দূরামৃততালগৈরিকহলাজাজীগদত্র্যূষণৈর্দ্ধৎপাষাণরসোনবাণদহনস্নুহ্যর্কত্বগ্ভির্নিশা। রাজীগন্ধকহিঙ্গুভিঃ পরিমিতৈঃ শুক্ত্যা পচেৎ সার্ষপং তৈলং প্রস্থমিতং স্নুতস্য কুড়বং পাত্রং তথার্কাদ্রসং ॥ হৃৎপাষাণং মনঃশিলা। গোমূত্রঞ্চ তথা বিনীয় সকলং পূতং শৃতং রোগিণে দদ্যাৎ কুষ্ঠবিচর্চ্চিকাদিষু ভিষক্ নাম্না তু ষড়্‌বিন্দুকং। ষড়্‌বিন্দুতৈলং ॥ ৬১ ॥ সর্ব্বকুষ্ঠে সর্ব্বব্রণে সর্ব্বত্র গলিতে ক্ষতে ॥ নক্তমালং হরিদ্রে দ্বে অর্কং তগরমেব চ। করবীরবচাকুষ্ঠং আস্ফোতা রক্তচন্দনং ॥ মালতী সিন্ধুবারঞ্চ মঞ্জিষ্ঠা সপ্তপর্ণকং। এষামর্দ্ধপলান্ ভাগান্ বিষস্য দ্বিপলং তথা ॥ চতুর্গুণে গবাং মূত্রে তৈলপ্রস্থং বিপাচয়েৎ। শ্বিত্রবিস্ফোটকিটিমকীটলূতাবিচর্চ্চিকাঃ ॥ কণ্ডুকচ্ছুরিকায়াশ্চ যে ব্রণা বিষদূষিতাঃ। তে সর্ব্বে নাশমায়ান্তি তমঃ সূর্য্যোদয়ে যথা ॥ বিষতৈলমিদং নাম্না সর্ব্বব্রণবিশোধনং। বিষতৈলং ॥ ৬২ ॥ সোমরাজী হরিদ্রে দ্বে সর্ষপাঃ কুষ্ঠমেব চ। করঞ্জৈড়গজাবীজং পত্রাণ্যারগ্বধস্য চ ॥ বিপচেৎ সার্ষপং তৈলং নাড়ীদুষ্টব্রণাপহং। অনেনাশু প্রশাম্যন্তি কুষ্ঠাম্যষ্টাদশৈব তু ॥ নীলিকা পিড়কা ব্যঙ্গা গম্ভীরং বাতশোণিতং। কণ্ডুকচ্ছুপ্রশমনং দদ্রুপামানিবারণং ॥ সোমরাজীতৈলং ॥ ৬৩ ॥ সোমরাজীতুলাকাথে তথা দদ্রুহনস্য চ। গোমূত্রস্য তথা পাত্রে কল্কং দত্ত্বা বিচক্ষণঃ ॥ বিপচেৎ কার্ষিকৈর্ভাগৈঃ কটুতৈলাঢ়কং ভিষক্। চিত্রকং লাঙ্গলাখ্যা চ নাগরং কুষ্ঠমেব চ ॥ হরিদ্রা নক্তমালঞ্চ হরিতালং মনঃশিলা। আস্ফোতার্ককরবীরং সপ্তপর্ণঞ্চ গোময়ং ॥ খদিরো নিম্বপত্রঞ্চ মরিচং কাসমর্দ্দকং। এতানি শ্লক্ষ্ণপিষ্টানি কল্কং দত্ত্বা বিচক্ষণঃ ॥ হন্তি সর্ব্বাণি কুষ্ঠানি ক্রিমিদুষ্টব্রণানি চ। কিটিমং দদ্রুজাতঞ্চ গাত্রবৈবর্ণ্যমেব চ ॥ বিশীর্ণচর্ম্মমাংসাদিদৃঢ়ীকরণমুত্তমং। পাণ্ডুরোগং তথা কণ্ডুং বিসর্পং হন্তি দারুণং ॥ যে চান্যে ত্বগ্‌গতা রোগাস্তাংস্তু শীঘ্রং ব্যপোহতি। বৃহৎসোমরাজীতৈলং ॥ ৬৪। মরিচালশিলাব্দার্কপয়োঽশ্বারিজটাত্রিবৃৎ। শকৃদ্রসবিশালারুক্ নিশাযুক্‌দারুচন্দনৈঃ॥ কটুতৈলাৎ পচেৎ প্রস্থং দ্ব্যক্ষৈর্বিষপলান্বিতৈঃ। সগোমূত্রৈস্তদভ্যঙ্গাদ্দদ্রুশ্বিত্রবিনাশনং ॥ সর্ব্বেষ্বপি চ কুষ্ঠেষু তৈলমেতৎ প্রশস্যতে। মরিচাদ্যং তৈলং ॥৬৫॥ মরিচং ত্রিবৃতা দন্তী ক্ষীরমার্কং শকৃদ্রসঃ। দেবদারু হরিদ্রে দ্বে মাংসী কুষ্ঠং সচন্দনং ॥ বিশালা করবীরঞ্চ হরিতালং মনঃশিলা। চিত্রকো লাঙ্গলাখ্যা চ বিড়ঙ্গং চক্রমর্দ্দকং ॥ শিরীষং কুটজো নিম্বঃ সপ্ত-

পর্ণঃ স্নুহ্যম্বতা। শম্পাকো নক্তমালো-
হব্দং খদিরং পিপ্পলী বচা॥ জ্যোতিষ্মতী
চ পলিকা বিষস্য দ্বিপলং ভবেৎ। আঢ়কং
কটুতৈলস্য গোমূত্রঞ্চ চতুর্গুণং॥ মৃৎপাত্রে
লৌহপাত্রে বা শনৈর্মৃদ্বগ্নিনা পচেৎ।
পক্কা তৈলবরং হ্যেতন্ম্রক্ষয়েৎ কুষ্ঠকান্
ব্রণান্॥ পামাবিচর্চ্চিকাদদ্রুকণ্ডূবিস্ফো-
টকানি চ। বলয়ঃ পলিতং ছায়া নলী
ব্যঙ্গং তথৈব চ॥ অভ্যঙ্গেন প্রণশ্যন্তি
সৌকুমার্য্যঞ্চ জায়তে। প্রথমে বয়সি
স্ত্রীণাং যাসাং নস্যন্তু দীয়তে॥ পরামপি
জরাং প্রাপ্য ন স্তনা যান্তি নম্রতাং।
বলীবর্দ্দস্তুরঙ্গো বা গজো বা বায়ুপীড়িতঃ॥
ত্রিভিরভ্যঞ্জনৈর্গাঢ়ং ভবেন্মারুতবিক্রমঃ।
কটুতৈল ১৬ শের গোমূত্র ৬৪ শের
কল্কার্থং মরিচাদীনাং প্রত্যেকং ১ পল
বিষ ২ পল। বৃহন্মরিচাদ্যং তৈলং॥ ৬৬॥
সপ্তপর্ণস্তথা কালী গুড়ূচী পিচুমর্দ্দকং।
শিরীষঞ্চ মহাতিক্তা জয়া তুম্বী মৃগাদনী॥
কালী কালিয়া লতা॥ নিশাদশপলান্
ভাগান্ জলদ্রোণে বিপাচয়েৎ। তৈল-
প্রস্থং সমাদায় গোমূত্রঞ্চ চতুর্গুণং॥ আর-
গ্বধো ভৃঙ্গরাজো জয়াধুস্তুররাত্রয়ঃ। ইন্দ্রা-
শনাগ্নিখর্জ্জুরং গোময়ার্কস্নুহীচ্ছদং॥
তৈলতুল্যং প্রদাতব্যং স্বরসঞ্চ পৃথক্
পৃথক্। মহাকাল বচা ব্রহ্মী তুম্ব্যগ্নি গৃহ-
পুত্রিকা॥ কুচেলা কুলকা রাত্রির্মেঘনামা
চ গ্রন্থিকা। সম্পাকমর্কক্ষীরঞ্চ কাসুন্দে-
শ্বরমূলকং॥ কাসুন্দমূলকং কালকাসুন্দা-
মূলং। কাসুন্দঃ খরমর্দ্দকমিতি কচিৎপাঠঃ

তন্মতে ঈশ্বরমূলস্থানে অপামার্গমূলং॥
আচু জিঙ্গী মহাতিক্তা বিশালা ছপি-
পত্রকং। পূতিকাস্ফোত মূর্ব্বা চ সপ্ত-
পর্ণং শিরীষকং॥ ছপিপত্রকং বিছাতি-
পত্রং॥ কুটজং পিচুমর্দ্দশ্চ মহানিম্বং
তথৈব চ। গুড়ূচী চন্দ্ররেখা চ সোমরাট্
চক্রমর্দ্দকং॥ তুম্বুরুভৃঙ্গযষ্ট্যাহ্বকন্দকং
কটুরোহিণী। শটী দার্ব্বী ত্রিবৃৎ পদ্মগ্রন্থিকা-
গুরুপুষ্করং॥ কর্পূরং কট্ফলং মাংসী
মুরৈলাটরুষাভয়ং। এতেষাং কার্ষিকৈঃ
কল্কৈর্নাম্না কন্দর্প উচ্যতে॥ অষ্টাদশবিধং
কুষ্ঠং গ্রন্থিমজ্জগতং তথা। হস্তপাদাঙ্গুলী-
সন্ধিগলিতং সর্ব্বসন্ধিষু॥ অধিকানি চ
মাংসানি যস্য গাত্রে ভবিষ্যতি। নাসা-
কর্ণাস্যবৈকল্যং ভেকাকারবপুস্ত্বচং॥
শ্বেতং রক্তং তথা কুষ্ঠং নানাবর্ণং বিপা-
দিকং। শ্বিত্রং বহুবিধঞ্চৈব বাতশোণিত-
মেব চ॥ কাপালং ক্রিমিজং কুষ্ঠং কণ্ডূ-
দদ্রুবিচর্চ্চিকাং। পামাদিস্ফোটকাদীনি
ক্রিমিবৃদ্ধিং তথৈব চ॥ কটীদদ্রুং মসূরী-
ঞ্চ কিটিমং রক্তমণ্ডলং। কুষ্ঠমৌড়ুম্বরং
পদ্মং মহাপদ্মং তথৈব চ॥ গলগণ্ডার্ব্বুদং
হন্যাদ্গণ্ডমালাং ভগন্দরং। বাতজং পিত্ত-
জঞ্চৈব শ্লেষ্মজং সান্নিপাতিকং॥ একো-
ল্বণং দ্ব্যুল্বণঞ্চ কুষ্ঠং হন্যান্ন সংশয়ঃ।
কন্দর্পসারতৈলং॥ ৬৭॥ *॥ ভল্লা-
তকানাং পবনোদ্ধতানাং বৃন্তব্যুদানাঞ্চ
যদাঢ়কং স্যাৎ। তচ্চেষ্টকাচূর্ণকণৈর্বিঘৃষ্য
প্রক্ষালয়িত্বা বিসৃজেৎ প্রবাতে॥ শুষ্কং
পুনস্তদ্বিদলীকৃতঞ্চ ততঃ পচেদপ্সু চতু-

গুর্ণাস্থ। তৎপাদশেষং পরিপূতশীতং ক্ষীরেণ তুল্যেন পুনঃ পচেত্তু॥ তদর্দ্ধয়া শর্করয়া বিকীর্ণং ততঃ খজেনোন্মথিতং বিধায়। তৎ সপ্তরাত্রাদুপজাতবীর্য্যং সুধারসাদপ্যধিকত্বমেতি॥ প্রাতর্বিবুদ্ধঃ কৃতদেবকার্য্যো মাত্রাঞ্চ খাদেৎ স্বশরীরযোগ্যাং। ন চান্নপানে পরিহার্য্যমস্তি ন চাতপে চাধ্বনি মৈথুনে চ॥ যথেষ্টচেষ্টো বিহিতোপযোগাস্তবেন্নরঃ কাঞ্চনরাশিগৌরঃ। অনন্যমেধা নরসিংহতেজা হৃষ্টেন্দ্রিয়োহব্যাহতবুদ্ধিসত্ত্বঃ॥ দন্তাশ্চ শীর্ণাঃ পুনরুদ্ভবন্তি কেশাশ্চ শুক্লাঃ পুনরেব দিব্যাঃ। নীলাঞ্জনালিপ্রতিমা ভবন্তি ত্বচো বিবর্ণাঃ পুনরেব দিব্যাঃ॥ বিশীর্ণকর্ণাঙ্গুলিনাসিকোহপি ক্রিম্যর্দ্দিতো ভিন্নগলোহপি কুষ্ঠী। সোহপি ক্রমাদঙ্কুরিতাগ্রশাখস্তরুর্যথা ভাতি নভোহম্বুসিক্তঃ॥ উষ্ট্রান্ ময়ূরান্ জয়তি স্বরেণ বলেন নাগস্তরগো জবেন। রসায়নস্যাস্য নরঃ প্রসাদাদ্বৃহস্পতেরপ্যধিকোহপি বুদ্ধ্যা॥ গ্রন্থান্ বিশালান্ পুনরুক্তিদোষান্ গৃহ্লাতি শীঘ্রং ন চ নশ্যতে তু। কুর্ব্বন্নিমং কল্পমনল্পবুদ্ধির্জীবেন্নরো বর্ষশতানি পঞ্চ॥ রাজা হ্যয়ং সর্ব্বরসায়নানাং চকার যোগং ভগবানগস্ত্যঃ। অমৃতভল্লাতকং ॥ ৬৮॥ নিম্বং গোপারুণা কর্ট্বী ত্রায়ন্তী ত্রিফলা ঘনং। পদ্ম টারগুজানন্তাবচাখদিরচন্দনং ॥ অরগুজং হাকুচবীজং। পাঠা শুণ্ঠী শটী ভার্গী বাসা ভূনিম্ববৎসকং। শ্যামেন্দ্রবারুণী মূর্ব্বা বিড়ঙ্গেন্দ্রবিষানলং॥ হস্তিকর্ণামৃতা দ্রেকা পটোলং রজনীদ্বয়ং। কর্ণারগ্বধসপ্তাহ্বকৃষ্ণবেত্রোচ্চটাফলং॥ দ্রেকা মহানিম্বং। কর্ণারগ্বধঃ শোণালিফলমজ্জা। ভূকন্দং তৃণপর্ণঞ্চ জিঙ্গী পদ্মাটমূষলী। বিশ্বক্সেনা চ কৈটর্য্যং শরপুঙ্খা ক্ষীরকঞ্চুকী॥ এষাং দ্বিপলিকান্ ভাগান্ জলদ্রোণে বিপাচয়েৎ। অষ্টভাগাবশেষস্তু কষায়মবতারয়েৎ॥ ভল্লাতকসহস্রাণি ত্রীণি ছিত্বার্ম্মণেহম্ভসি। চতুর্ভাগাবশেষস্তু কষায়মবতারয়েৎ॥ তৌ কষায়ৌ সমাদায় বস্ত্রপূতৌ চ কারয়েৎ। গুড়স্য তু তুলা তাভ্যাং কষায়ং বিপচেৎ ভিষক্॥ ভল্লাতকসহস্রাণাং মজ্জানং তত্র দাপয়েৎ। ত্রিকটুত্রিফলামুস্তসৈন্ধবানাং পলং পলং॥ দীপকস্য পলঞ্চৈব চাতুর্জ্জাতং পলাংশিকং। সংচূর্ণ্য প্রক্ষিপেদত্র কন্দকঞ্চ চতুঃপলং॥ স্নিগ্ধভাণ্ডে বিনিক্ষিপ্য স্থাপয়েৎ কুশলো ভিষক্। মহাভল্লাতকো হ্যেষ মহাদেবেন নির্ম্মিতঃ॥ জগতস্তু হিতার্থায় জয়েচ্ছীঘ্রং ন সংশয়ঃ। শ্বিত্রমৌড়ুম্বরং দদ্রুমৃষ্যজিহ্বং সকাকণং॥ পুণ্ডরীকঞ্চ চর্ম্মাখ্যং বিস্ফোটং মণ্ডলং তথা। কণ্ডুং কপালং কণ্ডূঞ্চ পামানং সবিপাদিকং॥ বাতরক্তমুদাবর্ত্তং পাণ্ডুরোগং ব্রণক্রিমীন্। অর্শাংসি ষট্প্রকারাণি কাসং শ্বাসং ভগন্দরং॥ সদাভ্যাসেন পলিতমামবাতং সুদুস্তরং। অনুপানে প্রযোক্তব্যং ছিন্নাকাথং পয়োহথবা॥ ভোজনে চ সদা ভোজ্যমুষ্ণঞ্চান্নং বিশেষতঃ। মহাভল্লাতকগুড়ঃ॥ ৬৯॥ হুতাশমুখসংশুদ্ধং পলমেকং রসস্য বৈ। পলং

লৌহস্য তাম্রস্য পলং ভল্লাতকস্য চ ॥ গন্ধকঞ্চ পলঞ্চৈকমভ্রকস্য চ গুগ্‌গুলোঃ। হরীতকীবিভীতক্যোশ্চূর্ণং কর্ষদ্বয়ং দ্বয়োঃ॥ অষ্টমাষাধিকং তত্র ধাত্র্যাঃ পাণিতলানি ষট্। ঘৃতং দ্ব্যষ্টগুণং লোহাৎ দ্বাত্রিংশ-ত্রিফলাজলং ॥ একং কৃত্বা পচেৎ পাত্রে লৌহে চ বিধিপূর্ব্বকং। পাকমেতস্য জানীয়াৎ কুশলো লোহপাকবিৎ ॥ বিবুদ্ধঃ প্রাতরুত্থায় গুরুদেবদ্বিজার্চ্চকঃ। রক্তিকাদিক্রমেণৈব ঘৃতভ্রামরমর্দ্দিতং ॥ লৌহে লৌহস্য দণ্ডেন কুর্য্যাদেতদ্রসায়নং। অনুপানঞ্চ কুর্বীত নারিকেলোদকং পয়ঃ॥ সর্ব্বকুষ্ঠহরং শ্রেষ্ঠং বলীপলিতনাশনং। পাণ্ডুমেহামবাতঘ্নং বাতরক্তরুজাপহং ॥ ক্রিমিশোথাশ্মরীশূলদুর্নামবাতরোগনুৎ। ক্ষয়ং হন্তি মহাশ্বাসমত্যর্থং শুক্রবর্দ্ধনং ॥ অগ্নিসন্দীপনং হৃদ্যং কান্ত্যায়ুর্বলবৃদ্ধিকৃৎ। বিবর্জ্জ্য শাকাম্লমপি স্ত্রিয়ঞ্চ সেব্যো রসো জাঙ্গলজাবিকানাং। শাল্যোদনং ষষ্টিকমাজ্যমুদ্গক্ষৌদ্রং গুড়ঃ ক্ষীরমিহ ক্রিয়ায়াং ॥ শালিঞ্চ গুর্ব্বাদিবৃহৎকরঞ্জ-শিলাজতুক্ষৌদ্রযুতং পয়শ্চ। সর্পির্যুতং ভক্ষয়তো বিহঙ্গান্ প্রপূর্য্যতে দুর্ব্বলদেহধাতুঃ। কৃষ্ণস্য পক্ষস্য সিতে তু পক্ষে ত্রিপঞ্চরাত্রেণ যথা শশাঙ্কঃ। পাকলক্ষণং যথা। বস্ত্রে নিষ্পীড়িতং সূক্ষ্মে স্থূলতন্তৌ ঘনে দৃঢ়ে। সমুদ্রং জায়তে ব্যক্তং ন নিঃ-সরতি সন্ধিভিঃ॥ ন চ শব্দায়তে বহ্নৌ তদা সিদ্ধিং বিনির্দ্দিশেৎ। অমৃতাঙ্কুর-লৌহং ॥ ৭০ ॥ গন্ধকেন হতং তাম্রং দশভাগং সমুদ্ধরেৎ। উষণং পঞ্চভাগং স্যাদমৃতঞ্চ দ্বিভাগিকং ॥ দাতব্যং কুষ্ঠিনে সম্যগনুপানস্য যোগতঃ। গলিতে স্ফুটিতে চৈব বিপুলে মণ্ডলে তথা ॥ বিচর্চ্চিকা-দদ্রুপামাসর্ব্বকুষ্ঠপ্রশান্তয়ে। উদয়-ভাস্করঃ ॥ ৭১ ॥ তালকং বংশপত্রাখ্যং কুষ্মাণ্ডসলিলে ক্ষিপেৎ। সপ্তধা বা ত্রিধা বাপি দধ্যাম্লেন তথৈব চ ॥ শোধয়িত্বা পুনঃ শুষ্কং চূর্ণয়েৎ তণ্ডুলাকৃতিঃ। ততঃ শরাবকে যন্ত্রে স্থাপয়েৎ কুশলো ভিষক্ ॥ বদরীপল্লবোত্থেন লেপনং কারয়েৎ ততঃ। অরুণাভমধঃপাত্রং তাবজ্জ্বালা প্রদীয়তে॥ স্বাঙ্গশীতং সমুদ্ধৃত্য মাণিক্যাভো ভবেদ্রসঃ। ঘৃতক্ষৌদ্রেণ সংমর্দ্য খাদয়েদ্রক্তিকাদ্বয়ং ॥ সংপূজ্য দেবদেবেশং কুষ্ঠরোগাদ্বিমুচ্যতে। স্ফুটিতং গলিতং কুষ্ঠং বাতরক্তং ভগন্দরং ॥ নাড়ীব্রণং ব্রণং দুষ্টমুপদংশং বিচর্চ্চিকাং। নাসাস্যসম্ভবান্ রোগান্ ক্ষতান্ হন্যাৎ সুদারুণান্॥ পুণ্ডরীকঞ্চ চর্ম্মাখ্যং বিস্ফোটং মণ্ডলং তথা। রসমাণিক্যং ॥ ৭২ ॥ কুষ্মাণ্ডত্রিফলাতৈলকন্যাকাঞ্জিকভাবিতং। তালকং তুল্যগন্ধং স্যাদর্দ্ধপারদমর্দ্দিতং ॥ অজাক্ষীরেণ নিম্বুককন্যাতোয়ৈর্দিনত্রয়ং। প্রত্যেকং ভাবয়েৎ শুষ্কং চক্রিকাকারতাং গতং ॥ বিপচেৎ হণ্ডিকামধ্যে পলাশ-ক্ষারমধ্যগং। যামান্ দ্বাদশ শীতেঽস্মিন্ প্রযোজ্যং রক্তিকাদ্বয়ং ॥ হন্ত্যষ্টাদশ কুষ্ঠানি রোমবিধ্বংসনং তথা। দ্বি-বিধং বাতরক্তঞ্চ নাড়ীদুষ্টব্রণানি চ ॥

তালকেশ্বরঃ ॥ ৭৩ ॥ দদ্রুম্নবাণাঙ্ঘ্রিরসং দত্ত্বা তালং সুচূর্ণিতং। পুনঃ পুনশ্চ সংমর্দ্দ্য শুষ্কং কৃত্বা পুটে দহেৎ ॥ বাণাঙ্ঘ্রিরসং শরপুঙ্খপত্ররসং ॥ দৃঢ়স্থাল্যাং ধৃতং ক্ষারং পালাশঞ্চাপ্যুপর্য্যধঃ। ততো জ্বালা প্রদাতব্যা দিনরাত্রে মৃতং ভবেৎ ॥ শুক্লবর্ণো যদা চ স্যাদগ্নৌ দত্তে ন ধূমকং। তদা জ্ঞাতং মৃতং তালং সর্ব্বকুষ্ঠবিনাশনং ॥ গলৎকুষ্ঠং বাতরক্তং তাম্রবর্ণঞ্চ মণ্ডলং। শীতপিত্তমহাদদ্রুচ্ছুচ্ছুন্দরবিনাশনং ॥ পথ্যং মসূরচণকং মুদ্গসূপং যথেচ্ছয়া। তালকেশ্বরঃ ॥ ৭৪ ॥ অতিদৃষ্টফলোঽয়ং ॥ সংমর্দ্দ্য তালকং শুষ্কং বংশপত্রাখ্যমুচ্চকৈঃ। কুষ্মাণ্ডনীরে সম্ভাব্য ত্রিদিনং শোধয়েৎ পুনঃ ॥ ঘৃতকন্যাদ্রবৈর্ভূয়ো ভাবয়েচ্চ দিনত্রয়ং। সংমর্দ্দ্য কাঞ্জিকেনৈব দগ্ধাম্লেন বিমর্দ্দয়েৎ ॥ সংমর্দ্দ্য চূর্ণসলিলে রসে পৌনর্নবে পুনঃ। ত্রিদিনং মর্দ্দয়িত্বা তু কারয়েৎ খটিকাকৃতিং ॥ স্থাল্যাং দৃঢ়তরায়াস্তু পলাশক্ষারসঞ্চয়ং। উপর্য্যধস্তালকস্য ক্ষারং দত্ত্বা শরাবকৈঃ ॥ পিধায় লেপয়েৎ যত্নাৎ পূরয়েৎ ক্ষারসঞ্চয়ং। পুনরূর্দ্ধং শরাবেণ লেপয়েত্তৎ দৃঢ়ং ততঃ ॥ দ্বাত্রিংশদযামপর্য্যন্তং বহ্নিজ্বালা প্রদীয়তে। এবং সিদ্ধেন তালেন গন্ধতুল্যেন মেলয়েৎ ॥ দ্বয়োস্তুল্যং জীর্ণতাম্রং বালুকাযন্ত্রগং পচেৎ। অয়ং তালেশ্বরো নাম রসঃ পরমদুর্লভঃ ॥ হন্ত্যষ্টাদশ কুষ্ঠানি বাতশোণিতনাশনঃ। রক্তমণ্ডলমত্যুগ্রং স্ফুটিতং গলিতং তথা ॥ বহুরূপং সর্ব্বজাতং নাশয়েদবিকল্পতঃ। দুষ্টব্রণঞ্চ বীসর্পং ত্বগ্দোষঞ্চ বিনাশয়েৎ ॥ দৃষ্টো বারসহস্রঞ্চ রোগবারণকেশরী। মহাতালকেশ্বরঃ ॥ ৭৫ ॥ কুষ্মাণ্ডত্রিফলাতৈলকন্যাকাঞ্জিকভাবিতং। তালুকং তুল্যগন্ধং স্যাদর্দ্ধপারদমর্দ্দিতং ॥ অজাক্ষীরেণ নিম্বুককন্যাতোয়ৈর্দিনত্রয়ং। প্রত্যেকং ভাবয়েচ্চুক্রং চক্রিকাকারতাং গতং ॥ বিপচেৎ হণ্ডিকামধ্যে পলাশক্ষারমধ্যগং। যামান্ দ্বাদশ শীতেঽস্মিন্ প্রযোজ্যং রক্তিকাদ্বয়ং ॥ হন্ত্যষ্টাদশ কুষ্ঠানি রোমবিধ্বংসনাদিকং। তালকেশ্বরঃ ॥ ৭৬ ॥ ইতি গোবিন্দবিশারদকৃতভৈষজ্যরত্নাবল্যাং কুষ্ঠচিকিৎসা সমাপ্তা ॥

কুষ্ঠকেতুঃ (পুং) ভূম্যাহুল্যঃ। ইতি রাজনির্ঘণ্টঃ ॥

কুষ্ঠগন্ধি (ক্লী) এলবালুকং। ইতি রাজনির্ঘণ্টঃ ॥

কুষ্ঠঘ্নঃ (পুং) হিতাবলী। ইতি রাজনির্ঘণ্টঃ॥

কুষ্ঠঘ্নী (স্ত্রী) কাকোডুম্বরিকা। ইতি রাজনির্ঘণ্টঃ ॥

কুষ্ঠনাশনঃ (পুং) বারাহীকন্দঃ। গৌরসর্ষপঃ। ইতি রাজনির্ঘণ্টঃ॥ ক্ষীরীশবৃক্ষঃ। ইতি রত্নমালা ॥

কুষ্ঠনাশিনী (স্ত্রী) সোমরাজিঃ। ইতি রত্নমালা ॥

কুষ্ঠলং (ক্লী) কুৎসিতস্থলং। ইতি সংক্ষিপ্তসারব্যাকরণং ॥

কুষ্ঠসূদনঃ (পুং) আরগ্বধঃ। ইতি রাজনির্ঘণ্টঃ ॥

কুষ্ঠহন্তা (পুং) হস্তিকন্দঃ। ইতি রাজনির্ঘণ্টঃ ॥

কুষ্ঠহন্ত্রী (স্ত্রী) বাকুচী। হাকুচ্ ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ ॥

কুষ্ঠহৃৎ (পুং) খদিরবৃক্ষঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

কুষ্ঠারিঃ (পুং) বিট্‌খদিরঃ। ইতি শব্দচন্দ্রিকা ॥ পটোলঃ। আদিত্যপত্রঃ। খদিরঃ। গন্ধকঃ। ইতি রাজনির্ঘণ্টঃ ॥

কুষ্ঠী [ন্] (ত্রি) কুষ্ঠরোগযুক্তঃ। যথা। কুষ্ঠ্যতিপাতকী। ইতি শুদ্ধিতত্ত্বং ॥

কুষ্মলং (ক্লী) ছেদনং। ইত্যুণাদিকোষঃ ॥

কুষ্মাণ্ডঃ (পুং স্ত্রী) শিবস্য গণদেবতাভেদঃ। ভ্রূণবিশেষঃ। ইতি মেদিনী ॥ বৃহৎফললতাবিশেষঃ। কুমড়া ইতি কোহড়া ইতি চ ভাষা। তৎপর্য্যায়ঃ। ঘৃণাবাসঃ ২ তিমিষঃ ৩ গ্রাম্যকর্কটী ৪। ইতি ত্রিকাণ্ডশেষঃ॥ কুষ্মাণ্ডকঃ৫ কর্কারুঃ ৬। ইত্যমরঃ॥ পুষ্পফলঃ ৭। ইতি রত্নমালা॥ কুষ্মাণ্ডী ৮ কর্কোটিকা ৯ কুষ্মাণ্ডী ১০ বৃহৎফলা ১১ সুফলা ১২ কুঞ্চফলা ১৩ নাগপুষ্পফলা ১৪ শুনী ১৫ কূষ্মাণ্ডঃ ১৬ শিখিবর্দ্ধকঃ ১৭। ইতি শব্দরত্নাবলী॥ কূষ্মাণ্ডকঃ ১৮। ইত্যমরটীকা॥ অপি চ। কুষ্মাণ্ডং স্যাৎ পুষ্পফলং পীতপুষ্পং বৃহৎফলং। কুষ্মাণ্ডং বৃংহণং বৃষ্যং গুরুপিত্তাস্রবাতনুৎ॥ বালং পিত্তাপহং শীতং মধ্যমং কফকারকং। বৃদ্ধং নাতিহিমং স্বাদু সক্ষারং দীপনং লঘু॥ বস্তিশুদ্ধিকরং চেতোরোগহৃৎ সর্ব্বদোষজিৎ ॥ * ॥ অথ কোহণ্ডী। কুষ্মাণ্ডী তু ভৃশং লঘ্বী কর্কারুরপি কীর্ত্তিতা। কর্কারুর্গ্রাহিণী শীতা রক্তপিত্তহরা গুরুঃ। পক্বা তিক্তাগ্নিজননী সক্ষারা কফবাতনুৎ॥ ইতি ভাবপ্রকাশঃ॥ অস্য ফলগুণাঃ। মূত্রাঘাতপ্রমেহকৃচ্ছ্রাশ্মরীনাশিত্বং। বিণ্মূত্রগ্লপনত্বং। তৃষ্ণার্ত্তিশমনত্বং। জীর্ণাঙ্গপুষ্টিপ্রদত্বং। শুক্রবৃদ্ধিকারিত্বং স্বাদুতরত্বং। অরোচকহরত্বং। বলকারিত্বং। পিত্তাপহত্বং। বল্লীফলানাং মধ্যে প্রবরত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ তস্য বালফলগুণঃ। পিত্তহরত্বং। মধ্যমফলগুণৌ। কফকারিত্বং। অতিগুরুপাকিত্বং॥ পক্বফলগুণাঃ। লঘুপাকিত্বং। উষ্ণত্বং। ক্ষাররসত্বং। অগ্নিদীপনত্বং। বস্তিশোধনত্বং। সর্ব্বদোষনাশিত্বং। হৃদ্যত্বং। চিত্তবিকারিণঃ পথ্যত্বঞ্চ॥ অস্য নাড়িকাগুণাঃ! ক্ষাররসত্বং। মধুরত্বং। গুরুত্বং। রূক্ষত্বং। রুচিকারিত্বং। বায়ুকফাশ্মরীশর্করারোগনাশিত্বঞ্চ॥ অস্য মজ্জগুণাঃ। শুক্রকারিত্বং। পিত্তনাশিত্বং। বস্তিশোধনত্বঞ্চ। ইতি রাজবল্লভঃ॥

কুষ্মাণ্ডকঃ (পুং) কুষ্মাণ্ডঃ। ইত্যমরঃ॥

কুষ্মাণ্ডী (স্ত্রী) উমা। ওষধী। ইতি হেমচন্দ্রঃ॥ কর্কারুঃ। ইতি রাজনির্ঘণ্টঃ॥ যাগক্রিয়াবিশেষঃ। ইতি শব্দরত্নাবলী॥

কুস ই কি ভাসনে। ইতি কবিকল্পদ্রুমঃ॥ পঞ্চমস্বরী। ই কুংস্যতে। কি কুংসয়তি কুংসতি। ভাসনং দীপ্তিঃ। ইতি দুর্গাদাসঃ॥

কুস য ইর শ্লিষি। ইতি কবিকল্পদ্রুমঃ॥

কুস্তুম্বরী (স্ত্রী) ধন্যাকং। ইত্যমরটীকায়াং ভরতঃ॥

কুস্তুম্বুরু (ক্লী) ধন্যাকং। ইত্যমরঃ॥

কুস্ম ক ঙ মতীক্ষিতে। ইতি কবিকল্পদ্রুমঃ॥ কুস্মিতি। হ্রস্বী দন্ত্যোপধঃ। মতীক্ষিতং বুদ্ধিপূর্ব্বকদর্শনং। কুস্মিৎ কুৎসিতমীষদ্ধাস্যং। ক ঙ কুস্ময়তে জনঃ। বুদ্ধ্যা পশ্যতি কুৎসিতং স্ময়তে বেত্যর্থঃ। ইতি দুর্গাদাসঃ॥

কুহ ৎ ক ঙ বিস্মায়নে। ইতি কবিকল্পদ্রুমঃ॥ হ্রস্বী। বিস্মায়নমন্যতো বিস্ময়োৎপাদনং। ঙ কুহয়তে। কুহকেনেন্দ্রজালিকো লোকং বিস্মায়য়তি ইত্যর্থঃ। স্মাতাং কুহয়তে বিস্মাপয়তে হেতুতো ভয়মিতি ভট্টমল্লদর্শনাদ্বিস্মাপনে ইতি পাঠ ইত্যেকে। ইতি দুর্গাদাসঃ॥

কুহ ব্য কুত্র। বৈদিকপ্রয়োগোঽয়ং। ইতি মুগ্ধবোধব্যাকরণং॥

কুহঃ (পুং) কুবেরঃ। ইতি হেমচন্দ্রঃ॥

কুহকং (ক্লী) মায়া। তৎপর্য্যায়ঃ। ইন্দ্রজালং ২ জালং ৩ কুসৃতিঃ ৪। তদ্যুক্তে ত্রি। তৎপর্য্যায়ঃ। ধূর্ত্তঃ ২ বঞ্চকঃ ৩ ব্যংসকঃ ৪ দাণ্ডাজিনিকঃ ৫ মায়ী ৬ জালিকঃ ৭। ইতি হেমচন্দ্রঃ॥

কুহকজীবী [ন্] (ত্রি) মায়াজীবী। বাজিকর ইতি ভাষা। ইতি মহাভারতং॥

কুহকস্বনঃ (পুং) কুক্কুটপক্ষী। ইতি হেমচন্দ্রঃ॥

কুহকস্বরঃ (পুং) কুক্কুটঃ। ইতি হারাবলী॥

কুহক্কঃ (পুং) তালভেদঃ। যথা। দ্রুতদ্বন্দ্বং লঘুদ্বন্দ্বং তালে কুহক্কসংজ্ঞকে। ইতি সঙ্গীতদামোদরঃ॥

কুহনং (ক্লী) মৃদ্ভাণ্ডবিশেষঃ। কাচভাজনং। ঈর্ষ্যালৌ ত্রি। ইতি মেদিনী॥

কুহনঃ (পুং) মূষিকঃ। সর্পঃ। ইতি হেমচন্দ্রঃ॥

কুহনা (স্ত্রী) দম্ভচর্য্যা। ইতি মেদিনী॥ লোভান্মিথ্যের্য্যাপথকল্পনা। ইত্যমরঃ॥ অর্থলিপ্সয়া মিথ্যাচারভেদস্য সম্পাদনা। দম্ভমাত্রকৃতধ্যানমৌনাদিঃ। অর্থলিপ্সয়া ধর্ম্মাশ্রবণং ইত্যন্যে। ইতি ভরতঃ॥

কুহনিকা (স্ত্রী) কুহনা। ইতি শব্দরত্নাবলী॥

কুহরং (ক্লী) গহ্বরং। ছিদ্রং। ইতি মেদিনী॥ কর্ণঃ। কণ্ঠশব্দঃ। গলঃ। অন্তিকং। ইত্যজয়পালঃ॥

কুহরঃ (পুং) নাগবিশেষঃ। ইতি মেদিনী॥

কুহরিতং (ক্লী) পিকালাপঃ। রতিধ্বনিঃ। ইতি মেদিনী॥ রটিতং। ইতি বিশ্বঃ॥

কুহলিঃ (পুং) পূগপুষ্পিকা। পান ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ॥

কুহা (স্ত্রী) কটুকী। ইতি শব্দচন্দ্রিকা॥

কুহুঃ (স্ত্রী) কুহূঃ। ইতি হেমচন্দ্রঃ॥

কুহূঃ (স্ত্রী) নষ্টেন্দুকলামাবাস্যা। ইত্যমরঃ॥ কোকিলালাপঃ। ইতি মেদিনী॥

কুহূকণ্ঠঃ (পুং) কোকিলঃ। ইতি শব্দরত্নাবলী॥

কুহূমুখঃ (পুং) কোকিলঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কুহূরবঃ (পুং) কোকিলঃ। ইতি রাজনির্ঘণ্টঃ॥

কুহূলং (ক্লী) সশল্যভূরন্ধ্রং। ইতি জটাধরঃ॥

কুহেড়িকা (স্ত্রী) কুজ্‌ঝটিকা। ইতি ভূরিপ্রয়োগঃ॥

কুহেড়ী (স্ত্রী) কুহেড়িকা। ইতি শব্দমালা॥

কুহেলিকা (স্ত্রী) কুজ্‌ঝটিঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কুক্ষঃ (পুং) কুক্ষিঃ। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ॥

কুক্ষিঃ (পুং) উদরং। ইত্যমরঃ॥

কুক্ষিম্ভরিঃ (ত্রি) আত্মম্ভরিঃ। স্বোদরপূরকঃ। ইত্যমরঃ॥

কুক্ষিরন্ধ্রঃ (পুং) নলঃ। ইতি রাজনির্ঘণ্টঃ॥

কু শি ঙ আভস্বরে। ইতি কবিকল্পদ্রুমঃ॥ শি ঙ কুবতে অকুবিষ্ট। ইতি দুর্গাদাসঃ॥

কূ ঞ গ শব্দে। ইতি কবিকল্পদ্রুমঃ॥ ঞ গ কূনাতি কূনীতে। হ্রস্বান্তোঽয়মিতি জৈমিনিঃ। দন্ত্যনোপধোঽপি। নকাররহিতো হ্রস্বান্ত ইতি রমানাথঃ। দীর্ঘান্ত ইতি জৌমরাঃ। ইতি দুর্গাদাসঃ॥

কূঃ (স্ত্রী) পিশাচী। ইতি শব্দমালা॥

কূকুদঃ (ত্রি) সংকৃত্যালঙ্কৃতাং কন্যাং যো দদাতি সঃ। ইত্যমরঃ॥

কূচঃ (পুং) স্তনঃ। ইত্যুণাদিকোষঃ॥

কূচিকা (স্ত্রী) তূলিকা। ইতি হেমচন্দ্রঃ॥

কূজ হিক্কনে। ইতি কবিকল্পদ্রুমঃ॥ দীর্ঘী। হিক্কনমব্যক্তশব্দঃ। কূজতি কোকিলঃ। ইতি দুর্গাদাসঃ॥

কূজিতং (ক্লী) পক্ষিধ্বনিঃ। ইতি হেমচন্দ্রঃ॥

কূট ক ঙ অপ্রসাদাপ্রদোঃ। ইতি কবিকল্পদ্রুমঃ॥ অপ্রদা দানাভাবঃ। ক ঙ কূটয়তে খলঃ স্ফুটমপ্যর্থং প্রসন্নং ন করোতি। কিঞ্চিন্ন দদাতি বেত্যর্থঃ। ইতি দুর্গাদাসঃ॥

কূট ৎ ক দাহে। মন্ত্রে। ইতি কবিকল্পদ্রুমঃ॥ দীর্ঘী। অচুকূটৎ। ইতি দুর্গাদাসঃ॥

কূটঃ (পুং) অগস্ত্যমুনিঃ। ইতি শব্দরত্নাবলী॥

কূটঃ (পুং স্ত্রী) গৃহং। ইতি শব্দরত্নাবলী॥

কূটঃ (পুং ক্লী) নিশ্চলঃ। রাশিঃ। লৌহমুদ্গরঃ। দম্ভঃ। মায়া। পর্ব্বতশৃঙ্গং। তুচ্ছঃ। সীরাবয়বঃ। যন্ত্রং। অনৃতং। ইতি মেদিনী॥ ভগ্নশৃঙ্গষণ্ডঃ। ইতি হেমচন্দ্রঃ॥ কৈতবং। ইত্যমরঃ॥

কূটকং (ক্লী) ফালং। ইত্যমরঃ॥

কূটকঃ (পুং) কবরী। ইতি ত্রিকাণ্ডশেষঃ॥ মুরানামগন্ধদ্রব্যং। ইতি শব্দমালা॥

কূটকৃৎ (পুং) শিবঃ। কায়স্থঃ। ইতি ত্রিকাণ্ডশেষঃ॥ কিতবে ত্রি॥

কূটজঃ (পুং) কুটজবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কূটপূর্ব্বঃ (পুং) হস্তিনাং ত্রিদোষজজ্বরঃ। ইতি ত্রিকাণ্ডশেষঃ॥ কূটপর্ব্বোঽপি ক্বচিৎ পাঠঃ॥

কূটপালকঃ (পুং) পিত্তজ্বরঃ। কুলালস্য পবনং। কুমারের পোয়ান্‌ ইতি ভাষা। ইতি হারাবলী॥

কূটযন্ত্রং (ক্লী) আমিষং দত্ত্বা মৃগপক্ষিবন্ধনার্থং যৎ সন্ধানযন্ত্রং নিবেশ্যতে তৎ। ফাঁদ্‌ ইতি ভাষা। তৎপর্য্যায়ঃ। উন্মাথঃ ২। ইত্যমরঃ॥

কূটশাল্মলিঃ (পুং) শাল্মলিবিশেষঃ। কাশিমালা ইতি খ্যাতঃ। কুৎসিতশাল্মলিঃ অনৃতশাল্মলির্বা। ইত্যন্যে। ইতি ভরতঃ॥

তৎপর্য্যায়ঃ। রোচনঃ ২। ইত্যমরঃ॥ রাজনির্ঘণ্টোক্তগুণপর্য্যায়ৌ রোহিতকশব্দে দ্রষ্টব্যৌ॥

কূটসংক্রান্তিঃ (স্ত্রী) অর্দ্ধরাত্রাতীতে সূর্য্যস্য রাশ্যন্তরগমনং। যথা। সংক্রান্তির্দ্বিবিধা যত্র পূর্ব্বং তত্র পরিত্যজেৎ। কর্ত্তব্যং কূটসংক্রান্ত্যাং স্নানদানতপোব্রতং॥ অর্দ্ধরাত্রব্যতীতে তু যদা সংক্রমতে রবিঃ। সা জ্ঞেয়া কূটসংক্রান্তির্মুনিভিঃ পরিকীর্ত্তিতা॥ ইতি বিদ্যানিধিকৃতজ্যোতিঃসাগরসারধৃতং বচনং॥ * ॥ অপি চ। অর্দ্ধরাত্রে ব্যতীতে তু সংক্রান্তির্যদহর্ভবেৎ। পূর্ব্বে ব্রতাদিকং কুর্য্যাৎ পরেদ্যুঃ স্নানদানয়োরিতি ভীমপরাক্রমীয়ং॥ স্নানদানয়োরিত্যত্র সপ্তমীনির্দ্দেশাৎ পরদিবসীয়স্নানদাননিমিত্তকং পূর্ব্বদিনে উপবাসসংযমনরূপং ব্রতাদিকং কুর্য্যাদিত্যর্থঃ। ইতি তিথ্যাদিতত্ত্বং॥

কূটস্থঃ (ত্রি) একরূপতয়া যঃ কালব্যাপী সঃ। ইত্যমরঃ॥ একেনৈব স্বভাবেন নিরবধিকালস্থ ব্যাপকো য আকাশাদিঃ। ইতি ভরতঃ॥ ব্যালনখঃ। ইতি রাজনির্ঘণ্টঃ॥

কূটস্থং (ক্লী) ব্যাঘ্রনখাখ্যগন্ধদ্রব্যং। ইতি জটাধরঃ॥

কূটসাক্ষী [ন্] (ত্রি) মিথ্যাসাক্ষী। ইতি ব্যবহারতত্ত্বং॥

কূটাগারং (ক্লী) বড়ভী। তৎপর্য্যায়ঃ। চন্দ্রশালিকা ২। ইতি ত্রিকাণ্ডশেষঃ॥ স্ত্রীণাং ক্রীড়াগারং। ইত্যাদিকাণ্ডটীকা॥

কূটার্থভাষিতা (স্ত্রী) প্রবন্ধকল্পনাকথা। রূপকথা ইতি ভাষা। ইতি শব্দরত্নাবলী॥

কূড় শি ঘান্যে। ভক্ষে। ইতি কবিকল্পদ্রুমঃ॥ ষষ্ঠস্বরী। ফলাভাবেঽপ্যস্য কূটাদৌ পাঠঃ প্রাচামনুরোধাৎ। প্রাঞ্চোঽপি ডান্তপ্রস্তাবাদিমং কূটাদৌ পঠিতবন্তঃ। শি কূড়তী কূড়ন্তী। ঘান্যং ঘনীভাবঃ। কূড়তি দুগ্ধং বহ্নিযোগাৎ। কূড়ত্যন্নং লোকঃ। ইতি দুর্গাদাসঃ॥

কূড্যং (ক্লী) ভিত্তিঃ। দেয়াল ইতি ভাষা। ইতি শব্দরত্নাবলী॥

কূণ ৎ ক সঙ্কোচে। ইতি কবিকল্পদ্রুমঃ॥ দীর্ঘী মূর্দ্ধন্যোপধঃ। অচুকূণচ্চক্ষুঃ সঙ্কুচিতমভূদিত্যর্থঃ। ইতি দুর্গাদাসঃ॥

কূণ ক ঙ সঙ্কুচি। ইতি কবিকল্পদ্রুমঃ॥ ষষ্ঠস্বরী। ক ঙ কূণয়তে চক্ষুঃ সঙ্কুচিতং স্যাদিত্যর্থঃ। পঞ্চমস্বরীত্যেকে। ইতি দুর্গাদাসঃ॥

কূণিঃ (ত্রি) কুণিঃ। রোগাদিনা কুঞ্চিতকরঃ। ইত্যমরটীকায়াং ভরতঃ॥

কূণিকা (স্ত্রী) শৃঙ্গং। বীণামূলস্থবংশশলাকা। তৎপর্য্যায়ঃ। কলিকা ২। ইতি হেমচন্দ্রঃ॥

কূদরঃ (পুং) জাতিবিশেষঃ। যথা। ব্রাহ্মণ্যামৃষিবীর্য্যেণ ঋতোঃ প্রথমবাসরে। কুৎসিতে চোদরে জাতঃ কূদরস্তেন কীর্ত্তিতঃ। তদশৌচং বিপ্রতুল্যং পতিতো হৃতুদোষতঃ। সদ্যঃ কোটকসংসর্গাদধমো জগতীতলে॥ ইতি ব্রহ্মবৈবর্ত্তপুরাণং॥

কূদ্দালঃ (পুং) কুদ্দালবৃক্ষঃ। ইত্যমরটীকায়াং রমানাথঃ॥

কূপ ৎ ক দৌর্ব্বল্যে। অয়ং ষষ্ঠস্বরী। ইতি ত্রিলোচনঃ॥ সপ্তমস্বরী। ইতি কবিকল্পদ্রুমটীকায়াং দুর্গাদাসঃ॥

কূপঃ (পুং) স্বনামখ্যাতো জলাধারঃ। কূয়া ইতি পাৎকূয়া ইতি চ ভাষা। তৎপর্য্যায়ঃ। অন্ধুঃ ২ প্রহিঃ ৩ উদপানং ৪। ইত্যমরঃ॥ অবটঃ ৫ কোট্টারঃ ৬। ইতি জটাধরঃ॥ কাতঃ ৭ কর্ত্তঃ ৮ বভ্রঃ ৯ কাটঃ ১০ খাতঃ ১১ অবতঃ ১২ ক্রিবিঃ ১৩ সূদঃ ১৪ উৎসঃ ১৫ ঋষ্যদাৎ ১৬ কারোতরাৎ ১৭ কুশেষঃ ১৮ কেবটঃ ১৯। ইতি ত্রয়োদশ কূপনামানি। ইতি বেদনিঘণ্টৌ ৩ অধ্যায়ঃ॥ তস্য লক্ষণং যথা। ভূমৌ খাতোঽল্পবিস্তারো গম্ভীরো মণ্ডলাকৃতিঃ। বদ্ধোঽবদ্ধঃ স কূপঃ স্যাত্তদম্ভঃ কৌপমুচ্যতে॥ ইতি ভাবপ্রকাশঃ॥ তজ্জলগুণাঃ। বাতকফনাশিত্বং। অগ্নিদীপনত্বং। লঘুত্বং। পিত্তবর্দ্ধনত্বং। ক্ষারত্বং। শীতকালে উষ্ণত্বং। উষ্ণকালে শীতত্বং। বসন্তকালে প্রশস্তত্বঞ্চ। ইতি রাজবল্লভঃ॥ গর্ত্তঃ। গুণবৃক্ষঃ। নদীমধ্যস্থিতো বৃক্ষঃ পর্ব্বতো বা। ইত্যুণাদিকোষঃ॥ কূপকঃ। কুপা ইতি ভাষা। মৃন্মানং। ইতি মেদিনী॥

কূপকঃ (পুং) নৌকাগুণবন্ধনস্তম্ভঃ। মাস্তুল ইতি ভাষা। ইত্যমরঃ॥ তৈলপাত্রং। কুপা ইতি ভাষা। কুকুন্দরং। উদপানং। চিতা। ইতি মেদিনী॥

কূপাঙ্গঃ (পুং) রোমাঞ্চঃ। ইতি শব্দরত্নাবলী॥ কূপাঙ্কোঽপি পাঠঃ॥

কূপারঃ (পুং) অকূপারঃ। ইত্যমরটীকা॥ কূবারোঽপি পাঠঃ॥

কূপিকা (স্ত্রী) অম্ভোগতোপলং। জলমধ্যস্থিতপর্ব্বতাদিঃ। ইতি মেদিনী॥

কূপী (স্ত্রী) পাত্রবিশেষঃ। যথা। ভাবয়েৎ সপ্তকৃত্বস্তচ্চণকাম্লজলেন চ। তৎ সংশোষ্য সংপিষ্য কূপীমধ্যে নিধাপয়েৎ॥ ইত্যজীর্ণচিকিৎসায়াং ভাবপ্রকাশঃ॥

কূমং (ক্লী) সরোবরং। ইতি জটাধরঃ॥

কূরঃ (পুং) ভক্তং। ইতি হলায়ুধ

কূর্চ্চং (ক্লী) মলাপকর্ষার্থকেশাদিমুষ্টিঃ। কুঁচি ইতি ভাষা। যথা। নরসিংহপুরাণে। ততঃ সমর্পয়েৎ কূর্চ্চমুশীরাদিবিনির্ম্মিতং। মলাপকর্ষণাদ্যর্থং শ্রীমন্মূর্ত্ত্যঙ্গসন্ধিতঃ॥ বিষ্ণুধর্ম্মোত্তরে চ। উশীরকূর্চ্চকং দত্ত্বা সর্ব্বপাপৈঃ প্রমুচ্যতে। দত্ত্বা গোবালজং কূর্চ্চং সর্ব্বাংস্তাপান্ ব্যপোহতি॥ দত্ত্বা চামরকং কূর্চ্চং শ্রিয়মাপ্নোত্যনুত্তমাং। ইতি শ্রীহরিভক্তিবিলাসস্য ৬ বিলাসে ৪৮ শ্লোকঃ॥

কূর্চ্চঃ (পুং ক্লী) ভ্রুবোর্মধ্যং। ভ্রূদ্বয়মধ্যস্থানং। ইত্যমরঃ॥ ময়ূরপুচ্ছমুষ্টিঃ। কুশমুষ্টিঃ। ইতি হরিবংশে পুণ্যকব্রতটীকায়াং নীলকণ্ঠঃ॥ কঠিনং। শ্মশ্রু। কৈতবং। ইতি মেদিনী॥ বিকত্থনং। দম্ভঃ। ক্ষিপ্রো পরিভাগঃ। স তু অঙ্গুষ্ঠাঙ্গুলিমধ্যস্য উপরি ভাগঃ। ইতি হেমচন্দ্রঃ॥ হৃং-বীজং। ইতি তন্ত্রং॥

কূর্চ্চঃ (পুং) শীর্ষং। ইতি ধরণী॥

কূর্চ্চশিরঃ [স্] (ক্লী) অঙ্ঘ্রিস্কন্ধঃ। গুড়্মুড়া ইতি ভাষা। ইতি হেমচন্দ্রঃ॥

কূর্চ্চশীর্ষঃ (পুং) জীবকবৃক্ষঃ। স তু অষ্টবর্গ-মধ্যপঠিতৌষধিঃ। ইত্যমরঃ॥

কূর্চ্চশীর্ষকঃ (পুং) জীবকঃ। ইতি রাজ-নির্ঘণ্টঃ॥

কূর্চ্চশেখরঃ (পুং) নারিকেলবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ।

কূর্চ্চিকা (স্ত্রী) ক্ষীরবিকৃতিঃ। ক্ষীরসা ইতি ভাষা। ইত্যমরঃ॥ সা দ্বিধা যথা। দধ্না সহ চ যৎ পক্বং ক্ষীরং সা দধিকূর্চ্চিকা। তক্রেণ পক্বং যৎ ক্ষীরং সা ভবেত্তক্র-কূর্চ্চিকা॥ ইতি ভরতঃ॥ সূচিকা। সূঁচ ইতি ভাষা। তূলিকা। তুলী ইতি ভাষা। কুট্মলঃ। কুঁড়ি ইতি ভাষা। কুঞ্চিকা। কুঁজি ইতি ভাষা। ইতি হেম-চন্দ্রো মেদিনী চ॥

কূর্দ্দ ঙ ক্রীড়ায়াং। ইতি কবিকল্পদ্রুমঃ॥ ষষ্ঠস্বরী। ঙ কূর্দ্দতে। ইতি দুর্গাদাসঃ॥

কূর্দ্দনং (ক্লী) ক্রীড়া। খেলা। ইত্যমরঃ॥

কূর্দ্দনী (স্ত্রী) চৈত্রীপূর্ণিমা। সা তু কাম-দেবোৎসবতিথিঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কূর্পং (ক্লী) ভ্রূদ্বয়মধ্যস্থলং। ইতি হেম-চন্দ্রঃ॥

কূর্পাসঃ (পুং) কঞ্চুকঃ। বারবাণঃ। ইতি হেমচন্দ্রঃ॥

কূর্ম্মঃ (পুং) জলজন্তুবিশেষঃ। কাছিম্ ইতি ভাষা। তৎপর্য্যায়ঃ। কচ্ছপঃ২ পঞ্চনখঃ৩ গুহ্যঃ৪ পঞ্চগুপ্তঃ৫ পীবরঃ৬ কমঠঃ৭ জলগুল্মঃ৮। ইতি জটাধরঃ॥ অস্য মাংসাদিগুণপর্য্যায়ান্তরৌ কচ্ছপশব্দে দ্রষ্টব্যৌ॥ *॥ বাহ্যবায়ুবিশেষঃ। যথা। উন্মীলনে স্মৃতঃ কূর্ম্মো ভিন্নাঞ্জনসমপ্রভঃ। ইতি শারদাতিলকটীকা॥ *॥ মুদ্রা-বিশেষঃ। যথা। বামহস্তস্য তর্জ্জন্যাং দক্ষিণস্য কনিষ্ঠয়া। তথা দক্ষিণতর্জ্জন্যাং বামাঙ্গুষ্ঠেন যোজয়েৎ॥ উন্নতং দক্ষিণা-ঙ্গুষ্ঠং বামস্য মধ্যমাদিকাঃ। অঙ্গুলীর্যোজ-য়েৎ পৃষ্ঠে দক্ষিণস্য করস্য চ॥ বামস্য পিতৃতীর্থেন মধ্যমানামিকে তথা। অধো-মুখে চ তে কুর্য্যাদ্দক্ষিণস্য করস্য চ॥ কূর্ম্মপৃষ্ঠসমং কুর্য্যাদ্দক্ষপাণিঞ্চ সর্ব্বতঃ। কূর্ম্মমুদ্রেয়মাখ্যাতা দেবতাধ্যানকর্ম্মণি॥ ইতি তন্ত্রসারঃ॥ *॥ সত্যযুগে সমুদ্র-মন্থনকালে মন্দরপর্ব্বতধারণার্থং কচ্ছপ-রূপভগবদবতারবিশেষঃ। যথা। ক্ষীরোদ-মধ্যে ভগবান্ কূর্ম্মরূপী স্বয়ং হরিঃ। ইতি পদ্মপুরাণং॥ অপি চ। বিলোক্য বিঘ্নেশ-বিধিং তদেশ্বরো দুরন্তবীর্য্যোঽবিতথো-ঽভিসন্ধিঃ। কৃত্বা বপুঃ কাচ্ছপমদ্ভুতং মহৎ প্রবিশ্য তোয়ং গিরিমুজ্জহার॥ ইতি শ্রীভাগবতং॥

কূর্ম্মচক্রং (ক্লী) কৃষিকর্ম্মোক্তকচ্ছপাকার-চক্রং। তস্যাকারো যথা। প্রাঙ্মুখো ভগ-বান্ দেবঃ কূর্ম্মরূপী ব্যবস্থিতঃ। আক্রম্য ভারতং বর্ষং নবভেদং যথাক্রমং॥ *॥ তত্র নক্ষত্রন্যাসক্রমঃ। মধ্যপ্রাগগ্নিযাম্যাদি-কৃত্তিকাদিত্রয়ত্রয়ৈঃ। ক্রূরবেধযুতৈস্তৈস্তু পীড্যন্তে তন্নিবাসিনঃ॥ *॥ তত্র বেধো যথা। পূর্ব্বাপরে ভবেদ্বেধো বেধশ্চোত্তর-

দক্ষিণে। ঈশানে রাক্ষসে বেধো বেধ আগ্নেয়মারুতে ॥ তারাত্রয়ান্বিতং তত্র সৌরিং যত্নেন চিন্তয়েৎ ॥ * ॥ তত্র বেধাদিজন্যদোষাঃ। অতিবৃষ্টিরনাবৃষ্টিঃ শলভা মূষিকাঃ খগাঃ। স্বচক্রং পরচক্রঞ্চ সপ্তৈতে সম্ভবন্তি চ ॥ এবং দেশগৃহগ্রাম-ক্ষেত্রনামর্ক্ষতো বদেৎ। তথা চ যত্র নক্ষত্রে দিব্যপার্থিবনাভসাঃ ॥ দৃশ্যন্তে সুমহোৎ-পাতাঃ স্বাং দিশং তত্র পীড়য়েৎ। সৌরি-র্বলাধিপো দুষ্টঃ স্বল্পবীর্য্যঃ শুভাবহঃ ॥ একদা পীড়য়েদ্যত্র ভানুজঃ কূর্ম্মপঙ্ককে। তত্র স্থানে মহাবিঘ্নো জায়তে নাত্র সংশয়ঃ ॥ দুষ্টস্থানে গতে চন্দ্রে কর্ত্তব্যং শান্তিপৌষ্টিকং ॥ * ॥ তচ্চক্রমধ্যস্থা দেশাঃ। মধ্যে সারস্বতা মৎস্যাঃ শূরসেনাঃ সমাথুরাঃ। পঞ্চালশাল্বমাণ্ডব্যকুরুক্ষেত্র-গজাহ্বয়াঃ ॥ মরুনৈমিষবিন্ধ্যাদ্রিপাণ্ড্য-ঘোষাঃ সযামুনাঃ। কাশ্যযোধ্যা প্রয়াগশ্চ গয়া বৈদেহকাদয়ঃ ॥ * ॥ তত্র পূর্ব্বস্থদেশাঃ। প্রাচ্যাং মাগধশোণৌ চ বারেন্দ্রীগৌড়-রাঢ়কাঃ। বর্দ্ধমানতমোলিপ্তপ্রাগ্জ্যো-তিষোদয়াদ্রয়ঃ ॥ * ॥ তত্রাগ্নিকোণস্থদেশাঃ। আগ্নেয্যামঙ্গবঙ্গোপবঙ্গত্রৈপুরকোশলাঃ। কলিঙ্গৌড্রান্ধ্রকিষ্কিন্ধ্যাবিদর্ভশবরাদয়ঃ ॥ * ॥ তত্র দক্ষিণস্থদেশাঃ। দক্ষিণেঽবন্তিমাহেন্দ্র-মলয়া ঋষ্যমূককাঃ। চিত্রকূটমহারণ্যকাঞ্চী-সিংহলকোঙ্কণাঃ ॥ কাবেরী তাম্রপর্ণী চ লঙ্কাত্রিকূটকাদয়ঃ ॥ * ॥ তত্র নৈর্ঋত-কোণস্থদেশাঃ। নৈর্ঋতে দ্রবিড়ানর্ত্তমহা-রাষ্ট্রাশ্চ রৈবতঃ। যবনঃ পহ্লবঃ সিন্ধুঃ পারসীকাদয়ো মতাঃ ॥ * ॥ তত্র পশ্চিমস্থ-দেশাঃ। পশ্চিমে হৈহয়াস্তাদ্রিম্লেচ্ছবাস-শকাদয়ঃ ॥ * ॥ তত্র বায়ুকোণস্থদেশাঃ বায়ব্যে গুজ্জরাটশ্চ নাটজালন্ধরাদয়ঃ ॥ * ॥ তত্র উত্তরস্থদেশাঃ। উত্তরে চীননেপাল-হূনকৈকেয়মন্দরাঃ। গান্ধারহিমবৎক্রৌঞ্চ-গন্ধমাদনমালবাঃ ॥ কৈলাসমদ্রকাশ্মীর-ম্লেচ্ছদেশাঃ খসাদয়ঃ ॥ * ॥ তত্রেশান-কোণস্থদেশাঃ। ঐশানে স্বর্ণভৌমশ্চ গঙ্গা-দ্বারস্তু টঙ্কণঃ। বাহ্লীকব্রহ্মপুরককিরাতা দরদাদয়ঃ ॥ ইতি জ্যোতিস্তত্ত্বং ॥ * ॥ জপযজ্ঞকর্ম্মোক্তকমঠাকারচক্রং। তস্য লিখনক্রমঃ। চতুরস্রাং ভুবং ভিত্ত্বা কোষ্ঠানাং নবকং লিখেৎ। পূর্ব্বকোষ্ঠাদি বিলিখেৎ সপ্তবর্গাননুক্রমাৎ ॥ লক্ষমীশে মধ্যকোষ্ঠে স্বরান্ যুগ্মক্রমাল্লিখেৎ। দিক্ষু পূর্ব্বাদিতো যত্র ক্ষেত্রাদ্যক্ষরসংস্থিতিঃ ॥ মুখং তত্তস্য জানীয়াৎ হস্তাবুভয়তঃ স্থিতৌ। কোষ্ঠে কুক্ষী উভে পাদৌ দ্বে শিষ্টং পুচ্ছমীরিতং ॥ ক্রমেণানেন বিভজেন্মধ্যস্থ-মপি ভাগতঃ ॥ * ॥ তস্যাঙ্গবিশেষে স্থিতস্য জপাদৌ গুণদোষাঃ যথা। মুখস্থো লভতে সিদ্ধিং করস্থঃ স্বল্পজীবনঃ। উদাসীনঃ কুক্ষিসংস্থঃ পাদস্থো দুঃখমাপ্নুয়াৎ ॥ পুচ্ছস্থঃ পীড্যতে মন্ত্রী বন্ধনোচ্চাটনা-দিভিঃ। কূর্ম্মচক্রমিদং প্রোক্তং মন্ত্রিণাং সিদ্ধিদায়কং ॥ * ॥ তদজ্ঞানে দোষঃ পিঙ্গলায়াং। কূর্ম্মচক্রমবিজ্ঞায় যঃ কুর্য্যাৎ জপযজ্ঞকং। তস্য যজ্ঞফলং নাস্তি সর্ব্বা-নর্থায় কল্পতে ॥ ইতি তন্ত্রসারঃ ॥

কূর্ম্মপৃষ্ঠঃ (পুং) অম্লানবৃক্ষঃ। ইতি শব্দচন্দ্রিকা ॥ কচ্ছপস্য পৃষ্ঠদেশশ্চ ॥

কূর্ম্মপৃষ্ঠকং (ক্লী) শরাবং। শরা ইতি ভাষা। ইতি শব্দচন্দ্রিকা ॥

কূর্ম্মরাজঃ (পুং) কচ্ছপরাজঃ। তৎপর্য্যায়ঃ। অকূপারঃ ২ পরীবর্ত্তঃ ৩। ইতি জটাধরঃ॥ তথাহি। পৃথ্বি স্থিরা ভব ভুজঙ্গম ধারয়ৈনাং ত্বং কূর্ম্মরাজ তদিদং দ্বিতয়ং দধীথাঃ। দিক্কুঞ্জরাঃ কুরুত তত্রিতয়ে দিধীর্ষামার্য্যঃ করোতু হরকার্ম্মুকমাততজ্যং ॥ ইতি মহানাটকং ॥ স এবাদিকচ্ছপঃ। যথা। বিলোক্য বিঘ্নেশবিধিং তদেশ্বরো দুরন্তবীর্য্যোঽবিতথোঽভিসন্ধিঃ। কৃত্বা বপুঃ কাচ্ছপমদ্ভুতং মহৎ প্রবিশ্য তোয়ং গিরিমুজ্জহার ॥ সুরাসুরেন্দ্রৈর্ভুজবীর্য্যবেপিতং পরিভ্রমন্তং গিরিমঙ্গপৃষ্ঠতঃ। বিভ্রত্তদাবর্ত্তনমাদিকচ্ছপো মেনেঽঙ্গকণ্ডূয়নমপ্রমেয়ঃ ॥ ইতি শ্রীভাগবতং ॥

কূল আবৃতৌ। ইতি কবিকল্পদ্রুমঃ॥ ষষ্ঠস্বরী। কূলতি বাটীং প্রাচীরং। ইতি দুর্গাদাসঃ॥

কূলং (ক্লী) নদ্যা জলসমীপস্থানং। তৎপর্য্যায়ঃ। রোধঃ ২ তীরং ৩ প্রতীরং ৪ তটং ৫ তটঃ ৬ তটী ৭। ইত্যমরঃ॥ রোধং ৮। ইতি শব্দরত্নাবলী ॥ বেলা ৯। ইতি জটাধরঃ॥ স্তূপঃ। সৈন্যপৃষ্ঠং। তড়াগঃ। ইতি বিশ্বঃ॥

কূলকং (ক্লী পুং) স্তূপঃ। ইতি মেদিনী। তীরং। ইতি বিশ্বঃ॥

কূলকঃ (পুং) কৃমিপর্ব্বতঃ। উএর ঢিপি ইতি ভাষা। ইতি মেদিনী॥

কূলঙ্কষঃ (পুং) সমুদ্রঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কূলঙ্কষা (স্ত্রী) নদী। ইতি হলায়ুধঃ॥

কূলভূঃ (স্ত্রী) তীরভূমিঃ। ইতি হেমচন্দ্রঃ॥

কূলবতী (স্ত্রী) নদী। ইতি রাজনির্ঘণ্টঃ॥

কূলহণ্ডকঃ (পুং) জলাবর্ত্তঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কূবরঃ (পুং ক্লী) যুগন্ধরঃ। যত্র রথস্য যুগকাষ্ঠমাসজ্যতে তত্র। ইত্যমরমেদিনীকরৌ॥

কূবরঃ (পুং) কুব্জকঃ। কুঁজা ইতি ভাষা। মনোজ্ঞে ত্রি। ইতি মেদিনী॥

কূবরী (স্ত্রী) কম্বলাচ্ছাদিতরথঃ। ইতি হলায়ুধঃ॥

কূষ্মাণ্ডঃ (পুং) গণদেবতাবিশেষঃ। কর্কারুঃ। ইতি হেমচন্দ্রঃ॥

কূষ্মাণ্ডকঃ (পুং) কূষ্মাণ্ডঃ। ইত্যমরটীকায়াং স্বামী॥

কূষ্মাণ্ডী (স্ত্রী) অম্বিকা। ওষধিঃ। ইতি হেমচন্দ্রঃ॥

কূহনা (স্ত্রী) কুহনা। ইতি শব্দরত্নাবলী॥

কূহা (স্ত্রী) কুজ্ঝটিকা। কুয়া ইতি ভাষা। ইতি শব্দরত্নাবলী॥

কৃ ঞ কৃতৌ। ইতি কবিকল্পদ্রুমঃ॥ ঞ করতি করতে। অয়ং কৈশ্চিৎ ন মন্যতে। ইতি দুর্গাদাসঃ॥

কৃ ঞ ন বধে। ইতি কবিকল্পদ্রুমঃ॥ ঞ ন কৃণোতি কৃণুতে। ইতি দুর্গাদাসঃ॥

কৃ ঞ দ ডু কৃতৌ। ইতি কবিকল্পদ্রুমঃ॥ ঞ দ করোতি কুরুতে। ডু কৃত্রিমং। অস্মাদন্যানিমকারোঽপ্যগুণী বা বক্তব্য

ইতি বররুচিঃ ॥ তেন কিং করোমি কথং কুর্মি কান্নুগচ্ছামি মাধব। দুর্য্যোধনবিহীনস্তু শূন্যং সর্ব্বমিদং জগৎ ॥ ইতি দুর্গাদাসঃ ॥

কৃকঃ ( পুং ) গলঃ। ইতি হেমচন্দ্রঃ ॥

কৃকণঃ ( পুং ) ক্রকরপক্ষী। কয়ার ইতি ভাষা। ইত্যমরঃ ॥ কৃমিঃ। ইতি হারাবলী ॥

কৃকরঃ ( পুং ) শিবঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ শরীরবাহ্যপঞ্চবায়ন্তর্গতবায়ুবিশেষঃ। যথা কৃকরস্তু ক্ষুতে চৈব জবাকুসুমসন্নিভঃ। ইতি শারদাতিলকটীকা ॥ কৃকণপক্ষী। ইতি শব্দরত্নাবলী ॥ চব্যকং। করবীরবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কৃকলা ( স্ত্রী ) পিপ্পলী। ইতি রাজনির্ঘণ্টঃ ॥

কৃকলাশঃ ( পুং ) কৃকলাসঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

কৃকলাসঃ ( পুং ) জন্তুবিশেষঃ। কাঁকলাস ইতি ভাষা। তৎপর্য্যায়ঃ। সরটঃ ২। ইত্যমরঃ ॥ বেদারঃ ৩ ক্রকচপাৎ ৪ তৃণাঞ্জনঃ ৫ প্রতিসূর্য্যঃ ৬। ইতি ত্রিকাণ্ডশেষঃ ॥ প্রতিসূর্য্যকযানকঃ ৭ বৃত্তিস্থঃ ৮ কণ্টকাগারঃ ৯ দুরারোহঃ ১০ ক্রমাশ্রয়ঃ ১১। ইতি রাজনির্ঘণ্টঃ ॥

কৃকবাকুঃ ( পুং ) কুক্কুটঃ। ইত্যমরঃ ॥ ময়ূরঃ। সরটঃ। ইতি মেদিনী ॥

কৃকবাকুধ্বজঃ ( পুং ) কার্ত্তিকেয়ঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

কৃকাটিকা ( স্ত্রী ) ঘাটা। ঘাড় ইতি ভাষা। ইত্যমরঃ

কৃকূলাসঃ ( পুং ) কৃকলাসঃ। ইত্যমরটীকা ॥

কৃচ্ছ্রং ( ক্লী ) কষ্টং। তদ্বতি ত্রি। সান্তপনাদিব্রতং। ইত্যমরঃ ॥ পাপং। ইতি মেদিনী ॥ মূত্রকৃচ্ছ্ররোগঃ। ইতি রাজনির্ঘণ্টঃ ॥ স্মৃতৌ ব্রতে পুংলিঙ্গোঽপ্যয়ং ॥

কৃচ্ছ্রাতিকৃচ্ছ্রঃ ( পুং ) ব্রতবিশেষঃ। যথা বশিষ্ঠঃ। অম্বুভক্ষস্তৃতীয়ঃ কৃচ্ছ্রাতিকৃচ্ছ্রো যাবৎ সকৃদাদদীত। যাবদেকবারমুদকং হস্তেন গ্রহীতুং শক্নোতি তাবন্নবসু দিবসেষু ভক্ষয়িত্বা ত্র্যহমুপবাসঃ কৃচ্ছ্রাতিকৃচ্ছ্রঃ ॥ সুমন্তুর্যথা। দ্বাদশরাত্রং নিরাহারঃ স কৃচ্ছ্রাতিকৃচ্ছ্রঃ। এতৎ কৃচ্ছ্রাতিকৃচ্ছ্রদ্বয়ং দ্বাদশাহসাধ্যমশক্তবিষয়ং ॥ ব্রহ্মপুরাণং। চরেৎ কৃচ্ছ্রাতিকৃচ্ছ্রঞ্চ পিবেত্তোয়ঞ্চ শীতলং। একবিংশতিরাত্রন্তু কালেষ্বেতেষু সংযতঃ ॥ কালেষ্বিতি প্রাতঃসায়ংমধ্যাহ্নেষ্বিত্যর্থঃ। ইতি প্রায়শ্চিত্তবিবেকঃ ॥

কৃচ্ছ্রারিঃ ( পুং ) বিল্বান্তরবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কৃচ্ছ্রার্দ্ধঃ ( পুং ) দিনষট্‌কসাধ্যব্রতবিশেষঃ যথাপস্তম্বঃ। সায়ং প্রাতস্তথৈকৈকং দিনদ্বয়মযাচিতং। দিনদ্বয়ঞ্চ নাশ্নীয়াৎ কৃচ্ছ্রার্দ্ধঃ সোঽভিধীয়তে ॥ ইতি প্রায়শ্চিত্তবিবেকঃ ॥

কৃণুঃ ( পুং ) চিত্রকরজাতিঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

কৃৎ ঈ শ প ছিদি। ইতি কবিকল্পদ্রুমঃ ॥ ঈ কৃত্তঃ। শ প কৃন্ততি। নৃৎকৃৎবৃদিত্যাদিসূত্রেণ বেমত্বাদেব নিষ্ঠায়াং অনিমত্বে সিদ্ধে অস্য পূর্ব্বস্য চ ঈদনুবন্ধো

নেম্ ভীশ্বীত্যস্য ব্যভিচারসূচনার্থঃ। তেন ধাবুঞ্জবে মৃজীত্যাদীনাং ধাবিতাঃ পান্থ-সার্থা ইত্যাদি সিদ্ধমিতি রমানাথঃ। মনিতঃ যতিতং ইত্যাদি সিদ্ধমিতি ক্রমদীশ্বরঃ। ঈদিৎকরণমাভ্যাং যঙ্লুকি নিষ্ঠায়া ইম্ নিষেধার্থং ইতি কেচিৎ। চরীকৃত্ত ইতি। কিন্তৈতন্মতে ধাবিতাদীনাং ধাবনং ধাবঃ ধাবোঽস্য জাতঃ ধাবিতঃ ইত্যাদি সমাধানং। বিরহিনিকৃন্তনকুন্তমুখাকৃতি-কেতকি দন্তুরিতাশে ইত্যত্র নিকৃন্তন ইতি জয়দেবোক্তং নিকৃন্তং করোতি ইতি শত্রন্তাৎ ঞৌ নন্দ্যাদিত্বাদনে সাধ্যং। ইতি দুর্গাদাসঃ ॥

কৃৎ ঈ ধ বেষ্টে। ইতি কবিকল্পদ্রুমঃ॥ ঈ কৃত্তঃ। ধ কৃর্ণত্তি চকর্ত্ত। ইতি দুর্গাদাসঃ॥

কৃতং (ক্লী) সত্যযুগং। পর্য্যাপ্তং। ইত্যমরঃ॥ ফলং। ইতি হেমচন্দ্রঃ॥ অলমর্থঃ। ইতি মেদিনী॥

কৃতং (ত্রি) বিহিতং। হিংসিতং। ইতি মেদিনী॥ নিষ্পাদিতং। ইত্যমরটীকায়াং মথুরানাথঃ॥

কৃতকং (ক্লী) বিড়্লবণং। ইত্যমরঃ॥

কৃতকঃ (ত্রি) কৃত্রিমঃ। ইত্যুণাদিকোষঃ॥

কৃতকর্ম্মা [ন্] (ত্রি) কার্য্যক্ষমঃ। তৎপর্য্যায়ঃ। প্রবীণঃ২ শিক্ষিতঃ৩ নিষ্ণাতঃ৪ নিপুণঃ৫ দক্ষঃ ৬ কৃতহস্তঃ ৭ কৃতমুখঃ৮ কুশলঃ৯ চতুরঃ১০ অভিজ্ঞঃ ১১ বিজ্ঞঃ১২ বৈজ্ঞানিকঃ ১৩ পটুঃ ১৪ ছেকঃ ১৫ বিদগ্ধঃ ১৬। ইতি হেমচন্দ্রঃ॥

কৃতকৃত্যঃ (ত্রি) নিষ্পন্নকর্ম্মা। সমাপ্তকার্য্যঃ। যথা। কৃতকৃত্যো বিধির্মন্যে ন বর্দ্ধয়তি তস্য তাং। ইতি মাঘঃ॥

কৃতকোটিঃ (পুং) কাশ্যপমুনিঃ। উপবর্ষমুনিঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কৃতক্রিয়ঃ (ত্রি) কৃতকার্য্যঃ। যথা। বিপ্রঃ শুধ্যত্যপঃ স্পৃষ্ট্বা ক্ষত্রিয়ো বাহনায়ুধং। বৈশ্যঃ প্রতোদং রশ্মীন্ বা যষ্টিং শূদ্রঃ কৃতক্রিয়ঃ॥ ইতি মনুঃ॥

কৃতঘ্নঃ (ত্রি) কৃতহন্তা। অর্থাৎ যেন কেনচিৎ কৃতস্য উপকারাদের্ঘাতকঃ অস্বীকর্ত্তা। নেমক্‌হারাম ইতি পারস্যভাষা। তস্য প্রায়শ্চিত্তাভাবো যথা। ব্রহ্মঘ্নে চ সুরাপে চ চৌরে চ গুরুতল্পগে। নিষ্কৃতির্বিহিতা সদ্ভিঃ কৃতঘ্নে নাস্তি নিষ্কৃতিঃ॥ স তু বহুবিধো যথা। ভর্ত্তৃপিণ্ডাপহর্ত্তা চ পিতৃপিণ্ডাপহারকঃ। যস্মাদ্‌গৃহীত্বা বিদ্যাঞ্চ দক্ষিণাং ন প্রযচ্ছতি॥ পুত্রান্ স্ত্রিয়শ্চ যো দ্বেষ্টি যশ্চ তান্ ঘাতয়েন্নরঃ। কৃতস্য দোষং বদতি সকামান্ ন করোতি যঃ॥ ন স্মরেচ্চ কৃতং যস্তু আশ্রমান্ যস্তু দূষয়েৎ। সর্ব্বাংস্তানৃষিভিঃ সার্দ্ধং কৃতাঘ্নানব্রবীন্মনুঃ॥ ইতি প্রায়শ্চিত্ততত্ত্বে স্কন্দপুরাণবচনং॥

কৃতচ্ছিদ্রা (স্ত্রী) কোশাতকী লতা। ইতি রাজনির্ঘণ্টঃ॥

কৃতজ্ঞঃ (ত্রি) মর্য্যাদী। কুক্কুরে পুং। ইতি মেদিনী॥

কৃতত্রা (স্ত্রী) ত্রায়মাণা লতা। ইতি রাজনির্ঘণ্টঃ॥

কৃতদাসঃ ( পুং ) নারদোক্তপঞ্চদশদাসান্তর্গত-দাসবিশেষঃ । স তু কেনচিন্নিমিত্তেন এতাবৎকালপর্য্যন্তং তবাহং দাস ইতি কৃতসময়ঃ। ইতি ক্রমসংগ্রহঃ ॥

কৃতপুঙ্খঃ ( ত্রি ) বাণশিক্ষাবিচক্ষণঃ । ভাল তিরান্দাজ ইতি ভাষা। তৎপর্য্যায়ঃ। কৃতহস্তঃ ২ সুপ্রয়োগবিশিখঃ ৩। ইত্যমরঃ ॥

কৃতপূর্ব্বী [ ন্ ] ( ত্রি ) পূর্ব্বনিষ্পন্নকর্ম্মা। কৃতং পূর্ব্বমনেন ইত্যর্থে ইন্। যথা। কৃতপূর্ব্বী কটং । ইতি সংক্ষিপ্তসার-ব্যাকরণং ॥

কৃতফলং ( ক্লী ) কক্কোলং। ইতি রাজ-নির্ঘণ্টঃ ॥

কৃতফলা ( স্ত্রী ) কোলশিম্বী। ইতি রাজ-নির্ঘণ্টঃ ॥

কৃতমালঃ ( পুং ) আরগ্বধবৃক্ষঃ। সোঁদালি ইতি ভাষা। ইত্যমরঃ ॥ কর্ণিকারবৃক্ষঃ। স তু লঘ্বারগ্বধঃ। ছোট শোনালু ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ ॥

কৃতমুখঃ ( ত্রি ) কৃতকর্ম্মা। কৃতী। ইত্যমরঃ ॥

কৃতলক্ষণঃ ( ত্রি ) গুণৈঃ প্রতীতঃ। শৌর্য্যাদি-গুণৈঃ খ্যাতঃ। ইত্যমরঃ ॥

কৃতবেতনঃ ( ত্রি ) বেতনেন নিযুক্তদাসাদিঃ। ইতি স্মৃতিঃ ॥

কৃতবেধকঃ ( পুং ) ঘোষাতকী। শ্বেতঘোষা ইতি ভাষা। ইতি রত্নমালা ॥

কৃতবেধনা ( স্ত্রী ) কোষাতকী লতা। ইতি রাজনির্ঘণ্টঃ ॥

কৃতশ্রমঃ ( ত্রি ) মহোৎসাহঃ। যেন শ্রমঃ কৃতঃ সঃ। ইতি শব্দমালা ॥

কৃতসাপত্নিকা ( স্ত্রী ) কৃতসপত্নীভাবা। প্রথম-বিবাহিতা স্ত্রী। তৎপর্য্যায়ঃ। অধ্যূঢ়া ২ অধিবিন্না ৩। ইত্যমরঃ ॥ কৃতসাপত্নকা ৪ কৃতসাপত্নী ৫ কৃতসাপত্নীকা ৬। ইতি টীকায়াং রমানাথঃ ॥

কৃতহস্তঃ ( ত্রি ) কৃতপুঙ্খঃ। সুশিক্ষিতশর-মোক্ষযোধাদিঃ। ইত্যমরঃ ॥

কৃতাঞ্জলিঃ ( ত্রি ) যেনাঞ্জলিঃ কৃতঃ সঃ। যথা। ছন্দোগপরিশিষ্টং। তদসংযুক্তপার্ষ্ণির্ব্বা একপাদর্দ্ধপাদপি। কুর্য্যাৎ কৃতাঞ্জলির্ব্বাপি ঊর্দ্ধবাহুরথাপি বা ॥ ইতি সূর্য্যোপস্থানে আহ্নিকাচারতত্ত্বং ॥ ওষধিভেদে পুং। ইতি ধরণী ॥

কৃতান্তঃ ( পুং ) যমঃ। সিদ্ধান্তঃ। দৈবং। পূর্ব্বদেহকৃতং ফলোন্মুখীভূতং শুভাশুভ-কর্ম্ম। অকুশলকর্ম্ম। ইত্যমরঃ॥ শনি বারঃ। ইতি শব্দচন্দ্রিকা ॥

কৃতান্তজনকঃ (পুং) সূর্য্যঃ। ইতি হেমচন্দ্রঃ।

কৃতান্তা ( স্ত্রী ) রেণুকানামগন্ধদ্রব্যং। ইতি শব্দচন্দ্রিকা ॥

কৃতার্থঃ ( ত্রি ) কৃতপ্রয়োজনঃ। কৃতকার্য্যঃ। যথা। বিলোকনেনৈব তবামুনা মুনে কৃতঃ কৃতার্থোঽস্মি নিবর্হিতাংহসা। ইতি মাঘঃ ॥

কৃতালয়ঃ ( পুং ) ভেকঃ। ইতি ত্রিকাণ্ড-শেষঃ ॥

কৃতাবশক্‌থিকঃ ( ত্রি ) বস্ত্রাদিনা কৃতপৃষ্ঠজানু-জঙ্ঘাদিবন্ধঃ। ইতি কাত্যায়নঃ ॥

কৃতিঃ (স্ত্রী) করণং। হিংসা। ইতি মেদিনী ॥

কৃতিকরঃ ( পুং ) রাবণঃ। ইতি শব্দমালা ॥

কৃতী [ ন্ ] ( ত্রি ) নিপুণঃ। পণ্ডিতঃ। ইত্যমরঃ॥ সাধুঃ। পুণ্যবান্। ইতি শব্দরত্নাবলী॥

কৃত্তং ( ত্রি ) ছিন্নং। চেষ্টিতং। ইতি হেমচন্দ্রঃ

কৃত্তিঃ ( স্ত্রী ) কৃষ্ণসারাদিচর্ম্ম। ইত্যমরঃ॥ ত্বক্। ভূর্জঃ। কৃত্তিকানক্ষত্রং। ইতি মেদিনী॥

কৃত্তিকা ( স্ত্রী ) অশ্বিন্যাদিসপ্তবিংশত্যন্তর্গততৃতীয়নক্ষত্রং। তৎপর্য্যায়ঃ। বহুলা ২ অগ্নিদেবা ৩। ইতি হেমচন্দ্রঃ॥ তস্যা রূপং। অগ্নিশিখাকৃতিষট্‌তারকাময়ং। ইতি কালিদাসঃ॥ ক্ষুরনিভষট্‌তারাময়ং। ইতি কেচিৎ। তস্যা অধিষ্ঠাত্রী দেবতা অগ্নিঃ। সা তু মিশ্রগণান্তর্গতা। ইতি দীপিকা॥ তত্র জাতস্য ফলং। ক্ষুধাধিকঃ সত্যধনৈর্ব্বিহীনো বৃথাটনোৎপন্নমতিঃ কৃতঘ্নঃ। কঠোরবাক্ চাহিতকর্ম্মকৃৎ স্যাৎ চেৎ কৃত্তিকায়াং মনুজঃ প্রসূতঃ॥ ইতি কোষ্ঠীপ্রদীপঃ॥

কৃত্তিকাভবঃ ( পুং ) চন্দ্রঃ। ইতি শব্দচন্দ্রিকা॥

কৃত্তিকাসুতঃ ( পুং ) কার্ত্তিকেয়ঃ। ইতি হেমচন্দ্রঃ॥

কৃত্তিবাসঃ ( পুং ) শিবঃ। ইতি দ্বিরূপকোষঃ॥

কৃত্তিবাসাঃ [ স্ ] ( পুং ) শিবঃ। ইত্যমরঃ॥

কৃত্নুঃ ( ত্রি ) শিল্পী। ইত্যুণাদিকোষঃ॥

কৃত্যং ( ক্লী ) কার্য্যং। প্রয়োজনং। ইতি হেমচন্দ্রঃ॥

কৃত্যঃ ( ত্রি ) বিদ্বিষ্টঃ। কার্য্যং। ইতি মেদিনী॥ ধনাদিভির্ভেদ্যঃ। ইতি জটাধরঃ॥ প্রত্যয়বিশেষঃ। যথা। কৃত্যাঃ ষট্ তে সমাখ্যাতাঃ ক্যপ্‌ণ্যতৌ ভাবকর্ম্মণোঃ। তব্যানীয়াবনস্তাদ্‌যৎকেলিমঃ কর্ম্মকর্ত্তরি। ইতি সুপদ্মসম্মতা কারিকা॥ কর্ত্তরি কর্ম্মণি চার্থে বিহিতাঃ কৃত্যা বাচ্যলিঙ্গাঃ স্যুঃ। কৃত্যাস্তব্যাদয়ঃ বোপদেবমতে তেল্যাঃ কৃদ্ভ্যোঃ কভাবঃ ইত্যুক্তেঃ কচিৎ কৃত্যাঃ কর্ত্তর্য্যপি স্যুঃ। কর্ত্তরি যথা ভব্যস্তরুঃ ভব্যা লতা ভব্যং বনং। কর্ম্মণি যথা। গ্রামো গন্তব্যঃ নগরী গন্তব্যা পুরং গন্তব্যং। কর্ত্তরি কর্ম্মণি কিং স্নাতব্যং স্থেয়ং ব্রহ্মভূয়ং। ব্রহ্মহত্যা ইহ ভাবে কৃত্যাঃ। অসংজ্ঞায়ামিত্যেব সূর্য্যোঽর্কঃ ভিদ্যোদ্ধ্যৌ নদৌ। ইত্যমরটীকায়াং ভরতঃ॥

কৃত্যা ( স্ত্রী ) ক্রিয়া। যথা কাং কৃত্যামকার্ষীঃ। দেবতা। যজ্ঞদেবতাবিশেষঃ। যথা প্রহ্লাদচরিতে। কৃত্যামুৎপাদয়ামাসুর্জ্বালামালোজ্জ্বলাকৃতিং। ইত্যমরভরতৌ॥ তস্যা ধ্যানং যথা। ক্রোধাজ্জ্বলন্তীং জ্বলনং বমন্তীং সৃষ্টিং দহন্তীং দিতিজং গ্রসন্তীং। ভীমং নদন্তীং প্রণমামি কৃত্যাং রোরূয়মাণাং ক্ষুধয়োগ্রকালীং॥ *॥ অভিচারিকী ক্রিয়া। যথা। রোগকৃত্যা গ্রহাদীনাং নিরাসঃ শান্তিরীরিতা। বশ্যং জনানাং সর্ব্বেষাং বিধেয়ত্বমুদীরিতং॥ ইতি ষট্‌কর্ম্মদীপিকা॥

কৃত্রিমং ( ক্লী ) বিড়্‌লবণং। ইতি মেদিনী॥ কাচলবণং। জবাদিনামগন্ধদ্রব্যং। রসাঞ্জনং। ইতি রাজনির্ঘণ্টঃ॥

কৃত্রিমঃ (পুং) সিহ্লকঃ। ইতি মেদিনী॥ দ্বাদশবিধপুত্ত্রান্তর্গতপুত্ত্রবিশেষঃ। ইতি জটাধরঃ॥

কৃত্রিমঃ (ত্রি) করণাজ্জাতঃ। রচিতঃ। ইতি মেদিনী॥

কৃত্রিমকঃ (পুং) তুরুষ্কনামগন্ধদ্রব্যং। ইতি রাজনির্ঘণ্টঃ॥

কৃত্রিমধূপকঃ (পুং) নানাসুগন্ধিদ্রব্যকৃতদশাঙ্গাদিধূপঃ। তৎপর্য্যায়ঃ। বৃকধূপঃ ২। ইত্যমরঃ॥

কৃত্রিমপুত্ত্রঃ (পুং) দ্বাদশবিধপুত্ত্রমধ্যে পুত্ত্রবিশেষঃ। তথা চ মনুঃ। সদৃশন্তু প্রকুর্য্যাদ্যং গুণদোষবিচক্ষণং। পুত্ত্রং পুত্ত্রগুণৈর্যুক্তং স বিজ্ঞেয়শ্চ কৃত্রিমঃ॥ অস্যার্থঃ। যঃ পুনঃ সমানজাতীয়ং পিত্রোঃ পারলৌকিকশ্রাদ্ধাদিকরণাকরণাভ্যাং গুণদোষৌ ভবত ইত্যেবমাদিজ্ঞং পুত্ত্রগুণৈশ্চ মাতাপিত্রোরারাধনাদিভির্যুক্তং পুত্ত্রং কুর্য্যাৎ স কৃত্রিমাখ্যঃ পুত্ত্রো বোধ্যঃ। ইতি কুল্লুকভট্টঃ॥ পুত্তলিকা। যথা। সা কন্দুকৈঃ কৃত্রিমপুত্ত্রকৈশ্চ রেমে। ইতি কুমারসম্ভবঃ॥

কৃত্রিমমিত্রঃ (পুং) রচিতবন্ধুঃ। ইতি স্মৃতিঃ॥

কৃৎসং (ক্লী) জলং। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ॥ সমুদায়ঃ। ইত্যুণাদিকোষঃ॥

কৃৎস্নং (ক্লী) জলং। সর্ব্বং। কুক্ষিঃ। ইতি মেদিনী॥

কৃৎস্নঃ (ত্রি) অশেষঃ। সমস্তঃ। ইত্যমরঃ॥

কৃদরঃ (পুং) ধান্যাদিগৃহং। গোলা ইতি ভাষা। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ॥

কৃন্তত্রং (ক্লী) লাঙ্গলং। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ॥

কৃন্তনং (ক্লী) ছেদনং। যথা। কৃন্তনং নখকেশানাং ছেদনঞ্চ বনস্পতেঃ। শাবাশৌচে ন কর্ত্তব্যং পাঠনং পঠনস্তথা॥ ইতি কর্ম্মলোচনে নারদবচনং॥

কৃপ ঊ ঙ ব ৯ কল্পনে। ইতি কবিকল্পদ্রুমঃ॥ সপ্তমস্বরী। কল্পনং সামর্থ্যং। ঊ অকল্পিষ্ট অকৢপ্ত। ঙ কল্পতে কল্পবৃক্ষবদিতি হলায়ুধঃ॥ ব কল্প্স্যতি চিকৢপ্সতি। ৯ অকৢপৎ। হতে তস্মিন্ প্রিয়ং শ্রুত্বা কল্প্তা প্রীতিং পরাং প্রভুরিতি অনেকার্থত্বেঽস্তর্ভূতণ্যর্থত্বাৎ জনয়িতেত্যর্থঃ। ইতি দুর্গাদাসঃ॥

কৃপ ৎক দৌর্ব্বল্যে। ইতি কবিকল্পদ্রুমঃ॥ সপ্তমস্বরী। কৃপয়তি। ষষ্ঠস্বরীতি ত্রিলোচনঃ। ইতি দুর্গাদাসঃ॥

কৃপ কি যুতৌ। চিত্রে। কল্পনে। ইতি কবিকল্পদ্রুমঃ॥ সপ্তমস্বরী। কি কল্পয়তি কল্পতি। কৃপঃ কৢপোঽকৃপাদাবিতি কৢপাদেশঃ। ইতি দুর্গাদাসঃ॥

কৃপঃ (পুং) কৃপাচার্য্যঃ। স তু দ্রোণাচার্য্যশ্যালকঃ। ইতি মেদিনী॥ তথা চোক্তং। গৌতমান্মিথুনং জজ্ঞে শরস্তম্বাচ্ছরদ্বতঃ। অশ্বত্থাম্নশ্চ জননী কৃপশ্চৈব মহাবলঃ॥ ইতি মহাভারতং॥ ব্যাসঃ। ইতি ধরণী॥

কৃপণঃ (ত্রি) অদাতা। তৎপর্য্যায়ঃ। কদর্য্যঃ ২ কিম্পচানঃ ৩ মিতম্পচঃ ৪ ক্ষুদ্রঃ ৫। ইত্যমরঃ॥ কিম্পচঃ ৬ অনমিতম্পচঃ ৭। ইতি তট্টীকা॥ মন্দঃ ৮ কীকটঃ ৯

কুমুৎ ১০ কীণাশঃ ১১। ইতি জটাধরঃ॥ কুৎসিতঃ। ইতি মেদিনী॥ মহাব্যসন-প্রাপ্তঃ। দীনঃ। যথা। মহদ্বা ব্যসনং প্রাপ্তো দীনঃ কৃপণ উচ্যতে। ইতি রামায়ণং॥

কৃপণঃ (পুং) কৃমিঃ। ইতি মেদিনী॥

কৃপা (স্ত্রী) করুণা। ইত্যমরঃ॥

কৃপাণঃ (পুং) খড়্গঃ। ইত্যমরঃ॥

কৃপাণকঃ (পুং) খড়্গঃ। ইতি হারাবলী॥

কৃপাণিকা (স্ত্রী) ছুরিকা। ইতি হেমচন্দ্রঃ॥

কৃপাণী (স্ত্রী) কর্ত্তরী। ইত্যমরঃ॥ ছুরিকা। ইতি মেদিনী॥

কৃপাদ্বৈতঃ (পুং) বুদ্ধভেদঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কৃপালুঃ (ত্রি) দয়ালুঃ। ইত্যমরঃ॥

কৃপী (স্ত্রী) দ্রোণাচার্য্যপত্নী। ইতি মেদিনী॥

কৃপীটং (ক্লী) উদরং। জলং। ইতি মেদিনী॥ বিপিনং। ইন্ধনং। ইতি শব্দরত্নাবলী॥

কৃপীটপালঃ (পুং) কেনিপাতঃ। সমুদ্রঃ। ইতি মেদিনী॥ পবনঃ। ইতি শব্দরত্নাবলী॥

কৃপীটযোনিঃ (পুং) অগ্নিঃ। ইত্যমরঃ॥

কৃপীপতিঃ (পুং) দ্রোণাচার্য্যঃ। ইতি শব্দমালা॥

কৃপীপুত্রঃ (পুং) অশ্বত্থামা। ইতি ভূরিপ্রয়োগঃ॥

কৃপীসুতঃ (পুং) অশ্বত্থামা। ইতি ত্রিকাণ্ডশেষঃ॥

কৃমিঃ (পুং) কীটঃ। পোকা ইতি ভাষা। তৎপর্য্যায়ঃ। নীলাঙ্গঃ ২। ইত্যমরঃ॥ নীলাঙ্গুঃ ৩ ক্রিমিঃ ৪। ইতি তট্টীকা॥ পুণ্ড্রঃ ৫। ইতি জটাধরঃ॥ লাক্ষা। কৃমিলঃ। খরঃ। ইতি বিশ্বমেদিন্যৌ॥ উদরজাতকীটরোগঃ। তস্যৌষধং যথা। বদরীকারবীমূলং গুড়াজ্যেন সমন্বিতং। অগ্নিনা সাধিতং জগ্ধ্বা কৃমীন্ সর্ব্বান্ হরেচ্ছিব॥ ইতি গারুড়ে ১৭৪ অধ্যায়ঃ॥ অন্যৎ ক্রিমিশব্দে দ্রষ্টব্যং॥

কৃমিকণ্টকং (ক্লী) বিড়ঙ্গং। চিত্রাঙ্গঃ। উড়ুম্বরঃ। ইতি মেদিনী॥

কৃমিকোষোত্থং (ত্রি) কৌষেয়ং। রেসমি কাপড় ইতি ভাষা। ইত্যমরঃ॥

কৃমিঘ্নঃ (পুং) বিড়ঙ্গঃ। ইত্যমরঃ॥ পলাণ্ডুঃ। কোলকন্দঃ। পারিভদ্রঃ। ভল্লাতকঃ। ইতি রাজনির্ঘণ্টঃ॥

কৃমিঘ্না (স্ত্রী) হরিদ্রা। ইতি ভাবপ্রকাশঃ॥

কৃমিঘ্নী (স্ত্রী) ধূম্রপত্রা। বিড়ঙ্গঃ। ইতি রাজনির্ঘণ্টঃ॥

কৃমিজং (ক্লী) অগুরু। ইত্যমরঃ॥

কৃমিজগ্ধং (ক্লী) অগুরু। ইতি রাজনির্ঘণ্টঃ॥

কৃমিজা (স্ত্রী) লাক্ষা। ইতি রাজনির্ঘণ্টঃ॥

কৃমিরিপুঃ (পুং) বিড়ঙ্গঃ। ইতি শব্দরত্নাবলী॥

কৃমিলা (স্ত্রী) বহুপ্রসূঃ। বহুসন্তানপ্রসবা। ইতি হেমচন্দ্রঃ॥ কৃমিযুক্তে ত্রি॥

কৃমিবৃক্ষঃ (পুং) কোষাম্রঃ। ইতি ভাবপ্রকাশঃ॥

কৃমিশঙ্খঃ (পুং) জীবশঙ্খঃ। তৎপর্য্যায়ঃ। কৃমিজলজঃ ২ কৃমিবারিরুহঃ ৩ জন্তুকম্বুঃ ৪। অস্য গুণঃ। রসবীর্য্যাদৌ শঙ্খসদৃশত্বং। ইতি রাজনির্ঘণ্টঃ॥

কৃমিশুক্তিঃ (স্ত্রী) জলশুক্তিঃ। ইতি রাজনির্ঘণ্টঃ॥

কৃমিশৈলকঃ (পুং) বল্মীকঃ। ইতি শব্দরত্নাবলী॥

কৃমীলকঃ (পুং) বনমুদ্গঃ। ইতি রাজনির্ঘণ্টঃ॥

কৃব ই ন কৃতৌ। হিংসে। ইতি কবিকল্পদ্রুমঃ॥ হ্রস্বী। ন কৃণোতি। ই কৃণ্ব্যতে। ইতি দুর্গাদাসঃ॥

কৃবিঃ (পুং) বাপযন্ত্রং। তাঁত ইতি ভাষা। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ॥

কৃশ ইর্ য কার্শ্যে। ইতি কবিকল্পদ্রুমঃ॥ কার্শ্যং কৃশকরণং। ইর্ অকৃশৎ অকর্শীৎ। অস্মাৎ পুষাদিত্বান্নিত্যং ঙ ইত্যন্যে। য কৃশ্যতি চন্দ্রং কৃষ্ণপক্ষঃ। ইতি দুর্গাদাসঃ॥

কৃশঃ (ত্রি) অল্পঃ। সূক্ষ্মঃ। ইত্যমরঃ॥

কৃশরঃ (পুং) তুল্যতিলান্নং। তৎপর্য্যায়ঃ। ত্রিসরঃ ২। ইতি হেমচন্দ্রঃ॥

কৃশরা (স্ত্রী) তিলৌদনং। ইতি হারাবলী॥ দ্বিদলমিশ্রিতান্নং। খিচড়ী ইতি ভাষা। যথা। তণ্ডুলা দালিসংমিশ্রা লবণার্দ্রকহিঙ্গুভিঃ। সংযুক্তাঃ সলিলৈঃ সিদ্ধাঃ কৃশরা কথিতা বুধৈঃ॥ অস্যা গুণাঃ। শুক্রবলকারিত্বং। গুরুত্বং। পিত্তকফপ্রদত্বং। দুর্জরত্বং। বিষ্টম্ভমলমূত্রকারিত্বঞ্চ। ইতি ভাবপ্রকাশঃ॥

কৃশলা (স্ত্রী) কেশঃ। ইতি শব্দচন্দ্রিকা॥

কৃশশাখঃ (পুং) পর্পটঃ। ইতি রাজনির্ঘণ্টঃ॥

কৃশাঙ্গী (স্ত্রী) প্রিয়ঙ্গুবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥ সূক্ষ্মাঙ্গবিশিষ্টে ত্রি॥

কৃশানুঃ (পুং) অগ্নিঃ। ইত্যমরঃ॥ চিত্রকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কৃশানুরেতাঃ [স্] (পুং) শিবঃ। ইত্যমরঃ॥

কৃশাশ্বী [ন্] (পুং) নটঃ। ইত্যমরঃ॥

কৃশিকা (স্ত্রী) আখুকর্ণীলতা। ইতি রাজনির্ঘণ্টঃ॥

কৃষ ঔ আকৃষি। বিলেখনে। ইতি কবিকল্পদ্রুমঃ॥ ঔ অকার্ক্ষীৎ অকৃক্ষৎ অক্রাক্ষীৎ। আকৃষি আকর্ষণে। কর্ষন্তি তুরগা রথং। ইতি দুর্গাদাসঃ॥

কৃষ ঔ ঞ শ আকর্ষণে। বিলেখনে। ইতি কবিকল্পদ্রুমঃ॥ শ ঞ কৃষতি কৃষতে ভূমিং কৃষকঃ। ঔ অকার্ক্ষীৎ। অক্রাক্ষীৎ অকৃক্ষৎ। ইতি দুর্গাদাসঃ॥

কৃষকঃ (ত্রি) কর্ষকঃ। ইতি মেদিনী॥

কৃষকঃ (পুং) ফালঃ। ইতি মেদিনী॥ বৃষঃ। ইতি শব্দচন্দ্রিকা॥

কৃষাণুঃ (পুং) কৃশানুঃ। ইত্যমরটীকা॥

কৃষিঃ (স্ত্রী) বৈশ্যবৃত্তিবিশেষঃ। কর্ষণং। চাস ইতি ভাষা। তৎপর্য্যায়ঃ। অনৃতং ২। ইত্যমরঃ॥ প্রনৃতং ৩। ইতি জটাধরঃ॥

কৃষিকঃ (পুং) ফালঃ। ইত্যমরঃ॥ কর্ষকঃ। ইতি কেচিৎ॥

কৃষীবলঃ (ত্রি) কর্ষকঃ। কৃষিজীবী। মরঃ॥ কাকজঙ্ঘাবৃক্ষঃ। ইতি রত্নমালা॥

কৃষ্করঃ (পুং) শিবঃ। ইতি ত্রিকাণ্ডশেষঃ

কৃষ্টং (ত্রি) কৃষ্টক্ষেত্রং। চসা ক্ষেৎ ইতি ভাষা। তৎপর্য্যায়ঃ। সীত্যং ২ হল্যং ৩। ইত্যমরঃ॥

কৃষ্টপচ্যঃ (ত্রি) ব্রীহিঃ। ধান্যং। ইতি মুগ্ধবোধব্যাকরণং ॥

কৃষ্টপাক্যং (ত্রি) কৃষ্টপচ্যং। ইতি ব্যাকরণং ॥

কৃষ্টিঃ (পুং) পণ্ডিতঃ। ইত্যমরঃ॥ কর্ষণে স্ত্রী। ইতি মেদিনী ॥

কৃষ্ণং (ক্লী) মরিচং। ইত্যমরঃ॥ লৌহং। ইতি জটাধরঃ॥ নীলাঞ্জনং। ইতি রাজনির্ঘণ্টঃ॥ কালাগুরু। ইতি রত্নমালা ॥

কৃষ্ণঃ (পুং) ভগবদবতারবিশেষঃ। স চ ভূভারহরণার্থং দ্বাপরযুগশেষে ভাদ্রকৃষ্ণাষ্টম্যাং রোহিণীনক্ষত্রে নিশীথে দেবকীগর্ভে আবির্ভূতঃ। তস্য জন্মসময়ো যথা। উচ্চস্থাঃ শশিভৌমচান্দ্রিশনয়ো লগ্নং বৃষো লাভগো জীবঃ সিংহতুলালিষু ক্রমবশাৎ পূষোশনোরাহবঃ। নৈশীথঃ সময়োঽষ্টমী বুধদিনং ব্রহ্মর্ক্ষমত্র ক্ষণে শ্রীকৃষ্ণাভিধমম্বুজেক্ষণমভূদাবিঃ পরং ব্রহ্ম তৎ ॥ ইতি খমাণিক্যনামজ্যোতিগ্রর্ন্থঃ॥ তন্নামব্যুৎপত্তির্যথা। কৃষির্ভূবাচকঃ শব্দো ণশ্চ নির্ব্বৃতিবাচকঃ। তয়োরৈক্যং পরং ব্রহ্ম কৃষ্ণ ইত্যভিধীয়তে॥ ইতি শ্রীধরস্বামী॥ তস্য ধ্যানং। যথা। স্মরেদ্বৃন্দাবনে রম্যে মোহয়ন্তমনারতং। গোবিন্দং পুণ্ডরীকাক্ষং গোপকন্যাঃ সহস্রশঃ॥ আত্মনো বদনাম্ভোজে প্রেষিতাক্ষিমধুব্রতাঃ। পীড়িতাঃ কামবাণেন চিরমাশ্লেষণোৎসুকাঃ॥ মুক্তাহারলসৎপীনতুঙ্গস্তনভরানতাঃ।স্রস্তধম্মিল্লবসনা মদস্খলিতভাষণাঃ॥ দন্তপংক্তিপ্রভোদ্ভাসিস্পন্দমানাধরাঞ্চিতাঃ। বিলোভয়ন্তী বিবিধৈর্বিভ্রমৈর্ভাবগর্ব্বিতৈঃ॥ ফুল্লেন্দীবরকান্তিমিন্দুবদনং বর্হাবতংসপ্রিয়ং শ্রীবৎসাঙ্কমুদারকৌস্তভধরং পীতাম্বরং সুন্দরং। গোপীনাং নয়নোৎপলার্চ্চিততনুং গোগোপসংঘাবৃতং গোবিন্দং কলবেণুবাদনপরং দিব্যাঙ্গভূষং ভজে॥ ইতি তন্ত্রসারঃ॥*॥ অস্য পাদচিহ্নানি যথা। চন্দ্রার্দ্ধং কলসং ত্রিকোণধনুষী খং গোষ্পদং প্রোষ্ঠিকাং শঙ্খং সব্যপদেঽথ দক্ষিণপদে কোণাষ্টকং স্বস্তিকং। চক্রং ছত্রযবাঙ্কুশং ধ্বজপবী জম্বূর্দ্ধরেখাম্বুজং বিভ্রাণং হরিমূনবিংশতিমহালক্ষ্মার্চ্চিতাঙ্ঘ্রিং ভজে॥ ইতি রূপচিন্তামণিঃ॥*॥ অস্যাবতারা হ্যসংখ্যেয়াঃ। তত্র যুগাবতারাশ্চত্বারঃ যথা। কৃতে শুক্লশ্চতুর্ব্বাহুর্জটিলো বল্কলাম্বরঃ। কৃষ্ণাজিনোপবীতাক্ষান্ বিভ্রদ্দণ্ডং কমণ্ডলুং॥ ত্রেতায়াং রক্তবর্ণোঽসৌ চতুর্ব্বাহুস্ত্রিমেখলঃ। হিরণ্যকেশস্ত্রয্যাত্মা স্রুক্স্রুবাদ্যুপলক্ষণঃ॥ দ্বাপরে ভগবান্ শ্যামঃ পীতবাসা নিজায়ুধঃ। শ্রীবৎসাদিভিরঙ্কৈশ্চ লক্ষণৈরুপলক্ষিতঃ॥ নানাতন্ত্রবিধানেন কলাবপি যথা শৃণু। কৃষ্ণবর্ণং ত্বিষা কৃষ্ণং সাঙ্গোপাঙ্গাস্ত্রপার্ষদং॥ যজ্ঞৈঃ সংকীর্ত্তনপ্রায়ৈর্যজন্তীহ সুমেধসঃ॥*॥ অস্য কল্পাবতারা দশ যথা। মৎস্যঃ ১ কূর্ম্মঃ ২ বরাহঃ ৩ নৃসিংহঃ ৪ বামনঃ ৫ পরশুরামঃ ৬ রামঃ ৭ কৃষ্ণঃ ৮ বুদ্ধঃ ৯ কল্কী ১০। ইতি শ্রীভাগবতং॥*॥ তস্য গুণাশ্চতুঃষষ্টির্যথা। অয়ং নেতা সুরম্যাঙ্গঃ ১

সর্ব্বসল্লক্ষণান্বিতঃ ২। রুচির ৩ স্তেজসা
যুক্তো ৪ বলীয়ান্৫ বয়সান্বিতঃ ৬॥ বিবি-
ধাদ্ভুতভাষাবিৎ ৭ সত্যবাক্যঃ ৮ প্রিয়-
ম্বদঃ ৯। বাবদূকঃ ১০ সুপাণ্ডিত্যো ১১
বুদ্ধিমান্ ১২ প্রতিভান্বিতঃ ১৩॥ বিদগ্ধ ১৪
শ্চতুরো ১৫ দক্ষঃ ১৬ কৃতজ্ঞঃ ১৭ সুদৃঢ়-
ব্রতঃ ১৮। দেশকালসুপাত্রজ্ঞঃ ১৯ শাস্ত্র-
চক্ষুঃ ২০ শুচি ২১ র্ব্বশী ২২॥ স্থিরো ২৩
দান্তঃ ২৪ ক্ষমাশীলো ২৫ গম্ভীরো ২৬
ধৃতিমান্ ২৭ সমঃ ২৮। বদান্যো ২৯
ধার্ম্মিকঃ ৩০ শূরঃ ৩১ করুণো ৩২ মান্য-
মানকৃৎ ৩৩॥ দক্ষিণো ৩৪ বিনয়ী ৩৫
হ্রীমান্ ৩৬ শরণাগতপালকঃ ৩৭।
সুখী ৩৮ ভক্তসুহৃৎ ৩৯ প্রেমবশ্যঃ ৪০
সর্ব্বশুভঙ্করঃ ৪১॥ প্রতাপী ৪২ কীর্ত্তি-
মান্ ৪৩ রক্তলোকঃ ৪৪ সাধুসমাশ্রয়ঃ ৪৫।
নারীগণমনোহারী ৪৬ সর্ব্বারাধ্যঃ ৪৭
সমৃদ্ধিমান্ ৪৮॥ বরীয়া ৪৯ নীশ্বর ৫০
শ্চেতি গুণাস্তস্যানুকীর্ত্তিতাঃ। সদা স্বরূপ-
সম্প্রাপ্তঃ ৫১ সর্ব্বজ্ঞো ৫২ নিত্য-
নূতনঃ ৫৩॥ সচ্চিদানন্দসান্দ্রাঙ্গঃ ৫৪
সর্ব্বসিদ্ধিনিষেবিতঃ ৫৫। অবিচিন্ত্যমহা-
শক্তিঃ ৫৬ কোটিব্রহ্মাণ্ডবিগ্রহঃ ৫৭॥
অবতারাবলীবীজং ৫৮ হতারিগতি-
দায়কঃ ৫৯। আত্মারামগণাকর্ষী ৬০ ত্যমী
কৃষ্ণে কিলাদ্ভুতাঃ॥ সর্ব্বাদ্ভুতচমৎকার-
লীলাকল্লোলবারিধিঃ ৬১। অতুল্যমধুর-
প্রেমমণ্ডিতপ্রিয়মণ্ডলঃ ৬২॥ ত্রিজগন্-
মানসাকর্ষী মুরলীকলকূজিতঃ ৬৩। অস-
মানোর্দ্ধরূপশ্রীবিস্মাপিতচরাচরঃ ৬৪॥

লীলাপ্রেম্না প্রিয়াধিক্যং মাধুর্য্যে বেণু
রূপয়োঃ। ইত্যসাধারণং প্রোক্তং গোবি-
ন্দস্য চতুষ্টয়ং॥ এবং গুণাশ্চতুর্ভেদা
শ্চতুঃষষ্টিরুদাহৃতাঃ॥ *॥ অস্য গদা
কৌমোদকী। খড়্গঃ নন্দকঃ। ধনুঃ
শার্ঙ্গং। শঙ্খঃ পাঞ্চজন্যঃ। চক্রং সুদ
র্শনঃ। মণিঃ কৌস্তুভঃ। বাহনঃ গরুড়ঃ।
রথঃ গরুড়ধ্বজঃ। রথস্যাশ্বাঃ শৈব্যসুগ্রীব
মেঘবাহনপুষ্করাঃ। ইতি শ্রীভাগবতং॥ *॥
অস্য পত্ন্যঃ গোলোকে বৃন্দাবনে চ
শ্রীরাধা। বৈকুণ্ঠে লক্ষ্মীঃ। ইতি ব্রহ্ম
বৈবর্ত্তং॥ দ্বারকায়াং রুক্মিণী ১ জাম্ব
বতী ২ সত্যভামা ৩ কালিন্দী ৪ মিত্র
বিন্দা৫ নাগ্নজিতী৬ ভদ্রা৭ লক্ষ্মণা৮ এতাঃ
প্রধানাঃ। অন্যা অপি শতাধিকষোড়শ-
সহস্রাণি স্থিতাঃ। ইতি শ্রীভাগবতং॥ *॥
ব্রজস্থিতস্যাস্য সখায়শ্চতুর্ব্বিধাঃ। তত্র
কিঞ্চিদ্বয়সাধিকাঃ সুহৃদো যথা। সুভদ্রঃ ১
মণ্ডলীভদ্রঃ ২ ভদ্রবর্দ্ধনঃ ৩ গোভটঃ ৪
যক্ষেন্দ্রভটঃ ৫ ভদ্রাঙ্গঃ ৬ বীরভদ্রঃ ৭
মহাগুণঃ৮ বিজয়ঃ৯ বলভদ্র১০ ইত্যাদ্যাঃ॥
বয়সা ন্যূনাঃ সখায়ো যথা। বিশালঃ ১
বৃষভঃ ২ ওজস্বী ৩ দেবপ্রস্থঃ ৪ বরূথপঃ ৫
মণিবন্ধঃ ৬ করন্ধম ৭ ইত্যাদ্যাঃ॥ বয়সা
তুল্যাঃ প্রিয়সখা যথা। শ্রীদামা ১ সুদামা ২
বসুদামকঃ ৩ কিঙ্কিণী ৪ স্তোককৃষ্ণঃ ৫
অংশুঃ ৬ ভদ্রসেনঃ ৭ বিলাসী ৮ পুণ্ড-
রীকবিটঙ্কাক্ষঃ ৯ কলবিঙ্ক ১০ ইত্যাদ্যাঃ॥
পূর্ব্বতঃ শ্রেষ্ঠা আত্যন্তিকরহস্যেষু যুক্তাঃ
ভাববিশেষবিশিষ্টাঃ প্রিয়নর্ম্মসখা যথা।

সুবলঃ ১ অর্জুনঃ ২ গন্ধর্ব্বঃ ৩ বসন্তঃ ৪ উজ্জ্বলঃ ৫ ইত্যাদ্যাঃ ॥ ইতি ভক্তিরসামৃতসিন্ধুঃ ॥*॥ বৃন্দাবনস্থিতস্য অস্য সখ্যঃ শতকোটয়ঃ। তত্র বেদমুনিদেবস্ত্রিয়োঽপি কৃষ্ণারাধনার্থং গোপাঙ্গনারূপেণ জাতাঃ। ব্রজে অস্য নিত্যপ্রিয়া যথা। রাধা ১ চন্দ্রাবলী ২ বিশাখা ৩ ললিতা ৪ শ্যামা ৫ পদ্মা ৬ শৈব্যা ৭ ভদ্রিকা ৮ তারা ৯ বিচিত্রা ১০ গোপালী ১১ ধনিষ্ঠা ১২ পালিকা ১৩ খঞ্জনাক্ষী ১৪ মনোরমা ১৫ মঙ্গলা ১৬ বিমলা ১৭ লীলা ১৮ কৃষ্ণা ১৯ শারী ২০ বিশারদা ২১ তারাবলী ২২ চকোরাক্ষী ২৩ শঙ্করী ২৪ কুঙ্কুমাদয়ঃ ২৫। এতাসাং মধ্যে বিশাখা ললিতা পদ্মা শৈব্যা এতাশ্চতস্রঃ সখ্যঃ। অন্যা যূথাধিপাঃ। তাসাং মধ্যে রাধাদয়োঽষ্টৌ সুভগাঃ। আসাং রাধাচন্দ্রাবল্যৌ শ্রেষ্ঠে। অনয়োরপি রাধাধিকা। ইত্যুজ্জ্বলনীলমণিঃ ॥*॥ অপি চ। চন্দ্রাবলী ১ সুশীলা ২ তস্যাঃ সহচর্য্যঃ ষোড়শসহস্রাণি। শশিকলা ৩ অস্যাঃ সহচর্য্যঃ চতুর্দ্দশসহস্রাণি। চন্দ্রমুখী ৪ অস্যাঃ সহচর্য্যঃ ত্রয়োদশসহস্রাণি। মাধবী ৫ অস্যাঃ সহচর্য্যঃ একাদশসহস্রাণি। কদম্বমালা ৬ অস্যাঃ সহচর্য্যঃ ত্রয়োদশসহস্রাণি। কুন্তী ৭ অস্যাঃ সহচর্য্যঃ দশসহস্রাণি। যমুনা ৮ অস্যাঃ সহচর্য্যঃ চতুর্দ্দশসহস্রাণি। জাহ্নবী ৯ অস্যাঃ সহচর্য্যঃ নবসহস্রাণি। পদ্মমুখী ১০ অস্যাঃ সহচর্য্যঃ নবসহস্রাণি। সাবিত্রী ১১ অস্যাঃ সহচর্য্যঃ পঞ্চদশসহস্রাণি। সুধামুখী ১২ অস্যাঃ সহচর্য্যঃ চতুর্দ্দশসহস্রাণি। শুভা ১৩ অস্যাঃ সহচর্য্যঃ চতুর্দ্দশসহস্রাণি। পদ্মা ১৪ অস্যাঃ সহচর্য্যঃ চতুর্দ্দশসহস্রাণি। গৌরী ১৫ অস্যাঃ সহচর্য্যঃ চতুর্দ্দশসহস্রাণি। সর্ব্বমঙ্গলা ১৬ অস্যাঃ সহচর্য্যঃ ষোড়শসহস্রাণি। সরস্বতী ১৭ অস্যাঃ সহচর্য্যঃ ত্রয়োদশসহস্রাণি। ভারতী ১৮ অস্যাঃ সহচর্য্যঃ দশসহস্রাণি। অপর্ণা ১৯ অস্যাঃ সহচর্য্যঃ চতুর্দ্দশসহস্রাণি। রতিঃ ২০ অস্যাঃ সহচর্য্যঃ দশসহস্রাণি। গঙ্গা ২১ অস্যাঃ সহচর্য্যঃ চতুর্দ্দশসহস্রাণি। অম্বিকা ২২ অস্যাঃ সহচর্য্যঃ ষোড়শসহস্রাণি। সতী ২৩ অস্যাঃ সহচর্য্যঃ ত্রয়োদশসহস্রাণি। নন্দিনী ২৪ অস্যাঃ সহচর্য্যঃ দশসহস্রাণি। সুন্দরী ২৫ অস্যাঃ সহচর্য্যঃ ত্রয়োদশসহস্রাণি। কৃষ্ণপ্রিয়া ২৬ অস্যাঃ সহচর্য্যঃ ষোড়শসহস্রাণি। মধুমতী ২৭ অস্যাঃ সহচর্য্যঃ চতুর্দ্দশসহস্রাণি। চম্পা ২৮ অস্যাঃ সহচর্য্যঃ ত্রয়োদশসহস্রাণি। চন্দনা ২৯ অস্যাঃ সহচর্য্যঃ চতুর্দ্দশসহস্রাণি। ইতি ব্রহ্মবৈবর্ত্তপুরাণং ॥*॥*॥ ব্যাসঃ। অর্জুনঃ। কোকিলঃ। ইতি বিশ্বঃ ॥ কাকঃ। ইতি মেদিনী ॥ করমর্দ্দকঃ। ইতি শব্দরত্নাবলী ॥ বর্ণবিশেষঃ। কালবর্ণঃ। তৎপর্য্যায়ঃ। নীলঃ ২ অসিতঃ ৩ শ্যামঃ ৪ কালঃ ৫ শ্যামলঃ ৬ মেচকঃ ৭ বহুলঃ ৮ রামঃ ৯ শিতিঃ ১০। ইতি জটাধরঃ ॥ তদ্বতি ত্রি। ইত্যমরঃ ॥

কৃষ্ণকন্দং (ক্লী) রক্তোৎপলং। ইতি ত্রিকাণ্ডশেষঃ ॥

কৃষ্ণকর্ম্মা [ন্] (ত্রি) পাপাচারযুক্তঃ। ইত্যমরঃ

কৃষ্ণকলিঃ, কৃষ্ণকেলিঃ (স্ত্রী) স্বনামখ্যাতপুষ্পবৃক্ষঃ তস্য শাখা রক্ততণ্ডুলীয়নালবদ্‌গ্রন্থিযুক্তা পত্রং ক্ষুদ্রতাম্বূলদলবদ্ভবতি। তস্য পুষ্পং শ্বেতরক্তপীতপাটলবর্ণং মিলিতপঞ্চদলং ষট্‌কেশরমধ্যং স্বল্পসদ্গন্ধযুক্তং অপরাহ্ণে প্রস্ফুটতি। তস্য বীজং কৃষ্ণমরীচতুল্যং পুষ্পং সর্ব্বকালে সুলভং বর্ষাকালে প্রচুরং ভবতি। তদুৎপত্তিস্তস্য মূলতো বীজতশ্চ। ইতি লোকপ্রসিদ্ধং ॥

কৃষ্ণকাষ্ঠং (ক্লী) কালাগুরু। ইতি রাজনির্ঘণ্টঃ ॥

কৃষ্ণকোহলঃ (পুং) দ্যূতকৃৎ। ইতি ত্রিকাণ্ডশেষঃ ॥

কৃষ্ণগন্ধা (স্ত্রী) শোভাঞ্জনঃ। ইতি রাজনির্ঘণ্টঃ ॥

কৃষ্ণগর্ত্তঃ (পুং) কট্‌ফলঃ। ইতি রাজনির্ঘণ্টঃ ॥

কৃষ্ণচঞ্চুকঃ (পুং) চণকঃ। ইতি রাজনির্ঘণ্টঃ ॥

কৃষ্ণচতুর্দ্দশী (স্ত্রী) কৃষ্ণপক্ষীয়চতুর্দ্দশী। তৎপর্য্যায়ঃ। ভূতঃ ২। ইতি ত্রিকাণ্ডশেষঃ ॥

কৃষ্ণচরঃ (ত্রি) কৃষ্ণস্য ভূতপূর্ব্বো গবাদিঃ। ইতি মুগ্ধবোধং ॥

কৃষ্ণচূড়া (স্ত্রী) স্বনামখ্যাতসকণ্টকপুষ্পবৃক্ষঃ তস্য পত্রং বকবৃক্ষদলবদ্ভবতি। তস্য পুষ্পং পীতরক্তবর্ণং উপর্য্যধঃস্থূলসূক্ষ্মদশদলং দীর্ঘবৃন্তং দশদীর্ঘকেশরমধ্যং ঈষৎসদ্গন্ধযুক্তঞ্চ জায়তে। তৎফলং শিম্বীসদৃশং পুষ্পং সর্ব্বকালে সুলভং বর্ষাকালে প্রচুরং ভবতি। তদুৎপত্তিস্তস্য শাখায়া বীজাচ্চ ভবতি। ইতি লোকপ্রসিদ্ধং ॥

কৃষ্ণচূড়িকা (স্ত্রী) গুঞ্জা। ইতি রাজনির্ঘণ্টঃ ॥

কৃষ্ণচূর্ণং (ক্লী) লৌহমলং। ইতি রাজনির্ঘণ্টঃ ॥

কৃষ্ণজটা (স্ত্রী) জটামাংসী। ইতি রত্নমালা ॥

কৃষ্ণজীরকঃ (পুং) কৃষ্ণবর্ণস্থূলজীরকঃ। কেলে জীরা ইতি ভাষা। তৎপর্য্যায়ঃ। সুষবী ২ কারবী ৩ পৃথ্বী ৪ পৃথুঃ ৫ কালা ৬ উপকুঞ্চিকা ৭। ইত্যমরঃ ॥ সুশবী ৮ কুঞ্চিকা ৯। ইতি তট্টীকায়াং নয়নানন্দঃ ॥ উপকুঞ্চিঃ ১০। ইতি রত্নমালা ॥ কৃষ্ণা ১১ জরণা ১২ শালী ১৩ বহুগন্ধা ১৪। পৃথুকা ১৫ পৃথিবী ১৬ ভেষজং ১৭। ইতি শব্দরত্নাবলী ॥ অপি চ। কৃষ্ণজীরঃ সুগন্ধশ্চ তথৈবোদ্গারশোধনঃ। কণাজাজী তু সুষবী কালিকা চোপকালিকা ॥ পৃথ্বীকা কারবী পৃথ্বী পৃথুঃ কৃষ্ণোপকুঞ্চিকা। উপকুঞ্চী চ কুঞ্চী চ বৃহজ্জীরক ইত্যপি ॥ জীরকত্রিতয়ং রূক্ষং কটূষ্ণং দীপনং লঘু। সংগ্রাহি পিত্তলং মেধ্যং গর্ভাশয়বিশুদ্ধিকৃৎ ॥ জ্বরঘ্নং পাচনং বল্যং বৃষ্যং রুচ্যং কফাপহং। চক্ষুষ্যং পবনাধ্মানগুল্মচ্ছর্দ্দ্যতিসারহৃৎ ॥ ইতি ভাবপ্রকাশঃ ॥ অস্য গুণাঃ। কটুত্বং। উষ্ণত্বং। কফশোথজীর্ণজ্বরনাশিত্বং। রুচিচক্ষুর্হিতকারিত্বং।

গ্রাহিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ স তু স্থূল-সূক্ষ্মভেদেন দ্বিধা॥

কৃষ্ণতণ্ডুলা (স্ত্রী) কর্ণস্ফোটা লতা। ইতি রাজনির্ঘণ্টঃ॥

কৃষ্ণতাম্রং (ক্লী) গোশীর্ষচন্দনং। ইতি শব্দমালা॥

কৃষ্ণতারঃ (পুং) হরিণঃ। ইতি রাজনির্ঘণ্টঃ॥

কৃষ্ণত্রিবৃতা (স্ত্রী) কৃষ্ণবর্ণা ত্রিবৃৎ। কাল তেউড়ী ইতি ভাষা। তৎপর্য্যায়ঃ। শ্যামা২ পালিন্দী ৩ কালমেষিকা ৪ কালা ৫ মসূরবিদলা ৬ অর্দ্ধচন্দ্রা ৭ সুষেণিকা ৮। ইতি জটাধরঃ॥

কৃষ্ণদন্তা (স্ত্রী) কাশ্মরীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কৃষ্ণদেহঃ (পুং) ভ্রমরঃ। ইতি সারস্বতঃ॥ কৃষ্ণবর্ণশরীরে ত্রি॥

কৃষ্ণদ্বৈপায়নঃ (পুং) বেদব্যাসঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কৃষ্ণধত্তূরকঃ (পুং) কৃষ্ণবর্ণধুস্তূরঃ। কাল ধুতুরা ইতি ভাষা। তৎপর্য্যায়ঃ। সিদ্ধঃ ২ কনকঃ ৩ সচিবঃ ৪ শিবঃ ৫ কৃষ্ণপুষ্পঃ ৬ বিষারাতিঃ ৭ ক্রূরধূর্ত্তঃ ৮। অস্য গুণাঃ। কটুত্বং। উষ্ণত্বং। কান্তিকারিত্বং। ব্রণার্ত্তিত্বগ্দোষখর্জ্জুকণ্ডূতিজ্বরভ্রমনাশিত্বঞ্চ॥ সিতনীলকৃষ্ণলোহিতপীতপ্রসবাশ্চ সন্তি ধত্তূরাঃ। সামান্যগুণোপেতাস্তেষু গুণাঢ্যস্তু কৃষ্ণকুসুমঃ স্যাৎ॥ ইতি রাজনির্ঘণ্টঃ॥

কৃষ্ণপর্ণী (স্ত্রী) কালতুলসী। ইতি রত্নমালা॥

কৃষ্ণপক্ষঃ (পুং) অসিতপক্ষঃ। স তু প্রতিপদাদ্যমাবাস্যান্তানি পঞ্চদশ দিনানি। যথা। তত্র পক্ষাবুভৌ মাসে শুক্লকৃষ্ণৌ ক্রমেণ হি। চন্দ্রবৃদ্ধিকরঃ শুক্লঃ কৃষ্ণশ্চন্দ্রক্ষয়াত্মকঃ॥ পক্ষত্যাদ্যাস্তু তিথয়ঃ ক্রমাৎ পঞ্চদশ স্মৃতাঃ। দর্শান্তাঃ কৃষ্ণপক্ষে তাঃ পূর্ণিমান্তাশ্চ শুক্লকে॥ ইতি তিথ্যাদিতত্ত্বং॥

কৃষ্ণপাকঃ (পুং) করমর্দ্দঃ। ইতি শব্দরত্নাবলী॥

কৃষ্ণপাকফলঃ (পুং) করমর্দ্দকঃ। ইত্যমরঃ॥

কৃষ্ণপিঙ্গলা (স্ত্রী) দুর্গা। ইতি ত্রিকাণ্ডশেষঃ॥

কৃষ্ণপিণ্ডীতকঃ (পুং) বৃক্ষবিশেষঃ। তৎপর্য্যায়ঃ। বরাহঃ২ কৃষ্ণপিণ্ডীরঃ৩। ইতি রত্নমালা॥

কৃষ্ণপিণ্ডীরঃ (পুং) কৃষ্ণপিণ্ডীতকবৃক্ষঃ। ইতি রত্নমালা॥

কৃষ্ণপিপীলী (স্ত্রী) কৃষ্ণবর্ণপিপীলিকা। কাল পিপীড়া ইতি ভাষা। তৎপর্য্যায়ঃ। স্থূলা ২ বৃক্ষরুহা ৩। ইতি রাজনির্ঘণ্টঃ॥

কৃষ্ণপুষ্পঃ (পুং) কৃষ্ণধত্তূরকঃ। ইতি রাজনির্ঘণ্টঃ॥

কৃষ্ণপুষ্পী (স্ত্রী) প্রিয়ঙ্গুবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥

কৃষ্ণফলঃ (পুং) করমর্দ্দকঃ। ইত্যমরটীকায়াং ভরতঃ॥

কৃষ্ণফলপাকঃ (পুং) করমর্দ্দকঃ। ইতি দ্বিরূপকোষঃ॥

কৃষ্ণফলা (স্ত্রী) সোমরাজী। ইত্যমরঃ॥

কৃষ্ণভূমঃ (পুং) কৃষ্ণবর্ণমৃত্তিকাযুক্তো দেশঃ। ইতি হেমচন্দ্রঃ॥

কৃষ্ণভূমিজা ( স্ত্রী ) গোমূত্রিকাতৃণং। ইতি রাজনির্ঘণ্টঃ ॥

কৃষ্ণভেদা ( স্ত্রী ) কটুকা। ইতি রাজনির্ঘণ্টঃ ॥

কৃষ্ণভেদী ( স্ত্রী ) কটুকী। ইত্যমরঃ ॥

কৃষ্ণমুদ্গঃ ( পুং ) মুদ্গবিশেষঃ। কাল মুগ ইতি ভাষা। তৎপর্য্যায়ঃ। বাসন্তঃ ২ মাধবঃ ৩ সুরাষ্ট্রজঃ ৪। অস্য গুণাঃ। ত্রিদোষদাহনাশিত্বং। মধুরত্বং। লঘুত্বং। দীপনত্বং। পথ্যত্বং। বলবীর্য্যাঙ্গপুষ্টিদাতৃত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

কৃষ্ণমূলী ( স্ত্রী ) শারিবাবিশেষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কৃষ্ণমৃৎ ( স্ত্রী ) কালমৃত্তিকা। তৎপর্য্যায়ঃ। শ্লক্ষ্নভূমিঃ ২। অস্যা গুণঃ। ক্ষতদাহাস্রপ্রদরশ্লেষ্মপিত্তহরত্বং। ইতি রাজনির্ঘণ্টঃ ॥

কৃষ্ণমৃত্তিকঃ ( পুং ) কৃষ্ণভূমঃ। ইতি হেমচন্দ্রঃ ॥

কৃষ্ণরুহা ( স্ত্রী ) জতুকা লতা। ইতি রাজনির্ঘণ্টঃ ॥

কৃষ্ণরূপ্যঃ ( ত্রি ) কৃষ্ণচরঃ। কৃষ্ণস্য ভূতপূর্ব্বো গবাদিঃ। ইতি মুগ্ধবোধব্যাকরণং ॥

কৃষ্ণলকঃ ( পুং ) গুঞ্জা। যথা। পঞ্চকৃষ্ণলকো মাষস্তে সুবর্ণস্তু যোড়শ। ইতি মনুঃ ॥

কৃষ্ণলবণং ( ক্লী ) সৌবর্চ্চললবণং। কাচলবণং। ইতি রাজনির্ঘণ্টঃ ॥

কৃষ্ণলা ( স্ত্রী ) গুঞ্জা। ইত্যমরঃ ॥

কৃষ্ণলোহং ( ক্লী ) অয়স্কান্তঃ। ইতি রাজনির্ঘণ্টঃ ॥

কৃষ্ণলোহিতঃ ( পুং ) কৃষ্ণরক্তমিশ্রবর্ণঃ। ধূম্রবর্ণঃ। তদ্বতি ত্রি। ইত্যমরঃ ॥

কৃষ্ণবক্ত্রঃ ( পুং ) বানরঃ। ইতি হলায়ুধঃ ॥

*কৃষ্ণবর্ত্মা [ ন্ ] ( পুং ) অগ্নিঃ। চিত্রকবৃক্ষঃ। ইত্যমরঃ ॥ দুরাচারঃ। রাহুঃ। ইতি মেদিনী ॥

কৃষ্ণবল্লী (স্ত্রী) কৃষ্ণার্জকঃ। ইতি শব্দচন্দ্রিকা ॥ সারিবাবিশেষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কৃষ্ণবল্লিকা ( স্ত্রী ) জতুকা লতা। ইতি রাজনির্ঘণ্টঃ ॥

কৃষ্ণবর্ব্বরকঃ ( পুং ) বর্ব্বরবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কৃষ্ণবানরঃ ( পুং ) কালবানরঃ। তৎপর্য্যায়ঃ। গোলাঙ্গূলঃ ২ গৌরাস্যঃ ৩ কপিঃ ৪ কৃষ্ণমুখঃ ৫। ইতি রাজনির্ঘণ্টঃ

কৃষ্ণবীজং (ক্লী) কালিঙ্গং। ইতি রাজনির্ঘণ্টঃ ॥

কৃষ্ণবীজঃ (পুং) রক্তশিগ্রুবৃক্ষঃ। ইতি জটাধরঃ ॥

কৃষ্ণবৃন্তা ( স্ত্রী ) পাটলাবৃক্ষঃ। ইত্যমরঃ ॥ মাষপর্ণী। ইতি মেদিনী ॥

কৃষ্ণবৃন্তিকা ( স্ত্রী ) গম্ভারীবৃক্ষঃ। পেটিকাবৃক্ষঃ। ইতি রত্নমালা ॥

কৃষ্ণশারঃ ( পুং ) কৃষ্ণসারমৃগঃ। ইত্যমরটীকায়াং রমানাথঃ ॥

কৃষ্ণশালিঃ ( পুং ) ধান্যবিশেষঃ। কাল ধান ইতি ভাষা। তৎপর্য্যায়ঃ। কালশালিঃ ২ শ্যামশালিঃ ৩ সিতেতরঃ ৪। অস্য গুণাঃ। ত্রিদোষদাহনাশিত্বং। মধুরত্বং। পুষ্টিবীর্য্যবর্দ্ধনত্বং। বর্ণকান্তিবলকারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

কৃষ্ণশিগ্রুঃ ( পুং ) শোভাঞ্জনবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কৃষ্ণশিম্বিকা ( স্ত্রী ) কৃষ্ণবর্ণশিম্বী। কাল শিম ইতি ভাষা। তৎপর্য্যায়ঃ। কাকাণ্ডী ২। ইতি রত্নমালা ॥

কৃষ্ণশৃঙ্গঃ ( পুং ) মহিষঃ। ইতি হেমচন্দ্রঃ ॥

কৃষ্ণসখঃ ( পুং ) কৃষ্ণস্য সখা। অর্জ্জুনঃ। ইতি মুগ্ধবোধব্যাকরণং ॥

কৃষ্ণসখী ( স্ত্রী ) জীরকঃ। ইতি শব্দচন্দ্রিকা ॥

কৃষ্ণসর্ষপঃ ( পুং ) রাজসর্ষপঃ। ইতি রাজনির্ঘণ্টঃ ॥

কৃষ্ণসারঃ ( পুং ) হরিণভেদঃ। কালসার ইতি ভাষা। ইত্যমরঃ ॥ অস্য মাংসগুণাঃ। সংগ্রাহিত্বং। রুচিবলকারিত্বং। জ্বরনাশিত্বঞ্চ। ইতি রাজবল্লভঃ ॥ স্নুহীবৃক্ষঃ। শিংশপাবৃক্ষঃ। ইতি মেদিনী ॥ খদিরবৃক্ষঃ। ইতি শব্দরত্নাবলী ॥

কৃষ্ণসারঙ্গঃ ( পুং ) কৃষ্ণসারঃ। কৃষ্ণবর্ণঃ সারঙ্গো মৃগঃ ইতি কর্ম্মধারয়সমাসান্নিষ্পন্নঃ ॥

কৃষ্ণসারথিঃ ( পুং ) অর্জ্জুনবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥ বহুব্রীহৌ পার্থশ্চ ॥

কৃষ্ণসারা ( স্ত্রী ) শিংশপাবৃক্ষঃ। ইতি রত্নমালা ॥

কৃষ্ণস্কন্ধঃ ( পুং ) কালস্কন্ধঃ। তমালবৃক্ষঃ। ইত্যমরটীকায়াং ভরতঃ ॥

কৃষ্ণা ( স্ত্রী ) দ্রৌপদী। নীলীবৃক্ষঃ। পিপ্পলী। দ্রাক্ষা। ইতি মেদিনী ॥ নীলপুনর্নবা। কৃষ্ণজীরকঃ। গম্ভারী। কটুকা। সারিবাবিশেষঃ। রাজসর্ষপঃ। ইতি রাজনির্ঘণ্টঃ ॥ পর্পটী। ইতি ভাবপ্রকাশঃ ॥ কাকোলী। সোমরাজী। ইতি জটাধরঃ ॥

কৃষ্ণাগুরু ( ক্লী ) কৃষ্ণবর্ণসুগন্ধিকাষ্ঠবিশেষঃ। তৎপর্য্যায়ঃ। অগুরু ২ শৃঙ্গারং ৩ বিশ্বরূপকং ৪ শীর্ষং ৫ কালাগুরু ৬ কেশ্যং ৭ বস্নুকং ৮ কৃষ্ণকাষ্ঠং ৯ ধূপার্হং ১০ বল্লরং ১১ মিশ্রবর্ণং ১২ গন্ধং ১৩। অস্য গুণাঃ। কটুত্বং। উষ্ণত্বং। তিক্তত্বং। লেপে শীতলত্বং। পানে পিত্তহরত্বং। কেষাং মতে ত্রিদোষঘ্নত্বং। ইতি রাজনির্ঘণ্টঃ ॥ তৎপর্য্যায়গুণাঃ। অথ অগুরু কৃষ্ণাগুরু। অগুরুপ্রবরং লোহং রাজার্হং জোঙ্গজং তথা। বংশিকং কৃমিজং চাপি কৃমিজগ্ধমনার্য্যকং ॥ অগুরূষ্ণং কটু ত্বচ্যং তিক্তং তীক্ষ্ণঞ্চ পিত্তলং। লঘু কর্ণাক্ষিরোগঘ্নং শীতবাতকফপ্রণুৎ ॥ কৃষ্ণং গুণাধিকং তত্তু লোহবদ্বারি মজ্জতি। অগুরুপ্রভবঃ স্নেহঃ কৃষ্ণাগুরুসমঃ স্মৃতঃ ॥ ইতি ভাবপ্রকাশঃ ॥

কৃষ্ণাচলঃ ( পুং ) রৈবতপর্ব্বতঃ। ইতি জটাধরঃ ॥

কৃষ্ণাঞ্জনী ( স্ত্রী ) কালাঞ্জনীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কৃষ্ণানদী ( স্ত্রী ) নদীভেদঃ। তৎপর্য্যায়ঃ। কৃষ্ণসমুদ্ভবা ২ কৃষ্ণবেণ্যা ৩ কৃষ্ণগঙ্গা ৪। অস্যা জলগুণাঃ। স্বচ্ছত্বং। রুচ্যত্বং। দীপনত্বং। পাচনত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

কৃষ্ণাভা ( স্ত্রী ) কালাঞ্জনী। ইতি রাজনির্ঘণ্টঃ ॥

কৃষ্ণামিষং ( ক্লী ) কৃষ্ণায়সং। ইতি হেমচন্দ্রঃ ॥

কৃষ্ণায়সং (ক্লী) কৃষ্ণবর্ণলৌহং। ইতি রত্নমালা ॥

কৃষ্ণার্চ্চিঃ [স্] (পুং) অগ্নিঃ। ইতি ভূরিপ্রয়োগঃ॥

কৃষ্ণার্জকঃ (পুং) কালতুলসী। তৎপর্য্যায়ঃ। কালমালঃ ২ মালূকঃ ৩ কৃষ্ণমালুকঃ ৪ কৃষ্ণমল্লিকা ৫ গরঘ্নঃ ৬ বনবর্ব্বরঃ ৭ বর্ব্বরী ৮ জাতিঃ ৯। অস্য গুণাঃ। কটুত্বং। উষ্ণত্বং। কফবাতাময়নেত্ররোগনাশিত্বং। রুচিসুখপ্রসবকারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

কৃষ্ণালুঃ (পুং) নীলালুঃ। ইতি রাজনির্ঘণ্টঃ॥

কৃষ্ণাবাসঃ (পুং) অশ্বত্থবৃক্ষঃ। ইতি হেমচন্দ্রঃ॥

কৃষ্ণাশ্রিতঃ (ত্রি) কৃষ্ণমাশ্রিতঃ। যস্য আশ্রয়ঃ কৃষ্ণঃ সঃ। ইতি মুগ্ধবোধং॥

কৃষ্ণিকা (স্ত্রী) রাজিকা। রাই সর্ষা ইতি ভাষা। ইত্যমরঃ॥ শ্যামাপক্ষিণী। তস্যা নামানি। শ্যামা বরাহী শকুনী কুমারী দুর্গা চ দেবী চটিকা তথোমা। ত্বং পোতকী পাণ্ডবিকা ত্বমেব ত্বং কৃষ্ণিকা ত্বং সিতপক্ষিণী চ॥ ত্বং ব্রহ্মপুত্রী শকুনৈকদেবী ধনুর্দ্ধরী পান্থসমূহমাতা। প্রত্যক্ষরূপা ভগবত্যহোমা নমোঽস্তু তুভ্যং কুরু মেঽর্থসিদ্ধিং॥ ইতি বসন্তরাজশাকুনং॥

কৃষ্ণেক্ষুঃ (পুং) ইক্ষুভেদঃ। কাজলী আক ইতি ভাষা। তৎপর্য্যায়ঃ। শ্যামেক্ষুঃ ২ কোকিলেক্ষুকঃ ৩ কোকিলাক্ষঃ ৪ কান্তারকঃ ৫। ইত্যমরঃ॥ অস্য গুণাঃ। তিক্তত্বং। পাকে মধুরত্বং। স্বাদুত্বং। সুহৃদ্যত্বং। কটুত্বং। রসাঢ্যত্বং। ত্রিদোষহারিত্বং। সমবীর্য্যবহুবীর্য্যসুবর্ণদাতৃত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ অস্য ভাবপ্রকাশোক্তগুণাঃ কান্তারশব্দে দ্রষ্টব্যাঃ॥

কৃষ্ণোদুম্বরিকা (স্ত্রী) কাকোদুম্বরিকা। ইতি রাজনির্ঘণ্টঃ॥

কৃসরঃ (পুং) কৃশরঃ। ইতি জটাধরঃ॥

কৄ শ বিক্ষেপে। ইতি কবিকল্পদ্রুমঃ॥ শ কিরতি। অস্যাপি নিষ্ঠায়াং কীর্ণ ইতি। সূল্বাদ্যোদিদিত্যত্র মূর্চ্ছবর্জনসামর্থ্যাৎ যেন কেনাপি প্রকারেণ রেফান্তান্নিষ্ঠাতস্য ন ইতি ব্যাখ্যানাৎ ঋৃদিরণাবিত্তি ইরি উরি চ কৃতে রান্তত্বাৎ নিষ্ঠাতস্য ন স্যাৎ। এবং গৄশ নিগরণে ইত্যাদেরপি গীর্ণ ইত্যাদি বোধ্যং। ইতি দুর্গাদাসঃ॥

কৄ ঞ গি হিংসে। ইতি কবিকল্পদ্রুমঃ॥ ঞ গি কৃণাতি কৃণীতে। কীর্ণঃ কীর্ণিঃ। ইতি দুর্গাদাসঃ॥

কৄ ক ঙ বিজ্ঞানে। ইতি কবিকল্পদ্রুমঃ॥ ক ঙ কারয়তে। ইতি দুর্গাদাসঃ॥

কৄ ৎ ক সংশব্দে। ইতি কবিকল্পদ্রুমঃ॥ দীর্ঘী। ক কীর্ত্তয়ন্তি চ গোষ্ঠীষু যদ্গুণানপ্সরোগণাঃ। কীর্ত্তাদেশস্য নিত্যত্বেঽপি কৃতপাঠঃ কীর্ত্তাদেশস্য ব্যভিচারসূচনার্থঃ তেন অচীকৃতদিতি সিদ্ধং। ইতি দুর্গাদাসঃ॥

কৢপ্তঃ (ত্রি) কৃতকল্পনঃ। কল্পনং সামর্থ্যং তদ্বিশিষ্টঃ। কল্পনার্থকৃপধাতোঃ কর্ম্মণি ক্তে কৢপাদেশঃ। নিয়তঃ। যথা। অবশ্যকৢপ্তাভিঃ পর্ব্বতত্বচত্বরত্বাদিতত্তদ্ধর্ম্মাবচ্ছিন্নাধিকরণতাব্যক্তিভিরেবোপপত্তৌ। ইতি জগদীশঃ॥

ক৯প্তকীলা (স্ত্রী) ব্যবস্থাপত্রং। তৎপর্য্যায়ঃ। পট্টোলিকা ২। ইতি ত্রিকাণ্ডশেষঃ॥

ক৯প্তধূপঃ (পুং) সিহ্লকঃ। ইতি জটাধরঃ॥

ক৯প্তিকঃ (ত্রি) ক্রীতঃ। ইতি হলায়ুধঃ॥

কেকয়ঃ (পুং) সূর্য্যবংশীয়রাজবিশেষঃ। ইতি শ্রীভাগবতং॥

কেকয়ী (স্ত্রী) দশরথরাজপত্নী। সা তু কেকয়রাজপুত্রী ভরতমাতা চ। ইতি শব্দরত্নাবলী॥

কেকরঃ (ত্রি) বলিরঃ। টেরা ইতি ভাষা। ইত্যমরঃ॥

কেকা (স্ত্রী) ময়ূরবাণী। ইত্যমরঃ॥

কেকাবলঃ (পুং) ময়ূরঃ। ইতি শব্দচন্দ্রিকা॥

কেকী [ন্] (পুং) ময়ূরঃ। ইত্যমরঃ॥

কেকেয়ী (স্ত্রী) কেকয়ী। ইতি শব্দরত্নাবলী॥

কেচন ব্য কেচিৎ। ইতি ব্যাকরণং॥

কেচিৎ ব্য কেচন। কোন ব্যক্তিরা ইতি ভাষা। ইতি ব্যাকরণং॥

কেচুকং (ক্লী) কচুঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কেণিকা (স্ত্রী) পটকুটী। কানাৎ ইতি ভাষা। ইতি হেমচন্দ্রঃ॥

কেত ৎ ক মন্ত্রণে। নিঃশ্রাবণে। ইতি কবিকল্পদ্রুমঃ॥ মন্ত্রণে নিমন্ত্রণে। অচিকেতৎ। নিঃশ্রাবণং সময়োদ্ভাষণং। ইতি দুর্গাদাসঃ॥

কেতকঃ (পুং) কেতকীবৃক্ষঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কেতকী (স্ত্রী) পুষ্পবৃক্ষবিশেষঃ। কেয়া ইতি ভাষা। তৎপর্য্যায়ঃ। সূচীপুষ্পঃ ২ হলীনঃ ৩ জম্বুলঃ ৪। ইতি রত্নমালা॥ কেতকঃ ৫ সূচিকাপুষ্পঃ ৬ জম্বুকঃ ৭ ক্রকচচ্ছদঃ ৮। ইতি ভাবপ্রকাশঃ॥ তীক্ষ্ণপুষ্পা ৯ বিফলা ১০ ধূলিপুষ্পিকা ১১ মেধ্যা ১২ কণ্টদলা ১৩ শিবদ্বিষ্টা ১৪ নৃপপ্রিয়া ১৫ ক্রকচা ১৬ দীর্ঘপত্রা ১৭ স্থিরগন্ধা ১৮ গন্ধপুষ্পা ১৯ ইন্দুকলিকা ২০ দলপুষ্পা ২১ পাংশুলা ২২। অস্যা গুণাঃ। মধুরত্বং। তিক্তত্বং। কফনাশিত্বং। কটুত্বং। লঘুত্বঞ্চ॥ তৎপুষ্পগুণঃ। বর্ণ্যত্বং। কেশদৌর্গন্ধ্যনাশিত্বঞ্চ॥ হেমাভায়াস্তস্যা মদনোন্মাদকত্বং। বৃংহণত্বং। সৌখ্যকারিত্বঞ্চ॥ তস্যাঃ স্তনগুণাঃ। অতিশিশিরত্বং। কটুত্বং। পিত্তকফাপহত্বং। রসায়নত্বং। বর্ণদেহদার্ঢ্যকারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

কেতনং (ক্লী) ধ্বজঃ। কার্য্যং। নিমন্ত্রণং ইত্যমরঃ॥ চিহ্নং। গৃহং। ইতি হেমচন্দ্রঃ॥ স্থানং। ইতি শব্দরত্নাবলী॥

কেতুঃ (পুং) নবগ্রহান্তর্গতগ্রহবিশেষঃ। স তু রাহোঃ শরীরং। তৎপর্য্যায়ঃ। শিখী ২। ইতি দীপিকা॥ অয়ং পাপগ্রহঃ। যথা। অর্দ্ধো নেন্দ্বর্কসৌরারাঃ পাপাঃ সৌম্যাস্তথাপরে। পাপযুক্তো বুধঃ পাপো রাহুকেতূ চ পাপদৌ॥ ইতি ॥ * ॥ অয়ন্তু জন্মরাশ্যপেক্ষয়া ষষ্ঠত্রিদশমৈকাদশস্থানস্থিতশ্চেৎ শুভঃ। যথা। কেতুপপ্নবভৌমমন্দগতয়ঃ ষষ্ঠত্রিসংস্থাঃ শুভাশ্চন্দ্রার্কাবপি তে চ তৌ চ দশমৌ চন্দ্রঃ পুনঃ সপ্তমঃ। জীবঃ সপ্তনবদ্বিপঞ্চমগতো যুগ্মেষু সোমাত্মজঃ শুক্রঃ ষড়্দশসপ্তবর্জমিতরে

সর্ব্বেঽপ্যুপান্ত্যে শুভাঃ ॥ ইতি অস্য ত্রিকোণ উচ্চস্বগৃহশক্রমিত্রসমনীচা যথা। সিংহস্ত্রিকোণং ধনুরুচ্চসংজ্ঞং মীনো গৃহং শুক্রশনী বিপক্ষৌ। সূর্য্যারচন্দ্রাঃ সুহৃদঃ সমানৌ জীবেন্দুজৌ ষট্ শিখিনঃ পরাংশাঃ॥ ইতি। স্বোচ্চাচ্চ সপ্তমং নীচং প্রাগ্বদ্ভাবৈবিনির্দ্দিশেৎ। ইতি ॥ ❋ ॥ অস্য রিষ্টির্যথা। কেতুর্যস্মিন্নৃক্ষেঽভ্যুদিতস্তস্মিন্ প্রসূয়তে জন্তুঃ। রৌদ্রে সর্পমুহূর্ত্তে বা প্রাণৈঃ সংত্যজ্যতে চাশু ॥ ইতি চ জ্যোতিস্তত্ত্বং ॥ ❋ ॥ অস্য দশাফলং কেরলীনামগ্রন্থে দ্রষ্টব্যং ॥ ❋ ॥ অথাতঃ কেতুচারাধ্যায়ো ব্যাখ্যায়তে। তত্রাদাবেবাগমপ্রদর্শনার্থমাহ। গার্গীয়ং শিখিচারং পারাশরমসিতদেবলকৃতঞ্চ। অন্যাংশ্চ বহূন্ দৃষ্ট্বা ক্রিয়তেঽয়মনাকুলশ্চারঃ ॥ গার্গীয়ং গর্গপ্রোক্তং কেতূনাং চারং তৎপরাশরেণ কৃতং অসিতনামাচার্য্যেণ কৃতং দেবলবিরচিতং এতান্ কেতুচারান্ অবলোক্য তথান্যানপি কশ্যপঋষিপুত্রনারদবজ্রাদিরচিতান্ বহূন্ দৃষ্ট্বা ময়া অয়ং অনাকুলো নিঃসন্দেহঃ কেতুচারঃ ক্রিয়তে ॥ ❋ ॥ অথোদয়াস্তময়লক্ষণং আহ। দর্শনমস্তময়ো বা ন গণিতবিধিনাস্য শক্যতে জ্ঞাতুং। দিব্যান্তরীক্ষভৌমাস্ত্রিবিধাঃ স্যুঃ কেতবো যস্মাৎ ॥ অস্য কেতোর্দ্দর্শনং উদয়ঃ অস্তময়োঽদর্শনং গণিতবিধানেন জ্ঞাতুং ন শক্যতে। যস্মাৎ কেতবস্ত্রিবিধাস্ত্রিপ্রকারাঃ। দিবি আকাশে ভবা দিব্যাঃ। অন্তরীক্ষে ভবা আন্তরীক্ষাঃ। গ্রহনক্ষত্রস্থানং বিহায়ান্যত্র আকাশে যে দৃশ্যন্তে তে আন্তরীক্ষাঃ। ভূমৌ ভবাঃ ভৌমাঃ। ইতি হেতোরুৎপাতরূপত্বাৎ এষামুদয়াস্তময়ৌ ন জ্ঞায়েতে ইতি ॥ ❋ ॥ অথ কেতূনাং দিব্যবর্জ্জিতানাং অন্যেষাং স্বরূপমাহ। অহুতাশেঽনলরূপং যস্মিংস্তৎ কেতুরূপমেবোক্তং। খদ্যোতপিশাচালয়মণিরত্নাদীন্ পরিত্যজ্য ॥ অহুতাশে অনলবর্জ্জিতে যস্মিন্ দেশে অনলরূপমগ্নিরূপং দৃশ্যতে যৎ তদেব কেতুরূপমুক্তং। কিন্তু খদ্যোত ইন্দ্রগোপককৃমিবিশেষঃ। পিশাচালয়ং যক্ষস্থানং। মণয়শ্চন্দ্রকান্তপ্রভৃতয়ঃ। রত্নানি মরকতপ্রভৃতীনি। আদিগ্রহণাদন্যান্যপি কাষ্ঠপ্রভৃতীনি তেজোরূপাণি এতান্ ত্যক্ত্বা। যত এষাং স্বভাবাদেবানলরূপমহুতাশে দৃশ্যতে অতো ন তৎ কেতুরূপমিতি ॥ ❋ ॥ অথ দিব্যান্তরীক্ষভৌমানাং কেতূনাং লক্ষণমাহ। ধ্বজশস্ত্রভবনতরুতুরগকুঞ্জরাদ্যেষ্বান্তরীক্ষাস্তে। দিব্যা নক্ষত্রস্থা ভৌমাঃ স্যুরতোঽন্যথা শিখিনঃ ॥ ধ্বজশ্চিহ্নং। শস্ত্রমায়ুধাদি। ভবনং গৃহং। তরুর্বৃক্ষঃ। তুরগোঽশ্বঃ। কুঞ্জরো হস্তী। আদিগ্রহণাদন্যেষু চতুষ্পদেষু যে দৃশ্যন্তে তে আন্তরীক্ষাঃ। দিব্যা নক্ষত্রস্থাঃ। অতোঽস্মাদুক্তাদন্যথা ভূমৌ যে দৃশ্যন্তে তে ভৌমাঃ। শিখিনঃ কেতবঃ ইতি ॥ ❋ ॥ অথ কেতূনাং সংস্থানং মতান্তরেণাহ। শতমেকাধিকমেকে সহস্রমপরে বদন্তি কেতূনাং। বহুরূপমেকমেব প্রাহ মুনি-

নারদঃ কেতুং ॥ একে পরাশরাদয়ঃ একাধিকং শতং কেতূনাং কথয়ন্তি। তথা চ পরাশরঃ। শতমেকোত্তরং কেতূনাং ভবন্তি তেষাং ষোড়শমৃত্যুনিশ্বাসজাঃ। দ্বাদশাদিত্যসম্ভবাঃ। দশ দক্ষমখবিলয়নে রুদ্রক্রোধজাঃ। সপ্ত পৈতামহাঃ। পঞ্চদশ ঋষেরৌদ্দালিকস্য পুত্রাঃ। সপ্তদশ মরীচিকশ্যপললাটজাঃ। পঞ্চ চ প্রজাপতিহসজাঃ। ত্রয়ো বিভাবসুজাঃ। ধূমোদ্ভবশ্চৈকঃ। চতুর্দ্দশ মথ্যমানেঽমৃতে সোমেন সহ সংভূতাঃ। একস্তু ব্রহ্মকোপজঃ ইতি ॥ **॥ অপরে গর্গাদয়ঃ সহস্রং কেতূনাং বদন্তি। তথা চ গর্গঃ। অনিত্যোদয়চারাণামশুভানাঞ্চ দর্শনং। আগন্তূনাং সহস্রং স্যাৎ গ্রহাণাং সংনিবোধ মে ॥ * ॥ বহুরূপমেকমেবেতি নারদাখ্যো মুনিরেকমেব কেতুং বহুরূপং প্রাহ। তন্মতে এক এব কেতুস্তস্য বহূনি রূপাণি স এব দিব্যান্তরীক্ষভৌম ইত্যর্থঃ। তথা চ নারদঃ। দিব্যান্তরীক্ষভৌমস্থ একঃ কেতুঃ প্রকীর্ত্তিতঃ। শুভাশুভফলং লোকে দদাত্যস্তময়োদয়ৈরিতি ॥ * ॥ এবং মতান্তরাণ্যুক্ত্বা স্বসিদ্ধান্তমাহ। যদ্যেকো যদি বহবঃ কিমনেন ফলন্তু সর্ব্বথা বাচ্যং। উদয়াস্তময়ৈঃ স্থানৈঃ স্পর্শৈরাধূপনৈর্ব্বর্ণৈঃ ॥ যদ্যেক এব কেতুঃ যদি বা বহবঃ কেতবঃ কিমনেন। সর্ব্বথা তেষামুদয়াস্তময়ৈঃ স্থানৈঃ স্পর্শৈরাধূপনৈর্ব্বর্ণৈশ্চ শুভাশুভং ফলং পুনর্ব্বক্তব্যং। উদয়ঃ কস্যাং দিশ্যুদিতঃ। অস্তময়ঃ কস্যামেবাস্তমিতঃ। স্থানং যথা কস্মিন্নাকাশভাগে কস্য নক্ষত্রস্য বা সমীপে উদিতোঽস্তমিতশ্চ। স্পর্শনং কস্তেন গ্রহো নক্ষত্রং বা স্পৃষ্টং। আধূপনং কোঽপি শিখয়াভিধূপিতঃ। বর্ণাঃ সিতরক্তপীতকৃষ্ণাদিকাঃ। এবমাদিভিস্তস্য ফলং বাচ্যং তস্মাদেকো বহবো বা ভবন্তু কা নঃ ক্ষতিরিতি ॥ * ॥ অথ কেতুচারে যেষাং কেতূনামভিদৃষ্টানাং কিয়ন্তং কালং যাবৎ ফলপাকো ভবতি তেষাং ফলপাকনিয়মার্থমাহ। যাবন্ত্যহানি দৃশ্যো মাসাস্তাবন্ত এব ফলপাকঃ। মাসৈরব্দাংশ্চ বদেৎ প্রথমাৎ পক্ষত্রয়াৎ পরতঃ ॥ দৃশ্যঃ কেতুরিতি সম্বধ্যতে। ফলস্য পাকঃ ফলপাকঃ। যঃ কেতুর্যাবন্ত্যহানি দৃশ্যো ভবতি তস্য তাবন্তো মাসাস্তস্য কেতোস্তাবতো মাসান্ ফলপাকো ব্রূয়াৎ। যাবৎসংখ্যকানি দিনানি দৃষ্টো ভবতি তত্তুল্যান্ মাসান্ তস্য ফলপাকো বদেৎ। মাসৈস্তু পুনরব্দান্ সংবৎসরান্ ব্রূয়াৎ। মাসসংখ্যাদর্শনে মাসতুল্যানি বর্ষাণি চ বদেৎ। যাবৎসংখ্যান্মাসান্ দৃশ্যো ভবতি তাবৎসংখ্যানি বর্ষাণি তস্য ফলপাকো বদেৎ। কস্মাৎ কালাৎ প্রভৃতিরিত্যত আহ প্রথমাৎ পক্ষত্রয়াৎ পরতঃ। সর্ব্বেষাং কেতূনাং দিনসাম্যত্বং। যাবন্তি দিনানি দৃশ্যঃ কেতুস্তস্মাদ্দর্শনাদূর্দ্ধং প্রথমং পক্ষত্রয়ং পঞ্চচত্বারিংশদ্দিনানি যাবৎ নিষ্ফলানি তস্মাৎ পক্ষত্রয়াৎ পরতঃ তাবতো মাসান্ ফলপাকঃ। অথ মাসান্ দৃশ্যতে তদা তস্মাদেব দর্শনাৎ

পরতঃ পক্ষত্রয়মতিক্রম্য মাসতুল্যানি বর্ষাণি বদেৎ। প্রথমাৎ পক্ষত্রয়াৎ পরতঃ তত্র পক্ষত্রয়ং যাবদ্দিনসংখ্যা গৃহ্যতে। পক্ষত্রয়াদূর্দ্ধং যদা দৃশ্যতে কেতুস্তদা মাসতুল্যানি বর্ষাণি বদেৎ। অত্র সন্দেহবুদ্যাসার্থং গর্গোক্তং নিয়মকমভিলিখ্যতে। তথা চ গর্গঃ। যাবন্ত্যহানি দৃশ্যঃ স্যাৎ তাবন্মাসান্ ফলং ভবেৎ। মাসাংস্তু যাবদ্দৃশ্যেত তাবতোঽব্দাংস্তু বৈকৃতান্ ॥ ত্রিপক্ষাৎ পরতঃ কর্ম্ম পচেত্তস্য শুভাশুভং। যদ্দিষ্টমুদিতে কেতৌ ফলং নেহাদিশেদ্বুধঃ ॥ তথা বৃদ্ধগর্গঃ। যাবতো দিবসাংস্তিষ্ঠেৎ তাবন্মাসান্ বিনির্দ্দিশেৎ। ত্রিপক্ষাৎ পরতশ্চাপি কর্ম্ম কেতোঃ প্রপচ্যতে ॥ তস্মাৎ কালাৎ পরং ক্রয়াৎ ফলমস্য শুভাশুভং। যদ্দিষ্টমুদয়ে কেতোঃ ফলং নেহাদিশেদ্বুধঃ ॥ যদ্যেবং তদা দ্বিতীয়ব্যাখ্যানমত্র ন ঘটতে প্রথমব্যাখ্যানমেব জ্যায় ইতি। যথা প্রথমাৎ পক্ষত্রয়াৎ পরতঃ দর্শনাদূর্দ্ধং পক্ষত্রয়ং যাবন্নিষ্ফলং পক্ষত্রয়াৎ পরতঃ ফলপাকস্য কালসংখ্যা প্রবর্ত্ততে। তস্মাদুক্তং যদ্দিষ্টমুদয়ে কেতোঃ ফলং নেহাদিশেদ্বুধঃ ইতি। যত্তুক্তং মাসৈরব্দাংশ্চ বদেৎ তদেকদেশেনাপি প্রতিমাসমেকদ্বিত্রিদিনদর্শনেন মাসসংখ্যা লভ্যত এবেত্যর্থঃ। সর্ব্বথা কিমনেনাস্মাকমসদ্বিকল্পেন। দিবসৈঃ পক্ষত্রয়াৎ পরতো মাসান্ বদেৎ। মাসৈস্তস্মাদেব পক্ষত্রয়াৎ পরতোঽব্দান্ বদেৎ। মাসাৎ পরতো দিনাধিক্যং দৃষ্ট্যনুপাতবশাৎ বাচ্যং। যথা যদি দিনত্রিংশতা বর্ষং লভ্যতে তদ্দৃষ্ট্যা দিনৈকেন মাসৈকমিতি। তথা চ সমাসসংহিতায়াং। কেচিৎ কেতুসহস্রং শতমেকসমন্বিতং বদন্ত্যেকে। নারদমতমেকোঽয়ং ত্রিস্থানসমুদ্ভবো বিবিধরূপঃ ॥ দিব্যা গ্রহর্ক্ষজাতাস্তীব্রফলকরা ভৌমাঃ। প্রাণিধ্বজাদিতুঙ্গেষু চান্তরীক্ষা ন চাত্যশুভাঃ ॥ উদয়াস্তময়াধূপনসংযোগাকারমার্গদিক্পাতৈঃ। ফলানি দিবসৈর্ম্মাসান্ মাসৈস্তু বর্ষাণি সন্দিশেৎ কেতোঃ ॥ * ॥ অথ শুভস্য কেতোর্লক্ষণমাহ। হ্রস্বতনুঃ প্রসন্নঃ স্নিগ্ধ ঋজুরচিরসংস্থিতঃ শুক্লঃ। উদিতো বাপ্যভিদৃষ্টঃ সুভিক্ষসৌখ্যাবহঃ কেতুঃ ॥ ঋজুঃ অকুটিলঃ। অচিরসংস্থিতঃ শীঘ্রমেবাদর্শনং যাতি। শুক্লঃ শ্বেতঃ। উদিতো বাপ্যভিদৃষ্টঃ অথবোদিত এবাভিদৃষ্টঃ তস্মিংস্তু উদিতমাত্রে যদি দৃষ্টির্ভবতি তদা শুভঃ। অন্যথা অশুভঃ ॥ * ॥ অশুভস্য কেতোর্লক্ষণমাহ। উক্তবিপরীতরূপো ন শুভকরো ধূমকেতুরুৎপন্নঃ। ইন্দ্রায়ুধানুকারী বিশেষতো দ্বিত্রিচূলো বা ॥ হ্রস্বতনুঃ প্রসন্ন ইত্যস্মাদুক্তাৎ যো বিপরীতরূপঃ কেতুরুৎপন্নঃ স ধূমকেতুঃ। স চ ন শুভকরঃ পাপং করোতীত্যর্থঃ। ইন্দ্রধনুঃসদৃশো ন শুভকর এব। তথা দ্বিশিখস্ত্রিশিখশ্চ বিশেষতঃ পাপফলদঃ। তথা চ সমাসসংহিতায়াং। অচিরস্থিতোঽভিদৃষ্টস্ত্বৃজুঃ সিতঃ স্নিগ্ধমূর্ত্তিরুদগুদিতঃ। হ্রস্বতনুঃ প্রসন্নঃ কেতুর্লোকস্য ভবায় ॥

ন শুভো বিপরীতো বিশেষতঃ শক্রচাপসংকাশঃ। দ্বিত্রিচতুশ্চূলো বা দক্ষিণসংস্থশ্চ মৃত্যুকরঃ ॥ * ॥ অধুনা কেতুসহস্রলক্ষণং বিবক্ষুস্তত্রাদাবেব রবিজাঃ পঞ্চবিংশতিঃ কেতবো ভবন্তি। তেষাং লক্ষণমাহ। হারমণিহেমরূপাঃ কিরণাখ্যাঃ পঞ্চবিংশতিঃ সশিখাঃ। প্রাগপরদিশোর্দৃশ্যা নৃপতিবিরোধাবহা রবিজাঃ ॥ হারো মুক্তাহারঃ। মণয়শ্চন্দ্রকান্তপ্রভৃতয়ঃ। হেম সুবর্ণং। তৎসমানবর্ণা যে কেতবস্তে কিরণাখ্যাঃ কিরণসংজ্ঞাঃ। সশিখাঃ সচুলাঃ। ● চ পঞ্চবিংশতী রবিজাঃ সূর্য্যসুতাঃ প্রাগপরয়োশ্চ দিশোর্দৃশ্যাঃ। প্রাক্ পূর্ব্বস্যামপরস্যাং পশ্চিমায়াং দিশি দৃশ্যন্তে। এতেষাং মধ্যাদেক এব দৃশ্যতে ন সর্ব্বে যুগপদিতি। সর্ব্বত্রেয়ং পরিভাষা। তে চ নৃপতে রাজ্ঞো বিরোধপ্রদাঃ অনিষ্টা ইত্যর্থঃ। তথা চ গর্গঃ। শুদ্ধস্ফটিকসংকাশা মৃণালরজতপ্রভাঃ। মুক্তাহারসুবর্ণাভাঃ সশিখাঃ পঞ্চবিংশতিঃ ॥ কিরণাখ্যা রবেঃ পুত্রা দৃশ্যন্তে প্রাগ্দিশি স্থিতাঃ। তথা চ পরভাগস্থা নৃপতের্ভয়দাশ্চ তে ॥ * ॥ অথাগ্নিপুত্রাস্তাবন্ত আহ। শুকদহনবন্ধুজীবকলাক্ষাক্ষতজোপমা হুতাশসুতাঃ। আগ্নেয্যাং দৃশ্যন্তে তাবন্তস্তেঽপি শিখিনো ভয়দাঃ ॥ শুকপক্ষী নীলপীতবর্ণঃ। দহনোঽগ্নিঃ। বন্ধুজীবকঃ পুষ্পবিশেষোঽতিলোহিতঃ। লাক্ষা বৃক্ষনির্যাসঃ। ক্ষতজং রক্তং। তদুপমাস্তত্তুল্যবর্ণাঃ। তে চ তাবন্তঃ পঞ্চবিংশতিঃ আগ্নেয্যাং দিশি দৃশ্যন্তে। তে চ হুতাশসুতাঃ অগ্নিপুত্রাঃ অগ্নিভয়দাঃ। তথা চ গর্গঃ। নানাবর্ণাগ্নিসঙ্কাশা দীপ্তিমন্তোঽপি চুলিনঃ। সৃজন্ত্যগ্নিমিবাকাশাৎ সর্ব্বজ্যোতিষনাশনাঃ ॥ তেঽগ্নিপুত্রা গ্রহা জ্ঞেয়া লোকেঽগ্নিভয়বেদিনঃ। আগ্নেয্যাং দিশি দৃশ্যন্তে পঞ্চবিংশাঃ প্রকীর্ত্তিতাঃ ॥ * ॥ অথ মৃত্যুসুতাস্তাবন্ত এবাহ। বক্রশিখা মৃত্যুসুতা রূক্ষাঃ কৃষ্ণাশ্চ তেঽপি তাবন্তঃ। দৃশ্যন্তে যাম্যায়াং জনমরকাবেদিনস্তে চ ॥ বক্রশিখাঃ অস্পষ্টচূড়াঃ। তে চ রূক্ষাঃ অস্নিগ্ধাস্তেঽপি পঞ্চবিংশতিরেব। তে চ মৃত্যোঃ পুত্রা দক্ষিণস্যাং দিশি দৃশ্যন্তে তে চ জনানাং মরকং আবেদয়ন্তি। তথা চ গর্গঃ। কৃষ্ণা রূক্ষা বক্রশিখা দৃশ্যন্তে যাম্যদিক্স্থিতাঃ। পঞ্চবিংশা মৃত্যুসুতাঃ প্রজাক্ষয়করাঃ স্মৃতাঃ ॥ * ॥ অথ ভূপুত্রা দ্বাবিংশতিরেবাহ। দর্পণবৃত্তাকারা বিশিখাঃ কিরণান্বিতা ধরাতনয়াঃ। ক্ষুদ্ভয়দা দ্বাবিংশতিরৈশান্যামম্বুতৈলনিভাঃ ॥ দর্পণবৎ বৃত্তং বর্ত্তুলং আকারো যেষাং তে বিশিখা বিচুলাঃ রশ্মিসংযুক্তাঃ ভূমেঃ পুত্রাঃ। তে চ দ্বাবিংশতিরৈশান্যাং দৃশ্যন্তে। জলস্য তৈলস্য চ সদৃশকান্তয়ঃ। এতে দৃষ্টা দুর্ভিক্ষং দদতি। তথা চ গর্গঃ। সমন্তবৃত্তা বিশিখা রশ্মিভিঃ পরিবারিতাঃ। অম্বুতৈলপ্রতীকাশা দ্বাবিংশা ভূসুতাঃ স্মৃতাঃ ॥ ঐশান্যাং দিশি দৃশ্যন্তে দুর্ভিক্ষভয়দাশ্চ তে ॥ * ॥ অথ চন্দ্রসুতাস্ত্রয়

আহ। শশিকিরণহিমরজতকুমুদকুন্দকুসু-মোপমাঃ সুতাঃ শশিনঃ। উত্তরতো দৃশ্যন্তে ত্রয়ঃ সুভিক্ষাবহাঃ শিখিনঃ ॥ এতে সৌম্যায়াং দিশি দৃশ্যন্তে। তে চ সুভিক্ষং কুর্ব্বন্তি। তথা চ গর্গঃ। চন্দ্র-রশ্মিসুবর্ণাভা হিমকুন্দেন্দুসুপ্রভাঃ। ত্রয়স্তে শশিনঃ পুত্রাঃ সৌম্যাশাস্থাঃ শুভা-বহাঃ ॥ * ॥ অথ ব্রহ্মদণ্ডাখ্যস্য লক্ষণ-মাহ। ব্রহ্মসুত এক এব ত্রিশিখো বর্ণৈ-স্ত্রিভির্যুগান্তকরঃ। অনিয়তদিক্‌সংপ্রভবো বিজ্ঞেয়ো ব্রহ্মদণ্ডাখ্যঃ ॥ ব্রহ্মপুত্র এক এব। স চ ত্রিচূড়ঃ। বর্ণৈঃ সিতাদিভি-শ্চোপলক্ষিতঃ। স তু ব্রহ্মদণ্ডসংজ্ঞো জ্ঞেয়ঃ। অনিয়তায়াং অনিশ্চিতায়াং দিশি সংপ্রভবঃ উৎপদ্যতে সর্ব্বাসু দিক্ষু দৃশ্যত ইত্যর্থঃ। স তু যুগস্যান্তং করোতি সর্ব্ব-ক্ষয়করঃ ইত্যর্থঃ। তথা চ গর্গঃ। একো ব্রহ্মসুতঃ ক্রূরস্ত্রিবর্ণস্ত্রিশিখান্বিতঃ। সর্ব্বা-স্বাশাসু দৃশ্যঃ স্যাৎ ব্রহ্মদণ্ডঃ ক্ষয়াবহঃ॥ * ॥ একাধিকং শতং কথিতং অন্যানি নব-শতান্যেকোনানি কথনীয়ানি ইত্যত আহ। শতমভিহিতমেকসমেতমেকাধিকাচ্ছতাৎ পরতঃ। একোনানি নবশতানি কেতূনাং স্পষ্টৈর্লক্ষণৈঃ কথয়িষ্যে ॥ শতমভিহিত-মেকসমেতং একেনাধিকং কেতূনাং শত-মভিহিতমুক্তং। তস্মাদেকাধিকাচ্ছতাৎ পরতঃ একোনানি একেন বিরহিতানি নবশতানি কেতূনাং স্পষ্টৈর্ব্যক্তৈর্লক্ষণৈ-শ্চিহ্নৈঃ কথয়িষ্যে ॥ * ॥ অথ শুক্রপুত্রা-শ্চতুরশীতিসংজ্ঞাশ্চাহ। শুক্রসুতা বিসর্পকাঃ সৌম্যৈশান্যোরুদয়ং যান্তি চতুরশীত্যাখ্যাঃ। বিপুলসিততারকান্তে স্নিগ্ধাশ্চ ভবন্তি তীব্রফলাঃ ॥ সৌম্যা উত্তরা। ঐশানী ঈশানদিক্। তয়োরুদয়ং দর্শনং গচ্ছন্তি। তে চ বিপুলা বিস্তীর্ণাঃ সিতাঃ শুক্লাঃ তারকা যেষাং। স্নিগ্ধা নির্ম্মলদেহাঃ তে চ তীব্রফলা অনিষ্টফলা ইতি। তথা চ গর্গঃ। স্থূলৈকতারকাঃ শ্বেতাঃ স্নেহবন্তশ্চ সুপ্রভাঃ। অর্চ্চিষ্মন্তঃ প্রসন্নাশ্চ তীব্রেণ চ সুখান্বিতাঃ ॥ এতে বিসর্পকা নাম শুক্রপুত্রাঃ পুরোদয়াঃ। অশীতিশ্চতুরশ্চৈব লোকক্ষয়করাঃ স্মৃতাঃ ॥ * ॥ অথ ষষ্টিশনৈশ্চরপুত্রানাহ। স্নিগ্ধাঃ প্রভাসমেতা দ্বিশিখাঃ ষষ্টিঃ শনৈ-শ্চরাঙ্গরুহাঃ। অতিকষ্টফলা দৃশ্যাঃ সর্ব্ব-ত্রৈতে কনকসংজ্ঞাঃ ॥ ঈদৃশাঃ ষষ্টিঃ শনৈ-শ্চরপুত্রাঃ কনককেতবঃ সর্ব্বত্র সর্ব্বাসু দিক্ষু দৃষ্টাঃ অত্যশুভফলাশ্চ তে। তথা চ গর্গঃ। সুস্নিগ্ধা রশ্মিসংযুক্তা দ্বিশিখাঃ সিততারকাঃ। ষষ্টিস্তে কনকা ঘোরাঃ শনৈশ্চরসুতা গ্রহাঃ ॥ * ॥ অথ গুরুসুতাঃ পঞ্চষষ্টিরাহ। বিকচা নাম গুরুসুতাঃ সিতৈকতারাঃ শিখাপরিত্যক্তাঃ। ষষ্টিঃ পঞ্চভিরধিকাঃ স্নিগ্ধা যাম্যাশ্রিতাঃ পাপাঃ॥ পঞ্চষষ্টিঃ কেতবো বিকচা নাম বৃহস্পতি-পুত্রাঃ। তে চ সিতঃ শ্বেতঃ একস্তারকো যেষাং চূড়ারহিতাঃ। তে চ দক্ষিণস্যাং দৃশ্যন্তে পাপা অনিষ্টফলদা ইত্যর্থঃ। তথা চ গর্গঃ। স্নিগ্ধাঃ শুক্লাঃ প্রসন্নাশ্চ মহারূপাঃ প্রভান্বিতাঃ। একতারা বপুষ্মন্তো

বিশিখা রশ্মিভির্ব্বৃতাঃ ॥ এতে বৃহস্পতেঃ পুত্রাঃ প্রায়সো দক্ষিণাশ্রয়াঃ। নামতো বিকচা ঘোরাঃ পঞ্চষষ্টির্ভয়াবহাঃ ॥ * ॥ অথৈকপঞ্চাশদ্‌বুধপুত্রানাহ। নাতিব্যক্তাঃ সূক্ষ্মা দীর্ঘাঃ শুক্লা যথেষ্টদিক্‌প্রভবাঃ। বুধজাস্তস্করসংজ্ঞাঃ পাপফলাস্ত্বেকপঞ্চাশৎ ॥ তস্করনামান একপঞ্চাশৎ কেতবো বুধস্য পুত্রাঃ। নাতিস্ফুটাঃ অল্পদেহাঃ যথেষ্টায়াং দিশি প্রভব উৎপত্তির্যেষাং সর্ব্বাসু দিক্ষু দৃশ্যন্ত ইত্যর্থঃ। তে চানিষ্টফলাঃ। তথা চ গর্গঃ। অরুন্ধতিসমা ব্যক্তাঃ কেচিদব্যক্ততারকাঃ। পাণ্ডুবর্ণাঃ সুদীর্ঘাশ্চ সূক্ষ্মা রশ্মিভিরাবৃতাঃ ॥ এতে বুধাত্মজা জ্ঞেয়াস্তস্করাখ্যা ভয়াবহাঃ। একাধিকাস্তে পঞ্চাশদথোহত্যর্থচরা গ্রহাঃ ॥ * ॥ অথ ষষ্টিভৌমপুত্রানাহ। ক্ষতজানলানুরূপাস্ত্রিচূলতারাঃ কুজাত্মজাঃ ষষ্টিঃ। নাম্না চ কৌঙ্কুমাস্তে সৌম্যাশাসংস্থিতাঃ পাপাঃ ॥ কৌঙ্কুমনামানঃ ষষ্টিকেতবো মঙ্গলপুত্রাঃ রক্তবহ্নিসদৃশাঃ লোহিতা ইত্যর্থঃ। ত্রিচূলাস্ত্রিশিখাস্তারা যেষাং তে চ উত্তরস্যাং দৃশ্যন্তে পাপফলাশ্চ। তথা চ গর্গঃ। ত্রিশিখাশ্চ ত্রিতারাশ্চ রক্তলোহিতরশ্ময়ঃ। প্রায়সস্তূত্তরামাশাং সেবন্তে নিত্যমেব তে ॥ লোহিতাঙ্গাত্মজা জ্ঞেয়া গ্রহাঃ ষষ্টিঃ সমাসতঃ। নামতঃ কৌঙ্কুমা জ্ঞেয়া রাজ্ঞাং সংগ্রামকারকাঃ ॥ * ॥ অথ ত্রয়স্ত্রিংশদ্রাহুপুত্রানাহ। ত্রিংশত্তু ত্র্যধিকা রাহোস্তে তামসকীলকা ইতি খ্যাতাঃ। রবিশশিনা দৃশ্যন্তে তেষাং ফলমর্কচারোক্তং ॥ ত্রয়স্ত্রিংশৎ স্বর্ভানুপুত্রাস্তে চ নামতঃ তামসকীলকা ইতি প্রসিদ্ধাঃ। তে চ অর্কচন্দ্রমণ্ডলস্থাঃ দৃশ্যন্তে তেষাঞ্চ ফলং সূর্য্যচারে কথিতং তামসকীলকসংজ্ঞা রাহুসুতা ইতি। তথা চ গর্গঃ। কৃষ্ণাভাঃ কৃষ্ণপর্য্যন্তাঃ সংকুলাঃ কৃষ্ণরশ্ময়ঃ। রাহুপুত্রাস্ত্রয়স্ত্রিংশৎ কীলকাশ্চাতিদারুণাঃ ॥ রবিমণ্ডলগাশ্চৈতে দৃশ্যন্তে চন্দ্রগাস্তথা। তথা চ পরাশরঃ। অপর্ব্বণ্যেব দৃশ্যন্তে হ্যঙ্গিরাঃ কাককীলকাঃ। রবেরিবাঙ্গিরামধ্যে হ্যুভয়োঃ কাককীলকৌ ॥ অঙ্গিরাঃ সরথো বাপি দৃশ্যতে পুরুষাকৃতিঃ। কাকঃ কাকাকৃতির্ঘোরস্ত্রিকোণো বাথ লক্ষ্যতে ॥ মণ্ডলং কীলকো মধ্যে মণ্ডলস্যাসিতো গ্রহঃ। মহানৃপবিরোধায় যস্যার্কং তস্য মৃত্যবে ইতি ॥ * ॥ অথ বিংশত্যধিকং শতমগ্নিপুত্রানাহ। বিংশত্যধিকমন্যচ্ছতমগ্নের্ব্বিশ্বরূপসংজ্ঞানাং। তীব্রানলভয়দানাং জ্বালামালাকুলতনূনাং ॥ অন্যৎ অপরং শতং বিংশত্যধিকং কেতুনামগ্নেঃ সুতানাং বিশ্বরূপনাম্নাং কীদৃশানাং জ্বালামালাভিরাকুলা ব্যাপ্তাস্তনবো মূর্ত্তয়ো যেষাং। তথা তীব্রং ঘোরমগ্নিভয়ং দদতি। তথা চ গর্গঃ। নানাবর্ণা হুতাশাভা দীপ্তিমন্তো বিচূলিনঃ। সৃজন্ত্যগ্নিমিবাকাশে সর্ব্বজ্যোতির্ব্বিনাশনাঃ ॥ তেহগ্নিপুত্রা গ্রহা জ্ঞেয়া লোকেহগ্নিভয়বেদিনঃ। বিংশং গ্রহশতং ঘোরং বিশ্বরূপেতি বিশ্রুতং ॥ * ॥ অথ সপ্তসপ্ততি-

বায়ুপুত্রানাহ। শ্যাবারুণা বিতারাশ্চামররূপা বিকীর্ণদীধিতয়ঃ। অরুণাখ্যা বায়োঃ সপ্তসপ্ততিঃ পাপদাঃ পরুষাঃ॥ অরুণসংজ্ঞা বায়োঃ পুত্রাঃ শ্যাবলোহিতবর্ণাঃ তারকবর্জ্জিতাঃ চামররূপা বালব্যজনাকৃতয়ঃ ব্যাক্ষিপ্তরশ্ময়ঃ রূক্ষাঃ দুষ্টফলপ্রদাঃ। অত্র যেষাং দিঙ্নিয়মো নাস্তি তেঽনিয়তদর্শনাঃ সর্ব্বাস্বপি দিক্ষু দৃশ্যন্তে। তথা চ গর্গঃ। অতাররূপপ্রতিমাঃ শ্যাবরক্তসুবর্ণিনঃ। বালরূপা ইবাভান্তি শুক্লবিস্তীর্ণরশ্ময়ঃ॥ সপ্তসপ্ততি চৈবান্যে বায়োঃ পুত্রাঃ প্রচক্ষতে। লোকবিধ্বংসনা রূক্ষা নামতস্ত্বরুণা গ্রহাঃ॥ *॥ অথাষ্টৌ প্রজাপতিসুতা দ্বে চ শতে চতুরধিকে ব্রহ্মণঃ পুত্রাস্তানাহ। তারাপুঞ্জনিকাশা গণকা নাম প্রজাপতেরষ্টৌ। দ্বে চ শতে চতুরধিকে চতুরস্রা ব্রহ্মসন্তানাঃ॥ অষ্টৌ কেতবো গণকা নাম প্রজাপতেঃ পুত্রাঃ। তে চ তারাণাং নক্ষত্রাণাং পুঞ্জঃ সমূহস্তদাকারাঃ। তে চ অশুভদায়িনঃ। তথা চ। দ্বে শতে চতুরধিকে কেতূনাং তে চ চতুরস্রসংজ্ঞাঃ চতুরাকৃতয়স্তে চ ব্রহ্মণঃ পুত্রাঃ পাপফলা এব জ্ঞেয়াঃ তে চাগ্নেয়দিগ্‌ভবাঃ। তথা চ গর্গঃ। তারাপুঞ্জপ্রতীকাশা ব্যোমমণ্ডলসংস্থিতাঃ। প্রাজাপত্যা গ্রহাস্ত্বষ্টৌ গণকা ভয়বেদিনঃ॥ ত্র্যস্রাশ্চ চতুরস্রা বা সশিখাঃ শ্বেতরশ্ময়ঃ। দ্বে শতে চতুরশ্চৈব ব্রহ্মজা ভয়দাশ্চ তে॥ *॥ অথ দ্বাত্রিংশদ্বরুণপুত্রানাহ। কঙ্কা নাম বরুণজা দ্বাত্রিংশৎ গুল্মসংস্থানাঃ। শশিবৎপ্রভাসমেতাস্তীব্রফলাঃ কেতবঃ প্রোক্তাঃ॥ তে বরুণপুত্রাঃ বংশগুল্মবৎ সংস্থানমাকৃতির্যেষাং। গুল্ম একমূলজো লতাসমূহঃ। শশিবৎ চন্দ্রবৎ প্রভয়া কান্ত্যা সমেতাস্তে চ তীব্রফলাঃ কষ্টফলাঃ প্রোক্তাঃ কথিতাস্তে চানিয়তদিক্‌প্রভবাঃ। তথা চ গর্গঃ। বংশগুল্মপ্রতীকাশা মহান্তঃ পূর্ণরশ্ময়ঃ। কাকতুণ্ডনিভৈশ্চাভি রশ্মিভিঃ কেচিদাবৃতাঃ॥ ময়ূখানুন্মৃজন্তীব স্নিগ্ধত্বাৎ সৌম্যদর্শনাঃ। এতে কষ্টফলাঃ কঙ্কা দ্বাত্রিংশদ্‌বারুণা গ্রহাঃ॥ *॥ অথ ষণ্ণবতিকালপুত্রানাহঃ। ষণ্ণবতিঃ কালসুতাঃ কবন্ধসংজ্ঞাঃ কবন্ধসংস্থানাঃ। পুণ্ড্রভয়প্রদাঃ স্যুর্ব্বিরূপতারাস্তে শিখিনঃ॥ কালপুত্রাঃ কবন্ধসংস্থানাঃ ষণ্ণবতিঃ। কবন্ধশ্ছিন্নশিরঃপুরুষস্তদ্বৎ সংস্থানমাকৃতির্যেষাং তে চ বিরূপা অস্ফুটাস্তারকা যেষাং তে শিখিনঃ কেতবঃ পুণ্ড্রা নাম জনপদাস্তেষাং শ্রেয়স্করাঃ স্যুঃ। অন্যত্র পুনর্ভয়দাস্তে চানিয়তদিক্‌সংপ্রভবাঃ। তথা চ গর্গঃ। তারাপুঞ্জবিরূপাশ্চ কবন্ধাকৃতিসংস্থিতাঃ। পীতারুণাঃ সবর্ণাশ্চ ভস্মকর্পূররশ্ময়ঃ॥ কালপুত্রাঃ কবন্ধাশ্চ নবতিঃ ষট্ প্রকীর্ত্তিতাঃ। লোকরোগকরা ঘোরাঃ পুণ্ড্রাণামভয়প্রদাঃ॥ *॥ অথ নব বিদিক্‌পুত্রাঃ সর্ব্বেষাঞ্চ সংখ্যামন্যেষাঞ্চ বক্ষ্যামীত্যেতদাহ। শুক্লবিপুলৈকতারা নব বিদিশাং কেতবঃ সমুৎপন্নাঃ। এবং কেতুসহস্রং বিশেষমেষামতো বক্ষ্যে॥ বিদিশাং

দিগন্তরাণাঞ্চ নব কেতবঃ সমুৎপন্নাঃ বিদিক্‌পুত্রা ইত্যর্থঃ। কিম্ভূতাঃ শুক্লঃ শ্বেতবর্ণো বিপুলো বিস্তীর্ণ একতারো যেষাং তে বিদিকেতবো দৃশ্যন্তে দৃষ্টাশ্চ পাপফলাঃ। তথা চ গর্গঃ। শুক্লৈকতারা বিপুলা বিদিক্‌পুত্রা নবগ্রহাঃ। বিদিক্ষু সংস্থিতা এব দৃশ্যন্তে ভয়দায়কাঃ ॥ এবং কেতুসহস্রমিতি এবং কেতূনাং সহস্রং উক্তং এষামেব বিশেষলক্ষণং বক্ষ্যে। এষাং মধ্যাৎ কেচিৎ দৃশ্যন্তে ন সর্ব্ব এব। তত্র যে দৃশ্যন্তে তেষাং লক্ষণং বক্তুকামস্তত্রাদাবেব কেতোর্লক্ষণমাহ ॥ * ॥ উদগায়তো মহান্ স্নিগ্ধমূর্ত্তিরপরোদয়ী বসাকেতুঃ। সদ্যঃ করোতি মরকং সুভিক্ষমপ্যুত্তমং কুরুতে ॥ উদগায়ত উত্তরস্যাং দিশ্যায়তো দীর্ঘঃ মহানতিস্থূলঃ নির্ম্মলতনুঃ অপরোদয়ী পশ্চিমায়াং দিশ্যুদয়ং যাতি। স চ নাম্না বসাকেতুর্দ্দৃষ্টঃ সদ্য এব তস্মিন্নহনি মরণং করোতি। উত্তমমপি প্রধানং সুভিক্ষঞ্চ কুরুতে ॥ * ॥ অথাস্থিকেতোঃ শস্ত্রাখ্যস্য চ লক্ষণমাহ। তল্লক্ষণোঽস্থিকেতুঃ স তু রূক্ষঃ ক্ষুত্তয়াবহঃ প্রোক্তঃ। স্নিগ্ধস্তাদৃক্ প্রাচ্যাং শস্ত্রাখ্যো ডমরমরকায় ॥ তদিত্যনেন বসাকেতোঃ পরামর্শঃ। অস্থিকেতুশ্চ তল্লক্ষণৈর্বসাকেতুসদৃশৈর্যুক্তঃ। উদগায়ত ইত্যাদি কিন্ত্বয়ং বিশেষঃ স তু রূক্ষঃ স্নেহরহিতঃ দৃষ্টশ্চ ক্ষুত্তয়াবহঃ কথিতঃ। স্নিগ্ধস্তাদৃগিতি তাদৃগ্বসাকেতুসদৃশোঽন্যঃ স্নিগ্ধো নির্ম্মলদেহঃ প্রাচ্যাং দৃশ্যতে। স তু শস্ত্রনামা কেতুর্দ্দৃষ্টঃ ডমরং শস্ত্রকলহং মরকঞ্চ করোতি। তথা চ পরাশরঃ। এভিঃ ষড়্বিংশতিরুদয়ৈঃ ফলমাবেদয়ন্তি। তন্নামতো রূপতঃ ফলতঃ কালতোঽভিধাস্যামঃ ॥ তত্র মার্ত্তিবাস্ত্রয় উদয়ং যান্তি। একৈকশো বসাস্থিশস্ত্রকেতুর্ব্বা। তত্র বসাকেতুঃ স্নিগ্ধো মহানুদগায়তশিখস্ত্রিংশদ্বর্ষশতং প্রোষ্য সংপ্লবে যুগে পশ্চিমোদিতঃ সদ্যো মরকফলঃ সৌভিক্ষকরঃ রূক্ষোঽস্থিকেতুঃ সৌভিক্ষকরস্তুল্যপ্রবাসকালফলঃ পূর্ব্বেণ স্নিগ্ধ এব শস্ত্রকেতুরাজবিরোধমরকফলঃ সমোদয়ঃ ॥ * ॥ অথ কপালকেতোর্লক্ষণমাহ। দৃশ্যোঽমাবাস্যায়াং কপালকেতুঃ সধূম্ররশ্মিশিখঃ। প্রাঙ্নভসোঽর্দ্ধবিচারী ক্ষুন্মরকাবৃষ্টিরোগকরঃ ॥ কপালকেতুর্নাম অমাবাস্যায়াং দৃশ্যতে পূর্ব্বদিশি উদয়ং যাতি। কীদৃশঃ সধূম্রা রশ্মিশিখা যস্য কিরণকান্তির্ধূম্রবর্ণেত্যর্থঃ। নভস আকাশস্য অর্দ্ধং যাবদ্বিচরতি। স চ দুর্ভিক্ষমরকাবর্ষণরোগপ্রদঃ। তথা চ পরাশরঃ। অথাদিত্যজানাং কপালকেতুরুদয়তে অমাবাস্যায়াং পূর্ব্বস্যাং দিশি সধূম্রার্চ্চিশিখো নভসো বিষয়ার্দ্ধচরো দৃশ্যতে। পঞ্চবিংশবর্ষশতং প্রোষ্য ত্রীংশ্চ পক্ষান্ স্থিতির্যস্য কুমুদকেতোশ্চারান্তে স দৃষ্ট এব। দুর্ভিক্ষানাবৃষ্টিব্যাধিভয়ং প্রত্যুপদ্রবান্ সৃজতি। যাবতো দিবসান্ দৃশ্যতে তাবন্মাসান্মাসৈঃ সম্বৎসরান্ পঞ্চপ্রস্থং বর্ষাধান্যস্যার্ঘ্যং

কৃত্বা প্রজানামেকমুপযুঙ্‌ক্তে ॥ * ॥ অথ রৌদ্রকেতোরাহ । প্রাগ্বৈশ্বানরমার্গে শূলাগ্রঃ শ্যাবরূক্ষতাম্রার্চ্চিঃ । নভসস্ত্রিভাগগামী রৌদ্র ইতি কপালতুল্যফলঃ॥ রৌদ্রনামা কেতুঃ পূর্ব্বস্যাং দিশি বৈশ্বানরমার্গে দহনবীথ্যাং দৃশ্যতে। পূর্ব্বাষাঢ়োত্তরাষাঢ়য়োঃ সমীপ ইত্যর্থঃ । কীদৃশঃ শূলাগ্রঃ শূলাকৃতিরগ্রং যস্য কেতোঃ স শূলাগ্রঃ ত্রিশিখ ইত্যর্থঃ। তস্যৈব বিশেষণং শ্যাবরূক্ষতাম্রার্চ্চিঃ শ্যাবরূক্ষং তাম্রং চার্চ্চিস্তেজো যস্য স শ্যাবরূক্ষতাম্রার্চ্চিঃ । নভস আকাশস্য ত্রিভাগগমনশীলঃ। স চ কপালকেতোঃ সমফলঃ। এতদুক্তং ভবতি ক্ষুম্মরকাবৃষ্টিরোগকৃৎ । আচার্য্যেণ শুক্রাচারে বৈশ্বানরমার্গঃ প্রদর্শিত এব আষাঢ়াদ্বয়ং দহন ইতি। তথা চ পরাশরঃ। অথ দক্ষযজ্ঞে রুদ্রক্রোধোদ্ভবঃ কালকেতুস্ত্রীণি বর্ষশতানি নব চ মাসান্ প্রোষ্য উদয়তে। পূর্ব্বেণ বৈশ্বানরমার্গে ইত্যমৃতময়স্য মণিকেতোশ্চারান্তে শ্যাবরূক্ষতাম্রারুণাং শূলাকারসদৃশীং শিখাং কৃত্বা নভসস্ত্রিভাগচারী স শস্ত্রভয়রোগদুর্ভিক্ষাবৃষ্টিমরকৈর্যাবন্মাসান্ দৃশ্যতে তাবদ্বর্ষাণি ত্রিভাগশেষাং প্রজাং কৃত্বা ॥ শারদধান্যস্যাঢ়কমর্ঘ্যং কৃত্বা চাস্তং ব্রজতি। তথা চ বৃদ্ধগর্গঃ। জ্যৈষ্ঠমূলমনুরাধা যা বীথী সংপ্রকীর্ত্তিতা। তাঞ্চ বীথীং সমারুহ্য কেতুশ্চেৎ ক্রীড়তে ভৃশং ॥ দক্ষিণাভিনতাং কৃত্বা শিখাং ঘোরাং ভয়ঙ্করাং। শূলাগ্রসদৃশীং তীক্ষ্ণাং শ্যাবতাম্রারুণপ্রভাং ॥ পূর্ব্বেণ উদিতশ্চৈব নক্ষত্রাণ্যুপধূপয়েৎ। ঘোরং প্রজাসূৎসৃজতি ফলং মাসে ত্রয়োদশে॥ ত্রিভাগং নভসো গত্বা ততো গচ্ছত্যদর্শনং। যাবতো দিবসাংস্তিষ্ঠেৎ তাবদ্বর্ষাণি তদ্ভয়ং ॥ শস্ত্রাগ্নিভয়রোগৈশ্চ দুর্ভিক্ষমরকৈর্হতাঃ । ঘূর্ণমানাঃ প্রজাঃ সর্ব্বা বিদ্রবন্তি দিশো দশ ॥ * ॥ অথ চলকেতোর্লক্ষণমাহ । অপরস্যাং চলকেতুঃ শিখয়া যাম্যাগ্রয়াঙ্গুলোচ্ছ্রিতয়া । গচ্ছেৎ যথোদক্ তথা তয়া দৈর্ঘ্যমায়াতি॥ সপ্তমুনীন্ সংস্পৃশ্য ধ্রুবমভিজিতমেব প্রতিনিবৃত্তঃ স্যাৎ। নভসোঽর্দ্ধভাগমিত্বা যাম্যেনাস্তং সমুপযাতি ॥ হন্যাৎ প্রয়াগকূলাৎ যাবদবন্তীঞ্চ পুষ্করারণ্যং। উদগপি চ দেবিকামপি ভূয়িষ্ঠং মধ্যদেশাখ্যং ॥ অন্যানপি চ স দেশান্ কচিৎ কচিদ্ধন্তি রোগদুর্ভিক্ষৈঃ। দশ মাসান্ ফলপাকোঽস্য কৈশ্চিদষ্টাদশ প্রোক্তঃ ॥ অপরস্যামিতি পশ্চিমায়াং দিশি চলকেতুনামা কেতুর্দৃশ্যতে। স চ কীদৃশঃ যাম্যায়াং দিশি অগ্রং যস্যাঃ তয়া অঙ্গুলপ্রমাণোচ্ছ্রিতয়া যথা যেন প্রকারেণ উদক্ উত্তরস্যাং দিশি যাতি তথা তেনৈব প্রকারেণ দৈর্ঘ্যং দীর্ঘতাং প্রাপ্নোতি । সপ্তমুনীন্ বশিষ্ঠাদীন্ সংস্পৃশ্য তথা ধ্রুবং ধ্রুবতারকং অভিজিতঞ্চ নক্ষত্রং সংস্পৃশ্য ততঃ প্রতিনিবৃত্তঃ প্রত্যাগতঃ নভস আকাশস্য অর্দ্ধভাগমিত্বা গত্বা প্রাপ্য যাম্যেন দক্ষিণস্যাং দিশি অদর্শনং যাতি।

স এব চলকেতুঃ প্রয়াগকূলাদারভ্য যাবদবন্তীং পুষ্করারণ্যনামস্থানং তাবৎ নাশয়েৎ। উদগপি চোত্তরস্যাং দিশ্যপি চ যাবৎ দেবিকাং নদীং তাবদ্ধন্যাৎ। মধ্যদেশাখ্যং মধ্যদেশং ভূয়িষ্ঠমতিশয়েন হন্যাৎ। অন্যানপি চ স দেশানিতি। স চলকেতুঃ অন্যান্ অপরান্ দেশানপি রোগদুর্ভিক্ষৈঃ ক্বচিৎ ক্বচিৎ নাশয়তি ন সর্ব্বত্র। অস্য কেতোর্দর্শ মাসান্ যাবৎ ফলপাকঃ। অদর্শনাৎ ত্রিপক্ষাৎ পরতো যাবদ্দশ মাসাংস্তাবদশুভং ফলং দদাতি। কৈশ্চিদন্যৈর্গর্গাদিভিরষ্টাদশ মাসান্ যাবৎ ফলপাকঃ প্রোক্তঃ। তথা চ পরাশরঃ। অথ পৈতামহশ্চলকেতুঃ পঞ্চদশবর্ষশতং প্রোষ্য উদিতঃ। পশ্চিমেনাঙ্গুলিপর্ব্বমাত্রাং শিখাং দক্ষিণাভিনতাং কৃত্বা চলকেতুশ্চারান্তে নভসস্ত্রিভাগমনুচরন্ যথা যথোত্তরাং ব্রজতি তথা তথা শূলাগ্রাকারাং শিখাং দর্শয়ন্ ব্রাহ্মং নক্ষত্রমুপস্থত্য মনাক্ ধ্রুবং ব্রজরাশিং সপ্তর্ষীন্ সংস্পৃশ্য নভসোঽর্দ্ধমাত্রং দক্ষিণমনুপরিক্রম্য অস্তং ব্রজতি। স স্বর্গে দারুণকর্ম্মা স্বর্গপ্রাপ্তিত্বাদেব বক্রাস্তমভিনিহন্তি লোকমপি চ। ভূমিং কম্পয়িত্বা দশ মাসান্ মধ্যদেশে ভূয়িষ্ঠং জনপদমবশেষং কুরুতে। তেষ্বপি চ ক্বচিৎ ক্বচিৎ শস্ত্রদুর্ভিক্ষমরকব্যাধিভয়ৈঃ ক্লিশ্নাত্যষ্টাদশ মাসানিতি ॥ তথা চ গর্গঃ। কৃচ্ছ্রস্ত্রমরকব্যাধিভয়ৈঃ সংপীড়য়েৎ প্রজাঃ। মাসান্ দশ তথাষ্টৌ চ চলকেতুঃ সুদারুণঃ ॥ * ॥

ততঃ শ্বেতকেতোর্লক্ষণমাহ। প্রাগর্দ্ধরাত্রদৃশ্যো যাম্যাগ্রঃ শ্বেতকেতুরন্যশ্চ। ক ইতি যুগাকৃতিরপরে যুগপত্তৌ সপ্তদিনদৃশ্যৌ ॥ স্নিগ্ধৌ সুভিক্ষশিবদৌ অথাধিকং দৃশ্যতে কনামা যঃ। দশবর্ষাণ্যুপতাপং জনয়তি শস্ত্রপ্রকোপকৃতং ॥ প্রাগর্দ্ধরাত্রদৃশ্য ইতি। শ্বেতকেতুনামা কেতুঃ প্রাক্ পূর্ব্বস্যাং দিশি অর্দ্ধরাত্রকালে দৃশ্যতে যাম্যাগ্রো দক্ষিণশিখঃ অন্যশ্চ দ্বিতীয়ঃ ক ইতি কনামা কেতুরপরে পশ্চিমায়াং দিশি দৃশ্যতে। যুগাকৃতিঃ যুগসংস্থানাকারঃ তৌ দ্বাবপি যুগপত্তুল্যকালং সপ্ত দিবসান্ দৃশ্যেতে। তৌ চ দ্বাবপি স্নিগ্ধাবতিনির্ম্মলৌ দৃশ্যৌ চ সুভিক্ষশিবদৌ। অথ যঃ কনামা স যদি সপ্তভ্যোঽধিকং দৃশ্যতে তদা শস্ত্রপ্রকোপজং সংগ্রামজমুপতাপং জনয়তি। তথা চ পরাশরঃ। অথোদ্দালকঃ শ্বেতকেতুর্দশোত্তরং বর্ষশতং প্রোষ্য ভটকেতোশ্চারান্তে পূর্ব্বস্যাং দক্ষিণাভিনতশিখোঽর্দ্ধরাত্রকালে দৃশ্যস্তেনৈব সহ দ্বিতীয়ঃ কঃ প্রজাপতিপুত্রঃ। পশ্চিমকেন গৃহকেতুর্যুপসংস্থায়ী যুগপদ্দৃশ্যেত। ততস্তাবুভৌ সপ্তরাত্রদৃশ্যৌ দশবর্ষাণি প্রজাঃ পীড়য়েতে। কঃ প্রজাপতিপুত্রো যদ্যধিকং দৃশ্যতে তদা দারুণতরং প্রজানাং শস্ত্রকোপং কুর্য্যাৎ। তথৈব স্নেহবর্ণযুক্তৌ ক্ষেমারোগ্যসুভিক্ষদৌ ভবতঃ ॥ * ॥ অথ শ্বেতস্য লক্ষণমাহ। শ্বেত ইতি জটাকারো রূক্ষঃ শ্যাবো বিয়ত্ত্রিভাগগতিঃ। বিনি-

বর্ত্ততেঽপসব্যং ত্রিভাগশেষাঃ প্রজাঃ কুরুতে ॥ শ্বেতনামা কেতুঃ জটাকারো জটাসদৃশঃ শ্যাবঃ কৃষ্ণবর্ণঃ বিয়ত্যাকাশে ত্রিভাগং যাবদগচ্ছতি ততোঽপসব্যং প্রদক্ষিণং বামভাগে নিবর্ত্ততে তৃতীয়াংশাবশেষাঃ প্রজাঃ কুরুতে। তথা চ পরাশরঃ। অথ কাশ্যপঃ শ্বেতকেতুঃ পঞ্চদশবর্ষশতং প্রোষ্যোগ্রঃ সোমসহজস্য বপ্রকেতোশ্চারান্তে শ্যাবরূক্ষো নভসস্ত্রিভাগমাক্রম্যাপসব্যং নিবৃত্যোর্দ্ধং প্রদক্ষিণজটাকারশিখঃ স যাবন্মাসান্ দৃশ্যতে তাবদ্বর্ষাণি সুভিক্ষমাবহতি। মধ্যদেশে আর্য্যগণানামদো নামোদীচ্যেভূর্মিষ্ঠস্ত্রিভাগশেষাং প্রজামবশেষয়তি ॥ * ॥ অথ রশ্মিকেতোর্লক্ষণমাহ। আধূম্রয়াতিশিখয়া দর্শনমায়াতি কৃত্তিকাসংস্থঃ। জ্ঞেয়ঃ স রশ্মিকেতুঃ শ্বেতসমানং ফলং ধত্তে ॥ যঃ কেতুরাধূম্রবর্ণয়া শিখয়োপলক্ষিতস্তথা কৃত্তিকাসংস্থঃ কবিকানাং সমীপে দর্শনং গচ্ছতি স রশ্মিকেতুঃ শ্বেতকেতোঃ সদৃশং ফলং ধত্তে। তথা চ পরাশরঃ। অথ রশ্মিকেতুর্বিভাবসুজঃ প্রোষ্য বর্ষশতমাবর্ত্তকেতোঃ। উদিতশ্চারান্তে কৃত্তিকাসু ধূম্রকেতুঃ ॥ * ॥ ধ্রুবকেতোর্লক্ষণমাহ। ধ্রুবকেতুরনিয়তগতিঃ প্রমাণাকৃতির্ভবতি। বিশ্বক্ দিব্যান্তরীক্ষভৌমো ভবত্যয়ং স্নিগ্ধ ইষ্টফলঃ॥ সেনাঙ্গেষু নৃপাণাং গৃহতরুশৈলেষু চাপি দেশানাং। গৃহিণামুপস্করেষু চ বিনাশিনাং দর্শনং যাতি ॥ ধ্রুবেতি অনিয়তা অনিশ্চিতা গতির্গমনং প্রমাণং স্থূলসূক্ষ্মমধ্যভাবমাকৃতিঃ আকারো যস্য স তথাভূতঃ। স চ বিশ্বক্ সমন্ততো ভবতি সর্ব্বাসু দিক্ষিত্যর্থঃ। স চ দিব্যান্তরীক্ষভৌমস্ত্রিবিধো ভবতি। কচিদ্দ্বিবিধো নানাকারো ভবতি। স চ স্নিগ্ধো নির্ম্মলশরীর ইষ্টফলঃ। এষ চ এবংবিধানাং বিনাশিনাং মুমূর্ষূণাং দর্শনমুদয়ং যাতি। নৃপাণাং বিনাশিনাং সেনাঙ্গেষু সোপকরণেষু খলীনতোরণাদিষু দর্শনং যাতি। দেশানাং বিনাশিনাং গৃহবৃক্ষপর্ব্বতেষু চ দৃশ্যতে। তথা গৃহিণামুপস্করেষু উপস্করভাণ্ডেষু দর্ব্বীসূর্পমার্জ্জন্যাদিষু গৃহতরুশৈলেষু বিনাশিনামেব দর্শনং যাতি। তথা চ পরাশরঃ। অথানিয়তদিক্‌কালরূপবর্ণপ্রমাণসংস্থানো ধূমকেতুঃ পরাভবিষ্যতাং দেশানাং রাজ্ঞাং জনপদানাঞ্চ বৃক্ষপুরপর্ব্বতবেশ্মধ্বজপতাকাশস্ত্রবর্ম্মায়ুধাবরণরথনাগোষ্ট্রপুরুষশয়নাসনভাণ্ডেষু চ দৃশ্যতে। স এব দিবি স্নিগ্ধো বিমলঃ প্রদক্ষিণশিখো গজনাগবীথীনামুত্তরেণ ব্রজন্ সুভিক্ষক্ষেমারোগ্যং চাবহতি। দশৈকবিংশতিদ্বিষষ্টিশতধা বা দর্শনমিচ্ছন্তি মুনয়ো ধূমকেতোস্তস্য চ প্রাগুদয়ান্নিমিত্তান্যর্ব্বাচীনচলনমগ্নেঃ প্রভামৎস্যপ্রধূপনং দিশাং শীতোষ্ণবিপর্য্যয় ঈতির্ব্যক্তিবাহুসম্ভবশ্চ ॥ * ॥ অথ কুমুদকেতোর্লক্ষণমাহ। কুমুদ ইতি কুমুদকান্তির্ব্বারুণ্যাং প্রাক্‌শিখো নিশামেকাং। দৃষ্টঃ সুভিক্ষমতুলং দশ কিল বর্ষাণি স

করোতি ॥ কুমুদ ইতি শ্বেতবর্ণ ইত্যর্থঃ। পশ্চিমায়াং প্রাক্‌শিখঃ পূর্ব্বাগ্রো নিশামেকাং দৃশ্যতে। কিলেত্যাগমসূচনে। স চ দৃষ্টো দশ বর্ষাণ্যতুলমসমং সুভিক্ষং করোতি। তথা চ পরাশরঃ। অথামৃতজঃ কুমুদো মণির্জলো ভবঃ পদ্মঃ আবর্ত্তঃ সম্বর্ত্তঃ শঙ্খো হিমো রুক্ষঃ কুক্ষিঃ ফলো বিসর্পণঃ শীতশ্চেতি। তত্র কুমুদকেতুর্ব্বসাকেতোশ্চার্দ্ধসমাপ্তৌ বারুণ্যাং দর্শনমুপৈতি। গোক্ষীরবিমলস্নিগ্ধপ্রভাং পূর্ব্বেণাভিগতাং শিখাং ধৃত্বৈকরাত্রিচরঃ স দৃষ্ট এব সুভিক্ষমুৎপাদয়তি দশ বর্ষাণি প্রজানামবিরোধঞ্চ। প্রতীচ্যানাঞ্চ মুখরোগারোচকপ্রতিশ্যায়পাণ্ডুরোগজ্বরৈঃ প্রজানাং বাধত ইতি ॥ * ॥ অথ মণিকেতোর্লক্ষণমাহ। সকৃদেকযামদৃশ্যো সুসূক্ষ্মতারঃ পরিণমতি মণিকেতুঃ। ঋজ্বী শিখাস্য শুক্লা স্তনোদ্গতা ক্ষীরধারেব ॥ উদয়ন্নেব সুভিক্ষং চতুরো মাসান্ করোত্যসৌ সার্দ্ধান্। প্রাদুর্ভাবং প্রায়ঃ করোতি চ ক্ষুদ্রজন্তূনাং ॥ সকৃদিতি মণিকেতুঃ স চ পশ্চিমায়াং দিশি সূক্ষ্মতারোঽল্পতারকঃ সকৃদেকবারমেকযামদৃশ্যঃ। যামশব্দেন রাত্রিচতুর্ভাগঃ। অস্য কেতোঋর্জ্বী স্পষ্টা শিখা চূড়া শ্বেতবর্ণা দৃশ্যতে। কীদৃশী স্তনোত্থা ক্ষীরধারেব স্তনাৎ নিঃসৃতা ক্ষীরধারা যথা দৃশ্যতে তদ্বত্তচ্ছিখা। উদয়ন্নেবেতি। অসৌ কেতুরুদয়ন্নবোদিতমাত্র এব চতুরঃ সার্দ্ধানর্দ্ধোনপঞ্চমাসান্ সুভিক্ষং ক্ষেমমুৎপাদয়তি। প্রায়ো বাহুল্যেন ক্ষুদ্রজন্তূনাং নকুলাদীনাং প্রাদুর্ভাবমুৎপত্তিং করোতি। তথা চ পরাশরঃ। মণিকেতুরপি কপালকেতোরবসানে প্রতীচ্যামুদয়ং যাতি। স তু সূক্ষ্মতারকঃ শ্বেতবর্ণয়া ক্ষীরপ্রসেকয়া পূর্ব্বাভিনতয়া শিখয়া সর্ব্বর্য্যামেকযামদৃশ্যঃ। স উদয়াৎ প্রভৃতি পঞ্চ মাসান্ ক্ষেমং সুভিক্ষমুৎপাদয়তি ॥ ক্ষুদ্রজন্তূনাং প্রাদুর্ভাবং করোত্যতিমাত্রকালদৃষ্টঃ ॥ * ॥ অথ জলকেতোর্লক্ষণমাহ। জলকেতুরপি চ পশ্চাৎ স্নিগ্ধঃ শিখয়া পরেণ চোন্নতয়া। নব মাসান্ সুভিক্ষং করোতি শোকশান্তিঞ্চ লোকস্য ॥ পশ্চাৎ পশ্চিমায়াং দিশি দৃশ্যতে অপরেণ পশ্চিমেন চোন্নতয়া উচ্চয়া শিখয়া যুক্তঃ। স চ দৃষ্টঃ নবমাসপর্য্যন্তং সুভিক্ষং করোতি। লোকমঙ্গলকরশ্চ। তথা চ পরাশরঃ। অথ জলকেতুঃ পৈতামহঃ যস্য চলকেতোর্নবমাসাবশিষ্টে কর্ম্মণি কৃতে প্রবর্ত্তয়তি। পশ্চিমেনোদিতঃ স্নিগ্ধঃ সুজাতোঽনুপশ্চিমাভিনতঃ। স চ শিখী নবমাসান্তাৎ ক্ষেমসুভিক্ষারোগ্যাণি প্রজাভ্যো ধত্তে। অন্যগ্রহকৃতানাং চাশুভানাং ব্যাঘাতায়েতি ॥*॥ অথ ভবকেতোর্লক্ষণমাহ। ভবকেতুরেকরাত্রং দৃশ্যঃ প্রাক্ সুসূক্ষ্মতারকঃ স্নিগ্ধঃ। হরিলাঙ্গুলোপময়া প্রদক্ষিণাবর্ত্তয়া শিখয়া ॥ যাবদেব মুহূর্ত্তান্ দর্শনমায়াতি নির্দ্দিশেন্মাসান্। তাবদতুলং সুভিক্ষং রুক্ষে প্রাণান্তিকান্ রোগান্ ॥ ভবকেতুঃ পূর্ব্বস্যাং দিশি একাং নিশাং দৃশ্যঃ সুসূক্ষ্মোঽল্পঃ তারকো যস্য

স্নিগ্ধো নির্ম্মলদেহঃ শিখয়োপলক্ষিতঃ। কীদৃশয়া হরিঃ সিংহস্তস্য লাঙ্গূলং পুচ্ছং তদুপময়া তদাকারয়া প্রদক্ষিণেনাবর্ত্তো যস্যাঃ তথাভূতয়া স চ যাবৎসংখ্যান্ ক্ষণান্ দৃশ্যতে তাবন্মাসানসমং সুভিক্ষং নির্দ্দিশেৎ যদি স্নিগ্ধঃ। রূক্ষে তু পুনঃ প্রাণান্তিকান্ রোগান্ বদেৎ। তথা চ পরাশরঃ। অথ জলকেতোঃ কর্ম্মসমাপ্তাঃ ধূম্রাদয়ঃ শীতার্ত্তা অষ্টৌ প্রাদুর্ভবন্তি। তত্র ত্রয়োদশচতুর্দ্দশাষ্টাদশবর্ষান্তাৎ দৃশ্যতে। সুভিক্ষ্যা ক্ষেম্যা বিপর্য্যয়া বিপরীতাঃ ক্ষুদ্রজন্তূনাঞ্চ বধায় তেষামষ্টানাং কর্ম্মণ্যতীতে ভবকেতুর্দ্দৃশ্যতে। পূর্ব্বেণৈকরাত্রং যাবৎ কৃত্তিকানামন্তরতো বা তৎপ্রমাণয়া স্নিগ্ধপারুষ্যাভয়া সিংহলাঙ্গুলসংস্থানয়া প্রদক্ষিণতাম্রয়া শিখয়োদিতঃ। স যাবন্মুহূর্ত্তান্ দৃশ্যতে তাবন্মাসান্ ভবত্যতীব সুভিক্ষায় ॥ রূক্ষঃ প্রাণহরাণাঞ্চ রোগাণাং প্রাদুর্ভাবায়েতি ॥ * ॥ অথ পদ্মকেতোর্লক্ষণমাহ। অপরেণ পদ্মকেতুর্ম্মৃণালগৌরো ভবেন্নিশামেকাং। সপ্ত করোতি সুভিক্ষং বর্ষাণ্যতিহর্ষযুক্তানি ॥ পদ্মকেতুঃ পশ্চিমায়াং দিশি রাত্রিমেকাং দৃশ্যতে। কীদৃশঃ মৃণালবৎ গৌরঃ শ্বেত ইত্যর্থঃ। দৃষ্টঃ সপ্তবর্ষাণি অতিহর্ষযুক্তানি সুভিক্ষং করোতি। তথা চ পরাশরঃ। সপ্তবর্ষাণ্যত্যুচ্ছ্রিতং হর্ষমাবহতি জগতঃ ॥ * ॥ অথাবর্ত্তকেতোর্লক্ষণমাহ। আবর্ত্ত ইতি নিশার্দ্ধেঽসব্যশিখোঽরুণনিভোঽপরে স্নিগ্ধঃ। যাবৎক্ষণান্ স দৃশ্যস্তাবন্মাসান্ সুভিক্ষকরঃ ॥ নিশার্দ্ধে পশ্চিমায়াং দিশি দক্ষিণদিগাশ্রিতশিখঃ স্নিগ্ধো নির্ম্মলমূর্ত্তির্দ্দৃশ্যতে স তু যাবৎসংখ্যান্ মুহূর্ত্তান্ দৃশ্যতে তাবদেব মাসান্ সুভিক্ষং করোতি। তথা চ পরাশরঃ। অথাবর্ত্তকেতুঃ শ্বেতকেতোঃ কর্ম্মণ্যতীতেঽপরেঽর্দ্ধরাত্রেঽসব্যোদিতারুণাভয়া প্রদক্ষিণেন তাম্রয়া শিখয়োদিতঃ। স যাবন্মুহূর্ত্তান্ দৃশ্যতে তাবন্মাসান্ অতীব সুভিক্ষং নিত্যযজ্ঞোৎসবং জগৎ ॥ * ॥ অথ সম্বর্ত্তকেতোর্লক্ষণমাহ। পশ্চাৎ সন্ধ্যাকালে সংবর্ত্তো নাম ধূম্রতাম্রশিখঃ। নভস্ত্রিভাগমাক্রম্য সমূলাগ্রস্থিতো রৌদ্রঃ॥ যাবত এব মুহূর্ত্তান্ দৃশ্যো বর্ষাণি হন্তি তাবন্তি। ভূপাংশ্চ শস্ত্রনিপাতৈরুদয়র্ক্ষং চাপি পীড়য়তি ॥ পশ্চাদিতি। পশ্চিমায়াং দিশি যাবতো মুহূর্ত্তান্ দৃশ্যস্তাবন্তি তৎসংখ্যানি বর্ষাণি নাশয়তি তথা নৃপান্ সংগ্রামৈর্হন্তি। তথোদয়র্ক্ষং যস্মিন্নক্ষত্রে উদিতো দৃশ্যতে তচ্চ পীড়য়তি। তথা চ পরাশরঃ। অথ সম্বর্ত্তকো বর্ষসহস্রমষ্টোত্তরং প্রোষ্য পশ্চিমেনাস্তং গতে সবিতরি সন্ধ্যায়াং দৃশ্যতে তন্বীং তাম্ররূপাং শূলাভাং ধূমং বিমুঞ্চন্তীং দারুণাং শিখাং কৃত্বা নভস্ত্রিভাগমাক্রম্য যাবন্মুহূর্ত্তান্ নিশি তিষ্ঠতি তাবদ্বর্ষাণি হন্তি পরস্পরং শস্ত্রৌঘমপি পার্থিবাঃ। যানি নক্ষত্রাণি সমাশ্রয়তি যত্র বোদেতি তানি দাহনতরং পীড়য়তি তদাশ্রিতাংশ্চ দেশানিতি। তথা চ গর্গঃ। যেষাং নক্ষত্রবিষয়ে

রুক্ষঃ স জ্বাললোহিতঃ। দৃশ্যতে বহুমূর্ত্তিশ্চ তেষাং বিদ্যাৎ মহাভয়ং ॥ অবর্ষশস্ত্রপারুষ্যকোপং দুর্ভিক্ষমেব চ। কুর্য্যান্নৃপতিপীড়াঞ্চ সচক্রপরচক্রতঃ ॥ যত্র তিষ্ঠতি নক্ষত্রে প্রবাসং যত্র গচ্ছতি। ধূপয়েদ্বা স্পৃশেদ্বাপি হন্যাদ্দেশাংস্তথাশ্রয়ান্ ॥ যস্যাভিষেকনক্ষত্রং জন্মভং কর্ম্মভং তথা। দেশর্ক্ষং পীড়য়েদ্বাপি স শান্তিপরমো ভবেৎ ॥ স্নিগ্ধঃ প্রসন্নো বিমলঃ প্রদক্ষিণশিখস্তথা। দৃশ্যতে যেষু দেশেষু শিবং তেষু বিনির্দ্দিশেৎ ॥ অথ শুভান্ কেতূন্ বর্জ্জয়িত্বাশুভানাং নক্ষত্রস্পর্শনাধূপনাদ্দুষ্টফলং বক্ষ্যামীত্যাহ। যে শস্তাস্তান্ হিত্বা কেতুভিরাধূপিতেঽথবা স্পৃষ্টে। নক্ষত্রে ভবতি বধো যেষাং রাজ্ঞাং প্রবক্ষ্যে তান্ ॥ যে কেতবঃ শস্তাঃ প্রশস্তফলাস্তান্ ত্যক্ত্বান্যৈঃ কেতুভিঃ নক্ষত্রে ধূপিতে অথবা স্পৃষ্টে যেষাং নৃপাণাং বধো মরণং ভবতি তান্ নৃপান্ কথয়িষ্যে তাংশ্চাধুনাহ। অশ্বিন্যামশ্মকপং ভরণীষু কিরাতপার্থিবং হন্যাৎ। বহুলাসু কলিঙ্গেশং রোহিণ্যাং শূরসেনাপতিং ॥ অশ্বিন্যামভিধূপিতায়াং স্পৃষ্টায়াং বা কেতুনা অশ্মকানাং জনানামধিপতিং নাশয়েৎ এবং সর্ব্বত্র। অন্যেষ্বাহ। ঔশীনরমপি ভাগ্যে উজ্জয়নীপমার্য্যম্ণে। সাবিত্রে দণ্ডকাধিপতিং ভৌজঙ্গে অসিকেশং ॥ মঘায়াং অঙ্গাধিপং পূর্ব্বফল্গুন্যাং পাণ্ড্যনাথং। ভাগ্যে পূর্ব্বফল্গুন্যাং ঔশীনরং। আর্য্যম্ণে উত্তরফল্গুন্যাং উজ্জয়নীপতিং। সাবিত্রে হস্তায়াং দণ্ডকারণ্যনাথং। ভৌজঙ্গে অশ্লেষায়াং অসিকা জনাস্তেষামীশং। অন্যেষ্বাহ। চিত্রাসু কুরুক্ষেত্রাধিপস্য মরণং সমাদিশেৎ। বাচা কাশ্মীরকাম্বোজৌ নৃপতী প্রাভঞ্জনে ন স্তঃ ॥ চিত্রাসু কেতুনাভিধূপিতাসু স্পৃষ্টাসু চ কুরুক্ষেত্রাধিপস্য মরণং বধং কেতুপঘাতজ্ঞঃ সমাদিশেৎ। প্রাভঞ্জনে স্বাত্যাং কাশ্মীরকাম্বোজাধিপৌ ন স্তঃ ন ভবতঃ। অন্যেষ্বাহ। ইক্ষ্বাকলকনাথশ্চ হন্যতে যদি ভবেদ্বিশাখাসু। মৈত্রে পুণ্ড্রাধিপতিং জ্যৈষ্ঠাসু চ সার্ব্বভৌমকান্যকুব্জাধিপবধঃ ॥ বিশাখাসু যদি কেতূপঘাতো ভবেৎ তদা ইক্ষ্বাকুনাথোঽলকনাথশ্চ হন্যতে। ইক্ষ্বাকবো জনাঃ। অলকা নগরী। অনুরাধায়াং পুণ্ড্রাধিপতিং হন্যাৎ। জ্যৈষ্ঠাসু চ সার্ব্বভৌমস্য রাজ্ঞো বধঃ কান্যকুব্জাধিপস্য চ বধঃ। অন্যেষ্বাহ। মূলে নৃমদ্রকপতী জলদেবে কাশিপো মরণমেতি। যৌধেয়কার্জ্জুনায়নশিবিবৈদ্যান্ বৈশ্বদেবে চ ॥ মূলে কেতুনাভিধূপিতে স্পৃষ্টে বা নৃপতিং মদ্রকপতিং চ হন্তি। জলদেবে পূর্ব্বাষাঢ়ায়াং কাশিপতির্ম্মরণমেতি। বৈশ্বদেবে উত্তরাষাঢ়ায়াং যৌধেয়কঃ অর্জ্জুনায়নঃ শিবিঃ বৈদ্যঃ এতান্নৃপতীন্ হন্তি। অথান্যেষ্বপ্যাহ। হন্যাৎ কৈকয়নাথং পাঞ্চনদং সিংহলাধিপং বঙ্গপং। নৈমিষনৃপং কিরাতপং শ্রবণাদিষু ষট্সু ষড়িমান্ ক্রমশঃ ॥ ষট্সু শ্রবণাদিষু হতেষু ষড়িমান্নৃপান্ ক্রমশঃ ক্রমেণ হন্যাৎ। তদ্যথা।

শ্রবণে হন্তে কৈকয়নাথং। ধনিষ্ঠায়াং পঞ্চনদাধিপতিং। শতভিষায়াং সিংহলাধিপতিং। প্রাগ্‌ভাদ্রপদায়াং বঙ্গাধিপতিং। উত্তরাসু নৈমিষনৃপং। রেবত্যাং কিরাতাধিপং হন্যাৎ॥ * ॥ অথ কেতোর্ব্বিশেষমাহ। উল্কাভিতাড়িতশিখঃ শিখী শিবঃ শিবতরোঽভিদৃষ্টঃ। অশুভঃ স এব চোলবঙ্গসিতহূনচীনানাং॥ যঃ শিখী কেতুঃ উল্কয়াভিমুখ্যেন তাড়িতা হতা শিখা চূড়া যস্য স শিবঃ শ্রেয়স্করঃ যোঽভিদৃষ্ট উদিতমাত্র এব দৃষ্টঃ স শিবতরঃ অতিশয়েন শুভপ্রদঃ কেতুরেবংবিধশ্চোলানাং বঙ্গানাং সিতানাং হূনানাং চাশুভঃ। চোলাদ্যাঃ সর্ব্ব এব জনাঃ॥ * ॥ অন্যদ্বিশেষমাহ। নত্রা যতঃ শিখিশিখাভিসৃতা যতো বাথর্ক্ষং চ সংস্পৃশতি তৎকথিতাংশ্চ দেশান্। দিব্যপ্রভাবনিহতান্ স যথা গরুত্মান্ ভুঙ্‌ক্তে গতো নরপতিঃ পরভোগিভোগান্॥ যতো যস্যাং দিশি শিখিনঃ শিখা কেতুশিখা নত্রা বক্রা তত্র যে দেশা যস্যাং বা গন্তুং প্রবৃত্তা অথ যদি ঋক্ষং নক্ষত্রং সংস্পৃশতি তৎকথিতাংশ্চ দেশান্ যস্যাং দিশি শিখা নত্রা তত্র চ যে দেশা বক্ষ্যমাণাস্তাংস্তৎকথিতান্ নরপতী রাজা গতো ভুঙ্‌ক্তে স্বীকরোতি কীদৃশান্ দিব্যেনাপ্রতিহতেন প্রভাবেণ পরাক্রমেণ নিহতান্ নির্জ্জিতান্ কীদৃশান্ পরৈরন্যৈর্ভোগিভির্ভুজ্যন্তে ভোগা গ্রামাস্তান্ কথং স রাজা ভুঙ্‌ক্তে যথা গরুত্মান্ গরুড়ঃ দিব্যপ্রভাবনিহতান্ পরভোগিভোগান্ ভুঙ্‌ক্তে পরা উৎকৃষ্টা যে ভোগিনঃ সর্পাস্তেষাং ভোগাঃ শরীরাণ্যঙ্গানি চ তান্ যথা যেন প্রকারেণ তথা। তথা চ পরাশরঃ। যস্যাং দিশি সমুত্তিষ্ঠেৎ তাং দিশং নাভিযোজয়েৎ। যতঃ শিখা যতো ধূমস্ততো যায়ান্নরাধিপঃ॥ প্রতিলোমো যতঃ কেতুর্যয়া ধ্যায়তি পার্থিবঃ। সামান্যবাহনবলস্তন্নাশমধিগচ্ছতি॥ ইতি ভট্টোৎপলবিরচিতায়াং সংহিতাবৃত্তৌ কেতুচারাধ্যায়ঃ॥ * ॥ * ॥ অন্যচ্চ। অনগ্নাবগ্নিরূপং বা ধ্বজশস্ত্রগৃহোপমং। তুরঙ্গগজবৃক্ষাদিনানারূপাণি কেতবঃ॥ শতমেকোত্তরং ব্যোম্নি সহস্রমপরে বিদুঃ। নানারূপমনেকঞ্চাপ্যেকমেবাহ নারদঃ॥ দিব্যা নক্ষত্রগা ভৌমাঃ কেতবস্ত্রিবিধা মতাঃ। শুক্লো হ্রস্বতনুঃ স্নিগ্ধ ঋজুশ্চাচিরসংস্থিতঃ॥ উদিতোঽপ্যতিবৃষ্টিঃ স্যাৎ সুভিক্ষসুখকৃচ্ছিখী। বিপরীতস্বরূপস্তু ধূমকেতুর্ন শোভনঃ॥ ইন্দ্রায়ুধানুকারী চ দ্বিচূড়ো বা ত্রিচূড়কঃ। শ্বেতঃ শস্ত্রাকুলং কুর্য্যাল্লোহিতস্ত্বগ্নিজং ভয়ং॥ ক্ষুত্তয়ং পীতকঃ কুর্য্যাৎ কৃষ্ণো রোগমথোল্বণং। শক্ত্যাকারো বিনাশায় সুখায় মুষলাকৃতিঃ॥ দীর্ঘঃ সূক্ষ্মঃ সুখায়ৈব হ্রস্বঃ স্থূলো বিনাশকৃৎ। মণিবর্ণসুবর্ণাভ্যাং কিরণাভ্যাং শিখান্বিতাঃ॥ প্রাক্ পশ্চিমদিশোর্দৃশ্যা নৃপযুদ্ধায় তেঽর্কজাঃ। বহ্নিজাঃ শুকবর্ণাশ্চ লাক্ষাবন্ধুকসন্নিভাঃ॥ আগ্নেয্যাং দিশি দৃশ্যন্তে তে চ বহ্নিভয়প্রদাঃ। কৃষ্ণা বক্রশিখা রুক্ষা মৃত্যুজাঃ পঞ্চবিংশতিঃ॥

যাম্যায়াং তে চ দৃশ্যন্তে নৃণাং মরক-
সূচকাঃ। আদর্শবৃত্তাকৃতয়ো বিশিখাঃ
ক্ষিতিসম্ভবাঃ ॥ সাংশবস্তৈলতোয়াভা
ঐশান্যাং ক্ষুদ্ভয়প্রদাঃ। চন্দ্রজা হিমকুন্দেন্দু-
কুমুদাভাশ্চ তৈলবৎ ॥ জলাভাশ্চোত্তরে
দৃশ্যাঃ কেতবস্তে সুভিক্ষদাঃ। ত্রিবর্ণ-
স্ত্রিশিখশ্চৈকো ব্রহ্মজোঽসৌ যুগান্তকৃৎ ॥
স চানিয়তদিক্‌সংস্থো ব্রহ্মদণ্ডঃ স উচ্যতে।
অর্কজা বহ্নিজা যাম্যাস্ত্রয়স্তে তত্ত্ব-
সংখ্যয়া ২৫॥ ক্ষিতিজা জাতিসংখ্যাশ্চ ২২
ত্রয়োঽন্যে ব্রহ্মজোঽপ্যয়ং। একোত্তর-
শতং হ্যেতে সহস্রন্ত্বথ লক্ষণৈঃ ॥ শুক্রা-
চ্চতুরশীত্যাখ্যা বিপুলাঃ সিততারকাঃ।
স্নিগ্ধাস্তীব্রফলা জ্ঞেয়াঃ সপ্রভা দ্বিশিখাঃ
পরে ॥ ষষ্টিঃ শনিতনূদ্ভূতাস্তেঽতিনষ্টফল-
প্রদাঃ। সর্ব্বত্র কনকোদ্দীপ্তা বিকচা
নাম জীবজাঃ ॥ শিতৈকতারা বিশিখাঃ
পাপা যাম্যাশ্রিতাস্তু তে। নাতিব্যক্তাঃ
সূক্ষ্মদীর্ঘাঃ শুক্লা বুধসমুদ্ভবাঃ ॥ পাপদা-
স্তস্করাখ্যাস্তে যথেষ্টদিক্‌প্রভান্বিতাঃ। ত্রি-
চূড়তারাঃ ক্ষতজা নানারূপাঃ কুজাত্মজাঃ ॥
কৌঙ্কুমাখ্যা হি তে সৌম্যদিক্‌স্থাঃ পাপ-
ফলপ্রদাঃ। ত্রিশিখাশ্চ ত্রিতারাশ্চ রক্ত-
লোহিতরশ্ময়ঃ ॥ লোহিতাঙ্গাত্মজাঃ ষষ্টিঃ
সংগ্রামভয়কারকাঃ। তামসাঃ কীলকা-
খ্যাশ্চ রাহুজাঃ সূর্য্যবিম্বগাঃ ॥ দৃষ্টাঃ শুভ-
ফলাস্তে চ চন্দ্রস্থাঃ পাপদায়িনঃ। কবন্ধ-
খ্যাংক্ষশত্রাভাশ্চন্দ্রেঽর্কেঽপ্যশুভপ্রদাঃ ॥
কৃষ্ণাভাঃ কৃষ্ণপর্য্যন্তাঃ সংকুলাঃ কৃষ্ণ-
রশ্ময়ঃ। রাহুপুত্রাস্ত্রয়স্ত্রিংশৎ কেতব-
শ্চাতিদারুণাঃ ॥ যত্রার্কবিম্বে দৃশ্যন্তে
ব্যসনন্তন্মহীপতেঃ। স্বচক্রং পরচক্রেণ
পীড্যতে ক্ষুদ্রুজান্বিতং ॥ অনোধনুঃক্ষেত্র-
রূপা নৃপবিত্তক্ষয়াবহাঃ। ধ্বাঙ্ক্ষো বা
কৃষ্ণশঙ্কুর্ব্বা কবন্ধো বার্কমণ্ডলে ॥ দৃশ্যতে
যত্র তত্রাশু ভূমিপালো বিনশ্যতি। দণ্ড-
কীলকপীঠাস্ত্রং দৃশ্যতে সূর্য্যমণ্ডলে ॥
দুর্ভিক্ষেতিভয়ব্যাধিবহ্নিচৌরাদিপীড়নং।
শৃগালান্ গর্দ্দভানশ্বান্ যাংশ্চান্যান্ মৃগ-
পক্ষিণঃ ॥ আদিত্যমণ্ডলে দৃষ্ট্বা দেশ-
ভঙ্গং বিনির্দ্দিশেৎ। মণ্ডলাভ্যন্তরস্থৈশ্চ
ক্রব্যাদৈর্মৃগপক্ষিভিঃ॥ পরচক্রাগমো বাচ্যঃ
প্রজানাশস্তথৈব চ। যত্রার্কবিম্বস্তত্র স্যা-
দ্রাজান্যত্বপ্রজাক্ষয়ঃ॥ একো দুর্ভিক্ষকৃদ্বাত্যা-
নৃপনাশভয়প্রদঃ ॥ সিতরক্তহরিৎকৃষ্ণৈ-
র্ব্বিদ্ধো দ্বিজনৃপাদিহা। বহ্নিজা বিশ্ব-
রূপাখ্যা জ্বালামালাকুলাঃ শতং ॥ শ্যামা-
রুণা বিতারাশ্চ বিকীর্ণামরসন্নিভাঃ।
তারাপুঞ্জনিভা রূক্ষা বায়ুজাঃ সপ্তসপ্ততিঃ॥
ব্রহ্মজাশ্চতুরস্রাস্তে বেদাধিকশতদ্বয়ং।
দ্বাত্রিংশদ্বংশগুল্মাভাঃ কঙ্কাখ্যা বরুণো-
দ্ভবাঃ॥ প্রভাঢ্যাঃ শশিবক্তে চ জ্ঞেয়াস্তীক্ষ্ণ-
ফলপ্রদাঃ। বিরূপতারাশ্চিত্রা বা শিখিন-
স্তেঽশুভপ্রদাঃ ॥ সর্ব্বদিক্‌প্রভবাঃ শুক্লাঃ
কেতবো ভয়দায়িনঃ। এবং কেতুসহস্রঞ্চ
তদ্বিশেষশ্চ বক্ষ্যতে ॥ * ॥ উত্তরায়ত-
সুস্নিগ্ধো মহান্ যশ্চাপরোদয়ী। করোতি
মরকং সদ্যঃ সুভিক্ষঞ্চ তথোত্তমং ॥
রূক্ষোঽস্থিকেতুঃ ক্ষুদ্ভীত্যৈ প্রাচ্যাং স্নিগ্ধো-
ঽপ্যুপপ্লবঃ। কপালকেতুর্দর্শে সধূম্রাংশু-

শিখো ভবেৎ ॥ প্রাগর্দ্ধচারী নভসঃ কুম্মারাবৃষ্টিকারকঃ। প্রাগগ্নিমার্গাচ্ছূলাগ্রো রূক্ষঃ শ্যামলতাম্ররুক্ ॥ ত্রিভাগচারী নভসো রৌদ্রাখ্যঃ পূর্ব্ববৎ ফলং। অপরস্যাং চলকেতুঃ শিখয়া দক্ষিণাগ্রয়া ॥ অঙ্গুলোচ্ছ্রায়য়া গচ্ছেদুত্তরাশাং যথা যথা। তথা দৈর্ঘ্যং সমায়াতি মুনীন্ সংস্পৃশ্য সপ্ত চ ॥ ধ্রুবং প্রতিনিবৃত্তোঽভিজিতঞ্চ নভসোঽর্দ্ধকং। গত্বাস্তং যাতি যাম্যেন স প্রয়াগকুলাবধি ॥ অবন্তীং পুষ্করারণ্যং যাবদ্ধন্যাস্তথাপরান্। দেশান্ কচিৎ কচিদ্রোগদুর্ভিক্ষৈঃ পরিপীড়িতান্ ॥ শ্বেতাখ্যস্তু জটাকারো শ্যামো ব্যোমত্রিভাগগঃ। নিবর্ত্ততেঽপসব্যেন ত্রিভাগী কুরুতে প্রজাঃ ॥ আধূম্রশিখয়া দৃশ্যঃ কৃত্তিকাসংস্থিতোঽপরঃ। রশ্মিকেতুরিতি খ্যাতস্ত্রিভাগী কুরুতে প্রজাঃ ॥ পশ্চাৎ সন্ধ্যাসু সম্বর্ত্তো ধূমতাম্রশিখো বিয়ৎ। ত্র্যংশমাক্রম্য শূলাগ্রাবস্থিতো রৌদ্রদর্শনঃ ॥ মুহূর্ত্তান্ যাবতো দৃশ্যস্তাবদ্বর্ষাণি হন্তি সঃ। ভূপশস্ত্রনিপাতাদ্যৈরুদয়র্ক্ষং নিপীড়য়েৎ ॥*॥ চৈত্রবৈশাখয়োর্ম্মধ্যে কৌবেরাংস্তু বিনির্দ্দিশেৎ। উচ্ছ্রিতৈর্যূপবেদীভিরুচ্ছ্রিতৈর্ধ্বজতোরণৈঃ ॥ হবির্ধূমাকুলা তত্র দৃশ্যতে চ বসুন্ধরা। জ্যৈষ্ঠে চৈব তথাষাঢ়ে বায়ুপুত্রাংশ্চ নির্দ্দিশেৎ ॥ বান্তি চৈব তথা বাতা মহাযুদ্ধং মহাভয়ং। শ্রাবণপ্রৌষ্ঠপদয়োর্ব্বারুণাংস্তু বিনির্দ্দিশেৎ ॥ আরোহয়ন্তি তে মেঘান্ পূর্ণাং কুর্য্যুর্ব্বসুন্ধরাং। ধান্যং সমার্ঘ্যতাং যাতি

ঈতয়ো ন ভবন্তি চ ॥ আশ্বিনে কার্ত্তিকে চৈব সূর্য্যপুত্রান্ বিনির্দ্দিশেৎ। ততো দহতি তীব্রাংশুঃ সর্ব্বান্নানি দিবাকরঃ ॥ ম্রিয়ন্তে চ তদা গাবঃ শ্বাপদাশ্চ বিশেষতঃ। মার্গশীর্ষে চ পৌষে চ বহ্নিপুত্রান্ বিনির্দ্দিশেৎ ॥ শীঘ্রং ভবতি দুর্ভিক্ষং হাহাভূতমচেতনং। মাঘে চ ফাল্গুনে চৈব যমপুত্রান্ বিনির্দ্দিশেৎ ॥ ছর্দ্দির্জ্বরাতিসারশ্চ গ্লানিশ্চৈবাক্ষিবেদনা ॥*॥ কৃত্তিকা রোহিণী সৌম্যং পৃথিব্যা মধ্যমুচ্যতে ॥ কেতবো হ্যত্র দৃশ্যন্তে আগ্নেয়া দশ পঞ্চ চ। আগ্নেয়েষু চ দৃষ্টেষু লোকানাং সংক্ষয়ো ভবেৎ ॥ নিত্যোদ্বিগ্নাঃ প্রজাঃ সর্ব্বা ভবন্তি হি ন সংশয়ঃ। পুনর্ব্বসুস্তথা পুষ্যঃ পৃথিব্যাঃ পূর্ব্বমুচ্যতে ॥ কেতবো হ্যত্র দৃশ্যন্তে রৌদ্রাস্তেঽপ্যেকবিংশতিঃ। যদা রৌদ্রাঃ প্রদৃশ্যন্তে দুর্ভিক্ষং নির্দ্দিশেত্তদা ॥ ঘূর্ণন্তে চ প্রজাঃ সর্ব্বা মৃত্যুক্ষুদ্রোগপীড়িতাঃ। অশ্লেষাপিত্র্যভাগ্যানি বিদ্যাদ্দক্ষিণপূর্ব্বতঃ ॥ কেতবো হ্যত্র দৃশ্যন্তে ঔদ্দালকিসুতা দশ। সুভিক্ষং ক্ষেমমারোগ্যং সুবৃষ্টিঃ শস্যসম্পদঃ ॥ আর্য্যম্নাদীনি চ ত্রীণি বিদ্যাদ্দক্ষিণভাগতঃ। কেতবো হ্যত্র দৃশ্যন্তে কাশ্যপেয়াশ্চতুর্দ্দশ ॥ অনাবৃষ্টিভয়ং ঘোরং প্রজানামতিদারুণং। স্বাতী বিশাখা মিত্রঞ্চ ভাগো দক্ষিণপশ্চিমঃ ॥ কেতবো হ্যত্র দৃশ্যন্তে চত্বারো মৃত্যুসম্ভবাঃ। দুর্ভিক্ষং মরকং ঘোরমনাবৃষ্টিস্তথৈব চ ॥ উপদ্রবশ্চ ভূতানাং তদা ভবতি দারুণঃ। জ্যেষ্ঠা

মূলমথাষাঢ়া ভাগ উত্তরপশ্চিমঃ ॥ কেতবো হ্যত্র দৃশ্যন্তে ত্রয়স্তে সোমসম্ভবাঃ। সুভিক্ষঞ্চ সুবৃষ্টিঞ্চ মহী যজ্ঞোৎসবাকুলা॥ উত্তরা শ্রবণা চৈব নক্ষত্রং বসুদৈবতং । কেতবো হ্যত্র দৃশ্যন্তে মাহেয়াঃ পঞ্চবিংশতিঃ॥ মাহেয়েষু চ দৃষ্টেষু লোকানাং সংক্ষয়ো ধ্রুবং। তদা রাজসহস্রাণাং মহী পিবতি শোণিতং॥ বারুণঞ্চৈব নক্ষত্রং তথা ভাদ্রপদদ্বয়ং। কেতবো হ্যত্র দৃশ্যন্তে বারুণাস্ত্রয় এব তে ॥ * ॥ ঊর্ম্মিকেতুঃ শ্বেতকেতুর্ধূমকেতুস্তৃতীয়কঃ। ঊর্ম্মিকেতুর্যদা দৃশ্যেত্তদাপ্লুদকজং ভয়ং ॥ শ্বেতকেতুর্যদা দৃশ্যেৎ শ্বেতাস্থি কুরুতে মহীং। তদা মানুষমাংসানি ভক্ষয়ন্তীহ মানুষাঃ॥ ক্ষুদ্ভয়ার্ত্তং জগৎ কৃৎস্নং চক্রবদ্‌ভ্রমতে তদা। ধূমকেতুর্যদা দৃশ্যেত্তস্য বক্ষ্যামি লক্ষণং॥ স হস্তি শিখয়া যোধান্ রাজানং মন্ত্রিণং জনান্। রেবত্যাশ্বযুজঞ্চৈব নক্ষত্রং যমদৈবতং॥ কেতবো হ্যত্র দৃশ্যন্তে যমপুত্রাস্ত্রয়োদশ । যমপুত্রেষু দৃষ্টেষু লোকানাং সংক্ষয়ো ধ্রুবং॥ চতুর্ব্বিধানাং ভূতানাং সংশয়ো জায়তে মহান্ ॥ * ॥ অপরে বিবিধাঃ সন্তি বৃহস্পত্যাদিকেতবঃ॥ নৃপদেশবিনাশায় দুর্ভিক্ষভয়দায়কাঃ । কুমুদাভস্তু কুমুদো বারুণ্যাং প্রাক্‌শিখো নিশাং ॥ একাং দৃষ্টঃ সুভিক্ষায় দশ বর্ষাণি সৌখ্যদঃ। পশ্চিমাভ্যুদিতাশ্চান্যে কুর্ব্বন্তি প্রবলান্ জ্বরান্ ॥ পাণ্ডুরোগং প্রতিশ্যায়ং মুখরোগমরোচকং । ক্ষীরধারেব শুক্লাভা ঋজ্বী সূক্ষ্মতরা শিখা॥ সকৃদ্‌যামৈকদৃশ্যাস্তে চতুর্ম্মাসং সুভিক্ষদাঃ। জলকেতুস্তু যঃ পশ্চাৎ শিখয়া নতয়া পরে॥ সুভিক্ষং কুরুতে শান্তিং প্রজানাং নবমাসতঃ। ভবকেতুস্ত্বেকরাত্রং দৃশ্যঃ প্রাক্ সূক্ষ্মতারকঃ ॥ দক্ষিণাবর্ত্তশিখয়া হরিলাঙ্গূলতুল্যয়া। মুহূর্ত্তান্ যাবতো দশ্যস্তাবন্মাসান্ সুভিক্ষদঃ॥ স এব রূক্ষো দৃশ্যশ্চেদ্রোগপ্রাণান্তকারণং । পদ্মকেতুর্ম্মৃণালাভো নিশামেকাং প্রদৃশ্যতে ॥ সপ্ত মাসান্ সুভিক্ষং স হর্ষবর্ষণদায়কঃ। আবর্ত্তঃ সব্যশিখয়ারুণাভশ্চ নিশার্দ্ধগঃ॥ স্নিগ্ধো যাবৎক্ষণান্ দৃশ্যস্তাবন্মাসান্ সুভিক্ষদঃ। ধ্রুবকেতুস্ত্বনিয়তগতিবর্ণাকৃতির্ব্বহুঃ॥ দিব্যান্তরীক্ষভৌমোঽয়ং স্নিগ্ধ ইষ্টঃ স নান্যথা। সেনাঙ্গেষু মহীন্দ্রাণাং দেশস্য গিরিশাখিষু॥ উপস্করেষু গৃহিণাং দৃশ্যতে চ বিনাশকৃৎ। হন্যাদুল্কা যদাগস্ত্যং কেতুর্ব্বাপ্যুপধূপয়েৎ ॥ দুর্ভিক্ষং মরকঞ্চৈব তদা জগতি জায়তে। যদা তু ভার্গবং প্রাপ্য ধূমকেতুঃ প্রধূপয়েৎ ॥ তদা সৈন্যানি বধ্যন্তে যত্রোদ্‌যুক্তা নরাধিপাঃ। যাত্রাগতাশ্চ যে সার্থা অসুমন্তশ্চ যে জনাঃ॥ তথা চারগণাঃ সর্ব্বে ভয়মৃচ্ছন্তি দারুণং। যদা প্রধূপয়েৎ কেতুঃ সপ্তর্ষীন্ ধ্রুবমেব চ ॥ তদা লোকাঃ ক্ষয়ং যান্তি সলিলঞ্চাপি শুষ্যতি। ধূমকেতুর্যদা রাজ্ঞো দৃশ্যতে বিষয়ে কচিৎ ॥ সরাষ্ট্রঃ সপুরো রাজা ক্ষিপ্রমেব প্রণশ্যতি। যাবন্ত্যহানি দৃশ্যন্তে তাবন্মাসান্ ফলপ্রদাঃ॥ শ্বাসৈ-

রব্দান্ বিজানীয়াৎ প্রথমে তু ত্রিপক্ষতঃ ॥ * ॥ কেতূৎপাতে তু সর্ব্বস্মিন্ সভয়ে সমুপস্থিতে॥ মহাশান্তিং প্রকুর্ব্বীত বিবিধাং ভূরিদক্ষিণাং। ধনং বা সর্ব্বমুৎসৃজ্য মৃত্যোর্ম্মুচ্যেত বন্ধনাৎ ॥ দদ্যাদ্বা পৃথিবীং সর্ব্বাং রাজা শান্তিং নিযচ্ছতি। অকস্মাদ্দৃশ্যতে কেতুরুদয়েঽস্তময়েঽপি বা॥ নিহন্ত্যন্তঃপুরে রাজ্ঞো জ্বরঃ পিত্তোদ্ভবো ভবেৎ। দধিমধুঘৃতাক্তানাং পুষ্পাণামযুতং ততঃ ॥ জুহুয়াদিন্দ্রনীলস্য কেতুং দদ্যাদ্দ্বিজাতয়ে । ভূষিতং হেমরত্নাদ্যৈস্ততঃ সম্পদ্যতে শুভং॥ ইতি মথুরানাথবিদ্যালঙ্কারকৃতসময়ামৃতে কেতূৎপাতাঃ সমাপ্তাঃ॥ কেতুগণঃ কুশদ্বীপজাতঃ জৈমিনিমুনেঃ সন্তানঃ ষড়ঙ্গুলঃ ধূম্রবর্ণঃ গৃধ্রবাহনঃ শূদ্রবর্ণঃ বিকৃতাননঃ সূর্য্যাভিমুখঃ বৃদ্ধঃ ধূম্রবসনঃ বরদঃ গদাধরশ্চ। তস্যাধিদেবতা চিত্রগুপ্তঃ প্রত্যধিদেবতা ব্রহ্মা। ইতি গ্রহযাগতত্ত্বং ॥ অস্য স্বরূপং শনিরাহুবৎ। স চ শিখাবান্ অনেকরূপঃ। ইতি জাতকং ॥ * ॥ রোগঃ। পতাকা। উৎপাতঃ । চিহ্নং । ইতি মেদিনী ॥ দীপ্তিঃ। ইতি হেমচন্দ্রঃ ॥

কেতুভঃ ( পুং ) মেঘঃ। ইতি শব্দমালা ॥

কেতুমালং ( ক্লী ) জম্বুদ্বীপস্য নবখণ্ডান্তর্গতখণ্ডবিশেষঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

কেতুরত্নং(ক্লী)বৈদূর্য্যমণিঃ। ইতি রাজনির্ঘণ্টঃ॥

কেদরঃ ( পুং ) বৃক্ষবিশেষঃ। ইতি লিঙ্গাদিসংগ্রহে অমরঃ ॥ টেরকে ত্রি। ইতি শব্দরত্নাবলী ॥

কেদারঃ ( পুং ) ক্ষেত্রং। ক্ষেৎ ইতি ভাষা। ইত্যমরঃ॥ কৈদারজলগুণাঃ। মধুরত্বং। বিপাকে গুরুত্বং। দোষলত্বং। তদ্বেব বদ্ধমুক্তস্তু বিশেষাদ্দোষদং ভবেৎ। ইতি রাজনির্ঘণ্টঃ ॥ পর্ব্বতবিশেষঃ । শিবঃ। ভূমিভেদঃ। আলবালং। ইতি মেদিনী ॥

কেদারকটুকা ( স্ত্রী ) কটুকা। কট্‌কী ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ ॥

কেদারজং ( ক্লী ) পদ্মকাষ্ঠং। ইতি রাজনির্ঘণ্টঃ ॥

কেদারেশঃ ( পুং ) কাশীস্থশিববিশেষঃ। যথা। হরং পাপহ্রদে স্নাত্বা কেদারেশং প্রপূজ্য চ । কোটিজন্মার্জ্জিতৈনোভির্ম্মুচ্যতে শ্রদ্ধয়ান্বিতঃ ॥ ইতি স্কান্দে কাশীখণ্ডে ৭৭ অধ্যায়ঃ ॥

কেদারেশ্বরঃ ( পুং ) কাশীস্থশিববিশেষঃ । যথা। শৃণ্বপর্ণেঽভিধাস্যামি কেদারেশ্বরসৎকথাং। সমাকর্ণ্যাপি যাং পাপোঽপ্যপাপো জায়তে ক্ষণাৎ॥ ইতি স্কান্দে কাশীখণ্ডে ৭৭ অধ্যায়ঃ ॥

কেনারঃ (পুং) কুম্ভিনরকঃ। ইতি হেমচন্দ্রঃ॥ শিরঃ। কপোলঃ। সন্ধিঃ। ইতি মেদিনী ॥

কেনিপাতঃ ( পুং ) অরিত্রং। হালি ইতি ভাষা। ইতি শব্দরত্নাবলী ॥

কেনিপাতকঃ ( পুং ) কেনিপাতঃ। ইত্যমরঃ ॥

কেন্দুঃ ( পুং ) তিন্দুকবৃক্ষঃ। ইতি শব্দরত্নাবলী ॥

কেন্দুকঃ ( পুং ) গালববৃক্ষঃ। গাব্ ইতি ভাষা। ইতি শব্দচন্দ্রিকা ॥ তালবিশেষঃ।

যথা। লঘুদ্বয়ং বিরামান্তং তালে কেন্দুক-সংজ্ঞকে। লঘুদ্বয়ং স্থানে দ্রুতদ্বয়মিতি চ পাঠঃ। অপরং নিয়মং বিনা। ইতি সঙ্গীতদামোদরঃ॥

কেন্দ্রং (ক্লী) লগ্নং। লগ্নাৎ চতুর্থসপ্তমদশম-স্থানানি। তৎপর্য্যায়ঃ। কণ্টকং ২। যথা। লগ্নাম্বুদ্যূনকর্ম্মাণি কেন্দ্রমুক্তঞ্চ কণ্টকং। চতুষ্টয়ঞ্চাত্র খেটো বলী লগ্নে বিশেষতঃ॥ ইতি নীলকণ্ঠকৃতবর্ষতন্ত্রাখ্য-জাতকং॥ স্পষ্টগ্রহানয়নার্থং শীঘ্রমন্দ-সংজ্ঞকাঙ্কদ্বয়ং। যথা। মৃদূচ্চেন হীনো গ্রহো মন্দকেন্দ্রং চলোচ্চং গ্রহাণাং ভবেচ্ছীঘ্রকেন্দ্রং॥ ইতি ভাস্করীয়সিদ্ধান্ত-শিরোমণৌ স্পষ্টাধিকারঃ॥ গ্রহং সংশোধ্য মন্দোচ্চাৎ তথা শীঘ্রাৎ বিশোধ্য চ শিষ্টং কেন্দ্রং। ইতি সূর্য্যসিদ্ধান্তঃ॥ গোলস্য মধ্যস্থানং। যথা। বৃত্তস্য মধ্যং কিল কেন্দ্রমুক্তং কেন্দ্রং গ্রহোচ্চান্তর-মুচ্যতেঽতঃ। যতোঽন্তরে তাবতি তুঙ্গ-দেশান্নীচোচ্চবৃত্তস্য সদৈব কেন্দ্রং॥ ইতি সিদ্ধান্তশিরোমণৌ গোলাধ্যায়ঃ॥

কেপ ঋ ঙ গত্যাং। চালে ইতি কবিকল্পদ্রুমঃ॥ ঙ কেপতে। ঋ অচিকেপৎ। ইতি দুর্গা-দাসঃ॥

কেমদ্রুমঃ (পুং) জন্মকালীনগ্রহযোগবিশেষঃ। যথা। রবিবর্জ্জং দ্বাদশগৈরনফা চন্দ্রাৎ দ্বিতীয়গৈঃ সুনফা। উভয়স্থিতৈর্দুরধুরা কেমদ্রুমসংজ্ঞিতোঽন্যঃ॥ অনফাদি-যোগঃ। সচ্ছীলং বিষয়সুখান্বিতং প্রভুং খ্যাতিযুক্তমনফায়াং। সুনফায়াং ধীধন-কীর্ত্তিযুক্তমাত্মার্জ্জিতৈশ্বর্য্যঞ্চ॥ বহুভৃত্য-কুটুম্বারম্ভমুদ্বিগ্নচিত্তমপি দৌরধুরে। ভৃতকং দুঃখিনমধনং জাতং কেমদ্রুমে বিদ্যাৎ॥ অনফাদিফলং। ইতি জ্যোতি-স্তত্ত্বং॥

কেমুকঃ (পুং) বৃক্ষবিশেষঃ। কেঁউ ইতি ভাষা। তৎপর্য্যায়ঃ। পেচুকঃ ২ পেচুনী ৩ পেচুঃ ৪ পেচিকা ৫ দলসারিণী ৬ কেচুকঃ ৭। ইতি রত্নমালা॥ তস্য মূল-গুণাঃ। কফপিত্তনাশিত্বং। রোচনত্বং। অগ্নিদীপনত্বঞ্চ। ইতি রাজবল্লভঃ॥ কটু-ত্বং। পাকে তিক্তত্বং। গ্রাহিত্বং। হিম-ত্বং। লঘুত্বং। পাচনত্বং। হৃদ্যত্বং। জ্বর-কুষ্ঠকাসপ্রমেহাস্রনাশিত্বং। বাতলত্বং। পটুত্বঞ্চ। ইতি ভাবপ্রকাশঃ॥

কেয়ূরং (ক্লী) অলঙ্কারবিশেষঃ। তাড় ইতি ভাষা। তৎপর্য্যায়ঃ। অঙ্গদং ২। ইত্য-মরঃ॥

কেয়ূরঃ (পুং) রতিবন্ধবিশেষঃ। যথা। স্ত্রীজঙ্ঘে চৈব সংপীড্য দোর্ভ্যামালিঙ্গ্য সুন্দরীং। কারয়েৎ ছাপনং কামী বন্ধঃ কেয়ূরসংজ্ঞকঃ॥ ইতি স্মরদীপিকা॥ অপি চ। স্ত্রীণাং জঙ্ঘান্তরাবিষ্টো গাঢ়-মালিঙ্গ্য সুন্দরীং। কাময়েদ্বিপুলং কামী বন্ধঃ কেয়ূরসংজ্ঞকঃ॥ ইতি রতিমঞ্জরী॥

কেরলঃ (পুং) দেশভেদঃ। মালেওয়ার ইতি ভাষা। যথা। উগ্রাঃ কেরলপর্য্যায়াঃ। ইতি হেমচন্দ্রঃ॥ বেদযাগানধিকারিশ্মশ্রু-ধারিম্লেচ্ছবিশেষঃ। পুরৈতে ক্ষত্রিয়া আসন্ সগরেণৈষাং ধর্ম্মো নাশিতঃ

বেশান্যস্থঞ্চ কৃতং। যথা। নিঃস্বাধ্যায়বষট্কারাঃ কৃতাস্তেন মহাত্মনা। শকা যবনকাম্বোজাঃ পারদাঃ পহ্লবাস্তথা॥ কোলিসর্পা মাহিষকা দর্ব্বাশ্চোলাঃ সকেরলাঃ। সর্ব্বে তে ক্ষত্রিয়াস্তাত ধর্ম্মস্তেষাং নিরাকৃতঃ॥ ইতি হরিবংশঃ॥

কেরলী (স্ত্রী) জ্যোতির্গ্রন্থবিশেষঃ। হোরা। ইতি শব্দরত্নাবলী॥

কেল ঋ চালে। গতৌ। ইতি কবিকল্পদ্রুমঃ॥ ঋ অচিকেলৎ। চালঃ কম্পঃ। চালঃ কৈশ্চিন্ন মন্যতে। ইতি দুর্গাদাসঃ॥

কেলকঃ (পুং) খড়্গধারাদিনর্ত্তকঃ। তৎপর্য্যায়ঃ। প্লবকঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥

কেলিঃ (পুং স্ত্রী) পরীহাসঃ। তৎপর্য্যায়ঃ। দ্রবঃ ২ ক্রীড়া ৩ লীলা ৪ নর্ম্ম ৫। ইত্যমরঃ॥

কেলিঃ (স্ত্রী) পৃথিবী। ইতি শব্দমালা॥

কেলিকঃ (পুং) অশোকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কেলিকলা (স্ত্রী) স্বরস্বতীবীণা। ইতি শব্দরত্নাবলী॥

কেলিকিলঃ (পুং) কুষ্মাণ্ডকঃ। স তু শিবস্যানুচরঃ। নাট্যে নায়কবয়স্যঃ। তৎপর্য্যায়ঃ। বিদূষকঃ ২ বাসন্তিকঃ ৩ বৈহাসিকঃ ৪ প্রহাসী ৫ প্রীতিদঃ ৬। ইতি হেমচন্দ্রঃ॥

কেলিকিলা (স্ত্রী) রতিঃ। সা তু কামদেবপত্নী। ইতি ত্রিকাণ্ডশেষঃ॥

কেলিকীর্ণঃ (পুং) উষ্ট্রঃ। ইতি হেমচন্দ্রঃ॥

কেলিকুঞ্চিকা (স্ত্রী) শ্যালিকা। শালী ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ॥

কেলিকোষঃ (পুং) নটঃ। ইতি শব্দরত্নাবলী॥

কেলিনাগরঃ (পুং) সম্ভোগবান্। ইতি জটাধরঃ॥

কেলিমুখঃ (পুং) পরীহাসঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কেলিবৃক্ষঃ (পুং) কদম্ববিশেষঃ। কেলিকদম্ব ইতি খ্যাতঃ। ইতি শব্দরত্নাবলী॥

কেলিসচিবঃ (পুং) নর্ম্মদঃ। ক্রীড়াবিষয়কমন্ত্রী। ইতি শব্দমালা॥

কেব ঋ ঙ সেবনে। ইতি কবিকল্পদ্রুমঃ॥ ঙ কেবতে। ঋ অচিকেবৎ। ইতি দুর্গাদাসঃ॥

কেবর্ত্তঃ (পুং) কৈবর্ত্তজাতিঃ। ইতি দ্বিরূপকোষঃ॥

কেবলং (ক্লী) নির্ণীতং। ইত্যমরমেদিনীকরৌ॥ জ্ঞানভেদঃ। ইতি বিশ্বো হেমচন্দ্রশ্চ॥ শুদ্ধং। কৃৎস্নং। অসহায়ঃ। ইতি সংক্ষিপ্তসারে উণাদিবৃত্তিঃ॥

কেবলঃ (পুং) কুহনঃ। ইতি মেদিনী॥

কেবলঃ (ত্রি) একঃ। কৃৎস্নঃ। ইত্যমরমেদিনীকরৌ॥

কেবলজ্ঞানী [ন্] (পুং) ভূতার্হদ্বিশেষঃ। ইতি হেমচন্দ্রঃ॥

কেবলদ্রব্যং (ক্লী) মরিচং। ইতি শব্দচন্দ্রিকা॥

কেবলী (স্ত্রী) জ্ঞানভেদঃ। ইতি মেদিনী॥ গ্রন্থবিশেষঃ। ইতি হেমচন্দ্রঃ॥

কেবলী [ন্] (পুং) জৈনবিশেষঃ। ইতি হলায়ুধঃ॥

কেবিকা (স্ত্রী) পুষ্পবিশেষঃ। কেবের ইতি ভাষা কোকণে প্রসিদ্ধা। তৎপর্য্যায়ঃ। কবিকা ২ কেবী ৩ ভৃঙ্গারিঃ ৪ নৃপবল্লভা ৫ ভৃঙ্গমারী ৬ মহাগন্ধা ৭ রাজকন্যা ৮ অলিবাহিনী ৯। অস্যা গুণাঃ। মধুরত্বং। শীতত্বং। দাহপিত্তশ্রমবাতশ্লেষ্মরোগপিত্ত-চ্ছর্দ্দিবিনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

কেশঃ (পুং) মজ্জজাতোপধাতুবিশেষঃ। চুল ইতি ভাষা। স তু গর্ভস্থবালকস্য অষ্টাভি-র্মাসৈর্জায়তে। ইতি সুখবোধঃ। তৎ-পর্য্যায়ঃ। চিকুরঃ ২ কুন্তলঃ ৩ বালঃ ৪ কচঃ ৫ শিরোরুহঃ ৬। ইত্যমরঃ॥ শির-সিজঃ ৭ মূর্দ্ধজঃ ৮ অস্রঃ ৯ বৃজিনঃ ১০। ইতি জটাধরঃ॥ তৎসমূহার্থবাচকাঃ শব্দাঃ যথা। বালাঃ স্যুস্তৎপরাঃ পাশো রচনা-ভার উচ্চয়ঃ। হস্তঃ পক্ষঃ কলাপশ্চ কেশ-ভূয়স্ত্ববাচকাঃ॥ ইতি হেমচন্দ্রঃ॥ *॥ বরুণঃ। হ্রীবেরং। ইতি মেদিনী॥ দৈত্য-বিশেষঃ। ইতি হেমচন্দ্রঃ॥ বিষ্ণুঃ। ইতি শব্দরত্নাবলী॥

কেশকলাপঃ (পুং) কেশপাশঃ। কেশসমূহঃ। ইতি হেমচন্দ্রঃ॥

কেশকারঃ (পুং) ইক্ষুভেদঃ। করিয়া কুশি-য়ার ইতি হিন্দী ভাষা। অস্য গুণাঃ। গুরুত্বং। শীতত্বং। রক্তপিত্তক্ষয়াপহত্বঞ্চ। ইতি ভাবপ্রকাশঃ॥

কেশগর্ভকঃ (পুং) কবরী। ইতি ত্রিকাণ্ড-শেষঃ॥

কেশঘ্নং (ক্লী) ইন্দ্রলুপ্তকং। ইতি হেমচন্দ্রঃ॥

কেশচ্ছিৎ [দ্] (পুং) নাপিতঃ। ইতি শব্দ-মালা॥

কেশটঃ (পুং) বিষ্ণুঃ। ছাগঃ। ওকণঃ। ইতি মেদিনী॥ ভ্রাতা। ইতি শব্দরত্নাবলী॥ কামদেবস্য শোষণবাণঃ। ইতি বিশ্বঃ॥ শোণকবৃক্ষঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কেশধৃৎ (পুং) ভূতকেশঃ। ইতি শব্দ-চন্দ্রিকা॥

কেশনাম [ন্] (ক্লী) বালং। বালা ইতি ভাষা। ইত্যমরঃ॥

কেশপক্ষঃ (পুং) কেশপাশঃ। ইত্যমরঃ॥

কেশপর্ণী (স্ত্রী) অপামার্গঃ। ইতি শব্দরত্না-বলী॥

কেশপাশঃ (পুং) কেশসমূহঃ। যথা। পাশঃ পক্ষশ্চ হস্তশ্চ কলাপার্থাঃ কচাৎ পরে। ইত্যমরঃ॥

কেশপাশী (স্ত্রী) শিরোমধ্যস্থশিখা। চূড়া। ইত্যমরঃ॥

কেশভূঃ (পুং) শিরঃ। ইতি রাজনির্ঘণ্টঃ॥

কেশমথনী (স্ত্রী) শমীবৃক্ষঃ। ইতি রাজ-নির্ঘণ্টঃ॥

কেশমার্জকং (ক্লী) কঙ্কতিকা। চিরুণী ইতি ভাষা। ইতি জটাধরঃ॥

কেশমার্জনং (ক্লী) কঙ্কতিকা। ইতি হেম-চন্দ্রঃ॥ কেশশুদ্ধিশ্চ॥

কেশমুষ্টিঃ (পুং) বিষমুষ্টিবৃক্ষঃ। মহানিম্বঃ। ইতি রাজনির্ঘণ্টঃ॥

কেশরঃ (পুং ক্লী) কিঞ্জল্কঃ। ইত্যমরঃ॥

কেশরঃ (পুং) নাগকেশরবৃক্ষঃ। বকুলবৃক্ষঃ।

পুন্নাগবৃক্ষঃ। সিংহজটা। ইতি মেদিনী ॥ হিঙ্গুবৃক্ষঃ। ইত্যমরটীকায়াং ভরতঃ ॥

কেশরঞ্জনঃ ( পুং ) ভৃঙ্গরাজবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কেশরাজঃ ( পুং ) শাকভেদঃ। কেশুরে ইতি ভাষা। তৎপর্য্যায়ঃ। ভৃঙ্গরাজঃ ২ ভৃঙ্গঃ ৩ পতঙ্গঃ ৪ মার্করঃ ৫। ইতি রত্নমালা ॥ মার্কবঃ ৬। ইত্যমরঃ ॥ নাগমারঃ ৭ পবরুঃ ৮ ভৃঙ্গসোদরঃ ৯। ইতি ত্রিকাণ্ডশেষঃ ॥ কেশরঞ্জনঃ ১০ কেশ্যঃ ১১ কুন্তলবর্দ্ধনঃ ১২। ইতি বৈদ্যকং ॥ অঙ্গারকঃ ১৩ একরজঃ ১৪ করঞ্জকঃ ১৫ ভৃঙ্গরজঃ ১৬ ভৃঙ্গারঃ ১৭। ইতি জটাধরঃ ॥ অজাগরঃ ১৮ ভৃঙ্গরজাঃ ১৯ মকরঃ ২০। ইতি শব্দরত্নাবলী ॥ অপি চ। ভৃঙ্গরাজো ভৃঙ্গরজো মার্কবো ভৃঙ্গ এব চ। ভৃঙ্গারকঃ কেশরাজো ভৃঙ্গারঃ কেশরঞ্জনঃ ॥ ভৃঙ্গরাজঃ কটুস্তিক্তো রূক্ষোষ্ণঃ কফবাতনুৎ। কেশ্যস্ত্বচ্যঃ কৃমিশ্বাসকাসশোথাময়াপহৃৎ ॥ দন্ত্যো রসায়নো বল্যঃ কুষ্ঠনেত্রশিরোঽর্ত্তিজিৎ। ইতি ভাবপ্রকাশঃ ॥ অস্য গুণাঃ। অগ্নিকারিত্বং। কেশচক্ষুর্হিতত্বং। পাণ্ডুকফাপহত্বং। রসায়নত্বঞ্চ। ইতি রাজবল্লভঃ ॥

কেশরাম্লঃ ( পুং ) মাতুলুঙ্গকবৃক্ষঃ। ইতি জটাধরঃ ॥

কেশরী [ন্] ( পুং ) সিংহঃ। ইত্যমরঃ ॥ ঘোটকঃ। পুন্নাগবৃক্ষঃ। নাগকেশরবৃক্ষঃ। ইতি মেদিনী ॥ বীজপূরকবৃক্ষঃ। ইতি জটাধরঃ ॥

কেশরুহা ( স্ত্রী ) ভদ্রদন্তিকাবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কেশরূপা ( স্ত্রী ) বন্দাকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কেশবঃ ( পুং ) বিষ্ণুঃ। ইত্যমরঃ ॥ পুন্নাগবৃক্ষঃ। কেশবতি ত্রি। ইতি মেদিনী ॥

কেশবর্দ্ধিনী ( স্ত্রী ) সহদেবীলতা। ইতি রাজনির্ঘণ্টঃ ॥

কেশবায়ুধঃ ( পুং ) আম্রবৃক্ষঃ। ইতি শব্দমালা ॥ বিষ্ণোরস্ত্রে ক্লী ॥

কেশবালয়ঃ (পুং) অশ্বত্থবৃক্ষঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

কেশবাবাসঃ ( পুং ) অশ্বত্থবৃক্ষঃ। ইতি জটাধরঃ ॥

কেশবেশঃ ( পুং ) কবরী। চুলের খোপা ইতি ভাষা। ইত্যমরঃ ॥

কেশহন্ত্রী (স্ত্রী) শমীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কেশহস্তঃ ( পুং ) কেশসমূহঃ। ইত্যমরঃ ॥

কেশাকেশি ( ক্লী ) কেশেষু কেশেষু গৃহীত্বা প্রবৃত্তং যুদ্ধং। চুলাচুলি ইতি ভাষা। ইতি ব্যাকরণং ॥

কেশারুহা ( স্ত্রী ) সহদেবী। ইতি রাজনির্ঘণ্টঃ ॥

কেশার্হা ( স্ত্রী ) মহানীলী। ইতি রাজনির্ঘণ্টঃ ॥

কেশিকঃ ( ত্রি ) প্রশস্তকেশযুক্তঃ। ইত্যমরঃ ॥

কেশিকা (স্ত্রী) শতাবরী। ইতি রাজনির্ঘণ্টঃ ॥

কেশিনিসূদনঃ ( পুং ) শ্রীকৃষ্ণঃ। ইতি ভগবদ্গীতা ॥

কেশিনী (স্ত্রী) জটামাংসী। ইতি রাজনির্ঘণ্টঃ ॥

চোরপুষ্পী। প্রশস্তকেশবিশিষ্টা। ইত্যমরঃ ॥

কেশিসূদনঃ (পুং) শ্রীকৃষ্ণঃ। ইতি ত্রিকাণ্ডশেষঃ

কেশিহা [ন্] (পুং) শ্রীকৃষ্ণঃ। ইতি হেমচন্দ্রঃ

কেশী [ন্] (ত্রি) প্রশস্তকেশযুক্তঃ। ইত্যমরঃ ॥

কেশী [ন্] (পুং) বিষ্ণুঃ। ইতি ত্রিকাণ্ডশেষঃ॥ দৈত্যভেদঃ। ইতি মেদিনী ॥ সিংহঃ। ইতি শব্দরত্নাবলী ॥

কেশী (স্ত্রী) নীলী। ইতি রাজনির্ঘণ্টঃ॥ ভূতকেশীবৃক্ষঃ ॥ অজলোমাবৃক্ষঃ। ইতি রত্নমালা ॥

কেশোচ্চয়ঃ (পুং) কেশসমূহঃ। ইতি হেমচন্দ্রঃ ॥

কেশ্যং (ক্লী) কৃষ্ণাগুরু। ভৃঙ্গরাজে পুং। ইতি রাজনির্ঘণ্টঃ ॥

কেসরং (ক্লী) হিঙ্গু। ইতি হেমচন্দ্রঃ ॥ নাগকেসরপুষ্পং। কাসীসং। স্বর্ণং। ইতি রাজনির্ঘণ্টঃ ॥

কেসরঃ (পুং) নাগকেশরবৃক্ষঃ। তুরঙ্গস্কন্ধকেশঃ। সিংহস্কন্ধকেশঃ। বকুলবৃক্ষঃ। পুন্নাগবৃক্ষঃ। কিঞ্জল্কঃ। ইতি হেমচন্দ্রঃ ॥

কেসরঃ (পুং ক্লী) কিঞ্জল্কঃ। হিঙ্গুনি পুং স্ত্রী। ইতি রভসঃ ॥

কেসরবরং (ক্লী) কুঙ্কুমং। ইতি রাজনির্ঘণ্টঃ ॥

কেসরাম্লঃ (পুং) বীজপূরঃ। ইতি রাজনির্ঘণ্টঃ ॥

কেসরিকা (স্ত্রী) সহদেবীলতা। ইতি রাজনির্ঘণ্টঃ ॥

কেসরিসুতঃ (পুং) হনূমান্। ইতি হেমচন্দ্রঃ ॥

কেসরী [ন্] (পুং) সিংহঃ। ঘোটকঃ। পুন্নাগঃ। নাগকেশরঃ। ইতি মেদিনী ॥ রক্তশিগ্রুঃ। ইতি রাজনির্ঘণ্টঃ ॥ বানরবিশেষঃ। স তু হনূমৎপিতা। ইতি রামায়ণং ॥

কৈ শব্দে। ইতি কবিকল্পদ্রুমঃ ॥ কায়তি। এষামাদন্তত্বেন দিবাদৌ পাঠেঽপীষ্টসিদ্ধৌ ভ্বাদাবৈকারান্তত্বেন পাঠো গণকৃতমনিত্যমিতি জ্ঞাপয়তি। তেন অয়ধাতোরাত্মনেপদানিত্যত্বে শপো লুকি চ য্বোর্লোপ ইতি যলোপে অয়ধাতৌ পরে উপসর্গরেফো ল ইতি বক্তব্যাৎ পরাশব্দস্য রেফস্য লকারে এব কালঃ সমুৎপন্নো যঃ পলাতি স জীবতি ইতি সিদ্ধং। বেদেষূচ্চারণভেদার্থো ভ্বাদৌ পাঠ ইতি কেচিৎ। ইতি দুর্গাদাসঃ ॥

কৈকয়ী (স্ত্রী) কেকয়ী। ইতি শব্দরত্নাবলী॥

কৈকেয়ী (স্ত্রী) কেকয়ী। সা তু কেকয়রাজকন্যা দশরথরাজপত্নী চ। ইতি শব্দরত্নাবলী ॥

কৈঙ্কর্য্যং (ক্লী) কিঙ্করত্বং। দাসত্বং। কিঙ্করশব্দাৎ ভাবার্থে ষ্যপ্রত্যয়ঃ ॥

কৈটজঃ (পুং) কুটজবৃক্ষঃ। ইতি ভাবপ্রকাশঃ ॥

কৈটভঃ (পুং) দৈত্যবিশেষঃ। যথা। যোগনিদ্রাং যদা বিষ্ণুর্জগত্যেকার্ণবীকৃতে। আস্তীর্য্য শেষমভজৎ কল্পান্তে ভগবান্ প্রভুঃ ॥ তদা দ্বাবসুরৌ ঘোরৌ বিখ্যাতৌ মধুকৈটভৌ। বিষ্ণুকর্ণমলোদ্ভূতৌ হন্তুং ব্রহ্মাণমুদ্যতৌ ॥ ইতি মার্কণ্ডেয়পুরাণ

কৈটভজিৎ ( পুং ) বিষ্ণুঃ। ইত্যমরঃ॥
কৈটভহা [ন্] ( পুং ) বিষ্ণুঃ। ইতি হেমচন্দ্রঃ॥
কৈটভা ( স্ত্রী ) দুর্গা। ইতি ত্রিকাণ্ডশেষঃ॥
কৈটভারিঃ ( পুং ) বিষ্ণুঃ। ইতি হলায়ুধঃ॥
কৈটভী ( স্ত্রী ) দুর্গা। ইতি ত্রিকাণ্ডশেষঃ॥
কৈটভেশ্বরী ( স্ত্রী ) দুর্গা। যথা। কৈটভস্ত বশং কৃত্বা গৃহীতা তৎপুরী যথা। তেন সা গীয়তে দেবী পুরাণে কৈটভেশ্বরী॥ ইতি দেবীপুরাণে ৪৫ অধ্যায়ঃ॥
কৈটর্য্যঃ ( পুং ) কট্‌ফলঃ। ইত্যমরঃ॥ নিম্বঃ। মহানিম্বঃ। ইতি রত্নমালা॥ মদনবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥
কৈড়র্য্যঃ ( পুং ) কট্‌ফলঃ। পূতিকরঞ্জঃ। কটভীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥
কৈতকং (ক্লী) কেতকীপুষ্পং। যথা। কৈতকং তিক্তকটুকমিতি রাজবল্লভঃ॥
কৈতবং ( ক্লী ) কপটঃ। দ্যূতঃ। ইত্যমরঃ॥ বৈদুর্য্যমণিঃ। ইতি রাজনির্ঘণ্টঃ॥
কৈদারং ( ক্লী ) ক্ষেত্রসমূহঃ। ইত্যমরটীকায়াং ভরতঃ॥
কৈদারঃ ( পুং ) শালিধান্যং। ইতি রাজনির্ঘণ্টঃ॥
কৈদারকং ( ক্লী ) কেদারসমূহঃ। ক্ষেত্রগণঃ। ইত্যমরঃ॥
কৈদারিকং ( ক্লী ) কৈদারকং। ইত্যমরঃ॥
কৈদার্য্যং ( ক্লী ) ক্ষৈত্রং। ক্ষেত্রসমূহঃ। ইত্যমরঃ॥
কৈমুতিকঃ ( পুং ) ন্যায়বিশেষঃ। কিমুতশব্দাৎ ঠিকপ্রত্যয়েন নিষ্পন্নঃ। তথা চ ছন্দোগপরিশিষ্টং। বেদাশ্ছন্দাংসি সর্ব্বাণি ব্রহ্মাদ্যাশ্চ দিবৌকসঃ। জলার্থিনোঽথ পিতরো মরীচ্যাদ্যাস্তথর্ষয়ঃ॥ উপাকর্ম্মণি চোৎসর্গে স্নানার্থং ব্রহ্মবাদিনঃ। বিযাসূনমুগচ্ছন্তি সংহৃষ্টা হ্যশরীরিণঃ॥ সমবায়শ্চ যত্রৈষাং তত্রান্যে বহবো মলাঃ। নূনং সর্ব্বে ক্ষয়ং যান্তি কিমুতৈকং নদীরজঃ॥ ইতি প্রায়শ্চিত্ততত্ত্বং॥
কৈরবং ( ক্লী ) কুমুদং। শ্বেতোৎপলং। ইত্যমরঃ॥
কৈরবঃ ( পুং ) শত্রুঃ। কিতবঃ। ইতি মেদিনী॥
কৈরবিণী ( স্ত্রী ) কুমুদিনী। ইতি শব্দরত্নাবলী॥
কৈরবী ( স্ত্রী ) চন্দ্রিকা। ইতি মেদিনী॥ মেথিকা। ইতি রাজনির্ঘণ্টঃ॥
কৈরবী [ন্] ( পুং ) চন্দ্রঃ। ইতি শব্দমালা॥
কৈরাটকঃ ( পুং ) স্থাবরবিষভেদঃ। ইতি হেমচন্দ্রঃ॥
কৈরাতং ( ক্লী ) ভূনিম্বঃ। ইতি শব্দচন্দ্রিকা॥ শম্বরচন্দনং। ইতি রাজনির্ঘণ্টঃ॥
কৈরাতঃ ( পুং ) ভূনিম্বঃ। ইতি রাজনির্ঘণ্টঃ॥ বলবান্ পুরুষঃ। তৎপর্য্যায়ঃ। দোগ্র্হঃ ২ ক্ষামঃ ৩। ইতি হারাবলী॥
কৈরালং ( ক্লী ) বিড়ঙ্গং। ইতি বৈদ্যকং॥
কৈরালী ( স্ত্রী ) বিড়ঙ্গা। ইতি রাজনির্ঘণ্টঃ॥
কৈলাসঃ ( পুং ) স্বনামখ্যাতপর্ব্বতঃ। ইত্যমরঃ॥ স চ শিবকুবেরয়োঃ স্থানং। তস্য পরিমাণং যথা। জঠরদেবকূটৌ মেরোঃ পূর্ব্বেণাষ্টাদশযোজনসহস্রমুদগায়তৌ দ্বি-

সহস্রং পৃথুভুজৌ ভবতঃ। এবমপরেণ পবনপারিপাত্রৌ দক্ষিণেন কৈলাসকর-বীরৌ প্রাগায়তৌ। ইতি শ্রীভাগ-বতং ॥

কৈলাসনিকেতনঃ (পুং) শিবঃ। ইতি কবি-কল্পলতা ॥

কৈলাসৌকাঃ [স্] (পুং) কুবেরঃ। ইতি হেমচন্দ্রঃ

কৈবর্ত্তঃ (পুং) স্বনামখ্যাতবর্ণসঙ্করজাতিঃ। স তু বেশ্যাগর্ত্তে ক্ষত্রিয়স্যৌরসজাতঃ। ইতি ব্রহ্মবৈবর্ত্তপুরাণং ॥ তৎপর্য্যায়ঃ। দাসঃ ২ ধীবরঃ ৩। ইত্যমরঃ ॥ দাসে-রকঃ ৪ জালিকঃ ৫। ইতি জটাধরঃ ॥

কৈবর্ত্তমুস্তং (ক্লী) কৈবর্ত্তমুস্তকং। ইতি শব্দ-রত্নাবলী ॥

কৈবর্ত্তমুস্তকং (ক্লী) কৈবর্ত্তীমুস্তকং। ইত্য-মরটীকায়াং ভরতঃ ॥

কৈবর্ত্তিকা (স্ত্রী) মালবে প্রসিদ্ধো লতাবিশেষঃ। তৎপর্য্যায়ঃ। সুরঙ্গা ২ লতা ৩ বল্লী ৪ দশারুহা ৫ রঙ্গিণী ৬ বস্ত্ররঙ্গা ৭ সুভগা ৮। অস্যা গুণাঃ। লঘুত্বং। বৃষ্যত্বং। কষায়ত্বং। কফকাসশ্বাসমন্দাগ্নি-দোষনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

কৈবর্ত্তিমুস্তকং (ক্লী) কৈবর্ত্তীমুস্তকং। ইত্য-মরটীকা ॥

কৈবর্ত্তী (স্ত্রী) পরিপেলং। ইতি বৈদ্যকং ॥ কৈবর্ত্তপত্নী চ ॥

কৈবর্ত্তীমুস্তকং (ক্লী) মুস্তাপ্রভেদঃ। কেওট-মুতা ইতি ভাষা। কেশুর ইতি নীচোক্তিঃ। ইতি ভরতঃ ॥ কেশুরিয়া মুথা। ইতি সারসুন্দরী ॥ তৎপর্য্যায়ঃ। কুটন্নটং ২ দশপুরং ৩ বানেয়ং ৪ পরি-পেলবং ৫ প্লবং ৬ গোপুরং ৭ গোনর্দ্দং ৮ ইত্যমরঃ ॥ দাশপুরং ৯ দাশপূরং ১০ দশপূরং ১১ দশপুরং ১২ পরিপেলং ১৩ পারিপেলং ১৪ কৈবর্ত্তমুস্তকং ১৫ কৈবর্ত্তি-মুস্তকং ১৬। ইতি তট্টীকা ॥ বন-সম্ভবং ১৭। ইতি রত্নকোষঃ ॥ ধাস্যং ১৮ শীতপুষ্পং ১৯ জীর্ণবুধ্নকং ২০ বন্যং ২১ সিতপুষ্পং ২২। ইতি জটাধরঃ ॥ অস্য গুণাঃ। কটুত্বং। উষ্ণত্বং। কফবায়ুব্রণ-দাহামশূলরক্তদোষনাশিত্বঞ্চ। ইতি রাজ-নির্ঘণ্টঃ ॥ হিমত্বং। তিক্তত্বং। কষা-য়ত্বং। কান্তিদত্বং। পিত্তবিসর্পকুষ্ঠকণ্ডু-বিষনাশিত্বঞ্চ ॥ ইদন্তু বিতুন্নকনাম্নো বৃক্ষস্য ত্বক্ মুস্তাকৃতি ॥ ইতি ভাব-প্রকাশঃ ॥

কৈবলং (ক্লী) বিড়ঙ্গং। ইতি রত্নমালা ॥

কৈবল্যং (ক্লী) মুক্তিঃ। ইত্যমরঃ ॥

কৈশিকং (ক্লী) কেশসমূহঃ। ইত্যমরঃ ॥

কৈশিকঃ (পুং) শৃঙ্গাররসঃ। ইতি শব্দরত্না-বলী জটাধরশ্চ ॥

কৈশিকী (স্ত্রী) নাটকবৃত্তিবিশেষঃ। যথা। ভারতী সাত্বতী কৈশিক্যারভট্যৌ চ বৃত্তয়ঃ ॥ ইতি হেমচন্দ্রঃ ॥

কৈশোরং (ক্লী) কিশোরাবস্থা। ইতি শব্দ-রত্নাবলী ॥ সা তু দশমবর্ষোত্তরপঞ্চদশ-বর্ষাবধিঃ। ইতি স্মৃতিঃ ॥

কৈশ্যং (ক্লী) কেশসমূহঃ। ইত্যমরঃ ॥

কোকঃ (পুং) চক্রবাকঃ। বৃকঃ। জ্যোতী।

খর্জ্জুরীবৃক্ষঃ। ভেকঃ। ইতি মেদিনী॥ বিষ্ণুঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কোকড়ঃ (পুং) বিলেশয়মৃগবিশেষঃ। তৎপর্য্যায়ঃ। জবিনঃ ২ কোকবাচঃ ৩ বিলেশয়ঃ ৪ চমরপুচ্ছঃ ৫ লোমশঃ ৬ ধূম্রবর্ণকঃ ৭। তন্মাংসগুণঃ। শ্বাসানিলকাসহরত্বং। পিত্তদাহকরত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

কোকদেবঃ (পুং) কপোতঃ। ইতি রাজনির্ঘণ্টঃ॥

কোকনদং (ক্লী) রক্তকুমুদং। রক্তপদ্মং। ইতি মেদিনী॥

কোকনদচ্ছবিঃ (পুং) রক্তবর্ণঃ। তদ্বতি ত্রি। ইত্যমরঃ॥

কোকবন্ধুঃ (পুং) সূর্য্যঃ। ইতি শব্দচন্দ্রিকা॥

কোকাগ্রঃ (পুং) সমষ্ঠিলবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কোকাহঃ (পুং) শ্বেতঘোটকঃ। তৎপর্য্যায়ঃ। কর্কঃ ২। ইতি হেমচন্দ্রঃ॥ কচিৎ পুস্তকে কাকাহ ইতি পাঠঃ॥

কোকিলঃ (পুং) স্বনামখ্যাতকৃষ্ণবর্ণমধুরস্বরপক্ষী। তৎপর্য্যায়ঃ। বনপ্রিয়ঃ ২ পরভৃতঃ ৩ পিকঃ ৪। ইত্যমরঃ॥ পরপুষ্টঃ ৫ কালঃ ৬ বসন্তদূতঃ ৭ তাম্রাক্ষঃ ৮ গন্ধর্ব্বঃ ৯ মধুগায়নঃ ১০ বাসন্তঃ ১১ কলকণ্ঠঃ ১২ কামান্ধঃ ১৩ কাকলীরবঃ ১৪ কুহূরবঃ ১৫ অন্যপুষ্টঃ ১৬ মত্তঃ ১৭ মদনপাঠকঃ ১৮। ইতি রাজনির্ঘণ্টঃ॥ অঙ্গারঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কোকিলনয়নঃ (পুং) কোকিলাক্ষবৃক্ষঃ। ইত্যমরটীকায়াং রমানাথঃ॥

কোকিলাবাসঃ (পুং) আম্রবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কোকিলাক্ষঃ (পুং) বৃক্ষবিশেষঃ। কুলিয়াখাড়া ইতি ভাষা। তালমখানা ইতি হিন্দী ভাষা। তৎপর্য্যায়ঃ। ইক্ষুগন্ধা ২ কাণ্ডেক্ষুঃ ৩ ইক্ষুরঃ ৪ ক্ষুরঃ ৫। ইত্যমরঃ॥ শৃগালী ৬ শৃঙ্খলী ৭ শুরকঃ ৮ শৃগালঘণ্টী ৯ বজ্রাস্থিঃ ১০ শৃঙ্খলা ১১ বজ্রকণ্টকঃ ১২ ইক্ষুঃ ১৩ ইক্ষুরকঃ ১৪ বজ্রঃ ১৫ শৃঙ্খলীকা ১৬ পিকেক্ষণা ১৭ পিচ্ছিলা ১৮। ইতি রাজনির্ঘণ্টঃ॥ শ্বেতস্য তস্য পর্য্যায়ঃ। বীরতরুঃ ২ ত্রিক্ষুরঃ ৩ ক্ষুরকঃ ৪ শুক্লপুষ্পঃ ৫॥ রক্তস্য তস্য পর্য্যায়ঃ। ছত্রকঃ ২ অতিচ্ছত্রঃ ৩। ইতি রত্নমালা॥ সামান্যস্য তস্য গুণাঃ। আমবাতবাতরক্তরোগনাশিত্বং। ইতি রাজবল্লভঃ॥ মধুরত্বং। শীতত্বং। পিত্তাতিসারনাশিত্বং। শুক্রকফবলরুচিকারিত্বং। সন্তর্পণত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

কোকিলাক্ষকঃ (পুং) কোকিলাক্ষবৃক্ষঃ। ইত্যমরটীকায়াং স্বামী॥

কোকিলেষ্টা (স্ত্রী) মহাজম্বুঃ। ইতি রাজনির্ঘণ্টঃ॥

কোকিলেক্ষুঃ (পুং) কৃষ্ণেক্ষুঃ। ইতি রাজনির্ঘণ্টঃ॥

কোকিলোৎসবঃ (পুং) আম্রবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কোঙ্কণং (ক্লী) শস্ত্রভেদঃ। ইতি হেমচন্দ্রঃ॥

কোঙ্কণঃ ( পুং ) দেশবিশেষঃ। কোকণ ইতি ভাষা। ইতি বিশ্বঃ॥

কোঙ্কণাসুতঃ ( পুং ) পরশুরামঃ। ইতি শব্দমালা॥

কোচঃ ( পুং ) জাতিবিশেষঃ। স তু মাংসচ্ছেদিগর্ভে তীবরস্তোরসজাতঃ। ইতি ব্রহ্মবৈবর্ত্তপুরাণং॥

কোজাগরঃ ( পুং ) আশ্বিনী পূর্ণিমা। তৎপর্য্যায়ঃ। শারদী ২ দ্যূতপূর্ণিমা ৩ শরৎপর্ব্ব ৪ কৌমুদী ৫। ইতি ত্রিকাণ্ডশেষঃ॥ অথ কোজাগরকৃত্যানি। তত্র ব্রহ্মপুরাণং। আশ্বযুজ্যাং পৌর্ণমাস্যাং নিকুম্ভো বালুকার্ণবাৎ। আয়াতি সেনয়া সার্দ্ধং কৃত্বা যুদ্ধং সুদারুণং॥ তস্মাৎ তত্র নরৈর্মার্গাঃ স্বগেহস্য সমীপতঃ। শোধিতব্যাঃ প্রযত্নেন ভূষিতব্যাশ্চ মণ্ডনৈঃ॥ পুষ্পার্ঘ্যফলমূলৌঘসর্ষপপ্রকরৈস্তথা। বেশ্মানি ভূষিতব্যানি নানাবর্ণৈর্বিশেষতঃ॥ সুস্নাতৈরনুলিপ্তৈশ্চ নরৈর্ভাব্যং সবান্ধবৈঃ। দিবা তত্র ন ভোক্তব্যং মনুষ্যৈশ্চ বিবেকিভিঃ॥ স্ত্রীবালবৃদ্ধমূর্খৈশ্চ ভোক্তব্যং পূজিতৈঃ সুরৈঃ। পূজ্যাশ্চ সফলৈঃ পত্রৈস্তথা দ্বারোর্দ্ধভিত্তয়ঃ॥ দ্বারোপান্তে সুদীপস্তু সংপূজ্যো হব্যবাহনঃ। যবাক্ষতযুতোপেতৈস্তণ্ডুলৈশ্চ সুতর্পিতঃ॥ সংপূজিতব্যঃ পূর্ণেন্দুঃ পয়সা পায়সেন চ। রুদ্রঃ সভার্য্যঃ স্কন্দশ্চ তথা নন্দীশ্বরো মুনিঃ॥ গোমস্তিঃ সুরভিঃ পূজ্যা ছাগবস্তিহুতাশনঃ। উরভ্রবস্তির্বরুণো গজবস্তির্বিনায়কঃ॥ পূজ্যঃ সাশ্বৈশ্চ রেবন্তো যথাবিভববিস্তরৈঃ। ততঃ পূজ্যো নিকুম্ভোঽপি সমাবৈস্তিলতণ্ডুলৈঃ॥ সুগন্ধিভিস্তোপেতৈঃ কৃশরাখ্যৈশ্চ ভূরিভিঃ। ব্রাহ্মণান্ ভোজয়িত্বা তু ভোক্তব্যং মাংসবর্জ্জিতং॥ বহ্নিপার্শ্বগতৈর্নেয়া দৃষ্ট্বা ক্রীড়াঃ পৃথগ্বিধাঃ॥ *॥ লিঙ্গপুরাণং। আশ্বিনে পৌর্ণমাস্যান্তু চরেজ্জাগরণং নিশি। কৌমুদী সা সমাখ্যাতা কার্য্যা লোকবিভূতয়ে॥ কৌমুদ্যাংপূজয়েল্লক্ষ্মীমিন্দ্রমৈরাবতং স্থিরং। সুগন্ধির্নিশি সদ্বেশশ্চাক্ষৈর্জাগরণং চরেৎ॥ নিশীথে বরদা লক্ষ্মীঃ কো জাগর্ত্তীতিভাষিণী। তস্মৈ বিত্তং প্রযচ্ছামি অক্ষৈঃ ক্রীড়াং করোতি যঃ॥ নারিকেলৈশ্চিপিটকৈঃ পিতৄন্ দেবান্ সমর্চ্চয়েৎ॥ বন্ধূংশ্চ প্রীণয়েত্তেন স্বয়ং তদশনো ভবেৎ॥ ইতিতিথ্যাদিতত্ত্বং॥

কোটঃ ( পুং ) দুর্গং। গড় কেল্লা ইতি চ ভাষা। ইতি কুটশব্দার্থে মেদিনী॥

কোটকঃ ( পুং ) গৃহকারকঃ। ঘরামি ইতি ভাষা। স তু কুম্ভকার্য্যা গর্ত্তে অট্টালিকাকারস্তোরসজাতঃ। ইতি ব্রহ্মবৈবর্ত্তপুরাণং॥

কোটরং ( ক্লী পুং ) বৃক্ষস্থিতগহ্বরং। গাছের খোড়োল ইতি ভাষা। তৎপর্য্যায়ঃ। নিষ্কুহঃ ২। ইত্যমরঃ॥ নির্গুহঃ ৩ কোটরঃ ৪। ইতি শব্দরত্নাবলী॥ প্রান্তরং ৫ তরুবিবরং ৬। ইতি জটাধরঃ॥

কোটরাবণং ( ক্লী ) সকোটরবৃক্ষযুক্তবনং। ইতি মুগ্ধবোধটীকায়াং দুর্গাদাসঃ॥

কোটরী ( স্ত্রী ) নগ্না স্ত্রী। ইত্যমরঃ॥ চণ্ডিকা। ইত্যমরটীকা॥

কোটবী ( স্ত্রী ) বিবস্ত্রা স্ত্রী। ইত্যমরটীকা॥ দুর্গা। ইতি ধরণী॥

কোটিঃ ( স্ত্রী ) অস্ত্রাদেঃ কোণঃ। উৎকর্ষঃ। শতলক্ষসংখ্যা। ক্রোর ইতি ভাষা। ধনুরগ্রং। ইত্যমরমেদিনীকরৌ॥ পৃক্কা। পিড়িঙ্গ শাক ইতি ভাষা। ইত্যমরঃ॥

কোটিকঃ ( পুং ) ইন্দ্রগোপনামকীটঃ। ইতি জটাধরঃ॥

কোটিজিৎ ( পুং ) কালিদাসঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কোটিপাত্রঃ ( পুং ) কেনিপাতকঃ। কেরোআল ইতি ভাষা। ইতি হেমচন্দ্রঃ॥

কোটিরঃ ( পুং ) ইন্দ্রঃ। নকুলঃ। শক্রগোপককীটঃ। ইতি মেদিনী॥

কোটিবর্ষং ( ক্লী ) বাণপুরং। ইতি শব্দরত্নাবলী॥

কোটিবর্ষা ( স্ত্রী ) পৃক্কা। পিড়িঙ্গ শাক ইতি ভাষা। ইত্যমরঃ॥

কোটিশঃ ( পুং ) লোষ্টভঙ্গসাধনমুদ্গরঃ॥ মই ইতি খ্যাত ইতি কেচিৎ। ইতি ভরতঃ॥ তৎপর্য্যায়ঃ। লেষ্টুভেদনঃ ২। ইত্যমরঃ॥ লেষ্টুঘ্নঃ ৩ কোটীশঃ ৪। ইতি রত্নকোষঃ॥ লেষ্টুভেদী ৫ চূর্ণদণ্ডঃ ৬ লোষ্টভঙ্গার্থমুদ্গরঃ ৭। ইতি শব্দরত্নাবলী॥ লোষ্টঘ্নঃ ৮। ইতি জটাধরঃ॥

কোটিশঃ [ স্ ] ব্য কোটিঃ কোটিঃ। ইতি ব্যাকরণং॥

কোটী ( স্ত্রী ) খড়্গাদেরগ্রভাগঃ। ইত্যমরটীকা॥ পৃক্কাশাকং। ইতি শব্দরত্নাবলী॥ কোটিসংখ্যা। ইতি লিঙ্গাদিসংগ্রহটীকায়াং ভরতঃ॥

কোটীরঃ ( পুং ) জটা। ইতি ত্রিকাণ্ডশেষঃ॥ কিরীটং। ইতি হেমচন্দ্রঃ॥

কোটীবর্ষং ( ক্লী ) বাণপুরং। ইতি ত্রিকাণ্ডশেষঃ॥

কোটীবর্ষা ( স্ত্রী ) কোটিবর্ষা। পিড়িঙ্গ শাক ইতি ভাষা। ইতি শব্দরত্নাবলী॥

কোটীশঃ ( পুং ) কোটিশঃ। ইত্যমরটীকায়াং ভরতঃ॥

কোট্টং ( ক্লী ) দুর্গং। কেল্লা গড় ইত্যাদি ভাষা। ইতি হেমচন্দ্রঃ॥

কোট্টঃ ( পুং ) দুর্গপুরং। ইতি লিঙ্গাদিসংগ্রহে অমরঃ॥

কোট্টবী ( স্ত্রী ) দুর্গা। ইতি ত্রিকাণ্ডশেষঃ॥ নগ্না স্ত্রী। ইতি শব্দরত্নাবলী॥ নগ্নমুক্তকেশী নারী। যথা। যা বিবাসা মুক্তকেশী কোট্টবী নগ্নিকা চ সা। ইতি জটাধরঃ॥ অপি চ। তন্মাতা কোট্টবী নাম নগ্না মুক্তশিরোরুহা। পুরোঽবতস্থে কৃষ্ণস্য পুত্ত্রপ্রাণরিরক্ষয়া॥ ইতি শ্রীভাগবতে ৬৩ অধ্যায়ঃ॥

কোট্টবীপুরং ( ক্লী ) বাণপুরং। ইতি শব্দরত্নাবলী॥

কোট্টারঃ ( পুং ) নাগরঃ। কূপঃ। পুষ্করিণ্যাঃ পাটকঃ। ইতি মেদিনী॥ দুর্গপুরং। ইতি লিঙ্গাদিসংগ্রহটীকায়াং ভরতঃ॥

কোঠঃ ( পুং ) চক্রাকারকুষ্ঠরোগঃ। তৎপর্য্যায়ঃ। মণ্ডলকং ২। ইত্যমরঃ॥ দুশ্চর্ম্মা ৩ স্বগ্দোষঃ ৪ চর্ম্মদূষিকা ৫।

ইতি রাজনির্ঘণ্টঃ॥ তস্য লক্ষণং যথা। অসম্যগ্বমনো দীর্ণপিত্তশ্লেষ্মানিগ্রহৈঃ। মণ্ডলানি সকণ্ডূনি রাগবন্তি বহূনি চ॥ উৎকোঠঃ সানুবন্ধশ্চ কোঠ ইত্যভিধীয়তে। ইতি মাধবকরঃ॥ অন্যচ্চ। বরটীদষ্টনিকাশঃ কণ্ডুমান্ লোহিতোঽস্রকফপিত্তাৎ। ক্ষণিকোৎপাদবিনাশঃ কোঠ ইতি নিগদ্যতে তজ্জ্ঞৈঃ॥ ইতি রক্ষিতঃ॥

কোঠরঃ (পুং) অঙ্কোঠবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

কোঠরপুষ্পী (স্ত্রী) বৃদ্ধদারকঃ। ইতি রাজনির্ঘণ্টঃ॥

কোণঃ (পুং) বীণাদিবাদনং। বীণাদি যন্ত্র বাজাইবার কাঠী ইতি ভাষা। অস্ত্রাদেরগ্রভাগঃ। তৎপর্য্যায়ঃ। পালিঃ ২ অশ্রিঃ ৩ কোটিঃ ৪। ইত্যমরঃ॥ বাদ্যপ্রভেদঃ। গৃহাদেরেকদেশঃ। লগুড়ঃ। ইতি মেদিনী॥ মঙ্গলগ্রহঃ। ইতি হেমচন্দ্রঃ॥ শনিঃ। ইতি বিশ্বঃ॥ দ্বয়োর্দিশোর্ম্মধ্যভাগঃ। ইতি রাজনির্ঘণ্টঃ॥ অস্য বিবরণং বিদিক্‌শব্দে দ্রষ্টব্যং॥

কোণকুণঃ (পুং) উৎকুণঃ। উকুণ ইতি ভাষা। ইতি হেমচন্দ্রঃ॥

কোণিঃ (ত্রি) কুণিঃ। কোপা ইতি ভাষা। ইত্যমরটীকা॥

কোথঃ (পুং) নেত্ররোগভেদঃ। কথো ইতি ভাষা। শটিতে মথিতে চ ত্রি। ইতি মেদিনীকরহেমচন্দ্রৌ॥

কোদণ্ডং (ক্লী) ধনুঃ। ইত্যমরঃ॥

কোদণ্ডঃ (পুং) ভ্রূঃ। জনপদবিশেষঃ। ইতি মেদিনী॥

কোদ্রবঃ (পুং) ধান্যবিশেষঃ। কোদো ইতি ভাষা। তৎপর্য্যায়ঃ। কোরদূষঃ ২। ইত্যমরঃ॥ কুদ্রবঃ৩। ইতি তট্টীকা॥ কুদ্দালঃ ৪ মদনাগ্রকঃ ৫ কোর্দ্রবঃ ৬ কোরদূষকঃ ৭। ইতি শব্দরত্নাবলী॥ অপি চ। কোদ্রবঃ কোরদূষঃ স্যাদুদ্দালো বনকোদ্রবঃ। কোদ্রবো বাতলো গ্রাহী হিমঃ পিত্তকফাপহঃ॥ উদ্দালস্তু ভবেদুষ্ণো গ্রাহী বাতকরো ভৃশং। ইতি ভাবপ্রকাশঃ॥ অস্য গুণাঃ। মধুরত্বং। তিক্তত্বং। ব্রণিনাং পথ্যকারকত্বং। কফপিত্তহরত্বং। রূক্ষত্বং। মোহকারিত্বং। নূতনস্য তু গুরুত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ পরমগ্রাহিত্বং। বাতলত্বং। ইতি রাজবল্লভঃ॥

কোপঃ (পুং) ক্রোধঃ। ইত্যমরঃ॥

কোপক্রমং (ক্লী) ব্রহ্মণঃ সৃষ্টিঃ। ইত্যমরটীকায়াং রায়মুকুটঃ॥ কোপযুক্তে ত্রি॥

কোপনঃ (ত্রি) কোপবিশিষ্টঃ। ইতি জটাধরঃ॥

কোপনকঃ (পুং) চোরকনামগন্ধদ্রব্যং। ইতি রাজনির্ঘণ্টঃ॥

কোপনা (স্ত্রী) কোপবতী। তৎপর্য্যায়ঃ। ভামিনী ২। ইত্যমরঃ॥ চণ্ডী ৩। ইতি জটাধরঃ॥ ভীমা ৪। ইতি শব্দরত্নাবলী॥

কোপলতা (স্ত্রী) কর্ণস্ফোটালতা। ইতি রাজনির্ঘণ্টঃ॥

কোপী [ন্] (ত্রি) ক্রোধনঃ। ইত্যমরঃ॥ জলপারাবতে পুং। ইতি রাজনির্ঘণ্টঃ॥

কোমলং (ক্লী) জলং। ইতি মেদিনী ॥
কোমলঃ (ত্রি) অকঠিনঃ। নরম ইতি ভাষা। তৎপর্য্যায়ঃ। সুকুমারঃ ২ মৃদুলঃ ৩ মৃদুঃ ৪। ইত্যমরঃ ॥ পেলবঃ ৫। ইতি জটাধরঃ ॥ মনোজ্ঞঃ। ইতি শব্দরত্নাবলী ॥
কোমলকং (ক্লী) মৃণালং। ইতি শব্দচন্দ্রিকা ॥
কোমলা (স্ত্রী) ক্ষীরিকা। ইতি শব্দচন্দ্রিকা ॥
কোমাসিকা (স্ত্রী) জালিকা। ফলের জালি ইতি ভাষা। ইতি হারাবলী ॥
কোযষ্টিঃ (পুং) জলকুক্কুভপক্ষী। ইতি ত্রিকাণ্ডশেষঃ ॥
কোযষ্টিকঃ (পুং) পক্ষিভেদঃ। কোঁড়াপাখী ইতি ভাষা। ইত্যমরঃ ॥
কোরকঃ (পুং) কলিকা। ইত্যমরঃ ॥
কোরকঃ (পুং ক্লী) মুকুলং। কক্কোলকং। মৃণালং। ইতি মেদিনী ॥ চোরনামগন্ধদ্রব্যং। ইতি জটাধরঃ ॥
কোরঙ্গী (স্ত্রী) সূক্ষ্মৈলা। ইত্যমরঃ ॥ পিপ্পলী। ইতি রাজনির্ঘণ্টঃ ॥
কোরদূষঃ (পুং) কোদ্রবঃ। ইত্যমরঃ ॥
কোলং (ক্লী) বদরীফলং। তৎপর্য্যায়ঃ। কুবলং ২ ফেনিলং ৩ সৌবীরং ৪ বদরং ৫ ঘোণ্টা ৬। ইত্যমরঃ ॥ পিচ্ছিলং ৭ স্বাদুফলং ৮ বদরীফলং ৯। ইতি শব্দরত্নাবলী ॥ কোকিলং ১০। ইতি জটাধরঃ ॥ অপি চ। পুংসি স্ত্রিয়াঞ্চ কর্কন্ধূর্বদরীকোলমিত্যপি। ফেনিলং কুবলং ঘোণ্টা সৌবীরং বদরঞ্চ তৎ ॥ অজাপ্রিয়া কুহা কোলির্বিষমোভয়কণ্টকঃ। অথ বদরবিশেষাণাং লক্ষণানি গুণাশ্চ। পচ্যমানং সুমধুরং সৌবীরং বদরং মহৎ। সৌবীরং বদরং শীতং ভেদনং গুরু শুক্রলং ॥ বৃংহণং পিত্তদাহাস্রক্ষয়তৃষ্ণানিবারণং। সৌবীরাল্লঘু সংপক্বং মধুরং কোলমুচ্যতে ॥ কোলস্তু বদরং দাহি রুচ্যমুষ্ণঞ্চ বাতহৃৎ। কফপিত্তকরং চাপি গুরু সারকমীরিতং ॥ কর্কন্ধুঃ ক্ষুদ্রবদরং কথিতং পূর্ব্বসূরিভিঃ। অম্লং স্যাৎ ক্ষুদ্রবদরং কষায়ং মধুরং মনাক্ ॥ স্নিগ্ধং গুরু চ তিক্তঞ্চ বাতপিত্তাপহং স্মৃতং। শুষ্কং ভেদ্যগ্নিকৃৎ সর্ব্বং লঘু তৃষ্ণাক্লমাস্রজিৎ ॥ ইতি ভাবপ্রকাশঃ ॥ বদরাদিদ্বয়ং শৃগালকোলৌ। বদরীসদৃশা ঘোণ্টা শৃগালকোলিঃ। যদুক্তং। বদরীসদৃশাকারো বৃক্ষঃ। সূক্ষ্মফলো ভবেৎ। অটব্যামেব সা ঘোণ্টা গোপঘোণ্টেতি চোচ্যতে ॥ ইতি স্মৃতিঃ ॥ হস্তিকোলির্গোপঘোণ্টা ঘোণ্টা চ বদরীচ্ছদা। শৃগালকোলিঃ কর্কন্ধুরিতি রত্নকোষঃ ॥ কেচিত্তু কোলাদিত্রয়ং বদরীফলে সৌবীরাদিত্রয়ং শৃগালকোলাবিত্যাহুঃ ॥ স্বামী তু কর্কন্ধুর্বদরী কোলির্ঘোণ্টা কুবলফেনিলৌ। সৌবীরং বদরং কোলমিতি পঠতি। তত্রাদ্যাস্ত্রয়ো বৃক্ষার্থাঃ অন্যে ফলার্থাঃ ঘোণ্টা ভূভয়স্পৃগিতি ব্যাচষ্টে। সৌবীরং বদরং কোলং বদরীণাং ফলং মতমিতি কোষান্তরঞ্চ। ইতি ভরতঃ ॥ * ॥ অস্য গুণঃ। অম্লত্বং। বায়ুকফনাশিত্বঞ্চ ॥ পক্বস্যাস্য গুণাঃ। বায়ুপিত্তনাশিত্বং। স্নিগ্ধত্বং। সুমধুরত্বং।

সারকত্বঞ্চ ॥ শুষ্কস্যাস্য গুণঃ। কফবায়ুনাশিত্বং। পিত্তাবিরোধিত্বঞ্চ ॥ পুরাতনস্যাস্য গুণাঃ। শ্রমতৃষ্ণানাশিত্বং। স্নিগ্ধত্বং। লঘুত্বঞ্চ ॥ অস্য মজ্জগুণঃ। মধুরত্বং। পিত্তচ্ছর্দ্দিতৃষ্ণানাশিত্বঞ্চ। ইতি রাজবল্লভঃ ॥ * ॥ তোলকপরিমাণং। ইতি বৈদ্যকপরিভাষা ॥ মরিচং। ইতি রাজনির্ঘণ্টঃ ॥ চব্যং। ইতি বৈদ্যকং ॥

কোলঃ (পুং) শূকরঃ। প্লবঃ। ভেলা মাড় ইত্যাদি ভাষা। ইত্যমরঃ ॥ অঙ্কপালিঃ। শনিঃ। চিত্রং। চিতা ইতি ভাষা। ক্রোড়ং। ইতি মেদিনী ॥ দেশবিশেষঃ। ইতি শব্দরত্নাবলী ॥ অস্ত্রভেদঃ। ইতি ধরণী ॥ বর্ণসঙ্করজাতিবিশেষঃ। স তু লেটাৎ তীবরকন্যায়াং জাতঃ। ইতি ব্রহ্মবৈবর্ত্তপুরাণং ॥ শ্মশ্রুধারিম্লেচ্ছজাতিবিশেষঃ। স চ পূর্ব্বং ক্ষত্রিয় আসীৎ সগররাজেনাসৌ বেদযাগাদাবনধিকারী কৃতঃ। ইতি হরিবংশঃ ॥

কোলকং (ক্লী) গন্ধদ্রব্যবিশেষঃ। কাঁকলা ইতি ভাষা। মরিচং। ইত্যমরঃ ॥

কোলকঃ (পুং) অঙ্কোঠবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥ বহুবারবৃক্ষঃ। ইতি জটাধরঃ ॥

কোলকন্দঃ (পুং) মহাকন্দবিশেষঃ। তৎপর্য্যায়ঃ। ক্রমিঘ্নঃ ২ পঞ্জলঃ ৩ বস্ত্রপঞ্জলঃ ৪ পুটালুঃ ৫ সুপুটঃ ৬ পুটকন্দঃ ৭। অস্য গুণাঃ। কটুত্বং। উষ্ণত্বং। ক্রমিদোষনাশিত্বং। বান্তিবিচ্ছর্দ্দিশমনত্বং। বিষদোষনিবারণত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

কোলকর্কটিকা (স্ত্রী) মধুখর্জ্জুরিকা। ইতি রাজনির্ঘণ্টঃ ॥

কোলদলং (ক্লী) নখীনামগন্ধদ্রব্যং। ইত্যমরঃ ॥

কোলনাশিকা (স্ত্রী) বঙ্কিণীবৃক্ষঃ। ইতি হারাবলী ॥

কোলপুচ্ছঃ (পুং) কঙ্কপক্ষী। ইতি হারাবলী ॥

কোলমূলং (ক্লী) পিপ্পলীমূলং। ইতি রাজনির্ঘণ্টঃ ॥

কোলম্বকঃ (পুং) বীণায়াঃ কায়ঃ। ইত্যমরঃ ॥ স তু তন্ত্রীদণ্ডাদিসমুদায়ঃ শরীরং। অলাবুদণ্ডককুভসমুদায়স্তন্ত্রীহীন ইত্যন্যে। ইতি ভরতঃ ॥

কোলবল্লী (স্ত্রী) গজপিপ্পলী। ইত্যমরঃ ॥ চব্যং। ইতি রাজনির্ঘণ্টঃ ॥

কোলশিম্বী (স্ত্রী) লতাবিশেষঃ। আলকুশী ইতি ভাষা। তৎপর্য্যায়ঃ। কৃতকলা ২ খট্বা ৩ শূকরপাদিকা ৪ কাকাণ্ডোলা ৫ দধিপুষ্পা ৬ কাকাণ্ডা ৭ পর্য্যঙ্কপাদিকা ৮। অস্যা গুণাঃ। বায়ুনাশিত্বং। গুরুত্বং। উষ্ণত্বং। কফপিত্তকারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ তৎপর্য্যায়গুণাঃ। অথ সুঅরাসেম্বি। কোলশিম্বী কৃষ্ণফলা তথা পর্য্যঙ্কপালিকা। কোলশিম্বী সমীরঘ্নী গুরূষ্ণা কফবাতহৃৎ। শুক্রাগ্নিসাদকৃদ্বল্যা রুচিকৃৎ বদ্ধবিড্‌গুরুঃ ॥ ইতি ভাবপ্রকাশঃ ॥

কোলা (স্ত্রী) কোলিবৃক্ষঃ। ইতি শব্দরত্নাবলী ॥ পিপ্পলী। চব্যং। ইতি মেদিনী ॥

কোলাঙ্কঃ (পুং) দেশবিশেষঃ। ইতি শব্দরত্নাবলী ॥ তত্র পুরং কান্যকুব্জং ॥

কোলাহলঃ (পুং) বহুবিধদুরগাব্যক্তধ্বনিঃ। তৎপর্য্যায়ঃ। কলকলঃ ২। ইত্যমরঃ ॥ কালকীলঃ ৩। ইতি শব্দরত্নাবলী ॥

কোলিঃ (পুং স্ত্রী) বৃক্ষবিশেষঃ। কুলগাছ ইতি ভাষা। তৎপর্য্যায়ঃ। কর্কন্ধুঃ ২ বদরী ৩। ইত্যমরঃ ॥ কর্কন্ধুঃ ৪ বদরঃ ৫ কোলী ৬ কোলা ৭ কুবলী ৮। ইতি তট্টীকায়াং ভরতঃ ॥ কোলঃ ৯। ইতি তট্টীকাসারসুন্দরী ॥

কোলী (স্ত্রী) কোলিবৃক্ষঃ। ইত্যমরটীকায়াং ভরতঃ ॥

কোল্যা (স্ত্রী) পিপ্পলী। ইতি রত্নমালা ॥

কোবিদঃ (ত্রি) পণ্ডিতঃ। ইত্যমরঃ ॥

কোবিদারঃ (পুং) রক্তকাঞ্চনবৃক্ষঃ। তৎপর্য্যায়ঃ। চমরিকঃ ২ কুদ্দালঃ ৩ যুগপত্রকঃ ৪। ইত্যমরঃ ॥ কাঞ্চনারঃ ৫ কণকারকঃ ৬ কান্তপুষ্পঃ ৭ করকঃ ৮ কান্তারঃ ৯ যমলচ্ছদঃ ১০ কাঞ্চনালঃ ১১ তাম্রপুষ্পঃ ১২ কুদারঃ ১৩ রক্তকাঞ্চনঃ ১৪। ইতি জটাধরঃ ॥ বিদলঃ ১৫। ইতি শব্দরত্নাবলী ॥ অপি চ। কাঞ্চনালঃ কাঞ্চনকো গণ্ডারিঃ শোণপুষ্পকঃ। অথ কচনারভেদঃ। কোবিদারশ্চমরিকঃ কুদ্দালো যুগপত্রকঃ। কুণ্ডলী তাম্রপুষ্পশ্চাশ্মান্তকঃ স্বল্পকেশরী ॥ কাঞ্চনালো হিমঃ গ্রাহী তুবরঃ শ্লেষ্মপিত্তনুৎ। কৃমিকুষ্ঠগুদভ্রংশগণ্ডমালাব্রণাপহঃ ॥ কোবিদারোঽপি তদ্বৎ স্যাৎ তয়োঃ পুষ্পং লঘু স্মৃতং। রুক্ষং সংগ্রাহি পিত্তাস্রপ্রদরক্ষয়কাসনুৎ ॥ ইতি ভাবপ্রকাশঃ ॥ অস্য গুণাঃ। কষায়ত্বং। সংগ্রাহিত্বং। ব্রণরোপণত্বং। দীপনত্বং। কফবাতমূত্রকৃচ্ছ্রনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ তৎপুষ্পগুণাঃ। ধারকত্বং। রুচিকারিত্বং। রক্তপিত্তরোগে সুপথ্যত্বঞ্চ। ইতি রাজবল্লভঃ ॥

কোশঃ (পুং) অণ্ডং। ইতি শব্দরত্নাবলী ॥ কৃতাকৃতং হেমরূপ্যং। তৎপর্য্যায়ঃ। হিরণ্যং ২। ইত্যমরঃ ॥ কৃতাকৃতং হেমরূপ্যঞ্চ মিলিতং প্রত্যেকঞ্চ কোশাদিদ্বয়বাচ্যং। কৃতমাবর্ত্তিতং অকৃতমাকরোত্থং চূর্ণং ঘটিতাঘটিতমিতি স্বামী ॥ কৃতমাভরণীকৃতং অকৃতং চূর্ণাদিরূপমাকরোত্থমিতি কেচিৎ। কুষ্যতে আকৃষ্যতে আয়স্থানেভ্যঃ কোষঃ। কুষ গ নিষ্কর্ষে ঘঞ্ কোষো মূর্দ্ধন্যান্তঃ তালব্যান্ত ইত্যন্যে। ইতি ভরতঃ ॥

কোশকারঃ (পুং) ইক্ষুঃ। ইতি শব্দরত্নাবলী ॥ মূর্দ্ধন্যমধ্যোঽপ্যয়ং ॥

কোশফলং (ক্লী) কক্কোলকং। ইত্যমরঃ ॥

কোশফলা (স্ত্রী) মহাকোশাতকী। ত্রপুষী। ইতি রাজনির্ঘণ্টঃ ॥

কোশলঃ (পুং স্ত্রী) অযোধ্যানগরী। ইতি শব্দমালা উণাদিকোষশ্চ ॥ মূর্দ্ধন্যমধ্যোঽপ্যয়ং ॥

কোশলাত্মজা (স্ত্রী) কৌশল্যা। সা তু শ্রীরামমাতা দশরথরাজপত্নী চ। ইতি শব্দরত্না-

কোশলিকং (ক্লী) উৎকোচঃ। ঘুষ ইতি ভাষা। ইতি হেমচন্দ্রঃ॥ মূর্দ্ধন্যমধ্যোঽপ্যয়ং॥

কোশাঙ্গং (ক্লী) ইৎকটঃ। ইতি হারাবলী॥ মূর্দ্ধন্যমধ্যোঽপ্যয়ং॥

কোশাতকঃ (পুং) কচঃ। ইতি বিশ্বমেদিন্যৌ॥

কোশাতকী (স্ত্রী) পটোলী। ঘোষকঃ। ইতি মেদিনী॥ ফলশাকবিশেষঃ। ঝিঙ্গা ইতি ভাষা। তৎপর্য্যায়ঃ। কৃতচ্ছিদ্রা ২ জালিনী ৩ কৃতবেধনা ৪ ক্ষ্বেড়া ৫ সুতিক্তা ৬ ঘণ্টালী ৭ মৃদঙ্গফলিনী ৮ কর্কশচ্ছদা ৯। অস্যা গুণাঃ। শিশিরত্বং। কটুত্বং। কষায়ত্বং। পিত্তবাতকফনাশিত্বং। মলাধ্মানবিশোধনত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ মূর্দ্ধন্যমধ্যোঽপ্যয়ং॥ মহাকোশাতকী। রাজকোশাতকী। যথা। অথ নেমুআ। মহাকোশাতকী প্রোক্তা হস্তিঘোষা মহাফলা। ধামার্গবো ঘোষকশ্চ হস্তিপর্ণশ্চ স স্মৃতঃ॥ মহাকোশাতকী স্নিগ্ধা সরা পিত্তানিলাপহা॥ অথ তোরই। ধামার্গবো পীতপুষ্পো জালিনী কৃতবোধনা। রাজকোশাতকী চেতি তথোক্তা রাজিমৎফলা॥ রাজকোশাতকী শীতা মধুরা কফবাতলা। পিত্তঘ্নী দীপনী শ্বাসজ্বরকাসকৃমিপ্রণুৎ॥ ইতি ভাবপ্রকাশঃ॥

কোশাতকী [ন্] (পুং) বাণিজ্যং। বণিক্। বাড়বাগ্নিঃ। ইতি বিশ্বঃ॥

কোশাম্রঃ (পুং) ফলবৃক্ষবিশেষঃ। কোশাম ইতি ভাষা। তৎপর্য্যায়ঃ। কৃমিবৃক্ষঃ ২ সুকোশকঃ ৩। ইতি ভাবপ্রকাশঃ॥ ঘনস্কন্ধঃ ৪ বনাম্রঃ ৫ জন্তুপাদপঃ ৬ ক্ষুদ্রাম্রঃ ৭ রক্তাম্রঃ ৮ লাক্ষাবৃক্ষঃ ৯ সুরক্তকঃ ১০। অস্য গুণাঃ। কুষ্ঠশোথাস্রপিত্তব্রণকফাপহত্বং। তৎফলগুণাঃ। গ্রাহিত্বং। বাতলত্বং। অম্লত্বং। উষ্ণত্বং। গুরুত্বং। পিত্তদত্বঞ্চ। ইতি ভাবপ্রকাশঃ॥ কফার্ত্তিপ্রদত্বং। বিদাহিত্বং। বিশোফকারিত্বঞ্চ॥ পক্বস্য তস্য গুণাঃ। মধুরত্বং। অম্লত্বঞ্চ॥ পট্বাদিযুক্তস্য তস্য গুণাঃ। দীপনত্বং। রুচিপুষ্টিবলকারিত্বঞ্চ॥ তত্তৈলস্য গুণাঃ। সারকত্বং। কৃমিকুষ্ঠব্রণাপহত্বং। অম্লমধুরত্বং। বল্যত্বং। পথ্যত্বং। রোচনত্বং। পাচনত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

কোশিলা (স্ত্রী) মুদ্গপর্ণী। ইতি রাজনির্ঘণ্টঃ॥

কোশী (স্ত্রী) উপানৎ। জুতা মোজা ইতি চ ভাষা। তৎপর্য্যায়ঃ। পাদূ ২ পাদবিরজাঃ ৩ পাদরথী ৪। ইতি হারাবলী॥ শুঙ্গা। ধান্যাদির শুঁয়া ইতি ভাষা। ইতি হেমচন্দ্রঃ॥

কোষঃ (পুং ক্লী) কুড্মলঃ। কুঁড়ি ইতি ভাষা। খড়্গপিধানং। খাপ ইতি ভাষা। অর্থসমূহঃ। দিব্যং। অণ্ডং। কৃতাকৃতং হেমরূপ্যং। ইত্যমরঃ॥ অস্য বিবরণং তালব্যান্তে দ্রষ্টব্যং। পাত্রং। জাতীকোষঃ। জায়ফল ইতি ভাষা। শব্দাদিসংগ্রহঃ। ইতি মেদিনী॥ ভাণ্ডাগারং। চষকঃ। যোনিঃ। শিশ্নঃ। ইতি হেমচন্দ্রঃ॥ পনসাদিফলস্তাস্তঃ। ইতি ধরণী॥

শব্দান্তরসংযোগে গোলকবাচকঃ। যথা সূত্রকোষঃ নেত্রকোষ ইত্যাদি। ইত্যমরটীকায়াং স্বামী ॥ ধনসংহতিঃ। ইতি জটাধরঃ ॥ তৎসঞ্চয়গুণাঃ। কোষো মহীপতের্জীবো ন তু প্রাণাঃ কথঞ্চন। দ্রব্যং হি রাজা ভূপস্য ন শরীরমিতি স্থিতিঃ ॥ ধর্ম্মহেতোঃ সুখার্থায় ভৃত্যানাং ভরণায় চ। আপদর্থঞ্চ সংরক্ষ্যঃ কোষঃ কোষবতা সদা ॥ ধনাৎ কুলং প্রভবতি ধনাদ্ধর্ম্মঃ প্রবর্ত্ততে। নাধনস্য ভবেদ্ধর্ম্মঃ কামশ্চৈব কথঞ্চন ॥ অধর্ম্মায় ধনং কুর্য্যাত্তদ্ধনং গৃহ্যতে পরৈঃ। স্বয়ং পাপস্য পাত্রং স্যাৎ সিংহো হস্তিবধাদিব ॥ তাদাত্বিকো মূলহরঃ কদর্য্যস্ত্রিবিধোহর্থকঃ। উৎপন্নার্থব্যয়করো যো ভবিষ্যদ্ধনাশয়া ॥ স তাদাত্বিক আখ্যাতঃ কল্যাণী তস্য নায়তিঃ। যঃ পিত্রাদ্যর্জ্জিতং বিত্তমন্যায়েন তু ভক্ষয়েৎ ॥ স মূলহর আখ্যাতস্তদুদর্কোঽপি চাশুভঃ। স কদর্য্যস্তু ভৃত্যাত্মপীড়নৈরর্থসঞ্চয়ী ॥ তদ্ধনং রাজদায়াদতস্করাণাং নিধির্ভবেৎ। ভিক্ষা চ রাজকোষশ্চ স্তোকস্তোকেন বর্দ্ধতে ॥ অঞ্জনঞ্চ ধনঞ্চৈব স্তোকস্তোকেন হীয়তে। কোষস্য সাধনোপায়ো মুখ্যং রাষ্ট্রমিতি স্মৃতং ॥ তৃণৈর্বর্দ্ধতে রাষ্ট্রং তদ্বৃদ্ধির্গপরম্পরা। রাজ্যোপায়েন সংরক্ষ্যা গ্রামে গ্রামে কৃষীবলাঃ ॥ তেভ্যঃ কৃষিভক্তশ্চার্থা অর্থেভ্যঃ সর্ব্বসম্পদঃ। শরীরকর্ষণাৎ প্রাণাঃ ক্ষীয়ন্তে প্রাণিনাং যথা ॥ তথা বর্ষেষু বর্ষেষু কর্ষণাৎ তৃণক্ষয়ঃ। একস্যাং গুণহীনায়াং কৃষিরন্যত্র কারয়েৎ ॥ ইতি যুক্তিকল্পতরুঃ ॥

কোষকঃ (পুং) অণ্ডং। অণ্ডকোষঃ। ইতি শব্দরত্নাবলী ॥

কোষকারঃ (পুং) ইক্ষুঃ। ইতি শব্দরত্নাবলী ॥ ইক্ষুবিশেষঃ। কুষারি ইতি ভাষা। অস্য গুণাঃ। গুরুত্বং। শীতত্বং। রক্তপিত্তক্ষয়াপহত্বঞ্চ। ইতি রাজবল্লভঃ ॥ কীটবিশেষঃ। গুটিপোকা ইতি ভাষা। তৎপর্য্যায়ঃ। তন্ত্রকীটঃ ২। ইতি জটাধরঃ ॥ অভিধানকর্ত্তা চ। তালব্যমধ্যোঽপ্যয়ং ॥

কোষচঞ্চুঃ (পুং) সারসপক্ষী। ইতি শব্দমালা ॥

কোষপানং (ক্লী) তত্তদিতিকর্ত্তব্যতাকপ্রসৃতিত্রয়জলপানরূপপরীক্ষাবিশেষঃ। যথা। অথ কোষবিধিঃ। নারদঃ। পূর্ব্বাহ্নে সোপবাসস্য স্নাতস্যার্দ্রপটস্য চ। সংসূচকা ব্যসনিনোঃ কোষপানং বিধীয়তে ॥ ইচ্ছতঃ শ্রদ্দধানস্য দেবব্রাহ্মণসন্নিধৌ। মদ্যপস্ত্রীব্যসনিনাং কিরাতানাস্তথৈব চ ॥ কোষঃ প্রাজ্ঞৈর্ন দাতব্যো যে চ নাস্তিকবৃত্তয়ঃ। মহাপরাধে নির্দ্ধর্ম্মে কৃতঘ্নে ক্লীবকুৎসিতে ॥ নাস্তিকব্রাত্যদাসেষু কোষপানং বিবর্জ্জয়েৎ। তমাহূয়াভিশস্তস্তু মণ্ডলাভ্যন্তরে স্থিতং ॥ আদিত্যাভিমুখং কৃত্বা পায়য়েৎ প্রসৃতিত্রয়ং। ঊর্দ্ধং যস্য হি সপ্তাহাদ্বৈকৃতন্তু মহদ্ভবেৎ ॥ নাভিযোজ্যঃ স বিদুষা কৃতকালব্যতিক্রমাৎ। সংসূচক আস্তিক ইতি মিতাক্ষরা ॥ মহাপরাধী মহাপাতকী। নির্দ্ধর্ম্মো

বর্ণাশ্রমরহিতঃ। কুৎসিতঃ প্রতিলোমজঃ। দাসঃ কৈবর্ত্তঃ। মণ্ডলাভ্যন্তরে গোময়কৃতমণ্ডলাভ্যন্তরে। বৈকৃতং রোগাদি। মহন্মান্নং। তস্য দেহিনামপরিহার্য্যত্বাৎ। তদাহ কাত্যায়নঃ। অথ দৈববিসম্বাদে ত্রিসপ্তাহস্ত দাপয়েৎ। অভিযুক্তং প্রযত্নেন তদর্থং দণ্ডমেব চ॥ তস্যৈকস্য ন সর্ব্বস্য জনস্য যদি তদ্ভবেৎ। রোগোঽগ্নির্জ্ঞাতিমরণমৃণং দাপ্যো দমঞ্চ সঃ॥ জ্বরাতিসারবিস্ফোটগূঢ়াস্থিপরিপীড়নং। নেত্ররুক্ গলরোগশ্চ তথোন্মাদঃ প্রজায়তে॥ শিরোরুগ্‌ভুজভঙ্গশ্চ দৈবিকা ব্যাধয়ো নৃণাং। গলরোগ ইত্যত্র শূলরোগ ইতি কচিৎ পাঠঃ। ত্রিসপ্তাহস্ত মহাভিযোগভববিষয়ং। মহাভিযোগেষেতানীতি প্রস্তুত্য চতুর্দ্দশকাদহ্ন ইতি যাজ্ঞবল্ক্যাভিধানাৎ। মিতাক্ষরাপ্যেবং। যত্তু ত্রিরাত্রাৎ সপ্তরাত্রাদ্বা দ্বাদশাহাৎ ত্রিসপ্তকাৎ। বৈকৃতং যস্ত দৃশ্যেত পাপকৃৎ স উদাহৃতঃ॥ ইতি পিতামহোক্তং তন্মহাভিযোগাৎ কৃৎস্নদ্রব্যাদর্ব্বাচীনং দ্রব্যং ত্রিধা বিভজ্য ত্রিরাত্রাদি পক্ষত্রয়ং ব্যবস্থাপনীয়মিতি মিতাক্ষরা॥ তথা ভক্তো যো যস্ত দেবস্ত পায়য়েত্তস্ত তজ্জলং। সমভাবে তু দেবানামাদিত্যস্ত তু পায়য়েৎ॥ দুর্গায়াঃ পায়য়েচ্চৌরান্ যে চ শস্ত্রোপজীবিনঃ। ভাস্করস্ত তু যত্তোয়ং ব্রাহ্মণং তন্ন পায়য়েৎ॥ দুর্গায়াঃ স্নাপয়েচ্ছূলমাদিত্যস্ত চ মণ্ডলং। অন্যেষামপি দেবানাং স্নাপয়েদায়ুধানি চ॥ অত্র স্বল্পাপরাধে দেবায়াং স্নাপয়িত্বা-দুধোদকং। পায্যো বিকারে চাশুদ্ধো নিযম্যঃ শুচিরন্যথা॥ ইতি কাত্যায়নোক্তবিশেষান্মহাপরাধে দেবস্নানোদকমিতি বিষয়ভেদঃ। রত্নাকরোঽপ্যেবং। মণ্ডলং ব্যোমেতি ব্যবহারদীপিকা॥ তস্যাং বিষ্ণুঃ। উগ্রান্ দেবান্ সমভ্যর্চ্চ্য তৎস্নানোদকপ্রসৃতিত্রয়ং পিবেৎ। ইদং ময়া ন কৃতমিতি ব্যাহরন্দেবতামুখ ইতি। এতদনুসারাদেবাস্যত্র প্রতিজ্ঞা প্রাগুক্তা। তত্র ক্রমঃ। প্রাড়্বিবাকো গোময়কৃতমণ্ডলাভ্যন্তরে ধর্ম্মাবাহনাদিসর্ব্বদেবতাপূজাং হবনান্তাং নির্ব্বর্ত্ত্য দক্ষিণাং দত্ত্বা সমন্ত্রকং প্রতিজ্ঞাপত্রং শোধ্য শিরসি নিধায় যথাবিহিতং দেবং সংপূজ্য তৎস্নানোদকমানীয় ওম্ তোয় ত্বং প্রাণিনাং প্রাণঃ সৃষ্টেরাদ্যস্তু নির্ম্মিতং। শুদ্ধেশ্চ কারণং প্রোক্তং দ্রব্যাণাং দেহিনাস্তথা॥ অতস্ত্বং দর্শয়াত্মানং শুভাশুভপরীক্ষণে॥ ইত্যাভ্যামভিমন্ত্র্য গোময়কৃতমণ্ডলাভ্যন্তরে স্থিতং সোপবাসং স্নাতার্দ্রবাসসমাদিত্যাভিমুখং ওম্ সত্যেন মামভিরক্ষস্ব বরুণেত্যনেন শোধ্য পাঠিতেনাভিমন্ত্রিতং প্রসৃতিত্রয়ং জলং পায়য়েৎ। ততো যদি অবধিকালাভ্যন্তরে রোগপীড়া ন ভবতি তদা শুদ্ধ ইতি। ততো দক্ষিণা দেয়া। ইতি দিব্যতত্ত্বং॥

কোষফলং (ক্লী) কক্কোলং। তচ্চ কর্পূরতুল্যগন্ধদ্রব্যবিশেষঃ। ইত্যমরটীকায়াং রমানাথঃ সারসুন্দরী চ॥

কোষফলঃ (পুং) ঘোষকলতা। ইতি জটাধরঃ॥

কোষফলা (স্ত্রী) পীতঘোষা। ইতি রত্নমালা ॥ তালব্যমধ্যাপীয়ং ॥.

কোষলা (স্ত্রী) অযোধ্যা। ইতি শব্দরত্নাবলী ॥

কোষবৃদ্ধিঃ (স্ত্রী) কুরণ্ডঃ। ইতি শব্দরত্নাবলী॥

কোষশায়িকা (স্ত্রী) ছুরিকা। ইতি জটাধরঃ ॥

কোষাতকঃ (পুং) কেশঃ। ইতি জটাধরঃ ॥

কোষাতকী (স্ত্রী) ঘোষালতা। অস্যাঃ ফলগুণঃ। কফার্শোনাশিত্বং ॥ পক্কফলগুণঃ। আমাশয়শুদ্ধিকারিত্বং। ইতি রাজবল্লভঃ॥ জ্যোৎস্নিকা। ঝিঙ্গা ইতি ভাষা। জ্যোৎস্নাবতী রাত্রিঃ। ইত্যমরভরতৌ ॥ তালব্যমধ্যাপীয়ং ॥

কোষাম্রং (ক্লী) ফলবিশেষঃ। কেওড়া ইতি ভাষা। অস্য গুণাঃ। কফবায়ুনাশিত্বং। অগ্নিদীপনত্বং। মলবদ্ধতাকারিত্বঞ্চ। ইতি রাজবল্লভঃ॥ তালব্যমধ্যমপীদং ॥

কোষী (স্ত্রী) পাদুকা। ইতি শব্দরত্নাবলী॥ শুঙ্গা। শস্যের শুঁয়া ইতি ভাষা। ইতি তালব্যান্তে হেমচন্দ্রঃ॥

কোষী [ন্] (পুং) আম্রবৃক্ষঃ। ইতি শব্দমালা ॥

কোষ্ঠঃ (পুং) কুসূলঃ। গৃহমধ্যং। কুক্ষিমধ্যং। আত্মীয়ে ত্রি। ইতি মেদিনী॥ স্থানান্যামাগ্নিপক্কানাং মূত্রস্য রুধিরস্য চ। হৃদ্‌ণ্ডুকঃ ফুপ্‌ফুষশ্চ কোষ্ঠ ইত্যভিধীয়তে॥ ইতি বৈদ্যকং॥

কোষ্ণং (ক্লী) ঈষদুষ্ণং। তৎপর্য্যায়ঃ। কবোষ্ণং ২ মন্দোষ্ণং ৩ কদুষ্ণং ৪। তদ্বতি ত্রি। ইত্যমরঃ॥

কোহলঃ (পুং) মদ্যভেদঃ। ইতি হেমচন্দ্রঃ॥ বাদ্যভেদঃ। নাট্যশাস্ত্রপ্রবক্তা। ইতি মেদিনী॥

কৌকৃত্যং (ক্লী) অনুতাপঃ। অযুক্তকরণং। ইতি মেদিনী॥

কৌকুটিকঃ (পুং) দাম্ভিকঃ। অদূরেরিতেক্ষণঃ। কীটাদিবধভীত্যা সংযতচক্ষুঃ পাদনিক্ষেপদেশদর্শী ভিক্ষুঃ। ইত্যমরভরতৌ॥ অদূরদর্শনশীলঃ। ইতি সারসুন্দরী॥

কৌকুটিকন্দলঃ (পুং) সর্পবিশেষঃ। বোড়াসাপ ইতি ভাষা। তৎপর্য্যায়ঃ। ভাণ্ডপুষ্পঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥

কৌঙ্কঃ (পুং) দেশবিশেষঃ। কোকণ ইতি খ্যাতঃ। ইতি শব্দরত্নাবলী॥

কৌঙ্কিণঃ (পুং) কোঙ্কণদেশঃ। ইতি শব্দরত্নাবলী॥

কৌঞ্চঃ (পুং) ক্রৌঞ্চপর্ব্বতঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কৌঞ্জায়নঃ (পুং) কুঞ্জস্য পুমপত্যং। ইতি ব্যাকরণং॥

কৌঞ্জায়নী (স্ত্রী) ব্রাহ্মণী। ইতি জটাধরঃ॥ কুঞ্জস্য স্ত্র্যপত্যং। ইতি মুগ্ধবোধং॥

কৌঞ্জায়ন্যঃ (পুং) কুঞ্জস্য পুমপত্যং। ইতি মুগ্ধবোধং॥

কৌটঃ (পুং) কুটজবৃক্ষঃ। ইতি ভাবপ্রকাশঃ॥

কৌটকিকঃ (ত্রি) মাংসিকঃ। মাংসবিক্রেতা। ইতি শব্দরত্নাবলী॥

কৌটজঃ (পুং) কুটজবৃক্ষঃ। ইত্যমরটীকায়াং রায়মুকুটঃ॥

কৌটতক্ষঃ (পুং) স্বকর্ম্মজীবী স্বগৃহস্থিতো-

ঽনধীনস্তক্ষা। স্বাধীন ছুতর ইতি ভাষা। ইত্যমরঃ ॥

কৌটল্যঃ (পুং) বাৎস্যায়নমুনিঃ। ইতি হেমচন্দ্রঃ

কৌটসাক্ষী [ন্] (পুং) মিথ্যাসাক্ষী। ইতি মিতাক্ষরা ॥

কৌটিকঃ (ত্রি) মাংসবিক্রেতা। কষাই ইতি ভাষা। তৎপর্য্যায়ঃ। বৈতংসিকঃ ২ মাংসিকঃ ৩। ইত্যমরঃ ॥

কৌটিলিকঃ (পুং) লোহকারঃ। ব্যাধঃ। ইতি কেচিৎ ॥

কৌটিল্যং (ক্লী) চাণক্যমূলকং। ইতি রাজনির্ঘণ্টঃ ॥ কুটিলতা। যথা। কৌটিল্যং কচনিচয়ে করচরণাধরতলেষু রাগস্তে। কাঠিন্যং কুচযুগলে তরলত্বং নয়নয়োর্বসতি ॥ ইতি কাব্যপ্রকাশঃ ॥

কৌটুম্বিকঃ (পুং) কুটুম্বী। কুটুম্ববিশিষ্টঃ। কুটুম্বোঽস্যাস্তীত্যর্থে ষ্ণিকপ্রত্যয়ঃ ॥

কৌড়বিকং (ত্রি) কুড়বপরিমিতবীজবপনযোগ্যক্ষেত্রং। ইত্যমরটীকায়াং রায়মুকুটঃ ॥

কৌণপঃ (পুং) রাক্ষসঃ। ইত্যমরঃ ॥

কৌণপদন্তঃ (পুং) ভীষ্মঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

কৌণ্ডিন্যঃ (পুং) কুণ্ডিনমুনিপুত্ত্রঃ। তৎপর্য্যায়ঃ। বিষ্ণুগুপ্তঃ ২। ইতি ত্রিকাণ্ডশেষঃ ॥

কৌতুকং (ক্লী) কুতূহলং। ইত্যমরঃ ॥ অভিলাষঃ। উৎসবঃ। নর্ম্ম। হর্ষঃ। পরম্পরাগ্নাতমঙ্গলং। বিবাহসূত্রং। গীতাদিভোগঃ। ইতি মেদিনী ॥ গীতাদিঃ। ভোগকালঃ। ইতি হেমচন্দ্রঃ ॥

কৌতূহলং (ক্লী) কুতূহলং। অপূর্ব্ববস্তুদিদৃক্ষাদ্যতিশয়ঃ। ইত্যমরঃ ॥

কৌদালীকঃ (পুং) বর্ণসঙ্করজাতিবিশেষঃ। স তু রজক্যাং তীবরাজ্জাতঃ। ইতি ব্রহ্মবৈবর্ত্তপুরাণং ॥

কৌদ্রবিকং (ক্লী) সৌবর্চ্চললবণং। ইতি রাজনির্ঘণ্টঃ ॥

কৌদ্রবীণং (ত্রি) কোদ্রবধান্যোদ্ভবযোগ্যক্ষেত্রং। কোদোর ক্ষেত ইতি ভাষা। ইত্যমরঃ ॥

কৌন্তিকঃ (পুং) প্রাসিকঃ। প্রাসাস্ত্রধারী যোদ্ধা। ইত্যমরঃ ॥

কৌন্তী (স্ত্রী) রেণুকানামগন্ধদ্রব্যং। ইত্যমরঃ ॥

কৌন্তেয়ঃ (পুং) কুন্তীপুত্ত্রঃ। স তু যুধিষ্ঠিরাদিঃ। ইতি মহাভারতং ॥ অর্জ্জুনবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কৌপং (ক্লী) কূপোদকং। অস্য গুণাঃ যথা। কৌপং পয়ো যদি স্বাদু ত্রিদোষঘ্নং হিমং লঘু। তৎক্ষারং কফবাতঘ্নং দীপনং পিত্তকৃৎ পরং ॥ ইতি ভাবপ্রকাশঃ ॥

কৌপীনং (ক্লী) চীরং। ইতি মেদিনী ॥ তত্তু মেখলাবদ্ধপরিধেয়বস্ত্রখণ্ডং। কপিনী ইতি ভাষা। তৎপর্য্যায়ঃ। কচ্ছা ২ কচ্ছটিকা ৩ কক্ষা ৪ ধটী ৫। ইতি ত্রিকাণ্ডশেষঃ ॥ অকার্য্যং। গুহ্যদেশঃ। ইত্যমরঃ ॥ পাপং। ইতি পাণিনিঃ ॥

কৌপোদকী (স্ত্রী) কৌমোদকী। ইতি ভরতো দ্বিরূপকোষশ্চ ॥

কৌমারং ( ক্লী ) কুমারাবস্থা। সা তু জন্মাবধি-পঞ্চমবর্ষপর্য্যন্তা। ইতি স্মৃতিঃ॥ তন্ত্রমতে ষোড়শবর্ষপর্য্যন্তা। তদ্বতি পুং স্ত্রী। ইতি শব্দমালা॥

কৌমারী ( স্ত্রী ) মাতৃকাবিশেষঃ। সা তু কার্ত্তিকেয়শক্তিঃ। ইতি শব্দমালা॥ যথা। কৌমারী শক্তিহস্তা চ ময়ূরবরবাহনা। যোদ্ধুমভ্যাযযৌ দৈত্যানম্বিকা গুহরূপিণী॥ ইতি মার্কণ্ডেয়পুরাণে দেবীমাহাত্ম্যে ৮ অধ্যায়ঃ॥ বারাহীকন্দঃ। ইতি রাজনির্ঘণ্টঃ॥

কৌমুদঃ ( পুং ) কার্ত্তিকমাসঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কৌমুদিকা ( স্ত্রী ) উমাসখীবিশেষঃ। ইতি শব্দমালা॥

কৌমুদী ( স্ত্রী ) জ্যোৎস্না। ইত্যমরঃ॥ উৎসবঃ। ইতি ধরণী॥ কার্ত্তিকোৎসবঃ। স তু কার্ত্তিকীপূর্ণিমায়াং কর্ত্তব্যঃ। ইতি ত্রিকাণ্ডশেষঃ॥ আশ্বিনীপূর্ণিমা। ইতি শব্দরত্নাবলী॥ কার্ত্তিকীপূর্ণিমা। কৌমুদঃ কার্ত্তিকস্তস্যেয়মিতি ব্যুৎপত্তিঃ॥

কৌমুদীচারঃ ( পুং ক্লী ) কোজাগরপূর্ণিমা। ইতি ত্রিকাণ্ডশেষঃ॥

কৌমুদীপতিঃ ( পুং ) চন্দ্রঃ। ইতি হেমচন্দ্রঃ॥

কৌমুদীবৃক্ষঃ ( পুং ) দীপবৃক্ষঃ। দীপগাছা পিলসুজ ইত্যাদি ভাষা। ইতি হারাবলী॥

কৌমোদকী ( স্ত্রী ) বিষ্ণুগদা। ইত্যমরঃ॥

কৌমোদী ( স্ত্রী ) বিষ্ণুগদা। ইতি শব্দরত্নাবলী॥

কৌরবঃ ( পুং স্ত্রী ) কুরুরাজসন্ততিঃ। ইতি মহাভারতং॥

কৌরব্যঃ ( পুং ) কৌরবঃ। ইতি মহাভারতং॥

কৌর্প্যঃ ( পুং ) বৃশ্চিকরাশিঃ। ইতি দীপিকা॥

কৌলঃ ( ত্রি ) সৎকুলোদ্ভবঃ। তৎপর্য্যায়ঃ। আন্বয়িকঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥ দিব্যবীরপশুভাবত্রয়ান্তর্গতদিব্যভাবরতঃ। স তু ব্রহ্মজ্ঞানী। তদ্‌যথা। দিব্যভাবরতঃ কৌলঃ সর্ব্বত্র সমদর্শনঃ। ইতি কুলার্ণবতন্ত্রং॥ পশোর্বক্ত্রাল্লব্ধমন্ত্রঃ পশুরেব ন সংশয়ঃ। বীরাল্লব্ধমনুর্ব্বীরঃ কৌলাচ্চ ব্রহ্মবিদ্ভবেৎ॥ ইতি মহানীলতন্ত্রং॥

কৌলকেয়ঃ ( ত্রি ) সৎকুলোদ্ভবঃ। অসতীপুত্রে পুং। ইতি শব্দরত্নাবলী॥

কৌলটিনেয়ঃ ( পুং স্ত্রী ) সতী যা ভিক্ষার্থং কুলানি গৃহাণি অটতি ন তু জারার্থং সাপি কুলটা তৎপুত্রঃ। তৎপর্য্যায়ঃ। কৌলটেয়ঃ ২। ইত্যমরঃ॥ কৌলটেরঃ ৩। ইতি তট্টীকাসারসুন্দরী॥

কৌলটেয়ঃ ( পুং স্ত্রী ) কৌলটিনেয়ঃ। অসতীসুতঃ। ইত্যমরঃ॥

কৌলটেরঃ ( পুং স্ত্রী ) অসতীসুতঃ। ইত্যমরঃ॥ কৌলটিনেয়ঃ। ইতি সারসুন্দরী॥

কৌলত্থীনং ( ত্রি ) কুলত্থকলায়োদ্ভবক্ষেত্রং। ইত্যমরটীকায়াং ভরতঃ॥

কৌলবঃ ( পুং ) ববাদ্যেকাদশান্তর্গততৃতীয়করণং। তত্র জাতস্য ফলং যথা। বাগ্মী বিনীতো নিতরাং স্বতন্ত্রঃ প্রাগল্‌ভ্যযুক্তো মনুজো মহৌজাঃ। সুসম্মতঃ স্যাদ্বিদুষাং

কৃতঘ্নশ্চেৎ কৌলবাখ্যং করণং প্রসূতৌ॥ ইতি কোষ্ঠীপ্রদীপঃ॥

কৌলিকঃ (পুং) তন্তুবায়ঃ। ইতি শব্দমালা॥ পাষণ্ডঃ। ইতি ত্রিকাণ্ডশেষঃ॥ কুলপরম্পরায়াতে ত্রি॥

কৌলীনং (ক্লী) গুহ্যং। জন্যং। কুকর্ম্ম। কুলীনত্বং। পশ্বহিপক্ষিণাং যুদ্ধং। ইতি মেদিনী॥ কৌলেয়কঃ। ইতি বিশ্বঃ॥ লোকবাদঃ। ইত্যমরঃ॥

কৌলীরা (স্ত্রী) কর্কটশৃঙ্গী। ইতি রাজনির্ঘণ্টঃ॥

কৌলেয়ঃ (ত্রি) কুলীনঃ। ইতি ভরতো দ্বিরূপকোষশ্চ॥

কৌলেয়কঃ (পুং) কুক্কুরঃ। ইত্যমরঃ॥ কুলীনে ত্রি। ইতি মেদিনী॥

কৌল্মাষীণং (ত্রি) কুল্মাষধান্যোদ্ভবক্ষেত্রং। ইত্যমরটীকায়াং রায়মুকুটঃ॥

কৌল্যঃ (ত্রি) কুলীনঃ। ইতি ভরতো দ্বিরূপকোষশ্চ॥

কৌবলং (ক্লী) কুবলং। কোলিফলং। ইতি ভরতো দ্বিরূপকোষশ্চ॥

কৌবেরং (ক্লী) কুষ্ঠং। কুড় ইতি ভাষা। ইতি শব্দরত্নাবলী॥ কুবেরসম্বন্ধিনি তৎকার্য্যে চ ত্রি। যথা। কৌবেরমথ যাম্যঞ্চ চক্রাতে বরুণস্য চ। ইতি দেবীমাহাত্ম্যং॥

কৌবেরী (স্ত্রী) উত্তরা দিক্। যথা। দিগ্বিভাগে তু কৌবেরী দিক্ শিবা প্রীতিদায়িনী। ইতি তিথ্যাদিতত্ত্বং। কুবেরশক্তিশ্চ

কৌশং (ক্লী) কান্যকুব্জদেশঃ। ইতি হেমচন্দ্রঃ॥

কৌশলং (ক্লী) কুশলতা। যথা। ক চাতিকর্কশঃ শাস্ত্রঃ ক চাতিললিতঃ শুচিঃ। একত্র কাব্যে ব্যাখ্যাতুস্তাবহো কৌশলং কবেঃ॥ ইতি অমরুশতকটীকা॥

কৌশলিকা (স্ত্রী) প্রাভৃতকং। নজর ইতি ভাষা। ইতি হারাবলী॥

কৌশলী (স্ত্রী) কুশলপ্রশ্নঃ। প্রাভৃতং। ইতি ত্রিকাণ্ডশেষঃ॥

কৌশলেয়ঃ (পুং) শ্রীরামঃ। ইতি শব্দরত্নাবলী॥

কৌশল্যা (স্ত্রী) শ্রীরামমাতা। সা চ কোশলরাজকন্যা দশরথপত্নী চ। ইতি শব্দরত্নাবলী॥ কুশলত্বে ক্লী॥

কৌশল্যানন্দনঃ (পুং) শ্রীরামঃ। ইতি শব্দরত্নাবলী॥

কৌশল্যায়নিঃ (পুং) শ্রীরামঃ। ইতি ত্রিকাণ্ডশেষঃ॥

কৌশাম্বী (স্ত্রী) দেশবিশেষঃ। তৎপর্য্যায়ঃ। বৎসপত্তনং ২। ইতি হেমচন্দ্রঃ॥

কৌশিকঃ (পুং) ইন্দ্রঃ। গুগ্গুলুঃ। উলূকঃ। ব্যালগ্রাহী। ইত্যমরঃ॥ নকুলঃ। কোষজ্ঞঃ। বিশ্বামিত্রমুনিঃ। ইতি মেদিনী॥ কোষকারঃ। ইতি শব্দরত্নাবলী॥ শৃঙ্গাররসঃ। ইতি ত্রিকাণ্ডশেষঃ॥ মজ্জা। ইতি হেমচন্দ্রঃ॥ অশ্বকর্ণবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ

কৌশিকপ্রিয়ঃ (পুং) শ্রীরামঃ। ইতি শব্দরত্নাবলী

কৌশিকফলঃ ( পুং ) নারিকেলবৃক্ষঃ। ইতি শব্দরত্নাবলী ॥

কৌশিকা ( স্ত্রী ) চষকং। পানভাজনং। ইতি হেমচন্দ্রঃ ॥

কৌশিকাত্মজঃ ( পুং ) অর্জ্জুনঃ। ইতি শব্দমালা ॥

কৌশিকায়ুধং ( ক্লী ) ইন্দ্রধনুঃ। ইতি শব্দরত্নাবলী

কৌশিকারাতিঃ ( পুং ) কাকঃ। ইতি রাজনির্ঘণ্টঃ ॥

কৌশিকারিঃ ( পুং ) কাকঃ। ইতি রাজনির্ঘণ্টঃ ॥

কৌশিকী ( স্ত্রী ) চণ্ডিকা। নদীবিশেষঃ। ইতি মেদিনী ॥

কৌশিক্যোজঃ ( পুং ) শাখোটবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

কৌশীতকী ( স্ত্রী ) অগস্ত্যপত্নী। ইতি ত্রিকাণ্ডশেষঃ ॥

কৌশেয়ং ( ত্রি ) কৃমিকোশোত্থবস্ত্রাদি। ইত্যমরঃ ॥ মূর্দ্ধন্যমধ্যঞ্চ ॥

কৌষিকঃ ( পুং ) কৌশিকঃ। ইতি মেদিনী ॥

কৌষিকী ( স্ত্রী ) কৌশিকী। ইতি মেদিনী ॥ কালিকাকায়কোষনিঃসৃতাদেবীবিশেষঃ। যথা। কায়কোষান্নিঃসৃতা যা কালিকায়াস্তু ভৈরব। সা কৌষিকীতি বিখ্যাতা চারুরূপা মনোহরা ॥ নিঃসৃতা হৃদয়াদ্দেব্যা রসনাগ্রেণ চণ্ডিকা। নৈতস্যাঃ সদৃশী মূর্ত্ত্যা চারুরূপেণ বিদ্যতে ॥ ত্রিষু লোকেষু কান্ত্যা বা নাস্যাস্তুল্যা ভবিষ্যতি। যোগনিদ্রা মহামায়া যা মূলপ্রকৃতিঃ স্মৃতা ॥ তস্যাঃ প্রাণস্বরূপেয়ং দেবী সা কৌষিকী স্মৃতা। নেত্রবীজং তথৈতস্যা বীজস্তু পরিকীর্ত্তিতং ॥ তন্ত্রমস্যাঃ প্রবক্ষ্যামি সর্ব্বকামপ্রদং নৃণাং। সমাপ্তি নাস্ত্যদন্ত্যস্তু ষষ্ঠবর্গাদিবিন্দুনা ॥ ষষ্ঠস্বরেণ সংস্পৃষ্টৌ বিন্দুনা সমলঙ্কৃতঃ। কৌষিকী তন্ত্রমন্ত্রোঽয়ং ধর্ম্মকামার্থদায়কঃ ॥ এতস্যাঃ সংপ্রবক্ষ্যামি মূর্ত্তিরূপঞ্চ ভৈরব। শৃণুষ্বৈকমনা ভূত্বা জগদাহ্লাদকারকং ॥ ধম্মিল্লসংযতকচা বিধোশ্চাধোমুখীং কলাং। কেশান্তে তিলকস্যোর্দ্ধে দধতী সুমনোহরা ॥ মণিকুণ্ডলসংঘৃষ্টগণ্ডা মুকুটমণ্ডিতা। সজ্যোতিঃকর্ণপূরাভ্যাং কর্ণমাপূর্য্য সংগতা ॥ সুবর্ণমণিমাণিক্যনাগহারবিরাজিতা। সদা সুগন্ধিভিঃ পুষ্পৈরম্লানৈরতিসুন্দরী ॥ মালাং বিভর্ত্তি গ্রীবায়াং রত্নকেয়ূরধারিণী। মৃণালায়তবৃত্তৈস্তু বাহুভিঃ কোমলৈঃ শুভৈঃ ॥ রাজন্তী কঞ্চুকোপেতপীনোন্নতপয়োধরা। ক্ষীণমধ্যা পীতবস্ত্রা ত্রিবলীপরিভূষিতা ॥ শূলং বজ্রঞ্চ বাণঞ্চ খড়্গং শক্তিং তথৈব চ। দক্ষিণৈঃ পাণিভির্দ্দেবী গৃহীত্বাতিবিরাজিতা ॥ গদাং ঘণ্টাঞ্চ চাপঞ্চ চর্ম্ম শঙ্খং তথৈব চ ॥ ঊর্দ্ধাদিক্রমতো দেবী দধতী বামপাণিভিঃ ॥ সিংহস্যোপরি তিষ্ঠন্তী ব্যাঘ্রচর্ম্মণি কৌষিকী। বিভ্রতী রূপমতুলং সুরাসুরমনোহরং ॥ এতস্যাঃ শৃণু ত্বং বৎস ত্বং যাঃ পূজ্যা অষ্টযোগিনীঃ। তাঃ পূজিতাশ্চ কুর্ব্বন্তি চতুর্ব্বর্গং নৃণাং সদা ॥ ব্রহ্মাণী প্রথমা প্রোক্তা ততো মাহেশ্বরী পরা। কৌমারী বৈষ্ণবী চৈব বারাহী

পঞ্চমী তথা॥ নারসিংহী তথৈবৈন্দ্রী শিবদূতী তথাষ্টমী। এতাঃ পূজ্যা মহাভাগা যোগিনীঃ কামদায়িনীঃ॥ ইতি কালিকাপুরাণে উত্তরতন্ত্রে ৬০ অধ্যায়ঃ ॥ * ॥ অন্যচ্চ। শরীরকোষতশ্চাস্যাঃ সমুদ্ভূতাব্রবীচ্ছিবা। স্তোত্রং মমৈতৎ ক্রিয়তে শুম্ভদৈত্যনিরাকৃতৈঃ॥ দেবৈঃ সমেতৈঃ সমরে নিশুম্ভেন পরাজিতৈঃ। শরীরকোষাদ্যত্তস্যাঃ পার্ব্বত্যা নিঃসৃতাম্বিকা॥ কৌষিকীতি সমস্তেষু ততো লোকেষু গীয়তে॥ ইতি মার্কণ্ডেয়পুরাণে দেবীমাহাত্ম্যে ৫ অধ্যায়ঃ॥ * ॥ অপরব্যুৎপত্তির্যথা। অন্নেনৈবোপকারেণ যস্মাল্লোকে সুখপ্রদা। কৌষেয়ধারণাদ্বাপি সপ্রসাদাথ কৌষিকী॥ ইতি দেবীপুরাণে দেবীনিরুক্তাধ্যায়ঃ ৪৫॥

কৌষেয়ং (ত্রি) কৃমিকোষোত্থবস্ত্রাদি। রেসমী কাপড় ইতি ভাষা। ইত্যমরটীকায়াং। ভরতঃ

কৌসীদ্যং (ক্লী) আলস্যং। তন্দ্রা। ইতি হেমচন্দ্রঃ॥ কুসীদস্য ভাবশ্চ॥

কৌসুমং (ক্লী) কুসুমাঞ্জনং। পুষ্পাঞ্জনং। ইতি রাজনির্ঘণ্টঃ॥

কৌসুম্ভঃ (পুং) অরণ্যকুসুম্ভঃ। ইতি রাজনির্ঘণ্টঃ॥ কুসুম্ভপুষ্পরাগযুক্তে ত্রি। ইত্যমরটীকায়াং রায়মুকুটঃ॥

কৌসৃতিকঃ (ত্রি) মায়াকারঃ। ইতি জটাধরঃ॥

কৌস্তুভঃ (পুং) স্বনামখ্যাতো বিষ্ণুবক্ষঃস্থো মণিঃ। ইত্যমরঃ॥ কৌস্তুভস্তু মহাতেজাঃ কোটিসূর্য্যসমপ্রভঃ। ইদং কিমুত বক্তব্যং প্রদীপাদ্দীপ্তিমানিতি॥ ইতি ভাগবতামৃতং॥ মুদ্রাবিশেষঃ। যথা। অনামাঙ্গুষ্ঠসংলগ্না দক্ষিণস্য কনিষ্ঠিকা। কনিষ্ঠয়ান্যয়া বদ্ধা তর্জ্জন্যা দক্ষয়া তথা॥ বামানামাঞ্চ বধ্নীয়াৎ দক্ষিণাঙ্গুষ্ঠমূলকে। অঙ্গুষ্ঠমধ্যমে ভূয়ঃ সংযোজ্য সরলাঃ পরাঃ॥ চতস্রোঽপ্যগ্রসংলগ্না মুদ্রা কৌস্তুভসংজ্ঞিকা। ইতি তন্ত্রসারঃ॥

কৌস্তুভবক্ষাঃ [স্] (পুং) বিষ্ণুঃ। ইতি হারাবলী॥

কৌক্ষেয়কঃ (পুং) খড়্গঃ। ইত্যমরঃ॥

ক্নথ কি ম বধে। ইতি কবিকল্পদ্রুমঃ॥ কি ম ক্নথয়তি। ইতি দুর্গাদাসঃ॥

ক্নস উ ম য হ্বৃতৌ। ভাসনে। ইতি কবিকল্পদ্রুমঃ॥ এষ দন্ত্যনকারযুক্তঃ। উ ক্নসিত্বা ক্নস্ত্বা। ম ক্নসয়তি কান্ত্যা জগৎ পান্থঃ। য ক্নস্যতি খলঃ কুটিলঃ স্যাদিত্যর্থঃ। হ্বৃতিরিহ কৌটিল্যং। ইতি দুর্গাদাসঃ॥


ক্নস ই কি ভাসনে। ইতি কবিকল্পদ্রুমঃ॥ ই ক্নংস্যতে। কি ক্নংসয়তি ক্নংসতি। ভাসনং দীপ্তিঃ। ইতি দুর্গাদাসঃ॥

ক্নূয় ঈ ঙ দুর্গন্ধে। আর্দ্রত্বে। শব্দে। ইতি কবিকল্পদ্রুমঃ॥ দন্ত্যনকারযুক্তো দীর্ঘী। তথা চ। ক্নূয়ী স্নায়তি তে বিদেব য ইমে সেবিশ্চ মেবিস্তথা। ইতি শার্দ্দূলবিক্রীড়িতে চণ্ডেশ্বরঃ॥ ঈ ক্নূতঃ। ঙ ক্নূয়তে মৎস্যঃ দুর্গন্ধঃ স্যাদিত্যর্থঃ। ক্নূয়তে বস্ত্রং মস্তসা। ইতি দুর্গাদাসঃ॥

ম্বর কৌটিল্যে। ইতি কবিকল্পদ্রুমঃ ॥ ওষ্ঠবর্গ-শেষযুক্তঃ। ম্বরতি খলঃ কুটিলঃ স্যাদিত্যর্থঃ। ইতি দুর্গাদাসঃ ॥


ক্রকচঃ (পুং ক্লী) গ্রন্থিলবৃক্ষঃ। ইতি মেদিনী ॥ করপত্রং। কাষ্ঠবিদারণাস্ত্রবিশেষঃ। করাৎ ইতি ভাষা। ইত্যমরঃ ॥ অথ ক্রকচব্যবহারে করণসূত্রং বৃত্তং। পিণ্ডযোগদলমগ্রমূলয়োর্দৈর্ঘ্যসংগুণিতমঙ্গুলাত্মকং। দারুদারণপথৈঃ সমাহতং ষট্স্বরেষু বিহৃতং করাত্মকং ॥ উদাহরণং। মূলে নখাঙ্গুলমিতোহথ নৃপাঙ্গুলোহগ্রে পিণ্ডঃ শতাঙ্গুলমিতং কিল যস্য দৈর্ঘ্যং। তদ্দারুদারণপথেষু চতুর্ষু কিং স্যাদ্ধস্তাত্মকং বদ সখে গণিতং দ্রুতং মে ॥

ন্যাসঃ




পিণ্ডযোগদলং। ১৮। দৈর্ঘ্যেণ। ১০০। সংগুণিতং। ১৮০০। দারুদারণপথৈ। ৪। গুণিতং। ৭২০০। ষট্স্বরেষু। ৫৭৬। বিহৃতং জাতং করাত্মকং গণিতং। ২৫/২ ॥ ক্রকচান্তরে করণসূত্রং সার্দ্ধবৃত্তং। ছিদ্যতে তু যদি তির্য্যগুক্তবৎ পিণ্ডবিস্তৃতিহতে ফলং তদা। ইষ্টিকাচিতিদৃষচ্চিতিখাতক্রাকচব্যবহৃতৌ খলু মূল্যং। কর্ম্মকারজনসম্প্রতিপত্ত্যা তন্মৃদুত্বকঠিনত্ববশেন ॥ উদাহরণং। যদ্বিস্তৃতির্দ্দন্তমিতাঙ্গুলানি পিণ্ডস্তথা ষোড়শ যত্র কাষ্ঠে। ছেদেষু তির্য্যঙ্নবসু প্রচক্ষ্ব কিং স্যাৎ ফলং তত্র করাত্মকং মে ॥

ন্যাসঃ




বিস্তারঃ ৩২ পিণ্ড

১৬ পিণ্ড

বিস্তৃতিহতিঃ। ৫১২। দারুদারণমার্গ। ৯। ঘ্না। ৪৬০৮। ষট্স্বরেষু। ৫৭৬। বিহৃতং জাতং ফলং হস্তাঃ। ৮। ইতি লীলাবত্যাং ক্রকচব্যবহারঃ ॥ * ॥

ক্রকচচ্ছদঃ (পুং) কেতকীবৃক্ষঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

ক্রকচপত্রঃ (পুং) শাকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

ক্রকচপাৎ [দ্] (পুং) কৃকলাসঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

ক্রকচপাদঃ (পুং) কৃকলাসঃ। ইতি হারাবলী ॥

ক্রকচপৃষ্ঠী (স্ত্রী) কবয়ী মৎস্যঃ। ইতি শব্দরত্নাবলী॥

ক্রকচা (স্ত্রী) কেতকী। ইতি রত্নমালা॥

ক্রকণঃ (পুং) পক্ষিবিশেষঃ। কয়ার ইতি ভাষা। ইত্যমরঃ॥

ক্রকরঃ (পুং) করীরবৃক্ষঃ। উট্‌কাটার ইতি ভাষা। ক্রকণপক্ষী। কয়ার ইতি করকরা ইতি চ ভাষা। ইত্যমরঃ॥ অস্য মাংসস্য গুণঃ। লঘুত্বং। হৃদ্যত্বং। ইতি রাজনির্ঘণ্টঃ॥ দীনঃ। ক্রকচঃ। ইতি মেদিনী॥

ক্রতুঃ (পুং) যজ্ঞঃ। ইত্যমরঃ॥ সপ্তর্ষ্যন্তর্গতমুনিবিশেষঃ। ইতি মেদিনী॥ স তু ব্রহ্মণঃ করাজ্জাতঃ। অস্য ভার্য্যা কর্দ্দমমুনিকন্যা ক্রিয়া। পুত্রাঃ ষষ্টিসহস্রবালিখিল্যাখ্যাঙ্গুষ্ঠমাত্রা ঋষয়ঃ। ইতি শ্রীভাগবতং॥ বিশ্বদেবদশকান্তর্গতবিশ্বদেববিশেষঃ। ইতি জটাধরঃ॥

ক্রতুদ্রুক্ [হ্] (পুং) অসুরঃ। ইতি জটাধরঃ॥ অস্য রূপান্তরাণি। ক্রতুদ্রুগ্। ক্রতুদ্রুট্। ক্রতুদ্রুড়্॥

ক্রতুদ্বিট্ [ষ্] (পুং) অসুরঃ। ইতি ত্রিকাণ্ডশেষঃ॥

ক্রতুধ্বংসী [ন্] (পুং) শিবঃ। ইত্যমরঃ॥

ক্রতুপশুঃ (পুং) অশ্বঃ। ইতি হারাবলী॥

ক্রতুপুরুষঃ (পুং) বিষ্ণুঃ। ইতি ত্রিকাণ্ডশেষঃ॥

ক্রতুভুক্ [জ্] (পুং) দেবতা। ইত্যমরঃ॥

ক্রতুরাজঃ (পুং) রাজসূয়যজ্ঞঃ। ইতি শব্দরত্নাবলী॥

ক্রতূত্তমঃ (পুং) রাজসূয়যজ্ঞঃ। ইতি ত্রিকাণ্ডশেষঃ॥

ক্রথ ম বধে। ইতি কবিকল্পদ্রুমঃ॥

ক্রথ ক প্রতিহর্ষে। ইতি কবিকল্পদ্রুমঃ॥ রেফযুক্তঃ। প্রতিহর্ষঃ পুনঃপুনর্হৃষ্টীকরণং। ক ক্রথয়তি শিশুং লোকঃ পুনঃপুনর্হর্ষয়তি ইত্যর্থঃ। ইতি দুর্গাদাসঃ॥

ক্রথ কি বধে। ইতি কবিকল্পদ্রুমঃ॥ রেফযুক্তঃ। কি ক্রাথয়তি ক্রথতি। ইতি দুর্গাদাসঃ॥

ক্রথ কি ম বধে। ইতি কবিকল্পদ্রুমঃ॥ রেফযুক্তঃ। পুনঃ পাঠাৎ পূর্ব্বো ন মিৎ। কি ম ক্রথয়তি। ইতি দুর্গাদাসঃ॥

ক্রথনং (ক্লী) মারণং। ইত্যমরঃ॥

ক্রথনকং (ক্লী) সিতাগুরু। ইতি শব্দচন্দ্রিকা॥

ক্রদ ই য ম ঙ রোদনে॥ আহ্বানে। ইতি কবিকল্পদ্রুমঃ॥ ই ক্রন্দ্যতে। ততোঽক্রন্দীদ্দশগ্রীব ইতি। ক্রন্দতি ভর্ত্তারমিবাভিপন্নং। য ক্রন্দ্যা। ম ক্রন্দয়তি। ঙ ক্রন্দতে। ইতি দুর্গাদাসঃ॥

ক্রদ ই বৈক্লব্যে। ইতি কবিকল্পদ্রুমঃ॥ ইতি হ্বাদাবাত্মনেপদী মানুবন্ধঃ ক্রমদীশ্বরদুর্গসিংহাদিভিঃ পঠ্যতে। ক্রন্দতে অক্রন্দি অক্রান্দি। ইতি দুর্গাদাসঃ॥

ক্রদ য ম ঙ বৈক্লব্যবিকলত্বয়োঃ। ইতি কবিকল্পদ্রুমঃ॥ য ক্রদ্যা। ম ক্রদয়তি। ঙ ক্রদতে। ইতি দুর্গাদাসঃ॥

ক্রন্দ ক শব্দসাতত্যে। ইতি কবিকল্পদ্রুমঃ॥ রেফযুক্তঃ। আ উপসর্গপূর্ব্বকঃ। ক আক্রন্দয়তি। শব্দসাতত্যং নিরন্তরশব্দক্রিয়া। ইতি দুর্গাদাসঃ॥

ক্রন্দনং (ক্লী) শোকাদিনাশ্রুপতনং। কাঁদন ইতি ভাষা। তৎপর্য্যায়ঃ। ক্রন্দিতং ২ রুদিতং ৩ ক্রুষ্টং ৪ রোদনং ৫। ইতি শব্দরত্নাবলী॥ যোধসংরাবঃ। আহ্বানং ইত্যমরঃ॥

ক্রন্দনঃ (পুং) বিড়ালঃ। ইতি শব্দমালা॥

ক্রন্দিতং (ক্লী) রোদনং। ইত্যমরঃ॥ আহ্বানং। ইতি মেদিনী॥ যোধচিৎকরণং। ইতি শব্দরত্নাবলী॥

ক্রপ ষ ম ঙ কৃপায়াং। ইতি কবিকল্পদ্রুমঃ॥ কৃপা দয়া। ষ কৃপা। ভীষি চিন্তীতি ঙে মনীষাদ্যা ইতি নিপাতনাৎ রেফস্য ঋকারঃ। ম ক্রপয়তি। ঙ ক্রপতে দয়ালুর্দীনং। ইতি দুর্গাদাসঃ॥

ক্রম উ গতৌ। ইতি কবিকল্পদ্রুমঃ॥ উ ক্রমিত্বা ক্রান্ত্বা ক্রন্ত্বা। ক্রামতি। বারিপূর্ণাং মহীং কৃত্বা পশ্চাৎ সংক্রমতে গুরুরিতি সংশব্দস্যোপসর্গপ্রতিরূপকত্বে বাগেরিত্যাত্মনেপদং। বৃত্ত্যুৎসাহতায়নেষূপসর্গান্তরপূর্ব্বাদপ্যাত্মনেপদমিতি শরণদেবঃ। সংক্রাময়তীত্যাদি তু সংক্রামন্তং করোতীতি শত্রন্তাৎ ঞৌ সাধ্যং। অন্যথা অমন্তত্বাদ্ধ্রস্বঃ স্যাৎ। হরের্যদক্রামি পদৈকেন খমিতি তু ধাতুপারায়ণমতে চুরাদিবিবক্ষয়া সিদ্ধং। তন্মতন্তু পরিভাষায়াং লিখিতং। অথবা আত্মেতি কর্ম্মণোঽধ্যাহারে প্রেরণে ঞৌ সাধ্যং। হরেঃ পদং আত্মানং যৎ খং ক্রাময়ামাস। ইত্যর্থঃ। ইতি দুর্গাদাসঃ॥

ক্রম য গতৌ। ইতি কবিকল্পদ্রুমঃ॥ য ক্রম্যতি। গোবিন্দভট্টক্রমদীশ্বরৌ তু দীর্ঘং বিধায় ক্রাম্যতীত্যাহতুঃ। তথা চ। ইম্যতেশ্যনি দীর্ঘত্বং দাক্ষিলক্ষণবেদিভিঃ। তেন ক্রাম্যতি কৌমারে শ্যনীত্যস্যোপলক্ষণাদিতি। ইতি দুর্গাদাসঃ॥

ক্রমঃ (পুং) বৈদিকবিধানং। তৎপর্য্যায়ঃ। কল্পঃ ২ বিধিঃ ৩। ইত্যমরঃ॥ অনুক্রমঃ। শক্তিঃ। আক্রমণং। ইতি মেদিনী॥ চরণঃ। ইতি হেমচন্দ্রঃ॥

ক্রমকঃ (পুং) ক্রমং বেত্ত্যধীতে বা। ক্রমজ্ঞঃ। ইতি মুগ্ধবোধং॥

ক্রমণঃ (পুং) চরণঃ। ইতি হেমচন্দ্রঃ॥

ক্রমপূরকঃ (পুং) বকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

ক্রমশঃ [স্] ব্য ক্রমেণ ক্রমেণ। ক্রমে ক্রমে ইতি ভাষা। যথা। ভবতি বিজ্ঞতমঃ ক্রমশো জনঃ। ইতি প্রাচীনাঃ॥

ক্রমাগতং (ত্রি) ক্রমায়াতং। পিতৃপিতামহাদিক্রমেণ প্রাপ্তং। যথা। অস্বতন্ত্রাঃ স্ত্রিয়ঃ সর্ব্বাঃ পুত্ত্রদাসপরিগ্রহাঃ। অস্বতন্ত্রস্তত্র গৃহী যত্র তৎ স্যাৎ ক্রমাগতং॥ ইতি ব্যবহারতত্ত্বে নারদঃ॥

ক্রমায়াতঃ (ত্রি) ক্রমাগতঃ। ইতি মিতাক্ষরা॥

ক্রমিঃ (পুং) কৃমিঃ। ইতি ভরতো দ্বিরূপকোষশ্চ॥ রোগবিশেষঃ। তচ্চিকিৎসা যথা। বিড়ঙ্গব্যোষসংযুক্তমন্নমণ্ডং পিবেন্নরঃ। দীপনং ক্রিমিনাশায় জঠরাগ্নিবিবৃদ্ধয়ে॥ প্রত্যহং কটুকং তিক্তং ভোজনং কফনাশনং। ক্রিমীণাং

নাশনং রুচ্যমগ্নিসন্দীপনং পরং ॥ বিড়ঙ্গশৃতপানীয়ং বিড়ঙ্গেনাবধূলিতং। পীতং ক্রিমিহরং দৃষ্টং ক্রিমিজাংশ্চ গদান্ জয়েৎ ॥ লিহ্যাদ্বিড়ঙ্গচূর্ণং বা মধুনা ক্রিমিনাশনং। পলাশবীজস্য রসং পিবেন্মাক্ষিকসংযুতং ॥ পিবেত্তদ্বীজকল্কং বা তক্রেণ ক্রিমিনাশনং। কাম্পিল্যচূর্ণকর্ষার্দ্ধং গুড়েন সহ ভক্ষিতং ॥ পাতয়েত ক্রিমীন্ সর্ব্বানুদরস্থান্ন সংশয়ঃ। বিড়ঙ্গং কৌটজং বীজং তথা বীজং পলাশজং ॥ সংচূর্ণ্য খাদেৎ খণ্ডেন ক্রিমীন্নাশয়িতুং নরঃ। নিম্বপত্রসমুদ্ভূতং রসং ক্ষৌদ্রযুতং পিবেৎ ॥ ধূস্তূরপত্রজং বাপি ক্রিমিনাশনমুত্তমং। রসেন্দ্রেণ সমাযুক্তো রসো ধুস্তূরপত্রজঃ ॥ তাম্বুলপত্রজো বাপি লেপাদ্যুকাবিনাশনঃ। ধত্তূরপত্রকল্কেন তদ্রসেনৈব পাচিতং ॥ তৈলমভ্যঙ্গমাত্রেণ যুকান্নাশয়তি ক্ষণাৎ। ক্রিমীণাং বিটকফোত্থানামেতদুক্তং চিকিৎসিতং ॥ রক্তজানাস্তু সংহারং কুর্য্যাৎ কুষ্ঠচিকিৎসয়া। ক্ষীরাণি মাংসানি ঘৃতানি বাপি দধীনি শাকানি চ পর্ণবন্তি। অম্লঞ্চ মিষ্টঞ্চ রসং বিশেষাৎ ক্রিমীন্ জিঘাংসুঃ পরিবর্জ্জয়েদ্ধি ॥ ইতি ক্রিম্যধিকারঃ। ইতি ভাবপ্রকাশঃ ॥

ক্রমিকণ্টকং ( ক্লী ) চিত্রাঙ্গঃ। বিড়ঙ্গং। উড়ুম্বরঃ। ইতি মেদিনী ॥

ক্রমিঘ্নং ( ক্লী ) বিড়ঙ্গং। ইতি রত্নমালা ॥

ক্রমিজং ( ক্লী ) অগুরু। ইত্যমরঃ ॥

ক্রমিজা ( স্ত্রী ) লাক্ষা। ইতি রত্নমালা ॥

ক্রমিশত্রুঃ ( পুং ) বিড়ঙ্গঃ। ইতি রত্নমালা ॥

ক্রমুঃ ( পুং ) গুবাকঃ। ইতি ভরতো দ্বিরূপকোষশ্চ ॥

ক্রমুকঃ ( পুং ) পট্টিকালোধ্রঃ। গুবাকবৃক্ষঃ। ব্রহ্মদারুবৃক্ষঃ। ইত্যমরঃ ॥ ভদ্রমুস্তকং। কার্পাসিকাফলং। ইতি মেদিনী ॥

ক্রমুকফলং ( ক্লী ) গুবাকং। ইতি রাজনির্ঘণ্টঃ ॥ অস্য গুণপর্য্যায়ৌ গুবাকশব্দে দ্রষ্টব্যৌ ॥

ক্রমুকী ( স্ত্রী ) গুবাকঃ। ইতি শব্দরত্নাবলী ॥

ক্রমেলঃ ( পুং ) উষ্ট্রঃ। ইত্যুণাদিকোষঃ ॥

ক্রমেলকঃ ( পুং ) উষ্ট্রঃ। ইত্যমরঃ ॥

ক্রমোদ্বেগঃ ( পুং ) বৃষঃ। ইতি ভূরিপ্রয়োগঃ ॥

ক্রয়ঃ ( পুং ) মূল্যেন দ্রব্যগ্রহণং। কেনা ইতি ভাষা। যথা। প্রকাশন্বা ক্রয়ং কুর্য্যাৎ মূল্যং বাপি সমর্পয়েৎ। ইতি প্রায়শ্চিত্ততত্ত্বে বৃহস্পতিঃ ॥

ক্রয়লেখ্যং ( ক্লী ) ভূম্যাদিক্রয়লিপিঃ। কবালা ইতি পারস্য ভাষা। যথা। গৃহং ক্ষেত্রাদিকং ক্রীত্বা তুল্যমূল্যাক্ষরান্বিতং। পত্রং কারয়তে যত্তু ক্রয়লেখ্যং তদুচ্যতে ॥ ইতি প্রায়শ্চিত্ততত্ত্বে বৃহস্পতিঃ ॥

ক্রয়বিক্রয়ঃ ( পুং ) বাণিজ্যং। কেনা বেচা ইতি ভাষা। যথা। ঋণদানং তথাদানং বস্তূনাং ক্রয়বিক্রয়ং। ন কুর্য্যাৎ গুরুণা সার্দ্ধং শিষ্যো ভূত্বা কদাচন ॥ ইতি তন্ত্রসারঃ ॥

ক্রয়বিক্রয়ানুশয়ঃ ( পুং ) অষ্টাদশবিবাদান্তর্গতবিবাদবিশেষঃ। যথা। বেতনস্যৈব চাদানং সংবিদশ্চ ব্যতিক্রমঃ। ক্রয়-

বিক্রয়ানুশয়ো বিবাদঃ স্বামিপালয়োঃ॥ অস্য বিবরণং। ক্রীত্বা বিক্রীয় বা কিঞ্চিৎ যস্যেহানুশয়ো ভবেৎ। সোঽন্তর্দশাহাৎ তদ্দ্রব্যং দদ্যাচ্চৈবাদদীত বা॥ ইতি মনুঃ॥

ক্রয়বিক্রয়িকঃ (পুং) বণিক্। ইত্যমরঃ॥

ক্রয়শীর্ষং (ক্লী) কপিশীর্ষং। ইতি ত্রিকাণ্ডশেষঃ॥

ক্রয়ারোহঃ (পুং) হট্টঃ। ইতি ত্রিকাণ্ডশেষঃ॥

ক্রয়িকঃ (পুং) ক্রেতা। তৎপর্য্যায়ঃ। ক্রায়কঃ ২। ইত্যমরঃ॥ ক্রয়ী ৩। ইতি হেমচন্দ্রঃ॥ ক্রয়জীবী। বণিক্। ইত্যমরটীকায়াং ভরতঃ॥

ক্রয়ী [ন্] (ত্রি) ক্রয়কর্ত্তা। ইতি হেমচন্দ্রঃ॥

ক্রয্যং (ত্রি) ক্রয়ে প্রসারিতং। ক্রয়নিমিত্তং হট্টাদৌ ন্যস্তং যৎ দ্রব্যং। ইত্যমরঃ॥

ক্রব্যং (ক্লী) মাংসং। ইত্যমরঃ॥

ক্রব্যঘাতনঃ (পুং) মৃগঃ। ইতি শব্দচন্দ্রিকা॥

ক্রব্যাৎ [দ্] (পুং) রাক্ষসঃ। ইত্যমরঃ॥ মাংসাশিনি ত্রি। ইতি মেদিনী॥

ক্রব্যাদঃ (পুং) রাক্ষসঃ। ইত্যমরঃ॥ সিংহঃ। শ্যেনঃ। ইতি রাজনির্ঘণ্টঃ॥ শবভক্ষকাগ্নিঃ। যথা। ক্রব্যাদো মৃতভক্ষণে। ইতি তিথ্যাদিতত্ত্বং॥ মাংসাশিনি ত্রি। ইতি ধরণী॥

ক্রান্তঃ (পুং) ঘোটকঃ। ইতি ত্রিকাণ্ডশেষঃ॥ আক্রান্তে ত্রি॥

ক্রান্তা (স্ত্রী) বৃহতী। ইতি রাজনির্ঘণ্টঃ॥

ক্রান্তিঃ (স্ত্রী) খগোলমধ্যবর্ত্তিসূর্য্যগমনার্থতির্য্যগ্গোলরেখা। যথা। অয়নাদয়নং যাবৎ কক্ষা তির্য্যক্ তথাপরা। ক্রান্তিসংজ্ঞা তয়া সূর্য্যঃ সদা পর্য্যেতি ভাসয়ন্॥ ইতি সূর্য্যসিদ্ধান্তে গোলাধ্যায়ঃ॥ নাড়ীমণ্ডলাৎ দক্ষিণোত্তরং ক্রান্তিমণ্ডলাবধিযদন্তরং তৎ। ইতি তট্টীকায়াং নৃসিংহবিদাম্বরঃ॥ তৎপর্য্যায়ঃ। অপমণ্ডলং ২ অপবৃত্তং ৩ অপক্রমঃ ৪ অপক্রান্তিঃ ৫। ইতি সূর্য্যসিদ্ধান্তঃ॥ অপমঃ ৬। ইতি সিদ্ধান্তশিরোমণিঃ॥ ইষ্টক্রান্ত্যানয়নক্রমো যথা। পরমাপক্রমজ্যা চ সপ্তরন্ধ্রগুণেন্দবঃ। তদ্গুণাজ্যা ত্রিজীবাপ্তা তচ্চাপক্রান্তিরুচ্যতে॥ ইতি সূর্য্যসিদ্ধান্তঃ॥ *॥ আক্রমঃ। ইতি হেমচন্দ্রঃ॥ গতিঃ। গত্যর্থাৎ ক্রমধাতোর্ভাবে ক্তিপ্রত্যয়ঃ॥

ক্রান্তিবলয়ঃ (পুং) ক্রান্তিমণ্ডলং। বিষুবদ্বৃত্তাৎ চতুর্বিংশতিভাগৈর্দক্ষিণে চোত্তরে যদ্বৃত্তং তৎ। ইতি সিদ্ধান্তশিরোমণিঃ॥

ক্রান্তুঃ (পুং) পক্ষী। ইত্যুণাদিকোষঃ॥

ক্রায়কঃ (পুং) ক্রেতা। ইত্যমরঃ॥ ক্রয়জীবী। ইত্যমরটীকায়াং ভরতঃ॥

ক্রিমিঃ (পুং) কীটঃ। ক্রমাময়ঃ। ইত্যমরটীকায়াং ভরতঃ॥ রোগবিশেষঃ। তস্য প্রকারো যথা। ক্রিময়স্তু দ্বিধা প্রোক্তা বাহ্যাভ্যন্তরভেদতঃ। বহির্ম্মলকফাসৃগ্বিড়্জন্মভেদাচ্চতুর্ব্বিধাঃ॥ নামতো বিংশতিবিধা বাহ্যাস্তত্র মলোদ্ভবাঃ। তিলপ্রমাণসংস্থানবর্ণাঃ কেশাম্বরাশ্রয়াঃ॥ বহুপাদাশ্চ সূক্ষ্মাশ্চ যূকা লিখ্যাশ্চ নামতঃ। দ্বিধা তে কোঠপিড়কা কণ্ডূগণ্ডান্ প্রকুর্ব্বতে॥ *॥ নিদানং যথা। অজীর্ণভোজী

মধুরাম্লনিত্যো দ্রবপ্রিয়ঃ পিষ্টগুড়োপভোক্তা। ব্যায়ামবর্জী চ দিবাশয়ানো বিরুদ্ধভুক্ সংলভতে ক্রমীংশ্চ ॥ * পুরীষজনিদানং যথা। মাংসপিষ্টাম্ললবণগুড়শাকৈঃ পুরীষজাঃ ॥ * ॥ কফজনিদানং যথা। মাংসমাষগুড়ক্ষীরদধিশুক্তৈঃ কফোদ্ভবাঃ ॥ * ॥ রক্তজনিদানং যথা। বিরুদ্ধাজীর্ণশাকাদ্যৈঃ শোণিতোত্থা ভবন্তি হি ॥ * ॥ অভ্যন্তরক্রিমিলক্ষণং যথা জ্বরো বিবর্ণতা শূলং হৃদ্রোগশ্ছর্দ্দনং ভ্রমঃ ॥ ভক্তদ্বেষোঽতিসারশ্চ সংজাতক্রিমিলক্ষণং ॥ * ॥ কফজরূপং যথা। কফাদামাশয়ে জাতা বৃদ্ধাঃ সর্পন্তি সর্ব্বতঃ ॥ পৃথুব্রধ্ননিভাঃ কেচিৎ কেচিদ্গণ্ডূপদোপমাঃ। রূঢ়ধান্যাঙ্কুরাকারাস্তনুদীর্ঘাস্তথাণবঃ ॥ শ্বেতাস্তাম্রাবভাসাশ্চ নামতঃ সপ্তধা তু তে। অন্ত্রাদা উদারাবেষ্টা হৃদয়াদা মহাগুদাঃ ॥ চুরবো দর্ভকুসুমাঃ সুগন্ধাস্তে চ কুর্ব্বতে। হৃল্লাসমাস্যস্রবণমবিপাকমরোচকং ॥ মূর্চ্ছাচ্ছর্দ্দিজ্বরানাহকার্শ্যক্ষবথুপীনসান্ ॥ * ॥ রক্তজরূপং যথা। রক্তবাহিশিরাস্থানা রক্তজা জন্তবোঽণবঃ॥ অপাদা বৃত্ততাম্রাশ্চ সৌক্ষ্মাৎ কেচিদদর্শনাঃ। কেশাদা রোমবিধ্বংসা রোমদ্বীপা উড়ম্বরাঃ॥ ষট্ তে কুষ্ঠৈককর্ম্মাণঃ সহসৌরসমাতরঃ ॥ * ॥ বিড়্জরূপং যথা। পক্বাশয়ে পুরীষোত্থা জায়ন্তেঽধোবিসর্পিণঃ॥ বৃদ্ধাস্তে স্যুর্ভবেয়ুশ্চ তে যদামাশয়োন্মুখাঃ। তদাস্যোদ্গারনিশ্বাসবিড়্গন্ধানুবিধায়িনঃ॥ পৃথুবৃত্ততনুস্থূলাঃ শ্যাবপীতসিতাসিতাঃ। তে পঞ্চ নাম্না ক্রিময়ঃ ককেরুকমকেরুকাঃ॥ সৌস্বরাদাঃ সশূলাখ্যা লেলিহা জনয়ন্তি হি ॥ * ॥ বিমার্গগক্রিমিলক্ষণং যথা। বিড়্ভেদশূলবিষ্টম্ভকার্শ্যপারুষ্যপাণ্ডুতাঃ। রোমহর্ষাগ্নিসদনগুদকণ্ডূর্বিমার্গগাঃ ॥ ইতি মাধবকরঃ ॥

ক্রিমিকণ্টকং (ক্লী) কৃমিকণ্টকং। ইতি মেদিনী ॥

ক্রিমিঘ্নঃ (পুং) কৃমিঘ্নঃ। বিড়ঙ্গঃ। ইত্যমরটীকায়াং রমানাথঃ ॥

ক্রিমিঘ্নী (স্ত্রী) সোমরাজী। ইতি শব্দচন্দ্রিকা ॥

ক্রিমিজং (ক্লী) অগুরু। ইত্যমরঃ ॥

ক্রিমিজা (স্ত্রী) লাক্ষা। ইতি রত্নমালা ॥

ক্রিমিশত্রুঃ (পুং) রক্তপুষ্পকঃ। পালিতামাদার ইতি ভাষা। ইতি শব্দচন্দ্রিকা ॥

ক্রিমিশাত্রবঃ (পুং) বিট্খদিরঃ। ইতি শব্দচন্দ্রিকা ॥

ক্রিমিশৈলঃ (পুং) বল্মীকঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

ক্রিয়ঃ (পুং) মেষরাশিঃ। ইতি দীপিকা ॥

ক্রিয়া (স্ত্রী) আরম্ভঃ। নিষ্কৃতিঃ। শিক্ষা। পূজনং। সম্প্রধারণং। উপায়ঃ। কর্ম্ম। তন্নববিধং। যথা। আরম্ভো নিষ্কৃতিঃ শিক্ষা পূজনং সম্প্রধারণং। উপায়ঃ কর্ম্ম চেষ্টা চ চিকিৎসা চ নব ক্রিয়াঃ॥ ইতি ভাবপ্রকাশঃ॥ চেষ্টা। চিকিৎসা। ইত্যমরঃ॥ কারণং। ইতি হেমচন্দ্রঃ॥ শ্রাদ্ধং। ইত্যমরটীকায়াং স্বামী॥ শৌচং। ইতি

শব্দরত্নাবলী ॥ ধাত্বর্থঃ করোত্যর্থো বা। ইতি বৈয়াকরণাঃ ॥ ক্রিয়াঃ সাধ্যরূপাঃ বস্তুধর্ম্মাঃ পাকাদয়ঃ এষু হি অধিশ্রয়ণাদ্যবশ্রয়ণান্তাদিঃ পূর্ব্বাপরীভূতো ব্যাপারকলাপঃ পাকাদিশব্দবাচ্যঃ। ইতি সাহিত্যদর্পণং ॥ চতুঃপ্রকারব্যবহারপাদান্তর্গতব্যবহারপাদবিশেষঃ। সা দ্বিধা মানুষী দৈবিকী চ। তত্রাদ্যা সাক্ষ্যলেখ্যানুমানভেদেন ত্রিধা। দ্বিতীয়া ধটাগ্ন্যুদকবিষকোষতণ্ডুলতপ্তমাষকফালধর্ম্মজভেদেন নবধা দিব্যানি। যথা। দ্বিপ্রকারা ক্রিয়া প্রোক্তা মানুষী দৈবিকী তথা। সাক্ষ্যলেখ্যানুমানঞ্চ মানুষী ত্রিবিধা স্মৃতা ॥ ধটাদ্যা ধর্ম্মজান্তাশ্চ দৈবিকী নবধা স্মৃতা। ইতি ব্যবহারতত্ত্বে বৃহস্পতিঃ ॥

ক্রিয়াকারঃ (পুং) নবচ্ছাত্রঃ। নূতন পড়ুয়া ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ ॥ কর্ম্মকর্ত্তরি ত্রি ॥

ক্রিয়াদ্বেষী [ন্] (পুং) সাক্ষ্যলিখিতভুক্তিযুক্তিশপথদ্বেষ্টা। স চ ব্যবহারবিষয়ে পঞ্চধা। হীনান্তর্গতহীনবিশেষঃ। যথা। অন্যবাদী ক্রিয়াদ্বেষী নোপস্থায়ী নিরুত্তরঃ। আহূতপ্রপলায়ী চ হীনঃ পঞ্চবিধঃ স্মৃতঃ ॥ ইতি ব্যবহারতত্ত্বে নারদঃ ॥ কর্ম্মদ্বেষ্টরি ত্রি ॥

ক্রিয়াপাদঃ (পুং) চতুষ্পাদব্যবহারান্তর্গততৃতীয়পাদঃ। যথা। পূর্ব্বপক্ষঃ স্মৃতঃ পাদো দ্বিতীয়শ্চোত্তরঃ স্মৃতঃ। ক্রিয়াপাদস্তথা চান্যশ্চতুর্থো নির্ণয়ঃ স্মৃতঃ ॥ ইতি বৃহস্পতিঃ ॥ স চ সাক্ষ্যলিখিতভুক্তিযুক্তিশপথরূপঃ। ইতি ব্যবহারতত্ত্বং ॥

ক্রিয়াভ্যুপগমঃ (পুং) পরস্পরক্রিয়াস্বীকারঃ। দ্বয়োঃ পুরুষয়োঃ কস্মিংশ্চিদ্বিষয়ে পরস্পরাঙ্গীকারেণ অনুমতিঃ। যথা। ক্রিয়াভ্যুপগমাৎ ক্ষেত্রং বীজার্থং যৎ প্রদীয়তে। তস্যেহ ভাগিনৌ দৃষ্টৌ বীজী ক্ষেত্রিক এব চ ॥ ইতি মনুঃ ॥ অস্যার্থঃ। যদত্রাপত্যং ভবিষ্যতি তদাবয়োরুভয়োরেবেতি নিয়মৈ্যতৎ ক্ষেত্রস্বামিনা বীজবপনার্থং যদ্বীজিনো দীয়তে তস্যাপত্যস্য লোকে বীজিক্ষেত্রিণৌ দ্বাবপি ভাগিনৌ দৃষ্টৌ। ইতি কুল্লুকভট্টঃ ॥ উপলক্ষণমেতৎ ॥

ক্রিয়াযোগঃ (পুং) দেবারাধনতদালয়াদিকরণরূপপুণ্যক্রিয়া। যথা। নারদ উবাচ। ক্রিয়াযোগঃ কথং প্রোক্তস্ত্বয়া মে প্রপিতামহ। তদহং শ্রোতুমিচ্ছামি ফলং চাস্য যথাতথং ॥ ব্রহ্মোবাচ। জ্ঞানযোগস্তু যোগস্য যস্তু সাধনমাত্মনা। যস্তু বাহ্যার্থসংযোগঃ ক্রিয়াযোগঃ স উচ্যতে ॥ প্রধানং কারণং যোগো মুক্তের্মুনিবরোত্তম। ক্রিয়াযোগস্তু যোগস্য পরমং তাত সাধনং ॥ যদেতদ্ভবতা পৃষ্টং তদিহৈকমনাঃ শৃণু। যৈস্তু দেবালয়ং বিষ্ণোঃ শুভং দারুময়ং কৃতং ॥ কারয়েন্মৃণ্ময়ং বাপি শৃণু তস্য ফলং মুনে। অহন্যহনি যোগেন যজতো যন্মহাফলং ॥ প্রাপ্নোতি তৎ ফলং বিষ্ণোর্যঃ কারয়তি মন্দিরং। কুলানাং শতমাগামি সমতীতং তথা শতং ॥ কারয়েদ্ভগবদ্ধাম নয়ত্যচ্যুতমন্দিরং। সপ্তজন্মকৃতং পাপং স্বল্পং বা

যদি বা বহু ॥ বিষ্ণোরালয়বিন্যাসপ্রারম্ভাদেব নশ্যতি। পতিতং পতমানস্তু তথার্দ্ধপতিতং তথা ॥ সমুদ্ধৃত্য হরের্দ্ধাম দ্বিগুণং ফলমাপ্নুয়াৎ ॥ * ॥ প্রতিমাং লক্ষণবতীং যঃ কুর্য্যাচ্চৈব মানবঃ ॥ কেশবস্য পরং লোকমক্ষয়ং প্রতিপদ্যতে। অনুজ্ঞাতো ময়া রাজ্যে যমো রাজাথ কিঙ্করাঃ ॥ কেবলং যে জগদ্ধামমনন্তং সমুপাশ্রিতাঃ। ভবদ্ভিঃ পরিহার্য্যাস্তে তেষাং নাস্তীহ সংস্থিতিঃ ॥ নমঃ কৃষ্ণাচ্যুতানন্ত বাসুদেবেত্যুদীরিতং। যৈর্ভাবভাবিতৈর্দূতাস্তে চ ত্যাজ্যাঃ সুদূরতঃ ॥ দানং দদদ্ভির্যৈরুক্তমচ্যুতঃ প্রীয়তামিতি। শ্রদ্ধাপুরঃসরৈর্নিত্যং তে চ ত্যাজ্যাঃ সুদূরতঃ ॥ ইত্যাদ্যে বহ্নিপুরাণে বৈষ্ণবক্রিয়াযোগে যমানুশাসননামাধ্যায়ঃ ॥

ক্রিয়াবসন্নঃ (ত্রি) সাক্ষ্যাদিনা প্রাপ্তপরাজয়ঃ। যথা। স্বয়মভ্যুপপন্নো হি স্বচর্য্যাবসিতোঽপি সন্। ক্রিয়াবসন্নো বাদে তু পরং সভ্যাবধারণং ॥ ইতি ব্যবহারতত্ত্বং ॥

ক্রিয়াবান্ [ৎ] (ত্রি) কর্ম্মসূদ্যতঃ। ক্রিয়াসু নিযুক্তঃ। ইত্যমরঃ ॥

ক্রিয়াবাদী [ন্] (পুং) প্রমাণবাদী। কার্য্যবাদী। ফরিয়াদী ইতি ভাষা। ইতি মিতাক্ষরা ॥

ক্রিয়েন্দ্রিয়ং (ক্লী) কর্ম্মেন্দ্রিয়ং। ইতি হেমচন্দ্রঃ

ক্রী ডু ঞ গ দ্রব্যপর্য্যয়ে। ইতি কবিকল্পদ্রুমঃ ॥ পর্য্যয়ঃ পরীবর্ত্তঃ। ডু ক্রীত্রিমং। ঞ গ ক্রীণাতি ক্রীণীতে ধান্যং ধনেন লোকঃ। ইতি দুর্গাদাসঃ ॥

ক্রীড় ঋ খেলে। ইতি কবিকল্পদ্রুমঃ ॥ ঋ অচিক্রীড়ৎ। ক্রীড়তি বালঃ শিশুভিঃ। ইতি দুর্গাদাসঃ ॥

ক্রীড়ঃ (পুং) পরীহাসঃ। ইতি শব্দরত্নাবলী ॥

ক্রীড়নং (ক্লী) খেলা। যথা। বালক্রীড়নমিন্দুশেখরধনুর্ভঙ্গাবধি প্রহ্বতা তাতে কাননসেবনাবধি কৃপা সুগ্রীবসখ্যাবধি। ইতি মহানাটকং ॥

ক্রীড়া (স্ত্রী) পরীহাসঃ। খেলা। ইত্যমরঃ ॥ অবজ্ঞানং। ইতি মেদিনী ॥

ক্রীড়াতালঃ (পুং) তালপ্রভেদঃ। যথা। এক এব প্লুতো যত্র ক্রীড়াতালঃ স কথ্যতে। অপরং নিয়মং বিনা। ইতি সঙ্গীতদামোদরঃ ॥

ক্রীড়ারত্নং (ক্লী) রতিঃ। ইতি ত্রিকাণ্ডশেষঃ॥

ক্রীড়ারথঃ (পুং) ক্রীড়ার্থরথঃ। ইতি হলায়ুধঃ ॥

ক্রীতঃ (পুং) ক্রীতকপুত্রঃ। স তু দ্বাদশবিধপুত্রান্তর্গতপুত্রভেদঃ। ইতি জটাধরঃ ॥ কৃতক্রয়ে ত্রি। কেনা ইতি ভাষা। যথা। দীয়মানং ন গৃহ্লাতি ক্রীতং পণ্যঞ্চ যঃ ক্রয়ী। স এবাস্য ভবেদ্দোষো বিক্রেতুর্যোঽপ্রযচ্ছতঃ ॥ ইতি প্রায়শ্চিত্ততত্ত্বে নারদঃ ॥

ক্রীতকঃ (পুং) ক্রীতপুত্রঃ। যথা। ক্রীণীয়াদ্যস্ত্বপত্যার্থে মাতাপিত্রোর্যমন্তিকাৎ। স ক্রীতকঃ সুতস্তস্য সদৃশোঽসদৃশোঽপি বা ॥ ইতি মনুঃ ॥

ক্রীতানুশয়ঃ (পুং) দ্রব্যং ক্রীত্বা পশ্চাদনুতাপঃ। যথা। ক্রীত্বা মূল্যেন যঃ পণ্যং

ক্রেতা ন বহু মন্যতে। ক্রীতানুশয় ইত্যে-
তৎ বিবাদপদমুচ্যতে ॥ ইতি যাজ্ঞবল্ক্যঃ ॥

ক্রুঙ্ [ ঞ্ ] ( পুং স্ত্রী ) ক্রৌঞ্চঃ । কোঁচ বক ইতি ভাষা। ইত্যমরঃ ॥

ক্রুঞ্চঃ ( পুং ) ক্রৌঞ্চপর্ব্বতঃ। ইতি হেমচন্দ্রঃ॥

ক্রুঞ্চা ( স্ত্রী ) বীণাভেদঃ । ইতি শব্দরত্নাবলী ॥

ক্রুৎ [ ধ্ ] ( স্ত্রী ) ক্রোধঃ। ইত্যমরহেমচন্দ্রৌ ॥ অস্যা রূপান্তরাণি। ক্রুদ্। ক্রুত্ ক্রুদ্দ। ইতি সংক্ষিপ্তসারব্যাকরণং ॥

ক্রুদ্ধঃ ( ত্রি ) ক্রোধযুক্তঃ। যথা। যোদ্ধুমভ্যাযযৌ ক্রুদ্ধো রক্তবীজো মহাসুরঃ। ইতি দেবীমাহাত্ম্যং ॥ ক্রোধে ক্লী ॥

ক্রুধ ৯ য ঐ কোপে। ইতি কবিকল্পদ্রুমঃ॥ ৯ অক্রুধৎ। য ক্রুধ্যতি লোকঃ শিশবে। ঐ ক্রোদ্ধা। ইতি দুর্গাদাসঃ ॥ * ॥ রেলতে ১ হেলতে ২ ভ্রামতে ৩ ভৃণীয়তে ৪ ভ্রীণাতি ৫ ভ্রেয়তি ৬ দোধতি ৭ বনয্যতি ৮ কম্পতে ৯ ভোজতে ১০ । ইতি দশ ক্রুধ্যতিকর্ম্মাণঃ। ইতি বেদনিঘণ্টৌ ২ অধ্যায়ঃ ॥

ক্রুধা (স্ত্রী) ক্রোধঃ। ইত্যমরটীকায়াং ভরতঃ॥

ক্রুন্চ গত্যাং। বক্রণে। ইতি কবিকল্পদ্রুমঃ॥ রেফযুক্তাদিঃ পঞ্চমস্বরী। ক্রুঞ্চতি। ইতি দুর্গাদাসঃ ॥

ক্রুন্থ গঁ ক্লিষি। ক্লিশি। ইতি কবিকল্পদ্রুমঃ॥ পঞ্চমস্বরী রেফযুক্তঃ। ক্লিষি দুঃখানুভবে। গ ক্রুথ্নাতি বুভুক্ষার্ত্তঃ। ইতি হলায়ুধঃ। চুক্রুন্থ। ইতি দুর্গাদাসঃ ॥

ক্রুশ জ ঔ রোদে। হ্বুতৌ। ইতি কবিকল্পদ্রুমঃ ॥ জ ক্রোশঃ ক্রুশঃ। ঔ অক্রুক্ষৎ। রোদোঽশ্রুবিমোচনং । হুতিরাহ্বানং । ইতি দুর্গাদাসঃ ॥

ক্রুশ্বা [ ন্ ] ( পুং স্ত্রী ) শৃগালঃ। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ ॥

ক্রুষ্টং ( ক্লী ) রোদনং। ইত্যমরঃ ॥ রাবঃ। ইতি মেদিনী ॥

ক্রূরঃ ( ত্রি ) পরদ্রোহকারী। নির্দয়ঃ। তৎপর্য্যায়ঃ। নৃশংসঃ ২ ঘাতুকঃ ৩ পাপঃ ৪। কঠিনঃ। ইত্যমরঃ॥ ঘোরঃ। ইতি মেদিনী॥ উষ্ণঃ। ইতি হেমচন্দ্রঃ ॥ প্রথমতৃতীয়পঞ্চমসপ্তমনবমৈকাদশরাশয়ঃ । যথা । ওজোঽথ যুগ্মং বিষমঃ সমশ্চ ক্রূরোঽথ সৌম্যঃ পুরুষোঽঙ্গনা চ। চরস্থিরদ্ব্যাত্মকনামধেয়া মেষাদয়োঽমী ক্রমশঃ প্রদিষ্টাঃ॥ ইতি দীপিকা ॥

ক্রূরঃ (পুং) ভূতাঙ্কুশবৃক্ষঃ। রক্তকরবীরবৃক্ষঃ। শ্যেনপক্ষী। কঙ্কপক্ষী। ইতি রাজনির্ঘণ্টঃ॥

ক্রূরকর্ম্মা [ ন্ ] ( পুং ) কটুতুম্বিনীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥ ভয়ানককর্ম্মকর্ত্তরি ত্রি ॥

ক্রূরগন্ধঃ ( পুং ) গন্ধকঃ। ইতি রাজনির্ঘণ্টঃ ॥

ক্রূরগন্ধা ( স্ত্রী ) কন্থারীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

ক্রূরদৃক্ [ শ্ ] ( ত্রি ) পিশুনঃ। শনৈশ্চরে পুং। ইতি মেদিনী ॥

ক্রূরধূর্ত্তঃ ( পুং ) কৃষ্ণধত্তূরকঃ। ইতি রাজনির্ঘণ্টঃ ॥

ক্রূররাবী [ ন্ ] ( পুং ) দ্রোণকাকঃ। ইতি রাজনির্ঘণ্টঃ ॥

ক্রূরলোচনঃ ( পুং ) শনিঃ। ইতি হারাবলী ॥

স্বরঃ ( পুং ) কর্কশধ্বনিযুক্তঃ। যথা।

ক্রূরস্বরাঃ কাকোলূকখরষ্ট্রোষ্ট্রাশ্বগর্দ্দভাঃ। ইতি কবিকল্পলতায়াং দ্বিতীয়শ্লেষস্তবকে তৃতীয়কুসুমং ॥

ক্রূরা (স্ত্রী) রক্তপুনর্নবা। ইতি রাজনির্ঘণ্টঃ ॥

ক্রূরাকৃতিঃ (পুং) রাবণঃ। ইতি শব্দমালা ॥

ক্রেণিঃ (পুং) ক্রয়ণং। ইত্যুণাদিকোষঃ ॥

ক্রেতব্যং (ত্রি) ক্রেয়বস্তু। যথা। ক্রেয়ং ক্রেতব্যমাত্রকে। ইত্যমরঃ ॥

ক্রেতা [ঋ] (ত্রি) ক্রয়কর্ত্তা। যথা। বিক্রেতুর্দর্শনাচ্ছুদ্ধিঃ স্বামী দ্রব্যং নৃপো দমং। ক্রেতা মূল্যমবাপ্নোতি তস্মাদ্যস্তস্য বিক্রয়ী ॥ ইতি প্রায়শ্চিত্ততত্ত্বে যাজ্ঞবল্ক্যঃ ॥

ক্রেয়ং (ত্রি) ক্রেতব্যমাত্রকং। কিনিবার উপযুক্ত দ্রব্য ইতি ভাষা। ইত্যমরঃ ॥

ক্রৌঞ্চদারণঃ (পুং) কার্ত্তিকেয়ঃ। ইত্যমরটীকায়াং রায়মুকুটঃ ॥

ক্রোড়ং (ক্লী স্ত্রী) বাহ্বোর্মধ্যং। কোল ইতি ভাষা। তৎপর্য্যায়ঃ। ভুজান্তরং ২ উরঃ ৩ বৎসং ৪ বক্ষঃ ৫। ইত্যমরঃ ॥ উৎসঙ্গঃ ৬ ভোগঃ ৭ বপুষঃপ্রাক্ ৮। ইতি রাজনির্ঘণ্টঃ ॥

ক্রোড়ঃ (পুং) শূকরঃ। ইত্যমরঃ ॥ শনিঃ। ইতি মেদিনী ॥ বারাহীকন্দঃ। ইতি রাজনির্ঘণ্টঃ ॥

ক্রোড়কন্যা (স্ত্রী) বারাহীকন্দঃ। ইতি রাজনির্ঘণ্টঃ ॥

ক্রোড়চূড়া (স্ত্রী) মহাশ্রাবণিকাবৃক্ষঃ। বড় থুলকুড়ি ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ ॥

ক্রোড়পর্ণী (স্ত্রী) কণ্টকারিকা। ইতি শব্দচন্দ্রিকা ॥

ক্রোড়পাদঃ (পুং) কচ্ছপঃ। ইতি হেমচন্দ্রঃ ॥

ক্রোড়াঙ্গঃ (পুং) কচ্ছপঃ। ইতি শব্দরত্নাবলী ॥

ক্রোড়াঙ্ঘ্রিঃ (পুং) কচ্ছপঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

ক্রোড়ী (স্ত্রী) বারাহীকন্দঃ। ইতি রাজনির্ঘণ্টঃ ॥

ক্রোড়ীকরণং (ক্লী) আলিঙ্গনং। ইতি হলায়ুধঃ ॥

ক্রোড়ীকৃতিঃ (স্ত্রী) আলিঙ্গনং। ইতি হেমচন্দ্রঃ ॥

ক্রোড়ীমুখঃ (পুং) গণ্ডকঃ। গণ্ডার ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ ॥

ক্রোড়েষ্টা (স্ত্রী) মুস্তা। ইতি রাজনির্ঘণ্টঃ ॥

ক্রোথঃ (পুং) হননং। ইতি হেমচন্দ্রঃ ॥

ক্রোধঃ (পুং) প্রতিকূলে সতি তৈক্ষ্ণ্যস্য প্রবোধঃ। তৎপর্য্যায়ঃ। কোপঃ ২ অমর্ষঃ ৩ রোষঃ ৪ প্রতিঘঃ ৫ রুট্ ৬ ক্রুৎ ৭ ক্রুদ্ ৮। ইত্যমরঃ ॥ আমর্ষঃ ৯। ইতি তট্টীকাসারসুন্দরী ॥ ভীমঃ ১০ ক্রুধা ১১ রুষা ১২। ইতি শব্দার্ণবঃ ॥ স তু ব্রহ্মণো ভ্রুবো জাতঃ শরীরস্থষড়্রিপোরন্তর্গতশ্চ। ইতি পুরাণং ॥ হেলঃ ১ হরঃ ২ হৃণিঃ ৩ ত্যজঃ ৪ ভামঃ ৫ এহঃ ৬ হ্বরঃ ৭ তপুষী ৮ জূর্ণিঃ ৯ মন্যুঃ ১০ ব্যথিঃ ১১। ইত্যেকাদশ ক্রোধনামানি। ইতি বেদনিঘণ্টৌ ২ অধ্যায়ঃ ॥

ক্রোধজঃ (পুং) মোহঃ। যথা। সঙ্গাৎ সংজায়তে কামঃ কামাৎ ক্রোধোঽভিজায়তে। ক্রোধাৎ ভবতি সম্মোহঃ সম্মোহাৎ স্মৃতি-

বিভ্রমঃ ॥ ইতি ভগবদ্গীতা ॥ দ্বিধাব্যসনগণান্তর্গতব্যসনগণঃ। যথা। পৈশুন্যং সাহসং দ্রোহ ঈর্ষ্যাসূয়ার্থদূষণং। বাগ্দণ্ডজঞ্চ পারুষ্যং ক্রোধজোঽপি গণোঽষ্টকঃ॥ ইতি মনুঃ ॥

ক্রোধনঃ (ত্রি) ক্রোধবিশিষ্টঃ। তৎপর্য্যায়ঃ। অমর্ষণঃ ২ কোপী ৩। ইত্যমরঃ ॥ ক্রোধী ৪ রোষণঃ ৫। ইতি হেমচন্দ্রঃ ॥

ক্রোধনা (স্ত্রী) কোপবতী। তৎপর্য্যায়ঃ। ভামিনী ২ চণ্ডী ৩। ইতি ত্রিকাণ্ডশেষঃ ॥

ক্রোধমূর্চ্ছিতঃ (পুং) চোরনামগন্ধদ্রব্যং ইতি শব্দরত্নাবলী ॥ অতিকোপনে ত্রি ॥

ক্রোধী [ন্] (ত্রি) ক্রোধযুক্তঃ। ইতি হেমচন্দ্রঃ ॥ মহিষঃ। ইতি রাজনির্ঘণ্টঃ ॥

ক্রোশঃ (পুং) সহস্রধনুঃ। চতুঃসহস্রহস্তপরিমাণং। কোশ ইতি ভাষা। তৎপর্য্যায়ঃ। গব্যূতং ২। ইতি হেমচন্দ্রঃ ॥ দ্বিসহস্রদণ্ডঃ। অষ্টসহস্রহস্তপরিমাণং। ইতি লীলাবতী ॥ মুহূর্ত্তঃ। যথা। দশদণ্ডে তু যা পূজা তৎসর্ব্বমক্ষয়ং ভবেৎ। ষষ্ঠক্রোশে মহেশানি তৎ সর্ব্বমমৃতোপমং ॥ সপ্তমক্রোশকে দেবি সর্ব্বং ক্ষীরোপমং ভবেৎ। অষ্টমক্রোশকে দেবি দ্রব্যতুল্যং ন সংশয়ঃ ॥ অতঃ পরং মহেশানি বিষতুল্যং ন সংশয়ঃ। ইতি গুপ্তসাধনতন্ত্রে ষষ্ঠঃ পটলঃ ॥

ক্রোশতালঃ (পুং) ঢক্কা। ইতি হারাবলী ॥

ক্রোশধ্বনিঃ (পুং) ঢক্কা। ইতি হারাবলী ॥

ক্রোশযুগং (ক্লী) ক্রোশদ্বয়ং। তৎপর্য্যায়ঃ। গব্যূতিঃ ২। ইত্যমরঃ ॥ গোরুতং ৩ গব্যা ৪ গব্যূতং ৫। ইতি হেমচন্দ্রঃ

ক্রোষ্টা [ঋ] (পুং স্ত্রী) শৃগালঃ। ইত্যমরঃ ॥

ক্রোষ্টুকপুচ্ছিকা (স্ত্রী) পৃশ্নিপর্ণী। চাকুলিয়া ইতি ভাষা। রামবাসক ইতি খ্যাতা। ইতি কেচিৎ। ইত্যমরটীকায়াং স্বামী ॥ গোলোমিকা। ইতি রাজনির্ঘণ্টঃ ॥

ক্রোষ্টুকমেখলা (স্ত্রী) পৃশ্নিপর্ণী। ইতি রত্নমালা ॥

ক্রোষ্টুপুচ্ছিকা (স্ত্রী) পৃশ্নিপর্ণী। ইতি রত্নমালা ॥

ক্রোষ্টুপুচ্ছী (স্ত্রী) পৃশ্নিপর্ণী। ইতি শব্দরত্নাবলী ॥

ক্রোষ্টুফলঃ (পুং) ইঙ্গুদীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

ক্রোষ্টুবিন্না (স্ত্রী) পৃশ্নিপর্ণী। ইত্যমরঃ ॥ বিরালছাঞ্চি ইতি খ্যাতা ইতি কেচিৎ। ইতি ভরতঃ ॥

ক্রোষ্টেক্ষুঃ (পুং) শ্বেতেক্ষুঃ। ইতি রাজনির্ঘণ্টঃ ॥

ক্রোষ্ট্রী (স্ত্রী) শুক্লভূমিকুষ্মাণ্ডঃ। ইত্যমরঃ ॥ শৃগালিকা। কৃষ্ণবিদারী। লাঙ্গলী। ইতি মেদিনী ॥

ক্রৌঞ্চঃ (পুং) পক্ষিভেদঃ। কোঁচ বক ইতি ভাষা। তৎপর্য্যায়ঃ। ক্রুঙ্ ২ ক্রুঞ্চঃ ৩ ক্রুঞ্চা ৪ ক্রৌঞ্চা ৫। ইত্যমরভরতৌ ॥ কালিকঃ ৬ কালীকঃ ৭ কলিকঃ ৮। ইতি শব্দরত্নাবলী ॥ পর্ব্বতবিশেষঃ। ইতি মেদিনী ॥ কুররপক্ষী। ইতি রাজনির্ঘণ্টঃ ॥

দ্বীপভেদঃ। স চ দধিমণ্ডোদসমুদ্রেণাবৃতঃ ষোড়শলক্ষযোজনপরিমিতঃ। তস্যাধিপতিঃ প্রিয়ব্রতরাজপুত্রো ঘৃতপৃষ্ঠঃ। ইতি শ্রীভাগবতং॥ অর্হতাং ধ্বজঃ। রাক্ষসবিশেষঃ। ইতি হেমচন্দ্রঃ॥

ক্রৌঞ্চদারণঃ (পুং) কার্ত্তিকেয়ঃ। ইত্যমরঃ॥

ক্রৌঞ্চা (স্ত্রী) ক্রৌঞ্চভার্য্যা। কোঁচবকী ইতি ভাষা। ইতি জটাধরঃ॥

ক্রৌঞ্চাদনং (ক্লী) মৃণালং। ঘেঞ্চুলী। ঘেঁচু ইতি ভাষা। চিঞ্চোটকঃ। চেঁচ্‌কো ইতি ভাষা। ইতি মেদিনী॥ শেষস্য গুণাঃ। গুরুত্বং। অজীর্ণকারিত্বং। শীতত্বঞ্চ। ইতি রাজবল্লভঃ॥ পিপ্পলী। ইতি শব্দরত্নাবলী॥

ক্রৌঞ্চাদনী (স্ত্রী) পদ্মবীজং। ইতি রাজনির্ঘণ্টঃ॥

ক্রৌঞ্চারাতিঃ (পুং) কার্ত্তিকেয়ঃ। ইতি হলায়ুধঃ॥

ক্রৌঞ্চারিঃ (পুং) কার্ত্তিকেয়ঃ। ইতি হেমচন্দ্রঃ॥ পরশুরামঃ। ইতি শব্দমালা॥

ক্রৌশশতিকঃ (পুং) শতক্রোশগমনকর্ত্তা। ইতি ব্যাকরণং॥

ক্লথ কি ম বধে। ইতি কবিকল্পদ্রুমঃ॥ অন্তঃস্থতৃতীয়যুক্তঃ। কি ক্লাথয়তি ক্লথতি। ম ক্লথয়তি। ইতি দুর্গাদাসঃ॥

ক্লদ ই ঞ ঙ রুদি। ইতি কবিকল্পদ্রুমঃ॥ অন্তঃস্থতৃতীয়যুক্তঃ। ই ক্লন্দ্যতে। ঞ ক্লন্দতি ক্লন্দতে। ঙ ক্লন্দতে। রুদি রোদনে। ইতি দুর্গাদাসঃ॥

ক্লদ ই ষ ম ঙ রোদনে। আহ্বানে। ইতি কবিকল্পদ্রুমঃ॥ ই ক্লন্দ্যতে। ষ ক্লন্দা। ম ক্লন্দয়তি। ঙ ক্লন্দতে। ইতি দুর্গাদাসঃ॥

ক্লদ ষ ম ঙ বৈক্লব্যবিকলত্বয়োঃ। ইতি কবিকল্পদ্রুমঃ॥ বৈক্লব্যং বিহ্বলীভাবঃ। ষ ক্লদা। ম ক্লদয়তি। ঙ ক্লদতে শোকার্ত্তঃ। ইতি দুর্গাদাসঃ॥

ক্লম উ ভ ইর্ গ্লানৌ। ইতি কবিকল্পদ্রুমঃ॥ অন্তঃস্থতৃতীয়যুক্তঃ। উ ক্লমিত্বা ক্লান্ত্বা। ভ ক্লামতি। ভ্বাদিপক্ষেঽপি সমাদিত্বং ষ্ঠিবুক্লমাচম ইতি দীর্ঘজ্ঞাপনার্থং। ইর্ অক্লমৎ অক্লমীৎ। ইতি দুর্গাদাসঃ॥

ক্লম ঞি য ভ গ্লানৌ। ইতি কবিকল্পদ্রুমঃ॥ অন্তঃস্থতৃতীয়যুক্তঃ। ঞি ক্লান্তোঽস্তি। য ভ ক্লাম্যতি। ইতি দুর্গাদাসঃ॥

ক্লমঃ (পুং) আয়াসঃ। ইত্যমরঃ॥

ক্লমথঃ (পুং) আয়াসঃ। ইত্যমরঃ॥

ক্লব ষ ম ঙ ভয়ে। ইতি কবিকল্পদ্রুমঃ॥ ষ ক্লবা। ম ক্লবয়তি। ঙ ক্লবতে। বিক্লবন্তি দিবি গ্রহাঃ। ইতি পচাদিত্বাদনি বিক্লবা ইবাচরন্তীতি কৌ সাধ্যং। ইতি দুর্গাদাসঃ॥

ক্লান্তঃ (ত্রি) ক্লান্তিযুক্তঃ। শ্রান্তঃ। যথা। মদনকদনক্লান্তঃ কান্তে প্রিয়স্তব বর্ত্ততে। ইতি জয়দেবঃ॥

ক্লিদ ই ঞ ঙ রুদি। ইতি কবিকল্পদ্রুমঃ॥ অন্তঃস্থতৃতীয়যুক্তঃ। ই ক্লিন্দ্যতে। ঞ ক্লিন্দতি ক্লিন্দতে। ঙ ক্লিন্দতে। রুদি রোদনে। ইতি দুর্গাদাসঃ॥

ক্লিদ য উ ইর্ ক্লেদে। ইতি কবিকল্পদ্রুমঃ॥ অন্তঃস্থতৃতীয়যুক্তঃ। ক্লেদ আর্দ্রীভাবঃ।

য ক্লিদ্যতি বস্ত্রং পয়সা। উ ক্লেদিষ্যতি ক্লেৎস্যতি। ইর্ অক্লিদৎ অক্লেদীৎ। অস্মাৎ পুষাদিত্বাৎ ঙ ইত্যন্যে। ইতি দুর্গাদাসঃ ॥

ক্লিন্নং (ত্রি) আর্দ্রং। ভিজা ইতি ভাষা। ইত্যমরঃ ॥

ক্লিন্নাক্ষঃ (ত্রি) শ্লেষ্মাদিনা ক্লিন্নচক্ষুঃ। কফাদিজনিতক্লেদযুক্তং চক্ষুর্যস্য সঃ। তৎপর্য্যায়ঃ। চুল্লঃ ২ চিল্লঃ ৩ পিল্লঃ ৪। ক্লিন্নে চক্ষুষি ক্লী। ইত্যমরঃ ॥

ক্লিশ য উ ঞ ঙ উপতাপে। ইতি কবিকল্পদ্রুমঃ ॥ য ঞ ক্লিশ্যতি ক্লিশ্যতে। য ঙ ক্লিশ্যতে। উ ক্লিশিত্বা ক্লিষ্ট্বা। উপতাপ ইহ উপতপ্তীভাবঃ। তৎকরণঞ্চ। ক্লিশ্যতে ন চ নিষ্ফলমিতি হলায়ুধঃ। ক্লিশ্যতে কৃপণঃ স্বর্গমপীতি চতুর্ভুজঃ। অন্যে ত্বস্মাৎ পরস্মৈপদমমন্যমানাঃ। ক্লিশ্যন্নপি হি মেধাবীতি। প্রত্যাসন্নতুষারদীধিতিকরক্লিশ্যত্তমো বল্লবীত্যাদি চ ক্লিশং করোতীতি কণ্ড্বাদিত্বাৎ ক্যে শত্রন্তমাহুঃ। নৃপাত্মজৌ চিক্লিশতুঃ সসীতাবিতি ভট্টিপ্রয়োগঞ্চ ক্ৰৈয়াদিকাৎ সমাদধতে তচ্চায়ং। ক্ৰৈয়াদিকস্য সকর্ম্মকত্বাৎ। ইতি দুর্গাদাসঃ ॥

ক্লিশ উ গ বিহতৌ। ইতি কবিকল্পদ্রুমঃ ॥ উ অক্লেশীৎ অক্লিক্ষৎ। গ ইত্থমারাধ্যমানোঽপি ক্লিশ্নাতি ভুবনত্রয়ং। ইতি দুর্গাদাসঃ ॥

ক্লিশিতঃ (ত্রি) ক্লিষ্টঃ। ইত্যমরঃ ॥

ক্লিষ্টঃ (ত্রি) ক্লেশযুক্তঃ। তৎপর্য্যায়ঃ। ক্লিশিতঃ ২। পূর্ব্বাপরবিরুদ্ধবাক্যে ক্লী। তৎপর্য্যায়ঃ। সংকুলং ২ পরস্পরপরাহতং ৩। ইত্যমরঃ ॥

ক্লিষ্টিঃ (স্ত্রী) ক্লেশঃ। সেবা। ইতি ধরণী ॥

ক্লীতকং (ক্লী) যষ্টিমধুকা। ইত্যমরঃ ॥

ক্লীতকিকা (স্ত্রী) নীলীবৃক্ষঃ। ইত্যমরঃ ॥

ক্লীব ঋ ঙ অধার্ষ্ট্যে। ইতি কবিকল্পদ্রুমঃ ॥ অন্তঃস্থতৃতীয়যুক্তঃ। অধার্ষ্ট্যমপ্রগল্ভীভাবঃ। ঙ শোকেন ক্লীবতে সর্ব্ব ইতি হলায়ুধঃ। ঋ অচিক্লীবৎ। ইতি দুর্গাদাসঃ ॥

ক্লীব ঋ ঙ বাস্তবৎ। ঋ অচিক্লীবৎ। ঙ ক্লীবতে। বাস্তবদিতি ক্লীবৃঙ অধার্ষ্ট্যে ইত্যর্থঃ। ইতি দুর্গাদাসঃ ॥

ক্লীবঃ (পুং ক্লী) স্ত্রীপুরুষভিন্নঃ। তৎপর্য্যায়ঃ। পণ্ডঃ ২ নপুংসকং ৩ তৃতীয়াপ্রকৃতিঃ ৪ শণ্ডঃ ৫। ইত্যমরঃ ॥ তৃতীয়প্রকৃতিঃ ৬ ষণ্ডঃ ৭ সণ্ডঃ ৮ শণ্ঢঃ ৯। ইতি তট্টীকা॥ পুরুষত্বহীনঃ। তস্য লক্ষণং। ন মূত্রং ফেনিলং যস্য বিষ্ঠা চাপ্সু নিমজ্জতি। মেঢ্রশ্চোন্মাদশুক্রাভ্যাং হীনঃ ক্লীবঃ উচ্যতে ॥ ইত্যুদ্বাহতত্ত্বং ॥

ক্লীবঃ (ত্রি) বিক্রমহীনঃ। ইত্যমরঃ ॥

ক্লেদঃ (পুং) আর্দ্রং। যথা। পদস্থিতস্য পদ্মস্য বন্ধূ বরুণভাস্করৌ। পদচ্যুতস্য তস্যৈব ক্লেদক্লেশকরাবুভৌ ॥ ইত্যুদ্ভটঃ ॥

ক্লেদনঃ (পুং) কফঃ। ইতি শব্দচন্দ্রিকা ॥ পঞ্চপ্রকারশ্লেষ্মান্তর্গতশ্লেষ্মবিশেষঃ। ইতি সুখবোধঃ ॥

ক্লেদা [ন্] (পুং) চন্দ্রঃ। ইত্যুণাদিকোষঃ ॥

**ক্লেদুঃ** ( পুং ) চন্দ্রঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ সন্নিপাতঃ। ইতি সংক্ষিপ্তসার উণাদিবৃত্তিঃ ॥

**ক্লেশ** ঙ বধে। উপতাপে। ইতি কবিকল্পদ্রুমঃ ॥ ঙ ক্লেশতে চিক্লেশে। ধাতুপ্রদীপে তু ক্লেষ ব্যক্তায়াং বাচীতি মূর্দ্ধন্যান্তো দৃশ্যতে। ক্লেষতে ন বৃথাবাক্যমিতি হলায়ুধোঽপি। ইতি দুর্গাদাসঃ ॥

**ক্লেশঃ** ( পুং ) দুঃখং। তৎপর্য্যায়ঃ। আদীনবঃ ২ আস্রবঃ ৩। ইত্যমরঃ ॥ স তু পঞ্চবিধঃ। অবিদ্যা ১ বিদ্যাবিরোধিনী। অস্মিতা ২ অহমস্মীত্যহঙ্কারঃ। রাগঃ ৩ ইচ্ছাবিশেষঃ। দ্বেষঃ ৪ বৈরতা। অভিনিবেশঃ ৫ মরণভয়ং। ইতি কুসুমাঞ্জলিঃ ॥ কোপঃ। ব্যবসায়ঃ। ইতি মেদিনী ॥

**ক্লেশিতঃ** ( ত্রি ) ক্লেশযুক্তঃ। যথা। নিদ্রাং যাতো মম পতিরসৌ ক্লেশিতঃ কর্ম্মদুঃখা ॥ ইতি শৃঙ্গারতিলকং ॥

**ক্লৈতকিকং** ( ক্লী ) মদ্যং। ইতি শব্দচন্দ্রিকা ॥

**ক্লোম** [ ন্ ] ( ক্লী ) ফুপ্ফুসং। ফোঁফড়া ইতি ফুলঘরা ইতি চ খ্যাতং। ইতি ভরতঃ ॥ তৎপর্য্যায়ঃ। তিলকং ২। ইত্যমরঃ ॥ ক্লোমং ৩ কোমং ৪। ইতি তট্টীকা ॥ বাহ্বোর্দ্ধয়োর্ম্মধ্যে বক্ষঃ তন্মধ্যে হৃদয়ং তৎপার্শ্বে ক্লোম পিপাসাস্থানং। ইতি বৈদ্যকং ॥

**ক্ব** ব্য কুত্র। কোথা ইতি ভাষা। ইতি ব্যাকরণং ॥ অত্যন্তাসম্ভাবনায়াং পণ্ডিতৈঃ ক্বদ্বয়ং প্রযুজ্যতে। যথা। ক্ব সূর্য্যপ্রভবো বংশঃ ক্ব চাল্পবিষয়া মতিঃ। ইতি রঘুঃ ॥

**ক্বঙ্গুঃ** ( পুং ) কঙ্গুঃ। ইতি হেমচন্দ্রঃ ॥

**ক্বচন** ব্য ক্বচিৎ। ইতি ব্যাকরণং ॥

**ক্বচিৎ** ব্য কস্মিংশ্চিৎ। কুত্রচিৎ। কোন স্থানে ইত্যাদি ভাষা। ইতি ব্যাকরণং ॥

**ক্বণ** শব্দে। ইতি কবিকল্পদ্রুমঃ ॥ বকারযুক্তঃ। ক্বণতি বীণা। ইতি দুর্গাদাসঃ ॥

**ক্বণঃ** ( পুং ) কণকণেতি শব্দবিশেষঃ। ইত্যমরটীকায়াং সারসুন্দরী ॥ বীণায়াঃ শব্দঃ অন্যস্য চ শব্দঃ। ইতি ভরতঃ ॥ তৎপর্য্যায়ঃ। নিকাণঃ ২ নিক্বণঃ ৩ ক্বাণঃ ৪ ক্বণনং ৫। ইত্যমরঃ ॥

**ক্বণনং** ( ক্লী ) ক্বণঃ। ইত্যমরঃ ॥

**ক্বণনঃ** ( পুং ) হণ্ডিকাসুতঃ। ছোট হাঁড়ী ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ ॥

**ক্বথ** এ জ নিষ্পচনে। ইতি কবিকল্পদ্রুমঃ ॥ বকারযুক্তঃ। এ অক্বথীৎ। জ ক্বাথঃ ক্বথঃ। ক্বথতি বৈদ্য ঔষধং নিষ্পচতীত্যর্থঃ। ইতি দুর্গাদাসঃ ॥

**ক্বথিতঃ** ( ত্রি ) অতিপকব্যঞ্জনদশমূলাদিঃ। তৎপর্য্যায়ঃ। নিষ্পকঃ ২। ইত্যমরঃ ॥ কষায়ঃ ৩ নির্য্যূহঃ ৪ ক্বাথঃ ৫ শৃতঃ। ইতি বৈদ্যকপরিভাষা ॥

**ক্বাণঃ** ( পুং ) ক্বণঃ। ইত্যমরঃ ॥

**ক্বাথঃ** (পুং) দুঃখং। ব্যসনং। দ্রব্যনিষ্পাকঃ। ইতি হেমচন্দ্রঃ ॥ কাথ্যমানং তোয়ং ত্রিবিধং। পাদাবশেষং ১ অর্দ্ধাবশেষং ২ ত্রিপাদাবশেষঞ্চ ৩। অস্য নামপারিভাষিকোষ্ণোদকং। তত্র ত্রিপাদাবশেষং বাত-

নাশকং। অর্দ্ধাবশেষং পিত্তনাশকং। পাদাবশেষং কফনাশকং লঘু অগ্নিবর্দ্ধকঞ্চ। তেষাং মধ্যে ত্রিপাদাবশেষজলং হেমন্তে শিশিরে চ প্রশস্তং। বসন্তে পাদাবশেষজলং প্রশস্তং। শরদি গ্রীষ্মে চ অর্দ্ধাবশেষজলং প্রশস্তং। বর্ষায়াং অষ্টভাগাবশেষজলং প্রশস্তং। তৎকালে বহুদোষত্বাৎ। দিনপক্কজলং রাত্রৌ গুরু রাত্রিপক্কজলং দিবা গুরু। ইতি রাজবল্লভঃ॥

ক্বাথোদ্ভবং (ক্লী) তুথাঞ্জনং। ইত্যমরঃ॥

কেল খ্ব চালে। গতৌ। ইতি কবিকল্পদ্রুমঃ॥ বকারযুক্তঃ। খ্ব অচিকেলৎ। চালঃ কম্পঃ। চালঃ কৈশ্চিন্ন মন্যতে। ইতি দুর্গাদাসঃ॥

## খ

খ খকারঃ। স তু ব্যঞ্জনদ্বিতীয়বর্ণঃ। অস্যোচ্চারণস্থানং কণ্ঠঃ। ইতি ব্যাকরণং॥ *॥ খকারং পরমাশ্চর্য্যং শঙ্খকুন্দসমপ্রভং। কোণত্রয়যুতং শূন্যং বিন্দুত্রয়সমন্বিতং॥ গুণত্রয়যুতং দেবি পঞ্চদেবময়ং সদা। ত্রিশক্তিসংযুতং বর্ণং খকারং প্রণমাম্যহং॥ ইতি কামধেনুতন্ত্রং॥ *॥ তস্যোৎপত্তির্যথা। স সর্গঃ শ্লেষিতঃ কণ্ঠে বায়ুনা কাদিমীরয়েৎ। বর্গস্পর্শনমাত্রেণ কং স্বরস্পর্শনাত্তু খং॥ ইতি প্রপঞ্চসারঃ॥ *॥ তস্য লেখনপ্রকারাদির্যথা। শিবরূপা বামরেখা দক্ষরেখা প্রজাপতিঃ। অধোরেখা বিষ্ণুরূপা সাক্ষাদ্ব্রহ্মস্বরূপিণী॥ বামাদ্বামগতা রেখা বহ্নিরূপা চ সা স্মৃতা। মাত্রা কুণ্ডলিনী সাক্ষাৎ খকারঃ পঞ্চদৈবতঃ॥ ধ্যানমস্যাঃ প্রবক্ষ্যামি শৃণুষ্ব কমলাননে। বন্ধুকপুষ্পসঙ্কাশাং রত্নালঙ্কারভূষিতাং॥ বরাভয়করীং নিত্যামীষদ্ধাস্যমুখীং পরাং। এবং ধ্যাত্বা ব্রহ্মরূপাং তন্মন্ত্রং দশধা জপেৎ॥ ইতি বর্ণোদ্ধারতন্ত্রং॥ *॥ তস্য নামানি যথা। খঃ প্রচণ্ডঃ কামরূপী ঋদ্ধির্বহ্নিঃ সরস্বতী। আকাশমিন্দ্রিয়ং দুর্গা চণ্ডীশস্তাপিনী গুরুঃ॥ শিখণ্ডী দন্তজাতীশঃ কফোণির্গরুতো যদি। শূন্যং কপালী কল্যাণী সূর্পকর্ণোঽজরামরঃ॥ শুভ্রাগ্রেয়া চণ্ডলিঙ্গো জনা ব্যঙ্গারখড়্গকৌ। ইতি নানাতন্ত্রাহৃতনামানি॥

খং (ক্লী) ইন্দ্রিয়ং। পুরং। ক্ষেত্রং। শূন্যং। বিন্দুঃ। আকাশং। সংবেদনং। দেবলোকঃ। কর্ম্ম। ইতি মেদিনী॥ লগ্নাৎ দশমরাশিঃ। ইতি দীপিকা॥ সুখং। ইতি হেমচন্দ্রঃ॥ অভ্রকং। ইতি রাজনির্ঘণ্টঃ॥

খঃ (পুং) সূর্য্যঃ। ইতি হেমচন্দ্রঃ॥

খকুন্তলঃ (পুং) শিবঃ। ইতি ত্রিকাণ্ডশেষঃ॥

খকৃখ হাসে। ইতি কবিকল্পদ্রুমঃ॥ কোপধঃ। খাদিঃ। খকৃখতি। ইতি দুর্গাদাসঃ॥

খকৃখটঃ (পুং) কক্খটঃ। কঠিনঃ। ইত্যমরটীকায়াং রায়মুকুটঃ॥

খখোল্কঃ (পুং) সূর্য্যঃ। যথা। হরিরুবাচ। পুনঃ সূর্য্যার্চ্চনং বক্ষ্যে যদুক্তং ভৃগবে

পুরা। ওম্ খখোল্কায় ওম্ নমঃ। ইতি গারুড়ে ১৬ অধ্যায়ঃ॥ খষোল্কায়েতি চ পাঠঃ॥

খগঃ(পুং) সূর্য্যঃ। গ্রহঃ। দেবঃ। বাণঃ। পক্ষী। ইতি মেদিনী॥ বায়ুঃ। ইতি শব্দচন্দ্রিকা॥ শলভঃ। ইত্যমরটীকায়াং ভরতঃ॥

খগখানং (ক্লী) বৃক্ষকোটরং। ইতি শব্দচন্দ্রিকা॥

খগপতিঃ (পুং) গরুড়ঃ। ইতি শব্দরত্নাবলী॥

খগবক্ত্রঃ (পুং) লকুচবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥

খগবতী (স্ত্রী) পৃথ্বী। ইতি জটাধরঃ॥

খগশত্রুঃ (পুং) পৃশ্নিপর্ণী। চাকুলিয়া ইতি ভাষা। ইতি শব্দচন্দ্রিকা॥

খগান্তকঃ (পুং) শ্যেনপক্ষী। ইতি রাজনির্ঘণ্টঃ॥

খগাসনঃ (পুং) উদয়পর্ব্বতঃ। ইতি শব্দমালা॥ বিষ্ণুঃ। খগো গরুড় আসনং যস্যেতি বহুব্রীহিসমাসনিষ্পন্নঃ॥

খগেন্দ্রঃ (পুং) গরুড়ঃ। ইতি রাজনির্ঘণ্টঃ॥

খগেন্দ্রধ্বজঃ (পুং) বিষ্ণুঃ। খগেন্দ্রো গরুড়ো ধ্বজঃ কেতুর্বাহনম্বা যস্যেতি বুৎপত্তিঃ॥

খগেশ্বরঃ (পুং) গরুড়ঃ। ইত্যমরঃ॥

খগোলঃ (পুং) আকাশমণ্ডলং। তস্য বিবরণং যথা। এতদ্ব্রহ্মাণ্ডং সচ্ছিদ্রং কটাহদ্বয়স্য গোলাকারসম্পুটতুল্যং। যত্র ভূর্ভুবঃস্বর্মহোজনতপঃসত্যসংজ্ঞকানি সপ্তভুবনানি সন্তি। ব্রহ্মাণ্ডমধ্যে যঃ পরিধিঃ স আকাশকক্ষ্যা। তন্মধ্যে পরাবহপরিবহসুবহসম্বহোদ্বহাখ্যানাং পঞ্চানাং বায়ুনাং স্থানানি অধোঽধঃক্রমেণ সন্তি। তদধস্তাৎ অধোঽধঃস্থিতপূর্ব্বাভিমুখশনিবৃহস্পতিরাহুকেতুমঙ্গলসূর্য্যশুক্রবুধচন্দ্রগ্রহযুক্তং দক্ষিণোত্তরস্থিতধ্রুবাখ্যতারাদ্বয়েন বদ্ধং নক্ষত্রচক্রং সদাপশ্চিমগতিনা প্রবহবায়ুনা ভ্রমতি। ততঃ অধোঽধঃক্রমেণ সিদ্ধবিদ্যাধরমেঘবিদ্যুদাদিযুক্তঃ সদোত্তরগতিরাবহবায়ুর্ভ্রমতি এতদ্ব্রহ্মাণ্ডস্য মধ্যে সমন্তাৎ ঈশ্বরস্য ধারণাত্মিকাং শক্তিং বিভ্রাণো ভূগোলঃ শূন্যে তিষ্ঠতি। পৃথ্ব্যন্তর্গতা নাগাসুরসমাশ্রয়া দিব্যৌষধিরসোপেতা রম্যাঃ পাতালরসাতলমহাতলতলাতলসুতলবিতলাতলসংজ্ঞকা ঊর্দ্ধোর্দ্ধক্রমেণ সপ্তপাতালভূময়শ্চ সন্তি। সুমেরুপর্ব্বতোপরি শূন্যে একা ধ্রুবতারা ভ্রমতি। এবং বড়বানলোপরি শূন্যে অন্যা ধ্রুবতারা ভ্রমতি।

| অথ | কক্ষ্যাযোজনানি | ব্যাসযোজনানি | পৃথিব্যুচ্চযোজনানি |
|---|---|---|---|
| আকাশস্য ব্রহ্মাণ্ডস্য বা | ১৮৭১২০৮০৮৬৪০০০০০০ | ৫৯৫৩৮৪৩৯১১২৭২৭২৭ | ২৯৭৬৯২১৯৫৫৬৩৬৩৬৩ |
| নক্ষত্রস্য | ২৫৯৮৯০০০০ | ৮২৬৯২২৭৩ | ৪১৩৪৫৩৩৬ |
| শনেঃ | ১২৭৬৬৮২৫৫ | ৪০৬২০২১৭ | ২১৩১০০৫৮ |
| রাহুকেত্বোঃ | ৮০৫৭২৮৬৩২ | ২৫৬৩৬৮২০১ | ১২৮১৮৮৩০০ |
| গুরোঃ | ৫১৩৭৫৭৬৪ | ১৬৩৪৬৮৩৪ | ৮১৭২৬১৭ |

| অথ কক্ষ্যাযোজনানি | | ব্যাসযোজনানি | পৃথিব্যুচ্চযোজনানি* |
|---|---|---|---|
| চন্দ্রোচ্চস্য | ৩৮৩২৮৪৮৪ | ১২৭৪২৮২৮ | ৬৩৭০৬১৪ |
| মঙ্গলস্য | ৮১৪৬৯০৯ | ২৫৯২১৯৮ | ১২৯৫২৯৯ |
| সূর্য্যস্য | ৪৩৩১৫০০ | ১৩৭৮২০৪ | ৬৮৮৩০২ |
| শুক্রশীঘ্রস্য | ২৬৬৪৬৩৭ | ৮৪৭৮৩৯ | ৪২৩১১৯ |
| বুধশীঘ্রস্য | ১০৪৩২০৯ | ৩৩১৯৩০ | ১৬৫১৬৫ |
| বুধশুক্রয়োঃ | ৪৩৬১৫০ | ১৩৮৭৭৫ | ৬৮৫৮৮ |
| চন্দ্রস্য | ৩২৪০০০ | ১০৩০৯১ | ৫৭৪৫ |
| আবহবায়োঃ | ৫১০৪ | ১৬২৪ | ১২ |
| ভূগোলস্য | ৪৯৬৭ | ১৫৮১ | ০ |

অথ গ্রহাণাং মধ্যভুক্তয়ঃ।

| | রবেঃ | চন্দ্রস্য | মঙ্গলস্য |
|---|---|---|---|
| দিনে—কলাদ্যাঃ | ৫৯।৮।১০।০ | ৭৯০।৩৪।৫২ | ৩১।২৬।২৮ |
| বর্ষে——রাশ্যাদ্যাঃ | ১২।০।০।০ | ৪।১২।৪৬।৪০।৪৮ | ৬।১১।২৪।৯।৩৬ |
| যুগে——ভগণাদ্যাঃ | ৪৩২০০০০ | ৫৭৭৫৩৩৩৬ | ২২৯৫৮৩২ |
| কল্পে——ভগণাদ্যাঃ | ৪৩২০০০০০০০ | ৫৭৭৫৩৩৩৬০০০ | ২২৯৫৮৩২০০০ |

| | বুধশীঘ্রস্য | বৃহস্পতেঃ | শুক্রশীঘ্রস্য |
|---|---|---|---|
| দিনে—কলাদ্যাঃ | ২৪৫।৩২।২১ | ৪।৫৯।৯ | ৯৬।৭।৪৩ |
| বর্ষে——রাশ্যাদ্যাঃ | ১।২৪।৪৫।২২।৪৮ | ১।০।২১।৩।৩৬ | ৭।১৫।১১।৪৯।১২ |
| যুগে——ভগণাদ্যাঃ | ৭১৯৩৭০৬০ | ৩৬৪২২০ | ৩০১২৩৭৬ |
| কল্পে——ভগণাদ্যাঃ | ৭১৯৩৭০৬০০০০ | ৩৬৪২২০০০০ | ৩০১২৩৭৬০০০ |

## অথ গ্রহাণাং মধ্যভুক্তয়ঃ।

| | শনেঃ | রাহোঃ | চন্দ্রোচ্চস্য |
|---|---|---|---|
| দিনে— কলাদ্যাঃ | ২।০।২৩ | ৩।১০।৪৪ | ৬।৪১।০ |
| বর্ষে— রাশ্যাদ্যাঃ | ০।১২।১২।৫৪ | ০।১৯।২১।১২।৩৬ | ১।১০।৪০।৫৯।৪২ |
| যুগে— ভগণাদ্যাঃ | ২৪৬৫৬৮ | ২৩১২৩৮ | ৪৮৮১০৩ |
| কল্পে ভগণাদ্যাঃ | ২৪৬৫৬৮০০০ | ২৩১২৩৮০০০ | ৪৮৮১০৩০০০ |

## অথ রাশিষু নক্ষত্রাণাং স্থিতিঃ

| | অশ্বিনী | ভরণী | কৃত্তিকা | রোহিণী | মৃগশিরা | আর্দ্রা | পুনর্বসুঃ | পুষ্যা | অশ্লেষা |
|---|---|---|---|---|---|---|---|---|---|
| রাশিঃ | ০ | ০ | ১ | ১ | ২ | ২ | ২ | ৩ | ৩ |
| অংশঃ | ১ | ২০ | ১ | ২৯ | ৩ | ১ | ২০ | ১৬ | ২৯ |
| কলা | ০ | ০ | ৩ | ৩০ | ০ | ১০ | ৪০ | ২০ | ২০ |
| অপক্রম-ভাগাঃ | ১০ উত্তরঃ | ১২ উত্তরঃ | ৫ উত্তরঃ | ৫ দক্ষিণঃ | ১০ দক্ষিণঃ | ৯ দক্ষিণঃ | ৬ উত্তরঃ | ০ উত্তরঃ | ৭ দক্ষিণঃ |

| | মঘা | পূর্বফল্গুনী | উত্তরফল্গুনী | হস্ত | চিত্রা | স্বাতি | বিশাখা | অনুরাধা | জ্যেষ্ঠা |
|---|---|---|---|---|---|---|---|---|---|
| রাশিঃ | ৪ | ৪ | ৫ | ৫ | ৫ | ৬ | ৬ | ৭ | ৭ |
| অংশঃ | ২ | ২২ | ৫ | ১০ | ২৪ | ১৬ | ২৬ | ২৪ | ২৯ |
| কলা | ২০ | ২০ | ৪০ | ০ | ১০ | ৪ | ৪০ | ০ | ০ |
| অপক্রম-ভাগাঃ | উ | ১২ উ | ১৩ উ | ১১ দ | ২ দ | ২৭ উ | ৩৪ দ | ৩ দ | ৪ দ |

অথ রাশিষু নক্ষত্রাণাং স্থিতিঃ।

| | মূলা | পূর্ব্বাষাঢ়া | উত্তরাষাঢ়া | অভিজিৎ | শ্রবণা | ধনিষ্ঠা | শতভিষা | পূর্ব্বভাদ্রপদা | উত্তরভাদ্রপদা | রেবতী |
|---|---|---|---|---|---|---|---|---|---|---|
| রাশিঃ | ৮ | ৮ | ৮ | ৮ | ৯ | ৯ | ১০ | ১০ | ১১ | ১১ |
| অংশঃ | ১ | ১৪ | ২০ | ২৪ | ১০ | ২০ | ২০ | ২৬ | ১ | ২৬ |
| কলা | ১০ | ০ | ০ | ৪০ | ০ | ০ | ০ | ০ | ০ | ৫০ |
| অপক্রম-ভাগাঃ | ৯ দ | ৫ ৩০ দ | ৫ দ | ৩০ উ | ৩০ উ | ৩৩ উ | ৩০ দ | ২৪ উ | ২৬ উ | ০ উ |

| | অগস্ত্যঃ | মৃগব্যাধঃ। কালপুরুষঃ | হুতভুক্ | ব্রহ্মহৃদয়ং | সপ্তর্ষিতারা |
|---|---|---|---|---|---|
| রাশিঃ | ৩ | ২ | ১ | ১ | ১ |
| ভাগঃ | ০ | ২০ | ২২ | ২২ | ১ |
| কলা | ০ | ০ | ০ | ০ | ৩ |
| অপক্রম-ভাগাঃ | ৬০ দ | ৩৪০ দ | ৩৮ দ | ৩৩০ দ | ৫ উ |
| | পুনর্ব্বসৌ | আর্দ্রায়াং | রোহিণ্যাং | রোহিণ্যাং | কৃত্তিকায়াং |

অথ খগোলরচনা।

স্ববাঞ্ছিতং কাষ্ঠনির্ম্মিতং ভূগোলং তন্মধ্যগং সুমেরোরুভয়ত্র নির্গতং দণ্ডঞ্চ কৃত্বা ষষ্ট্যুত্তর-শতত্রয়পরিমিতং সমবিভক্তং আধারকক্ষ্যা-দ্বয়ং বিষুবকক্ষ্যৈকা চ কার্য্যা॥

অথ মেষাদিরাশিস্থিতিঃ।

স্বাহোরাত্রার্দ্ধকর্ণৈস্তৎপ্রমাণানুমানেন চ ক্রান্তি-স্থানাৎ দক্ষিণোত্তরবিভক্তৈর্বিক্ষেপভাগৈর্নিজ-নিজাপক্রমৈশ্চ মেষাদীনাং রাশীনাং তিস্রঃ কক্ষ্যাঃ কুর্য্যাৎ। তা এব কক্ষ্যাঃ কর্কাদীনাং বৈপরীত্যেন কুর্য্যাৎ। তাদৃশ্যস্তিস্রস্তুলাদীনাং তথাবিপর্য্যয়াৎ মকরাদীনাঞ্চ কুর্য্যাৎ॥

অহোরাত্রার্দ্ধকর্ণজ্ঞানং যথা।

স্বক্রান্তেরুৎক্রমক্রমজ্যে দ্বে কুর্য্যাৎ। তত্র উৎক্রমজ্যয়া হীনা ত্রিজ্যা দক্ষিণোত্তরং দিন-ব্যাসদলং স্যাৎ॥

বিক্ষেপজ্ঞানং যথা।

চন্দ্রঃ স্বক্রান্ত্যংশাৎ নিজপাতেন রাশিচক্রকলা-শীতিভাগৈঃ পরমং দক্ষিণোত্তরং বিক্ষিপ্যতে। তস্য নবভাগং দ্বিগুণিতং বৃহস্পতিঃ মঙ্গল-

ত্রিগুণিতং অন্যে চতুর্গুণং বিক্ষিপ্যন্তে। তত্র ক্রমঃ চন্দ্রস্য মধ্যবিক্ষেপকলাঃ ২৭০ মঙ্গলস্য৯০ বুধস্য ১২০ বৃহস্পতেঃ ৬০ শুক্রস্য ১২০ শনেঃ ১২০ রবের্ব্বিক্ষেপকলা নাস্তি ॥

অথ নক্ষত্রাদিকক্ষ্যাস্থানং।

আধারকক্ষ্যাদ্বয়োপরিযাম্যোদগ্‌গোলসংস্থিতানাং নক্ষত্রাদীনাং কক্ষ্যাঃ কুর্য্যাৎ। সর্ব্বাসাং কক্ষ্যাণাং মধ্যস্থানে বিষুবৎকক্ষ্যা স্থিতা। তদাধারকক্ষ্যয়োর্যুতেরূর্দ্ধং দ্বে অয়নে বিষুবদ্বয়ঞ্চ কুর্য্যাৎ। বিষুবস্থানাৎ ভগণসঞ্চারপর্য্যন্তং স্ফুটভাগৈর্মঙ্গলাদীনাং ক্ষেত্রাণ্যেব কুর্য্যাৎ অর্থাৎ মেষাদিরাশীন্ তির্য্যক্‌জ্যাভী রচয়েৎ। তথা অয়নস্থানাৎ অন্যায়নপর্য্যন্তং তির্য্যক্ অপরা কক্ষ্যাক্রান্তিসংজ্ঞা কার্য্যা। তয়া কক্ষ্যয়া সূর্য্যঃ প্রকাশয়ন্ সদা ভ্রমতি ॥ চন্দ্রাদ্যা গ্রহাঃ অপমণ্ডলমাশ্রিতৈঃ স্বস্বপাতাংশৈরপক্রমাৎ বিক্ষেপান্তেষু অপক্রমেণাকৃষ্টাঃ সন্তো লোকৈর্দৃশ্যন্তে। ক্ষিতিজে উদয়ন্ রাশিঃ লগ্নং স্যাৎ তদ্বশাৎ অস্তং গচ্ছংশ্চ অস্তাখ্যং স্যাৎ। লগ্নোদয়ৈর্যথা সিদ্ধং দশচতুর্থস্থানঞ্চ কুর্য্যাৎ। মধ্যক্ষিতিজয়োর্ম্মধ্যে যা জ্যা সা অন্ত্যা কথ্যতে। বিষুবৎক্ষিতিজয়োরন্তরজ্যা চরদলজ্যা। উপরি স্বকং স্থানং মধ্যে ক্ষিতিজমণ্ডলং কৃত্বা বস্ত্রবেষ্টিতং লোকালোকবেষ্টিতঞ্চ কৃত্বা জলপতনযোগেন পারদস্রাবযোগেন বা কালভ্রমণং সাধয়েৎ। ইতি সূর্য্যসিদ্ধান্তসম্মতং ॥

খগ্গড়ঃ (পুং) তৃণবিশেষঃ। খাগ্‌ড়া ইতি ভাষা। তৎপর্য্যায়ঃ। পোটগলঃ২ বৃহৎকাশঃ ৩ কাকেক্ষুঃ ৪। ইতি রত্নমালা ॥

খঙ্করঃ (পুং) চূর্ণকুন্তলঃ। ইতি হেমচন্দ্রঃ ॥

খচ গ ভূতিপূত্যোরুৎপত্তৌ। ইতি কবিকল্পদ্রুমঃ ॥ ভূতিঃ সম্পত্তিঃ পূতিঃ পবিত্রতা তয়োরুৎপত্তিঃ প্রাদুর্ভাবঃ। ভূত্যুৎপত্তৌ পূত্যুৎপত্তৌ চেত্যর্থঃ। গ খচ্নাতি রাজা সমৃদ্ধঃ স্যাদিত্যর্থঃ। শেষার্থঃ কাতন্ত্রাদ্যসম্মতঃ। ইতি দুর্গাদাসঃ ॥

খচ ৎ ক বন্ধনে। ইতি কবিকল্পদ্রুমঃ ॥ খচয়তি। ইতি দুর্গাদাসঃ ॥

খচমসঃ (পুং) চন্দ্রঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

খচরঃ (পুং) মেঘঃ। ইতি শব্দচন্দ্রিকা ॥ বায়ুঃ। রাক্ষসঃ। সূর্য্যঃ। এতেষাং প্রমাণং যথা। খচরস্য সুতস্য সুতঃ খচরঃ খচরস্য পিতা ন পুনঃ খচরঃ। খচরস্য সুতেন হতঃ খচরঃ খচরী পরিরোদিতি হা খচর ॥ ইতি মহাভারতে দ্রোণপর্ব্ব ॥ আকাশগামিনি ত্রি। যথা। পবনো দিক্‌পতির্ভূমিরাকাশং খচরামরাঃ ॥ ইতি স্মৃতিঃ ॥ রূপকভেদঃ। যথা। খচরো রঙ্গতালে স্যাৎ গুরুরাদৌ লঘুস্তথা। শান্তেঽথবা হাস্যরসে ভবেদেষ দশাক্ষরঃ ॥ ইতি সঙ্গীতদামোদরঃ ॥

খচিতং (ত্রি) সংযুক্তং। তৎপর্য্যায়ঃ। করম্বিতং ২ রূষিতং ৩ গুরুগুণ্ডিতং ৪। ইতি ত্রিকাণ্ডশেষঃ ॥ করম্বং ৫ কবরং ৬ মিশ্রং ৭ সংপৃক্তং ৮। ইতি হেমচন্দ্রঃ ॥ ব্যাপ্তং৯। ইতি শব্দরত্নাবলী ॥ গুণ্ঠিতং১০ ছুরিতং ১১। ইতি জটাধরঃ ॥

খঞ্জ মন্থে। ইতি কবিকল্পদ্রুমঃ ॥ মন্থো

বিলোড়নং। খজতি জলং মৎস্যঃ। ইতি দুর্গাদাসঃ॥

খজ ই পাঙ্গুল্যে। ইতি কবিকল্পদ্রুমঃ॥ ই খঞ্জ্যতে। পঙ্গুঃ খোড়ঃ ভাবপ্রধাননির্দ্দেশাৎ পঙ্গুত্বমিতি যাবৎ। সোঽস্যাস্তীতি চূড়াদিত্বাল্লঃ। পঙ্গুলস্তস্য ভাবঃ পাঙ্গুল্যং খোটনমিত্যর্থঃ। খঞ্জতি খোড়ঃ। ভাবপ্রধাননির্দ্দেশো যথা। বুদসবর্ণ ইতি কাতন্ত্রসূত্রং। অত্র অসবর্ণে পরে উবর্ণো বকারত্বং প্রাপ্নোতীত্যেবার্থঃ। ইতি দুর্গাদাসঃ॥

খজঃ (পুং) দর্ব্বিঃ। হাতা ইতি ভাষা। ইত্যমরটীকায়াং ভরতঃ॥

খজকঃ (পুং) মন্থানদণ্ডঃ। ইতি হেমচন্দ্রঃ॥

খজপং (ক্লী) ঘৃতং। ইত্যুণাদিকোষঃ॥

খজলং (ক্লী) নীহারঃ। ইতি ত্রিকাণ্ডশেষঃ॥ আকাশবারি। যথা। বর্ষাসু চরন্তি ঘনৈঃ সহোরগা বিয়তি কীটলূতাশ্চ। তদ্বিষদুষ্টমপেয়ং খজলমগস্ত্যোদয়াৎ পূর্ব্বং॥ ইতি রাজবল্লভঃ॥

খজা (স্ত্রী) মন্থঃ। মওয়া ইতি ভাষা। প্রহস্তঃ ইতি মেদিনী॥ দর্ব্বী। ইতি হেমচন্দ্রঃ॥ মারণং। ইতি শব্দরত্নাবলী॥

খজাকঃ (পুং) পক্ষী। ইত্যুণাদিকোষঃ॥

খজাকা (স্ত্রী পুং) দর্ব্বী। হাতা চমস ইত্যাদি ভাষা। ইত্যমরঃ॥

খজিৎ (পুং) বুদ্ধবিশেষঃ। ইতি হেমচন্দ্রঃ॥

খজ্যোতিঃ [স্] (পুং) খদ্যোতঃ। ইতি রাজনির্ঘণ্টঃ॥

খঞ্জঃ (ত্রি) বিকলগতিঃ। খোঁড়া ইতি ভাষা। তৎপর্য্যায়ঃ। খোড়ঃ ২। ইত্যমরঃ॥ খোলঃ ৩। ইতি শব্দরত্নাবলী॥ খোরঃ ৪ খঞ্জকঃ ৫। ইতি হেমচন্দ্রঃ॥ খোটঃ ৬। ইতি খোড়ধাত্বর্থদর্শনাৎ॥ তস্য লক্ষণং যথা। বায়ুঃ কট্যাশ্রিতঃ সক্থ্নঃ কণ্ডরামাক্ষিপেদ্যদা। খঞ্জস্তদা ভবেজ্জন্তুঃ পঙ্গুঃ সক্থ্নোর্দ্বয়োর্বধাৎ॥ ইতি মাধবকরঃ॥

খঞ্জকঃ (ত্রি) খঞ্জঃ। ইতি হেমচন্দ্রঃ॥

খঞ্জকারিঃ (পুং) স্থন্না। খেঁসারি ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥

খঞ্জখেটঃ (পুং) খঞ্জনপক্ষী। ইতি শব্দমালা॥

খঞ্জখেলঃ (পুং) খঞ্জনপক্ষী। ইতি ত্রিকাণ্ডশেষঃ॥

খঞ্জনং (ক্লী) গমনং। ইতি মেদিনী॥

খঞ্জনঃ (পুং) স্বনামখ্যাতপক্ষী। তৎপর্য্যায়ঃ। খঞ্জরীটঃ ২। ইত্যমরঃ॥ কণাটীনঃ ৩ কাকচ্ছর্দ্দিঃ ৪ খঞ্জখেলঃ ৫ তাতনঃ ৬ মুনিপুত্রকঃ ৭ ভদ্রনামা ৮ রত্ননিধিঃ ৯। ইতি ত্রিকাণ্ডশেষঃ॥ খঞ্জখেটঃ ১০ গূঢ়নীড়ঃ ১১ তণ্ডকঃ ১২ চরঃ ১৩। ইতি শব্দমালা॥ কাকচ্ছদঃ ১৪ নীলকণ্ঠঃ ১৫ কণাটীরঃ ১৬ কণাটীরকঃ ১৭। ইতি শব্দরত্নাবলী॥

খঞ্জনরতং (ক্লী) যমিনাং গোপ্যং রতং। যতিনাং গোপনীয়মৈথুনং। ইতি হারাবলী॥

খঞ্জনা (স্ত্রী) সর্ষপী। ক্ষুদ্রখঞ্জনজাতিঃ। ইতি মেদিনী॥

খঞ্জনাকৃতিঃ (স্ত্রী) খঞ্জনবিশেষঃ। ইতি শব্দচন্দ্রিকা॥ তৎপর্য্যায়ঃ। হাপুত্রিকা ২ খঞ্জনিকা ৩ সর্ষপী ৪। ইতি শব্দরত্নাবলী॥

খঞ্জনিকা (স্ত্রী) খঞ্জনাকারপক্ষিবিশেষঃ। তৎপর্য্যায়ঃ। হাপুত্রিকা ২ তুলিকা ৩ স্ফোটিকা ৪ সর্ষপী ৫। ইতি ত্রিকাণ্ডশেষঃ॥ খঞ্জনাকৃতিঃ ৬। ইতি শব্দচন্দ্রিকা॥

খঞ্জরীটঃ (পুং) খঞ্জনপক্ষী। ইত্যমরঃ॥

খট কাঙ্ক্ষে। ইতি কবিকল্পদ্রুমঃ॥ খটতি। কাঙ্ক্ষ আকাঙ্ক্ষায়াং। ইতি দুর্গাদাসঃ॥

খটঃ (পুং) অন্ধকূপঃ। কফঃ। প্রহারান্তরং। টঙ্কঃ। ইতি মেদিনী॥ তৃণং। ইতি হেমচন্দ্রঃ॥ লাঙ্গলং। কতৃণং। ইত্যজয়পালঃ॥

খটকঃ (পুং) ঘটকঃ। তৎপর্য্যায়ঃ। নাগবীটঃ ২ টাক্করঃ ৩ ত্র্যক্করঃ ৪। ইতি ত্রিকাণ্ডশেষঃ॥ কুব্জিতপাণিঃ। ইতি শব্দমালা॥

খটিকঃ (পুং) কুব্জিতপাণিঃ। ইতি হেমচন্দ্রঃ॥

খটিকা (স্ত্রী) লেখনদ্রব্যং। খড়ী ইতি ভাষা। কর্ণরন্ধ্রং। বীরণং। ইতি বিশ্বঃ॥

খটিনী (স্ত্রী) খটী। ইতি রাজনির্ঘণ্টঃ॥

খটী (স্ত্রী) লেখনদ্রব্যং। খড়ী ইতি ভাষা। তৎপর্য্যায়ঃ। খটিনী ২ খটিকা ৩ ধবলমৃত্তিকা ৪ সিতধাতুঃ ৫ পাণ্ডুমৃৎ ৬ পাণ্ডুমৃত্তিকা ৭। অস্যা গুণাঃ। মধুরত্বং। তিক্তত্বং। শীতলত্বং। পিত্তদাহব্রণদোষকফাস্রনেত্ররোগনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ অস্যাঃ পর্য্যায়ান্তরাণি কঠিনীশব্দে দ্রষ্টব্যানি

খট্ট ক বৃত্তৌ। ইতি কবিকল্পদ্রুমঃ॥ টদ্বয়ান্তঃ। ক খট্টয়তি। বৃতিঃ সংবরণং। ইতি দুর্গাদাসঃ॥

খট্টনঃ (ত্রি) খর্ব্বঃ। খাট ইতি ভাষা। ইতি হেমচন্দ্রঃ॥ খদৃত ইতি পাঠোঽপি দৃষ্টঃ॥

খট্টা (স্ত্রী) খট্বা। ইতি শব্দচন্দ্রিকা॥

খট্টাশঃ (পুং স্ত্রী) বনজন্তুবিশেষঃ। খটাশ ইতি গন্ধগোকুলা ইতি চ ভাষা। তৎপর্য্যায়ঃ। গন্ধৌতুঃ২ বনবাসনঃ ৩। ইতি ত্রিকাণ্ডশেষঃ॥ খট্টাশী ৪ বনাখুঃ ৫। ইতি শব্দরত্নাবলী॥ খট্টাসঃ ৬ গন্ধমার্জারঃ ৭ বনশ্বা ৮ শালিঃ ৯। ইতি জটাধরঃ॥ পুষ্যলকঃ ১০। যথা। চর্ম্মণি দ্বীপিনং হন্তি দন্তয়োর্হন্তি কুঞ্জরং। কেশেষু চমরীং হন্তি সীম্নি পুষ্যলকো হতঃ॥ ইতি দুর্গাদাসধৃতবচনং॥

খট্টাসঃ (পুং) খট্টাশঃ। ইতি জটাধরঃ॥

খট্টিঃ (পুং) শবযানং। তৎপর্য্যায়ঃ। অন্তশয্যা ২ বাক্লঠঃ ৩। ইতি ত্রিকাণ্ডশেষঃ॥

খট্টিকঃ (ত্রি) শাকুনিকঃ। পাখিমারা ইতি ভাষা। ইতি শব্দমালা॥

খট্টিকা (স্ত্রী) ক্ষুদ্রখট্টা। তৎপর্য্যায়ঃ। নিষদ্যা ২ সন্দী ৩। ইতি ত্রিকাণ্ডশেষঃ॥ আসন্দী ৪। ইতি জটাধরঃ॥ শবযানং। ইতি শব্দমালা॥

খট্টেরকঃ (ত্রি) খর্ব্বঃ। ইতি শব্দমালা॥

খট্বা (স্ত্রী) কাষ্ঠাদিরচিতশয্যাধারঃ। খাট্ ইতি ভাষা। তৎপর্য্যায়ঃ। শয়নং ২ মঞ্চঃ ৩ পর্য্যঙ্কঃ ৪ পল্যঙ্কঃ ৫। ইত্যমরঃ॥ তল্পং ৬ শল্লঃ ৭। ইতি শব্দরত্নাবলী॥ *॥

তদ্‌যুক্তির্যথা। অষ্টাভিঃ কাষ্ঠখণ্ডৈশ্চ খট্বেতি প্রতিচক্ষতে। অথৈষাং নামানি। তিষ্ঠেৎ যদালম্ব্য খট্বা তজ্‌জ্ঞেয়ং চরণাদ্বয়ং। শিরঃস্থং ব্যপধানং স্যাৎ অধঃস্থং স্যাৎ নিরূপকং॥ আলিঙ্গনে উভে পার্শ্বে প্রাহ ভোজমহীপতিঃ। আলিঙ্গনে চতুর্হস্তে ব্যপধাননিরূপকে॥ তদৰ্দ্ধেন তদর্দ্ধেন চত্বারশ্চরণা ইতি। সর্ব্বষোড়শিকা খট্বা সর্ব্বত্রাভয়দায়িকা॥ আলিঙ্গনে সার্দ্ধবেদে ব্যপধাননিরূপকে। সার্দ্ধদ্বয়ে চ চরণা হস্তৈকপরিসম্মিতাঃ॥ সর্ব্বাষ্টাদশকা খট্বা সর্ব্বকামফলপ্রদা। আলিঙ্গনে পঞ্চহস্তে ব্যপধানে নিরূপকে॥ তদৰ্দ্ধেন তদর্দ্ধেন চত্বারশ্চরণা ইতি। সর্ব্ববিংশতিকা খট্বা ধনধান্যজয়প্রদা॥ আলিঙ্গনে পঞ্চহস্তে ব্যপধানে নিরূপকে। ত্রিহস্তসম্মিতে পাদা হস্তৈকপরিসম্মিতাঃ॥ সর্ব্ববিংশতিকা খট্বা এবমপ্যুপজায়তে। আলিঙ্গনে সার্দ্ধপঞ্চে ব্যপধানে নিরূপকে॥ তদৰ্দ্ধেন তদৰ্দ্ধেন চত্বারশ্চরণা ইতি। সর্ব্বদ্বাবিংশিকা খট্বা সর্ব্বসম্পৎপ্রদায়িনী॥ আলিঙ্গনে চ ষড়্‌ঢস্তে ব্যপধানে নিরূপকে। ত্রিহস্তসম্মিতে পাদাশ্চত্বারশ্চরণা ইতি॥ চতুর্ব্বিংশতিকা খট্বা সর্ব্বরোগক্ষয়ঙ্করী। আলিঙ্গনে সপ্তহস্তে ব্যপধানে নিরূপকে॥ ত্রিহস্তে সার্দ্ধহস্তাশ্চ চত্বারশ্চরণা ইতি। সর্ব্বষড়্‌বিংশিকা খট্বা সর্ব্বসৌভাগ্যকারিকা॥ আলিঙ্গনে সার্দ্ধসপ্তে ব্যপধানে নিরূপকে। সার্দ্ধত্রিহস্তে সার্দ্ধাশ্চ চত্বারশ্চরণা ইতি॥ সর্ব্বাষ্টাবিংশিকা খট্বা সর্ব্বভোগপ্রদায়িকা। আলিঙ্গনে চাষ্টহস্তে ব্যপধানে নিরূপকে॥ চতুর্হস্তে সার্দ্ধহস্তাশ্চত্বারশ্চরণা ইতি। সর্ব্বত্রিংশতিকা খট্বা সর্ব্বকামার্থদায়িনী॥ এবমষ্টবিধাঃ খট্বাঃ সমাসেনোপদর্শিতাঃ। আদিত্যাদিদশাজানাং নৃণাং সম্পত্তিদায়িকাঃ॥ কার্য্যাঃ শিল্পিভিরেতাসু বিবিধাকৃতিকল্পনাঃ। সর্ব্বষোড়শিকা খট্বা সর্ব্বেষামেব যুজ্যতে॥ অষ্টৌ খণ্ডানি যস্যাঃ স্যুশ্চতুর্হস্তযুতানি চ। শ্রীসর্ব্বমঙ্গলা নাম খট্বৈষা পৃথিবীপতেঃ॥ ইয়ং যদা সচ্ছদনা তদা সর্ব্বজয়াভিধা। যাত্রাসিদ্ধিঃ সর্ব্বসিদ্ধির্বিজয়া চাষ্টমঙ্গলা॥ *॥ একৈকহস্তবৃদ্ধ্যা তু ভবেন্মঞ্চমতঃ পরং। জয়োঽথ মঙ্গলঃ প্রেয়ান্ চিত্রকান্তঃ পরো মহান্॥ একৈকহস্তবৃদ্ধ্যা তু মঞ্চানামিতি লক্ষণং। সা তুঙ্গা হৃতিতুঙ্গা চ শিখরী বিষয়েক্ষণা॥ একৈকহস্তবৃদ্ধ্যা তু টঙ্ক ইত্যভিধীয়তে। যাত্রাসিদ্ধিং সমারভ্য যেঽমী ষোড়শ কীর্ত্তিতাঃ॥ আদিত্যাদিদশাজানামাদ্যস্তৈকদ্বয়ং ক্রমাৎ। দূরদর্শী দীর্ঘদর্শী দুর্ল্লভ্যোঽথ দুরাসদঃ॥ যথোত্তরং দশগুণাঃ পাদৈকপরিণাহিনঃ। প্রাসাদসংজ্ঞকাঃ কার্য্যা রাজ্ঞা সুখমভীপ্সতা॥ চত্বার এতে সর্ব্বেষাং ভূপতীনাং সুখাবহাঃ॥ *॥ ভোজমতে চ। সর্ব্বত্রিংশতিকাং যাবৎ আরভ্যাভয়ষোড়শীং। খট্বানামিতি নামানি অষ্টৌ হস্তদ্বয়াধিকাৎ॥ তদ্‌যথা। মঙ্গলা বিজয়া পুষ্টিঃ ক্ষমা তুষ্টিঃ সুখাসনং। প্রচণ্ডা সর্ব্বতোভদ্রা খট্বা-

নামাষ্টকং বিদুঃ ॥ আসাং বিভাগঃ পূর্ব্ববৎ ॥ * ॥ পরাশরসংহিতায়ান্তু। অষ্টাভিঃ কাষ্ঠখণ্ডৈস্তু যোঽঙ্কপিণ্ডো বিজায়তে। স চেৎ সমো ভবেৎ খট্বা প্রণশ্যা স্যাদতোঽন্যথা ॥ সমে সর্ব্বায়সম্পত্তির্বিষমে বিষমাম্পদং। তস্মাৎ খট্বাঙ্গপিণ্ডো যঃ সমঃ কার্য্যঃ স সূরিভিঃ ॥ ইদন্তু সামান্যং সর্ব্বসম্মতঞ্চ। কাষ্ঠনিয়মস্তু পূর্ব্ববদেব। ইত্যাসনযুক্তৌ খট্বোদ্দেশঃ ॥ * ॥ তস্যা দোষগুণা যথা। খট্বায়াং যো গুণো দোষো মানঞ্চ পরিকীর্ত্তিতং। তেনৈব খট্বা কাষ্ঠোত্থা তথৈব গুণমাবহেৎ ॥ অনেনৈব বিধানেন কার্য্যং বহুবিধাসনং। বিনা নৌকাসমং কার্য্যং সর্ব্বত্রৈবাসনং গুরু ॥ ইতি তত্রৈব যুক্তিকল্পতরুঃ ॥ অস্যা গুণঃ। বাতলত্বং। ইতি রাজবল্লভঃ ॥ প্রেঙ্খা। ইত্যমরটীকা ॥ কোলশিম্বী। ইতি রাজনির্ঘণ্টঃ ॥

খট্বাঙ্গং (ক্লী) শিবস্যাস্ত্রবিশেষঃ। তৎপর্য্যায়ঃ। সুখংসুণঃ ২। ইতি হেমচন্দ্রঃ ॥

খট্বাঙ্গঃ (পুং) সূর্য্যবংশীয়রাজবিশেষঃ। স তু বিশ্বসহরাজপুত্রঃ। যথা। ততো দশরথস্তস্মাৎ পুত্র ঐড়িবিড়িস্ততঃ। রাজা বিশ্বসহো যস্য খট্বাঙ্গশ্চক্রবর্ত্ত্যভূৎ ॥ ইতি শ্রীভাগবতং ॥

খট্বাঙ্গভৃৎ (পুং) শিবঃ। ইতি হেমচন্দ্রঃ ॥

খট্বাঙ্গী [ন্] (পুং) শিবঃ। ইতি হারাবলী ॥

খট্বারূঢ়ঃ (ত্রি) অবিনীতঃ। প্রমাদবান্। ইতি ত্রিকাণ্ডশেষভূরিপ্রয়োগৌ ॥ খট্বারূঢ়ো নরো জাল্মঃ। ইতি কলাপব্যাকরণং ॥ খট্বোপরিস্থিতশ্চ ॥

খট্বিকা (স্ত্রী) ক্ষুদ্রখট্বা। ইতি জটাধরঃ ॥ খট্বাবিশেষঃ। তদ্যুক্তির্যথা। ব্রহ্মক্ষত্রিয়বৈশ্যানাং চতুঃষড়ষ্টকোণিকাঃ। খট্বিকা সুখসম্ভূতাঃ শুক্লরক্তাসিতাম্বরাঃ ॥ ইতি যুক্তিকল্পতরৌ খট্বিকোদ্দেশঃ ॥

খড ই ঙ মথি। ইতি কবিকল্পদ্রুমঃ ॥ মথি মন্থনে। মন্থনঞ্চেহ ভঞ্জনং। ই খণ্ড্যতে। ঙ খণ্ডতে দণ্ডেন ভাণ্ডং লোকঃ। ইতি দুর্গাদাসঃ ॥

খড ক ভেদে। ইতি কবিকল্পদ্রুমঃ ॥ ক খাড়য়তি। ইতি দুর্গাদাসঃ ॥

খড়ং (ক্লী পুং) লঘুতৃণং। খড় ইতি ভাষা। ইতি শব্দরত্নাবলী ॥

খড়ঃ (পুং) পানান্তরং। ভেদঃ। ইতি মেদিনী ॥ খড়যূষো যথা। তক্রং কপিত্থচাঙ্গেরীমরিচাজাজিচিত্রকৈঃ। সুপক্বং খড়যূষোঽয়ময়ং কাম্বলিকোঽপরঃ ॥ ইতি চক্রদত্তঃ ॥

খড়ক্কিকা (স্ত্রী) পক্ষদ্বারং। খড়্কিদ্বার ইতি ভাষা। ইতি হারাবলী ॥

খড়তূঃ (পুং) বাহুজঙ্ঘাভরণং। ইতি সংক্ষিপ্তসারে উণাদিবৃত্তিঃ ॥

খড়িকা (স্ত্রী) কঠিনী। ইতি জটাধরঃ ॥

খড়ী (স্ত্রী) কঠিনী। স্বনামখ্যাতশ্বেতবর্ণমৃত্তিকাবিশেষঃ। ইতি শব্দচন্দ্রিকা ॥ অস্যা গুণপর্য্যায়ৌ কঠিনীশব্দে খটীশব্দে চ দ্রষ্টব্যৌ

খড়ূঃ (পুং) ঘৃতশয্যা। ইতি সংক্ষিপ্তসারে উণাদিবৃত্তিঃ॥

খড়্গং (ক্লী) লোহং। ইতি রাজনির্ঘণ্টঃ॥

খড়্গঃ (পুং) গণ্ডকঃ। গণ্ডার ইতি ভাষা। গণ্ডকশৃঙ্গং। খাগ ইতি ভাষা। বুদ্ধভেদঃ। ইতি মেদিনী॥ চোরকনামগন্ধদ্রব্যং। ইতি রাজনির্ঘণ্টঃ॥ অস্ত্রবিশেষঃ। খাঁড়া তরবাল ইত্যাদি ভাষা। তৎপর্য্যায়ঃ। নিস্ত্রিংশঃ ২ চন্দ্রহাসঃ ৩ অসিঃ ৪ রিষ্টিঃ ৫ কৌক্ষেয়কঃ ৬ মণ্ডলাগ্রঃ ৭ করবালঃ ৮ কৃপাণঃ ৯। ইত্যমরঃ॥ ঋষ্টিঃ ১০ করপালঃ ১১। ইতি তট্টীকা॥ বিশসনঃ ১২ তীক্ষ্ণধারঃ ১৩ দুরাসদঃ ১৪ শ্রীগর্ভঃ ১৫ বিজয়ঃ ১৬ ধর্ম্মপালঃ ১৭। কৌক্ষেয়ঃ ১৮ তরবারিঃ ১৯ তবরাজঃ ২০ কৃপাণকঃ ২১ কৃপাণী ২২ শস্ত্রঃ ২৩। ইতি শব্দরত্নাবলী॥*॥ তস্যোৎপত্তির্ব্রহ্মণো যজ্ঞাগ্নৌ যথা। বিকীর্য্যাগ্নিং তথাভূতমুত্থিতং শ্রূয়তে তদা। নীলোৎপলসবর্ণাভং তীক্ষ্ণদংষ্ট্রং কৃশোদরং॥ প্রাংশুং সুদুর্দ্ধর্ষতরং তথৈব হ্যমিতৌজসং। ততস্তদ্রূপমুৎসৃজ্য বভৌ নিস্ত্রিংশ এব সঃ॥ বিমলস্তীক্ষ্ণধারশ্চ কালান্তক ইবোদ্যতঃ। ততঃ স শিতিকণ্ঠায় রুদ্রায়র্ষভকেতবে॥ ব্রহ্মা দদাবসিং তীক্ষ্ণমধর্ম্মপ্রতিবারণং। ততঃ স ভগবান্ রুদ্রো দানবক্ষতজোক্ষিতং॥ অসিং ধর্ম্মস্য গোপ্তারং দদৌ সৎকৃত্য বিষ্ণবে। বিষ্ণুর্মরীচয়ে স মহর্ষিভ্যঃ তে ইন্দ্রায় স লোকপালেভ্যঃ তে মনবে সূর্য্যপুত্রায় স ক্ষুপায় স ইক্ষ্বাকবে স পুরূরবসে স আয়বে স নহুষায় স যযাতয়ে স পুরবে স অমূর্ত্তরয়সে স ভূমিশয়ায় স ভরতায় স ঐড়বিড়ায় স ধুন্ধুমারায় স কাম্বোজায় স মুচুকুন্দায় স মরুত্তায় স রৈবতায় স যৌবনাশ্বায় স রঘবে স হরিণাশ্বায় স শুনকায় স উশীনরায় স ভোজায় স শিবয়ে স প্রতর্দ্দনায় স অষ্টকায় স ঋষদশ্বায় স ভরদ্বাজায় স দ্রোণায় স কৃপায় স পাণ্ডবেভ্যো দত্তবান্॥*॥ অথ খড়্গবিষয়কত্রয়োদশবিধসঞ্চরণং যথা। মণ্ডলাকারতঃ খড়্গভ্রামণং ভ্রান্তমুচ্যতে। তদেব বাহুমুদ্যম্য কৃতমুদ্ভ্রান্তমীরিতং॥ ভ্রামণং স্বস্য পরিতঃ খড়্গস্যাবিদ্ধমুচ্যতে। পরপ্রযুক্তশস্ত্রস্য বারণার্থমিদং ত্রয়ং॥ শত্রোরাক্রমণার্থায় গমনস্যাপ্লুতং মতং। খড়্গস্যাগ্রেণ তদ্দেহস্পর্শনং প্রসৃতং মতং॥ বঞ্চয়িত্বা রিপোঃ শস্ত্রপাতনং গদিতং স্মৃতং। পরিবৃত্যং ভবেৎ শত্রোর্বামদক্ষিণতো গতিঃ॥ পশ্চাৎ পদাপসরণং নিবৃত্যং সংপ্রচক্ষতে। অন্যোঽন্যতাড়নং প্রাহুঃ সম্পাতমুভয়োরপি॥ আধিক্যমাত্মনো যৎ তৎ সমুদীর্ণমুদীরিতং। অঙ্গপ্রত্যঙ্গদেশেষু ভ্রামণং ভারতং স্মৃতং॥ বিচিত্রখড়্গসঞ্চারদর্শনং কৌশিকং স্মৃতং। নিলীয় চর্ম্মণি ক্ষেপো যদসেঃ সাত্বতং হি তৎ॥ ইতি মহাভারতং॥ তস্য পরীক্ষা তরবারিশব্দে দ্রষ্টব্যা॥

খড়্গকোষঃ (পুং) খড়্গলতা। তৎপর্য্যায়ঃ। খড়্গপত্রঃ ২ খড়্গিমারঃ ৩ অশ্বপুচ্ছকঃ ৪। ইতি শব্দচন্দ্রিকা॥ খড়্গাধারঃ। খাপ

ইতি ভাষা। অয়ং ব্যুৎপত্তিলব্ধো-

খড়্গপটঃ (পুং) বৃহৎকাশঃ। ইতি হারাবলী॥

খড়্গধেনুঃ (স্ত্রী) খড়্গপুত্রিকা। ছুরি ইতি ভাষা। গণ্ডকস্ত্রী। মাদী গণ্ডার ইতি ভাষা। ইতি মেদিনী॥

খড়্গপত্রঃ (পুং) খড়্গলতা। ইতি শব্দচন্দ্রিকা॥

খড়্গপিধানং (ক্লী) খড়্গকোষঃ। খাপ ইতি ভাষা। ইতি হলায়ুধঃ॥

খড়্গপিধানকং (ক্লী) খড়্গপিধানং। খাপ ইতি ভাষা। তৎপর্য্যায়ঃ। প্রত্যাকারঃ ২ পরীবারঃ ৩ কোশঃ ৪। ইতি হেমচন্দ্রঃ॥

খড়্গারীটঃ (ত্রি) ফলকঃ। অসিধারাব্রতধারী। ইতি মেদিনী॥

খড়্গিকঃ (পুং) মহিষীক্ষীরফেনঃ। শৌনিকঃ। ইতি মেদিনী॥

খড়্গিমারঃ (পুং) খড়্গকোষলতা। ইতি শব্দচন্দ্রিকা॥

খড়্গী [ন্] (পুং) বনজন্তুবিশেষঃ। গণ্ডার ইতি ভাষা। তৎপর্য্যায়ঃ। গণ্ডকঃ ২ খড়্গঃ ৩। ইত্যমরঃ॥ খড়্গমৃগঃ ৪ ক্রোড়ীমুখঃ ৫ তুঙ্গমুখঃ ৬ বলী ৭ বজ্রচর্ম্মা ৮ বার্দ্ধীনসঃ ৯। ইতি রাজনির্ঘণ্টঃ॥ একচরঃ ১০ গণোৎসাহঃ ১১। ইতি ত্রিকাণ্ডশেষঃ॥ গণ্ডঃ ১২ স্বনোৎসাহঃ ১৩। ইতি শব্দরত্নাবলী॥ অস্য মাংসগুণাঃ। বলকারিত্বং। বৃংহণত্বং। গুরুত্বং। ইতি রাজনির্ঘণ্টঃ॥ কফবায়ুনাশিত্বং। কষায়ত্বং। পিতৃলোকতৃপ্তিকারিত্বং। পবিত্রত্বং। আয়ুর্হিতত্বং। মূত্রবন্ধকারিত্বং। রূক্ষত্বঞ্চ। ইতি রাজবল্লভঃ॥

খড়্গীকং (ক্লী) দাত্রং। ইতি শব্দরত্নাবলী॥

খণ্ডং (ক্লী) বিড়্লবণং। ইতি রাজনির্ঘণ্টঃ॥ ইক্ষুবিকারঃ। অস্য গুণাঃ। বৃষ্যতমত্বং। চক্ষুষ্যত্বং। বাতপিত্তনাশিত্বঞ্চ। ইতি রাজবল্লভঃ॥

খণ্ডঃ (পুং ক্লী) একদেশঃ। তৎপর্য্যায়ঃ। ভিত্তং ২ শকলং ৩। ইত্যমরঃ॥

খণ্ডঃ (পুং) ইক্ষুবিকারঃ। খাঁড় ইতি ভাষা। মণিদোষঃ। ইতি মেদিনী॥

খণ্ডকঃ (পুং) নির্নখঃ। ইতি শব্দচন্দ্রিকা॥ সিতাখণ্ডঃ। ইতি রাজনির্ঘণ্টঃ॥

খণ্ডকথা (স্ত্রী) বাঙ্ময়ভেদঃ। ইতি ত্রিকাণ্ডশেষঃ॥

খণ্ডকর্ণঃ (পুং) আলুবিশেষঃ। শকরকন্দ আলু ইতি ভাষা। তৎপর্য্যায়ঃ। বজ্রকন্দঃ ২। ইতি রত্নমালা॥ অস্য গুণাঃ। কফপিত্তনাশিত্বং। কটুপাকিত্বং। ইতি রাজবল্লভঃ॥

খণ্ডকালু (ক্লী) আলুবিশেষঃ। ইতি শব্দচন্দ্রিকা॥

খণ্ডজঃ (পুং) গুড়ঃ। যবাসশর্করা। ইতি রাজনির্ঘণ্টঃ॥

খণ্ডজোদ্ভবজঃ (পুং) তবরাজোদ্ভবখণ্ডঃ। ইতি রাজনির্ঘণ্টঃ॥

খণ্ডতালঃ (পুং) তালবিশেষঃ। যথা। দ্রুতমেকং ভবেদ্যত্র খণ্ডতালঃ স উচ্যতে। অপরং নিয়মং বিনা। ইতি সঙ্গীতদামোদরঃ॥

খণ্ডধারা (স্ত্রী) কর্ত্তরী। কাঁচি ইতি ভাষা। ইতি শব্দমালা ॥

খণ্ডনং (ক্লী) ভঞ্জনং। ভেদনং। নিরাকরণং। ছেদনং। যথা। ঘটয় ভুজবন্ধনং জনয় রদখণ্ডনং দেহি পদপল্লবমুদারং ॥ ইতি জয়দেবঃ ॥

খণ্ডপরশুঃ (পুং) শিবঃ। ইত্যমরঃ ॥

খণ্ডপর্শুঃ (পুং) পরশুরামঃ। শিবঃ। চূর্ণলেপী। খণ্ডামলকভৈষজ্যং। রাহুঃ। ইতি মেদিনী ॥ ভগ্নদন্তহস্তী। ইতি শব্দরত্নাবলী ॥

খণ্ডপালঃ (পুং) মোদকঃ। ময়রা ইতি ভাষা। তৎপর্য্যায়ঃ। খাণ্ডিকঃ ২। ইতি হারাবলী ॥

খণ্ডমোদকঃ (পুং) যবাসশর্করা। ইতি রাজনির্ঘণ্টঃ ॥

খণ্ডলবণং (ক্লী) বিড়্‌লবণং। ইতি রাজনির্ঘণ্টঃ ॥

খণ্ডশাখা (স্ত্রী) মহিষবল্লী। ইতি রাজনির্ঘণ্টঃ॥

খণ্ডসরঃ (পুং) যবাসশর্করা। ইতি রাজনির্ঘণ্টঃ ॥

খণ্ডাভ্রং (ক্লী) অভ্রলেশঃ। ছেঁড়ামেঘ ইতি ভাষা। দন্তক্ষতবিশেষঃ। ইতি মেদিনী॥

খণ্ডিকঃ (পুং) কলায়ঃ। কড়াই ইতি ভাষা। ইত্যমরঃ ॥ কক্ষঃ। বগল ইতি ভাষা। ইতি হেমচন্দ্রঃ ॥

খণ্ডিতং (ত্রি) খণ্ডীকৃতং। তৎপর্য্যায়ঃ। ছিন্নং ২ লূনং ৩ ছিতং ৪ দিতং ৫ ছেদিতং ৬ বৃক্ণং ৭ বৃত্তং ৮। ইতি হেমচন্দ্রঃ ॥

খণ্ডিতা (স্ত্রী) স্বীয়াদিনায়িকায়া ভেদঃ। অস্যা লক্ষণং। অন্যোপভোগচিহ্নিতঃ পতিঃ প্রাতরাগচ্ছতি যস্যাঃ সা। অস্যাশ্চেষ্টা। অস্ফুটালাপচিন্তাসন্তাপনিশ্বাসতূষ্ণীম্ভাবাশ্রুপাতাদয়ঃ। ইতি রসমঞ্জরী ॥

খণ্ডিনী (স্ত্রী) পৃথ্বী। ইতি শব্দরত্নাবলী ॥

খণ্ডী [ন্] (পুং) বনমুদ্গঃ। ইতি হেমচন্দ্রঃ॥

খণ্ডীরঃ (পুং) পীতমুদ্গঃ। ইতি হেমচন্দ্রঃ ॥

খতমালঃ (পুং) ধূমঃ। মেঘঃ। ইতি মেদিনী॥

খদ স্থৈর্য্যে। বধে। ইতি কবিকল্পদ্রুমঃ ॥ খদতি। ইতি দুর্গাদাসঃ ॥

খদিকা (স্ত্রী) লাজাঃ। খই ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ ॥

খদিরঃ (পুং) বৃক্ষবিশেষঃ। খয়েরগাছ ইতি ভাষা। তৎপর্য্যায়ঃ। গায়ত্ত্রী ২ বালতনয়ঃ ৩ দন্তধাবনঃ ৪। ইত্যমরঃ ॥ তিক্তসারঃ ৫ কণ্টকীদ্রুমঃ ৬। ইতি রত্নমালা॥ বালপত্রঃ ৭ খদ্যপত্রী ৮ ক্ষিতিক্ষমঃ ৯ সুশল্যঃ ১০ বক্রকণ্টঃ ১১ যজ্ঞাঙ্গঃ ১২ জিহ্বাশল্যঃ ১৩ কণ্টী ১৪ সারদ্রুমঃ ১৫ কুষ্ঠারিঃ ১৬ বহুসারঃ ১৭ মেধ্যঃ ১৮ বালপুত্রঃ ১৯ রক্তসারঃ ২০ কর্কটী ২১ জিহ্মশল্যঃ ২২। ইতি জটাধরঃ॥ কুষ্ঠহৃৎ ২৩ বালপত্রকঃ ২৪ যূপদ্রুমঃ ২৫ ইতি শব্দরত্নাবলী॥ অপি চ। খদিরো রক্তসারশ্চ গায়ত্ত্রী দন্তধাবনঃ। কণ্টকী বালপত্রশ্চ বহুশল্যশ্চ পাজ্ঞিকঃ॥ খদিরঃ শীতলো দন্ত্যঃ কণ্ডুকাসারুচিপ্রণুৎ। তিক্তঃ কষায়ো মেদোঘ্নঃ কৃমিমেহজ্বরব্রণান্ ॥ শ্বিত্রশোথামপিত্তাস্রপাণ্ডুকুষ্ঠকফান্ হরেৎ।

ইতি ভাবপ্রকাশঃ ॥ অস্য গুণাঃ। তিক্ত-রসত্বং। শীতত্বং। পিত্তকফকুষ্ঠকাসরক্ত-শোফকণ্ডুব্রণনাশিত্বং। পাচনত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ বিসর্পবেদনামেহমেদ-নাশিত্বং। ইতি রাজবল্লভঃ ॥*॥ ইন্দ্রঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ চন্দ্রঃ। ইতি মেদিনী ॥

খদিরপত্রিকা (স্ত্রী) অরিখদিরঃ। লজ্জালু-লতা। ইতি রাজনির্ঘণ্টঃ ॥

খদিরপত্রী (স্ত্রী) লজ্জালুলতা। ইতি বৈদ্যকং ॥

খদিরা (স্ত্রী) লজ্জালুলতা। ইতি রাজ-নির্ঘণ্টঃ ॥

খদিরিকা (স্ত্রী) লাক্ষা। ইতি রাজনির্ঘণ্টঃ ॥

খদিরী (স্ত্রী) খদিরীশাকং। লাজালু ইতি খ্যাতা। ইতি কেচিৎ। কিন্তু রভসেন বরাহক্রান্তা লজ্জালুঃ সমঙ্গা জলকারি-কেতি খদিরিকায়াং সঙ্কোচপত্রী লজ্জালু-রিতি লজ্জালুকায়াং পঠিতং। ইতি ভরতঃ ॥ তৎপর্য্যায়ঃ। নমস্কারী ২ গণ্ড-কালী ৩ সমঙ্গা ৪। ইত্যমরঃ ॥ গণ্ড-কারী ৫। ইতি ভরতঃ ॥ শমীপত্রা ৬ রক্তপত্রী ৭ অঞ্জলিকারিকা ৮ রাম্না ৯। ইতি জটাধরঃ ॥

খদিরোপমং (ক্লী) কদরঃ। কাঁটা বাবলা ইতি ভাষা। ইতি রত্নমালা

খদূরবাসিনী (স্ত্রী) বুদ্ধশক্তিবিশেষঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

খদ্যোতঃ (পুং) সূর্য্যঃ। ইতি জটাধরঃ ॥ কীটবিশেষঃ। জোনাক পোকা ইতি ভাষা। তৎপর্য্যায়ঃ। জ্যোতিরিঙ্গণঃ ২ ইত্যমরঃ ॥ খজ্যোতিঃ ৩ প্রভাকীটঃ ৪ উপসূর্য্যকঃ ৫। ইতি রাজনির্ঘণ্টঃ ॥ ধ্বান্তোন্মেষঃ ৬ তমোমণিঃ ৭ দৃষ্টিবন্ধুঃ ৮ তমোজ্যোতিঃ ৯ জ্যোতিরিঙ্গঃ ১০ নিমে-ষকঃ ১১। ইতি শব্দরত্নাবলী ॥

খদ্যোতনঃ (পুং) সূর্য্যঃ। ইতি জটা-ধরঃ ॥

খধূপঃ (পুং) অগ্নিক্রীড়াবিশেষঃ। হাউই ইতি ভাষা। যথা। উল্কাস্প্রচক্রুর্নগরস্য মার্গান্ ধ্বজান্ ববন্ধুর্মুমুচুঃ খধূপান্। ইতি ভট্টিঃ ॥

খন উ ঞ বিদারে। ইতি কবিকল্পদ্রুমঃ ॥ উ খনিত্বা খাত্বা। ঞ তৃষিতো জাহ্নবী-তীরে কূপং খনতি দুর্ম্মতিঃ। খনতে। ইতি দুর্গাদাসঃ ॥

খনকঃ (পুং) উন্দুরুঃ। সন্ধিতস্করঃ। সিঁদেল চোর ইতি ভাষা। ভূমিবিত্তজ্ঞঃ। স্বর্ণা-দ্যুৎপত্তিস্থানজ্ঞঃ। ইতি হেমচন্দ্রঃ ॥

খনকঃ (ত্রি) অবদারকঃ। খননকর্ত্তা। ইতি মেদিনী ॥

খননং (ক্লী) বিদারণং। খোঁড়ন খোদন ইতি চ ভাষা। যথা। পশ্য ত্বং খননং নখেন তদভূদালোক্য মূকঃ শঠঃ। ইত্যুদ্-ভটঃ ॥

খনয়িত্রী (স্ত্রী) অস্ত্রভেদঃ। খন্তীতি ভাষা। যথা। খনয়িত্রী শুভা যাত্রা জয়ার্থং জয়-কাঙ্ক্ষিণাং। পঞ্চবর্ণাংশুকযুতা চালনীয়া পুরঃ সতাং ॥ ইতি নারদপঞ্চরাত্রে পাদ্ম-সংহিতা ॥

খনিঃ (স্ত্রী) রত্নাদ্যুৎপত্তিস্থানং। খানি ইতি ভাষা। তৎপর্য্যায়ঃ। আকরঃ ২। ইত্যমরঃ॥ খানী ৩ খনী ৪ খানিঃ ৫। ইতি শব্দরত্নাবলী॥ গঙ্গা ৬। ইতি হেমচন্দ্রঃ॥

খনিত্রং (ক্লী) অস্ত্রবিশেষঃ। খন্তা ইতি ভাষা। তৎপর্য্যায়ঃ। অবদারণং ২। ইত্যমরঃ॥

খনী (স্ত্রী) রত্নাদ্যুৎপত্তিস্থানং। ইতি শব্দরত্নাবলী॥

খপুরং (ক্লী) ঘটঃ। ইতি হেমচন্দ্রঃ॥ ঊর্দ্ধগং পুরং। হরিশ্চন্দ্রপুরং। ইতি ত্রিকাণ্ডশেষঃ॥

খপুরঃ (পুং) গুবাকঃ। ভদ্রমুস্তকং। অলসকে ত্রি। ইতি মেদিনী॥ ব্যালনখঃ। ইতি রাজনির্ঘণ্টঃ॥

খভ্রান্তিঃ (পুং) চিল্লঃ। চিল ইতি ভাষা। ইতি শব্দরত্নাবলী॥

খমণিঃ (পুং) সূর্য্যঃ। ইতি ত্রিকাণ্ডশেষঃ॥

খমীলনং (ক্লী) তন্দ্রা। ইতি শব্দরত্নাবলী॥

খমূলিঃ (স্ত্রী) কুম্ভিকা। পানা ইতি ভাষা। ইতি শব্দরত্নাবলী॥

খমূলিকা (স্ত্রী) খমূলী। কুম্ভিকা। ইতি শব্দরত্নাবলী॥

খম্ব গতৌ। ইতি কবিকল্পদ্রুমঃ॥ ওষ্ঠবর্গশেষোপধঃ। খম্বতি। ইতি দুর্গাদাসঃ॥

খরং (ক্লী) তীব্রং। তৎপর্য্যায়ঃ। তিগ্মং ২ তীক্ষ্ণং ৩। তদ্বতি ত্রি। ইত্যমরঃ॥

খরঃ (পুং) গর্দ্দভঃ। ইত্যমরঃ॥ ঘর্ম্মঃ। ইতি মেদিনী॥ নিষ্ঠুরঃ। রাক্ষসবিশেষঃ। স তু রাবণভ্রাতা। ইতি হেমচন্দ্রঃ॥ দৈত্যঃ। ইতি ত্রিকাণ্ডশেষঃ॥ কণ্টকিবৃক্ষবিশেষঃ। ইত্যজয়ঃ॥ কঙ্কঃ। কাকঃ। কুররপক্ষী। ইতি রাজনির্ঘণ্টঃ॥

খরকাষ্ঠিকা (স্ত্রী) বলা। ইতি রাজনির্ঘণ্টঃ॥

খরকুটী (স্ত্রী) নাপিতশালিকা। নাপিতস্য গৃহং। ইতি ত্রিকাণ্ডশেষঃ॥

খরকোণঃ (পুং) তিত্তিরিপক্ষী। ইতি হেমচন্দ্রঃ॥

খরগন্ধনিভা (স্ত্রী) নাগবলা। ইতি জটাধরঃ

খরগন্ধা (স্ত্রী) নাগবলা। ইতি রাজনির্ঘণ্টঃ॥

খরগৃহং (ক্লী) গর্দ্দভশালা। গাদার ঘর ইতি ভাষা। তৎপর্য্যায়ঃ। খরগ্রহঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥

খরগেহং (ক্লী) খরগৃহং। ইতি শব্দরত্নাবলী॥

খরগ্রহঃ (পুং) খরগৃহং। ইতি ত্রিকাণ্ডশেষঃ॥

খরঘাতনঃ (পুং) নাগকেশরঃ। ইতি শব্দচন্দ্রিকা॥

খরচ্ছদঃ (পুং) উলুকং। উলুখড় ইতি ভাষা। ইৎকটঃ। ওকড়া ইতি ভাষা। ইতি রত্নমালা॥ কুন্দরতৃণং। ইতি রাজনির্ঘণ্টঃ॥

খরণসঃ (ত্রি) তীক্ষ্ণনাসিকঃ। তৎপর্য্যায়ঃ। খরণাঃ ২। ইত্যমরঃ॥

খরণাঃ [স্] (ত্রি) তীক্ষ্ণনাসিকঃ। ইত্যমরঃ॥

খরত্বক্ (স্ত্রী) অলম্বুষা। লজ্জালুপ্রভেদঃ। ইতি ভাবপ্রকাশঃ॥

খরদণ্ডং (ক্লী) পদ্মং। ইতি ধরণী॥

খরদলা (স্ত্রী) ক্ষেমাফলা। ডুমুর ইতি ভাষা। ইতি শব্দচন্দ্রিকা॥

খরদূষণঃ ( পুং ) ধুস্তূরঃ। ইতি শব্দচন্দ্রিকা খরেণ সহ দূষণশ্চ

খরধ্বংসী [ ন্ ] ( পুং ) শ্রীরামঃ। ইতি শব্দরত্নাবলী ॥

খরনাদিনী ( স্ত্রী ) রেণুকানামগন্ধদ্রব্যং। ইতি শব্দচন্দ্রিকা ॥

খরপত্রঃ ( পুং ) ক্ষুদ্রপত্রতুলসী। শাকাখ্যবৃক্ষঃ। ইতি রত্নমালা ॥ যাবনালশরঃ। হরিদর্ভঃ। মরুবকঃ। ইতি রাজনির্ঘণ্টঃ ॥

খরপত্রকঃ ( পুং ) তিলকবৃক্ষঃ। ইতি শব্দচন্দ্রিকা ॥

খরপত্রী ( স্ত্রী ) গোজিহ্বাবৃক্ষঃ। কাকোদুম্বরিকা। ইতি রাজনির্ঘণ্টঃ ॥

খরপাত্রং ( ক্লী ) লৌহপাত্রং। ইতি ত্রিকাণ্ডশেষঃ ॥

খরপাদাঢ্যঃ ( পুং ) কপিত্থবৃক্ষঃ। ইতি শব্দচন্দ্রিকা ॥

খরপুষ্পঃ (পুং) মরুবকবৃক্ষঃ। ইতি রত্নমালা ॥

খরপুষ্পা ( স্ত্রী ) বর্ব্বরা। বাবুই তুলসী ইতি ভাষা। ইত্যমরঃ ॥

খরপ্রিয়ঃ ( পুং ) পারাবতঃ। ইতি শব্দমালা ॥

খরমঞ্জরী ( স্ত্রী ) অপামার্গঃ। ইত্যমরঃ ॥

খররোমা [ ন্ ] ( পুং ) নাগভেদঃ। ইতি জটাধরঃ ॥

খরবল্লিকা ( স্ত্রী ) নাগবলা। গোরক্ষচাউলিয়া ইতি ভাষা। ইতি রত্নমালা ॥

খরশব্দঃ ( পুং ) কুররপক্ষী। ইতি রাজনির্ঘণ্টঃ ॥

খরশাকঃ ( পুং ) ভার্গী। বামণহাটী ইতি ভাষা। ইতি ভাবপ্রকাশঃ ॥

খরস্কন্ধঃ ( পুং ) প্রিয়ালবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ

খরস্কন্ধা ( স্ত্রী ) খর্জ্জুরী। ইতি রাজনির্ঘণ্টঃ ॥

খরস্বরা ( স্ত্রী ) বনমল্লিকা। ইতি রত্নমালা ॥

খরা ( স্ত্রী ) দেবতাড়বৃক্ষঃ। ইত্যমরঃ ॥

খরাংশুঃ ( পুং ) সূর্য্যঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

খরাগরী ( স্ত্রী ) দেবতাড়বৃক্ষঃ। ইত্যমরটীকায়াং রায়মুকুটঃ ॥

খরাব্দাঙ্কুরকং ( ক্লী ) বৈদূর্য্যমণিঃ। ইতি রাজনির্ঘণ্টঃ ॥

খরাশ্বা ( স্ত্রী ) ময়ূরশিখা। রুদ্রজটা ইতি খ্যাতা। ক্ষেত্রযমানিকা ইতি কেচিৎ। ইত্যমরভরতৌ ॥

খরাহ্বা ( স্ত্রী ) অজমোদা। ইতি রাজনির্ঘণ্টঃ ॥

খরিকা (স্ত্রী) কস্তুরীভেদঃ। সা তু চূর্ণাকৃতিঃ। ইতি রাজনির্ঘণ্টঃ ॥

খরুঃ ( পুং ) শিবঃ। হয়ঃ। দর্পঃ। দন্তঃ। ইতি মেদিনী ॥ কামদেবঃ। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ ॥ শুক্লবর্ণঃ। ইতি হেমচন্দ্রঃ ॥

খরুঃ ( ত্রি ) শ্বেতঃ। ইতি মেদিনী ॥ নিষিদ্ধৈকরুচিঃ। ইতি হেমচন্দ্রঃ ॥ নির্বোধঃ। ক্রূরঃ। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ ॥ তীক্ষ্ণঃ। ইতি সংক্ষিপ্তসারে উণাদিবৃত্তিঃ ॥

খর্জ্জ ব্যথায়্জোঃ। ইতি কবিকল্পদ্রুমঃ ॥ খর্জ্জতি। মৃট্ মার্জ্জনং। ইতি দুর্গাদাসঃ ॥

খর্জ্জিকা (স্ত্রী) অবদংশঃ। ইতি শব্দচন্দ্রিকা ॥

খর্জ্জুঃ ( পুং ) খর্জ্জুরী। কণ্ডুঃ। কীটঃ। ইতি হেমচন্দ্রঃ ॥

খর্জ্জূরং (ক্লী) রৌপ্যং। ইত্যমরটীকায়াং রমানাথঃ

খর্জ্জুঃ (স্ত্রী) কণ্ডূঃ। কীটঃ। ইত্যুণাদিকোষঃ

খর্জ্জূরঃ (পুং) চক্রমর্দ্দঃ। ধত্তূরঃ। অর্কবৃক্ষঃ ইতি রাজনির্ঘণ্টঃ॥

খর্জ্জূরং (ক্লী) খর্জ্জূরফলং। অস্য গুণাঃ মধুরত্বং। শীতলত্বং। গুরুত্বং। ক্ষয়াভিঘাতদাহবাতপিত্তরোগে হিতত্বং। বৃংহণত্বং। শুক্রবৃদ্ধিকারিত্বঞ্চ। ইতি রাজবল্লভঃ॥ রৌপ্যং। হরিতালং। ইতি হেমচন্দ্রঃ॥ খলঃ। ইতি মেদিনী॥

খর্জ্জূরঃ (পুং স্ত্রী) খর্জ্জূরীবৃক্ষঃ। খেজুর গাছ ইতি ভাষা। অস্য মস্তিষ্কগুণাঃ। স্বাদুত্বং। তিক্তত্বং। কষায়ত্বং। মূত্রাতঙ্করোগনাশিত্বং। বলপ্রাণশুক্রবৃদ্ধিকারিত্বঞ্চ। ইতি রাজবল্লভঃ॥ বৃশ্চিকঃ। ইতি মেদিনী॥

খর্জ্জূরিকা (স্ত্রী) মিষ্টান্নবিশেষঃ। মিঠা গজা ইতি ভাষা। ইতি পাকরাজেশ্বরঃ॥

খর্জ্জূরী (স্ত্রী) বনখর্জ্জূরঃ। ইত্যমরঃ॥ খর্জ্জূরবৃক্ষঃ। খেজুরগাছ ইতি ভাষা। তৎপর্য্যায়ঃ। খরস্কন্ধা ২ দুষ্প্রধর্ষা ৩ দুরারুহা ৪ নিশ্রেণী ৫ কষারী ৬ যবনেষ্টা ৭ হরিপ্রিয়া ৮। অস্যা গুণাঃ। কষায়ত্বং। পক্বে গৌল্যত্বং। কষায়িকত্বং। পিত্তকৃমিনাশিত্বং। বৃংহণত্বং। কফশুক্রবৃদ্ধিকারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ তৎপর্য্যায়গুণাঃ। ভূমিখর্জ্জূরিকা স্বাদ্বী দুরারোহা মৃদুচ্ছদা। তথা স্কন্ধফলা কাককর্কটী স্বাদুমস্তকা॥ *॥ পিণ্ডখর্জ্জূরিকা ত্বন্যা সা দেশে পশ্চিমে ভবেৎ। খর্জ্জূরী গোস্তনাকারা পরাদ্বীপাদিহাগতা॥ জায়ন্তে পশ্চিমে দেশে সা ছোহারেতি কীর্ত্ত্যতে। খর্জ্জূরীত্রিতয়ং শীতং মধুরং রসপাকয়োঃ॥ স্নিগ্ধং রুচিকরং হৃদ্যং ক্ষতক্ষয়হরং গুরু। তর্পণং রক্তপিত্তঘ্নং বিষ্টম্ভশুক্রদং॥ কোষ্ঠমারুতকৃদ্বল্যং বাহ্ববাতকফাপহং। জ্বরাভিঘাতক্ষুত্তৃষ্ণাকাসশ্বাসনিবারকং॥ মদমূর্চ্ছামরুৎপিত্তমদ্যোদ্ভূতগদান্তকৃৎ। মহতীভ্যাং গুণৈরল্পা স্বল্পা খর্জ্জূরিকা স্মৃতা॥ *॥ খর্জ্জূরীতরুতোয়ন্তু মদপিত্তকরং ভবেৎ। বাতশ্লেষ্মহরং রুচ্যং দীপনং বলশুক্রকৃৎ॥ *॥ সুনেপালী তু মৃদুলা বলিহীনফলা চ সা। সুনেপালী শ্রমভ্রান্তিদাহমূর্চ্ছাস্রপিত্তহৃৎ॥ ইতি ভাবপ্রকাশঃ॥

খর্দ্দ দশনে। ইতি কবিকল্পদ্রুমঃ॥ দশনং দন্তকরণকক্রিয়া। খর্দ্দতি মূলকং লোকঃ। কেচিত্তু দন্দশূকে ইতি পঠিত্বা দন্দশূকঃ দন্দশূককর্ত্তৃকক্রিয়েত্যাহুঃ। ইতি দুর্গাদাসঃ॥

খর্পরঃ (পুং) তস্করঃ। ধূর্ত্তঃ। ভিক্ষাপাত্রং। কপালং। ইতি মেদিনী॥ ছত্রং। ইতি ত্রিকাণ্ডশেষঃ॥

খর্পরী (স্ত্রী ক্লী) কর্পরীতুত্থং। ইত্যমরটীকা॥

খর্পরীতুত্থং (ক্লী) তুত্থবিশেষঃ। তৎপর্য্যায়ঃ। খর্পরীরসকং ২ চক্ষুষ্যং ৩ অমৃতোৎপন্নং ৪ তুত্থং ৫ খর্পরিকা ৬। অস্য গুণাঃ। কটুত্বং। তিক্তত্বং। চক্ষুর্হিতত্ব

রসায়নত্বং। ত্বগ্দোষশমনত্বং। দীপ্যত্বং। বলপুষ্টিপ্রদত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

খর্ব্ব গতৌ। ইতি কবিকল্পদ্রুমঃ॥ খর্ব্বতি। ইতি দুর্গাদাসঃ॥

খর্ব্বং (ক্লী) সংখ্যাবিশেষঃ। ইতি মেদিনী॥ তত্তু দশাব্জসংখ্যা। ইতি লীলাবতী॥ দশবৃন্দসংখ্যা ১০০০০০০০০০০। ইতি স্মৃতিঃ॥

খর্ব্বঃ (পুং) কুবেরস্য নিধিবিশেষঃ। ইতি শব্দরত্নাবলী॥ দশবৃন্দসংখ্যা। ইতি স্মৃতিঃ॥ কুব্জকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

খর্ব্বঃ (ত্রি) ক্ষুদ্রঃ। খাটো ছোট ইত্যাদি ভাষা। তৎপর্য্যায়ঃ। হ্রস্বঃ ২ নীচঃ ৩ বামনঃ ৪ হ্রস্বঃ ৫। ইত্যমরঃ॥ নিখর্ব্বঃ ৬ খদৃতঃ ৭ খর্ব্বশাখঃ ৮। ইতি হেমচন্দ্রঃ॥ অনুচ্চঃ ৯ অনায়তঃ ১০। ইতি জটাধরঃ॥

খর্ব্বশাখঃ (ত্রি) বামনঃ। খর্ব্বঃ। ইতি হেমচন্দ্রঃ॥

খর্ম্মঃ (পুং) পৌরুষং। কোষত্বাংশুকং। পট্টবস্ত্রং। ইতি মেদিনী॥

খর্ব্ব গর্ব্বে। ইতি কবিকল্পদ্রুমঃ॥ অন্তঃস্থবকারান্তোঽয়ং॥ খর্ব্বতি। ইতি দুর্গাদাসঃ॥

খর্ব্বঃ (ত্রি) হ্রস্বঃ। বর্গ্যবকারান্তখর্ব্বশব্দার্থোঽপ্যত্র॥

খর্ব্বটঃ (পুং ক্লী) চতুঃশতগ্রামমধ্যস্থলং। ইতি ভূরিপ্রয়োগঃ॥ পর্ব্বতপ্রান্তগ্রামঃ। ইতি শ্রীভাগবতটীকায়াং শ্রীধরস্বামী॥

খর্ব্বুরা (স্ত্রী) তরুদীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

খর্ব্বুজং (ক্লী) খড়ুভুজা। খরবুজা ইতি ভাষা। ইতি ভাবপ্রকাশঃ॥

খল ক্ষলজার্থে। ইতি কবিকল্পদ্রুমঃ॥ ক্ষলজার্থশ্চালচয়ৌ। চালশ্চেহ স্খলনং। খলতি খলো ধর্ম্মাৎ। ইতি দুর্গাদাসঃ॥

খলং (ক্লী) ভূঃ। স্থানং। কল্কঃ। ইতি মেদিনী॥ খলাধানং। ধান্যমাড়িবার খামার ইতি ভাষা। ইতি হেমচন্দ্রঃ॥

খলঃ (পুং) সূর্য্যঃ। ইতি ভূরিপ্রয়োগঃ॥ তমালবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥ ধস্তূরবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

খলঃ (ত্রি) নীচঃ। অধমঃ। ইতি মেদিনী॥ ক্রূরঃ। তৎপর্য্যায়ঃ। দুর্জনঃ ২ পিশুনঃ ৩। ইত্যমরঃ॥ দুর্ব্বিধঃ ৪ বিশ্বকদ্রুঃ ৫ নৃশংসঃ ৬ ঘাতুকঃ ৭ ক্রূরঃ ৮ পাপঃ ৯। ইতি জটাধরঃ॥

খলতিঃ (পুং) ইন্দ্রলুপ্তরোগযুক্তঃ। টাকপড়া মাথা ইতি ভাষা। তৎপর্য্যায়ঃ। খল্বাটঃ ২ ঐন্দ্রলুপ্তিকঃ ৩ শিপিবিষ্টঃ ৪ বভ্রুরথঃ ৫। ইতি হেমচন্দ্রঃ॥ খল্লীটঃ ৬। ইতি ত্রিকাণ্ডশেষঃ॥ খল্লিটঃ ৭। ইতি শব্দরত্নাবলী॥

খলপূঃ (ত্রি) মার্জনকারী। ঝাড়ুকষ ফরাস ইত্যাদি ভাষা। তৎপর্য্যায়ঃ। বহুকরঃ ২। ইত্যমরঃ॥

খলমূর্ত্তিঃ (পুং) পারদঃ। পারা ইতি ভাষা। ইতি শব্দচন্দ্রিকা॥

খলাধারা (স্ত্রী) তৈলপায়িকা। আরস্থলা ইতি ভাষা। ইতি জটাধরঃ॥

খলিঃ (পুং) তৈলকিট্টং। ইতি রাজনির্ঘণ্টঃ॥

খলিনঃ ( পুং ক্লী ) খলীনঃ। ইত্যমরটীকায়াং রায়মুকুটঃ ॥

খলিনী ( স্ত্রী ) খলসমূহঃ। ধানের অনেক খামার ইতি ভাষা। তৎপর্য্যায়ঃ। খল্যা ২। ইত্যমরঃ ॥ তালমূলী। ইতি রত্নমালা ॥

খলিশঃ ( পুং ) স্বনামখ্যাতমৎস্যঃ। খলিশা-মাছ ইতি ভাষা। তৎপর্য্যায়ঃ। কঙ্ক-ত্রোটঃ ২ খলেশয়ঃ ৩। ইতি শব্দরত্না-বলী ॥ অস্য গুণাঃ। গ্রাহিত্বং। কষায়ত্বং। বায়ুকোপনত্বং। রূক্ষত্বং। লঘুত্বং। শূল-হরত্বং। কিঞ্চিদামবিনাশিত্বঞ্চ। ইতি রাজবল্লভঃ ॥ খল্লিশোঽপি পাঠঃ ॥

খলীকারঃ ( পুং ) অপকারঃ। ইতি জটাধরঃ ॥

খলীনঃ ( পুং ) কবিকা। কড়িয়ালি ইতি ভাষা। ইত্যমরঃ ॥

খলু ব্য নিষেধঃ। বাক্যালঙ্কারঃ। জিজ্ঞাসা। অনুনয়ঃ। ইত্যমরঃ ॥ নিশ্চিতং। পদ-বাক্যাদিপূরণং। বীপ্সা। ইতি শব্দরত্না-বলী ॥

খলুক্ [জ্] ( পুং ) অন্ধকারঃ। ইতি ত্রিকাণ্ড-শেষঃ ॥

খলুরেষঃ ( পুং ) মৃগভেদঃ। ইতি শব্দ-চন্দ্রিকা ॥

খলুরিকা ( স্ত্রী ) শস্ত্রাভ্যাসভূমিঃ। ইতি হেম-চন্দ্রঃ ॥

খলেধানী ( স্ত্রী ) মেধিঃ। খলে পশুবন্ধনদারু। ইতি জটাধরঃ ॥

খলেবালী ( স্ত্রী ) খলে গোবন্ধনদারু। মেই-কাঠ ইতি ভাষা। ইতি হেমচন্দ্রঃ ॥

খলেশঃ ( পুং ) খলিশমৎস্যঃ। ইতি হারা-বলী ॥

খলেশয়ঃ ( পুং ) খলিশমৎস্যঃ। ইতি শব্দ-রত্নাবলী ॥

খল্যা ( স্ত্রী ) খলিনী। ধানমাড়ার অনেক খামার ইতি ভাষা। ইত্যমরঃ ॥

খল্লঃ ( পুং ) বস্ত্রপ্রভেদঃ। গর্ত্তঃ। চর্ম্ম। চাতকপক্ষী। ইতি মেদিনী ॥ দৃতিঃ। মশক ইতি ভাষা। ইতি হেমচন্দ্রঃ ॥ ঔষধমর্দ্দনপাত্রং। খল ইতি ভাষা। ইতি বৈদ্যকং ॥

খল্লিকা (স্ত্রী) ঋজীষং। পিষ্টকাদিভর্জনপাত্রং। ইতি শব্দচন্দ্রিকা ॥

খল্লিটঃ ( ত্রি ) খলতিঃ। ইতি শব্দরত্নাবলী ॥

খল্লী ( স্ত্রী ) হস্তপাদাবমর্দ্দনাখ্যরোগঃ। ইতি মেদিনী ॥ তস্য লক্ষণং। খল্লী তু পাদ-জঙ্ঘোরুকরমূলাবমোটনী। ইতি মাধব-করঃ ॥ তচ্চিকিৎসা যথা। কুষ্ঠসৈন্ধবয়োঃ কল্কশ্চুক্রতৈলসমন্বিতঃ। সুখোষ্ণো মর্দ্দনে যোজ্যঃ খল্লীশূলনিবারণঃ ॥ ইতি ভাব-প্রকাশঃ ॥ অপি চ। খল্ল্যাং স্নিগ্ধাম্ললবণৈঃ স্বেদোন্মাদোপনাহনং। ইতি ভৈষজ্য-রত্নাবলী ॥

খল্লীটঃ ( ত্রি ) খলতিঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

খব গ ভূতিপূত্যোরুৎপত্তৌ। ইতি কবিকল্প-দ্রুমঃ ॥ ভূতিঃ সম্পত্তিঃ পূতিঃ পবিত্রতা তয়োরুৎপত্তিঃ প্রাদুর্ভাবঃ ॥

খবল্লী ( স্ত্রী ) আকাশবল্লী। ইতি রাজনির্ঘণ্টঃ ॥

খবারি ( ক্লী ) দিব্যোদকং। ইতি রাজনির্ঘণ্টঃ ॥

খবাষ্পঃ ( পুং ) হিমং। ইতি হারাবলী ॥

খশঃ ( পুং ) দেশবিশেষঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

খশা ( স্ত্রী ) মুরানামগন্ধদ্রব্যং। ইতি শব্দচন্দ্রিকা ॥ দক্ষকন্যা। সা চ কশ্যপপত্নী। যথা। ধর্ম্মপত্ন্যঃ সমাখ্যাতাঃ কশ্যপস্য বদাম্যহং। অদিতির্দ্দিতির্দ্দনুঃ কালা অনায়ুঃ সিংহিকা মুনিঃ॥ কদ্রুঃ প্রাধা ইরা ক্রোধা বিনতা সুরভিঃ খশা। ইতি। ইরা বৃক্ষলতা বল্লী তৃণজাতিশ্চ সর্ব্বশঃ। খশা চ যক্ষরক্ষাংসি মুনিরপ্সরসস্তথা ॥ ইতি চ গারুড়ে ৬ অধ্যায়ঃ ॥

খশেটঃ ( পুং ) খলিশমৎস্যঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

খশ্বাসঃ ( পুং ) বায়ুঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

খষ বধে। ইতি কবিকল্পদ্রুমঃ ॥ খষতি। ইতি দুর্গাদাসঃ ॥

খষ্পং ( ক্লী ) ক্রোধঃ। বলাৎকারঃ। ইত্যুণাদিকোষঃ ॥

খসঃ ( পুং ) পামা। খোস ইতি ভাষা। তৎপর্য্যায়ঃ। পাম ২ কচ্ছূঃ ৩ বিচর্চ্চিকা ৪। ইতি হেমচন্দ্রঃ

খসকন্দঃ ( পুং ) ক্ষীরকঞ্চুকীবৃক্ষঃ। ইতি রত্নমালা ॥ খসগন্ধোঽপি কচিৎ পাঠঃ ॥

খসতিলঃ ( পুং ) খস্খসঃ। ইতি রাজনির্ঘণ্টঃ॥

খসমঃ ( পুং ) বুদ্ধঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

খসম্ভবা ( স্ত্রী ) আকাশমাংসী। ইতি রাজনির্ঘণ্টঃ ॥

খসর্পণঃ ( পুং ) বুদ্ধবিশেষঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

খসাত্মজঃ (পুং) রাক্ষসঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

খসৃমঃ ( পুং ) বিপ্রচিত্তিদৈত্যপুত্রঃ। যথা। সিংহিকায়াং সমুৎপন্না বিপ্রচিত্তিসুতাস্তথা। ব্যংশঃ শল্যশ্চ বলবান্ নভশ্চৈব মহাবলঃ ॥ বাতাপির্নমুচিশ্চৈব ইল্বলঃ খসৃমস্তথা। অন্তকো নরকশ্চৈব কালনাভস্তথৈব চ॥ নিবাতকবচা দৈত্যাঃ প্রহ্লাদস্য কুলেঽভবন্। ইতি গারুড়ে ৬ অধ্যায়ঃ ॥

খস্খসঃ ( পুং ) বৃক্ষবিশেষঃ। পোস্তা ইতি ভাষা। তৎপর্য্যায়ঃ। সূক্ষ্মবীজঃ ২ সূক্ষ্মতণ্ডুলঃ ৩ সুবীজঃ ৪। অস্য গুণঃ। পাকে মধুরত্বং। কান্তিবীর্য্যবলপ্রদত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

খস্খসরসঃ ( পুং ) অহিফেনঃ। আফিং ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ ॥

খস্তনী ( স্ত্রী ) পৃথিবী। ইতি ত্রিকাণ্ডশেষঃ ॥

খস্ফাটিকঃ ( পুং ) সূর্য্যকান্তমণিঃ। চন্দ্রকান্তমণিঃ। ইতি হেমচন্দ্রঃ ॥

খাখসঃ ( পুং ) বীজবিশেষঃ। পোস্তাদানা ইতি ভাষা। তৎপর্য্যায়গুণাঃ। তিলভেদঃ খসতিলঃ খাখসশ্চাপি স স্মৃতঃ ॥ * ॥ স্যাদ্বা খসফলোদ্ভূতং বল্কলং শীতলং লঘু ॥ গ্রাহি তিক্তং কষায়ঞ্চ বাতকৃৎ কফকাসহৃৎ। ধাতূনাং শোষকং রূক্ষং মদকৃদ্বাগ্বিবর্দ্ধনং ॥ মুহুর্ম্মোহকরং রুচ্যং সেবনাৎ পুংস্ত্বনাশনং ॥ * ॥ অথ অফেনং। উক্তং খসফলক্ষীরমাফুকমহিফেনকং। আফুকং শোষণং গ্রাহি শ্লেষ্মঘ্নং বাতপিত্তলং ॥ তথা খসফলোদ্ভূতং বল্কলপ্রায়মিত্যপি ॥ * ॥ অথ খসবীজং।

উচ্যন্তে খসবীজানি তে খাখসতিলা অপি ॥ খসবীজানি বল্যানি বৃষ্যাণি সু-গুরূণি চ। জনয়ন্তি কফং তানি শময়ন্তি সমীরণং ॥ ইতি ভাবপ্রকাশঃ ॥

খাজিকঃ (পুং) লাজাঃ। খৈ ইতি ভাষা। ইতি হারাবলী ॥

খাটঃ (পুং স্ত্রী) শবরথঃ। মরার খাট্ ইতি ভাষা। ইতি শব্দরত্নাবলী ॥

খাটিঃ (স্ত্রী) অসদ্গ্রহঃ। কিণঃ। শবরথঃ। ইতি মেদিনী ॥

খাটিকা (স্ত্রী) খাটঃ। শবরথঃ। ইতি শব্দ-রত্নাবলী ॥

খাণ্ডবং (ক্লী) বনবিশেষঃ। তদ্বিবরণং যথা। বিরূপস্যাভবদ্গাধির্গাধের্ম্মিত্রোঽভবৎ সুতঃ। তেষাং কল্লোঽভবদ্রাজা কল্লাত্তু বিজয়োঽভবৎ ॥ যো বিজিত্য ক্ষিতিং সর্ব্বাং পার্থিবান্ ভূরিতেজসা। শক্রস্যানু-মতে চক্রে খাণ্ডবং শতযোজনং ॥ যৎ সব্যসাচী হ্যদহৎ পাণ্ডুপুত্রঃ প্রতাপবান্। আবহন্ পরমাং প্রীতিং জ্বলনস্য মহা-ত্মনঃ ॥ * ॥ ঋষয় ঊচুঃ। কথং স খাণ্ডবং চক্রে বিজয়ঃ শতযোজনং। তদ্বয়ং শ্রোতু-মিচ্ছামঃ কথয়স্ব তপোধন ॥ মার্কণ্ডেয় উবাচ। সোমবংশেঽভবদ্রাজা মহাত্মা স মহাবলঃ ॥ ধীরঃ সুদর্শনো নাম চারুরূপঃ প্রতাপবান্। স বৈ হিমবতো নাতিদূরে ভঙ্ক্ত্বা মহাবনং ॥ সিংহান্ ব্যাঘ্রান্ সমুৎসার্য্য ক্বচিচ্চাপি তপোধনান্। খাণ্ডবীং নাম নগরীমকরোত্তত্র শোভনাং ॥ ত্রিংশ-দ্যোজনবিস্তীর্ণামায়তাং শতযোজনং। উচ্চপ্রাকারসংযুক্তাং সাট্টালাম্বুদতো-রণাং ॥ নিম্নাভির্রতিদীর্ঘাভিঃ পরিখাভিঃ সমাবৃতাং। দীর্ঘিকাভিশ্চোপবনৈর্ব্বহুভি-শ্চাপ্যরোগণৈঃ ॥ আকীর্ণাঞ্চ তথাবাসৈ-রুত্তমৈরপি মানবৈঃ। সোৎসবাঃ সততং যত্র জনা দেবান্ দিবি স্থিতান্ ॥ স্পর্দ্ধন্তে-স্ম মুদা যুক্তা আঢ্যা ভোগসমন্বিতাঃ। স বৈ সুদর্শনো রাজা খাত্বা ভূমিং বিদার্য্য চ ॥ গঙ্গাং কনখলাং দেবীং বাহয়ামাস খাণ্ডবীং। আপ্লাব্য খাণ্ডবীমধ্যং তেন খাতৈশ্চ বর্ত্মভিঃ ॥ বক্রাম্বু বক্রগা ভূত্বা যাতি সীতাং নদীং প্রতি। স জিত্বা সক-লান্ ভূপান্ বিত্তান্যাহৃত্য ভূরিশঃ ॥ রাশীচকার খাণ্ডব্যা মধ্যে রত্নৈরনেকশঃ। অন্যেষাং নগরেভ্যস্তু জনানানীয় ভূপতিঃ ॥ খাণ্ডব্যাং বাসয়ামাস হঠাদপি সুদর্শনঃ। দেবদানবগন্ধর্ব্বান্ জিত্বা জিত্বায়ুধা কৃতী ॥ দেববৃক্ষং দেবরত্নং দেবীঞ্চাপি তথৌ-ষধীং। খাণ্ডব্যাং রোপয়ামাস সহামাত্যঃ সুদর্শনঃ ॥ * ॥ অসহিষ্ণুর্নরপতির্ব্বিজয়স্তং সুদর্শনং। কৃতাপচারং বহুধা দেবানাঞ্চ তথা নৃণাং ॥ বারাণসীপতিং বীরং বিজয়ং জয়শালিনং। সন্ধায় কৃত্বা সাচিব্যং তত্রে-বেশো ন্যযোজয়ৎ ॥ বিজয়ো বিবরং প্রাপ্য মহাবলপরাক্রমঃ। সুদর্শনস্য নৃপতেরবস্কন্দমথাকরোৎ ॥ নাসহৎ সোঽপ্যবস্কন্দং বিজয়স্য সুদর্শনঃ। চতু-রঙ্গবলেনাশু যুদ্ধায়াভিমুখোঽভবৎ ॥ বিজয়ো রথমারুহ্য নিযুজ্য চতুরঙ্গিণীং। সেনাং সুদর্শনং যোদ্ধুং সম্মুখোঽভব-

দণ্ডসা ॥ তদা মহদ্‌যুদ্ধমাসীদ্বিজয়েন মহাত্মনা। সুদর্শনস্য নৃপতের্বৃত্রবাসবয়োরিব ॥ ততঃ সুদর্শনো রাজা দারিতো গদয়াপতৎ। তস্মিন্নিপতিতে বীরে সেনাভিস্তস্য সৈনিকাঃ ॥ ভয়াৎ সংপ্রাদ্রবন্নস্মাদ্দিশঃ প্রদিশ এব চ। নষ্টেষু তস্য সৈন্যেষু বিজয়ঃ খাণ্ডবীং পুরীং ॥ প্রবিশ্য দদৃশে তত্র রাশীভূতান্ গিরীনিব। সুবর্ণানাঞ্চ রত্নানাং সঞ্চয়ান্ বহুশঃ পুরঃ॥ দৃষ্ট্বা সরাংসি তত্রাথ প্রফুল্লকমলানি তু। হংসকারণ্ডবানাদনাদিতানি সমন্ততঃ ॥ রাশীন্ সুবর্ণরত্নানাং পর্ব্বতানিব বিস্তৃতান্। পুষ্পিতান্ দেববৃক্ষাংশ্চ ভ্রমদ্‌ভ্রমরভূষিতান্ ॥ প্রাসাদান্ বিপুলান্ শুভ্রান্ কৈলাসসদৃশান্ গজান্। বিস্ফুটাংশ্চ সুগন্ধাঢ্যান্ প্রতিগেহে ব্যবস্থিতান্ ॥ উৎফুল্লনয়নো রাজা বিজয়ঃ পরবীরহা। মেনেঽমরাবতীং তান্তু পুরীং ক্ষিতিগতামিব ॥ তং বীক্ষন্তং নরপতিং নগরীং তাং সুরেশ্বরঃ। সমেত্য বিজয়ং প্রাহ সান্ত্বয়ন্ শ্লক্ষ্ণয়া গিরা ॥ * ॥ ইন্দ্র উবাচ। রাজন্মহদ্বনমিদমাসীদ্দেবগণাবৃতং। নরগন্ধর্ব্বযক্ষাণাং মুনীনাঞ্চ মনোহরং ॥ সর্ব্বানুৎসার্য্য দেবাদীন্মম চাপ্যপ্রিয়ে রতঃ। ভঙ্‌ক্ত্বা বনমিদং শুহ্বং সমুৎসাদ্য তপোধনং ॥ খাণ্ডবীং নগরীং চক্রে হঠাদ্রাজা সুদর্শনঃ। তদিদং পুনরেব ত্বং বনং কুরু নৃপোত্তম ॥ তত্রাহং বিহরিষ্যামি তক্ষকেণ সমং রহঃ। মুনীনাঞ্চ তপঃস্থানং মণ্ডলং তে প্রসাদতঃ ॥ ভবিষ্যতি চ যক্ষাণাং কিন্নরাণাঞ্চ পার্থিব ॥ * ॥ মার্কণ্ডেয় উবাচ। এতৎ শ্রুত্বা বচস্তস্য শক্রস্য বিজয়স্তদা। বনমেবাকরোত্তাস্তু খাণ্ডবীং শক্রগৌরবাৎ ॥ গচ্ছন্তু ভো যথাস্থানং প্রজাঃ সর্ব্বা যথেচ্ছয়া। যেষাং বাঞ্ছাস্তি লোকানাং মদ্রাজ্যগমনে পুনঃ ॥ বারাণসীং তে গচ্ছন্তু ময়ৈব প্রতিপালিতাং। ততস্তস্য বচঃ শ্রুত্বা জনাঃ কেচিন্নিজং পদং ॥ জগ্মুর্ব্বারাণসীং কেচিদ্বিজয়েনাভিপালিতাং। ততো ধনানাং তান্রাশীন্রত্নানাঞ্চ পৃথক্ পৃথক্ ॥ অশ্মনাং কনকানাঞ্চ কূপ্যানাং বিজয়স্তদা। ধীবরৈর্ব্বাহয়ামাস পুরীং বারাণসীং প্রতি ॥ গন্ধর্ব্বাণাঞ্চ দেবানাং যদা নীতং হঠাৎ পুরা। রত্নদার্ব্বাদিকং যত্তু বিজয়ং তৎ প্রসাদ্য চ ॥ তৈস্তৈর্নীতন্তু খাণ্ডব্যাঃ স্বস্থানং প্রতি হর্ষিতৈঃ। ত্রিংশদ্যোজনবিস্তীর্ণাং শতযোজনমায়তাং॥ তাং পুরীং বিজয়শ্চক্রে ন চিরাদেব বৈ বনং। তস্মিন্ শক্রস্য সম্মত্যা তক্ষকঃ সহিতো গণৈঃ ॥ উবাস সুচিরং তত্র ততোঽভূন্নির্জ্জনং বনং। তত্র দেবাঃ সগন্ধর্ব্বাঃ ক্রীড়ন্তেঽপ্সরসাং গণাঃ ॥ আশংসয়ংশ্চ বিজয়ং রণেষু বিজয়াবহং ॥ * ॥ অষ্টাবিংশতিমে প্রাপ্তে যুগে দ্বাপরশেষতঃ ॥ বহ্নির্ব্রাহ্মণরূপেণ ভিক্ষাং জিষ্ণুমযাচত। দাতুমঙ্গীকৃতে ভিক্ষাং তদা পাণ্ডুসুতেন বৈ ॥ বহ্নিঃ স্বরূপমাস্থায় জিষ্ণুং বচনমব্রবীৎ। অহমগ্নিঃ পাণ্ডুপুত্র যজ্ঞভাগাতিভোজনাৎ॥ ব্যাধিতোঽহং ততো ব্যাধিং মম ত্বং

নাশয়াধুনা। খাণ্ডবং নাম বিপিনং সপক্ষি-মৃগরাক্ষসং ॥ যদি ত্বং মাং ভোজয়িতুং শক্নোষি শ্বেতবাহন। তদা মমাত্যসৌ ব্যাধিরপযাস্যতি নো চিরাৎ ॥ পুরা তু বিজয়ো রাজা খাণ্ডবীং নাম তাং পুরীং। ভঙ্‌ক্ত্বা বনং ততশ্চক্রে তেন তৎ খাণ্ডবং বনং ॥ যদর্থং দেববিহিতং বনং তচ্ছ্বেত-বাহন। বিরোধাত্তত্তু শক্রস্য ন স্বয়ং ভোক্তুমুৎসহে ॥ তস্মাৎ ত্রাহি মহাভাগ বনে তস্মিন্নিয়োজয়। যথাহং সকলং ভোক্তুং প্রাপ্নোমি ত্বৎপ্রসাদতঃ ॥ তস্য তদ্বচনং শ্রুত্বা সব্যসাচী মহাবলঃ। দাহয়া-মাস বিপিনং তৎ সর্ব্বং প্রাণিসংযুতং ॥ দেবকীতনয়েনাসৌ বাসুদেবেন পালিতঃ। খাণ্ডবং দাহয়ামাস জ্বলনস্য হিতে রতঃ ॥ * ॥ সুপ্রীতঃ প্রদদৌ তস্মাদর্জ্জুনায় মহাত্মনে। বহ্নির্ধনুশ্চ গাণ্ডীবং বারুণং দেবনির্ম্মিতং ॥ অক্ষয়াবিষুধী দ্বৌ চ রূপ্যাভাংশ্চতুরো হয়ান্। হনুমতাধি-ষ্ঠিতন্তু মহান্তং বানরধ্বজং ॥ খড়্গঞ্চ ত্রিশিখং তীক্ষ্ণং দহনঃ সব্যসাচিনে। নীরোগশ্চাভবদ্বহ্নিস্তদা জিষ্ণুপ্রসাদতঃ ॥ তৈর্ব্বাণৈস্তেন ধনুষা তেন খড়্গেন কেতুনা। তদশ্বস্যন্দনেনাপি বিজিগ্যে ফাল্গুনো রণে ॥ এবং ভৈরববর্গেষু সংজাতো বিজয়ো নৃপঃ। খাণ্ডবং নাম বিপিনং চকার সুমহাকৃতী ॥ ইতি শ্রীকালিকাপুরাণে ৯০ অধ্যায়ঃ ॥

খাণ্ডবী (স্ত্রী) চন্দ্রবংশীয়সুদর্শনরাজকৃতহিম-বৎপর্ব্বতনিকটস্থপুরীবিশেষঃ। তদ্বিবরণং খাণ্ডবশব্দে দ্রষ্টব্যং ॥

খাণ্ডিকঃ (পুং) খণ্ডপালঃ। মোদকঃ। ময়রা ইতি ভাষা। ইতি হারাবলী ॥

খাতং (ক্লী) পুষ্করিণী। ইত্যমরঃ ॥ তস্য পরিমাণং যথা। শতেন ধনুর্ভিঃ পুষ্ক-রিণী ত্রিভিঃ শতৈর্দীর্ঘিকা চতুর্ভির্দ্রোণঃ পঞ্চভিস্তড়াগঃ দ্রোণদশগুণা বাপীতি ॥ চতুর্বিংশাঙ্গুলো হস্তো ধনুস্তচ্চতু-রুত্তরঃ। শতধন্বন্তরশ্চৈব তাবৎ পুষ্ক-রিণী শুভা। এতৎপঞ্চগুণঃ প্রোক্তস্তড়াগ ইতি নির্ণয়ঃ ॥ ইতি নব্যবর্দ্ধমানধৃতো বশিষ্ঠঃ ॥


খাতকং (ক্লী) পরিখা। খানা পগার ইত্যাদি ভাষা। ইতি হেমচন্দ্রঃ ॥

খাতকঃ (পুং) অধমর্ণঃ। ধারী। ঋণী। যথা। উত্তমর্ণো ধনস্বামী অধমর্ণস্তু খাতকঃ। ইতি সংক্ষিপ্তসারটীকায়াং গোয়ীচন্দ্রঃ ॥

খাতভূঃ (স্ত্রী) প্রতিকূপঃ। পরিখা। ইতি হারাবলী ॥


খাতব্যবহারঃ (পুং) পুষ্করিণ্যাদিপরিমাণং। পুকুরে কালীতি ভাষা। অথ খাতব্যবহারে করণসূত্রং সার্দ্ধার্য্যা। গণয়িত্বা বিস্তারং বহুষু স্থানেষু তদ্যুতির্ভাজ্যা। স্থানকমিত্যা সমমিতিরেবং দৈর্ঘ্যে চ বেধে চ ॥ ক্ষেত্র-ফলং বেধগুণং খাতে ঘনহস্তসংখ্যা স্যাৎ ॥ উদাহরণং। ভুজবক্রতয়া দৈর্ঘ্যং দশেশার্ক-করৈর্ম্মিতং। ত্রিষু স্থানেষু ষট্ পঞ্চ সপ্ত হস্তা চ বিস্তৃতিঃ ॥ যস্য খাতস্য বেধোঽপি দ্বিচতুস্ত্রিকরঃ সখে। তত্র খাতে কিয়ন্তঃ স্যুর্ঘনহস্তাঃ প্রচক্ষ্ব মে ॥

ন্যাসঃ




অত্র সমমিতিকরণেন বিস্তারে হস্তাঃ । ৬ । দৈর্ঘ্যে । ১১ । বেধে । ৩ । তৎক্ষেত্র-দর্শনং যথা ।


ন্যাসঃ




যথোক্তকরণেন লব্ধা ঘনহস্তসংখ্যা ॥ ১৯৮ ॥

খাতান্তরে করণসূত্রং সার্দ্ধবৃত্তং । মুখজতলজতদ্যুতিজক্ষেত্রফলৈক্যং হৃতং ষড়্‌ভিঃ । ক্ষেত্রফলং সমমেতৎ বেধহতং ফলং ঘনফলং স্পষ্টং ॥ সমখাতফলত্র্যংশঃ সূচীখাতে ফলং ভবতি । উদাহরণং । মুখে দশদ্বাদশহস্ততুল্যং বিস্তারদৈর্ঘ্যন্তু তলে তদর্দ্ধং । যস্যাঃ সখে সপ্তকরশ্চ বেধঃ কা খাতসংখ্যা বদ তত্র বাপ্যাং ॥


ন্যাসঃ




মুখজং ক্ষেত্রফলং । ১২০ । তলজং । ৩০ । তদযুতিজং । ২৭০ । এষামৈক্যং । ৪২০ ।


ষড়্‌ভি । ৬ । হৃতং জাতং সমফলং । ৭০ । বেধ ৭ হতং জাতং খাতফলং ঘনহস্তাঃ । ৪৯০ ।

দ্বিতীয়োদাহরণং। খাতেঽথ তিগ্মকরতুল্যচতুর্ভুজে চ কিং স্যাৎ ফলং নবমিতঃ কিল যত্র বেধঃ। বৃত্তে তথৈব দশবিস্তৃতিপঞ্চবেধে সূচীফলং বদ তয়োশ্চ পৃথক্ পৃথঙ্মে ॥




ভুজঃ। ১২। বেধঃ। ৯। জাতং যথোক্তকরণেন খাতফলং ঘনহস্তাঃ। ১২৯৬। সূচীফলং। ৪৩২।

বৃত্তখাতদর্শনায়।




ব্যাসঃ। ১০। বেধঃ। ৫। অত্র সূক্ষ্মপরিধিঃ $\frac{৩৯২৭}{১২৫}$। সূক্ষ্মক্ষেত্রফলং $\frac{৩৯২৭}{৫০}$। বেধগুণং জাতং সূক্ষ্মখাতফলং $\frac{৩৯২৭}{১০}$। সূক্ষ্মসূচীফলং $\frac{১৩০৯}{১০}$। যদ্বা স্থূলখাতফলং $\frac{২৭৫০}{৭}$। সূচীফলং স্থূলং $\frac{২৭৫০}{২১}$

ইতি লীলাবত্যাং খাতব্যবহারঃ সমাপ্তঃ ॥ * ॥

খাত্রং (ক্লী) খাতং। খনিত্রং। ইত্যুণাদিকোষঃ ॥ দারুণং। বনং। সূত্রং। ইতি সংক্ষিপ্তসারে উণাদিবৃত্তিঃ ॥

খাদ ঋ ভক্ষণে। ইতি কবিকল্পদ্রুমঃ ॥ ঋ অচখাদৎ। ইতি দুর্গাদাসঃ ॥

খাদকঃ (ত্রি) ঋণগ্রহীতা। খাতক ইতি খ্যাতঃ। ইতি মিতাক্ষরা॥ ভক্ষকঃ। যথা। বিক্রয়ৈর্গোবিনিময়ৈর্দত্ত্বা গোমাংসখাদকে। ব্রতং চান্দ্রায়ণং কুর্য্যাদ্বধে সাক্ষাদ্বধী ভবেৎ ॥ ইতি প্রায়শ্চিত্ততত্ত্বে গোভিলঃ ॥

খাদনং (ক্লী) ভক্ষণং। আহারঃ। দন্তে পুং। ইতি হেমচন্দ্রঃ ॥

খাদিতং (ত্রি) ভক্ষিতং। খাওয়া ইতি ভাষা। ইত্যমরঃ ॥

খাদিরসারঃ ( পুং ) খদিরবৃক্ষনির্য্যাসঃ। খএর ইতি ভাষা। তৎপর্য্যায়ঃ। খাদিরঃ ২ অদ্ভুতসারঃ ৩ সৎসারঃ ৪ রঙ্গদঃ ৫ রঙ্গঃ ৬। অস্য গুণাঃ। কটুত্বং। তিক্তত্বং। উষ্ণত্বং। কফবাতব্রণকণ্ঠাময়নাশিত্বং। রুচিকারিত্বং। দীপনত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ খদিরসারোঽপি পাঠঃ॥

খাদুকঃ ( ত্রি ) হিংসালুকঃ। ইতি হারাবলী॥

খাদ্যং ( ত্রি ) ভক্ষণীয়দ্রব্যং। যথা। কস্ত্বং ভদ্রখলেশ্বরোঽহমিহ কিং ঘোরে বনে স্থীয়তে শার্দ্দূলাদিভিরেব হিংস্রপশুভিঃ খাদ্যোঽহমিত্যাশয়া। ইত্যুদ্ভটঃ॥

খানপানং ( ক্লী ) কঠিনদ্রবদ্রব্যয়োর্গলাধঃকরণং। খানা পিনা ইতি হিন্দী ভাষা। যথা। সম্ভাবেন হি তুষ্যন্তি দেবাঃ সৎপুরুষা দ্বিজাঃ। ইতরাঃ খানপানেন বাক্প্রদানেন পণ্ডিতাঃ॥ ইতি গারুড়ে নীতিসারে ১০৯ অধ্যায়ঃ॥

খানিঃ ( স্ত্রী ) খনিঃ। ইতি হেমচন্দ্রঃ॥

খানিকং ( ক্লী ) কুড্যচ্ছেদ্যং। দেয়ালের গর্ত্ত ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ॥

খানিলঃ ( ত্রি ) ভিত্তিচৌরঃ। সিঁদেল চোর ইতি ভাষা। ইতি শব্দরত্নাবলী॥

খানী ( স্ত্রী ) খনিঃ। ইতি শব্দরত্নাবলী॥

খানোদকঃ ( পুং ) নারিকেলঃ। ইতি ত্রিকাণ্ডশেষঃ॥

খাপগা ( স্ত্রী ) গঙ্গা। ইতি হেমচন্দ্রঃ॥

খারঃ ( পুং ) খারীপরিমাণং। ইতি হড্ডচন্দ্রঃ॥

খারিঃ ( স্ত্রী ) খারীপরিমাণং। ইতি ভরতধৃতহড্ডচন্দ্রঃ॥

খারিকং ( ক্লী ) মহাপারেবতং। ইতি রাজনির্ঘণ্টঃ॥

খারিম্পচঃ ( ত্রি ) খারিপরিমিতান্নাদিপাককর্ত্তা। ইতি ব্যাকরণং॥

খারী ( স্ত্রী ) পরিমাণবিশেষঃ। ইত্যমরঃ॥ যদাহুঃ। পলং প্রকুঞ্চকং মুষ্টিঃ কুড়বস্তচ্চতুষ্টয়ং। চত্বারঃ কুড়বাঃ প্রস্থশ্চতুঃপ্রস্থমথাঢ়কং॥ অষ্টাঢ়কো ভবেদ্দ্রোণো দ্বিদ্রোণঃ সূর্প উচ্যতে। সার্দ্ধসূর্পো ভবেৎ খারী দ্বে খার্য্যৌ গোণ্যুদাহৃতা॥ তামেব ভারং জানীয়াৎ বাহো ভারচতুষ্টয়ং। ইতি তট্টীকায়াং ভরতঃ॥ ষোড়শদ্রোণপরিমাণং। ইত্যমরটীকায়াং স্বামী লীলাবতী চ॥ গোণীচতুষ্টয়ং। তত্তু ষণ্ণবত্যধিকচতুঃসহস্রপলানি। পাঁচশতবারশের ইতি ভাষা। ইতি বৈদ্যকপরিভাষা॥ দ্রোণচতুষ্টয়ং। যথা। চতুরাঢ়কো ভবেদ্দ্রোণঃ খারী দ্রোণচতুষ্টয়ং। ইতি স্মৃতিঃ॥

খারীকং ( ত্রি ) খারীক্ষেত্রং। খারীপরিমিতবীজবপনোপযুক্তক্ষেত্রং। তৎপর্য্যায়ঃ। খারীবাপঃ ২। ইত্যমরঃ॥

খারীবাপঃ ( ত্রি ) খারীকঃ। ইত্যমরঃ॥

খিখিঃ ( স্ত্রী ) কিখিঃ। খ্যাঁক্‌শেয়ালী ইতি ভাষা। ইতি কচিৎ ত্রিকাণ্ডশেষে পাঠঃ॥

খিঙ্খিরঃ ( পুং ) শিবাভেদঃ। খ্যাঁক্‌শেয়ালী ইতি ভাষা। খট্বাঙ্গং। তত্তু শিবস্যাস্ত্রং।

বারিবালকং। তত্তু গন্ধদ্রব্যং। ইতি বিশ্বো হেমচন্দ্রশ্চ ॥

খিট ভয়ভীষয়োঃ। ইতি কবিকল্পদ্রুমঃ ॥ ভীষা স্বতো ভয়োৎপাদনা। খেটতি জনো ব্যাঘ্রাদ্বিভেতীত্যর্থঃ। খেটতি ব্যাঘ্রো জনং ভীষয়তে ইত্যর্থঃ। ইতি দুর্গাদাসঃ ॥

খিদ শ প ঔ পরিঘাতে। ইতি কবিকল্পদ্রুমঃ ॥ শ প খিন্দতি দুষ্টং রাজা। ঔ খেত্ত্বা। ইতি দুর্গাদাসঃ ॥

খিদ ঙ ধ য ঔ দৈন্যকে। ইতি কবিকল্পদ্রুমঃ॥ দৈন্যকমুপতপ্তীভাবঃ। ঙ ধ খিন্তে তেঘেব যে দ্রব্যং দীয়মানং ন গৃহ্লতে। ইতি হলায়ুধঃ ॥ ঙ য স্বসুখনিরভিলাষঃ খিদ্যতে লোকহেতোরিতি শাকুন্তলে। ঔ খেত্ত্বা। ইতি দুর্গাদাসঃ ॥

খিদিরঃ (পুং) চন্দ্রঃ। ইত্যুণাদিকোষঃ ॥ দীনঃ। তাপসঃ। ইতি সংক্ষিপ্তসারে উণাদিবৃত্তিঃ ॥

খিদ্যমানঃ (ত্রি) খেদযুক্তঃ। দৈন্যগ্রস্তঃ। উপতপ্তঃ। যথা। খিদ্যমানস্তু তং দৃষ্ট্বা সূর্য্যঃ কৃষ্ণাত্মজং তদা। ইতি শাম্বপুরাণে সূর্য্যস্তবঃ ॥

খিদ্রঃ (পুং) রোগঃ। দরিদ্রঃ। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ ॥

খিন্নঃ (ত্রি) দৈন্যগ্রস্তঃ। খেদযুক্তঃ। যথা। গৌর্ভূত্বাশ্রুমুখী খিন্না রুদন্তী করুণং বিভোঃ। ইতি শ্রীভাগবতং ॥

খিরহিট্টী (স্ত্রী) মহাসমঙ্গা। ইতি রাজ-

খিলং (ত্রি) হলাদিনা অকৃষ্টভূমিঃ। খিল ভুঁই ইতি ভাষা। তৎপর্য্যায়ঃ। অপ্রহতং ২। ইত্যমরঃ ॥ সারসংক্ষিপ্তে বেধসি চ পুং। ইতি মেদিনী ॥ খিলো নারায়ণঃ প্রোক্ত ইষবস্তদ্গুণাঃ স্মৃতাঃ। ইতি খিলেষু হরিবংশে ইত্যত্র নীলকণ্ঠটীকা ॥

খু ঙ ধ্বনৌ। ইতি কবিকল্পদ্রুমঃ ॥ ঙ খবতে। ইতি দুর্গাদাসঃ ॥

খুঙ্গাহঃ (পুং) কৃষ্ণবর্ণঘোটকঃ। ইতি হেমচন্দ্রঃ॥

খুজ উ স্তেয়ে। ইতি কবিকল্পদ্রুমঃ ॥ উ খোজিত্বা খুক্ত্বা। স্তেয়ং চৌর্য্যং। ইতি দুর্গাদাসঃ ॥

খুজ্জাকঃ (পুং) দেবতাড়বৃক্ষঃ। ইতি রত্নমালা ॥ খুঞ্জাক ইতি কচিৎ পাঠঃ ॥

খুড ই ঙ খঞ্জে। ইতি কবিকল্পদ্রুমঃ ॥ পঞ্চমস্বরী। খঞ্জঃ খোটনং। ই খুণ্ড্যতে। ঙ খুণ্ডতে খোড়ঃ। ইতি দুর্গাদাসঃ ॥

খুড ক } ভেদে। ইতি কবিকল্পদ্রুমঃ॥<br>খুড ই ক } দ্বৌ পঞ্চমস্বরিণৌ। ক খোড়য়তি। দ্বিতীয় আদ্যস্বরীতি কাতন্ত্রাদ্যাঃ। স্বমতে তু দ্বিতীয়স্যাদ্যস্বরিত্বে পূর্ব্বোঽপীদনুবন্ধঃ স্যাৎ। পঞ্চমস্বরিত্বে তু স্বজাতীয়স্য পুনঃপাঠাৎ পূর্ব্বো নেদনুবন্ধঃ। খুণ্ডয়তি। খণ্ডয়তীতি প্রয়োগস্তু খড়িঙ্ মথীত্যস্মাৎ ঘঞি খণ্ডং করোতীতি ঞৌ সাধ্যং। তস্য ভেদবাচিত্বন্তু ধাতুনামনেকার্থত্বাৎ। ইতি দুর্গাদাসঃ ॥

খুর শ বিলেখনে। ছেদনে। ইতি কবিকল্পদ্রুমঃ॥ শ খুরতি ভূমিং তৃণং বা লোকঃ। খোরিতা। খুরঃ শফং। ইতি দুর্গাদাসঃ ॥

খুরঃ (পুং) শফং। গবাদীনাং পাদাগ্রং। কোলদলং। নখীনামগন্ধদ্রব্যং। ইতি মেদিনী॥ ছেদনবস্তু। নাপিতস্য খুরঃ। ইতি শব্দরত্নাবলী॥ খট্বাদীনাং পাদুকং। খুরা ইতি ভাষা। ইতি ধরণী॥

খুরকঃ (পুং) তিলবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥

খুরণসঃ (ত্রি) চিপিটনাসিকঃ। চেপটানাক-যুক্ত ইতি ভাষা। ইত্যমরঃ॥

খুরণাঃ (ত্রি) খুরণসঃ। ছেপড়ানাসিকাযুক্ত ইতি ভাষা। ইত্যমরঃ॥

খুরপ্রঃ (পুং) বাণবিশেষঃ। খুরপা ইতি ভাষা। ইত্যমরটীকায়াং স্বামী॥

খুরলী (স্ত্রী) শরাভ্যাসঃ। ইতি হেমচন্দ্রঃ॥

খুরাকঃ (পুং) পশুঃ। ইত্যুণাদিকোষঃ॥

খুরালকঃ (পুং) লৌহময়বাণঃ। ইতি শব্দ-মালা॥

খুরালিকঃ (পুং) গ্রামণীভণ্ডিঃ। নাপিতের ভাঁড়ি ইতি ভাষা। নারাচঃ। উপধানং। ইতি মেদিনী॥ খরালিকোঽপি পাঠঃ॥

খুর্দ্দ ঙ ক্রীড়ায়াং। ইতি কবিকল্পদ্রুমঃ॥ পঞ্চমস্বরী। দীর্ঘিণঃ পৃথক্‌পাঠাৎ পূর্ব্বস্য ন দীর্ঘঃ। ঙ খুর্দ্দতে। ইতি দুর্গাদাসঃ॥

খুল্লং (ক্লী) নখীনামগন্ধদ্রব্যং। ইতি শব্দ-চন্দ্রিকা॥ ক্ষুদ্রে নীচে চ ত্রি॥

খুল্লকঃ (ত্রি) স্বল্পঃ। নীচঃ। কনিষ্ঠঃ। দরিদ্রঃ। নিষ্ঠুরঃ। খলঃ। ইত্যমর-টীকা॥

খুল্লতাতঃ (পুং) পিতৃকনিষ্ঠভ্রাতা। খুড়া ইতি ভাষা। ইতি শব্দরত্নাবলী॥

খুল্লমঃ (পুং) পন্থাঃ। ইতি ত্রিকাণ্ডশেষঃ॥

[illegible] ॥ ষষ্ঠস্বরী। ঙ খূর্দ্দতে। ইতি দুর্গাদাসঃ॥

খেখীরকঃ (পুং) শব্দবতী যষ্টিঃ। ইতি হারা-বলী

খেগমনঃ (পুং) কালকণ্ঠপক্ষী। ইতি শব্দ-মালা॥

খেচরঃ (পুং) শিবঃ। ইতি শব্দরত্নাবলী॥ বিদ্যাধরঃ। ইতি জটাধরঃ॥ পারদঃ। ইতি রাজনির্ঘণ্টঃ॥ আকাশচারিণি ত্রি॥

খেচরান্নং (ক্লী) দ্বিদলাদিসহিতপক্বতণ্ডুলং। খিচড়ীতি ভাষা। ইতি পাকরাজেশ্বরঃ॥

খেট ৎ ক ভক্ষণে। ইতি কবিকল্পদ্রুমঃ॥ অচিখেটৎ। ইতি দুর্গাদাসঃ॥

খেটং (ক্লী) তৃণং। ইতি শব্দরত্নাবলী॥ খেট্টমপি পাঠঃ॥

খেটঃ (পুং) গ্রহঃ। যথা। যস্মিন্ রাশৌ স্থিতঃ খেটস্তেন তং পরিপূরয়েৎ। ইত্যাদি ভাববিবেকঃ॥

খেটঃ (ত্রি) অধমঃ। ইত্যমরঃ॥ ঘোটকঃ। ইতি শব্দরত্নাবলী॥ সুনিন্দকঃ। ইতি বিশ্বঃ॥ সুনন্দক ইতি পাঠে বলরামস্ত গদা ইতি কশ্চিৎ॥

খেটঃ (পুং ক্লী) মৃগয়া। ইত্যমরহেমচন্দ্রৌ॥ কফঃ। গ্রামভেদঃ। স তু কর্ষকগ্রামঃ। চর্ম্ম। ইতি মেদিনীশব্দরত্নাবল্যৌ॥

খেটকঃ (পুং) গ্রামভেদঃ। চাসার গাঁ ইতি ভাষা। ইতি জটাধরঃ॥ ফলকং। ইতি হেমচন্দ্রঃ॥ খেটকং বসুনন্দকে। ইতি হারাবলী॥ বসুনন্দকো ধনবৃদ্ধিজীবক ইতি তৎসূচী॥ বলদেবস্ত গদা ইতি কশ্চিৎ॥

খেটঃ } (পুং) যষ্টিঃ। যথা। যষ্টিরূপেণ
খেটকঃ } খেট ত্বমরিসংহারকারকঃ। দেবী-
হস্তস্থিতো নিত্যং মম রক্ষাং কুরুষ্ব চ॥
ইতি শারদীয়দুর্গাপূজাপদ্ধতৌ অস্ত্রপূজা-
প্রকরণং॥ খেটকং পূর্ণচাপঞ্চ পাশমঙ্কুশ-
মেব চ। ইতি চ তত্র দশভুজায়া দুর্গায়া
ধ্যানং॥

খেটিতালঃ (পুং) বৈতালিকঃ। ইতি শব্দ-
মালা॥

খেটী [ন্] (পুং) নাগরঃ। কামী। ইতি শব্দ-
মালা॥

খেড ৎ ক ভক্ষণে। ইতি কবিকল্পদ্রুমঃ॥
অচিখেড়ৎ। ইতি দুর্গাদাসঃ॥

খেদঃ (পুং) শোকঃ। ইতি হেমচন্দ্রঃ॥ অব-
সন্নতা। ইতি জটাধরঃ॥

খেদিনী (স্ত্রী) অশনপর্ণীবৃক্ষঃ। লতা। ইতি
শব্দচন্দ্রিকা॥

খেয়ং (ক্লী) পরিখা। গড়খাই ইতি ভাষা।
ইত্যমরঃ॥ খননীয়ং। ইতি ব্যাকরণং॥

খেল ঋ চালে। গত্যাং। ইতি কবিকল্প-
দ্রুমঃ॥ কবর্গদ্বিতীয়াদিঃ। অচিখেলৎ।
চালঃ কম্পঃ। চালঃ কৈশ্চিন্ন মন্যতে।
ইতি দুর্গাদাসঃ॥

খেলনং (ক্লী) ক্রীড়নং। ইতি হলায়ুধঃ॥

খেলনী (স্ত্রী) শারিফলং। ইতি হেমচন্দ্রঃ॥

খেলা (স্ত্রী) খেলনং। তৎপর্য্যায়ঃ। ক্রীড়া ২
কূর্দ্দনং ৩। ইত্যমরঃ॥

খেলিঃ (স্ত্রী) গীতং। বাণঃ। সূর্য্যঃ। পক্ষী।
জন্তুঃ। ইত্যজয়পালঃ॥

খেব ঋ ঙ সেবে। ইতি কবিকল্পদ্রুমঃ॥
ঋ অচিখেবৎ। ঙ খেবতে। ইতি দুর্গা-
দাসঃ॥

খেসরঃ (পুং) জন্তুবিশেষঃ। খচর ইতি
ভাষা। তৎপর্য্যায়ঃ। অশ্বখরজঃ ২ সকৃদ্-
গর্ভঃ ৩ অধ্বগঃ ৪ ক্ষমী ৫ সন্তুষ্টঃ ৬
মিশ্রজঃ ৭ মিশ্রশব্দঃ ৮ অতিভারগঃ ৯।
ইতি রাজনির্ঘণ্টঃ॥

খৈ স্থৈর্য্যে। খননে। হিংসায়াং। ইতি
কবিকল্পদ্রুমঃ॥ খায়তি। ইতি দুর্গাদাসঃ॥

খোঙ্গাহঃ (পুং) শ্বেতপিঙ্গলাশ্বঃ। ইতি হেম-
চন্দ্রঃ॥ খাঙ্গাহোঽপি পাঠঃ॥

খোট ঋ গত্যাঘাতে। ইতি কবিকল্পদ্রুমঃ॥
ঋ অচুখোটৎ। গত্যাঘাতঃ খোটনং।
খোটতি খঞ্জঃ। ইতি দুর্গাদাসঃ॥

খোট ৎ ক ক্ষেপে। ইতি কবিকল্পদ্রুমঃ॥
অচুখোটৎ। ইতি দুর্গাদাসঃ॥

খোটিঃ (স্ত্রী) চতুরা স্ত্রী। ইতি শব্দমালা॥
খোরিরিত্যপি পাঠঃ॥

খোটী (স্ত্রী) পালঙ্কীবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥
চতুরাপি॥

খোড ঋ খোটনে। ইতি কবিকল্পদ্রুমঃ॥
ঋ অচুখোড়ৎ। খোড়তি খঞ্জঃ। রমা-
নাথস্তু খোড়তি বালা ক্রিমিমিত্যুদাহৃত-
বান্। ইতি দুর্গাদাসঃ॥

খোড ৎ ক ক্ষেপে। ইতি কবিকল্পদ্রুমঃ॥
অচুখোড়ৎ। ইতি দুর্গাদাসঃ॥

খোড়ঃ (ত্রি) খঞ্জঃ। খোঁড়া ইতি ভাষা।
ইত্যমরঃ॥

খোড়কশীর্ষকং (ক্লী) কপিশীর্ষং। ক্রমশীর্ষং।
ইতি ত্রিকাণ্ডশেষঃ॥

খোর ঋ খোটনে । গতিবৈকল্যে ইতি যাবৎ। ইতি কবিকল্পদ্রুমঃ॥ ঋ অচু-খোরৎ.। খোরতি খঞ্জঃ। ইতি দুর্গা-দাসঃ॥

খোরঃ (ত্রি) খঞ্জঃ। ইতি হেমচন্দ্রঃ॥

খোল ঋ খোটনে । গতিবৈকল্যে । ইতি কবিকল্পদ্রুমঃ॥ ঋ অচুখোলৎ। খোলতি খঞ্জঃ। রমানাথস্তু খোলতি বালা ক্রিমি-রিত্যুদাহৃতবান্। ইতি দুর্গাদাসঃ॥

খোলঃ (ত্রি) খঞ্জঃ। ইতি শব্দমালা॥

খোলকঃ (পুং) পাকঃ। খোলা ইতি ভাষা। শিরস্ত্রঃ। খোপড়া ইতি ভাষা। বল্মীকঃ। উয়ের ঢিপি ইতি ভাষা। পূগকোষঃ। গুয়ার ছোবড়া ইতি ভাষা। ইতি মেদিনী॥

খোলিঃ (স্ত্রী) তূণঃ। ইতি শব্দমালা॥

খোল্মুকঃ (পুং) মঙ্গলগ্রহঃ। ইতি ত্রিকাণ্ড-শেষঃ॥

খ্যা ল খ্যাতৌ। কথনে। ইতি কবিকল্প-দ্রুমঃ॥ খ্যাতিঃ প্রসিদ্ধিঃ। ল খ্যাতি গুণী প্রসিদ্ধঃ স্যাদিত্যর্থঃ। খ্যাতি সাধুঃ কথাং হরেঃ। তথা চ। খ্যা প্রকথনে। প্রকথনং প্রসিদ্ধিরিতি গোবিন্দভট্টঃ। খ্যা প্রকথনে ইতি চতুর্ভুজজুমরৌ। ইতি দুর্গাদাসঃ॥

খ্যাতঃ (ত্রি) খ্যাতিযুক্তঃ। তৎপর্য্যায়ঃ। প্রতীতঃ২ প্রথিতঃ৩ বিত্তঃ৪ বিজ্ঞাতঃ৫ বিশ্রুতঃ৬। ইত্যমরঃ॥

খ্যাতগর্হণঃ (ত্রি) প্রসিদ্ধকুৎসনঃ। তৎ-পর্য্যায়ঃ। অবগীতঃ২। ইত্যমরঃ॥

খ্যাতগর্হিতঃ (ত্রি) খ্যাতগর্হণঃ। ইতি জটা-ধরঃ

খ্যাতিঃ (স্ত্রী) প্রসিদ্ধিঃ। তৎপর্য্যায়ঃ প্রথা ২। ইত্যমরঃ॥

## গ

গ গকারঃ। স তু ব্যঞ্জনতৃতীয়বর্ণঃ। অস্যো-চ্চারণস্থানং কণ্ঠঃ। ইতি ব্যাকরণং॥ *॥ গকারং পরমেশানি পঞ্চদেবাত্মকং সদা। নির্গুণং ত্রিগুণোপেতং নিরীহং নির্ম্মলং সদা॥ পঞ্চপ্রাণময়ং বর্ণং সর্ব্বশক্ত্যাত্মকং প্রিয়ে। অরুণাদিত্যসঙ্কাশাং কুণ্ডলীং প্রণমাম্যহং॥ ইতি কামধেনুতন্ত্রং॥ *॥ সসর্গঃ শ্লেষিতঃ কণ্ঠে বায়ুনা কাদিমীর-য়েৎ। বর্গস্পর্শনমাত্রেণ কং স্বরস্পর্শনা-ত্তু খং॥ স্তোকগম্ভীরসংস্পর্শাদ্গঘৌ গুঞ্চ বহির্গতং। ইতি প্রপঞ্চসারঃ॥ *॥ তস্য লেখনপ্রকারাদির্যথা। অধঃকুঞ্চিতরেখা যা গাণেশী সা প্রকীর্ত্তিতা। ততো দক্ষগতা যা তু কমলা তত্র সংস্থিতা॥ অধোগতা ততো যা তু তস্যামীশঃ সদা বসেৎ। অধোমুখেন গতা পুনরূর্দ্ধমুখেনাগতে-ত্যর্থঃ॥ *॥ তস্য ধ্যানং যথা। ধ্যানমস্যাঃ প্রবক্ষ্যামি শৃণুষ্ব বরবর্ণিনি। দাড়িমীপুষ্প-সঙ্কাশাং চতুর্ব্বাহুসমন্বিতাং॥ রক্তাম্বর-ধরাং নিত্যাং রত্নালঙ্কারভূষিতাং। এবং ধ্যাত্বা ব্রহ্মরূপাং তন্মন্ত্রং দশধা জপেৎ॥ ইতি বর্ণোদ্ধারতন্ত্রং॥ *॥ তস্য নামানি যথা। গোগৌরী গৌরবো গঙ্গা গণেশো

গোকুলেশ্বরঃ। শার্ঙ্গী পঞ্চাত্মকো গাথা গন্ধর্ব্বঃ সর্ব্বগঃ স্মৃতিঃ ॥ সর্ব্বসিদ্ধিঃ প্রভা ধূম্রা দ্বিজাখ্যঃ শিবদর্শনঃ। বিশ্বাত্মা গৌঃ পৃথগ্রূপা বালবদ্ধস্ত্রিলোচনঃ ॥ গীতং সরস্বতী বিদ্যা ভোগিনী নন্দনো ধরা। ভোগবতী চ হৃদয়ং জ্ঞানং জালন্ধরো লবঃ ॥ ইতি নানাতন্ত্রাহৃতনামানি ॥

গং (ক্লী) গীতং। ইত্যেকাক্ষরকোষঃ ॥

গঃ (পুং) গণেশঃ। গন্ধর্ব্বঃ। ইত্যেকাক্ষরকোষঃ ॥

গগনং (ক্লী) আকাশং। ইত্যমরঃ ॥ তৎপর্য্যায়ঃ। বর্হিঃ ১৯ ধম্ব ২০ আপঃ ২১ পৃথিবী ২২ ভুঃ ২৩ স্বয়ম্ভুঃ ২৪ অধ্বা ২৫ সগরঃ ২৬ সমুদ্রঃ ২৭ অধ্বরঃ ২৮। ইতি বেদনিঘণ্টৌ ১ অধ্যায়ঃ ॥ * ॥ অমরোক্তপর্য্যায়াঃ আকাশশব্দে দ্রষ্টব্যাঃ ॥ আকাশং প্রথমং ভূতং শ্রোত্রমধ্যাত্মমুচ্যতে। অধিভূতং তথা শব্দো দিশস্তত্রাধিদৈবতং ॥ ইত্যাশ্বমেধিকপর্ব্ব ॥ তস্য গুণাঃ। শব্দঃ ১ ব্যাপৃত্বং ২ ছিদ্রতা ৩ অনাশ্রয়ং ৪ অনালম্বং ৫ আশ্রয়ান্তরশূন্যং। অব্যক্তং ৬ রূপস্পর্শশূন্যত্বাৎ। অধিকারিতা ৭ দ্রব্যান্তরানারম্ভকত্বং। অপ্রতীঘাতিতা ৮ ভূতত্বং ৯ শ্রোত্রেন্দ্রিয়োপাদানত্বাৎ। বিকৃতানি ১০ দেহান্তর্গতচ্ছিদ্রাণি। তদ্যথা। আকাশস্য গুণঃ শব্দো ব্যাপৃত্বং ছিদ্রমেব চ। অনাশ্রয়মনালম্বমব্যক্তমবিকারিতা ॥ অপ্রতীঘাতিতা চৈব ভূতত্বং বিকৃতানি চ। গুণাঃ পঞ্চাশতঃ প্রোক্তাঃ পঞ্চভূতাত্মভূততা ॥ পঞ্চানাং ভূতানাং আত্মা প্রাপ্তিঃ স্বকং স্বরূপং তত্র লক্ষিতা। ইতি মোক্ষধর্ম্মঃ ॥

গগনধ্বজঃ (পুং) মেঘঃ। ইতি হারাবলী ॥ সূর্য্যঃ। ইতি হেমচন্দ্রঃ ॥

গগনাধ্বগঃ (পুং) সূর্য্যঃ। ইতি হেমচন্দ্রঃ ॥

গগনেচরঃ (পুং) গ্রহঃ। নক্ষত্রং। ইতি সিদ্ধান্তশিরোমণিঃ ॥

গগনোল্মুকঃ (পুং) মঙ্গলগ্রহঃ। ইতি হারাবলী ॥

গগ্ঘ হসনে। ইতি কবিকল্পদ্রুমঃ ॥ কণ্ঠ্যবর্গতৃতীয়োপধঃ। গগ্ঘতি। ইতি দুর্গাদাসঃ ॥

গঙ্গকা (স্ত্রী) গঙ্গা। ইতি মুগ্ধবোধং ॥

গঙ্গা (স্ত্রী) স্বনামখ্যাতনদী। তদধিষ্ঠাত্রী দেবতা চ। তৎপর্য্যায়ঃ। বিষ্ণুপদী ২ জহ্নুতনয়া ৩ সুরনিম্নগা ৪ ভাগীরথী ৫ ত্রিপথগা ৬ ত্রিস্রোতাঃ ৭ ভীষ্মসূঃ ৮। ইত্যমরঃ ॥ অর্ঘ্যতীর্থং ৯ তীর্থরাজঃ ১০। ইতি পদ্মপুরাণং ॥ ত্রিদশদীর্ঘিকা ১১ কুমারসূঃ ১২ সরিদ্বরা ১৩ সিদ্ধাপগা ১৪ স্বরাপগা ১৫ স্বর্গ্যাপগা ১৬ খাপগা ১৭ ঋষিকুল্যা ১৮ হৈমবতী ১৯ স্বর্বাপী ২০ হরশেখরা ২১। ইতি হেমচন্দ্রঃ ॥ সুরাপগা ২২ ধর্ম্মদ্রবী ২৩ সুধা ২৪ জহ্নুকন্যা ২৫ গান্দিনী ২৬ রুদ্রশেখরা ২৭ নন্দিনী ২৮ অলকনন্দা ২৯ সিতসিন্ধুঃ ৩০। ইতি জটাধরঃ ॥ অধ্বগা ৩১ উগ্রশেখরা ৩২ সিদ্ধসিন্ধুঃ ৩৩। ইতি ত্রিকাণ্ডশেষঃ ॥ স্বর্গসরিদ্বরা ৩৪ মন্দাকিনী ৩৫ জাহ্নবী ৩৬ পুণ্যা ৩৭ সমুদ্রসুভগা ৩৮ স্বর্নদী ৩৯ সুরদীর্ঘিকা ৪০

সুরনদী ৪১ স্বর্ধুনী ৪২ জ্যেষ্ঠা ৪৩ জহ্নুসুতা ৪৪ ভীষ্মজননী ৪৫ শুভ্রা ৪৬ শৈলেন্দ্রজা ৪৭। ভবায়না ৪৮। ইতি শব্দরত্নাবলী॥ অস্যা জলস্য গুণাঃ শীতত্বং। স্বাদুত্বং। স্বচ্ছত্বং। অত্যন্তরুচ্যত্বং। পথ্যত্বং। পাবনত্বং। পাপহারিত্বং। তৃষ্ণামোহধ্বংসনত্বং। দীপনত্বং। প্রজ্ঞাধারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ * ॥ অস্যা উৎপত্তিস্তু হিমালয়াৎ সুমেরুদুহিতরি মনোরমায়াং। হিমালয়ঃ প্রার্থিতঃ সন্ দেবেভ্য ইমাং দত্তবান্। তাং নীত্বা দেবাঃ স্বর্গং গতবন্তঃ॥ * ॥ পৃথিব্যামস্যা অবতরণকারণং। সগররাজস্য সুতান্ কপিলশাপেন ভস্মীভূতানুদ্ধর্ত্তুং ভগীরথরাজঃ পৃথিব্যাং গঙ্গানয়নায় তপস্তেপে। ততো ব্রহ্মা তুষ্টস্তস্মৈ তং বরং দত্ত্বা গঙ্গাধারণার্থং শিবারাধনং কর্ত্তুমুক্তবান্। স শিবং পর্য্যতোষয়ৎ। শিবোঽপি হিমালয়পর্ব্বতং গত্বা জটা বিকীর্য্য পতেতি গঙ্গামব্রবীৎ। সা তজ্জটাসু পতিত্বা সম্বৎসরপর্য্যন্তং বভ্রাম। ততঃ শিবো ভগীরথপ্রার্থনয়া জটামেকামুৎক্ষিপ্য তামুৎসসর্জ্জ। সাতিবেগেন পৃথিবীতলমাগত্য ভগীরথস্য পশ্চাৎ পশ্চাজ্জগাম। স সগরপুত্রকৃতখাতেন তাং রসাতলমানীয় তজ্জলেন তাংস্তর্পয়ামাস। তে পূতাঃ স্বর্গং গতবন্তঃ। ইতি বাল্মীকিরামায়ণমতং॥ * ॥ প্রকারান্তরং। বামনদেবস্য বলেঃ সকাশাত্ত্রিলোকহরণকালে ব্রহ্মাণ্ডোপরিগতবামপাদাঙ্গুষ্ঠনখজনিতবিবরেণ ব্রহ্মাণ্ডোর্দ্ধস্থিতা যা জলধারা তচ্চরণস্পর্শেন পবিত্রা ধ্রুবলোকে পপাত। ততো দেবমার্গেণ সুমেরুপর্ব্বতোপরি ব্রহ্মসদনে পতিত্বা সীতালকনন্দা বংক্ষুর্ভদ্রেতি চতুর্দ্ধা ভূত্বা চতুর্দ্দিশং লবণসমুদ্রং প্রবিষ্টা। তত্র সীতা ব্রহ্মসদনাৎ কেশরাচলশৃঙ্গেভ্যোঽধোঽধঃ স্রবন্তী গন্ধমাদনমূর্দ্ধসু পতিত্বা ভদ্রাশ্ববর্ষমধ্যেন প্রাচ্যাং দিশ্যেবং বংক্ষুর্মাল্যবচ্ছিখরান্নিপত্য কেতুমালবর্ষমধ্যেন প্রতীচ্যাম্পরং ভদ্রা গিরিশৃঙ্গাণ্যতিক্রম্য শৃঙ্গবতঃ শিখরান্নিপত্য উত্তরকুরুবর্ষমধ্যেনোদীচ্যামতোঽলকনন্দা বহুপর্ব্বতশৃঙ্গাণ্যতিক্রম্য হিমকূটান্নিপত্য ভারতবর্ষমধ্যেন দক্ষিণস্যাং দিশ্যেবংক্রমেণ লবণসমুদ্রং সর্ব্বাঃ প্রবিষ্টাঃ। ইতি ভাগবতমতং॥ * ॥ অস্যাঃ পৃথিব্যামবতরণকালস্তু আদিত্যপুরাণে। বৈশাখশুক্লপক্ষে তু তৃতীয়ায়াং যুধিষ্ঠির। যবানুৎপাদয়ামাস যুগঞ্চারব্ধবান্ কৃতং॥ ব্রহ্মলোকাৎ ত্রিপথগাং পৃথিব্যামবতারয়ৎ। তস্যাং কার্য্যো যবৈর্হোমো যবৈর্বিষ্ণুং সমর্চ্চয়েৎ॥ * ॥ অস্যা হিমালয়ান্নির্গতায়া দশহরা সংজ্ঞা। তথা চ স্মৃতিঃ। জ্যৈষ্ঠে মাসি ক্ষিতিসুতদিনে শুক্লপক্ষে দশম্যাং হস্তে শৈলান্নিরগমদিয়ং জাহ্নবী মর্ত্তলোকং। পাপান্যস্যাং হরতি চ তিথৌ সা দশেত্যাহুরার্য্যাঃ পুণ্যং দদ্যাদপি শতগুণং বাজিমেধাযুতস্য॥ * ॥ অথ গঙ্গাধ্যানং। ভবিষ্যে। চতুর্ভুজাং ত্রিনেত্রাঞ্চ সর্ব্বাবয়বভূষিতাং। রত্নকুম্ভাং

সিতাম্ভোজাং বরদামভয়প্রদাং ॥ শ্বেত-
বস্ত্রপরীধানাং মুক্তামণিবিভূষিতাং। ততো
ধ্যায়েৎ স্বরূপাঞ্চ চন্দ্রাযুতসমপ্রভাং ॥
চামরৈর্বীজ্যমানাঞ্চ শ্বেতচ্ছত্রোপশোভি-
তাং। সুপ্রসন্নাং সুবদনাং করুণার্দ্রনিজা-
ন্তরাং ॥ সুধাপ্লাবিতভূপৃষ্ঠামার্দ্রগন্ধানু-
লেপনাং। ত্রৈলোক্যনমিতাং গঙ্গাং
দেবাদিভিরভিষ্টুতাং ॥ দিব্যরূপবিভূষাঞ্চ
দিব্যমাল্যানুলেপনাং ॥ * ॥ অপি চ।
সিতমকরনিষণ্ণাং শুভ্রবর্ণাং ত্রিনেত্রাং
করধৃতকমলোদ্যৎসূৎপলাভীত্যভীষ্টাং।
বিধিহরহরিরূপাং সেন্দুকোটীরচূড়াং
কলিতসিতদুকূলাং জাহ্নবীং তাং
নমামি ॥ * ॥ অথ গঙ্গামাহাত্ম্যশ্রবণপঠন-
ফলং। ভবিষ্যে। মাহাত্ম্যং যে চ গঙ্গায়াঃ
শৃণ্বন্তি চ পঠন্তি চ। তেঽপ্যসংখ্যৈর্মহা-
পাপৈর্মুচ্যন্তে নাত্র সংশয়ঃ ॥ * ॥ অস্যাঃ
স্মরণফলং। গচ্ছংস্তিষ্ঠন্ স্বপন্ ধ্যায়ন্
জাগ্রদ্‌ভুঞ্জন্ শ্বসন্ বদন্। যঃ স্মরেৎ
সততং গঙ্গাং স চ মুচ্যেত বন্ধনাৎ ॥
ভবনানি বিচিত্রাণি বিচিত্রাভরণাঃ স্ত্রিয়ঃ।
আরোগ্যং বিত্তসম্পত্তির্গঙ্গাস্মরণজং
ফলং ॥ * ॥ অস্যা দর্শনাদিফলং। ব্রহ্মা-
ণ্ডাগ্নেয়য়োঃ। দৃষ্টা তু হরতে পাপং
স্পৃষ্টা তু ত্রিদিবং নয়েৎ। প্রসঙ্গেনাপি
যা গঙ্গা মোক্ষদা ত্ববগাহিতা ॥ ভবিষ্যে।
যৎ ফলং জায়তে পুংসাং দর্শনাৎ পরমা-
ত্মনঃ। তত্তবেদেব গঙ্গায়া দর্শনে ভক্তি-
ভাবতঃ ॥ * ॥ অস্যাং স্নানফলং। ব্রহ্মাণ্ড-
পুরাণে। যৈঃ পুণ্যবাহিনী গঙ্গা সকৃদ্-
ভক্ত্যাবগাহিতা। তেষাং কুলানাং লক্ষন্তু
ভবাত্তারয়তে শিবা ॥ অনেকজন্মসম্ভূতং
পাপং পুংসাং প্রণশ্যতি। স্নানমাত্রেণ
গঙ্গায়াং সদ্যঃ পুণ্যস্য ভাজনং ॥ দান-
ধর্ম্মে। অন্ধাঃ ক্লীবা জড়া ব্যঙ্গাঃ পতিতা
রোগিণোঽন্ত্যজাঃ। গঙ্গাং সংসেব্য
পুরুষা দেবৈর্গচ্ছন্তি তুল্যতাং ॥ স্নানন্তু
ভক্ত্যা গঙ্গায়াং কর্ত্তুকামস্য গচ্ছতঃ।
পদে পদেঽশ্বমেধস্য ফলং মর্ত্ত্যস্য জায়তে ॥
ব্রহ্মাণ্ডে। যে গচ্ছন্তি স্বতো গঙ্গাং
পরাংশ্চ প্রেরয়ন্তি যে। ইহ তে সর্ব্ব-
ভোগানামন্তে জ্ঞানস্য ভাজনং ॥ * ॥
অস্যাঃ পূজায়াঃ ফলং। আগ্নেয়ে। গঙ্গায়াং
পূজিতায়ান্তু পূজিতাঃ সর্ব্বদেবতাঃ। তস্মাৎ
সর্ব্বপ্রযত্নেন পূজয়েদমরাপগাং ॥ * ॥
তস্যাং যজ্ঞাদিকরণফলং। স্কান্দে। যজ্ঞো
দানং তপো জপ্যং শ্রাদ্ধঞ্চ সুরপূজনং।
গঙ্গায়াং যৎ কৃতং সর্ব্বং কোটিকোটি-
গুণং ভবেৎ ॥ ভবিষ্যে। সুলভং সকলং
পুণ্যং যজ্ঞদানাদিজং ফলং। গঙ্গাতোয়ৈ-
শ্চ সতিলৈর্দুর্ল্লভং পিতৃতর্পণং ॥ গয়া-
শ্রাদ্ধং কৃতং তেন উৎসৃষ্টস্তু বৃষস্তথা।
যেন তদ্বীচিসংসিক্তে তীরে শ্রাদ্ধমকারি
চ ॥ * ॥ তজ্জলপানফলং। ভবিষ্যে।
গণ্ডূষমাত্রপানেন অশ্বমেধফলং লভেৎ।
স্বচ্ছন্দং যঃ পিবেদাপস্তস্য মুক্তিঃ করে
স্থিতা ॥ ত্রিভিঃ সারস্বতং তোয়ং সপ্তভি-
স্তথ যামুনং। নার্ম্মদং দশভির্মাসৈর্গাঙ্গং
বর্ষেণ জীর্য্যতি ॥ নাভ্যন্তর্গততোয়ানাং
মৃতানাং ক্বাপি দেহিনাং। তত্তত্তীর্থ-

ফলপ্রাপ্তির্নাত্র কার্য্যা বিচারণা ॥ যমোক্তৌ। ক্ষেত্রস্থমুদ্ধৃতং বাপি শীতমুষ্ণমথাপি বা। গাঙ্গেয়ং হরতে পাপমাজন্মমরণান্তিকং ॥ * ॥ অস্যাং মরণফলং। কূর্ম্মপুরাণে। গঙ্গায়াং জ্ঞানতো মৃত্বা মুক্তিমাপ্নোতি মানবঃ। অজ্ঞানাদ্‌ব্রহ্মলোকঞ্চ যাতি নাস্ত্যত্র সংশয়ঃ ॥ গঙ্গায়াঞ্চ জলে মোক্ষো বারাণস্যাং জলে স্থলে। অন্তরীক্ষে চ গঙ্গায়াং গঙ্গাসাগরসঙ্গমে ॥ স্মৃতৌ। শুক্লপক্ষে দিবা ভূমৌ গঙ্গায়ামুত্তরায়ণে। ধন্যা দেহং বিমুঞ্চন্তি হৃদয়স্থে জনার্দ্দনে ॥ * ॥ তত্রাস্থিনিক্ষেপফলং। দশাহাভ্যন্তরে যস্য গঙ্গাতোয়েঽস্থি মজ্জতি। গঙ্গায়াং মরণে যাদৃক্ স তাদৃক্ ফলমাপ্নুয়াৎ ॥ * ॥ তত্র ত্রয়োদশক্রিয়াবর্জ্জনং ব্রহ্মাণ্ডে। গঙ্গাং পুণ্যজলাং প্রাপ্য ত্রয়োদশ বিবর্জ্জয়েৎ। শৌচমাচমনং সেকং নির্মাল্যং মলঘর্ষণং ॥ গাত্রসম্বাহনং ক্রীড়াং প্রতিগ্রহমথো রতিং। অন্যতীর্থরতিঞ্চৈব অন্যতীর্থপ্রশংসনং। বস্ত্রত্যাগমথাঘাতং সন্তারঞ্চ বিশেষতঃ ॥ * ॥ অথ নারায়ণক্ষেত্রলক্ষণং। ব্রহ্মপুরাণে। প্রবাহমবধিং কৃত্বা যাবদ্ধস্তচতুষ্টয়ং। অত্র নারায়ণঃ স্বামী নান্যঃ স্বামী কদাচন ॥ * ॥ অথ গর্ত্ততীরয়োর্লক্ষণং। ভাদ্রকৃষ্ণচতুর্দ্দশ্যাং যাবদাক্রমতে জলং। তাবদ্গর্ত্তং বিজানীয়াৎ তদূর্দ্ধং তীরমুচ্যতে ॥ সার্দ্ধহস্তশতং যাবদ্গর্ত্ততস্তীরমুচ্যতে ॥ * ॥ তীরে প্রতিগ্রহাদিনিষেধঃ। তীরে প্রতিগ্রহস্ত্যাজ্যস্ত্যাজ্যো ধর্ম্মস্য বিক্রয়ঃ ॥ * ॥ অথ গঙ্গাক্ষেত্রফলং স্কান্দে। তীরাদ্গব্যূতিমাত্রন্তু পরিতঃ ক্ষেত্রমুচ্যতে। অত্র যদ্যৎ কৃতং কর্ম্ম গঙ্গায়াং নাত্র সংশয়ঃ ॥ অত্রস্থাস্ত্রিদিবং যান্তি যে মৃতাস্তেঽপুনর্ভবাঃ ॥ * ॥ ইতি প্রায়শ্চিত্ততত্ত্বং ॥ দুর্গা। যথা। ক্রিয়াকারণরূপত্বাৎ সরণাচ্চ সরিন্মতা। সঙ্গমাদ্গমনাদ্গঙ্গা লোকে দেবী বিভাব্যতে ॥ ইতি দেবীপুরাণে ৪৫ অধ্যায়ঃ ॥

গঙ্গাকা (স্ত্রী) গঙ্গা। ইতি মুগ্ধবোধং ॥

গঙ্গাচিল্লী (স্ত্রী) চিল্লবিশেষঃ। গাঙ্গচিল ইতি ভাষা। তৎপর্য্যায়ঃ। দেবট্টী ২ বিশ্বকা ৩ জলকুক্কুটী ৪। ইতি হারাবলী ॥

গঙ্গাজঃ (পুং) ভীষ্মঃ। ইতি শব্দরত্নাবলী ॥ কার্ত্তিকেয়ঃ। ইতি ভারতং ॥

গঙ্গাটেয়ঃ (পুং) মৎস্যভেদঃ। চিঙ্গিড়ি ইতি ভাষা। তৎপর্য্যায়ঃ। গলানিলঃ ২। ইতি ত্রিকাণ্ডশেষঃ ॥

গঙ্গাধরঃ (পুং) শিবঃ। ইত্যমরঃ ॥ সমুদ্রঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

গঙ্গাপত্রী (স্ত্রী) বৃক্ষবিশেষঃ। তৎপর্য্যায়ঃ। পত্রী ২ সুগন্ধা ৩ গন্ধপত্রিকা ৪। অস্যা গুণাঃ। কটুত্বং। উষ্ণত্বং। বাতনাশিত্বং। ব্রণরোপণত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

গঙ্গাপুত্রঃ (পুং) ভীষ্মঃ। ইতি পুরাণং ॥ বর্ণসঙ্করজাতিবিশেষঃ। মুরদাফরাশ ইতি পারস্যভাষা। স তু লেটাৎ তীবরকন্যায়াং জাতঃ। ইতি ব্রহ্মবৈবর্ত্তপুরাণং ॥

গঙ্গাসুতঃ (পুং) কার্ত্তিকেয়ঃ। ইতি হেমচন্দ্রঃ ॥ ভীষ্মশ্চ ॥

গঙ্গিকা (স্ত্রী) গঙ্গা। ইতি মুগ্ধবোধং ॥

গচ্ছঃ (পুং) বৃক্ষঃ। গাছ ইতি ভাষা। ইতি হেমচন্দ্রঃ ॥ নির্ব্বিসর্গে গমনক্রিয়ানুমতিঃ। যাও ইতি ভাষা। ইতি ব্যাকরণং ॥

গজ মদে। স্বনে। ইতি কবিকল্পদ্রুমঃ ॥ গজতি। ইতি দুর্গাদাসঃ ॥

গজ ই স্বনে। ইতি কবিকল্পদ্রুমঃ ॥ ই গঞ্জ্যতে। ইতি দুর্গাদাসঃ ॥

গজ ক স্বনে। ক গজয়তি। ইতি দুর্গাদাসঃ ॥

গজঃ (পুং) হস্তী। ইত্যমরঃ ॥ পরিমাণবিশেষঃ। স তু হস্তদ্বয়ং পাদোনহস্তদ্বয়ঞ্চ। বাস্তুনঃ স্থানভেদঃ। ইতি মেদিনী ॥ * ॥ প্রস্তারে দৈর্ঘ্যমানন্তু স্বহস্তেন তথা নরৈঃ। কৃত্বা ত্রিঘ্নং গজৈর্হৃত্বা বাস্তুস্থাননিরূপণং ॥ ধ্বজো ধূমশ্চ সিংহশ্চ শ্বা বৃষঃ খর এব চ। গজঃ কাকপদশ্চৈব স্থানান্যষ্টৌ চ বাস্তুনঃ ॥ ধ্বজে বিভূতির্মরণঞ্চ ধূমে সিংহে জয়ঃ শ্বা চ করোত্যনর্থং। বৃষে চ ভোগী ক্ষয়ণং খরে চ পুষ্টির্গজে কাকপদে বিনাশঃ ॥ ইতি জ্যোতিষং ॥ * ॥ ঔষধপাকার্থগর্ত্তবিশেষঃ। যথা। হস্তপ্রমাণগর্ত্তো যঃ পুটঃ স তু গজাহ্বয়ঃ। ইত্থং চারত্নিকে কুণ্ডে পুটো বারাহ উচ্যতে ॥ ইতি বৈদ্যকপ্রয়োগামৃতং ॥

গজকন্দঃ (পুং) হস্তিকন্দঃ। ইতি রাজনির্ঘণ্টঃ ॥

গজকূর্ম্মাশী [ন্] (পুং) গরুড়ঃ। ইতি শব্দরত্নাবলী ॥

গজচির্ব্ভটা (স্ত্রী) ইন্দ্রবারুণী। গোয়ক্‌লাড়ু রাখালশসা ইতি চ ভাষা। ইতি রত্নমালা ॥

গজচির্ব্ভিটঃ (পুং) গোড়ুম্বা। ইতি ত্রিকাণ্ডশেষঃ ॥

গজচির্ব্ভিটা (স্ত্রী) মহেন্দ্রবারুণী। ইতি রাজনির্ঘণ্টঃ ॥

গজচ্ছায়া (স্ত্রী) যোগবিশেষঃ। যথা। যদেন্দুঃ পিতৃদৈবত্যে হংসশ্চৈব করে স্থিতঃ। যাম্যা তিথির্ভবেৎ সা হি গজচ্ছায়া প্রকীর্ত্তিতা ॥ ইতি মিতাক্ষরাপরিভাষা ॥ অপি চ। কৃত্যচিন্তামণৌ। কৃষ্ণপক্ষে ত্রয়োদশ্যাং মঘাস্বিন্দুঃ করে রবিঃ। যদা তদা গজচ্ছায়া শ্রাদ্ধে পুণ্যৈরবাপ্যতে ॥ অন্যচ্চ। যোগো মঘাত্রয়োদশ্যাং কুঞ্জরচ্ছায়সংজ্ঞিতঃ। ভবেন্মঘায়াং সংস্থে চ শশিন্যর্কে করে স্থিতে ॥ ইতি। চন্দ্রসূর্য্যয়োর্গ্রহণকালঃ। যথা। বরাহঃ সৈংহিকেয়ো যদা ভানুং গ্রসতে পর্ব্বসন্ধিষু। গজচ্ছায়া তু সা প্রোক্তা তত্র শ্রাদ্ধং প্রকল্পয়েৎ ॥ ইতি। অমাবাস্যাশ্রাদ্ধকালঃ। যথা। অমাবাস্যাং গতে সোমে ছায়া যা প্রাঙ্মুখী ভবেৎ। গজচ্ছায়া তু সা প্রোক্তা তত্র শ্রাদ্ধং প্রকল্পয়েৎ ॥ ইতি চ মলমাসতত্ত্বং ॥

গজঢক্কা (স্ত্রী) গজোপরিস্থবৃহড্ঢক্কা। তৎপর্য্যায়ঃ। মদাম্নাতঃ ২। ইতি হারাবলী ॥

গজতা (স্ত্রী) গজসমূহঃ। তৎপর্য্যায়ঃ। হাস্তিকং ২। ইত্যমরঃ ॥

গজদঘ্নঃ (পুং) গজপরিমাণং। ইতি মুগ্ধবোধং ॥

গজদন্তঃ ( পুং ) গণেশঃ। ইতি শব্দরত্নাবলী॥ গজসম্বন্ধিদন্তঃ। হাতির দাঁত ইতি ভাষা। নাগদন্তঃ। স তু দ্রব্যস্থাপনার্থং ভিত্তিস্থ-দণ্ডদ্বয়ং। দাণ্ডা। ইতি ভাষা॥

গজদন্তফলা (স্ত্রী) ডঙ্গরীলতা। ইতি রাজ-নির্ঘণ্টঃ॥

গজদানং (ক্লী) হস্তিমদঃ। ইতি রাজ-নির্ঘণ্টঃ॥

গজদ্বয়সঃ (ত্রি) গজপরিমিতঃ। ইতি মুগ্ধ-বোধং॥

গজপাদপঃ (পুং) স্থালীবৃক্ষঃ। ইতি ভাব-প্রকাশঃ॥

গজপিপ্পলী (স্ত্রী) পিপ্পলীভেদঃ। গজপিঁপুল ইতি ভাষা। তৎপর্য্যায়ঃ। করিপিপ্পলী ২ ইভকণা ৩ কপিবল্লী ৪ কপিল্লিকা ৫ শ্রেয়সী ৬ বশিরঃ ৭ গজাহ্বা ৮। ইতি রত্নমালা॥ কোলবল্লী ৯। ইত্যমরঃ॥ বসিরঃ ১০। ইতি তট্টীকা॥ গজোষণা ১১ চব্যফলং ১২ চব্যজা ১৩ ছিদ্রবৈদেহী ১৪ দীর্ঘগ্রন্থিঃ ১৫ তৈজসী ১৬ বর্ত্তুলী ১৭ স্থূলবৈদেহী ১৮। অস্যা গুণাঃ। কটুত্বং। উষ্ণত্বং। রুজামলবিশোষণত্বং। বলাস-বাতহরত্বং। স্তনকর্ণবিবর্দ্ধনত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ ভেদাগ্নিকারিত্বং। ইতি রাজবল্লভঃ॥ তৎপর্য্যায়গুণাঃ। চবিকায়াঃ ফলং প্রাজ্ঞৈঃ কথিতা গজপিপ্পলী। কপি-বল্লী কোলবল্লী শ্রেয়সী বশিরশ্চ সা॥ গজকৃষ্ণা কটুর্বাতশ্লেষ্মনুদ্বহ্নিবর্দ্ধিনী। উষ্ণা নিহন্ত্যতীসারশ্বাসকণ্ঠাময়ক্রিমীন্॥ ইতি ভাবপ্রকাশঃ॥

গজপুটঃ (পুং) ঔষধপাকার্থহস্তপরিমিতগর্ত্তঃ। ইতি বৈদ্যকং॥ অস্য প্রমাণং গজশব্দে দ্রষ্টব্যং॥

গজপ্রিয়া (স্ত্রী) শল্লকীবৃক্ষঃ। ইতি হেম-চন্দ্রঃ॥

গজবন্ধনী (স্ত্রী) গজবন্ধনস্থানং। হাতিশালা ইতি ভাষা। তৎপর্য্যায়ঃ। বারী ২। ইত্য-মরঃ॥ বারিঃ৩। ইতি ভরতঃ॥ প্রারব্ধিঃ ৪। ইতি জটাধরশব্দরত্নাবল্যৌ॥

গজভক্ষকঃ (পুং) অশ্বত্থবৃক্ষঃ। ইতি রাজ-নির্ঘণ্টঃ॥ গজৈর্ভক্ষ্যতে যঃ কর্ম্মণ্যল্ স্বার্থে কঃ॥

গজভক্ষা (স্ত্রী) শল্লকীবৃক্ষঃ। ইতি শব্দ-রত্নাবলী॥

গজভক্ষ্যা (স্ত্রী) শল্লকীবৃক্ষঃ। ইত্যমরঃ॥

গজমাচলঃ (পুং স্ত্রী) সিংহঃ। ইতি হারা-বলী॥

গজমাত্রঃ (ত্রি) গজপরিমিতঃ। ইতি মুগ্ধ-বোধং॥

গজমোটনঃ (পুং স্ত্রী) সিংহঃ। ইতি শব্দ-মালা॥

গজবদনঃ (পুং) গণেশঃ। ইতি হলায়ুধঃ॥

গজবল্লভা (স্ত্রী) গিরিকদলী। শল্লকী। ইতি রাজনির্ঘণ্টঃ॥

গজসাহ্বয়ং (ক্লী) হস্তিনাপুরং। ইতি শব্দ-রত্নাবলী॥

গজাখ্যঃ (পুং) চক্রমর্দ্দবৃক্ষঃ। ইতি রাজ-নির্ঘণ্টঃ॥

গজাগ্রণীঃ (পুং) ঐরাবতহস্তী। ইতি শব্দ-রত্নাবলী॥

গজাজীবঃ ( পুং ) হস্তিপালকঃ। তৎপর্য্যায়ঃ। আধোরণঃ ২ হস্তিপকঃ ৩ ইভপালকঃ ৪। ইতি হেমচন্দ্রঃ॥
গজাণ্ডং (ক্লী) পিণ্ডমূলং। ইতি রাজনির্ঘণ্টঃ॥
গজাননঃ ( পুং ) গণেশঃ। ইত্যমরঃ॥
গজারিঃ ( পুং ) বৃক্ষবিশেষঃ। সিংহঃ। যথা। গজারিস্তরুসিংহয়োরিতি হড্ডচন্দ্রঃ॥
গজাশনঃ ( পুং ) অশ্বত্থবৃক্ষঃ। ইতি রত্নমালা॥ গজাদনোঽপি॥
গজাশনা (স্ত্রী) ভঙ্গা। ইতি শব্দচন্দ্রিকা॥ শল্লকীবৃক্ষঃ। পদ্মমূলং। ইতি রত্নমালা॥
গজাস্যঃ ( পুং ) গণেশঃ। ইতি হেমচন্দ্রঃ॥ হস্তিমুখে ক্লী॥
গজাহ্বং (ক্লী) হস্তিনাপুরং। ইতি মেদিনী॥
গজাহ্বয়ং (ক্লী) হস্তিনাপুরং। ইতি শব্দরত্নাবলী॥
গজাহ্বা (স্ত্রী) গজপিপ্পলী। ইতি মেদিনী॥
গজেষ্টা (স্ত্রী) বিদারী। ভুঁইকুমড়া ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥
গজোষণা (স্ত্রী) গজপিপ্পলী। ইতি রাজনির্ঘণ্টঃ॥
গঞ্জঃ ( পুং ) অবজ্ঞা। ভাণ্ডাগারং। খনিঃ। ইতি হেমচন্দ্রঃ॥ গোষ্ঠাগারং। গোয়ালিঘর ইতি ভাষা। ইতি হারাবলী॥
গঞ্জঃ ( পুং ক্লী ) ভাণ্ডাগারং। ইতি মেদিনী॥
গঞ্জা (স্ত্রী) মদিরাগৃহং। ইত্যমরঃ॥ খনিঃ। ইতি মেদিনী॥ পামরসদ্ম। মদ্যভাণ্ডং। ইতি শব্দরত্নাবলী॥
গঞ্জিকা (স্ত্রী) মদিরাগৃহং। ইতি শব্দরত্নাবলী॥
গড ই গণ্ডে। ইতি কবিকল্পদ্রুমঃ॥ ই গণ্ড্যতে। গণ্ডে কপোলবিষয়ক্রিয়ায়াং তথা চ। যত্র দ্রব্যনির্দ্দেশস্তত্র তন্নিষ্ঠক্রিয়াবিশেষো লক্ষ্যতে। ইতি মৈত্রেয়বোপদেবৌ॥ রমানাথস্তু কড্ড কার্কশ্যে ইত্যস্মাৎ কার্কশ্য ইত্যনুবৃত্ত্যা কপোলকর্তৃককার্কশ্যমিতি ব্যাখ্যায় গণ্ডতি কপোলঃ পাংশুনা ইত্যুদাহৃতবান্। কেচিত্তু গণ্ড ইতি শব্দস্য ব্যুৎপত্ত্যর্থমেবায়ং ধাতুর্মন্তব্যো ন ত্বস্যান্যত্র প্রয়োগঃ ইত্যাহ। ইতি দুর্গাদাসঃ॥
গড ম সেকে। ইতি কবিকল্পদ্রুমঃ॥ ম গড়য়তি। সেকঃ ক্ষরণং। গড়য়তি ঘটাৎ পানীয়ং। ডলয়োরেকত্বাৎ লস্যৈব প্রায়ঃ প্রয়োগঃ। ইতি রমানাথঃ॥ তন্মতে তু লান্তপক্ষেঽপি মানুবন্ধঃ। স্বমতে তু লান্তো বক্ষ্যমাণঃ স ঘনুবন্ধশূন্যঃ ইতি বিরোধঃ। ইতি দুর্গাদাসঃ॥
গড়ঃ ( পুং ) মৎস্যভেদঃ। গড়ুই ইতি ভাষা। অন্তরায়ঃ। ইতি মেদিনী॥ পরিখা। ব্যবধানং। ইতি শব্দরত্নাবলী॥ দেশবিশেষঃ। রাজনির্ঘণ্টে গড়লবণপর্য্যায়ে গড়দেশজমিতি দর্শনাৎ॥
গড়কঃ ( পুং ) মৎস্যবিশেষঃ। গড়ুই মাছ ইতি ভাষা। তৎপর্য্যায়ঃ। শকুলার্ভকঃ ২। ইত্যমরঃ॥ গড়ঃ ৩ গলঃ ৪ গলকঃ ৫। ইতি শব্দরত্নাবলী॥ অস্য গুণাঃ। মধুরত্বং। রুক্ষত্বং। কষায়ত্বং। শীতলত্বং। লঘুত্বঞ্চ। ইতি রাজবল্লভঃ॥
গড়য়ন্তঃ ( পুং ) মেঘঃ। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ॥

গড়লবণং (স্ত্রী) সম্বরদেশোদ্ভবলবণং। সাম্বরলুণ ইতি ভাষা। তৎপর্য্যায়ঃ। শুভ্রং ২ পৃথ্বীজং ৩ গড়দেশজং ৪ গড়োত্থং ৫ মহারম্ভং ৬ সাম্বরং ৭ সম্বরোদ্ভবং ৮। অস্য গুণাঃ। উষ্ণত্বং। লবণত্বং। ঈষদম্লত্বং। মলাপহত্বং। দীপনত্বং। কফবাতার্শোনাশিত্বং। কোষ্ঠশোধনত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

গড়দেশজং (স্ত্রী) সাম্বরলবণং। ইতি রাজনির্ঘণ্টঃ॥

গড়িঃ (পুং) বৎসতরঃ। ইতি রাজনির্ঘণ্টঃ॥ অলসো গবাদিঃ। গড়িয়া ইতি ভাষা। যথা। গুণানামেব দৌরাত্ম্যাদ্ধুরি ধুর্য্যো নিযুজ্যতে। অসংজাতকিণস্কন্ধঃ সুখং স্বপিতি গৌর্গড়িঃ॥ ইতি কাব্যপ্রকাশঃ॥

গড়ুঃ (পুং) গলগণ্ডঃ। পৃষ্ঠগুড়ঃ। স তু ঘাটামস্তকয়োর্মধ্যে মাংসবৃদ্ধিঃ। ইতি লিঙ্গাদিসংগ্রহে অমরভরতৌ॥ কুব্জঃ। ইতি মেদিনী॥ শল্যাস্ত্রং। ইতি শব্দরত্নাবলী॥ কিঞ্চুলুকঃ। ইতি ত্রিকাণ্ডশেষঃ॥ বিষমগ্রন্থিঃ। যথা কাব্যপ্রকাশে তদেতৎ কাব্যান্তর্গড়ুভূতমিতি নাস্য ভেদলক্ষণং কৃতমিত্যত্র তট্টীকাকারঃ॥

গড়ুরঃ (ত্রি) কুব্জঃ। ইতি শব্দরত্নাবলী॥

গড়ুলঃ (ত্রি) কুব্জঃ। ইত্যমরঃ॥

গড়েরঃ (পুং) মেঘঃ। ইতি ত্রিকাণ্ডশেষঃ॥

গড়োত্থং (স্ত্রী) গড়লবণং। ইতি রাজনির্ঘণ্টঃ॥

গড়োলঃ (পুং) গুড়ঃ। ইত্যুণাদিকোষঃ॥ গ্রাসঃ। ইতি হেমচন্দ্রঃ॥

গড্ডরিকা (স্ত্রী) অজ্ঞাতপ্রবাহাগমমূলো ধারাবাহীনদীবিশেষঃ। ইতি কেচিৎ। মেষযূথৈরনুগম্যমানা মেষী। ইত্যন্যে। ইতি কাব্যপ্রকাশটীকায়াং মহেশ্বরঃ॥

গড্ডুকঃ (পুং) জলপাত্রবিশেষঃ। গাড়ু ইতি ভাষা। ইতি শব্দরত্নাবলী॥

গড্ডূকঃ (পুং) গড্ডুকঃ। ইতি শব্দরত্নাবলী॥

গণ ৎ ক সংখ্যানে। ইতি কবিকল্পদ্রুমঃ॥ মূর্দ্ধন্যোপধঃ। গণয়তি। ইতি দুর্গাদাসঃ॥

গণঃ (পুং) সমূহঃ। প্রমথঃ। রুদ্রানুচরঃ। সেনাসংখ্যাবিশেষঃ। তদ্যথা। গজাঃ ২৭ রথাঃ ২৭ অশ্বাঃ ৮১ পদাতিকাঃ ১৩৫ সমুদায়েন ২৭০। ইত্যমরঃ॥ সংখ্যা। চোরনামগন্ধদ্রব্যং। ইতি মেদিনী॥ *॥ গণেশঃ। যথা। গাণপস্ত্ত মহেশানি গণদীক্ষাপ্রবর্ত্তকঃ। ইতি মহানির্ব্বাণতন্ত্রং॥ *॥ অশ্বিন্যাদিজন্মনক্ষত্রানুসারেণ দেবমানুষরাক্ষসগণ ইতি তু পারিভাষিকং। যথা। দে ম রা ম দে মা দে দে রা রা ম ম দ রা দ রা। দে রা রা ম ম দে রা রা ম ম দেতি গণত্রয়ং॥ ইতি জ্যোতিষরত্নমালা॥ পূর্ব্বোত্তরাত্রয়শ্চৈব ভরণ্যার্দ্রা চ রোহিণী। ইমানি মানুষাণ্যাহুর্নক্ষত্রাণি মনীষিণঃ॥ জ্যেষ্ঠাশতভিষামূলধনিষ্ঠাশ্লেষকৃত্তিকাঃ। চিত্রামঘাবিশাখাঃ স্যুস্তারা রাক্ষসদেবতাঃ॥ অশ্বিনী রেবতী পুষ্যঃ স্বাতী হস্তঃ পুনর্ব্বসুঃ। অনুরাধা মৃগশিরঃ শ্রবণং দেবতারকাঃ॥ ইতি নিবন্ধঃ॥ *॥ ধাতুসমূহঃ। যথা। ভ্বাদ্যদাদিজুহোত্যাদিদিবাদি স্বাদিরেব চ। তুদা-

রুধাতনুক্র্যাদিশ্চুরাদিশ্চ গণা দশ ॥ ইতি মনোরমা ॥

গণকঃ ( পুং ) দৈবজ্ঞঃ । জ্যোতির্বিৎ । তৎপর্য্যায়ঃ । সাম্বৎসরঃ ২ জ্যোতিষিকঃ ৩ দৈবজ্ঞঃ৪ মৌহূর্ত্তিকঃ৫ মৌহূর্ত্তঃ৬ জ্ঞানী৭ কার্ত্তান্তিকঃ ৮ । ইত্যমরঃ ॥ জ্যোতিষিকঃ ৯ । ইতি তট্টীকা ॥ স তু বর্ণসঙ্করজাতিবিশেষঃ । দেবলাদ্বৈশ্যাগর্ব্ভজাতঃ । তস্য কর্ম্ম তিথিবারাদিজ্ঞাপনং । ইতি পরাশরপদ্ধতিঃ ॥ স তু অস্পৃশ্যঃ । যথা । কলিকালে মহেশানি পাষণ্ডা বহবো জনাঃ । সঙ্গদোষান্মহেশানি তৎক্ষণাদ্ধানিতাং ব্রজেৎ ॥ তস্মাৎ প্রযত্নতো দেবি সংসর্গং বর্জ্জয়েৎ সুধীঃ । বরং চাণ্ডালসংস্পর্শং কুর্য্যাত্তু সাধকোত্তমঃ ॥ তথাপ্যস্পৃশ্যগণকং সর্ব্বদা তং পরিত্যজেৎ । ইতি শাক্তানন্দতরঙ্গিণ্যাং ষোড়শোল্লাসে মহিষমর্দ্দিনীতন্ত্রবচনং ॥ তস্য লক্ষণং যথা । জ্যোতিঃশাস্ত্রবিশেষজ্ঞঃ সুন্দরাঙ্গঃ সভাপটুঃ । কুলক্রমাগতঃ শুদ্ধো গণকঃ স্যান্মহীপতেঃ ॥ ইতি যুক্তিকল্পতরুঃ ॥

গণকর্ণিকা (স্ত্রী) ইন্দ্রবারুণী । ইতি রাজনির্ঘণ্টঃ ॥

গণকারঃ ( পুং ) ভীমসেনঃ । ইতি শব্দরত্নাবলী ॥ ধাতুসংগ্রহকর্ত্তা । যথা । গণকারবচনপ্রমাণার্থমিদমিতি কাতন্ত্রবৃত্তিঃ ॥

গণকী ( স্ত্রী ) গণকপত্নী । ইতি জটাধরঃ ॥

গণচক্রকং (ক্লী) ধার্ম্মিকাণাং সম্ভূয় ভোজনং । ইতি ত্রিকাণ্ডশেষঃ ॥

গণতা ( স্ত্রী ) গণস্য ভাবঃ । সমূহত্বং । পক্ষপাতিত্বং । ইতি লোকপ্রসিদ্ধিঃ ॥

[ম্] ( পুং ) বহুযাজকঃ । ইতি মিতাক্ষরা ॥ গণেশদীক্ষিতে ত্রি । গণস্য গণেশস্য দীক্ষা গণদীক্ষা ইতি মহানির্ব্বাণতন্ত্রং ॥ সা বিদ্যতে অস্য ইতি ব্যুৎপত্তিঃ ॥

গণদেবতা ( স্ত্রী ) সংহতদেবতাবিশেষঃ । যথা ।
আদিত্যা বিশ্ববসবস্তুষিতা ভাস্বরানিলাঃ ।
মহারাজিকসাধ্যাশ্চ রুদ্রাশ্চ গণদেবতাঃ ॥
আদিত্যা দ্বাদশ প্রোক্তা বিশ্বেদেবা দশ স্মৃতাঃ । বসবশ্চাষ্টসংখ্যাতাঃ ষট্‌ত্রিংশৎ তুষিতা মতাঃ ॥ আভাস্বরাশ্চতুঃষষ্টির্বাতাঃ পঞ্চাশদূনকাঃ । মহারাজিকনামানো দ্বে শতে চাপি বিংশতিঃ ॥ সাধ্যা দ্বাদশ বিখ্যাতা রুদ্রাশ্চৈকাদশ স্মৃতাঃ । এতে চ সংহতা দেবাস্তত্রাদিত্যাঃ স্বনামতঃ ॥ ইতি জটাধরঃ ॥

গণদ্রব্যং (ক্লী) সাধারণদ্রব্যং । মিলিতানেকাসম্বন্ধিস্বামিকদ্রব্যং । গণানাং দ্রব্যমিতি ব্যুৎপত্তিঃ । দ্রব্যসমূহঃ । দ্রব্যাণাং গণ ইতি ব্যুৎপত্তিঃ ॥

গণনং ( ক্লী ) সংখ্যানং । গণা ঠিক্ দেয়া ইতি চ ভাষা । যথা । যেনৈব লিখনং কুর্য্যাত্তেনৈব গণনং স্মৃতং । ইতি বিশ্বসারতন্ত্রং ॥

গণনা ( স্ত্রী ) গণনং । সংখ্যা । যথা । যদি ত্রিলোকী গণনাপরা স্যাদিতি শ্রীহর্ষঃ ॥

গণনাথঃ ( পুং ) গণেশঃ । ইতি শব্দরত্নাবলী ॥

গণনায়কঃ ( পুং ) গণেশঃ । ইতি শব্দরত্নাবলী ॥

গণনায়িকা ( স্ত্রী ) দুর্গা । ইতি ত্রিকাণ্ডশেষঃ ॥

গণনীয়ং ( ত্রি ) গণনার্হং । সংখ্যেয়ং । তৎ-

পর্য্যায়ঃ। গণেয়ং ২। ইত্যমরঃ॥ গণিতব্যং ৩ গণ্যং ৪। ইতি ব্যাকরণং॥ সংখ্যেয়ং ৫। ইতি জটাধরঃ॥

গণপতিঃ (পুং) গণেশঃ। ইতি হলায়ুধঃ॥

গণপর্ব্বতঃ (পুং) কৈলাসপর্ব্বতঃ। ইতি ত্রিকাণ্ডশেষঃ॥

গণপীঠকং (ক্লী) বক্ষঃ। ইতি শব্দচন্দ্রিকা॥

গণরাত্রং (ক্লী) রাত্রিসমূহঃ। ইত্যমরঃ॥

গণরূপঃ (পুং) অর্কবৃক্ষঃ। ইত্যমরঃ॥

গণরূপকঃ (পুং) রাজার্কঃ। ইতি রাজনির্ঘণ্টঃ॥

গণরূপী [ন্] (পুং) শ্বেতার্কঃ। ইতি রত্নমালা॥

গণবতীসুতঃ (পুং) দিবোদাসঃ। যথা। ধন্বন্তরির্দিবোদাসঃ কাশিরাজঃ সুধোদ্ভবঃ। পালকাখ্যাগণবতীকরেণুরুচিরাসুতঃ॥ ইতি ত্রিকাণ্ডশেষঃ॥

গণহাসঃ (পুং) চোরকনামগন্ধদ্রব্যং। ইতি রাজনির্ঘণ্টঃ॥

গণহাসকঃ (পুং) চোরকনামগন্ধদ্রব্যং। ইত্যমরঃ॥

গণাগ্রণীঃ (পুং) গণেশঃ। ইতি ত্রিকাণ্ডশেষঃ॥

গণাচলঃ (পুং) কৈলাসপর্ব্বতঃ। ইতি জটাধরঃ॥

গণাধিপঃ (পুং) গণেশঃ। ইত্যমরঃ॥ শিবঃ। ইতি হলায়ুধঃ॥

গণিঃ (স্ত্রী) গণনং। ইতি ব্যাকরণং॥

গণিকা (স্ত্রী) বেশ্যা। যূথিকা। ইত্যমরঃ॥ গণিকারিকাবৃক্ষঃ। ইতি শব্দরত্নাবলী॥ হস্তিনী। ইতি জটাধরঃ॥

গণিকারিকা (স্ত্রী) বৃক্ষবিশেষঃ। গড় গণিয়ারী ইতি ভাষা। তৎপর্য্যায়ঃ। শ্রীপর্ণং ২ অগ্নিমন্থঃ ৩ কণিকা ৪ জয়া ৫। ইত্যমরঃ॥ তেজোমন্থঃ ৬ হবির্মন্থঃ ৭ জ্যোতিষ্কঃ ৮ পাবকঃ ৯ অরণিঃ ১০ বহ্নিমন্থঃ ১১ মথনঃ ১২। ইতি রত্নমালা॥ অগ্নিমথনঃ ১৩ তর্কারী ১৪ বৈজয়ন্তিকা ১৫ অরণীকেতুঃ ১৬ শ্রীপর্ণী ১৭ কর্ণিকা ১৮ নাদেয়ী ১৯ বিজয়া ২০ অনন্তা ২১ নদীজা ২২। অস্যা গুণাঃ। কটুত্বং। উষ্ণত্বং। তিক্তত্বং। অনিলকফশোফশ্লেষ্মাগ্নিমান্দ্যার্শোমলবন্ধভ্রমনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ ক্ষুদ্রগণিকারিকাগুণপর্য্যায়ৌ ক্ষুদ্রাগ্নিমন্থশব্দে দ্রষ্টব্যৌ॥

গণিকারী (স্ত্রী) পুষ্পবৃক্ষবিশেষঃ। গণিয়ারী ইতি ভাষা। তৎপর্য্যায়ঃ। কাঞ্চনিকা ২ কাঞ্চনপুষ্পী ৩ বসন্তদূতী ৪ গন্ধকুসুমা ৫ অলিমোদা ৬ বাসন্তী ৭ মদনমাদিনী ৮। অস্যা গুণাঃ। সুরভিতরত্বং। ত্রিদোষশমনত্বং। দাহশোষকামক্রীড়াড়ম্বরসম্বরহরত্বং। চাপলপ্রসরত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

গণিতং (ত্রি) কৃতগণনং। তৎপর্য্যায়ঃ। সংখ্যাতং ২। ইত্যমরঃ॥

গণিতং (ক্লী) অঙ্কশাস্ত্রং। তৎ দ্বিবিধং ব্যক্তং পাটীগণিতং। অব্যক্তং বীজগণিতং। ইতি লীলাবতী॥ গণনং। যথা। পারে পরার্দ্ধং গণিতং যদি স্যাদিতি শ্রীহর্ষঃ॥

গণিপিটকা (স্ত্রী) দ্বাদশাঙ্গী। সা তু জিনানাং বিদ্যাবিভাগঃ। ইতি হেমচন্দ্রঃ॥

গণেয়ঃ (ত্রি) সংখ্যেয়ঃ। গণনীয়ঃ। ইত্যমরঃ॥

গণেরুঃ (পুং) কর্ণিকারবৃক্ষঃ। ইতি মেদিনী॥

গণেরুঃ (স্ত্রী) বেশ্যা। হস্তিনী। ইতি মেদিনী॥

গণেরুকা (স্ত্রী) কুট্টনী। ইতি ত্রিকাণ্ডশেষঃ॥

গণেশঃ (পুং) শিবঃ। ইতি হারাবলী॥ শিবপুত্রঃ। তৎপর্য্যায়ঃ। বিনায়কঃ ২ বিঘ্নরাজঃ ৩ দ্বৈমাতুরঃ ৪ গণাধিপঃ ৫ একদন্তঃ ৬ হেরম্বঃ ৭ লম্বোদরঃ ৮ গজাননঃ ৯। ইত্যমরঃ॥ বিঘ্নেশঃ ১০ পশুপাণিঃ ১১ গজাস্যঃ ১২ আখুগঃ ১৩। ইতি হেমচন্দ্রঃ॥ শূর্পকর্ণঃ ১৪। ইতি ব্রহ্মবৈবর্ত্তপুরাণং॥ *॥ তস্যোৎপত্তিঃ। তত্র পার্ব্বতীং প্রতি বৃদ্ধব্রাহ্মণরূপশ্রীকৃষ্ণবাক্যং। যথা। ন ভবেদ্বিষ্ণুভক্তিশ্চ বিষ্ণুমায়ে ত্বয়া বিনা। ত্বদ্‌ব্রতং লোকশিক্ষার্থং ত্বত্তপস্তব পূজনং॥ সর্ব্বেজ্যাফলদাত্রী ত্বং নিত্যরূপা সনাতনী। গণেশরূপঃ শ্রীকৃষ্ণঃ কল্পে কল্পে তবাত্মজঃ॥ ত্বৎক্রোড়মাগতঃ ক্ষিপ্রমিত্যুক্ত্বান্তরধীয়ত। কৃত্বান্তর্দ্ধানমীশশ্চ বালরূপং বিধায় সঃ॥ জগাম পার্ব্বতীতল্পং মন্দিরাভ্যন্তরস্থিতং। তল্পস্থে শিববীর্য্যে চ মিশ্রিতঃ স বভূব হ॥ দদর্শ গেহশিখরং প্রসূতবালকো যথা। শুদ্ধচম্পকবর্ণাভঃ কোটিচন্দ্রসমপ্রভঃ॥ সুখদৃশ্যঃ সর্ব্বজনৈশ্চক্ষুরশ্মিবিবর্দ্ধকঃ। অতীবসুন্দরতনুঃ কামদেববিমোহনঃ॥ মুখং নিরুপমং বিভ্রৎ শারদেন্দুবিনিন্দকং। সুন্দরে লোচনে বিভ্রৎ চারুপদ্মবিনিন্দকে॥ ওষ্ঠাধরপুটং বিভ্রৎ পক্কবিম্ববিনিন্দকং। কপালঞ্চ কপোলং তদতীব সুমনোহরং॥ নাসাগ্রং রুচিরং বিভ্রৎ খগেন্দ্রচঞ্চুনিন্দকং। ত্রৈলোক্যেষু নিরুপমং সর্ব্বাঙ্গং বিভ্রদুত্তমং॥ শয়ানঃ শয়নে রম্যে প্রেরয়ন্ হস্তপাদকং॥ *॥ তস্য শনৈশ্চরদর্শনাৎ মস্তকবিনাশঃ বিষ্ণুকর্ত্তৃকগজমস্তকসংযোগশ্চ যথা। সা চ দেববশীভূতা শনিং প্রোবাচ কৌতুকাৎ। পশ্য মাং মৎশিশুমিতি নিষেকঃ কেন বার্য্যতে॥ পার্ব্বতীবচনং শ্রুত্বা সোঽনুমেনে হৃদা স্বয়ং। পশ্যামি কিং ন পশ্যামি পার্ব্বতীসুতমিত্যহো॥ বালং দ্রষ্টুং মনশ্চক্রে ন বালমাতরং শনিঃ। বিষণ্ণমানসঃ পূর্ব্বং শুষ্ককণ্ঠৌষ্ঠতালুকঃ॥ সব্যলোচনকোণেন দদর্শ চ শিশোর্মুখং। শনিশ্চ দৃষ্টিমাত্রেণ চিচ্ছেদ মস্তকং মুনে॥ বিস্মিতাস্তে সুরাঃ সর্ব্বে চিত্রপুত্তলিকা যথা। দেব্যশ্চ শৈলা গন্ধর্ব্বাঃ শিবঃ কৈলাসবাসিনঃ॥ তান্ সর্ব্বান্ মূর্চ্ছিতান্ দৃষ্ট্বা চারুহ্য গরুড়ং হরিঃ। জগাম পুষ্পভদ্রাং স উত্তরস্যাং দিশি স্থিতাং॥ পুষ্পভদ্রানদীতীরে দদর্শ কাননস্থিতং। গজেন্দ্রং নিদ্রিতং তত্র শয়ানং হস্তিনীযুতং॥ শীঘ্রং সুদর্শনেনৈব চিচ্ছেদ তচ্ছিরো মুদা। স্থাপয়ামাস গরুড়ে রুধিরাক্তং মনোহরং॥ আগত্য পার্ব্বতীস্থানং বালং কৃত্বা স্ববক্ষসি। রুচিরং তৎশিরঃ

কৃত্বা যোজয়ামাস বালকে ॥ ব্রহ্মস্বরূপো ভগবান্ ব্রহ্মজ্ঞানেন লীলয়া । জীবনং জীবয়ামাস হুংকারোচ্চারণেন চ ॥ ইতি ব্রহ্মবৈবর্ত্তপুরাণং ॥ * ॥ অস্য ধ্যানং । খর্ব্বং স্থূলতনুং গজেন্দ্রবদনং লম্বোদরং সুন্দরং ! প্রস্যন্দন্মদগন্ধলুব্ধমধুপব্যালোলগণ্ডস্থলং ॥ দন্তাঘাতবিদারিতারিরুধিরৈঃ সিন্দূরশোভাকরং । বন্দে শৈলসুতাসুতং গণপতিং সিদ্ধিপ্রদং কামদং ॥ ইতি পুরাণং ॥ * ॥ ধ্যানান্তরং যথা । সিন্দূরাভং ত্রিনেত্রং পৃথুতরজঠরং হস্তপদ্মৈর্দধানং দন্তং পাশাঙ্কুশেষ্টান্যুরুকরবিলসদ্বীজপূরাভিরামং । বালেন্দুদ্যোতমৌলিং করিপতিবদনং দানপূরার্দ্রগণ্ডং ভোগীন্দ্রাবদ্ধভূষং ভজত গণপতিং রক্তবস্ত্রাঙ্গরাগং ॥ ইতি তন্ত্রসারঃ ॥ * ॥ একপঞ্চাশদ্গণেশাঃ যথা । বিঘ্নেশো বিঘ্নরাজশ্চ বিনায়কশিবোত্তমৌ। বিঘ্নকৃৎ বিঘ্নহর্ত্তা চ গণৈকদ্বিসুদন্তকাঃ ॥ গজবক্ত্রনিরঞ্জনৌ কপর্দ্দী দীর্ঘজিহ্বকঃ । শঙ্কুকর্ণশ্চ বৃষভধ্বজশ্চ গণনায়কঃ ॥ গজেন্দ্রঃ সূর্পকর্ণশ্চ স্যাত্রিলোচনসংজ্ঞকঃ । লম্বোদরমহানন্দৌ চতুর্ম্মূর্ত্তিসদাশিবৌ ॥ আমোদদুর্ম্মুখৌ চৈব সুমুখশ্চ প্রমোদকঃ । একপাদো দ্বিজিহ্বশ্চ সুরবীরঃ সষণ্মুখঃ ॥ বরদো বামদেবশ্চ বক্রতুণ্ডো দ্বিরণ্ডকঃ । সেনানীর্গ্রামণীর্মত্তো বিমত্তো মত্তবাহনঃ ॥ জটী মুণ্ডী তথা খড়্গী বরেণ্যো বৃষকেতনঃ । ভক্ষপ্রিয়ো গণেশশ্চ মেঘনাদকসংজ্ঞকঃ ॥ ব্যাপী গণেশ্বরঃ প্রোক্তাঃ পঞ্চাশদ্গণপা ইমে । তরুণারুণসঙ্কাশা গজবক্ত্রাস্ত্রিলোচনাঃ ॥ পাশাঙ্কুশবরাভীতিহস্তাঃ শক্তিসমন্বিতাঃ ॥ * ॥ তেষামেকপঞ্চাশচ্ছক্তয়শ্চ যথা । হ্রীঃ শ্রীশ্চ পুষ্টিঃ শান্তিশ্চ স্বস্তিশ্চৈব সরস্বতী । স্বাহামেধাকান্তিকামিন্যো মোহিন্যপি বৈনটী ॥ পার্ব্বতী জ্বলিনী নন্দা সুযশাঃ কামরূপিণী । উমা তেজোবতী সত্যা বিঘ্নেশানী সুরূপিণী ॥ কামদা মদজিহ্বা চ ভূতিঃ স্যাদ্ভৌতিকা সিতা । রমা চ মহিষী প্রোক্তা শৃঙ্গিণী চ বিকর্ণপা ॥ ভ্রুকুটিঃ স্যাত্তথা লজ্জা দীর্ঘঘোণা ধনুর্দ্ধরা । যামিনী রাত্রিসংজ্ঞা চ কামান্ধা চ শশিপ্রভা ॥ লোলাক্ষী চঞ্চলা দীপ্তিঃ সুভগা দুর্ভগা শিবা । ভর্গা চ ভগিনী চৈব ভোগিনী সুভগা মতা ॥ কালরাত্রিঃ কালিকা চ পঞ্চাশচ্ছক্তয়ঃ স্মৃতাঃ । সর্ব্বালঙ্করণোদ্দীপ্তাঃ প্রিয়াঙ্কস্থাঃ সুশোভনাঃ ॥ রক্তোৎপলকরা ধ্যেয়া রক্তমাল্যাম্বরারুণাঃ । ইতি শারদাতিলকটীকায়াং রাঘবভট্টঃ ॥

**গণেশকুসুমঃ** ( পুং ) রক্তকরবীরঃ । ইতি রাজনির্ঘণ্টঃ ॥

**গণেশভূষণং** ( ক্লী ) সিন্দূরং । ইতি রাজনির্ঘণ্টঃ ॥

**গণোৎসাহঃ** ( পুং ) গণ্ডকঃ । গণ্ডার ইতি ভাষা । ইতি ত্রিকাণ্ডশেষঃ ॥

**গণ্ডঃ** ( পুং ) হস্তিকপোলঃ । তৎপর্য্যায়ঃ । কটঃ ২ । ইত্যমরঃ ॥ করটঃ ৩ । ইতি তট্টীকা ॥ কটকঃ ৪ হস্তিগণ্ডকঃ ৫ । ইতি শব্দরত্নাবলী ॥ কপোলঃ । গাল ইতি

ভাষা। ইত্যমরঃ ॥ খড়্গী। বীথ্যঙ্গং। পিটকঃ। চিহ্নং। বীরঃ। হয়ভূষণং। বুদ্বুদঃ। ইতি মেদিনী ॥ স্ফোটকঃ। গ্রন্থিঃ। ইত্যমরটীকায়াং রমানাথঃ ॥ * ॥ বিষ্কুম্ভাদিসপ্তবিংশতিযোগান্তর্গতদশমযোগঃ। তত্র জাতফলং। স্বকার্য্যকর্ত্তা পরকার্য্যহর্ত্তা গণ্ডোদ্ভবঃ স্যাদতিগণ্ডবাক্যঃ। অত্যন্তধূর্ত্তঃ পুরুষঃ কুরূপঃ সুহৃদ্গণানামতিতাপদাতা ॥ ইতি কোষ্ঠীপ্রদীপঃ ॥ * ॥ দোষজনকোঽশ্বিন্যাদিনক্ষত্রাণাং ভাগবিশেষঃ। যথা। অশ্বিনীমঘমূলানাং তিস্রো গণ্ডাদ্যনাড়িকাঃ। অন্ত্যাঃ পৌষ্ণোরগেন্দ্রাণাং পঞ্চৈব জবনা জগুঃ ॥ মূলেন্দ্রয়োর্দিবা গণ্ডো নিশায়াং পিতৃসর্পয়োঃ। সন্ধ্যাদ্বয়ে তথা জ্ঞেয়ো রেবতীতুরগর্ক্ষয়োঃ ॥*॥ তত্র জাতস্য দোষো যথা। সন্ধ্যারাত্রিদিবাভাগে গণ্ডযোগোদ্ভবঃ শিশুঃ। আত্মানং মাতরং তাতং বিনিহন্তি যথাক্রমং ॥ * ॥ তস্য শান্তির্যথা। সর্ব্বেষাং গণ্ডজাতানাং পরিত্যাগো বিধীয়তে। তাতেনাদর্শনং বাপি যাবৎ ষাণ্মাসিকো ভবেৎ ॥ কুঙ্কুমং চন্দনং কুষ্ঠং গোরোচনমথাপি বা। ঘৃতৈরেবান্বিতং কৃত্বা চতুর্ভিঃ কলসৈর্ব্বুধঃ ॥ সহস্রাক্ষেণ মন্ত্রেণ বালকং স্নাপয়েত্ততঃ। পিতৃযুক্তং দিবাজাতং মাতৃযুক্তঞ্চ রাত্রিজং ॥ স্নাপয়েৎ পিতৃমাতৃভ্যাং সন্ধ্যয়োরুভয়োরপি। কাংস্যপাত্রং ঘৃতৈঃ পূর্ণং গণ্ডদোষোপশান্তয়ে ॥ দদ্যাদ্ধেনুং হিরণ্যঞ্চ গ্রহাংশ্চাপি প্রপূজয়েৎ। মূলায়াঃ প্রথমে পাদে পিতুর্ব্বপুর্ব্বিনশ্যতি ॥ দ্বিতীয়ে নিয়তাং পীড়াং মাতুঃ কুর্য্যাৎ পিতুস্তথা। তৃতীয়ে ধননাশায় চতুর্থে সর্ব্বসম্পদঃ ॥ ব্যত্যয়েন ফলং জ্ঞেয়মশ্লেষাস্বপি পূর্ব্ববৎ। বল্মীকমৃত্তিকাং নদ্যাস্তূভয়তটমৃত্তিকাং ॥ গোবিষাণমৃদঞ্চাপি দন্তিমৃদঞ্চ নিঃক্ষিপেৎ। তীর্থাম্ভঃপঞ্চগব্যেন স্নানং মাতুঃ পিতুঃ শিশোঃ ॥ দিবা জাতা তু যা কন্যা নিশি জাতস্তু যঃ পুমান্। নোভয়োর্গণ্ডদোষঃ স্যাৎ নাচলো হস্তি পর্ব্বতং ॥ ইতি জ্যোতিষতত্ত্বং ॥

গণ্ডকঃ (পুং) খড়্গী। গণ্ডার ইতি ভাষা। ইত্যমরঃ ॥ সংখ্যাপ্রভেদঃ। গণ্ডা ইতি ভাষা। বিদ্যাবিশেষঃ। অবচ্ছেদঃ। অন্তরায়ঃ। ইতি মেদিনী ॥

গণ্ডকারী (স্ত্রী) খদিরীবৃক্ষঃ। ইতি শব্দচন্দ্রিকা ॥ বরাহক্রান্তা। ইতি রত্নমালা ॥

গণ্ডকালী (স্ত্রী) খদিরীবৃক্ষঃ। ইত্যমরঃ ॥

গণ্ডকী (স্ত্রী) স্বনামখ্যাতা নদী। ইতি মেদিনী ॥ গণ্ডক্যাশ্চৈকদেশে চ শালগ্রামস্থলং স্মৃতং। পাষাণং তদ্ভবং যত্তৎ শালগ্রামমিতি স্মৃতং ॥ ইতি স্মৃতিঃ ॥ তত্র শালগ্রামোৎপত্তিকারণং যথা। গণ্ডক্যাপি পুরা তপ্তং বর্ষাণামযুতং বিধেঃ। শীর্ণপর্ণাশনং কৃত্বা বায়ুভক্ষাপ্যনন্তরং ॥ দিব্যং বর্ষশতং তেপে বিষ্ণুং চিন্তয়তী তদা। ততঃ সাক্ষাজ্জগন্নাথো হরির্ভক্তজনপ্রিয়ঃ ॥ উবাচ মধুরং বাক্যং প্রীতঃ প্রণতবৎসলঃ। গণ্ডকি ত্বাং প্রসন্নোঽস্মি তপসা বিস্মিতোঽনঘে ॥ অনবচ্ছিন্নয়া ভক্ত্যা বরং বরয় সুব্রতে। কিং দেয়ং

তম্বদস্বাশু প্রীতোঽস্মি বরবর্ণিনি ॥ গণ্ডক্যপি পুরো দৃষ্ট্বা শঙ্খচক্রগদাধরং। দণ্ডবৎ প্রণতা ভূত্বা ততঃ স্তোতুং প্রচক্রমে॥ অহো দেব ময়া দৃষ্টো দুর্দ্দর্শো যোগিনামপি। ত্বয়া সর্ব্বমিদং সৃষ্টং জগৎ স্থাবরজঙ্গমং॥ তদনু ত্বং প্রবিষ্টোঽসি পুরুষস্তেন চোচ্যতে। তল্লীলোন্মীলিতে বিশ্বে কঃ স্বতন্ত্রোঽস্তি বৈ পুমান্॥ অনাদ্যন্তমপর্য্যন্তং যদ্‌ব্রহ্ম শ্রুতিবোধিতং। তদেব ত্বং মহাবিষ্ণো যস্ত্বাং বেদ স বেদবিৎ তবৈবাদ্যা জগন্মাতা যা শক্তিঃ পরমা স্মৃতা। তাং যোগমায়াং প্রকৃতিপ্রধানমিতি বক্ষ্যতে॥ নির্গুণঃ পুরুষোঽব্যক্তশ্চিৎস্বরূপী নিরঞ্জনঃ। আনন্দরূপঃ শুদ্ধাত্মা হ্যকর্ত্তা নির্বিকারকঃ॥ ত্বাং যোগমায়ামাবিশ্য কর্তৃত্বং প্রাপ্তবানসি। প্রকৃত্যা সৃজ্যমানেঽস্মিন্ দ্রষ্টা সাক্ষী নিগদ্যতে॥ প্রকৃতেস্ত্রিগুণৈরস্মিন্ সৃজ্যমানেঽপি নান্যথা। সান্নিধ্যমাত্রতো দেব ত্বয়ি স্ফুরতি কারণে॥ স্ফটিকে হি যথা স্বচ্ছে জবাকুসুমরাগতঃ। প্রকাশতে ত্বৎপ্রকাশাৎ জ্যোতীরূপ নতাস্মি তে॥ ব্রহ্মাদয়োঽপি কবয়ো ন বিন্দন্তি যথার্থতঃ। তৎ কথং বেদ্ম্যহং মূঢ়া তব রূপং নিরঞ্জনং॥ মূঢ়স্য জগতো মধ্যে স্থিতা কিঞ্চিদজানতী। ত্বয়া ধৃষ্টা কৃতা চাস্মি যোগ্যাযোগ্যমবিন্দতী॥ তেন লোকে মহত্ত্বঞ্চ ত্বৎপ্রসাদেন চেচ্ছতী। যদ্যাচে তত্তপোদার তন্মে দাতুং ত্বমর্হসি॥ দয়ালুরসি দীনেষু নেতি মাং ন বদ প্রভো। ততঃ প্রোবাচ ভগবান্ দেবি যদ্যত্ত্বমিচ্ছসি॥ তদ্যাচয় বরারোহে অদেয়মপি সর্ব্বথা। যদ্দুর্লভং মনুষ্যাণাং শীঘ্রং যাচয় মাং প্রতি॥ মদ্দর্শনমনুপ্রাপ্য কো বাপূর্ণমনোরথঃ। ততো হিমাংশো সা দেবী গণ্ডকী লোকতারিণী॥ প্রাঞ্জলিঃ প্রণতা ভূত্বা মধুরং বাক্যমব্রবীৎ। যদি দেব প্রসন্নোঽসি দেয়ো মে বাঞ্ছিতো বরঃ॥ মম গর্ব্ভগতো ভূত্বা বিষ্ণো মৎপুত্রতাং ব্রজ। ততঃ প্রসন্নো ভগবান্ চিন্তয়ামাস গোপতে॥ কিং যাচিতং নিম্নগয়া নিত্যং মৎসঙ্গলুব্ধয়া। দাস্যামি যাচিতং যেন লোকানাং ভবমোক্ষণং॥ ইত্যেবং কৃপয়া দেবো নিশ্চিত্য মনসা স্বয়ং। গণ্ডকীমবদৎ প্রীতঃ শৃণু দেবি বচো মম॥ শালগ্রামশিলারূপী তব গর্ভগতঃ সদা। তিষ্ঠামি তব পুত্রত্বে ভক্তানুগ্রহকারণাৎ॥ মৎসান্নিধ্যাৎ নদীনাং ত্বমতিশ্রেষ্ঠা ভবিষ্যসি। দর্শনাৎ স্পর্শনাৎ স্নানাৎ পানাচ্চৈবাবগাহনাৎ॥ হরিষ্যসি মহাপাপং বাঙ্মনঃকায়সম্ভবং। যঃ স্নাস্যতি বিধানেন দেবর্ষিপিতৃতর্পকঃ॥ তর্পয়েৎ স্বপিতৄংশ্চাপি তারয়িত্বা দিবং নয়েৎ। স্বয়ং মম প্রিয়ো ভূত্বা ব্রহ্মলোকং গমিষ্যতি॥ যদি ত্বয্যুৎসৃজেৎ প্রাণান্ মম কর্ম্মপরায়ণঃ। সোঽপি যাতি পরং স্থানং যত্র গত্বা ন শোচতি॥ এবং দত্ত্বা বরান্ দেব্যৈ তত্রৈবান্তরধীয়ত। ততঃ প্রভৃতি তিষ্ঠামঃ ক্ষেত্রেঽস্মিন্ শশলাঞ্ছন॥ ইতি বরাহপুরাণে সোমেশ্বরাদিলিঙ্গমহিমাবিমুক্তক্ষেত্রত্রিবেণ্যাদিমহিমনামাধ্যায়ঃ

গণ্ডকুসুমং (ক্লী) হস্তিমদঃ। তৎপর্য্যায়ঃ। উৎকটঃ ২। ইতি হারাবলী॥

গণ্ডকূপঃ (পুং) পর্ব্বতস্যোচ্চস্থানং। ইতি হারাবলী॥

গণ্ডগাত্রং (ক্লী) ফলবিশেষঃ। আতা ইতি ভাষা। ইতি শব্দচন্দ্রিকা॥

গণ্ডদূর্ব্বা (স্ত্রী) দূর্ব্বাবিশেষঃ। গাঁটিয়া দূর্ব্বা ইতি ভাষা। তৎপর্য্যায়ঃ। গণ্ডালী ২ অতিতীব্রা ৩ মৎস্যাক্ষী ৪ বারুণী ৫ মীননেত্রা ৬ শ্যামগ্রন্থিঃ ৭ গ্রন্থিলা ৮ গ্রন্থিপর্ণী ৯ সূচীপত্রা ১০ শ্যামকাণ্ডা ১১ জলস্থা ১২ শকুলাক্ষী ১৩ কলায়া ১৪ চিত্রা ১৫। অস্যা গুণাঃ। মধুরত্বং। বাতপিত্তজ্বরভ্রমতৃষ্ণাশ্রমদ্বন্দ্বদোষনাশিত্বং। শিশিরত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ গণ্ডদূর্ব্বা তু গণ্ডালী মৎস্যাক্ষী শকুলাক্ষকঃ। গণ্ডদূর্ব্বা হিমা লোহদ্রাবিণী গ্রাহিণী লঘুঃ॥ তিক্তা কষায়া মধুরা বাতকৃৎ কটুপাকিনী। দাহতৃষ্ণাবলাশাস্রকুষ্ঠপিত্তজ্বরাপহা॥ ইতি ভাবপ্রকাশঃ॥

গণ্ডমালা (স্ত্রী) গলরোগবিশেষঃ। তৎপর্য্যায়ঃ। গলগণ্ডঃ ২। ইতি হেমচন্দ্রঃ॥ তস্যৌষধং যথা। অজমোদঃ সসিন্দুরো হরিতালনিশাদ্বয়ং। ক্ষারদ্বয়ং ফেনযুতমার্দ্রকং শরলোদ্ভবং॥ ইন্দ্রবারুণ্যপামার্গকদলৈঃ কন্দলৈঃ সমৈঃ। এভিঃ সর্ষপজং তৈলমজামূত্রৈশ্চ যোজিতং॥ মৃদ্বগ্নিনা পচেদেতদর্কক্ষীরেণ সংযুতং। অজমোদাদিকং তৈলং গণ্ডমালাং ব্যপোহতি॥ বিদগ্ধন্তু পচেৎ পক্বং পক্বঞ্চৈব বিশোধয়েৎ। রোপণং মৃদুভাবঞ্চ তৈলেনানেন কারয়েৎ॥ অজমোদাদিকং তৈলং মহাবীর্য্যঞ্চ রোগনুৎ। ইতি গারুড়ে ১৭৮ অধ্যায়ঃ॥ অপি চ। দ্বিজযষ্ট্যাশ্চ বৈ মূলং পিষ্টং তণ্ডুলবারিণা। গণ্ডমালাং হরেল্লেপাৎ কুরুণ্ড-গলগণ্ডকং॥ ইতি গারুড়ে ১৯০ অধ্যায়ঃ॥ অপি চ। অপরাজিতায়া মূলঞ্চ গোমূত্রেণ সমন্বিতং। পীতঞ্চাপি হরত্যেব গণ্ডমালাং ন সংশয়ঃ॥ ইতি তত্রৈব ১৯৪ অধ্যায়ঃ॥ অপি চ। বিল্বাগ্নিমন্থশ্যোনাকপাটলাপারিভদ্রকং। প্রশারণ্যশ্বগন্ধা চ বৃহতী কণ্টকারিকা॥ বলা চাতিবলা রাস্না প্রদংষ্ট্রা চ পুনর্নবা। এরণ্ডশারিবা পর্ণী গুড়ূচী কপিকচ্ছুরা॥ এষাং দশপলিকান্ ভাগান্ কাথয়েৎ সলিলেঽমলে। তেন পাদাবশেষেণ তৈলং পাত্রে বিপাচয়েৎ॥ আজং বা যদি বা গব্যং ক্ষীরং দত্ত্বা চতুর্গুণং। শতাবরীরসঞ্চৈব তৈলতুল্যং প্রদাপয়েৎ॥ দ্রব্যাণি যানি পেষ্যাণি তানি বক্ষ্যামি তৎ শৃণু। শতপুষ্পা দেবদারু শালপর্ণী বচাগুরু॥ কুষ্ঠং মাংসী সৈন্ধবঞ্চ পলমেকং পুনর্নবা॥ পানে নস্যে তথাভ্যঙ্গে তৈলমেতৎ প্রদাপয়েৎ। হৃচ্ছূলং পার্শ্বশূলঞ্চ গণ্ডমালাঞ্চ নাশয়েৎ॥ অপস্মারং বাতরক্তমায়ুষ্মাংশ্চ পুমান্ ভবেৎ। গর্ভমশ্বতরী বিন্দ্যাৎ কিং পুনর্মানুষী শিব॥ অশ্বানাং বাতভগ্নানাং কুঞ্জরাণাং নৃণাং তথা। তৈলমেতৎ প্রদাতব্যং সর্ব্ববাতবিকারিণাং॥ ইতি

গারুড়ে ১৯৮ অধ্যায়ঃ ॥ * ॥ অস্তচ্চ। অথ গণ্ডমালায়া লক্ষণমাহ। কর্কন্ধু-কোলামলকপ্রমাণৈঃ কক্ষাংসমন্যা গল-বংক্ষণেষু। মেদঃকফাভ্যাং চিরমন্দ-পাকৈঃ স্যাদগণ্ডমালা বহুভিস্তু গণ্ডৈঃ॥ কর্কন্ধুঃ ক্ষুদ্রবদরী। কোলং বৃহদ্বদরং। চিরমন্দপাকৈঃ চিরেণ মন্দোঽল্পঃ পাকো যেষাং তৈঃ ॥ * ॥ অথ গণ্ডমালায়া এবা-বস্থাবিশেষমপচীমাহ। তে গ্রন্থয়ঃ কেচি-দবাপ্তপাকাঃ স্রবন্তি নশ্যন্তি ভবন্তি চান্যে। কালানুবন্ধং চিরমাদধাতি সৈবাপচীতি প্রবদন্তি কেচিৎ ॥ তে গ্রন্থয়ঃ গণ্ডমালায়া এবং গণ্ডাঃ কেচিদবাপ্তপাকাঃ সন্তঃ স্রবন্তি কেচিৎ নশ্যন্তি স্বয়ো হন্তি! অন্যে ভবন্তি চ কালানুবন্ধাচ্চিরমাদধাতি। যা গণ্ডমালা চিরং তিষ্ঠতি সৈবাপচী ইতি কেচিদ্বদন্তি ॥ * ॥ অপচ্যাঃ সাধ্যত্বাদিক-মাহ। সাধ্যা স্মৃতা পীনসপার্শ্বশূলকাশজ্বর-চ্ছর্দ্দিযুতা ত্বসাধ্যা ॥ * ॥ অথ গ্রন্থিঃ। গ্রন্থে-র্লক্ষণমাহ। বাতাদয়ো মাংসমসৃক্ চ দুষ্টা সংদূষ্য মেদশ্চ তথা শিরাশ্চ। বৃত্তোন্নতং বিগ্রথিতং তু শোথং কুর্ব্বন্ত্যতো গ্রন্থিরিতি প্রদিষ্টঃ॥ বিগ্রথিতং গ্রন্থিরূপং। অতো গ্রন্থিঃ ॥*॥ অস্যা নিদানাদি পূর্ব্বলিখিতং। অথ গণ্ডমালায়াশ্চিকিৎসা। কাঞ্চনার-ত্বচঃ কাথঃ শুণ্ঠীচূর্ণেন সংযুতঃ। মাক্ষি-কাঢ্যঃ সকৃৎপীতঃ কাথো বরুণমূলজঃ ॥ গণ্ডমালাং হরত্যাশু চিরকালানুবন্ধিনীং। পলমর্দ্ধপলং বাপি পিষ্ট্বা তণ্ডুলবারিণা ॥ কাঞ্চনারত্বচং পীত্বা গণ্ডমালাং ব্যপোহতি।

কাঞ্চনারস্য গৃহ্লীয়াৎ ত্বচং পঞ্চপলো-ন্মিতং ॥ নাগরস্য কণায়াশ্চ মরী-চস্য পলং পলং। পথ্যাবিভীতধাত্রীণাং পলমর্দ্ধং পৃথক্ পৃথক্ ॥ বরুণস্যাক্ষমেকঞ্চ পত্রৈকেলাত্বচং পুনঃ। টঙ্কং টঙ্কং সমা-দায় সর্ব্বাণ্যেকত্র চূর্ণয়েৎ। যাবচ্চূর্ণমিদং সর্ব্বং তাবানেবাত্র গুগ্গুলুঃ ॥ সঙ্কুট্য সর্ব্ব-মেকত্র পিণ্ডং কৃত্বা বিধারয়েৎ। গুটিকাঃ শাণিকাঃ কৃত্বা প্রভাতে ভক্ষয়েন্নরঃ॥ গণ্ড-মালাং জয়ত্যুগ্রামপচীমর্ব্বুদানি চ। গ্রন্থ্য-র্ব্বুদানি গুল্মাংশ্চ কুষ্ঠানি চ ভগন্দরং ॥ প্রদেয়শ্চানুপানার্থং কাথো মুণ্ডিতিকা-ভবঃ। কাথঃ খদিরসারস্য কাথঃ কোষ্ণো-ঽভয়াভবঃ ॥ কাঞ্চনারগুগ্গুলুঃ ॥ * ॥ চক্র-মর্দ্দকমূলস্য কল্কং দত্ত্বা বিপাচয়েৎ। কেশরাজরসে তৈলং কটুকং মৃদুনাগ্নিনা ॥ পাদশেষে বিনিঃক্ষিপ্য সিন্দুরমবতারয়েৎ। এতত্তৈলং নিহন্ত্যাশু গণ্ডমালাং সুদা-রুণাং ॥ চক্রমর্দ্দতৈলং ॥ গুঞ্জামূলফলৈ-স্তৈলং বিপকং দ্বিগুণাম্ভসা। হরেদভ্যঙ্গ-নস্যাভ্যাং গণ্ডমালাং সুদারুণাং ॥ গুঞ্জ-তৈলং ॥ * ॥ অথাপচ্যাশ্চিকিৎসা। চন্দনং সাভয়া লাক্ষা বচা কটুকরোহিণী। এভিস্তৈলং শৃতং পীতং সমূলামপচীং হরেৎ ॥ চন্দনাদিতৈলং ॥ * ॥ ব্যোষং বিড়ঙ্গং মধুকং সৈন্ধবং দেবদারু চ। তৈলমেভিঃ শৃতং নস্যাৎ সকৃচ্ছ্রামপচীং হরেৎ ॥ ব্যোষাদিতৈলং ॥ * ॥ অথ গ্রন্থি-চিকিৎসা। সর্জ্জিকামূলকক্ষারশঙ্খচূর্ণসম-ন্বিতং। এতেন সহিতো লেপো হন্তি

গ্রন্থিং তথার্ব্বুদং ॥ গ্রন্থির্ন যো নশ্যতি ভেষজৈন নিষ্কাশ্য তং শস্ত্রচিকিৎসকেন। জাত্যাদিপকেন ঘৃতেন বৈদ্যো ব্রণেন চান্যেন চ সংচিকিৎসেৎ ॥ গ্রন্থিমুৎকৃত্য পশ্চাত্তু ব্রণোক্তং ক্রমমাচরেৎ। শিরা-গ্রন্থিং বিহায়ান্যে শেষে শস্ত্রং প্রযুজ্যতে ॥ ইতি ভাবপ্রকাশঃ ॥

গণ্ডমালিকা (স্ত্রী) লজ্জালুবৃক্ষঃ। ইতি রত্নমালা ॥

গণ্ডশৈলঃ (পুং) গিরেশ্চ্যুতঃ স্থূলোপল। ভূকম্পাদিনা পর্ব্বতাৎ গলিতো মহান্ প্রস্তরঃ। ইত্যমরঃ ॥ ললাটং। ইতি হেমচন্দ্রঃ

গণ্ডাঙ্গঃ (পুং) খড়্গী। ইতি শব্দচন্দ্রিকা ॥

গণ্ডারিঃ (পুং) কোবিদারবৃক্ষঃ। ইতি ভাবপ্রকাশঃ ॥

গণ্ডালী (স্ত্রী) শ্বেতদূর্ব্বা। ইত্যমরঃ ॥ সর্পাক্ষী। ইতি ভাবপ্রকাশঃ ॥ গণ্ডদূর্ব্বা। ইতি রাজনির্ঘণ্টঃ ॥

গণ্ডিঃ (পুং) বৃক্ষস্য মূলাচ্ছাখাবধিভাগঃ। গুঁড়ি ইতি ভাষা। ইতি হেমচন্দ্রঃ ॥

গণ্ডীরঃ (পুং) সমষ্ঠিলা। শসা ইতি খ্যাতঃ। সমঠ ইতি খ্যাতঃ। অনূপদেশজং শাকং। ইতি কেচিৎ। গুণ্ঠিয়া ইতি খ্যাতশাকং। ইতি সর্ব্বানন্দঃ। ইত্যমরটীকায়াং ভরতঃ ॥ বীরঃ। ইতি জটাধরঃ ॥

গণ্ডীরী (স্ত্রী) সেহুণ্ডবৃক্ষঃ। সিজ ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ ॥

গণ্ডুঃ (পুং স্ত্রী) উপধানং। ইতি জটাধরঃ ॥

গণ্ডূপদঃ (পুং) কিঞ্চুলুকঃ। ইত্যমরঃ ॥

গণ্ডূপদভবং (ক্লী) সীসকং। ইতি হেমচন্দ্রঃ ॥

গণ্ডূপদী (স্ত্রী) কিঞ্চুলুকপত্নী। তৎপর্য্যায়ঃ। শিলী ২। ইত্যমরঃ ॥ সিলী ৩। ক্ষুদ্র-কিঞ্চুলুকজাতিঃ। ছোটজাতি কেঁচুয়া ইতি ভাষা। ইত্যমরটীকায়াং ভরতঃ ॥

গণ্ডূষঃ (পুং) মুখপূরণং। হস্তিশুণ্ডাগ্রভাগঃ। প্রসৃতিপরিমিতং। ইতি মেদিনী ॥

গণ্ডূষা (স্ত্রী) গণ্ডূষঃ। ইতি লিঙ্গাদিসংগ্রহে অমরঃ ॥ মুখপূর্ণতোয়মিতি ভগী ॥ রায়-মুকুটস্তু গণ্ডূষাশব্দো মুখপূরণে স্ত্রীলিঙ্গঃ। পুংলিঙ্গস্তু গণ্ডূষশব্দশ্চুলুকপরিমাণ ইতি। যথা। অপাং দ্বাদশগণ্ডূষৈর্মুখশুদ্ধির্বিধী-য়তে। ইতি তট্টীকাসারসুন্দরী ॥

গণ্ডোলঃ (পুং) গুড়ঃ। গ্রাসঃ। ইতি হেমচন্দ্রঃ ॥

গণ্যং (ত্রি) গণনীয়ং। গণিতব্যং। তৎ-পর্য্যায়ঃ। গণেয়ং ২ সংখ্যেয়ং ৩। ইতি হেমচন্দ্রঃ ॥

গতং (ত্রি) বিজ্ঞাতং। যাতং। ইতি মেদিনী ॥ গমনে ক্লী ॥

গতনাসিকঃ (ত্রি) নাসিকারহিতঃ। তৎ-পর্য্যায়ঃ। বিগ্রঃ ২। ইত্যমরঃ ॥ বিখ্রঃ ৩ ছিন্ননাসিকঃ ৪। ইতি শব্দরত্নাবলী ॥ বিনাসিকঃ ৫ বিনসঃ ৬। ইতি জটাধরঃ ॥

গতসন্নকঃ (পুং) নির্ম্মদহস্তী। ইতি শব্দ-চন্দ্রিকা ॥

গতাগতং (ক্লী) পক্ষিগতিবিশেষঃ। ইতি জটাধরঃ ॥ যাতায়াতং। যথা। গতাগত-কুতূহলং নয়নয়োরপাঙ্গাবধি। ইতি রস-

গতার্ত্তবা (স্ত্রী) বৃদ্ধা। বন্ধ্যা। ইতি রাজনির্ঘণ্টঃ ॥

গতিঃ (স্ত্রী) গমনকর্ম্ম। তৎপর্য্যায়ঃ। বর্ত্ততে ১ অয়তে ২ লোটতে ৩ লোঠতে ৪ স্যন্দতে ৫ কসতি ৬ সর্পতি ৭ স্যমতি ৮ স্রবতি ৯ স্রংশতে ১০ অবতি ১১ শ্চোততি ১২ ধ্বংসতি ১৩ বেনতি ১৪ মার্ষ্টি ১৫ গুরণ্যতি ১৬ শবতি ১৭ কালয়তি ১৮ পেলয়তি ১৯ কণ্টতি ২০ পিস্যতি ২১ বিস্যতি ২২ মিস্যতি ২৩ প্রবতে ২৪ প্লবতে ২৫ চ্যবতে ২৬ কবতে ২৭ গবতে ২৮ নবতে ২৯ ক্ষোদতি ৩০ নক্ষতি ৩১ সক্ষতি ৩২ ম্যক্ষতি ৩৩ সচতি ৩৪ ঋচ্ছতি ৩৫ তুরীয়তি ৩৬ চততি ৩৭ অততি ৩৮ গাতি ৩৯ ইয়ক্ষতি ৪০ সশ্চতি ৪১ সরতি ৪২ রংহতি ৪৩ যততে ৪৪ ভ্রমতি ৪৫ ধজতি ৪৬ রজতি ৪৭ লজতি ৪৮ ক্ষিয়তি ৪৯ ধমতি ৫০ মিনাতি ৫১ ঋণ্বতি ৫২ ঋণোতি ৫৩ স্বরতি ৫৪ সিসর্ত্তি ৫৫ বেবিষ্টিঃ ৫৬ যোষিষ্টিঃ ৫৭ ঋণাতি ৫৮ ঋয়তে ৫৯ তেজতি ৬০ দধ্যতি ৬১ দঘ্নোতি ৬২ যুধ্যতি ৬৩ ধন্বতি ৬৪ অরুষতি ৬৫ আর্য্যন্তি ৬৬ ডীয়তে ৬৭ তকতি ৬৮ টীয়তে ৬৯ ইষতি ৭০ ফণতি ৭১ হনতি ৭২ অর্দ্ধতি ৭৩ মর্দ্দতি ৭৪ সস্থতে ৭৫ নসতে ৭৬ হর্যতি ৭৭ ইয়র্ত্তি ৭৮ ঈর্ত্তে ৭৯ ঈখতে ৮০ ভ্রয়তি ৮১ স্বাত্রতি ৮২ গন্তি ৮৩ আগনীগন্তি ৮৪ জংগন্তি ৮৫ জিন্বতি ৮৬ জসতি ৮৭ গমতি ৮৮ ধ্রতি ৮৯ গ্লাতি ৯০ ধ্রয়তি ৯১ বহতে ৯২ রথর্য্যতি ৯৩ জেহতে ৯৪ স্বঃকতি ৯৫ ক্ষুম্পতি ৯৬ প্সাতি ৯৭ বাতি ৯৮ যাতি ৯৯ দূয়তি ১০০ দ্রাতি ১০১ ভুলতি ১০২ এজতি ১০৩ জমতি ১০৪ জবতি ১০৫ বঞ্চতি ১০৬ অনিতি ১০৭ পবতে ১০৮ হন্তি ১০৯ সেধতি ১১০ অগন্ ১১১ অজগন্ ১১২ জিগাতি ১১৩ পততি ১১৪ ইন্বতি ১১৫ দ্রমতি ১১৬ দ্রবতি ১১৭ বেতি ১১৮ হয়ন্তাৎ ১১৯ এতি ১২০ জগায়াৎ ১২১ অযুথুঃ ১২২। ইতি দ্বাবিংশং শতং গতিকর্ম্ম। ইতি বেদনিঘণ্টৌ ২ অধ্যায়ঃ ॥ মার্গঃ। দশা। জ্ঞানং। যাত্রা। অভ্যুপায়ঃ। নাড়ীব্রণং। সরণী। ইতি মেদিনী ॥

গতিলা (স্ত্রী) নদীবিশেষঃ। পরম্পরাভেদঃ। ইত্যুণাদিকোষঃ ॥

গত্বরঃ (ত্রি) গমনশীলঃ। ইতি ব্যাকরণং ॥

গদ ৎ ক অভ্রধ্বনৌ। ইতি কবিকল্পদ্রুমঃ ॥ অভ্রধ্বনৌ মেঘকর্ত্তৃকশব্দে। গদয়তি মেঘঃ। ইতি দুর্গাদাসঃ ॥

গদ ভাষে। ইতি কবিকল্পদ্রুমঃ ॥ গদতি। সারঙ্গং কতিচিচ্চ সংজগদিরে ইতি গণকৃতানিত্যত্বাৎ। ইতি দুর্গাদাসঃ ॥

গদং (ক্লী) বিষং। ইতি রাজনির্ঘণ্টঃ ॥

গদঃ (পুং) রোগঃ। শ্রীকৃষ্ণভ্রাতা। ইতি হেমচন্দ্রঃ ॥ ভাষণঞ্চ

গদয়িত্নুঃ (পুং) কন্দর্পঃ। ইতি মেদিনী ॥

গদয়িত্নুঃ (ত্রি) জল্পাকঃ। কামুকঃ। ইতি মেদিনী ॥

গদা (স্ত্রী) স্বনামখ্যাতলৌহময়াস্ত্রং। ইতি মেদিনী॥ পাটলাবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥

গদাখ্যং (ক্লী) কুষ্ঠং। কুড় ইতি ভাষা। ইতি রত্নমালা॥

গদাগদৌ (পুং) অশ্বিনীকুমারৌ। ইতি ত্রিকাণ্ডশেষঃ॥ দ্বিবচনান্তোঽয়ং শব্দঃ॥

গদাগ্রজঃ (পুং) শ্রীকৃষ্ণঃ। ইতি ত্রিকাণ্ডশেষঃ॥

গদাগ্রণীঃ (পুং) ক্ষয়রোগঃ। ইতি রাজনির্ঘণ্টঃ॥

গদাধরঃ (পুং) বিষ্ণুঃ। ইতি হলায়ুধঃ॥

গদাভৃৎ (পুং) বিষ্ণুঃ। ইতি হেমচন্দ্রঃ॥

গদাম্বরঃ (পুং) মেঘঃ। ইতি ত্রিকাণ্ডশেষঃ॥

গদারাতিঃ (পুং) ঔষধং। ইতি রাজনির্ঘণ্টঃ॥

গদাহ্বং (ক্লী) কুষ্ঠং। কুড় ইতি ভাষা। ইতি শব্দরত্নাবলী॥

গদী [ন্] (পুং) বিষ্ণুঃ। ইতি হারাবলী॥ গদাবিশিষ্টে রোগযুক্তে চ ত্রি॥

গদ্গদঃ (পুং) লুপ্তপদব্যঞ্জনাভিধায়ী। অত্যস্পষ্টবক্তা। তস্য সম্প্রাপ্তিপূর্ব্বকলক্ষণং যথা। আবৃত্য বায়ুঃ সকফো ধমনীঃ শব্দবাহিনীঃ। নরান্ করোত্যক্রিয়কান্ মূকমিম্মিনগদ্গদান্॥ ইতি মাধবকরঃ॥

গদ্গদধ্বনিঃ (পুং) হর্ষশোকাদিনা অস্পষ্টধ্বনিঃ। তৎপর্য্যায়ঃ। মম্মনঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥

গদ্যং (ক্লী) পদ্যভিন্নং। কবিকৃতং। অপাদঃ পদসন্তানঃ। ইত্যমরঃ॥ কবিকৃতভিন্নে ত্রি। যথা গদ্যো ব্যবহারঃ গদ্যা বাক্ গদ্যং বচঃ। ইতি তট্টীকায়াং ভরতঃ॥ অপাদঃ পদসন্তানো গদ্যমাখ্যায়িকা কথা। ইতি দণ্ডী॥ আখ্যায়িকা তু আচষ্টে প্রতিপাদয়তি অত্যর্থং আখ্যায়িকা অত্র নায়কেন স্বয়মুপলব্ধোঽর্থ আখ্যায়তে ইত্যেকে। জ্ঞাতায়াং সত্যার্থায়াং কথায়ামাখ্যায়িকা। সা চ মাধবিকা বাসবদত্তা হর্ষচরিতাদিঃ। কথা তু। প্রবন্ধস্য কল্পনা রচনা বহ্বনৃতা স্তোকসত্যা কথা। প্রবন্ধকল্পনাং স্তোকসত্যাং প্রাজ্ঞাঃ কথাং বিদুঃ। পরম্পরাশ্রয়া যস্মাৎ সা মতাখ্যায়িকা কচিৎ॥ ইতি কোলাহলাচার্য্যঃ॥ কথা কাদম্বর্য্যাদিঃ। ইত্যমরটীকায়াং ভরতঃ॥

গদ্যানকং (ক্লী) অষ্টচত্বারিংশৎরক্তিকাপরিমাণং। ইতি লীলাবতী॥ চতুঃষষ্টিগুঞ্জাপরিমাণং। ইতি বৈদ্যকং॥ গড্যালকমিতি কুত্রচিৎ পাঠঃ॥

গন্তা [ঋ] (ত্রি) গমনকর্ত্তা। ইতি ব্যাকরণং॥

গন্তুঃ (পুং) পথিকঃ। ইত্যুণাদিকোষঃ॥

গন্ত্রী (স্ত্রী) বৃষবহনীয়শকটং। গরুর গাড়ি ইতি ভাষা। ইত্যমরঃ॥

গন্ত্রীরথঃ (পুং) শকটং। তৎপর্য্যায়ঃ। মঠঃ২। ইতি হারাবলী॥

গন্ধ ক ঙ দ্রুহি। ইতি কবিকল্পদ্রুমঃ॥ ক ঙ গন্ধয়তে। দ্রুহি হিংসায়াং। গতিহিংসাযাচনেষ্বিতি রমানাথঃ। ইতি দুর্গাদাসঃ॥

গন্ধং (ক্লী) কৃষ্ণাগুরু। ইতি রাজনির্ঘণ্টঃ॥

গন্ধঃ (পুং) আমোদঃ। ইতি বিশ্বঃ॥ স তু ঘ্রাণগ্রাহ্যপৃথিবীগুণঃ। যথা। ঘ্রাণগ্রাহ্যো

ভবেদগন্ধো ঘ্রাণস্তেবোপকারকঃ। সৌরভ-ঞ্চাসৌরভঞ্চ তদ্দ্বেধা পরিকীর্ত্তিতং ॥ ইতি ভাষাপরিচ্ছেদঃ ॥ স তু দশবিধঃ। যথা। ইষ্টঃ ১ কস্তুরিকাদৌ। অনিষ্টঃ ২ শবাদৌ। মধুরঃ ৩ মধুপুষ্পাদৌ। কটুঃ ৪ মরিচাদৌ। নির্হারী ৫ হিঙ্গ্বাদৌ। সংহতঃ ৬ চিত্রগন্ধঃ অনেককল্কগতঃ। স্নিগ্ধঃ ৭ সদ্যস্তপ্তঘৃতাদৌ। রূক্ষঃ ৮ সার্ষপতৈলাদৌ। বিসদঃ ৯ শাল্যন্নাদৌ। ইতি ভারতে মোক্ষধর্ম্মঃ ॥ অম্লঃ ১০ আম্রাতকাদৌ। ইত্যাশ্বমেধিকপর্ব্ব ॥ * ॥ সৌরভং। তত্তু পঞ্চবিধং। যথা। গন্ধঞ্চ সম্যক্ শৃণুতং পুত্র বেতালভৈরব। চূর্ণীকৃতো বা ঘৃষ্টো বা দাহাকর্ষিত এব বা ॥ রসঃ সম্মর্দ্দজো বাপি প্রাণ্যঙ্গোদ্ভব এব বা। গন্ধঃ পঞ্চবিধঃ প্রোক্তো দেবানাং প্রীতিদায়কঃ ॥ গন্ধচূর্ণং গন্ধপত্রং চূর্ণং সুমনসাং তথা। প্রশস্তগন্ধযুক্তানাং পত্রচূর্ণানি যানি চ ॥ তানি গন্ধাহ্বয়ানি স্যুঃ স গন্ধঃ প্রথমঃ স্মৃতঃ। ১। ঘৃষ্টো মলয়জো গন্ধঃ শরলশ্চ নমেরুণা ॥ অগুরুপ্রভৃতিশ্চাপি যস্য পঙ্কঃ প্রদীয়তে। ঘৃষ্ট্বা স ঘৃষ্টো গন্ধোঽয়ং দ্বিতীয়ঃ পরিকীর্ত্তিতঃ ॥ ২ ॥ দেবদার্ব্বগুরুব্রহ্মশালসারাস্তচন্দনাঃ। প্রিয়াদীনাঞ্চ যো দগ্ধ্বা গৃহ্যতে দাহজো রসঃ ॥ স দাহাকর্ষিতো গন্ধস্তৃতীয়ঃ পরিকীর্ত্তিতঃ।৩। সগন্ধকরবীবিল্বগন্ধিনীতিলকং তথা ॥ প্রভৃতীনাং রসো যোঽসৌ নিষ্পীড্য পরিগৃহ্যতে। স সংমর্দ্দোদগতো গন্ধঃ সংমর্দ্দজ ইতীর্য্যতে ॥ ৪ ॥ মৃগনাভিসমুদ্ভূতস্তৎকোষোদ্ভব এব বা। গন্ধঃ প্রাণ্যঙ্গজঃ প্রোক্তো মোদদঃ স্বর্গবাসিনাং ॥ ৫ ॥ কর্পূরগন্ধসারাদ্যাঃ ক্ষোদে ঘৃষ্টে চ সংস্থিতাঃ। চন্দ্রভাগাদয়শ্চাপি রসে পঙ্কে চ সঙ্গতাঃ ॥ গন্ধসারস্তু সর্ব্বত্র সংসর্গাদৌ প্রযুজ্যতে। মৃগনাভির্ভবেদ্ঘৃষ্টশ্চূর্ণোঽপ্যন্যস্য যোগতঃ ॥ এবং সর্ব্বস্তু সর্ব্বত্র গন্ধো ভবতি পঞ্চধা। ঘৃষ্টাদিভাবাদন্যোন্যং গন্ধঃ প্রীতিকরঃ পরঃ ॥ গন্ধস্য বিস্তরো ভেদঃ প্রোক্তঃ কালীয়কাদয়ঃ। সর্ব্বঃ পঞ্চবিধেষ্বেব প্রবিষ্টো ভবতি ক্ষণাৎ ॥ * ॥ গন্ধো মলয়জো যস্তু দৈবে পৈত্র্যে চ সম্মতঃ। তৎপঙ্কো বা রসো বাপি চূর্ণো বা বিষ্ণুতুষ্টিদঃ ॥ সর্ব্বেষু গন্ধজাতেষু প্রশস্তো মলয়োদ্ভবঃ। তস্মাৎ সর্ব্বপ্রযত্নেন দদ্যান্মলয়জং সদা ॥ কৃষ্ণাগুরুঃ সকর্পূরঃ সহিতো মলয়োদ্ভবৈঃ। বৈষ্ণবীপ্রীতিদো গন্ধঃ কামাখ্যায়াশ্চ ভৈরব ॥ কুঙ্কুমাগুরুকস্তূরীচন্দ্রভাগৈঃ সমীকৃতৈঃ। ত্রিপুরাপ্রীতিদো গন্ধস্তথা চণ্ড্যাশ্চ শম্ভুনা ॥ দৈবতোদ্দেশপূর্ব্বেণ গন্ধান্ সম্পূজ্য সাধকঃ। দেবায়েজ্যায় বিতরেৎ সর্ব্বসাধ্যেষু পূজকঃ ॥ গন্ধেন লভতে কামং গন্ধো ধর্ম্মপ্রদঃ সদা। অর্থানাং সাধকো গন্ধো গন্ধে মোক্ষঃ প্রতিষ্ঠিতঃ ॥ অয়ং বাং কথিতো গন্ধঃ পুত্রৌ বেতালভৈরবৌ। ইতি কালিকাপুরাণে ৬৮ অধ্যায়ঃ ॥ প্রতিবেশী। লেশঃ। সম্বন্ধঃ। গন্ধকঃ। ইতি মেদিনী ॥ গর্ব্বঃ। ইতি হেমচন্দ্রঃ ॥ শোভাঞ্জনঃ। ইতি

শব্দরত্নাবলী ॥ ঘৃষ্টচন্দনং। যথা। ঘৃষ্টৌ মলয়জো গন্ধঃ। ইতি শুদ্ধিতত্ত্বং ॥

গন্ধকঃ (পুং) শোভাঞ্জনবৃক্ষঃ। ইতি শব্দরত্নাবলী॥ উপধাতুবিশেষঃ। তৎপর্য্যায়ঃ। গন্ধাশ্মা ২ সৌগন্ধিকঃ ৩। ইত্যমরঃ॥ গন্ধিকঃ ৪ সুগন্ধিকঃ ৫। ইতি তট্টীকা॥ গন্ধপাষাণঃ ৬ পামায়ঃ ৭। ইতি রত্নমালা॥ গন্ধমোদনঃ ৮ পূতিগন্ধঃ ৯ অতিগন্ধঃ ১০ বরঃ ১১ সুগন্ধঃ ১২ দিব্যগন্ধঃ ১৩ গন্ধঃ ১৪ রসগন্ধকঃ ১৫ কুষ্ঠারিঃ ১৬ ক্রূরগন্ধঃ ১৭ কীটঘ্নঃ ১৮ শরভূমিজঃ ১৯ গন্ধী ২০। ইতি শব্দরত্নাবলী॥ * ॥ অস্য গুণাঃ। কটুত্বং। উষ্ণত্বং। তীব্রগন্ধত্বং। অতিবহ্নিকারিত্বং। বিষকুষ্ঠকণ্ডূতিখর্জ্জুত্বগ্দোষনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ কৃমিপ্লীহনেত্ররোগনাশিত্বং। ইতি রাজবল্লভঃ॥ * ॥ তস্য ভেদাঃ। শ্বেতো রক্তশ্চ পীতশ্চ নীলশ্চেতি চতুর্ব্বিধঃ। গন্ধকো বর্ণতো জ্ঞেয়ো ভিন্নভিন্নগুণাশ্রয়ঃ॥ শ্বেতঃ কুষ্ঠাপহারী স্যাদ্রক্তো লোহপ্রয়োগকৃৎ। পীতো রসে প্রয়োগার্হো নীলো বর্ণান্তরোচিতঃ॥ ইতি রাজনির্ঘণ্টঃ॥ * ॥ অথ গন্ধকস্যোৎপত্তিনামলক্ষণগুণাঃ। শ্বেতদ্বীপে পুরা দেব্যাঃ ক্রীড়ন্ত্যা রজসাপ্লুতং। দুকূলং তেন বস্ত্রেণ স্নাতায়াঃ ক্ষীরনীরধৌ। প্রসৃতং যদ্রজস্তস্মাদ্গন্ধকঃ সমজায়ত॥ গন্ধকো গন্ধিকশ্চাপি গন্ধপাষাণ ইত্যপি। সৌগন্ধিকশ্চ কথিতো বলির্বলবসাপি চ॥ চতুর্দ্ধা গন্ধকঃ প্রোক্তো রক্তঃ পীতঃ সিতোঽসিতঃ। রক্তো হেমক্রিয়াসুক্তঃ পীতশ্চৈব রসায়নে। ব্রণবিলেপনে শ্বেতঃ কৃষ্ণঃ শ্রেষ্ঠঃ সুদুর্লভঃ॥ শ্রেষ্ঠো হেমক্রিয়াদিষু সর্ব্বত্র প্রশস্ততরঃ॥ * ॥ গন্ধকঃ কটুকস্তিক্তো বীর্য্যোষ্ণস্তুবরঃ সরঃ। পিত্তলঃ কটুকঃ পাকে কণ্ডূবীসর্পজন্তুজিৎ॥ হন্তি কুষ্ঠক্ষয়প্লীহকফবাতান্ রসায়নঃ॥ অশোধিতো গন্ধক এব কুষ্ঠং করোতি তাপং বিষমং শরীরে। সৌখ্যঞ্চ রূপঞ্চ বলং তথৌজঃ শুক্রং নিহন্ত্যেব করোতি চাস্রং॥ * ॥ তস্য শোধনবিধির্যথা। লোহপাত্রে বিনিঃক্ষিপ্য ঘৃতমগ্নৌ প্রতাপয়েৎ। তপ্তে ঘৃতে তৎসমানং ক্ষিপেদ্গন্ধকজং রজঃ॥ বিদ্রুতং গন্ধকং দৃষ্ট্বা তনুবস্ত্রে বিনিঃক্ষিপেৎ। যথা বস্ত্রাদ্বিনিঃসৃত্য দুগ্ধমধ্যেঽখিলং ক্ষিপেৎ॥ এবং স গন্ধকঃ শুদ্ধ্যেৎ সর্ব্বকর্ম্মোচিতো ভবেৎ। ইতি ভাবপ্রকাশঃ॥ শোধিতো যস্তু গন্ধঃ স্যাৎ জরামৃত্যুরুজাপহঃ। অগ্নিসন্দীপনঃ শ্রেষ্ঠো বীর্য্যবৃদ্ধিকরোঽস্থিকৃৎ॥ ইতি প্রয়োগামৃতং॥

গন্ধকন্দকঃ (পুং) কশেরু। ইতি বৈদ্যকং॥

গন্ধকারিকা (স্ত্রী) সৈরিন্ধ্রী। সা তু পরবেশ্মস্থা স্ববশা শিল্পকারিকা। ইতি হলায়ুধঃ॥

গন্ধকালিকা (স্ত্রী) ব্যাসমাতা। ইতি হেমচন্দ্রঃ॥

গন্ধকালী (স্ত্রী) ব্যাসমাতা। ইতি শব্দরত্নাবলী॥

গন্ধকাষ্ঠং (ক্লী) অগুরুকাষ্ঠং। ইতি ত্রিকাণ্ডশেষঃ॥ শম্বরচন্দনং। ইতি রাজনির্ঘণ্টঃ॥

গন্ধকুটী (স্ত্রী) মুরানামগন্ধদ্রব্যং। ইত্যমরঃ॥

গন্ধকুসুমা ( স্ত্রী ) গণিকারীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

গন্ধকেলিকা ( স্ত্রী ) কস্তূরী। ইতি রাজনির্ঘণ্টঃ॥

গন্ধকোকিলা ( স্ত্রী ) গন্ধদ্রব্যবিশেষঃ। অস্যা গুণাঃ। স্নিগ্ধত্বং। উষ্ণত্বং। কফনাশিত্বং। তিক্তত্বং। সুগন্ধিত্বং। ইতি ভাবপ্রকাশঃ॥

গন্ধখেড়ং ( ক্লী ) গন্ধবীরণং। গন্ধবেণা ইতি ভাষা। তৎপর্য্যায়ঃ। ভূতৃণং ২ রৌহিষং ৩ গোময়প্রিয়ং ৪। ইতি রত্নমালা॥

গন্ধখেড়কং ( ক্লী ) গন্ধতৃণং। ইতি শব্দরত্নাবলী ॥

গন্ধচেলিকা ( স্ত্রী ) কস্তূরী। ইতি ত্রিকাণ্ডশেষঃ ॥

গন্ধজাতং ( ক্লী ) তেজপত্রং। ইতি শব্দরত্নাবলী ॥

গন্ধজ্ঞা ( স্ত্রী ) নাসিকা। ইতি হেমচন্দ্রঃ॥

গন্ধতূর্য্যং ( ক্লী ) বাদ্যবিশেষঃ। তৎপর্য্যায়ঃ। রণতূর্য্যং ২ মহাস্বনঃ ৩। ইতি শব্দরত্নাবলী ॥

গন্ধতৃণং ( ক্লী ) সুগন্ধতৃণং। তৎপর্য্যায়ঃ। সুগন্ধভূতৃণং ২ সুরসঃ ৩ সুরভিঃ ৪ সুগন্ধিঃ ৫ মুখবাসঃ ৬। অস্য গুণাঃ। সুগন্ধিত্বং। ঈষত্তিক্তত্বং। রসায়নত্বং। স্নিগ্ধত্বং। মধুরত্বং। শীতলত্বং। কফপিত্তশ্রমনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

গন্ধত্বক্ ( [illegible] ) এলবালুকং। ইতি রাজনির্ঘণ্টঃ ॥

গন্ধদলা ( স্ত্রী ) অজমোদা। ইতি রাজনির্ঘণ্টঃ॥

গন্ধধূমজঃ ( পুং ) স্বাত্বনামগন্ধদ্রব্যং। ইতি রাজনির্ঘণ্টঃ॥

গন্ধধূলিঃ ( স্ত্রী ) কস্তূরী। ইতি হেমচন্দ্রঃ॥

গন্ধনং ( ক্লী ) উৎসাহঃ। প্রকাশনং। সূচনং। হিংসা। ইতি মেদিনী॥

গন্ধনকুলঃ (পুং) ছুচ্ছুন্দরী। ছুঁছা ইতি ভাষা। ইতি হারাবলী॥

গন্ধনাকুলী ( স্ত্রী ) রাস্না। ইত্যমরঃ॥ কন্দবিশেষঃ। তৎপর্য্যায়ঃ। মহাসুগন্ধা ২ সুবহা ৩ সর্পাক্ষী ৪ ফণিহন্ত্রী ৫ নকুলাঢ্যা ৬ অহিভুক্ ৭ বিষমর্দ্দনিকা ৮ অহিমর্দ্দনী ৯ বিষমর্দ্দনী ১০ মহাহিগন্ধা ১১ অহিলতা ১২। অস্যা গুণাঃ। তিক্তত্বং। কটুত্বং। উষ্ণত্বং। ত্রিদোষানেকবিষনাশিত্বং। নাকুল্যাঃ কিঞ্চিৎ শ্রেষ্ঠত্বং। ইতি রাজনির্ঘণ্টঃ॥ তৎপর্য্যায়গুণাঃ। নাকুলী সুরসা রাস্না সুগন্ধা গন্ধনাকুলী। নকুলেষ্টা ভুজঙ্গাক্ষী সর্পাঙ্গী বিষনাশিনী॥ নাকুলী তুবরা তিক্তা কটুকোষ্ণা বিনাশয়েৎ। ভোগিলূতাবৃশ্চিকাখুবিষজ্বরক্রিমিব্রণান্॥ ইতি ভাবপ্রকাশঃ॥

গন্ধনামা [ন্] (পুং) রক্ততুলসী। ইতি রত্নমালা॥

গন্ধনাম্নী ( স্ত্রী ) ক্ষুদ্ররোগবিশেষঃ। তল্লক্ষণং। যথা। বাহুকক্ষাংসপার্শ্বেষু কৃষ্ণস্ফোটাং সবেদনাং। পিত্তপ্রকোপসম্ভূতাং কক্ষামিতি বিনির্দ্দিশেৎ॥ একান্তু তাদৃশীং দৃষ্ট্বা পিড়কাং স্ফোটসন্নিভাং। ত্বগ্‌জাতাং পিত্তকোপেন গন্ধনাম্নীং প্রচক্ষতে॥ তাদৃশীং বাহ্বাদিষু কৃষ্ণাং সবেদনাঞ্চ॥ তচ্চিকিৎসা যথা। কক্ষাঞ্চ গন্ধনাম্নীঞ্চ চিকিৎসতি চিকিৎসকঃ। পৈত্তিকস্য

বিসর্পস্য ক্রিয়য়া পূর্ব্বযুক্তয়া ॥ ইতি ভাবপ্রকাশঃ ॥

গন্ধনালী (স্ত্রী) নাসিকা। ইতি ত্রিকাণ্ডশেষঃ ॥

গন্ধনিলয়া (স্ত্রী) নবমল্লিকা। ইতি শব্দচন্দ্রিকা ॥

গন্ধনিশা (স্ত্রী) গন্ধপত্রা। ইতি রাজনির্ঘণ্টঃ॥

গন্ধপত্রঃ (পুং) শ্বেততুলসী। ইতি রত্নমালা॥ মরুবঃ। বর্ব্বরঃ। নারঙ্গঃ। বিল্বঃ। ইতি রাজনির্ঘণ্টঃ ॥

গন্ধপত্রা (স্ত্রী) শটীভেদঃ। পলাশ ইতি মালবে প্রসিদ্ধা। তৎপর্য্যায়ঃ। স্থূলা ২ তিক্তকন্দিকা ৩ বনজা ৪ শটিকা ৫ বন্যা ৬ তবক্ষীরী ৭ একপত্রিকা ৮ গন্ধপীতা ৯ পলাশান্তা ১০ গন্ধাঢ্যা ১১ গন্ধপত্রিকা ১২ দীর্ঘপত্রা ১৩ গন্ধনিশা ১৪ বেদমুখ্যা ১৫ সুপাকিনী ১৬। অস্যা গুণাঃ। কটুত্বং। স্বাদুত্বং। তীক্ষ্ণত্বং। উষ্ণত্বং। কফবাতকাসচ্ছর্দ্দিজ্বরনাশিত্বং। পিত্তকোপকারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

গন্ধপত্রিকা (স্ত্রী) গন্ধপত্রা। অজমোদা। ইতি রাজনির্ঘণ্টঃ ॥

গন্ধপত্রী (স্ত্রী) অম্বষ্ঠা। অশ্বগন্ধা। অজমোদা। ইতি রাজনির্ঘণ্টঃ ॥

গন্ধপলাশিকা (স্ত্রী) হরিদ্রা। ইতি হারাবলী॥

গন্ধপলাশী (স্ত্রী) শটী। ইতি ভাবপ্রকাশঃ ॥

গন্ধপাষাণঃ (পুং) গন্ধকঃ। ইতি জটাধরঃ ॥

গন্ধপিশাচিকা (স্ত্রী) ধূপঃ। ইতি হেমচন্দ্রঃ ॥

গন্ধপীতা (স্ত্রী) গন্ধপত্রা। ইতি রাজনির্ঘণ্টঃ॥

গন্ধপুষ্পঃ (পুং) বেতসবৃক্ষঃ। ইতি শব্দরত্নাবলী ॥ অঙ্কোঠবৃক্ষঃ। ইতি জটাধরঃ ॥ বহুবারবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

গন্ধপুষ্পা (স্ত্রী) নীলী। কেতকী। গণিকারী। ইতি রাজনির্ঘণ্টঃ ॥

গন্ধফণিজ্ঝকঃ (পুং) রক্ততুলসী। ইতি রত্নমালা ॥

গন্ধফলঃ (পুং) কপিত্থঃ। বিল্বঃ। তেজঃফলবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

গন্ধফলা (স্ত্রী) প্রিয়ঙ্গুবৃক্ষঃ। ইতি শব্দরত্নাবলী ॥ মেথিকা। বিদারী। শল্লকী। ইতি রাজনির্ঘণ্টঃ ॥

গন্ধফলী (স্ত্রী) চম্পককলিকা। প্রিয়ঙ্গুবৃক্ষঃ। ইত্যমরঃ ॥

গন্ধবন্ধুঃ (পুং) আম্রবৃক্ষঃ। ইতি শব্দরত্নাবলী ॥

গন্ধভদ্রা (স্ত্রী) লতাবিশেষঃ। গন্ধভাদালিয়া ইতি ভাষা। ইতি শব্দচন্দ্রিকা ॥

গন্ধভাণ্ডঃ (পুং) গর্দ্দভাণ্ডবৃক্ষঃ। ইতি শব্দরত্নাবলী ॥

গন্ধমাংসী (স্ত্রী) জটামাংসীভেদঃ। তৎপর্য্যায়ঃ। কেশী ২ ভূতজটা ৩ পিশাচী ৪ পূতনা ৫ ভূতকেশী ৬ লোমশা ৭ জটালা ৮ লঘুমাংসী ৯। অস্যা গুণাঃ। তিক্তত্বং। শীতত্বং। কফকণ্ঠাময়রক্তপিত্তবিষভূতজ্বরনাশিত্বং। বর্ণ্যত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

গন্ধমাতা (স্ত্রী) পৃথিবী। ইতি হেমচন্দ্রঃ ॥

গন্ধমাদনং (ক্লী পুং) পর্ব্বতবিশেষঃ। ইত্যমরঃ ॥ অয়ং ইলাবৃতভদ্রাশ্ববর্ষয়োঃ সীমাপর্ব্বতঃ। অস্য বিস্তারঃ নীলনিষধপর্ব্বতপর্য্যন্তঃ। ইতি শ্রীভাগবতং ॥

গন্ধমাদনঃ (পুং) ভ্রমরঃ। বানরবিশেষঃ। গন্ধকঃ। ইতি মেদিনী॥

গন্ধমাদনী (স্ত্রী) মদিরা। ইতি ত্রিকাণ্ডশেষঃ॥ বন্দাকঃ। চীড়ানামগন্ধদ্রব্যং। ইতি রাজনির্ঘণ্টঃ॥

গন্ধমাদিনী (স্ত্রী) লাক্ষা। পুরানামগন্ধদ্রব্যং। ইতি রাজনির্ঘণ্টঃ॥

গন্ধমার্জারঃ (পুং) খট্টাসঃ। ইতি জটাধরঃ॥

গন্ধমালতী (স্ত্রী) গন্ধদ্রব্যবিশেষঃ। সা তু গুণৈর্গন্ধকোকিলাতুল্যা। ইতি ভাবপ্রকাশঃ॥

গন্ধমালিনী (স্ত্রী) মুরানামগন্ধদ্রব্যং। ইতি জটাধরঃ॥

গন্ধমুণ্ডঃ (পুং) লতাবিশেষঃ। গন্ধভাদালিয়া ইতি ভাষা। তৎপর্য্যায়ঃ। নন্দীবৃক্ষঃ ২ তাম্রপাকী ৩ কলপাকী ৪ পীতকঃ ৫ গর্দ্দভাণ্ডঃ ৬ ক্ষিপ্রপাকী ৭। ইতি বৈদ্যকং॥

গন্ধমূলঃ (পুং) কুলঞ্জনবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

গন্ধমূলকঃ (পুং) শটী। ইতি শব্দরত্নাবলী॥

গন্ধমূলা (স্ত্রী) শল্লকী। শটী। ইতি রাজনির্ঘণ্টঃ॥

গন্ধমূলিকা (স্ত্রী) মাকন্দী। শটী। ইতি রাজনির্ঘণ্টঃ॥

গন্ধমূলী (স্ত্রী) শটী। ইত্যমরঃ॥

গন্ধমূষিকঃ (পুংস্ত্রী) ছুছুন্দরী। ইতি ত্রিকাণ্ডশেষঃ॥

গন্ধমুখী (স্ত্রী) ছুছুন্দরী। ইতি হেমচন্দ্রঃ॥

গন্ধমৃগঃ (পুং) খট্টাসঃ। ইতি শব্দমালা॥

গন্ধমৈথুনঃ (পুং) বৃষঃ। ইতি জটাধরঃ॥

গন্ধমোদনঃ (পুং) গন্ধকঃ। ইতি রাজনির্ঘণ্টঃ॥

গন্ধমোহিনী (স্ত্রী) চম্পককলী। ইতি রাজনির্ঘণ্টঃ॥

গন্ধরসঃ (পুং) উপধাতুবিশেষঃ। কুলসম্ব ইতি খ্যাতঃ। তৎপর্য্যায়ঃ। বোলঃ ২ প্রাণঃ ৩ পিণ্ডঃ ৪ গোপঃ ৫ রসঃ ৬। ইত্যমরঃ॥ রসগন্ধঃ ৭ গোসঃ ৮ পিণ্ডগোসঃ ৯ শশঃ ১০ গোসশশঃ ১১। ইতি তট্টীকা॥ গান্ধারং ১২ মসিবর্দ্ধনং ১৩। ইতি ত্রিকাণ্ডশেষঃ॥ গোপরসঃ ১৪ বোলজঃ ১৫ গোপকঃ ১৬। ইতি শব্দরত্নাবলী॥

গন্ধরসাঙ্গকঃ (পুং) শ্রীবেষ্টনামসুগন্ধিদ্রব্যং। ইতি রাজনির্ঘণ্টঃ॥

গন্ধরাজং (ক্লী) চন্দনং। জবাদিনামগন্ধদ্রব্যং। ইতি রাজনির্ঘণ্টঃ॥ স্বনামখ্যাতশুক্লবর্ণপুষ্পঞ্চ॥

গন্ধরাজঃ (পুং) মুদ্গরবৃক্ষঃ। কণগুগ্গুলুঃ। ইতি রাজনির্ঘণ্টঃ॥ স্বনামখ্যাতপুষ্পবৃক্ষঃ। তস্য পত্রং পনসবৃক্ষস্য ক্ষুদ্রদলবৎ। পুষ্পঞ্চ সুগন্ধি শ্বেতবর্ণং উপর্য্যধোদ্বাদশদলং ষট্কেশরমধ্যং ভবতি বসন্তবর্ষাকালে প্রস্ফুটতি চ। তস্য শাখারোপণে বৃক্ষো জায়তে। ইতি লোকপ্রসিদ্ধং॥ গন্ধশ্রেষ্ঠশ্চ॥

গন্ধরাজী (স্ত্রী) নখীনামগন্ধদ্রব্যং। ইতি শব্দচন্দ্রিকা॥

গন্ধর্ব্বঃ (পুং) স্বর্গগায়কঃ। স তু দেবযোনিঃ। তৎপর্য্যায়ঃ। গাতুঃ ২ দিব্যগায়নঃ ৩ তদ্ভেদা যথা। হাহা হুহুশ্চিত্ররথো হংসো

বিশ্বাবসুস্তথা। গোমায়ুস্তুম্বুরুর্নন্দিরেব-মাদ্যাশ্চ তে স্মৃতাঃ॥ ইতি জটাধরঃ॥*॥ তস্য একাদশ গণা যথা। অভ্রাজোঽন্ধারি-বম্ভারী সূর্য্যবর্চাস্তথা কৃধুঃ। হস্তঃ সুহস্তঃ স্বাঞ্চেব মূর্দ্ধন্বাংশ্চ মহামনাঃ॥ বিশ্বা-বসুঃ কৃশানুশ্চ গন্ধর্ব্বৈকাদশো গণাঃ। ইতি বহ্নিপুরাণে গণভেদনামাধ্যায়ঃ॥ গুহ্যকলোকোপরি বিদ্যাধরলোকস্যাধো গন্ধর্ব্বলোকঃ। যথা। ততো বিলোকয়া-মাস লোকং লোচনশর্ম্মদং। শিবশর্ম্মা ততঃ প্রাহ তুষ্টস্তৌ বিষ্ণুপার্ষদৌ॥ কেঽমী জনাস্ত্বসৌ লোকঃ কিন্নাম বদতাঙ্গণৌ। গণাবূচতুঃ। গান্ধর্ব্বস্ত্বেষ লোকোঽমী গন্ধ-র্ব্বাশ্চ শুভব্রতাঃ। দেবানাং গায়না হ্যেতে চারণাঃ স্তুতিপাঠকাঃ॥ গীতজ্ঞা অতিগীতেন তোষয়ন্তি নরাধিপান্। স্তুবন্তি চ ধনাঢ্যাংশ্চ ধনলোভেন মোহিতাঃ॥ রাজ্ঞাং প্রসাদলব্ধানি সুবাসাংসি ধনানি চ। দ্রব্যাণ্যপি সুগন্ধীনি কর্পূরাদীন্যনে-কশঃ॥ ব্রাহ্মণেভ্যঃ প্রযচ্ছন্তি গীতং গায়-ন্ত্যহর্নিশং। স্তুতাবেব মনস্তেষাং নাট্যশাস্ত্র-কৃতশ্রমাঃ॥ তেন পুণ্যেন গান্ধর্ব্বো লোক-স্ত্বেষাং বিধীয়তে। ব্রাহ্মণাস্তোষিতা যদ্বৈ গীতবিদ্যার্জ্জিতৈর্ধনৈঃ॥ গীতবিদ্যাপ্রভা-বেণ দেবর্ষির্নারদো মহান্। মান্যো বৈষ্ণব-লোকে বৈ শ্রীশম্ভোশ্চাতিবল্লভঃ॥ তুম্বুরু-র্নারদশ্চোভৌ দেবানামপি দুর্লভৌ। নাদ-রূপী শিবঃ সাক্ষাৎ নাদতত্ত্ববিদৌ হি তৌ॥ যদি গীতং কচিদ্গীতং শ্রীমদ্ধরিহরা-ত্মকং। মোক্ষস্তু তৎফলং প্রাহুঃ সান্নিধ্য-মথবা তয়োঃ॥ গীতজ্ঞো যদি গীতেন নাপ্নোতি পরমং পদং। রুদ্রস্যানুচরো ভূত্বা তেনৈব সহ মোদতে॥ অস্মিঁল্লোকে সদা কালং স্মৃতিরেষা প্রগীয়তে। তদ্গীত-মালয়া পূজ্যৌ দেবৌ হরিহরৌ সদা॥ ইতি শৃণ্বন্ ক্ষণাৎ প্রাপ পুনরন্যং মনো-হরং। শিবশর্ম্মাথ পপ্রচ্ছ কিংসংজ্ঞং নগরন্ত্বিদং॥ ইতি কাশীখণ্ডং॥*॥ ঘোটকঃ। পশুজাতিবিশেষঃ। স তু কস্তূরী-মৃগঃ। অন্তরাভবসত্ত্বঃ। ইত্যমরঃ॥ অন্তরা-ভবসত্ত্বস্তু জন্মমরণয়োর্মধ্যভবঃ প্রাণী যো মৃতো নৈব কায়ান্তরং প্রাপ্তঃ নাপি জন্ম স মরণজন্মনোরন্তরা ভবত্বাদন্তরা-ভবসত্ত্বঃ স চ যাতনাশরীরঃ ইত্যেকে ইতি মুকুটঃ। গুপ্তপ্রাণীতি কেচিৎ যথা গন্ধর্ব্বাঃ পতয়ো মম ইতি বিরাটে ইতি রমানাথঃ। ইত্যমরটীকায়াং ভরতঃ॥ পুংস্কোকিলঃ। গায়নমাত্রং। ইতি মেদিনী॥

গন্ধর্ব্বতৈলং (ক্লী) এরণ্ডতৈলং। যথা। গন্ধর্ব্বতৈলসিদ্ধাং হরীতকীং গোঽম্বুনা পিবেৎ। শ্লীপদবিবন্ধমুক্তো ভবত্যসৌ সপ্তরাত্রেণ॥ গন্ধর্ব্বতৈলং এরণ্ডতৈলং। গোঽম্বুনা গোমূত্রেণ। ইতি ভাবপ্রকাশঃ॥

গন্ধর্ব্ববেদঃ (পুং) সংগীতবিদ্যা। যথা। ঋগ্বেদস্যায়ুর্ব্বেদোপবেদো যজুর্ব্বেদস্য ধনুর্ব্বেদোপবেদঃ। সামবেদস্য গন্ধর্ব্ব-বেদোপবেদোঽথর্ব্ববেদস্য শস্ত্রশাস্ত্রাণীতি। ইতি শৌনকোক্তচরণব্যূহঃ॥

গন্ধর্ব্বহস্তঃ (পুং) এরণ্ডবৃক্ষঃ। ইতি হারা-বলী॥

গন্ধর্ব্বহস্তকঃ ( পুং ) এরণ্ডবৃক্ষঃ। ইত্যমরঃ ॥

গন্ধ লোলুপা ( স্ত্রী ) মক্ষিকা। ইতি শব্দরত্নাবলী ॥

গন্ধবণিক্ [জ্] (পুং) গান্ধিকঃ। স চ বর্ণসঙ্করজাতিবিশেষঃ। গন্ধবেণিয়া ইতি ভাষা। স তু অম্বষ্ঠাৎ রাজপুত্ত্র্যাং জাতঃ। তস্য কর্ম্ম লিখনং গন্ধদানঞ্চ। ইতি পরাশরভাষ্যং ॥

গন্ধবতী ( স্ত্রী ) পৃথিবী। বরুণপুরী। ব্যাসমাতা। সুরা। ইতি মেদিনী ॥ বনমল্লিকা। ইতি রত্নমালা ॥ মুরানামগন্ধদ্রব্যং। ইতি জটাধরঃ ॥

গন্ধবধূঃ ( স্ত্রী ) শটী। চীড়ানামগন্ধদ্রব্যং। ইতি রাজনির্ঘণ্টঃ ॥

গন্ধবল্কলং ( ক্লী ) ত্বচং। দারচিনী ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ ॥

গন্ধবল্লরী ( স্ত্রী ) সহদেবী। ইতি রাজনির্ঘণ্টঃ ॥

গন্ধবল্লী ( স্ত্রী ) পীতপুষ্পদণ্ডোৎপলঃ। ডানিপোলা ইতি ভাষা। তৎপর্য্যায়ঃ। গোবন্দনী ২ সহদেবী ৩ সহা ৪। ইতি রত্নমালা ॥

গন্ধবহঃ ( পুং ) বায়ুঃ। ইত্যমরঃ ॥ গন্ধযুক্তে ত্রি ॥

গন্ধবহলঃ ( পুং ) সিতার্জ্জকঃ। ইতি রাজনির্ঘণ্টঃ ॥

গন্ধবহা ( স্ত্রী ) নাসিকা। ইত্যমরঃ ॥

গন্ধবহুলা ( স্ত্রী ) গোরক্ষীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

গন্ধবাহঃ ( পুং ) বায়ুঃ। ইত্যমরঃ ॥ মৃগবিশেষঃ। স তু কস্তূরীমৃগঃ। ইতি হেমচন্দ্রঃ ॥

গন্ধবাহা ( স্ত্রী ) নাসিকা। ইতি হেমচন্দ্রঃ ॥

গন্ধবিহ্বলঃ ( পুং ) গোধূমঃ। ইতি শব্দচন্দ্রিকা ॥

গন্ধবীজা ( স্ত্রী ) মেথিকা। ইতি রাজনির্ঘণ্টঃ ॥

গন্ধবৃক্ষকঃ ( পুং ) সালবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

গন্ধব্যাকুলং ( ক্লী ) কক্কোলং। ইতি শব্দচন্দ্রিকা ॥

গন্ধশটী ( স্ত্রী ) শটী। ইতি শব্দরত্নাবলী ॥

গন্ধশাকং ( ক্লী ) গৌরসুবর্ণশাকং। ইতি রাজনির্ঘণ্টঃ ॥

গন্ধশালিঃ ( পুং ) শালিধান্যবিশেষঃ। তৎপর্য্যায়ঃ। কল্মাষঃ ২ গন্ধালুঃ ৩ কলমোত্তমঃ ৪ সুগন্ধিঃ ৫ গন্ধবহুলঃ ৬ সুরভিঃ ৭ গন্ধতণ্ডুলঃ ৮ সুগন্ধিশালিঃ ৯। অস্য গুণাঃ। মধুরত্বং। অতিবৃষ্যত্বং। পিত্তশ্রমশ্বাসবিদাহশান্তিকারিত্বং। স্তন্যগর্ব্ভস্থিরতাল্পবায়ুপুষ্ট্যল্পকফবলপ্রদত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

গন্ধশুণ্ডিনী ( স্ত্রী ) ছুছুন্দরী। ইতি রাজনির্ঘণ্টঃ ॥ কচিৎ পুস্তকে গন্ধা শুণ্ডিনী ইতি নামদ্বয়ং ॥

গন্ধশেখরঃ ( পুং ) কস্তূরী। ইতি হারাবলী ॥

গন্ধসারঃ ( পুং ) চন্দনবৃক্ষঃ। ইত্যমরঃ ॥ মুদ্গরবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

গন্ধসারণঃ ( পুং ) বৃহন্নথী। ইতি রত্নমালা ॥

গন্ধসোমং (ক্লী) কুমুদং। ইতি ত্রিকাণ্ডশেষঃ ॥

গন্ধহারিকা ( স্ত্রী ) পরগৃহং গত্বা কর্ম্মকারিণী

শিল্পিনী। ইতি শব্দমালা॥ গন্ধহরণ-কর্ত্রী চ॥

গন্ধা (স্ত্রী) চম্পককলিকা। ইতি শব্দরত্নাবলী॥ শটী। ইতি রাজনির্ঘণ্টঃ॥ শালপর্ণী। ইত্যমরটীকায়াং ভরতঃ॥

গন্ধাখুঃ (পুং) ছুছুন্দরী। ইতি হারাবলী॥

গন্ধাজীবঃ (পুং) গন্ধবণিক্। ইতি জটাধরঃ॥

গন্ধাঢ্যং (ক্লী) জবাদিনামগন্ধদ্রব্যং। চন্দনং। ইতি রাজনির্ঘণ্টঃ॥ গন্ধযুক্তে ত্রি॥

গন্ধাঢ্যঃ (পুং) নারঙ্গবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

গন্ধাঢ্যা (স্ত্রী) গন্ধপত্রা। স্বর্ণযূথী। তরুণী। আরামশীতলা। ইতি রাজনির্ঘণ্টঃ॥ গান্ধালী। ইতি শব্দচন্দ্রিকা॥

গন্ধাধিকং (ক্লী) তৃণকুঙ্কুমং। ইতি রাজনির্ঘণ্টঃ॥

গন্ধাম্লা (স্ত্রী) বনবীজপূরকঃ। ইতি রাজনির্ঘণ্টঃ॥

গন্ধালা (স্ত্রী) বৃক্ষবিশেষঃ। জিয়তীতি খ্যাতা। ইতি শব্দচন্দ্রিকা॥

গন্ধালী (স্ত্রী) লতাবিশেষঃ। গাঁধালী গন্ধভাদালী ইতি চ ভাষা। তৎপর্য্যায়ঃ। প্রসারণী ২ ভদ্রপর্ণী ৩ কটম্ভরা ৪। ইতি রত্নমালা॥ গন্ধাঢ্যা ৫। ইতি শব্দচন্দ্রিকা॥ সরণা ৬ রাজবলা ৭ ভদ্রবলা ৮। ইত্যমরঃ॥ গন্ধোলী ৯ সারণী ১০। ইতি জটাধরঃ॥ অপি চ। প্রসারণী রাজবলা ভদ্রপর্ণী প্রতানিনী। সরণিঃ সারণী ভদ্রবলা চাপি কটম্ভরা॥ প্রসারণী গুরুর্বৃষ্যা বলসন্ধানকৃৎ সরা। বীর্য্যোষ্ণা বাতকৃত্তিক্তা বাতরক্তকফাপহা॥ ইতি ভাবপ্রকাশঃ॥ রাজনির্ঘণ্টোক্তগুণপর্য্যায়ৌ প্রসারিণীশব্দে দ্রষ্টব্যৌ॥

গন্ধালীগর্ভঃ (পুং) সূক্ষ্মৈলা। ইতি রাজনির্ঘণ্টঃ॥

গন্ধাশ্মা [ন্] (পুং) গন্ধকঃ। ইত্যমরঃ॥

গন্ধাষ্টকং (ক্লী) পঞ্চদেবতাদেয়াষ্টপ্রকারগন্ধদ্রব্যং। যথা। চন্দনাগুরুকর্পূরচোরকুঙ্কুমরোচনাঃ। জটামাংসীকপিযুতাশক্তের্গন্ধাষ্টকং বিদুঃ॥ *॥ চন্দনাগুরুহ্রীবেরকুষ্ঠকুঙ্কুমসেব্যকাঃ। জটামাংসী মুরমিতি বিষ্ণোর্গন্ধাষ্টকং বিদুঃ॥ *॥ চন্দনাগুরুকর্পূরতমালজলকুঙ্কুমং। কুশীদং কুষ্ঠসংযুক্তং শৈবং গন্ধাষ্টকং শুভং॥ *॥ স্বরূপং চন্দনং চোরং রোচনাগুরুমেব চ। মদং মৃগদ্বয়োদ্ভূতং কস্তূরীচন্দ্রসংযুতং॥ গন্ধাষ্টকং বিনির্দ্দিষ্টং গণেশস্য মহেশিতুঃ॥ ইতি শারদাতিলকং॥ *॥ অপি চ। চন্দনাগুরুকর্পূররোচনাকুঙ্কুমং মদং। রক্তচন্দনহ্রীবেরং গাণপত্যমুদাহৃতং॥*॥ জলকাশ্মীরকুষ্ঠৈস্তু রক্তচন্দনচন্দনৈঃ। উশীরাগুরুকর্পূরৈঃ সৌরং গন্ধাষ্টকং বিদুঃ॥ ইতি মেরুতন্ত্রং॥

গন্ধি (ক্লী) তৃণকুঙ্কুমং। ইতি রাজনির্ঘণ্টঃ॥

গন্ধিকঃ (পুং) গন্ধকঃ। ইতি হেমচন্দ্রঃ॥

গন্ধিনী (স্ত্রী) মুরা। ইত্যমরঃ॥

গন্ধিপর্ণঃ (পুং) সপ্তচ্ছদবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

গন্ধোতুঃ (পুং) খট্টাশঃ। ইতি ত্রিকাণ্ডশেষঃ॥ গন্ধৌতুশ্চ॥

গন্ধোৎকটা (স্ত্রী) দমনকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

গন্ধোত্তমা (স্ত্রী) মদিরা। ইত্যমরঃ॥

গন্ধোলিঃ (স্ত্রী) শটী। ইতি শব্দরত্নাবলী॥

গন্ধোলী (স্ত্রী) বরটা। ইত্যমরঃ॥ ভদ্রা। শটী। ইতি মেদিনী॥

গভস্তিঃ (পুং) কিরণঃ। সূর্য্যঃ। ইতি মেদিনী॥

গভস্তিঃ (স্ত্রী) স্বাহা। ইতি মেদিনী॥

গভস্তিমৎ (ক্লী) সপ্তপাতালান্তর্গতপাতালবিশেষঃ। তত্তু তলাতলং। ইতি শব্দরত্নাবলী॥

গভস্তিমান্ [ৎ] (পুং) সূর্য্যঃ। ইতি শব্দরত্নাবলী॥

গভস্তিহস্তঃ (পুং) সূর্য্যঃ। ইতি ত্রিকাণ্ডশেষঃ॥

গভীরং (ত্রি) নীচস্থানং। তৎপর্য্যায়ঃ। নিম্নং ২ গম্ভীরং ৩। ইত্যমরঃ॥ গভীরকং ৪। ইতি শব্দরত্নাবলী॥ অগাধং। গহনং। ইত্যুণাদিকোষঃ॥

গভীরিকা (স্ত্রী) বৃহড্ঢক্কা। ইতি শব্দরত্নাবলী॥

গভোলিকঃ (পুং) মসূরঃ। ইতি হারাবলী॥

গম ঔ ৯ গত্যাং। ইতি কবিকল্পদ্রুমঃ॥ ঔ গন্তা। ৯ অগমৎ। গতিরুত্তরদেশসংযোগফলকব্যাপারঃ। ইতি দুর্গাদাসঃ॥

গমঃ (পুং) জিগীষোর্গমনং। ইত্যমরঃ॥ অক্ষবিবর্ত্তঃ। স তু দ্যূতপ্রভেদঃ। অপর্য্যালোচিতং। অধ্বা। ইতি মেদিনী॥ সদৃক্পাঠঃ। ইতি হেমচন্দ্রঃ॥ গমনঞ্চ॥

গমকঃ (পুং) স্বরবিশেষঃ। যথা। গমকঃ স্বশ্রুতিস্থানচ্ছায়াং শ্রুত্যন্তরাশ্রয়াং। স্বরো যো মূর্চ্ছনামেতি গমকঃ স ইহোচ্যতে॥ কম্পিতঃ স্ফুরিতো লীলো ভিন্নঃ স্থবির এব চ। আহতান্দোলিতো চেতি গমকাঃ সপ্ত কীর্ত্তিতাঃ॥ মাঘপৌষনিশায়াস্তু শেষপ্রহরমাত্রকে। সাধকঃ সলিলে স্থিত্বা গমকান্ সপ্ত সাধয়েৎ॥ দাক্ষিণাত্যা হরিপ্রীত্যৈ গায়ন্তি গমকানিমান্। ইতি সঙ্গীতদামোদরঃ॥

গমকারিত্বং (ক্লী) রভসঃ। ইতি ত্রিকাণ্ডশেষঃ॥

গমথঃ (পুং) পন্থা। পথিকে ত্রি। ইত্যুণাদিকোষঃ॥

গমনং (ক্লী) জিগীষোঃ প্রয়াণং। কুচ্ ইতি পারস্য ভাষা। তৎপর্য্যায়ঃ। যাত্রা ২ ব্রজ্যা ৩ অভিনির্য্যাণং ৪ প্রস্থানং ৫ গমঃ ৬। ইত্যমরঃ॥ প্রয়াণং ৭ প্রস্থিতিঃ ৮ যানং ৯ প্রাণনং ১০। ইতি শব্দরত্নাবলী॥ পাদবিহরণং। তত্তু পঞ্চবিধকর্ম্মান্তর্গতকর্ম্মবিশেষঃ। তস্য ভেদাঃ। যথা। ভ্রমণং ১ রেচনং ২ স্যন্দনং ৩ ঊর্দ্ধ্বজ্বলনং ৪ তির্য্যগ্গমনং ৫। ইতি ভাষাপরিচ্ছেদঃ॥

গমী [ন্] (ত্রি) গমনকর্ত্তা। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ॥

গম্ব গতৌ। ইতি কবিকল্পদ্রুমঃ॥ গম্বতি। ইতি দুর্গাদাসঃ॥

গম্ভারিকা (স্ত্রী) গম্ভারীবৃক্ষঃ। ইতি রাজবল্লভঃ॥

গম্ভারী (স্ত্রী) বৃক্ষবিশেষঃ। গামারী ইতি ভাষা। তৎপর্য্যায়ঃ। সর্ব্বতোভদ্রা ২ কাশ্মরী ৩ মধুপর্ণিকা ৪ শ্রীপর্ণী ৫ ভদ্রপর্ণী ৬ কাশ্মর্য্যঃ ৭। ইত্যমরঃ॥ কাশ্মরী ৮। ইতি তট্টীকা॥ ভদ্রা ৯ গোপভদ্রিকা ১০ কুমুদা ১১ সদাভদ্রা ১২ কট্‌ফলা ১৩ কৃষ্ণবৃন্তিকা ১৪। ইতি রত্নমালা॥ কৃষ্ণবৃন্তা ১৫ হীরা ১৬ সর্ব্বতোভদ্রিকা ১৭ স্নিগ্ধপর্ণী ১৮ সুভদ্রা ১৯ কম্ভারী ২০ গোপভদ্রা ২১ বিদারিণী ২২ ক্ষীরিণী ২৩ মহাভদ্রা ২৪ মধুপর্ণী ২৫ স্বরুভদ্রা ২৬ কৃষ্ণা ২৭ অশ্বেতা ২৮ রোহিণী ২৯ গৃষ্টিঃ ৩০ স্থূলত্বচা ৩১ মধুমতী ৩২ সুফলা ৩৩ মেদিনী ৩৪ মহাকুমুদা ৩৫ সুদৃঢ়ত্বচা ৩৬। অস্যা গুণাঃ। কটুত্বং। তিক্তত্বং। গুরুত্বং। উষ্ণত্বং। ভ্রমশোথত্রিদোষবিষদাহার্ত্তিজ্বরতৃষ্ণাস্রদোষনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ এতৎফলগুণাঃ। তিক্তত্বং। গুরুত্বং। গ্রাহিত্বং। মধুরত্বং। কেশহিতত্বং। রসায়নত্বং। মেধ্যত্বং। শীতলত্বং। দাহপিত্তনাশিত্বঞ্চ। এতন্মূলগুণৌ। অত্যুষ্ণত্বং। মানসব্যাধৌ অহিতকারিত্বঞ্চ। ইতি রাজবল্লভঃ॥ তৎপর্য্যায়গুণাঃ। গম্ভারী ভদ্রপর্ণী চ শ্রীপর্ণী মধুপর্ণিকা। কাশ্মীরী কাশ্মরী হীরা কাশ্মর্য্যঃ পীতরোহিণী॥ কৃষ্ণবৃন্তা মধুরসা মহাকুমুদিকাপি চ। কাশ্মরী তুবরা তিক্তা বীর্য্যোষ্ণা মধুরা গুরুঃ॥ দীপনী পাচনী মেধ্যা ভেদিনী ভ্রমশোষজিৎ। দোষতৃষ্ণামশূলার্শোবিষদাহজ্বরাপহা॥ তৎফলং বৃংহণং বৃষ্যং গুরু কেশ্যং রসায়নং। বাতপিত্ততৃষারক্তক্ষয়মূত্রবিবন্ধহৃৎ॥ স্বাদু পাকে হিমং স্নিগ্ধং তুবরাম্লং কৃৎ। হন্যাদ্দাহতৃষাবাতরক্তপিত্তক্ষতক্ষয়ান্॥ ইতি ভাবপ্রকাশঃ॥

গম্ভীরং (ত্রি) গভীরং। ইত্যমরঃ॥

গম্ভীরঃ (পুং) জম্বীরঃ। পঙ্কজং। ঋগ্বেদমন্ত্রঃ। ইত্যুণাদিকোষঃ॥

গম্ভীরবেদী [ন্] (পুং) দুর্দ্ধরহস্তী। তৎপর্য্যায়ঃ। অঙ্কুশদুর্দ্ধরঃ ২ চালকঃ ৩ ব্যালকঃ ৪। ইতি ত্রিকাণ্ডশেষঃ॥ অবমতাঙ্কুশঃ ৫। ইতি হেমচন্দ্রঃ॥

গম্যং (ত্রি) প্রাপ্যং। ইত্যমরঃ॥ গমনযোগ্যঞ্চ॥

গম্যমানঃ (ত্রি) বর্ত্তমানগমনাশ্রয়গ্রামাদিঃ। গমধাতোঃ কর্ম্মণি শানপ্রত্যয়েন নিষ্পন্নঃ॥

গয়ঃ (পুং) বানরভেদঃ। স তু বৈবস্বতপুত্রঃ। ইতি রামায়ণং॥ রাজর্ষিভেদঃ। স চ অমূর্ত্তরয়ঃপুত্রঃ। ইতি শ্রীভাগবতং॥ অসুরভেদঃ। ইতি বায়ুপুরাণং॥

গয়া (স্ত্রী) গয়রাজর্ষিপুরী। ইতি হেমচন্দ্রঃ॥ সা তু তীর্থভেদঃ। তস্য নামকরণং যথা। যজ্ঞং চক্রে গয়ো রাজা বহ্বন্নং বহুদক্ষিণং। যত্র দ্রব্যসমূহানাং সংখ্যা কর্ত্তুং ন শক্যতে॥ গয়ং বিষ্ণ্বাদয়স্তুষ্টা বরং ব্রূহীতি চাব্রুবন্। গয়স্তান্ প্রার্থয়ামাস অভিশস্তাস্তু যে পুরা॥ ব্রহ্মণা তে দ্বিজাঃ পূতা ভবন্তু ক্রতুপূজিতাঃ। গয়াপুরী তু মন্নাম্না খ্যাতু ব্রহ্মপুরী তথা॥ এবমস্তু বরং দত্ত্বা ততশ্চান্তর্দধুঃ সুরাঃ॥ *॥

তস্যোৎপত্তিকারণং যথা। গয়াসুরো-ঽসুরাণাঞ্চ মহাবলপরাক্রমঃ। যোজনানাং সপাদঞ্চ শতং তস্যোচ্চয়ঃ স্মৃতঃ॥ স্থূলঃ ষষ্টির্যোজনানাং শ্রেষ্ঠোঽসৌ বৈষ্ণবঃ স্মৃতঃ। কোলাহলে গিরিবরে তপস্তেপে সুদারুণং॥ বহুবর্ষসহস্রাণি নিরুচ্ছ্বাসঃ স্থিরোঽভবৎ। তত্তপস্তাপিতা দেবাঃ সংক্ষোভং পরমং গতাঃ॥ ব্রহ্মলোকং গতা দেবাঃ প্রোচুস্তেঽথ পিতামহং। গয়াসুরাদ্রক্ষ দেব ব্রহ্মা দেবাংস্তথাব্রবীৎ॥ ব্রজামঃ শঙ্করং দেবা ব্রহ্মাদ্যাশ্চ গতাঃ শিবং। কৈলাসে চাব্রুবন্নত্বা রক্ষ রক্ষ মহাসুরাৎ॥ ব্রহ্মাদ্যাংশ্চাব্রবীচ্ছম্ভু-র্ব্রজামঃ শরণং হরিং। ক্ষীরাব্ধৌ দেব-দেবেশঃ স নঃ শ্রেয়ো বিধাস্যতি॥ ব্রহ্মা মহেশ্বরো দেবা বিষ্ণুং নত্বা প্রতুষ্টুবুঃ। কিমর্থমাগতা দেবা বিষ্ণুনোক্তাস্তমব্রুবন্॥ গয়াসুরভয়াদ্দেব রক্ষাস্মানব্রবীদ্ধরিঃ। ব্রহ্মাদ্যা যান্তু তং দৈত্যঞ্চাগমিষ্যাম্যহং ততঃ॥*॥ ঊচুস্তং বাসুদেবাদ্যাঃ কিমর্থং তপ্যতে ত্বয়া। সন্তুষ্টাশ্চাগতাঃ সর্ব্বে বরং ব্রূহি গয়াসুর॥ যদি তুষ্টাঃ স্থ মে দেবা ব্রহ্মবিষ্ণুমহেশ্বরাঃ। সর্ব্বদেবদ্বিজা-তিভ্যো যজ্ঞতীর্থশিলোচ্চয়াৎ॥ মন্ত্রেভ্যো দেবদেবীভ্যো যোগিভ্যশ্চাপি সর্ব্বশঃ। জ্ঞাতিভ্যোঽতিপবিত্রোঽহং পবিত্রঃ স্যাং সদা সুরাঃ॥ পবিত্রো ভব তং দেবা দৈত্যমুক্ত্বা যযুর্দিবং। দৃষ্ট্বা দৈত্যং ততঃ স্পৃষ্ট্বা সর্ব্বে হরিপুরং যযুঃ॥ শূন্যে লোকত্রয়ে জাতে শূন্যা যমপুরী হ্যভূৎ। যমঃ ইন্দ্রাদিভিঃ সার্দ্ধং ব্রহ্মলোকং ততো-ঽগমৎ॥ ব্রহ্মাণমূচিরে দেবা গয়াসুর-বিলোপিতাঃ। ত্বয়া দত্তো যোঽধিকার-স্তং গৃহাণ পিতামহ॥ ব্রহ্মাব্রবীত্ততো দেবা ব্রজামো বিষ্ণুমব্যয়ং। ব্রহ্মাদয়ো-ঽব্রুবন্ বিষ্ণুং ত্বয়া দত্তবরেঽসুরে॥ তদ্দর্শনাদ্যযুঃ স্বর্গং শূন্যং লোকত্রয়ং হ্যভূৎ। দেবৈরুক্তো বাসুদেবো ব্রহ্মাণং স বচোঽব্রবীৎ॥ গত্বা সুরং প্রার্থয়স্ব যজ্ঞার্থং দেহি দেহকং। বিষ্ণূক্তঃ সসুরো ব্রহ্মা গত্বাপশ্যন্ মহা-সুরং॥ ব্রহ্মোবাচ। পৃথিব্যাং যানি তীর্থানি দৃষ্টানি ভ্রমতা ময়া। যজ্ঞার্থং ন তু তে তানি পবিত্রাণি শরীরতঃ॥ অতঃ পবিত্রং দেহং স্বং যজ্ঞার্থং দেহি মেঽসুর। গয়া-সুর উবাচ। ধন্যোঽহং দেবদেবেশ যদ্দেহঃ প্রার্থ্যতে ত্বয়া॥ ত্বয়ৈবোৎপাদিতো দেহঃ পবিত্রশ্চ ত্বয়া কৃতঃ। সর্ব্বেষামুপকারায় যাগোঽবশ্যং ভবত্বিতি॥*॥ ইত্যুক্ত্বা সো-ঽপতদ্ভূমৌ শ্বেতকল্পে গয়াসুরঃ। নৈর্ঋতীং দিশমাশ্রিত্য তদা কোলাহলে গিরৌ॥ শিরঃ কৃত্বোত্তরে দৈত্যঃ পাদৌ কৃত্বা তু দক্ষিণে। ব্রহ্মা সম্ভৃতসম্ভারো মানসা-নৃত্বিজোঽসৃজৎ॥ চলিতশ্চকিতো ব্রহ্মা ধর্ম্মরাজমভাষত। যাস্তে গৃহে তব শিলা তামানীয়াত্র ধারয়॥ দৈত্যস্য শীঘ্রং শিরসি তাং ধারয় মমাজ্ঞয়া। নিশ্চলার্থং যমঃ শ্রুত্বা ধারয়ন্মস্তকে শিলাং॥ শিলায়াং ধারিতায়ান্তু সশিলশ্চাসুরোঽচলৎ। দেবা-নূচেঽথ রুদ্রাদীন্ শিলায়াং নিশ্চলাঃ

কিল ॥ তিষ্ঠন্তু দেবাঃ সকলাস্তথেত্যুক্ত্বা চ তে স্থিতাঃ। দেবাঃ পাদৈর্লকয়িত্বা তথাপি চলিতোঽসুরঃ॥ ব্রহ্মাথ ব্যাকুলো বিষ্ণুং গতঃ ক্ষীরাব্ধিশায়িনং। অজমূচে হরিঃ কস্মাদাগতোঽসি বদস্ব তৎ॥ ব্রহ্মোবাচ। দেবদেব কৃতে যাগে প্রচচাল গয়াসুরঃ। ইদানীং নিশ্চলার্থং হি প্রসাদং কুরু মাধব॥ ব্রহ্মণো বচনং শ্রুত্বা হ্যাকৃষ্য স্বশরীরতঃ। মূর্ত্তিং দদৌ নিশ্চলার্থং ব্রহ্মণে ভগবান্ হরিঃ॥ আনীয় মূর্ত্তিং ব্রহ্মাপি শিলায়াং সমধারয়ৎ। তথাপি চলিতং বীক্ষ্য পুনর্দেবমিহাহ্বয়ৎ॥ আগত্য বিষ্ণুঃ ক্ষীরাব্ধেঃ শিলায়াং সংস্থিতোঽভবৎ। আদ্যয়া গদয়া চাসৌ যস্মাদ্দৈত্যঃ স্থিরীকৃতঃ॥ স্থিত ইত্যেব হরিণা তস্মাদাদিগদাধরঃ॥ * ॥ ঊচে গয়াসুরো দেবান্ কিমর্থং বঞ্চিতো হ্যহং। যজ্ঞার্থং ব্রহ্মণে দত্তং শরীরমমলং ময়া। পীড্যশ্চ যদ্যহং দেবাঃ প্রসন্নাঃ সন্তু সর্ব্বদা॥ বরং ব্রূহি প্রসন্নাঃ স্মো দেবানূচে গয়াসুরঃ। যাবৎপৃথ্বী পর্ব্বতাশ্চ যাবচ্চন্দ্রার্কতারকাঃ॥ তাবচ্ছিলায়াং তিষ্ঠন্তু ব্রহ্মবিষ্ণুমহেশ্বরাঃ। গদাধরঃ স্বয়ং লোকান্ পূয়াৎ সর্ব্বাঘনাশনঃ॥ শ্রাদ্ধং সপিণ্ডকং যেষাং ব্রহ্মলোকং প্রয়ান্তু তে। কিং বহুক্ত্যা সুরেশানাং যুষ্মাকমপি দেবতাঃ॥ চেন্ন তিষ্ঠেদহঞ্চাপি সময়ঃ প্রতিপাল্যতাং। ত্বয়া যৎ প্রার্থিতং বীর তত্তবিষ্যত্যসংশয়ং॥ অস্মৎপাদানর্চ্চয়িত্বা যাস্যন্তি পরমাং গতিং। দেবৈর্দত্তবরো দৈত্যো হর্ষিতো নিশ্চলোঽভবৎ॥



অথ গয়াশিরআদিপরিমাণং।

নাগাজ্জনার্দ্দনাদ্ব্রহ্মযূপাচ্চোত্তরমানসাৎ। এতদ্গয়াশিরঃ প্রোক্তং ফল্গুতীর্থং তদুচ্যতে॥ পিতামহং সমাসাদ্য যাবদুত্তরমানসং। ফল্গুতীর্থস্তু বিজ্ঞেয়ং দেবানামপি দুর্লভং॥ ক্রৌঞ্চপাদাৎ ফল্গুতীর্থং যাবৎ সাক্ষাদ্গয়াশিরঃ। মুখং গয়াসুরস্যৈতত্তস্মাৎ শ্রাদ্ধমথাক্ষয়ং॥ মুণ্ডপৃষ্ঠাচ্চ পূর্ব্বস্মিন্ পশ্চিমে দক্ষিণোত্তরে। শ্রাদ্ধে ক্রোশদ্বয়ং মানং গয়ায়াং ব্রহ্মণেরিতং॥ পঞ্চক্রোশং গয়াক্ষেত্রং ক্রোশমেকং গয়াশিরঃ। তন্মধ্যে সর্ব্বতীর্থানি ত্রৈলোক্যে যানি সন্তি বৈ॥

অথ গয়ামাহাত্ম্যাদি।

গয়ায়াং ন হি তৎ স্থানং যত্র তীর্থং ন বিদ্যতে। সান্নিধ্যং সর্ব্বতীর্থানাং গয়াতীর্থং ততো বরং॥ ব্রহ্মজ্ঞানেন কিং সাধ্যং গোগ্রহে মরণেন কিং। বাসেন কিং কুরুক্ষেত্রে যদি পুত্রো গয়াং ব্রজেৎ॥ শ্রাদ্ধকৃদেবা গয়াক্ষেত্রে পিতৄণামনৃণোঽপি সঃ। শিরসি শ্রাদ্ধকৃদযস্তু কুলানাং শতমুদ্ধরেৎ॥ গয়াশিরসি যঃ পিণ্ডান্ যেষাং নাম্না তু নির্ব্বপেৎ। নরকস্থা দিবং যান্তি স্বর্গস্থা মোক্ষমাপ্নুয়ুঃ॥ গত্বা বণিগ্গয়াশীর্ষে প্রেতরাজস্য পিণ্ডকং। প্রদদৌ মনুজৈঃ সার্দ্ধং স্বপিতৃভ্যস্ততো দদৌ॥ প্রেতাঃ প্রেতত্বনির্ম্মুক্তা বণিক্ চ গৃহমাগতঃ। প্রেতরাজঃ সহ প্রেতৈর্গয়াশ্রাদ্ধাদ্দিবং গতঃ॥ * ॥ গয়ায়াং সর্ব্বকালেষু পিণ্ডং দদ্যাদ্বিচক্ষণঃ। অধিমাসে

জন্মদিনে চাস্তেঽপি গুরুশুক্রয়োঃ ॥ ন ত্যক্তব্যং গয়াশ্রাদ্ধং সিংহস্থেঽপি বৃহস্পতৌ। তথা দৈবপ্রমাদেন প্রবহৎসু ব্রণেষু চ ॥ পূতঃ কর্ম্মাধিকারী চ শ্রাদ্ধকৃদ্‌ব্রহ্মলোকভাক্॥ মীনে মেষে স্থিতে সূর্য্যে কন্যায়াং কার্ম্মুকে ঘটে। নারদ ত্রিষু লোকেষু গয়াশ্রাদ্ধং সুদুর্লভং ॥ * ॥ মুণ্ডনঞ্চোপবাসশ্চ সর্ব্বতীর্থেষ্বয়ং বিধিঃ। বর্জ্জয়িত্বা কুরুক্ষেত্রং বিশালাং বিরজাং গয়াং ॥ দণ্ডং প্রদর্শয়েদ্‌ভিক্ষুর্গয়াং গত্বা ন পিণ্ডদঃ। দণ্ডং ন্যস্য বিষ্ণুপদে পিতৃভিঃ সহ মুচ্যতে॥ গয়াগজো গয়াদিত্যো গায়ত্রী চ গদাধরঃ। গয়া গয়াসুরশ্চৈব ষড়্‌গয়া মুক্তিদায়িকাঃ ॥

অথ পিণ্ডদানদ্রব্যাণি।

পায়সেনাথ চরুণা সক্তুনা পিষ্টকেন বা। তণ্ডুলৈঃ ফলমূলাদ্যৈর্গয়ায়াং পিণ্ডপাতনং ॥ তিলকল্কেন খণ্ডেন গুড়েন সঘৃতেন বা। কেবলেনৈব দধ্না বা অন্নেন মধুনাথবা ॥ পিন্যাকং সঘৃতং খণ্ডং পিতৃভ্যোঽক্ষয়মিত্যুত ॥

অথ গয়াস্থব্রাহ্মণপূজাবিধিঃ।

তত্রস্থা ব্রাহ্মণা ব্রহ্মাণমূচুঃ। ত্বয়া যদ্দত্তমখিলং তৎ সর্ব্বং শাপতো গতং। জীবনার্থং প্রসাদং নো ভগবন্ কর্ত্তুমর্হসি ॥ তৎ শ্রুত্বা ব্রাহ্মণান্ ব্রহ্মা প্রোবাচেদং দয়ান্বিতঃ। তীর্থোপজীবিকা যুয়মাচন্দ্রার্কং ভবিষ্যথ ॥ লোকাঃ পুণ্যগয়ায়াং যে শ্রাদ্ধিনো ব্রহ্মলোকগাঃ। যুষ্মান্ যে পূজয়িষ্যন্তি তৈরহং পূজিতঃ সদা ॥

অথ গয়ায়াং শ্রাদ্ধাদিকরণার্থং তীর্থানি।

প্রথমদিনে গয়াপ্রবেশে ফল্গুতীর্থে স্নানতর্পণশ্রাদ্ধানি ১ প্রেতশিলায়াং ব্রহ্মকুণ্ডে স্নানং শ্রাদ্ধং ষোড়শপিণ্ডদানং প্রেতপর্ব্বতে তিলমিশ্রিতসক্তুনিক্ষেপশ্চ ২ পঞ্চতীর্থমধ্যে উত্তরমানসে স্নানং সপিণ্ডকং শ্রাদ্ধং সূর্য্যার্চ্চনঞ্চ ৩ দক্ষিণমানসে উদীচ্যাং উদীচীতীর্থে স্নানং ৪ তস্য মধ্যে কনখলতীর্থে স্নানং ৫ তস্য দক্ষিণে দক্ষিণমানসে তীর্থত্রয়ে স্নানং শ্রাদ্ধং সূর্য্যার্চ্চনঞ্চ ৬ ফল্গুতীর্থে স্নানং তর্পণং সপিণ্ডকং শ্রাদ্ধং ততো গদাধরস্য দর্শনং পূজনঞ্চ ৭ ॥ দ্বিতীয়দিনে ধর্ম্মারণ্যে গমনং ধর্ম্মেশ্বরনমনং বোধিতরুনমনঞ্চ ৮ মতঙ্গবাপ্যাং স্নানং তর্পণং শ্রাদ্ধং মতঙ্গেশনমনং যূপকূপয়োর্মধ্যে শ্রাদ্ধঞ্চ ৯ ॥ তৃতীয়দিনে ব্রহ্মসরসি স্নানং সপিণ্ডকং শ্রাদ্ধং যূপপ্রদক্ষিণং ব্রহ্মনমনঞ্চ ১০ গোপ্রচারসমীপে আম্রবৃক্ষসেচনং ১১ ততো যমকুক্কুরকাকবলিদানং পুনঃ স্নানঞ্চ ১২ ॥ চতুর্থদিনে ফল্গুতীর্থে স্নানাদিকং ততো গয়াশিরসি বিষ্ণুপদস্য দর্শনং স্পর্শনং পূজনং তত্র সপিণ্ডকং শ্রাদ্ধঞ্চ ১৩ রুদ্রঃ ১৪ ব্রহ্মা ১৫ দক্ষিণাগ্নিঃ ১৬ গার্হপত্যঃ ১৭ আহবনীয়ঃ ১৮ সভ্যঃ ১৯ আবসথ্যঃ ২০ শক্রঃ ২১ অগস্ত্যঃ ২২ ক্রৌঞ্চঃ ২৩ মাতঙ্গঃ ২৪ কার্ত্তিকেয়ঃ ২৫ গণেশঃ ২৬ কশ্যপঃ এষাং পদেষু শ্রাদ্ধং ২৭ গজকর্ণিকায়াং তর্পণং ২৮

কনকেশকেদারনরসিংহবামনরথমার্গাণাং পূজনং ২৯ ॥ পঞ্চমদিনে গদালোলে স্নানং সপিণ্ডকং শ্রাদ্ধঞ্চ ৩৩ অক্ষয়বটে শ্রাদ্ধং ব্রহ্মকল্পিতবিপ্রাণাং পূজনং পুরোধসে ষোড়শদানঞ্চ ৩৪ গায়ত্র্যগ্রে প্রাতঃসন্ধ্যাচরণং সপিণ্ডকং শ্রাদ্ধঞ্চ ৩৫ সমুদ্যন্তীর্থে স্নাত্বা সাবিত্র্যগ্রে মধ্যাহ্নসন্ধ্যাচরণং পিণ্ডদানঞ্চ ৩৬ প্রাচীসরস্বত্যাং স্নাত্বা সায়াহ্নসন্ধ্যাচরণং ৩৭ বিশালা ৩৮ লেলিহানং ৩৯ ভরতাশ্রমনামকরামতীর্থং ৪০ পদাঙ্কিতং ৪১ মুণ্ডপৃষ্ঠস্থগদাধরসমীপং ৪২ আকাশগঙ্গা ৪৩ গিরিকর্ণমুখং এষু স্নানং পিণ্ডদানঞ্চ ৪৪ বৈতরণ্যাং স্নানং পিণ্ডদানং শ্রাদ্ধং গোদানঞ্চ ৪৫ ঘৃতকুল্যা ৪৬ মধুকুল্যা ৪৭ দেবিকানদী ৪৮ শিলাসঙ্গম ৪৯ মধুস্রবাসু স্নানং সপিণ্ডকং শ্রাদ্ধং পিণ্ডদানঞ্চ ৫০ দশাশ্বমেধিকং ৫১ হংসতীর্থং ৫২ অমরকণ্টকং ৫৩ কোটিতীর্থং ৫৪ রুক্মিণীকুণ্ডং এষু পিণ্ডদানং ৫৫ মার্কণ্ডেয়েশ্বর ৫৬ কোটীশ্বরয়োর্দর্শনং নমনঞ্চ ৫৭ দিবৌকসাং পুষ্করিণ্যাং পিতৃভ্যো দানং ৫৮ পঙ্কজবনে পাণ্ডুশিলায়াং শ্রাদ্ধং ৫৯ মুখ্যতীর্থে স্নানং তর্পণং পিণ্ডদানঞ্চ ৬০ গয়াকূপে পিণ্ডদানং ৬১ ভস্মকূটে ভস্মনা স্নানং ৬১ সঙ্গমতীর্থে স্নানং ৬২ ধেনুকারণ্যে পিণ্ডদানং ৬৩ কামধেনুপদে স্নাত্বা কামদুঘানমনং ৬৪ ॥ * ॥ কর্দ্দমালে গয়ানাভৌ মুণ্ডপৃষ্ঠসমীপতঃ। স্নাত্বা শ্রাদ্ধাদিকং কৃত্বা পিতৃণামনৃণো ভবেৎ ॥ কন্ডচণ্ডীশ্মশানাক্ষীমঙ্গলাদ্যাঃ সমর্চ্চয়েৎ। গয়ায়াঞ্চ বৃষোৎসর্গস্ত্রিসপ্তকুলমুদ্ধরেৎ ॥ ইতি বায়ুপুরাণে গয়ামাহাত্ম্যং ॥ * ॥ তত্র মরণে মুক্তির্যথা। গদাধরোদ্দেশ্যতীর্থং সর্ব্বতীর্থোত্তমোত্তমং। মুক্তির্ভবেৎ পিতৃণাঞ্চ কর্তৃণাং শ্রাদ্ধতঃ সদা ॥ জরায়ুজা অণ্ডজা বা স্বেদজা বাপি চোদ্ভিদঃ। ত্যক্ত্বা দেহং শিলায়াং তে যান্তি বিষ্ণুস্বরূপতাং ॥ ইতি বায়ুপুরাণে গয়ামাহাত্ম্যে ৩ অধ্যায়ঃ ॥ * ॥ তত্রস্থজনার্দ্দনহস্তে জীবিতস্য পিণ্ডদানবিধির্যথা। জনার্দ্দনো ভস্মকূটে তস্য হস্তে তু পিণ্ডদঃ। আত্মনোঽপ্যথবান্যেষাং সব্যেনৈব তিলৈর্ব্বিনা ॥ জীবতাং দধিসংমিশ্রং সর্ব্বে তে বিষ্ণুলোকগাঃ। যস্তু পিণ্ডো ময়া দত্তস্তব হস্তে জনার্দ্দন ॥ যমুদ্দিশ্য ত্বয়া দেয়স্তস্মিন্ পিণ্ডো মৃতে প্রভো। এষ পিণ্ডো ময়া দত্তস্তব হস্তে জনার্দ্দন ॥ অন্তকালে গতে মহ্যং ত্বয়া দেয়ো গয়াশিরে। ইতি চ বায়ুপুরাণে গয়ামাহাত্ম্যে ৪ অধ্যায়ঃ ॥

গরং (ক্লী) ববাদ্যেকাদশকরণান্তর্গতপঞ্চমকরণং। ইতি মেদিনী ॥ তত্র জাতস্য ফলং। বিচারদক্ষো বিজিতারিপক্ষঃ শূরোঽতিধীরো মৃদুহাস্যযুক্তঃ। দাতা দয়ালুর্গুণবান্নরঃ স্যাদ্গরে পরেষামুপকারকর্ত্তা ॥ ইতি কোষ্ঠীপ্রদীপঃ ॥ বিষং। বৎসনাভাখ্যবিষং। ইতি রাজনির্ঘণ্টঃ ॥

গরঃ (পুং) বিষং। উপবিষং। রোগঃ। ইতি হেমচন্দ্রঃ ॥

গরম্বঃ ( পুং ) কৃষ্ণার্জ্জকঃ। বর্ব্বরঃ। ইতি রাজনির্ঘণ্টঃ ॥

গরম্বী ( স্ত্রী ) মৎস্যবিশেষঃ। গরই ইতি ভাষা। অস্যা গুণাঃ। মধুরত্বং। কষায়ত্বং। বাতপিত্তকফনাশিত্বং। রুচিবলবীর্য্যকারিত্বং। দীপনত্বং। লঘুত্বঞ্চ। ইতি ভাবপ্রকাশঃ ॥

গরণং ( ক্লী ) সেচনং। নিগরণং। গৃগৄধাতুভ্যাং ভাবেঽনট্প্রত্যয়ঃ ॥

গরদং ( ক্লী ) বিষং। ইতি রাজনির্ঘণ্টঃ ॥

গরদঃ ( ত্রি ) বিষদানকর্ত্তা। যথা। অগ্নিদো গরদশ্চৈব শস্ত্রপাণির্ধনাপহঃ। ইতি স্মৃতিঃ ॥

গরব্রতঃ ( পুং ) ময়ূরঃ। ইতি শব্দরত্নাবলী ॥

গরভঃ ( পুং ) গর্ভঃ। ইতি হেমচন্দ্রঃ ॥

গরলং ( ক্লী ) বিষং। ইত্যমরঃ ॥ পন্নগবিষং। পরিমাণং। তৃণপূলকং। ঘাসের গন্ন্যা পুলা আটি ইত্যাদি ভাষা। ইতি হেমচন্দ্রঃ ॥

গরলারিঃ ( পুং ) মরকতমণিঃ। ইতি রাজনির্ঘণ্টঃ ॥

গরা ( স্ত্রী ) দেবদালীলতা। ইতি রাজনির্ঘণ্টঃ ॥ নিগরণং। ইতি ধরণী ॥

গরাগরী ( স্ত্রী ) দেবতাড়বৃক্ষঃ। ইত্যমরটীকায়াং স্বামী ॥

গরাম্বকং ( ক্লী ) শোভাঞ্জনবীজং। ইতি শব্দচন্দ্রিকা ॥

গরাধিকা ( স্ত্রী ) লাক্ষা। ইতি রত্নমালা ॥ গরাধিকা গবাধিকাপি পাঠঃ ॥

গরিমা [ ন্ ] (ত্রি) গুরুতা। ইতি ব্যাকরণং ॥

গরিষ্ঠঃ ( ত্রি ) অতিগুরুঃ। ইতি জটাধরঃ ॥

গরী ( স্ত্রী ) দেবতাড়বৃক্ষঃ। ইত্যমরঃ ॥

গরীয়ান্ [ স্ ] ( ত্রি ) অতিগুরুঃ। ইতি ব্যাকরণং ॥

গরুড়ঃ ( পুং ) স্বনামখ্যাতপক্ষী। তৎপর্য্যায়ঃ। গরুত্মান্ ২ তার্ক্ষ্যঃ ৩ বৈনতেয়ঃ ৪ খগেশ্বরঃ ৫ নাগান্তকঃ ৬ বিষ্ণুরথঃ ৭ সুপর্ণঃ ৮ পন্নগাশনঃ ৯ মহাবীরঃ ১০ পক্ষিসিংহঃ ১১ উরগাশনঃ ১২। ইতি জটাধরঃ ॥ শাল্মলী ১৩ হরিবাহনঃ ১৪ অমৃতাহরণঃ ১৫ নাগাশনঃ ১৬। ইতি হারাবলী ॥ শাল্মলিস্থঃ ১৭ খগেন্দ্রঃ ১৮ ভুজগান্তকঃ ১৯ তরস্বী ২০ তার্ক্ষ্যনায়কঃ ২১। ইতি রাজনির্ঘণ্টঃ ॥ * ॥ তস্যোৎপত্তিকারণং যথা। যজতঃ পুত্রকামস্য কশ্যপস্য প্রজাপতেঃ। সাহায্যমৃষয়ো দেবা গন্ধর্ব্বাশ্চ দদুঃ কিল ॥ তত্রেধ্মানয়নে শক্রো নিযুক্তঃ কশ্যপেন হ। মুনয়ো বালিখিল্যাশ্চ যে চান্যে দেবতাগণাঃ ॥ শক্রস্তু বীর্য্যসদৃশমিধ্মভারং গিরিপ্রভং। সমুৎক্ষিপ্যানয়ামাস নাতিকৃচ্ছ্রাদিব প্রভুঃ ॥ অথাপশ্যদৃষীন্ হ্রস্বাঙ্গুষ্ঠোদরবর্ম্মণঃ। পলাশবৃন্তিকামেকাং সহিতান্ বহতঃ পথি ॥ তান্ সর্ব্বান্ বিস্ময়াবিষ্টো বীর্য্যোন্মত্তঃ পুরন্দরঃ। অবহস্যাভ্যগাচ্ছীঘ্রং লঙ্ঘয়িত্বাবমন্য চ ॥ তেঽথ রোষসমাবিষ্টাঃ সুভৃশং জাতমন্যবঃ। আরেভিরে মহৎ কর্ম্ম তদা শক্রভয়ঙ্করং ॥ কামবীর্য্যঃ কামগমো দেবরাজভয়প্রদঃ। ইন্দ্রোঽন্যঃ সর্ব্বদেবানাং ভবেদিতি যত-

ব্রতাঃ ॥ তদ্‌বুদ্ধা ভৃশসন্তপ্তো দেবরাজঃ শতক্রতুঃ। জগাম শরণং তত্র কশ্যপং শংসিতব্রতং ॥ তচ্ছ্রুত্বা দেবরাজস্য কশ্যপোঽথ প্রজাপতিঃ। বালিখিল্যানুপাগম্য কর্ম্মসিদ্ধিমপৃচ্ছত ॥ অথ তে তং মহাত্মানং প্রত্যূচুঃ সত্যবাদিনঃ। তান্ কশ্যপ উবাচেদং সান্ত্বপূর্ব্বং প্রজাপতিঃ ॥ * ॥ তস্য পক্ষীন্দ্রত্বকারণং যথা। অয়মিন্দ্রস্ত্রিভুবনে নিয়োগাৎ ব্রহ্মণঃ কৃতঃ। ইন্দ্রার্থঞ্চ ভবন্তোঽপি যত্নবন্তস্তপোধনাঃ ॥ ন মিথ্যা ব্রহ্মণো বাক্যং কর্ত্তুমর্হথ সত্তমাঃ। ভবতাং হি ন মিথ্যায়ং সংকল্পো বৈ চিকীর্ষিতঃ ॥ ভবত্বেষ পতত্ত্রীণামিন্দ্রোঽতিবলসত্ত্ববান্। প্রসাদঃ ক্রিয়তামস্য দেবরাজস্য যাচতঃ ॥ বালিখিল্যা উচুঃ। অপত্যার্থং সমারম্ভো ভবতশ্চায়মীপ্সিতঃ। তথা চৈবং বিধৎস্বাত্র যথাশ্রেয়োঽনুপশ্যসি ॥ এতস্মিন্নেব কালে তু দেবী দাক্ষায়ণী শুভা। বিনতা নাম কল্যাণী পুত্ত্রকামা যশস্বিনী ॥ তপস্তপ্তা ব্রতপরা স্নাতা পুংসবনে শুচিঃ। উপচক্রাম ভর্ত্তারং তামুবাচাথ কশ্যপঃ ॥ আরম্ভঃ সফলো দেবি ভবিতায়ং তবেপ্সিতঃ। জনয়িষ্যতি পুত্ত্রৌ দ্বৌ বীরৌ ত্রিভুবনেশ্বরৌ ॥ তপসা বালিখিল্যানাং মম সঙ্কল্পজৌ তথা। এতৌ সর্ব্বপতত্ত্রীণামিন্দ্রত্বং কারয়িষ্যতঃ ॥ বিনতা চাপি সিদ্ধার্থা বভূব মুদিতা তথা। জনয়ামাস পুত্ত্রৌ দ্বাবরুণং গরুড়ং তথা ॥ বিকলাঙ্গোঽরুণস্তত্র ভাস্করস্য পুরঃসরঃ। পতত্ত্রীণাম্ভ গরুড় ইন্দ্রত্বেনাভ্যষিচ্যত ॥ * ॥

তস্য জন্মকালীনরূপং যথা। এতস্মিন্নন্তরে চাপি গরুড়ঃ কাল আগতে। বিনা মাত্রা মহাতেজা বিদার্য্যাণ্ডমজায়ত ॥ মহাসত্ত্ববলোপেতঃ সর্ব্বা বিদ্যোতয়ন্দিশঃ। কামরূপী কামগমঃ কামবীর্য্যো বিহঙ্গমঃ ॥ অগ্নিরাশিরিবোদ্ভাসন্ সমিদ্ধোঽতিভয়ঙ্করঃ। বিদ্যুদ্বিস্পষ্টপিঙ্গাক্ষো যুগান্তাগ্নিসমপ্রভঃ ॥ প্রবৃদ্ধঃ সহসা পক্ষী মহাকায়ো নভো গতঃ। ঘোরো ঘোরস্বনো রৌদ্রো বহ্নিরৌর্ব্ব ইবাপরঃ ॥ * ॥ তস্য বিষ্ণুবাহনত্বে কারণং যথা। অপীত্বা চামৃতং পক্ষী পরিগৃহ্যাশু নিঃসৃতঃ। অগচ্ছদপরিশ্রান্ত আবার্য্যার্কপ্রভাং খগঃ ॥ বিষ্ণুনা তু তদাকাশে বৈনতেয়ঃ সমেয়িবান্। তস্য নারায়ণস্তুষ্টস্তেনালৌল্যেন কর্ম্মণা ॥ তমুবাচাব্যয়ো দেবো বরদোঽস্মীতি খেচরং। স বব্রে তব তিষ্ঠেয়মুপরীত্যন্তরীক্ষগঃ ॥ উবাচ চৈনং ভূয়োঽপি নারায়ণমিদম্বচঃ। অজরশ্চামরশ্চাস্যামমৃতেন বিনাপ্যহং। এবমস্ত্বিতি তং বিষ্ণুরুবাচ বিনতাসুতং ॥ প্রতিগৃহ্য বরৌ তৌ তু গরুড়ো বিষ্ণুমব্রবীৎ। ভবতেঽপি বরং দদ্মি বৃণোতু ভগবানপি ॥ তং বব্রে বাহনং কৃষ্ণো গরুত্মন্তং মহাবলং। ধ্বজঞ্চ চক্রে ভগবানুপরি স্থাস্যতীতি তং ॥ ইতি মহাভারতং ॥

গরুড়ধ্বজঃ (পুং) বিষ্ণুঃ। ইত্যমরঃ ॥

গরুড়াগ্রজঃ (পুং) অরুণঃ। ইত্যমরঃ ॥

গরুড়াঙ্কিতং (ক্লী) মরকতমণিঃ। ইতি শব্দরত্নাবলী ॥

গরুড়াশ্মা [ন্] (পুং) মরকতমণিঃ। ইতি জটাধরঃ॥

গরুড়োত্তীর্ণং (ক্লী) মরকতমণিঃ। ইতি রাজনির্ঘণ্টঃ॥

গরুৎ (পুং) পক্ষঃ। পাখা ইতি ভাষা। ইত্যমরঃ॥

গরুত্মান্ [ৎ] (পুং) গরুড়ঃ। ইত্যমরঃ॥ পক্ষিমাত্রং। ইতি মেদিনী॥

গরুদ্যোধী [ন্] (পুং) ভারতীপক্ষী। ভারই ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ॥

গর্গঃ (পুং) মুনিবিশেষঃ। স তু ব্রহ্মণঃ পুত্রঃ। ইতি বায়ুপুরাণং॥ তালবিশেষঃ। যথা। চতুর্দ্রুতং বিরামান্তং তালোঽয়ং গর্গসংজ্ঞিতঃ। ইতি সঙ্গীতদামোদরঃ॥

গর্গরঃ (পুং) মৎস্যভেদঃ। গাগরা ইতি ভাষা। ইতি জটাধরঃ॥ অস্য গুণাঃ। মধুরত্বং। স্নিগ্ধত্বং। বাতপিত্তনাশিত্বঞ্চ। ইতি রাজবল্লভঃ॥ অস্যাকারগুণৌ যথা। যঃ পীতবর্ণোঽপি চ পিচ্ছিলাঙ্গঃ পৃষ্ঠেষু রেখা বহুলঃ সশল্কঃ। স গর্গরো বর্ব্বরনাদবগ্যো জড়শ্চ শীতঃ কফবাতকারী॥ ইতি রাজনির্ঘণ্টঃ॥ গর্গরঃ পিত্তলঃ কিঞ্চিৎ বাতজিৎ কফকোপনঃ। ইতি ভাবপ্রকাশঃ॥

গর্গরী (স্ত্রী) মন্থনী। দধিমন্থনপাত্রং। ইত্যমরঃ॥ কলসী। গাগরী ইতি ভাষা। যথা। মেষাদৌ সক্তবো দেয়া বারিপূর্ণা চ গর্গরী। ইতি তিথ্যাদিতত্ত্বং॥

গর্গাটঃ (পুং) মৎস্যবিশেষঃ। তৎপর্য্যায়ঃ। যোগনাবিকঃ ২। ইতি হারাবলী॥

গর্জ্জ উর্জ্জাশব্দে। ইতি কবিকল্পদ্রুমঃ॥ উর্জ্জা বলং। সেনত্তাৎ সরোরিতি অঃ তৎকরণকশব্দঃ। গর্জ্জতি সিংহঃ। ইতি দুর্গাদাসঃ॥

গর্জ্জ ক স্বনে। ইতি কবিকল্পদ্রুমঃ॥ ক গর্জ্জয়তি। ইতি দুর্গাদাসঃ॥

গর্জ্জং (ক্লী) হস্তিশব্দঃ। ইতি হেমচন্দ্রঃ॥ মেঘাদিশব্দশ্চ॥

গর্জকঃ (পুং) মৎস্যবিশেষঃ। গজাড় ইতি ভাষা। তৎপর্য্যায়ঃ। শালঃ২ শালজঃ ৩। ইতি শব্দরত্নাবলী॥

গর্জনং (ক্লী) শব্দঃ। কোপঃ। ইতি মেদিনী॥

গর্জরং (ক্লী) মূলবিশেষঃ। গাজর ইতি ভাষা। তৎপর্য্যায়ঃ। পিণ্ডমূলং ২ পীতকন্দং ৩ সুমূলকং ৪ স্বাদুমূলং ৫ সুপীতং ৬ নারঙ্গং ৭ পীতমূলকং ৮। অস্য গুণাঃ। মধুরত্বং। রুচিকারিত্বং। কিঞ্চিৎ কটুত্বং। কফাধ্মানক্রিমিশূলদাহপিত্ততৃষ্ণানাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ তৎপর্য্যায়গুণাঃ। গাজরং গৃঞ্জনং প্রোক্তং তথা নারঙ্গবর্ণকং। গাজরং মধুরং তীক্ষ্ণং তিক্তোষ্ণং দীপনং লঘু॥ সংগ্রাহি রক্তপিত্তার্শোগ্রহণীকফবাতজিৎ। ইতি ভাবপ্রকাশঃ॥

গর্জাফলঃ (পুং) বিকণ্টকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥ যুদ্ধং। ইতি হেমচন্দ্রঃ॥ ভর্ৎসনং। উত্তেজনং। ইতি শব্দরত্নাবলী॥

গর্জ্জিঃ (পুং) মেঘশব্দঃ। ইতি হেমচন্দ্রঃ॥

গর্জ্জিতং (ক্লী) মেঘশব্দঃ। ইত্যমরঃ॥ কৃতশব্দে ত্রি॥

গর্জ্জিতঃ (পুং) মত্তহস্তী। ইত্যমরঃ॥

গর্ত্তঃ (পুং) ভুবি শ্বভ্রং। গাড়া ইতি ভাষা। তৎপর্য্যায়ঃ। অবটঃ ২। ইত্যমরঃ॥ ভুরন্ধ্রং ৩ দরঃ ৪ শ্বভ্রং ৫। ইতি জটাধরঃ॥ আবর্টিঃ ৬ আবটুঃ ৭ পৃথিবীরন্ধ্রং ৮। ইতি শব্দরত্নাবলী॥ ত্রিগর্ত্তদেশঃ। কুকুন্দরঃ। ইতি মেদিনী॥ রোগভেদঃ। ইতি শব্দরত্নাবলী॥

গর্ত্তিকা (স্ত্রী) তন্তুশালা। তাঁৎঘর ইতি ভাষা। ইতি হেমচন্দ্রঃ॥

গর্দ্দ কি রবে। ইতি কবিকল্পদ্রুমঃ॥ কি গর্দ্দয়তি গর্দ্দতি। রবঃ শব্দঃ। ইতি দুর্গাদাসঃ॥

গর্দ্দভং (ক্লী) শ্বেতকুমুদং। ইতি হেমচন্দ্রঃ॥ বিড়ঙ্গং। ইতি রত্নমালা॥

গর্দ্দভঃ (পুং) পশুবিশেষঃ। গাদা ইতি ভাষা। তৎপর্য্যায়ঃ। চক্রীবান্ ২ বালেয়ঃ ৩ রাসভঃ ৪ খরঃ ৫। ইত্যমরঃ॥ রাশভঃ ৬। ইতি তন্ত্রীকা॥ শঙ্কুবর্ণঃ ৭ ভারগঃ ৮ ভূরিগমঃ ৯ ধূসরাহ্বয়ঃ ১০ বেশবঃ ১১ ধূসরঃ ১২। ইতি জটাধরঃ॥ স্মরসূর্য্যঃ ১৩ চিরমেহী ১৪ পশুচরিঃ ১৫ চারপুঙ্খঃ ১৬ চারটঃ ১৭ গ্রাম্যাশ্বঃ ১৮। ইতি শব্দরত্নাবলী॥ *॥ অস্য মাংসস্য গুণঃ। কিঞ্চিৎ গুরুত্বং বলপ্রদত্বঞ্চ। তন্মূত্রস্য গুণাঃ। কটুত্বং। উষ্ণত্বং। তিক্তত্বং। ক্ষারত্বং। কফমহাবাতভূতকম্পোন্মাদহরত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ তস্মাৎ গুণশিক্ষা যথা। অবিশ্রামং বহেদ্ভারং শীতোষ্ণঞ্চ ন বিন্দতি। সসন্তোষস্তথা নিত্যং ত্রীণি শিক্ষেত গর্দ্দভাৎ॥ ইতি চাণক্যং॥ গন্ধঃ। ইতি হেমচন্দ্রঃ॥

গর্দ্দভগদঃ (পুং) জালগর্দ্দভকরোগঃ। ইতি রাজনির্ঘণ্টঃ॥ অস্য লক্ষণং জালগর্দ্দভশব্দে দ্রষ্টব্যং॥

গর্দ্দভশাকঃ (পুং) ব্রহ্মযষ্টিবৃক্ষঃ। ইতি জটাধরঃ॥

গর্দ্দভশাকা (স্ত্রী) ব্রহ্মযষ্টিঃ। বামণহাটী ইতি ভাষা। ইতি রত্নমালা॥

গর্দ্দভশাখী (স্ত্রী) ভার্গী। ইতি রাজনির্ঘণ্টঃ॥

গর্দ্দভাণ্ডঃ (পুং) বৃক্ষবিশেষঃ। গাদ্ধিভাট ইতি খ্যাতঃ। অয়ং পত্রকাণ্ডফলাদিভিরশ্বত্থাকারঃ। গন্ধপিপ্পলঃ ইতি কেচিৎ। ইতি ভরতঃ॥ গর্দ্দপিপ্পলী ইতি খ্যাতঃ। ইতি সারসুন্দরী॥ তৎপর্য্যায়ঃ। কন্দরালঃ ২ কপীতনঃ ৩ সুপার্শ্বকঃ ৪ প্লক্ষঃ ৫। ইত্যমরঃ॥ শুঙ্গী ৬ প্লবঃ ৭ কমণ্ডলুঃ ৮। ইতি জটাধরঃ॥ গর্দ্ধভাণ্ডঃ ৯ প্লক্ষেশঃ ১০ কন্দরালকঃ ১১। ইতি শব্দরত্নাবলী॥ প্লক্ষবৃক্ষঃ। পাকুড় ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥

গর্দ্দভাহ্বয়ঃ (পুং) কুমুদং। ইতি হেমচন্দ্রঃ॥

গর্দ্দভিকা (স্ত্রী) ক্ষুদ্ররোগবিশেষঃ। তল্লক্ষণং যথা। মণ্ডলং বৃত্তমুৎসন্নং সরক্তং পিড়কাচিতং। রুজাকরীং গর্দ্দভিকাং তাং বিদ্যাৎ বাতপিত্তজাং॥ তচ্চিকিৎসা যথা। বিবৃত্তামিন্দ্রবৃদ্ধাঞ্চ গর্দ্দভীং জালগর্দ্দভং। পৈত্তিকস্য বিসর্পস্য ক্রিয়য়া সাধয়েদ্ভিষক্॥ পাকে তু শোষয়েদাজ্যৈঃ পকৈর্ম্মধুরভেষজৈঃ। ইতি ভাবপ্রকাশঃ॥

গর্দ্দভী (স্ত্রী) গর্দ্দভপত্নী। তস্যাঃ ক্ষীরন্তু

গুণাঃ। বলকারিত্বং। বাতশ্বাসহরত্বং। মধুরাম্লরসত্বং। রূক্ষত্বং। দীপনত্বং। পথ্যত্বঞ্চ। তদ্দধিগুণাঃ। রূক্ষত্বং। উষ্ণত্বং। লঘুত্বং। দীপনত্বং। পাচনত্বং। মধুরাম্লরসত্বং। রুচ্যত্বং। বাতদোষনাশিত্বঞ্চ। তন্নবনীতগুণাঃ। কষায়ত্বং। কফবাতনাশিত্বং। বল্যত্বং। দীপনত্বং। পাকে লঘুত্বং। উষ্ণত্বং। মূত্রদোষকারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ ক্ষুদ্রজন্তুবিশেষঃ। গর্দ্দভিকারোগঃ। ইতি মেদিনী॥ অপরাজিতা। শ্বেতকণ্টকারী। কটভী। ইতি রাজনির্ঘণ্টঃ॥

গর্দ্ধ ক লিপ্সে। ইতি কবিকল্পদ্রুমঃ॥ ক গর্দ্ধয়তি। ইতি দুর্গাদাসঃ॥

গর্দ্ধঃ (পুং) স্পৃহা। ইতি হেমচন্দ্রঃ॥ গর্দ্দভাণ্ডবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥

গর্দ্ধনঃ (ত্রি) লুব্ধঃ। ইত্যমরঃ॥

গর্ব্ব ৎ ক ঙ দর্পে। ইতি কবিকল্পদ্রুমঃ॥ দর্পোঽহঙ্কারঃ। ঙ গর্ব্বয়তে গর্ব্বাপয়তে ধনৈর্নীচঃ। ইতি দুর্গাদাসঃ॥

গর্ব্ব গতৌ। ইতি কবিকল্পদ্রুমঃ॥ গর্ব্বতি। ইতি দুর্গাদাসঃ॥

গর্ব্বঃ (পুং) অহঙ্কারঃ। দর্পার্থাদন্তগর্ব্বধাতোর্ভাবেঽল্প্রত্যয়ঃ॥

গর্ভঃ (পুং) ভ্রূণঃ। তদ্বিবরণং যথা। স্বর্গাচ্চ নরকান্মুক্তঃ স্ত্রীণাং গর্ভো ভবত্যপি। নাভিভূতঞ্চ তস্যৈব যাতি বীজদ্বয়ং হি তৎ॥ কললং বুদ্বুদত্বঞ্চ ততঃ পেশীত্বমেব চ। পেশ্যাপলসমোঽণ্ডঃ স্যাদঙ্কুরস্তত উচ্যতে॥ অঙ্গানামথ চোৎপত্তিঃ পঞ্চানামঙ্গুলাংশকাৎ। উপাঙ্গান্যঙ্গুলীনেত্রনাসাস্যশ্রবণানি চ॥ প্ররোহং যান্তি চাঙ্গেভ্যস্তদ্বত্তেভ্যো নখাদিকং। ত্বচো রোমাণি জায়ন্তে কেশাশ্চৈব ততঃ পরং॥ বরশ্চাধোমুখঃ স্থিত্বা দশমে চ স জায়তে। ততস্তু বৈষ্ণবী মায়া সমাশ্রয়তি মোহিনী॥ বালত্বস্তু কুমারত্বং যৌবনং বৃদ্ধতামপি। ততশ্চ মরণং তত্তজ্জন্মমাপ্নোতি মানবঃ॥ এবং সংসারচক্রেঽস্মিন্ ভ্রাম্যতে ঘটিযন্ত্রবৎ। ইতি গারুড়ে ২২৯ অধ্যায়ঃ॥ তস্য লক্ষণং যথা। গর্ভাশয়গতং শুক্রমার্ত্তবং জীবসংজ্ঞকং। প্রকৃতিঃ সবিকারা চ তৎ সর্ব্বং গর্ভসংজ্ঞকং॥ কালেন বর্দ্ধিতো গর্ভো যদ্যঙ্গোপাঙ্গসংযুতঃ। ভবেত্তদা স মুনিভিঃ শরীরীতি নিগদ্যতে॥ * ॥ তদন্যপ্রকৃতির্যথা। যদা নার্য্যাবুপেয়াতাং বৃষস্যন্ত্যৌ কথঞ্চন। মুঞ্চন্ত্যৌ শুক্রমন্যোঽন্যমনস্থিস্তত্র জায়তে॥ ঋতুস্নাতা তু যা নারী স্বপ্নে মৈথুনমাচরেৎ। আর্ত্তবং বায়ুরাদায় কুক্ষৌ গর্ভং করোতি হি॥ মাসি মাসি প্রবর্দ্ধেত স গর্ভো গর্ভলক্ষণঃ। করণং জায়তে তস্যা বর্জ্জিতং পৈতৃকৈর্গুণৈঃ॥ ইতি ভাবপ্রকাশঃ॥ * ॥ অস্য দ্বাদশধা গতির্যথা। ভুগ্নোঽনিলেন বিগুণেন ততঃ স গর্ভঃ সংখ্যামতীত্য বহুধা সমুপৈতি যোনিং। দ্বারং নিরুধ্য শিরসা জঠরেণ কশ্চিৎ কশ্চিচ্ছরীরপরিবর্ত্তিতকুব্জদেহঃ॥ একেন কশ্চিদপরস্তু ভুজদ্বয়েন তির্য্যগ্গতো ভবতি কশ্চিদবাঙ্মুখোঽন্যঃ। পার্শ্বাপবৃত্ত-

গতিরেত্তি তথৈব কশ্চিদিত্যষ্টধা. গতি-রিয়ং হ্যপরা চতুর্দ্ধা ॥ সঙ্কীলকঃ প্রতি-খুরঃ পরিঘোহথ বীজস্তেষূর্দ্ধবাহুচরণৈঃ শিরসা চ যোনৌ। সঙ্গী চ যো ভবতি কীলকবৎ সকীলো দৃশ্যৈঃ খুরৈঃ প্রতিখুরঃ স হি কায়সঙ্গী ॥ গচ্ছেদ্ভুজ-দ্বয়শিরাঃ স চ বীজকাখ্যো যোনৌ স্থিতঃ সপরিঘঃ পরিঘেণ তুল্যঃ ॥ * ॥ গর্ভনাশলক্ষণাদি। অপবিদ্ধশিরা যা তু শীতাঙ্গী নিরপত্রপা। নীলোদ্গতশিরা হন্তি সা গর্ভং স চ তাং তথা ॥ মানসাগন্তুভি-র্মাতুরুপতাপৈঃ প্রপীড়িতঃ। গর্ভো ব্যাপ-দ্যতে কুক্ষৌ ব্যাধিভিশ্চ প্রপীড়িতঃ ॥ * ॥ অন্তর্মৃতগর্ভলক্ষণং যথা। গর্ভাস্পন্দন-মাবীনাং প্রণাশঃ শ্যাববর্ণতা। ভবেদুচ্ছ্বাস-পূতিত্বং শোথশ্চান্তর্মৃতে শিশৌ ॥ ইতি মাধবকরঃ ॥ * ॥ শিশুঃ। কুক্ষিঃ। সন্ধিঃ। পনসকণ্টকং। ইতি মেদিনী ॥ মধ্যং। অপবরকঃ। ইতি হেমচন্দ্রঃ ॥ গঙ্গাদি-সন্নিহিতদেশঃ। যথা। ভাদ্রকৃষ্ণচতুর্দ্দশ্যাং যাবদাক্রমতে জলং। তাবদ্গর্ভং বিজা-নীয়াৎ তদূর্দ্ধং তীরমুচ্যতে ॥ ইতি প্রায়-শ্চিত্ততত্ত্বং ॥ রেফসংযোগাৎ ভকারস্য দ্বিত্বে বকারযুক্তোঽপ্যয়ং ॥

গর্ভকং (ক্লী) রজনীদ্বন্দ্বং। দুই রাত্রি ইতি ভাষা। ইতি হেমচন্দ্রঃ ॥

গর্ভকঃ (পুং) কেশমধ্যস্থিতমাল্যং। খোপার মালা ইতি ভাষা। ইত্যমরঃ ॥

গর্ভকরঃ (পুং) পুত্রজীববৃক্ষঃ। ইতি ভাব-প্রকাশঃ

গর্ভঘাতিনী (স্ত্রী) লাঙ্গলিকাবৃক্ষঃ। ইতি রত্ন-মালা ॥

গর্ভগুঃ (পুং) নাভিগুড়কঃ। নাভির গাঁড় ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ ॥ গর্ভ-স্যাণ্ড ইব গর্ভণ্ডঃ পৃষোদরাদিত্বাদকার-লোপঃ ॥

গর্ভদঃ (পুং) পুত্রজীববৃক্ষঃ। ইতি রাজ-নির্ঘণ্টঃ ॥

গর্ভদাত্রী (স্ত্রী) ক্ষুপবিশেষঃ। গর্ভদা ইতি খ্যাতা। তৎপর্য্যায়ঃ। পুত্রদা ২ প্রজাদা ৩ অপত্যদা ৪ সৃষ্টিপ্রদা ৫ প্রাণিমাতা ৬ তাপসক্রমসন্নিভা ৭। অস্যা গুণাঃ। মধু-রত্বং। শীতত্বং। নারীপুষ্পাদিদোষপিত্ত-দাহশ্রমনাশিত্বং। গর্ভসম্ভূতিদাতৃত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

গর্ভনুৎ [দ্] (পুং) কলিকারীবৃক্ষঃ। বিষ-লাঙ্গলিয়া ইতি ভাষা। ইতি ভাবপ্রকাশঃ ॥

গর্ভপাকী [ন্] (পুং) ষষ্টিকব্রীহিঃ। ষেটে ধান ইতি ভাষা। ইতি হেমচন্দ্রঃ ॥

গর্ভপাতঃ (পুং) পঞ্চমষষ্ঠমাসীয়স্য কঠিন-শরীরস্য গর্ভস্য পতনং। অস্য প্রমাণাদি গর্ভস্রাবশব্দে দ্রষ্টব্যং ॥

গর্ভপাতকঃ (পুং) রক্তশোভাঞ্জনবৃক্ষঃ। ইতি জটাধরঃ ॥

গর্ভপাতনঃ (পুং) রীঠাকরঞ্জঃ। ইতি ভাব-প্রকাশঃ ॥

গর্ভপাতনী (স্ত্রী) কলিকারীবৃক্ষঃ। ইতি রাজ-নির্ঘণ্টঃ ॥

গর্ভপাতিনী (স্ত্রী) বিশল্যাবৃক্ষঃ। ইতি জটা-ধরঃ ॥

গর্ভরূপঃ (ত্রি) তরুণঃ। ইতি ভূরিপ্রয়োগঃ॥
গর্ভবতী (স্ত্রী) অন্তরাপত্যা। তৎপর্য্যায়ঃ। অন্তর্ব্বত্নী ২ গুর্ব্বিণী ৩ গর্ভিণী ৪ সসত্ত্বা ৫ আপন্নসত্ত্বা ৬ দোহদবতী ৭। ইতি শব্দরত্নাবলী॥ উদরিণী ৮ গুর্ব্বী ৯। ইতি হেমচন্দ্রঃ॥ * ॥ অথ সদ্যোগৃহীতগর্ভায়া লক্ষণং। শুক্রশোণিতয়োর্যোনেরস্রাবোঽথ শ্রমোদ্ভবঃ। সাবসাদঃ পিপাসা চ গ্লানিঃ স্ফূর্ত্তির্ভগে ভবেৎ॥ * ॥ তস্যা উত্তরোত্তরকালীনলক্ষণং যথা। স্তনয়োর্মুখকার্ষ্ণ্যং স্যাৎ রোমরাজ্যুদ্গমস্তথা। অক্ষিপক্ষ্মাণি চাপ্যস্যাঃ সংমীল্যন্তে বিশেষতঃ॥ ছর্দ্দয়েৎ পক্ষভুক্তাপি গন্ধাদুদ্বিজতেঽশুভাৎ। প্রসেকঃ সদনঞ্চৈব গর্ভিণ্যা লিঙ্গমুচ্যতে॥ * ॥ পুত্রগর্ভবত্যাঃ লক্ষণং যথা। পুত্রগর্ভযুতায়াস্তু নার্য্যা মাসি দ্বিতীয়কে। গর্ভো গর্ভাশয়ে লক্ষ্যঃ পিণ্ডাকারোঽপরং শৃণু॥ দক্ষিণাক্ষিমহত্ত্বং স্যাৎ প্রাক্ক্ষীরং দক্ষিণস্তনে। দক্ষিণোরুঃ সুপুষ্টঃ স্যাৎ প্রসন্নমুখবর্ণতা॥ পুন্নামধেয়দ্রব্যেষু স্বপ্নেষ্বপি মনোরথঃ। আম্রাদি ফলমাপ্নোতি স্বপ্নেষু কমলাদি চ॥ * ॥ কন্যাগর্ভবতীলক্ষণং যথা। কন্যাগর্ভবতীগর্ভে পেশীং মাসি দ্বিতীয়কে। পুত্রগর্ভস্য লিঙ্গানি বিপরীতমবেক্ষতে॥ * ॥ নপুংসকগর্ভবতীলক্ষণং যথা। নপুংসকং যদা গর্ভো ভবেদ্গর্ভোঽর্ব্বুদাকৃতিঃ। উন্নতে ভবতঃ পার্শ্বে পুরস্তাদুদরং মহৎ॥ ইতি ভাবপ্রকাশঃ॥
গর্ভশয্যা (স্ত্রী) গর্ভোৎপত্তিস্থানং। তত্র পিত্তাশয়পকাশয়য়োর্ম্মধ্যবর্ত্তি। তস্য রূপং যথা। শঙ্খনাভ্যাকৃতির্যোনিস্ত্র্যাবর্ত্তা সা চ কীর্ত্তিতা। তস্যাস্তৃতীয়ে ত্বাবর্ত্তে গর্ভশয্যা প্রকীর্ত্তিতা॥ যথা রোহিতমৎস্যস্য মুখং ভবতি রূপতঃ। তৎসংস্থাঞ্চ তথারূপাং গর্ভশয্যাং বিদুর্ব্বুধাঃ॥ ইতি ভাবপ্রকাশঃ॥
গর্ভস্রাবঃ (পুং) গর্ভপাতঃ। চতুর্থমাসপর্য্যন্তং শোণিতরূপগর্ভস্য স্রবণং। পেটখসা ইতি ভাষা। তস্যাশৌচং যথা। যদি গর্ভো বিপদ্যেত স্রবতে বাপি যোষিতঃ। যাবন্মাসান্ স্থিতো গর্ভস্তাবদ্দিনানি সূতকং॥ ইতি গারুড়ে ১০৭ অধ্যায়ঃ॥ রাত্রিভির্মাসতুল্যাভির্গর্ভস্রাবে বিশুধ্যতি। ইতি মনুঃ॥ * ॥ অর্ব্বাক্ ষণ্মাসতঃ স্ত্রীণাং যদি স্যাৎ গর্ভসংস্রবঃ। তদা মাসসমৈস্তাসামশৌচং দিবসৈঃ স্মৃতং॥ অত ঊর্দ্ধন্তু পতনে স্ত্রীণাং স্যাদ্দশরাত্রকং। সদ্যঃশৌচং সপিণ্ডানাং গর্ভস্রাবাচ্চ বা ততঃ॥ ইতি কূর্ম্মপুরাণং॥ * ॥ অন্যৎ অশৌচশব্দে দ্রষ্টব্যং॥ * ॥ অথ গর্ভস্রাবনিদানলক্ষণে। ভয়াভিঘাততীক্ষ্ণোষ্ণপানাশননিষেবণাৎ। গর্ভে পততি রক্তস্য সশূলং দর্শনং ভবেৎ॥ আচতুর্থাৎ ততো মাসাৎ প্রস্রবেদ্গর্ভবিদ্রবঃ। ততঃ স্থিরশরীরস্য পাতঃ পঞ্চমষষ্ঠয়োঃ॥ গর্ভোঽভিঘাতবিষমাশনপীড়নাদ্যৈঃ পক্বং দ্রুমাদিব ফলং পততি ক্ষণেন। মূঢ়ঃ করোতি পবনঃ খলু মূঢ়গর্ভং শূলঞ্চ যোনিজঠরাদিষু মূত্রসঙ্গং॥ ইতি মাধবকরঃ॥ অথ গর্ভস্রাবপাতয়োর্নিদানমাহ। গ্রাম্যধর্ম্মাধ্বগমনযানস্খলন-

পীড়নৈঃ। জ্বরোপবাসোৎপতনপ্রহারা-জীর্ণধাবনৈঃ॥ বমনাচ্চ বিরেকাচ্চ কুন্থনা-দগর্ভপাতনাৎ। তীক্ষ্ণধারোষ্ণকটুকতিক্ত-রুক্ষনিষেবণাৎ॥ বেগাভিঘাতাদ্বিষমা-দাসনাচ্ছয়নাত্তয়াৎ। গর্ভে পততি রক্তস্য সশূলং দর্শনং ভবেৎ॥ গর্ভপাত-নাৎ নিয়মেন গর্ভপাতনশীলং দ্রব্যং তস্মাৎ॥ গর্ভস্য স্রাবপাতয়োঃ পূর্ব্বরূপ-মাহ। গর্ভে পততীত্যাদি। পততি স্রাবেণ পাতেন বা পতিষ্যতি॥*॥ স্রাব-পাতয়োরবধিমাহ। আচতুর্থাত্ততো মাসাৎ প্রস্রবেদগর্ভবিদ্রবঃ। ততঃ স্থিরশরীরস্য পাতঃ পঞ্চমষষ্ঠয়োঃ॥ আচতুর্থাৎ মাসাৎ চতুর্থমাসপর্য্যন্তং। গর্ভস্য বিদ্রবঃ শোণিত-রূপঃ। গর্ভঃ স্রবতি শোণিতমিতি ভোজ-বচনাৎ। স্থিরশরীরস্য কঠিনশরীরস্য গর্ভস্য। গর্ভপাতস্য দৃষ্টান্তং দর্শয়তি। গর্ভোঽভিঘাতবিষমাসনপীড়নাদ্যৈঃ পক্বং দ্রুমাদিব ফলং পততি ক্ষণেন। যথা বৃন্তলগ্নং পক্বং ফলং অভিঘাতেনাকাল এব পততি তথা গর্ভোঽপ্যভিঘাতাদিনা-কালেঽপি পততি॥*॥ অথ গর্ভস্রাবস্য চিকিৎসা। গুর্ব্বিণ্যা গর্ভতো রক্তং স্রবেদযদি মুহুর্মুহুঃ। তন্নিরোধায় সুস্নিগ্ধ-মুৎপলাদি শৃতং পিবেৎ॥ উৎপলাদিগণ-মাহ। উৎপলং নীলমারক্তং কহ্লারং কুমুদং তথা। শ্বেতাম্ভোজঞ্চ মধুকমুৎ-পলাদিরয়ং গণঃ॥ সংশীলিতো হরত্যেব দাহং তৃষ্ণাং হৃদাময়ং। রক্তপিত্তঞ্চ মূর্চ্ছাঞ্চ তথা ছর্দিমরোচকং॥*॥ অথ গর্ভপাতস্যোপদ্রবানাহ। প্রস্রংসমানে গর্ভে স্যাদ্দাহং শূলঞ্চ পার্শ্বয়োঃ। পৃষ্ঠরুক্ প্রদরানাহৌ মূত্রসঙ্গশ্চ জায়তে॥ প্রস্রংস-মানে পততি॥*॥ অথ গর্ভস্য স্থানা-ন্তরগমনে চোপদ্রবানাহ। স্থানাৎ স্থানা-ন্তরং তস্মিন্ প্রয়াত্যপি চ জায়তে। আমপক্বাশয়াদৌ তু ক্ষোভঃ পূর্ব্বেঽপ্যুপ-দ্রবাঃ॥ পূর্ব্বেঽপ্যুপদ্রবাঃ পার্শ্বে শূলা-দয়ঃ॥*॥ তচ্চিকিৎসামাহ। স্নিগ্ধাঃ শীতাঃ ক্রিয়াস্তেষু দাহাদিষু সমাচরেৎ। কুশকাশোরুবূকাণাং মূলৈর্গোক্ষুরকস্য চ॥ শৃতং দুগ্ধং সিতাযুক্তং গর্ভিণ্যাঃ শূলহৃৎ পরং। স্বদংষ্ট্রামধুকক্ষুদ্রাম্লানৈঃ সিদ্ধং পয়ঃ পিবেৎ॥ শর্করামধুসংযুক্তং গুর্ব্বিণীবেদনাপহং। অম্লানঃ পুষ্পজাতিঃ। অয়ং বাণপুষ্পং ইতি গৌড়াদৌ প্রসিদ্ধঃ। ইতি ভাবপ্রকাশঃ॥

গর্ভস্রাবী [ন্] (পুং) হিন্তালবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

গর্ভাগারং (ক্লী) গৃহমধ্যভাগঃ। শয়নগৃহং। গৃহান্তর্গৃহং ইত্যেকে। ইতি ভরতঃ॥ তৎপর্য্যায়ঃ। বাসগৃহং ২। ইত্যমরঃ॥ গর্ভাশয়ঃ। ইতি রাজনির্ঘণ্টঃ॥

গর্ভাধানং (ক্লী) দশসংস্কারান্তর্গতপ্রথম-সংস্কারঃ। যথা। গর্ভাধানমৃতৌ পুংসঃ সবনং স্পন্দনাৎ পুরা। ঋতৌ ঋতুকালে। স চ কালো যাজ্ঞবল্ক্যেনোক্তঃ। ষোড়-শর্ত্তুনিশাঃ স্ত্রীণাং তাসু যুগ্মাসু সং-বিশেৎ। ইতি মলমাসতত্ত্বং॥ তত্র ক্রমঃ। ঋতুস্নানাদূর্দ্ধং নিষেকদিবসে সায়ংসন্ধ্যায়া-

মতীতায়াং পতিঃ শুচিঃ সুগন্ধিঃ সুবেশঃ মন্ত্রেণ সূর্য্যার্ঘ্যং দত্ত্বা পূর্ব্বাভিমুখোপবিষ্টায়াশ্চ বধ্বা দক্ষিণহস্তেনোপস্থং স্পৃশন্ মন্ত্রং জপেৎ ততঃ পুনরপি উপস্থং স্পৃশন্ মন্ত্রং জপেৎ। ততো ভার্য্যামুপেয়াৎ। ইতি ভবদেবভট্টঃ॥তদ্বিহিতনিষিদ্ধনক্ষত্রাদি যথা। জ্যেষ্ঠা মূলা মঘাশ্লেষা রেবতী কৃত্তিকাশ্বিনী। উত্তরাত্রিতয়ং ত্যক্ত্বা পর্ব্ববর্জ্জং ব্রজেদৃতৌ॥ পর্ব্বাণ্যাহ বিষ্ণুপুরাণং। চতুর্দ্দশ্যষ্টমী চৈব অমাবাস্যাথ পূর্ণিমা। পর্ব্বাণ্যেতানি রাজেন্দ্র রবিসংক্রান্তিরেব চ॥ শৌনকঃ। পুংনক্ষত্রাণি চৈতানি তিষ্যো হস্তঃ পুনর্ব্বসুঃ। অভিজিৎ প্রৌষ্ঠপচ্চৈবানুরাধাষাঢ়শ্চাশ্বযুক্॥ অন্যশ্চ। হস্তো মূলং শ্রবণঃ পুনর্ব্বসুর্মৃগশিরস্তথা পুষ্যশ্চ। গর্ভাধানাদিকার্য্যেষু পুংনামায়ং গণঃ শুভদঃ॥ রোহিণ্যন্তকচিত্রাহিবিশাখশতবর্জ্জিতে। ভে পুংগ্রহাহে স্ত্রীশুদ্ধ্যা ফলবন্ধনমিষ্যতে॥ পুষ্যার্কচন্দ্রশিবমূলপুনর্ব্বসুঃ স্বাদাষাঢ়যুগ্মহরিভাদ্রপদদ্বয়ঞ্চ। এতানি পুংসি কথিতানি শুভানি ভানি চান্যেষু গর্ভপতনাদিভয়ঞ্চ তেষু॥ নন্দা ভদ্রা ভবেৎ পুংসি স্ত্রীষু পূর্ণা জয়া স্মৃতা। রিক্তা নপুংসকে ত্বাহুস্তস্মাত্তাং পরিবর্জ্জয়েৎ॥ স্ত্রীণামৃতুর্ভবতি ষোড়শবাসরাণি তত্রাদিতঃ পরিহরেচ্চ নিশাশ্চতস্রঃ। যুগ্মাসু রাত্রিষু নরা বিষমাসু নার্য্যঃ কুর্য্যান্নিষেকমথ তাস্বপি পর্ব্ববর্জ্জং॥ মূলর্ক্ষং স্মৃতিছুষ্টত্বাদ্গর্ভাধানেষু নেষ্যতে। তস্য পুংসবনাদৌ তু পুংসংজ্ঞত্বে প্রয়োজনং॥ যথা যাজ্ঞবল্ক্যঃ। এবং গচ্ছন্ স্ত্রিয়ং ক্ষামাং মঘাং মূলাঞ্চ বর্জ্জয়েৎ। শস্ত ইন্দৌ সকৃৎ পুত্রং লক্ষণ্যং জনয়েৎ পুমান্॥ ক্ষামাং আহারলাঘবাদিনা ক্ষীণাং। ফলঞ্চ যুগ্মাসু পুত্রা জায়ন্তে স্ত্রিয়োঽযুগ্মাসু রাত্রিষু। তস্মাদ্যুগ্মাসু পুত্রার্থী সংবিশেদার্ত্তবে স্ত্রিয়ং॥ পুমান্ পুংসোঽধিকে শুক্রে স্ত্রী ভবত্যধিকে স্ত্রিয়াঃ। ইতি মনূক্তং॥ এবঞ্চ যুগ্মায়ামপি রাত্রৌ চেৎ শোণিতং প্রচুরং যদা। কন্যা চ পুষ্যস্তবতি শুক্রাধিক্যে পুমান্ ভবেৎ॥ কন্যৈবাযুগ্মরাত্রৌ চ প্রাধান্যং সমবায়িনোঃ। নিমিত্তকারণাৎ কালাৎ শুক্রশোণিতয়োর্যতঃ॥ পীড়া রাশৌ ভৌমদৃষ্টে শশাঙ্কে মাসং মাসং যোষিতামার্ত্তবং স্যাৎ। ত্র্যংশে শান্তং যচ্চ রক্তং জবাভং তদ্গর্ভার্থং বেদনাগন্ধহীনং॥ গর্ভযোগ্যর্ত্তু নিরূপণং॥ পাপাসংযুতমধ্যগেষু দিনকৃৎলগ্নক্ষপাস্বামিষু তদ্দ্যূনেষু শুভোজ্ঝিতেষু বিকুজে ছিদ্রে বিপাপে সুখে। সদ্যুক্তেষু ত্রিকোণকণ্টকবিধুষায়ত্রিষষ্ঠান্বিতে পাপে যুগ্মনিশাস্বগণ্ডসময়ে পুংশুদ্ধিতঃ সঙ্গমঃ॥ মূলমঘাশ্বিনীনামাদ্যং জ্যেষ্ঠান্ত্যসর্পাণামন্ত্যং। চতুর্থাংশং গণ্ডপদং ত্যক্ত্বা ষোড়শাহে ঋতৌ ব্রজেৎ॥ অশক্তৌ তু ভুজবলভীমে। অন্ত্যং পৌষ্ণেন্দ্রসর্পাণাং আদ্যং পিত্রশ্বিমূলগং। গণ্ডং দণ্ডত্রয়ং খ্যাতং সর্ব্বকার্য্যেষু কল্পিতং॥ পুমান্ বিংশতিবর্ষশ্চেৎ পূর্ণষোড়শবর্ষয়া। স্ত্রিয়া সঙ্গচ্ছতে গর্ভাশয়ে

শুদ্ধে রজস্যপি ॥ অপত্যং জায়তে ভদ্রং তয়োর্ন্যূনেঽধমং স্মৃতং । মাসেশৈঃ সিতকুজগুরুরবিশনিসৌম্যলগ্নপশশীনৈঃ । কলুষৈঃ পীড়া গর্ভস্য পীড়িতৈঃ পতনমন্যথা পুষ্টিঃ ॥ কালুষ্যং মাসেশেন পাপগ্রহযোগশক্রগৃহস্থিতিনীচগৃহযোগোপগ্রহযোগাদি । মাসেশজন্মনক্ষত্রে পাপগ্রহযোগঃ পীড়া যেষাং জন্মর্ক্ষাণি । ১৬ । ৩ । ২০।২২।১১।৮। ২৭ । ২।৯। মাসেশশান্ত্যাদৌ কৃতে ন গর্ভপীড়া । অথ প্রশ্নাৎ পুত্ত্রাদিজ্ঞানং । বিবাহলগ্নং বিষমর্ক্ষসংস্থঃ সৌরোঽপি পুংজন্মকরো বিলগ্নাৎ । স্ত্র্যাদিগ্রহাণামবলোক্য বীর্য্যং বাচ্যঃ প্রসূতৌ পুরুষোঽঙ্গনা বা ॥ ইতি জ্যোতিস্তত্ত্বং ॥ * ॥ অপি চ । গোভিলঃ । যদা ঋতুমতী ভবতি উপরতশোণিতা তদা সম্ভবকালঃ । ঋতুঃ প্রজাজননযোগ্যকালঃ। তন্নিমিত্তেন নৈমিত্তিকং গমনং কার্য্যং অকুর্ব্বতঃ প্রত্যবায়ান্নিয়মঃ । ঋতুমতীস্তু যো ভার্য্যাং সন্নিধৌ নোপসর্পতি । অবাপ্নোতি স মন্দাত্মা ভ্রূণহত্যামৃতাবৃতৌ ॥ ইতি স্মৃতেঃ ॥ জ্যোতিষে । জ্যেষ্ঠা মূলা মঘাশ্লেষা রেবতী কৃত্তিকাশ্বিনী । উত্তরাত্রিতয়ং ত্যক্ত্বা পর্ব্ববর্জ্জং ব্রজেদৃতৌ ॥ বিষ্ণুপুরাণং । চতুর্দ্দশ্যষ্টমী চৈব অমাবস্যাথ পূর্ণিমা । পর্ব্বাণ্যেতানি রাজেন্দ্র রবিসংক্রান্তিরেব চ ॥ যাজ্ঞবল্ক্যঃ । ষোড়শর্ত্তুনিশা স্ত্রীণাং তাসু যুগ্মাসু সংবিশেৎ । অত্র ষোড়শাহো রাত্র্যাত্মককালস্য সাবনত্বাৎ পুংসবননামকরণয়োরপি সাবনগণনায়া সংস্কারমাত্রে সাবনগণনয়া ব্যবহারঃ । তথা চ যাজ্ঞবল্ক্যঃ । গর্ভাধানমৃতৌ পুংসঃ সবনং স্পন্দনাৎ পুরা । ষষ্ঠেঽষ্টমে বা সীমন্তঃ প্রসবে জাতকর্ম্ম চ ॥ অহন্যেকাদশে নাম চতুর্থে মাসি নিষ্ক্রমঃ । ষষ্ঠেঽন্নপ্রাশনং মাসি চূড়া কার্য্যা যথাকুলং ॥ এবমেনঃ শমং যাতি বীজগর্ভসমুদ্ভবং । চতুর্থে স্পন্দতে ততঃ ইতি বচনাৎ স্পন্দনাৎ পূর্ব্বং তৃতীয়মাসঃ পুংসবনকালঃ । অত্র চতুর্থমাসস্য সৌরত্বে চান্দ্রত্বে বা নিষেকমাসস্যাপি তথাত্বে তদাদ্যন্তদিননিষেকে সতি অধিকন্যূনকালয়োর্গর্ভস্পন্দনমনিয়তমাপদ্যেত সাবনে তু নিয়তং । তেনাত্র সাবনগণনা যুক্তা যোষিদ্ব্যবহারসিদ্ধা চ । অহন্যেকাদশে নাম ইত্যত্রাপি অশৌচব্যপগমে নামধেয়মিতি বিষ্ণুসূত্রাৎ সূতকোত্তরদিনপরমেকাদশপদং । সূতকাদিপরিচ্ছেদো দিনমাসাব্দপাস্তথা । মধ্যমগ্রহভুক্তিশ্চ সাবনেন প্রকীর্ত্তিতাঃ ॥ ইতি সূর্য্যসিদ্ধান্তবচনেন সূতকস্য সাবনদিনঘটিতত্বাৎ তদুত্তরদিনস্যাপি তথাত্বং । অতো দিনমাসবর্ষগণনা সাবনেনেতি । শুভাশুভবিবেচনন্তু সৌরেণ জ্যোতিঃশাস্ত্রাৎ । অতএব পিতামহঃ । বিবাহাদৌ স্মৃতঃ সৌরো যজ্ঞাদৌ সাবনো মতঃ । অত্র দ্বিতীয়াদিশব্দাৎ সংস্কারপরিগ্রহঃ । গর্ভাধানে সদা গ্রাহ্যা বারা ভৌমরবীজ্যকাঃ । গোভিলঃ । দক্ষিণেন পাণিনা উপস্থমভিস্পৃশেৎ বিষ্ণুর্যোনিং কল্পয়ত্বেতয়র্চা । গর্ভং ধেহি সিনী চ

সমাপ্যর্চ্চৌ সম্ভবতঃ॥ কুৎসিতদেশস্য সব্যেন পাণিনা শৌচদর্শনাৎ তন্নিবারণায় দক্ষিণেনেতি। উপস্থং যোনিং স্পৃশেৎ বিষ্ণুরিতিমন্ত্রেণ প্রথমং ততো গর্ভং ধেহি সিনীবালীত্যাদিমন্ত্রেণ চ। মন্ত্রান্তে কর্ম্মাদিসন্নিপাত ইতি ন্যায়াৎ পাঠানন্তরং স্পর্শঃ। ন তু ভবদেবভট্টোক্তং স্পৃশন্ জপতীতি। ঋচৌ সমাপ্যৈব সংযোগং কুরুতঃ ন মধ্যে বামদেব্যজপঃ। দেবলঃ। সকৃচ্চ সংস্কৃতা নারী সর্ব্বগর্ভেষু সংস্কৃতা। তেন গর্ভাধানপুংসবনসীমন্তোন্নয়নানি সকৃদেব কর্ত্তব্যানি। ছন্দোগপরিশিষ্টং। বিবাহাদিঃ কর্ম্মগণো য উক্তো গর্ভাধানং শুশ্রুম যস্য চান্তে। বিবাহাদাবেকমেবাত্র কুর্য্যাৎ শ্রাদ্ধং নাদৌ কর্ম্মণঃ কর্ম্মণঃ স্যাৎ॥ বিবাহাদিগর্ভাধানান্তকর্ম্মসু একমেব শ্রাদ্ধং ন তু প্রতিকর্ম্মাদৌ একেনৈব শ্রাদ্ধেন কৃতেন সর্ব্বাণি শ্রাদ্ধবন্তীতি। অন্তশব্দোঽত্রাবয়বার্থঃ দশান্তঃ পট ইতিবৎ। সমীপার্থত্বে উপলক্ষণং স্যাৎ। ততশ্চ বিশেষণোপলক্ষণসন্দেহে বিশেষণত্বেন গ্রহণং কার্য্যান্বিতত্বাৎ। যত্তু। নিষেককালে সোমে চ সীমন্তোন্নয়নে তথা। জ্ঞেয়ং পুংসবনে চৈব শ্রাদ্ধং কর্ম্মাঙ্গমেব চ॥ ইত্যনেন ভবিষ্যপুরাণেন শ্রাদ্ধং কর্ম্মাঙ্গত্বেন বিহিতং তচ্ছন্দোগেতরপরং অতএব ভবদেবভট্টেনাপি ন লিখিতং। অত্র শ্রাদ্ধোত্তরগমনেঽপি ন দোষঃ। উক্তভবিষ্যপুরাণাৎ। নিত্যে নান্দীমুখশ্রাদ্ধে কৃতে দারাদ্যবর্জ্জনং। ইতি বচনান্তরাচ্চ। ইতি সংস্কারতত্ত্বং॥

**গর্ভাশয়ঃ** (পুং) জরায়ুঃ। যেন বেষ্টিতো গর্ভঃ কুক্ষৌ তিষ্ঠতি সঃ। ইত্যমরঃ॥ গর্ভশয্যা। ইতি ভাবপ্রকাশঃ॥

**গর্ভাষ্টমঃ** (পুং) গর্ভজননমাসাদষ্টমমাসঃ। তৎপর্য্যায়ঃ। দেবমাসঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥

**গর্ভিণী** (স্ত্রী) গর্ভবতী। পোয়াতি ইতি ভাষা। ইত্যমরঃ॥ ক্ষীরাবীবৃক্ষঃ। ক্ষীরাই ইতি ভাষা। ইতি শব্দচন্দ্রিকা॥

**গর্ভিণ্যবেক্ষণং** (ক্লী) কুমারভৃত্যা। গর্ভিণীপরিচর্য্যা। ইতি ত্রিকাণ্ডশেষঃ॥

**গর্ভোপঘাতিনী** (স্ত্রী) অনৃতৌ বৃষোপগমনাদিবশাৎ যস্যা গর্ভপাতো ভবতি সা গৌঃ। গাবড়াফেলা গাই ইতি ভাষা। তৎপর্য্যায়ঃ। বেহৎ ২। ইত্যমরঃ॥

**গর্ম্মুৎ** (স্ত্রী) তৃণধান্যবিশেষঃ। ময়না ইতি খ্যাতঃ। গড় গড় ইতি কেচিৎ। ইত্যমরো ভরতশ্চ॥ স্বর্ণং। নড়ঃ। ইতি মেদিনী॥

**গর্ম্মূটিকা** (স্ত্রী) ব্রীহিভেদঃ। মাড়ুয়া ইতি ভাষা। তৎপর্য্যায়ঃ। গর্ম্মূচ্ছদঃ ২। ইতি রত্নমালা॥

**গর্ম্মোটিকা** (স্ত্রী) জরড়ীতৃণং। ইতি রাজনির্ঘণ্টঃ॥

**গর্ব্ব** মদে। ইতি কবিকল্পদ্রুমঃ॥ মদ ইহ অহঙ্কারঃ। নীচো গর্ব্বতি সম্পদা। ইতি দুর্গাদাসঃ॥

**গর্ব্বঃ** (পুং) অহঙ্কারঃ। ইত্যমরঃ॥ অহঙ্কারস্তথাধ্যাত্মং সর্ব্বসংসারকারণং।

অভিমানোঽধিভূতঞ্চ রুদ্রস্তত্রাধিদৈবতং ॥ ইতি মহাভারতে আশ্বমেধিকপর্ব্ব ॥

গর্ব্বাটঃ (পুং) দ্বাঃস্থিতঃ। দ্বারপালঃ। ইতি ত্রিকাণ্ডশেষ

গর্ব্বিতঃ (ত্রি) গর্ব্বযুক্তঃ। অহঙ্কৃতঃ। ইতি জটাধরঃ ॥

গর্হ ঙ কুৎসনে। ইতি কবিকল্পদ্রুমঃ। রেফোপধঃ। ঙ গর্হতে। কুৎসনং নিন্দা। ইতি দুর্গাদাসঃ ॥

গর্হ কি কুৎসনে। ইতি কবিকল্পদ্রুমঃ ॥ কি গর্হয়তি গর্হতি। ইতি দুর্গাদাসঃ ॥

গর্হণং (ক্লী) নিন্দা। ইত্যমরঃ ॥

গর্হা (স্ত্রী) নিন্দা। ইতি শব্দরত্নাবলী ॥

গর্হিতং (ত্রি) নিন্দিতং। যথা। অতিদর্পে হতা লঙ্কা অতিমানে চ কৌরবাঃ। অতিদানে বলির্ব্বদ্ধঃ সর্ব্বমত্যন্তগর্হিতং ॥ ইতি চাণক্যং ॥

গর্হ্যঃ (ত্রি) অধমঃ। নিন্দ্যঃ। ইত্যমরঃ ॥

গর্হ্যবাদী [ন্] (ত্রি) কদ্বদঃ। ইত্যমরঃ

গল ভক্ষে। স্রাবে। ইতি কবিকল্পদ্রুমঃ ॥ গলতি। ইতি দুর্গাদাসঃ ॥

গল ক ঙ স্রাবে। ইতি কবিকল্পদ্রুমঃ ॥ স্রাবঃ ক্ষরণং। ক ঙ গালয়তে রক্তং ক্ষতস্য। স্বয়ং হারাকারা গলতি জলধারা কুবলয়াৎ। ইতি দুর্গাদাসঃ ॥

গলঃ (পুং) কণ্ঠঃ। গলা ইতি ভাষা। ইত্যমরঃ ॥ সর্জ্জরসঃ। ধুনা ইতি ভাষা। ইতি মেদিনী ॥ বাদ্যভেদঃ। গড়কমৎস্যঃ। ইতি শব্দরত্নাবলী ॥

গলকঃ (পুং) গড়কমৎস্যঃ ॥ ইতি শব্দরত্নাবলী ॥

গলকম্বলঃ (পুং) গবাং গলস্থিতকম্বলাকৃতিমাংসং। তৎপর্য্যায়ঃ। সাস্না ২। ইত্যমরঃ ॥

গলগণ্ডঃ (পুং) গলরোগবিশেষঃ। গরগণ্ড ইতি ভাষা। অথ গলগণ্ডাধিকারঃ। তত্র গলগণ্ডস্য সামান্যং লিঙ্গমাহ। নিবদ্ধঃ শ্বযথুর্যস্য মুষ্কবল্লম্বতে গলে। মহান্ বা যদি বা হ্রস্বো গলগণ্ডং তমাদিশেৎ ॥ নিবদ্ধো দৃঢ়ঃ অচলো বা। মুষ্কবৎ অণ্ডবৎ। গল ইতি হনুমন্যয়োরুপলক্ষণং। তথা চ ভোজঃ। মহান্তং শোথমল্পং বা হনুমন্যা গলাশ্রয়ং। মুষ্কবল্লম্বমানং তু গলগণ্ডং বিনির্দ্দিশেৎ ॥ * ॥ সংপ্রাপ্তিমাহ। বাতঃ কফশ্চাপি গলে প্রবৃদ্ধৌ মধ্যে তু সংস্থৃত্য তথৈব মেদঃ। কুর্ব্বন্তি গণ্ডং ক্রমশঃ স্বলিঙ্গৈঃ সমন্বিতং তং গলগণ্ডমাহুঃ ॥ ক্রমশঃ শনৈঃ শনৈঃ। স্বলিঙ্গৈঃ বাতকফমেদোলক্ষণৈঃ ॥ * ॥ বাতিকমাহ। তোদান্বিতঃ কৃষ্ণশিরাবনদ্ধঃ শ্যাবারুণো বা পবনাত্মকস্তু। পারুষ্যযুক্তশ্চিরবৃদ্ধ্যপাকো যদৃচ্ছয়া পাকমিয়াৎ কদাচিৎ ॥ বৈরস্যমাস্যস্য চ তস্য জন্তোর্ভবেত্তথা তালুগলপ্রশোষঃ। চিরবৃদ্ধ্যপাকঃ চিরেণ বৃদ্ধিরপাকশ্চ যস্য সঃ ॥ * ॥ শ্লৈষ্মিকমাহ। স্থিরঃ সবর্ণো গুরুরুগ্রকণ্ডুঃ শীতো মহাংশ্চাপি কফাত্মকস্তু। চিরাচ্চ বৃদ্ধিং ভজতেঽচিরাদ্বা প্রপচ্যতে মন্দরুজঃ কদাচিৎ ॥ মাধুর্য্যমাস্যস্য চ তস্য

জন্তোর্ভবেত্তথা তালুগলপ্রলেপঃ। কদাচিৎ প্রপচ্যতে বা পাকোঽপি চিরাত্তবতি ॥ প্রলেপঃ শ্লেষ্মণা ॥ * ॥ মেদোজমাহ। স্নিগ্ধো মৃদুঃ পাণ্ডুরনিষ্টগন্ধো মেদোঽন্বিতঃ কণ্ডুযুতো রুজশ্চ। প্রলম্বতেঽলাবুবদল্পমূলো দেহানুরূপক্ষয়বৃদ্ধিযুক্তঃ ॥ স্নিগ্ধাস্যতা তস্য ভবেচ্চ জন্তোর্গলেন শব্দং কুরুতে চ নিত্যং। দেহক্ষয়ে কার্শ্যে ক্ষয়ং দেহবৃদ্ধৌ বৃদ্ধিং যাতীত্যর্থঃ ॥ * ॥ অসাধ্যমাহ। কৃচ্ছ্রাচ্ছ্বসন্তং মৃদুসর্ব্বগাত্রং সম্বৎসরাতীতমরোচকার্ত্তং। ক্ষীণঞ্চ বৈদ্যো গলগণ্ডযুক্তং ভিন্নস্বরং নৈব নরং চিকিৎসেৎ ॥ * ॥ অথ গলগণ্ডচিকিৎসা। সর্ষপান্ শিগ্রুবীজানি শণবীজাতসীযবান্। মূলকস্য চ বীজানি তক্রেণাম্লেন পেষয়েৎ ॥ গলগণ্ডো গণ্ডমালা গ্রন্থয়শ্চৈব দারুণাঃ। প্রলেপাদস্য নশ্যন্তি বিলয়ং যান্তি সত্বরং ॥ ১ ॥ রক্ষোঘ্নতৈলযুক্তেন জলকুম্ভীকভস্মনা। লেপনং গলগণ্ডস্য চিরোত্থস্যাপি নাশনং ॥ রক্ষোঘ্নঃ সর্ষপঃ॥২॥ শ্বেতাপরাজিতামূলং প্রাতঃ পিষ্ট্বা পিবেন্নরঃ। সর্পিষা নিয়তাহারো গলগণ্ডপ্রশান্তয়ে ॥ ৩ ॥ তিক্তালাবুফলে পক্বে সপ্তাহমুষিতং জলং। সদ্যঃ স্যাদ্গলগণ্ডঘ্নং পানাৎ পথ্যানুসেবিনাং ॥ ৪ ॥ তৈলং পিবেচ্চামৃতবল্লিবিম্বাহিংস্রাহ্বয়াবৃক্ষকপিপ্পলীভিঃ। সিদ্ধং বলাভ্যাং সহ দেবদারু হিতায় নিত্যং গলগণ্ডরোগী ॥ বৃক্ষকোঽত্র তুণিঃ। উক্তঞ্চ নিঘণ্টৌ ধন্বন্তরিণা। তুণিস্তুণী কপীতন্ত নন্দিবৃক্ষোঽথ বৃক্ষকঃ। বলাভ্যাং বলাতিবলাভ্যাং। অমৃতাদিতৈলং ॥ ৫ ॥ যবমুদ্গপটোলাদিকটুরূক্ষান্নভোজনং। বমনং রক্তমোক্ষঞ্চ গলগণ্ডে প্রযোজয়েৎ ॥ ৬ ॥ দাপয়েদ্গলগণ্ডে তু প্রচ্ছন্নানি বহূনি চ। গণ্ডগোপালিকাং পিষ্ট্বা তত্র লেপং প্রকল্পয়েৎ ॥ অবশ্যং নশ্যতি ক্ষিপ্রং গলগণ্ডো গদোঽমুনা। প্রলেপস্ত্বনুভূতোঽয়ং বহুধা বহুভির্জ্জনৈঃ ॥ প্রচ্ছন্নানি পছনা ইতি লোকে। গণ্ডগোপালিকা গণ্ডগুয়া ইতি লোকে প্রসিদ্ধা আম্রবাটিকায়াং সুলভা কীটবিশেষো ভবতি ॥ ৭ ॥ লবণং জলকুম্ভ্যাস্ত কণাচূর্ণেন সংযুতং। প্রভাতে নিত্যমশ্নীয়াৎ গলগণ্ডপ্রশান্তয়ে ॥ ৮ ॥ ইতি ভাবপ্রকাশঃ ॥

গলগ্রহঃ (পুং) ব্যঞ্জনবিশেষঃ। তৎপর্য্যায়ঃ। মৎস্যঘণ্টঃ ২। ইতি শব্দচন্দ্রিকা ॥ তিথিবিশেষঃ। যথা। কৃষ্ণপক্ষে চতুর্থী চ সপ্তম্যাদিদিনত্রয়ং। ত্রয়োদশী চতুষ্কঞ্চ অষ্টাবেতে গলগ্রহাঃ ॥ ইতি মদনরত্নে নারদঃ ॥ অপি চ। আরম্ভানন্তরং যত্র প্রত্যারম্ভো ন বিদ্যতে। গর্গাদিমুনয়ঃ সর্ব্বে তমেবাহুর্গলগ্রহং ॥ ইতি রাজমার্ত্তণ্ডঃ ॥

গলন্তিকা (স্ত্রী) কর্করী। স্বল্পবারিধানিকা। ইত্যমরঃ ॥

গলমেখলা (স্ত্রী) গলসূত্রং। কণ্ঠাভরণবিশেষঃ। তৎপর্য্যায়ঃ। সূত্রালী ২। ইতি হারাবলী ॥

গলব্রতঃ (পুং) ময়ূরঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

গলশুণ্ডিকা ( স্ত্রী ) তালুর্দ্ধসূক্ষ্মজিহ্বা। আল্‌-জিব্‌ ইতি ভাষা। তৎপর্য্যায়ঃ। সুধাস্রবা ২ ঘণ্টিকা ৩ লম্বিকা ৪। ইতি হেমচন্দ্রঃ॥ রসাঙ্কা ৫ প্রতিজিহ্বিকা ৬ মাধ্বী ৭ অলিজিহ্বিকা ৮। ইতি শব্দরত্নাবলী॥

গলস্তনী ( স্ত্রী ) ছাগী। ইতি হেমচন্দ্রঃ॥

গলা ( স্ত্রী ) অলম্বুষা। ইতি ভাবপ্রকাশঃ॥

গলাঙ্কুরঃ ( পুং ) গলরোগবিশেষঃ। তৎপর্য্যায়ঃ। রোহিণী ২। ইতি হেমচন্দ্রঃ॥ তস্য সম্প্রাপ্তিপূর্ব্বকলক্ষণং। যথা। গলেঽনিলঃ পিত্তকফৌ চ মূর্চ্ছিতৌ প্রদূষ্য মাংসঞ্চ তথৈব শোণিতং। গলোপসংরোধকরৈস্তথাঙ্কুরৈর্নিহন্ত্যসূন্‌ ব্যাধিরয়ঞ্চ রোহিণী॥ ইতি মাধবকরঃ॥

গলানিলঃ ( পুং ) মৎস্যবিশেষঃ। তৎপর্য্যায়ঃ। গঙ্গাটেয়ঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥ গলানিকঃ গলাবিল ইতি চ কচিৎ পাঠঃ॥

গলিঃ ( পুং ) শক্তোঽপ্যধূর্ব্বহো বৃষঃ। গড়িয়া গরু ইতি ভাষা। তৎপর্য্যায়ঃ। দুষ্টবৃষঃ ২। ইতি হেমচন্দ্রঃ॥

গলিতঃ (ত্রি) পতিতঃ। তৎপর্য্যায়ঃ। স্রস্তঃ ২ ধ্বস্তঃ ৩ ভ্রষ্টঃ ৪ স্কন্নঃ ৫ পন্নঃ ৬ চ্যুতঃ ৭।

গলেগণ্ডঃ ( পুং ) পক্ষিবিশেষঃ। তৎপর্য্যায়ঃ। মর্কটঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥

গলেস্তনী ( স্ত্রী ) ছাগী। ইতি রাজনির্ঘণ্টঃ॥

গলুঃ ( পুং ) মণিবিশেষঃ। ইতি মহাভারতং॥

গল্‌ভ ঙ ধৃষ্টত্বে। ইতি কবিকল্পদ্রুমঃ॥ অস্তঃস্থতৃতীয়োপধঃ। ঙ গল্‌ভতে লোকঃ প্রগল্‌ভঃ স্যাদিত্যর্থঃ। ইতি দুর্গাদাসঃ॥

গল্যা ( স্ত্রী ) গলসমূহঃ। কণ্ঠানাং সমূহঃ। ইত্যমরঃ॥

গল্লঃ ( পুং ) গণ্ডঃ। গাল ইতি ভাষা। ইতি হেমচন্দ্রঃ॥

গল্লচাতুরী ( স্ত্রী ) উপধানবিশেষঃ। গালবালিশ ইতি ভাষা। ইতি জটাধরঃ॥

গল্বর্কঃ ( পুং ) চষকঃ। মদ্যপানপাত্রং। ইতি হেমচন্দ্রঃ॥ ইন্দ্রনীলমণিঃ। ইতি ত্রিকাণ্ডশেষঃ॥

গল্‌হ ঙ কুৎসনে। ইতি কবিকল্পদ্রুমঃ॥ অস্তঃস্থতৃতীয়োপধঃ। ঙ গল্‌হতে। ইতি দুর্গাদাসঃ॥

গবয়ঃ ( পুং ) গলকম্বলশূন্যগোসদৃশপশুঃ। তৎপর্য্যায়ঃ। গবালূকঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥ বনগৌঃ ৩ বলভদ্রঃ ৪ মহাগন্ধঃ ৫। তন্মাংসগুণৌ। পরুষত্বং। বৃংহণত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ বানরবিশেষঃ। স তু বৈবস্বতপুত্রঃ। যথা। পুত্রা বৈবস্বতস্যাত্র পঞ্চ কালান্তকোপমাঃ। গয়ো গবাক্ষো গবয়ঃ শরভো গন্ধমাদনঃ॥ ইতি রামায়ণং॥

গবয়ী ( স্ত্রী ) গবয়স্ত্রী। তৎপর্য্যায়ঃ। বনধেনুঃ ২ ভিল্লগবী ৩। ইতি রাজনির্ঘণ্টঃ॥

গবরাজঃ ( পুং ) বৃষঃ। ইতি শব্দচন্দ্রিকা॥

গবলং ( ক্লী ) মহিষশৃঙ্গং। ইত্যমরঃ॥

গবলঃ ( পুং ) বনমহিষঃ। ইতি হেমচন্দ্রঃ॥

গবাচী ( স্ত্রী ) মৎস্যবিশেষঃ। পাঁকাল মাছ্‌ ইতি ভাষা। অস্য গুণাঃ। অজীর্ণকারিত্বং।

গুরুত্বং। শ্লেষ্মপ্রকোপণত্বঞ্চ। ইতি রাজবল্লভঃ ॥

গবাদনং (ক্লী) ঘাসঃ। ইতি শব্দচন্দ্রিকা ॥

গবাদনী (স্ত্রী) ইন্দ্রবারুণী। গবাং ঘাসভক্ষণাধারঃ। গরুর ঘাস খাইবার গড়া ইতি ভাষা। ইতি মেদিনী ॥ নীলাপরাজিতা। ইতি রাজনির্ঘণ্টঃ ॥

গবালুকঃ (পুং) গবয়ঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

গবাশনঃ (পুং) গোভক্ষকঃ। মুচি ইতি ভাষা। যথা মাতাপ্যেকা পিতাপ্যেকো মম তস্য চ পক্ষিণঃ। অহং মুনিভিরানীতঃ স চানীতো গবাশনৈঃ ॥ ইত্যুদ্ভটঃ ॥

গবাষিকা (স্ত্রী) লাক্ষা। ইতি রত্নমালা ॥ গরাধিকাপি পাঠঃ ॥

গবাক্ষঃ (পুং) গবামক্ষীব যঃ। জানালার জালী ইতি ভাষা। তৎপর্য্যায়ঃ। বাতায়নং২। ইত্যমরঃ॥ বধূদৃগয়নং ৩ জালং৪ জালকং ৫। ইতি কোষান্তরং। ইতি ভরতঃ ॥ বানরবিশেষঃ। ইতি মেদিনী ॥ স তু বৈবস্বতপুত্রঃ। যথা। পুত্রা বৈবস্বতস্যাত্র পঞ্চ কালান্তকোপমাঃ। গয়ো গবাক্ষো গবয়ঃ শরভো গন্ধমাদনঃ ॥ ইতি রামায়ণং

গবাক্ষী (স্ত্রী) গোড়ুম্বা। গোমুক্ ইতি ভাষা। ইত্যমরঃ ॥ ইন্দ্রবারুণী। রাখাল শসা ইতি ভাষা। শাখোটঃ। শেওড়া ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ ॥ অপরাজিতা। ইতি রত্নমালা ॥

গবীশ্বরঃ (পুং) গবাং স্বামী। তৎপর্য্যায়ঃ। গোমান্ ২ গোমী ৩। ইত্যমরঃ ॥ গবেশ্বরোঽপি ॥

গবেড়ুঃ (স্ত্রী) ধান্যবিশেষঃ। গড়্গড়ু ইতি ভাষা। ইত্যমরঃ ॥

গবেধুঃ (পুং) গবেড়ুঃ। ইতি ভরতঃ ॥

গবেধুকং (ক্লী) গৈরিকং। ইতি রাজনির্ঘণ্টঃ ॥

গবেধুকা (স্ত্রী) তৃণধান্যবিশেষঃ। গড়্গড়্ দেধান ইতি চ ভাষা। তৎপর্য্যায়ঃ। গবেড়ুঃ ২। ইত্যমরঃ ॥ গবেধুঃ ৩ গবেড়ুকা ৪। ইতি তট্টীকা॥ ক্ষুদ্রা ৫ গোজিহ্বা৬ গুন্দ্রা ৭ গুণ্ঠঃ ৮। ইতি রত্নমালা ॥ নাগবলা। ইতি রাজনির্ঘণ্টঃ ॥

গবেরুকং (ক্লী) গৈরিকং। ইতি ত্রিকাণ্ডশেষঃ ॥

গবেশকা (স্ত্রী) বৃক্ষবিশেষঃ। গোরক্ষ চাউলিয়া ইতি ভাষা। ইতি শব্দচন্দ্রিকা ॥

গবেষ ৎ ক মার্গণে। ইতি কবিকল্পদ্রুমঃ ॥ মূর্দ্ধন্যোপধঃ। অজগবেষৎ গুণং গুণী। ইতি দুর্গাদাসঃ ॥

গবেষণা (স্ত্রী ক্লী) অন্বেষণা। ইত্যমরঃ ॥

গবেষিতং (ত্রি) অন্বেষিতং। ইত্যমরঃ ॥

গবোদ্বহঃ (পুং) উত্তমগবঃ। গোষূদ্বহঃ প্রশস্তঃ ইতি ব্যুৎপত্তিঃ ॥

গব্যং (ত্রি) গবাং সর্ব্বং। গোসম্বন্ধি। তত্তু দুগ্ধগোময়াদি। ইত্যমরঃ ॥ গোহিতং। ইতি মেদিনী ॥

গব্যং (ক্লী) জ্যা। রাগদ্রব্যং। ইতি মেদিনী ॥

গব্যা (স্ত্রী) গোসমূহঃ। তৎপর্য্যায়ঃ। গোত্রা ২। ইত্যমরঃ ॥ গব্যূতিঃ। জ্যা।

ইতি হেমচন্দ্রঃ॥ গোরোচনা। ইতি রাজনির্ঘণ্টঃ॥

গব্যূতং (ক্লী) ক্রোশঃ। গব্যূতিঃ। ইতি হেমচন্দ্রঃ॥

গব্যূতিঃ (স্ত্রী পুং) দ্বিসহস্রধনুঃ। ইতি শব্দার্ণবঃ॥ ক্রোশদ্বয়ং। তৎপর্য্যায়ঃ। ক্রোশযুগং ২। ইত্যমরঃ॥ গব্যূতং ৩ গোরুতং ৪ গোতমং ৫। ইতি ভরতধৃতবাচস্পতিঃ॥ গব্যা ৬ গব্যূতী ৭। ইতি হেমচন্দ্রঃ॥

গব্যূতী (স্ত্রী) গব্যূতিঃ। ইতি হেমচন্দ্রঃ॥

গহ ৎ ক গহনে। ইতি কবিকল্পদ্রুমঃ॥ গহনং দুর্ব্বোধঃ। গহয়তি শাস্ত্রং জড়ধীঃ। দুঃখেন জানাতীত্যর্থঃ। ইতি দুর্গাদাসঃ॥

গহনং (ক্লী) বনং। ইত্যমরঃ॥ গহ্বরং। দুঃখং। ইতি মেদিনী॥

গহনঃ (ত্রি) দুর্গমঃ। দুষ্প্রবেশঃ। তৎপর্য্যায়ঃ। কলিলঃ ২। ইত্যমরঃ॥

গহনা (স্ত্রী) অলঙ্কারঃ। ইতি দেবীপুরাণং॥

গহ্বরং (ক্লী) গুহা। দম্ভঃ। ইত্যমরঃ॥ বনং। ইতি মেদিনী॥ রোদনং। ইতি হেমচন্দ্রঃ॥

গহ্বরঃ (পুং) নিকুঞ্জঃ। ইতি মেদিনী॥

গহ্বরী (স্ত্রী) গুহা। ইতি শব্দরত্নাবলী॥

গা ঙ গতৌ। ইতি কবিকল্পদ্রুমঃ॥ ঙ গাতে। ইতি দুর্গাদাসঃ॥

গা র লি স্তুতৌ। জন্মনি। ইতি কবিকল্পদ্রুমঃ॥ র বৈদিকঃ। লি জগাতি। ইতি দুর্গাদাসঃ॥

গা (স্ত্রী) গাথা। ইতি পুরুষোত্তমঃ॥

গাঙ্গং (ত্রি) গঙ্গাসম্ভূতং। ইতি মেদিনী॥

গাঙ্গঃ (পুং) ভীষ্মঃ। কার্ত্তিকেয়ঃ। ইতি মেদিনী॥

গাঙ্গটঃ (পুং) মৎস্যভেদঃ। চিঙ্গিড়ি মাছ ইতি ভাষা। ইতি শব্দরত্নাবলী॥

গাঙ্গটকঃ (পুং) গাঙ্গটমৎস্যঃ। ইতি শব্দরত্নাবলী॥

গাঙ্গটেয়ঃ (পুং) গাঙ্গটমৎস্যঃ। ইতি শব্দরত্নাবলী॥

গাঙ্গায়নিঃ (পুং) ভীষ্মঃ। ইতি ত্রিকাণ্ডশেষঃ॥ কার্ত্তিকেয়শ্চ॥

গাঙ্গেয়ং (ক্লী) স্বর্ণং। ধুস্তূরঃ। কশেরু। ইত্যমরঃ॥ মুস্তং। ইতি হেমচন্দ্রঃ॥

গাঙ্গেয়ঃ (পুং) ভীষ্মঃ। কার্ত্তিকেয়ঃ। ইতি হেমচন্দ্রঃ॥ ইল্লীশমৎস্যঃ। ইতি ত্রিকাণ্ডশেষঃ॥ ভদ্রমুস্তা। ইতি রাজনির্ঘণ্টঃ॥

গাঙ্গেরুকী (স্ত্রী) গোরক্ষতণ্ডুলা। ইত্যমরঃ॥

গাঙ্গেষ্ঠী (স্ত্রী) কটশর্করালতা। নটা ইতি ভাষা। ইতি হারাবলী॥

গাঞ্জিকায়ঃ (পুং) বর্ত্তিকপক্ষী। ইতি রাজনির্ঘণ্টঃ॥

গাঢ়ং (ক্লী) অতিশয়ঃ। দৃঢ়ং। তদ্যুক্তে ত্রি। ইত্যমরঃ॥

গাঢ়মুষ্টিঃ (পুং) খড়্গঃ। কৃপণে ত্রি। ইতি মেদিনী॥

গাঢ়াবটী (স্ত্রী) চতুরঙ্গক্রীড়ামধ্যে ক্রীড়াবিশেষঃ। যথা। নৌকৈকা বটিকা যস্য বিদ্যতে খেলনে যদি। গাঢ়াবটীতি বিখ্যাতা পদং তস্য ন দুষ্যতি॥ ইতি তিথ্যাদিতত্ত্বং॥

গাণপত্যঃ (ত্রি) গণেশোপাসকঃ। ইত্যাগমঃ॥ গণপতিসম্বন্ধী। গণপতিভাবে ক্লী॥

গাণিক্যং (ক্লী) গণিকাসমূহঃ। বহুবেশ্যাঃ। ইত্যমরঃ॥

গাণ্ডিবঃ (পুং ক্লী) অর্জুনধনুঃ। ধনুর্মাত্রং। ইতি মেদিনী॥

গাণ্ডীবঃ (পুং ক্লী) অর্জুনধনুঃ। ইত্যমরঃ॥ কার্ম্মুকং। ইতি মেদিনী॥

গাণ্ডীবী [ন্] (পুং) অর্জুনঃ। ইতি ত্রিকাণ্ড-শেষঃ॥ অর্জুনবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

গাতা [ঋ] (ত্রি) গায়কঃ। ইতি সংগীত-দামোদরঃ॥

গাতুঃ (পুং) কোকিলঃ। ভ্রমরঃ। গন্ধর্ব্বঃ। ইতি মেদিনী॥

গাতুঃ (ত্রি) রোষণঃ। ইতি মেদিনী॥ গায়নঃ। ইতি সিদ্ধান্তকৌমুদ্যামুণাদি-বৃত্তিঃ॥

গাত্র ৎ ক ঙ শৈথিল্যে। ইতি কবিকল্প-দ্রুমঃ॥ দন্ত্যবর্গাদ্যমধ্যঃ। ঙ গাত্রয়তে গাত্রাপয়তে। ইতি দুর্গাদাসঃ॥

গাত্রং (ক্লী) অঙ্গং। ইতি মেদিনী॥ হস্তি-পূর্ব্বজঙ্ঘাদিদেশঃ। হস্ত্যগ্রপাদাদিসম্মুখ-ভাগঃ। হস্তপাদাদ্যবয়বসমুদয়ঃ। গা ইতি ভাষা। তৎপর্য্যায়ঃ। কলেবরং ২ বপুঃ ৩ সংহননং ৪ শরীরং ৫ বর্ষ্ম ৬ বিগ্রহঃ ৭ কায়ঃ ৮ দেহঃ ৯ মূর্ত্তিঃ ১০ তনুঃ ১১ তনূঃ ১২। ইত্যমরঃ॥ ইন্দ্রিয়ায়তনং ১৩ অঙ্গং ১৪ ক্ষেত্রং ১৫ ভুবণঃ ১৬ মৎ-করণং ১৭ বেরং ১৮ সঞ্চরঃ ১৯ ঘণঃ ২০ বন্ধঃ ২১ পুরং ২২ পিণ্ডঃ ২৩ পুদ্গলং ২৪। ইতি হেমচন্দ্রঃ॥ ভূতাত্মা ২৫ স্বর্গ-লোকেশঃ ২৬ স্কন্ধঃ ২৭ পঞ্জরঃ ২৮ কুলং ২৯ বলং ৩০। ইতি জটাধরঃ॥

গাত্রভঙ্গা (স্ত্রী) শূকশিম্বী। ইতি শব্দ-চন্দ্রিকা॥

গাত্রমার্জনী (স্ত্রী) শরীরমার্জনার্থং বস্ত্রং। গামোছা ইতি ভাষা। ইতি লোক-প্রসিদ্ধিঃ॥

গাত্রসঙ্কোচী [ন্] (পুং) জাহকজন্তুঃ। ইতি রাজনির্ঘণ্টঃ॥

গাত্রসংপ্লবঃ (পুং) প্লবপক্ষী। ইতি হেম-চন্দ্রঃ॥

গাত্রসম্মিতঃ (পুং) গাত্রাবয়বোৎপত্তিঃ। যথা। পাদ উৎপন্নমাত্রে তু দ্বৌ পাদৌ গাত্রসম্মিতে। পাদোনং ব্রতমাচষ্টে হত্বা গর্ভমচেতনং॥ অঙ্গপ্রত্যঙ্গসম্পন্নে গর্ভে চেতঃসমন্বিতে। দ্বিগুণং গোব্রতং কুর্য্যাৎ প্রায়শ্চিত্তং বিশুদ্ধয়ে॥ মধ্যম-বচনং ভবদেবেন ব্যাখ্যাতং। যদা লগুড়া-দ্যভিঘাতেন গৌর্জীবতি গর্ভমাত্রপাতো ভবতি তদোৎপন্নগর্ভমাত্রপাতে যথোক্ত-প্রায়শ্চিত্তপাদাচরণং। গাত্রাবয়বোৎ-পত্তৌ প্রায়শ্চিত্তপাদদ্বয়ং। সকলগাত্র-সম্পত্তৌ প্রায়শ্চিত্তপাদত্রয়ং। অর্থা-চ্চৈতন্যযুক্তগর্ভঘাতে কৃৎস্নমেব প্রায়-শ্চিত্তমূহনীয়ং। ইতি প্রায়শ্চিত্ততত্ত্বং॥

গাত্রানুলেপনী (স্ত্রী) গাত্রানুলেপনযোগ্যং মৃষ্টং পিষ্টং বা সুগন্ধিদ্রব্যং। তৎ-পর্য্যায়ঃ। বর্ত্তিঃ ২ বর্ণকং ৩ বিলেপনং ৪। ইত্যমরঃ॥

গাথকঃ (ত্রি) গায়কঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

গাথা (স্ত্রী) শ্লোকঃ। সংস্কৃতান্যভাষা। সা তু প্রাকৃতভাষা। গেয়ং। তচ্চ গীতং। বৃত্তং। তত্তু অক্ষরসংখ্যাতং পদ্যং। ইতি মেদিনী ॥

গাধ ঋ ঙ প্রতিষ্ঠায়াং। গ্রন্থে। লিপ্সে। ইতি কবিকল্পদ্রুমঃ ॥ ঋ অজগাধৎ। ঙ গাধিতাসে নভো ভূয় ইতি ভট্টিঃ। গাধতে মালিকঃ স্রজঃ। ইতি দুর্গাদাসঃ ॥

গাধঃ (পুং) স্থানং। লিপ্সা। ইতি হেমচন্দ্রঃ ॥

গাধিঃ (পুং) চন্দ্রবংশীয়কুশিকরাজপুত্রঃ। স তু কান্যকুব্জদেশস্য রাজা বিশ্বামিত্রমুনিপিতা চ। ইতি মহাভারতং

গাধিজঃ (পুং) বিশ্বামিত্রমুনিঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

গাধিপুরং (ক্লী) কান্যকুব্জদেশঃ। ইতি হেমচন্দ্রঃ

গাধিভূঃ (পুং) বিশ্বামিত্রমুনিঃ। ইতি শব্দরত্নাবলী ॥

গাধেয়ঃ (পুং) বিশ্বামিত্রমুনিঃ। ইতি হেমচন্দ্রঃ ॥

গানং (ক্লী) গীতং। ইত্যমরঃ ॥ তৎপর্য্যায়ঃ। গেয়ং ২ গীতিঃ ৩ গান্ধর্ব্বং ৪। ইতি হেমচন্দ্রঃ ॥ ধ্বনিঃ। ইতি ধরণী ॥

গানিনী (স্ত্রী) বচা। ইতি শব্দচন্দ্রিকা ॥

গান্তুঃ (ত্রি) গন্তা। ইত্যুণাদিকোষঃ ॥ গাথকঃ। ইতি সংক্ষিপ্তসারে উণাদিবৃত্তিঃ ॥

গাত্রী (স্ত্রী) গন্ত্রী। বৃষবাহ্যশকটঃ। গরুর গাড়ি ইতি ভাষা। ইত্যমরটীকায়াং রায়মুকুটঃ ॥

গান্দিনী (স্ত্রী) গঙ্গা। ইতি ত্রিকাণ্ডশেষঃ শব্দরত্নাবলী চ ॥ অক্রূরমাতা। ইতি শ্রীভাগবতং ॥

গান্দিনীসুতঃ (পুং) ভীষ্মঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ অক্রূরঃ। ইতি শ্রীভাগবতং ॥

গান্ধর্ব্বং (ক্লী) গানং। ইতি হেমচন্দ্রঃ ॥

গান্ধর্ব্বঃ (পুং) গন্ধর্ব্বঃ। ইতি হেমচন্দ্রঃ ॥ অষ্টপ্রকারবিবাহান্তর্গতবিবাহবিশেষঃ। যত্র কন্যাবরয়োরন্যোন্যানুরাগাৎ ত্বং মে ভার্য্যা ত্বং মে পতিরিতি নিশ্চয়ঃ সঃ। যথা। গান্ধর্ব্বঃ সময়ান্মিথঃ। ইতি মনুঃ ॥ তৎসম্বন্ধিনি ত্রি ॥

গান্ধারং (ক্লী) গন্ধরসঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

গান্ধারঃ (পুং) সিন্দূরং। জম্বুদ্বীপস্যোত্তরদেশঃ। কান্ধার ইতি ভাষা। ইতি মেদিনী ॥ সপ্তস্বরান্তর্গততৃতীয়স্বরঃ। স তু ছাগস্বরতুল্যঃ। তস্যোৎপত্ত্যাদিঃ। বায়ুঃ সমুদ্গতো নাভেঃ কণ্ঠশীর্ষসমাহতঃ। নানাগন্ধবহঃ পুণ্যো গান্ধারস্তেন হেতুনা ॥ ইতি ভরতঃ ॥ অপি চ। নাভেঃ সমুদ্গতো বায়ুর্গন্ধং শ্রোত্রে চ চালয়ন্। স শব্দস্তেন নির্ঘাতি গান্ধারস্তেন কথ্যতে ॥ চতস্রঃ পঞ্চমে ষড়্জে মধ্যমে শ্রুতয়ো মতাঃ। ঋষভে ধৈবতে তিস্রো দ্বে গান্ধারনিষাদকে ॥ রাগবিশেষঃ। তস্য রূপং যথা। জটাং দধানঃ কৃতভূতিভূষণঃ কাষায়বাসাস্তনুদেহযষ্টিঃ। সযোগপট্টঃ কৃতনেত্রমুদ্রো গান্ধাররাগঃ কথিতস্তপস্বী ॥ স তু

ভৈরবরাগপুত্রঃ। প্রভাতে তস্য গানসময়ঃ। ইতি সঙ্গীতদামোদরঃ॥

গান্ধাররাজঃ (পুং) শকুনিঃ। ইতি মহাভারতং॥

গান্ধারী (স্ত্রী) ধৃতরাষ্ট্ররাজপত্নী। সা তু দুর্য্যোধনমাতা। ইতি মহাভারতং॥ জিনানাং শাসনদেবতাবিশেষঃ। ইতি হেমচন্দ্রঃ॥ যবাসঃ। ইতি রাজনির্ঘণ্টঃ॥ দুরালভা। ইতি ভাবপ্রকাশঃ॥ মাদকদ্রব্যবিশেষঃ। গাঁজা ইতি ভাষা। ইতি বিষ্ণুসিদ্ধান্তসারাবলীবৈদ্যকগ্রন্থঃ॥

গান্ধারেয়ঃ (পুং) দুর্য্যোধনরাজঃ। ইতি ত্রিকাণ্ডশেষঃ॥

গান্ধিকঃ (পুং) লেখকঃ। সুগন্ধিব্যবহারী। গন্ধবণিক্ ইতি খ্যাতঃ। ইতি মেদিনী॥ স তু অম্বষ্ঠাৎ রাজপুত্র্যাং জাতঃ। ইতি পরাশরপদ্ধতিঃ॥ কীটবিশেষঃ। গাঁধিপোকা ইতি ভাষা। ইতি শব্দরত্নাবলী॥

গামুকঃ (ত্রি) গন্তা। ইতি ব্যাকরণং॥

গাম্ভীর্য্যং (ক্লী) গম্ভীরতা। যথা। মেঘনির্ঘোষগাম্ভীর্য্যং প্রতিনাদবিধায়িতা। ইতি জিনবাগ্গুণে হেমচন্দ্রঃ॥

গায়কঃ (ত্রি) গানকর্ত্তা। ইতি শব্দরত্নাবলী॥ তৎপর্য্যায়ঃ। গায়নঃ ২ গাথকঃ ৩। ইতি ত্রিকাণ্ডশেষঃ॥ গাতা ৪। তস্য দোষা যথা। লজ্জিতং ভীতমুত্ত্বেমু অব্যক্তমনুনাসিকং। কাকস্বরঃ শিরঃকম্পো লয়স্থানবিবর্জ্জিতং॥ বিস্বরং বিরসঞ্চৈব বিশ্লিষ্টং বিষমাহতং। ব্যাকুলং তালহীনঞ্চ গাতুর্দোষাশ্চতুর্দ্দশ॥ ইতি সঙ্গীতদামোদরঃ॥

গায়ত্রী [ন্] (পুং) খদিরবৃক্ষঃ। ইতি ভরতঃ॥

গায়ত্রী (স্ত্রী) খদিরবৃক্ষঃ। ইত্যমরঃ॥ ষড়ক্ষরচ্ছন্দোবিশেষঃ। তস্যাবৃত্তিস্ত্রিবিধা যথা। তনুমধ্যা ১ শশিবদনা ২ সোমরাজী ৩। আদ্যায়াঃ আদ্যন্তয়োর্গুরুদ্বয়ে মধ্যে লঘুদ্বয়ং॥ দ্বিতীয়ায়াঃ আদিমধ্যয়োর্লঘুদ্বয়ে অন্তে গুরুদ্বয়ং॥ তৃতীয়ায়াঃ আদিমধ্যয়োর্লঘুগুরু গুরুলঘু অন্তে গুরুদ্বয়ং॥ ক্রমেণোদাহরণানি যথা। আস্তাং মম চিত্তে নিত্যং তনুমধ্যা॥ ১॥ শশিবদনানাং ব্রজতরুণীনাং॥ ২॥ হরে সোমরাজী সমা তে যশঃশ্রীঃ॥ ৩॥ ইতি ছন্দোমঞ্জরী॥ *॥ দুর্গা। যথা। গায়নাদ্গমনাদ্বাপি গায়ত্রী ত্রিদশার্চ্চিতা। সাধনাৎ সিদ্ধিরিত্যুক্তা সাধকা বাথ ঈশ্বরী॥ ইতি দেবীপুরাণে দেবীনিরুক্তনাম ৪৫ অধ্যায়ঃ॥ *॥ ত্রিপদা দেবী। ইতি মেদিনী॥ সা তু ত্রিপাদষ্টাক্ষরচ্ছন্দোযুক্তমন্ত্রাত্মিকা বেদমাতা দ্বিজৈরুপাস্যা। তস্যা নামব্যুৎপত্তির্যথা। গায়ন্তং ত্রায়তে যস্মাৎ গায়ত্রী ত্বং ততঃ স্মৃতা। ইতি স্মৃতিঃ॥ *॥ সাপি ব্রহ্মণঃ পত্নী। যথা। অধ্বর্য্যুণা সমাহূতা এহি দেবি ত্বরান্বিতা। উত্থিতাশ্চাগ্নয়ঃ সর্ব্বে দীক্ষাকালমুপাগতাঃ॥ সাবিত্র্যুবাচ। লক্ষ্মীর্নাদ্যাপি চায়াতি সতী নৈবেহ দৃশ্যতে। বৃহদাগ্রায়ণে হূতা শক্রাণী গচ্ছতী দ্বিহ॥ নাহমেকাকিনী যাস্যে যাবন্নায়ান্তি তাঃ স্ত্রিয়ঃ। ব্রূহি গত্বা বিরিঞ্চিস্তং তিষ্ঠস্বিহ মুহূর্ত্তকং॥ বদমানাং তথাধ্বর্য্যুস্ত্যক্ত্বা দেবমুপাগমৎ। সাবিত্রী ব্যাকুলা দেবী প্রসক্তা

গৃহকর্ম্মণি॥ সখ্যো নাভ্যাগতা যাবৎ তাবন্নাগমনং মম। এবমুক্তোঽস্মি বৈ দেব কালশ্চাপ্যতিবর্ত্ততে॥ যচ্চ যোগ্যং ভবেদত্র তৎ কুরুষ পিতামহ। এবমুক্তে তদা বাক্যং কিঞ্চিৎকোপসমন্বিতঃ॥ পত্নীঞ্চান্যাং মদর্থন্ত শীঘ্রং ত্বঞ্চ সমানয়। প্রবর্ত্ততে যথা যজ্ঞঃ কালহীনো ন জায়তে॥ তথা শীঘ্রং বিধেহি ত্বং নারীং কাঞ্চিদুপানয়। এবমুক্তস্তথা শক্রো গত্বা সর্ব্বং ধরাতলং॥ স্ত্রিয়ো দৃষ্টাস্তু যাস্তেন সর্ব্বাস্তাস্তু পরিগ্রহাঃ। আভীরকন্যা সুরূপা সুভাষা চারুলোচনা॥ দদর্শ তাং সুচার্ব্বঙ্গীং কমলায়তলোচনাং। কাসি কন্য কুতশ্চ ত্বমাগতা সুভ্রূ কথ্যতাং॥ একাকিনী কিমর্থঞ্চ বীথিমধ্যেঽবতিষ্ঠসি। রূপান্বিতা চ সা কন্যা শক্রং প্রোবাচ বেপতী॥ গোপকন্যা অহং বীর বিক্রেতুমিহ গোরসং। সমাগতা ঘৃতাদীনাং প্রগৃহ্লীষ্ব যথেপ্সিতং॥ এবমুক্তস্তদা শক্রো গৃহীত্বা তাং করে দৃঢ়ং। আনীয়তাং বিশালাক্ষীং যত্র ব্রহ্মা ব্যবস্থিতঃ॥ কমলাক্ষীং স্ফুরদ্বাণীং পুণ্ডরীকনিভেক্ষণাং। গান্ধর্ব্বেণ তদা ব্রহ্মা গ্রহীতুং মন আদধে॥ প্রভুত্বমাত্মনো দানে গোপকন্যাপ্যমন্যত। যদেবং মাং সুরূপত্বাদিচ্ছত্যাদাতুমাগ্রহাৎ॥ নাস্তি সীমন্তিনী কাচিন্মত্তো ধন্যতরা যতঃ। অনেনাহং সমানীতা যস্য দৃগ্‌গোচরং গতা॥ এবং চিন্তাপরা দীনা যাবৎ সা গোপকন্যকা। ভবত্যেষা মহাভাগা গায়ত্রী নামতঃ প্রভো॥ তাবদেব

মহাবিষ্ণুঃ প্রোক্তবানিদমুত্তমং। অনুগ্রহেণ দেবেশ অস্যাঃ পাণিগ্রহং কুরু॥ গান্ধর্ব্বেণ বিবাহেন উপযেমে পিতামহঃ॥ * ॥ অস্যা ধ্যানং যথা। শ্বেতা ত্বং শ্বেতরূপাসি শশাঙ্কেন সমা মতা। বিভ্রতী বিপুলাবূরূ কদলীগর্ভকোমলৌ॥ এণশৃঙ্গং করে গৃহ্য পঙ্কজঞ্চ সুনির্ম্মলং। বসানা বসনে ক্ষৌমে রক্তে চাদ্ভুতদর্শনে॥ শশিরশ্মিপ্রকাশেন হারেণোরসি রাজসে। দিব্যকুণ্ডলপূর্ণাভ্যাং শ্রবণাভ্যাং বিভূষিতা॥ চন্দ্রযোগণযুক্তেন মুকুটেন বিরাজসে। মুকুটেন ত্রিগ্রন্থেন কেশবন্ধেন শোভিনা॥ ভুজগাভোগসদৃশৌ ভুজৌ ভ্রাজয়তো দিশঃ। স্তনৌ তে কঠিনৌ দেবি বর্ত্তুলৌ সমচুচুকৌ॥ জঘনেনাতিশুভ্রেণ ত্রিবলীভিশ্চ সংযুতা। বিস্তীর্ণস্পষ্টজঘনা সুশ্রোণী চ বরাননা॥ চারুরূপোরুযুগলা অম্বুজাভরণা তথা। ত্রৈলোক্যচারিণী সা ত্বং জগতামেব পাবনী॥ অস্যা বৈদিকতান্ত্রিকধ্যানদ্বয়ং গুহ্যত্বাদত্র ন লিখিতং॥ * ॥ তস্যা জপফলং তত্র ব্রাহ্মণান্ প্রতি গায়ত্রীবাক্যং। বিশেষাৎ পুষ্করে স্নাত্বা মাং জপ্ত্বা বেদমাতরং। প্রতিগ্রহকৃতান্ দোষান্নপ্রাপ্স্যথ দ্বিজোত্তমাঃ॥ মদীয়ৈঃ কিল জাপ্যৈস্তু তারণায় ত্রিভিঃ কৃতৈঃ। ব্রহ্মহত্যাসমং পাপং তৎক্ষণাদেব নশ্যতি॥ দশভির্জন্মজনিতং শতেন তু পুরা কৃতং। ত্রিযুগস্তু সহস্রেণ নাত্র কার্য্যা বিচারণা॥ অষ্টাক্ষরা স্থিতা চাহং জগদ্ব্যাপ্তং ময়া ত্বিদং। মাতাহং সর্ব্ব-

বেদানাং পদৈঃ সর্ব্বৈরলঙ্কৃতা॥ জপ্তা মাং পরমাং সিদ্ধিং যাস্যন্তি দ্বিজসত্তমাঃ। প্রাধান্যং মম জাপ্যেন সর্ব্বেষাং বো ভবিষ্যতি॥ * ॥ তস্যা মাহাত্ম্যাদি। উপলভ্য চ সাবিত্রীং নোপতিষ্ঠেত যো দ্বিজঃ। কালে ত্রিকালং সপ্তাহাৎ স পতেন্নাত্র সংশয়ঃ॥ গায়ত্রীমন্ত্রতোয়াঢ্যং দত্তং যেনাঞ্জলিত্রয়ং। কালে সাবিত্রিকেণ স্যাত্তেন দত্তং জগত্রয়ং॥ অষ্টাদশসু বিদ্যাসু মীমাংসাতিগরীয়সী। ততোঽপি তর্কশাস্ত্রাণি পুরাণং তেভ্য এব চ॥ ততোঽপি ধর্ম্মশাস্ত্রাণি তেভ্যো গুর্ব্বী শ্রুতির্নৃপ। ততো হ্যুপনিষৎ শ্রেষ্ঠা গায়ত্রী চ ততোঽধিকা॥ বাচ্যবাচকসম্বন্ধো গায়ত্র্যাঃ সবিতুর্দ্বয়োঃ। বাচ্যোঽসৌ সবিতা সাক্ষাৎ গায়ত্রী বাচিকা পরা॥ তাং দেবীমুপতিষ্ঠন্তে ব্রাহ্মণা যে জিতেন্দ্রিয়াঃ। সূর্য্যলোকং তে প্রয়ান্তি ক্রমান্মুক্তিঞ্চ পার্থিব॥ ইতি পদ্মপুরাণং॥ অথ গায়ত্রীকল্পঃ। জপন্ হি পাবনীং দেবীং গায়ত্রীং বেদমাতরং। তপসা ভাবিতো দেব্যা ব্রাহ্মণঃ পূতকিল্বিষঃ॥ ন সীদেৎ প্রতিগৃহ্নন্ স হ্যপি পৃথ্বীং সসাগরাং। দ্বে সন্ধ্যে হ্যুপতিষ্ঠেত গায়ত্রীং প্রযতঃ শুচিঃ॥ যত্তস্য দুষ্কৃতং নাস্তি পূর্ব্বতঃ পরতোঽপি বা। যজ্ঞদানরতো বিদ্বান্ সাঙ্গবেদস্য পাঠকঃ॥ গায়ত্রীধ্যানপূতস্য কলাং নার্হন্তি ষোড়শীং। এবং কিল্বিষযুক্তস্তু বিনির্দ্দহতি পাতকং॥ উভে সন্ধ্যে হ্যুপাসীত তস্মান্নিত্যং দ্বিজোত্তমঃ। ছন্দস্তস্যাস্তু গায়ত্রং গায়ত্রীত্যুচ্যতে ততঃ॥ গায়ন্তং ত্রায়তে যস্মাৎ গায়ত্রী তু ততঃ স্মৃতা। মরীচে কারণাত্তস্মাৎ গায়ত্রী কীর্ত্তিতা ময়া॥ তব বুদ্ধিমতাং শ্রেষ্ঠ নিত্যং সর্ব্বেষু কর্ম্মসু। সব্যাহৃতিং সপ্রণবাং গায়ত্রীং শিরসা সহ॥ জপন্তি যে সদা তেষাং ন ভয়ং বিদ্যতে ক্বচিৎ। দশকৃত্বঃ প্রজপ্তা সা রাত্র্যহ্নোর্যৎ কৃতং লঘু॥ তৎ পাপং প্রণুদত্যাশু নাত্র কার্য্যা বিচারণা। শতং জপ্তা তু সা দেবী পাপৌঘশমনী স্মৃতা॥ সহস্রং জপ্তা সা দেবী মহাপাতকনাশিনী। লক্ষজাপ্যেন সাপ্যেবং সপ্ত জন্মানি পাতকং॥ কোটিজাপ্যেন বিপ্রর্ষে যদিচ্ছতি তদাপ্নুয়াৎ। যক্ষবিদ্যাধরত্বে বা গান্ধর্ব্বে দৈবতেঽপি বা॥ যত্র যত্র ভবেদ্বাঞ্ছা তত্তদাপ্নোত্যসংশয়ং। দশসাহস্রজাপ্যেন নিষ্কামঃ পুরুষো যদি॥ বিধিনা নিয়তং ধ্যায়েৎ প্রাপ্নোতি পরমং পদং। যথাকথঞ্চিজ্জপিতা গায়ত্রী পাপহারিণী॥ সর্ব্বকামপ্রদা প্রোক্তা পৃথক্কর্ম্মসু নিষ্ঠিতা॥ * ॥ মরীচিরুবাচ। বিধিনা কেন কর্ত্তব্যা গায়ত্রী পাপনাশিনী। পবিত্রো পরমা হ্যেষা সর্ব্বকল্যাণসাধিনী॥ বহ্নিরুবাচ। সব্যাহৃতিং সপ্রণবাং জপ্তা মাসাংশ্চ ষোড়শ। অপি ভ্রূণহনঃ পাপাৎ মুচ্যন্তেঽহরহঃকৃতাৎ॥ সব্যাহৃতিং সপ্রণবাং গায়ত্রীং শিরসা সহ। ত্রিঃ পঠেদায়তপ্রাণঃ প্রাণায়ামঃ স উচ্যতে॥ প্রাণায়ামত্রয়ং কৃত্বা প্রাণায়ামৈস্ত্রিভিস্ত্রিভিঃ। অহোরাত্রকৃতাৎ পাপাৎ মুচ্যতে

নাত্র সংশয়ঃ ॥ অন্তর্জলে ত্রিরাবর্ত্ত্য গায়ত্রীং প্রযতস্তথা। মুচ্যতে পাতকৈঃ সর্ব্বৈর্যদি ন ব্রহ্মহা ভবেৎ॥ নাস্তি সত্যাৎ পরো ধর্ম্মো নাস্তি কৃষ্ণাৎ সমা গতিঃ। গায়ত্র্যাশ্চ সমং নাস্তি দিবি চেহ চ পাবনং ॥ হুতা চ বরদা দেবী সর্ব্বকাম-ফলপ্রদা। গায়ত্র্যাশ্চ তিলৈর্হোমঃ সর্ব্ব-পাতকনাশনঃ ॥ শান্তিকামো যবৈঃ কুর্য্যাদায়ুষ্কামো ঘৃতেন তু। কর্ম্মান্তসিদ্ধি-কামস্তু কুর্য্যাৎ সিদ্ধার্থকৈর্নরঃ ॥ ব্রহ্ম-বর্চ্চসকামস্তু পয়সা চ সমাচরেৎ। পুত্র-কামঃ সদা দধ্না ধান্যকামস্তু শালিভিঃ ॥ ক্ষীরবৃক্ষসমিদ্ভিস্তু গ্রহপীড়োপশান্তয়ে। ধনকামস্তথা বিল্বৈঃ শ্রীকামঃ কমলৈস্তথা॥ আরোগ্যকামঃ ক্ষীরাক্তৈঃ কুর্য্যাৎ দূর্ব্বা-ঙ্কুরৈস্তথা। দেশোপসর্গে সংপ্রাপ্তে তদেব চ বিধীয়তে ॥ গুগ্‌গুলৈর্গুটিকাভিস্তু কৃত্বা হোমমতন্দ্রিতঃ। সৌভাগ্যং মহদাপ্নোতি নাত্র কার্য্যা বিচারণা॥ পায়সেন তথা হুত্বা বিদ্যাং সমধিগচ্ছতি। *। যেন যেন তু কামেন লক্ষহোমং সমাচরেৎ ॥ তং তং কামমবাপ্নোতি নাত্র কার্য্যা বিচারণা। কৃচ্ছ্রেণ শুদ্ধিমুৎপাদ্য প্রাণা-য়ামশতেন চ॥ অন্তর্জলে চ তাং জপ্ত্বা স্নাতো নিত্যমতন্দ্রিতঃ। প্রাণায়ামাংস্ততঃ কৃত্বা বিধানেনৈব ষোড়শ ॥ পূর্ব্বাহ্নে জুহুয়াদগ্নৌ সুসমিদ্ধে যথাবিধি। ভৈক্ষ্যান্ন চ কণাশী বা ফলমূলাশনোঽপি বা॥ ক্ষীর-শক্তুঘৃতাহারো ভবেত্তত্র বিচক্ষণঃ। আহা-রাণাং যথোক্তানামেকাহারং সমাশ্রয়েৎ॥

সমাপ্তির্লক্ষহোমস্ত যাবত্তবতি নিত্যশঃ। লক্ষহোমাবসানে তু ব্রাহ্মণেভ্যস্তু দক্ষিণা ॥ দেয়া ভবতি শক্ত্যা তু গাবো বস্ত্রাণি কাঞ্চনং। সর্ব্বোৎপাত-সমুৎপত্তৌ সর্ব্বং ভবতি শোভনং ॥ পঞ্চভির্দশভির্ব্বাথ লক্ষহোমং সমাচরেৎ। অসংকীর্ণে তথা দোষে নৃপতিস্তৎপ্রশা-ন্তয়ে॥ নাস্তি লোকে স উৎপাতো যো হুতো নোপশাম্যতি। মঙ্গলঞ্চ পরং নাস্তি যদস্মাদতিরিচ্যতে॥ গ্রহশান্তিং পুরা কৃত্বা মন্ত্রৈঃ স্বৈঃ স্বৈঃ শৃণুষ্ব তান্। ইন্দ্রায়াগ্নয়ে সোমায় নমঃ প্রজাপতেস্তথা॥ ব্যাহৃতিভ্যস্ততঃ পশ্চাৎ পূর্ণাহুতিমথা-দদেৎ। গণানাস্ত্বেতি বা কৃষ্ণ ইমং দেবেতি চেন্দবে ॥ অগ্নির্মূর্দ্ধেত্যুদ্বুধ্যস্ব বৃহস্পতেতি প্রযোজয়েৎ। অন্নাৎ পরি-শ্রুতেনৈব সন্নো দেবীস্ততঃ পুনঃ॥ কয়া ন ইতি রাহোর্ব্বৈ কেতুং কৃণ্বেতি কেতবে। ত্র্যম্বকেণ তু রৌদ্রস্তু হোময়েজ্জাতবেদসি॥ সর্ব্বং গায়ত্রীহোমস্তু লক্ষহোমে প্রকল্প-য়েৎ। দিক্‌পালেভ্যশ্চ হোতব্যং ভূতেভ্য-শ্চ ততঃ ক্রমাৎ ॥ মরুত্বমগ্নিং দূতং বৈ যস্মিন্ বৃক্ষে নমামি তং। বরুণং বো রিশা দশ বয়মুক্ত্বা পথস্য তে॥ সোমং রাজানমবসে ব্রহ্মারুদ্রায় বৈ তথা। ক্ষেত্রস্য পতিনা চৈব ভূতানাং পতয়ে তথা ॥ রক্ষোঘ্নেনৈব মন্ত্রেণ হোতব্যং বিধিপূর্ব্বকং। ঘৃতাক্তাভিঃ সমিদ্ভিশ্চ তিলহোমং ততঃ পরং॥ দশৈকং প্রতি বা কুর্য্যাদষ্টাবিংশতিমেব চ। একৈকং

প্রতি পূর্ণা স্যাত্তদত্র ঋষিসত্তমাঃ ॥ ব্রহ্ম-বৃক্ষোদ্ভবাশ্চেষ্মাস্তথা দূর্ব্বাঙ্কুরোদ্ভবাঃ। হোতব্যা লক্ষহোমে তু গায়ত্র্যাঃ কামিকং পরং ॥ শ্রীসূক্তং পাবমানঞ্চ পৌরুষং শান্তবং তথা। রৌদ্রমৈন্দ্রঞ্চ রামঞ্চ জ্যেষ্ঠ-সাম বৃহদ্রথং ॥ মহাজপস্তু হোমান্তে কুর্য্যাৎ বৈ সর্ব্বসিদ্ধিদং। সম্যক্ পূর্ণাং ততো দদ্যাৎ সপ্ত তে অভিমন্ত্রিতং ॥ নমো ব্রহ্মণেতি চামন্ত্র্য ত্রম্বিণঞ্চ নবং ঘটং। রত্নৈর্বীজৈঃ শুভৈর্ব্বস্ত্রৈর্হেম্না চৈব তু সংযুতং ॥ তজ্জলেনাভিষিঞ্চেত্ত দেবস্য ত্বেতি বৈ তদা। ধন্বনাগাদিভির্মন্ত্রৈরভি-ষিঞ্চেত্ততঃ ক্রমাৎ ॥ এবং যঃ কুরুতে রাজা লক্ষহোমং যতব্রতঃ। ন তস্য শত্রবঃ সঙ্খ্যে অগ্রে তিষ্ঠন্তি কর্হিচিৎ ॥ ন চৈব মরকো দেশে ব্যাধির্ব্বা জায়তে তথা। অতিবৃষ্টিরনাবৃষ্টির্মূষকাঃ শলভাঃ শুকাঃ ॥ রাক্ষসাদ্যা বিনশ্যন্তি সর্ব্বাস্তত্র তথেতয়ঃ। রসবন্তি চ তোয়ানি শস্যঞ্চ নিরুপদ্রবং ॥ জায়তে যস্য যা চেষ্টা ধর্ম্মিষ্ঠা সা ন কিং ভবেৎ। *। কোটিহোমস্তু যো রাজা কারয়েদ্বিধিপূর্ব্বকং ॥ ন তস্য মানসো দাহ ইহ লোকে পরত্র চ। কোটিহোমে তু বরয়েৎ ব্রাহ্মণান্ বিংশতিং নৃপ ॥ শতং বাথ সহস্রং বা য ইচ্ছেদ্গতিমাত্মনঃ। কোটিহোমং স্বয়ং যস্তু কুরুতে শ্রদ্ধয়া দ্বিজঃ ॥ ক্ষত্রিয়ো বাথ বৈশ্যো বা তস্য পুণ্যফলং মহৎ। যদ্যদিচ্ছতি কামানাং তত্তদাপ্নোত্যসংশয়ং ॥ সশরীরোঽপি চেদ্গন্তুং দিবমিচ্ছেত্তদাপ্নুয়াৎ। সাবিত্রী পরমা দেবী সাবিত্রী পাবনং পরং ॥ সর্ব্বকামপ্রদা যৈব সাবিত্রী কথিতা তব ॥*। অভিচারেষু তাং দেবীং বিপরীতাং বিচিন্তয়েৎ ॥ কার্য্যা ব্যাহৃতয়শ্চাত্র বিপ-রীতাক্ষরাস্তথা। বিপরীতাক্ষরং কার্য্যং শিরশ্চ ঋষিসত্তম ॥ আদৌ শিরঃ প্রযো-ক্তব্যং প্রণবোঽন্তেন বৈ ঋষে। মতিস্থে-নৈব ফট্কারং মধ্যে নাম প্রকীর্ত্তিতং ॥ গায়ত্রীং চিন্তয়েত্তত্র দীপ্তানলসমপ্রভাং। ঘাতয়ন্তীং ত্রিশূলেন কেশেষাক্ষিপ্য বৈরিণং ॥ নির্দ্দহন্তীং ত্রিশূলেন ভ্রূকুটী-ভূষিতাননাং। উচ্চাটনে তু তাং দেবীং বায়ুভূতাং বিচিন্তয়েৎ ॥ ধাবমানং তথা সাধ্যং তস্মাদ্দেশাত্তু দূরতঃ। অভিচারেষু হোতব্যা রাজিকা বিষমিশ্রিতাঃ ॥ স্বরক্ত-মিশ্রং হোতব্যং কটুতৈলমথাপি বা। তত্রাপি চ বিষং দেয়ং হোমকালে প্র-যত্নতঃ ॥ ক্রোধেন মহতাবিষ্টঃ পরানভি-চরেদ্বুধঃ। ন জহ্যাৎ যদি ক্রোধেন ধ্রুবং নশ্যেৎ স এব তু ॥ অনাগসি ন কর্ত্তব্য-মভিচারমতো বুধৈঃ। স্বল্পাগসি ন কর্ত্তব্যো হ্যভিচারো মহামুনে ॥ মহাপরাধং বলিনং দেবব্রাহ্মণকণ্টকং। অভিচারেণ যো হন্যান্ন স দোষেণ লিপ্যতে ॥ ধর্ম্মপ্রদানে তু তথা স্বল্পাগসি তথৈব চ। অভিচারং ন কুর্ব্বীত বহুপাপং বিচক্ষণঃ ॥ বহুনাং কণ্টকং যস্তু পাপাত্মানং সুদুর্ম্মতিং। হন্যাৎ প্রাপ্তাপরাধস্তু তস্য পুণ্যফলং মহৎ ॥ যে ভক্তাঃ পুণ্ডরীকাক্ষে বেদযজ্ঞে দ্বিজে জনে। ন তানভিচরেৎ জাতু তত্র

তদ্বিফলং ভবেৎ ॥ ন হি কেশবভক্তানা-মভিচারেণ কর্হিচিৎ। বিনাশমভিপদ্যেত তস্মাত্তন্ন সমাচরেৎ ॥ * ॥ সেয়ং ধাত্রী বিধাত্রী চ সাবিত্র্যঘবিনাশিনী। প্রাণা-য়ামেন জপ্যেয় তথা চান্তর্জলেন চ ॥ সব্যা-হৃতীকপ্রণবা জপ্তব্যা শিরসা সহ। প্রণবেন তথা স্মৃত্বা বাচ্যা ব্যাহৃতয়ঃ পৃথক্ ॥ দৈবতং সবিতাপ্যস্যা গায়ত্রং ছন্দ এব চ। বিশ্বামিত্র ঋষিশ্চৈব প্রোচ্যতে ঋষি-সত্তম ॥ কর্ম্মেন্দ্রিয়াণি পঞ্চৈব পঞ্চ বুদ্ধী-ন্দ্রিয়াণি চ। পঞ্চেন্দ্রিয়ার্থাঃ সুমহৎ ভূতানাং পঞ্চপঞ্চকং ॥ মনো বুদ্ধিস্তথৈ-বাত্মা অব্যক্তমৃষিসত্তম। চতুর্বিংশত্যথৈ-তানি গায়ত্র্যাস্ত্বক্ষরাণি তু ॥ প্রাগেবং পুরুষং বিদ্ধি সঙ্গতং পঞ্চবিংশকং। সপ্ত-লোকাশ্চ যে চেহ মহাব্যাহৃতয়স্তথা ॥ শিরশ্চ তত্তথা বাচ্যঃ পুরুষঃ পরমেশ্বরঃ। এবম্বিধা চ গায়ত্রী জপ্তব্যা রাজসত্তম ॥ হোতব্যা চ যথাশক্ত্যা সর্ব্বকামসমৃদ্ধিদা। সাবিত্রীসারমাত্রোঽপি বরং বিপ্রঃ সু-যন্ত্রিতঃ ॥ নাযন্ত্রিতশ্চতুর্ব্বেদী সর্ব্বাশী সর্ব্ব-বিক্রয়ী। গায়ত্রীং জপতে যস্তু ত্রিকালং ব্রাহ্মণঃ সদা ॥ অর্থী প্রতিগ্রহী বাপি স গচ্ছেৎ পরমাং গতিং। গায়ত্রীং জপতে যস্তু কল্যমুত্থায় যো দ্বিজঃ ॥ স লিপ্যতি ন পাপেন পদ্মপত্রমিবাম্ভসা। কামকামী লভেৎ কামান্ গতিকামশ্চ সদগতিং ॥ অকামঃ সমবাপ্নোতি অবিষ্ণোঃ পরমং পদং। ইত্যাদ্যে বহ্নিপুরাণে গায়ত্রী-কল্পনামাধ্যায়ঃ ॥

গায়নঃ ( ত্রি ) গায়কঃ। গানোপজীবী। ইতি ত্রিকাণ্ডশেষঃ ॥ জম্বাকঃ। ইতি ধরণী ॥

গারিত্রং ( ক্লী ) ওদনং। ইত্যুণাদিকোষঃ ॥

গারুড়ং ( ক্লী ) গরুড়পুরাণং। ইতি পুরাণং ॥ যথা। গরুড় উবাচ। মম মাতা চ বিনতা নাগৈর্দাসীকৃতা হরে। যথাহং দৈবতান্ জিত্বা চামৃতং হ্যানয়ামি তৎ ॥ দাস্যাদ্বি মোক্ষয়িষ্যামি যথাহং বাহনং তব। মহা-বলো মহাবীর্য্যঃ সর্ব্বজ্ঞো নাগদারণঃ ॥ পুরাণসংহিতাকর্ত্তা যথাহং স্যাং তথা কুরু। বিষ্ণুরুবাচ। যথা ত্বয়োক্তং গরুড় তথা সর্ব্বন্তবিষ্যতি। দেবাদীন্ সকলান্ জিত্বা চামৃতং হ্যানয়িষ্যসি ॥ নাগদাস্যান্-মাতরং স্বাং বিনতাং মোক্ষয়িষ্যসি। মহা-বলো বাহনস্ত্বং ভবিষ্যসি বিষার্দ্দন ॥ পুরাণং মৎপ্রসাদাচ্চ মম মাহাত্ম্যবাচকং। যদুক্তং মৎস্বরূপঞ্চ তব চাবির্ভবিষ্যতি ॥ গারুড়ং তব নাম্না তল্লোকে খ্যাতিং গমি-ষ্যতি। যথাহং দেবদেবানাং শ্রীঃ খ্যাতা বিনতাসুত ॥ তথা খ্যাতিং পুরাণেষু গারুড়ং গরুড়ৈষ্যতি। যথাহং কীর্ত্তনীয়ো-ঽথ তথা ত্বং গরুড়াত্মনা ॥ মাং ধ্যাত্বা পক্ষিমুখ্যেদং পুরাণং গদ গারুড়ং। ইত্যুক্তো গরুড়ো রুদ্র কশ্যপায়াহ পৃচ্ছতে ॥ কশ্যপো গরুড়ং শ্রুত্বা বৃক্ষং দগ্ধমজীবয়ৎ। স্বয়ঞ্চাপ্যমলো ভূত্বা বিদ্যয়া-ন্যানজীবয়ৎ ॥ পক্ষী ওঁ ভং স্বাহা জাপী বিদ্যেয়ং গারুড়ী পরা। গরুড়োঽহং গারুড়ং হি শৃণু রুদ্র মহাত্মকং ॥ ইত্যাদ্যে মহাপুরাণে গারুড়ে প্রশ্নাধ্যায়ো নাম

ঃ ॥ * ॥ গারুড়ী বিদ্যা গরুড়-পুরাণে ২০২ অধ্যায়াদৌ দ্রষ্টব্যা ॥ স্বর্ণং। ইতি হেমচন্দ্রঃ ॥ বিষমন্ত্রঃ। ইতি জটাধরঃ ॥ মরকতমণিঃ। ইতি রাজনির্ঘণ্টঃ ॥

গারুড়িকঃ (পুং) বিষবৈদ্যঃ। ইতি শব্দরত্নাবলী ॥

গারুড়ী (স্ত্রী) পাতালগরুড়ীলতা। ইতি র ণ্টঃ

গারুত্মতং (ক্লী) মরকতমণিঃ। ইত্যমরঃ ॥

গারুত্মতপত্রিকা (স্ত্রী) পাচীলতা। ইতি রাজনির্ঘণ্টঃ ॥

গার্গকং (ক্লী) গর্গস্যাপত্যং। ইত্যমরটীকায়াং রায়মুকুটঃ ॥

গার্গী (স্ত্রী) গর্গস্য স্ত্র্যপত্যং। ইতি মুগ্ধবোধং ॥

গার্গীপুত্রকায়নিঃ (পুং) গার্গীপুত্রবংশঃ। অস্য রূপান্তরং। গার্গীপুত্রায়নিঃ। গার্গীপুত্রিঃ। ইতি পাণিনিব্যাকরণং ॥

গার্গ্যঃ (পুং) গর্গস্য পুমপত্যং। ইতি মুগ্ধবোধব্যাকরণং ॥

গার্দ্ধপক্ষঃ (পুং) গার্দ্ধ্রপত্রবাণঃ। ইতি হেমচন্দ্রঃ ॥ গার্ধ্রপক্ষোঽপি ॥

গার্দ্ধ্যং (ক্লী) লিপ্সা। যথা। পাত্থা জলানাং নিধিনাতিগার্দ্ধ্যাৎ। ইতি মাঘঃ ॥

গার্দ্ধ্রপত্রঃ (পুং) গৃধ্রপক্ষযুক্তবাণঃ। ইতি মহাভারতং ॥

গার্ভিণং (ক্লী) গর্ভিণীসমূহঃ। ইত্যমরঃ ॥

গার্ভিণ্যং (ক্লী) গর্ভিণীসমূহঃ। ইত্যমরটীকায়াং ভরতঃ ॥

গার্হপত্যঃ (পুং) যজ্ঞীয়াগ্নিবিশেষঃ। গৃহপতির্গৃহস্বামী তেন নিত্যসম্বদ্ধঃ। ইত্যমরভরতৌ ॥

গালনং (ক্লী) ক্ষারণং। ছাঁকন গড়ান ইত্যাদি ভাষা। যথা। তথা পচেৎ যথা দাহকাঠিন্যাতিশৈথিল্যমণ্ডগালনরহিতোঽন্তরুষ্মপক্কশ্চরুর্ভবতি। ইতি ভবদেবভট্টঃ ॥

গালবঃ (পুং) মুনিবিশেষঃ। লোধ্রবৃক্ষঃ। ইতি মেদিনী ॥ শ্বেতলোধ্রঃ। ইত্যমরটীকায়াং স্বামী ॥ কেন্দুকবৃক্ষঃ। ইতি শব্দচন্দ্রিকা ॥

গালিঃ (পুং) শাপঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

গালিতঃ (ত্রি) দ্রবীকৃতঃ। গলান ইতি ভাষা। যথা। গালিতস্য সুবর্ণস্য ষোড়শাংশেন সীসকমিতি রত্নাবলী ॥ কৃতগালনঃ। যথা। তথা পচেৎ যথা অগালিতমণ্ডশ্চরুর্ভবতি। ইতি কালেশিঃ ॥

গালিনী (স্ত্রী) মুদ্রাবিশেষঃ। যথা। কনিষ্ঠাঙ্গুষ্ঠকৌ সক্তৌ করয়োরিতরেতরং। তর্জ্জনী মধ্যমানামা সংহতা ভুগ্নবর্জ্জিতা ॥ মুদ্রেষা গালিনী প্রোক্তা শঙ্খস্যোপরি চালিতা। ইতি তন্ত্রসারঃ ॥

গালোড়নং (ক্লী) উন্মাদঃ। রোগঃ। মূর্খত্বং। ইতি বক্ষ্যমাণশব্দদর্শনাৎ ॥ *

গালোড়িতঃ (ত্রি) উন্মত্তঃ। রুগ্নঃ। মূর্খঃ। যথা। উন্মাদশীলে রোগার্ত্তে মূর্খে গালোড়িতঃ স্মৃতঃ। ইতি দুর্গাসিংহকৃতকলাপবৃত্তিটীকায়াং ত্রিলোচনদাসঃ ॥ গোলোহিতোঽপি পাঠঃ ॥

গালোড্যং (ক্লী) পদ্মবীজং। ইতি রাজনির্ঘণ্টঃ॥

গাবৌ (পুং) গ্রামঃ। যথা। একৈকেন তথা দ্বাভ্যাং বচনৈস্ত্রিভিরেব চ। সাকাঙ্ক্ষত্বপ্রযুক্তস্ত নাম পঞ্চবিধং স্মৃতং॥ একবচনসাকাঙ্ক্ষত্বযুক্তং একবিংশত্যাদিশব্দে। উভপদং দ্বিপদং পুষ্পবন্তপদং স্বর্বৈদ্যে অশ্বিনাদিপদং ভূস্বর্গয়ো রোদস্যাদিপদং গ্রামে গোপদঞ্চ দ্বিবচনমাত্রেণাকাঙ্ক্ষং। ইতি। তদা গাবৌ গ্রাম ইত্যাদাবিব সাধুত্বার্থকমেব তত্র দ্বিবচনমিতি বদন্তি। ইতি চ শব্দশক্তিপ্রকাশিকা॥

গাহ ঊ ঙ বিলোড়নে। ইতি কবিকল্পদ্রুমঃ॥ ঙ গাহন্তাং মহিষা নিপানসলিলমিতি শাকুন্তলে। ঊ অগাহিষ্ট অগাঢ়। ইতি দুর্গাদাসঃ॥

গিরা (স্ত্রী) বচনং। ইতি ত্রিকাণ্ডশেষঃ॥

গিরিঃ (পুং) পর্ব্বতঃ। ইত্যমরঃ॥ গেণ্ডুকঃ। ইতি বিশ্বঃ॥ চক্ষূরোগবিশেষঃ। ইতি মেদিনী॥ পারদস্য দোষবিশেষঃ। যথা। নাগো বঙ্গো মলো বহ্নিশ্চাঞ্চল্যঞ্চ বিষং গিরিঃ। অসহ্যাগ্নির্মহাদোষা নিসর্গাৎ পারদে স্থিতাঃ॥ ইতি রত্নাবলী॥ সন্ন্যাসিনাং পদ্ধতিবিশেষশ্চ॥

গিরিঃ (স্ত্রী) নিগরণং। গেলা ইতি ভাষা। ইত্যমরঃ॥ বালমূষিকা। ইত্যমরটীকায়াং রমানাথঃ॥ পূজ্যে ত্রি। ইতি মেদিনী॥

গিরিকণ্টকঃ (পুং) বজ্রঃ। ইতি ত্রিকাণ্ডশেষঃ॥

গিরিকদম্বঃ (পুং) নীপঃ। ধারাকদম্বঃ। ইতি রাজনির্ঘণ্টঃ॥

গিরিকদলী (স্ত্রী) পর্ব্বতীয়কদলী। তৎপর্য্যায়ঃ। গিরিরম্ভা ২ পর্ব্বতমোচা ৩ অরণ্যকদলী ৪ বহুবীজা ৫ বনরম্ভা ৬ গিরিজা ৭ গজবল্লভা ৮। অস্যা গুণাঃ। মধুরত্বং। হিমত্বং। বলবীর্য্যবৃদ্ধিকারিত্বং। রুচ্যত্বং। তৃষ্ণাপিত্তদাহশোষপ্রশমনত্বং। দুর্জ্জরত্বং। গুরুত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

গিরিকর্ণিকা (স্ত্রী) পৃথিবী। ইতি ত্রিকাণ্ডশেষঃ॥ শ্বেতকিণিহীবৃক্ষঃ। অপরাজিতা। ইতি রাজনির্ঘণ্টঃ॥

গিরিকর্ণী (স্ত্রী) অপরাজিতা। ইত্যমরঃ॥ যবাসঃ। ইতি শব্দচন্দ্রিকা॥

গিরিকা (স্ত্রী) বালমূষিকা। ইত্যমরঃ॥

গিরিকানঃ (পুং) গিরিরোগেণৈকচক্ষুর্হীনঃ। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ॥

গিরিগুড়ঃ (পুং) গেণ্ডুকঃ। ইতি হেমচন্দ্রঃ॥

গিরিজং (ক্লী) অভ্রকং। শিলাজতু। শৈলজং। লোহং। ইতি মেদিনী॥ গৈরিকং। ইতি রাজনির্ঘণ্টঃ॥

গিরিজঃ (পুং) মধুকবৃক্ষবিশেষঃ। তৎপর্য্যায়ঃ। গৌরশাকঃ ২ মধুলঃ ৩ স্বল্পপত্রকঃ ৪। ইতি রত্নমালা॥

গিরিজা (স্ত্রী) পার্ব্বতী। মাতুলুঙ্গী। ইতি মেদিনী॥ শ্বেতবুহ্না। ইতি রত্নমালা॥ ক্ষুদ্রপাষাণভেদা। ত্রায়মাণালতা। কারীবৃক্ষঃ। মল্লিকা। গিরিকদলী। ইতি রাজনির্ঘণ্টঃ॥

গিরিজামলং (ক্লী) অভ্রকং। ইত্যমরটীকায়াং রায়মুকুটঃ ॥

গিরিজ্বরঃ (পুং) বজ্রঃ। ইতি শব্দরত্নাবলী ॥

গিরিতঃ (ত্রি) গিলিতঃ। ভক্ষিতঃ। ইত্যমরটীকায়াং রায়মুকুটঃ ॥

গিরিধাতুঃ (পুং) গৈরিকং। ইতি রাজনির্ঘণ্টঃ ॥

গিরিনিম্বঃ (পুং) মহারিষ্টবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

গিরিপীলুঃ (পুং) পরূষকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

গিরিপুষ্পকং (ক্লী) শৈলেয়ং। ইতি রাজনির্ঘণ্টঃ ॥

গিরিপ্রিয়া (স্ত্রী) চমরীগবী। ইতি রাজনির্ঘণ্টঃ ॥

গিরিভিৎ [দ্] (পুং) পাষাণভেদকবৃক্ষঃ। ইতি ভাবপ্রকাশঃ ॥

গিরিভূঃ (স্ত্রী) ক্ষুদ্রপাষাণভেদাঃ। ইতি রাজনির্ঘণ্টঃ ॥ পার্ব্বতী চ ॥

গিরিমল্লিকা (স্ত্রী) কুটজবৃক্ষঃ। ইত্যমরঃ ॥

গিরিমানঃ (পুং) হস্তী। ইতি শব্দরত্নাবলী ॥

গিরিমৃৎ [দ্] (স্ত্রী) গৈরিকং। ইতি ত্রিকাণ্ডশেষঃ ॥

গিরিমৃদ্ভবং (ক্লী) গৈরিকং। ইতি রাজনির্ঘণ্টঃ ॥

গিরিমেদঃ (পুং) বিট্খদিরঃ। ইতি রত্নমালা ॥ ইরিমেদ ইতি বা পাঠঃ ॥

গিরিয়কঃ (পুং) গেণ্ডুকঃ। ইতি হেমচন্দ্রঃ ॥

গিরিয়াকঃ (পুং) গেণ্ডুকঃ। ইতি শব্দরত্নাবলী ॥

গিরিবাসী [ন্] (পুং) হস্তিকন্দঃ। ইতি রাজনির্ঘণ্টঃ ॥

গিরিশঃ (পুং) শিবঃ। ইত্যমরঃ ॥

গিরিশালিনী (স্ত্রী) অপরাজিতা। যথা। পারিভদ্রং পাটলা চ বকুলং গিরিশালিনী। ইতি বামনপুরাণং ॥

গিরিশৃঙ্গঃ (পুং) গণেশঃ। ইতি শব্দরত্নাবলী ॥

গিরিসারঃ (পুং) লৌহং। বঙ্গং। মলয়পর্ব্বতঃ। ইতি মেদিনী ॥

গিরিসুতা (স্ত্রী) পার্ব্বতী। যথা। অবতু বো গিরিসুতা শশিভৃতঃ প্রিয়তমা। বিশতু বো হৃদি সদা ভগবতঃ পদযুগং ॥ ইত্যুদ্ভটঃ ॥

শঃ (পুং) শিবঃ। হিমালয়পর্ব্বতঃ। বৃহস্পতিঃ। ইতি মেদিনী ॥

গিলঃ (পুং) জম্বীরঃ। ইতি শব্দচন্দ্রিকা ॥

গিলগ্রাহঃ (পুং) নক্রঃ। ইতি রাজনির্ঘণ্টঃ ॥

গিলনং (ক্লী) গিরণং। ভক্ষণং। ইত্যমরটীকা ॥

গিলিঃ (স্ত্রী) গিলনং। ইত্যমরটীকা ॥

গিলিতং (ত্রি) ভক্ষিতং। ইত্যমরঃ ॥

গিষ্ণঃ (পুং) সামবেদবেত্তা। গায়কঃ। ইত্যুণাদিকোষঃ ॥

গীঃ [র্] (স্ত্রী) বাক্যং। সরস্বতী। ইত্যমরঃ ॥

গীতং (ক্লী) গানং। ইত্যমরঃ ॥ তস্য লক্ষণং। ধাতুমাতুসমাযুক্তং গীতমিত্যুচ্যতে বুধৈঃ। তত্র নাদাত্মকো ধাতুর্মাতুরক্ষরসঞ্চয়ঃ ॥*॥ তদ্দ্বিবিধং যথা। গীতঞ্চ দ্বিবিধং প্রোক্তং

যন্ত্রগাত্রবিভাগতঃ। যন্ত্রং স্যাদ্বেণুবীণাদি গাত্রন্তু মুখজং মতং॥ অপি চ। নিবদ্ধমনিবদ্ধঞ্চ গীতং দ্বিবিধমুচ্যতে। অনিবদ্ধং ভবেদ্গীতং বর্ণাদিনিয়মং বিনা॥ যদ্বা গমকধাতুভ্যেরনিবদ্ধং বিনাকৃতং। নিবদ্ধঞ্চ ভবেদ্গীতং তালমানরসাঞ্চিতং॥ ছন্দো গমকধাতুভ্যের্বর্ণাদিনিয়মৈঃ কৃতং। *। ঋগ্ভিঃ পাঠ্যমভূদ্গীতং সামভ্যঃ সমপদ্যত॥ যজুর্ভ্যোঽভিনয়া জাতা রসাশ্চাথর্ব্বণঃ স্মৃতাঃ॥ *॥ অথ সংগীতলক্ষণং। তালবাদ্যানুগং গীতং নটীভির্যত্র গীয়তে। নৃত্যস্যানুগতং রঙ্গে তৎ সঙ্গীতকমুচ্যতে॥ *॥ অথ গীতপ্রশংসা। সঙ্গীতকেন রম্যেণ সুখং যস্য ন চেতসি মনুষ্যবৃষভো লোকে বিধিনৈব স বঞ্চিতঃ॥ সংসারদুঃখদগ্ধানামুত্তমানামনুগ্রহাৎ। প্রভুণা শঙ্করেণাত্র গীতবাদ্যং প্রকাশিতং॥ গীতং বাদ্যং তথা নৃত্যং তৌর্য্যত্রিকমিদং মতং। তূর্য্যশব্দো মৃদঙ্গে স্যাৎ মুরজেঽপি চ দৃশ্যতে॥ গীতজ্ঞো যদি গীতেন নাপ্নোতি পরমং পদং। রুদ্রস্যানুচরো ভূত্বা তেনৈব সহ মোদতে॥ গীতেন হরিণা রঙ্গং প্রাপ্নুবন্ত্যপি পক্ষিণঃ। বনাদায়ান্তি ফণিনঃ শিশবো ন রুদন্তি চ॥ কৃতিচমৎকৃতয়ে কিমতঃ পরং ফণিবরোঽশ্বতরো বত পঞ্চমঃ। অপি মৃতাং যদবাপ মদালসাং মধুরগীতবশীকৃতশঙ্করঃ॥ পরমানন্দবিবর্দ্ধনমভিমতফলং বশীকরণং। সকলজনচিত্তহরণং বিমুক্তিবীজং পরং গীতং॥ গীতং পীনপয়োধরা সমদনা বিচিত্রা কথা রম্যং হর্ম্ম্যতলং সুধাংশুকিরণপ্রোদ্দীপিতা যামিনী। চিত্তজ্ঞাঃ সুহৃদঃ সুতাঃ সুমনসো ভক্তাঃ পুনঃ সেবকাঃ শুদ্ধং গীতফলং কবিত্বমতুলং সংসারসারা মতাঃ॥ *॥ শুদ্ধশালগসঙ্কীর্ণভেদাদ্গীতং ত্রিধা মতং। শুদ্ধসূত্রং বিংশতির্যথা॥ এলা সোঽদ্যভবা সপাঢ়করণং তৎপঞ্চতালেশ্বরঃ কৈরাতস্মরচক্রপালবিজয়া গদ্যং ত্রিভঙ্গিস্তথা। ঢেঙ্কীবর্ণসরঃ পুটৌ দ্বিপদিকা মুক্তাবলী মাহকা লম্বো দণ্ডকবর্ত্তনীতি কথিতাঃ শুদ্ধাস্তু তে বিংশতিঃ॥ এলাদীনামেতেষাং বিংশতিসংখ্যকানাং প্রবন্ধগীতানামঙ্গানি ষট্ ভবন্তি। তথা চ। পদং তানো বিরুদশ্চ তালঃ পাঢ়ঃ স্বরস্তথা। এলাদীনাং ষড়ঙ্গানি কথিতানি বিরিঞ্চিনা॥ পৌনরুক্ত্যং ন দেশীয়ে গীতে দোষোঽভিজায়তে। শীঘ্রোচ্চারেণ বর্ণানাং তথা চৈব প্রসারণে॥ লিঙ্গান্ত্যে বিসন্ধৌ চ সংযুক্তাক্ষরমোক্ষণে। পরিবর্ত্তেঽক্ষরাণাঞ্চ হ্রস্বদীর্ঘব্যতিক্রমে॥ *॥ অথ শালগসূত্রং। ধ্রুবকো মণ্ঠকশ্চৈব প্রতিমণ্ঠো নিসারুকঃ। বাসকঃ প্রতিলাভশ্চ তথান্যা চৈকতালিকা॥ যতিশ্চ ঝুমরিশ্চেতি শালগঃ সূত্রমীরিতং॥ *॥ অথ সংকীর্ণসূত্রং। চৈত্রো মঙ্গলকস্তথা ন গণিকা চর্চ্চাতিনাটোম্নবী দোহা স্যাদ্বহুলস্তথা গুরুবলো গীতা চ গোবিন্দস্তথা। হেম্নোকোঽপ্যথ কারিকা ত্রিপদিকেত্যেতানি কামদ্বিষা সংক্ষেপেণ চতুর্দ্দশ প্রকটিতান্যত্রাধমানি

ক্রমাৎ ॥ ইতি সঙ্গীতদামোদরঃ ॥ * ॥ শব্দিতে ত্রি। ইতি মেদিনী ॥

গীতমোদী [ ন্ ] ( পুং ) কিন্নরঃ। ইতি শব্দরত্নাবলী ॥

গীতা ( স্ত্রী ) গ্রন্থবিশেষঃ। ভগবদ্গীতেতি খ্যাতা। সা তু অর্জুনস্য মোহনিবৃত্ত্যর্থং মহাভারতীয়ভীষ্মপর্ব্বান্তর্গতা কর্ম্মোপাসনাজ্ঞানকাণ্ডত্রয়াত্মিকাষ্টাদশাধ্যায়ী শ্রীকৃষ্ণোক্তা। যথা। ভারতে সর্ব্ববেদার্থো ভারতার্থশ্চ কৃৎস্নশঃ। গীতায়ামস্তি তেনেয়ং সর্ব্বশাস্ত্রময়ী মতা ॥ ইয়মষ্টাদশাধ্যায়ী ক্রমাৎ ষট্‌কত্রয়েণ হি। কর্ম্মোপাস্তিজ্ঞানকাণ্ডত্রিতয়াত্মা নিগদ্যতে ॥ ইতি নীলকণ্ঠঃ ॥ গীতা সুগীতা কর্ত্তব্যা কিমন্যৈঃ শাস্ত্রবিস্তরৈঃ। যা স্বয়ং পদ্মনাভস্য মুখপদ্মাৎ বিনিঃসৃতা ॥ ইতি স্বামী ॥ এতদন্যাঃ শ্রীভাগবতোক্তগোপীগীতাধ্যাত্মরামায়ণোক্তরামগীতাশ্বমেধিকপর্ব্বোক্তে ব্রাহ্মণগীতানুগীতে দেবীভাগবতোক্তভগবতীগীতা শিবগীতা ইত্যাদ্যাঃ সন্তি ॥

গীতাসারঃ ( পুং ) অর্জ্জুনং প্রতি শ্রীকৃষ্ণোক্তমুক্ত্যর্থাষ্টাঙ্গাদিযোগঃ। যথা। শ্রীভগবানুবাচ। গীতাসারং প্রবক্ষ্যামি অর্জ্জুনায়োদিতং পুরা। অষ্টাঙ্গযোগং মুক্ত্যর্থং সর্ব্ববেদান্তসারগং ॥ আত্মলাভঃ পরো নান্য আত্মা দেহাদিবর্জ্জিতঃ। রূপাদিমান্ হি দেহোঽতঃ করণত্বাদি লোচনং ॥ করণত্বাম্মনোঽধীনো ন প্রাণোঽচেতনো যতঃ। বিজ্ঞানরহিতঃ প্রাণঃ সুষুপ্তে হি প্রতীয়তে ॥ নাহমাত্মা চ দুঃখাদিসংসারাভিসমন্বয়াৎ। বিধূম ইব দীপ্তার্চ্চিরাদিত্য ইব দীপ্তিমান্ ॥ বৈদ্যুতোঽগ্নিরিবাকাশে হৃৎস্থো জ্ঞেয়াত্মনাত্মনি। শ্রোত্রাদীনি ন পশ্যন্তি স্বং স্বমাত্মানমাত্মনা ॥ সর্ব্বজ্ঞঃ সর্ব্বদর্শী চ ক্ষেত্রজ্ঞস্তানি পশ্যতি। স্বানাস্ত মনসা রশ্মীন্ যদা সম্যঙ্‌নিযচ্ছতি ॥ তদা প্রকাশতে হ্যাত্মা ঘটে দীপো জ্বলন্নিব। জ্ঞানমুৎপদ্যতে পুংসাং ক্ষয়াৎ পাপস্য কর্ম্মণঃ ॥ যথাদর্শতলপ্রখ্যে পশ্যত্যাত্মানমাত্মনি। ইন্দ্রিয়াণীন্দ্রিয়ার্থাংশ্চ মহাভূতানি পঞ্চ চ ॥ মনো বুদ্ধিমহঙ্কারমব্যক্তং পুরুষং তথা। প্রসংখ্যায় পরাবাপ্তৌ বিমুক্তো বন্ধনৈর্ভবেৎ ॥ ইন্দ্রিয়গ্রামমখিলং মনস্যভিনিবেশ্য চ। মনশ্চৈবাপ্যহঙ্কারে প্রতিষ্ঠাপ্য চ পাণ্ডব ॥ অহঙ্কারং তথা বুদ্ধৌ বুদ্ধিঞ্চ প্রকৃতাবপি। প্রকৃতিং পুরুষে স্থাপ্য পুরুষং ব্রহ্মণি ন্যসেৎ ॥ অহং ব্রহ্মপরং জ্যোতিঃ প্রসংখ্যায় বিমুচ্যতে। দ্বিদ্বাদশেভ্যঃ খ্যাতো যঃ পুরুষঃ পঞ্চবিংশকঃ ॥ বিবেকাৎ কেবলীভূতঃ ষড়্‌বিংশমনুপশ্যতি। নবদ্বারমিদং গেহং ত্রিস্থূণং পঞ্চসাক্ষিকং ॥ ক্ষেত্রজ্ঞাধিষ্ঠিতং বিদ্বান্ যো বেদ স বরঃ কবিঃ। অশ্বমেধসহস্রাণি বাজপেয়শতানি চ ॥ জ্ঞানযজ্ঞস্য সর্ব্বাণি কলাং নার্হন্তি ষোড়শীং। ইতি গারুড়ে ২৩৩ অধ্যায়ঃ ॥ * ॥ শ্রীভগবানুবাচ। যমাশ্চ নিয়মাঃ পার্থ আসনং প্রাণসংযমঃ। প্রত্যাহারস্তথা ধ্যানং ধারণার্জ্জুন সপ্তমী ॥ সমাধিরয়মষ্টাঙ্গো যোগ উক্তো বিমুক্তয়ে। কর্ম্মণা

মনসা বাচা সর্ব্বভূতেষু সর্ব্বদা ॥ অক্লেশ-জননং প্রোক্তং ভূতানাং যদহিংসনং। অহিংসা পরমো ধর্ম্মো, হ্যহিংসা পরমং সুখং। বিধিনা যা ভবেদ্ধিংসা ত্বহিংসা সা প্রকীর্ত্তিতা॥ যথা নাগপদেহন্যানি পদানি পদগামিনাং। সর্ব্বাণ্যেবাপিধীয়ন্তে পদজাতানি কৌঞ্জরে॥ এবং সর্ব্বং হি হিংসায়াং ধর্ম্মার্থমপিধীয়তে। যদ্ভূতহিত-মত্যন্তং বচঃ সত্যস্য লক্ষণং॥ সত্যং ব্রুয়াৎ প্রিয়ং ব্রুয়াৎ ন ব্রুয়াৎ সত্য-মপ্রিয়ং। প্রিয়ঞ্চ নানৃতং ব্রুয়াৎ এষ ধর্ম্মঃ সনাতনঃ॥ যত্র দ্রব্যাপহরণং চৌর্য্যাদ্বাথ বলেন বা। স্তেয়ং তস্যানাচরণমস্তেয়ং ধর্ম্মসাধনং॥ কর্ম্মণা মনসা বাচা সর্ব্বা-বস্থাসু সর্ব্বদা। সর্ব্বত্র মৈথুনত্যাগং ব্রহ্ম-চর্য্যং প্রচক্ষতে॥ দ্রব্যাণামপ্যনাদান-মাপৎস্বপি যথেচ্ছয়া। অপরিগ্রহমিত্যাহু-স্তং প্রযত্নেন বর্জ্জয়েৎ॥ দ্বিধা শৌচং মৃজ্জলাভ্যাং বাহ্যং ভাবাদথান্তরং। যদৃচ্ছালাভতস্তুষ্টিঃ সন্তোষঃ সুখলক্ষণং॥ মনসশ্চেন্দ্রিয়াণাঞ্চ ঐকাগ্র্যং পরমং তপঃ। শরীরশোষণং বাপি কৃচ্ছ্রচান্দ্রায়ণা-দিভিঃ॥ বেদান্তশতরুদ্রীয়প্রণবাদিজপং বুধাঃ। সত্ত্বশুদ্ধিকরং পুংসাং স্বাধ্যায়ং পরিচক্ষতে॥ স্তুতিস্মরণপূজাদিবাঙ্মনঃ-কায়কর্ম্মভিঃ। সুনিশ্চলা হরৌ ভক্তি-রেতদীশ্বরচিন্তনং॥ আসনং স্বস্তিকং প্রোক্তং পদ্মমর্দ্ধাসনং তথা। প্রাণঃ স্বদেহজো বায়ুরায়ামস্তন্নিরোধনং॥ প্রাণা-পাননিরোধস্তু প্রাণায়াম উপস্থিতঃ। ইন্দ্রিয়াণাং বিচরতাং বিষয়েষু স্বভাবতঃ। নিয়মঃ প্রোচ্যতে সদ্ভিঃ প্রত্যাহারস্তু পাণ্ডব॥ মূর্ত্তামূর্ত্তব্রহ্মরূপচিন্তনং ধ্যান-মুচ্যতে। যোগারম্ভে মূর্ত্তহরিমমূর্ত্তমথ চিন্তয়েৎ॥ নাভিকন্দে স্থিতং নালং দশাঙ্গুলসমাযুতং। নালে চাষ্টদলং পদ্মং দ্বাদশাঙ্গুলবিস্তৃতং॥ সকর্ণিকে কেশরালে সূর্য্যসোমাগ্নিমণ্ডলং। অগ্নিমণ্ডলমধ্যস্থো বাসুদেবশ্চতুর্ভুজঃ॥ শঙ্খচক্রগদাপদ্মযুক্তঃ কৌস্তুভসংযুতঃ। বনমালী কৌস্তুভেন যুতোহহং ব্রহ্মমুক্ত ওঁ॥ ধারণেত্যুচ্যতে চেয়ং ধার্য্যতে যন্মনোময়ে। প্রাগ্ভ্রুভ্যাং হৃদয়ে চাপু তৃতীয়া চ তথোরসি॥ কণ্ঠে মুখে নাসিকাগ্রে নেত্রভ্রূমধ্যমূর্দ্ধসু। কিঞ্চিত্তস্মাৎ পরস্মিংশ্চ ধারণাদেশ-কীর্ত্তিতাঃ॥ অহং ব্রহ্মেত্যবস্থানং সমাধিরভিধীয়তে। একাকারঃ সমাধিঃ স্যাদ্দেশলক্ষণবর্জ্জিতঃ॥ ইতি গারুড়ে ২৩৪ অধ্যায়ঃ॥ *॥ শ্রীভগবানুবাচ। ব্রহ্মগীতাং প্রবক্ষ্যামি যাং জ্ঞাত্বা মুচ্যতে ভবান্। অহং ব্রহ্মাস্মীতি বাক্যাজ্জ্ঞানা-ন্মোক্ষো ভবেন্নৃণাং॥ বাক্যজ্ঞানং ভবেজ্-জ্ঞানাদহং ব্রহ্মপদার্থয়োঃ। পদদ্বয়ার্থৌ দ্বিবিধৌ বাচ্যৌ লক্ষ্যৌ স্মৃতৌ বুধৈঃ॥ বাচ্যৌ দশবলো জ্ঞেয়ৌ লক্ষ্যৌ শুদ্ধৌ প্রকীর্ত্তিতৌ। প্রাণপিণ্ডাত্মকার্য্যেণ চেতনং শরণন্তু যৎ॥ তথা বৈ দেবপর্য্যন্তমহং শব্দেন নোচ্যতে। প্রত্যগুপমদ্বিতীয়মহ শব্দেন ভণ্যতে॥ অদ্বয়ানন্দচৈতন্যং পরোক্ষসহিতং পরং। প্রাণপিণ্ডাত্মকাপার্থ

সদ্বিতীয়বিভাগকং ॥ ত্যাগেন প্রত্যক্চৈতন্যভাগো লক্ষ্যেত চাহ মা। তথা ব্রহ্মপদেনৈব প্রাণপিণ্ডাত্মকারণা॥ বিদ্যাপরোক্ষভাগে চ পরিত্যাগে চ লক্ষ্যতে। অদ্বয়ানন্দচৈতন্যভাগ এবং বিচিন্তয়েৎ॥ অহং পদেন চৈতন্যপ্রত্যগ্‌ব্রহ্মপদেন তু। অদ্বয়ানন্দচৈতন্যং লক্ষয়িত্বা স্থিতস্য চ॥ ব্রহ্মাহমস্ম্যহং ব্রহ্ম অহং ব্রহ্মপদার্থয়োঃ। অহং ব্রহ্মাস্মি বাক্যাচ্চ আত্মভূতিফলাত্মকং॥ একত্বজ্ঞানঞ্চ ভবেদ্বেদান্তাদ্‌গুরুতো ধ্রুবং। জ্ঞানাদজ্ঞানতাকার্য্যনিবৃত্তের্মুক্ত একতঃ॥ ইতি গারুড়ে ২৩৫ অধ্যায়ঃ॥ *॥ শ্রীভগবানুবাচ। সম্মায়িব্রহ্মতঃ খং স্যাৎ খান্মরুত্বাং স্ততোঽনলঃ। অগ্নেরাপস্ততঃ ধ্বী প্রপঞ্চীকৃতভূতকং॥ ততঃ সপ্তদশং লিঙ্গং পঞ্চ কর্ম্মেন্দ্রিয়াণি চ। বাক্পাণিপাদং পায়ুশ্চ উপস্থমথ ধীন্দ্রিয়ং॥ শ্রোত্রং ত্বক্‌চক্ষুষী জিহ্বা ঘ্রাণং স্যাৎ পঞ্চ বায়বঃ। প্রাণোঽপানঃ সমানশ্চ ব্যানস্তূদান এব চ॥ মনো ধীরন্তঃকরণং স্যাত্মনঃ সংশয়াত্মকং। বুদ্ধির্নিশ্চয়রূপা তু এতৎসূক্ষ্মশরীরকং॥ হিরণ্যগর্ভমাত্মীয়ং ভূততৎকার্য্যলিঙ্গকং। পঞ্চীকৃতানি ভূতানি অপঞ্চীকৃতভূততঃ॥ পঞ্চীকৃতেভ্যো ভূতেভ্যো ব্রহ্মাণ্ডং সমজায়ত। লোকপ্রসিদ্ধং স্থূলাক্ষং শরীরচরণাদিমৎ॥ পঞ্চীকৃতানি ভূতানি তৎকার্য্যঞ্চাহমেব চ। সর্ব্বং শরীরজাতঞ্চ প্রাণিনাং স্থূলমীরিতং॥ তীরাদুপরতাত্মানঃ শরীরং প্রোচ্যতে বুধৈঃ। দেহদ্বয়াভিমানী চ ত্বমথো জীব একতঃ॥ সচ্ছব্দবাচ্যং ব্রহ্মৈব প্রবিষ্টং দেহয়োর্দ্বয়োঃ। জলার্কবদ্‌ঘটখবজ্জীবঃ প্রাণাদিধারণাৎ॥ জাগ্রৎস্বপ্নসুষুপ্তীনাং সাক্ষী জীবঃ স চ স্মৃতঃ। জাগ্রৎস্বপ্নসুষুপ্তাখ্যৈর্ব্যতিরিক্তশ্চ নির্গুণঃ॥ নির্গতাবয়বোৎসর্গো নিত্যশুদ্ধস্বভাবকঃ। পরমাত্মৈব সজ্জাগ্রৎস্বপ্নাদৌ সন্নিধানতঃ॥ অন্তঃকরণরাগেশ্চ অন্তঃকরণসংস্থিতঃ। জাগ্রৎস্বপ্নসুষুপ্তীশ্চ পশ্যতোঽবিকৃতঃ সদা॥ ফলং ক্রিয়াকারকয়োর্জ্জাগ্রদাদীন্ বদাম্যহং। ইন্দ্রিয়ৈরনুবিজ্ঞানং জাগ্রৎস্থানমুদীরিতং॥ জাগ্রৎসংস্কারসম্ভূতঃ প্রত্যয়ো বিষয়ান্বিতঃ। স্বপ্নং প্রসুপ্তিশরণোপসংহারোঽধিপঃ স্থিতঃ॥ ব্রহ্মকারণরূপেণ বটস্য কণিকাত্মনা। ক্রমতে ক্রমতো জীবো জাগ্রদাদীন্ স পশ্যতি॥ সমাধ্যারম্ভকালে তু পূর্ব্বমেবাবধারয়েৎ। মুমুক্ষুঃ পশ্চাৎ সংজাতে অন্তঃকরণনিশ্চলে॥ বিলাপয়েৎ ক্ষেত্রজাতং ক্ষেত্রজ্ঞং পরিশেষয়েৎ। পঞ্চীকৃতেভ্যো ভূতেভ্যঃ অণ্ডাদিব্যতিরিক্তকং॥ যথা মৃদো ঘটো ভিন্নো নাস্তি তৎকার্য্যতস্তথা। পঞ্চীকৃতানি ভূতানি অপঞ্চীকৃতভূততঃ॥ সমষ্টিব্যতিরেকেণ শিষ্টং সূক্ষ্মশরীরকং। অপঞ্চীকৃতভূতেভ্যো ন লিঙ্গং ব্যতিরিক্তকং॥ পৃথ্বী বারি বিনা নাস্তি বারি নাস্তি চ তেজসা। তেজশ্চ বায়ুনা নাস্তি বায়ুঃ খেন বিনা ন হি॥ সদ্‌ব্রহ্মণা চ খং নাস্তি শুদ্ধব্রহ্ম বিনা চ সৎ। শুদ্ধভাবাত্তথা জাগ্রৎস্বপ্নাদীনামসম্ভবে॥ জীবত্ব-

বর্জ্জিতঃ প্রত্যগাত্মা বৈ তন্মুরূপকঃ। নিত্যশুদ্ধবুদ্ধমুক্তং সত্যং ব্রহ্মাদ্বিতীয়কং॥ তত্ত্বং পদার্থৌ শিষ্টৌ তত্রাকারো ব্রহ্মকারকঃ। উকারশ্চ অকারশ্চ মকারোঽহং দৃগদ্বয়ঃ॥ ব্রহ্মাহমস্ম্যহং ব্রহ্মজ্ঞানমজ্ঞানমর্দ্দনং। অয়মাত্মা ব্রহ্মজ্যোতির্বিজ্ঞানানন্দরূপকং॥ সত্যজ্ঞানমনন্তঃ স তত্ত্বমসি শ্রুতীরিতং। অহং ব্রহ্মাস্মি ব্রহ্মাহং সর্ব্বপ্রাণিষু সর্ব্বগং॥ যোঽসাবাদিত্যপুরুষঃ সোঽসাবহমনাদিমৎ। গীতাসারোঽর্জ্জুনায়োক্তো যেন ব্রহ্মণি বৈ লয়ঃ॥ ইত্যাদিমহাপুরাণে গারুড়ে গীতাসারে ২৩৬ অধ্যায়ঃ॥

গীতিঃ (স্ত্রী) গানং। আর্য্যাচ্ছন্দোবিশেষঃ। ইতি মেদিনী॥

গীরথঃ (পুং) বৃহস্পতিঃ। ইতি ত্রিকাণ্ডশেষঃ॥

গীর্ণঃ (ত্রি) স্তুতঃ। ইত্যমরটীকায়াং ভরতঃ॥

গীর্ণিঃ (স্ত্রী) গিলনং। ইত্যমরঃ॥ স্তুতিশ্চ। গীর্ণশব্দদর্শনাৎ॥

গীর্দ্দেবী (স্ত্রী) সরস্বতী। ইতি শব্দরত্নাবলী॥

গীর্লতা (স্ত্রী) মহাজ্যোতিষ্মতী। ইতি রাজনির্ঘণ্টঃ॥

গীর্ব্বাণঃ (পুং) দেবতা। ইত্যমরঃ॥

গীর্ব্বাণকুসুমং (ক্লী) লবঙ্গং। ইতি রাজনির্ঘণ্টঃ॥

গীষ্পতিঃ (পুং) বৃহস্পতিঃ। ইত্যমরঃ॥ পণ্ডিতঃ। ইতি শব্দরত্নাবলী॥ অস্য রূপান্তরে গীর্পতিঃ গীঃপতিঃ। ইতি মুগ্ধবোধং॥

গু ও ধ্বনৌ। ইতি কবিকল্পদ্রুমঃ॥ গুবতে। ইতি দুর্গাদাসঃ॥

গু শি ও বিঠোৎসর্গে। ইতি কবিকল্পদ্রুমঃ॥ শি গুবতি অগুবীৎ। ও গুণঃ। ইতি দুর্গাদাসঃ॥

গুগ্গুলঃ (পুং) গুগ্গুলুঃ। ইত্যমরটীকায়াং ভরতঃ॥

গুগ্গুলুঃ (পুং) রক্তশোভাঞ্জনবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥ স্বনামখ্যাতবৃক্ষঃ। স তু গোমূত্রোদ্ভবঃ। যথা। গোরোচনায়া মঙ্গল্যাঃ সংজাতাঃ সর্ব্বকামিকাঃ। গুগ্গুলুস্তু ততো জাতো গোমূত্রাচ্চুভদর্শনঃ॥ ইতি বহ্নিপুরাণে বৈষ্ণবধর্ম্মে শুদ্ধিব্রতনামাধ্যায়ঃ॥ অস্য নির্য্যাসঃ সুগন্ধিদ্রব্যং। তৎপর্য্যায়ঃ। কুম্ভং ২ উলূখলকং ৩ কৌশিকঃ ৪ পুরঃ ৫। ইত্যমরঃ॥ কুম্ভোলূঃ ৬ খলকং ৭ কুম্ভোলূখলকং ৮ গুগ্গুলঃ ৯। ইতি ভরতঃ॥ জটায়ুঃ ১০ কালনির্য্যাসঃ ১১ দেবধূপঃ ১২ সর্ব্বসহঃ ১৩ মহিষাক্ষঃ ১৪ পলঙ্কষা ১৫। ইতি রত্নমালা॥ যবনদ্বিষ্টঃ ১৬ ভবাভীষ্টঃ ১৭ নিশাটকঃ ১৮ জটালঃ ১৯ পুটঃ ২০ ভূতহরঃ ২১ শিবঃ ২২ শাম্ভবঃ ২৩ দুর্গঃ ২৪ যাতুঘ্নঃ ২৫ মহিষাক্ষকঃ ২৬ দেবেষ্টঃ ২৭ মরুদিষ্টঃ ২৮ রক্ষোহা ২৯ রূক্ষগন্ধকঃ ৩০ দিব্যং ৩১। অস্য গুণাঃ। কটুত্বং। তিক্তত্বং। উষ্ণত্বং। কফমারুতকাসক্রিমিবাতোদরক্লেদশোকার্শোনাশিত্বং। রসায়নত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ দীপনত্বং। তীক্ষ্ণত্বং। কষায়ত্বং। মেদঃকুষ্ঠনাশিত্বং।

পিত্তদাতৃত্বং। লঘুত্বঞ্চ। ইতি রাজবল্লভঃ॥ বিশদত্বং। সারকত্বং। রূক্ষত্বং। পাকে কটুত্বং। ভগ্নসন্ধানকারিত্বং। বৃষ্যত্বং। সূক্ষ্মত্বং। স্বর্য্যত্বং। পিচ্ছিলত্বং। বলকারিত্বং। ব্রণমেহাশ্মবাতামবাতপিড়কাগ্রন্থিগণ্ডমালানাশিত্বঞ্চ॥ * ॥ মাধুর্য্যাচ্ছমরেদ্বাতং কষায়ত্বাচ্চ পিত্তহা। তিক্তত্বাৎ কফজিত্তেন গুগ্‌গুলুঃ সর্ব্বদোষহা॥ স তু পঞ্চধা যথা। মহিষাক্ষো মহানীলঃ কুমুদঃ পদ্ম ইত্যপি। হিরণ্যঃ পঞ্চমো জ্ঞেয়ো গুগ্‌গুলোঃ পঞ্চজাতয়ঃ॥ তেষাং রূপাণি যথা। ভৃঙ্গাঞ্জনসবর্ণস্তু মহিষাক্ষ ইতি স্মৃতঃ। মহানীলস্তু বিজ্ঞেয়ঃ স্বনামসমলক্ষণঃ॥ কুমুদঃ কুমুদাভঃ স্যাৎ পদ্মো মাণিক্যসন্নিভঃ। হিরণ্যাখ্যস্তু হেমাভঃ পঞ্চানাং লিঙ্গমীরিতং॥ এষাং প্রাণিবিশেষে প্রয়োগো যথা। মহিষাক্ষমহানীলৌ গজেন্দ্রাণাং হিতাবুভৌ। হয়ানাং কুমুদঃ পদ্মঃ স্বস্ত্যারোগ্যকরৌ পরৌ॥ বিশেষেণ মনুষ্যাণাং কনকঃ পরিকীর্ত্তিতঃ। কদাচিন্মহিষাক্ষস্তু মতঃ কৈশ্চিন্নৃণামপি॥ নূতনগুগ্‌গুলো রূপং যথা। স্নিগ্ধকাঞ্চনসঙ্কাশঃ পক্বজম্বুফলোপমঃ। নূতনো গুগ্‌গুলুঃ প্রোক্তঃ সুগন্ধির্যস্তু পিচ্ছিলঃ॥ পুরাতনস্য রূপং যথা। শুষ্কো দুর্গন্ধিকশ্চৈব ত্যক্তপ্রকৃতবর্ণকঃ। পুরাণঃ স তু বিজ্ঞেয়ো গুগ্‌গুলুর্ব্বীর্য্যবর্জ্জিতঃ॥ ইতি ভাবপ্রকাশঃ॥ * ॥ অস্য স্থানবিশেষে জন্মাদিকথনং। যথা। জায়ন্তে পুরপাদপা মরুভুবি গ্রীষ্মেঽর্কসন্তাপিতাঃ শীতার্ত্তাঃ শিশিরেঽপি গুগ্‌গুলুরসং মুঞ্চন্তি তে পঞ্চধা। হেমাভং মহিষাক্ষতুল্যমপরং সৎপদ্মরাগোপমং ভৃঙ্গাভং কুমুদদ্যুতিঞ্চ বিধিনা গ্রাহ্যা পরীক্ষা ততঃ॥ বহ্নৌ জ্বলন্তি তপনে বিলয়ং প্রয়ান্তি ক্লিদ্যন্তি কোঞ্চসলিলে পয়সঃ সমানাঃ। গ্রাহ্যাঃ শুভাঃ পরিহরেচ্চিরকালজাতানঙ্গারবর্ণসমপূযবিগন্ধবর্ণান্॥ ইতি প্রয়োগামৃতং॥ পকস্যাস্য পূর্ণবীর্য্যত্বং মাসত্রয়পর্য্যন্তং তিষ্ঠতি। ইতি পরিভাষা॥

**গুচ্ছঃ** (পুং) স্তবকঃ। পুষ্পাদির থলুয়া ইতি ভাষা। স্তম্বঃ। তৃণাদির গোছা ইতি ভাষা। দ্বাত্রিংশদযষ্টিকহারঃ। বত্রিশনর হার ইতি ভাষা। কলাপঃ। ময়ূরের পাখা ইতি ভাষা। ইতি মেদিনী॥ মুক্তাহারঃ। ইতি রন্তিদেবঃ॥

**গুচ্ছকং** (ক্লী) গ্রন্থিপর্ণং। ইতি ভাবপ্রকাশঃ॥

**গুচ্ছকঃ** (পুং) স্তবকঃ। ইত্যমরঃ॥ তৎপর্য্যায়ঃ। গুলঞ্চঃ ২ স্তম্বঃ ৩ কুসুমোচ্চয়ঃ ৪ গুচ্ছঃ ৫। ইতি রাজনির্ঘণ্টঃ॥ গুৎসঃ ৬ গুৎসকঃ ৭। ইত্যমরটীকায়াং ভরতঃ॥ রীঠাকরঞ্জঃ। ইতি রাজনির্ঘণ্টঃ॥ স্বার্থে কপ্রত্যয়াৎ গুচ্ছশব্দার্থোঽপ্যত্র॥

**গুচ্ছকণিশঃ** (পুং) রাগীধান্যং। ইতি রাজনির্ঘণ্টঃ॥

**গুচ্ছকরঞ্জঃ** (পুং) করঞ্জবিশেষঃ। তৎপর্য্যায়ঃ। স্নিগ্ধদলঃ ২ গুচ্ছপুষ্পকঃ ৩ নন্দী ৪ গুচ্ছী ৫ সানন্দঃ ৬ দন্তধাবনঃ ৭। অস্য গুণাঃ। কটুত্বং। তিক্তত্বং। উষ্ণত্বং। বিষবাতার্ত্তি-

কণ্ডুবিচর্চ্চিকাকুষ্ঠস্পর্শত্বগ্দোষনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

গুচ্ছদন্তিকা (স্ত্রী) কদলী। ইতি রাজনির্ঘণ্টঃ ॥

গুচ্ছপত্রঃ (পুং) তালবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

গুচ্ছপুষ্পঃ (পুং) সপ্তচ্ছদবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

গুচ্ছপুষ্পকঃ (পুং) রীঠাকরঞ্জঃ। গুচ্ছকরঞ্জঃ। ইতি রাজনির্ঘণ্টঃ ॥

গুচ্ছপুষ্পী (স্ত্রী) ধাতকী। শিমৃড়ীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

গুচ্ছফলঃ (পুং) রীঠাকরঞ্জঃ। রাজাদনী। কতকঃ। ইতি রাজনির্ঘণ্টঃ ॥

গুচ্ছফলা (স্ত্রী) অগ্নিদমনী। কাকমাচী। নিষ্পাবী। দ্রাক্ষা। কদলী। ইতি রাজনির্ঘণ্টঃ ॥

গুচ্ছবধ্রা (স্ত্রী) গুণ্ডালাবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

গুচ্ছমূলিকা (স্ত্রী) গুণ্ডাসিনীতৃণং। ইতি রাজনির্ঘণ্টঃ ॥

গুচ্ছার্দ্ধঃ (পুং) চতুর্ব্বিংশতিযষ্টিকো হারঃ। ইত্যমরঃ ॥

গুচ্ছালঃ (পুং) ভূতৃণং। ইতি রাজনির্ঘণ্টঃ ॥

গুচ্ছাহ্বকন্দঃ (পুং) গুলঞ্চকন্দঃ। ইতি রাজনির্ঘণ্টঃ ॥

গুচ্ছী (স্ত্রী) গুচ্ছকরঞ্জঃ। ইতি রাজনির্ঘণ্টঃ ॥

গুজ কূজনে। ইতি কবিকল্পদ্রুমঃ ॥ পঞ্চমস্বরী। গোজতি। কূজনমব্যক্তশব্দঃ। ইতি দুর্গাদাসঃ

গুজ ই কূজনে। ইতি কবিকল্পদ্রুমঃ ॥ পঞ্চমস্বরী। ই গুঞ্জ্যতে। কূজনমব্যক্তশব্দঃ। গুঞ্জতি ভ্রমরঃ কুঞ্জে। ইতি দুর্গাদাসঃ ॥

গুজ শি ধ্বনৌ। ইতি কবিকল্পদ্রুমঃ ॥ শি গুজতি অগুজীৎ জুগোজ। ইতি দুর্গাদাসঃ ॥

গুজ্জরী (স্ত্রী) রাগিণীবিশেষঃ। অস্যা রূপং যথা। শ্যামা সুকেশী মলয়দ্রুমাণাং মৃদুল্লসৎপল্লবতল্পযাতা। শ্রুতেঃ স্বরাণাং দধতী বিভাগং তন্ত্রীমুখাদ্দক্ষিণগুজ্জরীয়ং ॥ অস্যাঃ কালনিয়মো যথা। নাটো গৌড়ো বড়ারী চ গুজ্জরী দেশিরেবচ। পূর্ব্বাহ্নে গানমেতেষাং নিষিদ্ধমিতি তদ্বিদঃ ॥ ইতি সঙ্গীতদামোদরঃ ॥ মতভেদেন পূর্ব্বাহ্নেঽপি গীয়তে ॥

গুঞ্জঃ (পুং) গুচ্ছঃ। পুষ্পস্তবকঃ। ইতি শব্দরত্নাবলী ॥

গুঞ্জকৃৎ (পুং) ভ্রমরঃ। ইতি শব্দচন্দ্রিকা ॥

গুঞ্জনং (ক্লী) গুন্‌গুন্‌ধ্বনিঃ। ভ্রমরাদিশব্দঃ। কূজনার্থগুঞ্জধাতোর্ভাবেঽনট্‌প্রত্যয়ঃ ॥

গুঞ্জা (স্ত্রী) লতাবিশেষঃ। কুঁচ ইতি ভাষা। তৎপর্য্যায়ঃ। কাকচিঞ্চী ২ কৃষ্ণলা ৩। ইত্যমরঃ ॥ সাঙ্গুষ্ঠা ৪ রক্তিকা ৫ কাকণন্তিকা ৬ কাকাদনী ৭ কাকতিক্তা ৮ কাকজঙ্ঘা ৯ শিখণ্ডিনী ১০। ইতি রত্নমালা ॥ চূড়ামণিঃ ১১ সৌম্যা ১২ শিখণ্ডী ১৩ অরুণা ১৪ তাম্রিকা ১৫ শীতপাকী ১৬ উচ্চটা ১৭ কৃষ্ণচূড়িকা ১৮ রক্তা ১৯ কাম্বোজী ২০ ভিল্লভূষণা ২১ বন্যা ২২ শ্যামলচূড়া ২৩ কাকচিঞ্চিকা ২৪। অস্যা

বীজগুণাঃ। তীক্ষ্ণত্বং। উষ্ণত্বং। ইতি রাজনির্ঘণ্টঃ॥ কুষ্ঠব্রণনাশিত্বং। ইতি রাজবল্লভঃ॥ অস্যাঃ শিফাগুণঃ। বান্তিকারিত্বং। শূলবিষনাশিত্বঞ্চ। বশ্যকর্ম্মণি শ্বেতা প্রশস্তা। ইতি রাজনির্ঘণ্টঃ॥ *॥ ত্রিযবপরিমাণং। রতি ইতি ভাষা। ইতি বৈদ্যকং॥ চতুর্ধান্যপরিমাণং। ইতি শুভঙ্করঃ॥ গোধূমদ্বয়মানং। ইতি রাজনির্ঘণ্টঃ॥ পটহঃ। কলধ্বনিঃ। ইতি মেদিনী॥ মদিরাগৃহং। ইতি শব্দরত্নাবলী॥ চর্চ্চা। ইতি ত্রিকাণ্ডশেষঃ॥

গুঞ্জিকা (স্ত্রী) গুঞ্জা। ত্রিযবপরিমাণং। ইতি শব্দচন্দ্রিকা॥

গুঞ্জিতং (ক্লী) গুঞ্জনং। যথা। ন গুঞ্জিতং তন্ন জহার যন্মনঃ॥ ইতি ভট্টিঃ॥

গুটিকা (স্ত্রী) বটিকা। গুলি ইতি বড়ি ইতি চ ভাষা। যথা গুটিকাপাতাদিনা ব্যঞ্জনমিতি দায়ভাগঃ॥

গুঠ ই ক বেষ্টে। ইতি কবিকল্পদ্রুমঃ॥ হ্রস্বী। ই ক গুণ্ঠয়তি অজুগুণ্ঠৎ। ইতি দুর্গাদাসঃ॥

গুড ই ক বেষ্টে। রক্ষে। ইতি কবিকল্পদ্রুমঃ॥ পঞ্চমস্বরী। ই ক গুণ্ডয়তি। অনেকার্থত্বাচ্চূর্ণীকরণেঽপি। গুণ্ডয়তি হিঙ্গুলং লোকঃ। ইতি দুর্গাদাসঃ॥

গুড শি রক্ষে। ব্যাঘাতে। ইতি কবিকল্পদ্রুমঃ॥ শি গুড়তি অগুড়ীৎ। ইতি দুর্গাদাসঃ॥

গুড়ঃ (পুং) গোলঃ। হস্তিসন্নাহঃ। ইতি মেদিনী॥ গ্রাসঃ। ইতি হেমচন্দ্রঃ॥ কার্পাসী। ইতি রাজনির্ঘণ্টঃ॥ ইক্ষুপাকঃ। ইত্যমরঃ॥ তস্য পর্য্যায়ঃ। ইক্ষুসারঃ ২ মধুরঃ ৩ রসপাকজঃ ৪ খণ্ডজঃ ৫ দ্রবজঃ ৬ সিদ্ধঃ ৭ মোদকঃ ৮ অমৃতসারজঃ ৯ শিশুপ্রিয়ঃ ১০ সিতাদিঃ ১১ অরুণঃ ১২ রসজঃ ১৩। ইতি রাজনির্ঘণ্টঃ॥ ইক্ষুরসক্বাথঃ ১৪ গণ্ডোলঃ ১৫ মধুবীজকঃ ১৬। ইতি বৈদ্যকং॥ গণ্ডোলং ১৭ গুলঃ ১৮ স্বাদুখণ্ডঃ ১৯। ইতি শব্দরত্নাবলী॥ স্বাদুঃ ২০। ইতি ত্রিকাণ্ডশেষঃ॥ অস্য গুণাঃ। বৃষ্যত্বং। স্নিগ্ধত্বং। গুরুত্বং। বাতনাশিত্বং। মূত্রশোধনত্বং। নাতিপিত্তহরত্বং। মেদঃকফকৃমিবলপ্রদত্বঞ্চ। ইতি রাজবল্লভঃ॥ মধুরত্বং। ক্ষারত্বং। উষ্ণত্বং। কফনাশিত্বং। পিত্তরক্তে অহিতত্বং। জীর্ণশ্চৈব রসায়নঃ॥ পুরাতনস্য তস্য গুণাঃ। পিত্তপবনার্ত্তিত্রিদোষপাণ্ডুপ্রমেহশ্রমনাশিত্বং। দ্রব্যান্তরসংযোগেন বিশেষতো জ্বরনাশিত্বং। রুচিকারিত্বং। হৃদ্যত্বং। সন্তাপশান্তিপ্রদত্বং। বিণ্মূত্রাময়শোধনত্বং। অগ্নিজননত্বং। স্নিগ্ধত্বং স্বাদুতরত্বং। লঘুত্বং। পথ্যত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ অধিকগুণত্বং। রক্তপ্রসন্নবলকারিত্বং। মধুরত্বঞ্চ। ইতি রাজবল্লভঃ॥ যাবনালরসপাকভবগুড়গুণাঃ। ক্ষারত্বং। কটুত্বং। মধুরত্বং। কফবাতনাশিত্বং। পিত্তপ্রদত্বং। সততনিষেবণেন কণ্ডূতিকুষ্ঠজননত্বং। জনন ইত্যত্র শমন ইতি কচিৎ পাঠঃ। অস্রবিদাহদায়িত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ *॥ ইক্ষো রসো যঃ সংপক্বো

জায়তে লোষ্টবদ্দৃঢ়ঃ। স গুড়ো গৌড়-দেশে তু মৎস্যণ্ডোব গুড়ো মতঃ॥ শ্লেষ্মাণ-মাশু বিনিহন্তি সদার্দ্রকেণ পিত্তং নিহন্তি চ তদেব হরীতকীভিঃ। শুণ্ঠ্যা সমং হরতি বাতমশেষমিত্থং দোষত্রয়ক্ষয়করায় নমো গুড়ায় ॥ ইতি ভাবপ্রকাশঃ ॥

গুড়কঃ ( পুং ) গুড়দ্বারা পক্বৌষধবিশেষঃ। অস্য পূর্ণতেজঃ ষণ্মাসপর্য্যন্তং তিষ্ঠতি। ইতি পরিভাষা ॥

গুড়করী (স্ত্রী) রাগিণীবিশেষঃ। ইতি হলায়ুধঃ॥

গুড়চী ( স্ত্রী ) গুড়ূচী। ইত্যমরটীকায়াং ভরতঃ

গুড়তৃণঃ ( পুং ) ইক্ষুঃ। ইতি রাজনির্ঘণ্টঃ ॥

গুড়ত্রিণং ( ক্লী ) গুড়তৃণং। ইক্ষুঃ। ইতি শব্দরত্নাবলী ॥

গুড়ত্বক্ [ চ্ ] ( ক্লী ) স্বনামখ্যাতগন্ধদ্রব্যং। তৎপর্য্যায়ঃ। সূৎকটং ২ ভৃঙ্গং ৩ ত্বক্-পত্রং ৪ বরাঙ্গকং ৫ ত্বচং ৬ চোলং ৭ ত্বচাপত্রং ৮ হৃদ্যং ৯ সুরভিবল্কলং ১০। ইতি শব্দরত্নাবলী ॥ উৎকটং ১১ চোচং ১২। ইত্যমরঃ॥ ত্বক্ ১৩ পত্রং ১৪ ইতি তট্টীকা ॥ অস্য গুণাঃ। কফশুক্রাম-বাতনাশিত্বং। মধুরত্বং। কটুত্বঞ্চ। ইতি রাজবল্লভঃ ॥ লঘুত্বং। উষ্ণত্বং। স্বাদুত্বং। তিক্তত্বং। রূক্ষত্বং। পিত্তবৃদ্ধিকারিত্বং। অরুচিকণ্ঠহৃদ্বস্তিবাতার্শঃকৃমিপীনসরোগ-নাশিত্বঞ্চ। ইতি ভাবপ্রকাশঃ ॥

গুড়ত্বচং ( ক্লী ) গুড়ত্বক্। রাজভোগ্যং। জয়িত্রী ইতি ভাষা। ইতি শব্দচন্দ্রিকা ॥

গুড়দারু ( ক্লী ) ইক্ষুঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

গুড়ধেনুঃ ( স্ত্রী ) গুড়াদিনির্ম্মিতা ধেনুঃ। যথা। গুড়ধেনুবিধানস্য যদ্রূপমিহ যৎ ফলং। তদিদানীং প্রবক্ষ্যামি সর্ব্বপাপবিনাশনং॥ কৃষ্ণাজিনং চতুর্হস্তং প্রাগ্‌গ্রীবং বিন্যসে-দ্ভুবি। গোময়েনানুলিপ্তায়াং দর্ভমাস্তীর্য্য সর্ব্বতঃ॥ লবণেনাজিনং তদ্বৎ বৎসস্য পরিকল্পয়েৎ। উদঙ্মুখীং কল্পয়েদ্ধেনুমু-দীচ্যাঞ্চ সবৎসকাং॥ উত্তমা গুড়ধেনুঃ স্যাৎ সদা ভারচতুষ্টয়ং। বহুভারেণ বা কার্য্যা ভারাভ্যাং মধ্যমা স্মৃতা॥ অর্দ্ধ-ভারেণ বৎসঃ স্যাৎ কনিষ্ঠা ভারকেণ তু। চতুর্থাংশেন বৎসঃ স্যাৎ গৃহবিত্তানুসারতঃ॥ ধেনুবৎসৌ তদা তৌ তু সিতসূক্ষ্মাম্বরা-বৃতৌ। শুক্তিকর্ণাবিক্ষুপাদৌ শুদ্ধমুক্তা-ফলেক্ষণৌ॥ সিতসূত্রশিরালৌ তু সিত-কম্বলকম্বলৌ। তাম্রগুড়কপৃষ্ঠৌ তু সিত-চামররোমকৌ। বিদ্রুমভ্রূযুগকৃতৌ নব-নীতস্তনান্বিতৌ ॥ ক্ষৌমপুচ্ছৌ কাংস্য-দোহাবিন্দ্রনীলকতারকৌ। ইত্যেবং রচ-য়িত্বা তু ধূপদীপৈঃ সমর্চ্চয়েৎ॥ সর্ব্বাসাং ধেনূনামেবং বিধানং জ্ঞেয়ং। ইতি পাদ্মে সৃষ্টিখণ্ডং ॥

গুড়পুষ্পঃ ( পুং ) মধূকবৃক্ষঃ। ইত্যমরঃ ॥

গুড়ফলঃ ( পুং ) পীলুবৃক্ষঃ। ইত্যমরঃ ॥

গুড়ভা ( স্ত্রী ) যাবনালশর্করা। ইতি রাজ-নির্ঘণ্টঃ ॥

গুড়মূলঃ ( পুং ) অম্লমাম্রিষশাকং। ইতি শব্দ-চন্দ্রিকা॥

গুড়লং ( ক্লী ) গৌড়ী মদিরা। ইতি শব্দ-চন্দ্রিকা ॥

গুড়বীজঃ ( পুং ) মসূরঃ। ইতি রাজনির্ঘণ্টঃ
গুড়শর্করা ( স্ত্রী ) শর্করা। তৎপর্য্যায়ঃ পিপ্যটা ২। ইতি ত্রিকাণ্ডশেষঃ ॥
গুড়শিগ্রুঃ ( পুং ) রক্তশোভাঞ্জনঃ। ইতি শব্দচন্দ্রিকা ॥
গুড়া ( স্ত্রী ) স্নুহীবৃক্ষঃ। গুড়িকা। ইতি মেদিনী ॥ উশীরী। ইতি রাজনির্ঘণ্টঃ ॥
গুড়াকা ( স্ত্রী ) নিদ্রা। ইতি গুড়াকেশশব্দব্যুৎপত্তৌ শ্রীধরস্বামী ॥
গুড়াকেশঃ ( পুং ) শিবঃ। অর্জ্জুনঃ। ইতি জটাধরঃ ॥
গুড়াশয়ঃ ( পুং ) আখোটবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥
গুড়িকা ( স্ত্রী ) গুটিকা। বৃহদ্বটিকা। যথা। বটিকা গুটিকা চেতি সংজ্ঞাবান্তরভেদতঃ। ইতি বৈদ্যকপরিভাষা ॥
গুড়চী ( স্ত্রী ) গুড়ূচী। ইতি দ্বিরূপকোষঃ ॥
গুড়ূচী ( স্ত্রী ) লতাবিশেষঃ। গুলঞ্চ ইতি ভাষা। তৎপর্য্যায়ঃ। বৎসাদনী ২ ছিন্নরুহা ৩ তন্ত্রিকা ৪ অমৃতা ৫ জীবন্তিকা ৬ সোমবল্লী ৭ বিশল্যা ৮ মধুপর্ণী ৯। ইত্যমরঃ ॥ গুড়ূচী ১০। ইতি ভরতঃ ॥ কুণ্ডলী ১১ চক্রলক্ষণা ১২। ইতি রত্নমালা ॥ অমৃতবল্লী ১৩ জ্বরারিঃ ১৪ শ্যামা ১৫ বরা ১৬ সুরকৃতা ১৭ মধুপর্ণিকা ১৮ ছিন্নোদ্ভবা ১৯ অমৃতলতা ২০ রসায়নী ২১ ছিন্না ২২ সোমলতিকা ২৩ ভিষক্প্রিয়া ২৪ কুণ্ডলিনী ২৫ বয়ঃস্থা ২৬ নাগকুমারিকা ২৭ ছদ্মিকা ২৮ চন্দ্রহাসা ২৯। ইতি রাজনির্ঘণ্টঃ ॥ অমৃতবল্লরী ৩০ সুধা ৩১ জীবন্তী ৩২ সোমা ৩৩ চক্রলক্ষণিকা ৩৪ বয়স্যা ৩৫ মণ্ডলী ৩৬ দেবনির্ম্মিতা ৩৭। অস্যা গুণাঃ। কটুত্বং। তিক্তত্বং। স্বাদুপাকিত্বং। রসায়নত্বং। সংগ্রাহিত্বং। কষায়ত্বং। উষ্ণত্বং। লঘুত্বং। বল্যত্বং। অগ্নিদীপনত্বং। দোষত্রয়ামতৃড়্দাহমেহকাসপাণ্ডুতাকামলাকুষ্ঠবাতাস্রজ্বরকৃমিবমিনাশিত্বঞ্চ। ইতি ভাবপ্রকাশঃ ॥ গুরুত্বং। বীর্য্যদাতৃত্বং। ভ্রমনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ রক্তপিত্তনাশিত্বং। ইতি রাজবল্লভঃ ॥ অস্যাঃ পত্রস্য গুণাঃ। আগ্নেয়ত্বং। সর্ব্বজ্বরহরত্বং। লঘুত্বং। কষায়ত্বং। কটুত্বং। তিক্তত্বং। স্বাদুপাকিত্বং। রসায়নত্বং। বলকারিত্বং। উষ্ণত্বং। সংগ্রাহিত্বং। ত্রিদোষতৃষ্ণাদাহপ্রমেহবাতাসৃক্কামলাকুষ্ঠপাণ্ডুতানাশিত্বঞ্চ। ইতি ভাবপ্রকাশঃ ॥ ঘৃতযুক্তায়া বাতনাশিত্বং। গুড়যুক্তায়া বিবন্ধনাশিত্বং। সিতাযুক্তায়াঃ পিত্তনাশিত্বং। মধুযুক্তায়াঃ কফনাশিত্বং। এরণ্ডতৈলযুক্তায়া উগ্রবাতাস্রনাশিত্বং। শুণ্ঠীযুক্তায়া আমবাতনাশিত্বং। ইতি রাজবল্লভঃ ॥ * ॥ অস্যা উৎপত্তির্যথা। অথ লঙ্কেশ্বরো নাম্না রাবণো রাক্ষসাধিপঃ। রামপত্নীং বলাৎ সীতাং জহার মদনাতুরঃ ততস্তং বলবান্ রামো রিপুং জায়াপহারিণং। বলং বানরসৈন্যেন জঘান রণমূর্দ্ধনি ॥ হতে তস্মিন্ সুরারাতৌ রাবণে বলগর্ব্বিতে। দেবরাজঃ সহস্রাক্ষঃ পরিতুষ্টোঽপি রাঘবে ॥ তত্র যে বানরাঃ কেচিদ্রাক্ষসৈর্নিহতা রণে। তানিন্দ্রো

জীবয়ামাস সংসিচ্যামৃতবৃষ্টিভিঃ ॥ ততো যেষু চ দেশেষু কপিগাত্রাৎ পরিচ্যুতাঃ। পীযূষবিন্দবঃ পেতুস্তেভ্যো জাতা গুড়ূচিকা ॥ ইতি ভাবপ্রকাশঃ ॥

গুড়েরঃ ( পুং ) গ্রাসঃ। ইত্যুণাদিকোষঃ ॥ গুড়কঃ। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ ॥

গুড়েরকঃ ( পুং ) গ্রাসঃ। ইতি হেমচন্দ্রঃ ॥

গুড়োদ্ভবা ( স্ত্রী ) শর্করা। ইতি রাজনির্ঘণ্টঃ ॥

গুণ ৎ ক মন্ত্রণে। ইতি কবিকল্পদ্রুমঃ ॥ হ্রস্বী। মূৰ্দ্ধন্যোপধঃ। গুণয়তি। ইতি দুর্গাদাসঃ ॥

গুণঃ ( পুং ) ষট্প্রকাররাজনীতিবিশেষঃ। তদ্যথা। সন্ধিঃ ১ বিগ্রহঃ ২ যানং ৩ আসনং ৪ দ্বৈধং ৫ আশ্রয়ঃ ৬ ॥ ধনুরাকর্ষণরজ্জুঃ। ছিলা ইতি ভাষা। তৎপৰ্য্যায়ঃ। মৌৰ্ব্বী ২ জ্যা ৩ শিঞ্জিনী ৪ শিঞ্জা ৫ জ্যাবা ৬ পতঞ্চিকা ৭। ইতি শব্দরত্নাবলী ॥ জীবা ৮। ইতি জটাধরঃ ॥ রজ্জুঃ। সত্ত্বরজস্তমাংসি। শুক্লকৃষ্ণরক্তপীতাদিঃ। দ্রব্যাশ্রিতঃ। স তু শৌর্য্যাদিঃ রসগন্ধাদিশ্চ। ইত্যমরঃ ॥ তস্য লক্ষণং যথা। সত্ত্বে নিবিশতেঽপৈতি পৃথগ্জাতিষু দৃশ্যতে। আধেয়শ্চাক্রিয়াজশ্চ সোঽসত্ত্বপ্রকৃতির্গুণঃ ॥ ইতি মুগ্ধবোধং ॥ বিশেষাধানহেতুঃ সিদ্ধো বস্তুধর্ম্মঃ। শুক্লাদয়ো হি গবাদিকং স্বজাতীয়েভ্যঃ কৃষ্ণগবাদিভ্যো ব্যাবর্ত্তয়ন্তীতি সাহিত্যদর্পণং ॥ অপি চ। দ্রব্যত্বব্যাপকতাবচ্ছেদকসত্ত্বান্যজাতিমত্ত্বং তদর্থঃ। তদ্যথা। রূপং ১ রসঃ ২ গন্ধঃ ৩ স্পর্শঃ৪ সংখ্যা ৫ পরিমাণং ৬ পৃথক্ত্বং ৭ সংযোগঃ ৮ বিভাগঃ ৯ পরত্বং ১০ অপরত্বং ১১ বুদ্ধিঃ ১২ সুখং ১৩ দুঃখং ১৪ ইচ্ছা ১৫ দ্বেষঃ ১৬ যত্নঃ ১৭ গুরুত্বং ১৮ দ্রবত্বং ১৯ স্নেহঃ ২০ সংস্কারঃ ২১ ধর্ম্মঃ ২২ অধর্ম্মঃ ২৩ শব্দঃ ২৪। ইতি ভাষাপরিচ্ছেদঃ ॥ অপ্রধানং। সূদঃ। ইন্দ্রিয়ং। ত্যাগঃ। বটী। ইতি মেদিনী ॥ ভীমসেনঃ। তন্তুঃ। দোষান্যবিশেষণং। ইতি হেমচন্দ্রঃ ॥ বিদ্যাদি। ইতি বিশ্বঃ ॥ ব্যাকরণোক্তসংজ্ঞাবিশেষঃ। যথা। ইন্তোঽরলেঙ্গুঃ। অস্যার্থঃ। ই উ ঋ ৯ এষাং স্থানে এ ও অর্ অল্ এতে গুণসংজ্ঞা ভবন্তি। ইতি মুগ্ধবোধং ॥ কাব্যগুণস্য লক্ষণং যথা। যে রসস্যাঙ্গিনো ধর্ম্মাঃ শৌর্য্যাদয় ইবাত্মনঃ। উৎকর্ষহেতবস্তে স্যুরচলস্থিতয়ো গুণাঃ ॥ ইতি কাব্যপ্রকাশঃ ॥ তস্য ভেদাঃ। শ্লেষঃ প্রসাদঃ সমতা মাধুর্য্যং সুকুমারতা। অর্থব্যক্তিরুদারত্বমোজঃকান্তিসমাধয়ঃ ॥ ইতি বৈদর্ভমার্গস্য প্রাণা দশ গুণাঃ স্মৃতাঃ ॥ ইতি দণ্ডী ॥ মাধুর্য্যৌজঃপ্রসাদাখ্যাস্ত্রয়স্তে ন পুনর্দশ ॥ তস্য দশসংখ্যাভাবে হেতুর্যথা। কেচিদন্তর্ভবন্ত্যেষু দোষত্যাগাৎ পরে শ্রিতাঃ। অন্যে ভজন্তি দোষত্বং কুত্রচিন্ন ততো দশ ॥ ইতি ভরতমুনিঃ ॥ স্মৃত্যুক্তগুণবিশেষা উপবাসশব্দে দ্রষ্টব্যাঃ ॥

গুণকঃ ( পুং ) পূরকাঙ্কং। যথা। গুণ্যান্ত্যমঙ্কং গুণকেন হন্যাৎ। ইতি লীলাবতী ॥

গুণকারঃ ( পুং ) ভীমসেনঃ। ইতি ত্রিকাণ্ড-

শেষঃ॥ গুণকারকে ত্রি। গুণং করোতী-ত্যর্থে কৃধাতোঃ কর্ত্তরি ণ্বুল্প্রত্যয়েন নিষ্পন্নঃ॥

গুণজ্ঞঃ (ত্রি) গুণবেত্তা। যথা। গুণিনি গুণজ্ঞো রমতে নাগুণশীলস্য গুণিনি পরিতোষঃ। অলিরেতি বনাৎ কমলং ন হি ভেকস্ত্বেকবাসোঽপি॥ ইত্যুদ্ভটঃ॥

গুণনিকা (স্ত্রী) নৃত্যং। শূন্যাঙ্কং। পাঠ-নিশ্চয়ঃ। ইতি মেদিনী॥ মালা। ইত্যা-নন্দলহরীটীকা॥

গুণনী (স্ত্রী) পাঠনিশ্চয়ঃ। তৎপর্য্যায়ঃ। ভবিনী ২ শীলনং ৩। ইতি ত্রিকাণ্ড-শেষঃ॥

গুণনীয়ঃ (পুং) শাস্ত্রাদ্যভ্যাসঃ। ইতি হারা-বলী॥

গুণভ্রংশঃ (পুং) গুণনাশঃ। তৎপর্য্যায়ঃ। পর্য্যস্তিকা ২। ইতি হারাবলী॥

গুণলয়নিকা (স্ত্রী) বস্ত্রনির্ম্মিতগৃহং। তৎ-পর্য্যায়ঃ। কেণিকা ২ পটকুটী ৩। ইতি হেমচন্দ্রঃ॥

গুণলয়নী (স্ত্রী) গুণলয়নিকা। ইতি হলা-য়ুধঃ॥

গুণবান্ [ৎ] (ত্রি) সম্বন্ধী। ইতি ত্রিকাণ্ড-শেষঃ॥ *গুণবিশিষ্টঃ। যথা। দাতা* দয়ালুর্গুণবান্নরঃ স্যাৎ গরে পরেষামুপ-কারকর্ত্তা। ইতি কোষ্ঠীপ্রদীপঃ॥

গুণবৃক্ষকঃ (পুং) নৌকাগুণবন্ধনস্তম্ভঃ। মাস্তুল ইতি ভাষা। তৎপর্য্যায়ঃ। কূপকঃ ২। ইত্যমরঃ॥

গুণসাগরঃ (পুং) ব্রহ্মা। ইতি শব্দরত্নাবলী॥

বৃক্ষবিশেষঃ। ইতি ত্রিকাণ্ডশেষঃ॥ সকল-গুণাধারে ত্রি॥

গুণা (স্ত্রী) দূর্ব্বা। মাংসরোহিণী। ইতি রাজনির্ঘণ্টঃ॥

গুণাকরঃ (পুং) বুদ্ধঃ। ইতি শব্দরত্নাবলী॥ গুণযুক্তে ত্রি। যথা। তপস্তভিরতস্তাথ তস্য পুত্রো গুণাকরঃ। সত্যবান্ নাম দেবর্ষে মনসা সম্বৃতো ময়া॥ ইতি বন-পর্ব্বণি সাবিত্রীব্রতকথা॥

গুণিতঃ (ত্রি) পূরিতঃ। তৎপর্য্যায়ঃ। আহতঃ ২। ইত্যমরঃ॥ যথা। পঞ্চধা গুণিতা দ্বাদশসংখ্যা ষষ্টির্ভবতীত্যাদি ইতি ভরতঃ॥ পিণ্ডিতঃ। ইতি শব্দরত্নাবলী॥

গুণী [ন্] (পুং) ধনুঃ। ইতি ত্রিকাণ্ডশেষঃ॥ গুণবিশিষ্টে ত্রি। যথা। গুণিগণগণনা-রম্ভে ন পততি কঠিনী সুসম্ভ্রমাদ্যস্য। তেনাম্বা যদি সুতিনী বদ বন্ধ্যা কীদৃশী নাম॥ ইতি হিতোপদেশঃ॥

গুণীভূতঃ (ত্রি) অপ্রধানীভূতঃ। যথা। কৃত-পূর্ব্বীকটমিত্যত্র সমাসনিবিষ্টত্বাদ্গুণী-ভূতাদ্বিশেষবোধিকা দ্বিতীয়া নোক্তা। ইতি সুসেনকবিরাজঃ॥

গুণীভূতব্যঙ্গ্যঃ (পুং) কাব্যবিশেষঃ। যথা। অতাদৃশি গুণীভূতব্যঙ্গ্যং ব্যঙ্গ্যে তু মধ্যমং॥ *॥ তস্যাষ্টৌ ভেদাঃ যথা। অগূঢ়মপরস্যাঙ্গং বাচ্যসিদ্ধ্যঙ্গমস্ফুটং। সন্দিগ্ধতুল্যপ্রাধান্যে কাকাক্ষিপ্তমসুন্দরং। ব্যঙ্গ্যমেবং গুণীভূতব্যঙ্গ্যস্যাষ্টৌ ভিদা মতাঃ॥ *॥ অগূঢ়ং যথা। স্ফুটতয়া

বাচ্যায়মানমিতি অপরাঙ্গং। যথা অপরস্য রসাদের্বাচ্যস্য বা বাক্যার্থীভূতস্য অঙ্গং রসাদি অনুরণনরূপং বা ॥ * ॥ বাচ্যসিদ্ধ্যঙ্গং যথা। আপাততঃ প্রতীতস্য বাচ্যার্থস্য প্রতিসন্ধীয়মানানুপপত্তিনিরাসকং ব্যঙ্গ্যং ॥ * ॥ অস্ফুটং যথা। বিদগ্ধৈরপি ক্লেশগম্যং সন্দিগ্ধপ্রাধান্যং যথা প্রাধান্যমত্র রসাদিব্যঞ্জকত্বেন তথা চ প্রতীতস্য রসাদের্ব্যঞ্জকং কিং বাচ্যং কিম্বা ব্যঙ্গ্যমিত্যৌত্তরকালিকসন্দেহবিষয়ত্বং তত্ত্বং ॥ * ॥ তুল্যপ্রাধান্যং যথা। অত্রাপি রসাদিব্যঞ্জকত্বেনৈব প্রাধান্যং ব্যঙ্গ্যস্য নিশ্চিতত্বেন তেন তেন বাচ্যেন তুল্যার্থো বোধ্যঃ ॥ * ॥ কাকাক্ষিপ্তং যথা। আক্ষিপ্তমত্র প্রাগেব পদার্থবিধয়া উপস্থাপনং ॥ * ॥ অসুন্দরং যথা। রসাদিব্যঞ্জনে বাচ্যমুখনিরীক্ষকং ব্যঙ্গ্যং। ইতি কাব্যপ্রকাশঃ ॥

গুণেশ্বরঃ ( পুং ) চিত্রকূটপর্ব্বতঃ। ইতি শব্দরত্নাবলী ॥ গুণপতৌ ত্রি ॥

গুণোৎকর্ষঃ ( পুং ) গুণপ্রাধান্যং। অতিশয়ঃ। তৎপর্য্যায়ঃ। পরভাগঃ ২। ইতি হেমচন্দ্রঃ ॥

গুণোৎকীর্ত্তনং ( ক্লী ) গুণকথনং। বিরহকালীনকান্তাবিষয়কপ্রশংসাপ্রতিপাদনং। ইতি রসমঞ্জরী॥ কান্তাপদমত্রোপলক্ষণং॥

গুণ্ঠিতঃ ( ত্রি ) গুণ্ডিতঃ। ইত্যমরটীকায়াং রমানাথঃ ॥

গুণ্ডঃ ( পুং ) তৃণভেদঃ। যস্য কন্দঃ কশেরু। তৎপর্য্যায়ঃ। কাণ্ডগুণ্ডঃ ২ দীর্ঘকাণ্ডঃ ৩ ত্রিকোণকঃ ৪ ছত্রগুচ্ছঃ ৫ অসিপত্রঃ ৬ নীলপত্রঃ ৭ ত্রিধারকঃ ৮। অস্য গুণাঃ। মধুরত্বং। শীতত্বং। কফপিত্তাতিসারদাহরক্তনাশিত্বং। অস্য মধ্যে স্থূলতরোঽধিকগুণঃ। ইতি রাজনির্ঘণ্টঃ ॥

গুণ্ডকঃ ( পুং ) মলিনঃ। ধূলী। কলোক্তিঃ। স্নেহপাত্রং। ইতি মেদিনী ॥

গুণ্ডকন্দঃ ( পুং ) কশেরু। ইতি রাজনির্ঘণ্টঃ॥

গুণ্ডারোচনিকা ( স্ত্রী ) বৃক্ষবিশেষঃ। কমলাগুঁড়ি ইতি ভাষা। তৎপর্য্যায়ঃ। কাম্পিল্লকঃ ২ রক্তাঙ্গঃ ৩। ইতি রত্নমালা ॥

গুণ্ডালা (স্ত্রী) ক্ষুদ্রক্ষুপবিশেষঃ। তৎপর্য্যায়ঃ। জলোদ্ভূতা ২ গুচ্ছবধ্রা ৩ জলাশয়া ৪। অস্যা গুণাঃ। কটুত্বং। তিক্তত্বং। উষ্ণত্বং। শোথব্রণনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

গুণ্ডাসিনী (স্ত্রী) তৃণভেদঃ। তৎপর্য্যায়ঃ। গুণ্ডালা ২ গুড়ালা ৩ গুচ্ছমূলিকা ৪ চিপিটা ৫ তৃণপত্রী ৬ যবাসা ৭ পৃথুলা ৮ বিষ্টরা ৯। অস্যা গুণাঃ। কটুত্বং। পিত্তদাহশ্রমশ্বযথুব্রণদোষনাশিত্বং। তিক্তত্বং। উষ্ণত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

গুণ্ডিকঃ ( পুং স্ত্রী ) গুণ্ডকঃ। তণ্ডুলাদিচূর্ণং। গুঁড়া ইতি ভাষা। যথা। গুণ্ডিকৈঃ সিতপীতৈশ্চ মণ্ডয়ন্তী গৃহাঙ্গনং। ইত্যনন্তব্রতকথা ॥

গুণ্ডিচা (স্ত্রী) শ্রীপুরুষোত্তমদেবস্য রথারোহণানন্তরবাসার্থমণ্ডপবিশেষঃ। যথা। মণ্ডপে বাসয়েদ্দেবান্ গুণ্ডিচাখ্যে মনোহরে। চারুচন্দ্রাতপে চারুমাল্যচামরভূষিতে ॥ রত্নস্তম্ভময়ে স্বর্ণবেদিকোপস্কৃতান্তরে।

প্রাচীরবলয়াবীতে সুধালেপসমুজ্জ্বলে ॥ সাধুসোপানঘটিতে চতুর্দ্দ্বারোপশোভিতে। ত্রৈলোক্যাড়ম্বরযুতে মহাবেদ্যাং মহাক্রতোঃ ॥ প্রাদুর্ভাবো মহেশস্য যাত্রাভূদ্দারুবর্ম্মণঃ। * । তস্যাং শ্রীজগন্নাথদেবস্য দর্শনফলং যথা। বিন্দুতীর্থতটে তস্মিন্ সপ্তাহানি জনার্দ্দনঃ। তিষ্ঠেৎ পুরা স্বয়ং রাজ্ঞে বরমেতৎ সমাদিশৎ ॥ তত্তীর্থতীরে রাজেন্দ্র স্থাস্যামি প্রতিবাসরং। সর্ব্বতীর্থানি তস্মিংশ্চ স্থাস্যন্তি ময়ি তিষ্ঠতি ॥ তত্র স্নাত্বা বিধানেন তীর্থে তীর্থোপপাবনে। সপ্তাহং যে প্রপশ্যন্তি গুণ্ডিচামণ্ডপে স্থিতং ॥ মাঞ্চ রামং সুভদ্রাঞ্চ মম সাযুজ্যমাপ্নুয়ুঃ ॥ * ॥ তস্যা নামকরণং যথা। অত ঊর্দ্ধং প্রবক্ষ্যামি মহাবেদীমহোৎসবং। অজ্ঞানতিমিরান্ধোঽপি যেন ভাস্বৎপদং ভজেৎ ॥ সর্ব্বপাপরজঃশান্ত্যা পূজ্যত্বাৎ সর্ব্বদৈবতৈঃ। গুণ্ডিচাখ্যাপি সা যাত্রা ব্রহ্মতেজোঽহবগুণ্ঠনাৎ ॥ ইত্যুৎকলখণ্ডং ॥

গুণ্ডিতঃ (ত্রি) ধূলিগুণ্ডকেনৈব ব্রক্ষিতঃ। তৎপর্য্যায়ঃ। রূষিতঃ ২। ইত্যমরঃ ॥ চূর্ণীকৃতশ্চ ॥

গুথঃ (পুং) গবেধুকা ইতি রত্নমালা ॥

গুথকং (ক্লী) গ্রন্থিপর্ণং। ইতি রত্নমালা ॥

গুৎসঃ (পুং) স্তবকঃ। স্তম্বঃ। দ্বাত্রিংশদ্যষ্টিকহারঃ। গ্রন্থিপর্ণবৃক্ষঃ। ইতি মেদিনী ॥

গুৎসকঃ (পুং) স্তবকঃ। ইতি শব্দরত্নাবলী ॥ গ্রন্থপরিচ্ছেদঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

গুৎসকপুষ্পঃ (পুং) সপ্তচ্ছদবৃক্ষঃ। ইতি জটাধরঃ ॥

গুৎসার্দ্ধঃ (পুং) গুচ্ছার্দ্ধঃ। চতুর্ব্বিংশতিযষ্টিকহারঃ। ইত্যমরটীকায়াং ভরতঃ ॥ গুচ্ছৈব ঋধ্নোতি বর্দ্ধতে ইতি ব্যুৎপত্তিঃ ॥

গুদ ঙ খেলনে। ইতি কবিকল্পদ্রুমঃ ॥ ঙ গোদতে। ইতি দুর্গাদাসঃ ॥

গুদং (ক্লী) মলত্যাগদ্বারং। তৎপর্য্যায়ঃ। অপানং ২ পায়ুঃ ৩ ইত্যমরঃ ॥ গুহ্যং ৪ গুদবর্ত্ম ৫। ইতি জটাধরঃ ॥

গুদকীলঃ (পুং) অর্শোরোগঃ। ইতি রাজনির্ঘণ্টঃ ॥

গুদকীলকঃ (পুং) গুদকীলঃ। ইতি হলায়ুধঃ ॥

গুদগ্রহঃ (পুং) উদাবর্ত্তরোগঃ। ইতি হেমচন্দ্রঃ ॥

গুদভ্রংশঃ (পুং) মলদ্বারনির্গমরোগঃ। তস্য লক্ষণং। প্রবাহণাতিসারাভ্যাং নির্গচ্ছতি গুদং বহিঃ। রূক্ষদুর্ব্বলদেহস্য গুদভ্রংশং তমাদিশেৎ ॥ ইতি মাধবকরঃ ॥ তচ্চিকিৎসা যথা। গুদভ্রংশে গুদং স্বিন্নং স্নেহেনাক্তং প্রবেশয়েৎ। প্রবিষ্টং রোধয়েদ্বন্ধাদগব্যসচ্ছিদ্রচর্ম্মণা ॥ পদ্মিন্যাঃ কোমলং পত্রং যঃ খাদেচ্ছর্করান্বিতং। এতন্নিশ্চিত্য নির্দ্দিষ্টং ন তস্য গুদনির্গমঃ ॥ মূষকাণাং বসাভির্ব্বা গুদভ্রংশে প্রলেপনং। স্বিন্নমূষিকামাংসেনাথবা স্বেদয়েদ্গুদং ॥ বৃক্ষাম্লানলচাঙ্গেরীবিল্বপাঠাযবাগ্রজং। তক্রেণ শীলয়েৎ পায়ুং ভ্রংশার্ত্তোঽনলদীপনং ॥ মূষকান্ দশমূলানি গৃহ্লীয়াচ্চ দ্বয়ং সমং। তয়োঃ ক্বাথেন কল্কেন

পচেত্তৈলং যথোদিতং ॥ অভ্যঙ্গাত্তস্য তৈলস্য গুদভ্রংশো বিনশ্যতি। বিনশ্যতি তথা তেন গুদমূলং ভগন্দরঃ॥ মূষক-তৈলং। ইতি ভাবপ্রকাশঃ॥

গুদাঙ্কুরঃ (পুং) অর্শোরোগঃ। ইতি হেম-চন্দ্রঃ॥

গুদ্র ই ক কুদ্রে। ইতি কবিকল্পদ্রুমঃ॥ পঞ্চম-স্বরী। দন্ত্যবর্গতৃতীয়োপধঃ। কুদ্রো মিথ্যোক্তিঃ। ই ক গুন্দ্রয়তি নীচঃ মিথ্যা বদতীত্যর্থঃ। গুদ্র ইত্যনেনৈবেষ্টসিদ্ধে ইদনুবন্ধো বেদেষূচ্চারণভেদার্থঃ। ইতি দুর্গাদাসঃ॥

গুধ গ রুষি। ইতি কবিকল্পদ্রুমঃ॥ গ গুধ্নাতি জুগোধ। ইতি দুর্গাদাসঃ॥

গুধ ঙ ক্রীড়ে। ইতি কবিকল্পদ্রুমঃ॥ ঙ গোধতে। ইতি দুর্গাদাসঃ॥

গুধ য বেষ্টে। ইতি কবিকল্পদ্রুমঃ॥ য গুধ্যতি জুগোধ। ইতি দুর্গাদাসঃ॥

গুধেরঃ (ত্রি) রক্ষকঃ। ইতি সিদ্ধান্তকৌমুদ্যা-মুণাদিবৃত্তিঃ॥

গুন্দলঃ (পুং) মর্দ্দলশব্দঃ। ইতি হেমচন্দ্রঃ॥

গুন্দ্রঃ (পুং) শরতৃণং। ইত্যমরঃ॥ বৃক্ষ-বিশেষঃ। গোঁদপটের ইতি দেশান্তরীয় ভাষা। তৎপর্য্যায়ঃ। পটেরকঃ ২ অচ্ছঃ ৩ শৃঙ্গবেরাভমূলকঃ ৪। অস্য গুণাঃ। কষা-য়ত্বং। মধুরত্বং। হিমত্বং। পিত্তরক্তমূত্র-কৃচ্ছ্রনাশিত্বং। স্তন্যশুক্ররজোমূত্রশোধনত্ব-ঞ্চ। ইতি ভাবপ্রকাশঃ॥

গুন্দ্রমূলা (স্ত্রী) এরকাতৃণং। ইতি ভাব-প্রকাশঃ

গুন্দ্রা (স্ত্রী) ভদ্রমুস্তকঃ। প্রিয়ঙ্গুবৃক্ষঃ। ইত্য-মরঃ॥ গবেধুকা। ইতি রত্নমালা॥ এরকা। ইতি ভাবপ্রকাশঃ॥

গুন্দ্রালঃ (পুং) জীবঞ্জীবপক্ষী। ইতি হেম-চন্দ্রঃ॥ গুন্দালোঽপি পাঠঃ॥

গুন্ফ শ গ্রন্থে। ইতি কবিকল্পদ্রুমঃ॥ পঞ্চম-স্বরী। শ গুন্ফতি মালাং মালিকঃ। জুগুন্ফ। ইতি দুর্গাদাসঃ॥

গুপ উ রক্ষে। ইতি কবিকল্পদ্রুমঃ। আয়ন্ত-স্থাতুভয়পদমিতি বোপদেবঃ। গোপায়তি গোপায়তে। অন্যে তু আয়স্যাপ্রাপ্তিপক্ষে পরস্মৈপদমেব। অগোপীৎ। জুগোপ গোরূপধরামিবোর্ব্বীমিতি রঘুঃ॥ উ গোপিষ্যতি গোপ্স্যতি। ইতি দুর্গাদাসঃ॥

গুপ ক ভাসি। ইতি কবিকল্পদ্রুমঃ॥ ক গোপ-য়তি। ভাসি দীপ্তৌ। ইতি দুর্গাদাসঃ॥

গুপ ঙ গোপনকুৎসয়োঃ। ইতি কবিকল্প-দ্রুমঃ॥ গোপনমপহ্নবঃ। ঙ কঙ্কণঝনৎ-কারঞ্চ কিং গোপসে। অত্র ত্যাদয়ো ন স্যুরিতি রমানাথঃ। কুৎসা নিন্দা। সা জুগুপ্সাং প্রচক্রেঽসূন্। ইতি ভট্টিঃ। ইতি দুর্গাদাসঃ॥

গুপ য ইর্ ব্যাকুলত্বে। ইতি কবিকল্পদ্রুমঃ॥ ব্যাকুলত্বং ব্যাকুলীভাবস্তৎকরণঞ্চ। য ধীরো ন গুপ্যতি মহত্যপি কার্য্যজাতে। ইতি হলায়ুধঃ। গুপ্যতি গা বৃষ্টিঃ। আকুলীকরোতীত্যর্থঃ। ইতি চতুর্ভুজঃ। ইর্ অগুপৎ অগোপীৎ। অস্মাৎ পুষা-দিত্বাৎ নিত্যং ঙ ইত্যন্যে। ইতি দুর্গা-দাসঃ॥

গুপিলঃ ( পুং ) রাজা। ইত্যুণাদিকোষঃ॥

গুপ্তং ( ত্রি ) কৃতরক্ষণং। তৎপর্য্যায়ঃ। ত্রাতং ২ ত্রাণং ৩ রক্ষিতং ৪ অবিতং ৫ গোপায়িতং ৬। কৃতগোপনং। তৎ-পর্য্যায়ঃ। গূঢ়ং ২। ইত্যমরঃ। সঙ্গতং। ইতি শব্দরত্নাবলী॥ বৈশ্যশূদ্রাণাং পদ্ধতি-বিশেষে পুং। যথা। গুপ্তদাসাত্মকং নাম প্রশস্তং বৈশ্যশূদ্রয়োঃ। ইত্যুদ্বাহতত্ত্বম্॥

গুপ্তগতিঃ ( পুং ) চরঃ। ইতি শব্দরত্নাবলী॥

গুপ্তচরঃ ( পুং ) বলদেবঃ। ইতি ত্রিকাণ্ড-শেষঃ॥

গুপ্তস্নেহঃ ( পুং ) অঙ্কোঠবৃক্ষঃ। ইতি রাজ-নির্ঘণ্টঃ॥

গুপ্তা ( স্ত্রী ) কপিকচ্ছুঃ। ইতি রাজনির্ঘণ্টঃ॥ পরকীয়ান্তর্গতনায়িকাভেদঃ। তস্যা লক্ষণং। মৈথুনগোপনং। সা চ ত্রিধা। বৃত্তসুরতগোপনা ১ বর্ত্তিষ্যমাণসুরত-গোপনা ২ বৃত্তবর্ত্তিষ্যমাণসুরতগোপনা ৩। ইতি রসমঞ্জরী॥

গুপ্তিঃ ( স্ত্রী ) অবকরস্থানং। কারাগারং। রক্ষণং। ইতি মেদিনী॥ ভূগর্ত্তঃ। যমঃ। ইতি হেমচন্দ্রঃ॥ গর্ত্তার্থং ক্ষিতেরুৎ-খননং। নৌকাচ্ছিদ্রং। ইত্যমরটীকায়াং ভরতঃ॥ গোপনং। ইতি তন্ত্রীকাসার-সুন্দরী॥

গুফ প শ গ্রন্থে। ইতি কবিকল্পদ্রুমঃ॥ পঞ্চম-স্বরী। প শ গুম্ফতি মালাং মালিকঃ। জুগোফ। ইতি দুর্গাদাসঃ॥

গুফিতঃ ( ত্রি ) গুম্ফিতঃ। গ্রথিতঃ। ইত্য-মরটীকা॥

গুম্ফঃ ( পুং ) গ্রন্থনং। বাহোরলঙ্কারঃ। ইতি মেদিনী॥ শ্মশ্রু। গোঁপ ইতি ভাষা। ইতি শব্দরত্নাবলী॥

গুম্ফিতঃ ( ত্রি ) গ্রম্ফিতঃ। ইত্যমরটীকায়াং রায়মুকুটঃ॥

গুর ঈ য ঙ বধে। গত্যাং। ইতি কবি-কল্পদ্রুমঃ॥

গুর ঙ ঈ শি উদ্যমে। ইতি কবিকল্পদ্রুমঃ॥ হ্রস্বী। ঙ শি গুরতে অগুরিষ্ট। ঈ গূর্ণঃ। ইতি দুর্গাদাসঃ॥

গুরণং ( ক্লী ) উদ্যমঃ। ইত্যমরঃ॥ অস্য রূপান্তরে গূরণং গোরণং ইতি ভরতঃ॥

গুরুঃ (পুং) বৃহস্পতিঃ। নিষেকাদিকৃৎ। ইত্য-মরঃ॥ নিষেকো গর্ব্ভাধানং আদিনা সীম-ন্তোন্নয়নাদের্মন্ত্রবিদ্যাদানাদেশ্চ গ্রহণং। তৎকর্ত্তা পিত্রাদির্গুরুঃ স্যাৎ। ইতি ভরতঃ॥ মন্ত্রদাতা। তস্য বর্জ্জনীয়ত্বং যথা। অভি-শপ্তমপুত্রঞ্চ সন্নদ্ধং কিতবং তথা। ক্রিয়া-হীনমকল্পাঙ্গং বামনং গুরুনিন্দকং॥ সদা মৎসরসংযুক্তং গুরুং মন্ত্রেষু বর্জ্জয়েৎ। গুরুর্ম্মন্ত্রস্য মূলং স্যান্মূলশুদ্ধৌ সদা শুভং॥ ইতি কালিকাপুরাণে ৫৪ অধ্যায়ঃ॥ * ॥ অপি চ। ক্রিয়াসারসমুচ্চয়ে। শ্বিত্রী চৈব গলৎকুষ্ঠী নেত্ররোগী চ বামনঃ। কুনখী শ্যাবদন্তশ্চ স্ত্রীজিতশ্চাধিকাঙ্গকঃ॥ হীনাঙ্গঃ কপটী রোগী বহ্বাশী বহুজল্পকঃ। এতৈর্দোষৈর্ব্বিহীনো যঃ স গুরুঃ শিষ্য-সম্মতঃ॥ ইতি তন্ত্রসারঃ॥ * ॥ গুরুবর্গো যথা। উপাধ্যায়ঃ পিতা জ্যেষ্ঠভ্রাতা চৈব মহীপতিঃ। মাতুলঃ শ্বশুরস্ত্রাতা

মাতামহপিতামহ্যৌ॥ বন্ধুর্জ্যেষ্ঠঃ পিতৃব্যশ্চ পুংস্যেতে গুরবঃ স্মৃতাঃ। মাতামহী মাতুলানী তথা মাতুশ্চ সোদরাঃ॥ শ্বশ্রূঃ পিতামহী জ্যেষ্ঠা ধাত্রী চ গুরবঃ স্ত্রীষু। ইত্যুক্তো গুরুবর্গোঽয়ং মাতৃতঃ পিতৃতো দ্বিজাঃ॥ অনুবর্ত্তনমেতেষাং মনোবাক্‌কায়কর্ম্মভিঃ। গুরুং দৃষ্ট্বা সমুত্তিষ্ঠেদভিবাদ্য কৃতাঞ্জলিঃ॥ নৈতৈরুপবিশেৎ সার্দ্ধং বিবদেন্নাত্মকারণাৎ। জীবিতার্থমপি দ্বেষাদ্‌গুরুভির্নৈব ভাষণং॥ উদিতোঽপি গুণৈরন্যৈর্গুরুদ্বেষী পতত্যধঃ। গুরূণাঞ্চৈব সর্ব্বেষাং পূজ্যাঃ পঞ্চ বিশেষতঃ॥ তেষামাদ্যাস্ত্রয়ঃ শ্রেষ্ঠাস্তেষাং মাতা সুপূজিতা। যো ভাবয়তি যা সূতে যেন বিদ্যোপদিশ্যতে॥ জ্যেষ্ঠভ্রাতা চ ভর্ত্তা চ পঞ্চৈতে গুরবঃ স্মৃতাঃ। আত্মনঃ সর্ব্বযত্নেন প্রাণত্যাগেন বা পুনঃ॥ পূজনীয়া বিশেষেণ পঞ্চৈতে ভূতিমিচ্ছতা। যাবৎ পিতা চ মাতা চ দ্বাবেতৌ নির্ব্বিকারিণৌ॥ তাবৎ সর্ব্বং পরিত্যজ্য পুত্রঃ স্যাত্তৎপরায়ণঃ। পিতা মাতা চ সংপ্রীতৌ স্যাতাং পুত্রগুণৈর্যদি॥ স পুত্রঃ সকলং ধর্ম্মং প্রাপ্নুয়াত্তেন কর্ম্মণা। নাস্তি পিতৃসমং দেবং নাস্তি মাতৃসমং গুরুঃ॥ তয়োঃ প্রত্যুপকারোঽপি ন কথঞ্চন বিদ্যতে। তয়োর্নিত্যং প্রিয়ং কুর্য্যাৎ কর্ম্মণা মনসা গিরা॥ ন তাভ্যামননুজ্ঞাতো ধর্ম্মমন্যং সমাশ্রয়েৎ। বর্জ্জয়িত্বা মুক্তিফলং নিত্যং নৈমিত্তিকং তথা॥ ধর্ম্মসারঃ সমুদ্দিষ্টঃ প্রেত্যানন্দফলপ্রদঃ। সম্যগারাধ্য বক্তারং বিসৃষ্টস্তদনুজ্ঞয়া। শিষ্যো বিদ্যাফলং ভুঙ্‌ক্তে প্রেত্য চাপ্যাপ্নতে দিবি॥ যো ভ্রাতরং পিতৃসমং জ্যেষ্ঠং মূঢ়োঽবমন্যতে। তেন দোষেণ স প্রেত্য নিরয়ং ঘোরমৃচ্ছতি॥ পুংসা বর্ত্মনিবিষ্টেন পূজ্যো ভক্ত্যা তু সর্ব্বদা। অপি মাতরি লোকেঽস্মিন্ উপকারাদ্ধি গৌরবং॥ যে নরা ভর্ত্তৃপিণ্ডার্থং স্বান্ প্রাণান্ সংত্যজন্তি হি। তেষামথাক্ষয়াল্লোকান্ প্রোবাচ ভগবান্ মনুঃ॥ মাতুলাংশ্চ পিতৃব্যাংশ্চ শ্বশুরানৃত্বিজো গুরূন্। অসাবহমিতি ব্রূয়াৎ প্রত্যুত্থায় যবীয়সঃ॥ ইতি কূর্ম্মপুরাণে উপবিভাগে ১১ অধ্যায়ঃ॥ *॥ তস্য পরীক্ষা যথা। সদাচারঃ কুশলধীঃ সর্ব্বশাস্ত্রার্থপারগঃ। নিত্যনৈমিত্তিকানাঞ্চ কার্য্যাণাং কারকঃ শুচিঃ॥ অপর্ব্বমৈথুনপরঃ পিতৃদেবার্চ্চনে রতঃ। গুরুভক্তো জিতক্রোধো বিপ্রাণাং হিতকৃৎ সদা॥ দয়াবান্ শীলসম্পন্নঃ সৎকুলীনো মহামতিঃ। পরদারেষু বিমুখো দৃঢ়সঙ্কল্পকো দ্বিজঃ॥ অন্যৈশ্চ বৈদিকগুণৈর্যুক্তঃ কার্য্যো গুরুর্নৃপৈঃ। এতৈরেব গুণৈর্যুক্তঃ পুরোধাঃ স্যান্মহীভুজাং॥ ইতি যুক্তিকল্পতরুঃ॥ *॥ শিষ্যকৃতপাপং গুরুং স্পৃশতি যথা। মন্ত্রিপাপঞ্চ রাজানং পতিং জায়াকৃতং তথা। তথা শিষ্যকৃতং পাপং প্রায়ো গুরুমপি স্পৃশেৎ॥ প্রায় ইতি গুরুণা শিষ্যঃ সম্যগ্‌বোধিতোঽপি তদ্বাক্যমনাদৃত্য পাপঞ্চেদাচরতি তদা তৎ পাপং গুরৌ ন

ব্যাগ্নোতীত্যর্থঃ ॥ বর্ণাশ্রমাণাং সর্ব্বেষামাচারঃ সদাতিপ্রদঃ। গুরুস্ত্রিবারমাচারং বোধয়েৎ কুলনায়িকে ॥ ন গৃহ্লাতি হি শিষ্যশ্চেত্তদা পাপং গুরোর্ন হি। ইতি কুলার্ণববচনাৎ। ইতি শিবার্চ্চনচন্দ্রিকা ॥ মন্ত্রদগুরোর্লক্ষণং যথা। গকারঃ সিদ্ধিদঃ প্রোক্তো রেফঃ পাপস্য হারকঃ। উকারো বিষ্ণুরব্যক্তস্ত্রিতয়াত্মা গুরুঃ পরঃ ॥ শা[illegible]দান্তঃ কুলীনশ্চ বিনীতঃ শুদ্ধবেশবান্। শুদ্ধাচারঃ সুপ্রতিষ্ঠঃ শুচির্দক্ষঃ সুবুদ্ধিমান্ ॥ আশ্রমী ধ্যাননিষ্ঠশ্চ মন্ত্রতন্ত্রবিশারদঃ। নিগ্রহানুগ্রহে শক্তো গুরুরিত্যভিধীয়তে ॥ উদ্ধর্ত্তুং চৈব সংহর্ত্তুং সমর্থো ব্রাহ্মণোত্তমঃ। তপস্বী সত্যবাদী চ গৃহস্থো গুরুরুচ্যতে ॥ * ॥ দেশভেদেন তস্য বিশেষো যথা। মধ্যদেশকুরুক্ষেত্রনাটকোঙ্কণসম্ভবাঃ। অন্তর্ব্বেদিপ্রতিষ্ঠানা আবন্ত্যাশ্চ গুরূত্তমাঃ ॥ গৌড়াঃ শাল্লোদ্ভবাঃ সৌরা মগধাঃ কেরলাস্তথা। কোশলাশ্চ দশার্ণাশ্চ গুরবঃ সপ্ত মধ্যমাঃ ॥ কর্ণাটনর্ম্মদারেবাকচ্ছাতীরোদ্ভবাস্তথা। কালিঙ্গাশ্চ কলম্বাশ্চ কাম্বোজাশ্চাধমা মতাঃ ॥ বৈষ্ণবে বৈষ্ণবো গ্রাহ্যঃ শৈবে শৈবশ্চ শাক্তিকে। শৈবঃ শাক্তোঽপি সর্ব্বত্র দীক্ষাস্বামী ন সংশয়ঃ ॥ ইতি তন্ত্রসারঃ ॥ * ॥ গুরুরগ্নির্দ্বিজাতীনাং বর্ণানাং ব্রাহ্মণো গুরুঃ। পতিরেকো গুরুঃ স্ত্রীণাং সর্ব্বত্রাভ্যাগতো গুরুঃ ॥ ইতি চাণক্যং ॥ কপিকচ্ছুঃ। ইতি রাজনির্ঘণ্টঃ ॥ দ্বিমাত্রঃ। দীর্ঘঃ। ইতি শব্দরত্নাবলী ॥

গুরুঃ ( ত্রি ) মহান্। দুর্জ্জরঃ। অলঘুঃ। ইতি মেদিনী ॥

গুরুক্রমঃ (পুং) ইতিহ। পারম্পর্য্যোপদেশঃ। ইতি হলায়ুধঃ ॥

গুরুম্নঃ ( পুং ) গৌরসর্ষপঃ। ইতি রাজনির্ঘণ্টঃ। গুরুহন্তরি ত্রি ॥

গুরুণ্টকঃ ( পুং ) তিলময়ূরঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

গুরুতল্পগঃ ( পুং ) বিমাতৃগন্তা। যথা। গুরুতল্পগঃ সুরাপশ্চ রুক্মস্তেয্যথ বিপ্রহা। মহাপাতকিনস্ত্বেতে সংসর্গী চৈব পঞ্চমঃ ॥ ইতি প্রায়শ্চিত্তবিবেকঃ ॥

গুরুতালঃ ( পুং ) তালবিশেষঃ। যথা। এক এব গুরুর্যত্র গুরুতালঃ স কথ্যতে। অপরং নিয়মং বিনা। ইতি সঙ্গীতদামোদরঃ ॥

গুরুত্বং ( ক্লী ) মহত্ত্বং। গুরুতা। অলঘুতা। যথা। অতীন্দ্রিয়ং গুরুত্বং স্যাৎ পৃথিব্যাদিদ্বয়ে তু তৎ। অনিত্যে তদনিত্যং স্যাৎ নিত্যে নিত্যমুদাহৃতং ॥ তদেবাসমবায়ি স্যাৎ পতনাখ্যে তু কর্ম্মণি। ইতি ভাষাপরিচ্ছেদঃ ॥

গুরুদৈবতঃ ( পুং ) পুষ্যনক্ষত্রং। ইতি হেমচন্দ্রঃ ॥

গুরুপত্রং ( ক্লী ) বঙ্গং। ইতি হেমচন্দ্রঃ ॥

গুরুপত্রা ( স্ত্রী ) তিন্তিড়ীবৃক্ষঃ। ইতি শব্দরত্নাবলী ॥

গুরুমর্দ্দলঃ ( পুং ) ডিণ্ডিমবাদ্যং। ইতি শব্দরত্নাবলী ॥

গুরুরত্নং (স্ত্রী) পুষ্পরাগমণিঃ। ইতি রাজ-
নির্ঘণ্টঃ॥
গুরুবর্চ্চোঘ্নঃ (পুং) লিম্পাকঃ। পাতিলেবু
ইতি ভাষা। ইতি শব্দচন্দ্রিকা॥
গুরুহা [ন্] (পুং) গুরুঘ্নঃ। তৎপর্য্যায়ঃ।
নরকীলকঃ ২। ইতি হেমচন্দ্রঃ॥
গুর্জ্জরঃ (পুং) গুজ্জরাটদেশঃ। ইতি শব্দ-
রত্নাবলী॥
গুর্জ্জরী (স্ত্রী) রাগিণীবিশেষঃ। ইতি হলা-
য়ুধঃ॥
গুর্দ্দ ক নিকেতনে। কূর্দ্দে। ইতি কবি-
কল্পদ্রুমঃ॥ দীর্ঘিণো বক্ষ্যমাণত্বাদস্য ন
দীর্ঘঃ। ক গুর্দয়তি। নিকেতনং নিবাসঃ।
ইতি দুর্গাদাসঃ॥
গুর্দ্দ ঙ কূর্দ্দে। ইতি কবিকল্পদ্রুমঃ॥ দীর্ঘিণো
বক্ষ্যমাণত্বাদস্যাপি ন দীর্ঘঃ। ঙ গুর্দতে।
কূর্দ্দঃ ক্রীড়া। ইতি দুর্গাদাসঃ॥
গুর্ব্ব ঈ উদ্যমে। ইতি কবিকল্পদ্রুমঃ॥ হ্রস্বী।
গূঃ গুরৌ গুরঃ। ঈ গূর্ণঃ। গুর্ব্বতি পত্তিঃ
খড়্গং। ইতি দুর্গাদাসঃ॥
গুর্ব্বিণী (স্ত্রী) গর্ব্বিণী। ইত্যমরঃ॥
গুর্ব্বী (স্ত্রী) গর্ব্ভবতী। ইতি হেমচন্দ্রঃ॥
গুরুপত্নী। গুরুত্বযুক্তা। যথা। অনন্য-
গুর্ব্ব্যাস্তবকেন কেবলঃ পুরাণমূর্ত্তের্মহিমা-
বগম্যতে। ইতি মাঘঃ॥
গুলঃ (পুং) ঐক্ষবঃ। গুড়ঃ। ইতি মেদিনী॥
গুলঞ্চকন্দঃ (পুং) কন্দবিশেষঃ। কুলী ইতি
ভাষা। তৎপর্য্যায়ঃ। গুচ্ছাহ্বকন্দঃ ২
বলাহ্বকন্দঃ ৩ নিঘণ্টিকা ৪। অস্য গুণাঃ।
মধুরত্বং। সুশীতলত্বং। বৃষ্যপ্রদত্বং।
তর্পণত্বং। দাহনাশিত্বঞ্চ। ইতি রাজ-
নির্ঘণ্টঃ॥
গুলা (স্ত্রী) স্নুহীবৃক্ষঃ। ইতি মেদিনী॥
গুলী (স্ত্রী) গুটিকা। রোগভেদঃ। বসন্ত
ইতি খ্যাতঃ। ইতি মেদিনী॥
গুলুচ্ছঃ (পুং) গুচ্ছঃ। স্তবকঃ। ইতি ত্রিকাণ্ড-
শেষঃ॥
গুলুঞ্চঃ (পুং) গুচ্ছঃ। ইতি হেমচন্দ্রঃ॥
গুলুঞ্ছকঃ (পুং) গুচ্ছঃ। ইতি শব্দরত্নাবলী॥
গুল্ফঃ (পুং) পাদগ্রন্থিঃ। তৎপর্য্যায়ঃ।
ঘুটিকা ২। ইত্যমরঃ॥ চরণগ্রন্থিঃ ৩
কঃ ৪ ঘুণ্টকঃ ৫ ঘুণ্টঃ ৬। ইতি হেম-
চন্দ্রঃ॥
গুল্মঃ (পুং) উদরজরোগবিশেষঃ। তস্য
নিদানাদি। দুষ্টা বাতাদয়োঽত্যর্থং মিথ্যা-
হারবিহারতঃ। কুর্ব্বন্তি পঞ্চধা গুল্মং
কোষ্ঠান্তর্গ্রন্থিরূপিণং॥ *॥ তস্য পঞ্চ-
বিধং স্থানং পার্শ্বে হৃন্নাভিবস্তয়ঃ। হৃন্না-
ভ্যোরন্তরে গ্রন্থিঃ সঞ্চারী যদি বাচলঃ॥
বৃত্তশ্চয়াপচয়বান্ স গুল্ম ইতি কীর্ত্তিতঃ।
স ব্যস্তৈর্জায়তে দোষৈঃ সমস্তৈরপি
চোচ্ছ্রিতৈঃ॥ পুরুষাণাং তথা স্ত্রীণাং
জ্ঞেয়ো রক্তেন চাপরঃ॥ *॥ তস্য পূর্ব্ব-
রূপং যথা। উদ্গারবাহুল্যপুরীষবন্ধতৃপ্ত্য-
ক্ষমত্বান্ত্রবিকূজনানি। আটোপ আধ্মান-
মপক্তিশক্তিরাসন্নগুল্মস্য বদন্তি লিঙ্গং॥*॥
তস্য সামান্যরূপং। অরুচিঃ কৃচ্ছ্রবিণ্মূত্র-
বাতত্বান্ত্রবিকূজনং। আনাহশ্চোর্দ্ধবাতশ্চ
সর্ব্বগুল্মেষু লক্ষয়েৎ॥ *॥ বাতিকস্য
নিদানং যথা। রুক্ষান্নপানং বিষমাতি-

মাত্রং বিচেষ্টনং বেগবিনিগ্রহশ্চ। শোকোঽভিঘাতোঽতিমলক্ষয়শ্চ নিরন্নতা চানিলগুল্মহেতুঃ ॥ * ॥ বাতিকস্য রূপং। যথা। যঃ স্থানসংস্থানরুজা বিকল্পং বিড্বাতসঙ্গং গলবক্ত্রশোষং। শ্যাবারুণত্বং শিশিরজ্বরঞ্চ হৃৎকুক্ষিপার্শ্বাংসশিরোরুজঞ্চ ॥ করোতি জীর্ণেঽভ্যধিকং প্রকোপং ভুক্তে মৃদুত্বং সমুপৈতি যশ্চ। বাতাৎ স গুল্মো ন চ তত্র রূক্ষং কষায়তিক্তং কটু চোপশেতে ॥ * ॥ পৈত্তিকস্য নিদানং যথা। কট্বম্লতীক্ষ্ণোষ্ণবিদাহিরূক্ষক্রোধাতিমদ্যার্কহুতাশসেবা আমাভিঘাতো রুধিরঞ্চ দুষ্টং পৈত্তস্য গুল্মস্য নিমিত্তমুক্তং ॥ * ॥ পৈত্তিকস্য রূপং যথা। জ্বরঃ পিপাসা বদনাঙ্গরাগঃ শূলং মহজ্জীর্য্যতি ভোজনে চ। স্বেদো বিদাহো ব্রণবচ্চ গুল্মঃ স্পর্শাসহঃ পৈত্তিকগুল্মরূপং ॥ * ॥ শ্লৈষ্মিকস্য নিদানং। শীতং গুরু স্নিগ্ধমচেষ্টনঞ্চ সংপূরণং প্রস্বপনং দিবা চ। গুল্মস্য হেতুঃ কফসম্ভবস্য সর্ব্বস্তু দুষ্টো নিচয়াত্মকস্য ॥ * ॥ শ্লৈষ্মিকস্য রূপং। স্তৈমিত্যশীতজ্বরগাত্রসাদহৃল্লাসকাসারুচিগৌরবাণি। শৈত্যং রুগল্পা কঠিনোন্নতত্বং গুল্মস্য রূপাণি কফাত্মকস্য ॥ * ॥ দ্বন্দ্বজস্য রূপং যথা। নিমিত্তলিঙ্গান্যুপলভ্য গুল্মে দ্বিদোষজে দোষবলাবলঞ্চ। ব্যামিশ্রলিঙ্গানপরাংশ্চ গুল্মাংস্ত্রীনাদিশেদৌষধকল্পনার্থং ॥ * ॥ ত্রিদোষজস্য রূপং যথা। মহারুজং দাহপরীতমশ্মবদ্ঘনোন্নতং শীঘ্রবিদাহিদারুণং। মনঃশরীরাগ্নিবলাপহারিণং ত্রিদোষজং গুল্মমসাধ্যমাদিশেৎ ॥ * ॥ অথ স্ত্রীণাং রক্তজগুল্মনিদানং যথা। নবপ্রসূতাহিতভোজনা যা যা চামগর্ভং বিসৃজেদৃতৌ বা। বায়ুর্হি তস্যাঃ পরিগৃহ্য রক্তং করোতি গুল্মং সরুজং সদাহং ॥ * ॥ স্ত্রীণাং রক্তজগুল্মলক্ষণং যথা। পৈত্তস্য লিঙ্গেন সমানলিঙ্গং বিশেষণঞ্চাপ্যপরং নিবোধ। যঃ স্পন্দতে পিণ্ডিত এব নাঙ্গৈশ্চিরাৎ সশূলঃ সমগর্ভলিঙ্গঃ ॥ সরৌধিরঃ স্ত্রীভব এব গুল্মো মাসে ব্যতীতে দশমে চিকিৎস্যঃ। স্ত্রীণামার্ত্তবজো গুল্মো ন পুংসামুপজায়তে। অন্যস্ত্বসৃগ্‌ভবো গুল্মঃ স্ত্রীণাং পুংসাঞ্চ জায়তে ॥ * ॥ অথাসাধ্যলক্ষণং যথা। সঞ্চিতঃ ক্রমশো গুল্মো মহাবাস্তুপরিগ্রহঃ। কৃতমূলঃ শিরানদ্ধো যদা কূর্ম্ম ইবোন্নতঃ ॥ দৌর্ব্বল্যারুচিহৃল্লাসকাসচ্ছর্দ্যরতিজ্বরৈঃ। তৃষ্ণাতন্দ্রাপ্রতিশ্যায়ৈর্যুজ্যতে ন স সিধ্যতি ॥ গৃহীত্বা সজ্বরং শ্বাসচ্ছর্দ্যতীসারপীড়িতং। হৃন্নাভিহস্তপাদেষু শোথঃ কর্ষতি গুল্মিনং ॥ শ্বাসঃ শূলং পিপাসান্নবিদ্বেষো গ্রন্থিমূঢ়তা। জায়তে দুর্ব্বলত্বঞ্চ গুল্মিনো মরণায় বৈ ॥ ইতি মাধবকরঃ ॥ * ॥ তচ্চিকিৎসা যথা। বাতারিতৈলেন পয়োযুতেন পথ্যাসমেতেন বিরেচনং হি। সংস্বেদনং স্নিগ্ধমতিপ্রশস্তং প্রভঞ্জনক্রোধকৃতে তু গুল্মে ॥ স্বর্জ্জিকাকুষ্ঠসহিতঃ ক্ষারঃ কেতকসম্ভবঃ। পীতস্তৈলেন শময়েদ্‌গুল্মং পবনসম্ভবং ॥ তিত্তিরাংশ্চ ময়ূরাংশ্চ কুক্কুটান্ ক্রৌঞ্চবর্ত্তকান্। সর্পিঃ

শালিং প্রসন্নাঞ্চ বাতগুল্মে প্রযোজয়েৎ ॥*॥ পিত্তগুল্মে ত্রিবৃচ্চূর্ণং পাতব্যং ত্রিফলাম্বুনা। বিরেকায় সিতাযুক্তং কম্পিল্লং বা সমাক্ষিকং ॥ ত্রিফলাম্বুনা ত্রিফলাক্বাথেন। কম্পিল্লং কম্বিলা ইতি লোকে। অভয়াং দ্রাক্ষয়া খাদেৎ পিত্তগুল্মী গুড়েন বা। *। যোগৈশ্চ বাতগুল্মোক্তৈঃ শ্লেষ্মগুল্মমুপাচরেৎ॥ অপরৈশ্চ বলাসঘ্নৈর্যুক্তিযুক্তৈঃ শমং নয়েৎ। *। হিঙ্গুগ্রন্থিকধান্যজীরকবচাচব্যাগ্নিপাঠাশটীবৃক্ষাম্লং লবণত্রয়ং ত্রিকটুকং ক্ষারদ্বয়ং দাড়িমং। পথ্যাপৌষ্করবেতসাম্লহবুষাজাজ্যন্তদেভিঃ কৃতং চূর্ণং ভাবিতমেতদার্দ্রকরসৈঃ স্যাদ্‌বীজপূরদ্রবৈঃ ॥ গুল্মাধ্মানগুদাঙ্কুরান্ গ্রহণিকোদাবর্ত্তসংজ্ঞৌ গদৌ প্রত্যাধ্মানগরোদরাশ্মরিযুতাংস্তূনীদ্বয়ারোচকান্ । ঊরুস্তম্ভমতিভ্রমঞ্চ মনসো বাধির্য্যমষ্ঠীলিকাং প্রত্যষ্ঠীলিকয়া সহাপহরতে প্রাক্‌পীতমুষ্ণাম্বুনা ॥ হৃৎকুক্ষিবংক্ষণকটীজঠরান্তরেষু বস্তিস্তনাংশফলকেষু চ পার্শ্বয়োশ্চ। শূলানি নাশয়তি বাতবলাসজানি হিঙ্গ্বাদ্যমাদ্যমিদমাশ্বিনসংহিতোক্তং ॥ হিঙ্গ্বাদিচূর্ণং ॥ * ॥ ধীমানুপচরেদ্‌গুল্মং প্রত্যাখ্যায় ত্রিদোষজং। সন্নিপাতোত্থিতে গুল্মে ত্রিদোষঘ্নো বিধির্হিতঃ॥ শরপুঙ্খস্য লবণং পথ্যাচূর্ণং সমং দ্বয়ং। শাণপ্রমাণমশ্নীয়াচ্চূর্ণং গুল্মগদাপহং॥ স্বর্জ্জিকা শাণমানা স্যাত্তাবদেব গুড়ং ভবেৎ। উভয়োর্ব্বটিকাং খাদেদ্‌গুল্মাময়বিনাশিনীং ॥ * ॥ পলাশবজ্রীশিখরিচিঞ্চার্কতিলনালজাঃ। যবজঃ

স্বর্জ্জিকা চেতি ক্ষারা অষ্টৌ প্রকীর্ত্তিতাঃ॥ গুল্মশূলহরাঃ ক্ষারা অজীর্ণস্য চ পাচনাঃ। ক্ষারাষ্টকং ॥ * ॥ সামুদ্রং সৈন্ধবং কাচং যবক্ষারঃ সুবর্চ্চলং। টঙ্কণং স্বর্জ্জিকাক্ষারস্তুল্যং চূর্ণং প্রকল্পয়েৎ ॥ বজ্রীক্ষীরৈরবিক্ষীরৈরাতপে ভাবয়েৎ ত্র্যহং। বেষ্টয়েদর্কপত্রেণ রুদ্ধ্বা ভাণ্ডপুটে পচেৎ ॥ তৎক্ষারং চূর্ণয়েৎ পশ্চাৎ ত্র্যূষণং ত্রিফলাং তথা। যবানী জীরকো বহ্নিশ্চূর্ণমেষাঞ্চ কারয়েৎ॥ সর্ব্বচূর্ণসমক্ষারঃ সর্ব্বমেকত্র কারয়েৎ। তচ্চূর্ণং টঙ্কযুগলং সলিলেন প্রযোজয়েৎ॥ গুল্মে শূলে তথাজীর্ণে শোথে সর্ব্বোদরেষু চ। মন্দে বহ্ন্যাবুদাবর্ত্তে প্লীহ্নি চাপি পরং হিতং ॥ বাতেঽধিকে জলৈঃ কোষ্ণৈর্হিতং পিত্তেঽধিকে ঘৃতৈঃ। গোমূত্রেণ কফাধিক্যে কাঞ্জিকেন ত্রিদোষজে॥ বজ্রক্ষার ইতি খ্যাতঃ প্রোক্তঃ পূর্ব্বং স্বয়ম্ভুবা। সেবিতো হরতেঽজীর্ণং তথাজীর্ণভবান্ গদান্ ॥ বজ্রক্ষারঃ ॥ * ॥ সুবর্চ্চিকা টঙ্কমিতা শাণমানার্দ্রিকাপি চ। উভে ভুঞ্জীত যুগপদ্‌গুল্মাময়নিবৃত্তয়ে ॥ সুবর্চ্চিকা সোরা ইতি লোকে। শুক্তিকাচূর্ণগুটিকাং টঙ্কমাত্রাং সুবেষ্টয়েৎ। গুড়েন শাণমানেন তাঙ্গিলেৎ গুল্মরোগবান্ ॥ গুল্মী কুমারিকামাংসং কর্ষার্দ্ধং গোঘৃতান্বিতং। গিলেৎ ঘোষাভয়াসিন্ধুসূক্ষ্মচূর্ণাবধূলিতং ॥ কুমারিকা ঘিউকুঁয়ারী ইতি লোকে ॥ * ॥ বল্লূরং মূলকং মৎস্যং শুষ্কশাকানি বৈদলং। ন খাদেদালুকং গুল্মী মধুরাণি ফলানি চ॥

বৈদলানাং নিষেধেঽপি মাষকুলত্থয়োরত্র নিষেধঃ। ইতি সুশ্রুতটীকা। ইতি গুল্মাধিকারঃ॥ ইতি ভাবপ্রকাশঃ॥ সেনাসংখ্যাবিশেষঃ। অত্র গজা নব রথা নব অশ্বাঃ সপ্তবিংশতিঃ পদাতয়ঃ পঞ্চচত্বারিংশৎ সমুদায়েন নবতিঃ॥ প্লীহা। অপ্রকাণ্ডবৃক্ষঃ। তৎপর্য্যায়ঃ। স্তম্বঃ ২। ইত্যমরঃ॥ অবিদ্যমানপ্রকাণ্ডস্তনুপ্রকাণ্ডো বা বহুপত্রবান্ মল্লীঝিণ্টীনলকমলবংশবীরণাদিঃ মূলাদারভ্য পূর্ব্বভাগঃ প্রকাণ্ডঃ। ইতি ভরতঃ॥ ঘট্টভেদঃ। সৈন্যরক্ষণং। ইতি মেদিনী॥

গুল্মকেতুঃ (পুং) অম্লবেতসঃ। ইতি রাজনির্ঘণ্টঃ॥

গুল্মমূলং (ক্লী) আর্দ্রকং। ইতি রাজনির্ঘণ্টঃ॥

গুল্মবল্লী (স্ত্রী) সোমলতা। ইতি রাজনির্ঘণ্টঃ॥

গুল্মশূলঃ (পুং) রোগবিশেষঃ। তস্যৌষধং যথা। নারী পুষ্পদিনে পীত্বা গোক্ষীরেণোপবাসতঃ। শ্বেতার্কস্য তু বৈ মূলং তস্যাস্তদ্গুল্মশূলমুৎ॥ ইতি গারুড়ে ১৯৩ অধ্যায়ঃ॥

গুল্মিনী (স্ত্রী) বিস্তৃতা লতা। তৎপর্য্যায়ঃ। বীরুৎ২ উলুপঃ৩। ইত্যমরঃ॥ বীরুধা ৪ অবরুৎ ৫। ইতি শব্দরত্নাবলী॥

গুল্মী (স্ত্রী) আমলকী। এলা। বনী। বস্ত্রবেশ্ম। ইতি মেদিনীশব্দরত্নাবল্যৌ হেমচন্দ্রশ্চ॥ গৃধ্রনখীবৃক্ষঃ। গুড়কাওলী ইতি ভাষা। ইতি শব্দচন্দ্রিকা॥ গুল্মরোগযুক্তে ত্রি॥

গুল্যঃ (পুং) মধুরঃ। স্বাদুঃ। ইতি হেমচন্দ্রঃ॥

গুবাকঃ (পুং) বৃক্ষবিশেষঃ। গুয়া সুপারি ইতি চ ভাষা। তৎপর্য্যায়ঃ। ঘোণ্টা ২ পূগঃ ৩ ক্রমুকঃ ৪ খপুরঃ ৫। ইত্যমরঃ॥ গূবাকঃ ৬। ইতি তট্টীকা॥ পূগবৃক্ষঃ ৭ দীর্ঘপাদপঃ ৮ বল্কতরুঃ ৯ দৃঢ়বল্কঃ ১০ চিক্কণঃ ১১। ইতি রাজনির্ঘণ্টঃ॥ পূগী ১২। ইতি ভাবপ্রকাশঃ॥ সুরঞ্জনঃ ১৩ গোপদলঃ ১৪ রাজতালঃ ১৫ ছটাফলঃ ১৬। ইতি ত্রিকাণ্ডশেষঃ॥ *॥ অস্য ফলস্য পর্য্যায়ঃ। ক্রমুকফলং ১ পূগং ২ চিক্কণী ৩ চিক্কা ৪ চিক্কণং ৫ শ্লক্ষ্ণকং ৬ উদ্বেগং ৭ পূগফলং ৮। ইতি রাজনির্ঘণ্টঃ॥ পূগীফলং ৯। ইতি ভাবপ্রকাশঃ॥ *॥ অস্য মস্তিষ্কস্য গুণাঃ। স্বাদুত্বং। তিক্তত্বং। কষায়ত্বং। বলপ্রাণশুক্রবৃদ্ধিভেদমদকারিত্বং। মূত্ররোগনাশিত্বঞ্চ। ইতি রাজবল্লভঃ॥ *॥ অস্য নির্য্যাসস্য গুণাঃ। হিমত্বং। মোহনত্বং। গুরুত্বং। বিপাকে উষ্ণত্বং। ক্ষারত্বং। সাম্লত্বং। বাতঘ্নত্বং। পিত্তলত্বঞ্চ॥ *॥ অস্য ফলগুণাঃ। সম্মোহকারিত্বং। কষায়ত্বং। স্বাদুত্বং। রেচনত্বং। ত্রিদোষশমনত্বং। রুচ্যত্বং। বক্ত্রক্লেদমলাপহত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ গুরুত্বং। রূক্ষত্বং। কফপিত্তকারিত্বং। দীপনত্বঞ্চ॥ *॥ আর্দ্রস্য তস্য গুণাঃ। গুরুত্বং। অভিষ্যন্দিত্বং। অগ্নিদৃষ্টিহরত্বঞ্চ॥ *॥ স্বিন্নস্য তস্য গুণঃ। দোষত্রয়চ্ছেদিত্বং। দৃঢ়মধ্যাৎ তদুত্তমং। ইতি

ভাবপ্রকাশঃ ॥ * ॥ আমপূগস্য গুণাঃ। কষায়ত্বং। মুখমলরক্তামশ্লেষ্মপিত্তোদরাধ্মাননাশিত্বং। কণ্ঠশুদ্ধিকারিত্বং। সারকত্বঞ্চ ॥ * ॥ শুষ্কস্য তস্য গুণাঃ। কণ্ঠাময়ঘ্নত্বং। রুচিকরত্বং। পাচনত্বং। রেচনত্বঞ্চ ॥ * ॥ তৎ তাম্বুলেনোনমযুতঞ্চ চেৎ ঝটিতি পাণ্ডুবাতশোথকারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ * ॥ তৎপীগগুণাঃ। তস্যাদিপীগং বিষতুল্যং। দ্বিতীয়পাগং ভেদকং দুর্জরঞ্চ। তৃতীয়পীগং পানোপযুক্তং সুধাতুল্যং রসায়নঞ্চ। ইতি রাজবল্লভঃ ॥

গুহ উ ঞ সংবৃতৌ। ইতি কবিকল্পদ্রুমঃ ॥ হ্রস্বী। উ অগূহীৎ অঘুক্ষৎ। ঞ গূহতি গূহতে। গুহো গোরূরিতি দীর্ঘঃ। ইতি দুর্গাদাসঃ ॥

গুহঃ (পুং) কার্ত্তিকেয়ঃ। ইত্যমরঃ ॥ ঘোটকঃ। ইতি শব্দরত্নাবলী ॥ শ্রীরামসখঃ। স তু শৃঙ্গবেরপুরবাসী নিষাদাধিপতিঃ। ইতি রামায়ণং ॥ বিষ্ণুঃ। ইতি তস্য সহস্রনামমধ্যে পঠিতঃ ॥ কায়স্থানাং পদ্ধতিবিশেষশ্চ ॥

গুহষষ্ঠী (স্ত্রী) মার্গশীর্ষমাসীয়শুক্লষষ্ঠী। যথা ভবিষ্যে। যেয়ং মার্গশিরে মাসি ষষ্ঠী ভরতসত্তম। পুণ্যা পাপহরা ধন্যা শিবা শান্তা গুহপ্রিয়া ॥ শুক্লেয়ং গুহষষ্ঠী। ইতি তিথ্যাদিতত্ত্বং ॥

গুহা (স্ত্রী) সিংহপুচ্ছীলতা। গর্ত্তঃ। পর্ব্বতাদের্গহ্বরং। ইতি মেদিনী ॥ শেষস্য পর্য্যায়ঃ। বিলং২ শিলাসন্ধিঃ৩ দেবখাতং৪ গহ্বরং ৫। শালপর্ণীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

গুহাশয়ঃ (পুং) ব্যাঘ্রঃ। ইতি রাজনির্ঘণ্টঃ ॥ বিষ্ণুঃ। যথা। তাবৎ স ভগবান্ সাক্ষাৎ যোগাধীশো গুহাশয়ঃ। অন্তর্দধে ঋষেঃ সদ্যো যথেহানীশনির্ম্মিতা ॥ ইতি শ্রীভাগবতং ॥

গুহিনং (ক্লী) বনং। ইতি শব্দরত্নাবলী ॥

গুহিলং (ক্লী) ধনং। ইত্যুণাদিকোষঃ ॥

গুহেরঃ (পুং) লৌহকারঃ। ইত্যুণাদিকোষঃ ॥ গোপ্তা। ইতি সংক্ষিপ্তসারে উণাদিবৃত্তিঃ ॥

গুহ্যং (ক্লী) উপস্থঃ। স তু ভগং লিঙ্গঞ্চ। রহস্যে ত্রি। ইত্যমরঃ ॥ গোপ্যং। তৎপর্য্যায়ঃ। বিবিক্তঃ২ বিজনঃ৩ ছন্নঃ ৪ নিঃশলাকঃ ৫ রহঃ ৬ উপাংশু ৭ গূঢ়ং ৮ উপহ্বরং ৯। ইতি জটাধরঃ ॥

গুহ্যঃ (পুং) কমঠঃ। দম্ভঃ। ইতি মেদিনী ॥ বিষ্ণুঃ। ইতি তস্য সহস্রনামমধ্যে পঠিতঃ ॥

গুহ্যকঃ (পুং) দেবযোনিবিশেষঃ। স তু কুবেরানুচরঃ নিধিরক্ষকো মাণিভদ্রাদিযক্ষভেদঃ। ইত্যমরভরতৌ ॥ * ॥ তস্য লোকঃ পিশাচলোকাদূর্দ্ধং গন্ধর্ব্বলোকাদধঃ। যথা। ততো গচ্ছন্দদর্শাগ্রে হৃষ্টপুষ্টজনৈর্বৃতং। পিচিণ্ডিলৈঃ স্থূলবক্ত্রৈর্মেঘগম্ভীরনিস্বনৈঃ ॥ লোকৈরধ্যুষিতং লোকং শ্যামলাঙ্গৈশ্চ লোমশৈঃ। গণৌ কথয়তং কেহমী কো লোকঃ পুণ্যতঃ কৃতঃ ॥ গণাবূচতুঃ। গুহ্যকানাময়ং লোকস্ত্বেতে বৈ গুহ্যকাঃ স্মৃতাঃ। ন্যায়েনোপার্জ্য বিত্তানি গূহয়ন্তি চ যে ভুবি ॥ স্ব-

মার্গগা ধনাঢ্যাশ্চ শূদ্রপ্রায়াঃ কুটুম্বিনঃ। সংবিভজ্য চ ভোক্তারঃ ক্রোধাসূয়াবিবর্জ্জিতাঃ॥ ন তিথিং নৈব বারঞ্চ সংক্রান্ত্যাদি ন পর্ব্ব চ। নাধর্ম্মঞ্চ ন ধর্ম্মঞ্চ বিদন্ত্যেতে সদাসুখাঃ॥ একমেব হি জানন্তি কুলপূজ্যো হি যো দ্বিজঃ। তস্মৈ গাঃ সংপ্রযচ্ছন্তি মন্যন্তে তদ্বচঃ স্ফুটং॥ সমৃদ্ধিভাজো হ্যত্রাপি তেন পুণ্যেন গুহ্যকাঃ। ভুঞ্জতে স্বর্গসৌখ্যানি দেবস্বমকুতোভয়াঃ॥ ইতি কাশীখণ্ডে শিবশর্ম্মণো বৈকুণ্ঠলোকগমনে বিষ্ণুগণসম্বাদঃ॥

গুহ্যকেশ্বরঃ (পুং) কুবেরঃ। ইত্যমরঃ॥

গুহ্যগুরুঃ (পুং) শিবঃ। ইতি ত্রিকাণ্ডশেষঃ॥

গুহ্যদীপকঃ (পুং) খদ্যোতঃ। ইতি শব্দচন্দ্রিকা॥

গুহ্যনিষ্যন্দঃ (পুং) মূত্রং। ইতি রাজনির্ঘণ্টঃ॥

গুহ্যপুষ্পঃ (পুং) অশ্বত্থবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

গুহ্যভাষিতং (ক্লী) মন্ত্রঃ। ইতি জটাধরঃ॥ গুপ্তবাক্যঞ্চ॥

গুহ্যবীজঃ (পুং) ভূতৃণং। ইতি রাজনির্ঘণ্টঃ॥

গূ ও শি বিট্‌সৃজৌ। ইতি কবিকল্পদ্রুমঃ॥ ও গূনঃ। শি গুবতি অগুবীৎ। বিট্‌সৃজির্হদনং। ইতি দুর্গাদাসঃ॥

গূঃ (পুং) গুঃ। বিষ্ঠা। গুধাতোঃ কর্ম্মণি ক্বিপ্‌প্রত্যয়েন নিষ্পন্নঃ॥

গূঢ়ং (ক্লী) রহঃ। গুহ্যং। ইতি মেদিনী॥

গূঢ়ঃ (ত্রি) সংবৃতঃ। গুপ্তঃ। ইত্যমরমেদিনীকরৌ॥

গূঢ়জঃ (পুং) গূঢ়োৎপন্নপুত্রঃ। ইতি মিতাক্ষরা।

গূঢ়নীড়ঃ (পুং) খঞ্জনপক্ষী। ইতি শব্দমালা॥

গূঢ়পত্রঃ (পুং) করীরবৃক্ষঃ। অঙ্কোঠবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

গূঢ়পথঃ (পুং) অন্তঃকরণং। ইতি হেমচন্দ্রঃ॥ গুপ্তপথশ্চ॥

গূঢ়পাৎ [দ্] (পুং) সর্পঃ। ইত্যমরঃ॥

গূঢ়পাদঃ (পুং) সর্পঃ। ইতি শব্দরত্নাবলী॥

গূঢ়পুরুষঃ (পুং) চরঃ। ইত্যমরঃ॥

গূঢ়পুষ্পকঃ (পুং) বকুলবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

গূঢ়ফলঃ (পুং) বদরঃ। ইতি রাজনির্ঘণ্টঃ॥

গূঢ়মার্গঃ (পুং) ভুবোঽন্তরমার্গঃ। সুড়ঙ্গ ইতি ভাষা। তৎপর্য্যায়ঃ। সুরঙ্গা ২ সন্ধিলা ৩। ইতি হেমচন্দ্রঃ॥

গূঢ়মৈথুনঃ (পুং) কাকঃ। ইতি ত্রিকাণ্ডশেষঃ॥

গূঢ়বর্চ্চাঃ [স্] (পুং) ভেকঃ। ইতি ত্রিকাণ্ডশেষঃ॥

গূঢ়বল্লিকা (স্ত্রী) অঙ্কোঠবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

গূঢ়সাক্ষী [ন্] (ত্রি) যোঽর্থিনা গূঢ়তয়া প্রত্যর্থিবচনং শ্রাবিতঃ সঃ। ফরিয়াদী গোপনে রাখিয়া আসামীর কথা যাহাকে শুনাইয়াছে সেই সাক্ষী ইতি ভাষা। তথা চ নারদঃ। অর্থিনা স্বার্থসিদ্ধ্যর্থং প্রত্যর্থিবচনং স্ফুটং। যঃ শ্রাব্যতে তদা গূঢ়ো গূঢ়সাক্ষী স উচ্যতে॥ ইতি ব্যবহারতত্ত্বং॥

গূঢ়াঙ্গঃ (পুং) কচ্ছপঃ। ইতি রাজনির্ঘণ্টঃ॥

গূঢ়াঙ্ঘ্রিঃ (পুং) সর্পঃ। ইতি রাজনির্ঘণ্টঃ॥

গূঢ়োৎপন্নঃ (পুং) দ্বাদশবিধপুত্রমধ্যে পুত্রবিশেষঃ। যথা। উৎপদ্যতে গৃহে যস্য ন চ জ্ঞায়েত কস্য সঃ। স গৃহে গূঢ় উৎপন্নস্তস্য স্যাদ্যস্য তল্পজঃ॥ ইতি মনুঃ॥ অস্যার্থঃ। যস্য গৃহেঽবস্থিতায়াং ভার্য্যায়াং পুত্র উৎপদ্যতে সজাতীয়োঽয়ং ভবতীতি জ্ঞানেঽপি কস্মাৎ পুরুষবিশেষাজ্জাতোঽসাবিতি ন জ্ঞায়তে স গৃহে অপ্রকাশমুৎপন্নস্তস্য পুত্রঃ স্যাৎ যদীয়ায়াং ভার্য্যায়াং জাতঃ। ইতি কুল্লুকভট্টঃ॥

গূথং (ক্লী) বিষ্ঠা। গু ইতি ভাষা। ইত্যমরঃ॥

গূথলক্তঃ (পুং) পক্ষিবিশেষঃ। গুয়ে শালিক্ ইতি ভাষা। তৎপর্য্যায়ঃ। শরমল্লঃ ২ ক্ষুদ্রচূড়ঃ ৩ সাল্লিকঃ ৪। ইতি শব্দচন্দ্রিকা॥

গূনঃ (ত্রি) কৃতপুরীষোৎসর্গঃ। তৎপর্য্যায়ঃ। হন্নঃ ২। ইত্যমরঃ॥

গূর ঙ ক উদ্যমে। ইতি কবিকল্পদ্রুমঃ॥ দীর্ঘী। ঙ ক ভগ্নেষু নো গূরয়তে মহোরগঃ। ইতি দুর্গাদাসঃ॥

গূর ঈ য ঙ বধে। গত্যাং। ইতি কবিকল্পদ্রুমঃ॥ দীর্ঘী। তথা চ। দীপিপূরিজনিগরিধূরয়ঃ কাশিবাশিপদিশূরিতূরয়ঃ। ঘূরিজূরিখিদিবিদ্যতিঃ ক্লিশিশ্চূরিশুধ্যতিমনো দিবাদিষু॥ ইতি রথোদ্ধতায়াং চণ্ডেশ্বরঃ। ইতি দুর্গাদাসঃ॥

গূরণং (ক্লী) উদ্যমঃ। ইত্যমরটীকায়াং রায়মুকুটঃ॥

গূর্দ্দ ক নিকেতনে। কূর্দ্দে। ইতি কবিকল্পদ্রুমঃ॥ ক গূর্দ্দয়তি। ইতি দুর্গাদাসঃ॥

গূর্দ্দ ঙ কূর্দ্দে। ইতি কবিকল্পদ্রুমঃ॥ ঙ গূর্দ্দতে। ইতি দুর্গাদাসঃ॥

গূবাকঃ (পুং) গুবাকঃ। ইতি শব্দরত্নাবলী॥

গূষণা (স্ত্রী) ময়ূরচন্দ্রকঃ। ময়ূরপিচ্ছচক্রং। ইতি শব্দচন্দ্রিকা॥

গৄ সেকে। ইতি কবিকল্পদ্রুমঃ॥ গরতি তরুং মেঘঃ। ইতি দুর্গাদাসঃ॥

গৃজ ধ্বনৌ। ইতি কবিকল্পদ্রুমঃ॥ সপ্তমস্বরী গর্জ্জতি। ইতি দুর্গাদাসঃ॥

গৃজ ই ধ্বনৌ। ইতি কবিকল্পদ্রুমঃ॥ সপ্তমস্বরী। ই গৃঞ্জ্যতে। ইতি দুর্গাদাসঃ॥

গৃঞ্জনং (ক্লী) বিষদিগ্ধপশোর্মাংসং। ইতি মেদিনী॥ মূলবিশেষঃ। সলগম ইতি খ্যাতঃ। তৎপর্য্যায়ঃ। শিখিমূলং ২ যবনেষ্টং ৩ বর্ত্তুলং ৪ গ্রন্থিমূলং ৫ শিখাকন্দং ৬ কন্দং ৭ ডিণ্ডীরমোদকং ৮। অস্য গুণাঃ। কটুত্বং। উষ্ণত্বং। কফবাতরোগগুল্মনাশিত্বং। রুচ্যত্বং। দীপনত্বং। হৃদ্যত্বং। দুর্গন্ধত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

গৃঞ্জনঃ (পুং) রসোনকঃ। রশুন্ ইতি ভাষা। ইতি মেদিনী॥ রক্তলশুনঃ। ইতি রাজনির্ঘণ্টঃ॥

গৃণ্ডীবঃ (পুং) পৃথুশৃগালঃ। বড় শেয়াল ইতি ভাষা। তৎপর্য্যায়ঃ। লোপাকঃ ২। ইতি হেমচন্দ্রঃ॥

গৃৎসঃ (পুং) কন্দর্পঃ। ইত্যুণাদিকোষঃ॥

গৃধ ইর্ য উ লিপ্সে। ইতি কবিকল্পদ্রুমঃ॥

ইত্থ্ অগৃধৎ অগর্দ্ধীৎ। অস্মাৎ পুষাদিত্বাৎ নিত্যং ঙ ইত্যন্যে। য গৃধ্যতি ধনং লুব্ধঃ। উ গর্দ্ধিত্বা গৃদ্ধা। ইতি দুর্গাদাসঃ॥

গৃধুঃ (পুং) কামদেবঃ। ইত্যুণাদিকোষঃ॥ অভিলাষুকঃ। ইতি সংক্ষিপ্তসারে উণাদিবৃত্তিঃ॥

গৃধূঃ (পুং) বুদ্ধিঃ। অপানং। কুৎসিতং। ইতি সংক্ষিপ্তসারে উণাদিবৃত্তিঃ॥

গৃধ্নুঃ (ত্রি) লুব্ধঃ। ইত্যমরঃ॥

গৃধ্নুতা (স্ত্রী) লুব্ধতা। তৎপর্য্যায়ঃ। রাগঃ ২ সঙ্গঃ ৩। ইতি ত্রিকাণ্ডশেষঃ॥

গৃধ্রঃ (পুং) পক্ষিবিশেষঃ। গৃধিনী শকুনী ইতি চ ভাষা। তৎপর্য্যায়ঃ। দাক্ষায্যঃ ২ বজ্রতুণ্ডঃ ৩ দূরদর্শনঃ ৪। ইতি রাজনির্ঘণ্টঃ॥

গৃধ্রনখী (স্ত্রী) কুলিকবৃক্ষঃ। কালিয়াকড়া ইতি ভাষা। ইতি রত্নমালা॥ কোলিবৃক্ষঃ। ইতি ত্রিকাণ্ডশেষঃ॥

গৃধ্রপত্রা (স্ত্রী) ধুস্ত্রপত্রাবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

গৃধ্ররাজঃ (পুং) জটায়ুপক্ষী। যথা। ভূয়ঃ কনকপুঙ্খাগ্রৈ রক্ষোবাণৈরজিহ্মগৈঃ। নির্বিভেদ সুতীক্ষ্ণাগ্রৈর্গৃধ্ররাজং শিলাশিতৈঃ॥ ইতি রামায়ণং॥

গৃধ্রসী (স্ত্রী) বাতরোগবিশেষঃ। তল্লক্ষণং যথা। স্ফিক্‌পূর্ব্বোরুকটীপৃষ্ঠজানুজঙ্ঘাপদং ক্রমাৎ। গৃধ্রসী স্তম্ভরুক্ তোদৈর্গৃহ্লাতি স্পন্দতে মুহুঃ॥ বাতাদ্বাতকফাভ্যাং সা বিজ্ঞেয়া দ্বিবিধা পুনঃ। বাতজায়াং ভবেত্তোদো দেহস্যাতীববক্রতা॥ জানুজঙ্ঘোরুসন্ধীনাং স্ফুরণং স্তব্ধতা ভৃশং। বাতশ্লেষ্মোদ্ভবায়াস্তু গৌরবং বহ্নিমার্দ্দবং॥ তন্দ্রা মুখপ্রসেকশ্চ ভক্তদ্বেষস্তথৈব চ। গৃধ্রসীবাতাৎ কেবলাৎ স্ফিগাদিপর্য্যন্তং স্তম্ভরুক্ তোদৈর্গৃহ্লাতি। ক্রমাৎ বৃদ্ধিক্রমাৎ। তেন যথা যথা বর্দ্ধতে তথা তথা স্ফিগাদীন্যাক্রামতি। নাত্র গ্রহণে নির্দ্দেশক্রমনিয়মঃ। তথা মুহুঃ স্পন্দতে স্ফিগাদিষু শিরাকম্পং করোতীত্যর্থঃ॥ *॥ অথ তস্যাশ্চিকিৎসা। গৃধ্রস্যাস্তু নরং সম্যক্ রেকেণ বমনেন বা। জ্ঞাত্বা নিরামং দীপ্তাগ্নিং বস্তিভিঃ সমুপাচরেৎ॥ নার্ব্বা বস্তিবিধিং কুর্য্যাদ্যাবদূর্দ্ধং ন শুদ্ধ্যতি। স্নেহো নিরর্থকঃ স স্যাদ্ভস্মন্যেব হুতো যথা॥ *॥ তৈলমেরণ্ডজং প্রাতর্গোমূত্রেণ পিবেন্নরঃ। মাসমেকং প্রয়োগোঽয়ং গৃধ্রস্যাস্তু গ্রহাপহঃ॥ ১॥ তৈলং ঘৃতং সার্দ্রকমাতুলুঙ্গরসং সচুক্রং সগুড়ং পিবেদ্বা। কট্যুরুপৃষ্ঠত্রিকশূলগুল্মগৃধ্রস্যুদাবর্ত্তহরঃ প্রয়োগঃ॥ ২॥ নিক্কুম্ভৈরেরণ্ডবীজানি পিষ্ট্বা ক্ষীরে বিপাচয়েৎ। তৎপায়সং কটীশূলে গৃধ্রস্যাং পরমৌষধং॥ ৩॥ এরণ্ডমূলং বিল্বঞ্চ বৃহতী কণ্টকারিকা। কষায়ো রুচকোপেতঃ পীতো বৃষণবস্তিজং॥ গৃধ্রসীজং হরেচ্ছূলং চিরকালানুবন্ধি চ। রুচকং সৌবর্চ্চলং॥ ৪॥ গোমূত্রৈরণ্ডতৈলাভ্যাং কৃষ্ণাচূর্ণং পিবেন্নরঃ। দীর্ঘকালোত্থিতাং হন্তি গৃধ্রসীং কফবাতজাং॥ ৫॥ সিংহাস্যদন্তীকৃতমালকানাং পিবেৎ কষায়ং রুবুতৈল-

মিশ্রং। যো গৃধ্রসীনষ্টগতিঃ প্রসুপ্তঃ স শীঘ্রগঃ স্যাদ্ধি কিমত্র চিত্রং ॥ ৬ ॥ বৃহন্নিম্বতরোঃ সারো বারিণা পরিপেষিতঃ। স পীতো নাশয়েৎ ক্ষিপ্রমসাধ্যামপি গৃধ্রসীং ॥ ৭ ॥ শেফালিকাদলৈঃ কাথো মৃদ্বগ্নিপরিপাচিতঃ। দুর্ব্বারং গৃধ্রসীরোগং পীতমাত্রঃ প্রণাশয়েৎ ॥ শেফালিকানির্গুণ্ডী ॥ ৮॥ রাস্নায়াস্তু পলশ্চৈকং পঞ্চকর্ষাণি গুগ্‌গুলোঃ। সর্পিষা বটিকাং কৃত্বা ভক্ষয়েৎ গৃধ্রসীহরীং॥ রাস্নাগুগ্‌গুলুঃ ॥ ৯॥ রাস্নামৃতারগবধদেবদারুত্রিকণ্টকৈরণ্ডপুনর্নবানাং। কাথং পিবেন্‌[illegible]মিশ্রং জঙ্ঘোরুপৃষ্ঠত্রিকপার্শ্ব[illegible]লী রাস্নাসপ্তককাথঃ ॥ ১ ॥ পথ্যাবিভীতামলকীফলানাং শতং ক্রমেণ দ্বিগুণা[illegible]বৃদ্ধঃ। [illegible]স্থন যুক্তঞ্চ প[illegible]ক্ষষাণাং দ্রোণে জলে [illegible]স্থিতমেকরাত্রং ॥ অর্দ্ধাবশেষং ক্বথি[illegible] কষায়ং ভাণ্ডে পচেত্তৎ পুন[illegible]ব লৌহে। অস্মিন বহ্নেরবতার্য্য দদ্যাৎ দ্রব্যাণি সংচূর্ণ্য পলার্দ্ধকানি ॥ বিড়ঙ্গদন্তীত্রিফলাগুডূচীকৃষ্ণাত্রিবৃন্নাগরকোষণানি। যথেষ্টচেষ্টস্য নরস্য শীঘ্রং হিমাম্বুপানানি চ ভোজনানি ॥ নিষেব্যমাণো বিনিহন্তি রোগান্ স গৃধ্রসীং নূতনখঞ্জতাঞ্চ। প্লীহানমুগ্রং জঠরাণি গুল্মং পাণ্ডুত্বকণ্ডুবমিবাতরক্তং ॥ পথ্যাদিকো গুগ্‌গুলুরেষ নাম্না খ্যাতঃ ক্ষিতাবপ্রমিতপ্রভাবঃ। বলেন নাগেন সমং মনুষ্যং জবেন কুর্য্যাত্তুরগেণ তুল্যং ॥ আয়ুঃপ্রকর্ষং বিদধাতি চক্ষুর্ব্বলং তথা পুষ্টিকরো বিষঘ্নঃ। ক্ষতস্য সন্ধানকরো বিশেষাদ্রোগেষু শস্তঃ সকলেষু তজ্জ্ঞৈঃ ॥ পথ্যাদিগুগ্‌গুলুঃ ॥ ১১ ॥ ইতি ভাবপ্রকাশঃ ॥

গৃধ্রাণী (স্ত্রী) ধূম্রপত্রাবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

গৃষ্টিঃ (স্ত্রী) একবারপ্রসূতা গৌঃ। তৎপর্য্যায়ঃ। সকৃৎপ্রসূতিকা ২। ইতি হেমচন্দ্রঃ ॥ বরাহক্রান্তা। ইত্যমরঃ ॥ বদরবৃক্ষঃ। ইতি মেদিনী ॥ কাশ্মরী। ইতি রাজনির্ঘণ্টঃ ॥

গৃহ ৎ ক ঙ গ্রহে। ইতি কবিকল্পদ্রুমঃ ॥ সপ্তমস্বরী। ক ঙ গৃহয়তে। গ্রহো গ্রহণং। ইতি দুর্গাদাসঃ ॥

গৃহং (ক্লী) ইষ্টকাদিরচিতবাসস্থানং। ঘর ইতি ভাষা। তৎপর্য্যায়ঃ। গেহং ২ উদবসিতং ৩ বেশ্ম ৪ সদ্ম ৫ নিকেতনং ৬ নিশান্তং ৭ বস্ত্যং ৮ সদনং ৯ ভবনং ১০ অগারং ১১ মন্দিরং ১২ গৃহাঃ ১৩ নিকায্যঃ ১৪ নিলয়ঃ ১৫ আলয়ঃ ১৬ বাসঃ ১৭ কুটঃ ১৮ শালা ১৯ সভা ২০। ইত্যমরঃ ॥ পস্ত্যং ২১ সাদনং ২২ আগারং ২৩ কুটিঃ ২৪ কুটী ২৫ গেহঃ ২৬ নিকেতঃ২৭ সালা২৮ মন্দিরা ২৯ ওকঃ ৩০। ইতি ভরতঃ ॥ নিবাসঃ ৩১ সংবাসঃ ৩২ আবাসঃ ৩৩ অধিবাসঃ ৩৪ নিবসতিঃ ৩৫ বসতিঃ ৩৬ কেতনং ৩৭। ইতি শব্দরত্নাবলী ॥ গয়ঃ ৩৮ কৃদরঃ ৩৯ গর্ত্তঃ ৪০ হর্ম্ম্যং ৪১ অস্তং ৪২ দুরোণে ৪৩ নীলং ৪৪ দুর্যাঃ ৪৫ স্বসরাণি ৪৬ অমা ৪৭ দমে ৪৮ কৃত্তিঃ ৪৯ যোনিঃ৫০ শরণং৫১ বরূথং৫২ ছর্দ্দিঃ ৫৩ ছদিঃ ৫৪ ছায়া ৫৫ শর্ম্ম ৫৬

অজ্ঞ ৫৭। ইতি বেদনিঘণ্টৌ৩ অধ্যায়ঃ॥*॥ অথ গৃহারম্ভকালঃ। বৈশাখশ্রাবণাষাঢ়মার্গফাল্গুনকার্ত্তিকাঃ। সুপ্রশস্তা গৃহারম্ভে পত্নীপুত্রসমৃদ্ধিদাঃ॥ শুক্লপক্ষে ভবেৎ সৌখ্যং কৃষ্ণপক্ষে ভবেদ্ভয়ং। আদিত্যভৌমবর্জস্তু সর্ব্বে বারাঃ শুভাবহাঃ॥ পূর্ণিমাদ্যষ্টমীং যাবৎ পূর্ব্বাস্যং বর্জয়েদ্‌গৃহং। উত্তরাস্যং ন কুর্ব্বীত নবম্যাদিচতুর্দ্দশীং॥ অমাবস্যাষ্টমীং যাবৎ পশ্চিমাস্যং বিবর্জয়েৎ। নবম্যাদি তথা যাম্যাং যাবচ্ছুক্লচতুর্দ্দশীং॥ বজ্রব্যাঘাতশূন্যে চ ব্যতীপাতাতিগণ্ডয়োঃ। বিষ্কুম্ভগণ্ডয়োশ্চৈব গৃহারম্ভং ন কারয়েৎ॥ আদিত্যদ্বয়রোহিণী মৃগশিরো জ্যেষ্ঠা ধনিষ্ঠোত্তরা রেবত্যাথ মঘানুরাধহরিভিঃ শুদ্ধৈঃ স্বভাবাদিভিঃ। সৌম্যানাং দিবসেঽথ গণ্ডরহিতে যোগে বিরিক্তে তিথৌ বিষ্টিত্যক্তদিনে বদন্তি মুনয়ো বেশ্মাদিকার্য্যং শুভং॥ ত্রিভিস্ত্রিভির্বেশ্মানি কৃত্তিকাদ্যৈরুচ্ছেষপুত্রাপ্তিধনানি শোকাঃ। শত্রোর্ভয়ং রাজভয়ঞ্চ মৃত্যুঃ সুখং প্রবাসশ্চ নব প্রভেদাঃ॥ নাশং দিশন্তি মকরালিকুলীরলগ্নে মেষে ঘটে ধনুষি কার্ম্মসুদীর্ঘসূত্রং। কন্যাঝসে মিথুনকে ধ্রুবমর্থলাভো জ্যোতির্ব্বিদঃ কলসসিংহবৃষেষু বৃদ্ধিং॥ ইতি যুক্তিকল্পতরুঃ॥*॥ তত্র প্রবেশকালঃ। জ্যেষ্ঠাপুনর্ব্বসুবর্জং গৃহারম্ভোদিতঞ্চ যৎ। তৎ সর্ব্বং চিন্তয়েদ্বেশ্মপ্রবেশে দৈবচিন্তকঃ॥ হস্তাপুষ্যপুনর্ব্বসূশতভিষাজ্যেষ্ঠাস্বথো রোহিণীরেবত্যুত্তরবিষ্ণুবাতশশভৃন্মূলাধনিষ্ঠাসু চ। কন্যাকুম্ভবৃষালিসিংহমিথুনস্বর্কোদয়েঽর্কে শুভে শুক্রেজ্যেন্দুজশীতরশ্মিদিবসে বেশ্মপ্রবেশঃ শুভঃ॥ কৃত্বাগ্রতো দ্বিজবরানথ পূর্ণকুম্ভং দধ্যক্ষতাম্রদলপুষ্পফলোপশোভং। দত্ত্বা হিরণ্যবসনঞ্চ তথা দ্বিজেভ্যো মাঙ্গল্যশান্তিনিলয়ং নিলয়ং বিশেত্তু॥ ইতি সময়প্রদীপঃ॥*॥ নাম। কলত্রং। ইতি শব্দরত্নাবলী॥ তথা চ স্মৃতিঃ। ন গৃহং গৃহমিত্যাহুর্গৃহিণী গৃহমুচ্যতে। তয়া হি সহিতঃ সর্ব্বান্ পুরুষার্থান্ সমশ্নুতে॥

গৃহকচ্ছপঃ (পুং) পেষণশিলা। তৎপর্য্যায়ঃ। পেষণিঃ ২ পেষণীপট্টঃ ৩ গৃহাশ্মা ৪। ইতি শব্দরত্নাবলী॥

গৃহকন্যা (স্ত্রী) ঘৃতকুমারী। ইতি রাজনির্ঘণ্টঃ॥

গৃহকপোতকঃ (পুং) পক্ষিবিশেষঃ। পায়রা ইতি ভাষা। তৎপর্য্যায়ঃ। প্রাসাদকুক্কুটঃ ২ ঝিল্লীকণ্ঠঃ ৩ পারাবতঃ ৪। ইতি ত্রিকাণ্ডশেষঃ॥

গৃহকর্ত্তা (পুং) ধূসরোঽতিসূক্ষ্মশ্চটকঃ। তৎপর্য্যায়ঃ। ধান্যভক্ষণঃ ২ ক্ষমঃ ৩ ভীরুঃ ৪ কৃষিদ্বিষ্টঃ ৫ কণপ্রিয়ঃ ৬। ইতি রাজনির্ঘণ্টঃ॥

গৃহকারকঃ (পুং) বর্ণসঙ্করজাতিবিশেষঃ। ঘরামী ইতি ভাষা। যথা। প্রতিমাঘটকাদেব কন্যায়াং নাপিতস্য চ। সূত্রকারস্য সম্ভূতিঃ সোপানগৃহকারকঃ॥ ইতি পরাশরপদ্ধতিঃ॥

গৃহকারী [ন্] (পুং) কীটবিশেষঃ। কুমিরক্যা ইতি ভাষা। ইতি কেচিৎ॥

গৃহগোধা (স্ত্রী) জ্যেষ্ঠী। জেঠী টিক্‌টিকি ইতি চ ভাষা। তৎপর্য্যায়ঃ। পল্লী ২ মুষলী ৩ বিশম্বরা ৪ জ্যেষ্ঠা ৫ কুড্যমৎস্যঃ ৬ পল্লিকা ৭ গৃহগোধিকা ৮। ইতি রাজনির্ঘণ্টঃ॥ গৃহগোলিকা ৯ মাণিক্যা ১০ ভিত্তিকা ১১ গৃহালিকা ১২। ইতি হেমচন্দ্রঃ॥

গৃহগোধিকা (স্ত্রী) জ্যেষ্ঠী। ইত্যমরঃ॥

গৃহগোলিকা (স্ত্রী) জ্যেষ্ঠী। ইতি হেমচন্দ্রঃ॥

গৃহতটী (স্ত্রী) বীথী। পিঁড়া দাওয়া ইতি চ ভাষা। ইতি হারাবলী॥

গৃহদ্রুমঃ (পুং) মেঢ়শৃঙ্গীবৃক্ষঃ। ইতি রত্নমালা॥

গৃহণী (স্ত্রী) কাঞ্জিকং। ইতি ত্রিকাণ্ডশেষঃ॥

গৃহনাশনঃ (পুং) কপোতঃ। ইতি রাজনির্ঘণ্টঃ॥

গৃহনীড়ঃ (পুং) চটকঃ। ইতি হারাবলী॥

গৃহপতিঃ (পুং) গৃহস্থঃ। মন্ত্রী। ইতি মেদিনী॥ ধর্ম্মঃ। ইতি শব্দরত্নাবলী॥

গৃহপোতকঃ (পুং) বাস্তুঃ। বাটী। ইতি শব্দরত্নাবলী॥

গৃহবলিপ্রিয়ঃ (পুং) বকপক্ষী। ইতি শব্দরত্নাবলী॥

গৃহবলিভুক্ [জ্] (পুং) চটকঃ। ইতি হেমচন্দ্রঃ॥ বকঃ। কাকঃ। ইতি কেচিৎ॥

গৃহভূমিঃ (স্ত্রী) বাস্তুঃ। বেশ্মভূঃ। ইতি হলায়ুধঃ॥

গৃহমণিঃ (পুং) প্রদীপঃ। ইতি হেমচন্দ্রঃ॥

গৃহমাচিকা (স্ত্রী) চর্ম্মচটী। চামচিকা ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ॥

গৃহমৃগঃ (পুং) কুক্কুরঃ। ইতি হেমচন্দ্রঃ॥

গৃহমেধী [ন্] (পুং) গৃহস্থঃ। ইতি হেমচন্দ্রঃ

গৃহমেধিনী (স্ত্রী) সাত্ত্বিকী বুদ্ধিঃ। ইতি মহাভারতং॥ গৃহস্থপত্নী চ॥

গৃহযাপ্যঃ (পুং) গৃহস্থঃ। ইত্যুণাদিকোষঃ॥

গৃহয়ালুঃ (পুং) গ্রহীতা। গ্রহণশীলঃ। ইত্যমরঃ॥

গৃহবাটিকা (স্ত্রী) গৃহসমীপবনং। ইতি হারাবলী॥

গৃহস্থঃ (পুং) গৃহী। দ্বিতীয়াশ্রমী। তৎপর্য্যায়ঃ। জ্যেষ্ঠাশ্রমী ২ গৃহমেধী ৩ স্নাতকঃ ৪ গৃহী ৫। ইতি হেমচন্দ্রঃ॥ গৃহপতিঃ ৬ সত্রী ৭। ইত্যমরঃ॥ গৃহযাপ্যঃ ৮। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ॥ গৃহাধিপঃ ৯। ইতি হলায়ুধঃ॥ কুটুম্বী ১০। ইতি জটাধরঃ॥ গৃহায়নিকঃ ১১। ইতি শব্দরত্নাবলী॥ *॥ তস্য ধর্ম্মো যথা। গৃহস্থো ব্রহ্মচারী চ বানপ্রস্থোঽথ ভিক্ষুকঃ। চত্বার আশ্রমাঃ প্রোক্তাঃ সর্ব্বে গার্হস্থ্যমূলকাঃ॥ যঃ কশ্চিদিহ লোকেঽস্মিন্নাগমঃ সংপ্রকীর্ত্তিতঃ। তস্যাত্র গমনং শ্রেয়ঃ কীর্ত্তিরেষা সনাতনী॥ সংস্কারৈঃ সংস্কৃতঃ পূর্ব্বং যথাবচ্চরিতব্রতঃ। জাতৌ গুণবিশিষ্টায়াং সমাবর্ত্তেত বেদবিৎ॥ স্বদারনিরতো নিত্যং শিষ্টাচারো জিতেন্দ্রিয়ঃ। পঞ্চভিশ্চ মহাযজ্ঞৈঃ শ্রদ্দধানো যজেদিহ॥ দেবতাতিথিশিষ্টাশী নিরতো বেদকর্ম্মসু। ইজ্যাপ্রদানযুক্তশ্চ যথাশক্তি যথাবিধি॥ ন পাণিপাদচপলো ন নেত্রচপলো মুনিঃ।

ন চ বাগঙ্গচপল ইতি শিষ্টস্য গোচরঃ॥ নিত্যং যজ্ঞোপবীতী স্যাৎ শুক্লবাসাঃ শুচিব্রতঃ। নিয়তো দমদানাভ্যাং সদা শিষ্টৈশ্চ সম্বিশেৎ॥ জিতশিশ্নোদরো মৈত্রঃ শিষ্টাচারসমন্বিতঃ॥ বৈণবীং ধারয়েদ্‌যষ্টিং সোদকঞ্চ কমণ্ডলুং। অধীত্যাধ্যাপনং কুর্য্যাৎ তথা যজনযাজনে॥ দানং প্রতিগ্রহঞ্চাপি ষড়্‌গুণাং বৃত্তিমাচরেৎ। ত্রীণি কর্ম্মাণি যানীহ ব্রাহ্মণানাস্তু জীবিকা॥ যাজনাধ্যাপনে চোভে শুদ্ধাচ্চাপি প্রতিগ্রহঃ। অথ শেষাণি চান্যানি ত্রীণি কর্ম্মাণি যানি তু॥ দানমধ্যয়নং যজ্ঞো ধর্ম্মযুক্তানি তানি তু। তেষ্বপ্রমাদং কুর্ব্বীত ত্রিষু কর্ম্মসু ধর্ম্মবিৎ॥ দান্তো মৈত্রঃ ক্ষমাযুক্তঃ সর্ব্বভূতসমো মুনিঃ। সর্ব্বমেতদ্‌যথাশক্তি বিপ্রো নির্ব্বর্ত্তয়ন্‌ শুচিঃ॥ এবংযুক্তো জয়েৎ স্বর্গং গৃহস্থঃ সংশিতব্রতঃ॥ ইত্যাশ্বমেধিকপর্ব্ব॥ সর্ব্বেষামাশ্রমাণাস্তু দ্বৈবিধ্যন্তু চতুর্ব্বিধং। ব্রহ্মচার্য্যুপকুর্ব্বাণো নৈষ্ঠিকো ব্রহ্মতৎপরঃ॥ যোঽধীত্য বিধিবদ্বেদান্‌ গৃহস্থাশ্রমমাব্রজেৎ। উপকুর্ব্বাণকো জ্ঞেয়ো নৈষ্ঠিকো মরণান্তিকঃ॥ অগ্নয়োঽতিথিশুশ্রূষা যজ্ঞো দানং সুরার্চ্চনং। গৃহস্থস্য সমাসেন ধর্ম্মোঽয়ং দ্বিজসত্তমাঃ॥ উদাসীনঃ সাধকশ্চ গৃহস্থো দ্বিবিধো ভবেৎ। কুটুম্বভরণে যুক্তঃ সাধকোঽসৌ গৃহী ভবেৎ॥ ঋণানি ত্রীণ্যপাকৃত্য ত্যক্ত্বা ভার্য্যাধনাদিকং। একাকী বিচরেদ্‌যস্তু উদাসীনঃ স মৌক্ষিকঃ॥ ইতি গারুড়ে ৪৯ অধ্যায়ঃ॥ বাহুল্যস্তু তত্রৈব ৫০।৫১ অধ্যায়য়োর্দ্রষ্টব্যং॥ *॥ গৃহস্থব্রাহ্মণধর্ম্মো যথা। চতুর্থমায়ুষো ভাগমুষিত্বাদ্যং গুরৌ দ্বিজঃ। দ্বিতীয়মায়ুষো ভাগং কৃতদারো গৃহে বসেৎ॥ অদ্রোহেণৈব ভূতানামল্পদ্রোহেণ বা পুনঃ। যা বৃত্তিস্তাং সমাস্থায় বিপ্রো জীবেদনাপদি॥ যাত্রামাত্রপ্রসিদ্ধ্যর্থং স্বৈঃ কর্ম্মভিরগর্হিতৈঃ। অক্লেশেন শরীরস্য কুর্ব্বীত ধনসঞ্চয়ং॥ ঋতামৃতাভ্যাঞ্জীবেত্তু মৃতেন প্রমৃতেন বা। সত্যানৃতাভ্যামপি বা ন শ্ববৃত্ত্যা কদাচন॥ ঋতমুঞ্ছশিলং জ্ঞেয়মমৃতং স্যাদযাচিতং। মৃতস্তু যাচিতং ভৈক্ষং প্রমৃতং কর্ষণং স্মৃতং॥ সত্যানৃতস্তু বাণিজ্যং তেন চৈবাপি জীব্যতে। সেবা শ্ববৃত্তিরাখ্যাতা তস্মাত্তাং পরিবর্জ্জয়েৎ॥ ইত্যাদি মানবে ৪ অধ্যায়ঃ॥

গৃহস্থূণং (ক্লী) গৃহস্তম্ভঃ। ইতি লিঙ্গাদিসংগ্রহে অমরঃ॥

গৃহাঃ (পুং) গৃহং। দারাঃ। ইত্যমরঃ॥ বহুবচনান্তোঽয়ং শব্দঃ॥

গৃহাগতঃ (পুং) অতিথিঃ। ইত্যমরঃ॥

গৃহাধিপঃ (পুং) গৃহস্থঃ। ইতি হলায়ুধঃ॥

গৃহাম্লং (ক্লী) কাঞ্জিকং। ইতি ত্রিকাণ্ডশেষঃ॥

গৃহায়নিকঃ (পুং) গৃহস্থঃ। ইতি শব্দরত্নাবলী॥

গৃহারামঃ (পুং) গৃহসমীপে কৃত্রিমবনং। তৎপর্য্যায়ঃ। নিষ্কুটঃ ২। ইত্যমরঃ॥

গৃহালিকা (স্ত্রী) জ্যেষ্ঠী। ইতি হারাবলী॥

গৃহাবগ্রহিণী (স্ত্রী) দেহলী। হাতিনা দাওয়া ইতি চ ভাষা। ইত্যমরঃ॥

গৃহাশয়া (স্ত্রী) তাম্বূলী। পানের গাছ ইতি ভাষা। ইতি শব্দচন্দ্রিকা॥

গৃহাশ্মা [ন্] (পুং) পেষণশিলা। শিল ইতি ভাষা। ইতি শব্দরত্নাবলী॥

গৃহিণী (স্ত্রী) ভার্য্যা। ইতি হেমচন্দ্রঃ॥

গৃহী [ন্] (পুং) গৃহস্থঃ। ইত্যমরঃ॥ ভর্ত্তা। ইতি রাজনির্ঘণ্টঃ॥

গৃহীতং (ত্রি) স্বীকৃতং। প্রাপ্তং। জ্ঞাতং। ধৃতং। যথা। গৃহীত ইব কেশেষু মৃত্যুনা ধর্ম্মমাচরেৎ। ইতি স্মৃতিঃ॥

গৃহীতদিক্ [শ্] (ত্রি) পলায়িতঃ। তিরোহিতঃ। ইতি হেমচন্দ্রঃ॥

গৃহোলিকা (স্ত্রী) জ্যেষ্ঠী। ইতি হেমচন্দ্রঃ॥

গৃহ্যং (ক্লী) গুদং। গ্রন্থভেদঃ। ইতি মেদিনী॥ তত্র তু গোভিলাদিকৃতসামবেদাদ্যুক্তকর্ম্মকাণ্ডনির্ণয়ঃ॥

গৃহ্যঃ (পুং) গৃহাসক্তমৃগাদিঃ। ইতি মেদিনী॥

গৃহ্যঃ (ত্রি) অস্বৈরী। অস্বতন্ত্রঃ। পক্ষঃ। ইতি বিশ্বমেদিন্যৌ॥

গৃহ্যকঃ (ত্রি) অস্বতন্ত্রঃ। পরাধীনঃ। ইত্যমরঃ॥

গৃহ্যকঃ (পুং) গৃহাসক্তপক্ষিমৃগাদিঃ। তৎপর্য্যায়ঃ। ছেকঃ ২। ইত্যমরঃ॥

গৃহ্যা (স্ত্রী) শাখাপুরং। নগরনিকটস্থগ্রামঃ। ইত্যমরঃ॥

গৄ ক ঙ বিজ্ঞাপে। বিজ্ঞানে। ইতি কবিকল্পদ্রুমঃ॥ বিজ্ঞাপো বিজ্ঞাপনং। ক ঙ গারয়তে সূক্ষ্মমর্থং সুধীঃ। ইতি দুর্গাদাসঃ॥

গৄ গি শব্দে। ইতি কবিকল্পদ্রুমঃ॥ শব্দ ইহ ব্যক্তবাক্যং। গি গৃণাতি বাক্যং লোকঃ। গীর্ণঃ গীর্ণিঃ। ইতি দুর্গাদাসঃ॥

গৄ শ নিগরণে। ইতি কবিকল্পদ্রুমঃ॥ নিগরণং ভক্ষণং। শ গিরত্যন্নং লোকঃ। দৈবাভক্তো বিগলিতো গিলিতো রকেন ইতি তু অস্মাৎ কৃদ্ধোঃ কভাবে ইতি ভাবে কপ্রত্যয়ে ঋদিরণাবিতি ইরি বক্তব্যাদ্রেফস্য লকারে গিল ইতি স্থিতে লেঃ কৃত্যাখ্যানে ইতি ক্রৌ কর্ম্মণি ক্তে সিদ্ধং। ইতি দুর্গাদাসঃ॥

গেণ্ডুঃ (পুং) গেণ্ডুকঃ। ইতি ভরতো দ্বিরূপকোষশ্চ॥

গেণ্ডুকঃ (পুং) কন্দুকঃ। গেঁড়ু ইতি গেঁদ ইতি চ ভাষা। ইত্যমরঃ॥

গেণ্ডুকঃ (পুং) গেণ্ডুকঃ। ইতি জটাধরঃ॥

গেদ ঋ ঙ উ গতৌ। চালে। ইতি কবিকল্পদ্রুমঃ॥

গেপ ঙ ঋ গতিচালয়োঃ। ঙ গেপতে। ঋ অজিগেপৎ। ইতি দুর্গাদাসঃ॥

গেয়ং (ক্লী) গীতং। ইতি মেদিনী॥

গেয়ঃ (ত্রি) গাতব্যঃ। গায়নঃ। ইতি মেদিনী॥

গেব ঋ ঙ সেবনে। ইতি কবিকল্পদ্রুমঃ॥ ঋ অজিগেবৎ। ঙ গেবতে। ইতি দুর্গাদাসঃ॥

গেষ ঋ ঙ অন্বেষে। ইতি কবিকল্পদ্রুমঃ॥ ঋ অজিগেষৎ। ঙ গেষতে। জিগেষে। অন্বেষোঽনুসন্ধানং। ইতি দুর্গাদাসঃ॥

গেষ্ণঃ (পুং) রঙ্গোপজীবী। সামগানকর্ত্তা। ইত্যুণাদিকোষঃ॥

গেষ্ণুঃ ( পুং ) গায়নঃ। নটঃ। ইতি মেদিনী॥ সামগানকর্ত্তা চ ॥

গেহং ( ক্লী ) গৃহং। ইত্যমরঃ ॥

গেহী [ ন্ ] ( ত্রি ) গৃহী। গেহশব্দাদস্ত্যর্থে ইন্‌প্রত্যয়ঃ ॥

গেহেনর্দ্দী [ ন্ ] ( পুং ) কাপুরুষঃ। তৎপর্য্যায়ঃ। গেহেশূরঃ ২ পিণ্ডীশূরঃ ৩। ইতি হেমচন্দ্রঃ ॥

গেহেশূরঃ ( পুং ) গেহেনর্দ্দী। ইতি হেমচন্দ্রঃ॥

গৈ গানে। ইতি কবিকল্পদ্রুমঃ ॥ গীতং গায়তি গায়নঃ। ইতি দুর্গাদাসঃ ॥

গৈরিকং ( ক্লী ) স্বর্ণং। রক্তবর্ণধাতুবিশেষঃ। গিরিমাটী ইতি ভাষা। তৎপর্য্যায়ঃ। রক্তধাতুঃ ২ গিরিধাতুঃ ৩ গবেধুকং ৪ ধাতুঃ ৫ সুরঙ্গধাতুঃ ৬ গিরিমৃত্তবং ৭। ইতি রাজনির্ঘণ্টঃ॥ বনালক্তং ৮ গবেরুকং ৯ প্রত্যশ্মা ১০ গিরিমৃৎ ১১। ইতি ত্রিকাণ্ডশেষঃ॥ লোহিতমৃত্তিকা ১২ গিরিজং ১৩॥ পীতগৈরিকস্য পর্য্যায়ঃ। সুবর্ণগৈরিকং ১ সুবর্ণং ২ স্বর্ণগৈরিকং৩। ইতি রত্নমালা ॥ স্বর্ণধাতুঃ ৪ সুরক্তকঃ ৫ সন্ধ্যাভ্রং ৬ বভ্রুধাতুঃ ৭ শিলাধাতুঃ ৮। অনয়োর্গুণাঃ। মধুরত্বং। শীতত্বং। কষায়ত্বং। ব্রণরোপণত্বং। বিস্ফোটার্শো-ঽগ্নিদাহনাশিত্বং। স্বর্ণবর্ণাদিকং শুভং। ইতি রাজনির্ঘণ্টঃ॥ নির্ম্মলত্বং। স্নিগ্ধত্বং। সুবর্ণগৈরিকং তদ্বৎ বিশেষতশ্চক্ষুস্তেজস্কারিত্বং। ইতি রাজবল্লভঃ ॥

গৈরিকাক্ষঃ ( পুং ) জলমধূকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

গৈরী ( স্ত্রী ) লাঙ্গলিকীবৃক্ষঃ। বিষলাঙ্গলা ইতি ভাষা। ইতি রত্নমালা ॥

গৈরেয়ং ( ক্লী ) শিলাজতু। ইত্যমরঃ ॥ গিরিজাতে ত্রি ॥

গোকণ্টকঃ ( পুং ) গোক্ষুরকবৃক্ষঃ। স্থপুটঃ। গবাং খুরং। ইতি বিশ্বমেদিন্যৌ॥ গোখুরৈঃ স্থপুটীকৃতঃ। ইতি হেমচন্দ্রঃ॥ বিকণ্টকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

গোকর্ণঃ ( পুং ) পরিমাণবিশেষঃ। স তু অনামিকাযুক্তবিস্তৃতাঙ্গুষ্ঠং। মৃগভেদঃ। ইত্যমরঃ॥ অশ্বতরঃ। সর্পভেদঃ। গণদেবতাবিশেষঃ। ইতি মেদিনী॥ তীর্থবিশেষঃ। যথা। ততোঽভিব্রজ্য ভগবান্ কেরলাংস্তু ত্রিগর্ত্তকান্। গোকর্ণাখ্যং শিবক্ষেত্রং সান্নিধ্যং যত্র ধূর্জ্জটেঃ॥ ইতি ভাগবতং ॥

গোকর্ণী ( স্ত্রী ) মূর্ব্বালতা। ইত্যমরঃ ॥

গোকিরাটিকা ( স্ত্রী ) সারিকাপক্ষী। ইতি হেমচন্দ্রঃ॥

গোকিরাটী ( স্ত্রী ) সারিকাপক্ষী। ইতি রাজনির্ঘণ্টঃ ॥

গোকিলঃ ( পুং ) মুষলং। হলং। ইতি হেমচন্দ্রঃ ॥

গোকীলঃ ( পুং ) মুষলং। হলং। ইতি হারাবলী॥

গোকুলং ( ক্লী ) গোসমূহঃ। তৎপর্য্যায়ঃ। গোধনং ২ গবাংব্রজঃ ৩। ইত্যমরঃ॥ গোস্থানং। যথা। গোকুলে কন্দুশালায়াং তৈলযন্ত্রেক্ষুযন্ত্রয়োঃ। অমীমাংস্যানি শৌচানি স্ত্রীষু বালাতুরেষু চ॥ ইতি

তিথ্যাদিতত্ত্বং ॥ মথুরৈকদেশে শ্রীনন্দস্য বাসস্থানং। যথা। কালেন ব্রজতা তাত গোকুলে রামকেশবৌ। জানুভ্যাং সহ পাণিভ্যাং রিঙ্গমাণৌ বিজহ্রতুঃ॥ ইতি শ্রীভাগবতং ॥

গোকুলিকঃ (ত্রি) কেকরঃ। পঙ্কস্থগব্যুপেক্ষকঃ। ইতি মেদিনী ॥

গোকৃতং (ক্লী) গোময়ং। ইতি শব্দচন্দ্রিকা॥

গোখুরঃ (পুং) গোক্ষুরবৃক্ষঃ। ইতি শব্দরত্নাবলী ॥ গবাং শফে ক্লী ॥

গোখুরিঃ (পুং) গোক্ষুরঃ। ইতি শব্দচন্দ্রিকা॥

গোগৃষ্টিঃ (স্ত্রী) সকৃৎপ্রসূতা গৌঃ। ইতি কেচিৎ ॥

গোগোযুগং (ক্লী) গোদ্বয়ং। ইতি মুগ্ধবোধব্যাকরণং ॥

গোগোষ্ঠং (ক্লী) গোস্থানং। ইতি মুগ্ধবোধং॥

গোগ্রন্থিঃ (পুং) করীষং। গোষ্ঠং। গোজিহ্বিকৌষধিঃ। ইতি মেদিনী ॥

গোঘ্নঃ (পুং) অতিথিঃ। ইতি পাণিনিঃ॥ গোঘাতকে ত্রি। যথা। গোঘ্নবদ্বিহিতঃ কল্পশ্চান্দ্রায়ণমথাপি বা। ইতি প্রায়শ্চিত্ততত্ত্বং ॥

গোঘৃতং (ক্লী) বৃষ্টিঃ। ইতি ত্রিকাণ্ডশেষঃ॥ গব্যঘৃতঞ্চ ॥

গোচরঃ (পুং) ইন্দ্রিয়ার্থঃ। স তু রূপশব্দগন্ধরসস্পর্শস্বরূপঃ। ইত্যমরঃ॥ জন্মরাশ্যবধিগ্রহাক্রান্তরাশীনাং সংজ্ঞা। যথা। গোচরে বা বিলগ্নে বা যে গ্রহারিষ্টসূচকাঃ। পূজয়েত্তান্ প্রযত্নেন পূজিতাঃ স্যুঃ শুভাবহাঃ॥ অপি চ। অষ্টবর্গশুভৈঃ শ্রীমান্ কর্ম্ম কুর্য্যাল্লভশ্চরৈঃ। গোচরস্থৈস্তদপ্রাপ্তৌ তদপ্রাপ্তৌ তু বেধগৈঃ॥ গোচরশুদ্ধির্যথা। কেতুপপ্লবভৌমমন্দগতয়ঃ ষষ্ঠত্রিসংস্থাঃ শুভাশ্চন্দ্রার্কাবপি তে চ তৌ চ দশমৌ চন্দ্রঃ পুনঃ সপ্তমঃ। জীবঃ সপ্তনবদ্বিপঞ্চমগতো যুগ্মেষু সোমাত্মজঃ শুক্রঃ ষড়্দশসপ্তবর্জমিতরে সর্ব্বেঽপ্যুপান্তে শুভাঃ॥ ইতি দীপিকা ॥

গোচর্ম্ম [ন্] (ক্লী) গবাং ত্বক্। কর্ম্মবিশেষে তদাসনবিধির্যথা। মেষাসনন্তু বশ্যার্থমাকৃষ্টৌ ব্যাঘ্রচর্ম্ম চ। শান্তৌ মৃগাজিনং শস্তং মোক্ষার্থং ব্যাঘ্রচর্ম্ম চ॥ গোচর্ম্ম স্তম্ভনে দেবি সম্ভবে বাজিচর্ম্ম চ। ইতি সময়াচারতন্ত্রে ২ পটলঃ॥ *॥ পরিমাণবিশেষঃ। যথা। যৎকিঞ্চিৎ কুরুতে পাপং জ্ঞানতোঽজ্ঞানতোঽপি বা। অপি গোচর্ম্মমাত্রেণ ভূমিদানেন শুদ্ধ্যতি॥ গোচর্ম্মলক্ষণঞ্চ বৃহস্পতিনা দর্শিতং। সপ্তহস্তেন দণ্ডেন ত্রিংশদ্দণ্ডৈর্নিবর্ত্তনং। দশ তান্যেব গোচর্ম্ম দত্ত্বা স্বর্গে মহীয়তে॥ ইতি মিতাক্ষরায়াং আচারাধ্যায়ঃ॥

গোচ্ছালঃ (পুং) কুলাহলবৃক্ষঃ। কোকশিমা ইতি ভাষা। ইতি রত্নমালা॥

গোজলং (ক্লী) গোমূত্রং। ইতি রাজনির্ঘণ্টঃ॥

গোজা (স্ত্রী) গোলোমিকাবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

গোজাগরিকং (ক্লী) মঙ্গলং। ইতি মেদিনী॥

গোজাগরিকঃ (পুং) কণ্টকারিকা। ইতি মেদিনী॥

গোজাপর্ণী ( স্ত্রী ) দুগ্ধফেনীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

গোজিহ্বা ( স্ত্রী ) ক্ষুপবিশেষঃ। গোজিয়া লতা ইতি দারিয়া শাক ইতি চ ভাষা। তৎপর্য্যায়ঃ। দার্ব্বিকা ২। ইত্যমরঃ॥ দর্ব্বিকা ৩। ইতি ভরতঃ॥ দার্ব্বিপত্রিকা ৪। ইতি রত্নমালা॥ খরপত্রী ৫ বাতোনা ৬ অধোমুখা ৭ অনড়ুজ্জিহ্বা ৮ অধঃপুষ্পী ৯ দর্ব্বী ১০ গোজিহ্বিকা ১১। ইতি শব্দরত্নাবলী॥ অপি চ। গোজিহ্বা গোজিকা গোভী দার্ব্বিকা খরপর্ণিনী। গোজিহ্বা বাতলা শীতা গ্রাহিণী কফপিত্তনুৎ॥ হৃদ্যা প্রমেহকাসাস্রব্রণজ্বরহরী লঘুঃ। কোমলা তুবরী তিক্তা স্বাদুপাকরসা স্মৃতা॥ ইতি ভাবপ্রকাশঃ॥ অস্যা গুণাঃ। কটুত্বং। তীক্ষ্ণত্বং। শীতলত্বং। পিত্তসর্ব্বদন্তিবিষার্ত্তিনাশিত্বং। ব্রণসংরোপণত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ গবেধুকা। গড়গড় ইতি ভাষা। ইতি রত্নমালা॥

গোজিহ্বিকা (স্ত্রী) গোজিহ্বা লতা। ইতি শব্দরত্নাবলী॥

গোড়ঃ ( পুং ) গোণ্ডঃ। স তু নাভৌ প্রবৃদ্ধমাংসগুড়কঃ। ইতি লিঙ্গাদিসংগ্রহটীকায়াং ভরতঃ॥

গোড়ুম্বঃ ( পুং ) শীর্ণবৃন্তঃ। তরমুজ ইতি খ্যাতঃ। ইতি মেদিনী॥

গোড়ুম্বা ( স্ত্রী ) গবাদনী। ইতি মেদিনী॥ গোমুক ইতি খ্যাতা গোমা ইতি রাজগোমুক ইতি চ খ্যাতা ইত্যেকে। ইতি ভরতঃ॥ তৎপর্য্যায়ঃ। চিত্রা ২ গবাক্ষী ৩। ইত্যমরঃ॥ গোড়ুম্বিকা ৪। ইতি রত্নমালা॥

গোড়ুম্বিকা ( স্ত্রী ) গোড়ুম্বা। ইতি রত্নমালা॥

গোণী ( স্ত্রী ) ছিদ্রবস্ত্রং। তৎপর্য্যায়ঃ। শানী ২। ইতি হেমচন্দ্রঃ॥ ধান্যাদিবহনার্থাধারবিশেষঃ। গুণ ইতি ভাষা। ইতি মুগ্ধবোধং॥ দ্রোণীপরিমাণং। ইতি বৈদ্যকপরিভাষা॥

গোণ্ডঃ (পুং) নাভৌ বৃদ্ধমাংসগুড়কঃ। গেঁড়্ ইতি ভাষা। ইতি লিঙ্গাদিসংগ্রহে অমরঃ॥ পামরজাতিঃ। বৃদ্ধনাভিযুক্তে ত্রি। ইতি মেদিনী॥ অস্য রূপান্তরং গোড়ঃ গৌড়ঃ। ইত্যমরটীকা॥

গোতমঃ ( পুং ) গৌতমমুনিঃ। স তু ব্রহ্মপুত্রঃ। ইতি গয়ামাহাত্ম্যে বায়ুপুরাণং॥

গোতমান্বয়ঃ ( পুং ) শাক্যমুনিঃ। ইতি হেমচন্দ্রঃ॥

গোতল্লজঃ ( পুং ) উত্তমগৌঃ। গোষু মধ্যে তল্লজঃ প্রশস্তঃ ইতি ব্যুৎপত্তিঃ॥

গোত্রং ( ক্লী ) গবতে শব্দয়তি পূর্ব্বপুরুষান্ যৎ। ইতি ভরতঃ॥ তৎপর্য্যায়ঃ। সন্ততিঃ ২ জননং ৩ কুলং ৪ অভিজনঃ ৫ অন্বয়ঃ ৬ বংশঃ ৭ অন্ববায়ঃ ৮ সন্তানঃ ৯। ইত্যমরঃ॥ আখ্যা। সম্ভাবনীয়বোধঃ। কাননং। ক্ষেত্রং। বর্ত্ম। ইতি মেদিনী॥ ছত্রং। ইতি হেমচন্দ্রঃ॥ সংঘঃ। বৃদ্ধিঃ। ইতি শব্দচন্দ্রিকা॥ বিত্তং। ইতি বিশ্বঃ॥ * ॥ বংশপরম্পরাপ্রসিদ্ধং আদিপুরুষং ব্রাহ্মণরূপং। ক্ষত্রিয়-

বৈশ্যয়োরুপদিষ্টাতিদিষ্টগোত্রং শূদ্রস্যাতিদিষ্টাতিদিষ্টগোত্রং। ইত্যুদ্বাহতত্ত্বং॥ ক্ষত্রিয়বৈশ্যশূদ্রাণামতিদিষ্টাতিদিষ্টগোত্রপ্রবরমতএবৈতেষাং পুরোহিতগোত্রপ্রবরমিত্যর্থঃ। তথা চাগ্নিপুরাণে বর্ণসঙ্করোপাখ্যানে। ক্ষত্রিয়বৈশ্যশূদ্রাণাং গোত্রঞ্চ প্রবরাদিকং। তথান্যবর্ণসঙ্করাণাং যেষাং বিপ্রাশ্চ যাজকাঃ॥ গোত্রাণি তু চতুর্ব্বিংশতিঃ তথা চ মনুঃ। শাণ্ডিল্যঃ কাশ্যপশ্চৈব বাৎস্যঃ সাবর্ণকস্তথা। ভরদ্বাজো গৌতমশ্চ সৌকালীনস্তথাপরঃ॥ কল্কিষশ্চাগ্নিবেশ্যশ্চ কৃষ্ণাত্রেয়বশিষ্ঠকৌ। বিশ্বামিত্রঃ কুশিকশ্চ কৌশিকশ্চ তথাপরঃ॥ ঘৃতকৌশিকমৌদগল্যৌ আলম্যানঃ পরাশরঃ। সৌপায়নস্তথাত্রিশ্চ বাসুকী রোহিতস্তথা॥ বৈয়াঘ্রপদ্যকশ্চৈব জামদগ্ন্যস্তথাপরঃ। চতুর্ব্বিংশতির্বৈ গোত্রা কথিতাঃ পূর্ব্বপণ্ডিতৈঃ॥ তথা চ মনুঃ। জমদগ্নির্ভরদ্বাজো বিশ্বামিত্রাত্রিগৌতমাঃ। বশিষ্ঠকাশ্যপাগস্ত্যা মুনয়ো গোত্রকারিণঃ॥ এতেষাং যান্যপত্যানি তানি গোত্রাণি মন্যতে। এতদুপলক্ষণমন্যেষামপি দর্শনাৎ। তথা চ। সৌকালীনকমৌদগল্যৌ পরাশরবৃহস্পতী। কাঞ্চনো বিষ্ণুকৌশিক্যৌ কাত্যায়নাত্রেয়কাণ্বকাঃ॥ কৃষ্ণাত্রেয়ঃ সাঙ্কৃতিশ্চ কৌণ্ডিল্যো গর্গসংজ্ঞকঃ। আঙ্গিরস ইতি খ্যাতঃ অনাবৃকাখ্যসঙ্গিতঃ॥ অব্যজৈমিনিবৃদ্ধাখ্যাঃ শাণ্ডিল্যো বাৎস্য এব চ। সাবর্ণ্যালম্যানবৈয়াঘ্রপদ্যশ্চ ঘৃতকৌশিকঃ॥ শক্তিঃ কাণ্বায়নশ্চৈব বাসুকী গৌতমস্তথা। শুনকঃ সৌপায়নশ্চৈব মুনয়ো গোত্রকারিণঃ॥ এতেষাং যান্যপত্যানি তানি গোত্রাণি মন্যতে। সর্ব্বে দ্বিচত্বারিংশদেগাত্রাঃ। ইতি কুলদীপিকাধৃতধনঞ্জয়কৃতধর্ম্মপ্রদীপঃ॥

গোত্রঃ (পুং) পর্ব্বতঃ। ইত্যমরঃ॥

গোত্রজঃ (ত্রি) গোত্রোৎপন্নঃ। স তু জন্মনামস্মৃতিপর্য্যন্তসমানোদকভাবাৎ পশ্চাদ্ভবতি। ইতি শুদ্ধিতত্ত্বং॥

গোত্রভিৎ [দ্] (পুং) ইন্দ্রঃ। ইত্যমরঃ॥

গোত্রবৃক্ষঃ (পুং) ধন্বনবৃক্ষঃ। ইতি ভাবপ্রকাশঃ॥

গোত্রা (স্ত্রী) পৃথিবী। গোসমূহঃ। ইতি মেদিনী॥

গোদঃ (পুং) মস্তকস্নেহঃ। মস্তিষ্কং। ইতি হেমচন্দ্রঃ॥ গোদাতরি ত্রি। ইতি মুগ্ধবোধং॥

গোদন্তং (ক্লী) হরিতালং। ইতি রাজনির্ঘণ্টঃ॥

গোদা (স্ত্রী) গোদাবরী নদী। ইতি হেমচন্দ্রঃ॥

গোদারণং (ক্লী) লাঙ্গলং। ইত্যমরঃ॥ কুদ্দালঃ। ইতি হেমচন্দ্রঃ॥

গোদাবরী (স্ত্রী) নদীবিশেষঃ। তৎপর্য্যায়ঃ। গোদা ২। ইতি হেমচন্দ্রঃ॥ গৌতমসম্ভবা ৩ ব্রাহ্মাদ্রিজাতা ৪ গৌতমী ৫। অস্যা জলস্য গুণাঃ। পিত্তার্ত্তিরক্তার্ত্তিবায়ুপাপকুষ্ঠাদিদুষ্টাময়দোষতৃষ্ণানাশিত্বং।

পরমপথ্যত্বং। দীপনত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

গোদুগ্ধদা (স্ত্রী) চণিকাতৃণং। ইতি রাজনির্ঘণ্টঃ॥

গোদোহনী (স্ত্রী) গোদোহনপাত্রং। তৎপর্য্যায়ঃ। পারী ২। ইতি জটাধরঃ॥

গোদ্রবঃ (পুং) গোমূত্রং। ইতি রাজনির্ঘণ্টঃ॥

গোধনং (ক্লী) গোসমূহঃ। ইত্যমরঃ॥

গোধনঃ (পুং) স্থূলাগ্রবাণঃ। তুকা ইতি ভাষা। ইতি হরিবংশঃ॥

গোধা (স্ত্রী) ধনুর্গুণাঘাতবারণায় প্রকোষ্ঠবদ্ধা চর্ম্মকৃতপট্টিকা। তৎপর্য্যায়ঃ। তলা২ জ্যাঘাতবারণা ৩। ইত্যমরঃ। তলং ৪। ইতি তট্টীকা॥ জন্তুবিশেষঃ। গোসাপ ইতি ভাষা। সা তু স্থলজজলজভেদাৎ দ্বিবিধা। তৎপর্য্যায়ঃ। নিহাকা ২ গোধিকা ৩। ইত্যমরঃ॥ দারুমুখ্যাহ্বা ৪। অস্যা মাংসগুণাঃ। বাতশ্বাসকাসনাশিত্বং। ইতি রাজনির্ঘণ্টঃ॥ পাকে মধুরত্বং। কষায়ত্বং। কটুরসত্বং। পিত্তনাশিত্বং। রক্তশুক্রবলকারিত্বঞ্চ। ইতি রাজবল্লভঃ॥

গোধাপদিকা (স্ত্রী) গোধাপদীলতা। ইতি শব্দরত্নাবলী॥

গোধাপদী (স্ত্রী) লতাবিশেষঃ। গোয়ালিয়া ইতি ভাষা। তৎপর্য্যায়ঃ। স্থবহা ২। ইত্যমরঃ॥ হংসপদী ৩ গোধাঙ্ঘ্রী ৪ ত্রিকলা ৫। ইতি ভরতঃ॥ ত্রিপদী ৬ মধুস্রবা ৭ হংসপাদী ৮। ইতি রত্নমালা॥ হংসপাদিকা ৯ হংসাঙ্ঘ্রিঃ ১০ রক্তপাদী ১১ ত্রিপদা ১২ ঘৃতমণ্ডলিকা ১৩ বিশ্বগ্রন্থিঃ ১৪ ত্রিপাদিকা ১৫ ত্রিপাদী ১৬ কীটমারী ১৭ কর্ণাটী ১৮ তাম্রপাদী ১৯ বিক্রান্তা ২০ ব্রহ্মাদনী ২১ পদাঙ্গী ২২ শীতাঙ্গী ২৩ সুতপাদিকা ২৪ সঞ্চারিণী ২৫ পদিকা ২৬ প্রহ্লাদী ২৭ কীটপাদিকা ২৮ ধার্ত্তরাষ্ট্রপদী ২৯ গোধাপদিকা ৩০। ইতি শব্দরত্নাবলী॥ ছিদলা ৩১ হংসবতী ৩২। ইতি জটাধরঃ॥ অস্যা গুণাঃ। কটুত্ব। উষ্ণত্বং। বিষভূতভ্রান্ত্যপস্মারদোষনাশিত্বং। রসায়নত্বঞ্চ। মুষলী। তালমূলী ইতি খ্যাতা। ইতি রাজনির্ঘণ্টঃ॥

গোধাস্কন্ধঃ (পুং) বিট্‌খদিরঃ। ইতি রাজনির্ঘণ্টঃ॥

গোধিঃ (পুং) ললাটং। ইত্যমরঃ॥ গোধিকা। ইতি শব্দরত্নাবলী॥

গোধিকা (স্ত্রী)-গোধা। গোসাপ ইতি ভাষা। ইত্যমরঃ॥

গোধিকাত্মজঃ (পুং) স্থলগোধিকা। গোধাশিশুতুল্যাকারকোটরস্থজন্তুবিশেষস্য তোকে ইতি খ্যাতস্য ইতি ভগী। ইতি সারসুন্দরী॥ তৎপর্য্যায়ঃ। গৌধেরঃ ২ গৌধারঃ ৩ গৌধেয়ঃ ৪। ইত্যমরঃ॥

গোধিনী (স্ত্রী) ক্ষবিকা। সা তু বৃহতীভেদঃ। ইতি রাজনির্ঘণ্টঃ॥

গোধুক্ [হ্] (ত্রি) গোদোগ্ধা। ইতি ব্যাকরণং॥

গোধুমঃ (পুং) গোধূমঃ। ইতি শব্দচন্দ্রিকা॥

গোধূমঃ (পুং) নাগরঙ্গঃ। ওষধীবিশেষঃ। ব্রীহিভেদঃ। গম গোম্ ইতি চ ভাষা। ইতি মেদিনী॥ শেষস্য পর্য্যায়ঃ। বহু-

দুগ্ধঃ ২ অপূপঃ ৩ ম্লেচ্ছভোজনঃ ৪ যবনঃ ৫ নিস্তুষক্ষীরঃ ৬ রসালঃ ৭ সুমনাঃ ৮। অস্য গুণাঃ। স্নিগ্ধত্বং। মধুরত্বং। বাতপিত্তদাহনাশিত্বং। গুরুত্বং। শ্লেষ্মমদবলরুচিবীর্য্যকারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ বৃংহণত্বং। জীবনহিতত্বং। শীতত্বং। ভগ্নসন্ধানস্থৈর্য্যকারিত্বং। সারকত্বঞ্চ। ইতি রাজবল্লভঃ॥

গোধূমচূর্ণং (ক্লী) চূর্ণীকৃতগোধূমঃ। ময়দা ইতি ভাষা। যথা। শুষ্কগোধূমচূর্ণেন কিঞ্চিৎপুষ্টাঞ্চ রোটিকাং। ইতি ভাবপ্রকাশঃ॥

গোধূমসম্ভবং (ক্লী) সৌবীরং। কাঞ্জিকভেদঃ। ইতি রাজনির্ঘণ্টঃ॥

গোধূমসারঃ (পুং) গোধূমস্য সারভাগঃ। পালো ইতি ভাষা। তৎকরণবিধির্যথা। নিস্তুষগোধূমং উদূখলে কণ্ডয়িত্বা সন্ধ্যাকালে মৃত্তিকাদিপাত্রে জলে মগ্নং কারয়িত্বা পরদিনে প্রভাতে উপরিস্থজলং ক্রমেণ দূরীকৃত্বা নীচস্থসারং রৌদ্রে শুষ্কং কৃত্বা পাত্রান্তরে স্থাপয়েৎ। ইতি পাকরাজেশ্বরঃ॥

গোধূমী (স্ত্রী) গোলোমিকা। ইতি রাজনির্ঘণ্টঃ॥

গোধূলিঃ (স্ত্রী) কালবিশেষঃ। সা তু ত্রিবিধা যথা। গ্রীষ্মে অর্দ্ধাস্তরবিকালঃ। হেমন্তশিশিরয়োর্মৃদুতাপ্রাপ্তপিণ্ডীকৃতরবিকালঃ। বর্ষাশরদ্বসন্তেষ্বস্তগতরবিকালঃ। যথা। গোধূলিং ত্রিবিধাং বদন্তি মুনয়ো নারী-বিবাহাদিকে হেমন্তে শিশিরে প্রয়াতি মৃদুতাং পিণ্ডীকৃতে ভাস্করে। গ্রীষ্মে-র্দ্ধাস্তমিতে বসন্তসময়ে ভানৌ গতেহদৃশ্যতাং সূর্য্যে চাস্তমুপাগতে চ নিয়তং বর্ষাশরৎকালয়োঃ॥ ইতি দীপিকা॥

গোধেনুঃ (স্ত্রী) দুগ্ধবতী গবী। ইতি সংক্ষিপ্তসারব্যাকরণং॥

গোধেরঃ (পুং) গোপ্তা। ইতি সংক্ষিপ্তসারে উণাদিবৃত্তিঃ॥

গোনন্দী (স্ত্রী) সারসপক্ষিণী। ইতি হারাবলী॥

গোনর্দ্দং (ক্লী) কৈবর্ত্তীমুস্তকং। ইতি মেদিনী॥

গোনর্দ্দঃ (পুং) সারসপক্ষী। ইতি মেদিনী॥

গোনর্দ্দীয়ঃ (পুং) পতঞ্জলিমুনিঃ। ইতি হেমচন্দ্রঃ॥

গোনসঃ (পুং) সর্পবিশেষঃ। বোড়া ইতি খ্যাতঃ গোখুরা ইতি খ্যাত ইত্যেকে। মণ্ডলীবোড়া ইতি খ্যাত ইত্যন্যে। ইতি ভরতঃ॥ তৎপর্য্যায়ঃ। তিলিৎসঃ ২। ইত্যমরঃ॥ গোনাসঃ ৩ ঘোনসঃ ৪। ইতি হেমচন্দ্রঃ॥ মণ্ডলীবোড্রঃ ৫। ইতি বিক্রমাদিত্যঃ॥ বোড্রঃ ৬। ইতি শব্দরত্নাবলী॥ বৈক্রান্তমণিঃ। ইতি রাজনির্ঘণ্টঃ॥

গোনাথঃ (পুং) অনড্বান্। ইতি রাজনির্ঘণ্টঃ॥

গোনাসং (ক্লী) বৈক্রান্তমণিঃ। ইতি রাজনির্ঘণ্টঃ॥

গোনাসঃ (পুং) গোনসসর্পঃ। ইতি হেমচন্দ্রঃ॥

গোনিষ্যন্দঃ (পুং) গোমূত্রং। ইতি রাজনির্ঘণ্টঃ॥

গোপঃ (পুং) বোলঃ। জাতিবিশেষঃ। গোয়ালা ইতি ভাষা। তৎপর্য্যায়ঃ।

গোসংখ্যঃ ২ গোধুক্ ৩ আভীরঃ ৪ বল্লবঃ ৫ গোপালঃ ৬। ইত্যমরঃ॥ তস্যোৎপত্তির্যথা। মণিবন্ধ্যাং তন্ত্রবায়াৎ গোপজাতেশ্চ সম্ভবঃ। ইতি পরাশরপদ্ধতিঃ॥ গোষ্ঠাধ্যক্ষঃ। পৃথ্বীপতিঃ। বহুগ্রামস্যাধিকৃতঃ। ইতি মেদিনী॥

গোপঃ (ত্রি) রক্ষকঃ। উপকারকঃ। ইতি শব্দরত্নাবলী॥

গোপকঃ (পুং) বোলঃ। বহুগ্রামাধিপতিঃ। ইতি শব্দরত্নাবলী॥

গোপকন্যা (স্ত্রী) শারিবৌষধিঃ। ইতি রাজনির্ঘণ্টঃ॥ আভীরসুতা চ॥

গোপঘোণ্টা (স্ত্রী) হস্তিকোলিঃ। ইতি রত্নমালা॥ বদরীসদৃশসূক্ষ্মফলবৃক্ষঃ। শেয়াকুল ইতি ভাষা। ইতি শব্দরত্নাবলী॥ বিকঙ্কতবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

গোপতিঃ (পুং) শিবঃ। সূর্য্যঃ। রাজা। বৃষঃ। ইতি মেদিনী॥ ঋষভনামৌষধিঃ। ইতি রাজনির্ঘণ্টঃ॥

গোপদলঃ (পুং) গুবাকঃ। ইতি ত্রিকাণ্ডশেষঃ॥

গোপনং (ক্লী) অপহ্নবঃ। কুৎসনং। রক্ষা। ব্যাকুলত্বং। দীপ্তিঃ। ইতি কবিকল্পদ্রুমে গুপধাত্বর্থদর্শনাৎ॥ তমালপত্রং। তেজপাত ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥

গোপনীয়ং (ত্রি) গোপ্যং। গোপিতব্যং। যথা। স্বর্গেঽপি দুর্লভা বিদ্যা গোপনীয়া প্রযত্নতঃ। ইতি নাড়ীপ্রকাশঃ॥

গোপভদ্রং (ক্লী) শালূকং। ইতি শব্দচন্দ্রিকা॥

গোপভদ্রা (স্ত্রী) কাশ্মরীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

গোপভদ্রিকা (স্ত্রী) গম্ভারীবৃক্ষঃ। ইতি রত্নমালা॥

গোপরসঃ (পুং) বোলঃ। ইতি শব্দরত্নাবলী॥

গোপবধূঃ (স্ত্রী) শারিবা। ইতি ভাবপ্রকাশঃ॥ গোপস্য পত্নী চ॥

গোপবল্লী (স্ত্রী) মূর্ব্বা। শারিবা। ইতি রাজনির্ঘণ্টঃ॥ শ্যামালতা। ইতি শব্দরত্নাবলী॥

গোপা (স্ত্রী) শ্যামালতা। ইত্যমরটীকা শব্দরত্নাবলী চ॥

গোপানসী (স্ত্রী) বড়ভী। গৃহাণামগ্রভাগে দত্তবক্রকাষ্ঠং। মুদনী ইতি ভাষা। ইত্যমরটীকাসারসুন্দরী॥ গৃহচূড়া বড়ভী তচ্ছাদনার্থং বক্রীকৃত্য যৎ কাষ্ঠং দীয়তে সা বড়ভী চতুষ্কিকাদিচূড়া তচ্ছাদনায় বক্রীকৃত্য যৎ কাষ্ঠং দীয়তে সা। ইতি মধুঃ॥ পটলাধোবংশপঞ্জরং। ইতি ভট্টঃ॥ কর্ণিকাবিষ্কম্ভিদারু ইত্যন্যে। বক্রীভূতং ধরণকাষ্ঠং। ইত্যেকে। ইত্যমরটীকায়াং ভরতঃ॥

গোপায়িতং (ত্রি) রক্ষিতং। ইত্যমরঃ॥

গোপালঃ (পুং) গবাং পালকঃ। বৃন্দাবনস্থগোপালানাং স্বরূপং যথা। গোপালা মুনয়ঃ সর্ব্বে বৈকুণ্ঠানন্দমূর্ত্তয়ঃ। ইতি পদ্মপুরাণে পাতালখণ্ডে ব্যাসং প্রতি শ্রীকৃষ্ণবাক্যং॥ * ॥ রাজা। নন্দনন্দনঃ। ইতি মেদিনী॥ * ॥ শ্রীগোপালস্য ধ্যানং যথা। অব্যাদ্ব্যাকোষনীলাম্বুজ-

রুচির[illegible]ম্ভোজনেত্রোঽম্বুজস্থো বালো জঙ্ঘাকটীরস্থলকলিতরণৎকিঙ্কিণীকো মুকুন্দঃ। দোর্ভ্যাং হৈয়ঙ্গবীনং দধদতিবিমলং পায়সং বিশ্ববন্দ্যো গোগোপীগোপবীতো রুরুনখবিলসৎকণ্ঠভূষশ্চিরং বঃ ॥ ইতি তন্ত্রসারঃ ॥ * ॥ তস্য স্বরূপং যথা। শ্রীব্যাস উবাচ। ততোঽহমব্রুবং হৃষ্টঃ পুলকোৎফুল্লবিগ্রহঃ। ত্বামহং দ্রষ্টুমিচ্ছামি চক্ষুর্ভ্যাং মধুসূদন ॥ যত্তৎ সত্যং পরং ব্রহ্ম জগদ্‌যোনির্জগৎপতিঃ। বসন্তং বেদ শিরসি চাক্ষুষং নাথ মেঽস্তু তৎ ॥ শ্রীভগবানুবাচ। ব্রহ্মণৈবং পুরা পৃষ্টঃ প্রার্থিতশ্চ যথা পুরা। যদবোচমহং তস্মৈ তত্তুভ্যমপি কথ্যতে ॥ মামেকে প্রকৃতিং প্রাহুঃ পুরুষঞ্চ তথেশ্বরং। ধর্ম্মমেকে ধনঞ্চৈকে মোক্ষমেকেঽকুতোভয়ং ॥ শূন্যমেকে ভাবমেকে পরমার্থমথাপরে। দৈবমেকে দেবমেকে গ্রহমেকে মনঃ পরে ॥ বুদ্ধিমেকে কালমেকে শিবমেকে সদাশিবং। অপরে বেদশিরসি স্থিতমেকং সনাতনং ॥ সদ্ভাবং বিক্রিয়াহীনং সচ্চিদানন্দবিগ্রহং। মন্মায়ামোহিতধিয়ঃ সর্ব্বকালেষু বঞ্চিতাঃ। কোঽপি বেদ পুমান্ লোকে মদনুগ্রহভাজনঃ ॥ পশ্যাদ্য দর্শয়িষ্যামি স্বং রূপং বেদগোপিতং ॥ ততোঽপশ্যমহং ভূপ বালং বালাম্বুদপ্রভং। গোপকন্যাবৃতং গোপং হসন্তং গোপবালকৈঃ ॥ কদম্বমূলমাসীনং পীতবাসসমদ্ভুতং। বনং বৃন্দাবনং নাম নবপল্লবমণ্ডিতং ॥ কোকিলভ্রমরারাবমনোভবমনোহরং। নদীমপশ্যং কালিন্দীমিন্দীবরদলপ্রভাং ॥ গোবর্দ্ধনং তথাপশ্যং কৃষ্ণবামকরোদ্ধৃতং। মহেন্দ্রদর্পনাশায় গোগোপালসুখাবহং ॥ দৃষ্ট্বা বিহ্বষ্টো হ্যভবং সর্ব্বভূষণভূষণং। গোপালমবলাসঙ্গমুদিতং বেণুনাদিতং। ততো মামাহ ভগবান্ বৃন্দাবনচরঃ স্বয়ং। যদিদং মে ত্বয়া দৃষ্টং রূপং দিব্যং সনাতনং ॥ নিষ্কলং নিষ্ক্রিয়ং শান্তং সচ্চিদানন্দবিগ্রহং। পূর্ণং পদ্মপলাশাক্ষং নাতঃ পরতরং মম ॥ ইদমেব বদন্ত্যেতে বেদাঃ কারণকারণং। সত্যং ব্যাপি পরানন্দচিদ্ঘনং শাশ্বতং শিবং ॥ নিত্যাং মে মথুরাং বিদ্ধি বনং বৃন্দাবনং তথা। যমুনাং গোপকন্যাশ্চ তথা গোপালবালকান্ ॥ মমাবতারো নিত্যোঽয়মত্র মা সংশয়ং কৃথাঃ। মমেষ্টা হি সদা রাধা সর্ব্বজ্ঞোঽহং পরাৎপরঃ ॥ ময়ি সর্ব্বমিদং বিশ্বং ভাতি মায়াবিজৃম্ভিতং। ইতি পদ্মপুরাণে পাতালখণ্ডং ॥ * ॥ দ্বাদশগোপালাশ্চৈতন্যশব্দে দ্রষ্টব্যাঃ ॥

গোপালকঃ (পুং) শিবঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ শ্রীকৃষ্ণঃ। যথা। দাতা ফলানামভিবাঞ্ছিতানাং প্রাগেব গোপালকমন্ত্র এষঃ। ইতি ক্রমদীপিকা ॥ গোপালশব্দাৎ স্বার্থে কে গোরক্ষকশ্চ ॥

গোপালকর্কটী (স্ত্রী) কর্কটীভেদঃ। গোয়ালকাঁকরী গুরুম্বা ইতি চ হিন্দী ভাষা। তৎপর্য্যায়ঃ। বন্যা ২ গোপকর্কটিকা ৩ ক্ষুদ্রেৰ্ব্বারুঃ ৪ ক্ষুদ্রফলা ৫ গোপালী ৬ ক্ষুদ্রচির্ভিটা ৭। অস্যা গুণাঃ। শীতত্বং।

মধুরত্বং। পিত্তমূত্রকৃচ্ছ্রাশ্মরীমেহদাহশোষ-নাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

গোপালিকা (স্ত্রী) গোপালপত্নী। ইতি মুগ্ধ-বোধং॥ কীটবিশেষঃ। তৎপর্য্যায়ঃ। মহাভীরুঃ ২। ইতি হেমচন্দ্রঃ॥

গোপালী (স্ত্রী) গোপালকর্কটী। গোরক্ষী। ইতি রাজনির্ঘণ্টঃ॥

গোপাষ্টমী (স্ত্রী) কার্ত্তিকশুক্লাষ্টমী। যথা। শুক্লাষ্টমী কার্ত্তিকে তু স্মৃতা গোপাষ্টমী বুধৈঃ। তদ্দিনে বাসুদেবোঽভূদ্গোপঃ পূর্ব্বন্তু বৎসপঃ॥ তত্র কুর্য্যাৎ গবাং পূজাং গোগ্রাসং গোপ্রদক্ষিণং। গবানু-গমনং কার্য্যং সর্ব্বান্ কামানভীপ্সতা॥ ইতি কূর্ম্মপুরাণং॥

গোপিকা (স্ত্রী) গোপী। যথা। ন খলু গোপিকানন্দনো ভবানখিলদেহিনামন্ত-রাত্মদৃক্। ইতি শ্রীভাগবতং॥ রক্ষিত্রী চ॥

গোপিনী (স্ত্রী) শ্যামালতা। ইতি শব্দ-চন্দ্রিকা॥

গোপিলঃ (ত্রি) গোপ্তা। ইতি সংক্ষিপ্তসারে উণাদিবৃত্তিঃ॥

গোপী (স্ত্রী) গোপপত্নী। বৃন্দাবনস্থগোপীনাং স্বরূপং যথা। গোপ্যস্তু শ্রুতয়ো জ্ঞেয়াঃ স্বাধিজা গোপকন্যকাঃ। দেবকন্যাশ্চ রাজেন্দ্র ন মানুষ্যঃ কথঞ্চন॥ *॥ তত্র ব্রজবালা যথা। পূর্ণরসা রসমন্থরা রসালয়া রসমঞ্জরী রসপীযূষধামা রসতরঙ্গিণী রস-কল্লোলিনী রসবাপিকা অনঙ্গমঞ্জরী অনঙ্গমানিনী মদয়ন্তী রঙ্গবিহ্বলা ললিতা ললিতযৌবনা অনঙ্গকুসুমা মদনমঞ্জরী কলাবতী রতিকলা কলকণ্ঠী অজাত্যা রতোৎসুকা রতিসর্ব্বস্বা রতিচিন্তামণিঃ ইত্যাদ্যাঃ॥ *॥ শ্রুতিগণা যথা। উদ্গীতা রসগীতা কলগীতা কলস্বরা কলকণ্ঠিতা বিপঞ্চী কলপদা বহুমতা বহুকর্ম্মসুনিষ্ঠা বহুহরিঃ বহুশাখা বিশাখা সুপ্রয়োগতমা বিপ্রয়োগা বহুপ্রয়োগা বহুকলা কলাবতী ক্রিয়াবতী ইত্যাদ্যাঃ॥ *॥ মুনিগণা যথা। উগ্রতপাঃ সুতপাঃ প্রিয়ব্রতা সুব্রতা সুরেখা সুপর্ব্বা বহুপ্রদা রত্নরেখা মণিগ্রীবা অপর্ণা সুপর্ণা মত্তা সুলক্ষণা সুদতী গুণবতী সৌকালিনী সুলোচনা সুমনাঃ সুভদ্রা সুশীলা সুরভিঃ সুখদায়িকা ইত্যাদ্যাঃ॥*॥ গোপবালা যথা। চন্দ্রাবলী চন্দ্রিকা কাঞ্চন-মালা রুক্মমালাবতী চন্দ্রাননা চন্দ্ররেখা চান্দ্রবাপী চন্দ্রমালা চন্দ্রপ্রভা চন্দ্রকলা সৌবর্ণমালা মণিমালিকা বর্ণপ্রভা শুদ্ধ-কাঞ্চনসন্নিভা মালতী যূথী বাসন্তী নব-মল্লিকা মল্লী নবমল্লী শেফালিকা সৌগ-ন্ধিকা কস্তূরী পদ্মিনী কুমুদ্বতী রসালা সুরসা মধুমঞ্জরী রম্ভা উর্ব্বশী সুরেখা স্বর্ণ-রেখিকা বসন্ততিলকা ইত্যাদ্যাঃ। ইতি পাদ্মে পাতালখণ্ডং॥ অস্যা বিবরণং কৃষ্ণশব্দে দ্রষ্টব্যং॥ *॥ শারিবা। রক্ষিকা। ইতি বিশ্বঃ॥ প্রকৃতিঃ। যথা। গোপা-য়তি সকলমিদং গোপায়তি পরং পুংমাংসং গোপীপ্রকৃতিরিতি ক্রম-দীপিকা॥

গোপীথং (ক্লী) তীর্থস্থানং। ইতি সিদ্ধান্ত-কৌমুদ্যামুণাদিবৃত্তিঃ॥

গোপীথঃ (পুং) রক্ষণং। ইতি সংক্ষিপ্তসারে উণাদিবৃত্তিঃ॥

গোপুচ্ছঃ (পুং) হারভেদঃ। ইতি হেমচন্দ্রঃ॥ গোলাঙ্গুলবানরঃ। যথা। শার্দ্দূলমৃগসংঘুষ্টং সিংহৈর্ভীমবলৈর্বৃতং। ঋক্ষবানরগোপুচ্ছৈর্মার্জ্জারৈশ্চ নিষেবিতং॥ ইতি রামায়ণে কিষ্কিন্ধ্যাকাণ্ডং॥ গবাং লাঙ্গুলঞ্চ॥

গোপুটা (স্ত্রী) স্থূলৈলা। ইতি রাজনির্ঘণ্টঃ॥

গোপুটিকং (ক্লী) শিববৃষস্য মণ্ডপঃ। ইতি ত্রিকাণ্ডশেষঃ॥

গোপুরং (ক্লী) নগরদ্বারং। সহরের ফটক্ ইতি ভাষা। তৎপর্য্যায়ঃ। পুরদ্বারং ২। ইত্যমরঃ॥ দুর্গপুরদ্বারং। ইত্যন্যে॥ দ্বারমাত্রং। ইতি ভরতঃ॥ কৈবর্ত্তীমুস্তকং। ইতি মেদিনী॥

গোপুরকঃ (পুং) কুন্দুরুকঃ। ইতি রাজনির্ঘণ্টঃ॥

গোপুরীষং (ক্লী) গোময়ং। ইতি রাজনির্ঘণ্টঃ॥

গোপেন্দ্রঃ (পুং) বিষ্ণুঃ। ইতি হেমচন্দ্রঃ॥

গোপেশঃ (পুং) শাক্যমুনিঃ। ইতি ত্রিকাণ্ডশেষঃ॥ নন্দঘোষঃ। যথা। রামকৃষ্ণাবুভৌ তো গোপেশং পরিতঃ পরে। ইতি মুগ্ধবোধং॥ শ্রীকৃষ্ণশ্চ॥

গোপ্তা [ঋ] (ত্রি) রক্ষকঃ। যথা। বিপ্রাণামভয়ার্থমধ্বরবিধের্গোপ্তা গুরোরাজ্ঞয়া। ইতি রাঘবপাণ্ডবীয়ে কবিরাজঃ॥

গোপ্যঃ (পুং) দাসঃ। ইত্যমরটীকায়াং ভরতঃ॥ দাসীপুত্রঃ। রক্ষণীয়ে ত্রি। ইতি মেদিনী॥ গোপনীয়ঃ। যথা। আয়ুর্ব্বিত্তং গৃহচ্ছিদ্রং মন্ত্রমৈথুনভেষজং। অপমানস্তপো দানং নব গোপ্যানি যত্নতঃ॥ ইতি পুরাণং॥ গোপীসমূহশ্চ॥

গোপ্যকঃ (পুং) দাসঃ। ইত্যমরঃ॥

গোপ্যাধিঃ (পুং) বন্ধকবিশেষঃ। তথা চ নারদঃ। অধিক্রিয়ত ইত্যাধিঃ স বিজ্ঞেয়ো দ্বিলক্ষণঃ। কৃতকালোপনেয়শ্চ যাবদ্দেয়োদ্যতস্তথা॥ স পুনর্দ্বিবিধঃ প্রোক্তো গোপ্যো ভোগ্যস্তথৈব চ। গোপ্যো রক্ষণীয়ঃ। ইতি মিতাক্ষরা॥

গোপ্রকাণ্ডঃ (পুং) শ্রেষ্ঠগৌঃ। গোষু মধ্যে প্রকাণ্ডঃ প্রশস্ত ইতি ব্যুৎপত্তিঃ॥

গোবধঃ (পুং) গোহত্যা। স চ উপপাতকবিশেষঃ। যথা। গোবধোঽযাজ্যসংযাজ্যপারদার্য্যাত্মবিক্রয়াঃ। ইত্যাদ্যুপপাতকগণনে মানবে ১১ অধ্যায়ঃ॥ তৎপ্রায়শ্চিত্তং প্রায়শ্চিত্তশব্দে দ্রষ্টব্যং॥

গোভণ্ডীরঃ (পুং) জলকুক্কুভপক্ষী। ইতি ত্রিকাণ্ডশেষঃ॥

গোম ৎ ক লেপনে। ইতি কবিকল্পদ্রুমঃ॥ অজুগোমদ্গোময়েন স্থানং চেটী। ইতি দুর্গাদাসঃ॥

গোমতল্লিকা (স্ত্রী) সুশীলা গৌঃ। ইতি হলায়ুধঃ॥

গোমতী (স্ত্রী) স্বনামখ্যাতা নদী। তৎপর্য্যায়ঃ। বাশিষ্ঠী ২। ইতি হেমচন্দ্রঃ॥ বৈদিকমন্ত্রভেদঃ। যথা। পঞ্চগব্যেন গোঘাতী মাসেকেন বিশুধ্যতি। গোমতীঞ্চ জপেদ্বিদ্যাং গবাং গোষ্ঠে চ সংবসেৎ॥ ইতি প্রায়শ্চিত্ততত্ত্বে শাতাতপঃ॥

গোমন্তঃ ( পুং ) পর্ব্বতবিশেষঃ। ইতি জটাধরঃ ॥ গবাং স্বামিসমূহশ্চ ॥

গোময়ং ( ক্লী পুং ) গবাং গূথং। গোবর ইতি ভাষা। তৎপর্য্যায়ঃ। গোবিট্ ২। ইত্যমরঃ ॥ জগলং ৩ গোহল্লং ৪ গোশকৃৎ ৫। ইতি রত্নমালা ॥ গোপুরীষং ৬ গোবিষ্ঠা ৭ গোমলং ৮। ইতি রাজনির্ঘণ্টঃ ॥ তস্য মাহাত্ম্যং যথা। শতং বর্ষসহস্রাণাং তপস্তপ্তং সুদুষ্করং। গোভিঃ পূর্ব্ববিসৃষ্টাভির্গচ্ছেম শ্রেষ্ঠতামিতি ॥ অস্মৎপুরীষস্নানেন জনঃ পূয়েত সর্ব্বদা। শকৃতা চ পবিত্রার্থং কুর্ব্বীরন্ দেবমানুষাঃ ॥ তাভ্যো বরং দদৌ ব্রহ্মা তপসোঽন্তে স্বয়ং প্রভুঃ। এবং ভবত্বিতি বিভুর্লোকাংস্তারয়তেতি চ ॥ * ॥ তত্র লক্ষ্ম্যা বাসো যথা। লক্ষ্মীং প্রতি গবাং বাক্যং। অবশ্যং মাননা কার্য্যা তবাস্মাভির্যশস্বিনি। শকৃন্মূত্রে নিবস ত্বং পুণ্যমেতদ্ধি নঃ শুভে ॥ শ্রীরুবাচ। দিষ্ট্যা প্রসাদো যুষ্মাভিঃ কৃতো মেঽনুগ্রহাত্মকঃ। এবং ভবতু ভদ্রং বঃ পূজিতাস্মি সুখপ্রদাঃ ॥ ইতি মহাভারতে দানধর্ম্মঃ ॥ * ॥ গবাত্মকে ক্লী ॥

গোময়চ্ছত্রং ( ক্লী ) করকং। কোঁড়কছাতা ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ ॥

গোময়চ্ছত্রিকা ( স্ত্রী ) গোময়চ্ছত্রং। তৎপর্য্যায়ঃ। ছিলীরং ২ শিলীন্ধ্রকং ৩। ইতি হারাবলী ॥ উচ্ছিলীন্ধ্রং ৪। যথা। উচ্ছিলীন্ধ্রবিদার্ভকাঃ। ইতি শ্রীভাগবতং ॥

গোময়প্রিয়ং ( ক্লী ) ভূতৃণং। গন্ধখড় ইতি ভাষা। ইতি রত্নমালা ॥

গোময়োত্থা ( স্ত্রী ) গোময়জাতকীটবিশেষঃ। তৎপর্য্যায়ঃ। গর্দ্দভী ২। ইতি হেমচন্দ্রঃ ॥

গোময়োদ্ভবঃ ( পুং ) আরগ্বধঃ। শোনালু ইতি ভাষা। ইতি শব্দচন্দ্রিকা ॥

গোমক্ষিকা ( স্ত্রী ) দংশঃ। ডাঁশ ইতি ভাষা। ইতি শব্দরত্নাবলী ॥

গোমাংসং ( ক্লী ) গবাং পিশিতং। তদ্ভক্ষণপ্রায়শ্চিত্তং যথা। সুমন্তুঃ। গোমাংসভক্ষণে প্রাজাপত্যঞ্চরেৎ। ইদমজ্ঞানতঃ সকৃদ্ভক্ষণবিষয়ং। পরাশরঃ। অগম্যাগমনে চৈব মদ্যগোমাংসভক্ষণে। শুদ্ধ্যৈ চান্দ্রায়ণং কুর্য্যান্নদীং গত্বা সমুদ্রগাং ॥ চান্দ্রায়ণে ততশ্চীর্ণে কুর্য্যাদ্ব্রাহ্মণভোজনং। অনডুৎসহিতাং গাঞ্চ দদ্যাদ্বিপ্রায় দক্ষিণাং ॥ ইদং জ্ঞানতোঽভ্যাসে। শঙ্খঃ। গামশ্বং কুঞ্জরোষ্ট্রৌ চ সর্ব্বং পঞ্চনখং তথা। ক্রব্যাদং কুক্কুটং গ্রাম্যং কুর্য্যাৎ সম্বৎসরং ব্রতং ॥ এতচ্চিরকালাভ্যাসে। সম্বৎসরকৃচ্ছ্রব্রতে পঞ্চদশধেনবঃ। পুনরুপনয়নঞ্চ। যথা বিষ্ণুঃ। বিড়্বরাহগ্রাম্যকুক্কুটনরগোমাংসভক্ষণে সর্ব্বেষ্বেব দ্বিজাতীনাং প্রায়শ্চিত্তান্তে ভূয়ঃ সংস্কারং কুর্য্যাৎ। ইতি প্রায়শ্চিত্তবিবেকঃ ॥

গোমান্ [ৎ] ( ত্রি ) বহূনাং গবাং স্বামী। তৎপর্য্যায়ঃ। গবীশ্বরঃ ২ গোমী ৩। ইত্যমরঃ ॥

গোমায়ুঃ ( পুং ) শৃগালঃ। ইত্যমরঃ ॥ গন্ধর্ব্ববিশেষঃ। ইতি জটাধরঃ ॥ গোপিত্তজাতক্লীবোহয়ং ॥

গোমী [ ন্ ] ( ত্রি ) গোমান্। ইত্যমরঃ॥ উপাসকঃ। ইতি মেদিনী॥

গোমী [ ন্ ] ( পুং ) শৃগালঃ। ইতি মেদিনী॥ বুদ্ধভিক্ষুশিষ্যঃ। ইতি ত্রিকাণ্ডশেষঃ॥

গোমীনঃ ( পুং ) মৎস্যবিশেষঃ। যথা। শৃণু দেবি প্রবক্ষ্যামি মাংসভেদান্ নিবোধ মে। ন দেয়ং তিক্তকমঠং পশুশৃঙ্গিণমেব চ॥ গোমীনং চক্রশকুলং বড়ালং রাঘবস্তথা॥ ইতি মৎস্যসূক্তং॥

গোমুখং ( ক্লী ) কুটিলাগারং। বাদ্যভাণ্ডং। লেপনং। ইতি মেদিনী॥ চৌরক্রিয়মাণসুরঙ্গাভেদঃ। সিঁধবিশেষ ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ॥ জপমালাগোপনার্থং বস্ত্রনির্ম্মিতযন্ত্রং যথা। চতুর্ব্বিংশাঙ্গুলমিতং পট্টবস্ত্রাদিসম্ভবং। নির্ম্মায়াষ্টাঙ্গুলিমুখং গ্রীবাং তৎ ষড়্দশাঙ্গুলং॥ জ্ঞেয়ং গোমুখযন্ত্রঞ্চ সর্ব্বতন্ত্রেষু গোপিতং। তন্মুখে স্থাপয়েন্মালাং গ্রীবামধ্যগতঃ করঃ॥ প্রজপেদ্বিধিনা গুহ্যং বর্ণমালাধিকং প্রিয়ে। ইতি মুণ্ডমালাতন্ত্রং॥ অপি চ। গোমুখাদৌ ততো মালাং গোপয়েন্মাতৃজারবৎ। ইতি মায়াতন্ত্রং॥

গোমুখঃ ( পুং ) নক্রঃ। যক্ষবিশেষঃ। ইতি হেমচন্দ্রঃ॥

গোমুখী ( স্ত্রী ) হিমালয়াদগঙ্গাপতনে গোমুখাকারগুহা। ইতি লোকপ্রসিদ্ধিঃ॥ রাঢ়দেশস্থনদীবিশেষঃ। গোমুড় ইতি খ্যাতা॥

গোমূত্রং ( ক্লী ) গোপ্রস্রাবঃ। চোনা ইতি ভাষা। তৎপর্য্যায়ঃ। গোজলং ২ গোমূত্রঃ ৩ গোনিষ্যন্দঃ ৪ গোদ্রবঃ ৫। অস্য গুণাঃ। ২। তিক্তত্বং। উষ্ণত্বং। লঘুত্বং। কফবাতত্বগ্দোষনাশিত্বং। পিত্তকারিত্বং। দীপনত্বং। মেধ্যত্বং। মতিপ্রদত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ তীক্ষ্ণত্বং। ক্ষারত্বং। কষায়ত্বং। শূলগুল্মোদরানাহকণ্ডূক্ষিমুখরোগকিলাসবাতামবস্তিরুক্কুষ্ঠকাসশ্বাসশোথকামলাপাণ্ডুতিসারমূত্ররোধকৃমিশীতপ্লীহবর্চ্চোগ্রহনাশিত্বং। পূরণাৎ কর্ণশূলনাশিত্বং। সর্ব্বমূত্রেষু গুণাধিকত্বঞ্চ। ইতি ভাবপ্রকাশঃ॥

গোমূত্রিকা ( স্ত্রী ) তৃণবিশেষঃ। তাম্বড় ইতি ভাষা। তৎপর্য্যায়ঃ। রক্ততৃণা ২ ক্ষেত্রজা ৩ কৃষ্টভূমিজা ৪। অস্যা গুণাঃ। মধুরত্বং। বৃষ্যত্বং। গোদুগ্ধদায়িত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ চিত্রকাব্যবিশেষঃ। যথা। গতিরুচ্চাবচা যত্র মার্গে মূত্রস্য গোরিব। গোমূত্রিকেতি তৎ প্রাহুর্দুষ্করাং চিত্রবেদিনঃ॥ তস্যা ভেদাঃ। পাদগোমূত্রিকা। অর্দ্ধগোমূত্রিকা। শ্লোকগোমূত্রিকা। বিপরীতগোমূত্রিকা। ইতি সরস্বতীকণ্ঠাভরণং॥

গোমেদঃ ( পুং ) গোমেদকমণিঃ। ইতি রাজনির্ঘণ্টঃ॥

গোমেদকং ( ক্লী ) পীতমণিঃ। কাকোলং। পত্রকং। ইতি মেদিনী॥

গোমেদকঃ ( পুং ) স্বনামখ্যাতমণিঃ। তৎপর্য্যায়ঃ। গোমেদঃ ২ রাহুরত্নং ৩ তমোমণিঃ ৪ স্বর্ভানবঃ ৫ পিঙ্গস্ফটিকঃ ৬। অস্য গুণাঃ। অম্লত্বং। উষ্ণত্বং। বাতকোপবিকারনাশিত্বং। দীপনত্বং। পাচনত্বং।

ধারণে পাপনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ তস্য পরীক্ষা যথা। হিমালয়ে বা সিন্ধৌ বা গোমেদমণিসম্ভবঃ। স্বচ্ছকান্তির্গুরুঃ স্নিগ্ধো বর্ণাঢ্যো দীপ্তিমানপি॥ বলক্ষঃ পিঞ্জরো ধন্যো গোমেদ ইতি কীর্ত্তিতঃ। চতুর্দ্ধা জাতিভেদস্তু গোমেদেঽপি প্রকাশ্যতে ॥ ব্রাহ্মণঃ শুক্লবর্ণঃ স্যাৎ ক্ষত্রিয়ো রক্ত উচ্যতে। আপীতো বৈশ্যজাতিস্তু শূদ্রাস্ত্বনীল উচ্যতে ॥ ছায়া চতুর্বিধা শ্বেতা রক্তা পীতাসিতা তথা। গুরুপ্রভাঢ্যঃ সিতবর্ণরূপঃ স্নিগ্ধো মৃদুর্ব্বাতিমহাপুরাণঃ। স্বচ্ছস্তু গোমেদমণির্দ্ধৃতোঽয়ং করোতি লক্ষ্মীং ধনধান্যবৃদ্ধিং॥ লঘুর্বিরূপোঽতিখরোঽন্যমানঃ স্নেহোপলিপ্তো মলিনঃ খরোঽপি। করোতি গোমেদমণির্বিনাশং সম্পত্তিভোগাবলবীর্য্যরাশেঃ॥ যে দোষা হীরকে জ্ঞেয়াস্তে গোমেদমণাবপি। পরীক্ষা বহ্নিতঃ কার্য্যা শানে বা রত্নকোবিদৈঃ॥ স্ফটিকেনৈব কুর্ব্বন্তি গোমেদপ্রতিরূপিণং। শুদ্ধস্য গোমেদমণেস্তু মূল্যং স্বর্ণতো দ্বৈগুণমাহুরেকে। অন্যে তথা বিক্রমতুল্যমূল্যং তথাপরে চামরতুল্যমাহুঃ॥ চতুর্ব্বিধানামেষাস্তু ধারণং পরিসম্মতং। ইতি ভোজরাজকৃতযুক্তিকল্পতরুঃ॥

গোমেদসন্নিভঃ (পুং) দুগ্ধপাষাণঃ। ইতি রাজনির্ঘণ্টঃ॥

গোমেধঃ (পুং) যজ্ঞবিশেষঃ। তত্র স্ত্রীগোপশুঃ মন্ত্রেষু স্ত্রীলিঙ্গপাঠাৎ। তস্য লক্ষণং সপ্তশফত্বনবশফত্বভগ্নশৃঙ্গত্বকাণত্বছিন্নকর্ণত্বাদি-দোষরাহিত্যং। তস্য প্রয়োগঃ সর্ব্বোঽপি ছাগপশুবৎ। যজমানস্য স্বর্গঃ ফলং গোশ্চ গোলোকপ্রাপ্তিঃ। তস্য চ কলৌ নিষেধো যথা। অশ্বালম্ভং গবালম্ভং সন্ন্যাসং পলপৈতৃকং। দেবরাচ্চ সুতোৎপত্তিঃ কলৌ পঞ্চ বিবর্জয়েৎ॥ ইত্যাপস্তম্বাদিকল্পসূত্রপুরাণং॥

গোরঙ্কুঃ (পুং) পক্ষিভেদঃ। লগ্নকঃ। বন্দী। ইতি মেদিনী॥ কচিৎ পুস্তকে লগ্নকস্থানে নগ্নকোঽপি পাঠঃ॥

গোরটঃ (পুং) দুর্খদিরঃ। ইতি রাজনির্ঘণ্টঃ॥

গোরণং (ক্লী) গুরণং। উদ্যমঃ। ইত্যমরটীকা॥

গোরসঃ (পুং) দুগ্ধং। দধি। তক্রং। ইতি হেমচন্দ্রঃ॥

গোরসজং (ক্লী) তক্রং। ইতি রাজনির্ঘণ্টঃ॥

গোরক্ষঃ (পুং) ঋষভনামৌষধং। ইতি হেমচন্দ্রঃ॥ নাগরঙ্গঃ। গোরক্ষকে ত্রি। ইতি মেদিনী॥

গোরক্ষকর্কটী (স্ত্রী) চির্ভিটা। ইতি ভাবপ্রকাশঃ॥

গোরক্ষজম্বুঃ (স্ত্রী) গোধূমঃ। গোরক্ষতণ্ডুলা। ইতি বিশ্বঃ॥ ঘোণ্টাফলঃ। ইতি জটাধরঃ॥

গোরক্ষতণ্ডুলা (স্ত্রী) ক্ষুদ্রলতাবিশেষঃ। গোরক্ষচাউলিয়া ইতি ভাষা। তৎপর্য্যায়ঃ। গাঙ্গেরুকী ২ নাগবলা ৩ ঝষা ৪ হ্রস্বগবেধুকা ৫ খরযষ্টিকা ৬ বিশ্বদেবা ৭। ইতি রত্নমালা॥

গোরক্ষতুম্বী (স্ত্রী) কুম্ভতুম্বী। ইতি রাজনির্ঘণ্টঃ॥

গোরক্ষদুগ্ধা (স্ত্রী) ক্ষুদ্রক্ষুপবিশেষঃ। তৎপর্য্যায়ঃ। গোরক্ষী ২ তাম্রদুগ্ধা ৩ রসায়নী ৪ বহুপত্রী ৫ অমৃতা ৬ জীব্যা ৭ অমৃতসঞ্জীবনী ৮। অস্যা গুণাঃ। মধুরত্বং। বৃষ্যত্বং। সংগ্রাহিত্বং। হিমত্বং। সর্ব্ববশ্যকারিত্বং। রসসিদ্ধিগুণপ্রদত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

গোরক্ষী (স্ত্রী) ক্ষুদ্রক্ষুপবিশেষঃ। সা তু মালবে প্রসিদ্ধা। তৎপর্য্যায়ঃ। সর্পদণ্ডী ২ দীর্ঘদণ্ডী ৩ সুদণ্ডিকা ৪ চিত্রলা ৫ গন্ধবহুলা ৬ গোপালী ৭ পঞ্চপর্ণিকা ৮। অস্যা গুণাঃ। মধুরত্বং। তিক্তত্বং। শিশিরত্বং। দাহপিত্তবিস্ফোটবান্ত্যতীসারজ্বরদোষনাশিত্বঞ্চ। গোরক্ষদুগ্ধা। কুম্ভতুম্বী। ইতি রাজনির্ঘণ্টঃ॥

গোরাটী (স্ত্রী) শারিকাপক্ষী। ইতি হেমচন্দ্রঃ॥

গোরাণ্টিকা (স্ত্রী) শারিকাপক্ষী। ইতি রাজনির্ঘণ্টঃ॥

গোরিকা (স্ত্রী) শারিকাপক্ষী। ইতি রাজনির্ঘণ্টঃ॥

গোরুতং (ক্লী) ক্রোশদ্বয়ং। ইতি হেমচন্দ্রঃ॥

গোরোচং (ক্লী) হরিতালং। ইতি রাজনির্ঘণ্টঃ॥

গোরোচনা (স্ত্রী) স্বনামখ্যাতপীতবর্ণদ্রব্যং। তত্তু গোমস্তকস্থশুক্রপিত্তং। যথা। বিশোষয়েত্ত্বিগতং সশুক্রং সূত্রং সপিত্তং পবনঃ কফঞ্চ। যদা তদাশ্মর্য্যুপজায়তে চ ক্রমেণ পিত্তেম্বিব রোচনা গোঃ॥ ইতি মাধবকরঃ॥ তৎপর্য্যায়ঃ। রুচিঃ ২ শোভা ৩ রুচিরা ৪ শোভনা ৫ শুভা ৬ গৌরী ৭ রোচনী ৮ পিঙ্গা ৯ মঙ্গল্যা ১০ মঙ্গলা ১১ শিবা ১২ পীতা ১৩ গৌতমী ১৪ গব্যা ১৫ চন্দনীয়া ১৬ কাঞ্চনী ১৭ মেধ্যা ১৮ মনোরমা ১৯ শ্যামা ২০ রামা ২১। ইতি রাজনির্ঘণ্টঃ॥ বন্দ্যা ২২ রোচনা ২৩। অস্যা গুণাঃ। হিমত্বং। তিক্তত্বং। বশ্যমঙ্গলকান্তিকারিত্বং। বিষালক্ষ্মীগ্রহোন্মাদগর্ভস্রাবক্ষতাস্রনাশিত্বঞ্চ। ইতি ভাবপ্রকাশঃ॥ রুচ্যত্বং। পবিত্রতাশৃঙ্গাররহিতকারিত্বং। কৃমিকুষ্ঠনাশিত্বং। ভূতোপশমনত্বং। জনমোহনত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

গোর্দ্দং (ক্লী) মস্তিষ্কং। মস্তকস্নেহঘৃতং। ইত্যমরঃ॥

গোলং (ক্লী) মণ্ডলং। ইতি মেদিনী॥

গোলঃ (পুং) সর্ব্ববর্ত্তুলঃ। ইতি হেমচন্দ্রঃ॥ মদনবৃক্ষঃ। ইতি রত্নমালা॥ জারাৎ বিধবায়াঃ সুতঃ। ইতি ধরণী॥ বোলঃ। ইতি জটাধরঃ॥ ভূগোলঃ খগোলশ্চ। যথা। গোলং শ্রোতুং যদি তব মতির্ভাস্করীয়ং শৃণু ত্বং। ইতি সিদ্ধান্তশিরোমণিঃ॥ একরাশৌ ষড়্গ্রহযোগঃ। যথা। গ্রহাণামেকস্মিন্ যদি ভবতি ষণ্ণাং নিবসতিস্তদা গোলো যোগঃ প্রলয়পদস্থিতোঽপি লভতে। তয়োর্লোকো বৃক্ষঃ পরিহরতি পুত্রঞ্চ জননী নৃপাণাং নাশঃ স্যাৎ

জ্বলতি বসুধা শুষ্যন্তি নদী॥ ইতি প্রশ্নকৌমুদী॥ একরাশৌ সপ্তগ্রহযোগশ্চ। যথা। সপ্তগ্রহা যদৈকস্থা গোলযোগস্তদা ভবেৎ। দুর্ভিক্ষ্যং রাষ্ট্রপীড়া চ তস্মিন্ কালে নৃপক্ষয়ঃ॥ ইতি ময়ূরচিত্রকং॥ অপি চ। একাদিগৃহোপেতৈরুক্তান্ যোগান্ বিহায় সংখ্যাখ্যাঃ। গোলযুক্শূলকেদারপাশদামাখ্যবীনাঃ স্যুঃ॥ দুঃখিতদরিদ্রঘাতুককৃষিকরদুঃশীলপশুপনিপুণানাং॥ জন্মক্রমেণ দুঃখিনঃ পরভাগ্যৈঃ সর্ব্ব এবৈতে॥ ইতি দীপিকা॥

গোলকং (ক্লী) গোলোকং। যথা। যদ্রূপং গোলকং ধাম তদ্রূপং নাস্তি মামকে। ইতি তন্ত্রং॥

গোলকঃ (পুং) মৃতে ভর্ত্তরি জারজঃ। রাঁড়ের ছেলে ইতি ভাষা। ইত্যমরঃ॥ অলিঞ্জরঃ। গুড়ঃ। পিণ্ডঃ। ইতি হেমচন্দ্রঃ॥ গন্ধরসঃ। ইতি রত্নমালা॥ কলায়ঃ। মটর ইতি খ্যাতঃ। ইতি শব্দচন্দ্রিকা॥

গোলা (স্ত্রী) দুর্গা। গোদাবরী। সখী। কুনটী। পত্রাঞ্জনং। মণ্ডলং। অলিঞ্জরঃ। বালক্রীড়নকাষ্ঠং। ইতি মেদিনী॥

গোলাঙ্গূলঃ (পুং) বানরঃ। তৎপর্য্যায়ঃ। কপিখাস্যঃ ২ দধিশোণঃ ৩ নগাটনঃ ৪। ইতি ত্রিকাণ্ডশেষঃ॥ কৃষ্ণবানরঃ। ইতি রাজনির্ঘণ্টঃ॥

গোলাসঃ (পুং) গোময়চ্ছত্রিকা। শিলীন্ধ্রং। ইতি হারাবলী॥

গোলিহঃ (পুং) ঘণ্টাপাটলিঃ। ইতি জটাধরঃ॥

গোলীঢ়ঃ (পুং) ঘণ্টাপাটলিঃ। ইত্যমরঃ॥

গোলোকং (ক্লী) শ্রীকৃষ্ণস্য স্থানং। যথা। বৈকুণ্ঠস্য দক্ষভাগে গোলোকং সর্ব্বমোহনং। তত্রৈব রাধিকা দেবী দ্বিভুজো মুরলীধরঃ॥ যদ্রূপং গোলকং ধাম তদ্রূপং নাস্তি মামকে। জ্ঞানে বা চক্ষুষোঃ কিংবা ধ্যানযোগে ন বিদ্যতে॥ শুদ্ধতত্ত্বময়ং দেবি নানাদেবেন শোভিতং। মধ্যদেশে গোলকাখ্যং শ্রীবিষ্ণোর্লোভমন্দিরং॥ শ্রীবিষ্ণোঃ সত্ত্বরূপস্য যৎ স্থলং চিত্তমোহনং। তস্য স্থানস্য মাহাত্ম্যং কিং ময়া কথ্যতেঽধুনা॥ তত্রৈব সততং ভাতি দ্বিভুজো মুরলীধরঃ। তদা সত্ত্বময়ো বিষ্ণুর্ভুবনং পাতি নিশ্চিতং॥ বৈষ্ণবস্য মহামোক্ষো যত্রৈব পরমেশ্বরি। ইতি স্থানস্য মাহাত্ম্যং সংক্ষেপেণ ময়োদিতং॥ বিস্তারেণ ন শক্নোমি জন্মান্তরশতেন চ। বীজকোষস্য বাহ্যে তু বেষ্টিতং তোয়মণ্ডলং॥ প্রমাণং সুন্দরং তোয়ং যথা ক্ষীরোদসাগরং। ধ্রুবস্ত জ্যোতিষাকারং কোটিচন্দ্রসমপ্রভং॥ বলয়াকাররূপেণ সুশুভ্রং তোয়মণ্ডলং। গঙ্গাদিসরিতঃ সর্ব্বাস্তথৈব ভান্তি সুন্দরি॥ ইন্দ্রাদিদেবতাঃ সর্ব্বে স্তূয়মানা নিরন্তরং। গন্ধর্ব্বযক্ষনাগাদিকুষ্মাণ্ডা ভৈরবাস্তথা॥ নানাসুখবিলাসেন সদা চৈকাগ্রচেতসঃ। বিষ্ণুগানং প্রকুর্ব্বন্তি স্তুতিভক্তিপরায়ণাঃ॥ দেবা গানং প্রকুর্ব্বন্তি চতুর্ব্বক্ত্রেণ বেধসা। মালবাদ্যাশ্চ ষড্রাগাঃ ষট্‌ত্রিংশদ্রাগিণী তথা॥ বেদগানেন ভাসন্তো মূর্ত্তিমন্তঃ

সদৈব হি। মালবেনৈব রাগেণ সামগানং সদা প্রিয়ে॥ মল্লারেণ সদাথর্ব্বং বসন্তেন তথা পুনঃ। হিন্দোলেন যজুঃপাঠং সদা কুর্ব্বন্তি চেতসা॥ কর্ণাটেনৈব ঋগ্বেদং শ্রীরাগেণ তথা শিবে। নির্দ্দিষ্টপাঠমেতত্তু অনির্দ্দিষ্টমতঃ পরং॥ তত্রৈব সন্তি তে রাগাঃ সহস্রাণি চ ষোড়শ। মুরারের্মুররী-গানাৎ সর্ব্বস্তালঃ প্রজায়তে॥ তেন তালেন রাগেণ সদা গায়ন্তি বেধসঃ। তদ্রাগস্য বিভাগং হি কুর্ব্বন্তি মুনয়ো জনাঃ॥ বসন্তাদ্যাশ্চ ঋতবস্তিষ্ঠন্তি তত্র সন্ততং। নানাঋতুপ্রসূনেন ভূষিতং মুররী-ধরং॥ তত্রৈব রাধিকা দেবী নানাসুখ-বিলাসিনী। বদন্তী মুররীগানং কুরু কান্ত প্রমোহনং॥ যেন শব্দেন কামস্য উৎ-পত্তির্জায়তে সদা। তদ্রাগশ্চৈব তত্তালং কুরু গানং প্রযত্নতঃ॥ এবমানন্দসংযুক্তা মহাবেশবিলাসিনী। বামভাগে সদা ভাতি রাধিকা ভক্তবৎসলা॥ ইতি তন্ত্রং॥

গোলোকঃ (পুং) শ্রীকৃষ্ণস্য নিত্যধাম। যথা। নিরাধারশ্চ বৈকুণ্ঠো ব্রহ্মাণ্ডানাং পরো বরঃ। তৎপরশ্চাপি গোলোকঃ পঞ্চাশৎ-কোটিযোজনাৎ॥ ঊর্দ্ধে নিরাশ্রয়শ্চাপি রত্নসারবিনির্ম্মিতঃ। সপ্তদ্বারঃ সপ্তসারঃ পরিখাসপ্তসংযুতঃ॥ লক্ষপ্রাকারযুক্তশ্চ নদ্যা বিরজয়া যুতঃ। বেষ্টিতো রত্নশৈলেন শতশৃঙ্গেন চারুণা॥ যোজনাযুতমানঞ্চ যস্তৈকং শৃঙ্গমুজ্জ্বলং। শতকোটিযোজনশ্চ শৈল উচ্ছ্রিত এব চ॥ দৈর্ঘ্যং তস্য শত-গুণং প্রস্থে চ লক্ষযোজনং। যোজনা-যুতবিস্তীর্ণস্তত্রৈব রাসমণ্ডলঃ॥ অমূল্যরত্ন-নির্ম্মাণো বর্ত্তুলশ্চন্দ্রবিম্ববৎ। পারিজাত-বনেনৈব পুষ্পিতেন চ বেষ্টিতঃ॥ কল্পবৃক্ষ-সহস্রেণ পুষ্পোদ্যানশতেন চ। নানাবিধৈঃ পুষ্পবৃক্ষৈঃ পুষ্পিতেন চ চারুণা॥ ত্রিকোটিরত্নাভরণৈর্গোপীলক্ষৈশ্চ রক্ষিতঃ। রত্নপ্রদীপযুক্তশ্চ রত্নতল্পসমন্বিতঃ॥ নানা-ভোগসমাযুক্তো মধুবাপীশতৈর্বৃতঃ। পীযূষ-বাপীযুক্তশ্চ কামভোগসমন্বিতঃ॥ গো-লোকগৃহসংখ্যানং বর্ণনং বা বিশা-রদঃ। ন কোঽপি বেদ বিদ্বান্ বা বেদ বিদ্বান্ ব্রজেশ্বরঃ॥ ইতি ব্রহ্মবৈবর্ত্ত-পুরাণং॥

গোলোমিকা (স্ত্রী) ক্ষুদ্রক্ষুপবিশেষঃ। গোধূমী ইতি পাথরী ইতি চ ভাষা। তৎপর্য্যায়ঃ। গোধূমী ২ গোজা ৩ ক্রোষ্টুকপুচ্ছিকা ৪ গোসম্ভবা ৫ প্রস্তরিণী ৬। অস্যা গুণাঃ। কটুত্বং। তিক্তত্বং। ত্রিদোষশমনত্বং। হিমত্বং। শূলরোগাস্রদোষনাশিত্বং। গ্রাহিত্বং। দীপনত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

গোলোমী (স্ত্রী) শ্বেতদূর্ব্বা। বচা। ভূত-কেশঃ। ইতি মেদিনী॥ বেশ্যা। ইতি হেমচন্দ্রঃ॥ গোলোমিকা। ইতি রাজ-নির্ঘণ্টঃ॥

গোবৎসাদী [ ন্ ] (পুং) বৃকঃ। ইতি রাজ-নির্ঘণ্টঃ॥

গোবন্দনী (স্ত্রী) প্রিয়ঙ্গুবৃক্ষঃ। ইত্যমরঃ॥ পীতদণ্ডোৎপলঃ। ইতি রত্নমালা॥

গোবরং (ক্লী) গোখুরক্ষুণ্ণগোষ্ঠস্থশুষ্কগোময়-চূর্ণং। যথা। গোষ্ঠান্তর্গোখুরক্ষুণ্ণং শুষ্কং

গোময়চূর্ণিতং। গোবরং তৎ সমাখ্যাতং বরিষ্ঠং রসসাধনে ॥ ইতি ভাবপ্রকাশঃ ॥

গোবর্দ্ধনঃ (পুং) স্বনামখ্যাতশ্রীবৃন্দাবনস্থ-পর্ব্বতঃ। ইতি জটাধরঃ ॥ তস্য স্বরূপং যথা। অনাদির্হরিদাসোঽয়ং ভূধরো নাত্র সংশয়ঃ। ইতি পাদ্মে পাতালখণ্ডে ব্যাসং প্রতি শ্রীকৃষ্ণবাক্যং ॥ তস্য পূজাকালাদির্যথা। প্রাতর্গোবর্দ্ধনং পূজ্য দ্যূতঞ্চৈব সমাচরেৎ। ভূষণীয়াস্তথা গাবঃ পূজ্যাশ্চ দোহবাহনাঃ ॥ শ্রীকৃষ্ণদাসবর্য্যোঽয়ং শ্রীগোবর্দ্ধনভূধরঃ। শুক্লপ্রতিপদি প্রাতঃ কার্ত্তিকেঽর্চ্চ্যোঽত্র বৈষ্ণবৈঃ ॥ প্রাতর্গোবর্দ্ধনং পূজ্য রাত্রৌ জাগরণং চরেৎ। ইতি ক্বচিৎ পাঠঃ। তস্মাত্তদিদং কর্ম্ম গোবর্দ্ধনপ্রাধান্যেন গোপ্রাধান্যেন চ খ্যাতমপ্যেকমেব জ্ঞেয়ং। তত্র দিননির্ণয়ঃ। তদাহ দেবলঃ। প্রতিপদ্দর্শসংযোগে ক্রীড়নন্তু গবাং মতং। পরবিদ্ধাস্তু যঃ কুর্য্যাৎ পুত্রদারধনক্ষয়ঃ ॥ নির্ণয়ামৃতধৃতং পুরাণান্তরবচনং। যা কুহূঃ প্রতিপন্মিশ্রা তত্র গাঃ পূজয়েন্নৃপ। পূজামাত্রেণ বর্দ্ধন্তে প্রজা গাবো মহীপতেঃ ॥ ততঃ প্রাতর্গোবর্দ্ধনং পূজ্যেতি পূর্ব্বাহ্ণতাৎপর্য্যকং। দ্বিতীয়াসময়ে তু সর্ব্বথা নিষিদ্ধং। তদ্যথা। নন্দায়াং দর্শনে রক্ষা বলিদানদশাসু চ। ভদ্রায়াং গোকুলক্রীড়া দেশনাশায় জায়তে ॥ পুরাণসমুচ্চয়ে তু সম্ভাবিতচন্দ্রোদয়দ্বিতীয়াসংযোগ এব নিষিধ্যতে। গবাং ক্রীড়াদিনে যত্র রাত্রৌ দৃশ্যেত চন্দ্রমাঃ। সোমো রাজা পশূন্ হন্তি সুরভী পূজকাংস্তথা। তদুদয়সম্ভাবনঞ্চ নির্ণয়ামৃতে নির্ণীতং। প্রতিপদ্যাপরাহ্নিকত্রিমুহূর্ত্তব্যাপিন্যাং দ্বিতীয়ায়াং চন্দ্রদর্শনং সম্ভাব্যতে। তদুক্তমগ্ন্যাধানবিষয়ে বৃদ্ধশাতাতপেন। দ্বিতীয়া ত্রিমুহূর্ত্তা চেৎ প্রতিপদ্যাপরাহ্নিকী॥ অগ্ন্যাধানঞ্চতুর্দ্দশ্যাং পরতঃ সোমদর্শনাদিতি। অপরাহ্লশ্চ পঞ্চধাবিভক্তস্যাহ্নশ্চতুর্থো ভাগঃ। ততশ্চ যত্র প্রতিপদি যন্মুহূর্ত্তব্যাপিনী দ্বিতীয়া তত্র চন্দ্রদর্শনসম্ভাবনমিতি। অন্যদা তূত্তরৈব প্রতিপত্তত্র গৃহীতা। তথৈব পুরাণসমুচ্চয়ে। বর্দ্ধমানতিথৌ নন্দা যদা সার্দ্ধত্রিযামিকা। দ্বিতীয়াবৃদ্ধিগামিত্বাদুত্তরা তত্র চোচ্যতে ॥ কিঞ্চ। যদা পূর্ণপ্রতিপৎ পরত্র নিক্রামতি তদাপ্যুত্তরৈব কার্য্যা। যথোক্তং ভবিষ্যোত্তরে। যথা দ্বাদশভির্ম্মাসৈর্ম্মাসো বৃদ্ধো মলিম্লুচঃ। তথৈবাহোরাত্রিবৃদ্ধ্যা তিথিঃ প্রোক্তো মলিম্লুচঃ ॥ যথা মলিম্লুচঃ পূর্ব্বো মাসো দৈবস্তথা পরঃ। ত্যাজ্যা তিথিস্তথা পূর্ব্বা গ্রাহ্যা চৈব তথোত্তরেতি নির্ণয়ামৃতমতং ॥ কিন্তু। বঞ্জুলীন্যায়েন পূর্ব্বৈব মন্তুং শক্যতে। তদ্বদত্রাপি দেবলাদিবচনপ্রামাণ্যমস্তীতি ॥ * ॥ অথ গোবর্দ্ধনপূজাবিধিঃ। পাদ্মে তত্রৈব। মথুরায়াস্তথান্যত্র কৃত্বা গোবর্দ্ধনং গিরিং। গোময়েন মহাস্থূলং তত্র পূজ্যো গিরির্যথা ॥ মথুরায়াং তথা সাক্ষাৎ কৃত্বা চৈব প্রদক্ষিণং। বৈষ্ণবং ধাম সংপ্রাপ্য মোদতে হরিসন্নিধৌ ॥ পূজামন্ত্রঃ। গোবর্দ্ধন ধরাধার

গোকুলত্রাণকারকঃ। বিষ্ণুবাহুকৃতোচ্ছ্রায়ো গবাং কোটিপ্রদো ভব॥ ইতি। গোপূজামন্ত্রঃ স্কান্দে তত্রৈব। লক্ষ্মীর্যা লোকপালানাং ধেনুরূপেণ সংস্থিতা। ঘৃতং বহতি যজ্ঞার্থে যমপাশং ব্যপোহতু॥ অগ্রতঃ সন্তু মে গাবো গাবো মে সন্তু পৃষ্ঠতঃ। গাবো মে পার্শ্বতঃ সন্তু গবাং মধ্যে বসাম্যহং॥ *॥ অথ গোক্রীড়া। তত্রৈব। ক্রোধাপয়েদ্ধাবয়েচ্চ গোমহিষ্যাদিকং ততঃ। বৃষান্ কর্ষাপয়েদ্গোপৈরুক্তিপ্রত্যুক্তিবাদনাৎ॥ পাদ্মে চ তত্রৈব। মহিষ্যাদেস্তথা ভূষা ক্রীড়নং বারণস্তথা। তন্মাহাত্ম্যঞ্চ তত্রৈব। এবং গোবর্দ্ধনং গাশ্চ পূজনীয়া বিধানতঃ। গোবর্দ্ধনমখো রম্যঃ কৃষ্ণসন্তোষকারকঃ॥ ইতি শ্রীহরিভক্তিবিলাসে কার্ত্তিককৃত্যে ১৬ বিলাসঃ॥

গোবর্দ্ধনধরঃ (পুং) শ্রীকৃষ্ণঃ। ইতি শব্দচন্দ্রিকা॥

গোবশা (স্ত্রী) বন্ধ্যা গৌঃ। ইতি কলাপব্যাকরণং॥

গোবিট্ [শ্] (পুং) গোময়ং। ইত্যমরঃ॥

গোবিন্দঃ (পুং) শ্রীকৃষ্ণঃ। গবাধ্যক্ষঃ। বৃহস্পতিঃ। ইতি মেদিনী॥ পরমব্রহ্ম। যথা। তত্র যদ্যসমর্থস্ত্বং জ্ঞানযোগে মহামতে। ক্রিয়াযোগে দিবা রাত্রৌ তৎপরঃ সততং ভব॥ করোষি যানি কর্ম্মাণি তানি দেবে জগৎপতৌ। সমর্পয়স্ব ভদ্রং তে ততঃ কর্ম্ম প্রহাস্যসি॥ শুভাশুভপরিত্যাগী ক্ষীণে নিঃশেষকর্ম্মণি। লয়মাপ্স্যসি গোবিন্দং তদ্ব্রহ্ম পরমং মহৎ॥ ইতি। তন্নামমাহাত্ম্যং যথা। যে তিষ্ঠন্তঃ স্বপন্তশ্চ গচ্ছন্তশ্চলিতে ক্ষুতে। সংকীর্ত্তয়ন্তি গোবিন্দং তে বস্ত্যাজ্যাঃ সুদূরতঃ॥ ইতি চ বহ্নিপুরাণে যমানুশাসননামাধ্যায়ঃ॥

গোবিন্দদ্বাদশী (স্ত্রী) ফাল্গুনশুক্লদ্বাদশী। যথা। ফাল্গুনে দ্বাদশী শুক্লা যা পুষ্যর্ক্ষেণ সংযুতা। গোবিন্দদ্বাদশী নাম সা স্যাদ্গোবিন্দভক্তিদা॥ তস্যামুপোষ্য বিধিনা ভগবন্তং প্রপূজয়েৎ। লিখিতঃ পাপনাশিন্যাং বিধির্যোঽত্রাপি স স্মৃতঃ॥ তন্মাহাত্ম্যঞ্চ ব্রহ্মপুরাণে শ্রীবশিষ্ঠমান্ধাতৃসম্বাদে। ফাল্গুনামলপক্ষে তু পুষ্যর্ক্ষে দ্বাদশী যদি। গোবিন্দদ্বাদশী নাম মহাপাতকনাশিনী॥ তস্যামুপোষ্য বিধিবন্নরঃ সংক্ষীণকল্মষঃ। প্রাপ্নোত্যনুত্তমাং সিদ্ধিং পুনরাবৃত্তিদুর্লভামিতি॥ আমর্দ্দকী দ্বাদশীতি লোকে খ্যাতেয়মেব হি। যত্র আমর্দ্দকীপূজা ব্রতমস্যাং বিশেষতঃ॥ তদুক্তং ব্রাহ্মে তত্রৈব পাপনাশিনীমাহাত্ম্যপ্রসঙ্গে। ফাল্গুনে তু বিশেষেণ বিশেষঃ কথিতো নৃপ। আমর্দ্দক্যা ব্রতং পুণ্যং বিষ্ণুলোকপ্রদং নৃণাং॥ প্রভাসখণ্ডে চ। শ্রীদেবীমহেশসংবাদে। ফাল্গুনস্য সিতে পক্ষে একাদশ্যামুপোষিতঃ। স্নাত্বা নদ্যাং তড়াগে বা বাপ্যাং কূপে গৃহেঽপি বা॥ গত্বা গিরৌ বনে বাপি যত্র স্যা প্রাপ্যতে শিবা। ক্ষীরোদে মথ্যমানে তু যদা বৃক্ষঃ সমুত্থিতঃ॥ আমর্দ্দাদ্দেবদৈত্যানাং তেন সামর্দ্দকী স্মৃতা। শিবা লক্ষ্মীঃ স্মৃতো

বৃক্ষঃ সেব্যতে সুরসত্তমৈঃ ॥ নৈবৈর্ব্রহ্মা-দিভিঃ সর্ব্বৈর্বৃক্ষোঽসৌ বৈষ্ণবঃ স্মৃতঃ। তত্র গত্বা হরিঃ পূজ্যো বৃক্ষমূলেঽথবা শিবা॥ পূজ্যা পুষ্পৈঃ শুভৈ রাত্রৌ কার্য্যং জাগরণং হরেঃ। করকং জলপূর্ণন্তু কর্ত্তব্যং পাত্রসংযুতং ॥ হবিষ্যান্নন্তু কর্ত্তব্যং দীপঃ কার্য্যো বিধানতঃ। এবং জাগরণং কার্য্যং কথাশ্রবণতৎপরৈঃ ॥ মুচ্যন্তে দেহিনঃ পাপৈঃ কলিজৈঃ কায়সম্ভবৈঃ। দেহান্তে চ নরাঃ সর্ব্বে পূজ্যন্তে হরিমন্দিরে॥ ইতি শ্রীহরিভক্তিবিলাসে ১৪ বিলাসঃ ॥

গোবিষ্ঠা ( স্ত্রী ) গোময়ং। ইতি রাজনির্ঘণ্টঃ ॥

গোবৃন্দং ( ক্লী ) গোসমূহঃ। ইতি হলায়ুধঃ ॥

গোবৃন্দারকঃ (পুং) শ্রেষ্ঠগৌঃ। ইতি কলাপ-ব্যাকরণং ॥

গোবৃষঃ ( পুং ) বৃষঃ। ইতি শব্দরত্নাবলী ॥

গোশকৃৎ ( ক্লী ) গোময়ং। ইতি জটাধরঃ ॥

গোশালং ( ক্লী স্ত্রী ) গোগৃহং। গোয়ালি ইতি ভাষা। ইতি লিঙ্গাদিসংগ্রহে অমরঃ॥

গোশীর্ষং ( ক্লী ) চন্দনং। ইতি রাজনির্ঘণ্টঃ ॥ হরিচন্দনং। ইত্যমরঃ ॥ গোঃ শীর্ষং গোশীর্ষং তদাকারে মলয়ৈকদেশে জাতং কালতাম্রব্যামিশ্রবর্ণমুৎপলগন্ধি অতি-সুরভি শীতলতয়া সদৈব সর্পৈর্বেষ্টিতং। ইতি ভরতঃ ॥ গবাং মস্তকঞ্চ ॥

গোশীর্ষকঃ ( পুং ) দ্রোণপুষ্পীবৃক্ষঃ। ইতি রত্ন-মালা ॥

গোশৃঙ্গঃ ( পুং ) বর্ব্বূরবৃক্ষঃ। ইতি রাজ-নির্ঘণ্টঃ ॥ গোবিষাণে ক্লী ॥

গোষড়্গবং ( ক্লী ) গোষট্কং। ইতি মুগ্ধ-বোধং ॥

গোষ্ট ঙ সংঘাতে। ইতি কবিকল্পদ্রুমঃ ॥ সংঘাতো রাশীকরণং। ঙ গোষ্টতে ধান্যং লোকঃ। ইতি দুর্গাদাসঃ ॥

গোষ্ঠং ( ক্লী ) গোস্থানং। গোঠ ইতি ভাষা। ইত্যমরঃ॥ প্রত্যয়বিশেষঃ। স তু স্থানার্থে পশুবাচকশব্দেভ্যো ভবতি। যথা। গো-গোষ্ঠং মহিষগোষ্ঠং ইত্যাদি। ইতি ভরতঃ ॥

গোষ্ঠশ্বঃ ( ত্রি ) স্বগৃহাঙ্গনে স্থিতো যঃ পরান্ দ্বেষ্টি সঃ। ইতি জটাধরঃ ॥

গোষ্ঠাষ্টমী ( স্ত্রী ) গোপাষ্টমী। সা চ কার্ত্তিকশুক্লাষ্টমী। যথা। পাদ্মে তত্রৈব কূর্ম্মপুরাণে চ। শুক্লাষ্টমী কার্ত্তিকে তু স্মৃতা গোপাষ্টমী বুধৈঃ। তদ্দিনে বাসু-দেবোঽভূদ্গোপঃ পূর্ব্বন্তু বৎসপঃ ॥ তত্র কুর্য্যাদ্গবাং পূজাং গোগ্রাসং গোঃ প্রদ-ক্ষিণং। গবানুগমনং কুর্য্যাৎ সর্ব্বান্ কামানভীপ্সতা ॥ ইতি শ্রীহরিভক্তি-বিলাসে ১৬ বিলাসঃ ॥ ভীমপরাক্রমে কার্ত্তিকশুক্লপক্ষমধিকৃত্য। গোষ্ঠাষ্টম্যাং গবাং পূজাং গোগ্রাসং গোঃ প্রদক্ষিণং। গবানুগমনং কুর্য্যাৎ সর্ব্বপাপবিমুক্তয়ে ॥ ইতি তিথ্যাদিতত্ত্বং ॥

গোষ্ঠী ( স্ত্রী ) সভা। তস্যা লক্ষণবিশেষঃ। একাঙ্কা কথিতা গোষ্ঠী কৈশিকীবৃত্তি-সংযুতা। সম্ভোগরসষট্পঞ্চসপ্ত বা যোষিদন্বিতা ॥ প্রাকৃতৈর্নবভিঃ পুংভি-র্দশভির্ব্বাপ্যলঙ্কৃতা। গর্ব্বাবমর্ষসন্ধিভ্যাং

হীনা প্রাকৃতসম্মতা ॥ বাদ্যাদ্যৈরন্বিতা নৈব কর্ত্তব্যেয়ং বিচক্ষণৈঃ। ইতি সঙ্গীত-দামোদরঃ ॥ সংলাপঃ। ইতি মেদিনী ॥ পোষ্যবর্গঃ। যথা। বিষং গোষ্ঠী দরিদ্রস্য বৃদ্ধস্য তরুণী বিষং। ইতি চাণক্যং ॥

গোষ্ঠীপতিঃ (পুং) পোষ্যবর্গপালকঃ। সভাপতিঃ। অথ ব্রাহ্মণগোষ্ঠীপতিলক্ষণং যথা। নানাশাস্ত্রবিশারদৈ রসিকত্র সৎকাব্যসম্মোদিতা নির্দ্দোষৈঃ কুলভূষণৈঃ পরিমিতা পূর্ণা কুলজ্ঞৈরপি। শ্রীমদ্ভাগবতাদিকারণকথা শুশ্রূষয়ানন্দিতা গত্বাভীষ্টমুপৈতি যদ্গুণিজনো গোষ্ঠী হি সা চোচ্যতে ॥ এবম্ভূতা গোষ্ঠী তস্যাঃ পতিঃ। অপি চ। কুলীনাঃ শ্রোত্রিয়াঃ সর্ব্বে যস্যান্নং ভুঞ্জতে মুহুঃ। কুলীনায় সুতাং দত্ত্বা স গোষ্ঠীপতিরুচ্যতে ॥ তদ্যথা। গাঙ্গবংশে লক্ষ্মীকান্তমজমুয়াদারঃ ১ মুখবংশে মদনভট্টাচার্য্যঃ ২ তদ্বংশে গন্ধর্ব্বরায়ঃ ৩ বন্দ্যবংশে শুভরাজখানবংশঃ ৪ চট্টবংশে অনন্তভট্টাচার্য্যঃ ৫ এতে প্রাচীনাঃ আধুনিকা বহবঃ সন্তি ॥ * ॥ কায়স্থগোষ্ঠীপতিলক্ষণং যথা। নীতিজ্ঞঃ কুলকর্ম্মঠঃ স্থিতিমতাং মান্যোঽপি ধর্ম্মান্বিতঃ কার্য্যাকার্য্যবিলোকনৈঃ কুলভৃতাং সম্মানদানোদ্যতঃ। পোষ্টা যঃ কুলসম্বিদাং কুলসুধীঃ সন্মৌলিকানাং তথা সদ্বংশপ্রভবঃ ক্ষিতৌ সুবিদিতো দাতা স গোষ্ঠীপতিঃ ॥ অথ কায়স্থগোষ্ঠীপতিগণনা। আদৌ দ্বাদশপর্য্যয়ে সমভবদ্দানেন গোষ্ঠীপতিঃ সৎকীর্ত্তিশ্চ সুবুদ্ধিখানতনয়ঃ শ্রীমন্তরায়ঃ কৃতী। ১। সংজাতস্তদনন্তরং গুণধরাগণ্যো চ পর্য্যায়কে স্বেচ্ছাতো হি পুরন্দরঃ কুলভবঃ খানঃ সদা দানতঃ ॥ ২ ॥ পর্য্যায়ে চ চতুর্দ্দশে সমভবৎ পৌরন্দরঃ কেশবঃ খানঃ সন্ততদানতো হি বিলসৎকীর্ত্তির্ধরামণ্ডলে। ৩। নানাবিত্তবিসর্জনেন জনিতপ্রোৎফুল্লকীর্ত্তিঃ ক্ষিতাবাসীৎ পঞ্চদশে তদাত্মজকৃতী শ্রীকৃষ্ণবিশ্বাসখাস্ ॥ ৪ ॥ ততঃ ষোড়শে পর্য্যয়ে দানজালঃ কুলীনালিমালো দয়ারামপালঃ। ৫। ততস্তৎসুতঃ পর্য্যয়ে সূর্য্যবাজিক্ষপানাথগণ্যেঽভবৎ পুণ্যরাজিঃ ॥ ৬ ॥ ততঃ পর্য্যয়েঽষ্টাদশে তত্তনূজঃ সমাহূয় ভূয়োঽর্চ্চিতার্য্যব্রজো যঃ। সদা সৎকথালাপসংলাপতোষঃ কুলীনৌঘপূজাপরোঽয়ং সুভাষঃ ॥ ৭ ॥ আসীৎ কিঙ্করসেননামসুকৃতী যো মৌলিকৈকাগ্রণীঃ পর্য্যায়ে পরিপূজিতার্য্যনিচয়ে চৈকোনবিংশে হি সঃ। সদ্গোষ্ঠীপতিপালবংশতনয়াপাণিগ্রহেণাত্মনো দানেনাপি চ মেলিকাটিরপরো গোষ্ঠীপতিঃ প্রাথমঃ ॥ ৮ ॥ দানেনাতিবদান্যতাদিগুণতো নিঃসীমপুণ্যৈশ্চ যো গোপীসিংহচতুর্ধুরীণসুকৃতী বিংশে হি পর্য্যায়কে। যস্মাৎ কিঙ্করসেনবংশতনয়াপাণিগ্রহাত্রাগতঃ সোঽপ্যাসীৎ ভুবি মেলিকাটিরপরো গোষ্ঠীপতিঃ সত্তিঃ ॥ ৯ ॥ পর্য্যায়ে পুনরেকবিংশক ইহ খ্যাতঃ ক্ষমামণ্ডলে গোপীসিংহচতুর্ধুরীণকুলজো যো রামকান্তঃ কৃতী।

ধন্যো গণ্যস্বপুণ্যজন্যযশসা গোষ্ঠীপতেরগ্রণীর্দানৈঃ কর্ণ ইবাতিধৈর্য্যপয়সাং রত্নাকরশ্চাপরঃ ॥ ১০ ॥ দ্বাবিংশে কিল পর্য্যয়েঽতিনিয়তেস্তস্যাত্মজাসংগ্রহাৎ স্বস্যৈবাস্যস্বপুণ্যদত্তকতনূদ্ভূতস্য চ শ্রীমতঃ। গোপীমোহনসংজ্ঞকস্য তনয়দ্বারা চ গোষ্ঠীপতিঃ সম্ভূতো নবকৃষ্ণভূপতিবরঃ সম্মেলিকার্টিঃ ক্ষিতৌ ॥ ১১ ॥ তাবন্মুখ্যকনিষ্ঠমধ্যমকুলোদ্ভূতাং স্তৃতীয়োদ্ভবান্ ষড়্‌ভ্রাতৃনপি তাবতোঽত্র গণনা বদ্ধক্রমানাদরাৎ। সদ্গোষ্ঠীপতিকারকানতিনতাধীনান্ কুলীনান্ সমাহূয়াত্র প্রকৃতাংস্তথাত্র সহজান্ পূজ্যাংস্তথা কোমলান্ ॥ বিত্তৈর্বাগমৃতৈর্স্তুতিপ্রণতিভিশ্চান্যৈস্ত্রয়োবিংশকে পর্য্যায়েঽতিতরাং প্রপূজ্য পরমাহ্লাদান্বিতঃ শ্রীযুতঃ। গোপীমোহনদেববংশতিলকো গোষ্ঠীপতিঃ ক্ষ্মাপতির্জাতঃ সংপ্রতি ভূমিদেবঘটকানাঞ্চকনাদচ্যুতিঃ ॥ ১২ ॥ ইতি দক্ষিণরাঢ়ীয়কায়স্থকুলাচার্য্যকারিকা ॥*॥ অথ বৈদ্যানাং গোষ্ঠীপতির্যথা। বিপ্রেভ্যঃ প্রিয়ভোজ্যবস্তুবসনং ছত্রাসনং ভূষণং গ্রামা ভূমিতুরঙ্গমা গজগণাঃ স্বর্ণানি রত্নানি চ। গাবো নাব উদারমন্দিররুচো বাট্যশ্চ দত্তাঃ সদা সাধুজ্ঞাতিকুটুম্বসদ্‌গুণগণাঃ সংপ্রীণিতা যেন চ ॥ গৌড়ক্ষ্মাপতিনা য এব ভিষজাং শ্রৈষ্ঠ্যেঽভিষিক্তঃ কৃতী নানাশাস্ত্রবিশারদঃ শুভমতির্বাগ্মী চিকিৎসাপটুঃ। তস্মাৎ প্রাপ গজং তুরঙ্গকনকচ্ছত্রঞ্চ রত্নং ধনং সোঽভূৎ সেনবিনায়কো বহুগুণৈরস্বষ্ঠগোষ্ঠীপতিঃ ॥ বৈনায়কেষু সর্ব্বেষু ভাস্করঃ শ্রেষ্ঠ ঈরিতঃ। গোষ্ঠীপতিতয়া খ্যাতঃ স বৈদ্যৈঃ পূজিতোঽগ্রতঃ ॥ ইতি ভরতমল্লিককৃতকুলপঞ্জিকা ॥

গোষ্পদং (ক্লী) গোসেবিতস্থানং। গোখুরপ্রমাণং। ইত্যমরঃ ॥ তথা চ। গোষ্পদং গোপদশ্বভ্রে গবাঞ্চ গতিগোচরে। ইতি বিশ্বো মেদিনী চ ॥

গোসঃ (পুং) বোলঃ। উষঃকালঃ। ইতি মেদিনী ॥

গোসংখ্যঃ (পুং) গোপঃ। ইত্যমরঃ ॥

গোসঙ্গঃ (পুং) প্রত্যূষঃ। ইতি ভূরিপ্রয়োগঃ ॥

গোসদৃক্ষঃ (পুং) গবয়ঃ। ইতি হেমচন্দ্রঃ ॥

গোসন্দায়ঃ (পুং) গোদানকর্ত্তা। ইতি ব্যাকরণং ॥

গোসম্ভবা (স্ত্রী) শ্বেতদূর্ব্বা। ইতি রাজনির্ঘণ্টঃ ॥ গোজাতে ত্রি ॥

গোসর্গঃ (পুং) প্রভাতং। ইতি হারাবলী ॥

গোসবঃ (পুং) গোমেধযজ্ঞঃ। ইতি জটাধরঃ ॥

গোসশশঃ (পুং) বোলঃ। ইত্যমরটীকায়াং রায়মুকুটঃ ॥

গোসহস্রী (স্ত্রী) মঙ্গলবারযুক্তামাবাস্যা। তত্র গঙ্গাস্নানে সহস্রগোদানফলং। যথা ব্যাসঃ। অমাবাস্যাং ভবেদ্বারো যদি ভূমিসুতস্য চ। গোসহস্রফলং দদ্যাৎ স্নানমাত্রেণ জাহ্নবী ॥ ইতি তিথ্যাদিতত্ত্বং ॥ * ॥ সোমবারযুক্তামাবাস্যা। তত্র অরুণোদয়কালমারভ্য স্নানকালপর্য্যন্তং মৌনীভূত্বা স্নানাৎ গোসহস্রদান-

ফলং। যথা ব্যাসঃ। সিনীবালী কুহূর্ব্বাপি যদি সোমদিনে ভবেৎ। গোসহস্রফলং দদ্যাৎ স্নানং যন্মৌনিনা কৃতং॥ ইতি চ তিথ্যাদিতত্ত্বং॥

গোস্তনঃ (পুং) হারভেদঃ। ইত্যমরঃ॥ স তু চতুর্যষ্টিকঃ। চতুস্ত্রিংশদ্যষ্টিক ইতি কেচিৎ। ইতি ভরতঃ॥ গবাং কুচশ্চ॥

গোস্তনা (স্ত্রী) গোস্তনী। ইত্যমরটীকা॥

গোস্তনী (স্ত্রী) দ্রাক্ষা। ইত্যমরঃ॥ কপিলদ্রাক্ষা। ইতি রাজনির্ঘণ্টঃ॥

গোস্থানং (ক্লী) গোষ্ঠং। ইতি শব্দরত্নাবলী॥

গোস্থানকং (ক্লী) গোষ্ঠং। ইত্যমরঃ॥

গোস্বামী [ন্] (ত্রি) গোপতিঃ। ইতি হলায়ুধঃ॥ স্বর্গস্য ভুবো বা প্রভুঃ। যথা। শ্রীসনাতনগোস্বামী প্রিয়া শ্রীরতিমঞ্জরী। ইত্যনন্তসংহিতা॥

গোহত্যা (স্ত্রী) গোবধঃ। তৎপ্রায়শ্চিত্তাদি প্রায়শ্চিত্তশব্দে দ্রষ্টব্যং॥ * ॥ পারিভাবিকগোহত্যা যথা। সাবিত্র্যুবাচ। বিপ্রহত্যাঞ্চ গোহত্যাং কিংবিধামাতিদেশিকীং। কা বা নৃণামগম্যা বা কো বা সন্ধ্যাবিহীনকঃ॥ এতেষাং লক্ষণং সর্ব্বং বদ বেদবিদাংবর। যম উবাচ। গামাহারং প্রকুর্ব্বন্তং পিবন্তং যো নিবারয়েৎ। যাতি গোবিপ্রয়োর্ম্মধ্যে গোহত্যাঞ্চ লভেত্তু সঃ॥ দণ্ডৈর্গাস্তাড়য়ন্ মূঢ়ো যো বিপ্রো বৃষবাহকঃ। দিনে দিনে গবাং হত্যাং লভতে নাত্র সংশয়ঃ॥ দদাতি গোভ্য উচ্ছিষ্টং ভোজয়েদ্বৃষবাহকং। ভোজয়েদ্বৃষবাহান্নং স গোহত্যাং লভেৎ ধ্রুবং॥ বৃষলীপতিং যাজয়েৎ যো ভুঙ্‌ক্তেঽন্নং তস্য যো নরঃ। গোহত্যাশতকং সোঽপি লভতে নাত্র সংশয়ঃ॥ পাদং দদাতি বহ্নৌ যো গাঞ্চ পাদেন তাড়য়েৎ। গৃহং বিশেদধৌতাঙ্ঘ্রিঃ স্নাত্বা গোবধমালভেৎ॥ যো ভুঙ্‌ক্তেঽস্নিগ্ধপাদেন শেতে স্নিগ্ধাঙ্ঘ্রিরেব চ। সূর্য্যোদয়ে চ দ্বির্ভোজী স গোহত্যাং লভেৎ ধ্রুবং॥ অবীরান্নঞ্চ যো ভুঙ্‌ক্তে যোনিজীবী চ ব্রাহ্মণঃ। যস্ত্রিসন্ধ্যাবিহীনশ্চ স গোহত্যাং লভেৎ ধ্রুবং॥ পিতৄংশ্চ পর্ব্বকালে চ তিথিকালে চ দেবতাঃ। ন সেবতেঽতিথিং যো হি স গোহত্যাং লভেৎ ধ্রুবং॥ স্বভর্ত্তরি চ কৃষ্ণে বা ভেদবুদ্ধিং করোতি যা। কটূক্ত্যা তাড়য়েৎ কান্তং সা গোহত্যাং লভেৎ ধ্রুবং॥ গোমার্গং খননং কৃত্বা দদাতি শস্যমেব চ। তড়াগে চ তদূর্দ্ধে বা স গোহত্যাং লভেৎ ধ্রুবং॥ প্রায়শ্চিত্তং গোবধস্য যঃ করোতি ব্যতিক্রমং। অর্থলোভাদথাজ্ঞানাৎ স গোহত্যাং লভেৎ ধ্রুবং॥ রাজকে দৈবকে যত্নাৎ গোস্বামী গাং ন পালয়েৎ। দুঃখং দদাতি যো মূঢ়ো গোহত্যাং লভতে ধ্রুবং॥ প্রাণিনং লঙ্ঘয়েদ্যো হি দেবার্চ্চানলং জলং। নৈবেদ্যং পুষ্পমন্নঞ্চ স গোহত্যাং লভেৎ ধ্রুবং॥ শশ্বন্নাস্তীতি যো বাদী মিথ্যাবাদী প্রতারকঃ। দেবদ্বেষী গুরুদ্বেষী স গোহত্যাং লভেৎ ধ্রুবং॥ দেবতাপ্রতিমাং

দৃষ্ট্বা গুরুং বা ব্রাহ্মণং সতি। ন সম্ভ্রমাস্নমেৎ যো হি স গোহত্যাং লভেৎ ধ্রুবং ॥ ন দদাত্যাশিষং কোপাৎ প্রণতায় চ যো দ্বিজঃ। বিদ্যার্থিনে চ বিদ্যাঞ্চ স গোহত্যাং লভেৎ ধ্রুবং ॥ ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ২৭ অধ্যায়ঃ ॥

গোহন্নং (ক্লী) গোময়ং। ইতি রত্নমালা ॥

গোহরীতকী (স্ত্রী) বিল্ববৃক্ষঃ। ইতি শব্দরত্নাবলী ॥

গোহালিয়া (স্ত্রী) লতাবিশেষঃ। গোয়ালিয়া ইতি ভাষা। যথা। পীতং গোহালিয়ামূলং তিলদধ্যাজ্যসংযুতং। নিবদ্ধমূত্রং কথিতং প্রবর্ত্তয়তি শঙ্কর ॥ ইতি গারুড়ে ১৯০ অধ্যায়ঃ ॥

গোহিতঃ (পুং) ঘোষলতা। বিল্বঃ। ইতি শব্দচন্দ্রিকা ॥ গবাং হিতকারকে ত্রি ॥

গোহিরং (ক্লী) পাদমূলং। ইতি হেমচন্দ্রঃ ॥

গোহ্যং (ত্রি) গুহ্যং। গোপনীয়ং। ইতি পাণিনিব্যাকরণং ॥

গোক্ষুরঃ (পুং) ক্ষুদ্রক্ষুপবিশেষঃ। স তু ক্ষুদ্রবৃহদ্ভেদেন দ্বিবিধঃ। গোখুরি ইতি গোখুরু ইতি চ ভাষা। তৎপর্য্যায়ঃ। ত্রিকণ্টঃ ২ স্থলশৃঙ্গাটঃ ৩ গোকণ্টঃ ৪ ত্রিকণ্টকঃ ৫ ত্রিপুটঃ ৬ কণ্টকফলঃ ৭ ক্ষুরঃ ৮। ইতি রত্নমালা ॥ গোক্ষুরকঃ ৯ পলঙ্কষা ১০ ইক্ষুগন্ধা ১১ শ্বদংষ্ট্রা ১২ স্বাদুকণ্টকঃ ১৩ গোকণ্টকঃ ১৪ বনশৃঙ্গাটঃ ১৫। ইত্যমরঃ ॥ ক্ষুরকঃ ১৬ ভক্ষ্যকণ্টঃ ১৭ ইক্ষুগন্ধিকা ১৮। ইতি ভাবপ্রকাশঃ ॥ ক্ষুরাঙ্গঃ ১৯ শ্বদংষ্ট্রকঃ ২০ কণ্টকী ২১ ভদ্রকণ্টঃ ২২ ব্যালদংষ্ট্রঃ ২৩ ষড়ঙ্গঃ ২৪ গোখুরঃ ২৫ ত্রিকটঃ ২৬ ত্রিকঃ ২৭ ইক্ষুরঃ ২৮। ইতি শব্দরত্নাবলী ॥ অস্য গুণাঃ। সুশীতলত্বং। বলপ্রদত্বং। মধুরত্বং। বৃংহণত্বং। কৃচ্ছ্রাশ্মরীমেহবিদাহনাশিত্বং। রসায়নত্বং। তত্র বৃহতো গুণোত্তরত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ স্বাদুত্বং। বস্তিশোধনত্বং। দীপনত্বং। পুষ্টিদত্বং। শ্বাসকাসার্শোব্রণনাশিত্বঞ্চ। ইতি ভাবপ্রকাশঃ ॥ বায়ুনাশিত্বং। বৃষ্যত্বঞ্চ। তচ্ছাকগুণাঃ। তিক্তত্বং। বৃষ্যত্বং। স্রোতোবিশোধনত্বঞ্চ। ইতি রাজবল্লভঃ ॥

গোক্ষুরকঃ (পুং) গোক্ষুরঃ। ইত্যমরঃ ॥

গৌঃ [গো] (পুং স্ত্রী) স্বনামখ্যাতপশুঃ। গরু ইতি ভাষা। পুংগোঃ পর্য্যায়ঃ অনড্বান্ ইতিপদে দ্রষ্টব্যঃ ॥ স্ত্রীগোঃ পর্য্যায়ঃ। মাহেয়ী ২ সৌরভেয়ী ৩ উস্রা ৪ মাতা ৫ শৃঙ্গিণী ৬ অর্জ্জুনী ৭ অঘ্ন্যা ৮ রোহিণী ৯। ইত্যমরঃ ॥ মাহেন্দ্রী ১০ ইজ্যা ১১ ধেনুঃ ১২ অঘ্না ১৩ দোগ্ধ্রী ১৪ ভদ্রা ১৫ ভূরিমহী ১৬ অনড়ুহী ১৭ কল্যাণী ১৮ পাবনী ১৯ গৌরী ২০ সুরভিঃ ২১ মহা ২২ নিলিনাচিঃ ২৩ সুরভী ২৪ অনড্বাহী ২৫ থিড়া ২৬ অধমা ২৭। ইতি শব্দরত্নাবলী ॥ বহুলা ২৮ মহী ২৯ সরস্বতী ৩০। ইতি জটাধরঃ ॥ উস্রিয়া ৩১ অহী ৩২ অদিতিঃ ৩৩ ইলা ৩৪ জগতী ৩৫ শর্করী ৩৬। ইতি বেদনিঘণ্টৌ ২ অধ্যায়ঃ ॥ * ॥ গোর্মঙ্গলত্বাদি যথা।

দেবলঃ। লোকেঽস্মিন্ মঙ্গলান্যষ্টৌ ব্রাহ্মণো গৌর্হুতাশনঃ। হিরণ্যং সর্পিরাদিত্য আপো রাজা তথাষ্টমঃ॥ এতানি সততং পশ্যেন্নমস্যেদর্চ্চয়েচ্চ যঃ। প্রদক্ষিণঞ্চ কুর্ব্বীত তথা চায়ুর্ন হীয়তে॥ অভিপ্রেতার্থসিদ্ধির্ম্মঙ্গলং তদ্ধেতুতয়া ব্রাহ্মণাদ্যপি ॥ * ॥ গোপ্রণামে ব্রহ্মপুরাণং। সদা গাবঃ প্রণম্যাস্ত মন্ত্রেণানেন পার্থিব। নমো গোভ্যঃ শ্রীমতীভ্যঃ সৌরভেয়ীভ্য এব চ॥ নমো ব্রহ্মসুতাভ্যশ্চ পবিত্রাভ্যো নমো নমঃ। মন্ত্রস্য স্মরণাদেব গোদানফলমাপ্নুয়াৎ॥ ভবিষ্যে। গামালভ্য নমস্কৃত্য কৃত্বা চৈব প্রদক্ষিণং। প্রদক্ষিণীকৃতা তেন সপ্তদ্বীপা বসুন্ধরা॥ গবামস্থি ন লঙ্ঘেত মৃতে গন্ধং ন বর্জ্জয়েৎ। যাবদাঘ্রাতি তদ্গন্ধং তাবদ্গন্ধেন যুজ্যতে॥ বিষ্ণুঃ। গোমূত্রং গোময়ং ক্ষীরং সর্পির্দধি চ রোচনা। ষড়ঙ্গমেতন্মঙ্গল্যং পবিত্রং সর্ব্বদা গবাং॥ ষড়ঙ্গং ষট্প্রকারং। ইতি শুদ্ধিতত্ত্বং॥ তন্মাংসগুণাঃ। সুস্নিগ্ধত্বং। পিত্তশ্লেষ্মবিবর্দ্ধনত্বং। বৃংহণত্বং। বলকারিত্বং। পীনসপ্রদরনাশিত্বঞ্চ। ইতি ভাবপ্রকাশঃ॥ অপূতত্বং। গুরুত্বং। বাতকফাপহত্বঞ্চ॥ * ॥ তদ্দুগ্ধগুণাঃ। পথ্যত্বং। অত্যন্তরুচ্যত্বং। স্বাদুত্বং। স্নিগ্ধত্বং। পিত্তবাতাময়নাশিত্বং। মেধ্যত্বং। কান্তিপ্রজ্ঞাঙ্গপুষ্টিবীর্য্যবৃদ্ধিকারিত্বঞ্চ॥ * ॥ তদ্দধিগুণাঃ। অতিপবিত্রত্বং। শীতত্বং। স্নিগ্ধত্বং। দীপনত্বং। বলকারিত্বং। মধুরত্বং। অরোচকবাতাময়নাশিত্বং। গ্রাহিত্বঞ্চ॥ * ॥ তন্নবনীতগুণাঃ। শীতত্বং। বর্ণবলশুক্রকফরুচিসুখকান্তিপুষ্টিকারিত্বং। সুমধুরত্বং। সংগ্রাহকত্বং। চক্ষুর্হিতত্বং। বাতসর্ব্বাঙ্গশূলকাসশ্রমসর্ব্বদোষনাশিত্বঞ্চ॥ * ॥ তদ্ঘৃতগুণাঃ। হৃদ্যত্বং। ধীকান্তিস্মৃতিবলমেধাপুষ্ট্যগ্নিবৃদ্ধিশুক্রবপুঃস্থৌল্যকারিত্বং। বাতশ্লেষ্মশ্রমপিত্তনাশিত্বং। বিপাকে মধুরত্বং। হব্যতমত্বং। বহুগুণত্বঞ্চ॥ * ॥ গবাং প্রত্যুষসি ক্ষীরং গুরুবিষ্টম্ভিদুর্জরং। তস্মাদভ্যুদিতে সূর্য্যে যামং যামার্দ্ধমেব বা॥ সমুত্তার্য্য পয়ো গ্রাহ্যং তৎ পথ্যং দীপনং লঘু। বিবৎসাবালবৎসানাং পয়ো দোষলমীরিতং॥ শস্তং বৎসৈকবর্ণায়া ধবলীকৃষ্ণয়োরপি। ইক্ষ্বাদা মাসপর্ণাদা ঊর্দ্ধশৃঙ্গী চ যা ভবেৎ॥ তাসাং গবাং হিতং ক্ষীরং শৃতং বাশৃতমেব বা। গবাং সিতানাং বাতঘ্নং কৃষ্ণানাং পিত্তনাশনং। শ্লেষ্মঘ্নং রক্তবর্ণানাং ত্রীন্ হন্তি কপিলাপয়ঃ॥ ইতি রাজনির্ঘণ্টঃ॥

গৌঃ [গো] (পুং) স্বর্গঃ। রশ্মিঃ। বজ্রঃ। ইতি মেদিনী॥ চন্দ্রঃ। ইতি বিশ্বঃ॥ সূর্য্যঃ। গোমেধযজ্ঞঃ। ইত্যমরটীকায়াং ভানুদীক্ষিতঃ॥ ঋষভনামৌষধং। ইতি রাজনির্ঘণ্টঃ॥

গৌঃ [গো] (স্ত্রী) চক্ষুঃ। বাণঃ। দিক্। বাক্। ভূঃ। জলে বহুবচনান্তোঽয়ং। ইতি মেদিনী॥ জলে একবচনান্তোঽপি ইতি কেচিৎ। ইতি ভরতঃ॥ মাতা। ইত্যেকাক্ষরকোষঃ॥

গোঃ [ গো ] ( পুং ক্লী ) লোম। জলং। ইত্যমরটীকায়াং ভানুদীক্ষিতঃ ॥

গৌল্মিকঃ ( পুং ) স্বর্ণকারঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

গৌড়ঃ ( পুং ) স্বনামখ্যাতদেশঃ। তদ্দেশস্থে পুং ভূম্নি। ইতি জটাধরঃ ॥ তদ্দেশসীমা যথা। বঙ্গদেশং সমারভ্য ভুবনেশান্তগং শিবে। গৌড়দেশঃ সমাখ্যাতঃ সর্ব্ববিদ্যাবিশারদঃ ॥ ইতি শক্তিসঙ্গমতন্ত্রে সপ্তমপটলঃ ॥ পঞ্চ গৌড়া যথা। সারস্বতাঃ কান্যকুব্জা গৌড়মৈথিলিকোৎকলাঃ ॥ পঞ্চ গৌড়া ইতি খ্যাতা বিন্ধ্যস্যোত্তরবাসিনঃ ॥ ইতি স্কন্দপুরাণং ॥

গৌড়বাস্তূকঃ ( পুং ) চিল্লীশাকং। ইতি রাজনির্ঘণ্টঃ ॥

গৌড়িকং ( ক্লী ) মদ্যবিশেষঃ। যথা। পৈষ্টিকগৌড়িকমাধ্বীকানাং পানং সুরাপানে কষ্টতমং। ইতি প্রায়শ্চিত্তবিবেকে দেবলঃ ॥ গুড়নিষ্পন্নদ্রব্যে ত্রি। গুড়স্যেদং ইত্যর্থে ঞিকপ্রত্যয়ঃ ॥

গৌড়ী ( স্ত্রী ) গুড়াদিকৃতা সুরা। গুড়ের মদ ইতি ভাষা। তৎপর্য্যায়ঃ। বাল্কলী ২। ইতি ত্রিকাণ্ডশেষঃ ॥ অস্যা গুণাঃ। তীক্ষ্ণত্বং। উষ্ণত্বং। মধুরত্বং। বাতনাশিত্বং। পিত্তবলকান্তিতৃপ্তিকারিত্বং। দীপনত্বং। পথ্যত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ রাগিণীবিশেষঃ। সা তু মেঘরাগস্য পত্নী। ইতি সঙ্গীতদামোদরঃ ॥ কাব্যরীতিবিশেষঃ। যথা। ওজঃপ্রসাদমাধুর্য্যং গুণত্রিতয়ভেদতঃ। গৌড়বৈদর্ভপাঞ্চালরীতয়ঃ পরিকীর্ত্তিতাঃ ॥ ইতি কাব্যচন্দ্রিকা ॥

গৌণঃ ( পুং ) গৌণীবৃত্তিবোধিতঃ। যথা। শক্যস্য সাদৃশ্যাত্মকঃ সম্বন্ধো গুণঃ তদধীনা যা লক্ষণা সা গৌণী তদ্যোগাৎ গৌণঃ। ইতি দায়ভাগটীকায়াং শ্রীকৃষ্ণতর্কালঙ্কারঃ ॥

গৌণকালঃ ( পুং ) মুখ্যকালকর্ত্তব্যকর্ম্মকরণযোগ্যকালান্তরঃ। যথা। যদ্বাগামিক্রিয়ামুখ্যকালস্যাপ্যন্তরালবৎ। গৌণকালত্বমিচ্ছন্তি কেচিৎ প্রাক্তনকর্ম্মণি ॥ যদ্বেতি পক্ষান্তরং প্রাক্তনকার্য্যে মধ্যকালবৎ আগামিক্রিয়ায়া মুখ্যকালস্যাপি গৌণকালত্বং। তেন সায়ং সন্ধ্যায়া রাত্রিঃ প্রাতঃ সন্ধ্যাকালশ্চ গৌণকাল ইত্যর্থঃ। ইতি মলমাসতত্ত্বং ॥

গৌণচান্দ্রঃ ( পুং ) কৃষ্ণপ্রতিপদাদিপৌর্ণমাস্যন্তমাসঃ। যথা। গৌণচান্দ্রেণ ভাদ্রতা মুখ্যচান্দ্রেণ শ্রাবণতা। ইতি জন্মাষ্টমীপ্রকরণে তিথ্যাদিতত্ত্বং ॥ অপি চ। চান্দ্রোঽপি দ্বিবিধঃ প্রোক্তো মুখ্যগৌণবিভেদতঃ। গৌণঃ কৃষ্ণপ্রতিপদাদিপৌর্ণমাস্যন্ত ঈরিতঃ ॥ ইতি শব্দরত্নাবলী ॥

গৌণী ( স্ত্রী ) অশীতিপ্রকারলক্ষণান্তর্গতলক্ষণাবিশেষঃ। যথা। সাদৃশ্যেতরসম্বন্ধাঃ শুদ্ধাস্তাঃ সকলা অপি। সাদৃশ্যাত্তু মতা গৌণ্যস্তেন ষোড়শ ভেদিতাঃ ॥ ইতি সাহিত্যদর্পণে ২ পরিচ্ছেদঃ ॥ অন্যৎ সর্ব্বং লক্ষণাশব্দে দ্রষ্টব্যং ॥

গৌতমঃ (পুং) মুনিবিশেষঃ। স তু শতানন্দঃ।

ইতি হেমচন্দ্রঃ ॥ শাক্যবংশাবতীর্ণ-বুদ্ধমুনিবিশেষঃ। তৎপর্য্যায়ঃ। শাক্য-মুনিঃ ২ শাক্যসিংহঃ ৩ সর্ব্বার্থসিদ্ধঃ ৪ শৌদ্ধোদনিঃ ৫ অর্কবন্ধুঃ ৬ মায়াদেবী-সুতঃ ৭। ইত্যমরঃ ॥ খজিৎ ৮ শ্বেত-কেতুঃ ৯ ধর্ম্মকেতুঃ ১০ মহামুনিঃ ১১ পঞ্চজ্ঞানঃ ১২ সর্ব্বদর্শী ১৩ মহাবোধিঃ ১৪ মহাবলঃ ১৫ বহুক্ষমঃ ১৬ ত্রিমূর্ত্তিঃ ১৭ সিদ্ধার্থঃ ১৮ শকঃ ১৯। ইতি শব্দরত্নাবলী ॥

গৌতমসম্ভবা (স্ত্রী) গোদাবরী নদী। ইতি রাজনির্ঘণ্টঃ ॥

গৌতমী (স্ত্রী) দুর্গা। ইতি মেদিনী॥ রাক্ষসী-বিশেষঃ। ইতি শব্দরত্নাবলী ॥ গোদাবরী নদী। গোরোচনা। ইতি রাজনির্ঘণ্টঃ ॥

গৌত্তমঃ (পুং) স্থাবরবিষভেদঃ। ইতি হেম-চন্দ্রঃ ॥

গৌধারঃ (পুং) গোধিকাত্মজঃ। গোধা ইতি খ্যাতঃ। ইত্যমরঃ ॥

গৌধেয়ঃ (পুং) গোধিকাত্মজঃ। ইত্যমরঃ ॥

গৌধেরঃ (পুং) গোধিকাত্মজঃ। ইত্যমরঃ ॥

গৌরং (ক্লী) পদ্মকেশরঃ। ইতি মেদিনী ॥ কুঙ্কুমং। স্বর্ণং। ইতি রাজনির্ঘণ্টঃ ॥

গৌরঃ (পুং) শ্বেতসর্ষপঃ। চন্দ্রঃ। ইতি মেদিনী ॥ ধববৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥ পীতবর্ণঃ। গোরো ইতি ভাষা। তদ্বর্ণ-করণৌষধং যথা। কুষ্মাণ্ডনালক্ষারস্তু সগো-মূত্রশ্চ তত্ত্বচঃ। জলপিষ্টা হরিদ্রা চ সিদ্ধা মন্দানলেন হি ॥ মাহিষেণ পুরীষেণ বেষ্টিতা বৃষভধ্বজ। অস্যা উদ্বর্ত্তনং কুর্য্যাদঙ্গগৌরত্বমীশ্বর ॥ ইতি গারুড়ে ১৯৪ অধ্যায়ঃ ॥ শ্বেতবর্ণঃ। অরুণবর্ণঃ। তদ্বতি ত্রি। ইত্যমরঃ ॥ শ্রীচৈতন্যদেবঃ। ইত্যনন্তসংহিতা ॥

গৌরঃ (ত্রি) বিশুদ্ধঃ। ইতি মেদিনী ॥

গৌরচন্দ্রঃ (পুং) শ্রীচৈতন্যদেবঃ। যথা। কৃষ্ণশ্চৈতন্যগৌরাঙ্গৌ গৌরচন্দ্রঃ শচী-সুতঃ। প্রভুর্গৌরো গৌরহরির্নামানি ভক্তি-দানি মে ॥ ইত্যনন্তসংহিতা ॥

গৌরজীরকঃ (পুং) শুক্লজীরকঃ। শাদা জীরা ইতি ভাষা। তৎপর্য্যায়ঃ। অজাজী ২ শ্বেতজীরকঃ ৩ কণাহ্বা ৪ কণজীরঃ ৫ কণা ৬ সিতদীপ্যঃ ৭ দীর্ঘকণা ৮ সিতা-জাজী ৯ গৌরাজাজী ১০। অস্য গুণাঃ। হিমত্বং। রুচিকারিত্বং। কটুত্বং। মধুর-ত্বং। দীপনত্বং। কৃমিবিষাধ্মাননাশিত্বং। চক্ষুর্হিতত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

গৌরত্বক্ (পুং) ইঙ্গুদীবৃক্ষঃ। ইতি রাজ-নির্ঘণ্টঃ ॥

গৌরবং (ক্লী) অভ্যুত্থানং। ইতি হেমচন্দ্রঃ॥ গুরোর্ভাবঃ। গুরুত্বং। ইতি মুগ্ধবোধং ॥

গৌরবিতঃ (ত্রি) অর্য্যঃ। তৎপর্য্যায়ঃ। আর্য্য-মিশ্রঃ ২। ইতি ত্রিকাণ্ডশেষঃ ॥

গৌরশাকঃ (পুং) মধুকবৃক্ষবিশেষঃ। ইতি জটাধরঃ ॥

গৌরসর্ষপঃ (পুং) শ্বেতসর্ষপঃ। তৎপর্য্যায়ঃ। অনদ্যঃ ২ সিদ্ধার্থঃ ৩ ভূতনাশনঃ ৪ কটু-স্নেহঃ ৫ গ্রহঘ্নঃ ৬ কণ্ডুঘ্নঃ ৭ রাজিকা-ফলঃ ৮ তীক্ষ্ণকঃ ৯ দুরাধর্ষঃ ১০ রক্ষোঘ্নঃ ১১ কুষ্ঠনাশনঃ ১২ সিদ্ধপ্রয়োজনঃ ১৩ সিদ্ধ-

সাধনঃ ১৪ সিতসর্ষপঃ ১৫। অস্য গুণাঃ। কটুত্বং। তিক্তত্বং। উষ্ণত্বং। বাতরক্তগ্রহ-ঘ্নদোষবিষভূতব্রণনাশিত্বং। রুচ্যত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ হৃদ্যত্বং। তীক্ষ্ণত্বং। কফরক্ষঃকণ্ডূকুষ্ঠকোঠকৃমিনাশিত্বং। রক্তপিত্তাগ্নিবর্দ্ধনত্বঞ্চ। ইতি ভাবপ্রকাশঃ॥

গৌরসুবর্ণং (ক্লী) পত্রশাকবিশেষঃ। তত্তু চিত্রকূটদেশে প্রসিদ্ধং। তৎপর্য্যায়ঃ। স্বর্ণং ২ সুগন্ধিকং ৩ ভূমিজং ৪ বারিজং ৫ হ্রস্বং ৬ গন্ধশাকং ৭ কটুশৃঙ্গালং ৮ চূর্ণশাকাঙ্কঃ ৯। অস্য গুণাঃ। শিশিরত্বং। কফপিত্তজ্বরদাহরুচিভ্রান্তিরক্তশ্রমনাশিত্বং। পথ্যত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

গৌরা (স্ত্রী) গৌরী। ইতি দ্বিরূপকোষঃ॥

গৌরাঙ্গঃ (পুং) শ্রীচৈতন্যদেবঃ। যথা। গৌরাঙ্গং গৌরদীপ্তাঙ্গং পঠেৎ স্তোত্রং কৃতাঞ্জলিঃ। নন্দগোপসুতঞ্চৈব নমস্যামি গদাগ্রজং॥ ইতি ব্রহ্মজামলে চৈতন্যকল্পে চৈতন্যস্তবঃ॥ অপি চ। গৌরাঙ্গো নাদগম্ভীরঃ স্বনামামৃতলালসঃ। ইতি কৃষ্ণজামলং॥

গৌরার্দ্রকঃ (পুং) স্থাবরবিষভেদঃ। ইতি হেমচন্দ্রঃ॥

গৌরাস্যঃ (পুং) কৃষ্ণবানরঃ। ইতি রাজনির্ঘণ্টঃ॥

গৌরিকা (স্ত্রী) অষ্টবর্ষীয়া কন্যা। ইতি শব্দরত্নাবলী॥

গৌরিলঃ (পুং) শ্বেতসর্ষপঃ। লৌহচূর্ণং। ইতি মেদিনী॥

গৌরী (স্ত্রী) পার্ব্বতী। অসংজাতরজঃকন্যা। হরিদ্রা। দারুহরিদ্রা। গোরোচনা। প্রিয়ঙ্গুবৃক্ষঃ। বসুধা। নদীবিশেষঃ। বরুণভার্য্যা। ইতি মেদিনী॥ সূর্য্যবংশীয়প্রসেনজিদ্রাজভার্য্যা। যথা। লেভে প্রসেনজিদ্ভার্য্যাং গৌরীং নাম পতিব্রতাং। অভিশস্তা তু সা ভর্ত্রা নদী বৈ বাহুদাভবৎ॥ ইতি হরিবংশঃ॥ বুদ্ধশক্তিবিশেষঃ। ইতি হেমচন্দ্রঃ॥ মঞ্জিষ্ঠা। শ্বেতদূর্ব্বা। মল্লিকা। তুলসী। সুবর্ণকদলী। আকাশমাংসী। ইতি রাজনির্ঘণ্টঃ॥ রাগিণীবিশেষঃ। সা তু মালবরাগপত্নী। তস্যা রূপং যথা। আরামমধ্যগতা কুমারিকা শারদেন্দুমুখলক্ষ্মীঃ। রাড়ী দাড়িমবীজং দধতী কীরাননে গৌরী॥ ইতি সঙ্গীতদামোদরঃ॥

গৌরীজং (ক্লী) অভ্রকং। ইতি রাজনির্ঘণ্টঃ॥

গৌরীপুত্রঃ (পুং) কার্ত্তিকেয়ঃ। ইতি হলায়ুধঃ॥

গৌরীপুষ্পঃ (পুং) প্রিয়ঙ্গুবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

গৌরীললিতং (ক্লী) হরিতালং। ইতি রাজনির্ঘণ্টঃ॥

গৌরুতল্পিকঃ (পুং) গুরুপত্নীগামী। ইতি প্রায়শ্চিত্তপ্রকরণে ধর্ম্মশাস্ত্রং॥

গৌলিকঃ (পুং) মুষ্ককবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

গৌল্যং (ক্লী) মধুরং। ইতি রাজনির্ঘণ্টঃ॥

গৌশতিকঃ (ত্রি) গোশতস্বামী। যাহার এক শত গরু আছে ইতি ভাষা। ইতি ব্যাকরণং॥

গৌষ্ঠীনং (ক্লী) ভূতপূর্ব্বকগোস্থানং। পূর্ব্বের গোঠ ইতি ভাষা। ইত্যমরঃ॥

গ্রথ ই ঙ কৌটিল্যে। ইতি কবিকল্পদ্রুমঃ॥ রেফযুক্তঃ। কৌটিল্যমিহ কুটিলীভাবঃ কুটিলীকরণঞ্চ। ই গ্রন্থ্যতে। ঙ গ্রন্থতে কাষ্ঠং কুটিলং স্যাদিত্যর্থঃ। গ্রন্থতে লতাং বায়ুঃ কুটিলাং করোতীত্যর্থঃ। ইতি দুর্গাদাসঃ॥

গ্রথিতং (ত্রি) কৃতগ্রন্থনং। গাঁথা ইতি ভাষা। তৎপর্য্যায়ঃ। গ্রন্থিতং ২ দৃব্ধং ৩। ইত্যমরঃ॥ গুম্ফিতং ৪। আক্রান্তং। হিংসিতং। ইতি মেদিনী॥

গ্রন্থ কি গ দর্ভে। ইতি কবিকল্পদ্রুমঃ॥ রেফযুক্তঃ। দর্ভো গ্রন্থনং। কি গ্রন্থয়তি গ্রন্থতি। গ গ্রথ্নাতি মালাং মালিকঃ। গ্রন্থিমুদগ্রথয়িতুং হৃদয়েশঃ। ইতি মাঘে চিন্ত্যং। ইতি দুর্গাদাসঃ॥

গ্রন্থঃ (পুং) গুম্ফঃ। গ্রন্থনা। ধনং। শাস্ত্রং। দ্বাত্রিংশদ্বর্ণনির্ম্মিতিঃ। অনুষ্টুপ্‌ছন্দঃশ্লোকং। ইতি হেমচন্দ্রঃ॥

গ্রন্থকর্ত্তা [ ঋ ] (ত্রি) গ্রন্থকারঃ। পুস্তককারকঃ। শাস্ত্রকৃৎ। গ্রন্থং করোতীত্যর্থে তৃন্‌প্রত্যয়ঃ॥

গ্রন্থকুটী (স্ত্রী) লেখ্যস্থানং। ইতি ত্রিকাণ্ডশেষঃ॥

গ্রন্থনং (ক্লী) গুম্ফনং। গ্রন্থনা। তৎপর্য্যায়ঃ। সন্দর্ভঃ ২ রসনাগুম্ফঃ ৩ শ্রন্থনং ৪। ইতি হেমচন্দ্রঃ॥

গ্রন্থনা (স্ত্রী) গ্রন্থনং। ইতি মুগ্ধবোধং॥

গ্রন্থিঃ (পুং) বংশাদিসন্ধিঃ। গাঁটি ইতি ভাষা। তৎপর্য্যায়ঃ। পর্ব্ব ২ পরুঃ ৩। ইত্যমরঃ॥ কাণ্ডসন্ধিঃ ৪। ভদ্রমুস্তা। হিতাবলী। পিণ্ডালুঃ। ইতি রাজনির্ঘণ্টঃ॥ কৌটিল্যং। গ্রন্থিপর্ণবৃক্ষঃ। বন্ধনং। রুগ্‌ভেদঃ। ইতি মেদিনী॥ তস্য নিদানসংপ্রাপ্তী যথা। বাতাদয়ো মাংসমসৃক্‌প্রদুষ্টাঃ সন্দূষ্য মেদাশ্চ তথা শিরাশ্চ। বৃত্তোন্নতং বিগ্রথিতন্তু শোথং কুর্ব্বন্ত্যতো গ্রন্থিরিতি প্রদিষ্টঃ॥ *॥ তস্য বাতিকরূপং যথা। আযম্যতে বৃশ্চতি তুদ্যতে চ প্রভ্রংশ্যতে মথ্যতি ভিদ্যতে চ। কৃষ্ণো মৃদুর্ব্বস্তিরিবাততশ্চ ভিন্নঃ স্রবেচ্চানিলজেঽস্রমচ্ছং॥ *॥ পৈত্তিকরূপং যথা। দংদহ্যতে ধূপ্যতি চূষ্যতে চ পাপচ্যতে প্রজ্বলতীব চাপি। রক্তঃ সপীতোঽপ্যথবাপি পিত্তাৎ ভিন্নঃ স্রবেদুষ্ণমতীব চাস্রং॥ *॥ শ্লৈষ্মিকরূপং যথা। শীতো বিবর্ণোঽল্পরুজোঽতিকণ্ডূঃ পাষাণবৎসংহননোপপন্নঃ। চিরাভিবৃদ্ধিশ্চ কফপ্রকোপাদ্ভিন্নঃ স্রবেচ্ছুক্লঘনঞ্চ পূযং॥ ইতি মাধবকরঃ॥ তস্য চিকিৎসা যথা। স্বর্জ্জিকামূলকক্ষারঃ শঙ্খচূর্ণসমন্বিতঃ। এতেন বিহিতো লেপো হন্তি গ্রন্থিং তথার্ব্বুদং॥ গ্রন্থির্ন যো নশ্যতি ভেষজেন নিষ্কাস্য তং শস্ত্রচিকিৎসকেন। জাত্যাদিপকেন ঘৃতেন বৈদ্যো ব্রণোন চান্যেন চ সংচিকিৎসেৎ॥ গ্রন্থীমুদ্ধৃত্য পশ্চাত্তু ব্রণোক্তং ক্রমমাচরেৎ। শিরাগ্রন্থিং বিহায়ান্যে শেষে শস্ত্রং প্রযুঞ্জতে॥ অন্যে আচার্য্যাঃ। ইতি ভাবপ্রকাশঃ॥

গ্রন্থিকং (ক্লী) পিপ্পলীমূলং। গ্রন্থিপর্ণং। গুগ্‌গুলুঃ। ইতি মেদিনী॥

গ্রন্থিকঃ ( পুং ) করীরঃ। দৈবজ্ঞঃ। সহদেবাখ্যপাণ্ডবঃ। ইতি মেদিনী ॥

গ্রন্থিতং ( ত্রি ) গ্রথিতং। ইত্যমরঃ ॥

গ্রন্থিদলা ( স্ত্রী ) মালাকন্দঃ। ইতি রাজনির্ঘণ্টঃ ॥

গ্রন্থিদূর্ব্বা ( স্ত্রী ) মালাদূর্ব্বা। ইতি রাজনির্ঘণ্টঃ ॥

গ্রন্থিপর্ণং ( ক্লী ) বৃক্ষবিশেষঃ। গাঁঠিয়ালা ইতি ভাষা। তৎপর্য্যায়ঃ। শুকং ২ বর্হিপুষ্পং ৩ স্থৌণেয়ং ৪ কুক্কুরং ৫। ইত্যমরঃ ॥ বর্হিঃপুষ্পং ৬ বর্হী ৭ পুষ্পং ৮ বর্হং ৯ শুকবর্হং ১০। ইতি তট্টীকা ॥ স্থৌণেয়কং ১১ কুশপুষ্পং ১২ শুণ্ঠকং ১৩। ইতি রত্নমালা ॥ বিশীর্ণাখ্যং ১৪ স্বারামগুচ্ছকং ১৫ বর্হিঃ ১৬ শুকপুচ্ছং ১৭ শুকচ্ছদং ১৮। ইতি গ্রন্থান্তরং ॥ গ্রন্থিকং ১৯ কাকপুষ্পং ২০ নীলপুষ্পং ২১ সুগন্ধং ২২ তৈলপর্ণকং ২৩। অস্য গুণাঃ। তিক্তত্বং। তীক্ষ্ণত্বং। কটুত্বং। উষ্ণত্বং। দীপনত্বং। লঘুত্বং। কফবাতবিষশ্বাসকণ্ডুদৌর্গন্ধ্যনাশিত্বঞ্চ। ইতি ভাবপ্রকাশঃ ॥ অস্য লেপনগুণঃ। রক্ততালক্ষ্মীরাক্ষসজ্বরনাশিত্বং। ইতি রাজবল্লভঃ ॥

গ্রন্থিপর্ণঃ ( পুং ) চোরকনামগন্ধদ্রব্যং। ইতি রাজনির্ঘণ্টঃ ॥

গ্রন্থিপর্ণা ( স্ত্রী ) জতুকালতা। ইতি রাজনির্ঘণ্টঃ ॥

গ্রন্থিপর্ণী (স্ত্রী) গণ্ডদূর্ব্বা। ইতি রাজনির্ঘণ্টঃ ॥

গ্রন্থিফলঃ (পুং) শাকুরুণ্ডবৃক্ষঃ। কপিত্থবৃক্ষঃ। মদনবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

গ্রন্থিমৎফলঃ ( পুং ) লকুচঃ। ইতি রাজনির্ঘণ্টঃ ॥

গ্রন্থিমান্ [ৎ] ( পুং ) অস্থিসংহারকবৃক্ষঃ। হাড়ভাঙ্গা ইতি হাড়জোড়া ইতি চ ভাষা। তৎপর্য্যায়ঃ। অস্থিসংহারী ২ বজ্রাঙ্গী ৩ অস্থিশৃঙ্খলা ৪। অস্য গুণাঃ। বাতশ্লেষ্মকৃমিদুর্নামনাশিত্বং। অস্থিযোক্তৃত্বং। উষ্ণত্বং। সারকত্বং। অম্লরোগপিত্তকারিত্বং। রূক্ষত্বং। স্বাদুত্বং। লঘুত্বং। বৃষ্যত্বং। পাচনত্বঞ্চ। ইতি ভাবপ্রকাশঃ ॥ রত্নমালোক্তপর্য্যায়া রাজবল্লভোক্তগুণাশ্চাস্থিসংহারশব্দে দ্রষ্টব্যাঃ ॥

গ্রন্থিমূলং ( ক্লী ) গৃঞ্জনং। ইতি রাজনির্ঘণ্টঃ ॥

গ্রন্থিমূলা ( স্ত্রী ) মালাদূর্ব্বা। ইতি রাজনির্ঘণ্টঃ ॥

গ্রন্থিলং ( ক্লী ) পিপ্পলীমূলং। ইতি রাজনির্ঘণ্টঃ ॥ আর্দ্রকং। ইতি শব্দচন্দ্রিকা ॥

গ্রন্থিলঃ ( পুং ) বিকঙ্কতবৃক্ষঃ। বঁইচি ইতি ভাষা। করীরবৃক্ষঃ। ইত্যমরঃ ॥ তণ্ডুলীয়শাকং। হিতাবলী। পিণ্ডালুঃ। চোরকনামগন্ধদ্রব্যং। বিকণ্টকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥ গ্রন্থিযুক্তে ত্রি। ইতি মেদিনী ॥

গ্রন্থিলা ( স্ত্রী ) ভদ্রমুস্তা। মালাদূর্ব্বা। গণ্ডদূর্ব্বা। ইতি রাজনির্ঘণ্টঃ ॥

গ্রন্থিবর্হী [ন্] ( পুং ) গ্রন্থিপর্ণবৃক্ষঃ। ইতি শব্দচন্দ্রিকা ॥

গ্রন্থিহরঃ (পুং) অমাত্যঃ। মন্ত্রী। ইতি ত্রিকাণ্ডশেষঃ ॥

গ্রন্থীকং (ক্লী) গ্রন্থিকং। পিপ্পলীমূলং। ইতি দ্বিরূপকোষঃ ॥

গ্রস ঊ ঙ ভক্ষণে। ইতি কবিকল্পদ্রুমঃ ॥ রেফযুক্তঃ। ঊ গ্রসিত্বা গ্রস্ত্বা। ঙ গ্রসতে। হিমাংশুমাশু গ্রসতে। ইতি মাঘঃ। ইতি দুর্গাদাসঃ ॥

গ্রস কি গ্রাসে। ইতি কবিকল্পদ্রুমঃ ॥ রেফযুক্তঃ। কি গ্রাসয়তি কলং লোকঃ। গ্রসতি তব মুখেন্দুং পূর্ণচন্দ্রং বিহায়। ইমং গ্রহণে পঠন্তি কেচিৎ। ইতি দুর্গাদাসঃ ॥

গ্রস্তং (ত্রি) লুপ্তবর্ণপদং। অসম্পূর্ণবাক্যং। ভুক্তং। খাদিতং। ইত্যমরঃ ॥

গ্রহ গ ঞ গ্রহণে। ইতি কবিকল্পদ্রুমঃ ॥ গ ঞ গৃহ্লাতি গৃহ্লীতে। ইতি দুর্গাদাসঃ ॥

গ্রহ উ কি আদানে। ইতি কবিকল্পদ্রুমঃ ॥ উ অগ্রহীৎ অগ্রাক্ষীৎ। কি গ্রাহয়তি গ্রহতি। এষ হ্বাদিরেব মন্যতে তত্রাপ্যাত্মনেপদী এব। ইতি দুর্গাদাসঃ ॥

গ্রহঃ (পুং) সূর্য্যাদিনব। যথা। রবিসোমমঙ্গলবুধবৃহস্পতিশুক্রশনিরাহুকেতবঃ। তেষামষ্টধা গতির্যথা। বক্রা১ অতিবক্রা২ কুটিলা ৩ মন্দা ৪ মন্দতরা ৫ সমা ৬ শীঘ্রা ৭ শীঘ্রতরা ৮। ইতি জ্যোতিষং ॥ তেষাং ধ্যানানি যথা। তত্র সূর্য্যস্য। ক্ষত্রিয়ং কাশ্যপং রক্তং কালিঙ্গং দ্বাদশাঙ্গুলং। পদ্মহস্তদ্বয়ং পূর্ব্বাননং সপ্তাশ্ববাহনং ॥ শিবাধিদৈবতং সূর্য্যং বহ্নিপ্রত্যধিদৈবতং ॥ * ॥ সোমস্য। সামুদ্রং বৈশ্যমাত্রেয়ং হস্তমাত্রং সিতাম্বরং। শ্বেতং দ্বিবাহুং বরদং দক্ষিণং সগদেতরং ॥ দশাশ্বং শ্বেতপদ্মস্থং বিচিন্ত্যোমাধিদৈবতং। জলপ্রত্যধিদৈবঞ্চ সূর্য্যাস্যমাহ্বয়েত্তথা ॥ * ॥ মঙ্গলস্য। আবন্ত্যং ক্ষত্রিয়ং রক্তং মেষস্থং চতুরঙ্গুলং। আরক্তমাল্যবসনং ভারদ্বাজং চতুর্ভুজং ॥ দক্ষিণোর্দ্ধক্রমাচ্ছক্তিবরাভয়গদাকরং। আদিত্যাভিমুখং দেবং তদ্বদেব সমাহ্বয়েৎ ॥ স্কন্দাধিদৈবতং ভৌমং ক্ষিতিপ্রত্যধিদৈবতং ॥ * ॥ বুধস্য। মাগধং দ্ব্যঙ্গুলাত্রেয়ং বৈশ্যং পীতং চতুর্ভুজং। বামোর্দ্ধক্রমতশ্চর্ম্মগদাবরদখড়্গিনং ॥ সূর্য্যাস্যং সিংহগং সৌম্যং পীতবস্ত্রং তথাহ্বয়েৎ। নারায়ণাধিদৈবঞ্চ বিষ্ণুপ্রত্যধিদৈবতং ॥ * ॥ বৃহস্পতেঃ। দ্বিজমাঙ্গিরসং পীতং সৈন্ধবঞ্চ ষড়ঙ্গুলং। ধ্যাত্বা পীতাম্বরং জীবং সরোজস্থং চতুর্ভুজং ॥ দক্ষোর্দ্ধাদক্ষবরদকরকাদণ্ডমাহ্বয়েৎ। ব্রহ্মাধিদৈবং সূর্য্যাস্যমিন্দ্রপ্রত্যধিদৈবতং ॥ * ॥ শুক্রস্য। শুক্রং ভোজকটং বিপ্রং ভার্গবঞ্চ নবাঙ্গুলং। পদ্মস্থমাহ্বয়েৎ সূর্য্যমুখং শ্বেতং চতুর্ভুজং ॥ সদাক্ষবরকরকাদণ্ডহস্তং সিতাম্বরং। শক্রাধিদৈবতং ধ্যায়েৎ শচীপ্রত্যধিদৈবতং ॥ * ॥ শনেঃ। সৌরাষ্ট্রং কাশ্যপং শূদ্রং সূর্য্যাস্যং চতুরঙ্গুলং। কৃষ্ণং কৃষ্ণাম্বরং গৃধ্রগতং সৌরিং চতুর্ভুজং। তদ্বদ্বাণবরং শূলং ধনুর্হস্তং সমাহ্বয়েৎ। যমাধিদৈবতং প্রজাপতিপ্রত্যধি-

দৈবতং ॥*॥ রাহোঃ। রাহুং মলয়জং শূদ্রং পৈঠীনং দ্বাদশাঙ্গুলং। কৃষ্ণং কৃষ্ণাম্বরং সিংহাসনং ধ্যাত্বা তথাহ্বয়েৎ॥ চতুর্ব্বাহুং খড়্গবরশূলচর্ম্মকরস্তথা। কালাধিদৈবং সূর্য্যাস্যং সর্পপ্রত্যধিদৈবতং ॥ * ॥ কেতূনাং। কৌশদ্বীপং কেতুগণং জৈমিনীয়ং ষড়ঙ্গুলং। ধূম্রং গৃধ্রগতং শূদ্রমাহ্বয়েদ্বিকৃতাননং ॥ সূর্য্যাস্যং ধূম্রবসনং বরদং গদিনং তথা। চিত্রগুপ্তাধিদৈবঞ্চ ব্রহ্মপ্রত্যধিদৈবতং ॥ ইতি গ্রহযাগতত্ত্বং ॥ তেষাং কামরূপে স্থানানি ধ্যানমন্ত্রাদিশ্চ যথা। পূর্ব্বং সুমদনায়াস্তু ব্রহ্মক্ষেত্রস্য পশ্চিমে। মহাক্ষেত্রং যত্র দেব আদিত্যঃ সততং স্থিতঃ॥ ভৈরবস্য হিতার্থায় যদা সর্ব্বে সুরাঃ স্থিতাঃ। কামরূপে মহাপাঠে ব্রহ্মেন্দ্রবরুণাদয়ঃ॥ তদা তত্ত্বাহ্বয়ে শৈলে শ্রীসূর্য্যোঽপি ব্যবস্থিতঃ। ত্রিস্রোতা নাম তস্যাস্তি নদী পূর্ব্বদিশি স্থিতা ॥ কাপোতং করণং পশ্চাদস্য কুণ্ডদ্বয়ং স্থিতং। কাপোতকুণ্ডে বিধিবৎ স্নাত্বা করণকুণ্ডকে॥ তত্ত্বাচলং সমারুহ্য সংপূজ্য চ দিবাকরং। সকৃদেব নরো যাতি ভাস্করস্য গৃহং প্রতি॥ সূর্য্যরশ্মিসমুদ্ভূত কাপোত করণামৃত। পুণ্যতোয় মহাঘোরং পাপং কাপোত মে হর ॥ ইত্যনেন তু মন্ত্রেণ স্নাত্বা কাপোতপুষ্করে। করণং সমুপস্পৃশ্য তত্ত্বশৈলে রবিং যজেৎ ॥ * ॥ ত্রিবিধং ব্রহ্মবীজন্তু সহস্রপদমস্ততঃ। রশ্ময়েতি চতুর্থ্যন্তং দেবতায়াঃ শুচেস্ততঃ॥ অঙ্গবীজমিদং প্রোক্তমাদিত্যস্যাতিকামদং। ধ্যানং যথা। পদ্মাসনঃ পদ্মকরঃ পদ্মগর্ভসমদ্যুতিঃ। সপ্তাশ্বঃ সপ্তরজ্জুশ্চ দ্বিভুজো ভাস্করঃ সদা॥ বর্ত্তুলং মণ্ডলং চাস্য অষ্টপত্রসমন্বিতং। অঙ্গুষ্ঠাদ্যঙ্গুলীনান্তু হৃদাদীনাং তথা চ ষট্॥ অঙ্গমন্ত্রেণ সংযুক্ত উপাস্ত্যো বহ্নিসংযুতঃ। সর্ব্বন্যাসে সমুদ্দিষ্টো মন্ত্রঃ সর্ব্বফলপ্রদঃ॥ হৃচ্ছিরস্তু শিখাবর্ম্মনেত্রাস্ত্রোদরপৃষ্ঠতঃ। বাহ্বোঃ পাণ্যোর্জ্জঙ্ঘয়োস্তু পাদয়োশ্চাপি বিন্যসেৎ॥ জঘনে তু সমস্তানি ক্রমান্মন্ত্রাক্ষরাণি তু। ক্রমশ্চোত্তরতন্ত্রোক্তঃ পূজনেঽস্য প্রকীর্ত্তিতঃ॥ বিসর্জ্জনং তথৈশান্যাং বিদ্যাদ্যা দলশক্তয়ঃ। নির্ম্মাল্যধৃগুগ্রচণ্ডো মাঠরাদ্যাস্তু পার্শ্বয়ঃ॥ বীজমুত্তরতন্ত্রস্য পূর্ব্বতঃ প্রতিপাদিতং। অনেন বিধিনা তত্র পূজয়িত্বা সুরোত্তমং॥ স কামানখিলান্ প্রাপ্য ইহ লোকে স উত্তমঃ। সুখী শেষে ততো গচ্ছেদ্ভাস্করস্যালয়ং প্রতি ॥ ১ ॥ ইতি কালিকাপুরাণে ৮০ অধ্যায়ঃ ॥ * ॥ পূর্ব্বং বায়ুগিরেঃ শৈলশ্চন্দ্রকূট ইতি স্মৃতঃ। ত্রিকোণস্তাম্রসংকাশস্তদূর্দ্ধে চন্দ্রমণ্ডলং ॥ দ্বিতীয়বর্গস্যাদ্যন্তু বিন্দিন্দুভ্যামলঙ্কৃতং। চন্দ্রবীজমিতি প্রোক্তং তেন চন্দ্রং প্রপূজয়েৎ ॥ অদ্যাপি প্রতিদর্শে তু পর্ব্বতং তং নিশাপতিঃ। প্রদক্ষিণীকরোত্যেব দশভিশ্চাশ্বভির্যুতঃ॥ তস্যৈব পূর্ব্বভাগে তু সোমকুণ্ডাহ্বয়ং সরঃ। তত্র স্নাত্বা চ পীত্বা চ নরঃ কৈবল্যমশ্নুতে ॥ স্বর্গাদবস্তুতশ্চন্দ্রঃ

কামাখ্যাসেবনে যদা। তদা তদ্রশ্মিসঞ্জাত-নিঃসৃতাস্তোয়রাশয়ঃ ॥ তৈস্তোয়ৈর্ব্বাসবঃ কুণ্ডমকরোদিন্দ্রচন্দ্রয়োঃ। মধ্যে পুণ্যতমস্থানে স্বয়ং ব্রহ্মশিলোপরি ॥ চন্দ্ররশ্মিসমুদ্ভূতচন্দ্রকুণ্ড মহোদধে। সুধাস্রবণ সাহ্লাদ ত্বং চন্দ্র কলুষং হর ॥ ইত্যনেন তু মন্ত্রেণ যঃ স্নাত্বা চন্দ্রপাথসি। চন্দ্রকূটং সমারুহ্য পূজয়েদ্বস্তু তং নরঃ॥ অবিচ্ছিন্না সন্ততিস্তু সুকান্তা তস্য জায়তে। পরত্র চন্দ্রভবনং ভিত্বা যাতি পরং পদং॥ ধ্যানং যথা। শ্বেতঃ শ্বেতাম্বরধরো দশাশ্বো হেমভূষিতঃ। গদাপাণির্দ্বিবাহুশ্চ স্মর্ত্তব্যো বরদঃ শশী ॥ ২ ॥ * ॥ পূর্ব্বস্যাং কর্পটাখ্যাস্তু শৈলাচ্চিত্র ইতি স্মৃতঃ। যঃ পূর্ব্বভাগপ্রান্তোঽভূদ্দিশ্যাগ্নেয্যাং ব্যবস্থিতঃ ॥ পীঠস্য ব্রাহ্মগ্রাবস্তু অর্ব্বাক্ পর্ব্বত উচ্যতে। তস্মিন্ বসন্তি সততং গ্রহা রাজন্ যথেচ্ছয়া॥ তত্র তান্ পূজয়েদ্যস্তু স নাপ্নোত্যাপদং কচিৎ। রূপং মন্ত্রঞ্চ সূর্য্যস্য চন্দ্রস্য প্রতিপাদিতং। সপ্তানামিতরেষাস্তু মন্ত্রং রূপং শৃণুষ মে ॥ রক্তাম্বরধরঃ শূলী শক্তিমাংশ্চ গদাধরঃ। চতুর্ভুজো মেষরথো বরদো মঙ্গলো মতঃ ॥ ৩ ॥ * ॥ পীতাম্বরধরঃ শূলী পীতমাল্যানুলেপনঃ। খড়্গচর্ম্মগদাপাণিঃ সিংহস্থো বরদো বুধঃ ॥ ৪ ॥ * ॥ স্বর্ণগৌরঃ পীতবাসাঃ স্বর্ণপঙ্কজসংস্থিতঃ। মালাং কমণ্ডলুং দণ্ডং বামেন বরদায়কং ॥ চতুর্ভুজং সুসংবদ্ধং চিন্তয়েদ্দেবতীর্থকং। সর্ব্বৈর্দেবগণৈর্নিত্যং নম্যমানং মনোহরং ॥ ৫ ॥ * ॥ শুক্লবস্ত্রং শুক্লবর্ণং শঙ্খনাগোপরিস্থিতং। চতুর্ভুজং চাক্ষমালাং পুস্তকঞ্চ বরাভয়ে ॥ ক্রমাদ্দক্ষিণবামাভ্যাং ধত্তে দৈত্যগুরুঃ সদা ॥ ৬ ॥ * ॥ ইন্দ্রনীলনিভঃ শূলী বরদো গৃধ্রবাহনঃ। পাশবাণাসনধরো ধ্যাতব্যোঽর্কসুতঃ সদা ॥ ৭ ॥ * ॥ কামদেবস্য বীজন্তু মন্ত্রং ভৌমস্য কীর্ত্তিতং। মং। দুর্গায়া নেত্রবীজস্য যত্তু মধ্যাক্ষরং শুভং। তন্মন্ত্রং শশিপুত্রস্য সর্ব্বকামফলপ্রদং ॥ বু ॥ ভকারপঞ্চমো যস্তু চতুর্থস্বরসংযুতঃ। গণেশবীজং তদিদং গুরোর্ম্মন্ত্রং প্রকীর্ত্তিতং ॥ বৃ ॥ বিন্দিন্দুসংযুতঞ্চাপি পূর্ব্ববর্ণদ্বয়ং পুনঃ। সপ্তমস্বরসংযুক্তো ভকারস্থাদিরস্তরং ॥ প্রান্তবর্গাদ্যক্ষরস্তু বিন্দ্বিন্দুভ্যাং সমন্বিতং। ভবেচ্ছুক্রস্য বীজন্তু সর্ব্বকামসমৃদ্ধিদং ॥ শু ॥ প্রান্তবর্গাদ্যক্ষরস্তু চন্দ্রবিন্দুসমন্বিতং। আদ্যমন্ত্যস্বরোপেতং তদেবেন্দ্বাদিসংযুতং। শনৈশ্চরস্য মন্ত্রোঽয়ং সর্ব্বদোষবিনাশনঃ॥ শ ॥ বিন্দুচন্দ্রসমাযুক্তং নামাদ্যক্ষর এব বা। তেষাং সর্ব্বগ্রহাণাং বৈ মন্ত্রসঞ্জ্ঞঃ প্রকীর্ত্তিতঃ॥ শান্তিকে পৌষ্টিকে কৃত্যে এভির্মন্ত্রৈর্গ্রহানিমান্। পূজয়েৎ সর্ব্বদা ধীরো ভূতিকামো মহামতিঃ॥ বরদাভয়হস্তশ্চ খড়্গচর্ম্মধরস্তথা। সিংহাসনগতঃ কৃষ্ণো রাহুর্ধীরৈঃ প্রচক্ষ্যতে ॥ ৮ ॥ ধূম্রবর্ণো বিশালাক্ষঃ পুচ্ছরূপী চতুর্ভুজঃ। খড়্গচর্ম্মগদাবাণপাণিঃ কেতুঃ শবাসনঃ ॥ ৯ ॥ উপান্ত্যাদিদ্বাদশেন স্বরেণ সহিতঃ পুনঃ।

উপান্তপঞ্চমেনেন্দুবিন্দুভ্যাং সহিতাবুভৌ ॥ মন্ত্রোঽয়মনুলোমেন রাহোঃ কেতোর্বিলোমতঃ। আদ্যাক্ষরং বিন্দুমদ্বা মন্ত্রমুক্তং তথৈতয়োঃ ॥ রা ॥ কে ॥ এবং চিত্রে শৈলবরে পূজয়িত্বা নবগ্রহান্। অভীষ্টান্ লভতে কামান্ নরঃ শান্তিং তথোত্তমাং ॥ ইতি কালিকাপুরাণে ৮১ অধ্যায়ঃ॥*॥ তেষাং দশা তৎফলাদি চ দশাশব্দে গরুড়পুরাণে ৬০ অধ্যায়ে চ দ্রষ্টব্যং ॥ * ॥ নবগ্রহযাগবিধানাদি যথা। যাজ্ঞবল্ক্য উবাচ। শ্রীকামঃ শান্তিকামো বা বৃষ্ট্যায়ুরভিচারবান্। গ্রহযজ্ঞং সমং কুর্য্যাৎ গ্রহাশ্চৈতে বুধৈঃ স্মৃতাঃ॥ সূর্য্যঃ সোমো মঙ্গলশ্চ বুধশ্চৈব বৃহস্পতিঃ। শুক্রঃ শনৈশ্চরো রাহুঃ কেতুঃ কুর্য্যাৎ গ্রহাংস্তথা॥ তাম্রকাৎ স্ফটিকাদ্রক্তচন্দনাৎ স্বর্ণকাদুভৌ। রজতাদয়সঃ সীসাৎ কাংস্যাৎ বর্ণান্ নিবোধত॥ রক্তঃ শুক্লস্তথা রক্তঃ পীতঃ পীতঃ সিতোঽসিতঃ। কৃষ্ণঃ কৃষ্ণঃ ক্রমাদ্বর্ণা দ্রব্যাণি মুনয়স্ততঃ॥ স্থাপয়েদ্গ্রহবর্ণানি হোমার্থং প্রলিখেৎ পটে। সবর্ণানি প্রদেয়ানি বাসাংসি কুসুমানি চ॥ গন্ধাশ্চ বলয়শ্চৈব ধূপো দেয়শ্চ গুগ্গুলুঃ। কর্ত্তব্যাস্তত্র মন্ত্রৈশ্চ চরবঃ প্রতিদৈবতং॥ আকৃষ্ণেন ইমং দেবা অগ্নির্মূর্দ্ধা দিবঃ ককুৎ। উদ্বুধ্যস্বেতি জুহুয়াদৃগ্‌ভিরেব যথাক্রমং॥ বৃহস্পতেঽতিযদর্য্যেতি সর্ব্বেঽন্নাৎ পরিস্রুতঃ। শন্নো দেবীস্ততঃ কাণ্ডাৎ কেতুং কৃণ্বন্নিতি ক্রমাৎ॥ অর্কঃ পলাশঃ খদিরশ্চাপামার্গোঽথ পিপ্পলঃ। উড়ুম্বরঃ শমী দূর্ব্বা কুশশ্চ সমিধঃ ক্রমাৎ॥ হোতব্যা মধুসর্পির্ভ্যাং দধ্না চৈব সমন্বিতাঃ। গুড়ৌদনং পায়সঞ্চ হবিষ্যং ক্ষীরষষ্টিকং। দধ্যোদনং হবিঃ পূপান্মাংসং চিত্রান্নমেব চ। দদ্যাদ্গ্রহক্রমাদেতান্ গ্রহেভ্যো ভোজনং ততঃ॥ ধেনুঃ শঙ্খস্তথানড্বান্ হেম বাসো হয়স্তথা। কৃষ্ণা গৌরায়সশ্ছাগ এতা বৈ দক্ষিণাঃ ক্রমাৎ॥ গ্রহাঃ পূজ্যাঃ সদা যস্মাদ্রাজ্যাদি প্রাপ্যতে ফলং। ইতি গারুড়ে ১০১ অধ্যায়ঃ॥ অনুগ্রহঃ। নির্ব্বন্ধঃ। গ্রহণং। রণোদ্যমঃ। পূতনাদয়ঃ। তে তু বালগ্রহাঃ। সৈংহিকেয়ঃ। উপরাগঃ। স তু চন্দ্রসূর্য্যয়োর্গ্রহণং। ইতি মেদিনী॥

গ্রহকল্লোলঃ (পুং) রাহুঃ। ইতি ত্রিকাণ্ডশেষঃ॥

গ্রহণং (ক্লী) স্বীকারঃ। আদরঃ। করঃ। উপলব্ধিঃ। বন্দী। উপরাগঃ। ইতি মেদিনী॥ ইন্দ্রিয়ং। ইতি রাজনির্ঘণ্টঃ॥ শব্দঃ। ইতি জটাধরঃ॥ * ॥ অথ সূর্য্যচন্দ্রগ্রহণকারণং যথা। ভত্রিপাদান্তরে রাহোঃ কেতোর্ব্বা সংস্থিতো রবিঃ। চতুষ্পাদান্তরে চন্দ্রস্তদা সংভাব্যতে গ্রহঃ॥ যস্মিন্ ঋক্ষে রবিস্তস্মাচ্চতুর্দ্দশগতঃ শশী। পূর্ণিমাপ্রতিপৎসন্ধৌ রাহুণা গ্রস্যতে শশী॥ কৃষ্ণপক্ষে তৃতীয়ায়াং মাসর্ক্ষং যদি জায়তে। ততস্ত্রয়োদশে সূর্য্যো রাহুণা গ্রস্যতে রবিঃ॥*॥ গ্রহণকালীনরবিচন্দ্রয়োর্মেঘেনাচ্ছাদনাচ্ছাদনকারণং যথা। রবিভৌমমবাংশে তু নিরভ্রং গ্রাসমাদিশেৎ। বুধসৌরিনবাংশে

তু মলিনং ক্ষুদ্রবর্ষণং ॥ গুরোরংশক- মাসাদ্য দৃশ্যতে সবলাহকঃ। শশিশুক্র- নবাংশে তু প্রাবৃট্কালে মহজ্জলং। অন্যত্রাব্যক্তভূতৌ তৌ দৃশ্যেতে ছাদিতা- ম্বরৌ ॥ * ॥ রাহোর্ব্বর্ণবিশেষে শুভাশুভং যথা। শ্বেতে ক্ষেমসুভিক্ষং ব্রাহ্মণপীড়াঞ্চ নির্দ্দিশেদ্রাহৌ। অগ্নিভয়মনলবর্ণে পীড়া চ হুতাশবৃত্তীনাং ॥ হারিতে রোগো- হনুতাপঃ শস্যানামীতিতশ্চ বিধ্বংসঃ। কপিলে শীঘ্রগসত্ত্বম্লেচ্ছবিধ্বংসোঽথ দু- র্ভিক্ষং ॥ অরুণকিরণানুরূপে দুর্ভিক্ষং বৃষ্টয়ো গ্রহপীড়া। ধূম্রাভে ক্ষেমসুভিক্ষ- মাদিশেন্মন্দবৃষ্টিঞ্চ ॥ কাপোতারুণকপিলে শ্যামাভে ক্ষুদ্ভয়ং বিনির্দ্দিশেৎ। কাপোতঃ শূদ্রাণাং ব্যাধিকরঃ কৃষ্ণবর্ণশ্চ ॥ বিমল- কমলপীতাভো বৈশ্যধ্বংসী ভবেৎ সুভি- ক্ষায়। সার্চ্চিষ্মত্যগ্নিভয়ং গৈরিকরূপে চ যুদ্ধানি ॥ দূর্ব্বাকাণ্ডশ্যামে হারিদ্রে চ বিনির্দ্দিশেন্মরকং। অশনিভয়সম্প্রদায়ী পাটলকুসুমোপমো রাহুঃ ॥ * ॥ তদ্দর্শন- নিষেধো যথা। সপ্তাষ্টজন্মশেষেষু চতুর্থে দশমে তথা। নবমে চ তথা চন্দ্রে ন কুর্য্যাদ্রাহুদর্শনং ॥ জন্মভে জন্মরাশৌ চ ষষ্ঠাষ্টমগতে তয়োঃ। চতুর্থে দ্বাদশে চন্দ্রে ন কুর্য্যাদ্রাহুদর্শনং ॥ গ্রাসদর্শনমাত্রেণ চার্থহানির্মহদ্ভয়ং। জায়তে নাত্র সন্দেহ- স্তস্মাত্তাং পরিবর্জয়েৎ ॥ বিপৎকরপ্রত্যরি- সংজ্ঞিতেষু বৈনাশিকর্ক্ষেষু কৃতং হি কর্ম্ম। সর্ব্বং নৃণাং নিষ্ফলমেব যস্মাৎ কৃতেঽপি তত্রাস্তি শুভং ন কিঞ্চিৎ ॥ * ॥ তত্র কর্ত্তব্যং কর্ম্ম যথা। একরাত্রমুপোষ্যৈব রাহুং দৃষ্ট্বাক্ষয়ং নরঃ। পুণ্যমাপ্নোতি কৃত্বা চ স্নানং শ্রাদ্ধং বিধানতঃ ॥ আদিত্য- কিরণৈঃ পূতং পুনঃ পূতঞ্চ বহ্নিনা। জলং ব্যাধ্যাতুরঃ স্নায়াৎ গ্রহণেঽপ্যুষ্ণবারিণা ॥ সর্ব্বং ভূমিসমং দানং সর্ব্বে ব্যাসসমা দ্বিজাঃ। সর্ব্বং গঙ্গাসমং তোয়ং গ্রহণে নাত্র সংশয়ঃ ॥ সর্ব্বস্বেনাপি কর্ত্তব্যং শ্রাদ্ধং বৈ রাহুদর্শনে। অকুর্ব্বাণস্তু তৎ শ্রাদ্ধং পঙ্কে গৌরিব সীদতি ॥ আপদ্য- নগ্নৌ তীর্থে চ চন্দ্রসূর্য্যগ্রহে তথা। আম- শ্রাদ্ধং দ্বিজৈঃ কার্য্যং শূদ্রেণ তু সদৈব হি ॥ চন্দ্রসূর্য্যগ্রহে স্নানং শ্রাদ্ধদানজপা- দিকং। কার্য্যাণি মলমাসেঽপি নিত্যং নৈমিত্তিকং তথা ॥ সত্তীর্থেঽর্কবিধুগ্রাসে তন্তু দামনপর্ব্বণোঃ। মন্ত্রদীক্ষাং প্রকু- র্ব্বাণো মাসর্ক্ষাদীন্ ন শোধয়েৎ ॥ চন্দ্র- গ্রহশ্চন্দ্রবারে সূর্য্যে সূর্য্যগ্রহস্তথা। চূড়া- মণিরয়ং যোগস্তত্রানন্তফলং স্মৃতং ॥ অন্যস্মাদগ্রহণাৎ কোটিগুণমত্র ফলং লভেৎ। অথবান্যপ্রকারেণ পুরশ্চরণ- মিষ্যতে। গ্রহণেঽর্কস্য চেন্দোর্ব্বা শুচিঃ পূর্ব্বমুপোষিতঃ ॥ নদ্যাং সমুদ্রগামিন্যাং নাভিমাত্রোদকে স্থিতঃ। যদ্বা পুণ্যোদকে স্নাত্বা শুচিঃ পূর্ব্বমুপোষিতঃ ॥ গ্রহণাদি- বিমোক্ষান্তং জপেন্মন্ত্রং সমাহিতঃ। অন- ন্তরং দশাংশেন ক্রমাদ্ধোমাদিকং চরেৎ ॥ তদন্তে মহতীং পূজাং কুর্য্যাদ্ব্রাহ্মণ- তর্পণং। ততো মন্ত্রপ্রসিদ্ধ্যর্থং গুরুং সংপূজ্য তোষয়েৎ ॥ এবঞ্চ মন্ত্রসিদ্ধিঃ

স্যাদ্দেবতা চ প্রসীদতি। সূতকে মৃতকে চৈব ন দোষো রাহুদর্শনে। স্নানমাত্রন্তু কর্ত্তব্যং দানশ্রাদ্ধবিবর্জ্জিতং ॥ * ॥ নক্ষত্র-বিশেষে গ্রহণে নরাণাং দোষস্তৎশান্তিশ্চ যথা। যস্মিংস্ত্রিজন্মনক্ষত্রে গ্রস্তেতে শশি-ভাস্করৌ। তজ্জাতানাং ভবেৎ পীড়া যে নরাঃ শান্তিবর্জ্জিতাঃ ॥ গ্রহণগ্রহ-পরিপীড়িতনাড়ীনক্ষত্রদোষশমনায়। সহ শতপুষ্পৈঃ স্নায়াৎ ফলিনীফলচন্দনো-শীরৈঃ ॥ নাড়ীনক্ষত্রাণি চ। আদ্যদশ-ষোড়শাষ্টাদশত্রয়োবিংশপঞ্চবিংশতয়ঃ ॥ তাম্রপাত্রং তিলৈঃ পূর্ণং পূর্ণং বা গব্য-সর্পিষা। ভাস্করগ্রহণে দদ্যান্নাড়ীদোষোপ-পীড়িতঃ ॥ ঘৃতকুম্ভোপরি নিহিতং শঙ্খং নবনীতপূরিতং দদ্যাৎ। নাড্যাদিদোষ-শান্ত্যৈ দ্বিজায় দোষাকরগ্রহণে ॥ * ॥ তত্র ভোজনাদিনিষেধো যথা। চন্দ্রস্য যদি বা ভানোর্যস্মিন্নহনি ভার্গব। গ্রহণন্তু ভবে-ত্তত্র তৎপূর্ব্বাং ভোজনক্রিয়াং। নাচরেৎ সগ্রহে চৈব তথৈবাস্তমুপাগতে। যাবৎ স্যান্নোদয়স্তস্য নাশ্নীয়াত্তাবদেব তু ॥ মুক্তিং দৃষ্ট্বা তু ভুঞ্জীত স্নানং কৃত্বা পরে-ঽহনি ॥ সূর্য্যগ্রহেতু নাশ্নীয়াৎ পূর্ব্বং যাম-চতুষ্টয়ং। চন্দ্রগ্রহে তু যামাংস্ত্রীন্ বাল-বৃদ্ধাতুরৈর্ব্বিনা ॥ ত্র্যহং ন কীর্ত্তয়েদ্ব্রহ্ম রাজ্ঞো রাহোশ্চ সূতকে ॥ * ॥ তত্রাশৌচং যথা। সর্ব্বেষামেব বর্ণানাং সূতকং রাহু-দর্শনে। স্নাত্বা কর্ম্মাণি কুর্ব্বীত শৃতমন্নং বিবর্জ্জয়েৎ ॥ গ্রহণে শাবমাশৌচং বিমুক্তৌ সৌতিকং স্মৃতং। তয়োঃ সম্পাতিমাত্রেণ উপস্পৃশ্য ক্রিয়াক্রমঃ ॥ ইতি তিথ্যাদি-তত্ত্বং ॥ * ॥ অথ জ্যোতির্মতে গ্রহণ-স্বরূপং যথা। রাহুঃ পৃথিবীচ্ছায়াং সমা-শ্রিত্য চন্দ্রং চন্দ্রমাশ্রিত্য রবিং যদাচ্ছা-দয়তি তৎ গ্রাসাখ্যং। কিন্তু রবিচন্দ্রয়ো-র্ন গতিরোধকস্বরূপো গ্রাসঃ ॥ * ॥ অথ গ্রহণসম্ভাবনা। অমাবস্যাবসানসময়ে যদি রবিস্ফুটরাশ্যাদিঃ রাহুকেত্বোঃ স্ফুট-রাশ্যাদিভিস্তুল্যঃ কিম্বা দশভাগান্তরিতো ভবতি তদা সূর্য্যগ্রহণং পূর্ণিমাবসানকালে যদি চন্দ্রস্ফুটরাশ্যাদিঃ রাহুকেত্বোঃ স্ফুট-রাশ্যাদিভিস্তুল্যঃ কিম্বা ত্রয়োদশভাগা-ন্তরিতো ভবতি তদা চন্দ্রগ্রহণং স্যাৎ ॥ * ॥ তস্য গণনাপ্রকারো যথা। অমাবস্যা-শেষক্ষণে পূর্ণিমাবসানে চ সূর্য্যসিদ্ধা-ন্তোক্তগণিতাগতৌ যথাসম্ভবরাশ্যাদিস্থৌ রবিচন্দ্রৌ কর্ত্তব্যৌ। মধ্যরাহুরাশ্যাদিভি-র্যুক্তঃ স্ফুটরাশ্যাদিস্থো রবিশ্চ কার্য্যঃ অস্মিন্রাহুযুক্তরবৌ ষড়্রাশ্যধিকে সতি ষড়া-শীন্ ত্যক্ত্বা ত্রিংশতা পূরিতঃ সন্ যদি নবতিভাগাধিকো ভবতি তদাশীত্যুত্তর-শতাংশেভ্যো হীনঃ কার্য্যঃ। অবশিষ্টাঙ্কো দ্বিঃ স্থাপ্য একস্মাৎ দ্বাভ্যাং হৃতাঙ্কেনা-পরো যুক্তঃ সন্ শরো ভবতি। রাহুরব্যো-র্যোগে কৃতে মেষাদিরাশিষট্কে সতি স শরঃ সৌম্যসংজ্ঞকঃ তুলাদিষট্কে সতি যাম্যসংজ্ঞকঃ স্যাৎ ॥ * ॥ চন্দ্ররাহুমান-জ্ঞানং। পঞ্চত্রিংশদ্বিকলাধিকনবত্যুত্তর-সপ্তশতকলামিতমধ্যচন্দ্রভুক্তিঃ ৭৯০।৩৫ সা চ স্ফুটকর্ম্মণা কিঞ্চিৎকলাদিভি-

ন্যূনাধিকা বা ভবতি। তস্যাঃ স্ফুটে-ন্দুভুক্ত্যাঃ সকাশাৎ দ্বাচত্বারিংশদধিক-শতেন১৪২ হৃতলব্ধং চন্দ্রস্য মানং স্যাৎ। পঞ্চগুণিতচন্দ্রমানাৎ ত্র্যাভ্যাং হৃতলব্ধং রাহুমানং ভবতি ॥*॥ অথ চন্দ্রগ্রহণং। রাহু-চন্দ্রয়োর্মানং মিলিতং শরেণ হীনকরণাৎ যদবশিষ্টং তৎ গ্রাসো ভবেৎ শরে শূন্যে সতি রাহুচন্দ্রয়োর্ম্মিলিতং মানদ্বয়ং গ্রাসো ভবেৎ। শরেঽধিকে গ্রাসো ন স্যাৎ॥*॥ চন্দ্রগ্রহণারম্ভাদিকালজ্ঞানং যথা। ষড়্গুণিতগ্রাসাঙ্কাৎ চতুর্ম্মিশ্রিতগ্রাসাঙ্কেন লব্ধং দণ্ডাদিকং স্থিতিদণ্ডাদেরর্দ্ধং ভবতি। তৎ পৌর্ণমাসীয়দণ্ডাদিষু হীনং সৎ স্পর্শ-কালঃ। যুক্তং সৎ মুক্তিকালঃ দ্বিগুণিতং তৎ স্থিতিদণ্ডাদিকালঃ স্যাৎ ॥*॥ চন্দ্রমণ্ড-লস্য স্পর্শাদিদিগ্‌জ্ঞানং। পূর্ব্বোক্তশরে যাম্যে সতি আকাশে চন্দ্রমণ্ডলস্য অগ্নি-কোণে স্পর্শো নৈঋর্তকোণে মুক্তিশ্চ স্যাৎ। শরে সৌম্যে সতি ঈশানকোণে স্পর্শঃ বায়ুকোণে মোক্ষঃ। ইতি চন্দ্র-গ্রহণং ॥*॥ সূর্য্যগ্রহণে অক্ষো যথা। স্বদেশবিষুবচ্ছায়া দ্বিঃ স্থাপ্যা। একস্যাঃ ষড়্‌ভূতেনাপ্তা যুক্তা সতী ভাগাদির্যাম্যাক্ষঃ স্যাৎ ॥*॥ সূর্য্যগ্রহণোপযোগিনতমাহ। দিনার্দ্ধামাবস্যয়োর্দণ্ডাদীনাং যদন্তরং তৎ অংশাদিকং নতনামকং স্যাৎ॥*॥ সূর্য্য-গ্রহণোপযোগি লম্বনং যথা। দ্বিগুণনত-সমসংখ্যকখণ্ডো গ্রাহ্যঃ খণ্ডান্তরগুণিত-শেষাৎ ষষ্টিলব্ধযুক্তঃ সন্ স্ফুটলম্বনং অংশাদিকং ভবতি॥*॥ সূর্য্যগ্রহণে ফলং যথা। দিনপূর্ব্বাপরার্দ্ধক্রমেণ ষড়্‌গুণিত-লম্বনেন সহিতস্ফুটরবৌ ষড়্‌ভাধিকে ষড়্‌ভাশীন্ ত্যক্ত্বা ত্রিংশতা গুণিতো যদি নবত্যা অধিকো ভবতি তদা অশীত্যুত্তর-শতাৎ হীনঃ কার্য্যঃ। ত্রিগুণিতদশলব্ধৈঃ খণ্ডো গ্রাহ্যঃ খণ্ডান্তরগুণিতশেষাৎ দশ-লব্ধযুক্তঃ সন্ ফলং ভবতি॥*॥ সূর্য্য-গ্রহণে নতির্যথা। অক্ষফলয়োর্যোগো নতিঃ স্যাৎ ষড়্‌ভাশিন্যূনে অক্ষফলান্তরনতিঃ সা ফলে অধিকে সতি সৌম্যা অক্ষে অধিকে সতি যাম্যা ভবতি॥*॥ সূর্য্যগ্রহণে শরো যথা। মধ্যরাহুসহিতঃ স্ফুটরবির্দ্বি-গুণিতলম্বনখণ্ডাৎ নবহৃতাংশাদিভির্দ্দিন-পূর্ব্বার্দ্ধে রহিতঃ দিনপরার্দ্ধে সহিতঃ কার্য্যঃ এতাদৃশসংস্কৃতরবৌ ষড়্‌ভাশ্যধিকে ষড়া-শীন্ ত্যক্ত্বা ইত্যাদি চন্দ্রগ্রহণোক্তবৎ শরঃ কার্য্যঃ। এষ স্ফুটশরঃ উভয়োঃ শরনত্যো-র্দিক্‌তুল্যতায়াং নত্যা সহ যুক্তো দিগ্বি-ভেদে রহিতঃ কার্য্যঃ অন্তরে কার্য্যে সতি যদধিকং তস্য দিশা শরস্য দিক্ বক্তব্যা॥*॥ সূর্য্যমানং যথা। দশানু-পলাষ্টবিপলাধিকোনষষ্টিকলামিতরবিমধ্য-ভুক্তিঃ ৫৯।৮।১০ সা চ স্ফুটকর্ম্মণি কিঞ্চিৎকলাদিভির্ন্যূনাধিকা বা ভবতি। তস্যাস্ত্রিগুণিতস্ফুটরবিভুক্তের্ত্রিংশতা লব্ধং রবিমানং স্যাৎ॥*॥ অথ সূর্য্য-গ্রহণং। পূর্ব্বোক্তচন্দ্রমানং রবিমানং মিলিতং শরেণ হীনং সৎ গ্রাসো ভবেৎ॥*॥ সূর্য্যগ্রহণস্যারম্ভাদিকালজ্ঞানং॥ চতু-র্গুণিতগ্রাসাঙ্কাৎ দ্বিযুতগ্রাসাঙ্কেন লব্ধং

দণ্ডাদিকং স্থিতিনাড়িকার্দ্ধং ভবতি। তদমাবস্যায়াং দণ্ডাদিষু হীনং স্পর্শকালঃ যুক্তং মুক্তিকালঃ স্যাৎ ॥ * ॥ স্পর্শাদিদিগ্‌জ্ঞানং। শরে যাম্যে সতি অর্কমণ্ডলস্য নৈর্ঋতকোণে স্পর্শোঽগ্নিকোণে মোক্ষঃ স্যাৎ। সৌম্যে শরে সতি বায়ুকোণে স্পর্শ ঈশানকোণে মুক্তির্ভবেৎ দ্বিগুণিতং তৎ স্থিতিদণ্ডাদি স্যাৎ॥*॥ দিবারাত্র্যোঃ পরার্দ্ধে যদি গ্রহণং ভবতি তদা অমাবস্যাপৌর্ণমাস্যোর্দণ্ডাদিঃ স্ফুটলম্বনযুক্তঃ কার্য্যঃ ॥ গণিতাগতকালাৎ হীনাতিরিক্তে কালে যদি গ্রহণং স্যাৎ তৎ ঔৎপাতিকং ভবেৎ ॥*॥ গ্রহণে মণ্ডলস্য সামান্যবর্ণো যথা। বিম্বস্য বৈবর্ণ্যং অংশুহানিস্তমোবৃতিঃ খণ্ডনমম্লতা বা শুক্লারুণশ্যামলপীতচিত্রৈঃ পটাদ্যৈঃ রোধ ইব বেষ্টনম্বা ভবতি ॥ * ॥ অপর্ব্বজং গ্রহণং ঈতিব্যসনার্ত্তিকারি স্যাৎ তদা দিশশ্চ বিরূপাঃ স্যুঃ ॥ * ॥ গ্রাসাঙ্গুলিমানজ্ঞানং। দশগুণিতগ্রাসাঙ্কাৎ মানদ্বয়ার্দ্ধেন লব্ধং চন্দ্রসূর্য্যয়োর্গ্রাসস্য গতাঙ্গুলাদ্যং ভবতি। সূর্য্যস্য ত্র্যঙ্গুলমপি গ্রাসোঽদৃশ্যো ভবতি। চন্দ্রস্য সার্দ্ধাঙ্গুলঃ সুদর্শঃ যদি ষোড়শাঙ্গুলাধিকো ভবতি তদা সর্ব্বগ্রাসঃ ॥ * ॥ গ্রহণে মণ্ডলবর্ণো যথা। অল্পে গ্রহণে ধূম্রাভং সমগ্রে কপিলং অর্দ্ধে কৃষ্ণাভং। ইতি সূর্য্যগ্রহণং ॥ ইতি সিদ্ধান্তমঞ্জরীসম্মতং ॥

গ্রহণিঃ (স্ত্রী) গ্রহণীরোগঃ। ইত্যমরটীকায়াং রায়মুকুটঃ ॥

গ্রহণী (স্ত্রী) অগ্ন্যধিষ্ঠাননাড়ী। স্বনামখ্যাতরোগঃ। তস্য নিদানসম্প্রাপ্তী যথা। অতীসারে নিবৃত্তেঽপি মন্দাগ্নেরহিতাশিনঃ। ভূয়ঃ সন্দূষিতো বহ্নির্গ্রহণীমপি দূষয়েৎ ॥ একৈকশঃ সর্ব্বশশ্চ দোষৈরত্যর্থমূর্চ্ছিতৈঃ। সা দুষ্টা বহুশো ভুক্তমামমেব বিমুঞ্চতি ॥ পক্বং বা সরুজং পূতিমুহুর্ব্বদ্ধং মুহুর্দ্রবং। গ্রহণীরোগমাহুস্তমায়ুর্ব্বেদবিদো জনাঃ ॥ * ॥ তস্য পূর্ব্বরূপং যথা। পূর্ব্বরূপস্তু তস্যেদং তৃষ্ণালস্যং বলক্ষয়ঃ। বিদাহোঽন্নস্য পাকশ্চ চিরাৎ কায়স্য গৌরবং ॥ তস্য বাতিকস্য নিদানরূপে। কটুতিক্তকষায়াতিরূক্ষসন্দুষ্টভোজনৈঃ। প্রমিতানশনাত্যধ্ববেগনিগ্রহমৈথুনৈঃ ॥ মারুতঃ কুপিতো বহ্নিং সংছাদ্য কুরুতে গদান্। তস্যান্নং পচ্যতে দুঃখং শুক্তপাকং খরাঙ্গতা ॥ কণ্ঠাস্যশোষঃ ক্ষুৎ তৃষ্ণা তিমিরং কর্ণয়োঃ স্বনঃ। পার্শ্বোরুবঙ্ক্ষণগ্রীবা রুগভীক্ষ্ণং বিসূচিকা ॥ হৃৎপীড়াকার্শ্যদৌর্ব্বল্যং বৈরস্যং পরিকর্ত্তিকা। গৃদ্ধিঃ সর্ব্বরসানাঞ্চ মনসঃ সদনং তথা ॥ জীর্ণে জীর্য্যতি চাধ্মানং ভুক্তে স্বাস্থ্যমুপৈতি চ। স বাতগুল্মহৃদ্রোগপ্লীহাশঙ্কী চ মানবঃ ॥ চিরাদ্দুঃখং দ্রবং শুষ্কং তন্বামং শব্দফেনবৎ। পুনঃ পুনঃ সৃজেদ্বর্চ্চঃ শ্বাসকাসার্দ্দিতোঽনিলাৎ ॥ * ॥ পৈত্তিকস্য তস্য নিদানরূপে। কট্বজীর্ণবিদাহ্যম্লক্ষারাদ্যৈঃ পিত্তমুল্বণং। আপ্লাবয়দ্ধন্ত্যনলং জলং তপ্তমিবানলং ॥ সোঽজীর্ণং নীলপীতাভং পীতাভঃ সার্য্যতে দ্রবং। পূত্যম্লোদ্গারহৃৎকণ্ঠদাহারুচি-

ত্বর্দ্দিতঃ ॥ * ॥ শ্লৈষ্মিকস্য তস্য নিদানরূপে। গুর্ব্বতিস্নিগ্ধশীতাদিভোজনাদতিভোজনাৎ। ভুক্তমাত্রস্য চ স্বপ্নাদ্ধন্ত্যগ্নিং কুপিতঃ কফঃ॥ তস্যান্নং পচ্যতে দুঃখং হৃল্লাসচ্ছর্দ্দ্যরোচকাঃ। আস্যোপদেহমাধুর্য্যকাসষ্ঠীবনপীনসাঃ॥ হৃদয়ং মন্যতে স্ত্যানমুদরং স্তিমিতং গুরু। দুষ্টো মধুর উদ্গারঃ সদনং স্ত্রীষ্বহর্ষণং॥ ভিন্নামশ্লেষ্মসংসৃষ্টগুরুবর্চ্চঃপ্রবর্ত্তনং। অকৃশস্যাপি দৌর্ব্বল্যমালস্যঞ্চ কফাত্মকে॥ পৃথগ্বাতাদিনির্দ্দিষ্টং হেতুলিঙ্গসমাগমে। ত্রিদোষং নির্দ্দিশেদেবং তেষাং বক্ষ্যামি ভেষজং॥ * ॥ তস্যাসাধ্যস্য লক্ষণং যথা। লিঙ্গৈরসাধ্যগ্রহণীবিকারো যৈস্তৈরতীসারগদো ন সিধ্যেৎ। বৃদ্ধস্য নূনং গ্রহণীবিকারো হত্বা তনুং নো বিনিবর্ত্ততে চ॥ ইতি মাধবকরঃ॥ তস্য চিকিৎসা যথা। চিকিৎসাথ গ্রহণ্যাস্ত গ্রহণী চাগ্নিনাশিনী। চিত্রককাথকল্কাভ্যাং গ্রহণীঘ্নং শৃতং হবিঃ॥ ইতি গারুড়ে ১৭৪ অধ্যায়ঃ॥ হরিরুবাচ। মরীচং শৃঙ্গবেরঞ্চ কুটজস্বচমেব চ। পানাচ্চ গ্রহণী নশ্যেৎ শশাঙ্ককৃতশেখর॥ ইতি তত্রৈব ১৮৭ অধ্যায়ঃ॥ অঙ্কোঠমূলকর্ষার্দ্ধং পিষ্টং তণ্ডুলবারিণা। সর্ব্বাতীসারগ্রহণীং পীতং হরতি ভূতপ॥ মরীচশুণ্ঠীকুটজত্বক্চূর্ণন্তু গুড়ান্বিতং। ক্রমাত্তৎ দ্বিগুণং পীতং গ্রহণীব্যাধিনাশনং॥ ইতি তত্রৈব ১৮৯ অধ্যায়ঃ॥*॥ অথ সামান্যগ্রহণীরোগস্য চিকিৎসা। গ্রহণীমাশ্রিতং রোগমজীর্ণবদুপাচরেৎ। লঙ্ঘনৈর্দ্দীপনীয়ৈশ্চ সদাতীসারভেষজৈঃ॥ দোষং সামং নিরামঞ্চ বিদ্যাদত্রাতিসারবৎ। অতীসারোক্তবিধিনা তস্যামঞ্চ বিপাচয়েৎ॥ পেয়াদিপটুলঘ্বন্নং পঞ্চকোলাদিভির্যুতং। দীপনানি চ তক্রঞ্চ গ্রহণ্যাং যোজয়েদ্ভিষক্॥ কপিত্থবিল্বচাঙ্গেরীতক্রদাড়িমসাধিতা। যবাগূঃ পাচয়ত্যামং শকৃৎ সংবর্ত্তয়ত্যপি॥ সংবর্ত্তয়তি ঘনীকরোতি ॥ * ॥ অথ তক্রং। তত্র গোদধিগুণাঃ। গব্যং দধ্যুত্তমং বল্যং পাকে স্বাদু রুচিপ্রদং। পবিত্রং দীপনং স্নিগ্ধং পুষ্টিকৃৎ পবনাপহং॥ উক্তং দধ্নামশেষাণাং মধ্যে গব্যং গুণাধিকং॥ * ॥ অথ মহিষীদধিগুণাঃ। মাহিষং দধি সুস্নিগ্ধং শ্লেষ্মলং বাতপিত্তনুৎ। স্বাদুপাকমভিষ্যন্দি বৃষ্যং গুর্ব্বস্রদূষণং ॥ * ॥ অথ ছাগীদধিগুণাঃ। আজং দধ্যুত্তমং গ্রাহি লঘু দোষত্রয়াপহং। শস্যতে শ্বাসকাসার্শঃক্ষয়কার্শ্যেষু দীপনং॥ উত্তমং গ্রাহিণাং মধ্যে শ্রেষ্ঠ ইত্যর্থঃ॥ * ॥ অথ তক্রস্য ভেদাঃ। তক্রন্তু ঘোলমথিতোদশ্বিৎ তক্রপ্রভেদতঃ। সুশ্রুতাদ্যৈর্মুনিশ্রেষ্ঠৈশ্চতুর্দ্ধা পরিকীর্ত্তিতং॥ সসরং নির্জ্জলং ঘোলং মথিতন্ত্বসরোদকং। তক্রং পাদজলং প্রোক্তমুদশ্বিচ্চার্দ্ধবারিকং॥ বাতপিত্তহরং ঘোলং মথিতং কফপিত্তনুৎ। উদশ্বিৎ কফদং বল্যং শ্রমঘ্নং পরমং মতং॥*॥ অথ তক্রস্য গুণাঃ। তক্রং গ্রাহি কষায়াম্লং মধুরং দীপনং লঘু। বীর্য্যোষ্ণং বলদং বৃষ্যং প্রীণনং বাতনাশনং॥

যান্যুক্তানি দধীন্যস্থৌ তদগুণং তক্রমাদিশেৎ। গ্রহণ্যাদিমতং তক্রং পথ্যং সংগ্রাহি লাঘবাৎ ॥ বাতঘ্নমম্লসান্দ্রত্বাৎ সদ্যস্কং স্ববিদাহি চ। কিঞ্চ স্বাদুবিপাকিত্বান্ন চ পিত্তপ্রকোপণং॥ কষায়োষ্ণবিকাষিত্বাদ্রৌক্ষ্যাচ্চৈব কফে হিতং। * । অথোদ্ধৃতস্তোকোদ্ধৃতানুদ্ধৃতঘৃতস্য তক্রস্য গুণাঃ। সমুদ্ধৃতঘৃতং তক্রং পথ্যং লঘু বিশেষতঃ। স্তোকোদ্ধৃতঘৃতং তস্মাদগুরু বৃষ্যং কফাপহং ॥ অনুদ্ধৃতঘৃতং সান্দ্রং গুরু পুষ্টিকফপ্রদং ॥ * ॥ অথ দোষবিশেষে তক্রবিশেষাঃ। বাতেঽম্লসৈন্ধবোপেতং পিত্তে স্বাদু সশর্করং। পিবেত্তক্রং কফে চাপি ক্ষারত্রিকটুসংযুতং ॥ হিঙ্গুজীরযুতং ঘোলং সৈন্ধবেনাবধূলিতং ॥ গ্রহণ্যর্শোঽতিসারঘ্নং ভবেদ্বাতহরং পরং। রোচনং পুষ্টিদং বল্যং বস্তিশূলবিনাশনং ॥ * ॥ অথামপক্বতক্রগুণাঃ। তক্রমামং কফং কোষ্ঠে হন্তি কণ্ঠে করোতি চ। পীনসশ্বাসকাসাদৌ পক্বমেব বিশিষ্যতে ॥ * ॥ অথ তক্রস্য নিষেধঃ। নৈব তক্রং ক্ষতে দদ্যান্নোষ্ণকালে ন দুর্ব্বলে। ন মূর্চ্ছাভ্রমদাহেষু ন রোগে রক্তপৈত্তিকে ॥ * ॥ অথ তক্রস্য গুণোৎকর্ষঃ। ন তক্রসেবী ব্যথতে কদাচিন্নতক্রদগ্ধাঃ প্রভবন্তি রোগাঃ। যথা সুরাণামমৃতং সুখায় তথা নরাণাং ভুবি তক্রমাহুঃ ॥ * ॥ মুদ্গযূষং রসং তক্রং ধান্যজীরকসংযুতং। সৈন্ধবেনান্বিতং দদ্যাৎ ষড়্যূষমিতি কীর্ত্তিতং ॥ রসং লঘু গ্রাহি মাংসভবরসং।

ষড়্যূষঃ ॥ * ॥ কর্ষং গন্ধর্কর্ষকর্পাররমুভে কুর্য্যাচ্চতুৰ্ভাং কজ্জলীং ত্র্যক্ষং ত্র্যূষণতশ্চ পঞ্চলবণং সার্দ্ধঞ্চ কর্ষং পৃথক্। স্ফুটং হিঙ্গু চ জীরকদ্বয়যুতং সর্ব্বার্দ্ধভঙ্গান্বিতং খাদেট্টঙ্কমিতং প্রবৃত্তিগদবাংস্তক্রস্য বিঘ্নেন চ ॥ ইতি লঘুলাঈচূর্ণং ॥ * ॥ ত্রিকটু ত্রিফলা চৈব বিড়ঙ্গং জীরকদ্বয়ং। ভল্লাতকং যবানীঞ্চ হিঙ্গুং লবণপঞ্চকং ॥ গৃহধূমবচাকুষ্ঠং রসগন্ধকমভ্রকং। ক্ষারত্রয়াজমোদা চ চিত্রকং গজপিপ্পলী। মুস্তা মোচরসং পাঠা লবঙ্গং জাতিপত্রকং ॥ সমভাগকৃতঞ্চৈষাং চূর্ণং শ্লক্ষ্ণং বিনির্ম্মিতং। শক্রাশনস্য চূর্ণন্তু চূর্ণতুল্যং প্রদাপয়েৎ ॥ মন্দাগ্নিকাসদুর্নামপ্লীহপাণ্ডুরুচিজ্বরান্। বিষ্টম্ভং সংগ্রহং শূলং হন্যান্নানাতিসারজিৎ ॥ আমবাতাপহং বল্যং সূতিকাদোষনাশনং। বর্জ্জনীয়ং মাষমম্লং স্নানং পিশিতভোজনং ॥ পথ্যং কাঞ্জিকমত্রাপি দধি তক্রমথাপি বা। বৃহল্লাঈচূর্ণমিদং লাঈভাষিতমুত্তমং॥ ইতি বৃহল্লাঈচূর্ণং ॥ * ॥ জাতীফললবঙ্গৈলাপত্রত্বঙ্নাগকেশরৈঃ। কর্পূরচন্দনতিলত্বক্ক্ষীরীতগরাম্বলৈঃ ॥ তালীসপিপ্পলীপথ্যাস্থূলজীরকচিত্রকৈঃ। শুণ্ঠীবিড়ঙ্গমরিচৈঃ সমভাগবিচূর্ণিতৈঃ॥ যাবন্ত্যেতানি সর্ব্বাণি দদ্যাত্তঙ্গাং চ তাবতীং। সর্ব্বচূর্ণসমাংশা প্রদেয়া শুভ্রশর্করা॥ কর্ষমাত্রমিদং খাদেন্মধুনাপ্লাবিতং জনঃ। নাশয়েৎ গ্রহণীং কাসং ক্ষয়ং শ্বাসমরোচকং ॥ জাতীফলাদিচূর্ণং ॥*॥ চিত্রকং পিপ্পলীমূলং

ক্ষারৌ লবণপঞ্চকং। ব্যোষং হিঙ্গ্বজমোদাঞ্চ চব্যং চৈকত্র চূর্ণয়েৎ॥ বটিকা মাতুলুঙ্গস্য রসৈর্ব্বা দাড়িমস্য বা। কৃতা বিপাচয়ত্যামং প্রদীপয়তি চানলং॥ ক্ষারৌ স্বর্জ্জিকা যবক্ষারশ্চ। লবণপঞ্চকমিতি সৈন্ধবং রুচকং চৈব বিড়ং সামুদ্রিকং গড়মিতি। ব্যোষং শুণ্ঠীপিপ্পলীমরিচানি। অজোমোদাত্র যবানিকা। মাতুলুঙ্গং বীজপূরকং। চিত্রকাদিবটিকা॥ *॥ শ্রীফলশলাটুঃ কল্কো নাগরচূর্ণেন মিশ্রিতঃ সগুড়ঃ। গ্রহণীগদমত্যুগ্রং তক্রভুজা শীলিতো জয়ন্তি॥ শ্রীফলশলাটুঃ বিল্বস্যামং ফলং। গুড়স্যাত্র ভাগদ্বয়ং। বিল্বকল্কঃ॥ *॥ চতুষ্পলং সুধাকাণ্ডং ত্রিপলং লবণত্রয়ং। বার্ত্তাকোঃ কুড়বঞ্চার্কমূলাদ্দ্বিল্বে তথানলাৎ॥ দগ্ধ্বা দ্রবেণ বার্ত্তাকোর্গুটিকা ভোজনোত্তরং। ভুক্তা ভুক্তং পচত্যাশু নাশয়েদ্গ্রহণীগদং॥ কাসং শ্বাসং তথার্শাংসি বিসূচীঞ্চ হৃদাময়ং। বার্ত্তাকুগুটিকা॥ *॥ মুস্তকাতিবিষাবিল্বকৌটজং সূক্ষ্মচূর্ণিতং। মধুনা চ সমালীঢ়ং গ্রহণীং সর্ব্বজাং ত্যজেৎ॥ কৌটজং ইন্দ্রযবঃ। মুস্তকাদিচূর্ণং॥ *॥ শ্বেতো বা যদি বা রক্তঃ সুপক্কো গ্রহণীগদঃ। গুড়েনাধিকসর্জ্জেন ভক্ষিতেনাশু নশ্যতি॥ সর্জ্জঃ রাল ইতি লোকে। সর্জ্জরসচূর্ণং॥ *॥ বিল্বাব্দশক্রযববালকমোচসিদ্ধমাজং পয়ঃ পিবতি যো দিবসত্রয়েণ। সোঽতিপ্রবৃদ্ধচিরজগ্রহণীবিকারং সামং সশোণিতমসাধ্যমপি ক্ষিণোতি॥ মোচো মোচরসঃ।

ক্ষিণোতি হন্তি। প্রস্থত্রয়ে ত্বামলকীরসস্য শুদ্ধস্য দত্বার্দ্ধতুলাং গুড়স্য। চূর্ণীকৃতৈর্গ্রন্থিকজীরচব্যব্যোষেভকৃষ্ণাহবুষাজমোদৈঃ॥ বিড়ঙ্গসিন্ধুত্রিফলাযবানীপাঠাগ্নিধান্যৈশ্চ পলপ্রমাণৈঃ। দত্বা ত্রিবৃচ্চূর্ণপলানি চাষ্টাবষ্টৌ চ তৈলস্য পচেদ্যথাবৎ॥ তং ভক্ষয়েদক্ষফলপ্রমাণং যথেষ্টচেষ্টস্ত্রিসুগন্ধিযুক্তং। অনেন সর্ব্বে গ্রহণীবিকারাঃ সশ্বাসকাসস্বরভেদশোথাঃ॥ শাম্যন্তি চায়ং চিরমন্তরগ্নের্হতস্য পুংস্তস্য চ বৃদ্ধিহেতুঃ। স্ত্রীণাস্তু বন্ধ্যাময়নাশনঃ স্যাৎ কল্যাণকো নাম গুড়ঃ প্রসিদ্ধঃ॥ তৈলে মনাক্ ত্রিবৃতস্ত্রিবৃৎ ত্রিসুগন্ধি পলং পলং। সিদ্ধে নিধেয়মত্রৈব গুড়ে কল্যাণপূর্ব্বকে॥ কল্যাণগুড়ঃ॥ *॥ পিপ্পলী পিপ্পলীমূলং চিত্রকং গজপিপ্পলী। ধান্যকঞ্চ বিড়ঙ্গানি যবানী মরিচানি চ॥ ত্রিফলা চাজমোদা চ নলিনী জীরকস্তথা। সৈন্ধবং রৌমকঞ্চাপি সামুদ্রং রুচকং বিড়ং॥ আরগ্বধশ্চ ত্বক্ পত্রং সূক্ষ্মৈলা চোপকুঞ্চিকা। শুণ্ঠীশক্রযবাশ্চৈব প্রত্যেকং কর্ষসম্মিতাঃ॥ মৃদ্বীকায়াঃ পলান্যত্র চত্বারি কথিতানি হি। ত্রিবৃতায়াঃ পলান্যষ্টৌ গুড়স্যার্দ্ধতুলা তথা॥ তিলতৈলপলান্যষ্টাবামলক্যা রসস্য তু। প্রস্থত্রয়মিদং সর্ব্বং শনৈর্মৃদ্বগ্নিনা পচেৎ॥ উড়ুম্বরং চামলকং বাদরং বা যথাফলং। তাবন্মাত্রমিদং খাদেত্তক্ষয়েদ্বা যথানলং॥ নিখিলান্ গ্রহণীরোগান্ প্রমেহাংশ্চৈব বিংশতিং। উরোঘাতং প্রতিশ্যায়ং দৌর্ব্বল্যং বহ্নি-

সংক্ষয়ং ॥ জ্বরানপি হরেৎ সর্ব্বান্ কুর্য্যাৎ কান্তিং মতিং স্বরং। পিচুপাঠাম্বয়াদ্ধন্তি রক্তপিত্তঞ্চ বিগ্রহং। ধাতুক্ষীণো বয়ঃক্ষীণঃ স্ত্রীষু ক্ষীণঃ ক্ষয়ী চ যঃ ॥ তেভ্যো হিতশ্চ বন্ধ্যায়ৈ মহাকল্যাণকো গুড়ঃ ॥ মহাকল্যাণকগুড়ঃ ॥ * ॥ কুষ্মাণ্ডানাং সুপক্কানাং স্বিন্নানাং নিষ্কুলত্বচাং। সর্পিঃপ্রস্থে পলশতং তাম্রপাত্রে শনৈঃ পচেৎ ॥ পিপ্পলী পিপ্পলীমূলং চিত্রকং গজপিপ্পলী। ধান্যকানি বিড়ঙ্গানি নাগরং মরিচানি চ ॥ ত্রিফলা চাজমোদা চ কলিঙ্গাজাজিসৈন্ধবং। একৈকস্য পলং চৈকং ত্রিবৃতোঽষ্টৌ পলানি চ ॥ তৈলস্য চ পলান্যষ্টৌ গুড়াৎ পঞ্চাশদেব তু। আমলক্যা রসস্যাত্র প্রস্থত্রয়মুদীরিতং ॥ তাবৎ পাকং প্রকুর্ব্বীত মৃদুনা বহ্নিনা ভিষক্। যাবৎ দর্ব্বীপ্রলেপঃ স্যাত্তদৈনমবতারয়েৎ॥ ঔডুম্বরং চামলকং বাদরং বা যথাফলং। তাবন্মাত্রমিদং খাদেদ্ভক্ষয়েদ্বা যথানলং ॥ অনেনৈব বিধানেন প্রযুক্তশ্চ দিনে দিনে। নিহন্তি গ্রহণীরোগান্ কুষ্ঠান্যর্শোভগন্দরান্ ॥ জ্বরমানাহহৃদ্রোগগুল্মোদরবিসূচিকাঃ। কামলাং পাণ্ডুরোগঞ্চ প্রমেহাংশ্চৈব বিংশতিং ॥ বাতশোণিতবীসর্পদদ্রুপক্ষহলীমকান্। বাতপিত্তকফান্ সর্ব্বান্ দুষ্টান্ শুদ্ধান্ সমাচরেৎ ॥ ব্যাধিক্ষীণা বয়ঃক্ষীণাঃ স্ত্রীষু ক্ষীণাশ্চ যে নরাঃ। তেভ্যো হিতো গুড়োঽয়ং স্যাৎ বন্ধ্যানামপি পুত্রদঃ ॥ বৃষ্যো বল্যো বৃংহণশ্চ বয়সঃ স্থাপনঃ পরঃ। কুষ্মাণ্ডকল্যাণকগুড়ঃ ॥ * ॥ অতীসারাধিকারলিখিতং বিল্বতৈলং চাত্র হিতং। ইতি গ্রহণীরোগাধিকারঃ। ইতি ভাবপ্রকাশঃ

গ্রহণীরুক্ [ জ্ ] ( স্ত্রী ) গ্রহণীরোগঃ। তৎপর্য্যায়ঃ। প্রবাহিকা ২। ইত্যমরঃ ॥ গ্রহিণী ৩। ইতি তট্টীকা ॥

গ্রহণীহরং ( ক্লী ) লবঙ্গং। ইতি শব্দচন্দ্রিকা ॥

গ্রহদ্রুমঃ ( পুং ) শাকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

গ্রহনায়কঃ ( পুং ) শনিঃ। ইতি শব্দরত্নাবলী ॥ সূর্য্যশ্চ ॥

গ্রহনাশঃ ( পুং ) বৃক্ষবিশেষঃ। ছাতিয়ান ইতি ভাষা। ইতি শব্দরত্নাবলী ॥

গ্রহনাশনঃ ( পুং ) গ্রহনাশবৃক্ষঃ। ইতি শব্দরত্নাবলী রত্নমালা চ ॥

গ্রহনেমিঃ ( পুং ) চন্দ্রঃ। ইতি শব্দরত্নাবলী ॥

গ্রহপতিঃ ( পুং ) সূর্য্যঃ। অর্কবৃক্ষঃ। ইত্যমরঃ ॥

গ্রহপুষঃ ( পুং ) সূর্য্যঃ। ইতি হেমচন্দ্রঃ ॥

গ্রহভীতিজিৎ [ দ্ ] ( পুং ) চীড়ানামগন্ধদ্রব্যং। ইতি রাজনির্ঘণ্টঃ ॥

গ্রহযাগঃ (পুং) গ্রহাণাং যজ্ঞঃ। তস্য শান্তিকল্পে মলমাসাদাবপি কর্ত্তব্যত্বং পৌষ্টিকল্পে তু শুদ্ধকালে। তস্য প্রয়োগো যথা। যজমানঃ কৃতস্নানাদিঃ গোময়োপলিপ্তে দেশে কুশাসনে উপবিষ্ট উদঙ্মুখো ব্রাহ্মণান্ স্বস্তিবাচ্য সংকল্প্য মন্ত্রমুচ্চার্য্য শ্বেতসর্ষপেণ বিঘ্নকরানুৎসার্য্য সগণাধিপষোড়শমাতৃকাপূজাবসোর্দ্ধারাবৃদ্ধিশ্রাদ্ধানি

কৃত্বা স্বয়ং করণাসামর্থ্যে ব্রাহ্মণান্ বৃণুয়াৎ। ততো মণ্ডপোত্তরপূর্ব্বভাগে বিতস্তিদ্বয়বিস্তৃতায়াং বিতস্ত্যুচ্ছ্রিতায়াং উদক্প্লবায়াং বেদ্যাং রক্তচন্দনাদিনা মধ্যে বর্ত্তুলং সূর্য্যং আগ্নেয্যাং শ্বেতমর্দ্ধচন্দ্রাকারং সোমং দক্ষিণস্যাং ত্রিকোণং রক্তং মঙ্গলং ঐশান্যাং পীতং ধনুরাকারং বুধং উত্তরস্যাং পীতং পদ্মাকারং গুরুং প্রাচ্যাং শ্বেতং চতুষ্কোণং শুক্রং প্রতীচ্যাং শ্যামং সর্পাকারং শনিং নৈঋর্ত্যাং শ্যামং মকরাকারং রাহুং বায়ব্যাং ধূম্রবর্ণান্ খড়্গাকারান্ কেতূন্ বিলিখ্য স্বগৃহ্যোক্তবিধিনাগ্নিস্থাপনাদিব্রহ্মস্থাপনপর্য্যন্তং কর্ম্ম কৃত্বা গ্রহশব্দে লিখিততত্তদ্ধ্যানেন মণ্ডলে গ্রহানাবাহ্য তেষাং স্বস্ববর্ণবস্ত্রগন্ধপুষ্পাদিনা পূজয়েৎ। গন্ধে বিশেষঃ সূর্য্যায় রক্তচন্দনং সোমায় শ্বেতচন্দনং মঙ্গলায় কুঙ্কুমং বুধায় সরলং গুরবে সমভাগেন মিশ্রিতানি রক্তচন্দনশ্বেতচন্দনকুঙ্কুমসরলানি শুক্রায় শ্বেতচন্দনং শনৈশ্চরায় কস্তূরীং রাহবে পদ্মকাষ্ঠং কেতুভ্যশ্চ পদ্মকাষ্ঠং দদ্যাৎ। ধূপে বিশেষঃ। রবয়ে গুগ্গুলুং সোমায় সরলং মঙ্গলায় দেবদারু বুধায় ঘৃতমিশ্রিতদেবদারু বৃহস্পতয়ে দশাঙ্গং শুক্রায়াগুরুং শনৈশ্চরায় কালাগুরুং রাহবে গুড়ত্বচং কেতুভ্যো মধুমিশ্রিতগুড়ত্বচং দদ্যাৎ। ততোঽধিদেবতাপ্রত্যধিদেবতাঃ পূজয়েৎ। ততো বলিং দদ্যাৎ। সূর্য্যায় গুড়োদনং সোমায় ঘৃতপায়সং মঙ্গলায় পক্বযবচূর্ণাত্মকং যাবকং বুধায় ক্ষীরান্নং গুরবে দধ্যোদনং শুক্রায় ঘৃতৌদনং শনৈশ্চরায় যবতিলতণ্ডুলাত্মকং কৃষরং রাহবে ছাগমাংসং কেতুভ্যঃ অজাক্ষীরসাধিতাজকর্ণরক্তমিশ্রিতযবতিলতণ্ডুলরূপং চিত্রৌদনং। ততশ্চরুং শ্রপয়েৎ। ততঃ কুশণ্ডিকাং সমাপ্য রব্যাদীনাং চরুহোমং কুর্য্যাৎ। ততো যথাশক্তি একৈকস্যাষ্টাবিংশতিমষ্টোত্তরশতমষ্টোত্তরসহস্রং বা মধুসর্পিমিশ্রিতাভিঃ সূর্য্যাদীনাং তত্তৎসমিদ্ভির্হোমং কুর্য্যাৎ। সমিধস্তু। অর্কঃ পলাশঃ খদিরস্ত্বপামার্গোঽথ পিপ্পলঃ। উডুম্বরঃ শমী দূর্ব্বা কুশাশ্চ সমিধঃ ক্রমাৎ॥ তত উদীচ্যং কর্ম্ম সমাপ্য দক্ষিণাং দদ্যাৎ। দক্ষিণাস্তু। ধেনুঃ শঙ্খস্তথানড্বান্ হেম বাসো হয়স্তথা। কৃষ্ণা গৌরায়সশ্ছাগ এতা বৈ দক্ষিণাঃ স্মৃতাঃ॥ অস্য যাগস্য প্রয়োজনং যথা। গোচরে বা বিলগ্নে বা যে গ্রহা রিষ্টসূচকাঃ। পূজয়েত্তান্ প্রযত্নেন পূজিতাঃ স্যুঃ শুভাবহাঃ॥ শ্রীকামঃ শান্তিকামো বা গ্রহযজ্ঞং সমাচরেৎ। বৃষ্ট্যায়ুঃপুষ্টিকামো বা তথৈবাভিচরন্নপি॥ ইতি গ্রহযাগতত্ত্বং॥

গ্রহরাজঃ (পুং) সূর্য্যঃ। চন্দ্রঃ। ইতি মেদিনী॥ বৃহস্পতিঃ। ইতি শব্দরত্নাবলী॥

গ্রহাধারঃ(পুং)ধ্রুবনক্ষত্রং। ইতি শব্দরত্নাবলী॥

গ্রহাময়ঃ (পুং) আবেশঃ। স তু ভূতাদিনা জাতরোগঃ। ইতি রাজনির্ঘণ্টঃ॥

গ্রহাশী [ন্] (পুং) গ্রহনাশবৃক্ষঃ। ইতি শব্দরত্নাবলী॥

গ্রহাহ্বয়ঃ ( পুং ) ভূতাঙ্কুশবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

গ্রহীতা [ ঋ ] (ত্রি) গ্রহণকর্ত্তা। তৎপর্য্যায়ঃ। গৃহয়ালুঃ ২। ইত্যমরঃ॥

গ্রামঃ ( পুং ) বিপ্রাদিবর্ণপ্রায়া প্রাকারপরিখাদিরহিতা বহুজনবসতিঃ। ইতি ভরতঃ॥ তৎপর্য্যায়ঃ। সম্বসথঃ ২। ইত্যমরঃ॥ হট্টাদিশূন্যবসতিঃ। ইতি শ্রীধরস্বামী॥ তথা শূদ্রজনপ্রায়া সুসমৃদ্ধকৃষীবলা। ক্ষেত্রোপযোগভূমধ্যে বসতির্গ্রামসংজ্ঞিকা॥ ইতি মার্কণ্ডেয়পুরাণং॥ শব্দাদিপূর্ব্বকশ্চেৎ সমূহার্থঃ। ইতি বিশ্বঃ॥ যথা শব্দগ্রামঃ ভূতগ্রামঃ গুণগ্রামঃ। ইত্যাদি॥*॥ স্বরভেদঃ। যথা। ষড়্জমধ্যমগান্ধারাস্ত্রয়ো গ্রামা মতা ইহ। ষড়্জগ্রামো ভবেদত্র মধ্যমগ্রাম এব চ॥ সুরলোকে চ গান্ধারো গ্রামঃ প্রচরতি স্বয়ং। ইদানীং ষড়্জগ্রামস্য মূর্চ্ছনাঃ ক্রিয়ন্তে। মূর্চ্ছনা প্রস্তার ইত্যর্থঃ। ষ ঋ গ ম প ধ নিশ্চ। ইতি ষড়্জস্য। মপৌ ধনী ষ ঋ চ গঃ। ইতি মধ্যমস্য। ঋগৌ মপৌ ধনী ষোঽন্তে। ইতি গান্ধারস্য মূর্চ্ছনাঃ। ষ ঋ গ ম প ধ নিশ্চ। নিষৌ ঋগমপাশ্চ ধঃ। ধ নি ষ ঋ গ ম পোঽন্তে। পধৌ নিষৌ ঋগৌ চ মঃ। মপৌ ধনী চ ষ ঋ গ। গ ম প ধ নি ষশ্চ ঋঃ। ঋগৌ মপৌ ধনী ষোঽন্তে। মূর্চ্ছনাঃ সপ্ত ষড়্জাঃ॥ আদিদ্বিত্রিচতুঃপঞ্চষট্সপ্তস্বপি সমে মতা। মধ্যমো মো যদা তেষু মধ্যমগ্রামমূর্চ্ছনা॥ আদৌ গকারো যত্রাস্তি গান্ধারগ্রামমূর্চ্ছনা। তত্র ষড়্জগ্রামপ্রস্তারস্যায়ং ক্রমঃ। ষড়্জাম্নিষধান্তং নের্ধান্তং ধাৎ পান্তমিষ্যতে। পান্মান্তং মধ্যমাদ্গান্তং গাদৃষভান্তমিষ্যতে॥ ঋষভাৎ ষান্তমিত্যাহুঃ ষড়্জগ্রামস্য মূর্চ্ছনাঃ। মধ্যমগ্রামজাস্ত্বেবং মূর্চ্ছনাঃ পরিকীর্ত্তিতাঃ। মকারাদিক্রমেণৈব গকারান্তাস্ত তা মতাঃ। তারো মন্দ্রশ্চ আবশ্চ ইতি গ্রামনিরূপণাঃ। ষড়্জগ্রামমূর্চ্ছনায়াঃ সপ্তকোষ্ঠানি। ব্রহ্মবিষ্ণুশিবৈরুক্তাস্ত্রয়ো গ্রামা মনোহরাঃ॥ ইতি সঙ্গীতদামোদরঃ॥

গ্রামকূটঃ ( পুং ) শূদ্রঃ। ইতি ত্রিকাণ্ডশেষঃ॥

গ্রামজনিষ্পাবী ( স্ত্রী ) নখনিষ্পাবী। ইতি রাজনির্ঘণ্টঃ॥

গ্রামণীঃ ( পুং ) বিষ্ণুঃ। যথা। অগ্রণীর্গ্রামণীঃ শ্রীমান্ ন্যায়ো নেতা সমীরণঃ। ইতি তস্য সহস্রনামস্তোত্রং॥ যক্ষঃ। যথা। স রথাধিষ্ঠিতো দেবৈরাদিত্যৈর্ঋষিভিস্তথা। গন্ধর্ব্বৈরপ্সরোভিশ্চ গ্রামণীসর্পরাক্ষসৈঃ॥ ইতি বিষ্ণুপুরাণে ২ অংশে ১০ অধ্যায়ঃ॥ দেবৈরাদিত্যৈঃ আদিত্যা এব দেবাস্তৈঃ। গ্রামণীর্যক্ষঃ। ইতি তট্টীকা॥ নাপিতঃ। ইত্যমরঃ॥

গ্রামণীঃ ( ত্রি ) প্রধানঃ। অধিপতিঃ। ইতি মেদিনী॥ ভোগিকঃ। ইতি হেমচন্দ্রঃ॥

গ্রামণীঃ ( স্ত্রী ) বেশ্যা। গ্রামেয়া। নীলিকা। ইতি হেমচন্দ্রঃ॥

গ্রামতক্ষঃ ( পুং ) গ্রামাধীনঃ কাষ্ঠতট্। গ্রামায়ত্তস্তক্ষা। গেঁয়ে ছুতার ইতি ভাষা। ইত্যমরঃ॥

গ্রামতা ( স্ত্রী ) গ্রামসমূহঃ। ইত্যমরঃ ॥ গ্রামত্বঞ্চ ॥

গ্রামভৃতঃ ( পুং ) গ্রামপ্রেষ্যঃ। স তু ব্রাহ্মণশ্চেৎ পঞ্চমাব্রাহ্মণঃ। ইত্যাহ্নিকতত্ত্বং ॥

গ্রামমদ্গুরিকা ( স্ত্রী ) শৃঙ্গীমৎস্যঃ। গ্রামযুদ্ধং। ইতি মেদিনী ॥

গ্রামমুখঃ ( পুং ) হট্টঃ। ইতি শব্দরত্নাবলী ॥

গ্রামমৃগঃ ( পুং ) কুক্কুরঃ। ইতি শব্দরত্নাবলী॥

গ্রামযাজকঃ ( পুং ) গ্রামস্থনানাবর্ণানাং পুরোহিতঃ। স তু চতুর্থাব্রাহ্মণঃ। যথা। অব্রাহ্মণাস্তু ষট্ প্রোক্তা ঋষিণা তত্ত্ববেদিনা। আদ্যো রাজভৃতস্তেষাং দ্বিতীয়ঃ ক্রয়বিক্রয়ী ॥ তৃতীয়ো বহুযাজ্যঃ স্যাৎ চতুর্থো গ্রামযাজকঃ। পঞ্চমস্তু ভৃতস্তেষাং গ্রামস্য নগরস্য চ ॥ অনাদিত্যাস্তু যঃ পূর্ব্বাং সাদিত্যাঞ্চৈব পশ্চিমাং। নোপাসীত দ্বিজঃ সন্ধ্যাং স ষষ্ঠোঽব্রাহ্মণঃ স্মৃতঃ ॥ ইতি শাতাতপঃ ॥

গ্রামস্থঃ ( ত্রি ) গ্রামবাসী। গ্রামে তিষ্ঠতি য ইত্যর্থে ডপ্রত্যয়ঃ ॥

গ্রামহাসকঃ ( পুং ) ভগিনীপতিঃ। ইতি শব্দরত্নাবলী ॥

গ্রামাধানং ( ক্লী ) মৃগয়া। ইতি হলায়ুধঃ ॥

গ্রামান্তং ( ক্লী ) গ্রামসমীপং। তৎপর্য্যায়ঃ। উপশল্যং ২। ইত্যমরঃ ॥ গ্রামান্তিকং ৩। ইতি বোপালিতঃ ॥

গ্রামিণী ( স্ত্রী ) নীলীবৃক্ষঃ। ইতি জটাধরঃ ॥

গ্রামী [ ন্ ] ( ত্রি ) গ্রামবিশিষ্টঃ। গাঁই ইতি ভাষা। যথা। রামো গড়গড়গ্রামী নিপঃ কেশরকোণিতঃ। কেশরকোণীতি খ্যাতো গ্রামী গ্রামবতাম্বরঃ ॥ ইতি ব্রাহ্মণকুলাচার্য্যকারিকা ॥

গ্রামীণঃ ( পুং ) গ্রাম্যশূকরঃ। ইতি রাজনির্ঘণ্টঃ ॥ কুক্কুরঃ। কাকঃ। গ্রামোৎপন্নে ত্রি। ইতি মেদিনী ॥

গ্রামীণা ( স্ত্রী ) নীলীবৃক্ষঃ। ইতি মেদিনী ॥ পালক্যশাকং। ইতি রাজনির্ঘণ্টঃ ॥

গ্রামেয়কঃ ( ত্রি ) গ্রাম্যঃ। ইতি হেমচন্দ্রঃ ॥

গ্রামেয়া ( স্ত্রী ) গ্রাম্যনারী। ইতি গ্রামণীশব্দার্থে হেমচন্দ্রঃ ॥

গ্রামেশঃ ( ত্রি ) গ্রামেশ্বরঃ। গ্রামাধিপতিঃ। যথা। যং কঞ্চিৎ পুরুষাধমং কতিপয়গ্রামেশমল্পার্থদং সেবায়ৈ মৃগয়ামহে নরমহো মূঢ়া বরাকা বয়ং। ইতি শান্তিশতকং ॥

গ্রাম্যঃ ( ত্রি ) গ্রামোৎপন্নঃ। তৎপর্য্যায়ঃ। গ্রামেয়কঃ ২ গ্রামীণঃ ৩। ইতি হেমচন্দ্রঃ ॥ ভণ্ডাদিবচনং। হালিকশাকটিকপ্রধানত্বাৎ গ্রামে ভবং গ্রাম্যং। ইতি ভরতঃ ॥ তৎপর্য্যায়ঃ। অশ্লীলং ২। ইত্যমরঃ ॥

গ্রাম্যকন্দঃ ( পুং ) গ্রাম্যোল্লঃ। বনওল ইতি ভাষা। তৎপর্য্যায়ঃ। স্থলকন্দঃ ২। ইতি রত্নমালা ॥ স তু দোবলঃ। ইতি রাজবল্লভঃ ॥

গ্রাম্যকর্কটী ( স্ত্রী ) কুষ্মাণ্ডঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

গ্রাম্যকুঙ্কুমং ( ক্লী ) কুসুম্ভং। ইতি ত্রিকাণ্ডশেষঃ ॥

গ্রাম্যধর্ম্মঃ ( পুং ) মৈথুনং। ইত্যমরঃ ॥

গ্রাম্যপশুঃ (পুং) গ্রামজাতজন্তুঃ। স তু সপ্তবিধো যথা। গৌঃ ১ অজঃ ২ মেষঃ ৩ মনুষ্যঃ ৪ অশ্বঃ ৫ অশ্বতরঃ ৬ গর্দ্দভঃ ৭। ইতি তিথ্যাদিতত্ত্বং ॥

গ্রাম্যমদ্গুরিকা (স্ত্রী) শৃঙ্গীমৎস্যঃ। ইতি হারাবলী ॥

গ্রাম্যমৃগঃ (পুং) কুক্কুরঃ। ইতি জটাধরঃ ॥

গ্রাম্যরাশিঃ (পুং) মিথুনং। কন্যা। তুলা। বৃশ্চিকঃ। ধনুঃ। কুম্ভঃ। রাত্রৌ মেষঃ বৃষশ্চ। ইতি জ্যোতিষং ॥

গ্রাম্যবল্লভা (স্ত্রী) পালক্যশাকং। ইতি রাজনির্ঘণ্টঃ ॥

গ্রাম্যশূকরঃ (পুং স্ত্রী) গ্রামোৎপন্নবরাহঃ। তৎপর্য্যায়ঃ। বিড়্বরাহঃ ২ গ্রামীণঃ ৩ গ্রামক্রোড়ঃ ৪ গ্রামকোলঃ ৫ বিষ্কলঃ ৬ দারকঃ ৭। তস্য মাংসস্য গুণাঃ। বনবরাহমাংসাদ্গুরুত্বং। মেদোবলবীর্য্যবৃদ্ধিকারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

গ্রাম্যা (স্ত্রী) নীলী। নিষ্পাবী। ইতি রাজনির্ঘণ্টঃ ॥

গ্রাম্যাশ্বঃ (পুং) গর্দ্দভঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

গ্রাবা [ন্] (পুং) প্রস্তরঃ। পর্ব্বতঃ। ইত্যমরঃ ॥ মেঘঃ। ইতি বিশ্বঃ ॥ দৃঢ়ে ত্রি। ইতি শব্দরত্নাবলী ॥

গ্রাসঃ (পুং) মুখপূরণান্নাদি। যথা। কুক্কুটাণ্ডপ্রমাণাংশ্চ যাবাংশ্চ প্রবিশেন্মুখং। এতং গ্রাসং বিজানীয়াৎ শুদ্ধ্যর্থং কায়শোধনং ॥ ইতি প্রায়শ্চিত্তপ্রকরণে পরাশরঃ ॥ তৎপর্য্যায়ঃ। কবলঃ ২। ইত্যমরঃ ॥ গুড়েরকঃ ৩ পিণ্ডঃ ৪ গণ্ডোলঃ ৫ কবকঃ ৬ গুরুঃ ৭। ইতি হেমচন্দ্রঃ ॥

গ্রাহঃ (পুং) গ্রহণং। জলজন্তুবিশেষঃ। হাঙ্গর ইতি ভাষা। জলহস্তী ইতি কেচিৎ ॥ তৎপর্য্যায়ঃ। অবহারঃ ২। ইত্যমরভরতৌ ॥ শিশুকঃ। ইতি রাজনির্ঘণ্টঃ ॥

গ্রাহকঃ (পুং) সিতাবরশাকং। ইতি রাজনির্ঘণ্টঃ ॥ হিংস্রপক্ষী। ব্যালগ্রাহী। গ্রহীতরি ত্রি। ইতি শব্দরত্নাবলী ॥

গ্রাহিণী (স্ত্রী) ক্ষুদ্রদুরালভা। ইতি রাজনির্ঘণ্টঃ ॥ তাম্রমূলাবৃক্ষঃ। ক্ষিরই ইতি ভাষা। ইতি রত্নমালা ॥

গ্রাহিফলঃ (পুং) কপিত্থবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

গ্রাহী [ন্] (পুং) কপিত্থঃ। ইতি শব্দচন্দ্রিকা ॥

গ্রাহী [ন্] (ত্রি) মলবন্ধকঃ। ধারকঃ। ইতি বৈদ্যকং ॥ গ্রহণকর্ত্তা। ইতি ব্যাকরণং ॥

গ্রীবা (স্ত্রী) গলঘাটাদিসমুদিতা। ইতি ভরতঃ ॥ সা তু গর্ভে মাসমাত্রেণ ভবতি। ইতি সুখবোধঃ ॥ তৎপর্য্যায়ঃ। শিরোধিঃ ২ কন্ধরা ৩। ইত্যমরঃ ॥ কন্ধিঃ ৪ শিরোধরা ৫। ইতি রাজনির্ঘণ্টঃ ॥ কন্ধরাশিরা। ইতি মেদিনী ॥

গ্রীবী [ন্] (পুং স্ত্রী) উষ্ট্রঃ। ইতি জটাধরঃ ॥ প্রশস্তগ্রীবাযুক্তে ত্রি ॥

গ্রীষ্মঃ (পুং) ঋতুবিশেষঃ। স তু জ্যৈষ্ঠাষাঢ়ৌ। তৎপর্য্যায়ঃ। উষ্ণকঃ ২ নিদাঘঃ ৩ উষ্ণোপগমঃ ৪ উষ্ণঃ ৫ উষ্মাগমঃ ৬ তপঃ ৭। ইত্যমরঃ ॥ ঘর্ম্মঃ ৮ তাপনঃ ৯

উষ্ণাগমঃ ১০ উষ্ণকালঃ ১১। গ্রৈষ্মিকস্বন-ভিস্যন্দি জলমিত্যেষ নিশ্চয়ঃ। ইতি রাজনির্ঘণ্টঃ॥ তত্র জাতফলং। গ্রীষ্মোদ্ভবো ভোগভবানুরক্তো বক্তা সুশীলো জলকেলিশীলঃ। বিদ্যাধনৈশ্বর্য্যযশোমনোজ্ঞো ধন্বী সুবেশঃ পরদাররচিত্তঃ॥ ইতি কোষ্ঠীপ্রদীপঃ॥ উষ্ণঃ। গরমি ইতি তাৎ ইতি চ ভাষা। ইতি মেদিনী॥ তদ্বতি ত্রি॥

গ্রীষ্মজা (স্ত্রী) লবণী। লোণা ইতি ভাষা। ইতি শব্দচন্দ্রিকা॥

গ্রীষ্মপুষ্পী (স্ত্রী) করুণীপুষ্পবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

গ্রীষ্মভবা (স্ত্রী) নবমল্লিকা। ইতি রত্নমালা॥

গ্রীষ্মসুন্দরকঃ (পুং) শাকবিশেষঃ। গিমা ইতি ভাষা। তস্য গুণাঃ। তিক্তত্বং। লঘুত্বং। কফপিত্তদোষনাশিত্বং। রুচিকারিত্বঞ্চ। ইতি রাজবল্লভঃ॥

গ্রীষ্মহাসং (ক্লী) ইন্দ্রতূলকং। বুড়ীর সূতা। ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ॥

গ্রীষ্মী (স্ত্রী) নবমল্লিকা। ইতি রাজনির্ঘণ্টঃ॥

গ্রীষ্মোদ্ভবা (স্ত্রী) নবমল্লিকা। ইতি রাজনির্ঘণ্টঃ॥

গ্রুচ ইর্ উ চৌর্য্যে। গতৌ। ইতি কবিকল্পদ্রুমঃ॥ রেফযুক্তঃ। পঞ্চমস্বরী। ইর্ অগ্রুচৎ অগ্রোচীৎ। উ গ্রোচিত্বা গ্রুক্ত্বা। ইতি দুর্গাদাসঃ॥

গ্রৈবং (ক্লী) গ্রীবাভূষণং। ইতি শব্দরত্নাবলী॥

গ্রৈবেয়ং (ক্লী) কণ্ঠভূষণং। ইতি শব্দরত্নাবলী॥

গ্রৈবেয়কং (ক্লী) কণ্ঠভূষা। ইত্যমরঃ॥

গ্রৈষ্মী (স্ত্রী) নবমল্লিকা। ইতি ত্রিকাণ্ডশেষঃ॥ গ্রীষ্মসম্বন্ধিনি ত্রি নাস্তস্য॥

গ্লস উ ঙ ভক্ষণে। ইতি কবিকল্পদ্রুমঃ॥ অন্তঃস্থতৃতীয়যুক্তঃ। উ গ্লসিত্বা গ্লস্ত্বা। ঙ গ্লসতে। ইতি দুর্গাদাসঃ॥

গ্লস্তঃ (ত্রি) ভক্ষিতঃ। ইত্যমরঃ॥

গ্লহ উ কি আদানে। ইতি কবিকল্পদ্রুমঃ॥ অন্তঃস্থতৃতীয়যুক্তঃ। উ অগ্লহীৎ অগ্লাক্ষীৎ। কি গ্লাহয়তি গ্লহতি। এষঃ কৈশ্চিন্ন মন্যতে। ইতি দুর্গাদাসঃ॥

গ্লহঃ (পুং) অক্ষক্রীড়াসু পণঃ। আড় ইতি বাজি ইতি চ ভাষা। ইত্যমরঃ॥

গ্লাতা [ঋ] (ত্রি) গ্লানিযুক্তঃ। ইতি ব্যাকরণং॥

গ্লানঃ (ত্রি) রোগাৎ ক্ষীণদেহঃ। তৎপর্য্যায়ঃ। গ্লাস্নুঃ ২। ইত্যমরঃ॥ রোগী। ইতি রাজনির্ঘণ্টঃ॥

গ্লানিঃ (স্ত্রী) বলদীনতা। ইতি হেমচন্দ্রঃ॥ রোগঃ। ইতি রাজনির্ঘণ্টঃ॥

গ্লাস্নুঃ (ত্রি) গ্লানঃ। ইত্যমরঃ॥

গ্লুচ ইর্ উ চৌর্য্যে। গতৌ। ইতি কবিকল্পদ্রুমঃ॥ অন্তঃস্থতৃতীয়যুক্তঃ। পঞ্চমস্বরী। ইর্ অগ্লুচৎ অগ্লোচীৎ। উ গ্লোচিত্বা গ্লুক্ত্বা। ইতি দুর্গাদাসঃ॥

গ্লুঞ্চ উ ইর্ গতৌ। ইতি কবিকল্পদ্রুমঃ॥ অন্তঃস্থতৃতীয়যুক্তাদিঃ। পঞ্চমস্বরী। উ গ্লুঞ্চিত্বা গ্লুক্ত্বা। ইর্ অগ্লুচৎ অগ্লোঞ্চীৎ। ইতি দুর্গাদাসঃ॥

গ্লেপ ঋ ঙ দৈন্যে। গতৌ। চালে। ইতি কবিকল্পদ্রুমঃ॥ অন্তঃস্থতৃতীয়যুক্তঃ। ঙ গ্লেপতে

নির্ধনঃ সদা। ঋ অজিঘ্রেপৎ। ইতি দুর্গাদাসঃ ॥

ঘ্রেয়ঃ (ত্রি) ঘ্রানিযোগ্যঃ। ইতি ব্যাকরণং ॥

ঘ্রেব ঋ ঙ সেবে। ইতি কবিকল্পদ্রুমঃ ॥ অন্তঃস্থতৃতীয়যুক্তঃ। ঋ অজিঘ্রেবৎ। ঙ ঘ্রেবতে। ইতি দুর্গাদাসঃ ॥

ঘ্রেষ ঋ ঙ অম্বেষে। ইতি কবিকল্পদ্রুমঃ ॥ অন্তঃস্থতৃতীয়যুক্তঃ। ঋ অজিঘ্রেষৎ। ঙ ঘ্রেষতে জিঘ্রেষে। অম্বেষোহনুসন্ধানং। ঘ্রেষতে যঃ সতাং মার্গমিতি হলায়ুধঃ। ইতি দুর্গাদাসঃ ॥

ঘ্রৈ ক্লমে। ইতি কবিকল্পদ্রুমঃ ॥ অন্তঃস্থতৃতীয়যুক্তঃ। ক্লমো হর্ষক্ষয়ঃ। গ্লায়তি লোকঃ শোকাৎ। অনুপসর্গস্য ঞৌ জ্বল হ্বল হ্মল ইত্যাদিনা বা হ্রস্বঃ। গ্লপয়তি গ্লাপয়তি। সোপসর্গস্য তু প্রগ্লাপয়তি। ইতি দুর্গাদাসঃ ॥

গ্লৌঃ (পুং) চন্দ্রঃ। কর্পূরঃ। ইত্যমরঃ ॥

## ঘ

ঘ ঘকারঃ। স তু ব্যঞ্জনচতুর্থবর্ণঃ। অস্যোচ্চারণস্থানং কণ্ঠঃ। ইতি ব্যাকরণং ॥ অস্য স্বরূপং যথা। ঘকারং চঞ্চলাপাঙ্গি চতুষ্কোণাত্মকং সদা। পঞ্চদেবময়ং বর্ণং অরুণাদিত্যসন্নিভং ॥ নির্গুণং ত্রিগুণোপেতং সদা ত্রিগুণসংযুতং। সর্ব্বগং সর্ব্বদং শান্তং ঘকারং প্রণমাম্যহং ॥ ইতি কামধেনুতন্ত্রং ॥ অস্যোৎপত্তির্গবর্ণে দ্রষ্টব্যা। তস্য লেখনপ্রকারাদির্যথা। সৃষ্টিরূপা বামরেখা কিঞ্চিদাকুঞ্চিতা ততঃ। কুণ্ডলীরূপমাস্থায় ততোহধোগত্য দক্ষতঃ ॥ অত ঊর্দ্ধং গতা রেখা শম্ভুর্নারায়ণস্তয়োঃ। ব্রহ্মস্বরূপিণী দেবি মাত্রাশক্তিঃ প্রকীর্ত্তিতা ॥ ইতি। অস্য ধ্যানং যথা। মালতীপুষ্পবর্ণাভাং ষড়্ভুজাং রক্তলোচনাং। শুক্লাম্বরপরীধানাং শুক্লমাল্যবিভূষিতাং ॥ সদা স্মেরমুখীং রম্যাং লোচনত্রয়রাজিতাং। এবং ধ্যাত্বা ঘকারস্তু তন্মন্ত্রং দশধা জপেৎ ॥ তৎপ্রণামমন্ত্রো যথা। নির্গুণং ত্রিগুণোপেতং সদা ত্রিগোলসংযুতং। সর্ব্বগং সর্ব্বদা শান্তং ঘকারং প্রণমাম্যহং ॥ ইতি চ বর্ণোদ্ধারতন্ত্রং ॥ * ॥ তস্য নামানি যথা। ঘঃ খড়্গী ঘুর্ঘুরো ঘণ্টী ঘণ্টীশস্ত্রিপুরান্তকঃ। বায়ুঃ শিবোত্তমঃ সত্যা কিঙ্কিণী ঘোরনায়কঃ ॥ মরীচির্ব্বরুণো মেধা কালরূপী চ দাম্ভিকঃ। লম্বোদরা জ্বালমূলং নন্দেশো হননং ধ্বনিঃ ॥ ত্রৈলোক্যবিদ্যা সংহর্ত্তা কামাখ্যমনঘাময়ঃ। ইতি নানাতন্ত্রাণি ॥

ঘঃ (পুং) ঘণ্টা। ঘর্ঘরশব্দঃ। ইতি মেদিনী ॥

ঘগ্ঘ হসনে। ইতি কবিকল্পদ্রুমঃ ॥ কণ্ঠ্যবর্গতৃতীয়োপধঃ। ঘগ্ঘতি। ইতি দুর্গাদাসঃ ॥

ঘট ক হিংসে। সংঘাতে। দ্যুতৌ। ইতি কবিকল্পদ্রুমঃ ॥ ক ঘাটয়তি কবাটং দ্বারি জনঃ সংযোজয়তীত্যর্থঃ। ইতি দুর্গাদাসঃ ॥

ঘট ই কি দ্যুতৌ। ইতি কবিকল্পদ্রুমঃ ॥ ই ঘণ্ট্যতে। কি ঘণ্টয়তি ঘণ্টতি। দ্যুতিদীপ্তিঃ। দ্যুত্যর্থত্বেন পাক্ষিকচুরাদিত্বে সিদ্ধে কি করণমর্থান্তরেঽপি পাক্ষিক-

চুরাদিস্থার্থং । তথা চ । ক্রিয়াবাচিত্ব-মাখ্যাতুং প্রসিদ্ধোঽর্থঃ প্রদর্শিতঃ। প্রয়োগতোঽন্যে মন্তব্যা অনেকার্থা হি ধাতবঃ॥ ইতি বোপদেবঃ। প্রসিদ্ধার্থং কথয়িতুং ধাতূনাং প্রসিদ্ধোঽর্থঃ প্রদর্শিতঃ। কিন্তু মহাকবিপ্রয়োগং দৃষ্ট্বান্যেঽপ্যর্থা মন্তব্যাঃ হি যস্মাৎ ধাতবোঽনেকার্থা ভবন্তীত্যর্থঃ। তেন হিংসান্তত্যোঃ পঠিতস্যাপি শংসতেঃ কথনার্থত্বে ন মে হ্রিয়া শংসতি কিঞ্চি-দীপ্সিতমিতি রঘৌ কথয়তীত্যেবার্থঃ। এবং দীপ্তিপঠিতস্যাপি তর্কধাতোর্বিতর্কণার্থত্বে তর্কয়ত্যম্মগুণং সুধীরিত্যাদিঃ। ইতি দুর্গাদাসঃ॥

ঘট ষ ঙ ম চেষ্টে। ইতি কবিকল্পদ্রুমঃ॥ ষ ঘটা। ঙ ঘটতে পঠিতুং শিষ্যঃ। ম ঘটয়তি। ঘটতীতি ঘটো জ্ঞেয়ো নাঘটন্ ঘটতামিয়াদিতি তু ঘটতে ঘটঃ পচাদিত্বা-দন্। ততো ঘট ইবাচরতীতি কৌ সাধ্যং। ইতি দুর্গাদাসঃ॥

ঘটঃ (পুং) কলসঃ। ইত্যমরঃ॥ তস্য পরি-মাণং কলশশব্দে দ্রষ্টব্যং। সমাধিভেদঃ। স তু কুম্ভকং। ইভশিরঃ। কূটকুটঃ। ইতি মেদিনী॥ কুম্ভরাশিঃ। যথা। সিংহে বা যদি গোঘটে গতনরঃ সর্ব্বার্থসিদ্ধিং লভেৎ। ইতি সময়প্রদীপঃ॥ দ্রোণপরি-মাণং। ইতি বৈদ্যকপরিভাষা॥ কুম্ভপরি-মাণং। যথা। দশদ্রোণো ভবেৎ খারী কুম্ভস্তু দ্রোণবিংশতিঃ। ইতি প্রায়শ্চিত্ত-তত্ত্বে কাত্যায়নঃ॥

ঘটকঃ (পুং) কুলাচার্য্যঃ। তস্যাস্পৃশ্যত্বং। যথা। বরং চাণ্ডালসংস্পর্শং কুর্য্যাত্তু সাধকোত্তমঃ। তথাপ্যস্পৃশ্যগণকং সর্ব্বদা তং পরিত্যজেৎ॥ দূষিতাঃ কলিকালেষু ভারতে বিবিধাঃ প্রজাঃ। অতএব মহে-শানি সর্ব্বে সংসর্গদূষিতাঃ॥ ঘটকং ব্রাহ্মণং দেবি সংস্পর্শে যত্নতস্ত্যজেৎ। ইতি শাক্তানন্দতরঙ্গিণ্যাং ষোড়শোল্লাসে মহিষমর্দ্দিনীতন্ত্রবচনং॥ যোজকঃ। তৎ-পর্য্যায়ঃ। ব্রাহ্মরঃ ২। ইতি ত্রিকাণ্ড-শেষঃ॥ তস্য লক্ষণং যথা। ধাবকো ভাবকশ্চৈব যোজকশ্চাংশকস্তথা। দূষক-স্তাবকশ্চৈব ষড়েতে ঘটকাঃ স্মৃতাঃ॥ অন্যচ্চ। কে নো বিদন্তি পুরুষা পুরুষানু-পূর্ব্বিমুর্ব্বীতলে কুলভৃতাং পরিবর্তনঘা। অত্যন্তসূক্ষ্মমপি যে কুলতারতম্যং জানন্তি তে হি ঘটকা ন তু যোজকাদ্যাঃ॥ ইতি কুলদীপিকা॥ বনস্পতিঃ। পুষ্পেণ বিনা যঃ ফলতি সঃ। ইতি ভুরিপ্রয়োগঃ॥

ঘটদাসী (স্ত্রী) কুট্টনী। তৎপর্য্যায়ঃ। কুট্টিনী ২ ইজ্যা ৩ বৃত্তভালী ৪ গণে-রুকা ৫। ইতি ত্রিকাণ্ডশেষঃ॥

ঘটনা (স্ত্রী) সংঘাতীকরণং। সমূহীকরণং। যথা। করিণাং ঘটনা ঘটা। ইত্যমরঃ॥ যোজনা। মেলনং। যথা। অঘটনঘটনা-পটীয়সী মায়া। ইতি মায়ালক্ষণং॥

ঘটযোনিঃ (পুং) অগস্ত্যমুনিঃ। ইতি হলা-য়ুধঃ॥

ঘটরাজঃ (পুং) কুম্ভঃ। ইতি হারাবলী॥

ঘটা (স্ত্রী) করিণাং ঘটনা। হস্তিনাং যুদ্ধাদা-বেকত্র সংঘাতীকরণং। ইত্যমরঃ॥

ঘটনং। গোষ্ঠী। সভা। ইতি মেদিনী॥ সমূহঃ। যথা। যদগারঘটাট্টকুট্টিমস্রবদিন্দুপলতুন্দিলাপয়া। ইতি শ্রীহর্ষঃ॥

ঘটালাবুঃ (স্ত্রী) কুম্ভতুম্বী। ইতি রাজনির্ঘণ্টঃ॥

ঘটিকং (ক্লী) নিতম্বঃ। ইতি শব্দচন্দ্রিকা॥

ঘটিকা (স্ত্রী) পাদগ্রন্থিঃ। ইতি শব্দরত্নাবলী॥ মুহূর্ত্তঃ। ইতি জটাধরঃ॥ দণ্ডঃ। ঘড়ী ইতি ভাষা। যথা। চতস্রো ঘটিকাঃ প্রাতররুণোদয় উচ্যতে। ইতি তিথ্যাদিতত্ত্বং॥

ঘটী (স্ত্রী) দণ্ডঃ। ঘড়ী ইতি ভাষা। ইতি ভূরিপ্রয়োগঃ॥ ক্ষুদ্রঘটঃ। ইতি মুগ্ধবোধং॥

ঘটীকারঃ (পুং) অঘটং ঘটং করোতি যঃ। কুলালঃ। ইতি মুগ্ধবোধং॥

ঘটীযন্ত্রং (ক্লী) কূপাজ্জলোত্তোলনার্থরজ্জুসহিতঘটঃ। জলতোলা কল ইতি ভাষা। তৎপর্য্যায়ঃ। উদ্ঘাটনং ২। ইত্যমরঃ॥

ঘটোৎকচঃ (পুং) রাক্ষসবিশেষঃ। স তু হিড়িম্বারাক্ষসীগর্ভে ভীমসেনাজ্জাতঃ॥ ইতি মহাভারতং॥

ঘটোৎকচান্তকঃ (পুং) কর্ণরাজঃ। ইতি ত্রিকাণ্ডশেষঃ॥

ঘটোদ্ভবঃ (পুং) অগস্ত্যমুনিঃ। ইতি হেমচন্দ্রঃ

ঘট্ট ক চালে। ইতি কবিকল্পদ্রুমঃ॥ টবয়াস্তঃ চালশ্চলনং। ক ঘট্টয়তি মেঘো বায়ুনা ইতি দুর্গাদাসঃ॥

ঘট্ট ঙ চালে। ইতি কবিকল্পদ্রুমঃ॥ টবয়াস্তঃ ঙ ঘট্টতে। ইতি দুর্গাদাসঃ॥

ঘট্টঃ (পুং) নদ্যাদৌ স্নানাদ্যর্থং প্রবেশস্থানং। ঘাট্ ইতি যস্য প্রসিদ্ধিঃ। জগান্ত ইতি খ্যাতো বা। ইতি লিঙ্গাদিসংগ্রহে অমরভরতৌ॥ তৎপর্য্যায়ঃ। তীর্থাবতারঃ ২। ইতি হেমচন্দ্রঃ॥

ঘট্টগা (স্ত্রী) নদীভেদঃ। যথা মলাপহা ভীমরথী চ ঘট্টগা যথা চ কৃষ্ণা জলসাম্যতাগুণৈঃ। মলাপহা ঘট্টপয়স্তথাপি পথ্যং লঘু স্বাদুতরং সুকান্তিদং॥ ইতি রাজনির্ঘণ্টঃ॥

ঘট্টজীবী [ন্] (পুং) বর্ণসঙ্করজাতিবিশেষঃ। পাটুনি ইতি ভাষা। স তু বৈশ্যায়াং রজকাজ্জাতঃ। ইতি বিবাদার্ণবসেতুঃ॥

ঘট্টনা (স্ত্রী) চলনা। বৃত্তিঃ। ইতি হেমচন্দ্রঃ॥

ঘণ দ ঞ উ দীপ্তৌ। ইতি কবিকল্পদ্রুমঃ॥ দ ঞ ঘণোতি ঘণুতে। উ ঘণিত্বা ঘত্বা। ইতি দুর্গাদাসঃ॥

ঘণ্টঃ (পুং) স্বনামখ্যাতব্যঞ্জনবিশেষঃ। মৎস্যঘণ্টগুণঃ। বলরুচিকারিত্বং। বাতনাশিত্বঞ্চ। ইতি রাজবল্লভঃ॥

ঘণ্টকঃ (পুং) ক্ষুপবিশেষঃ। ঘেঁটুকোল ইতি ভাষা। অস্য মূলগুণাঃ। কফনাশিত্বং। কটুপাকিত্বং। পিত্তকারিত্বঞ্চ। ইতি রাজবল্লভঃ॥ ঘণ্টকর্ণোঽপি পাঠঃ॥

ঘণ্টা (স্ত্রী) কাংস্যনির্ম্মিতবাদ্যবিশেষঃ। যথা। সর্ব্ববাদ্যময়ী ঘণ্টা বাদ্যাভাবে নিযোজয়েৎ। ইতি স্মৃতিঃ॥ শঙ্খো যস্য গৃহে নাস্তি ঘণ্টা বা গরুড়াঙ্কিতা। পুরতো বাসুদেবস্য ন স ভাগবতঃ কলৌ॥ ইতি পদ্মপুরাণে পাতালখণ্ডং॥ অথ ঘণ্টামাহাত্ম্যং

উক্তঞ্চ স্কান্দে শ্রীব্রহ্মনারদসংবাদে। স্নানার্চ্চনক্রিয়াকালে ঘণ্টানাদং করোতি যঃ। পুরতো বাসুদেবস্য তস্য পুণ্যফলং শৃণু॥ বর্ষকোটিসহস্রাণি বর্ষকোটিশতানি চ। বসতে দেবলোকে তু অপ্সরোগণসেবিতঃ॥ সর্ব্ববাদ্যময়ী ঘণ্টা কেশবস্য সদা প্রিয়া। বাদনাল্লভতে পুণ্যং যজ্ঞকোটিসমুদ্ভবং॥ বাদিত্রনিনদৈস্তূর্য্যগীতমঙ্গলনিঃস্বনৈঃ। যঃ স্নাপয়তি গোবিন্দং জীবন্মুক্তো ভবেদ্ধি সঃ। বাদিত্রাণামভাবে তু পূজাকালে হি সর্ব্বদা। ঘণ্টাশব্দো নরৈঃ কার্য্যঃ সর্ব্ববাদ্যময়ী যতঃ॥ সর্ব্ববাদ্যময়ী ঘণ্টা দেবদেবস্য বল্লভা। তস্মাৎ সর্ব্বপ্রযত্নেন ঘণ্টানাদস্তু কারয়েৎ॥ মন্বন্তরসহস্রাণি মন্বন্তরশতানি চ। ঘণ্টানাদেন দেবেশঃ প্রীতো ভবতি কেশবঃ॥ *॥ বিষ্ণুধর্ম্মোত্তরে শ্রীভগবৎপ্রহ্লাদসংবাদে। শৃণু দৈত্যেন্দ্র বক্ষ্যামি ঘণ্টামাহাত্ম্যমুত্তমং। প্রহ্লাদ ত্বৎসমো নাস্তি মদ্ভক্তো ভুবনত্রয়ে॥ মম নামাঙ্কিতা ঘণ্টা পুরতো মম তিষ্ঠতি। অর্চ্চিতা বৈষ্ণবগৃহে তত্র মাং বিদ্ধি দৈত্যজ॥ বৈনতেয়াঙ্কিতাং ঘণ্টাং সুদর্শনযুতাং যদি। মমাগ্রে স্থাপয়েদ্যস্তু দেহে তস্য বসাম্যহং॥ যস্তু বাদয়তে ঘণ্টাং বৈনতেয়েন চিহ্নিতাং। ধূপে নীরাজনে স্নানে পূজাকালে বিলেপনে॥ মমাগ্রে প্রত্যহং বৎস প্রত্যেকং লভতে ফলং। মখাযুতং গোযুতঞ্চ চান্দ্রায়ণশতোদ্ভবং॥ বিধিবাহ্যকৃতা পূজা সফলা জায়তে নৃণাং। ঘণ্টানাদেন তুষ্টোঽহং প্রযচ্ছামি স্বকং পদং॥ নাগারিচিহ্নিতা ঘণ্টা রথাঙ্গেন সমন্বিতা। বাদনাৎ কুরুতে নাশং জন্মমৃত্যুভয়স্য চ॥ গরুড়েনাঙ্কিতাং ঘণ্টাং দৃষ্ট্বাহং প্রত্যহং সদা। প্রীতিং করোতি দৈত্যেন্দ্র লক্ষ্মীং প্রাপ্য যথাধনঃ॥ দৃষ্ট্বামৃতং যথা দেবাঃ প্রীতিং কুর্ব্বন্ত্যহর্নিশং। সুপর্ণে চ তথা প্রীতিং ঘণ্টাশিখরমাস্থিতে॥ স্বকরেণ প্রকুর্ব্বন্তি ঘণ্টানাদং সুভক্তিতঃ। মদীয়ার্চ্চনকালে তু ফলং কোট্যৈন্দবং কলৌ॥ অন্যত্র চ। ঘণ্টাদণ্ডস্য শিখরে সচক্রং স্থাপয়েত্তু যঃ। গরুড়ং বৈ প্রিয়ং বিষ্ণোঃ স্থাপিতং ভুবনত্রয়ং॥ সচক্রঘণ্টানাদন্তু মৃত্যুকালে শৃণোতি যঃ। পাপকোটিযুতস্যাপি নশ্যন্তি যমকিঙ্করাঃ॥ সর্ব্বে দোষাঃ প্রলীয়ন্তে ঘণ্টানাদে কৃতে হরৌ। দেবতানাং মুনীন্দ্রাণাং পিতৃণামুৎসবো ভবেৎ॥ অভাবে বৈনতেয়স্য চক্রস্যাপি ন সংশয়ঃ। ঘণ্টানাদেন ভক্তানাং প্রসাদং কুরুতে হরিঃ॥ গৃহে যস্য ভবেন্নিত্যং ঘণ্টা নাগারিসংযুতা। ন সর্পাণাং তত্র ভয়ং নাগ্নিবিদ্যুৎসমুদ্ভবং॥ যস্য ঘণ্টা গৃহে নাস্তি শঙ্খশ্চ পুরতো হরেঃ। কথং ভাগবতং নাম গীয়তে তস্য দেহিনঃ॥ ইতি। অতো ভগবতঃ প্রীত্যৈ ঘণ্টা শ্রীগরুড়ান্বিতা। সংগ্রাহ্যা বৈষ্ণবৈর্যত্নাচ্চক্রেণোপরিমণ্ডিতা॥ স্নানে শঙ্খাদিবাদ্যন্তু নামসঙ্কীর্ত্তনং হরেঃ। গীতং নৃত্যং পুরাণাদিপঠনঞ্চ প্রশস্যতে॥ ইতি শ্রীহরিভক্তিবিলাসে ৬ বিলাসঃ॥ ঘণ্টাপাটলিবৃক্ষঃ।

ইতি শব্দরত্নাবলী ॥ অতিবলা। নাগবলা।
ইতি রাজনির্ঘণ্টঃ ॥

ঘণ্টাকঃ ( পুং ) ঘণ্টাপাটলিবৃক্ষঃ। ইতি শব্দরত্নাবলী ॥

ঘণ্টাকর্ণঃ ( পুং ) শিবগণবিশেষঃ। ঘেঁটু ইতি খ্যাতঃ। যথা। ঘণ্টাকর্ণো গণঃ শ্রীমান্ শিবস্যাতীববল্লভঃ। ইতি শিবপুরাণং ॥ তস্য পূজাবিধির্যথা। চৈত্রে মাসি চ সংপূজ্যো ঘণ্টাকর্ণো ঘটাত্মকঃ। আরোগ্যায় স্নুহীমূলং সংক্রান্ত্যাং তত্র কারয়েৎ ॥ পূজামন্ত্রো যথা। ঘণ্টাকর্ণ মহাবীর সর্ব্বব্যাধিবিনাশন। বিস্ফোটকভয়ে প্রাপ্তে রক্ষ রক্ষ মহাবল ॥ ইতি তিথ্যাদিতত্ত্বং ॥

ঘণ্টাপথঃ ( পুং ) গ্রামাদৌ প্রধানমার্গঃ। যথা। দশধন্বন্তরো রাজমার্গো ঘণ্টাপথঃ স্মৃতঃ। ইতি চাণক্যং ॥ ঘণ্টোপলক্ষিতানাং হস্ত্যাদীনাং পন্থাঃ। ইতি ভরতঃ ॥ তৎপর্য্যায়ঃ। সংসরণং ২। তৎ সংসরণং যদি পুরসম্বন্ধি স্যাৎ তদা উপনিষ্করমিতি খ্যাতং। ইত্যমরঃ ॥

ঘণ্টাপাটলিঃ ( পুং ) বৃক্ষবিশেষঃ। ঘণ্টাপারুল ইতি ভাষা। তৎপর্য্যায়ঃ। গোলীঢ়ঃ ২ ঝাটলঃ ৩ মোক্ষঃ ৪ মুষ্ককঃ ৫। ইত্যমরঃ ॥ গোলিহঃ ৬ ঘণ্টা ৭ পাটলিঃ ৮ ইতি তট্টীকা ॥ ক্ষারশ্রেষ্ঠঃ ৯ কালমুষ্ককঃ ১০। ইতি রত্নমালা ॥ পাটলী ১১ ঘণ্টাকঃ ১২ ঝাটঃ ১৩। ইতি শব্দরত্নাবলী ॥ তীক্ষ্ণঃ ১৪ ঘণ্টকঃ ১৫। ইতি রত্নকোষঃ ॥ মোক্ষকঃ ১৬ কাষ্ঠপাটলী ১৭ কালাস্থালী ১৮ কাচস্থালী ১৯। ইতি ভাবপ্রকাশঃ ॥ রাজনির্ঘণ্টোক্তগুণপর্য্যায়ৌ মুষ্ককশব্দে দ্রষ্টব্যৌ ॥

ঘণ্টারবা ( স্ত্রী ) বৃক্ষবিশেষঃ। ঝন্‌ঝনিয়া ইতি বনশণ ইতি চ ভাষা। তৎপর্য্যায়ঃ। শণপুষ্পিকা ২। ইত্যমরঃ ॥ শণপুষ্পী ৩। ইতি ভরতঃ ॥

ঘণ্টালী (স্ত্রী) কোশাতকী। ইতি রাজনির্ঘণ্টঃ ॥ ঘণ্টাশ্রেণী চ ॥

ঘণ্টাবীজং ( ক্লী ) জয়পালঃ। ইতি রাজনির্ঘণ্টঃ ॥

ঘণ্টাশব্দং ( ক্লী ) কাংস্যং। ইতি হেমচন্দ্রঃ ॥

ঘণ্টিকা ( স্ত্রী ) লম্বিকা। তালুমূলস্থসূক্ষ্মজিহ্বা। ইতি রাজনির্ঘণ্টো হেমচন্দ্রশ্চ ॥

ঘণ্টিনীবীজং ( ক্লী ) জয়পালঃ। ইতি রাজনির্ঘণ্টঃ ॥

ঘণ্টুঃ ( পুং ) গজঘণ্টা। প্রতাপঃ। ইত্যুণাদিকোষঃ ॥

ঘণ্টেশ্বরঃ ( পুং ) দেবতাবিশেষঃ। স তু মঙ্গলপুত্রঃ। ব্রণদাতা চ। ঘেঁটু ইতি ভাষা। যথা। মঙ্গলস্য প্রিয়া মেধা তস্যাং ঘণ্টেশ্বরো মহান্। ব্রণদাতা চ তেজস্বী বিষ্ণুতুল্যো বভূব হ ॥ ইতি ব্রহ্মবৈবর্ত্তপুরাণং ॥

ঘণ্ডঃ ( পুং ) ভ্রমরঃ। ইতি সংক্ষিপ্তসারে উণাদিবৃত্তিঃ ॥

ঘনং ( ক্লী ) কাংস্যতালাদিকং বাদ্যং। ইত্যমরঃ ॥ কাংস্যতালঃ করতাল ইতি খ্যাতঃ আদিনা কাহলাদয়ঃ। ইতি সারসুন্দরী ॥ মধ্যমনৃত্যং। ইতি মেদিনী ॥ লৌহং। ইতি হেমচন্দ্রঃ ॥ ত্বচং। ইতি রাজনির্ঘণ্টঃ ॥

ঘনঃ (পুং) মেঘঃ। মুস্তা। ওঘঃ। দার্ঢ্যং। বিস্তারঃ। লৌহমুদ্গরঃ। ইতি মেদিনী॥ শরীরং। কফঃ। অভ্রকং। ইতি রাজনির্ঘণ্টঃ॥ সজাতীয়াঙ্কত্রয়স্য পূরণং। যথা। সমত্রিঘাতশ্চ ঘনঃ প্রদিষ্টঃ স্থাপ্যো ঘনোঽন্ত্যস্য ততোঽন্ত্যবর্গঃ। আদিত্রিনিঘ্নস্তত আদিবর্গস্ত্র্যন্ত্যাহতোঽথাদিঘনশ্চ সর্ব্বে॥ ইতি লীলাবতী॥

ঘনঃ (ত্রি) নিবিড়ঃ। তৎপর্য্যায়ঃ। নিরন্তরঃ ২ সান্দ্রঃ ৩। ইত্যমরঃ॥ দৃঢ়ঃ। ইতি মেদিনী॥ পূর্ণঃ। সম্পুটঃ। ইতি শব্দরত্নাবলী॥

ঘনকফঃ (পুং) করকা। ইতি ত্রিকাণ্ডশেষঃ॥

ঘনকালঃ (পুং) বর্ষা ঋতুঃ। ইতি শব্দরত্নাবলী॥

ঘনগোলকঃ (পুং) সংশ্লিষ্টরজতসুবর্ণং। মিশান সোণা রূপা ইতি ভাষা। ইতি হেমচন্দ্রঃ॥

ঘনজম্বালঃ (পুং) চুলুকঃ। ইতি ত্রিকাণ্ডশেষঃ॥

ঘনজ্বালা (স্ত্রী) মেঘদীপ্তিঃ। বজ্রাগ্নিঃ। ইতি শব্দরত্নাবলী॥

ঘনতালঃ (পুং) সারঙ্গপক্ষী। ইতি জটাধরঃ॥

ঘনতোলঃ (পুং) চাতকপক্ষী। ইতি ত্রিকাণ্ডশেষঃ॥

ঘনদ্রুমঃ (পুং) বিকণ্টকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

ঘননাভিঃ (পুং) ধূমঃ। ইতি শব্দরত্নাবলী॥

ঘনপত্রঃ (পুং) পুনর্নবা। ইতি রাজনির্ঘণ্টঃ॥

ঘনপাষণ্ডঃ (পুং) ময়ূরঃ। ইতি শব্দমালা॥

ঘনফলঃ (পুং) বিকণ্টকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

ঘনমূলং (ক্লী) পূরিতসজাতীয়াঙ্কত্রয়স্যাদ্যাঙ্কঃ। যথা। নবঘনস্য মূলং ত্রয়ং ইত্যাদি॥ তৎকরণসূত্রং যথা। আদ্যং ঘনস্থানমথাঘনে দ্বে পুনস্তথান্ত্যাৎ ঘনতো বিশোধ্য। ঘনং পৃথক্‌স্থং পদমস্য কৃত্যা ত্রিঘ্ন্যা তদাদ্যং বিভজেৎ ফলন্তু॥ পংক্ত্যাং ন্যসেত্তৎকৃতিমন্ত্যনিঘ্নীং ত্রিঘ্নীং ত্যজেত্তৎপ্রথমাৎ ফলস্য। ঘনং তদাদ্যাৎ ঘনমূলমেবং পংক্ত্যা ভবেদেবমতঃ পুনশ্চ॥ ইতি লীলাবতী॥

ঘনমূলঃ (পুং) মোরটঃ। ইতি রাজনির্ঘণ্টঃ॥

ঘনরসঃ (পুং) সান্দ্রনির্যাসঃ। মোরটঃ। জলং। কর্পূরং। পীলুপর্ণী। সম্যক্‌সিদ্ধরসঃ। ইতি মেদিনী॥ জলে ক্লীবলিঙ্গোঽপি। যথা। ঘনরসমমন্দং ক্ষীরং ঘৃতমমৃতং জীবনং ভুবনং। ইতি রত্নকোষঃ॥

ঘনবল্লিকা (স্ত্রী) বিদ্যুৎ। ইতি হারাবলী॥

ঘনবল্লী (স্ত্রী) অমৃতস্রবা লতা। ইতি রাজনির্ঘণ্টঃ॥

ঘনবাতঃ (পুং) নরকভেদঃ। ইতি হেমচন্দ্রঃ॥

ঘনবাসঃ (পুং) কুষ্মাণ্ডঃ। ইতি হারাবলী॥

ঘনবাহনঃ (পুং) শিবঃ। ইতি হেমচন্দ্রঃ॥ ইন্দ্রশ্চ। মেঘবাহন ইত্যমরদর্শনাৎ॥

ঘনশ্যামঃ (ত্রি) নিবিড়কৃষ্ণবর্ণঃ। মেঘতুল্যশ্যামবর্ণঃ। যৌগিকোঽয়ং শব্দঃ শ্রীরামকৃষ্ণয়োর্বোধকঃ। যথা। অয়ে রাম ঘনশ্যাম চুম্বামি মুখপঙ্কজং। যদি জীবামি শোকেন পুনর্দ্রক্ষ্যামি তে মুখং॥ ইতি

মহানাটকং ॥ সমানকর্ণবিন্যস্তস্ফুরন্মকরকুণ্ডলং। হেমাম্বরং ঘনশ্যামং শ্রীবৎসশ্রীনিকেতনং ॥ ইতি শ্রীভাগবতং ॥

ঘনসারঃ ( পুং ) কর্পূরং। দক্ষিণাবর্ত্তপারদঃ। ইতি মেদিনী ॥ বৃক্ষভেদঃ। জলং। ইতি ধরণী ॥

ঘনস্কন্ধঃ ( পুং ) কোশাম্রবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

ঘনস্বনঃ ( পুং ) তণ্ডুলীয়শাকঃ। ইতি রাজনির্ঘণ্টঃ ॥ মেঘশব্দশ্চ ॥

ঘনা ( স্ত্রী ) মাষপর্ণী। রুদ্রজটা। ইতি রাজনির্ঘণ্টঃ ॥

ঘনাকরঃ ( পুং ) বর্ষাকালঃ। ইতি শব্দরত্নাবলী ॥

ঘনাঘনঃ ( পুং ) ইন্দ্রঃ। ঘাতুকমত্তহস্তী। বর্ষুকমেঘঃ। ইত্যমরঃ ॥ অন্যোন্যঘট্টনং। ইতি ধরণী ॥

ঘনাঘনঃ ( ত্রি ) নিরন্তরঃ। ঘাতুকঃ। ইতি হেমচন্দ্রঃ ॥

ঘনাঘনা ( স্ত্রী ) কাকমাচী। ইতি শব্দচন্দ্রিকা ॥

ঘনাত্যয়ঃ ( পুং ) শরৎকালঃ। ইতি হেমচন্দ্রঃ ॥

ঘনাময়ঃ ( পুং ) খর্জুরবৃক্ষঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

ঘনামলঃ ( পুং ) বাস্তূকশাকঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

ঘনাশ্রয়ঃ ( পুং ) আকাশং। ইতি হেমচন্দ্রঃ ॥

ঘনোদধিঃ ( পুং ) নরকভেদঃ। ইতি হেমচন্দ্রঃ ॥

ঘনোপলঃ ( পুং ) করকা। ইতি হেমচন্দ্রঃ ॥

ঘম্ব গতৌ। ইতি কবিকল্পদ্রুমঃ ॥ ওষ্ঠ্যবর্গশেষোপধঃ। ঘম্বতি। ইতি দুর্গাদাসঃ ॥

ঘরট্টঃ ( পুং ) পেষণী। জাঁতা ইতি ভাষা। ইতি পুরাণং ॥

ঘর্ঘটঃ ( পুং ) মৎস্যবিশেষঃ। ট্যাঙ্গরা ইতি ভাষা। ইতি শব্দরত্নাবলী ॥

ঘর্ঘরঃ ( পুং ) পর্ব্বতদ্বারং। দ্বারং। উলূকঃ। নদবিশেষঃ। স্বরভেদে ত্রি। ইতি মেদিনী ॥ ধ্বনিঃ। হাস্যং। ইতি হেমচন্দ্রঃ ॥ তুষানলঃ। ইতি ভূরিপ্রয়োগঃ ॥

ঘর্ঘরকঃ ( পুং ) ঘর্ঘরনদঃ। যথা। শোণে ঘর্ঘরকে জলন্তু রুচিদং সন্তাপশোষাপহং। পথ্যং বহ্নিকরং তথা চ বলদং ক্ষীণাঙ্গবৃদ্ধিপ্রদং ॥ ইতি রাজনির্ঘণ্টঃ ॥

ঘর্ঘরা ( স্ত্রী ) ক্ষুদ্রঘণ্টিকা। বীণাভেদঃ। ইতি মেদিনী ॥

ঘর্ঘরিকা ( স্ত্রী ) ক্ষুদ্রঘণ্টিকা। ভৃষ্টধান্যং। নদীবিশেষঃ। বাদিত্রদণ্ডঃ। ইতি হেমচন্দ্রঃ ॥ বাদ্যপ্রভেদঃ। ইতি বিশ্বঃ ॥

ঘর্ঘুর্ঘা ( স্ত্রী ) যমকীটঃ। ঘুরঘুরিয়া ইতি ভাষা। ইতি রত্নমালা ॥

ঘর্ব্ব গতৌ। ইতি কবিকল্পদ্রুমঃ ॥ রেফোপধঃ। ঘর্ব্বতি। ইতি দুর্গাদাসঃ ॥

ঘর্ম্মঃ ( পুং ) শ্রমবারি। অঙ্গজলং। ঘাম্ ইতি ভাষা। তৎপর্য্যায়ঃ। নিদাঘঃ ২ স্বেদঃ ৩। ইত্যমরঃ ॥ সিপ্রঃ ৪। ইতি জটাধরঃ ॥ স্রবণং ৫। ইতি শব্দরত্নাবলী ॥ অস্য নিদানং স্বেদশব্দে দ্রষ্টব্যং। আতপঃ। গ্রীষ্মঃ। উষ্মা। ইতি হেমচন্দ্রঃ

ঘর্ম্মদোষঃ (পুং) স্বেদস্য বিকারঃ। তস্যৌষধং যথা। মন্দোষ্ণলোধ্রনীবারচূর্ণস্তু কনকস্য চ। তেনোদ্বর্ত্তিতদেহস্য হরেদ্‌গ্রীষ্মপ্রসারিকাং॥ ত্বগ্দোষশ্চৈব দেবেন্দ্র ঘর্ম্মদোষশ্চ নশ্যতি। ইতি গারুড়ে ১৯৪ অধ্যায়ঃ॥

ঘর্ম্মবিচর্চ্চিকা (স্ত্রী) ঘর্ম্মবিচর্চ্চী। ঘর্ম্মচর্চ্চিকা। ঘামাচি ইতি ভাষা। যথা। স্বেদবাহীনি দুষ্যন্তি ক্রোধশোকভয়ৈস্তথা। ততঃ স্বেদঃ প্রবর্ত্তেত দৌর্গন্ধ্যং ঘর্ম্মচর্চ্চিকা॥ রাজিকাকৃতিরুৎকোথা যতো ঘর্ম্মবিচর্চ্চিকা। ইতি প্রয়োগামৃতং॥ অস্যাশ্চিকিৎসা স্বেদশব্দে দ্রষ্টব্যা॥

ঘর্ম্মান্তঃ (পুং) বর্ষাকালঃ। ইতি রাজনির্ঘণ্টঃ॥

ঘর্ম্মান্তকামুকী (স্ত্রী) বলাকা। ইতি রাজনির্ঘণ্টঃ॥

ঘর্ষণং (ক্লী) ঘর্ষঃ। ঘষা ইতি ভাষা। যথা। ঘর্ষণাদভিঘাতাদ্বা যদঙ্গং বিগতত্বচং। উষাস্রাবান্বিতং তদ্ধি ঘৃষ্টমিত্যভিধীয়তে॥ ইতি মাধবকরঃ॥

ঘর্ষণালঃ (পুং) শিলাপুত্রঃ। লোড়া ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ॥

ঘর্ষণী (স্ত্রী) হরিদ্রা। ইতি ত্রিকাণ্ডশেষঃ॥

ঘষ ই ঙ ক্ষরে। ইতি কবিকল্পদ্রুমঃ॥ আদ্যস্বরী। ই ঘংষ্যতে। ঙ ঘংষতে। অয়ং কৈশ্চিন্ন মন্যতে। ইতি দুর্গাদাসঃ॥

ঘস ই ঙ করণে। ইতি কবিকল্পদ্রুমঃ॥ ই ঘংস্যতে। ঙ ঘংসতে। অয়ং কৈশ্চিন্ন মন্যতে। ইতি দুর্গাদাসঃ॥

ঘস ৯ ঔ ভক্ষণে। ইতি কবিকল্পদ্রুমঃ॥ ৯ অঘসৎ। ঔ ঘস্তা। ইতি দুর্গাদাসঃ॥

ঘসিঃ (পুং) আহারঃ। ইতি হেমচন্দ্রঃ॥

ঘস্মরঃ (ত্রি) অস্মরঃ। ভক্ষকঃ। ইত্যমরঃ॥

ঘস্রং (ক্লী) কুঙ্কুমং। ইতি ত্রিকাণ্ডশেষঃ॥

ঘস্রঃ (পুং) দিনং। হিংস্রে ত্রি। ইতি মেদিনী॥

ঘা (স্ত্রী) কাঞ্চী। ঘাতঃ। ইতি মেদিনী॥

ঘাটঃ (পুং) ঘাটা। ইতি শব্দরত্নাবলী॥

ঘাটা (স্ত্রী) গ্রীবাপশ্চাদ্ভাগঃ। ঘাড় ইতি ভাষা। তৎপর্য্যায়ঃ। অবটুঃ ২ কৃকাটিকা ৩। ইত্যমরঃ॥ শিরঃপশ্চাৎসন্ধিঃ ৪। ইতি রাজনির্ঘণ্টঃ॥ ঘাটঃ ৫ কৃকাটী ৬। ইতিশব্দরত্নাবলী॥ ঘাটিকা ৭। ইতি শব্দচন্দ্রিকা॥

ঘাটিকা (স্ত্রী) ঘাটা। ইতি শব্দচন্দ্রিকা॥

ঘাণ্টিকঃ (পুং) যো বহুভির্ম্মিলিত্বা স্তুতিং পঠতি সঃ। যো দেবতাদ্যগ্রে ঘণ্টাঘাতেন শংসতি স প্রাবণাখ্যঃ। ইতি স্বামী। ইতি সারসুন্দরী॥ তৎপর্য্যায়ঃ। ঘাটিকঃ ২। ইতি ভরতঃ॥ চাক্রিকঃ ৩। ইত্যমরঃ॥ অন্যচ্চ। মিলিতা বহবো যে তু ভবেয়ুঃ স্তুতিকারকাঃ। চাক্রিকাস্তে নিগদিতাশ্চক্রিকা অপি কুত্রচিৎ॥ ঘণ্টাবাদ্যস্তাবকা যে ঘাণ্টিকা ঘণ্টিকাশ্চ তে। ইতি শব্দরত্নাবলী॥ ধুস্তুরবৃক্ষঃ। ইতি হারাবলী॥

ঘাতঃ (পুং) কাণ্ডঃ। প্রহারঃ। ইতি মেদিনী॥ অঙ্কপূরণং। যথা। সমত্রিঘাতশ্চ ঘনঃ প্রদিষ্টঃ। ইতি লীলাবতী॥

ঘাতকঃ (ত্রি) হননকর্ত্তা। যথা। গৌরীমাধবয়ো-

ভর্ত্তা রাধিকা শিবসন্নিধৌ। ইন্দুঃ কুমুদহন্তা চ সূর্য্যঃ কমলঘাতকঃ॥ ইতি বিদগ্ধমুখমণ্ডনং॥

ঘাতনং (ক্লী) হননং। বধঃ। যজ্ঞার্থপশুবধঃ। ইতি শব্দরত্নাবলী॥

ঘাতনঃ (ত্রি) বধকর্ত্তা। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ॥

ঘাতিঃ (পুং) পক্ষিবন্ধনং। ইত্যুণাদিকোষঃ॥ প্রহরণং। ইতি সংক্ষিপ্তসারে উণাদিবৃত্তিঃ॥

ঘাতিপক্ষী [ন্] (পুং) শ্যেনপক্ষী। ইতি হারাবলী॥

ঘাতুকঃ (ত্রি) হিংস্রঃ। ক্রূরঃ। ইত্যমরঃ॥

ঘাত্যং (ত্রি) হননযোগ্যং। ইতি ব্যাকরণং॥

ঘারঃ (পুং) সেচনং। ইতি হেমচন্দ্রঃ॥

ঘার্ত্তিকঃ (পুং) ঘৃতপূরঃ। ইতি হেমচন্দ্রঃ॥

ঘাসঃ (পুং) গবাদ্যদনীয়তৃণবিশেষঃ। তৎপর্য্যায়ঃ। যবসং ২। ইত্যমরঃ॥ যবসঃ ৩ জবসঃ ৪। ইতি ভরতঃ॥ যবাসং ৫। ইতি শব্দরত্নাবলী॥

ঘাসিঃ (পুং) অগ্নিঃ। ইতি ত্রিকাণ্ডশেষঃ॥

ঘিণ ই ঙ গ্রহণে। ইতি কবিকল্পদ্রুমঃ॥ ই ঘিণ্ণ্যতে। ঙ ঘিণ্ণতে। জেঘিণ্ণ্যতে। ইতি দুর্গাদাসঃ॥

ঘু ঙ ধ্বনৌ। ইতি কবিকল্পদ্রুমঃ॥ ঙ ঘবতে। ইতি দুর্গাদাসঃ॥

ঘুঃ (পুং) ধ্বনিঃ। ইতি জটাধরঃ॥

ঘুট ঙ ৯ পরিবর্ত্তে। ইতি কবিকল্পদ্রুমঃ॥ পরিবর্ত্তো গতবতঃ প্রত্যাগমনং বিনিময়ো বা। ঙ ঘোটতে নদী। ৯ অঘুটৎ। ইতি দুর্গাদাসঃ॥

ঘুট শি প্রতিহতৌ। ইতি কবিকল্পদ্রুমঃ॥ শি ঘুটতি অঘুটীৎ শত্রুং শূরঃ। জুঘোট। ইতি দুর্গাদাসঃ॥

ঘুটঃ (পুং) চরণগ্রন্থিঃ। ইতি হেমচন্দ্রঃ॥

ঘুটিঃ (স্ত্রী) গুল্ফঃ। ইতি দ্বিরূপকোষঃ॥

ঘুটিকঃ (পুং) গুল্ফঃ। ইতি হেমচন্দ্রঃ॥

ঘুটিকা (স্ত্রী) গুল্ফঃ। ইত্যমরঃ॥

ঘুটী (স্ত্রী) গুল্ফঃ। ইতি দ্বিরূপকোষঃ॥

ঘুড শি ব্যাঘাতে। ইতি কবিকল্পদ্রুমঃ॥ শি ঘুড়তি অঘুড়ীৎ। ইতি দুর্গাদাসঃ॥

ঘুণ ঙ ভ্রমণে। ইতি কবিকল্পদ্রুমঃ॥ ঙ ঘোণতে। ইতি দুর্গাদাসঃ॥

ঘুণ ই ঙ গ্রহণে। ইতি কবিকল্পদ্রুমঃ॥ ই ঘুণ্ণ্যতে। ঙ ঘুণ্ণতে জোঘুণ্ণ্যতে। ইতি দুর্গাদাসঃ॥

ঘুণ শ ভ্রমণে। ইতি কবিকল্পদ্রুমঃ॥ শ ঘুণতি ঘোণিতা। ইতি দুর্গাদাসঃ॥

ঘুণঃ (পুং) কাষ্ঠক্রিমিঃ। তৎপর্য্যায়ঃ। কাষ্ঠবেধকঃ ২। ইতি লিঙ্গাদিসংগ্রহটীকায়াং ভরতঃ॥ কাষ্ঠলেখকঃ ৩। ইতি ভূরিপ্রয়োগঃ॥

ঘুণবল্লভা (স্ত্রী) অতিবিষা। ইতি ভাবপ্রকাশঃ॥

ঘুণ্টঃ (পুং) গুল্ফঃ। ইতি শব্দমালা॥

ঘুণ্টকঃ (পুং) গুল্ফঃ। ইতি হেমচন্দ্রঃ॥

ঘুণ্টিকং (ক্লী) বনস্থকরীষং। বিলঘুঁটে ইতি ভাষা। ইতি শব্দচন্দ্রিকা॥

ঘুণ্ডঃ (পুং) ভ্রমরঃ। ইত্যুণাদিকোষঃ॥

ঘুর শ ধ্বনৌ। ভীমার্থে। ইতি কবিকল্পদ্রুমঃ॥ ভীমো ভয়ানকরসস্তস্য অর্থো নিমিত্তং

হেতুরিতি যাবৎ ভীমার্থঃ। শ ঘুরতি ব্যাঘ্রো মনুষ্যাণাং ভয়হেতুর্ভবতীত্যর্থঃ। ঘুর ভীমার্থার্ত্তশব্দয়োরিতি প্রাঞ্চঃ। আর্ত্ত ইতি শব্দবিশেষণমিতি রমানাথঃ। ঘুরত্যার্ত্তে চ কুরুতে ইতি। শব্দানুবৃত্তৌ ভট্টমল্লঃ। ঘোরিতা। ইতি দুর্গাদাসঃ॥

ঘুর্ঘুরঃ (পুং) কীটবিশেষঃ। ঘুরঘুরিয়া ইতি ভাষা। তৎপর্য্যায়ঃ। বমকীটঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥ ঘর্ঘুর্ঘা ৩। ইতি রত্নমালা॥

ঘুর্ঘুরী (স্ত্রী) জলজন্তুবিশেষঃ। তৎপর্য্যায়ঃ। মৃৎকিরা ২। ইতি ত্রিকাণ্ডশেষঃ॥

ঘুলঞ্চঃ (পুং) গবেধুকা। গড়গড় ইতি ভাষা। ইতি রত্নমালা

ঘুলঘুলারবঃ (পুং) পারাবতভেদঃ। ইতি রাজনির্ঘণ্টঃ॥

ঘুষ ই ঙ ধৃশে। ইতি কবিকল্পদ্রুমঃ॥ ধৃশঃ কান্তিকৃতিঃ। ই ঘুংষ্যতে। ঙ ঘুংষতে চন্দনো গাত্রং। ইতি দুর্গাদাসঃ॥

ঘুষ ইর্ বধে। ইতি কবিকল্পদ্রুমঃ॥ ইর্ অঘুষৎ অঘোষীৎ। ইতি দুর্গাদাসঃ॥

ঘুষ কি ইর্ স্তুতৌ। স্তুতৌ ইতি যাবৎ। বিশব্দে। ইতি কবিকল্পদ্রুমঃ॥ বিশব্দ ইহ কথনং আবিষ্করণং নানাশব্দকরণঞ্চ আঙপূর্ব্বকঃ সততক্রন্দনে। ইতি তট্টীকা॥ কি ঘোষয়তি ঘোষতি গূঢ়মর্থমভিযুক্তঃ। নানাশব্দে বাদ্যং ঘোষয়তি দ্বারি যস্য কশ্চিদুপক্রতঃ। ইতি হলায়ুধঃ। ইর্ অঘুষৎ অঘোষীৎ। ঘুষ কিরনুবর্ত্ততে। কি আঘোষয়তি আঘোষতি শোকার্ত্তঃ সততং ক্রন্দতীত্যর্থঃ। ইতি দুর্গাদাসঃ॥

ঘুষিতং (ত্রি) শব্দিতং। ইতি সুপদ্মব্যাকরণং॥

ঘুষ্টং (ত্রি) শব্দিতং। ইতি মুগ্ধবোধং॥

ঘুসৃণং (ক্লী) কুঙ্কুমং। ইতি ত্রিকাণ্ডশেষঃ॥

ঘূকঃ (পুং) উলূকঃ। ইতি হেমচন্দ্রঃ॥

ঘূকারিঃ (পুং) কাকঃ। ইতি হেমচন্দ্রঃ॥

ঘূকাবাসঃ (পুং) শাখোটবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

ঘূর্ য ঙ ঈ হিংসাজ্যান্যোঃ। ইতি কবিকল্পদ্রুমঃ॥ দীর্ঘী। য ঙ ঘূর্য্যতে। ঈ ঘূর্ণঃ। জ্যানির্গতবহুবয়োভাবঃ। ইতি দুর্গাদাসঃ॥

ঘূর্ণ ঞ শ ভ্রমণে। ইতি কবিকল্পদ্রুমঃ॥ ঞ ঘূর্ণতি ঘূর্ণতে। শ ঘূর্ণতী ঘূর্ণন্তী। ইতি দুর্গাদাসঃ॥

ঘূর্ণঃ (পুং) গ্রীষ্মসুন্দরকঃ। গীমা ইতি ভাষা। ইতি শব্দচন্দ্রিকা॥ ভ্রমণঞ্চ

ঘূর্ণনং (ক্লী) ভ্রমণং। তৎপর্য্যায়ঃ। চক্রাবর্ত্তং ২ ভ্রমঃ ৩ ভ্রান্তিঃ ৪ ভ্রমিঃ ৫ ঘূর্ণিঃ ৬। ইতি হেমচন্দ্রঃ॥

ঘূর্ণয়মানঃ (ত্রি) ভ্রাম্যমাণঃ। যথা। ইন্দ্রাদ্যৈরখিলার্থসাধনপরৈঃ সংস্তূয়মানং মুহুঃ পীতোন্মত্তফলাতুলালসতয়া ঘূর্ণায়মানেক্ষণং। ইতি কলাপধাতুব্যাখ্যাসারঃ॥

ঘূর্ণিঃ (স্ত্রী) ঘূর্ণনং। ইতি হেমচন্দ্রঃ॥

ঘূর্ণিতঃ (ত্রি) ভ্রমিতঃ। তৎপর্য্যায়ঃ। প্রচলায়িতঃ ২। ইত্যমরঃ॥

ঘূর্ণ্যমানঃ (ত্রি) ভ্রাম্যমাণঃ। যথা। ভো

বৃক্ষাঃ পর্ব্বতস্থা বহুকুসুমযুতা বায়ুনা ঘূর্ণ্যমানাঃ। ইতি মহানাটকং ॥

ঘৃ সেকে। ইতি কবিকল্পদ্রুমঃ ॥ ঘরতি তরুং মেঘঃ। ইতি দুর্গাদাসঃ ॥

ঘৃ ক সেকে। ছাদনে। ইতি কবিকল্পদ্রুমঃ ॥ ক ঘারয়তি। ইতি দুর্গাদাসঃ ॥

ঘৃ র লি ভাসি। সেকে। ইতি কবিকল্পদ্রুমঃ॥ র বৈদিকঃ। লি জঘর্ত্তি ঘৃতং দীপ্যতে ক্ষরতি বেত্যর্থঃ। ইতি দুর্গাদাসঃ ॥

ঘৃণ ই ঙ গ্রহণে। ইতি কবিকল্পদ্রুমঃ ॥ ই ঘৃণ্যতে। ঙ ঘৃণতে জরীঘৃণ্যতে। ইতি দুর্গাদাসঃ ॥

ঘৃণ দ এ উ দীপ্তৌ। ইতি কবিকল্পদ্রুমঃ ॥ দ এ ঘৃণোতি ঘর্ণোতি। ঘৃণুতে ঘর্ণুতে। উ ঘর্ণিত্বা ঘৃত্বা। ইতি দুর্গাদাসঃ ॥

ঘৃণা (স্ত্রী) করুণা। জুগুপ্সা। তৎপর্য্যায়ঃ। অর্ত্তনং ২ ঋতীয়া ৩ হৃণীয়া ৪। ইত্যমরঃ ॥ রীজ্যা ৫ হৃণিয়া ৬ হ্রিণীয়া ৭ হৃণীয়া ৮। ইতি তট্টীকা ॥

ঘৃণাবাসঃ (পুং) কুষ্মাণ্ডঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ ঘৃণাযুক্তে ত্রি ॥

ঘৃণিঃ (পুং) কিরণঃ। ইত্যমরঃ ॥ সূর্য্যঃ। জলং। ইতি মেদিনী ॥

ঘৃতঃ (পুং ক্লী) পক্বনবনীতং। ঘি ইতি ভাষা। তৎপর্য্যায়ঃ। আজ্যং ২ হবিঃ ৩ সর্পিঃ ৪। ইত্যমরঃ ॥ পবিত্রং ৫ নবনীতকং ৬ অমৃতং ৭ অভিঘারঃ ৮ হোম্যং ৯ আয়ুঃ ১০ তৈজসং ১১। ইতি রাজনির্ঘণ্টঃ ॥ আজং ১২। যথা। ঘৃতোঽস্ত্রী চাজমাজ্যঞ্চ সর্পিঃ স্যাদমৃতং হবিঃ। ইতি জটাধরঃ ॥ তস্য গুণাঃ। বুদ্ধ্যগ্নিশুক্রৌজোমেদঃস্মৃতিকফকারিত্বং। বাতপিত্তবিষোন্মাদরোগশোথালক্ষ্মীজ্বরনাশিত্বং। মাংসাদষ্টগুণগুরুত্বঞ্চ। ইতি রাজবল্লভঃ ॥ রসায়নত্বং। স্বাদুত্বং। চক্ষুর্হিতত্বং। শীতবীর্য্যত্বং। পাপনাশিত্বং। অল্পাভিস্যন্দিত্বং। কান্তিতেজোলাবণ্যস্বরায়ুর্হিতবলকারিত্বং। পবিত্রত্বং। গুরুত্বং। উদাবর্ত্তশূলানাহব্রণক্ষয়বীসর্পরক্তনাশিত্বং। স্নিগ্ধত্বং। রূক্ষত্বঞ্চ। ইতি ভাবপ্রকাশঃ ॥ * ॥ অথ গব্যঘৃতস্য গুণাঃ। বিশেষেণ চক্ষুর্হিতত্বং। শীতত্বং। বাতপিত্তকফালক্ষ্মীপাপরক্ষোনাশিত্বং। শুক্রাগ্নিস্বাদুপাকমেধালাবণ্যকান্ত্যোজস্তেজোবৃদ্ধিবয়ঃস্থিতিবলায়ুর্হিতকারিত্বং। গুরুত্বং। পবিত্রত্বং। সুমঙ্গল্যত্বং। রসায়নত্বং। সুগন্ধিত্বং। রোচনত্বং। চারুত্বং। সর্ব্বাজ্যেষু গুণাধিকত্বঞ্চ। ইতি ভাবপ্রকাশঃ ॥ বুদ্ধিস্মৃতিপুষ্টিবপুঃস্থৈর্য্যকারিত্বং। শ্রমোপশমনত্বং। হব্যতমত্বং। বহুগুণত্বঞ্চ ॥ * ॥ মাহিষঘৃতগুণাঃ। উত্তমত্বং। ধৃতিসৌখ্যকান্তিবলবর্ণচক্ষুর্হিতকারিত্বং। বাতশ্লেষ্মদুর্নামগ্রহণীবিকারনাশিত্বং। মন্দানলোদ্দীপনত্বং। নবগব্যতঃ পরমহৃদ্যত্বং। মনোহারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ স্বাদুত্বং। পিত্তরক্তনাশিত্বং। শীতত্বং। শ্লেষ্মশুক্রবৃদ্ধিকারিত্বং। গুরুত্বং। স্বাদুপাকিত্বঞ্চ ॥ * ॥ ছাগীঘৃতগুণাঃ। অগ্নিচক্ষুর্হিতবলকারিত্বং। কাসশ্বাসক্ষয়েষু হিতত্বং। কটুপাকিত্বঞ্চ। ইতি ভাবপ্রকাশঃ ॥ কফনাশিত্বং। ইতি রাজ-

নির্ঘণ্টঃ ॥ * ॥ মেষীঘৃতগুণাঃ। পিত্ত-মেদস্কারিত্বং। যোনিদোষে শোষে কফে অনিলে চ শস্তত্বং। রূক্ষত্বং। দুর্নামো-ন্মাদনাশিত্বঞ্চ। ইতি রাজবল্লভঃ ॥ পাকে লঘুত্বং। পিত্তকোপাকারিত্বং। শোফে কম্পে চ হিতত্বঞ্চ ॥ * ॥ ভেড়কঘৃতগুণাঃ। অতিগৌরবাৎ সুকুমারদেহিবর্জ্যত্বং। বুদ্ধি-পাটবহরত্বং। বলকারিত্বং। নৃণাং বপুষো বিস্রগন্ধকারিত্বঞ্চ ॥ * ॥ হস্তিনীঘৃতগুণাঃ। কফপিত্তবিষক্রিমিনাশিত্বং। কষায়ত্বং। লঘুত্বং। বিষ্টম্ভিত্বং। তিক্তত্বং। বহ্নি-করত্বঞ্চ ॥ * ॥ অশ্বাঘৃতগুণাঃ। কটুত্বং। মধুরত্বং। কষায়ত্বং। ঈষদগ্নিদীপনত্বং। বাল্যপ্রদত্বং। মূর্চ্ছাহারিত্বং। গুরুত্বঞ্চ ॥ * ॥ গর্দ্দভীঘৃতগুণাঃ। অগ্নিবলকারিত্বং। মূত্র-দোষকফনাশিত্বং। পাকে লঘুত্বং। কষা-য়ত্বং। উষ্ণবীর্য্যত্বঞ্চ ॥ * ॥ উষ্ট্রীঘৃতগুণাঃ। মধুরত্বং। বিপাকে কটুত্বং। শীতলত্বং। কুষ্ঠকৃমিবিষবাতকফগুল্মোদরনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ শোথনাশিত্বং। ইতি রাজবল্লভঃ ॥ * ॥ নারীঘৃতগুণাঃ। চক্ষু-র্হিতরুচিকারিত্বং। পথ্যত্বং। মন্দাগ্নি-দীপনত্বং। পাকে লঘুত্বং। সর্ব্বাময়বিষ-নাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ প্রমেহ-নাশিত্বং। ইতি রাজবল্লভঃ ॥ * ॥ দুগ্ধ-ভবঘৃতগুণাঃ। গ্রাহিত্বং। শীতলত্বং। নেত্ররোগকারিত্বং। পিত্তদাহাস্রমদমূর্চ্ছা-ভ্রমানিলনাশিত্বঞ্চ ॥ * ॥ হৃস্তনদধিজঘৃতং তদেব হৈয়ঙ্গবীনং। তস্য গুণাঃ। চক্ষুর্হিত-ত্বং। দীপনত্বং। রুচিবলকারিত্বং। বৃংহ-ণত্বং। বৃষ্যত্বং। বিশেষাজ্জ্বরনাশিত্বঞ্চ ॥ * ॥ বর্ষাদূর্দ্ধং পুরাণস্য তস্য গুণাঃ। ত্রিদোষ-মূর্চ্ছাকুষ্ঠবিষোন্মাদাপস্মারতিমিরনাশিত্বং। ইতি ভাবপ্রকাশঃ ॥ মদশিরঃকর্ণাদিজ-রোগভ্রান্তিনাশিত্বং। ব্রণস্য শোধনত্বং রোপণত্বঞ্চ। আয়ুর্বৃদ্ধিশরীরদৃঢ়তাসৌকু-মার্য্যকান্তিস্মৃতিবলকারিত্বং। বাল্যে তরুণে বার্দ্ধকে চাতিবল্যত্বং। পথ্যত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ প্রতিশ্যায়ামকাসজীর্ণ-জ্বরসর্ব্বরোগনাশিত্বং। শ্রেষ্ঠত্বং। ধাতু-সাম্যকারিত্বঞ্চ ॥ * ॥ তস্য লক্ষণং। উগ্র-গন্ধং পুরাণং স্যাদ্দশবর্ষস্থিতং ঘৃতং। লাক্ষারসনিভং শীতং প্রপুরাণমতঃ পরং। যথা যথা ভবেজ্জীর্ণং গুণবৎ স্যাত্তথা তথা॥*॥ কাংস্যপাত্রে দশদিনস্থিতং ঘৃতং ত্যাজ্যং। ইতি রাজবল্লভঃ ॥ ঔষধঘটিতপক্কঘৃতস্য পূর্ণবীর্য্যং ষণ্মাসপর্য্যন্তং তিষ্ঠতি। ইতি বৈদ্যকপরিভাষা ॥

ঘৃতঃ (ত্রি) দীপ্তঃ। সেচকঃ। ইতি শব্দ-রত্নাবলী ॥

ঘৃতকরঞ্জঃ (পুং) করঞ্জভেদঃ। ঘিয়া-করমচা ইতি ভাষা। তৎপর্য্যায়ঃ। প্রকীর্য্যঃ ২ ঘৃতপর্ণকঃ ৩ স্নিগ্ধপত্রঃ ৪ তপস্বী ৫ বিষারিঃ ৬ বিরোচনঃ ৭। অস্য গুণাঃ। কটুত্বং। উষ্ণত্বং। বাতব্রণসর্ব্ব-ত্বগ্দোষবিষস্পর্শনাশিত্বঞ্চ। ইতি রাজ-নির্ঘণ্টঃ ॥

ঘৃতকুমারিকা (স্ত্রী) ঘৃতকুমারী। ইতি ভাব-প্রকাশঃ ॥

ঘৃতকুমারী (স্ত্রী) স্বনামখ্যাতগুল্মঃ। ঘিকুমারী

ইতি ভাষা। তৎপর্য্যায়ঃ। কুমারী ২ তরণিঃ ৩ সহা ৪। ইতি শব্দরত্নাবলী॥ কন্যকা ৫ দীর্ঘপত্রিকা ৬ স্থলেরুহা ৭ মৃদুঃ ৮ কন্যা ৯ বহুপত্রা ১০ অমরা ১১ অজরা ১২ কণ্টকপ্রাবৃতা ১৩ বীরা ১৪ ভৃঙ্গেষ্টা ১৫ বিপুলাস্রবা ১৬ ব্রহ্মঘ্নী ১৭ তরুণী ১৮ রামা ১৯ কপিলা ২০ অম্বুধিস্রবা ২১ সুকণ্টকা ২২ স্থূলদলা ২৩ গৃহকন্যা ২৪। অস্যা গুণাঃ। হিমত্বং। তিক্তত্বং। মদগন্ধিত্বং। কফপিত্তকাসবিষশ্বাসকুষ্ঠনাশিত্বং। রসায়নত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ ভেদকত্বং। নেত্রহিতত্বং। মধুরত্বং। বৃংহণত্বং। শুক্রবলকারিত্বং। বাতগুল্মপ্লীহযকৃৎবৃদ্ধিজ্বরগ্রন্থ্যগ্নিদগ্ধবিস্ফোটপিত্তরক্তত্বগ্রোগনাশিত্বঞ্চ। ইতি ভাবপ্রকাশঃ॥

ঘৃততৈলাদিকল্পঃ (পুং) রোগনাশকনানৌষধিপকঘৃততৈলাদিবর্গঃ। যথা। ধন্বন্তরিরুবাচ। ঘৃততৈলাদি বক্ষ্যামি শৃণু সুশ্রুত রোগনুৎ। শঙ্খপুষ্পী বচা সোমা ব্রাহ্মী ব্রহ্মসুবর্চ্চলা॥ অভয়া গুড়ূচী চৈব অটরূষকবাকুচী। এতৈরক্ষসমৈর্ভাগৈর্ঘৃতপ্রস্থং বিপাচয়েৎ॥ কণ্টকার্য্যা রসপ্রস্থক্ষীরপ্রস্থসমন্বিতং। এতদ্ব্রাহ্মীঘৃতং নাম শ্রুতিমেধাকরং পরং॥ ১॥ ত্রিফলাচিত্রকবলানির্গুণ্ডীনিম্ববাসকাঃ। পুনর্নবা গুড়ূচী চ বৃহতী চ শতাবরী॥ এতৈর্ঘৃতং যথালাভং সর্ব্বরোগবিমর্দ্দনং। ২। বলাশতকষায়ে তু তৈলস্যার্দ্ধাঢ়কং পচেৎ॥ কল্কৈর্মধুকমঞ্জিষ্ঠাচন্দনোৎপলপদ্মকৈঃ। সূক্ষ্মৈলাপিপ্পলীকুষ্ঠত্বগেলাগুরুকেশরৈঃ॥ গন্ধাশ্মজীবনীয়ৈশ্চ ক্ষীরাঢ়কসমাশ্রিতং। এতম্মৃদ্বগ্নিনা পক্বং স্থাপয়েদ্রজতে শুভে॥ সর্ব্ববাতবিকারাংস্তু সর্ব্বধাতন্তরাশ্রয়ান্। তৈলমেতৎ প্রশময়েদ্বলাখ্যং রাজবল্লভং॥ ৩॥ শতাবরীরসপ্রস্থং ক্ষীরপ্রস্থং তথৈব চ। শতপুষ্পা দেবদারু মাংসী শৈলেয়কং বলা॥ চন্দনং তগরং কুষ্ঠং মালা চাংশুমতী তথা। এতৈঃ কর্ষসমৈঃ কল্কৈস্তৈলপ্রস্থং বিপাচয়েৎ॥ কুব্জবামনপঙ্গূনাং বধিরব্যঙ্গকুষ্ঠিনাং। বায়ুনা ভগ্নগাত্রাণাং যে চ সীদন্তি মৈথুনে॥ জরাজর্জ্জরগাত্রাণামাধ্মানমুখশোষিণাং। ত্বগ্গতাশ্চাপি যে বাতাঃ শিরাস্নায়ুগতাশ্চ যে॥ সর্বাস্তিং নাশয়ত্যাশু তৈশ্চৈব স্যাদ্দশাঙ্গকং। নারায়ণমিদং তৈলং বিষ্ণুনোক্তং রুগর্দ্দনং॥ ৪॥ পৃথক্ তৈলং ঘৃতং কুর্য্যাৎ সমস্তৈরৌষধৈঃ পৃথক্। শতাবর্য্যা গুড়ূচ্যা বা চিত্রকৈ রোচনাযুতঃ॥ নির্গুণ্ড্যা বা প্রসারণ্যাঃ কণ্টকার্য্যা রসাদিভিঃ। বর্ষ্যা বানলয়া বাপি বাসকেন ফলত্রিকৈঃ॥ ব্রাহ্ম্যা চৈরগুকেনাপি ভৃঙ্গরাজেন মুণ্ডিনা। মুষল্যা দশমূলেন খদিরেণ বটাদিভিঃ॥ বটিকা মোদকো বাপি চূর্ণং স্যাৎ সর্ব্বরোগনুৎ। ঘৃতেন মধুনা বাপি যুক্তং খণ্ডগুড়াদিভিঃ॥ লবণৈঃ কটুকৈর্যুক্তং যথালাভঞ্চ রোগনুৎ। ৫। চিত্রককারুত্রিবৃতামলম্বহয়মারকং॥ সুধাঞ্চ বালাগণিকাসপ্তপর্ণসুবর্চ্চিকাং। জ্যোতিষ্মতীঞ্চ সংভৃজ্য তৈলং বীরো বিপাচয়েৎ॥

এতন্নিশুম্ভনং তৈলং ভৃশং দদ্যাস্তগন্দরে। শোধনং রোচনঞ্চৈব সর্ব্ববর্ণকরং পরং ॥ চিত্রকাদ্যং মহাতৈলং সর্ব্বরোগপ্রভঞ্জনং। ৬। অজমোদঃ সসিন্দুরো হরিতালং নিশাদ্বয়ং ॥ ক্ষারদ্বয়ং ফেনমুতমার্দ্রকং সরলোদ্ভবং। ইন্দ্রবারুণ্যপামার্গকদলৈঃ কন্দলৈঃ সমৈঃ ॥ এভিঃ সর্ষপজং তৈলমজমূত্রেশ্চ যোজিতং। মৃদ্বগ্নিনা পচেদেতদর্কক্ষীরেণ সংযুতং ॥ অজমোদাদিকং তৈলং গণ্ডমালাং ব্যপোহতি। বিদগ্ধন্ত পচেৎ পক্কং পক্কঞ্চৈব বিশোধয়েৎ ॥ রোপণং মৃদুভাবঞ্চ তৈলেনানেন কারয়েৎ। অজমোদাদিকং তৈলং মহাবীর্য্যঞ্চ রোগনুৎ ॥ ৭ ॥ ইত্যাদিমহাপুরাণে গারুড়ে ঘৃততৈলাদিকল্পঃ সমাপ্তঃ। ১৭৮ অধ্যায়ঃ ॥

ঘৃতদীধিতিঃ (পুং) অগ্নিঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

ঘৃতপর্ণকঃ (পুং) ঘৃতকরঞ্জঃ। ইতি রাজনির্ঘণ্টঃ ॥

ঘৃতপূরঃ (পুং) পিষ্টকবিশেষঃ। যথা। মর্দিতাং সমিতাং ক্ষীরনারিকেলঘৃতাদিভিঃ। অবগ্রাহ্য ঘৃতে পক্কা ঘৃতপূরোঽয়মুচ্যতে ॥ ঘৃতপূরো গুরুর্বৃষ্যঃ কফকৃদ্রক্তমাংসদঃ। রক্তপিত্তহরো হৃদ্যঃ স্বাদুঃ পিত্তহরোঽগ্নিদঃ ॥ ইতি রাজবল্লভঃ ॥ তৎপর্য্যায়ঃ। পিষ্টপূরঃ ২ ঘৃতবরঃ ৩ ঘার্ত্তিকঃ ৪। ইতি হেমচন্দ্রঃ ॥

ঘৃতপূর্ণকঃ (পুং) করঞ্জবৃক্ষঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

ঘৃতমণ্ডলিকা (স্ত্রী) হংসপদীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

ঘৃতমণ্ডা (স্ত্রী) বারসোলীবৃক্ষঃ। মাকড়হাতা ইতি ভাষা। ইতি শব্দচন্দ্রিকা ॥

ঘৃতবরঃ (পুং) ঘৃতপূরঃ। ইতি হেমচন্দ্রঃ ॥

ঘৃতা (স্ত্রী) ঘৃতমণ্ডা। ইতি শব্দচন্দ্রিকা ॥

ঘৃতাচী (স্ত্রী) অপ্সরোবিশেষঃ। ইতি হলায়ুধঃ ॥

ঘৃতাচীগর্ভসম্ভবা (স্ত্রী) স্থূলৈলা। ইতি রাজনির্ঘণ্টঃ ॥

ঘৃতাহ্বঃ (পুং) সরলদ্রবঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

ঘৃতেলী (স্ত্রী) কীটবিশেষঃ। তৈলপায়িকা ইতি কেচিৎ ॥ তৎপর্য্যায়ঃ। পিঙ্গকপিশা ২। ইতি হেমচন্দ্রঃ ॥

ঘৃতোদঃ (পুং) ঘৃতসমুদ্রঃ। যথা। এবং সুরোদাদ্বহিস্তদ্দ্বিগুণঃ সমানেন ঘৃতোদেন যথা পূর্ব্বঃ কুশদ্বীপঃ। ইতি শ্রীভাগবতং ॥

ঘৃষ উ সংঘর্ষে। ইতি কবিকল্পদ্রুমঃ ॥ উ ঘর্ষিত্বা ঘৃষ্ট্বা। ঘর্ষতি চন্দনং লোকঃ। ইতি দুর্গাদাসঃ ॥

ঘৃষ্টঃ (ত্রি) ঘর্ষিতঃ। ঘষা ইতি ভাষা। যথা। ঘৃষ্টো মলয়জো গন্ধঃ। ইতি শুদ্ধিতত্ত্বং ॥

ঘৃষ্টিঃ (স্ত্রী) বারাহী। চামর আলু ইতি ভাষা। ইত্যমরঃ ॥ ঘর্ষণং। স্পর্দ্ধা। অপরাজিতা। শূকরে পুং। ইতি মেদিনী ॥

ঘৃষ্টিলা (স্ত্রী) চিত্রপর্ণিকা। পৃশ্নিপর্ণী। ইতি রত্নমালা ॥

ঘৃষী [ন্] (পুং স্ত্রী) শূকরঃ। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ ॥

ঘেঞ্চুলিকা (স্ত্রী) ক্রৌঞ্চাদনং। ঘেঁচু ইতি ভাষা। ইতি রত্নমালা॥

ঘোটঃ (পুং স্ত্রী) ঘোটকঃ। ইতি রাজনির্ঘণ্টঃ॥

ঘোটকঃ (পুং স্ত্রী) পশুবিশেষঃ। ঘোড়া ইতি ভাষা। তৎপর্য্যায়ঃ। পীতিঃ ২ তুরগঃ ৩ তুরঙ্গঃ ৪ অশ্বঃ ৫ তুরঙ্গমঃ ৬ বাজী ৭ বাহঃ ৮ অর্ব্বা ৯ গন্ধর্ব্বঃ ১০ হয়ঃ ১১ সৈন্ধবঃ ১২ সপ্তিঃ ১৩। ইত্যমরঃ॥ ঘোটঃ ১৪ পীতী ১৫ পীথিঃ ১৬। ইতি ভরতঃ॥ তার্ক্ষ্যঃ ১৭ হরিঃ ১৮ বীতী ১৯। ইতি হেমচন্দ্রঃ॥ মুদ্গভোজী ২০ ধারাটঃ ২১ জবনঃ ২২ জিতবঃ ২৩ জবী ২৪ বাহনশ্রেষ্ঠঃ ২৫ শ্রীভ্রাতা ২৬ অমৃত-সোদরঃ ২৭। মুদ্গভুক্ ২৮ শালি-হোত্রঃ ২৯ লক্ষ্মীপুত্রঃ ৩০ প্রকীর্ণকঃ ৩১। ইতি জটাধরঃ॥ বাতায়নঃ ৩২ শ্রীপুত্রঃ ৩৩ চামরী ৩৪ হেষী ৩৫ শালিহোত্রী ৩৬ মরুদ্রথঃ ৩৭ বাজস্কন্ধঃ ৩৮ হরিদ্রোক্তঃ ৩৯ একশফঃ ৪০ কিঙ্কী ৪১ ললানং ৪২ বিমানকঃ ৪৩। ইতি শব্দরত্নাবলী॥ অত্যঃ ৪৪ বহ্নিঃ ৪৫ দধিক্রা ৪৬ দধি-ক্রাবা ৪৭ এতগ্বঃ ৪৮ এতশঃ ৪৯ পৈদ্বঃ ৫০ দৌর্গহঃ ৫১ উচ্চৈঃশ্রবসঃ ৫২ আশুঃ ৫৩ ব্রধ্নঃ ৫৪ অরুষঃ ৫৫ মাংশ্চত্বঃ ৫৬ অব্যথয়ঃ ৫৭ শ্যেনাসঃ ৫৮ সুপর্ণাঃ ৫৯ পতঙ্গাঃ ৬০ নরঃ ৬১ হ্বার্য্যাণাং ৬২ হংসাস্যঃ ৬৩। ইতি বেদ-নিঘণ্টৌ ১ অধ্যায়ঃ॥ হরী ইন্দ্রস্য ১ রোহিতঃ অগ্নেঃ ২ হরিতঃ আদিত্যস্য ৩ রাসভৌ অশ্বিনোঃ ৪ অজাঃ পূষ্ণঃ ৫ পৃষত্যো মরুতাং ৬ অরুণ্যো গাব উষসাং ৭ শ্যাবাঃ সবিতুঃ ৮ বিশ্বরূপা বৃহস্পতেঃ ৯ নিযুতো বায়োঃ ১০। ইতি দশাদিষ্টোপযোজনানি। ইতি চ বেদ-নিঘণ্টৌ ১ অধ্যায়ঃ॥ অস্য মাংসগুণাঃ। উষ্ণত্বং। বাতনাশিত্বং। লঘুগুরুত্বং। অতিসেবনাৎ পিত্তদাহপ্রদত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ অগ্নিকফবলকারিত্বং। বৃংহ-ণত্বং। চক্ষুর্হিতত্বং। মধুরত্বঞ্চ। ইতি ভাবপ্রকাশঃ॥ *॥ অথাশ্বপরীক্ষা। সপক্ষা বাজিনঃ পূর্ব্বং সংজাতা ব্যোমচারিণঃ। গন্ধর্ব্বেভ্যো যথাকামং গচ্ছন্তি চ সম-ন্বিতাঃ॥ ইন্দ্রাদেশাচ্ছালিহোত্রস্তেষাং পক্ষমথাচ্ছিনৎ। ততঃ প্রভৃতি নিষ্পক্ষা-স্তুরঙ্গা ধরণীং গতাঃ॥ উত্তমা মধ্যমা নীচাঃ কনীয়াংসস্তথাপরে। চতুর্দ্ধা বাজিনো ভূমৌ জায়ন্তে দেশসংশ্রয়াৎ॥ তাজিতাঃ খুরশালাশ্চ তুষারাশ্চোত্তমা হয়াঃ। গোজি-কাণাশ্চ কেকাণাঃ প্রৌঢ়াহারাশ্চ মধ্যমাঃ॥ তাড়জা উত্তমাশাশ্চ বাজশূলাশ্চ মধ্যমাঃ। গহ্বরাঃ সাধ্যবাসাশ্চ সিন্ধুদারাঃ কনীয়সঃ॥ অন্যদেশোদ্ভবা যে চ তে বৈ নীচাঃ প্রকী-র্ত্তিতাঃ। বাজিনো জলজাঃ কেচিদ্বহ্নি-জাতাস্তথাপরে॥ সমীরপ্রভবাশ্চান্যে তুরগা মৃগজাঃ পরে। জলোদ্ভবা দ্বিজা জ্ঞেয়াঃ ক্ষত্রিয়া বহ্নিসম্ভবাঃ॥ প্রভঞ্জন-ভবা বৈশ্যা মৃগজাঃ শূদ্রজাতয়ঃ। পুষ্প-গন্ধির্দ্বিজো বিপ্রঃ ক্ষত্রিয়োঽগুরুগন্ধিকঃ॥ ঘৃতগন্ধো ভবেদ্বৈশ্যো মীনামোদী চ শূদ্রকঃ। বিবেকী সদ্গুণো বিপ্রস্তেজস্বী

ক্ষত্রিয়ো বলী ॥ কোষ্ণভাবো ভবেদ্বৈশ্যঃ শূদ্রো নিঃসত্ত্বকো ভবেৎ। বিপ্রাদ্যা বাহনাঃ সর্ব্বে ত্রয়ো ভূমিপতেঃ সদা ॥ শূদ্রজাতিং তুরঙ্গন্তু ন স্পৃশন্তি নরেশ্বরাঃ। ইত্যুৎপত্তিঃ ॥ * ॥ অথাঙ্গুল্যাঙ্গবিভাগঃ। সপ্তবিংশত্যঙ্গুলিভির্মুখমানং বিধীয়তে। কর্ণৌ ষড়ঙ্গুলৌ প্রোক্তৌ ভালকং চতুরঙ্গুলং ॥ চত্বারিংশচ্চ সপ্তাঢ্যা স্কন্ধঃ সংপরিকীর্ত্তিতঃ। পৃষ্ঠবংশশ্চতুর্ব্বিংশঃ সপ্তবিংশা তথা কটী ॥ ইতি সূক্ষ্মং তথা নিম্নং প্রতিপুচ্ছং দ্বয়াধিকং। লিঙ্গং হস্তপ্রমাণন্তু তথাণ্ডৌ চতুরঙ্গুলৌ ॥ মধ্যস্থানং চতুর্ব্বিংশং হৃদয়ং ষোড়শাত্মকং। কটিকুক্ষ্যন্তরং প্রোক্তং চত্বারিংশৎপ্রমাণতঃ ॥ মণিবন্ধদ্বয়ঞ্চৈব খুরাশ্চ চতুরঙ্গুলাঃ। অশীত্যঙ্গুলিকাঃ পাদা দীর্ঘা বিংশাধিকা মতাঃ ॥ ইত্যঙ্গুলিবিভাগঃ ॥*॥ অথ বর্ণঃ। যদাহ নকুলঃ। সপ্তবর্ণা ভবন্তীহ সর্ব্বেষাং বাজিনাং ধ্রুবং। তানহং কীর্ত্তয়িষ্যামি ভেদৈর্জাতাননেকধা ॥ সিতো রক্তস্তথা পীতঃ সারঙ্গঃ পিঙ্গ এব চ। নীলঃ কৃষ্ণোঽথ সর্ব্বেষাং শ্বেতঃ শ্রেষ্ঠতমো মতঃ ॥ শ্বেতঃ কুন্দেন্দুসঙ্কাশো রক্তঃ কৌসুম্ভসন্নিভঃ। হরিদ্রাসদৃশঃ পীতঃ সারঙ্গঃ কর্ব্বুরঃ স্মৃতঃ ॥ পিশঙ্গঃ কপিলাকারো নীলো দূর্ব্বাদলপ্রভঃ। কৃষ্ণো জম্বুফলাকারঃ শাস্ত্রজ্ঞৈঃ সমুদাহৃতঃ ॥ ইতি বর্ণাঃ ॥ * ॥ অথ বয়োবিভাগঃ। দন্তেষু ব্যঞ্জনং যদ্বত্তেন জ্ঞেয়ো বয়ঃক্রমঃ। তদ্যথা। কালিকা হরিণী শুক্লা কাচা মক্ষিকয়া সহ ॥ শঙ্খো মুষলকঞ্চৈব দন্তানাং চলতা তথা। ইত্যষ্টৌ ব্যঞ্জনাস্যাহুরথৈষাং লক্ষণং শৃণু ॥ চতুর্ভির্বৎসরৈর্দন্তাশ্চত্বারঃ পরিকীর্ত্তিতাঃ। পঞ্চভিশ্চ বড়িত্যেবং জায়ন্তে ত্বথ কালিকাঃ ॥ ষষ্ঠে সম্বৎসরে প্রাপ্তে কালিকান্যা ভবেত্তু হি। তথান্যা সপ্তমে বর্ষে চতুর্থী কালিকা ভবেৎ ॥ অষ্টমে বৎসরে প্রাপ্তে জায়ন্তে সর্ব্বকালিকাঃ। নবমে ত্বথ তাঃ সর্ব্বা আপীতাঃ সম্ভবন্তি চ ॥ কেচিদেকাদশে বর্ষে তাবৎ পীতত্বমাগতাঃ। ততঃ শ্বেতাঃ প্রজায়ন্তে চতুর্দ্দশসমাবধি ॥ ততঃ কাচপ্রভাঃ সম্যক্ যাবৎ সম্বৎসরাস্ত্রয়ঃ। ততঃ সপ্তদশাদূর্দ্ধং যাবদ্বর্ষাণি বিংশতিঃ ॥ মক্ষিকাভাং বদন্ত্যেষাং যাবদ্বর্ষত্রয়ং পুনঃ। শঙ্খাভাসাঃ সর্ব্বদন্তা ভবন্তি বাজিনাং ততঃ ॥ ত্রয়োবিংশাৎ পরে বর্ষে দশনা মুষলা মতাঃ। ষড়্‌বিংশাৎ পরতো দন্তাঃ স্থানাচ্চলনমাপ্নুয়ুঃ ॥ যাবদ্বর্ষত্রয়ং পশ্চান্নিপতন্তি সমাত্রয়ে। দ্বাত্রিংশদ্বৎসরে বাজী নূনং নির্ব্বাণমাপ্নুয়াৎ ॥ ইতি বয়ঃস্থানং ॥ * ॥ অথ শুভলক্ষণানি। দীর্ঘাঃ শুক্লা বিশালাস্যা যে ভবন্তি তুরঙ্গমাঃ। তে শস্তাঃ পার্থিবেন্দ্রস্য যানবাহনকর্ম্মণি ॥ আস্যং ভুজৌ চাপি কৃকাটিকা চ দীর্ঘং চতুষ্কং তুরগস্য শস্তং। তথোন্নতে ঘ্রাণপুটে ললাটে কফশ্চ বাজিপ্রবরস্য বোধ্যঃ ॥ শ্রোত্রে চ মণিবন্ধশ্চ পুচ্ছং কোষ্ঠং লঘূত্তমং। পীতাঙ্গঃ শ্বেতপাদো যো যশ্চ স্যাৎ সিতলোচনঃ ॥ চক্রবাকঃ স বিজ্ঞেয়ো

রাজার্হঃ প্রিয়সত্তমঃ। মুখে চন্দ্রকসম্বীতঃ পঙ্কজস্মুফলাকৃতিঃ॥ শ্বেতপাদঃ স বিজ্ঞেয়ো মল্লিকাখ্যঃ সুপূজিতঃ। সর্ব্বশ্বেতো হয়ো যস্তু শ্যামৈকশ্রবণো ভবেৎ। স বাজী বাজিমেধার্হঃ শ্যামকর্ণঃ সুদুর্লভঃ॥ যস্য পাদাঃ সিতাঃ সর্ব্বে পুচ্ছো মুক্তো মুখং তথা। মূর্দ্ধজাস্তু সিতা যস্য তদ্বিদ্যাদষ্টমঙ্গলং॥ যস্য পাদাঃ সিতাঃ সর্ব্বে চন্দ্রকঞ্চ ললাটকে। কল্যাণপঞ্চকঃ প্রোক্তো ভর্ত্তুঃ কল্যাণকারকঃ॥ বিমিশ্রবর্ণকাঃ সর্ব্বে প্রশস্তা বাজিনো মতাঃ। যস্যোৎকৃষ্টতরা বর্ণা বৃদ্ধিং যান্তি শনৈঃ শনৈঃ॥ নাশয়ন্তি তথা নীচান্ করোতি স বহূন্ হয়ান্॥ *॥ অথাবর্ত্তগুণাঃ। রোম্নাং ভ্রমিবদাবৃত্তিরাবর্ত্ত ইতি গদ্যতে। যড়্বিধো দক্ষিণো বামো দক্ষিণস্তু শুভাবহঃ॥ নাশিকাগ্রে ললাটাগ্রে শঙ্খে কণ্ঠে চ মস্তকে। আবর্ত্তো জায়তে·যেষাং তে ধন্যাস্তু তুরঙ্গমাঃ॥ ললাটে যস্য চাবর্ত্তো দ্বিতীয়স্তু কুকুন্দরে। মস্তকে চ তৃতীয়স্তু স বিজ্ঞেয়ো হয়োত্তমঃ॥ দণ্ডাবর্ত্তো ভবেদ্যস্য বাজিনো দক্ষিণাশ্রয়ঃ। স করোতি মহাসৌখ্যং স্বামিনঃ শিবসংজ্ঞিতঃ॥ কর্ণমূলে যদাবর্ত্তঃ স্তনমধ্যে তথাপরঃ। বিজয়াখ্যাবুভৌ তৌ তু যুদ্ধকালে জয়প্রদৌ॥ স্কন্ধপার্শ্বে যদাবর্ত্তঃ স ভবেৎ সুখকারকঃ। নাসামধ্যে যদাবর্ত্ত একো বা যদি বা ত্রয়ঃ॥ চক্রবর্ত্তী স বিজ্ঞেয়ো বাজী ভূপালভূষিতঃ। কণ্ঠে যস্ত মহাবর্ত্তঃ প্রোক্তশ্চিন্তামণিঃ শুভঃ॥ রোম্নাং বৃশ্চিকবৎ স্থানং শুক্তিরিত্যভিধীয়তে। যত্রাবর্ত্তঃ শুভস্তত্র শুক্তিস্তত্র শুভাবহা॥*॥ অথ দোষাঃ। চত্বারোঽপ্যসিতাঃ পাদাঃ সর্ব্বশ্বেতস্য বাজিনঃ। ভবন্তি যস্য স ত্যাজ্যো যমদূতঃ সুদূরতঃ॥ চত্বারো যস্য বৈ পাদাঃ পরস্পরবিবর্ণকাঃ। স ত্যাজ্যো মুষলী নাম্না মুনিভিঃ কুলনাশনঃ॥ চুর্ণ্ণক্ষবাজিনং জহ্বা যদীচ্ছেঃ শাশ্বতীং শ্রিয়ং। যস্তু বর্ণবিভেদেন জায়তে রোমসম্ভবাৎ॥ পুষ্পাখ্যঃ স পরিত্যাজ্যঃ সর্ব্ববাজিভয়াবহঃ। যস্যাবশেষবর্ণেন ছাদ্যতে চ প্রধানতঃ॥ বিবৃদ্ধিং গচ্ছতঃ সোঽশ্বঃ কুরুতে হয়সংক্ষয়ং। ইতি স্কন্ধে গলে চৈব কটিদেশে তথৈব চ॥ নাভৌ কুক্ষৌ চ পার্শ্বাংশে মধ্যমঃ স প্রকীর্ত্তিতঃ। একো বামকপোলস্থো যস্যাবর্ত্তঃ প্রদৃশ্যতে॥ চর্ব্বণী স হয়স্ত্যাজ্যঃ কুরুতে স্বামিনাশনং। বামগণ্ডাশ্রয়াবর্ত্তঃ প্রকরোতি ধনক্ষয়ং॥ কক্ষান্তে যস্য চাবর্ত্তঃ স মৃত্যুং কুরুতে বিভোঃ। ক্লেশং জানুগতাবর্ত্তঃ প্রবাসং কুরুতেঽথবা॥ বাজীমেঢ্রগতাবর্ত্তো বর্জ্জনীয়ো মহীভুজা। ত্রিবলিপ্রভবাবর্ত্তস্ত্রিবর্গস্য প্রণাশকঃ॥ পৃষ্ঠবংশে যদাবর্ত্ত একঃ সংপরিলক্ষ্যতে। ধূমকেতুরিতি খ্যাতঃ স ত্যাজ্যো দূরতো নৃপৈঃ॥ গুহ্যে পুচ্ছে বলৌ যস্য ভবন্ত্যাবর্ত্তকাস্ত্রয়ঃ। স কৃতান্তস্তু রূপেণ বর্জ্জনীয়স্তুরঙ্গমঃ॥ অধোর্দ্ধঞ্চ যদা বাজী সম্পুটং ন স্পৃশেৎ কচিৎ। যমদূতঃ স বিজ্ঞেয়ো বর্জ্জনীয়স্তুরঙ্গমঃ॥ হীনদন্তোঽধিকশ্চৈব করালী কৃষ্ণতালুকঃ। মুষলী চ তথা শৃঙ্গী

ষড়েতে ঘাতকাঃ স্মৃতাঃ ॥ তত্রাদ্যৌ বিদিতার্থৌ তু শেষাণাং লক্ষণং শৃণু। ত্রয়ঃ পাদাঃ সিতা যস্য কৃষ্ণশ্চৈকোঽভিজায়তে॥ ত্রয়ো বাপ্যসিতা যস্য একঃ শুক্লোঽভিজায়তে। মুষলী নাম পাপোঽয়ং দূরে ত্যাজ্যো হয়াধমঃ ॥ বিকটৌ বিষমৌ যস্য দশনঃ স করালকঃ। করালী কুরুতে নাশং ভর্ত্তুরত্র ন সংশয়ঃ॥ কৃষ্ণতালুর্হয়ো নাশং কুরুতে নাত্র সংশয়ঃ। বিষদন্তো ভবেদ্যস্তু কৃষ্ণতালুর্ন দুষ্যতে॥ কর্ণান্তে চুলিকান্তে চ শৃঙ্গবল্লক্ষ্যতে যদি। স শৃঙ্গী কুরুতে নাশং রাষ্ট্রস্য চ কুলস্য চ॥ একাণ্ডোঽজাতকাণ্ডশ্চ হীনাণ্ডোঽভ্যধিকাণ্ডকঃ। ঘণ্টী চ কম্বলী চৈব ষড়েতে পাপকৃত্তমাঃ ॥ * ॥ অথারিষ্টং। সুস্থস্যাপি চ নেত্রান্তে স্যাতাং নীলে চ বাজিনঃ। তথৈব তস্য জানীয়াদ্ভবেন্মৃত্যুর্দ্বিবার্ষিকী॥ নীলপীতে চ নেত্রান্তে ত্রিভির্মাসৈর্বপুঃক্ষয়ঃ। যস্য নেত্রান্তরে রেখা বহুবর্ণা প্রজায়তে॥ বিশেষাদ্বাজিনো জ্ঞেয়ং তস্যায়ুঃ পঞ্চমাসিকং। জিহ্বায়াং জায়তে বিন্দুরকস্মাদ্যদি বাজিনঃ॥ মাসৈকং জীবিতং তত্র পীতে মাসদ্বয়ন্তথা। রক্তে মৃত্যুস্ত্রিভির্মাসৈশ্চতুর্ভিশ্চ বিচিত্রকে॥ পঞ্চভির্নীলবর্ণে চ ষড়্ভির্বক্রসমাকৃতৌ। সপ্তভিঃ পাটলাকারে চণকাভে তথাষ্টভিঃ॥ নবভিশ্চ হরিদ্রাভে দশভির্জতুকোপমে। একাদশে সুবর্ণাভে বৎসরেণ হিমদ্যুতৌ॥ যস্য শ্বাসো ভবেদুষ্ণঃ শরীরং পুলকাঙ্কিতং। জিহ্বা হি মলিনাকারা মাসষট্কং স জীবতি ॥ জিহ্বাগ্রে পিড়কা যস্য পাদান্তে চ তথোদরে। মূত্রং করোতি রক্তাভ্মা মাসষট্কং স জীবতি॥ কর্ণয়োঃ ক্ষতজং যস্য নেত্রাভ্যাম্বা প্রবর্ত্ততে। বাজিনঃ পিত্তগ্রস্তস্য দশমাসান্ স জীবতি। যস্য নেত্রে হরিদ্রাভে যস্য বাতার্দ্দিতস্য চ। তস্যায়ুঃ সপ্তমাসীয়ং বহুবর্ণে তথা দিনৈঃ॥ যস্যৈকং লোচনং হীনং দ্বিতীয়ং রক্তসন্নিভং। পুটান্তে চ স বিজ্ঞেয়ঃ পীতাভে মাসজীবকঃ॥ এতানি অরিষ্টানি রক্তদোষজানি। স্ফুলিঙ্গা যস্য দৃশ্যন্তে পুচ্ছতোঽশ্বস্য বহ্নিজাঃ। নির্গচ্ছন্তঃ প্রভোর্নাশং তে বদন্তি নিশাগমে॥ অশ্বশালাং সমাসাদ্য যদা চ মধুমক্ষিকাঃ। মধুজালং প্রবধ্নন্তি তদাশ্বান্ ঘ্নন্তি কৃৎস্নশঃ ॥ * ॥ অথ হয়ক্রিয়াকালঃ। স্ববরুণগুরুপার্শ্বাস্যেষু ভৌমার্কবারে স্বতিথিকরণতারাচন্দ্রযোগোদয়েষু। শুভমিহ হয়কার্য্যং কার্য্যমার্য্যেণ বুদ্ধ্বা ন শনিরবিকুজানাং বাসরে নোগ্রতারে॥ ইতি কালঃ ॥ * ॥ অথ হয়ারোহণজ্ঞানং। চলকিশলয়পাদঃ কর্ণমধ্যৈকদৃষ্টির্ন চলতি কটিদেশঃ খাসনে সংস্থিতো যঃ। হয়হৃদয়গতিজ্ঞঃ স্থানদণ্ডাবতাপঃ স খলু তুরগযাতা পূজ্যতে পার্থিবেন্দ্রৈঃ॥ মেরুঃ স্থিরো যস্য চলৌ চ পাদৌ ত্রিকোন্নতং সংহতমাসনঞ্চ। স বাজিবাহঃ প্রথিতঃ পৃথিব্যাং শেষা নরা ভারকরা হয়ানাং॥ * ॥ তত্র তাড়নবিধিঃ। রক্তকোষ্ঠে মুখে চৌষ্ঠে

গলে পুচ্ছে চ তাড়য়েৎ। ভীতে বক্ষঃ-স্থলং হন্যাদ্বক্ত্রং চোন্মার্গগামিনঃ॥ কুপিতে পুচ্ছসংস্থানং ভ্রান্তে জানুদ্বয়ং তথা। সর্ব্বস্যাপ্রাপ্তদণ্ডস্য দণ্ডমেকং নিপাতয়েৎ॥ অস্থানদণ্ডপাতাচ্চ বহুদোষঃ প্রজায়তে। তস্মান্নিরীক্ষ্য কর্ত্তব্যং হয়ে দণ্ডনিপাতনং ॥ * ॥ অথ ধাবনবিধিঃ। হস্তৈশ্চতুর্ব্বিংশতিভির্দ্ধনুর্দ্দণ্ড উদাহৃতঃ। অক্ষোর্নিমেষণান্যষ্টৌ মাত্রা প্রোক্তা বিচক্ষণৈঃ॥ মাত্রাষোড়শকেনাশ্বো যো ধাবতি ধনুঃশতং। তমুত্তমোত্তমং বিদ্যাদ্বায়ুবেগং মহাজবং॥ বিংশত্যা মধ্যমো জ্ঞেয়ো হ্যতোঽন্যে চাধমা মতাঃ। নভস্যাশ্বযুজে মাসি নৈবাশ্বান্ বাহয়েন্নৃপঃ॥ বজ্রাগ্নিসদৃশং পিত্তং শ্রমাৎ কুপ্যতি বাজিনাং। কার্য্যেণ মহতা বাপি যোজ্যো মাসি তু কার্ত্তিকে॥ হেমন্তে শিশিরে যোগো বসন্তে চ যদৃচ্ছয়া। বালং বৃদ্ধং কৃশং রুগ্নং দন্তস্লেহং বৃহদ্বলিং॥ পূর্ণাতিরিক্তকোষ্ঠঞ্চ গুর্ব্বিণীঞ্চ ন বাহয়েৎ॥ * ॥ অথ রক্তমোক্ষণবিধিঃ। দ্বাসপ্ততিসহস্রাণি নাড়ীনাং সম্ভবন্তি হি। বাজিনামিহ সর্ব্বেষামাশু রক্তং ব্যবস্থিতং॥ তাসাং নির্ম্মোক্ষণার্থায় দ্বারাণ্যষ্টৌ বদাম্যহং। যৈর্যাতি কুৎসিতং রক্তং সর্ব্বদেহসমুদ্ভবং॥ কণ্ঠে কক্ষে লোচনয়োরংসয়োশ্চ মুখে তথা। অণ্ডয়োরথ পাদেষু পার্শ্বয়োরুভয়োরপি॥ এতদ্বর্ত্ম সুবিজ্ঞেয়ং বাজিনাং ভিষগুত্তমৈঃ। অন্যে সপ্তদশান্যাহুঃ সিরাদ্বারাণি বাজিনঃ॥ যেষু রক্তং হৃতং সদ্যঃ প্রকরোতি ততঃ সুখং। গুল্ফে গলে তথা মেঢ্রে কক্ষান্তে চৈব পত্রকে। গুদে পুচ্ছেঽথ বস্তৌ চ জঙ্ঘয়োঃ সর্ব্বসন্ধিষু। জিহ্বায়াং চাধরে চৌষ্ঠে নেত্রয়োরুভয়োরপি॥ কর্ণমূলে মণৌ গণ্ডে রুধিরং স্রাবয়েদ্ভিষক্। সৌশ্রুতমানপলেন ত্যাজ্যং রক্তং তুরঙ্গপ্রমাণং॥ তদ্যথা। পলং শতং মুখে ত্যাজ্যং কক্ষয়োশ্চৈকমেব চ। শতার্দ্ধং নেত্রদেশাচ্চ মেঢ্রদেশাত্তথৈব চ॥ গণ্ডয়োরণ্ডয়োশ্চৈব স্রাবয়েৎ পঞ্চবিংশতিং। দ্বাদশৈব গুদে প্রাহুরশ্বশাস্ত্রবিচক্ষণাঃ॥ পৈত্তিকং কালিকং বিদ্যাদ্বাতে বিদ্যাৎ সফেনিলং। পিচ্ছিলং শ্লেষ্মলং পাণ্ডু কষায়োদকবচ্চ যৎ॥ * ॥ অথ ঋতুচর্য্যা। ন প্রাজ্ঞো বাহয়েদশ্বান্ প্রাবৃট্‌কালে কথঞ্চন। যদীচ্ছেদমৃতস্তস্য বাহনং দশমাসিকং॥ কূপোদকং কটুকতৈলনিবাতগেহং শস্তং পলার্দ্ধলবণং দিবসান্তরেণ। তত্রান্যথা সতি মুখাময়বীর্য্যহানির্মুখ্যৈর্বলৈর্ব্বিরহিতস্তু বয়ো বিনশ্যেৎ॥ শরদি গুড়ঘৃতং পয়ঃ প্রশস্তং শরদি সিতাষ্টপলপ্রমাণমচ্ছং। মধুরমথ জলং সরোবরোত্থং ঘৃতযুতনীলমুকুষ্টকাশ্চ ভোজ্যাঃ॥ হেমন্তকালে ঘৃততৈলমাষা নির্ব্বাতসংস্থা চ পয়ো যথেচ্ছং। শনৈঃ শনৈর্বাহনকর্ম্ম কুর্য্যাদ্যবাংশ্চ পক্কা বিতরেদ্বিধিজ্ঞঃ॥ শিশিরে তৈলপলাষ্টকং কটিস্থং দিনসপ্তাবধি পায়য়েত্তুরঙ্গান্। তদনু প্রাতর্ভোজয়েদ্যবাংশ্চ যবযবসাশ্চ তথামৃতস্বরূপাঃ॥ যস্য দত্তা যবা ভোজ্যে

শিশিরে সমুপস্থিতে। অকৃত্বাপি ক্রিয়াঃ সর্ব্বাঃ স হয়ঃ সুখমৃচ্ছতি॥ বসন্তে সংপ্রাপ্তে নিজসুখবশাদ্বাহয় হয়ান্ ঘৃতং তৈলং শস্তং সকলবিধিরুক্তোঽপি চ মতঃ। পয়ো দদ্যাদস্মৈ সলবণমথো বাহনবিধির্ভূশং যোজ্যস্তেনাব্দমপি সুখমিচ্ছেদ্ধয়বরঃ॥ বসন্তসময়ে যোঽশ্বঃ স্থানে তিষ্ঠতি বন্ধনে। তস্যোৎসাহঃ প্রণশ্যেত সালস্যং জায়তে বপুঃ॥ গ্রীষ্মে ঘৃতং ক্ষতজমোক্ষণঘর্ম্মশান্তিসুচ্ছায়বন্ধনবিমর্দ্দনশীততোয়ং। দূর্ব্বা তৃণং লঘু চ কোমলমন্যদেব যৎকিঞ্চিদেবমুপযুক্তমিদং বদন্তি॥ * ॥ ভোজে তু হয়লক্ষণমন্যথা। স্নিগ্ধাঙ্গো লঘুতরলোমকস্তু পুচ্ছো দীর্ঘাস্যাশ্বিনয়নকেশপৃষ্ঠবংশঃ। রক্তৌষ্ঠঃ পৃথুলনিতম্বভারবক্ষা রাজার্হো ভবতি তুরঙ্গমঃ প্রশস্যঃ॥ নাভেরারভ্য দেহস্তু দ্বিধা পূর্ব্বাপরক্রমাৎ। পূর্ব্বকায়স্থিতা রক্তাঃ শুভায় হয়সংস্থিতাঃ॥ অধঃকায়ে স্থিতা রক্তা অধমত্বপ্রকাশকাঃ। শুক্তীনাং বৈপরীত্যেন প্রশস্তফলমাদিশেৎ॥ * ॥ বাৎস্যস্তু। ব্রহ্মাদিজাতিভেদেন হয়জাতিশ্চতুর্ব্বিধা। তদ্যথা। যে শুক্লাঃ সুবিমলপুষ্পগন্ধা যে বা শুদ্ধাঙ্গাঃ সঘৃণসদুষ্কভোজিনো বা॥ অক্রুদ্ধাঃ সমরগতা ভৃশঞ্চ পুষ্টাস্তে বিপ্রাঃ ক্ষিতিপতিবাহনেঽতিযোগ্যাঃ। যে রক্তাঃ সদগুরুগন্ধয়োঽহতা বা সংরুষ্টা বহুতরভোজিনো বলাঢ্যাঃ॥ অশ্রান্তাঃ সকলগুণগ্রহাঃ প্রবীণা বিজ্ঞেয়া বিধিকরজাতজাতয়স্তে। যে পীতাঃ খলু ঘৃতগন্ধয়োঽপি যে বা যেঽক্রুদ্ধাঃ কথমপি রোষশালিনো যে॥ বদ্ধা বা বহুতরনাদঘোষণা বা বিজ্ঞেয়া নৃপবরবৈশ্যজাতয়স্তে। যে কৃষ্ণাঃ সরুষামগন্ধয়োঽপি যে বা অন্যথা বহুতরতাড়নৈরপীমে॥ ক্ষীণাঙ্গা লঘুতনবোঽপি বেশহীনাস্তে শূদ্রাঃ ক্ষিতিপতিনা ভৃশং বিহেয়াঃ। এতত্তু একৈকমেব লক্ষণং ন সামুদায়িকং॥ লক্ষণদ্বয়সম্বন্ধাৎ দ্বিজাতিঃ স্যাত্তুরঙ্গমঃ। চতুর্ল্লক্ষণযুক্তস্তু দূরে ত্যাজ্যো হয়াধমঃ॥*॥ অন্যত্র তু। সাত্ত্বিকা রাজসাশ্চেতি তামসাশ্চেতি তে হয়াঃ। যে শুদ্ধবর্ণা ভৃশবেগযুক্তা অশ্রান্তিভাজো বহুভোগিনশ্চ। অক্রোধশীলাঃ সমরেঽতিরুষ্টাস্তে সাত্ত্বিকা ভূপতুরঙ্গমাঃ স্যুঃ॥ যে রক্তবর্ণা গুরুবেগরোষাঃ কষাভিঘাতং ন হি যে সহন্তে। যেঽশ্মী বলাঢ্যাঃ খলু দীর্ঘদেহাস্তে রাজসা ভূপ তুরঙ্গমাঃ স্যুঃ॥ যে কৃষ্ণবর্ণাস্তনুরোষবেগা অল্পাশিনো লক্ষণলক্ষিতাশ্চ। যে দুর্ব্বলাঃ সর্ব্বগুণৈর্বিহীনাস্তে তামসা ভূপ তুরঙ্গমাধমাঃ॥ দ্বয়োর্লক্ষণসম্বন্ধাৎ দ্বিগুণো বাজিমধ্যমঃ। ত্রয়াণাং গুণসম্বন্ধাৎ ত্রিগুণো বাজিনিন্দিতঃ॥ * ॥ পরাশরসংহিতায়াস্তু। পৃথিব্যব্বায়ুতেজঃখৈঃ পঞ্চভিস্তুরগাশ্রিতৈঃ। উল্বণৈঃ পঞ্চধা ভেদাঃ পরাশরমতা যথা॥ যে স্থূলাঃ শ্রমসহদেহরূপভাজশ্চাক্রান্তা বহুতরভোজনাশ্চ দীর্ঘাঃ। অক্রুদ্ধাঃ সমরগতাস্তু রোষভাজো ভৌমাস্তে ঘনগুরুঘর্ঘরস্বরাস্তু॥ যে শ্লথাঙ্গাস্তনুবলাঃ শ্রমাসহকলেবরাঃ।

অক্রোধবেগাঃ সম্বপ্না আপ্যান্তে তুরগাধমাঃ ॥ যে বাতবেগপ্রতিমোগ্রবেগাঃ শুষ্কা ভৃশং দীর্ঘকলেবরাশ্চ। অশ্রান্তিভাজো বহুদূরগাশ্চ তে বায়বা বাজিবরাঃ প্রদিষ্টাঃ ॥ যে ক্রোধশীলা ভৃশবেগযুক্তা মুক্তা দিনাৎ ক্রোশশতং ব্রজন্তি। তে তৈজসাঃ পুণ্যবতাং প্রদেশে ভবন্তি পুণ্যৈরপি তে মিলন্তি ॥ একো যদা তৈজসসংজ্ঞকোঽশ্বঃ কিং কার্য্যমন্যৈস্তুরগাধমৈস্তু। শুদ্ধং যদা হীরকখণ্ডমেকং কিং কার্য্যমন্যৈর্মণিভির্বিচিত্রৈঃ ॥ উৎপ্লুত্য যে বাজিবরা ব্রজন্তি ক্রুধা ভৃশং বেগসমন্বিতাশ্চ। যে লঙ্ঘয়ন্তঃ পরিখামপারাং তে গাগণাঃ পুণ্যতমাঃ প্রদিষ্টাঃ ॥ দ্বয়োর্ল্লক্ষণসম্বন্ধাত্তুরগঃ স্যাৎ দ্বিভৌতিকঃ। স্বজাতিগুণভূতানাং হয়ানাং বাহনং শুভং ॥ শালিহোত্রাদিবিজ্ঞানাত্তদ্বিজ্ঞেয়ং যথোত্তরং। অসম্ভবে হি দুষ্টাশ্বং বাহয়েদিতি চেত্তদা ॥ তিলং সকাঞ্চনং দদ্যাল্লবণম্বা গুড়ান্বিতং। রেবন্তং পূজয়েদ্বাপি নিজং নির্ম্মন্থয়েত্তদা ॥ দদ্যাত্তাম্রপলম্বাপি অভাবে সর্ব্বকর্ম্মণঃ। এবমন্যত্রাপি। কাঞ্চনং রজতং তাম্রং লৌহমেতদযথাক্রমং। ব্রহ্মাদিজাতিদোষাণাং দেয়মেতৎ প্রশান্তয়ে ॥ অভাবেঽপি চ সর্ব্বেষাং তাম্রেণ স্যাৎ প্রতিক্রিয়া। ইতি হয়পরীক্ষা ॥ * ॥ ইতি ভোজরাজকৃতযুক্তিকল্পতরুঃ ॥

ঘোটিকা (স্ত্রী) বৃক্ষভেদঃ। তৎপর্য্যায়ঃ। কর্কটী ২ তুরঙ্গী ৩ চতুরঙ্গা ৪। অস্যা গুণাঃ। কটুত্বং। উষ্ণত্বং। মধুরত্বং। বাতব্রণকণ্ডুকুষ্ঠাস্রশ্বয়থুনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

ঘোণা (স্ত্রী) নাসা। অশ্বনাসিকা। তৎপর্য্যায়ঃ। প্রোথঃ ২। ইত্যমরঃ ॥

ঘোণী [ন্] (পুং) শূকরঃ। ইত্যমরঃ ॥

ঘোণ্টা (স্ত্রী) বৃক্ষবিশেষঃ। শেয়াকুল ইতি ভাষা। তৎপর্য্যায়ঃ। বদরঃ ২ গোপঘোণ্টা ৩ শৃগালকোলিঃ ৪ কপিকোলিঃ ৫। ইতি কাচিৎ রত্নমালা ॥ হস্তিকোলিঃ ৬ বদরীচ্ছদা ৭ কর্কন্ধুঃ ৮। ইতি রত্নকোষঃ ॥ পূগবৃক্ষঃ। ইতি মেদিনী ॥

ঘোনসঃ (পুং) গোনসঃ। তিলিৎসসর্পঃ। ইতি হেমচন্দ্রঃ ॥

ঘোরং (ক্লী) বিষং। ইতি রাজনির্ঘণ্টঃ ॥

ঘোরঃ (পুং) শিবঃ। ভয়ানকে ত্রি। ইতি হেমচন্দ্রঃ ॥

ঘোরদর্শনঃ (পুং স্ত্রী) উলূকঃ। ইতি রাজনির্ঘণ্টঃ ॥ ভয়ানকরূপে ত্রি ॥

ঘোরপুষ্পং (ক্লী) কাংস্যং। ইতি রাজনির্ঘণ্টঃ ॥ ঘোরঘুষ্যমপি পাঠঃ ॥

ঘোররাসনঃ (পুং) শৃগালঃ। ইতি শব্দরত্নাবলী ॥

ঘোররাসী [ন্] (পুং) শৃগালঃ। ইতি হেমচন্দ্রঃ ॥

ঘোরা (স্ত্রী) রাত্রিঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ দেবদালী লতা। ইতি রাজনির্ঘণ্টঃ ॥ ভয়ানকা চ ॥

ঘোলং (ক্লী) সসরং নির্জলং মথিতং দধি। তৎপর্য্যায়ঃ। দণ্ডাহতং ২ কালসেয়ং ৩

অরিষ্টং ৪ গোরসঃ ৫ ঘনং ৬ মলিনং ৭ কেবলং ৮ ভগ্নসন্ধিকং ৯। তস্য ভেদাঃ। তক্রং হ্যুদশ্বিন্মথিতং পাদাম্ব্বর্দ্ধাম্বুনির্জ্জলং। সসারং যন্ত্রবেত্তক্রং বটুরং তৎ প্রকীর্ত্তিতং॥ ইতি শব্দচন্দ্রিকা॥ অস্য বিশেষাঃ তক্রশব্দে দ্রষ্টব্যাঃ॥

ঘোলী (স্ত্রী) পত্রশাকবিশেষঃ। তৎপর্য্যায়ঃ। ঘোলিকা ২ ঘোলিঃ ৩ কলম্বুঃ ৪ কুবকালুকা ৫। ক্ষেত্রজাতায়া অস্যা গুণাঃ। লবণত্বং। রুচিকারিত্বং। অম্লত্বং। বাতকফনাশিত্বঞ্চ॥ আরামঘোলিকাগুণাঃ। অম্লত্বং। রুক্ষত্বং। রুচ্যত্বং। বায়ুনাশিত্বং। পিত্তশ্লেষ্মকারিত্বং। সূক্ষ্মায়া জীর্ণজ্বরনাশিত্বং। ইতি রাজনির্ঘণ্টঃ॥

ঘোষং (ক্লী) কাংস্যং। ইতি রাজনির্ঘণ্টঃ॥

ঘোষঃ (পুং) আভীরপল্লী। গোপালঃ। ধ্বনিঃ। ঘোষকলতা। কাংস্যং। মেঘশব্দঃ। ইতি মেদিনী॥ মশকঃ। ইতি ত্রিকাণ্ডশেষঃ॥ কায়স্থাদীনাং পদ্ধতিবিশেষশ্চ॥

ঘোষকঃ (পুং) ঘোষাখ্যা। তৎপর্য্যায়ঃ। ধামার্গবঃ ২। ইত্যমরঃ॥ ঘোষকাকৃতিঃ ৩ আদানী ৪ দেবলী ৫ তুরঙ্গকঃ ৬ ঘোষঃ ৭ ঘোষালী ৮। ইতি শব্দরত্নাবলী॥ কোষকালঃ। ইতি জটাধরঃ॥ মহাংশ্চেৎ হস্তিঘোতকী॥ *॥ পীতঘোষায়াঃ পর্য্যায়ঃ ধামার্গবঃ ১ পীতঘোষা ২ রাজঘোতকী ৩ কর্কোটকী ৪ মহাজালী ৫ ক্ষ্বেড় কোষফলা ৭ কোষাতকী ৮। ইতি জটাধরঃ॥ *॥ শ্বেতঘোষায়াঃ পর্য্যায়ঃ। ঘোষাতকী ১ মৃদঙ্গী ২ জালিনী ৩ কৃতবেধকঃ ৪ শ্বেতপুষ্পা ৫ আকৃতিচ্ছত্রা ৬ জ্যোৎস্না ৭ ইতি রত্নমালা॥

ঘোষকাকৃতিঃ (পুং) ঘোষকঃ। ইতি রত্নমালা॥

ঘোষণা (স্ত্রী) উচ্চৈঃশব্দঃ। লোকবিজ্ঞাপনায়োচ্চৈঃশব্দিতং। তৎপর্য্যায়ঃ। উচ্চৈর্ঘুষ্টং ২। ইত্যমরঃ॥ নিঘুষ্টং ৩ ঘুষ্টঘোষণং ৪। ইতি শব্দরত্নাবলী॥

ঘোষয়িত্নুঃ (পুং) ব্রাহ্মণঃ। কোকিলঃ। বন্দী। ইতি শব্দরত্নাবলী॥

ঘোষবতী (স্ত্রী) বীণা। ইতি হেমচন্দ্রঃ॥ শব্দবিশিষ্টে ত্রি॥

ঘোষা (স্ত্রী) মধুরিকৌষধিঃ। মৌরী ইতি ভাষা। ইতি মেদিনী॥ কর্কটশৃঙ্গী। ইতি রাজনির্ঘণ্টঃ॥

ঘোষাতকী (স্ত্রী) শ্বেতঘোষা। ইতি রত্নমালা॥

ঘ্রা গন্ধোপাদানে। ইতি কবিকল্পদ্রুমঃ॥ জিঘ্রতি পুষ্পং লোকঃ। ইতি দুর্গাদাসঃ॥

ঘ্রাণং (ক্লী) নাসিকা। ইত্যমরঃ॥ ন্যায়মতে ঘ্রাণেন্দ্রিয়গ্রাহ্যগন্ধত্বাদি। ঘ্রাতে ত্রি। ইতি মেদিনী॥

ঘ্রাণতর্পণঃ (পুং) সুগন্ধিঃ। ইত্যমরঃ॥

ঘ্রাণদুঃখদা (স্ত্রী) ছিক্কনী। ইতি ভাবপ্রকাশঃ॥

ঘ্রাতঃ (ত্রি) গৃহীতগন্ধপুষ্পাদিঃ। ঘ্রাণ লওয়া ইতি সোঁকা ইতি চ ভাষা। তৎপর্য্যায়ঃ। ঘ্রাণঃ ২। ইত্যমরঃ॥ শিঙ্ঘিতঃ ৩। ইতি জটাধরশব্দরত্নাবল্যৌ॥

ঘ্রাতিঃ (স্ত্রী) নাসিকা। ইতি শব্দচন্দ্রিকা॥

ঙ

ঙকারঃ। স তু ব্যঞ্জনপঞ্চমবর্ণঃ। অস্যোচ্চারণস্থানং সনাসিককণ্ঠঃ। ইতি ব্যাকরণং॥ অস্য স্বরূপং যথা। ঙকারং পরমেশানি স্বয়ং পরমকুণ্ডলী। সর্ব্বদেবময়ং বর্ণং ত্রিগুণং লোললোচনে॥ পঞ্চপ্রাণময়ং বর্ণং ঙকারং প্রণমাম্যহং। ইতি কামধেনুতন্ত্রং॥ অপি চ। ঊর্দ্ধাধঃক্রমতো রেখা কিঞ্চিদাকুঞ্চিতা ততঃ। অধোগতা কুণ্ডলী তু মাত্রা শক্তিস্বরূপিণী॥ রেখাত্রয়েষু ব্রহ্মেশবিষ্ণবঃ সন্তি দেবতাঃ। ধ্যানং যথা। ধূম্রবর্ণাং মহাঘোরাং ললজ্জিহ্বাং চতুর্ভুজাং। পীতাম্বরপরীধানাং সাধকাভীষ্টসিদ্ধিদাং॥ এবং ধ্যাত্বা ব্রহ্মরূপাং তন্মন্ত্রং দশধা জপেৎ। ইতি বর্ণোদ্ধারতন্ত্রং॥*॥ তস্য নামানি যথা। ঙঃ শঙ্খী ভৈরবশ্চণ্ডো বিন্দুত্তংসঃ শিশুপ্রিয়ঃ। একরুদ্রো দক্ষনখঃ খর্পরো বিষয়স্পৃহা॥ কান্তিঃ শ্বেতাপরাজিতো ধীরো দ্বিজাত্মা জ্বালিনী বিয়ৎ। মন্ত্রশক্তিশ্চ মদনো বিঘ্নেশী চাত্মনায়কঃ॥ একনেত্রো মহানন্দো দুর্দ্ধরশ্চন্দ্রমা যতিঃ। শিবঘোষা নীলকণ্ঠঃ কামেশী চ মহাংশুকৌ॥ ইতি নানাতন্ত্রাণি॥

ঙঃ (পুং) বিষয়ঃ। বিষয়স্পৃহা। ইতি মেদিনী॥ ভৈরবঃ। ইত্যেকাক্ষরকোষঃ॥

ঙু ঙ ধ্বনৌ। ইতি কবিকল্পদ্রুমঃ॥ ঙ ঙবতে। ইতি দুর্গাদাসঃ॥